DELHI UNIVERSITY
LIBRARY

DR. THADA[illegible] [illegible]CTION

D.U.P. 956—2-98—40,000

ARTS LIBRARY
(DELHI UNIVERSITY LIBRARY SYSTEM)

Cl. No. 911:21 1543·4
Ac. No. 375932

This book should be returned on or before the date last stamped below. An overdue charge of Rupee one will be charged for each day the book is kept overtime.

(Authority: E.C. Res. 200 dated 27th August 1996).

1946

Price Rs. 25

THE EXECUTIVE COMMITTEE

OF THE

VAIDIKA SAMS'ODHANA MANDALA,

POONA

—o—

President

The Hon'ble Mr. M. S. Aney

Vice-President

Sardar M. V. Kibe, M.A.

Members

Mr. N. C. Kelkar, B.A., LL.B.
Mr. J. S. Karandikar, B.A., LL.B.
Prof. H. D. Velankar, M.A.
Prof. R. D. Vadekar, M.A.
Acarya V. P. Limaye, B.A. (Tilak)
Mr. Y. R. Date, B.A., LL.B.
Vidyanidhi Siddheshwarśastri Chitrav
Mr. V. V. Atitkar, B.A.

375932

Secretary

Mr. N. S. Sontakke, B.A. (Tilak)

Assistant Secretary

Mr. C. G. Kashikar, M.A. (Tilak)

Treasurer

Mr. D. K. Sathe, B.A., B.Sc.

INTRODUCTION

We feel great pleasure in presenting this fourth and the last volume of Sāyaṇa's commentary on the Ṛgveda to the world of scholars. We also feel a sense of satisfaction at the completion of the enormous task undertaken by the Vaidika Saṁśodhana Maṇḍala, although the fifth volume comprising various indices is yet to be prepared and published.

A General Review of the Work:—The Vaidika Saṁśodhana Maṇḍala was founded in 1928 under the auspices of the Tilak Maharaṣṭra Vidyapith, Poona, with the aim of reviving and encouraging the study of Vedic literature. An edition of Sāyaṇa's commentary on the Ṛgveda was not then available in the market. Both the second edition of Max Müller and the Bombay edition were practically out of stock and it was considered that a critical edition of Sāyaṇa's commentary on the Ṛgveda based on unused old MSS. was the first thing to commence with. A scheme of the publication was immediately prepared and brought into operation. The first volume comprising Maṇḍala I was published in 1933, the second containing Maṇḍalas II to V was sent out in 1936, the third giving Maṇḍalas VI to VIII was published in 1941 and the present one containing Maṇḍalas IX–X is being published in 1946. Max Müller's *editio princeps* required 25 years for completion. His second edition was published within a short period of two years; so also the Bombay edition seems to have been published within a period of two or three years. The reason why our edition took a longer period for completion as compared with the two editions just mentioned, is that the duration required for the completion of our edition includes the periods both of editing and printing, while those editions were probably ready before they were actually sent to press. It should also be remembered that such huge literary projects have to be backed by adequate financial support for being brought to a successful completion within a specific period. The first edition of Max Müller was published under the patronage of the East India Company, and for the second edition the generous patronage of H. H. the Maharaja of Vijayanagaram had become available. For the editors of the Bombay edition the support of a sound publishing firm was probably sufficient in view of the manner in which they worked. For us, no support of any of these kinds was available. The circumstances which led to the foundation of our Maṇḍala were such that no Government patronage could be expected. We had to carry on our activities entirely on the sympathy of the general public.

There is no doubt much truth in what Prof. Macdonell says about the impropriety of editing texts in *fasciculi*. (Cf. Introduction to *Bṛhaddevatā* p. xxxiv). But it does not equally apply to such extensive texts as Sāyaṇa's commentary on the Ṛgveda, especially when critical editions of the same have already appeared. When we commenced editing the first volume, we were new entrants in the field. Each volume gave us more experience by which we were profited at the time of editing the next one. Had it

been possible to complete the editing of all the volumes before any one was sent to press, the classification would have obviously been more uniform. It will be, however, seen that even in the first volume all available variants have been recorded in the foot-notes, though no attempt could then be made in the matter of classification of MSS. Such attempt has, of course, been made in the second and third volumes.[1]

The Critical Apparatus :—

ग

(1) [ग १] MS. No. 465 (Aṣṭakas VI-VII), No. 485 (Aṣṭaka VIII, Adhyāyas 1 to 4) and No. 518 (Aṣṭaka VIII, Adhyāyas 5 to 8) procured by Dr. T. R. Chintamani of Madras University. Palm leaf MS. in Grantha script. The last Aṣṭaka ends with the 36th Varga of the 8th Adhyāya. Some portion here and there is wanting in this Aṣṭaka.

(2) [ग २] Travancore University Library, Trivandrum. MS. R. No. 3652. Palm leaf MS. written in Grantha script. Contains the same portion as ग १ with the exception that in Aṣṭaka VII ग २ gives the commentary upto the 12th Varga of the 3rd Adhyāya only.

(3) [ग ३] Theosophical Society's Library, Adyar, Madras. MS. Gen. No. 257 V_2. Palm leaf MS. in Telugu script. Begins with Aṣṭaka VI, Adhyāya 7, Varga 24 and ends with the 25th Varga in the 7th Adhyāya of Aṣṭaka VII. The MS. is very old, worm-eaten and worn out and seems to be copied from some Grantha MS. The text is not so correct. Certain portions here and there are omitted.

The text of these three MSS. is identical. The MSS. carry the name ग when combined, while their individual names are denoted in the case of different readings. For the character of ग MSS., refer to introduction to Vol. III, pp. vi-viii.

(4) [ग 4] Tanjore Maharaja Sarfoji's Saraswati Mahal Library, Tanjore. MS. No. 650. Palm leaf MS. written in Telugu script. The MS. is very old and worm-eaten. Borders of certain pages are ruined. Contains Aṣṭaka VIII, Adhyāyas 1 to 5 and Vargas 1 and 2 of Adhyāya 6th. Certain portions are left uncopied for which space is reserved. The text agrees with ग in the 1st Adhyāya only, then it differs and joins the भ class. The MS. is admitted to the ग class simply for its South Indian script and Palm leaf substance. See page 4.

घ

(5) Bhandarkar Oriental Research Institute, Poona. MS. No. 4 Vis. I. Paper MS. written in Devanāgarī script[2] in Saṁvat 1785. Aṣṭakas III-VII. In Aṣṭaka VII it is identical with त ५.

(6) Bombay branch Royal Asiatic Society. MS. No. 447 (ZZ a 21) Aṣṭakas V-VI.

1. With regard to the Notes to Vols. I-III it may be mentioned that the Notes to Vol. I included only the readings adopted by us, in Vol. II conjectural readings were mostly recorded along with the adopted readings and the Notes to Vol. III included all the different topics.

2. All MSS. mentioned henceforward are paper MSS. written in Devanāgarī script unless otherwise specified. Date of MS. is mentioned if recorded.

Prājña Pāṭhaśālā, Wai (Dist. Satara). Aṣṭakas I-II, V-VIII. See serial No. 23.

MS. from Mahabaleśvar Dattatreya Dīkṣita, Gokarn (N. Canara), dated Śaka 1779. Aṣṭakas I-II, IV-VIII. The last Aṣṭaka ends with the 10th Varga of the 5th Adhyāya. See serial No. 21.

These four MSS. reveal exactly identical text in Aṣṭaka VI portion. Their peculiarity, as described in the introduction to Vol. III, is that grammatical portion and alternative explanations are omitted ; in the introduction to hymns the Anukramaṇī quotation and the part prescribing Viniyogas are also omitted ; only the names of author, metre and deity are mentioned.

त

(7) [त १] T. M. S. S. M. Library, Tanjore. MS. No. 597 (Catalogue No. 1, 1928 ; Burnell's Cat. No. 2360 A). A complete MS. written at Benares in Saṁvat 1844. The chief MS. in त class.

(8) [त २] MS. from Mr. I akshman Ganesh Athalye, Gwalior. Dated Śaka 1711. A complete MS. excepting the 2nd Adhyāya in Aṣṭaka I and the 3rd in Aṣṭaka VII.

(9) [त ३] Oriental Institute, Baroda. MS. No. 235 Aṣṭakas V-VIII. In Aṣṭaka VII it joins भ group and agrees with भ५.

(10) [त ४] Bhārata Itihāsa Saṁśodhaka Maṇḍala, Poona. Kalamkar Collection MS. No. 1. Aṣṭakas IV-VIII written in Saṁvat 1643. Contains frequent marginal corrections in Aṣṭakas VII & VIII.

(11) [त ५] A complete MS. written in Saṁvat 1877 from the Archæological Department, Jodhpur. The Bhārat Itihāsa Saṁśodhaka Maṇḍala MS. and the Jodhpur MS. were identical in Aṣṭakas IV to VI and were therefore, given a common designation त ४. In Aṣṭakas VII & VIII also the text of the B. I. S. M. MS. with certain corrections is identical with that of the Jodhpur MS. Certain other corrections in the B.I.S.M. MS. are, however, not found in the Jodhpur MS. This shows that the B. I. S. M. MS. was corrected twice in Aṣṭakas VII & VIII, that the Jodhpur MS. was copied from it in those Aṣṭakas directly or indirectly after the first correction was effected and that the second series of corrections took place afterwards. Therefore a separate designation त ५ is allotted to the Jodhpur MS , retaining the old त ४ for the old B. I. S. M. MS. For the sake of convenience, these separate designations have been used for the Aṣṭaka VI portion also, where in fact both the MSS. give identical text.

(12) [त ६] Bhandarkar O. R. Institute, Poona. MS. No. 4 of 1916-18. Aṣṭakas V—VIII witten in Śaka 1740. MS. No. 5 of 1916-18 containing Aṣṭakas II to IV forms part of this MS. In Aṣṭakas IV & V this MS. had affinity with भ group. In Aṣṭakas VI to VIII it joins त class. In Adhyāyas 1 & 5 of Aṣṭaka VII and in Adhyāyas 1 & 2 of Aṣṭaka VIII it agrees with भ (६ and ७).

(13) [त ७] Government Sanskrit College, Benares. Rewa collection Bundle 44-5. A complete MS. written in Saṁvat 1903 (Śake 1768).

(14) [त ८] Bhandarkar O. R. Institute, Poona. MS. No. 17 of 1886-92. Aṣṭaka VIII dated Saṁvat 1813. Agrees with भ in later portion.

भ

(15) [भ १] MS. From Krishṇacharya Malgi of Bagalkot (Dist. Bijapur). Aṣṭakas III to VIII and some portion in Aṣṭaka II (from the 19th Varga in the 3rd Adhyāya to the 21st Varga in the 5th Adhyāya). Dated Saṁvat 1743. Contains marginal corrections. The chief MS. in भ class.

(16) [भ १ (२)] Osmania University Library, Hyderabad. MS. No. P.L. 1056. This is an old palm leaf MS. written in Telugu script giving the commentary on Adhyāyas 1-3 and on some portion in Adhyāyas 4 & 7 in Aṣṭaka VII. This MS. is of special significance since it gives text agreeing with that of भ class and is different from other MSS. written in South Indian scripts. Its text generally agrees with भ १ and occasionally with भ २. In the cases of important differences with भ१ its readings have been recorded by the designation भ १ (२). That this MS. actually falls into भ class is an important fact showing that South Indian MSS. are more or less independent branches of भ class. The MS. ग ४ which sometimes agrees with ग १, २ and sometimes with भ, is a connecting link between भ १ (२) and ग १, २. Thus the various stages in the transmission of the text of भ to ग can be shown thus :—(i) भ, (ii) भ १ (२), (iii) ग ४, (iv) ग १, २.

(17) [भ २] Oriental Institute, Baroda. MS. No. 12205 Aṣṭaka VI dated Saṁvat 1877; No. 12206 Adhyāyas 1 and 2 of Aṣṭaka VII; No. 12207 Adhyāyas 3-8 of Aṣṭaka VII; No. 12208 Aṣṭaka VIII. These four MSS. form a whole and are of the same character. Aṣṭaka VIII has affiinity with भ ८.

(18) [भ ३] Bhandarkar O. R. Institute, Poona. MSS. Nos. 226 Vis. II and 15 of 1886-92. Aṣṭaka VI.

(19) [भ ४] A MS. from Sardar M. V. Kibe of Indore. A complete MS. written in Saṁvat 1903. It gave the text of त class in Aṣṭakas I-IV. In the previous volumes it was called न. It generally agrees with भ class in Aṣṭakas V - VIII, and hence admitted to that class. In the last portion of Aṣṭaka VI and the beginning of Aṣṭaka VII it agrees with त.

(20) [भ ५] The Anūpa Sanskrit Library, Bikaner. MS. No. 71. A complete MS.

(21) [भ ६] A MS. from Mahabaleśvar Dattatreya Dīkṣita, Gokarn (N. Canara). Aṣṭakas I-II and IV-VIII. Aṣṭaka VIII ends with the 10th Varga in the 5th Adhyāya. Dated Śaka 1779. In Aṣṭaka IV it joined भ class; in Aṣṭakas V & VI it agreed with त; in the last portion of Aṣṭaka VI (IX. 1 to IX. 43) it agrees with घ. In Aṣṭaka VII it is identical with भ ७ from the beginning upto the 18th Varga of the 2nd Adhyāya (IX. 44. to IX. 67). Then it agrees with the MS. procured from Mr. Chidambar Dīkṣita of Badli (Dist. Belgaum) which contains Aṣṭakas II, V and VII and was used for the previous volumes. It is dated Śaka 1596. In Aṣṭaka VII it begins with the 19th Varga of the 2nd Adhyāya (IX. 68). The Gokarn MS. is identical with the Badli MS. in Aṣṭaka VII which in its turn agrees with त २. In Aṣṭaka VIII the Gokarn MS. falls in भ class.

(22) A MS. procured from Mr. Chidambar Dīkṣita, Badli (Dist. Belgaum). See above.

(23) [भ ७] A MS. from Prājña Pāṭhaśālā, Wai (Dist. Satara). Aṣṭakas I-II, V-VIII. Aṣṭakas V, VII and VIII belong to भ class; Aṣṭaka VI belongs to घ.

(24) [भ ८] Theosophical Society's Library, Adyar, Madras. MS. No. 34 J 45 (Eastern section). New No. 41-A-45[5]. Aṣṭakas I, II, IV, V and VIII. Dated Saṃvat 1835. Agrees much with त.

All these MSS. except ग ३, ग ४ and त ८ were used for one or the other of the previous volumes. The new MSS. give portion pertaining to this volume only.

Additional MSS. :—Besides the MSS. described above, the following have also been examined or tested, though some of them do not concern this volume :—

(1) Osmania University Library, Hyderabad. MS. No. 30/1. Contains introductory portion and Vargas 1–19 of the 1st Adhyāya of Aṣṭaka I. The MS. was read and found to be agreeing with च and फ (See introduction to Vol. I).

(2) Osmania University Library, Hyderabad MS. 39/1 Aṣṭaka I, No. 101/1 Aṣṭaka II. The colophon of MS. No. 39/1 reads शके १७२५ विजयपुराभिधे ग्रामे (presumably Bijapur). Both these MSS. form part of one and the same MS. No. 39/1 gives identical text with the MS. स (Aṣṭaka I, Mr. Khadilkar's MS. See intro. Vol. I.) except a few scribal differences. No. 101/1 is exactly indentical with the MS. म (the Badli. MS., Aṣṭaka II) after omissions and additions were made in the latter. Since Nos. 39/1 and 101/1 form part of one and the same MS., it can safely be presumed that No. 39/1 and स together present the text of Aṣṭaka I of the MS. म which is not available. Since स in Aṣṭaka I and म in Aṣṭaka II were collated[1] and

1. Adhyāyas 1 & 2 of Aṣṭaka I in स and Aṣṭaka II portion in म in Vol I were not collated, as they became available after the portion concerned was printed. Important readings from these portions in No. 39/1 and 101/1 are recorded below. Readings bearing the sign ॥ before them were conjectural emendations of Max Müller, while they have actually been found in this MS.

Intro. p. 2, line 3 बह्वय: for बंहवः; p. 2, l. 26 अप्प्रणयनादि° for प्रणयनादि°; RV. I. 84. 12 सश्चिरे सेविरे ज्ञायन्त इत्यर्थः ॥ The MS. gives सश्चिरे सिषेविरे ज्ञायन्त इत्यर्थः; I. 122. 11 ज्ञप् for ज्ञः; I. 123. 8; 124. 8; 13 उक्तरीत्या; I. 124. 11 दृष्ट्वा गतयोऽनुमीयन्ते for दृष्ट्वोदयोऽनुमीयते; I. 125. 7 प्राप्तं दुःखमेनस्तत्साधन° ॥ I. 127. 1 बहु मन्यन्त ॥; I. 133. 6 व्युदस्यन्नुदपद्यत ॥; I. 141. 3 श्वसिति ॥; I. 144. 1 निसते चुम्बन्ति प्राप्ताः ॥; I. 149. 2 एवं सर्वोत्पादकः श्रवोभिः ॥; I. 152. 2 समर्थाः सन्तोऽपि ॥; I. 157. 2 शूरसाता etc. ॥; I. 158. 4 दशतयो दशवारः ॥; I. 162. 19 भवतः ॥; I. 164. 1 संरब्धानीति ॥; I. 164. 19 चक्रथुः कृतवंतौ स्थ। तानि for चक्रथुः कृतवन्तौ तानि ॥ supplied by conjecture; I. 164. 23 सवनान्तेऽपि ॥; I. 164. 29 बालकस्योद्वानस्तनपाना° for बालकस्यादनस्तनपाना° ॥; I. 164. 39 °भूताः संतः अपर° for °भूताः सांगापर° ॥; I. 167. 1 इषः एषणीयाः ॥; I. 170. 4 शिष्टमविशिष्टं ॥; I. 174. 3 पालिता ॥; I. 175. 2 भवेति for भवसि ॥; I. 183. 3 यजमानदत्तहविषा तद्वान् for यजमानाय दत्तहविषा तद्वान्; in I. 185. 4 Max Müller suggests यद्वा before अतप्यमाने; यद्वा is actually found in this MS.; I. 191. 11 बालेत्यर्थः ॥

used in Vols. I and II respectively, it was not thought necessary to collate No. 39/1 and 101/1.

(3) A MS. from Gwalior State Sanskrit Library. Contains the following portions:—

Aṣṭaka	V	The last few Vargas in the 8th Adhyāya.
,,	VI	Complete.
,,	VII	Complete except the 6th Adhyāya.
,,	VIII	Adhyāyas 1 to 4 and the 5th from Varga 21 to the end.

This MS. was used for Vol. III. As before, certain important readings were got compared. The MS. gives a conflated text. In Aṣṭakas VI and VII and in Adhyāyas 3 and 4 of Aṣṭaka VIII it is identical with त ५. Adhyāyas 1, 2 and 5 in Aṣṭaka VIII agree with त २. In a few important cases, it is independently mentioned. See notes to ṚV. X. 73. 7; 75. 4.

(4) A MS. from Pandit Balacarya M. Khuperkar Śastri, Kolhapur. This MS. which was used for Vol. III is in two sizes. The small size contains portions from Aṣṭaka V as described in Vol. III; the large size contains Aṣṭaka VI (Adhyāyas 1 to 6) and VII (Adhyāyas 3 to 8) and VIII complete. The text in the small size MS. was identical with त ४; that in the large size MS. is identical with त २. From Adhyāya 4 in Aṣṭaka VIII the MS. agrees with त ६. This has been fully collated.

(5) A MS. from Mr. Hari Vasudev Hoshing Dīkṣita, Bhor (Dist. Poona). Aṣṭaka VII dated Saṁvat 1712. The MS. was fully collated and was found identical with त५.

(6) Bhārata Itihāsa Saṁśodhaka Maṇḍala, Poona. Kriṣṇaśastri Rajawade collection, MS. No. 12. This is a modern MS giving in part the commentary on Maṇḍala IX (Hymns 1–67). It was fully read and found to be identical with त १.

(7) Bhandarkar O. R. Institute, Poona. MS. No. 16 of 1886–92. Aṣṭaka VII. This has been fully collated and has been found to be identical with त ५.

(8) Punjab University Library, Lahore. MS. No. 2962, Aṣṭaka VI to VIII. The MS. could not be lent outside; arrangement was therefore made to get important readings compared with those in the MS. It was found that the text in Aṣṭakas VI and VII agrees with that in त ५ and the text in Aṣṭaka VIII agrees with that in त २.

(9) Royal Asiatic Society of Bengal, Calcutta. MS. No. G (142) 7872. This is a very old paper MS. written in Devanāgarī. It consists of 89 leaves giving stray portions in Aṣṭaka V (Adhyāyas 7 and 8, 16 leaves) VI (8 leaves) and VII (65 leaves). Each Aṣṭaka is written in different hands, although all are written in the *Pṛṣṭhamātrā* style. The text is rather incorrect. Leaves giving portions of Aṣṭakas VI and VII are pasted back to back and then used for writing, just resembling the manner of the Kashmir MS. of Ṛgveda (see Preface to the Khilas p. 892). Some of the pages are, however, separated in course of time. In Aṣṭaka V it agrees with ग which in its turn is

related to the त group ; in Aṣṭaka VI it agrees much with भ २; in Aṣṭaka VII it is identical with त ३ which in that Aṣṭaka joins भ group.[1]

Classification of MSS. :—The main critical apparatus can be divided into certain classes according to the Aṣṭaka division :—

Aṣṭaka VI—ग [=ग १, २, ३], घ, त [=त १, २, ३, ४, ५, ६, ७], भ [=भ १, २, ३, ४, ५].

Aṣṭaka VII—ग [=ग १, २, ३], त [=त १, २, ३, ४, ५, ६, ७], भ [=भ १, २, ४, ५, ६, ७].

Aṣṭaka VIII—ग [=ग १, २, ४], त [=त १, २, ३, ४, ५, ६, ७, ८], भ [=भ १, २, ४, ५, ६, ७, ८].

As compared to the preceding volumes, it will be seen that the designations of certain MSS. have been changed in this volume. The main reason for this is an attempt to present the MSS. material in a more scientific manner. Attempts were made in the second as well as the third volume to set all the MSS. into 3 or 4 classes. The present volume shows an advancement in the same direction. Another reason for changing names of certain MSS. is that in certain portions their character has also changed. It was therefore thought proper to allot them different names depicting their true nature. We hope this method of classification will enable the reader to understand easily the value of variants. When the general designation of a class is mentioned, it is presumed that all MSS. in that class give the same reading, with the following exception : in Aṣṭaka VII त has 7 MSS. (त १ to त ७). Of these, त ३ joins भ class in that Aṣṭaka only. Therefore त in Aṣṭaka VII means all MSS. of त class excepting त ३. That त ३ joins भ will be evident from the variants of भ class recorded in the foot-notes. Similarly भ in Aṣṭakas VII and VIII means all MSS. of भ class except भ ३ which is restricted to Aṣṭaka VI only.

All MSS. have thus been divided into 4 classes : ग, घ, त, भ. The nature of these classes has been broadly described in the introduction to Vol. III. Of these four classes, significance mainly attaches to two : त and भ. ग and घ can more strictly be called branches of the भ class. The main feature of ग is that it gives plently of different readings. When the ग MSS. give readings common with other classes, they agree with भ. The character of readings in ग in Aṣṭakas VII and VIII is the same as that described in Vol. III with regard to Aṣṭaka VI. As stated above, the chief reason for allotting them a separate class is their South Indian script on Palm leaf substance. The peculiarity of घ MSS. has already been shown. They retain only such portion of the commentary as is absolutely essential for the explanation of the verse and omit optional renderings and grammatical explanations. In the introduction to a hymn simply the names of authors, deity and metre are noted. The text has a tendency to agree with

1. Comparison of readings in the Alwar MS. of Ṛgvedabhāṣya as recorded by Peterson in his Selections from the Ṛgveda with our MSS. shows that the Alwar MS. agrees with त १ in Aṣṭakas II, III, IV, V. Attempts either to procure the MS. or to get it sufficiently compared could not succeed.

भ class. The habit of Sāyaṇa to quote the *Pratīka* is more conspicuous in this class. The peculiar nature of the MSS. (Serial No. 21 and 23) from Wai and Gokarn is an additional proof for the affinity of घ to भ; they give the text of भ in Aṣṭaka V, then fall into घ in Aṣṭaka VI and again in Aṣṭakas VII and VIII they become members of भ.

So, there remain only two classes, namely त and भ. Of these, the latter is the more important class. It reveals the least number of variants. The MSS. in त frequently differ from the text. A good number of their variants consists of omission of certain words, especially either the *Pratīkas* or their explanations. Another equally important point to be noted in connection with the character of the MSS. in the two classes भ and त is that the text of भ can be said to represent the Deccan tradition, since many of its MSS. are copied in that region, and that of त to represent the Benares tradition, as is clear from the fact that most of the त MSS. are copied at Benares. We, therefore, have come to the conclusion that भ represents the *archtypus* of Sāyaṇa to the greatest extent. It is in the fitness of things that भ representing the Deccan tradition should have the greatest affinity with the *archtypus* of Sāyaṇa who himself flourished in the Deccan. It is also quite natural that the South Indian branch of MSS. (i.e. ग) should be related to the भ class of the Deccan which lies on its borders. As for घ it is difficult to say anything peculiarly, since the घ MSS. are modern, incomplete and partly giving text of another class. The Benares tradition of त is distinguished from भ in point of distance of region, as well as in point of variation from the original text. Being a well known centre of learning in ancient as well as mediæval India, a considerable number of copies of Ṛgvedabhāṣya were made at Benares and spread over many parts of India.

Editorial Work :—The principle which we have generally followed in fixing Sāyaṇa's text will now become clear. We have stuck to the text of भ as far as possible. Complete dependence on भ was, however, not possible in view of the peculiarities of other classes and also in view of the necessity to present a correct and more intelligible text. Certain readings from ग,[1] घ and त have, therefore, been adopted. Still there remained a considerable

1. The following is a full list of readings adopted from ग:–RV. IX. 22. 4 श्राम्यन्ति, 51. 3 व्याप्नवन्ति प्राप्नुवन्ति, 67. 14 प्रथमं गच्छति ततः पश्चात्, 67. 27 अथ, 67 30 न अस्मानपापान्, 73. 1 समशब्दयन् वा, 74. 3 अस्मद्यज्ञं, X. I. 3 अह इमं, 22. 13 सन्त्विति निदेशविशेषणत्वात्, 29. 7 अस्येन्द्रस्यार्थे, 40. 7 पराजीयमानं, 64. 10 शंसमानस्य स्तोतुः; 67. 12 ततः, 68. 2 स्वसामर्थ्येन, 70. 9 सहायो, 71. 10 सखिभूतेन, 73. 7 काक्षी, 76. 2 वल्गति, 82. 7 असन्, 85. 3 अपशवो वा, 85. 24 यज्ञविनियोगपक्षे, 86. 8 एकः किशब्दः पूरणः, 87. 11 मारकव्यापारान्, 88. 2 चौषधीः, 92. 10 कर्ममार्गान् वा, 93. 8 यागं प्रति शीघ्र०, 95. 11 वदेर्लेटयाडागमः, 95. 13 अमादेशः, 105. ini. शिष्टाः सर्वाः, 108. 6 जसः सुः, 110. 8 आ एतु; 110. 10 स्वादूकुर्वन्तु, 115. 1 स्तनपानायापि, 117. 2 अतिथये, 123. 5 जरयितारं, 125. 5 यं कामये, 129. 7 ईश्वरमेव, 130. 1 य उक्तः सर्गात्मका यज्ञस्तं यज्ञमिमे पितरः, 134. 4 अन्नानि धनानि वा, 134. 5 वियुत्य, 135. 2 दोषानाविष्कुर्वन्, 146. 4 पक्षिमृगादिशब्दं, 149. 4 योद्धा, 172. 1 धनेन वा.

number of passages where none of the MSS. gave the correct text. In such cases conjectures made by Max Müller had to be adopted. In certain cases we have also adopted readings from the Bombay edition[1] as in the previous volumes. Certain readings from the Bombay edition have also been shown in the footnotes. Even this was not sufficient, and we ourselves have had to adopt a few readings by conjecture[2] as in the preceding volumes All these different readings are recorded and discussed wherever necessary, along with other topics in the Sanskrit Notes as usual. Supplementary Notes to Vols. I–III are added at the end of these Notes. Max Müller's notes have generally been taken into consideration while preparing our Notes. Certain insignificant readings preferred to those in Max Müller strictly on the basis of MSS. support have been ignored in the Notes— e. g. वालेन for बालेन IX. 1. 6 ; सर्वस्य द्रष्टा for सर्वद्रष्टा IX. 66. 20 ; युष्मदपेक्षितं for युष्मदभिमतं X. 48. 5 ; एषां for एतेषां X. 128. 6 ; बन्धात् for बन्धनात् X. 143. 1.

In Vols. I & II all available variants have been recorded ; in Vols. III & IV certain insignificant variants have been ignored. Comparison of our Notes with the *Varietas lectionis* of Max Müller shows that Max Müller also did not record each and every variant reading.[3] Care has however, been taken to record variants where Max Müller records them. We have recorded[4] the variants in two places. In those cases where we have

1. The following is a full list of readings adopted from मुः–RV. IX. 64. 11 देवकामः, 69. 3 सोमः, 69. 10 पवमानेन परिष्टुते, 86. 15 उत्कृष्टे, X. 13. 3 अनुरोहामि शकटे युवयोः स्थापनवहनानन्तरं, 26. 4 परिचर्याद्वारेण, 49. 9 अलम्भयं, 53. 1. नि षत्सद्धि, 59. 2. अत्रापि न्विति, 61. 7 रोहितं भूतामृग्यो भूत्वा, 61. 8 गोनिरोधायागच्छन्तं, 85. 4 सोमोऽन्नत्वैः, 85. 30 स्याच्चेदिति, 90. 12 यद्यावूरु.

2. The following is a full list of readings adopted by conjecture :–RV. X. 2. 4 तदेतत्, 13. 3 पदितृणि होतृत्वेन, 14. 9 प्रमृज्यमानदहनस्थानात्, 16. 9 शान्तिकर्मार्थ-मुपादत्तः, 26. 4 शरीरशस्त्रास्त्रबलादिभिः, 61. 1 यज्ञं पारं, 65. 7 वा देवाः, 67. 12 अस्त्रावयद्वा, 73. 7 स्रुघ्नं, 82. 7 नात्यन्तं सन्... ..°योग्यत्वात्, 85. 3 वर्धनकामार्थं, 85. 5 मसी परिमाणे मस्यते परिमीयते, 86. 10 समितिः समनमिति, 89. 16 शोभना, 104. 9 वृत्रहत्यायां मेघहनने, 114. 4 समुद्द्रवणं, 123. 5 उपगम्य, 130. 1 एवमायाम°, 142. 2 प्रादुर्भवनं, 148. 3 सर्वदा.

3. A good many passages can be cited which are not supported by our MSS. and which are not referred to in Max Mullers' *Varietas lectionis*. It is impossible to think that Max Müller's MSS. did not contain variants in those places.

4. In Vols. I and II as well as in foot-notes in Vol. III upto p. 336 the variants are recorded in conformity with grammatical rules regarding *Parasavarṇa* etc. The practice has since then been changed, the *Anusvāra* being used instead. The MSS. always use *Anusvāra* and not *Parasavarṇa*. Our practice of showing the *Pratīka* by a particular sign has necessitated the elimination of *Sandhi* to a great extent. Naturally while recording the variants the Sandhi-system in the MSS. has had to be discarded to that extent in view of the necessity to maintain the parallelism between the original text and the variant. We hope this practice has not done any particular harm to the proper representation of the MSS. material. The signs (i. e. figures) denoting variants have been the same throughout all the volumes. The original text and the variant bear the same figure. If a variant involves two or more words in the original text, both the beginning and the closing words in the original text bear the figure, thus specifying the extent of the variant. If any word inbetween has got any different reading, it is marked by an asterisk.

adopted different readings from Max Müller and also in those where readings are adopted by conjecture either by Max Müller or by us, the variants are recorded in the Notes. Variants of subordinate nature have been relegated to the foot-notes. In the case of readings in the Notes, MSS. supporting both the adopted text as well as the variants are mentioned. In the case of readings in the foot-notes, however, only the MSS. giving the variants are mentioned.

Comparison of our MSS. material with that of Max Müller:— Max Müller has divided his MSS. into three classes A, B and C. He held that none of these classes represented the *archtypus* of Sāyaṇa, and that the text was mishandled before these classes were formed. There are a good many passages in the commentary where none of these classes preserves the original and correct text. He moreover held that the A class represents the Benares tradition, B class that of Bombay and Punah (Poona) and the C class that of Calcutta. Now these A, B, C classes of Max Müller are not exactly parallel to our classes. Our त coincides with Max Müller's ACa, ष agrees with part of B, and भ is parallel to part of B plus C. Max Müller's A is our त[1] and Max Müller rightly says that it comes from Benares. The chief MSS. of his B is B_1, Stevenson's MS., India Office Library, and that of C is his own MS. Ca which is dated Saṁvat 1624 (=A.D. 1568). This was the oldest of all the MSS. used by Max Müller. It contains frequent additions and alterations and according to Max Müller it was the original of all C MSS. and was collated with a MS. of A class. So in its original text it was counted by him with C, and in its corrections with A. He therefore called it Ca.[2] He may be right in depicting the character of this MS., but when he records the variants in Ca, one is at a loss to know whether the reading is original or corrected, and consequently whether it represents the A or C class. In fact readings in A and Ca agree in a great majority of cases as recorded in Max Müller's *Varietas lectionis*.[3] The Ca MS. is exactly identical with our त ४ which was written at Benares in Saṁvat 1643 (=A.D. 1586). त ४ is apparently a MS. of त class. This त class agrees with A of Max Muller and त ४ is identical with Ca; therefore the similarity of Ca to A is established. Max Müller attaches first grade importance to A MSS. representing the Benares tradition and gives secondary significance to B and C, the so-called Bombay-Poona and Calcutta traditions respectively. But the conclusion has, as stated above, forced itself upon us that the भ class representing the Deccan tradition is the nearest approach to Sāyaṇa's original work.

1. A few places bearing the identity of A with त may be cited here:—ṚV. III. 2. 9; 3.2; V. 43. 9, 10; 50. ini.; VI. 62.1; VII. 55. ini.; 75. 5; 100. 6; VIII. 8. 12; 12. 32; 21. 18; 22. 10; IX. 65. 21; 107. 7; 108. 3; 114. 2.

2. See preface to the second volume of first edition, p. xxxiii Vol. I, 2nd edition.

3. Among the numerous places showing similarity of Ca to त some are noted below:—ṚV. V. 43. 9; VI 2. 5; VII. 2. ini.; 33.8; 98. 5; 99. 5; 100. 6; VIII. 1. 17; 30; 6. 33; 8.12; 13. 20; 21. 18; 22. 10; IX. 107. 7; 108. 3; 114. 2 etc.

The Bm MS. of Max Müller presents Mudgala's abridgement of the commentary on Aṣṭakas I to III and Adhyāyas 5 to 8 of Aṣṭaka IV. According to Max Müller the MS. belongs to B class[1] in its later portions while in the first Maṇḍala, it is an insignificant representative of C class. This Bm MS. is equivalent to our घ which ends with Aṣṭaka VI. Max Müller's B class, of which Bm is a part, continues to the end of Aṣṭaka VIII and we find that in Aṣṭakas VII and VIII his B readings are equivalent to those in one or the other MS. of भ.[2] On the other hand, there are certain cases where readings of Max Müller's C agree with those of our भ.[3] Max Müller had a number of C MSS. for the first Aṣṭaka, further on he had only two of them. He says that some C MSS. have later on turned into A class.[4] Regarding the origin of the MSS. in C class he says that they at least in their earlier Aṣṭakas represent the Calcutta tradition and were specially copied for European scholars.[5] We have not been able to collate all the MSS. connected with the so-called Calcutta tradition. Those which we could read or test, fell either in our त or भ, or partly in both, and thus did not necessitate the formation of a separate class. It is also to be noted that in Max Müller's opinion C MSS. represented the Calcutta tradition only in earlier Aṣṭakas. Thus our MSS. material does not allow us to form a special class representing the Calcutta tradition. We find only two traditions, namely the Deccan tradition and the Benares tradition represented by भ and त respectively. ग and घ cannot be called independent traditions, but branches of भ as already stated. The relation of our classes भ and त and also घ to Max Müller's A, B and C can be shown in the following way :—

भ = B + C
त = A + Ca
घ = B

The same can be shown in a reverse way :—

A = त
B = घ + भ
C = भ + त.

For the second edition of his Ṛgvedabhāṣya Max Müller consulted about two dozen MSS. out of which 16 were complete and 8 were fragmen-

1. Passages showing similarity of घ to B may be found, among others, at the following places :—II. 35. 5 ; 8 ; III. 3. 8 ; 9.6 ; V. 46. 3 ; 49. 3 ; 86. 3 ; VI. 62. 1 ; 75. 18 ; VII. 2 ; VIII. 13. 4 ; 5 ; 15. 3 ; 19. 37 ; 21. 18 ; 23. 7 ; 34. 15 ; 60. 20 ; 90. 5 ; IX. 8. 5.

2. e.g. see RV. III. 9. 6, VI. 62. 1, VII. 55. ini., 75. 5, 98. 5, 99. 5, 100. 6, 104. 23, VIII. 6. 33, 8. 12, 13. 20, IX. 48. 3, 60. ini., 62. 21, 66. 3, 98. 12, 103. 3, 108. 2, 114. 4. Max Müller's B4 is identical with our भ ७.

3. A few places where Ca agrees with भ are shown below :—III. 30. 15, V. 43. 10, VI. 52. 1, 2, 67. 1, 75. 18, VII. 55. ini., 56. 9, 10, VIII. 20. 11, 14, 43. 3, 48. 3, 4, 60. 20, 61. 2, 69. 2.
It is to be noted that त ४ which is identical with Ca, also agrees with ग १, २ and भ in many cases in Aṣṭaka VIII.

4. Preface to the 2nd volume of first edition, p. xxxiv, Vol. I, 2nd edn.

5. Preface to the 1st vol. of 1st edition, p. xx, Vol. I, 2nd edn.

tary running to the length of three Aṣṭakas at the most. We, for our edition, either collated or tested over five dozen MSS., out of which only five were complete, four contained 7 Aṣṭakas, two gave 6 Aṣṭakas, 15 comprised a number of Aṣṭakas ranging from 3 to 5 and the rest gave a single Aṣṭaka.[1] So, certain facts become clear if we compare our MSS. material with that of Max Müller, namely (1) that our MSS. are quite different from those of Max Müller, (2) that we have used a larger number of MSS. than Max Müller, (3) that while Max Müller had a majority of complete MSS., we had a majority of incomplete MSS., and (4) that a good number of MSS. written in South Indian scripts (Grantha, Telugu and Malayalam) became available to us. Max Müller was able to procure only a fragmentary portion in Maṇḍala I written in Grantha and Tulu scripts. As for the age of MSS., there is no particular difference between those of Max Müller and ours, except the fact that the oldest available MS. of Sāyaṇa's commentary (dated Saṁvat 1452 = A.D. 1395, Aṣṭaka IV, Oriental Institute, Baroda, MS. No. 12211) was used by us.

Our Achievements :—It is obvious that in these circumstances a thorough comparison of MSS. used in these two editions is indeed impossible. A general comparison of the character of the various MSS. used in both the editions can, however, be made by giving a statistical table showing the analysis of variants in certain hymns as a specimen [See next page]. For this purpose we have picked up one hymn from each Maṇḍala addressed to a different deity. It is neither possible nor desirable to give an analysis of the variants in the whole of the Ṛgvedabhāṣya.

This table may conveniently be taken to speak for the whole of the Ṛgveda in general and therefore can give a clear idea of the relation of our MSS. material to that of Max Müller and also of our achievements. The comparison of columns 2 and 3 shows that we have been able to discover a larger number of variants than Max Müller even taking into account the probability that Max Müller might have ignored certain insignificant readings. We cannot deny the possibility of more MSS. of Sāyaṇabhāṣya exhibiting some more variants being discovered in future. In a vast country like India, several MSS. may still be lying in corners awaiting discovery and proper care, which may perhaps help in restoring the original text of Sāyaṇa. We, on our part, have tried our best to procure as many MSS. as could be available and have used them according to our judgement. It was quite natural that the variants recorded in our edition should tally with those in Max Müller at least to a certain extent. The number in column 4 denotes the common places of variants in both the editions. The number of readings conjectured by Max Müller is shown in column No. 5. This number, of course, forms part of the

1. The three MSS. from India Office Library London, mentioned in Vol. II were collated and referred to in the notes to Vols. I and II. They were, later, not used, since they were collated by Max Muller for his edition. These are excluded from the above calculation.

Statistical Table showing a Comparative Analysis of Variants.

	'MN	Variants recorded by Max Müller.	Variants recorded in the Poona edition.	Variants in places common to M. M. and Poona edition.	Readings conjectured by Max Müller.	M. M. conjectures found in our edition.	Readings preferred to those in Max Müller.	Readings preferred to those in M. M. and also found in the Bombay edition.
	1)	(2)	(3)	(4)	(5)	(6)	(7)	(8)
	125	30	38	10	5	0	0	0
II	34	8	32	5	4	1	6	4
III	26	19	73	12	3	1	5	2
IV	2	11	47	7	6	2	7	2
V	44	29	32	7	0	0	5	2
VI	47	16	43	7	3	1	5	0
VII	100	3	12	2	3	2	4	1
VIII	91	24	37	24	12	4	2	1
IX	96	9	33	7	2	1	2	0
X	106	24	36	11	7	3	14	8
		173	383	92	45	15	50	20

number in column No. 2. Column No. 6 is useful in finding out how many conjectural readings of Max Müller we could discover in at least some of our MSS. Column No. 7 denotes the number of readings preferred generally on the MSS. support to those in Max Müller. It shows an average of 5 readings per hymn. This number also forms part of that in column No. 3. Max Müller improved the text of his second edition after collating even a few more MSS. than those for the first edition. It was, therefore, no wonder if we, who were editing the text after the lapse of nearly half a century with altogether different MSS. material, could improve the text to such an extent with the aim of making the nearest possible approach to Sāyaṇa's own work. The readings that we have adopted differently from Max Müller may be divided into three classes (i) *Pratīkas*, (2) Readings that are grammatically correct and (3) Readings which are useful for the better explanation of a verse. The last column shows the comparison of our MSS. with the Bombay edition as far as the adopted readings are concerned. The number in this column, of course, forms part of that in column No. 7.

It may be asked, to what extent does our bhāṣya text differ from that of Max Müller? It can at once be said that there is not and cannot be any material difference between the two. At the same time there is plenty that can be considered as improvement of the text. The improvements which we effected in the bhāṣya text are all recorded in the Notes, reference to which may fully bring out the value of this edition. Certain cases in the present volume may however be pointed out here :

Considerable changes have been effected in the commentary to the following verses: IX. 65, 4, 97. 26, 109. 22, 113. 10, X. 30. 8, 65. 1, 2. In RV. X. 16. 1 मषीभूतं for भस्मीभूतं. Three stages of burning are here denoted, of which this is the first. X. 22. 13 सन्तिति निर्देशविशेषणत्वात् for सति निर्देशस्याविशेषणत्वात. Max Müller's explanation is not satisfactory. In X. 27. 20 our text runs युक्तौ रथे नियुक्तौ सु सुष्ठु पूजितौ. Max Müller has युक्तौ सुष्ठु पूजितौ and suggests योजितौ for पूजितौ. In our text युक्तौ is explained by रथे नियुक्तौ, and सुष्ठु पूजितौ is the explanation of सु. Max Müller suggests सुष्ठु योजितौ as the explanation of युक्तौ which renders the word सुष्ठु and the causal योजितौ superfluous. X. 73. 7 सुप्रं गतो मार्गः काञ्ची गतो मार्गः for शीघ्रं गतो मार्गः कांत्या गतो मार्गः. Max Müller has in vain tried to defend his reading. The text adopted by us is a fine specimen of improvements made by us in the bhāṣya text. The famous places of सुप्र and काञ्ची are often mentioned in ancient Sanskrit literature by way of example. X. 82. 7 नाप्यन्तं सन् काष्ठपाषाणादिरूपान्तरेण संबन्द्धुमयोग्यत्वात् for नार्थतं सन काष्ठपाषाणादिवत्संबोद्धुमयोग्यत्वात्. See Sanskrit note. X. 89. 14 यद्यया हेत्या त्वं...रक्षो भिनदः अभिनः यद्यया च शक्त्या. Max Müller has यद्यदा हेत्या त्वं...रक्षो भिनदः अभिनत् यद्यदा च शक्त्या. The adopted text is a clear improvement. In X. 91. 4, 5, 130. 1 Max Müller denoted *lacunae* which we could fill in properly on MSS. authority. There are certain others which had to be retained as such. In X. 121. 4 यस्य चेमाः प्रदिशः प्राच्यारम्भा आग्नेयाद्याः कोणदिश ईशितव्याः। There was a controversy between

Max Müller and Peterson about the text of this passage. Max Müller read यस्य चेमाः प्रदिशः प्राच्यारंभा आग्नेय्याद्याः कोणदिशः ईशानांता वा while Peterson preferred to retain the text in the MSS. : यस्य चेमाः प्रदिशः प्रारंभा आग्नेयाद्याः कोणदिश ईशितव्याः. We consider the emendation प्राच्यारम्भाः as essential, but the conjecture of ईशानांता वा for ईशितव्याः is uncalled for; ईशितव्याः is quite satisfactory. Max Müller could not find in his MSS. the commentary on X. 174. 2. The Bombay edition gave it, the genuineness of which was doubted by Max Müller. Our त MSS. have given it, so we have no hesitation in declaring it as genuine.

These are some of the improvements we have made in the text. In undertaking the present edition our chief aim was to prepare a scientific edition of Sāyaṇabhāṣya as none was available in the market. It was, therefore, essential to procure old unused MSS. from all parts of India and prepare a critical edition on their basis. The outcome of our long labours is now before scholars and it is up to them to pass judgment.

The study of the Veda from modern scientific point of view commenced in Europe over a century ago. A number of translations of the Ṛgveda have been made and critical notes written in different languages which have considerably helped the understanding of that Veda. It is difficult to pass any remarks on the various methods of interpretation. But it is our humble opinion that notwithstanding modern philological and historical researches, the value of Sāyaṇa's commentary has not diminished. It, therefore, naturally follows that we must do full justice to Sāyaṇa by trying to find out what he himself must have written, and ours is an humble attempt in that direction with the means available to us.

The Bombay edition of Ṛgvedabhāṣya :—We have already stated (cf. intro. to Vol. III. p. viii) that we have also used the Bombay edition of Ṛgvedabhāṣya. The editors of the Bombay edition have tried their best to present a good edition of the bhāṣya and have obviously used certain MSS. of bhāṣya, even though no information regarding them is available in the preface to the same. On comparing the text of the Bombay edition with our MSS., we find that the Bombay editors used MSS. mostly of त group. A comparison of readings of the Bombay edition (मु) with those recorded in the Notes or foot-notes will amply bear testimony to this. Especially they used MSS. agreeing with त १ and त २, comp. commentary on RV. X. 27. 14, 65. 1, 2, 73. 9. It is striking that in certain cases the modern MS. त ७ gives the same readings as in मु. See comm. on RV. IX. 67. 22, 77. 5, 97. 14, 16, X. 12. 6, 18. 14, 27. 9, 46. 3, 66. 13. Since the MS. was written before the Bombay edition was printed, it seems probable that both the MS. and the edition had a common source. In some cases they also disagree with each other, see RV. X. 45. 12, 73. 9.

Udgīthabhāṣya on the Ṛgveda:—The commentary of Udgīthācārya on some portion of Maṇḍala X of the Ṛgveda (X. 5. 4 to X. 34. 3) has been published by the D. A. V. College Research Department, Lahore, 1935. The book has no preface giving information regarding the MS. or MSS.

used for the edition. A number of printing mistakes have occurred in the text. The commentary has a considerable number of incorrect readings which could not be corrected probably on account of the singleness of the MS. The commentary was, however, compared with that of Sāyaṇa. The comparison has clearly shown that Sāyaṇa largely used Udgīthabhāṣya for composing his own commentary, at least as far as the available extent of Udgīthabhāṣya is concerned. Parallel construction is found every now and then, so much so that incorrect portion in one can be corrected by the help of the other in most cases. In fact the editor of Udgīthabhāṣya has frequently used Sāyaṇa's commentary in restoring Udgītha's text. We have, therefore, used Udgītha's bhāṣya for determining Sāyaṇa's text, especially with regard to the readings adopted by us in preference to those in Max Müller as well as the conjectural readings. Udgītha's readings have been recorded in all such cases. Udgīthabhāṣya is thus a first-rate means for constituting Sāyaṇa's text. Unfortunately it is neither complete nor correct. Sāyaṇa's commentary is not available on certain verses (X. 18. 14 ; 27. 9 ; 73. 9). Udgītha gives commentary on them which is fully reproduced in the Notes. It can give us an idea as to how Sāyaṇa might have explained those verses. His commentary on certain verses is rather different from and more comprehensive than Sāyaṇa (X. 45. 12 ; 65. 1 ; 2). In X. 10. 2 some part is left unexplained in Sāyaṇa. Udgītha's explanation on it is reproduced in the Notes. Pandit Bhagwad Datta of Lahore possessed further transcript of Udgīthabhāṣya from Rv. X. 34. 5 to X. 83. 5. On our request he kindly sent his transcript for our use. It has been used in the same way as the printed portion. Both the printed and transcript portions are in a corrupt state. We are thankful to Pandit Bhagavad Datta for kindly lending us his transcript for use in our edition. It would be a contribution to our sources of Ṛgveda interpretation if the unpublished portion would be properly edited and printed together with a revised text of the printed portion.

Udgītha was a predecessor of Sāyaṇa, since he is referred to by Sāyaṇa at least once in his commentary (See RV. X. 46. 5). He says, उद्गीथस्तु भूर्जयन्तमित्येकपदं मत्वा भूरादींल्लोकाञ्जयन्तमिति व्याचकार. Udgītha's bhāṣya on the portion concerned runs:—भूः भूरादीन् लोकानित्यर्थः। अत एव च महां महान्तं विरोधां etc. The explanation of जयन्तं is not available. However, the correctness of Sāyaṇa's statement can be ascertained by the explanation of भूः given here, and we can rest assured as to the genuineness of Udgīthabhāṣya.

Certain conclusions can be drawn from the relation of Sayaṇa to Udgītha. In a number of cases the adopted text of Sāyaṇabhāṣya has no MSS. support. Many such readings find support in Udgīthabhāṣya. Another important contribution of Udgīthabhāṣya to the editing of Sāyaṇa-bhāṣya is that it has thrown its weight in fovour of one of the four (or two) classes of MSS. Our conclusion that the भ class has the first claim to represent the *archtypus* of Sāyaṇa is particularly supported by Udgītha's

commentary. In certain cases,[1] Udgītha's readings agree with those of भ, disagreeing with those of त.

At two places Udgītha differs from the traditional recitation of the Saṁhitā text: (1) He considers RV. X. 9 as consisting of 10 verses instead of 9, the last verse being a *Khailika*: सप्तपीस्तदपसो दिवा नक्तं च सप्तधीः। वरेण्यक्रतुरहमा देवीरवसे हुवे॥. This last verse is explained by him,[2] while verses 6 to 9 are left unexplained because they are commented upon previously in Maṇḍala I. (2) According to the tradition, the 6th Adhyāya of Aṣṭaka VII (i.e. 54th Adhyāya) ends with RV. X. 18. According to Udgītha, however, it ends with X. 20. 1: भद्रं नो अपि वातय मनः which he considers as an independent hymn. The next hymn begins with X. 20. 2. How far this difference went cannot be found, since the commentary breaks at X. 20. 5 and again begins with the 22nd hymn. The editor of Udgīthabhāṣya is hereby inclined to believe that Udgītha probably commented upon a recension of Ṛgveda different from Śākala. We may add that the enumeration of Adhyāyas instead of Aṣṭakas is found in the Kashmir MS. of Ṛgveda and the Junagadh MS. of Śāṅkhāyana śākhā of Ṛgveda. See Preface to the Khilas pp. 893–4.

The Khilas:—The Ṛgveda Saṁhitā presented in this edition is the text of the Śākala śākhā which is well known over the whole of India. There are certain other śākhās also of the Ṛgveda which more or less differ from the Śākala text and contain certain additional hymns or verses. Some MSS. of the Ṛgveda Saṁhitā contain such supplementary hymns or *khilas* even though there is scarcely any unanimity amongst them as to their number and text. These Khilas have been published in most of the previous editions of the Ṛgveda. The most genuine, important and extensive collection of Khilas is found in a MS. of the Ṛgveda Saṁhitā discovered by Dr. G. Bühler in Kashmir. It is written in the Śāradā script and is about 400 years old. It consists of 191 leaves of birch bark, of which 1-176 are devoted to the Saṁhitā text and the rest to the Khilas. The Khilas are collected as a separate book divided into 5 chapters, each having at the beginning its own Anukramaṇī. The text of this Kashmir MS. was edited and published in Roman script by Dr. phil. J. Scheftelowitz in 1906 at Breslau in Germany

1. For example, the readings of भ are supported by Udgītha at the following places, while त gives different readings :—

X. 22. 15 कर्मवैगुण्यकरणेन, 23. 2 ऋजीषलक्षणं, 24. 1 शस्त्रलक्षणैः, 24. 4 निर्मथितवन्तौ, 24. 5 स्थित्वावहतं, 26. 7 पोषणानां करणे, 27. 8 सर्वतः. 27. 11 वरयितुं, 27. 23 क एते, 30. 1 महागतेरिन्द्रस्य चार्थायेत्यर्थः, 30. 3 वृष्टिकर्मण्यधिकृतं, 30. 9 वृष्टिरूपेण, 30. 11 अत्रानेकत्ववाची, 31. 3 उत्कृष्टजन्मानं, 34. 2 जाया. The reading बलवत्क्रूरशूरमृगमित्यर्थः in X. 28. 9 preferred to Max Müller's conjectural reading बलवत्क्रूरमृगमित्यर्थः is found in भ as well as in Udgītha. In most of the MSS. used by Max Müller as well as by us a letter स्य comes after बलवत्क्रूर, which justifies the reading in भ and Udgītha.

2. See Khila III. 13.

with critical notes and introduction under the title "*Apokryphen des Ṛgveda*". The Khilas appended to this volume are based on those printed in that work. For the purpose of editing the Khilas as well as for preparing notes, other editions of Khilas, certain MSS. and other material that gathered after the publication of Scheftelowitz's work, have also been used. Mr. C. G. Kashikar has edited this Khila portion and has added a separate Preface discussing all details.

Acknowledgments :—Before we proceed to acknowledge the help received from the various quarters, we have to do a painful duty of recording the death of Prin. V. K. Rajawade, the Founder-President of our Maṇḍala and the Advisory editor of this edition, which took place on 17th December 1944 at the age of 64. Till the end of his life he very sincerely performed his duties in both the capacities. He was a scholar of Sanskrit, especially of Veda and Nirukta. When faced with difficulties in deciding the text of Sāyaṇa, we used to approach him, and by his profound learning and ripe thinking, he could easily solve them. His love of learning and sincerity of work were so keen that even in his last illness he discussed certain readings in the 10th Maṇḍala with full energy and readiness. His plain living, high thinking, profound learning and strict adherence to truth made him a modern Ṛṣi. It was unfortunate that he could not be spared to see this last volume of the Ṛgvedabhāṣya published.

We also regret to record the death of Vedamūrti Govindabhaṭṭa Phatak, Poona, the well known Ghanapāṭhi of Mahārāṣṭra, whose help was obtained while printing the Vedic text of the previous volumes. In modern times when traditional learning is fast disappearing and the place of a Ghanapaṭhi Brahman is scarcely refilled, his death is keenly felt.

It is our first and pleasant duty to acknowledge the help we received from Max Müller's edition of the Ṛgvedabhāṣya. The ample use made by us of his edition including his *Varietas lectionis* has already become clear. Having the outcome of his labours by our side, it was easy for us to go ahead in finding out a more correct and original text of the bhāṣya. Good editions of Vedic and other texts which now have become available, did not exist in his time. Vedic researches have advanced to a great extent at the present day, which also have rendered help in editing the bhāṣya. This was not the case in his time. In such circumstances it was indeed creditable to him to proceed with his self-imposed task slowly but steadily and present the complete edition to the world of scholars. The lovers of Vedic literature will ever remain grateful to him for his signal service to the cause of learning.

On the occasion of the completion of the Ṛgveda text and Sāyaṇabhāṣya, we have great pleasure to acknowledge the patronage and help we received since the commencement of the work. We are grateful to all our patrons—various Governments, Princes in Rajaputana, Central India, Kathiawar, U. P., Bengal, Gujarat, Deccan and South India and also men of wealth—whose help is chiefly responsible for the successful termination of

the work. For an institution like ours which owes its maintenance to public support, it was impossible to go ahead with the work unless generous help was forthcoming. There have been times which served as a test of our sincerity for the work, but fortunately they passed off by the grace of the Supreme Being. The third volume was published by the end of 1941 when the war was in full swing. The editorial work of the present volume was seriously commenced in 1943 when the difficult problem of the expenses of printing had to be faced. The printing rates had gone very high, so also the paper had become too dear, if ever it was available in market. It was very difficult to obtain public sympathy in those hard days when even ordinary life had become so difficult. Under these circumstances it was impossible to think of the publication of this volume. But, as if inspired by the Vedapuruṣa, Chandrashekhar Govind Agashe, Esqr. B.A., LL.B., the Managing Director of the Bṛhanmaharaṣṭra Sugar Syndicate, Ltd., Poona, came to our help and kindly promised to undertake the financial responsibility of the volume by bearing all expenses in connection with paper and printing. This was really a great boon. We cannot adequately express our gratitude to Mr. Agashe for his very timely, selfless and generous patronage. But for his princely donation we cannot say when it would have been possible for us to publish this volume. In these days when ancient learning is generally regarded as dry bones of the past, souls like Mr. Agashe provide a ray of hope for the revival of the sacred knowledge of the past and the unravelling of truth hidden in obscurity. At his desire, this last volume of the Ṛgveda-bhāṣya is dedicated at the feet of Śrī Vedapuruṣa.

Thus relieved of anxiety, we set ourselves to work more energetically and finished the editorial work in early 1944. The next requirement was paper which was not available in the market. The Government of India had issued the Paper Control (Economy) Order by which a publisher had to obtain the necessary permission for purchasing the required quantity of paper and also for printing. We are glad to note that on our application, the Government immediately sanctioned the required quantity of paper and also granted permission to print the volume. We are thankful to the Government of India for their prompt and sympathetic action. The Deccan Paper Mills Co. Ltd. Poona, who supplied us with the special kind of paper for all the previous volumes, were approached for the same kind of paper for the present volume also, and they kindly supplied us with the required quantity in spite of certain inconveniences inevitable in war time and also in spite of other tremendous demands. We record our thanks to the Proprietors of the Mills for their timely response. The copy was sent to press in the latter half of 1944. It was now the turn of the press to labour under difficulties. Due to employment on war work the staff of the press was reduced to a negligible quantity and it was indeed difficult even to commence the printing. Partly due to the relief caused by the end of war in 1945 and partly owing to the efforts of the manager of the press, the difficulties were soon over and the printing of the volume could be

finished within a reasonable period. We are thankful to Mr. S. R. Sardesai, B.A., LL.B., of the Samartha Bharat Press, Poona, who has made a name for elaborate Sanskrit printing and has printed all the previous volumes of this edition, for printing this volume neatly and in as short a period as was possible under the circumstances. Vedamūrti Bhalachandraśastri Karambelkar, Superintendent of the Vaidika Smārta Dharmāśrama (Pāṭhśālā), Poona, a disciple of the late Vedamūrti Govindabhaṭṭa Phatak, has helped us in getting the Vedic text of this volume accurately printed, for which we are thankful to him. We have also to thank Pandit Maheshwarshastri Joshi of Poona for his help from time to time in matters pertaining to technical points of grammar.

We must not fail to acknowledge the help received by us from the various MSS. libraries, institutions and individuals who kindly lent us their valuable MSS. of Sāyaṇabhāṣya. We offer our hearty thanks to them. But for their kind help the project itself would have been an impossibility. In respect of borrowing MSS., we have to thank the authorities of the Bhandarkar Oriental Research Institute, Poona, especially Mr. P. K. Gode, M.A., the energetic Curator of its MSS. Department, for the kind and ready help in procuring MSS. from distant parts of the country. Similarly we record our thanks to those scholars who have rendered their valuable help with regard to the editing not only of this volume, but of the whole work. We are also thankful to the editors of the various Oriental Journals who encouraged us in our undertaking by publishing appreciative reviews of our volumes.

We hope this volume will meet with the approval of scholars.

Vaidika Saṁśodhana Maṇḍala, Poona,
Varṣa-pratipadā, Śake 1868,
April 3, 1946.

N. S. SONTAKKE
C. G. KASHIKAR

प्रास्ताविकम्

अथायं सायणभाष्यसहिताया ऋग्वेदसंहितायाश्चतुर्थो भागो नवमदशममण्डलात्मको विदुषां करकमलयोः सादरं सामोदं च समर्प्यते। यद्यपि पञ्चमो भागः ऋषिच्छन्दोमन्त्रपदादिसूच्यात्मकोऽनाप्यारचनीयः प्रकाशनीयश्च वर्तते तथापि संहिताभाष्यमुद्रणसमापनेन निर्वर्तितकार्यमिवात्मानं मन्यामहे।

इदमस्माकं वैदिक-संशोधन-मण्डलं वेदविद्याभिवृद्ध्यर्थं १८५० मिते शाके पुण्यपत्तनस्थ-तिलक-महाराष्ट्र-विद्यापीठ-शाखीयत्वेन निर्मितम्। सभाष्यस्य ऋग्वेदसंहितापुस्तकस्यातिदुर्लभत्वात् प्राचीनानि भाष्यलिखितपुस्तकानि संपाद्य भाष्यपाठं संशोध्य सभाष्या ऋग्वेदसंहिता प्रथमं मुद्रापयितव्येति निश्चयोऽभूत्। तदनुसारं ऋग्वेदसंहितायाः प्रथममण्डलात्मकः प्रथमो भागः १८५५ शाके प्रकाशितः। द्वितीयो द्वितीयतृतीयचतुर्थपञ्चममण्डलात्मको भागः १८५८ शाके षष्ठसप्तमाष्टममण्डलात्मकस्तृतीयभागश्च १८६३ शाके प्रकाशितः। अधुनायं चतुर्थो भागो नवमदशममण्डलात्मकः सकलः १८६८ शाके प्रकाश्यते। मॅक्समुल्लरमहोदयैः ऋग्वेदभाष्यं प्रथमं पञ्चविंशतौ वर्षेषु मुद्रापितम्। तत्पुस्तकस्य द्वितीयावृत्तिः केवलं वर्षत्रितये प्रकाशिता। तथा च मुम्बापुरीमुद्रितं ऋग्वेदभाष्यमपि वर्षत्रितय एव संपूर्णं प्रकाशितम्। एवं सति अस्मत्पुस्तकप्रकाशनार्थमियान् विलम्बः कस्मादित्याशङ्का भवेत्। तत्रेदं वक्तव्यं यन्मॅक्समुल्लरपुस्तकं मुम्बापुरीपुस्तकं च मुद्रणसमयात्पूर्वं संपूर्णमारचितमासीत्। अस्माभिस्तावदेकैको भाग आरचितो मुद्रापितश्च। तेनेयान् कालो यातः। एतद्रीत्या ग्रन्थस्य प्रकाशनेन न काचिद्धानिः संजाता स्यादिति विश्वसिमः। आस्तां तावत्। अस्य चतुर्थभागस्य भाष्यसंशोधन उपयुक्तानि लिखितपुस्तकान्यधुनोपवर्ण्यन्ते।

ग-वर्गः—

(१) [ग १] क्रमाङ्कः ४६५ (६-७ अष्टकौ), क्रमाङ्कः ४८५ (अष्टमाष्टकस्य १-४ अध्यायाः), क्रमाङ्कः ५१८ (अष्टमाष्टकस्य ५-८ अध्यायाः। अष्टमाष्टके ३६ वर्गपर्यन्तमेव भाष्यं विद्यते)। मद्रासनगरस्थैः डॉ. टी. आर्. चिन्तामणिमहोदयैः प्रदत्तं तालपत्रलिखितं ग्रन्थाक्षरयुतं च। यत्रतत्र क्वचिदंशो लुप्तः।

(२) [ग २] त्रिवेन्द्रम्-विश्वविद्यालयस्थं ३६५२ क्रमाङ्कयुतं ग्रन्थाक्षरयुक्तं तालपत्रपुस्तकं ग१-पुस्तकगतभाष्यांशयुतम्। सप्तमाष्टके तावत् तृतीयाध्याये द्वादशवर्गान्तमेव भाष्यम्।

(३) [ग ३] मद्रासनगरनिकटवर्ति-अडयारग्रामस्थित-'थिऑसॉफिकल सोसायटी'-ग्रन्थालयस्थं २५७ क्रमाङ्कयुतं तेलुगुलिपिलिखितं तालपत्रपुस्तकम्। षष्ठाष्टके सप्तमाध्याये २४ वर्गादारभ्य सप्तमाष्टके सप्तमाध्याये २५ वर्गान्तं प्राचीनं कीटभक्षितं क्वचिदशुद्धम्।

एतानि त्रीणि पुस्तकानि समानपाठयुतानि। 'ग' इति तेषां समूहस्य संज्ञा। यत्र तेषां पाठो भिन्नस्तत्र तत्तत्संज्ञया प्रदर्शितः।

(४) [ग ४] तञ्जौरनगरस्थ-सरस्वतीमहालग्रन्थालयस्थं ६५० क्रमाङ्कयुतं तेलुगुलिप्यां लिखितं तालपत्रपुस्तकं प्राचीनं कीटभक्षितमष्टमाष्टके प्रथमाध्यायादारभ्य षष्ठाध्याये द्वितीयवर्गान्तम्। प्रथमाध्याये ग-पाठानुसारि अनन्तरं भ-पाठानुसारि च। तेलुगुलिपिवशात्तालपत्रलिखितत्वाच्च ग-वर्गे समावेशितम्।

भ-वर्गः—

(५) पुण्यपत्तनस्थ-भाण्डारकर-प्राच्यविद्या-संशोधन-मन्दिरग्रन्थालयस्थं ४ (विश्राम. १) क्रमाङ्कयुतं देवनागरीलिप्यां[1] संवत् १७८५ वर्षे लिखितं ३-७ अष्टकानां लिखितपुस्तकम्। सप्तमाष्टकपाठः ग५-पुस्तकपाठमनुसरति।

१. एतस्मादनन्तरं प्रायः सर्वाणि लिखितपुस्तकानि देवनागरीलिपियुक्तानि।

(६) मुम्बापुरीस्थ–' रॉयल एशियाटिक सोसायटी '–ग्रन्थालयस्थं ४४७ क्रमाङ्कयुतं पञ्चम-षष्ठाष्टकात्मकं लिखितपुस्तकम् ।

वांईक्षेत्रस्थ–प्राज्ञपाठशालाग्रन्थालयस्थं १-२; ५-८ अष्टकात्मकं पुस्तकम् ।

गोकर्णक्षेत्रस्थ–महाबलेश्वर–दत्तात्रेय–दीक्षितानां पुस्तकं १७७९ शाके लिखितं १-२; ४-८ अष्टकात्मकम् । अष्टमाष्टके ६-८ अध्याया नष्टाः ।

एतेषां चतुर्णां षष्ठाष्टके समानः पाठः । एषु पुस्तकेषु व्याकरणप्रक्रिया विकल्पितार्थाः सूक्तादौ अनुक्रमणीपाठः श्रौतविनियोगश्चेत्येते न सन्ति । केवलं ऋषिच्छन्दोदेवता निर्दिष्टाः ।

त-वर्गः—

(७) [त १] तञ्जौरग्रन्थालयस्थं ५९७ क्रमाङ्कयुतं संवत् १८४४ वर्षे वाराणस्यां लिखितं संपूर्णं पुस्तकं त–वर्गस्याधारभूतम् ।

(८) [त २] ग्वालियरनगरस्थ–लक्ष्मण गणेश आठल्येमहोदयानां १७११ शाके लिखितं संपूर्णं पुस्तकं प्रथमाष्टके द्वितीयाध्यायं सप्तमाष्टके तृतीयाध्यायं च वर्जयित्वा ।

(९) [त ३] बडोदानगरस्थ–प्राच्यविद्यामन्दिरगतं २३५ क्रमाङ्कयुतं ५-८ अष्टकात्मकं पुस्तकम् । सप्तमाष्टकपाठो भ–पुस्तकपाठमनुसरति ।

(१०) [त ४] पुण्यपत्तनस्थ–भारतेतिहाससंशोधकमण्डल–ग्रन्थालयस्थं कळमकरसंग्रहे १ क्रमाङ्कयुतं संवत् १६४३ वर्षे लिखितं ४-८ अष्टकात्मकं पुस्तकम् ।

(११) [त ५] जोधपूरनगरस्थ–पुरातत्त्वविभागाधिकृतग्रन्थालयस्थं संपूर्णं पुस्तकं संवत् १८७७ वर्षे लिखितं प्रायः त ४–पुस्तकपाठानुसारि ।

(१२) [त ६] भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरस्थं ४ (१९१६-१८) क्रमाङ्कयुतं शके १७४० वत्सरे लिखितं ५-८ अष्टकात्मकं पुस्तकम् । ५ (१९१६-१८) क्रमाङ्कयुतं २-४ अष्टकात्मकं पुस्तकमस्यैव पूर्वभागः । ६-८ अष्टकेष्विदं त–पाठानुसारि, ४-५ अष्टकयोः तथा सप्तमाष्टके प्रथमपञ्चमाध्याययोः अष्टमाष्टके प्रथमद्वितीयाध्याययोश्चेदं भ–पाठानुसारि ।

(१३) [त ७] वाराणसीस्थ–गव्हर्मेंटसंस्कृतकॉलेजग्रन्थालयस्थं रिवासंग्रहे ४४-४५ संख्याकं संवत् १९०३ वर्षे लिखितं संपूर्णं पुस्तकम् ।

(१४) [त ८] भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरस्थं १७ (१८८६-९२) क्रमाङ्क-युतं संवत् १८१३ वर्षे लिखितमष्टमाष्टकस्य पुस्तकम् ।

भ-वर्गः—

(१५) [भ १] विजापूरप्रान्ते बागलकोटग्रामस्थ–कृष्णाचार्यमळगीमहोदयानां द्वितीयाष्टके केनचिदंशेन सह तृतीयाद्यष्टमाष्टकान्तं संवत् १७४३ वर्षे लिखितं भ–वर्गस्याधारभूतं लिखित-पुस्तकम् ।

(१६) [भ१(२)] भागानगर(हैद्राबाद)स्थ–उस्मानियाविश्वविद्यालयग्रन्थालयस्थं १०५६ संख्याकं तेलुगुलिप्यां लिखितं प्राचीनं तालपत्रपुस्तकम् । अस्मिन् सप्तमाष्टकस्य १-३ अध्यायाः चतुर्थसप्तमाध्याययोश्च कियांश्चिदंशो लिखितोऽस्ति । इदं दाक्षिणात्यं पुस्तकं सदपि भ–पाठमनुसर-तीत्ययमस्य विशेषः । भ१–पुस्तकपाठेनास्य साम्यमस्ति । अतः भ–वर्ग एवेदं समावेशितम् । अनेन दाक्षिणात्यपुस्तकानां भ–वर्गशाखीयत्वमपि सिध्यति । भ१–पुस्तकपाठात् भ१(२)–पुस्तक-पाठः, तस्मात् ग४–पुस्तकपाठः, ततोऽपि ग १-२ पुस्तकपाठ इति क्रमेण भ–पुस्तकपाठात् ग–पुस्तक-पाठ उत्क्रान्तो दृश्यते ।

(१७) [भ २] बडोदानगरस्थ-प्राच्यविद्यामन्दिरस्थं १२२०५ संख्यायुतं संवत् १८७७ वर्षे लिखितं षष्टाष्टकपुस्तकं तथा १२२०६ संख्याकं सप्तमाष्टके १-२ अध्याययोः पुस्तकं तथा च १२२०७ संख्याकं सप्तमाष्टके ३-८ अध्यायानां पुस्तकं तथा च १२२०८ संख्याकमष्टमाष्टकपुस्तकमित्येतेषामनया संज्ञया निर्देशः। अष्टमाष्टकं भ८-पुस्तकपाठेन साम्यमावहति।

(१८) [भ ३] भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरस्थं २२६(विश्राम २), १५ (१८८६-९२) क्रमाङ्कयुतं षष्टाष्टकपुस्तकम्।

(१९) [भ ४] इन्दोरनगरस्थानां श्रीमतां माधव विनायक किबे-महोदयानां संवत् १९०३ वर्षे लिखितं संपूर्णं पुस्तकम्। १-४ अष्टकेष्विदं त-पाठमन्वसरत् ५-८ अष्टकेषु च भ-पाठम्। षष्टाष्टकान्ते सप्तमाष्टकादौ चेदं त-पुस्तकपाठानुसारि। प्रथमद्वितीयतृतीयभागेष्वस्य ' न ' इति संज्ञासीत्।

(२०) [भ ५] बीकानेरनगरस्थ-अनूपसंस्कृतग्रन्थालयस्थं ७१ संख्याकं संपूर्णं पुस्तकम्।

(२१) [भ ६] गोकर्णक्षेत्रस्थ-महाबलेश्वरदत्तात्रेयदीक्षितमहोदयानां १-२; ४ ८ अष्टकात्मकं (अस्याष्टमाष्टकं पञ्चमाध्याये दशमे वर्गे पर्यवसितं) १७७९ शाके लिखितं पुस्तकं ४, ८ अष्टकयोः भ-पाठानुसारि ५-७ अष्टकेषु त-पाठानुसारि च।

(२२) [भ ७] वेणुग्रामप्रान्ते बडलीग्रामस्थ-चिदम्बरदीक्षितमहोदयानां पुस्तकं १५९६ शाके लिखितं २, ५, ७ अष्टकात्मकम्। सप्तमाष्टकपाठः भ६-पुस्तकसमानोऽस्ति।

(२३) [भ ७] सातारान्तीय-विराट(वांई)नगरस्थप्राज्ञपाठशालाग्रन्थालयगतं १-२; ५-८ अष्टकात्मकं लिखितपुस्तकं ५,७,८ अष्टकेषु भ-पाठानुसारि षष्टाष्टके च घ-पाठानुसारि।

(२४) [भ ८] मद्रासनिकटवर्ति-अडयारग्रामस्थ-' थिऑसॉफिकल सोसायटी '-ग्रन्थालयस्थं (34 J 45 क्रमाङ्कयुतं) संवत् १८३५ वर्षे लिखितं १,२,४,५,८ अष्टकात्मकं पुस्तकम्।

एतेषु ग३, ग४, त८ पुस्तकानि वर्जयित्वान्यानि सर्वाणि पुस्तकानि पूर्वमुपयुक्तानि।

यान्यन्यानि भाष्यपुस्तकान्यस्माभिरस्य भागस्य पूर्वेषां भागानां वा कृते दृष्टानि परीक्षितानि वा तान्यत्र निर्दिश्यन्ते—

(१) हैद्राबादनगरस्थ-उस्मानियाविश्वविद्यालयग्रन्थालयस्थं $\frac{1}{0}$ संख्याकं प्रथमाष्टके प्रथमाध्याये १-१९ वर्गाणां भाष्यपुस्तकम्। अस्माभिः प्रथमभागे निर्दिष्टाभ्यां च-फ-पुस्तकाभ्यामिदं साम्यमावहति।

(२) उस्मानियाविश्वविद्यालयस्थं $\frac{3}{0}\frac{9}{0}$, $\frac{1}{0}\frac{0}{0}\frac{1}{0}$ संख्याकं प्रथमद्वितीयाष्टकयोर्भाष्यपुस्तकम्। प्रथमाष्टकं स-पुस्तकेन समानं द्वितीयाष्टकं च म-पुस्तकेन।

(३) ग्वालियरनगरस्थ-राजकीयसंस्कृतग्रन्थालयस्थं ६-८ अष्टकानां क्वचित् त्रुटितं भाष्यपुस्तकम्। इदं तृतीयभाग उपयुक्तमासीत्। प्रायः त५-पुस्तकपाठेन साम्यमावहति क्वचित् त२-पुस्तकेन।

(४) करवीर(कोल्हापूर)नगरस्थ-पण्डितबाळाचार्यसुपेरकरमहोदयानां ५-८ अष्टकात्मकं क्वचित् त्रुटितं भाष्यपुस्तकम्। ६-८ अष्टकभाष्यं प्रायः त२-पुस्तकपाठमनुसरति।

(५) पुण्यपत्तनप्रान्ते भोरग्रामस्थ-हरि वासुदेव होशिंग-दीक्षितमहोदयानां संवत् १७१२ वर्षे लिखितं सप्तमाष्टकपुस्तकं त५-पाठानुसारि।

(६) पुण्यपत्तनस्थ-भारतेतिहाससंशोधकमण्डलग्रन्थालयस्थं कृष्णशास्त्रीराजवाडे-संग्रहे १२ संख्याकं नवममण्डलांशस्य (१-६७ सूक्तानि) अर्वाचीनं पुस्तकं त१-पाठानुसारि।

(७) भाण्डारकरप्राच्यविद्यामन्दिरस्थं १६ (१८८६-९२)संख्याकं सप्तमाष्टकपुस्तकं त५-पाठानुसारि।

(८) लाहोरनगरस्थ-पंजाबविश्वविद्यालयग्रन्थालयस्थं २९६२क्रमाङ्कयुतं ६-८ अष्टकात्मकं भाष्यपुस्तकम्। एतत्पुस्तकस्थाः पाठविशेषा अस्मत्प्रार्थनामनुसृत्य तत्रत्याधिकृतैर्लेखयित्वा प्रेषिताः षष्ठसप्तमाष्टकयोः त५-पुस्तकपाठेन अष्टमाष्टके च त२-पुस्तकपाठेन साम्यमावहन्ति।

(९) कलकत्तानगरस्थ-रॉयल् एशियाटिक सोसायटी-ग्रन्थालयस्थं १४२ (७८७२) संख्यायुक्तं ५-७ अष्टकानां प्रायः त्रुटितं भाष्यपुस्तकं पञ्चमाष्टके त-पाठानुसारि षष्ठसप्तमाष्टकयोश्च भ-पाठानुसारि।

पूर्वं निर्दिष्टानि चतुर्विंशतिसंख्याकानि लिखितपुस्तकानि षष्ठाष्टके ग, घ, त, भ इति चतुर्षु वर्गेषु सप्तमाष्टमाष्टकयोश्च ग, त, भ इति त्रिषु वर्गेषु संविभक्तानि। सर्वेषां पुस्तकानामेतेषु वर्गेष्वन्तर्भावेन तत्तत्पुस्तकपाठभेदानां महत्त्वमल्पत्वं वा सौकर्येण ज्ञास्यते। एतदर्थं पूर्वमुपयुक्तानां केषांचित्पुस्तकानां संज्ञान्तरं कर्तव्यमासीत्। यत्र केवलं वर्गसंज्ञा निर्दिष्टा तत्र तद्वर्गान्तर्भूतानि सर्वाणि पुस्तकानि तादृशं पाठं धारयन्तीति स्पष्टम्। सप्तमाष्टके त३-पुस्तकं भ-पाठमनुसरति। तथापि सप्तमाष्टके त३ वर्जयित्वा इतरेषां पुस्तकानां त इत्येव साधारणसंज्ञा सौकर्यार्थं दत्ता। अतः सप्तमाष्टके त इत्युक्ते त३ वर्जयित्वा इतराणि सर्वाणि पुस्तकानि समानं पाठं वहन्तीति मन्तव्यम्। एवं च भ३-पुस्तकं केवलं षष्ठाष्टकात्मकमेव। अतः सप्तमाष्टमाष्टकयोः भ इति संज्ञया भ३ वर्जयित्वा इतराणि सर्वाणि भ-पुस्तकानि ग्रहीतव्यानि।

ग, घ, त, भ इति चतुर्षु वर्गेषु ग-वर्गः प्रायः भ-वर्गशाखीयत्वेन वर्तते। ग-पुस्तकानां वैशिष्ट्यं तृतीयभागप्रस्तावनायां यदुक्तं तदेवात्रापि। घ-पुस्तकानां विशेषो पूर्वं प्रदर्शित एव। घ-पाठोऽपि प्रायः भ-पाठपक्षपात्येव। सायणाचार्याणां प्रतीकोद्धरणवैशिष्ट्यमस्मिन् घ-वर्गे विशेषतो दृग्गोचरं भवति। घ-पाठस्य भ-पाठपक्षपाते प्रमाणमप्यस्ति। वांईक्षेत्रस्थपुस्तके गोकर्णक्षेत्रस्थपुस्तके च पञ्चमाष्टकं भ-पाठमनुसरति षष्ठाष्टकं घ-पाठमनुसरति सप्तमाष्टमाष्टके च पुनः भ-पाठमनुसरतः। अतः त, भ इति वर्गद्वयमेव प्रधानम्। अनयोः भ-वर्गस्य समीचीनत्वं पाठभेदाल्पीयस्त्वं च। त-वर्गे पाठभेदा बाहुल्येनोपलभ्यन्ते। त-वर्गान्तर्गतानां बहूनां पुस्तकानां वाराणस्यां लिखितत्वात् त-वर्गपाठः वाराणसीपाठ उत्तरदेशपाठो वेति वक्तुं योग्यं तथा च भ-पुस्तकानां प्रायो दक्षिणदेशे लिखितत्वात् भ-पाठस्य दक्षिणदेशपाठ इति संज्ञा उचिता। अतः यद्यपि दक्षिणदेशपाठ एव सायणपाठ इति वक्तुं दुष्करं तथापि दक्षिणदेशपाठस्य सायणपाठेनातीव सादृश्यमिति वक्तुं सुशकम्। सायणाचार्यैर्दक्षिणदेशस्यैवात्मनो जन्मनालंकृतत्वाद्दक्षिणदेशपाठस्य सायणपाठेन साधर्म्यमुचितमेव। तथा च सायणालंकृतदेशादपि दक्षिणस्यां दिशि लिखितानि तालपत्रपुस्तकानि भ-पाठशाखारूपमेव पाठमङ्गीकुर्वन्तीति स्वाभाविकमेव।

अतः भाष्यपाठविनिश्चयेऽस्माभिः भ-वर्गपाठस्यैव प्राथम्यं स्वीकृतम्। तथापि बहुषु स्थलेषु भ-पाठस्वीकरणेन कार्यं न संजातम्। सायणभाष्यस्य मूलपाठोऽन्वेषणीय इति यद्यप्यस्माकमुद्देशः तथापि भाष्यस्य शुद्धत्वं सुबोधत्वं चाप्यभिप्रेतमासीत्। अतः क्वचित् क्वचित् ग, घ, त इति वर्गाणां पाठा अपि स्वीकर्तव्या आसन्। एवं कृतेऽपि केषुचित् स्थलेषु सर्वाणि पुस्तकान्यशुद्धं पाठं दर्शयन्ति स्म। एतादृशेषु स्थलेषु मॅक्समुल्लरमहोदयैः कृता अभ्यूहा अस्माभिः स्वीकृताः। केषुचित् स्थलेषु मुम्बापुरीमुद्रितपुस्तकपाठोऽपि शुद्ध इति मत्वाङ्गीकृतः। एतेनापि कार्येऽसंजाते सति अस्माभिरपि क्वचन अभ्यूहाः कृताः। पाठविनिश्चयविषयकः अन्यविषयकश्च सर्वोऽपि विचारः पूर्ववत् टिप्पणीषु दत्तः। लिखितपुस्तकाधारेण स्वीकृताः केचनाल्पाः पाठाः टिप्पणीषु न निर्दिष्टाः। प्रथमद्वितीयतृतीयभागानां पाठभेदादिविषयकविचारस्य परिशिष्टमस्य भागस्य टिप्पण्या अन्ते दत्तम्।

प्रथमद्वितीयभागयोः प्रायः सर्व एव लिखितपुस्तकोपलब्धाः पाठभेदाः पादटिप्पणीषु निर्दिष्टाः। तृतीयचतुर्थभागयोः केचनाल्पाः पाठभेदास्त्यक्ताः। मॅक्समुल्लरमहोदयैरप्येवं कृतं

दृश्यते। पाठभेदादिविषयकविचारे स्वीकृतपाठस्याधारभूतानि पुस्तकानि निर्दिष्टानि। पादटिप्पण्यां तु केवलं पाठभेदस्यैव लिखितपुस्तकानि निर्दिष्टानि न मूलपाठस्याधारभूतानि। इयं रीतिः प्रथमभागादारब्धा एतावत्पर्यन्तं तथैवानुसृता। न तेन कापि हानिः संवृत्ता स्यादिति मन्यामहे।

मॅक्समुल्लरमहोदयैः स्वकीयग्रन्थपाठविनिश्चयार्थं यानि पुस्तकानि समवलोकितानि तैः सहास्माकं पुस्तकानां कीदृशः संबन्ध इति प्रश्ने किंचिदुच्यते। मॅक्समुल्लरमहोदयैः स्वकीयानि पुस्तकानि ए, बी, सी इति त्रिषु वर्गेषु संविभक्तानि। ए-वर्गपाठः सायणपाठेनातीव सदृश इति तेषामभिप्रायात् ए-पाठस्य प्राधान्यं तैः स्वीकृतम्। 'ए' इति वाराणसीपाठ इति तेषामभिप्रायः। तथा च 'बी' इति मुम्बापुरी-पुण्यपत्तनपाठः (दक्षिणदेशपाठः), 'सी' इति च कलिकातापाठ इति तेऽमन्यन्त। एतेषां वर्गाणामस्माकं पुस्तकवर्गैः न सर्वथा साम्यम्। अस्माकं त-वर्गः मॅक्समुल्लरमहोदयानां ए-सीए इति वर्गाभ्यां समानः, घ-वर्गः बी-वर्गस्यांशेन समानः, भ-वर्गश्च बीसीवर्गाभ्यां समानः। एतदेव व्यत्ययेन वक्तव्यं चेत् ए-वर्गः त-वर्गेण समानः, बी-वर्गः घ-भ-वर्गाभ्यां समानः, सी-वर्गश्च भ-त-वर्गाभ्यां समान इति ज्ञातव्यम्। मॅक्समुल्लरपुस्तकानामस्मत्पुस्तकैः सह तुलनं प्रायोऽशक्यम्। कस्मादिति चेत्, मॅक्समुल्लरपुस्तकेभ्योऽधिकानि पुस्तकान्यस्माभिरुपलब्धानि। तेषां सर्वाणि पुस्तकानि प्रायः संपूर्णान्यासन्, न तथास्माकम्। दाक्षिणात्यलिपिलिखितानि बहूनि पुस्तकान्यस्माभिरुपलब्धानि। मॅक्समुल्लरमहोदयैः केवलं प्रथममण्डलस्य कियांश्चिदंश उपलब्ध आसीत्। मॅक्समुल्लरपुस्तकापेक्षया द्विगुणाधिकाः पाठभेदा अस्माकं पुस्तके टिप्पण्यां निर्दिष्टाः। केचन पाठभेदास्तत्पुस्तकेऽस्मत्पुस्तके च समानाः सन्तीति स्वाभाविकमेव। प्रतिसूक्तं मॅक्समुल्लरपाठेभ्योऽधिकाः भिन्ना वा प्रायः पञ्च पाठा अस्माभिः शुद्धाः समीचीनाश्चेति कृत्वा लिखितपुस्तकाधारेण स्वीकृताः। एतेषु केचन पाठा मुम्बापुरीपुस्तकेऽप्युपलभ्यन्ते। मॅक्समुल्लरमहोदयैः केवलं द्वित्राणां लिखितपुस्तकानामवलोकनेन प्रथमावृत्यपेक्षया द्वितीयायामावृत्यां समीचीनतराः पाठाः स्वीकृताः। एवं सति बहूनि पुस्तकान्युपयुज्यास्माभिर्भाष्यपाठो बहुत्र संशोधित इति नाश्चर्यावहम्।

मॅक्समुल्लरमुद्रितभाष्यपाठस्य अस्मन्मुद्रितभाष्यपाठस्य च कियान् भेद इत्युक्ते न महान् भेद इति ब्रूमः। किंतु अस्मन्मुद्रितपाठः शुद्धतरः समीचीनतरश्चेति टिप्पण्यवलोकनेन सुव्यक्तं भवेत्। विशेषतः ऋ. सं. ९. ६५. ४; ९७. २६; १०९. २२; ११३. १०; १०. ३०. ८; ६५. १;२ एषु स्थलेषु भाष्यपाठोऽतीव भिन्नः समीचीनतरश्च। केषुचित् स्थलेषु मॅक्समुल्लरपुस्तके त्रुटयो दर्शिताः। तेषु काश्चन अस्माभिः पुस्तकाधारेण पूरिताः। ऋ. सं. १०. १६. १; २२. १३; २७. २०; ७३. ७; ८२. ७; ८९. १४; ९१. ४; ५; १२१. ४; १३०. १; १७४. २ अत्रापि टिप्पणीषु निर्दिष्टा भाष्यपाठा द्रष्टव्याः। ऋग्वेदस्यार्थज्ञानविषये पाश्चात्यविद्वद्भिः सुबहु प्रयतितम्। तेषां व्याख्यानरीतेः समीचीनासमीचीनत्वविषये निर्णयं कर्तुं दुष्करम्। किंत्विदं तावत्सत्यं यत्सत्स्वप्यर्वाचीनसंशोधनप्रधानेषु बहुषु ग्रन्थेषु ऋग्वेदस्यार्थज्ञानविषये सायणभाष्यमेव प्रथमं साधनं भवितुमर्हति। अतः सायणभाष्यस्य मूलपाठोऽन्वेषणीयो भवति। अमुमेवोद्देशं पुरस्कृत्यास्माकमयमल्पो यत्नः।

भाष्यपाठसंशोधने मुम्बापुरीमुद्रितं भाष्यपुस्तकमस्माभिरुपयुक्तमिति पूर्वमुक्तमेव। मुम्बापुरीपुस्तकसंपादकैः कानिचन लिखितपुस्तकानि दृष्ट्वा पाठो निश्चित इति व्यक्तमेव। तेषां निर्देशस्तैः प्रास्ताविके न कृतो दृश्यते। अस्मत्पाठभेदतुलनयेदमनुमीयते यत्तैः प्रायः त-वर्गपुस्तकान्यवलोकितानि। विशेषतः त १, २ पुस्तकपाठानुसारि पुस्तकं तैरुपयुक्तं दृश्यते। केषुचित् स्थलेषु मु-पाठः त७-पाठसमानो दृश्यते। त७-पुस्तकमर्वाचीनमेव। त७-मु-पुस्तकयोर्मूलं किमपि पुस्तकं तैरुपयुक्तं प्रतिभाति।

ऋग्वेदसंहिताया दशममण्डलस्य कस्मिंश्चिदंशे लाहोरनगरमुद्रितमुद्गीथाचार्याणां भाष्यमुपलभ्यते (ऋ. सं. १०. ५. ४ आरभ्य १०. ३४. ३ पर्यन्तं)। तत्पाठोऽतीवाशुद्धोऽपि सायणभाष्यपाठेन बहु साम्यमावहति। अत एव तत्पुस्तकसंपादकैः पाठविनिश्चये सायणभाष्यमप्युपयुक्तम्। अस्माभिरपि सायणभाष्यपाठनिर्धारणार्थमेतदुद्गीथभाष्यमुपयुक्तम्। यत्र मॅक्समुल्लरपाठापेक्षया भिन्नः पाठोऽस्माभिः स्वीकृतः यत्र च अभ्यूहमात्रेण पाठाः स्वीकृताः तादृशेषु स्थलेषु उद्गीथपाठोऽवश्यमवलोकितः टिप्पणीषु निर्दिष्टश्च। केषुचिन्मन्त्रेषु सायणभाष्यं नोपलभ्यते। तेषां मन्त्राणामुद्गीथभाष्यं टिप्पण्यां दत्तम्। लाहोरनगरस्थ-पण्डितभगवद्दत्तमहोदयानां सकाश उद्गीथभाष्यस्याधिकोंऽशो (ऋ. सं. १०. ३४. ५ आरभ्य १०.८३.५ पर्यन्तम्) लिखितपुस्तकादुद्धृतो वर्तते। अस्मत्प्रार्थनामनुसृत्य तैः सोऽस्माकमुपयोगार्थं प्रेषितः। सोऽपि पाठनिर्धारणे विनियुक्तः। उद्गीथभाष्यस्य लिखितोंऽशः मुद्रितोंऽशश्च उभावप्यशुद्धौ। अयं संपूर्णो भाष्यभागः संशोध्य मुद्रापितश्चेद् वेदजिज्ञासूनामुपकाराय भवेत्। ऋ. सं. १०.४६.५ मन्त्रस्य सायणभाष्ये उद्गीथाचार्याणां नामोद्धृतमस्ति। ' उद्गीथस्तु भूर्जयन्तमित्येकपदं मत्वा भूरादीँल्लोकाञ्जयन्तमिति व्याचकार ' इति भाष्ये लिखितम्। उद्गीथभाष्ये 'भूः भूरादीन् लोकानित्यर्थः। अत एव च महां महान्तं विपोधाम् ' इत्यादि लिखितमस्ति। जयन्तम् इति पदस्य व्याख्यानमत्र लुप्तम्। तथापि भूः इति पदस्य व्याख्यानात् सायणोक्तेः सत्यत्वं प्रतीयते। एतेनोद्गीथभाष्येण सायणपाठनिर्धारणविषये बहु साहाय्यमारचितम्। केषुचित् स्थलेषु पाठा लिखितपुस्तकाधाराभावात् अभ्यूहमात्रेण स्वीकर्तव्या आसन्। एतादृशाः केचनाभ्यूहिताः पाठा उद्गीथभाष्य उपलभ्यन्ते। अन्यच्च उद्गीथपाठाः साधारण्येन भ-पुस्तकपाठसमाना दृश्यन्ते। भ-पाठस्य सायणपाठेन समानत्वमनेन प्रतीयते। उद्गीथाचार्याणामृग्वेदपाठः पारंपरिकसंहितापाठात् क्वचिद्भिन्नो दृश्यते। उद्गीथमते ऋ. सं. १०.९ सूक्तं दशर्चं, न नवर्चम्। ' सप्तरीतदपसो ' इत्यादिकः खैलिको मन्त्रस्तैर्दशमत्वेन स्वीकृतो व्याख्यातश्च। तथा च वस्तुतः सप्तमाष्टकस्य षष्ठेऽध्याये ऋ. सं. १०. १८ सूक्तान्ते समाप्ते सति उद्गीथभाष्ये षष्ठोऽध्यायः ऋ. सं. १०. २० सूक्तस्य ' भद्रं नो अपि वातय मनः ' इति प्रथममन्त्रान्ते समाप्तः। ' भद्रं नो ' इति तेषां मत एकर्चं सूक्तम्। ऋ. सं. १०. २० सूक्ते पञ्चममन्त्रानन्तरं शेषसूक्तस्य २१ सूक्तस्य चोद्गीथभाष्यं नोपलभ्यते। एतावता उद्गीथभाष्यं शाकलशाखाभिन्नायाः कस्याश्चिदृग्वेदशाखाया भाष्यमिति तत्पुस्तकसंपादकानां मतम्। अस्माभिस्तावदिदमत्र निर्दिश्यते यदष्टकगणनास्थानेऽध्यायगणना यथा उद्गीथभाष्ये दृश्यत एवं काश्मीरऋग्वेदपुस्तके जुनागडशाङ्खायनशाखापुस्तकेऽप्युपलभ्यते (खिलप्राप्ताविके पृ. ८९४ द्रष्टव्यम्)।

अस्माकं संहिताभाष्यपुस्तके ऋग्वेदसंहितायाः शाकलशाखापाठो लोके प्रसिद्धो मुद्रापितः। शाखान्तरेषु किंचिन्न्यूनाधिक्यं वर्तते। केषुचिल्लिखितपुस्तकेष्वधिकानि खिलसंज्ञकानि सूक्तानि लिखितानि दृश्यन्ते किंत्वस्मिन् विषये तेष्वैकमत्यं नोपलभ्यते। बहुषु मुद्रितपुस्तकेष्वेतानि खिलानि परिशिष्टत्वेन मुद्रापितानि सन्ति। काश्मीरदेशे ४०० वर्षेभ्यः प्राक् शारदालिप्यां लिखितं ऋग्वेदसंहितायाः प्राचीनमतिजीर्णं लिखितपुस्तकं बुल्हरमहाशयैः पुण्यपत्तनस्थ-डेक्कनकॉलेज-ग्रन्थालयार्थं संपादितम्। एतद्धुना पुण्यपत्तनस्थ-भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरे स्थापितमस्ति। भूर्जपत्रेषु लिखितानि १९१ पृष्ठान्यस्मिन् सन्ति। १-१७६ पृष्ठेषु ऋग्वेदसंहिता लिखिता शिष्टेषु च खिलानि लिखितानि। तानि खिलानि पञ्चखध्यायेषु विभक्तानि प्रत्यध्यायं चादौ तस्य तस्याध्यायस्य अनुक्रमणी दत्ता। एतानि खिलानि शेफ्टेलोवित्झ्महाशयैः १९०६ खिस्ताब्दे शार्मण्यदेशे रौमनलिप्यां प्रास्ताविकेन टिप्पणीभिश्चालंकृत्य मुद्रापितानि। एनं काश्मीरखिलपाठमनुसृत्यैवात्र खिलानि अन्ते मुद्रापितानि। खिलपाठनिर्धारणार्थं टिप्पणीलेखनार्थं च खिलानां मुद्रितानि लिखितानि च पुस्तकानि केचन निबन्धग्रन्थाश्चावलोकिताः। श्रीमद्भिः चिं. ग. काशीकरमहोदयैरयं

खिलभागः संपादितः टिप्पणीभिश्च संयोजितः। खिलसंपादनविषयकः सर्वो विचारस्तैः खिल-प्रास्ताविके संपूर्णतया प्रदर्शितः।

अस्माकं वैदिकसंशोधनमण्डलस्याध्यक्षाः प्रि. वैजनाथ काशीनाथ राजवाडे-महोदयाः १८९६ शाके पौषमासे शुक्लपक्षे द्वितीयायां तिथौ स्वर्लोकं याता इत्यावेदयितुं खिद्यते नश्चेतः। यावज्जीवं मण्डलस्य कार्यजातमेते आत्मीयत्वेन निरवर्तयन्। वेदनिरुक्तादिग्रन्थेषु तेषां महानधिकार आसीदिति विश्रुतमेव। सायणभाष्यपाठविषयेऽस्माकमाशङ्कास्ते सपदेव समादधति स्म। तेषां व्रतस्थं जीवनं विद्याव्यासङ्गः सूक्ष्मान्वेषणबुद्धिः सत्यप्रियत्वं चेत्यादिगुणसमुच्चयं दृष्ट्वा ऋषिः इति पदेनैव तान् संबोद्धुमुचितम्। सभाष्यऋग्वेदसंहिता संपूर्णतया मुद्रापिता तैर्द्रष्टव्या इत्यस्माकं मनीषासीत् किंतु 'मनसा चिन्तितं कार्यं दैवमन्यत्र चिन्तयेत्' इति न्यायेन सा विफला संजाता। तथा पुण्यपत्तनस्थाः वेदमूर्ति-गोविन्दभट्ट फाटक-महोदया वैदिका घनपाठनिष्णाता अप्यस्माकं दुर्दैववशादस्मिन्नेव हायने निधनं याताः। पूर्वप्रकाशितस्य भागत्रयस्य संहितापदपाठयोः शुद्धा-शुद्धविषय एतैर्बहु साहाय्यमारचितम्। अस्मिन् काले एतेषां सदृशा निपुणा वैदिका विरला एव दृश्यन्ते।

सभाष्या ऋग्वेदसंहिता प्रथमं मॅक्समुलरमहोदयैः संपाद्य प्रकाशितेति विश्रुतमेव। भाष्यस्य शुद्धान्यशुद्धानि वा प्राचीनानि नवीनानि वा लिखितपुस्तकानि समवलोक्य यो भाष्यपाठस्तैः सुनिश्चितः यश्च पाठभेदादिविषयकविचारः प्रदर्शितः सोऽस्माकं लाभाय संजातः। समीचीनतया मुद्रितानां वैदिकानामन्येषां च ग्रन्थानां दुर्लभत्वेऽपि भाष्यसंशोधनमुद्रणविषयको यो महानार-म्भस्तैः समापितस्तदर्थं ते सर्वेषामेव वैदिकधर्मश्रद्धावतां जिज्ञासूनां धन्यवादार्हाः। यत्सत्यं तेषां शोभनेन ग्रन्थेनास्माकं भाष्यसंशोधनकार्यं सुकरं संवृत्तम्। अतः अस्मिंश्चतुर्थभागप्रकाशनावसरे तेषां नाम सानन्दं सोपकारं चोल्लेखनीयं मन्यामहे।

अस्य ऋग्वेदभाष्यपुस्तकस्य प्रकाशने अद्ययावत्पर्यन्तं यैर्महाभागैरनल्पद्रविणप्रदानेन साहाय्यं कृतं तेषामुपकारभरं सामोदं स्मरामः। तृतीयो भागः १९४३ खिस्ताब्दस्यान्ते प्रकाशितः। तस्मिन् काले पाश्चात्यदेशेषु महायुद्धं प्रारब्धचरमासीत् यस्य परिणामस्वेनात्र भारतवर्षेऽपि जीवनं दुष्करं समजनि। चतुर्थभागसंपादनार्थं लिखितपुस्तकपठनादिकार्यं शनैः शनैः प्रचलितमासीत्। किंत्व-खिलवस्तुजातस्यातिमहार्घत्वान्मुद्रणविचारोऽप्यशक्यः संवृत्तः। एवं किंकर्तव्यतामूढेष्वस्मासु करुणा-करेण श्रीवेदपुरुषेण प्रेरिताः श्रीमच्चन्द्रशेखर गोविंद आगाशे-महोदयाः पुण्यपत्तनस्था अस्मत्साहा-य्यार्थं प्रधाविताः। चतुर्थभागस्य मुद्रणार्थं पत्राणां क्रयणे मुद्रणव्यये च पर्याप्तस्य द्रविणस्य प्रदान-मङ्गीकृत्य सुमहान् खलु भारस्तैरूढः। तेषां कृतज्ञताप्रदर्शनमस्माकं परमं प्रियं च कर्तव्यम्। यत्सत्यं तेषां महता साहाय्येनैवास्य भागस्य प्रकाशनं सुशकमभूत्। प्राचीनविद्याभ्यासपराङ्मुखेऽस्मिन् कालेऽपि वेदादिप्राचीनग्रन्थानां रक्षणाभ्यसनादिकार्यं सम्यक् प्रचलेदित्याशासयति आगाशेमहा-भागानामियं वदान्यता। तेषामभिलषितमनुसृत्यायमृग्वेदसंहितायाश्चतुर्थो भागः श्रीवेदपुरुषचरण-कमलयोः समर्प्यते।

एवं श्रीमताम् आगाशेमहोदयानां कृपया द्रविणचिन्तायां निरस्तायां मुद्रणपत्रसंपादन-विषयकोऽन्यः प्रश्नोऽस्माकं पुरस्तात्समुपस्थितः। मुद्रणपत्राण्यतीव महार्घाण्यासन् तान्यपि न सुलभानि। राज्यकृतां शासनानुसारेण तेषां संमतिं विना मुद्रणपत्रक्रयणं मुद्रणं चाशक्यमासीत्। अस्माभिः प्रार्थिता एतत्कार्याधिकारिणः मुद्रणपत्रसंपादने ग्रन्थमुद्रणे चावश्यकीं संमतिं दत्त्वोपकृत-वन्तः। पुण्यपत्तनस्थ-'डेक्कन पेपर मिल्स'-संचालकैरप्यात्मीयतया अस्माकमपेक्षितानि मुद्रण-पत्राणि यथापूर्वमस्मदर्थं निर्माय शीघ्रं प्रदत्तान्यतस्ते धन्यवादार्हाः। एवं मुद्रणपत्रिकासु प्राप्तास्वपि

मुद्रणालयस्य कार्यं न समीचीनतया प्राचलत्। युद्धसंबन्धिकार्येषु बहुधनलाभात् तत्रस्था बहवः कार्यं त्यक्त्वा गतवन्तः। १९४५ ख्रिस्ताब्दे युद्धसमाप्तिहेतोः मुद्रणालयसंचालकानां परिश्रमाद्यार्थं प्रत्यूहो निरस्तः मुद्रणकार्यं च शीघ्रत्वेन निर्वर्तितम्। अतः अस्य भागस्य शीघ्रं समीचीनत्वेन च मुद्रणे यैः श्रीमद्भिः स. रा. सरदेसाईमहोदयैर्बहु प्रयतितं तेऽतीव धन्यवादार्हाः। मुद्रणशुद्ध्यर्थं बहु प्रयतितेऽपि काश्चनाशुद्धयः संजातास्ता अन्ते प्रदर्शिताः। अस्मिन् भागे संहितापदपाठयोर्मुद्रणशुद्ध्यर्थं वेदमूर्ति-करंबेळकर-भालचन्द्रशास्त्रिभिः पुण्यपत्तनस्थवैदिकस्मार्तधर्माश्रमसंचालकैः वैकुण्ठवासि-गो विंदभट्टफाटकमहाभागानां शिष्यवरैः प्रयतितमतस्तेषामुपकारं स्मरामः। पुण्यपत्तनवासिभिः पं. महेश्वरशास्त्रीजोशीमहोदयैर्व्याकरणविषये बहु साहाय्यं वितीर्णमतस्तेऽपि धन्यवादार्हाः। अस्मद्ऋग्वेदभाष्यग्रन्थसंपादनार्थं यैर्यैर्लिखितपुस्तकग्रन्थालयाधिकृतैः संशोधनालयाधिकृतैरन्यैश्च सज्जनैर्लिखितपुस्तकानि दत्तानि तेषामुपकारभरानवश्यं स्मरामः। तेषां साहाय्येन विना इदं कार्यमेव नारप्स्यत। लिखितपुस्तकसंपादने पुण्यपत्तनस्थ-भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरग्रन्थालयाधिकृतैः श्रीमद्भिः परशुराम कृष्ण गोडे-महोदयैरतीव साहाय्यमारचितमतस्तेभ्यो धन्यवादान् वितरामः। यैर्विद्वद्भिरस्मिन् ऋग्वेदभाष्यसंशोधनेऽस्मभ्यं बहुविधं साहाय्यं वितीर्णं तेऽपि धन्यवादार्हाः। यैर्विद्वन्महाभागैः प्राचीनविद्याविषयकनियतकालिकेषु ऋग्वेदभाष्यभागानां यथाकालं परीक्षणं कृतं तेऽप्यवश्यं धन्यवादार्हाः।

अन्ते चायं चतुर्थो भागो विदुषां परितोषाय स्यादित्याशास्महे।

वैदिकसंशोधनमण्डलम्, पुण्यपत्तनम्
१८६८ शाके वर्षप्रतिपदि

ना. श्री. सोनटक्के
चिं. ग. काशीकर

॥ श्रीः ॥

पाठभेदादिविषयकविचारः

मॅ = मॅक्समुल्लरमुद्रितपुस्तके। एतस्मात्पूर्वं यत्र *एतच्चिह्नं दत्तं तत्र तादृशः पाठः मॅक्समुल्लर-महाशयैः लिखितपुस्तकेषु तथानुपलम्भात् स्वयमभ्यूहित इति मन्तव्यम् ॥

मु = मुम्बापुरीमुद्रितपुस्तकं ।

उद्गीथ = लवपुर(लाहोर)मुद्रिते उद्गीथाचार्यविरचितऋग्वेदभाष्यपुस्तके। अस्मिन् पुस्तके दशममण्डलस्य कियतश्चिदंशस्यैवोद्गीथभाष्यमुपलभ्यते (ऋ. सं. १०.५.४ आरभ्य १०.३४.३ पर्यंतं)। लवपुरस्थपण्डितभगवद्दत्तमहोदयानां सकाशे कियांश्चिदधिको भागो लिखितो विद्यते (ऋ. सं. १०. ३४.५ आरभ्य १०.८३.५ पर्यन्तः)। अस्मत्प्रार्थनामनुसृत्य तैः प्रेषितोऽयमधिको भागोऽप्यत्रोप-युक्तः। अस्माभिरुपलब्धानामुपयुक्तानां च लिखितपुस्तकानां नामानि पूर्वमेव प्रास्ताविके दर्शितानि।

§ = सर्वेषु लिखितपुस्तकेषूपलभ्यते। × = सर्वेषु लिखितपुस्तकेषु नास्ति।

॥ नवमं मण्डलम् ॥

षष्ठाष्टकभाष्यसंशोधनार्थमुपयुक्तानि लिखितपुस्तकानि–ग (१, २, ३), घ, त (१, २, ३, ४, ५, ६, ७), भ (१, २, ३, ४, ५)

[९. १] १. १९ [२] **हिरण्यपाणिरभिषुणोति**—एतद्वचनं क्वत्यमिति न ज्ञायते। ऋ. सं. ९. ७५. ३; ९७. १ भाष्येऽप्येतदुद्धृतम् ॥ २. ३ [४] **धानाद्यन्नेन**—*मॅ-मु। रसात्मके-नान्नेन–ग-भ१.२.३.५; धात्मकेनान्नेन–घ; धानाद्यात्मकेनान्नेन–त; रसात्मकोनान्नेन–भ ४॥ ९. [५] **त्वत्परिचरणमेव**—भ१। तत्परिचरणमेव–मॅ-मु इतरेषु च ॥

[९. २] ३. १७ [२] **प्सरः पानीयमन्धः**—ग-त१.२.६-भ२.३-मॅ। प्सरः पानीय-मंध अन्नं–घ; प्सरः पनीयमंध–त४.५-भ४; प्सरः पानीय अंध–त७; प्सरः प्सानीयमंध–भ१; प्सरः पानीयं मधु–मु॥ २५ [४] **तदा महान्तं**—ग-घ-भ। तत्तदा महांतं–त-मॅ-मु। ऋचि 'तत्' नास्ति ॥ ४.२ [५] **ममृजे मृज्यते**—*मॅ-मु। ममृजे ममृज्यते–घ; ममृजे मर्मृज्यते–त-भ१.२.३; ममृज्यते–भ४ ॥ १० [७] **कर्मेच्छा°**—*मॅ-मु। कर्मेच्छोः–ग-घ-त-भ४; कर्मेः–भ१; कर्मणः–भ२; कर्म–भ३ ॥ २५ [१०] **भवसि**—मॅ-मु। भवा-त; भव–भ ॥

[९. ३]. ५. ३ [१] **द्रोणकलशानि**—नपुंसकलिङ्गप्रयोगश्चिन्त्यः ॥ ५. ७ [२] **अथर्यो विपः**—*मॅ। अध्वर्यवः–§। विपः कध्याः–मु ॥

[९. ४] ७. २३ [९] **आत्मनो विधा°**—ग-त१.२.६.७-भ३-मु। आत्मनि धा°–घ; आत्मने विधा°–त४.५-भ२; आ आत्मने विधा°–भ१; आ आ अते विधा°–भ४। आत्म विधा–मॅ ॥

[९. ५] ८. १५ [२] **तनूनपादत्र**–मॅ-मु। तनूनां पौत्रः–ग; तनूपात्रः–त१.२.६; तनूनपात्रः–त४.५.७-भ२.४; तनूनप्रात्रः–भ१; तनूनपः–भ३ ॥ **अद्भ्योऽशवो**—*मॅ-मु। अद्भ्योशंवो–ग; अभ्यः संवो–त१.२.६; अद्भ्यः संवो–त४.५-भ१.२.४; अद्भ्यः सवो–त७; अद्भ्य संवा–भ३ ॥ इयं श्रुतिः कुत्रत्येति न ज्ञायते ॥ १८ [२] **द्वाभ्यां धाराभ्यामाप्रयणं**

गृह्णाति । कुत उद्धृतेयं श्रुतिः १ ॥ ९.१४ [७] निरुक्तपाठोद्धरणे भाष्यकारः ' वेरां ददातीति वेरां दधातीति ' इत्यंशं त्यक्तवान्, ' धारयत इति ' अस्य स्थाने ' धारयतीति ' पठितवान्, पुनरपि ' वेन्दवे द्रवतीति वेन्दौ रमत इति ' इत्यंशं नोद्धृतवान् । ९. २८. [९] **अहमाह्वयामि**—ग-त-भ१.२.४.५-मु । आह्वयामि–घ-भ३-मॅ ॥ १०. १३. [११] **आगच्छत**—घ-भ४ । प्रत्या-गच्छत–मॅ-मु इतरेषु च ॥

[९. ६] ११. १३ [६] **तं**—मॅ-मु–× ॥ १८. [७] **आप्यायितवत्**—मॅ-मु । आप्यायितवान्–§ ॥

[९. ७] १. २ **गायत्रं छन्दः** । अबद्धमेतत् । ' गायत्री छन्दः ' अथवा ' सूक्तं गायत्रम् ' इति भाव्यम् ॥ ६. [१] **सृज्यन्ते**—*मॅ । हविर्धानं सृज्यते–ग१; हविर्धानात् सृज्यते–ग२; युक्तान् ज्यते–घ; हविर्धाना सृज्यते–त-भ ॥ १०. [२] ' धारा ' इति पदपाठः । ' धाराः ' इति भाष्यकारेण स्वीकृतम् ॥ १३. [३] **एतदेव दर्शयति** । अस्य प्रयोजनं नावगम्यते ॥ १३. १७. [९] **संजयतं**—ग-भ१.२.४-*मॅ-मु । संजयितं–घ-त-भ४ ॥

[९. ८] १४. ३ [३] **अभिलषितः**—भ१.२.४-*मॅ-मु । अभिलषितं–ग; अभि-लषितः–त ॥

[९. ९] १५. १५ [१] **वयांसि इयेना अतिथयः पर्वतानां ककुभ इति** । अस्याः श्रुतेर्मूलं नोपलब्धम् ॥ ५. [१] **आगच्छन्**—मॅ-मु । अगच्छन्–ग-त४.५-भ; अगच्छत–घ-त१.२.७ ॥

[९. १०] १७. ३ [१] **प्र स्वानासः** । ' प्र ' इत्युपसर्गस्य क्रियायान्वयोऽपेक्ष्यते ॥ २६. [६] **हरस आहरस आहर्तारश्च**–*मॅ । हरसः अहर्तारश्च–ग; हरसे हरसः आहरसः आहर्तारश्च–घ; हरसे हरसः आहर्तारश्च–त१.२.६.७-मु; हरसः आहर्तारश्च आहर्तारश्च–त४.५-भ४; हरसः आहर्तारश्च–भ१.२.३ । ' हरसे ' इति पदस्य स्थाने ' हरसः ' इति भाष्यकारैः पठितम् ॥ १८. १ [७] **सप्रजामयः** इति पदं भाष्यकारा विभज्य व्याख्यातवन्तः ॥

[९. १२] २०. ११ [२] **निवसति**–भ१.२.३ । अधिवसति–ग; मिश्रयति–घ-मॅ-मु; मिगसति–त; निगसति–भ४ ॥ २१. ७ [८] **पदा पदानि**—भ-मु । पदानि–ग-घ-त-मॅ ॥

[९. १३] २१. २२ **विद्यादनुक्तेऽपि लाघवाया दृळहृच्युतात्**—त१.२.६-भ१-मॅ-मु ॥ विद्यादनुलोके घवापादळच्युतात्–ग; विद्यादनुलोक्तेयवाया दळहृच्युतात्; विद्यादनुलोक्ते घवाया वृल्हृच्युतात्–त५; विद्यादनुक्तोपि लाघवाया दळहृच्युतात्–त७ । अयमानुष्टुभः श्लोको भाष्यकारैः कुत उद्धृत इत्यन्वेषणीयम् । अनु. भाष्यं द्रष्टव्यम् । ऋ. सं. ५. ४१. ७; ९. ७२. १ भाष्ये-ऽप्येकः श्लोकार्धो व्याकरणप्राक्रियात्मकः समुद्धृतोऽस्ति । षड्गुरुशिष्यस्य सर्वानुक्रमणीभाष्य एतादृशी छन्दोबद्धरचना दरीदृश्यते । ऋग्वेदभाष्यकारो माधवभट्टोऽपि स्वभाष्ये अनुष्टुप्छन्दोबद्धाः कारिका आरचितवान् । २२. १० [३] **अन्नलाभ इत्यर्थः**—भ१.२.३.५ । वाजलाभ इति–ग-घ-त-भ४-मॅ-मु ॥

[९. १४] २३. २५ [२] ' यदी ' इति संहितापाठः । ' यदीम् ' इति भाष्यकाराः पठितवन्तः । अग्रिमे मन्त्रे पुनरपि ' यदी ' इति संहितापाठः । तत्र तावत् भाष्यकाराः ' यदि ' इति

यथापदपाठं गृह्णन्ति ॥ २४. ८ [४] **जिघ्नते**—घ-भ४-मॅ। जिघ्नते–मु इतरेषु च। 'जिघ्नते' इति संहितापदपाठयोः। मॅ-पुस्तके 'जिघ्नते' इति संहितापदपाठयोः विद्यते तदशुद्धम्। भाष्यकाराः 'जिघ्नते' इति पठित्वा व्याख्यातवन्तः। ऋ. सं. १. ५४. १० द्रष्टव्यम् ॥ १६. [६] **यं विदे**—इति प्रतीकद्वयं न व्याख्यातम् ॥

[९. १५] २६. २० [८] **तम् गतमु**—घ-त१.२.३-मु। तं–मॅ इतरेषु च ॥

[९. १६] २८. ४ [७] **पिप्युषी आप्याययन्ती**—*मॅ-मु। पिप्युषी आप्यायती–घ; ग-त-भ-पुस्तकेषु नास्ति ॥ ८ [८] **अथवा**—ग-*मॅ-मु। अथ–त१.२.६.७-भ; अथा–त३. ४.५ ॥

[९. १७] २९. ४ [५] **न** इति पदं न व्याख्यातम् ॥

[९. १९] ३१. १७ [३] **पुनानः पूयमानः**—ग-घ-त१.२.३.४.५.७-भ-मु। पुनानः त६-मॅ ॥

[९. २१] ३४. ९ [४] **प्राप्नुवन्ति**—§ मॅ-मु। 'प्रापयन्ति' इति भाव्यम्। 'रयम्' इति पदम् 'अर्थम्' इत्यर्थे गृहीत्वा 'अभिमतं देशम्' इति भाष्यकारैः व्याख्यातं इति मॅक्समुल्लरमहाशयैः संसूचितं तदनावश्यकं प्रतिभाति ॥ १४. [५] **वेनं कामयन्तम्**—कमधातोरात्मनेपदत्वात् 'कामयमानम्' इति भाव्यम् ॥ १५ [५] **अरावा.....प्रयच्छति**—त३.४. ५-भ-मॅ। अरावा अदातृशब्दरहितः संपन्नः सन् प्रयच्छति–घ-त१.२.७-मु; अरावा अदातृशब्दरहितः सन् प्रयच्छति–त६। 'अरावा अदाता न किंचित्प्रयच्छति प्राप्तकामः स एव प्रयच्छति' इति स्यादिति मॅक्समुल्लरमहाशयाः संसूचयन्ति ॥ २६ [७] **प्रेरयन्**—ग-*मॅ-मु। प्रेरयन्–घ-त-भ।

[९. २२] ३५. १८ [४] **श्राम्यन्ति**—ग। शाम्यंति–घ-त-भ-मॅ-मु ॥ ३६.१ [६] **पृथिव्या चान्तरिक्षेण**—ग-भ३-मु। पृथिव्यां चांतरिक्षेण-त-भ१.२.४। पृथिव्यां चान्तरिक्षे-मॅ ॥

[९. २३] ३६. १८ [२] **रूपकव्याहारेण**–भ३-*मॅ-मु। रूपकद्वारेण–ग; रूपकव्यद्वारेण–त-भ२.४; रूपकव्याहारेण–भ१ ॥ २७ [४] **तत्रामिश्रितो**—*मॅ-मु। मिश्रितो–घ; तथामिश्रितो–त; तदाश्रितो–भ२ ॥ **तमाभे पवन्त**—*मॅ-मु। त अभि पवंत–घ; तमभि पवंत–त१.२.६; तं अभि पवंत–त३ ॥ ३७. ९ [६] **क्षरसि**—भ२.३। रक्षसि–भ१; क्षरसे–मॅ-मु इतरेषु च ॥

[९. २४] ३८. ८ [५] **उदराय**—ग-*मॅ-मु। उदाराय–त-भ२.४; उदकाराय–भ१ ॥ ११. [६] **हन्तरिन्दो**। हंतरिंद्र–§-मॅ-मु। "हन्तरिन्दो इति भाव्यम् किंतु लिखितपुस्तकेष्वेतादृश्याश्च्युतेः साधारणत्वान्नात्र अभ्यूह उचितः" इति मॅक्समुल्लरमहाशयैः टिप्पण्यां लिखितम्। परं भाष्यपाठनिर्धारणे केवलं लिखितपुस्तकपाठो नालं मन्त्रार्थोऽप्यवधारितव्यो भवतीति स्वयं तैरेव लिखितम्[1]। एतदनुसारेण स्वयं तैरपि बहुत्र पाठा अभ्यूहिताः। अत्र 'इन्दो' इत्यावश्यकं। 'इन्द्रो' मास्तु इति व्यक्तं प्रतीयमाने सति अभ्यूहः किमर्थं नाश्रयणीयः? सामवेदस्य सायणभाष्ये (२. ३. २. ३. ६) 'हे सोम' इति व्याख्यातमिति तैरेवोल्लिखितम्। ऋ.सं. १. ९१. ५; ६. १७. ११; ८. ९२. १७; ९. १. ३; १७. १; २५. ३; २८. ३; ३७. ५;

1. Preface to the fifth volume of the first edition, p. xcviii, second edition Vol. IV.

६१. २०; ८८. ४; ८९. ७; ११०. १; १०. २५. ९ अत्र सोमे वृत्रहन्तृत्वं कल्पितम् ॥ १५ [७] वल्ल्यात्मकः सोमो—*मॅ । मंश्वात्मक सोमो–ग; वल्यात्मकः सोमो–घ-मु; वल्यात्मक सोमो–त; वल्ल्यात्मकं सोमो–भ ॥

[९. २६] ४०. ७ [४] भुरिजोः—ग-त१.२.३.४.५.७-भ१.२-मु । भूरिजोः–घ-त६-भ४-मॅ ॥ १६ [६] सोम तं—ग-घ-त४-भ । सोम–त१.२.३.६.७ । सोम उक्तगुणविशिष्टं तं त्वा त्वां–मु ॥

[९. २७] ४१. ७ [३] वननीयेषु—ग-त६-भ३ । वननीयेषु पात्रेषु–त१.२.४-भ१.२.४-मॅ-मु ॥ १७ [५] सोमस्रावणे.....सोमस्याप्यायनात्—ग-*मॅ-मु । सुमस्रावणे (सुमस्रावणे–भ२.४; सुमश्रावणे–भ१.३) सूर्यस्य कः प्रसंग इति न वाच्यं । तं सूर्यरश्मिभिरेव सोमस्याप्यायनात् (°ध्यायमानात्–त ७)–त-भ ॥

[९. २८] ४२. १० [३] अतिशयेन—भ । विशेषण–ग-त-मॅ-मु ॥

[९. २९] ४३. ५ [२] अयं वै ज्योतिर्यत्सोमः । एतच्छ्रुतेर्मूलस्थानमन्वेषणीयम् ॥ १० [३] शोभनाभिभावुकानि—ग-भ२.३.४-*मॅ-मु । सुम. भा.२.९.१.१.३ । शोभनानि–घ; शोभनानि भावुकानि–त-मु ॥ २० [५] अमुञ्चन्नित्यर्थः—*मॅ-मु । मुंचतीत्यर्थः–ग; अमुंचनित्यर्थः–त१.२.३.६.७; अमुंचनित्यर्थः–त४.५–भ१.२.४; अमुंचेनित्यर्थः–भ३ ॥ २१ [५] रक्षेति—ग । रक्षयेति–घ-त-भ-मॅ-मु ॥

[९. ३०] ४४. ९ [२] इन्द्रियमपि करं—त-भ१.२.४-मॅ । इंद्रियं प्रियकरं–ग; इंद्रियमपि गमस्त्योः करयो–भ३ । इंद्रियमपि कं–मु । 'इन्द्रियमपि वा बलकरम्' इति स्यादिति मॅक्समुल्करमहाशया अभ्यूहन्ति । ऋ. सं. १. १०३. १; २. १६. ३; ४. २४. ५ द्रष्टव्यम् ॥ २८ [६] ब्रूते यजमानः स्वीयान्—भ१.२-*मॅ-मु । ब्रूयान् तेजस स्वीयात्–ग; ब्रूते यजमान स्वीयान्-त२. ६; ब्रूते यजमा स्वीयान्–त३-भ४; ब्रूयं तेजमा स्वीयान्–त५; ब्रूते यजमानः स्वायान्–भ३ ॥

[९. ३१] ४५. ५ [१] सुध्यानाः—मॅ-मु । स्वानाः–घ-त; स्वाध्यानाः–भ ॥ ११ [२] अस्मभ्यमित्यर्थः—*मॅ-मु । अस्मभ्यं देहीत्यर्थः–ग; अस्मदित्यर्थः–त; अस्मदित्यमित्यर्थः–भ ॥ २७ [६] जगदाप्यायिकत्वेन तत्स्वामित्वं । जगदाप्यायनं स्वामित्वं–ग; जगदाप्यायिनं–स्वामित्वं–त-भ४; जगदाप्यायिकत्वेन–स्वामित्वं–भ१.२.३ । जगदाप्यायिकत्वं तत्स्वामित्वं–मॅ । जगदाप्यायकत्वं तत्स्वामित्वं–मु ॥

[९. ३२] ४७. ९ [६] मह्यमस्मभ्यमित्यर्थः—ग-भ४-*मॅ-मु । मह्यमभ्यमित्यर्थः–त; मभ्यमित्यर्थः–भ१; मस्मभ्यमित्यर्थः–भ२; अस्मभ्यमित्यर्थः–भ३ ॥

[९. ३३] ४७. १६ [१] किमिव—त१.२.३.६.७-*मॅ-मु । किं न–ग-घ-भ; किव–त४.५ ॥ १७ न । ते—मु । ते–ग; तं–त-भ४; न–भ१.२.३-मॅ ॥ दृष्टान्तो दर्शितो—*मॅ-मु । दृष्टांतः दर्पतो–त१.२.६; दृष्टांत दर्पतो–त३; दृष्टांतः दर्पितो–भ१; दृष्टांत तदर्पतो भ४ ॥ २२ [२] द्रोणानि द्रोणकलशान् प्रति—घ । प्रति द्रोणानि द्रोणकलशान् (१)-मॅ-मु

इतरेषु च ॥ २३ इतरेऽपि पात्रा—*मॅ-मु । इतराणि पात्राणि–ग; इतारपि (=इतरेपि) पात्रा–त१. २. ७-भ४; इतारीपि पात्रा–त३.५; इतरोपि पात्रा–त४; तारपि पात्रा–भ१; इतरपि पात्रा–भ२; इतराण्यपि पात्राणि–भ३ ॥ २६ अथवैकमेव—*मॅ-मु ॥ अस्माकं अथवैकमेव–ग-भ३; अस्माकं अथैकमेव–त-भ१.२.४ ॥ ४८. १८ [६] °समुद्रमुद्रित°—भ१.२.३-*मॅ-मु । °समुद्रभूत-मुद्रित°–ग-त१.३.४.५.७-भ४; °समुद्रभूदित°–त२.६ ॥

[९. ३४] ४८. २५ [१] अथ प्रत्यक्षेणोच्यते । अग्रिमं वाक्यं तु परोक्षमेव ॥ ४९. ७ [४] सूक्तद्रष्टुर्ऋषेः सोऽयं—*मॅ-मु । सूक्तद्रष्टुर्ऋषेरयं–ग; ऋषेः योयं–घ; सूक्तद्रष्टुर्ऋषयेयं–त-भ२.४ । सूक्तद्रष्टुर्ऋषयेयं–भ१ ॥

[९. ३५] ५०. १७ [५] माधवस्तु.....चकार । कोऽयं माधव इति न ज्ञायते । ऋ. सं. १०. ८६. १ भाष्ये माधवभट्ट उल्लिखितः । अयं ऋग्वेदभाष्यकारो वेंकटार्यसुत इति कुन्हन् राजा-महोदयैः । स्वयं प्रकाशितायां ऋग्वेदानुक्रमण्यां उपोद्घाते साधितम्[1]। स एव माधव-भट्टोऽत्रापि निर्दिष्टो वेत्यन्वेषणीयम् ।

[९. ३६] ५०. २८ [१] अधिषवण°—ग-घ-मु । अभिषवण°–त-भ-मॅ ॥ ३० युद्धमितरेतरकर्षणात्—ग-*मॅ । यद्धमितरेतरघर्षणात्–त-भ२.४; यवमितरेतरथर्षणात्–भ१; युद्धमितरेतरघर्षणात्–मु ॥ कामति—भ१.२ । कामयति–मॅ-मु इतरेषु च ॥

[९. ३७] ५२. १२ [४] महर्षेः अधि—*मॅ-मु । त्रितमहर्षेधि–ग; महार्षेः यत् अधि–घ; महर्षे यद्यधि–त-भ ॥

[९. ३९] ५४. ८ [२] अनिष्कृतमसंस्कृतं—ग-भ२-*मॅ-मु-साम. भा.२.३.१.४.२ । अनिष्कृतं संस्कृतं–मु इतरेषु च ॥

[९. ४०] ५६. २ [६] द्यृपृथिव्याख्ययोः—त१.२.६-भ२-मु । द्यपृथिव्याख्ययोः–त३.५-भ४ । द्यावापृथिव्याख्ययोः–ग-मॅ ॥

[९. ४१] ५६. ८ [१] एवं वोपमीयन्ते—*मॅ । ये चोपनीयंते–ग; एव चोपमीयंते–त-भ४; एवं चोपमीयंते–भ२-मु ॥ १५ [२] बन्धनं दुराव्यं दुष्टमतिं च—*मॅ । दुष्टमतिं च–ग-त३.४.५-भ२.३; राक्षससंबंधिनं दुराव्यं–घ; बंधनं दुराव्यं तद्वयं दुष्टमतिं च–त२.६.७-भ१-४ । बंधं दुष्टमतिं च–मु ॥ १६ अव्रतमकर्माणं—*मॅ । अव्रतं कर्मणां–ग-घ; अव्रतकर्मणां–त-भ३; अव्रतकर्माणं–भ२.४; अव्रतं दुराव्यं तद्वयं कर्माणं–मु ॥ ५७. ५ [५] तदुपलक्षितमहरुच्यते—*मॅ-मु । तदुपलक्षितमज्यते–ग; तदुपलक्षमज्यते–त१; तदुपलक्ष्यतमज्यते त२.७; तदुपल ... ... तमज्यते–त४.५-भ१.३.४; तदुपलक्षतमज्यते–त६; तदुपल... तमज्यते–त३; तदुपलक्षण ... तमज्यते–भ२ ॥

[९. ४२] ५७. २५ [३] के । सोमाः । कीदृशाः—त१.२.६.७-भ१.२-मु । के सोमाः–भ५ । सोमाः–त३.४.५.भ३.४-मॅ ॥ ऋ. सं. ९. २६. ६; ३१. १; ४०. ५; ६; ४१.

1. Rgvedānukramaṇī of Mādhavabhaṭṭa, son of Veṅkaṭārya, Part I, Preface p. 15, Madras 1932. See also "Indices and Appendices to the Nirukta" by Dr. L. Sarup, p. 31 and Max Müller's Preface to the sixth Vol. of the 1st edition Vol. IV, pp. cxxviii ff. 2nd edition.

३; द्रष्टव्यम् ॥ ५८. १ [४] **दुहानो दधानः**—*मॅ-मु। दधावः दुहानः–ग; दुहानः–घ; दधानः–त-भ ॥

[९. ४३] ५९. ५ [५] **अयमिन्दुर्वाज°**—*मॅ। इंदुर्वाज°–ग; यमिंदवाज°–त १.३.४.५-भ१.३; यमिदवाज°–त६; यर्दिदुः यमिंदवाजः°–त७; यमिंदुः वाज°–भ२; यमिवाज° –भ४। य इंदुर्वाज°–घ-मु ॥ ७ **इडभावे च**—*मॅ। इडभावश्च–ग-त-भ-मु ॥

॥ षष्ठाष्टकः समाप्तः ॥

सप्तमाष्टकभाष्यसंशोधनार्थमुपयुक्तानि लिखितपुस्तकानि—ग (१, २, ३), त (१, २, ३, ४, ५, ६, ७), भ (१, २, ४, ५, ६, ७)। भ६-पुस्तकं द्वितीयाध्यायस्य एकोनविंशे वर्गे (६८ तमे सूक्ते) प्रारभ्यते।

[९. ४४] ६२.३ [६] **गातुवित्तमः पुण्य°**—ग३–*मॅ। गातुवित्तमहः पुण्य°–ग१. २; गातुवित्पुण्य°–त-भ-मु ॥

[९. ४५] ६२. १४ [२] **अभिगच्छ**—ग-त१.२.७-भ४*-मॅ-मु। अभिगच्छति–त४.५; अभिगच्छतु–त६-भ१.७ ॥ १५. **देवानायाचस्वेत्यर्थः**—त३-भ१। देवानां पवस्वेत्यर्थः–ग; देवाना यावस्वेत्यर्थः–त१.२; देवानी याचस्येत्यर्थः–त६-भ७; देवानां याचस्वेत्यर्थः–भ४। देवाना पवस्वेत्यर्थः–त५-मॅ-मु ॥ ६३.२ [५] **अनूषत अस्तुवन्**—त१.२-भ१-*मॅ-मु। अनूषत स्तुवते–ग; अनूषत स्तुवन्–त३.४.५.७-भ२.४; अनूषतास्तुवत्–त६; अनूषतास्तावन्–भ६ ॥

[९. ४६] ६३. १२ [१] **जाता वा**—ग-भ। वा जाता वा–त१.२.३.७; जाताः– त५। वा जाताः–मॅ-मु ॥ २२ [३] **वर्धयन्ति**—ग-भ। प्रवर्धयंति–त-मॅ-मु ॥ ६४. ६ [६] **त्रिशः**—*मॅ-मु। विशः–ग-त३.४.५-भ२.४; विशेषः–त२.७; अण्यः–त६-भ६ ॥

[९. ४७] ६४. १७ [२] **अस्य**—§। कृतान्यस्य–मॅ ॥ **असुराणां नाशकानि**— त१.२.७। असुराणां हिंसकाव–ग; असुराणां हिंसकानि–भ१ (२)। असुराणां–त३.५.६- भ२-६-मॅ। एतन्मन्त्रपूर्वार्धस्य भाष्यं मु-पुस्तके विभिन्नं वर्तते–' अस्य यस्यैतस्य सोमस्य दस्युतर्हणा दस्यूनामसुराणां तर्हणा नाशकानि कर्त्वा कर्माणि कृतानीत् अस्माभिरेव कृतानि सोयं ' इ. ॥ ६५. ४ [५] **शत्रून्**—भ१(२)। शत्रूं–भ४। शत्रुं–मॅ-मु इतरेषु च ॥

[९. ४८] ६५. २१ [३] **हे सोम**—ग-भ। **हे सुक्रतो** शोभनकर्मन् (°कर्मवन्– त४-भ४) पवमान सोम–त-मु। हे पवमान सोम–*मॅ। ' सुक्रतो ' इति पदं ' सुक्रतुः ' इति पठित्वा भाष्यकारैः व्याख्यातम्। ' सुक्रतुः सुप्रज्ञः ' इति भाष्यगतं व्याख्यानं मु-पुस्तके त्यक्तम्। एतदप्रामाणिकम्। ' पवमान ' इति पदमप्यनावश्यकम्। एतत्सूक्तस्य द्वितीयमन्त्रभाष्यं द्रष्टव्यम्॥ २६ [४] **स्वर्दृशे सर्वदृशे**—*मॅ-मु। स्वर्दृशे–ग-त३.६-भ; सर्वदृशे–त१.२.५.७; सर्वर्दृशे त४। ' स्वेः। दृशे ' इति भिन्नः पदपाठः॥ २७ **साधारणमित्समानमेव**—त६-भ१.२.४-*मॅ-मु। साधारणमिछमानमेव–त१.२.४.५.७; साधारणमित्यमानमेव–भ६ ॥

[९. ५०] ६७. ११ [२] **यज्ञमिच्छतो**—त३-भ१.२.४। यज्ञमिच्छघ्नतो–त६- भ६.७ । यज्ञमिच्छवो–त१.२.४.५.७-मॅ-मु ॥ २२ [४] **योनिं स्थानं**—ग-त३.६-भ

१.६.७ । योनिमुदरं स्थानं–त१.२.४.५.७-म२.४-मॅ-मु । अयं मन्त्रः पूर्वमागतः (९.२५.६) । तत्र ' योनिं स्थानम् ' इत्येव व्याख्यानमस्ति ॥

[९. ५१] ६८. १४ [३] **व्याप्नुवन्ति प्राप्नुवन्ति**—ग । व्याप्नुवंति–त१.२.६-म१.६.७; व्याप्नुवते व्याप्नुवंति–त३.४.५.७-म२-मॅ-मु ॥ २१ [५] **अर्ष गच्छ**—*मॅ-मु । अभ्यर्ष अभिगच्छ–ग; अर्ष गच्छसि–त१.२.३.४.५.७-म२.४; गच्छसि–त६-म६; यं गच्छसि–म१ ॥

[९. ५२] ६८. २३ **शुक्रः इत्यनु°**—ग-त२-*मॅ-अनु । शुक्रेत्यनु°–मु इतरेषु च ॥

[९. ५३] ६९. २५ [१] **स्पृधः स्पर्धमानाः** । ' परिस्पृधः ' इति प्रतीकम् ॥ ७०. ३ [२] **च निमित्ते**—त३-म१-*मॅ-मु । धननिमित्ते–ग; च निमिते–त१.२.७; च निमित्त–त४.५-म२.४.७ ॥ ७ [३] **त्वां यो दुर्बुद्धिः**—त३.७-म१.२.४*मॅ-मु । त्वां धुयो दुर्बुद्धिः–त१.२.५; दुर्धियो दुर्बुद्धिः–त४; त्वा यो दुर्बुद्धि–त६; त्वां यो दुर्णधि–म७ ॥

[९. ५४] ७०. १७ [१] **अपरिमितस्य ... ... द्रष्टारं**—त३.६-म१.२.६.७ । आदातारं ऋषिमतींद्रियस्य कर्मफलस्य द्रष्टारं–ग । अपरिमितस्य कर्मफलस्य दातारं–त१.२.५.७-म४ मॅ-मु ॥

[९. ५५] ७१. ११ [१] **सौभगा सौभगानि**—ग-त३-म४-मु । सौभगा सौभगा–म२ । सौभगानि–त२.४.५-म१.७-मॅ ॥

[९. ५६] ७२. १० [३] **दश दशसंख्याकाः**—त३-म२. ४ । दशसंख्याका–मॅ-मु इतरेषु च ॥ १५ [४] **इन्द्राय इन्द्रार्थं**—ग-त३-म१.२.४.७-मु । इंद्रार्थं–त२.४.५.७-मॅ ॥

[९. ५७] ७२. २३ [१] **अस्मदर्थं**—त२.३.४ ६.७-म२.६.७-मु । अभि अस्मदर्थं–त१.५ । नोऽस्मदर्थं–मॅ ॥ ७३.७ [४] **सः अभिषुतः पुनानः**–ग-त३-म२.५ । अभिष्टुतः पुनानः–म१.६.७ । पुनानः–त२.४.५.७-म४-मॅ-मु ॥

[९. ५८] ७३. १ [१] ' धारा सुतस्यान्धसो ' इत्यस्यानन्तरं ' धारयाभिषुतस्यान्धसः ' इत्यधिकं निरुक्तपाठे ॥ २८ [३] ऋग्वेदभाष्ये शाट्यायनकब्राह्मणवचनानि बहुत्र (ऋ. सं. १. ५१. १३; ८४. १३; १०५ प्रस्ता.; १०५. १०; ५. २. १; ७. ३२ प्रस्ता.; ३३. ७; ८. ९१. १; ३; ५; ७; १०. ३८. ५; ५७. १; ६०. ७) उद्धृतानि । वेंकटमाधवस्य ऋग्वेदभाष्येऽपि शाट्यायनकवचनानि बहुश उद्धृतानि । शाट्यायनकब्राह्मणस्य जैमिनीयब्राह्मणेनातीव साम्यं दृश्यते । जैमिनीयब्राह्मणस्य कियाश्चिदंशः कॅलण्डमहोदयैः[1] मुद्रापितः । ऋग्वेदभाष्यलिखितपुस्तकेषु शाट्यायनकपाठानां प्रायोऽशुद्धत्वात् जैमिनीयपाठतुलनया शाट्यायनकपाठशोधनं सुशकम् । एतस्मिन् विषये ओर्टेल्महोदयैः[2] बहु प्रयतितम् । बटकृष्णघोषमहोदयैरपि लुप्तब्राह्मणवचनशोधनमधिकृत्य निबन्ध आरचितः[3] । तद्वताः शाट्यायनजैमिनीय ब्राह्मणपाठा अस्मिन् पाठभेदादिविषयकविचारे तत्तत्स्थानेषु निवेशिताः ॥ ३०. [३] **प्रतिममृशाते**—*मॅ । प्रतिम्राते–ग; प्रतिमृशाते–त-म१.२.४.७-मु; प्रतिमुमृशाते–म४ ॥ **नाविवेदं** । नाविदं–शाट्या. ब्रा.; जै.ब्रा.। ७४. ५ [४] **त्रिंशतं त्रिंशतानि**—त३-म१.२.४ । त्रिंशतं–ग; त्रिंशतं शतानि–त; त्रिंशतं त्रिंशतानि–म७ । त्रिंशतं त्रीणि शतानि–*मॅ । ' त्रिंशतम् ' इति पदं ' त्रिंशतम् ' इति पठित्वा

1. Amsterdam, 1919. 2. JAOS XVIII. p. 15.,ff. 1897. 3. Lost Brâhmanas, Calcutta.

भाष्यकारैः व्याख्यातमिति व्यक्तं, परं 'त्रीणि शतानि' इत्यभ्यूहोऽनावश्यकः। 'त्रिशतानि' इत्यलम् ॥

[९. ५९] ७४. २३ [३] उपद्रवाणि। उपद्रवशब्दः पुंलिङ्गः ॥ २७ [४] विश्वानित्—भ१.४.७। विश्वान्—ग-त१.२.३.६.७-भ२-मु; विश्वानेव—त४.५-मॅ ॥

[९. ६०] ७४. २९ पुरउष्णिगाद्यद्वादशका द्व्यष्टका—*मॅ। पुरष्णिमगाद्यथद्वादशकाष्टका—ग; पुरउष्णिगाद्योद्वादशकोद्व्यष्टकौ—त-भ४; पुरउष्णिगाद्योद्वादशको द्व्यष्टकाः—भ१.७; पुरउष्णिगाद्यद्वादशको द्व्यष्टकौ—मु ॥

[९. ६१] ७५. २९ [२] तुर्वशं तुर्वशनामकं—त३-भ१.२.४.५-मु। शनामकं—ग; तुर्वशं नामकं—त१.२.६; तुर्वशनामक—भ७। तुर्वशनामकं—त४.५.७-मॅ ॥ ७६. २४ [८] संगच्छते—त३-भ। संगच्छेति—त। संगच्छति—*मॅ सप्तममन्त्रभाष्यं द्रष्टव्यम् ॥ ७७. १० [११] विश्वा विश्वानि। 'विश्वानि' इत्येव तु प्रतीकम् ॥ १४. ९ [१२] धनस्य—ग-त३-भ। अन्नस्य—त-मॅ-मु। वरिवःशब्दो विशेषतो नवमे मण्डले सर्वत्र धनवाच्येव ॥ २५ [१४] 'संशिश्वरीरिव' इत्येकं पदं सं + शिश्वरीरिव इति विभज्य व्याख्यातम् ॥ ७८. ४ [१६] चित्रं विचित्रं—त३-भ१.२.४। चित्रं—त२.४.५.६.७-भ७-मॅ-मु ॥ ७९. ७ [२३] 'हे मीढ्वः सेक्तः सोम पुनानः पूयमानस्त्वम्' इत्ययं भाष्यभागः सर्वेषु लिखितपुस्तकेषु मु-पुस्तके च भाष्यारम्भे गृहीतोऽस्ति ॥ १२ [२४] प्रबुद्धो—*मॅ-मु। प्रबुद्धो—ग-त-भ ॥

[९. ६२] ८१. २० [७] सृज्यन्ते—ग-त३.४-भ२.४.७। असृज्यंते—त१.२.५.६.७; सृज्यंते—भ१; असृज्यंत—मॅ-मु ॥ ८२. ४ [१०] चेतति—ग१-त३-भ१.२.७। स चेतति—त-भ४-मॅ-मु ॥ ज्ञायते—ग-भ१(२); संज्ञायते—त२.३.४.६.७-भ१.७; स ज्ञायते—त१.५-मॅ-मु ॥ २७ [१६] सोमः—ग-त३.७-भ१.२.७। सोमश्च—त२.४.५.६-भ४-मॅ-मु ॥ ८४.१ [२४] जमदग्निना जमदग्निनाम्ना—भ१(२).४। जमदग्नि जमदग्निनाम्ना-त३-भ२; जमदग्निनाम्ना—त१.२७-भ१.७-मॅ-मु ॥ परितः स्तोतव्यानि—भ१.४.७। परिस्तोतव्यानि—त३-भ२। परितः श्रोतव्यानि—त२.४.५-मॅ-मु ॥ १५ [२७] तुभ्य तुभ्यं—त३-भ१.२-मु। तुभ्यं—त२.७-भ४.७-मॅ ॥

[९. ६३] ८५. १६ [४] 'अति' इति पदस्य स्थाने 'आभि' इति भाष्यकारैः पठितं दृश्यते। ८६. ४. [८] सूर्यस्य—ग-त३-भ१.६.७। प्रेरकस्य सूर्यस्य—त-भ२.४-मॅ-मु ॥ एतग्वः—ग-त३.७-भ-निघण्टु। एतग्वा—त२.४.५-मॅ-मु ॥ ८७. १ [१५] दधि .....दध्याशिरः दधिसंस्कृताः—ग-त३-भ। दधिसंस्कृताः—त-मॅ-मु। स्वीकृतपाठो मॅक्समुल्लरमहाशयैः नोपलब्धः। ऋ. सं. ९. ६५. १ भाष्ये स्वसारः इति पदमेतद्रीत्या व्याख्यातमस्ति ॥ ६ [१६] ते तव। 'ते' इति संहितायां नास्ति ॥

[९. ६४] ८९. ५ पवमानसौम्यम्। पवमानसोम्यमिति साधु ॥ ९०. ७ [६] अन्तरिक्ष्याणि—ग-त३.४-भ४। आंतरिक्षाणि—त२.५-भ२.७-मॅ। अंतरिक्षाणि—मु ॥ ८. आ पवन्तां—भ१.७। पवंतां—ग-त-भ२. ४-मॅ-मु ॥ ११ [७] सृज्यमाना—त३-भ। प्रसृज्यमाना—त-मॅ-मु ॥ १३ प्रसृज्यन्ते—त१.४.५। प्रासृज्यत—त३; प्रसृज्यंत—त७-भ२; प्रासृज्यंत—मॅ-मु।

'असुग्रम्' इति पदस्य लडर्थे व्याख्यानं नवमे मण्डले बहुत्रोपलभ्यते ॥ १७ [८] रूपा रूपाणि—त३-भ१.४-मु । रूपाणि–त-भ२.७-मँ ॥ ३० [११] देवकामः—मु । देवः–ङ-मँ । 'देवकामः' इति भाष्यमिति मॅक्समुल्लरमहाशयाः[1] । ऋ. सं. ९.६१.१९ अत्र 'देवावीः' इति पदमेवमेव व्याख्यातम् । ऋ. सं. ९.६४.१२;१०७.७ अपि द्रष्टव्यम् ॥ ९१.५ [१२] आपवस्व —त-भ-मु । पवस्व–ग-मँ ॥ ९२. ४ [१९] च तदा स—त३-भ२ । च स तदा–ग-त-मु । तदा स-मँ ॥ ९३. ७ [२६] आ भर आहर—ग-भ१.४.७-*मँ-मु । आहर आभर–त-भ२ ॥ १० [२७] आहुत—ग-त-भ२-मु । आहुत–भ४.७-मँ ॥

[९. ६५] ९४. ३१-९५. २ [४] हे सोम ..... आह्वयामहे–ग-त१.२.३.६.७-भ । पवमान पूयमान वृषा अभिमतफलानां वर्षितासि हि भवसि खलु । तस्मात् हे पवमान पुनान वा सोम स्वाध्यः शोभनकर्माणः सुष्ठु ध्यानवन्तो वा वयं भानुना रश्मिना द्युमन्तं दीप्तिमन्तं अतिशयेन तेजस्विनं इत्यर्थः स्तुतिमन्तं वा त्वा त्वां हवामहे यज्ञेषु आह्वयामहे-मु । हे पवमान पूयमान सोम स्वाध्यः सुकर्माणो वयं भानुना रश्मिना द्युमंतं स्तुतिमंतं त्वा त्वां हवामहे आह्वयामः । हि यस्मात्त्वं वृषा कामानां वर्षयितासि–त५-मँ ॥ स्वीकृतपाठे 'अतिशयेन तेजस्विनमित्यर्थः' इत्यंशोऽनावश्यकः । किंतु लिखितपुस्तकेषु विद्यमानत्वात्तथैव स्थापितः ॥ ९५. १२ [६] बभसति—*मँ । गतमेनं–ग; गभसंति–त-भ७-मु; गभसति–त३-भ२.४; गभेसति–भ१ ॥ १५ पात्रेण—ग-त३-भ । परिप्लवेन पात्रेण–त१.२.६.७-मु । पारिप्लवेन पात्रेग–त४.५-मँ ॥ २६ [८] भाष्यरचना न समीचीना दृश्यते ॥ ९६. ७ [९] ङसि—ग-भ । जसि–त१.२.६.७-मु; डसि–त४.५ । उसि–त३-मँ । ९६.१८ [११] सर्वस्य—ग-त३-भ१.२ । स्वर्गस्य सर्वस्य–भ७; सर्गस्य–त४; स्वर्गस्य–त२.५.६.७-मँ-मु ॥ १८ [११] तं पूर्वोक्त°—ग-भ१.४ । पूर्वोक्त°–त-भ२.६.७-मँ-मु ॥ ९७. १५ [१५] पवस्व सर्वतो गच्छ । भाष्यकारैः 'आ पवस्व' इति स्वीकृत्य 'सर्वतो गच्छ' इति व्याख्यातमिति भाति ॥ २७. [१७] गवादींश्च तेषां च वृद्धिं—ङ-मँ-मु । 'गवादींश्च तेषां वृद्धिं च' इति साधु ॥ ९८. ३ [१८] गमनशीलं बलं च—भ१ । गमनशीलं बलं किंच–त३-भ२.४.५; गमनशीलं च–भ७; गमनशीलं किंच–ग-त१.२.५.६.७-मँ-मु ॥ २४ [२१] दिक्ष्वस्मभ्यं—ग-*मँ-मु । इतरलिखितपुस्तकेष्ववद्धाः पाठाः ॥ आ प्रापय—ग-भ१.४.७ । आ प्रापथ–त३; आ प्रापयथ–भ२ । आ प्रयच्छ–त१.२.४.५-मँ-मु ऋ सं.९.६५.२४ द्रष्टव्यम् ॥ १००. १३ [२९] प्रत्येकविशेषणापेक्षया—ग-त-भ१ २.४ ॥ प्रत्येकं विशे°–भ७-मँ-मु ॥ १८ [३०] शोभनप्रज्ञ—ग-त३-भ१.२.४ । शोभनयज्ञ–त-मँ-मु ॥

[९. ६६] १००. २८ [१] स्तुत्यस्तोतृयष्टृयष्टव्य°—ग-त३.४.५-भ । स्तुत्यस्तोतृयष्टव्य°–त१.२.६.७; स्तुत्यस्तोतृयशब्दयष्टव्य°–त३ । स्तुत्यः स्तोतृयष्टृत्व°–मु । स्तुत्यस्तोतृयष्टव्ययष्टृ°–मँ ॥ १०१. ६ [२] नामनी वा—ग-त३ । नामनी–त-भ-मँ-मु ॥ १३ [३] त्वदीयानि धामानि त्वदधीना... ..परि वर्तन्ते । त्वदीयानि धामानि त्वदधीना अहोरात्ररूपाः कालविशेषाः परि भवंति सर्वत्र व्याप्नुवंति । यद्वा त्वदीयानि धामानि (त्वदीयधामानि–भ१.४.७) त्वद्वधीना अहो ('त्वद्वधीना अहो' नास्ति–भ१) तेजसां परि वर्तते–ग-भ१.४.५.७;

1. Preface to the Second edition, Vol. IV. p. clxxviii.

त्वदीयानि धामानि त्वद्गत्यधीना.....। यद्वा त्वदीयानि धामानि तेजांसि परितो वर्तते–त३-भ२। त्वदीयानि धामानि तेजांसि परितो वर्तते–त-मॅ-मु। 'धामानि' इति पदस्य साधारणत्वेन त-पुस्तकेषु तावान् भागो लुप्तः प्रतीयते। स्वीकृतपाठोऽपि न्यूनं सर्वथा न पूरयति। 'यानि' इति प्रतीकं भाष्ये न व्याख्यातम्। 'अहोरात्रौ यत्र यत्र' इत्यादिवाक्यस्य सुष्ठुवगमार्थमुपरितनपाठस्वीकृतिरावश्यकी। मॅक्समुल्लरमहाशयैरपि सदृश पाठ उपलब्धः किंतु तैर्न स्वीकृतः॥ २० [४] **अस्मत्कृतानि**—ग-त३-भ१.२.४। अस्मत्त्वतानि–भ७। अस्मद्गतानि–त-मॅ-मु॥ १०३. ८ [११] **क्षो रमादेशः**–त३-भ१.२.४। 'क्षस्यामादेशः' इति भाव्यम्॥ १३ [१२] **अच्छ अभिगच्छन्ति**—ग-भ। अभिगच्छंति–त-मॅ-मु॥ २३ [१३] **तदार्षन्ति प्रगच्छन्ति। यद्यदा**—भ४-*मॅ। अर्षति प्रगच्छंति यद्यदा–मु। लिखितपुस्तकेष्वयद्धाः पाठाः॥ १०४. ४ [१५] **इन्द्राय**—ग-त३-भ१.२.४। रंद्राय–भ७। चंद्राय–त-मॅ॥ **तत इन्द्रस्य**। तत इंद्रजाते–ग; तव इंद्रस्य–त-भ। इंद्रस्य–मॅ-मु॥ ९. [१६] **प्रीणयितासि**—ग-त३-भ२.४.५-मु। प्रीणयितासु–त; प्रीणयिता स–भ१। प्रीणयिता–भ७-मॅ॥ २८. [१८] **°साहाय्याय**—ग-भ१.२.४-*मॅ। °सहोज्याय–त; °सहाय्याय–त३-भ७। °सहायाय–मु॥ १०६. २०. [२५] **पवित्रान्निर्गच्छन्तीत्यर्थः**—ग-त३.७-भ१.४-*मॅ-मु। पवित्रानिर्गच्छंतीत्यर्थः--त१.२.४.५.६; पवित्राणि गच्छंतीत्यर्थः--भ२; पवित्रतागार्गच्छंति--भ७॥ १०७. ८ [२८] **प्रति प्रकर्षेण**—ग-त३-भ१.४.५। प्रतिकर्षेण--त-भ२.७-मॅ। प्रकर्षेण--मु। 'प्रति प्रकर्षेण' इति पाठः समीचीनः स्यादिति मॅक्समुल्लरमहाशयैः स्वयमभ्यूहितम्[1]॥ १० **तिलोपः**—मॅ। तिलोपः अनित्यमागमशासनमिति सिच इ आ-ऽ-मु। 'सिच इ आ' इत्यस्य स्थाने इट् न-ग; सच इंद्रा-भ४; सिच इत तः--भ७। मॅक्समुल्लरटिप्पणी द्रष्टव्या॥ १५. [२९] **संक्रीडते। किं कुर्वन्.....भृशमाह्वयन्**। संक्रीडते। किं कुर्वन्...भृशमाह्वयन् क्रीडति--ग-त३-भ१.२.४। संक्रीडते--त-मॅ। संक्रीडते इंद्रं परमेश्वरं मदाय मदार्थं जोहुवत् आह्वानं कृतवान्--मु। स्वीकृत[5]पाठो मॅक्समुल्लरमहाशयैर्नोपलब्धः॥

[९. ६७] १०७. २६ **अलाय्यस्येत्येषा.....शिष्टा गायत्र्यः**—ग-त३-भ। त-मॅ-मु-पुस्तकेष्वेतन्नास्ति। स्वीकृतपाठो मॅक्समुल्लरमहाशयैर्लब्धोऽपि नाङ्गीकृतः॥ १०८. १० [१] **मादयितृतमः**—ग-त-३-भ१.४.५.७; मोदयितृतमः–त-भ२-मॅ-मु॥ ११०. ५ [१०] **आभजतु**—ग-त३-भ५। आभजत--त१.२.४.५; आभजत्--भ२.४। आभजतां--मॅ-मु॥ ६. **भजः**—*मॅ। भज--ग-त१.२.४-भ४.७; यज--त५; भजे--त७; भजतेः--भ१(२)। भजेः--मु॥ २६ [१४] **वक्तव्यस्य**—ग-त१.२.६.७-भ१(२).२-मु। वक्तस्य--त३; वक्तृयस्य--भ४। अस्य--भ७-मॅ। ऋ. सं. १०. १७९ प्रस्तावना द्रष्टव्या॥ २७ **विगाहत इति द्वे इति**—ग-त३.७-*मॅ। विगाहत इति--त४.५-भ१.२.४.७-मु॥ १११. ४ **प्रथमं गच्छति। ततः पश्चात्**—ग। पश्चात्प्रथमं गच्छति ततः--त-भ-मॅ-मु॥ ११ [१५] **आगच्छतु**—ग-त३-भ१.२.७। आगच्छत–त१.५.६; आगच्छति–त४; आगच्छत्--मॅ-मु॥ **सिपि वा**—*मॅ। सिपि ता-ग; सिपि ना--त-भ१.२.४; सिपि कचा--भ७। सिपि-मु॥ १९ [१७] **देवानां पानाय**—त१.२.३.६ ७-मु। देवानाय--भ१.७; देवानां गमनाय--भ२। देवयजनाय--मॅ॥ २६.

1. Preface to the Sixth volume of the First edition, Vol. IV. p. clxxviii (2nd Edn.).

[१८] **आगच्छति खलु**—ग-त३-भ । आगच्छति--त-मॅ-मु ॥ ११२. १ [१९] **प्राऽणा**—ग-त७ । त्वं प्राण्णा--मॅ-मु **इतरेषु च** ॥ ७ [२०] **रक्षसां**—ग-त-भ२.४-मु । रक्षसानां--भ१ । राक्षसानां--भ७-मॅ ॥ १८. [२२] 'तेजसा' इत्यस्यानन्तरं त७-पुस्तके 'पोता स्वयं पवित्रः सन्' इति, मु-पुस्तके च 'यः पोता स्वयं पवित्रः सन् स' इत्यधिकं विद्यते । त७-मु-पुस्तकपाठयोः साम्यमितरत्राप्युपलभ्यते । ऋ. सं. १०. १२. ६ टिप्पणी द्रष्टव्या । मु-पुस्तकपाठोऽस्माल्लिखित-पुस्तकेषु नोपलभ्यत इति मॅक्समुल्लरमहाशयैरुक्तम्[1] ॥ ११३. १९ [२७] **अथ**—ग । अथवा--त-भ-मॅ-मु ॥ ११४. ८. [३०] **नास्मानपापान्**—ग । अस्मानपापान्--त-भ-मॅ-मु ॥ २७ [३२] **यागादिपरं वेदशास्त्रविदं**—*मॅ-मु । यागादिपरवेदशास्त्रविदं--ग-भ२.४; यागादिपरवेद-शाखाविदं--त१.२.७; यागादिपरवेदशाखविदं--त४.५; यागादिपरं वेदशास्त्रं--भ१; योगादिपरं वेदशास्त्रं--भ७ ॥

[९. ६८] ११४. ३१ **वत्सप्रिर्भा**° । 'वत्सप्रीर्भा°' इत्यनुक्रमणीपाठः ॥ ११५. ७. [१] **पयांसि प्रस्रवन्ति**—ग-त३-भ२.४.५ । यांति प्रस्रवंति—त१.२.६.७-मु; यांसि प्रस्रवंति--त५ । प्रस्रवंति--मॅ ॥ ८ [१] **बर्हिषदः.....वचनावन्तः.....उस्रियाः**। लिङ्गभेदात् दुर्ग व्याख्यानम् ॥ २३. [२] **सोमदातृभ्यो**—त१.२.३.४.५–भ२.६.७ । सोमं दातृभ्यो-त६-मॅ-मु ॥ ११६. ४. [३] **स सोमो**—ग-त३-भ१.४.५.७ । सोमो--त-भ७-मॅ-मु ॥ ११ [४] **स सोमो**—ग-त-भ२.४.५.६-मु । सोमो--भ१.७-मॅ ॥ १६ **भूतजातं**—त३-भ१.२.७-मु । भूतजातं च–त२.५.७-भ४.६-मॅ ॥ २४. [५] **सः सूर्याद्धि**—ग-त३.७-भ१.२.४-*मॅ-मु । स सूर्याद्धि--त१.२.६; स सूर्याद्धि--त४.५; स सूर्यादि--भ६; स सूर्यः--भ७ ॥ ११७. ३. [६] **तस्य**--त३-भ१.२.५ । रसस्य--त१.२.५.६-भ४.६-मॅ-मु ॥ ११८ ३. [९] **उदकनामैतत् सर्वमुदकं**--ग-त-भ२.५.६-मु । उदकं–भ१.४.७-मॅ ॥

[९. ६९] ११८. ३० [१] **सोम**—*मॅ । यज्ञेष्वपि सोम--ग; यद्वोपव सोम--त१; यद्वोपव सोम--त२.४.५.६-भ६; यद्वोपच सोम--त३-भ२.४. द्वोपव सोम--भ१.७; यद्वा सोम--त७ । च सोम–मु ॥ ११९. १८. [३] **पूतो भवति वा**—ग-त-भ२.४-मु । पूतो भवति–भ१.६.७-मॅ ॥ २६ **सोमः**—मु । सोमं-§ । सोम- मॅ ॥ १२०. १७. [५] **मृजी शौचा**°—त२.३.६.७-भ-*मॅ-मु । मृज्ञी शौचा°–ग; मृजी शोबा°–त४; मृजी शौबा°–त५ । 'मृजू शौचा°' इति धातुपाठः ॥ २०. **निर्नेजनाय**—ग-त२-भ१.४-*मॅ । निर्निजनाय–त१.३.६. ७-भ२.७ मु; निर्नजनाय–त४; निर्भजनाय–त५; निर्णेजनाय–भ६ ॥ १२१. १३. [७] **परिस्रुताः**—त-भ-मु । परिष्कृताः–ग । परिस्तुताः–मॅ (मुद्रणदोषः ?) ॥ १७. **प्रजाश्च**—ग-त२. ३-भ२.४.६-मु । प्रजाः–भ१ । प्रज्ञाश्च–त७-मॅ ॥ १२२. २०. [१०] **बाधकानामसिता**—ग-भ४-*मॅ-मु । बाधकानां आसिता–त-भ६; बाधकां असिता–भ१.२.७ ॥ २१. **पवमानेन परिप्लुते**—मु । पवमानेन परिते–ग-त-भ२.४.५.६; पवमाने परिते–भ१.७ । पवमाने–*मॅ । मु-पुस्तकपाठः समीचीन इति मॅक्समुल्लरमहाशयानां मतम्[2] ॥

1. Preface to the Second edition, Vol. IV. p. clxxii. 2. Ibid p. clxxi.

[९. ७०] १२३. १६ [२] वरणार्थं—*मँ । वर्षणार्थ–ग; वर्णार्थ–त-भ-मु ॥ १२४. १९. [५] रुन्धन्ति—त३-भ१.२-मु । रुधंति–ग; रुधंति–त-भ४.६ ॥ २८. [६] स्वभूतो—ग-त३ । स्वरूपतो–त-भ-मँ-मु । ' तस्य ' इत्यस्य स्थाने ' तस्याः ' इति भाष्यम् ॥ १२५. १३. [७] स्थाल्याग्रयणं—त-भ-मु । स्थास्या ग्रहणं–मँ ॥ १२६. १८. [१०] बाधां—त-भ१.२. ६.७-मु । बाधा–भ४; बाधां त्विनाश्य–ग; बाधान्–मँ ॥ १९. तिपि.....तिपो लोपः—त-भ १.४-मँ । तिपि...तिपे रूपं–ग; तिपि तिलोपः–त३-भ२.६.७-मु । मध्यमपुरुषेण व्याख्यातत्वात् 'तिपि.....तिपो लोपः' इति भाष्यम् ॥

[९. ७१] १२६. ३२ [१] पय उदकं—ग-त३.४-भ.१.२.५.७-मु । उदकं--त१.२.५.६.७-भ४.६-मँ ॥ १२७. १. किंचायं सोमः—*मँ-मु । किंच यं सोमं--ग-त ५.६.७-भ७; किंचायं सोमं--त१.२.३.४-भ१.४.६; किंच सोमः--भ२ ॥ १०. [२] बाधकमस्य—त-भ२.६-मु । बाधकस्य--भ१.७-मँ ॥ १२८. २५ [६] आ रिणन्ति—ग-भ ६-*मँ-मु । इतरलिखितपुस्तकेष्वबद्धाः पाठाः ॥ १२९. २. [७] विशेषेणाक्तः—त४ । विशेषेणक्तः--त५.७; विशेषेण–मँ-मु इतरेषु च ॥ ४. [७] सर्वेषु । सवनेष्वित्यर्थः । ऋ. सं. ९. ७५. ३ द्रष्टव्यम् ॥ १४. [८] सोमस्य स्वभूतो वर्णः—ग-*मँ-मु । सोमस्वभूतो वर्णः–त१.२.६; सोमस्य स्वभुतो वर्णः–त३.४-भ२.६.७; सोमस्वभु - - नो वर्णः--त५; सोमस्वभूतो वर्णः–त७; सोमस्य स्वभुवो वर्णः–भ१; सोमस्य स्वभुवनो वर्णः–भ४ ॥

[९. ७२] १३०. १२ [१] कलशे द्रोणाभिधाने—ग-त३-भ२.४ । कलशो द्रोणाभिधानः–त; द्रोणकलशो द्रोणाभिधानः–भ६ कलशे कलशो द्रोणाभिधानः–मँ-मु ॥ २६. [२] दशभिः दशसंख्याकाभिः–ग-त१.२.३.४.६.७-भ२-मु । दशसंख्याकाभिः–त५-भ१.४.६. ७-मँ ॥ अङ्गुलीभिः—त३-भ१(२).२-मु । मँ इतरेषु च नास्ति ॥ १३१. २८. [५] अभिमन्यमानान्—ग । अभिगम्यमानान्–भ२ । अभिमानान्–त-भ१.४.७-मँ-मु ॥ ३१. दृश्यन्ते—*मँ । दृश्यते--ङ्-मु ॥ १३२. १ विः—भ१.७ । वेः -मँ-मु इतरेषु च ॥ ११.[६] संगच्छन्ति—ग-त३.४-भ१.२.४-मु । गच्छंति–त१.२.५-भ६-मँ ॥ १७. [७] उच्छ्रिते पदे—त-भ२.६ । उछिते प्रादेशे–भ७ । उच्छ्रिते प्रदेशे–मु । उच्छ्रितप्रदेशे–मँ ॥ २८. [८] अदाभ्यग्रहे त्रिभि°–भ१(२). २.४-*मँ । अदाभ्यग्रहहातृभि°–ग; अदाभ्यग्रहो त्रिभि°–त-भ१.६.७ । अदाभ्यग्रहात्रिभि°–मु ॥ १३३. १ मा वियोक्षीः—भ१(२) । मा वियणक्षीः–ग; मा नियोक्षीः–त३-भ २.५; स्वानियोक्षीः–भ.१.७; मा नियोक्षाः–भ४ । त-मँ-मु-पुस्तकेष्वेतन्नास्ति ॥ २९. [८]तेरनं .....सप्तकृत्वो वा । आपस्तम्बश्रौत[illegible]त्र एतदन्वेषणीयम् । इदं सूत्रं ऋ. सं. ९. १०७.५ भाष्येऽप्युद्धृतम् । तत्र ' आधूनोति ' इति [illegible]. ॥ १५. [९] स्वभूतस्य—भ४ (२) । स्वभूतं तस्य ग; भूतस्य–त-भ । एवंभूतस्य–मँ-मु ॥

[९. ७३] १३३. २४ [१] ' हनुरधिषवणफलकः' इत्याम्नानात् हनुस्थानीये—भ१ (२) । हनु अधिषवण इत्याम्नानात् हनुस्थाने-(हनुस्थानीयाधि°–ग)–ग-त३-भ२.४.५.६; हनु अधिषण इत्याम्नानास्वनुस्थाने–भ१.७; हनु–त । मँ-मु-पुस्तकयोरेतन्नास्ति ॥ २६. शब्दशब्दन् वा—ग-भ१(२) । तदस्य शब्दयन वा–त१; तदस्य शब्दयेन वा–त२.६.७; तदस्य शब्द-

न्वा--त३.भ४.६; तदस्य शब्दयन वा--त५; तदस्य शब्दयन्--भ१; तदस्य शब्दस्य यत्--भ२; तदस्य शब्दयमानस्य वा--त४। तदास्य शब्दयन्वा--मु। तदास्यशब्दयन्वा--मँ॥ १३४. १ पूजयन्ति वा—त-भ-मँ-मु। वा इति पदात् 'पूरयन्ति पूजयन्ति वा' इति भाष्यम्॥ १३५. १. [४] सहस्रधारे। बहूदकधारा—त२.३.७-भ१.२.४-मु। सहस्रधारे बहूदकधारे–भ६। सहस्रधारेऽव उदकधारा–मँ। ऋ. सं. ९. ७४. ६ द्रष्टव्यम्॥ २ स्थिताः समस्वरन्—भ१(२)। स्थिता–भ१। स्थितां–मँ इतरेषु च। पृथिवीं समस्वरन् वृष्ट्या--मु॥ ६ राजभृत्या यथा—भ१(२)। राजा–भ१.७। राजानो--मँ-मु इतरेषु च। विचारयितुं—ग-त१.२.३. ६.७-भ। विचारयितुं (१)–त४. ५-मँ-मु। विचारयितुं नाम अन्वेषितुम्॥ एते–भ१(२)। एव ते–भ१; एत एव ते–भ४। एव ते–त-मँ-मु॥ २८. [६] नरश्चापाहासत—*मँ। नरश्च तानहासत–ग; नरश्च त्वमहासत–त-भ१.२.४.६; नरश्च जपहास–भ७। नरश्च अपहासत–मु॥ १३६. ५ गन्धर्वेष्वन्तरिक्षेऽवातिष्ठते—भ१(२)। °गंधर्वाश्चेतंतरिक्षेविष्ठन–भ१; °गंधर्वाश्चेतंतरिक्षेविष्ठना–त२-भ४; °गंधर्वाश्चेतंतरिक्षे तिष्ठंति-भ६; °गंधर्वेद्वयतरिक्षेष्ठन्–भ७। °गंधर्वाश्चांतरिक्षेऽतिष्ठन्–मँ-मु। अस्मत्स्वीकृतपाठ एव शुद्धः॥ ६. [७] गोरूपया—ग-भ६। याः गोपाया–भ१.७। गोपया–त-भ४-मँ-मु॥ ८. मरुतः स्पशः मध्यमया वाचा—भ१(२)। मध्यमवाचा प्रभव मरुतः स्पशः वाचा–ग; मध्यमवाचा प्रप्र मरुतो (मरुते–त) शसः वाचा–त-भ१.२.४.७; मध्यमवाचा प्रथममयारुतो शसः वाचा–भ६। मध्यमवाचा पुत्रा मरुतः स्पशो वाचा–मु। मध्यमवाचः पुत्रा मरुतः स्पशो वाचा–*मँ॥ १३७. ४ [९] लेट्यागमः—भ१·२.४–*मँ। द्रिले सर्वागमः–ग; लेट्यडागमः–त-भ७-मु॥

[९. ७४] १३७. २९ [२] गतेर्निघातः—त३-भ१.२.४-*मँ-मु। गतेनघातः--ग; गच्छतेर्निघातः–त-भ६; गतेविघातः–भ७॥ १३८. ६. [३] अस्मद्यङ्—ग। तस्माद्यङ्--त-भ-मँ-मु॥ ७. इन्द्रस्य—ग-भ१(२)। इंद्रः–त-भ-मँ-मु। ८. मार्गो—ग-त-भ१. २. ४. ६। मार्गे–भ७-मँ-मु। इन्द्रस्य गमनार्थं मार्गो विस्तीर्णोऽभवदित्येव शुद्धं वाक्यम्। इंद्रः गंतुं मार्गे विस्तीर्णोऽभवादिति मॅक्समुल्लरपाठोऽनन्वितः॥ २४. [४] मापोरित्वे रुन्निति—*मँ-मु। लिखित-पुस्तकेष्वबद्धाः पाठाः॥

[९. ७५] १४१. १७ [३] हिरण्यपाणिरभिषुणोति। ऋ. सं. ९. १. २; ९७. १ भाष्येऽप्युद्धृतमेतद्वचनं कुत्रत्यमित्यन्वेषणीयम्॥ १८ [३] 'नियम्यमानः सोमः' इत्येतावत्पर्यन्तो भाष्यभाग उत्तरवाक्येन न संगच्छते। अत्र भाष्ये रचनादोषो दृश्यते। 'ततः ऋतस्य.....दोग्धु-त्वमभिहितम्' इत्ययं भाष्यभागः 'अवक्रन्दति शब्दायते' इत्यस्यानन्तरं यदि स्थाप्येत, 'सोमः' इति शब्दस्य च द्विरुक्तिर्यदि त्यज्येत, तर्हि समग्रं भाष्यं समीचीनं सुसंगतं च भवेत्॥ १४२. १३. [५] वचनवन्तः। 'वज्रनवन्तः' इति यास्कपाठः॥

[९. ७६] १४४. २ [४] मनुष्यवाक्यनृनशब्द°। अनृतशब्दो मनुष्यवाची कुत्र वर्तते?॥ ऋतशब्दस्य देवार्थः। 'देवार्थः' इति प्रयोगो न शुद्धो दृश्यते॥७ किं। रजः—*मँ। रजः--ग। किंच रजः--त-भ-मु॥

[९. ७७] १४५. ६ [२] **तिरस्तीर्णं तिरस्कुर्वन्** ? १५. [३] **उपरता अत्रेत्युपराः** भ१ (२)-*मॅ-मु । उपरता वा अत्रेत्युपराः--ग; उपरता च अत्रेत्युपराः--त१.२; उपरता च अत्रेत्युपराः--त३.४.५.६.७-भ४; उपरता च अत्रेत्युपचारः--भ१.७; उपरतावत्रेत्युपराः--भ६ ॥ [५] **वरुणः**—इति न व्याख्यातम् ॥ १४६. ५. **वृजनेषु**—त७-मु । **वृजिनेषु**—मॅ इतरेषु च । 'वृजनेषु' इति संहितायाम् । स एव युक्तः पाठ इति मॅक्समुल्लरमहाशयाः[1] ॥

[९. ७८] १४७. ७ [३] **ता एता आपः ईमेनं**—भ१(२) । ता ईमेनं--ग । ता ईमेना एवेमेनं--त-भ-मॅ । ईमेनं पवमानं--मु ॥ ८. **ता एव**—त४-भ६ । ता पव—त१.२.५.६; ता एताः--भ१(२) । त एते--भ१.७-मॅ-मु ॥ १७ [४] **स्वर्गस्य सुखस्य** । विकल्पेन व्याख्यातत्वात् 'स्वर्गस्य सुखस्य वा' इत्यावश्यकम् ॥ [५] **द्रविणानि धनानि**--त३-भ । द्रविणानि--ग-त-मॅ-मु ॥

[९. ७९] १४८. १५ [२] **प्र धन्वन्तु**--ग-त-भ४. ६ । धन्वंतु--मु । प्र णो धन्वंतु प्रधन्वंतु--मॅ ॥ २६. [३] **समरीत**—त१.२.३.६.७-भ२.४-*मॅ-मु । समरीत्—त४.५; समरीन्—भ६ ॥ १४९. ८. [४] **द्युलोकस्थसोमांशभूतं**—ग-त३.४-भ२.५.६-मु । कस्थसोमांशभूतं—त१.२.५.६.७ । सोमांशभूतं—भ७-मॅ ॥

[९. ८०] १५०. २१ [३] **संक्रीडमानो**—ग-त-भ२.४.६-मु । स क्रीडमानो—भ१. ७-मॅ ॥

[९. ८१] १५१. २१ [२] **स यथा**—ग-त३-भ१.२.४.७-मु । यथा—त-भ६-मॅ ॥ २२. **सोमसजुषां**—*मॅ । सोमसजोषां—त-भ१.२.६-मु; सोममजोषां—भ४ ॥

[९. ८२] १५३. २५ [४] **तद्गर्भत्वं**—ग-त३-भ२. ६ । गर्भत्वं—त-भ१.४.७-मॅ-मु॥ १५४. ३ [५] **सोम त्वं**—ग-त३.४-भ१.२.४.७ । सोम—त१.२.५.६.७-भ६-मॅ-मु ॥

[९. ८३] १५५. ८ [३] **प्रज्ञावन्तो देवा**—ग-त३-भ । प्रज्ञावंतो—त-मॅ-मु ॥ ९ **पितरः पालका**—ग-त३.४-भ१.२.४ । पालका—त१.२.५.६-भ६-मॅ-मु ॥ २३. [४] **पाशसमूहस्वामी**—ग-भ४ । पशुसमूहस्वामी (!)—मॅ-मु इतरेषु च ॥

[९. ८४] १५७. १४ [४] **वायुभिरेव**—भ१ (२)—*मॅ । वायुरेव—मु इतरेषु च ॥

[९. ८५] १५८. १५ [२] **संग्रामात्**—ऽ-मॅ-मु । 'संग्रामान्' इति स्यादिति मॅक्समुल्लरमहाशयाः संभावयन्ति ॥ १६०. २६ [११] **उत्पतन्तं**—भ६ । उत्पततं पतयंतं—मॅ-इतरेषु च । वर्तमानं सुपर्णं शोभनपर्णोपेतं पश्चादुपपतिवांसं उपपतयंतं सोमं—मु ॥ भाष्यकारैः 'उपपतिवांसम्' इति पदं विभज्य व्याख्यातम् ॥

[९. ८६] १६१. ११ **नीवावरी**—ऽ-मॅ । निवावरी—मु-अनु. । **आकृष्टा**—इति भाष्यकाराः पठितवन्तः । 'अकृष्टा' इत्यनुक्रमण्यां तद्भाष्ये च ॥ १५. **पृश्नयो**—ग-त३.७-भ१.२.४-*मॅ-मु । प्रश्नयो—त१.२.४.५.६-भ६; पृश्नये—भ७ ॥ **तृतीये त्रयः** । 'तृतीयेऽत्रयः' इत्यनुक्रमणीपाठः । 'चतुर्थे दशर्चेऽत्र इतिनामानः' इति षड्गुरुशिष्यकृतायां वेदार्थदीपिकायाम् । 'तृतीये त्रयः'

1. Preface to the Second edition, Vol. IV. p. clxxviii.

इति सायणाचार्याः ॥ १६ पञ्चान्त्यास्तिस्रो §-मॅ-मु । पंचात्या–अनु. ॥ १६२. ११ [३] अथ प्रत्यक्षकृतः । ' अथ परोक्षकृतः' इति भाष्यम् ॥ १६३. १३. [७] ततस्तदर्थं—मु । ततो तदर्थ--(?) त-मॅ । तदर्थ--भ ॥ १६४. ३ [९] तादृशः सोमो महानुभावः सोमः पुनानः पूयमानः । क्लिष्टेयं रचना । पुनानः इति प्रतीकमग्रे गृहीतमेव । अत्रैतदनावश्यकम् । ' तादृशो महानुभावः सोमः' इत्यलम् । तादृशः सोमो महानुभावः पुनानः पूयमानः–मु ॥ १६५. ७. [१३] शोध्यमानश्च—भ-मु । सूयमानः शोध्यमानश्च–मॅ इतरेषु च । ' सूयमानः' इत्यनावश्यकम् ॥ १७. [१४] दिवि स्प्रष्टारं—ग-भ६ । दिवस्पष्टारं–त१.२.५.६; दिवस्प्रष्टारं–त३.४-भ४; दिवि स्रष्टारं--त७ । देवस्प्रष्टारं–भ१.२.७-मॅ । दिवः स्प्रष्टारं–मु । ऋ. सं. १०. ३६. ६; ८८. १ द्रष्टव्यम् ॥ २७. [१५] उत्कृष्टे–मु । तदुत्कृष्टे–त-भ१.२.६ । महत्युत्कृष्टे–भ७-मॅ । महति इत्यनावश्यकम् ॥ ऋ. सं. १. १६४. ३९ इत्यादि द्रष्टव्यम् ॥ व्योमन्—त-भ१.२.४ । व्योमनि–भ६-मॅ । व्योमन् व्योमनि–मु । ऋ. सं. १.१६४. ३९ अत्र व्योमन् इति पदमेतद्रीत्या विकल्पेन व्याख्यातम् ॥ २८ यतः—§-मु । अतो–मॅ । ' विऽओमनि । अतः' इति पदपाठः । भाष्यकारैः ' व्योमन् यतः' इति स्वीकृतमिति व्यक्तं ज्ञायते । ' अतः' इति पदस्य ' यस्मात्सोमात् ' इति व्याख्यानं नितरामशक्यम् । नापि ' अस्मात्सोमात् ' इति व्याख्यानं संभवति, ' स सोमः ' इति पदयोरग्रे विद्यमानत्वात् । मॅक्समुल्लरटिप्पण्यामयं पाठो न निर्दिष्ट इत्याश्चर्यं खलु ॥ १६९. ५ [२५] नवते क्षोदते । ' नवते क्षोदति ' इति निघण्टुः ॥ १६. [२६] रसमयान् । एतत्केनान्वितम् ? ॥ २४ [२७] दीप्तयः—त३-भ१.२.४.७ । रश्मयो दीप्तयः–ग । रश्मयः–त-भ६-मॅ-मु । रश्मिशब्दः पुंलिंगः । अत्र तु स्त्रीलिङ्गस्यापेक्षा । अनन्तरवर्ती ' दीप्तिराक्षे ' इति प्रयोगोऽपि स्वीकृतपाठस्य युक्तत्वं द्रढयति ॥ २५. [२७] 'गोभिः' इत्यस्यानन्तरं ' पयोभिः ' इति व्याख्यानमपेक्षितम् । ऋ. सं. ९. ६१. १३ द्रष्टव्यम् ॥ १७१. २ [३१] अवक्रन्दन्—त३.७-भ२-*मॅ । अवक्रंदति--ग; अवक्रंदत्- त१.२.४.५.६-भ-मु । अव चक्रदत् इति क्रियापदं विशेषणत्वेन व्याख्यातम् ॥ १३ [३२] भाष्यस्यान्तिमं वाक्यं न सम्यगर्थमावहति ॥ २१. [३३] नृभिर्नेनृभिः । ' हरिः' इति पदस्य स्थाने ' नृभिः ' इति भाष्यकारा अपठन् । भ१ (२) लिखितपुस्तके संहितापाठेऽपि ' हरिः ' इत्यस्य स्थाने ' नृभिः ' इति दृश्यत इत्याश्चर्यम् ॥ १७२. २ [३४] ' धनेभ्यो हिताय ' इत्यस्य स्थाने ' जनेभ्यो हिताय ' इति बहुषु पुस्तकेषु वर्तमानः पाठः ' धन्याय ' इत्यस्य स्थाने जन्याय इति भाष्यकारैः पठितं स्यादित्याशङ्क्यते । एकस्मिँल्लिखितपुस्तके [भ१(२)] ' जन्याय ' इति पाठः साक्षादुपलब्धः ॥ १८. [३६] पयोभिराच्छादयन्तीति शेषः । °च्छादयन्तीत्यर्थः इति साधु ॥ २६. [३७] वीयसे गच्छसि । वी गत्यादिषु । ' वि । ईयसे ' इति पदपाठः । ' वीयसे ' इति भाष्यकारा अपठन् ॥ १७५. ६. [४४] अभिषवादिकर्मणा ... दशापवित्रात् । दुष्टः प्रयोगः ॥ २३. [४६] द्रोणकलशाधवनीय°—त२.३.७-भ१.२. ७ । द्रोणकलशावनीय°–ग; द्रोणकलशधवनीय°--भ४ । द्रोणकलशाधावनीय°–त१.४.५.६-भ६-मॅ-मु ॥

[९. ८७] १७७. २३ [५] किमिव—त-भ२. ४. ६ । किमिश्व--भ१ । किमिच्छवः–भ७-मॅ-मु । उत्तरपादस्य दृष्टान्तत्वात् ' किमिव ' इत्येवावश्यकम् ॥ १७८. १६ [८] पात्रं स्वयं प्राप्तव्यं–*मॅ । पात्रं स्वया प्राप्तव्यं–ग-त३-६-भ; प्राप्तं स्वया प्राप्तव्यं–त४.५ । पात्रं तया प्राप्तव्यं-मु॥

[९. ८८] १७९. २० [२] **अस्मद्विरोधीनि**—ग-त४-मु। **अस्मद्विरोधाधीनि**—त१. २. ५; अस्मद्विरोधादीनि—भ६; अस्मद्विरोधारत्—त६-भ७; अस्मद्विरोधाच्चित्—भ४। **अस्मद्विरोधात्**—भ१-*मॅ। *लिखितपुस्तकपाठसादृश्यात्—मु-पुस्तकपाठो युक्ततर इति मॅक्समुल्लरमतम्*[1]। २८. [३] **हवमाह्वानं**—§-मॅ। 'हवे' इति पदपाठः। हवे हवं—मु॥

[९. ८९] १८१. १८ [१] **पवमानः पूयमानः**—ग-त३-भ। पवमानः—त-मॅ-मु॥ २०. **निषीदति**—भ१ (२)-*मॅ। लिखितपुस्तकेऽन्त्यपादस्य व्याख्यानं लुप्तं दृश्यते। निषीदति वा मातुः पृथिव्या उपस्थे—ग; निसीद निषीदति मातुः दशापवित्रस्य उत्संगे द्युलोकस्य वा उपस्थे सोमः आ वा—त१.२; निषीदति वा—त३-भ; निषीद निषीदति निषीदति वा—त५; निसीद निषीदति वा—त६; नि सीद मातुः.....उत्संगे.....सोम आ निषीदति वा—त७; नि षीदन् निषीदति वा—भ६। नि सीदति मातुः दशापवित्रस्य उपस्थे द्युलोकस्य वा उपस्थे अथवा वने सोमः आनिषीदति—मु॥ १७. [४] **मार्जयन्ति**। मर्जयन्ति इति संहितापदपाठयोः॥ १८२. १३ [४] **उक्तलक्षणाश्वस्थानीयं व्याप्तं**—मॅ। उक्तलक्षणाश्वमश्वस्थानीयं व्याप्तं—भ७। उपलक्षणमश्वमश्वस्थानीयं व्याप्तं—मु। 'व्याप्तम्' इत्यस्यानन्तरं 'वा' पदस्य निवेशनेन मु-पुस्तकपाठः समीचीनतरः स्यादिति मॅक्समुल्लरमतम्[2]॥ १८३. ८. [७] अस्य मन्त्रस्य भाष्यं लिखितपुस्तकेषु सर्वथा नोपलभ्यत इति मॅक्समुल्लरमहाशयैरुक्तम्[3]॥ अस्माभिस्तावत् केषुचिल्लिखितपुस्तकेषूपलब्धं भाष्यं न सायणाचार्यकृतमिति मत्वा अधस्टिप्पण्यां दत्तम्॥ वस्तुतः मॅक्समुल्लरसंपादितेषु केषुचित् पुस्तकेष्वेतेन भाष्यम्॥

[९. ९०] १४ [१] **रथो न** इति पदद्वयं न व्याख्यातम्॥ १७ [१] **प्रगच्छति**—ग-त३ भ४। प्रयच्छति (?)—त-भ१.२.६.७-मॅ-मु॥ १८५. ९ [६] **विमृष्य**—*मॅ-मु। निष्कृत्य—ग; निकृष्य—त-भ॥

[९. ९१] १८५. २० **षष्ठं**—*मॅ। अष्टमं—§-मु॥ १८६. ३१ [४] **पवमान**—ग-त३-भ१। पवमानः (?)—त-भ४.६.७-मॅ-मु॥ ३२ **ऊर्णुहि**। 'वि' इति पदं न व्याख्यातम्। **विविधं ऊर्णुहि**—मु॥ १८७. २ **तेषां**—भ४-*मॅ। अपां—ग; येषां—त-भ१.६.७-मु॥ २२ [६] **तोका पुत्रान्**—*मॅ। तोकान् पुत्रान्—ग-त३-भ४. ६; तोकान्—त-भ२; लोकान्—भ१.७। तोका तोकान्—मु॥

[९. ९२] १८८. १४ [२] **उपविशन्**—§-मॅ। सीदन् उपविशन्—मु॥ **सप्तसंख्याका**—§-मॅ। **सप्त सप्तसंख्याका**—मु॥ १८९. १ [४] **स्वभूताः**—भ७-*मॅ-मु। स्वभूताः—ग; प्रभूताः—त-भ१.२.४.५.६॥ ४ **उदकैः**—मॅ। बलैरुदकैर्वा—ग; उदकैर्षा—त-भ१.२-मु; उदकैर्बलैर्वा—भ४; उदकै—भ७॥ ५ **सप्र**—ग-भ। त-मॅ-मु-पुस्तकेषु नास्ति॥ १२ [५] **प्रसिद्धं**—ग-भ। प्रसिद्धस्य—त-मॅ-मु॥

[९. ९४] १९२. २१ [३] **सांग्रामिकाणि**—ग-भ२। **साग्रामिकानि**—मु। **संग्रामिकाणि**—त-भ१-४-६-मॅ॥ १९३. १३ [५] **विश्वानि**—§-मॅ। तानि विश्वानि—मु॥

1. Preface to the Second edition, Vol. IV. p. clxxviii.
2. Ibid. p. clxxi. 3. Ibid. p. clxxiii.

[९. ९५.] १९४. १४ [३] **अवर्णश्च**—*मॅ-मु । **उवर्णश्च**--त-भ१.२.४.६; **उवर्णस्य**--भ७; **अभ्यासस्य उकारस्यात्यकारादेशश्छांदसः**--ग ॥ १९५. ७ [५] **धनप्रदानाभिमुखीं कुरु**--त३.४-भ१.२.४-*मॅ-मु । **धनप्रदानाभिमुखी कुरु**—ग-भ७; **धनप्रदानाभिमुखीं**—त१.२.५.६.७-भ६ ॥ **त्वं च**—ग-त३-भ४ । **त्वं**--त-भ१.२.६-मॅ-मु ॥

[९. ९६] १९५. २० [१] **कृतानीन्द्रस्य**—*मॅ । कृतान् इंद्रस्य--ऽ-मु ॥ १९६. १९ [४] **देवैस्तायमानाय**—त-भ२.६ । देवैः स्तूयमानाय--भ१.७-मॅ-मु ॥ १९७. १५ [६] **छेदकोऽसि** । ' स्वधितिर्वेनानाम् ' इति मन्त्रभागस्य प्रत्यक्षकृतं व्याख्यानं शिष्टमन्त्रभागस्य परोक्षव्याख्यानेन न संगच्छते ॥ २१ [७] **ईशिताः**—त-भ-मॅ-मु । ' ईशित्रीः ' इति भाव्यम् । ऋ. सं. ९. ६८. ८; ९५. ३ द्रष्टव्यम् ॥ १९८. २ [८] **सः सोमः.....अभि अर्ष अभिगच्छ** । पुरुषव्यत्ययेन व्याख्यानं दुष्टम् । ' हे सोम ' इति भाष्यादौ गृहीत्वा ' सः त्वम् ' इति कृतं चेत् शुद्धं भवेत् ॥ १९९.४ [११] **अभिगतस्त्वं**—ऽ-मॅ । चतुर्थपादो न व्याख्यातः । पादटिप्पणी द्रष्टव्या । अभिगतस्त्वं वीरेभिर्वेगवद्भिः अश्वैर्व्याप्तैः--मु । अवातः इति पदं भाष्यकारैः प्रायः नञ्पूर्वकं व्याख्यातम् ॥ ५. **अस्माकं**—ऽ-मॅ । अस्माकं मघवा इंद्रो भव भूयाः--मु ॥ १३ [१२] एवं--ऽ-मॅ । एव एवं-मु ॥ २३ [१३] उदकवतो--भ४-*मॅ । उदकवभो--ग; **उदकवंति**--त-भ२-मु; उदकवतो--त३-भ१.७; उदवंतो--भ६ ॥ २००. १६ [१५] **वोळ्हा वोढाश्वः**—ऽ-मॅ । वोळ्हा न वोढा अश्व इव-मु ॥ २५ [१६] **आजादेशः**—त१.२.५.६-भ१.२.६.७-मॅ-मु । सूत्रे आजादेशाभावात् ' आदेशः ' इति भाव्यम् ॥ २०२.९ [२०] **यूथानि**—ऽ-मॅ । यूथा यूथानि--मु ॥ २८ [२२] **कुर्वन्**—ग-त-भ४.६ । कुर्वन् सोमस्य--भ१.२ । कुर्वन् सोमः--भ७-मॅ-मु । 'सोमः' इति पदमग्रे विद्यते खलु ॥ २०३. १५ [२४] **सुष्टु**—ऽ-मॅ । सुदुघाः सुष्टु--मु ॥

[९. ९७] २०३. ३१ [१] **हिरण्यपाणिरभिषुणोति** । इयं श्रुतिः कुत उद्धृता ? ऋ. सं. ९.१.२; ७५.३ भाष्येऽपीयं दृश्यते ॥ २०४. १९ [३] **अविभवे**—त३.४.५-भ । अविभये--त१.२.६.७-मॅ-मु ॥ २८ [४] **प्रभूतं धनाय**—ग-त३-भ१.२.४.७-*मॅ । प्रभूतधनाय--त-भ६-मु ॥ २०५. २ **लेट्यडागमः**—ग-त४-भ१.२.४ । लेट्यडागमः--त१.२.३.५.६.७-भ६-मॅ-मु ॥ ७ [५] **बहुविधधारोपेतः**—ग-त३.७-भ१.२.४ । बहुधारोपेतः--भ७ । बहुविधधारः--त१.२.४.५.६-भ६-मॅ-मु । ऋ. सं. ९.९७.१९ द्रष्टव्यम् ॥ २६ [७] **उद्धारयन्**—*मॅ-मु । उद्धरन्--त१.२.६; उद्धरयन्--त४.५-भ६ ॥ २०६. ८ [८] **हंसा इवाचरन्तो वा**—त३-भ१.२.४.७ । हंसान् रूपा वा--ग । हंसा इव चरंतो वा--त-भ६-मॅ मु ॥ १२. **घोशब्दस्य पृषोदरादित्वाद्रू इत्यादेशः**—*मॅ । घोषशब्दस्य पृषोदरादित्वादांगुष इत्यादेशः--मु । लिखितपुस्तकेष्वबद्धाः पाठाः । ऋ. सं. १.६१.२; ६२.१; मॅक्समुल्लरटिप्पणी च द्रष्टव्या ॥ १४ [८] **आङोऽनु°**—**आङ अनु°**--ऽ-मॅ । आङ् अनु°--मु ॥ २०७. १२ [११] **पवते**—ग-त१.३.६.७-भ । पवते क्षरति--त२-मॅ-मु । ' पवते ' इति पदं व्याख्यातचरम् ॥ १७ [१२] **प्रियाणि प्रीणयितृणि धर्माणि धारकाणि तेजांस्यृतुथा** । अयं पाठः मॅक्समुल्लरमहाशयैः मु-पुस्तकानुसारेण स्वीकृतः । परमस्माभिः ग-त३.७-भ१(२). २.४-पुस्तकेषु स उपलब्धः । प्रियाणि प्रीणि धारकाणि तेजांसि **ऋतुथा काले**--भ१.७ ॥ **कालेकाले** । अयं पाठः मु-पुस्तके विद्यमानोऽपि लिखितपुस्तकेष्वनुपलम्भा-

मॅक्समुल्लरमहाशयै न स्वीकृतः[1]। परमस्माकं ग-त-३.७-म१(२). २.४-पुस्तकेषु स उपलभ्यते। काले—म१.६.७ ॥ ३० [१३] इव आ। मु-पुस्तकमनुसृत्य मॅ-पुस्तके स्वीकृतः[2]। इव—§ ॥ २०८. २६ [१६] सुपथानि—§-मॅ। सुपथा सुपथानि—मु ॥ सुगा—§-मॅ। सुगानि—मु। 'सुगानि' इति प्रतीकम् ॥ २०९. २६ [१९] बहुविधधारोपेतः—ग-त३-म। बहुधारोपेतः—त-मॅ-मु। ऋ. सं. १. ९७. ५ द्रष्टव्यम् ॥ २१०. ४ [२०] अवद्धा इत्यर्थः—म१(२)-*मॅ-मु। अश्वा इवेत्यर्थः—ग; अवधीत्यर्थः—त-म१.२.४.६; अवधा इत्यर्थः—म७ ॥ २११. ६ [२३] क्षारयिता—*मॅ। क्षारयि—ग; रक्षयिता—त-म-मु; क्षरयिता—त३ ॥ ७ [२३] प्र पवते—ग-त ३-म१.२.५। पवते—त-म६.७-मॅ-मु ॥ १९ [२४] सुष्ठु संभृतं—ग-त३-म२.४। सुष्ठु तं भृतं—म१; सुष्ठु संभूतं—म५; सुष्ठु भृतं—म७। संभृतं—त-म६-मॅ-मु। 'सु' इत्यस्य व्याख्यानं 'सुष्ठु' इति ॥ २१२. ७ [२६] तथा आयज्यवः... ... च प्रेरयन्तु—ग-त३.४-म१(२).२.५.६। एतन्नास्ति त१.२.५.६-म१.४.७-मॅ-पुस्तकेषु। कीदृशाः सुमतिं शोभनमतिं यजमानं आयज्यवः यष्टुमिच्छवः विश्ववाराः विश्ववरणीयाः होतारो न इ.—मु। तृतीयपादस्य व्याख्यानं मॅक्समुल्लरमहाशयैः लिखितपुस्तकेषु नोपलब्धम्[3]। मु-पुस्तकपाठापेक्षयास्मत्स्वीकृतपाठः समीचीनतर इति विश्वसिमः। प्रथमं तावत् मु-पुस्तकपाठो लिखितपुस्तकेषु नोपलब्धः। सुमतिशब्दो यजमानार्थे क्वचिदेव प्रयुक्तः। 'आयज्यवः' इतिपदगत 'आ' इत्युपसर्गो न व्याख्यातः। 'विश्ववाराः' इतिपदस्थो विश्वशब्दस्तेनैव व्याख्यातः। तथा च 'सुमतिम्' इति पदस्य 'आयज्वनः' इति पदेनान्वयो न सम्यगर्थकरो नापि सायणरीत्यनुसारी। स्वीकृतपाठस्तावत् प्राचीनेषु पुस्तकेषूपलब्धः। तत्तत्पदानां व्याख्यानानि च सायणभाष्ये साधारण्येनोपलभ्यन्ते। 'आयज्यवः' इति पदस्य व्याख्याने ऋ. सं. १.३९.९; ८६.७; १८०.२८; ३.६.२; ५.८७.१; ६.२१.१०; २२.११; ४८.२०; ४९. ४; ७.५६.१४; ८.७.३३ अत्रत्यं प्रयज्युशब्दस्य व्याख्यानं प्रमाणम्। 'प्रेरयन्तु' इति पदस्य साधारण्येन पाठलोपः संजात इति प्रतिभाति ॥ २१३. ७ [२९] भजनसाधनं धनं—*मॅ। भजनसाधनं—§-मु ॥ २१४. ५ [३२] पन्थानं—§-मॅ। पंथां पंथानं—मु ॥ मार्गमभि—§-मॅ। मार्गमनु—मु ॥ 'अनु' इति संहिता ॥ २१५. ११ [३६] बहुधि—*मॅ। बहुधियं—§-मु ॥ २१६ २ [३८] प्रिया प्रियाणि—ग-त३.४-म४.५.६। प्रियाणि—म१.७ मॅ-मु ॥ ४. कारिणे न—ग-*मॅ-मु। यथा कारिणे च—त-म१.२.४.६; यथा कारिणे न—त३; यथा कारिणं—म५.७ ॥ भृतकाय भृतिं यथा प्रयच्छन्ति—*मॅ। भृतकाय यथा भृतिं प्रयच्छति—ग; कृतकाय भृतिं तथा प्रयच्छति—त-म६; भृतकाय (कृतकाय—म२; ऋतकाय—त३) भृतिं यथा प्रयच्छति—त३-म१.२.४.७। यथा कारिणे च कृतकाय भृतिं प्रयच्छति—मु ॥ २० [४०] समुद्रवन्ति—मु। समुद्रवंत्यस्मादाप इति—ग; संद्रवंति—त-म-मॅ। मु-पुस्तकपाठः समीचीनतर इति मॅक्समुल्लरमहाशयानां मतम्[4]। २१७. २७ [४४] वा वस्वो वसुनो—*मॅ। आपवस्व वस्वो वसुनो—त१.२.६.७; वा पवस्व वस्वो वसुना—त३.४-म१.२.४.७; वा पवस्व स्वो वसुनो—त५; चापवस्व स्वो वसुनो—म६; आपवस्व वस्वो वसु—मु ॥ २१८. १० [४५] स्थानं—म१.६.७।

1. Preface to the Second edition, Vol. IV. p. clxxviii. 2. Ibid. 3. Ibid.p. clxxiii. 4. Ibid. p. clxxviii.

योनिस्थानं—त-भ२-मॅ-मु। १९ [४६] काम—ग-त३-भ। कामद—त-मॅ-मु ॥ [५४] स्नेहयत् इति संहितापदपाठयोः। भाष्यकारैः स्नेहयत् इति पठितं दृश्यते ॥ २२१. १३ अञ्चति°— §। अचति°—मॅ-मु ॥ २१ [५५] मघवद्भ्यो धनवद्भ्यो—ग-त३-भ१.५.६.७। मघवद्भ्यो—त-भ४-मॅ-मु॥ २२२.१ [५६] लभन्त इति—*मॅ। लभंते—ग-त-भ-मु ॥ १९. [५८] एतन्नामिका—ग-त३-भ१.२.४.७। एतन्नामका—त-भ६-मु। एतन्नामकाः—*मॅ ॥

[९. ९८] २२३. २४ [४] मर्त्याय—§-मॅ। मर्ताय—मु॥ २५ धनं—मॅ। धनं प्रयच्छति तथा सति हे इंदो सहस्रसंख्याकं बहुरूपं धनं—ग। एतन्मन्त्रभाष्यं त्रुटितं वर्तते केषांचित् पदानां व्याख्यानाभावात्। धनं विवाससि। हे इंदो सोम त्वं सहस्रिणं सहस्रसंख्याकं रयिं धनं शतात्मानं अपरिमितपुत्रपौत्राद्युपेतं—मु ॥ २२४. ११ [६] स्वयशसं स्वभूत°—त१.२.६.७-*मॅ-मु। स्वयशसं प्रभूत°—ग; स्वयशसं भूत°—त३.४.५-भ ॥ २२५. २८ [१२] सोममश्याम अश्नीयाम—*मॅ। सोममश्याम अश्नवाम—ग; तत्रभवा सोममश्याम अश्नीम—त१.२.५.६.७; सोममश्याम अश्नाम—त३; सोममश्याम अश्नीम—त४-भ४; सोममश्याम अश्नाम—भ१; सोमं तत्रभवा अश्याम अश्नीम—भ२; तत्रभवं सोममश्याम अश्नीम—भ६; सोममश्याम अश्नवाम—भ७। तत्रभवं सोममश्याम अश्नीयाम पिबेम—मु ॥

[९. ९९] २२७. १३ [५] तं सोमं—ग-त३-भ। सोमं—त-मॅ-मु ॥

[९. १००] २२९. १५ [५] क्रान्तदर्शिन्—त३-भ। क्रांतदर्शन्—त४.५। क्रांतदर्शन—ग-त१.२.६.७-मॅ-मु ॥ अस्माकं—ग-त-३-भ। अस्मभ्यं—त-मॅ-मु ॥

[९. १०१] २३०. १०. षोळश श्यावाश्विरंधीगुर्यायाति°—§-मॅ। षोळशांधीगुः श्यावाश्विर्ययाति°—मु-अनु ॥ १७ [१] पुरःस्थित°—*मॅ। पुरःस्थितस्य—§-मु ॥ २३३. २९ [१०] स्वर्गप्रापका—त६-भ। सर्वप्रापका—त१.२.४.५.७-मॅ-मु। ऋ. सं. ९.२१.१ द्रष्टव्यम् ॥ २३४. २१ [१३] पुरापराद्धं मखमेतन्नामानं—भ१.४-*मॅ। मखमपराद्धं—ग; पुरा अपराद्धमखं एतन्नामानं—त१.२.७-मु; पुरा अपराधं मखं एतन्नामानं—त५; पुरा अपराद्धं मखं (मुखं-भ२) एतन्नामानं—त३-भ२; पुरापराद्धमखमेतशनामानं—भ६ ॥

[९. १०२] २३६. १५ [४] अनुशासति—ग-त-भ। अनुशासंति (?)—मॅ-मु ॥

[९. १०३] २३८. १२ [४] अहिंसितः—§-मॅ। अहिंस्यः—मु ॥ २४ [६] किंप्रत्ययः—भ। किंप्रत्ययः—त-मॅ-मु। ऋ. सं. ३.४९.२ द्रष्टव्यम् ॥

[९. १०४] २३९. ३ [१] शोभार्थं—त३.६-भ५। शोभनार्थं—त१.२.४.५.७-भ १.२.४.६.७-मॅ-मु ॥ २४०. १ [५] नः अस्मदीयानां—ग-त३.६-भ१.२.४। हे न अस्मदीनां—त१.४.५; हे न अस्मदादीनां—त७। नोऽस्मदादीनां—त२-भ६-मॅ-मु ॥ ऋ. सं. ९. १०५.५ द्रष्टव्यम् ॥

[९. १०७] २४६. ५ [५] तैरेनं ... समकृत्वो वा। एतदापस्तम्बश्रौतसूत्रेऽन्वेषणीयम्। ऋ. सं. ९.७२.८ भाष्येऽप्येतन्निर्दिष्टम्। तत्र 'आधुनोति' इति पाठः ॥ १९. [७] सोमः—*मॅ। सोमो भवान्—ग-त३.४.६-भ७; सोमो भवन्—त१.२.५.७-भ४.६-मु; सोमो

भवान–भ१ ॥ २१ अत्यन्तं देवकामो—*मॅ-मु। अत्यंतं कामो–ग-त१.२.३.५.६.७-भ१.४.६.७; अत्यंतकामो–त४-भ२ ॥ २४७. २५ [११] अलंक्रियते तद्वत्—ग-त१.६-भ। अलंक्रियते–त१.२.४.५.७-मॅ-मु ॥ २४८. ७ [१२] मधुररसस्य—ग-त२.६-भ। रसस्य–त१.२.४.५.७-मॅ-मु ॥ २५१. १० [२४] स तादृशः—ग-त३.६-भ१.२.७-मु। तादृशः–त१.२.४.५.७-भ४.६-मॅ ॥

[९. १०८] २५२. १६ [२] यस्य यं—ग-त३-भ। यस्य–त४.५.६-मॅ-मु ॥ १७ स्वर्दृशः सर्वस्य दर्शकस्य—ग-त३-भ२-*मॅ। ईदृशः सर्वस्य दर्शकस्य–त१.२.४.५.७-भ६; स्वर्विदः स्वर्गलंभकस्य–त६-भ१.७; स्वर्विदः स्वर्गलंभकस्य स्वर्दृशः सर्वस्य दर्शकस्य–भ४। स्वर्विदः सर्वस्य दर्शकस्य–मु। 'स्वर्विदः' इति संहिता। सायणाचार्यैः 'स्वर्दृशः' इति पठितं दृश्यते ॥ २४ [३] घृषिर् विशब्दने—*मॅ। घृषिरवशब्दने–ग; घृषिरविशते–त१.२.५.७; घृषिरविशब्दने–त३.४.६-भ१.२.७-मु; घृषिरनिशब्दने–भ४; घृषिरविशब्दे–भ६ ॥ २९ [४] एतन्नामकोऽगिरा—त२.३.४.७-भ४.७-*मॅ-मु। एतन्नामकोंगिद्वा–त५; एतन्नामकोंगिरा–त६-भ१.७; एतन्नामकोंगिरः यद्वा–भ६ ॥ २५३. ३ आनशुः व्याप्नुवन्। आशुः आनशिरे व्याप्नुवन्–ग-भ१.५; आनशुः आनख्योप्नुवन्–त१.२.५; आनशुः आनशिरे व्याप्नुवन्–त३ ६-भ२.४ ६.७; आनशुः आनशिरे आप्नुवन्–त४; आनशुः अन्नानि व्याप्नुवन्–त७-मु। आनशुः आप्नुवन्–*मॅ ॥ १७ [६] निरच्छिनन् निरगमयत्—त६-भ। निरच्छिनत् निरवासयत्–ग; निरच्छिनत् निरवामयत्–त३। निरच्छिनत्–त१.२.४.५-भ६-मॅ-मु। ऋ. सं. १०.६७.५ द्रष्टव्यम् ॥ २६ [७] स्तोतव्यं—ग-त३.४-भ१.२.६.७-*मॅ। तव्यं–त१.२.५.७; स्तोव्यं–त६; स्तोतव्य–भ४। स्तव्यं–मु ॥ २७ वनकक्षं—त१.२ ३.४.६.७-भ२.६.७-मु। नवकृक्षं–ग; वनशक्षं–त५। वनकक्षं–भ१.४-मॅ। 'वनकक्षम्' इत्येव संहितापाठः ॥ उदकानां कर्षकं—त३.४-भ१.२ ४.६। उदकानां वर्षकं–ग-त६ भ७-मु। उदकानामर्षकं—त१.२.५-मॅ ॥ २५४. १८ [१०] अभिषुतः—ग-त३.६-भ१.२.७। अभिषुतस्त्वं–त१.२.४.५.७-भ४.६-मॅ-मु ॥ २५५. २१ [१४] लेट्यडागमः—ग-त४-भ४। लेट्यडागमः–त१.२.३.५-भ१.२.६.७-मॅ-मु ॥ २५६. ७ [१६] एतेभ्यः—त२-भ६। यतेभ्यो–त१.४.५। तेभ्यो–मु। च तेभ्यो–मॅ। ऋ. सं. ९.७०.८ द्रष्टव्यम् ॥ —जुष्टः पर्याप्तः—ग-त३ ४.६-भ५.६। जुष्टः–त१.२.५.७-भ२.४-मॅ-मु ॥

[९. १०९] २५८. १० [१३] इन्दुः सोमः—ग-त३.६-भ२.५.७। इंदुः–त४.५.७-भ६-मॅ-मु ॥ २५९. १८ [२२] गव्यैः क्षीरादिभिः.....रिणन्—ग-त३.४-भ६। ('श्रीयमाणः' इत्यस्य स्थाने श्रियमाणः–त४; श्रयमाणः–भ६; 'मिश्रयन्वा' इत्यस्य स्थाने मिश्रइत्या–भ६; 'वसतीवरीः' इत्यस्य स्थाने वसतीवरीभिः–ग)। स्वीकृतपाठः त१.२.५.६.७-भ१.२.४-मॅ-पुस्तकेषु नास्ति। 'श्रीणन् प्रेरयन्' इति पदयोर्मध्य उत्तरार्धस्य व्याख्यानं नष्टमिति व्यक्तमेव। अस्मात्स्वीकृतपाठ एतन्न्यूनं सुयोग्यतया संपूर्यते। यद्यपि त४-भ६-पुस्तकयोः प्रान्तेऽयं लिखित उपलभ्यते तथापि सायणभाष्यरीत्यनुसरणादयं सायणकृत एवेति मन्तुमुचितम्। 'श्रीणन्' 'रिणन्' इति पदयोः सादृश्येन लिखितपुस्तकेषु पाठलोपः संजातः स्यात्। श्रीणन् प्रेरयन् उग्र उद्गूर्णः सोमो–मु। 'सोमोऽभिषूयते' इत्यन्तिमं पदद्वयमनावश्यकम् ॥

[९. ११०] २६०. १ [१] यापयिता विनाशयिता—ग-त३.६-भ। यापयिता—त१.२.४.५-मॅ-मु॥ २६२. ७ [९] निःष्ठाः—§-मॅ। निःष्ठा—मु। ऋ. सं. ३.३१.१० द्रष्टव्यम्॥ २० [११] यज्ञवान्—ग-*मॅ-मु। यजमानः—त-भ॥

[९. १११] २६३. ३० [२] आदरार्थं—*मॅ। आदरार्था—ग-त३.६-म१.४.७; आदरार्थे—त-भ६-मु; आदरार्थः—भ२॥ २६४. ९ [३] आदरार्थं—त४-*मॅ। आदरार्था—त१.२.३.५.६.७-भ। आदरार्थे—मु॥ १३ आदरार्थं—भ१.७-*मॅ। आदरार्थः—ग; आदरार्था—त-भ-मु॥

[९. ११२] २६४. २१ [१] सोमस्याजामित्वाय—§-मॅ। सोमस्य जामित्वाय—मु। निरु. ४.२० द्रष्टव्यम्॥ २६५. १२ [३] सर्वं त्रय्या विद्यया भिषज्यति। किंमूलेयं श्रुतिः ?॥ प्रक्षिणोति—त१.२.३.४.७-भ१.२.४.६-*मॅ-मु। प्रदाक्षिणाति—ग; प्रक्षिणेति—त६-भ७; प्रेक्षिणोति—त५॥ १७ जसः शसादेशः—*मॅ-मु; वस्याकानादेशः—ग; जसोकारादेशः—त; जस्याकारादेशः—भ॥ २८ [४] नर्मसचिवाः—ग-भ४-*मॅ-मु। नर्मशचिवा—त१.२.३.५-भ१.२.६; नर्मश्राविवा—त४; नर्मशायिव—त६-भ७॥

[९. ११३] २६६. २६ [३] दुहिता श्रद्धा नाम—ग-त३.४.६-भ। दुहिता—त१.२.५-मॅ-मु॥ २६८. २६ [१०] यद्वा कामा.....प्रज्ञापकस्य—ग-त३.४-भ। (त४-भ६-पुस्तकयोः प्रान्तेऽयं पाठो लिखितोऽस्ति। 'निकामा' नास्ति—भ४; अभिलाषनिकामाश्च—भ१ २.४; यत्र च विद्यते—त७-भ४.६; यत्र च लोके—भ२; तत्र लोके—ग)। त१.२.५.६.७-मॅ-मु-पुस्तकेष्वयं पाठो नास्ति। त्रुटितस्थाने लिखितपुस्तकेष्ववकाशोऽपि न दर्शितोऽस्ति इति मॅक्समुल्लरमहाशयैः स्वकीयटिप्पण्यां लिखितम्। 'यद्वा' इति पदस्य द्विरागमेन लिखितपुस्तकेषु पाठलोपः संजातो दृश्यते॥ २८ सहस्थानं—*मॅ। महत्स्थानं—ग-त३-भ१.४.५.६; महस्थानं—त१-भ२; महे स्थाने—त७॥ विद्यं सहस्थानं विद्यते यत्र लोके—मु॥ —यत्र—×-मॅ॥ —हर्षणं हर्षश्च—§-मॅ।मु-पुस्तक एतन्नास्ति॥

[९. ११४] २६९. १६ [१] तं जनं—*मॅ। तं मनुजं—ग; तमनुजनं—त-भ-मु॥ २७ [२] वर्धयन्—ग-*मॅ। वर्धन्—त-भ-मु॥ २९ पालकः—*मॅ। पालकः सञ्—ग; पालकः स—त-भ४.६-मु; पालकः सं—त३-भ१.२॥ २७०. ६ [३] नानासूर्याः—त१.२.३.६.७-म। सोता नानासूर्या—त५। ता नानासूर्या—मॅ-मु॥ ९ आदित्याः—त३-भ१.२.४। सप्तादित्याः—त-भ६-मॅ-मु॥ —मार्ताण्ड°—ग-त३-भ१.५। मार्तंड°—त-भ२.४.६-मॅ-मु॥ २७०. २० [४] यद्धविरस्ति—*मॅ-मु। हविरस्ति—§॥ २२ अरातित्ववान्—ग-त-भ४.६.७-मु। अरातित्वान्—भ१.२। अरातिवान्—भ७-मॅ॥

नवमं मण्डलं समाप्तम्॥

[१०. १] २७२. ४ [२½]-मथितो यद्वा विभृतः—ग-त३-भ५.६ । मथितः—त-म १.२.७-मॅ-मु ॥ ' विविधं ह्रियमाणः ' इत्याद्यर्थस्य वैकल्पिकत्वात् स्वीकृतपाठ एवोचितः ॥ १४ [३] ' विष्णुः ' इति प्रथममागतं पदमनावश्यकम् । मु-पुस्तके तत्त्यक्तं भाष्यारम्भे च 'परमं उत्कृष्टं' इति पदद्वयमधिकम् ॥ पादटिप्पणीगतं पाठान्तरं द्रष्टव्यम् ॥ १५ अस्य इमं—ग । अस्य इमे त-भ-मु । अस्य मे-मॅ ॥ २७३. ९ [५] ' प्रतिऽअर्धिम् ' इति पदं विभज्य व्याख्यातम् । तैत्तिरीय-संहितायां (५.४.८.३) ' यत्सर्वेषामर्धमिन्द्रः प्रति ' इति पाठः ॥

[१०. २] २७४. २८ [३] प्रायणीयायामाग्नेयस्य—ग-त३-भ । प्रायणीयायामपि—मॅ-मु । त-पुस्तकेषु किंचिद्भ्रलिखितम् ॥ २७५. १८ [४] वः युष्माकं—ग-त३-भ-मु । युष्माकं—त-मॅ ॥ २० तदेतत् । तत एव—ग । तदेनं—त-भ । तत्—मॅ । अग्निस्तस्विष्टकृतं विश्वं—मु ॥ २८ [५] सततयाजनेन दीनबलाः—ग । सततयानिजितेन°—त१.२.३.५-भ१.२.५; सततयान-जनितेन°—त६-भ७; सततयानिजितेन°—त४; सततयाविदितेन°—त७; सततयानिर्जितेन°—भ६ । दीनबलाः—मॅ-मु ॥ २७६. १० [६] नानारूपं वा—ग-त३.६-भ१.२.४.५.७ । नानारूपं—त१.२.४.५.७-भ६-मॅ-मु ॥

[१०. ३] २७७. ७ [१] लभ्यते—§-मु । लक्ष्यते—मॅ ॥ २७८. ६ [४] किंच—त२.३-भ४.६-मु । किंतु—भ७-मॅ ॥ वग्नून्—त१.२.६.७-भ-मु । वसून्—त३; यवग्नून्—त४.५ । न वग्नून्—मॅ ॥ स्तुत्यस्तोतृत्वयष्टृयष्टव्यत्व°—*मॅ । स्तुत्यस्तोत्रोत्वयष्टृयष्टव्य—ग; स्तुत्य-स्तोतृत्वयन्दयष्टव्य°—त१.२.४.५.७-भ६; स्तुत्यस्तोतृत्वयष्टृयष्टव्य°—त३.६-भ१.२.४.७ । स्तुत्य-स्तोतृयष्टृयष्टव्य°—मु ॥ अश्नन्तः । ' अजन्तः ' इति स्यादिति मॅक्षमुल्लरमहाशयाः ॥ १० यान्ति वा—ग-त३-भ१.२.४.७ । यांति—त-भ६-मॅ-मु ॥ २८ [६] ' किंच ' इति पदमनावश्यकं प्रतिभाति ॥

[१०. ४] २८०. ९ [३] सन्नस्मिन्—ग-त३-भ१.२.४.५ । तस्मिन्—त-भ६-मॅ-मु ॥ अधिः सप्तम्यर्थद्योतकः । वस्तुतः पञ्चम्यर्थे व्याख्यातः ॥ २८१. १३ [६] अधीतां । एतस्मात्पूर्वं द्वितीयपादस्य भाष्यं लुप्तं प्रतिभाति ॥

[१०. ५] २८२. ८ [१] 'मनो वै देवा मनुष्यस्य जानन्ति ' इति कुत्रोक्तम् ? ॥ २८३. ३ [३] अग्निसूर्यात्मना—ग-त१.२.४.५.६-भ६-मु । अग्निं सूर्यात्मना—त३.७-भ२-मॅ । अग्निधा सूर्यात्मना—भ१.४; अग्निवा सूर्यात्मना—भ७ ॥ ३१ [५] ततः—ग-त१.२.३.६.७-भ२-५-६ । प्यातः—भ१.४.७ । प्रातः -मॅ-मु ॥ ३२ प्रायच्छदिति—ग-त३-भ२ । प्रायच्छति—त१.२.६.७-भ१.४-मु; प्रयच्छदिति—भ६ । प्रयच्छति—भ७-मॅ ॥ २८४. ६ [६] निरुक्तपाठः क्वचिद्भिन्नः ॥ २४ [७] प्रथममेव जातः—ग-त३-भ१.२.४.७ । प्रथमजातः—त-भ६-मॅ-मु ॥ २६ पूर्वस्मिन्—ग-त३-भ५.६ । पूर्वत्वं—त-म१.२.४.७-मॅ-मु ॥

[१०. ६] २८७. १० [७] आहुतिप्रक्षेपार्हः—ग-त-भ१.२.४.६-मु-उद्धीथ । आहुतिप्रक्षेणार्हः—भ७ । आहुतिप्रक्षेपणार्हः—मॅ ॥

[१०. ७] २८८. २३ [४] मर्यादया—§ । मर्यादतया—मॅ-मु ॥ २४ मां त्रायसे—त२-म१.४.६-उद्गीथ । मात्रायसे—त१.३.७; मंत्रायसे—त४.५-म७; मां त्रयसे—त६-म२ । त्रायसे—मॅ-मु ॥ २८९. ६ [५] अध्वरस्य यज्ञस्य—§-मु-उद्गीथ । अध्वरस्य—मॅ ॥

[१०. ८] २९०. २४ [३] आकीषदर्थे । आरब्ध ईषद्धिनस्ति—*मॅ-मु । लिखित-पुस्तकेष्वयद्धाः पाठाः । आरब्ध आकीषदर्थे रभिर्हिंसार्थः ईषद्धिनस्ति—उद्गीथ । २९१. १३ [५] सोमरसलक्षणस्य । भौमरसलक्षणस्य—उद्गीथ । पुनरपि ऋ. सं. १०.२७.१३;२४ भाष्ये उद्गीथः " भौम० " इत्येवालिखत् । देवराजनिघंटुर्द्रष्टव्यः ॥ २८ [६] हविषां—ग-त-भ१.२.४.५.६ । हविषो—भ७-मॅ-मु ॥ २९२. ३ [७] इममर्थं ब्रवीति—ग-त३.६.७-भ६-*मॅ । इंममर्थं ब्रवीति—त१.२.४; इंद्रममर्थं ब्रवीति—त५; इंद्र इमर्थं ब्रवीति—त३-भ१.४.७ । इन्द्र इममर्थं ब्रवीति—मु ॥

[१०. ९] २९३. २ [१] ईशाना.....प्रतिष्ठा—*मॅ-मु-× ॥ ४ पञ्चमी ..... प्रतिष्ठेति—त७-भ२-*मॅ-मु ॥ १७ [२] स्तन्यरसं—त-भ । तनये यथा रसं—ग । स्तन्यं रसं—मॅ-मु ॥

[१०. १०] २९५. २१ [२] ' उर्विया परि ख्यन् ' इत्यंशो भाष्ये न व्याख्यातो दृश्यते । उद्गीथभाष्ये तावदुत्तरार्धे ' वीरा उर्विया परि ख्यन् ' इत्येतदेव व्याख्यातम् । सायण-भाष्यस्य उद्गीथभाष्यस्य चातीव साम्यादुद्गीथभाष्यस्यांशोऽत्रोद्धियते—'(वीराः) उरु विस्तीर्णं विजनं चावान्तरद्वीपं गूढसंभोगस्थानं त्वयाभिप्रेतं परि ख्यन् सर्वतोऽव्यवधानेन पश्यन्ति । तस्मादत्र न कश्चिद् दुष्करं क्रियमाणं पश्यतीत्येतन्मा मंस्थास्त्वम् ' उक्तं च मनुना—'मन्यन्ते वै पापकृतो न कश्चित्पश्यतीति नः । तांश्च देवाः प्रपश्यन्ति स्वश्चैवान्तरपूरुषः' (मनु. ८. ८६) इति ' ॥ २९५. २७ [३] देवा अपि—ग-भ । देवा—त-मु । अपि देवा—मॅ ॥ २९६. ९ [४] प्रजापतिः—§-उद्गीथ । प्रजापतेः—मॅ-मु ॥ कृतवान्—भ६-उद्गीथ । कृ—भ१.२.४; त-वर्गपुस्तकेषु ' कृतवान् ' नास्ति । कृतं—भ७-मॅ-मु ॥ १० ऋता ऋतानि—ग-भ-मु । ऋतानि—त-मॅ ॥ २९८. १० [१०] उत्तरा उत्तराणि—ग-त४-भ१.२.४-उद्गीथ । उत्तराणि—मॅ-मु इतरेषु च ॥ गच्छान्—भ७-*मॅ-मु-उद्गीथ । गच्छन्—ग; गछन्—त-भ१.२.४.६ ॥ २९९. १४ [१३] परिष्वङ्क्तुं । परिष्वक्तुं—§-मु-उद्गीथ । भाष्यकारैः प्रायः ' परिष्वक्तुम् ' इति लिखितं दृश्यते ॥

[१०. ११] ३००. २ [१] वृष्णः । ' वृष्णे ' इति प्रतीकम् । वृष्णे इति केवलं त४-पुस्तके । इतरत्र ' वृष्णः ' इति ॥ ५ यज्ञार्हः सोऽग्निः—ग-त-भ२.६-मु । यज्ञार्हः—भ१.४.७-मॅ ॥ ३०१. ३ [४] अभिगमनीयं तं व्रजन्तो—*मॅ-मु । अभिगमाय त्वां व्रजंतो—ग; अभिगमनीय तां व्रतंतो—त-भ ॥ ११ [५] स्वपुष्टिं—§-मु-उद्गीथ । च पुष्टिं—मॅ ॥ २० [६] उदीरय उद्गमय—ग-त१.२ ३.४.६-भ२.४.५.६-मु-उद्गीथ । उद्गमय—त५-मॅ ॥ २२ स्वीयं ज्योतिः—त३-भ ५ । स्वयं ज्योतिः—ग-त-भ२.६-मु । स्वज्योतिः—उद्गीथ । ज्योतिः—भ१.४.७-मॅ ॥ २५ इच्छति च—त-भ१.२.४.६-मु । इच्छति—भ७-मॅ ॥ ३०२. ३ [७] ते त्वदीयां—त-भ५.६-मु । ते तव स्वभूतां—उद्गीथ । त्वदीयां—ग-भ१.२.४.७-मॅ ॥ ३०३. २ [९] अस्मद्यज्ञादपगन्ता—*मॅ । अस्मद्यज्ञांगं—ग; अस्मद्यज्ञामपगंता—त-भ१.२.४; अस्मद्यज्ञमपगंता—भ६.७-मु । अस्मद्यज्ञान-

[१०. १२] ३०३. १५ [१] **अस्मद्यागकाले**—ऽ-मु-उद्गीथ । अस्मद्यजनकाले—मॅ ।। २३ [२] **संदीपनेन**—ग-त-भ१.२.४.५.६-मु-उद्गीथ । दीपनेन—भ७-मॅ ।। ३०४. २३ [५] **लिग्धेनाहूयमानः**—ग-त३ । **लिग्धेमा°**—त१.२.५.६; **लिग्धिना°**—भ१.४; **लिग्धाना°**—भ५; **लिग्धेजिह्वामा°**—भ६; **लिग्धोना°**—भ७ । **लिग्धमाहूयमानः**—त४.७-मॅ-मु ।। **को वि वेद** । एतन्न व्याख्यातम् । २७ [६] षष्ठमन्त्रभाष्यं बहुषु पुस्तकेषु लुप्तम् । ग-त७-पुस्तकयोरुपलभ्यमानमपि टिप्पण्यामुद्धृतम् । त७-मु-पुस्तकयोर्भाष्यं समानमेव । अन्येष्वपि केषुचित्स्थलेषु मु-पुस्तकपाठः त७-पुस्तकपाठसमानो वर्तते । मु-पुस्तके भाष्यं कुत उद्धृतमित्यस्मिन् विषये मॅक्समुल्लरमहाशयैः स्वकीय-टिप्पण्यां जिज्ञासा प्रकटिता । उद्गीथभाष्ये षष्ठमन्त्रभाष्यं त्रुटितम् ।

[१०. १३] ३०६. १३ [१] **गच्छतु**—ग-त२.३.४.५.६-भ१.२.४.५-मु । गच्छत—त१; गच्छति—भ६; गछता—भ७ । गच्छतां—मॅ ।। २५ [२] **प्रतिगच्छथः**—त१.२.५-भ१.४ । प्रतिगच्छतः—भ६.७-मॅ-मु । ऐतं गतवती स्थः—उद्गीथ ।। २६ **प्र भरन् प्रभरन्ति**—त१.२.६.७-भ२.६-*मॅ-मु । प्रहरंति—ग; प्रतरन् प्रभरंति—त४.५-भ४; प्रातरन् प्रभरंति—त३-भ१; प्र भरन् प्रहरंति—भ७ । प्र भरन् प्रभवंत (?)—उद्गीथ ।। ३०७. ६ [३] **पदितृणि होतृत्वेन** । होतृत्वेन—त१.२; पदितृणि हेतृत्वेन—त३-भ२; पदित्रीणि हेतृत्वेन—त४.५; हातृत्वेन—त६.७; तृणि हेतृत्वेन—भ१.४; पदित्रीणि होतृत्वेन—भ६ । वृष्टिहेतुत्वेन—भ७-मॅ । वृत्तिहेतुत्वेन—मु । पदितृणि स्थितिहेतुत्वेन—उद्गीथ ।। **अनुरोहामि शकटे युवयोः स्थापनवहनानन्तरं**—मु । आरोहामि शकटे युवयोः स्वासनहवनानंतरं—त१.२.३.६.७-भ१.२.४; आरोहामि शकटे युवयोः स्वामनहवनानंतरं—त४.५; आरोहामि शकटे युवयोः वासनहवनानंतरं—भ५; अस्वरोहामि शकटे युवयोः स्थापनवहनानतरं—भ७ । अनुरोहामि शकटयोः स्थापनवहनानंतरं—*मॅ । अनु अरोहं युवयोः स्वासनभवनानंतरं—उद्गीथ । हे शकटे इति संबुद्धिः ।। ३०८. १ [५] **पुत्रभूताः**—ग-*मॅ-मु-उद्गीथ । पितृभूताः—त-भ ।।

[१०. १४] ३०८. ७ **सरमापुत्रौ.....स्थितौ**—*मॅ-मु । पुत्रौ द्वौ श्वानौ परलोकमार्गमभितस्थौ—ऽ ।। ११ '**महापितृयज्ञे**' इत्यस्यानन्तरं त३-भ१.२.४-पुस्तकेषु पञ्चाक्षराणामवकाशो दत्तः । 'महापितृयज्ञे परयिवांसमित्येषा यमयागाख्या याज्या' इति पाठं संभावयामः । एतत्सूक्तगतचतुर्थमन्त्रस्य विनियोजकं वाक्यं द्रष्टव्यम् ।। ३० [२] **सर्वे स्वाः.....गतीरनुगच्छन्ति**—*मॅ-मु । सर्वे स्वः स्वभूताः पथ्याः स्वकर्ममार्गं प्रतिगताः अनुगच्छति—ग; सर्वस्वाः स्वभूताः पथ्याः स्वकर्ममार्गप्रत्यागताः (°प्रतागताः—त३.४.५-भ) अनुगच्छंति—त-भ ।। ३०९. ८ [३] **भवति - - -** । **तत्र**—मॅ । भवति तत्र—ऽ । द्वितीयपादस्य व्याख्यानं लुप्तम् । 'भवति तथा बृहस्पतिः ऋक्वभिः पितृविशेषैः सह वर्धमानो भवति तत्र'—मु । 'बृहस्पतिर्ऋक्वभिः । ऋक्वनो देवविशेषाः । ऋक्वभिर्मध्यस्थानैर्देवगणैः सह सदा वर्धमानो वर्धमान आस्ते'—उद्गीथ । सायणभाष्यस्य उपलब्धोद्गीथभाष्येण सादृश्यात् सायणभाष्यपाठोऽनानुमातुं शक्यः ।। ३१०. ९ [७] . **सत्रमध्ये दीक्षितमरणे**—भ६ । सत्रमध्ये दीक्षितमध्ये मरणे—ग; तत्रमध्ये दीक्षितमध्ये मध्येरयो (रथो—त४)—त; सत्रमध्ये दीक्षितमध्ये मध्येरणे (माध्यरणे—त३; मध्येमरणे—भ१; माध्यराणो—भ५)—त३-भ१.२.४.५; सत्रमध्ये दीक्षितस्य मरणे—*मॅ-मु ।। १७ **सत्रा मदन्ता मदन्तौ**—

§-मु । मदंतौ–मॅ ॥ २३ [८] 'यमेन' इति न व्याख्यातम् ॥ २५ म्रियमानाख्यं—त-भ६ । भ१.२.४.७-पुस्तकेषु क्रियाविदंशो लुप्तः । 'न्' इति दन्त्यवर्णस्य भावात् 'म्रि' युक्तः पाठोऽशुद्धः । 'श्मशानाख्यं' इति मॅक्समुल्लरमहाशयाः संभावयन्ति । तेषां टिप्पणी तै. आ. ६.४.२ च द्रष्टव्यम् ॥ ३११. ५ [९] प्रमृज्यमानदहनस्थानात् । प्रमृज्यमानदाहन°–त१; प्रमृजमानदाहन°–त.२.६; मृत्यक्षमानदहन°–त३-भ२.४; प्रमृजमानदहन°–त४.७-भ६; प्रमृजमानदेहन°–त५; प्रत्यक्ष-मानदहन°–भ१ । मृतयजमानदहन°–मॅ-मु ॥ २७ [११] ताभ्यां श्वभ्यां—ग-त-मु । ताभ्यां श्व –भ१.४.७; ताभ्यां–भ६-मॅ ॥ ३१२. २२ [१४] प्रतिष्ठत च—ग-त-भ१.२.४-मु । प्र तिष्ठत–भ६ । प्र च तिष्ठत–मॅ ॥ ३१३. ९ [१६] बृहद्महज्जगद्यमश्च–*मॅ-मु । बृहज्जंगमश्च–ग-भ६; बृहत् महज्जंगमश्च–त-भ१.२.४; बृहत् अंगमाश्च–भ७ ॥ षण्मोर्वीरंहस°... । ऋ. सं. ६.४७.३; १०. १२८. ५ भाष्यं श. ब्रा. १.५.१.२२ च द्रष्टव्यम् ॥ १० सर्वा ता सर्वाणि–ग-त३.४-भ१.२.४.६-मु । सर्वां ता सर्वाणि–त१.२.५.६.७ । सर्वाणि–भ७-मॅ ॥ आहिता आहितानि—त-भ१.४.६-मु । आहितानि–ग-भ७-मॅ ॥ ११ अवस्थितानि—§-मॅ-मु । 'अव-स्थापितानि' इति भाव्यम् ॥

[१०. १५] ३१३. ३२ [२] आग्निमारुते इदं पितृभ्यः—त१.२.७-भ२.७-मु । भ७-वर्जयित्वा सर्वेषु पुस्तकेषु 'इदं पितृभ्यः' इत्यारभ्य 'पूर्वमेवोदाहृतम्' इत्येतावत्पर्यन्तो भागो लुप्तः । त१.२.३.७-भ१.२.४.६-पुस्तकेषु 'महापितृयज्ञे पितरो बर्हिषद इत्यस्य द्वितीयानुवाक्या सूत्र तु पूर्वमुदाहृतम्' इत्यंशः 'चतस्रः इति' इत्यस्यानन्तरं पुनरावृत्तः । भ७-मॅ-पुस्तकयोः 'आग्नि-मारुते' इति पदं नास्ति ॥ ३१७. ९ [११] शुचीनि—त१.२.४.६.७-मु-उद्वीथ । शुनि–त५; उक्तानि–ग; शब्दानि–त३-भ१.२.४; शुचि–भ६ । स्रुचि–*मॅ । मॅक्समुल्लरमहाशयैरभ्यूहितः पाठः 'प्रयतानि' इति पदेनान्वितः । 'शुचीनि' इति 'हवींषि' इत्यस्य विशेषणम् । बहुषु पुस्तके-ष्वभिप्रेतोऽयं पाठ उद्वीथभाष्येऽप्युपलभ्यमानत्वादस्माभिः स्वीकृतः ॥ शुचीनि इति न 'प्रयतानि' इति पदस्य व्याख्यानं किंतु स्वतन्त्रं पदम् । अस्य सूक्तस्य द्वादशे मन्त्रेऽपि उद्वीथः 'प्रयता' इत्यस्यानन्तरं 'शुचीनि' इति पदं निदधाति ॥ ३१८. १३ [१४] तृप्यन्ति—उद्वीथ-मॅ-मु ॥

[१०. १६] ३१८. २५ [१] मधीभूतं—त३-भ१.४ । मधीभस्मीभूतं–भ२; मेधीभूतं भ७ । भस्मीभूतं–त-मॅ-मु । मन्त्रस्य पूर्वार्धे दहनस्यावस्थात्रयं कथितम् । मधीभवनं संतपनं त्वग्विक्षे-पणमिति क्रमेणावस्थाः । भस्मीभवनं न प्रथमावस्था । तै. आ. ६.१.४ द्रष्टव्यम् ॥ ३१९. ५ [२] गच्छाति—उद्वीथ । १० [३] त्वदीयं—§ । ते त्वदीयं–मॅ-मु । 'ते' इति मन्त्रे नास्ति ॥ १३. एतन्मन्त्रस्यान्तिमो भागः अपूर्णो व्याख्यात इति मॅक्समुल्लरमतम् । 'कर्मफलम्' इत्यत्रैकं वाक्यं परिसमापितं चेत्, नैतदपूर्णं किंतु संक्षिप्तम् । मु-पुस्तके 'तत्रान्तरिक्षे' इत्येतस्मात्पूर्वं 'यदि' इत्यधिकम् । प्रति तिष्ठ–भ७-मॅ । प्रति तिष्ठति–त१.२.४.६.७; प्र तिष्ठति–त५-भ६; प्रतिष्ठितः–त३-भ१.२.४ । प्रति तिष्ठ प्रतितिष्ठति–मु । तै. आ. ६.१.४ अत्रायं मन्त्रो व्याख्यातः । तत्र अन्ति-मभागस्य व्याख्यानमेवं वर्तते–यत्र यस्मिल्लोके ते तव हितं सुखमस्ति तत्र गत्वौषधीषु प्रविश्य तद्द्वारा पितृदेहमातृदेहौ प्रविश्य तत्र तत्रोचितानि शरीराणि स्वीकृत्य तैः शरीरैः प्रतिष्ठितो भव ॥ ३२०. १२ [६] श्वापदः श्वश्रृगालादिः—त३.४-भ५-मु । श्वापदः सृगालादिः–ग; श्वापदः श्वश्रृगादिः

त१.२.५.६.७-भ६; श्वापदश्च मृगाश्चादिः—भ१.७। श्वापदश्च मृगाश्चादिः—भ४-मॅ॥ —तै. आ. ६.४.२ अत्र 'विश्वात् सर्वस्मादुपद्रवात्' इति पञ्चम्यन्तं व्याख्यातम्॥ २२ [७] च सं—ग-त३-भ१.२.४.५। च सं-त; च-भ६.७। मांसेन च सं—मु। मांसेन—मॅ। 'मेदसा' इत्यस्य 'मांसेन' इति व्याख्यानमयुक्तम्॥ २५ लेट्यागमः—ग-त-भ१.२.४। लेट्यडागमः—भ६.७-मॅ-मु॥ ३२१. ६ [८] हव्यैः कव्यैश्च—ग-त३.४-भ२.६-मु। दद्यैः कव्यैश्च—भ५। हव्यैश्च—भ१.४.७-मॅ॥ १५ [९] अयं—भ१.२.४.७-उद्गीथ। अथ—मॅ-मु-त-भ६॥ शान्तिकर्मार्थमुपादत्तः। शान्तिकर्मार्थमुगात्तः—उद्गीथ। शांतिकर्मार्थमुपासतः—त४-भ१.२.४.७; शान्तिकर्मार्थमुगासनः—त१.२.५.६.७-मॅ-मु। 'उत्तरेण शान्तिकर्मार्थमादत्ते' इति उपर्युक्तम्। तदनुकूलोऽयं पाठोऽभ्यूहितः। उद्गीथोऽपि तमुपोद्बलयति॥ ३२२. ३ [११] 'कव्यवाहनः' इति संहितापाठः। बहुषु पुस्तकेषु वर्तमानत्वात् 'कव्यवाहनः' इत्येव सायणपाठः। आश्व. श्रौ. पाठोऽपि तथैव॥ ५. वोचतु। 'वोचति' इति संहितापाठः॥ १५ [१२] किमर्थं—ग-त३.४-भ६-उद्गीथ। एतन्नास्ति त१.२.५.६.७-भ१.२.४-मॅ-मु-पुस्तकेषु॥

[१०. १७] ३२४. २५ [४] परि पासति परि पातु—*मॅ-मु-उद्गीथ। परि पासतु परिपासि—त; परिपासति—त३; परिपाहि—त७-भ१.२.४; परिपासतु परि पाति—भ६॥ ३२७. २१ [११] यद्वा। द्रप्सः—त-भ१.२.४.६-मु। यद्वा—भ७-मॅ॥

[१०. १८] ३३०. १८ [५] पूर्वपूर्व—*मॅ। पूर्व—ऽ-मु॥ ३३१. २३ [८] अनुमरण°—*मॅ। अनुसरण°—त-भ१.२.४-मु; अनुसरण°—भ६.७॥ ३३२. ४ [९] संघर्षयितृन्—भ१.४। संघर्षयितून्—भ७। संघर्षयेन्नीन्—त-मॅ-मु॥ १३ [१०] अत्र भाष्यादौ संबोधनं न दृश्यते। उद्गीथभाष्ये 'हे अस्थिकुंभ' इति प्रारम्भः॥ ३३३. ७ [१२] संपरिवार्य—ऽ-मु-उद्गीथ। तं संपरिवार्य—मॅ॥ ८. ते पांसवः—भ४-*मॅ-मु उद्गीथ। तेषांसवा—त१.२.५.६.७-भ२.६; ते पार्थिवा—त४॥ २२ [१४] त७-मु-पुस्तकयोरस्य मन्त्रस्य समानं भाष्यमधिष्पण्यां दत्तमेव। अन्येष्वेतद्भाष्यं लुप्तम्। अस्य मन्त्रस्य समग्रमुद्गीथभाष्यमुपलभ्यते तदधो दीयते—

प्रतीचीने प्रतिगते संप्राप्ते अहनि अस्थिसंचयनदिवसे मामस्थिकुम्भरूपं यजमानमादधुः त्वयि भूमावाहितवन्तः पुत्रपौत्रादयोऽधिकृतवन्तः। किमिहामिहितवन्तः। इष्वाः पर्णमिव। यथा केचिदिषुकाराः इष्वाः संवन्धि पर्ण वाजाख्यं सुश्लिष्टमिषावादधति एवमेतज्ज्ञात्वा प्रतीचीं त्वां प्रतिगतां प्रार्थनाद्वारेण त्वत्कर्णपथं प्राप्तां वाचं प्रार्थनारूपाम् 'एषा त्वा पातु निर्ऋतेरुपस्थात्' (ऋ. सं. १०.१८.१०) 'उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना' (ऋ. सं. १०.१८.११) इत्यादिकामचिकृतसत्कारां जग्रभ गृहाण। किमिव। अश्वं रशनया रज्ज्वा यथा कश्चित् गृह्णीयादेवं गृहाण कर्तव्यत्वेन मनसि कुर्वित्यर्थः। अथवा मृतस्य पुत्रो ब्रवीति। प्रतीचीने प्रतिगते अह्याहनि मां मृतस्य पुत्रमा दधुः श्मशानकर्मणि कर्तव्ये महतादरेण श्लिष्टमाहितवन्तः अधिकृतवन्त ऋत्विगादयः स्मृतिकारा वा। किमिवा दधुः। इष्वाः संवन्धि पर्ण वाजाख्यं यथा केचिदिषुकाराः पर्ण सुश्लिष्टमिषावादधति एवमेतज्ज्ञात्वा पृथिवी प्रतीचीं प्रार्थनाद्वारेण त्वत्कर्णपथं प्राप्तां वाचं प्रार्थनारूपाम् 'एषा त्वा पातु निर्ऋतेरुपस्थात्' 'उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः' इत्यादिकां जग्रभ गृहाण कर्तव्यत्वेन। किमिव। अश्वं रशनया यथा कश्चित् गृह्णात्येवम्॥

[१०. १९] ३३६. १६ [१] सेचयत । अवगाहनगोदोहन°—त३ । सेवत अवगाहनगोदोहन°–ग; सेवयत अवगाहत गोदोहन°–त५ । सेचयत अवगाहन°–भ१.२.४ । सेवयत अवगाहत मानु गात अस्मद्व्यतिरिक्तं यजमानं मा गच्छत गोदोहन°–त१.२.६.७ । एतेषु उपरितना भाष्यपङ्क्तिः मध्ये प्रविष्टा । सेवयत अवगाहन°–भ६; सचयत अवगाहन°–भ७ । सेचयत अवगाहत गोदोहन°–त४-*मॅ-मु । ' सेचयत ' इत्यस्य ' अवगाहत ' इति पुनर्व्याख्यानं नोचितम् । तथा च गाह्धातुरात्मनेपदी । ' अवगाहध्वम् ' इति भाष्यम् । बहुषु पुस्तकेषु ' अवगाहन ' इति भावात् ' त ' स्थाने ' न 'एव पठनीयः । वाहनदोहन°–उद्गीथ ॥ १७ आच्छादयितारौ हे अग्नीषोमा अग्नीषोमौ—त३-४-भ६-मु । आच्छादयितारौ–त१.२.५.६.७-भ१.२.४.७-मॅ ॥ ३३५. ४ [३] सास्यादिमतीनां—ग-त३-भ२-*मॅ-मु-उद्गीथ । सास्वादिमतीनां–त१.२.४.५.६; सास्वादादिमतीनां–त७; सास्न्यादिमतीनां–भ१.४; सस्न्यादिप्रतीनो–भ७ ॥ वृष्टिलक्षणानामपां । ' अपां वा वृष्टिलक्षणानाम् ' इत्युद्गीथभाष्यपाठः साधीयान् ॥ १५ [४] ' संज्ञानं यत्परायणं आवर्तनम् ' इति पदत्रयस्य व्याख्यानं लुप्तम् । उद्गीथभाष्ये उपलभ्यते तद्यथा— यदपि गवां संज्ञानं । सम्यग्ज्ञायतेऽनेनेति संज्ञानम् । शबलादिचिह्नं नाम वा । तदपि प्रार्थये । यदपि गवां परायणं परागमनं चरित्रं वनं प्रति गमनं तदपि प्रार्थये । यदपि गवामावर्तनं वने चरितुमितश्चेतश्च प्रवर्तनं तदपि प्रार्थये ॥

[१०. २०] ३३७. १ [१] उद्गीथमते ' भद्रं नो अपि वातय मनः ' इति मन्त्रस्यानन्तरं सप्तमाष्टकस्य प्रथमोऽध्यायः समाप्तः 'अग्निमीळे' इति मन्त्रेण च नवीनं सूक्तमध्यायश्च प्रारब्धः ॥ १४ [२] स्वरित्ययं सर्वशब्दो निपातः । अशुद्धः प्रयोगः ॥ ३३९. २० [१०] किंचिदेयमस्ति—ग-त३-भ१.२.४.६-*मॅ-मु । किंचिदेवं यमस्ति–त१.२.४.५.६; किंचिदेयं यमस्ति–त७; किंचिदेयमस्ति–भ७ ॥

[१०. २१] ३४०. १९ [३] आसते उपासते—भ । आसते–त-मॅ-मु ॥

[१०. २२] ३४३. ८ [३] आङ् मर्यादायाम् । आ समाप्तेः—*मॅ-मु । आमर्यादया (अमर्यादया–त६) असमाप्तः–ग-त३.४.५.६-भ६-उद्गीथ; असमाप्तः–त१.२; अमर्यादया असज्जमानः–त७; आ मर्यादया आ समाप्तेः–भ१.२.४; आङ् मर्यादायां असमाप्तः–भ५; आ मर्यादायां आ समाप्तेः–भ७॥ ३४५. २३ [११] क्षिप्रकरण°—ग-त४ । क्षिप्रकारण°—त१.२.५.६-मॅ-मु । क्षिप्रकरणे युक्तानीत्यर्थः–उद्गीथ ॥ ३४६. २ [१२] कुध्न्यक्—त-मॅ-मु । अकुध्न्यक्–भ७-उद्गीथ । अंकुध्न्यक्–भ१.४ । ' अकुध्न्यक् ' इति संहिता ॥ ११ [१३] सन्त्विति निर्देशविशेषणत्वात्—ग । सनि निर्देशमाविशेषणत्वात्–त; सति निर्देशविशेषणत्वात्–त३-भ१.२.४.७; बहुवचननिर्देशविशेषणत्वात्–भ६ । सति निर्देशस्याविशेषणत्वात्–मॅ । सनि निर्देशस्याविशेषणत्वात्–मु । स्तुतिनिर्देशविशेषत्वात्–उद्गीथ ॥

[१०. २३] ३४७. ३० [२] मघवा—ग-त३-भ१.२.४-मु । अथवा–त-भ६ । मघवान्–मॅ ॥ ३४८. ९ [३] बहतः—§-मॅ । बि बहतः–मु ॥ ३४९. १ [५] वर्धयति–§-उद्गीथ । ववृधे वर्धयति–मॅ-मु । ' ववृधे ' इति प्रतीकस्य अग्रे वर्तमानत्वात् पुनर्ग्रहणमनावश्यकम् ॥ २० [७] केचिदपि—§-मु-उद्गीथ । काचिदपि–मॅ । पुस्तकेष्वनुपलभ्यमानः पाठः मॅक्समुलर-

महाशयैः कुतो गृहीतः ? मुद्रणदोषो वा ? केचित्—उद्गीथ ॥ २१ प्रमतिं प्रकृष्टां मतिं—त१.२.६. ७-मु-उद्गीथ । प्रकृष्टमतिं-ग-त३.४-भ५-६; प्रकृष्टामतिं—भ१.२.४ । प्रमतिं—भ७-मॅ ॥

[१०. २४] ३५१. ४ [४] ईळिता ईळितौ—ग-भ-मु । ईंळितौ—त-मॅ ॥

[१०. २५] ३५४. ९ [७] प्रार्थ्यसे—त-मु-उद्गीथ । प्रार्थ्यते—भ-मॅ ॥ २५ [९] तस्मिन् । अतिमहतीत्यर्थः—*मॅ-मु । तस्मिन् सतीत्यर्थः—ग; तस्मिन् सतिमहतीत्यर्थः—त-भ६; तस्मिन् सर्वति महतीत्यर्थः—त३-भ१.४; तस्मिन् सर्वाणि महतीत्यर्थः—भ७ ॥ ३५५. ६ [१०] वर्धयेदित्यर्थः—भ । अवर्धयदित्यर्थः—त-मॅ-मु । वर्धयत्विति शेषः—उद्गीथ ॥

[१०. २६] ३५६. २० [४] परिचर्याद्वारेण—मु । परिचर्यादाबादरेण—ग; परिचर्यादा—त१.२.६.७; परिचर्यादारणं—त४.५-भ२; परिचर्याद्वारण—त३-भ१.४; परिचर्याचरणं—भ६ । परिचर्यादरेण—भ७-मॅ । परिचर्यात्यादरेण—उद्गीथ ॥ २५ [५] रथानामश्वहयः । हयतिर्गतिकर्मा । रथानां संबन्धिभिः—मॅ । रथानां संबंधिभिः अश्वहयः हयतिर्गतिकर्मा—§-मु । उद्गीथभाष्यपाठः मॅ-पाठं द्रढयति॥ ३५७.१६. [७] वि अदूधोत्—§-मॅ । वि दूधोत्—मु संहितायां च॥

[१०. २७] ३५८. २३. [२] यत् यदा अहमित् अहमेव—त३.४-भ६-मु । अहमिदहमेव—ग; यद्यदाहमित्य अहमेव—त१.२.५.६.७; यद्यदा अहमेव—भ१.२.४ । यदीद्यदाहमेव—मॅ । 'यदि' इत्यस्य स्थाने 'यत्' इति भाष्यकारैः पठितमित्येव मन्तुमुचितम् ॥ ३५९.१६. [४] शरीरशस्त्रास्त्रबलादिभिः । शरीरशस्त्रबलादिभिः—भ१; शरीराशस्त्राबलादिभिः—भ४; शरीरशस्त्रबालादिभिः—भ७; शरीरशस्त्रास्त्रेषुबलादिभिः—भ६; शारीरशस्त्रास्त्रबलतः—उद्गीथ; शरीरबस्त्रास्त्रबलादिभिः—त-मॅ-मु॥२६ [५] वै उ इत्येवैव—भ१.४-*मॅ । वै उ इत्येतैव—मु बहुषु पुस्तकेषु च ॥ ३६०. १७ [७] मध्यमपुरुषेनेंन्द्रस्यो°—भ७-मु । मध्यमपुरुषेंद्रस्यो°—त-भ१.२.४; मध्यमपुरुषस्येंद्रस्यो°—भ६ । मध्यमपुरुषत्वेनेंद्रस्यो°—मॅ । मध्यमपुरुषेण प्रथमपुरुषेण च—उद्गीथ ॥ ३६०. २९. [७] गच्छंत्यौ— *मॅ । गंत्यौ (गंत्यौ—ग-त-४.६-भ५; गच्छंत्यौ—भ६) यद्वा सर्वस्य प्रकर्षेणाच्छादयित्र्यौ रेफश्छांदसः (रेफलोपश्छांदसः—भ६-मु)—ग-त-भ मु॥ ३६१. ११. [८] दुदुहे—*मॅ । दुदुहु—ग; दुहदि—त१.२.५.६; दुहू—त३.४-भ१.२.४.६; दुह—भ७ । दुहे—मु ॥ १२. [९] त७-मु-पुस्तकयोरुपलभ्यमानं नवममन्त्रभाष्यमधिष्पण्यामुद्धृतमेव । इतरपुस्तकेष्वेतन्मन्त्रभाष्यं लुप्तम् । उद्गीथभाष्य उपलभ्यमानमस्य मन्त्रस्य भाष्यमत्रो दीयते—

'पुरुष एवेदं सर्वं' (ऋ. सं. १०. ९०. २) 'सर्वं खल्विदं ब्रह्म' (छां. उ. ३.१४.१) इत्यादिवचनात् कारणात्मनः सर्वात्मकत्वादहमेव सम्यक् ज्ञानयोगात् कारणात्मरूपेण स्थित्वा स्थावरजंगमलक्षणं यद्यत् द्विपाच्चतुष्पादादिकं च सर्वमुत्पादयामीति कारणात्मरूपेणात्मानमिन्द्रः स्तौति।जनानां सर्वप्राणिनां यदन्नन्यं यवसं यवाद्यन्नं च तस्य सर्वस्य यवसस्य यवाद्यन्नस्य च वयमेव सम्यगन्तारो द्विपदचतुष्पादीनां कार्यरूपेण स्थित्वाहमेव कारणरूपेण स्थित्वा सर्वस्य यवादिकान्नस्यात्ता । क्रु स्थितः अन्नत्ता त्वमुच्यते—उरुअन्ने अन्तः । उरु विस्तरेण । अज गतिक्षेपणयोः । अन्तरिति अभिव्यक्तवचनः । विस्तीर्णस्य जनस्य गमनस्य जगतो मध्ये स्थितः अन्नत्तारमीत्यर्थः । 'अनेकजन्मसंसिद्धस्ततो याति परां गतिम्' (भगवद्गीता ६. ४५) इति वचनान्मोक्षस्य दुष्प्रापत्वात् । अत्रास्मिन्नेव जन्मनि

अवसातारं संसारान्तस्य कर्तारं मोक्षं गमयितारं मामेव इच्छात् आराधयितुमिच्छति । कः । योगीन्द्र एव संसारसागरादुद्धर्ता नान्य इति परया भक्त्या योऽयमाराधयति योगेन तमहमस्मिन्नेव जन्मनि संसारान्मोचयामीत्यर्थः । अथो अपि च अयुक्तमयोगिनं युनजत् । उत्तमस्य स्थाने प्रथमोऽयम् । युनज्म्यात्मना संसारान्मोचयामीत्यर्थः । वयन्वान् संभजन्नहं यदि कामयेयमित्यर्थः ॥ २२. [१०] उत्पादयानीति त्वं जानीहि—ग-भ५। उत्पादयानीति-त-भ१.२.४; उत्पादयामीति त्वं जानीहि-त३-भ६; उत्पादयामीति-त४-मॅ-मु। उत्पादयानीति जानीहि त्वं-उद्गीथ । यत्स्थावरजंगमात्मकं जगत् तदहं संजानानि उत्पादयानीत्यर्थः ॥ ३६२. २४. [१२] अवस्थितमिति । 'अवस्थितमपि' इति भाष्यमिति प्रतिभाति ॥ ३६३. १३. [१४] पराशदनवार्जितः—त२-मॅ-मु-उद्गीथ । मॅ-पुस्तकेऽयं पाठो मु-पुस्तकानुसारेण स्वीकृतः ॥ ३६४. १ [१५] तिरन्ति—ग-भ६-*मॅ-मु । तरं-त; तरंति-भ ॥ ४. तिरन्ति—*मॅ-मु । तरंति-त-भ ॥ १४. [१६] तत्र—*मॅ । गति°-त-भ; गर्भ°-भ१(२) । गर्भवासं-उद्गीथ ॥ २२. [१७] पक्कवन्तो—ऽ-मॅ-मु । ऋ. सं. ६.२०.१३ भाष्ये 'पक्कवान्' इति पाठोऽस्माभिरभ्यूह्य स्वीकृतः । सोऽनेन प्रमाणितः ॥ ३६५. ८. [१८] वनति-त-भ१.२.४.७-मु-उद्गीथ । वनते-भ३ । वनुते-मॅ ॥ १३. [१९] भूतसंघं-त-भ-मु । ग्राम-भूतं संघं-मॅ । भूतसंघातं-उद्गीथ ॥ १७. युगा युगानि-ग-त३-भ६-*मॅ-उद्गीथ । युगा युग्मानि-त-भ१.२.४.७-मु ॥ २५. [२०] अभेदोपचारात्—भ१(२) । उपचारात्-त-भ-मॅ-मु । एकत्वोपचारात्-उद्गीथ ॥ २६. युक्तौ रथे नियुक्तौ—ग-त३-भ५.६ । युक्तौ-त-भ१.२.४.७-मॅ-मु ॥ सु सुष्ठु—भ६ । सुष्ठु-त-भ१.२.४.७-मॅ-मु ॥ सुष्ठु अभिपूजितौ-उद्गीथ । 'सुष्ठु पूजितौ' इत्यस्य स्थाने 'सुष्ठु योजितौ' इति पाठो 'युक्तौ' इति पदस्य व्याख्यानत्वेन मॅक्समुल्लरमहाशयैः सूचितः । परं 'सुष्ठु पूजितौ' इति 'सु' इति पदस्य व्याख्यानम् । 'युक्तौ' इति पदस्य व्याख्यानमुपर्यागतमेव । 'युक्तौ' इत्यस्य 'सुष्ठु योजितौ' इति व्याख्यानाभ्युपगमे 'सुष्ठु' इति पदं 'योजितौ' इति णिजन्तं रूपं चोभयमप्यनावश्यकम् ॥ ३६७. ३. [२३] प्रीणयितृ पूरयितृ वा—ग-त३-भ५.६-उद्गीथ । प्रीणयितृ-त-भ१.४-मॅ । पालयितृ प्रीणयितृ वा-मु ।

[१०.२८] ३६७. २३. शेषा । शिष्टा-अनु ॥ ३६८.२६. [४] अत्सारीत्—*मॅ । अत्सान्-ग; अत्सात्-त१.२.४.५.७-भ-मु; सत्यात्-त६ ॥ २७ अतिगहनदेशात्—*मॅ-मु । निमर्जनदेशात्-ग; अभिहनदेशात्-त-भ६; निर्गहनदेशात्-भ१.२.४.७। गहनं देशात्-उद्गीथ॥ ३६९. २८. [७] मेघमसुरं वा-भ६-मु । मेघासुरं वा-त-भ१.२.४.७ । मेघासुरं-मॅ । वृत्रमसुरं मेघं-उद्गीथ ॥ ३७०.१६. [९] बलवत्क्रूरशूरमृग°—भ१.२.४.७-उद्गीथ । बलवत्क्रूरस्यमृग°-त । बलवत्क्रूरमृग°-ग-भ६-*मॅ-मु ॥ २७. [१०] करस्योपरि—ऽ-मॅ-मु । पञ्जरस्य परि-उद्गीथ ॥

[१०. २९.] ३७२.९. [१] एवं तावत्—भ६-मु । एव तावत्-त१.२.५.६.७-भ२; एता एतावत्-त४ । एतावत्-मॅ ॥ ३७३.२. [२] स रथः कुत्सेन कुत्सो—*मॅ । स रथः कुत्सेर-ग; स रथः कुत्सो-त१.२.४.५.६-भ६; रथः कुत्सो-त७; स रथः कुत्सेन-भ१.२.४.७ । तं रथं कुत्सो-मु ॥ १३. [३] सर्वार्थदर्शिनी—भ१.४.७ । सर्वार्थदर्शनीय-त४ (प्रान्ते) । त-पुस्तकेषु भाष्यांशो लुप्तः । सर्वार्थदर्शना-मॅ-मु । सर्वार्थदर्शनी-उद्गीथ ॥ १५. वयं...शक्यां... संगमयेयम् (?)-ऽ-मॅ-मु । उद्गीथभाष्ये 'वयं' नास्ति ॥ ३७४. १७. [६] स्वाद्मन्—

त२.६.७–भ४.७–मॅ। स्वाग्नन् स्वायु–त४; स्वाग्नन् स्वादुवुक्ता–भ६। त५–भ१.२–पुस्तकेषु 'स्वाग्नन्' इत्यस्यानन्तरमवकाशो दत्तः। स्वाग्नन्शब्दस्य व्याख्यानमत्रापेक्षितं दृश्यते॥ १८. अस्माभिर्दत्ताः—त–भ२.६। अस्माभिर्दत्तः–ग; अस्मादताः–भ१.४.७। स्वाग्नन् स्वाग्नानः स्वादिष्ठाः भवंतु अस्माभिर्दत्ताः संतु–मु। आस्वादिताः–*मॅ। स्वाग्नन्शब्दस्य व्याख्यानं लुप्तमस्तीति स्वीकरणे 'आस्वादिताः' इत्यभ्यूहोऽनावश्यकः स्यात्। बहुषु पुस्तकेषूपलभ्यमानत्वात् स्वीकृतपाठ उपपन्नः प्रतिभाति। 'मधूनि' इति पदस्य व्याख्यानं स्वीकृतपाठमेव प्रमाणयति। उद्गीथभाष्यमशुद्धमपि द्रष्टव्यम्॥ २४. [७] अस्येन्द्रस्यार्थं—ग–उद्गीथ। अस्यैंद्रार्थं–त–भ१.२.४.६.मु; इंद्रायार्थ–भ७। इंद्रार्थं–मॅ॥ ३७५.३. [८] इन्द्रः—§–मु। स इंद्रः–मॅ॥

[१०. ३०] ३७५. १२. अप इष्य—§–मु। अपयिष्य (१)–मॅ॥ ३७६. ११. [३] आर्यिकोऽयं—ग–भ६–मु। अर्यिकोयं–त। स्वार्यिकोऽयं–भ१.२.४–मॅ। अर्योऽयं–उद्गीथ॥ ३७७. २१. [७] °वेष्टनाभिर्हिंसनात्—*मॅ–मु। मु–पुस्तकपाठ एव मॅ–पुस्तके स्वीकृतः। °वेष्टिताभिः हिंसनात्–त–भ६; °वेष्टिताभिः हिंसात्–भ१; °विष्टिताभिः हिंसात्–भ४। °वेष्टनाभिः हिंसातः–उद्गीथ॥ ३७८. १. [८] प्रगमयत.....शृणुत—ग–त१.२.४.६.७–भ१.२.४.६–मु। भ६–पुस्तके 'प्रगमयत' इत्यस्य स्थाने 'प्रसंगमयत', 'तैर्धनवत्यः' इत्यस्य स्थाने च 'तद्वत्यः'। त१.२.७–भ२–पुस्तकेषु 'रेवतीः' नास्ति। उत्तरार्धव्याख्यानरूपोऽयं भागः त५–मॅ–पुस्तकयोर्नास्ति। न वायं मॅक्समुल्लरमहाशयैः स्वीयेषु लिखितपुस्तकेषूपलब्धः। अस्य मन्त्रस्योद्गीथभाष्यमन्त्रोद्धियते–'यच्छन्दसंबन्धाद्द्वितीये पादे? गर्भसारः यो वः युष्माकं स्वभूतः हे सिन्धवः स्यन्दनशीलाः मध्वः मधुनः मृष्टरसस्य उत्सः उत्स्यन्दिनः उत्सिपिता। यच्छन्दसंबन्धात् गर्भ? मधुमन्तं मधुस्वादोपेतं ऊर्मिमप्संघातम्। घृतपृष्ठं घृतेनाज्येन पृष्ठमीडयं स्तुत्यमध्वरेषु यज्ञेषु। ईदृशं सारं युष्मत्संबन्धिनमस्मै अस्येन्द्रस्यार्थाय प्रहिणोत प्रगमयत प्रस्थापयतास्मद्यज्ञं प्रत्यंगभावाय। हे आपः अस्मभ्यं युष्माभिः दातव्य? दृष्टादृष्टफललक्षणेन तद्वत्यं शृणुत हवमाह्वानं वचनमेतदित्यर्थः। मे मम स्वभूतम्'। अशुद्धमेतत्सायणभाष्यानुसारेण शोधयितुं शक्यम्। ईषद्रचनाभेदे सत्यपि स्वीकृतपाठमेतत्प्रमाणयति॥ ११. [९] नभोजां—ग–त७–भ६–*मॅ–मु–उद्गीथ। नभोजं–त१.२.४.५.६–भ२; नभोज–भ१.४॥ ३८०. ११. [१४] आगमन्—*मॅ–मु–उद्गीथ। अगमन्–§॥

[१०. ३१.] ३८२. ११. [४] वाग्भिः स्तुतः—भ२.५.६। वाग्भिः स्तुत–त३–भ१.४। वाग्भिः–त–मॅ–मु॥ २८. [६] सुष्टुतिः—त६। सुष्टुस्तुतिः–मॅ–मु इतरेषु च। सुस्तुतिः–उद्गीथ॥ ३८३. १४. [८] एतावद्देवजातं...अपि तु एना—*मॅ–मु। तावद्देवजातं सामर्थ्येन युक्तं–ग; एतावद्देवजातं सामर्थ्येन युक्तमिति अपि तु एता–त; एताः देवा वा जातं सामर्थ्येन युक्तं भ१.४.७; एतावद्देवजातं सामर्थ्यायुक्तं एता–त३; एतावद्देवजातं सामर्थ्येन युक्तमिति एता–भ२। न एतावत्। नैतावद्देवजातं सामर्थ्ययुक्तं। किं तर्हि एता–उद्गीथ॥ ३८४. ११. [१०] ड्यादेशः—त–भ१.२.४.६–मु। ड्याडागमः–त३; ड्याडागमः–भ५। ड्यादेशः–ग–भ७–मॅ। ड्यादेशे 'शम्या' इति रूपं भवेत्। अतः स्वीकृतपाठो न युक्तः। परं बहुषु पुस्तकेषूपलभ्यमानत्वात् स्वीकृतः। 'ड्यादेशः' इति मॅ–पाठोऽवद्ध एव। 'आ–आदेशः' इति युक्तम्॥

[१०. ११] ३८५. १२. [२] रजःशब्दाच्छस आकारः—भ६-*मॅ-मु। इतरलिखितपुस्तकेष्वशुद्धाः पाठाः॥ ३८६.४. [४] यद्यत्र—त-भ२.६-मु। यद्य—त३-भ१.४; यदा—भ७। यद्यदा—मॅ॥ ६. यत आगत्य प्रकाशयेत्यत्र (प्रकाशसेऽत्र-भ६) कारणमाह (तारणमाह—त३-भ१.२)—ग-त-भ-मु। यत आगत्य प्रकाशस्ततोऽत्र कारणमाह—*मॅ। स्वीकृतपाठो मॅक्समुल्लरमहाशयैरुपलब्धोऽपि किमर्थं त्यक्तोऽभ्यूहश्चाश्रित इति न ज्ञायते। स्वीकृतपाठ एव सम्यगर्थमावहति न मॅक्समुल्लरमहाशयैरभ्यूहितः पाठः॥ ३८७. २. [६] अन्तर्हितं त्वां—ग-त३-भ। अंतर्हित्वं—त४.५। अंतर्हितं—त१.२.६.७—मॅ-मु॥ ३८८.५. [९] हे कलश कलावन्—भ६-मु। हे कलश कलावान्—त१.२.६.७; हे कलश कलाशन्—त३.४.५; हे कलश कलशान्—भ१.२.४। हे कलश—भ७-मॅ। हे कलश कलाशयन सर्वकलाधारपारिपूर्ण—उद्गीथ॥ १३. [९] बहुवचनम्। एवं—त३.४-भ५। बहुवचनं पदं—त१.२.५.६—मु; बहुवचनं पदा—त७; बहुवचनं—ग-भ१.४.६। बहुवचनपदं-मॅ॥

[१०. ३३] ३८९. १२. [२] पार्श्वान्थीनि—ग-भ१.२.४-*मॅ-मु। पार्श्वस्थानि—त; पार्श्वस्थीनि—भ६; पार्श्वास्थानि—भ७॥ १६. कम्पयते (२)। 'कम्पते' इति साधु॥ ३९०.८. [५] प्रष्टिवाहिनं रथं—*मॅ। तिष्टिवाहिनं रथं—ग; प्रतिष्ठवाहिनं (प्रतिष्ठ°—त५) रथं च—त१.४.५.६.७; प्रतिष्ठवाहिनं रथं—भ१.२.४.७; प्रतिष्ठावाहिनं तं रथं च—भ६। प्रष्टिवाहिनं रथं च—मु॥ २९. [९] न जीवति—त-भ६-मु। जीवति—भ१.२.४.७-मॅ॥

[१०. ३४] ३९१. २. अत्र द्वादश्यक्षान् स्तौति.....सा देवता—*मॅ। अयं पाठो मॅक्समुल्लरमहाशयैरभ्यूहितः। अभ्यूहे कारणान्यपि तैः स्वकीयटिप्पण्यां प्रदर्शितानि। लिखितपुस्तकेषु साधारण्येनैतादृशः पाठो विद्यते—'अत्र द्वादश्याक्षान्स्तौति नवम्याद्यावातस्तास्तदेवत्यः सप्तमी त्रयोदशी च कृषिं स्तौति अतस्तयोः सा देवता'। बृहद्देवतापाठस्त्वेवं वर्तते—'अत्राक्षान्द्वादशी स्तौति नवम्याद्या च सप्तमी। त्रयोदशी कृषिं स्तौति.....'। बृहद्देवतापाठमुद्धृत्य सूक्तदेवताः कथयितुं भाष्यकारा उद्युक्ताः। सप्तमी ऋक् न कृषिं स्तौति किंतु अक्षान् स्तौति। तथा च 'स्तौति' इति क्रियापदमेकवचनान्तम्। 'तयोः' इति पदमप्यबद्धमिति स्पष्टमेव। एतामशुद्धिं दूरीकृत्य यः पाठो मॅक्समुल्लरमहाशयैरभ्यूहितः स युक्त एव। मु-पुस्तकेऽशुद्धः पाठः॥ १०. विभीतकस्य—ग-*मॅ-मु। बिभीतकस्य—त१.२.४.५; बिभीदकस्य—त७; बिभीतस्य—भ१.४.७॥ १३. [१] अचच्छदत्—ग-*मॅ-मु। अवछत्—त१.२.६; अचछत्—त४.५; अचछदत्—त७-भ॥ ३९२. १७. [५] न दूषये—त७-*मॅ-मु। न दूये—ग; दूषये—त-भ॥ ३९३. ५. [७] नितोदितवन्तश्च—*मॅ। नितोदितनंतश्च द्यूतपुरुषे च कृषौ प्रवर्तमानेन—त१.२.६; नितोदितवंतश्च पुरुषे च कृषौ प्रवर्तमाने—त४-मु; नितोदितवंतश्च पुरुषश्च कृषौ प्रवर्तमाने—त५; नितोदितवंतश्च द्यूतपुरुषे च कृषौ प्रवर्तमान—त७; नितोदितवंतश्च पुरुषस्य कृष्टौ प्रवर्तमाने—ग; नितोदितवंतश्च पुरुषस्य कृषौ प्रवर्तमाने—भ१.२.४; नितोदितवंतश्च पुरुषस्य कृषौ प्रवर्तमानाः—भ६। एतत्सूक्तप्रस्तावनायां सप्तममन्त्रस्य देवताविषये योऽभ्यूहः कृतः स यद्युचितस्तर्ह्ययमप्यभ्यूह आवश्यको भवति। सप्तम्याः कृषिस्तुतित्वं यदा प्रस्तावनायां प्रविष्टं तदैव 'पुरुषस्य कृषौ प्रवर्तमानस्य' इत्यपपाठो भाष्ये प्रविष्टः॥ १६. [८] आस्फारे—भ१.२.४-*मॅ। आस्थाल्य—ग; अस्फारे—त-भ६-मु। आस्फोरा—भ७॥ ३९५. ४. [१३] रतिं—उद्गीथ-मु-आउफ्लेट। मतिं—ऽ-मॅ॥

[१०. ३५] ३९५. २७. [१] **द्यावापृथिवी द्यावापृथिव्यौ**—ग-त३-भ१.२.४.५.७। द्यावापृथिव्यौ–त-भ६-मँ-मु ॥ ३९७. ६. [६] **अश्विनावपि**—त-भ-मु। अश्विनौ–मँ ॥ १४. [७] **स प्रार्थितः**—ग-त३-भ१.२.४.७। अप्रार्थितः (?)–त-भ६-मँ। प्रार्थितः–मु ॥ ३९८. २७. [१२] **पश्चे पशवे**—मु। पश्चे–भ। पश्चे पश्चात्मकाय–त१.२.७-भ६-मँ; पश्चात्मकाय–त४.५। ऋ. सं. १.४३.२; १.६५.१; ८.५.२०; १०.६१.१२ द्रष्टव्यम् ॥

[१०. ३६.] ३९९. २७. [१] **सर्वं**—ग-त३-भ१.२.४.७-*मँ। स्वर्ग–त१.२.६.७-मु; सर्व–त४; सर्ग–त५; सर्ग–भ६ ॥ ४००. २८. [५] **पिन्वतां सिञ्चतु**—ग-भ५.६। पिन्वतां प्रीणयतु किंतु–त१.२.६.७-मु; पिन्वतां किंतु–त४.५-भ१.४.७-मँ। पिन्वतां वृष्ट्या सिंचतु–उद्गीथ ॥ ४०१. ८. [६] **अस्माकं**—ग-त३-भ। नोऽस्माकं–त-मँ-मु। प्रथमायां पङ्क्तावपि 'नोऽस्माकम्' इत्यनावश्यकम्। 'अस्माकम्' इत्येव प्रतीकम् ॥

[१०. ३७.] ४०३. २०. येन सूर्य–भ-मु। येन सूर्यो–त-मँ ॥ ४०४. २. [१] **देवेषु जाताय**—त१.३.४-भ। देवेषु जाताय देवार्थमुत्पन्नाय–त२.७-मँ-मु। देवार्थमुत्पन्नाय–त५.६-भ६। देवजाताय देवात् प्रजापतेः सकाशादुत्पन्नाय-उद्गीथ ॥ ४०७. १०. [१२] **निधत्त**—ग-त३-भ५.६-मु-उद्गीथ। विधत्त–त-भ१.२.४.७–मँ ॥

[१०. ३८.] ४०७. १३. **ताण्डयशाट्यायनकाः**—भ६-मु। तांडकं छाट्यायनकाः–ग; तांडवा शाट्यायनका–त१.२.४.५.६; तांडवा छाट्यायनका–त३-भ१.२.४; तांडवाः शाट्यायनकाः–त७-*मँ। पञ्चममन्त्रभाष्यं द्रष्टव्यम्। 'तांडवशाट्यायनका' इति मँ-संसूचितम् ॥ ४०८. ५. [३] **त्रैवर्णिको वा अदेवः देवादन्यो**—भ१.४.६.७। त्रैवर्णिको वादेवः अन्यो–त१.२.६; त्रैवर्णिको वा देवादन्यो–त५। त्रैवर्णिको वादेवश्चान्यो–मु। त्रैवर्णिकोऽदेवः देवादन्यो–भ२-मँ। यो दासः अकुलीन इत्यर्थः। आर्यो वा कुलीनो वेत्यर्थः। अदेवः देवादन्यो वा पिशाचासुरराक्षसादिकः–उद्गीथ ॥ २७. [५] **कुत्सस्याहवं**। कुत्सस्य हवं–शा. ब्रा; जै. ब्रा.। २८. **अभ्यवदत्**—*मँ-मु। न्यवदत्–ग-त-भ ॥ ३०. **प्रादुद्रुवदिति**—ग-*मँ। प्रादुद्रवदिमपि–त; प्रादुद्रवदिति–त३ ॥ ३२. **वाध्रीशतेत**—*मँ। द्विशतेन–ग; वाध्रियतेन–त; वाध्रिशतेन–भ-मु। प्रादुद्रवदिति–भ-मु। प्राद्रवत्–शाट्या ब्रा., जै. ब्रा. ॥ ३१. **आहूतवन्तौ**—भ६-*मँ-मु। आहूयतांत–ग; आहूतवतां–त१.२.६.७; आहूतवंतौ–त४.५; आहूतवंत–त३-भ। ताण्ड्य ब्रा. ९.२.२२ द्रष्टव्यम् ॥

[१०. ३९.] ४१०. [३] **ऋतस्य**। 'रुतस्य' इति संहिता ॥ ४१. २८. [६] **मे मम संबन्धिनमिममाह्वानम् (?)**—§-मँ-मु ॥ ४११. २०. [८] **पुनः पुनरपि**—ग-त३-भ२.६। पुनरपि–त४-भ१.४.७-मँ-मु ॥ ४१३. २१. [१४] **वां**—त-भ६-मु। ततो वां–त३-भ१.२.४.७-मँ ॥

[१०. ४०.] ४१४. २६. [३] **बन्दिनो वाणी कापा**—त३-भ२.५-मु। बंदीनो वरणी कापा–त१.४.६; बंदीनो वरणा कापा–त२.५; बंदिनो वाणी सापा–भ१.४। बंदिनो वाणी कापा–ग-*मँ ॥ ४१५. ५. [४] **युवां**—ग-*मँ-मु। युवं युवां–त-भ ॥ ४१६. ४. [७] **पराजीयमानं**—ग-उद्गीथ। पराजयमानं–त-भ-मँ-मु ॥

[१०. ४२] ४२०. २२. [५] **स्पन्द्रं स्पन्दनशीलं**—ग-मु। स्यंद्रं स्यंदनशीलं—त-भ-मॅ। 'स्पन्द्रम्' इत्येव संहितापाठः न 'स्यन्द्रम्'। ऋ. सं. १.१८०.९; ५.५२.३; ८; ८७.३; ६.१२.५ अत्रापि स्पन्द्र इति पकारयुक्त एव पाठः। नागरीलिपिलिखितपुस्तकेषु प्रायेण यकारपकारयोः साम्यं दृश्यते। ऋ. सं. ६.१२.५ टिप्पणी द्रष्टव्या। 'स्पन्द्रम्' इत्येव उद्गीथभाष्ये॥ २५. **पूर्वाह्णे**—ग-*मॅ। पूर्वाह्णः—त१.२.४.७; पूर्वाह्णः—त३.५-भ-मु॥

[१०. ४३.] ४२२. २७. **इति याज्ये**—ऽ-मॅ-मु। इति याज्या-आश्व. श्रौ. ॥ ४२४. ११. [५] **पूर्वोऽपि**—ग-*मॅ। पुत्रोपि-त-भ१.२.४.७; प्रत्नोपि-भ६। पुरातनोपि-मु॥ ४२५. ६. [८] **पतयति**—*मॅ। पतयत् पतति—ग; पतयद्वि—त१.२.४.५.६; पतयत् गच्छति वि—त७; पतति—त३-मु; पति—भ१.२.४; पतयत् अपातयत्—भ६; तपति—भ७॥

[१०. ४४] ४२६. १७. [२] **अस्मदभिमुखं**—त-भ-मु। अस्मदभिमुखः—मॅ॥ २३. [३] **नृणां**—ग-त४.५-भ६। नृणां—त७-मु; नेतॄणां—त१.२.३.६-भ१.२.४.७। नरां नेतॄणां—मॅ॥ ४२७. १७. [५] **अनाधृष्याणि**—ग-भ२.६—*मॅ। अनाधृष्यानि—त-भ१.४.७। अनाधृष्या अनाधृष्याणि—मु॥ ४२८. ८. [७] **ये उपरे**—*मॅ—उद्गीथ। ये अपरे—ऽ-मु॥ २०. [८] **किंचेन्द्रो वृष्णः.....मदे सति**—*मॅ। लिखितपुस्तकेष्वशुद्धाः पाठाः। किंचेंद्रो वृष्णः स्वोदरस्यासकृत् वर्षणशीलान् सोमान् पीत्वा मदे सति—मु। वृष्णः वर्षितॄन् स्वोदकस्य सेक्तॄ सोमान् पीत्वा मदे सति मत्तः सन्नित्यर्थः—उद्गीथ॥

[१०. ४५] ४२९. १४. **वत्सप्रीराग्नेयं**—ऽ-मॅ-मु। वत्सप्रीराग्नेयं—अनु.॥ ४३०. ४. [२] **धामानि**—त१.२.६.७-मु-उद्गीथ। सद्मानि—त३.४.५-भ-मॅ॥ १३. [३] **त्वा त्वां**—ऽ-मु। त्वां-मॅ॥ ४३१. ३. [४] **द्यावापृथिव्यौ**—त-भ२.६.७-मु-उद्गीथ। द्यावापृथिवी द्यावापृथिव्यौ—भ१.४-मॅ॥ ५. **क्षामां वै रेरिह्यमाणो**—*मॅ-मु। क्षाम वै रेरिह्यमानणं-ग; क्षामामा वै रेरिह्यमाणं—त१.२.४.५; क्षामा वै रेरिह्यमाणं—त६-भ॥ ४३२. २१. [९] **सुम्नं**—भ२(प्रान्ते).७-*मॅ-उद्गीथ। द्युम्नं-ग-त-भ१.४.६-मु॥ ४३३. २. [१०] **जनिष्यमाणैः**—ग-त-भ६-मु-उद्गीथ। जनयिष्यमाणैः-भ१.२.४-मॅ। जैनिष्यमाणैः—भ७॥ १६. [१२] अस्य मन्त्रस्योद्गीथभाष्यमधो दीयते—अस्ताबि स्तुतोऽग्निः। नरां मनुष्याणां सुशेवः बहूपकारित्वात् सुसुखः वैश्वानरः विश्वेषां नराणां नेता कर्मसु प्रवर्तयिता विश्वैर्वा नरैर्यागार्थं नीयमानः विश्वानरस्य वा अपत्यभूतः ऋषिभिरस्माभिः सोमगोपाः सोमस्य रक्षिता रक्षआदिभ्यः। इदानीं कृतकृत्याः सन्तो वयं अद्वेषे द्वेषरहिते अस्माकमुपरि परस्परतो वा द्यूते द्यावापृथिवी हुवेम आह्वयाम नश्चयदृष्टादृष्टफलदानायास्मभ्यं यूयमपि हे कर्मांगदेवाः अग्निसहिताः धत्त दत्त रयिं धनं दृष्टादृष्टफललक्षणं अस्मे अस्मभ्यं सुवीरं सुपुत्रसहितं॥

अष्टमोऽष्टकः

अष्टमाष्टकभाष्यसंशोधनार्थमुपयुक्तानि लिखितपुस्तकानि—ग (१,२,४), त (१,२,३,४,५,६,७,८), भ (१,२,४,५,६,७,८)॥

[१०. ४६] ४३५. ८. **अनुवर्तनात्**—ग१.२-त१.२.३.७-मु। अनुवर्तमानात्—ग४-भ-मॅ॥ १६. [१] **वेत्ता**—त१.२.३.४.५.७-*मॅ-मु। शाता—ग-त६.८-भ१.४.५.६.८;

ज्ञानं-भ२ ॥ १८. यद्वा अपां अपसामित्यर्थः—*मॅ। अपसामित्यर्थः-ग१.२-त१.२.३.७.८-भ; यद्वा अप इति ('इति' नास्ति-त४) कर्मनाम अपसामित्यर्थः-ग४-त४; अपां समीप इत्यर्थः यद्वा ('यद्वा' नास्ति-त५)-त५.६ ॥ ४३६. १. [२] चतति°—ग४-त१.२.३.६.७.८-भ-मु। चरति°-त४; चसति°-त५। चति°-ग१.२-मॅ ॥ स्तोत्रैर्वा इच्छन्त आत्मन इच्छन्तः—*मॅ-मु। स्तोत्रैर्वा इच्छंतैः अनमिषंतो-त१; स्तोत्रैर्वा इच्छंतः आत्मानं इच्छंतः-त२.६-भ६; स्तोत्रैर्वा इच्छंतः अनमिषंतो-त३.७; र्वा इच्छंतः आत्मानं इच्छंतः-त८-भ१.२.४.८; स्तोत्रैर्वा अनिमिच्छंतः अनिमिषंता-त४; स्तोत्रैर्वा इवंतः अनिमिषंता-त५ ॥ २०. [४] नेतारं प्रापयिता-रमरतिं गन्तारं-त४-*मॅ-मु। नेतारमरतिं गंतारं-ग-त८-भ; नेतारं प्रापयितारं-त१.२.३.५.७; नेतारं-त६ ॥ २८. [५] जेतव्यान् शत्रून् जयन्तं-*मॅ। जेतव्यं-ग-त८; जेतव्यान्-त१.२.३.४.५.६.७-भ-मु ॥ २९. [५] भूर्जयन्तमित्येकपदं मत्वा—ग१.२-*मॅ-मु। भूर्जयंतमित्येकपदमिति मत्वा-ग४-त६.८-भ; भूर्जयंतमित्येकं पदमिति कृत्वा-त१.२.३.४.५; भूर्जयंतमित्येकपदं कत्वा-त ७। उद्गीथभाष्यस्य अयमेक एव निर्देशः सायणभाष्ये। 'भूः भूरादीन् लोकानित्यर्थः अत एव च महां महांतं विपोधां...' इत्यादि उपलभ्यमानोद्गीथभाष्यलिखितपुस्तके। 'जयन्तम्' इति पदस्य व्याख्यानाभावात् भाष्यमिदं त्रुटितं दृश्यते। तथापि 'भूः' इति पदस्य व्याख्यानात् सायणोक्तेः सत्यत्वं प्रतीयते ॥ ४३७. १७. [६] कर्मणा यन्त्रैः—मु। 'अयन्त्रैः' इत्यस्य स्थाने 'यन्त्रैः' इति भाष्यकारैः पठितम्। कर्मणायंत्रैः-मॅ। अयन्त्रैः अयमनैः गमनप्रतिबंधरहितैः स्वर्गमार्गैः-उद्गीथ ॥ २६. [७] श्वेतिमानमन्वन्तः—ग४-भ६.८-*मॅ-मु। श्वेतिमानमन्वमंचतः-ग१.२; श्वितिमानमवंत-त१.२.३; श्वितिमाननांचंत-त४; श्वितिमानवसंत-त५; श्वितिमानमर्चतः-त७; श्वेतिमानमंवतः-त८; श्वेतिमानमवंतः-भ१.४.७; श्वेतिमानमवंतः-भ२। ऋ. सं. २.३३.८ भाष्ये 'श्वितीचे' इति पदस्य व्याकरणप्रक्रिया द्रष्टव्या ॥ श्वेतं-ऽ-मु। श्वेतः-मॅ ॥ ४३८. १५. [९] किंच ईळेन्यं—ऽ-मु। ईळेन्यं-मॅ ॥ यमग्निं—ऽ-मु। अग्निं-मॅ ॥

[१०. ४७] ४३८. २९. बुद्धश्चेन्द्र—ग-त६-भ। बुध्यद्र-त८। बुध्द्वेंद्र-त१.२.३.४.५.७-मॅ-मु ॥ ४३९. २६. [३] धनं च—ग-त-भ१.४-मु। धनं-भ२.६.७.८-मॅ ॥ ४४०. १९. [६] जिगाति अभिगच्छति—ग-त-भ१.२.४.५.६.८-मु। जिगाति-भ७-मॅ ॥ ४४१. ४. [७] हृदुद्युभ्यां ङेरुपसंख्यानमिति सप्तम्या अलुक्—त-भ१.२.४.६.८-मु। ङेरुपसंख्यान-मिति सप्तम्या अलुक्-ग; हृदुद्युभ्यां ङेरुपसंख्यानमिति-भ५। हृदुद्युभ्यामित्युपसंख्यानात् ङेरलुक्-मॅ। १२. [८] दद दाने—ऽ-मु। ददातेः-मॅ ॥

[१०. ४८] ४४२. २ [१] हविषो दात्रे—ग-त१.२.३.४.५.६.८-भ२.४.५.६.८-मु। हविर्दात्रे-त७। दात्रे-भ१.७-मॅ ॥ ११ [२] तदत्रोच्यते—ग-मु। तत्रोच्यते-त-भ-मॅ ॥ २४ [३] सेनासमूहं। समूहशब्दस्य नपुंसकलिंगप्रयोगश्चिन्त्यः ॥ कुर्वन्ति—ग-त१.२.६.८-भ। कुर्वते-त४-मॅ। मु-पुस्तकेऽस्य मन्त्रस्य भाष्यमेवम्-मह्यं मदर्थं त्वष्टा देवः आयसमयोमयं वज्रं आयुधं अतक्षत् संपादितवान्। अपि च देवाः मयि विषये क्रतुं यज्ञं अभृजन् कुर्वंति मम अनीकं अश्वादि सूर्यस्येव रवेरिव दुस्तरं दुरवगाहं। किंच कृतेन निष्पादितेन कर्त्रेन वृत्रवधादिरूपेण कर्मणा उपलक्षितं मां सर्वे आर्यंति गच्छंति ॥ अर्यमीश्वरं—त-भ। आर्यमीश्वरं-मॅ ॥ ४४३. १५. [५] सर्वस्य

धनस्य—ग-त-भ२.४.५.६.८-मु। धनस्य-भ१.७। धनस्य सर्वस्य-मॅ ॥ ४४४. १० [७]यथा—ग-*मॅ-मु। त-भ-पुस्तकयोः 'यथा' नास्ति ॥ जीर्णत्रीह्यादिस्तम्बान्—त३-*मॅ। जीर्णकस्यादिस्तंभान्-ग; जीर्णत्रीह्यादिस्तंभान्-त; जीर्णत्रीह्यादिस्तंभनात्-भ। निष्पावजीर्णत्रीह्यादिस्तंबान्-मु ॥ २१ [८] उत वा अपि च—ग-त-भ१.२.४.५.६.८-मु। उतावपि च-भ७। उतापि च-मॅ ॥ २८ [९] आश्रयणीयः सन्—त-भ१.२.४.६.८-मु। आश्रयणीयः-ग-भ७-मॅ ॥ ४४५. १४ [१०] अस्था अस्थ्ना—त८-भ१.२.६। अस्था अस्थ्ना न-त६; अस्था अस्था-भ४.७.८। अस्था-ग-त१.२.३.४.५.७-मॅ-मु ॥

[१०. ४९] ४४६. २१ [३] सुखवासाय—§-मु। सुखार्थ-मॅ ॥ ४४७. १७ [५] 'अकरम्' इति पदपाठः। 'करम्' इति भाष्यकारैः स्वीकृतमिति व्याकरणप्रक्रियया स्पष्टम्। अकरं कृतवानस्मि-उद्गीथ ॥ १८ अरन्धयं वशमनयम्—त-मु। अरंधयं वशं गमयः-ग१.२; अरंधयं वशमगमयं-ग४। अरंधयं-भ-मॅ ॥ २५ [६] अनुषक्तः—ग-त६.८-भ६.८-मु। आनुषक्तः-त१.२.३.४.५.७-भ१.२.४.७-मॅ ॥ ४४८. ७ [७] ऋधगित्ययं—त५.६.८-भ। ऋधगित्यव्ययं-ग-त१.२.३.४.७-मॅ-मु ॥ १२ [८] सप्तहा सप्त°—ग-त१.२.३.४.५.७-मु। सप्त°—त६.८-भ-मॅ ॥ शत्रुपुरां—ग-त२.३.४.५.६.७.८-भ४.५.६.८-मु। शत्रुपुरा-त१-भ२; शत्रूणां पुरां-भ१; शत्रूणां पुरां वा-भ७। पुरां शत्रूणां वा-मॅ ॥ १६ अडभावः—त-भ-मु। अडभावश्छांदसः-ग। अडभाव आर्षः-मॅ ॥ २३ [९] स्रवतीः—§। स्रवंतीः (?)-मॅ-मु। स्रवतः नदान् सिंधुलोहितप्रभृतीन्-उद्गीथ ॥ २६ अलम्भयम्—मु। लेभेयं-ग१.२; लंभयं-त-भ१.२.४.५.६.८; लभेय-ग४; लभयं-त३-भ७। अलभं-मॅ। लिखितपुस्तकपाठसादृश्यात् मु-पाठः स्वीकृतः। 'अलभे' इत्यपि संभवेत्। विदं लब्धवानस्मि-उद्गीथ ॥ २७ पुषादि° इत्यादिना—भ१.२.४.६.८-मु। पुष्टादीत्यादिना-भ७; पुषादित्यादिना-त। पुषादित्वात्-मॅ। दिवादौ लाभार्थे विद्धातुर्नास्ति ॥ ४४९. ६ [१०] आगामिवर्षासमय°—ग४-त१.२.३.४.७.८-भ१.२.८-मु। आवर्षसमय°-भ७। आगामिवर्षसमय°-त५-मॅ ॥

[१०. ५०] ४४९. १९ सप्तर्चं—ग-त-भ२.६-मु-उद्गीथ। अष्टर्चं-भ१.४.७.८-मॅ ॥ ३० [१] सांहितिको दीर्घः—§-मु। दीर्घः-मॅ ॥ ४५१. ५ [४] विश्वस्मिन् सर्वस्मिन्—ग-त-भ४.५.६-मु। विश्वस्मिन्-भ१.७-मॅ ॥ ६ भुवः—§-मु। अभवः-मॅ ॥ १६ [५] अम गत्यादिषु...छान्दस उमादेशः—*मॅ। लिखितपुस्तकेष्वशुद्धाः पाठाः। अम गत्यादिषु औणादिकः अत्रन्प्रत्ययः छांदस ऊमादेशः-मु ॥ १८. एता एतानि—ग-त-भ५.६.८-मु। एतानि-भ१.२.४.७-मॅ ॥ २४ [६] सर्वाणि सवना—त-मु। सवना सर्वाणि-मॅ ॥ ४५२. ५ [७] स्तोत्रकर्तारो—त-भ-मु। स्तोत्रकृतो-मॅ ॥

[१०. ५१] ४५२. २८ [१] तत् प्रावरणं—ग१.२-त-भ-मु। तत्र प्रावरणं-ग४। प्रावरणं-मॅ ॥ तत्तत्—त-भ-मु। तत्-मॅ ॥ ४५३. १ जातप्रज्ञ ते—ग-त-भ१.२.४.६.८-मु। जातप्रज्ञान-भ७-मॅ। 'ज्ञ ते' इति पृष्ठमात्रालेखनरीत्या 'ज्ञात' इति स्यात् नतयोश्च सादृश्यम् ॥ १८ [३] अप्रविष्टं—त६.८-भ५.६। प्रविष्टं-ग-त१.२.३.४.५.७-भ१.२.४.७.८-मॅ-मु ॥ २७ [४] देवा—ग-त-भ१.२.४.६.८-मु। देवगणा-भ७-मॅ ॥ २९ हविर्वहने—ग४-त२.७-

म१.४.६.७। हविर्वहनप्रयोजने—त४.५-मॅ-मु॥ नैव योजयन्तु—त६-मु। नैव योजयंत—ग-त २.३.७-म१.२.४.५.८; नैवायोजयंत—त१; नैव योजयतो—त४; नैव योजयंतो—त५; नैव योजयत—त८-म६; नैव योजयंत्—म७। नैव योजयंत (?)—*मॅ॥ ४५४. ९ [५] त्वं तु—ग-त१.२.३. ४.५.६.७-म-मु। त्वं—त८-मॅ॥ १२ संमत्या। समित्य—मु। 'तव संमत्या' इति समीचीनमिति मॅ-मतम्॥ १३ वह च—ग-त१ २.३.६.७.८-म१.५.६.८-मु। वह—त४.५-म२.४.७-मॅ॥ २१ [६] वृणोति—§-मु। वृणुते—मॅ॥ २३ गौरो न गौरमृग—ग-त३.६.८-म४.५.६-मु। गौपा न गौरमृग—म८; गोरो न गौरशृंग—त१.२; गोरो न गौरमृग—त७; गौरमृग—म१; गौरो मृग—म७। गौगे न मृग—मॅ॥ ३० [७] युक्तः—§। युंज्मः—मु। तथा—मॅ॥ संयुक्तः—त१.२.३. ६.७.८-म-मु। युक्तः—ग-त४.५-मॅ॥ ४५५. ८ [८] प्रतिजानाति। प्रति + ज्ञा इत्यात्मनेपदी धातुः॥ १४ तस्मादाहुराग्नेयाः.....। 'तस्मादाहुराग्नेयाः प्रयाजानुयाजा आग्नेयमाज्यमिति' इति शाङ्खायनब्राह्मणम् (१.२)। 'शरीरदाया ह वा अग्नयो भवन्ति' 'पुरुषाहुतिर्यस्य प्रियतमा' इति वाक्यद्वयं नोपलब्धम्। 'प्रियतमा' अस्य स्थाने 'प्रयतमेति' इति मु-पाठः॥

[१०. ५२] ४५६. १४ [२] आहुतिर्भवति भवत्वित्यर्थः—त४.५.७-म४-मु। आहुतिर्भवति भवतुमित्यर्थः—ग। आहुतिर्भवत्वित्यर्थः—त६.८-म१.२.७.८-मॅ। प्रादुर्भवति भवत्वित्यर्थः—त१.२.३॥ १५ तदेवोभयं भवतीति—*मॅ। तदेव भक्षयंतीति—ग; तदेवाभयंतीति—त१. २.३ ८; तदेवाभयं भवतीति—त४.५; ते देवा भयंतीति—त६-म२.८; तदेवा नयंतीति—त७; तदेवा भवंतीति—म४। तदेवोभयंतीति—मु। एतच्छन्दोगब्राह्मणवचनमन्वेषणीयम्॥ २९ [३] स्वात्मानं—ग-त१.२.३.४.६.७.८-म-मु। आत्मानं—त५-मॅ॥ ४५७. ७ [४] कल्पयाति कल्पयति—म४.६-मु। कल्पयति—ग-त४.५.६.८-म५.७; कल्पयाति कलायति—त१.२.३.७। कल्पयाति—म१.२.८-मॅ॥ २५ [६] मह्यं—§। मह्यं च—मॅ-मु॥

[१०. ५३] ४५७. २८ दृबृचस्य—ग-त१.२.३.५.६.७.८-म१.२.४.५.६.८-मु। तृचस्य—त४-म७-मॅ॥ ४५८. ६ [१] जानंस्तथा—त-म४-मु। जानन्—ग। तथा—म१.२.६. ७.८-मॅ॥ ८ नि षत्साद्धि—मु। नि षद्धि—त१.२.३.७-म१.२.६; नि षत्संधि—म७; नि षद्धि—म८। नि हि षत्सत्—म४-मॅ॥ २१ [३] जीवति मृतशब्दो जायते तस्य—*मॅ। जीवति सति मृतप्रया जायते तस्य (तस्याः—त४.५)—ग-त४.५; जीवति सति प्रया जायत (जायते—त६-म६) तस्याः—त१.२.३.६.७.८-म६; जीवति सति प्रजा अजायते तस्याः—म४; जीवति प्रजाया जायते तस्या—म१.२.७.८। जीवति सति मृतशब्दो जायते तस्य-मु। ऐ. ब्रा. ७.९; क. सं. ५.१.६ भाष्यं च द्रष्टव्यम्॥ २९ [३] गुह्यां—ग-त-म१.२.४.६.८-मु। जिह्वां गुह्यां—म७-मॅ॥ ४५९. २७ [६] अग्न्यन्तराले श्वातिक्रमणे—*मॅ-मु। अग्नितराले ख्यातिक्रमणे—त१.२.३.७; अस्यंतराले श्वातिक्रमणे—त५; अग्निनरोले ख्यातिक्रमेण—त६.८-म१.६.८; अग्निनरोले ख्याभिक्रमेण—म२; अग्न्यंतराले ख्यानिःक्रमेण—म४; अग्निनरोवेद्याभिक्रमेण—म७॥ २८ मध्यं—त१.२.३.६.८-म-मु। मध्ये—त४.५.७-मॅ॥ च पूरयेत्—त१.२.३.६.७.८-म-मु। वापूरयेत्—त४.५। चापूरयेद्—मॅ॥ ४६१. १ [८] सं रभध्वम्—इति न व्याख्यातम्॥ ४६२. १ [११] ते मरुतो। 'ते क्रमवो' इति मु-पाठो युक्तः। 'चर्माणि' इत्यस्यानन्तरं 'वा' इति मु-पुस्तकेऽधिकम्॥

[१०. ५४] ४६३. ९ [३] केऽपीत्यर्थः—ग-त६-८-भ-मु । कोऽपीत्यर्थः (!)--त१. २.४.५.७-मॅ ॥ १० मातरं च—§-मु । मातरं--मॅ ॥ १८ [४] उत्तरसूक्त उपान्त्यवर्जिते—*मॅ-मु । उत्तरसूक्ते उपान्त्यवर्जितेषु--त४.५; उत्तरसूक्ते उपेत्येवर्जितेषु--त१.२.३.७; उत्तरसूक्तेषु उपान्त्यवर्जितेषु--त६.८-भ; उत्तरसूक्ते उपान्त्यवर्जितेषु दूरे तन्मामेत्यादिचतसृषु मंतृषु--ग ॥ १९ वेत्सि--ग-त-भ१.२.४.६.८-मु । अदाभ्यान्यहिंस्यानि वेत्सि--भ७-मॅ ॥ ४६४. १० [६] °मधुरद्रव्याणि—ग-त६.८-भ८-मु । °मधुद्रव्याणि--त३.४.५-भ१.२.४.७-मॅ ॥

[१०. ५५] ४६४. २३ [१] सती—§-मॅ । सत्यौ--मु ॥ अवेत्यब्रूतां—*मॅ । आह्वातवत्यौ--ग; अहेत्यब्रूतां--त-भ । मु-पुस्तके एतन्नास्ति ॥ ४६५. १५ [३] आपृणात्—त-भ-मु । अपृणात्--ग-मॅ ॥ १६ °रक्षःसंशकान्—ग-त१.२.३.४.५.७-भ१.२.७-मु । रक्षसःसंशकान्--त६-भ४.६.८; रक्षससंशकान्--त८ । राक्षससंशकान्--मॅ ॥ २९ [४] यच्च—ग-त१.२.३.४.७-भ१.२.४.७.८-मु । या--त५.६.८; यदा--भ६ । यद्वा--मॅ ॥ ४६६. १० [५] अननमनः प्राणनं—*मॅ-मु । अनतिः प्राणनं--ग१.२; अनने अनः प्राणनं--ग४; अनेनमनः प्राणनं--त१.२. ३.४.५.७-भ२.४.६.८; अमनेन मनः प्राणनं--त६; अननः प्राणनं--त८; अनेनमनः प्रीणनं--भ१. ७ ॥ १३ अद्य—ग-त३.४.५.७-भ-मु । अयं--त१.२.८-मॅ ॥ २३ [६] सुपर्णरूपकेण—त-भ-मु । सुपर्णरूपेण--ग-मॅ ॥

[१०. ५६] ४६७. १७ वाद्यादि°—त१.२.३.७-भ७-मु । वाद्यादि°--त४.५.६.८-भ१.२.४.६.८-मॅ ॥ ४६८. २ [१] यत्सूर्यः—ग-*मॅ-मु । ये सूर्य--त-भ१.२.४.६.८; यः सूर्य--भ७ । अस्याः श्रुतेर्मूलमन्वेषणीयम् ॥ ४६९. २४ [६] संबन्धिनं—§-मॅ-मु । 'संबन्धि' इति भाव्यम् ॥

[१०. ५७] ४७०. १२ एतस्मादनुक्रमणीसूत्रात्पूर्वं विद्यमानः 'पराणि चत्वारि सूक्तान्युक्ता ऋषयो द्वैपदे त्वन्त्रिमण्डले' इतीयानंशः भाष्यकारैर्नादृत इति दृश्यते ॥ २३ [१] लिखितपुस्तकेषु वर्तमानाः शाटयायनकब्राह्मणपाठभेदा मॅक्समुल्लरमहाशयैः सोद्धारं विचारितास्ते तदीयायां टिप्पण्यां द्रष्टव्याः ॥ २३ [१] अभ्यगमंस्ते । अभ्यदासंस्ते--शाट्या. ब्रा.; जै. ब्रा. । २४ तं ह स्मानग्नौ निधाय । तौ ह स्मानग्नावधिधाय-शाट्या. ब्रा.; जै. ब्रा. ॥ पचतोऽग्नौ । पचतोऽनग्नौ--शाट्या. ब्रा., जै. ब्रा. । पचंते नग्नौ--ग ॥ २५ असुराशं दग्ध्वा । असुराशनं जग्ध्वा--शाट्या. ब्रा.; जै. ब्रा. ॥ २६ आवां । आवं--शाट्या. ब्रा.; जै. ब्रा. ॥ २७ [६] 'अयं ह्यातततन्तुर्यत्प्रजाः' इति ब्राह्मणवाक्यस्य मूलं नोपलब्धम् ॥ २७ न्वेता नाभितपन्तीति । त्वैता नाभितप्स्यन्तीति--शाट्या. ब्रा.; जै. ब्रा. ॥ २८ आहुत्य । आहृत्य--शाट्या. ब्रा.; जै. ब्रा. । समाहृत्य--ग । २९ मा प्र गाम—§ । प्र गाम--मॅ-मु ॥ ४७१. २ [२] साधयिता देवेष्वाततः—ग-त-मु । साधयिता--भ-मॅ ॥ ३ प्राप्नुयाम—*मॅ । प्राप्नोमि--ग-त१.२.३.७; प्राप्नुमः--त५; प्राप्नोति--त६.८-भ । व्याप्नुयाम-मु ॥ ५ [१] च तिसृभिः--मु-आश्व. श्रौ । चतसृभिः--§-मॅ ॥ ८. आ हुवामहे आह्वयामहे—ग४-त१.२.३.४.५.७-मु । आ हुवामहे—ग१.२-त६.८-भ-मॅ ॥ ११. मन्मभिश्च—§-मु । मन्मभिः--मॅ ॥ १५. [४] क्रत्वेऽपानाय दक्षाय प्राणाय—*मॅ । क्रत्वे प्राणनाय दक्षाय अपानाय (अपाननाय–ग४) च–ग-भ८; क्रत्वे प्राणनाय दक्षाय अपाननाय–त४.५-भ४; क्रत्वे प्राणनाय अपाननाय–त१.२.३.७-मु; क्रत्वे प्राणनाय दक्षाय अपानाय–त६-भ६; क्रत्वे–त८;

ऋत्वे प्राणाय अपाननाय–भ१; ऋत्वे प्राणानाय दक्षाय अपाननाय–भ२; ऋत्वे प्राणाय अपानाय–भ७ ॥ १६. ज्योक् चिरकालं सूर्यं च दृशे सूर्यं द्रष्टुं—ग-त-भ-मु। ज्योक्च चिरकालं सूर्यं दृशे सूर्यं द्रष्टुं–मॅ ॥ २०. [५] 'पितरः' इति पदं भाष्यकारैः संबोधनान्तस्य स्थाने प्रथमान्तं गृहीतं दृश्यते। तथा च 'मनः' इत्यस्य स्थाने 'जनः' इत्यपि स्वीकृतम् ॥ २७. [६] युक्ताः सन्तः—ग-त-भ५.८-मु। युक्ताः–भ१.२. ४.७-मॅ ॥

[१०. ५८] ४७२. ७. [१] °जीवनाय—ऽ-मु। °जीवनायेत्यर्थः–मॅ ॥ ४७३.१. [५] तदिति गतम्—त-भ-मु। तदाबर्तयामः–मॅ ॥

[१०. ५९]. ४७५.६. [२] अत्रापि न्विति—मु। अत्रान्विति–ऽ। अत्र न्विति-मॅ ॥ जीर्णा स्तुता वा—ग-त३-भ२.८-*मॅ। जीर्णा स्तुति– त१.२.७; जीर्णा स्तुतिर्वा–त३.६.८-भ; जीर्णा स्तोता वा–त४.५। जीर्णा स्तुता–मु ॥ ९. गच्छतु—ग-त३.४.५-मु। गच्छतां–त१.२. ६.७.८-भ-मॅ ॥ २३. [४] मा कार्षीः—त१.२. ३.भ-मु। नोऽस्मान् मा कार्षीः–ग-त७-मॅ ॥ २४. सूर्यदर्शनासंभवात्—ग-त१.२.३.६.७.८-भ१.२.४.६.८-मु। सूर्यसंदर्शनासंभवात्–त४.५; सूर्यदर्शनात्–भ७। सूर्यादर्शनात्-मॅ ॥ ४७६. ३. [५] चिरसंदर्शने—त१.२.३.७-*मॅ-मु। चिरसंदर्शन–ग-त४.५.६-भ ॥ वर्धयस्व वर्धय—ग-त४.५.७-भ१.२.७-मु। वर्धयस्व वर्धयस्व–त१.२.३; वर्धय वर्धय–त६-भ४.८। वर्धय वर्धयस्व–मॅ ॥ ९. [६] प्राणं पुनः—त-भ-मु। पुनः प्राणं–मॅ ॥ ४७७. ५. [८] रपः—त१.२.३.७-भ६.८-मु। परः–भ१.२.४; परं–भ७। परं रपः–मॅ ॥ ६. हिनस्तु—त१.२.३.७-भ४.६-८-*मॅ-मु। हिनस्ति–ग-त४.५; हिनस्तु–त६.८; मा आगच्छतु–भ१.७ ॥ १५. [९] परिरक्षन्तु—ऽ-मु। रक्षंतु-मॅ ॥ २१. [१०] समीरय संप्रेरय—भ६-मु। संप्रेरय समीरय–त-भ१.२.४.७.८। समीरय प्रेरय–ग-मॅ ॥

[१०. ६०] ४७७. २८. स्पर्शनहेतुभूतो देवता। °भूतो हस्तो देवता इति पाठं मॅक्स-मुल्लरमहाशया अभ्यूहन्ति ॥ २९. पञ्चाद्या—मु-अनु। पञ्चम्याद्या–त-मॅ ॥ ४७८. २८. [५] अनयेन्द्रमाह्वयतेऽसमात्यर्थं—*मॅ। अनयेंद्रमाशते समत्यर्थ–ग; अनयेंद्रमासते असमात्यर्थ–त१.२. ३.६.८-भ६; अनया इंद्रस्य समासतेत्यसमात्यर्थे–त४.५; अनया इमासते असमात्यर्थ–भ१.२.४; अनया समासिषु असमात्यर्थ–भ७; अनया इंमासते–भ८। अनयेंद्रमाशासते असमात्यर्थ–मु ॥ ३०. दर्शनाय—ग-त-भ१.२.४.५.६.८-मु। संदर्शनाय-भ७-मॅ ॥ ४७९. १३. [७] एषान्तः°। एषोऽतः°–शाट्या. ब्रा., जै. ब्रा. ॥ सुप्रीतस्तस्थौ—ऽ-मॅ-मु। सत्रीळस्तस्थौ–बृहद्दे ॥ १४. गौपायनानभि—त६.८-*मॅ-बृहद्दे। गोपायनाविभि–ग; गोपायनानिति–त१.२.३. ७; गोपायननभि–त४.५; गोपायनानभि–भ२.४.६.७.८। गौपायनानिति–मु ॥ १५. सूक्तेन ते—ऽ-मॅ-मु। सूक्तेनाप्य–बृहद्दे ॥ १५. द्वैपदेन यथात्रिषु—*मॅ-मु-बृहद्दे। द्वैपदसूक्तेन स्तुवन् येद्वदत्रिषु–ग; द्वैपदं यद्वदत्रिषु–त१.२.३.६.७.८-भ; द्वैपदं यद्वमत्रिषु–त४.५ ॥ अथाग्निरब्रवी°—ऽ-मॅ-मु। अग्निरप्यब्रवी°–बृहद्दे ॥ १६. चेक्ष्वाको°–ऽ-मॅ-मु। चैक्ष्वाको°–बृहद्दे ॥

[१०. ६१] ४८१. ६. सूक्ते शंसय ते—ग२-त६-भ६-*मॅ। सूक्ते संयते–ग१-त१. २.३.७; सूक्तं संयते–त४.५; सूक्ते संस्तूयते–भ१.२.७; सूक्ते संयंते–भ८। सूक्ते संयच्छते-मु ॥

८. **यज्ञं पारं प्रापय्य**—*मॅ। यज्ञपरं पारं प्रापय्य—ग-त-भ८; यज्ञपारं प्राप्य—भ१.२.७; यज्ञपारं प्रापय्य—भ४; यज्ञस्य परं पारं प्रापय्य—भ५.६; यज्ञं परं पारं प्रापय्य—मु ॥ ९. **तं च**—भ६—*मॅ-मु। ते च—ग-त-भ२.८ ॥ २२. [१] **तेन नाभानेदिष्ठः**—*मॅ-मु। तेनायं नाभानेदिष्ठः—ग; तेन यज्ञाभानेदिष्ठः—त-म ॥ २५. **यज्ञं पारं**। यज्ञपारं—§-मॅ-मु। सूक्तप्रस्तावना द्रष्टव्या ॥ ४८२. ३. [२] **यथा घनः**—*मॅ-मु। यथा घनं—§ ॥ १६. [३] **आदिशम् आदिश्य**—ग-त४.५-भ६-मु। आदिशे आदिश्य—त१.२.३.७; आदिश्य—भ। आदिशं—त६.८-मॅ ॥ ४८३. ९ [५] **अस्तेः सिपि**———मॅ। अस्तेः तिपि लोपः—ग; अस्तेः सिपि रूपं—त४-मु। अत्र भाष्यांशो लुप्त इति विस्पष्टम्। ऋ. सं. १०. १२९. ३ भाष्ये 'आः' इत्यस्य व्याकरणप्रक्रिया द्रष्टव्या ॥ २५. [७] **रोहितं भूतामृश्यो भूत्वा**—मु। रोहितां भूतां मृश्यो भुवा—ग; रोहिता भूतामृश्यो भूता—त१.२.७; रोहिता भूतां मृश्यो भूता—त३.४.५; रोहिता भूतां—त६.८; रोहिता भूत्वा—भ१; रोहिता—भ४; रोहिता भूता—भ६.८। रोहितो भूत्वा—भ२-मॅ ॥ ४८४. ५. [८] **गोनिरोधायागच्छन्तं**—मु। गोनिकरायागच्छतं—ग; गोनिरोपागच्छंतं—त१.२.३.७; गोभिरोच्चागच्छंतं—त४.५; गोनिरोपगच्छंतं—त६.८; गोनिरोयछतं—भ१.४; गोनिरोधायागच्छतं—भ२। गा निरोधयंतं—मॅ॥ ८. **यः कश्चित्**—ग१.२-*मॅ; किंच—ग४-त४.५; यं किंचि—त१.२.३.७.८—भ८; यं किंचित्—भ१.४.६; यं कंचि—भ२; यं किंच -त६। मु-पुस्तके 'यः कश्चित्' इति नास्त्येव ॥ २९. [१०] **ऋतयुक्ति**—ग४-त-भ१.२.४.६.८-मु। ऋतयुक्तिमग्मन्—ग१.२-भ७-मॅ ॥ ४८५. २. 'अदक्षिणानि सत्राणीत्याहुः' 'ये यजमानास्त ऋत्विजः' इति वाक्यद्वयं कुत उद्धृतम्? ॥ १०. [११] **हे इन्द्र**—§-मॅ-मु। 'हे रुद्र' इति भाष्यमिति—मॅ-मतम् ॥ २०. [१२] **स्तोता इति**—त४। स्तोत्रकर्ता—ग१.२; तेतेति—त१.२.३.६.७.८-भ२.८; तेते—त७; ते इति—भ१; तेति—भ६; ति—भ४; इति—ग४-भ७-मॅ-मु ॥ ४८७. १. [१६] **रेजयत् अकम्पयत्**—त१.२.३.७-भ६-मु। रेजयत् कंपयत्—त४.५। रेजयत्—ग४-त६-भ१.२.४.७.८-मॅ ॥ **स एवाग्निं**—*मॅ-मु। स एवाग्निः—त१.२.३.६.८-भ; सोम एवाग्निः—त४.५.७ ॥ **अशक्तं सन्तं**—*मॅ-मु। अशक्तः सन्—§ ॥ २. **रेजयत्**—त१.२.३.७—भ४.६.८-मु। रेजयत् अकंपयत्—ग४-भ१.२.७-मॅ ॥ २०. [१८] **सूर्यापत्यत्वेऽपि पर्यवस्यति**—मु। सूर्यापत्यमपि मित्येवं पर्यवसाम्यति—त१.२.३.७-भ१.२.८; सूर्यापत्यमित्येवं पर्यवस्यति—भ४; सूर्यापत्यमपीत्येवं पर्यवसाम्यति—भ६। सूर्यापत्यत्वं पर्यवस्यति—भ७-मॅ ॥ ४८८. ५. [१९] **द्विजा.....प्रथमजाः**—*मॅ। द्विजाः ऋतस्य प्रथमजाः—ग; द्विजा ऋतस्य—त१.३.७; द्विजाः प्रथमजाः ऋतस्य—त२; द्विजा — — ऋतस्य प्रथमजाः—त४.५; द्विजा ऋतस्य प्रथमजाः सत्यप्रथमजाः—त६; द्विजा—ऋतस्य प्रथमजाः सत्यप्रथमजाः—त८; द्विजाः ऋतस्य प्रथमजाः सत्यस्य प्रथमजाः—भ१.४.७; द्विजा — — ऋतस्य तस्य प्रथमजाः सत्यप्रथमजाः—भ६; द्विजाः ऋतस्य तस्य — — सत्यप्रथमजाः—भ८। द्विजा ब्रह्मांडजा ऋतस्य—मु ॥ १४. [२०] **शिशुः शंसनीयः सेनेव**—*मॅ। शिशुः सेनेव—ग; शिशुर्न सेनेन—त-भ४.८; शिशुर्न सोनेन—भ१.२.७। श्रेणिर्न पिपीलिका पंक्तिरिवाहिं शिशुः शंसनीयः—मु ॥ ४९०. १०. [२६] **अद्भिर्देवताभिर्देववान्**—ग१.२-मु। देवताभिदेववान्—त१; देवतातिर्देववान्—त७; देवताभिदंवचने—त४.५; देवताभिर्देवान्—भ७। देवताभिर्देववान्—त२.

३.६.८-भ१.२.४.८-मॅ । 'अङ्गिरब्देवताभिर्देवबान्' इति स्यादिति मॅक्समुल्लरमहाशयैः संसूचितम् ॥ २०. [२७] प्रापयथ—त१.२.३.६.७.८-भ-मु । प्रापय–त४; प्रापय ये च–ग४ । प्रापयत–मॅ ॥ २१. अमूरा अमूढाः—ग-त१.२.३.४.५.७-मु । अमूढाः–त६.८-भ । अमूराः–मॅ ॥

[१०. ६२] ४९३. २० [७] तत्पुण्याय च कर्माणि—त१.२.३.७.८-भ१.२.४.८-मु । तत्पुण्यानि च कर्माणि–ग१.२ । तत्पुण्याय च कर्मणि–ग४-त४.५.६-भ७-मॅ । अयं श्लोको बृहद्देवतायां नोपलभ्यते । एवमेवाष्टममन्त्रप्रस्तावनायामागतः 'सावर्णिना' इत्यादिरपि ॥ ४९४. १३ [१०] गोपरिणसौ—*मॅ । 'गोपरीणसौ' इति मुद्रणदोषः । परिणद्धपशू–§ । गोपरीणसौ परिणद्धपशू–मु ॥

[१०. ६३] ४९४. २९ चोत्तरया—ग४-भ८-*मॅ-मु । चरया–ग१.२; सोत्तरया–त १.२.३.४.५-भ२.४; वात्तरया–त६; उत्तरया–त७; वोत्तरया–त८; तोत्तरया–भ१; वा सा सहोत्तरया–भ६ ॥ पृष्ठ्याभिप्लवषडहयोस्तृतीयेऽहनि वैश्वदेवशस्त्र एतत्सूक्तं वैश्वदेवनिविद्धानम्—त१.२.३.४.५.७-मु । पृष्ठ्याभिप्लवषडहयोः तृतीयेहनि वैश्वदेवनिविद्धानं–ग१.२; पृष्ठ्याभिप्लवयोस्तृतीयेहनि वैश्वदेवनिविद्धानं–त६-भ४; पृष्ठ्याभिप्लवयोस्तृतीयेहनि वैश्वदेवे एतत्सूक्तं वैश्वदेवं निविद्धानं (वैश्वदेवनिविद्धानं–त८-भ६.८)–ग४-त८-भ१.२.६.७.८-मॅ । ऋ. सं. १०.६६ सूक्तप्रस्तावना द्रष्टव्या ॥ ४९५. २० [२] उत अपि च.....भवन्ति—ग-त२.३.४.६.७.८-भ१.२.४.५.८-मु । इदं नास्ति भ७-मॅ-पुस्तकयोः ॥ ४९६. २ [३] स्तुतिबलान्—§ । अतिबलान् (?) -मॅ-मु ॥ ४९७. ४ [६] कः वा यजमानः । 'वः' इत्युत्तरार्धे पदम् । भाष्यकारैः 'वा' इति पठितम् ॥ ४९८. ८ [१०] उदयनीयायां—ग१.२-त१.४.५-भ१.२.७-मु । उदनीयायां–ग४-त२.३; उदयनीया–त६.८-भ४.६; उदनीयां–त७; उदयनी–भ८ । उदयनीयाया–मॅ ॥ ४९९. ८ [१२] दुर्शानं–§ । दुर्विज्ञानं–मॅ-मु ॥ १५ [१३] हे देवाः—ग-त-मु । हे श्व देवाः–भ१.७ । हे विश्वे देवाः–भ२.८-मॅ ॥ १९ सन्मार्गे नयथ—त१.२.३.६.७-भ१.२.४.८-मु । सन्मार्गेण प्रापयथ–ग; सन्मार्गेण नयथ–त४ । सन्मार्गं नयथ–त८-भ७-मॅ ॥ २५ [१४] विनाश्यन्ते–ग-त१.२.३.६.७.८-भ६.८-मु । विनश्यंते–त४-भ१.२.४.७-मॅ ॥

[१०. ६४] ५०२. ३ [३] गन्तुमशक्यं—§-मॅ-मु । 'गूहितुमशक्यम्' इति स्यादिति मॅक्समुल्लरमहाशयानामभिप्रायः । अगोह्यमगूहनीयं सर्वजनप्रकाशमित्यर्थः–उद्गीथ ॥ ५०३. ३० [८] सोमाभिषेकार्थं—ग-त६.८-भ । सोमाभिधानार्थं–त२.३; सोमाभिधानार्थं–त७ । सोमाभिषवार्थं–त१.४.५-मॅ-मु ॥ ५०४. ३ [८] यज्ञपरिशिष्टस्वामिनं—ग-त४.५-भ२.८-मु । यज्ञपरिशिष्टे स्वामिनं–त१.२.३.७ । परिशिष्टस्वामिनं–त६.८-भ६-मॅ ॥ १४ [९] प्रयच्छन्तु—ग-त१.२.३.४.६.८-भ । प्रयच्छतु–त५.७-भ७ । प्रयच्छत–मॅ-मु । हे देवीः देव्यः आप.....दत्तेत्यर्थः–उद्गीथ ॥ २२ [१०] सौधन्वनः—ग-*मॅ-मु । सौधन्वः–त१.२.३.७; सोधन्वः–त४.५; सौधन्व–त६.८-भ ॥ २३ शंसमानस्य स्तोतुः—ग । शंसमानं स्तोतुं–त१.२.३.६.७.८-भ-मु; तत्समानं स्तोतुं–त४.५ । शंसमानं स्तोतॄन्–*मॅ । 'शंसमानान् स्तोतॄन्' अथवा 'शंसमानस्य स्तोतुः' इति स्यादिति मॅक्समुल्लरमहाशयाः । अपरः पाठो लिखितपुस्तक उपलब्ध इति स्वीकृतः ॥ ५०५. ८ [१२] हे मरुतः.....दत्तवन्तः स्थ—मॅ-मु । हे इंद्रादयो देवाः यां श्रियं यत्कर्म मे मह्यं

दातुमिच्छथ हे मरुतः हे इंद्र (इंद्रादयो–त४.५) देवा (हे देवा–ग-भ५) हे वरुण हे मित्र यूय-मददात दत्तवंतः स्थ–§ । पूर्व भाष्यांशो लुप्तः स्यात्, अनन्तरं केनापि प्रान्ते पूरितः पुस्तकेष्वस्थाने प्रविष्टः स्यादिति मॅक्समुल्लरमहाशयानामभिप्रायः ॥ १२ **प्राप्ताः स्थ**—मॅ-मु । 'प्राप्नुथ' इति भाष्य-मिति प्रतिभाति । ' वहाथ लोडर्थे लङ् वहथ प्रापयथ यूयं'–उद्गीथ ॥ ५०६. १ [१४] **लटि**—ग-त४.५ । लिटि–त२.३.६.७.८-म२.८-मॅ-मु । भूते लट्–उद्गीथ ॥

[१०. ६५] ५०७. ५ [१] **सजोषसः संगताः सन्तः अन्तरिक्षं स्वमहिम्ना आपूरयन्तीत्युत्तरेण संबन्धः**—त१.२.७-मु । सजोषसः संहत्या--ग-त३.४.५-भ१.२.४.६; सजोषसः--भ७ । सजोषसः संहत्य--*मॅ । अस्य मन्त्रस्योद्गीथभाष्यमेवं वर्तते—ऋज्वर्थं यादृग्देवता-नामानिर्देशार्थत्वात् । सजोषसः समानप्रीतयः समानसेवाः स्वर्बृहत् । द्यौर्महतीत्यर्थः । सोमोऽत्र चंद्रमाः ॥ ११ [२] **वृत्रहत्येषु वृत्रहननेषु युद्धेषु । यद्वा कर्मणि छान्दसः क्यप् । वृत्राणि शत्रवो हन्यन्तेऽत्रेति वृत्रहत्या युद्धानि**—त१.२.७-मु । युद्धानि--ग-त३.४.५.६.८-भ । वृत्रहत्या युद्धानि--मॅ । एतौ प्रथमद्वितीयमन्त्रभाष्यभागौ सायणाचार्याणामेव कृतिरिति विश्वसितुं प्रमाणं नास्ति । परं केषुचित्पुस्तकेषूपलब्धत्वात् सम्यगर्थकरत्वाच्च स्वीकृतौ । द्वितीयमन्त्रस्यो-द्गीथभाष्यं–इन्द्राग्नी सत्यती सतां पातारौ वृत्रहत्येषु वृत्रहनने शत्रुवधेषु निमित्तभूतेषु मिथः परस्परेण सहितौ हिन्वाना शत्रुवधाय गच्छन्तौ तन्वा शरीरेण । स्वयमेवेत्यर्थः । समोकशा संगतनिवासौ अनन्त-रितपृथिव्यन्तरिक्षस्थानौ सोमश्च घृतश्रीः उदकलक्ष्मीरुदकन्नेव नोपा उदकाश्रया वा । महिमानं महत्त्व-मात्मानमीरयन् सर्वत्र सदा गमयन् वर्तेथे । एते यथोक्ता देवा अन्तरिक्षमाकाशं महि महत् आपप्रुः आपूरयन्ति स ओजसा स्वेन बलेन महत्त्वलक्षणेन ॥ ५०९. ५ [७] **वा देवाः** । वा--ग-त१.२. ३.६.७.८-भ; देवा वा--त४.५-मॅ । देवा--मु । ऋतावृधः ऋतस्य सत्यस्य यज्ञस्योदकस्य वा वर्ध-यितारः--उद्गीथ ॥ ५१०. १९ [११] **आकारलोपः**—ग-त१.२.३.४.५.७-भ६-मु । अकार-लोपः--त६.८-भ१.२.४.७.८-मॅ ॥ २० **व्रता व्रतानि**—ग-त१.२.३.७-उद्गीथ । व्रतानि--त४.५. ६.८-भ-मॅ-मु ॥ ५११. ११ [१३] **भवार्थे**—ग । भावार्थ--त४.५ । भावार्थे--त१.२.३.६. ७.८-भ-मॅ । भावर्थे (१)-मु ॥

[१०. ६६] ५१२. १९ [२] **तत्तत्कार्येषु**—ग-त-भ२.८-मु । नतत्कार्येषु--भ१.४ । तत्कार्येषु--भ७-मॅ ॥ ३० [३] **गयं गृहं**—ग-त१.२.३.४.५.७ । गृहं गयं--त६.८-भ-मॅ-मु ॥ ५१३. २ **लेटयडागमः**—ग-त१.२.३.६.७.८-भ१.२.५.७.८-मु । लेटयडागमः--त४.५-भ४-मॅ ॥ ५१४. ७ [७] **अग्नीषोमा अग्नीषोमौ**—ग-त१.२.३.४.५.७-मु । अग्नीषोमौ--त६.८-भ-मॅ॥

[१०. ६७] ५१७.२३ [२] **प्रज्ञावतः**—ग१.२-त-भ-मु । प्रज्ञानवतः--ग४-मॅ । प्राणवतः प्रज्ञावतो वा--उद्गीथ ॥ ५१८. २० [४] **आडागमः**—ग-त१.२.३.६.७-भ१.२.४.५.८ । अडागमः--त४.५-भ७-मॅ-मु ॥ २७ [५] **उषःकालं ततः**—§-मु । उषःकालतः (१)-मॅ ॥ २८ **मन्त्रं सूर्यं**—§-मॅ-मु । ' मन्त्रम् ' इति मास्तु अथवा ' मन्त्रं सूर्यं वा ' इति भवत्विति मॅक्समुल्लर-महोदयाः ॥ ५१९. ७ [६] **सः पर्णि**—ग१.४-त-भ-मु । पर्णि--त२-मॅ ॥ २५ [८] **कप्रत्ययः**–ग१.२-त१.२.७-मु । प्रत्ययः--ग४-त३.४.५.६.८-भ-मॅ ॥ ५२०. २१ [११] **निधानाय**—ग१.२ । धानाय--ग४-मु । ध्यानाय--त-भ-मॅ । ऋ. सं. १०.५५.१ द्रष्टव्यम् ॥ ५२१. ३ [१२]

ततः—ग४। अतः--त-भ-मॅ-मु ॥ ४ **प्रत्यगमयत् अस्रावयत् वा**। प्रत्यगमयत् अस्रावत् (अस्रावयत्--ग१; अस्रावत्--ग४; अस्रवत्--भ२; अस्रावयत्--भ४) यद्वा--ग१.४-त-भ२.४.५.६.८; प्रत्यगमयत् यद्वा--ग२। प्रत्यगमयत् अस्रावयत्- मु। प्रत्यगमयत्--भ७-मॅ ॥

[१०. ६८] ५२१. १५ [१] **यथा**—*मॅ। न-ग२; मु-इतरेषु च 'यथा' नास्ति ॥ २३ [२] **संनयति**—ग-त-भ-मु। नयति--मॅ ॥ २५ **स्वसामर्थ्येन**—ग१.२। स्वसामर्थ्यं -मॅ-मु इतरेषु च ॥ ५२२. २३ [५] **समन्तात्**—ग-त१.२.३.६.७.८-भ। आ समंतात्--त४.५-मॅ-मु ॥ ५२३. २३ [८] **निर्जभार पर्वतान्निर्जहार**—ग-त१.२.३.७-मु। निर्जभार--त४.५.६.८-भ-मॅ ॥ ५२४. ३ [९] °**वलस्य पर्वणः... ..निर्जहार**—*मॅ-मु। लिखितपुस्तकेष्वशुद्धाः पाठाः ॥ १४ [१०] **सूर्याचन्द्रमसौ**—ऽ-मु। सूर्यचंद्रमसौ--मॅ ॥

[१०. ६९] ५२६. १२ [४] **त्वा त्वां**—ग-त१.२.३.४.५.७-भ२-मु। त्वां--त६.८-भ१.४.६.७.८-मॅ ॥ ५२८. ९ [१०] **प्रत्नान्**—ग-*मॅ-मु। सत्वान्--त५.६.८-भ; सत्वान्--त४; इतरेषु नास्ति ॥ १८ [११] °**दीप्तिमन् वा**—ग-त१.२.७-मु। °दीतिमन्--त३.४.५.६.८-भ-मॅ। विकल्पार्थत्वात् 'वा' आक्षेपकः ॥

[१०. ७०] ५३०. ६ [४] °**शब्दस्येमनिचि**—ग१.२-त२.३.६.७.८-भ२.८-*मॅ-मु। °शब्दस्यमनिचि--ग४-भ६; °शब्दस्येमनिनि--त४.५; °शब्दस्येमनिवि--भ१.४; °शब्दान्मनिनि---भ७ ॥ ७ **अकारस्येकारो वर्णव्यापत्त्या**—ग४-त१.२.३.६.७.८-भ१.२.४.६.७-*मॅ-मु। इकारस्य अकारो वर्णव्यापत्त्या--ग१.२; अकारस्येकारो वर्णव्यापत्त्या--त४.५; आकारस्येकारो वर्णव्यापत्त्या--भ८ ॥ १७ [५] **'पृथिव्या'** इति पदम्। 'पृथिव्याः' इति भाष्यकाराः। पृथिव्या वा मात्रया वा इत्थंभूतेलक्षणे तृतीयैषा पृथिव्या परिमाणभूतया--उद्वीथ ॥ ५३१. २४ [९] **प्राप्तवानसि**—ऽ-मु--उद्वीथ। प्राप्तवान्--मॅ ॥ २५ **तप्रत्ययस्य**—ग-त१.२.३.६.७.८। वप्रत्ययस्य--भ१.२.७.८; तुप्रत्ययस्य--भ४। प्रत्ययस्य--त४. ५-मॅ-मु। ऋ. सं. १०.१०४.६ द्रष्टव्यम् ॥ **सहायः**—ग२। सखायो--ग४-त१.२.६.७.८-भ; स्खायो--त३; स्तदायो--त४; स्तदाया--त५। सखा--मॅ-मु ॥

[१०. ७१] ५३२. १९ **सुज्योतिः परमं ब्रह्म**—ऽ-मॅ। यज्ज्योतिः परमं ब्रह्म--मु। यज्ज्योतिरमृतं ब्रह्म--बृहद्दे ॥ ५३४. २६ [५] **शुश्रुवान्**—ग-त-भ४.६-मु। शुश्रुषान् श्रुतवान्--भ१.७-मॅ ॥ ५३५. ५ [६] **तित्याज तत्याज**—ग-त१.३.४.५.७-मु। तित्याज--त२.६.८-भ-मॅ ॥ १८ [७] **तस्मादेते व्यक्ततरे इव**। अस्याः श्रुतेर्मूलमन्वेषणीयम् ॥ २१ **ऋच्छन्ती इव खे उदगन्ताम्**। अस्या अपि मूलमन्वेषणीयम् ॥ ५३६. २६ [१०] **सखिभूतेन**—ग४। प्रतिभूतेन--त-भ-मॅ-मु। 'प्रतिभूभूतेन' अथवा 'सखिभूतेन' इति भाष्यकारैः लिखितं स्यादिति मॅक्समुल्लरमहाशयाः। विद्वत्सखिभूतेन--उद्वीथ ॥ २९ **एषां**—ग-त-भ१.२.४.६.८-मु। येषां--भ७-मॅ ॥ **जायते**—ऽ-मु। संजायते--मॅ ॥ ५३७. १० [११] **प्रयोगं**—*मॅ-मु। प्रयोगे--त१.२.३.७.८-भ१.२.४.७.८; प्रयोगेषु--त४.५.६; प्रयोगः--भ६ ॥ १३ [११] **न निघातः**—ग४-त६-*मॅ-मु। निघातः--त१.२.३.७.८-भ२.४.७; प्रतिघातः--त४.५; अनिघातः--भ८ ॥

[१०. ७२] ५३८. २०. [२] **अधिष्ठानस°**—ग-त४.५-*मॅ-मु। अधिष्ठानाः स°--ग१.३.७-भ२; अधिष्ठानात्स°--त२; अष्ठानाः स°--त६.८-भ८; आदेतेः स्थानाः स°--भ६; अष्ठानां

तस्त°–म८ ॥ ५४०. १० [८] विवस्वानादित्यश्च । इन्द्रश्च विवस्वांश्च–तै. आ. ॥ २१ [९] मृतादुल्मृद्धादण्डात्—ग२.४-त१.२.३-म२.४.८-*मॅ-मु ॥

[१०. ७३] ५४०. २८ महाव्रतेऽपि निष्केवल्ये—ऽ-मॅ-मु । 'महाव्रतेऽपि मरुत्वतीये' इति भाष्यम् । ऋ. सं. १.१६५;६.१७;१०.२७ प्रस्तावनासु द्रष्टव्यम् । निविद्धानम्—ऽ-मॅ-मु । मरुत्वतीयम्–ऐ. आ. ॥ ५४१. १५ तमिन्द्रं निषण्णेति—ग-त-म२.८-*मॅ-मु । सहितं च निषण्णेति–म१.४; सहितमिंद्रं निषण्णेति–म६; सहितं च निषण्णेति–म७ ॥ १६ [२] अवर्धयन्—ग१.२-त४ । अवर्धत–ग४-त१.२.३.५.६.७.८-भ-मॅ-मु ॥ २३ [३] पादा पादौ—ग१.२-म२ । पादादौ–त१.३.७; पदो पदौ–त४.५; पादौ दौ–त२; पादौ–ग४-त६.८-म१.४.७.८-मॅ-मु ॥ ५४२. १५ [५] तमांसि.....मॅ । तमांसि च ता माया व्यनाशयत्–ग१.२; इतरेषु भाष्यं लुप्तम् । वृष्टीः प्रावपत् तमांसि च प्रावपत् व्यनाशयदित्यर्थः–मु ॥ २१ [६] अथेन्द्रस्तं—ग-*मॅ । अथेंद्रस्त्वं–त१.२.३.४.५.७-मु; अथेंद्रः त्वं–त६.८-म८; अथेंद्र त्वं–म१.४.७; अथेंद्रः–म६ ॥ ५४३. १ [७] किंच त्वं—ग-त३.४.५.७-म२-मु । किंच–त६.८-म८-मॅ ॥ ५ खुम्नं । सुम्न-ग१.२; सुघं–ग४-त४.५.६.८; सुम्न–त१.२.७; सुम्न–त३; सुम्नं–म१.२; सुम्नं–म४; मुम्नं–म६; सम्नं–म८ । शीघ्रं–म७-मॅ-मु । 'स्तुम्नं' इति ग्वालियरलिखितपुस्तके । 'खुम्न' इति पाटलिपुत्रसमीपं वर्तमानस्य कस्यचन देशस्य नगरस्य च नाम । अद्यतने यमुनायास्तीरे 'सूग' इति ग्रामः वर्तते । स एवायम् ॥ काञ्चीं—ग४ । काशींति–ग१.२; कांती–त-म१.२.४.८; कांति–म६ । कांत्या–मॅ । 'काञ्ची गतौ मार्ग' इति मु-पुस्तके नास्ति ॥ १७ [९] नवममन्त्रस्योद्गीथभाष्यम्—अस्य तवेन्द्रस्य यच्चक्रं । चक्रायुधमित्यर्थः। अप्सु लब्धव्यत्वेन निमित्तभूतासु आ निषत्तमुतो मर्यादया मेघैर्निषण्णमपि अनुप्रविष्टं चेत्यर्थः । तच्चक्रायुधमस्मै तुभ्यमिन्द्राय मधु उदकं मेघोदरगतमित् चच्छद्यात् । इदित्येवार्थे । चच्छद्यादिति कान्तिकर्मा । कामयत एव दातुमिति शेषः। तवायुधचेष्टितं निष्फलं न भवति । तदन्तर्गतमुदकमपश्यन् तुभ्यं ददाति तवायुधमित्यर्थः । दत्तं च सत्तदुदकं त्वं पृथिव्यामदधाः दधासि पर्यायेण ओषधीषु औषध्यादिस्थावरेषु च दधासि । यच्च अतिसितं अतिशुद्धं पयः पयोरूपमुदकं ऊधः प्रतीति शेषः । ऊधःप्रदेश इत्यर्थः । गोषु धारयसि त्वं ॥

[१०. ७४] ५४६. ५ [५] इन्द्रं देवं—ऽ-मु । इंद्रं–मॅ ॥

[१०. ७५] ५४७. ३ [१] त्रिप्रकारं—मु । त्रिःप्रकारं–ऽ-मॅ ॥ ५४७. २० [३] व्याप्नोति—ग-त१.२.६.८-म१.२.४.६-मु-उद्गीथ । प्राप्नोति–त३.४.५.७-म७.८-मॅ ॥ ५४८. १ [४] मातरः पुत्रमिव—ग-त१.२.३-मु । पुत्रमिव–त४.५.६.७.८-भ-मॅ ॥ ३ तरौ—*मॅ । भरौ–ग-त-म१.२.६.८-मु; भाये–म४; भये–म७; तदौ–ग्वालियरपुस्तके ॥ १२ [५] शृणुत च—ऽ-मु । शृणुत–मॅ ॥ १४ त७-पुस्तके पञ्चमषष्ठमन्त्रयोर्मध्ये 'सितासिते सरिते यत्र संगते' इत्यादिर्मन्त्रस्तस्य विस्तृतं भाष्यं च लिखितमस्ति । खिलेष्वयं मन्त्रो द्रष्टव्यः । स्पष्टार्थकत्वादस्य भाष्यस्योद्धरणमनावश्यकम् । भाष्यकारस्य नामादिसूचकं वाक्यं भाष्यान्त उपलभ्यते तद्यथा–'इति श्रीमत्सदाक्यप्रमाणमर्यादाधुरंधरचतुर्धरकुलावतंसगोविंदसूरिसूनोर्नीलकंठस्य कृतिः स्वोद्धृतमंत्रकाशीखंडमंत्ररहस्यप्रकाशिका समाप्तिमगमत् ॥ ५४९. ५ [८] शोभनवसना—त१.२.३.६.७.८-म१.२.४.६-मु । शोभनसाना–म८ । शोभनवस्त्रोपेता–त४.५-मॅ ॥

[१०. ७६] ५४९. २९. [१] 'यथा' इति पदं भाष्यकारैः न व्याख्यातम् ॥ ५५०. ६. [२] धृतोऽश्व—*मॅ-मु। धूर्त अश्व-ग-त१.२.३.६.७.८-म; धृताश्व-त४.५ ॥ ७. दृढं गृहीतो—ग४-त१.२.३.७-भ२-मु। दृढगृहीतो-त४.५-मॅ। गृहीतो-त६.८-भ ॥ बल्गति—ग४। चलति-ग१.२; बलानि-त१.२.३.७-भ६; बलाति-त४.५-भ२.८; बल्गति-त६.८-भ१.४.७। बलवान्-*मॅ-मु। बल्ग इति गत्यर्थो धातुः। बल इत्यश्वगतिवाचको धातुः स्यात् अतः 'बलते' इति भाष्यकारैः लिखितं स्यादिति मॅक्समुल्लरमहोदयैः स्वकीयटिप्पण्यां लिखितम् ॥ ९. 'महो' इति संहिता। 'महे' इति भाष्यकाराः ॥ ५५१. २८. [७] हव्या न—त३.७-भ२.४.६.८। हव्या न्-ग४-त१.२; ह न-भ१। हव्या मॅ-मु ॥

[१०. ७७] ५५२. १८. [१] शोभनानां—ग-त-भ२.६.८-मु। शोभमानां-भ१.४; शोभमाना-भ७। शोभमानानां-मॅ ॥ १९. स्तुतवानस्मि-*मॅ-मु। स्तुतोस्मि-ग-त-भ ॥ ५५३. ६. [३] रिरिक्रे रिरिचिरे—ग४-त२.३.७-मु। रिरिचिरे-त१। रिरिक्रे-भ-मॅ ॥ १६. [४] परिष्कर्तारः—*मॅ-मु। परिवेष्टारः-ग; परिष्टारः-त१.२.३.६.७.८-भ; परिष्टा-त४.५ ॥ २४. [५] तेजस्वन्तः—त४.५-मु। तेजोवंतः-त१.२.३.६.७.८-भ-मॅ। 'तसौ मत्वर्थे' इति सूत्रेण भसंज्ञा भवति, न पदसंज्ञा ॥ ५५४. ५. [६] द्वेष्टून्। कीदृशान्—ग-त-भ१.२.४.६.८-मु। द्वेष्टून्-भ७-मॅ ॥ १२. [७] अध्वर्युभ्य ऋत्विगादिभ्यः। अयुक्तमिदम्। 'ऋत्विग्भ्योऽध्वर्यादिभ्यः' अथवा 'अध्वर्युप्रभृतिभ्य ऋत्विग्भ्यः' इति भाव्यम् ॥ २४. [८] यामन् यागगमने—ग-त३.६-भ२.६-*मॅ। यामन् यागगमन-त१.२.३.७; यागे यागगमने-त४.५; यामन् यागमने-भ१.४; यामन् यामनि गमने-भ७-मु ॥

[१०. ७८.] ५५५. ६. [१] यजमाना—ग-त१.२.३.७-भ६-मु। ये यजमाना-त४.५.६.८-भ८-मॅ ॥ ७. व्यापृता इत्यर्थः—ग-त१.२.३.४.५.७-मु। व्यापृता भवंति-त६.८-भ२.४.६.८-मॅ ॥ ५५६. १५. [५] ज्येष्ठासः ज्येष्ठाः—त१.२.३.७-मु। ज्येष्ठाः—ग-त६ ८-भ-मॅ ॥ ५५७. ४. [७] दूराध्वनीना—*मॅ-मु। दूराध्वनिनो-ग-त७-भ१.२.७; दूराध्वानिनो-त१.२.३.६.८-भ४.६.८; अदूराध्वानिनो-त४.५ ॥

[१०. ७९.] ५५८. ३. [२] गुहा गुहायां—ग-त१.२.४.५.७-मु-उद्गीथ। गुहायां-त३.६.८-भ-मॅ ॥ २६. [४] प्रभवामीत्यर्थ—ग-त१.२.३.७-*मॅ-मु। भवामीत्यर्थः-त४.५.६.८-भ ॥ ५५९. १६. [६] चकर्थ—ऽ-मॅ-मु। 'चकर्त' इति संहिता। वि चकर्त विकृतवानहं-उद्गीथ ॥

[१०. ८०.] ५६१. ६. [४] विभृतानि संभृतानि—ग-त१.२.४.५.६ ७.८-भ। विभृतानि-त३-मॅ-मु ॥ १६. [५] गोनां गवां—ऽ-मु-उद्गीथ। गोनां-मॅ ॥

[१०. ८१.] ५६२. ७. ब्रह्म वै स्वयंभु—श. ब्रा। ब्रह्मा वै स्वयंभूः-त-मॅ-मु। ब्रह्म वै स्वयंभू-भ१; ब्रह्मा वै स्वयंभू-भ४ ॥ ३०. [१] बहुः—*मॅ-मु। बहु-ऽ ॥ ५६३. ५. [२] अत्र तस्य—त१.२.३.६.७.८-भ२.६-मु। अत्रैतस्य-त४.५; तत्रास्यां-भ१.४.७। तत्र तस्य-मॅ ॥ ५६४. १७. [५] मध्यमा मध्यमानि—ग४-त१.२.४.५.६.७-भ२.४.६। मध्यमो बध्यमानि-त३। मध्यमानि-त८-भ८-मॅ-मु ॥ शरीराणि—त१.२.३.७-भ२.४.६.८। धामानि

शरीराणि—मॅ-मु ॥ ५६५. ११. [७] °गमनं देवं—ग-त१.२.३.४.५.६.७-म२.६-मु। °गमनं—त८-म४.७.८-मॅ ॥

[१०. ८२.] ५६६. ४. [२] बहुविधप्रकाश°—ग-त म१.२.४.६.८-मु। बहुविध-प्रकार°—म७-मॅ ॥ २५. [३] तत्तत्पदेषु—ग१.२-म२.४.७.८। तत्पदेषु—ग४-त१.२.३.६.७.८-म६ मु। तत्रत्यदेवेषु—त४.५-मॅ। स्वीकृतपाठो मॅक्समुल्लरमहोदयैरुपलब्धोऽपि न स्वीकृतः। मॅ-पाठादयमेव सार्वीयान्। तत्रत्य इति पदं साकाङ्क्षम्। ५६७. २६. [६] 'अप एव ससर्जादौ तासु बीजमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्' इति मनुस्मृतिपाठः। वाजसनेयिसंहिता-यामपि (१७. ३०) 'तमिद्गर्भम्' इति मन्त्र आगतः। तस्य व्याख्याने 'बीजमवासृजत्' 'सूर्यकोटि°' इति स्मृतिपाठः ॥ ५६८. ४ [७] सर्ववेदान्तवेद्यं—ऽ-मॅ-मु। तै. सं. ४.६.२.२ सायणभाष्येऽप्येवमेव। वा. सं. १७.३१ महीधरभाष्ये सर्वावदानं वेद्यं इति पाठोऽस्ति सोऽशुद्धः। पृष्ठमात्रालेखनरीत्या 'सर्वावे' इति 'सर्वाव' इति लिख्यते ॥ ६. असन्—ग१.२। असत्—ग४-त-भ-मॅ-मु। नीहारशब्दस्य पुंलिंगत्वात् स्वीकृतपाठ एव युक्तः। वा. सं. १७.३१ महीधरभाष्ये तै. सं. ४.६.२.२ सायणभाष्ये च 'असन्' इत्येव पाठः ॥ नाप्यत्यन्तं सन् काष्ठपाषाणादि-रूपान्तरेण संबन्द्धुमयोग्यत्वात्। काष्ठपाषाणादिचांतरेण संबद्धुमयोग्यत्वात्—ग; काष्ठपाषाणादि-चांतरेण (वंतरेण-त२; व्यंतरेण—भ१.४) संबुद्धमयोग्यत्वात्—त१.२.३.७-भ१.२.४.६.८; काष्ठ-पाषाणादितरेण संबंधुमयोग्यत्वात्—त४.५; एतन्नास्ति भ७-पुस्तके। नात्यन्तं सत् काष्ठपाषाणादि-बत्संबोद्धुमयोग्यत्वात्—*मॅ-मु। अस्मिन् विषये मॅक्समुल्लरमहोदयानां टिप्पणी द्रष्टव्या। अयं मन्त्रः तै. सं. ४.६.२.२; वा. सं. १७. ३१ अत्रागतः भाष्यकारैश्च व्याख्यातः। काठकमैत्रायणीसंहित-योरप्ययमागतः। तै. सं. पाठे 'बभूव' इत्यस्य स्थाने 'भवाति' इति वर्तते। तैत्तिरीयसंहितायाः सायणभाष्यस्य वाजसनेयिसंहिताया महीधरभाष्यस्य च ऋग्वेदसायणभाष्येणातीव साम्यमस्ति। उभय-भाष्यभागस्तुलनार्थमत्रोद्धियते—

वा. सं. महीधरभाष्यं—नीहारेण प्रावृताः नीहारसदृशेनाज्ञानेनावृतत्वान्न जानीथ यथा नीहारो नात्यन्तमसत् दृष्टेरावरकत्वात्, नाप्यत्यन्तं सत् काष्ठाश्मादिवद्बोधयितुमयोग्यत्वात् एवमज्ञानमपि नात्यन्तमसत् ईश्वरतत्त्वावरकत्वात् नापि सत् बोधमात्रनिवर्त्यत्वात् ईदृशेनानिर्वचनीयेनाज्ञानेन भवन्तः सर्वे जीवाः प्रावृताः। न केवलं नीहारेण जल्प्या च प्रावृताः ॥

तै. सं. सायणभाष्यं—नीहारेण प्रावृता भवन्तो नीहारसदृशेनाज्ञानेनावृतत्वान्न जानन्ति। यथा नीहारो नात्यन्तमसत् दृष्टेरावरकत्वात्, नाप्यत्यन्तं सत् काष्ठपाणादिरूपान्तरेण संबद्धुमयोग्य-त्वात्, एवमज्ञानमपि नात्यन्तमसदीश्वरतत्त्वावरकत्वात्, नापि सद्बाध(? द्बोध)मात्रनिवर्त्यत्वात्। ईदृशेनानिर्वचनीयेनाज्ञानेन भवन्तः सर्वे जीवाः प्रावृताः। न केवलं तत्त्वं [न जानन्तः] किंतु जल्प्या च ॥

महीधराचार्याः सायणाचार्येभ्यः पूर्वकालीना इति स्पष्टमेव। सायणाचार्यैश्च पूर्वं यजुर्वेदो व्याख्यातः अनन्तरमृग्वेदः। 'आश्वर्यवस्य यज्ञेषु प्राधान्याद्याकृतः पुरा। यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते ॥' इति स्वयं तैरेव स्वकीयऋग्वेदभाष्योपोद्घातप्रारम्भे लिखितम्। अत एतन्मन्त्रस्य महीधरभाष्यं दृष्ट्वा सायणाचार्यैः यजुर्वेद एतन्मन्त्रस्य व्याख्यानमारचितं, यजुर्वेदमन्त्रभाष्यानुसारेण

च ऋग्वेदेऽयं मन्त्रो व्याख्यात इति मन्तुमुचितम्। एतदनुसृत्यैवास्माभिरत्र भाष्यपाठोऽभ्यूहितः। 'नाप्यत्यन्तं सन्' इति पाठो लिखितपुस्तकेष्वविद्यमानोऽपि महीधरसायणभाष्ययोर्विद्यमानत्वादभ्यूहितः। 'नात्यन्तं सत्' इति मॅक्समुल्लरमहोदयानामभ्यूहः। तथा च तै सं. सायणभाष्ये 'काष्ठपाषाणादिरूपान्तरेण' इति पाठोऽस्ति। लिखितपुस्तकेष्वपि तत्सदृश एव पाठ उपलभ्यते। अतः तै. सं. भाष्यपाठ एवास्माभिः स्वीकृतः। मॅ-पुस्तके तु 'काष्ठपाषाणादिवत्' इति पाठः महीधरभाष्यानुसारेणाभ्यूहितः। किंतु अंतरेण इति सर्वेषु लिखितपुस्तकेषु वर्तते इति मॅक्समुल्लरमहोदयैर्निर्दिष्टमेव। तै. सं. सायणभाष्यपाठः साधीयानित्यपि तैर्लिखितम्। 'संबद्धुमयोग्यत्वात्' इति तै. सं. सायणभाष्यपाठः। लिखितपुस्तकेष्वपि तदनुकूला एव पाठाः। संबन्दुमयोग्यत्वात्' इति व्याकरणशुद्धः पाठः त४.५-पुस्तकानुसारेणास्माभिः स्वीकृतः। 'संबोध्दु°' इति मॅ-पाठो लिखितपुस्तकपाठैर्न समन्वेति। 'रोधयितुम्' इति महीधरपाठेन 'संबन्धुम्' (अथवा संबद्धुं) इति सायणपाठस्य समानार्थकत्वं न 'संबोद्धुं' इति मॅ-पाठस्य॥ ८. भवन्तः सर्वे जीवाः—ऽ-मु। सर्वे जीवाः–मॅ। वा. सं. महीधरभाष्ये तै. सं. सायणभाष्येऽपि 'भवन्तः सर्वे जीवा' इत्येव पाठः। अतोऽत्रापि तथैव लिखितमिति व्यक्तम्। मॅक्समुल्लरमहाशयानां लिखितपुस्तकेष्वपि 'भवन्तः' इति पदेन भाव्यमेव। वा. सं. तै. सं. भाष्ययोः युष्मच्छब्दसमानार्थकभवच्छब्दस्य 'भवन्तः' इति प्रयोगः पूर्वमागतः सन् पुनरुपयुक्तः ऋग्वेदभाष्ये तु 'यूयम्' इति युष्मच्छब्दप्रयोग एव पूर्वमागतः॥ न केवलं प्रावृतत्वं किंतु जल्प्या च। न केवलं नीहारेणैव प्रावृताः किंतु जल्प्या अपि इति विवक्षा। उपर्युद्धृतं महीधरभाष्यमवलोकनीयम्॥ ९. उदरंभरा। व्याकरणदुष्टः प्रयोगः॥

[१०. ८३] ५६८. १४. [१] मन्युदेवत्यं—ग-त१.२.३.७-भ२.६। मन्युदेवतं–त८-भ१.४.७.८। मन्युदैवत्यं–मु। मन्युदैवतं–मॅ॥ ५६९. १०. [३] उपक्षपणकारी—ग२-भ१.२.४.७। उपलक्षण°—ग४-भ३; उपक्षण°-त१.२.३.६.७.८; उपक्षणंपण°-भ८। उपक्षय°-त-४.५-मॅ-मु॥

[१०. ८४] २५. [१] अयं मन्त्रः तै. ब्रा. २.४.१.१० अत्र पाठभेदेनागतः। तत्रस्थं भाष्यं समीचीनतरमिति मॅक्समुल्लरमहाशयानामभिप्रायः॥ ५७२. २१. [७] हृदयेषु—ग-त१.२.३.६.७.८-भ-मु। हृदये–त४.५-मॅ॥

[१०. ८५] ५७२. २५ पृच्छमानावित्येका—ग-त-भ२.४.८-मु। °वित्येषा–भ१.६.७-मॅ॥ ५७३. १२ [१] यज्ञे—ऽ। यज्ञेन (?)-मॅ-मु॥ २० [२] सोमो नक्षत्राणामेषाम्। न क्षं त्रायन्त इति नक्षत्रा ग्रहचमसादयः—त४.५.६-*मॅ-मु। सोमो नक्षत्राणामेषां न क्षं त्रायंत इति नक्षत्रा ग्रहचमसादयः–भ१.२; सोमो नो नक्षत्राणामेषां न क्ष त्रायंत इति नक्षत्रग्रहचयसादयः–ग४-त१.२.३; सोमो नक्षत्राणामेषां न क्ष त्रायंत इति नक्षत्रग्रहचमसादयः–त७; सोमो नो नक्षत्राणामेषां न क्ष त्रायंत इति नक्षत्रा ग्रहचमसादयः–भ१.४.८; सोमो नक्षत्राणामेषां न क्षं त्रायंत इति नक्षत्रा ग्रहचमसादयः–भ२; सोमेन नक्षत्राणामेषां न क्ष त्रायंत इति नक्षत्रा ग्रहचमसादयः–भ६। मॅक्समुल्लरटिप्पणी द्रष्टव्या॥ २१ प्रसिद्धानां—ग-त-भ२.४.५.६.८-मु। सिद्धानां–भ१.७-मॅ॥ २४ [२] प्रथमां पिबते.....। कस्याः स्मृतेर्वचनमिदम्?॥ ५७४. १ [३] तं सोमं—ग-त-भ१.२.४.५.७.८-मु। सोमं–भ६-मॅ॥ वर्धनकामार्थं। वर्धनकामार्थं–ग१.

२-भ२; न वैचेनकामार्थे—ग४-त३.६.८; वैचेनुंकामार्थे—त१.२.७; नद्योघनकामार्थे—त४.५; नवैचेनंकामार्थे—भ१.४.६.८। वैचेनकामार्थे—मु। मैथुनकामार्थे—*मॅ॥ ३ [३] यद्ब्रह्मशब्दो—ऽ-मॅ-मु। 'यत्' इत्यनावश्यकम्॥ ११ अपशवो वा—ग। अपशवो वो—त१.२.३.६.७। अपशवो—त४.५.८-भ-मॅ-मु॥ २१ [४] पौर्णमास्याम्—मु। पौर्णमास्याममावास्यार्या—त४; पौर्णमास्यार्या—त१.२-भ-मॅ॥ °रूपः सोमोऽत्रत्यैः—मु। °रूपः सोमोन्यैः—ग१.२; °रूपात्सोमात्—ग४; °रूपासोमासस्त्रैः—त१.२.३; °रूपसोमासुस्त्रैः—त४.५; °रूपास्त्रस्त्रैः—त६-भ१.४.६.८; °रूपाः सोमा अस्त्रमैः—त७; °रूपास्त्रमैः—त८; °रूपासोमास्त्रस्त्रैः—भ२; °रूपैस्तस्तैः—भ७। °रूपोऽत्रत्यैः—मॅ॥ ५७५. १ [५] मसी परिमाणे मस्यते परिमीयते। मसी परिमाणे रमस्यते परिमीयते—ग१.२; मास परिमाण मस्यते परिमीयते—ग४; मांस परिमाणे मस्यते परिमीयते—त१.२.३; मास परिमाणे मस्यते परिमीयते—त४.५.७—भ२; मासः परिमीयते—त६-भ१.४.६.७.८; मस्यंत परिमाद्यत—त८। मस्यते परिमीयते—मु। परिमीयते—मॅ॥ ३ [५] 'वसन्ते वसन्ते ज्योतिषा यजेत' 'वायुगोपा वनस्पतयः' इति श्रुतिद्वयस्य मूलं नोपलब्धम्॥ ८ चासि एकैककलाह्रासवृद्धिभ्यां—ग-त३.४.५-भ२-मु। चास्यै केवलाह्रासवृद्धिभ्यां—त१.२.६; चास्यै केवला ह्रासवृद्धिभ्यां हि—त७; वास्यै कैकला - सवृद्धिभ्यां—भ१.६; त्वास्यै केवलसवृद्धिभ्यां—भ७। चासि एकैककलाक्षयसंवृद्धिभ्यां—मॅ॥ २६ [७] त्रिककुन्नामपर्वते.....आञ्जते—*मॅ। त्रिककुन्नाम पर्वतः तेन त्रैककुदेनांजनेन (त्रैककुदेवानांजननेन—त६) सजातीयेन चक्षुष्यांजते (चक्षुषांजते—ग१.२; चक्षुष्यंते—ग४; चक्षुष्यांजने—भ)—ग-त४.५.६.८-भ; त्रिककुन्नाम पर्वतः तेनात्रैककुदेनांजनेन सजातीयेन चक्षुष्यांजात—त१.२.३.७। त्रिककुन्नाम पर्वतः तेन त्रैककुदेनाञ्जनेन सजातीयेन चक्षुषी अञ्जते—मु। तै. सं. ६.१.१.५; श. ब्रा. ३.१.३.१२ द्रष्टव्यम्॥ ५७६. ४. [८] येनोपशेरते—*मॅ-मु। येनोक्तनुभवंति—ग१.२; येनोत्तभवंति—ग४; येनानोवति—त१.२; येनोवंति—त३-भ८; योनेः तुवंति—त४.५; येनोक्तभवंति—त६; येनावति—त७; येवानोवति—त८; येनोभव्वंति—भ१; येनोभवंति—भ२.४; येनो-वंति—भ६। ऋ. सं. ६.५३.९; ८.१४.५; ९.७२.१; १.१७३.६ द्रष्टव्यम्॥ ५७८. १८. [१६] विनिर्दिष्टे—*मॅ-मु। निविष्टे—ग-त६; निविचष्टे—त१.२.३.४.५.७.८-भ१.२.४.६.८; विनचष्टे—भ७॥ ५७९. ४. [१८] भुवना भुवनानि—त१.२.३.७-भ२-मु। भुवनानि—ग-भ१.४.६.७.८-मॅ॥ ५. यद्यपि—ग-त-भ१.२.४.५.६.७-मु। यग्वपि—भ८। यदि—मॅ॥ पुनर्जनिरस्ति—ऽ-मु। पुनर्जातिरस्ति—मॅ॥ ५८०. ३. [२१] यतः एषा—त४। त एषा—ग४। त१.२.३.५.७-भ१.२.६-पुस्तकेषु 'एषा' इत्यस्मात्पूर्वं कियांश्चिदवकाशोऽस्ति। एषा—त६.८-भ४.७-मॅ-मु॥ १४. [२२] लभामि तेन—त-भ१.२.४.६.८-*मॅ-मु। लाभामि तेन—ग; लभामि ते—भ७। अयं मन्त्रः कत्यः?॥ १५. तादृश देव—त-भ२.६.८-मु। तादृशं देवं—ग। स तादृश देव—भ७-मॅ॥ २७. [२४] अथास्या योक्त्रं विचृतेत्—ग४-भ२-*मॅ-मु। अथास्यो योक्त्रं विचृतेत्—ग१.२; अथास्या योक्त्रं विचृते—त१.२.३.७-भ८; अथ योक्त्रं विचृते—त६; अथास्या योक्त्रं विसृजेत्—त४.५; अथा योक्त्रं विचृते—भ६॥ ५८१. ४. येन पाशेन—ग-त१.२.३.४.५.७-भ२-मु। येन—त६.८-भ१.४.६.७.८-मॅ॥ सुसुखो—ग-त१.३.४.५.६.७-भ। सुखा—त८। सुखो—त२-मॅ॥ ५. यज्ञविनियोगपक्षे—ग।

यज्ञयोगपक्षे–त१.२.३; यज्ञवियोगपक्षे–त४.५-भ२; यज्ञविगपक्षे–त६.८-भ१.४; यज्ञयागपक्षे–त७; यज्ञाविगपक्षे–भ८। यज्ञागपक्षे–मॅ-मु॥ २६. [२७] गृहप्रवेशनी—ग-त१.२.३.७-मु-*मॅ। °प्रवेशनं–त४.५; °प्रवेशिनी–त६.८-भ॥ ५८२. १३. [२८] पतिश्च—ग-त४.५.६-भ। पतिः–त१.२.३.७.८-मॅ-मु॥ ५८३. २. [३०] पापया पापरूपया—ग-त१.२.३.४. ५.७.८-भ६.७-मु। पापया रूपया–त६; पापया–भ४। पापरूपया–मॅ॥ २. स्याच्चेदिति—मु। चदिति–ग४; स्योच्चेदिति–त१.२-भ२.८; स्याच्चेति–त३; स्यच्चेदिति–त७; कथं स्मच्चेदिति–भ१; कथं स्माच्चेदिति–भ४; कथं स्मायेदिति–भ६; कस्माच्चेदिति–भ७। स्यादिति–मॅ॥ १२. [३२] जघ्या—§-मु। याज्या (१)–मॅ॥ ५८४. १४. [३५] अधिविकर्तनं—*मॅ-मु। विकर्तनं–§॥ यत्त्रिधा वासो विकृन्तन्ति—*मॅ-मु। यत्रिधा वासो विकृंतंति–ग४; यत्त्विधा-त्रिधायसो विकृंतंति–ग१.२; यत्विधा वास्ये विकृंतंति–त४.६; यच्चिधा वास्ये विकृंतंति–त८; यन्विधा वास्ये विकृंतंति (विकृंतनि–भ१.२; विकृंतति–भ८)-त१.२.३.७-भ१.२.४.८; यद्विधा वास्ये विकृंतति–भ६; यन्विधा वसे विकृतंभि–भ७। एतद्दुर्बोधमिति मॅक्समुल्लरमतम्॥ ५८५. ५. [३७] यस्यामूरौ। एतत्पदद्वयं द्विवारमागतं न सम्यगर्थमावहति। यस्याम् इत्यलम्। मॅक्समुल्लर-टिप्पणी द्रष्टव्या॥ ५८६. १०. [४२] पौत्रैः—*मॅ-मु। प्रपौत्रैः–§॥

[१०. ८६] ५८८. २५ [१] माधवभट्टास्तु.....। ऋग्वेदव्याख्याकर्ता माधव-भट्टो वेंकटार्यसुतोऽत्राभिप्रेतः इति तत्पुस्तकसंवादकैः सी. कुञ्जन् राजा--महोदयैः दर्शितम्। ऋ. सं. ९.३५.५ भाष्यं टिप्पणी च द्रष्टव्या॥ २९. [१] जनपदे—त५.८-भ१.२.४.६.८। जन--त१.२.३.६.७; जनपदेषु--ग-त४-भ५.७। देशे--मॅ-मु॥ ५९०. १७ [७] यथेत्र इति संहिता। 'यथैव' इति भाष्यकाराः॥ २८ [८] किं किमर्थं—त१.२.३.६.७-मु। किमर्थं--ग४-त४.५. ८-भ-मॅ॥ एकः किंशब्दः पूरणः—ग१.२। एकः किंशब्दः--ग४-त-भ-मॅ-मु॥ ५९१. १४ [१०] संग्रामं वा। समितिः समनमिति संग्रामनामसु। संग्रामं वा समिति समनमिति संग्रामनामसु--ग४-त७-मु; संग्रामं वा समिति संग्रामसु--त१; संग्रामं वा समिति समनमिति संग्रामसु--त२.३; संग्रामं वा समितिः संग्रामसु--भ१.२.४.६.८; संग्रामं समितिः संग्रामनामसु--भ७। संग्रामं समनमिति संग्रामनामसु--मॅ। ५९२ [१२] संस्कृतं—ग१.२-त-भ-मु। संसृतं--त४। सुसंस्कृतं-मॅ॥ ५९३. १८ [१७] ईशे ईष्टे—त-भ-मु। ईशे--ग४-मॅ॥ २७ [१८] सूनामुद्धानं—*मॅ-मु। सूनामुद्धनं–ग१.२-त८; सूनामग्नं--ग४; सूनामुद्वहनं--त१.२.३.४.५.६.७; सूनामुद्धनं--भ॥ ५९४. १५ [२०] मृगोद्वास°--*मॅ-मु। मृगावास°--ग१; मृगोवास°--ग४-त१.२.३.४. ५.६.७-भ१.२.४.६.८; मृगोवाः स--त८; मृगोवामरणं--भ७॥ ५९५. १५ [२३] इन्द्र-विसृज्यमानमनेन मन्त्रेण—मॅ-मु। इन्द्रेण विसृज्यमानं शरमुद्दिश्यानेन मन्त्रेण इत्यपेक्षितम्॥

[१०. ८७] २२ अङ्गाराभिविहरणे—*मॅ-मु। अंगाराभिहरणे--ग; आहाराभिहारणे--त१.६; आहाराभिहरणे--त२.७; आहाराभिहारण--त३; अहाराभिहरेण--त४.५; संहाराभिहरणे--त८-भ॥ ५९६. १० [२] मारकव्यापारान्—*मॅ-मु। मारकव्यवहारान्--ग-त४; मारकाव्या-वाहन--त१.२.७; मारकावाहन्--त३; मारकव्यवाहन्--त८-भ६; मारकाव्यवाहन्--भ२.८। 'मार-व्यवहारान्' इति स्यादिति मॅक्समुल्लरमहाशयाः। १४, १९ मन्त्रौ द्रष्टव्यौ॥ ५९७. ५ [५]

शरीरसंधिषु—ग-त१.२.३.६.७.८-भ१.२.४.५.६.८-मु । शरीरसंबंधिषु--त४.५-भ७-मॅ ॥ ५९८ २७ [११] **यो यातुधानः**—*मॅ । यं यातु°--ग; यातु°--त१.२.३.६.७.८-भ-मु; त्वं यो यातु° --त४; त्वं यातु°--त५ ॥ ५९९. २३ [१४] **मारकव्यापारान्**—ग२ । मारयितव्यान्--त-मु । मारव्यापारान्--भ-मॅ । २, १९ मन्त्रौ द्रष्टव्यौ ॥ ६००. २० [१७] **अस्मदीयाया गोः**—ग-त१. २.३.४.५.७-मु । गोः--त६.८-भ-मॅ ॥ २९ [१८] **हिंस्रेभ्यः**—ग-त१.२.३.६.७-मु । किम्यः --त४; हिंसेभ्यः--त५.८-भ२.४.६; हिंसेभ्यः--भ८ । सिंहेभ्यः--भ१.७-मॅ ॥ ६०२. २५. [२५] **त्वं हरसा**—ग त१.२.३.४.५.६.८-भ-मु । हरसा--त७-मॅ ॥

[१०. ८८.] ६०३. २२. [२] **चौषधीः**—ग१.२; ओषधीः--ग४; चोषधीः--त१. २.३.६.७-मु; वोषधीः--भ । वौषधीः--त४.५.८-मॅ ॥ ६०४. ६. [४] **समञ्जन्ति**—ग-त-भ१. २.६.७-मु । समंजति--भ४-मॅ ॥ ७. [४] **स वैश्वानरोऽग्निः**—ग-त-भ१.२.४.५.६.८-मु । वैश्वानरोऽग्निः--भ७-मॅ ॥ ८ **जगदित्यर्थः**—§-मु । यज्जगदित्यर्थः--मॅ ॥ ६०५. ६ [७] **आभिमुख्येन जुहुवुः**—त७-*मॅ । आभिमुख्येन आ जुहवुः--ग१.२-त१.२.३.४.५.६.८-भ; आभिमुख्येनाभिजुहुवुः--ग४ । आभिमुख्येन जुहवुः--मु ॥ १२ [८] **अजनयन्त जनयन्ति**—ग-त१. २.३.६.७-मु । अजनयंत--त४.५.८-भ-मॅ ॥ ६०७. ३ [१३] **प्रयक्षम् इत्यादौ**—*मॅ-मु । प्रयक्षतमित्यादौ--ग१.२; तदु प्रयक्षतमित्यादौ--ग४; प्रयतमिहादौ--त१.२.३.४.५.७; प्रयंतमिहादौ--त६; प्रयतमित्यादौ--त८-भ४.६; प्रयतत्यादौ--भ१; प्रत्ययमित्यादौ--भ२.८; प्रत्यक्षत्यादौ--भ७ । ऋ. सं.२.५.१ अत्र 'प्रयक्षन्' इत्यस्य स्थाने 'प्रयक्षम्' इति भाष्यकारैः पठितं तद्वदत्रापि ॥ २० [१५] **द्यावापृथिव्योर्मध्ये**—ग-त-मु । द्यावापृथिवीमध्ये--भ-मॅ ॥ ६०८. २ [१६] **उत मन्येऽहमेनमनयोर्हि**—ग४-त४.५.६-भ६-*मॅ-मु । उत मन्येहमेनयोर्हि--ग२; उत मन्येदमेनमनयोर्हि--त१.२; उत मन्येहमेनसमयोर्गि--भ१; उत मन्येहमेनमसयोर्गि--भ४; उत मे हन्यमेनसमायोगे--भ७ । अस्याः श्रुतेर्मूलं नोपलभ्यते ॥ ५ **विश्वा विश्वानि**—ग-त-मु । विश्वानि--भ-मॅ ॥ ६ **मन्यन्ते**—§-मॅ-मु । मन्यते--तै. सं. ॥ [१७] **वेत्ति** । अस्यानन्तरं 'इति' आवश्यकमिति मॅक्समुल्लरमहाशयाः ॥

[१०. ८९] ६०९. १९ [१] **वारकैः**—ग-त-मु । वरेकैः (= वारकैः)--भ । वरकैः--मॅ ॥ २८ [२] **सर्गोऽश्वः । तम्** । **कृष्णा कृष्णानि**—ग-त-मु । सर्गोऽश्वः तं कृष्णानि--भ । सर्गोऽश्वः । कृष्णानि--मॅ ॥ ६१०. ७ [३] **य इन्द्रः**—*मॅ । इंद्रो--§-मु ॥ **यज्ञेषु**—ग-भ२ । यज्ञ यज्ञेषु--त१.२.३.७; यज्ञे यज्ञेषु--भ१.४.६.८-मु । यज्ञे यज्ञे--भ७-मॅ । १५ [४] **य इन्द्रः**—ग४-*मॅ ॥ ६१०. २१ [५] **प्रावभिः**—ग-भ । प्रावादिभिः--त-मॅ-मु ॥ २५ **गुरूणि**—§-मु । पुरूणि--मॅ (मुद्रणदोषः ?) ॥ ६११. २५ [८] **उपद्रवाणि**—§-मॅ-मु । नपुंसकलिङ्गप्रयोगश्चिन्त्यः ॥ ६१२. १३ [१०] **प्राज्ञानां**—*मॅ । प्रज्ञानां--ग४-त१.६-भ२.८-मु; प्रज्ञानानां--त२.३.४.५.७; प्रजानां--भ१.७ ॥ २९ [१२] **पताकास्थानीयो**—ग१ । पातकास्थानीयो--ग२-त४.५ । पताकात्स्थानीयो--भ७ । पताकस्थानीयो--ग४-त१.२.३.६.७.८-भ१.२. ४.८-मॅ । ऋ. सं. १०.१.५ द्रष्टव्यम् ॥ ६१३. १८-१९ [१४] **यत् यया हेत्या.....यत् यया च शक्त्या** । यद्यया हेत्या त्वमघस्य द्वितीयार्थे आहननभूतमेघद्युद्धार्थमागच्छद्रक्षो भिनदो-

भिनः यद्यदा ल शक्त्या–ग१.२; यद्यदा हेत्या त्वमघस्य द्वितीयार्थे षष्ठी अभूतमेघद्युद्वार्थमागच्छद्रक्षो भिनदोभिनः यद्यदा ल शक्त्या–ग४; यद्यदा च शक्त्या–त१.२.३.६.७.८-भ२.५.८। भ-१.४.६.७-पुस्तकेषु भाष्यांशो लुप्तः। यद्यया हेत्या त्वमघस्य द्वितीयार्थे षष्ठी अभूतमेघद्युद्वार्थमागच्छद्रक्षोभिनद्दो भिनदः यद्यदा च शक्त्या–त४.५। त४-पुस्तके 'यद्यदा च शक्त्या' इति पदसमूहे 'यद्यया' इति पूर्वं लिखित्वा अनन्तरं 'या' इत्यक्षरं हरितालेन विलिप्य 'दा' इति लिखितम्। यद्यदा हेत्या त्वमघस्य द्वितीयार्थे षष्ठी अहतमेघद्युद्वार्थमागच्छद्रक्षो भिनदः अभिनत् यद्यदा च शक्त्या–*मॅ-मु। ग-त४.५-वर्जयित्वा सर्वेषु लिखितपुस्तकेष्वयं भाष्यांशो नोपलभ्यते। अतः केवलं ग-त-४.५-पुस्तकपाठानुसारेणात्र पाठोऽभ्यूहितव्यः। 'यद्यया हेत्या' इति पाठः ग-त४.५-पुस्तकेषूपलभ्यमानत्वात् समीचीनत्वाच्च स्वीकृतः। 'यद्यदा च शक्त्या' इति पाठे ग-त४.५-पुस्तकेषूपलब्धेऽपि 'यद्यया हेत्या' इति पाठानुसारेण 'यद्यया च शक्त्या' इति पाठः स्वीकृतः। त४-पुस्तके पूर्वं 'यद्यया' इति पाठ आसीदिति लिखितचरमेव। यया हेत्या त्वं शत्रून् हतवानसि यया च हिंसिताः शत्रवः भूमौ शेरते सा तव हेतिः कदा भविष्यतीति तात्पर्यम्। 'यद्यदा' इति पाठः उभयत्र सर्वथाबद्धः। 'अभिनः' इति पाठः 'अभिनदः' इत्यस्य व्याख्यानत्वेनास्माभिः स्वीकृतः। ग१.२-पुस्तकयोस्तादृशः पाठ उपलब्ध एव। 'अभिनत्' इति मॅक्समुल्लरपाठः अभ्यूहितोऽपि पुरुषव्यत्ययेनाबद्धः। 'अभूतमेघत्' अस्य स्थाने 'अहतमेघत्' इति पाठो मॅक्समुल्लरमहाशयैरभ्यूहितः। यद्यपि स न समीचीनस्तथाप्यनन्यगतिकत्वात् स एव स्वीकृतः। 'अघ' इत्यस्य 'आहन्तृ' इति व्याख्यानं प्रायः सायणभाष्ये आगच्छति। तदेवात्रापि युक्तं स्यादिति प्रतिभाति॥ ६१४. ७. [१६] **शोभना**। शोभिता–ग१.२; शोचना–ग४–त-भ२.४.८। शब्दवती–भ७-मॅ-मु॥ १४. [१७] **सुमतीनां सुमतीः**—ग-त४.५। सुमतीः–त१.२.३.६.७.८-भ। सुमतीनां–मॅ-मु॥ १६. **लभेमहि**—ग४-त४.५। लभेम–त१.२.३.६.७.८-भ२.४.८-मॅ-मु। लभंत–भ७॥

[१०. ९०.] ६१६. २२. [५] **मायय्यैव इति**—*मॅ। ययेवेति–त; ययेति-भ। मायेति-मु॥ ६१८. १. [९] **सामानि च**—त-मु। सामानि–भ-मॅ॥ २५. [१२] **यत् यावूरू तद्रूपो**—मु। यद्यावुरू तद्रूपो–भ२.८; यद्यदोरू तद्रूपो–त२.४; यद्यदास्तद्रूपो–त१.६.७; यद्यदोस्तद्रूपो–त३; यद्यारू तद्रूपो–भ४; यातद्रूपो–भ७। यदूरू तद्रूपो–मॅ॥ २६ [१२] **ऊरुभ्यां**—ग१.२-मु। उरुभ्यां–त१.२-भ७। ऊरुभ्यां–मॅ॥ ६१८. २७ **ब्राह्मणादीनां**—ऽ-मु। ब्राह्मणानां–मॅ॥ ६१९. २३ [१५] **दधात्यादित्यो**—त४। दध्यात्यादित्यो–त२। दध्यादित्यादित्यो–भ-मॅ-मु॥ ६१९. २६ **°युक्तेध्मत्वेन**—ग-त४.५-मु। °युक्तेनघात्वेन–त१.२.३.६; °युक्तेनेध्मत्वेन–त७; °युक्तेघात्वेन–त८-भ२.४.८; °युक्तः घात्वेन–भ७। °युक्तेंधनत्वेन–मॅ॥

[१०. ९१] ६२०. १३ **अग्निदेवत्यम्**—ग-त८-भ४। अग्निदैवत्यं–त१.२.३.४.५.६.७-भ२.७.८-मॅ-मु॥ ६२१. २ [२] **आ क्षेति : अभिगच्छति**—ग-त-मु। आ क्षेति–भ-मॅ॥ २०-२१ [४] **सूर्यस्येव यथा सूर्यस्य अरेपसः पापरहिता निर्गता रश्मयः दृश्यन्ते तद्वत् आ चिकित्रे प्रज्ञायन्ते**। सूर्यस्येव यथा सूर्यस्यारेपसः पापरहिता निर्गता (निर्गत्वा–त१.२.६) रश्मयो (रामयो–त१.२.६.७) दृश्यंते तद्वदाचिकित्रे (तद्वदारिकित्रे–त१.६) प्रज्ञायंते (आज्ञा-

यंते–त१.६; आशायंते–मु)–त१.२.६.७-मु । सूर्यस्य वारेपसः पापरहिता निमन्वा रश्मयो दृश्यंते तद्वदादित्यचित्रा – – – शायते–ग४; सूर्यरश्मयः अरेपसः अपापाः आचित्रिते आसमंतात् प्रशायंते–ग१.२ । सूर्यस्येव – – – – मॅ इतरपुस्तकेषु च ॥ २६-२७ [५] हे अग्ने तव श्रियः रश्मिलक्षणा विभूतयः चित्राः विचित्राः चिकित्रे प्रज्ञायन्ते । तत्र दृष्टान्तः । वर्ष्यस्येव यथा वर्षितुर्मेघस्य । हे अग्ने तव श्रियो रश्मिलक्षणा विभूतयश्चित्रा (विभूतयाश्चित्र–त६) विचित्रा (चित्रिता त६; चित्रिश्–त१; चिकित्रा–त२; ' विचित्रा ' नास्ति–मु) श्चिकित्रे प्रजायंते । तत्र दृष्टांतः स्तोत्रपर्यायवर्षितुर्मेघस्य (' तत्र दृष्टांतः स्तोत्रपर्याय ' नास्ति–त६)–त१.२.६.७-मु । तव विभूतयः चित्राः चिकित्रे ज्ञायंते वि वर्ष्यस्येव यथा वर्षितुर्मेघस्य–ग१.२ । – – – यथा वर्षितुर्मेघस्य–मॅ इतरपुस्तकेषु च । साम.२.३.२.७.१ भाष्यं द्रष्टव्यम् । यद्यप्यस्माभिः स्वीकृतश्चतुर्थपञ्चममन्त्रभाष्यभागो बहुषु लिखितपुस्तकेषु नोपलभ्यते तथापि तस्य मूलपाठत्वं संभवति । ' यथा ' इति पदस्य ' चिकित्रे प्रज्ञायन्ते ' इति पदद्वयस्य च सामान्येन भाष्यलोपः संजातो दृश्यते । दाक्षिणात्यलिपिलिखितपुस्तकेऽपि स्वीकृतपाठसदृशः पाठ उपलभ्यत इति विशेषः । ' चिकित्रे ' इति पदस्य पुनरुक्तं समानं व्याख्यानं स्वीकृतपाठं द्रढयति । अरेपसः, चित्राः इत्येतयोः स्वीकृतपाठसदृशं व्याख्यानं ऋ. सं. ६. १७.२; २६.५; ९.६१.१६; १०.७८.१ अत्र द्रष्टव्यम् ॥ ६२२. १६ [७] अन्ना—त-मु । अन्नानि–भ-मॅ ॥ १७ काष्ठानि—ग-त-मु । काव्यानि–भ२.४.८ । काननानि–भ७-मॅ ॥ २५ [८] चरुपुरोडाशादिके—ग२-त७-मु । पशुपुरोडाशादिके–ग४ । च पुरोडाशादिके–त१.२.३.४.५.६.८-भ मॅ ॥ ६२३. १५ [१०] अग्निन् नान्यः—ग२-*मॅ । अग्निः नान्यः–ग१-त१.२.३.४.६.७-भ१.६-मु; अग्निः नन्यः–त८-भ४.८; अग्निः नग्निः–त५; अग्नि नान्यः–भ२; अग्निन् नान्यः–भ७ ॥ ६२४. २६ [१४] कीलालपाशब्दस्योभयथा व्याख्यातत्वात् ' सुरां पिबते ' इत्यस्यानन्तरं ' यद्वा ' इत्येतादृशं पदमावश्यकम् ॥

[१०. ९२] ६२५. १३ चातुर्विंशिकेन—ग४-*मॅ-मु । चातुर्विंशकेन–ग१.२-त-भ १.२.४.७.८; चातुर्विंशिकेहनि–भ६ । ऋ. सं. १. १६० सूक्तप्रस्तावना द्रष्टव्या ॥ ६२६. ५ [३] विपणेः । 'वि पणेः' इति भिन्नः पदपाठः ॥ ६२६. १५ [४] संबन्धिनमेनमग्निं—ग-त-मु । संबंधिनमग्निं–भ-मॅ ॥ ६२७. ३ [६] अन्तरिक्षस्य—ग-त-मु । अंतरिक्ष°–भ-मॅ ॥ १३ [७] पौंस्यं । ' पौंस्ये ' इति पदम् ॥ ६२८. १५ [१०] कर्ममार्गान् वा—ग२ । काममार्गान् वा–ग४; कर्ममार्गानर्वा–त१.२.८; कर्ममार्गानर्षान–त६; कर्मयागानर्वा–त७; कर्मयागान् वा–भ १.२.४.६.८; कर्मयोग्यान् वा–भ७ । कर्मयोग्यान्–मॅ-मु ॥ २३ [११] पत्नी—*मॅ । पत्नी पत्न्यौ–§ । पत्न्यौ–मु ॥ ६२९. ६ [१२] धिया बुद्ध्या अस्य—*मॅ । बुद्ध्या–ग-त१.७; बुध्न्या–त२.३.४.५.६.७.८-भ२.४.६.८ । धिया बुद्ध्या–मु ॥ ६२९. ७ द्यौर्नहुर्धीयं...एष गर्भः इति वाजसनेयकवचनमन्वेषणीयम् ॥ १६ [१३] यागगमने—ग१.२-त१.२.३.५.७.८-मु । मागमने–ग४-भ; गमगने–त४; यागमने–त६.८ । गमने–भ७-मॅ ॥ ' अभि अर्चत ' इति पदद्वयं न व्याख्यातम् ॥ २२ [१४] स्वयं समुपार्जितकीर्ति—ग१.२-भ२.७ । सं स्वशस्यमुपा°-ग४; स्वयशमुपा°–त-भ१.४.६; स्वयशामुपा°–भ८ । उपार्जितकीर्ति-मॅ-मु ॥ २३ पत्युरपत्यान्तत्वेन—*मॅ । पत्युरपत्रागंतृत्वेन–ग१.२; पत्युरतंप्रत्यन–ग४; पत्युरपत्यंतंत्रत्रेन–त१.२.३.४.५.६; पत्युर-

पत्यंतंतन्वेन–त७; पत्युरपतंतन्वेन–त८-भ६; पत्युरयतंतत्वेन–भ१.२.४.८; यत्पुरयतत्वेन–भ७। पत्युरप्रत्यृतत्वेन–मु ॥ २४ **सहितां स्तुमः**–भ७-मु। **सह संस्तुमः**–ग४-त४.५-भ६.८; **सहसंस्तुमः**–त१.२.३.६.७-भ१.२.४; **सहसस्तुमः**–त८। **सह स्तुमः**–मॅ ॥ ६३०. १ [१५] **सन्**—त-भ-मु। सन् अनेन–ग। स-मॅ ॥

[१०. ९३] ६३०. ६. सायणमते तान्वः पार्थः अस्य सूक्तस्यर्षिः। तथैवानुक्रमण्या-मनुक्रमणीभाष्ये च। पञ्चदशमन्त्रे पार्थ्यशब्द आगतः। तत्रापि पार्थ इत्येव भाष्यकारैः पठितम्। अनुक्रमण्याः केषुचिल्लिखितपुस्तकेषु पार्थ्य इति पाठः। मु-पुस्तकेऽप्यनुक्रमणीपाठः पार्थ्य इत्येवोद्धृतः। तथा च मु-पुस्तके पञ्चदशमन्त्रभाष्ये पार्थ्य इति संहितावत् पठित्वा पृथेः पुत्रः इत्युक्तम्। सूक्तप्रस्ता-वनायां तु पृथोः पुत्रः इत्येव ॥ ६३१. १. [३] **द्योतनादि°**—ग-भ७-मु। द्योतमानां द्योतमा-नादि°–त१.२.३.६; द्योतमानानां द्योतमानादि°–त७। द्योतमानादि°–त४.५.८-भ१.२.४. ६.८-मॅ ॥ ६३१. ८. [४] **अन्यो देवजनश्च**—ऽ-मॅ। देवश्च-मु ॥ २५. [६] **उरुष्यतां रक्षताम्**–त१.८-भ। रक्षतां–ग४-त२.३.४.५.६.७-मु। उरुष्यतां रक्षेतां–मॅ ॥ २७. **गच्छति प्राप्नोति**—ग-त-मु। प्राप्नोति गच्छति–भ-मॅ ॥ ६३२. १४. [८] **यागं प्रति शीघ्र°**—ग१.२। प्रतिशीघ्र°–ग४-त-भ१.२.४.६.८-मु। अतिशीघ्र°-भ७-मॅ। मॅक्समुल्लरटिप्पणी द्रष्टव्या। 'यज्ञं प्रति शीघ्र° ' इति स्यादिति स्वयं तैरेवोक्तम् ॥ २६. [९] **रश्मिं न यथा रश्मिं चक्रादिकं**—ग१। रश्मिं न यथा रश्मिः चक्रादिकं–ग२.४-त; रश्मिं चक्रादिकं–भ१.४.६; रश्मिं न रश्मिमिव चक्रादिकं–भ७। रश्मिं न यथा रश्मिचक्रादिकं–मु। रश्मिं न यथा चक्रादिकं–मॅ ॥ ६३३. २१. [१२] **विस्तृतान् रश्मीन् वर्धयन्ति**—*मॅ–मु। विस्तृतान् रश्मीन् सूर्यइव–ग१.२; विस्तृतान् रश्मीन् (विस्तुताद्रश्मीन्–त१; विस्तृताद्रश्मीन्–त२.३.७; विसृतान् रश्मीन्–भ१.२.४) वर्धयंत–त-भ ॥ २७. [१३] **स्तुतिरावर्वर्त**—*मॅ। स्तुतिस्थारावर्वर्त वर्तते–ग१.२; स्तुतिः सारावा वर्वर्तते–ग४; स्तुतिः सा ववर्त वर्तते–त१.२.३.६.७; स्तुतिः सा ववर्त ते–त४.५; स्तुतिः सारावर्वर्त –त८-भ४.८; स्तुतिः सा रावर्वर्त वर्तते–भ१.६; स्तुतिः सा राया ववर्त–भ२; स्तुतिरावर्वर्तते–भ७। स्तुतिरावर्वर्त वर्तते–मु ॥ ६३४. ८. [१४] **वा विशेषेण**—ग१.२-त-भ४.६.८–मु। ना विशेषेण–भ१.२। नाविशेषेण–भ७-मॅ ॥

[१०. ९४] ६३५. २८ [४] **शन्दायन्ते**—ग-भ४.५.६.८। शन्दायंति–त; शन्दयंते –भ१.२; शन्दयंति–भ७-मु। शन्दं कुर्वंति–मॅ ॥ ६३६. २६ [७] **बन्धनसाधनभूता**—त-भ २-७। बंधकसाधनभूता–ग४; बंधसाधनभूता–ग१.२-भ६.८; बंधसाधसाधनंभूता–भ१.४। बंधने साधनभूता–मॅ-मु ॥ ६३७. १६ [९] **सोमादः**—ग१.२-त३.४.५। ते सोमादः–ग४-त१.२.६.७.८-भ-मॅ-मु। 'ते ' इति प्रतीकमग्र आगतमेव ॥ १७ 'गवि अधि अधिषवण° ' इति साधु इति मॅक्समुल्लरमहाशयाः। गवि गव्ये अधिषवण°-मु ॥ ६३८. १४ [१२] **सदांस्यात्मना न युञ्जते**—ग१.२-त३.४.५.७-मु। न युंजते सदांस्यात्मना–मॅ ॥

[१०. ९५] ६३९. २६ **शप्तवन्तौ मनुजभोग्या**—ग-भ६-*मॅ-मु। शप्तवंतौ मनुजो-भोग्यां–त१; शप्तवंतौ मनुजौभोग्यां–त७; शप्तवंतौ मनुजभोग्यां–त२.३.६-भ१.२.८; सपूर्वंतौ मनुजभोग्यां–त४.५; शप्तवंतौ मनुजम्योग्या–भ४; शप्तवंतौ मनुजोभाग्यं–भ७ ॥ ६४०.१ **सोमपुत्रा-**

ज्ञातो—ऽ-मु । सोमसुताज्जातो–मॅ॥ **तमुर्वशी तु**—ग-भ४-*मॅ-मु । तमुर्वशीति–त१.२.३.६.७.८-भ१.२.६.७.८; तमुर्वशी क–त४.५ ॥ २ **तत्पादन्यत्र**—त२.३.६.८-*मॅ-मु । तदान्यत्र–ग-त४.५-भ१.२.७.८; तत्पादन्यंत्र–त१; रतादन्यत्र–भ४; यदान्यत्र च–भ६ ॥ ३ **°रुरणकद्वयं**—भ२-*मॅ-मु । °रुणकद्वयं–ग१.२; °ररुणकद्वयं–ग४-त२.३.६.७.८-भ१.६.७.८; °ररुणकद्वहतं–त४.५; °रुरुणकद्वयं–त१-भ४ ॥ ८ **साश्वं सापश्यदुक्ता**—*मॅ । साश्वं सापश्यदुक्ता–त१.२.३-भ२; ससापश्य उक्ता–त४.५; साश्वं सापश्यदुक्त्वा–त६.७; साश्वां सापश्यदुक्ता–त८; साश्वः सापश्यदुक्ता–भ१.४.६.७.८ । साश्वं सापश्यदुक्त्वा–मु ॥ ६४१. ७ [२] **तथाहमपीति**—ग१.२-त४.५-भ२ । अहमपीति–ग४-त१.२.३.६.७.८-भ८-मॅ-मु ॥ ८ **माता मय्यभिलाषं**—ग४-भ१.२.६.८ । मय्यभि°–त१.२.६; मय्यभिलाषं मा–त३.७-मु; मामप्यभि°–त४.५; मा माभि°–त८ । मा ममाभि°–मॅ ॥ ९ **स्वस्या**—ग-त१.२.४.५.६-भ४-मु । तस्या–त८-भ१.६-मॅ ॥ १९ [३] **मत्सामर्थ्यं**—ग१.२-त३.४.५-भ१.२.४.६.८-मु । नत्सामर्थ्यं–ग४; न तत्सामर्थ्यं–त७; तत्सामर्थ्यं–भ७ । न मत्सामर्थ्यं–त१.२.६.८-मॅ ॥ २० **भटा**—ग.त५.७.८-भ२.४.५.८ । भवन–त१.२.३.६; भ–त४ । नरा–भ१.७-मॅ-मु ॥ ६४२. १ [४] **यच्छ्वशुरस्य**—*मॅ-मु । यस्य श्वशुरस्य–ग-त-भ२; यस्य श्वस्य–भ१.६; यश्च्यसुरस्य–भ४; यस्येश्वरस्य–भ७ ॥ ६४४. ४ [१०] **कर्मसु कर्मवान् वा** । कर्मसु–मॅ-मु । ऋ. सं. ३.६०.३; ५.४२.१२; ९.७२.६ इ. द्रष्टव्यम् ॥ १२. [११] **भूमे रक्षणाय**—ग-त-मु । सूरेक्षणाय–भ१; सूरे रक्षणाय–भ२.४; मे क्षणाय–भ६; सूरक्षणाय–भ७; भूरे रक्षणाय–भ८ । भूरक्षणाय–मॅ ॥ १३ **पुनस्तदेवाह**—ग१.२-भ५.६ । पुत्रदेवाह–ग४-भ७; पुत्र एवाह–त; पुत्रवदेवाह–भ१.२.४.८ । पुनर्देव्याह–मॅ-मु ॥ १६ **शिक्षितवत्यस्मि**—*मॅ-मु । शिक्षितवानस्मि–ऽ ॥ १८ **वदेर्लेट्याडागमः**–ग१.२ । वदेतेत्यागमः–ग४; °र्लट्या°–त३.७; °र्लिट्या°–भ८; °र्लेट्य°–त१.२.४.५.६.८-भ१.२.४.६.७-मॅ-मु ॥ [११] **एडकद्वय°**–ग-त८-भ२.५.८-मु। **एकद्वय°**–त१.२.३.४.५.६.७; एडकवालकद्वय°–भ१;**एकलकद्वय°**–भ४; पलकद्वय°–भ६ । एडकवालक°–मॅ॥ ६४५.१८ [१३]**अमादेशः**—ग२ । **अणादेशः**–ग४ । आमादेशः–त-भ-मॅ-मु ॥ २६ [१४] **असमर्थः**—ग-भ । **समर्थः** सन्–त-मु । **समर्थः**–मॅ ॥ ६४६. १२ [१५] **एता एतानि**—ग२-त । एतानि–ग४-भ-मॅ-मु ॥ १३ **तेषां हृदयानि यथा**—ग-त१.२.३.६.७-मु । तेषां यथा–त४.५ । यथा–त८-भ-मॅ ॥ २१ [१६] **प्रमयित्रीः**—ग-त-भ १.२.४.६.८ । परमयित्री–भ७ । पूरयित्रीः (?)–मॅ-मु ॥ ६४७. ७ [१८] **यजासि** । 'यजाति' इति संहिता ॥

[१०. ९६.] ६४८. ५. [२] **नवप्रसूता**—त८-भ-मु । प्रसूता–त१.२.३.६.७ । नवप्रसूतिका–ग-त४.५-मॅ ॥ **पुरस्तादुपाचारो**—ग-त-भ८ । °दुपचारो–भ१.२.६.७-मॅ-मु ॥ १६. [३] **रूपाणि सर्वाणि**–ऽ-मु । रूपाणि-मॅ ॥ ६५०. २७. [१०] **हे इन्द्र हर्यतः**—ग-त१.२.३.६.७.८-भ-मु । हर्यतः–त४.५-मॅ ॥ ६५१. १५. [१२] **प्रापयन्तु**–ऽ-मु । प्रापयंतु प्रवहंति-मॅ ॥

[१०. ९७] ६५२. १२. [१] **ओषधीः ओषधयः**—ग-त-मु । ओषधयः भ-मॅ ॥ १८. **सोम्था ओषधयः औषधः पुरुषः**—ग१-त३-*-मॅ-मु । इतरपुस्तकेष्वबद्धाः पाठाः॥ ६५३. २६. [५] **शप्चेति द्विविकरणता**–*मॅ । शप्चेति विकरणता–मु । लिखितपुस्तकेष्वबद्धाः पाठाः ॥

६५४. ३. [६] **ब्राह्मणः सः**—ग४-त१.२.३.६.७.८-भ-मु। ब्राह्मणः अ--त४.५। ब्राह्मणः--मॅ॥ ६५५. १२. [११] **शकुन्यादीनां**—ग१.२-त३.७.८-भ५-मु। कुशन्यादीनां--भ१.२.४.८; कुशलादीनां--भ६; शकुन्यानां--भ७। शकुनादीनां--ग४-त४.५-*मॅ॥ **ग्राहकाद्व्याधात्**--ग-*मॅ-मु। ग्राहकाव्याघात्--त१.२.३.७.८; ग्राहकात् व्याध्यात्--भ६; ग्राहकाव्योघात्--भ१; ग्राहकाव्यात्--भ४; ग्रहकोवाघात्--भ७॥ १९. [१२] **समनन्तरशत्रून्**—ग४-त-भ१.४.७.८; सामन्त°--ग२। समनंतरं°--भ२.६-मॅ-मु॥ २६. [१३] **गत्या वेगेन**—ग१.२-त१.२.३.६.७.८-भ१.२.७.८-मु। गत्यनेन--ग४; गत्वा वेगेन--भ६। गतिवेगेन--त४.५--मॅ॥ ६५६. १३ [१५] भ६-लिखितपुस्तकं पञ्चदशमन्त्रभाष्यान्ते समाप्तम्॥ ६५८. १४. [२३] **अभिहिनस्ति**—ग-त-मु। भिहिनस्ति--भ१.४.७.८। हिनस्ति--भ२-मॅ॥

[१०. ९८] ६५९. १७ [३] **तां वाचमिति**—ग-त१.२.३.६.७.८-भ-मु। वाचमिति--त४.५-मॅ॥ ६६१. १२ [१०] **सति आहुतानि**—मॅ-मु। सति आहूतानि?॥ २१ [११] **कुरुकुलजातमपि**—*मॅ-मु। एतत्कुलजातमपि शंतनुमपि भूताकुलं बाजमपि--ग१.२; भूतकुलजालमपि--ग४; भूताकुलाजालमपि--त१.६.७.८; भूताकुलजालमपि--त२.३-भ; भूताकुलजातमपि--त४.५। 'उलकुलजातमपि' इति मॅक्समुल्लरमहाशयैः संभावितम्॥ २६ [१२] 'मृधः' इति पदं भाष्यकारैः न व्याख्यातम्॥

[१०. ९९] ६६२. २३ [२] **युक्तः सन्**—ग-त-मु। युक्तः--भ-मॅ॥ २४ **माया आसुरी ऋते**—*मॅ। माया आसुरीः ऋते--ग१.२-त१.२.३.६.७.८-भ-मु; मांदा आसर्यः ऋते--ग४; माया आसुर कृतेन--त४.५। भाष्यकारैः 'मायाः' इत्यस्य स्थाने 'माया' इत्येकवचनान्तं पठितम्॥ ६६३. ३ [३] **संग्रामे**—ग४-*मॅ-मु॥ ४ **शतदुरस्य शतद्वारस्य**—ग-त१.२.३.६.७-मु। शतदुरस्य--त४.५-मॅ॥ ६६४. ७ [६] **व्यहन्**। 'हन्' इति संहिता॥ २७ [८] **लम्भयन्**। **न इति**—ग४-*मॅ। लंभयतु न इति--ग१.२; लभयन् न इति--त१.२.३.६.७; अविदत् अलभत--त४.५-मु; लभयत इति--त८; लंबयन् इति--भ७॥ ६६६. १३ [१२] 'इन्द्रम्' इत्यस्य स्थाने 'इन्द्र' इति सायणाचार्यैः पठितं दृश्यते॥

[१०. १००] ६६६. २० **त्वन्त्या त्रिष्टुप्**। तु त्रिष्टुबन्तं--अनु.॥ ६६८. २८. [८] **सवितृदेवोऽस्माकं**—ग-त१.२.३.६.७। सवितृदेवो नोस्माकं--त४.५.८-भ-मु। सवितृदेवतास्माकं--मॅ॥ ६६९. १५. [१०] **अङ्ध्वे**—त१.२.३.६.७-*मॅ-मु। अङ्ग्वे--ग१.२; अङ्वे--ग४-भ१.४.८; अङ्गध्वे--त४; अग्ध्व--त५; अङ्ग्य--त८॥

[१०. १०१] ६७१. १३ [३] **'सप्त ग्राम्याः कृष्टे सप्तारण्या अकृष्टे'** इत्यापस्तम्बवचनमन्वेषणीयम्॥ २९ [५] **°कर्षणार्थगोपानसाधनद्रुममयपान°**—*मॅ। °कर्षणार्थं गोपानसाधनं द्रुममयपान°--ग-त१.२.३.६.७.८-भ। °कर्षणार्थगोपानसाधनमुपपयमाने°--त४.५। °कर्षणार्थं गोपानसाधनद्रुममयपान°--मु॥ द्वितीयपादस्य व्याख्यानं लुप्तम्। ग४-पुस्तकस्थं द्वितीयपादव्याख्यानं पादटिप्पण्यां दत्तम्॥ ६७२. १ **पित्त्वेनाङित्त्वात्**—ग-त। त्वेनाङित्वात्--भ८; पत्वेनाङित्वात्--भ१.४। तेनाङित्वात्--मॅ-मु॥ ३ **कदाचिदपि**—ग४-त१.२.३.७-मु। कदाचित्--भ-मॅ॥ ६ [६] **कीदृशमवतं**—ग-त-भ८-मु। कीदृशमवटं--भ१.२.४.७-मॅ॥ २२ [७] **अश्वं रथं**—ऽ-मु।

अश्वरथं–मॅ ॥ ३० **कूपरूपकव्याजेन**—ग-त१.२.३.६.७.८-भ१.४ । कूपव्याजेन–भ७ । कूपरूपव्याजेन–त४.५-भ२.८-मॅ-मु ॥ ६७३. २५ [९] **अपि वा**—ग२.४-मु । अपि वो–त-भ१.२.४ । अपि च–मॅ ॥ अपि चा–भ७ ॥ ६७४. ५ [१०] **ईम् एनं**—ग-त४.५.८-भ । एनं–त१.२.३.६.७-मॅ-मु ॥ १० **प्रति**—ग४-*मॅ । प्र–त४.५ । 'प्रति' नास्ति मु इतरेषु च ॥ 'वह्निम्' इत्यस्य स्थाने 'वह्नी' इति भाष्यकारैः पठितम् ॥ ११ °**हलविषयतया**—ग-त१.२.३.४.५.६.७-भ-मु । °हलाविषयतया–त८-मॅ ॥ १६ [११] **धुरौ आपिन्दमानः आपिशब्दमानः वह्निः हविर्वाहको**—*मॅ । धुरो वा आपिन्दमानो वह्निः वाहको–ग१.२; धुरौ वा आपिन्दमानो वह्निर्वाहको (°र्वाहका –त१.७)–ग४-त१.२.६.७.८; धुरावापिशब्दमानो वह्निर्वाहको–त४.५; धुरौ वा आपिन्दमानः हविर्वाहको–भ१.२.४.८; धुरौ चा अपिशब्दमानः हविर्वाहनको–भ७ । धुरौ आपिन्दमानः आशब्दमानो वह्निर्वाहको–मु ॥ १९ **स्थापयतासन्द्याम्**—ग१.२-*मॅ-मु । °त सत्यां–ग४; °तासद्यां–त१.२; °त संद्यां–भ१; °त संद्यां–भ४; °तसद्यां–भ७ ॥ २१ **धुरावापिन्दमानोऽपिशब्दमानो**—*मॅ । धुरावापिन्दमानो–ग१.२-त७; धुरावापन्दमानो–ग४; धुरावपिशब्दमानो–त१.२.३.६.८; धुरावपि पिशब्दमनो–त४.५; धुरौ अपिशब्दमानो–भ१.२.४.८; धुरावपिशब्दौ–भ७ । धुरौ अपिन्दमानः शब्दमानो–मु ॥

[१०. १०२] ६७५.८. **भर्म्यश्वपुत्रो**—त२-*मॅ । भर्म्याश्वपुत्रो–ग१.२-त३-मु । भाम्यश्वपुत्रो–ग४; भार्म्याश्वपुत्रो–त१; भार्म्यश्वपुत्रो–त७-भ४.७.८; भ्रार्म्यश्वपुत्रो–भ१.२ ॥ **ऋषभेण द्रुघणेन** । द्रुघणेन ऋषभेण–अनु. ॥ १२. **चोरमार्गानुसारकः**—ग-त१.२.३.४.५.६.८-*मॅ । चोरमार्गोनुसारकः–त७-भ१.२.७.८; चोरमार्गोनुवारकः–भ४ । चौर°-मु ॥ ६७७. १. [५] °**चणकादिभक्षकम्**–ग४-त१.२.३.६.७-मु । °चरणकादि°–त८-भ१.२.४.८; °चरणादिक°-भ७ । °चर्वणादि°–त४.५-मॅ ॥ २४. [७] **उत् उत्कृष्टम्**—त१.२.३.७-मु । उत्कृष्टं–ग४–भ । उदावन् उत्कृष्टं–मॅ ॥ ३१. [८] **वधौ**—त१.२.३.७-भ८-मु । वाधौ–भ१; वधौ–भ२.४; शर्धौ–भ७ । वध्यां–मॅ ॥ ६७९. ६. [११] °**प्याडागमः**—ग१.२-त१.२.३.७.-भ१.२.४.८-मु । °प्यडागमः–ग४-त४.५.६-भ७-मॅ ॥ **अश्नोतेर्वा लिटि तलोपः**—ग-त१.४.५.६-भ२.८ । अश्नोतेर्वा लिटि नलोपः–त२.३.७-मु; अश्नोतेर्लिटि वा तलोपः–त८-भ१; अश्नोतेर्लिटि वा लोपः–भ४; अश्नोतेर्लेटि वा तलोपः–भ७ । अश्नोतेर्लिटि वा णलोपः–मॅ । ऋ. सं. १०. १०४. ६. द्रष्टव्यम् ॥ ६७९. १९. [१२] **त्वया दृष्टया**—ग४-त१.२.३.६.७.८-भ । त्वया दृष्टा–ग१.२ । त्वया–त४.५-मॅ-मु ॥

[१०. १०३] ६८०. ६. [१] **हन्तेः पचाद्यचि**—ग१.२-त१.२.६.७-भ१.२.४.८-मु । हंतः पचाद्यचि–त३.८-भ७ । हंता पचाद्यचि–त४.५-मॅ ॥ २०. [२] **तत् शत्रुबलं**—ग४-त४.५-मु । तच्छत्रुं बलं–ग१.२; तच्छत्रुबलं–त१.२.३.६.७-भ; तशत्रुबलं–त८ । शत्रुबलं–मॅ ॥ ६८१. १. [३] **भवन्तीत्यर्थः**—त१.२.३.६.७-भ-मु । भवती°–त४.५.८-मॅ । इषवः वृथा न भवन्तीति तात्पर्यम् ॥ ७. [४] **गतिकर्मा**—ग-त-मु । गच्छतिकर्मा–भ-मॅ ॥ २८. [६] **जयन्तं**—ग४-त१.२.३.६.७.८-भ-मु । जयंतं शत्रूनभिभवंतं-त४.५-मॅ ॥ ६८२. १६. [८] **अस्मत्सहायार्थं**—§-मॅ-मु । '°त्साहाय्यार्थम्' इति भाव्यमिति मॅक्समुल्लरमहाशयाः ॥ २६ [९]

भुवनानां व्यावयितृणां—ग-त१.२.३.६.७-भ१.२.४-मु। व्यावयितृणां—त४.५-भ७.८-मॅ॥ 'जयताम्' इति न व्याख्यातम्॥ ६८३. ४. [१०] सैनिकानां—ग१.२-त१.२.३.६.७-भ२-८-मु। प्रीतिकानां-भ१.४; प्रीतिकामानां—भ७। सेवकानां—ग४-त४.५-मॅ॥ ६८३. १७. [१२] विमोहयन्ती सती—ग-त-मु। विमोहयंती—भ-मॅ॥ 'परेहि' इति न व्याख्यातम्॥

[१०. १०४] ६८५. १२. [४] शक्तिवन्निन्द्र—ऽ-मॅ-मु। 'शक्तिमन्निन्द्र' इति शुद्धम्॥ यज्ञमहर्जानन्तः—*मॅ-मु। महूजाज्ञानंतो—ग१.२; यज्ञं षष्ठमहर्जानन्तो—ग४; यज्ञं महर्जानंतो—त१.२.३.६.७-भ; यज्ञं महर्यातं यातगितांगिरसः—त४.५; यज्ञमहर्जानंस्तांगिरसः—त८॥ ६८६. ५. [६] तप्रत्ययस्य—ग-त१.२.३.६.७.८-भ। सुप्रत्यस्य—त४.५। तत्प्रत्ययस्य—भ२-मॅ-मु। ऋ. सं. १०.७०.९; १०३. ११ द्रष्टव्यम्॥ ६८७. ३. [९] वृत्रहत्यायां मेघहनने। वृत्रहत्याय मेघहनने—ग१.२; वृत्रहत्यायां मघहन—ग४; वृत्रहत्याय मेहवमे—त१.२.३.६.७-भ२.८; वृत्रहत्यायां मे हवं—त४.५; वृत्रहत्याय मेहेवमे—त८; वृत्रहत्याय मे—भ१.४; वृत्रहत्याय—भ७। वृत्रहत्यायां—*मॅ-मु॥ १४. [१०] शक्रः शक्तः—ग२.४-त१.२.३.४.५.६.७-भ२.८-मु। शक्रः—त८-मॅ॥

[१०. १०५] ६८७. २१ ऐन्द्रम्। कुत्सपुत्रो—ग१.२-त१.३.७-भ१.२-मु। ऐंद्र-कुत्सपुत्रो—त२.६.८-भ४.७.८-मॅ॥ २२ स ऋषिः—ऽ-मु। ऋषिः—मॅ॥ २४ शिष्टाः सर्वाः—ग। शिष्टाभिः सर्वाभिः—त-भ-मॅ-मु॥ ६८८. २१ [२] केशिना केशिनौ—ग१.२-त१.२.३.६.७-मु। केशा केशिनौ—ग४। केशिनौ—त४.५-भ-मॅ॥ ६८९. २४ [६] प्रास्तौन् प्रस्तौति—ग४-त-भ२.४.५.८-मु। प्रास्तौति—भ१.७। प्रास्तौत्—मॅ॥ ६९०. २३ तद्वती—*मॅ। यद्वती—त१.२.३.६.७; द्विती—त४.५; यद्वदती—त८-भ१.२.४.८; यद्वा—भ७-मु॥ 'विश्वायुस्तन्वम्' इत्यस्य स्थाने 'विश्वाभिस्तनुम्' इति भाष्यकारैः पठितम्॥ ६९१. १ [९] प्रीयमाणः—त-भ १.२.४.८-मु। प्रीयमाणो वा—भ७-मॅ॥ ९ [१०] दर्विः अपि अरेपाः—त१.२.३.७-भ२.७। दर्विरप्यपरेपाः—भ१.४.८। दर्विररणिररेपाः—मॅ-मु॥

[१०. १०६] ६९२.६. ग४-लिखितपुस्तकं १०५ सूक्तान्ते समाप्तम्॥ अश्विदेवत्यम्—ग४-त-भ१.४.७.८-मु। °दैवत्यं-भ२-मॅ॥ ८ तिरिक्तोक्थ—त४.५.७.८-भ१.२.४.८-मु। °तिरिक्तोक्त्य—ग४; °तिरिक्तोत्थ—त१.२.३.६; °तिरिक्तोक्थ्य—भ७। °तिरिक्तोक्थ्य—मॅ॥ १८ [१] अपसा अपस्विनौ—ग४-त१.२.३.६.७-भ-मु। बाह्यसा अपस्विनौ—त४; अपबाह्यसा अपस्विनौ—त५। अपस्विनौ—त८-मॅ॥ २३ लक्ष्मि—ग४-त१.२.३.६.७.८-भ। लटि—त४.५। लुक्ष्मि—मॅ-मु॥ ६९३. ४ [२] प्रायोगेन प्रायोगौ—ग४-भ१.२-मु। प्रायोगेन प्रायोगो—त१.२.३.६.७.८; प्रायोगेन प्रयोगो—त४.५-भ४। प्रायोगेव—भ७-मॅ॥ ६९३. ११ नापगच्छतः—ग४-त-मु। आगच्छतः—भ७। अपगच्छतः—भ१.२.४.८-मॅ॥ ६९४. ९ [४] भवार्थे—त-मु। तवार्थे—ग४। भावार्थे—भ-मॅ॥ २२ [५] भवे—त५.८। भावे—ग४-त३.४.६.७-भ२.८-मॅ-मु॥ शिम्बाता शिम्बातौ—त७-भ१.२.८-*मॅ-मु॥ २३ हेतुना आतं व्याप्तमिति—भ७। हेतुनातितं व्याप्तमिति—मु। हेतुनातितं प्राप्तमिति—*मॅ। हेतुना आतं व्याप्तव्यमिति—त१.२.३.७.८-भ१.२.४.८; हेतुना आतं प्राप्तव्यमिति—त४.५॥ सहावस्थानात्—ग४। सहावस्थानान्—त५; सहवेल्या-

तान्–त४; सहावस्थितान्–त१.२.३.६.७.८-म१.२.४.८ । सहावस्थित°–म७-मँ-मु ॥ **३१ सुखकरत्वस्य विवक्षितत्वेन**—*मँ-मु । सुखकरत्वस्य विवक्षितत्वे–ग४-त१.२.३.६.७.८; सुखस्य विवक्षितत्वेन–त४.५; सुखकरन्वक् विवक्षितन्वे–भ४ ॥ ६९५. ७ [५] **पुरीषं पृणातेः पोषयतेर्वा** । 'पुरीषं पृणातेः पूरयतेर्वा' इति निरुक्तपाठः ॥ २२ [६] **तुर्फरी**—त६. ७-भ१.२-*मँ-मु । तूर्फरी–त१.२.३.८-म१.४.८; तुफरी–त४.५ ॥ २५ **अस्मादीकनि**—*मँ-मु । अस्माकन्–ग४; अस्मादिति–त१.२.३.७.८; अस्मादिति–त४.५; अस्मादितीष्–त६ ॥ २७ **उदन्नादेशः**—ग४-*मँ । उदन्यादेशः–त१.२.३.५.६.७.८-भ-मु; उदनादेशः–त४ ॥ **रत्ने इव**—भ१.२-*मँ । रत्नेर्वश इव–ग४; रत्ते इच–त१; तन्ते इच–त२.३.७; रत्रे इव–त४.५; रन्ते इव–त६; रत्रे इच–त८; रत्ते इव–भ४.८; रत्नेव–भ७ । जाताविव–मु ॥ ६९६. ११ [७] **वायुर्न वायुरिव**—त४.५-भ२.५.८ । वायुरिव–त१.२.३.६.७.८-मँ-मु ॥ २८ [८] **आह्लादकं**—त४.५-भ२-मु । आह्लादिकं–त१.२.३.६.७.८-म१.४.७.८-मँ ॥ ६९७. ८ [९] **स्मरतेर्लेट्याडागमः**—त३.७.८-भ२.८-मु । स्मरतेर्त्येंव्याडागमः–त२-भ१.४; स्मरतेर्याडागमः–भ७; स्मरतेर्लेट्यडागमः–त४.५.८-मँ ॥ ६९८. ५ [११] **गोरूधस्य°**—*मँ । गोरूप्यस्य°–ग४; गोरूपस्य°–त१.२.३.६.७.८-म१.२.४.८; °रथं धनं बोचतः स्व–त४.५; गोरूपस्यांतस्थितं–भ७ । गोरूधस्यन्तःस्थितं–मु ॥ ८ **आ अप्राः**—त४.५ । विलिप्राः–ग४ । अप्राः–त१.२.३.६.७.८-म२.८-मँ-मु ॥

[१०. १०७] ६९८. २३ [१] **चैत्रमासे तयोरिन्द्रः** । किमस्य मूलम्? ऋ. सं. ३. ३४.१ मन्त्रे 'चैत्रमासे तपेदिन्द्रः' इति स्मृतिरुदूता ॥ ६९९. १५ [३] **पालिनी** । मॅक्समुल्लर-टिप्पणी द्रष्टव्या ॥ १९ [३] **हविर्भिश्च**—त-भ१.४.७.८-मु । हविर्भिर्वा–भ२-मँ ॥ ३० [४] **एतौ**—त१.२.३.६.७.८-भ-मु । तौ–त४.५-मँ ॥ ७००. २७ [६] **लित्स्वरः**—त१.२.३-भ-मु । लिट्स्वरः–मँ ॥ ७०१. २६ [९] **अनाहूयमानाः**—त१.२.३.६.७.८-भ-मु । आहूयमानाः–त४.५-मँ ॥ ७०२. ३ [१०] **शरीरावयवविशेषशोभया**—त१.२.३.७-मु । शरीरावसंनिवेविशेषशोभया–भ । शरीरावयवशोभया–मँ ॥ ८ **देवमानमिव देवयानमिव**—त४.५-भ१.४.५.७ । देवमानेव देवयानेव–त१.२.३.६.७.८-भ८; देवमानेव देवमानमिव देवयानमिव–भ२ । देवमानमिव–मँ ॥

[१०. १०८] ७०२. २६ [१] **°निंगूळ्हा गा**—त७-*मँ । °निर्दूढा गा–त१.३.८-भ१.४.८; °निंरूढा गा–त२-भ२; °निंगच्छते–त४; °निर्गूढा गो–त६; °निंगूढा गा–भ७-मु । °निंरूळ्हा गा–अनु. ॥ [३] उत्तरार्धे कानिचित्पदान्यव्याख्यातानि ॥ ७०४. ६ [४] **हिनस्त्येव**—ऽ-मु । हिनस्त्वेव–मँ ॥ ७०४. २३ [५] **को वा**—ग-त१.२.३.६.७.८-भ-मु । को नाम–त४.५-मँ ॥ ७०५. ३ [६] **जसः सुः**—ग१.२ । जसः–त२-भ१.४; जसः स–त४.५ । जसः शः–मँ-मु ॥ ६ **सुखयेत्**—ग१.२-त४.५-भ७ । सुखयत्–त२.६.८-भ१.४ । सुखयतु–मँ-मु ॥ ७ **लेटयाडागमः**—ग-त१.२.३.६.७-भ-मु । लेटयडागमः–त४.५-मँ ॥ १६ [७] **अतोलोप°**—ग२-मु । अतो लोपौ°–त१.२.३.६.७.८-भ२.४.८; अनो लोपौ°–भ१.७ । आतो लोप°–त४.५-मँ ॥ २६ [८] **उदतिष्ठन्**—ग२ । दतिषुन्–त१.३.६.७.८-म१.२.४; दतिष्ठन्

–त४.५; अतिष्ठन्–त२; द्धतिष्ठुन्–भ७; दितिष्ठुन–भ८। अध्यतिष्ठन्–मॅ-मु। ऋ. सं. १.३३.६; १०. ६१. १० द्रष्टव्यम्॥ ७०६. ९ [९] **समूहापेक्षयैकवचनम्**—ग-त-भ२.८-मु। **समूहापिक्षेरेक°**–भ४; समहापेक्षएक°–भ७। **समूहापेक्षैक°**–मॅ॥ २० [१०] **छद अपवारणे**—त१. २.३.६.७.८-*मॅ-मु। छद आवरणे–ग-त४.५; छद अपवारेण–भ१; छंद अपवारणे–भ४; छद आपवारणे–भ७॥

[१०. १०९] ७०८. १० [३] **ग्रहीतव्यमेव**—त४.५। गृहीतव्यमेव–त३.६.७.८-भ२.८-मॅ-मु॥ ७०९. २१ [६] **अव्यवहार्यत्व°**—भ४-मु। अभ्यवहार्यत्व°–त१.२.३.६.७.८-भ२.८। अभ्यवहार्य°–त४.५-भ१.७-मॅ॥

[१०. ११०] ७१०. ३० [२] **स्वादय**—त-भ८। स्वादयस्व–मॅ-मु॥ **स्वादूकुरु**—*मॅ। स्वादुकुरु–ग-त-भ-मु। ७११. १० [३] **स त्वं**—ग२-त४.५-भ-मु। स त्वं देत्वं–त१. २.३; स त्वं देव त्वं–त६.८; स त्वं त्वं–त७। स त्वं देव–मॅ॥ ७१२. १४ [६] **उषासानक्ता उषाश्च**—ग१.२-त४.७। उषसानक्तोषश्च–त३.५.६.८-भ२.८-मॅ-मु॥ १६ **कीदृश्यौ**—ग१. २-त४.५-भ१.२.५.८। किदृश्यो–त१.३.७.८; कीदृश्यो–त२.६; किदृश्यौ–भ१.४। कीदृश्ये–मॅ-मु॥ ७१३. ६ [८] **आ एतु**—ग१.२। एतु–त-भ-मॅ-मु॥ ७ **जानाना**—ग१.२-त१.२.३. ६.७.८-भ२.५.८-मु। जाना–भ१.४; जनानां–भ७। जानती–त४.५-मॅ॥ २२ [९] **जानानस्त्वं**—त-भ-मु। जानंस्त्वं–मॅ॥ ७१४. ४ [१०] **स्वादूकुर्वन्तु**—ग२। स्वादूं°–त५। स्वादं° –त३.४.६.७.८-भ२.८-मॅ-मु॥

[१०. १११] ७१४. १६ **दशाग्रादंष्ट्रः**। 'दशाष्टादंष्ट्रः' इत्यनुक्रमणीपाठः॥ २२ [१] **बुद्धयनु°**—ग१-*मॅ-मु। बुद्धयानु°–ग२-त-भ॥ ७१५. १६ [३] **भौवादिकः** - - - —अत्र भाष्यांशो निःसंशयं लुप्तः। किंतु लिखितपुस्तकेषु लोपदर्शकं किमपि चिह्नं नास्ति॥ २४ [४] **मीङ् हिंसायाम्**—§-मॅ-मु। 'मीञ् हिंसायाम्' इति भाव्यम्॥ ७१६. २४ [७] **तदानीं**—ग१.२-*मॅ-मु। इदानीं–त१.२.३.६.७.८-भ; तदनु–त४.५॥ ७१७. १५ [९] **अनुदात्तेत्**—ग१.२-त४.५.८-भ। उदात्तेत्–त१.२.३.६.७-मॅ-मु॥ २१ **क्रीडन्ति**—त४.५। क्रीडंते–त१. ६.८-मॅ-मु॥

[१०. ११२] ७२०. ३१ [९] **त्वां**--त४.५.८। त्वा त्वां--त१.२.३.६.७-भ-मॅ-मु॥ 'त्वाम्' इत्येव मन्त्रे॥

[१०. ११३] ७२१. २६ [१] **विश्वेभिः**—§-मु। विश्वेभिः सर्वेभिः (१)--मॅ॥ ७२३. २८ [७] **या यानि**—ग२-त१.२.३.६.७.८-भ-मु। यानि--मॅ॥ ७२५. १ [१०] **मन्यतेर्लोटि**—त१.२.३.६.७.८-भ-मु। मन्यतेर्लेटि--ग१.२-त४.५-मॅ॥

[१०. ११४] ७२५. ६ **सूक्तं वैश्वदेवम्**—ग१.२-त४.५। सूक्तं--त१.२.३.६.७.८-भ-मॅ-मु॥ ७२८. १ [६] **स्तुतशस्त्रादिरूपेण**—ग१.२-त१.४.५.७-भ५। स्तुत्शस्त्रादि°--त २.३.६.८-भ२.४.८। सन्शस्त्रादि°--भ७। संतः शस्त्रादि°--मॅ-मु॥ ७२८. २२ [८] **उक्था उक्थानि**—ग१.२-भ५.८-मु। उक्थानि--त१.३.६.७.८-भ२-मॅ॥ २७ **प्रतिक्षणं**—त-भ४.७. ८। प्रतिक्षीणं--ग१.२। प्रतिलक्षणं--भ१.२-मॅ-मु॥ ७२९. १९ [१०] **सप्ताश्वाः**—ग१.२-त-भ २.५.८-मु। ताश्वाः--भ१.४; संख्याः--भ७। अश्वाः--मॅ॥

[१०. ११५.] ७३०. ५. [१] **स्तनपानायापि**—ग१.२ । सूनयानायापि--त१.२. ६.८; स्तुवपानीयापि--त४.५; सूनांयानायापि--त३; सूनपानायापि--त७-म१.४; नपानायापि--भ७; सूनपामीयापि–भ८ । पानायापि–मॅ-मु ॥ ७. **समासान्तस्यानङः ... ... °नङभावः**—*मॅ-मु । लिखितपुस्तकेष्वशुद्धाः पाठाः । ९. **तर्हि स्तनपानाय न गच्छतीति**—*मॅ-मु । तर्हि स्तनपानाय न गच्छंतीति–ग१.२-भ२; नहि स्तनयानाय न गच्छतीति–त१.२.३.८-भ१.४; तर्हि स्तनपानायेति–त४.५; नहि स्तनयानाय नायन गच्छतीति–त६; नहि स्तनपानयनेन गच्छतीति–त७; तर्हि तनपानाय न गच्छतीति–भ७ ॥ १०. **न याति**–*मॅ । नायाति–ग१.२-त१.२.३.६.७.८-भ; नु याति–त४.५; न पाति--मु ॥ २७. [२] **इनः समर्थः**—ग-त१.२.३.६.७.८-भ । इनो न समर्थः–त४.५-मॅ-मु ॥ ७३१. २४. [४] **प्र शिषन्तः प्रकर्षेण सिषन्तः सिपासन्तः**—*मॅ । प्रकर्षेण सिषासंतः–ग१.२; प्रकर्षेण सिषंतः सिषासंतः–त१.२.३.६.७.८-भ२.८; प्रकर्षेणासिषंतः–त४; प्रकर्षेणासिषंतः संत–त५; प्रकर्षेण सिषंतः–भ१.४.७ । प्रशिषन्त प्रकर्षेण शिषन्तः शिपासन्तः–मु ॥ ७३२. १. [५] **शब्दार्थादशिप्रुषी°**—*मॅ-मु । शब्दार्थादशूषिप्रषी°–ग१.२; शब्दार्थादन् (°वन्–त७) पृथ्वी°–त१.२.३.७; शब्दार्थाः दशपृथ्वी°–भ ॥ **कन्प्रत्ययः**—*मॅ । त्रन्°–त४.५; वन्°–मु इतरेषु च ॥ ४. **विप्रकृष्टस्य**—ग१.२.-त४.५-भ७-मु । च प्रकृष्टस्य–त१.२.३.६.७.८-भ । च प्रकृष्टस्य च–मॅ ॥ ५. **वर्तमानस्य च**—ग२-त१.२.३.६.७.८-भ-मु । वर्तमानस्य–त४.५-मॅ ॥ २८. [७] **वसु धनम्** । ' वसु ष्टवे ' इति संहिता । ' वसुः स्तवे ' इति पदपाठः ॥ ७३३. १. **सुधितार्थास्तृप्त्यर्थाः** । इदं काशिकायां (पा. सू. ७.४. ४५) नोपलभ्यते ॥ १०. [८] 'अन्नं वा आज्यम्' इति श्रुतिः कुत उद्धृतेति न ज्ञायते ॥ १५. [८] **लेट्यडागमः**—ग१.२-त१.३.७.८-भ१.२.७.८ । लट्यागमः–भ४ । लेट्यडागमः–त२. ४.५-मॅ-मु ॥

[१०. ११६] ७३४. १८ [२] **अस्य सोमस्य**—ग१.२-त१.२.३.७.८-भ१.२.४. ५.८-मु । सोमस्य--मॅ ॥ ७३५. २१ [४] **नुडभावः**—ग१.२-त१.२.३.६.७.८-भ१.२.४.५. ८-मु । नुडागमः--त४.५; दुडभावः–भ७ । नुडागमाभावः--मॅ ॥ ७३६. २१ [७] **ङयि च इत्याद्युदात्तत्वम्**—ग१-*मॅ-मु । दुयिवेद्यत्वाद्यु°--त१.२.३.६.७.८-भ८; सुवेत्याद्यु°--त४.५; दुःयिवेद्यत्वाद्यु°--भ१.२.४.७ ॥

[१०. ११७] ७३७. २० **°प्रशंसाद्ये**—*मॅ-मु । °प्रशंशाख्ये--ग१.२; °प्रशंसावाद्ये--त१.२.३.६.७.८; °प्रशंसाद्ये--त४.५; °प्रशंसाचाद्ये--त७-भ१.२.७ ॥ ७३८. १० [२] **चकमानाय कामयमानाय**—ग१.२-त४ । चकमानाय--त३.५.६.७.८-भ२.८-मॅ-मु ॥ ११ **अतिथये**—ग१.२ । अतिशयेन--त-भ-मॅ-मु । ७३९. ६ [४] **व्यतिरेकेण निन्दामाह**—*मॅ-मु । व्यतिरेकेन°--त४.५ । व्यतिरेकान्वयाभ्यामाह--ग१.२-त१.२.३.६.७.८-भ ॥ २० [५] **एव खलु**—ग१.२-त१.२.३.६.७-भ । एते खलु--त८ । खलु--त४.५-मॅ-मु ॥ २२ **चक्रा चक्राणि**—ग२-त४.५ । चक्राणि--त३.६.७.८-भ२.८-मॅ-मु ॥ २९ ' अप्रचेताः ' इति पदस्य उभयथा व्याख्यातत्वात् ' यस्य न भवति स वा ' इत्यावश्यकमिति प्रतिभाति ॥ ७४०. ८ [६] **नैहिकं नामुष्मिकमिति**—ग१.२-त-भ२.४.८-मु । नैहिकं न्वामु°--भ१; नैहिन्वामु°--भ७ । ऐहिकमामुष्मिकमिति--मॅ ॥ १७ [७] **शास्त्रार्थमब्रुवाणाज्जनात्**—त१.२.३.६.७.८-मु । शास्त्रार्थमब्रुवानाज्जनात्--मॅ । अक्षस्य जनस्य--भ; अज्ञस्य जनस्य--ग१.२-त४.५ ॥

[१०. ११८] ७४१. २० [१] °तेजस्क वा—ग१.२-त१.२.३.६.७.८-भ-मु। °तेजस्क--त४.५-मॅ ॥

[१०. ११९] ७४५. १२ [११] अकार्ष्टम्—*मॅ-मु। अकार्ष--ग१.२-त१.२.३. ४.५.६.८-भ१.२.७.८; अकाषी--त७; आकार्ष--भ४। ' अकर्षम् ' इति पाठः पीटर्सन्महाशयैः स्वीकृतः ॥ १७ [१२] नाभौ—*मॅ। लभौ--त१.२.३.६.७.८; नभो--त४; नतो--त५; लाभौ --भ७। नभौ--मु ॥ ' अभिनभ्यम् ' इति पदं विभज्य व्याख्यातम् ॥ १९ अव्ययीभावः—ग१. २-त७-भ१.२.४-मु। अव्ययीभाव°--त३.४.५.६.८-भ७.८-मॅ ॥

[१०. १२०] ७४७. ३० [३] स्त्रीपुंसरूपेण—त-भ। स्त्रीपुंरूपेण--मॅ-मु। ऋ. सं. ७.१०४.२३; पा. सू. ५.४.७७ द्रष्टव्यम् ॥ ७४८. २७ [५] बलानि—त-भ। बहुलानि (?)--मॅ-मु। षष्ठमन्त्रभाष्यं द्रष्टव्यम् ॥ ७४९. १३ [६] ढत्वकत्व°—ग१.२-त१.२.३.४.५.७ -भ८-मु। ठत्व°--त६; डत्वकत्व°--भ१.२.४। टत्वकत्व°--त८-भ७-मॅ ॥

[१०. १२१] ७५१. ८ [१] परमात्मनः—त१.२.३.६.७.८-भ-मु। परमात्मनः सकाशात्--ग१.२-त४.५-मॅ ॥ ९ वियदादीनां—भ४.७। वियदादीनां सूक्ष्मभूतानां—त-मॅ-मु ॥ —°स्तदुपहितो—त-भ-मु। °स्तदुपाहितो—मॅ ॥ ७५२. १७ [३] इत्येकदेश°—§-मु। इत्येकादेश°—मॅ (मुद्रणदोषः ?) ॥ १९ पूर्वपदस्य—ग१.२। पूर्वपदं–भ२.८-मॅ। पूर्वपदं..... आद्युदात्तं—मु ॥ ३१ [४] प्राच्यारम्भा आग्नेय्याद्याः कोणदिश ईशितव्याः। प्रारंभा आग्नेयाद्याः कोणादिशः ईशितव्याः—ग१.२-भ२.४.७; प्रारंभा आग्नेयाद्याः कोणदिशः ईशितव्याः—त१.२.३. ६.७.८-भ८-पीटर्सन्। ईशितव्याः—त४.५। प्राच्यारंभा आग्नेय्याद्या कोणदिशः ईशान्यन्ताः—मु। प्राच्यारंभा आग्नेय्याद्याः कोणदिश ईशानांता वा—मॅ। मॅक्समुल्लरटिप्पणी[1] पीटर्सन्टिप्पणी[2] च द्रष्टव्या। उभाभ्यामपि स्वीकृतपाठौ समर्थितौ। लिखितपुस्तकेषूपलभ्यमानः पाठ एव समीचीनः, अभ्यूहो मास्त्विति पीटर्सनमहाशयानां मतम्। अस्मन्मते ' प्राच्यारम्भा ' इत्यभ्यूह आवश्यकः किंतु न ' ईशानान्तो वा ' इति। ' आग्नेय्याद्याः कोणदिशः ' इति पदयोर्भावात् ' प्राच्यारम्भा ' इत्यावश्यकं प्रतिभाति। प्रथमतः भाष्यकारः ' प्रदिशः ' इति पदं ' प्राच्यारम्भा दिशः ' इति व्याख्यातुमैच्छत्, परं अनन्तरं ' बाहू ' इति पदं प्रधानदिक्त्वेन व्याख्येयमिति प्राप्ते पुनः ' आग्नेय्याद्याः कोणदिशः' इति प्रदिक्पदं व्याख्यातवान्। मॅक्समुल्लरमहाशयानामयं विचारोऽस्माकं संमतः। 'भुजवत्प्राधान्ययुक्ता दिशश्च ' इति यदि स्यात्, समीचीनमभविष्यत्। ' ईशानान्ताः' इत्यभ्यूहस्तावत् सर्वथानावश्यकः प्रतिभाति। यस्य प्रदिश ईशितव्या इति समीचीनार्थवहम्। वस्तुतः यस्येमाः प्रदिशः आग्नेय्याद्याः कोणदिशः ईशितव्याः.....भुजवत्प्राधान्ययुक्ता दिशश्च यस्य स्वभूताः' इति पाठः समीचीनः स्यात्। किंतु ' प्रारंभा ' इति लिखितपुस्तकेषु वर्तते अतः ' प्राच्यारंभा ' इत्यभ्यूह्य पाठनिर्धारणमावश्यकम्। ' इमाश्च प्रदिशः प्रधानभूताश्चतस्रो दिशः यस्य देवस्य बाहू बाहुभूताः तस्मै ' इत्यथर्ववेद (४.२.५) भाष्यम् ॥ ७५३. ५ [५] उद्गूर्णविशेषागहनरूपा वा—भ७-मु। उद्गूर्णविशेषागहनरूपा कृता—ग१.२; उद्गूर्णाविशेषागहनरूपा तता—त१.२.३.६.७.८-भ४.५.८;

1. Preface to the Sixth Volume of the First Edition, Vol. IV, p. cxxxviii. f. (2nd Edn.).
2. Hymns from the Rgveda (Bombay, 1888).

उद्पूर्णाविशेषागहनरूपा–त४.५; उद्पूर्णविशेषागहनसंपा तता–भ२ । उद्पूर्ण विशेषागहनरूपं वा–*मॅ। २०. [६] अत एव अभ्यस्ता°—ग१.२-त४.५ । अभ्यस्ता°–त१.२.३.६.७.८-भ-मॅ-मु ॥ ७५४. १४. [८] यश्चित् यश्च—ग१.२-त४.५-भ२ । यश्च–त१.२.३.६.७.८-भ१. ४.७.८-मॅ-मु ॥

[१०. १२२.] ७५५. २८. [१] लेट्यडागमः—ग१.२-त४.५-भ७-मु । लेट्याडागमः–त१.२.३.६.७.८-भ१.२.४.५.८ । लेट् लेट्यडागमः–मॅ ॥ २९. विश्वशब्दोपपदात्—§-मु । विश्वशब्दोपधात्–मॅ ॥ ७५७. १३. [४] यजमानं पृणन्तं—ग२ । यजमानं तं–त१.२.३.७.८-भ । यजमानं–मॅ-मु ॥ २२. [५] नोऽस्माभिः । 'नः' इति मन्त्रे नास्ति ॥ ७५८. २. [६] सुशकां—ग१.२-त१.२.३.६.७.८-भ२.४.५.८-मु । सुशक्तां–त४.५; सुशक–भ१; सुशकं–भ७ । सुशक्यां–मॅ ॥

[१०. १२३.] ७५९. २४. [२] नभस्याकाशे - - - —भ७-मॅ । नभस्यकाय जात तस्यास्य हर्यतस्य पृष्ठं दर्शि दृश्यते । ऋतस्य उदकस्य सानौ उच्छ्रिते देशे विष्टपि विष्टब्धे भ्राट् दीप्यमानं तमिमं समानं योनिं सर्वसाधारमुदकस्थानं–ग१.२ । आकाशस्य पंक्तिरेका त्यक्तास्ति–त१.२.३.६.७.८-भ१.२.४.५.८ । नभस्याकाशस्य–त४.५-मु ॥ ७६०. २३. [५] उपगम्य—उपगत्य–§-मॅ-मु । अस्मिन्नेव मन्त्रभाष्ये 'उपगम्य' इत्यनन्तरमागतम् ॥ २५. जरयितारं—ग२ । रजयितारं–त१.२.३.६.७.८; रजतारं--भ; जारयितारं–त४.५-मॅ-मु ॥ ७६१. १५. [७] गवि गन् धृष्णो वः—ग२-मॅ-मु । इतरलिखितपुस्तकेष्वशुद्धाः पाठाः ॥ १६. गन्भावश्च—त४-*मॅ । गन्नावश्च–त५ । गंभावश्च–ग१.२-त१.२.३.६.७.८-भ-मु ॥

[१०. १२४.] ७६२. ८. आद्याग्नेयी—§ । आग्नेय्याद्या–अनु. ॥ ७६३. २१. [४] बहून् संवत्सरान्—§-मु । संवत्सरान्–मॅ ॥

[१०. १२५.] ७६६. २३. [२] दधामि धारयामि—त१ । दधामि प्रयच्छामि–ग१.२-त४.५-भ२; दधामि–त२.६; दधामि धारयामि प्रयच्छामि–त७ । धारयामि–त३.८-भ१. ४.७.८-मॅ-मु ॥ ७६७. [४] श्वासोच्छ्वास°—भ७ । श्वासोच्छ्वासादि°–त-भ२.८-मॅ-मु ॥ ११. शृप्रत्ययः । धातोः—त२-भ४.७ । शृप्रत्ययः धातोः–त१.३.६.७.८-भ२.५.८; शृप्रत्ययः–त४.५; भप्रत्ययः धातोः–भ७ । शृधातोः–मॅ-मु ॥ २४. [५] यं कामये—ग१.२ । कामये–त-भ-मॅ-मु ॥ ७६९. २. [८] सर्वस्मात्—ग१.२-त१.२.३.६.७.८-भ-मु । सर्वात् (१)–त४.५-मॅ ॥

[१०. १२८.] ७७५. १०. [४] विवादपदेषु—ग१.२-भ२ । विवादपरेषु–त१.२.३.६.७.८-भ१.४.७.८; विवादेपरेषु-भ५ । विवादेषु–त४.५-मॅ-मु ॥ ११. अट्—त१.२.३.६.७.८-भ१.२.४.८ । आट्-भ७ । अट्–त४.५-मॅ । आट्–मु ॥ षण्मोर्वीरंहसः..... । श. ब्रा. १.५.१.२२; ऋ. सं. ६.४७.३; १०.१४.१६ द्रष्टव्यम् ॥ २२. [५] यथा—भ२.७ । तथा–ग१.२-त-मॅ-मु ॥ २३. प्रयतध्वम्—ग२-त-भ२.८ । प्रयध्वं–भ१; प्रयत्वध्वं–भ४ । प्रयच्छध्वं–भ७-मॅ-मु ॥

[१०. १२९] ७७७. १५. सृष्टिस्थितिप्रलयादीनामत्र—*मॅ-मु । सृष्टिस्थित्यादिप्रलया°-§ ॥ ७७८. ८. [१] चाक्षेपमुखेन—ग१.२-भ२-*मॅ-मु । चापेक्षामुखेन–त१.२.७-

भ७; चापेक्षासुखेन–त३.८; चाक्षेपसुखेन–त४.५; चाक्षासुखेन–त६; चाणाक्षासुखेन–भ८; चापेक्ष्यसुखेन भ४ ॥ ११. **आत्रियमाण°**—ग१.२-त-भ२.४.८ । आवार्याभावादात्रियमाण°–भ७-मॅ-मु ॥ १४. **भोगे**—ग१.२-त१-भ२.८ । भा-त२.६.८; मा-त३; भोग–त४-भ४; भोगि–त५; न-त७ । वा-भ७-मॅ-मु ॥ २१. **दुरवस्थानं**—ग१.२-त१.२.३.६.७.८-भ२-मु । दुःखस्थानं–भ४. ७.८-मॅ ॥ ७७९. ४. [२] **ओदनः**—त५-भ४.७.८ । ओदना–त२.६.८; उदना–त३.७; ओदन–त१; उदनः–भ२ । ओदनं–त४-मॅ-मु ॥ ६. **राज्ञा**—त१.२.३.६.७.८-भ२.५.८ । **आह न राज्ञा अहश्च**–त४.५-भ४.७ । न राज्ञा-मॅ ॥ **नासीत्**—§-मु । आसीत्-मॅ ॥ १२. **शुद्ध**—*मॅ-मु । शुभ्र–त१.२.३.४.५.६.७-भ; शुभ्र–त८ । ' अप्राणो ह्यमनाः शुद्ध ' इति कुत उद्धृतम् ? ॥ ७८०. १५. [३] **तद्रूपता तदात्मनाम्**—*मॅ-मु । तद्रूपतां तदात्मतां-त१; तद्रूपतां तदात्मतां–त२.४.५.६.७-भ२.७.८; तद्रूपतां तदात्मनां–त३.८ ॥ ७८१. १५. [४] **इति श्रुतिः । आत्मना इत्थमवगमितेऽर्थे**—भ४-मु । इति श्रुतिरात्मना इत्थमवगमितेर्यो–त१-भ२.८; इति श्रुतिरात्मना इत्थमवगमितथा–(°गतितथा-त७)–त२.३.६.७.८; इति श्रुत्यात्मना इत्थमवगमितेथा–त४.५; इति श्रुतिरात्मनेत्थमवगमतेर्थे–भ७ । इति श्रुत्यात्मनेत्थमवगमितेर्थे–मॅ । ' श्रुतिः ' इति पदमनावश्यकम् । मॅ-पाठे ' तथा चाम्नायते ' ' इत्थम् ' इत्यनावश्यकम् ॥ ७८२. २४. [६] **निगमयति**—§-मु । निर्गमयति (?)-मॅ ॥ ७८३. ५. [७] **द्रढयति**—भ४-मु । दृढयति–त-भ२.८-मॅ ॥ ६. **न कदाचिद्°**—ग१.२-त४-भ२.४.७ । कदाचिदँ–त१.२.३.५.६. ७.८-भ८-मॅ-मु ॥ १४. **°बोधा न तर्हि**—§ । °बोधना तर्हि (?)-मॅ-मु ॥ १५. **ईश्वरमेव**—ग२ । ईश्वरः वेद–त३.६.७.८-भ२.८; ईश्वरवेद-त४.५ । ईश्वरो वेदं–त१-मॅ-मु ॥ २०. **गते व्याप्ते**–ग१.२-त१.२.६.८-भ४.५ । व्याप्ते–त४.५ । गंतव्ये–मॅ-मु ॥

[१०. १३०] ७८४. ७ [१] **य उक्तः सर्गात्मको यज्ञस्तं यज्ञम् इमे पितरः**—ग१.२ । यदुक्तः सर्गालोको (स्वर्गो लोको–त१; सर्गालोऽहो–त७; सर्गालको–भ५) यज्ञस्तं यज्ञमिमे पितरः–त१.२.६.७-भ५ । – – । पितरः–मॅ । पितरः–मु ॥ ८ **सर्जनेन**—ग१.२ । सर्वजनेन–त-भ । स्वक्षयनेन–*मॅ-मु । ' स्वसर्जनेन ' इति स्यादिति मॅकसमुल्लरमहाशयाः ॥ १५ **विश्वतः सर्वतः**—§-मु । सर्वतो विश्वतः (?)–मॅ ॥ १७ **एवमायामविस्तारवान्** । एवमायावि°–ग१.२-भ२; एवमायावि°–त२.३.६.७.८-भ१.४.५.८ । एवमायतो विस्तारवान्–मॅ-मु । ६ षड्भिर्द्रष्टव्या ॥ ७८६. २२ [५] **सर्वयागोपकरणाः**—ग१.२-भ-मु । यागोपकरणाः–त । यागोपकाराः–मॅ ॥ ७८८. ३१ [३] **वाजयन्तः अन्नकामा बलकामाश्च** । एकस्य पदस्य व्याख्यानद्वयम् ॥ ७९०. १ [७] **सुष्ठु त्राता**—§-मु । सुत्राता–मॅ ॥

[१०. १३२] ७९०. ९-१० **मैत्रावरुणं.....°देवतान्त्या** । ' मैत्रावरुणमाद्या लिङ्गोक्तदेवता न्यङ्कुसारिण्यन्त्या ' इत्यनुक्रमणीपाठः ॥ २८ [२] **हे मित्रावरुणा मित्रावरुणौ**—ग१.२-भ । हे मित्रावरुणौ–त-मॅ-मु ॥ ७९१. १३ [३] **इत्याकारलोपः**–त-भ-मु । इत्यकार°–मॅ ॥ ७९२. ८ [५] **मित्रो वरुणो वा**—भ२.८-*मॅ-मु । मित्रावरुणौ वा–ग१.२-त४; मित्रावरुणो वा–त१.२.३.५.६.७.८-भ४; मित्रावरुणो–भ१.७ ॥

[१०. १३३] ७९४. ११ [२] **हे इन्द्र त्वं**—ग१.२-त४.५ । हे इंद्र–त३.६.७.८-

भ२.८-मॅ-मु ॥ १७ **तं तादृशं**—ग१.२-त४.५। तादृशं-त३.६.७.८-भ२.८-मॅ-मु ॥ **त्वा त्वां**—त४.५। त्वां-त३.६.७.८-भ२.८-मॅ-मु ॥ १९ **°लोपः**। **गतमन्यत्**—ग१.२-त४.५। °लोपः-त३.६.७.८-भ२.८-मॅ-मु ॥ ७९६. १० [७] **कर्मण्यप्**—ग१.२-त४.५। कर्मण्यण्-त३.६.७.८-भ२.८-मॅ-मु ॥

[१०. १३४] ७९६. २५ [१] **आप्रासि**—त१.२.३.६.७.८-भ। आप्रथयसि-त४.५-मॅ-मु ॥ २८ **जनित्री साधु जनयित्री**—ग१.२-त१.२.३.६.७.८-भ। जनित्री जनयित्री-मु। जनित्री-त४.५-मॅ ॥ ७९८. ३ [४] **अन्नानि धनानि वा**—ग१.२। अन्नानि वा-त-भ-मॅ-मु ॥ १४ [५] **वियुत्य**—ग२। वियता-त-भ-मॅ-मु। 'वियता' इति व्याख्यानं न समीचीनं, किंत्वभ्यूहोऽनावश्यक इति मॅक्समुल्लरमतम् ॥

[१०. १३५] ८००. ५ [२] **दोषानावि°**—ग१.२। दोषान्यावि°-त१.२.३.६.७.८-भ१.२.४.८; दोषाण्यावि°-भ७। दूषणान्यावि°-मॅ-मु ॥ १९ [३] **पुण्यपापात्मकं**—ग१.२-त१.३.६.७.८-भ-मु। पुण्यं पुण्यकामात्मकं-त४.५। पुण्यापुण्यात्मकं-मॅ ॥ ८०१. १५ [५] **सार्वात्म्य°**—ग१.२-भ१-मु। सर्वात्म°-त१.२.३.६.७.८। सर्वात्म्य°-त४.५-भ२.४.८-मॅ ॥ १८ **निर्वर्तयति**—*मॅ-मु। निर्वर्तयते-ग१.२। निवर्तयति-त-भ ॥ --**निर्वर्तयितुं**—*मॅ-मु। निर्वर्तयतु°-ग१.२; निवर्तयितु°-त-भ ॥ **निर्वर्त्यस्या°**—ग१.२-*मॅ-मु। निवर्त्यस्या°-त-भ२.४.८; विवर्त्यस्या°-भ७ ॥ १९ **सार्वात्म्या°**—ग१.२-त-भ-मु। सर्वात्म्या°-मॅ ॥

[१०. १३६] ८०४. २५ [७] **आलोडयति**—*मॅ-मु। श्वालोकयति-त१.३.७; श्वोलोकयति-त२; आलोकंयति-त४; आलोकंयति--त५; श्वलोकयति-त६; आलोकयति-भ ॥

[१०. १३७] ८०६. ११ [५] **विश्वा विश्वानि**—ग१.२-त४-भ२-मु। विश्वानि-त ३.६.७.८-भ१.४.७.८-मॅ ॥

[१०. १३८.] ८०७. २३. [२] **श्वञ्चयः अगमयः**—ग१.२-त४.५-भ२। श्वंचयः-त१.२.३.६.७.८-भ१.४.७.८-मॅ-मु ॥ ८०९. २. [५] **अप्रहृतसेनः**—ग१.२-*मॅ-मु। प्रकृतसेनः-त१.२.३.६.७.८-भ१; अहृतसेनः-त४.५; प्रहृतसेनः-भ१.२.४.८ ॥ २३. [६] **स्तोतव्यानीत्यर्थः**—ग१.२-त१.२.३.५.६.७.८-भ-मु। आस्तातव्यानीत्यर्थः-त५-मॅ ॥

[१०. १३९.] ८१०. २०. [२] **इत्यकारलोपे**—त४-भ७। इत्यःकारलोपे-ग१; इत्यर्थः कारलोपे-ग२। इत्याकारलोपे-त१.२.३.५.६.७.८-भ१.२.४.८-मॅ-मु ॥ ८१२. २. [६] **प्रवहणे निमित्तभूते**—त१.२.३.७-भ२.८-मु। निमित्तभूते-भ१.४.७-प्रवहणनिमित्तभूते-मॅ ॥ ७. [६] **लेट्यडागमः**—त१.२.३.६.७। लेट्यडागमः-त४.५.८-भ-मॅ-मु ॥

[१०. १४०.] ८१२. २०. [१] **वसु धनं**—ऽ-मु। वसुर्धनं (?)-मॅ ॥ ८१३. ७. [३] **हितः**—त२.३.७-भ। **कर्मभिर्हितः**-मॅ-मु ॥ १०. **इत्यस्य**—ऽ-मॅ-मु। 'इत्यत्र' इति समीचीनमिति मॅक्समुल्लरमहाशयाः ॥

[१०. १४२.] ८१६. २२. [२] **प्रादुर्भवनं**। प्रादुर्भावं-मॅ-मु ॥ ८१८. ८. [६] **आक्रम्य**—त१.२.३.६.७-भ१.२.४-मु। अक्रम्य-त८। अभिक्रम्य-मॅ ॥ १२. **अव्वा कर्तव्यः**—*मॅ-मु। लिखितपुस्तकेष्वशुद्धम् ॥

[१०. १४३.] ८१९. २४. [१] **ऊढ्**—त४-मु । **ऊढ्**-त८-भ२.७.८-मॅ । **त्यूढ्**-त२.३ ॥ ८२१. १६. [५] **पुनर्युवामकुरुतम्**—त२-भ१.४ । **पुनर्युवानं कुरुतं**-त४.५-भ७-मॅ-मु ॥ १७. **अडभावश्च । लुङि वा मन्त्रे घस इति च्लेर्लुक्**—भ२ । अडभावश्च लुङि मंत्रे घसेति च्लेर्लुक्-त१.२.३.६.७.८-भ१.४.७.८ । अडभावश्च-मॅ-मु ॥

[१०. १४४.] ८२२. २३. [२] **यजमानं च**—त-भ-मु । यजमानं-मॅ ॥ ८२३. १९. [५] **जागार जजागार**—त१.२.३.६.७.८-भ-मु । जजागार-त४ । जागार-त५-मॅ ॥ ८२४. १. [६] **यद्वा अस्मदस्मत्तः.....°त्यन्वयः**—*मॅ-मु । लिखितपुस्तकेष्वशुद्धम् ॥

[१०. १४५.] ८२४. ४. **अत एतत्सूक्त°**—त१.२.३.७-भ२.७.८-मु । एत एव सूक्त°-भ१ । अत एव सूक्त°-भ४-मॅ ॥ १०. **°रभिमन्त्रणम्**—*मॅ-मु । °रभिमंत्रणे-त-भ१.२.८; °भिमंत्रेण-भ४ ॥ ८२५. ५. [४] **नो न खलु**—भ२.८ । नो खलु-त-भ१.४.७-मॅ-मु ॥ ७. **गमयामसि गमयामः**—त१.४-भ२ । गमसि गयामः-त२.३.६.७.८-भ१.४.७; गमयामसि गमयाम-त५; गमयामसि गयामः-त७ । गमयामसि-मॅ-मु ॥ १४. [५] **अभिभवाव**—त४.५-भ२ । अभिभवेम-भ७ । अभिभवाम-त३.६.७.८-भ८-मॅ-मु ॥

[१०. १४६.] ८२६. १६. [२] **वृषारवोक्तस्य शब्दस्य**—भ१.२.४ । **वृषारवेकेस्य** शब्दस्य-त१.२.३.६.८; वृषारकोक्तस्य शब्दस्य-त४; वृषारकेस्य शब्दस्य-त७; वृषारवे स्वशब्दस्य-भ७ । वृषारवाय स्वशब्दस्य-मॅ-मु । स्वीकृतपाठो यद्यपि मॅक्समुल्लरमहाशयैः नोपलब्धस्तथापि तैः संभावितः ॥ **चीचीशब्दकरणेन**—भ२ । °करणे-त१.२.३.७-भ१.४.७.८-मु । °कारेण-*मॅ । स्वीकृतपाठो मॅक्समुल्लरमहाशयैः नोपलब्धः ॥ १७. **आघांटिभिरिव । आघाटयो घाटलिकाः**—*मॅ-मु । आघाटिभिरिव आघाटया घाटलिकाः-त१.२.३.६.७.८; आघाटिभिरिव आघाट आघाटभिकाः-त४; आघाटिभिर्मरतक आघाट आघाटलिकाः-त५; आघाटिभिरिव आघाटय आघाटलिकाः-ग१.२-भ२ ॥ २८. [३] **अपेक्षितं**—ग१.२-त४.५-भ१.२.४.८ । अर्ण्या क्षतं-त१.२.३.६.७.८; अरण्ये कृतं-भ५ । अरण्ये क्षत्रं-मु । अरण्ये क्षतं-मॅ ॥ ८२७. ५. [४] **पक्षिमृगादिशब्दं**—ग२ । पक्षिमृगादि-त४.५ । पक्षिमृगादिकं शब्दं-त३.६.७.८-भ२.८-मॅ-मु । तै. ब्रा. २.५.५.७ भाष्यं समीचीनतरमिति मॅक्समुल्लरमहाशयैरुक्तम् ॥

[१०. १४७.] ८२८. २५. [३] **पुरुहूत बहुभिराहूत**—ग१.२-त४.५ । पुरुहूत-त३.६.७.८-भ२.८-मॅ-मु ॥ **सूरिषु स्तोतृषु**—ग१.२-त४.५-भ२ । सूरिषु-त१.२.३.६.७.८-भ२-मॅ-मु ॥ २६. **अभिकामयस्व वा**—त-भ । अभिकामयस्व-मॅ-मु ॥

[१०. १४८] ८२९.२४. [१] **बहुबल बहुधन वा**—ग१.२ । बहुबलधन वा-त३.६-भ२.५; बहुलधन वा-त४.५; बहुलं धन पा-भ१.४.८; बहुलंधन-भ७ । बहुलधन-मॅ-मु ॥ २६. **यस्य**—ग१.२-त१.२.३.६.७.८.भ२.८ । यद्वा यस्य-त४.५-मॅ-मु ॥ ८३०. ६. [२] **विशः प्रजाः**—ग१.२-भ२-*मॅ । विशः जातः-त१.२.३.६.७.८-भ१.४.८-मु । विशः प्रभाः-त४.५; विवश जातः-भ७ ॥ १६. [३] **सर्वदा भवेम** । भवेम-मॅ-मु ॥

[१०.१४९] ८३१. १३. **अर्चत आर्षं**—*मॅ-मु । अर्चतस्यार्षं-ग१.२-त७-भ१.२.८; अर्षतस्यार्षं-त१.२.३.८-भ४; अर्चतस्यार्षं-त४.५ ॥ २६. [१] **शिक्षकः सादी**—ग१.२-

म२। शिक्षकः साक्षी—त१.२.३.६.७.८-म१.४.५.८। शिक्षकः—मॅ-मु॥ ८३२. ८. [२] ऊर्ध्वमवस्थितं—ग१.२-त-म१.२.४। ऊर्ध्वमिव स्थितं-म८। ऊर्ध्वमेव स्थितं—म७-मॅ-मु॥ ९. अस्तेर्लङि—त-म। अस्तेर्लुङि—मॅ-मु॥ २९. [४] योद्धा—ग१.२। वा—त१.२.३.६.७.८-म। च—त४.५-मॅ-मु॥

[१०. १५०] ८३४. २१. [४] विशेषणसापेक्षस्यापि धनशब्दस्य—*मॅ-मु। लिखितपुस्तकेष्वशुद्धम्॥ २२. धनसातये—त-म। धनस्य सातये—मॅ-मु॥

[१०. १५२] ८३६. १३. भरद्वाजपुत्रस्य शासनात्र—ग१.२-त४.५। शासनात्र—त३.६.७.८-म२.८-मॅ-मु॥ २१. [१] एतत्संज्ञोऽहं—ग१.२-त४.५-म२। तत्संज्ञोऽहं—त३.६.७.८-म२.८-मॅ.मु॥ २२. भवासि—ग१.२-त४.५-म२। भवसीति—त३.६.७.८-म८-मॅ-मु॥

[१०. १५३] ८३८. २१. [३] आवरकापनोदनेन—ग१.२-त४-म२। आकारका°—त१.२.३.६.७.८-म। आवारका°—मॅ-मु॥ ८३९. १. [५] अभिभूरसि—ग२-त४-म२। असि—त१.२.३.६.७.८-म१.४.७.८। अभिभूः—मॅ-मु॥

[१०. १५४] ८३९. १७. [१] यदाथर्वणाङ्गिरसो—*मॅ-मु। यदथर्वांगिरसो--ग१२;. यदथर्वणांगिरसो--त१.२.३.६.७.८-म१.२.४; यदथर्वाणंगिरसो--भ७; यद्-र्वणांगिरसो--भ८॥ यद्यङ्गूंषि घृतस्य कुल्या, यदाथर्वणाङ्गिरसो मधोः कुल्या। तैत्तिरीयारण्यके 'कूल्या' इति दीर्घम्॥ १८. अपि—ग२-त४-म२। प्रत्यपि--त३.६.७.८-म८-मॅ-मु॥

[१०. १५५.] ८४०. २८. [१] विकृताङ्गि—ऽ-मु। विकृतांगे (१)-मॅ॥ ८४१. १०. [२] अराय्यम् अदात्रीं दान°—म। अराय्यं अदान°--त१.२.३.६.८; अराज्यं अदात्रीं राज्य°--त४.५। अराय्यं दान°--त७-मॅ-मु॥ ८४२. २. [४] तन्वादेशः—ग१.२-म२। तन्वा-देशः--त१.२.३.६.७.८-म१.७.८; तनादेशः--त४.५; दद्यादेशः--म४। तनवादेशः--मॅ-मु॥ ९. [५] पर्यनेषत पर्यनयन्—ग१.२-*मॅ। पर्यनेषत् पर्यनयत्--त१.२.३.६; पर्यनेषत् पर्यनयत--त४.५-म१.४.७-मु; पर्यनेषत पर्यनयत्--त८-म८; पर्यनेषत् पर्यनयन्--त७-म२॥

[१०. १५६.] ८४३. ३. [३] अश्वैश्चोपेतं—ऽ-मु। अश्वोपेतं--मॅ॥ ४. अद्भिः—ग१.२-त१.२.३.६.७.८-म२-*मॅ-मु। अद्भि--त४.५-म७; अद्भवि--म१.८; अंद्भि--म४॥ ११. [४] उपर्यवस्थापितवानसि—ग१.२। उपर्यवस्थितवानसि--त-म-मॅ-मु। ऋ. सं. ८. ८९. ७ द्रष्टव्यम्॥

[१०. १५७] ८४३. २१ इमा नु कं—त१.२.३.६.७-म२-अनु। इमा नु—त८-म १.४-मॅ-मु॥

[१०. १५८] ८४५. ११ [३] विदधातु—ग१.२-त७। विधातु—त१.२.३.४.५-म। दधातु—मॅ-मु॥ १६ [४]प्रकाशकं तदनुग्राहकं—ग१.२-त४.५-म२.८-मु। प्रकाशकं—त१.२.६.८; प्रकाशं तदनुग्राहकं—म१.४; प्रकाशे तदनुग्राहकं—म७। प्रकाशकं तदानुग्राहकं—मॅ॥

[१०. १६०] ८४९. १२ [५] अश्वानात्मन इच्छन्तः—त४.५-म२। अश्वान इच्छंतः--त१.२.३.६.७.८-म८। अश्वानिच्छंतः--म१.४-मॅ-मु॥

[१०. १६१] ८५०. २१ [३] **सहस्राक्षेण**। **सहस्रमिति**—त१.२.३.७-म१.२.४.८-मु। सहस्रमिति--म७-मॅ ॥

[१०. १६३] ८५३. १० [१] **उद्धारयामि**—*मॅ। उद्धरयामि--त१.२.३.६.७.८-म-मु। उद्धरयामि--त४.५ ॥ १२. **छुबुकाच्चुबुकात्**—म२.८-*मॅ-मु। छुबुकात् चुचुकात्--त१.२.३.४.५.७.८; छुबुकात्--त६; छुबुकात्--म१; छुकात्--म४; छबुकात्--म७ ॥ १७ **उद्धारयामि**—*मॅ। उद्धारयामि–त४.५; उद्धरयामि--त१.२.३.६.७.८-म१.२.७.८-मु ॥ ८५४. १६ [४] **जघनाभ्यां**—त१.२.३.६.७.८-म१.२.४.७। जंघनाभ्यां--म८-मॅ-मु ॥

[१०. १६४] ८५६. ४ [४] **अभितो द्रोहकं**—त१.२.६.७.८-म१.२.४.७। अभिद्रोहकं--त४.५; अभितो द्राह अभितो द्रोहकं--त३। अभितो द्रोहं--मॅ-मु ॥

[१०. १६५] ८५६. १९ **प्रायश्चित्तं**—ग१.२-त१.२.३.६.७-*मॅ। प्रायश्चित्त--त४.५; प्रायश्चित्तं मद--म१.४; प्रायश्चित्तं महद--म५। प्रायश्चितमिदं--मु-अनु ॥ ८५७. ५ [२] **इषितो गतः**—ग१.२-त४.५-म२। इषितः--त१.२.३.६.७.८-म१.४.७.८-मॅ-मु ॥ ८५८. ७ [५] **विश्वानि सर्वाणि**—ग१.२-त४.५-म२। सर्वाणि विश्वानि--त१.३.६.७.८-म८। सर्वाणि--मॅ-मु ॥

[१०.१६६] ८५८.१३. **प्रयाणसमये** - - - **जपेत्**–मॅ। प्रयाणसमये निर्गमनावं जपेत्--त१; प्रयाणसमये निर्गमनाद्यं जपेत्–त२.३.६.८-म१.४; प्रयाणसमये निर्गमनार्थं जपेत्–त७; प्रयाणसमये निर्गच्छमानाद्यं जपेत्–म२; प्रयाणसमये निर्गमनाद्यं जपेत्–म५; प्रयाणसमये निर्गमनात्वं जपेत्–म८; प्रयाणसमये निर्गच्छतार्थं जपेत्–ग१; प्रयाणसमये निर्गच्छन्मार्गे जपेत्–त४.५। प्रयाणसमये निर्गमनार्थमेतज्जपेत्--मु। 'प्रयाणसमये गृहमभिगच्छन्नेतज्जपेत्' इति मॅक्समुल्लरमहाशयाः संभावयन्ति। 'प्रयाणसमये' इति वचनात् लिखितपुस्तकपाठेभ्यश्चानुमातुं शक्यं यद्भाष्यकारैरेतत्सूक्तमन्यथा विनियुक्तम् ॥ ८५९. ९. [३] **उभे आर्त्नीइव**—ग१.२-त४.५-म२। आर्त्नी इव–त३.६.७.८-म८-मॅ-मु ॥ २८ [५] **वृष्टाज्जलात्**—त१.२.३.६.७-म। वृषाज्जलात्–त८; निष्कृष्टांजसात्–त४.५। वृष्टिजलात्–मॅ-मु ॥

[१०. १६७] ८६०. १३ [१] **न केवल°**—त-म-मु। नः केवल° (१)–मॅ ॥ १९. [२] **स्वर्जितम् उक्त°**—त-म-मु। उक्त°–मॅ ॥ २२ **देशे**—त-म-मु। यज्ञे–मॅ ॥

[१०. १६८] ८६१. ३१ [२] **स्वयुक्**—ऽ-मॅ। **सयुक्**–मु। 'सयुक्' इति संहितापाठः ॥ ८६२. ११ [३] **सत्यवान् यज्ञवान्वा**—म२। सत्यवान्वा–त१.२.३.६.७.८-म१.४.५.८। सत्यवान्–मॅ-मु ॥ २० [४] **शनैर्गच्छति**—त१.२.३.६.७.८-म-मु। शनैर्गतिः–त४.५-मॅ ॥

[१०. १६९] ८६३. ३ [१] **प्रीणयित्रीः**—त६-म२.७। प्राणयित्रीः–त३.४.५.७.८-म८-मॅ-मु। ऋ. सं. १०. ३०. १४; १. ८०. ४ द्रष्टव्यम् ॥ १५ [३] **या देवेष्विति द्वाभ्यां**—त-म-मु। द्वाभ्यां–मॅ ॥

[१०. १७०] ८६५. १२ [४] **रोचनं रोचमानं स्थानम्**—म२। रोचमास्थानं–त१; रोचनमास्थानं–त२.३.६.७.८; रोचमानं स्थानं–म१.४.८। रोचनं स्थानं–त४.५-म७-मॅ। रोचनं–मु ॥

[१०. १७१] ८६६. ८ [४] **सायंसमये**—ग१.२-त४.५। समये-त१.२.६.८-भ १.४; अस्तमये-भ७। अस्तसमये-मॅ-मु॥ **प्रातःकाले**—ग१.२-त४.५। काले-त१.२.६.८-भ १.४। उदयकाले-भ७-मॅ-मु॥

[१०. १७२] ८६६. १५ **सूत्रितम् आ याहि वनसा सहेति नव समाम्नाता इति**। आ याहि वनसा सहेति नव (वन-त१; नव-त७) समाम्नाता (समाम्ना-त२.६-मु) (इति-त७)-त१.२.६.७-मु। सूत्रितं इमा नु कं भुवना सीषधामा याहि वनसा सहेति-ग१.२। त३-भ १.२.४-पुस्तकेष्ववकाश उत्सृष्टः। सूत्रितं-त४.५-मॅ॥ १८ [१] **धनेन वा**—ग१.२-धनेन-त-भ-मॅ-मु॥

[१०. १७३] ८६७. १८. [१] **त्वा त्वां**—ग१.२-त४-भ। त्वा-त१.२.५.६.७। त्वां-त३.८-मॅ-मु॥

[१०. १७४] ८६९. १७-२१ [२] **हे राजन् ... ... °वात्रापि संबोध्यः**—त१.२.३.६.७-मु। (शपत्नान्-त१.२.३.६; 'या' इत्यस्य स्थाने याऱ्य-त१.२.३.६; 'अपि' नास्ति-त७; पृतना-त७; आत्मानमिच्छंतं-त१.२.३.६.७; ईषेति-त१.२.३.६; 'ईर्ष्यति' नास्ति-त७; 'तिरस्' नास्ति-त७-मु; ईर्ष्यान्यां-त१.३.६; ईर्षायां-त७)। इतरपुस्तकेषु मॅ-पुस्तके च द्वितीयमन्त्रभाष्यं नास्ति। मॅक्समुल्लरमहाशयैः मु-पुस्तकस्थं भाष्यं स्वकीयटिप्पण्यामुद्धृतं तस्य प्रामाण्यं चाक्षिप्तम्। परं त्विदं भाष्यं लिखितपुस्तकेषु केषुचिदुपलब्धं, न कपोलकल्पितमिति व्यक्तमेव। मॅ-संपादितलिखितपुस्तकसंग्रहापेक्षया मु-पुस्तक-संपादकैरस्माभिश्च संपादितः पुस्तकसंग्रहः समृद्धतर इत्यप्येतेन स्पष्टं भवति॥ २८. [३] **असस्सि**—त१.२.३.७-भ२-मु। इति सस्सि-भ८। असि-भ१-४.७-मॅ॥

[१०. १७५] ८७१. ८. [४] **सुवतु**—*मॅ-मु। प्रस्वतु-ग१.२; प्रभुवतु-त१.२.३.६.७.८; प्रसवतु-त४.५; प्रसुवतु-भ॥

[१०. १७६.] ८७२. १८. [४] **देवादेव°**—त१.२.३.६.७.८-भ१.२-मु। देवदेव°-त४.५; देववादेव°-भ४; अमरणदेवतादेव°-भ७। देव°-भ८-मॅ॥ **मनुष्यात् मनुष्य°**—त-भ १.२.४.८। मनुष्य°-भ७-मॅ-मु॥

[१०. १७७.] ८७३. ३. [१] **हृदा हृत्स्थेन। तात्स्थ्यात्ताच्छब्द्यम्**—*-मॅ-मु॥ लिखितपुस्तकेष्ववद्धाः पाठाः। मॅक्समुल्लरमहाशयानामभ्यूहो युक्त एव[1]॥

[१०. १७८] ८७४. २४. [१] **तार्क्ष्यं...गर्गादिः**—*मॅ-मु। अत्रापि लिखितपुस्तकपाठानामवद्धत्वान्मॅ-अभ्यूहो युक्तः[2]॥ ग१.२-पुस्तकद्वयमत्र समाप्तम्॥ ८७५. ६. डप्रत्ययः—*मॅ-मु। इट्प्रत्ययः-त१.२.३.६.७.८-भ; इडप्रत्ययः-त४.५॥

[१०. १७९] ८७६. १ **शिबिर्नाम**—त४.५.६.७-भ-मु। शिबि°-त१.२.३.८-मॅ॥ २. **रोहिदश्वपुत्रो**। रुशदश्वपुत्रो इति अनुक्रमणीभाष्यपाठः॥ ३. **शिबि°**—त१.२.३.५.६-भ-मु-अनु। शिबि°-त४-७.८-मॅ॥ ४. **दधिघर्मे**—त४.५.७-भ२-*मॅ। दधिवर्म्ये-त१.३.६.८-भ८-मु॥

---

1. Preface to the Sixth Volume of the first edition, Vol. IV, p. cxli, 2nd edn.
2. Ibid. p. cxl.

[१०. १८०] ८७७. १४ हविःषुं । हविषु--त४.५ । हविषि--त३.६.७.८-भ२.८-मॅ-मु ॥ २५ [१] रेशब्दाच—त१.२.३.६.७.८-भ । रैशब्दाच्च--त४.५-मॅ-मु । ऋ.सं. १.१८. २; ७९.५; ९२.१४; ९५.११; ११६.१८ द्रष्टव्यम् ॥

[१०. १८२] ८७९. २४ [१] क्षिपत् क्षिपतु—त४.५-भ१.२.४ । क्षिपतु--त१.२. ३.८-भ८-मु; क्षिपंतु--त६ । क्षिपत्--त७-भ७-मॅ ॥

[१०. १८३] ८८०. ११ ऋचः—*मॅ-मु । अंत्याः ऋचः--त१.२.३.६.७.८-भ१.२. ४.८; इत्याचरु--त४.५; अनृचः—भ७ ॥ ८८१. १२ [३] सर्वजननहेतुः—भ७ । सर्वजन-हेतुः—त३.४.५.६.७.८-भ२.८-मॅ-मु ॥

[१०. १८४] ८८१. १३ गर्भाणां कर्ता—त४.५-भ७ । गर्भाणा--त३.६.७.८-भ२. ८-मॅ-मु । २३ [१] विसृजत्वित्यर्थः—त१.२.३.६.७.८-भ२.४.८-मु । सृजत्वि°--त४-५-मॅ ॥ २४. स्रावपातापप्रसवा—त३-भ१.४.८-*मॅ । स्नावपातापप्रसवा--त१.२.६.८; स्रावपाताप्रसवा--त४. ५.७; स्रावपाताप°--भ२; सावपातप्रसवा--भ७ । गर्भपातापप्रसवा--मु ॥

[१०. १८५] ८८२. १३ [१] त्रीणामित्यपि छन्दसि दृश्यते । ' °छन्दसीष्यते ' इति काशिकावचनम् ॥

[१०. १८७] ८८३. २६ [२] धन्वान्तरिक्षम् । धन्वन्यन्तरिक्षे—भ२ । धन्वांत-रिक्ष धन्वंतरिक्षे--त१.२.३.६.८; यद्वांतरिक्षं न्वनांतरिक्षे--त४.५; धन्वांतरिक्षं धन्वंतरिक्षे--त७; धन्वन्यंतरिक्षे--भ१.७; धन्वान्यंतरिक्षे--भ४; धन्वांतरिक्षे--भ८ । धन्वान्तरिक्षं--मु । धन्वांतरिक्षं धन्वांतरिक्षं--मॅ ॥ २७. प्रकाशते—भ७ । प्रकाशयते--मॅ-मु इतरेषु च ॥ ८८४. १ [४] अभि अभिमुखं—भ । अभिमुखं--त-मॅ-मु ॥

[१०. १८९] ८८५. २९ [३] स्तुतिरूपा—त-भ । श्रुतिरूपा (?)—मॅ-मु ॥ ३२ [३] सूर्यं सेवत इत्यर्थः—भ२.४.८ । स्तूयते सूर्य सवते इत्यर्थः--त१.२.३.६.८; सेवत इत्यर्थः--त४.५; स्तूयते सूर्य सेवत इत्यर्थः--त७ । स्तूयते सूर्यः सर्वत इत्यर्थः--*मॅ-मु । सर्वत इत्यनर्थकोऽभ्यूहः ॥

[१०. १९०] ८८६. ४ °त्वान्तादमूप—*मॅ-मु । °त्वादमूप--त१.२.३.६.७.८-भ२. ४.८; °त्वादप°--त४; °त्वाकन्यादरूप°--त५ ॥ १४ [१] °रूपादुपादानभूतात्—मु । °रूपा-दानभूतात्--त१.२.३.६.७.८-भ४.८; °भूतात्--त४; °नूनात्--त५ । °रूपापादानभूतात्--*मॅ ॥ २४ [२] भूतजातानि—त१.३.६.७-मु । भूतानि--त४.५.८-भ-मॅ ॥ ८८७. ३ [३] कल्पे —भ२ । काले--भ७-मॅ-मु ॥

[१०. १९१] ८८८. १६ [४] समाना समानानि—त१.२.३.७-भ२ । समानानि —भ१.४.७.८-मॅ-मु ॥

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
10	19	Mss.	Ms.
३३	११	महोदयैः ।	महोदयैः
५०	९	°द्रलिखितं	°द्रलितं
६०	२३	वाश्रीशतेत	वाश्रीशतेन
६८	३२	स्तोतृन्	स्तोतॄन्

प्रथमद्वितीयतृतीयभागसंबन्धिपाठभेदादिविषयकविचारस्य परिशिष्टम्

प्रथमो भागः

१. १७. अभ्यर्हितं पूर्वम्—(पा. सू. २.२.३४.४) ॥

२. २. तदेतदृचाभ्युक्तम्—(गो. ब्रा. १. १. ९) ॥

२. ३. बहव । 'बह्व्य' इति पठनीयम् । हैद्राबादनगरस्थलिखितपुस्तके ($\frac{३९}{१}$ क्रमाङ्कयुते) तथोपलभ्यते ॥

२. २४. वृत्रं शत्रुं हन्तुं शक्नोत्याभिर्ऋग्भिरित्येषा व्युत्पत्तिः कस्मिंश्चिद्ब्राह्मणे विज्ञायते । शां. ब्रा. २३.२ द्रष्टव्यम् ।

२. २६. प्रणयनादि° । 'अप्प्रणयनादि°' इति हैद्राबादपुस्तकानुसारेण पठनीयम् ॥

३६. १० [१. १. २] तनन्प्रत्ययः । 'तनप्रत्ययः' इति भाव्यम् ॥

३८. ८ [१. १. ६] शाट्यायनब्राह्मणपाठेन साम्यमादधानो जैमिनीयब्राह्मणपाठो बटकृष्णघोषमहोदयैः प्रकाशितः[1] ॥

२१३. १९ [१. २९. ७] सहस्रेषु इति पदम् । सहस्रेषुं इत्यशुद्धम् ॥

३६१. २० [१. ५१. १३] जैमिनीयब्राह्मणेऽपि शाटयायनब्राह्मणसमानः पाठः[2] ॥

३६२. ९ [१. ५१. १४] शाटयायनब्राह्मणसदृशो जैमिनीयब्राह्मणपाठः (३. १५) बटकृष्णघोषमहोदयानां पुस्तके[3] द्रष्टव्यः ॥

४२४. ८ [१. ६२. ३] 'अन्नादिनी ते' एतस्मादारभ्य 'स इन्द्रोऽलभतेति' एतावत्पर्यन्तं शाटयायनकवचनम् । जैमिनीयब्राह्मणे 'अन्नादिनीमरे ते सरमे प्रजां करोमि या नो गा अन्वविद इति' इयानेवांशः । शाटयायनकजैमिनीयवचनानुसारेण गवामन्वेषणानन्तरं सरमायाः प्रजाया अन्नं प्रदातुमिन्द्रः प्रतिज्ञातवान् । सायणभाष्ये तु साररूपेणोद्धृतायां कथायां सरमा गवामन्वेषणात्पूर्वमेव प्रजाया अन्नप्रदानार्थमिन्द्रेण सह समयं चक्र इति लिखितम्[4] ॥

४४०. २७ [१. ६४. ८] पृषत्यः श्वेतबिन्दुङ्किता मृग्य इत्यैतिहासिकाः (?) ॥

४५९. २० [१. ६९. ४] प्वादीनां...ह्रस्वत्वम् । दुष्टेयं व्याकरणप्रक्रिया । 'मीनातेर्निगमे' इति सूत्रेण ह्रस्वत्वम् ॥

४६९. १७ [१. ७१. १०] प्वादीनां...ह्रस्वत्वम् । प्राग्वत् 'मीनातेर्निगमे' इति सूत्रेण ह्रस्वत्वम् ॥

५२३. ३ [१. ८४. १३] सायणाचार्यैः साररूपेणोद्धृतः शाटयायनपाठो वेङ्कटमाधवभाष्ये साक्षादुपलभ्यत इति प्रायस्तत्समानेन जैमिनीयब्राह्मणपाठेनानुमातुं शक्यम्[5] । वेङ्कटमाधवभाष्यगतः चतुर्दशमन्त्रस्थः पाठोऽत्र दीयते—

1. *Collection of the Fragments of Lost Brāhmaṇas*, Batakrishna Ghosh, Calcutta 1935, p. 1
2. Ibid. p. 6. 3. Ibid. pp. 7-12. 4. Ibid. p. 13. 5. Ibid. pp. 13-18.

'दध्यङ् ह वा आथर्वणस्तेजस्वी ब्रह्मवर्चस्यास। तं ह स्म यावन्तोऽसुराः परापश्यन्ति ते ह स्म तदैव विशीर्षाणः शेरते। स ह स्वर्गं लोकमुच्चक्राम। स हेन्द्रोऽसुरैरभिवाढ उवाच क्व नु स दध्यङ्ङभवादिति। तस्मै होचुः स्वर्गं वै भगवः स लोकमुदक्रामदिति। स होवाच न ह्यस्येह किंचित् परिशिष्टमस्तीति। तस्मै होचुरासीदेतदाश्वं शीर्ष येनाश्विभ्यां देववेदं प्राब्रवीत्। तन्तु न विद्म यत्राभवदिति। तद्वा अन्विच्छतेति। तद्धान्वैषिषुः। इच्छन्नश्वस्येत्यादिकमुक्त्वाह। शर्यणावद्ध नाम कुरुक्षेत्रस्य जघनार्धे सरः स्कन्दते। तदनुविद्याजहुः तदस्मै प्रायच्छन्। तद्ध स्मासुराणां प्रकाशेऽधारयन् तद्ध स्म यावन्तोऽसुराः परापश्यन्ति ते ह स्म तदैव विशीर्षाणः शेरते। स ह तैरेवास्थिभिर्नव नवतीर्जघानासुराणामिति'॥

५३६. ७ [१. ८६. ४] मरुतो देवाः सोमस्य मत्सन्। (निविदध्यायः, खिल.५.५.९)॥

५४२. १७ [१. ८८. १] तथा चाहुः–सर्वा स्त्री मध्यमस्थाना पुमान्वायुश्च सर्वगः। गणाश्च सर्वे मरुत इति वृद्धानुशासनम्॥ क एते वृद्धाः?

५४२. १८ पौराणिकास्त्वाचक्षते–मारीचात्कश्यपात्सप्तगणात्मका एकोनपञ्चाशत्संख्याका मरुतो जज्ञिरे इति। ब्रह्मपु. १२४. ७१, १०३ द्रष्टव्यम्॥

६२७. २१ [१. १०२. ६] तथा च शाट्यायनकं–सिम इति वै श्रेष्ठमाचक्षते। तृतीयभागे ५४७. १४ [८. ४. १] टिप्पणी द्रष्टव्या॥

६४०. ६ [१. १०५] अत्र सायणभाष्ये शाट्यायनब्राह्मणगता त्रितस्य कथा साररूपेणोद्धृतास्ति। वेङ्कटमाधवभाष्ये स्वयं शाट्यायनपाठ उद्धृतोऽस्ति। स यथा—

'आप्त्यान् सातं नयतोऽरण्ये पिपासाविन्दत्। ते धन्वन् कूपमविन्दन्। तत्र द्वितोऽवरोढुमकामयत नैकतस्त्रितोऽवारोहत्। तौ यदापिबतामतृप्यतामथ हैनं तदेव रथचक्रेणापिधाय गोभिः प्रैताम्। सोऽकामयतोदित इयां गातुं नायं विन्देयेति'। जैमिनीयब्राह्मणपाठः प्राय एतत्समान एव[1]।

६४५. १४ [१. १०५. १०] शाट्यायनपाठेन सादृश्यमादधानो जैमिनीयब्राह्मणपाठोऽधो दीयते[2]—'अथो ह्येषामेतान्येव पञ्च ज्योतींषि यान्येषु लोकेषु दीप्यन्तेऽग्निः पृथिव्यां वायुरन्तरिक्ष आदित्यो दिवि चन्द्रमा नक्षत्रेषु विद्युदप्सु'॥

७१९. २७ [१. ११६. १२] इयं दधीच आथर्वणस्य कथा भाष्यकारैः शाट्यायनकवाजसनेयकाभ्यामुद्धृता॥ अस्मिन् विषये श. ब्रा.१४.१.१.१८-२४ द्रष्टव्यम्। वेङ्कटमाधवाचार्यैरपि स्वकीय ऋग्भाष्य इयं कथा ताभ्यामेवोद्धृत्य दत्ता। वेङ्कटमाधवभाष्यगतः शाट्यायनकपाठः जैमिनीयब्राह्मणपाठाद्भिन्नः। वेङ्कटमाधवभाष्यं[3] (ऋ. सं. १. ११६. १२) द्रष्टव्यम्॥

७२४. ५ [१. ११६. १८] रयिशब्दाच्च। 'रेशब्दाच्च' इति भाष्यम्। ऋ. सं. १. १८.२; ७९.५; ९२.१४; ९५.११; १०.१८०.१ द्रष्टव्यम्॥

७७६. १६ [१. १२२. १४] 'मणिग्रीवम्' इति पदं स्वररहितमिति वेङ्कटमाधवाचार्यैः स्वकीय ऋग्वेदभाष्ये लिखितम्[4]॥

1. Ibid. pp. 19-21. 2. Ibid. pp. 22-24. 3. Rgveda Saṁhitā with Veṅkaṭa Mādhava's *Rgarthadīpikā*, edited by Dr. L. Sarup, Lahore. 4. Cf. Rgvedānukramaṇī by Mādhava Bhaṭṭa, edited by Dr. C. Kunhan Raja, Madras 1932, preface p. xxv.

८१८. २६ [१. १२९. ४] पृत्सु । ' पृत्सुषु ' इति संहिता ॥
१११३. २५ [१. १९१. १२] ' पुष्यम् ' इति संहिता । ' पुष्यम् ' इति भाष्यकारः ॥

द्वितीयो भागः

१. १० [२. १] त्वमग्न इति... ..आङ्गिरस उच्यते । इति ऋष्यनुक्रमणे शौनकस्य वचनम् ॥

१८. ८ [२. ३. १०] अग्निर्वै देवानां शमिता इति श्रुतेर्मूलमन्वेषणीयम् ॥

२८. १८ [२. ७. ६] द्रुग्नः । ' द्रुघ्नः ' इति शुद्धम् । एवमेव भाष्येऽपि ॥

४५. ८ [२. १२] तान्दृष्ट्वा निर्जगामेन्द्रो यज्ञाद्गृत्समदाकृतिः । अस्य मूलं नोपलब्धम् ॥

४७. १९ [२. १२. ५] मीङ् हिंसायाम् । ' मीञ् ' इति भाव्यम् ॥

१०२. १६ [२. २४. १२] मीङ् हिंसायाम् । पूर्ववत् ' मीञ् ' इति शुद्धम् ॥

११५. २७ [२. २८] इदमेकादशं.....चेति शुश्रुम । अस्य मूलमन्वेषणीयम् ॥

१२९. २ [२. ३१. ४] छन्दांसि वै ग्राः (तै. सं. ५.१.७.२) ॥

१४४. ५ [२. ३४. ८] प्रस्नुतस्तनी । ऋ. सं. १.३८.८ भाष्यं द्रष्टव्यम् ॥

१६२. ११ [२. ३८. १०] छन्दांसि वै ग्राः (तै. सं. ५.१.७.२) ॥

१६२. १२ [२. ३८. १०] पशवो वै रयिः (तै. ब्रा. १.४.४.९) ॥

१८८. २० [३. २. ९] प्रजा वा अनूयाजाः इति श्रुतिः कुत्रत्येति न ज्ञायते ॥

१८८. २२ [३. २. ९] त्रीन् परिधींस्तिस्रः समिधः इति निगमस्य मूलमन्वेषणीयम् ॥

२५०. ९ [३. १५. ४] एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः । ताण्ड्य ब्रा. १६. १. २ अत्र ' एष वाव प्रथमो यज्ञानाम् ' इति ॥

२५८. १ [३. १७. ३] प्रजामेका रक्षत्यूर्जमेका राष्ट्रमेका रक्षति । अस्याः श्रुतेर्मूलं नोपलब्धम् ॥

३५५. २५ [३. ३४. १] चैत्रमासे तपेदिन्द्रः इति स्मृतिवचनं कुत्यम् ? ऋ. सं. १०. १०७. १ भाष्ये ' चैत्रमासे तपोरिन्द्रः ' इति ॥

४२३. १२ [३. ५१. ७] इन्द्रः शार्यातस्य यज्ञे सोमरसानपिबदित्येषोऽर्थः कौषीतके स्पष्टमुक्तः । शाङ्खायनब्राह्मणे न स उपलब्धः ॥

४६४. ३ [३. ५६. ४] मेषादिस्थे सवितरि यो यो मासः प्रपूर्यते चान्द्रः चैत्राद्यः स ज्ञेयः । कुत्यमिदम् ? ॥

४६४. १८ [३. ५६. ५] त्रयो वा इमे त्रिवृतो लोकाः (ऐ. आ. १.२.२) ॥

४८६. १२ [३. ६२. ३] पशवो वै रयिः (तै. ब्रा. १.४.४.९) ॥

४८६. १४ [३. ६२. ३] वाचि हि प्राणं जुहुमः प्राणे वा वाचम् । कुत्येयं श्रुतिः ? ॥

५००. १३ [४. १. १६] जानन्त्यो । ' जानत्यो ' इति भाव्यम् ॥

५३६. ४ [४. ६. ४] यद्वै देवैर्जोष्यते हविस्तद्विरिमात्रं वर्धते । इयं श्रुतिरन्वेषणीया ॥

५४६. १९ [४. ९. ५] स हि सप्तदशः कर्मणामुपद्रष्टा भवति इत्युक्तिरापस्तम्बे द्रष्टव्या ॥

६०८. २० [४. २४. ९] अल्पं यः परिगृह्णाति.....वस्त्रमित्ययम् ' एते श्लोकाः संप्रदायविद्भिः (?) पठ्यन्ते ॥

६१६. १० [४. २७. १] श्येनभावं.....गर्भे नु सन्निति । अस्य श्लोकस्य मूलस्थानं नोपलब्धम् ॥

६५६.१४ [४.३८.२] तानग्निरश्वो भूत्वाभ्यद्रवत् इति कस्मिंश्चिद्ब्राह्मणे समाम्नातम् ॥

६७९. २ [४. ४५. १] इदमन्नमशनं पानं खादश्च इति कुत्र श्रुतम् ? ॥

६७९. ३ [४. ४५. १] माता पिता पुत्रस्तदेव तन्मिथुनम् (तै. सं. ६.५.६.३)॥

७१५. २ [४. ५८. ३] शाब्दिकास्तु.....(पा. म. १.१.१) ॥

७२४. ५ [५. २. १] जैमिनीयब्राह्मणगतस्त्रैवृष्णकथाभागोऽधो दीयते—

' वृशो वै जानस्त्यरुणस्य त्रैवृष्णस्यैक्ष्वाकस्य राज्ञः पुरोहित आसाथ ह स्म ततः पुरा राजभ्यः पुरोहिता एव रथान् संगृह्णन्त्यौपद्रष्टयाय नेदयं पापं करवदिति । तौ हाधावयन्तौ ब्राह्मणकुमारं पथि क्रीळन्तं रथचक्रेण विचिच्छिदतुरितरो हाधावयन्नभिपयुयावा अपेतर आययाम स हाधि न शशाकापयन्तुम् । तं ह तदेव विचिच्छिदतुस्तस्मिन्होदाते त्वं हन्तासि त्वं हन्तासीति.....नेति हेतर उवाचाप वा अहमायांसं स त्वमभिप्रायौषीस्त्वमेव हन्तासीति । तौ वै पृच्छावहा इति । तौ हेक्ष्वाकूनेव प्रभमेयतुस्ते हेक्ष्वाकव ऊचुर्यो वाव रथं संगृह्णाति स रथस्येशे त्वमेव हन्तासीति वृशमेव पराब्रुवन् । सोऽकामयतोदितं इयां गातुं नायं विन्देय समयं कुमारो जीवेदिति । स एतत्सामापश्यत्तेनैनं समैरयत् .....स क्रुद्धो जनमगच्छदनृतं मा व्यवोचन्निति । तेषां हेक्ष्वाकूणामग्नेर्होऽपाक्रामद्यं सायमोदनमध्यदधुः प्रातः सोऽपच्यत यः प्रातः सायं स ब्राह्मणं वा अनार्यमपाराम तेषां नोऽग्नेर्होऽपाक्रमीदेतैनमनुमन्त्रयामहा इति । तमन्वमन्त्रयन्त । स आगच्छद्यथा राज्ञा ब्राह्मणोऽनुमन्त्र्यमाण आगच्छेदेवम् । स आगत्याकामयत पश्येयमिदमग्नेर्ह इति । स एतत्सामापश्यत्तदभ्यगायत । तदपश्यत्पिशाची वा इयं व्यरुणस्य जाया सैनत्कशिपुनाच्छादयित्वाध्यास्त इति तदभिव्याहरत् '।

वेङ्कटमाधवस्य ऋग्वेदभाष्येऽपि शाट्यायनोक्त इतिहासः श्लोकैर्वर्द्धबोधृतः स द्रष्टव्यः । सायणभाष्यापेक्षया वेङ्कटमाधवभाष्यगतः कथाभागो जैमिनीयब्राह्मणपाठेनाधिकतरं सादृश्यमावहति । वेङ्कटमाधवभाष्ये शाट्यायनब्राह्मणभागोऽशत उद्धृतोऽस्ति सोऽत्र दीयते—

' स आगच्छद्यथा राज्ञा ब्राह्मणोऽनुमन्त्र्यमाण आगच्छेदेवम् । स एतत्सामापश्यत्तदभ्यगायत तदपश्यत्पिशाची वा इयं व्यरुणस्य जाया सैनत्कशिपुनाच्छादयित्वाध्यास्त इति ' [1] ॥

८२२. १७ [५. ३४. ४] इन्द्रो यतीन्.....प्रायच्छम् । ताण्ड्यमहाब्राह्मणे ' इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत् ' इतीयानंशो बहुवारमागतः (८.१.४.; १३.४. १७ इ.) ॥

८३८. २ [५. ४०. ८] स्वर्भानुश्चासुरः.....°दपाकृन्तन् इति श्रुतिः हारिद्रविकब्राह्मणादुद्धृता । हारिद्रविकब्राह्मणं नोपलभ्यते । ' यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकम् ' इति निरु. १०. ५ । तै. सं. १.५.१.१; श. ब्रा. ९.१.१.६ अपि द्रष्टव्यम् । पातञ्जलमहाभाष्ये (पा. सू. ४.२.१०४. १९) हारिद्रविणा निर्दिष्टाः । 'हरिद्रुणा प्रोक्तमधीयते हारिद्रविणः 'इति च काशिका (पा. सू. ४. २. २. १०४)। चरणव्यूहे हारिद्रवीया इति यजुर्वेदस्य शाखा[2] ॥

1. Batakrishna Ghosh, Lost Brāhmaṇas, pp. 41-6. 2. Ibid. p. 114.

८४१. १२ [५. ४१. ७] ईषिः प्रापणकर्मा स्यादुपप्राभिः समन्वितः । अयं श्लोकार्धः कुत उद्धृतः ? ऋ. सं. ९. १३ टिप्पणी द्रष्टव्या ॥

८९४. १२ [५. ५२. १७] अदितिगर्भे... अभवन्निति पुराणेषु (?) प्रसिद्धम् ॥

९२९. १२ [५. ६१. ८] अर्धं शरीरस्य भार्या इति कस्याः स्मृतेः ? ॥

९३१. १६ [५. ६१. १७] संपन्नऋषिभावस्य ..... वनं जगामेति । नीतिमञ्जरी (८६) द्रष्टव्या ॥

९६५. १७ [५. ७६] °तिरिक्तोक्थ्ये । ' °तिरिक्तोक्थे ' इति पठनीयम् ॥

९६८. १७ [५. ७७. २] पूर्वाह्णो वै देवानाम् इति श्रुतिः कुत्या ? ॥

९८९. २१ [५. ८५. २]वनेषु हीदमेषु...व्यन्तरिक्षं ततान इति वाजसनेयकम् (?) ॥

९९१. १४ [५. ८५. ६] एष ब्रह्मा । कुत्रेयं श्रुतिः ? ॥

तृतीयो भागः

२८. २१. [६. ९. २] एतच्च संप्रदायविद्भिरुक्तं (?) ॥

२८. २३. आत्मविदः (?) ॥

१३५. २६. [६. ४२. २] अन्य आह (?) ॥

१४६. ५. [६. ४४. २४] चक्षुश्च श्रोत्रं च ..... (खिल २. १२) ॥

१६५. २७. [६. ४७. २०] अगव्यूती.....स्तुतः । बृहद्देवतापाठस्तु ' अगव्यूति स्तौति देवान् पादो भूमिमथोत्तरः । बृहस्पतिं तृतीयस्तु इन्द्रमेवोत्तमं पदम् ' (बृहद्दे. ५. १११) । अनु. भा. ६. ४७. द्रष्टव्यम् ॥

१७२. २७. [६. ४८. ७] भरतूऽवाजे इति शुद्धः पदपाठः ॥

२७०. २४. [७. २ प्रस्ता.] पशाविष्टाविदम् । ' पशौ वसिष्ठानामिदम् ' इति युक्तमिति टिप्पण्यां संसूचितम् । ऋ. सं. १०. ११० प्रस्तावनायां ' पशौ जामदग्न्यानामिदमाप्रीसूक्तम् ' इति पाठानुसारेण सूचितपाठो युक्ततरः प्रतिभाति ॥

३५०. २७. [७. ३३. ७] कृणोति । करोति—शाट्या. ब्रा., जै. ब्रा. ॥

३५०. २८. तासां ज्योतिः । तेषां तज्ज्योतिः—शाट्या ब्रा.; तेषामेति (तेषामेतत्) ज्योतिः—जै. ब्रा. ॥

४०४. ९. [७. ५७. ३] कश्चिदेकवाक्यतामाह (?) ॥

४५८. ३१. [७. ८२. ३] अस्य मदे...°पिन्वदपितः । खिलसूक्ते (५. ५) '°जिन्वदजुबोऽपिन्वदजितः ' इति पाठः ॥

४७१. १५. [७. ८७. ४] अपर आह (?) ॥

४७२. ३१. [७. ८८. २] स्वर्यं° इति शुद्धः संहितापाठः ॥

४८०. ११. [७. ९१. ५] ग्रहशब्दस्य नपुंसकलिङ्गप्रयोगश्चिन्त्यः ॥

४९६. २३. [७. ९८. ६] न केवलमेकस्या एव गोः पतिः । अयमभ्यूहितः पाठः ऋ. सं. १०. १०८. ३; १६६. १ भाष्यगतसमानपाठेन समर्थितः ॥

५१२. २३. [७. १०४. १२] **अत्र केचिदाहुः (!) ॥**

५४७. १४. [८. ४. १] **सिम इति वै श्रेष्ठमाचक्षते ।** जैमिनीयब्राह्मणेऽप्ययं पाठ उपलभ्यते । बाजसनेयकस्थोऽयमिति सायणाचार्यैर्लिखितं किंतु शतपथब्राह्मणेऽयं नास्ति । भाष्यकाराणामयं प्रमाद इति वक्तुं न शक्यते यतो बाजसनेयकपाठत्वेनोद्धृताः केचनान्येऽपि पाठा बाजसनेयके नोपलभ्यन्ते[1] ॥

५५५. १४ [८. ५. २] **छान्दसत्वम् ।** ' छान्दसं वत्वम् ' इति युक्तः पाठः । त३-पुस्तके तथोपलभ्यते ॥

६९६. १८ [८. २९. २] ' **अग्नये गृहपतये** ' इति श्रुतेर्मूलं नोपलब्धम् ॥

६९७. ६ [८. २९. ५] **प्रथमो दैव्यो भिषक्—**तै. सं. ४.५.१.२ ॥

७. ११. २२ [८. ३३. ६] **श्मश्रु युद्धमिति वृद्धा (?) वदन्ति ॥**

७१४. १६ [८. ३३.१७] **प्रायोगिश्चासङ्गो.....दानं दत्त्वा ।** अस्य मूलं नोपलब्धम्॥

७७९. १४-८०५.११ [८. ४९-५८] बालखिल्यसूक्तपाठभेदाः खिलेषु प्रथमाध्याये ४, ६ सूक्तयोः, तृतीयाध्याये १-८, १८ सूक्तेषु च द्रष्टव्याः ॥

९०४. १० [८. ९१. १] **अभ्यवयन्ती ।** अभ्यवयती[2]—जै. ब्रा. ॥

९०४. ११ **सा तमभिव्याजहार ।** साभिव्याहरत्[2]—शाटया. ब्रा., जै. ब्रा. ॥

९०४. ११ **अस्यै त इदं ।** अस्यै वा इदं[2]—शाटया. ब्रा., जै. ब्रा. ॥

९०५. ८ [८. ९१. ३] **सोमपीथ इह वा अस्य ।** सोमपीथौ ह वा अस्य स[2]—शाटया. ब्रा., जै. ब्रा. ॥

९०५. ३० [८. ९१. ५] **किं कामयसीति ।** किं कामासीति[2]—शाटया.ब्रा.,जै. ब्रा. ॥

९०५. ३१ **पिता स ।** ' पितास ' (= पिता + आस) इति पठनीयम् । जैमिनीयब्राह्मणेऽप्येवमेव पाठः[2] ॥

९०६. १८ [८. ९१. ७] **तां खेऽनसोऽत्यबृहत्सा संश्लिष्टकाभवत् ।** तां खेऽनसोऽत्यबृहत्सा कृकलास्यभवत्तां खे युगस्यात्यबृहत्सा संश्लिष्टकाभवत्—शाटया. ब्रा., जै. ब्रा. ॥

९२८. २ [८. ९५. ७] **वासुरान् ।** वा असुरान्—शाटया. ब्रा. ॥

९२८. २ **तत ऋषयः ।** त एत ऋषयः—वेंकटमाधवभाष्ये ॥

९३५. १ [८. ९६. १४] **केचित् (?) इष्यामि वो मरुत इति पठन्ति ॥**

1. Ibid. p. 19. 2. Ibid. pp. 57-60.

।। ऋग्वेदसंहिता ।।

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

९–१० मण्डले

ॐ

ऋग्वेदसंहिता

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

॥ अथ नवमं मण्डलम् ॥

नवमे[1] मण्डले[1] सप्तानुवाकाः । तत्र प्रथमेऽनुवाके चतुर्विंशतिसंख्याकानि सूक्तानि । तत्र 'स्वादिष्टया' इति दशर्चं प्रथमं सूक्तम् । अत्रानुक्रम्यते—'स्वादिष्टया दश मधुच्छन्दाः' इति । वैश्वामित्रो मधुच्छन्दा ऋषिः । प्राग्वत्सप्रीत्यपरिभाषया गायत्री छन्दः । 'नवमं मण्डलं पावमानं सौम्यम्' (अनु.) इति वचनात् पवमानगुणविशिष्टः सोमो देवता । आवस्तोरैऽर्बुदसूक्तस्य प्रागुक्तमाया इदमादिकं सर्वं पावमानं विकल्पेनावपनीयम् । सूत्रितं च—'प्रैते वदन्त्वित्यर्बुदं प्रागुक्तमायाः[2] आ व ऋञ्जसे प्र वो ग्रावाण इति सूक्तयोरन्तरोपरिष्टात्पुरस्ताद्वा पावमानीरोप्य यथार्थमा[3] वा ग्रहग्रहणात्[3]' (आश्व. श्रौ. ५. १२) इति । उपाकर्मणि मण्डलादिग्रहण आद्या । सूत्रं पूर्वमेवोदाहृतम् ॥

स्वादिष्टया मदिष्टया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥ १ ॥

स्वादिष्टया । मदिष्टया । पवस्व । सोम । धारया । इन्द्राय । पातवे । सुतः ॥ १ ॥

हे [v]सोम [v]इन्द्राय [v]पातवे पातुं [v]सुतः अभिषुतः त्वं [v]स्वादिष्टया स्वादुतमया [v]मदिष्टया अतिशयेन मादयित्र्या [v]धारया [v]पवस्व क्षर ॥

रक्षोहा विश्वचर्षणिरभि योनिमयोहतम् । द्रुणा सधस्थमासदत् ॥ २ ॥

रक्षःऽहा । विश्वऽचर्षणिः । अभि । योनिम् । अयःऽहतम् ।
द्रुणा । सधऽस्थम् । आ । असदत् ॥ २ ॥

[v]रक्षोहा रक्षसां हन्ता [v]विश्वचर्षणिः विश्वस्य द्रष्टा सोमः [v]अयोहतं हिरण्येन हतम् । तथा च ब्राह्मणं—'हिरण्यपाणिरभिपुणोति' इति । [v]द्रुणा द्रोणकलशेनाधिषवणफलकाभ्यां[4] वा [v]सधस्थं सहस्थानं [v]योनिम् अभिषवस्थानम् [v]अभि [v]आसदत् अभ्यासीदति ॥

वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः । पर्षि राधो मघोनाम् ॥ ३ ॥

वरिवःऽधातमः । भव । मंहिष्ठः । वृत्रहन्ऽतमः । पर्षि । राधः । मघोनाम् ॥ ३ ॥

हे सोम त्वं [v]वरिवोधातमः अतिशयेन धनानां दाता [v]भव । 'वेदो वरिवः' इति धननामसु पाठात् । [v]मंहिष्ठः दातृतमश्च भव । सर्वदातृत्वमत्रोच्यत इत्यपुनरुक्तिः । [v]वृत्रहन्तमः अतिशयेन शत्रूणां हन्ता भव । किंच [v]मघोनां धनवतां शत्रूणां [v]राधः धनं च [v]पर्षि अस्मभ्यं प्रयच्छ ॥

---

१. ग-त-भ—तत्र । २. ग—प्रागुपेततमाया । ३. ग—यथार्थमावग्रहणात्; त१—यथार्थमावाग्रहणात्; त५.६-भ१—यथार्थमावापग्रहणात्; भ४—यथार्थमतापग्रहणात् । ४. भ१—°कलशेविषवण°; भ४—°कलशेधिषवण° ।

अभ्यर्ष महानां देवानां वीतिमन्धसा । अभि वाजमुत श्रवः ॥ ४ ॥

अभि । अर्ष । महानाम् । देवानाम् । वीतिम् । अन्धसा । अभि । वाजम् । उत । श्रवः ॥४॥

हे सोम त्वं ᵛमहानां महतां ᵛदेवानां ᵛवीतिं यज्ञम् ᵛअन्धसा धानाद्यन्नेन सह ᵛअभ्यर्ष अभिगच्छ । ᵛउत अपि चाभिगच्छंस्त्वं[1] ᵛवाजं बलं ᵛश्रवः अन्नं चाभिगमयास्मानित्यर्थः ॥

त्वामच्छा चरामसि तदिदर्थं दिवेदिवे । इन्दो त्वे न आशसः ॥ ५ ॥

त्वाम् । अच्छ । चरामसि । तत् । इत् । अर्थम् । दिवेऽदिवे ।

इन्दो इति । त्वे इति । नः । आऽशसः ॥ ५ ॥

हे ᵛइन्दो यागेषु क्लिद्यमान सोम ᵛत्वामच्छ त्वां प्रति ᵛचरामसि वयं चरामः । ᵛदिवेदिवे प्रतिदिनमस्माकं ᵛतदित् तदेव त्वत्परिचरणमेव ᵛअर्थं कार्यं नान्यत्कार्यमस्ति । ᵛनः अस्माकम् ᵛआशसः आशंसनान्यपि ᵛत्वे त्वय्येव नान्यत्र ॥ ॥ १६ ॥

पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता । वारेण शश्वता तना ॥ ६ ॥

पुनाति । ते । परिऽस्रुतम् । सोमम् । सूर्यस्य । दुहिता । वारेण । शश्वता । तना ॥ ६ ॥

हे सोम ᵛते तव ᵛपरिस्रुतं क्षरन्तं ᵛसोमं सोमरसं ᵛसूर्यस्य ᵛदुहिता श्रद्धा देवी ᵛवारेण[2] वालेन ᵛशश्वता शाश्वतेन ᵛतना विस्तृतेन ᵛपुनाति[3] । तथा च वाजसनेयिन आमनन्ति–[4] श्रद्धा वै सूर्यस्य दुहिता श्रद्धा ह्येनं पुनाति[3]' इति[3] ॥

तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश । स्वसारः पार्ये दिवि ॥ ७ ॥

तम् । ईम् । अण्वीः । सऽमर्ये । आ । गृभ्णन्ति । योषणः । दश । स्वसारः । पार्ये । दिवि ॥७॥

ᵛसमर्ये समनुष्ये यज्ञे ᵛपार्ये ᵛदिवि सौत्येऽहनि ᵛयोषणः स्त्रियः ᵛस्वसारः स्वयं सरन्त्यो दशसंख्याकाः ᵛअण्वीः[4] अण्व्योऽङ्गुलयः । 'अमुवः अण्व्यः' इत्यङ्गुलिनामसु पाठात् । ᵛतमीं तमेनं सोमम् ᵛआ ᵛगृभ्णन्ति आगृह्णन्ति ॥

तमीं हिन्वन्त्यग्रुवो धर्मन्ति बाकुरं दृतिम् । त्रिधातु वारणं मधु ॥ ८ ॥

तम् । ईम् । हिन्वन्ति । अग्रुवः । धर्मन्ति । बाकुरम् । दृतिम् । त्रिऽधातु । वारणम् । मधु ॥८॥

ᵛतमीम् एनं सोमम् ᵛअग्रुवः अङ्गुलयः ᵛहिन्वन्ति अभिषवदेशं प्रति प्रेरयन्ति । प्रेरयित्वा च ᵛबाकुरं भासमानं ᵛदृतिं दृतिसदृशांशुमेनं[5] सोमं ᵛधमन्ति अभिषुण्वन्ति[6] । यद्यपि धमतिरभिषवकर्मा न भवति तथाप्यौचित्यादत्राभिषवपरो भविष्यति । तदेतत् सोमात्मकं ᵛमधु वस्तु ᵛत्रिधातु त्रिस्थानम् । द्रोणकलश आधवनीयः पूतभृदिति त्रिधातवः । ᵛवारणं शत्रूणां वारकं च भवति ॥

अभी ३ ममघ्न्या उत श्रीणन्ति धेनवः शिशुम् । सोममिन्द्राय पातवे ॥ ९ ॥

अभि । इमम । अघ्न्याः । उत । श्रीणन्ति । धेनवः । शिशुम् । सोमम् । इन्द्राय । पातवे ॥९॥

---

१. त१.५.६-भ१–वाभिः । २. ग-भ–'वारेण.....पुनाति' नास्ति । ३. ग–पुनंतीति । सा वारेण वालमयेन शश्वता दृढेन वस्त्रेण पुनाति शोधयति । यजुर्ब्राह्मणं वारेण शश्वता तनेत्याह वारेणा हि सोमं पुनंतीति; त-भ१.२.४ पुनंतीति । ४. ग-त५–अण्वीरेता । ५. ग–°सदृशुमंशुमेनं; घ–°सदृशं मधु । ६. ग-त१.२.५.६.७–भ–अभिषुण्वंति च ।

vउत अपि च vइमम् एनं vशिशुं बालं vसोमम् vअज्याः अहन्तव्याः vधेनवः गावः vइन्द्राय vपातवे पातुम् vअभि vश्रीणन्ति । स्वकीयेन पयसा संस्कुर्वन्तीत्यर्थः ॥

अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते । शूरो मघा च मंहते ॥ १० ॥

अस्य । इत् । इन्द्रः । मदेषु । आ । विश्वा । वृत्राणि । जिघ्नते । शूरः । मघा । च । मंहते ॥१०॥

vशूरः वीरः vइन्द्रः vअस्येत् अस्य सोमस्यैव vमदेषु vविश्वा विश्वानि vवृत्राणि शत्रून् vआ vजिघ्नते आहन्ति । vमघा मघानि धनानि vच vमंहते यजमानेभ्यः प्रयच्छति ॥ ॥ १७ ॥

' पवस्व ' इति दशर्चं द्वितीयं सूक्तं काण्वस्य मेधातिथेरार्षं[1] गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तं–' पवस्व मेधातिथिः[2] ' इति । उक्तो विनियोगः ॥

पवस्व देववीरति पवित्रं सोम रंह्या । इन्द्रमिन्दो वृषा विश ॥ १ ॥

पवस्व । देवऽवीः । अति । पवित्रम् । सोम । रंह्या । इन्द्रम् । इन्दो इति । वृषा । आ । विश ॥१॥

हे vसोम vदेववीः देवकामस्त्वं vरंह्या वेगेन vपवित्रं यथा भवति तथा vअति vपवस्व अतिक्षर । किंच हे vइन्दो vवृषा सेचकस्त्वम् vइन्द्रम् vआ vविश प्रविश ॥

आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः । आ योनिं धर्णसिः सदः ॥ २ ॥

आ । वच्यस्व । महि । प्सरः । वृषा । इन्दो इति । द्युम्नवत्ऽतमः ।
आ । योनिम् । धर्णसिः । सदः ॥ २ ॥

हे vइन्दो सोम vमहि महान् vवृषा कामानां वर्षकः vद्युम्नवत्तमः यशस्वितमः vधर्णसिः धर्ता त्वं vप्सरः पानीयमन्धः vआ vवच्यस्व अस्मान् प्रत्यागमय । vयोनिं स्वकीयं स्थानम् vआ vसदः आसीद च ॥

अधुक्षत प्रियं मधु धारा सुतस्य वेधसः । अपो वसिष्ट सुक्रतुः ॥ ३ ॥

अधुक्षत । प्रियम् । मधु । धारा । सुतस्य । वेधसः । अपः । वसिष्ट । सुऽक्रतुः ॥ ३ ॥

vसुतस्य अभिषुतस्य vवेधसः अभिलषितस्य विधातुर्यस्य सोमस्य vधारा vप्रियं प्रीतिकरं vमधु अमृतम् vअधुक्षत दुग्धे सः vसुक्रतुः सुकर्मा[3] सोमः vअपः वसतीवरीः vवसिष्ट आच्छादयति ॥

महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः । यद्गोभिर्वासयिष्यसे ॥ ४ ॥

महान्तम् । त्वा । महीः । अनु । आपः । अर्षन्ति । सिन्धवः । यत् । गोभिः । वासयिष्यसे ॥४॥

हे सोम त्वं vयत् यदा यज्ञे vगोभिः गोविकारैः पयोभिः vवासयिष्यसे आच्छादयिष्यसे तदा vमहान्तं त्वाम् vअनु प्रति vसिन्धवः स्यन्दमानाः vमहीः महत्यः vआपः vअर्षन्ति गच्छन्ति ॥

समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥ ५ ॥

समुद्रः । अप्ऽसु । ममृजे । विष्टम्भः । धरुणः । दिवः । सोमः । पवित्रे । अस्मऽयुः ॥ ५ ॥

---

१. ग-त१.२.६–मेध्यातिथे° । २. ग-त१.२.६-मु–मेध्यातिथि° । ३. ग-त४.५-मु–शोभनकर्मा; घ-स६–भीमकर्मा; त१.२.७–भामकर्मा; भ४–सोकर्मा ।

vसमुद्रः । समुद्द्रवन्त्यस्माद्रसा इति समुद्रः । vविष्टम्भः vदिवः स्वर्गस्य vधरुणः धारकश्च vअस्मयुः अस्मत्कामः vसोमः vअप्सु उदकेषु vमृज्जे मृज्यते vपवित्रे अभिषिच्यत इत्यर्थः ॥ ॥१८॥

अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः । सं सूर्येण रोचते ॥ ६ ॥

अचिक्रदत् । वृषा । हरिः । महान् । मित्रः । न । दर्शतः । सम् । सूर्येण । रोचते ॥ ६ ॥

vवृषा कामानां वर्षकः vहरिः हरितवर्णः vमहान् सर्वोत्तमः vमित्रो vन यथा सखा तद्वत् vदर्शतः[1] दर्शनीयो योऽयं सोमः vअचिक्रदत् शब्दं करोति सोऽयं सोमः vसूर्येण सह vरोचते[2] दिवि प्रकाशते ॥

गिरस्त इन्द्र ओजसा मर्मृज्यन्ते अपस्युवः । याभिर्मदाय शुम्भसे ॥ ७ ॥

गिरः । ते । इन्दो इति । ओजसा । मर्मृज्यन्ते । अपस्युवः । याभिः । मदाय । शुम्भसे ॥ ७ ॥

हे vइन्दो vते तव vओजसा बलेन vअपस्युवः कर्मेच्छासंबन्धिन्यः ताः vगिरः स्तुतयः vमर्मृज्यन्ते शोध्यन्ते vयाभिः गीर्भिस्त्वं vमदाय क्षरन् vशुम्भसे अलंक्रियसे ॥

तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे । तव प्रशस्तयो महीः ॥ ८ ॥

तम् । त्वा । मदाय । घृष्वये । ऊँ इति । लोकऽकृत्नुम् । ईमहे । तव । प्रऽशस्तयः । महीः ॥८॥

हे सोम यस्य vतव vप्रशस्तयः प्रशंसाः vमहीः महत्यः vघृष्वय vउ त्वत्प्रसादाच्छत्रूणां घर्षणशीलाय यजमानायैव vलोककृत्नुम् उत्तमस्य लोकस्य कर्तारं vतं त्वां सोमं vमदाय vईमहे वयं याचामहे ॥

अस्मभ्यमिन्दविन्द्रयुर्मघवः पवस्व धारया । पर्जन्यो वृष्टिमाँइव ॥ ९ ॥

अस्मभ्यम् । इन्दो इति । इन्द्रऽयुः । मघवः । पवस्व । धारया । पर्जन्यः । वृष्टिमान्ऽइव ॥ ९ ॥

हे vइन्दो सोम vइन्द्रयुः इन्द्रकामस्त्वं vमघवः मदकरस्यामृतस्य[3] vधारया vपर्जन्यो vवृष्टिमानिव यथा वर्षवान् पर्जन्यो मेघस्तथा[4] vअस्मभ्यं मेधातिथिभ्यः vपवस्व क्षर ॥

गोषा इन्दो नृषा असश्वसा वाजसा उत । आत्मा यज्ञस्य पूर्व्यः ॥ १० ॥

गोऽसाः । इन्दो इति । नृऽसाः । असि । अश्वऽसाः । वाजऽसाः । उत ।
आत्मा । यज्ञस्य । पूर्व्यः ॥ १० ॥

हे vइन्दो vयज्ञस्य vपूर्व्यः प्रत्नः vआत्मा आत्मभूतस्त्वं vगोषाः अस्मभ्यं गवां दाता vअसि भवसि । vनृषाः पुत्राणां दाता चासि । vअश्वसाः अश्वानां दाता चासि । vउत अपि च vवाजसाः अन्नानां दाता चासि ॥ ॥ १९ ॥

' एष देवः ' इति दशर्चं तृतीयं सूक्तमाजीगर्तेः शुनःशेपस्यार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च–' एषः शुनःशेपः ' इति । उक्तो विनियोगः ॥

---

१. त–दर्शतो कं; भ१.४–दर्शतो क । २. घ-मु– सं रोचते । ३. ग–मदकरस्य रसस्य; घ-त७–मदकरस्य सोमस्य; त४–मदकरस्योत्तमस्य; त५–मदकरस्यामृतस्य । ४. ग–मेघः क्षरति तथा ।

एष देवो अमर्त्यः पर्णवीरिव दीयति । अभि द्रोणान्यासदम् ॥ १ ॥

एषः । देवः । अमर्त्यः । पर्णवीःऽइव । दीयति । अभि । द्रोणानि । आऽसदम् ॥ १ ॥

[v]देवः द्योतमानः [v]अमर्त्यः मरणरहितः [v]एषः सोमः [v]द्रोणानि द्रोणकलशानि [v]अभि अभिलक्ष्य [v]आसदम् आसदनार्थं [v]पर्णवीरिव यथा पक्षी तथा वेगेन [v]दीयति गच्छति ॥

एष देवो विपा कृतोऽति ह्वरांसि धावति । पवमानो अदाभ्यः ॥ २ ॥

एषः । देवः । विपा । कृतः । अति । ह्वरांसि । धावति । पवमानः । अदाभ्यः ॥ २ ॥

[v]विपा अङ्गुल्या । 'अथर्यो विपः' इत्यङ्गुलिनामसु पाठात् । [v]कृतः अभिषुतः[1] [v]एषः सोमः [v]देवः [v]पवमानः क्षरन् [v]अदाभ्यः केनाप्यहिंसितश्च सन् [v]ह्वरांसि शत्रून् [v]अति [v]धावति हन्तुमभिगच्छति ॥

एष देवो विपन्युभिः पवमान ऋतायुभिः । हरिर्वाजाय मृज्यते ॥ ३ ॥

एषः । देवः । विपन्युऽभिः । पवमानः । ऋतयुऽभिः । हरिः । वाजाय । मृज्यते ॥ ३ ॥

[v]पवमानः क्षरन् [v]एषः सोमः [v]देवः [v]विपन्युभिः स्तोतृभिः [v]ऋतायुभिः यज्ञकामैः[2] [v]हरिः अश्व इव [v]वाजाय संग्रामार्थं [v]मृज्यते स्तुतिभिरलंक्रियते ॥

एष विश्वानि वार्या शूरो यन्निव सत्वभिः । पवमानः सिषासति ॥ ४ ॥

एषः । विश्वानि । वार्या । शूरः । यनऽइव । सत्वऽभिः । पवमानः । सिसासति ॥ ४ ॥

[v]पवमानः क्षरन् [v]शूरः वीरः [v]एषः सोमो देवः [v]विश्वानि सर्वाणि [v]वार्या वरणीयानि धनानि [v]सत्वभिः बलैः [v]यन्निव गच्छन्निव [v]सिषासति अस्मदर्थं संभक्तुमिच्छति ॥

एष देवो रथर्यति पवमानो दशस्यति । आविष्कृणोति वग्वनुम् ॥ ५ ॥

एषः । देवः । रथर्यति । पवमानः । दशस्यति । आविः । कृणोति । वग्वनुम् ॥ ५ ॥

[v]पवमानः[3] क्षरन् [v]एषः सोमः [v]देवः [v]रथर्यति अस्मदीयं यागं प्रत्यागमनाय रथं कामयते । [v]दशस्यति आगत्य चास्मभ्यमभिलषितं प्रयच्छति[4] । [v]वग्वनुं शब्दम् [v]आविष्कृणोति । अभिषूयमाणः प्रकटयति ॥ ॥ २० ॥

एष विप्रैरभिष्टुतोऽपो देवो वि गाहते । दधद्रत्नानि दाशुषे ॥ ६ ॥

एषः । विप्रैः । अभिऽस्तुतः । अपः । देवः । वि । गाहते । दधत् । रत्नानि । दाशुषे ॥ ६ ॥

[v]विप्रैः मेधाविभिः स्तोतृभिः [v]अभिष्टुतः परितः स्तुतः [v]एषः सोमः [v]देवः [v]दाशुषे हविषां प्रदात्रे यजमानाय [v]रत्नानि रमणीयानि धनानि [v]दधत् धारयन् प्रयच्छन् [v]अपः वसतीवरीः [v]वि [v]गाहते प्रविशति ॥

एष दिवं वि धावति तिरो रजांसि धारया । पवमानः कनिक्रदत् ॥ ७ ॥

एषः । दिवम् । वि । धावति । तिरः । रजांसि । धारया । पवमानः । कनिक्रदत् ॥ ७ ॥

---

१. ग–सुतोभिषुतः । २. ग-त-भ-सु–यज्ञकामैर्वा । ३. घ–पवमानः पूयमानः । ४. ग-घ-त-भ–प्रयच्छति च ।

ᵛधारया ᵛपवमानः क्षरन् ᵛएषः सोमः ᵛकनिक्रदत् अभिधूयमाणः शब्दं कुर्वन् ᵛरजांसि लोकान् ᵛतिरः तिरस्कुर्वन् यागात् ᵛदिवं स्वर्गं ᵛवि ᵛधावति गच्छति ॥

एष दिवं व्यासरत्तिरो रजांस्यस्पृतः । पवमानः स्वध्वरः ॥ ८ ॥

एषः । दिवम् । वि । आ । असरत् । तिरः । रजांसि । अस्पृतः । पवमानः । सुऽअध्वरः ॥८॥

ᵛपवमानः क्षरन् ᵛएषः सोमः ᵛस्वध्वरः सुयज्ञः ᵛअस्पृतः केनाप्यहिंसितश्च सन् ᵛरजांसि लोकान् ᵛतिरः[1] तिरस्कुर्वन् यज्ञात् ᵛदिवं प्रति ᵛव्यासरत् विसरति गच्छति ॥

एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः । हरिः पवित्रे अर्षति ॥ ९ ॥

एषः । प्रत्नेन । जन्मना । देवः । देवेभ्यः । सुतः । हरिः । पवित्रे । अर्षति ॥ ९ ॥

ᵛहरिः हरितवर्णः ᵛदेवः द्योतमानः ᵛएषः सोमः ᵛप्रत्नेन पुराणेन ᵛजन्मना जननेन ᵛदेवेभ्यः देवार्थं ᵛसुतः अभिषुतः सन् ᵛपवित्रे स्थातुम् ᵛअर्षति गच्छति ॥

एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः । धारया पवते सुतः ॥ १० ॥

एषः । ऊँ इति । स्यः । पुरुऽव्रतः । जज्ञानः । जनयन् । इषः । धारया । पवते । सुतः ॥ १० ॥

ᵛस्यः ᵛएष ᵛउ[2] सोम एव ᵛपुरुव्रतः बहुकर्मा ᵛजज्ञानः जायमान एव ᵛइषः अन्नानि ᵛजनयन् उत्पादयन् ᵛसुतः अभिषुतः सन् ᵛधारया ᵛपवते क्षरति ॥ ॥ २१ ॥

'सना च' इति दशर्चं चतुर्थं सूक्तमाङ्गिरसकुलस्य हिरण्यस्तूपस्यार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च–'सन हिरण्यस्तूपः' इति । उक्तो विनियोगः ॥

सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस्कृधि ॥ १ ॥

सना । च । सोम । जेषि । च । पवमान । महि । श्रवः । अथ । नः । वस्यसः । कृधि ॥ १ ॥

हे ᵛमहि ᵛश्रवः महदन्न ᵛपवमान ᵛसोम ᵛसन[3] । अस्मद्यागे यजनीयान् देवान् भज । ᵛजेषि ᵛच । यागविध्वंसकारिणो राक्षसांश्च जय । ᵛअथ देवान् प्राप्य राक्षसांश्च जित्वानन्तरं ᵛनः अस्मान् ᵛवस्यसः श्रेयसः[4] ᵛकृधि कुरु । श्रेयोऽस्मभ्यं देहीत्यर्थः ॥

सना ज्योतिः सना स्व१र्विश्वा च सोम सौभगा । अथा नो वस्यसस्कृधि॥२॥

सना । ज्योतिः । सना । स्वः । विश्वा । च । सोम । सौभगा । अथ । नः । वस्यसः । कृधि ॥२॥

हे ᵛसोम त्वं ᵛज्योतिः तेजः ᵛसन अस्मभ्यं प्रयच्छ । अपि च ᵛस्वः[5] स्वर्गं ᵛसन अस्मभ्यं देहि । ᵛविश्वा विश्वानि ᵛसौभगा सौभाग्यानि ᵛच सन । सिद्धमन्यत् ॥

सना दक्षमुत क्रतुमप सोम मृधो जहि । अथा नो वस्यसस्कृधि ॥ ३ ॥

सना । दक्षम् । उत । क्रतुम । अप । सोम । मृधः । जहि । अथ । नः । वस्यसः । कृधि ॥ ३ ॥

हे ᵛसोम त्वं ᵛदक्षं बलं ᵛसन अस्मभ्यं देहि । ᵛउत अपि च ᵛक्रतुं प्रज्ञानं सन । ᵛमृधः हिंसकान् शत्रूंश्च ᵛअप ᵛजहि मारय । सिद्धमन्यत् ॥

१. ग-त-भ–'तिरः' नास्ति । २. ग-घ-त-भ–'उ' नास्ति । ३. ग–सना । ४. त-भ२.४–श्रेयः । ५. ग-त-भ–'स्वः' नास्ति ।

पवीतारः पुनीतन सोममिन्द्राय पातवे । अथा नो वस्यसस्कृधि ॥ ४ ॥

पवितारः । पुनीतन । सोमम् । इन्द्राय । पातवे । अथ । नः । वस्यसः । कृधि ॥ ४ ॥

हे ᵛपवीतारः[1] सोमाभिषवकर्तारः यूयम् ᵛइन्द्राय ᵛपातवे पानुं ᵛसोमं ᵛपुनीतन अभिषुणुत । सिद्धमन्यत् ॥

त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः । अथा नो वस्यसस्कृधि ॥ ५ ॥

त्वम् । सूर्ये । नः । आ । भज । तव । क्रत्वा । तव । ऊतिऽभिः । अथ । नः । वस्यसः । कृधि ॥५॥

हे सोम ᵛत्वं ᵛतव ᵛक्रत्वा ᵛतव ᵛऊतिभिः त्वत्कर्तृकेण कर्मणा त्वत्कर्तृकाभी रक्षाभिश्च ᵛनः अस्मान् ᵛसूर्ये ᵛआ ᵛभज प्रापय । सिद्धमन्यत् ॥ ॥ २२ ॥

तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् । अथा नो वस्यसस्कृधि ॥ ६ ॥

तव । क्रत्वा । तव । ऊतिऽभिः । ज्योक् । पश्येम । सूर्यम । अथ । नः । वस्यसः । कृधि ॥६॥

हे सोम ᵛतव ᵛक्रत्वा प्रज्ञानेन ᵛतव ᵛऊतिभिः रक्षाभिश्च ᵛज्योक् चिरं ᵛपश्येम ᵛसूर्यम् । पश्याम[2] द्रक्ष्यामः[3] । सिद्धमन्यत् ॥

अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम् । अथा नो वस्यसस्कृधि ॥ ७ ॥

अभि । अर्ष । सुऽआयुध । सोम । द्विऽबर्हसम् । रयिम् । अथ । नः । वस्यसः । कृधि ॥७॥

हे ᵛस्वायुध शोभनायुध ᵛसोम त्वं ᵛद्विबर्हसं द्वयोर्द्यावापृथिव्योः स्थानयोः परिवृढं ᵛरयिं धनम् ᵛअभ्यर्ष अस्मानभिगमय । सिद्धमन्यत् ॥

अभ्यर्षानपच्युतो रयिं समत्सु सासहिः । अथा नो वस्यसस्कृधि ॥ ८ ॥

अभि । अर्ष । अनपऽच्युतः । रयिम् । समतऽसु । ससहिः । अथ । नः । वस्यसः । कृधि ॥८॥

हे सोम ᵛसमत्सु संग्रामेषु ᵛअनपच्युतः शत्रुभिरनाहतः[4] ᵛसासहिः शत्रूणामभिभविता त्वं ᵛरयिं धनम् ᵛअभ्यर्ष अस्मानभिगमय । सिद्धमन्यत् ॥

त्वां यज्ञैरवीवृधन्पवमान विधर्मणि । अथा नो वस्यसस्कृधि ॥ ९ ॥

त्वाम् । यज्ञैः । अवीवृधन् । पवमान । विऽधर्मणि । अथ । नः । वस्यसः । कृधि ॥ ९ ॥

हे ᵛपवमान सोम यजमानानां विधारणाय प्रवृत्तं ᵛत्वां ᵛयज्ञैः ᵛविधर्मणि आत्मनो विधारणार्थम् ᵛअवीवृधन् यजमाना वर्धयन्ति । सिद्धमन्यत् ॥

रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर । अथा नो वस्यसस्कृधि ॥ १० ॥

रयिम् । नः । चित्रम् । अश्विनम् । इन्दो इति । विश्वऽआयुम् । आ । भर ।
अथ । नः । वस्यसः । कृधि ॥ १० ॥

---

१. ग-भ१.३-पवितारः । २. ग-त२-अश्यामः; त६-पश्येम । ३. त२-' द्रक्ष्यामः ' नास्ति । ४. ग-°रनभिभूतः; भ१.३-°रनाभिहतः; भ२-°रनभिहतः; भ४-°रनभिहितः ।

हे ᵛइन्दो यागेषु क्रियमान सोम त्वं[1] ᵛचित्रं नानाविधम् ᵛअश्विनम् अश्ववन्तं च ᵛविश्वायुं सर्वगामिनं ᵛरयिं ᵛनः अस्मभ्यम् ᵛआ ᵛभर आहर। सिद्धमन्यत् ॥ ॥ २३ ॥

'समिद्धः' इत्येकादशर्चं पञ्चमं सूक्तं काश्यपस्यासितस्य[2] देवलस्य वार्षम्। अष्टम्याद्याश्चतस्रोऽनुष्टुभः शिष्टाः सप्त गायत्र्यः। नराशंसवर्जिताः[3] समिदादयः क्रमेण प्रत्यृचं देवताः। तथा चानुक्रान्तं–'समिद्ध एकादश काश्यपोऽसितो देवलो वा विंशतिः सूक्तान्याद्यमाप्रियश्चतुरनुष्टुबन्तम्' इति। काश्यपस्य[4] पावमानमिदमाग्रीसूक्तम्[5]। सूत्रितं च–'समिद्धो अद्येति सर्वेषां यथर्षि वा' (आश्व. श्रौ. ३. २) इति ॥

समिद्धो विश्वतस्पतिः पवमानो वि राजति। प्रीणन्वृषा कनिक्रदत् ॥ १ ॥

समऽइद्धः। विश्वतः। पतिः। पवमानः। वि। राजति। प्रीणन्। वृषा। कनिक्रदत् ॥१॥

आग्नीवत्सोमस्तुतिरत्र[6]। ᵛसमिद्धः सम्यग्दीप्तः ᵛविश्वतस्पतिः सर्वतः स्वामी ᵛवृषा कामानां वर्षिता ᵛपवमानः सोमः ᵛकनिक्रदत् अभिषूयमाणः शब्दं कुर्वन् ᵛप्रीणन् देवान् प्रीणयन् ᵛवि ᵛराजति यागेषु प्रकाशते ॥

तनूनपात्पवमानः शृङ्गे शिशानो अर्षति। अन्तरिक्षेण रारजत् ॥ २ ॥

तनूऽनपात्। पवमानः। शृङ्गे इति। शिशानः। अर्षति। अन्तरिक्षेण। रारजत ॥ २ ॥

ᵛतनूनपात्[7] ᵛपवमानः सोमः। तनूनपादत्र सोमो भवति। तथा च श्रूयते—'अद्भ्योऽशवो जायन्ते ततः सोमो जायते' इति। ᵛशृङ्गे दीप्ते उन्नतप्रदेशे[8]। 'हृणिः शृङ्गाणि' इति ज्वलन्नामसु पाठात्। ᵛशिशानः तीक्ष्णीकुर्वन् ᵛअन्तरिक्षेण ᵛरारजत् ᵛअर्षति। द्रोणकलशं प्रति गच्छति। तथा चाम्नायते—'द्राभ्यां धाराभ्यामाग्रयणं[9] गृह्णाति[10]' इति ॥

ईळेन्यः पवमानो रयिर्वि राजति द्युमान्। मधोर्धाराभिरोजसा ॥ ३ ॥

ईळेन्यः। पवमानः। रयिः। वि। राजति। द्युऽमान्। मधोः। धाराभिः। ओजसा ॥ ३ ॥

ᵛईळेन्यः स्तुत्यः ᵛपवमानः सोमः ᵛरयिः अभीष्टस्य दाता ᵛद्युमान् दीप्तिमांश्च सन् ᵛमधोः उदकस्य ᵛधाराभिः सह क्षरन् ᵛओजसा बलेन ᵛवि ᵛराजति प्रकाशते ॥

बर्हिः प्राचीनमोजसा पवमानः स्तृणन्हरिः। देवेषु देव ईयते ॥ ४ ॥

बर्हिः। प्राचीनम्। ओजसा। पवमानः। स्तृणन्। हरिः। देवेषु। देवः। ईयते ॥ ४ ॥

ᵛहरिः हरितवर्णः ᵛदेवः द्योतमानः सोमः ᵛपवमानः ᵛदेवेषु[11] यज्ञेषु ᵛबर्हिः ᵛप्राचीनं प्राचीनाग्रं ᵛस्तृणन् स्तारयन् ᵛओजसा बलेन ᵛईयते गच्छति ॥

१. ग-त५-भ२–स त्वं; भ १.४– – – स त्वं। २. ग-त-भ४-सु–काश्यपासितस्य। ३. घ-भ१.२.३–नाराशंस°। ४. ग–शौनकस्य पवमानसोममिद°; त-भ४–शौनकस्य पावमानमिद°। ५. त-भ४–आप्रीतन्सोम°; सु–आप्रीयसोम°। ६. घ–तनूनपादेवः। ७. त–°प्रवेशे। ८. ग–पराभ्यामाग्रयणं; त६–आसभ्यामाग्रयणं; भ२.३–आग्रयणं। ९. ग-त१.२.६.७–गृण्हामीति; त४.५–गृहामिति; भ३–गृहतीति। १०. ग-त-भ४–'देवेषु' नास्ति।

उदातैर्जिहते बृहद्द्वारो देवीर्हिरण्ययीः । पवमानेन सुष्टुताः ॥ ५ ॥

उत् । आतैः । जिहते । बृहत् । द्वारः । देवीः । हिरण्ययीः । पवमानेन । सुऽस्तुताः ॥ ५ ॥

[v]हिरण्ययीः हिरण्मय्यः [v]द्वारो [v]देवीः द्वारो देव्यः [v]पवमानेन सोमेन सह [v]सुष्टुताः स्तोतृभिः सम्यक् स्तुताः सत्यः [v]बृहत् बृहतीभ्यो महतीभ्यः [v]आतैः आताभ्यो दिग्भ्यः । 'आता आशाः' इति दिङ्नामसु पाठात् । [v]उत् [v]जिहते उद्गच्छन्ति ॥ ॥ २४ ॥

सुशिल्पे बृहती मही पवमानो वृषण्यति । नक्तोषासा न दर्शते ॥ ६ ॥

सुशिल्पे इति सुऽशिल्पे । बृहती इति । मही इति । पवमानः । वृषण्यति ।
नक्तोषसा । न । दर्शते इति ॥ ६ ॥

[v]सुशिल्पे सुरूपे [v]बृहती परिवृढे [v]मही महत्यौ [v]न संप्रति [v]दर्शते दर्शनीये [v]नक्तोषासा नक्तोषासौ[1] [v]पवमानः सोमः [v]वृषण्यति कामयते ॥

उभा देवा नृचक्षसा होतारा दैव्या हुवे । पवमान इन्दो वृषा ॥ ७ ॥

उभा । देवा । नृऽचक्षसा । होतारा । दैव्या । हुवे । पवमानः । इन्दः । वृषा ॥ ७ ॥

[v]नृचक्षसा मनुष्याणां द्रष्टारौ [v]दैव्या दैव्यौ देवसंबन्धिनौ [v]होतारा होतारौ [v]उभा उभौ [v]देवा देवौ [v]हुवे आह्वयामि यज्ञे । [v]पवमानः सोमः [v]इन्दः दीप्तः । तथा च यास्कः–'इन्द्र इरां दृणातीति वेरां दारयत इति वेरां धारयतीति वेन्धे भूतानीति वा तद्यदेनं प्राणैः समैन्धत[2] तदिन्द्रस्येन्द्रत्वमिति विज्ञायते' (निरु. १०. ८) इति । [v]वृषा कामानां वर्षिता च भवतीति ॥

भारती पवमानस्य सरस्वतीळा मही । इमं नो यज्ञमा गमन्तिस्रो देवीः सुपेशसः ॥ ८ ॥

भारती । पवमानस्य । सरस्वती । इळा । मही ।
इमम् । नः । यज्ञम् । आ । गमन् । तिस्रः । देवीः । सुऽपेशसः ॥ ८ ॥

[v]भारती भारत्याख्या [v]सरस्वती सरस्वत्याख्या च [v]मही महती इळाख्या[3] च [v]तिस्रः [v]सुपेशसः सुरूपाः [v]देवीः देव्यः [v]नः अस्माकं [v]पवमानस्य सोमस्य संबन्धिनम् [v]इमं[4] [v]यज्ञं प्रति [v]आ [v]गमन् आगच्छन्तु ॥

त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे ।
इन्दुरिन्द्रो वृषा हरिः पवमानः प्रजापतिः ॥ ९ ॥

त्वष्टारम् । अग्रऽजाम् । गोपाम् । पुरःऽयावानम् । आ । हुवे ।
इन्दुः । इन्द्रः । वृषा । हरिः । पवमानः । प्रजाऽपतिः ॥ ९ ॥

[v]अग्रजाम् अग्रे जातं [v]गोपां प्रजानां पालयितारं [v]पुरोयावानं देवानां पुरस्ताद्गन्तारं [v]त्वष्टारं देवम् [v]आ [v]हुवे अहमाह्वयामि यज्ञे । [v]हरिः[5] हरितवर्णः [v]पवमानः [v]इन्दुः सोमः[6] [v]इन्द्रः देवानामीश्वरः [v]वृषा कामानां वर्षिता च [v]प्रजापतिः प्रजानां पालयिता च भवतीति ॥

---

१. ग-मु–नक्तोषसौ । २. त१.२.६.७-मु–समैधन् ; त४.५-भ३–समैधन; भ४–समैवत । ३. भ१.२.३–इळा इळाख्या । ४. त-भ–'इमं' नास्ति । ५. ग-त-भ२.३.४–'हरिः' नास्ति । ६. त-भ–'सोमः' नास्ति ।

वनस्पतिं पवमान मध्वा समङ्ग्धि धारया ।
सहस्रवल्शं हरितं भ्राजमानं हिरण्ययम् ॥ १० ॥

वनस्पतिम् । पवमान । मध्वा । सम् । अङ्ग्धि । धारया ।
सहस्रऽवल्शम् । हरितम् । भ्राजमानम् । हिरण्ययम् ॥ १० ॥

हे ᵛपवमान सोम ᵛहरितं हरितवर्णं ᵛहिरण्ययं कदाचिद्धिरण्मयवर्णं च ᵛभ्राजमानं दीप्यमानं ᵛसहस्रवल्वां सहस्रशाखं ᵛवनस्पतिं देवं ᵛधारया धारामयेन ᵛमध्वा मधुना ᵛसमङ्ग्धि अङ्क्ष्व । संस्कुर्वित्यर्थः ॥

विश्वे देवाः स्वाहाकृतिं पवमानस्या गत ।
वायुर्बृहस्पतिः सूर्योऽग्निरिन्द्रः सजोषसः ॥ ११ ॥

विश्वे । देवाः । स्वाहाऽकृतिम् । पवमानस्य । आ । गत ।
वायुः । बृहस्पतिः । सूर्यः । अग्निः । इन्द्रः । सऽजोषसः ॥ ११ ॥

हे ᵛविश्वे ᵛदेवाः ᵛवायुः ᵛबृहस्पतिः च ᵛसूर्यः च ᵛअग्निः च ᵛइन्द्रः च सर्वे यूयं ᵛसजोषसः संगताः सन्तः ᵛपवमानस्य सोमस्य ᵛस्वाहाकृतिं स्वाहाकारं प्रति[१] ᵛआ ᵛगत[१] आगच्छत ॥ ॥२५॥

'मन्द्रया' इति नवर्चं षष्ठं सूक्तं काश्यपस्यासितस्य देवलस्य वार्षं गायत्रं पवमानसोमदेवताकम्[२] ॥

मन्द्रया सोम धारया वृषा पवस्व देवयुः । अव्यो वारेष्वस्मयुः ॥ १ ॥

मन्द्रया । सोम । धारया । वृषा । पवस्व । देवऽयुः । अव्यः । वारेषु । अस्मऽयुः ॥ १ ॥

हे ᵛसोम ᵛवृषा कामानां वर्षिता ᵛदेवयुः देवकामः ᵛअस्मयुः अस्मत्कामश्च ᵛअव्यः अवेः ᵛवारेषु वालेषु दशापवित्रे ᵛमन्द्रया मदकरया ᵛधारया ᵛपवस्व क्षर ॥

अभि त्यं मद्यं मदमिन्दविन्द्र इति क्षर । अभि वाजिनो अर्वतः ॥ २ ॥

अभि । त्यम् । मद्यम् । मदम् । इन्दो इति । इन्द्रः । इति । क्षर । अभि । वाजिनः । अर्वतः ॥२॥

हे ᵛइन्दो सोम त्वम् ᵛइन्द्रः ईश्वरः ᵛइति कृत्वा ᵛत्यं[३] तं[३] ᵛमद्यं मदकरं[४] ᵛमदं रसम् ᵛअभि[५] ᵛक्षर वर्ष । ᵛवाजिनः बलवतः ᵛअर्वतः अश्वांश्च अस्मदर्थम् ᵛअभि क्षरेत्यर्थः ॥

अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ । अभि वाजमुत श्रवः ॥ ३ ॥

अभि । त्यम् । पूर्व्यम् । मदम् । सुवानः । अर्ष । पवित्रे । आ । अभि । वाजम् । उत । श्रवः ॥३॥

हे सोम ᵛसुवानः अभिषूयमाणस्त्वं ᵛपूर्व्यं प्रत्नं ᵛत्यं तं प्रसिद्धं ᵛमदं मदकरं रसं ᵛपवित्रे ᵛआ समन्तात् ᵛअभि ᵛअर्ष अभिगमय । ᵛवाजं बलमस्मान् ᵛअभि अर्ष । ᵛउत अपि च ᵛश्रवः अन्नमस्मर्ष ॥

---

१. ग-त४.५-' प्रति आ गत ' नास्ति; त१.२.६.७-मु-आगत । २. ग-°देवताकं अनुक्रांतं मंद्रया नवेति; घ-°देवताकं मंद्रया नवेति अनुक्रांतं च । ३. ग-त-भ-'त्यं तं' नास्ति । ४. त-भ-मदकरमत्यंतं । ५. त-भ-' अभि ' नास्ति ।

अनु द्रप्सास इन्दव आपो न प्रवतासरन् । पुनाना इन्द्रमाशत ॥ ४ ॥

अनु । द्रप्सासः । इन्दवः । आपः । न । प्रऽवता । असरन् । पुनानाः । इन्द्रम् । आशत ॥४॥

[v]द्रप्सासः द्रुतगतयः[1] [v]पुनानाः क्षरन्तः [v]इन्दवः सोमाः [v]प्रवता प्रवणेन मार्गेण [v]आपो [v]न आप इव [v]इन्द्रम् [v]अनु [v]असरन् अनुगच्छन्ति । [v]आशत व्याप्नुवन्ति च ॥

यमत्यमिव वाजिनं मृजन्ति योषणो दश । वने क्रीळन्तमत्यविम् ॥ ५ ॥

यम् । अत्यम्ऽइव । वाजिनम् । मृजन्ति । योषणः । दश । वने । क्रीळन्तम् । अतिऽअविम् ॥ ५ ॥

[v]अत्यविं दशापवित्रमतिक्रम्य [v]वने अरण्ये [v]क्रीळन्तं वर्तमानं [v]यं सोमं [v]दश[2] दशसंख्याकाः [v]योषणः स्त्रियः । अङ्गुलय इत्यर्थः । तथा च निगमान्तरं– 'तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश' (ऋ. सं. ९.१.७) इति । [v]वाजिनं बलिनम् [v]अत्यमिव[3] अश्वमिव [v]मृजन्ति परिचरन्ति । उत्तरया सहान्वयः ॥ ॥ २६ ॥

तं गोभिर्वृषणं रसं मदाय देववीतये । सुतं भराय सं सृज ॥ ६ ॥

तम् । गोभिः । वृषणम् । रसम् । मदाय । देवऽवीतये । सुतम् । भराय । सम् । सृज ॥ ६ ॥

[v]वृषणं कामानां वर्षितारं [v]देववीतये देवानां पानाय [v]मदाय [v]सुतम् अभिषुतं [v]तं [v]रसं [v]भराय संग्रामाय [v]गोभिः[4] पयोभिः[4] [v]सं [v]सृज संयोजय ॥

देवो देवाय धारयेन्द्राय पवते सुतः । पयो यदस्य पीपयत् ॥ ७ ॥

देवः । देवाय । धारया । इन्द्राय । पवते । सुतः । पयः । यत् । अस्य । पीपयत् ॥ ७ ॥

[v]देवाय द्योतमानाय [v]इन्द्राय [v]सुतः अभिषुतः [v]देवः द्योतमानः सोमः [v]धारया [v]पवते क्षरति । [v]यत् यस्मात् [v]अस्य सोमस्य [v]पयः [v]पीपयत् इन्द्रमाप्यायितवत् । तस्माद्धारया पवत इत्यर्थः ॥

आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः । प्रत्नं नि पाति काव्यम् ॥ ८ ॥

आत्मा । यज्ञस्य । रंह्या । सुस्वानः । पवते । सुतः । प्रत्नम् । नि । पाति । काव्यम् ॥८॥

[v]यज्ञस्य [v]आत्मा आत्मभूतः [v]सुतः अभिषुतः सोमः [v]सुष्वाणः यजमानेभ्यः कामान् प्रेरयन् [v]रंह्या वेगेन [v]पवते क्षरति । [v]प्रत्नं पुरातनं [v]काव्यम् आत्मनः कवित्वं च [v]नि [v]पाति अभिरक्षति ॥

एवा पुनान इन्द्रयुर्मदं मदिष्ठ वीतये । गुहा चिद्दधिषे गिरः ॥ ९ ॥

एव । पुनानः । इन्द्रऽयुः । मदम् । मदिष्ठ । वीतये । गुहा । चित् । दधिषे । गिरः ॥९॥

हे [v]मदिष्ठ अतिशयेन मदकर सोम [v]इन्द्रयुः इन्द्रकामस्त्वं [v]वीतये इन्द्रस्य पानाय [v]एव एवं [v]मदं [v]पुनानः क्षरन् [v]गुहा गुहायाम् । यज्ञशालायामित्यर्थः । [v]गिरः [v]चित् शब्दानपि [v]दधिषे । अभिषववेलायामुपरवेषु धारयसि । करोषीत्यर्थः ॥ ॥ २७ ॥

१. त–द्रुगतयः । २. त-भ४–'दश' नास्ति । ३. ग-भ–अस्यं न । ४. ग-त४.५-भ–'गोभिः पयोभिः' नास्ति; घ–गोभिः ।

'असृग्रम्' इति नवर्चं सप्तमं सूक्तम्। 'असृग्रम्' इत्यनुक्रान्तम्। असितो देवलो वर्षिः। तौ च कश्यपगोत्रजौ[1]। गायत्रं[2] छन्दः[2]। सोमः पवमानो देवता। उक्तो विनियोगः॥

असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः। विदाना अस्य योजनम्॥ १॥

असृग्रम्। इन्दवः। पथा। धर्मन्। ऋतस्य। सुऽश्रियः। विदानाः। अस्य। योजनम्॥१॥

[v]सुश्रियः शोभनश्रयणाः[3] [v]अस्य इन्द्रस्य [v]योजनं संबन्धं [v]विदानाः जानन्तः [v]इन्दवः सोमाः [v]धर्मन् कर्मणि [v]ऋतस्य यज्ञस्य [v]पथा मार्गेण [v]असृग्रं सृज्यन्ते॥

प्र धारा मध्वो अग्रियो महीरपो वि गाहते। हविर्हविष्षु वन्द्यः॥ २॥

प्र। धाराः। मध्वः। अग्रियः। महीः। अपः। वि। गाहते। हविः। हविष्षु। वन्द्यः॥२॥

[v]हविष्षु हविषां मध्ये [v]वन्द्यः स्तुत्यः [v]हविः हविरात्मको यः सोमः [v]महीः महतीः [v]अपः वसतीवरीः [v]वि [v]गाहते तस्य [v]मध्वः सोमस्य [v]अग्रियः मुख्याः [v]धाराः [v]प्र पतन्तीत्यर्थः॥

प्र युजो वाचो अग्रियो वृषावं चक्रदद्वने। सद्माभि सत्यो अध्वरः॥ ३॥

प्र। युजः। वाचः। अग्रियः। वृषा। अव। चक्रदत्। वने। सद्म। अभि। सत्यः। अध्वरः॥३॥

एतदेव दर्शयति। [v]वृषा कामानां वर्षकः [v]सत्यः सत्यभूतः [v]अध्वरः हिंसावर्जितः [v]अग्रियः मुख्यः सोमः [v]सद्म यज्ञगृहम् [v]अभि प्रति [v]वने उदके [v]युजः युक्ताः [v]वाचः [v]प्र [v]अव [v]चक्रदत् अवक्रन्दति। शब्दान् करोतीत्यर्थः॥

परि यत्काव्या कविर्नृम्णा वसानो अर्षति। स्वर्वाजी सिषासति॥ ४॥

परि। यत्। काव्या। कविः। नृम्णा। वसानः। अर्षति। स्वः। वाजी। सिसासति॥ ४॥

[v]कविः क्रान्तकर्मा सोमः [v]नृम्णा नृम्णानि[4] धनानि [v]वसानः आच्छादयन् स्तोतॄणां [v]काव्या[5] काव्यानि कविकर्माणि स्तोत्राणि [v]यत् यदा [v]परि [v]अर्षति परिगच्छति तदा [v]स्वः स्वर्गे[6] [v]वाजी बलवानन्नवान् वा इन्द्रः [v]सिषासति। यागं प्रत्यागन्तुं स्वकीयं बलं संभक्तुमिच्छति॥

पवमानो अभि स्पृधो विशो राजेव सीदति। यदीमृण्वन्ति वेधसः॥ ५॥

पवमानः। अभि। स्पृधः। विशः। राजाऽइव। सीदति। यत्। ईम्। ऋण्वन्ति। वेधसः॥५॥

[v]यत् यदा [v]ईम् एनं सोमं [v]वेधसः कर्मणां कर्तारः[7] [v]ऋण्वन्ति प्रेरयन्ति तदा [v]पवमानः क्षरन्नेव सोमः [v]स्पृधः स्पर्धमानान् यागविघ्नकारिणो राक्षसान् [v]विशः स्पर्धमानान् मनुष्यान् [v]राजेव[8] यथा राजा[9] तद्वत् [v]अभि [v]सीदति[10] नाशयितुमभिगच्छति॥ ॥ २८॥

अव्यो वारे परि प्रियो हरिर्वनेषु सीदति। रेभो वनुष्यते मती॥ ६॥

अव्यः। वारे। परि। प्रियः। हरिः। वनेषु। सीदति। रेभः। वनुष्यते। मती॥ ६॥

१. ग-त७-काश्यपगोत्रजौ; भ१.३-कश्यपगोत्रौ। २. भ१.२.३-गायत्रछंदसं। ३. त-भ-°श्रवणा। ४. ग-त-भ-'नृम्णानि' नास्ति। ५. ग-त-भ-'काव्या' नास्ति। ६. ग-स्वर्गात्। ७. त-भ-कर्तारं। ८. त-भ४-राजसेव। ९. भ१.२.३.४-राजाभिषीदति। १०. त-भ१.२.४-निषीदति।

vहरिः हरितवर्णः vप्रियः देवानां प्रियतम एव सोमः vवनेषु उदकेषु संपृक्तः vअव्यः अवेः vवारे वालोपेते vपरि vषीदति । किंच vरेभः अभिषववेलायामुपरवेषु शब्दं कुर्वन् vमती मत्या स्तुत्या vजनुष्यते सेव्यते ॥

स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मभिः ॥ ७ ॥

सः । वायुम् । इन्द्रम् । अश्विना । साकम् । मदेन । गच्छति । रणा । यः । अस्य । धर्मऽभिः ॥७॥

vयः यजमानः vअस्य सोमस्य vधर्मभिः कर्मभिः क्रयणाभिषवादिभिः vरण रमते vसः यजमानः vवायुमिन्द्रं च vअश्विना अश्विनौ[1] च vमदेन vसाकं सह vगच्छति प्राप्नोति ॥

आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः । विदाना अस्य शक्मभिः ॥ ८ ॥

आ । मित्रावरुणा । भगम् । मध्वः । पवन्ते । ऊर्मयः । विदानाः । अस्य । शक्मऽभिः ॥ ८ ॥

येषां यजमानानां vमध्वः सोमस्य vऊर्मयः तरङ्गाः vमित्रावरुणा मित्रावरुणौ देवौ vभगं भगात्म्यं देवं च प्रति vपवन्ते क्षरन्ति ते यजमानाः vअस्य सोमस्येमं सोमं vविदानाः जानन्तः vशक्मभिः सुखैः संगच्छन्त[2] इति शेषः ॥

अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो वसूनि सं जितम् ॥ ९ ॥

अस्मभ्यम् । रोदसी इति । रयिम् । मध्वः । वाजस्य । सातये । श्रवः । वसूनि । सम् । जितम् ॥९॥

हे vरोदसी द्यावापृथिव्यौ युवां vमध्वः देवानां मोदयितुः[3] vवाजस्य सोमात्मकस्यान्नस्य vसातये लाभाय vअस्मभ्यं काश्यपासितेभ्यः काश्यपदेवलेभ्यो वा vरयिं धनं vश्रवः अन्नं च vवसूनि वासकान्यन्यान्यपि पश्वादीनि धनानि vसं vजितं संजयतम् । प्रयच्छतमित्यर्थः ॥ ॥ २९ ॥

' एते सोमाः ' इति नवर्चमष्टमं सूक्तम् । ऋष्याद्याः पूर्ववत् । अनुक्रान्तं च–' एते सोमाः ' इति । उक्तः सूक्तविनियोगः । प्रावस्तोत्रे गाणगारिमतेनाभिरूपकरणे सोमे मृज्यमाने ' मृजन्ति त्वा ' इत्येषा । सूत्रितं च–' अथापरमभिरूपं कुर्यादिति गाणगारिरा प्यायस्व समेतु त इति तिस्रो मृजन्ति त्वा दश क्षिपः ' (आश्व. श्रौ. ५.१२) इति ॥

एते सोमा अभि प्रियमिन्द्रस्य कामममक्षरन् । वर्धन्तो अस्य वीर्यम् ॥ १ ॥

एते । सोमाः । अभि । प्रियम् । इन्द्रस्य । कामम् । अक्षरन् । वर्धन्तः । अस्य । वीर्यम् ॥१॥

vएते अभिषुता इमे vसोमाः vअस्य इन्द्रस्य vवीर्यं शक्तिं vवर्धन्तः वर्धयन्तः vइन्द्रस्य vकामं काम्यं vप्रियं प्रीतिकरं रसम् vअभि vअक्षरन् अभिषवन्ते अभ्यवर्षन् ॥

पुनानासश्चमूषदो गच्छन्तो वायुमश्विना । ते नो धान्तु सुवीर्यम् ॥ २ ॥

पुनानासः । चमूऽसदः । गच्छन्तः । वायुम् । अश्विना । ते । नः । धान्तु । सुऽवीर्यम् ॥२॥

vते प्रसिद्धाः सोमाः vपुनानासः पुनाना अभिषूयमाणाः vचमूषदः चमसेषु सीदन्तः vवायुम् vअश्विना अश्विनौ च vगच्छन्तः प्राप्नुवन्तः vनः अस्मभ्यं vसुवीर्यं शोभनवीर्यं vधान्तु धारयन्तु । प्रयच्छन्त्वित्यर्थः ॥

---

१. ग-त-भ–' अश्विनौ ' नास्ति । २. घ–आसंगच्छंत । ३. ग–मादयितुः ।

इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय । ऋतस्य योनिमासदम् ॥ ३ ॥

इन्द्रस्य । सोम । राधसे । पुनानः । हार्दि । चोदय । ऋतस्य । योनिम् । आऽसदम् ॥ ३ ॥

हे [v]सोम [v]पुनानः अभिषूयमाणः [v]हार्दि अभिलक्षितस्वम् [v]इन्द्रस्य [v]राधसे संराधनाय [v]ऋतस्य यज्ञस्य [v]योनिं स्थानम् [v]आसदं यथेन्द्र आसीदति तथेन्द्रं [v]चोदय प्रेरय ॥

मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः । अनु विप्रा अमादिषुः ॥ ४॥

मृजन्ति । त्वा । दश । क्षिपः । हिन्वन्ति । सप्त । धीतयः । अनु । विप्राः । अमादिषुः ॥४॥

हे सोम [v]त्वा त्वां [v]दश दशसंख्याकाः [v]क्षिपः अङ्गुलयः । ' त्रिशः[1] क्षिपः ' इत्यङ्गुलिनामसु पाठात् । [v]मृजन्ति परिचरन्ति । [v]सप्त ससंख्याकाः [v]धीतयः होत्रकाश्च त्वा त्वां [v]हिन्वन्ति स्वस्वव्यापारैः प्रीणयन्ति । [v]विप्राः मेधाविनश्च त्वाम् [v]अनु [v]अमादिषुः अनुमादयन्ति ॥

देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः । सं गोभिर्वासयामसि ॥ ५ ॥

देवेभ्यः । त्वा । मदाय । कम् । सृजानम् । अति । मेष्यः । सम् । गोभिः । वासयामसि ॥५॥

हे सोम [v]मेष्यः अवेर्लोमानि [v]कम्[2] उदकं च [v]अति अभि[2] [v]सृजानं [v]त्वा त्वां [v]देवेभ्यः देवानाम् । विभक्तिव्यत्ययः । [v]मदाय मदार्थं [v]गोभिः गोविकारैः पयोभिः [v]सं [v]वासयामसि संवासयामः ॥ ॥ ३० ॥

पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः । परि गव्यान्यव्यत ॥ ६ ॥

पुनानः । कलशेषु । आ । वस्त्राणि । अरुषः । हरिः । परि । गव्यानि । अव्यत ॥ ६ ॥

[v]पुनानः पूयमानः [v]कलशेषु कुम्भेषु निषिच्यमानः [v]अरुषः आरोचमानः [v]हरिः हरितवर्णः सोमः [v]गव्यानि दध्यादीनि [v]वस्त्राणि वासांसीव [v]परि [v]अव्यत पर्याच्छादयति ॥

मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इन्दो सखायमा विश ॥ ७ ॥

मघोनः । आ । पवस्व । नः । जहि । विश्वाः । अप । द्विषः ।

इन्दो इति । सखायम् । आ । विश ॥ ७ ॥

हे [v]इन्दो सोम [v]मघोनः धनवतः [v]नः अस्मान् प्रति [v]पवस्व क्षर । [v]विश्वाः विश्वान् [v]द्विषः द्वेष्टॄन् [v]अप [v]जहि मारय च । [v]सखायं प्रियमिन्द्रम् [v]आ [v]विश आप्नुहि च ॥

वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि । सहो नः सोम पृत्सु धाः ॥ ८ ॥

वृष्टिम् । दिवः । परि । स्रव । द्युम्नम् । पृथिव्याः । अधि ।

सहः । नः । सोम । पृत्ऽसु । धाः ॥ ८ ॥

---

१. ग-त१.२.४.७-म४-विशः; त६-म१.३-' त्रिशः ' नास्ति । २. ग-इत्यर्थः अति; घ-कमुदकं चात्यभि; त१-कं उवकं चादन्यभि; त२.६-कं उवकं न्यभि; त४.५- - - - द अभि; त७-कमुदकं त्वदन्यभि; म१.२-द अति; म३-दशापवित्रमति; म४-अभि; मु-कमुदकं चाति ।

हे ᵛसोम त्वं ᵛदिवः द्युलोकात् ᵛवृष्टिं वर्षं ᵛपरि ᵛस्रव वर्षय। ᵛपृथिव्या ᵛअधि पृथिव्याम्। अधिः सप्तम्यर्थानुवादः। ᵛद्युम्नम् अन्नं चोत्पादयेति शेषः। ᵛनः अस्माकं ᵛसहः बलं च ᵛपृत्सु संग्रामेषु ᵛधाः धेहि ॥

नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम्। भक्षीमहि प्रजामिषम् ॥ ९ ॥

नृऽचक्षसम्। त्वा। वयम्। इन्द्रऽपीतम्। स्वःऽविदम्। भक्षीमहि। प्रऽजाम्। इषम् ॥९॥

हे सोम ᵛनृचक्षसं नृणां द्रष्टारं ᵛस्वर्विदं सर्वज्ञम् ᵛइन्द्रपीतम् इन्द्रेण[1] पीतं ᵛत्वा[1] त्वां पिबन्तः ᵛवयं काश्यपासिताः काश्यपदेवलाः[2] वा ᵛप्रजां पुत्रादिकाम् ᵛइषम् अन्नं च ᵛभक्षीमहि भजेमहि ॥ ॥ ११ ॥

'परि प्रिया' इति नवर्चं नवमं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'परि प्रिया' इत्यनुक्रान्तम्। उक्तो विनियोगः ॥

परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः। सुवानो याति कविक्रतुः ॥ १ ॥

परि। प्रिया। दिवः। कविः। वयांसि। नप्त्योः। हितः। सुवानः। याति। कविऽक्रतुः ॥१॥

ᵛकविः मेधावी ᵛकविक्रतुः क्रान्तप्रज्ञः क्रान्तकर्मा वा सोमः ᵛनप्त्योः अधिषवणफलकयोः ᵛहितः निहितः ᵛसुवानः अभिषूयमाणः ᵛदिवः द्युलोकस्य ᵛपरि ᵛप्रिया अतिप्रियाणि ᵛवयांसि प्राप्णः। तथा च मन्त्रवर्णः—'वयांसि[3] इयेना अतिथयः पर्वतानां ककुभः' इति। ᵛयाति गच्छति ॥

प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे। वीत्यर्ष चनिष्ठया ॥ २ ॥

प्रऽप्र। क्षयाय। पन्यसे। जनाय। जुष्टः। अद्रुहे। वीती। अर्ष। चनिष्ठया ॥ २ ॥

हे सोम ᵛप्रप्र अत्यन्तं ᵛक्षयाय तव निवासभूताय ᵛअद्रुहे अद्रोग्धे च ᵛपन्यसे स्तोत्रे ᵛजनाय मनुष्याय ᵛवीती वीत्यै भक्षणाय ᵛजुष्टः पर्याप्तस्त्वं ᵛचनिष्ठया अन्नवत्तमया धारया ᵛअर्ष यागं प्रति गच्छ ॥

स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा ॥ ३ ॥

सः। सूनुः। मातरा। शुचिः। जातः। जाते इति। अरोचयत्।
महान्। मही इति। ऋतऽवृधा ॥ ३ ॥

ᵛजातः उत्पन्नः ᵛशुचिः विशुद्धः ᵛमहान् हविरुत्तमः ᵛसः सोमाख्यः ᵛसूनुः पुत्रः ᵛमही महत्यौ ᵛऋतावृधा यज्ञस्य वर्धयित्र्यौ ᵛजाते विश्वस्य जनयित्र्यौ ᵛमातरा आत्मनो मातरौ द्यावापृथिव्यौ ᵛअरोचयत् रोचयति दीपयति ॥

स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः या एकमक्षि वावृधुः ॥ ४ ॥

सः। सप्त। धीतिऽभिः। हितः। नद्यः। अजिन्वत्। अद्रुहः। याः। एकम्। अक्षि। ववृधुः ॥४॥

---

१. ग-त-भ-'इंद्रेण पीतं त्वा' नास्ति। २. त-कश्यप°। ३. ग-भ-'वयांसि' नास्ति।

ᵛयाः नद्यः यम् ᵛएकं मुख्यं सोमम् ᵛअक्षि अक्षीणं ᵛवबृधुः वर्धयन्ति ᵛसः सोमः ᵛधीतिभिः[1] अङ्गुलिभिः। 'रशना धीतयः' इत्यङ्गुलिनामसु पाठात्। ᵛहितः निहितः सन् ᵛअद्रुहः द्रोहवर्जिताः ᵛसप्त सप्तसंख्याकाः ᵛनद्यः नदीः[2] ᵛअजिन्वत् प्रीणयति ॥

ता अभि सन्तमस्तृतं महे युवानमा दधुः। इन्दुमिन्द्र तवे व्रते ॥ ५ ॥

ताः। अभि। सन्तम्। अस्तृतम्। महे। युवानम्। आ। दधुः। इन्दुम्। इन्द्र। तवे। व्रते ॥५॥

हे ᵛइन्द्र ᵛतव त्वदीये ᵛव्रते कर्मणि ᵛताः अङ्गुल्यः। पूर्वत्र धीतिभिः इत्यङ्गुलीनामुपात्तत्वात् तच्छब्देन परामर्शः। ᵛसन्तं विद्यमानम् ᵛअस्तृतम् अहिंसितं ᵛयुवानं नित्यतरुणम् ᵛइन्दुं सोमं ᵛमहे महतेऽभिषवादिलक्षणाय कर्मणे ᵛअभि ᵛआ ᵛदधुः ॥ ॥ ३२ ॥

अभि वह्निरमर्त्यः सप्त पश्यति वावहिः। क्रिविर्देवीरतर्पयत् ॥ ६ ॥

अभि। वह्निः। अमर्त्यः। सप्त। पश्यति। वावहिः। क्रिविः। देवीः। अतर्पयत् ॥ ६ ॥

यः ᵛवह्निः यज्ञस्य धुरो वोढा ᵛअमर्त्यः मरणरहितः ᵛवावहिः देवानां तृप्तेरत्यन्तं वोढा च सोमः ᵛसप्त नदीः ᵛपश्यति सोऽयं ᵛक्रिविः कूपरूपेण[3] पूर्णोऽवस्थितः सन् ᵛदेवीः नदीः ᵛ अतर्पयत् तर्पयति ॥

अवा कल्पेषु नः पुमस्तमांसि सोम योध्या। तानि पुनान जङ्घनः ॥ ७ ॥

अव। कल्पेषु। नः। पुमः। तमांसि। सोम। योध्या। तानि। पुनान। जङ्घनः ॥ ७ ॥

हे ᵛपुमः पुमन् सोम ᵛकल्पेषु कल्पनीयेष्वहःसु ᵛनः अस्मान् ᵛअव रक्ष। अपि च ᵛपुनान हे पवमान ᵛसोम त्वं ᵛयोध्या योधनीयानि ᵛतमांसि रक्षांसि यानि ᵛतानि ᵛजङ्घनः नाशय ॥

नू नव्यसे नवीयसे सूक्ताय साधया पथः। प्रत्नवद्रोचया रुचः ॥ ८ ॥

नु। नव्यसे। नवीयसे। सुऽउक्ताय। साधय। पथः। प्रत्नऽवत्। रोचय। रुचः ॥ ८ ॥

हे सोम ᵛनव्यसे नव्याय नूतनाय ᵛनवीयसे स्तुत्यायास्माकं ᵛसूक्ताय ᵛपथः मार्गान् ᵛनु क्षिप्रं ᵛसाधय अभिगच्छ। अपि च ᵛप्रत्नवत् यथापूर्वं ᵛरुचः स्वदीप्तीः ᵛरोचय प्रकाशय ॥

पवमान महि श्रवो गामश्वं रासि वीरवत्। सना मेधां सना स्वः ॥ ९ ॥

पवमान। महि। श्रवः। गाम्। अश्वम्। रासि। वीरऽवत्।
सन। मेधाम्। सन। स्वरिति स्वः ॥ ९ ॥

हे ᵛपवमान सोम यस्त्वं ᵛवीरवत् पुत्रवत् ᵛमहि महत् ᵛश्रवः अन्नं ᵛगां च ᵛअश्वं च ᵛरासि अस्मभ्यं प्रयच्छसि स त्वं ᵛमेधां ᵛसन अस्मभ्यं प्रयच्छ। अपि च ᵛस्वः यदस्मदभिलषितं तत् सर्वं ᵛसन देहि ॥ ॥ ३३ ॥

'प्र स्वानासः' इति नवर्चं दशमं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'प्र स्वानासः' इत्यनुक्रान्तम्। उक्तो विनियोगः ॥

१. ग-त-भ४-धीतयः। २. त१.४.५.६.७-भ४-नदीभिः; त२-नदीव। ३. ग-कूपवत्।

प्र स्वानासो रथाइवार्वन्तो न श्रवस्यवः । सोमासो राये अक्रमुः ॥ १ ॥

प्र । स्वानासः । रथाःऽइव । अर्वन्तः । न । श्रवस्यवः । सोमासः । राये । अक्रमुः ॥ १ ॥

vप्र vस्वानासः अभिषववेलायामुपरवेषु शब्दं कुर्वन्तः vसोमासः सोमाः vरथाइव यथा शब्दं कुर्वन्तो रथाः vअर्वन्तो vन यथा शब्दं कुर्वन्तोऽश्वाः तथा vश्रवस्यवः शत्रुभ्योऽन्नमिच्छन्तः vराये यजमानानां धनाय vअक्रमुः आगच्छन् ॥

हिन्वानासो रथाइव दधन्विरे गभस्त्योः । भरासः कारिणामिव ॥ २ ॥

हिन्वानासः । रथाःऽइव । दधन्विरे । गभस्त्योः । भरासः । कारिणाम्ऽइव ॥ २ ॥

सोमाः vरथाइव यथा रथास्तथा vहिन्वानासः हिन्वाना यागदेशं प्रति गच्छन्तः vभरासः भराः vकारिणामिव यथा भारवाहिनां[1] बाह्वोर्धीयन्ते तथा vगभस्त्योः ऋत्विजां बाह्वोः । 'गभस्ती बाहू' इति बाहुनामसु पाठात् । vदधन्विरे धीयन्ते ॥

राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते । यज्ञो न सप्त धातृभिः ॥ ३ ॥

राजानः । न । प्रशस्तिऽभिः । सोमासः । गोभिः । अञ्जते । यज्ञः । न । सप्त । धातृऽभिः ॥३॥

vसोमासः सोमाः vप्रशस्तिभिः प्रशस्ताभिः[2] स्तुतिरूपाभिर्वाग्भिः vराजानो vन यथा राजानः vसप्त vधातृभिः सप्त होत्राभिः vयज्ञो vन यथा च यज्ञस्तथा vगोभिः गोविकारैः पयोभिः vअञ्जते अज्यन्ते । संस्क्रियन्त इत्यर्थः ॥

परि सुवानास इन्दवो मदाय बर्हणा गिरा । सुता अर्षन्ति धारया ॥ ४ ॥

परि । सुवानासः । इन्दवः । मदाय । बर्हणा । गिरा । सुताः । अर्षन्ति । धारया ॥ ४ ॥

vसुवानासः सुवाना अभिषूयमाणाः vइन्दवः सोमाः vबर्हणा महत्या vगिरा स्तुतिरूपया वाचा vसुताः अभिषुताः सन्तः vमदाय मदार्थं vधारया vपरि vअर्षन्ति परितो गच्छन्ति ॥

आपानासो विवस्वतो जनन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥ ५ ॥

आपानासः । विवस्वतः । जनन्तः । उषसः । भगम् । सूराः । अण्वम् । वि । तन्वते ॥५॥

vविवस्वतः इन्द्रस्य vआपानासः आपानभूताः vउषसः vभगं vजनन्तः जनयन्तः vसूराः सरन्तः सोमाः vअण्वं vवि vतन्वते । अभिषववेलायामुपरवेषु शब्दं कुर्वन्ति ॥ ॥ ३४ ॥

अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः । वृष्णो हरस आयवः ॥ ६ ॥

अप । द्वारा । मतीनाम् । प्रत्नाः । ऋण्वन्ति । कारवः । वृष्णः । हरसे । आयवः ॥ ६ ॥

vमतीनां स्तुतीनां vकारवः कर्तार ऋत्विजः vप्रत्नाः पुराणाः vवृष्णः सेचकस्य सोमस्य[3] vहरस आहरस आहर्तारश्च vआयवः मनुष्याः vद्वारा यज्ञस्य द्वाराणि vअप vऋण्वन्ति ॥

समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः ॥ ७ ॥

समूऽईचीनासः । आसते । होतारः । सप्तऽजामयः । पदम् । एकस्य । पिप्रतः ॥ ७ ॥

---

१. त-भ-मु-भारवाहानां । २. ग-भ-'प्रशस्ताभिः' नास्ति; घ-शस्ताभिः । ३. ग-घ-त-'सोमस्य' नास्ति ।

vसमीचीनासः समीचीनाः vजामयः जामिसदृशाः vएकस्य सोमस्य vपदं स्थानं vपिप्रतः पूरयन्तः vसप्त vहोतारः सप्त होत्रकाः vआसते यज्ञ उपविशन्ति ॥

नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा । कवेरपत्यमा दुहे ॥ ८ ॥

नाभा । नाभिम् । नः । आ । ददे । चक्षुः । चित् । सूर्ये । सचा । कवेः । अपत्यम् । आ । दुहे ॥८॥

vनाभिं यज्ञस्य नाभिभूतं सोमं vनः अस्माकं vनाभा नाभौ अहम् vआ vददे । पिबामीत्यर्थः । पीतसोमानामस्माकं vचक्षुश्चित् चक्षुरपि vसूर्ये vसचा संगतं भवति । किंच vकवेः क्रान्तकर्मणः सोमस्य vअपत्यम्[1] अंशुम् vआ vदुहे आपूरयामि ॥

अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितम् । सूरः पश्यति चक्षसा ॥ ९ ॥

अभि । प्रिया । दिवः । पदम् । अध्वर्युऽभिः । गुहा । हितम् । सूरः । पश्यति । चक्षसा ॥९॥

vसूरः सुवीर्य इन्द्रः vचक्षसा चक्षुषा vदिवः दीप्तस्यात्मनः[2] vप्रिया प्रियं vपदम् vअध्वर्युभिः vगुहा गुहायां हृदये vहितं निहितं[3] पीतं सोममपि vअभि[4] vपश्यति ॥ ॥ ३५ ॥

' उपास्मै ' इति नवर्चमेकादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ' उपास्मै ' इत्यनुक्रान्तम् । उक्तः सूक्तविनियोगः । अभिषवे धर्मदुघावत्सेऽपनीयमाने[5] ' नमसेदुप ' इत्येषा । सूत्रितं च–' नमसेदुप सीदत संजानाना उप सीदन्नभिज्ञु ' (आश्व. श्रौ. ४.७) इति ॥

उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ इयक्षते ॥ १ ॥

उप । अस्मै । गायत । नरः । पवमानाय । इन्दवे । अभि । देवान् । इयक्षते ॥ १ ॥

हे vनरः नेतार ऋत्विजः[6] यज्ञस्य vदेवान् इन्द्रादीन् vअभि vइयक्षते आभिमुख्येन यष्टुमिच्छते[7] vपवमानाय क्षरते vअस्मै अभिषूयमाणाय vइन्दवे सोमाय vउप vगायत उपगानं कुरुत ॥

अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु ॥ २ ॥

अभि । ते । मधुना । पयः । अथर्वाणः । अशिश्रयुः । देवम् । देवाय । देवऽयु ॥ २ ॥

हे सोम vते तव vदेवं देवनशीलं vदेवयुं देवयुं देवकामं रसं vदेवाय देवनशीलायेन्द्राय vमधुना vपयः गव्येन पयसा vअथर्वाणः ऋषयः vअभि vअशिश्रयुः अभ्यश्रीणन् । समस्कुर्वन्नित्यर्थः ॥

स नः पवस्व शं गवे शं जनाय शमर्वते । शं राजन्नोषधीभ्यः ॥ ३ ॥

सः । नः । पवस्व । शम् । गवे । शम । जनाय । शम् । अर्वते । शम् । राजन् । ओषधीभ्यः ॥ ३ ॥

हे vराजन् दीप्यमान सोम vसः प्रसिद्धस्त्वं vनः अस्माकं vगवे vशं सुखं vपवस्व क्षर । vजनाय पुत्रादये च vशं पवस्व । vअर्वते अश्वाय च vशं पवस्व । vओषधीभ्यः च vशं पवस्व ॥

---

१. ग–अपत्यमपत्यभूतं । २. घ-त७– दीप्तस्य स्वर्गस्यात्मनः । ३. ग-घ-त–' निहितं ' नास्ति । ४. त-भ४–' अभि ' नास्ति । ५. ग–धर्मदुघावत्से उपनीयमाने; त-सु–धर्मदुघोवत्सो पवनीयमाने; भ१.२.३–धर्मदुघोवत्से पनीयमाने; भ४–धर्मदुघोवत्से पवनीयमाने । ६. ग-त-भ–'ऋत्विजः' नास्ति । ७. त-भ–°मिच्छति ।

बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे । सोमाय गाथमर्चत ॥ ४ ॥

बभ्रवे । नु । स्वऽतवसे । अरुणाय । दिविऽस्पृशे । सोमाय । गाथम् । अर्चत ॥ ४ ॥

हे स्तोतारः ᵛबभ्रवे बभ्रुवर्णाय ᵛस्वतवसे स्वबलाय ᵛअरुणाय कदाचिदरुणवर्णाय ᵛदिवि-स्पृशे दिवं स्पृशते ᵛसोमाय ᵛनु[1] क्षिप्रं[1] ᵛगाथं स्तुतिरूपां वाचम् ᵛअर्चत । उच्चारयतेत्यर्थः ॥

हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन । मधावा धावता मधु ॥ ५ ॥

हस्तऽच्युतेभिः । अद्रिऽभिः । सुतम् । सोमम् । पुनीतन । मधौ । आ । धावत । मधु ॥५॥

हे ऋत्विजः ᵛहस्तच्युतेभिः हस्तप्रच्युतैः ᵛअद्रिभिः अभिषवग्रावभिः ᵛसुतम् अभिषुतं ᵛसोमं ᵛपुनीतन पवित्रे पावयत । अपि च ᵛमधौ मदकरे सोमे ᵛमधु गव्यं पयः ᵛआ ᵛधावत प्रक्षिपत ॥ ॥३६॥

नमसेदुप सीदत दध्नेदभि श्रीणीतन । इन्दुमिन्द्रे दधातन ॥ ६ ॥

नमसा । इत् । उप । सीदत । दध्ना । इत् । अभि । श्रीणीतन । इन्दुम् । इन्द्रे । दधातन ॥ ६ ॥

हे ऋत्विजः ᵛनमसेत् नमस्कारेणैव ᵛउप ᵛसीदत सोममुपगच्छत । ᵛदध्नेत् दध्नैव ᵛअभि ᵛश्रीणीतन अभिश्रीणीत च । ᵛइन्द्रे ᵛइन्दुं सोमं ᵛदधातन धत्त च ॥

अमित्रहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो अनुकामकृत् ॥ ७ ॥

अमित्रऽहा । विऽचर्षणिः । पवस्व । सोम । शम् । गवे । देवेभ्यः । अनुकामऽकृत् ॥७॥

हे ᵛसोम ᵛअमित्रहा अमित्राणां हन्ता ᵛविचर्षणिः विद्रष्टा ᵛदेवेभ्यः ᵛअनुकामकृत् अभीष्टस्य कर्ता त्वं ᵛगवे अस्माकं गवे ᵛशं सुखं ᵛपवस्व क्षर ॥

इन्द्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥ ८ ॥

इन्द्राय । सोम । पातवे । मदाय । परि । सिच्यसे । मनःऽचित् । मनसः । पतिः ॥ ८ ॥

हे ᵛसोम ᵛमनश्चित् मनसो ᵛज्ञाता ᵛमनसस्पतिः ईश्वरस्त्वम् ᵛइन्द्राय इन्द्रस्य ᵛपातवे पानाय ᵛमदाय च ᵛपरि ᵛषिच्यसे परितः पात्रेषु सिच्यसे ॥

पवमान सुवीर्यं रयिं सोम रिरीहि नः । इन्दविन्द्रेण नो युजा ॥ ९ ॥

पवमान । सुऽवीर्यम् । रयिम् । सोम । रिरीहि । नः । इन्दो इति । इन्द्रेण । नः । युजा ॥९॥

हे ᵛइन्दो क्षियमाण ᵛपवमान ᵛसोम त्वं ᵛसुवीर्यं शोभनवीर्योपेतं ᵛरयिं धनं ᵛनः अस्माकं संबन्धिना ᵛइन्द्रेण ᵛयुजा सहायेन ᵛनः अस्मभ्यं ᵛरिरीहि देहि ॥ ॥ ३७ ॥

'सोमा असुग्रम्' इति नवर्चं द्वादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'सोमा असुग्रम्' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

सोमा असुग्रमिन्दवः सुता ऋतस्य सादने । इन्द्राय मधुमत्तमाः ॥ १ ॥

सोमाः । असुग्रम् । इन्दवः । सुताः । ऋतस्य । सदने । इन्द्राय । मधुमत्ऽतमाः ॥ १ ॥

---

१. ग-त-भ–'नु क्षिप्रं' नास्ति ।

vसुताः अभिषुताः vमधुमत्तमाः अतिशयेन मधुमन्तः[1] vइन्दवः vसोमाः vऋतस्य यज्ञस्य vसादने गृहे[2] vइन्द्राय इन्द्रार्थम् vअसृग्रं सृज्यन्ते ॥

अभि विप्रा अनूषत गावो वत्सं न मातरः । इन्द्रं सोमस्य पीतये ॥ २ ॥

अभि । विप्राः । अनूषत । गावः । वत्सम् । न । मातरः । इन्द्रम् । सोमस्य । पीतये ॥२॥

vविप्राः मेधाविनः vसोमस्य vपीतये पानाय vइन्द्रं vमातरः जनयित्र्यः vगावः vवत्सं vन यथा वत्सं प्रति तद्वत् vअभि vअनूषत अभिशब्दयन्ति ॥

मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् । सोमो गौरी अधि श्रितः ॥ ३ ॥

मदऽच्युत् । क्षेति । सदने । सिन्धोः । ऊर्मा । विपःऽचित् ।
सोमः । गौरी इति । अधि । श्रितः ॥ ३ ॥

vमदच्युत् मदकरस्य रसस्य च्यावयिता सोमः vसादने[1] । संहितायां दीर्घश्छान्दसः । स्थाने vक्षेति निवसति । एतदेव विवृणोति । vसिन्धोः नद्याः vऊर्मा ऊर्मौ तरङ्गे । वसतीवरीष्वित्यर्थः । vविपश्चित् विद्वान् vसोमः vगौरी vअधि गौर्यामधि । अधीति सप्तम्यर्थानुवादः । माध्यमिकायां वाचि । ' गौरी गान्धर्वी ' इति वाङ्नामसु पाठात् । vश्रितः निवसति ॥

दिवो नाभा विचक्षणोऽव्यो वारे महीयते । सोमो यः सुक्रतुः कविः ॥ ४ ॥

दिवः । नाभा । विऽचक्षणः । अव्यः । वारे । महीयते । सोमः । यः । सुऽक्रतुः । कविः ॥४॥

vयः vसुक्रतुः सुप्रज्ञः vकविः क्रान्तकर्मा vविचक्षणः विद्रष्टा सः vसोमः vदिवः अन्तरिक्षस्य vनाभा नाभौ नाभिभूते vअव्यः अवेः vवारे वाले vमहीयते पूज्यते । पूयमानः स्तूयत इत्यर्थः ॥

यः सोमः कलशेष्वाँ अन्तः पवित्र आहितः । तमिन्दुः परि षस्वजे ॥ ५ ॥

यः । सोमः । कलशेषु । आ । अन्तरिति । पवित्रे । आऽहितः । तम् । इन्दुः । परि । सस्वजे ॥५॥

vयः vसोमः vकलशेषु कुम्भेषु vआ आस्ते यश्च vपवित्र पवित्रस्य vअन्तः मध्ये vआहितः निहितः vतं स्वांशभूतं सोमम् vइन्दुः[4] सोमो देवः vपरि vषस्वजे प्रविशति ॥ ॥ ३८ ॥

प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन्कोशं मधुश्चुतम् ॥ ६ ॥

प्र । वाचम् । इन्दुः । इष्यति । समुद्रस्य । अधि । विष्टपि । जिन्वन् । कोशम् । मधुऽश्चुतम् ॥६॥

vइन्दुः सोमः vमधुश्चुतं मधुनश्च्यावकं vकोशं मेघम् । ' असुरः कोशः ' इति मेघनामसु पाठात् । vजिन्वन् प्रीणयन् vसमुद्रस्य अन्तरिक्षस्य vअधि vविष्टपि विष्टब्धे स्थाने vवाचं vप्र vइष्यति प्रेरयति । पवित्रे पूयमानः शब्दं करोतीत्यर्थः ॥

नित्यस्तोत्रो वनस्पतिर्धीनामन्तः सबर्दुघः । हिन्वानो मानुषा युगा ॥ ७ ॥

नित्यऽस्तोत्रः । वनस्पतिः । धीनाम् । अन्तरिति । सबःऽदुघः । हिन्वानः । मानुषा । युगा ॥७॥

---

१. ग-मधुराः । २. ग-त-भ४-सदने; भ१.२.३-' गृहे ' नास्ति । ३. ग-त-भ-सदने; घ-मदन । ४. त-म-ईदुं ।

vनित्यस्तोत्रः संततस्तोत्रः vसवर्दुघः अमृतस्य दोग्धा vवनस्पतिः वनानां पालयिता सोमः vमानुषा मानुषाणि vयुगा युगानि अहीनैकाहात्मकानि vहिन्वानः प्रीणयन् vधीनां कर्मणाम् vअन्तः मध्ये निवसतीत्यर्थः ॥

अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ॥ ८ ॥

अभि । प्रिया । दिवः । पदा । सोमः । हिन्वानः । अर्षति । विप्रस्य । धारया । कविः ॥ ८ ॥

vकविः क्रान्तकर्मा vसोमः vदिवः[1] अन्तरिक्षात् vहिन्वानः प्रेर्यमाणः vविप्रस्य मेधाविनः स्वस्य vधारया vप्रिया प्रियाणि vपदा पदानि स्थानानि vअभि vअर्षति अभिगच्छति ॥

आ पवमान धारय रयिं सहस्रवर्चसम् । अस्मे इन्दो स्वाभुवम् ॥ ९ ॥

आ । पवमान । धारय । रयिम् । सहस्रऽवर्चसम् । अस्मे इति । इन्दो इति । सुऽआभुवम् ॥ ९ ॥

हे vपवमान vइन्दो सोम त्वं vसहस्रवर्चसं बहुदीप्तिं vस्वाभुवं शोभनभवनं vरयिं धनम् vअस्मे अस्मासु vधारय[2] । प्रक्षिपेत्यर्थः ॥ ॥ ३९ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थ-
प्रकाश ऋक्संहिताभाष्ये षष्ठाष्टके सप्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
षष्ठस्य सप्तमोऽध्यायः संग्रहात्संप्रदर्शितः ।
अथाष्टमः सुमतिना संगमेन[3] प्रदर्श्यते ॥

तत्र 'सोमः पुनानः' इति नवर्चं त्रयोदशं सूक्तम् । असितो देवलो वर्षिः । सोमो देवता । 'पवमानगुणः सोमो विज्ञेयः काश्यपावृषी । इति विद्यादनुक्रमेऽपि लाघवाद्यो दलहच्युतात्' ॥ 'सोमः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिन्द्रस्य निष्कृतम् ॥ १ ॥

सोमः । पुनानः । अर्षति । सहस्रऽधारः । अतिऽअविः । वायोः । इन्द्रस्य । निःऽकृतम् ॥ १ ॥

अयं vपुनानः पावकः vसोमः vअर्षति गच्छति । कीदृशोऽयं पवमानः । vसहस्रधारः अपरिमितधारः vअत्यविः । अत्राविशब्देन तद्लोमान्युच्यन्ते । अविलोमभिर्निष्पादितं दशापवित्रमित्यर्थः । तदतिक्रम्य गच्छतीत्यत्यविः । किमर्थम् । vवायोरिन्द्रस्य च पानायेति शेषः । किं प्रति । vनिष्कृतम् । निरित्येष समित्येतस्मिन्नर्थे । संस्कृतं पात्रं प्रति ॥

---

१. त-भ४–देवः । २. ब–आधारय । ३. ग–संप्रदेण ।

पवमानमवस्यवो विप्रमभि प्र गायत । सुष्वाणं देववीतये ॥ २ ॥

पवमानम् । अवस्यवः । विप्रम् । अभि । प्र । गायत । सुस्वानम् । देवऽवीतये ॥ २ ॥

हे [v]अवस्यवः रक्षणकामा उद्गात्रादयः यूयं [v]पवमानं शोधकं [v]विप्रं विशेषेण देवानां प्रीणयितारं विप्रवच्छुद्धं वा । अथवा विप्र इति मेधाविनाम । मेधाविनम् । [v]देववीतये देवपानाय [v]सुष्वाणं सूयमानम् [v]अभि [v]प्र [v]गायत आभिमुख्येन प्रकर्षेण स्तुत ॥

पवन्ते वाजसातये सोमाः सहस्रपाजसः । गृणाना देववीतये ॥ ३ ॥

पवन्ते । वाजऽसातये । सोमाः । सहस्रऽपाजसः । गृणानाः । देवऽवीतये ॥ ३ ॥

[v]पवन्ते क्षरन्ति [v]सोमाः । किमर्थम् । [v]वाजसातये अन्नस्य लाभाय । कीदृशाः । [v]सहस्रपाजसः बहुबलाः[1] । पातॄणां बलप्रदा इत्यर्थः । [v]गृणानाः । कर्मणि कर्तृप्रत्ययः । स्तूयमानाः । पुनः किमर्थम् । [v]देववीतये । देवानां वीतिर्गतिः प्राप्तिर्भक्षणं वा यस्मिन् स देववीतिर्यज्ञः[2] । तदर्थम् । यज्ञसिद्धिः साक्षात् प्रयोजनं तद्द्वारा अन्नलाभ इत्यर्थः ॥

उत नो वाजसातये पवस्व बृहतीरिषः । द्युमदिन्दो सुवीर्यम् ॥ ४ ॥

उत । नः । वाजऽसातये । पवस्व । बृहतीः । इषः । द्युऽमत् । इन्दो इति । सुऽवीर्यम् ॥४॥

[v]उत अपि च [v]नः अस्माकं [v]वाजसातये अन्नलाभाय हे [v]इन्दो सोम [v]बृहतीरिषः महतीः रसधाराः [v]द्युमत् दीप्तिमत् [v]सुवीर्यं शोभनसामर्थ्यं च [v]पवस्व क्षर । शोभनसामर्थ्योपेता धाराः पवस्वेत्यर्थः । अथवा । वाजसातये संग्रामाय बृहतीरिषो द्युमत् सुवीर्यं संपादयितुं पवस्वेति योज्यम् ॥

ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ॥ ५ ॥

ते । नः । सहस्रिणम् । रयिम् । पवन्ताम् । आ । सुऽवीर्यम् । सुवानाः । देवासः । इन्दवः ॥५॥

[v]ते [v]इन्दवः सोमाः [v]नः अस्माकं [v]सहस्रिणं सहस्रसंख्योपेतं [v]रयिं धनं [v]सुवीर्यं च[3] [v]आ [v]पवन्ताम् । कीदृशास्ते । [v]सुवानाः सूयमानाः [v]देवासः द्योतनादिगुणयुक्ताः[4] ॥ ॥ १ ॥

अत्या हियाना न हेतृभिरसृग्रं वाजसातये । वि वारमव्यमाशवः ॥ ६ ॥

अत्याः । हियानाः । न । हेतृऽभिः । असृग्रम् । वाजऽसातये । वि । वारम् । अव्यम् । आशवः ॥६॥

[v]वाजसातये संग्रामाय [v]हियानाः प्रेर्यमाणाः [v]अत्याः [v]न अश्वा इव ते यथा प्रेरकैः प्रेर्यमाणाः संग्रामाय शीघ्रं धावन्ति तद्वत् [v]हेतृभिः प्रेरकैः प्रेर्यमाणाः [v]आशवः शीघ्रगामिनः सोमाः वाजसातये[1] अन्नलाभाय[1] [v]अव्यं [v]वारं दशापवित्रं [v]वि [v]असृग्रं व्यतिसृज्यन्ते[5] ॥

वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः । दधन्विरे गभस्त्योः ॥ ७ ॥

वाश्राः । अर्षन्ति । इन्दवः । अभि । वत्सम् । न । धेनवः । दधन्विरे । गभस्त्योः ॥ ७ ॥

---

१. त-म४–बहुलाः । २. त-म४–देवतातिर्यज्ञः । ३. ग-त-म४– वा । ४. ग-त-म१.२.४–°गुणकाः; म५–°गुणकराः । ५. म–' वाजसातये अन्नलाभाय ' नास्ति । ६. त१.२.६–व्यतिसृज्यंते किं प्रति अव्यं अविभवां वारं वालं दशापवित्रं प्रतीत्यर्थः; त३.५-म४–पुस्तकेषु ' व्यतिसृज्यते ' इत्यस्यानन्तरं कियांश्चिदवकाशो विद्यते; त७–व्यतिसृज्यंते किं प्रति अव्यं वारं वालां दशापवित्रं प्रतीत्यर्थः ।

[v]वाश्राः शब्दयन्तः [v]इन्दवः सोमाः [v]अभि [v]अर्षन्ति अभिगच्छन्ति पात्रं प्रति वाश्राः शब्दकारिण्यः [v]धेनवः [v]न । ता यथा शब्दयन्त्यः [v]वत्सं प्रत्यागच्छन्ति तद्वत् । त एव [v]गर्भस्थोः वाह्नोः [v]दधन्विरे प्रियन्ते च ॥

जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् । विश्वा अप द्विषो जहि ॥ ८ ॥

जुष्टः । इन्द्राय । मत्सरः । पवमान । कनिक्रदत । विश्वाः । अप । द्विषः । जहि ॥ ८ ॥

[v]इन्द्राय [v]जुष्टः प्रियः[1] पर्याप्तः [v]मत्सरः सोमो भवतीति शेषः । 'मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः' (निरु. २.५) इति निरुक्तम् । हे [v]पवमान त्वं [v]कनिक्रदत् शब्दयन् [v]विश्वाः [v]द्विषः सर्वानस्माकं द्वेष्टॄन् [v]अप [v]जहि ॥

अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः । योनावृतस्य सीदत ॥ ९ ॥

अपऽघ्नन्तः । अराव्णः । पवमानाः । स्वःऽदृशः । योनौ । ऋतस्य । सीदत ॥ ९ ॥

हे [v]पवमानाः [v]अराव्णः अदानानयजमानान् [v]अपघ्नन्तः हिंसन्तः [v]स्वर्दृशः सर्वत्र[2] द्रष्टारश्च यूयम् [v]ऋतस्य [v]योनौ यज्ञस्य स्थाने [v]सीदत । अथवा । सोमपानार्थमुत्कलक्षणा देवा ऋतस्य योनौ सीदतेति योज्यम् ॥ ॥ २ ॥

'परि प्र' इत्यष्टर्चं चतुर्दशं सूक्तम् । ऋष्यादि पूर्ववत् । 'परि प्राष्टौ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः । कारं बिभ्रत्पुरुस्पृहम् ॥ १ ॥

परि । प्र । असिस्यदत् । कविः । सिन्धोः । ऊर्मौ । अधि । श्रितः ।
कारम् । बिभ्रत् । पुरुऽस्पृहम् ॥ १ ॥

[v]परि [v]प्रासिष्यदत् परिप्रस्यन्दते [v]कविः मेधावी सोमः[3] [v]सिन्धोरूर्मौ तरङ्गे[4] वसतीवर्युदकसे[4] [v]अधि [v]श्रितः आश्रितः । [v]पुरुस्पृहं बहुभिः स्पृहणीयं [v]कारं शब्दं [v]बिभ्रत् धारयन् परिस्यन्दत इति संबन्धः ॥

गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः । परिष्कृण्वन्ति धर्णसिम् ॥ २ ॥

गिरा । यदि । सऽबन्धवः । पञ्च । व्रातः । अपस्यवः । परिऽकृण्वन्ति । धर्णसिम् ॥ २ ॥

[v]सबन्धवः समानबन्धनाः [v]पञ्च [v]व्राताः पञ्च जना मनुष्याः[5] यजमानाः[5] [v]अपस्यवः कर्मेच्छवः यद्यदा ईमेनं [v]धर्णसिं धारकं सोमं [v]गिरा[6] स्तुत्या[6] [v]परिष्कृण्वन्ति अलंकुर्वन्ति । अस्योत्तरत्रान्वयः ॥

आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत । यदी गोभिर्वसायते ॥ ३ ॥

आत् । अस्य । शुष्मिणः । रसे । विश्वे । देवाः । अमत्सत । यदि । गोभिः । वसायते ॥ ३ ॥

---

१. ग-त-भ-मु-'प्रियः' नास्ति । २. भ१.३-सर्व । ३. ग-त-भ-'सोमः' नास्ति । ४. ग-त-भ-'तरंगे...°रसे' नास्ति । ५. ग-त-भ-'मनुष्या यजमानाः' नास्ति । ६. ग-त-भ-'गिरा स्तुत्या' नास्ति ।

vआत् परिष्करणानन्तरमेव vशुष्मिणः बलवतः vअस्य सोमस्य vरसे vविश्वे vदेवाः vअमत्सत अमाद्यन्त[1]। vयदि यदा vगोभिः गोविकारैः। विकारे प्रकृतिशब्दः। क्षीरादिभिः vवसायते आच्छाद्यते ॥

निरिणानो वि धावति जहच्छर्याणि तान्वा। अत्रा सं जिग्रते युजा ॥ ४ ॥

निऽरिणानः। वि। धावति। जहत्। शर्याणि। तान्वा। अत्र। सम्। जिग्रते। युजा ॥४॥

अयं सोमः vनिरिणानः दशापवित्रादधो गच्छन् vवि vधावति विविधं धावति - - - - यदा vतान्वा। तनु दशापवित्रवस्त्रम्। तत्संबन्धीनि vशर्याणि द्वाराणि vजहत्[2] अधः सरति। vअत्र अस्मिन् यज्ञे vयुजा सखिभूतेनेन्द्रेण सह vसं vजिग्रते संगतो भवति। वस्त्रसुषिराद्विनिर्गत्य दशापवित्रादधः सन्[3] पात्रं विविधं गच्छन् होमद्वारेणेन्द्रेण संगतो भवतीत्यर्थः ॥

नृभिर्यो विवस्वतः शुभ्रो न मामृजे युवा। गाः कृण्वानो न निर्णिजम् ॥ ५ ॥

नृभीभिः। यः। विवस्वतः। शुभ्रः। न। ममृजे। युवा। गाः। कृण्वानः। न। निःऽनिर्जम् ॥५॥

vयः सोमः vविवस्वतः परिचरणवतो यजमानस्य vनृभीभिः पौत्रस्थानीयाभिः। तस्य हस्तः पुत्रोऽङ्गुलयः पौत्रस्थानीया इत्यभिप्रायः। vमामृजे[4] मृज्यते vशुभ्रो vन दीप्तोऽश्वः vयुवा इव। यथाप्रवृद्धोऽश्वो[5] मृज्यते स्वपरिचारकैस्तद्वत् स एव युवा मिश्रणशीलः सोमः vनिर्णिजम्। 'निर्णिक्' इति रूपनाम। स्वकीयं रूपं vगाः vन[6] vकृण्वानः गोविकारांश्च कुर्वाणो भवतीति शेषः ॥ ॥ ३ ॥

अति श्रिती तिरश्चता गव्या जिगात्यण्व्या। वग्नुमियर्ति यं विदे ॥ ६ ॥

अति। श्रिती। तिरश्चता। गव्या। जिगाति। अण्व्या। वग्नुम्। इयर्ति। यम्। विदे ॥ ६ ॥

vअण्व्या अङ्गुल्याभिधूयमाणः सोमः vगव्या गव्यानि vश्रिती श्रित्यै अयनार्थं vतिरश्चता तिरश्चीनम् vअति vजिगाति। अंशुमतिक्रम्य गच्छति। तथाङ्गुल्याभिधूयमाणः vवग्नुं शब्दम् vइयर्ति प्रेरयति[7] ॥

अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम्। पृष्ठा गृभ्णत वाजिनः ॥ ७ ॥

अभि। क्षिपः। सम्। अग्मत। मर्जयन्तीः। इषः। पतिम्। पृष्ठा। गृभ्णत। वाजिनः ॥ ७ ॥

vक्षिपः अङ्गुलयः vमर्जयन्तीः[8] अभिसृशन्त्यः vइषस्पतिम् अन्नानां स्वामिनं सोमम् vअभि vसमग्मत अभिसंगच्छन्ते। संगत्य च vवाजिनः बलवतः सोमस्य vपृष्ठा पृष्ठानि vगृभ्णत गृह्णन्त्यभिषवाङ्गुलयः ॥

परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा। वसूनि याह्यस्मयुः ॥ ८ ॥

परि। दिव्यानि। मर्मृशत्। विश्वानि। सोम। पार्थिवा। वसूनि। याहि। अस्मऽयुः ॥८॥

---

१. ग-माद्यंति; भ१.२.३-अमाद्यं। २. त-भ-' जहत् ' नास्ति। ३. ग-भ१.२.३-सु-सरन्; त-भ४-सन्। ४. ग-ममृजे। ५. ग-यथातिप्रयत्नात् युवाश्वो। ६. ग-त-भ-' न ' नास्ति। ७. ग-प्रेरयति यं शब्दं जानामी; घ-प्रेरयति विदे जानते यजमानाय। ८. भ१-४-पुस्तकयोः ' मर्जयन्तीः ' इत्यस्यानन्तरं क्रियाखिदवकाशो विद्यते।

हे Vसोम Vदिव्यानि पार्थिवानि च Vविश्वानि[1] सर्वाणि Vवसूनि धनानि[1] Vपरि Vमर्मृशत् परिमृशन् परिगृह्णन् Vअस्मयुः अस्मान् कामयमानः Vयाहि आगच्छ। एवमभिषुण्वन्[2] ऋत्विक् संबोध्य ब्रूते ॥ ॥ ४ ॥

'एष धिया' इत्यष्टर्चं पञ्चदशं सूक्तम्। ऋष्यादयः पूर्ववत्। 'एष धिया' इत्यनुक्रान्तम्। गतो विनियोगः ॥

एष धिया यात्यण्व्या शूरो रथेभिराशुभिः। गच्छन्निन्द्रस्य निष्कृतम् ॥ १ ॥

एषः। धिया। याति। अण्व्या। शूरः। रथेभिः। आशुऽभिः।
गच्छन्। इन्द्रस्य। निःऽकृतम् ॥ १ ॥

Vएषः सोमः Vशूरः विक्रान्तः Vअण्व्या अङ्गुल्याभिषुतः Vधिया कर्मणा Vयाति गच्छति। कं देशं प्रति। उच्यते। Vइन्द्रस्य Vनिष्कृतं स्थानं दिवं प्रति Vरथेभिः रथैः Vआशुभिः शीघ्रगामिभिः Vगच्छन् इन्द्रेण रथेऽवस्थाप्य स्वस्थाननयनाय। अङ्गुल्याभिषूयमाणः सन् होमद्वाराग्निं निष्पीडनद्वारा[3] पात्रं वा गच्छतीत्यर्थः[3] ॥

एष पुरू धियायते बृहते देवतातये। यत्रामृतास आसते ॥ २ ॥

एषः। पुरु। धियाऽयते। बृहते। देवऽतातये। यत्र। अमृतासः। आसते ॥ २ ॥

Vएषः सोमः Vपुरु बहुलं Vधियायते धियं कर्मेच्छति। धीशब्दाद्यकारोपजनः। यद्वा। द्वितीयार्थे तृतीया छान्दसश्चालुक्। कस्मै। Vबृहते महते Vदेवतातये यज्ञाय। Vयत्र यस्मिन् यज्ञे Vअमृतासः अमृता देवाः Vआसते वसन्ति तदर्थम् ॥

एष हितो वि नीयतेऽन्तः शुभ्रावता पथा। यदी तुञ्जन्ति भूर्णयः ॥ ३ ॥

एषः। हितः। वि। नीयते। अन्तरिति। शुभ्रऽवता। पथा। यदि। तुञ्जन्ति। भूर्णयः ॥३॥

Vएषः सोमः Vहितः निहितः हविर्धाने Vवि Vनीयते तस्मात् स्थानादाहवनीयं प्रति। Vअन्तः तयोर्मध्यदेशे Vशुभ्रावता शोभावता Vपथा मार्गेण Vयदि यदा Vतुञ्जन्ति प्रयच्छन्ति देवेभ्यः Vभूर्णयः भरणशीला अध्वर्यवादयः। तदा वि नीयत इति समन्वयः ॥

एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा। नृम्णा दधान ओजसा ॥ ४ ॥

एषः। शृङ्गाणि। दोधुवत्। शिशीते। यूथ्यः। वृषा। नृम्णा। दधानः। ओजसा ॥ ४ ॥

Vएषः सोमः Vशृङ्गाणि शृङ्गवदुन्नतानंशूनभिषवकाले Vदोधुवत् धूनोति[4]। Vयूथ्यः यूथार्हो यूथपतिः Vवृषा वृषभो यथा Vशिशीते तीक्ष्णे शृङ्गे धूनोति[5] तद्वत्। कीदृश एषः। Vओजसा बलेन Vनृम्णा नृम्णानि धनानि Vदधानः अस्मदर्थं धारयन् ॥

१. ग-त३.४.५-भ४–वसूनि; त७–वसूनि धनानि विश्वानि सर्वाणि; भ१.२.३–विश्वानि वसूनि। २. ग–एवमभिषवानंतरं; भ१.३–एवमभिषुण्वन्। ३. ग–निपातनद्वारा च तज्जेवागच्छतीत्यर्थः; त–निष्पीडनद्वारा पात्रे वा गच्छतीत्यर्थः; भ१.३–वा पात्रं गच्छतीत्यर्थः; भ४–निष्पीडनद्वारा पात्रं गच्छतीत्यर्थः। ४. घ-त१.६.७-भ१.३–धुनोति। ५. घ-त७–धुनोति; त१.२.३.६-भ१.४–धूनेति।

एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः । पतिः सिन्धूनां भवन् ॥ ५ ॥

एषः । रुक्मिऽभिः । ईयते । वाजी । शुभ्रेभिः । अंशुऽभिः । पतिः । सिन्धूनाम् । भवन् ॥ ५ ॥

vएषः सोमः vरुक्मिभिः अध्वर्वादिभिः सह vईयते गच्छति । कीदृश एषः । vवाजी वेजनवान्[1] vशुभ्रेभिः शुभ्रैर्दीप्तैः vअंशुभिः विशिष्टः । अथवा रुक्मिभिरित्येतदप्यंशुविशेषणम् । vसिन्धूनां स्यन्दमानानां रसानां vपतिः vभवन् य[2] ईयत इति ॥

एष वसूनि पिब्दना परुषा ययिवाँ अति । अव शादेषु गच्छति ॥ ६ ॥

एषः । वसूनि । पिब्दना । परुषा । ययिऽवान् । अति । अव । शादेषु । गच्छति ॥ ६ ॥

vएषः सोमः vवसूनि आच्छादकानि vपिब्दना पिब्दनानि[3] पीडितानि रक्षांसि vपरुषा पर्वणा vअति अतिक्रम्य vययिवान् गच्छन् vशादेषु शातनीयेषु रक्षःसु vअव vगच्छति ॥

एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः । प्रचक्राणं महीरिषः ॥ ७ ॥

एतम् । मृजन्ति । मर्ज्यम् । उप । द्रोणेषु । आयवः । प्रऽचक्राणम् । महीः । इषः ॥ ७ ॥

vआयवः मनुष्या ऋत्विजः vएतं सोमं vमर्ज्यं मार्जनीयम् vउप vमृजन्ति । निष्पीडयन्तीत्यर्थः । कुत्र । vद्रोणेषु द्रोणकलशेषु । कीदृशम् । vमहीरिषः महान्त्यन्नानि vप्रचक्राणं कुर्वाणम् । प्रभूतरसस्राविणमित्यर्थः ॥

आवस्तोत्रे गाणगारिमतेनाभिरूपकरणे मृज्यमाने सोमे 'एतमु त्यम्' इत्येषा । सूत्रितं च– 'एतमु त्यं दश क्षिपो मृज्यमानः सुहस्त्या' (आश्व. श्रौ. ५ . १२) इति ॥

एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः । स्वायुधं मदिन्तमम् ॥ ८ ॥

एतम् । ऊँ इति । त्यम् । दश । क्षिपः । मृजन्ति । सप्त । धीतयः ।
सुऽआयुधम् । मदिन्ऽतमम् ॥ ८ ॥

vत्यं तम् vएतमु एतमेव सोमं vदश vक्षिपः दशाङ्गुलयः vमृजन्ति परिचरन्ति । vसप्त vधीतयः सप्त ऋत्विजश्च । ऋत्विजोऽङ्गुलिभिर्मृजन्तीत्यर्थः । कीदृशमेतम्[4] । vस्वायुधं शोभनायुधं vमदिन्तमं मादयितृतमम् । रक्षोहननसामर्थ्यप्रदर्शनाय स्वायुधशब्दश्रवणम् ॥ ॥ ५ ॥

' प्र ते सोतारः' इत्यष्टर्चं षोडशं सूक्तम् । ऋष्यादयः पूर्ववत् । ' प्र ते ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र ते सोतार ओण्योः३ रसं मदाय घृष्वये । सर्गो न तक्त्येतशः ॥ १ ॥

प्र । ते । सोतारः । ओण्योः । रसम् । मदाय । घृष्वये । सर्गः । न । तक्ति । एतशः ॥ १ ॥

हे सोम vते तव रसं vसोतारः सोमाभिषवकर्तारः vओण्योः vरसम् । लुप्तोपममेतत् । द्यावापृथिव्यो रसमुदकमिव । अथवौण्योर्द्यावापृथिव्योर्मध्ये तयोः संबन्धिनं वा रसम् । vप्र स्रावयन्तीति

१. ग–वाजनवान् ; घ–वेगवान् । २. ग–अर्य; घ–र्यं । ३. ग-त१.२.३.६.७-भ२.३–' पिब्दनानि ' नास्ति । ४. ग-त-भ४–कीदृशमेनं ।

शेषः । किमर्थम् । vधृष्वये शत्रुधर्षणशीलाय[1] vमदाय इन्द्रस्य मदाय । अभिषवजनितः सोमः vसर्गः सृष्टः vएतशः vन अश्व इव vतस्कि गच्छति पात्रं प्रति ॥

कृत्वा दक्षस्य रथ्यमपो वसानमन्धसा । गोषामण्वेषु सश्चिम ॥ २ ॥

कृत्वा । दक्षस्य । रथ्यम् । अपः । वसानम् । अन्धसा । गोऽसाम् । अण्वेषु । सश्चिम ॥२॥

वयमभिषोतारः vदक्षस्य बलस्य vरथ्यं नेतारम् vअपः उदकानि रसान् vवसानम् आच्छादयन्तम् vअन्धसा श्रयणान्नेन सहितं vगोषां गवां सोतारमेवमुक्तलक्षणं[2] सोमं vकृत्वा कर्मणा vअण्वेषु अङ्गुलीषु vसश्चिम संयोजयामः[3] ॥

अनंशमप्सु दुष्टरं सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे ॥ ३ ॥

अनंशम् । अप्ऽसु । दुस्तरम् । सोमम् । पवित्रे । आ । सृज । पुनीहि । इन्द्राय । पातवे ॥३॥

vअनंशं शत्रुभिरनाशम् vअप्सु[4] आन्तरिक्ष्यासु । वर्तमानमिति शेषः । vदुष्टरम् अन्यैरनभिभाव्यम् । न हि सोमं कश्चिदप्यतितरति । ईदृशं vसोमं vपवित्रे दशापवित्रे vआ vसृज प्रक्षिप हे अध्वर्यो । तत्रोच्यते[5] । vइन्द्राय इन्द्रस्य vपातवे पातुं vपुनीहि ॥

प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति । क्रत्वा सधस्थमासदत् ॥ ४ ॥

प्र । पुनानस्य । चेतसा । सोमः । पवित्रे । अर्षति । क्रत्वा । सधऽस्थम् । आ । असदत् ॥४॥

vचेतसा स्तुत्या vपुनानस्य पूयमानस्यांशीभूतः vसोमः vपवित्रे दशापवित्रे vअर्षति गच्छति[6] । अथ पश्चात् vक्रत्वा कर्मणा प्रज्ञानेन वा vसधस्थं सहस्थानं द्रोणकलशे[7] vआसदत् आसीदति ॥

प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत । महे भराय कारिणः ॥ ५ ॥

प्र । त्वा । नमःऽभिः । इन्दवः । इन्द्रे । सोमाः । असृक्षत । महे । भराय । कारिणः ॥ ५ ॥

हे vइन्द्र vत्वा त्वां vनमोभिः नमस्कारोपलक्षितैः स्तोत्रैरथवान्नैः सह vइन्दवः vसोमाः vप्र[8] vअसृक्षत[8] प्राप्नुवन्ति । किमर्थम् । vमहे महते vभराय संग्रामाय । कीदृशाः । vकारिणः बलकरणशीलाः ॥

पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥ ६ ॥

पुनानः । रूपे । अव्यये । विश्वाः । अर्षन् । अभि । श्रियः । शूरः । न । गोषु । तिष्ठति ॥६॥

vअव्यये अविमये vरूपे रूप्यमाणे वस्त्रे vपुनानः पूयमानः vविश्वाः सर्वाः vश्रियः शोभाः vअभि vअर्षन् अभिगच्छन् vगोषु निमित्तासु vशूरो vन शूर इव स यथा संग्रामे तिष्ठति तद्वदसौ vतिष्ठति पात्रे ॥

१. घ–घर्षणशीलाय; भ–शत्रूणां घर्षणशीलाय । २. ग–दातारमेव°। ३. त–संयोजमानः । ४. त-भ–अप्सु अप्सु । ५. ग–तदेवोच्यते; त-भ४–तवोच्यते । ६. भ१.२–प्रगच्छति । ७. ग–द्रोणकलशं । ८. घ–असृक्षत; त-भ–प्रासृजन् ।

दिवो न सानु पिप्युषी धारा सुतस्य वेधसः । वृथा पवित्रे अर्षति ॥ ७ ॥

दिवः । न । सानु । पिप्युषी । धारा । सुतस्य । वेधसः । वृथा । पवित्रे । अर्षति ॥ ७ ॥

vदिवो vन द्युलोकादन्तरिक्षादिव vसानु समुच्छ्रितमुदकं तद्यथाधो निपतति तद्वत् vवेधसः विधातुर्बलस्य कर्तुः vसुतस्य अभिषुतस्य सोमस्य vपिप्युषी आप्याययन्ती vधारा vवृथा अनायासेनैव vपवित्रे दशापवित्रे vअर्षति गच्छति ॥

त्वं सोम विपश्चितं तनां पुनान आयुषु । अव्यो वारं वि धावसि ॥ ८ ॥

त्वम् । सोम । विपः ऽचितम् । तना । पुनानः । आयुषु । अव्यः । वारम् । वि । धावसि ॥ ८ ॥

हे vसोम vत्वं vविपश्चितं[1] स्तोतारम् vआयुषु मनुष्येषु[2] मध्ये रक्षसि । अथवा । तृतीयार्थे द्वितीया । विपश्चिताध्वर्युणा । vतना वस्त्रेण vपुनानः पूयमानः । अथवा । विपश्चितमिन्द्रं प्रीणयितुं तना पुनानः सन् । vअव्यो vवारम् अवेर्वालं vवि vधावसि विविधं गच्छसि ॥ ॥ ६ ॥

'प्र निम्नेनेव' इत्यष्टर्चं सप्तदशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'प्र निम्नेनेव' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः । सोमा असृग्रमाशवः ॥ १ ॥

प्र । निम्नेन ऽइव । सिन्धवः । घ्नन्तः । वृत्राणि । भूर्णयः । सोमाः । असृग्रम् । आशवः ॥ १ ॥

vनिम्नेन प्रवणेन देशेन vसिन्धवः नद्यः vइव तथा vवृत्राणि शत्रून् vघ्नन्तः vभूर्णयः क्षिप्रगमनाः vआशवः व्याप्ताः vसोमाः vप्र vअसृग्रं प्रगच्छन्ति द्रोणकलशं प्रति ॥

अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव । इन्द्रं सोमासो अक्षरन् ॥ २ ॥

अभि । सुवानासः । इन्दवः । वृष्टयः । पृथिवीम् ऽइव । इन्द्रम् । सोमासः । अक्षरन् ॥ २ ॥

vसुवानासः सूयमानाः vइन्दवः द्रवरूपाः vसोमासः सोमाः vइन्द्रं प्रीणयितुम् vअभि vअक्षरन् । किमिव । vवृष्टयः vपृथिवीमिव ॥

अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥ ३ ॥

अतिऽऊर्मिः । मत्सरः । मदः । सोमः । पवित्रे । अर्षति । विऽघ्नन् । रक्षांसि । देवऽयुः ॥ ३ ॥

vअत्यूर्मिः । अतिक्रान्ता ऊर्मयो यस्मात् सोऽत्यूर्मिः । अतिप्रवृद्ध इत्यर्थः । vमत्सरः मादनशीलः vमदः मदात्मकः vसोमः vपवित्रे vअर्षति गच्छति । किं कुर्वन् । vरक्षांसि vविघ्नन् घातयन् vदेवयुः देवान् कामयमानोऽर्षतीति संबन्धः ॥

पवित्रेष्टयां द्वितीयाज्यभागस्य 'आ कलशेषु' इति याज्या । सूत्रितं च—'आ कलशेषु धावति पवित्रे परिषिच्यत इत्येका[3]' (आश्व. श्रौ. ५. १२) इति[3] ॥

आ कलशेषु धावति पवित्रे परि षिच्यते । उक्थैर्यज्ञेषु वर्धते ॥ ४ ॥

आ । कलशेषु । धावति । पवित्रे । परि । सिच्यते । उक्थैः । यज्ञेषु । वर्धते ॥ ४ ॥

---

१. म–विपश्चितं स्तोतृनामैतत् । २. म–इतरेषु मनुष्येषु । ३. त-म-मु–इत्येके ।

अयं सोमः vकलशेषु vआ vधावति। तदर्थं vपवित्रे vपरि vषिच्यते अध्वर्युभिः। vउक्थैः स्तोत्रैः vयज्ञेषु निमित्तेषु vवर्धते प्रवृद्धो भवति ॥

अति॒ ह्री सोम रोच॒ना रोह॒न्न भ्राज॑से दि॒वम्। इ॒ष्णन्त्सूर्यं॒ न चो॑दयः ॥ ५ ॥

अति। ह्री। सोम। रोचना। रोहन्। न। भ्राजसे। दिवम्। इष्णन्। सूर्यम्। न। चोदयः ॥५॥

हे vसोम त्वं vह्री vरोचना[1] ह्रीणि[1] रोचनानि त्रीँल्लोकान् vअति अतिक्रम्य vरोहन् उपरिस्थं vदिवं द्युलोकं vभ्राजसे प्रकाशयसि। तथा vइष्णन् गच्छन् vसूर्यं vन सूर्यं च vचोदयः चोदयसि प्रेरयसि। नशब्दश्चार्थे ॥

अ॒भि विप्रा॑ अनूषत मू॒र्धन्य॒ज्ञस्य॑ का॒रवः॑। दधा॑ना॒श्चक्ष॑सि प्रि॒यम् ॥ ६ ॥

अभि। विप्राः। अनूषत। मूर्धन्। यज्ञस्य। कारवः। दधानाः। चक्षसि। प्रियम् ॥ ६ ॥

vअभि[2] vअनूषत[2] अभिष्टुवन्ति vविप्राः मेधाविनः स्तोतारः। कुत्र[3]। vयज्ञस्य vमूर्धन् मूर्धनि। शिरोवदुत्तमेऽभिषवदिवस इत्यर्थः। कीदृशास्ते। vकारवः कर्तारः परिचर्यायां यागानुष्ठातारो वा। vचक्षसि द्रष्टरि सोमे vप्रियं vदधानाः अभ्यनूषतेति समन्वयः ॥

तमु॒ त्वा वा॒जिनं॒ नरो॑ धी॒भिर्विप्रा॑ अवस्यवः। मृ॒ज॒न्ति दे॒वता॑तये ॥ ७ ॥

तम्। ऊँ इति। त्वा। वाजिनम्। नरः। धीभिः। विप्राः। अवस्यवः। मृजन्ति। देवऽतातये ॥७॥

हे सोम vतमु तमेव vत्वा[4] त्वां vवाजिनम् अन्नवन्तं गमनवन्तं वा vनरः नेतारः vविप्राः मेधाविनोऽध्वर्यवादयः vधीभिः[5] कर्मभिः vमृजन्ति शोधयन्ति vदेवतातये यज्ञार्थम्। किमिच्छवः। vअवस्यवः अन्नमिच्छवः[5] ॥

मधो॒र्धारा॒मनु॒ क्षर॒ तीव्रः॑ सु॒हस्त्यासदः। चारु॒र्ऋ॒ताय॑ पी॒तये॑ ॥ ८ ॥

मधोः। धाराम्। अनु। क्षर। तीव्रः। सुऽहस्त्यम्। आ। असदः। चारुः। ऋताय। पीतये ॥८॥

हे सोम त्वं vमधोः मधुररसस्य vधारामनु vक्षर प्रवहन्[6]। vतीव्रः तीव्ररसः सन् vसुहस्त्यं सुहस्थानमभिषवस्थानं पवित्रं वा vआ vअसदः सीद। vचारुः चरणशीलः सन् vऋताय यज्ञार्थं vपीतये देवानां पानाय ॥ ॥ ७ ॥

'परि सुवानः' इति सप्तर्चमष्टादशं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'परि सुवानः सप्त' इत्यनुक्रान्तम्। गतो विनियोगः ॥

परि॑ सु॒वा॒नो गि॑रि॒ष्ठाः प॒वित्रे॒ सोमो॑ अक्षाः। मदे॑षु॒ सर्व॒धा अ॑सि ॥ १ ॥

परि। सुवानः। गिरिऽस्थाः। पवित्रे। सोमः। अक्षारिति। मदेषु। सर्वऽधाः। असि ॥१॥

१. त१.२.६–रोचना; त३.४.५.७-भ३–'रोचना त्रीणि' नास्ति। २. भ–हे सोम त्वां अभ्यनूषत। ३. ग–क्व; त-भ४–क्रतु। ४. ग-त–'त्वा' नास्ति। ५. ग–अवस्यवः रक्षणेच्छवः देवतातये यज्ञाय तवा धीभिः कर्मभिः मृजंति। ६. ग-भ१.३–प्रवह।

अयं vसोमः vपवित्रे vपरि vअक्षाः परिक्षरति। vसुवानः सूयमानः vगिरिष्ठाः गिरिस्थायी। ग्रावसु वर्तमान इत्यर्थः। स त्वं vमदेषु मादकेषु सोतृषु vसर्वधा[1] vअसि सर्वस्य धाता दाता वा भवसि[1] ॥

त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः। मदेषु सर्वधा असि ॥ २ ॥

त्वम्। विप्रः। त्वम्। कविः। मधु। प्र। जातम्। अन्धसः। मदेषु। सर्वऽधाः। असि ॥२॥

हे सोम vत्वं vविप्रः विविधं प्रीणयिता विप्रसदृशो वा vत्वं च vकविः मेधावी। अतस्त्वम् vअन्धसः अन्नात् vजातं vमधु मधुररसं vप्र यच्छसीति शेषः ॥

तव विश्वे सजोषसो देवासः पीतिमाशत। मदेषु सर्वधा असि ॥ ३ ॥

तव। विश्वे। सऽजोषसः। देवासः। पीतिम्। आशत। मदेषु। सर्वऽधाः। असि ॥ ३ ॥

हे सोम vतव vपीतिं पानं vविश्वे vदेवासः देवाः[2] vसजोषसः समानप्रीतयः सन्तः vआशत प्राप्नुवन् ॥

आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे। मदेषु सर्वधा असि ॥ ४ ॥

आ। यः। विश्वानि। वार्या। वसूनि। हस्तयोः। दधे। मदेषु। सर्वऽधाः। असि ॥४॥

vयः सोमः vविश्वानि vवार्या वरणीयानि vवसूनि धनानि[3] स्तोतुः vहस्तयोः vआ vदधे करोति। प्रयच्छतीत्यर्थः। vमदेषु vसर्वधा vअसि इति। अथवा[4] स शुष्मी इत्युत्तरत्र संबन्धः ॥

य इमे रोदसी मही सं मातरेव दोहते। मदेषु सर्वधा असि ॥ ५ ॥

यः। इमे इति। रोदसी इति। मही इति। सम्। मातराऽइव। दोहते। मदेषु। सर्वऽधाः। असि ॥ ५ ॥

vयः सोमः vइमे vमही महत्यौ vरोदसी द्यावापृथिव्यौ vसं vदोहते। उभयोः सारं परिगृह्णातीत्यर्थः। vमातरेव यथा द्वे मातरावेको वत्सो दोहते तद्वत् ॥

परि यो रोदसी उभे सद्यो वाजेभिरर्षति। मदेषु सर्वधा असि ॥ ६ ॥

परि। यः। रोदसी इति। उभे इति। सद्यः। वाजेभिः। अर्षति। मदेषु। सर्वऽधाः। असि ॥६॥

vयः सोमः vउभे vरोदसी द्यावापृथिव्यौ vसद्यः तदानीमेव vवाजेभिः अन्नैः vपरि vअर्षति परिगच्छति[5]। सोमाहुत्या[6] द्यावापृथिव्यावन्नवत्यौ करोतीत्यर्थः ॥

स शुष्मी कलशेष्वा पुनानो अचिक्रदत्। मदेषु सर्वधा असि ॥ ७ ॥

सः। शुष्मी। कलशेषु। आ। पुनानः। अचिक्रदत्। मदेषु। सर्वऽधाः। असि ॥ ७ ॥

---

१. ग–सर्वधाता दाता चसि भवसि; त१.६–सर्वधा सर्वदा असि सर्वस्य धाता दाता वा भवति; त३.४.५–सर्वधाता दाता चा भवति; त७–सर्वस्य दाता दाता वा भवति; भ४–सर्वधा असि सर्वस्य धाता दाता भवसि; मु–सर्वधा सर्वदा असि सर्वस्य धाता दाता वा भवसि। २. घ–सर्वे देवाः। ३. ग-त-भ–' धनानि ' नास्ति। ४. ग-त-मु–' अथवा ' नास्ति। ५. त-भ४–परिगच्छति परिगच्छ; मु–परिगच्छति परिगत्य। ६. घ–आहुत्या।

उक्थरीत्या[1] महान् [v]सः सोमः [v]शुष्मी बलवान् [v]पुनानः पूयमानः सन् [v]आ[2] [v]अचिक्रदत् शब्दं[3] करोति । अत्र सर्वत्र यथोचितमुत्तरपादो नेयः ॥ ॥ ८ ॥

' यत् सोम ' इति सप्तर्चमेकोनविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ' यत् सोम ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु । तन्नः पुनान आ भर ॥ १ ॥

यत् । सोम । चित्रम् । उक्थ्यम् । दिव्यम् । पार्थिवम् । वसु । तत् । नः । पुनानः । आ । भर ॥१॥

हे [v]सोम [v]यत् [v]चित्रं चायनीयम् [v]उक्थ्यं स्तुत्यं [v]दिव्यं दिवि भवं [v]पार्थिवं पृथिवी-संबद्धं[4] च [v]वसु[5] धनमस्ति [v]तत् [v]नः अस्मभ्यं [v]पुनानः पूयमानः सन् [v]आ [v]भर आहर ॥

युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती । ईशाना पिप्यतं धियः ॥ २ ॥

युवम् । हि । स्थः । स्वःपती इति स्वःऽपती । इन्द्रः । च । सोम । गोपती इति गोऽपती । ईशाना । पिप्यतम् । धियः ॥ २ ॥

हे [v]सोम [v]त्वम् [v]इन्द्रश्च [v]युवं [v]हि युवां खलु [v]स्वर्पती सर्वस्य[6] स्वामिनौ [v]स्थः भवथः । तथा [v]गोपती गवां पालकौ [v]ईशाना ईश्वरौ सन्तौ [v]धियः अस्मदीयानि कर्माणि [v]पिप्यतं प्याययतम् ॥

वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि । हरिः सन्योनिमासदत् ॥ ३ ॥

वृषा । पुनानः । आयुषु । स्तनयन् । अधि । बर्हिषि । हरिः । सन् । योनिम् । आ । असदत् ॥३॥

[v]वृषा[7] कामानां वर्षकः सोमः[7] [v]आयुषु मनुष्येष्वध्वर्यादिषु [v]पुनानः पूयमानः सन् [v]स्तन-यन् शब्दं कुर्वन् [v]अधि [v]बर्हिषि । अधीति सप्तम्यर्थानुवादी । आस्तीर्णे दर्भे [v]हरिः[9] हरितवर्णः [v]सन् [v]योनिं स्वकीयं स्थानम् [v]आसदत् आसीदति ॥

अवावशन्त धीतयो वृषभस्याधि रेतसि । सूनोर्वत्सस्य मातरः ॥ ४ ॥

अवावशन्त । धीतयः । वृषभस्य । अधि । रेतसि । सूनोः । वत्सस्य । मातरः ॥ ४ ॥

[v]धीतयः धीयमानाः सोमाख्येन वत्सेन पीयमाना वसतीवर्यः । क्विन् व्यत्ययेनान्तोदात्तः । [v]अधि [v]रेतसि स्वकीये सारे [v]वृषभस्य वर्षकस्य सोमस्य । सोममित्यर्थः । [v]अवावशन्त पुनः[8] कामयन्ते[8] । सोममाप्याययितुं कामयन्त इत्यर्थः । तदेवाह । [v]सूनोः स्वपुत्रस्थानीयस्य [v]वत्सस्य सोमस्य [v]मातरः निर्माण्यः प्रवृद्धिकामा मातृस्थानीया अवावशन्तेति समन्वयः ॥

कुविद्वृषण्यन्तीभ्यः पुनानो गर्भमादधत् । याः शुक्रं दुहते पयः ॥ ५ ॥

कुवित् । वृषण्यन्तीभ्यः । पुनानः । गर्भम् । आऽदधत् । याः । शुक्रम् । दुहते । पयः ॥५॥

---

१. भ- य उक्थरीत्या । २. ग-त-भ-'आ' नास्ति । ३. घ-कलशेषु शब्दं । ४. ग-°संबंधि यत् । ५. ग-स्व; त१.३.६.७-सु-स्वर्गस्य । ६. ग-त-म-' वृषा · · · सोमः ' नास्ति । ७. ग-त-' हरिः' नास्ति; भ-हरिः सन् । ८. घ-मीलितवंतः; भ१.२-पुनःपुनः कामयते ।

vवृषण्यन्तीभ्यः वृषणं सोममात्मन इच्छन्तीभ्यो वसतीवरीभ्यः vपुनानः पूयमानो मिश्रयमाणः vगर्भं स्वगर्भस्थानीयं रसं vकुवित् बहु प्रभूतम् vआदधत् करोति। vयाः आपः vशुक्रं दीप्तं vपयः vदुहते स्वदत्साय सोमाय ताभ्यो गर्भमादधत् ॥

उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु। पवमान विदा रयिम् ॥ ६ ॥

उप। शिक्ष। अपऽतस्थुषः। भियसम्। आ। धेहि। शत्रुषु। पवमान। विदाः। रयिम् ॥६॥

हे vपवमान सोम vउप vशिक्ष त्वं समीपे कुरु। कान्। vअपतस्थुषः अपक्रम्य स्थितान्। अस्मदभिमतानित्यर्थः। vशत्रुषु अस्मद्विरोधिषु vभियसं भयम् vआ vधेहि कुरु जनय। अस्माकं तेषां शत्रूणां vरयिं धनं vविदाः विन्दसि ॥

नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर। दूरे वा सतो अन्ति वा ॥ ७ ॥

नि। शत्रोः। सोम। वृष्ण्यम्। नि। शुष्मम्। नि। वयः। तिर।
दूरे। वा। सतः। अन्ति। वा ॥७॥

हे अभिषूयमाण vसोम त्वं vशत्रोः vवृष्ण्यं वर्षकं बलं vनि vतिर। निपूर्वस्तिरतिर्नाशार्थः। नाशय। तथा शत्रोः vशुष्मं शोषकं तेजः vनि तिर। तस्यैव[1] vवयः अन्नं च vनि तिर। कीदृशस्य शत्रोः। vदूरे vवा vसतः अस्मत्तो दूरे वर्तमानस्य vअन्ति vवा सतोऽन्तिके वर्तमानस्य वा ॥ ॥९॥

'प्र कविः' इति सप्तर्चं विंशं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'प्र कविः' इत्यनुक्रान्तम्। गतो विनियोगः ॥

प्र कविर्देववीतयेऽव्यो वारेभिरर्षति। साह्वान्विश्वा अभि स्पृधः ॥ १ ॥

प्र। कविः। देवऽवीतये। अव्यः। वारेभिः। अर्षति। साह्वान्। विश्वाः। अभि। स्पृधः ॥१॥

vकविः मेधावी सोमः vदेववीतये देवानां पानाय vअव्यः अवेः vवारेभिः वारैः[2] दशापवित्रेण vप्र vअर्षति प्रकर्षेण गच्छति। vसाह्वान् शत्रूणां सोढा सोमः vविश्वाः vस्पृधः सर्वान् संग्रामान् हिंसकान् वा vअभि भवतीति शेषः ॥

स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति। पवमानः सहस्रिणम् ॥ २ ॥

सः। हि। स्म। जरितृऽभ्यः। आ। वाजम्। गोऽमन्तम्। इन्वति।
पवमानः। सहस्रिणम् ॥ २ ॥

vस vहि vष्म स खलु vपवमानः सोमः vजरितृभ्यः स्तोतृभ्यः vगोमन्तं बहुभिर्गोभिर्युक्तं vसहस्रिणं सहस्रसंख्याकं vवाजम् अन्नम्[3] vआ अभिमुखम् vइन्वति व्याप्नोति। प्रयच्छतीत्यर्थः ॥

परि विश्वानि चेतसा मृशसे पवसे मती। स नः सोम श्रवो विदः ॥ ३ ॥

परि। विश्वानि। चेतसा। मृशसे। पवसे। मती। सः। नः। सोम। श्रवः। विदः ॥३॥

हे सोम त्वं vचेतसा स्वीयेनास्मदनुकूलेन चित्तेन vविश्वानि सर्वाणि धनानि vपरि vमृशसे। प्रयच्छसीत्यर्थः। vमती मत्या अस्मत्स्तुत्या vपवसे क्षरसि रसम्। vसः त्वं हे vसोम vनः अस्मभ्यं vश्रवः अन्नं vविदः देहि ॥

---

१. घ–तथैव। २. घ–वारैर्वालैः। ३. ग-त-म–अन्नं वा।

अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् । इषं स्तोतृभ्य आ भर ॥ ४ ॥

अभि । अर्ष । बृहत् । यशः । मघवत्ऽभ्यः । ध्रुवम् । रयिम् ।
इषम् । स्तोतृऽभ्यः । आ । भर ॥ ४ ॥

हे सोम ᵛबृहद्यशः महतीं कीर्तिम् ᵛअभ्यर्ष अभिगमय । ᵛमघवद्भ्यः हविष्मद्भ्यः[1] अस्मभ्यं ᵛध्रुवं ᵛरयिं धनं चाभ्यर्ष । किंच ᵛइषम् अन्नं ᵛस्तोतृभ्यः अस्मभ्यम् ᵛआ ᵛभर आहर ॥

त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ । पुनानो वह्ने अद्भुत ॥ ५ ॥

त्वम् । राजाऽइव । सुऽव्रतः । गिरः । सोम । आ । विवेशिथ । पुनानः । वह्ने । अद्भुत ॥५॥

हे ᵛसोम ᵛसुव्रतः सुकर्मा ᵛपुनानः ᵛत्वं ᵛराजेव ᵛगिरः अस्मदीयाः स्तुतीः ᵛआ ᵛविवेशिथ आविशसि । हे ᵛवह्ने वोढः ᵛअद्भुत महन् सोम ॥

स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः । सोमश्चमूषु सीदति ॥ ६ ॥

सः । वह्निः । अप्ऽसु । दुस्तरः । मृज्यमानः । गभस्त्योः । सोमः । चमूषु । सीदति ॥६॥

ᵛसः ᵛसोमः ᵛवह्निः वोढा यज्ञादेः ᵛअप्सु अन्तरिक्षे वर्तमानः ᵛदुष्टरः दुःखेनान्यैस्तरणीयः ᵛमृज्यमानः शोध्यमानः ᵛगभस्त्योः हस्तयोरेवंभूतः सन् सः ᵛचमूषु पात्रेषु ᵛसीदति ॥

क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यम् ॥ ७ ॥

क्रीळुः । मखः । न । मंहयुः । पवित्रम् । सोम । गच्छसि । दधत् । स्तोत्रे । सुऽवीर्यम् ॥७॥

हे ᵛसोम ᵛक्रीळुः क्रीडनशीलस्त्वं ᵛमंहयुः । मंहतिर्दानकर्मा । दानेच्छुः ᵛमखो ᵛन दानमिव ᵛपवित्रं ᵛगच्छसि । किं कुर्वन् । ᵛस्तोत्रे स्तुतिकर्त्रे ᵛसुवीर्यं शोभनवीर्यं ᵛदधत् प्रयच्छन् ॥ ॥१०॥

'एते धावन्ति' इति सप्तर्चमेकविंशं सूक्तम् । ऋष्यादयः पूर्ववत् । 'एते धावन्ति' इत्यनुक्रान्तम् । गतो विनियोगः ॥

एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः । मत्सरासः स्वर्विदः ॥ १ ॥

एते । धावन्ति । इन्दवः । सोमाः । इन्द्राय । घृष्वयः । मत्सरासः । स्वःऽविदः ॥ १ ॥

ᵛएते ᵛसोमाः ᵛइन्द्राय ᵛधावन्ति गच्छन्ति । कीदृशा एते । ᵛइन्दवः क्लेदयितारो दीप्ता वा ᵛघृष्वयः घर्षणशीलाः ᵛमत्सरासः मादयितारः ᵛस्वर्विदः स्वर्लोकस्य लम्भयितारः ॥

प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः । स्वयं स्तोत्रे वयस्कृतः ॥ २ ॥

प्रऽवृण्वन्तः । अभिऽयुजः । सुस्वये । वरिवःऽविदः । स्वयम् । स्तोत्रे । वयःऽकृतः ॥ २ ॥

ᵛप्रवृण्वन्तः सुवानं प्रकर्षेण संभजन्तः तथा ᵛअभियुजः अभियोजयितारः ᵛसुष्वये सुष्ठु अभिषवकर्त्रे ᵛवरिवोविदः । 'वरिवः' इति धननाम । तस्य लम्भयितारः ᵛस्वयं ᵛस्तोत्रे[2] ᵛवयस्कृतः अन्नस्य कर्तारः । एते धावन्तीति संबन्धः ॥

---

१. ग-घ-त३-५– 'हविष्मद्भ्यः' नास्ति । २. भ– स्तोत्रे च ।

वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित्। सिन्धोरूर्मा व्यक्षरन् ॥ ३ ॥

वृथा। क्रीळन्तः। इन्दवः। सधऽस्थम्। अभि। एकम्। इत्। सिन्धोः। ऊर्मा। वि। अक्षरन्॥३॥

[v]वृथा अनायासेन [v]क्रीळन्तः [v]इन्दवः सोमाः [v]एकमित् एकमेव [v]सधस्थं सहस्थानं द्रोणकलशं वा [v]अभि अक्षरन्निति शेषः। [v]सिन्धोरूर्मा वसतीवरीषु [v]व्यक्षरन्॥

एते विश्वानि वार्या पवमानास आशत। हिता न सप्तयो रथे ॥ ४ ॥

एते। विश्वानि। वार्या। पवमानासः। आशत। हिताः। न। सप्तयः। रथे॥ ४ ॥

[v]एते सोमाः [v]पवमानासः पूयमानाः [v]विश्वानि [v]वार्या[१] वार्याणि वरणीयानि धनानि [v]आशत व्याप्नुवन्। [v]रथे [v]हिताः स्थापिताः[२] [v]न[२] [v]सप्तयः अश्वा इव। ते यथा रथमभिमतं देशं प्राप्नुवन्ति तद्वदनमस्माकं प्रायच्छन्नित्यर्थः॥

आस्मिन्पिशङ्गमिन्दवो दधाता वेनमादिशे। यो अस्मभ्यमरावा ॥ ५ ॥

आ। अस्मिन्। पिशङ्गम्। इन्दवः। दधात। वेनम्। आऽदिशे।
यः। अस्मभ्यम्। अरावा॥ ५ ॥

हे [v]इन्दवः सोमाः [v]अस्मिन् यजमाने [v]पिशङ्गं बहुरूपं मणिमुक्ताहिरण्यादिभेदेन नानारूपं [v]वेनं कामयन्तं बहुविधं कामम् [v]आदिशे अस्मभ्यमादेशनाय [v]आ [v]दधात आयच्छत[३]। [v]यः यजमानः [v]अस्मभ्यम् [v]अरावा - - - - - प्रयच्छति प्रातकाम एव खलु ऋत्विग्भ्यः प्रयच्छति॥

ऋभुर्न रथ्यं नवं दधाता केतमादिशे। शुक्राः पवध्वमर्णसा ॥ ६ ॥

ऋभुः। न। रथ्यम्। नवम्। दधात। केतम्। आऽदिशे। शुक्राः। पवध्वम्। अर्णसा॥६॥

[v]ऋभुर्न उरु भासमानो रथस्वामीव स यथा [v]रथ्यं रथस्य नेतारं [v]नवं स्तुत्यं कुशलं सारथिनमग्र आधत्ते तद्वदस्मदीयेऽस्मिन् [v]आदिशे स्वामिनि[४] [v]केतं प्रज्ञानं [v]दधात स्थापयत। हे सोमाः योऽस्मभ्यं प्रयच्छति तस्मिन्नित्यर्थः। हे सोमाः [v]अर्णसा उदकेन [v]शुक्राः दीप्ताः सन्तः [v]पवध्वं क्षरध्वम्॥

एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत। सतः प्रासाविषुर्मतिम् ॥ ७ ॥

एते। ऊँ इति। त्ये। अवीवशन्। काष्ठाम्। वाजिनः। अक्रत।
सतः। प्र। असाविषुः। मतिम्॥ ७ ॥

[v]त्ये ते [v]एत [v]उ एत एव सोमाः [v]अवीवशन् कामयन्ते यज्ञम्। कान्त्वा च [v]वाजिनः बलवन्तोऽन्नवन्तो वा सोमाः [v]काष्ठाम् [v]अक्रत निवासस्थानमकुर्वन्। द्रोणकलशादुद्गता[५] ग्रहानित्यर्थः[५]। [v]सतः यजमानस्य स्तोतुर्वा [v]मतिं बुद्धिं स्तुतिं वा [v]प्रासाविषुः प्रैरयन्॥ ॥ ११ ॥

'एते सोमासः' इति सप्तर्चं द्वाविंशं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'एते सोमासः' इत्यनुक्रान्तम्। गतो विनियोगः॥

---

१. ग-त-भ-'वार्या' नास्ति। २. ग-युक्ता। ३. भ-स्थापयत। ४. ग-त्तदेशय स्वामिनि; त-भ-सं स्वामिनि। ५. ग-द्रोणकलशानित्यर्थः।

एते सोमास आशवो रथाइव प्र वाजिनः । सर्गाः सृष्टा अहेषत ॥ १ ॥

एते । सोमासः । आशवः । रथाःऽइव । प्र । वाजिनः । सर्गाः । सृष्टाः । अहेषत ॥ १ ॥

vएते पूयमानाः vसोमासः सोमाः vसृष्टाः अध्वर्युणा vआशवः दशापवित्रादधोगमने शीघ्राः vप्र vअहेषत प्रहेषन्ते । शीघ्रगमने दृष्टान्तद्वयम् । आजौ सृष्टाः शीघ्राः vरथाइव तथोक्तलक्षणाः[1] vवाजिनः इव वेजनवन्तोऽश्वा इव[1] ॥

एते वाताइवोरवः पर्जन्यस्येव वृष्टयः । अग्नेरिव भ्रमा वृथा ॥ २ ॥

एते । वाताःऽइव । उरवः । पर्जन्यस्यऽइव । वृष्टयः । अग्नेःऽइव । भ्रमाः । वृथा ॥२॥

vएते सोमाः vउरवः महान्तः vवाताइव[2] वायव इव[3] vवृथा अनायासेन व्यानशुः इत्युत्तरत्र संबन्धनीयम् । अथवाध्याहारेण निःसरन्तीति योज्यम् । तथा vपर्जन्यस्य vवृष्टयः vइव वर्षा यथा तथैव । किंच vअग्नेः vभ्रमाः भ्रमणा ज्वालासंचाराः vइव ॥

एते पूता विपश्चितः सोमासो दध्याशिरः । विपा व्यानशुर्धियः ॥ ३ ॥

एते । पूताः । विपःऽचितः । सोमासः । दध्याऽआशिरः । विपा । वि । आनशुः । धियः ॥३॥

vएते vसोमासः सोमाः vपूताः शुद्धाः vविपश्चितः प्राज्ञाः vदध्याशिरः दध्याश्रयणाः vविपा प्रज्ञानेन vधियः अस्मदीयानि कर्माणि vव्यानशुः व्याप्नुवन्ति ॥

एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः । इयक्षन्तः पथो रजः ॥ ४ ॥

एते । मृष्टाः । अमर्त्याः । ससृऽवांसः । न । शश्रमुः । इयक्षन्तः । पथः । रजः ॥४॥

vएते सोमाः vमृष्टाः दशापवित्रेण शोधिताः vअमर्त्याः अमरणधर्माणः vससृवांसः हविर्धानात् सरन्तः vपथः मार्गान् vरजः लोकांश्च vइयक्षन्तः गन्तुमिच्छन्तः vन vशश्रमुः न श्राम्यन्ति ॥

एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः । उतेदमुत्तमं रजः ॥ ५ ॥

एते । पृष्ठानि । रोदसोः । विऽप्रयन्तः । वि । आनशुः । उत । इदम् । उतऽतमम् । रजः ॥५॥

vएते सोमाः vरोदसोः[4] द्यावापृथिव्योः vपृष्ठानि vविप्रयन्तः विविधं गच्छन्तः vव्यानशुः व्याप्नुवन्ति । vउत अपि च vइदमुत्तमं vरजः द्युलोकं व्यानशुः । आहुतिद्वारेणेति भावः । रोदसोरित्यत्रान्तरिक्षोऽभिप्रेतः ॥

तन्तुं तन्वानमुत्तममनु प्रवत आशत । उतेदमुत्तमाय्यम् ॥ ६ ॥

तन्तुम् । तन्वानम् । उतऽतमम् । अनु । प्रऽवतः । आशत । उत । इदम् । उत्तमाय्यम् ॥६॥

vतन्तुं यज्ञं vतन्वानम् vउत्तमम् उत्कृष्टं सोमम् vअनु vआशत vप्रवतः नद्यः । vउत अपि च vइदं कर्म अनेन सोमेन vउत्तमाय्यम् उत्तमीकृतम्[5] । अथवा तन्तुं तन्वानं सोमं प्रवतोऽधःस्थिताः

---

१. घ–तथोक्तलक्षणसर्गा वाजिन इव सृष्टा अश्वा इव; त१.२.६.७-मु–उक्तलक्षणसर्गा वाजिन इव वेजनवतोश्वा इव । २. ग-त३.४.५-भ४–वाता । ३. त-भ२.४–' इव ' नास्ति । ४. ग–रोदस्योः । ५. त१.२.६–°कृत्यं ।

सर्वो अन्वाशात । उतेदमुत्तमाख्यं रजः । युक्तोक इत्यर्थः । सोऽप्यन्वश्नुते पृथिव्या चान्तरिक्षेण च । उत्तमीकृतमुत्तमाख्यम् ॥

त्वं सोम पणिभ्य आ वसु गव्यानि धारयः । ततं तन्तुमचिक्रदः ॥ ७ ॥

त्वम् । सोम । पणिऽभ्यः । आ । वसु । गव्यानि । धारयः । ततम् । तन्तुम् । अचिक्रदः ॥७॥

हे vसोम vत्वं vपणिभ्यः असुरेभ्यो लुब्धकेभ्यो वा सकाशात् vगव्यानि गोहितानि vवसु वसूनि गोयूथानि वसूनि वेति[1] वा vआ आहृत्य vधारयः[2] धास्यसि । तथा vतन्तुं यज्ञं प्रति vततं विस्तृतं यथा भवति तथा vअचिक्रदः शब्दमकार्षीः ॥ ॥ १२ ॥

'सोमा असृग्रम्' इति सप्तर्चं त्रयोविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'सोमा असृग्रम्' इत्यनुक्रान्तम् । गतो विनियोगः ॥

सोमा असृग्रमाशवो मधोर्मदस्य धारया । अभि विश्वानि काव्या ॥ १ ॥

सोमाः । असृग्रम् । आशवः । मधोः । मदस्य । धारया । अभि । विश्वानि । काव्या ॥ १॥

vआशवः क्षीघ्राः vसोमाः vअसृग्रम् असृग्रन् सृज्यन्ते । vमधोः मधुरस्य[3] vमदस्य[3] मदकरस्य vधारया असृग्रमिति संबन्धः । किं प्रति उच्यते । vअभि लक्षीकृत्य vविश्वानि सर्वाणि vकाव्या काव्यानि स्तोत्राणि प्रति । स्तोत्रसमय इत्यर्थः ॥

अनु प्रत्नासो आयवः पदं नवीयो अक्रमुः । रुचे जनन्त सूर्यम् ॥ २ ॥

अनु । प्रत्नासः । आयवः । पदम् । नवीयः । अक्रमुः । रुचे । जनन्त । सूर्यम् ॥ २ ॥

vप्रत्नासः पुराणाः केचित् vआयवः क्षीघ्रगमना अन्ये vनवीयः नवतरं vपदम् vअनु vअक्रमुः अनुक्रमन्ते । रूपकव्याहारेण सोमाः स्तूयन्ते । vरुचे[4] दीप्त्यै[4] vसूर्यं vजनन्त कुर्वन्ति । दीप्तं कुर्वन्तीत्यर्थः । सोमप्यायनेन हि चन्द्रो रोचते ॥

आ पवमान नो भरार्यो अदाशुषो गयम् । कृधि प्रजावतीरिषः ॥ ३ ॥

आ । पवमान । नः । भर । अर्यः । अदाशुषः । गयम् । कृधि । प्रजाऽवतीः । इषः ॥ ३ ॥

हे vपवमान सोम त्वं vनः अस्मभ्यम् vअर्यः अरेः vअदाशुषः अप्रयच्छतः[5] vगयं गृहं गृहोपलक्षितं धनम् vआ vभर आहर । तथास्मभ्यं vप्रजावतीरिषः च[6] vकृधि कुरु ॥

अभि सोमास आयवः पवन्ते मद्यं मदम् । अभि कोशं मधुश्चुतम् ॥ ४ ॥

अभि । सोमासः । आयवः । पवन्ते । मद्यम् । मदम् । अभि । कोशम् । मधुऽश्चुतम् ॥४॥

vआयवः गन्तारः vसोमासः सोमाः vमद्यं मदकरं रसम् vअभि vपवन्ते क्षरन्ति । तथा vमधुश्चुतं मधुस्राविणं vकोशम् । रसाधारेण कोशशब्देन तत्राभिश्रितो रसो लक्ष्यते । तम् vअभि पवन्त इति शेषः[7] ॥

१. भ१.२.३–वेति । २. ग-भ१.२.३–आधारयः । ३. त-भ–'मधुरस्य मदस्य' नास्ति । ४. घ–एतैः सोमैः रुचे दीप्तौ; त-भ–रुचे दीप्तौ । ५. त-भ–प्रयच्छतः । ६. घ–अन्नानि च । ७. घ–शेषः किमर्थं मदे मदं मदाय हर्षाय ।

सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम् । सुवीरो अभिशस्तिपाः ॥ ५ ॥

सोमः । अर्षति । धर्णसिः । दधानः । इन्द्रियम् । रसम् । सुऽवीरः । अभिशस्तिऽपाः ॥५॥

[v]सोमः [v]अर्षति गच्छति । कीदृशः सः । [v]धर्णसिः धारको जगतां तथा [v]इन्द्रियम् इन्द्रियवर्धकं [v]रसं [v]दधानः धारयन् [v]सुवीरः सुवीर्यः [v]अभिशस्तिपाः अभिशस्तेः पाता । अभितो हिंसा ततो रक्षक इत्यर्थः । सोमपानं ब्रह्महत्यादिनिन्दामनुमार्ष्टीति प्रसिद्धम् ॥

इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः । इन्दो वाजं सिषाससि ॥ ६ ॥

इन्द्राय । सोम । पवसे । देवेभ्यः । सधऽमाद्यः । इन्दो इति । वाजम् । सिसाससि ॥६॥

हे [v]सोम [v]सधमाद्यः । सधमादो यज्ञः । तदर्हस्त्वम् [v]इन्द्राय [v]देवेभ्यः चान्येभ्यः[1] [v]पवसे क्षरसि । हे तादृश [v]इन्दो सोम अस्मभ्यं [v]वाजम् अन्नं [v]सिषाससि दातुमिच्छसि ॥

अस्य पीत्वा मदानामिन्द्रो वृत्राण्यप्रति । जघान जघनच्च नु ॥ ७ ॥

अस्य । पीत्वा । मदानाम् । इन्द्रः । वृत्राणि । अप्रति । जघान । जघनत् । च । नु ॥७॥

[v]मदानां मदकराणां मध्येऽतिशयेन मदकरम् [v]अस्य असुं सोमं [v]पीत्वा [v]वृत्राणि शत्रून् अप्रतिगतः[2] सन् [v]इन्द्रः [v]जघान हतवान् । [v]नु क्षिप्रं [v]जघनत् [v]च । हन्तु चेदानीमपि[3] ॥ ॥१३॥

' प्र सोमासः ' इति सप्तर्चं चतुर्विंशं सूक्तम् । असितो देवलो वर्षिगांधत्री छन्दः सोमो देवता । ' प्र सोमासः ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणाना अप्सु मृञ्जत ॥ १ ॥

प्र । सोमासः । अधन्विषुः । पवमानासः । इन्दवः । श्रीणानाः । अप्ऽसु । मृञ्जत ॥ १ ॥

[v]सोमासः सोमाः [v]पवमानासः[4] पूयमानाः [v]इन्दवः दीप्ताः[5] [v]प्र [v]अधन्विषुः । धन्वतिर्गतिकर्मा । प्रगच्छन्ति । किंच [v]श्रीणानाः गोभिः श्रयमाणाः [v]अप्सु वसतीवरीषु च [v]मृञ्जत मृज्यन्ते ॥

अभि गावो अधन्विषुरापो न प्रवता यतीः । पुनाना इन्द्रमाशत ॥ २ ॥

अभि । गावः । अधन्विषुः । आपः । न । प्रऽवता । यतीः । पुनानाः । इन्द्रम् । आशत ॥२॥

[v]गावः गमनशीला इन्दवः[6] [v]अभि [v]अधन्विषुः अभिगच्छन्ति दशापवित्रम् । किमिव । [v]प्रवता प्रवणवता देशेन [v]यतीः गच्छन्त्यः [v]आपो [v]न आप इव । पश्चात् [v]पुनानाः [v]इन्द्रं प्रीणयितुम् [v]आशत व्याप्नुवन् । आहुतिप्रणाड्येन्द्रमेव वा व्याप्नुवन् ॥

प्र पवमान धन्वसि सोमेन्द्राय पातवे । नृभिर्यतो वि नीयसे ॥ ३ ॥

प्र । पवमान । धन्वसि । सोम । इन्द्राय । पातवे । नृऽभिः । यतः । वि । नीयसे ॥ ३ ॥

हे [v]पवमान [v]सोम [v]इन्द्राय इन्द्रस्य [v]पातवे पानाय [v]प्र [v]धन्वसि प्रगच्छस्याहवनीयं प्रति हविर्धानात् । तदेवाह । [v]नृभिः नेतृभिर्ऋत्विग्भिः [v]यतः विनीतः[7] [v]वि [v]नीयसे हविर्धानात् । अथवा । पवमान प्र धन्वसि पात्रं प्रतीन्द्रपानाय तदर्थं हविर्धानाद्धि नीयसे ॥

---

१. म१.२.३–' चान्येभ्यः ' नास्ति । २. त-भ–प्रतिगतः । ३. ग-घ-त-भ२–चेदानीमिति । ४. त३.५-भ–पवमानाः । ५. त-भ–दीप्ताः सोमाः । ६. घ–इंदवः सोमाः । ७. ग–विगृहीतो ।

त्वं सोम नृमादनः पवस्व चर्षणीसहे । सस्निर्यो अनुमाद्यः ॥ ४ ॥

त्वम् । सोम । नृऽमादनः । पवस्व । चर्षणिऽसहे । सस्निः । यः । अनुऽमाद्यः ॥ ४ ॥

हे ᵛसोम ᵛत्वं ᵛनृमादनः नृणां मादयिता त्वं ᵛचर्षणीसहे । चर्षणयो मनुष्या द्वेष्टारः[1] । तेषां समभिभवित्र इन्द्राय ᵛपवस्व क्षर ᵛयः त्वं ᵛसस्निः शुद्धः ᵛअनुमाद्यः स्तुत्यः स[2] पवस्वेति समन्वयः ॥

इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि । अरमिन्द्रस्य धाम्ने ॥ ५ ॥

इन्दो इति । यत् । अद्रिऽभिः । सुतः । पवित्रम् । परिऽधावसि । अरम् । इन्द्रस्य । धाम्ने ॥५॥

हे ᵛइन्दो त्वं ᵛयत् यदा ᵛअद्रिभिः ग्रावभिः ᵛसुतः अभिषुतः ᵛपवित्रं दशापवित्रं ᵛपरिधावसि परिगच्छसि । तदा ᵛइन्द्रस्य ᵛधाम्ने स्थानायाधारकायोदराय[3] वा ᵛअरं पर्याप्तो भवसि ॥

पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः । शुचिः पावको अद्भुतः ॥ ६ ॥

पवस्व । वृत्रहन्ऽतम । उक्थेभिः । अनुऽमाद्यः । शुचिः । पावकः । अद्भुतः ॥ ६ ॥

हे ᵛवृत्रहन्तम शत्रूणामतिशयेन हन्तरिन्दो त्वं[4] ᵛपवस्व क्षर । कीदृशस्त्वम् । ᵛउक्थेभिः शस्त्रैः ᵛअनुमाद्यः स्तुत्यः ᵛशुचिः शुद्धः ᵛपावकः अन्यस्य शोधकः ᵛअद्भुतः महान् । एवंमहानुभावः पवस्व ॥

शुचिः पावक उच्यते सोमः सुतस्य मध्वः । देवावीरघशंसहा ॥ ७ ॥

शुचिः । पावकः । उच्यते । सोमः । सुतस्य । मध्वः । देवऽअवीः । अघशंसऽहा ॥ ७ ॥

ᵛसुतस्य अभिषुतस्य ᵛमध्वः मदकरस्य वल्ल्यात्मकः ᵛसोमः रसरूपः ᵛशुचिः स्वयं शुद्धः ᵛपावकः शोधकश्च ᵛउच्यते । तथा ᵛदेवावीः देवानामविना तर्पयिता ᵛअघशंसहा । अघं पापं शंसन्तीत्यघशंसा असुराः । तेषां हन्तेति चोच्यते ॥ ॥ १४ ॥ ॥ १ ॥

द्वितीयेऽनुवाके षट्त्रिंशत्सूक्तानि । तत्र 'पवस्व' इति षडृचं प्रथमं सूक्तं दृळ्हच्युतनाम्नोऽगस्त्यपुत्रस्यार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च—'पवस्व षड् दृळ्हच्युत आगस्त्यः' इति । गतो विनियोगः ॥

पवस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मदः ॥ १ ॥

पवस्व । दक्षऽसाधनः । देवेभ्यः । पीतये । हरे । मरुतऽभ्यः । वायवे । मदः ॥ १ ॥

हे ᵛहरे हरितवर्ण पापहर्तर्वा सोम ᵛदक्षसाधनः । दक्षो बलम् । तस्य साधकः ᵛमदः मदकरश्च त्वं ᵛपवस्व क्षर । ᵛदेवेभ्यः इन्द्रादिभ्यः ᵛपीतये पानाय । तथा ᵛमरुद्भ्यः ᵛवायवे च पीतये पवस्व ॥

पवमान धिया हितोऽभि योनिं कनिक्रदत् । धर्मणा वायुमा विश ॥ २ ॥

पवमान । धिया । हितः । अभि । योनिम् । कनिक्रदत । धर्मणा । वायुम् । आ । विश ॥२॥

हे ᵛपवमान सोम ᵛधिया कर्मणास्मदङ्गुल्या[4] वा ᵛहितः धृतः सन् ᵛकनिक्रदत् शब्दं कुर्वन् ᵛयोनिं स्थानं ग्रहं वा ᵛअभि विशेति शेषः । तदेवाह । ᵛधर्मणा[5] ᵛवायुम् । वायुसंबन्धि[6] पात्रमित्यर्थः । तत् ᵛआ ᵛविश प्रविश ॥

---

१. घ–शत्रवः । २. म१.२.३–'स' नास्ति । ३. ग–स्थानाय धारकायोदराय; घ-त-भ–स्थानाधारकायोदराय । ४. म१.२.३–'त्वं' नास्ति । ५. ग-त–'अंगुल्या' नास्ति । ६. त१.२.६.७-म१.२.३-मु–धर्मणा कर्मणा; म ४–धर्मणा कर्मणा वा । ७. ग-घ-त-भ-मु–°संबंधिनं ।

सं देवैः शोभते वृषा कविर्योनावधि प्रियः । वृत्रहा देववीतमः ॥ ३ ॥

सम् । देवैः । शोभते । वृषा । कविः । योनौ । अधि । प्रियः । वृत्रऽहा । देवऽवीतमः ॥३॥

अयं सोमः [v]सं [v]शोभते [v]देवैः सह [v]योनौ स्थाने स्वीयेऽधिष्ठितः [v]वृषा[1] कामानां वर्षकः [v]कविः क्रान्तप्रज्ञः[1] [v]प्रियः प्रियभूतः सर्वेषां यद्वा प्रीणयिता [v]वृत्रहा वृत्रस्य हन्ता [v]देववीतमः अतिशयेन देवान् कामयमानः एवंमहानुभावः सोमः संशोभते ॥

विश्वा रूपाण्याविशन्पुनानो याति हर्यतः । यत्रामृतास आसते ॥ ४ ॥

विश्वा । रूपाणि । आऽविशन् । पुनानः । याति । हर्यतः । यत्र । अमृतासः । आसते ॥४॥

[v]विश्वा सर्वाणि [v]रूपाण्याविशन् [v]पुनानः पूयमानः [v]हर्यतः कमनीयः । 'हर्य गतिकान्त्योः' । ईदृशः [v]याति गच्छति । [v]यत्र [v]अमृतासः अमृता देवाः [v]आसते तिष्ठन्ति तं देशं याति ॥

अरुषो जनयन् गिरः सोमः पवत आयुषक् । इन्द्रं गच्छन् कविक्रतुः ॥ ५ ॥

अरुषः । जनयन् । गिरः । सोमः । पवते । आयुषक् । इन्द्रम् । गच्छन् । कविऽक्रतुः ॥५॥

[v]अरुषः आरोचमानः [v]सोमः [v]गिरः शब्दान् [v]जनयन् [v]पवते क्षरति । किं कुर्वन् । [v]आयुषक्[2] अनुषक्तम् [v]इन्द्रं [v]गच्छन् व्याप्नुवन् [v]कविक्रतुः क्रान्तप्रज्ञः ॥

आ पवस्व मदिन्तम पवित्रं धारया कवे । अर्कस्य योनिमासदम् ॥ ६ ॥

आ । पवस्व । मदिनऽतम । पवित्रम । धारया । कवे । अर्कस्य । योनिम् । आऽसदम् ॥६॥

हे [v]मदिन्तम मादयितृतम [v]कवे क्रान्तप्रज्ञ सोम त्वं [v]पवित्रम् अतिक्रम्य [v]धारया [v]आ [v]पवस्व । किमर्थम् । [v]अर्कस्य अर्चनीयस्येन्द्रस्य [v]योनिं स्थानम् [v]आसदं प्राप्तुम् ॥ ॥ १५ ॥

'तममृक्षन्त' इति षड्चं द्वितीयं सूक्तं दृळहच्युतपुत्रस्येध्मवाहनाम्न आर्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च—'तममृक्षन्तेध्मवाहो दार्ढच्युतः' इति । गतो विनियोगः ॥

तममृक्षन्त वाजिनमुपस्थे अदितेरधि । विप्रासो अण्व्या धिया ॥ १ ॥

तम् । अमृक्षन्त । वाजिनम् । उपऽस्थे । अदितेः । अधि । विप्रासः । अण्व्या । धिया ॥१॥

[v]तं [v]वाजिनम् अश्वमश्ववदाशुम् । व्याप्तमित्यर्थः । [v]अदितेः पृथिव्याः [v]उपस्थे[3] उत्सङ्गे । [v]अधि इति सप्तम्यर्थानुवादी । [v]अमृक्षन्त शोधितवन्तः । के । [v]विप्रासः मेधाविनोऽध्वर्यवादयः । केन साधनेन । [v]अण्व्या अङ्गुल्या [v]धिया प्रज्ञया स्तुत्या वा अमृक्षन्त । अथवाण्व्या सूक्ष्मया धियाङ्गुल्येति विशेष्यविशेषणभावः ॥

तं गावो अभ्यनूषत सहस्रधारमक्षितम् । इन्दुं धर्तारमा दिवः ॥ २ ॥

तम् । गावः । अभि । अनूषत । सहस्रऽधारम् । अक्षितम् । इन्दुम् । धर्तारम् । आ । दिवः ॥२॥

[v]तं सोमं [v]गावः गन्त्र्यः स्तुतयः [v]अभ्यनूषत अस्तुवन् । कीदृशं तम् । [v]सहस्रधारं बहुधारम् [v]अक्षितम् अक्षीणम् [v]इन्दुं दीप्तं [v]दिवः द्युलोकस्य [v]आ [v]धर्तारं सर्वतो धारकम् । सोमधारत्वात् द्युलोकवासिनां संस्थानस्य ॥

---

१. ग-त-भ–'वृषा···क्रांतप्रज्ञः' नास्ति । २. ग-त-भ–आनुषक् । ३. घ–उपस्थे अधि ।

तं वेधां मेधयाह्यन्पवमानमधि द्यवि । धर्णसिं भूरिधायसम् ॥ ३ ॥

तम् । वेधाम् । मेधया । अह्यन् । पवमानम् । अधि । द्यवि । धर्णसिम् । भूरिऽधायसम् ॥३॥

[v]वेधां विधातारं [v]पवमानं [v]तं [v]मेधया प्रज्ञया [v]अह्यन् प्रहिण्वन्ति । किं प्रति । [v]अधि [v]द्यवि द्युलोकं प्रति । पुनः कीदृशम् । [v]धर्णसिं सर्वस्य धारकं [v]भूरिधायसं बहूनां कर्तारम् ॥

तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः । पतिं वाचो अदाभ्यम् ॥ ४ ॥

तम् । अह्यन् । भुरिजोः । धिया । सम्ऽवसानम् । विवस्वतः । पतिम् । वाचः । अदाभ्यम् ॥४॥

[v]तं सोमं [v]विवस्वतः परिचरत[1] ऋत्विजः [v]भुरिजोः बाह्वोः [v]धिया अङ्गुल्या [v]अह्यन् प्राहिण्वन् । कीदृशं तम् । [v]संवसानं वसन्तं पात्रे [v]वाचः स्तुतेः [v]पतिं स्वामिनम् [v]अदाभ्यम् अदम्भनीयम् ॥

तं सानावधि जामयो हरिं हिन्वन्त्यद्रिभिः । हर्यतं भूरिचक्षसम् ॥ ५ ॥

तम् । सानौ । अधि । जामयः । हरिम् । हिन्वन्ति । अद्रिऽभिः । हर्यतम् । भूरिऽचक्षसम् ॥५॥

[v]तं[2] सोमं [v]हरिं हरितवर्णं [v]सानावधि समुच्छ्रिते देशे । अधीति सप्तम्यर्थानुवादी । [v]जामयः[3] अङ्गुलयः[3] [v]हिन्वन्ति प्रेरयन्ति । अधिषुण्वन्ति [v]अद्रिभिः ग्रावभिः । कीदृशम् । [v]हर्यतं कमनीयं [v]भूरिचक्षसं बहुद्रष्टारम् ॥

तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् । इन्दविन्द्राय मत्सरम् ॥ ६ ॥

तम् । त्वा । हिन्वन्ति । वेधसः । पवमान । गिराऽवृधम् । इन्दो इति । इन्द्राय । मत्सरम् ॥६॥

हे [v]पवमान[4] सोम [v]तम् उक्तगुणविशिष्टं [v]त्वा त्वां [v]हिन्वन्ति प्रेरयन्ति । कस्मै । [v]इन्द्राय । के । [v]वेधसः विधातार ऋत्विजः । कीदृशं त्वाम् । [v]गिरावृधं स्तुत्या वर्धमानम् [v]इन्दुं[5] दीप्तं सरूपं वा[5] [v]मत्सरं मदकरम् ॥ ॥ १६ ॥

'एष कविः' इति षष्ठर्चं तृतीयं सूक्तं मृमेधनाम्न आङ्गिरसस्यार्षं गायत्रं सौम्यम् । 'एष कविर्मृमेधः' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

एष कविरभिष्टुतः पवित्रे अधि तोशते । पुनानो घ्नन्नप स्रिधः ॥ १ ॥

एषः । कविः । अभिऽस्तुतः । पवित्रे । अधि । तोशते । पुनानः । घ्नन् । अप । स्रिधः ॥ १ ॥

[v]एषः सोमः [v]कविः मेधावी [v]अभिष्टुतः अभितः स्तुतः [v]पवित्रे [v]अधि दशापवित्रमतीत्य [v]तोशते । यद्यपि तोशतिर्वधकर्मा तथापि इहने गतिसङ्घातादत्र गतिमात्रे वर्तते । गच्छतीत्यर्थः[6] । अथवा । पवित्रेऽधि कृष्णाजिने तोशते हन्यते । पीड्यत इत्यर्थः । किं कुर्वन् । [v]पुनानः पूयमानः [v]स्रिधः शत्रून् [v]अप [v]घ्नन् अपगमयन् ॥

एष इन्द्राय वायवे स्वर्जित्परि षिच्यते । पवित्रे दक्षसाधनः ॥ २ ॥

एषः । इन्द्राय । वायवे । स्वःऽजित् । परि । सिच्यते । पवित्रे । दक्षऽसाधनः ॥ २ ॥

---

१. ग–परिचरंतः । २. ग–जामयोंगुल्यः तं । ३. ग-त-म–' जामयः अङ्गुल्यः ' नास्ति । ४. घ–पवमान पूयमान इंदो दीप्त । ५. घ–' इन्दु · · · वा ' नास्ति । ६. त–गच्छंतीत्यर्थः ।

vएषः सोमः vस्वर्जित् स्वर्गस्य सर्वस्य वा जेता[1] vइन्द्राय vवायवे च vपवित्रे vपरि vक्षिप्यते । कीदृश एषः । vदक्षसाधनः बलकारी ॥

एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः । सोमो वनेषु विश्ववित् ॥ ३ ॥

एषः । नृऽभिः । वि । नीयते । दिवः । मूर्धा । वृषा । सुतः । सोमः । वनेषु । विश्वऽवित् ॥३॥

vएषः vसोमः vनृभिः कर्मनेतृभिर्ऋत्विग्भिः vवि vनीयते विविधं नीयते । एष कीदृशः । vदिवः द्युलोकस्य vमूर्धा शिरोवत्प्रधानभूतः vवृषा अभिमतवर्षकः vसुतः अभिषुतः । कुत्र नीयते । vवनेषु वननीयेषु वनसंभूतद्रुमविकारेषु वा पात्रेषु । vविश्ववित् सर्वज्ञ एष इति समन्वयः ॥

एष गव्युरचिक्रदत्पवमानो हिरण्ययुः । इन्दुः सत्राजिदस्तृतः ॥ ४ ॥

एषः । गव्युः । अचिक्रदत् । पवमानः । हिरण्यऽयुः । इन्दुः । सत्राऽजित् । अस्तृतः ॥४॥

vएषः सोमः vपवमानः पूयमानः vअचिक्रदत् शब्दं करोति । कथंभूतः सन् । vगव्युः अस्माकं गा इच्छन् vहिरण्ययुः धनमिच्छन् vइन्दुः दीप्तः सन् vसत्राजित् महतः[2] शत्रोरसुरादेर्जेता vअस्तृतः स्वयमन्यैरहिंस्यश्च सन् ॥

एष सूर्येण हासते पवमानो अधि द्यवि । पवित्रे मत्सरो मदः ॥ ५ ॥

एषः । सूर्येण । हासते । पवमानः । अधि । द्यवि । पवित्रे । मत्सरः । मदः ॥ ५ ॥

vएषः vपवमानः पूयमानः सोमः vसूर्येण देवेन vअधि vद्यवि द्युलोकेऽन्तरिक्षे vपवित्रे vहासते परित्यज्यते । vमत्सरः मदकरः vमदः सोमः । यद्यप्यध्वर्युहस्तादशापवित्रे परित्यज्यते सोमस्तथाप्यन्तरिक्षे सूर्येण पवित्रे त्यज्यत इति भावना वीर्यवत्त्वाय । सस्त्वप्यन्यदेवेषु सोमस्रावणे सूर्यस्य कः प्रसङ्ग इति न वाच्यं सूर्यरश्मिभिरेव सोमस्याप्यायनात् ॥

एष शुष्म्यसिष्यदद्दुन्तरिक्षे वृषा हरिः । पुनान इन्दुरिन्द्रमा ॥ ६ ॥

एषः । शुष्मी । असिस्यदत् । अन्तरिक्षे । वृषा । हरिः । पुनानः । इन्दुः । इन्द्रम् । आ ॥ ६ ॥

vएष vशुष्मी बलवान् सोमः vअन्तरिक्षे दशापवित्रे vअसिष्यदत् स्यन्दते । कीदृश एषः । vवृषा वर्षकः vहरिः हरितवर्णः vपुनानः पूयमानः vइन्दुः दीप्तश्चैव[3] vइन्द्रमा इन्द्रं च अभिगच्छतीति शेषः । आ इति चार्थे ॥ ॥ १७ ॥

' एष वाजी ' इति षड्र्चं चतुर्थं सूक्तं प्रियमेधस्यार्षं गायत्रं सौम्यम् । ' एष वाजी प्रियमेधः ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

एष वाजी हितो नृभिर्विश्ववित्मनसस्पतिः । अव्यो वारं वि धावति ॥ १ ॥

एषः । वाजी । हितः । नृऽभिः । विश्वऽवित् । मनसः । पतिः । अव्यः । वारम् । वि । धावति ॥१॥

vएषः सोमः vवाजी गमनशीलः vहितः अध्वर्युणा[4] पात्रे निहितः vविश्ववित् सर्वज्ञः vमनसः स्तोत्रस्य vपतिः स्वामी । अथवा सोमस्य मनोभिमानित्वात् मनसः स्वामित्वं ' चन्द्रमा

---

१. ग-त-भ४-जेता सोमः । २. ग-संहत°; त-महतां । ३. ग-दीप्तश्चेंद्र इव; घ-दीप्तश्च; त-दीप्तश्च इव । ४. घ-नृभिः अध्वर्यादिभिः ।

मनो भूत्वा हृदयं प्राविशत्' (ऐ. आ. २.४.२) इति श्रुतेः । तादृशोऽसौ ᵛअश्वो ᵛवारम् अवेर्वालं दशापवित्रं ᵛवि ᵛधावति विविधं गच्छति ॥

एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः । विश्वा धामान्याविशन् ॥ २ ॥

एषः । पवित्रे । अक्षरत् । सोमः । देवेभ्यः । सुतः । विश्वा । धामानि । आऽविशन् ॥२॥

ᵛएषः ᵛसोमः ᵛदेवेभ्यः देवार्थं ᵛसुतः अभिषुतः सन् ᵛपवित्रे ᵛअक्षरत् स्रवति । ᵛविश्वा सर्वाणि ᵛधामानि देवशरीराणि ᵛआविशन् प्रविशन् । प्रवेष्टुमित्यर्थः ॥

एष देवः शुभायतेऽधि योनावमर्त्यः । वृत्रहा देववीतमः ॥ ३ ॥

एषः । देवः । शुभायते । अधि । योनौ । अमर्त्यः । वृत्रऽहा । देवऽवीतमः ॥ ३ ॥

ᵛएषः सोमः ᵛदेवः ᵛशुभायते शोभते । कुत्र । ᵛअधि ᵛयोनौ स्वीये स्थाने । कीदृश एषः । ᵛअमर्त्यः अमरणधर्मा ᵛवृत्रहा शत्रुहन्ता ᵛदेववीतमः अतिशयेन देवानां कामयिता ॥

एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः । अभि द्रोणानि धावति ॥ ४ ॥

एषः । वृषा । कनिक्रदत् । दशऽभिः । जामिऽभिः । यतः । अभि । द्रोणानि । धावति ॥४॥

ᵛएष ᵛवृषा वर्षिता कामानां ᵛकनिक्रदत् शब्दं कुर्वन् ᵛदशभिर्जामिभिः अङ्गुलीभिः ᵛयतः धृतः ᵛद्रोणानि द्रुममयाणि[1] पात्राणि ᵛअभि ᵛधावति अभिगच्छति ॥

एष सूर्यमरोचयत्पवमानो विचर्षणिः । विश्वा धामानि विश्ववित् ॥ ५ ॥

एषः । सूर्यम् । अरोचयत् । पवमानः । विऽचर्षणिः । विश्वा । धामानि । विश्वऽवित् ॥५॥

ᵛएषः सोमः ᵛसूर्यमरोचयत् रोचयति स्वरसेन । ᵛपवमानः पूयमानः ᵛविचर्षणिः सर्वस्य द्रष्टा ᵛविश्ववित् सर्ववित् । न केवलं सूर्यं किंतु ᵛविश्वा सर्वाणि ᵛधामानि तेजःस्थानानि रोचयति ॥

एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति । देवावीरघशंसहा ॥ ६ ॥

एषः । शुष्मी । अदाभ्यः । सोमः । पुनानः । अर्षति । देवऽअवीः । अघशंसऽहा ॥ ६ ॥

ᵛएषः ᵛसोमः ᵛशुष्मी बलवान् ᵛअदाभ्यः अदम्भनीयः ᵛपुनानः पूयमानः ᵛअर्षति गच्छति । ᵛदेवावीः देवानामविता ᵛअघशंसहा । अघान् शंसन्तीत्यघशंसाः । तेषां हन्ता ॥ ॥ १८ ॥

'प्रास्य' इति षड्र्चं पञ्चमं सूक्तं नृमेधस्याङ्गिरसस्यार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रम्यते च—'प्रास्य नृमेधः' इति । गतो विनियोगः ॥

प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा । देवाँ अनु प्रभूषतः ॥ १ ॥

प्र । अस्य । धाराः । अक्षरन् । वृष्णः । सुतस्य । ओजसा । देवान् । अनु । प्रऽभूषतः ॥१॥

ᵛअस्य सोमस्य ᵛवृष्णः वर्षकस्य ᵛसुतस्य अभिषुतस्य ᵛदेवाननु ᵛप्रभूषतः प्रभवितुमिच्छतः ᵛओजसा स्ववीर्येण ᵛधाराः ᵛप्र ᵛअक्षरन् प्रकर्षेण क्षरन्ति ॥

१. ग-घ-त-भ-मु-द्रुममयानि ।

सस्निं मृजन्ति वेधसो गृणन्तः कारवो गिरा । ज्योतिर्जज्ञानमुक्थ्यम् ॥ २ ॥

सस्निम् । मृजन्ति । वेधसः । गृणन्तः । कारवः । गिरा । ज्योतिः । जज्ञानम् । उक्थ्यम् ॥२॥

vसस्निम् अश्वस्थानीयं सर्पणस्वभावं वा सोमं vमृजन्ति शोधयन्ति । के । vगृणन्तः स्तुवन्तः vवेधसः विधातारः vकारवः कर्मकर्तारोऽध्वर्वादयः vगिरा स्तुत्या साधनेन । कीदृशं सस्निम् । vज्योतिः दीप्यमानं सोमं vजज्ञानं[1] जायमानम् । प्रवृद्धमित्यर्थः । अथवा ज्योतिर्जायमानम् 'अयं वै ज्योतिर्यत् सोमः' इति श्रुतेः[2] । vउक्थ्यं[3] स्तुत्यम्[3] ॥

सुषहा सोम तानि ते पुनानाय प्रभूवसो । वर्धा समुद्रमुक्थ्यम् ॥ ३ ॥

सुऽसहा । सोम । तानि । ते । पुनानाय । प्रभुवसो इति प्रभुऽवसो । वर्ध । समुद्रम् । उक्थ्यम् ॥३॥

हे vसोम vप्रभूवसो प्रभूतधन vपुनानाय पूयमानस्य vते तव vतानि तेजांसि vसुषहा शोभनाभिभावुकानि । यस्मादेवं तस्मात् vसमुद्रं समुद्रसदृशं द्रोणकलशम् vउक्थ्यं स्तुत्यं तं vवर्ध वर्धय । पूरय रसेन ॥

विश्वा वसूनि संजयन्पवस्व सोम धारया । इन्दो द्वेषांसि सध्र्यक् ॥ ४ ॥

विश्वा । वसूनि । सम्ऽजयन् । पवस्व । सोम । धारया । इन्दो । द्वेषांसि । सध्र्यक् ॥ ४ ॥

हे vसोम vविश्वा सर्वाणि vवसूनि अस्मदर्थं vसंजयन् vपवस्व क्षर vधारया । vद्वेषांसि द्वेष्याणि सर्वाणि vसध्र्यक् सहैव vइन्दो प्रेरय दूरदेशं प्रति ॥

रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित् । निदो यत्र मुमुच्महे ॥ ५ ॥

रक्ष । सु । नः । अररुषः । स्वनात् । समस्य । कस्य । चित् । निदः । यत्र । मुमुच्महे ॥ ५ ॥

हे सोम vनः अस्मान् vसु सुष्ठु vरक्ष पालय । कस्मात् । vअररुषः अदातुः vस्वनात् शब्दात् निन्दारूपात्[4] । किमेकस्यादानशीलस्य । न । vसमस्य सर्वस्य योऽस्ति तस्य सर्वस्य कस्यचित् । कंचनामुञ्चन्नित्यर्थः । नं केवलमदातुः स्वनात् । किं तर्हि । vकस्य vचित् कस्यापि vनिदः निन्दकाद्रक्ष । vयत्र vमुमुच्महे यस्मिन्रक्षणे सति वयं मुक्ता भवेम तेन रक्षणेन रक्षेति ॥

एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया । द्युमन्तं शुष्ममा भर ॥ ६ ॥

आ । इन्दो इति । पार्थिवम् । रयिम् । दिव्यम् । पवस्व । धारया ।
द्युऽमन्तम् । शुष्मम् । आ । भर ॥ ६ ॥

हे vइन्दो क्षिप्यमान सोम त्वं vधारया vआ vपवस्व सर्वतः क्षर । vपार्थिवं दिव्यं च vरयिं धनं vद्युमन्तं दीप्तिमन्तं vशुष्मं बलं च vआ vभर आहरास्मभ्यम् ॥ ॥ १९ ॥

'प्र धाराः' इति षड्र्चं षष्ठं सूक्तं बिन्दुनाङ्ग आङ्गिरसस्यार्षं गायत्रं पवमानसोमदेवताकम् । 'प्र धारा बिन्दुः' इत्यनुक्रमणिका । गतो विनियोगः ॥

---

१. ग-त-जज्ञानं जातं । २. भ-श्रुतिः । ३. भ१.२.३-'उक्थ्यं स्तुत्यं' नास्ति । ४. घ-त-निदः निंदारूपात् ।

प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन्। पुनानो वाचमिष्यति ॥ १ ॥

प्र। धाराः। अस्य। शुष्मिणः। वृथा। पवित्रे। अक्षरन्। पुनानः। वाचम्। इष्यति ॥१॥

[v]शुष्मिणः बलवतः [v]अस्य सोमस्य [v]धाराः [v]पवित्रे दशापवित्रे [v]वृथा अप्रयत्नेन[1] [v]अक्षरन् क्षरन्ति[2]। तदानीं [v]पुनानः पूयमानः सोमः [v]वाचं स्तुतिं स्वीयं ध्वनिं वा [v]इष्यति प्रेरयति ॥

इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत्। इयर्ति वग्नुमिन्द्रियम् ॥ २ ॥

इन्दुः। हियानः। सोतृऽभिः। मृज्यमानः। कनिक्रदत्। इयर्ति। वग्नुम्। इन्द्रियम् ॥२॥

अयम् [v]इन्दुः दीप्तः सोमः [v]हियानः प्रेर्यमाणः व्याप्रियमाणः। कैः। [v]सोतृभिः[3] ऋत्विग्भिः। पश्चाद्दशापवित्रे [v]मृज्यमानः शोध्यमानः[4] [v]कनिक्रदत् शब्दं कुर्वन् [v]इन्द्रियम् इन्द्रस्य संबन्धिनमिन्द्रियमपि - - - - - करं [v]वग्नुं शब्दम् [v]इयर्ति प्रेरयति ग्रहणसमये ॥

आ नः शुष्मं नृषाह्यं वीरवन्तं पुरुस्पृहम्। पवस्व सोम धारया ॥ ३ ॥

आ। नः। शुष्मम्। नृऽसह्यम्। वीरऽवन्तम्। पुरुऽस्पृहम्। पवस्व। सोम। धारया ॥ ३ ॥

हे [v]सोम त्वं [v]धारया [v]आ [v]पवस्व। किम्। [v]शुष्मं बलम्। कीदृशम्। [v]नृषाह्यं नृणामस्मद्विरोधिनामभिभावुकं [v]वीरवन्तं पुत्रोपेतं [v]पुरुस्पृहं बहुभिः स्पृहणीयं शुष्ममस्मा पवस्व। एतस्य लाभाय पवस्वेत्यर्थः। रसस्रावे सति होमद्वारा तस्सिद्धे शुष्मं पवस्वेत्युपचर्यते ॥

प्र सोमो अति धारया पवमानो असिष्यदत्। अभि द्रोणान्यासदम् ॥ ४ ॥

प्र। सोमः। अति। धारया। पवमानः। असिस्यदत्। अभि। द्रोणानि। आऽसदम् ॥४॥

अयं [v]पवमानः [v]सोमः [v]धारया [v]अति अतिक्रम्य दशापवित्रं [v]प्र [v]असिष्यदत् प्रस्यन्दते। किमर्थम्। [v]द्रोणानि द्रोणकलशादीनि [v]आसदम् आसादनाय[5] ॥

अप्सु त्वा मधुमत्तमं हरिं हिन्वन्त्यद्रिभिः। इन्दविन्द्राय पीतये ॥ ५ ॥

अप्ऽसु। त्वा। मधुमत्ऽतमम्। हरिम्। हिन्वन्ति। अद्रिऽभिः। इन्दो इति। इन्द्राय। पीतये ॥५॥

हे [v]इन्दो सोम [v]अप्सु वसतीवरीभूदकेषु [v]मधुमत्तमम् अतिशयेन मधुमन्तं [v]हरिं हरितवर्णं [v]त्वा त्वाम् [v]अद्रिभिः अभिषवग्रावभिः [v]हिन्वन्ति प्रेरयन्ति। किमर्थम्। [v]इन्द्राय इन्द्रस्य [v]पीतये पानाय ॥

सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे। चारुं शर्धाय मत्सरम् ॥ ६ ॥

सुनोत। मधुमत्ऽतमम्। सोमम्। इन्द्राय। वज्रिणे। चारुम्। शर्धाय। मत्सरम् ॥ ६ ॥

हे ऋत्विजः यूयं [v]मधुमत्तमं मधुररसोपेतं [v]सोममिन्द्राय [v]वज्रिणे वज्रयुक्ताय [v]सुनोत सुनुत। पुनः कीदृशम्। [v]चारुं चरणीयं [v]मत्सरं मदकरं [v]शर्धाय अस्माकं बलायेन्द्रस्य पानाय च सोमं सुनुतेति ब्रूते यजमानः स्वीयान् ॥ ॥ २० ॥

---

१. ग-अप्रयासेन। २. भ-प्रस्रवंति। ३. त-म१.४-स्तोतृभिः। ४. ग-म२.३-शोध्यमानः सन्। ५. म२.३-आसदनाय; म५-आसनाय।

'प्र सोमासः' इति षडृचं सप्तमं सूक्तं राहूगणस्य गोतमस्यार्षं सौम्यम्। 'प्र सोमासो गोतमः' इत्यनुक्रान्तम्। गतो विनियोगः ॥

प्र सोमासः स्वाध्यः पवमानासो अक्रमुः। रयिं कृण्वन्ति चेतनम् ॥ १ ॥

प्र। सोमासः। सुऽआध्यः। पवमानासः। अक्रमुः। रयिम्। कृण्वन्ति। चेतनम् ॥ १ ॥

प्र अक्रमुः प्रगच्छन्ति कलशं प्रति। के। सोमासः सोमाः। कीदृशाः। स्वाध्यः सुध्यानाः सुकर्माणो वा पवमानासः पूयमानाः। ते च चेतनं प्रज्ञापनं रयिं धनं कृण्वन्ति कुर्वन्त्यस्माकम् ॥

दिवस्पृथिव्या अधि भवेन्दो द्युम्नवर्धनः। भवा वाजानां पतिः ॥ २ ॥

दिवः। पृथिव्याः। अधि। भव। इन्दो इति। द्युम्नऽवर्धनः। भव। वाजानाम्। पतिः ॥२॥

हे इन्दो वाजानाम् अन्नानां पतिः स्वामी त्वं दिवः द्युलोकस्य पृथिव्याः भूलोकस्य द्युम्नवर्धनः द्योतमानस्य हिरण्यादिलक्षणधनस्य वर्धयिता भव। अस्माकं लोकद्वये यत् द्युम्नमस्ति तस्य वर्धयिता भवास्मभ्यमित्यर्थः ॥

तुभ्यं वाता अभिप्रियस्तुभ्यमर्षन्ति सिन्धवः। सोम वर्धन्ति ते महः ॥ ३ ॥

तुभ्यम्। वाताः। अभिऽप्रियः। तुभ्यम्। अर्षन्ति। सिन्धवः। सोम। वर्धन्ति। ते। महः ॥३॥

हे सोम तुभ्यं त्वदर्थं वाताः वायवः अभिप्रियः अभितर्पयितारो भवन्ति। तथा सिन्धवः स्यन्दमाना नद्यः तुभ्यमर्षन्ति गच्छन्ति। अभिपूयमाणस्य तवाप्यायनायैवं कुर्वन्तीत्यर्थः। त उभयेऽमी ते तव महः महत्वं वर्धन्ति वर्धयन्ति ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य संगथे ॥ ४ ॥

आ। प्यायस्व। सम्। एतु। ते। विश्वतः। सोम। वृष्ण्यम्। भव। वाजस्य। सम्ऽगथे ॥ ४ ॥

हे सोम त्वं वायुभिरद्भिश्च आ प्यायस्व प्रवृद्धो भव। ते त्वां विश्वतः वृष्ण्यं वर्षयोग्यं बलं समेतु संगच्छताम्। संगथे संग्रामे वाजस्य अन्नस्य प्रापकः भव ॥

तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम्। वर्षिष्ठे अधि सानवि ॥ ५ ॥

तुभ्यम्। गावः। घृतम्। पयः। बभ्रो इति। दुदुह्रे। अक्षितम्। वर्षिष्ठे। अधि। सानवि ॥५॥

हे बभ्रो बभ्रुवर्ण सोम तुभ्यं त्वदर्थं गावो घृतं पयः च अक्षितम् अक्षीणं दुदुह्रे दुहते। वर्षिष्ठे प्रवृद्धे अधि सानवि समुच्छ्रिते प्रदेशे स्थिताय तुभ्यम् ॥

स्वायुधस्य ते सुतो भुवनस्य पते वयम्। इन्दो सखित्वमुश्मसि ॥ ६ ॥

सुऽआयुधस्य। ते। सुतः। भुवनस्य। पते। वयम्। इन्दो इति। सखिऽत्वम्। उश्मसि ॥६॥

हे भुवनस्य भूतजातस्य पते स्वामिन् पालक सोम। सोमस्य जगदाप्यायिकत्वेन तत्स्वामित्वम्। हे इन्दो सोम वयम् अनुष्ठातारः स्वायुधस्य ते तव सुतः[2] सखित्वमुश्मसि कामयामहे ॥ ॥ २१ ॥

१. घ-त-भ४–तव। २. भ१–संतः।

'प्र सोमासः' इति षडृचमष्टमं सूक्तमात्रेयस्य इयावाश्वस्यार्षं गायत्रं सौम्यम्। अनुक्रम्यते च—'प्र सोमासः इयावाश्वः' इति। गतो विनियोगः ॥

प्र सोमासो मदच्युतः श्रवसे नो मघोनः। सुता विदथे अक्रमुः ॥ १ ॥

प्र। सोमासः। मदऽच्युतः। श्रवसे। नः। मघोनः। सुताः। विदथे। अक्रमुः ॥ १ ॥

vसोमासः सोमाः vमदच्युतः मदस्राविणः vसुताः अभिषुताः सन्तः vविदथे यज्ञे vमघोनः हविष्मतो मम vश्रवसे अन्नाय कीर्तये वा vप्र vअक्रमुः प्रगच्छन्ति ॥

आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये ॥ २ ॥

आत्। ईम्। त्रितस्य। योषणः। हरिम्। हिन्वन्ति। अद्रिऽभिः। इन्दुम्। इन्द्राय। पीतये ॥२॥

vआत् अपि[1] च vईम् एनं vहरिं हरितवर्णं सोमं vत्रितस्य ऋषेः vयोषणः अङ्गुलयः vअद्रिभिः ग्रावभिः vहिन्वन्ति प्रेरयन्ति[2]। किमर्थम्। vइन्दुं दीप्तं सोमम् vइन्द्राय इन्द्रस्य vपीतये पानाय ॥

आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम्। अत्यो न गोभिरज्यते ॥ ३ ॥

आत्। ईम्। हंसः। यथा। गणम्। विश्वस्य। अवीवशत्। मतिम्।
अत्यः। न। गोभिः। अज्यते ॥ ३ ॥

vआत् अपि च vईम् अयं सोमः vहंसो vयथा vगणं जनसंघं स्वगतिविशेषेण स्वेन वा प्रविशति तद्वत् vविश्वस्य सर्वस्य स्तोतृजनस्य vमतिं स्तुतिं बुद्धिं वा vअवीवशत् वशां नयति। स च सोमः vअत्यो vन अश्व इव vगोभिः गव्यैरुदकैर्वा vअज्यते सिच्यते स्निग्धीक्रियते ॥

उभे सोमावचाकशन्मृगो न तक्तो अर्षसि। सीदन्नृतस्य योनिमा ॥ ४ ॥

उभे इति। सोम। अवऽचाकशत। मृगः। न। तक्तः। अर्षसि।
सीदन्। ऋतस्य। योनिम्। आ ॥ ४ ॥

हे vसोम vउभे द्यावापृथिव्यौ vअवचाकशत्। पश्यतिकर्मेदम्। पश्यन् vमृगो vन मृग इव vतक्तः गव्यैः पयआदिभिर्मिश्रितः सन्। 'दध्ना तनक्ति' (तै. सं. २.५.३.५) इत्यादौ तथा दृष्टत्वात्। vअर्षसि[3] गच्छसि[3] च[4]। किं कुर्वन्। vऋतस्य यज्ञस्य vयोनिं स्थानम् vआ vसीदन् आश्रयन्[5]। यज्ञसाधनाय गच्छसीत्यर्थः[6] ॥

अभि गावो अनूषत योषा जारमिव प्रियम्। अर्कस्राजिं यथा हितम् ॥ ५ ॥

अभि। गावः। अनूषत। योषाः। जारम्ऽइव। प्रियम्। अर्कन्। आजिम्। यथा। हितम् ॥५॥

१. ग–अभिषवानंतरं; भ१.२–एवं च। २. ग-त-भ–'प्रेरयंति' नास्ति। ३. घ-त-भ–अर्षति गच्छति। ४. त७-भ२–'च' नास्ति। ५. ग-घ-त-भ-४–आश्रयन् गच्छति; भ१.२.३-मु–आश्रयन् गच्छसि। ६. ग-घ-त-भ–गच्छतीत्यर्थः।

हे सोम त्वां [v]गावः शब्दाः [v]अभि [v]अनूषत अभिष्टुवन्ति। [v]योषा [v]प्रियं [v]जारमिव। सा यथा तं स्तौति तद्वत्। स सोमः [v]आजिं गन्तव्यं [v]हितं मित्रमिव तं [v]यथा अन्यः [v]अगन्[१] स्वहिताय गच्छति तद्वत्। अथवा हितं धनप्रापकत्वेन[२] हितकरम्[३] आजिं शूर इव। अयमागच्छति पात्रम्॥

अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च। सनिं मेधामुत श्रवः॥ ६॥

अस्मे इति। धेहि। द्युऽमत। यशः। मघवत्ऽभ्यः। च। मह्यम्। च। सनिम्। मेधाम्। उत। श्रवः॥ ६॥

हे सोम [v]अस्मे[४] अस्मभ्यं [v]द्युमत् दीप्तिमत् [v]यशः अन्नं [v]धेहि देहि। कीदृशेभ्योऽस्मभ्यम्। [v]मघवद्भ्यश्च हविर्लक्षणान्नवद्भ्यश्च [v]मह्यं [v]च स्तुतिकर्त्रे च। अथवा मह्यमस्मभ्यमित्यर्थः। अस्मे मघवद्भ्यश्च मह्यं चेति तेषामेवाशंसनाभेदादुभयत्र चशब्दो युक्तः। किंच [v]सनिं धनं [v]मेधां प्रज्ञाम् [v]उत अपि च [v]श्रवः कीर्तिं च धेहि॥ ॥ २२॥

'प्र सोमासः' इति षट्ऋचं नवमं सूक्तं त्रितस्यार्षं गायत्रं पवमानसोमदेवताकम्। 'प्र सोमासस्त्रितः' इत्यनुक्रान्तम्। गतो विनियोगः॥

प्र सोमासो विपश्चितोऽपां न यन्त्यूर्मयः। वनानि महिषाइव॥ १॥

प्र। सोमासः। विपःऽचितः। अपाम्। न। यन्ति। ऊर्मयः। वनानि। महिषाःऽइव॥ १॥

[v]विपश्चितः मेधाविनः [v]सोमासः सोमाः [v]प्र[५] [v]यन्ति[६] प्रगच्छन्ति पात्राणि प्रति। किमिव। [v]अपाम् [v]ऊर्मयः [v]न। ते यथा संततमुद्भवन्ति[७] तद्वत्। बाहुल्येऽयं दृष्टान्तो दर्शितो गमने दृष्टान्तान्तरमभिधीयते। [v]वनानि [v]महिषाः प्रवृद्धा मृगाः [v]इव। अथवा स्वाश्रयात् प्रपतने[८] प्रथमो दृष्टान्तो द्वितीयस्तु दशापवित्रादधःप्रवेशे॥

अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया। वाजं गोमन्तमक्षरन्॥ २॥

अभि। द्रोणानि। बभ्रवः। शुक्राः। ऋतस्य। धारया। वाजम्। गोऽमन्तम्। अक्षरन्॥ २॥

[v]अभि क्षरन्तीति शेषः। उपसर्गश्रुतेरुचितक्रियाध्याहारः। [v]द्रोणानि द्रोणकलशान् प्रति। यद्यपि द्रोणकलश एक एव तथापि तत्प्राधान्यादितरेऽपि पात्रा द्रोणा इत्युच्यन्ते। अथवैकस्मिन्नेव पूजार्थं बहुवचनम्। के। [v]बभ्रवः बभ्रुवर्णाः सोमाः [v]शुक्राः दीप्ताः। केन प्रकारेण। [v]ऋतस्य[९] अमृतस्य[९] [v]धारया धाराकारेण[९]। किंच [v]वाजम् अन्नं [v]गोमन्तं बहुगोयुक्तम् [v]अक्षरन् क्षरन्ति। अथवैकमेव वाक्यम्। उक्तविधाः सोमा द्रोणान् प्रत्यक्षरन् धारया। किं कुर्वन्तः। गोमन्तं वाजं प्रयच्छन्त इत्यर्थः॥

सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षन्ति विष्णवे॥ ३॥

सुताः। इन्द्राय। वायवे। वरुणाय। मरुत्ऽभ्यः। सोमाः। अर्षन्ति। विष्णवे॥ ३॥

---

१. ग-त-भ-'अगन्' नास्ति। २. त-धनंप्रापत्वेन; भ१.४-धनप्रापत्वेन। ३. ग-हितकरं त्वां; त-भ-मु-हितकरं वा। ४. ग-त-भ-'अस्मे' नास्ति। ५. त-भ१.४-प्रणयंति। ६. ग-°मुच्चलंति। ७. ग-प्रच्यवने; त-भ४-प्रदवने। ८. ग-त-भ-'ऋतस्य अमृतस्य' नास्ति। ९. भ१-धारकेण।

vसुताः अभिषुताः vसोमाः vइन्द्राय इन्द्रार्थं vवायवे च vवरुणाय च vमरुद्भ्यः च vविष्णवे वैषामर्थम् vअर्षन्ति गच्छन्ति ॥

तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ॥ ४ ॥

तिस्रः । वाचः । उत् । ईरते । गावः । मिमन्ति । धेनवः । हरिः । एति । कनिक्रदत् ॥४॥

vतिस्रो vवाचः । ऋगादिभेदेन त्रिविधा स्तुतिः । vउदीरते प्रोद्गमयन्त्यृत्विजः । vधेनवः आशिरेण प्रीणयित्र्यः vगावः vमिमन्ति शब्दयन्ति दोहार्थम् । vहरिः हरितवर्णश्च सोमः vकनिक्रदत् शब्दं कुर्वन् vएति गच्छति[1] कलशम् ॥

अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः । मर्मृज्यन्ते दिवः शिशुम् ॥ ५ ॥

अभि । ब्रह्मीः । अनूषत । यह्वीः । ऋतस्य । मातरः । मर्मृज्यन्ते । दिवः । शिशुम् ॥ ५ ॥

vब्रह्मीः ब्राह्मणप्रेरिताः vयह्वीः महत्यः । यह्वीरिति महन्नाम । vऋतस्य यज्ञस्य vमातरः निर्माञ्यः स्तुतयः vअभि vअनूषत स्तुवन्ति । किम् । vदिवः द्युदेवतायाः vशिशुं शिशुस्थानीयं सोमम् । तमेव vमर्मृज्यन्ते[2] मृजन्ति । 'तृतीयस्यामितो दिवि सोम आसीत्' (तै. सं. ३. ५. ७. १) इत्यादिश्रुतेर्द्युशिशुत्वं तस्य ॥

रायः समुद्रांश्चतुरोऽस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणः ॥ ६ ॥

रायः । समुद्रान् । चतुरः । अस्मभ्यम् । सोम । विश्वतः । आ । पवस्व । सहस्रिणः ॥ ६ ॥

vरायः धनस्य संबन्धिनः vचतुरः vसमुद्रान् । धनपूर्णानित्यर्थः । तादृशान् समुद्रान् vअस्मभ्यम् अर्थाय हे vसोम vविश्वतः सर्वतः vआ vपवस्व । तथा vसहस्रिणः अपरिमितान् कामान् आ पवस्व आयच्छ । चतुःसमुद्रस्थधनविशेषप्राप्तेः तन्मध्यगतभूमिस्वामित्वमन्तरेणासंभवाच्चतुःसमुद्रमुद्रितभूमण्डलस्वामित्वमेवाशास्ते यजमानः ॥ ॥ २३ ॥

'प्र सुवानः' इति षड्वृचं दशमं सूक्तम् । ऋष्यादयः पूर्ववत् । 'प्र सुवानः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र सुवानो धारया तनेन्दुर्हिन्वानो अर्षति । रुजद्दृळ्हा व्योजसा ॥ १ ॥

प्र । सुवानः । धारया । तना । इन्दुः । हिन्वानः । अर्षति । रुजत् । दृळ्हा । वि । ओजसा ॥१॥

vइन्दुः सोमः vसुवानः सूयमानः vहिन्वानः अध्वर्युणा प्रेर्यमाणः vधारया vतना पवित्रं vप्र vअर्षति गच्छति । अथ प्रत्यक्षेणोच्यते । vदृळ्हा दृढान्यपि शत्रुपुराणि vओजसा बलेन vवि vरुजत् विरुजति विश्लथयति ॥

सुत इन्द्राय वायवे वरुणाय मरुद्भ्यः । सोमो अर्षति विष्णवे ॥ २ ॥

सुतः । इन्द्राय । वायवे । वरुणाय । मरुत्ऽभ्यः । सोमः । अर्षति । विष्णवे ॥ २ ॥

अयं vसुतः अभिषुतः vसोमः इन्द्रार्थम्[3] vअर्षति गच्छति ॥

१. ग-त१.६-भ१-'गच्छति' नास्ति । २. त-मृज्यते । ३. घ-इंद्राय वायवे वरुणाय मरुद्भ्यश्च विष्णवे च ।

वृषाणं वृषभिर्युतं सुन्वन्ति सोममद्रिभिः । दुहन्ति शक्मना पयः ॥ ३ ॥

वृषाणम् । वृषऽभिः । युतम् । सुन्वन्ति । सोमम् । अद्रिऽभिः । दुहन्ति । शक्मना । पयः ॥३॥

[v]वृषाणं रससेक्तारं [v]यतं नियतं [v]सोमं [v]वृषभिः रसस्य वर्षकैः [v]अद्रिभिः ग्रावभिः [v]सुन्वन्ति[1]। [v]शक्मना कर्मणा [v]दुहन्ति अध्वर्वादयः [v]पयः सोमरसम् । सोमं पयो दुहन्तीति द्विकर्मकोऽयम् ॥

भुवत्त्रितस्य मर्ज्यो भुवदिन्द्राय मत्सरः । सं रूपैरज्यते हरिः ॥ ४ ॥

भुवत् । त्रितस्य । मर्ज्यः । भुवत् । इन्द्राय । मत्सरः । सम् । रूपैः । अज्यते । हरिः ॥४॥

[v]त्रितस्य अपां पुत्रस्य सूक्तद्रष्टुर्ऋषेः सोऽयं [v]मत्सरः मदकरः सोमः [v]मर्ज्यो [v]भुवत् शुद्धो[2] भवति । तस्य यागार्थं शेषपानार्थं च । तथा [v]इन्द्राय इन्द्रपानाय मर्ज्यः [v]भुवत् । [v]रूपैः रूपकैश्च[3] क्षीरादिभिः [v]हरिः हरितवर्णः सोमः [v]सम् [v]अज्यते ॥

अभीमृतस्य विष्टपं दुहते पृश्निमातरः । चारुं प्रियतमं हविः ॥ ५ ॥

अभि । ईम् । ऋतस्य । विष्टपम् । दुहते । पृश्निऽमातरः । चारुं । प्रियऽतमम् । हविः ॥५॥

[v]ईम् एनं सोमम् [v]ऋतस्य [v]विष्टपं स्थानम् । यज्ञाश्रयमित्यर्थः । तादृशं [v]पृश्निमातरः मरुतः [v]अभि [v]दुहते । किम् । [v]प्रियतमम् इन्द्रादीनां [v]हविः होमसाधनं [v]चारु[4] मनोहरम्[5]। मरुत्प्रेरित-वृष्टया सोमवृद्धेस्तद्दोग्धृत्वम् ॥

समेनमहुता इमा गिरो अर्षन्ति सस्रुतः । धेनूर्वाश्रो अवीवशत् ॥ ६ ॥

सम् । एनम् । अहुताः । इमाः । गिरः । अर्षन्ति । सऽस्रुतः । धेनूः । वाश्रः । अवीवशत् ॥६॥

[v]सम् [v]अर्षन्ति संगच्छन्ते [v]एनं सोमम् [v]अहुताः अकुटिलाः [v]गिरः अस्मदीयाः स्तुतयः [v]सस्रुतः सरन्त्यः । ताश्च [v]धेनूः प्रीणयित्रीः[6] स्तुतीः [v]वाश्रः शब्दयन् [v]अवीवशत् कामयते[7] सोमः ॥ ॥ २४ ॥

'आ नः' इति षड्चमेकादशं सूक्तमाङ्गिरसस्य प्रभूवसोरार्षं गायत्रं पवमानसोमदेवताकम् । अनुक्रान्तं च—'आ नः पवस्व प्रभूवसुः' इति । गतो विनियोगः ॥

आ नः पवस्व धारया पवमान रयिं पृथुम् । यया ज्योतिर्विदासि नः ॥ १ ॥

आ । नः । पवस्व । धारया । पवमान । रयिम् । पृथुम् । यया । ज्योतिः । विदासि । नः ॥ १ ॥

हे [v]पवमान सोम त्वं [v]धारया [v]नः अस्माकम् [v]आ [v]पवस्व सर्वतः क्षर । किम् । [v]रयिं धनं [v]पृथुं विस्तीर्णम् । [v]यया धारया [v]ज्योतिः द्योतमानं यज्ञं स्वर्गं वा [v]विदासि लम्भयसि [v]नः अस्माकम् ॥

इन्दो समुद्रमीङ्खय पवस्व विश्वमेजय । रायो धर्ता न ओजसा ॥ २ ॥

इन्दो इति । समुद्रम् । ईङ्खय । पवस्व । विश्वम् । एजय । रायः । धर्ता । नः । ओजसा ॥२॥

हे [v]इन्दो सोम हे [v]समुद्रमीङ्खय । समुद्रमित्युदकनाम । ईङ्खयतिर्गतिकर्मा[9] । उदकप्रेरक तथा हे [v]विश्वमेजय विश्वस्य सर्वस्यास्मच्छत्रोः कम्पयितः सोम त्वम् [v]ओजसा त्वदीयेन बलेन [v]नः

---

१. त-भ-'सुन्वंति' नास्ति । २. ग-त-भ-'शुद्धो' नास्ति । ३. भ१-°दकैश्च । ४. ग-त-भ-सोमं । ५. घ-त-भ४-प्रीणयित्र्यः । ६. ग-अकामयत । ७. ग-भ४-ईखति°; त-ईषति° ।

अस्मभ्यं vरायः धनस्य vधर्ता धारकः vपवस्व । भवेत्यर्थः । अत्र यद्यप्युदकप्रेरणसर्वशत्रुकम्पने संबोधनान्तर्गतत्वादुद्देश्यगते तथापि यजमानस्यापेक्षिते इति रायो धर्तृत्ववदाशास्ये अधिगन्तव्ये ॥

त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः । क्षरा णो अभि वार्यम् ॥ ३ ॥

त्वया । वीरेण । वीरऽवः । अभि । स्याम । पृतन्यतः । क्षर । नः । अभि । वार्यम् ॥ ३ ॥

हे vवीरवः वीरवन् सोम vवीरेण vत्वया साधनेन vपृतन्यतः संग्राममिच्छतः शत्रून् vअभि vष्याम अभिभवेम । अतः vनः अस्माकं vवार्यं वरणीयं धनम् vअभि vक्षर । अभिगमयेत्यर्थः । अथवा वरणीयं सोमाख्यं धनं क्षर पवस्व ॥

प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः । व्रता विदान आयुधा ॥ ४ ॥

प्र । वाजम् । इन्दुः । इष्यति । सिसासन् । वाजऽसाः । ऋषिः । व्रता । विदानः । आयुधा ॥४॥

सोमः vवाजम् अन्नम् vइष्यति प्रेरयति यजमानेभ्यः[1] । किं कुर्वन् । vसिषासन् यजमानान् संभक्तुमिच्छन् । ईदृशः vइन्दुः[2] vवाजसाः अन्नस्य दाता vऋषिः सर्वस्य द्रष्टा vव्रता कर्माणि आयुधानि च vविदानः जानन् ॥

तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि । सोमं जनस्य गोपतिम् ॥ ५ ॥

तम् । गीःऽभिः । वाचम्ऽईङ्खयम् । पुनानम् । वासयामसि । सोमम् । जनस्य । गोऽपतिम् ॥५॥

vतं सोमं vगीर्भिः स्तुतिवाग्भिः[3] स्तौमीति शेषः । किंच vवाचमीङ्खयं वाचः प्रेरयितारं vपुनानं पूयमानं तं vसोमं vवासयामसि वासयामः श्रयणद्वय्यैः । कीदृशं सोमम् । vजनस्य vगोपतिं गवां पालकम् । यद्वा । एकमेव वाक्यम् । उक्तविशेषणविशिष्टं सोमं स्तुतिभिर्वासयाम इति । माधवस्तु वाचमिति पृथक्पदं तिङन्तं कृत्वा वाक्यद्वयं चकार ॥

विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः । पुनानस्य प्रभूवसोः ॥ ६ ॥

विश्वः । यस्य । व्रते । जनः । दाधार । धर्मणः । पतेः । पुनानस्य । प्रभुऽवसोः ॥ ६ ॥

vविश्वः सर्वः vजनः मनुष्यो यजमानः vयस्य सोमस्य vव्रते कर्मणि vदाधार धारयति मन इति शेषः । कीदृशस्य । vधर्मणः[4] कर्मणः vपतेः पालकस्य vपुनानस्य पूयमानस्य vप्रभूवसोः प्रभूतधनस्य ॥ ॥ २५ ॥

' असर्जि ' इति षड्चं द्वादशं सूक्तम् । ऋष्यादयः पूर्ववत् । ' असर्जि ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः । कार्ष्मन्वाजी न्यक्रमीत् ॥ १ ॥

असर्जि । रथ्यः । यथा । पवित्रे । चम्वोः । सुतः । कार्ष्मन् । वाजी । नि । अक्रमीत् ॥१॥

vरथ्यो vयथा रथसंबन्ध्यश्व इव स यथा विसृज्यते तद्वत् vचम्वोः अधिषवणफलकयोः vसुतः अभिषुतः सोमः vअसर्जि सृष्टोऽभूत् vपवित्रे । तथाभूतः vवाजी वेजनवान् सोमाख्योऽश्वः vकार्ष्मन् । कार्ष्मं युद्धमितरेतरकर्षणात् । अत्र देवानामाकर्षणवति[5] यज्ञाख्ये संग्रामे vन्यक्रमीत् नितरां क्रामति ॥

---

१. त–ऋचमानेभ्यः । २. भ१.२–इंदुः सोमः । ३. त१.२.६–भ१.२–स्तुतिभिर्वाग्भिः; त७–स्तुतिभिः । ४. ग-त-भ–यस्य धर्मणः। ५. ग–°माकर्षणोपेते; त-भ२.४–°माकर्षणयति; भ१–°माकर्षयति ।

स वह्निः सोम जागृविः पवस्व देववीरति । अभि कोशं मधुश्चुतम् ॥ २ ॥

सः । वह्निः । सोम । जागृविः । पवस्व । देवऽवीः । अति । अभि । कोशम् । मधुऽश्चुतम् ॥२॥

हे [v]सोम [v]स [v]वह्निः वाहकः [v]जागृविः जागरूकः [v]देववीः देवकामस्त्वं [v]मधुश्चुतं मधुस्रावि [v]कोशं दशापवित्रमतिक्रम्य [v]अभि [v]पवस्व द्रोणकलशं प्रति क्षर ॥

स नो ज्योतींषि पूर्व्य पवमान वि रोचय । क्रत्वे दक्षाय नो हिनु ॥ ३ ॥

सः । नः । ज्योतींषि । पूर्व्य । पवमान । वि । रोचय । क्रत्वे । दक्षाय । नः । हिनु ॥ ३ ॥

हे [v]पूर्व्य पुराण [v]पवमान सोम[1] [v]नः अस्माकं [v]ज्योतींषि दिव्यानि स्थानानि [v]वि [v]रोचय प्रकाशय । किंच [v]क्रत्वे कर्मणे यागाय [v]दक्षाय बलाय च[2] बलप्रदाय[3] यागाय वा [v]नः अस्मान् [v]हिनु प्रेरय ॥

शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः । पवते वारे अव्यये ॥ ४ ॥

शुम्भमानः । ऋतयुऽभिः । मृज्यमानः । गभस्त्योः । पवते । वारे । अव्यये ॥ ४ ॥

[v]ऋतायुभिः यज्ञकामैर्ऋत्विग्भिः [v]शुम्भमानः अलंक्रियमाणस्तेषामेव [v]गभस्त्योः हस्तयोः [v]मृज्यमानः सोमः [v]अव्यये अविमये [v]वारे वाले दशापवित्रे [v]पवते पूयते ॥

स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा । पवतामान्तरिक्ष्या ॥ ५ ॥

सः । विश्वा । दाशुषे । वसु । सोमः । दिव्यानि । पार्थिवा । पवताम् । आ । अन्तरिक्ष्या ॥ ५ ॥

[v]सः अभिषूयमाणः [v]सोमः [v]दाशुषे हविर्दात्रे [v]विश्वा सर्वाणि [v]वसु वसूनि धनानि [v]पवतां प्रयच्छतु । विश्वानीत्युक्तस्य विवरणं शिष्टम् । [v]दिव्यानि दिवि भवानि [v]पार्थिवा पृथिवी-संबद्धानि [v]अन्तरिक्ष्या[4] अन्तरिक्षे भवानि च पवताम् ॥

आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि । वीरयुः शवसस्पते ॥ ६ ॥

आ । दिवः । पृष्ठम् । अश्वऽयुः । गव्यऽयुः । सोम । रोहसि । वीरऽयुः । शवसः । पते ॥६॥

हे [v]सोम त्वं स्तोतृणाम् [v]अश्वयुः अश्वमिच्छन् [v]गव्ययुः गा इच्छन् [v]वीरयुः पुत्रानिच्छन् [v]दिवस्पृष्ठं द्युलोकम् [v]आ [v]रोहसि आहुतिद्वारा हे [v]शवसस्पते अन्नस्य पालक ॥ ॥ २६ ॥

'स सुतः' इति षडृचं त्रयोदशं सूक्तं रहूगणस्यार्षं[5] गायत्रं सौम्यम् । अनुक्रम्यते च—'स सुतो रहूगणः' इति । गतो विनियोगः ॥

स सुतः पीतये वृषा सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥ १ ॥

सः । सुतः । पीतये । वृषा । सोमः । पवित्रे । अर्षति । विऽघ्नन् । रक्षांसि । देवऽयुः ॥१॥

[v]सः [v]सोमः [v]पीतये इन्द्रादिपानाय[6] [v]सुतः अभिषुतः [v]वृषा वर्षणः[7] सन् [v]पवित्रे [v]अर्षति गच्छति । किं कुर्वन् । [v]रक्षांसि [v]विघ्नन्[8] [v]देवयुः देवकामः स इत्यन्वयः ॥

---

१. घ–सोम स त्वं । २. ग-घ-त–'च' नास्ति । ३. भ१.२–बलप्रदानाय । ४. त५-भ१.२–आंतरिक्ष्या । ५. ग-त-भ४–राहू° । ६. ग–इंद्रपानाय । ७. ग–वर्षकः; त३.४.५-भ४–कषणः । ८. ग-त५–विघ्नन् निघ्नन् ; त३–निघ्नन् ।

स पवित्रे विचक्षणो हरिरर्षति धर्णसिः । अभि योनिं कनिक्रदत् ॥ २ ॥

सः । पवित्रे । विऽचक्षणः । हरिः । अर्षति । धर्णसिः । अभि । योनिम् । कनिक्रदत् ॥२॥

[v]सः सोमः [v]विचक्षणः । पश्यतिकर्मैतत् । सर्वस्य द्रष्टा [v]हरिः हरितवर्णः सोमः [v]धर्णसिः सर्वस्य धारकः [v]पवित्रे [v]अर्षति गच्छति । पश्चात् [v]कनिक्रदत् शब्दं कुर्वन् [v]योनिं स्थानं द्रोणकलशम् [v]अभि गच्छति ॥

स वाजी रोचना दिवः पवमानो वि धावति । रक्षोहा वारमव्ययम् ॥ ३ ॥

सः । वाजी । रोचना । दिवः । पवमानः । वि । धावति । रक्षःऽहा । वारम् । अव्ययम् ॥३॥

[v]स [v]वाजी वेजनवानश्वस्थानीयः [v]दिवः स्वर्गस्य[1] [v]रोचना रोचकः [v]पवमानः पूयमानः [v]वि [v]धावति । कीदृशः । [v]रक्षोहा रक्षोहन्ता [v]अव्ययं [v]वारं दशापवित्रमतीत्य च[2] धावति ॥

स त्रितस्याधि सानवि पवमानो अरोचयत् । जामिभिः सूर्यं सह ॥ ४ ॥

सः । त्रितस्य । अधि । सानवि । पवमानः । अरोचयत् । जामिऽभिः । सूर्यम् । सह ॥४॥

[v]सः सोमः [v]त्रितस्य महर्षेः [v]अधि [v]सानवि समुच्छ्रिते यज्ञे । अधीति सप्तम्यर्थानुवादी । [v]पवमानः पूयमानः [v]जामिभिः प्रवृद्धैर्बन्धुभूतैर्वा स्वतेजोभिः [v]सह सहितः सन् [v]सूर्यम् [v]अरोचयत् प्रकाशितवान् ॥

स वृत्रहा वृषा सुतो वरिवोविददभ्यः । सोमो वाजमिवासरत् ॥ ५ ॥

सः । वृत्रऽहा । वृषा । सुतः । वरिवःऽवित् । अदाभ्यः । सोमः । वाजम्ऽइव । असरत् ॥५॥

[v]स [v]वृत्रहा [v]वृषा वर्षकः [v]सुतः अभिषुतः [v]वरिवोवित् धनस्य लम्भकः [v]अदाभ्यः[3] अन्यैरदम्भनीयः [v]सोमः [v]वाजमिव संग्राममश्व इव [v]असरत् गच्छति कलशम् ॥

स देवः कविनेषितोऽभि द्रोणानि धावति । इन्दुरिन्द्राय मंहना ॥ ६ ॥

सः । देवः । कविना । इषितः । अभि । द्रोणानि । धावति । इन्दुः । इन्द्राय । मंहना ॥६॥

[v]सः सोमः [v]देवः [v]इन्दुः क्रियमानः [v]कविना क्रान्तप्रज्ञेनाध्वर्युणा [v]इषितः प्रेरितः सन् [v]द्रोणानि द्रोणकलशान् [v]अभि [v]धावति अभिगच्छति । किमर्थम् । [v]इन्द्राय इन्द्रार्थम् । [v]मंहना महान् स इति समन्वयः ॥ ॥ २७ ॥

' एषः ' इति षड्चं चतुर्दशं सूक्तम् । ऋष्यादयः पूर्ववत् । ' एष उ स्यः ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

एष उ स्य वृषा रथोऽव्यो वारेभिरर्षति । गच्छन्वाजं सहस्रिणम् ॥ १ ॥

एषः । ऊँ इति । स्यः । वृषा । रथः । अव्यः । वारेभिः । अर्षति ।
गच्छन् । वाजम् । सहस्रिणम् ॥ १ ॥

---

१. ग-त-भ–' स्वर्गस्य ' नास्ति । २. ग–वि; त-भ४–व । ३. घ-त१.२.६.७–अदाभ्यः अदातृभ्यः; त३.४.५–अदातृभ्यः ।

vस्यः स[1] प्रसिद्धः vएषः अभिषुतः सोमः vवृषा वर्षिता vरथः रंहणस्वभावः vअव्यो vवारेभिः अवेर्वालैर्देशापवित्रेण vअर्षति गच्छति कलशम् । vवाजम् अन्नं vसहस्रिणं सहस्रसंख्याकं यजमानाय प्रदातुं vगच्छन् द्रोणकलशं प्रविशन्नर्षतीत्यर्थः । vउ[2] पूरणः[2] ॥

एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥ २ ॥

एतम् । त्रितस्य । योषणः । हरिम् । हिन्वन्ति । अद्रिऽभिः । इन्दुम् । इन्द्राय । पीतये ॥२॥

vएतम् vइन्दुं क्रियमाणं vहरिं हरितवर्णं सोमं vत्रितस्य ऋषेः vयोषणः अङ्गुलयः vअद्रिभिः[3] vहिन्वन्ति[3] vइन्द्राय इन्द्रस्य vपीतये पानाय ॥

एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः । याभिर्मदाय शुम्भते ॥ ३ ॥

एतम् । त्यम् । हरितः । दश । मर्मृज्यन्ते । अपस्युवः । याभिः । मदाय । शुम्भते ॥ ३ ॥

vएतं vत्यं तं सोममध्वर्योः vदश vहरितः हरणस्वभावा अङ्गुलयः vअपस्युवः कर्मेच्छवः सत्यः vमर्मृज्यन्ते शोधयन्ति । vयाभिः इन्द्रस्य vमदाय vशुम्भते दीप्यते । शोध्यत इत्यर्थः । तमेतमिति संबन्धः ॥

एष स्य मानुषीष्वा श्येनो न विक्षु सीदति । गच्छञ्जारो न योषितम् ॥ ४ ॥

एषः । स्यः । मानुषीषु । आ । श्येनः । न । विक्षु । सीदति । गच्छन् । जारः । न । योषितम् ॥४॥

vस्यः सः vएषः सोमः vमानुषीषु vविक्षु प्रजासु यजमानरूपास्वनुग्रहेण vआ vसीदति vश्येनो vन श्येन इव । पुनः[4] क इव[4] । vयोषितं vगच्छन् अभिगच्छन् vजारो vन जार इव । स यथा संकेतितस्तस्याः कामपूरणाय गूढो गच्छति तद्वदित्यर्थः ॥

एष स्य मधो रसोऽवं चष्टे दिवः शिशुः । य इन्दुर्वारमाविशत् ॥ ५ ॥

एषः । स्यः । मधः । रसः । अव । चष्टे । दिवः । शिशुः । यः । इन्दुः । वारम् । आ । अविशत् ॥५॥

vस्यः[5] सः vएषः vमधः मदनिमित्तः vरसः vअव vचष्टे सर्वमवपश्यति[6] । vदिवः vशिशुः द्युपुत्रः । तत्रोत्पत्तेः पुत्रत्वमस्य । vय vइन्दुः दीप्तः सोमः vवारं दशापवित्रम् vआविशत् आविशति स एष इति ॥

एष स्य पीतये सुतो हरिरर्षति धर्णसिः । क्रन्दन्योनिमभि प्रियम् ॥ ६ ॥

एषः । स्यः । पीतये । सुतः । हरिः । अर्षति । धर्णसिः । क्रन्दन् । योनिम् । अभि । प्रियम् ॥६॥

vएष vस्यः स सोमः vपीतये पानाय vसुतः अभिषुतः vहरिः हरितवर्णः vधर्णसिः धारकः vप्रियं स्वप्रियभूतं vयोनिं स्थानं द्रोणकलशं vक्रन्दन् शब्दयन् vअभि vअर्षति गच्छति ॥ ॥ २८ ॥

' आशुरर्ष ' इति षड्र्चं पञ्चदशं सूक्तमाङ्गिरसस्य बृहन्मतेरार्षं गायत्रं पवमानसोमदेवताकम् । ' आशुरर्ष बृहन्मतिः ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

---

१. ग-त-भ-' स ' नास्ति । २. ग-त-भ-' उ पूरणः ' नास्ति । ३. घ-अद्रिभिः प्रावभिः हिन्वंति प्रेरयंति । ४. ग-घ-त३.४.५-भ३-' पुनः क इव ' नास्ति । ५. ग-त-भ३.४-' स्यः ' नास्ति । ६. ग-त-भ२.३-सर्वमवपश्यदिति; भ४-सर्वमेव पश्यति ।

आशुर्ऋषे बृहन्मते परि प्रियेण धाम्ना । यत्र देवा इति ब्रुवन् ॥ १ ॥

आशुः । अर्ष । बृहत्ऽमते । परि । प्रियेण । धाम्ना । यत्र । देवाः । इति । ब्रुवन् ॥ १ ॥

हे ᵛबृहन्मते महामते सोम ᵛप्रियेण देवानां प्रियतमेन ᵛधाम्ना शरीरेण धारया ᵛआशुः शीघ्रः सन् ᵛपरि ᵛअर्ष परिगच्छ । ᵛयत्र ᵛदेवाः इन्द्रादयो वर्तन्ते ᵛइति ᵛब्रुवन् ब्रुवन् उच्चारयन् । तां[1] दिशं गच्छामीति ब्रुवन्निित्यर्थः ॥

परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः । वृष्टिं दिवः परि स्रव ॥ २ ॥

परिऽकृण्वन् । अनिःऽकृतम् । जनाय । यातयन् । इषः । वृष्टिम् । दिवः । परि । स्रव ॥२॥

ᵛअनिष्कृतम् असंस्कृतं यजमानं स्थानं वा ᵛपरिष्कृण्वन् संस्कुर्वन् ᵛजनाय यागकर्त्रे ᵛइषः अन्नानि ᵛयातयन् निर्गमयन् ᵛदिवः अन्तरिक्षात् ᵛवृष्टिं ᵛपरि ᵛस्रव ॥

सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥ ३ ॥

सुतः । एति । पवित्रे । आ । त्विषिम् । दधानः । ओजसा । विऽचक्षाणः । विऽरोचयन् ॥३॥

ᵛसुतः अभिषुतः सोमः सन् ᵛपवित्रे दशापवित्रे । ᵛआ इत्यनर्थकः । ᵛओजसा बलेन शीघ्रम् ᵛएति गच्छति । कीदृशः सन् । ᵛत्विषिं दीप्तिं ᵛदधानः धारयन् ᵛविचक्षाणः सर्वं पश्यन् ᵛविरोचयन् दीपयंश्च । किम् । देवानिति शेषः ॥

अयं स यो दिवस्परि रघुयामा पवित्र आ । सिन्धोरूर्मा व्यक्षरत् ॥ ४ ॥

अयम् । सः । यः । दिवः । परि । रघुऽयामा । पवित्रे । आ । सिन्धोः । ऊर्मा । वि । अक्षरत् ॥४॥

ᵛअयं ᵛसः सोमः ᵛपवित्रे ᵛआ सिच्यमान इति शेषः । ᵛसिन्धोः जलस्राविण्याः ᵛऊर्मा[2] ऊर्मौ संघाते ᵛव्यक्षरत् विविधं क्षरति[3] । स इत्युक्तं क इत्याह । ᵛयो ᵛदिवस्परि द्युलोकस्योपरि ᵛरघुयामा लघुगमनो देवप्रापौ सोऽयमिति संबन्धः ॥

आविवासन्परावतो अथो अर्वावतः सुतः । इन्द्राय सिच्यते मधु ॥ ५ ॥

आऽविवासन् । पराऽवतः । अथो इति । अर्वाऽवतः । सुतः । इन्द्राय । सिच्यते । मधु ॥५॥

ᵛसुतः अभिषुतः सोमः ᵛपरावतः । दूरनामैतत् । दूरस्थान् ᵛअथो अपि च ᵛअर्वावतः अन्तिकस्थांश्च देवान्[4] ᵛआविवासन्[4] । रसेन परिचरणायेत्यर्थः । ᵛइन्द्राय इन्द्रार्थं ᵛमधु मधुसदृशः सोमः ᵛसिच्यते ॥

समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः । योनावृतस्य सीदत ॥ ६ ॥

सम्ऽईचीनाः । अनूषत । हरिम् । हिन्वति । अद्रिऽभिः । योनौ । ऋतस्य । सीदत ॥ ६ ॥

ᵛसमीचीनाः सम्यगञ्चिताः संगताः स्तोतारः ᵛअनूषत स्तुवन्ति । किंच सोमं ᵛहरिं हरितवर्णं ᵛहिन्वन्ति प्रेरयन्ति गमयन्ति ᵛअद्रिभिः ग्रावभिः । यस्मादेवं तस्मात् ᵛऋतस्य यज्ञस्य ᵛयोनौ स्थाने ᵛसीदत निषण्णा भवत हे देवाः ॥ ॥ २९ ॥

---

१. ग–तेषां; त-भ३.४–ते तां । २. ग-त-भ–'ऊर्मा' नास्ति । ३. ग–क्षरति गच्छति । ४. घ–आविवासन् ; त-भ–देवानामविवासन् ।

'पुनानः' इति षडृचं षोडशं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'पुनानः' इत्यनुक्रान्तम्। गतो विनियोगः ॥

पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः ॥ १ ॥

पुनानः। अक्रमीत्। अभि। विश्वाः। मृधः। विऽचर्षणिः। शुम्भन्ति। विप्रम्। धीतिऽभिः ॥१॥

vपुनानः पूयमानः vविचर्षणिः द्रष्टा सोमः[1] vविश्वाः सर्वान् vमृधः हिंसकान् शत्रून् vअभि vअक्रमीत् अतिक्रान्तवान्[2]। तं vविप्रं मेधाविनं vधीतिभिः कर्मभिरभिषवादिभिः स्तुतिभिर्वा vशुम्भन्ति दीपयन्ति अलंकुर्वन्ति ॥

आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः। ध्रुवे सदसि सीदति ॥ २ ॥

आ। योनिम्। अरुणः। रुहत्। गमत्। इन्द्रम्। वृषा। सुतः। ध्रुवे। सदसि। सीदति ॥ २ ॥

अयम् vअरुणः अरुणवर्णः सोमः vयोनिं स्थानं द्रोणकलशम् vआ vरुहत् आरोहति। ततः vइन्द्रं vगमत् गच्छति। कुतः सन्। अयं vवृषा वर्षकः फलानां vसुतः अभिषुतः सन् गत्वा vध्रुवे vसदसि स्थिरे स्थाने द्युलोकाख्ये vसीदति निवसति ॥

नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम् ॥ ३ ॥

नु। नः। रयिम्। महाम्। इन्दो इति। अस्मभ्यम्। सोम। विश्वतः।
आ। पवस्व। सहस्रिणम् ॥ ३ ॥

हे vसोम अभिषुतस्त्वं हे vइन्दो[3] vनः vअस्मभ्यं vनु क्षिप्रं vमहां महान्तं vसहस्रिणम् असंख्यातं[4] vरयिं धनं vविश्वतः vआ vपवस्व सर्वतः परिस्रव ॥

विश्वा सोम पवमान द्युम्नानीन्दवा भर। विदाः सहस्रिणीरिषः ॥ ४ ॥

विश्वा। सोम। पवमान। द्युम्नानि। इन्दो इति। आ। भर। विदाः। सहस्रिणीः। इषः ॥४॥

हे vसोम vपवमान पूयमान vइन्दो दीप्त त्वं vविश्वा सर्वाणि बहुविधानि vद्युम्नानि द्रविणानि vआ vभर आहर। vविदाः लम्भय च vसहस्रिणीः सहस्रसंख्याकानि[4] vइषः अन्नानि ॥

स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम्। जरितुर्वर्धया गिरः ॥ ५ ॥

सः। नः। पुनानः। आ। भर। रयिम्। स्तोत्रे। सुऽवीर्यम्। जरितुः। वर्धय। गिरः ॥५॥

हे सोम vसः[5] त्वं vनः अस्मभ्यं vस्तोत्रे स्तोतृभ्यः vपुनानः पूयमानोऽभिषूयमाणः vआ vभर आहर। किम्। vरयिं धनम्। कीदृशम्। vसुवीर्यं सुपुत्रम्। किंच vजरितुः स्तोतुः vगिरः स्तुतीः vवर्धय ॥

पुनान इन्दवा भर सोम द्विबर्हसं रयिम्। वृषन्निन्दो न ऊतये ॥ ६ ॥

पुनानः। इन्दो इति। आ। भर। सोम। द्विऽबर्हसम्। रयिम्।
वृषन्। इन्दो इति। नः। ऊतये ॥ ६ ॥

---

१. ग–सर्वस्य। २. ग-घ-त१.२.४.५.७–आक्रांतवान्; त३.६-भ३.४–अक्रांतवान्। ३. घ–ईदो दीप्त। ४. घ–सहस्रसंख्यातं। ४. ग-घ-त-भ–°संख्याका। ५. त–'सः' नास्ति।

हे [v]इन्दो [v]सोम [v]पुनानः पूयमानस्त्वम् [v]आ [v]भर आहर । किम् । [v]रयिं धनम् । कीदृशं धनम् । [v]द्विबर्हसं द्वयोः द्युपृथिव्याख्ययोः स्थानयोः परिवृढम् । तदेवाह । हे [v]इन्दो[1] [v]वृषन् वर्षक [v]नः अस्मभ्यम् [v]उक्थ्यं स्तुत्यं धनमा भर ॥ ॥ ३० ॥

' प्र ये गावः ' इति षड्चं सप्तदशं सूक्तं काण्वस्य मेध्यातिथेरार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तं–' प्र ये गावो मेध्यातिथिः ' इति । गतो विनियोगः ॥

प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥१॥

प्र । ये । गावः । न । भूर्णयः । त्वेषाः । अयासः । अक्रमुः । घ्नन्तः । कृष्णाम् । अप । त्वचम् ॥१॥

[v]ये अभिषुताः सोमाः [v]गावो [v]न उदकानीव तानि यथा तूर्णमधः पतन्ति तद्वत् । एवं वोपमीयन्ते । यथा गावः स्वगोष्ठं प्रत्याशु गच्छन्ति तद्वत् । अथवा गावः स्तुतिवाचः । ता यथा स्तुत्यं प्रति क्षिप्रं प्राप्नुवन्ति तद्वत् । [v]भूर्णयः क्षिप्राः[2] [v]त्वेषाः दीप्ताः [v]अयासः अया गमनशीलाः [v]कृष्णां [v]त्वचम् । कृष्णा त्वग्रक्षाः । तम् [v]अप[3] [v]घ्नन्तः[3] निघ्नन्तः । त्वचिः संवरणकर्मा । ईदृग्भूताः सोमाः [v]प्र [v]अक्रमुः । तान् स्तुतेति[4] शेषः ॥

सुवितस्य मनामहेऽति सेतुं दुराव्यम् । साह्वांसो दस्युमव्रतम् ॥ २ ॥

सुवितस्य । मनामहे । अति । सेतुम् । दुःऽआव्यम् । सह्वांसः । दस्युम् । अव्रतम् ॥ २ ॥

[v]सुवितस्य । शोभनं प्राप्तः सुवितः । शोभनस्य सोमस्य [v]सेतुं रक्षोविषयं बन्धनं [v]दुराव्यं दुष्टमतिं च रक्षसां बन्धनं तेषां हननबुद्धिं च सोमकर्तृकाः [v]मनामहे स्तुमः । कथं स्तुम इति तदुच्यते । [v]अव्रतम् अकर्माणं [v]दस्युं शत्रुं [v]साह्वांसः अभिभवन्तः ॥

शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः । चरन्ति विद्युतो दिवि ॥ ३ ॥

शृण्वे । वृष्टेःऽइव । स्वनः । पवमानस्य । शुष्मिणः । चरन्ति । विऽद्युतः । दिवि ॥ ३ ॥

[v]शृण्वे श्रूयते । किम् । सोमस्वनः । किमिव । [v]वृष्टेः वर्षणस्य [v]स्वनः [v]इव । तस्य यथा महान्[4] स्वनः श्रूयते तद्वत् प्रभूतरसापातसमये श्रूयते । कस्य स्वन इति तत्राह । [v]पवमानस्य पूयमानस्य [v]शुष्मिणः बलवतः । तस्यैव [v]विद्युतः दीप्तयः [v]दिवि अन्तरिक्षे [v]चरन्ति ॥

आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् । अश्वावद्गोजावत्सुतः ॥ ४ ॥

आ । पवस्व । महीम् । इषम् । गोऽमत् । इन्दो इति । हिरण्यऽवत् ।
अश्वऽवत् । वाजऽवत् । सुतः ॥ ४ ॥

हे [v]इन्दो सोम [v]सुतः अभिषुतस्त्वं [v]महीमिषम् महदन्नम् [v]आ [v]पवस्व[5] । कीदृशमन्नम् । [v]गोमत् बहुगोभिरुपेतमेवं[6] [v]हिरण्यवत्[7] हिरण्यैः [v]अश्ववत् अश्वैः [v]वाजवत् वाजैर्बलैश्चोपेतम्[7] ॥

१. ग-त-भ-'इन्दो' नास्ति; घ-इंदो सोम । २. ग-त३.४.५-भ३-' क्षिप्राः ' नास्ति: । ३. त-भ-' अप घ्नंतः ' नास्ति । ४. ग-स्तुवतीति; घ-त-भ३.४-सु-स्तुवतेति । ५. त-महत् ; भ३.४-महन् । ६. घ-पवस्व क्षर । ७. घ-गोभिरु°; भ-बहुभिर्गोभिरु° । ८. ग-हिरण्यवद्धिरण्यैरुपेतं अश्ववद्गाजवद्गाजैर्बलैश्चोपेतं; घ-हिरण्यवद्धिरण्ययुक्तं अश्ववदश्वयुक्तं वाजवद्बलैश्चोपेतं; त-भ३-हिरण्यवद्धिरण्यैरश्ववद्गाजैर्बलैश्चोपेतं ।

स पवस्व विचर्षण आ मही रोदसी पृण । उषाः सूर्यो न रश्मिभिः ॥ ५ ॥

सः । पवस्व । विऽचर्षणे । आ । मही इति । रोदसी इति । पृण ।
उषाः । सूर्यः । न । रश्मिऽभिः ॥ ५ ॥

हे ᵛविचर्षणे विद्रष्टः सोम ᵛसः त्वं ᵛपवस्व क्षर रसम् । तथा कृत्वा तेन रसेन ᵛमही महत्यौ ᵛरोदसी द्यावापृथिव्यौ ᵛआ ᵛपृण आपूरय । ᵛउषाः उषसः । एकदेशवाचिनोषःशब्देन तदुपलक्षितमहरुच्यते तत्प्राधान्यात् । अहानि ᵛरश्मिभिः ᵛसूर्यो ᵛन सूर्य इव ॥

परि णः शर्मयन्त्या धारया सोम विश्वतः । सरा रसेव विष्टपम् ॥ ६ ॥

परि । नः । शर्मऽयन्त्या । धारया । सोम । विश्वतः । सर । रसाऽइव । विष्टपम् ॥ ६ ॥

हे ᵛसोम ᵛनः अस्मभ्यं ᵛशर्मयन्त्या सुखयन्त्या ᵛधारया ᵛविश्वतः सर्वतः ᵛपरि ᵛसर परिचर । ᵛरसेव रसेनेव ᵛविष्टपं भूलोकम् । यद्वा । रसा नदी स्थानं सा प्रवणरूपमिव ॥ ॥ ३१ ॥

'जनयन्' इति षड्ऋचमष्टादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'जनयन्' इत्यनुक्रान्तम् । गतो विनियोगः ॥

जनयन्रोचना दिवो जनयन्नप्सु सूर्यम् । वसानो गा अपो हरिः ॥ १ ॥

जनयन् । रोचना । दिवः । जनयन् । अप्ऽसु । सूर्यम् । वसानः । गाः । अपः । हरिः ॥ १ ॥

अयं ᵛहरिः सोमः ᵛदिवः द्युसंबन्धीनि ᵛरोचना रोचनानि नक्षत्रग्रहमण्डलानि ᵛजनयन् तथा ᵛअप्सु अन्तरिक्षे ᵛसूर्यं च ᵛजनयन् तथा ᵛगाः अधोगन्त्रीः ᵛअपः ᵛवसानः भूमिमात्मानं वाच्छादयन् पवत इत्युत्तरत्र संबन्धः ॥

एष प्रत्नेन मन्मना देवो देवेभ्यस्परि । धारया पवते सुतः ॥ २ ॥

एषः । प्रत्नेन । मन्मना । देवः । देवेभ्यः । परि । धारया । पवते । सुतः ॥ २ ॥

ᵛएषः सोमः[1] ᵛप्रत्नेन पुराणेन ᵛमन्मना मननीयेन स्तोत्रेण युक्तः[2] ᵛसुतः अभिषुतश्च सन् ᵛदेवेभ्यः ᵛपरि[3] परितः ᵛधारया स्वीयया ᵛपवते ॥

वावृधानाय तूर्वये पवन्ते वाजसातये । सोमाः सहस्रपाजसः ॥ ३ ॥

ववृधानाय । तूर्वये । पवन्ते । वाजऽसातये । सोमाः । सहस्रऽपाजसः ॥ ३ ॥

ᵛवावृधानाय वर्धमानाय ᵛतूर्वये क्षिप्राय ᵛवाजसातये संग्रामायान्नलाभाय[4] वा ᵛपवन्ते पूयन्ते । के । ᵛसोमाः । कीदृशाः । ᵛसहस्रपाजसः अपरिमितबलाः । असंख्यातवेगा इत्यर्थः ॥

दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते । क्रन्दन् देवाँ अजीजनत् ॥ ४ ॥

दुहानः । प्रत्नम् । इत् । पयः । पवित्रे । परि । सिच्यते । क्रन्दन् । देवान् । अजीजनत् ॥ ४ ॥

---

१. घ–सोमो देवः । २. ग–युक्तो देवो द्योतमानः । ३. ग-त३.४.५-भ३-'परि' नास्ति । ४. त–संग्रामान्न°

vअत्नमित् पुराणमेव vपयः रसं vदुहानः दधानः सोमः vपवित्रे vपरि vषिच्यते । किंच vक्रन्दन् शब्दं कुर्वन् vदेवानजीजनत् जनयति स्वसमीपे । यत्र सोमोऽभिषूयते तत्र देवा नियतं प्रादुर्भवन्ति । अतो जनयतीत्युपचर्यते ॥

अभि विश्वानि वार्याभि देवाँ ऋतावृधः । सोमः पुनानो अर्षति ॥ ५ ॥

अभि । विश्वानि । वार्या । अभि । देवान् । ऋतऽवृधः । सोमः । पुनानः । अर्षति ॥ ५ ॥

अयं vसोमः vपुनानः पूयमानः vविश्वानि vवार्या वरणीयानि धनानि vअभि vअर्षति । तथा vऋतावृधः यज्ञवर्धकान् vदेवान् vअभि अर्षति ॥

गोमन्नः सोम वीरवदश्वावद्वाजवत्सुतः । पवस्व बृहतीरिषः ॥ ६ ॥

गोऽमत् । नः । सोम । वीरऽवत् । अश्वऽवत् । वाजऽवत् । सुतः । पवस्व । बृहतीः । इषः ॥ ६ ॥

हे vसोम vसुतः त्वं vनः अस्मभ्यं vगोमत् गोभिर्युक्तं vवीरवत् बहुभिर्वीरैरुपेतम्[1] vअश्वावत् अश्वैर्युक्तं vवाजवत् वाजैर्बलैः संग्रामैर्वोपेतं धनं vबृहतीरिषः प्रभूतान्यन्नानि vपवस्व । प्रयच्छेत्यर्थः ॥ ॥ ३२ ॥

'यो अत्यइव' इति षड्ऋचमेकोनविंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'यो अत्यइव' इत्यनुक्रान्तम् । गतो विनियोगः ॥

यो अत्यइव मृज्यते गोभिर्मदाय हर्यतः । तं गीर्भिर्वासयामसि ॥ १ ॥

यः । अत्यःऽइव । मृज्यते । गोभिः । मदाय । हर्यतः । तम् । गीःऽभिः । वासयामसि ॥ १ ॥

vयः सोमः vअत्यइव अतनशीलोऽश्व इव vगोभिः वसतीवरीभिरद्भिर्गोविकारैः पयआदिभिर्वा vमृज्यते मिश्र्यते । किमर्थम् । vमदाय देवानाम् । कीदृशः । यः vहर्यतः कान्तः । vतं सोमं vगीर्भिः स्तुतिभिः vवासयामसि वासयामः ॥

तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा । इन्दुमिन्द्राय पीतये ॥ २ ॥

तम् । नः । विश्वाः । अवस्युवः । गिरः । शुम्भन्ति । पूर्वऽथा । इन्दुम् । इन्द्राय । पीतये ॥ २ ॥

vतम् vइन्दुं सोमं vनः अस्माकं vविश्वाः सर्वाः vअवस्युवः । अवो रक्षणम् । तदिच्छन्त्यः vगिरः स्तुतयः vपूर्वथा पूर्वमिव पूर्वं यथा तथेदानीमपि vशुम्भन्ति दीपयन्ति । किमर्थम् । vइन्द्राय इन्द्रस्य vपीतये पानाय ॥

पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः । विप्रस्य मेध्यातिथेः ॥ ३ ॥

पुनानः । याति । हर्यतः । सोमः । गीःऽभिः । परिऽकृतः । विप्रस्य । मेध्यऽअतिथेः ॥ ३ ॥

vपुनानः पूयमानः vहर्यतः कमनीयः vसोमो vगीर्भिः vपरिष्कृतः स्तुतिभिरलंकृतः vयाति कलशं प्रति । किमर्थम् । vविप्रस्य मेधाविनः vमेध्यातिथेः मम यागार्थम् । यद्वा । मम गीर्भिरिति संबन्धः ॥

पवमान विदा रयिमस्मभ्यं सोम सुश्रियम् । इन्दो सहस्रवर्चसम् ॥ ४ ॥

पवमान । विदाः । रयिम् । अस्मभ्यम् । सोम । सुऽश्रियम् । इन्दो इति । सहस्रऽवर्चसम् ॥ ४ ॥

---

१. घ-पुत्रैरुपेतं ।

हे vपवमान[1] vइन्दो vसोम vअस्मभ्यं[1] vसुश्रियं शोभनया[2] श्रिया[2] युक्तं vसहस्रवर्चसं बहुदीप्तिं vरयिं धनं vविदाः । देहीत्यर्थः ॥

इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ । यदक्षारतिं देवयुः ॥ ५ ॥

इन्दुः । अत्यः । न । वाजऽसृत् । कनिक्रन्ति । पवित्रे । आ । यत् । अक्षाः । अतिं । देवऽयुः ॥५॥

अथम् vइन्दुः vवाजसृत् संग्रामसरणः vअत्यो vन अश्व इव vपवित्र vआ पवित्रे vकनिक्रन्ति[3] शब्दं[4] करोति । vयत् यदा vअक्षाः क्षरति । 'क्षर संचलने' इत्यस्माच्छान्दसे लुङि तिपि सिच् । 'बहुलं छन्दसि' इतीडभावः । इडभावे च 'रात्सस्य' इति सलोपः । vदेवयुः देवकामः सन् तदा शब्दं करोति[5] ॥

पवस्व वाजसातये विप्रस्य गृणतो वृधे । सोम रास्व सुवीर्यम् ॥ ६ ॥

पवस्व । वाजऽसातये । विप्रस्य । गृणतः । वृधे । सोम । रास्व । सुऽवीर्यम् ॥ ६ ॥

हे सोम vपवस्व क्षर । किमर्थम् । vवाजसातये अन्नलाभाय[6] । तथा vगृणतः स्तुवतः vविप्रस्य मम मेध्यातिथेः vवृधे वर्धनाय च । हे vसोम vसुवीर्यं शोभनवीर्योपेतं पुत्रं च vरास्व देहि ॥ ॥ ३३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थ-
प्रकाश ऋक्संहिताभाष्ये षष्ठाष्टकेऽष्टमोऽध्यायः ॥

समाप्तं च षष्ठाष्टकम् ॥

१. ग-त-पवमानविदास्मभ्यं । २. भ१.२.५-शोभनश्रिया । ३. त३-भ१.४-कनिक्रंदति । ४. ग-त३.५-भ३.४-'शब्दं' नास्ति । ५. घ-त१.२.६-करोति । आ पूरणः । ६. घ-त-भ१.४-सु-अन्नस्य लाभाय ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ सप्तमाष्टकस्य प्रथमाध्याय आरभ्यते । 'प्र णः' इति षड्चं विंशं सूक्तमाङ्गिरसस्यायास्यस्यार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तं–'प्र णोऽयास्यः' इति । गतो विनियोगः ॥

प्र ण इन्दो महे तन ऊर्मिं न बिभ्रदर्षसि । अभि देवाँ अयास्यः ॥ १ ॥

प्र । नः । इन्दो इति । महे । तने । ऊर्मिम् । न । बिभ्रत् । अर्षसि । अभि । देवान् । अयास्यः ॥१॥

हे ᵛइन्दो सोम त्वं ᵛनः अस्माकं ᵛमहे महते ᵛतने धनाय ᵛप्र ᵛअर्षसि प्रगच्छसि[१] । ᵛन संप्रति ᵛअयास्यः चायमृषिः तवᵛ ऊर्मिं तरङ्गं ᵛबिभ्रत् धारयन् ᵛदेवान् ᵛअभि गच्छति यष्टुम् ॥

मती जुष्टो धिया हितः सोमो हिन्वे परावति । विप्रस्य धारया कविः ॥ २ ॥

मती । जुष्टः । धिया । हितः । सोमः । हिन्वे । पराऽवति । विप्रस्य । धारया । कविः ॥२॥

ᵛकविः क्रान्तकर्मा ᵛसोमः ᵛविप्रस्य मेधाविनः स्तोतुः ᵛमती मत्या स्तुत्या ᵛजुष्टः सेवितः ᵛधिया कर्मणा ᵛहितः यज्ञे निहितः ᵛपरावति पवित्राद्दूरदेशे ᵛधारया ᵛहिन्वे प्रेर्यते ॥

अयं देवेषु जागृविः सुत एति पवित्र आ । सोमो याति विचर्षणिः ॥ ३ ॥

अयम् । देवेषु । जागृविः । सुतः । एति । पवित्रे । आ । सोमः । याति । विऽचर्षणिः ॥३॥

ᵛजागृविः जागरणशीलः ᵛअयं ᵛसोमः ᵛदेवेषु देवार्थं ᵛसुतः अभिषुतः ᵛआ ᵛएति समन्तात् गच्छति । अपि च ᵛविचर्षणिः विद्रष्टा[२] सोमः ᵛपवित्रे ᵛयाति पावनाय गच्छति ॥

स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम् । बर्हिष्माँ आ विवासति ॥ ४ ॥

सः । नः । पवस्व । वाजऽयुः । चक्राणः । चारुम् । अध्वरम् । बर्हिष्मान् । आ । विवासति ॥४॥

हे सोम यं त्वां ᵛबर्हिष्मान् ऋत्विक् ᵛआ ᵛविवासति परिचरति ᵛसः त्वं ᵛनः अस्मदर्थं ᵛवाजयुः अन्नमिच्छन् ᵛअध्वरं हिंसारहितं यागं[४] ᵛचारुं कल्याणं ᵛचक्राणः कुर्वन् ᵛपवस्व क्षर ॥

स नो भगाय वायवे विप्रवीरः सदावृधः । सोमो देवेष्वा यमत् ॥ ५ ॥

सः । नः । भगाय । वायवे । विप्रऽवीरः । सदाऽवृधः । सोमः । देवेषु । आ । यमत् ॥५॥

ᵛसः पवमानः ᵛसोमः ᵛवायवे वायुदेवार्थं ᵛभगाय भगदेवार्थं च ᵛविप्रवीरः विप्रैर्मेधाविभिः स्तुत्या प्रेरितः ᵛसदावृधः नित्यवृद्धो[५] भवन् ᵛनः अस्मभ्यं ᵛदेवेषु स्थितं धनम् ᵛआ ᵛयमत् आ प्रयच्छतु ॥

१. घ-त६-भ१–क्षिप्रं गच्छसि । २. ग–स्तोता । ३. ग–विश्वद्रष्टा । ४. घ-त-भ–यागं च
५. भ१–नित्यनित्यशुद्धो; भ२–नित्यं वृद्धो ।

स नो अद्य वसुत्तये क्रतुविद्रातुवित्तमः । वाजं जेषि श्रवो बृहत् ॥ ६ ॥

सः । नः । अद्य । वसुत्तये । क्रतुऽवित् । रातुवित्ऽतमः । वाजम् । जेषि । श्रवः । बृहत् ॥६॥

हे सोम [v]क्रतुवित् क्रतूनां कर्मणां लम्भकः[१] [v]रातुवित्तमः पुण्यलोकानामतिशयेन मार्गस्य ज्ञाता त्वम् [v]अद्य अस्मिन्नहनि [v]नः अस्माकं [v]वसुत्तये धनलाभाय [v]बृहत् महत् [v]श्रवः अन्नं [v]वाजं बलं च [v]जेषि जय ॥ ॥ १ ॥

'स प्रवस्व' इति षड्ऋचमेकविंशं सूक्तम् । ऋष्यादयः पूर्ववत् । 'स पवस्व' इत्यनुक्रान्तम् । गतो विनियोगः ॥

स पवस्व मदाय कं नृचक्षा देववीतये । इन्दविन्द्राय पीतये ॥ १ ॥

सः । पवस्व । मदाय । कम् । नृऽचक्षाः । देवऽवीतये । इन्दो इति । इन्द्राय । पीतये ॥१॥

हे [v]इन्दो सोम [v]नृचक्षाः नृणां नेतॄणां द्रष्टा [v]सः त्वं [v]देववीतये यज्ञाय [v]इन्द्राय इन्द्रस्य [v]पीतये पानाय च [v]मदाय मदार्थं च [v]कं सुखं यथा भवति तथा [v]पवस्व क्षर ॥

स नो अर्षाभि दूत्यं१ त्वमिन्द्राय तोशसे । देवान्त्सखिभ्य आ वरम् ॥ २ ॥

सः । नः । अर्ष । अभि । दूत्यम् । त्वम् । इन्द्राय । तोशसे । देवान् । सखिऽभ्यः । आ । वरम् ॥२॥

हे सोम [v]त्वं [v]नः अस्माकं [v]दूत्यं[२] दूतस्य कर्म [v]अर्ष अभिगच्छ[३] । अपि[३] च यस्त्वं [v]इन्द्राय इन्द्रार्थं [v]तोशसे पीयसे [v]सः त्वं [v]सखिभ्यः प्रियेभ्यः अस्मभ्यं [v]वरं श्रेष्ठं धनं [v]देवान् [v]आ याचस्वेत्यर्थः ॥

उत त्वामरुणं वयं गोभिरञ्मो मदाय कम् । वि नो राये दुरो वृधि ॥ ३ ॥

उत । त्वाम् । अरुणम् । वयम् । गोभिः । अञ्ज्मः । मदाय । कम् ।
वि । नः । राये । दुरः । वृधि ॥ ३ ॥

[v]उत अपि च हे सोम यम् [v]अरुणम् अरुणवर्णं [v]त्वां [v]मदाय मदार्थं [v]वयम् आङ्गिरसायास्याः [v]गोभिः गोविकारैः पयोभिः [v]अञ्ज्मः वासयामः[४] संस्कुर्मः[५] । [v]कम् इति पूरणम् । स त्वं [v]नः अस्माकं [v]राये धनाय [v]दुरः द्वाराणि [v]वि [v]वृधि विवृतानि कुरु ॥

अत्यू पवित्रमक्रमीद्वाजी धुरं न यामनि । इन्दुर्देवेषु पत्यते ॥ ४ ॥

अति । ऊँ इति । पवित्रम् । अक्रमीत् । वाजी । धुरम् । न । यामनि । इन्दुः । देवेषु । पत्यते ॥४॥

[v]इन्दुः सोमः [v]वाजी अश्वः [v]यामनि गमने [v]धुरं [v]न रथस्य धुरं यथा तथा [v]पवित्रम् [v]अति [v]अक्रमीत् अतिगच्छति । [v]देवेषु देवानां मध्ये [v]पत्यते गच्छति च ॥

समी सखायो अस्वरन्वने क्रीळन्तमत्यविम् । इन्दुं नावा अनूषत ॥ ५ ॥

सम् । ईमिति । सखायः । अस्वरन् । वने । क्रीळन्तम् । अतिऽअविम् ।
इन्दुम् । नावाः । अनूषत ॥ ५ ॥

१. ग–लंभकोथ । २. त६-भ१.४.७–'दूत्यं' नास्ति । ३. त३–अभिगच्छत्स्वपि; भ२–अभिगच्छसि अपि । ४. त१.२.३-भ१–वातयामः; त६-भ६.७–अंजयामः । ५. ग-त१.२.३.६-भ–'संस्कुर्मः' नास्ति ।

vअत्यविम् अतिक्रान्तं दशापवित्रं vवने उदके vक्रीडन्तं संक्रीडमानम् vईम् एनम् vइन्दुं सोमं vसखायः प्रियस्तोतारः vसम् vअस्वरन् संस्तुवन्ति। vनावाः वाचोऽपि vअनूषत अस्तुवन्। 'नौरक्षरम्' इति वाङ्नामसु पाठात्॥

तया पवस्व धारया यया पीतो विचक्षसे। इन्दो स्तोत्रे सुवीर्यम्॥ ६॥

तया। पवस्व। धारया। यया। पीतः। विऽचक्षसे। इन्दो इति। स्तोत्रे। सुऽवीर्यम्॥६॥

हे vइन्दो त्वं vयया vधारया vपीतः सन् vविचक्षसे विचक्षणाय vस्तोत्रे स्तोत्राणां कर्त्रे पुरुषाय vसुवीर्यं शोभनवीर्यं प्रयच्छसीति शेषः। vतया धारया vपवस्व क्षर॥ ॥ २॥

'असृग्रन्' इति षड्चं द्वाविंशं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'असृग्रन्' इत्यनुक्रान्तम्। गतो विनियोगः॥

असृग्रन्देववीतयेऽत्यासः कृत्व्याइव। क्षरन्तः पर्वतावृधः॥ १॥

असृग्रन्। देवऽवीतये। अत्यासः। कृत्व्याःऽइव। क्षरन्तः। पर्वतऽवृधः॥ १॥

vपर्वतावृधः पर्वतैरभिषवग्रावभिर्वृद्धाः पर्वतेषु जाता वा vक्षरन्तः सोमाः vदेववीतये यज्ञाय vअत्यासः अश्वाः vकृत्व्याइव यथा कर्मण्या अश्वाः तद्वत् vअसृग्रन् सृज्यन्ते॥

परिष्कृतास इन्दवो योषेव पित्र्यावती। वायुं सोमा असृक्षत॥ २॥

परिऽकृतासः। इन्दवः। योषाऽइव। पित्र्यऽवती। वायुम्। सोमाः। असृक्षत॥ २॥

vइन्दवः यागेषु क्लिद्यमानाः vसोमाः vपरिष्कृतासः परिष्कृता अलंकृताः[1] सन्तः vपित्र्यावती पितृमती vयोषेव अलंकृता कन्यका यथा वरं प्रति गच्छति तद्वत् vवायुं प्रति vअसृक्षत गच्छन्ति॥

एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः। इन्द्रं वर्धन्ति कर्मभिः॥ ३॥

एते। सोमासः। इन्दवः। प्रयस्वन्तः। चमू इति। सुताः। इन्द्रम्। वर्धन्ति। कर्मऽभिः॥३॥

vइन्दवः दीप्ताः vप्रयस्वन्तः अन्नवन्तः vएते अस्मिन् कर्मणि वर्तमाना अमी vसोमासः सोमाः vचमू चम्वोरधिषवणफलकयोः vसुताः अभिषुताः सन्तः vकर्मभिः यागैः vइन्द्रं vवर्धन्ति वर्धयन्ति प्रीणयन्तीत्यर्थः॥

आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना। गोभिः श्रीणीत मत्सरम्॥ ४॥

आ। धावत। सुऽहस्त्यः। शुक्रा। गृभ्णीत। मन्थिना। गोभिः। श्रीणीत। मत्सरम्॥ ४॥

हे vसुहस्त्यः शोभनहस्ता ऋत्विजः vआ vधावत। मां संप्रति आगच्छत। vमन्थिना सह vशुक्रा शुक्रं च vगृभ्णीत गृह्णीत सोमम्। vमत्सरं सोमं vगोभिः गोविकारैः पयोभिः vश्रीणीत संस्कुरुत च॥

स पवस्व धनंजय प्रयन्ता राधसो महः। अस्मभ्यं सोम गातुवित्॥ ५॥

सः। पवस्व। धनम्ऽजय। प्रऽयन्ता। राधसः। महः। अस्मभ्यम्। सोम। गातुऽवित्॥५॥

---

१. त१.२.६.७-म६.७-'अलंकृताः' नास्ति।

हे [v]धनंजय शत्रुसंबन्धिनां जनानां जेतः [v]सोम [v]गातुवित् अभीष्टमार्गस्य लम्भकः [v]अस्मभ्यं [v]महः महतः [v]राधसः धनस्य [v]प्रयन्ता प्रदाता च यः[1] [v]सः त्वं[1] [v]पवस्व क्षर ॥

एतं मृजन्ति मर्ज्यं पवमानं दश क्षिपः । इन्द्राय मत्सरं मदम् ॥ ६ ॥

एतम् । मृजन्ति । मर्ज्यम् । पवमानम् । दश । क्षिपः । इन्द्राय । मत्सरम् । मदम् ॥ ६ ॥

[v]मर्ज्यं मर्जनीयं शोध्यं [v]पवमानं क्षरन्तं [v]मत्सरं मदकरम् [v]एतम् इमं [v]मदं सोमं दशसंख्याकाः [v]क्षिपः अङ्गुलयः । 'त्रिशः क्षिपः' इत्यङ्गुलिनामसु पाठात् । इन्द्रार्थं[2] [v]मृजन्ति पवित्रे[3] शोधयन्ति ॥ ॥ ३ ॥

'अया सोमः' इति पञ्चर्चं त्रयोविंशं सूक्तं भृगुपुत्रस्य कवेरार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तम्—'अया सोमः पञ्च कविर्भार्गवः' इति । उक्तो विनियोगः ॥

अया सोमः सुकृत्यया महश्चिदभ्यवर्धत । मन्दान उद्वृषायते ॥ १ ॥

अया । सोमः । सुऽकृत्यया । महः । चित् । अभि । अवर्धत । मन्दानः । उत् । वृषऽयते ॥ १ ॥

[v]सोमः [v]अया अनया [v]सुकृत्यया शोभनयाभिषवादिलक्षणया क्रियया [v]महश्चित् महतो देवान् प्रति [v]अभ्यवर्धत प्रवृद्धोऽभूत् । [v]मन्दानः मोदमानः [v]उद्वृषायते वृषवदाचरति । यथा मोदमानो वृषभः शब्दं करोति तथाभिषववेलायामुपरवेषु शब्दं करोतीत्यर्थः ॥

कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा । ऋणा च धृष्णुश्चयते ॥ २ ॥

कृतानि । इत् । अस्य । कर्त्वा । चेतन्ते । दस्युऽतर्हणा । ऋणा । च । धृष्णुः । चयते ॥ २ ॥

[v]अस्य यस्य एतस्य सोमस्य [v]दस्युतर्हणा दस्यूनामसुराणां नाशकानि [v]कर्त्वा कर्माणि सः [v]इत् अस्माभिरेव सोऽयं [v]धृष्णुः धृष्टः सोमो यजमानानाम् [v]ऋणा [v]च ऋणान्यपि [v]चयते कामप्रदानेन चातयति ॥

आत्सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत् । उक्थं यदस्य जायते ॥ ३ ॥

आत् । सोमः । इन्द्रियः । रसः । वज्रः । सहस्रऽसाः । भुवत् । उक्थम् । यत् । अस्य । जायते ॥ ३ ॥

[v]यत् यदा [v]अस्य इन्द्रस्य [v]उक्थं शक्रं [v]जायते प्रादुर्भवति तत् [v]आत् अनन्तरमेव [v]इन्द्रियः इन्द्रस्य प्रियकरः रसः बलवान् [v]वज्रः वज्रसदृशः केनाप्यहिंस्यः [v]सोमः [v]सहस्रसाः अस्मभ्यमपरिमितस्य[4] धनस्य दाता भवति ॥

स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति । यदी मर्मृज्यते धियः ॥ ४ ॥

स्वयम् । कविः । विऽधर्तरि । विप्राय । रत्नम् । इच्छति । यदि । मर्मृज्यते । धियः ॥ ४ ॥

[v]यदि [v]कविः क्रान्तकर्मा अयं सोमः [v]धियः धीभिः[5]। विभक्तिव्यत्ययः । धीतिभिः[6]। अङ्गुलीभिरित्यर्थः । [v]मर्मृज्यते शोध्यते तर्हि [v]स्वयं[7] स्वयमेव [v]विप्राय मेधाविने [v]विधर्तरि कामानां विधातरीन्द्रे [v]रत्नं रमणीयं धनम् [v]इच्छति । इन्द्रेण धनं दापयितुमिच्छतीत्यर्थः ॥

१. ग-त१.२.३-भ२-स त्वं; त६-भ७- स; भ१- सद्य । २. ग-इंद्रस्य पानाय; त१.२.३.७-भ२. -'इंद्रार्थं' नास्ति; भ४-इंद्राय इंद्रार्थं । ३. ग-पवित्रैः । ४. ग-सहस्रपरिमितस्य । ५. त६-भ१. -धीतिभिः; भ४-धीतिः । ६. त१.२.७-धीभिः; भ१-धीतिः । ७. ग-त६-भ१.७-'स्वयं' नास्ति ।

सिषासतू रयीणां वाजेष्वर्वतामिव । भरेषु जिग्युषामसि ॥ ५ ॥

सिसासतुः । रयीणाम् । वाजेषु । अर्वताम्ऽइव । भरेषु । जिग्युषाम् । असि ॥ ५ ॥

हे सोम त्वं [v]भरेषु संग्रामेषु [v]जिग्युषां शत्रून् जयतां [v]रयीणां धनानां [v]सिषासतुः संभक्तुमिच्छुः [v]असि भवसि । शत्रून्[1] जयद्भ्यो धनानि प्रयच्छसीत्यर्थः । तत्र दृष्टान्तः। [v]वाजेषु संग्रामेषु [v]अर्वतामिव अश्वानामिव । यथा संग्रामं प्रविशद्भ्योऽश्वेभ्यो घासं प्रयच्छन्ति तद्वदित्यर्थः[1]॥ ॥ ४ ॥

'तं त्वा' इति पञ्चर्चं चतुर्विंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'तं त्वा' इत्यनुक्रान्तम् । गतो विनियोगः ॥

तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः । चारुं सुकृत्ययेमहे ॥ १ ॥

तम् । त्वा । नृम्णानि । बिभ्रतम् । सधऽस्थेषु । महः । दिवः । चारुम् । सुऽकृत्यया । ईमहे ॥ १ ॥

[v]महः[2] [v]दिवः महतो द्युलोकस्य [v]सधस्थेषु सहस्थानेषु स्थितं [v]नृम्णानि धनानि [v]बिभ्रतम् अस्मदर्थं[3] धारयन्तं [v]चारुं कल्याणं [v]तं पवमानं [v]त्वा त्वां [v]सुकृत्यया शोभनया क्रियया [v]ईमहे धनानि याचामहे ॥

संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् । शतं पुरो रुरुक्षणिम् ॥ २ ॥

संवृक्तऽधृष्णुम् । उक्थ्यम् । महाऽमहिव्रतम् । मदम् । शतम् । पुरः । रुरुक्षणिम् ॥ २ ॥

हे सोम [v]संवृक्तधृष्णुम् । संवृक्ताः संछिन्ना धृष्णवो धर्षणशीलाः[4] शत्रवो येनासौ संवृक्तधृष्णुः। तम् [v]उक्थ्यम् उक्थार्हं प्रशस्यं [v]महामहिव्रतं महनीयबहुकर्माणं [v]मदं मदकरं [v]शतं बहूनि [v]पुरः शत्रूणां पुराणि [v]रुरुक्षणिं विनाशयन्तं त्वां धनानीमह इति संबन्धः ॥

अतस्त्वा रयिमभि राजानं सुक्रतो दिवः । सुपर्णो अव्यथिर्भरत् ॥ ३ ॥

अतः । त्वा । रयिम् । अभि । राजानम् । सुक्रतो इति सुऽक्रतो । दिवः ।

सुऽपर्णः । अव्यथिः । भरत् ॥ ३ ॥

हे सोम [v]रयिमभि धनं प्रति [v]राजानं [v]त्वा त्वाम् [v]अतः[5] [v]दिवः अमुष्मात् द्युलोकात् [v]सुक्रतुः सुप्रज्ञः [v]अव्यथिः व्यथारहितः [v]सुपर्णः श्येनः [v]भरत् आहरत् । तथा च निगमान्तरम्— 'आदाय श्येनो अभरत्सोमं सहस्रं सवाँ' (ऋ. सं. ४.२६.७) इति ॥

विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरम् । गोपामृतस्य विर्भरत् ॥ ४ ॥

विश्वस्मै । इत् । स्वः । दृशे । साधारणम् । रजःऽतुरम् । गोपाम् । ऋतस्य । विः । भरत् ॥ ४ ॥

[v]रजस्तुरम् उदकस्य प्रेरकम् [v]ऋतस्य यज्ञस्य [v]गोपां गोपायितारं [v]विश्वस्मै सर्वस्मै [v]स्वर्दृशे सर्वदृशे देवाय [v]साधारणम् [v]इत् समानमेव सन्तं सोमं [v]विः पक्षी श्येनः [v]भरत् स्वर्गादाहरत् ॥

१. ग–सिषासन् वाजेषु संग्रामेषु अश्वानां घासं प्रयच्छति तद्वत् जयद्भ्यो धनानि प्रयच्छसीत्यर्थः । २. त१-भ१.२.३.७–महो महत्याः; भ४–महो महत्यः । ३. ग-त६-भ१.७– अस्मदर्थे । ४. त३. ६-भ१.२.७–धृष्णाः; भ४–धृष्टाः धर्षणशीलाः । ५ त१.२–महतो; त५–अतोपि ।

अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे । अभिष्टिकृद्विचर्षणिः ॥ ५ ॥

अध । हिन्वानः । इन्द्रियम् । ज्यायः । महिऽत्वम् । आनशे । अभिष्टिऽकृत् । विऽचर्षणिः ॥५॥

[v]अध अथ [v]विचर्षणिः कर्मणां विद्रष्टा [v]अभिष्टिकृत् यजमानानामभीष्टस्य फलस्य कर्ता सोमः [v]इन्द्रियं स्वकीयं बलं [v]हिन्वानः प्रेरयन् [v]ज्यायः प्रशस्यतरं [v]महित्वं महत्त्वम् [v]आनशे प्राप्नोति ॥ ॥ ५ ॥

'पवस्व' इति पञ्चर्चं पञ्चविंशं सूक्तम् । ऋष्यादयः पूर्ववत् । 'पवस्व' इत्यनुक्रान्तम् । गतो विनियोगः ॥

पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि । अयक्ष्मा बृहतीरिषः ॥ १ ॥

पवस्व । वृष्टिम् । आ । सु । नः । अपाम् । ऊर्मिम् । दिवः । परि । अयक्ष्माः । बृहतीः । इषः ॥१॥

हे सोम त्वं [v]दिवः द्युलोकात् [v]वृष्टिं [v]नः अस्माकम् [v]आ [v]पवस्व समन्तात् क्षर । एतदेव दर्शयति । [v]अपाम् उदकानाम् [v]ऊर्मिं तरङ्गं दिवः [v]परि आ पवस्व । अपि च [v]अयक्ष्माः यक्ष्मरहितानि[1] अनामयानि [v]बृहतीः महान्ति[2] [v]इषः अन्नानि आ पवस्व ॥

तया पवस्व धारया यया गाव इहागमन् । जन्यास उप नो गृहम् ॥ २ ॥

तया । पवस्व । धारया । यया । गावः । इह । आऽगमन् । जन्यासः । उप । नः । गृहम् ॥ २ ॥

हे सोम त्वं [v]तया तादृश्या [v]धारया [v]पवस्व क्षर । कीदृश्येत्यत्राह[3] । [v]यया यादृश्या त्वदीयया धारया [v]जन्यासः जन्याः शत्रुजनपदभवाः [v]गावः [v]इह अस्मिँल्लोके [v]नः अस्माकं संबन्धि [v]गृहम् [v]उप [v]आगमन् उपागच्छन्ति ॥

घृतं पवस्व धारया यज्ञेषु देववीतमः । अस्मभ्यं वृष्टिमा पव ॥ ३ ॥

घृतम् । पवस्व । धारया । यज्ञेषु । देवऽवीतमः । अस्मभ्यम् । वृष्टिम् । आ । पव ॥ ३ ॥

हे सोम [v]यज्ञेषु [v]देववीतमः अत्यन्तं देवकामस्त्वम् [v]अस्मभ्यं भार्गवेभ्यः[4] कविभ्यः[4] [v]घृतम् उदकम् । 'वनं घृतम्' इत्युदकनामसु पाठात् । [v]धारया संपातेन [v]पवस्व क्षर । [v]वृष्टिं वर्षं च [v]आ [v]पव पवस्व ॥

स नः ऊर्जे व्यव्ययं पवित्रं धाव धारया । देवासः शृणवन् हि कम् ॥ ४ ॥

सः । नः । ऊर्जे । वि । अव्ययम् । पवित्रम् । धाव । धारया । देवासः । शृणवन् । हि । कम् ॥४॥

हे सोम सुतः अभिषुतस्त्वं [v]नः अस्माकम् [v]ऊर्जे अन्नाय [v]अव्ययम् अविनश्वरं [v]पवित्रं [v]धारया संपातेन [v]वि [v]धाव प्राप्नुहि । [v]देवासः देवा अपि [v]हि [v]कं [v]शृणवन् गमनवेलायामुत्पन्नं तव शब्दं शृण्वन्तु ॥

पवमानो असिष्यदद्रक्षांस्यपजङ्घनत् । प्रत्नवद्रोचयन्रुचः ॥ ५ ॥

पवमानः । असिस्यदत् । रक्षांसि । अपऽजङ्घनत् । प्रत्नऽवत् । रोचयन् । रुचः ॥ ५ ॥

---

१. ग–यक्ष्मरहिताः; त६-भ१.७–रहितानि । २. ग–महतीः । ३. ग–त्यत आह । ४. ग–होत्रच्छावाकादिभ्यो ।

vरक्षांसि राक्षसान् vअपजङ्घनत् अपाघ्नन् vस्वः आत्मीया दीप्तीः vप्रस्नवत् पुराणवत्[1] vरोचयन् दीपयन् vपवमानः सोमः vअसिष्यदत् स्यन्दते ॥ ॥ ६ ॥

'उत्ते' इति पञ्चर्चं षड्विंशं सूक्तमाङ्गिरसस्योच्यस्यार्षं गायत्रं पवमानसोमदेवताकम्। तथा चानुक्रान्तम्—'उत्ते शुष्मास उच्चध्यः' इति। उक्तो विनियोगः ॥

उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः। वाणस्य चोदया पविम् ॥ १ ॥

उत्। ते। शुष्मासः। ईरते। सिन्धोः। ऊर्मेःऽइव। स्वनः। वाणस्य। चोदय। पविम् ॥१॥

हे सोम vते तव vशुष्मासः शुष्मा वेगाः vउत् vईरते उद्गच्छन्ति। तत्र दृष्टान्तः। vसिन्धोः समुद्रस्य vऊर्मेरिव यथा तरङ्गात् vस्वनः ध्वनिरुद्गच्छति तद्वदित्यर्थः। सः त्वं vवाणस्य विसृष्टस्य वाणस्य नालस्य[2] वा वादित्रविशेषस्य vपविं शब्दम्। 'पविः भारती' इति वाङ्नामसु पाठात्। vचोदय प्रेरय। वेगेन स्यन्दमानस्त्वं विसृष्टबाणशब्दसदृशं शब्दं कुर्वित्यर्थः ॥

प्रसवे त उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि ॥ २ ॥

प्रऽसवे। ते। उत्। ईरते। तिस्रः। वाचः। मखस्युवः। यत्। अव्ये। एषि। सानवि ॥२॥

हे सोम vते तव vप्रसवे सति vमखस्युवः यज्ञमिच्छतो यजमानस्य vतिस्रो vवाचः ऋग्यजुःसामात्मकानि त्रीणि वाक्यानि vउदीरते उद्गच्छन्ति। कदेत्यत आह। vयत् यदा vसानवि व्युच्छिन्ने vअव्ये अविमये पवित्रे vएषि त्वं गच्छसि ॥

अव्यो वारे परि प्रियं हरिं हिन्वन्त्यद्रिभिः। पवमानं मधुश्चुतम् ॥ ३ ॥

अव्यः। वारे। परि। प्रियम्। हरिम्। हिन्वन्ति। अद्रिऽभिः। पवमानम्। मधुऽश्चुतम् ॥३॥

vप्रियं देवानां प्रीतिकरं vहरिं हरितवर्णम् vअद्रिभिः ग्रावभिरभिषुतं vमधुश्चुतं मधुनो रसस्य च्यावयितारं vपवमानं सोमम् vअव्यः अवेः vवारे वाले vपरि vहिन्वन्ति ऋत्विजः परिप्रेरयन्ति ॥

आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम् ॥ ४ ॥

आ। पवस्व। मदिन्ऽतम। पवित्रम्। धारया। कवे। अर्कस्य। योनिम्। आऽसदम् ॥४॥

हे vमदिन्तम मादयितृतम vकवे क्रान्तकर्मन् सोम vअर्कस्य अर्चनीयस्येन्द्रस्य vयोनिं स्थानम् vआसदं प्राप्तुं vपवित्रम् अतीत्य vधारया संपातेन vआ vपवस्व आभिमुख्येन क्षर। यद्यप्येषा पूर्वस्मिन्नध्याये (ऋ. सं. ९.२५.६) व्याकृता तथापि मन्दमतीनां विस्मरणशङ्कया पुनर्व्याख्याता ॥

स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः। इन्दविन्द्राय पीतये ॥ ५ ॥

सः। पवस्व। मदिन्ऽतम। गोभिः। अञ्जानः। अक्तुऽभिः। इन्दो इति। इन्द्राय। पीतये ॥५॥

हे vमदिन्तम मादयितृतम vइन्दो सोम vअक्तुभिः अञ्जनसाधनभूतैः vगोभिः गोविकारैः पयोभिः vअञ्जानः अज्यमानः संस्क्रियमाणः vसः त्वम् vइन्द्राय इन्द्रस्य vपीतये पानाय[3] vपवस्व क्षर ॥ ॥ ७ ॥

---

१. ग-त७-भ७-'पुराणवत्' नास्ति। २. ग-त६-भ१.७-'नालस्य...'विशेषस्य' नास्ति।
३. ग-पानार्थं; त१.२.४.५.७-पानीय।

'अध्वर्यो' इति पञ्चर्चं सप्तविंशं सूक्तमाङ्गिरसस्योचथ्यस्यार्षं गायत्रं पवमानसोमदेवताकम्। तथा चानुक्रम्यते—'अध्वर्यो' इति। गतः सूक्तविनियोगः॥

अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज। पुनीहीन्द्राय पातवे॥ १॥

अध्वर्यो इति। अद्रिऽभिः। सुतम्। सोमम्। पवित्रे। आ। सृज। पुनीहि। इन्द्राय। पातवे॥१॥

हे ᵛअध्वर्यो ᵛअद्रिभिः ग्रावभिः ᵛसुतम् अभिषुतं ᵛसोमं ᵛपवित्र ᵛआ ᵛसृज। एतदेव दर्शयति। ᵛइन्द्राय इन्द्रस्य ᵛपातवे पानाय ᵛपुनीहि पावय॥

दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्॥ २॥

दिवः। पीयूषम्। उत्ऽतमम्। सोमम्। इन्द्राय। वज्रिणे। सुनोत। मधुमत्ऽतमम्॥२॥

हे अध्वर्यवः यूयं ᵛमधुमत्तमम् अतिशयेन मधुमन्तं ᵛदिवः द्युलोकस्य ᵛपीयूषम् अमृतम् ᵛउत्तमं श्रेष्ठं ᵛसोमं ᵛवज्रिणे वज्रवते ᵛइन्द्राय ᵛसुनोत अभिषुणुत॥

तव त्य इन्दो अन्धसो देवा मधोर्व्यश्नते। पवमानस्य मरुतः॥ ३॥

तव। त्ये। इन्दो इति। अन्धसः। देवाः। मधोः। वि। अश्नते। पवमानस्य। मरुतः॥३॥

हे ᵛइन्दो सोम ᵛतव संबन्धिनं ᵛमधोः मदकरस्य[1] ᵛपवमानस्य[2] पूयमानम् ᵛअन्धसः अन्नम्। कर्मणि षष्ठी। ᵛत्ये त इमे ᵛदेवाः इन्द्रादयः ᵛमरुतः च ᵛव्यश्नते व्याप्नुवन्ति प्राप्नुवन्तीत्यर्थः॥

त्वं हि सोम वर्धयन्त्सुतो मदाय भूर्णये। वृषन्तस्तोतारमूतये॥ ४॥

त्वम्। हि। सोम। वर्धयन्। सुतः। मदाय। भूर्णये। वृषन्। स्तोतारम्। ऊतये॥ ४॥

हे ᵛसोम ᵛसुतः अभिषुतः ᵛत्वं ᵛवर्धयन् देवान् प्रवृद्धान् कुर्वन् ᵛवृषन् कामान् वर्षन् ᵛभूर्णये क्षिप्राय ᵛमदाय ᵛऊतये रक्षणाय च ᵛस्तोतारम् अभिगच्छसीत्यर्थः[3]॥

अभ्यर्ष विचक्षण पवित्रं धारया सुतः। अभि वाजमुत श्रवः॥ ५॥

अभि। अर्ष। विऽचक्षण। पवित्रम्। धारया। सुतः। अभि। वाजम्। उत। श्रवः॥५॥

हे ᵛविचक्षण सोम ᵛसुतः अभिषुतस्त्वं ᵛपवित्रम् ᵛअभि प्रति ᵛधारया ᵛअर्ष गच्छ। ᵛउत अपि चास्माकं ᵛवाजम् अन्नं ᵛश्रवः कीर्तिं च ᵛअभि क्षरेत्यर्थः[4]॥ ॥ ८ ॥

'परि द्युक्षः' इति पञ्चर्चमष्टाविंशं सूक्तम्। ऋष्यादयः पूर्ववत्। 'परि द्युक्षः' इत्यनुक्रान्तम्। उक्तो विनियोगः॥

परि द्युक्षः सनद्रयिर्भरद्वाजे नो अन्धसा। सुवानो अर्ष पवित्र आ॥ १॥

परि। द्युक्षः। सनत्ऽरयिः। भरत्। वाजम्। नः। अन्धसा। सुवानः। अर्ष। पवित्रे। आ॥१॥

ᵛद्युक्षः दीप्तः ᵛसनद्रयिः दीयमानधनः सोमः ᵛनः अस्माकं ᵛवाजं बलम् ᵛअन्धसा अन्नेन सह ᵛपरि ᵛभरत् परिभरतु[5] प्रयच्छतु[6]। अथ प्रत्यक्षस्तुतिः। हे सोम[6] ᵛसुवानः अभिषूयमाणस्त्वं ᵛपवित्रे ᵛआ ᵛअर्ष क्षर॥

---

१. ग–मधुरस्य। २. ग–पूयमानस्य। ३. ग–अभ्येषीति उत्तरत्र संबंधः। ४. त१.४.५.६-भ१.७-मु–रक्षेत्यर्थः; त३–रक्षेति शेषः। ५. ग–संपादयतु; त३.६-भ१.२.७–भरंतु। ६. ग–'प्रयच्छतु...सोम' नास्ति।

तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः । सहस्रधारो याति ना ॥ २ ॥

तव । प्रत्नेभिः । अध्वऽभिः । अव्यः । वारे । परि । प्रियः । सहस्रऽधारः । याति । तना ॥२॥

हे सोम ᵛतव संबन्धी ᵛप्रियः देवानां प्रीतिकरः ᵛसहस्रधारः बहुधारः ᵛतना विस्तृतसारो[1] रसः ᵛप्रत्नेभिः पुराणैः ᵛअध्वभिः मार्गैः ᵛअव्यः अवेः ᵛवारे वाले दशापवित्रे ᵛपरि ᵛयाति परिगच्छति ॥

चरुर्न यस्तमीङ्खयेन्दो न दानमीङ्खय । वधैर्वधस्नवीङ्खय ॥ ३ ॥

चरुः । न । यः । तम् । ईङ्खय । इन्दो इति । न । दानम् । ईङ्खय ।

वधैः । वधस्नो इति वधऽस्नो । ईङ्खय ॥ ३ ॥

हे सोम ᵛचरुर्न चरुरिव ᵛयः पूर्णौदनो[2] भवति ᵛतमीङ्खय अस्मान् प्रापय । अपि च हे ᵛइन्दो ᵛन इदानीं ᵛदानं देयम् ᵛईङ्खय । हे ᵛवधस्नो प्रहारेण प्रस्रवणशील सोम ᵛवधैः प्राणां प्रहारैः ᵛईङ्खय ॥

नि शुष्ममिन्दवेषां पुरुहूत जनानाम् । यो अस्माँ आदिदेशति ॥ ४ ॥

नि । शुष्मम् । इन्दो इति । एषाम् । पुरुऽहूत । जनानाम् । यः । अस्मान् । आऽदिदेशति ॥४॥

हे ᵛपुरुहूत बहुभिराहूत ᵛइन्दो सोम त्वं ᵛयः शुष्मो येषां शत्रुजनानां बलम् ᵛअस्मान् ᵛआदिदेशति बाधार्थमाह्वयति ᵛएषां शत्रुजनानां तं ᵛशुष्मं बलं ᵛनि न्यक् कुर्विति शेषः ॥

शतं न इन्द ऊतिभिः सहस्रं वा शुचीनाम् । पवस्व मंहयद्रयिः ॥ ५ ॥

शतम् । नः । इन्दो इति । ऊतिऽभिः । सहस्रम् । वा । शुचीनाम् । पवस्व । मंहयत्ऽरयिः ॥५॥

हे ᵛइन्दो सोम ᵛमंहयद्रयिः प्रदीयमानधनस्त्वं ᵛनः अस्माकम् ᵛऊतिभिः ऊतिभ्यः । विभक्तिव्यत्ययः । रक्षार्थं ᵛशुचीनां शुद्धानां तव अंशभूतानां सोमानां ᵛशतं ᵛसहस्रं ᵛवा ᵛपवस्व क्षर ॥ ॥ ९ ॥

'उत्ते' इति चतुर्ऋचमेकोनत्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं गायत्रं पवमानसोमदेवताकम् । तथा चानुक्रान्तम्—'उत्ते चतुष्कमवत्सारः' इति । उक्तो विनियोगः ॥

उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः । नुदस्व याः परिस्पृधः ॥ १ ॥

उत् । ते । शुष्मासः । अस्थुः । रक्षः । भिन्दन्तः । अद्रिऽवः । नुदस्व । याः । परिऽस्पृधः ॥१॥

हे ᵛअद्रिवः ग्रावन् सोम ᵛते तव ᵛशुष्मासः शुष्मा वेगाः ᵛरक्षः राक्षसान् ᵛभिन्दन्तः विदारयन्तः ᵛउत् ᵛअस्थुः उत्तिष्ठन्ति । ᵛयाः ᵛस्पृधः स्पर्धमानाः शत्रुसेना अस्मान् प्रतिबाधन्ते तास्त्वं ᵛनुदस्व प्रेरय । बाधस्वेत्यर्थः ॥

अया निजघ्निरोजसा रथसङ्गे धने हिते । स्तवा अबिभ्युषा हृदा ॥ २ ॥

अया । निऽजघ्निः । ओजसा । रथऽसङ्गे । धने । हिते । स्तवै । अबिभ्युषा । हृदा ॥२॥

१. ग–विस्तृतस्सारो; त६-भ१.७–विसृतसारो । २. ग-त१.२.३.४.५-भ१.२–पूर्णोदनो; त६-भ पूर्णेदिनो; भ४–पूर्णेदनो ।

हे सोम त्वम् [v]अथा अनेन कृतेन[1] [v]ओजसा बलेन [v]निजघ्निः शत्रून् हन्तुं शीलवान्। तं त्वाम् [v]अभिष्युधा अभीतेन [v]हृदा मनसा युक्तोऽहं [v]रथसङ्गे अस्माकं रथानां सङ्गे [v]हिते शत्रुषु निहिते [v]धने च निमित्ते [v]स्तवै स्तौमि ॥

अस्य व्रतानि नाधृषे पवमानस्य दूढ्या। रुज यस्त्वा पृतन्यति ॥ ३ ॥

अस्य। व्रतानि। न। आऽधृषे। पवमानस्य। दुःऽध्या। रुज। यः। त्वा। पृतन्यति ॥३॥

हे सोम [v]पवमानस्य क्षरतो यस्य [v]अस्य तव [v]व्रतानि कर्माणि [v]दूढया दुर्बुद्धिना राक्षसेन [v]नाधृषे आधर्षयितुमशक्यानि स त्वं त्वां [v]यः दुर्बुद्धिः शत्रुः [v]पृतन्यति योद्धुमिच्छति तं [v]रुज बाधस्व॥

तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम् ॥ ४ ॥

तम्। हिन्वन्ति। मदऽच्युतम्। हरिम्। नदीषु। वाजिनम्। इन्दुम्। इन्द्राय। मत्सरम् ॥४॥

[v]मदच्युतं मदस्य च्यावयितारं [v]हरिं हरितवर्णं [v]वाजिनं बलिनं [v]मत्सरं मदकरं [v]तम् [v]इन्दुं सोमं [v]नदीषु वसतीवरीषु [v]इन्द्राय इन्द्रार्थं [v]हिन्वन्ति ऋत्विजः प्रेरयन्ति ॥ ॥ १० ॥

'अस्य प्रत्नाम्' इति चतुर्ऋचं त्रिंशं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'अस्य प्रत्नाम्' इत्यनुक्रान्तम्। उक्तो विनियोगः ॥

अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः। पयः सहस्रसामृषिम् ॥ १ ॥

अस्य। प्रत्नाम्। अनु। द्युतम्। शुक्रम्। दुदुह्रे। अह्रयः। पयः। सहस्रऽसाम्। ऋषिम् ॥१॥

[v]अस्य सोमस्य [v]प्रत्नां पुराणां [v]द्युतं[2] द्योतमानां तनुम् [v]अनु[2] [v]शुक्रं दीप्तं [v]सहस्रसाम् अभिलषितस्यापरिमितस्य दातारम् [v]ऋषिम् अतीन्द्रियस्य कर्मफलस्य द्रष्टारं [v]पयः पातव्यं रसम् [v]अह्रयः कवयः [v]दुदुह्रे दुहन्ति ॥

अयं सूर्यइवोपदृगयं सरांसि धावति। सप्त प्रवत आ दिवम् ॥ २ ॥

अयम्। सूर्यःऽइव। उपऽदृक्। अयम्। सरांसि। धावति। सप्त। प्रऽवतः। आ। दिवम् ॥२॥

[v]अयं सोमः [v]सूर्यइव यथा सूर्यः सर्वस्य लोकस्योपद्रष्टा तद्वत् कर्मणाम् [v]उपदृक् उपद्रष्टा। अपि च [v]अयं सोमः [v]सरांसि। त्रिंशदुक्थपात्राणीति केचिद्वर्णयन्ति। अपरे तु त्रिंशदहोरात्राणि सरांसीति। तानि [v]धावति[3] गच्छति[3]। तथा च यास्कः—'तत्रैतद्याज्ञिका वेदयन्ते त्रिंशदुक्थपात्राणि माध्यंदिने सवन एकदेवतानि तान्येतस्मिन्काल एकेन प्रतिधानेन पिबन्ति तान्यत्र सरांस्युच्यन्ते। त्रिंशदपरपक्षस्याहोरात्राण्यिंशत्पूर्वपक्षस्येति नैरुक्ताः' (निरु. ५. ११) इति। अपि चायं सोमः [v]दिवम् अधिकृत्य [v]सप्त [v]प्रवतः सप्त नदीः [v]आ तिष्ठति ॥

अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः ॥ ३ ॥

अयम्। विश्वानि। तिष्ठति। पुनानः। भुवना। उपरि। सोमः। देवः। न। सूर्यः ॥३॥

[v]पुनानः पूयमानः [v]अयं [v]सोमः [v]विश्वानि सर्वाणि [v]भुवना भुवनानि सर्वेषां भुवनानाम् [v]उपरि [v]तिष्ठति। तत्र दृष्टान्तमाह। [v]देवो [v]न [v]सूर्यः। यथा सूर्यो देवः सर्वेषां भुवनानामुपरि तिष्ठति तद्वदयं सोमोऽपीत्यर्थः ॥

---

१. त६-म७—प्रकृतेन। २. ग—द्योतमानां तनु; त३-म२—द्योतमानां तनुमनु; त६-म७—द्योतवन्मनु; म१—द्योतनुमनु। ३. ग—तावति; त३.६-म१.२.७—धावति।

परि णो देववीतये वाजाँ अर्षसि गोमतः । पुनान इन्दविन्द्रयुः ॥ ४ ॥

परि । नः । देवऽवीतये । वाजान् । अर्षसि । गोऽमतः । पुनानः । इन्दो इति । इन्द्रऽयुः ॥४॥

हे [v]इन्दो सोम [v]इन्द्रयुः इन्द्रकामः [v]पुनानः पूयमानस्त्वं [v]नः अस्माकं [v]देववीतये यज्ञाय [v]गोमतः गोयुक्तानि [v]वाजान् अन्नानि [v]परि [v]अर्षसि परितः क्षरेत्यर्थः ॥ ॥ ११ ॥

'यवंयवं नः' इति चतुर्ऋचमेकत्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षं गायत्रं पवमानसोमदेवताकम् । 'यवंयवम्' इत्यनुक्रान्तम् । गतो विनियोगः ॥

यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव । सोम विश्वा च सौभगा ॥ १ ॥

यवंम्ऽयवम् । नः । अन्धसा । पुष्टम्ऽपुष्टम् । परि । स्रव । सोम । विश्वा । च । सौभगा ॥१॥

हे [v]सोम त्वं [v]नः अस्माकं [v]पुष्टंपुष्टं बहुलं [v]यवंयवं पुनःपुनर्युतं रसम् [v]अन्धसा अन्नात्मना [v]परि [v]स्रव धारया क्षर ॥ अत्र प्रार्थयितुस्तृष्णयात्यन्तं पीडितत्वात् 'आबाधे च' (पा. सू. ८.१.१०) इति द्विर्भावः[1] । पीडा प्रयोक्तृधर्मो नाभिधेयधर्म इत्युक्तम् ॥ अपि च [v]विश्वा विश्वानि [v]सौभगा सौभगानि धनानि परि स्रव ॥

इन्दो यथा तव स्तवो यथा ते जातमन्धसः । नि बर्हिषि प्रिये सदः ॥ २ ॥

इन्दो इति । यथा । तव । स्तवः । यथा । ते । जातम् । अन्धसः । नि । बर्हिषि । प्रिये । सदः ॥२॥

हे[2] [v]इन्दो सोम [v]अन्धसः अन्नरूपस्य [v]तव संबन्धी [v]स्तवः स्तवनं स्तोत्रं तथा [v]ते तव [v]जातं जन्म [v]यथा प्रादुर्भूतमस्ति तथा त्वं [v]प्रिये प्रीणयितरि [v]बर्हिषि अस्मद्यागे [v]नि [v]षदः निषण्णो भव[2]॥

उत नो गोविदश्ववित्पवस्व सोमान्धसा । मक्षूतमेभिरहभिः ॥ ३ ॥

उत । नः । गोऽवित् । अश्वऽवित् । पवस्व । सोम । अन्धसा । मक्षुऽतमेभिः । अहऽभिः ॥३॥

[v]उत अपि च हे [v]सोम [v]नः अस्माकं [v]गोवित् गोप्रदः [v]अश्ववित् अश्वप्रदश्च त्वं [v]मक्षूतमेभिः मक्षुतमैरतिशयेन शीघ्रैः [v]अहभिः अहोभिर्हेतुभिः [v]अन्धसा अन्नेन [v]पवस्व धारया क्षर ॥

यो जिनाति न जीयते हन्ति शत्रुमभीत्य । स पवस्व सहस्रजित् ॥ ४ ॥

यः । जिनाति । न । जीयते । हन्ति । शत्रुम् । अभिऽइत्य । सः । पवस्व । सहस्रऽजित् ॥४॥

हे [v]सहस्रजित् असंख्यानां[3] शत्रूणां जेतः सोम [v]यः भवान्[4] [v]जिनाति शत्रून् हन्ति [v]न [v]जीयते स्वयं शत्रुभिर्न जीयते । न हन्यत इत्यर्थः । [v]शत्रुमभीत्य शत्रुं स्वयमभ्येत्य [v]हन्ति न च स्वयं शत्रुभिरभिभूयते [v]सः त्वं [v]पवस्व क्षर ॥ ॥ १२ ॥

'परि सोमः' इति चतुर्ऋचं द्वात्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'परि सोमः' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

परि सोम ऋतं बृहदाशुः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥ १ ॥

परि । सोमः । ऋतम् । बृहत् । आशुः । पवित्रे । अर्षति । विऽघ्नन् । रक्षांसि । देवऽयुः ॥१॥

---

१. ग–द्विर्भावः । आबाधनमाबाधः; त३-भ२.५–द्विर्बाधः । अबाधमाबाधः; भ१.७–द्विर्भावः । आबाधे चेति । २. ग–हे इंदो यथा तव स्तवो भवति यथा वा ते तुभ्यं अंधसो जातं अन्ननं प्रियार्थं तादृशः त्वं बर्हिषि निषीद । ३. भ४–सहस्रसंख्यानां । ४. ग-त३.६-भ१.२.७–'भवान्' नास्ति ।

vआशुः क्षिप्रकारी vदेवयुः देवकामः vसोमः vपवित्रे स्थित्वा vरक्षांसि राक्षसान् vविघ्नन् निघ्नन् vबृहत् महत् vऋतम् अन्नं vपरि vअर्षति परिगमयति । अस्मभ्यं प्रयच्छतीत्यर्थः ॥

यत्सोमो वाजमर्षति शतं धारा अपस्युवः । इन्द्रस्य सख्यमाविशन् ॥ २ ॥

यत् । सोमः । वाजम् । अर्षति । शतम् । धाराः । अपस्युवः । इन्द्रस्य । सख्यम् । आऽविशन् ॥२॥

vयत् यदा vअपस्युवः कर्मकामाः vशतं शतसंख्याकाः vधाराः vसोमस्य धाराः vइन्द्रस्य vसख्यं सख्ित्वम् vआविशन् प्राप्नुवन्ति तदा vसोमः vवाजम् अन्नम् vअर्षति गमयति । अस्मभ्यं प्रयच्छतीत्यर्थः ॥

अभि त्वा योषणो दश जारं न कन्यानूषत । मृज्यसे सोम सातये ॥ ३ ॥

अभि । त्वा । योषणः । दश । जारम् । न । कन्याः । अनूषत । मृज्यसे । सोम । सातये ॥३॥

हे vसोम vत्वा त्वां याः vदश दशसंख्याकाः vयोषणः अङ्गुलयः vकन्या पितृमतीः[1] कन्यका vजारं vन यथा प्रियमभिशब्दायते तद्वत् vअभि vअनूषत अभिशब्दायन्ते ताभिः vसातये अस्माकं धनस्य लाभाय vमृज्यसे इन्द्रार्थं शोध्यसे[2] ॥

त्वमिन्द्राय विष्णवे स्वादुरिन्दो परि स्रव । नृन्स्तोतॄन्पाह्यंहसः ॥ ४ ॥

त्वम् । इन्द्राय । विष्णवे । स्वादुः । इन्दो इति । परि । स्रव । नृन् । स्तोतॄन् । पाहि । अंहसः ॥४॥

हे vइन्दो सोम vस्वादुः प्रियरसस्त्वम् vइन्द्राय इन्द्रार्थं vविष्णवे विष्ण्वर्थं च vपरि vस्रव परिक्षर । vनॄन् कर्मणां नेतॄन् vस्तोतॄन् त्वद्विषयाणां स्तुतीनां कर्तॄन् vअंहसः दुरितात् vपाहि रक्ष च ॥ ॥ १३ ॥

'प्र ते धाराः' इति चतुर्ऋचं त्रयस्त्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'प्र ते धाराः' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः । अच्छा वाजं सहस्रिणम् ॥ १ ॥

प्र । ते । धाराः । असश्चतः । दिवः । न । यन्ति । वृष्टयः । अच्छ । वाजम् । सहस्रिणम् ॥१॥

हे सोम vते तव vअसश्चतः सङ्गरहिताः vधाराः vसहस्रिणम् अपरिमितसंख्याकं vवाजम् अन्नम् vअच्छ अस्मदर्थं vप्र vयन्ति प्रगच्छन्ति । तत्र दृष्टान्तः । vदिवो vन vवृष्टयः । यथा द्युलोकात् वर्षधारा निःसङ्गाः प्रजानामपरिमितमन्नं[3] प्रयच्छन्ति[4] तद्वदित्यर्थः ॥

अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति । हरिस्तुञ्जान आयुधा ॥ २ ॥

अभि । प्रियाणि । काव्या । विश्वा । चक्षाणः । अर्षति । हरिः । तुञ्जानः । आयुधा ॥ २ ॥

vहरिः हरितवर्णः सोमः vविश्वा विश्वानि vप्रियाणि देवानां प्रीतिकराणि vकाव्या काव्यानि कर्माणि vचक्षाणः पश्यन् vआयुधा स्वकीयान्यायुधानि vतुञ्जानः राक्षसान् प्रति प्रेरयंश्च vअभि vअर्षति यागं प्रति गच्छति ॥

---

१. ग–ऋतुमती । २. ग–त३–भ५–त्वं शोध्यसे । ३. ग–जनानाम° । ४. ग–त३–भ४.५–प्रति यांति; त–प्रयंति; भ१.२–प्रयांति ।

स मर्मृजान आयुभिरिभो राजेव सुव्रतः । श्येनो न वंसु षीदति ॥ ३ ॥

सः । मर्मृजानः । आयुऽभिः । इभः । राजाऽइव । सुऽव्रतः । श्येनः । न । वंसु । सीदति ॥३॥

[v]सुव्रतः सुकर्मा [v]सः सोमः [v]आयुभिः मनुष्यैर्ऋत्विग्भिः [v]मर्मृजानः शोध्यमानः [v]इभः गतभयः [v]राजेव यथा राजा [v]श्येनो [v]न यथा च श्येनस्तथा [v]वंसु उदकेषु वसतीवरीषु [v]सीदति ॥

स नो विश्वा दिवो वसूतो पृथिव्या अधि । पुनान इन्दवा भर ॥ ४ ॥

सः । नः । विश्वा । दिवः । वसु । उतो इति । पृथिव्याः । अधि । पुनानः । इन्दो इति । आ । भर ॥४॥

हे [v]इन्दो सोम [v]सः अभिषुतः [v]पुनानः पवमानस्त्वं [v]दिवः [v]अधि दिवि स्थितानि [v]उतो अपि च [v]पृथिव्या अधि पृथिव्यां स्थितानि । अधीति सप्तम्यर्थानुवादः । [v]विश्वा विश्वानि [v]वसु वसूनि [v]नः अस्मभ्यम् [v]आ [v]भर आहर ॥ ॥ १४ ॥

'तरत्सः' इति चतुर्ऋचं चतुस्त्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'तरत्सः' इत्यनुक्रान्तम् । उक्तो विनियोगः ॥

तरत्स मन्दी धावति धारा सुतस्यान्धसः । तरत्स मन्दी धावति ॥ १ ॥

तरत् । सः । मन्दी । धावति । धारा । सुतस्य । अन्धसः । तरत् । सः । मन्दी । धावति ॥१॥

[v]मन्दी देवानां हर्षकरः [v]सः सोमः [v]तरत् स्तोतॄन् पाप्मनः सकाशात् तारयन् [v]धावति पवते । तदेव दर्शयति । [v]सुतस्य अभिषुतस्य [v]अन्धसः देवानामन्नात्मकस्य सोमस्य [v]धारा धावतीति । पुनरपि तदेवाह अत्यन्तादरार्थं [v]तरत्स [v]मन्दी [v]धावति इति । यद्वा । अस्या ऋचो यास्केनोक्तोऽर्थो द्रष्टव्यः । तद्यथा—'तरति स पापं सर्वं मन्दी यः स्तौति धावति गच्छत्यूर्ध्वां गतिम् । धारा सुतस्यान्धसो धारयाभिषुतस्य[1] सोमस्य मन्त्रपूतस्य वाचा स्तुतस्य' (निरु. १३·६) इति ॥

उस्रा वेद वसूनां मर्तस्य देव्यवसः । तरत्स मन्दी धावति ॥ २ ॥

उस्रा । वेद । वसूनाम् । मर्तस्य । देवी । अवसः । तरत् । सः । मन्दी । धावति ॥ २ ॥

[v]वसूनां धनानाम् [v]उस्रा उत्सरणशीला प्रदात्री [v]देवी द्योतमाना स्तूयमाना वा यस्य[2] सोमस्य धारा [v]मर्तस्य मनुष्यं यजमानम् [v]अवसः रक्षितुं [v]वेद जानाति । सिद्धमन्यत् ॥

ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे । तरत्स मन्दी धावति ॥ ३ ॥

ध्वस्रयोः । पुरुऽसन्त्योः । आ । सहस्राणि । दद्महे । तरत् । सः । मन्दी । धावति ॥ ३ ॥

[v]ध्वस्रयोः [v]पुरुषन्त्योः । ध्वस्रः कश्चिद्राजा पुरुपन्तिः कश्चित् । तयोरुभयोः । अत्र इतरेतरयोगविवक्षया द्विवचनं द्रष्टव्यम् । [v]सहस्राणि धनानां सहस्राणि [v]आ [v]दद्महे वयं प्रतिगृह्णीमः । तदस्माभिः प्रतिगृहीतं धनमुत्तममस्त्विति ऋषिः सोमं प्रार्थयत इति सोमस्य स्तुतिः । सिद्धमन्यत् । यथावत्सार एतयोर्धनानि प्रतिजग्राह एवं तरन्तपुरुमीळ्हौ प्रतिजगृहतुः । तथा च शाट्यायनकम्—'अथ ह वै तरन्तपुरुमीळ्हौ वैददश्वौ ध्वस्रयोः पुरुषन्त्योर्बहु प्रतिगृह्य गरगिराविव मेनाते तौ ह स्माङ्गुष्ठया सातं प्रतिमसृशाते तावकामयेतामसातं नाविवेदं सातं स्यादात्तमिवैव न प्रतिगृहीतमिति

---

१. त१.२.५–धाराभिरभि°; त२.३.४·भ२–धाराभि° । २. त३-भ–'यस्य' नास्ति ।

तावेतचतुर्ऋचमपश्यतां तेन प्रत्यैतां ततो वै तयोरसातं सातमभवदात्तमिवैव न प्रतिगृहीतं स यः प्रतिगृह्य कामयेत ' इत्यादि ॥

आ ययोस्त्रिंशतं तना सहस्राणि च दध्महे । तरत्स मन्दी धावति ॥ ४ ॥

आ । ययोः । त्रिंशतम् । तना । सहस्राणि । च । दध्महे । तरत् । सः । मन्दी । धावति ॥४॥

ᵛययोः ᵛवस्त्रपुरुषवन्योः ᵛत्रिंशतं त्रिंशतानि ᵛसहस्राणि ᵛतना वस्त्राणि ᵛआ ᵛदध्महे वयं प्रतिगृह्णीमः तयोरस्माभिः प्रतिगृहीतं तत्सर्वमप्रतिगृहीतमस्त्विति सोमऋषिः प्रार्थयत इति सोमस्यैव स्तुतिः । सिद्धमन्यत् ॥ ॥ १५ ॥

' पवस्व ' इति चतुर्ऋचं पञ्चत्रिंशं सूक्तम् । ऋष्याद्याः पूर्ववत् । ' पवस्व ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

पवस्व गोजिदश्वजिद्धिरण्यजित्सोम रण्यजित् । प्रजावद्रत्नमा भर ॥ १ ॥

पवस्व । गोऽजित् । अश्वऽजित् । विश्वऽजित् । सोम । रण्यऽजित् ।
प्रजाऽवत् । रत्नम् । आ । भर ॥ १ ॥

हे ᵛसोम ᵛगोजित् शत्रूणां गवां जेता ᵛअश्वजित् अश्वानामपि जेता ᵛविश्वजित् विश्वस्य जगतो जेता ᵛरण्यजित् रमणीयस्य धनस्यापि जेता त्वं ᵛपवस्व धारया क्षर । अपि चास्मभ्यं ᵛप्रजावत् पुत्राद्युपेतं ᵛरत्नं रमणीयं धनम् ᵛआ ᵛभर आहर ॥

पवस्वाज्यो अदाभ्यः पवस्वौषधीभ्यः । पवस्व धिषणाभ्यः ॥ २ ॥

पवस्व । अतऽभ्यः । अदाभ्यः । पवस्व । ओषधीभ्यः । पवस्व । धिषणाभ्यः ॥ २ ॥

हे सोम त्वम् ᵛअज्यः वसतीवरीभ्यः ᵛअदाभ्यः अंशुभ्यश्च ᵛपवस्व क्षर । अपि च ᵛओषधीभ्यः ᵛपवस्व क्षर । किंच ᵛधिषणाभ्यः ग्रावभ्यः ᵛपवस्व क्षर ॥

त्वं सोम पवमानो विश्वानि दुरिता तर । कविः सीद नि बर्हिषि ॥ ३ ॥

त्वम् । सोम । पवमानः । विश्वानि । दुःऽइता । तर । कविः । सीद । नि । बर्हिषि ॥ ३ ॥

हे ᵛसोम ᵛपवमानः पूयमानः ᵛकविः क्रान्तकर्मा ᵛत्वं ᵛविश्वानि सर्वाणि दुरितानि राक्षसैः कृतान्युपद्रवाणि ᵛतर निराकुरु । अस्मिन् ᵛबर्हिषि ᵛनि ᵛसीद च ॥

पवमान स्वर्विदो जायमानोऽभवो महान् । इन्दो विश्वाँ अभीदसि ॥ ४ ॥

पवमान । स्वः । विदः । जायमानः । अभवः । महान् । इन्दो इति । विश्वान् । अभि । इत् । असि ॥४॥

हे ᵛपवमान सोम त्वं ᵛस्वः सर्वं ᵛविदः यजमानाय प्रयच्छ । अपि च ᵛजायमानः प्रादुर्भवन्नेव ᵛमहान् पूजनीयः ᵛअभवः[1] असि । किंच हे ᵛइन्दो सोम त्वं ᵛविश्वानित् सर्वानेव शत्रून् ᵛअभि ᵛअसि तेजसाभिभवसि ॥ ॥ १६ ॥

' प्र गायत्रेण ' इति चतुर्ऋचं षट्त्रिंशं सूक्तं काश्यपस्यावत्सारस्यार्षम् । तृतीया पुरउष्णिगाद्या द्वादशका अष्टका । शिष्टा गायत्र्यः । पवमानः सोमो देवता । तथा चानुक्रान्तं—' प्र गायत्रेणोपान्त्या पुरउष्णिक् ' इति । उक्तो विनियोगः ॥

---

१. ग-घ-त-भ-' अभवः ' नास्ति ।

प्र गायत्रेण गायत पवमानं विचर्षणिम् । इन्दुं सहस्रचक्षसम् ॥ १ ॥

प्र । गायत्रेण । गायत । पवमानम् । विऽचर्षणिम् । इन्दुम् । सहस्रऽचक्षसम् ॥ १ ॥

[v]विचर्षणिं विद्रष्टारं [v]सहस्रचक्षसं बहुदर्शनं [v]पवमानं पूयमानम् [v]इन्दुं सोमं [v]गायत्रेण गायत्रनामधेयेन साम्ना [v]प्र [v]गायत हे स्तोतारः गानं कुरुत । स्तुतेत्यर्थः ॥

तं त्वा सहस्रचक्षसमथो सहस्रभर्णसम् । अति वारमपाविषुः ॥ २ ॥

तम् । त्वा । सहस्रऽचक्षसम् । अथो इति । सहस्रऽभर्णसम् । अति । वारम् । अपाविषुः ॥२॥

हे सोम [v]सहस्रचक्षसं बहुदर्शनम् [v]अथो अपि च [v]सहस्रभर्णसं बहुभरणं [v]तम् अभिषुतं [v]त्वा त्वां [v]वारं वालं दशापवित्रम् [v]अति [v]अपाविषुः ऋत्विजः पावयन्ति ॥

अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति । इन्द्रस्य हार्दाविशन् ॥३॥

अति । वारान् । पवमानः । असिस्यदत् । कलशान् । अभि । धावति । इन्द्रस्य । हार्दि । आऽविशन् ॥३॥

[v]पवमानः पूयमानः सोमः [v]वारान् अवेर्वालान् [v]अति अतिक्रम्य [v]असिष्यदत् स्यन्दते । अपि च [v]इन्द्रस्य [v]हार्दि हृदयम् [v]आविशन् [v]कलशान् द्रोणान् [v]अभि [v]धावति अभिगच्छति ॥

इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे । प्रजावद्रेत आ भर ॥ ४ ॥

इन्द्रस्य । सोम । राधसे । शम् । पवस्व । विऽचर्षणे । प्रजाऽवत् । रेतः । आ । भर ॥ ४ ॥

हे [v]विचर्षणे विद्रष्टः त्वम् [v]इन्द्रस्य [v]राधसे राधनाय संसिद्धयै [v]शं सुखकरं रसं [v]पवस्व क्षर । अपि चास्मभ्यं [v]प्रजावत् पुत्राद्युपेतं [v]रेतः उदकमन्नं वा [v]आ [v]भर आहर । प्रयच्छेत्यर्थः ॥ ॥१७॥ ॥२॥

तृतीयेऽनुवाके सप्त सूक्तानि । तत्र 'अया वीती' इति त्रिंशदृचं प्रथमं सूक्तम् । अमहीयुर्नामाङ्गिरस ऋषिः । गायत्री छन्दः । पवमानः सोमो देवता । तथा चानुक्रान्तम्—'अया वीती त्रिंशदमहीयुः' इति । उक्तो विनियोगः ॥

अया वीती परि स्रव यस्त इन्दो मदेष्वा । अवाहन्नवतीर्नव ॥ १ ॥

अया । वीती । परि । स्रव । यः । ते । इन्दो इति । मदेषु । आ । अवऽअहन् । नवतीः । नव ॥ १ ॥

हे [v]इन्दो सोम [v]अया अनेन रसेन [v]वीती वीत्या इन्द्रस्य भक्षणाय [v]परि [v]स्रव परिक्षर । कीदृशेन रसेनेत्यत आह । [v]ते तव [v]यः रसः [v]मदेषु संग्रामेषु [v]नवतीर्नव इति नवनवतिसंख्याकाश्च शत्रुपुरीः [v]अवाहन् जघान । अमुं सोमरसं पीत्वा मत्तः सन्निन्द्र उक्तलक्षणाः शत्रुपुरीर्जघानेति कृत्वा रसो जघानेत्युपचारः ॥

पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् । अध त्यं तुर्वशं यदुम् ॥ २ ॥

पुरः । सद्यः । इत्थाऽधिये । दिवःऽदासाय । शम्बरम् । अध । त्यम् । तुर्वशम् । यदुम् ॥२॥

[v]सद्यः एकस्मिन्नेवाह्नि [v]पुरः शत्रूणां पुराणि सोमरसोऽवाहन् । [v]इत्थाधिये सत्यकर्मणे [v]दिवोदासाय राज्ञे [v]शम्बरं शत्रुपुराणां स्वामिनम् [v]अध अथ [v]त्यं तं [v]तुर्वशं तुर्वशनामकं राजानं दिवोदासशत्रुं [v]यदुं यदुनामकं राजानं च[1] वशमानयच्च[1] । अत्रापि सोमरसं पीत्वा मत्तः सन्निन्द्रः सर्वमेतदकार्षीदिति सोमरसे कर्तृत्वमुपचर्यते ॥

---

१. ग—स्ववशमनयच्च; म१.७—च वशमनयच्च ।

परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत् । क्षरा सहस्रिणीरिषः ॥ ३ ॥

परि । नः । अश्वम् । अश्वऽवित् । गोऽमत् । इन्दो इति । हिरण्यऽवत् । क्षर । सहस्रिणीः । इषः ॥३॥

हे ᵛइन्दो सोम ᵛअश्ववित् अश्वस्य लम्भकस्त्वं ᵛनः अस्माकम् ᵛअश्वं ᵛगोमत् गोयुक्तं ᵛहिरण्यवत् हिरण्योपेतं धनं च ᵛपरि ᵛक्षर । अपि च ᵛसहस्रिणीः बहूनि ᵛइषः अन्नानि क्षर ॥

पवमानस्य ते वयं पवित्रमभ्युन्दतः । सखित्वमा वृणीमहे ॥ ४ ॥

पवमानस्य । ते । वयम् । पवित्रम् । अभिऽउन्दतः । सखिऽत्वम् । आ । वृणीमहे ॥ ४ ॥

हे सोम ᵛपवित्रमभ्युन्दतः पवित्रमभिक्लेदयतः ᵛपवमानस्य क्षरतश्च ᵛते तव ᵛसखित्वं सख्यं ᵛवयम् अमहीयव आङ्गिरसाः ᵛआ ᵛवृणीमहे प्रार्थयामहे ॥

ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया । तेभिर्नः सोम मृळय ॥ ५ ॥

ये । ते । पवित्रम् । ऊर्मयः । अभिऽक्षरन्ति । धारया । तेभिः । नः । सोम । मृळय ॥ ५ ॥

हे ᵛसोम ᵛते तव ᵛये[1] ᵛऊर्मयः तरङ्गाः ᵛपवित्रं ᵛधारया ᵛक्षरन्ति ᵛतेभिः तैरूर्मिभिः ᵛनः अस्मान् ᵛमृळय सुखय ॥ ॥ १८ ॥

स नः पुनान आ भर रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः ॥ ६ ॥

सः । नः । पुनानः । आ । भर । रयिम् । वीरऽवतीम् । इषम् । ईशानः । सोम । विश्वतः ॥६॥

हे ᵛसोम ᵛविश्वतः सर्वस्य जगतः ᵛईशानः ईश्वरः ᵛसः अभिषुतः ᵛपुनानः पूयमानस्त्वं ᵛनः अस्मभ्यं ᵛरयिं धनं ᵛवीरवतीं पुत्राद्युपेतम् ᵛइषम् अन्नं च ᵛआ ᵛभर आहर ॥

एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् । समादित्येभिरख्यत ॥ ७ ॥

एतम् । ऊँ इति । त्यम् । दश । क्षिपः । मृजन्ति । सिन्धुऽमातरम् । सम् । आदित्येभिः । अख्यत ॥७॥

ᵛसिन्धुमातरं यस्य सोमस्य सिन्धवो नद्यो मातरो भवन्ति ᵛत्यं तम् ᵛएतम् इमं सोमं ᵛदश ᵛक्षिपः दशसंख्याका अङ्गुलयः ᵛमृजन्ति शोधयन्ति । अपि च सोऽयं सोमः ᵛआदित्येभिः आदित्यैः ᵛसम् ᵛअख्यत संगच्छते ॥

समिन्द्रेणोत वायुना सुत एति पवित्र आ । सं सूर्यस्य रश्मिभिः ॥ ८ ॥

सम् । इन्द्रेण । उत । वायुना । सुतः । एति । पवित्रे । आ । सम् । सूर्यस्य । रश्मिऽभिः ॥ ८ ॥

ᵛसुतः अभिषुतः सोमः ᵛपवित्रे ᵛइन्द्रेण ᵛसम् ᵛएति संगच्छते । ᵛउत अपि च ᵛवायुना समेति । ᵛसूर्यस्य ᵛरश्मिभिः मयूखैरपि ᵛसम् एति ॥

स नो भगाय वायवे पूष्णे पवस्व मधुमान् । चारुर्मित्रे वरुणे च ॥ ९ ॥

सः । नः । भगाय । वायवे । पूष्णे । पवस्व । मधुऽमान् । चारुः । मित्रे । वरुणे । च ॥ ९ ॥

हे सोम ᵛमधुमान् मधुररसः ᵛचारुः कल्याणस्वरूपश्च ᵛसः अभिषुतस्त्वं ᵛनः अस्माकं यज्ञे ᵛभगाय भगाख्याय देवाय ᵛवायवे च ᵛपूष्णे[2] च[2] ᵛमित्रे मित्राय देवाय ᵛवरुणे वरुणाय ᵛच ᵛपवस्व क्षर ॥

---

१. त·म२–'ये' नास्ति । २. त१.२.६.७–पूष्णे रवये; त४–पूष्णे खेद ।

उच्चा ते जातमन्धसो दिवि षद्भूम्या ददे। उग्रं शर्म महि श्रवः ॥ १० ॥

उच्चा । ते । जातम् । अन्धसः । दिवि । सत् । भूमिः । आ । ददे ।
उग्रम् । शर्म । महि । श्रवः ॥ १० ॥

हे सोम [v]ते तव संबन्धिनः [v]अन्धसः रसस्य [v]उच्चा उपरि [v]जातं जन्म अपि च [v]दिवि द्युलोके [v]सत् विद्यमानं स्वतस्तव संबन्धि [v]उग्रम् उद्भूर्णं [v]शर्म सुखं [v]महि महत् [v]श्रवः अन्नं च [v]भूमिः [v]आ [v]ददे। भूम्या ददे इति पदत्रयमामनन्ति। विसर्जनीयलोपः सांहितिकः। भूमिर्भौमा जना मादृशाः। भूमिष्टैरादीयत इत्यर्थः ॥ ॥ १९ ॥

एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे ॥ ११ ॥

एना । विश्वानि । अर्यः । आ । द्युम्नानि । मानुषाणाम् । सिसासन्तः । वनामहे ॥ ११ ॥

[v]एना एनेनानेन सोमेन [v]मानुषाणां मनुष्याणां विश्वा [v]विश्वानि [v]द्युम्नानि अन्नानि [v]आ[1] [v]अर्यः अभिगच्छन्तः [v]सिषासन्तः संभक्तुमिच्छन्तश्च वयं [v]वनामहे संभजामहे ॥

स नः इन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव ॥ १२ ॥

सः । नः । इन्द्राय । यज्यवे । वरुणाय । मरुत्ऽभ्यः । वरिवःऽवित् । परि । स्रव ॥ १२ ॥

हे सोम [v]वरिवोवित् धनस्य लम्भकः पवमानस्त्वं [v]नः अस्माकं [v]यज्यवे यष्टव्याय [v]इन्द्राय [v]वरुणाय च [v]मरुद्भ्यः च [v]परि [v]स्रव धारया क्षर ॥

उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम्। इन्दुं देवा अयासिषुः ॥ १३ ॥

उपो इति । सु । जातम् । अप्ऽतुरम् । गोभिः । भङ्गम् । परिऽकृतम् ।
इन्दुम् । देवाः । अयासिषुः ॥ १३ ॥

[v]सु [v]जातं सम्यक्प्रादुर्भूतम् [v]अप्तुरं वसतीवरीभिः प्रेरितं [v]भङ्गं शत्रूणां भञ्जकं [v]गोभिः गोविकारैः पयोभिः [v]परिष्कृतम् अलंकृतं संस्कृतम् [v]इन्दुं सोमं [v]देवाः इन्द्रादयः [v]उप [v]अयासिषुः उपागच्छन्ति ॥

तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव। य इन्द्रस्य हृदंसनिः ॥ १४ ॥

तम् । इत् । वर्धन्तु । नः । गिरः । वत्सम् । संशिश्वरीःऽइव । यः । इन्द्रस्य । हृदम्ऽसनिः ॥ १४ ॥

[v]यः सोमः [v]इन्द्रस्य [v]हृदंसनिः हृदयस्य संभक्ता भवति [v]तमित् तमेव सोमं [v]नः अस्माकं [v]गिरः स्तुतिरूपा वाचः [v]सं [v]वर्धन्तु सम्यग्वर्धयन्तु। तत्र दृष्टान्तः। [v]वत्सं बालं [v]शिश्वरीरिव। यथा शिश्वर्यो बद्धपयस्का[2] मातरो वत्सं वर्धयन्ति तद्वदित्यर्थः ॥

अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्यम् ॥ १५ ॥

अर्ष । नः । सोम । शम् । गवे । धुक्षस्व । पिप्युषीम् । इषम् । वर्ध । समुद्रम् । उक्थ्यम् ॥ १५ ॥

हे [v]सोम त्वं [v]नः अस्माकं [v]गवे [v]शं सुखम् [v]अर्ष क्षर। अपि च [v]पिप्युषीं प्रवृद्धम्[3] [v]इषम् अन्नं [v]धुक्षस्व पूरय। किंच [v]उक्थ्यं प्रशस्यं [v]समुद्रम् उदकं [v]वर्ध वर्धय ॥ ॥ २० ॥

---

१. ग-त२.५.६-भ२.४-'आ' नास्ति । २. ग-द्धयपसका; त१.६-वृद्धपयस्का; त२-वृद्धस्पयस्का; त४-बद्धपयस्का । ३. ग-त-भ४-प्रवृद्धां ।

पवमानो अजीजनदिवश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत् ॥ १६ ॥

पवमानः। अजीजनत्। दिवः। चित्रम्। न। तन्यतुम्। ज्योतिः। वैश्वानरम्। बृहत् ॥१६॥

vपवमानः सोमः vबृहत् महत् vवैश्वानरं वैश्वानराख्यं vज्योतिः तेजः vदिवः द्युलोकस्य vचित्रं विचित्रं vतन्यतुं vन अशनिमिव vअजीजनत् अजनयत् ॥

पवमानस्य ते रसो मदो राजन्नदुच्छुनः। वि वारमव्यमर्षति ॥ १७ ॥

पवमानस्य। ते। रसः। मदः। राजन्। अदुच्छुनः। वि। वारम्। अव्यम्। अर्षति ॥१७॥

हे vराजन् दीप्यमान सोम vपवमानस्य क्षरतः vते तव vअदुच्छुनः रक्षोवर्जितः vमदः मदकरः vरसः vअव्यम् अविमयं vवारं वालं दशापवित्रम् vअर्षति अभिगच्छति ॥

पवमान रसस्तव दक्षो वि राजति द्युमान्। ज्योतिर्विश्वं स्वर्दृशे ॥ १८ ॥

पवमान। रसः। तव। दक्षः। वि। राजति। द्युऽमान्। ज्योतिः। विश्वम्। स्वः। दृशे ॥१८॥

हे vपवमान सोम vतव त्वदीयः vदक्षः वृद्धः vद्युमान् दीप्तिमान् vरसः vवि vराजति प्रकाशते। न केवलं स्वयमेव प्रकाशते किंतु vविश्वं व्याप्तं vस्वः सर्वं vज्योतिः तेजश्च vदृशे द्रष्टुं करोतीति शेषः ॥

यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघशंसहा ॥ १९ ॥

यः। ते। मदः। वरेण्यः। तेन। पवस्व। अन्धसा। देवऽअवीः। अघशंसऽहा ॥ १९ ॥

हे सोम vते तव vदेवावीः देवकामः vअघशंसहा राक्षसानां हन्ता vवरेण्यः सर्ववरणीयः vमदः मदकरः vयः रसो विद्यते vतेन रसेन vअन्धसा अदनीयेन vपवस्व क्षर ॥

जहि वृत्रममित्रियं सस्निर्वाजं दिवेदिवे। गोषा उ अश्वसा असि ॥ २० ॥

जहिः। वृत्रम्। अमित्रियम्। सस्निः। वाजम्। दिवेऽदिवे।
गोऽसाः। ऊँ इति। अश्वऽसाः। असि ॥ २० ॥

हे सोम त्वम् vअमित्रियम् अमित्रभवं vवृत्रं शत्रुं vजहिः हन्ता vअसि भवसि। किंच vदिवेदिवे प्रतिदिनं vवाजं संग्रामं vसस्निः संभक्तासि। किंच vगोषाः गवां दाताऽसि। vअश्वसाः अश्वानां दाता चासि ॥ ॥ २१ ॥

संमिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः। सीदञ्छ्येनो न योनिमा ॥ २१ ॥

सम्ऽमिश्लः। अरुषः। भव। सुऽउपस्थाभिः। न। धेनुऽभिः।
सीदन्। श्येनः। न। योनिम्। आ ॥ २१ ॥

हे सोम त्वं vसूपस्थाभिः शोभनोपस्थानाभिः vधेनुभिः गोभिः। गोविकारैः पयोभिरित्यर्थः। vसंमिश्लः संमिश्रितः vश्येनो vन यथा श्येनः शीघ्रमागत्य स्थानमासीदति तद्वत् vयोनिं स्वकीयं स्थानम् vआ vसीदन्। vन संप्रत्यर्थे। इदानीम् vअरुषः आरोचमानः vभव ॥

स पवस्व य आविथेन्द्रं वृत्राय हन्तवे। वव्रिवांसं महीरपः ॥ २२ ॥

सः। पवस्व। यः। आविथ। इन्द्रम्। वृत्राय। हन्तवे। वव्रिऽवांसम्। महीः। अपः ॥२२॥

हे सोम [V]यः त्वं [V]महीः महतीः [V]अपः महान्त्युदकानि [V]वव्रिवांसं निरुन्धानं [V]वृत्राय वृत्रं [V]हन्तवे हन्तुम् [V]इन्द्रम् [V]आविथ अरक्षः [V]सः त्वं [V]पवस्व धारया क्षर। सोमं पीत्वा मत्तः सन्निन्द्रो महान्त्युदकानि निरुन्धानं वृत्रं जघानेत्यर्थः ॥

सुवीरासो वयं धना जयेम सोम मीढ्वः। पुनानो वर्ध नो गिरः ॥ २३ ॥

सुऽवीरासः। वयम्। धना। जयेम। सोम। मीढ्वः। पुनानः। वर्ध। नः। गिरः ॥२३॥

[V]सुवीरासः सुवीराः कल्याणपुत्राः [V]वयम् अमहीयव आङ्गिरसाः [V]धना शत्रूणां धनानि [V]जयेम। शत्रून् जित्वा तदीयानि धनानि स्वीकुर्यामेत्यर्थः। हे [V]मीढ्वः सेक्तः [V]सोम [V]पुनानः पूयमानस्त्वं [V]नः अस्माकं [V]गिरः स्तुतिरूपा वाचश्च [V]वर्ध वर्धय ॥

त्वोतासस्तवावसा स्याम वन्वन्त आमुरः। सोम व्रतेषु जागृहि ॥ २४ ॥

त्वाऽऊतासः। तव। अवसा। स्याम। वन्वन्तः। आऽमुरः। सोम। व्रतेषु। जागृहि ॥२४॥

हे [V]सोम [V]तव त्वदीयेन [V]अवसा रक्षणेन [V]त्वोतासः त्वया रक्षिताः सन्तः [V]वन्वन्तः शत्रून् भजमानाः [V]आमुरः तेषामभिमारकाः [V]स्याम भवेम। [V]व्रतेषु अस्माकं कर्मसु [V]जागृहि प्रबुद्धो भव ॥

अपघ्नन्पवते मृधोऽप सोमो अरावणः। गच्छन्निन्द्रस्य निष्कृतम् ॥ २५ ॥

अपऽघ्नन्। पवते। मृधः। अप। सोमः। अरावणः। गच्छन्। इन्द्रस्य। निःऽकृतम् ॥२५॥

[V]सोमः [V]मृधः हिंसकाञ्छत्रून् [V]अपघ्नन् मारयन् [V]अरावणः शत्रौ सत्यां धनानामदातॄंश्च [V]अप घ्नन् [V]इन्द्रस्य [V]निष्कृतं स्थानं [V]गच्छन् प्राप्नुवन् [V]पवते धारया क्षरति ॥ ॥ २२ ॥

महो नो राय आ भर पवमान जही मृधः। रास्वेन्दो वीरवद्यशः ॥ २६ ॥

महः। नः। रायः। आ। भर। पवमान। जहि। मृधः।
रास्व। इन्दो इति। वीरऽवत्। यशः ॥ २६ ॥

हे [V]पवमान [V]इन्दो सोम [V]नः अस्माकं [V]महः महान्ति [V]रायः धनानि [V]आ [V]भर आहर। [V]मृधः हिंसकाञ्छत्रूंश्च [V]जहि मारय। [V]वीरवत् पुत्राद्युपेतां[1] [V]यशः कीर्तिं च [V]रास्व अस्मभ्यं देहि ॥

न त्वा शतं चन हुतो राधो दित्सन्तमा मिनन्। यत्पुनानो मखस्यसे ॥२७॥

न। त्वा। शतम्। चन। हुतः। राधः। दित्सन्तम्। आ। मिनन्।
यत्। पुनानः। मखस्यसे ॥ २७ ॥

हे सोम [V]राधः धनम् [V]आ [V]दित्सन्तम् आदातुमिच्छन्तं [V]त्वा त्वां [V]शतं [V]चन बहवोऽपि [V]हुतः हिंसकाः शत्रवः [V]न [V]मिनन् न[2] हिंसन्ति। कदेत्यत्राह। [V]यत् यदा [V]पुनानः पूयमानस्त्वं [V]मखस्यसे अस्मभ्यं धनं दातुमिच्छसि ॥

पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि ॥२८॥

पवस्व। इन्दो इति। वृषा। सुतः। कृधि। नः। यशसः। जने। विश्वाः। अप। द्विषः। जहि ॥२८॥

---

१. ग-त-भ४-°द्युपेतं। २. त-भ२-'न' नास्ति।

हे [v]इन्दो सोम [v]सुतः अभिषुतः[1] [v]वृषा सेक्ता रसं [v]पवस्व धारया क्षर। [v]जने जनपदेषु [v]यः अस्मान् [v]यशसः यशस्विनः [v]कृधि कुरु। [v]विश्वाः सर्वान् [v]द्विषः द्वेष्टॄन् शत्रून् [v]अप [v]जहि मारय च ॥

अस्य ते सुख्ये वयं तवेन्दो द्युम्न उत्तमे। ससह्याम पृतन्यतः ॥ २९ ॥

अस्य। ते। सख्ये। वयम्। तव। इन्दो इति। द्युम्ने। उत्ऽउतमे। ससह्याम। पृतन्यतः ॥२९॥

हे [v]इन्दो सोम [v]अस्य अस्मिन् यागे वर्तमानस्य [v]ते तव [v]सख्ये सखित्वे सति [v]वयम् अमहीयव आङ्गिरसाः [v]तव स्वदीये [v]उत्तमे श्रेष्ठे [v]द्युम्ने अन्ने तृप्तिं[2] प्राप्ताः[2]। तथा च यास्कः—'द्युम्नं द्योततेर्यशो वान्नं वा' (निरु. ५. ५) इति। [v]पृतन्यतः युद्धमिच्छतः शत्रून् [v]ससह्याम अभिभवेम ॥

या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः ॥३०॥

या। ते। भीमानि। आयुधा। तिग्मानि। सन्ति। धूर्वणे। रक्ष। समस्य। नः। निदः ॥३०॥

हे सोम [v]ते तव [v]या यानि [v]भीमानि शत्रूणां भयंकराणि [v]तिग्मानि तीक्ष्णानि [v]आयुधा आयुधानि [v]धूर्वणे[3] शत्रुवधार्थं [v]सन्ति तैरायुधैः [v]समस्य सर्वस्य शत्रोः [v]निदः निन्दायाः [v]नः अस्मान् [v]रक्ष पालय ॥ ॥ २३ ॥

'एते असृग्रम्' इति त्रिंशदृचं द्वितीयं सूक्तं भार्गवस्य जमदग्नेरार्षं गायत्रं पवमानसोमदेवताकम्। तथा चानुक्रान्तम्—'एते असृग्रं जमदग्निः' इति। गतो विनियोगः ॥

एते असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा ॥ १ ॥

एते। असृग्रम्। इन्दवः। तिरः। पवित्रम्। आशवः। विश्वानि। अभि। सौभगा ॥ १ ॥

[v]आशवः शीघ्राः [v]एते पवमानाः [v]इन्दवः सोमाः [v]विश्वानि सर्वाणि [v]सौभगा सौभगानि धनान्यभिलक्ष्य [v]पवित्रं [v]तिरः [v]असृग्रम् ऋत्विग्भिः सृज्यन्ते ॥

विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः। तना कृण्वन्तो अर्वते ॥ २ ॥

विऽघ्नन्तः। दुःऽइता। पुरु। सुऽगा। तोकाय। वाजिनः। तना। कृण्वन्तः। अर्वते ॥२॥

[v]वाजिनः बलवन्तः सोमाः [v]पुरु बहूनि [v]दुरिता दुरितानि [v]विघ्नन्तः विशेषेण नाशयन्तः [v]तोकाय अस्माकं पुत्राय [v]अर्वते अश्वाय च [v]सुगा सुखानि [v]तना धनानि च [v]कृण्वन्तः कुर्वन्तः तिरः पवित्रं सृज्यन्त इति संबन्धः ॥

कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम्। इळामस्मभ्यं संयतम् ॥ ३ ॥

कृण्वन्तः। वरिवः। गवे। अभि। अर्षन्ति। सुऽस्तुतिम्। इळाम्। अस्मभ्यम्। सम्ऽयतम्॥३॥

अस्माकं [v]गवे [v]अस्मभ्यं च [v]संयतं यदस्मान् संयच्छति तत् [v]वरिवः धनम् [v]इळाम् अन्नं च [v]कृण्वन्तः कुर्वन्तः सोमाः [v]सुष्टुतिम् अस्मदीयां शोभनां स्तुतिम् [v]अभ्यर्षन्ति आभिमुख्येन गच्छन्ति ॥

१. ग-त३-म१.२.७-'अभिषुतः' नास्ति। २. ग-त३-म१.५.७-'तृप्तिं प्राप्ताः' नास्ति। ३. त१.२.६-तूर्वणे; त४.५-पूर्वणे।

असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः । श्येनो न योनिमासदत् ॥ ४ ॥

असावि । अंशुः । मदाय । अप्ऽसु । दक्षः । गिरिऽस्थाः । श्येनः । न । योनिम् । आ । असदत् ॥४॥

vगिरिष्ठाः पर्वते जातः vअंशुः सोमः vमदाय मदार्थम् vअसावि अभिषुतः । vअप्सु वसतीवरीषु vदक्षः प्रवृद्धश्च भवति । किंच vश्येनो vन यथा श्येनो वेगेनागत्य स्थानमासीदति तद्वदयं सोमो vयोनिं स्वकीयं स्थानम् vआसदत् आसीदति ॥

शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः । स्वदन्ति गावः पयोभिः ॥ ५ ॥

शुभ्रम् । अन्धः । देवऽवातम् । अप्ऽसु । धूतः । नृऽभिः । सुतः ।
स्वदन्ति । गावः । पयःऽभिः ॥ ५ ॥

यत् vदेववातं देवैः प्रार्थितं vशुभ्रं शोभनम् vअन्धः अन्नं vगावः पशवः vपयोभिः आशिरैः vस्वदन्ति स्वादयन्ति[1] सोऽयं सोमः vनृभिः नेतृभिर्ऋत्विग्भिः vसुतः अभिषुतः सन् vअप्सु वसतीवरीषु vधूतः शोधितो भवति ॥ ॥ २४ ॥

आदीमश्वं न हेतारोऽशूशुभन्नमृताय । मध्वो रसं सधमादे ॥ ६ ॥

आत् । ईम् । अश्वम् । न । हेतारः । अशूशुभन् । अमृताय । मध्वः । रसम् । सधऽमादे ॥ ६ ॥

vआत् अनन्तरं vहेतारः प्रेरका ऋत्विजः vसधमादे यज्ञे vईम् एनं vमध्वः मदकरस्य सोमस्य vरसम् vअमृताय अमरणाय vअश्वं vन अश्वमिव vअशूशुभन् शोभयन्ति ॥

यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये । ताभिः पवित्रमासदः ॥ ७ ॥

याः । ते । धाराः । मधुऽश्चुतः । असृग्रम् । इन्दो इति । ऊतये ।
ताभिः । पवित्रम् । आ । असदः ॥ ७ ॥

हे vइन्दो सोम vते तव vमधुश्चुतः मधुररसस्य श्रोतयित्र्यः vयाः vधाराः vऊतये रक्षणाय vअसृग्रं सृज्यन्ते vताभिः धाराभिस्त्वं vपवित्रम् vआसदः आसीद ॥

सो अर्षेन्द्राय पीतये तिरो रोमाण्यव्यया । सीदन् योना वनेष्वा ॥ ८ ॥

सः । अर्ष । इन्द्राय । पीतये । तिरः । रोमाणि । अव्यया । सीदन् । योना । वनेषु । आ ॥८॥

हे सोम vसः अभिषुतस्त्वम् vअव्यया अव्ययानि अविमयानि vरोमाणि वालानि vतिरः तिरस्कुर्वन् vवनेषु पात्रेषु vयोना योनौ स्थाने vआ vसीदन् vइन्द्राय इन्द्रस्य vपीतये पानाय vअर्ष क्षर ॥

त्वमिन्दो परि स्रव स्वादिष्ठो अङ्गिरोभ्यः । वरिवोविद्घृतं पयः ॥ ९ ॥

त्वम् । इन्दो इति । परि । स्रव । स्वादिष्ठः । अङ्गिरःऽभ्यः । वरिवः । वित् । घृतम् । पयः ॥९॥

हे vइन्दो सोम vस्वादिष्ठः स्वादुतमः vवरिवोवित् अस्मदभिलषितस्य धनस्य लम्भकश्च[2] vत्वम् vअङ्गिरोभ्यः अङ्गिरसामर्थाय vघृतम् आज्यं vपयः च vपरि vस्रव परिक्षर ॥

---

१. ग-त-भ१.२.४–स्वदयंति; भ७–' स्वादयंति ' नास्ति । २. ग–लंभक ।

अयं विचर्षणिर्हितः पवमानः स चेतति । हिन्वान आप्यं बृहत् ॥ १० ॥

अयम् । विऽचर्षणिः । हितः । पवमानः । सः । चेतति । हिन्वानः । आप्यम् । बृहत् ॥ १० ॥

vविचर्षणिः विद्रष्टा vहितः पात्रेषु निहितः vपवमानः vअयं सोमः vआप्यम् अप्सु भवं vबृहत् महदन्नं vहिन्वानः प्रेरयन् vचेतति सर्वैः ज्ञायते ॥ ॥ २५ ॥

एष वृषा वृषव्रतः पवमानो अशस्तिहा । करद्वसूनि दाशुषे ॥ ११ ॥

एषः । वृषा । वृषऽव्रतः । पवमानः । अशस्तिऽहा । करत् । वसूनि । दाशुषे ॥ ११ ॥

vवृषा कामानां सेक्ता vवृषव्रतः वृषकर्मा vअशस्तिहा राक्षसानां हन्ता vपवमानः vएषः सोमः vदाशुषे हविषां दात्रे यजमानाय vवसूनि धनानि vकरत् करोति । प्रयच्छतीत्यर्थः ॥

आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम् । पुरुश्चन्द्रं पुरुस्पृहम् ॥ १२ ॥

आ । पवस्व । सहस्रिणम् । रयिम् । गोऽमन्तम् । अश्विनम् । पुरुऽचन्द्रम् । पुरुऽस्पृहम् ॥ १२ ॥

हे सोम त्वं vसहस्रिणं बहुसंख्याकं vगोमन्तं गोभिरुपेतम् vअश्विनम् अश्ववन्तं vपुरुश्चन्द्रं बहूनां हर्षकं vपुरुस्पृहं बहुस्पृहणीयं vरयिं धनम् vआ vपवस्व परिक्षर ॥

एष स्य परि षिच्यते मर्मृज्यमान आयुभिः । उरुगायः कविक्रतुः ॥ १३ ॥

एषः । स्यः । परि । सिच्यते । मर्मृज्यमानः । आयुऽभिः । उरुऽगायः । कविऽक्रतुः ॥ १३ ॥

vउरुगायः बहुस्तुतिः vकविक्रतुः क्रान्तप्रज्ञः क्रान्तकर्मा वा vस्यः सः vएषः अयं सोमः vआयुभिः मनुष्यैः vमर्मृज्यमानः शोध्यमानः vपरि vपिच्यते ॥

सहस्रोतिः शतामघो विमानो रजसः कविः । इन्द्राय पवते मदः ॥ १४ ॥

सहस्रऽऊतिः । शतऽमघः । विऽमानः । रजसः । कविः । इन्द्राय । पवते । मदः ॥ १४ ॥

vसहस्रोतिः अपरिमितरक्षणः vशतमघः बहुधनः vरजसः लोकस्य vविमानः निर्माता vकविः क्रान्तकर्मा vमदः मदकरः सोमः vइन्द्राय इन्द्रार्थं vपवते धारया क्षरति ॥

गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते । वियोना वसताविव ॥ १५ ॥

गिरा । जातः । इह । स्तुतः । इन्दुः । इन्द्राय । धीयते । विः । योना । वसतौऽइव ॥ १५ ॥

vजातः प्रादुर्भूतः vगिरा स्तुत्या vस्तुतः च vइन्दुः सोमः vइह अस्मिन् यज्ञे vयोना योनौ स्वस्थाने vइन्द्राय इन्द्रार्थं vवसताविव vविः यथा स्ववासे पक्षी तथा vधीयते निधीयते ॥ ॥ २६ ॥

पवमानः सुतो नृभिः सोमो वाजमिवासरत् । चमूषु शक्मनासदम् ॥ १६ ॥

पवमानः । सुतः । नृऽभिः । सोमः । वाजम्ऽइव । असरत् । चमूषु । शक्मना । आऽसदम् ॥ १६ ॥

vनृभिः नेतृभिर्ऋत्विग्भिः vसुतः अभिषुतः vसोमः vचमूषु चमसेषु vशक्मना बलेन vआसदम् उपवेष्टुं vवाजमिव युद्धमिव[1] स्थानम् vअसरत् सरति ॥

तं त्रिपृष्ठे त्रिवन्धुरे रथे युञ्जन्ति यातवे । ऋषीणां सप्त धीतिभिः ॥ १७ ॥

तम् । त्रिऽपृष्ठे । त्रिऽवन्धुरे । रथे । युञ्जन्ति । यातवे । ऋषीणाम् । सप्त । धीतिऽभिः ॥ १७ ॥

---

१. भ–' युद्धमिव ' नास्ति ।

vत्रिपृष्ठे त्रिषवणपृष्ठे vत्रिवन्धुरे त्रिवेदवन्धुरे vऋषीणां vरये यज्ञरये vतं सोमं vसप्त सप्तभिः vधीतिभिः छन्दोभिः vयातवे देवान् प्रति गन्तुं vयुञ्जन्ति ऋत्विजो योजयन्ति ॥

तं सोतारो धनस्पृतमाशुं वाजाय यातवे । हरिं हिनोत वाजिनम् ॥ १८ ॥

तम् । सोतारः । धनऽस्पृतम् । आशुम् । वाजाय । यातवे । हरिम् । हिनोत । वाजिनम् ॥ १८ ॥

हे vसोतारः अभिषवकर्तारः ऋत्विजः vधनस्पृतं धनानां स्प्रष्टारं vवाजिनं बलिनम् vआशुं वेगवन्तं vतं सोमात्मकं vहरिम् अश्वं vवाजाय यज्ञाख्यं संग्रामं vयातवे गन्तुं vहिनोत प्रेरयत । यथा योद्धारो युद्धं गन्तुं बलिनं वेगवन्तमश्वं प्रेरयन्ति तद्वत् यज्ञमभिगन्तुं बलवन्तं सोमं प्रेरयतेति भावः ॥

आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥ १९ ॥

आऽविशन् । कलशम् । सुतः । विश्वाः । अर्षन् । अभि । श्रियः । शूरः । न । गोषु । तिष्ठति ॥ १९ ॥

vसुतः अभिषुतः सोमः vकलशं द्रोणम् vआविशन् vविश्वाः सर्वाः vश्रियः संपदः vअभि vअर्षन् अस्मानभिगमयन् vगोषु शत्रूणां पशुषु vशूरो vन यथा शूरो निःशङ्कः vतिष्ठति तद्वद्यज्ञेषु निःशङ्कस्तिष्ठति ॥

आ त इन्दो मदाय कं पयो दुहन्त्यायवः । देवा देवेभ्यो मधु ॥ २० ॥

आ । ते । इन्दो इति । मदाय । कम् । पयः । दुहन्ति । आयवः । देवाः । देवेभ्यः । मधु ॥ २० ॥

हे vइन्दो सोम vते तव vमधु मधुभूतं vपयः पेयं रसं vदेवाः स्तोतारः vआयवः मनुष्याः vमदाय vकं मदार्थं vदेवेभ्यः इन्द्रादिभ्यः vआ vदुहन्ति ॥ ॥ २७ ॥

आ नः सोमं पवित्र आ सृजता मधुमत्तमम् । देवेभ्यो देवश्रुत्तमम् ॥ २१ ॥

आ । नः । सोमम् । पवित्रे । आ । सृजत । मधुमत्ऽतमम् । देवेभ्यः । देवश्रुत्ऽतमम् ॥ २१ ॥

हे ऋत्विजः vनः अस्माकं vदेवश्रुतमम् अत्यन्तं देवैः श्रूयमाणं vमधुमत्तमम् अतिशयेन मधुमन्तं vसोमं vदेवेभ्यः इन्द्राद्यर्थं[1] vपवित्रे दशापवित्रे vआ vसृजत साधयत[2] ॥

एते सोमा असृक्षत गृणानाः श्रवसे महे । मदिन्तमस्य धारया ॥ २२ ॥

एते । सोमाः । असृक्षत । गृणानाः । श्रवसे । महे । मदिन्ऽतमस्य । धारया ॥ २२ ॥

vगृणानाः स्तूयमानाः vएते इमे vसोमाः vमहे महते vश्रवसे अन्नाय vमदिन्तमस्य मादयितृतमस्य रसस्य vधारया vअसृक्षत ऋत्विग्भिः सृज्यन्ते ॥

अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि । सनद्वाजः परि स्रव ॥ २३ ॥

अभि । गव्यानि । वीतये । नृम्णा । पुनानः । अर्षसि । सनत्ऽवाजः । परि । स्रव ॥ २३ ॥

हे सोम vपुनानः पूयमानो यस्त्वं vवीतये भक्षणाय vगव्यानि गोसंबन्धीनि vनृम्णा[3] नृम्णानि धनानि क्षीरादीनि vअभि vअर्षसि अभिगच्छसि स त्वं vसनद्वाजः दीयमानान्नः सन् vपरि vस्रव परिक्षर ॥

उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः । गृणानो जमदग्निना ॥ २४ ॥

उत । नः । गोऽमतीः । इषः । विश्वाः । अर्ष । परिऽस्तुभः । गृणानः । जमत्ऽअग्निना ॥ २४ ॥

---

१. ग-त३-भ–देवार्थं । २. त३-भ१.२.५.७–प्रक्षिप्ते; त७–प्रक्षिप्त साधयत; भ४–प्रक्षिप्त ।
३. त–' नृम्णा ' नास्ति ।

vउत अपि च हे सोम vजमदग्निना जमदग्निनाम्ना ऋषिणा मया vगृणानः स्तूयमानस्त्वं vनः अस्माकं vगोमतीः गोभिर्युक्तानि vपरिष्टुभः परितः स्तोतव्यानि vविश्वाः सर्वाणि vद्रुषः अन्नानि vअर्ष गच्छ। अस्मभ्यमेवंविधान्यन्नानि देहीत्यर्थः ॥

पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः। अभि विश्वानि काव्या॥२५॥

पवस्व। वाचः। अग्रियः। सोम। चित्राभिः। ऊतिऽभिः। अभि। विश्वानि। काव्या ॥२५॥

हे vसोम vअग्रियः मुख्यस्त्वं vचित्राभिः पूजनीयैः vऊतिभिः रक्षणैः सह vवाचः अस्मदीयाः स्तुतीः vअभि[1] vपवस्व। एतदेव दर्शयति। vविश्वानि सर्वाणि vकाव्या काव्यानि स्तुत्यात्मकानि वाक्यानि अभि पवस्वेति ॥ ॥ २८ ॥

त्वं समुद्रिया अपोऽग्रियो वाचं ईरयन्। पवस्व विश्वमेजय ॥ २६ ॥

त्वम्। समुद्रियाः। अपः। अग्रियः। वाचः। ईरयन्। पवस्व। विश्वम्ऽएजय ॥ २६ ॥

हे vविश्वमेजय विश्वकम्पक सोम vअग्रियः मुख्यः vत्वं vवाचः vईरयन् प्रेरयन् vसमुद्रियाः आन्तरिक्षाणि vअपः उदकानि vपवस्व धारया क्षर ॥

तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यमर्षन्ति सिन्धवः ॥ २७ ॥

तुभ्य। इमा। भुवना। कवे। महिम्ने। सोम। तस्थिरे। तुभ्यम्। अर्षन्ति। सिन्धवः ॥२७॥

हे vकवे क्रान्तकर्मन्[2] vसोम vतुभ्य तुभ्यं तव vमहिम्ने vइमा इमानि vभुवना भुवनानि vतस्थिरे तिष्ठन्ति। त्वामेव पुरस्कुर्वन्तीत्यर्थः। अपि च vसिन्धवः नद्यः vतुभ्यम् एव vअर्षन्ति गच्छन्ति। त्वदाज्ञामेवानुपालयन्तीत्यर्थः ॥

प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः। अभि शुक्रामुपस्तिरम् ॥ २८ ॥

प्र। ते। दिवः। न। वृष्टयः। धाराः। यन्ति। असश्चतः। अभि। शुक्राम्। उपऽस्तिरम् ॥२८॥

हे सोम vते तव vअसश्चतः असङ्गाः vधाराः vदिवः अन्तरिक्षात् vवृष्टयः vन वर्षाणीव vशुक्रां शुक्लवर्णां शुक्लवर्णैः अविलोमभिर्निर्मितम् vउपस्तिरम् उपस्तीर्यमाणं पवित्रम् vअभि प्रति vप्र[3] vयन्ति[3] ॥

इन्द्रायेन्दुं पुनीतनोग्रं दक्षाय साधनम्। ईशानं वीतिराधसम् ॥ २९ ॥

इन्द्राय। इन्दुम्। पुनीतन। उग्रम्। दक्षाय। साधनम्। ईशानम्। वीतिऽराधसम् ॥ २९ ॥

हे ऋत्विजः vउग्रम् उद्गूर्णं vदक्षाय बलस्य vसाधनं करणम् vईशानं धनानामीश्वरं vवीतिराधसं दत्तधनम् vइन्दुं सोमम् vइन्द्राय इन्द्रार्थं vपुनीतन पुनीत ॥

पवमान ऋतः कविः सोमः पवित्रमासदत्। दधत्स्तोत्रे सुवीर्यम् ॥ ३० ॥

पवमानः। ऋतः। कविः। सोमः। पवित्रम्। आ। असदत्। दधत्। स्तोत्रे। सुऽवीर्यम् ॥३०॥

vऋतः सत्यभूतः vकविः क्रान्तकर्मा vपवमानः vसोमः अस्मदीये vस्तोत्रे vसुवीर्यं शोभनवीर्यं vदधत् प्रयच्छन् vपवित्रमासदत् आसीदति ॥ ॥ २९ ॥

' आ पवस्व ' इति त्रिंशदृचं तृतीयं सूक्तं काश्यपस्य निध्रुवेरार्षं गायत्रं पवमानसोमदेवताकम्। तथा चानुक्रान्तम्—' आ पवस्व निध्रुविः काश्यपः ' इति। गतो विनियोगः ॥

---

१. ग-त३-भ-प्रति; त४-अति। २. ग-क्रांतप्रज्ञ। ३. ग-त३.६-यंति; भ१.७-प्रयच्छंति।

आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् । अस्मे श्रवांसि धारय ॥ १ ॥

आ । पवस्व । सहस्रिणम् । रयिम् । सोम । सुऽवीर्यम् । अस्मे इति । श्रवांसि । धारय ॥१॥

हे [v]सोम त्वं [v]सहस्रिणं बहुसंख्याकं [v]सुवीर्यं शोभनवीर्यं [v]रयिं धनम् [v]आ [v]पवस्व आभिमुख्येन क्षर । अपि च [v]अस्मे[1] अस्मासु [v]श्रवांसि अन्नानि [v]धारय स्थापय ॥

इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः । चमूष्वा नि षीदसि ॥ २ ॥

इषम् । ऊर्जम् । च । पिन्वसे । इन्द्राय । मत्सरिन्ऽतमः । चमूषु । आ । नि । सीदसि ॥२॥

हे सोम [v]मत्सरिन्तमः अतिशयेन मदयितृतमस्त्वम्[2] [v]इन्द्राय इन्द्रार्थम् [v]इषम् अन्नम् [v]ऊर्जं रसं [v]च [v]पिन्वसे क्षरसि । अपि च [v]चमूषु चमसेषु [v]आ [v]नि [v]षीदसि तिष्ठसि ॥

सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् । मधुमाँ अस्तु वायवे ॥ ३ ॥

सुतः । इन्द्राय । विष्णवे । सोमः । कलशे । अक्षरत् । मधुऽमान् । अस्तु । वायवे ॥ ३ ॥

[v]इन्द्राय इन्द्रार्थं [v]विष्णवे विष्ण्वर्थं च [v]वायवे वाय्वर्थं च [v]सुतः अभिषुतः यः [v]सोमः [v]कलशे द्रोणकलशे [v]अक्षरत् क्षरति सोऽयं सोमः [v]मधुमान् मधुररसवान् [v]अस्तु भवतु ॥

एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः । सोमा ऋतस्य धारया ॥ ४ ॥

एते । असृग्रम् । आशवः । अति । ह्वरांसि । बभ्रवः । सोमाः । ऋतस्य । धारया ॥ ४ ॥

[v]बभ्रवः बभ्रुवर्णाः [v]आशवः शीघ्राः [v]एते इमे [v]सोमाः [v]ऋतस्य उदकस्य [v]धारया [v]असृग्रं सृज्यन्ते । [v]ह्वरांसि रक्षांस्यभिगच्छन्ति च ॥

इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्यम् । अपघ्नन्तो अराव्णः ॥ ५ ॥

इन्द्रम् । वर्धन्तः । अप्ऽतुरः । कृण्वन्तः । विश्वम् । आर्यम् । अप ऽघ्नन्तः । अराव्णः ॥५॥

[v]इन्द्रं [v]वर्धन्तः वर्धयन्तः [v]अप्तुरः उदकस्य प्रेरकाः [v]विश्वं सोममस्मदीयकर्मार्थम् [v]आर्यं भद्रं [v]कृण्वन्तः कुर्वन्तः [v]अराव्णः अदातॄन् [v]अपघ्नन्तः विनाशयन्तः । अभ्यर्षन्तीत्युत्तरया[3] संबन्धः ॥ ॥ ३० ॥

सुता अनु स्वमा रजोऽभ्यर्षन्ति बभ्रवः । इन्द्रं गच्छन्त इन्दवः ॥ ६ ॥

सुताः । अनु । स्वम् । आ । रजः । अभि । अर्षन्ति । बभ्रवः । इन्द्रम् । गच्छन्तः । इन्दवः ॥६॥

[v]बभ्रवः बभ्रुवर्णाः [v]सुताः अभिषुताः [v]इन्दवः सोमाः [v]इन्द्रम् [v]आ [v]गच्छन्तः आभिमुख्येन प्राप्नुवन्तः [v]स्वं स्वकीयं [v]रजः स्थानम् [v]अनु प्रति [v]अभ्यर्षन्ति अभिगच्छन्ति ॥

अया पवस्व धारया यया सूर्यमरोचयः । हिन्वानो मानुषीरपः ॥ ७ ॥

अया । पवस्व । धारया । यया । सूर्यम् । अरोचयः । हिन्वानः । मानुषीः । अपः ॥ ७ ॥

हे सोम [v]मानुषीः मनुष्याणां हितानि [v]अपः उदकानि [v]हिन्वानः प्रेरयंस्त्वं [v]यया धारया [v]सूर्यमरोचयः प्राकाशयः[4] तया [v]अया अनया [v]धारया [v]पवस्व क्षर ॥

१. त–अस्माकं । २. ग-त७–मादयितृ° । ३. ग-त३-भ–उत्तरया । ४. ग-त३-भ१.२.७–अप्रकाशयः; त-भ४-मु–प्रकाशयः ।

अयुक्त सूर एतशं पवमानो मनावधि । अन्तरिक्षेण यातवे ॥ ८ ॥

अयुक्त । सूरः । एतशम् । पवमानः । मनौ । अधि । अन्तरिक्षेण । यातवे ॥ ८ ॥

vपवमानः पूयमानः सोमः vमनावधि । मनुर्मनुष्यः । तस्मिन् मनुष्य इत्यर्थः । vअन्तरिक्षेण vयातवे गन्तुं vसूरः सूर्यस्य vएतशम् अश्वम् । 'एतग्वः एतशः' इत्यश्वनामसु पाठात् । vअयुक्त युङ्क्ते ॥

उत त्या हरितो दश सूरो अयुक्त यातवे । इन्दुरिन्द्र इति ब्रुवन् ॥ ९ ॥

उत । त्याः । हरितः । दश । सूरः । अयुक्त । यातवे । इन्दुः । इन्द्रः । इति । ब्रुवन् ॥ ९ ॥

vउत अपि च vइन्दुः सोमः vइन्द्र vइति vब्रुवन् vत्याः ताः vदश दशसंख्याकाः vहरितः दिशः प्रति vयातवे गन्तुं vसूरः सूर्यस्यैतशम् vअयुक्त युनक्ति ॥

परीतो वायवे सुतं गिर इन्द्राय मत्सरम् । अव्यो वारेषु सिञ्चत ॥ १० ॥

परि । इतः । वायवे । सुतम् । गिरः । इन्द्राय । मत्सरम् । अव्यः । वारेषु । सिञ्चत ॥ १० ॥

हे vगिरः स्तोतारः यूयं vवायवे वाय्वर्थम् vइन्द्राय इन्द्रार्थं च vसुतम् अभिषुतं vमत्सरं मदकरं सोमम् vइतः अभिषवदेशादुद्धृत्य vअव्यः अवेः vवारेषु वालेषु vपरि vसिञ्चत ॥ ॥ ३१ ॥

पवमान विदा रयिमस्मभ्यं सोम दुष्टरम् । यो दूणाशो वनुष्यता ॥ ११ ॥

पवमान । विदाः । रयिम् । अस्मभ्यम् । सोम । दुस्तरम् । यः । दुःऽनशः । वनुष्यता ॥ ११ ॥

हे vपवमान vसोम vयः रयिः vवनुष्यता हिंसकेन शत्रुणा vदूणाशः नाशयितुमशक्यः तं शत्रुभिः vदुष्टरं vरयिं धनम् vअस्मभ्यं vविदाः देहि ॥

अभ्यर्ष सहस्रिणं रयिं गोमन्तमश्विनम् । अभि वाजमुत श्रवः ॥ १२ ॥

अभि । अर्ष । सहस्रिणम् । रयिम् । गोऽमन्तम् । अश्विनम् । अभि । वाजम् । उत । श्रवः ॥ १२ ॥

हे सोम त्वं vसहस्रिणं बहुसंख्याकं vगोमन्तं गोभिर्युक्तम् vअश्विनम् अश्ववन्तं vरयिं धनम् vअभ्यर्ष अस्मानभिगमय । vउत अपि च vवाजं बलं vश्रवः अन्नं चास्मान् vअभि गमय ॥

सोमो देवो न सूर्योऽद्रिभिः पवते सुतः । दधानः कलशे रसम् ॥ १३ ॥

सोमः । देवः । न । सूर्यः । अद्रिऽभिः । पवते । सुतः । दधानः । कलशे । रसम् ॥ १३ ॥

vदेवो vन देव इव vसूर्यः रोचमानः vसोमः vअद्रिभिः ग्रावभिः vसुतः अभिषुतः सन् vकलशे द्रोणकलशे vरसं vदधानः धारयन् vपवते धारया क्षरति ॥

एते धामान्यार्या शुक्रा ऋतस्य धारया । वाजं गोमन्तमक्षरन् ॥ १४ ॥

एते । धामानि । आर्या । शुक्राः । ऋतस्य । धारया । वाजम् । गोऽमन्तम् । अक्षरन् ॥ १४ ॥

vएते अभिषुताः इमे vशुक्राः दीप्ताः सोमाः vआर्या आर्याणां श्रेष्ठानां यजमानानां vधामानि गृहान् प्रति vगोमन्तं गोभिर्युक्तं vवाजम् अन्नम् vऋतस्य उदकस्य vधारया vअक्षरन् क्षरन्ति ॥

सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः । पवित्रमत्यक्षरन् ॥ १५ ॥

सुताः । इन्द्राय । वज्रिणे । सोमासः । दधिऽआशिरः । पवित्रम् । अति । अक्षरन् ॥ १५ ॥

[v]वज्रिणे वज्रवते [v]इन्द्राय इन्द्रार्थं [v]सुताः अभिषुताः [v]दध्याशिरः । दधि आशीराभयणद्रव्यं येषां ते दध्याशिरः । दधिसंस्कृताः [v]सोमासः सोमाः [v]पवित्रमति अतिक्रम्य [v]अक्षरन् धारया क्षरन्ति ॥ ॥ ३२ ॥

प्र सोम मधुमत्तमो राये अर्ष पवित्र आ । मदो यो देववीतमः ॥ १६ ॥

प्र । सोम । मधुमत्ऽतमः । राये । अर्ष । पवित्रे । आ । मदः । यः । देवऽवीतमः ॥ १६ ॥

हे [v]सोम ते तव [v]यः [v]मदः रसः [v]मधुमत्तमः अत्यन्तं मधुमान् [v]देववीतमः अतिशयेन देवकामश्च तं रसं [v]राये अस्माकं धनार्थं [v]पवित्रे [v]प्र [v]आ [v]अर्ष धारया क्षर ॥

तमीं मृजन्त्यायवो हरिं नदीषु वाजिनम् । इन्दुमिन्द्राय मत्सरम् ॥ १७ ॥

तम् । ईमिति । मृजन्ति । आयवः । हरिम् । नदीषु । वाजिनम् । इन्दुम् । इन्द्राय । मत्सरम् ॥ १७ ॥

[v]हरिं हरितवर्णं [v]वाजिनं बलिनं [v]मत्सरं मदकरं [v]तं पवमानम् [v]ईम् एनम् [v]इन्दुं सोमम् [v]आयवः मनुष्या ऋत्विजः [v]नदीषु वसतीवरीषु [v]मृजन्ति मार्जयन्ति[1] ॥

आ पवस्व हिरण्यवदश्वावत्सोम वीरवत् । वाजं गोमन्तमा भर ॥ १८ ॥

आ । पवस्व । हिरण्यऽवत् । अश्वऽवत् । सोम । वीरऽवत् । वाजम् । गोऽमन्तम् । आ । भर ॥ १८ ॥

हे [v]सोम त्वं [v]हिरण्यवत् सुवर्णोपेतम् [v]अश्ववत् अश्वयुक्तं च [v]वीरवत् पुत्रादियुपेतं च धनम् [v]आ [v]पवस्व अस्मान् प्रति क्षर । अपि च [v]गोमन्तं पशुभिरुपेतं [v]वाजम् अन्नम् [v]आ [v]भर अस्मभ्यमाहर ॥

परि वाजे न वाजयुमव्यो वारेषु सिञ्चत । इन्द्राय मधुमत्तमम् ॥ १९ ॥

परि । वाजे । न । वाजऽयुम् । अव्यः । वारेषु । सिञ्चत । इन्द्राय । मधुमत्ऽतमम् ॥ १९ ॥

[v]वाजयुं युद्धकामं [v]मधुमत्तमम् अतिशयेन मधुमन्तं सोमम् [v]इन्द्राय इन्द्रार्थं [v]अव्यः अवेः [v]वारेषु वालेषु दशापवित्रे [v]वाजे [v]न युद्ध इव हे ऋत्विजः [v]परि [v]षिञ्चत ॥

कविं मृजन्ति मर्ज्यं धीभिर्विप्रा अवस्यवः । वृषा कनिक्रदर्षति ॥ २० ॥

कविम् । मृजन्ति । मर्ज्यम् । धीभिः । विप्राः । अवस्यवः । वृषा । कनिक्रत् । अर्षति ॥ २० ॥

[v]अवस्यवः रक्षणकामाः [v]विप्राः मेधाविन ऋत्विजः [v]धीभिः अङ्गुलीभिः [v]मर्ज्यं मर्जनीयं [v]कविं क्रान्तकर्माणं यं सोमं [v]मृजन्ति मार्जयन्ति[2] सोऽयं [v]वृषा सेचकः सोमः [v]कनिक्रत् शब्दं कुर्वन् [v]अर्षति धारया क्षरति ॥ ॥ ३३ ॥

वृषणं धीभिरप्तुरं सोममृतस्य धारया । मती विप्राः समस्वरन् ॥ २१ ॥

वृषणम् । धीभिः । अप्ऽतुरम् । सोमम् । ऋतस्य । धारया । मती । विप्राः । सम् । अस्वरन् ॥ २१ ॥

[v]विप्राः मेधाविन ऋत्विजः [v]वृषणं कामानां वर्षकम् [v]अप्तुरम् अपां प्रेरकं [v]सोमं [v]धीभिः अङ्गुलीभिः [v]मती मत्या स्तुत्या च [v]ऋतस्य उदकस्य [v]धारया [v]समस्वरन् प्रेरयन्ति ॥

पवस्व देवायुषगिन्द्रं गच्छतु ते मदः । वायुमा रोह धर्मणा ॥ २२ ॥

पवस्व । देव । आयुषक् । इन्द्रम् । गच्छतु । ते । मदः । वायुम् । आ । रोह । धर्मणा ॥ २२ ॥

---

१. ग–शोधयंति; त२.३.४.६.७-भ–मर्जयंति । २. त-भ-मु–मर्जयंति ।

हे [v]देव द्योतमान सोम [v]पवस्व धारया क्षर। अपि च [v]ते तव [v]मदः मदकरो रसः [v]आयुषक् अनुषक्तम् [v]इन्द्रं प्रति [v]गच्छतु। अपि च त्वं [v]वायुं [v]धर्मणा धारकेण रसेन [v]आ [v]रोह प्राप्नुहि ॥

पवमान नि तोशसे रयिं सोम श्रवाय्यम्। प्रियः समुद्रमा विश ॥ २३ ॥

पवमान। नि। तोशसे। रयिम्। सोम। श्रवाय्यम्। प्रियः। समुद्रम्। आ। विश ॥ २३ ॥

हे [v]पवमान [v]सोम यस्त्वं [v]श्रवाय्यं श्रवणीयं [v]रयिं शत्रूणां धनं [v]नि [v]तोशसे नितरां पीडयसि स त्वं [v]प्रियः सन् [v]समुद्रं द्रोणकलशम् [v]आ [v]विश प्रविश ॥

अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम् ॥ २४ ॥

अपऽघ्नन्। पवसे। मृधः। क्रतुऽवित्। सोम। मत्सरः। नुदस्व। अदेवऽयुम्। जनम् ॥२४॥

हे [v]सोम [v]मत्सरः मदकरो यस्त्वं [v]मृधः हिंसकान् शत्रून् [v]अपघ्नन् मारयन् [v]क्रतुवित् अस्मभ्यं प्रज्ञां प्रयच्छन् [v]पवसे क्षरसि स त्वम् [v]अदेवयुम् अदेवकामं [v]जनं राक्षसवर्गं [v]नुदस्व प्रेरय ॥

पवमाना असृक्षत सोमाः शुक्रास इन्दवः। अभि विश्वानि काव्या ॥ २५ ॥

पवमानाः। असृक्षत। सोमाः। शुक्रासः। इन्दवः। अभि। विश्वानि। काव्या ॥ २५ ॥

[v]शुक्रासः उज्ज्वलाः [v]इन्दवः दीप्ताः [v]पवमानाः क्षरन्तः [v]सोमाः [v]विश्वानि [v]काव्या काव्यानि स्तोत्राणि [v]अभि [v]असृक्षत सृज्यन्त ऋत्विग्भिः[1] ॥ ॥ ३४ ॥

पवमानास आशवः शुभ्रा असृग्रमिन्दवः। घ्नन्तो विश्वा अप द्विषः ॥ २६ ॥

पवमानासः। आशवः। शुभ्राः। असृग्रम्। इन्दवः। घ्नन्तः। विश्वाः। अप। द्विषः ॥ २६ ॥

[v]आशवः शीघ्राः [v]शुभ्राः शोभमानाः [v]पवमानासः क्षरन्तः [v]इन्दवः दीप्ताः सोमाः [v]विश्वाः सर्वान् [v]द्विषः द्वेष्टॄन् शत्रून् [v]अप [v]घ्नन्तः मारयन्तः [v]असृग्रं सृज्यन्ते ॥

पवमाना दिवस्पर्यन्तरिक्षादसृक्षत। पृथिव्या अधि सानवि ॥ २७ ॥

पवमानाः। दिवः। परि। अन्तरिक्षात्। असृक्षत। पृथिव्याः। अधि। सानवि ॥ २७ ॥

[v]पवमानाः सोमाः [v]दिवः द्युलोकात् [v]अन्तरिक्षात् च [v]पृथिव्याः भूम्याः [v]अधि [v]सानवि समुच्छ्रिते देशे देवयजने [v]परि [v]असृक्षत सृज्यन्ते ॥

पुनानः सोम धारयेन्दो विश्वा अप स्रिधः। जहि रक्षांसि सुक्रतो ॥ २८ ॥

पुनानः। सोम। धारया। इन्दो इति। विश्वाः। अप। स्रिधः। जहि। रक्षांसि। सुक्रतो इति सुऽक्रतो ॥ २८ ॥

हे [v]इन्दो दीप्त [v]सुक्रतो सुकर्मन् [v]सोम [v]धारया [v]पुनानः पूयमानस्त्वं [v]विश्वाः सर्वान् [v]स्रिधः द्वेष्टॄन् शत्रून् [v]रक्षांसि राक्षसांश्च [v]अप [v]जहि मारय ॥

अपघ्नन्सोम रक्षसोऽभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम् ॥ २९ ॥

अपऽघ्नन्। सोम। रक्षसः। अभि। अर्ष। कनिक्रदत्। द्युऽमन्तम्। शुष्मम्। उत्ऽतमम् ॥२९॥

हे [v]सोम त्वं [v]रक्षसः रक्षांसि [v]अपघ्नन् विनाशयन् [v]कनिक्रदत् शब्दं कुर्वन् [v]द्युमन्तं दीप्तिमन्तम् [v]उत्तमं श्रेष्ठं [v]शुष्मं बलम् [v]अभ्यर्ष अस्मान् प्रति पवस्व ॥

---

१. ग-त३-भ-'ऋत्विग्भिः' नास्ति।

अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा । इन्दो विश्वानि वार्या ॥ ३० ॥

अस्मे इति । वसूनि । धारय । सोम । दिव्यानि । पार्थिवा । इन्दो इति । विश्वानि । वार्या ॥३०॥

हे ᵛइन्दो दीप्त ᵛसोम ᵛदिव्यानि दिवि भवानि ᵛपार्थिवा पार्थिवानि पृथिव्यां जातानि च ᵛविश्वानि[1] सर्वाणि ᵛवार्या[2] वार्याणि वरणीयानि ᵛवसूनि ᵛअस्मे अस्मासु ᵛधारय प्रक्षिप ॥ ॥३५॥

' वृषा सोम ' इति त्रिंशदृचं चतुर्थं सूक्तं मारीचस्य कश्यपस्यार्षं गायत्रं पवमानसौम्यम् । तथा चानुक्रान्तं—' वृषा सोम कश्यपः ' इति । उक्तो विनियोगः ॥

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥ १ ॥

वृषा । सोम । द्युऽमान् । असि । वृषा । देव । वृषऽव्रतः । वृषा । धर्माणि । दधिषे ॥ १ ॥

हे ᵛसोम ᵛवृषा वर्षकस्त्वं ᵛद्युमान् दीप्तिमान् ᵛअसि । अपि च हे ᵛदेव द्योतमान सोम ᵛवृषा त्वं ᵛवृषव्रतः वर्षणशीलकर्मासि । किंच हे सोम ᵛवृषा त्वं ᵛधर्माणि देवानां मनुष्याणां च हितानि कर्माणि ᵛदधिषे धारयसि ॥

वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः । सत्यं वृषन्वृषेदसि ॥ २ ॥

वृष्णः । ते । वृष्ण्यम् । शवः । वृषा । वनम् । वृषा । मदः ।
सत्यम् । वृषन् । वृषा । इत् । असि ॥ २ ॥

हे ᵛवृषन् कामानां वर्षक सोम ᵛवृष्णः वर्षितुः ᵛते तव ᵛशवः बलं ᵛवृष्ण्यं वर्षणशीलं भवति । ᵛवनं तव[3] भजनमपि[3] ᵛवृषा वर्षणशीलम् । ᵛमदः तव रसोऽपि ᵛवृषा वर्षणशीलः । ᵛसत्यं सत्यमेव त्वं ᵛवृषेत् वर्षणशील एव ᵛअसि भवसि ॥

अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः । वि नो राये दुरो वृधि ॥ ३ ॥

अश्वः । न । चक्रदः । वृषा । सम् । गाः । इन्दो इति । सम् । अर्वतः ।
वि । नः । राये । दुरः । वृधि ॥ ३ ॥

हे ᵛइन्दो सोम ᵛवृषा त्वम् ᵛअश्वो ᵛन अश्व इव ᵛसं ᵛचक्रदः संक्रन्दसे । अपि च ᵛगाः पशून् ᵛअर्वतः अश्वांश्चास्मभ्यं ᵛसं प्रयच्छसीति शेषः । किंच ᵛनः अस्माकं ᵛराये धनाय ᵛदुरः द्वाराणि ᵛवि ᵛवृधि विवृतानि[4] कुरु ॥

असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ॥ ४ ॥

असृक्षत । प्र । वाजिनः । गव्या । सोमासः । अश्वऽया । शुक्रासः । वीरऽया । आशवः ॥४॥

ᵛवाजिनः बलवन्तः ᵛशुक्रासः शुक्रा उज्ज्वलाः ᵛआशवः वेगवन्तश्च ᵛसोमासः सोमाः ᵛगव्या गवेच्छया ᵛअश्वया अश्वेच्छया च ᵛवीरया पुत्रेच्छया च ᵛप्र ᵛअसृक्षत ऋत्विग्भिः[4] सृज्यन्ते[4] ॥

शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः । पवन्ते वारे अव्यये ॥ ५ ॥

शुम्भमानाः । ऋतयुऽभिः । मृज्यमानाः । गभस्त्योः । पवन्ते । वारे । अव्यये ॥ ५ ॥

---

१. ग-भ-' विश्वानि...वार्या ' नास्ति । २. ग-ते संभजनमपि; त४-तव जनमपि; त५-तव मा भजनमपि । ३. ग-वृद्धानि । ४. ग-भ१.७-असृज्यत; त-ऋत्विग्भिः सृज्यंत सृज्यंते; त३-भ२.४-असृज्यते ।

ऋतायुभिः यज्ञकामैः शुम्भमानाः अलंक्रियमाणाः गभस्त्योः गभस्तिभ्यां बाहुभ्याम्। 'गभस्ती बाहू' इति बाहुनामसु पाठात्। मृज्यमानाः शोध्यमानाः सोमाः अभ्यये अधिमये वारे वारके पवित्रे पवन्ते क्षरन्ति ॥ ॥ ३६ ॥

ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या ॥ ६ ॥

ते। विश्वा। दाशुषे। वसु। सोमाः। दिव्यानि। पार्थिवा। पवन्ताम्। आ। अन्तरिक्ष्या ॥ ६ ॥

ते सोमाः दिव्यानि दिवि भवानि पार्थिवा पार्थिवानि पृथिव्यां संभूतानि च अन्तरिक्ष्या अन्तरिक्ष्याणि अन्तरिक्षे जातानि च विश्वा विश्वानि वसु वसूनि धनानि दाशुषे हविषां प्रदात्रे यजमानाय आ पवन्तां क्षरन्तु[1] ॥

पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः ॥ ७ ॥

पवमानस्य। विश्वऽवित्। प्र। ते। सर्गाः। असृक्षत। सूर्यस्यऽइव। न। रश्मयः ॥ ७ ॥

हे विश्ववित् विश्वस्य द्रष्टः सोम पवमानस्य क्षरतः ते तव सर्गाः सृज्यमाना धाराः सूर्यस्येव रश्मयः सूर्यस्य किरणा इव प्रकाशमानाः। न इति[2] संप्रत्यर्थे। इदानीं प्र असृक्षत प्रसृज्यन्ते ॥

केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि। समुद्रः सोम पिन्वसे ॥ ८ ॥

केतुम्। कृण्वन्। दिवः। परि। विश्वा। रूपा। अभि। अर्षसि। समुद्रः। सोम। पिन्वसे ॥ ८ ॥

हे सोम समुद्रः। समुद्रवन्ति यस्माद्रसाः स समुद्रः। स त्वं केतुं प्रज्ञानं कृण्वन् कुर्वन् अस्माकं विश्वा विश्वानि रूपा रूपाणि दिवः अन्तरिक्षात् अभ्यर्षसि अभिप्रवसे। पिन्वसे नानाविधानि धनानि चास्मभ्यं प्रयच्छसि ॥

हिन्वानो वाचमिष्यसि पवमान विधर्मणि। अक्रान्देवो न सूर्यः ॥ ९ ॥

हिन्वानः। वाचम्। इष्यसि। पवमान। विऽधर्मणि। अक्रान्। देवः। न। सूर्यः ॥ ९ ॥

हे पवमान सोम हिन्वानः प्रेर्यमाणस्त्वं वाचं शब्दम् इष्यसि प्रेरयसि। कदेत्याह। यदा तव रसः सूर्यः देवो न देव इव विधर्मणि विधारके पवित्रे अक्रान् अक्रमीत् तदेत्यर्थः ॥

इन्दुः पविष्ट चेतनः प्रियः कवीनां मती। सृजदश्वं रथीरिव ॥ १० ॥

इन्दुः। पविष्ट। चेतनः। प्रियः। कवीनाम्। मती। सृजत्। अश्वम्। रथीःऽइव ॥ १० ॥

चेतनः प्रज्ञापकः प्रियः देवानां प्रीतिकरः इन्दुः सोमः कवीनां क्रान्तकर्मणां स्तोतॄणां मती मत्या स्तुत्या पविष्ट पवते। अश्वं इयं रथीरिव रथीव ऊर्मिं सृजत् सृजति च ॥ ॥ ३७ ॥

ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत्। सीदन्नृतस्य योनिमा ॥ ११ ॥

ऊर्मिः। यः। ते। पवित्रे। आ। देवऽअवीः। परिऽअक्षरत्।
सीदन्। ऋतस्य। योनिम्। आ ॥ ११ ॥

हे सोम ते तव यः देवावीः देवकामः ऊर्मिः तरङ्गः ऋतस्य यज्ञस्य योनिं स्थानम् आ सीदन् पवित्रे पर्यक्षरत् परिक्षरति तमूर्मिं सृजतीति पूर्वत्र संबन्धः ॥

---

१. ग–स्रवतु। २. ग-त३-म१.७–'इति संप्रत्यर्थे' नास्ति।

स नो अर्ष पवित्र आ मदो यो देववीतमः । इन्दविन्द्राय पीतये ॥ १२ ॥

सः । नः । अर्ष । पवित्रे । आ । मदः । यः । देवऽवीतमः ।
इन्दो इति । इन्द्राय । पीतये ॥ १२ ॥

हे [v]इन्दो [v]यः त्वं [v]देववीतमः अतिशयेन देवकामः [v]मदः मदकरश्च भवसि [v]सः त्वं [v]नः अस्माकं [v]पवित्रे [v]इन्द्राय इन्द्रस्य [v]पीतये पानाय [v]आ [v]अर्ष आपवस्व ॥

इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ॥ १३ ॥

इषे । पवस्व । धारया । मृज्यमानः । मनीषिऽभिः । इन्दो इति । रुचा । अभि । गाः । इहि ॥ १३ ॥

हे [v]इन्दो सोम [v]मनीषिभिः ऋत्विग्भिः [v]मृज्यमानः शोध्यमानस्त्वम् [v]इषे अस्माकमन्नाय [v]धारया [v]पवस्व क्षर । [v]रुचा रोचमानेनान्धसा [v]गाः पशून् [v]अभि [v]इहि अभिगच्छ ॥

पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः । हरे सृजान आशिरम् ॥ १४ ॥

पुनानः । वरिवः । कृधि । ऊर्जम् । जनाय । गिर्वणः । हरे । सृजानः । आऽशिरम् ॥ १४ ॥

हे [v]गिर्वणः गीर्भिर्वननीय [v]हरे हरितवर्ण सोम [v]आशिरं क्षीरं[1] प्रति [v]सृजानः विसृज्यमानः [v]पुनानः पूयमानस्त्वं [v]जनाय यजमानार्थं[2] [v]वरिवः धनम् [v]ऊर्जम् अन्नं च [v]कृधि कुरु ॥

पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् । द्युतानो वाजिभिर्यतः ॥ १५ ॥

पुनानः । देवऽवीतये । इन्द्रस्य । याहि । निःऽकृतम् । द्युतानः । वाजिऽभिः । यतः ॥ १५ ॥

हे सोम [v]द्युतानः दीप्यमानः [v]वाजिभिः बलिभिर्यजमानैः [v]यतः संगृहीतः [v]देववीतये यज्ञार्थं [v]पुनानः पूयमानस्त्वम् [v]इन्द्रस्य [v]निष्कृतं स्थानं [v]याहि गच्छ ॥ ॥ ३८ ॥

प्र हिन्वानास इन्दवोऽच्छा समुद्रमाशवः । धिया जूता असृक्षत ॥ १६ ॥

प्र । हिन्वानासः । इन्दवः । अच्छ । समुद्रम् । आशवः । धिया । जूताः । असृक्षत ॥ १६ ॥

[v]आशवः वेगवन्तः [v]इन्दवः सोमाः [v]समुद्रम् अन्तरिक्षम् [v]अच्छ प्रति [v]हिन्वानासः हिन्वानाः प्रेर्यमाणाः [v]धिया अङ्गुल्या [v]जूताः कृष्टाश्च [v]प्र [v]असृक्षत सृज्यन्ते[3] ॥

मर्मृजानास आयवो वृथा समुद्रमिन्दवः । अग्मन्नृतस्य योनिमा ॥ १७ ॥

मर्मृजानासः । आयवः । वृथा । समुद्रम् । इन्दवः । अग्मन् । ऋतस्य । योनिम् । आ ॥ १७ ॥

[v]मर्मृजानासः मर्मृज्यमानाः [v]आयवः गन्तारः [v]इन्दवः सोमाः [v]वृथा आयासं विनैव [v]समुद्रम् अन्तरिक्षं गच्छन्ति । एतदेव दर्शयति । [v]ऋतस्य उदकस्य [v]योनिं स्थानम् [v]अग्मन्[4] गच्छन्तीति ॥

परि णो याह्यस्मयुर्विश्वा वसून्योजसा । पाहि नः शर्म वीरवत् ॥ १८ ॥

परि । नः । याहि । अस्मऽयुः । विश्वा । वसूनि । ओजसा । पाहि । नः । शर्म । वीरऽवत् ॥ १८ ॥

हे सोम [v]अस्मयुः अस्मत्कामस्त्वं [v]नः अस्माकं [v]विश्वा विश्वानि [v]वसूनि धनानि [v]ओजसा बलेन सह [v]परि [v]याहि रक्षार्थं परिगच्छ । अपि च [v]नः अस्माकं [v]वीरवत् पुत्रवत् [v]शर्म गृहं [v]पाहि रक्ष ॥

१. ग-त३.६.म१.२.७–' क्षीरं ' नास्ति । २. ग-त-म१.२.४.५–जनार्थं । ३. ग–प्रसृज्यंते; त७-म२–सृज्यते । ४. त१.२.३.४.५.६-म१.२.७–आगमन्; म४–आगमन् ।

मिमाति वह्निरेतशः पदं युजान ऋक्वभिः । प्र यत्समुद्र आहितः ॥ १९ ॥

मिमाति । वह्निः । एतशः । पदम् । युजानः । ऋक्वऽभिः । प्र । यत् । समुद्रे । आऽहितः ॥१९॥

हे सोम [v]यत्[१] यदा यः[१] [v]वह्निः वहनशीलः [v]एतशः अश्वः [v]मिमाति शब्दं करोति [v]ऋक्वभिः[२] ऋत्विग्भिः स्तोतृभिः [v]पदं[२] यज्ञे [v]युजानः[२] निदधत् स्तोत्रश्रवणार्थमागच्छति च तदा स यज्ञवाहकाश्वात्मा त्वं [v]समुद्रे उदके वसतीवरीषु [v]प्र [v]आहितः भवसि[४] ॥

आ यद्योनिं हिरण्ययमाशुर्ऋतस्य सीदति । जहात्यप्रचेतसः ॥ २० ॥

आ । यत् । योनिम् । हिरण्ययम् । आशुः । ऋतस्य । सीदति । जहाति । अप्रऽचेतसः ॥२०॥

[v]यत् यदा [v]आशुः वेगवान् सोमः [v]ऋतस्य यज्ञस्य [v]हिरण्ययं हिरण्मयं [v]योनिं स्थानम् । ' हिरण्यपाणिरभिषुणोति ' इत्युक्तम् । [v]आ [v]सीदति तदानीम् [v]अप्रचेतसः [v]जहाति विसृजति । अस्तोतृणां यज्ञं नाभिगच्छति किंतु स्तोतृणामेव यज्ञमभिगच्छतीत्यर्थः ॥ ॥ ३९ ॥

अभि वेना अनूषतेयक्षन्ति प्रचेतसः । मज्जन्त्यविचेतसः ॥ २१ ॥

अभि । वेनाः । अनूषत । इयक्षन्ति । प्रऽचेतसः । मज्जन्ति । अविऽचेतसः ॥ २१ ॥

[v]वेनाः कान्ताः स्तोतारः [v]अभि [v]अनूषत सोममभिष्टुवन्ति । [v]प्रचेतसः सुमतयः [v]इयक्षन्ति यष्टुमिच्छन्ति च । [v]अविचेतसः । विशिष्टमतयो विचेतसः । अविचेतसो विपरीतमतय इत्यर्थः । [v]मज्जन्ति निमज्जन्ति । ये सोमं नाभिष्टुवन्ति न यजन्ति च ते नरके पतन्तीत्यर्थः ॥

इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः । ऋतस्य योनिमासदम् ॥ २२ ॥

इन्द्राय । इन्दो इति । मरुत्वते । पवस्व । मधुमत्ऽतमः । ऋतस्य । योनिम् । आऽसदम् ॥ २२ ॥

हे [v]इन्दो सोम [v]मधुमत्तमः अतिशयेन मधुमांस्त्वम् [v]ऋतस्य यज्ञस्य [v]योनिं स्थानम् [v]आसदम् उपवेष्टुं [v]मरुत्वते [v]इन्द्राय इन्द्रार्थं [v]पवस्व क्षर ॥

तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति वेधसः । सं त्वा मृजन्त्यायवः ॥ २३ ॥

तम् । त्वा । विप्राः । वचःऽविदः । परि । कृण्वन्ति । वेधसः । सम् । त्वा । मृजन्ति । आयवः ॥२३॥

हे सोम [v]तं पवमानं [v]त्वा त्वां [v]विप्राः प्राज्ञाः [v]वेधसः कर्मणां कर्तारः[५] [v]वचोविदः स्तोतारः [v]परिष्कृण्वन्ति अलंकुर्वन्ति । अपि च [v]त्वा त्वाम् [v]आयवः मनुष्याः [v]सं [v]मृजन्ति सम्यक् शोधयन्ति ॥

रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे । पवमानस्य मरुतः ॥ २४ ॥

रसम् । ते । मित्रः । अर्यमा । पिबन्ति । वरुणः । कवे । पवमानस्य । मरुतः ॥ २४ ॥

हे [v]कवे क्रान्तकर्मन् सोम [v]पवमानस्य क्षरतः [v]ते तव [v]रसं [v]मित्रः [v]अर्यमा च [v]वरुणः च [v]मरुतः च एते सर्वे देवाः [v]पिबन्ति ॥

त्वं सोम विपश्चितं पुनानो वाचमिष्यसि । इन्दो सहस्रभर्णसम् ॥ २५ ॥

त्वम् । सोम । विपःऽचितम् । पुनानः । वाचम् । इष्यसि । इन्दो इति । सहस्रऽभर्णसम् ॥२५॥

---

१. ग–यस्त्वदीयो । २. ग–यदा ऋक्वभिः । ३. त१.२.६.७-मु–पदं युजानो यज्ञे युजानो; त५–पदं यज्ञे युजानौ युजानो; म४–पदं यज्ञे युजानो । ४. त३-म१.७–भवति । ५. ग–धावितरो (? विधातारो) ।

हे Vइन्दो दीप्त Vसोम Vपुनानः पूयमानः Vत्वं Vविपश्चितं प्रज्ञया पवित्रां Vसहस्रभर्णसं बहुभरणां Vवाचम् Vइष्यसि प्रेरयसि ॥ ॥ ४० ॥

उतो सहस्रभर्णसं वाचं सोम मखस्युवम् । पुनान इन्दवा भर ॥ २६ ॥

उतो इति । सहस्रऽभर्णसम् । वाचम् । सोम । मखस्युवम् ।
पुनानः । इन्दो इति । आ । भर ॥ २६ ॥

Vउतो अपि च हे Vइन्दो दीप्त Vसोम Vपुनानः पूयमानस्त्वं Vसहस्रभर्णसं सहस्रभरणां Vमखस्युवं धनकामां Vवाचम् अस्मभ्यम् Vआ Vभर आहर ॥

पुनान इन्दवेषां पुरुहूत जनानाम् । प्रियः समुद्रमा विश ॥ २७ ॥

पुनानः । इन्दो इति । एषाम् । पुरुऽहूत । जनानाम् । प्रियः । समुद्रम् । आ । विश ॥ २७ ॥

हे Vपुरुहूत बहुभिराहूत Vइन्दो सोम Vपुनानः पूयमानस्त्वम् Vएषाम् अस्मिन् यागे स्तोत्रं कुर्वतां Vजनानां Vप्रियः सन् Vसमुद्रं द्रोणकलशम् Vआ Vविश प्रविश ॥

दविद्युतत्या रुचा परिष्टोभन्त्या कृपा । सोमाः शुक्रा गवाशिरः ॥ २८ ॥

दविद्युतत्या । रुचा । परिऽस्तोभन्त्या । कृपा । सोमाः । शुक्राः । गोऽआशिरः ॥ २८ ॥

Vशुक्राः उज्ज्वलाः Vदविद्युतत्या द्योतमानया Vरुचा दीप्त्या Vपरिष्टोभन्त्या परितः शब्दायमानया Vकृपा धारया च युक्ताः Vसोमाः Vगवाशिरः भवन्ति । गव्येन पयसा मिश्रिता भवन्तीत्यर्थः ॥

हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत् । सीदन्तो वनुषो यथा ॥ २९ ॥

हिन्वानः । हेतृऽभिः । यतः । आ । वाजम् । वाजी । अक्रमीत् ।
सीदन्तः । वनुषः । यथा ॥ २९ ॥

Vवाजी बलवान्[1] सोमः Vहेतृभिः प्रेरकैः स्तोतृभिः Vहिन्वानः स्तोत्रैः प्रेर्यमाणः Vयतः संयतः सन् Vवाजं यागाख्यं युद्धम् Vआ Vअक्रमीत् आक्रामति । तत्र दृष्टान्तः । Vयथा Vवनुषः हन्तारो भटाः Vसीदन्तः युद्धं प्रविशन्तः आक्रामन्ति[2] तद्वदित्यर्थः ॥

ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः । पवस्व सूर्यो दृशे ॥ ३० ॥

ऋधक् । सोम । स्वस्तये । सम्ऽजग्मानः । दिवः । कविः । पवस्व । सूर्यः । दृशे ॥ ३० ॥

हे Vसोम Vकविः क्रान्तः Vसूर्यः सुवीर्यस्वम् Vऋधक् ऋध्नुवन् । तथा च यास्कः—'ऋधगिति पृथग्भावस्यानुप्रवचनं भवत्यथाप्यृद्ध्योत्यर्थे दृश्यते' (निरु. ४. २५) इति । Vसंजग्मानः संगच्छमानः Vस्वस्तये Vदृशे दर्शनाय च Vदिवः Vपवस्व क्षर ॥ ॥ ४१ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरंधरेण सायणाचार्येण[3] विरचिते माधवीये वेदार्थ-
प्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके प्रथमोऽध्यायः ॥

१. भ७–वेजनवान् । २. त-मु–आक्रमंति; भ७–अक्रमांति । ३. ग-त१.२.३.४.५-भ१.२.४–सायणामात्येन ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

'हिन्वन्ति' इति त्रिंशदृचं पञ्चमं सूक्तं वरुणपुत्रस्य भृगोरार्षं भार्गवस्य जमदग्नेर्वा गायत्रं पवमानसोमदेवताकम्। तथा चानुक्रम्यते–'हिन्वन्ति भृगुर्वारुणिर्जमदग्निर्वा' इति। गतो विनियोगः ॥

हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम्। महामिन्दुं महीयुवः ॥ १ ॥

हिन्वन्ति। सूरम्। उस्रयः। स्वसारः। जामयः। पतिम्। महाम्। इन्दुम्। महीयुवः ॥ १ ।

अत्र सर्वत्र पवमानः सोमः स्तूयते। तत्रादावृषिः सोमं प्रत्याह। मदीया अङ्गुलयस्त्वामभिषोतुं प्रेरयन्तीति। तदुच्यते। [v]स्वसारः। अङ्गुलिनामैतत्। सुष्ठु कर्मसु प्रेर्यन्त ऋत्विग्भिरिति स्वसारः। [v]जामयः एकस्मात्पाणेरुत्पन्नत्वात्[1] परस्परं बन्धुभूताः [v]उस्रयः कर्मार्थं निवसन्त्यः। सर्वत्र गन्तव्य इत्यर्थः। तादृश्योऽङ्गुलयः [v]महीयुवः त्वदभिषवं कामयमानाः सत्यः [v]सूरं सुवीर्यं सोमे पीते वीर्यं भवतीति शोभनवीर्यकारणं वा सर्वेषां कर्मणि प्रेरकं वा तादृशं [v]पतिं सर्वस्य स्थावरजङ्गमजातस्य स्वामिनं यस्माद्देवार्थमिज्यते अतः[2] एव [v]महां देवेभ्यो दीयमानत्वेन महान्तं महनीयं वा [v]इन्दुं ग्रहेषु स्यन्दमानं सोमं [v]हिन्वन्ति प्रेरयन्ति। 'हि वर्धनगत्योः'। स्वादिः ॥

पवमान रुचारुचा देवो देवेभ्यस्परि। विश्वा वसून्या विश ॥ २ ॥

पवमान। रुचाऽरुचा। देवः। देवेभ्यः। परि। विश्वा। वसूनि। आ। विश ॥ २ ॥

हे [v]पवमान दशापवित्रेण पूयमान यद्वा पुनान शुद्ध सोम [v]रुचारुचा। 'रुच दीप्तौ'। सर्वेण तेजसा [v]देवः दीप्यमानस्त्वं [v]देवेभ्यः [v]परि देवेभ्यः सकाशात् [v]विश्वा व्याप्तानि सर्वाणि बहूनि [v]वसूनि धनानि अस्माकम् [v]आ [v]विश प्रापय। यद्वा। देवेभ्यस्तदर्थं सर्वाणि वसूनि निवासस्थानानि ग्रहादीनि आ विश समन्तात् प्रविश ॥

आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। इषे पवस्व संयतम् ॥ ३ ॥

आ। पवमान। सुऽस्तुतिम्। वृष्टिम्। देवेभ्यः। दुवः। इषे। पवस्व। सम्ऽयतम् ॥ ३ ॥

हे [v]पवमान पूयमान पुनान वा सोम [v]सुष्टुतिं शोभनस्तुतियुक्तां [v]वृष्टिं [v]देवेभ्यः देवानां [v]दुवः। 'सुपां सुलुक्°' इति चतुर्थ्या लुक्। दुवसे परिचरणाय [v]आ [v]पवस्व आगमय। त्वं यथा मदीयया स्तुत्या वृष्टिर्भविष्यति तथा कुर्वित्यर्थः। किं चास्माकम् [v]इषे अन्नार्थं च [v]संयतं सम्यगस्मान् संगच्छन्तीं वृष्टिं कुरु। यद्वा। दुवः परिचर्यामभिलक्ष्य क्रियमाणां सुष्टुतिं शोभनस्तुतिरूपां वृष्टिम्। बहुस्तुतिभिरित्यर्थः। एतां देवेभ्यः प्रापय ॥

वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वाध्यः ॥ ४ ॥

वृषा। हि। असि। भानुना। द्युऽमन्तम्। त्वा। हवामहे। पवमान। सुऽआध्यः ॥ ४ ॥

हे सोम त्वं [v]वृषा अभिमतफलानां वर्षिता [v]असि [v]हि भवसि खलु। तस्मात् हे [v]पवमान

१. भ१(२)–एकस्मिन् पाणौ अत्यासक्तत्वात्। २. त३-भ१.२.७–तं अत।

पूयमान पुनान वा सोम vस्वाध्यः शोभनकर्माणः सुष्ठु ध्यानवन्तो वा वयं vभानुना तेजसा vसुमन्तं दीप्तिमन्तम् । अतिशयेन तेजस्विनमित्यर्थः । स्तुतिमन्तं वा vस्वा स्वां vहवामहे यज्ञेष्वाह्वयामहे ॥

आ पवस्व सुवीर्यं मन्दमानः स्वायुध । इहो ष्विन्दवा गहि ॥ ५ ॥

आ । पवस्व । सुऽवीर्यम् । मन्दमानः । सुऽआयुध । इहो इति । सु । इन्दो इति । आ । गहि ॥५॥

हे vस्वायुध। यज्ञे स्रुक्कपालादीनि दशायुधानीत्यभिधीयन्ते । शोभनानि तानि यस्य स तथोक्तः। यद्वा । धनुरादीन्यायुधानि यस्य सः । तादृश हे सोम त्वं vमन्दमानः मोदमानः सन् । यद्वा । अन्तर्णीतण्यर्थः । देवान् स्वयं मादयन् । vसुवीर्यं शोभनवीर्योपेतं पुत्रादिकमस्माकम् vआ vपवस्व । पवतिर्गत्यर्थः । आप्रापय । किंच हे vइन्दो ग्रहेषु चमसेषु च क्षरणशील सोम vइहो । इह उ पदद्वयम् । उ इत्यवधारणे । इहैवास्मदीये यज्ञ एव सुष्ठु vआ vगहि आगच्छ ॥ ॥ १ ॥

यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः । द्रुणा सधस्थमश्नुषे ॥ ६ ॥

यत् । अत्ऽअभिः । परिऽसिच्यसे । मृज्यमानः । गभस्त्योः । द्रुणा । सधऽस्थम् । अश्नुषे ॥६॥

हे सोम vगभस्त्योः । बाहुनामैतत् । बभसति दीपयन्ति निर्मन्थन्त्याभ्यामग्निमिति गभस्ती बाहू । तयोः vमृज्यमानः ताभ्यां शोध्यमानः सन् vअद्भिः । सोमसेचनार्थं चतुर्विधा आपः । ताभिर्वसतीवरीभिरेकधनाभिश्च vयत् यदा vपरिषिच्यसे परितः सिच्यमानो भवसि तदानीं vद्रुणा द्रुममयेन पात्रेण गृह्यमाणः सन् vसधस्थम् । सह तिष्ठन्त्यत्रेति सधस्थं स्थानं ग्रहचमसादिकम् । vअश्नुषे प्राप्नोषि ॥

प्र सोमाय व्यश्ववत्पवमानाय गायत । महे सहस्रचक्षसे ॥ ७ ॥

प्र । सोमाय । व्यश्वऽवत् । पवमानाय । गायत । महे । सहस्रऽचक्षसे ॥ ७ ॥

हे स्तोतारः vपवमानाय दशापवित्रेण पूयमानाय पुनानाय वा vसोमाय vप्र vगायत प्रकर्षेण सामगानं[1] कुरुत । अभिष्टुत वा । कथमिव । vव्यश्ववत् । यथा पूर्वं व्यश्वो नामर्षिः सोममगासीत् तद्वद्यूयमपि । कीदृशाय । vमहे महते देवेभ्यः स्वीक्रियमाणत्वेन गुणादिभिर्वा महत्त्वयुक्ताय vसहस्रचक्षसे । प्रयोगबाहुल्यापेक्षमेतद्वचनम् । सहस्रसंख्याकस्तोत्रयुक्ताय । यद्वा । नानाविधैर्वैरनेकधा द्रष्टव्याय सोमायेति ॥

यस्य वर्णं मधुश्चुतं हरिं हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये ॥ ८ ॥

यस्य । वर्णम् । मधुऽश्चुतम् । हरिम् । हिन्वन्ति । अद्रिऽभिः । इन्दुम् । इन्द्राय । पीतये ॥८॥

हे अध्वर्वादयः vवर्णं शत्रूणां वारकम् । येनासौ पीयते तेन मत्तेन शत्रवः संप्रहार्यन्त इति शत्रुनिवारणसमर्थम् । vमधुश्चुतं मधुररसस्य च्यावयितारं[2] vहरिं[3] हरितवर्णम् vइन्दुम् । इन्धेरेतद्रूपमत्रेष्यते । सर्वतो दीप्यमानम् । 'उन्दी क्लेदने' इत्यस्माद्वा । अभिषवानन्तरं पात्रेषु क्षरणशीलम् । vयस्य सोमस्य तव कारणमंशुम् vअद्रिभिः vहिन्वन्ति प्रेरयन्ति । अभिषुण्वन्तीत्यर्थः । vइन्द्राय vपीतये इन्द्रस्य पानाय । तदर्थमित्यर्थः ॥

१. ग–साम गायत गानं; त१.३.४.५.६-भ१.२.४–साम गायमानं; त२–सामणायमानं; त७–सामगायनं । २. ग-त३-भ५–च्यावयितारं क्षारयितारं । ३. त–रसं ।

तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः । सखित्वमा वृणीमहे ॥ ९ ॥

तस्य । ते । वाजिनः । वयम् । विश्वा । धनानि । जिग्युषः । सखिऽत्वम् । आ । वृणीमहे ॥९॥

हे सोम [v]वाजिनः संभृतहविष्काः [v]वयं [v]विश्वा विश्वानि सर्वाणि व्याप्तानि वा शत्रुधनानि [v]जिग्युषः जितवतः [v]तस्य पूर्वोक्तलक्षणस्य प्रसिद्धस्य वा [v]ते तव [v]सखित्वं स्तुत्यस्तोतृलक्षणं सख्यम् [v]आ [v]वृणीमहे संभजामहे। अस्मभ्यं धनं देहीति संभजनं कुर्म इत्यर्थः ॥ जिग्युषः । 'जि जये' । लिटि क्वसौ 'वस्वेकाजात्०' इति नियमादिडभावः । 'सन्लिटोर्जेः' इत्यभ्यासादुत्तरस्य कवर्गादेशः । ङसि परतो वसोः संप्रसारणम् । क्वसुप्रत्ययस्वरः ॥

वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा ॥ १० ॥

वृषा । पवस्व । धारया । मरुत्वते । च । मत्सरः । विश्वा । दधानः । ओजसा ॥ १० ॥

हे सोम त्वं [v]वृषा स्तोतॄणामभिमतफलस्य वर्षकः सन् [v]धारया त्वदीयया [v]पवस्व द्रोणकलशमागच्छ । पवतिर्गतिकर्मा । आगतस्त्वं[1] यदास्माभिरिन्द्राय दीयसे तदा [v]मरुत्वते सहाया मरुतो यस्य सन्ति तस्मा इन्द्राय [v]मत्सरः मदकरः [v]च भव । कीदृशः । [v]विश्वा विश्वानि सर्वाणि व्याप्तानि वा धनानि [v]ओजसा आत्मीयेन बलेन युक्तः सन् स्तोतृभ्यस्तानि [v]दधानः प्रयच्छन् । त्वं मादयिता भवेति समन्वयः ॥ ॥ २ ॥

तं त्वा धर्तारमोण्योः३ः पवमान स्वर्दृशम् । हिन्वे वाजेषु वाजिनम् ॥ ११ ॥

तम् । त्वा । धर्तारम् । ओण्योः । पवमान । स्वःऽदृशम् । हिन्वे । वाजेषु । वाजिनम् ॥११॥

हे [v]पवमान पूयमान पुनान वा हे सोम [v]ओण्योः । द्यावापृथिवीनामैतत् । तयोः [v]धर्तारं धारकमत एव [v]स्वर्दृशं सर्वस्य सूर्यस्य वा द्रष्टारं सर्वैर्देवैर्द्रष्टव्यं वा [v]वाजिनं बलवन्तं [v]तं पूर्वोक्तगुणप्रसिद्धं[2] [v]त्वा त्वां [v]वाजेषु संग्रामेषु [v]हिन्वे प्रेरयामि । यद्वा । वाजेष्वन्नेषु विषयेषु हिनोमि । अन्नादिकं प्रयच्छेत्यर्थः ॥

अया चित्तो विपानया हरिः पवस्व धारया । युजं वाजेषु चोदय ॥ १२ ॥

अया । चित्तः । विपा । अनया । हरिः । पवस्व । धारया । युजम् । वाजेषु । चोदय ॥१२॥

हे पवमान [v]अया । 'अय पय गतौ' । कर्मार्थमितस्ततो गच्छन्तीभिरनया [v]विपा । 'विप प्रेरणे' । हवींष्यग्नौ प्रेरयन्तीति विपोऽङ्गुलयः । एकवचनं छान्दसम् । प्रत्येकविवक्षया वा । एताभिर्मदीयाभिरङ्गुलीभिः [v]चित्तः ज्ञातः निर्गतोऽभिषुतः [v]हरिः हरितवर्णस्त्वं धारया संततया [v]पवस्व द्रोणकलशं प्रहांश्चागच्छ त्वम् । किंच [v]युजं सखायमिन्द्रं [v]वाजेषु संग्रामेषु [v]चोदय प्रेरय । यदा अस्माभिरिन्द्रार्थं सोमो दीयते तदा तत्पानेन हृष्टः सन् शत्रून् हन्तीत्यर्थः ॥

आ नः इन्दो महीमिषं पवस्व विश्वदर्शतः । अस्मभ्यं सोम गातुवित् ॥ १३ ॥

आ । नः । इन्दो इति । महीम् । इषम् । पवस्व । विश्वऽदर्शतः ।
अस्मभ्यम् । सोम । गातुऽवित् ॥ १३ ॥

१. ग–एवंभूतस्त्वं । २. ग-त३-म–पूर्वोक्तगुण प्रसिद्धं; त-मु–पूर्वोक्तगुणसिद्धं ।

हे [v]इन्दो क्षरणशील दीपनशील वा हे सोम [v]विश्वदर्शतः विश्वैः सर्वैर्दर्शनीयः । यद्वा । विश्वं सर्वं वस्तुजातं दर्श्यते ज्ञाप्यतेऽनेनेति । सः विश्वस्य प्रकाशक[1] इत्यर्थः । तादृशस्त्वं [v]महीमिषं महत्प्रभूतमन्नं [v]नः अस्मभ्यम् [v]आ [v]पवस्व आगमय । प्रयच्छेत्यर्थः । किंच हे [v]सोम अभिषूयमाण पवमान [v]अस्मभ्यं [v]गातुवित् स्वर्गमार्गस्य[2] लम्भयिता ज्ञापयिता भव ॥

आ कलशा अनूषतेन्दो धाराभिरोजसा । एन्द्रस्य पीतये विश ॥ १४ ॥

आ । कलशाः । अनूषत । इन्दो इति । धाराभिः । ओजसा । आ । इन्द्रस्य । पीतये । विश ॥ १४ ॥

हे [v]इन्दो क्षरणशील सोम [v]ओजसा बलेन युक्तस्य तव [v]धाराभिः निरन्तराभिः सहिताः [v]कलशाः । प्रयोगबाहुल्यापेक्षमेतद्बहुवचनम् । द्रोणकलशाः [v]आ[3] [v]अनूषत[3] स्तोतृभिः[4] आभिमुख्येन स्तूयन्ते । सोमाभिषवकाले हि ऋत्विजः स्तुवन्ति खलु । ततस्त्वम् [v]इन्द्रस्य [v]पीतये पानाय [v]आ [v]विश ग्रहांश्चमसांश्च प्रविश ॥

यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः । स पवस्वाभिमातिहा ॥ १५ ॥

यस्य । ते । मद्यम् । रसम् । तीव्रम् । दुहन्ति । अद्रिऽभिः । सः । पवस्व । अभिमातिऽहा ॥ १५ ॥

हे सोम [v]यस्य [v]ते तव [v]मद्यं मदकरं [v]तीव्रं क्षिप्रं मदकारिणं [v]रसम् [v]अद्रिभिः ग्रावभिरध्वर्यवादयः [v]दुहन्ति अभिषुण्वन्ति [v]सः[5] तादृशस्त्वं[5] [v]अभिमातिहा । अभितो मातिरभिमानं येषां ते शत्रवः । पापरूपाणां शत्रूणां हन्ता सन् [v]पवस्व सर्वतो गच्छ । येऽभिषुण्वन्ति ते पापरहिताः सुकृतिनो भवन्तीत्यर्थः ॥ ॥ ३ ॥

राजा मेधाभिरीयते पवमानो मनावधि । अन्तरिक्षेण यातवे ॥ १६ ॥

राजा । मेधाभिः । ईयते । पवमानः । मनौ । अधि । अन्तरिक्षेण । यातवे ॥ १६ ॥

[v]मनौ मनुष्ये यागं कुर्वाणे सति । यद्वा । मनावधि । मनुर्मन्तव्यो यज्ञः । तस्मिन् [v]पवमानः पूयमानः पुनानो वा [v]राजा । राजशब्देन सोमोऽभिधीयते । 'सोमं राजानमक्रीणन्' (ऐ. ब्रा. १.२७) इत्यादिषु दृष्टत्वात् । स राजा [v]मेधाभिः स्तुतिभिः सह[6] [v]ईयते गच्छति । किमर्थम् । [v]अन्तरिक्षेण आकाशमार्गेण द्रोणकलशं प्रति [v]यातवे यातुम् । द्रोणाभिगमनकाले हि स्तोतृभिः स्तूयते खलु ॥

आ नं इन्दो शतग्विनं गवां पोषं स्वश्व्यम् । वहा भगत्तिमूतये ॥ १७ ॥

आ । नः । इन्दो इति । शतऽग्विनम् । गवाम् । पोषम् । सुऽअश्वम् । वह । भगत्तिम् । ऊतये ॥ १७ ॥

हे [v]इन्दो पात्रेषु क्षरणशील दीपनशील वा हे सोम [v]शतग्विनं शतसहस्रसंख्याभिर्गोभिर्युक्तं [v]गवां [v]पोषं गवादीनां पुष्टिवर्धनं [v]स्वश्व्यं शोभनाश्वसङ्घसहितं [v]भगत्तिं भगदत्तिं भजनीयधनदानं च [v]ऊतये रक्षणाय [v]नः अस्माकम् [v]आ [v]वह प्रापय । गवादींश्च तेषां च वृद्धिं प्रयच्छेत्यर्थः ॥

आ नः सोम सहो जुवो रूपं न वर्चसे भर । सुष्वाणो देववीतये ॥ १८ ॥

आ । नः । सोम । सहः । जुवः । रूपम् । न । वर्चसे । भर । सुस्वानः । देवऽवीतये ॥ १८ ॥

---

१. त–प्रकाशकस्य; भ२–प्रकाशस्य । २. त३–स्वर्गस्य । ३. त–अनूषत । ४. ग–ऋत्विग्भिः । ५. भ५–एतादृशस्त्वं । ६. ग–स्तुतः ।

हे ᵛसोम ᵛदेववीतये देवपानाय देवानां कामाय वा ᵛसुष्वाणः अभिषूयमाणोऽभिषुतो भव त्वम्। ᵛसहः शत्रूभिभवनसमर्थं बलं ᵛजुवः। जु इति गत्यर्थः। शत्रून् प्रति शीघ्रगमनं च। यद्वा। सर्वतो गमनशीलं बलं च। ᵛन इति चार्थे। ᵛदर्षसे। 'दर्ष दीप्तौ'। दीप्त्यै सर्वत्र प्रकाशनाय ᵛरूपं च ᵛनः अस्मभ्यम् ᵛआ ᵛभर आहर प्रयच्छ॥

अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदन्छ्येनो न योनिमा॥ १९॥

अर्ष। सोम। द्युमत्ऽतमः। अभि। द्रोणानि। रोरुवत्।
सीदन्। श्येनः। न। योनिम्। आ॥ १९॥

हे ᵛसोम अभिषूयमाण पवमान ᵛद्युमत्तमः अतिशयेन दीप्तिमांस्त्वं ᵛद्रोणानि। प्रयोगबाहुल्यापेक्षमेतद्बहुवचनम्। द्रोणान् ᵛअभि लक्षीकृत्य ᵛरोरुवत् पुनःपुनर्भृशं वा शब्दं कुर्वन् ᵛअर्ष तानागच्छ। दशापवित्रमध्यान्निर्गतः सोमोऽविच्छिन्नधारया द्रोणकलशे[1] पतन् शब्दं करोति खलु। तत्र दृष्टान्तः। ᵛश्येनो ᵛन यथा ᵛआ ᵛसीदन् सर्वतो गच्छन् श्येनः शंसनीयगतिः[2] पक्षी ᵛयोनिं स्वस्थानं कुलायं प्रति भृशं शब्दायमानः सन्नागच्छति तद्वत्॥

अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमो अर्षति विष्णवे॥ २०॥

अप्साः। इन्द्राय। वायवे। वरुणाय। मरुत्ऽभ्यः। सोमः। अर्षति। विष्णवे॥ २०॥

ᵛअप्साः वसतीवरीनामधेयानामपां संभक्ता। 'पण संभक्तौ'। 'जनसन°' इति विट्। आत्वं 'विड्वनोः°' इति। तादृशः ᵛसोमः ᵛअर्षति द्रोणकलशमागच्छति। किमर्थम्। ᵛइन्द्राय। सर्वदेवानां प्रथम[3] एवेन्द्रः सोमं पिबति तस्मात्पूर्वमेवाभिहितः। तस्मै ᵛवायवे तत्सहायाय च। ऐन्द्रवायवे हीन्द्रस्यानन्तरं वायुः सोमं पिबति तस्मात्तदनु वायुरुक्तः। तस्मै च ᵛवरुणाय ᵛमरुद्भ्यः मित्रं शब्दं कुर्वद्भ्य एतन्नामकेभ्यो देवेभ्यः ᵛविष्णवे सर्वजगद्व्यापिने विष्णवे च। एतेषां पातुं सोमः स्रवतीत्यर्थः॥ ॥ ४॥

इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः। आ पवस्व सहस्रिणम्॥ २१॥

इषम्। तोकाय। नः। दधत्। अस्मभ्यम्। सोम। विश्वतः। आ। पवस्व। सहस्रिणम्॥ २१॥

हे ᵛसोम त्वं ᵛनः अस्माकं ᵛतोकाय पुत्राय ᵛइषम् अन्नं ᵛदधत् विदधत् प्रयच्छन् ᵛसहस्रिणं सहस्रसंख्याकं धनं ᵛविश्वतः सर्वतो दिक्षु ᵛअस्मभ्यं च[4] ᵛआ ᵛपवस्व आप्रापय। अस्मभ्यं पुत्राय च अन्नधनादिकं प्रयच्छेत्यर्थः॥

ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति॥ २२॥

ये। सोमासः। पराऽवति। ये। अर्वाऽवति। सुन्विरे। ये। वा। अदः। शर्यणाऽवति॥ २२॥

एतदादिम्याम्यृग्भ्यामिन्द्रार्थं सर्वत्र सोमाभिषवोऽस्तीत्याह। ᵛये ᵛसोमासः सोमाः ᵛपरावति विप्रकृष्टेऽतिदूरे देशे ᵛये वा ᵛअर्वावति अन्तिके देश इन्द्रार्थं ᵛसुन्विरे अभिषूयन्ते अभ्यषूयन्त ᵛये ᵛवा ᵛशर्यणावति। कुरुक्षेत्रस्थ जघनार्धे शर्यणावत्संज्ञकं मधुररसयुक्तं सोमवत्सरोऽस्ति। ᵛअदः अस्मिन् सरसि सुरसा ये सोमाः इन्द्रायाभिषूयन्ते तेऽस्माकमभिमतफलं प्रयच्छन्त्विति वक्ष्यमाणेन संबन्धः॥

१. ग-त३-म१.७–'द्रोणकलशे' नास्ति। २. त–शंसनीयं गच्छंति। ३. ग-त३-म१.४.७–प्रथमत। ४. त-मु–वा।

य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम् । ये वा जनेषु पञ्चसु ॥ २३ ॥

ये । आर्जीकेषु । कृत्वऽसु । ये । मध्ये । पस्त्यानाम् । ये । वा । जनेषु । पञ्चऽसु ॥ २३ ॥

ये वा सोमाः आर्जीकेषु । ऋजीकानामदूरभवा आर्जीका देशाः । तेषु तथा कृत्वसु । कृत्वान इति देशाभिधानम् । तेषु कर्मवत्सु देशेषु च किंच पस्त्यानां सरस्वत्यादीनां नदीनां मध्ये समीपे च ये सोमा अभिषूयन्ते । ' ऋषयो वै सरस्वत्यां सत्रमासत ' (ऐ. ब्रा. २.१९) इत्यादिषु नदीतीरे यज्ञकरणस्य श्रवणात् । किंच जनेषु पञ्चसु । निषादपञ्चमाश्चत्वारो वर्णाः पञ्च जनाः । तेषु च ये वा सोमा अभिषुताः ते सोमा अस्माकमभिमतं प्रयच्छन्त्विवरयुत्तरेण संबन्धः ॥

ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ॥ २४ ॥

ते । नः । वृष्टिम् । दिवः । परि । पवन्ताम् । आ । सुऽवीर्यम् । सुवानाः । देवासः । इन्दवः ॥२४॥

सुवानाः तत्र चात्र चाभिषूयमाणा देवा दीपनशीलाः स्तुत्या वा इन्दवः ग्रहेषु चमसेषु च क्षरन्तः ते सोमाः नः अस्माकं दिवस्परि । परिशब्दः पञ्चम्यर्थद्योतकः । अन्तरिक्षादादित्याद्वा वृष्टिम् । ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिः ' इति वृष्टिकारणत्वात् । किंच सुवीर्यं शोभनवीर्योपेतं पुत्रं च धनादिकं वा आ पवन्तां प्रापयन्तु । यजमानः सोमेन अभिमतफलानि प्राप्नोति खलु ॥

पवते हर्यतो हरिर्गृणानो जमदग्निना । हिन्वानो गोरधि त्वचि ॥ २५ ॥

पवते । हर्यतः । हरिः । गृणानः । जमत्ऽअग्निना । हिन्वानः । गोः । अधि । त्वचि ॥२५॥

हर्यतः देवान् कामयमानः हरिः हरितवर्णः किंच गोः त्वचि अधि आनद्धे चर्मणि हिन्वानः प्रेर्यमाणः स सोमः जमदग्निना मन्त्रद्रष्ट्रर्षिणा गृणानः स्तूयमानः सन् पवते दशापवित्रेण पूतो भवति । यद्वा । पात्राण्यभिगच्छति ॥ ॥ ५ ॥

प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः । श्रीणाना अप्सु मृञ्जत ॥२६॥

प्र । शुक्रासः । वयःऽजुवः । हिन्वानासः । न । सप्तयः । श्रीणानाः । अप्ऽसु । मृञ्जत ॥२६॥

शुक्रासः शुक्रा दीप्यमानाः वयोजुवः अन्नं प्रेरयन्तः । यद्यदपेक्ष्य देवेभ्यः सोमं प्रयच्छन्ति तत्तदपेक्षितं सोमो ददाति । ते सोमाः श्रीणानाः दधिक्षीरादिभिः श्रीयमाणाः सन्तः अप्सु वसतीवरीष्वेकधनासु च मृञ्जत ऋत्विग्भिः प्रमृज्यन्ते शोध्यन्ते । तत्र दृष्टान्तः । हिन्वानासो न सप्तयः । अश्वनामैतत् । यथाश्वा हिन्वानासो हिन्वानाः सादिभिः प्रेर्यमाणाः सन्तोऽप्सु तैरेव प्रक्षोभिता भवन्ति तद्वत् ॥

तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये । स पवस्वानया रुचा ॥ २७ ॥

तम् । त्वा । सुतेषु । आऽभुवः । हिन्विरे । देवऽतातये । सः । पवस्व । अनया । रुचा ॥२७॥

अथ प्रत्यक्षकृतः । हे सोम आभुवः : कर्मकरणार्थं समन्ताद्भवन्तीत्याभुव ऋत्विजः । ते सुतेषु । सुतोऽभिषुतः सोमः । तद्वत्सु यज्ञेषु देवतातये । ' सर्वदेवात्तातिल् ' इति स्वार्थिकस्तातिल् । इन्द्रादिदेवेभ्यः तं तादृशं प्रसिद्धं त्वा त्वां हिन्विरे प्रावभिः प्रेरयन्ति । अभिषुण्वन्तीत्यर्थः । ततः सः अभिषुत स त्वम् अनया रुचा दीप्यमानया धारया द्रोणकलशं प्रति पवस्व

आगच्छ। पवतिर्गतिकर्मा। यद्वा। अनया महीपचा इत्या स्तुत्या सह कक्षमागच्छ। कक्षाभिगमनकाले हि सोमं स्तुवन्ति ॥

आ ते दक्षं मयोभुवं वहिष्ठमद्या वृणीमहे। पान्तमा पुरुस्पृहम् ॥ २८ ॥

आ। ते। दक्षम्। मयःऽभुवम्। वहिष्ठम्। अद्य। वृणीमहे। पान्तम्। आ। पुरुऽस्पृहम् ॥२८॥

हे सोम यष्टारो वयं [v]ते तव स्वभूतं [v]दक्षं बलम् [v]अद्य अस्मिन् यागदिने आभिमुख्येन [v]आ [v]वृणीमहे संभजामहे[1]। कीदृशम्। [v]मयोभुवं सुखस्य भावकं [v]वहिष्ठं धनादीनां प्रापकं [v]पान्तं शत्रुभ्यो रक्षकं [v]पुरुस्पृहं बहुभिः स्पृहणीयं काम्यमानं बलमिति ॥

आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम्। पान्तमा पुरुस्पृहम् ॥ २९ ॥

आ। मन्द्रम्। आ। वरेण्यम्। आ। विप्रम्। आ। मनीषिणम्।
पान्तम्। आ। पुरुऽस्पृहम् ॥ २९ ॥

हे सोम [v]मन्द्रं मदकरं स्तुत्यं वा त्वाम् [v]आ वृणीमहे। [v]वरेण्यं सर्वैर्वरणीयं संभजनीयं च। किंच [v]विप्रं मेधाविनं त्वाम्। तथा [v]मनीषिणम्। मनस ईषा मनीषा। तद्वन्तं स्तुतिमन्तं वा त्वाम् [v]आ वृणीमहे। प्रत्येकविशेषणापेक्षया आ इत्युपसर्गः कृतः। किंच [v]पान्तं सर्वेषां रक्षकं [v]पुरुस्पृहं बहुभिः स्पृहणीयं च त्वां संभजामहे ॥

आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा। पान्तमा पुरुस्पृहम् ॥ ३० ॥

आ। रयिम्। आ। सुऽचेतुनम्। आ। सुक्रतो इति सुऽक्रतो। तनूषु। आ।
पान्तम्। आ। पुरुऽस्पृहम् ॥ ३० ॥

हे [v]सुक्रतो शोभनप्रज्ञ सोम त्वदीयं [v]रयिं धनं वयम् [v]आ वृणीमहे। किंच [v]सुचेतुनम्। 'चिती संज्ञाने'। भाव औणादिक उननूप्रत्ययः। सुज्ञानं च। [v]तनूषु[2] अस्मत्पुत्रेषु च धनं सुज्ञानं च त्वम् [v]आ विधेहि। यद्वा पुत्रार्थं वयमावृणीमहे। तथा [v]पान्तं सर्वस्य रक्षकं [v]पुरुस्पृहं बहुभिर्यष्टृभिः काम्यमानं त्वां संभजामहे ॥ ॥ ६ ॥

'पवस्व' इति त्रिंशदृचं षष्ठं सूक्तम्। अत्रानुक्रम्यते–'पवस्व शतं वैखानसा अष्टादश्यनुष्टुप्परास्तिस्र आग्नेय्यः' इति। शतसंख्याका वैखानसाख्याः संहता ऋषयः। 'त्वं सोम सूरः' इत्येषानुष्टुप्। शिष्टा गायत्र्यः। 'अग्न आयूंषि' इत्याद्यास्तिस्रः पवमानविशिष्टाग्निदेवताकाः। अन्यासां पवमानः सोमो देवता। गतः सूक्तविनियोगः ॥

पवस्व विश्वचर्षणेऽभि विश्वानि काव्या। सखा सखिभ्य ईड्यः ॥ १ ॥

पवस्व। विश्वऽचर्षणे। अभि। विश्वानि। काव्या। सखा। सखिऽभ्यः। ईड्यः ॥ १ ॥

हे [v]विश्वचर्षणे सर्वद्रष्ट्रित्वेन सर्वस्य द्रष्टर्हे सोम [v]सखा स्तुत्यस्तोतृयष्टृयष्टव्यलक्षणेन संबन्धेन सखिभूतस्त्वम् [v]ईड्यः स्तोतव्यः सन् [v]सखिभ्यः हविष्प्रदानेनोपकारकत्वात् मित्रभूतेभ्योऽस्मभ्यं [v]विश्वानि सर्वाणि [v]काव्या। कवेः कर्माणि काव्यानि। ब्राह्मणादित्वात् ष्यञ्। सर्वाणि स्तोत्राणि [v]अभि लक्षीकृत्य [v]पवस्व आगच्छ ॥

---

१. त–'संभजामहे' नास्ति। २. भ–किंच तनूषु।

ताभ्यां विश्वस्य राजसि ये पवमान धामनी । प्रतीची सोम तस्थतुः ॥२॥

ताभ्याम् । विश्वस्य । राजसि । ये इति । पवमान । धामनी इति ।
प्रतीची इति । सोम । तस्थतुः ॥ २ ॥

हे ᵛपवमान दशापवित्रेण पूयमान पुनान वा हे ᵛसोम ᵛये ᵛधामनी पूर्वपक्षापरपक्षयोर्लतारूपस्य सोमस्य तवैकैकपर्णवृद्धिह्रासाभ्यां तव स्वभूतौ पूर्वादिपक्षौ । यद्वा ये धामनी नामनी अंशुसोमात्मके अपि ᵛप्रतीची त्वदभिमुखं गच्छन्तौ गच्छती वा पक्षौ नामनी वा ᵛतस्थतुः उपजग्मतुः ᵛताभ्यां त्वं ᵛविश्वस्य सर्वस्य लोकस्य ᵛराजसि स्वामी भवसि । पूर्वादिपक्षाभ्यां सर्वलोकस्योपनायकत्वात्तस्य स्वामी भवसि । पृथिव्यामंशुनाङ्गा मनुष्याणां सर्वेषामभीप्सितदानेन तस्य लोकस्य द्युलोके देवेभ्यः स्वसुधामयकलादानेन तेषां प्रीणयिता भवसि[1] । देवाः खलु सोमस्यैकैकवृद्धिह्रासाभ्यां कलाः पिबन्ति ॥

परि धामानि यानि ते त्वं सोमासि विश्वतः । पवमान ऋतुभिः कवे ॥३॥

परि । धामानि । यानि । ते । त्वम् । सोम । असि । विश्वतः । पवमान । ऋतुऽभिः । कवे ॥३॥

हे ᵛसोम यस्मात् ᵛते त्वदीयानि ᵛधामानि त्वदधीना अहोरात्ररूपाः कालविशेषाः ᵛपरि भवन्ति सर्वत्र व्याप्तास्तिष्ठन्ति । यद्वा त्वदीयानि धामानि तेजांसि परि वर्तन्ते अत एव हे ᵛपवमान पूयमान हे ᵛकवे क्रान्तकर्मन् हे सोम त्वम् ᵛऋतुभिः वसन्तादिकालविशेषैः सह ᵛविश्वतः सर्वतः ᵛअसि भवसि । अहोरात्रौ यत्र यत्र व्याप्तौ तत्र तत्र वसन्तादिकालोपाधिकः सोमस्तिष्ठति । तयोस्तदधीनत्वादित्यर्थः ॥

पवस्व जनयन्निषोऽभि विश्वानि वार्या । सखा सखिभ्य ऊतये ॥ ४ ॥

पवस्व । जनयन् । इषः । अभि । विश्वानि । वार्या । सखा । सखिऽभ्यः । ऊतये ॥ ४ ॥

हे सोम ᵛसखा सखिभूतस्त्वं ᵛविश्वानि सर्वाणि ᵛवार्या वरणीयान्यस्मत्कृतानि स्तोत्राणि ᵛअभि लक्षीकृत्य ᵛसखिभ्यः अस्मभ्यम् ᵛऊतये रक्षणाय जीवनाय ᵛइषः अन्नानि ᵛजनयन् प्रयच्छन् ᵛपवस्व आगच्छ । पवतिर्गतिकर्मा ॥

तवं शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते । पवित्रं सोम धामभिः ॥ ५ ॥

तव । शुक्रासः । अर्चयः । दिवः । पृष्ठे । वि । तन्वते । पवित्रम् । सोम । धामऽभिः ॥५॥

हे ᵛसोम ᵛशुक्रासः सर्वत्र ज्वलनशीलाः ᵛधामभिः तेजोभिः सहितस्य ᵛतव स्वभूताः ᵛअर्चयः अर्चनीया रश्मयः ᵛदिवः द्योतमानस्यादित्यस्य द्युलोकस्य वा ᵛपृष्ठे अधरभागे । पृथिव्यामित्यर्थः । ᵛपवित्रं पवनसाधनमुदकं ᵛवि ᵛतन्वते विशेषेण तन्वन्ति विस्तारयन्ति । सर्वत्र कुर्वन्तीत्यर्थः ॥ ॥ ७ ॥

तवेमे सप्त सिन्धवः प्रशिषं सोम सिस्रते । तुभ्यं धावन्ति धेनवः ॥ ६ ॥

तव । इमे । सप्त । सिन्धवः । प्रऽशिषम् । सोम । सिस्रते । तुभ्यम् । धावन्ति । धेनवः ॥६॥

वृष्टिकर्तृत्वप्रसङ्गादाह । हे ᵛसोम ᵛइमे इमाः त्वया सृष्टाः ᵛसप्त सप्तसंख्याकाः ᵛसिन्धवः स्यन्दमाना गङ्गाद्या नद्यः । यद्वा सप्त सर्पणशीला नद्यः ᵛतव ᵛप्रशिषं प्रशासनमाज्ञामभि ᵛसिस्रते

१. त–भवति ।

अनुसरन्ति । त्वदाज्ञामनुसृत्य समुद्रं गच्छन्तीत्यर्थः । किंच ᵛधेनवः नवप्रसूतिका देवानां हविष्प्रदानेन प्रीणयित्र्यो गावः ᵛसुम्नं स्वदर्थमेवाशिरं प्रयच्छाम इति ᵛधावन्ति आगच्छन्ति ॥

प्र सोम याहि धारया सुत इन्द्राय मत्सरः । दधानो अक्षिति श्रवः ॥ ७ ॥

प्र । सोम । याहि । धारया । सुतः । इन्द्राय । मत्सरः । दधानः । अक्षिति । श्रवः ॥ ७ ॥

हे[1] ᵛसोम अभिषूयमाण देव ᵛमत्सरः इन्द्रस्य मदकरस्त्वं ᵛसुतः अस्माभिरभिषुतः सन् ᵛइन्द्राय इन्द्रार्थं दशापवित्रान्निर्गतया संततया त्वदीयया ᵛधारया द्रोणकलशं ᵛप्र ᵛयाहि प्रकर्षेण प्राप्नुहि । यद्वा । हे सोम सुतोऽभिषुतस्त्वमिन्द्राय मत्सरो मादयितृतमः सन् धारयाग्नौ स्वाहाकारेण पात्रात् पतन्त्या धारया सह त्वमिन्द्रमुपयाहि । कीदृशः[2] । ᵛअक्षिति अक्षीणं ᵛश्रवः। श्रव इत्यन्ननाम । ᵛदधानः अस्मभ्यं प्रयच्छन् प्र याहीति ॥

सम्मु त्वा धीभिरस्वरन् हिन्वतीः सप्त जामयः । विप्रमाजा विवस्वतः ॥ ८ ॥

सम् । ऊँ इति । त्वा । धीभिः । अस्वरन् । हिन्वतीः । सप्त । जामयः ।
विप्रम् । आजा । विवस्वतः ॥ ८ ॥

हे ᵛसोम ᵛहिन्वतीः । लिङ्गव्यत्ययः । हिन्वन्तः स्तुतीः प्रेरयन्तः ᵛसप्त सप्तसंख्याकाः ᵛजामयः एकस्मिन् यज्ञे कर्मकरणेन परस्परं बन्धुभूता होतृप्रभृतयः सप्त होत्रकाः ᵛविवस्वतः देवानां हविष्प्रदानेन परिचरणवतो यजमानस्य ᵛआजा आजौ । अजन्ति गच्छन्ति ऋत्विजोऽत्रेत्याजिर्यज्ञः । तस्मिन् ᵛविप्रं मेधाविनं पवमानं ᵛत्वा त्वामेव ᵛधीभिः[3] धीतिभिः स्तुतिभिः ᵛसम् ᵛअस्वरन् अशब्दयन् अस्तुवन् । यद्वा । हिन्वतीर्गच्छन्त्यः सप्त ग्रामयो गङ्गाद्याः सप्त नद्यो धीभिः । वर्णलोपश्छान्दसः । धीतिभिः[3] अङ्गुलीभिर्विप्रं त्वां समस्वरन् प्रेरयन्ति । वसतीवरीभिरेकधनाभिश्च परिस्रोधनार्थं प्रेरयन्तीति ॥

मृजन्ति त्वा सप्तयुवोऽव्ये जीरावधि ष्वणि । रेभो यदज्यसे वने ॥ ९ ॥

मृजन्ति । त्वा । सप्त । अयुवः । अव्ये । जीरौ । अधि । स्वनि । रेभः । यत् । अज्यसे । वने ॥ ९ ॥

हे सोम ᵛअयुवः । अङ्गुलिनामैतत् । अजन्ति प्रक्षिपन्ति हवींष्यग्नाविति । यद्वा अगेर्गत्यर्थस्य । कर्मकरणार्थमितस्ततो गच्छन्तीति । अयुवोऽङ्गुलयोऽस्मदीयाः ᵛजीरौ पापानामभिभाविके क्षिप्रं हृते वा ᵛस्वनि ᵛअधि अधिकं शब्दायमाने ᵛअव्ये अविवालेन कृते पवित्रे ᵛत्वा त्वां तदा[4] ᵛसं ᵛमृजन्ति सम्यक् शोधयन्ति । ᵛयत् यदा ᵛरेभः । 'रेभृ शब्दे' । उदकमध्ये प्रह्लेपेन शब्दायमानस्त्वं ᵛवने वननीये वसतीवर्याख्ये उदके ᵛअज्यसे अक्तः सिक्तो भवसि । तदा मृजन्तीत्यन्वयः ॥

पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत । अर्वन्तो न श्रवस्यवः ॥ १० ॥

पवमानस्य । ते । कवे । वाजिन् । सर्गाः । असृक्षत । अर्वन्तः । न । श्रवस्यवः ॥ १० ॥

मार्जनप्रसङ्गमाह । हे ᵛकवे क्रान्तप्रज्ञ हे ᵛवाजिन् अन्नवन् सोम ᵛपवमानस्य दशापवित्रेण पूयमानस्य ᵛते तव ᵛसर्गाः । सृज्यन्त इति सर्गा धाराः । कीदृशाः । ᵛश्रवस्यवः । छन्दसि परेच्छायां

---

१. ग–हे सोम इंद्रार्थं स्रुतोऽभिषुतः मदकरः एवंभूतः धारया प्र याहि । पुनः कीदृशः । २. त-म१. २.७–'धीभिः' नास्ति । ३. ग-त१.५.७–धीभिः । ४. त–सदा ।

क्यच्। यङ्णामकं कामयमानास्वदीया धाराः ᵛअसृक्षत सृजन्ति[1]। निर्गच्छन्तीत्यर्थः। तत्र दृष्टान्तः। ᵛअर्वन्तो ᵛन। यथाश्वा मन्दुरातो[2] निर्गच्छन्ति तद्वत् पवित्रान्निःसरन्तीत्यर्थः। प्रयोगापेक्षं चात्र धारावाहुल्यम्॥ ॥ ८ ॥

अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशन्त धीतयः॥ ११॥

अच्छ। कोशम्। मधुऽश्चुतम्। असृग्रम्। वारे। अव्यये। अवावशन्त। धीतयः॥ ११॥

धारानिर्गमनप्रसङ्गादभिधीयते। ᵛमधुश्चुतं मधुररसस्य च्यावयितारं क्षारयितारं ᵛकोशं द्रोणकलशम् ᵛअच्छ अभिलक्ष्य ᵛअव्यये अविमये अविस्वभूते[3] वा ᵛवारे वाले दशापवित्रे ᵛअसृग्रं सोमा ऋत्विग्भिः सृज्यन्ते। सृजेः कर्मणि 'तिङां तिङो भवन्ति' इति झो[4] रमादेशः[4]। किंच ᵛधीतयः। अङ्गुलिनामैतत्। धयन्ति पिबन्त्याभिरिति। अस्मदीया अङ्गुलयः ᵛअवावशन्त तान् सोमान् पुनःपुनर्मार्जनार्थं कामयन्ते॥

अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा॥ १२॥

अच्छ। समुद्रम्। इन्दवः। अस्तम्। गावः। न। धेनवः। अग्मन्। ऋतस्य। योनिम्। आ॥१२॥

ᵛइन्दवः[5] क्षरन्तः सोमाः ᵛसमुद्रं सोमानामेकत्रैव संगमनस्थानं द्रोणकलशम् ᵛअच्छ अभि गच्छन्ति। तत्र दृष्टान्तः। ᵛधेनवः पयःप्रदानेन जनानां प्रीणयित्र्यो नवप्रसूतिकाः ᵛगावः ᵛअस्तं गृहं यथाभिगच्छन्ति तद्वत्। किंच ते सोमाः ᵛऋतस्य सत्यभूतस्य यज्ञस्य ᵛयोनिं स्थानम् ᵛआ ᵛअग्मन् आभिमुख्येन गच्छन्ति। गमेर्लुङि सिचो लुक्युपधालोपः॥

प्र णः इन्दो महे रणा आपो अर्षन्ति सिन्धवः। यद्गोभिर्वासयिष्यसे॥ १३॥

प्र। नः। इन्दो इति। महे। रणे। आपः। अर्षन्ति। सिन्धवः।
यत्। गोभिः। वासयिष्यसे॥ १३॥

हे ᵛइन्दो क्षरन् सोम ᵛनः अस्माकं स्वभूताय ᵛरणे रणाय। रणन्ति स्तुवन्ति देवानत्रेति रणो यज्ञः। अधिकरणे अप्। 'ङेर्यः' (पा. सू. ७.१.१३) इति न भवति सर्वविधीनां छन्दसि विकल्पितत्वात्। ᵛमहे महते रणाय यज्ञाय तदर्थं ᵛसिन्धवः स्यन्दमानाः ᵛआपः वसतीवर्याख्याः सोमसेकार्थं तदा ᵛअर्षन्ति प्रगच्छन्ति। ᵛयत् यदा त्वं ᵛगोभिः गव्यैर्दधिक्षीरादिभिः ᵛवासयिष्यसे आच्छाद्यसे मिश्रितो भवसि तदापो गच्छन्तीति॥

अस्य ते सख्ये वयमियक्षन्तस्त्वोतयः। इन्दो सखित्वमुश्मसि॥ १४॥

अस्य। ते। सख्ये। वयम्। इयक्षन्तः। त्वाऽऊतयः। इन्दो इति। सखिऽत्वम्। उश्मसि॥१४॥

हे ᵛइन्दो पवमान ᵛइयक्षन्तः यष्टुमिच्छन्तः पूजयितुमिच्छन्तो वा ᵛअस्य प्रसिद्धस्य ᵛते तव ᵛसख्ये सखिकर्मणि स्थिताः ᵛवयं ᵛत्वोतयः त्वदायत्तरक्षणाः सन्तः ᵛसखित्वं सखिभावमेव ᵛउश्मसि उश्मः कामयामहे॥

---

१. ग-त३-भ२.४.५-विसृजंति; भ१.७-विसृज्यंति। २. ग-नगरतः; त१.५.७-मंदुगतो; त२-मंदुर्गतो; त३-नंदूरतो; त४-मंदुर्गतयो; भ४-नंदुरातो। ३. ग-अविसंभूते; त-भ४-अविश्वभूते। ४. ग-भ१-मु-झेरमादेशः; त१-नोरमादेशः; त२.४.५.६.७-नो इमादेशः। ५. त१.५-इंदवः समुद्रः; त४-इंदवः समुद्राः।

आ पवस्व गविष्टये महे सोम नृचक्षसे । एन्द्रस्य जठरे विश ॥ १५ ॥

आ । पवस्व । गोऽइष्टये । महे । सोम । नृऽचक्षसे । आ । इन्द्रस्य । जठरे । विश ॥ १५ ॥

हे [v]सोम पवमान [v]गविष्टये अङ्गिरसां गवामन्वेष्ट्रे [v]महे महते [v]नृचक्षसे नृणां मनुष्याणां द्रष्ट्रे कर्मणेतृणां फलं पश्यते वा इन्द्राय [v]आ [v]पवस्व पात्रेषु दशापवित्रेण पूतो भव। ततः [v]इन्द्रस्य [v]जठरे उदर उदरभूते द्रोणकलशे वा [v]आ [v]विश प्रविश ॥ ॥ ९ ॥

महाँ असि सोम ज्येष्ठ उग्राणामिन्द ओजिष्ठः । युध्वा सञ्छश्वज्जिगेथ ॥ १६ ॥

महान् । असि । सोम । ज्येष्ठः । उग्राणाम् । इन्दो इति । ओजिष्ठः ।
युध्वा । सन् । शश्वत् । जिगेथ ॥ १६ ॥

हे [v]सोम त्वं [v]महान् [v]असि यतस्त्वं देवानां प्रीणयितासि खलु। त्वं [v]ज्येष्ठः प्रशस्यतमो भवसि। किंच हे [v]इन्दो पवमान त्वम् [v]उग्राणाम् उद्गूर्णबलानामपि [v]ओजिष्ठः ओजस्वितमो भवसि। त्वं [v]युध्वा [v]सन् शत्रुभिः सह युद्धं कुर्वन्नेव [v]शश्वत् सर्वदा [v]जिगेथ तांस्तेषां धनानि च जितवानसि। 'जि जये'। थलि 'सन्लिटोर्जेः' इत्यभ्यासादुत्तरस्य कवर्गादेशः ॥

य उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः । भूरिदाभ्यश्चिन्मंहीयान् ॥ १७ ॥

यः । उग्रेभ्यः । चित् । ओजीयान् । शूरेभ्यः । चित् । शूरऽतरः ।
भूरिऽदाभ्यः । चित् । मंहीयान् ॥ १७ ॥

[v]यः सोमः [v]उग्रेभ्यश्चित् उद्गूर्णेभ्यो बलवद्भ्योऽपि [v]ओजीयान् ओजस्वितमः। किंच यः [v]शूरेभ्यश्चित् वीरेभ्योऽपि [v]शूरतरः अत्यन्तसमर्थो भवति। तथा यः सोमः [v]भूरिदाभ्यः। 'डुदाञ् दाने'। 'आतो मनिन्°' इति विच्। बहुधनानां दातृभ्योऽपि [v]मंहीयान् दातृतमो भवति। तं त्वां वृणीमह इत्युत्तरेण संबन्धः ॥

त्वं सोम सूर एषस्तोकस्य साता तनूनाम् । वृणीमहे सख्याय वृणीमहे युज्याय ॥१८॥

त्वम् । सोम । सूरः । आ । इषः । तोकस्य । साता । तनूनाम् ।
वृणीमहे । सख्याय । वृणीमहे । युज्याय ॥ १८ ॥

हे [v]सोम [v]सूरः सुधीर्यः। यद्वा। सर्वस्य यागादिकर्मणि प्रेरकः [v]त्वम् [v]इषः अन्नानि अस्माकम् [v]आ धेहि[1]। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। किंच त्वं [v]तोकस्य पुत्रस्य [v]तनूनाम्। तन्वन्ति विस्तारयन्ति कुलमिति तन्वः पौत्राः। तेषां च [v]साता दाता भव। 'षणु दाने'। 'जनसन°' इति विट्। 'जनसन°' इत्यात्वम्। वयं तं त्वां [v]सख्याय सखिभावाय कर्मणे वा [v]वृणीमहे संभजामहे। तथा [v]युज्याय। युज्[2] सहायः। तस्य भावे कर्मणि वा ष्यञ्। संज्ञापूर्वकस्य विधेरनित्यादवृद्धिः। शत्रुवधादिलक्षणसाहाय्याय च वयं [v]वृणीमहे ॥

अग्निहोत्रे पूर्वस्यामाहुतौ हुतायामुपस्थितेम[3] यजमानेन प्रतिदिवसं प्रतिसंवत्सरं वानेन तृप्तेनाग्निरुपस्थेयः। सूत्रितं च–' आग्नेयीभिश्चाग्न आयूंषि पवस इति तिसृभिः संवत्सरे संवत्सरे ' (आश्व.

---

१. ग–वह। २. ग–युक्; म१.७–युक्तः। ३. त२.६.७–मु–°मुपोषितेन; त५–°मुपोषितेन।

श्रौ. २.३-४) इति । चौलादिकर्मसु चतस्र आज्याहुतयो होतव्यास्तत्रैव तिस्रः । सूत्रितं च—' तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादग्न आयूंषि पवस इति तिसृभिः ' (आश्व. गृ. १.४.३-४) इति । आधाने पवमानेष्टावग्नेः पवमानस्य ' अग्न आयूंषि ' इत्येषानुवाक्या । ' अग्ने पवस्व ' इत्येषा याज्या । सूत्रितं च—' प्रथमायामग्निरग्निः पवमानोऽग्न आयूंषि पवसेऽग्ने पवस्व स्वपाः' (आश्व. श्रौ. २.१) इति । पुनराधेये द्वितीयाज्यभागस्य ' अग्न आयूंषि ' इत्येषा वैकल्पिकानुवाक्या । सूत्रितं च— ' नित्यं पूर्वमनुब्राह्मणिनोऽग्न आयूंषि पवस इत्युत्तरम् ' (आश्व. श्रौ. २.८) इति ॥

अग्न आयूंषि पवस आ सुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ १९ ॥

अग्ने । आयूंषि । पवसे । आ । सुव । ऊर्जम् । इषम् । च । नः ।

आरे । बाधस्व । दुच्छुनाम् ॥ १९ ॥

हे [v]अग्ने पवमानरूप त्वमस्माकम् [v]आयूंषि जीवनानि[1] [v]पवसे रक्षसि[2]। [v]नः अस्माकम् [v]ऊर्जम् अन्नरसम् [v]इषम् अन्नं च [v]आ [v]सुव आभिमुख्येन प्रेरय। किंच [v]दुच्छुनाम्। रक्षोनामैतत्। रक्षांसि [v]आरे अस्मत्तो दूर एव [v]बाधस्व संपीडय ॥

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ॥ २० ॥

अग्निः । ऋषिः । पवमानः । पाञ्चऽजन्यः । पुरःऽहितः । तम् । ईमहे । महाऽगयम् ॥ २० ॥

[v]पाञ्चजन्यः । निषादपञ्चमाश्चत्वारो वर्णाः पञ्चजनाः । यद्वा । गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येते पञ्चजनाः । अथवा देवमनुष्या गन्धर्वाप्सरसः सर्पाः पितर इति ब्राह्मणेऽभिहिताः पञ्चजनाः । ' गम्भीराञ्ज्यः' इत्यत्र ' बहिर्देवपञ्चजनेभ्य इति वक्तव्यम् ' (का. ४. ३. ५८. १) इति वचनात् भवार्थे ञ्यप्रत्ययः । तेषां तत्तदभीष्टप्रदानेन स्वभूतः [v]ऋषिः सर्वस्य द्रष्टा [v]पवमानः तद्रूपोऽग्निः[3] [v]पुरोहितः कर्मार्थमृत्विग्भिः पुरो निहितः । [v]तं पूर्वोक्तलक्षणं [v]महागयं महद्भिर्देवादिभिरपि गीर्भिः[4] गातव्यम्। महान्ति प्रभूतानि यज्ञगृहाणि वा यस्य स तथोक्तः । तं पवमानगुणविशिष्टमग्निम् [v]ईमहे धनादीनि याचामहे ॥ ॥ १० ॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् । दधद्रयिं मयि पोषम् ॥ २१ ॥

अग्ने । पवस्व । सुऽअपाः । अस्मे इति । वर्चः । सुऽवीर्यम् ।

दधत् । रयिम् । मयि । पोषम् ॥ २१ ॥

हे [v]अग्ने [v]स्वपाः । ' सोर्मनसी॰' इत्युत्तरपदाद्युदात्तत्वम् । शोभनकर्मा त्वम् [v]अस्मे अस्मासु [v]सुवीर्यं शोभनवीर्योपेतं [v]वर्चः । ' वर्च दीप्तौ ' । तेजः [v]पवस्व आगमय । तथा भवान् [v]रयिं धनं पुत्रं वा [v]पोषम् । भावे कर्मणि वा घञ् । गवां पुष्टिं यद्वा गवादिकं मयि भवान् [v]दधत् दधातु । करोत्वित्यर्थः । दधातेर्लेट्यडागमः । ' धोर्लोपो लेटि वा ' (पा. सू. ७. ३. ७०) इत्याकारलोपः ॥

पवमानो अति स्रिधोऽभ्यर्षति सुष्टुतिम् । सूरो न विश्वदर्शतः ॥ २२ ॥

पवमानः । अति । स्रिधः । अभि । अर्षति । सुऽस्तुतिम् । सूरः । न । विश्वऽदर्शतः ॥ २२ ॥

१. ग-भ–' जीवनानि ' नास्ति; त३–जीवनाय। २. ग-भ–' रक्षसि ' नास्ति। ३. ग-त३-भ–' तद्रूपोऽग्निः' नास्ति। ४. त१.७-भ२–' गीर्भिः' नास्ति।

Vपवमानः सोमः Vक्षिधः हिंसकान् शत्रूनतिक्रम्य गच्छति। तथा Vसुष्टुतिं स्तोतृणां शोभनां स्तुतिम् Vअभ्यर्षति आभिमुख्येन गच्छति। 'ऋषी गतौ'। तौदादिकः। 'बहुलं छन्दसि' इति शप्। गुणः। किंच Vसूरो Vन सूर्य इव Vविश्वदर्शतः सर्वस्य द्रष्टा सर्वैर्वा दर्शनीयो भवति॥

स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः। इन्दुरत्यो विचक्षणः॥ २३॥

सः। मर्मृजानः। आयुऽभिः। प्रयस्वान्। प्रयसे। हितः। इन्दुः। अत्यः। विऽचक्षणः॥२३॥

Vआयुभिः कर्मनेतृभिर्मनुष्यैः Vमर्मृजानः पुनःपुनर्मृज्यमानः शोध्यमानः Vसः Vइन्दुः स सोमः Vअत्यः देवान् संततं गन्ता भवति। कीदृशः। Vप्रयस्वान् प्रीणनशीलान्नवान्। यद्वा। स्तोतृभ्यो देयत्वेनान्नयुक्तः। अत एव Vप्रयसे हवीरूपायान्नाय Vहितः Vविचक्षणः सर्वस्य प्रदर्शनकारी सर्वस्य विद्रष्टा वा सोमो देवानभिगन्ता भवति। 'चक्षिङ् व्यक्तायां वाचि'। 'अनुदात्तेतश्च हलादेः' इति युच्॥

पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत्। कृष्णा तमांसि जङ्घनत्॥ २४॥

पवमानः। ऋतम्। बृहत्। शुक्रम्। ज्योतिः। अजीजनत्। कृष्णा। तमांसि। जङ्घनत्॥२४॥

Vपवमानः Vऋतं सत्यं यथार्थभूतं Vबृहत् प्रभूतं सर्वदेशेषु व्यापकं Vशुक्रं दीप्यमानं श्वेतवर्णं Vज्योतिः तेजः Vअजीजनत् द्युलोक उदपादयत्। किं कुर्वन्। Vकृष्णा कृष्णवर्णानि Vतमांसि Vजङ्घनत् भृशं विनाशयन्। हन्तेर्यङ्लुकि शतरि रूपम्। 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्॥

पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः॥ २५॥

पवमानस्य। जङ्घ्नतः। हरेः। चन्द्राः। असृक्षत। जीराः। अजिरऽशोचिषः॥ २५॥

Vजङ्घ्नतः पुनःपुनस्तमांसि विनाशयतः Vहरेः हरितवर्णस्य Vअजिरशोचिषः सर्वत्र गमनशीलतेजसः Vपवमानस्य सोमस्य Vचन्द्राः। 'चदि आह्लादने'। देवानामाह्लादयित्र्यः Vजीराः क्षिप्रक्षरणशीला धाराः Vअसृक्षत सृजन्ति। पवित्रान्निर्गच्छन्तीत्यर्थः॥ ॥ ११॥

पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः॥ २६॥

पवमानः। रथिऽतमः। शुभ्रेभिः। शुभ्रऽशस्तमः। हरिऽचन्द्रः। मरुत्ऽगणः॥ २६॥

Vपवमानः देवः Vरथीतमः अतिशयेन रथवान्। 'इन्द्रथिनः' (पा. सू. ८. २. १७. १) इति ईकारः। तथा Vशुभ्रेभिः शोभायुक्तेभ्यस्तेजोभ्योऽपि Vशुभ्रशस्तमः अत्यन्तदीप्यमानश्च। यद्वा। निर्मलेभ्योऽपि निर्मलतमयशोयुक्तः Vहरिश्चन्द्रः। 'हस्वाच्चन्द्रोत्तरपदे' इति सांहितिकः सुट्। हरितवर्णदीप्तिहरितधारावान् वा Vमरुद्गणः। मरुतो यस्य गणः सहायभूताः स तथोक्तः। तादृशः सर्वाँल्लोकान्[1] स्वरश्मिभिः स्वदीप्तिभिः व्यभवत् व्याप्नोदित्युत्तरेणान्वयः॥

पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यम्॥ २७॥

पवमानः। वि। अश्नवत्। रश्मिऽभिः। वाजऽसातमः। दधत्। स्तोत्रे। सुऽवीर्यम्॥ २७॥

---

१. ग-त३-म५-सोमः सर्वान्; त२-सर्वान्।

[v]पवमानः सोमः[१] [v]रश्मिभिः स्वदीप्तिभिः [v]व्यश्नवत् सर्वं जगद्व्याप्नोतु। कीदृशः। [v]वाजसातमः अतिशयेनान्नस्य दाता बलस्य संभक्ता वा। तथा [v]स्तोत्रे पवमानस्तोत्रं कुर्वते मनवे [v]सुवीर्यं सुवीर्योपेतं पुत्रं धनं वा [v]दधत् विदधत् प्रयच्छन्[२] व्याप्नोतु। अभीतेर्लेट्यडागमः॥

प्र सुवान इन्दुरक्षाः पवित्रमत्यव्ययम्। पुनान इन्दुरिन्द्रमा॥ २८॥

प्र। सुवानः। इन्दुः। अक्षारिति। पवित्रम्। अति। अव्ययम्।
पुनानः। इन्दुः। इन्द्रम्। आ॥ २८॥

[v]सुवानः अभिषूयमाणः [v]इन्दुः सोमः [v]अव्ययम् अविमयमूर्णास्तुकेन निर्मितं दशापवित्रमतीत्य [v]प्र[३] [v]अक्षाः[३] कलशं प्रति प्रकर्षेण क्षरति। क्षरतेर्लुङि तिपि सिचि छान्दस इडागमाभावः। 'अतो र्लान्तस्य[४]' (पा. सू. ७. २. २) इति वृद्धिः। 'रात्सस्य' इति सिचो लोपः। रेफान्तं स्पष्टयितुमितिकारः। 'बहुलं छन्दसि' (पा. सू. ७.३.९७) इति ईडभावः। हल्ङ्यादिना तिलोपः। ततः [v]पुनानः पवित्रेण शुद्धः [v]इन्दुः सोमः [v]इन्द्रमा विशति। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥

एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः। इन्दुं मदाय जोहुवत्॥ २९॥

एषः। सोमः। अधि। त्वचि। गवाम्। क्रीळति। अद्रिऽभिः। इन्द्रम्। मदाय। जोहुवत्॥२९॥

[v]एषः अंशुरूपः [v]सोमः [v]गवां [v]त्वचि आनदुहचर्मणि। अधिशब्द उपर्यर्थद्योतकः। चर्मण्युपरि [v]अद्रिभिः ग्रावभिः सह [v]क्रीडति अभिषवाय संक्रीडते। किं कुर्वन्। [v]मदाय सोमपानेन मादयितुम् [v]इन्द्रं [v]जोहुवत् मृशमाह्वयन्। एतेन तत्काल इन्द्रविषयां स्तुतिं कुर्वन्तीत्यवगम्यते॥

यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः। तेन नो मृळ जीवसे॥ ३०॥

यस्य। ते। द्युम्नऽवत्। पयः। पवमान। आऽभृतम्। दिवः। तेन। नः। मृळ। जीवसे॥३०॥

हे [v]पवमान पूयमान हे सोम [v]दिवः द्युलोकात् [v]आभृतं श्येनरूपया गायत्र्याहृतं [v]द्युम्नवत् अन्नवत् यशोयुक्तं वा [v]पयः सोमलक्षणमन्नं [v]यस्य [v]ते तव स्वभूतं विद्यते तस्मात्त्वं [v]तेन अन्नेन [v]नः अस्मान् [v]जीवसे चिरजीवनाय [v]मृळ[५] मृळय सुखय॥ ॥ १२॥

'त्वं सोमासि' इति द्वात्रिंशदृचं सप्तमं सूक्तम्। आद्यतृचस्य बार्हस्पत्यो भरद्वाज ऋषिः। द्वितीयस्य मारीचः कश्यपः। तृतीयस्य राहूगणो गोतमः। चतुर्थस्य भौमोऽत्रिः। पञ्चमस्य गाथिनो विश्वामित्रः। षष्ठस्य भार्गवो जमदग्निः। सप्तमस्य मैत्रावरुणिर्वसिष्ठः। सूक्तशेषस्याङ्गिरसः पवित्रो वसिष्ठो वोभौ वा समुदितावृषी। 'पवस्व सोम मन्दयन्' इत्याद्यास्तिस्रो द्विपदा गायत्र्यः। 'अलार्यस्य' इत्येषा त्रिंशी पुरउष्णिक् आद्यद्वादशकद्वयष्टकवती सप्तविंश्येकत्रिंशीद्वात्रिंश्यस्तिस्रोऽनुष्टुभः। शिष्टा गायत्र्यः। 'अविता नो अजाश्वः' इत्याद्यास्तिस्रः पवमानपूषदेवत्याः पवमानसोमदेवताका वा। 'यसे पवित्रमर्चिषि' इत्याद्याः पञ्चर्चः पवमानाग्निदेवत्याः। आसां पञ्चानां मध्ये 'उभाभ्यां देव सवितः' इति तृतीया पवमानसवितृदेवताका[६] वा। चतुर्थी 'त्रिभिष्ट्वं देव सवितः'

---

१. ग-त३-भ५-पुनानः एतन्नामको देवः। २. ग-प्रयच्छतु; त२-प्रयन; भ१.७-प्रयच्छते। ३. ग-द्रोण°। ४. ग-त१.२-ल्रांतस्य; त४-ल्रांतस्य; त५-लतिस्य; त६-त्रांतस्य; भ४-लंतिस्य; भ१(२)-मु-पा. सू.-ल्रांतस्य। ५. ग-त-भ२.४-'मृळ' नास्ति। ६. त-भ२.५-पवमानसोमदेवताका; भ१-पवमानसवितृमदेवताका; भ४-पवमानसवितृसोमदेवताका।

इत्येषा विकल्पेन पवमानाग्निसवितृदेवताका । 'पुनन्तु माम्' इत्येषा विकल्पेन वैश्वदेवी। 'यः पावमानीरध्येति' इत्यादिके हे पवमानमण्डलाध्येतृस्तुतिप्रतिपादिके। अतः सैव देवता। शिष्टाः सर्वाः पवमानसोमदेवताकाः। तथा चानुक्रम्यते–'त्वं सोमासि द्वार्त्रिंशदरद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इति ह' तृचाः सप्त ऋषयः शेषे पवित्रो वसिष्ठो वोभौ वा पवस्व सोम तिस्रो नित्यद्विपदा गायत्र्योऽविता नस्तिस्रः पौष्ण्यो वा यस्ते पवित्रं पञ्चाग्नेयः सावित्र्यग्निसावित्री वैश्वदेवी वासामन्त्यास्त्रिष्टुबी पुरउष्णिक् सप्तविंशयनुष्टुबन्त्ये च ते पावमान्यध्येतृस्तुती' इति। गतः सूक्तविनियोगः ॥

त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे। पवस्व मंहयद्रयिः ॥ १ ॥

त्वम्। सोम। असि। धारयुः। मन्द्रः। ओजिष्ठः। अध्वरे। पवस्व। मंहयत्ऽरयिः ॥ १ ॥

हे [v]सोम अभिषूयमाण पवमान [v]मन्द्रः मादयितृतमः [v]ओजिष्ठः ओजस्वितमः [v]त्वम् [v]अध्वरे हिंसारहितेऽस्मदीये यज्ञे [v]धारयुः अभिषवणधाराकामः [v]असि भवसि। ततस्त्वं [v]मंहयद्रयिः स्तोतृभ्यः प्रदीयमानधनः सन् [v]पवस्व द्रोणकलशे ग्रहादिषु दशापवित्रेण पूतो भव। यद्वा। धारयुः। 'तद्वर्ये भाष्यते' इति मत्वर्थीयो युः। स हे सोम त्वं धारावानिव ततः पवस्वेति संबन्धः ॥

त्वं सुतो नृमादनो दध्न्वान्मत्सरिन्तमः। इन्द्राय सूरिरन्धसा ॥ २ ॥

त्वम्। सुतः। नृऽमादनः। दध्न्वान्। मत्सरिन्ऽतमः। इन्द्राय। सूरिः। अन्धसा ॥ २ ॥

हे सोम [v]नृमादनः नृणां कर्मणो नेतॄणामृत्विजां मादयिता अत एव [v]दध्न्वान् तेभ्यो धनानि धारयन् प्रयच्छन् यद्वा यज्ञस्य धारकः [v]सूरिः प्राज्ञः [v]सुतः अस्माभिरभिषुतः [v]त्वम् [v]अन्धसा हवीरूपेणान्नेन सह [v]इन्द्राय [v]मत्सरिन्तमः तस्यातिशयेन मदकारी भव। 'नाद्धस्य' इति नकारः ॥

त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तं शुष्ममुत्तमम् ॥ ३ ॥

त्वम्। सुस्वानः। अद्रिऽभिः। अभि। अर्ष। कनिक्रदत्। द्युऽमन्तम्। शुष्मम्। उत्ऽतमम् ॥ ३ ॥

हे पवमान सोम[२] [v]अद्रिभिः ग्रावभिः [v]सुष्वाणः सुन्वानोऽभिषूयमाणः [v]त्वं [v]कनिक्रदत् भृशं शब्दं कुर्वन् [v]अभ्यर्ष कलशं पात्राणि वा[३] अभिगच्छ[३]। तथा [v]द्युमन्तं दीप्तियुक्तम् [v]उत्तमं [v]शुष्मं शत्रूणां शोषकं बलं च प्रामुहि। यद्वा। एकवाक्यतया योजनीयः। सूयमानस्त्वं बलमभिगच्छेति। 'कदि क्रदि' आह्वाने। क्रदेर्यङ्लुकि नलोपोऽभ्यासस्य निगागमश्च 'दाधर्तिदर्धर्ति°' इति सूत्रेण सर्वं निपात्यते। तस्माच्छतृप्रत्ययः। 'अभ्यस्तानामादिः' इति स्वरः ॥

इन्दुर्हिन्वानो अर्षति तिरो वाराण्यव्यया। हरिर्वाजमचिक्रदत् ॥ ४ ॥

इन्दुः। हिन्वानः। अर्षति। तिरः। वाराणि। अव्यया। हरिः। वाजम्। अचिक्रदत् ॥ ४ ॥

[v]हिन्वानः ग्रावभिः प्रेर्यमाणोऽभिषूयमाणः [v]इन्दुः सोमः [v]अव्यया अविमयान्यवीनां स्वभूतानि [v]वाराणि वालानि। पवित्राणीत्यर्थः। तानि [v]तिरः तिरस्कृत्य व्यवधाय [v]अर्षति गच्छति। प्रभूतं निर्गच्छतीत्यर्थः। सोऽयं [v]हरिः हरितवर्णः सोमः [v]वाजम् अन्नम् [v]अचिक्रदत् शब्दयति। त्वया सह इन्द्रमहमाह्वयामीत्यर्थः[४] ॥

१. ग-त-म१.७-मु–'ह' नास्ति। २. ग-त३-म१.२.७ 'सोम' नास्ति। ३. ग-त-म-मु–वामिगच्छ। ४. त–इंद्रमहं माह्वयामीति वाजमाह्वयामीत्यर्थः; त३-म२.५–इंद्रमह मादयामीति वाजमाह्वयामीत्यर्थः।

इन्दो व्यव्यमर्षसि वि श्रवाँसि वि सौभगा । वि वाजान्त्सोम गोमतः ॥ ५ ॥

इन्दो इति । वि । अव्यम् । अर्षसि । वि । श्रवांसि । वि । सौभगा ।
वि । वाजान् । सोम । गोऽमतः ॥ ५ ॥

हे [v]इन्दो सोम [v]अव्यम् अविवाले भवं पवित्रं [v]वि [v]अर्षसि विविधं धाराभिर्गच्छसि । किंच [v]श्रवांसि हवीरूपाण्यन्नानि च [v]वि गच्छसि । तथा [v]सौभगा । सुभगस्य भावः सौभगम् । सुभगशब्द उङ्गात्रादिषु पठ्यते । तस्योत्तरपदवृद्धिर्नेष्यते । सौभगानि[1] धनानि विविधं प्रामोषि । तथा हे [v]सोम [v]गोमतः पशुमन्ति [v]वाजान् बलानि च विविधं प्रामुहि । तानि सर्वाण्यस्माकं प्रापयेत्यभिप्रायः ॥ ॥ १३ ॥

आ नं इन्दो शतग्विनं रयिं गोमन्तमश्विनम् । भरा सोम सहस्रिणम् ॥ ६ ॥

आ । नः । इन्दो इति । शतऽग्विनम् । रयिम् । गोऽमन्तम् । अश्विनम् ।
भर । सोम । सहस्रिणम् ॥ ६ ॥

हे [v]इन्दो पात्रेषु क्षरन् हे [v]सोम [v]नः अस्मभ्यम् [v]आ [v]भर संपादय देहि । किमिति उच्यते । [v]शतग्विनम् । शतं गावो यस्य स शतगुः । तद्वन्तं [v]गोमन्तं प्रशस्तपशुमन्तम् [v]अश्विनम् अश्वयुक्तं [v]सहस्रिणं सहस्रसंख्याकं [v]रयिं धनं पुत्रं वा आ भर ॥

पवमानास इन्दवस्तिरः पवित्रमाशवः । इन्द्रं यामेभिराशत ॥ ७ ॥

पवमानासः । इन्दवः । तिरः । पवित्रम् । आशवः । इन्द्रम् । यामेभिः । आशत ॥ ७ ॥

[v]पवित्रम् ऊर्णास्तुकेन निर्मितं दशापवित्रं [v]तिरः तिरस्कृत्य व्यवधायकं कृत्वा [v]पवमानासः कलशं प्रति बहुधाराः क्षरन्तः [v]आशवः क्षिप्रंमदकारिणश्रमसादीन् व्याप्नुवन्तो वा [v]इन्दवः सोमाः [v]यामेभिः स्वीयैर्गमनैः [v]इन्द्रम् [v]आशत व्याप्नुवन्ति ॥

ककुहः सोम्यो रस इन्दुरिन्द्राय पूर्व्यः । आयुः पवत आयवे ॥ ८ ॥

ककुहः । सोम्यः । रसः । इन्दुः । इन्द्राय । पूर्व्यः । आयुः । पवते । आयवे ॥ ८ ॥

[v]ककुहः । सोमः[2] सर्वकर्मकारयितृत्वेन सर्वेषां समुच्छ्रितोऽतिशयितो भवति । सोऽयं [v]पूर्व्यः पूर्वैः कृतोऽभिषुतः पूर्वं प्रातःकाले कृतो वा [v]आयुः इन्द्रमभिगन्ता[3] [v]इन्दुः पात्रेषु क्षरन् [v]सोम्यः । 'मये च' (पा. सू. ४. ४. १३८) इति यप्रत्ययः । सोममयः [v]रसः [v]आयवे सर्वत्र गन्त्रे [v]इन्द्राय [v]पवते कलशेषु पवित्रेण पूतो भवति । यद्वा । इन्द्रार्थमभिमुखं गच्छति । पवतिर्गतिकर्मा ॥

हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम् । अभि गिरा समस्वरन् ॥ ९ ॥

हिन्वन्ति । सूरम् । उस्रयः । पवमानम् । मधुऽश्चुतम् । अभि । गिरा । सम् । अस्वरन् ॥ ९ ॥

[v]उस्रयः कर्मकरणार्थमितस्ततः संचरन्त्योऽङ्गुलयः [v]मधुश्चुतं मदकरस्य रसस्य स्रावयितारं [v]सूरं सुधीर्यं सर्वस्य यागादिकर्मणि प्रेरकं [v]पवमानं सोमं [v]हिन्वन्ति अभिषवार्थं संप्रेरयन्ति । ततः स्तोतारः [v]गिरा स्तुत्या तमेनम् [v]अभि [v]समस्वरन् सम्यगभिष्टुवन्ति ॥

---

१. ग-त३-भ२.५-सौभाग्यानि । २. त३-यः सोमः । ३. त-इंद्र तेभिर्गता ।

अविता नो अजाश्वः पूषा यामनियामनि । आ भक्षत्कन्यासु नः ॥ १० ॥

अविता । नः । अजऽअश्वः । पूषा । यामनिऽयामनि । आ । भक्षत् । कन्यासु । नः ॥ १० ॥

vअजाश्वः । 'अजाः पूष्णः' इत्युक्तत्वादजा एवाश्वा वाहनानि यस्य स तथोक्तः । सः vपूषा एतन्नामको देवः vयामनियामनि सर्वस्मिन् गमने भौमदिव्यलक्षणे vनः अस्माकम् vअविता पालयिता भवतु । किंच vकन्यासु कमनीयास्वभिमतासु स्त्रीषु vनः अस्मान् vआ vभक्षत् आभजतु । अस्माकं कन्याः प्रयच्छत्वित्यर्थः । भजः सेवार्थाल्लेटि सिप्यडागमे रूपम् । यद्वा । अजाश्वोऽजवाहनः पूषा सर्वस्य पोषयिता सोमो यामनियामनि । यायते प्राप्यते देवैरत्रेति याम यज्ञः । तत्र यज्ञे नोऽस्माकमविता रक्षिता भवतु । तथा कन्यासु स्त्रीष्वित्यष्टास्वस्माना भक्षत्[1] प्रापयतु ॥ ॥ १४ ॥

अयं सोमः कपर्दिने घृतं न पवते मधु । आ भक्षत्कन्यासु नः ॥ ११ ॥

अयम् । सोमः । कपर्दिने । घृतम् । न । पवते । मधु । आ । भक्षत् । कन्यासु । नः ॥ ११ ॥

vकपर्दिने कल्याणमुकुटवते सोमाय पूष्णे वा तदर्थम् vअयं मादयितृत्वाभिषुतोऽस्मदीयः vसोमः vपवते च गच्छति । तं प्राप्नोति । तत्र दृष्टान्तः । vघृतं vन vमधु मादकं हविरूपं घृतं यथा सोमं पूष्णं वा गच्छति तद्वत् । ततः सः vकन्यासु[2] अस्मानागमयत्[2] ॥

अयं ते आघृणे सुतो घृतं न पवते शुचि । आ भक्षत्कन्यासु नः ॥ १२ ॥

अयम् । ते । आघृणे । सुतः । घृतम् । न । पवते । शुचि । आ । भक्षत् । कन्यासु । नः ॥ १२ ॥

हे vआघृणे । 'घृ क्षरणदीप्त्योः' । सर्वतो दीप्यमान पवमान पूषन् वा vते त्वदर्थं vसुतः अभिषुतः vअयं सोमः vपवते त्वदभिमुखमागच्छति । यद्वा । त्वदर्थं पात्रेषु पवित्रेण पूतो भवति क्षरति वा । तत्र दृष्टान्तः । vघृतं vन vशुचि । शुद्धं घृतं यथा त्वां प्राप्नोति तद्वत् । ततस्त्वमभिलषितान्यस्माकं देहीति ॥

वाचो जन्तुः कवीनां पवस्व सोम धारया । देवेषु रत्नधा असि ॥ १३ ॥

वाचः । जन्तुः । कवीनाम् । पवस्व । सोम । धारया । देवेषु । रत्नऽधाः । असि ॥ १३ ॥

हे vसोम vकवीनां क्रान्तप्रज्ञानां स्तोतृणां vवाचो vजन्तुः स्तुतेर्जनयिता । यद्वा । मेधाविनां मध्ये त्वमेव[3] वाचं जनयसि । अत्यन्तं वाग्मी त्वं vधारया vपवस्व द्रोणकलशं प्रहांश्च प्राप्नुहि । तत इन्द्रादिदेवेषु vरत्नधाः रमणशीलस्य सोमस्य निधाता vअसि भवसि । अथवा । देवेषु स्तोत्रकारिषु कर्म कुर्वाणेषु वास्मासु रत्नस्य कनकादेर्दाता भवसि ॥

प्रावस्तोत्रे गाणगारिमतेनाभिरूपकरणे कलशेषु सोम आसिच्यमाने वक्ष्यमस्य तृचस्य 'आ कलशेषु' इत्यादिके द्वितीयातृतीये । सूत्रितं च—'आ कलशेषु धावति श्येनो वर्म वि गाहत इति द्वे' (आश्व. श्रौ. ५. १२) इति ॥

आ कलशेषु धावति श्येनो वर्म वि गाहते । अभि द्रोणा कनिक्रदत् ॥ १४ ॥

आ । कलशेषु । धावति । श्येनः । वर्म । वि । गाहते । अभि । द्रोणा । कनिक्रदत् ॥ १४ ॥

१. ग-त-भ१.२.४-'भक्षत्' नास्ति । २. ग-कन्याः अस्मानागमयत्; त१-कन्यास्तस्मानागमयत्; त२-कन्यास्वमानागमयत्; भ१-कन्यास्मानागमयत्; भ४-कन्यामयत्; भ७-कन्यासु नोस्मानागमयत् । ३. त-'त्वमेव' नास्ति ।

ऋत्विग्भिरभिषिच्यमानः कलशेषु सोमाधारेषु द्रोणकलशेषु आ धावति सर्वतो गच्छति । श्येनः । लुप्तोपममेतत् । यथा श्येनः वर्म वरणीयं कुलायं वि गाहते प्रविशति तद्वत् । कनिक्रदत् अत्यन्तं शब्दं कुर्वन् द्रोणा द्रोणकलशानभिगच्छति च । यद्वा । द्रोणाधवनीयपूतभृत्संज्ञकाभिप्रायम् । एकः सिच्यमानः सोमो द्रोणं प्रति शब्दायमानः प्रथमं गच्छति । ततः पश्चात् पात्रद्वयमिति ॥

परि प्र सोम ते रसोऽसर्जि कलशे सुतः । श्येनो न तक्तो अर्षति ॥ १५ ॥

परि । प्र । सोम । ते । रसः । असर्जि । कलशे । सुतः । श्येनः । न । तक्तः । अर्षति ॥ १५ ॥

हे सोम कलशेषु द्रोणाभिधानेषु सुतः अभिषुतः ते तव रसः परि प्र असर्जि परितो ग्रहेषु चमसेषु च प्रसृष्टो विभक्तो भवति । कथमिव । श्येनो न तक्तः । तकिर्गतिकर्मा । गमनशीलः श्येनः पक्षी यथा सर्वत्र अर्षति गच्छति तद्वत् । यद्वा । यथा श्येनः सर्वतो गन्ता तद्वत्तक्तः पात्रेषु गतः सोमोऽर्षति इन्द्रादिदेवानागच्छतु । अर्तेर्लेटि सिपि वा रूपम् । पूर्वम् ' ऋषी गतौ ' इत्यस्माल्लटि शपि रूपम् ॥ ॥ १५ ॥

पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ॥ १६ ॥

पवस्व । सोम । मन्दयन् । इन्द्राय । मधुमत्ऽतमः ॥ १६ ॥

हे सोम मधुमत्तमः अतिशयेन मधुररसवांस्त्वं मन्दयन् मादयिता भवन् । यद्वा । इन्द्राय । ' क्रियाग्रहणं कर्तव्यम् ' इति संप्रदानम् । इन्द्रं मोदमानः सन् पवस्व इन्द्रार्थमागच्छ ॥

असृग्रन् देववीतये वाजयन्तो रथाइव ॥ १७ ॥

असृग्रन् । देवऽवीतये । वाजऽयन्तः । रथाःऽइव ॥ १७ ॥

एतेऽभिषुताः सोमाः वाजयन्तः सन्तः[३] देववीतये देवानां पानाय असृग्रन् विसृज्यन्ते ऋत्विग्भिः प्रदीयन्ते । तत्र दृष्टान्तः । रथाइव । वाजयन्तः शत्रुधनानि बलानि वा स्वामिन इच्छन्तो रथा देववीतये देवानां गमनाय यथा विसृज्यन्ते तद्वत् ॥

ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत ॥ १८ ॥

ते । सुतासः । मदिन्ऽतमाः । शुक्राः । वायुम् । असृक्षत ॥ १८ ॥

मदिन्तमाः अतिशयेन मादयितारः शुक्राः दीप्यमानाः सुता[४] अभिषुताः ते सोमाः वायुं शब्दम् असृक्षत असृजन् अकार्षुः । यद्वा वायुमेव सोमपानार्थमसृजन् । सोमेषु सुतेषु[५] सत्सु[६] वायुस्तत्पानार्थमागच्छति खलु ॥

ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि । दधत्स्तोत्रे सुवीर्यम् ॥ १९ ॥

ग्राव्णा । तुन्नः । अभिऽस्तुतः । पवित्रम् । सोम । गच्छसि । दधत् । स्तोत्रे । सुऽवीर्यम् ॥ १९ ॥

---

१. ग-भ४–सृज्यते; त-भ१.२.७–प्रसृज्यते; मु–प्रासर्जि परिप्रसृज्यते । २. त३-भ१.४.७–विभक्तो भवत् । ३. ग-भ५–यजमानानामन्नमिच्छंतः; त३-भ२.४–यजमानानामन्नमिच्छंतः संतः । ४. भ१ (२)–सुतासः । ५. त–' सुतेषु ' नास्ति । ६. ग-त३-भ१.७–' सत्सु ' नास्ति ।

हे vसोम vआज्ञा vतुन्नः अभिपीडितोऽभिषुतस्त्वं स्तोतृभिः vअभिष्टुतः सन् vपवित्रं[1] vगच्छसि प्राप्नोषि। किं कुर्वन्। vस्तोत्रे स्तोत्रकारिणे जनाय vसुवीर्यं शोभनवीर्योपेतं धनादिकं vदधत् विदधत् प्रयच्छन् ॥

एष तुन्नो अभिष्टुतः पवित्रमति गाहते। रक्षोहा वारमव्ययम् ॥ २० ॥

एषः। तुन्नः। अभिऽस्तुतः। पवित्रम्। अति। गाहते। रक्षःऽहा। वारम्। अव्ययम्॥ २० ॥

vतुन्नः। 'तुद व्यथने'। ग्रावभिरभिव्यथितः सुतः अत एव सर्वैः vअभिष्टुतः vएषः अस्मदीयः सोमः vरक्षोहा कर्मविघ्नकारिणां रक्षसां पापानां वा[2] हन्ताभवत्। vअव्ययम् अविमयमव्ययवभूतं vवारं वालं तेन कृतं vपवित्रं दशापवित्रम् vअति अतिक्रम्य vगाहते द्रोणकलशं प्रविशति ॥ ॥१६॥

यदन्ति यच्च दूरके भयं विन्दति मामिह। पवमान वि तज्जहि २१ ॥

यत्। अन्ति। यत्। च। दूरके। भयम्। विन्दति। माम्। इह। पवमान। वि। तत्। जहि ॥२१॥

हे vपवमान पूयमान पुनान वा सोम vयत् vभयम् vअन्ति अन्तिके तथा vयच्च भयं vदूरके अतिदूरे देशे अथवा vइह अस्मिन् प्रदेशेऽपि भयं vमां vविन्दति लभते प्राप्नोति vतत् भयं त्वं vवि vजहि विशेषेण नाशय। यद्वा। इहेति यज्ञोऽयं लोको वा। अस्मिन् क्रियमाणे यज्ञेऽस्मिँल्लोके वा यद्भयं व्याप्नोति तन्नाशयेत्यर्थः ॥

पवमानः सो अद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु नः ॥२२॥

पवमानः। सः। अद्य। नः। पवित्रेण। विऽचर्षणिः। यः। पोता। सः। पुनातु। नः ॥२२॥

vसः तादृशः प्रसिद्धः vविचर्षणिः सर्वस्य द्रष्टा vपवमानः vअद्य इदानीमेव vपवित्रेण पापशोधकेन तेजसा[3] vनः अस्मान् vपुनातु पापरहितान् करोतु ॥

पवित्रेष्टयां प्रथमाज्यभागस्य याज्या 'यस्ते पवित्रम्' इत्येषा। सूत्रितं च—'यस्ते पवित्रमर्चिष्या कलशेषु धावतीति पवित्र इत्येते[4]' (आश्व. श्रौ. २. १२) इति ॥

यत्ते पवित्रमर्चिष्यग्ने वितततमन्तरा। ब्रह्म तेन पुनीहि नः ॥ २३ ॥

यत्। ते। पवित्रम्। अर्चिषि। अग्ने। विऽततम्। अन्तः। आ। ब्रह्म। तेन। पुनीहि। नः॥२३॥

हे पवमानगुणविशिष्ट vअग्ने vते त्वदीयं vपवित्रं शोधकं vयत् स्वतेजः vअर्चिषि सौरवैद्युतादितेजसि vअन्तः मध्ये vआ vविततम् आविस्तृतं विद्यते। यद्वा। हे अग्ने ते तव स्वभूतेऽर्चिषि तेजस्यन्तर्मध्ये यत्पवित्रं शुद्धयुत्पादकं सामर्थ्यमस्ति। vतेन तादृशेन[5] तेजसा vब्रह्म पुत्रादिवर्धनकारि vनः शरीरं vपुनीहि पापरहितं पूतं कुरु ॥

यत्ते पवित्रमर्चिष्यदग्ने तेन पुनीहि नः। ब्रह्मणस्पतेः पुनीहि नः ॥ २४ ॥

यत्। ते। पवित्रम्। अर्चिऽअत्। अग्ने। तेन। पुनीहि। नः। ब्रह्मऽअस्पतेः। पुनीहि। नः ॥२४॥

---

१. ग-त३-म५-पवित्रं दशापवित्रं। २. त१.५-म७-च; त४-चा। ३. त७-तेजसा पोता स्वयं पवित्रः सन्; मु-तेजसा यः पोता स्वयं पवित्रः सन्। ४. ग-इत्येका; त-भ-मु-इत्येक। ५. ग-तत्सदृशेन।

हे अग्ने [v]पवित्रं शोधकम् [v]अर्षेवत् अर्षिवत् । 'छन्दसीरः' इति मतुपो वत्वम् । सौरादितेजोयुक्तं [v]ते त्वदीयं [v]यत् तेजो विद्यते [v]तेन स्वीयेनैव तेजसा [v]नः अस्मान् [v]पुनीहि पूतान् कुरु । किंच [v]ब्रह्मसवैः ब्राह्मणकर्तृकसोमाभिषवैः । यद्वा । ब्रह्म सोमः । तस्याभिषवैः नोऽस्मान् पुनीहि ॥

उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ २५ ॥

उभाभ्याम् । देव । सवितरिति । पवित्रेण । सवेन । च । माम् । पुनीहि । विश्वतः ॥ २५ ॥

हे [v]सवितः सर्वस्य प्रेरक हे [v]देव द्योतमान सोम त्वं [v]पवित्रेण पापशोधकेन त्वदीयेन तेजसा [v]सवेन सोमाभिषवेण [v]च एताभ्याम् [v]उभाभ्यां [v]विश्वतः सर्वतः [v]मां [v]पुनीहि पूतं कुरु ॥ ॥१७॥

त्रिभिष्ट्वं देव सवितुर्वषिष्ठैः सोम धामभिः । अग्ने दक्षैः पुनीहि नः ॥ २६ ॥

त्रिऽभिः । त्वम् । देव । सवितः । वषिष्ठैः । सोम । धामऽभिः । अग्ने । दक्षैः । पुनीहि । नः ॥२६॥

हे [v]देव स्तुत्य दीप्यमान वा हे [v]सवितः सर्वस्य स्वस्वकर्मणि चोदयितर्हे [v]सोम पवमानगुणविशिष्ट हे [v]अग्ने [v]त्वं [v]वषिष्ठैः वृद्धतमैः अत एव [v]दक्षैः सामर्थ्यवद्भिः [v]त्रिभिः [v]धामभिः शरीरैः अग्निवायुसूर्यात्मकैस्त्रिभिः शरीरैः [v]नः अस्मान् [v]पुनीहि परिशुद्धान् कुरु ॥

पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।
विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥ २७ ॥

पुनन्तु । माम् । देवऽजनाः । पुनन्तु । वसवः । धिया ।
विश्वे । देवाः । पुनीत । मा । जातऽवेदः । पुनीहि । मा ॥ २७ ॥

[v]देवजनाः । देवानां जनः प्रादुर्भावो येषां यज्ञेष्विति देवजना यजमानाः । यद्वा इन्द्रादिदेवगणाः । [v]मां [v]पुनन्तु परिपूतं कुर्वन्तु । तथा [v]वसवः वासका[1] देवाः[2] [v]धिया आत्मीयेन कर्मणा मां [v]पुनन्तु । अथ प्रत्यक्षः । हे [v]विश्वे [v]देवाः सर्वे देवाः [v]मा मां [v]पुनीत पूतं कुरुत । हे [v]जातवेदः जातानि भूतजातानि वेत्तीति यद्वा जातप्रज्ञ हे अग्ने [v]मा मां [v]पुनीहि ॥

प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ॥ २८ ॥

प्र । प्यायस्व । प्र । स्यन्दस्व । सोम । विश्वेभिः । अंशुऽभिः । देवेभ्यः । उत्ऽतमम् । हविः ॥२८॥

हे [v]सोम [v]प्र [v]प्यायस्व अस्मान् प्रकर्षेण वर्धय[3] । यद्वा देवान् सोमेन वर्धय । किंच [v]विश्वेभिरंशुभिः सर्वैस्त्वदीयैरंशुभिः [v]देवेभ्यः देवार्थम् [v]उत्तमं प्रशस्ततमं [v]हविः सोमरूपं [v]प्र [v]स्यन्दस्व कलशादीन् प्रति प्रस्व । प्रयच्छेति यावत् ॥

अग्नीषोमप्रणयने 'उप प्रियम्' इत्येषा । सूत्रितं च—'उप प्रियं पनिप्रतमित्यर्धर्चे आरभेत्' (आश्व. श्रौ. ४. १०) इति ॥

उप प्रियं पनिप्रतं युवानमाहुतीवृधम् । अगन्म बिभ्रतो नमः ॥ २९ ॥

उप । प्रियम् । पनिप्रतम् । युवानम् । आहुतिऽवृधम् । अगन्म । बिभ्रतः । नमः ॥ २९ ॥

[v]प्रियं सर्वस्य प्रीणयितारं [v]पनिप्रतम् अत्यन्तं शब्दायमानं [v]युवानं तरुणम् [v]आहुतिवृधम् आहुतिभिर्वर्धनीयं पवमानं वयं [v]नमः[3] हविर्नमस्कारं वा [v]बिभ्रतः धारयन्तः सन्तः [v]उप [v]अगन्म

---

१. ग–अपि । २. ग-त३-भ१.२.४.५–प्रवर्धय । ३. ग–विप्राः ।

उपगच्छेम। गमेर्लुकि 'मन्त्रे घस०' इति च्लेर्लुकि सति 'म्वोश्च' इति नकारः। पनिमेतम्। पनेः स्तुत्यर्थस्य यङ्लुकि रूपम्। 'दाधर्ति दर्धर्ति०' इति सूत्रे इतिकरणस्य प्रदर्शनार्थत्वादन्नाभ्यासस्य निगागम उपधालोपश्च निपात्यते ॥

अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम। आखुं चिदेव देव सोम ॥३०॥

अलाय्यस्य। परशुः। ननाश। तम्। आ। पवस्व। देव। सोम।
आखुम्। चित्। एव। देव। सोम ॥ ३० ॥

vअलाय्यस्य। अर्तेरौणादिक आय्यप्रत्ययः। कपिलकादित्वाल्लत्वम्। अभिगमनशीलस्य शत्रोः vपरशुः छेदकः पवमानः vतम् एव शत्रुं vननाश नाशयतु नास्मानपापान्। ततो हे vदेव दीप्यमान vसोम vआ vपवस्व अस्मदाभिमुख्येन गच्छ। किंच हे vदेव द्योतमान स्तुत्य वा हे vसोम vआखुं vचित्। 'खनु अवदारणे'। सर्वस्याहन्तारमपि vतं शत्रुम् vएव बाधस्व नास्मानपापानिति ॥

यः पावमानीरध्येत्यृषिभिः संभृतं रसम्।
सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥ ३१ ॥

यः। पावमानीः। अधिऽएति। ऋषिऽभिः। सम्ऽभृतम्। रसम्।
सर्वम्। सः। पूतम्। अश्नाति। स्वदितम्। मातरिश्वना ॥ ३१ ॥

vयः जनः[1] vपावमानीः पवमानदेवताकाः सर्वा ऋचः तद्रूपम् vऋषिभिः सूक्तद्रष्टृभिर्मधुच्छन्दःप्रभृतिभिः vसंभृतं संपादितं vरसं वेदरसभूतं सारं सूक्तसंघम् vअध्येति अधीते vसः जनः vसर्वं भोज्यजातं vपूतं परिशुद्धमेव vअश्नाति। परिपूतं पापरहितमन्नं भक्षयति। कथमस्य पूतत्वं तत्राह। स्वस्याश्नानात्प्रागेव vमातरिश्वना। मातर्यन्तरिक्षे श्वसितीति मातरिश्वा वायुः। स च वायुः पवित्रमेव। पवित्रेण वायुना vस्वदितं स्वादूकृतं परिपूतमेवान्नं पश्चात् स नरोऽश्नाति ॥

पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम्।
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥ ३२ ॥

पावमानीः। यः। अधिऽएति। ऋषिऽभिः। सम्ऽभृतम्। रसम्।
तस्मै। सरस्वती। दुहे। क्षीरम्। सर्पिः। मधु। उदकम् ॥ ३२ ॥

vयः ब्राह्मणः vपावमानीः पवमानदेवताका ऋचः तदात्मकम् vऋषिभिः मधुच्छन्दआदिभिः vसंभृतं vरसं वेदसारं सूक्तसंघम् vअध्येति अधीते vतस्मै पवमानाध्ययनं कुर्वते जनाय vसरस्वती सर्वत्र सरणवती वाग्देवता vक्षीरं यज्ञसाधनभूतं पयः vसर्पिः तादृशं घृतं vमधु मदकरम् vउदकं सोमं vदुहे स्वयमेव दोग्धि। एनं नरं यागादिपरं वेदशास्त्रविदं करोतीत्यर्थः। 'दुह प्रपूरणे'। कर्मकर्तरि 'न दुहस्नुनमां यक्चिणौ' इति यकः प्रतिषेधः। 'लोपस्त आत्मनेपदेषु' इति तलोपः॥ ॥१८॥ ॥३॥

चतुर्थेऽनुवाकेऽष्टादश सूक्तानि। तत्र 'प्र देवम्' इति दशर्चं प्रथमं सूक्तं भलन्दनपुत्रस्य वत्सप्रेरार्षं पवमानसोमदेवताकम्। दशमी त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रम्यते—'प्र देवं दश वत्सप्रिर्भालन्दनस्त्रिष्टुबन्तं ह' इति। गतो विनियोगः ॥

१. ग-त३-भ२.५—यजमानः।

प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।
बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥ १ ॥

प्र । देवम् । अच्छ । मधुऽमन्तः । इन्दवः । असिस्यदन्त । गावः । आ । न । धेनवः ।
बर्हिऽसदः । वचनाऽवन्तः । ऊधऽभिः । परिऽस्रुतम् । उस्रियाः । निःऽनिजम् । धिरे ॥ १ ॥

[v]मधुमन्तः मादकरससंयुक्ताः[१] [v]इन्दवः सोमाः [v]देवं द्योतमानं सोमात्मकमिन्द्रम् [v]अच्छ प्रति [v]प्र [v]असिष्यदन्त प्रस्यन्दन्ते । ग्रहादिषु प्रक्षरन्ति । स्यन्दतेर्ण्यन्तस्य लुङि चङि रूपम् । तत्र दृष्टान्तः । [v]गाव [v]आ [v]न [v]धेनवः । पयस्विन्यः प्रीणयित्र्यो गावो यथा वत्सं प्रति पयांसि प्रस्रवन्ति तद्वत् । किंच [v]बर्हिषदः बर्हिषि सीदन्तः [v]वचनावन्तः हम्भारवादिशब्दवन्तः [v]उस्रियाः । गोनामैतत् । तादृश्यो गावः [v]ऊधभिः पयोधारकैः स्वैः स्वैरूधभिः [v]परिस्रुतं[२] परितः स्रवणशीलं [v]निर्णिजं शुद्धं पयोभूतं सोमरसं [v]धिरे दधिरे । इन्द्रार्थं धारयन्ति ॥

स रोरुवदभि पूर्वा अचिक्रददुपारुहः श्रथयन्त्स्वादते हरिः ।
तिरः पवित्रं परियन्नरु ज्रयो नि शर्याणि दधते देव आ वरम् ॥ २ ॥

सः । रोरुवत् । अभि । पूर्वीः । अचिक्रदत् । उपऽआरुहः । श्रथयन् । स्वादते । हरिः ।
तिरः । पवित्रम् । परिऽयन् । उरु । ज्रयः । नि । शर्याणि । दधते । देवः । आ । वरम् ॥ २ ॥

[v]रोरुवत् कलशादिकं प्रति अत्यन्तं शब्दं कुर्वन् [v]सः सोमः [v]पूर्वाः मुख्याः स्तोतॄणां स्तुतीः [v]अभि [v]अचिक्रदत् अभिमुखमध्वनयत् । स्तुतयः साधीयस्य इति प्रतिध्वनिमङ्गीकारमकार्षीदित्यर्थः । किंच [v]हरिः हरितवर्णः [v]उपारुहः । रोहतेस्ताच्छीलिकः क्विप् । उपारोहणशीला ऊर्ध्वं प्रादुर्भवनशीला ओषधीः [v]श्रथयन् अग्रे विश्लेषयन् [v]स्वादते स्वादूकरोति । ताः फलिनीः कुर्वन् स्वादुयुक्ता विदधातीत्यर्थः । तथा [v]पवित्रम् अविबालात्मकं दशापवित्रं [v]तिरः तिरस्कृत्य पात्राणि प्रत्यात्मनः क्षरणकाले पवित्रं व्यवधायकं कृत्वा [v]परियन् परितो गच्छन् सोमः [v]उरु महान्तं [v]ज्रयः वेगं करोति । ततः [v]शर्याणि । 'शॄ हिंसायाम्' । हिंसितव्यानि यद्वा शरेण हन्तव्यानि रक्षांसि [v]नि [v]दधते निक्षिपति न्यक्करोति । हिनस्तीति यावत् । पश्चात् [v]देवः दीप्यमानः सोमः [v]वरं वरणीयं धनं सोमदातृभ्यो यजमानेभ्यः [v]आ दधते आधारयति । प्रयच्छतीत्यर्थः । दधातेः लेट्यडागमे[३] 'धोर्लोपो लेटि वा' इत्याकारलोपः ॥

वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता ।
मही अपारे रजसी विवेविददभिव्रजन्नक्षितं पाज आ ददे ॥ ३ ॥

वि । यः । ममे । यम्या । संयती इति सम्ऽयती । मदः । साकम्ऽवृधा । पयसा । पिन्वत् । अक्षिता ।
मही इति । अपारे इति । रजसी इति । विऽवेविदत् । अभिऽव्रजन् । अक्षितम् । पाजः । आ । ददे ॥ ३ ॥

[v]यः [v]मदः । माद्यत्यनेनेति मदः सोमरसः । [v]यम्या युगलभूते [v]संयती परस्परं संगच्छमाने द्यावापृथिव्यौ [v]वि [v]ममे विशेषेण निर्मितवान् ततः ते [v]साकंवृधा सहैव वर्धनशीले तथा [v]अक्षिता

---

१. ग–मधुररसयुक्ताः; त३-भ२–मदकररसयुक्ताः । २. त-मु–ताभ्यः परिस्रुतं । ३. त३-भ१. ५.७–लेट्यडागमे ।

अक्षीणे सामर्थ्यवत्यौ यथा भविष्यतः तथा स सोमः [v]पयसा पयोरूपेण स्वीयरसेन [v]पिन्वत् असिञ्चत्। अवर्धयदिति यावत्। किंच [v]महौ महत्यौ अत एव [v]अपारे पर्यन्तरहिते [v]रजसी। द्यावापृथिवीनामैतत्। ते द्यावापृथिव्यौ [v]विवेविदत्। 'विद ज्ञाने'। बहुलमिकि शतरि रूपम्। अभ्यासस्वरः[1]। इयं पृथिवीयं द्यौरिति सर्वेषां विविच्य तेजसा प्रज्ञापयन् [v]अभिव्रजन् अभितः सर्वतो गच्छन् स सोमः [v]अक्षितम् अक्षीणमविनश्वरं [v]वाजः बलम् [v]आ [v]ददे स्वीकृतवान्। अत्यन्तं बलवानभवदित्यर्थः॥

स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदम्।
अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः॥ ४॥

सः। मातरा। विऽचरन्। वाजयन्। अपः। प्र। मेधिरः। स्वधया। पिन्वते। पदम्।
अंशुः। यवेन। पिपिशे। यतः। नृऽभिः। सम्। जामिऽभिः। नसते। रक्षते। शिरः॥४॥

[v]मेधिरः। 'मेधास्थाभ्यामिरनिरचौ' (पा. सू. ५.२.१०९.३) इतीरन्प्रत्ययो मत्वर्थीयः। मेधावान् प्राज्ञः [v]सः सोमः [v]मातरा मातरौ जगतो निर्मात्र्यौ द्यावापृथिव्यौ [v]विचरन् अन्तरेणान्यन्तं चरन् तथा [v]अपः अन्तरिक्षस्थितान्युदकानि [v]वाजयन् प्रेरयन्। वजेर्ण्यन्तस्य[2] शतरि रूपम्। तादृशः [v]स्वधया सकुलक्षणेनान्नेन सह [v]पदं स्वस्थानमुत्तरवेदिरूपं [v]प्र [v]पिन्वते प्रकर्षेणाप्याययति। ततः [v]नृभिः कर्मनेतृभिर्ऋत्विग्भिः [v]यतः संयतः [v]अंशुः सोमः [v]यवेन [v]पिपिशे। 'पिश अवयवे'। अवयवत्वेन कृतः। मिश्रित इत्यर्थः। सोमस्तु यवसकुभिः श्रीयते खलु। सोऽयं [v]जामिभिः एकस्मात्पाणेरुत्पन्नाभिरङ्गुलीभिः [v]सं [v]नसते संगच्छते च। [v]शिरः शीर्णं भूतजातं [v]रक्षते च[3]। स्वीयरसेन रक्षति पोषयति। नसतिर्गतिकर्मा। 'चादिलोपे विभाषा' इति न निघातः॥

सं दक्षेण मनसा जायते कविर्ऋतस्य गर्भो निहितो यमा परः।
यूना ह सन्ता प्रथमं वि जज्ञतुर्गुहा हितं जनिम नेममुद्यतम्॥ ५॥

सम्। दक्षेण। मनसा। जायते। कविः। ऋतस्य। गर्भः। निऽहितः। यमा। परः।
यूना। ह। सन्ता। प्रथमम्। वि। जज्ञतुः। गुहा। हितम्। जनिम। नेमम्। उतऽयतम्॥५॥

प्रसङ्गात् सोमसूर्ययोराविर्भावमाह। [v]दक्षेण प्रवृद्धेन [v]मनसा सह [v]सं [v]जायते पृथिव्याः[4] सम्यग्जायते। तथा [v]ऋतस्य उदकस्यैव [v]गर्भः गर्भस्थानीयः। यद्वा। सत्यस्य यज्ञस्य मध्ये गर्भः शब्दनीयः स्तुत्यः। स एव सोमः [v]परः परस्तादन्तरिक्षे [v]यमा यमेन नियमेन देवैः [v]निहितः सः। सूर्याद्धि वृष्टिर्भवति। तस्मात्सोमः सूर्यात्मकतयावस्थित इत्यर्थः। एवं [v]यूना। [v]ह इत्यवधारणे। युवानावेव सन्तौ तौ [v]प्रथमं जननकाले [v]वि [v]जज्ञतुः। अयं सोमोऽयं सूर्य इति विशेषेण ज्ञायते। तयोश्चार्धं [v]जनिम जन्म [v]गुहा गुहायां [v]हितं निहितं भवति। तयोः [v]नेमम् अर्धं च[5] [v]उद्यतं[6] प्रकाशितं भवति। दिवा सूर्यः प्रादुर्भवति रात्रौ चन्द्रमा इति॥ ॥ १९॥

युन्द्रस्य रूपं विविदुर्मनीषिणः श्येनो यदन्धो अभरत्परावतः।
तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तमंशुं परियन्तमृग्मियम्॥ ६॥

१. ग-त३-भ-अभ्यस्तस्वरः; त४.५-अभ्यस्वरः। २. त४-भ२.७-वाजेर्ण्यंतस्य। ३. भ६-'च' नास्ति। ४. ग-पृथिव्यां। ५. त१.२.५.६-चोद्यतमुद्यत; त४-वोद्यतमुद्यत; भ६-चोद्यतमुद्यतं; भ७-चोद्यत।

मन्द्रस्य । रूपम् । विविदुः । मनीषिणः । श्येनः । यत् । अन्धः । अभरत् । पराऽवतः ।
तम् । मर्जयन्त । सुऽवृधम् । नदीषु । आ । उशन्तम् । अंशुम् । परिऽयन्तम् । ऊर्म्मियम् ॥६॥

vमनीषिणः प्राज्ञा यष्टारः vमन्द्रस्य मदकरस्य तस्य सोमस्य vरूपं vविविदुः जानन्ति । vयत् vअन्धः यत् सोमलक्षणमन्नं vश्येनः गायत्रीरूपः पक्षी vपरावतः दूरात् द्युलोकात् vआभरत् आजहार । 'हृग्रहोर्भश्छन्दसि' इति भकारः । vतं तादृशं vसुवृधं सुष्ठु वर्धमानं सुवर्धयितारं वा vअंशुं सोमं vनदीषु नदमानासु[1] वसतीवर्याख्यास्वप्सु vआ vमर्जयन्त ऋत्विज आशोधयन्ति । अलंकुर्वन्ति वा । कीदृशम् । vउशन्तं[2] देवान् कामयमानं vपरियन्तं परितो गच्छन्तम् vऊर्म्मियम् ऊर्गर्हं स्तुत्यं सोममामर्जयन्तीति ॥

त्वां मृजन्ति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितम् ।
अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये ॥ ७ ॥

त्वाम् । मृजन्ति । दश । योषणः । सुतम् । सोम । ऋषिऽभिः । मतिऽभिः । धीतिऽभिः । हितम् ।
अव्यः । वारेभिः । उत । देवहूतिऽभिः । नृऽभिः । यतः । वाजम् । आ । दर्षि । सातये ॥७॥

हे vसोम vयोषणः द्वाभ्यां पाणिभ्यां विभज्योत्पन्नाः vदश दशसंख्याका अङ्गुलयः vऋषिभिः मधुच्छन्दःप्रभृतिभिः vसुतम् अभिषुतं vहितं पात्रेषु निहितं vत्वां vमतिभिः स्तुतिभिः vधीतिभिः कर्मभिश्च vअव्यः vवारेभिः[3] अविवालैः[3] पवित्रैः vमृजन्ति शोधयन्ति । vउत अपि च vदेवहूतिभिः देवाह्वानयुक्तैः vनृभिः कर्मनेतृभिर्ऋत्विग्भिः vयतः ग्रहेषु संयमितः संगृहीतस्त्वं vसातये[4] दानाय vवाजम् अन्नम्[5] vआ vदर्षि आविदारयसि । विवृतं करोषि । स्तोतृभ्योऽन्नादिकं प्रयच्छसीति यावत् ॥

परिप्रयन्तं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः ।
यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः ॥ ८ ॥

परिऽप्रयन्तम् । वय्यम् । सुऽसंसदम् । सोमम् । मनीषाः । अभि । अनूषत । स्तुभः ।
यः । धारया । मधुऽमान् । ऊर्मिणा । दिवः । इयर्ति । वाचम् । रयिषाट् । अमर्त्यः ॥ ८ ॥

vपरिप्रयन्तं पात्राणि परितः प्रगच्छन्तं vवय्यं देवैः काम्यमानं vसुसंसदं शोभनसंसदनं vसोमं vमनीषाः मनस ईशिभ्यः vस्तुभः स्तुतयः vअभ्यनूषत अभिष्टुवन्ति । वय्यम् । 'वी गत्यादिषु' इत्यस्माद्यति 'भयभ्रवय्ये च छन्दसि' (पा. सू. ६. १. ८३) इति निपातितः । अत्रानुपसर्गस्यापि निपातनं भवति । vमधुमान् मदकररसवान् vयः सोमः vधारया स्वीयया vऊर्मिणा वसतीवर्याख्येनोदकेन सह vदिवः आकाशात् द्रोणकलश आपतति[6] vरयिषाट् शत्रुधनानामभिभविता vअमर्त्यः मनुष्यधर्मरहितः स सोमः vवाचम् vइयर्ति प्रेरयति । तदा हि स्तोतारः स्तुवन्ति[6] ॥

अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति ।
अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इन्दुर्वारेवो विदत्प्रियम् ॥ ९ ॥

---

१. ग-भ६–नदनासु । २. त१.३.४.५.६.७-भ१.२.४.६–उशंतं तं । ३. ग-भ१.७–वालैः । ४. त१–वाजमन्नं; त२.३.४.५.६-भ२.६–वाजमन्नं सातये दानाय वाजमन्नं । ५. ग–आपवते । ६. ग-त३–स्तुवंति तदुच्यते; त१.२.६.७-भ१.२.४.७–स्तुवंति उच्यते ।

अयम्। दिवः। इयर्ति। विश्वम्। आ। रजः। सोमः। पुनानः। कलशेषु। सीदति।
अत्ऽअभिः। गोभिः। मृज्यते। अद्रिऽभिः। सुतः। पुनानः। इन्दुः। वरिवः। विदत्। प्रियम्॥९॥

ᵛअयं सोमः ᵛदिवः द्युलोकात् ᵛविश्वं ᵛरजः। उदकनामैतत्। सर्वमुदकम् ᵛइयर्ति[1] अभिप्रापयति। किंच ᵛपुनानः दशापवित्रेण पूयमानः ᵛसोमः ᵛकलशेषु द्रोणनामसु ᵛसीदति। तथा ᵛअद्रिभिः ग्रावभिः ᵛअद्भिः वसतीवर्याख्याभिः ᵛगोभिः गोविकारैः क्षीरदध्यादिभिश्च ᵛमृज्यते शोध्यते अलंक्रियते। ततः ᵛपुनानः पूतः ᵛइन्दुः सोमः ᵛप्रियं प्रियतरं प्रीणनकारि वा ᵛवरिवः वरणीयं धनं ᵛविदत् स्तोतृभ्यो लम्भयति। प्रयच्छतीति यावत्॥

एवा नः सोम परिषिच्यमानो वयो दधच्चित्रतमं पवस्व।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम्॥ १०॥

एव। नः। सोम। परिऽसिच्यमानः। वयः। दधत्। चित्रऽतमम्। पवस्व।
अद्वेषे इति। द्यावापृथिवी इति। हुवेम। देवाः। धत्त। रयिम्। अस्मे इति। सुऽवीरम्॥१०॥

अयं प्रत्यक्षकृतः। हे ᵛसोम ᵛदधत् प्रयच्छंस्त्वं ᵛपरिषिच्यमानः परितोऽद्भिर्गोभिर्वा सिच्यमानः ᵛएव[2] ᵛचित्रतमं[3] चित्रं नानाविधं चायनीयतमं वा ᵛवयः अन्नं ᵛनः अस्मभ्यं ᵛपवस्व प्रापय। प्रयच्छेति यावत्। किंच ᵛअद्वेषे द्वेषरहिते ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛहुवेम हविष्प्रदानार्थं वयमाह्वयेम। हे ᵛदेवाः यूयं च ᵛसुवीरम्। वीरः कर्मणि समर्थः पुत्रः। तादृशपुत्रोपेतं ᵛरयिं धनम् ᵛअस्मे अस्मासु ᵛधत्त निधत्त॥ ॥ २० ॥

'इषुर्न' इति दशर्चं द्वितीयं सूक्तमाङ्गिरसस्य हिरण्यस्तूपस्यार्षं पवमानसोमदेवताकम्। नवमीदशम्यौ त्रिष्टुभौ। शिष्टा जगत्यः। तथा चानुक्रान्तम्—'इषुर्न हिरण्यस्तूपोऽन्त्ये[4] त्रिष्टुभौ' इति। गतो विनियोगः।

इषुर्न धन्वन् प्रति धीयते मतिर्वत्सो न मातुरुप सर्ज्यूधनि।
उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम इष्यते॥ १॥

इषुः। न। धन्वन्। प्रति। धीयते। मतिः। वत्सः। न। मातुः। उप। सर्जि। ऊधनि।
उरुधाराऽइव। दुहे। अग्रे। आऽयती। अस्य। व्रतेषु। अपि। सोमः। इष्यते॥ १॥

अस्मिन् पवमानरूप इन्द्रे ᵛमतिः मननीयास्मदीया स्तुतिः ᵛप्रति ᵛधीयते अस्माभिर्निधीयते वा। दधाते रूपम्। तत्र दृष्टान्तः। ᵛइषुर्न यथेषुः शरः ᵛधन्वन् धनुषि प्रति धीयते तद्वत्। किंच ᵛऊधनि सर्वस्य पोषयितृत्वेनोधस्थानीय इन्द्रे सोमो मदार्थमस्माभिः ᵛउप ᵛसर्जि उपसृज्यते। कथमिव। ᵛमातुः गोः ᵛऊधनि पयोधारके ᵛवत्सो ᵛन वत्सो यथा पयःपानार्थं सृज्यते तद्वत्। ᵛउरुधारेव बहुविधपयोधारा गौरिव ᵛअग्रे वत्सस्य पुरतः ᵛआयती गच्छन्ती सती पयः ᵛदुहे दुग्धे तथा सोऽयमिन्द्रो वत्सभूतेभ्यः स्तोतृभ्यः पुरतो गच्छन् बहुविधान् कामान् दुग्धे। किंच ᵛअस्य एतादृशस्य ᵛव्रतेष्वपि ᵛसोम ᵛइष्यते यष्टृभिः प्रेर्यते खलु॥

---

१. भ५–आ इयर्ति। २. ग-त-म–एवं; मु–एव एवं। ३. ग-त१.२.५.६-म१.४.६–'चित्रतमं' नास्ति। ४. त१.२.४.५.६–हिरण्यस्तूपोंते।

उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ।
पवमानः संतनिः प्रप्रतामिव मधुमान्द्रप्सः परि वारमर्षति ॥ २ ॥

उपो इति । मतिः । पृच्यते । सिच्यते । मधु । मन्द्रऽअजनी । चोदते । अन्तः । आसनि ।
पवमानः । सम्ऽतनिः । प्रप्रताम्ऽइव । मधुऽमान् । द्रप्सः । परि । वारम् । अर्षति ॥ २ ॥

अस्मिन् पवमानरूप[1] इन्द्रे ᵛमतिः स्तुतिः ᵛउपो ᵛपृच्यते उपपृच्यते स्तोतृभिः संयोज्यते । ' पृची संपर्के ' । तथा ᵛमधु मदकरः सोमः इन्द्रार्थं ᵛसिच्यते अद्भिः यवसकुभिश्च सिक्तो भवति । ततश्च ᵛमन्द्राजनी । ' अज गतिक्षेपणयोः ' इत्यस्य ल्युटि ङीपि रूपम् । मदकरस्य रसस्य प्रेरयित्री सोमधारा तस्येन्द्रस्य ᵛआसनि आस्ये ᵛअन्तः मध्ये ᵛचोदते यष्टृभिः प्रेर्यते । आस्यशब्दस्य ' पद्दोमास्° ' इत्यादिना आसन्नित्यादेशः । किंच ᵛसंतनिः ग्रहादिषु सम्यग्विस्तृतः ᵛमधुमान् मदकररसवान् ᵛपवमानः पूयमानः सोमः ᵛद्रप्सः द्रुतगमनशीलो यद्वा क्षिप्रंहननशीलः[2] सन् ᵛवारम् अविवालमयं पवित्रं परितः ᵛअर्षति आगच्छति । तत्र दृष्टान्तः । ᵛप्रप्रतामिव । प्रकर्षेण हन्तॄणां योद्धॄणां संतनिः सम्यग्विसृष्टः शरो यथा शीघ्रं प्राप्यमभितो गच्छति तद्वत् ॥

अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेर्ऋतं यते ।
हरिरक्रान् यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते ॥ ३ ॥

अव्ये । वधूऽयुः । पवते । परि । त्वचि । श्रथ्नीते । नप्तीः । अदितेः । ऋतम् । यते ।
हरिः । अक्रान् । यजतः । सम्ऽयतः । मदः । नृम्णा । शिशानः । महिषः । न । शोभते ॥३॥

ᵛवधूयुः । वधूभूता वसतीवर्यं एकधनासहिता आपः । तद्वान् सोमः ᵛअव्ये अवेः स्वभूते ᵛत्वचि चर्मणि ᵛपरि ᵛपवते परितो वर्तते पूतो भवति वा । किंच ᵛनप्तीः नप्त्रीः । नप्तृशब्दश्चतुर्थ्यपत्यवाची । सोमस्य नप्त्रीः । सोमो ह्योषधीनामग्रे[3] रेतो निषिञ्चति । ' प्रजापते रेतो देवा देवानां रेतो वर्षं वर्षस्य रेत ओषधयः ' (ऐ. आ. २.१.६) इति श्रुतेः । यद्वा । नप्तृशब्दोऽपत्यवाची । तस्यापत्यानि । सोमः सुधामयैः स्वकिरणैरोषधीर्वर्धयति । तस्मादपत्यभूताः । ᵛअदितेः । पृथिवीनामैतत् । अदीनायाः पृथिव्या उत्पन्ना ओषधीः ᵛऋतं सत्यरूपं यज्ञं ᵛयते गच्छते यजमानाय ᵛश्रथ्नीते अग्रभागे फलिनीः कर्तुं विश्लेषयति । किंच ᵛहरिः हरितवर्णः ᵛयजतः सर्वैर्यष्टव्यः अत एव ᵛसंयतः ग्रहादिषु संगृहीतः ᵛमदः माद्यत्यनेनेति मदः सोमः । तादृशः ᵛअक्रान् क्रामति । पात्रेष्ववतिष्ठते । यद्वा । शत्रूनतिक्रामति । क्रमेर्लुकि तिपि ' बहुलं छन्दसि ' इति इडागमाभावाद्धल्ङौ कृतायां सिज्लोपे सति हल्ङ्यादिना तिपो लोपे ' मो नो धातोः ' इति नत्वे कृते रूपम् । अत एव सोमः ᵛनृम्णा स्वबलानि ᵛशिशानः तीक्ष्णीकुर्वन् । अथवा शत्रुबलानि तनूकुर्वन् । ᵛमहिषो ᵛन[4] । महन्नामैतत् । महानिव सर्वत्र व्याप्त इव ᵛशोभते स्वतेजसा सर्वत्र दीप्यते । यद्वा । नः संप्रत्यर्थे । इदानीमेवंगुणयुक्तो महान् सोमः शोभत इति ॥

१. त-भ६–पवमानरूपे स्तोत्रे । २. ग–क्षिप्रंपवन°; त-भ१.२.४.७–क्षिप्रंधनन°; भ६–क्षिप्रं-प्रधनन° । ३. त१.२.५.७–ह्योषधीनाम्नौ; त४-भ६–ह्योषधीनामग्नौ; भ७–ह्योषधीनामग्ने । ४. ग-त-भ–' न ' नास्ति ।

उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।
अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोम अव्यत ॥ ४ ॥

उक्षा । मिमाति । प्रति । यन्ति । धेनवः । देवस्य । देवीः । उप । यन्ति । निःऽकृतम् ।
अति । अक्रमीत् । अर्जुनम् । वारम् । अव्ययम् । अत्कम् । न । निक्तम् । परि । सोमः । अव्यत ॥४॥

[v]उक्षा रेतसः सेक्ता वृषभः पुरतः [v]मिमाति शब्दायते । 'माङ् माने शब्दे च[1]' । तं वृषभं [v]धेनवः गावः [v]प्रति [v]यन्ति अनुगच्छन्ति । तथा [v]देवस्य द्योतमानस्य [v]निष्कृतं[2] संस्कृतं स्थानं[2] [v]देवीः देव्यः [v]उप [v]यन्ति उपगच्छन्ति । अनेनार्धेन सोमस्तुतिरभिधीयते । सोमः[3] सन् द्रोणकलशाभिगमनकाले शब्दं करोति । तमनु धेनवः प्रीणयित्र्यः स्तुतयः परियन्ति देवस्य स्थानं स्तुतयोऽभिगच्छन्ति । तथा सोऽयं सोमः [v]अर्जुनं श्वेतवर्णम् [v]अव्ययम् अविनश्वरमविस्रंसभूतं[4] [v]वारं वार्लं पवित्रम् [v]अत्यक्रमीत् अतिक्रामति । अतिक्रम्य पात्राणि गच्छतीत्यर्थः । किंच [v]सोमः [v]अत्कं [v]न आत्मीयं कवचमिव [v]निक्तम् उज्ज्वलं श्रयणद्रव्यं[5] [v]परि [v]अव्यत परितः संवृणोति ॥

अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत ।
दिवस्पृष्ठं बर्हणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयम् ॥ ५ ॥

अमृक्तेन । रुशता । वाससा । हरिः । अमर्त्यः । निःऽनिजानः । परि । व्यत ।
दिवः । पृष्ठम् । बर्हणा । निःऽनिजे । कृत । उपऽस्तरणम् । चम्वोः । नभस्मयम् ॥ ५ ॥

[v]अमर्त्यः मनुष्यधर्मरहितः [v]हरिः हरितवर्णः सोमः [v]निर्णिजानः उदकेन शोध्यमानः सन् [v]अमृक्तेन । 'मृजी शौचालंकारयोः' । अनिर्णिक्तेनापि [v]रुशता स्वतः शुक्लवर्णेन पयोरूपेण [v]वाससा [v]परि [v]व्यत परित आच्छादयति । सोमे परिपूते गव्येन पयसा मिश्रीकुर्वन्ति खलु । तदुच्यते । ततः सोऽयं सोमः [v]दिवः द्युलोकस्य [v]पृष्ठं पृष्ठभागे तिष्ठन्तमादित्यं [v]बर्हणा बर्हणाय पापानामुद्यमनकारिणे पापनाशिने [v]निर्णिजे निर्नेजनाय परिपवनाय[6] [v]कृत द्युलोकेऽकार्षीत् । स हि स्वदीप्त्या सर्वं निर्णेक्ति । कृत । कृणोतेर्लुङि 'हस्वात्०' इति सिचो लोपः । तदेवाह । [v]चम्वोः । द्यावापृथिवीनामैतत् । चमन्ति भक्षयन्त्यत्र देवा मनुष्या इति । तयोः [v]उपस्तरणम् आच्छादनशीलं [v]नभस्मयम् आदित्यमयमादित्यस्य स्वभूतं तेजश्च सर्वेषां निर्णेजनाय[7] अकार्षीत् ॥ ॥ २१ ॥

सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते ।
तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन ॥ ६ ॥

सूर्यस्यऽइव । रश्मयः । द्रवयित्नवः । मत्सरासः । प्रऽसुपः । साकम् । ईरते ।
तन्तुम् । ततम् । परि । सर्गासः । आशवः । न । इन्द्रात् । ऋते । पवते । धाम । किम् । चन ॥६॥

---

१. भ६–वा । २. त-भ१.४.६.७–स्थानं निष्कृतं संस्कृतं स्थानं; भ२–स्थानं निष्कृतं निष्कृतस्थानं; मु–निःकृतं संस्कृतं स्थानं । ३. ग–सोमः कामसेक्ता । ४. ग–अविसंभूतं । ५. ग-भ४–श्रवणद्रव्यं; त४–अर्यणद्रव्यं; त५–अयणद्रव्यं; भ६–श्रपणद्रव्यं । ६. त-भ१.२.४.७–परिपवमानाय । ७. त३-भ२–निर्निजनाय; त७–निर्णिजेजनाय; भ१.७–निर्निजमानाय ।

vसूर्यस्य vरश्मयः सर्वस्य प्रेरकस्य सुवीर्यस्य वादित्यस्य रश्मयः सर्वतो व्यापकाः किरणाः vइव vप्रावयित्नवः सर्वत्राद्रवणशीलाः vमत्सरासः मदकराः vप्रसुपः शत्रूणां प्रस्वापका हन्तारः vआशवः ग्रहेषु चमसेषु च व्याप्ताः vसर्गासः सृज्यमानाः सोमाः vततं विस्तृतं vतन्तुं तन्तुभिः कृतं वस्त्रं vसाकं सह युगपत् vपरि vईरते परितो गच्छन्ति। ते सोमाः vइन्द्राय इन्द्रं वर्जयित्वा अन्यत् vकिं vचन vधाम देवशरीरं लक्ष्यीकृत्य vन vएवते न गच्छति[1]। एकवचनं छान्दसम्। न गच्छन्ति। किंत्विन्द्रस्यैव धाम प्रति गच्छन्ति। इन्द्रस्य धाम्नो यष्टव्यत्वं च 'अथालिन्द्रस्य प्रिया धामानि' (वा. सं. २१.४७) इति मन्त्रवर्णादवगम्यते॥

सिन्धोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत।
शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठन्तु कृष्टयः॥ ७॥

सिन्धोःऽइव। प्रवणे। निम्ने। आशवः। वृषऽच्युताः। मदासः। गातुम्। आशत।
शम्। नः। निऽवेशे। द्विऽपदे। चतुःऽपदे। अस्मे इति। वाजाः। सोम। तिष्ठन्तु। कृष्टयः॥७॥

vवृषच्युताः। वृष हिंसासंक्लेशनदानेष्वपि। वृषभिः सोमस्य दातृभिर्ऋत्विग्भिश्च्युताः परिस्रुताः vमदासः मदकारिणः सोमाः स्तुतिभिः प्राप्तव्य इन्द्रे vगातुं गमनम् vआशत प्राप्नुवन्ति। तत्र दृष्टान्तः। vसिन्धोरिव vप्रवणे। प्रगच्छन्त्युदकानि[2] यत्रेति तत्प्रवणम्। तस्मिन् vनिम्ने स्थले सिन्धोर्नद्याः vआशवः व्याप्ता आपो यथा गच्छन्ति तद्वत्। अथ प्रत्यक्षः। हे vसोम vनः अस्माकं vनिवेशे स्वगृहं प्रति प्रवेशने निर्गमने वा vद्विपदे पुत्रादिकाय[3] vचतुष्पदे गवादिकाय पशवे[4] vशं सुखं कुरु। किंच हे सोम vअस्मे अस्मासु vवाजाः अन्नानि vकृष्टयः पुत्रादिकाः प्रजाश्च vतिष्ठन्तु। अन्नादिकं[5] देहीत्यर्थः॥

आ नः पवस्व वसुमद्धिरण्यवदश्वावद्गोमद्यवमत्सुवीर्यम्।
यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः॥ ८॥

आ। नः। पवस्व। वसुऽमत्। हिरण्यऽवत्। अश्वऽवत्। गोऽमत्। यवऽमत्। सुऽवीर्यम्।
यूयम्। हि। सोम। पितरः। मम। स्थन। दिवः। मूर्धानः। प्रऽस्थिताः। वयःऽकृतः॥८॥

हे सोम त्वं vवसुमत् वसुयुक्तं vहिरण्यवत् कनकादिसहितम् vअश्ववत् vगोमत् गवाश्वसहितं[6] vयवमत्। यवो नाम धान्यविशेषः। धान्यविशिष्टं vसुवीर्यं शोभनवीर्योपेतं धनं vनः अस्मभ्यम् vआ vपवस्व आप्रापय। प्रयच्छेति यावत्। किंच हे vसोम यतस्त्वं मम पितृणामङ्गिरसामपि[7] पितासि[8] ततो vयूयम् एव vमम vपितरः vस्थन भवथ। पितृबहुत्वमत्र सोमस्याभिधीयते। कीदृशाः। vदिवः द्युलोकस्य vमूर्धानः मूर्धवदुच्छ्रिताः। कर्मभिः स्वर्गादिकमलभन्तेत्यर्थः। vप्रस्थिताः सर्वदा कर्मकरणार्थं स्थिताः vवयस्कृतः हवीरूपस्यान्नस्य कर्तारः। तादृशा मम पितरस्त्वं भवसि॥

१. त१.२.३.४.५.६-भ१.२.६-गच्छंति। २. त-गच्छंत्यु°। ३. त३-भ१.७-पुत्राय। ४. ग-त३-भ२.४.५-पशवे च। ५. ग-अन्नादिकं पश्वादिकं च। ६. ग-त३-भ२.४.५-गवाश्वयुक्तं; भ१.७-वाश्वयुक्तं। ७. ग-त-भ२.४.६-°मंगिरसामधिपतिरसि।

एते सोमाः पवमानास इन्द्रं रथाइव प्र ययुः सातिमच्छ ।
सुताः पवित्रमति यन्त्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ ॥ ९ ॥

एते । सोमाः । पवमानासः । इन्द्रम् । रथाःऽइव । प्र । ययुः । सातिम् । अच्छ ।
सुताः । पवित्रम् । अति । यन्ति । अव्यम् । हित्वी । वव्रिम् । हरितः । वृष्टिम् । अच्छ ॥९॥

Vपवमानासः पवित्रेण पूयमानाः Vएते अस्मदीयाः Vसोमाः Vसातिम् । ' षण संभक्तौ ' । कर्मणि क्तिन् । सर्वैः संभजनीयम् Vइन्द्रम् Vअच्छ Vप्र Vययुः प्रकर्षेण गच्छन्ति । तत्र दृष्टान्तः । Vरथाइव । इन्द्रस्य रथा यथा Vसातिम् । ' षो अन्तकर्मणि ' । ' ऊतियूति° ' इत्यादिना निपातितः । सीयते क्रियतेऽस्मिन्निति सातिः संग्रामः । तमच्छ तं प्रति प्रगच्छन्ति तद्वत् । किंच Vसुताः प्रावभिरभिषुताः सोमाः Vअव्यम् अविषालभवं Vपवित्रम् Vअति Vयन्ति अतीत्य गच्छन्ति । तेऽमी Vहरितः[1] हरितवर्णा अश्वाः । यद्वा । हरितस्त आदित्यवाहनरूपा[2] अश्वा भूत्वा । Vवव्रिम् । वृणोति शरीरमिति वव्रिर्जरा । ' आदृगमहन° ' इति किप्रत्ययः । सर्वाङ्गव्यापिनीं जरां Vहित्वी हित्वा तरुणाः सन्तः Vवृष्टिमच्छ वृष्टिं गमयितुं गच्छन्ति । हित्वी । ' जहातेश्च क्त्वि ' (पा. सू.७.४. ४३) इति ह्यादेशः । ' स्नात्व्यादयश्च ' इति छन्दसि निपातितम्[3] ॥

इन्दविन्द्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः ।
भरा चन्द्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः ॥ १० ॥

इन्दो इति । इन्द्राय । बृहते । पवस्व । सुऽमृळीकः । अनवद्यः । रिशादाः ।
भर । चन्द्राणि । गृणते । वसूनि । देवैः । द्यावापृथिवी इति । प्र । अवतम् । नः ॥१०॥

हे Vइन्दो सोम त्वं Vबृहते महते Vइन्द्राय तदर्थं Vपवस्व पात्रेषु क्षर । इन्द्रं प्रत्यागच्छ वा । कीदृशः । Vसुमृळीकः इन्द्रस्य सुष्ठु सुखयिता अत एव Vअनवद्यः गर्हारहितः Vरिशादाः रिशतां बाधकानामसिता । एतादृशस्त्वमिन्द्राय पवस्व । किंच Vगृणते स्तुवते मह्यं Vचन्द्राणि आह्लादकानि Vवसूनि धनानि Vभर प्रयच्छ । किंच हे Vद्यावापृथिवी युवां च पवमानेन परिप्लुते सत्यौ Vदेवैः सुभगैर्धनैः सह Vनः अस्मान् Vप्रावतं प्ररक्षतम् ॥ ॥ २२ ॥

' त्रिरस्मै ' इति दशर्चं तृतीयं सूक्तं वैश्वामित्रस्य रेणोरार्षम् । दशमी त्रिष्टुप् शिष्टा जगत्यः । पवमानः सोमो देवता । ' त्रिरस्मै रेणुः ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि ।
चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यद्तैरवर्धत ॥ १ ॥

त्रिः । अस्मै । सप्त । धेनवः । दुदुह्रे । सत्याम् । आऽशिरम् । पूर्व्ये । विऽओमनि ।
चत्वारि । अन्या । भुवनानि । निःऽनिजे । चारूणि । चक्रे । यत् । ऋतैः । अवर्धत ॥१॥

Vअस्मै पवमानाय Vपूर्व्ये पूर्वैः कृते Vव्योमनि । विविधमोमावनं गमनं देवानामत्रेति व्योम यज्ञः । तस्मिन् स्थिताय । यद्वा । प्रत्ने व्योमन्यन्तरिक्षे वर्तमानाय । Vत्रिः Vसप्त एकविंशतिसंख्याकाः

१. त-भ६-' हरितः ' नास्ति । २. ग-त३-भ२.४-आदित्यस्य वाहनरूपा । ३. ग-त३-भ१.२.४. ५.७-निपातितः ।

[v]धेनवः प्रीणयित्र्यो गावः [v]सत्यां यथार्थभूताम्[1] [v]आशिरम् आश्रयणसाधनं क्षीरादि [v]दुदुहे दुहन्ति। यद्वा। त्रिः सप्त 'द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः' (तै. सं.५.४.१२.२) इत्येतैः सर्वैः सह गोषु पय उत्पाद्यते तदावो दुहन्त इति। किंचायं सोमः [v]अम्या अन्यानि [v]चत्वारि [v]भुवनानि उदकानि वसतीवरीस्तिस्रश्चैकधना इति तानि चतुःसंख्याकानि [v]चारूणि कल्याणान्युदकानि [v]निर्णिजे निर्णेजनाय परिशोधनाय परिशोषणाय[2] वा[3] [v]चक्रे। कदा करोति। [v]यत् यदा अयम् [v]ऋतैः यज्ञैः [v]अवर्धत वर्धितवान् तदा करोति॥

स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे।
तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः॥ २॥

सः। भिक्षमाणः। अमृतस्य। चारुणः। उभे इति। द्यावा। काव्येन। वि। शश्रथे।
तेजिष्ठाः। अपः। मंहना। परि। व्यत। यदि। देवस्य। श्रवसा। सदः। विदुः॥ २॥

[v]सः पवमानः [v]चारुणः कल्याणस्य [v]अमृतस्य उदकस्य। 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानसंज्ञा। 'चतुर्थ्यर्थे बहुलम्०' (पा. सू. २.३.६२) इति षष्ठी। चारूदकं [v]भिक्षमाणः यष्टृभिर्याच्यमानः सन् [v]उभे। द्यावादेशस्य द्वंद्वे विहितत्वादश्रोक्तरपदाभावे द्वंद्वः प्रतीयते। उभे द्यावापृथिव्यौ [v]काव्येन कविकर्मणा [v]वि [v]शश्रथे विवृते[4] करोति। यज्ञनिमित्तेन[5] उदकेन संपूरयतीत्यर्थः। किंच [v]तेजिष्ठाः अतिशयेन दीप्तानि[6] [v]अपः उदकानि [v]मंहना महत्त्वेन [v]परि [v]व्यत वरणार्थं परित आच्छादयति। [v]यदि यदा ऋत्विजः [v]देवस्य द्योतमानस्य सोमस्य [v]सदः स्थानं [v]श्रवसा हविषा युक्ताः सन्तः [v]विदुः यागार्थं जानन्ति लभन्ते तदा परित आवृणोतीति। 'विद ज्ञाने'। 'सिजभ्यस्त०' इति झेर्जुसादेशः[7]॥

ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु।
येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत॥ ३॥

ते। अस्य। सन्तु। केतवः। अमृत्यवः। अदाभ्यासः। जनुषी इति। उभे इति। अनु।
येभिः। नृम्णा। च। देव्या। च। पुनते। आत्। इत्। राजानम्। मनना। अगृभ्णत॥३॥

[v]अस्य एतादृशस्य सोमस्य [v]केतवः प्रज्ञापकाः सर्वैर्ज्ञायनीयाः [v]अमृत्यवः मरणधर्मरहिता अत एव [v]अदाभ्यासः। 'दभेश्चेति वक्तव्यम्' (पा. सू. ३. १. १२४. ३) इति ण्यत्। परैरहिंस्याः [v]ते तादृशाः अस्य रश्मयः [v]उभे [v]जनुषी जन्मनी स्थावरजङ्गमात्मके द्वे [v]अनु लक्षीकृत्य [v]सन्तु रक्षन्तु। ओषधीनामयं[8] सोमो रेतो निषिञ्चति यज्ञे मनुष्याणां च धाराः स्रवन्ति खलु। सोऽयं [v]येभिः यैः केतुभिः [v]नृम्णा नृम्णानि बलानि [v]देव्या[9] देवार्हाणि[9] [v]च अन्नानि [v]पुनते प्रेरयति [v]आदित् अभिषवानन्तरमेव [v]राजानं सोमं [v]मनना मननीयाः स्तुतयः [v]अगृभ्णत परिगृह्णन्ति। प्राप्नुवन्तीत्यर्थः। 'हृग्रहोः०' इति भकारः॥

---

१. त३-भ२.६–यथार्थभूतं; भ१.७–यथार्थं भूतं। २. ग-त३-भ१.७–'परिपोषणाय वा' नास्ति। ३. त३-भ१.२.५.७–विवृते। ४. ग-त-भ२.४.६-मु–यज्ञेन निमित्तेन; भ१–यज्ञे निमित्तेन। ५. ग–अमृतेनोदकेन; त-भ२.४.६–प्रलेनोदकेन। ६. भ६–दीप्ता। ७. त१.४–र्जुसादेशः; त२.६–ऋर्जुसादेशः; त५–ऋर्जुसादेशः; भ६–मतुवादेशः। ८. ग-त-भ१.२.४.६–ओषधीनामग्रे। ९. त-भ६–देव्यावार्हाणि।

स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा ।
व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ ॥ ४ ॥

सः । मृज्यमानः । दशऽभिः । सुकर्मेऽभिः । प्र । मध्यमासु । मातृषु । प्रऽमे । सचा ।
व्रतानि । पानः । अमृतस्य । चारुणः । उभे इति । नृऽचक्षाः । अनु । पश्यते । विशौ ॥४॥

Vसः पवमानः Vसुकर्मभिः शोभनकर्मयुक्ताभिः Vदशभिः दशसंख्याकाभिरङ्गुलीभिः Vमृज्यमानः[1] सः Vसचा 'अग्नौ प्रास्ताहुतिः' इत्यादिक्रमेणापां सहायः Vप्रमे लोकान् प्रमातुं Vमध्यमासु अन्तरिक्षस्थितासु अवतिष्ठते ॥ प्रमे । प्रपूर्वान्मातेः किपि ङयि 'आतः' इति योगविभागादाकारलोपः ॥ किंच Vनृचक्षाः नृणां द्रष्टा पवमानः Vचारुणः कल्याणस्य Vअमृतस्य उदकस्य वृष्टयर्थं Vव्रतानि यागादिकर्माणि Vपानः रक्षन् Vउभे Vविशौ मनुष्यान् देवांश्चान्तरिक्षेण गच्छन् Vअनु Vपश्यते[2] अनुपश्यति । मनुष्यानभिमतदानेन देवान् हविष्प्रदानेनेति ॥

स मर्मृजान इन्द्रियाय धायसे ओभे अन्ता रोदसी हर्षते हितः ।
वृषा शुष्मेण बाधते वि दुर्मतीरादेदिशानः शर्यहेव शुरुधः ॥ ५ ॥

सः । मर्मृजानः । इन्द्रियाय । धायसे । आ । उभे इति । अन्तरिति । रोदसी इति । हर्षते । हितः ।
वृषा । शुष्मेण । बाधते । वि । दुःऽमतीः । आऽदेदिशानः । शर्यहाऽइव । शुरुधः ॥ ५ ॥

Vमर्मृजानः पवित्रेण मृज्यमानः Vसः पवमानः Vधायसे जगतो धारकाय Vइन्द्रियाय इन्द्रस्य पर्याप्ताय बलाय तदर्थम् Vउभे Vरोदसी । 'कालाध्वनोः०' इति द्वितीया । उभयोः द्यावापृथिव्योः Vअन्तः Vहितः मध्ये वर्तमानः सन् Vआ[3] Vहर्षते[3] सर्वतो गच्छति । इन्द्रस्य हि सोमेन बलं भवति । Vवृषा कामानामुदकानां वा वर्षकः सोऽयं Vशुष्मेण शोषकेण बलेन Vदुर्मतीः दुष्टबुद्धीनसुरान् Vवि Vबाधते विशेषेण पीडयति । किं कुर्वन् । Vशुरुधः । शुचा रुन्धन्ति परानिति । पृषोदरादिः । दुःखकारिणोऽसुरान् Vआदेदिशानः पुनःपुनराह्वयन् हन्ति । तत्र दृष्टान्तः । Vशर्यहेव । हननसाधनैः इषुभिर्हन्ता वीरः प्रतिभटान् यथा हिनस्ति तद्वत् ॥ ॥ २३ ॥

स मातरा न ददृशान उस्रियो नानददेति मरुतामिव स्वनः ।
जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ॥ ६ ॥

सः । मातरा । न । ददृशानः । उस्रियः । नानदत् । एति । मरुताम्ऽइव । स्वनः ।
जानन् । ऋतम् । प्रथमम् । यत् । स्वःऽनरम । प्रऽशस्तये । कम् । अवृणीत । सुऽक्रतुः ॥६॥

Vसः पवमानः Vमातरा मातरौ द्यावापृथिव्यौ Vददृशानः पुनःपुनः पश्यन् ततः Vनानदत् भृशं शब्दं कुर्वन् Vएति सर्वत्र गच्छति । तत्र दृष्टान्तः । Vउस्रियः Vन । उस्रियेति गोनाम । तस्य स्वभूतो वत्सो यथा मातरं गां पश्यन् शब्दं करोति तद्वत् । किंच Vमरुतामिव । यथा मरुतां गणः Vस्वनः । पचाद्यजन्तः । स्वनं कुर्वन् सर्वतो गच्छति तद्वत् । Vयत् उदकं Vस्वर्णरम् । स्वरिति

---

१. ग-त३.४-भ५.६-मृज्यमानः शोध्यमानः । २. त-भ६-पश्यन् । ३. त-भ२.६-आ हर्षति; भ१.७-आर्षति ।

सर्वपर्यायः। सर्वमनुष्यहितं भवति। सर्वे हि मनुष्या उदके संगच्छन्ते तत्कार्यत्वात्। तादृशं vप्रथमं मुख्यम् vऋतम् उदकं vजानन् विद्वान् vसुक्रतुः शोभनकर्मा सुप्रज्ञो वा स पवमानः vप्रशस्तये प्रशंसनायात्मस्तोत्रकरणाय vकं मनुष्यम् vअवृणीत समभजत। नान्यमस्मदृत्विरिक्तमित्यर्थः॥

रुवतिं भीमो वृषभस्तविष्यया शृङ्गे शिशानो हरिणी विचक्षणः।
आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी ॥७॥

रुवतिं। भीमः। वृषभः। तविष्यया। शृङ्गे इति। शिशानः। हरिणी इति। विऽचक्षणः।
आ। योनिम्। सोमः। सुऽकृतम्। नि। सीदति।
गव्ययी। त्वक्। भवति। निःऽनिक्। अव्ययी॥ ७॥

vभीमः शत्रूणां भयंकरः vवृषभः कामानामुदकानां वा वर्षगः vविचक्षणः सर्वस्य विदर्शनशीलः स पवमानः vतविष्यया। तु इति वृद्ध्यर्थः। अस्मात् 'अच इः' (उ. सू. ४. १३८) इति इप्रत्ययः। तस्मादिच्छायामर्थे क्यच्। 'सर्वप्रातिपदिकेभ्यः०' (का. ७.१.५१.३) इति सुगागमः। आत्मनो बलेच्छया vहरिणी हरितवर्णे द्वे vशृङ्गे vशिशानः तीक्ष्णीकुर्वन् द्रोणकलशं प्रति द्वाभ्यां धाराभ्यां स्थाल्याग्रथणं गृह्णाति। तदुच्यते। ते धारारूपशृङ्गे तीक्ष्णीकुर्वन् vरुवति शब्दायते। 'रु शब्दे'। 'बहुलं छन्दसि' इति शः। ततः सः vसोमः vसुकृतं सुष्ठु कृतं vयोनिं स्वस्थानं द्रोणकलशम् vआ vनि vषीदति समन्तात्तिष्ठति। तस्य सोमस्य vनिर्णिक् निर्नेक्नी परिशोधयित्री vगव्ययी गोमयी vत्वग्भवति। आनद्धे हि चर्मणि सोमाभिषवः। एवम् vअव्ययी अविमयी त्वक् च निर्नेक्नी भवति। तद्धि दशापवित्रापेक्ष्यमभिहितम्॥

शुचिः पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि।
जुष्टो मित्राय वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ॥ ८ ॥

शुचिः। पुनानः। तन्वम्। अरेपसम्। अव्ये। हरिः। नि। अधाविष्ट। सानवि।
जुष्टः। मित्राय। वरुणाय। वायवे। त्रिऽधातु। मधु। क्रियते। सुकर्मऽभिः॥ ८॥

vअरेपसं पापरहितम्। यद्वा। 'रिपि गतौ'। गतिरहितम्। पात्रे स्थितमित्यर्थः। तादृशं vतन्वम् आत्मीयं शरीरं vपुनानः शोधयन् अत एव vशुचिः पूतो दीप्यमानो वा vहरिः हरितवर्णः सोमः vसानवि सानुनि समुच्छ्रिते vअव्ये अविबालकृते दशापवित्रे vन्यधाविष्ट ऋत्विग्भिर्निधीयते। 'धूञ् कम्पने'। 'स्यसिच्सीयुट्तासिषु०' (पा. सू. ६. ४. ६२) इति कर्मणि लुङि च्विण्वदिट्। णिरवाद्वृद्धिः। ततः vमित्राय vवरुणाय vवायवे एतेभ्यः vजुष्टः पर्याप्तः vत्रिधातु त्रिसंधानो वसतीवरीभिर्दध्ना पयसा संसृष्टः सोमः vत्रिधातु तादृशं vमधु मदकरः सोमः vसुकर्मभिः शोभनकर्मयुक्तैर्ऋत्विग्भिः vक्रियते मित्रादिदेवार्थं प्रदीयते॥

पवस्व सोम देववीतये वृषेन्द्रस्य हार्दि सोमधानमा विश।
पुरा नो बाधादुरितादति पारय क्षेत्रविद्धि दिश आर्हा विपृच्छते ॥ ९ ॥

पवस्व। सोम। देवऽवीतये। वृषा। इन्द्रस्य। हार्दि। सोमऽधानम्। आ। विश।
पुरा। नः। बाधात्। दुःऽइता। अति। पारय। क्षेत्रऽवित्। हि। दिशः। आर्हा। विऽपृच्छते॥९॥

हे ᵛसोम ᵛकृधा कामानामुदकानां वा सेचकस्त्वं ᵛदेववीतये देवानां पानाय ᵛपवस्व कलशादिषु क्षर। अथ हे सोम त्वम् ᵛइन्द्रस्य ᵛहार्दि हृदयंगमं प्रियं ᵛसोमधानम्। सोमो निधीयतेऽस्मिन्निति सोमधानं पात्रम्। तत् ᵛआ ᵛविश प्रविश। किंच ᵛनः अस्माकं ᵛबाधात् बाधनात् पीडनात् ᵛपुरा पूर्वमेव दुरितानि दुर्गमनानि रक्षांसि ᵛअति ᵛपारय अतीत्य पारं गमय। अपि च ᵛक्षेत्रविद् मार्गज्ञः पुरुषः ᵛविपृच्छते विविधं पन्थानं पृच्छते जनाय ᵛदिशः मार्गान् ᵛआह ᵛहि ब्रूते खलु। उक्त्वा तं यथा रक्षति तथा यज्ञमार्गवेत्ता त्वमस्मभ्यं यज्ञपथ उक्त्वास्मान् पालयेति ॥

हितो न सप्तिरभि वाजमर्षेन्द्रस्येन्दो जठरमा पवस्व ।
नावा न सिन्धुमति पर्षि विद्वाञ्छूरो न युध्यन्नव नो निदः स्पः ॥ १० ॥

हितः । न । सप्तिः । अभि । वाजम् । अर्ष । इन्द्रस्य । इन्दो इति । जठरम् । आ । पवस्व ।
नावा । न । सिन्धुम् । अति । पर्षि । विद्वान् ।
शूरः । न । युध्यन् । अव । नः । निदः । स्परिति स्पः ॥ १० ॥

हे सोम ऋत्विग्भिः प्रेर्यमाणः सन् ᵛवाजं सोमनिधानं द्रोणकलशम् ᵛअभि ᵛअर्ष अभिगच्छ। तत्र दृष्टान्तः। ᵛहितो ᵛन ᵛसप्तिः। अश्वो हितः प्रेर्यमाणः सन् वाजं संग्राममभिलक्ष्य यथा याति तद्वत्। ततो हे ᵛइन्दो ᵛइन्द्रस्य ᵛजठरं जठरभूतं द्रोणकलशं वा ᵛआ ᵛपवस्व आभिमुख्येन प्रविश। किंच ᵛविद्वान् सर्वं जानंस्त्वमस्मान् ᵛअति ᵛपर्षि दुरितान्यतीत्य पारय। तत्र दृष्टान्तः। ᵛनावा ᵛन। यथा नाविकाः ᵛसिन्धुं नदीं नावा मनुष्यान् पारयन्ति तद्वत्। किंच हे सोम त्वं ᵛशूरो ᵛन शूरो वीर इव ᵛयुध्यन् शत्रून् संप्रहरन् ᵛनिदः निन्दकाच्छत्रोः ᵛनः अस्मान् ᵛअव ᵛस्पः अवपारय। बाधां विनाश्य पालय। यद्वा। नोऽस्माकं निदो निन्दकाञ्छत्रूनव स्पः अवाङ्मुखं जहि। 'स्पृ हिंसायाम्'। 'बहुलं छन्दसि' इति भाप्रत्ययस्य लुक्। तिपि गुणे हल्ङ्यादिना तिपो लोपः ॥ ॥ २४ ॥

'आ दक्षिणा' इति नवर्चं चतुर्थं सूक्तं वैश्वामित्रस्यर्षभस्यार्षं पवमानसोमदेवताकम्। नवमी त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रान्तम्–'आ दक्षिणा नव ऋषभस्तौ वैश्वामित्रौ' इति। 'तौ' इत्यनेन प्रकृतो रेणुर्ऋषभश्चोभौ परामृश्येते। श्रूयते हि–'अथ ह विश्वामित्रः पुत्रानामन्त्रयामास मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्टकः' (ऐ. ब्रा. ७. १७) इति। गतः सूक्तविनियोगः ॥

आ दक्षिणा सृज्यते शुष्म्या३सदं वेति द्रुहो रक्षसः पाति जागृविः ।
हरिरोपशं कृणुते नभस्पयं उपस्तिरे चम्वो३र्ब्रह्म निर्णिजे ॥ १ ॥

आ । दक्षिणा । सृज्यते । शुष्मी । आऽसदम् । वेति । द्रुहः । रक्षसः । पाति । जागृविः ।
हरिः । ओपशम् । कृणुते । नभः । पयः । उपऽस्तिरे । चम्वोः । ब्रह्म । निःऽनिजे ॥ १ ॥

सोमस्य स्वभूते यज्ञे ऋत्विग्भ्यः ᵛदक्षिणा ᵛआ ᵛसृज्यते अस्माभिः प्रदीयते। ᵛशुष्मी बलवान् सोमः ᵛआसदम् आस्थानं द्रोणाख्यं ᵛवेति प्रविशति। किंच ᵛजागृविः जागरणशीलः सोमः ᵛद्रुहः द्रोहकारिणः ᵛरक्षसः राक्षसान् ᵛपाति स्तोतॄन् रक्षति। अपि च ᵛहरिः हरितवर्णः सोमः ᵛओपशम्। आ समन्तादुपशेत इत्योपशः। सर्वस्य धारकं ᵛनभः नभस आदित्यस्य स्वभूतं ᵛपयः उदकं ᵛकृणुते सर्वत्र करोति। 'अग्नौ प्रास्ताहुतिः' इत्यादिक्रमेण करोतीत्यर्थः। यद्वा। नभोऽन्तरिक्षं पयः पयसो

धारकं करोतीति। किंचायं सोमः ᵛचम्वोः। द्यावापृथिवीनामैतत्। चमन्ति भक्षयन्ति मनुष्यदेवा अत्रेति। तयोः ᵛउपस्तिरे उपस्तरणायाच्छादनाय ᵛब्रह्म बृहदुद्यतं तमांसि विनाशयन्तं यद्वा परिवृढं सूर्यं द्युलोके करोति। तथा तमेव सूर्यं ᵛनिर्निजे पदार्थानां निर्नेजनाय परिशोधनाय च करोति। आदित्यो हि द्यावापृथिव्यौ स्वतेजसोपस्तृणाति। स हि स्वभासा सर्वं निर्नेक्ति च॥

प्र कृष्टिहेव शूष एति रोरुवदसुर्यं१ वर्णं नि रिणीते अस्य तम्।
जहाति वव्रिं पितुरेति निष्कृतमुपप्रुतं कृणुते निर्णिजं तना॥ २॥

प्र। कृष्टिहाऽइव। शूषः। एति। रोरुवत्। असुर्यम्। वर्णम्। नि। रिणीते। अस्य। तम्।
जहाति। वव्रिम्। पितुः। एति। निःऽकृतम्। उपऽप्रुतम्। कृणुते। निःऽनिजम्। तना॥२॥

ᵛशूषः शत्रूणां शोषको बलवान् सोमः ᵛरोरुवत् अत्यन्तं शब्दं कुर्वन् ᵛकृष्टिहेव मनुष्याणां हन्ता योद्धेव ᵛप्र ᵛएति प्रगच्छति। किंच ᵛअसुर्यम् असुराणां बाधकम् ᵛअस्य आत्मनो ᵛवर्णं हरितमावारकं बलं वा ᵛनि ᵛरिणीते निर्गमयति। ततः स सोमः ᵛवव्रिम्। वृणोति शरीरमिति वव्रिर्जरा। ᵛजहाति त्यजति। कथमिति चेत् तदुच्यते। ᵛपितुः अन्नं सोमः ᵛनिष्कृतं[1] संस्कृतं द्रोणकलशं दिवं वा इदानीम् ᵛएति गच्छति। किंच सोमः ᵛतना अविवालेन तते विस्तृते दशापवित्रे ᵛनिर्निजम्। निर्निगिति रूपनाम। आत्मीयं रूपम् ᵛउपप्रुतम् उपगमनशीलं ᵛकृणुते करोति। तस्माज्जरां त्यजतीत्यर्थः॥

अद्रिभिः सुतः पवते गभस्त्योर्वृषायते नभसा वेपते मती।
स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि॥ ३॥

अद्रिऽभिः। सुतः। पवते। गभस्त्योः। वृऽयते। नभसा। वेपते। मती।
सः। मोदते। नसते। साधते। गिरा। नेनिक्ते। अप्ऽसु। यजते। परीमणि॥ ३॥

ᵛअद्रिभिः ग्रावभिः ᵛगभस्त्योः बाह्वोः बाहुभ्यां च ᵛसुतः अभिषुतः स सोमः ᵛपवते पात्राणि प्रति गच्छति। यः[2] सोमः ᵛवृषायते वृषवदाचरति। किंच यः ᵛमती स्तुत्याभिष्टुतः सन् ᵛनभसा अन्तरिक्षेण ᵛवेपते सर्वत्र गच्छति[3] ᵛसः सोमः ᵛमोदते हृष्टो भवति। तथा ᵛनसते ग्रहादिषु संश्लिष्टो भवति। किंच ᵛगिरा स्तुत्या स्तुतः सन् ᵛसाधते स्तोतॄणां धनाद्यादिकं साधयति। अपि च ᵛअप्सु वसतीवर्याख्यासु ᵛनेनिक्ते शुद्धो भवति। तथा ᵛपरीमणि देवैः रक्ष्यमाणे यज्ञे देवानां हविष्प्रदानेन पोषके वा यज्ञे ᵛयजते पूजितो भवति॥

परिं द्युक्षं सहसः पर्वतावृधं मध्वः सिञ्चन्ति हर्म्यस्य सक्षणिम्।
आ यस्मिन्गावः सुहुताद ऊधनि मूर्धञ्छ्रीणन्त्यग्रियं वरीमभिः॥ ४॥

परिं। द्युक्षम्। सहसः। पर्वतऽवृधम्। मध्वः। सिञ्चन्ति। हर्म्यस्य। सक्षणिम्।
आ। यस्मिन्। गावः। सुहुतऽअदः। ऊधनि। मूर्धन्। श्रीणन्ति। अग्रियम्। वरीमऽभिः॥४॥

ᵛसहसः सहस्विनः ᵛमध्वः मदकराः सोमाः ᵛद्युक्षं दीप्यमाने[3] द्युलोके ᵛक्षियन्तं निवसन्तं ᵛपर्वतावृधं मेघानां पर्वतानां वा वर्धयितारं ᵛहर्म्यस्य हर्म्यवतः पुरस्य ᵛसक्षणिम् अभिभवितारमिन्द्रं ᵛपरि

---

१. त-म६–तिरस्कृतं। २. ग–नभसांतरिक्षेण वृषायते वर्षते मत्या स्तुत्यस्थानात् कंपते। ३. ग-त-म२.६–दीप्यमानं।

vविशन्ति । तथा vसुहुतादः सुहुतानां हविषां भक्षयितारः vगावः vमूर्धन् मूर्धनि समुच्छ्रिते vऊधनि पयोधारके स्थाने स्थितम् vअग्रियं मुख्यं पयः vबरीमभिः उरुव्यैर्महद्भिः vयस्मिन् पवमानगुणविशिष्ट इन्द्रे vआ vश्रीणन्ति आमिश्रयन्ति । दध्ना पयसा च सोमं श्रीणन्ति खलु । तदुच्यते ॥

समी रथं न भुरिजोरहेषत दश स्वसारो अदितेरुपस्थ आ ।
जिगादुप ज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन् ॥ ५ ॥

सम् । ईमिति । रथम् । न । भुरिजोः । अहेषत । दश । स्वसारः । अदितेः । उपऽस्थे । आ । जिगात् । उप । ज्रयति । गोः । अपीच्यम् । पदम् । यत् । अस्य । मतुथाः । अजीजनन् ॥५॥

vभुरिजोः । बाहुनामैतत् । बिभ्रति पदार्थानाभ्यामिति । तयोर्बाह्वोः vदश दशसंख्याकाः vस्वसारः सर्वत्रसरणशीला अङ्गुलयः vअदितेः भूमेः vउपस्थे समीपे देवयजनदेशे vईम् एनं सोमम् vआ आभिमुख्येन vसम् vअहेषत संप्रेरयन्ति । ' हि वर्धनगत्योः ' । लुङि रूपम् । कथमिव । vरथं vन । रथं यथाङ्गुलयः प्रेरयन्ति तद्वत् । स सोमः vजिगात् पात्राणि गच्छति । किंच vगोः धेनोः vअपीच्यम् अन्तर्हितं पयः vउप vज्रयति तदानीमुपगच्छति । vयत् यदा vमतुथाः मननीयगुणवन्तः स्तोतारः vअस्य सोमस्य vपदं स्थानम् vअजीजनन् जनयन्ति तदानीमित्यर्थः ॥ ॥२५॥

अभिष्टवे[1] ' इयेनो न योनिम् ' इत्येषा । सूत्रितं च—' संप्रेषितः इयेनो न योनिं सदनं धिया कृतम् ' (आश्व. श्रौ. ४. ७) इति । अग्नीषोमप्रणयनेऽप्येषा । सूत्रितं च–'अन्तश्च प्रागा अदितिर्भवासि इयेनो न योनिं सदनं धिया कृतम् ' (आश्व. श्रौ. ४. १०) इति ॥

इयेनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति ।
आ रिणन्ति बर्हिषि प्रियं गिराश्वो न देवाँ अप्येति यज्ञियः ॥ ६ ॥

इयेनः । न । योनिम् । सदनम् । धिया । कृतम् । हिरण्ययम् । आऽसदम् । देवः । आ । ईयति । आ । ईमिति । रिणन्ति । बर्हिषि । प्रियम् । गिरा ।
अश्वः । न । देवान् । अपि । एति । यज्ञियः ॥ ६ ॥

vदेवः द्योतमानः पवमानः vधिया स्वकर्मणा vकृतं संपादितं vहिरण्ययं हिरण्मयम् vआसदम् आसन्द्यभिधानम् vएषति अभिमुखं गच्छति । ईषतेर्गत्यर्थस्य व्यत्ययेन परस्मैपदम् । तत्र दृष्टान्तः । vइयेनो vन vयोनिम् । कुलायं यथा इयेनः पक्षी प्रविशति तद्वत् । ततः vईम् एनं vप्रियं प्रीणयितारं सोमं vगिरा स्तुत्या vबर्हिषि यज्ञे vआ vरिणन्ति स्तोतारोऽभिमुखं प्रेरयन्ति । स्तुवन्तीत्यर्थः । अनन्तरं vयज्ञियः यज्ञार्हः यष्टव्योऽयं सोमः vअश्वो vन अश्व इव त्वरया vदेवान् vअप्येति अभिगच्छति ॥

परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि ।
सहस्रनीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति ॥ ७ ॥

परा । विऽअक्तः । अरुषः । दिवः । कविः । वृषा । त्रिऽपृष्ठः । अनविष्ट । गाः । अभि ।
सहस्रऽनीतिः । यतिः । पराऽयतिः । रेभः । न । पूर्वीः । उषसः । वि । राजति ॥ ७ ॥

१. ग–अवितावप्रवर्ग्ये ।

vअरुषः आरोचमानः vकविः क्रान्तप्रज्ञः सोमः vव्यक्तः विस्पष्टधारायुक्तः । यद्वा । वसतीवरीभिर्विशेषेणाक्तः सिक्तः सन् vदिवः अन्तरिक्षात् vपरा पराङ्मुखम् आगच्छति । पवित्रात् द्रोणकलशं परागच्छतीत्यर्थः । vवृषा वृषभः vत्रिपृष्ठः । त्रीणि सवनानि पृष्ठान्यस्येति त्रिपृष्ठः सोमस्य सर्वेषु विद्यमानत्वात् । तस्मात् त्रिपृष्ठः सोमः vगाः स्तोतृभिः क्रियमाणाः स्तुतीरभिलक्ष्य vअनविष्ट शब्दायते । 'नु शब्दे' । किंच vसहस्रणीतिः सहस्रनयनः । प्रयोगबाहुल्यापेक्षं ग्रहेषु चमसेषु च सहस्रविधनयनत्वम् । अत एव vयतिः पात्रादीनि प्रत्यागन्ता vपरायतिः कलशान् प्रति परागन्ता भवति । सोऽयं vपूर्वीः बह्वीः vउषसः । 'कालाध्वनोः*' इति द्वितीया । बहुपूषःकालेषु vरेभो vन । 'रेभृ शब्दे' । शब्दायमानः स्तोतेव vवि vराजति विशेषेण दीप्यते । तेषु सोमस्याभिषूयमाणत्वात् । स्तोता खलु देवानां स्तुतिकरणेन राजति[1] ॥

त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः ।
अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥ ८ ॥

त्वेषम् । रूपम् । कृणुते । वर्णः । अस्य । सः । यत्र । अशयत् । सम्ऽऋता । सेधति । स्रिधः ।
अप्साः । याति । स्वधया । दैव्यम् । जनम् । सम् । सुऽस्तुती । नसते । सम् । गोऽअग्रया ॥८॥

vअस्य । अन्वादेशे अशादेशः । अस्य सोमस्य स्वभूतः vवर्णः शत्रूणां निवारको रश्मिः vत्वेषं दीप्यमानं vरूपं vकृणुते करोति । vसः रश्मिः vयत्र vसमृता । अर्तेः क्तिनि रूपम् । सम्यक् प्राप्यते योद्धृभिरत्रेति संग्रामः । अस्मिन् समृतौ युद्धे vअशयत् शेते तिष्ठति । शीङो लङि 'बहुलं छन्दसि' इति शपो लुगभावः । तत्र युद्धे स रश्मिः vस्रिधः शोषकाञ्छत्रून् vसेधति निषेधति । हिनस्तीति यावत् । वाक्यभेदादनिघातः । किंच vअप्साः । सनोतेः विटि आत्वे कृते रूपम् । अपामुदकानां दाता । यद्वा वसतीवर्योख्यानामपां संभक्ता । सोऽयं vस्वधया हवीरूपेणान्नेन सह vदैव्यं देवानां संबन्धिनं vजनं[2] प्रति vयाति गच्छति । अपि च सोऽयं vसुष्टुती सुस्तुत्या vसं संगच्छते । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । किंच स सोमः vगोअग्रया गवादिमुख्यया यया वाचा स्तोतारः पशून् याचन्ते तया वाचा vसं vनसते संगतो भवति । नसतिर्गत्यर्थः । भिन्नवाक्यत्वादनिघातः ॥

उक्षेव यूथा परियन्नरावीदधि त्विषीराधित सूर्यस्य ।
दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ॥ ९ ॥

उक्षाऽइव । यूथा । परिऽयन् । अरावीत् । अधि । त्विषीः । अधित । सूर्यस्य ।
दिव्यः । सुऽपर्णः । अव । चक्षत । क्षाम् । सोमः । परि । क्रतुना । पश्यते । जाः ॥ ९ ॥

vउक्षेव वृषभ इव vयूथा गोयूथानि प्रत्यागच्छञ्छन्दं करोति तद्वदयं सोमः स्तुतीः vपरियन् परिगच्छन् vअरावीत् शब्दायते । ततः vसूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य[3] vत्विषीः दीप्तीः vअधि vअधित अधिदधाति । सूर्यात्मना द्युलोकेऽवतिष्ठत इत्यर्थः । दधातेर्लुङि 'स्थाध्वोरिच्च' इति इत्वकित्त्वे । किंच vदिव्यः दिवि भवः vसुपर्णः सुपतनः श्येनरूपया[4] गायत्र्याहृतत्वाच्छोभनगमनः सोमः vक्षाम् । पृथिवीनामैतत् । क्षियन्ति निवसन्त्यत्रेति । क्षां पृथिवीम् vअव vचक्षत अवपश्यति ।

---

१. भ६–विराजति । २. त१.२.५.६-भ६–'जनं' नास्ति । ३. त-भ–प्रेरकादित्यस्य । ४. त१.२.६.७-भ६–शोभन°; त५–शोन° ।

चष्टेर्लेटि 'बहुलं छन्दसि' इति शपो लुगभावः। ततः vसोमः vजाः[1] जाताः[1] प्रजाः vक्रतुना प्रज्ञानेन vपरि vपश्यते परितः पश्यति। व्यत्ययेनात्मनेपदम्॥ ॥ २६ ॥

'हरिं मृजन्ति' इति नवर्चं पञ्चमं सूक्तमाङ्गिरसस्य हरिमन्तस्यार्षं पवमानसोमदेवताकम्। 'जागतमूर्ध्वं प्रागुशनसः' (अनु. ९.६७) इति परिभाषया जागतम्। तथा चानुक्रान्तं—'हरिं मृजन्ति हरिमन्तः' इति। गतो विनियोगः॥

हरिं मृजन्त्यरुषो न युञ्ज्यते सं धेनुभिः कलशे सोमो अज्यते।
उद्वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति चित्परिप्रियः॥ १॥

हरिम्। मृजन्ति। अरुषः। न। युज्यते। सम्। धेनुऽभिः। कलशे। सोमः। अज्यते।
उत्। वाचम्। ईरयति। हिन्वते। मती। पुरुऽस्तुतस्य। कति। चित्। परिऽप्रियः॥ १॥

vहरिं हरितवर्णं सोमसृत्विजो vमृजन्ति मार्जयन्ति। 'मृजेरजादौ संक्रमे विभाषा वृद्धिरिष्यते' (पा. म. १.१.३.१०; का. १.१.५) इति तत्र वृद्धेरभावः। सोऽयम् vअरुषः। अर्तेरुषच्प्रत्ययः। गमनशीलोऽश्व इव vयुज्यते इन्द्रादिभिः संयुज्यते। किंच vकलशे द्रोणाभिधाने स्थितः vसोमः vधेनुभिः गोविकारैः दध्यादिभिः vसम् vअज्यते समक्तः सिक्तो भवति। अपि च सोमो यदा vवाचं शब्दम् vउत् vईरयति उद्गमयति। शब्दं करोतीत्यर्थः। तदा स्तोतारश्च vमती। 'सुपां सुलुक्°' इति द्वितीयायाः पूर्वसवर्णदीर्घः। स्तुतिं vहिन्वते प्रेरयन्ति। 'हि गतौ वृद्धौ च' इति स्वादिः आत्मनेपदी। ततः स्तोत्राभिष्टुतः सः vपुरुष्टुतस्य बहुस्तोत्रयुक्तस्य स्तोतुः vपरिप्रियः। 'प्रीङ् तर्पणे'। क्विप्। शसि इयङादेशः। कृदुत्तरपदप्रकृतिस्वरत्वम्। परितः प्रीणयितृणि vकति vचित् कियन्ति धनानि प्रयच्छति॥

साकं वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यदादुहुः।
यदीं मृजन्ति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु॥ २॥

साकम्। वदन्ति। बहवः। मनीषिणः। इन्द्रस्य। सोमम्। जठरे। यत्। आऽदुहुः।
यदि। मृजन्ति। सुऽगभस्तयः। नरः। सऽनीळाभिः। दशऽभिः। काम्यम्। मधु॥ २॥

vमनीषिणः मनस ईशितारः प्राज्ञाः vबहवः स्तोतारः vसाकं सहैव युगपत् मन्त्रान् vवदन्ति। तदा स्तुवन्ति। यदा[2] vइन्द्रस्य vजठरे द्रोणकलशे vसोमम् vआदुहुः ऋत्विजो दुदुहुः तदाभिष्टुवन्तीति। दुहेर्लिटि गुसि रूपम्। द्विर्वचनस्य छन्दसि विकल्पितत्वादत्र द्विर्वचनाभावः। किंच vयदि यदा vसुगभस्तयः शोभनबाहुकाः vनरः कर्मनेतारो मनुष्याः vकाम्यं काम्यमानं vमधु मदकरं सोमं vसनीळाभिः vदशभिः दशसंख्याकाभिरङ्गुलीभिः vमृजन्ति सोममभिषुण्वन्ति तदा वदन्तीत्यन्वयः॥

अरमाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवम्।
अन्वस्मै जोषमभरद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः॥ ३॥

अरममाणः। अति। एति। गाः। अभि। सूर्यस्य। प्रियम्। दुहितुः। तिरः। रवम्।
अनु। अस्मै। जोषम्। अभरत्। विनम्ऽगृसः।
सम्। द्वयीभिः। स्वसृऽभिः। क्षेति। जामिऽभिः॥ ३॥

१. ग—जाः प्रजानामन्तर् जाताः; त१.२.६.७—जाः; त३.४.५-म२.६.७—जाताः। २. त—यद्वा।

[v]सः सोमः [v]अरममाणः अनुपरतः सन् । पुनःपुनर्देवानां प्रीणनाय ग्रहादीनि प्रविशन्नित्यर्थः । [v]गाः गोविकारानाश्रयणानभिलक्ष्य [v]अत्येति अतिक्रम्य गच्छति । ततः शब्दायमानः सोमः [v]सूर्यस्य आदित्यस्य [v]दुहितुः उषसः [v]प्रियं [v]रवं शब्दं [v]तिरः तिरस्करोति । तस्मिन्काले सोमाभिषवध्वनिर्महान् भवतीत्यर्थः । [v]विनंगृसः । विनं कमनीयं स्तोत्रं गृह्णातीति विनंगृसः स्तोता । [v]जोषम् । जुषेर्भावे रूपम् । पर्याप्तं स्तोत्रं तस्मै सोमाय [v]अनु [v]अभरत् अनुभरति । करोतीति यावत् । सोऽयं सोमः [v]द्वर्याभिः द्वाभ्यां पाणिभ्यामुत्पन्नाभिः [v]जामिभिः परस्परं बन्धुभिः स्वसृभिः कर्मकरणार्थमितस्ततो गच्छन्तीभिरङ्गुलीभिः [v]सं [v]क्षेति संगच्छते । ' क्षि निवासगत्योः ' । छान्दसो विकरणस्य लुक् ॥

नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुरृत्वियः ।
पुरंधिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते ॥ ४ ॥

नृऽधूतः । अद्रिऽसुतः । बर्हिषि । प्रियः । पतिः । गवाम् । प्रऽदिवः । इन्दुः । ऋत्वियः ।
पुरंधिऽवान् । मनुषः । यज्ञऽसाधनः । शुचिः । धिया । पवते । सोमः । इन्द्र । ते । ॥४॥

हे [v]इन्द्र पवमानगुणविशिष्टेन्द्र [v]ते त्वदर्थं [v]बर्हिषि यज्ञेऽयं [v]सोमः [v]धिया स्वेन कर्मणा धारया वा [v]पवते पात्रेषु स्यन्दते । कीदृशः। [v]नृधूतः कर्मनेतृभिर्मनुष्यैः शोधितः [v]अद्रिषुतः ग्रावभिरभिषुतः [v]प्रियः देवानां प्रीणयिता [v]गवां [v]पतिः स्वामी । इन्दो गा अलभत तस्माद्गवां स्वामी । [v]प्रदिवः । पुराणनामैतत् । पुराणः [v]इन्दुः पात्रेषु क्षरन् [v]ऋत्वियः ऋतौ जातः । 'ऋतोरण्' 'छन्दसि घस्' (पा. सू. ५. १. १०५-१०६) इति घस् । सिद्धेन पदसंज्ञायां भसंज्ञानिमित्त[1] ओर्गुणो[1] न भवति । [v]पुरंधिवान् । ' पुरंधिर्बहुधीः ' (निरु. ६. १३) इति यास्कः । बहुकर्मवान् [v]मनुषः मनुष्यस्य [v]यज्ञसाधनः [v]शुचिः दीप्यमानः । यद्वा । दशापवित्रेण शुद्धः । एवंगुणः सोमः इन्द्रार्थं पवत इति संबन्धः ॥

नृबाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते सोम इन्द्र ते ।
आप्राः क्रतून्त्समजैरध्वरे मतीर्वेर्न द्रुषच्चम्वो३रासदद्धरिः ॥ ५ ॥

नृबाहुऽभ्याम् । चोदितः । धारया । सुतः । अनुऽस्वधम् । पवते । सोमः । इन्द्र । ते ।
आ । अप्राः । क्रतून् । सम् । अजैः । अध्वरे । मतीः ।
वेः । न । द्रुऽसत् । चम्वोः । आ । असदत् । हरिः ॥ ५ ॥

हे [v]इन्द्र पवमानगुणविशिष्ट [v]नृबाहुभ्यां कर्मनेतॄणामृत्विजां बाहुभ्यां [v]चोदितः प्रेरितः [v]धारया [v]सुतः अभिषुतः । यथा धारा भवति तथाभिषुत इत्यर्थः । तादृशः [v]सोमः [v]ते तव [v]अनुष्वधं बलमनु बलार्थम् । यद्वा । स्वधेत्यन्ननाम । अन्नार्थं [v]पवते[2] आगच्छति । ततः स त्वं सोमपानेन [v]क्रतून् कर्माणि [v]आप्राः आपूरयसि । किंच [v]अध्वरे यज्ञे [v]मतीः अभिमन्यमानान् शत्रून् [v]समजैः सम्यग्जितवानसि । ' जि जये ' । लुङि सिपि सिचो ' बहुलं छन्दसि ' इति इडभावः । ' सिचि वृद्धिः ' इति वृद्धिः । सोऽयं [v]हरिः हरितवर्णः सोमः [v]चम्वोः अधिषवणफलकयोः [v]आसदत् आसीदति । तत्र दृष्टान्तः । [v]वेर्न । वी गत्यादिषु । ' अन्येभ्योऽपि दृश्यन्ते ' इति क्विप् । ' सार्व-

---

१. ग–भसंज्ञानिवृत्तेर्गुणः । २. ग-त१.२.३.४.५.६-भ–विपवते; त७–वेः पवते ।

धातुकार्यधातुकयोः ' इति गुणः । यथा विः पक्षी vद्रुषत् द्रुमे सीदतीति तद्वत् । द्रुषत्[1] । ' पूर्व-पदात् ' इति षत्वम् ॥ ॥ २७ ॥

अंशुं दुहन्ति स्तनयन्तमाक्षितं कविं कवयोऽपसो मनीषिणः ।
समी गावो मतयो यन्ति संयत ऋतस्य योना सदने पुनर्भुवः ॥ ६ ॥

अंशुम् । दुहन्ति । स्तनयन्तम् । अक्षितम् । कविम् । कवयः । अपसः । मनीषिणः ।
सम् । ईमिति । गावः । मतयः । यन्ति । सम्ऽयतः । ऋतस्य । योना । सदने । पुनःऽभुवः ॥ ६ ॥

vकवयः क्रान्तप्रज्ञाः vअपसः कर्मवन्तः vमनीषिणः । मनस ईशा मनीषा बुद्धिः । तद्वन्त ऋत्विजः vस्तनयन्तं शब्दायमानम् vअक्षितम् अक्षीणं vकविं क्रान्तदर्शिनम् vअंशुं सोमं vदुहन्ति अभिषुण्वन्ति । ततः vपुनर्भुवः पुनर्भवनशीलाः vगावः पशवः vमतयः मननीयाः स्तुतयश्च vसंयतः परस्परं संगताः सत्यः vऋतस्य सत्यभूतस्य यज्ञस्य vयोना योनौ योनिस्थानीय उत्पत्तिभूते vसदने उत्तरवेद्याख्ये vईम् एनं सोमं vसं vयन्ति संगच्छन्ति ॥

नाभा पृथिव्या धरुणो महो दिवोऽपामूर्मौ सिन्धुष्वन्तरुक्षितः ।
इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ॥ ७ ॥

नाभा । पृथिव्याः । धरुणः । महः । दिवः । अपाम् । ऊर्मौ । सिन्धुषु । अन्तः । उक्षितः ।
इन्द्रस्य । वज्रः । वृषभः । विभुऽवसुः । सोमः । हृदे । पवते । चारु । मत्सरः ॥ ७ ॥

vमहः महतः vदिवः द्युलोकस्य vधरुणः धारकोऽयं सोमः vपृथिव्याः विस्तीर्णाया भूमेः vनाभा नाभौ नाभिस्थानीये उच्छ्रिते पदे ' यदुत्तरवेदीनाभिः ' (ऐ. ब्रा. १. २८) इत्याम्नानात् उत्तरवेदिस्थान ऋत्विग्भिर्निहितः vसिन्धुषु स्यन्दमानासु नदीषु vअपाम् उदकानाम् vऊर्मौ संघे vअन्तः मध्ये vउक्षितः सिक्तः । अन्तरिक्षस्थानमध्ये वर्तमान इत्यर्थः । तादृशः vइन्द्रस्य vवज्रः वज्रस्थानीयः vवृषभः कामानां वर्षिता अत एव vविभूवसुः व्याप्तधनः vसोमः vचारु कल्याणं यथा भवति तथा इन्द्रस्य vमत्सरः मादयिता सन् vहृदे मनसे सुखाय vपवते आगच्छति ॥

स तू पवस्व परि पार्थिवं रजः स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो ।
मा नो निर्भाग्वसुनः सादनस्पृशो रयिं पिशङ्गं बहुलं वसीमहि ॥ ८ ॥

सः । तु । पवस्व । परि । पार्थिवम् । रजः । स्तोत्रे । शिक्षन् । आऽधून्वते । च । सुक्रतो
इति सुऽक्रतो ॥ मा । नः । निः । भाक् । वसुनः । सदनऽस्पृशः ।
रयिम् । पिशङ्गम् । बहुलम् । वसीमहि ॥ ८ ॥

हे vसुक्रतो शोभनकर्मन् सुप्रज्ञ वा सोम तादृशस्त्वं vपार्थिवं vरजः लोकं लक्षीकृत्य vतु क्षिप्रं vपरि vपवस्व परितः सर्वतः क्षर । किं कुर्वन् । vआधून्वते अदाभ्यग्रहे त्रिभिरंशुभिराधावनं कुर्वते । तथा भगवता आपस्तम्बेन सूत्रितं—' तैरेनं चतुराधुनोति पञ्चकृत्वः सप्तकृत्वो वा ' इति । तस्मै धनादिकं vशिक्षन् प्रयच्छन् परि पवस्वेति समन्वयः । ततस्त्वं vनः अस्मान् vवसुनः धनात् vमा

---

१. ग-त१.२.३-भ१.२.४.६–द्रुषदिति; भ१(२)-द्रुषदित्यत्र ।

[v]निर्भाक् मा निर्भाक्क्षीः मा वियोक्षीः। कीदृशात्। [v]सदनस्पृशः। येन[1] भूतेन[2] वसुना सदनानि गृहान् पुत्रादीन् स्पृशन्ति तादृशात् गृहादिकस्य प्रदातुः धनान्मा[3] वियुजः। भाक्। 'भज सेवायाम्'। लुङि सिपि सिचि 'बहुलं छन्दसि' इति ईडागमाभावः। 'एकाचः°' इति इट्प्रतिषेधः। हलन्त-लक्षणा वृद्धिः (पा. सू. ७. २. ३)। सिपो[3] लोपः। यस्मादेवं तस्माद्वयं• [v]पिशङ्गं नानारूपं कनकादिना अत एव [v]बहुलं प्रभूतं [v]रयिं धनं [v]वसीमहि आच्छादयेम। बहुधनवन्तो भवेमेत्यर्थः। 'वस आच्छादने'। आदादिकः। लिङि रूपम्॥

आ तू न इन्दो शतदात्वश्व्यं सहस्रदातु पशुमद्धिरण्यवत्।
उप मास्व बृहती रेवतीरिषोऽधि स्तोत्रस्य पवमान नो गहि॥ ९॥

आ। तु। नः। इन्दो इति। शतऽदातु। अश्व्यम्। सहस्रऽदातु। पशुऽमत्। हिरण्यऽवत्। उप। मास्व। बृहतीः। रेवतीः। इषः। अधि। स्तोत्रस्य। पवमान। नः। गहि॥ ९॥

हे [v]इन्दो पवमान [v]नः अस्मभ्यं [v]तु क्षिप्रं धनम् [v]आ आयच्छ। कीदृशम्। [v]शतदातु। दातु दानम्। बहुदानम् [v]अश्व्यम् अश्वसहितं [v]सहस्रदातु सहस्रदानोपेतं [v]पशुमत् पश्वादियुक्तं [v]हिरण्य-वत् हिरण्ययुक्तं च धनं देहि। तथा हे सोम [v]बृहतीः प्रभूतानि [v]रेवतीः धनवन्ति[4]। यद्वा पयसो दातारः पशवः। तद्वन्ति [v]इषः अन्नानि चास्मभ्यम् [v]उप [v]मास्व उपनिर्मिमीष्व। कुर्विति यावत्। किंच हे [v]पवमान [v]नः[5] अस्माकं स्वभूतस्य [v]स्तोत्रस्य श्रवणाय [v]अधि [v]गहि आगच्छ। 'क्रिया-र्थोपपदस्य°' (पा. सू. २. ३. १४) इति चतुर्थी। 'चतुर्थ्यर्थे बहुलं छन्दसि' इति षष्ठी॥ ॥ २८॥

'स्रक्वे' इति नवर्चं षष्ठं सूक्तमाङ्गिरसस्य पवित्रस्यार्षं जागतं पवमानसोमदेवताकम्। तथा चानुक्रम्यते–'स्रक्वे पवित्रः' इति। प्रवर्ग्येऽभिष्टव एतत्सूक्तम्। सूत्रितं च–'स्रक्वे द्रप्सस्यायं वेन-श्चोदयत्पृश्निगर्भाः' (आश्व. श्रौ. ४. ६) इति॥

स्रक्वे द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरन्त नाभयः।
त्रीन्त्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन्॥ १॥

स्रक्वे। द्रप्सस्य। धमतः। सम्। अस्वरन्। ऋतस्य। योना। सम्। अरन्त। नाभयः। त्रीन्। सः। मूर्ध्नः। असुरः। चक्रे। आऽरभे। सत्यस्य। नावः। सुऽकृतम्। अपीपरन्॥ १॥

[v]स्रक्वे यज्ञस्य[6] हनुस्थानीये। स्रक्व ओष्ठप्रान्तौ हनुरुच्यते। 'हनुरधिषवणफलकः' इत्याम्नानात् हनुस्थानीये अधिषवणफलके [v]धमतः अभिषूयमाणस्य [v]द्रप्सस्य सोमस्यांशवः [v]समस्वरन् संगच्छन्ते। समशब्दयन् वा। [v]ऋतस्य सत्यभूतस्य यज्ञस्य [v]योना योनावुत्पत्तिस्थाने [v]नाभयः सोमरसाः [v]समरन्त संगच्छन्ते। अर्तेः 'समो गमि°' इत्यादिनात्मनेपदम्। 'सर्तिशास्त्यर्तिभ्यश्च' इति च्लेरङ्। अथ [v]असुरः बलवान् सर्वेषां प्रीणनात् प्राणदाता वा [v]सः सोमः [v]मूर्ध्नः समुच्छ्रितान् [v]त्रीन् लोकान् [v]आरभे आरम्भणाय मनुष्यदेवादीनां संचरणाय[7] करोति। किंच [v]सत्यस्य सत्यभूतस्य सोमस्य [v]नावः नौका इव स्थिताश्चतस्रः स्थाल्यः[8]। आदित्याग्रयणोक्त्यध्रुवस्थाल्य इति। ताः

---

१. ग-त३.४-भ५–येन प्रभूतेन; त१.२.५.६.७-भ४–ये भूतेन; भ१.७–यत्ते नव। २. ग–यत्रास्मान् मा; त-भ२.४.६–यन्नान्ना; भ१.७–यन्ना। ३. ग–सिचो। ४. ग–धनवतीः; त७–धनवती। ५. भ६–सोम। ६. ग–यज्ञवक्त्रस्य। ७. ग-त-भ५.६–संचरणाय च; भ१.७–संवरणाय। ८. त–स्थाल्या स्थानि; भ१.४–स्थाल्यः स्थानि; भ६–स्थाल्य स्थानि।

स्थाप्यः ᵛसुकृतं सुष्ठु कर्माणि कुर्वन्तं यजमानम् ᵛअपीपरन् अभिमतदानेन पूजयन्ति[1] वा। पारयतेर्लुङि चङि सन्वद्भावाभ्यासेत्वदीर्घाः ॥

सम्यक् सम्यञ्चो महिषा अहेषत सिन्धोरूर्मावधि वेना अवीविपन्।
मधोर्धाराभिर्जनयन्तो अर्कमित्प्रियामिन्द्रस्य तन्वमवीवृधन् ॥ २ ॥

सम्यक्। सम्यञ्चः। महिषाः। अहेषत। सिन्धोः। ऊर्मौ। अधि। वेनाः। अवीविपन्। मधोः। धाराभिः। जनयन्तः। अर्कम्। इत्। प्रियाम्। इन्द्रस्य। तन्वम्। अवीवृधन् ॥२॥

ᵛमहिषाः पूज्या महान्तो वर्त्विजः ᵛसम्यञ्चः परस्परं संगताः सन्तः ᵛसम्यक् ᵛअहेषत सोमं सम्यक् प्रेरयन्ति अभिषुण्वन्तीति यावत्। 'हि गतौ वृद्धौ च'। लुङि सिचि रूपम्। ततः ᵛवेनाः। 'वेनतेः कान्तिकर्मणः' (निरु. १०. ३८) इति यास्कः। स्वर्गादिफलं कामयमाना ऋत्विजः ᵛसिन्धोः स्यन्दमानस्योदकस्य ᵛऊर्मौ ᵛअधि संधे वसतीवर्यादिषु जलेषु सोमम् ᵛअवीविपन् कम्पयन्ति। तत्र प्रेरयन्तीत्यर्थः। वपतेर्ण्यन्तस्य[2] लुङि चङि 'णौ चङ्युपधाया ह्रस्वः' इति ह्रस्वः। किंच ᵛअर्कम् अर्चनीयं स्तोत्रं ᵛजनयन्तः कुर्वन्तस्ते ᵛप्रियां प्रियतमाम् ᵛइन्द्रस्य ᵛतन्वं धाम च ᵛमधोः मदकरस्य सोमस्य ᵛधाराभिः ᵛअवीवृधन् वर्धितवन्तः। वर्धतेर्लुङि चङि रूपम् ॥

पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम्।
महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ॥ ३ ॥

पवित्रऽवन्तः। परि। वाचम्। आसते। पिता। एषाम्। प्रत्नः। अभि। रक्षति। व्रतम्। महः। समुद्रम्। वरुणः। तिरः। दधे। धीराः। इत्। शेकुः। धरुणेषु। आऽरभम् ॥३॥

ᵛपवित्रवन्तः पवित्रेण शोधकेन सामर्थ्येन युक्ताः सोमस्य रश्मयः ᵛवाचं सोमस्थितां माध्यमिकां वाचं ᵛपरि ᵛआसते पर्युपविशन्ति। सोमोऽन्तरिक्षे तिष्ठति खलु 'सोमो वै राजा गन्धर्वेष्वासीत्' (ऐ. ब्रा. १.२७). इत्याम्नानात्। ततः ᵛप्रत्नः पुराणः ᵛएषां रश्मीनां[3] ᵛपिता अयं सोमश्च ᵛव्रतं प्रकाशनात्मकं कर्म ᵛअभि ᵛरक्षति अवितं करोति। किंच ᵛवरुणः सर्वस्य स्वतेजसाच्छादकः सोऽयं सोमः ᵛमहः महत् ᵛसमुद्रम्। अन्तरिक्षनामैतत्। महदन्तरिक्षं तै[4] रश्मिभिः ᵛतिरो ᵛदधे अन्तर्हितमकरोत्। सर्वं व्याप्नोदिति यावत्। तमिमं सोमं ᵛधीराः। ᵛइत् अवधारणे। कर्मणि कुशलाः प्राज्ञा एवर्त्विजः ᵛधरुणेषु सर्वस्य धारकेषु वसतीवर्याख्येषूदकेषु ᵛआरभम् आरब्धुं ᵛशेकुः शक्नुवन्ति च। रभेस्तुमर्थे 'शकि णमुल्कमुलौ' (पा. सू. ३. ४. १२) इति कमुल्। लिस्वरेण मध्योदात्तः ॥

सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः।
अस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवः ॥४॥

सहस्रऽधारे। अव। ते। सम्। अस्वरन्। दिवः। नाके। मधुऽजिह्वाः। असश्चतः। अस्य। स्पशः। न। नि। मिषन्ति। भूर्णयः। पदेऽपदे। पाशिनः। सन्ति। सेतवः ॥४॥

१. ग–पूरयंति। २. ग–वेपते°; त-भ४.६–पतते°; भ२–कंपते°; भ७–वतपते°। ३. ग–अंशूनां। ४. ग–स्वै।

vसहस्रधारे । बहूदकधारा यस्माद्भवन्ति तत्तथोक्तमन्तरिक्षम् । तस्मिन् वर्तमानाः vते सोमरश्मयः vअव अवस्तात् स्थिताः vसमस्वरन् । पृथिवीं वृष्ट्या संयोजयन्तीत्यर्थः । किंच vदिवः द्युलोकस्य vनाके समुच्छ्रिते देशे वर्तमानाः vमधुजिह्वाः मध्वग्राः । सोमतेजसाग्रेभ्यो[1] हि मधूत्पन्नं भवति । अतो मधुजिह्वाः । vअसश्चतः संगतवर्जिताः[2] पृथक्पृथग्दिव्यवस्थिताः vअस्य सोमस्य स्वभूताः vस्पशः सारभूता रश्मयः vभूर्णयः क्षिप्रगामिनः सन्तः vन vनि vमिषन्ति निमेषं न कुर्वन्ति । किंतु पापिनः सुकृतिनश्च ज्ञातुं सर्वदा जाग्रतीत्यर्थः । अथवा । राजभृत्या यथा दुष्टान् विचारयितुं सर्वदा जागरणं कुर्वन्ति तद्वदेते रश्मयः vपदेपदे स्थाने स्थाने vसेतवः संबद्धाः सन्तः vपाशिनः पापकृतां बाधकाः vसन्ति भवन्ति ॥

पितुर्मातुरध्या ये समस्वरन्ऋचा शोचन्तः संदहन्तो अव्रतान् ।
इन्द्रद्विष्टामप धमन्ति मायया त्वचमसिक्नीं भूमनो दिवस्परि ॥ ५ ॥

पितुः । मातुः । अधि । आ । ये । सम्ऽअस्वरन् । ऋचा । शोचन्तः । सम्ऽदहन्तः । अव्रतान् । इन्द्रऽद्विष्टाम् । अप । धमन्ति । मायया । त्वचम् । असिक्नीम् । भूमनः । दिवः । परि ॥५॥

vपितुर्मातुः द्यावापृथिव्योः । 'द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम्' (ऋ. सं. १.१६४.३३) इत्यादिषु द्यावापृथिव्योर्मातापितृत्वाम्नानात् । द्यावापृथिवीभ्यां vये सोमरश्मयः vअध्या vसमस्वरन् अधिकं प्रादुर्भूता अभवन् ते vऋचा ऋत्विग्भिः क्रियमाणया स्तुत्या vशोचन्तः दीप्यमानाः vअव्रतान् कर्मरहितान् यजमानान् vसंदहन्तः सम्यग्विनाशयन्तस्ते रश्मयः vइन्द्रद्विष्टाम् इन्द्राय द्वेषकारिणीम् । 'के च' (पा. सू. ६. २. ४५) इति पूर्वपदप्रकृतिस्वरः । इन्द्रेण द्विष्टां वा । vअसिक्नीम् । रात्रिनामैतत् । रात्रिवत्कृष्णरूपां vत्वचम् । राक्षसमित्यर्थः[3] । vमायया कर्मणा प्रज्ञया वा vभूमनः विस्तृताद्द्युलोकात् vदिवस्परि द्युलोकाच्च vअप vधमन्ति अपगतं कुर्वन्ति । अपघ्नन्तीत्यर्थः ॥ ॥ २९ ॥

प्रत्नान्मानादध्या ये समस्वरञ्छ्लोकयन्त्रासो रभसस्य मन्तवः ।
अपानक्षासो बधिरा अहासत ऋतस्य पन्थां न तरन्ति दुष्कृतः ॥ ६ ॥

प्रत्नात् । मानात् । अधि । आ । ये । सम्ऽअस्वरन् । श्लोकऽयन्त्रासः । रभसस्य । मन्तवः । अप । अनक्षासः । बधिराः । अहासत । ऋतस्य । पन्थाम् । न । तरन्ति । दुःऽकृतः ॥६॥

vश्लोकयन्त्रासः । श्लोकाः स्तुतयः । स्तुतिनियमनाः vरभसस्य vमन्तवः वेगमभिमन्यमानाः एतादृशाः vये सोमरश्मयः vप्रत्नात् पुराणात्[4] vमानात् अन्तरिक्षात् vअध्या vसमस्वरन् सह प्रादुर्भूता अभवन् तान्रश्मीन् vअनक्षासः चक्षुर्वर्जिताः साधु पदार्थानामद्रष्टारो नराः vबधिराः देवतास्तुतिश्रवणवर्जिताः पापकृतो[5] नरश्च vअप vअहासत तान् परित्यजन्ति । दर्शिनः श्रवणवन्तो मेधाविनस्तु न परिजहति किंतु स्तुवन्ति । तदेवाह । vऋतस्य सत्यस्य vपन्थां मार्गभूतमेषां गणं vदुष्कृतः पापकृतो नराः vन vतरन्ति नोत्तारयन्ति । सुकृतस्तु तरन्तीत्यभिप्रायः ॥

सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः ।
रुद्रास एषामिषिरासो अद्रुहः स्पशः स्वञ्चः सुदृशो नृचक्षसः ॥ ७ ॥

---

१. ग-सोमतेजसामग्रेभ्यो । २. ग-त४-भ६-संगवर्जिताः; भ७-संगतावर्जिताः । ३. भ१(२)-राक्षसी° । ४. भ६-पुरातनात् । ५. भ१(२)-दुष्कृतः पापकृतः ।

सहस्रऽधारे । वितते । पवित्रे । आ । वाचम् । पुनन्ति । कवयः । मनीषिणः ।
रुद्रासः । एषाम् । इषिरासः । अद्रुहः । स्पशः । सुऽअञ्जः । सुऽदृशः । नृऽचक्षसः ॥ ७ ॥

[v]कवयः क्रान्तकर्माणः अत एव [v]मनीषिणः प्राज्ञा ऋत्विजः [v]सहस्रधारे अनेकधारोपेते [v]विततते कर्मणि विस्तृते [v]पवित्रे शुद्धयुत्पादके सोमे वर्तमानां [v]वाचं माध्यमिकाम् । सोमः खलु विश्वावसुप्रभृतिगन्धर्वेष्वन्तरिक्षेऽवतिष्ठते 'सोमो वै राजा गन्धर्वेष्वासीत्' (ऐ. ब्रा.१.२७) इति श्रवणात् । तत्र वर्तमानं सोमं देवा गोरूपया वाचा क्रीतवन्तः । तदा सोमे वाक्तिष्ठतीति शक्यते वक्तुम् । तस्मात्सोमे स्थितां माध्यमिकां वाचम् [v]आ [v]पुनन्ति संस्कुर्वन्ति । स्तुवन्तीति यावत् । य उक्तगुणा मरुतां मातरं माध्यमिकां वाचं स्तुवन्ति तेषां [v]रुद्रासः रुद्रपुत्रा मरुतः [v]स्पशः मध्यमया वाचा वशिनो भवन्ति । कीदृशाः । [v]इषिराः गमनशीलाः [v]अद्रुहः स्तोतॄणामद्रोग्धारः । यद्वा । द्रुहेः कर्मणि क्विबौणादिकः । परैरहिंस्याः । [v]स्वञ्जः शोभनाञ्जनाः अत एव [v]सुदृशः सुदर्शनाः [v]नृचक्षसः नृणां कर्मनेतॄणां द्रष्टारः ॥

ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्यन्तरा दधे ।
विद्वान्त्स विश्वा भुवनाभि पश्यत्यवाजुष्टान् विध्यति कर्ते अव्रतान् ॥ ८ ॥

ऋतस्य । गोपाः । न । दभाय । सुऽक्रतुः । त्री । सः । पवित्रा । हृदि । अन्तः । आ । दधे ।
विद्वान् । सः । विश्वा । भुवना । अभि । पश्यति । अव । अजुष्टान् । विध्यति । कर्ते । अव्रतान् ॥८॥

[v]ऋतस्य सत्यभूतस्य यज्ञस्य [v]गोपाः गोपायिता अत एव [v]सुक्रतुः शोभनकर्मा सोमः [v]न [v]दभाय दम्भाय[1] स्तम्भनाय न भवति । परैर्दम्भयितुं न शक्यत इत्यर्थः । किंच [v]सः सोमः [v]त्री । 'शेश्छन्दसि बहुलम्' इति लुक् । त्रीणि [v]पवित्रा अग्निवायुसूर्यात्मकानि त्रीणि पवित्राणि [v]हृद्यन्तः हृदयस्यान्तः [v]आ [v]दधे आदधाति । स्वस्मिन् संगमयतीत्यर्थः । अपि च [v]विद्वान् सर्वं जानानः [v]सः सोमः [v]विश्वा [v]भुवना सर्वाणि भुवनानि [v]अभि [v]पश्यति । ततः [v]कर्ते । करोतेरौणादिकः तप्रत्ययः । कर्मणि [v]अजुष्टान् अप्रियान् अत एव [v]अव्रतान् अयजमानान् [v]अव [v]विध्यति अधोमुखान् कृत्वा ताडयति । हिनस्तीति यावत् ॥

ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया ।
धीरास्श्चित्तत्समिनक्षन्त आशतात्रा कर्तमव पदात्यप्रभुः ॥ ९ ॥

ऋतस्य । तन्तुः । विऽततः । पवित्रे । आ । जिह्वायाः । अग्रे । वरुणस्य । मायया ।
धीराः । चित् । तत् । सम्ऽइनक्षन्तः । आशत । अत्र । कर्तम् । अव । पदाति । अप्रभुः ॥९॥

[v]ऋतस्य सत्यभूतस्य यज्ञस्य [v]तन्तुः ततिता[2] [v]पवित्रे अविवालमये दशापवित्रे [v]विततः विस्तृतः । यद्वा । पवित्रेऽन्तरिक्षे विस्तृतः सोमः [v]वरुणस्य [v]जिह्वाया [v]अग्रे [v]मायया कर्मणा [v]आ[3] आस्थितः[3] । वरुणजिह्वाग्र आपस्तिष्ठन्ति । तासु[4] सोमो वसतीति वसतीवर्याख्युदकेषु[5] स्थित इत्यर्थः ।

---

१. ग-न दंभाय । २. ग-ततिता अयं । ३. ग-त३-भ७-दुरास्थितः; त१-दरास्थित; त२.४.५.६ दुरास्थित; त७-दूरास्थित; भ१.२-दुरा दुरास्थितः; भ४-दुरस्थितः; भ६-दुरस्थित । ४. त-भ६-तेषु । ५. त-भ२-°द्युदके ।

ततः vधीराश्चित् कर्मणि प्राज्ञा एव vतत् वरुणजिह्वाप्रस्थानं vसमिनक्षन्तः। इनक्षतिर्गतिकर्मा। संख्यामुवन्तः सन्तः vआशत स्तुतिभिर्हविर्भिर्वा प्रामुवन्। यः पुनः vकर्तम्। 'कालाध्वनोः०' इति द्वितीया। कर्मणि vअप्रभुः समर्थो न भवति सोऽयम् vअत्र अस्मिन्नेव लोके vअव vपदाति अवस्ताच्चरके पतति नोपरि गच्छति। 'पद गतौ'। लेट्याडागमः। तस्मात्सर्वैरग्निष्टोमादिकर्म कर्तव्यमित्येषोऽर्थोऽभिहितो भवति॥ ॥ ३० ॥

'शिशुर्न' इति नवर्चं सप्तमं सूक्तं दैर्घतमसस्य कक्षीवत आर्षं पवमानसोमदेवताकम्। अष्टमी त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रम्यते–'शिशुर्न कक्षीवांस्त्रिष्टुबष्टमी' इति। गतः सूक्तविनियोगः॥

शिशुर्न जातोऽव चक्रदद्वने स्व१र्यद्वाज्यरुषः सिषासति।
दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म सप्रथः॥ १॥

शिशुः। न। जातः। अव। चक्रदत्। वने। स्वः। यत्। वाजी। अरुषः। सिसासति।
दिवः। रेतसा। सचते। पयःऽवृधा। तम्। ईमहे। सुऽमती। शर्म। सुऽप्रथः॥ १॥

स पवमानः सोमः vवने वननीये वसतीवर्याख्ये उदके vजातः उत्पन्नः vशिशुर्न शिशुरिव vअव vचक्रदत् अवाङ्मुखं क्रन्दति। तदोदकमध्ये पतञ्छब्दं करोति खलु। vयत् यदा vवाजी बलवानन्नवान् वा vअरुषः आरोचमानः। यद्वा। वाज्यश्व इव अरुषः। अर्तेरुषच्। गमनशीलः सोमः vस्वः स्वर्गलोकं vसिषासति संभक्तुमिच्छति। सनोतेः सनीडभाव आत्वम्। 'सनोतेः०' इति सांहितिकं षत्वम्। सोऽयं vपयोवृधा गवामोषधीनां च क्षीरस्य वर्धकेन[1] vरेतसा उदकेन सह vदिवः द्युलोकात् vसचते पार्थिवं लोकं समवैति। vतं तादृशं प्रसिद्धं सोमं vसप्रथः सर्वतः पृथुतरं[2] धनादिना युक्तं vशर्म गृहं तद्वयं vसुमती। 'सुपां सुलुक्०' इति तृतीयायाः पूर्वसवर्णदीर्घः। सुमत्या शोभनया स्तुत्या vईमहे याचामहे। ईमह इति याच्ञाकर्मा। 'ईङ् गतौ'। दैवादिकः। छान्दसः श्यनो लुक्॥

दिवो यः स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः।
सेमे मही रोदसी यक्षदावृता समीचीने दाधार समिषः कविः॥ २॥

दिवः। यः। स्कम्भः। धरुणः। सुऽआततः। आऽपूर्णः। अंशुः। परिऽएति। विश्वतः।
सः। इमे इति। मही इति। रोदसी इति। यक्षत्। आऽवृता।
समीचीने इति सम्ऽईचीने। दाधार। सम्। इषः। कविः॥ २॥

vदिवः द्युलोकस्य vस्कम्भः विष्कम्भयिता संरोद्धा vधरुणः सर्वस्य धारकः। यद्वा। पृथिव्या धारकः। 'विष्टम्भो दिवो धरुणः पृथिव्याः' (ऋ. सं. ९.८९.६) इत्याम्नानात्। तादृशः vस्वाततः सुष्ठु सर्वत्र vविततः विस्तृतः अत एव vआपूर्णः[3] पात्रेषु संपूर्णः vयः vअंशुः सोमात्मकः vविश्वतः सर्वतः vपर्येति परिगच्छति। 'तिङि चोदात्तवति' इति गतेर्निघातः। vसः सोमः vइमे vरोदसी द्यावापृथिव्यौ vआवृता संभजनीयेन कर्मणा vयक्षत् यजतु। स्वबलेन संयोजयत्वित्यर्थः। ततः सोऽयं vसमीचीने परस्परं संगते द्यावापृथिव्यौ vदाधार धारयांचकार। 'तुजादीनाम्०' इत्यभ्यासस्य दीर्घः। अनन्तरं vकविः क्रान्तकर्मा vइषः अन्नानि स्तोतृभ्यः vसं प्रयच्छतु। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥

१. त१.२.५.६.७-भ६–'वर्धकेन' नास्ति। २. ग-त३-भ–पृथुतमं। ३. भ१.२.७–पूर्णः।

महि प्सरः सुकृतं सोम्यं मधूर्वी गव्यूतिरदितेरृतं यते ।
ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिरृग्मियः ॥ ३ ॥

महि । प्सरः । सुऽकृतम् । सोम्यम् । मधु । उर्वी । गव्यूतिः । अदितेः । ऋतम् । यते ।
ईशे । यः । वृष्टेः । इतः । उस्रियः । वृषा । अपाम् । नेता । यः । इतःऽऊतिः । ऋग्मियः ॥३॥

[v]ऋतं सत्यभूतं यज्ञं [v]यते गच्छते तस्मा इन्द्राय [v]सुकृतं सुष्ठु संस्कृतं [v]सोम्यं सोममयं [v]महि महत् प्रभूतं [v]मधु मधुररसं [v]प्सरः भक्षणं[1] पानीयं भवति । 'प्सा भक्षणे' । किंच अस्मद्यज्ञं प्रत्यागच्छतामिन्द्रादीनाम् [v]अदितेः[2] पृथिव्याः [v]गव्यूतिः मार्गश्च [v]उर्वी विस्तीर्णा भवति । इन्द्रस्य शतसहस्रसंख्याकैर्हरिभिः सह गन्तुं मार्गो विस्तीर्णोऽभवदित्यर्थः । [v]यः इन्द्रः [v]इतः इमं लोकं प्रत्यापतन्त्याः [v]वृष्टेः [v]ईशे ईश्वरो भवति । तथा [v]उस्रियः । उस्रेति गोनाम । गोभ्यो हितः [v]अपाम् उदकानां [v]वृषा वर्षकः यज्ञस्य[3] [v]नेता[4] नायकः[5] [v]इतऊतिः इममस्मदीयं यज्ञं प्रत्यूतिर्गमनं यस्य स तथोक्तः । इतो गच्छन् [v]यः इन्द्रः [v]ऋग्मियः ऋगर्हः स्तोतव्यो भवति । तस्मा अयं सोमः पातव्यो[6] भवतीति ॥

प्रवर्ग्येऽभिष्टवे 'आत्मन्वन्नभः' इत्येषा । सूत्रितं च–'तदु प्रयक्षतममस्य कर्मात्मन्वन्नभो दुह्यते घृतं पयः' (आश्व. श्रौ. ४. ७) इति ॥

आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।
समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमर्व मेहन्ति पेरवः ॥ ४ ॥

आत्मन्ऽवत् । नभः । दुह्यते । घृतम् । पयः । ऋतस्य । नाभिः । अमृतम् । वि । जायते ।
सम्ऽईचीनाः । सुऽदानवः । प्रीणन्ति । तम् । नरः । हितम् । अर्व । मेहन्ति । पेरवः ॥४॥

[v]आत्मन्वत् । 'अनो नुट्' इति नुडागमः । आत्मवत् सारवत् [v]घृतं [v]पयः च [v]नभः नभस आदित्यरूपात्सोमः [v]दुह्यते । किंच [v]ऋतस्य यज्ञस्य [v]नाभिः । 'णह बन्धने' । 'स्वमोर्नपुंसकात्' (पा. सू. ७. १. २३) इति सोर्लुप्त भवति सर्वविधीनां छन्दसि विकल्पितत्वात् । नाभि[7] यज्ञस्य बन्धकम् [v]अमृतम् उदकं च [v]वि [v]जायते तस्मादेव प्रादुर्भवति । ततः [v]सुदानवः शोभन-स्तुतिहविर्दानवन्तो यजमानाः [v]समीचीनाः परस्परं संगताः सन्तः [v]तम् इमं सोमं प्रीणयन्ति[8] स्तुतिभिस्तर्पयन्ति । अथ [v]नरः नेतारः [v]पेरवः । 'पा रक्षणे' । 'मापोरित्वे रुन्' इति रुन्प्रत्ययः । सर्वस्य रक्षकाः सोमरश्मयः [v]हितं निहितम् [v]अर्व अवस्ताद्वर्तमानं पार्थिवमुदकं [v]मेहन्ति वर्षन्ति । 'मिह सेचने' । भौवादिकः । यद्वा । हितमुदकं पृथिवीं प्रति मेहन्ति ॥

अरावीदंशुः सचमान ऊर्मिणा देवाव्यं१ मनुषे पिन्वति त्वचम् ।
दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ॥ ५ ॥

अरावीत् । अंशुः । सचमानः । ऊर्मिणा । देवऽअव्यम् । मनुषे । पिन्वति । त्वचम् ।
दधाति । गर्भम् । अदितेः । उपऽस्थे । आ । येन । तोकम् । च । तनयम् । च । धामहे ॥५॥

१. ग-त३-म१.२.४.७–मक्षणीयं । २. त-भ२–या; भ६–या द्यावा; मु–अदितेः अदीनायाः । ३. ग-त३-म१.२.४.५.७–नेता सर्वस्य । ४. ग–जगतः । ५. ग–दातव्यो । ६. ग-म१.६.७–नाभिः; त४–नार्मि । ७. भ१(२)–स्तुतिभिः प्रीणंति प्रीणयंति स्तुतिभिः प्रीणयंति ।

vऊर्मिणा वसतीवर्यादीनामुदकानां संचेन vसचमानः vअंशुः सोमः vअरावीत् शब्दं करोति। किंच स सोमः vदेवाञ्यम्। 'अव रक्षणे'। ' अवितृस्तृतन्त्रिभ्य ईः' इति ईप्रत्ययः। देवानां पालयित्रीं vस्वचम् आत्मनः शरीरं vमनुषे मनुष्याय यजमानाय vपिन्वति सिञ्चति। पात्रेषु क्षरतीति यावत्। अपि च vअदितेः अदीनायाः पृथिव्याः vउपस्थे समीप ओषधीषु तं vगर्भम् vआ vदधाति सुधामयैः किरणैर्विदधाति। vयेन गर्भेण वयं vतोकं दुःखनाशकं पुत्रं vच vतनयम्। तनोति कुलमिति तनयः पौत्रः। तं vच vधामहे दध्महे धारयामः। दधातेर्लेटि ' बहुलं छन्दसि ' इति शपो लुक्॥ ॥ ३१ ॥

सहस्रधारेऽव ता असश्चतस्तृतीये सन्तु रजसि प्रजावतीः।
चतस्रो नाभो निहिता अवो दिवो हविर्भरन्त्यमृतं घृतश्चुतः॥ ६॥

सहस्रऽधारे। अव। ताः। असश्चतः। तृतीये। सन्तु। रजसि। प्रजाऽवतीः।
चतस्रः। नाभः। निऽहिताः। अवः। दिवः। हविः। भरन्ति। अमृतम्। घृतऽश्चुतः॥६॥

vसहस्रधारे बहूदकधारे vतृतीये vरजसि लोके स्वर्गे वर्तमानाः vअसश्चतः परस्परमसक्ताः vप्रजावतीः उत्पादितप्रजावत्यः सोमस्य स्वभूताः vताः vअव vसन्तु अवस्तात्पृथिव्यां पतन्तु। कास्ता इत्याह। vचतस्रो vनाभः तपसो[1] बाधिकाः सोमस्य संबन्धिन्यश्चतस्रो दीक्षयः कलाः vदिवः द्युलोकात् vअवः अवस्तात् vनिहिताः सोमेन स्थापिताः ताः vघृतश्चुतः घृतस्योदकस्य स्यावयित्र्यः सत्यः vहविः सोमादिलक्षणं vभरन्ति देवानां प्रयच्छन्ति। तथा[2] vअमृतं गोष्वोषधीषु च पयोरूपं सुधारूपं च भरन्ति प्रक्षिपन्ति॥

श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः।
धिया शमी सचते सेमभि प्रवद्दिवस्कवन्धमव दर्षदुद्रिणम्॥ ७॥

श्वेतम्। रूपम्। कृणुते। यत्। सिसासति। सोमः। मीढ्वान्। असुरः। वेद। भूमनः।
धिया। शमी। सचते। सः। ईम्। अभि। प्रऽवत्। दिवः। कवन्धम्। अव। दर्षत्। उद्रिणम्॥७॥

vश्वेतं दीप्यमानं शुक्लं vरूपं vकृणुते तदा करोति vयत् यदा vसिषासति स्वर्गं संभक्तुमिच्छति। सोमे पात्राण्यागते सति तत्तेजसानुरञ्जितानां तेषां श्वेतं रूपं भवति। ततः vमीढ्वान्। 'मिह सेचने'। अस्मात् क्वसौ ' दाश्वान्साह्वान्मीढ्वांश्च ' इति निपातनादभिमतरूपसिद्धिः। कामानां सेक्ता vअसुरः प्राज्ञो बलवान् वा vसोमः vभूमनः बहुधनानि vवेद स्तोतृभ्यो[3] दातुं जानाति। प्रयच्छतीति यावत्। vस vईम्। ' सोऽचि लोपे चेत्[4] ' इति सुलोपः। सोऽयं vधिया प्रज्ञानेन vप्रवत् प्रकृष्टानि vशमी। द्वितीयायाः पूर्वसवर्णदीर्घः। कर्माणि vअभि vसचते अभितः समवैति। किंच vदिवः अन्तरिक्षात् vउद्रिणम् उदकवन्तं vकवन्धं[5] मेघम्। कवन्धशब्देन[6] मेघोऽभिधीयते। तास्थ्यात्तच्छब्दमिति। मेघम् vअव vदर्षत् अवदारयति। विवृतद्वारं करोति। मेघं विदार्यान्तरिक्षात् वृष्टिं करोतीत्यर्थः॥

अधं श्वेतं कलशं गोभिरक्तं कार्ष्मन्वा वाज्यक्रमीत् ससवान्।
आ हिन्विरे मनसा देवयन्तः कक्षीवते शतहिमाय गोनाम्॥ ८॥

---

१. ग-मु-नभसो; त३-भ१.२.४.६-तमसो; भ७-नमसो। २. त-भ६-यथा। ३. ग-पातृभ्यः। ४. त३.५-भ-कबंधं। ५. त-भ-कबंध°।

अधं । श्वेतम् । कलशम् । गोभिः । अक्तम् । कार्ष्मन् । आ । वाजी । अक्रमीत् । ससऽवान् । आ । हिन्विरे । मनसा । देवऽयन्तः । कक्षीवते । शतऽहिमाय । गोनाम् ॥ ८ ॥

vअध अथानन्तरं vश्वेतं संप्रति सोमसंसर्गात् श्वेतवर्णं vगोभिः उदकैः vअक्तं संपृक्तं द्रोणकलशं vससवान् संभजन् सोमः[1] vआ vअक्रमीत् आक्रमते । vकार्ष्मन्[2]। कार्ष्मशब्दः काष्ठावचनः । आजिं धावन्तो योद्धारो यां गन्तुमिच्छन्ति तस्यां काष्ठायां vवाजी कश्चिदश्वो युद्धं भजमान आक्रमीत् आक्रमते । सोमः काष्ठायां द्रोणकलशे पततीत्यर्थः । ततस्तस्मै सोमाय vदेवयन्तः देवानिच्छन्त ऋत्विजः vमनसा vआ vहिन्विरे स्तुतीराभिमुख्येन प्रेरयन्ति । तत्र vशतहिमाय बहुगमनाय vकक्षीवते स्तोत्रकारिण एतन्नामकायर्षये सोमः vगोनां गाः पशून् प्रेरयति । 'गोः पादान्ते' (पा. सू. ७. १. ५७) इति नुडागमः । 'क्रियाग्रहणं कर्तव्यम्' इति संप्रदानसंज्ञा । चतुर्थ्यर्थे षष्ठी ॥

अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति ।
स मृज्यमानः कविभिर्मदिन्तम स्वदस्वेन्द्राय पवमान पीतये ॥ ९ ॥

अत्ऽभिः । सोम । पपृचानस्य । ते । रसः । अव्यः । वारम् । वि । पवमान । धावति ।
सः । मृज्यमानः । कविऽभिः । मदिन्ऽतम । स्वदस्व । इन्द्राय । पवमान । पीतये ॥ ९ ॥

हे vपवमान पवित्रेण पूयमान हे vसोम vअद्भिः वसतीवर्यादिभिरुदकैः vपपृचानस्य संपृच्यमानस्य vते तव vरसः vअव्यः अवेः vवारं वालं दशापवित्रं vवि vधावति विविधं प्राप्नोति । ततो हे vमदिन्तम मादयितृतम हे vपवमान सोम त्वं vकविभिः क्रान्तकर्मभिर्ऋत्विग्भिः vमृज्यमानः पूयमानः सन् vइन्द्राय vपीतये इन्द्रस्य पानार्थं vस्वदस्व प्रियरसो[3] भव ॥ ॥ ३२ ॥

'अभि प्रियाणि' इति पञ्चर्चमष्टमं सूक्तं भार्गवस्य कवेरार्षं जागतं पवमानसोमदेवताकम् । तथानुक्रम्यते–'अभि प्रियाणि पञ्च कविः' इति । गतो विनियोगः ॥

अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।
आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥ १ ॥

अभि । प्रियाणि । पवते । चनःऽहितः । नामानि । यह्वः । अधि । येषु । वर्धते ।
आ । सूर्यस्य । बृहतः । बृहन् । अधि । रथम् । विष्वञ्चम् । अरुहत् । विऽचक्षणः ॥ १ ॥

vचनोहितः । चन इत्यन्ननाम । चायतेरसुनि चन इत्यौणादिकसूत्रेण निपातितः । चनसेऽन्नाय हितः यद्वा हितान्नः सोमः vप्रियाणि जगतः प्रीणयितृणि vनामानि नमनशीलानि तान्युदकानि vअभि vपवते अभितः करोति । vयेषु अन्तरिक्षस्थितेषूदकेषु vयह्वः महानयं सोमः vअधि vवर्धते अधिकं प्रवृद्धो भवति । अपां मध्ये सोमो वसति । ततः vबृहन् महान् सोमः vबृहतः महतः परिवृढस्य vसूर्यस्य vविष्वञ्चं विष्वग्गमनम्[4] vअधि उपरि vरथं vविचक्षणः सर्वस्य विद्रष्टा सन् vआ vअरुहत् आरोहति । 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते' इति ॥

---

१. म१(२)–सोमः कार्ष्मन् । २. त२-म१-७–'कार्ष्मन्' नास्ति । ३. म६–प्रियतमो । ४. ग-म२–विष्वग्गामिनं रथं; त४-म१–विष्वग्गामनरथं; म७–विष्वंगांचनं वृथ; म१(२)–गमनसाधनं रथं ।

ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।
दधाति पुत्रः पित्रोरपीच्यं१ नाम तृतीयमधि रोचने दिवः ॥ २ ॥

ऋतस्य । जिह्वा । पवते । मधु । प्रियम् । वक्ता । पतिः । धियः । अस्याः । अदाभ्यः ।
दधाति । पुत्रः । पित्रोः । अपीच्यम् । नाम । तृतीयम् । अधि । रोचने । दिवः ॥ २ ॥

ऋतस्य सत्यभूतस्य यज्ञस्य जिह्वा मुख्यत्वेन जिह्वास्थानीयः सोमः प्रियं प्रियकरं मधु मदकरं रसं पवते क्षरति । कीदृशः । वक्ता शब्दकृत् । यद्वा । स्तोतृभिः क्रियमाणाः स्तुतयः२ साधीयस्य इति प्रतिश्रवणस्य कर्ता । अस्याः धियः एतस्य कर्मणः पतिः पालयिता अदाभ्यः रक्षोभिर्हिंसितुमशक्यः पुत्रः यजमानः पित्रोः मातापित्रोः अपीच्यम् अन्तर्हितं यत् नाम । तौ न जानीतो नामकरणवेलायाम् । तस्मात्तयोरपरिज्ञायमानं तत् तृतीयं नाम दिवः द्युलोकस्य रोचने दीप्यमाने सोमेऽभिषूयमाणे सति अधि दधाति अत्यन्तं धारयति । नक्षत्रव्यावहारिकनाम्नी प्रभाष्य सोमयाजीति तृतीयमस्य नाम इति भगवता बौधायनेनोक्तम् (बौ. गृह्यशेष. १.११.४-७) ॥

अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिरण्यये ।
अभीमृतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजति ॥ ३ ॥

अव । द्युतानः । कलशान् । अचिक्रदत् । नृऽभिः । येमानः । कोशे । आ । हिरण्यये ।
अभि । ईम् । ऋतस्य । दोहनाः । अनूषत । अधि । त्रिऽपृष्ठः । उषसः । वि । राजति ॥ ३ ॥

द्युतानः । ' द्युत दीप्तौ ' । दीप्यमानः नृभिः कर्मनेतृभिर्ऋत्विग्भिः हिरण्यये हिरण्मये कोशे अधिषवणचर्मणि३ । तस्य हिरण्मयत्वं ' हिरण्यपाणिरभिषुणोति ' इति हिरण्यसंबन्धात् । तादृशे कोशे येमानः । छान्दसे कर्मणि लिटि कानचि रूपम् । नियम्यमानः सोमः । ततः४ ऋतस्य सत्यभूतस्य यज्ञस्य दोहनाः दोग्धार ऋत्विजः ईम् एनं सोमम् अभि अनूषत अभिष्टुवन्ति । ' प्रावाणो वत्सा ऋत्विजो दुहन्ति ' (तै. सं. ६.२.११.४) इति तैत्तिरीयब्राह्मण एषां दोग्धृत्वमभिहितम् । सोमः कलशान् द्रोणाभिधानान्[४] प्रति अव अचिक्रदत् अवक्रन्दति शब्दायते । ततः त्रिपृष्ठः । त्रीणि सवनान्येव पृष्ठानि यस्य स तथोक्तः त्रिषु सवनेषु सोमस्य विद्यमानत्वात् । त्रिचक्रादित्वादुत्तरपदान्तोदात्तत्वम् । तादृशः सोमः उषसः अधि यागाहनि वि राजति । ' अधिशीङ्स्थासां० ' (पा. सू. १. ४. ४६) इति द्वितीया । तेष्वहःसु विशेषेण दीप्यते । यद्वा । राजतिरन्तर्णीतण्यर्थः । अहानि प्रकाशयति ॥

अद्रिभिः सुतो मतिभिश्चनोहितः प्ररोचयन्रोदसी मातरा शुचिः ।
रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिवेदिवे ॥ ४ ॥

अद्रिऽभिः । सुतः । मतिऽभिः । चनःऽहितः । प्रऽरोचयन् । रोदसी इति । मातरा । शुचिः ।
रोमाणि । अव्या । समया । वि । धावति । मधोः । धारा । पिन्वमाना । दिवेऽदिवे ॥ ४ ॥

१. त१.२.५.७-स्तुतः; त३.४-भ१.५.७-स्तुतीः; भ६-स्तुतिः । २. ग-अभिषव°; त३-भ१.२-अधिषव° । ३. ग-पवमानः; त३-भ१.२.६.७-ते तव; त४-तेनाव; भ१(२)-तेन च । ४. त३.४-द्रोणानभिधानान् ; भ६-द्रोणकलशाभिधानान् ।

vमतिभिः । 'मन ज्ञाने' । 'मन्ने वृषेवपचमन०' इति क्विप्प्रत्ययः । स्तुतिभिः vअद्रिभिः ग्रावभिश्च vसुतः अभिषुतः vघनोहितः घनसे अन्नाय हितः हितान्नो वा vमातरा मातरौ जगतो निर्मात्र्यौ vरोदसी द्यावापृथिव्यौ vप्ररोचयन् स्वतेजसा प्रकाशयन् अत एव vशुचिः दीप्यमानः एवंविधः सोमः अव्यानि[1] अविभवानि vरोमाणि तैः कृतानि पवित्राणि vसमथा अभितः समीपे vवि vधावति विशेषेण क्षरति । किंच vपिन्वमाना अद्भिः सिच्यमाना vमधोः मदकरस्य सोमस्य vधारा vदिवेदिवे अन्वहं दीर्घसत्रेषु पवित्राण्युभयतः पवते ॥

परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम् ।
ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम् ॥ ५ ॥

परि । सोम । प्र । धन्व । स्वस्तये । नृऽभिः । पुनानः । अभि । वासय । आऽशिरम् ।
ये । ते । मदाः । आहनसः । विऽहायसः । तेभिः । इन्द्रम् । चोदय । दातवे । मघम् ॥ ५ ॥

हे vसोम vस्वस्तये अविनाशाय vपरि vप्र vधन्व पात्राणि परितः प्रगच्छ[2] । धविर्गत्यर्थः । किंच vनृभिः कर्मनेतृभिर्ऋत्विग्भिः vपुनानः पूयमानस्त्वम् vआशिरम् आश्रयणं क्षीरादिकम् vअभि vवासय आच्छादय । संयोजयेति यावत् । vआहनसः । 'आहननवन्तो वचनवन्तः' (निरु. ४.१५) इति यास्कः । शत्रूणामाभिमुख्येन हन्तारोऽभिहन्यमाना अभिधूयमाणाः स्तुतिमन्तः शब्दवन्तो वा vविहायसः । महन्नामैतत् । महान्तः vते स्वदीयाः vये vमदाः मदहेतवो रसाः सन्ति vतेभिः तैः सोमैरस्माभिर्दीयमानैः[3] vमघं मंहनीयं धनमस्मभ्यं vदातवे दातुम् vइन्द्रं vचोदय प्रेरय ॥ ॥ ३३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये
सप्तमाष्टके द्वितीयोऽध्यायः संपूर्णः ॥

॥ श्रीगणेशाय नमः ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
व्याख्याय व्याहृतप्रज्ञः सप्तमस्य द्वितीयकम् ।
अध्यायं सायणामात्यस्तृतीयं व्याकरोत्यथ ॥

तत्र 'धर्ता' इति पञ्चर्चं नवमं सूक्तं भार्गवस्य कवेरार्षं जागतं पवमानसोमदेवताकम् । 'धर्ता' इत्यनुक्रान्तम् । गतो विनियोगः ॥

धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।
हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते नदीष्वा ॥ १ ॥

धर्ता । दिवः । पवते । कृत्व्यः । रसः । दक्षः । देवानाम् । अनुऽमाद्यः । नृऽभिः ।
हरिः । सृजानः । अत्यः । न । सत्वऽभिः । वृथा । पाजांसि । कृणुते । नदीषु । आ ॥ १ ॥

१. त७-अव्या । २. म१.७-आगच्छ । ३. त-म२.६-सोमैरिमभिर्दीयमानैः ।

[v]धर्ता सर्वस्य धारकः सोमः [v]दिवः अन्तरिक्षात् अन्तरिक्षस्थितादृशापवित्रात् [v]पवते पूयते। कीदृशः सोमः। [v]कृण्व्यः कर्तव्यः। शोध्य इत्यर्थः। [v]रसः रसात्मको [v]देवानां [v]दक्षः बलप्रदः। यद्वा। दक्षः प्रवर्धनीयो देवानामर्थाय। तथा [v]नृभिः नेतृभिर्ऋत्विग्भिः [v]अनुमाद्यः अनुमदनीयः स्तुत्यो वा [v]हरिः हरितवर्णः [v]सत्वभिः प्राणिभिः सादिभिः [v]सृजानः सृज्यमानः [v]अत्यो [v]न अश्व इव स यथा शिक्षितो [v]वृथा अनायासेन गच्छति तद्वत् वृथा अप्रयत्नेन [v]पाजांसि बलानि स्वीयान् वेगान् [v]कृणुते कुरुते। [v]नदीषु वसतीवरीषु। ताभिरित्यर्थः। [v]आ सिक्त इति शेषः। अयम् अभिषवसमयाभिप्रायः ॥

शूरो न धत्त आयुधा गभस्त्योः स्वर्१षः सिषासन्रथिरो गविष्टिषु।
इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ॥ २ ॥

शूरः। न। धत्ते। आयुधा। गभस्त्योः। स्वर्१रिति स्वः। सिसासन्। रथिरः। गोऽईष्टिषु।
इन्द्रस्य। शुष्मम्। ईरयन्। अपस्युऽभिः। इन्दुः। हिन्वानः। अज्यते। मनीषिऽभिः ॥२॥

अयं सोमः [v]गभस्त्योः हस्तयोः [v]आयुधा आयुधानि [v]शूरो [v]न शूर इव [v]धत्ते धारयति। [v]स्वः स्वर्गसुखसाधनं यज्ञं वा [v]सिषासन् संभक्तुमिच्छन् [v]रथिरः रथवान्। रथादिरच्प्रत्ययः। [v]गविष्टिषु यजमानस्य गवामेषणेषु सत्सु। यजमानार्थं गोसंभजनाय रथवानित्यर्थः। [v]इन्द्रस्य [v]शुष्मं बलम् [v]ईरयन् प्रेरयन् [v]इन्दुः सोमो देवः [v]अपस्युभिः कर्मेच्छुभिः [v]मनीषिभिः मेधाविभिर्ऋत्विग्भिः [v]हिन्वानः प्रेर्यमाणः [v]अज्यते गोभिः ॥

इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश।
प्र णः पिन्व विद्युदभ्रेव रोदसी धिया न वाजाँ उप मासि शश्वतः ॥ ३ ॥

इन्द्रस्य। सोम। पवमानः। ऊर्मिणा। तविष्यमाणः। जठरेषु। आ। विश।
प्र। नः। पिन्व। विऽद्युत्। अभ्राऽइव। रोदसी इति।
धिया। न। वाजान्। उप। मासि। शश्वतः ॥ ३ ॥

हे [v]सोम [v]पवमानः पूयमानस्त्वं [v]तविष्यमाणः वर्धयिष्यमाणः सन् [v]इन्द्रस्य [v]जठरेषु [v]ऊर्मिणा प्रभूतया धारया [v]आ [v]विश। जठरप्रदेशस्य बाहुल्याद्बहुवचनम्। [v]नः अस्मदर्थं [v]विद्युदभ्रेव अभ्राणीव सा यथा दोग्ध्यभ्राणि तद्वत् [v]प्र [v]पिन्व धुक्ष्व [v]रोदसी द्यावापृथिव्यौ। किंच [v]धिया कर्मणा [v]न इदानीम्। नेति संप्रत्यर्थे। [v]शश्वतः। बहुनामैतत्। बहून् [v]वाजान् अन्नानि [v]उप समीपे [v]मासि निर्मासि[६] ॥

विश्वस्य राजा पवते स्वर्दृशं ऋतस्य धीतिमृषिषाळवीवशत्।
यः सूर्यस्यासिरेण मुज्यते पिता मतीनामसमष्टकाव्यः ॥ ४ ॥

विश्वस्य। राजा। पवते। स्वःऽदृशः। ऋतस्य। धीतिम्। ऋषिषाट्। अवीवशत्।
यः। सूर्यस्य। असिरेण। मुज्यते। पिता। मतीनाम्। असमष्टऽकाव्यः ॥ ४ ॥

---

६. ग–ददासि।

Vविश्वस्य जगतः Vराजा स्वामी सोमः Vस्वर्दृशः स्वर्गंद्रष्टुः सर्वंद्रष्टुर्वा Vऋतस्य सत्यभूतस्येन्द्रस्य। मनुष्यवाच्यनृतशब्दप्रतियोगिकस्य ऋतशब्दस्य[1] देवार्थः[1]। तत्रापि औचित्येनेन्द्रः परिगृह्यते[2]। तस्य Vधीतिं मतिं कर्म वा Vऋषिषाट् ऋषीणामतीन्द्रियद्रष्टृणामभिभविता। महत्त्वेन स्वयमपि[3] ऋषिश्रेष्ठत्वादिति[3] भावः। तथा च मन्त्रान्तरं—'ब्रह्मा देवानां पदवीः कवीनामृषिः' (ऋ. सं.९.९६.६) इति। ईदृशः सोमः Vअवीवशत् अकामयत[4] इन्द्रस्य[4] कर्म। Vयः सोमः Vसूर्यस्य देवस्य Vअसिरेण क्षेपकेण रश्मिना Vमृज्यते। Vअसमष्टकाव्यः अन्यैः कविभिरव्याप्तकर्मा सोमः Vमतीनाम् अस्मदीयानां स्तुतीनां Vपिता पालकः स्वामी भवतीति शेषः। यद्वा। यो मतीनां पिता असमष्टकाव्यश्च सन् मृज्यते सः Vपवते इति संबन्धः॥

वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत्।
स इन्द्राय पवसे मत्सरिन्तमो यथा जेषाम समिथे त्वोतयः॥ ५॥

वृषाऽइव। यूथा। परि। कोशम्। अर्षसि। अपाम्। उपऽस्थे। वृषभः। कनिक्रदत्।
सः। इन्द्राय। पवसे। मत्सरिन्ऽतमः। यथा। जेषाम। सम्ऽइथे। त्वाऽऊतयः॥ ५॥

हे सोम त्वं Vवृषेव Vयूथा[5] यूथानि वृषभ इव स यथा तानि प्रविशति तद्वत् Vकोशं कोशवत् रसधारकं[6] कलशं Vपरि Vअर्षसि परिगच्छसि। कुत्रस्थः सन्। Vअपामुपस्थे अन्तरिक्षे। कीदृशः सन्। Vवृषभः वर्षिता Vकनिक्रदत् शब्दं कुर्वन्। Vसः त्वं हे सोम Vइन्द्राय इन्द्रार्थं Vपवसे पूयसे। Vमत्सरिन्तमः मादयितृतमस्त्वम्। Vयथा वयं Vजेषाम जयेम Vसमिथे संग्रामे Vत्वोतयः त्वया रक्षिताः सन्तः॥ ॥ १॥

'एष प्र कोशे' इति पञ्चर्चं दशमं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'एषः' इत्यनुक्रान्तम्। गतो विनियोगः॥

एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टरः।
अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः॥ १॥

एषः। प्र। कोशे। मधुऽमान्। अचिक्रदत्। इन्द्रस्य। वज्रः। वपुषः। वपुःऽतरः।
अभि। ईम्। ऋतस्य। सुऽदुघाः। घृतऽश्चुतः। वाश्राः। अर्षन्ति। पयसाऽइव। धेनवः॥१॥

Vएषः अयं सोमः Vमधुमान् मधुररसः Vकोशे द्रोणकलशे Vप्र Vअचिक्रदत् प्रकर्षेण शब्दायते। कीदृश एषः। Vइन्द्रस्य Vवज्रः वज्रस्थानीयः। बलकरत्वेन वज्रवत् प्रहरणसाधनत्वात् वज्रत्वोपचारः। एष एव हि सोमो वज्रे इन्द्रस्य साधने। तथा Vवपुषः बीजानां वप्तुः अन्यस्मात् Vवपुष्टरः अतिशयेन वप्ता। बीजावापस्य सोमकर्तृकत्वात् 'सोमो वै रेतोधाः' (तै. सं. २. १. १. ६) इति श्रुतेः। Vईम् अस्य Vऋतस्य सत्यफलस्य सोमस्य। धारा इति शेषः। ताः Vअभि Vअर्षन्ति अभिगच्छन्ति। कीदृश्यस्ताः। Vसुदुघाः सुष्ठु दोग्ध्र्यः फलानां Vघृतश्चुतः उदकस्य रसस्य वा क्षारयित्र्यः Vवाश्राः शब्दयन्त्यः। किमिव। Vपयसा युक्ता वाश्राः Vधेनवः Vइव इति॥

---

१. त३.भ७–°शब्दस्य देवोर्थः; भ६–°शब्दस्येवार्थः। २. त-मु–प्रतिगृह्यते। ३. ग–स्वयं ऋषिष्वपि श्रेष्ठत्वादिति। ४. ग–कामयते। ५. ग-त१.५.७-भ१.२.७–'यूथा' नास्ति। ६. ग–हविषः संधारकं; त-भ६–रसं धारकं; भ१.७–रवधारकं।

स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदीषितस्तिरो रजः ।
स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ॥ २ ॥

सः । पूर्व्यः । पवते । यम् । दिवः । परि । श्येनः । मथायत् । इषितः । तिरः । रजः ।
सः । मध्वः । आ । युवते । वेविजानः । इत् । कृशानोः । अस्तुः । मनसा । अह । बिभ्युषा ॥२॥

[v]सः सोमः [v]पूर्व्यः प्रत्नः [v]पवते पूयते । अभिषूयत इत्यर्थः । [v]यं सोमं [v]दिवः द्युलोकात् [v]श्येनः [v]इषितः स्वमात्रा प्रेषितः[1] सन् [v]परि [v]मथायत् पर्यमथ्नात् [v]तिरः तीर्णं तिरस्कुर्वन् । किम् । [v]रजः तृतीयं लोकम् । [v]सः एव सोमः [v]मध्वः मधुररसं सोमम् [v]आ [v]युवते यौति पृथक्करोति द्युलोकात् । स्वयं [v]वेविजान [v]इत् चलन् अधो गच्छन् [v]कृशानोः सोमपालस्य [v]अस्तुः शरक्षेप्तुः सकाशात् [v]बिभ्युषा भीतेन [v]मनसाह[2]। मध्व आ युवत इति संबन्धः । कृशानोः सोमपालत्वं ब्राह्मणे स्पष्टमुक्तं–' कृशानुः सोमपालः सव्यस्य पदः ' (ऐ. ब्रा. ३. २६) ॥

ते नः पूर्वासु उपरासु इन्दवो महे वाजाय धन्वन्तु गोमते ।
ईक्षेण्यासो अह्यो३ न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ॥ ३ ॥

ते । नः । पूर्वासः । उपरासः । इन्दवः । महे । वाजाय । धन्वन्तु । गोऽमते ।
ईक्षेण्यासः । अह्यः । न । चारवः । ब्रह्मऽब्रह्म । ये । जुजुषुः । हविःऽहविः ॥ ३ ॥

[v]ते वक्ष्यमाणाः [v]पूर्वासः पूर्वे [v]उपरासः । उपरता अत्रेत्युपराः । तादृशाः [v]इन्दवः सोमाः [v]महे महते [v]गोमते [v]नः मह्यं [v]वाजाय अन्नाय अन्नलाभार्थं [v]धन्वन्तु गच्छन्तु प्राप्नुवन्तु । कीदृशा इन्दवः । [v]ईक्षेण्यासः ईक्षणीयाः[3] संदर्शनीयाः [v]अह्यो [v]न । अह्यः स्त्रिय आहननात् । ता इव सुवेषाः स्त्रिय इव [v]चारवः रमणीयाः । त[4] इत्युक्तं क इत्याह । [v]ये इन्दवः [v]ब्रह्मब्रह्म सर्वमपि स्तावकमन्त्रजातं [v]हविर्हविः सर्वमपि हविर्जातं च [v]जुजुषुः सेवन्ते ॥

अयं नो विद्वान् वनवद्वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः ।
इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजम् ॥ ४ ॥

अयम् । नः । विद्वान् । वनवत् । वनुष्यतः । इन्दुः । सत्राचा । मनसा । पुरुऽस्तुतः ।
इनस्य । यः । सदने । गर्भम् । आऽदधे । गवाम् । उरुऽब्जम् । अभि । अर्षति । व्रजम् ॥४॥

[v]अयम् [v]इन्दुः सोमः [v]नः अस्मान् [v]वनुष्यतः हन्तुमिच्छतः शत्रून् [v]विद्वान् जानन् हन्तुं [v]वनवत् हन्तु तान् । केन साधनेन । [v]सत्राचा सहाञ्चता [v]मनसा । कीदृशः । [v]पुरुष्टुतः बहुभिः स्तुतः । [v]यः सोमः [v]इनस्य ईश्वरस्याग्नेः [v]सदने स्थाने भूमौ वेद्यां वा वर्तमानः [v]गर्भमादधे धारयत्योषधीषु । [v]यश्च [v]गवाम् अस्मदीयानां शत्रुभिरपहृतानाम् [v]उरुब्जं प्रभूतानामपां पयसां जनकं [v]व्रजम् [v]अभ्यर्षति गच्छति । स वनवदिति ॥

चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते ।
असावि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत् ॥ ५ ॥

---

१. ग-भ१.७–प्रेरितः । २. त–नभसा सह; त३-भ२.७–मनसा सह; भ६–नमसा सह; मु–मनसा अह सह । ३. ग-त१.३.४.७-भ१.४.७–' ईक्षणीयाः ' नास्ति । ४. त१.२.४.५–यत ।

चक्रिः । दिवः । पवते । कृत्व्यः । रसः । महान् । अदब्धः । वरुणः । हुरुक् । यते । असावि । मित्रः । वृजनेषु । यज्ञियः । अत्यः । न । यूथे । वृषऽयुः । कनिक्रदत् ॥ ५ ॥

vचक्रिः सर्वस्य कर्ता vकृत्व्यः कर्मण्यः vरसः रसात्मकः vमहान् गुणैरधिकः vअदब्धः अहिंस्यः vहुरुक् कुटिलं vयते गच्छते । इतस्ततः परिचरत इत्यर्थः । तदर्थं vदिवः सकाशात् vपवते पूयते । अन्तरिक्षस्थादक्षापवित्रादित्यर्थः । किंचासौ सोमः vअसावि सूयते । कदा । vवृजनेषु अरिष्टेषु सत्सु तत्परिहारार्थम् । कीदृशः सः । vमित्रः सर्वेषां मित्रभूतः vयज्ञियः यष्टव्यः vअत्यो vन अश्व इव vयूथे वडवायूथे स यथा vवृषयुः सन् शब्दं करोति तद्वदसौ वृषभो रसस्य वर्षिता vकनिक्रदत् शब्दं कुर्वन् असावीति ॥ ॥ २ ॥

'प्र राजा वाचम्' इति पञ्चर्चमेकादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'प्र राजा' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र राजा वाचं जनयन्नसिष्यदद्दपो वसानो अभि गा इयक्षति ।
गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतम् ॥ १ ॥

प्र । राजा । वाचम् । जनयन् । असिस्यदत् । अपः । वसानः । अभि । गाः । इयक्षति ।
गृभ्णाति । रिप्रम् । अविः । अस्य । तान्वा । शुद्धः । देवानाम् । उप । याति । निःऽकृतम् ॥ १ ॥

vराजा राजमानोऽयं सोमोऽभिषूयमाणः सन् vवाचं शब्दं vजनयन् उत्पादयन् vअसिष्यदत् प्रस्यन्दते । तथा vअपः वसतीवरीः vवसानः आच्छादयन् vगाः स्तुतीः vअभि vइयक्षति अभिगच्छति । इयक्षतिर्गतिकर्मसु पठितः । vअस्य सोमस्य vरिप्रम्[1] अनुपादेयत्वेन पापरूपम् अभिषुतवल्लीशकलादिरूपम् vअविः अविरोमनिर्मितं दशापवित्रं vतान्वा स्वीयेन वस्त्रेण vगृभ्णाति गृह्णाति शोधनसमये । पश्चात् vशुद्धः vदेवानां vनिष्कृतं संस्कृतं स्थानम् vउप vयाति उपगच्छति ॥

इन्द्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने ।
पूर्वीर्हि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः ॥ २ ॥

इन्द्राय । सोम । परि । सिच्यसे । नृऽभिः । नृऽचक्षाः । ऊर्मिः । कविः । अज्यसे । वने ।
पूर्वीः । हि । ते । स्रुतयः । सन्ति । यातवे । सहस्रम् । अश्वाः । हरयः । चमूऽसदः ॥ २ ॥

हे vसोम त्वम् vइन्द्राय इन्द्रार्थं vनृभिः नेतृभिर्ऋत्विग्भिः vपरि vषिच्यसे अभिषूयसे । तथा हे सोम vनृचक्षाः नृणां यष्टृणामनुग्रहेण द्रष्टा vऊर्मिः प्रेर्यमाणः प्रवृद्धो वा vकविः मेधावी च त्वं vवने उदके vअज्यसे प्रेर्यसे । vपूर्वीः बह्व्यः vहि vते vस्रुतयः मार्गांश्छिद्राणि vसन्ति vयातवे यातुम् । अल्पस्य सोमस्य अपरिमितस्रुतिगमनासंभवात्तस्य बाहुल्यमाह । vचमूषदः अभिषवणफलकयोः सीदतः vसहस्रम् अपरिमिताः vअश्वाः व्याप्ताः vहरयः हरितवर्णा अंशवः सन्ति । अथवा । इन्द्राय परिषिच्यस इत्युक्त्वादिन्द्रप्राप्तौ मार्गसाधनयोः सद्भाव उत्तरार्धेन प्रतिपादितः । ते पुरातन्यः सरण्यः सन्तीन्द्रं प्रति यातुम् । तथा सहस्रसंख्याका हरितवर्णा अश्वाश्च[2] सन्ति[3] चमूषदस्तवेति ॥

---

१. त१.२.५–ऋत्वं; भ६–क्रतुं । २. त१.२.७–अंशवः; त५–अशवः । ३. त१.७–संति अथ चेंद्राय; त२.४.५–संति अथ च ।

समुद्रियो अप्सरसो मनीषिणमासीना अन्तरभि सोममक्षरन् ।
ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम् ॥ ३ ॥

समुद्रियाः । अप्सरसः । मनीषिणम् । आसीनाः । अन्तः । अभि । सोमम् । अक्षरन् । ताः । ईम् । हिन्वन्ति । हर्म्यस्य । सक्षणिम् । याचन्ते । सुम्नम् । पवमानम् । अक्षितम् ॥३॥

[v]समुद्रियाः । समुद्रसाधनत्वात् समुद्रमन्तरिक्षम् । तत्संबन्धिन्यः [v]अप्सरसः काश्चन [v]अन्तः यज्ञमध्ये [v]आसीनाः पात्रेषु वर्तमाना वसतीवर्यः [v]मनीषिणं मेधाविनं [v]सोमम् [v]अभि [v]अक्षरन् अभिषूयमाणं सोममभिक्षरन्ति । [v]ताः एता आपः [v]ईम् एनं [v]हर्म्यस्य हर्म्यवत्सुखकरस्य यागगृहस्य [v]सक्षणिं सेचनशीलं[1] [v]हिन्वन्ति वर्धयन्ति पोषयन्ति । ता एव स्तोतारो वा [v]पवमानं सोमम् [v]अक्षितम् अक्षीणं [v]सुम्नं सुखं [v]याचन्ते प्रार्थयन्ते । तत्रायं[2] भावः । काश्चनाप्सरसः सोमं राजानं मनीषिणं कामयमाना देवानपि परित्यज्य स्वर्गादागत्य राज्ञः समीपे स्थित्वा तस्य रसानाददते । स्वरसेन वर्धयन्ति तं सुखं च याचन्त इति ॥

गोजिन्नः सोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् ।
यं देवासश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम् ॥ ४ ॥

गोऽजित् । नः । सोमः । रथऽजित् । हिरण्यऽजित् । स्वःऽजित् । अप्ऽजित् । पवते । सहस्रऽजित् । यम् । देवासः । चक्रिरे । पीतये । मदम् । स्वादिष्ठम् । द्रप्सम् । अरुणम् । मयःऽभुवम् ॥ ४ ॥

[v]नः अस्माकं [v]गोजित् गवां जेता तथा [v]रथजित् रथस्य जेता [v]हिरण्यजित् हिरण्यस्य जेता तथा [v]स्वर्जित् स्वर्गस्य सुखस्य जेता [v]अद्भिजत् अपां जेता [v]सहस्रजित् सहस्रसंख्याकस्य धनस्य जेता [v]सोमः [v]पवते पूयते । [v]यं [v]देवासः देवाः [v]चक्रिरे कृतवन्तः । किमर्थम् । [v]पीतये पानाय । कीदृशं सोमम् । [v]मदं मदकरं [v]स्वादिष्ठं स्वादुतमं [v]द्रप्सं रसात्मकम् [v]अरुणम् अरुणवर्णं [v]मयोभुवं सुखस्य भावयितारम् ॥

एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन् द्रविणान्यर्षसि ।
जहि शत्रुमन्तिके दूरके च य उर्वीं गव्यूतिमभयं च नस्कृधि ॥ ५ ॥

एतानि । सोम । पवमानः । अस्मऽयुः । सत्यानि । कृण्वन् । द्रविणानि । अर्षसि । जहि । शत्रुम् । अन्तिके । दूरके । च । यः । उर्वीम् । गव्यूतिम् । अभयम् । च । नः । कृधि ॥५॥

हे [v]सोम [v]एतानि पूर्वमन्त्रोक्तानि गवादीनि [v]द्रविणानि धनानि [v]सत्यानि [v]कृण्वन् कुर्वन् [v]पवमानः पूयमानः [v]अर्षसि पवसे । [v]जहि च [v]शत्रुं [v]यः अस्मच्छत्रुः [v]अन्तिके समीपे [v]दूरके अत्यन्तं दूरे देशे [v]च वर्तते तं जहि । तथा [v]उर्वीं [v]गव्यूतिं विस्तीर्णं मार्गम् [v]अभयं [v]च [v]नः अस्माकं [v]कृधि कुरु ॥ ॥ ३ ॥

'अचोदसः' इति पञ्चर्चं द्वादशं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'अचोदसः' इत्यनुक्रान्तम् । गतो विनियोगः ॥

---

१. ग–सेवनशीलं । २. ग-भ५–अत्रायं ।

अचोदसो नो धन्वन्त्विन्दवः प्र सुवानासो बृहद्दिवेषु हरयः ।
वि च नशन्न इषो अरातयोऽर्यो नशन्त सनिषन्त नो धियः ॥ १ ॥

अचोदसः । नः । धन्वन्तु । इन्दवः । प्र । सुवानासः । बृहत्ऽदिवेषु । हरयः ।
वि । च । नशन् । नः । इषः । अरातयः । अर्यः । नशन्त । सनिषन्त । नः । धियः ॥१॥

vअचोदसः अचोदना अनन्यप्रेरिताः vइन्दवः सोमाः vनः अस्माकं vप्र vधन्वन्तु प्रगच्छन्तु । धन्वतिर्गतिकर्मा । कुत्र । vबृहद्दिवेषु प्रभूतदीप्तिषु यागेषु निमित्तेषु । अथवा बृहद्दिवकुलजेषु मध्ये । न इति संबन्धः । कीदृशा इन्दवः । vसुवानासः सूयमानाः vहरयः हरितवर्णाः । किंच vनः[१] अस्मभ्यं[१] ये च vइषः अन्नस्य vअरातयः अदातारः सन्ति ते vच vवि vनशन् विनश्यन्तु । तथा vअर्यः अरयोऽपि vनशन्त[२] विनश्यन्तु[२] । vसनिषन्त संभजन्तु च vनो vधियः अस्मदीयानि कर्माणि देवा अस्मत्प्रियभूता वा ॥

प्र णो धन्वन्त्विन्दवो मदच्युतो धना वा येभिरर्वतो जुनीमसि ।
तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि विश्वधा भरेमहि ॥ २ ॥

प्र । नः । धन्वन्तु । इन्दवः । मदऽच्युतः । धना । वा । येभिः । अर्वतः । जुनीमसि ।
तिरः । मर्तस्य । कस्य । चित् । परिऽह्वृतिम् । वयम् । धनानि । विश्वधा । भरेमहि ॥२॥

vप्र[३] vधन्वन्तु प्रगच्छन्तु[३] vनः अस्माकम् vइन्दवः सोमाः vमदच्युतः मदस्राविणः । vवा अथवा[४] । किंचेत्यर्थः[४] । vधना धनान्यपि प्र धन्वन्तु । vयेभिः यैः सोमैः vअर्वतः बलवतः शत्रोः समीपं vजुनीमसि जुनीमः प्राप्नुमः । vकस्य vचित् कस्यापि vमर्तस्य मनुष्यस्य प्रबलस्य vपरिह्वृतिं परितो बाधां vतिरः तिरस्कुर्वन्तो vवयं vधनानि गवादिरूपाणि vविश्वधा सर्वदा vभरेमहि बिभृयाम ॥

उत स्वस्या अरात्या अरिर्हि ष उतान्यस्या अरात्या वृको हि षः ।
धन्वन्न तृष्णा समरीत तां अभि सोम जहि पवमान दुराध्यः ॥ ३ ॥

उत । स्वस्याः । अरात्याः । अरिः । हि । सः । उत । अन्यस्याः । अरात्याः । वृकः । हि । सः ।
धन्वन् । न । तृष्णा । सम् । अरीत । तान् । अभि । सोम । जहि । पवमान । दुःऽआध्यः ॥३॥

vउत अपि च vसः सोमः vस्वस्याः vअरात्याः स्वीयस्य शत्रोः[५] vअरिः अभिगन्ता हननाय । vउत अपि च vसः सोमः vअन्यस्याः अस्मदीयायाः vअरात्याः अस्मच्छत्रोः vवृको vहि हिंसकः खलु । अरातिशब्दः स्त्रीलिङ्गोऽप्यस्ति । अथ प्रत्यक्षकृतः । vधन्वन्न vतृष्णा । धन्व निरुदको देशः । तस्मिन् स्थितस्य तृष्णेव सा यथा तं vसमरीत प्राप्नोति तद्वत् vतान् उभयविधान्[७] शत्रून् vजहि[७] ॥

१. त५–नोस्मात्यं; म६–नोस्माकं । २. ग-त१.२.५.७-म२.६–नश्यंतु; त३.४–नशंत नश्यंतु । ३. म१.७–'प्र धन्वन्तु प्रगच्छन्तु' नास्ति । ४. ग-म१(२)–'अथवा' नास्ति । ५. त-मु–किंचिदित्यर्थः । ६. त-म६-मु–शत्रोः समीपं । ७. ग–तान् शत्रूनभि समरीत अज्ञानं प्राप्नोतु हे पवमान सोम दुर्बुद्धीस्तान् शत्रून् जहि ।

दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।
अद्रयस्त्वा बप्सति गोरधि त्वचय१प्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥ ४ ॥

दिवि । ते । नाभा । परमः । यः । आऽददे । पृथिव्याः । ते । रुरुहुः । सानवि । क्षिपः । अद्रयः । त्वा । बप्सति । गोः । अधि । त्वचि । अप्ऽसु । त्वा । हस्तैः । दुदुहुः । मनीषिणः ॥४॥

हे सोम ᵛते तव सः ᵛपरमः उत्तमोऽशो ᵛदिवि दिवः ᵛनाभा नाभौ द्युलोकस्य नाभिस्थानीये देशे । अथवा नाभौ वृष्ट्यादेर्बन्धके दिवि द्युलोके । वर्तते ᵛय ᵛआददे आदत्ते हविर्देवतारूपः सन् । ᵛते तव द्युलोकस्थांशस्यावयवाः ᵛपृथिव्याः ᵛसानवि समुच्छ्रिते देशे पर्वतादिप्रदेशे ᵛक्षिपः क्षिप्ताः सन्तः ᵛरुरुहुः रोहन्ति । ᵛत्वा त्वां द्युलोकस्थसोमांशभूतम् ᵛअद्रयः ग्रावाणः ᵛबप्सति भक्षयन्ति । बप्सतिरत्तिकर्मा । कुत्र । ᵛगोरधि ᵛत्वचि । अधीति सप्तम्यर्थानुवादी । आनद्धेऽधिषवणचर्मणीत्यर्थः । यद्यपि इदानींतनाः कृष्णाजिनेऽभिषुण्वन्ति न गोचर्मणि तथापि तस्मिन् सोमो मीयते क्रयार्थम् । तथा च सति यस्मिन् मिमीते तस्याधिषवणचर्म इति सूत्रात् मानसाधनस्यैव गोचर्मणः अधिषवणचर्मत्वाभिधानादविरोधः । ᵛत्वा त्वां तथा ᵛअप्सु वसतीवरीषु ᵛदुदुहुः दुहन्ति । अद्भिराप्लाव्य दुहन्तीत्यर्थः । यद्वा । अप्सूदकेषु रसेषु निमित्तेषु दुदुहुः । कैः साधनैः । ᵛहस्तैः । 'हस्तो हन्तेः' (निरु. १. ७) इति निरुक्तम् । के । ᵛमनीषिणः मेधाविनोऽध्वर्वादयः ॥

एवा त इन्दो सुभ्वं सुपेशसं रसं तुञ्जन्ति प्रथमा अभिश्रियः ।
निदंनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ॥ ५ ॥

एव । ते । इन्दो इति । सुऽभ्वम् । सुऽपेशसम् । रसम् । तुञ्जन्ति । प्रथमाः । अभिऽश्रियः । निदम्ऽनिदम् । पवमान । नि । तारिषः । आविः । ते । शुष्मः । भवतु । प्रियः । मदः ॥५॥

पूर्वत्र 'अद्रयस्त्वां बप्सति' इत्युक्तं तदेवोच्यते । हे ᵛइन्दो सोम ᵛएव एवमिदानींक्रियमाणप्रकारेण ᵛते तव ᵛसुभ्वं शोभनभवनं ᵛसुपेशसम् । पेश इति रूपनाम । सुरूपं ᵛरसं ᵛप्रथमाः प्रथममेव । यद्वा । प्रथम इति मुख्यनाम । ᵛप्रथमाः मुख्याः । ग्रावाणोऽध्वर्यवो वा ᵛअभिश्रियः अभिश्रयन्तः सन्तः ᵛतुञ्जन्ति प्रेरयन्ति । हे ᵛपवमान ᵛनिदंनिदम् अस्मन्निन्दकं सर्वमपि शत्रुं ᵛनि ᵛतारिषः विनाशय । ᵛते तव ᵛशुष्मः बलकरः ᵛप्रियः प्रियभूतः ᵛमदः मदकरो रसः ᵛआविः ᵛभवतु ॥ ॥ ४ ॥

'सोमस्य धारा' इति पञ्चर्चं त्रयोदशं सूक्तं भारद्वाजस्य वसुनाम्न आर्षं जागतं पवमानसोमदेवताकम् । तथा चानुक्रान्तं—'सोमस्य वसुर्भारद्वाजः' इति । गतो विनियोगः ॥

सोमस्य धारा पवते नृचक्षस ऋतेन देवान् हवते दिवस्परि ।
बृहस्पतेः रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः ॥ १ ॥

सोमस्य । धारा । पवते । नृऽचक्षसः । ऋतेन । देवान् । हवते । दिवः । परि । बृहस्पतेः । रवथेन । वि । दिद्युते । समुद्रासः । न । सवनानि । विव्यचुः ॥ १ ॥

ᵛसोमस्य अभिषूयमाणस्य ᵛधारा ᵛपवते स्रोतते । कीदृशस्य सोमस्य । ᵛनृचक्षसः नृणां यजमानानां द्रष्टुः । स च ᵛऋतेन यज्ञेन ᵛदेवान् सोमभाज इन्द्रादीन् ᵛहवते । कुत्र । ᵛदिवस्परि

द्युलोकस्योपरि वर्तमानान्। ᵛबृहस्पतेः मन्त्रपालकस्य स्तोतुः ᵛरवयेन शब्देन स्तोत्रेण ᵛवि ᵛदिद्युते विद्योतते। ᵛसमुद्रासो ᵛन समुद्रा इव पृथिवीं ᵛसवनानि यज्ञसंबन्धीनि ᵛविव्यचुः व्याप्नुवन्ति ॥

यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान्।
मघोनामायुः प्रतिरन् महि श्रव इन्द्राय सोम पवसे वृषा मदः ॥ २ ॥

यम्। त्वा। वाजिन्। अघ्न्याः। अभि। अनूषत। अयःऽहतम्। योनिम्। आ। रोहसि। द्युऽमान्। मघोनाम्। आयुः। प्रऽतिरन्। महि। श्रवः। इन्द्राय। सोम। पवसे। वृषा। मदः ॥ २ ॥

हे ᵛवाजिन् अन्नवन् सोम ᵛयं ᵛत्वा त्वाम् ᵛअघ्न्याः अहननीया गावः ᵛअभ्यनूषत अभिष्टुवन्ति। आशिरार्थं स्थिताः शब्दायन्त इत्यर्थः। स त्वम् ᵛअयोहतम्। अय इति हिरण्यनाम। तेन तद्वान् पाणिर्लक्ष्यते। हिरण्मयेन पाणिना हतं संस्कृतं ᵛयोनिं स्थानम् ᵛआ ᵛरोहसि ᵛद्युमान् दीप्तः सन्। 'अभि योनिमयोहतम्' (ऋ. सं. ९. १. २) इति द्युक्तम्। किंच हे ᵛसोम ᵛमघोनां हविष्मतां यजमानानाम् ᵛआयुः आयुष्यं ᵛमहि महत् ᵛश्रवः अन्नं यशो वा ᵛप्रतिरन् वर्धयन् ᵛइन्द्राय इन्द्रार्थं ᵛपवसे पूयसे। ᵛवृषा वर्षको ᵛमदः मदकरश्च त्वम् ॥

एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः।
प्रत्यङ् स विश्वा भुवनाभि पप्रथे क्रीळन् हरिरत्यः स्यन्दते वृषा ॥ ३ ॥

आ। इन्द्रस्य। कुक्षा। पवते। मदिन्ऽतमः। ऊर्जम्। वसानः। श्रवसे। सुऽमङ्गलः। प्रत्यङ्। सः। विश्वा। भुवना। अभि। पप्रथे। क्रीळन्। हरिः। अत्यः। स्यन्दते। वृषा ॥ ३ ॥

अयं सोमः ᵛइन्द्रस्य ᵛकुक्षा कुक्षौ ᵛआ ᵛपवते आसिच्यते। किमर्थम्। ᵛश्रवसे तस्यान्नाय यष्टुर्वा अन्नसिद्ध्यर्थम्। सोमो विशेष्यते। ᵛमदिन्तमः मादयितृतमः ᵛऊर्जं ᵛवसानः बलकरं रसमाच्छादयन्। 'अपो वसानः' (ऋ. सं. ९. ७८. १) इति द्युक्तम्। ᵛसुमङ्गलः शोभनमङ्गलप्रदः। ᵛसः सोमः ᵛप्रत्यङ् ᵛविश्वा ᵛभुवना सर्वाणि भूतजातानि ᵛअभि ᵛपप्रथे अभिप्रथयति। दिवि उदितः सन् ᵛक्रीळन् वेद्यां संक्रीडमानः ᵛहरिः हरितवर्णः ᵛअत्यः अतनकुशलः ᵛवृषा वर्षकः ᵛस्यन्दते रसरूपेण ॥

तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः।
नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान् देवाँ आ पवस्वा सहस्रजित् ॥ ४ ॥

तम्। त्वा। देवेभ्यः। मधुमत्ऽतमम्। नरः। सहस्रऽधारम्। दुहते। दश। क्षिपः। नृऽभिः। सोम। प्रऽच्युतः। ग्रावऽभिः। सुतः। विश्वान्। देवान्। आ। पवस्व। सहस्रऽजित्॥४॥

हे सोम ᵛतं तादृशं ᵛत्वा त्वां ᵛदेवेभ्यः इन्द्राद्यर्थं ᵛमधुमत्तमम् अतिशयेन मधुमन्तं ᵛसहस्रधारं बहुधारायुक्तं ᵛदुहते दुहन्ति। के। ᵛनरः नेतार ऋत्विजः ᵛदश ᵛक्षिपः तेषां दशसंख्याका अङ्गुलयश्च। हे ᵛसोम ᵛनृभिः मनुष्यैः ᵛप्रच्युतः ᵛग्रावभिः ᵛसुतः अभिषुतस्त्वं ᵛसहस्रजित् सहस्रसंख्याकधनस्य जेता सन् ᵛविश्वान् ᵛदेवान् ᵛआ ᵛपवस्व ॥

तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः।
इन्द्रं सोम मादयन् दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ॥ ५ ॥

तम् । त्वा । हस्तिनः । मधुऽमन्तम् । अद्रिऽभिः । दुहन्ति । अप्ऽसु । वृषभम् । दशै ।
इन्द्रम् । सोम । मादयन् । दैव्यम् । जनम् । सिन्धोःऽइव । ऊर्मिः । पवमानः । अर्षसि ॥५॥

vतं तादृशं vमधुमन्तं मधुररसं vवृषभं कामानां वर्षकं vत्वा त्वां vहस्तिनः सुहस्तस्य vदश vक्षिपः अङ्गुलयः vअद्रिभिः ग्रावभिः vअप्सु vदुहन्ति । तादृश हे vसोम vइन्द्रम् अन्यं vदैव्यं vजनं देवसंबन्धिनं संघं vमादयन् vसिन्धोरूर्मिरिव vपवमानः पूयमानः सन् vअर्षसि गच्छसि॥ ॥५॥

'प्र सोमस्य' इति पञ्चर्चं चतुर्दशं सूक्तम् । ऋषिर्देवते पूर्ववत् । अन्त्या त्रिष्टुप् शिष्टा जगत्यः । 'प्र सोमस्य' इत्यनुक्रान्तम् । गतो विनियोगः ॥

प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः ।
दक्षा यदीमुशतीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः ॥ १ ॥

प्र । सोमस्य । पवमानस्य । ऊर्मयः । इन्द्रस्य । यन्ति । जठरम् । सुऽउपेशसः ।
दक्षा । यत् । ईम् । उत्ऽअशीताः । यशसा । गवाम् । दानाय । शूरम् । उत्ऽअमन्दिषुः । सुताः॥१।

vपवमानस्य पूयमानस्य vऊर्मयः रसप्रवाहाः vइन्द्रस्य vजठरं vप्र vयन्ति प्रगच्छन्ति । vसुपेशसः सुरूपा ऊर्मय इति संबन्धः । vयत् यदा vईम् एते vसुताः अभिषुताः सोमाः vगवां vयशसा बलभूतेन[1] vदक्षा सह vउशीताः सन्तः vदानाय यजमानविषयाभिमतदानाय vशूरं विक्रान्तमिन्द्रम् vउदमन्दिषुः उन्मादयन्ति तदा जठरं यन्ति ॥

अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळ्हा रघुवर्तनिर्वृषा ।
अर्था देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥ २ ॥

अच्छ । हि । सोमः । कलशान् । असिस्यदत् । अत्यः । न । वोळ्हा । रघुऽवर्तनिः । वृषा ।
अर्थ । देवानाम् । उभयस्य । जन्मनः । विद्वान् । अश्नोति । अमुतः । इतः । च । यत् ॥ २ ॥

असौ[2] vसोमः vकलशान् vअच्छ अभिमुखम् vअसिष्यदत् स्यन्दते । क इव । vअत्यो vन vवोळ्हा रथस्य वाहकोऽश्व इव । स यथा स्वगन्तव्यमभिगच्छति तद्वत् । यद्वा । अयमुत्तरत्र दृष्टान्तः । vवोळ्हा अश्व इव vरघुवर्तनिः लघुगमनः vवृषा वर्षकश्च । vअथ अपि च vदेवानां सोमसजुषाम् vउभयस्य उभयविधं vजन्मनः जातं vविद्वान् जानन् असिष्यदत् कलशान् । किं तदुभयं जन्मेति उच्यते । यदेवजातम् vअमुतः द्युलोकात् vइतश्च अस्माद्भूलोकाच्च vअश्नोति व्याप्नोति यज्ञम् । तस्योभयस्य जातं विद्वानिति संबन्धः ॥

आ नः सोम पवमानः किरा वस्विन्दो भव मघवा राधसो महः ।
शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥ ३ ॥

आ । नः । सोम । पवमानः । किर । वसु । इन्दो इति । भव । मघऽवा । राधसः । महः ।
शिक्ष । वयःऽधः । वसवे । सु । चेतुना । मा । नः । गयम् । आरे । अस्मत् । परा । सिचः ॥३॥

१. ग–बलकरेण । २. ऋ६–अयं ।

vआ vकिर सर्वतो vविक्षिप vनः अस्मभ्यं हे vसोम vपवमानः पूयमानस्त्वम्। किम्। vवसु वासकं धनं गवादिरूपम्। किंच vइन्दो दीप्त हे सोम vमघवा धनवांस्त्वं vमहः महतः vराधसः धनस्य vभव दातेति शेषः। तथा हे vदधोधः अन्नस्य धातः सोम vवसवे वासकाय परिचरते मह्यं vचेतुना[1] प्रकृष्टेन प्रज्ञानेन vसु सुखं कल्याणं vशिक्ष देहि। vनः अस्मभ्यं प्रदेयं vगव्यं धनम् vअस्मत् vआरे अस्मत्तो दूरं vमा vपरा vसिचः मा प्रेरय ॥

आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः ।
बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥ ४ ॥

आ । नः । पूषा । पवमानः । सुऽरातयः । मित्रः । गच्छन्तु । वरुणः । सऽजोषसः ।
बृहस्पतिः । मरुतः । वायुः । अश्विना । त्वष्टा । सविता । सुऽयमा । सरस्वती ॥ ४ ॥

vसुरातयः सुदानाः vसजोषसः संगताः पूषादयो देवाः vआ vगच्छन्तु vनः अस्मान् अस्माकं यज्ञं वा। तथा vसुयमा। यम्यते नियम्यत इति यमो विग्रहः। सुविग्रहा vसरस्वती चागच्छतु ॥

उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।
भगो नृशंस उर्वन्तरिक्षं विश्वे देवाः पवमानं जुषन्त ॥ ५ ॥

उभे इति । द्यावापृथिवी इति । विश्वमिन्वे इति विश्वम्ऽइन्वे । अर्यमा । देवः । अदितिः । विऽधाता ।
भगः । नृऽशंसः । उरु । अन्तरिक्षम् । विश्वे । देवाः । पवमानम् । जुषन्त ॥ ५ ॥

vविश्वमिन्वे। इन्वतिर्व्याप्तिकर्मा। सर्वव्यापिन्यौ vउभे vद्यावापृथिवी द्यावापृथिव्यौ अर्यमादयश्चयश्च भगश्च vनृशंसः नृभिः शंसनीयः vउर्वन्तरिक्षं च vविश्वे vदेवाः च vपवमानं पूयमानं सोमं vजुषन्त सेवन्ते ॥ ॥ ६ ॥

'असावि' इति पञ्चर्चं पञ्चदशं सूक्तम्। ऋष्याद्याः पूर्ववत्। अत्रानुक्रमणिका—'असावीति त्रिष्टुबन्ते' इति। अनेन द्विवचनेन प्रकृतयोः 'प्र सोमस्य' इत्यादिकयोर्द्वयोरपि त्रिष्टुबन्तता प्रतिपादिता। गतो विनियोगः ॥

असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।
पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् ॥ १ ॥

असावि । सोमः । अरुषः । वृषा । हरिः । राजाऽइव । दस्मः । अभि । गाः । अचिक्रदत् ।
पुनानः । वारम् । परि । एति । अव्ययम् । श्येनः । न । योनिम् । घृतऽवन्तम् । आऽसदम् ॥ १ ॥

vसोमः vअसावि अभिषुतोऽभूत्। कीदृशः सोमः। vअरुषः आरोचमानः vवृषा वर्षकः vहरिः हरितवर्णः। स च vराजेव vदस्मः दर्शनीयः सन् vगाः उदकानि अभिलक्ष्य vअचिक्रदत् शब्दं करोति स्वरसनिर्मोकसमये। पश्चात् vपुनानः पूयमानः vअव्ययम् अविनश्वरं vवारं वालं दशापवित्रं vपर्येति। ततः vश्येनो vन श्येन इव vयोनिं स्वकीयं स्थानं vघृतवन्तम् उदकवन्तम् vआसदम् आसदनाय पवत इति शेषः ॥

---

१. ग–सुचेतुना।

कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।
अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् ॥ २ ॥

कविः । वेधस्याः । परि । एषि । माहिनम् । अत्यः । न । मृष्टः । अभि । वाजम् । अर्षसि ।
अपऽसेधन् । दुःऽइता । सोम । मृळय । घृतम् । वसानः । परि । यासि । निःऽनिर्जम् ॥२॥

हे सोम ᵛकविः क्रान्तदर्शी सन् ᵛवेधस्या यागविधानेच्छया ᵛमाहिनं महनीयं पवित्रं ᵛपर्येषि परिगच्छसि । पश्चात् ᵛमृष्टः प्रक्षालितः ᵛअत्यो ᵛन अश्व इव ᵛवाजं संग्रामम् ᵛअभि ᵛअर्षसि । हे ᵛसोम ᵛदुरिता अस्माकं दुरितानि ᵛअपसेधन् परिहरन् ᵛमृळय सुखय । ᵛघृतम् उदकं ᵛवसानः आच्छादयन् ᵛपरि ᵛयासि अभिगच्छसि । किम् । ᵛनिर्णिजं निर्णेजकं पवित्रम् ॥

पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।
स्वसारः आपो अभि गा उतासरन्त्सं ग्रावभिर्नसते वीते अध्वरे ॥ ३ ॥

पर्जन्यः । पिता । महिषस्य । पर्णिनः । नाभा । पृथिव्याः । गिरिषु । क्षयम् । दधे ।
स्वसारः । आपः । अभि । गाः । उत । असरन् । सम् । ग्रावऽभिः । नसते । वीते । अध्वरे ॥३॥

यस्य ᵛमहिषस्य महतः ᵛपर्णिनः पर्णवतः पतनवतो वा सोमस्य ᵛपर्जन्यः ᵛपिता जनकः स सोमः ᵛपृथिव्याः ᵛनाभा नाभौ नाभिस्थानीये हविर्धाने ᵛगिरिषु गिरिसंबन्धिग्रावसु[1] ᵛक्षयं निवासं ᵛदधे धारयत्यभिषवसमये । ᵛउत अपि च ᵛस्वसारः अङ्गुलयः ᵛआपः वसतीवर्यः ᵛगाः आशिरार्थाः स्तुतयो वा ᵛअभि[2] ᵛअसरन्[2] अभिसरन्ति । ᵛसं ᵛनसते संगच्छते च ᵛग्रावभिः साकम् । कुत्र । ᵛवीते कान्ते ᵛअध्वरे यज्ञे ॥

जायेव पत्यावधि शेव मंहसे पज्रायाः गर्भ श्रृणुहि ब्रवीमि ते ।
अन्तर्वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ॥ ४ ॥

जायाऽइव । पत्यौ । अधि । शेव । मंहसे । पज्रायाः । गर्भ । श्रृणुहि । ब्रवीमि । ते ।
अन्तः । वाणीषु । प्र । चर । सु । जीवसे । अनिन्द्यः । वृजने । सोम । जागृहि ॥ ४ ॥

ᵛजायेव ᵛपत्यौ जाया यथा स्वभार्यां भर्तरि सुखं प्रयच्छति तद्वत् ᵛशेव शेवम् । द्वितीयाया अभावाभावश्छान्दसः । सुखं ᵛमंहसे प्रयच्छसि यजमाने । हे ᵛपज्राया ᵛगर्भ सोम ᵛश्रृणुहि श्रृणु स्तुतीर्याः ᵛते तुभ्यं ᵛब्रवीमि । पजिर्गतिकर्मा । पज्रा पृथिवीत्याहुः । अपि वा माध्यमिका वाक् पज्रा । भूमावोषधिरूपेण जातत्वात्तद्गर्भत्वम् । माध्यमिकाया वाचोऽपि वृष्टिसाधनत्वात् तत्पुत्रत्वम् । स त्वं ᵛवाणीषु वाक्षु स्तुतिषु ᵛअन्तः मध्ये ᵛसु सुष्ठु ᵛप्र ᵛचर ᵛजीवसे अस्माकं जीवनाय । हे ᵛसोम ᵛअनिन्द्यः स्तुत्यस्त्वं ᵛवृजने अस्माकं शत्रुबले ᵛजागृहि प्रबुद्धो भव ॥

यथा पूर्वेभ्यः शतसा अमृधः सहस्रसाः पर्यया वाजमिन्दो ।
एवा पवस्व सुवितायु नव्यसे तवे व्रतमन्वापः सचन्ते ॥ ५ ॥

१. ग–गिरिसंबंधिप्रदेशेषु । २. त१.२.४.५-भ२–'अभ्यसरन्' नास्ति ।

यथा । पूर्वेभ्यः । शतऽसाः । अमृध्रः । सहस्रऽसाः । परिऽअयाः । वाजम् । इन्दो इति । एव । पवस्व । सुविताय । नव्यसे । तव । व्रतम् । अनु । आपः । सचन्ते ॥ ५ ॥

हे [v]इन्दो सोम त्वं [v]यथा [v]पूर्वेभ्यः महर्षिभ्यः स्तोतृभ्यः [v]शतसाः शतसंख्याकस्य धनस्य दाता तथा [v]सहस्रसाः च सन्[१] [v]परियाः परिगच्छेः [v]एव[२] एवमिदानीमपि[२] [v]नव्यसे नवतराय [v]सुविताय अभ्युदयाय [v]पवस्व क्षर । [v]तव [v]व्रतं कर्म [v]अन्वापः वसतीवर्यः [v]सचन्ते[३] । अतः पवस्व ॥ ॥ ७ ॥

' पवित्रं ते ' इति पञ्चर्चं षोडशं सूक्तमाङ्गिरसस्य पवित्रस्यार्षं जागतं पवमानसोमदेवताकम् । तथा चानुक्रान्तं—' पवित्रं ते पवित्रः ' इति । अभिष्टव आधे ऋची वक्ष्ये । सूत्रितं च—' पवित्रं ते विततं ब्रह्मणस्पत इति द्वे वि यत्पवित्रं धिषणा अतन्वत ' (आश्व. श्रौ. ४. ६) इति ॥

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत्समाशत ॥ १ ॥

पवित्रम् । ते । विऽततम् । ब्रह्मणः । पते । प्रऽभुः । गात्राणि । परि । एषि । विश्वतः । अतप्ततऽतनूः । न । तत् । आमः । अश्नुते । शृतासः । इत् । वहन्तः । तत् । सम् । आशत ॥ १ ॥

हे [v]ब्रह्मणस्पते मन्त्रस्य स्वामिन् सोम [v]ते[४] [v]पवित्रं शोधकमङ्गं [v]विततं सर्वत्र विस्तृतम् । स [v]प्रभुः प्रभविता त्वं [v]गात्राणि पातुरङ्गानि [v]पर्येषि परिगच्छसि [v]विश्वतः सर्वतः । तव [v]तत् पवित्रम् [v]अतप्ततनूः पयोव्रतादिना[५] असंतप्तगात्रः [v]आमः अपरिपक्वो [v]न [v]अश्नुते न व्याप्नोति । [v]शृतास [v]इत् शृता एव परिपक्वा एव [v]वहन्तः[६] यागं निर्वहन्तः [v]तत् पवित्रं [v]समाशत व्याप्नुवन्ति[७] ॥

तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन् ।
अर्वन्त्यस्य पवितारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा ॥ २ ॥

तपोः । पवित्रम् । विऽततम् । दिवः । पदे । शोचन्तः । अस्य । तन्तवः । वि । अस्थिरन् । अर्वन्ति । अस्य । पवितारम् । आशवः । दिवः । पृष्ठम् । अधि । तिष्ठन्ति । चेतसा ॥२॥

[v]तपोः शत्रूणां तापकस्य[८] सोमस्य[९] [v]पवित्रं शोधकमङ्गं तेजो वा [v]दिवस्पदे द्युलोकस्य उच्छ्रिते स्थाने [v]विततं विस्तृतम् । ' तृतीयस्यामितो दिवि सोम आसीत् ' (तै. ब्रा. ३. २. १. १) इति ब्राह्मणम् । [v]अस्य [v]तन्तवः अंशवः [v]शोचन्तः दीप्यमानाः [v]व्यस्थिरन् विविधं तिष्ठन्ति । पृथिव्यां हविर्धाने वा । [v]अस्य सोमस्य [v]आशवः शीघ्रगामिनो रसाः [v]अर्वन्ति रक्षन्ति । कम् । [v]पवितारं पावयितारम् । यजमानमर्वन्ति रक्षन्ति होमद्वारा[१०] पश्चादुताः[१०] [v]दिवः द्युलोकस्य [v]पृष्ठं पृष्ठभागमुच्चतदेशं [v]चेतसा बुद्ध्या देवगमनेच्छावत्या [v]अधि [v]तिष्ठन्ति आश्रयन्ते ॥

अभिष्टवे ' अरूरुचत् ' इत्येषावपनीया । सूत्रितं च—' इळे द्यावापृथिवी इति प्रागुत्तमाया अरूरुचदुषसः पृश्निरग्रिय इत्यावपेत ' (आश्व. श्रौ. ४. ६) इति ॥

१. ग—यथा अमृध्रः वाजं संग्रामं । २. ग—एवा एवमि°; घ-त-भ—एवमेवमि° । ३. ग-त३.४—सचंते सेवंते । ४. भ६—ते तव । ५. भ६—पयोमन्त्रादिना । ६. ग१-त३-भ१.२.७—' वहंतः ' नास्ति । ७. भ६—व्याप्नुवंति यः शृतः स रौद्रः यः शृतः स स देवः यो विदग्धः स नैर्ऋतः इति श्रुतेः । ८. त—व्यापकस्य । ९. ग—शोधकस्य । १०. ग—सोमधाराश्चाग्नौ हुताः; भ६—होमद्वारेण पश्चादुताः ।

अरूरुचदुषसः पृश्निरग्निय उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥ ३ ॥

अरूरुचत् । उषसः । पृश्निः । अग्नियः । उक्षा । बिभर्ति । भुवनानि । वाजऽयुः ।
मायाऽविनः । ममिरे । अस्य । मायया । नृऽचक्षसः । पितरः । गर्भम् । आ । दधुः ॥ ३ ॥

[v]उषसः संबन्धी [v]पृश्निः आदित्यः । 'पृश्निरादित्यो भवति प्राप्नुत एनं वर्णः' (निरु. २.१४) इति निरुक्तम् । [v]अग्नियः मुख्यः सोऽयं सोमः [v]अरूरुचत् रोचयति । सः [v]उक्षा जलस्य सेक्ता [v]बिभर्ति पुष्णात्युदकेन [v]भुवनानि भूतजातानि [v]वाजयुः तेषामन्नमिच्छन् । [v]मायाविनः । माया प्रज्ञा । प्रज्ञावन्तो देवाः [v]अस्य सोमस्य [v]मायया प्रज्ञया [v]ममिरे निर्मान्ति । सोमस्यैकैकांशपानेन जातबला अन्नादयः स्वस्वव्यापारेण जगत्सृजन्तीत्यर्थः । तथास्य मायया [v]नृचक्षसः नृणां द्रष्टारः [v]पितरः पालका देवा अङ्गिरसः पितरो वा [v]गर्भमा [v]दधुः धारयन्ति । ओषधीषु वात्र सूर्यात्मा सोमः स्तूयते सूर्यरश्मिभ्यनुगमाधीनवर्धनाच्चन्द्रस्य । अथमुषसः पृश्निः सवितारूरुचत् रोचयति सर्वं रोचते वा । शिष्टं समानम् । तत्संबन्धिनो नृचक्षसो नृणां द्रष्टारः पितरो जगद्रक्षका रश्मयो गर्भमा दधुर्वृष्ट्यर्थम् ॥

अभिष्टवे स्वरमवेक्षमाणः ' गन्धर्वं इत्था ' इत्येतां पठेत् । सूत्रितं च—' गन्धर्वं इत्था पदमस्य रक्षतीति स्वरमवेक्ष्य ' (आश्व. श्रौ. ४. ७) इति ॥

गन्धर्व इत्था पदमस्य रक्षति पातिं देवानां जनिमान्यद्भुतः ।
गृभ्णातिं रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ॥ ४ ॥

गन्धर्वः । इत्था । पदम् । अस्य । रक्षति । पातिं । देवानाम् । जनिमानि । अद्भुतः ।
गृभ्णातिं । रिपुम् । निऽधया । निधाऽपतिः । सुकृत्ऽतमाः । मधुनः । भक्षम् । आशत ॥ ४ ॥

[v]गन्धर्वः उदकानां स्तुतीनां वा धारक आदित्यः [v]अस्य सोमस्य [v]पदं स्थानं द्युसंबन्धि[1] [v]इत्था सत्यं [v]रक्षति । सोऽयं सोमः [v]देवानां [v]जनिमानि जन्मानि । देवानित्यर्थः । [v]पाति रक्षति [v]अद्भुतः महान् । किंचायं [v]रिपुम् अस्मद्वैरिणं [v]निधया । निधा पाश्या । पाशसमूहेन [v]गृभ्णाति गृह्णाति । [v]निधापतिः पाशसमूहस्वामी । तस्यास्य [v]मधुनः मधुररसस्य [v]भक्षं [v]सुकृत्तमाः अतिशयेन सुकृतकर्तार एव [v]आशत प्राप्नुवन्ति ॥

अन्तिमे प्रवर्ग्ये परिधानीयायाः पूर्वं ' हविर्हविष्मः ' इत्येषावपनीया । सूत्रितं च—' उत्तमे प्रागुत्तमाया हविर्हविष्मो महि सत्र दैव्यमित्यावपेत ' (आश्व. श्रौ. ४. ७) इति ॥

हविर्हविष्मो महि सत्र दैव्यं नभो वसानः परि यास्ध्वरम् ।
राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥ ५ ॥

हविः । हविष्मः । महि । सत्र । दैव्यम् । नभः । वसानः । परि । यासि । अध्वरम् ।
राजा । पवित्रऽरथः । वाजम् । आ । अरुहः । सहस्रऽभृष्टिः । जयसि । श्रवः । बृहत् ॥५॥

१. त१.३.७-म२.६—द्युसंबंधिनः ।

हे vहविष्मः। हविरित्युदकनाम। उदकवन् सोम हविर्भूतं vनभः। उदकनामैतत्। उदकरसमित्यर्थः। vवसानः आच्छादयन् vमहि महत् vदैव्यं vसद्म यागगृहं vपरि vयासि परिगच्छसि vअध्वरं निर्वोढुम्। किंच हे सोम vराजा vपवित्ररथः च vवाजं संग्राममम् vआरुहः आरोहसि। यद्वा। तत्र तत्र संग्रामवाचकेन शब्देन यज्ञव्यवहारदर्शनादत्र वाजो यज्ञाख्यसंग्रामः। तमारुहः। यथा कश्चिद्राजा रथमारुह्य स्वस्थानं प्रविशति तद्वदिति भावः। किंच vसहस्रभृष्टिः बहुभंगः। अपरिमितगमन इत्यर्थः। अथवा भृष्टिरायुधम्। असंख्यातायुधः सन्। vबृहत् vश्रवः महदन्नं vजयसि अस्माकम्॥ ॥ ८ ॥

'पवस्व देवमादनः' इति पञ्चर्चं सप्तदशं सूक्तं वाचः पुत्रस्य प्रजापतेरार्षं जागतं पवमानसोमदेवताकम्। तथा चानुक्रान्तं—'पवस्व वाच्यः प्रजापतिः' इति। गतो विनियोगः॥

पवस्व देवमादनो विचर्षणिरप्सा इन्द्राय वरुणाय वायवे।
कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनम्॥ १॥

पवस्व। देवऽमादनः। विऽचर्षणिः। अप्साः। इन्द्राय। वरुणाय। वायवे।
कृधि। नः। अद्य। वरिवः। स्वस्तिऽमत्। उरुऽक्षितौ। गृणीहि। दैव्यम्। जनम्॥१॥

हे सोम vदेवमादनः देवानां मादयिता vविचर्षणिः विद्रष्टा vअप्साः अपां दाता[1] त्वं vपवस्व क्षर। कस्मै। vइन्द्राय vवरुणाय vवायवे च। vनः अस्माकं vवरिवः धनं vस्वस्तिमत्। स्वस्तीत्यविनाशनाम। तद्वन्तं vकृधि कुरु। vउरुक्षितौ विस्तीर्णायां भूमौ यज्ञसंबन्धिन्यां vदैव्यं vजनं देवसंबन्धिनं संघम्। जनशब्दः संघवाची। तं vगृणीहि। गृणातिः शब्दकर्मा। शब्दय। यथा स्वदीयाभिषवशब्दं श्रुत्वा देवा आगच्छन्ति तथा गृणीहीत्यर्थः। अथवा दैव्यं जनमित्यृषिः स्वात्मानमाह। देवसंबन्धिनं जनं मां गृणीहि साधुसंभक्ता इति शब्दय॥

आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति।
कृण्वन्त्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः॥ २॥

आ। यः। तस्थौ। भुवनानि। अमर्त्यः। विश्वानि। सोमः। परि। तानि। अर्षति।
कृण्वन्। सम्ऽचृतम्। विऽचृतम्। अभिष्टये। इन्दुः। सिसक्ति। उषसम्। न। सूर्यः॥२॥

vयः vअमर्त्यः देवः vसोमः vभुवनानि लोकान् vआ vतस्थौ आस्थितवान् vतानि vविश्वानि सर्वाणि भुवनानि vपरि vअर्षति परितो गच्छति। परितो रक्षतीत्यर्थः। सोऽयम् vइन्दुः यज्ञं यजमानं वा vसंचृतं देवैः फलैर्वा[2] संबद्धं vकृण्वन् कुर्वन् vविचृतम् असुरादिभिर्दुःखैर्वा विमुक्तं[3] vकृण्वन् अभितो यागाय vसिषक्ति सेवते यज्ञम्। vउषसं vन vसूर्यः। सूर्य उषसमिव यथा vअभिष्टये अभितो गमनाय प्राणिनां संचृतं प्रकाशैः संयुक्तं विचृतं तमोभिर्विमुक्तं च लोकं कुर्वन्नुषसं सेवते तद्वत्॥

आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः।
आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन्दैव्यं जनम्॥ ३॥

---

१. ग—साता। २. ग—सुखैर्वा। ३. ग—वियुक्तं।

आ । यः । गोभिः । सृज्यते । ओषधीषु । आ । देवानाम् । सुम्ने । इषयन् । उपऽवसुः ।
आ । विऽद्युता । पवते । धारया । सुतः । इन्द्रम् । सोमः । मादयन् । दैव्यम् । जनम् ॥३॥

यः सोमः गोभिः रश्मिभिः आ सृज्यते ओषधीषु । यं सोमं स्थापयन्तीत्यर्थः । किमर्थम् । देवानां सुम्ने सुखे निमित्ते सति । कीदृशोऽयम् । इषयन् देवान् प्राप्तुमिच्छन् । ' इष गतौ ' । धनमिच्छन् वा । तथा उपावसुः शत्रुभ्यः सकाशात् प्राप्तधनः । सः सोमः विद्युता विद्योतमानया धारया आ पवते सुतः सन् । किं कुर्वन् । दैव्यं[1] देवस्वामिनम् इन्द्रं मादयन् ॥

एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधम् ।
इन्दुः समुद्रमुदियर्ति वायुभिरेन्द्रस्य हार्दि कलशेषु सीदति ॥ ४ ॥

एषः । स्यः । सोमः । पवते । सहस्रऽजित् । हिन्वानः । वाचम् । इषिराम् । उषःऽबुधम् ।
इन्दुः । समुद्रम् । उत् । इयर्ति । वायुऽभिः । आ । इन्द्रस्य । हार्दि । कलशेषु । सीदति ॥४॥

एष स्यः सः सोमः पवते पूयते । कीदृश एषः । सहस्रजित् सहस्रस्य जेता । किं कुर्वन् । वाचम् ऋत्विजां स्तुतिरूपां वाचं हिन्वानः प्रेरयन् । कीदृशीं वाचम् । इषिरां गमनशीलां स्तुत्यं प्रति गन्त्रीम् उषर्बुधम् उषसि प्रबुद्धाम् । सोऽयम् इन्दुः सोमः समुद्रं समुद्रियं रसम् उदियर्ति उद्गमयति वायुभिः गन्तृभिरध्वर्यवादिभिः वायुभिरेव वा प्रेर्यमाणः सन् । तथा इन्द्रस्य हार्दि । हार्दं प्रियम् । तद्धार्दि इन्द्रस्य प्रियवद्यथा भवति तथा कलशेषु द्रोणकलशप्रभृतिषु आ सीदति ॥

अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम् ।
धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥ ५ ॥

अभि । त्यम् । गावः । पयसा । पयःऽवृधम् । सोमम् । श्रीणन्ति । मतिऽभिः । स्वःऽविदम् ।
धनम्ऽजयः । पवते । कृत्व्यः । रसः । विप्रः । कविः । काव्येन । स्वःऽअर्चनाः ॥ ५ ॥

त्यं[2] तं पयोवृधं पयसो वर्धकं सोमं गावः पयसा स्वकीयेन क्षीरेण श्रीणन्ति श्रपणं कुर्वन्ति । यः मतिभिः स्तुतिभिः सर्वं प्रयच्छति तं स्वर्विदं सोमं श्रीणन्ति । सः धनंजयः शत्रुधनानां जेता सोमः काव्येन कर्मणा पवते पूयते । कीदृशः सः । कृत्व्यः कर्मण्यः रसः रसरूपः विप्रः मेधावी कविः क्रान्तप्रज्ञः स्वर्चनाः सर्वान्नः । चन इत्यन्ननाम[2] ॥ ॥ ९ ॥

' इन्द्राय ' इति द्वादशर्चमष्टादशं सूक्तं भृगुगोत्रस्य वेनस्यार्षं पवमानसोमदेवताकम् । एकादशीद्वादश्यौ त्रिष्टुभौ शिष्टा जगत्यः । तथा चानुक्रान्तम्—' इन्द्राय द्वादश वेनो भार्गवो द्वित्रिष्टुबन्तम् ' इति । गतो विनियोगः ॥

इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।
मा ते रसस्य मत्सत द्व्याविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥ १ ॥

---

१. भ२–दैव्यं जनं । २. ग–त्यं तं सोमं गावः पयसा अभिश्रीणंति । कीदृशं । पयोवृधं पयोवर्धकं मतिभिः स्तुतिभिः स्वर्विदं सर्वस्य लंभयितारं । धनानां जेता कृत्व्यः कर्मण्यः रसरूपः विप्रः मेधावी कविः काव्येन कविकर्मणा स्वर्चनाः सर्वान्नः । य एवंभूतस्तं सोममभिश्रीणंतीत्यन्वयः ।

इन्द्राय । सोम । सुऽसुतः । परि । स्रव । अप । अमीवा । भवतु । रक्षसा । सह ।
मा । ते । रसस्य । मत्सत । दुयाविनः । द्रविणस्वन्तः । इह । सन्तु । इन्दवः ॥ १ ॥

हे ᵛसोम त्वं ᵛसुषुतः सुष्ठु अभिषुतः सन् इन्द्रार्थं ᵛपरि ᵛस्रव परितः स्रव । गच्छ । रसं मुञ्च । ᵛअमीवा रोगः ᵛरक्षसा ᵛसह ᵛअप ᵛभवतु अपगतो वियुक्तो भवतु । ᵛते तव ᵛरसस्य स्वादुं रसं पीत्वा ᵛमा ᵛमत्सत मा माद्यन्तु । के । ᵛदुयाविनः । दुयं सत्यानृतम् । तेन युक्ताः । पापिन इत्यर्थः । किंच ᵛइन्दवः ते रसाः ᵛइह अस्मिन् यज्ञे ᵛद्रविणस्वन्तः धनवन्तः ᵛसन्तु भवन्तु ॥

अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।
जहि शत्रूँरभ्या भन्दनायतः पिबेन्द्र सोममव नो मृधो जहि ॥ २ ॥

अस्मान् । सऽसमर्ये । पवमान । चोदय । दक्षः । देवानाम् । असि । हि । प्रियः । मदः ।
जहि । शत्रून् । अभि । आ । भन्दनाऽयतः । पिब । इन्द्र । सोमम् । अव । नः । मृधः । जहि ॥२॥

हे ᵛपवमान सोम ᵛअस्मान् ᵛसमर्ये संग्रामे ᵛचोदय प्रेरय । ᵛदक्षः ᵛहि ᵛअसि समर्थः खलु भवसि ᵛदेवानां मध्ये । यद्वा । देवानां प्रीणनाय दक्षोऽसि । यद्वा । दक्षस्त्वं देवानां ᵛप्रियः प्रियकरो ᵛमदः मादयितासि हि । ᵛजहि च ᵛशत्रून् अस्माकम् । ᵛअभ्या गच्छ चास्मान् प्रति ᵛअभन्दनायतः । अभन्दनाः स्तुतयः । अभन्दतेः स्तुतिकर्मणः । ता इच्छतः । ᵛपिब च ᵛइन्द्र ᵛसोमम् ᵛअव ᵛजहि च ᵛनः अस्माकं ᵛमृधः संग्रामात् ॥

अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः ।
अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥ ३ ॥

अदब्धः । इन्दो इति । पवसे । मदिन्ऽतमः । आत्मा । इन्द्रस्य । भवसि । धासिः । उतऽतमः ।
अभि । स्वरन्ति । बहवः । मनीषिणः । राजानम् । अस्य । भुवनस्य । निंसते ॥ ३ ॥

हे ᵛइन्दो क्षियमाण सोम ᵛअदब्धः अहिंसितः ᵛमदिन्तमः मादयितृतमस्त्वं ᵛपवसे पूयसे । ᵛआत्मा स्वयमेव ᵛउत्तमः त्वम् ᵛइन्द्रस्य ᵛधासिः अन्नं ᵛभवसि । ᵛअस्य ᵛभुवनस्य ᵛराजानं सोमं ᵛबहवो ᵛमनीषिणः स्तोतारः ᵛअभि ᵛस्वरन्ति अभिष्टुवन्ति । ᵛनिंसते गच्छन्ति[१] च[१] ॥

सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु ।
जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥ ४ ॥

सहस्रऽनीथः । शतऽधारः । अद्भुतः । इन्द्राय । इन्दुः । पवते । काम्यम् । मधु ।
जयन् । क्षेत्रम् । अभि । अर्ष । जयन् । अपः । उरुम् । नः । गातुम् । कृणु । सोम । मीढ्वः ॥४॥

ᵛसहस्रनीथः बहुप्रकारनयनः ᵛशतधारः अपरिमितधारोपेतः ᵛअद्भुतः आश्चर्यकरो महान् ᵛइन्दुः ᵛइन्द्राय ᵛकाम्यं ᵛमधु ᵛपवते । किंच ᵛक्षेत्रम् अस्मभ्यम् ᵛअपः च ᵛजयन् ᵛअभ्यर्ष अभिगच्छ पवित्रम् । हे ᵛसोम ᵛमीढ्वः सेक्तः ᵛगातुं मार्गं ᵛनः अस्माकम् ᵛउरुं विस्तीर्णं ᵛकृणु कुरु ॥

१. ग-भ५-संगच्छंते च; त१.२.४.५.६-सु-गच्छंति वा; त३-संगच्छते च; भ१.७-गच्छंते च ।

कनिक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि ।
मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ॥ ५ ॥

कनिक्रदत् । कलशे । गोभिः । अज्यसे । वि । अव्ययम् । समया । वारम् । अर्षसि ।
मर्मृज्यमानः । अत्यः । न । सानसिः । इन्द्रस्य । सोम । जठरे । सम् । अक्षरः ॥ ५ ॥

हे सोम [v]कनिक्रदत् शब्दं कुर्वन् [v]कलशे वर्तमानः [v]गोभिः पयोभिः [v]अज्यसे सिक्तो भवसि । [v]अव्ययम् अविनश्वरं [v]वारं वालं दशापवित्रं [v]समया तत्समीपे [v]वि [v]अर्षसि विविधं गच्छसि । [v]मर्मृज्यमानः शोध्यमानः [v]अत्यो [v]न अश्व इव [v]सानसिः संभजनशीलस्त्वं हे [v]सोम [v]इन्द्रस्य [v]जठरे [v]समक्षरः सम्यक् क्षरसि ॥

स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥ ६ ॥

स्वादुः । पवस्व । दिव्याय । जन्मने । स्वादुः । इन्द्राय । सुहवीतुऽनाम्ने ।
स्वादुः । मित्राय । वरुणाय । वायवे । बृहस्पतये । मधुऽमान् । अदाभ्यः ॥ ६ ॥

हे सोम [v]स्वादुः त्वं [v]दिव्याय [v]जन्मने[1] देवगणाय [v]पवस्व । तथा [v]सुहवीतुनाम्ने शोभनाह्वाननामधेयाय [v]इन्द्राय [v]स्वादुः त्वं पवस्व । [v]मित्राय [v]वरुणाय [v]वायवे [v]बृहस्पतये च पवस्व [v]मधुमान् मधुररसः [v]अदाभ्यः अन्यैरहिंस्यस्त्वम् ॥ ॥ १० ॥

अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाचं ईरते ।
पवमाना अभ्यर्षन्ति सुष्टुतिमिन्द्रं विशन्ति मदिरास इन्दवः ॥ ७ ॥

अत्यम् । मृजन्ति । कलशे । दश । क्षिपः । प्र । विप्राणाम् । मतयः । वाचः । ईरते ।
पवमानाः । अभि । अर्षन्ति । सुऽस्तुतिम् । आ । इन्द्रम् । विशन्ति । मदिरासः । इन्दवः ॥७॥

[v]अत्यम् अतनवन्तमश्वस्थानीयं वा सोमं [v]कलशे [v]दश [v]क्षिपः दशाङ्गुलयोऽध्वर्युसंबन्धिन्यः [v]मृजन्ति शोधयन्ति । तथा [v]विप्राणां मध्ये [v]मतयः स्तोतारः [v]वाचः स्तुतीः [v]ईरते प्रेरयन्ति । [v]पवमानाः सोमाः [v]अभ्यर्षन्ति अभिगच्छन्ति [v]सुष्टुतिं शोभनस्तुतिम् । [v]इन्द्रं [v]मदिरासः मदकराः [v]इन्दवः सोमाः [v]आ [v]विशन्ति प्रविशन्ति ॥

पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः ।
माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ॥ ८ ॥

पवमानः । अभि । अर्ष । सुऽवीर्यम् । उर्वीम् । गव्यूतिम् । महि । शर्म । सुऽप्रथः ।
माकिः । नः । अस्य । परिऽसूतिः । ईशत । इन्दो इति । जयेम । त्वया । धनम्ऽधनम् ॥८॥

हे सोम [v]पवमानः पूयमानस्त्वं [v]सुवीर्यमुर्वीं महतीं [v]गव्यूतिं गोमार्गं च [v]महि महत् [v]सप्रथः सर्वतः पृथु [v]शर्म गृहं सुखं वा [v]अभ्यर्ष अभिगमय । [v]नः अस्माकम् [v]अस्य कर्मणः

---

१. ग–जन्मने जन्मवते; त–जन्मने जन्मदेवते; त३-भ४.६–जन्मने जन्मदेवते; भ१–जन्मने जन्म; भ५–जन्मने जन्मदेवतो ।

vपरिधूतिः हिंसायाः परिभेत्रको द्वेषी vमाकिः vईशत मेश्वरो भवतु। हे vइन्दो सोम vत्वया साधनेन vधनंधनं सर्वमपि धनं vजयेम ॥

अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः।
राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥ ९ ॥

अधि। द्याम्। अस्थात्। वृषभः। विऽचक्षणः। अरूरुचत्। वि। दिवः। रोचना। कविः। राजा। पवित्रम्। अति। एति। रोरुवत्। दिवः। पीयूषम्। दुहते। नृऽचक्षसः ॥ ९ ॥

vअधि vअस्थात् vद्यां द्युलोकं vवृषभः वर्षिता vविचक्षणः विद्रष्टा अयं सोमः। तथा कृत्वा vदिवः द्युलोकसंबन्धीनि vरोचना रोचमानानि नक्षत्रादीनि vवि vअरूरुचत् विविधं रोचयति। vकविः क्रान्तप्रज्ञः सन् vराजा सोमः vपवित्रं दशापवित्रम् vअत्येति अतिक्रम्य गच्छति। vरोरुवत् शब्दं कुर्वन्। vदिवः द्युलोकस्य vपीयूषं सारं रसं vनृचक्षसः नृणां द्रष्टारः सोमाः vदुहते स्रवन्ति। स्वकीयं रसमान्तरिक्ष्यमुदकं वा दुहन्तीत्यर्थः ॥

दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम्।
अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोरूर्मा मधुमन्तं पवित्र आ ॥१०॥

दिवः। नाके। मधुऽजिह्वाः। असश्चतः। वेनाः। दुहन्ति। उक्षणम्। गिरिऽस्थाम्। अप्ऽसु। द्रप्सम्। ववृधानम्। समुद्रे। आ। सिन्धोः। ऊर्मा। मधुऽमन्तम्। पवित्रे। आ ॥१०॥

vदिवः द्योतमानस्य यज्ञस्य संबन्धिनि vनाके दुःखरहिते हविर्धानाख्ये स्थाने vमधुजिह्वाः मधुरवाचः vअसश्चतः असंसक्ताः। पृथक्पृथगित्यर्थः। यद्वा चिरमकृत्वा[1] शीघ्रमभिपुण्वन्तः vवेनाः एतन्नामका महर्षयः vदुहन्ति अभिपुण्वन्ति। यद्वा द्युलोक एव वेनाः कान्ता देवा दुहन्ति। तं सोमम् vउक्षणं सेक्तारं vगिरिष्ठां गिरावुच्यते देशे वर्तमानम् vअप्सु उदकेषु वसतीवरीष्वन्तः[2] vववृधानं वर्धमानं vद्रप्सं रसरूपं vसमुद्रे समुद्रवत् प्रवृद्धे द्रोणकलशे vसिन्धोः उदकस्य vऊर्मा ऊर्मौ पूरे vआ सिञ्चन्तीति शेषः। तदर्थं vमधुमन्तं माधुर्योपेतं रसं vपवित्रे दशापवित्रे vआ सिञ्चन्तीति शेषः ॥

नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः।
शिशुं रिहन्ति मतयः पनिप्रतं हिरण्ययं शकुनं क्षामणि स्याम् ॥११॥

नाके। सुऽपर्णम्। उपपप्तिऽवांसम्। गिरः। वेनानाम्। अकृपन्त। पूर्वीः। शिशुम्। रिहन्ति। मतयः। पनिप्रतम्। हिरण्ययम्। शकुनम्। क्षामणि। स्याम् ॥११॥

vनाके द्युलोके वर्तमानं पश्चादुत्पतन्तं सोमं vवेनानाम् अस्माकं संबन्धिन्यः vपूर्वीः बह्वयः vगिरः स्तुतयः vउप vअकृपन्त उपकल्पन्ते। अभिष्टुवन्तीत्यर्थः। तं vशिशुं शिशुवत् संस्कर्तव्यं सोमं vमतयः स्तुतयः vरिहन्ति[3] लिहन्ति संस्पृशन्ति। प्राप्नुवन्तीत्यर्थः। कीदृशं शिशुम्। vपनिप्रतं शब्दायन्तम्। पनतेर्यङ्लुगन्तात् शतरि अभ्यासस्य निगागम उपधालोपश्च। vहिरण्ययं हिरण्मयं vशकुनं पक्षिणं vक्षामणि क्षमायां vस्यां हविर्धाने स्यां वर्तमानम् ॥

१. ग–चिरप्रवृत्ताः; त-भ१.२.६–चिरमधृत्वा; भ४–चिरसधृत्वा। २. ग–वसतीवरीषु ववृ°; त१.२.४.५-भ७–वसतीवरीषु तेर्ववृ°; त३-भ१.२.४–वसतीवरीषु तैर्ववृ°; त७-भ६–वसतीवरीषु ते वावृ°। ३. त–परिहंति।

ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य ।
भानुः शुक्रेण शोचिषा व्यद्यौत्प्रारूरुचद्रोदसी मातरा शुचिः ॥ १२ ॥

ऊर्ध्वः । गन्धर्वः । अधि । नाके । अस्थात् । विश्वा । रूपा । प्रतिऽचक्षाणः । अस्य ।
भानुः । शुक्रेण । शोचिषा । वि । अद्यौत् । प्र । अरूरुचत् । रोदसी इति । मातरा । शुचिः ॥१२॥

ऊर्ध्वः उन्नतः गन्धर्वः रश्मीनां धारकः सोमः नाके आदित्ये अधि अस्थात् अधितिष्ठति । किं कुर्वन् । अस्य आदित्यस्य विश्वा विश्वानि रूपाणि प्रतिचक्षाणः प्रतिपश्यन् । भानुः आदित्यः सोमाधिष्ठितः सन् शुक्रेण दीप्तेन शोचिषा तेजसा व्यद्यौत् विद्योतते । न केवलं स्वयमेव अपि तु मातरा निर्मात्र्यौ रोदसी द्यावापृथिव्यौ प्रारूरुचत् प्ररोचयति[1] । शुचिः दीप्तः सूर्यः ॥११॥ ॥४॥

अथ पञ्चमेऽनुवाके एकादश सूक्तानि । तत्र 'प्र ते' इत्यष्टाचत्वारिंशदृचं प्रथमं सूक्तम् । प्रथमदशर्चस्य आकृष्टा[2] इति मापा इति च द्विनामान ऋषिगणा[2] द्रष्टारः । द्वितीयस्य दशर्चस्य सिकता इति नीवावरी इति द्विनामान ऋषिगणाः । तृतीयस्य दशर्चस्य पृश्नय इत्यजा इति च नामद्वयोपेता ऋषिगणाः । अदृष्टार्थमेषां द्विनामत्वमवगन्तव्यम् । चतुर्थस्य दशर्चस्य आकृष्टा माषा इत्यादिद्विनामानस्त्रयो गणा द्रष्टारः । एवं चत्वारिंशदृचाः । अथ पञ्चानां भौमोऽत्रिर्ऋषिः । ततस्तिसृणां गृत्समदः । जगती छन्दः । पवमानः सोमो देवता । तथा चानुक्रान्तं—'प्र तेऽष्टाचत्वारिंशदृषिगणा दशर्चा आकृष्टा मापाः प्रथमे सिकता निवावरी द्वितीये पृश्नयोऽजास्तृतीये त्रयश्चतुर्थेऽत्रिः पञ्चान्त्यास्तिस्रो गृत्समदः' इति । गतो विनियोगः ॥

प्र तं आशवः पवमान धीजवो मदा अर्षन्ति रघुजाइव त्मना ।
दिव्याः सुपर्णा मधुमन्त इन्दवो मदिन्तमासः परि कोशमासते ॥ १ ॥

प्र । ते । आशवः । पवमान । धीऽजवः । मदाः । अर्षन्ति । रघुजाःऽइव । त्मना ।
दिव्याः । सुऽपर्णाः । मधुऽमन्तः । इन्दवः । मदिन्ऽतमासः । परि । कोशम् । आसते॥१॥

हे पवमान पूयमान सोम ते तव आशवः व्याप्ताः धीजवः मनोवेगाः मदाः मदकरा रसाः अर्षन्ति गच्छन्ति । त्मना आत्मनैव । अनायासेनेत्यर्थः । क इव । रघुजाइव । रघुः[3] शीघ्रगा वडवा[3] । तत्र जाता रघुजाः । त इव निर्गतास्ते दिव्याः दिवि भवाः । अन्तरिक्षे दशापवित्रे धार्यमाणा इत्यर्थः । सुपर्णाः सुपतनाः मधुमन्तः माधुर्योपेताः मदिन्तमासः अतिशयेन मादयितृतमाः इन्दवः दीप्ता रसाः कोशं द्रोणकलशं परि आसते पर्युपविशन्ति ॥

प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक् ।
धेनुर्न वत्सं पयसाभि वज्रिणमिन्द्रमिन्दवो मधुमन्त ऊर्मयः ॥ २ ॥

प्र । ते । मदासः । मदिरासः । आशवः । असृक्षत । रथ्यासः । यथा । पृथक् ।
धेनुः । न । वत्सम् । पयसा । अभि । वज्रिणम् । इन्द्रम् । इन्दवः । मधुऽमन्तः । ऊर्मयः ॥२॥

१. ग–प्रादीपयद्धि । २. ग-भ५.६–पृश्नय इति याजा (भ६–यजा) इति च नामगणाः ।
३. ग–रघवः शीघ्रवेगा अश्वाः; त६–रघुः शीघ्रवाडवा ।

vप्र vअसृक्षत प्रसृज्यन्ते vते तव vमदिरासः मदकराः vआशवः व्याप्ताः vमदासः मदा रसाः। क इव। vरथ्यासः रथ्या अश्वाः ते vयथा तथा vपृथक् प्रसृज्यन्ते। ते vमधुमन्तः माधुर्योपेताः vऊर्मयः प्रवृद्धरसाः vइन्दवः सोमाः vधेनुः vपयसा vवत्सम् इव स्वरसेन vवज्रिणमिन्द्रम् vअभि गच्छन्ति ॥

अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरम्।
वृषा पवित्रे अधि सानौ अव्यये सोमः पुनान इन्द्रियाय धायसे ॥ ३ ॥

अत्यः। न। हियानः। अभि। वाजम्। अर्ष। स्वःऽवित्। कोशम्। दिवः। अद्रिऽमातरम्। वृषा। पवित्रे। अधि। सानौ। अव्यये। सोमः। पुनानः। इन्द्रियाय। धायसे ॥ ३ ॥

vअत्यो vन अश्व इव vहियानः प्रेर्यमाणः vवाजं संग्रामम् vअभि vअर्ष अभिगच्छ। तथा vस्वर्वित् सर्ववित् vकोशं द्रोणकलशं vदिवः द्युलोकात् vअद्रिमातरम्। अद्रिर्मेघः। तेन तज्जन्य-मुदकं लक्ष्यते। तस्य निर्मातारमभ्यर्ष। अथ प्रत्यक्षकृतः। vवृषा वर्षकः vसोमः vअव्यये अविमये vअधि[1] vसानौ[1]। अधीति सप्तम्यर्थानुवादी। समुच्छ्रिते तस्मिन् vपुनानः पूयमानो भवति। किमर्थम्। vधायसे धारकाय vइन्द्रियाय तदर्थम् ॥

प्र तु आश्विनीः पवमान धीजुवो दिव्या असृग्रन् पयसा धरीमणि।
प्रान्तर्ऋषयः स्थाविरीरसृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥ ४ ॥

प्र। ते। आश्विनीः। पवमान। धीऽजुवः। दिव्याः। असृग्रन्। पयसा। धरीमणि। प्र। अन्तः। ऋषयः। स्थाविरीः। असृक्षत। ये। त्वा। मृजन्ति। ऋषिऽसान। वेधसः ॥४॥

हे vपवमान सोम vते तव vआश्विनीः व्याप्ताः ॥ 'अशू व्याप्तौ' इत्यस्मादौणादिको विनिः। ततोऽण्। व्यत्ययेनाद्युदात्तः ॥ vधीजुवः मनोवेगाः vदिव्याः दिवि भवा दिवः[2] पतन्त्यो धाराः vपयसा युक्ताः vधरीमणि धारके द्रोणकलशे vप्र vअसृग्रन् गच्छन्ति। vये vवेधसः विधातारः vऋषयः हे सोम vऋषिषाण ऋषिभिः संभक्त vत्वा त्वां vमृजन्ति अभिषुण्वन्ति ते ऋषयः vस्थाविरीः स्थविरा धाराः vअन्तः मध्ये पात्रस्यान्तः vप्र vअसृक्षत प्रसृजन्ति ॥

विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः।
व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥ ५ ॥

विश्वा। धामानि। विश्वऽचक्षः। ऋभ्वसः। प्रऽभोः। ते। सतः। परि। यन्ति। केतवः। विऽआनशिः। पवसे। सोम। धर्मऽभिः। पतिः। विश्वस्य। भुवनस्य। राजसि ॥ ५ ॥

हे vविश्वचक्षः सर्वस्य द्रष्टः सोम vप्रभोः परिवृढस्य vसतः vते तव vऋभ्वसः। ऋभ्वा इति महन्नाम। महान्तः vकेतवः रश्मयः vविश्वा सर्वाणि vधामानि तेजःस्थानानि देवशरीराणि vपरि vयन्ति परिगच्छन्ति। प्रकाशयन्तीत्यर्थः। हे vसोम vव्यानशिः व्यापनशीलश्च त्वं vधर्मभिः धारकैः रसनिस्यन्दैः vपवसे पूयसे। vविश्वस्य vभुवनस्य च vपतिः स्वामी त्वं vराजसि ईश्वरो भवसि ॥ ॥१२॥

उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः।
यदीं पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥ ६ ॥

१. ग–पवित्रे सानौ; त१.७–पवित्रे दशापवित्रे। २. त१.२.४.७-भ२–'दिवः' नास्ति।

उभयतः । पवमानस्य । रश्मयः । ध्रुवस्य । सतः । परि । यन्ति । केतवः ।
यदि । पवित्रे । अधि । मृज्यते । हरिः । सत्ता । नि । योनौ । कलशेषु । सीदति ॥६॥

vपवमानस्य पूयमानस्य vध्रुवस्य स्वयमविचलितस्य vसतः विद्यमानस्य सोमस्य vकेतवः प्रज्ञापकाः vरश्मयः vउभयतः इतश्चामुतश्च vपरि vयन्ति परिगच्छन्ति । अभिषवसमय एवं भवति । vयदि यदा vपवित्रे दशापवित्रे vहरिः हरितवर्णोऽयम् vअधि vमृज्यते तदानीं vसत्ता सदनशीलोऽयं योनौ स्वीये स्थाने vकलशेषु द्रोणकलशादिषु vनि vसीदति ॥

यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।
सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥ ७ ॥

यज्ञस्य । केतुः । पवते । सुऽअध्वरः । सोमः । देवानाम् । उप । याति । निःऽकृतम् ।
सहस्रऽधारः । परि । कोशम् । अर्षति । वृषा । पवित्रम् । अति । एति । रोरुवत् ॥ ७ ॥

vयज्ञस्य vकेतुः प्रज्ञापकः vस्वध्वरः शोभनयागः vसोमः vपवते पूयते अभिपूयते । तादृशः सोमः vदेवानां vनिष्कृतं[1] संस्कृतं स्थानम् vउप vयाति उपगच्छति । तदर्थं vसहस्रधारः vकोशं द्रोणकलशं vपरि vअर्षति । ततस्तदर्थं vवृषा सेक्ता यं vरोरुवत् शब्दयन् vपवित्रम् अतिक्रम्य[2] गच्छत्यधोदेशम् ॥

राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिन्धुषु श्रितः ।
अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः ॥ ८ ॥

राजा । समुद्रम् । नद्यः । वि । गाहते । अपाम् । ऊर्मिम् । सचते । सिन्धुषु । श्रितः ।
अधि । अस्थात् । सानु । पवमानः । अव्ययम् । नाभा । पृथिव्याः । धरुणः । महः । दिवः ॥८॥

अयं सोमः vराजा vसमुद्रम् अन्तरिक्षं vनद्यः तत्रत्या अपश्च vवि vगाहते । विगाह्य च vअपामूर्मिं vसचते उदकपूरं स्रवति । vसिन्धुषु उदकेषु ग्रहेषु वा vश्रितः सन् । हूयमानः सन् रश्मिद्वारा सूर्यं प्राप्य अन्तरिक्षे मेघेषु वर्तत इत्यर्थः । अस्यैव[3] वृष्टिसाधनत्वात् । यद्वा । लुप्तोपममेतत् । समुद्रं नद्य इव सिन्धुषु वसतीवरीषु श्रित आश्रितः सन् समुद्रम् अभिपुतसोमरसाधारपात्रं वि गाहते अभिषवात्पूर्वम् । पश्चात् vपवमानः पूयमानः vअव्ययं vसानु समुच्छ्रितं दशापवित्रम् vअध्यस्थात् अधितिष्ठति । कुत्र देशे । vनाभा vपृथिव्याः नाभिस्थानीये यज्ञे । तत्संबन्धिनि हविर्धान इत्यर्थः । ' यज्ञमाहुर्भुवनस्य नाभिम् ' (तै. सं. ७.४.१८.२) इति श्रुतेः । कीदृशः । vमहो vदिवः द्युलोकस्य vधरुणः धर्ता ॥

दिवो न सानु स्तनयन्नचिक्रदद् द्यौश्च यस्य पृथिवी च धर्मभिः ।
इन्द्रस्य सख्यं पवते विवेविदत्सोमः पुनानः कलशेषु सीदति ॥ ९ ॥

दिवः । न । सानु । स्तनयन् । अचिक्रदत् । द्यौः । च । यस्य । पृथिवी । च । धर्मऽभिः ।
इन्द्रस्य । सख्यम् । पवते । विऽवेविदत् । सोमः । पुनानः । कलशेषु । सीदति ॥ ९ ॥

---

१. ग-त-भ-' निष्कृतं ' नास्ति । २. भ१(२)-अतिक्रम्य एति । ३. ग-तस्यैव ।

vदिवो vन vसानु vस्तनयन् द्युलोकस्य समुच्छ्रितं स्थानं शब्दयन्निव vअचिक्रदत् क्रन्दते । vयस्य सोमस्य vधर्मभिः[1] धारणैः vद्यौश्च vपृथिवी vच धृते स्याताम् । वृष्टिप्रदानद्वारौषध्याद्युत्पादनेन देवानां हविर्भावेन[2] चोभयधारकत्वं प्रसिद्धम् । तादृशः vसोमः महानुभावः सोमः vपुनानः पूयमानः vइन्द्रस्य vसख्यं vविवेविदत्[3] vपवते पूयते पवित्रे । सः पुनानः सोमः[4] vकलशेषु vसीदति निवसति ॥

ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।
दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥ १० ॥

ज्योतिः । यज्ञस्य । पवते । मधु । प्रियम् । पिता । देवानाम् । जनिता । विभुऽवसुः ।
दधाति । रत्नम् । स्वधयोः । अपीच्यम् । मदिन्ऽतमः । मत्सरः । इन्द्रियः । रसः ॥ १० ॥

vयज्ञस्य vज्योतिः प्रकाशकः सोमः vप्रियं vदेवानां vमधु मधुरं रसं vपवते क्षरति । यद्वा । ज्योतिर्यज्ञस्येत्येतदपि मधुविशेषणम् । तथा सति उक्तलक्षणं मधु पवते पूयत इत्यर्थः । सोमरसो विशेष्यते । vपिता रक्षिता vदेवानां vजनिता उत्पादयिता सर्वस्य vविभूवसुः प्रभूतधनः । ईदृशः सः vस्वधयोः द्यावापृथिव्योः । 'स्वधे पुरंधी' इति द्यावापृथिवीनामसु पठितः । तयोः vअपीच्यम् अन्तर्हितं vरत्नं रमणीयं धनं vदधाति स्थापयति स्तोतृषु । पुनः स एव विशेष्यते । vमदिन्तमः मादयितृतमः vमत्सरः सोमः vइन्द्रियः इन्द्रेण जुष्ट इन्द्रस्य वर्धको वा vरसः रसरूपः ॥ ॥ १३ ॥

अभिक्रन्दन् कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।
हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥ ११ ॥

अभिऽक्रन्दन् । कलशम् । वाजी । अर्षति । पतिः । दिवः । शतऽधारः । विऽचक्षणः ।
हरिः । मित्रस्य । सदनेषु । सीदति । मर्मृजानः । अविऽभिः । सिन्धुऽभिः । वृषा ॥ ११ ॥

vवाजी वेजनवान् गमनवान् अश्वसदृशो वा सोमः vअभिक्रन्दन् शब्दं कुर्वन् vकलशम् अभि vअर्षति गच्छति । कीदृशो वाजी । vदिवः vपतिः द्युलोकस्य स्वामी vशतधारः शतसंख्याकधारः vविचक्षणः विद्रष्टा । vहरिः हरितवर्णो रसात्मकः सोमः vमित्रस्य देवानां मित्रभूतस्य यज्ञस्य वा vसदनेषु स्थानेषु vसीदति पात्रेषु धृतः सन् । कीदृशो हरिः । vसिन्धुभिः स्यन्दनसाधनैः vअविभिः दशापवित्रच्छिद्रैः vमर्मृजानः शोध्यमानः vवृषा वर्षकः ॥

अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति ।
अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥ १२ ॥

अग्रे । सिन्धूनाम् । पवमानः । अर्षति । अग्रे । वाचः । अग्रियः । गोषु । गच्छति ।
अग्रे । वाजस्य । भजते । महाऽधनम् । सुऽआयुधः । सोतृऽभिः । पूयते । वृषा ॥ १२ ॥

vयः सोमः vपवमानः vसिन्धूनां स्यन्दमानानामुदकानाम् vअग्रे vअर्षति गच्छति । तथा vअग्रियः अग्राहः श्रेष्ठः[5] vअग्रे vवाचः माध्यमिकाया अग्रे अर्षति । तथा vगोषु रश्मिषु vगच्छति ।

१. त–'धर्मभिः' नास्ति । २. ग–हविर्दानेन । ३. ग-त३-भ४–विवेविदत् जानन् । ४. त-भ–सोम्रेः । ५. ग-त३-भ१.२.४.७–श्रेष्ठोयं; त१.२.४.५.७–श्रेष्ठोये; भ६–श्रेष्ठोयो ।

तथा vवाजस्य अन्नस्य बलस्य वा लाभाय vमहाधनं संग्रामं vभजते। सः vस्वायुधः vवृषा वर्षकः सोमः vसोतृभिः अभिषवकर्तृभिः vपूयते ॥

अयं मतवाञ्छकुनो यथा हितोऽव्ये ससार पवमान ऊर्मिणा।
तव क्रत्वा रोदसी अन्तरा कवे शुचिर्धिया पवते सोम इन्द्र ते ॥ १३ ॥

अयम्। मतऽवान्। शकुनः। यथा। हितः। अव्ये। ससार। पवमानः। ऊर्मिणा। तव। क्रत्वा। रोदसी इति। अन्तरा। कवे। शुचिः। धिया। पवते। सोमः। इन्द्र। ते ॥१३॥

vअयं सोमः vमतवान्। मतं संमतं प्रियं स्तोत्रम्। तद्वान् vपवमानः पूयमानः शोध्यमानश्च सन् vहितः प्रेरितः vशकुनः पक्षी vयथा शीघ्रं गच्छति तथा vअव्ये पवित्रे vऊर्मिणा रसेन vससार गच्छति। हे vकवे क्रान्तप्रज्ञ अनूचान वा। 'ये वा अनूचानास्ते कवयः' (ऐ. ब्रा. २. ३८) इति श्रुतेः। तादृश यजमान यद्वा उक्तलक्षण vइन्द्र vते तव vक्रत्वा कर्मणा vधिया प्रज्ञया च। यद्वा। विशेषणविशेष्यभावः। धिया धारकेण क्रत्वा कर्मणा vरोदसी vअन्तरा रोदस्योर्द्यावापृथिव्योरन्तरा vशुचिः vसोमः vपवते पूयते ॥

द्रापिं वसानो यजतो दिविस्पृशमन्तरिक्षप्रा भुवनेष्वर्पितः।
स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितरमा विवासति ॥ १४ ॥

द्रापिम्। वसानः। यजतः। दिविऽस्पृशम्। अन्तरिक्षऽप्राः। भुवनेषु। अर्पितः। स्वः। जज्ञानः। नभसा। अभि। अक्रमीत्। प्रत्नम्। अस्य। पितरम्। आ। विवासति॥१४॥

vदिविस्पृशं दिविस्पष्टारं vद्रापिं कवचं तेजोरूपं vवसानः आच्छादयन् vयजतः यष्टव्यः vअन्तरिक्षप्राः अन्तरिक्षस्य पूरक उदकेन तादृशः सोमः vभुवनेषु उदकेषु vअर्पितः vस्वः सर्वं स्वेन पाययितव्यं देवसंघं स्वर्गं वा vजज्ञानः जनयन्। अथवा। स्वरुदकम्। तज्जनयन्। vनभसा उदकेन vअभ्यक्रमीत् अभिक्रामति। vअस्य उदकस्य vपितरं पालकं vप्रत्नं पुराणमिन्द्रम् vआ vविवासति परिचरति ॥

सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे।
पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः ॥ १५ ॥

सः। अस्य। विशे। महि। शर्म। यच्छति। यः। अस्य। धाम। प्रथमम्। विऽआनशे। पदम्। यत्। अस्य। परमे। विऽओमनि। अतः। विश्वाः। अभि। सम्। याति। सम्ऽयतः॥१५॥

vसः सोमः vअस्य इन्द्रस्य vविशे प्रवेशनाय vमहि महत् vशर्म सुखं vयच्छति[1]। vयः सोमः vअस्य इन्द्रस्य vधाम[2] तेजोयुक्तं शरीरं vप्रथमम्[3] इतरदेवप्राप्तेः पूर्वं vव्यानशे प्राप्तवान्। vयत् यस्य vअस्य सोमस्य vपरमे उत्कृष्टे vव्योमन् विशेषेण रक्षके द्युलोके वेद्यां वा[4] vपदं[4] भवति। vअतः यस्मात् सोमात् तृप्त इन्द्रः सोमः स्वयं वा vविश्वाः vसंयतः सर्वान् संग्रामान् vअभि vयाति[5] सम्यगभिगच्छति। स सोमो महि शर्म यच्छतीति संबन्धः ॥ ॥ १४ ॥

१. ग-त३.४-भ४–यच्छति प्रयच्छति; भ१.७–प्रयच्छति। २. त–सोम। ३. ग-त-भ१.२.४.६–'प्रथमं' नास्ति। ४. त-भ६–'वा पदं' नास्ति। ५. ग-त३.४-भ१.२.४-मु–संयाति।

प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम्।
मर्यइव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ॥ १६ ॥

प्रो इति। अयासीत्। इन्दुः। इन्द्रस्य। निःऽकृतम्। सखा। सख्युः। न। प्र। मिनाति। सम्ऽगिरम्॥ मर्यःऽइव। युवतिऽभिः। सम्। अर्षति। सोमः। कलशे। शतऽयाम्ना। पथा॥१६॥

ᵛइन्दुः सोमः ᵛइन्द्रस्य ᵛनिष्कृतं[1] स्थानमुदरं ᵛप्रो ᵛअयासीत् प्रैव गच्छति। गत्वा च ᵛसखा सखिभूतः सोमः ᵛसख्युः इन्द्रस्य ᵛसंगिरं सम्यग्गिरणाधारभूतमुदरं[2] ᵛन ᵛप्र ᵛमिनाति न हिनस्ति। किंच[3] ᵛमर्यइव ᵛयुवतिभिः[3] मर्त्यो यथा युवतिभिः सह संगतो भवति तद्वदयमपि सोमः युवतिभिर्मिश्रणशीलाभिर्वसतीवरीभिरद्भिः सह ᵛसमर्षति संगच्छतेऽभिषवकाले। पश्चात् ᵛसोमः ᵛशतयाम्ना अनेकयानसाधनच्छिद्रोपेतेन ᵛपथा मार्गेण दशापवित्रसंबन्धिनि ᵛकलशे द्रोणकलशे गच्छतीति शेषः। यद्वा एकमेव वाक्यम्। यथा मर्यो युवतिभिः सह संगच्छते एवं[4] कलशे शतयाम्ना पथा संगच्छतेऽद्भिः[4] ॥

प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवसनेष्वक्रमुः।
सोमं मनीषा अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः ॥ १७ ॥

प्र। वः। धियः। मन्द्रऽयुवः। विपन्युवः। पनस्युवः। सम्ऽवसनेषु। अक्रमुः। सोमम्। मनीषाः। अभि। अनूषत। स्तुभः। अभि। धेनवः। पयसा। ईम्। अशिश्रयुः॥१७॥

हे सोम ᵛवः युष्माकं ᵛधियः ध्यातारः ᵛमन्द्रयुवः मदकरं शब्दं कामयमानाः ᵛपनस्युवः स्तुतिं कामयमानाः ᵛविपन्युवः। स्तोतृनामैतत्। स्तोतारः ᵛसंवसनेषु संवासयोग्येषु यागगृहेषु ᵛप्र ᵛअक्रमुः प्रक्रमन्ते। तदेवाह। ᵛसोमं ᵛमनीषाः मनस ईश्वराः ᵛस्तुभः स्तोतारः ᵛअभ्यनूषत अभिष्टुवन्ति। ᵛधेनवः अपि ᵛपयसा स्वीयेन ᵛईम् एनं सोमम् ᵛअभि ᵛअशिश्रयुः अभिश्रीणन्ति ॥

आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमानो अस्रिधम्।
या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥ १८ ॥

आ। नः। सोम। सम्ऽयतम्। पिप्युषीम्। इषम्। इन्दो इति। पवस्व। पवमानः। अस्रिधम्। या। नः। दोहते। त्रिः। अहन्। असश्चुषी। क्षुऽमत्। वाजऽवत्। मधुऽमत्। सुऽवीर्यम्॥१८॥

हे ᵛइन्दो दीप्त ᵛसोम ᵛपवमानः त्वं ᵛनः अस्माकं ᵛसंयतं संगृहीतं ᵛपिप्युषीं प्रवृद्धम् ᵛइषम् अन्नम् ᵛअस्रिधम् अक्षीणं ᵛपवस्व। प्रयच्छेत्यर्थः। ᵛया यादृशी ᵛनः अस्माकम् ᵛअहन् अहनि अहः ᵛत्रिः त्रिषु सवनेषु ᵛअसश्चुषी अप्रतिबन्धा ᵛदोहते क्षरति। किम्। ᵛक्षुमत् शब्दोपेतं सर्वत्र श्रूयमाणं ᵛवाजवत्[4] ᵛमधुमत् माधुर्योपेतं ᵛसुवीर्यं शोभनसामर्थ्यं पुत्रं दोहते। तामिषं पवस्वेति समन्वयः ॥

१. ग-म४-निष्कृतं संस्कृतं। २. ग-सम्यग्गिरामाधार°; त१.५-सम्यग्गिरणाधार°; त२.४.५.६-म६-सम्यग्गिरणाधार°। ३. ग-तत्र दृष्टांतः। मर्यो। ४. ग-तथा वसतीवरीसंपृक्तः सन् कलशे समर्षतीति संबंधः। ५. ग-त३-म१.४.७-वाजवत् बलवत्।

वृषा मतीनां पवते विचक्षणः सोमो अहः प्रतरीतोषसो दिवः ।
क्राणा सिन्धूनां कलशाँ अवीवशदिन्द्रस्य हार्दाविशन्मनीषिभिः ॥ १९ ॥

वृषा । मतीनाम् । पवते । विऽचक्षणः । सोमः । अहः । प्रऽतरीता । उषसः । दिवः ।
क्राणा । सिन्धूनाम् । कलशान् । अवीवशत् । इन्द्रस्य । हार्दि । आऽविशन् । मनीषिऽभिः ॥ १९ ॥

अयं [v]सोमः [v]पवते अभिषूयते । कीदृशः सोमः । [v]मतीनाम् । मतयः स्तोतारः । तेषां [v]वृषा वर्षकः कामानां [v]विचक्षणः विद्रष्टा [v]अहः [v]उषसो [v]दिवः द्युलोकस्यादित्यस्य वा [v]प्रतरीता प्रवर्धयिता[1] । किंच [v]सिन्धूनां स्यन्दमानानामुदकानां [v]क्राणा कर्ता ॥ करोतेः शानचि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । सुः[2] । ' सुपां सुलुक्० ' इत्याकारः ॥ [v]कलशानवीवशत् कामयते प्रवेष्टुम् । किं कुर्वन् । [v]इन्द्रस्य [v]हार्दि हृदयम् [v]आविशन् प्रविशन्[3] [v]मनीषिभिः स्तुत इति शेषः । यद्वा । व्यवहितमपि मनीषिभिरित्येतत् पवत इत्यनेन संबध्यते ॥

मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् ।
त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोः सख्याय कर्तवे ॥ २० ॥

मनीषिऽभिः । पवते । पूर्व्यः । कविः । नृऽभिः । यतः । परि । कोशान् । अचिक्रदत् ।
त्रितस्य । नाम । जनयन् । मधु । क्षरत् । इन्द्रस्य । वायोः । सख्याय । कर्तवे ॥ २० ॥

अयं सोमः [v]मनीषिभिः मेधाविभिरध्वर्यवादिभिः [v]पवते पूयते । यद्वा । अयं मनीषिभिर्मनीषिणीभिर्धाराभिः पवते क्षरति । कीदृशोऽयम् । [v]पूर्व्यः पुराणः [v]कविः मेधावी [v]नृभिः नेतृभिरध्वर्यवादिभिः [v]यतः नियमितः सन् [v]कोशान् कलशान् प्राप्तुं [v]परि [v]अचिक्रदत् परिक्रन्दते शब्दं करोति । [v]त्रितस्य त्रिषु स्थानेषु विस्तृतस्येन्द्रस्य[4] संबन्धि [v]नाम नामकमुदकं [v]जनयन् उत्पादयन् [v]मधु मधुरं रसं [v]क्षरत् क्षरति । किमर्थम् । [v]इन्द्रस्य [v]वायोः च [v]सख्याय [v]कर्तवे सख्यं कर्तुम् ॥ ॥१५॥

अयं पुनान उषसो वि रोचयदयं सिन्धुभ्यो अभवदु लोककृत् ।
अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥ २१ ॥

अयम् । पुनानः । उषसः । वि । रोचयत् । अयम् । सिन्धुऽभ्यः । अभवत् । ऊँ इति ।
लोकऽकृत् ॥ अयम् । त्रिः । सप्त । दुदुहानः । आऽशिरम् ।
सोमः । हृदे । पवते । चारु । मत्सरः ॥ २१ ॥

[v]अयं सोमः [v]पुनानः पूयमानः [v]उषसो [v]वि [v]रोचयत् विविधं रोचयति । [v]अयं [v]सिन्धुभ्यः स्यन्दमानाभ्योऽद्भ्यो वसतीवरीभ्यः [v]अभवत् समृद्धो भवति । [v]उ इति पूरणः । कीदृशोऽयम् । [v]लोककृत् लोकानां कर्ता । वर्षकरत्वात् रेतोधारकत्वाच्चास्य लोककृत्वम् । [v]अयं [v]सोमः [v]त्रिः [v]सप्त एकविंशतिं[5] गा ऋत्विक्मुखेन[6] [v]आशिरं [v]दुदुहानः दुहानः । दोहस्य प्रयोजकत्वात्[6] कर्त्रुपचारः[7] । [v]मत्सरः मदकरः [v]चारु रमणीयं [v]पवते क्षरति । किमर्थम् । [v]हृदे हृदयाय हृदयगमनाय ॥

---

१. त-वर्धयिता । २. ग-त१.७-भ६-मु-' सुः ' नास्ति । ३. ग-त४-भ६.७-' प्रविशन् ' नास्ति । ४. ग-त-भ५.६-मु-'स्येंद्रस्य यजमानस्य । ५. त५-भ६-एकविंशतिवारान् त्वक्मुखेन; भ४-एकविंशतिवारं ऋत्विग्मुखेन; मु-एकविंशतिं वा ऋत्विक्मुखेन । ६. भ६-पूरकत्वात् । ७. ग-कर्तृत्वोपचारः; त१.२.७-मु-कर्तुरुपचारः; त३-कृत्वोपचारः; त४.५-कर्तुपचारः; भ१.२.७-उपचारः; भ६-कर्तृपचारः ।

पवस्व सोम दिव्येषु धामसु सृजान इन्दो कलशे पवित्र आ ।
सीदन्निन्द्रस्य जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि ॥ २२ ॥

पवस्व । सोम । दिव्येषु । धामऽसु । सृजानः । इन्दो इति । कलशे । पवित्रे । आ ।
सीदन् । इन्द्रस्य । जठरे । कनिक्रदत् । नृऽभिः । यतः । सूर्यम् । आ । अरोहयः । दिवि ॥२२॥

हे [v]सोम [v]दिव्येषु [v]धामसु स्थानेषु । देवानां संबन्धिपूदरेष्वित्यर्थः[1] । तेषु [v]पवस्व क्षर । कीदृशः[2] सन्[2] । हे [v]इन्दो दीप्त सोम [v]कलशे [v]पवित्र [v]आ दशापवित्रे च । आ इति चार्थे । [v]सृजानः सृज्यमानः । अत्र 'अग्निहोत्रं जुहोति यवागूं पचति' इतिवदार्थिकः क्रमोऽवगन्तव्यः । किंच [v]इन्द्रस्य [v]जठरे [v]सीदन् जठरं गच्छन् [v]कनिक्रदत् शब्दं कुर्वन् [v]नृभिः नेतृभिर्ऋत्विग्भिः [v]यतः परिगृहीतः । हुत इत्यर्थः । तथाभूतः सन् [v]दिवि [v]सूर्यम् [v]आरोहयः प्रादुर्भूतमकरोः[3] ॥

अद्रिभिः सुतः पवसे पवित्र आँ इन्दविन्द्रस्य जठरेष्वाविशन् ।
त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमङ्गिरोभ्योऽवृणोरप ॥ २३ ॥

अद्रिऽभिः । सुतः । पवसे । पवित्रे । आ । इन्दो इति । इन्द्रस्य । जठरेषु । आऽविशन् ।
त्वम् । नृऽचक्षाः । अभवः । विऽचक्षण । सोम । गोत्रम् । अङ्गिरःऽभ्यः । अवृणोः । अप ॥२३॥

हे [v]इन्दो सोम [v]अद्रिभिः ग्रावभिः [v]सुतः अभिषुतस्त्वं [v]पवसे क्षरसि पूयसे वा । [v]पवित्र [v]आ दशापवित्रे । आ इति पूरणः । यद्वा । अभिषुतो भवसि पवसे चेति चार्थं आकारः । किं कुर्वन् । [v]इन्द्रस्य [v]जठरेषु जठरप्रदेशेषु [v]आविशन् । जठरप्रवेशायेत्यर्थः । किंच हे [v]विचक्षण विद्रष्टः सोम [v]त्वं [v]नृचक्षा [v]अभवः नृणां मनुष्याणामनुग्रहेण द्रष्टा भवसि । किंच हे [v]सोम त्वम् [v]अङ्गिरोभ्यः [v]गोत्रं मेघमुदकं क्षारयितुं पणिभिरपहृतानां गवामावरकं पर्वतं वा [v]अप [v]अवृणोः ॥

त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नवस्यवः ।
त्वां सुपर्ण आभरदिवस्परीन्दो विश्वाभिर्मतिभिः परिष्कृतम् ॥ २४ ॥

त्वाम् । सोम । पवमानम् । सुऽआध्यः । अनु । विप्रासः । अमदन् । अवस्यवः ।
त्वाम् । सुऽपर्णः । आ । अभरत् । दिवः । परि ।
इन्दो इति । विश्वाभिः । मतिऽभिः । परिऽकृतम् ॥ २४ ॥

हे [v]सोम [v]पवमानं [v]त्वां [v]स्वाध्यः सुमतयः सुकर्माणो वा [v]विप्रासः विप्रा मेधाविनः स्तोतारः [v]अवस्यवः रक्षाकामाः [v]अनु [v]अमदन् अनुष्टुवन्ति । हे [v]इन्दो [v]त्वां [v]सुपर्णः श्येनः [v]आभरत् आहरत् । [v]दिवस्परि द्युलोकस्योपरि । द्युलोकादित्यर्थः । कीदृशं त्वाम् । [v]विश्वाभिर्मतिभिः सर्वाभिः स्तुतिभिः [v]परिष्कृतम् अलंकृतम् ॥

अव्ये पुनानं परि वारे ऊर्मिणा हरिं नवन्ते अभि सप्त धेनवः ।
अपामुपस्थे अध्यायवः कविमृतस्य योनौ महिषा अहेषत ॥ २५ ॥

१. म६–संबधिषु देवेष्वित्यर्थः । २. ग–कीदशस्त्वं; त-म१.२.६-सु–कीदशान् ; म४.७–कीदशः ।
३. त-म६–°मकरोत् ।

अव्ये । पुनानम् । परि । वारे । ऊर्मिणा । हरिम् । नवन्ते । अभि । सप्त । धेनवः ।
अपाम् । उपऽस्थे । अधि । आयवः । कविम् । ऋतस्य । योना । महिषाः । अहेषत ॥२५॥

vअव्ये अविमये vवारे वाले दशापवित्रे vऊर्मिणा रसेन vपरि परितः vपुनानं पवमानं vहरिं हरितवर्णं सोमम् vअभि vनवन्ते अभिगच्छन्ति vसप्त vधेनवः प्रीणयित्र्यः सप्त गायत्र्याद्याः सप्त गङ्गाद्या नद्यो वा । ' नवते क्षोदते ' इति गतिकर्मस्वयं पठितः । किंच vकविं त्वाम् vअपामुपस्थे अन्तरिक्षस्योत्सङ्गे vऋतस्य योनौ । उदकनामैतत् ' ऋतं योनिर्ऋतस्य योनिः' इति तन्नामसु पाठात् । उदके vमहिषाः महान्तः vआयवः मनुष्याः vअधि vअहेषत अधिकं प्रेरयन्ति ॥ ॥ १६ ॥

इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्सुपथानि यज्यवे ।
गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन् परि वारमर्षति ॥ २६ ॥

इन्दुः । पुनानः । अति । गाहते । मृधः । विश्वानि । कृण्वन् । सुऽपथानि । यज्यवे ।
गाः । कृण्वानः । निःऽनिर्जम् । हर्यतः । कविः ।
अत्यः । न । क्रीळन् । परि । वारम् । अर्षति ॥ २६ ॥

अयम् vइन्दुः दीप्तः सोमः vपुनानः पूयमानः vअति vगाहते अतिक्रम्य गच्छति vमृधः शत्रून् । किं कुर्वन् । vविश्वानि गन्तव्यानि सुवर्त्मानि वैदिकानि लौकिकानि च vसुपथानि vकृण्वन् कुर्वन् । कस्मै । vयज्यवे यागकर्त्रे । यजमानाय शत्रून् परिहरन् मार्गान् सुपथान् कुर्वन् कलशं प्रविशतीत्यर्थः । किंच vनिर्णिजम् आत्मीयं रूपं vगाः vकृण्वानः । रसमयान् कुर्वाण इत्यर्थः[1] । vहर्यतः कान्तः । ' हर्य गतिकान्त्योः' । औणादिकोऽतच् । vकविः क्रान्तप्रज्ञः एवंभूतः सोमः vअत्यो vन अश्व इव vक्रीळन् vवारं दशापवित्रं vपरि vअर्षति परिगच्छति ॥

असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः ।
क्षिपो मृजन्ति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥ २७ ॥

असश्चतः । शतऽधाराः । अभिऽश्रियः । हरिम् । नवन्ते । अव । ताः । उदन्युवः ।
क्षिपः । मृजन्ति । परि । गोभिः । आऽवृतम् । तृतीये । पृष्ठे । अधि । रोचने । दिवः ॥२७॥

vअसश्चतः परस्परमसंगताः vशतधाराः vअभिश्रियः अभितः सोमं श्रयन्त्यः vताः प्रसिद्धाः सूर्यस्य दीप्तयः vहरिम्[2] vअव vनवन्ते गच्छन्ति । vउदन्युवः उदकेच्छावत्यः सत्यः । यद्वा । धाराशब्देनात्र सोमधारा अभिप्रेताः । असश्चतोऽसंबद्धा अभिश्रियोऽभितो गाः श्रयन्त्यो गोभिः श्रितास्ताः प्रसिद्धा उदन्युव इन्द्रसंबन्धिवृष्टिकामा हरिमिन्द्रमव नवन्ते संगच्छन्ते । vक्षिपः अङ्गुलयोऽपि vगोभिः दीप्तिपक्षे गोभी रश्मिभिः vआवृतं सोमधारापक्षे गोभिः vपरि आवृतं व्याप्तं सोमं vमृजन्ति अवशोधयन्ति । vदिवः आदित्यात् vरोचने रोचमाने यमादित्यो रोचयति तस्मिन् vतृतीये[3] क्षित्यपेक्षायां तृतीयभूते[4] द्युलोके vअधि वसन्तं सोमं मृजन्ति ॥

१. ग-त३.४-भ१.३.४.७-इत्यर्थः । यद्वा गाः तद्विकाराणि क्षीराणि कुर्वाण इत्यर्थः । २. ग-हरिं हरितं । ३. मु-तृतीये पृष्ठे । ४. भ१(२)-तृतीयभूते पृष्ठे ।

तवेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि ।
अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामधा असि ॥ २८ ॥

तव । इमाः । प्रऽजाः । दिव्यस्य । रेतसः । त्वम् । विश्वस्य । भुवनस्य । राजसि ।
अथ । इदम् । विश्वम् । पवमान । ते । वशे ।
त्वम् । इन्दो इति । प्रथमः । धामऽधाः । असि ॥ २८ ॥

vतव vदिव्यस्य vरेतसः सकाशात् vइमाः vप्रजाः उत्पद्यमानाः प्राणिन उत्पन्नाः । 'सोमो वै रेतोधाः' (तै. सं. २.१.१.६) इति श्रुतेः । vत्वं[1] vविश्वस्य vभुवनस्य vराजसि ईश्वरो भवसि । vअथ अपि च vइदं vविश्वं हे vपवमान vते[2] vवशे त्वदधीनं वर्तते । हे vइन्दो vप्रथमः मुख्यः vत्वं vधामधाः धाम्नो धर्ता vअसि भवसि ॥

त्वं समुद्रो असि विश्ववित्कवे तवेमाः पञ्च प्रदिशो विधर्मणि ।
त्वं द्यां च पृथिवीं चाति जभ्रिषे तव ज्योतींषि पवमान सूर्यः ॥ २९ ॥

त्वम् । समुद्रः । असि । विश्वऽवित् । कवे । तव । इमाः । पञ्च । प्रऽदिशः । विऽधर्मणि ।
त्वम् । द्याम् । च । पृथिवीम् । च । अति । जभ्रिषे । तव । ज्योतींषि । पवमान । सूर्यः ॥ २९ ॥

हे vकवे क्रान्तप्रज्ञ vत्वं यस्मात् vसमुद्रः वर्षसाधनोऽपाम्[3] अतः vविश्ववित् vअसि । यद्वा । समुद्रो द्रवात्मकोऽसि विश्ववित्त्वमसि । किंच vतव vविधर्मणि विधारणे vपञ्च vप्रदिशः प्रकृष्टा दिशो भवन्तीति शेषः । vत्वं vद्यां vच दिवं च vपृथिवीं vच vअति vजभ्रिषे बिभर्षि । हे vपवमान vसूर्यः देवः vतव vज्योतींषि आप्याययति ॥

त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे ।
त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ॥ ३० ॥

त्वम् । पवित्रे । रजसः । विऽधर्मणि । देवेभ्यः । सोम । पवमान । पूयसे ।
त्वाम् । उशिजः । प्रथमाः । अगृभ्णत । तुभ्यं । इमा । विश्वा । भुवनानि । येमिरे ॥ ३० ॥

हे vसोम vपवमान vत्वं vरजसः लोकस्य रसस्य वा vविधर्मणि विधारके दशापवित्रे vदेवेभ्यः देवार्थं vपूयसे । vत्वामुशिजः कामयमाना ऋत्विजः vप्रथमाः प्रतमा[4] मुख्याः vअगृभ्णत गृह्णन्ति । vतुभ्य तुभ्यम् vइमा इमानि vविश्वा सर्वाणि vभुवनानि भूतजातानि vयेमिरे यच्छन्त्यात्मानम् ॥ १७ ॥

प्र रेभ एत्यति वारमव्ययं वृषा वनेष्वव चक्रदद्धरिः ।
सं धीतयो वावशाना अनूषत शिशुं रिहन्ति मतयः पनिप्नतम् ॥ ३१ ॥

प्र । रेभः । एति । अति । वारम् । अव्ययम् । वृषा । वनेषु । अव । चक्रदत् । हरिः ।
सम् । धीतयः । वावशानाः । अनूषत । शिशुम् । रिहन्ति । मतयः । पनिप्नतम् ॥ ३१ ॥

---

१. म१.२.७–त्वं सोम । २. म१–ते व; म२–ते तव । ३. ग–द्रविणसाधनोपां । ४. ग-त४-म–'प्रतमा' नास्ति ।

[v]रेभः शब्दयिता । 'रेभृ शब्दे' । सोमः [v]वारमव्ययम् अधिमर्यं बालं [v]प्र[1] [v]अति [v]पूति[1] प्रकर्षेणातिगच्छति । [v]वृषा सेक्ता सोमः [v]वनेषु उदकेषु [v]अव [v]क्रन्दत् अवक्रन्दन् [v]हरिः हरितवर्णः सोमः । [v]सम् [v]अनूषत संस्तुवन्ति । के । [v]धीतयः ध्यातारः [v]वावशानाः यागं सोमं वा कामयमानाः। [v]शिशुं शिशुवत् संस्कर्तव्यं सोमं [v]मतयः स्तुतयः [v]रिहन्ति लिहन्ति स्पृशन्ति । स्वविषयीकुर्वन्तीत्यर्थः । कीदृशम्[2] । [v]पनिप्नतं शब्दयन्तम्[2] ॥

स सूर्यस्य रश्मिभिः परि व्यत तन्तुं तन्वानस्त्रिवृतं यथा विदे ।
नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतम् ॥ ३२ ॥

सः । सूर्यस्य । रश्मिऽभिः । परि । व्यत । तन्तुम् । तन्वानः । त्रिऽवृतम् । यथा । विदे । नयन् । ऋतस्य । प्रऽशिषः । नवीयसीः । पतिः । जनीनाम् । उप । याति । निःऽकृतम् ॥ ३२ ॥

[v]सः सोमः [v]सूर्यस्य [v]रश्मिभिः [v]परि [v]व्यत परिवेष्टयत्यात्मानम् । किं कुर्वन् । [v]त्रिवृतं सवनैर्देवैर्वा त्रिवृतं [v]तन्तुं यज्ञं [v]तन्वानः विस्तारयन् [v]यथा [v]विदे जानाति । येन प्रकारेण संपूर्णमवगच्छति तथा तन्वानः । [v]ऋतस्य सत्यभूतस्य यजमानस्य [v]नवीयसीः नवतराः [v]प्रशिषः प्रशंसना अभिमतानि [v]नयन् प्रापयन् । तस्मा[3] एव[3] [v]जनीनां [v]पतिः पालकः स्वामी [v]निष्कृतं संस्कृतं पात्रम् [v]उप [v]याति गच्छति[4] ॥

राजा सिन्धूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत् ।
सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ॥ ३३ ॥

राजा । सिन्धूनाम् । पवते । पतिः । दिवः । ऋतस्य । याति । पथिऽभिः । कनिक्रदत् । सहस्रऽधारः । परि । सिच्यते । हरिः । पुनानः । वाचम् । जनयन् । उपऽवसुः ॥ ३३ ॥

[v]सिन्धूनां नदीनामुदकानां [v]राजा ईश्वरः[5] [v]दिवः[6] [v]पतिः द्युलोकस्य स्वामी[7] [v]ऋतस्य यज्ञस्य [v]पथिभिः मार्गैः [v]कनिक्रदत् शब्दं कुर्वन् [v]याति । [v]सहस्रधारः बहुधारायुक्तः सोमो नृभिर्नेतृभिर्ऋत्विग्भिः [v]परि [v]षिच्यते पात्रेषु । [v]पुनानः पूयमानः [v]वाचं शब्दं [v]जनयन् उत्पादयन् [v]उपावसुः उपागच्छद्भनः[8] परि षिच्यत इति समन्वयः ॥

पवमान महिर्णो वि धावसि सूरो न चित्रो अभ्यायनि पथ्या ।
गर्भस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ॥ ३४ ॥

पवमान । महि । अर्णः । वि । धावसि । सूरः । न । चित्रः । अभ्यायनि । पथ्या । गर्भस्तिऽपूतः । नृऽभिः । अद्रिऽभिः । सुतः । महे । वाजाय । धन्याय । धन्वसि ॥ ३४ ॥

हे [v]पवमान सोम [v]महिर्णः बहूदकम् । अर्ण इत्युदकनाम । रसं वा [v]वि [v]धावसि गमयसि[9] । 'धावु गतिशुद्धयोः' । किंच[9] [v]सूरो [v]न [v]चित्रः सूर्य इव चित्रः चायनीयः पूज्यः सन् [v]अभ्यायनि

---

१. त-भ२-मु-प्रत्येति । २. ग-त३-भ४.५-'कीदृशं...शब्दयन्तं' नास्ति; त-भ६-कीदृशं शब्दयंतं । ३. ग-तस्मादेव; मु-तस्मा एवं । ४. भ६-उपगच्छति । ५. ग-ईश्वरः पवते । ६. त-'दिवः' नास्ति । ७. मु-स्वामी सोमः पवते पूयते । ८. ग-भ१.४.६.७-उपगच्छद्भनः । ९. ग-शोधयसि । तत्र दृष्टांतः ।

अधिमयानि ᵛपश्यया पात्राणि गच्छसि । किंच ᵛगभस्तिपूतः बाहुभिरभिशोधितः ᵛनृभिः ऋत्विग्भिः प्रावभिश्च[1] ᵛसुतः अभिषुतः[1] ᵛमहे महते ᵛवाजाय संग्रामाय ᵛधन्याय[2] धनेभ्यो[3] हिताय ᵛधन्वसि गच्छसि । धन्वतिर्गतिकर्मा ॥

इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि ।
इन्द्राय मद्वा मद्यो मदः सुतो दिवो विष्टम्भ उपमो विचक्षणः ॥ ३५ ॥

इषम् । ऊर्जम् । पवमान । अभि । अर्षसि । श्येनः । न । वंसु । कलशेषु । सीदसि ।
इन्द्राय । मद्वा । मद्यः । मदः । सुतः । दिवः । विष्टम्भः । उपऽमः । विऽचक्षणः ॥३५॥

हे ᵛपवमान पूयमान सोम ᵛइषम् अन्नम् ᵛऊर्जं बलं च ᵛअभ्यर्षसि । ᵛश्येनो ᵛन श्येन इव ᵛवंसु वननीयेषु कुलायेषु[4] ᵛकलशेषु ᵛसीदसि[5] निषण्णो भवसि[5] । अथ परोक्षकृतः । ᵛइन्द्राय ᵛमद्वा मदकरः ᵛमद्यः मदहेतुः ᵛमदः रसः ᵛसुतः अभिषुतः । कीदृशः । ᵛदिवः द्युलोकस्य ᵛउपमः उपमीयमानः ᵛविष्टम्भः विशेषेण स्तम्भयिता । स्थूणा यथा गृहं तथा[6] । ᵛविचक्षणः विद्रष्टा । 'स्थूणेव जनाँ उपमित्' (ऋ. सं. १.५९.१) इत्युक्तम् ॥ ॥ १८ ॥

सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।
अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥ ३६ ॥

सप्त । स्वसारः । अभि । मातरः । शिशुम् । नवम् । जज्ञानम् । जेन्यम् । विपःऽचितम् ।
अपाम् । गन्धर्वम् । दिव्यम् । नृऽचक्षसम् । सोमम् । विश्वस्य । भुवनस्य । राजसे ॥ ३६ ॥

ᵛसप्त सर्पणस्वभावाः सप्तसंख्याका वा ᵛमातरः मातृस्थानीया गङ्गायमुनाद्याः ᵛशिशुं शिशुस्थानीयम् ᵛअभि गच्छन्तीति शेषः । स्वकीयैः पयोभिराच्छादयन्तीति शेषः । कीदृशं शिशुम् । ᵛनवं ᵛजज्ञानं जायमानं ᵛजेन्यं जयशीलं ᵛविपश्चितं विद्वांसम् ᵛअपां जनकं तेषां मध्ये वर्तमानं वा ᵛगन्धर्वम् उदकस्य धातारं ᵛदिव्यं दिवि भवं ᵛनृचक्षसं नृणां द्रष्टारं ᵛसोमम् अभिगच्छन्ति । किमर्थम् । ᵛविश्वस्य ᵛभुवनस्य विराजसे[7] विराजनार्थम् ॥

ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।
तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥ ३७ ॥

ईशानः । इमा । भुवनानि । वि । ईयसे । युजानः । इन्दो इति । हरितः । सुऽपर्ण्यः ।
ताः । ते । क्षरन्तु । मधुऽमत् । घृतम् । पयः । तव । व्रते । सोम । तिष्ठन्तु । कृष्टयः ॥३७॥

हे ᵛइन्दो सोम ᵛईशानः सर्वस्य स्वामी त्वम् ᵛइमा इमानि ᵛभुवनानि भूतजातानि ᵛवीयसे गच्छसि । वी गत्यादिषु । किं कुर्वन् । ᵛहरितः हरितवर्णाः ᵛसुपर्ण्यः सुपतनाश्वाश्वाः रथे ᵛयुजानः योजयन् । ᵛताः सुपर्ण्यः ᵛते तव संबन्धिन्यः ᵛमधुमत् माधुर्योपेतं ᵛघृतं दीप्तं ᵛपयः उदकं ᵛक्षरन्तु । हे ᵛसोम ᵛतव ᵛव्रते कर्मणि ᵛतिष्ठन्तु ᵛकृष्टयः मनुष्याः सर्वे ॥

---

१. भ१(२)-अद्रिभिः प्रावभिस्त्वं सुतोभिषुतश्च । २. भ१(२)-जन्याय । ३. त-भ१.२.५.६-जनेभ्यो । ४. भ६-कूपेषु । ५. त-सीदति निषण्णो भवति । ६. त-भ-मु-तथा तद्वत् । ७. भ१(२)-मु-राजसे ।

त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।
स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥ ३८ ॥

त्वम् । नृऽचक्षाः । असि । सोम । विश्वतः । पवमान । वृषभ । ता । वि । धावसि ।
सः । नः । पवस्व । वसुऽमत् । हिरण्यऽवत् । वयम् । स्याम । भुवनेषु । जीवसे ॥ ३८ ॥

हे ᵛसोम ᵛत्वं ᵛविश्वतः सर्वतः सर्वेषु भुवनेषु ᵛनृचक्षाः नृणां द्रष्टा ᵛअसि भवसि । हे ᵛपवमान ᵛवृषभ अपां वर्षक ᵛताः अपः ᵛवि ᵛधावसि विविधं गच्छसि । ᵛसः त्वं ᵛनः अस्माकं ᵛपवस्व क्षर । किम्[1] । ᵛवसुमत् बहुभिर्वसुभिर्वांसकैर्गवादिद्रव्यैर्युक्तं तथा ᵛहिरण्यवत् बहुभिर्हिरण्यैर्युक्तं धनम् । ᵛवयं च वसुभिर्हिरण्यैर्युक्ताः ᵛभुवनेषु लोकेषु ᵛजीवसे जीवितुं प्रभवः ᵛस्याम भवेम ॥

गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।
त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते ॥ ३९ ॥

गोऽवित् । पवस्व । वसुऽवित् । हिरण्यऽवित् । रेतःऽधाः । इन्दो इति । भुवनेषु । अर्पितः ।
त्वम् । सुऽवीरः । असि । सोम । विश्वऽवित् ।
तम् । त्वा । विप्राः । उप । गिरा । इमे । आसते ॥ ३९ ॥

हे सोम ᵛत्वं ᵛपवस्व क्षर । कीदृशः । ᵛगोवित् गवां लम्भकः ᵛवसुवित् धनस्य लम्भकः ᵛहिरण्यवित् हिरण्यस्य लम्भकः ᵛरेतोधाः । रेत उदकम् । तस्य धातौषधीनाम् । यद्वा । रेतः प्रजनन-सामर्थ्यम् । तस्य धारयिता । ᵛभुवनेषु उदकेषु ᵛअर्पितः । हे ᵛइन्दो ᵛसोम ᵛत्वं ᵛसुवीरः सुवीर्यः ᵛअसि भवसि । ᵛविश्ववित् सर्वस्य वेत्ता । ᵛतं ᵛत्वा त्वाम् ᵛइमे ᵛविप्राः ᵛगिरा स्तुत्या ᵛउप ᵛआसते ॥

उन्मध्व ऊर्मिर्वनना अतिष्ठिपदपो वसानो महिषो वि गाहते ।
राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत् ॥ ४० ॥

उत् । मध्वः । ऊर्मिः । वनानाः । अतिस्थिपत् । अपः । वसानः । महिषः । वि । गाहते ।
राजा । पवित्रऽरथः । वाजम् । आ । अरुहत् । सहस्रऽभृष्टिः । जयति । श्रवः । बृहत् ॥ ४० ॥

ᵛमध्वः मधुरस्य ᵛऊर्मिः रसः ᵛवनानाः वननीया वाचः ᵛउत् ᵛअतिष्ठिपत् उत्थापयति । सोमाभिषवकाले स्तुतिवाचः प्रवृत्तेः । ᵛअपः ᵛवसानः आच्छादयन् ᵛमहिषः महान् ᵛवि ᵛगाहते प्रविशति कलशम् । ᵛराजा सोमः ᵛपवित्ररथः । दशापवित्रमेव रथो यस्य स तथोक्तः । तादृशः सोमः ᵛवाजं संग्रामम् ᵛआरुहत् आरोहति । ᵛसहस्रभृष्टिः बहुभ्रंशोऽपरिमितगमनः ᵛबृहत् ᵛश्रवः महदन्नं ᵛजयति अस्मदर्थम् ॥ ॥ १९ ॥

स मन्दना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि ।
ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याचतात् ॥ ४१ ॥

---

१. ग-भ६-किंच ।

सः । भन्दनाः । उत् । इयर्ति । प्रजाऽवतीः । विश्वऽआयुः । विश्वाः । सुऽभराः । अहःऽदिवि ।
ब्रह्म । प्रजाऽवत् । रयिम् । अश्वऽपस्त्यम् ।
पीतः । इन्दो इति । इन्द्रम् । अस्मभ्यम् । याचतात् ॥ ४१ ॥

vसः सोमः vविश्वायुः सर्वस्य गन्ता सोमः vप्रजावतीः प्रजारूपफलदात्रीः[1] vसुभराः सुष्ठु हियमाणाः vविश्वाः सर्वाः vभन्दनाः स्तुतीः vउदियर्ति उत्कृष्टं प्रेरयति । कस्मिन् काले उच्यते । vअहर्दिवि अहोरात्रयोश्च । अथ प्रत्यक्षकृतः । vब्रह्म परिवृढं कर्म vप्रजावत् प्रजाभिर्युक्तम् । प्रजाफलकमित्यर्थः । यद्वा । अन्नं तच्च प्रजावत् प्रजायुपेतम् । तथा vरयिं धनम् । कीदृशम् । vअश्वपस्त्यं[2] व्याप्तगृहम् । तदुभयं हे vइन्दो दीप्त सोम vपीतः इन्द्रेण पीतस्त्वं तमेव vइन्द्रमस्मभ्यं vयाचतात् याचस्व ॥

सो अग्ने अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः ।
द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ॥ ४२ ॥

सः । अग्ने । अह्नाम् । हरिः । हर्यतः । मदः । प्र । चेतसा । चेतयते । अनु । द्युऽभिः ।
द्वा । जना । यातयन् । अन्तः । ईयते । नराशंसम् । च । दैव्यम् । च । धर्तरि ॥ ४२ ॥

vसः सोमः vअग्ने सर्वेषां संमुखं vचेतसा प्राणिनां चेतनेन सह vअह्नां vद्युभिः दीप्तिभिः vअनु vप्र vचेतयते अनुप्रज्ञायते । यद्वा । अह्नामग्रे अग्रभागे । प्रातरित्यर्थः । स्तोतॄणां चेतसा प्रज्ञानेन द्युभिर्दीप्तिभिः स्तुतिभिश्चानु प्र चेतयते । कीदृशः सः । vहरिः हरितवर्णः vहर्यतः कान्तः vमदः मदकरः । किंच vद्वा vजना द्वौ जनौ स्तोतारं यष्टारं च vयातयन् प्रापयन् स्वविहितेन कर्मणा । लौकिकवैदिकौ द्वौ जनौ द्रष्टव्यौ । एवं कुर्वन् vअन्तः द्यावापृथिव्योर्मध्ये vईयते गच्छति । 'ईङ् गतौ' । किं कुर्वन् । vनराशंसं नरैः शंसनीयम् । मानुषमित्यर्थः । vदैव्यं vच दिवि[3] भवम् उभयविधं धनं vधर्तरि धारके यजमाने प्रेरयन्निति शेषः ॥

अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।
सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥ ४३ ॥

अञ्जते । वि । अञ्जते । सम् । अञ्जते । क्रतुम् । रिहन्ति । मधुना । अभि । अञ्जते ।
सिन्धोः । उत्ऽश्वासे । पतयन्तम् । उक्षणम् । हिरण्यऽपावाः । पशुम् । आसु । गृभ्णते ॥ ४३ ॥

सोममृत्विजः vअञ्जते गोभिः । तथा vव्यञ्जते विविधमञ्जन्ति । vसमञ्जते सम्यगञ्जन्ति । स्तुत्यर्थत्वादपुनरुक्तिः । तथा vक्रतुं बलकर्तारं vरिहन्ति लिहन्ति । आस्वादयन्ति देवाः । तथा पुनः vमधुना गव्येन vअभ्यञ्जते । तमेव सोमं vसिन्धोः उदकस्य रसस्याधारभूते vउच्छ्वासे उच्छ्रिते देशे vपतयन्तं गच्छन्तम् ॥ 'पतॢ गतौ' इत्यस्मात्स्वार्थे णिचि वृद्ध्यभावश्छान्दसः ॥ vउक्षणं सेक्तारं vहिरण्यपावाः हिरण्येन पुनन्तः vपशुं द्रष्टारम् । 'पशुः पश्यतेः' (निरु. ३.१६) इति निरुक्तम् । vआसु वसतीवरीषु vगृभ्णते गृह्णन्ति ॥

विपश्चिते पवमानाय गायत महीं न धारामत्यन्धो अर्षति ।
अहिर्न जूर्णामतिं सर्पति त्वचमत्यो न क्रीळन्त्सरद्वृषा हरिः ॥ ४४ ॥

---

१. त-म-मु-°फलदात्र्यः । २. त१.२.५-विश्वपस्त्यं । ३. ग-त-म-मु-'दिवि भवं' नास्ति ।

विपः ऽचितें । पवमानाय । गायत । महीं । न । धारा । अतिं । अन्धः । अर्षति ।
अहिंः । न । जूर्णाम् । अतिं । सर्पति । त्वचम् ।
अत्यः । न । क्रीळन् । असरत् । वृषा । हरिंः ॥ ४४ ॥

हे[1] ऋत्विजः[1] ᵛविपश्चिते मेधाविने ᵛपवमानाय पूयमानाय ᵛगायत स्तुतिं कुरुत। स च विपश्चित्सोमः ᵛमही ᵛन ᵛधारा महती वर्षधारेव ᵛअन्धः अन्नं रसात्मकम्[2] ᵛअति ᵛअर्षति। ᵛअहिर्न अहिरिव ᵛजूर्णां जीर्णां ᵛत्वचम् ᵛअति ᵛसर्पति अतिमुञ्चति। अभिषवादिकर्मणा[3] त्वचं मुञ्चतीत्यर्थः[3]। तद्वदतिसर्पति धारा दशापवित्रात्। ᵛअत्यो ᵛन अश्व इव ᵛक्रीळन् ᵛअसरत् सरति गच्छति द्रोणकलशम्[4]। ᵛवृषा वर्षकः कामानां ᵛहरिः हरितवर्णः रसः ॥

अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।
हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥ ४५ ॥

अग्रेऽगः । राजा । अप्यः । तविष्यते । विऽमानः । अह्नाम् । भुवनेषु । अर्पितः ।
हरिंः । घृतऽस्नुः । सुऽदृशीकः । अर्णवः । ज्योतिःऽरथः । पवते । राये । ओक्यः ॥४५॥

ᵛअग्रेगः अग्रे गन्ता ᵛराजा राजमानः ᵛअप्यः अप्सु संस्कृतः सोमः ᵛतविष्यते स्तूयते। यः ᵛअह्नां दिनानां ᵛविमानः निर्माता चन्द्रकलाह्रासवृद्ध्यधीनत्वादहर्व्यवहारस्य। ᵛभुवनेषु उदकेषु वसतीवरीसंबन्धिषु ᵛअर्पितः स्थापितः स राजा तविष्यते। किंच ᵛहरिः हरितवर्णः ᵛघृतस्नुः प्रस्रुतोदकः ᵛसुदृशीकः शोभनदर्शनः ᵛअर्णवः उदकवान्। अर्ण इत्युदकनाम। ᵛज्योतीरथः ज्योतिर्मयरथः ᵛराये धनस्य प्रापयिता। ᵛओक्यः। ओक इति निवासनाम। तस्य हितः ॥ ॥ २० ॥

असर्जि स्कम्भो दिव उद्यतो मदः परि त्रिधातुर्भुवनान्यर्षति ।
अंशुं रिहन्ति मतयः पनिप्रतं गिरा यदि निर्णिजमृग्मिणो ययुः ॥ ४६ ॥

असर्जि । स्कम्भः । दिवः । उत्ऽयतः । मदः । परि । त्रिऽधातुः । भुवनानि । अर्षति ।
अंशुम् । रिहन्ति । मतयः । पनिप्रतम् । गिरा । यदि । निःऽनिजम् । ऋग्मिणः । ययुः ॥४६॥

ᵛदिवः द्युलोकस्य ᵛस्कम्भः स्कम्भयिता धारकः ᵛउद्यतः सोमः ᵛअसर्जि सृज्यते। अभिषूयते इत्यर्थः। किंच ᵛत्रिधातुः। द्रोणकलशाधवनीयपूतभृदाख्यास्त्रयो धातवो यस्य स तथोक्तः। तादृशो ᵛभुवनानि उदकानि ᵛअर्षति गच्छति। ᵛअंशुं सोमं ᵛपनिप्रतं शब्दायमानं ᵛमतयः पूजकाः ᵛरिहन्ति लिहन्ति आस्वादयन्ति। कदा। ᵛयदि ᵛनिर्णिजं निर्णिक्तम्। यद्वा। निर्णिगिति रूपनाम। रूपवन्तमित्यर्थः। तम् ᵛऋग्मिणः स्तोतारः ᵛगिरा स्तुत्या ᵛययुः गच्छन्ति तदा ॥

प्र ते धारा अत्यव्यानि मेष्यः पुनानस्य संयतो यन्ति रंहयः ।
यद्गोभिरिन्दो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि ॥४७॥

प्र । ते । धाराः । अतिं । अव्यानि । मेष्यः । पुनानस्य । सम्ऽयतः । यन्ति । रंहयः ।
यत् । गोभिः । इन्दो इतिं । चम्वोः । सम्ऽअज्यसे । आ । सुवानः । सोम । कलशेषु । सीदसि॥४७॥

---

१. ग-त३-भ१.२.७-' हे ऋत्विजः ' नास्ति। २. ग-त३-भ५-सोमात्मकं; त१.२.४-रथात्मकं; भ६-सोमात्मकं रसात्मकं। ३. ग-त३-भ१.५.७-' अभिषवा...'त्यर्थः ' नास्ति। ४. ग-त३-भ१.५.७-' द्रोणकलशं ' नास्ति।

vपुनानस्य पूयमानस्य vसंयतः संगृह्णमाणाः vरंहयः रंहणस्वभावाः vधाराः vमेष्यः vअव्यानि अव्यूनि लोमानि vअति vयन्ति अतिक्रम्य गच्छन्ति । हे vइन्दो सोम vयत् यदा vगोभिः उदकैः vचम्वोः अधिषवणफलकयोरुपरि vसमज्यसे तदानीं हे vसोम vसुवानः सूयमानस्त्वं vकलशेषु vआ vसीदसि ॥

पवस्व सोम क्रतुविन्न उक्थ्योऽव्यो वारे परि धाव मधु प्रियम् ।
जहि विश्वान्रक्षस इन्दो अत्रिणो बृहद्वदेम विदथे सुवीराः ॥ ४८ ॥

पवस्व । सोम । क्रतुऽवित् । नः । उक्थ्यः । अव्यः । वारे । परि । धाव । मधु । प्रियम् । जहि । विश्वान् । रक्षसः । इन्दो इति । अत्रिणः । बृहत् । वदेम । विदथे । सुऽवीराः ॥४८॥

हे vसोम vनः अस्माकं vक्रतुवित् कर्मज्ञः । स्तुतिज्ञ इत्यर्थः । vउक्थ्यः स्तुत्यः । यतः स्तुत्योऽतः क्रतुविदित्यभिप्रायः । ईदृशस्त्वं नोऽस्माकं यागाय vपवस्व स्रव रसम् । vअव्यो vवारे दशापवित्रे vप्रियं vमधु vपरि vधाव परिक्षर । हे vइन्दो दीप्त सोम vअत्रिणः भक्षकान् vविश्वान् vरक्षसः vजहि । vसुवीराः सुपुत्रा वयं vविदथे यज्ञे vबृहत् महद्धनं vवदेम उच्चारयेम । याचेमेत्यर्थः । यद्वा प्रभूतं स्तोत्रं वदेम ॥ ॥ २१ ॥

'प्र तु द्रव' इति नवर्चं द्वितीयं सूक्तं काव्यस्योशनस आर्षमनादेशपरिभाषया त्रैष्टुभं पवमानसोमदेवताकम् । तथा चानुक्रान्तं—'प्र तु नवोशना' इति । 'जागतमूर्ध्वं प्रागुशनसः' (अनु. ९. ६७) इति वचनाज्जगत्यधिकारो निवृत्तः । गतो विनियोगः ॥

प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।
अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्हीं रशनाभिर्नयन्ति ॥ १ ॥

प्र । तु । द्रव । परि । कोशम् । नि । सीद । नृऽभिः । पुनानः । अभि । वाजम् । अर्ष । अश्वम् । न । त्वा । वाजिनम् । मर्जयन्तः । अच्छ । बर्हिः । रशनाभिः । नयन्ति ॥ १ ॥

हे सोम vतु क्षिप्रं vप्र vद्रव प्रगच्छ । गत्वा च vकोशं द्रोणकलशं vपरि vनि vषीद निषण्णो भव । vनृभिः नेतृभिः vपुनानः पूयमानः vवाजम् अन्नं यजमानार्थमुद्दिश्य vअभि vअर्ष अभिगच्छ । vवाजिनं बलवन्तम् vअश्वं vन अश्वमिव तं यथा मार्जयन्ति[1] तद्वत् वाजिनं त्वां vमार्जयन्तः[2] शोधयन्तः vबर्हिः यज्ञम् vअच्छ प्रति vरशनाभिः रशनावदायताभिरङ्गुलीभिः vनयन्ति अध्वर्युप्रमुखाः ॥

स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः ।
पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥ २ ॥

सुऽआयुधः । पवते । देवः । इन्दुः । अशस्तिऽहा । वृजनम् । रक्षमाणः । पिता । देवानाम् । जनिता । सुऽदक्षः । विष्टम्भः । दिवः । धरुणः । पृथिव्याः ॥ २ ॥

vस्वायुधः शोभनायुधः vइन्दुः सोमः vदेवः vपवते । स च देवः vअशस्तिहा रक्षोहा vवृजनम् उपद्रवं vरक्षमाणः vपिता पालकः vदेवानां तथा vजनिता उत्पादकः vसुदक्षः सुबलः vदिवः vविष्टम्भः विशेषेण स्तम्भयिता vपृथिव्याः च vधरुणः धारकः । एवंमहानुभावः पवते ॥

३. ग–मर्जयति । ४. ग–मर्जयतः ।

ऋषिर्विप्रः पुरएता जनानामृभुर्धीरः उशना काव्येन ।
स चिद्विवेद निहितं यदासामपीच्यं[1] गुह्यं नाम गोनाम् ॥ ३ ॥

ऋषिः । विप्रः । पुरःऽएता । जनानाम् । ऋभुः । धीरः । उशना । काव्येन ।
सः । चित् । विवेद । निऽहितम् । यत् । आसाम् । अपीच्यम् । गुह्यम् । नाम । गोनाम् ॥३॥

ऋषिः अतीन्द्रियद्रष्टा विप्रः मेधावी पुरएता पुरतो गन्ता जनानां मनुष्याणाम् ऋभुः उरु भासमानः धीरः धीमान् उशना एतन्नामर्षिः यः स चित् स एव काव्येन कवित्वेन स्तोत्रेण विवेद लभते । किम् । यदासां गोनां गवाम् अपीच्यम् । अन्तर्हितनामैतत् । अन्तर्हितं गुह्यं गोपनीयं नाम नामकमुदकं पयोलक्षणम् ॥

एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।
सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥ ४ ॥

एषः । स्यः । ते । मधुऽमान् । इन्द्र । सोमः । वृषा । वृष्णे । परि । पवित्रे । अक्षारिति ।
सहस्रऽसाः । शतऽसाः । भूरिऽदावा । शश्वत्ऽतमम् । बर्हिः । आ । वाजी । अस्थात् ॥४॥

हे इन्द्र वृष्णे वर्षकाय ते तुभ्यम् एष स्यः सः सोमः मधुमान् माधुर्योपेतः वृषा वर्षकः पवित्रे परि अक्षाः परिक्षरति । क्षरतेर्लुङि रूपम् । स एव सहस्रसाः सहस्रसंख्याकधनस्य दाता शतसाः शतसंख्याकस्य दाता भूरिदावा ततोऽपि भूरेर्दाता वाजी बलवान् शश्वत्तमं नित्यं बर्हिः यज्ञम् आ अस्थात् आतिष्ठति ॥

एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।
पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः ॥ ५ ॥

एते । सोमाः । अभि । गव्या । सहस्रा । महे । वाजाय । अमृताय । श्रवांसि ।
पवित्रेभिः । पवमानाः । असृग्रन् । श्रवस्यवः । न । पृतनाजः । अत्याः ॥ ५ ॥

एते सोमाः गव्या गव्यानि सहस्रा सहस्राणि श्रवांसि अन्नानि आशिरलक्षणानि लक्षीकृत्य पवित्रेभिः पवित्रच्छिद्रैः पवमानाः पूयमानाः महे महते वाजाय अन्नाय अमृताय अमृतत्वाय अभि असृग्रन् सृज्यन्ते । किमिव । श्रवस्यवः अन्नेच्छवः पृतनाजः सेनाजेतारः अत्याः न अश्वा इव ॥ ॥ २२ ॥

परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना पूयमानः ।
अथा भर श्येनभृत प्रयांसि रयिं तुञ्जानो अभि वाजमर्ष ॥ ६ ॥

परि । हि । स्म । पुरुऽहूतः । जनानाम् । विश्वा । असरत् । भोजना । पूयमानः ।
अथ । आ । भर । श्येनऽभृत । प्रयांसि । रयिम् । तुञ्जानः । अभि । वाजम् । अर्ष ॥ ६ ॥

अयं परि असरत् परिसरति जनानाम्[2] अर्थाय विश्वा सर्वाणि भोजना भोजनान्यन्नानि धनानि वा । कीदृशः । पुरुहूतः बहुभिराहूतः पूयमानः शोध्यमानः । अथ प्रत्यक्षकृतः । अथ

1. तै३-भ१.२.६.७—जनानां यजमानानां ।

ऋ. ४–१२

इदानीं हे ᵛइयेनभृत इयेनेनाहृत सोम त्वं ᵛप्रयांसि अन्नानि ᵛआ ᵛभर आहर। ᵛरयिं धनं ᵛतुआनः ददानः ᵛवाजम् अन्नं रसम् ᵛअभि ᵛअर्ष अभिगच्छ ॥

एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।
तिग्मे शिशानो महिषो न शृङ्गे गा गव्यन्नभि शूरो न सत्वा ॥ ७ ॥

एषः । सुवानः । परि । सोमः । पवित्रे । सर्गः । न । सृष्टः । अदधावत् । अर्वा ।
तिग्मे इति । शिशानः । महिषः । न । शृङ्गे इति ।
गाः । गव्यन् । अभि । शूरः । न । सत्वा ॥ ७ ॥

ᵛएष ᵛसुवानः सूयमानः ᵛअर्वा अरणकुशलः ᵛसोमः ᵛसर्गो ᵛन ᵛसृष्टः विसृष्टोऽश्व इव ᵛपवित्रे ᵛपरि ᵛअदधावत् परिधावति। किंच ᵛतिग्मे तीक्ष्णे ᵛशृङ्गे ᵛशिशानः तीक्ष्णीकुर्वन् ᵛमहिषो ᵛन महान्[1] महिषाख्यो मृग इव[2]। तथान्यदृष्टान्तः। ᵛगा ᵛगव्यन् प्रभूता गा इच्छन् ᵛशूरो ᵛन शूर इव। एतौ महिषशूरौ यथा प्रतिबुद्धौ शीघ्रं धावतः तद्वत् ᵛसत्वा सदनशीलोऽयं गच्छतीति शेषः ॥

एषा यया परमादन्तरद्रेः कूचित्सतीरूर्वे गा विवेद ।
दिवो न विद्युत्स्तनयन्त्यभ्रैः सोमस्य ते पवत इन्द्र धारा ॥ ८ ॥

एषा । आ । ययौ । परमात् । अन्तः । अद्रेः । कूऽचित् । सतीः । ऊर्वे । गाः । विवेद ।
दिवः । न । विऽद्युत् । स्तनयन्ती । अभ्रैः । सोमस्य । ते । पवते । इन्द्र । धारा ॥ ८ ॥

ᵛएषा सोमधारा ᵛपरमात् उच्छ्रितात् स्थानात् ᵛययौ जगाम प्राप्तं स्वयंप्राप्तव्यं देशं वा। किंच ᵛअद्रेः पणीनां निवासस्थानस्य पर्वतस्य ᵛअन्तः ᵛकूचित् क्वचित् कुत्रचिद्दूढे ᵛऊर्वे देशे ᵛसतीः वर्तमानाः पणिभिरपहृताः ᵛगाः ᵛविवेद लब्धवती। यत्र पणयो गा अपहृत्य स्थापितवन्तः स देश ऊर्वः। 'ऊर्वं गव्यं महि गृणानः' (ऋ. सं. ६.१७.१) इति हि मन्त्रान्तरम्। ᵛदिवो ᵛन ᵛविद्युत् दिवः सकाशाद्विद्युदिव ᵛस्तनयन्ती शब्दयन्ती। विद्युत् विशेष्यते। ᵛअभ्रैः प्रेरितेति शेषः। सा यथा शब्दं करोति तद्वच्छब्दं कुर्वती। ᵛसोमस्य संबन्धिनी सेयं ᵛधारा हे ᵛइन्द्र ᵛते त्वदर्थं त्वत्पानाय ᵛपवते पूयते। क्षरति वा ॥

उत स्म राशिं परि यासि गोनामिन्द्रेण सोम सरथं पुनानः ।
पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत् ॥ ९ ॥

उत । स्म । राशिम् । परि । यासि । गोनाम् । इन्द्रेण । सोम । सऽरथम् । पुनानः ।
पूर्वीः । इषः । बृहतीः । जीरदानो इति जीरऽदानो ।
शिक्ष । शचीऽवः । तव । ताः । उपऽस्तुत् ॥ ९ ॥

ᵛउत ᵛस्म अपि च खलु हे ᵛसोम ᵛपुनानः पूयमानः ᵛगोनां गवां ᵛराशिं समूहं पणिभिरपहृतं ᵛपरि ᵛयासि परिगच्छसि। कथंभूतः सन् उच्यते। ᵛइन्द्रेण सह ᵛसरथम् एकमेव रथमास्थाय। हे

१. ग–'महान्' नास्ति। २. ग–इव पवित्रे पर्यदधावत् परिधावति।

vजीरदानो क्षिप्रदान सोम vउपस्तुत् उपस्तूयमानस्त्वं vपूर्वीः बह्वीः vबृहतीः महतीः vइषः उक्तलक्षणान्यन्नानि vशिक्ष देहि । हे vशचीवः अन्नवन् vताः इषः vतव स्वभूता इति शेषः ॥ ॥२३॥

' अयं सोमः ' इत्यष्टर्चं तृतीयं सूक्तम् । ऋष्याद्याः पूर्ववत् । ' अयं सोमोऽष्टौ ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥ १ ॥

अयम् । सोमः । इन्द्र । तुभ्यम् । सुन्वे । तुभ्यम् । पवते । त्वम् । अस्य । पाहि ।
त्वम् । ह । यम् । चकृषे । त्वम् । ववृषे । इन्दुम् । मदाय । युज्याय । सोमम् ॥ १ ॥

हे vइन्द्र vअयं vसोमः vतुभ्यं त्वदर्थं vसुन्वे सूयते ॥ सुनोतेः कर्मार्थे लटि ' लोपस्त आत्मनेपदेषु ' इति तलोपः ॥ vतुभ्यं त्वदर्थमेव vपवते पूयते । vत्वं च vअस्य असुं vपाहि पिब । vत्वं vह vयम् vइन्दुं vसोमं vचकृषे करोषि । vत्वं च यं vववृषे वृतवानसि । किमर्थम् । vमदाय vयुज्याय सहायाय । सोम इन्द्राय बलकरत्वात् सहाय इति प्रसिद्धम् । यमेवं करोषि त्वं तं पाहीति समन्वयः॥

स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि ।
आदीं विश्वा नहुष्याणि जाता स्वर्षाता वनं ऊर्ध्वा नवन्त ॥ २ ॥

सः । ईम् । रथः । न । भुरिषाट् । अयोजि । महः । पुरूणि । सातये । वसूनि ।
आत् । ईम् । विश्वा । नहुष्याणि । जाता । स्वःऽसाता । वने । ऊर्ध्वा । नवन्त ॥ २ ॥

vस vईं सोऽयं सोमः vभुरिषाट् भूरिभारस्य सोढा vरथो vन रथ इव भुरिषाट् प्रभूतस्य भारस्य सोढा vअयोजि युज्यते । कीदृशः सः । vमहः महान् । किमर्थमयोजि । vपुरूणि बहूनि vवसूनि धनानि vसातये अस्मभ्यं दातुम् । vआदीं योगानन्तरं vविश्वा विश्वानि सर्वाणि vनहुष्याणि । नहुषो[1] मनुष्याः । तेषां संबन्धीनि[1] vजाता जातान्यस्मद्विरोधीनि vऊर्ध्वा उन्मुखानि vवने वननीये vस्वर्षाता स्वर्षातौ । संग्रामनामैतत् । स्वर्गलाभयुक्ते संग्रामे vनवन्त गच्छन्तु । नवतिर्गतिकर्मा । यद्वा । सोमं संग्रामे युद्धार्थिनः संगच्छन्ति ॥

वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शंभविष्ठः ।
विश्ववारो द्रविणोदाइव त्मन्पूषेव धीजवनोऽसि सोम ॥ ३ ॥

वायुः । न । यः । नियुत्वान् । इष्टऽयामा । नासत्याऽइव । हवे । आ । शम्ऽभविष्ठः ।
विश्वऽवारः । द्रविणोदाःऽइव । त्मन् । पूषाऽइव । धीऽजवनः । असि । सोम ॥ ३ ॥

vयः सोमः vनियुत्वान् । नियुतो वायोरश्वाः । तद्वान् vवायुर्न वायुरिव vइष्टयामा इष्टगमनः । vनासत्येव अश्विनाविव vहवम् आह्वानमाकर्ण्य vआ सर्वतः vशंभविष्ठः सुखस्य भावयितृतमः । vद्रविणोदाइव धनदातेव vत्मन् आत्मनि vविश्ववारः विश्ववरणीयो भवति तद्वद्विश्ववारोऽसि । vपूषेव पोषकः सवितेव vधीजवनः मनोवेगः vअसि । यद्वा कर्मणां प्रवर्तयितासि हे vसोम ॥

१. ग–मनुष्यसंबंधीनि ।

इन्द्रो न यो महा कर्माणि चक्रिर्हन्ता वृत्राणामसि सोम पूर्भित् ।
पैद्वो न हि त्वमहिनाम्नां हन्ता विश्वस्यासि सोम दस्योः ॥ ४ ॥

इन्द्रः । न । यः । महा । कर्माणि । चक्रिः । हन्ता । वृत्राणाम् । असि । सोम । पूःऽभित् ।
पैद्वः । न । हि । त्वम् । अहिंऽनाम्नाम् । हन्ता । विश्वस्य । असि । सोम । दस्योः ॥ ४ ॥

ᵛइन्द्रो ᵛन इन्द्र इव ᵛयः त्वं ᵛमहा महान्ति ᵛकर्माणि ᵛचक्रिः तच्छीलयेन करोषि स त्वं हे ᵛसोम ᵛवृत्राणां शत्रूणां ᵛहन्ता ᵛअसि भवसि । तथा ᵛपूर्भित् पुरां भेत्तासि । किंच ᵛपैद्वो ᵛन अश्व इव खलु ᵛअहिनाम्नां ᵛहन्ता भवसि । आगत्य हन्तीत्यहिः । तत्सामकानामित्यर्थः । न केवलं तेषामेव अपि तु ᵛविश्वस्य अपि सर्वस्यापि ᵛदस्योः उपक्षपयितुः शत्रोर्हन्ता ᵛअसि ॥

अग्निर्न यो वन आ सुज्यमानो वृथा पाजांसि कृणुते नदीषु ।
जनो न युध्वा महत उपब्दिरर्यर्ति सोमः पवमान ऊर्मिम् ॥ ५ ॥

अग्निः । न । यः । वने । आ । सृज्यमानः । वृथा । पाजांसि । कृणुते । नदीषु ।
जनः । न । युध्वा । महतः । उपब्दिः । इर्यर्ति । सोमः । पवमानः । ऊर्मिम् ॥ ५ ॥

ᵛअग्निर्न अग्निरिव ᵛयः सोमः ᵛवने अरण्ये ᵛआ ᵛसृज्यमानः वनसंबन्ध्यग्नियथा बलानि[1] कुरुते[1] एवं यः सोमः ᵛवृथा अनायासेन ᵛनदीषु आन्तरिक्षाणि ᵛपाजांसि ᵛकृणुते कुरुते । किंच ᵛयुध्वा युद्धस्य कर्ता ᵛजनो ᵛन शूरो मनुष्य इव ᵛमहतः शत्रोः ᵛउपब्दिः । वाङ्नामैतत् । शब्दयिता सन् ᵛपवमानः पूयमानः ᵛसोमः ᵛऊर्मिं प्रवृद्धं रसम् ᵛइर्यर्ति प्रेरयति ॥

एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।
वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥ ६ ॥

एते । सोमाः । अति । वाराणि । अव्या । दिव्याः । न । कोशासः । अभ्रऽवर्षाः ।
वृथा । समुद्रम् । सिन्धवः । न । नीचीः । सुतासः । अभि । कलशान् । असृग्रन् ॥ ६ ॥

ᵛएते पूयमानाः ᵛसोमाः ᵛअव्या अविमयानि ᵛवाराणि वालानि ᵛअति गच्छन्तीति शेषः । तत्र दृष्टान्तः । ᵛदिव्या ᵛन ᵛकोशासः दिवि भवाः कोशा आप इव । ता विशेष्यन्ते । ᵛअभ्रवर्षाः अभ्रैर्वृष्यमाणाः । किंच ᵛवृथा अनायासेन ᵛसमुद्रं ᵛसिन्धवो ᵛन नद्य इव ᵛनीचीः नीचीनाग्राः ᵛसुतासः अभिषुताः सोमाः ᵛकलशान् ᵛअभि ᵛअसृग्रन् अभिगच्छन्ति ॥

शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
आपो न मक्षू सुमतिर्भवा नः सहस्रापाः पृतनाषाण्न यज्ञः ॥ ७ ॥

शुष्मी । शर्धः । न । मारुतम् । पवस्व । अनभिऽशस्ता । दिव्या । यथा । विट् ।
आपः । न । मक्षु । सुऽमतिः । भव । नः । सहस्रऽअप्साः । पृतनाषाट् । न । यज्ञः ॥ ७ ॥

हे सोम ᵛशुष्मी । शुष्मं बलं शोषणात् । बलवांस्त्वं ᵛमारुतं ᵛशर्धो ᵛन मरुतां बलमिव ᵛपवस्व । तत्र दृष्टान्तमेव स्पष्टयति । ᵛयथा ᵛदिव्या ᵛविट् प्रजा ᵛअनभिशस्ता । अभिशासो निन्दा ।

---

१. ग-ज्वाला विकुरुते ।

अनिन्दिता पवते। 'मरुतो वै देवानां विशः' (तै. सं. २. २. ५. ७) इति हि ब्राह्मणम्। किंच vआपो vन उदकानीव vमधु क्षिप्रं पवमानस्त्वं vसुमतिः vभव vनः अस्माकम्। किंच vसहस्रापाः। अप्स इति रूपनाम। बहुरूपस्त्वं vपृतनापाट् पृतनानामभिभवितेन्द्र इव vयज्ञः यष्टव्यो भवसीति॥

राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम॥ ८॥

राज्ञः। नु। ते। वरुणस्य। व्रतानि। बृहत्। गभीरम्। तव। सोम। धाम।
शुचिः। त्वम्। असि। प्रियः। न। मित्रः। दक्षाय्यः। अर्यमाऽइव। असि। सोम॥ ८॥

हे vसोम vवरुणस्य वारकस्य vते तव vव्रतानि कर्माणि vनु क्षिप्रं करोमीति शेषः। हे vसोम vतव vधाम तेजःस्थानं vबृहत् महत् vगभीरं च। vप्रियः vमित्रः इव vत्वं vशुचिः दीप्तः शुद्धो वा vअसि। vअर्यमेव अर्यमा देव इव त्वं vदक्षाय्यः vअसि॥ ॥ २४॥

'प्रो स्य वह्निः' इति सप्तर्चं चतुर्थं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'प्रो स्य सप्त' इत्यनुक्रान्तम्। गतो विनियोगः॥

प्रो स्य वह्निः पथ्याभिरस्यान् दिवो न वृष्टिः पवमानो अक्षाः।
सहस्रधारो असदन्य अस्मे मातुरुपस्थे वन आ च सोमः॥ १॥

प्रो इति। स्यः। वह्निः। पथ्याभिः। अस्यान्। दिवः। न। वृष्टिः। पवमानः। अक्षारिति।
सहस्रऽधारः। असदत्। नि। अस्मे इति। मातुः। उपऽस्थे। वने। आ। च। सोमः॥१॥

प्र ऊ इति निपातद्वयसमुदाय एको निपातितः। vप्रो vअस्यान् प्रस्यन्दते vस्यः सः vवह्निः वोढा vपथ्याभिः यज्ञमार्गैः। vदिवो vन vवृष्टिः दिवः सकाशात् वृष्टिरिव vपवमानः पूयमानः सन् vअक्षाः व्याप्नोषि। सोऽयं vसोमः vसहस्रधारः बहुधारः सन् vअस्मे अस्मासु vनि vअसदत् निषीदति॥

राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठाम्।
अप्सु द्रप्सो ववृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाम्॥ २॥

राजा। सिन्धूनाम्। अवसिष्ट। वासः। ऋतस्य। नावम्। आ। अरुहत्। रजिष्ठाम्।
अप्ऽसु। द्रप्सः। ववृधे। श्येनऽजूतः। दुहे। ईम्। पिता। दुहे। ईम्। पितुः। जाम्॥२॥

अयं vराजा सोमः vसिन्धूनाम् उदकानां क्षीरादिस्यन्दिनीनां गवां वा vवासः वसनस्थानीयं क्षीरात्मकं अयणद्रव्यम् vअवसिष्ट आच्छादयति। तथा कृत्वा vरजिष्ठाम् ऋजुतराम् vऋतस्य यज्ञस्य vनावमारुहत् आरोहति। सः vद्रप्सः सोमरसः vश्येनजूतः श्येनेनापहृतो रसः[1] vअप्सु वसतीवरीषु vववृधे वर्धते। vईं तमिमं vपितुः पालकात् पितृस्थानीयात् द्युलोकात् vजां जातमपत्यं सोमम् vईम् अयं vपिता पालको लोकः vदुहे दोग्धि रसम्। तथाध्वर्युरपि vदुहे दोग्धि। अथवा। उक्तलक्षणमेतं सोमं पिता पालकः स्वामी यजमानो दोग्धि फलं तथा दुहेऽध्वर्युरपि रसं दुहे। यद्वा। दुह ईमिति पुनरुक्तिरादरार्था॥

---

१. ग–थः।

सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम् ।
शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ॥ ३ ॥

सिंहम् । नसन्त । मध्वः । अयासम् । हरिम् । अरुषम् । दिवः । अस्य । पतिम् ।
शूरः । युत्ऽसु । प्रथमः । पृच्छते । गाः । अस्य । चक्षसा । परि । पाति । उक्षा ॥ ३ ॥

vसिंहं शत्रूणां हिंसकं सिंहसदृशं vमध्वः उदकस्य vअयासं प्रेरकं vहरिं हरितवर्णम् vअस्य vदिवः द्युलोकस्य vपतिं पालकं सोमं vनसन्त व्याप्नुवन्ति यजमानाः । vयुत्सु संग्रामेषु vशूरः vप्रथमः देवानां मध्ये मुख्यः सोमः vगाः पणिभिरपहृताः vपृच्छते मार्गज्ञान् । पणीन् हत्वा गा लब्धुं गोमार्गं पृच्छतीत्यर्थः । किंच vअस्य vचक्षसा सामर्थ्येन vउक्षा सेक्ता देवेन्द्रः vपरि vपाति विश्वम् ॥

मधुपृष्ठं घोरमयासमश्वं रथे युञ्जन्त्युरुचक्र ऋष्वम् ।
स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनमूर्जयन्ति ॥ ४ ॥

मधुऽपृष्ठम् । घोरम् । अयासम् । अश्वम् । रथे । युञ्जन्ति । उरुऽचक्रे । ऋष्वम् ।
स्वसारः । ईम् । जामयः । मर्जयन्ति । सऽनाभयः । वाजिनम् । ऊर्जयन्ति ॥ ४ ॥

vमधुपृष्ठं मधुरपृष्ठभागं vघोरं भयानकम् vअयासं गन्तारम् vऋष्वं दर्शनीयमुक्तलक्षणाश्वस्थानीयं व्याप्तं सोमम् vउरुचक्रे प्रभूतचक्रे vरथे यथाश्वं रथे vयुञ्जन्ति रथिकास्तद्वत् प्रभूतचरणे रथे रंहणस्य साधने यज्ञाख्ये रथे युञ्जन्ति । योजयन्त्यध्वर्यादयः । किंच vईम् एनं सोमं vस्वसारः स्वयंसारिण्यः परस्परं स्वसृभूता वा vजामयः बन्धुभूता अङ्गुलयः । एकहस्तनिष्पन्नत्वात् स्वसृत्वं जामित्वं च । एवंभूताः vमार्जयन्ति शोधयन्ति । तदेवाह । vसनाभयः समानबन्धनाः vवाजिनं बलवन्तं सोमम् vऊर्जयन्ति बलिनं कुर्वन्ति ॥

चतस्र ईं घृतदुहः सचन्ते समाने अन्तर्धरुणे निषत्ताः ।
ता ईमर्षन्ति नमसा पुनानास्ता ईं विश्वतः परि षन्ति पूर्वीः ॥ ५ ॥

चतस्रः । ईम् । घृतऽदुहः । सचन्ते । समाने । अन्तः । धरुणे । निऽसत्ताः ।
ताः । ईम् । अर्षन्ति । नमसा । पुनानाः । ताः । ईम् । विश्वतः । परि । सन्ति । पूर्वीः ॥५॥

vचतस्रः vघृतदुहः घृतदोग्ध्र्यो गावः[1] vईम् एनं सोमं vसचन्ते सेवन्ते । कीदृश्यस्ताः । vसमाने एकस्मिन् vधरुणे सर्वेषां धारकेऽन्तरिक्षे vनिषत्ताः निषण्णाः । vताः घृतदुहः vईम् एनम् vअर्षन्ति प्राप्नुवन्ति vनमसा अन्नेन vपुनानाः पूयमानाः सत्यः । vताः vपूर्वीः बह्व्यः प्रभूता गावः[2] vविश्वतः सर्वतः vपरि vषन्ति परिभवन्ति ॥

विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य ।
असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इन्द्रियाय ॥ ६ ॥

विऽस्तम्भः । दिवः । धरुणः । पृथिव्याः । विश्वाः । उत । क्षितयः । हस्ते । अस्य ।
असत् । ते । उत्सः । गृणते । नियुत्वान् । मध्वः । अंशुः । पवते । इन्द्रियाय ॥ ६ ॥

१. त१.२.३.४.५.६-भ१.२.६-नावः; भ७-नागावः । २. त१.२.३.४.५.६-भ१.२.६-नावः; भ७-नागावः ।

अयं सोमः [v]दिवः द्युलोकस्य विष्टम्भभूतः। यथा गृहस्य स्तम्भस्तद्वत्। तथा [v]पृथिव्याः [v]धरुणः धारकः। [v]उत अपि च [v]विश्वाः सर्वाः [v]क्षितयः प्रजाः [v]अस्य सोमस्य [v]हस्ते भवन्ति। [v]उत्सः। उत्सरन्त्यस्मात् कामा इत्युत्सः सोमः। सः [v]गृणते स्तुवते [v]ते हव्यं [v]नियुत्वान् अश्ववान् [v]अस्तु भवतु। स सोमः [v]मध्वः मधु। कर्मणि षष्ठी। मधुररसः [v]अंशुः सोमः। 'अंशुः शमष्टमात्रो भवति' (निरु. २. ५) इति यास्कः। [v]इन्द्रियाय[1] [v]पवते पूयते अभिषूयते[2] ॥

वन्वन्नवातो अभि देववीतिमिन्द्राय सोम वृत्रहा पवस्व।
शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम ॥ ७ ॥

वन्वन्। अवातः। अभि। देवऽवीतिम्। इन्द्राय। सोम। वृत्रऽहा। पवस्व।
शग्धि। महः। पुरुऽचन्द्रस्य। रायः। सुऽवीर्यस्य। पतयः। स्याम ॥ ७ ॥* ॥ २५ ॥

'प्र हिन्वानः' इति षड्ऋचं पञ्चमं सूक्तं मैत्रावरुणेर्वसिष्ठस्यार्षं त्रैष्टुभं पवमानसोमदेवताकम्। तथा चानुक्रान्तं—'प्र हिन्वानः षड्वसिष्ठः' इति। गतो विनियोगः ॥

प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिष्यन्नयासीत्।
इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥ १ ॥

प्र। हिन्वानः। जनिता। रोदस्योः। रथः। न। वाजम्। सनिष्यन्। अयासीत्।
इन्द्रम्। गच्छन्। आयुधा। सम्ऽशिशानः। विश्वा। वसु। हस्तयोः। आऽदधानः ॥ १ ॥

[v]हिन्वानः[3] प्रेर्यमाणोऽध्वर्वादिभिः [v]जनिता उत्पादयिता [v]रोदस्योः द्यावापृथिव्योः। तयोः[4] जनयितृत्वं वृष्टिप्रदानहविष्प्रापणाभ्याम्। तादृक्सोमः [v]वाजम् अन्नं [v]सनिष्यन् दास्यन् [v]प्र [v]अयासीत् प्रगच्छति। [v]इन्द्रं [v]गच्छन् प्राप्नुवन् [v]आयुधा आयुधानि [v]संशिशानः सम्यक् तीक्ष्णीकुर्वन्निन्द्रसाहाय्यगमनार्थं तीक्ष्णायुधः सन् [v]विश्वा सर्वाणि [v]वसु वसूनि [v]हस्तयोरादधानः अस्मभ्यं दानाय। एवं कुर्वन् प्रायासीत् ॥

अभि त्रिपृष्ठं वृषणं वयोधामाङ्गूषाणामवावशन्त वाणीः।
वना वसानो वरुणो न सिन्धून्वि रत्नधा दयते वार्याणि ॥ २ ॥

---

१. ग–इंद्रियार्थं; त-भ-मु–य इंद्रियाय। २. त३-भ६–अभिषूयते। त्यक्तं किंचित्। * ग–हे सोम वन्वन्नवातः शत्रुभिरनभिभूतः देववीतिं यज्ञमभिगच्छ। शत्रुहंता रसन् इंद्राय पवस्व। बहुभिः स्पृहणीयं धनं देहि। वयं च सुवीर्यस्य पतयः स्याम; त१.२.६.७-भ२–वन्वन् स (त१-सन्) देववीतिं देवानां पानार्थं हे सोम इंद्राय इंद्रार्थं वृत्रहा वृत्रस्य हंता (भ२–वृत्रहंता) त्वं पवस्व क्षर। कथंभूतस्त्वं। शग्धि शक्तिमानासि (त१–°मानसि)। त्वत्प्रसादाद्वयं पुरुश्चंद्रस्य रायः बह्वाल्हादकस्य रायः सुवीर्यस्य शोभनवीरा (त१.२–शोभना वीरा) यस्मिन् तादृशस्य धनस्य पतयः स्याम; भ४–उक्तोर्थः; मु–वन्वन् सन् देववीतिं देवानां पानार्थं हे सोम इंद्राय इंद्रार्थं वृत्रहा वृत्रस्य हंता अवातः त्वं अभिपवस्व क्षर। कथंभूतस्त्वं। शग्धि शक्तिमान् महो महानसि। त्वत्प्रसादात् वयं पुरुश्चंद्रस्य बह्वाल्हादकस्य सुवीर्यस्य शोभना वीरा यस्मिन् तादृशस्य राये धनस्य पतयः स्याम। ३. त३-भ– प्र हिन्वानः। ४. ग-त३-भ१.२.४.७–'तयोः' नास्ति।

अभि । त्रिऽपृष्ठम् । वृषणम् । वयःऽधाम् । आङ्गूषाणाम् । अवावशन्त । वाणीः ।
वना । वसानः । वरुणः । न । सिन्धून् । वि । रत्नऽधाः । दयते । वार्याणि ॥ २ ॥

[v]त्रिपृष्ठम् । त्रीणि पृष्ठानि स्तोत्राणि द्रोणकलशादिस्थानानि[1] वा[2] सवनानि वा यस्य स तथोक्तः । तं [v]वृषणं वर्षकं [v]वयोधाम् अन्नस्य दातारं सोमम् [v]आङ्गूषाणाम् आघोषवतां स्तोतॄणां [v]वाणीः वाचः [v]अभि [v]अवावशन्त शब्दयन्ते । [v]वना वनान्युदकानि [v]वसानः आच्छादयन् [v]वरुणो [v]न वरुण इव [v]सिन्धून् आच्छादयति तद्वत् । [v]रत्नधाः रत्नानां दाता सोमः [v]वार्याणि धनानि [v]दयते प्रयच्छति स्तोतृभ्यः ॥

शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्वसाळ्हः साह्वान्पृतनासु शत्रून् ॥ ३ ॥

शूरऽग्रामः । सर्वऽवीरः । सहावान् । जेता । पवस्व । सनिता । धनानि ।
तिग्मऽआयुधः । क्षिप्रऽधन्वा । समत्ऽसु । असाळ्हः । सह्वान् । पृतनासु । शत्रून् ॥ ३ ॥

हे सोम [v]पवस्व त्वम् । कीदृशस्त्वम् । [v]शूरग्रामः शूराणां ग्रामः संघो यस्य सः । [v]सर्ववीरः । सर्वे वीरा यस्य स तथोक्तः । [v]सहावान् सहनवान् [v]जेता जयशीलः [v]सनिता संभक्ता [v]धनानि [v]तिग्मायुधः तीक्ष्णप्रहरणसाधनः [v]क्षिप्रधन्वा क्षिप्रसहनशीलधन्वा [v]समत्सु संग्रामेषु [v]असाळ्हः असोढः[2] [v]साह्वान् अभिभवन् । कुत्र । [v]पृतनासु शत्रुसेनासु । कान् । [v]शत्रून् ॥

उरुगव्यूतिरभयानि कृण्वन्त्समीचीने आ पवस्वा पुरंधी ।
अपः सिषासन्नुषसः स्वर्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥ ४ ॥

उरुऽगव्यूतिः । अभयानि । कृण्वन् ।
समीचीने इति सम्ऽअञ्चीने । आ । पवस्व । पुरंधी इति पुरम्ऽधी ।
अपः । सिसासन् । उषसः । स्वः । गाः । सम् । चिक्रदः । महः । अस्मभ्यम् । वाजान् ॥४॥

हे सोम [v]उरुगव्यूतिः विस्तीर्णमार्गस्त्वम् [v]अभयानि स्तोतृभ्यः [v]कृण्वन् कुर्वन् [v]पुरंधी । इदं द्यावापृथिव्योर्नाम । ते[3] [v]समीचीने संगते कुर्वन् [v]आ [v]पवस्व आक्षर[4] । [v]अपः [v]उषसः [v]स्वः आदित्यं [v]गाः रश्मींश्च [v]सिषासन् पुष्टयर्थं संभक्तुमिच्छन् [v]सं [v]चिक्रदः संक्रन्दसे । [v]महः महतो महान्ति [v]वाजान् अन्नानि [v]अस्मभ्यं दातुमिति शेषः ॥

मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिन्द्रमिन्दो मदाय ॥ ५ ॥

मत्सि । सोम । वरुणम् । मत्सि । मित्रम् । मत्सि । इन्द्रम् । इन्दो इति । पवमान । विष्णुम् ।
मत्सि । शर्धः । मारुतम् । मत्सि । देवान् । मत्सि । महाम् । इन्द्रम् । इन्दो इति । मदाय ॥५॥

---

१. ग-त३-भ१.२.४.७–'द्रोण°...वा' नास्ति । २. ग-त-भ–असोढा । ३. ग-त१.२.३-भ–'ते' नास्ति । ४. भ१(२)–क्षर ।

हे ᵛपवमान पूयमान ᵛइन्दो ᵛसोम त्वं वरुणादीन् ᵛअस्मि तर्पय तेषां ᵛमदाय । इन्द्रस्य प्राधान्यात् द्विरभिधानम् ॥

एवा राजेव ऋतुमाँ अमेन विश्वा घनिघ्नदुरिता पवस्व ।
इन्दो सूक्ताय वचसे वयो धा युयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

एव । राजाऽइव । ऋतुऽमान् । अमेन । विश्वा । घनिघ्नत् । दुःऽइता । पवस्व ।
इन्दो इति । सुऽउक्ताय । वचसे । वयः । धाः । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

अनया स्तुतिमुपसंहरन् फलमाशास्ते । हे सोम ᵛएव एवं स्तुत इति शेषः । ᵛऋतुमान् त्वं ᵛराजेव ᵛअमेन बलेन ᵛविश्वा सर्वाणि ᵛदुरिता दुरितानि ᵛघनिघ्नत् विनाशयन् ᵛपवस्व । हे ᵛइन्दो दीप्त सोम ᵛसूक्ताय शोभनमुदिताय ᵛवचसे अस्माकं स्तोत्राय तद्वचो विमृश्यार्थंवदवगत्य ᵛवयो ᵛधाः अन्नं धेहि । अन्नलाभस्य स्तुतिनिमित्तकत्वात्तस्य स्तुतिवचसः प्राधान्येनोक्तिः । शिष्टं सिद्धम् ॥ ॥२६॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये
सप्तमाष्टके तृतीयोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तृतीयं श्रुतितत्त्वज्ञः सप्तमस्याष्टकस्य सः ।
व्याख्याय सायणामात्यश्चतुर्थं व्याचिकीर्षति ॥

तत्र ' असर्जि ' इति षड्चं षष्ठं सूक्तं मारीचस्य कश्यपस्यार्षं त्रैष्टुभं पवमानसोमदेवताकम् । ' असर्जि कश्यपः ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी ।
दश स्वसारो अधि सानो अव्येऽजन्ति वह्निं सदनान्यच्छ ॥ १ ॥

असर्जि । वक्वा । रथ्ये । यथा । आजौ । धिया । मनोता । प्रथमः । मनीषी ।
दश । स्वसारः । अधि । सानौ । अव्ये । अजन्ति । वह्निम् । सदनानि । अच्छ ॥ १ ॥

ᵛवक्वा शब्दायमानः । ' वच परिभाषणे ' । वनिप् । एतादृशः[1] पवमानः सोमः ᵛआजौ । अजन्ति कर्मार्थमृत्विज इत्याजिर्यज्ञः । तस्मिन् ᵛधिया कर्मणा स्तोत्रेण वा साकम् ᵛअसर्जि सृज्यते पात्रेष्विति । तत्र दृष्टान्तः । ᵛरथ्ये ᵛयथा रथार्हे आजौ । संग्रामनामैतत् अजन्ति प्रक्षिपन्ति आयुधान्यत्रेति[2] । तस्मिन्नश्वो यथा धियाकृत्या सृज्यते[3] तद्वत् । कीदृशः । ᵛमनोता यस्मिन् देवानां

१. ग-त३.४-भ१.२.४.७-तादृशः । २. ग-आयूंष्यत्रेति । ३. त१.२.४.५.७-भ२-मु-मृज्यते ।

मनांस्योतानि प्रोतानि सः। तथा च ब्राह्मणं—' तस्मिन् हि तेषां मनांस्योतानि ' (ऐ. ब्रा. २.१०) इति। vप्रथमः सर्वेषां देवानां मुख्यः vमनीषी। मनस ईषा मनीषा स्तुतिः। तद्वान्। vदक्ष vस्वसारः दशसंख्याका अङ्गुलयः vसदनानि यज्ञगृहाणि vअच्छ अभिमुखीकृत्य vवहिं वोढारं सोमं vसानौ समुच्छ्रिते। अधिः सप्तम्यर्थानुवादकः। vअव्ये अविभवे अविवालेन कृते पवित्रे vअजन्ति प्रेरयन्ति। ' अज गतिक्षेपणयोः'॥

वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुष्येभिरिन्दुः।
प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः ॥ २ ॥

वीती। जनस्य। दिव्यस्य। कव्यैः। अधि। सुवानः। नहुष्येभिः। इन्दुः।
प्र। यः। नृऽभिः। अमृतः। मर्त्येभिः। मर्मृजानः। अविऽभिः। गोभिः। अत्ऽभिः ॥२॥

vकव्यैः साधुभिः स्तोतृभिः vनहुष्येभिः मनुष्यैः vसुवानः अभिषूयमाणः vइन्दुः सोमः vदिव्यस्य दिवि भवस्य vजनस्य देवगणस्य vवीती। 'सुपां सुलुक्०' इति चतुर्थ्याः पूर्वसवर्णदीर्घः। सोमभक्षणार्थं यज्ञम् vअधि गच्छति। किंच vअमृतः मरणधर्मरहितः vयः सोमः vनृभिः कर्मनेतृभिः vमर्त्येभिः मर्त्यैः vअविभिः अविमयैः पवित्रैस्तथा vगोभिः आनन्दुहैरधिषवणचर्मभिः यद्वा गोविकारैः क्षीरादिभिः vअद्भिः वसतीवर्यादिभिरुदकैश्च vमर्मृजानः भृशं शोध्यमानः सन् यज्ञं प्रति गच्छति। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥

वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः।
सहस्रमृक्वा पथिभिर्वचोविद्ध्वस्मभिः सूरो अण्वं वि याति ॥ ३ ॥

वृषा। वृष्णे। रोरुवत्। अंशुः। अस्मै। पवमानः। रुशत्। ईर्ते। पयः। गोः।
सहस्रम्। ऋक्वा। पथिऽभिः। वचःऽवित्। अध्वस्मऽभिः। सूरः। अण्वम्। वि। याति ॥३॥

vवृषा कामानां वर्षको वृषेवाचरन् वा vरोरुवत् भृशं शब्दायमानः vअंशुः सोमः vपवमानः पूयमानः सन् vअस्मै vवृष्णे वर्षकायेन्द्राय तदर्थं vरुशत्। रोचतेरिदं रूपम्। आरोचमानं श्वेतं vगोः vपयः आश्रयणद्रव्यम् vईर्ते गच्छति। ' ईर गतौ '। आदादिकः। किंच vऋक्वा। '' छन्दसीवनिपौ ' इति मत्वर्थीयो वनिप्। स्तोत्रवानत एव vवचोवित् स्तुतीनां ज्ञाता vसूरः सुवीर्यः सर्वेषामग्नीषोमादिकर्मणि प्रेरकः सोमः vअध्वस्मभिः ध्वंसनवर्जितैर्हिंसारहितैः vसहस्रं vपथिभिः बहुभिर्मार्गैः vअण्वं सूक्ष्मच्छिद्रं पवित्रं vवि vयाति। अतीत्य द्रोणकलशं गच्छति॥

रुजा दृळ्हा चिद्रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान्।
वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ॥ ४ ॥

रुज। दृळ्हा। चित्। रक्षसः। सदांसि। पुनानः। इन्दो इति। ऊर्णुहि। वि। वाजान्।
वृश्च। उपरिष्टात्। तुजता। वधेन। ये। अन्ति। दूरात्। उपऽनायम्। एषाम् ॥ ४ ॥

हे सोम vदृळ्हा vचित् दृढान्यपि परैरगन्तव्यत्वेन vरक्षसः राक्षसस्य vसदांसि स्थानानि पुराणि vरुज विनाशय। ' रुजो भङ्गे ' तौदादिकः। किंच हे vइन्दो पवमान vपुनानः पवित्रादिभिः पूयमानस्त्वं vवाजान् तस्यास्त्राणि तस्य बलानि वा vऊर्णुहि आच्छादय। आहरेत्यर्थः। तथा vये

राक्षसाः ᵛउपरिष्टात् ऊर्ध्वदेशादागच्छन्ति ये वा ᵛअन्ति[1] अन्तिके समीप आगच्छन्ति ये च ᵛदूरात् दूरदेशाद्वागच्छन्ति तेषां राक्षसानाम् ᵛउपनायम् उपनेतारं स्वामिनं ᵛतुजता। तुजतिर्हिंसाकर्मा। हिंसकेन ᵛवधेन हननसाधनेनायुधेन त्वं ᵛवृश्च छिन्धि। 'ओव्रश्चू छेदने' तौदादिकः ॥

स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः।
ये दुष्पहासो वनुषा बृहन्तस्ताँस्ते अश्याम पुरुकृत्पुरुक्षो ॥ ५ ॥

सः। प्रत्नऽवत्। नव्यसे। विश्वऽवार। सुऽउक्ताय। पथः। कृणुहि। प्राचः।
ये। दुःऽसहासः। वनुषा। बृहन्तः। तान्। ते। अश्याम। पुरुऽकृत्। पुरुक्षो इति पुरुऽक्षो ॥५॥

हे ᵛविश्ववार विश्वैः सर्वैर्वरणीय हे सोम ᵛसः तादृशस्त्वं ᵛप्रत्नवत् पुराण इव स्थितस्त्वं ᵛनव्यसे नवीयसे नवतराय। नवशब्दादीयसुनीकारलोपश्छान्दसः। तस्मै ᵛसूक्ताय शोभनस्तुतिकाय मह्यं ᵛपथः मार्गान् ᵛप्राचः प्राचीनान् ᵛकृणुहि कुरु। सर्वत्र गमनं प्रयच्छेत्यर्थः। 'कृवि हिंसाकरणयोः'। 'धिन्विकृण्व्योरच' इत्युप्रत्ययः। हे ᵛपुरुकृत् बहुकर्मन् हे ᵛपुरुक्षो। 'दुक्षु शब्दे'। मितद्वादित्वाड्डुप्रत्ययः (पा. सू. ३. २.१८०.१)। बहुविधं शब्दायमान हे सोम ᵛदुःसहासः रक्षोभिः सोढुमशक्याः अत एव ᵛवनुषा। वनतिर्हिंसार्थः। हिंसया युक्ताः ᵛबृहन्तः महान्तः ᵛये त्वदीया अंशाः सन्ति ᵛतांस्ते तव स्वभूतानंशान् वयं यज्ञे ᵛअश्याम प्राप्नुयाम ॥

एवा पुनानो अपः स्वर्गा अस्मभ्यं तोका तनयानि भूरि।
शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ॥ ६ ॥

एव। पुनानः। अपः। स्वः। गाः। अस्मभ्यम्। तोका। तनयानि। भूरि।
शम्। नः। क्षेत्रम्। उरु। ज्योतींषि। सोम। ज्योक्। नः। सूर्यम्। दृशये। रिरीहि ॥६॥

हे सोम ᵛएव एवं ᵛपुनानः पूयमानः पवित्रादिभिः ᵛअस्मभ्यं ᵛरिरीहि प्रापय प्रयच्छ। किं तत्। ᵛअपः। अप इत्यन्तरिक्षनाम। आप्नोति सर्वमपि। अन्तरिक्षं ᵛस्वः स्वर्गं द्युलोकं ᵛगाः। सर्वैर्गम्यतेऽत्रेति गावः पृथिव्यः। ताः पृथिवीश्च ᵛभूरि। 'सुपां सुलुक्' इति द्वितीयाया लुक्। बहून् ᵛतोका पुत्रान् ᵛतनयानि। तन्वन्ति कुलमिति तनयाः पौत्राः। तांश्च तथा ᵛनः अस्मभ्यं ᵛक्षेत्रं ᵛशं सुखकरं कुरु। हे ᵛसोम ᵛज्योतींषि नक्षत्राणि ᵛउरु उरूणि अन्तरिक्षे विस्तीर्णानि कुरु। तथा ᵛनः अस्मभ्यं ᵛसूर्यम् आदित्यं ᵛज्योक्। चिरनामैतत्। चिरकालं ᵛदृशये द्रष्टुं[2] कुरु[3] ॥ ॥ १ ॥

'परि सुवानः' इति षड्चं सप्तमं सूक्तं मारीचस्य कश्यपस्यार्षं त्रैष्टुभं पवमानसोमदेवताकम्। 'परि सुवानः' इत्यनुक्रान्तम्। गतो विनियोगः ॥

परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये हियानः।
आपच्छ्लोकमिन्द्रियं पूयमानः प्रति देवाँ अजुषत प्रयोभिः ॥ १ ॥

परि। सुवानः। हरिः। अंशुः। पवित्रे। रथः। न। सर्जि। सनये। हियानः।
आपत्। श्लोकम्। इन्द्रियम्। पूयमानः। प्रति। देवान्। अजुषत। प्रयःऽभिः ॥ १ ॥

१. त–'अन्ति' नास्ति। २. ग–द्रष्टुं शक्तं। ३. त-भ१.२.६–कुर्विति कुरु; भ४–कुर्विति।

vसुवानः[1] अभिषूयमाणः vहियानः ऋत्विग्भिः प्रेर्यमाणः vहरिः हरितवर्णः vअंशुः सोमः vपवित्रे अविवालेन कृते दशापवित्रे vपरि vसर्जि परिसृज्यते । किमर्थम् । vसनये धनलाभाय देवानां संभजनाय वा । तत्र दृष्टान्तः । vरथो vन । रथो यथा युद्धे शत्रुवधार्थं शत्रुधनहरणार्थं[2] वा सृज्यते तद्वत् । किंच vपूयमानः पवित्रेण सोऽयं सोमः vहन्द्रियम् इन्द्रलिङ्गमिन्द्रस्य पर्यासं वा vश्लोकं स्तोत्रम् vआपत् आप्नोति । ' आप्लृ व्याप्तौ ' । लेट्यडागमः । तथा स सोमः vप्रयोभिः प्रीणयितृभिः हवीरूपैरन्नैः vदेवान् vप्रति vअजुषत प्रतिसेवते । ' जुषी प्रीतिसेवनयोः ' ॥

अच्छा नृचक्षा असरत्पवित्रे नाम दधानः कविरस्य योनौ ।
सीदन् होतेव सदने चमूषूपेमग्मन्नृषयः सप्त विप्राः ॥ २ ॥

अच्छ । नृऽचक्षाः । असरत् । पवित्रे । नाम । दधानः । कविः । अस्य । योनौ ।
सीदन् । होताऽइव । सदने । चमूषु । उप । ईम् । अग्मन् । ऋषयः । सप्त । विप्राः ॥ २ ॥

vनृचक्षाः नृणां द्रष्टा vकविः क्रान्तप्रज्ञः सोमः vनाम वसतीवर्याख्यमुदकं vदधानः धारयन् vअस्य एतादृशस्यात्मनः vयोनौ स्थाने vपवित्रे vअच्छ vअसरत् अभितः सरति । ततः vसदने । सीदन्यत्रेति सदनो यज्ञः । तस्मिन् vहोतेव होता यथा देवान् स्तोतुमुपविशति तद्वदेवानागन्तुमुपविशन् सोमः vचमूषु । चमन्ति[3] चम्वो ग्रहादयः । तेष्वभिसरति । अनन्तरं सप्तसंख्याकाः vविप्राः मेधाविनो भरद्वाजः कश्यपो गोतमोऽत्रिर्विश्वामित्रो जमदग्निर्वसिष्ठ इत्येते vऋषयः vईम् एनं सोमम् vउप vअग्मन् स्तोत्रैरुपगच्छन्ति ॥

प्र सुमेधा गातुवित्तो विश्वदेवः सोमः पुनानः सदं एति नित्यम् ।
भुवद्विश्वेषु काव्येषु रन्ता नु जनान्यतते पञ्च धीरः ॥ ३ ॥

प्र । सुऽमेधाः । गातुऽवित् । विश्वऽदेवः । सोमः । पुनानः । सदः । एति । नित्यम् ।
भुवत् । विश्वेषु । काव्येषु । रन्ता । अनु । जनान् । यतते । पञ्च । धीरः ॥ ३ ॥

vसुमेधाः । ' नित्यमसिच् प्रजामेधयोः ' (पा. सू. ५. ४. १२२) इत्यसिच्समासान्तः । शोभनप्रज्ञः vगातुवित् मार्गस्य वेत्ता । यद्वा । गातवः स्तोतारः । तेषां धनस्य लम्भयिता । vविश्वदेवः सर्वदेवोपगतः । यद्वा । देवो देवनं दीप्तिः । व्यापकदीप्तियुक्तः । एतादृशः vसोमः vपुनानः पूयमानः सन् vनित्यम् अविनश्वरं vसदः स्थानं द्रोणकलशं vप्र vएति प्रगच्छति । ततः vविश्वेषु सर्वेषु vकाव्येषु कविकर्मसु स्तोत्रेषु vरन्ता vभुवत् रमणशीलो भवति । रमेस्ताच्छीलिकस्तृन् । तथा vधीरः प्राज्ञः सोऽयं vपञ्च vजनान् निषादपञ्चमांश्चतुरो वर्णान् vअनु vयतते अनुगन्तुं प्रयत्नं करोति । अनुगच्छतीति यावत् ॥

तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः ।
दश स्वधाभिरधि सानो अव्ये मृजन्ति त्वा नद्यः सप्त यह्वीः ॥ ४ ॥

तव । त्ये । सोम । पवमान । निण्ये । विश्वे । देवाः । त्रयः । एकादशासः ।
दश । स्वधाभिः । अधि । सानौ । अव्ये । मृजन्ति । त्वा । नद्यः । सप्त । यह्वीः ॥ ४ ॥

---

१. त-म२- 'सुवानः' नास्ति । २. ग-त-म६-°धनाहरणार्थं; म४-°धनाय हरणार्थं । ३. ग-चमंतीति ।

हे vपवमान पूयमान हे vसोम vतव स्वभूताः vएते[1] ते प्रसिद्धाः[1] vत्रय vएकादशासः। पूरणार्थे डट्प्रत्ययः। त्रयस्त्रिंशत्संख्याकाः vविश्वे सर्वे vदेवाः vनिण्ये। अन्तर्हितनामैतत्। अन्तर्हिते स्थाने द्युलोके वर्तन्ते। तादृशं त्वां दशसंख्याका अङ्गुलयः vअधि vसानौ अधिकं समुच्छ्रिते vअव्ये अविमये पवित्रे vस्वधाभिः उदकैः vमृजन्ति शोधयन्ति। किंच vयह्वीः। 'वा छन्दसि' इति पूर्वसवर्णदीर्घः। यह्वयो महत्यः vसप्त सप्तसंख्याका गङ्गाद्याः vनद्यः vत्वा त्वां vमृजन्ति। वसतीवर्यात्मकैरेकधनात्मकैश्च स्वीयैरुदकैस्त्वां मार्जयन्तीत्यर्थः॥

तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त।
ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकम्॥ ५॥

तत्। नु। सत्यम्। पवमानस्य। अस्तु। यत्र। विश्वे। कारवः। सम्ऽनसन्त।
ज्योतिः। यत्। अह्ने। अकृणोत्। ऊँ इति। लोकम्।
प्र। आवत्। मनुम्। दस्यवे। कः। अभीकम्॥ ५॥

vसत्यं सत्यभूतं vतत् प्रसिद्धं vपवमानस्य सोमस्य स्थानं vनु क्षिप्रमस्माकम् vअस्तु। vयत्र यस्मिन् स्थाने vविश्वे सर्वे vकारवः स्तोतारः vसंनसन्त स्तोतुं संगच्छन्ते तत्स्थानमस्तु। अस्य सोमस्य vयत् vज्योतिः vअह्ने दिवसाय vलोकम् आलोकं प्रकाशम् vअकृणोत् करोति। vउ इत्यवधारणे। तज्ज्योतिः vमनुम् एतन्नामानं राजर्षिं vप्रावत् प्रकर्षेणारक्षत्। तथा सोमः स्वीयं तेजः vदस्यवे सर्वस्योपक्षपयित्रेऽसुराय vअभीकम् अभिगमनशीलं vकः अकार्षीत्। करोतेर्लुङि 'मन्त्रे घस°' इति च्लेर्लुक्॥

परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीरियानः।
सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु॥ ६॥

परि। सद्मऽइव। पशुऽमन्ति। होता। राजा। न। सत्यः। सम्ऽइतीः। इयानः।
सोमः। पुनानः। कलशान्। अयासीत। सीदन्। मृगः। न। महिषः। वनेषु॥ ६॥

vहोता देवानामाह्वातर्त्विक् vपशुमन्ति पशुमतः vसद्मेव यज्ञगृहान्[2] यथोपगच्छति[3]। किंच vराजा vन यथा राजा vसत्यः सत्यकर्मा सन् vसमितीः। संग्रामनामैतत् सम्यक् प्राप्यते योद्धृभिरत्रेति। तान् संग्रामान् vइयानः गच्छन् भवति तथा vपुनानः[4] vसोमः vवनेषु वननीयेषु वसतीवर्याख्येषूदकेषु vसीदन् vमृगो vन vमहिषः महिषाख्यो मृग इवोदकेषु तिष्ठन् vकलशान् द्रोणाभिधानान् vअयासीत् परियाति। यद्वा। महिषो महान् पूज्यो वा सोमः कलशान् परिगच्छतीति॥ ॥२॥

'साकमुक्षः' इति पञ्चर्चमष्टमं सूक्तं गौतमस्य नोधस आर्षम्। पूर्ववच्छन्दोदेवते। तथा चानुक्रम्यते—'साकमुक्षः पञ्च नोधाः' इति। गतो विनियोगः॥

साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः।
हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्ष अत्यो न वाजी॥ १॥

---

१. त–'एते ते प्रसिद्धाः' नास्ति। २. ग–यज्ञगृहान् परि याति। ३. त१–°गच्छते; त२.४.५.७. भ६–°गच्छंत; त३.६-भ१.२.४.७–°गच्छंति; मु–यथा परिगच्छते। ४. ग-त३-भ५.६–पुनानः पूयमानः; भ४–पुनानः पूयमानाः।

साकमुक्षः । मर्जयन्त । स्वसारः । दश । धीतयः । धनुत्रीः ।
हरिः । परि । अद्रवत् । जाः । सूर्यस्य । द्रोणम् । ननक्षे । अत्यः । न । वाजी ॥ १ ॥

Vसाकमुक्षः सह युगपत् सिञ्चन्त्यः । ' उक्ष सेचने ' । क्विपि रूपम् । ताइदयः Vस्वसारः कर्मकरणार्थमितस्ततः सुष्ठु गच्छन्त्योऽङ्गुलयः Vमर्जयन्त सोमं शोधयन्ति । ' मृजू शौचालंकारयोः ' । तथा Vदश दशसंख्याकाः Vधीतयः । अङ्गुलिनामैतत् । अङ्गुलयः Vधीरस्य समर्थस्य प्राज्ञस्य वा देवैर्ध्यातव्यस्य काम्यमानस्य वा सोमस्य Vधनुत्रीः प्रेरयित्र्यो भवन्ति । ततः Vहरिः हरितवर्णः सोमः Vसूर्यस्य Vजाः प्रादुर्भूता जाया दिशस्ताः Vपर्यद्रवत् परितो गच्छति । सूर्यतेजसा हाविर्भवन्तीति दिशां तस्य जात्वम् । Vअत्यः अतनशीलः Vवाजी Vन अश्व इव स्थितः सोमः Vद्रोणं कलशं Vननक्षे व्याप्नोति । नक्षतिर्व्याप्तिकर्मा ॥

सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।
मर्यो न योषामभि निष्कृतं यन्त्सं गच्छते कलशे उस्रियाभिः ॥ २ ॥

सम् । मातृऽभिः । न । शिशुः । वावशानः । वृषा । दधन्वे । पुरुऽवारः । अत्ऽभिः ।
मर्यः । न । योषाम् । अभि । निःऽकृतम् । यन् । सम् । गच्छते । कलशे । उस्रियाभिः ॥ २ ॥

Vवावशानः देवान् कामयमानः Vवृषा कामानां वर्षकोऽत एव Vपुरुवारः बहुभिर्वरणीयः सोमः Vअद्भिः मातृभूताभिर्वसतीवरीभिः Vसं Vदधन्वे संधार्यते । तत्र दृष्टान्तः । Vमातृभिर्न Vशिशुः । कामयमानः पुत्रो यथा मातृभिः पयःप्रदानेन संधार्यते । धविर्गत्यर्थः । कर्मणि लिटि रूपम् । Vमर्यो Vन मनुष्यो यथा Vयोषां युवतिमभिगच्छति तद्वत् Vनिष्कृतं संस्कृतं स्वस्थानम् Vअभि Vयन् अभिगच्छन् Vकलशे द्रोणाभिधाने Vउस्रियाभिः अद्भिर्गोविकारैः क्षीरादिभिर्वा Vसं Vगच्छते । गमेरकर्मकात् ' समो गम्यृच्छि ' इत्यात्मनेपदम् ॥

उत प्र पिप्ये ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।
मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥ ३ ॥

उत । प्र । पिप्ये । ऊधः । अघ्न्यायाः । इन्दुः । धाराभिः । सचते । सुऽमेधाः ।
मूर्धानम् । गावः । पयसा । चमूषु । अभि । श्रीणन्ति । वसुऽभिः । न । निक्तैः ॥ ३ ॥

Vउत अपि च Vअघ्न्यायाः । अघ्न्येति गोनाम । अहन्तव्याया गोः Vऊधः पयःस्थानं सोमः Vप्र Vपिप्ये । ओषध्यादिषु सोमः प्रविश्य प्रकर्षेणाप्याययति । प्यायतेर्लिटि ' लिट्यन्योश्च ' इति पीभावः । Vसुमेधाः शोभनप्रज्ञः सोऽयम् Vइन्दुः सोमः Vधाराभिः Vसचते समवैति संगच्छते । ततः Vगावः Vचमूषु । चमन्ति भक्षयन्त्यत्र सोममिति चम्वो ग्रहादयः । तेषु स्थितं Vमूर्धानं समुच्छ्रितमिमं सोमं Vपयसा श्वेतेन Vअभि Vश्रीणन्ति अभित आच्छादयन्ति । तत्र दृष्टान्तः । Vनिक्तैः प्रक्षालितैः Vवसुभिर्न वस्त्रैर्यथाच्छादयन्ति तद्वत् ॥

स नो देवेभिः पवमान रदेन्दो रयिमश्विनं वावशानः ।
रथिरायतामुशती पुरंधिरस्मध्रीगा दावने वसूनाम् ॥ ४ ॥

सः । नः । देवेभिः । पवमान । रद । इन्दो इति । रयिम् । अश्विनम् । वावशानः ।
रथिरायताम् । उशती । पुरंम्ऽधिः । अस्मध्र्यक् । आ । दावने । वसूनाम् ॥ ४ ॥

हे ᵛपवमान पूयमान सोम ᵛसः तादृशस्त्वं ᵛनः अस्मभ्यं ᵛदेवेभिः देवैः सह ᵛरद प्रयच्छ । किं तत् उच्यते । हे ᵛइन्दो पात्रेषु क्षरन् सोम ᵛवावशानः कामयमानः सन् ᵛअश्विनम् अश्ववन्तं ᵛरयिं धनं प्रयच्छेति । किंच ᵛरथिरायताम् । रथो येषामस्तीति रथिराः । 'मेधारथाभ्याम्०' इतीरच्-प्रत्ययः । तद्वदाचरतस्तानिच्छतो वा पुरुषान् ᵛउशती कामयमाना ᵛपुरंधिः त्वदीया बहुविधा धीः ᵛवसूनां धनानां ᵛदावने दानाय ᵛअस्मध्र्यक् अस्मदभिमुखी ᵛआ आगच्छतु । यद्वा । रथिरायतामिति धनानां विशेषणम् । बलवतां धनानामिति । अस्मध्र्यक् । 'विष्वग्देवयोश्च टेरध्र्यञ्चतावप्रत्यये' (पा. सू. ६. ३. ९२) इत्यध्र्यादेशः । अद्रिसदध्योरन्तोदात्तत्वनिपातनात् 'उदात्तस्वरितयोर्यणः०' इति स्वरितः[1] ॥

नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम् ।
प्र वन्दितुरिन्दो तारीर्युः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ५ ॥

नु । नः । रयिम् । उप । मास्व । नृऽवन्तम् । पुनानः । वाताप्यम् । विश्वऽचन्द्रम् ।
प्र । वन्दितुः । इन्दो इति । तारि । आयुः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ ५ ॥

हे सोम ᵛपुनानः पूयमानस्त्वं ᵛनः अस्मभ्यं ᵛनु क्षिप्रं ᵛनृवन्तं मनुष्यैर्युक्तम् । छान्दसं मतुपो वत्वम् । तादृशं ᵛरयिं धनम् ᵛउप ᵛमास्व उपनिर्मिमीष्व । उपकुर्वित्यर्थः । किंच ᵛविश्वचन्द्रं सर्वेषामाह्लादकं ᵛवाताप्यम् । उदकनामैतत् । उदकं च कुरु । तथा हे ᵛइन्दो सोम ᵛवन्दितुः तव स्तोतुः ᵛआयुः जीवनं ᵛप्र ᵛतारि त्वया वर्धितमस्तु । सोऽयं सोमः ᵛधियावसुः बुद्ध्या कर्मणा वा प्राप्तधनः ᵛप्रातः काले वा सवने वा[2] ᵛमक्षु शीघ्रमस्मदीयं यज्ञं प्रति ᵛजगम्यात् आगच्छेत् । गमेर्लिङि 'बहुलं छन्दसि' इति शपः श्लुः ॥ ॥ ३ ॥

'अधि यत्' इति पञ्चर्चं नवमं सूक्तमाङ्गिरसस्य कण्वस्यार्षम्[3] । तथानुक्रम्यते—'अधि यत्कण्वः' इति । पूर्ववच्छन्दोदेवते । गतो विनियोगः ॥

अधि यदस्मिन्वाजिनीव शुभ्रः स्पर्धन्ते धियः सूर्ये न विशः ।
अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥ १ ॥

अधि । यत् । अस्मिन् । वाजिनिऽइव । शुभ्रः । स्पर्धन्ते । धियः । सूर्ये । न । विशः ।
अपः । वृणानः । पवते । कविऽयन् । व्रजम् । न । पशुऽवर्धनाय । मन्म ॥ १ ॥

ᵛयत् यदा ᵛअस्मिन् सोमे ᵛवाजिनीव ᵛशुभ्रः अश्वे यथा वल्गाप्रभृत्यलंकारा भवन्ति । यदा वास्मिन् सोमे ᵛसूर्ये ᵛन यथा सूर्ये ᵛविशः रश्मय उदिता भवन्ति । तदा[4] ᵛधियः अङ्गुलयः ᵛअधि ᵛस्पर्धन्ते । अहं पुरस्ताच्छोधयाम्यहं पुरः शोधयामीत्यहमहमिकयोपतिष्ठन्ति । ततोऽयं सोमः ᵛअपः वसतीवरीः ᵛवृणानः आच्छादयन् ᵛपवते पात्रेषु क्षरति । कलशानधिगच्छति[5] । कीदृशः ।

१. त-भ२.६-मु-तित्स्वरितः । २. त-भ-'वा' नास्ति । ३. त-भ-काण्वस्यार्षं । ४. त३-भ२. ६.७-तथा । ५. भ१(२)-कलशानभिगच्छति ।

vकवीयन् कविरिवाचरन्। यद्वा। कवयः स्तोतारः। तानिच्छन्। तत्र दृष्टान्तः। vव्रजं vन vमम्म मननीयं[1] गवां गोष्ठं vपशुवर्धनाय पशूनां वर्धनाय गोपालः परिगच्छति। तथा देवानां प्रीणनाय पात्राणि प्रति पवत इति ॥

द्विता व्यूर्ण्वन्नमृतस्य धामं स्वर्विदे भुवनानि प्रथन्त।
धियः पिन्वानाः स्वसरे न गावं ऋतायन्तीरभि वावश्र इन्दुम् ॥ २ ॥

द्विता। विऽऊर्ण्वन्। अमृतस्य। धामं। स्वःऽविदे। भुवनानि। प्रथन्त।
धियः। पिन्वानाः। स्वसरे। न। गावः। ऋतऽयन्तीः। अभि। वावश्रे। इन्दुम् ॥ २ ॥

vअमृतस्य उदकस्य vधाम धारकं स्थानमन्तरिक्षं सोमः vद्विता द्विधा vव्यूर्ण्वन् उभयतः स्वतेजसाच्छादयन् मध्येन गच्छति। ततः vस्वर्विदे सर्वज्ञाय तस्मै सोमाय vभुवनानि vप्रथन्त विस्तीर्णानि भवन्ति। तस्य रश्मीनां संचरणार्थं प्रथन्त इत्यर्थः। अथ vपिन्वानाः प्रीणयित्र्यः vधियः स्तुतिलक्षणा वाचः vऋतायन्तीः यज्ञमिच्छन्त्यः सत्यस्तमिमम् vइन्दुं सोममभिलक्ष्य स्वसरे यागाहनि vवावश्रे शब्दायन्ते। यद्वा। सोमं कामयन्ते। तत्र दृष्टान्तः। vगावो vन यथा पिन्वमानाः पयः क्षरन्त्यो गावः vस्वसरे। सुष्ठु अस्यन्ते प्रेर्यन्ते गावोऽत्रेति स्वसरो गोष्ठम्। तस्मिन्नच्छाभिलक्ष्य शब्दं कुर्वन्ति तद्वत् ॥

परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा।
देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः ॥ ३ ॥

परि। यत्। कविः। काव्या। भरते। शूरः। न। रथः। भुवनानि। विश्वा।
देवेषु। यशः। मर्ताय। भूषन्। दक्षाय। रायः। पुरुऽभूषु। नव्यः ॥ ३ ॥

vकविः क्रान्तप्रज्ञः सोमः vकाव्या काव्यानि कवेः कर्माणि स्तोत्राणि vयत् यदा vपरि vभरते परितो बिभर्ति। परिगच्छतीति यावत्। कथमिव। vशूरो vन यथा शूरः शत्रूणां बाधकः vरथः तदीयः vविश्वा vभुवनानि सांग्रामिकाणि भूतानि परियाति तद्वत्। तदानीं vदेवेषु स्थितं vयशः व्यापकं धनं vमर्ताय मनुष्याय स्तोत्रे vभूषन्। भवतेरन्तर्भावितण्यर्थात् सनि रूपम्। भावयितुमिच्छन् सोमः vरायः आत्मना दत्तस्य धनस्य vदक्षाय वृद्ध्यर्थं vपुरुभूषु बहुषु यज्ञभवनेषु vनव्यः स्तोतव्यो भवति। 'णु स्तुतौ'। अचो यत् ॥

श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति।
श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ ॥ ४ ॥

श्रिये। जातः। श्रिये। आ। निः। इयाय। श्रियम्। वयः। जरितृऽभ्यः। दधाति।
श्रियम्। वसानाः। अमृतऽत्वम्। आयन्। भवन्ति। सत्या। समऽइथा। मितऽद्रौ ॥ ४ ॥

स सोमः vश्रिये vजातः संपदर्थं प्रादुर्भूतो भवति। तदेवाह। vश्रिये श्रयर्थमेव vआ vनिरियाय। अंशुभ्य आभिमुख्येन निर्गच्छति। निर्गतश्च स सोमः vजरितृभ्यः स्तोतृभ्यः vश्रियं

---

१. ग-त३.४-भ४.५.६—मननीयं बोद्धव्यं रक्षितव्यं; भ१.७—बोद्धव्यं गव्यं; भ२—बोद्धव्यं ।

vयवः अन्नं जीवनं वा vदधाति विदधाति प्रयच्छति। तेन दत्तां vश्रियं vवसानाः आच्छादयन्तः स्तोतारः vअमृतत्वं देवत्वममरणं[1] वा vआयन् प्राप्नुवन्। तस्मिन् vमितज्ञौ मितगमने सोमे vसमिथा। युद्धनामैतत् सम्यक् प्राप्यतेऽत्रेति। 'समीणः' (उ. सू. २. ११) इत्येतेः संपूर्वस्य थक्प्रत्ययः। तानि युद्धानि vसत्या सत्यानि यथार्थानि vभवन्ति न तु वितथानि। तेन सोमेन पराजितानि भवन्तीत्यर्थः॥

इषमूर्जमभ्यर्षाश्वं गामुरु ज्योतिः कृणुहि मत्सि देवान्।
विश्वानि हि सुषहा तानि तुभ्यं पवमान बाधसे सोम शत्रून्॥ ५॥

इषम्। ऊर्जम्। अभि। अर्। अश्वम्। गाम्। उरु। ज्योतिः। कृणुहि। मत्सि। देवान्।
विश्वानि। हि। सुऽसहा। तानि। तुभ्यम्। पवमान। बाधसे। सोम। शत्रून्॥ ५॥

हे सोम vइषम् अन्नम् vऊर्जम् अन्नरसं च अस्मभ्यम् vअभ्यर्ष अभिगमय। किंच vअश्वं वाहनं vगां पयःप्रदानेन यज्ञस्य साधनभूतां गां च। तथा vउरु महत् vज्योतिः सूर्याख्यं vकृणुहि जगदालोकनार्थं कुरु। किंच vदेवान् इन्द्रादीन् vमत्सि सोमेन तर्पय। मदेर्लेटि 'बहुलं छन्दसि' इति विकरणस्य लुक्। वाक्यभेदादनिघातः। अपि च हे सोम vतुभ्यं vविश्वानि सर्वाणि रक्षांसि vसुषहा सुसहान्यनायासेनैवाभिभवितुं शक्यानि भवन्ति। हिरवधारणे। अत एव हे vपवमान पूयमान हे vसोम सर्वान् vशत्रून् vबाधसे जहि॥ ॥ ४॥

'कनिक्रन्ति' इति पञ्चर्चं दशमं सूक्तं कण्वपुत्रस्य प्रस्कण्वस्यार्षम्। तथानुक्रम्यते—'कनिक्रन्ति प्रस्कण्वः' इति। पूर्ववच्छन्दोदेवते। गतो विनियोगः॥

कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः।
नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः॥ १॥

कनिक्रन्ति। हरिः। आ। सृज्यमानः। सीदन्। वनस्य। जठरे। पुनानः।
नृऽभिः। यतः। कृणुते। निःऽनिजम्। गाः। अतः। मतीः। जनयत। स्वधाभिः॥ १॥

vसृज्यमानः vआ समन्ताद्विसृज्यमानोऽभिषूयमाणः vहरिः हरितवर्णः सोमः vकनिक्रन्ति पुनःपुनः शब्दायते। क्रन्दतेर्यङ्लुकि तिपीडभावे 'दाधर्ति दर्धर्ति०' इत्यादिना निपातनाद्भ्यासस्य निगागमः। अभ्यस्तस्वरः। तथा vपुनानः पूयमानः vवनस्य वननीयस्य द्रोणकलशस्य vजठरे vसीदन् उपविशन् शब्दायते। किंच vनृभिः कर्मनेतृभिर्ऋत्विग्भिः vयतः संयतः सोमः vगाः गोविकारान् क्षीरादीन्याच्छादयन् vनिर्णिजम् आत्मनो रूपं vकृणुते ग्रहादिषु करोति। vअतः अस्मै सोमाय vमतीः मननीयाः स्तुतीः vस्वधाभिः हविर्भिः सह vजनयत स्तोतारः अजनयन्[2]। झस्यास्तादेशाभावः छान्दसः[3]। यद्वा। हे स्तोतारः अस्मै सोमाय स्तुतीर्जनयत उत्पादयत। कुरुतेति यावत्॥

हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम्।
देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे॥ २॥

---

१. ग–देवत्वममरणत्वं। २. ग–जनयंतु। ३. ग–छांदसस्तादेशः; भ१–छांदादेशः; भ२.४–छांदसोदादेशः।

हरिः । सृजानः । पथ्याम् । ऋतस्य । इयर्ति । वाचम् । अरिताऽइव । नावम् ।
देवः । देवानाम् । गुह्यानि । नाम । आविः । कृणोति । बर्हिषि । प्रऽवाचे ॥ २ ॥

[v]सृजानः सृज्यमानः [v]हरिः हरितवर्णः सोमः [v]ऋतस्य सत्यभूतस्य[1] [v]पथ्यां पथि भवां [v]वाचं दैवीम् [v]इयर्ति प्रेरयति । तत्र दृष्टान्तः । [v]अरितेव जनांस्तीरं प्रापयन्नाविकः [v]नावं यथा प्रेरयति तद्वत् । ' ऋ गतौ ' । जौहोत्यादिकः । ' अर्तिपिपर्त्योः० ' इत्यभ्यासस्येत्वम् । ततः [v]देवः दीप्यमानः सोमः [v]देवानाम् इन्द्रादीनां [v]गुह्यानि अन्तर्हितानि [v]नाम नामानि शरीराणि [v]प्रवाचे प्रकर्षेण वाचयित्रे स्तोत्रे [v]बर्हिषि यज्ञे [v]आविष्कृणोति स्तोतुमाविष्करोति ॥

अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।
नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥ ३ ॥

अपाम्ऽइव । इत् । ऊर्मयः । तर्तुराणाः । प्र । मनीषाः । ईरते । सोमम् । अच्छ ।
नमस्यन्तीः । उप । च । यन्ति । सम् । च । आ । च । विशन्ति । उशतीः । उशन्तम् ॥३॥

[v]अपामिव यथोदकानाम् [v]ऊर्मयः त्वरन्ते[2] । [v]इत् इति पूरणः । तद्वत् [v]तर्तुराणाः कर्मणि देवान् स्तोतुं त्वरमाणाः । ' तुर त्वरणे ' । जौहोत्यादिकः । यङ्लुगन्तस्य शानचि रूपम् । अभ्यासस्यावर्णश्च रेफादेशश्छान्दसः । अभ्यस्तस्वरः । तादृशा ऋत्विजः [v]मनीषाः मनस ईशित्रीः स्तुतीः [v]सोममच्छ सोमं प्रति [v]प्र [v]ईरते प्रेरयन्ति[3] । [v]नमस्यन्तीः नमस्यन्त्यः सोमं पूजयन्त्यः सत्यः तम् [v]उप [v]यन्ति [v]च उपगच्छन्ति तमेव [v]सं यन्ति [v]च । ' चवायोगे प्रथमा ' इति न निघातः । ततः [v]उशतीः कामयमानाः स्तुतयः [v]उशन्तं कामयमानं सोमम् [v]आ [v]विशन्ति [v]च[4] ॥

तं मर्मृजानं महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम् ।
तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ॥ ४ ॥

तम् । मर्मृजानम् । महिषम् । न । सानौ । अंशुम् । दुहन्ति । उक्षणम् । गिरिऽस्थाम् ।
तम् । वावशानम् । मतयः । सचन्ते । त्रितः । बिभर्ति । वरुणम् । समुद्रे ॥ ४ ॥

[v]मर्मृजानं यष्टृभिः परिचर्यमाणं [v]महिषं [v]न महिषाख्यं मृगमिव [v]सानौ समुच्छ्रिते देशे वर्तमानम् [v]उक्षणं कामानां सेक्तारं [v]गिरिष्ठाम् अभिषवार्थं ग्रावसु निष्ठितं[5] [v]तं तादृशं प्रसिद्धम् [v]अंशुं सोमं [v]दुहन्ति ऋत्विजो दुहते । ' ग्रावाणो वत्सा ऋत्विजो दुहन्ति ' (तै. सं. ६.२.११.४) इति तैत्तिरीयब्राह्मणम् । [v]तं तादृशं [v]वावशानं कामयमानं सोमं [v]मतयः मन्तव्याः स्तुतयः [v]सचन्ते समवयन्ति । सेवन्त इति यावत् । ततः [v]त्रितः त्रिषु स्थानेषु वर्तमान इन्द्रः [v]वरुणं शत्रूणां निवारकमेनं सोमं [v]समुद्रे अन्तरिक्षे [v]बिभर्ति शत्रुवधार्थं धारयति । यद्वा । त्रितस्त्रिषु स्थानेषु द्रोणाधवनीयपूतभृदाख्येषु कलशेषु ततो[6] विततः[6] सोमः शत्रूणां निवारकमिन्द्रं द्युलोके बिभर्ति पोषयति ॥

१. भ१(२)–सत्यभूतस्य यज्ञस्य । २. ग–तरंगाः । ३. ग–प्रेरयंति नो स्तुतिः; त३-भ५–प्रेरयंति ता स्तुतिः । ४. ग-त२.३.४-भ१.२.४.५.७–च प्रविशंति च । ५. ग-त३-भ१.२.४.७–तिष्ठंते । ६. त१–स्थितः लताः; त७-मु–स्थितः ।

इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।
इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥ ५ ॥

इष्यन् । वाचम् । उपवक्ताऽइव । होतुः । पुनानः । इन्दो इति । वि । स्य । मनीषाम् ।
इन्द्रः । च । यत् । क्षयथः । सौभगाय । सुऽवीर्यस्य । पतयः । स्याम ॥ ५ ॥

हे [v]इन्दो सोम [v]वाचं स्तुतिम् [v]इष्यन् प्रेरयन् [v]होतुः [v]उपवक्तेव यथाध्वर्युः प्रतिगरं कुर्वन् प्रोत्साहयति तद्वत् स्तोतॄणां शंसनाय प्रोत्साहं कुर्वन् [v]पुनानः पूयमानस्त्वं [v]मनीषां बुद्धिं [v]वि [v]स्य विमुञ्च । किंतु बुद्धिं धनप्रदानाभिमुखीं कुरु । किंच [v]यत् यदा [v]इन्द्रश्च त्वं च सह यज्ञे [v]क्षयथः निवसथः तदा स्तोतारो वयं [v]सौभगाय सौभाग्याय स्याम । किंच [v]सुवीर्यस्य शोभनवीर्योपेतस्य धनस्य [v]पतयः स्वामिनः [v]स्याम भवेम ॥ ॥ ५ ॥

'प्र सेनानीः' इति चतुर्विंशत्यृचमेकादशं सूक्तं दिवोदासपुत्रस्य प्रतर्दनाख्यस्य राजर्षेरिदं त्रैष्टुभं पवमानसोमदेवताकम् । तथा चानुक्रम्यते–'प्र सेनानीश्चतुर्विंशतिर्दैवोदासिः प्रतर्दनः' इति । गतः सूक्तविनियोगः ॥

प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥ १ ॥

प्र । सेनाऽनीः । शूरः । अग्रे । रथानाम् । गव्यन् । एति । हर्षते । अस्य । सेना ।
भद्रान् । कृण्वन् । इन्द्रऽहवान । सखिऽभ्यः । आ । सोमः । वस्त्रा । रभसानि । दत्ते ॥१॥

[v]सेनानीः सेनानामग्र उपनेता [v]शूरः शत्रूणां बाधकः [v]सोमः [v]गव्यन् शत्रूणां गा इच्छन् । यद्वा । यजमानानां पश्वादिकमिच्छन् । [v]रथानाम् [v]अग्रे रथानां पुरतः [v]प्र [v]एति प्रकर्षेण संग्रामं गच्छति । [v]अस्य[1] सोमस्य [v]सेना च [v]हर्षते हृष्यति । वाक्यभेदादनिघातः । किंच [v]सखिभ्यः समानस्थानेभ्यो यजमानेभ्यः [v]इन्द्रहवान् तैः कृतानीन्द्रस्याह्वानानि [v]भद्रान् कल्याणानि यथार्थानि [v]कृण्वन् कुर्वन् । आहूतो हीन्द्रः सोमं पीत्वा कामान् प्रयच्छतीति । [v]रभसानि इन्द्रस्य वेगेनागमने निमित्तानि[2] वस्त्राण्याच्छादकानि पयःप्रभृतीन्याश्रयणानि [v]आ [v]दत्ते आगृह्णाति ॥

समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः ।
आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥ २ ॥

सम् । अस्य । हरिम् । हरयः । मृजन्ति । अश्वऽहयैः । अनिऽशितम् । नमःऽभिः ।
आ । तिष्ठति । रथम् । इन्द्रस्य । सखा । विद्वान् । एना । सुऽमतिम् । याति । अच्छ ॥२॥

[v]हरयः हरन्त्यभिषुण्वन्ति सोममित्यृत्विजोऽङ्गुलयो वा[3] [v]हरिं हरितवर्णम् [v]अस्य सोमस्य कारणमंशुं [v]सं [v]मृजन्ति सम्यगभिषुण्वन्ति । ततः सोमः [v]नमोभिः नामयितृभिः [v]अश्वहयैः व्याप्तैरपि[4] [v]अनिशितम् असंस्कृतमयुक्तमननुगतं [v]रथं रमणसाधनमात्मीयं दशापवित्रम् [v]आ

---

१. त-भ६–तस्य । २. भ६-मु–निमित्तानि वस्त्रा । ३. ग-त३-भ–वा हरयः । ४. ग–व्याप्तैरश्वैरपि; त१.२.६.७–व्याप्तैर्गमनैरपि ।

vतिष्ठति आसीदति। अनन्तरम् vइन्द्रस्य vसखा सखिभूतः vविद्वान् प्राज्ञः सोमः vएना एतेन रयेन पवित्रेण vसुमतिं शोभनस्तुतिकं स्तोतारम् vअच्छ vयाति अभिगच्छति। तस्मिन्[1] काले तेन क्रियमाणां स्तुतिमभिगच्छतीत्यर्थः ॥

स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः।
कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः ॥ ३ ॥

सः। नः। देव। देवऽताते। पवस्व। महे। सोम। प्सरसे। इन्द्रऽपानः।
कृण्वन्। अपः। वर्षयन्। द्याम्। उत। इमाम्। उरोः। आ। नः। वरिवस्य। पुनानः ॥३॥

हे vदेव द्योतमान हे vसोम vसः तादृशः vइन्द्रपानः इन्द्रेण पातव्यस्त्वं vनः अस्माकं स्वभूते vदेवताते देवैस्तते विस्तते यज्ञे vमहे[2] महते vप्सरसे भक्षणायेन्द्रस्य पानाय vपवस्व ग्रहादिषु क्षर। किंच vअपः उदकानि vकृण्वन् कुर्वन् vउत अपि च vद्याम् vइमां द्यावापृथिव्यौ vवर्षयन्। भूमिं पर्जन्यरूपेण तर्पयति द्युलोकमग्निरूपेणेति। 'भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः' (ऋ. सं. १.११६४.५१) इति श्रवणात्। vउरोः विस्तीर्णादन्तरिक्षात् vआ आगच्छंस्त्वं vपुनानः पूयमानः सन् vनः अस्मान् vवरिवस्य धनादिप्रदानेन परिचरेति ॥

अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते।
तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम ॥ ४ ॥

अजीतये। अहतये। पवस्व। स्वस्तये। सर्वऽतातये। बृहते।
तत्। उशन्ति। विश्वे। इमे। सखायः। तत्। अहम्। वश्मि। पवमान। सोम ॥ ४ ॥

हे सोम vअजीतये यथा वयं शत्रुभिरजिता भवेम तथा तेषामजयाय[3] vअहतये यथा तैरहताः स्याम[3] तस्यै[4] च अत एव vस्वस्तये अविनाशाय किंच vबृहते[5] vसर्वतातये सर्वैरिन्द्रादिभिर्देवैः तायमानाय यज्ञाय एतदर्थं vपवस्व अस्मदभिमुखमागच्छ। पवितिर्गतिकर्मा। vविश्वे सर्वे vइमे मदीयाः vसखायः स्तोतारः vतत् त्वदीयं रक्षणम् vउशन्ति कामयन्ते। हे vपवमान vसोम vतत् रक्षणम् vअहम् अपि vवश्मि कामये ॥

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ५ ॥

सोमः। पवते। जनिता। मतीनाम्। जनिता। दिवः। जनिता। पृथिव्याः।
जनिता। अग्नेः। जनिता। सूर्यस्य। जनिता। इन्द्रस्य। जनिता। उत। विष्णोः ॥ ५ ॥

vसोमः अभिषूयमाणः vपवते पात्रेषु क्षरति। कीदृशः। vमतीनां बुद्धीनां यद्वा मननीयानां स्तुतीनां vजनिता जनयिता। 'जनिता मन्त्रे' (पा. सू. ६.४.५३) इति निपातनाण्णिलोपः। किंच vदिवः द्युलोकस्य vजनिता प्रादुर्भावयिता तथा vपृथिव्याः जनयिता vअग्नेः जनयिता प्रकाशयिता vसूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य vजनिता vइन्द्रस्य vजनिता पानेन मदस्य जनयिता vउत अपि

१. त-भ६–अस्मिन्। २. ग-त-भ–'महे' नास्ति। ३. ग–पवस्व। अहतिरहननं। ४. त१.३. ७-भ२–तस्मै। ५. त३-भ४.५–बृहते महते।

च Vविष्णोः व्यापकस्य Vजनिता जनयिता। एतत् सर्वं सोमेऽभिधूयमाने भवतीति। सोमो हि देवानाप्याययतीति ॥ ॥ ६ ॥

देवसुवां हविःषु सोमस्य वनस्पतेः 'ब्रह्मा देवानाम्' इति याज्या। सूत्र्यते च-'त्वं च सोम नो वशो ब्रह्मा देवानां पदवीः कवीनाम्' (आश्व. श्रौ. ४. ११) इति ॥

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्।
श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥ ६ ॥

ब्रह्मा। देवानाम्। पदऽवीः। कवीनाम्। ऋषिः। विप्राणाम्। महिषः। मृगाणाम्। श्येनः। गृध्राणाम्। स्वऽधितिः। वनानाम्। सोमः। पवित्रम्। अति। एति। रेभन् ॥६॥

सोम एवंरूपो भवति। Vदेवानां स्तोत्रकारिणामृत्विजां Vब्रह्मा ब्रह्मास्यर्त्विक्स्थानीयो भवति। यद्वा। देवानां द्योतमानानामिन्द्रादीनां ब्रह्मा राजा भवति। तथा Vकवीनां क्रान्तप्रज्ञानां Vपदवीः। स्खलन्ति पदानि साधुत्वेन यो योजयति स पदवीः। वी गत्यादिष्वित्येतस्मात् क्विपि रूपम्। तथा Vविप्राणां मेधाविनां मध्ये Vऋषिः भवति। यः परोक्षं पश्यति स ऋषिः 'ऋषिर्दर्शनात्' (निरु. २. ११) इति। Vमृगाणां Vमहिषः भवति। महिषास्त्यो बलवान् राजा भवति। तथा Vगृध्राणां पक्षिविशेषाणां Vश्येनः शंसनीयः पक्षिराजो भवति। Vवनानाम्। वनतिर्हिंसाकर्मा। हिंसकानां छेदकानां मध्ये Vस्वधितिः एतन्नामकश्छेदकोऽसि। एवंप्रभावः Vसोमः Vरेभन् शब्दायमानः सन् Vपवित्रम् ऊर्णास्तुकेन कृतम् Vअत्येति अतिगच्छति ॥

प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः।
अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥ ७ ॥

प्र। अवीविपत्। वाचः। ऊर्मिम्। न। सिन्धुः। गिरः। सोमः। पवमानः। मनीषाः। अन्तरिति। पश्यन्। वृजना। इमा। अवराणि। आ। तिष्ठति। वृषभः। गोषु। जानन् ॥७॥

Vपवमानः Vसोमः Vमनीषाः मनस ईशिता[1] हृदयंगमाः Vगिरः स्तुतीः Vप्रावीविपत् प्रकर्षेण वेपयति प्रेरयति। कथमिव। Vसिन्धुः स्यन्दमाना नदीव Vवाचः शब्दस्य Vऊर्मिं Vन संघं यथा प्रेरयति तद्वत्। किंच Vवृषभः कामानामुदकानां वा वर्षकः सोमः Vअन्तः अन्तर्हितं वस्तुजातं Vपश्यन् Vअवराणि दुर्बलैर्वारयितुमशक्यानि Vइमा Vवृजना इमानि बलानि Vआ Vतिष्ठति आसीदति। किं कुर्वन्। Vगोषु Vजानन् गवां[2] जानानः सन् परबलानि प्रविशति ॥

स मत्सरः पृत्सु वन्वन्नवातः सहस्रंरेता अभि वाजमर्ष।
इन्द्रायेन्दो पवमानो मनीष्यं१शोरूर्मिमीरय गा इषण्यन् ॥ ८ ॥

सः। मत्सरः। पृत्ऽसु। वन्वन्। अवातः। सहस्रंऽरेताः। अभि। वाजम्। अर्ष। इन्द्राय। इन्दो इति। पवमानः। मनीषी। अंशोः। ऊर्मिम्। ईरय। गाः। इषण्यन् ॥८॥

---

१. ग-ईप्सिता। २. त१.२.४.५.६-गवां जसाय; त३.७-भ२.६-गवां जनाय।

vमत्सरः मदकरः vपृत्सु संग्रामेषु vघ्नन् शत्रून् हिंसन् अत एव vअवातः अन्यैरगन्तुमशक्यः vसहस्रधाराः सहस्रोदकधारोपेतः vसः सोमः vवाजं शत्रूणां बलम् vअभि vअर्ष अभिगच्छ। हे vइन्दो सोम vपवमानः पूयमानः vमनीषी प्राज्ञस्त्वं vगाः vइषण्यन् शब्दान् प्रेरयन्। यद्वा। यजमानानां यज्ञसाधनभूता गाः प्रेरयन्। vइन्द्राय इन्द्रार्थम् vअंशोः अभिषूयमाणस्य सोमस्य vऊर्मिं संघम् vईरय प्रेरय॥

परि प्रियः कलशे देववातः इन्द्राय सोमो रण्यो मदाय।
सहस्रधारः शतवाज इन्दुर्वाजी न सप्तिः समना जिगाति॥ ९॥

परि। प्रियः। कलशे। देवऽवातः। इन्द्राय। सोमः। रण्यः। मदाय।
सहस्रऽधारः। शतऽवाजः। इन्दुः। वाजी। न। सप्तिः। समना। जिगाति॥ ९॥

vप्रियः प्रीणयिता अत एव vदेववातः देवैरभिगतः vरण्यः रमणीयः vसोमः vइन्द्राय इन्द्रस्य vमदाय मदार्थं vकलशे द्रोणाभिधाने vपरि vजिगाति परिगच्छति। कीदृशः। vसहस्रधारः बहुविधधारोपेतः vशतवाजः बहुबलः vइन्दुः पात्रेषु क्षरन्। तत्र दृष्टान्तः। vवाजी vन यथा वाजी बलवान् vसप्तिः अश्वः vसमना। संग्रामनामैतत्। 'सम इम अवैकृत्ये'। समन्ति भृष्टा भवन्ति योद्धारोऽत्रेति। तस्मिन् संग्रामे यथाश्वः जिगाति गच्छति तद्वत्॥

स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ।
अभिशस्तिपा भुवनस्य राजा विदद्गातुं ब्रह्मणे पूयमानः॥ १०॥

सः। पूर्व्यः। वसुऽवित्। जायमानः। मृजानः। अप्ऽसु। दुदुहानः। अद्रौ।
अभिशस्तिऽपाः। भुवनस्य। राजा। विदत्। गातुम्। ब्रह्मणे। पूयमानः॥ १०॥

vपूर्व्यः पुराणो यद्वा पूर्वैः कृतोऽभिष्टुतः vवसुवित् धनानां लम्भकः vजायमानः vअप्सु वसतीवर्याख्येषूदकेषु vमृजानः मृज्यमानः vअद्रौ अभिषवग्रावणि vदुदुहानः दुह्यमानः vअभिशस्तिपाः। अभितः शस्तिर्हिंसा येषां तेऽभिशस्तयः शत्रवः। तेभ्यः परिरक्षकः vभुवनस्य भूतजातस्य vराजा स्वामी एवंविधः vसः तादृशः सोमः vब्रह्मणे कर्मार्थं vपूयमानः सन् vगातुं मार्गं समीचीनं vविदत् यजमानेभ्यः प्रयच्छति॥ ॥ ७॥

महापितृयज्ञे पितरः सोमवन्तः इत्यस्य द्वितीयानुवाक्या 'त्वया हि नः पितरः' इत्येषा। सूत्रितं च—'पितरोऽभिष्वात्ता यम उदीरतामवर उत्परासस्त्वया हि नः पितरः सोम पूर्वे' (आश्व. श्रौ. २. १९) इति॥

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः।
वन्वन्नवातः परिधीरपोर्णु वीरेभिरश्वैर्मघवा भवा नः॥ ११॥

त्वया। हि। नः। पितरः। सोम। पूर्वे। कर्माणि। चक्रुः। पवमान। धीराः।
वन्वन्। अवातः। परिऽधीन्। अप। ऊर्णु। वीरेभिः। अश्वैः। मघऽवा। भव। नः॥ ११॥

हे [v]पवमान पूयमान [v]सोम [v]धीराः कर्मणि कुशलाः प्राज्ञाः [v]नः अस्माकं [v]पितरः [v]पूर्वे पुरातना अङ्गिरसः [v]त्वया। हिरवधारणे। त्वया[1] सहायेनैव [v]कर्माणि अग्निष्टोमादीनि [v]चक्रुः कृतवन्तः। किंच [v]वन्वन् स्तोतॄन् संभजन्। यद्वा। वनतिर्हिंसार्थः। शत्रून् हिंसन्* । [v]अवातः तैरभिगतस्त्वं [v]परिधीन्। परिधीयत एभिः सर्वमिति परिधयो राक्षसाः। तान् [v]अपोर्णु अपोर्णुहि अपच्छादय। जहीति यावत्। ऊर्णोतेर्लोटि[1] छान्दसो हेर्लुक्। एतादृशस्त्वं [v]नः अस्माकं[2] पुत्रादियुक्तं धनं प्रयच्छेत्यर्थः ॥

यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्विष्मान्।
एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ॥ १२ ॥

यथा। अपवथाः। मनवे। वयःऽधाः। अमित्रऽहा। वरिवःऽवित्। हविष्मान्।
एव। पवस्व। द्रविणम्। दधानः। इन्द्रे। सम्। तिष्ठ। जनय। आयुधानि ॥ १२ ॥

हे सोम [v]यथा पुरा त्वं [v]मनवे राज्ञे [v]वयोधाः अन्नस्य धाता तथा [v]अमित्रहा शत्रूणां हन्ता [v]वरिवोवित् धनस्य लम्भयिता [v]हविष्मान् पुरोडाशादियुक्तः सन् [v]अपवथाः तस्मै धनादिकं प्रदातुं यथागच्छः एवमस्मभ्यमपि [v]द्रविणं धनं [v]दधानः प्रयच्छन् [v]पवस्व अस्मदभिमुखमागच्छ। किंच अस्माभिर्दीयमानस्त्वम् [v]इन्द्रे [v]सं [v]तिष्ठ सम्यक् तिष्ठ। अपि च [v]आयुधानि त्वदीयानि [v]जनय तस्मै प्रकाशय। वाक्यभेदादनिघातः ॥

पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये।
अव द्रोणानि घृतवन्ति सीद मदिन्तमो मत्सर इन्द्रपानः ॥ १३ ॥

पवस्व। सोम। मधुऽमान्। ऋतऽवा। अपः। वसानः। अधि। सानौ। अव्ये।
अव। द्रोणानि। घृतऽवन्ति। सीद। मदिन्ऽतमः। मत्सरः। इन्द्रऽपानः ॥ १३ ॥

हे [v]सोम [v]मधुमान् मदकररसोपेतः [v]ऋतावा यज्ञवान्। 'छन्दसीवनिपौ' इति वनिप्प्रत्ययीयः। तादृशस्त्वम् [v]अपः वसतीवरीरेकधनाश्च [v]वसानः आच्छादयन् [v]अधि अधिकं [v]सानौ समुच्छ्रिते [v]अव्ये अविभवे पवित्रे [v]पवस्व क्षर। ततः [v]मदिन्तमः अतिशयेन मदकरः [v]इन्द्रपानः इन्द्रेण पातव्यः [v]मत्सरः मादयिता सोमः [v]घृतवन्ति उदकवतः [v]द्रोणानि द्रोणकलशान् [v]अव [v]सीद अवतिष्ठस्व ॥

वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ।
सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥ १४ ॥

वृष्टिम्। दिवः। शतऽधारः। पवस्व। सहस्रऽसाः। वाजऽयुः। देवऽवीतौ।
सम्। सिन्धुऽभिः। कलशे। वावशानः। सम्। उस्रियाभिः। प्रऽतिरन्। नः। आयुः ॥१४॥

१. ग–त्वया एव कर्माणि चक्रुः। वन्वन् रक्षांसि संभजन् अवातः तैरनभिगतः राक्षसान् परिधीन् ऊर्णुहि लिटि। * ग-त३-भ६–हिंसन्नत एव। २. ग-त३.४-भ–अस्माकं वीरेभिर्वीरैः कर्मप्राज्ञैः (भ६–कर्मणि प्राज्ञैः) पुत्रैरन्यैश्च सह मघवा धनवान् भव। यस्मात् (भ२–त्वं च) मम पितरः त्वया (भ२–यया) सह कर्म अकार्षुः तस्मादस्माकं (भ१.६.७–नोस्माकं)।

हे सोम vशतधारः बहुधारोपेतः[1] त्वं vदिवः अन्तरिक्षादादित्याद्वा vवृष्टिं vपवस्व कुरु। यद्वा। शतधारो बहुधात्मीयधारोपेतस्त्वं[2] vदिवो द्योतमानात् पवित्रात् वृष्टिमविच्छिन्नधारां पवस्व पात्रेषु कुरु[3]। कीदृशः। vदेववीतौ। देवानां वीतिर्हविर्भक्षणं यस्मिन् स देववीतिर्यज्ञः। तस्मिन् vसहस्रसाः यजमानानां सहस्रस्य धनस्य दाता vवाजयुः तेषामन्नं कामयमानस्त्वं[4] vसिन्धुभिः स्यन्दमानाभिः वसतीवरीभिः vकलशे द्रोणाभिधाने vसं गच्छस्व। तथा त्वं vनः अस्माकम् vआयुः जीवनं vप्रतिरन् वर्धयन्[5] vउक्षिताभिः गोविकारैः क्षीरादिभिश्च[6] कलशे[7] vसं गच्छस्व ॥

एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः।
पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळ्हा ॥ १५ ॥

एषः। स्यः। सोमः। मतिऽभिः। पुनानः। अत्यः। न। वाजी। तरति। इत्। अरातीः।
पयः। न। दुग्धम्। अदितेः। इषिरम्। उरुऽइव। गातुः। सुऽयमः। न। वोळ्हा ॥ १५ ॥

vएष[8] एतादृशः vस्यः सः[9] vसोमः vमतिभिः मननसाधनैः स्तोत्रैः vपुनानः पूयमानो भवति। यः सोमः vअत्यो vन अतनशीलः vवाजी अश्व इव संग्रामे vअरातीः अरातीन् शत्रून् vतरति। vइत् अवधारणे। तरत्येव हिनस्त्येव। यद्वृत्तयोगादनिघातः। किंच vअदितेः। गोनामैतत्। अदीनाया गोः vइषिरम् अन्वेषणीयं vदुग्धं vपयो vन क्षीरं यथा पूतं भवति एवं सोमः परिशुद्धः। अपि च vउर्विव। 'सुपां सुलुक्' इति सोर्लुक्। उरुर्विस्तीर्णः vगातुः मार्ग इव सर्वैः समाश्रयणीयस्तथा vवोळ्हा वोढाश्वः vसुयमः सुष्ठु नियन्तुं शक्यो यथा भवति तद्वदयं सोमः स्तोतृभिः नियन्तव्यो भवति ॥ ॥ ८ ॥

स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम।
अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ॥ १६ ॥

सुऽआयुधः। सोतृऽभिः। पूयमानः। अभि। अर्ष। गुह्यम्। चारु। नाम।
अभि। वाजम्। सप्तिःऽइव। श्रवस्या। अभि। वायुम्। अभि। गाः। देव। सोम ॥ १६ ॥

vस्वायुधः शोभनायुधोपेतः। यद्वा। यज्ञे स्फ्यकपालादीनि दशायुधानि सन्ति। तद्वान्। vसोतृभिः[10] अभिषुण्वद्भिः vपूयमानः त्वं vगुह्यं गुहायां निहितं vचारु कमनीयं vनाम स्वदीयं रसात्मकं शरीरं स्तुतिभिः सह vअभ्यर्ष कलशादीन्यभिगमय। किंच vसप्तिरिव अश्व इव वर्तमानस्त्वं vअवस्या। 'सुपां सुलुक्' इति सप्तम्या आजादेशः[9]। अस्मदीयायामन्नेच्छायां vवाजम्[10] अन्नमस्मभ्यम् vअभि गमय। अपि च हे vदेव स्तोतव्य हे vसोम vवायुं प्राणं जीवनम् vअभि गमय। vगाः पशूंश्चास्मभ्यम् vअभि गमय ॥

---

१. ग-त-म४.६-सु–बहुधोदकधारोपेतः; म१–बहुकधारोपेतः; म२–बहुदकधारोपेतः। २. ग-म१. ४.७–बहुविधात्मीय°। ३. म६–क्षर। ४. ग-त३-म१.२.५.६.७–कामयमानः किंच वावशानः कामयमानस्त्वं। ५. ग-त३-म२.४.५.६–प्रवर्धयन्; त१.२.५.७–'वर्धयन्' नास्ति। ६. म६–क्षीरादिभिः स्वकलशे। ७. स१.२.७–एष स्य एतादृश; त४.५–एष स्य एतादृशस्य। ८. त१.२.४.५.६-म६–स्तोतृभिः। ९. ग-म४–याजादेशः; त७–अजादेशः। १०. त-म२–'वाजं' नास्ति।

शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति वह्निं मरुतो गणेन ।
कविर्गीर्भिः काव्येना कविः सन्त्सोमः पवित्रमत्येति रेभन् ॥ १७ ॥

शिशुम् । जज्ञानम् । हर्यतम् । मृजन्ति । शुम्भन्ति । वह्निम् । मरुतः । गणेन ।
कविः । गीःऽभिः । काव्येन । कविः । सन् । सोमः । पवित्रम् । अति । एति । रेभन् ॥ १७ ॥

vशिशुम् इदानीमुत्पन्नत्वाच्छिशुवत्तिष्ठन्तम् । यद्वा । पापानि तनूकुर्वन्तं विनाशयन्तम् । vजज्ञानं प्रादुर्भूतमत एव vहर्यतम् । 'हर्यं गतिकान्त्योः' । 'भृमृदृशि०' इत्यादिनातच् । सर्वैः काम्यमानं सोमं vमृजन्ति vमरुतः शोधयन्ति । किंच vवह्निं वोढारं सोमं vगणेन आत्मीयेन सप्तसंख्याकेन गणेन vशुम्भन्ति अलंकुर्वन्ति । ततः vकविः क्रान्तप्रज्ञः vसोमः vकाव्येन कविकर्मणैव vकविः शब्दोपेतः[1] vसन् vरेभन् शब्दायमानः vगीर्भिः स्तुतिभिः सह vपवित्रमत्येति अतीत्य गच्छति ॥

ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।
तृतीयं धाम महिषः सिषासन्त्सोमो विराजमनु राजति ष्टुप् ॥ १८ ॥

ऋषिऽमनाः । यः । ऋषिऽकृत् । स्वःऽसाः । सहस्रऽनीथः । पदऽवीः । कवीनाम् ।
तृतीयम् । धाम । महिषः । सिसासन् । सोमः । विऽराजम् । अनु । राजति । स्तुप् ॥ १८ ॥

vऋषिमनाः सर्वदर्शनशीलमनस्कः अत एव vऋषिकृत् सर्वस्य दर्शनकर्ता प्रकाशनस्य कर्ता vस्वर्षाः सर्वस्य सूर्यस्य वा संभक्ता vसहस्रणीथः । नीथा स्तुतिः । बहुविधस्तुतिकः vकवीनां क्रान्तप्रज्ञानां मध्ये vपदवीः स्खलतां पदानां साधुत्वेन संयोजयिता vयः सोमो विद्यते सः vमहिषः महान् पूज्यो वा vसोमः vतृतीयं vधाम द्युलोकं vसिषासन् संभक्तुमिच्छन् vस्तुप् स्तूयमानः सन् vविराजं विशेषेण राजन्तं दीप्यमानमिन्द्रम् vअनु vराजति प्रकाशयति ॥

चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥ १९ ॥

चमूऽसत् । श्येनः । शकुनः । विऽभृत्वा । गोऽविन्दुः । द्रप्सः । आयुधानि । बिभ्रत् ।
अपाम् । ऊर्मिम् । सचमानः । समुद्रम् । तुरीयम् । धाम । महिषः । विवक्ति ॥ १९ ॥

vचमूषत् । चमन्ति भक्षयन्त्यत्रेति चम्वश्चमसाः । तेषु सीदन् । यद्वा । चम्वावधिषवणफलके । तयोर्वर्तमानः । vश्येनः शंसनीयः vशकुनः शक्तः सामर्थ्यकारी vविभृत्वा । हरतेः 'आतो मनिन्०' इत्यादिना क्वनिप् । पात्रेषु विहरणशीलः vगोविन्दुः यजमानानां गवां लम्भकः । 'विन्दुरिच्छुः' (पा. सू. ३. २. १६९) इत्युप्रत्ययान्तत्वेन निपातितः । vद्रप्सः द्रवणशीलः vआयुधानि स्रुक्कपालादीनि vबिभ्रत् धारयन् vअपाम् उदकानाम् vऊर्मिं प्रेरकं vसमुद्रम् । अन्तरिक्षनामैतत् । अन्तरिक्षलोकं vसचमानः सेवमानः vमहिषः महान् य एवंविधः सोमः स सोमः vतुरीयं चतुर्थं vधाम चान्द्रमसं स्थानं vविवक्ति सेवते । सूर्यलोकस्योपरि चन्द्रमसो लोको विद्यत इति चमः पृथिव्या

१. त-भ-शब्दयितव्यः ।

अधिपतिः स मावतु इत्यादिभिः चन्द्रमा नक्षत्राणामधिपतिः स मावतु इत्यन्तैर्मन्त्रैर्ज्ञायते (तै. सं. ३. ४. ५. १) ॥

मर्यो॑ न शु॒भ्रस्त॒न्वं॑ मृजा॒नोऽत्यो॒ न सृत्वा॑ स॒नये॒ धना॑नाम् ।
वृषे॑व यू॒था परि॒ कोश॒मर्ष॒न्कनि॑क्रदच्चम्वो॒३॒॑रा वि॑वेश ॥ २० ॥

मर्यः । न । शुभ्रः । तन्वम् । मृजानः । अत्यः । न । सृत्वा । सनये । धनानाम् ।
वृषाऽइव । यूथा । परि । कोशम् । अर्षन् । कनिक्रदत् । चम्वोः । आ । विवेश ॥ २० ॥

शुभ्रः दीप्यमानोऽलंकृतः मर्यो न मनुष्य इव तन्वम् आत्मीयं शरीरं मृजानः वसतीवरीभिः शोधयन् किंच धनानां सनये संभजनाय लाभाय अत्यो न अतनशीलोऽश्व इव सृत्वा सरणशीलः अपि च वृषेव वृषा यथा यूथानि प्रतिगच्छन् शब्दं करोति तद्वत् कोशम् अधिषवणचर्मणा कृतं पात्रं परि अर्षन् प्रतिगच्छन् सोमः कनिक्रदत् पुनःपुनः शब्दं कुर्वन् चम्वोः अधिषवणफलकयोः आ विवेश आविशति ॥ कनिक्रदत् । क्रदेर्यङ्लुकि ' दाधर्ति दर्धर्ति° ' इत्यादिना निपातनादभ्यासस्य निगागमः । तस्य शतरि ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥ ॥ ९ ॥

पव॑स्वेन्दो पव॑मानो महो॒भिः कनि॑क्रदत्परि॒ वारा॑ण्यर्ष ।
क्रीळ॑ञ्चम्वो॒३॒॑रा वि॑श पू॒यमा॑न इन्द्रं॒ ते रसो॑ मदि॒रो म॑मत्तु ॥ २१ ॥

पवस्व । इन्दो इति । पवमानः । महःऽभिः । कनिक्रदत् । परि । वाराणि । अर्ष ।
क्रीळन् । चम्वोः । आ । विश । पूयमानः । इन्द्रम् । ते । रसः । मदिरः । ममत्तु ॥ २१ ॥

हे इन्दो सोम महोभिः पूजकैर्ऋत्विग्भिः पवमानः पूयमानस्त्वं पवस्व क्षर । ततः कनिक्रदत् भृशं शब्दं कुर्वन् वाराणि अवेर्वालानि पवित्राणि परि अर्ष परिगच्छ । किंच पूयमानः त्वं चम्वोः अधिषवणफलकयोः क्रीळन् संक्रीडमानः सन् आ विश पात्राणि प्रविश । अनन्तरं मदिरः मदकरः ते त्वदीयः रसः इन्द्रं ममत्तु मोदयतु[1] । माद्यतेः ' बहुलं छन्दसि ' इति श्लुः ॥

प्रास्य॒ धारा॑ बृह॒तीर॑सृग्र॒न्वृको॒ गोभि॑: कु॒लशाँ॒ आ वि॑वेश ।
सा॒मं कृ॒ण्वन्त्सा॑म॒न्यो॑ विप॒श्चित्क्रन्द॑न्नेत्य॒भि सख्यु॒र्न जा॒मिम् ॥ २२ ॥

प्र । अस्य । धाराः । बृहतीः । असृग्रन् । अक्तः । गोभिः । कलशान् । आ । विवेश ।
सामं । कृण्वन् । सामन्यः । विपःऽचित् । क्रन्दन् । एति । अभि । सख्युः । न । जामिम् ॥ २२ ॥

अस्य सोमस्य बृहतीः बृहत्यो महत्यः धाराः प्र असृग्रन् प्रसृज्यन्ते । सृजेः कर्मार्थे लकि व्यत्ययेन श्नेरनादेशः । ' बहुलं छन्दसि ' इति रुडागमः । ततः सोऽयं सोमः गोभिः गोविकारैः क्षीरादिभिः अक्तः[2] सन् कलशान् द्रोणाभिधानान् आ विवेश आविशति । साम सामानि कृण्वन् कुर्वन् सामन्यः सामगानकुशलः । सुष्ठु शब्दायमान इत्यर्थः । विपश्चित् सर्वं जानानः सोमः क्रन्दन् देवानाह्वयन् अभि एति । ग्रहादीनि त्वरयाभिगच्छति । तत्र दृष्टान्तः । सख्युः सख्युर्न जामिं जायां यथेतरो लम्पटो वेगेनाभिगच्छति तद्वत् ॥

---

१. ग-त३-भ५.६-मादयतु । २. ग-त३-भ४.५-अक्तः सिक्तः ।

अपघ्नन्नेषि पवमान शत्रून्त्रियां न जारो अभिगीत इन्दुः ।
सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥ २३ ॥

अपऽघ्नन् । एषि । पवमान । शत्रून् । प्रियाम् । न । जारः । अभिऽगीतः । इन्दुः ।
सीदन् । वनेषु । शकुनः । न । पत्वा । सोमः । पुनानः । कलशेषु । सत्ता ॥ २३ ॥

हे ᵛपवमान पूयमान सोम ᵛअभिगीतः स्तोतृभिरभिष्टुतः ᵛइन्दुः पात्रेषु क्षरंस्त्वं ᵛशत्रून् ᵛअपघ्नन् अपहिंसन् ᵛएषि आगच्छसि । कथमिव । ᵛजारः ᵛप्रियां ᵛन प्रियतमामसतीं स्त्रीमन्यान् बाधमानः सन् यथाभिगच्छति तद्वत् । ᵛपत्वा पतनशीलः ᵛशकुनो ᵛन यथा शकुनः ᵛवनेषु वृक्षेषु ᵛसीदन् भवति तद्वत् पतनशीलः । ᵛपुनानः पूयमानः ᵛसोमः ᵛकलशेषु ᵛसत्ता सदनशीलो निषण्णो भवति । सदेस्ताच्छीलिकस्तृन् । ' एकाचः०' इतीट्प्रतिषेधः ॥

आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः ।
हरिरानीतः पुरुवारो अप्स्वर्चिक्रदत्कलशे देवयूनाम् ॥ २४ ॥

आ । ते । रुचः । पवमानस्य । सोम । योषाऽइव । यन्ति । सुऽदुघाः । सुऽधाराः ।
हरिः । आऽनीतः । पुरुऽवारः । अप्ऽसु । अर्चिक्रदत् । कलशे । देवऽयूनाम् ॥ २४ ॥

हे ᵛसोम ᵛपवमानस्य पूयमानस्य ᵛते तव स्वभूता ᵛयोषेव स्त्री यथा पुत्राणां पयो दोग्धि तद्वद्यजमानानां धनादिकस्य सुष्ठु दोग्ध्र्यः ᵛसुधाराः शोभनधारोपेताः ᵛरुचः दीप्तयः ᵛआ ᵛयन्ति पात्रादीन्यागच्छन्ति । किंच ᵛहरिः हरितवर्णः ᵛआनीतः ऋत्विग्भिः ᵛपुरुवारः बहुधा वरणीयः सोमः ᵛअप्सु वसतीवरीषु ᵛदेवयूनां देवानिच्छतां यजमानानां स्वभूते ᵛकलशे द्रोणाख्ये च ᵛअर्चिक्रदत् पुनःपुनः क्रन्दते शब्दायते ॥ ॥ १० ॥ ॥ ५ ॥

षष्ठेऽनुवाके सप्त सूक्तानि । तत्र ' अस्य प्रेषा ' इत्यष्टापञ्चाशदृचं प्रथमं सूक्तं त्रैष्टुभं पवमानसोमदेवताकम् । तत्राद्यस्य तृचस्य मैत्रावरुणो वसिष्ठ ऋषिः । द्वितीयस्येन्द्रप्रमतिर्नाम । तृतीयस्य वृषगणः । चतुर्थस्य मन्युः । पञ्चमस्योपमन्युः । षष्ठस्य व्याघ्रपात् । सप्तमस्य शक्तिः । अष्टमस्य कर्णश्रुत् । नवमस्य मृळीकः । दशमस्य वसुक्रः । एते सर्वे वसिष्ठगोत्राः । एवं त्रिंशदृचो गताः । अथ चतुर्दशानामृचां शक्तिपुत्रः पराशर ऋषिः । शिष्टानामाङ्गिरसः कुत्सः । तथानुक्रम्यते—' अस्य प्रेषाष्टापञ्चाशदाद्यं तृचं वसिष्ठोऽपश्यदुत्तरान्नव पृथग्रमिष्ठा इन्द्रप्रमतिर्वृषगणो मन्युरुपमन्युर्व्याघ्रपाच्छक्तिः कर्णश्रुन्मृळीको वसुक्र इति चतुर्दश पराशरोऽन्त्याः कुत्सः ' इति । गतो विनियोगः ॥

अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।
सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमान्ति होता ॥ १ ॥

अस्य । प्रेषा । हेमना । पूयमानः । देवः । देवेभिः । सम् । अपृक्त । रसम् ।
सुतः । पवित्रम् । परि । एति । रेभन् । मिताऽइव । सद्म । पशुऽमन्ति । होता ॥ १ ॥

ᵛअस्य सोमस्य ᵛप्रेषा । प्रेषतिर्गत्यर्थः । क्विप् रूपम् । ' सावेकाचः०' इति विभक्तेरुदात्तत्वम् । प्रेषा प्रेरकेण ᵛहेमना हिरण्येन ᵛपूयमानः । ' हिरण्यपाणिरभिषुणोति ' इति हिरण्यसंबन्धः । तादृशः ᵛदेवः दीप्यमानांशुः ᵛरसम् आस्वादनीयं ᵛदेवेभिः देवैः सह ᵛसमपृक्त संपर्चयति संयोजयति । ' पृची

संपर्के '। ततः vसुतः अभिषुतः सोमः vदेवन् शब्दायमानः सन् vपवित्रम् ऊर्णास्तुकेन निर्मितं vपर्येति परिगच्छति। कथमिव। vहोता देवानामाह्वातरित्विक् vमितेव निर्मितान् vपशुमन्ति बहु-पशून् vसद्म सदनानि यज्ञगृहान् यथा पर्येति तद्वत् ॥

भद्रा वस्त्रा समन्या३ वसानो महान् कविर्निवचनानि शंसन्।
आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥ २ ॥

भद्रा। वस्त्रा। समन्या। वसानः। महान्। कविः। निऽवचनानि। शंसन्।
आ। वच्यस्व। चम्वोः। पूयमानः। विऽचक्षणः। जागृविः। देवऽवीतौ ॥ २ ॥

vभद्रा भद्राणि कल्याणानि vसमन्या। 'समनम्' इति संग्रामनाम। 'तत्र साधुः' इति यत्। संग्रामयोग्यानि vवस्त्रा वस्त्राण्याच्छादकानि तेजांसि vवसानः आच्छादयन् vमहान् vकविः क्रान्तदर्शी अत एव vनिवचनानि नितरां वक्तव्यान्यृत्विक्कृतानि स्तोत्राणि vशंसन् vविचक्षणः विशेषेण सर्वस्य द्रष्टा vजागृविः जागरणशीलः सोमस्त्वं vदेववीतौ। देवानां वीतिर्भक्षणं यस्मिन् स देववीतिर्यज्ञः। तस्मिन् vचम्वोः अभिषवणफलकयोः vआ vवच्यस्व पात्राण्याविश। वर्धिर्गत्यर्थः। व्यत्ययेन श्यन्। vपूयमानः[1] सन्[2] ॥

सम्मु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे।
अभि स्वर धन्व पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥ ३ ॥

सम्। ऊँ इति। प्रियः। मृज्यते। सानौ। अव्ये। यशःऽतरः। यशसाम्। क्षैतः। अस्मे इति।
अभि। स्वर। धन्व। पूयमानः। यूयम्। पात। स्वस्तिऽभिः। सदा। नः ॥ ३ ॥

vयशसां यशस्विनां मध्ये vयशस्तरः अतिशयेन यशस्वी vक्षैतः क्षितौ भवः vप्रियः प्रीणयिता सोमः vसानौ समुच्छ्रिते vअव्ये अविभवे पवित्रे vअस्मे अस्मदर्थं vसं vमृज्यते ऋत्विग्भिः परिपूयते। vउ अवधारणे। vपूयमानः त्वं vधन्व अन्तरिक्षे vअभि vस्वर अभितः शब्दय। vयूयम्। पूजायां बहुवचनम्। हे सोम त्वं vनः अस्मान् vस्वस्तिभिः कल्याणतमैः पालनैः vसदा सर्वदा vपात रक्षत पालयत ॥

प्र गायताभ्यर्चाम देवान्त्सोमं हिनोत महते धनाय।
स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः ॥ ४ ॥

प्र। गायत। अभि। अर्चाम। देवान्। सोमम्। हिनोत। महते। धनाय।
स्वादुः। पवाते। अति। वारम्। अव्यम्। आ। सीदाति। कलशम्। देवऽयुः। नः ॥ ४ ॥

हे स्तोतारः vप्र vगायत। सोमं प्रकर्षेणाभिष्टुत। तथा vदेवान् vअभ्यर्चाम अभ्यर्चत। युष्मदस्मदोरवः। बहुलं छन्दसि। यद्वा। वयं देवानभिष्टुमः यूयं सोमं स्तुतेति। किंच vमहते महत् प्रभूतं vधनाय धनं प्राप्तुं सोमं vहिनोत अभिषवार्थं प्रेरयत। 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति धन-शब्दस्य चतुर्थी। ततः vस्वादुः स्वादुकरः[3] सोमः vअव्यम् अविभवं vवारं वारकं पवित्रम् vअति

१. त-भ२.६-'पूयमानः सन्' नास्ति। २. त१-भ१.२-स्वादुकारी; भ४.७-स्वादुकारि।

vपवते अतीव पवते । किंच vदेवयुः देवान् कामयमानः vनः अस्मदीयः सोमः vकलशं पात्रम् vआ vसीदति आसीदति प्रविशति । उभयत्र लेट्याडागमः ॥

इन्दुर्देवानामुप सख्यमायन्त्सहस्रधारः पवते मदाय ।
नृभिः स्तवानो अनु धाम पूर्वमगन्निन्द्रं महते सौभगाय ॥ ५ ॥

इन्दुः । देवानाम् । उप । सख्यम् । आऽयन् । सहस्रऽधारः । पवते । मदाय ।
नृऽभिः । स्तवानः । अनु । धाम । पूर्वम् । अगन् । इन्द्रम् । महते । सौभगाय ॥ ५ ॥

vदेवानाम् इन्द्रादीनां vसख्यं सखिभावम् vउप vआयन् उपगच्छन्[1] vसहस्रधारः बहुविधधारोपेतः vइन्दुः सोमः vमदाय देवानां मदार्थं vपवते कलशादिषु क्षरति । vनृभिः कर्मनेतृभिः vस्तवानः स्तूयमानः सोमः vपूर्वं पुरातनं vधाम द्युलोकम् vअनु गच्छति । तदेवाह । vमहते प्रभूताय vसौभगाय सौभाग्याय vइन्द्रम् vअगन् गच्छति । सोम इन्द्रेण पीते सति यजमानानां महत् सौभाग्यं भवति खलु ॥ अगन् । गमेर्लुङि ' मन्त्रे घस° ' इति च्लेर्लुक् । ' मो नो धातोः ' इति नत्वम् ॥ ॥ ११ ॥

स्तोत्रे राये हरिरर्षा पुनान इन्द्रं मदो गच्छतु ते भराय ।
देवैर्याहि सरथं राधो अच्छा युयं पात स्वस्तिभिः सदा नः ॥ ६ ॥

स्तोत्रे । राये । हरिः । अर्ष । पुनानः । इन्द्रम् । मदः । गच्छतु । ते । भराय ।
देवैः । याहि । सऽरथम् । राधः । अच्छ । युयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ६ ॥

हे सोम vहरिः हरितवर्णः vपुनानः पूयमानस्त्वं vस्तोत्रे अस्माभिः क्रियमाणे सति vराये धनार्थम् vअर्ष आगच्छ । ततः vते त्वदीयः vमदः मदकरः रसः vभराय । ' भृ भर्त्सने ' । भर्त्सयन्ति शत्रूनत्र योद्धार इति भरः संग्रामः । तदर्थम् vइन्द्रं vगच्छतु । किंच vसरथं vदेवैः समानं रथमास्थाय vराधः vअच्छ अस्माकं धनार्थं vयाहि आगच्छ । vयूयं vनः अस्मान् vस्वस्तिभिः vसदा vपात । त्वं रक्ष ॥

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥ ७ ॥

प्र । काव्यम् । उशनाऽइव । ब्रुवाणः । देवः । देवानाम् । जनिम । विवक्ति ।
महिऽव्रतः । शुचिऽबन्धुः । पावकः । पदा । वराहः । अभि । एति । रेभन् ॥ ७ ॥

vउशनेव एतन्नामक ऋषिरिव vकाव्यं कविकर्म स्तोत्रं vब्रुवाणः उच्चारयन् vदेवः स्तोतायमृत्विङ्मुखगाणो नाम vदेवानाम् इन्द्रादीनां vजनिम जन्मानि vप्र vविवक्ति प्रकर्षेण ब्रवीति । ' वच परिभाषणे ' । व्यत्ययेन विकरणस्य श्लुः । ' बहुलं छन्दसि ' इत्यभ्यासस्येत्वम् । vमहिव्रतः प्रभूतकर्मा vशुचिबन्धुः । बध्नन्ति शत्रूनिति बन्धूनि तेजांसि बलानि वा । दीप्ततेजस्कः vपावकः पापानां शोधकः vवराहः । वरं च तदहश्च वराहः । ' राजाहः सखिभ्यष्टच् ' इति टच् समासान्तः । तस्मिन्नहनि

---

१. ग—उपागच्छन् ।

अभिपूयमाणत्वेन तद्वान्। अर्शआदित्वात् मत्वर्थीयोऽच्। तादृशः सोमः [v]रेभन् शब्दं कुर्वन् [v]पदा पदानि स्थानानि पात्राणि [v]अभ्येति अभिगच्छति। यद्वा। यथा कश्चन वराहः पदा पादेन भूमिं विक्रममाणः शब्दं करोति तद्वत्॥

प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः।
आङ्गूष्यं१ पवमानं सखायो दुर्मर्षं साकं प्र वदन्ति वाणम्॥ ८॥

प्र। हंसासः। तृपलम्। मन्युम्। अच्छ। अमात्। अस्तम्। वृषऽगणाः। अयासुः।
आङ्गूष्यम्। पवमानम्। सखायः। दुःऽमर्षम्। साकम्। प्र। वदन्ति। वाणम्॥ ८॥

[v]हंसासः शत्रुभिर्हन्यमाना हंसा इवाचरन्तो वा [v]वृषगणाः एतन्नामका ऋषयः [v]अमात् शत्रूणां बलात् त्रासिताः सन्तः [v]तृपलम्। तृपलशब्दः क्षिप्रवाची। तदुक्तं यास्केन—'तृपलप्रभर्मा क्षिप्रप्रहारी' (निरु. ५. १२) इति। क्षिप्रप्रहारिणं [v]मन्युं शत्रूनभिमन्यमानं सोमम् [v]अच्छ अभिलक्ष्य [v]अस्तं यज्ञगृहं [v]प्र [v]अयासुः प्रायासिषुः प्रगच्छन्ति। ततः [v]सखायः स्तुत्यस्तोतृबलक्षणेन संबन्धेन सखिभूताः स्तोतारः [v]आङ्गूष्यं सर्वैरभिगन्तव्यम्। यद्वा। घोशब्दस्य पृषोदरादित्वात् गू इत्यादेशः। आङोऽनुनासिकश्छान्दसः। स्तोत्रार्हं [v]दुर्मर्षं शत्रुभिर्दुर्धर्षं दुःसहमेवंविधं सोमं [v]पवमानम् उद्दिश्य [v]वाणं वाद्यविशेषं [v]साकं सहैव [v]प्र [v]वदन्ति प्रवादयन्ति। तदुपलक्षितं गानं कुर्वन्तीत्यर्थः॥

स रेहत उरुगायस्य जूतिं वृथा क्रीळन्तं मिमते न गावः।
परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमुज्रः॥ ९॥

सः। रेहते। उरुऽगायस्य। जूतिम्। वृथा। क्रीळन्तम्। मिमते। न। गावः।
परीणसम्। कृणुते। तिग्मऽशृङ्गः। दिवा। हरिः। ददृशे। नक्तम्। ऋज्रः॥ ९॥

[v]सः सोमः [v]रेहते। अतिशीघ्रं गच्छतीत्यर्थः। [v]उरुगायस्य बहुभिः स्तुत्यस्यात्मनः [v]जूतिं गतिमनुसरन्। तं [v]वृथा अनायासेन [v]क्रीळन्तं विहरन्तं गच्छन्तं सोमं [v]गावः अन्ये गन्तारः [v]न [v]मिमते न परिच्छिन्दन्ति। तमनुगन्तुं न शक्नुवन्तीत्यर्थः। किंच [v]तिग्मशृङ्गः। शृणन्ति हिंसन्ति तमांसीति शृङ्गाणि तेजांसि। तीक्ष्णतेजस्कः [v]परीणसम्। बहुनामैतत्। बहुविधं तेजः [v]कृणुते करोति। अन्तरिक्षे वर्तमानो यः सोमः [v]दिवा अहनि [v]हरिः हरितवर्णः [v]ददृशे दृश्यते। न प्रकाशत इत्यर्थः। [v]नक्तं रात्रौ तु [v]ऋज्रः ऋजुगामी विस्पष्टः प्रकाशयुक्तो दृश्यते। दृशेः कर्मणि लिटि रूपम्[1]॥

इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय।
हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन् वृजनस्य राजा॥ १०॥

इन्दुः। वाजी। पवते। गोऽन्योघाः। इन्द्रे। सोमः। सहः। इन्वन्। मदाय।
हन्ति। रक्षः। बाधते। परि। अरातीः। वरिवः। कृण्वन्। वृजनस्य। राजा॥ १०॥

---

१. ग-त३.४-भ४.५—रूपं। यद्वृत्तयोगादनिघातः।

vइन्दुः क्षरणशीलः vवाजी बलवान् vगोन्योघाः गमनशीलनीचीनाग्ररससंघातः vइन्द्रे vसहः बलकररसम् vइन्वन् प्रेरयन् vसोमः vमदाय तस्य मदार्थं vपवते क्षरति[1] । किंच vरक्षः रक्षःकुलं vहन्ति हिनस्ति । किंच vअरातीः अरातीन् शत्रून् vपरि vबाधते परितः संहरति । कीदृशः । vवरिवः वरणीयं धनं vकृण्वन् स्तोतॄणां कुर्वन् vवृजनस्य बलस्य vराजा ईशिता सोम इति ॥ ॥१२॥

अध॒ धार॑या॒ मध्वा॑ पृचा॒नस्ति॒रो रोमं॑ पवते॒ अद्रि॑दुग्धः ।
इन्दु॒रिन्द्र॑स्य सख्यं॑ जु॒षा॒णो दे॒वो दे॒वस्य॑ मत्स॒रो मदा॑य ॥ ११ ॥

अध॑ । धार॑या । मध्वा॑ । पृ॒चा॒नः । ति॒रः । रोम॑ । प॒व॒ते॒ । अद्रि॑ऽदुग्धः ।
इन्दुः॑ । इन्द्र॑स्य । स॒ख्य॑म् । जु॒षा॒णः । दे॒वः । दे॒वस्य॑ । म॒त्स॒रः । मदा॑य ॥ ११ ॥

vअध अथानन्तरम् vअद्रिदुग्धः ग्रावभिर्दुग्धोऽभिषुतः सोमः vमध्वा मदकारिण्या vधारया vपृचानः देवान् संपर्चयन् संयोजयन् vरोम अविरोमभिः कृतं पवित्रं vतिरः तिरस्कृत्य व्यवधायकं कृत्वा vपवते कलशेषु क्षरति । किंच vइन्द्रस्य vसख्यं सख्यिभावं कर्म वा vजुषाणः सेवमानः vदेवः द्योतमानः vमत्सरः मदकरः vइन्दुः सोमः vदेवस्य इन्द्रस्य vमदाय मदार्थं पवते ॥

अ॒भि प्रि॒याणि॑ पवते पुना॒नो दे॒वो दे॒वान्त्स्वेन॒ रसे॑न पृ॒ञ्चन् ।
इन्दु॒र्धर्मा॑ण्यृ॒तुथा॒ वसा॑नो॒ दश॒ क्षिपो॑ अव्यत॒ सानो॒ अव्ये॑ ॥ १२ ॥

अ॒भि । प्रि॒याणि॑ । प॒व॒ते॒ । पु॒ना॒नः । दे॒वः । दे॒वान् । स्वेन॑ । रसे॑न । पृ॒ञ्चन् ।
इन्दुः॑ । धर्मा॑णि । ऋ॒तुऽथा । वसा॑नः । दश॑ । क्षिपः॑ । अ॒व्य॒त॒ । सानौ॑ । अव्ये॑ ॥ १२ ॥

vप्रियाणि प्रीणयितॄणि vधर्माणि धारकाणि तेजांसि vऋतुथा काले काले vवसानः आच्छादयन् vइन्दुः सोमः vपुनानः पूयमानः सन् vअभि vपवते कलशानभिलक्ष्य क्षरति । कीदृशः । vदेवः संक्रीडनशीलः vस्वेन आत्मीयेन vरसेन vदेवान् इन्द्रादीन् vपृञ्चन् संपर्चयन् संयोजयन् । तमिमं vदश दशसंख्याकाः vक्षिपः । अङ्गुलिनामैतत् । कर्मार्थं प्रेर्यन्त इति । तत्संख्याका अङ्गुलयः vसानौ समुच्छ्रिते vअव्ये अविभवे पवित्रे vअव्यत गमयन्ति । यद्वा । तत्र पवित्रे पूयमानं सोममव्यत गच्छन्ति । वी गत्यादिषु । लङि व्यत्ययेनात्मनेपदम् ॥

वृषा॒ शोणो॑ अभि॒कनि॑क्रद॒द्गा न॒दय॑न्नेति पृथि॒वीमु॒त द्याम् ।
इन्द्र॑स्येव॒ वग्नु॒रा शृ॑ण्व आ॒जौ प्र॑चेतय॒न्नर्ष॑ति वा॒चमे॒माम् ॥ १३ ॥

वृषा॑ । शोणः॑ । अ॒भि॒ऽकनि॑क्रदत् । गाः । न॒दय॑न् । एति॑ । पृ॒थि॒वीम् । उ॒त । द्याम् ।
इन्द्र॑स्यऽइव । वग्नुः॑ । आ । शृ॒ण्वे॒ । आ॒जौ । प्र॒ऽचे॒तय॑न् । अर्ष॑ति । वा॒चम् । आ । इ॒माम् ॥१३॥

vशोणः शोणवर्णः vवृषा कश्चिद्वृषभः vगाः पशून् vअभिकनिक्रदत् अभिलक्ष्य शब्दं करोति । एवं गाः स्तुतीर्विश्रयणार्थं पयसो दोग्ध्रीर्धेनूर्वा अभिकनिक्रददभिशब्दायमानः । तदेवाह । vनदयन् शब्दमुत्पादयन् सोमः vपृथिवीमुत अपि च vद्याम् एतौ लोकौ vएति गच्छति । किंच vवग्नुः । वाङ्नामैतत् । तस्य वाक् शब्दः vआजौ संग्रामे vइन्द्रस्येव इन्द्रस्य शब्द इव vआ vशृण्वे सर्वैः

---

१. ग-त१.३.६.७-भ–' क्षरति ' नास्ति ।

क्षपते । ततः vप्रचेतयन् आत्मानं सर्वेषां प्रज्ञापयन् vहृदा vवाचम् vअर्षति समन्ताद्गमयति । उच्चैः शब्दायत इत्यर्थः ॥

रसाय्यः पयसा पिन्वमान ईर्यन्नेषि मधुमन्तमंशुम् ।
पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥ १४ ॥

रसाय्यः । पयसा । पिन्वमानः । ईर्यन् । एषि । मधुऽमन्तम् । अंशुम् ।
पवमानः । सम्ऽतनिम् । एषि । कृण्वन् । इन्द्राय । सोम । परिऽसिच्यमानः ॥ १४ ॥

हे सोम vरसाय्यः । रसेरौणादिक आय्यप्रत्ययः । आस्वाद्यः vपयसा[1] vपिन्वमानः क्षरंस्वम् vईरयन् शब्दं प्रेरयन् vमधुमन्तं माधुर्योपेतम् vअंशुं रसभावम्[2] vएषि प्राप्नोषि[3]। 'अंशुः शमष्टमात्रो भवति' (निरु. २.५) इति यास्कः । अनेन सोमरसोऽभिधीयते । किंच हे vसोम vपरिषिच्यमानः अद्भिः परिषिक्तस्त्वं vपवमानः पवित्रे पूयमानः सन् vसंतनिम् । 'तनु विस्तारे' । इप्रत्ययः । संततां धारां vकृण्वन् कुर्वन् vइन्द्राय इन्द्रार्थम् vएषि गच्छसि ॥

एवा पवस्व मदिरो मदायोदग्राभस्य नमयन् वधस्नैः ।
परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥ १५ ॥

एव । पवस्व । मदिरः । मदाय । उदऽग्राभस्य । नमयन् । वधऽस्नैः ।
परि । वर्णम् । भरमाणः । रुशन्तम् । गव्युः । नः । अर्ष । परि । सोम । सिक्तः ॥ १५ ॥

हे vसोम vमदिरः मदकरस्त्वम् vउदग्राभस्य । 'क्रियाग्रहणं कर्तव्यम्' (पा. सू. १.४.३२.१) इति कर्मणः संप्रदानसंज्ञा । 'चतुर्थ्यर्थे बहुलम्०' (पा. सू. २.३.६२) इति षष्ठी । उदग्राभमुदकग्राहिणं मेघं vवधस्नैः हननसाधनैरायुधैः vनमयन् वृष्ट्यर्थं प्रह्वीकुर्वन् vमदाय मदार्थम् vएव vपवस्व । एवं पात्रेषु क्षर । किंच vरुशन्तम् आरोचमानं श्वेतं vवर्णं vपरि vभरमाणः परितो बिभ्रत् vसिक्तः पवित्रे सिच्यमानस्त्वं vगव्युः vनः[4] अस्माकं गा इच्छन् vपरि vअर्ष परिगच्छ ॥ ॥ १५ ॥

जुष्टी नं इन्दो सुपथा सुगान्युरौ पवस्व वरिवांसि कृण्वन् ।
घनेव विष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥ १६ ॥

जुष्टी । नः । इन्दो इति । सुऽपथा । सुऽगानि । उरौ । पवस्व । वरिवांसि । कृण्वन् ।
घनाऽइव । विष्वक् । दुःऽइतानि । विऽघ्नन् । अधि । स्नुना । धन्व । सानौ । अव्ये ॥ १६ ॥

हे vइन्दो दीप्त पवमान vजुष्टी । 'स्नात्व्यादयश्च' इति निपातितः । स्तुतिभिः प्रीतो[5] भूत्वा[6] vनः अस्माकं सुपथानि वैदिकमार्गान् तथा vवरिवांसि वरणीयानि धनानि vसुगा सुगमनानि सुप्रापणीयानि vकृण्वन् कुर्वन् vउरौ विस्तीर्णे द्रोणकलशे vपवस्व क्षर । किंच vघनेव घनीभूतेन लोहमयेनायुधेनेव vविष्वक् सर्वतः vदुरितानि दुष्प्रापणीयानि रक्षांसि vविघ्नन् हिंसन् vसानौ समुच्छ्रिते[7] vअव्ये अविभवे vस्नुना स्रवता धारासंघेन vअधि vधन्व अधिगच्छ । धावितार्थः ॥

---

१. त१.७-मु-पयसा युक्तः । २. त-मर्वं । ३. त१.२.३.४.५-प्राप्नोति । ४. ग-त-भ१.२.४.६-'नः' नास्ति । ५. भ६-प्रीतस्त्वं । ६. त७-मु-समुच्छ्रिते देशे ।

वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुम् ।
स्तुकेव वीता धन्वा विचिन्वन्बन्धूँरिमाँ अवराँ इन्दो वायून् ॥ १७ ॥

वृष्टिम् । नः । अर्ष । दिव्याम् । जिगत्नुम् । इळाऽवतीम् । शम्ऽगयीम् । जीरऽदानुम् । स्तुकाऽइव । वीता । धन्व । विऽचिन्वन् । बन्धून् । इमान् । अवरान् । इन्दो इति । वायून् ॥ १७ ॥

हे सोम ᵛनः अस्माकं ᵛवृष्टिम् ᵛअर्ष गमय। कीदृशीम्। ᵛदिव्यां दिवि भवां ᵛजिगत्नुं गमनशीलाम् ᵛइळावतीम् अन्नवतीं ᵛशंगयीं सुखस्य निवासभूतां ᵛजीरदानुं क्षिप्रदानोपेताम् । किंच हे ᵛइन्दो त्वं ᵛस्तुकेव ᵛवीता कान्तानि । स्तुकशब्दोऽपत्यवचनः । अपत्यानि यथा विचिनोपि तद्वत् ᵛबन्धून् स्तुत्यस्तोतृत्वेन बन्धुभूतान् ᵛअवरान् अवरदेशे स्थितान् पार्थिवान् ᵛवायून् त्वामभिगच्छतः ᵛइमान् अस्मान् ᵛविचिन्वन् धनादिप्रदानार्थं गवेषमाणः सन् ᵛधन्व गच्छ ॥

ग्रन्थिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम ।
अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् ॥ १८ ॥

ग्रन्थिम् । न । वि । स्य । ग्रथितम् । पुनानः । ऋजुम् । च । गातुम् । वृजिनम् । च । सोम । अत्यः । न । क्रदः । हरिः । आ । सृजानः । मर्यः । देव । धन्व । पस्त्यऽवान् ॥ १८ ॥

ᵛपुनानः पूयमानस्त्वं ᵛग्रथितं पापैर्बद्धं मां ᵛवि ᵛष्य मुञ्च[1]। पापेभ्यो विश्लेषय। कथमिव। ᵛग्रन्थिं ᵛन यथा कश्चिन् ग्रन्थिं विश्लेषयति। 'षो अन्तकर्मणि' इत्यस्य लोटि रूपम्। किंच हे ᵛसोम त्वम् ᵛऋजुम् अवक्रं ᵛगातुं मार्गं ᵛच ᵛवृजिनं बलं ᵛच मह्यं देहि। ᵛहरिः हरितवर्णस्त्वम् ᵛआ ᵛसृजानः पात्रेष्वासृज्यमानः सन् ᵛअत्यो ᵛन अतनशीलोऽश्व इव ᵛक्रदः क्रन्दसि शब्दायसे। किंच हे ᵛदेव ᵛमर्यः मनुष्यहितो मारको हिंसको वा शत्रूणां ᵛपस्त्यवान्। पस्त्यं गृहम्। तद्वांस्त्वं ᵛधन्व मामभिगच्छ कलशान् वा ॥

जुष्टो मदाय देवतात इन्दो परि ष्णा धन्व सानो अव्ये ।
सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये ॥ १९ ॥

जुष्टः । मदाय । देवऽतातेः । इन्दो इति । परि । स्नुना । धन्व । सानौ । अव्ये ।
सहस्रऽधारः । सुरभिः । अदब्धः । परि । स्रव । वाजऽसातौ । नृऽसह्ये ॥ १९ ॥

हे ᵛइन्दो ᵛमदाय ᵛजुष्टः पर्याप्तस्त्वं ᵛदेवतातेः देवैस्तते यज्ञे ᵛसानौ समुच्छ्रिते ᵛअव्ये अविभवे[2] पवित्रे[3] ᵛस्नुना स्रवणशीलेन[4] धारासंघेन सह ᵛपरि ᵛधन्व परिगच्छ। ᵛसहस्रधारः बहुविधधारोपेतः ᵛसुरभिः सुगन्धिस्त्वम् ᵛअदब्धः न कैश्चिद्धिंसितः सन् ᵛवाजसातौ अन्नलाभनिमित्ते[5] ᵛनृसह्ये नृभिः सोढव्ये युद्धे ᵛपरि ᵛस्रव परितो गच्छ ॥

अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।
एते शुक्रासो धन्वन्ति सोमा देवासस्ताँ उप याता पिबध्यै ॥ २० ॥

१. त३-भ४.५–विमुंच । २. ग-त३-भ१.४.७–'अविभवे' नास्ति । ३. त१.७-भ२-सु–'पवित्रे' नास्ति । ४. त१-भ६-सु–श्रवण° । ५. ग–अन्नलाभे धननिमित्ते; त१.३.४.५.६.७-भ२-सु–अन्नलाभाय निमित्ते; भ१.४–अन्नलाभाय निर्मितो ।

अरश्मानः । ये । अरथाः । अयुक्ताः । अत्यासः । न । ससृजानासः । आजौ ।
एते । शुक्रासः । धन्वन्ति । सोमाः । देवासः । तान् । उप । यात । पिबध्यै ॥ २० ॥

vअरश्मानः रश्मिवर्जिताः । रज्जुरहिता[1] इति यावत् । vअरथाः रथवर्जिताः vअयुक्ताः कुत्रापि न नियुक्ताः । अबद्धा इत्यर्थः । एतादृशाः vये vआजौ युद्धे vससृजानासः सृज्यमानाः vअत्यासो vन अश्वा यथा त्वरया लक्ष्यं गच्छन्ति तद्वदाजौ । अजन्ति कर्मकरणार्थमृत्विजोऽत्र इत्याजिर्यज्ञः । तस्मिन् सृज्यमानाः शुक्रा[2] दीप्यमानाः vएते vसोमाः vधन्वन्ति क्षिप्रं कलशानभिगच्छन्ति । अथ प्रत्यक्षः । हे vदेवासः देवाः vतान् आगच्छतः सोमान् vपिबध्यै पानाय vउप vयात उपगच्छत ॥ ॥ १४ ॥

एवा नं इन्दो अभि देववीतिं परि स्रव नभो अर्णश्चमूषु ।
सोमो अस्मभ्यं काम्यं बृहन्तं रयिं ददातु वीरवन्तमुग्रम् ॥ २१ ॥

एव । नः । इन्दो इति । अभि । देवऽवीतिम् । परि । स्रव । नभः । अर्णः । चमूषु ।
सोमः । अस्मभ्यम् । काम्यम् । बृहन्तम् । रयिम् । ददातु । वीरऽवन्तम् । उग्रम् ॥ २१ ॥

हे vइन्दो सोम vनः अस्मदीयम् vएव vदेववीतिम् । देवानां वीतिर्भक्षणं गमनं वा यस्मिन् स देववीतिर्यज्ञः । तमभिलक्ष्य vनभः नभसो द्युलोकात् vअर्णः उदकम् । अनेन पवित्रान्निर्गतः सोमरसोऽभिधीयते । तं रसं vचमूषु चमसेषु vपरि vस्रव परितः क्षर । ततः vसोमः vकाम्यं काम्यमानं vबृहन्तं प्रवृद्धं vवीरवन्तं पुत्रयुक्तम् vउग्रम् उद्गूर्णबलं vरयिं धनम् vअस्मभ्यं vददातु प्रयच्छतु ॥

तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षोरनीके ।
आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥ २२ ॥

तक्षत् । यदि । मनसः । वेनतः । वाक् । ज्येष्ठस्य । वा । धर्मणि । क्षोः । अनीके ।
आत् । ईम् । आयन् । वरम् । आ । वावशानाः । जुष्टम् । पतिम् । कलशे । गावः । इन्दुम् ॥ २२ ॥

vवेनतः । 'वेनो वेनतेः कान्तिकर्मणः' (निरु. १०. ३८) इति यास्कः । कामयमानस्य vमनसः । मन्यतेः स्तुतिकर्मणः । स्तोतुः vवाक् स्तुतिलक्षणा vयदि एनं vतक्षत् संस्करोति । वाशब्द उपमार्थे । यथा vधर्मणि । 'निमित्तात्कर्मसंयोगे[3]' (पा. सू. २. ३. ३६. ६) इति सप्तमी । धारकं योगक्षेमविषयं कर्मोद्दिश्य[4] vक्षोः शब्दायमानस्य vअनीके मुखे तत्र स्थितस्य जानपदिकस्य वाक् vज्येष्ठस्य । द्वितीयार्थे षष्ठी । प्रशस्यतमं राजानं यथा स्तौति तथा स्तोतुर्वाक् सोमं स्तौतीत्यर्थः । vआत् अनन्तरमेव vवरं वरणीयं vजुष्टं देवानां मदाय पर्याप्तं vपतिं सर्वस्य पालकं vकलशे स्थितम् vइन्दुम् vईम् एनं सोमं vवावशानाः कामयमानाः vगावः vआ vआयन् । पयसा स्वीयेन मिश्रयितुमागच्छन्ति ॥

१. त-मु-रज्जुवर्जिता; भ२-रज्जुता । २. भ१(२)-शुक्रासः शुका । ३. त-भ६-निमित्तत्वात् कर्मसंयोग; भ१.२-निमित्तत्वात् कर्मसंयोगः; भ४-निमित्तत्वात् कर्मयोगः । ४. त-भ२.६-धर्मोद्दिश्य ।

प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः ।
धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम ॥ २३ ॥

प्र । दानुऽदः । दिव्यः । दानुऽपिन्वः । ऋतम् । ऋताय । पवते । सुऽमेधाः ।
धर्मा । भुवत् । वृजन्यस्य । राजा । प्र । रश्मिऽभिः । दशऽभिः । भारि । भूम ॥ २३ ॥

vदिव्यः दिवि भवः vदानुदः दातृभ्यो धनादीनां दाता । तदेवाह । vदानुपिन्वः । 'पिवि सेचने' । 'कर्मण्यण्' (पा. सू. ३. २. १) इत्यण् । दातृभ्यः कामानां क्षारयिता vसुमेधाः शोभनप्रज्ञः सोमः vऋताय सत्यभूतायेन्द्राय vऋतं सत्यभूतमास्मीयं रसं vप्र vपवते प्रकर्षेण क्षरति । vराजा दीप्यमानः सोमः vवृजन्यस्य साधुबलस्य vधर्मा धारयिता vभुवत् भवति । किंच vदशभिः एतत्संख्याकाभिः vरश्मिभिः कर्मकरणार्थमभ्वानाभिरङ्गुलिभिः vभूम प्रभूतं vप्र vभारि प्रधार्यते । धिणि रूपम् ॥

पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानाम् ।
द्विता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विन्दुः ॥ २४ ॥

पवित्रेभिः । पवमानः । नृऽचक्षाः । राजा । देवानाम् । उत । मर्त्यानाम् ।
द्विता । भुवत् । रयिऽपतिः । रयीणाम् । ऋतम् । भरत् । सुऽभृतम् । चारु । इन्दुः ॥ २४ ॥

vपवित्रेभिः पवित्रैः vपवमानः पूयमानः vनृचक्षाः नृणां फलाफलयोर्द्रष्टा तथा[1] vदेवानाम् इन्द्रादीनाम् vउत अपि च vमर्त्यानां मनुष्याणामेवमुभयेषां जनानां vराजा vरयिपतिः धनस्य पतिः न त्वल्पस्य पतिः किंतु vरयीणां बहूनां धनानां स्वामी । वृत्र्यवृत्तिभ्यां स्वामित्वं बाहुल्यं च विवक्ष्यते । ईदृशः सोमः vद्विता द्विधा देवेष्वपि च मनुष्येषु vभुवत् भवति । सोऽयम् vइन्दुः सोमः vसुभृतं सुष्ठु संभृतं vचारु कल्याणम् vऋतम् उदकं vभरत् बिभर्ति ॥

अर्वाँइव श्रवसे सातिमच्छेन्द्रस्य वायोरभि वीतिमर्ष ।
स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित्पुनानः ॥ २५ ॥

अर्वान्ऽइव । श्रवसे । सातिम् । अच्छ । इन्द्रस्य । वायोः । अभि । वीतिम् । अर्ष ।
सः । नः । सहस्रा । बृहतीः । इषः । दाः । भव । सोम । द्रविणःऽवित् । पुनानः ॥ २५ ॥

हे सोम अन्नार्थं युद्धे vअर्वानिव अश्वो यथा गच्छति तद्वत् त्वं vश्रवसे अस्माकमन्नार्थं तथा vसातिमच्छ धनलाभं प्रति vइन्द्रस्य vवायोः च vवीतिं पानम् vअभि vअर्ष अभिगच्छ । ऐन्द्रवायवग्रहे हीन्द्रवायू सह सोमं पिबत इत्यत्र सहोपादानम् । vसः त्वं vसहस्रा सहस्राणि बहुविधानि vबृहतीः बृंहितानि प्रवृद्धानि vइषः अन्नानि vनः अस्मभ्यं vदाः प्रयच्छ । हे vसोम vपुनानः पूयमानस्त्वं नोऽस्मभ्यं vद्रविणोवित् धनस्य[2] लम्भयिता vभव । द्रविणशब्दात् 'सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः' (का. ७. १. ५१. ३) इति सुगागमः ॥ ॥ १५ ॥

१. त१.२.७-अथा; त३.४.५.६-भ१.२.४.७-'तथा' नास्ति; भ६-यथा; मु-अथ । २. त-अस्य ।

देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः ।
आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मन्द्रतमाः ॥ २६ ॥

देवऽअव्यः । नः । परिऽसिच्यमानाः । क्षयम् । सुऽवीरम् । धन्वन्तु । सोमाः ।
आऽयज्यवः । सुऽमतिम् । विश्वऽवाराः । होतारः । न । दिविऽयजः । मन्द्रऽतमाः ॥२६॥

[v]देवाव्यः । अवतेस्तर्पणार्थस्य ' अवितृस्तृतन्त्रिभ्य ईः ' इतीप्रत्ययः । ' उदात्तस्वरितयोर्यणः ' इति जसः स्वरितत्वम् । देवानां तर्पयितारः [v]परिषिच्यमानाः परितः पात्रेषु सिच्यमानाः [v]सोमाः [v]नः अस्माकं [v]सुवीरं शोभनपुत्रं [v]क्षयं गृहं [v]धन्वन्तु प्रेरयन्तु । तथा [v]आयज्यवः आभिमुख्येन यष्टव्या आभिमुख्येन प्रयच्छन्तो वा अत एव [v]विश्ववाराः सर्वैर्वरणीयाः [v]सुमतिम् अनुग्रहबुद्धिं च प्रेरयन्तु । कीदृशाः । [v]होतारो [v]न होतारो यथा देवानिन्द्रादीन् स्तुवन्ति एवं [v]दिविषजः दिवि द्युलोके[1] स्थितानिन्द्रादीन् देवान् यजन्तः । दिव्शब्दे ' तत्पुरुषे कृति बहुलम् ' इति सप्तम्या अलुक् । [v]मन्द्रतमाः अत्यन्तं मदकराः ॥

एवा देव देवताते पवस्व महे सोम प्सरसे देवपानः ।
महश्चिद्धि ष्मसि हिताः समर्ये कृधि सुष्ठाने रोदसी पुनानः ॥ २७ ॥

एव । देव । देवऽताते । पवस्व । महे । सोम । प्सरसे । देवऽपानः ।
महः । चित् । हि । स्मसि । हिताः । सुऽसमर्ये ।
कृधि । सुस्थाने इति सुऽस्थाने । रोदसी इति । पुनानः ॥ २७ ॥

हे [v]देव द्योतमान स्तोतव्य वा हे [v]सोम [v]देवपानः देवैः पातव्यस्त्वं [v]देवताते देवैस्तते वितते यज्ञे [v]महे महते [v]प्सरसे भक्षणाय देवानां पानाय [v]एव एव [v]पवस्व क्षर । ततो वयं [v]हिताः त्वया प्रेरिताः सन्तः [v]समर्ये मरणधर्मसहिते संग्रामे [v]महश्चित् महतो बलाधिकानपि शत्रून् [v]स्मसि [v]हि अभिभवेम खलु । किंच [v]पुनानः पूयमानस्त्वं [v]रोदसी द्यावापृथिव्यौ [v]सुस्थाने अस्माकं शोभनावासस्थाने मस्थौ [v]कृधि कुरु ॥

अश्वो न क्रन्दो वृषभिर्युजानः सिंहो न भीमो मनसो जवीयान् ।
अर्वाचीनैः पथिभिर्ये रजिष्ठा आ पवस्व सौमनसं न इन्दो ॥ २८ ॥

अश्वः । न । क्रदः । वृषऽभिः । युजानः । सिंहः । न । भीमः । मनसः । जवीयान् ।
अर्वाचीनैः । पथिऽभिः । ये । रजिष्ठाः । आ । पवस्व । सौमनसम् । नः । इन्दो इति ॥२८॥

हे सोम [v]वृषभिः ऋत्विग्भिः सोममभिषुण्वद्भिः [v]युजानः योज्यमानस्त्वम् [v]अश्वो [v]न अश्व इव [v]क्रदः क्रन्दसि शब्दायसे । कीदृशः । [v]सिंहो [v]न सिंह इव [v]भीमः शत्रूणां भयंकरः तथा [v]मनसः अपि [v]जवीयान् वेगवत्तरः । [v]अर्वाचीनैः अभिमुखैः [v]पथिभिः मार्गैः [v]ये मार्गाः [v]रजिष्ठाः अत्यन्तमृजवो भवन्ति । ' विभाषर्जोश्छन्दसि ' इत्युकारस्य रादेशः । हे [v]इन्दो दीप्यमान सोम तैर्मार्गैः [v]नः अस्माकं [v]सौमनसं सौमनस्यम् [v]आ [v]पवस्व आप्रापय ॥

१. त-भ६-मु-द्युलोके' ।

शतं धारा देवजाता असृग्रन्त्सहस्रमेनाः कवयो मृजन्ति ।
इन्दो सनित्रं दिव आ पवस्व पुरएतासि महतो धनस्य ॥ २९ ॥

शतम् । धाराः । देवऽजाताः । असृग्रन् । सहस्रम् । एनाः । कवयः । मृजन्ति ।
इन्दो इति । सनित्रम् । दिवः । आ । पवस्व । पुरःऽएता । असि । महतः । धनस्य ॥२९॥

हे सोम ᵛदेवजाताः देवार्थं प्रादुर्भूताः ᵛशतं शतसंख्याकास्त्वदीयाः ᵛधाराः ᵛअसृग्रन् सृज्यन्ते । ततः ᵛकवयः क्रान्तदर्शिन ऋत्विजः ᵛसहस्रं बहुविधाः ᵛएनाः त्वदीया धाराः ᵛमृजन्ति अलंकुर्वन्ति । यद्वा । सहस्रमनेकधा मृजन्ति शोधयन्ति । हे ᵛइन्दो ᵛसनित्रं भजनसाधनं धनं ᵛदिवः द्युलोकादस्माकं पुत्रादीनां च ᵛआ ᵛपवस्व आप्रापय । कुतोऽस्य धनमिति चेत् तत्राह । ᵛमहतः प्रभूतस्य[1] ᵛधनस्य ᵛपुरएता पुरतो गन्ता ᵛअसि भवसि । तस्मादेहीति ॥

दिवो न सर्गा असस्रुग्रह्वां राजा न मित्रं प्र मिनाति धीरः ।
पितुर्न पुत्रः क्रतुभिर्यतान आ पवस्व विशे अस्या अजीतिम् ॥ ३० ॥

दिवः । न । सर्गाः । असस्रुग्रम् । अह्वाम् । राजा । न । मित्रम् । प्र । मिनाति । धीरः ।
पितुः । न । पुत्रः । क्रतुऽभिः । यतानः । आ । पवस्व । विशे । अस्यै । अजीतिम् ॥३०॥

ᵛदिवो ᵛन यथा दिवो द्योतमानस्यादित्यस्य[2] ᵛअह्वां संबन्धिनः ᵛसर्गाः रश्मयः ᵛअससृग्रं विसृज्यन्ते तद्वत् सोमस्य सर्गाः । सृज्यन्त इति सर्गा धाराः । विसृज्यन्ते । सृजेर्व्यत्ययेन कर्मार्थे लङि ' बहुलं छन्दसि ' इति शस्य ᵛलुः । ह्रेरमादेशश्छान्दसः । ᵛधीरः प्राज्ञः ᵛराजा अयं सोमः ᵛमित्रं सखायं ᵛन ᵛप्र ᵛमिनाति न हिनस्ति । ᵛक्रतुभिः कर्मभिः ᵛयतानः यतमानः ᵛपुत्रः ᵛपितुर्न पितुर्यथापराभवं[3] करोति तद्वत् कर्मभिर्यतमानस्त्वम् ᵛअस्यै ᵛविशे प्रजायै ᵛअजीतिम्* अपराभवम् ᵛआ ᵛपवस्व आप्रापय । यथा न पराजिता भवन्ति तथा कुर्वित्यर्थः[3] ॥ ॥ १६ ॥

प्र ते धारा मधुमतीरसृग्रन्वाराण्यत्पूतो अत्येष्यव्यान् ।
पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः ॥ ३१ ॥

प्र । ते । धाराः । मधुऽमतीः । असृग्रन् । वाराण् । यत् । पूतः । अतिऽएषि । अव्यान् ।
पवमान । पवसे । धाम । गोनाम् । जज्ञानः । सूर्यम् । अपिन्वः । अर्कैः ॥ ३१ ॥

ᵛते तव स्वभूताः ᵛमधुमतीः मधुमत्यः ᵛधाराः ᵛप्र ᵛअसृग्रन् तदा प्रसृज्यन्ते ᵛयत् यदा ᵛपूतः वसतीवरीभिस्त्वम् ᵛअव्यान् अविभवान् ᵛवाराण् वालान् पवित्राणि ᵛअत्येषि अतीत्य गच्छसि । किंच हे ᵛपवमान ᵛधाम धारकं ᵛगोनां गवां पयो लक्षीकृत्य ᵛपवसे । ततः ᵛजज्ञानः जायमानस्त्वम् ᵛअर्कैः अर्चनीयैः स्वतेजोभिः ᵛसूर्यम् आदित्यम् ᵛअपिन्वः पूरयसि ॥

---

१. त-भ६ मु-प्रभूत* । २. त-भ६-द्योतमानस्त्वमादित्यस्य । ३. ग-पितुर्यथा पुत्रः पराभवं न करोति तथा अस्यै विशे यथा न पराजयो भवति तथा आपवस्व रक्षणं कुर्वतीत्यर्थः । *त-भ१.२.४.५-मु-अजीतिमपराजितिं ।

कनिक्रददनु पन्थामृतस्य शुक्रो वि भास्यमृतस्य धाम ।
स इन्द्राय पवसे मत्सरवान् हिन्वानो वाचं मतिभिः कवीनाम् ॥ ३२ ॥

कनिक्रदत् । अनु । पन्थाम् । ऋतस्य । शुक्रः । वि । भासि । अमृतस्य । धाम ।
सः । इन्द्राय । पवसे । मत्सरऽवान् । हिन्वानः । वाचम् । मतिऽभिः । कवीनाम् ॥ ३२ ॥

अभिषूयमाणः स सोमः ऋतस्य सत्यभूतस्य यज्ञस्य पन्थानं मार्गमभि कनिक्रदत् पुनः-पुनः शब्दायते । अथ प्रत्यक्षः । अमृतस्य अमरणधर्मस्य धाम स्थानभूतः । मरणरहित इत्यर्थः । तादृशः शुक्रः शुक्लवर्णस्त्वं वि भासि विशेषेण राजसि । मत्सरवान् मदकररसयुक्तः सः त्वम् इन्द्राय इन्द्रार्थं पवसे क्षरसि । कीदृशः । कवीनां स्तोतॄणां मतिभिः[1] सह वाचं शब्दं हिन्वानः प्रेरयन् पवसे ॥

दिव्यः सुपर्णोऽव चक्षि सोम पिन्वन्धाराः कर्मणा देववीतौ ।
एन्दो विश कलशं सोमधानं क्रन्दन्निहि सूर्यस्योप रश्मिम् ॥ ३३ ॥

दिव्यः । सुऽपर्णः । अव । चक्षि । सोम । पिन्वन् । धाराः । कर्मणा । देवऽवीतौ ।
आ । इन्दो इति । विश । कलशम् । सोमऽधानम् । क्रन्दन् । इहि । सूर्यस्य । उप । रश्मिम् ॥ ३३ ॥

हे सोम दिव्यः दिवि भवः सुपर्णः सुपतनस्त्वम् अव चक्षि अवस्तात् पश्य[2] । चष्टेर्लटि सिपि व्यत्ययेन परस्मैपदम् । किं कुर्वन् । देववीतौ देवानां हविर्भक्षणस्थाने यज्ञे कर्मणा धाराः पिन्वन् क्षरन् । किंच हे इन्दो सोमधानं कलशम् आ विश । क्रन्दन् शब्दाय-मानस्त्वं सूर्यस्य[3] प्रेरकस्यादित्यस्य रश्मिं कान्तिम् उप इहि उपगच्छ ॥

तिस्रो वाचं ईरयति प्र वह्निर्ऋतस्य धीतिं ब्रह्मणो मनीषाम् ।
गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥ ३४ ॥

तिस्रः । वाचः । ईरयति । प्र । वह्निः । ऋतस्य । धीतिम् । ब्रह्मणः । मनीषाम् ।
गावः । यन्ति । गोऽपतिम् । पृच्छमानाः । सोमम् । यन्ति । मतयः । वावशानाः ॥ ३४ ॥

वह्निः वोढा यजमानः तिस्रो वाचः ऋग्यजुःसामात्मिकाः स्तुतीः प्रेरयति । तथा ऋतस्य यज्ञस्य धीतिं धारयित्रीं ब्रह्मणः परिवृढस्य सोमस्य मनीषां मनस ईशित्रीं कल्याणीं वाचं च प्रेरयति । किंच गोपतिं वृषभं यथा गावोऽभिगच्छन्ति तद्वद्वां स्वामिनं सोमं गावः पृच्छमानाः पृच्छन्त्यः सत्यः यन्ति । स्वपयसा मिश्रयितुमभिगच्छन्ति । तथा वावशानाः कामयमानाः मतयः स्तोतारः सोमं यन्ति स्तोतुमभिगच्छन्ति ॥

सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।
सोमः सुतः पूयते अज्यमानः सोमे अर्का त्रिष्टुभः सं नवन्ते ॥ ३५ ॥

सोमम् । गावः । धेनवः । वावशानाः । सोमम् । विप्राः । मतिऽभिः । पृच्छमानाः ।
सोमः । सुतः । पूयते । अज्यमानः । सोमे । अर्काः । त्रिऽस्तुभः । सम् । नवन्ते ॥ ३५ ॥

---

१. भ१(२)–मतिभिः स्तुतिभिः । २. त-भ६-मु–पश्य च । ३. ग-त३-भ५–सूर्यस्य सर्वस्य ।

[v]धेनवः प्रीणयित्र्यः [v]गावः [v]सोमं [v]वावशानाः कामयमाना भवन्ति। [v]विप्राः मेधाविनः स्तोतारः [v]मतिभिः[1] [v]पृच्छमानाः पृच्छन्तो भवन्ति। [v]अज्यमानः गोभिः सिच्यमानः [v]सुतः अभिषुतः [v]सोमः ऋत्विग्भिः परिषूयते। तथा [v]त्रिष्टुभः त्रिष्टुप्रूपाः [v]अर्काः अस्माभिः क्रियमाणा एते मन्त्राः [v]सोमे [v]सं [v]नवन्ते संगच्छन्ते ॥ ॥ १७ ॥

एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति।
इन्द्रमा विश बृहता रवेण वर्धया वाचं जनया पुरंधिम् ॥ ३६ ॥

एव। नः। सोम। परिऽसिच्यमानः। आ। पवस्व। पूयमानः। स्वस्ति।
इन्द्रम्। आ। विश। बृहता। रवेण। वर्धय। वाचम्। जनय। पुरम्ऽधिम्॥ ३६ ॥

हे [v]सोम [v]परिषिच्यमानः परितः पात्रेषु सिच्यमानः [v]पूयमानः त्वं [v]नः अस्माकम् [v]एव [v]स्वस्ति अविनाशम् [v]आ [v]पवस्व आप्रापय। किंच [v]बृहता महता [v]रवेण शब्देन सह [v]इन्द्रमा [v]विश प्रविश। तथा[2] [v]वाचं स्तुतिलक्षणां [v]वर्धय। किंच [v]पुरंधिं बहुधि प्रज्ञानं [v]जनय अस्मभ्यमुत्पादय। वाक्यभेदादनिघातः ॥

आ जागृविर्विप्र ऋता मतीनां सोमः पुनानो असदच्चमूषु।
सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥ ३७ ॥

आ। जागृविः। विप्रः। ऋता। मतीनाम्। सोमः। पुनानः। असदत्। चमूषु।
सपन्ति। यम्। मिथुनासः। निऽकामाः। अध्वर्यवः। रथिरासः। सुऽहस्ताः॥ ३७ ॥

[v]जागृविः जागरणशीलः [v]ऋता। 'सुपां सुलुक्' इति षष्ठ्या आकारः। ऋतानां सत्यानां [v]मतीनां स्तुतीनां [v]विप्रः ज्ञाता सः [v]सोमः [v]पुनानः पूयमानः सन् [v]चमूषु चमसेषु [v]आ [v]असदत् आसीदति। [v]मिथुनासः परस्परं संगताः [v]निकामाः नितरां कामयमानाः [v]रथिरासः यज्ञस्य नेतारः [v]सुहस्ताः कल्याणपाणयः [v]अध्वर्यवः पवित्रे [v]यं सोमं [v]सपन्ति स्पृशन्ति। 'षप समवाये'। 'सपतिः स्पृशतिकर्मा' (निरु. ५.१६) इति नैरुक्ताः ॥

स पुनान उप सूरे न धातोभे अप्रा रोदसी वि ष आवः।
प्रिया चिद्यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ॥ ३८ ॥

सः। पुनानः। उप। सूरे। न। धाता।
आ। उभे इति। अप्राः। रोदसी इति। वि। सः। आवरित्यावः।
प्रिया। चित्। यस्य। प्रियसासः। ऊती। सः। तु। धनम्। कारिणे। न। प्र। यंसत्॥३८॥

[v]पुनानः पूयमानः [v]सः सोम इन्द्रे [v]उप गच्छति। तत्र दृष्टान्तः। [v]सूरे [v]न यथा सूर्ये [v]धाता संवत्सर उपगच्छति। 'संवत्सरो वै धाता संवत्सरेणैवास्मै प्रजाः प्रजनयति' (तै. ब्रा. १.७.२.१) इत्याम्नानात्। किंच [v]उभे [v]रोदसी द्यावापृथिव्यौ [v]आ [v]अप्राः स्वमहिम्ना आपूरयति। तथा [v]सः सोमः [v]वि [v]आवः स्वतेजसा तमांसि विवृणोति। वृणोतेः 'मन्त्रे घस०' इति

---

१. भ१(२)-मतिभिः स्तुतिभिः। २. ग-त३.४.६-भ१.६.७-तथा वर्धया;त१.२.७-भ२-तथा वर्धय।

क्केलुक्। 'छन्दस्यपि दृश्यते' इत्याडागमः[1]। 'पूर्वपदात्' इति स इत्यस्य सांहितिकं षत्वम्। vप्रिया। षष्ठ्या आकारः। प्रियस्य vयस्य सोमस्य यद्वा[2] प्रिया प्रियाणि प्रयच्छतो यस्य सोमस्य[2] vप्रियसासः अत्यन्तं प्रियतमा धाराः vऊती ऊत्यै रक्षणाय भवन्ति। vसः vतु क्षिप्रमस्मभ्यं vधनं vप्र vयंसत् प्रयच्छतु। यच्छतेर्लेटि सिप्यडागमः। तत्र दृष्टान्तः। vकारिणे vन भृतकाय भृतिं यथा प्रयच्छन्ति तद्वत्॥

स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत्।
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन्॥ ३९॥

सः। वर्धिता। वर्धनः। पूयमानः। सोमः। मीढ्वान्। अभि। नः। ज्योतिषा। आवीत्।
येन। नः। पूर्वे। पितरः। पदऽज्ञाः। स्वःऽविदः। अभि। गाः। अद्रिम्। उष्णन्॥३९॥

vवर्धिता देवानां स्वकलाप्रदानेन वर्धयिता vवर्धनः स्वयं वर्धमानः vपवित्रेण vपूयमानः vमीढ्वान् कामानां सेक्ता vसः vसोमः vनः अस्मान् vज्योतिषा स्वतेजसा vअभि vआवीत् अभिरक्षतु। vयेन सोमेन vपदज्ञाः पणिभिरपहृतानां गवां पदानि जानन्तः vस्वर्विदः सर्वज्ञाः[3] सूर्यं जानन्तो वा[3] vनः अस्माकं vपूर्वे चिरंतनाः vपितरः अङ्गिरसः vगाः पशूनभिलक्ष्य vअद्रिमुष्णन् शिलोच्चयमुष्णन्। सोमतेजसान्धकारावृतं शिलोच्चयं गत्वा पशूनाहरन्नित्यर्थः। उपरिह मुष्णातिसमानकर्मा। यद्वा। मुष्णातेर्लङि वर्णलोपः॥

अक्रान्त्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा।
वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः॥ ४०॥

अक्रान्। समुद्रः। प्रथमे। विऽधर्मन्। जनयन्। प्रऽजाः। भुवनस्य। राजा।
वृषा। पवित्रे। अधि। सानौ। अव्ये। बृहत्। सोमः। ववृधे। सुवानः। इन्दुः॥ ४०॥

vसमुद्रः। यस्मादापः[4] समुद्रवन्ति स समुद्रः। अपां वर्षकः[4] vराजा सोमः vप्रथमे विस्तृते vभुवनस्य उदकस्य vविधर्मन् विधारकेऽन्तरिक्षे vप्रजाः vजनयन् उत्पादयन् vअक्रान् सर्वमतिक्रामति। क्रमतेर्लुङि तिपीडभावे वृद्धौ च कृतायां सिज्लोपे मकारस्य 'मो नो धातोः' इति नकारे रूपम्। vवृषा कामानां वर्षिता vसुवानः अभिषूयमाणः vइन्दुः दीप्तः सः vसोमः vअधि अधिकं vसानौ समुच्छ्रिते vअव्ये अविभवे vपवित्रे vबृहत् प्रभूतं vववृधे वर्धते॥ ॥ १८॥

महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान्।
अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः॥ ४१॥

महत्। तत्। सोमः। महिषः। चकार। अपाम्। यत्। गर्भः। अवृणीत। देवान्।
अदधात्। इन्द्रे। पवमानः। ओजः। अजनयत्। सूर्ये। ज्योतिः। इन्दुः॥ ४१॥

---

१. त-भ६-मु-इत्यडागमः। २. त१.२.५.६.७-'यद्वा ...सोमस्य' नास्ति। ३. त-सर्वं जानंतो वा; भ६-सर्वं जानंतो। ४. ग-समुद्रवत्यस्मादाप इति। ५. त१.२.५.६.७-अविमये; त४-अविसये।

vमहिषः महान् पूज्यो वा vसोमः vमहत् प्रभूतं vतत् कर्म vचकार अकरोत्। किं तत्। vअपां vगर्भः उदकानां गर्भभूतो जनयितृत्वाज्जन्यत्वाच्च स सोमः vदेवान् vअवृणीत समभजतेति vयत् vतत् कृतवानिति। किंच vपवमानः पूयमानः सोमः vओजः सोमपानेन[1] जन्यं बलम् vइन्द्रे vअदधात् व्यदधात्। तथा vइन्दुः सोमः vसूर्ये vज्योतिः तेजः vअजनयत्॥

मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः।
मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम॥ ४२॥

मत्सि। वायुम्। इष्टये। राधसे। च। मत्सि। मित्रावरुणा। पूयमानः।
मत्सि। शर्धः। मारुतम्। मत्सि। देवान्। मत्सि। द्यावापृथिवी इति। देव। सोम॥ ४२॥

हे सोम त्वं vवायुं vमत्सि मादय[2]। किमर्थम्। vइष्टये अस्माकमेषणायान्नाय[3] vराधसे धनाय vच। तथा vपूयमानः पवित्रेण त्वं vमित्रावरुणा मित्रावरुणौ च vमत्सि तर्पयसि। किंच vमारुतं मरुतां स्वभूतं vशर्धः बलं च vमत्सि। तथा vदेवान् इन्द्रादीन् vमत्सि हर्षयसि। हे vदेव स्तोतव्य[4] हे vसोम द्यावापृथिव्यौ च vमत्सि मादय। एतान् हर्षयुक्तान् कृत्वास्मभ्यं धनं प्रयच्छेत्यर्थः॥

ऋजुः पवस्व वृजिनस्य हन्तापामीवां बाधमानो मृधश्च।
अभिश्रीणन्पयः पयसाभि गोनामिन्द्रस्य त्वं तव वयं सखायः॥ ४३॥

ऋजुः। पवस्व। वृजिनस्य। हन्ता। अप। अमीवाम्। बाधमानः। मृधः। च।
अभिऽश्रीणन्। पयः। पयसा। अभि। गोनाम्। इन्द्रस्य। त्वम्। तव। वयम्। सखायः॥४३॥

हे सोम vऋजुः ऋजुगमनः[5] सन् vपवस्व क्षर। किं कुर्वन्। vवृजिनस्य उपद्रवस्य vहन्ता। vअमीवां रोगरूपं राक्षसम् vअप vबाधमानः। तथा अस्मदीयान् vमृधः हिंसकान् शत्रून् vच बाधमानः सन् पवस्व। ततः vपयः आत्मीयं रसं vगोनां गवां vपयसा क्षीरेण vअभिश्रीणन् अभिसंयोजयन् पात्राणि vअभि गच्छसि। अपि च vत्वम् vइन्द्रस्य सखासि हे सोम vतव vवयं vसखायः स्तुत्यस्तोतृत्वयष्टृयष्टव्यत्वलक्षणेन सखिभूताः स्मः॥

मध्वः सूदं पवस्व वस्व उत्सं वीरं च न आ पवस्वा भगं च।
स्वदस्वेन्द्राय पवमान इन्दो रयिं च न आ पवस्वा समुद्रात्॥ ४४॥

मध्वः। सूदम्। पवस्व। वस्वः। उत्सम्। वीरम्। च। नः। आ। पवस्व। भगम्। च।
स्वदस्व। इन्द्राय। पवमानः। इन्दो इति। रयिम्। च। नः। आ। पवस्व। समुद्रात्॥४४॥

हे सोम vमध्वः माधुर्यस्य vसूदं क्षारयितारं घनीभूतं वा vवस्वः वसुनो धनस्य vउत्सम् उत्स्यन्दकं रसं vपवस्व। किंच vनः अस्मभ्यं vवीरं पुत्रम् vआ vपवस्व आप्रापय। तथा vभगं भजनीयं धनं vच देहि। हे vइन्दो vपवमानः पूयमानः सन् vइन्द्राय vस्वदस्व रुचितो भव।

---

१. भ६–सोमपान°। २. भ१(२) मादयसि। ३. भ१(२)–°मेषणीयायान्नाय। ४. ग–द्योतमान। ५. त४–शीघ्रगमनः।

ततस्त्वं ᵛनः अस्मभ्यं ᵛसमुद्रात् अन्तरिक्षात् ᵛरयिं धनं पुत्रं वा । राति ददाति क्षीरमिति रयिर्गौर्वा । तां[1] वा ᵛआ[1] ᵛपवस्व देहि ॥

सोमः सुतो धारयात्यो न हित्वा सिन्धुर्न निम्नमभि वाज्यक्षाः ।
आ योनिं वन्यमसदत्पुनानः समिन्दुर्गोभिरसरत्समद्भिः ॥ ४५ ॥

सोमः । सुतः । धारया । अत्यः । न । हित्वा । सिन्धुः । न । निम्नम् । अभि । वाजी । अक्षारिति । आ । योनिम् । वन्यम् । असदत् । पुनानः । सम् । इन्दुः । गोभिः । असरत् । सम् । अत्कभिः ॥४५॥

ᵛसुतः अभिषुतः ᵛसोमः ᵛधारया स्वीयया ᵛअत्यो ᵛन अतनशीलोऽश्व इव ᵛहित्वा गत्वा । हिनोतेः क्तनिपि[2] रूपम् । किंच ᵛवाजी बलवान् सोमः ᵛसिन्धुर्न यथा सिन्धुः स्यन्दमाना नदी ᵛनिम्नं प्रदेशमभिगच्छति तद्वन्निम्नमधरभाविनं कलशम् ᵛअभि ᵛअक्षाः अभिक्षरति । ततः ᵛपुनानः पूयमानः सोमः ᵛवन्यं वृक्षभवं ᵛयोनिं स्थानं कलशम् ᵛआ ᵛअसदत् आसीदति । सोऽयम् ᵛइन्दुः सोमः ᵛगोभिः गोविकारैः क्षीरादिभिः श्रयणैः ᵛसम् ᵛअसरत संसरति । तथा ᵛअद्भिः वसतीवरीभिश्च संगच्छते ॥ ॥ १९ ॥

एष स्य ते पवत इन्द्र सोमश्चमूषु धीर उशते तवस्वान् ।
स्वर्चक्षा रथिरः सत्यशुष्मः कामो न यो देवयतामसर्जि ॥ ४६ ॥

एषः । स्यः । ते । पवते । इन्द्र । सोमः । चमूषु । धीरः । उशते । तवस्वान् ।
स्वःऽचक्षाः । रथिरः । सत्यऽशुष्मः । कामः । न । यः । देवऽयताम् । असर्जि ॥ ४६ ॥

हे ᵛइन्द्र ᵛउशते कामयमानाय ᵛते तुभ्यं त्वदर्थं ᵛधीरः प्राज्ञः ᵛतवस्वान् वेगवान् ᵛस्यः सः ᵛएषः ᵛसोमः ᵛचमूषु चमसेषु ᵛपवते क्षरति । ᵛस्वर्चक्षाः सर्वदर्शनः ᵛरथिरः रथवान् ᵛसत्यशुष्मः यथार्थबलः ᵛयः सोमः ᵛदेवयतां देवानिच्छतां यजमानानां ᵛकामो ᵛन काम इव ᵛअसर्जि अभृज्यत । अदीयतेत्यर्थः ॥

एष प्रत्नेन वयसा पुनानस्तिरो वपाँसि दुहितुर्दधानः ।
वसानः शर्म त्रिवरूथमप्सु होतेव याति समनेषु रेभन् ॥ ४७ ॥

एषः । प्रत्नेन । वयसा । पुनानः । तिरः । वपाँसि । दुहितुः । दधानः ।
वसानः । शर्म । त्रिऽवरूथम् । अप्ऽसु । होताऽइव । याति । समनेषु । रेभन् ॥ ४७ ॥

ᵛप्रत्नेन पूर्वकालीनेन ᵛवयसा अन्नेन ᵛपुनानः पूयमानः । अन्नात्मिकया धारया क्षरन्नित्यर्थः । तादृशः ᵛदुहितुः सर्वस्य दोग्ध्र्याः पृथिव्याः ᵛवपाँसि । वर्प इति रूपनाम वृणोति शरीरमिति । रूपाणि ᵛतिरः ᵛदधानः स्वतेजसा तिरस्कुर्वन्नाच्छादयन् तथा ᵛत्रिवरूथं त्रिभूमिकोपेतम् । यद्वा । त्रयः शीतातपवर्षाः । तेषां निवारकम् । ᵛशर्म यज्ञगृहं ᵛवसानः आच्छादयन् ᵛअप्सु वसतीवरीषु स्थितः ᵛएषः सोमः ᵛहोतेव यथा होता स्तुतिध्वनिं कुर्वन् यज्ञेषु याति तद्वत् ᵛरेभन् शब्दायमानः सन् ᵛसमनेषु । समन्ति कर्माणि धृष्टाः प्रगल्भा यन्त्यत्रेति समना यज्ञाः । तेषु ᵛयाति गच्छति ॥

१. त१.२.३.५.६.७-म२.६-तं आ; त४-तां आ । २. त१.२.५.६.७-म६-क्विपि; त४-क्विनिपि ।

नू नस्त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः ।
अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा ॥ ४८ ॥

नु । नः । त्वम् । रथिरः । देव । सोम । परि । स्रव । चम्वोः । पूयमानः ।
अप्ऽसु । स्वादिष्ठः । मधुऽमान् । ऋतऽवा । देवः । न । यः । सविता । सत्यऽमन्मा ॥ ४८ ॥

हे [v]देव काम्यमान हे [v]सोम [v]रथिरः रथवान् [v]त्वं [v]नः अस्माकं स्वभूते यज्ञे [v]चम्वोः अधिषवणफलकयोः [v]पूयमानः सन् [v]अप्सु वसतीवरीषु [v]नु क्षिप्रं [v]परि [v]स्रव परितः क्षर । [v]स्वादिष्ठः स्वादुतमोऽन एव [v]मधुमान् माधुर्ययुक्तः [v]ऋतावा यज्ञवान् [v]सविता सर्वस्य प्रेरकः [v]यः त्वं [v]देवो [v]न देव इव [v]सत्यमन्मा सत्यस्तुतिको भवसि स त्वं परिस्रवेति ॥

अभि वायुं वीत्यर्षा गृणानोऽभि मित्रावरुणा पूयमानः ।
अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥ ४९ ॥

अभि । वायुम् । वीती । अर्ष । गृणानः । अभि । मित्रावरुणा । पूयमानः ।
अभि । नरम् । धीऽजवनम् । रथेऽस्थाम् । अभि । इन्द्रम् । वृषणम् । वज्रऽबाहुम् ॥ ४९ ॥

हे सोम [v]गृणानः स्तूयमानस्त्वं [v]वीती । 'सुपां सुलुक्०' इति चतुर्थ्याः पूर्वसवर्णदीर्घः । वीत्यै पानाय [v]वायुम् [v]अभि [v]अर्ष अभिगच्छ । तथा पवित्रेण[1] [v]पूयमानः त्वं [v]मित्रावरुणा मित्रावरुणौ च पानायाभिगच्छ । किंच [v]नरं सर्वस्य नेतारं [v]धीजवनं बुद्ध्या समं वेगं कुर्वाणं [v]रथेष्ठां रथेस्थां रथे तिष्ठन्तम् । अनेनाश्विनावभिधीयेते । एकवचनं प्रत्येकविवक्षया समुदायविवक्षया[2] वा । एतादृशावश्विनौ च [v]अभि गच्छ । तथा [v]वृषणं कामानां वर्षकं [v]वज्रबाहुं वज्रयुक्तबाहुम् [v]इन्द्रं च त्वं पानाय [v]अभि गच्छ ॥

अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।
अभि चन्द्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥ ५० ॥

अभि । वस्त्रा । सुऽवसनानि । अर्ष । अभि । धेनूः । सुऽदुघाः । पूयमानः ।
अभि । चन्द्रा । भर्तवे । नः । हिरण्या । अभि । अश्वान् । रथिनः । देव । सोम ॥ ५० ॥

हे [v]सोम त्वमस्माकं[3] [v]सुवसनानि सुपरिधानानि [v]वस्त्रा वस्त्राणि [v]अभि [v]अर्ष अभिगमय । यद्वा । सुवसनानि शोभनवस्त्रसहितानि वस्त्रा आच्छादकानि धनान्यभिगमय । किंच [v]पूयमानः पवित्रेण त्वं [v]सुदुघाः सुष्ठु पयसो दोग्ध्रीः [v]धेनूः नवप्रसूतिका गाः [v]अभि प्रापय । अपि च [v]चन्द्रा चन्द्राण्याह्लादकानि [v]हिरण्या हिरण्यानि [v]भर्तवे भरणाय पोषणाय [v]नः अस्माकम् [v]अभि गमय । तथा हे [v]देव स्तोतव्य हे [v]सोम [v]रथिनः रथवतः [v]अश्वान् अस्माकम् [v]अभि प्रापय ॥ ॥ २० ॥

अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।
अभि येन द्रविणमश्नवामाभ्यर्षेयं जमदग्निवन्नः ॥ ५१ ॥

---

१. त-भ६-पवित्रे । २. त-'समुदायविवक्षया' नास्ति । ३. ग-त-भ१.२.४.६-अस्माकं ।

अभि । नः । अर्ष । दिव्या । वसूनि । अभि । विश्वा । पार्थिवा । पुयमानः ।
अभि । येन । द्रविणम् । अश्नवाम । अभि । आर्षेयम् । जमदग्निऽवत् । नः ॥ ५१ ॥

हे सोम पवित्रेण ᵛपूयमानः त्वं ᵛदिव्या दिव्यानि दिवि भवानि ᵛवसूनि धनानि ᵛनः अस्माकम् ᵛअभि ᵛअर्ष अभिगमय । तथा ᵛपार्थिवा पार्थिवानि पृथिव्यां भवानि ᵛविश्वा सर्वाणि[१] धनानि ᵛअभि गमय । तथा ᵛयेन त्वदीयेन सामर्थ्येन ᵛद्रविणं धनं वयम् ᵛअभि ᵛअश्नवाम अभिव्याप्नुयाम तत् सामर्थ्यमभिगमय । किंच ᵛआर्षेयम् आर्षाणामृषिपुत्राणां योग्यं धनं ᵛजमदग्निवत् जमदग्नेर्यथा त्वं प्रापयः एवं ᵛनः अस्माकमपि ᵛअभि अर्ष । यद्वा । आर्षेयमार्षाणां योग्यं मन्त्रं जमदग्नेः स्वभूतं मन्त्रं यथा स्वादुतममकार्षीः एवमस्माकं तादृशं मन्त्रं स्वादुतमं कुर्विति कुत्सो नामर्षिः प्रार्थयते ॥

अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।
ब्रध्नश्चिदत्र वातो न जूतः पुरुमेधश्चित्तकवे नरं दात् ॥ ५२ ॥

अया । पवा । पवस्व । एना । वसूनि । माँश्चत्वे । इन्दो इति । सरसि । प्र । धन्व ।
ब्रध्नः । चित् । अत्र । वातः । न । जूतः । पुरुऽमेधः । चित् । तकवे । नरम् । दात् ॥५२॥

हे सोम ᵛअया अनया ᵛपवा पवमानया धारया सह ᵛएना एनानि ᵛवसूनि धनानि ᵛपवस्व क्षर । पवा । 'पूङ् पवने' । 'अन्येभ्योऽपि दृश्यन्ते' इति विचप्रत्ययः । आधंधातुकलक्षणो गुणः । 'सावेकाचः°' इति तृतीयाया उदात्तत्वम् । तथा हे ᵛइन्दो त्वं ᵛमाँश्चत्वे मन्यमानानां[२] चातके ᵛसरसि उदके वसतीवर्याख्ये ᵛप्र ᵛधन्व प्रगच्छ । ततः ᵛअत्र अस्मिन् सोमे पूयमाने सति ᵛब्रध्नश्चित् सर्वेषां प्रज्ञापको मूलभूतो वादित्योऽपि ᵛवातो ᵛन वात इव ᵛजूतः वेगितः सन् किंच ᵛपुरुमेधश्चित् बहुविधयज्ञ इन्द्राग्निदिन्द्रोऽपि ᵛतकवे । तकतिर्गतिकर्मसु पठितः । अस्मादौणादिक उन्प्रत्ययः । सोममभिगच्छते स्तुतिभिर्मह्यं ᵛनरं कर्मनेतारं पुत्रं ᵛदात् प्रयच्छतु । हे[३] सोम त्वया तर्पितौ सन्ताविन्द्रादित्यौ* मह्यं पुत्रं प्रयच्छतामित्यर्थः[३] ॥

उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।
षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥ ५३ ॥

उत । नः । एना । पवया । पवस्व । अधि । श्रुते । श्रवाय्यस्य । तीर्थे ।
षष्टिम् । सहस्रा । नैगुतः । वसूनि । वृक्षम् । न । पक्वम् । धूनवत् । रणाय ॥ ५३ ॥

हे सोम ᵛउत अपि च ᵛश्रवाय्यस्य सर्वैः श्रवणीयस्य सोमस्य तव ᵛश्रुते प्रसिद्धे । यद्वा । षष्ठ्यर्थे चतुर्थी । श्रुतस्य[४] शब्दस्य ᵛतीर्थे स्थाने ᵛनः अस्माकं स्वभूते यज्ञे ᵛएना अनया ᵛपवया पूयमानया धारया ᵛअधि[५] अधिकं ᵛपवस्व क्षर । ᵛनैगुतः । नीचीनं गवन्ते[६] शब्दायन्त इति निगुतः शत्रवः । तेषां हन्तृत्वेन संबन्धी सोऽयं सोमः ᵛषष्टिं ᵛसहस्रा षष्टिसंख्याकानि सहस्राणि

१. भ७–सर्वाणि वसूनि । २. त-भ६–वर्तमानानां । ३. ग-त३-भ१.५.७–'हे...°मित्यर्थः' नास्ति । * त–संतौ चंद्रादित्यौ । ४. ग-त-भ-मु–श्रुतः । ५. ग-त-भ–'अधि' नास्ति । ६. त१.२.४. ५–गंतात; त६–गंता; त७–गच्छन्; भ६–गच्छंते ।

Vवसूनि धनानि Vरणाय शत्रूणां जयार्थं Vधूनवत् अस्माकमकम्पयत्। प्रायच्छदिति यावत्। कथमिव। Vवृक्षं Vन Vपक्वं पक्वफलं वृक्षं यथा कम्पयति फलार्थी तद्वत्॥

महीमे अस्य वृषनामं शूषे माँश्चत्वे वा पृशने वा वधत्रे।
अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः॥ ५४॥

महि। इमे इति। अस्य। वृषनाम। शूषे इति। माँश्चत्वे। वा। पृशने। वा। वधत्रे इति। अस्वापयत्। निऽगुतः। स्नेहयत्। च। अप। अमित्रान्। अप। अचितः। अच। इतः॥५४॥

Vमहि महती[1] प्रभूते Vवृषनाम। 'सुपां सुलुक्०' इति सुपो लुक्। वृषनामनी वर्षणनमने। शत्रूणां वर्षणं शत्रूणां नमनम्। Vइमे एते द्वे कर्मणी Vअस्य सोमस्य Vशूषे सुखकरे भवतः। ये च कर्मणी Vमाँश्चत्वे। अश्वनामैतत् मश्नु चरतीति। अश्वैः क्रियमाणे युद्धे। तत्साध्यत्वाद्युद्धमिह गृह्यते। Vवा अपि वा Vपृशने स्पर्शनसाध्ये बाहुयुद्धे Vवधत्रे शत्रूणां हिंसनशीले भवतः। सोऽयं Vनिगुतः नीचैः शब्दायमानान् शत्रून् Vअस्वापयन् ताभ्यामसूपुपत्। अवधीदित्यर्थः। किंच Vस्नेहयत् प्राद्रवयत् संग्रामाच्छत्रून्। अथ प्रत्यक्षकृतः। हे सोम स त्वम् Vअमित्रान् शत्रून् Vअप Vअच अपगमय। तथा Vअचितः अग्निचयनमकुर्वतो नास्तिकांश्च Vइतः अस्मत्सकाशात् Vअप अच अपगमय। अञ्चतिर्गतिकर्मा॥

सं त्री पवित्रा वितंतान्येष्यन्वेकं धावसि पूयमानः।
अभि भगो असि दात्रस्य दातासि मघवा मघवद्भ्य इन्दो॥ ५५॥

सम्। त्री। पवित्रा। विऽततानि। एषि। अनु। एकम्। धावसि। पूयमानः। असि। भगः। असि। दात्रस्य। दाता। असि। मघऽवा। मघवत्ऽभ्यः। इन्दो इति॥ ५५॥

हे सोम Vवितानि विस्तृतानि Vत्री त्रीणि पवित्राणि[2] अग्निवायुसूर्यात्मकानि पवित्राणि Vसम् Vएषि सम्यक् प्राप्नोषि। किंच Vपूयमानः त्वम् Vएकम् अविवालकृतं पवित्रम् Vअनु Vधावसि अनुगच्छसि। किंच त्वं Vभगः भजनीयः Vअसि। तथा Vदात्रस्य देयस्य धनस्य Vदाता Vअसि। कथमस्य[3] धनदत्वमिति* चेत् तदुच्यते। हे Vइन्दो सोम[3] Vमघवद्भ्यः धनवद्भ्योऽन्येभ्योऽपि त्वं Vमघवा Vअसि अतिशयेन धनवान् भवसि॥ ॥ २१॥

एष विश्ववित्पवते मनीषी सोमो विश्वस्य भुवनस्य राजा।
द्रप्साँ ईरयन्विदथेष्विन्दुर्वि वारमव्यं समयाति याति॥ ५६॥

एषः। विश्वऽवित्। पवते। मनीषी। सोमः। विश्वस्य। भुवनस्य। राजा। द्रप्सान्। ईरयन्। विदथेषु। इन्दुः। वि। वारम्। अव्यम्। समया। अति। याति॥ ५६॥

Vविश्ववित् सर्वस्य वेत्ता अत एव Vमनीषी मेधावी Vविश्वस्य Vभुवनस्य सर्वस्य लोकस्य Vराजा स्वामी Vएषः Vसोमः Vपवते क्षरति। एतदेव विवृणोति। Vविदथेषु। विदन्ति जानन्त्यत्र

---

१. त-भ-महते। २. भ१(२)-पवित्रा पवित्राणि; मु-पवित्रा। ३. ग-भवसि किंच।
* त१-भ१.४-धनत्वमिति; त२.३.४.५.६.७-भ२.५.६-धनवत्त्वमिति।

देवानिति यद्वा विन्दन्ति लभन्त इति विदथा यज्ञाः। तेषु ᵛद्रप्सान् रसकणान् ᵛईरयन् प्रेरयन् ᵛइन्दुः सोमः ᵛअव्यम् अविभवं ᵛवारं वालं पवित्रं ᵛसमया उभयतः ᵛवि ᵛअति ᵛयाति व्यतीत्य गच्छति ॥

इन्दुं रिहन्ति महिषा अदब्धाः पदे रेभन्ति कवयो न गृध्राः ।
हिन्वन्ति धीरा दशभिः क्षिपाभिः समञ्जते रूपमपां रसेन ॥ ५७ ॥

इन्दुम् । रिहन्ति । महिषाः । अदब्धाः । पदे । रेभन्ति । कवयः । न । गृध्राः ।
हिन्वन्ति । धीराः । दशऽभिः । क्षिपाभिः । सम् । अञ्जते । रूपम् । अपाम् । रसेन ॥ ५७ ॥

ᵛमहिषाः महान्तः पूज्या वा अत एव ᵛअदब्धाः कैश्चिदप्यहिंसिता देवाः ᵛइन्दुं सोमं ᵛरिहन्ति लिहन्ति आस्वादयन्ति। किंच देवाः सोममुशन्तः सन्तः ᵛपदे तस्यास्य सोमस्य धारास्थाने ᵛरेभन्ति शब्दायन्ते। तत्र दृष्टान्तः। ᵛकवयो ᵛन ᵛगृध्राः। धनमभिकाङ्क्षमाणाः कवयः स्तोतारो यथा स्तुवन्तः शब्दायन्ते[1] तद्वत्। ᵛधीराः कर्मणि कुशला ऋत्विजः ᵛदशभिः एतत्संख्याकाभिः ᵛक्षिपाभिः अङ्गुलीभिस्तमिमं सोमं ᵛहिन्वन्ति अभिषवार्थं प्रेरयन्ति। अपि च ᵛरूपं सोमस्य[2] ᵛरूपम्[3] अंशुम् ᵛअपां वसतीवर्याख्यानां ᵛरसेन ᵛसमञ्जते सम्यक् सेवयन्ति ॥

त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५८ ॥

त्वया । वयम् । पवमानेन । सोम । भरे । कृतम् । वि । चिनुयाम । शश्वत् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥५८॥

हे ᵛसोम ᵛपवमानेन पवित्रेण पूयमानेन ᵛत्वया सहायेन ᵛभरे। संग्रामनाम। संग्रामे ᵛशश्वत् बहु ᵛकृतं कर्तव्यं ᵛवयं ᵛवि ᵛचिनुयाम विशेषेण कुर्याम। यस्मात्तव साहाय्येन कर्माणि कुर्मः ᵛतत् तस्मात् ᵛनः अस्मान् ᵛमित्रः ᵛवरुणः ᵛअदितिः एतन्नामिका ᵛसिन्धुः एतदभिधाना च ᵛपृथिवी ᵛउत अपि च ᵛद्यौः एते मित्रादयो नोऽस्मान् ᵛमामहन्तां पूजयन्तु धनादिदानेन ॥ ॥ २२ ॥

'अभि नः' इति द्वादशर्चं द्वितीयं सूक्तम्। वृषागिरो राज्ञः पुत्रोऽम्बरीषो भरद्वाजपुत्र ऋजिश्वोभौ सहितावस्यर्षी। इदमुत्तराणि च त्रीण्यानुष्टुभानि। अत्र त्वेकादशी बृहती। पवमानः सोमो देवता। तथा चानुक्रम्यते—'अभि नो द्वादशाम्बरीष ऋजिश्वा चानुष्टुभं ह बृहत्युपान्त्या' इति। गतो विनियोगः ॥

अभि नो वाजसातमं रयिमर्ष पुरुस्पृहम् ।
इन्दो सहस्रभर्णसं तुविद्युम्नं विभ्वासहम् ॥ १ ॥

अभि । नः । वाजऽसातमम् । रयिम् । अर्ष । पुरुऽस्पृहम् ।
इन्दो इति । सहस्रऽभर्णसम् । तुविऽद्युम्नम् । विभ्वऽसहम् ॥ १ ॥

हे ᵛइन्दो दीप्त[4] ᵛवाजसातमम् अत्यन्तं बलप्रदमन्नप्रदं वा ᵛरयिं धनं पुत्रं वा ᵛनः अस्माकम् ᵛअभि ᵛअर्ष अभिगमय। कीदृशम्। ᵛपुरुस्पृहं बहुभिः स्पृहणीयं ᵛसहस्रभर्णसं

१. त–शब्दार्यंति; भ६–शब्दयंति। २. त१.२.५.६.७–'सोमस्य रूपं' नास्ति; भ६–सोमस्य। ३. ग-त३-भ१.२.६.७–'दीप्त' नास्ति।

बहुविधभरणम्। अनेकपोषणयुक्तमित्यर्थः। [v]तुविद्युम्नम्। 'द्युम्नं द्योततेर्यशो वाङ्नं वा' (निरु. ५.५) इति यास्कः। बह्वन्नं बहुयशोयुक्तं वा [v]विश्वसहम्। विश्व इति महन्नाम। महतोऽभिभवितारम्॥

परि ष्य सुवानो अव्ययं रथे न वर्मीव्यत।
इन्दुरभि द्रुणा हितो हियानो धाराभिरक्षाः॥ २॥

परि। स्यः। सुवानः। अव्ययम्। रथे। न। वर्म। अव्यत।
इन्दुः। अभि। द्रुणा। हितः। हियानः। धाराभिः। अक्षारिति॥ २॥

[v]सुवानः सूयमानः[१] [v]स्यः स सोमः [v]अव्ययम् अविमयं पवित्रं [v]परि पवते। तत्र दृष्टान्तः। [v]रथे [v]न यथा रथे स्थितः[२] पुरुषः [v]वर्म कवचम् [v]अव्यत परिव्ययति। व्ययतेर्लुङि वर्णलोपश्छान्दसः। [v]अभि [v]हितः अभितः प्रेरितः यद्वा स्तोतृभिरभिष्टुतः सः [v]इन्दुः सोमः [v]द्रुणा द्रुमसयेन द्रोणकलशेन [v]हियानः। 'हि गतौ वृद्धौ च'। तेन पूर्यमाणः सन् [v]धाराभिः [v]अक्षाः क्षरति। क्षरतेर्लुङि रूपम्॥

परि ष्य सुवानो अक्षा इन्दुरव्ये मदच्युतः।
धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः॥ ३॥

परि। स्यः। सुवानः। अक्षारिति। इन्दुः। अव्ये। मदऽच्युतः।
धारा। यः। ऊर्ध्वः। अध्वरे। भ्राजा। न। एति। गव्यऽयुः॥ ३॥

[v]सुवानः सूयमानः [v]स्यः सः [v]इन्दुः सोमः [v]मदच्युतः मदार्थं देवैः प्रेरितः सन् [v]अव्ये अविभवे पवित्रे [v]परि [v]अक्षाः परितः क्षरति। [v]अध्वरे [v]ऊर्ध्वः समुच्छ्रितः सर्वेषां मुख्यः [v]यः सोमः [v]गव्ययुः गोकामः यद्वा क्षीरादिकं कामयमानः सन् [v]धारा धारया सह [v]एति गच्छति। [v]भ्राजा [v]न भ्राजमानया दीप्त्या यथान्तरिक्षे गच्छति तद्वत्॥

स हि त्वं देव शश्वते वसु मर्ताय दाशुषे।
इन्दो सहस्रिणं रयिं शतात्मानं विवाससि॥ ४॥

सः। हि। त्वम्। देव। शश्वते। वसु। मर्ताय। दाशुषे।
इन्दो इति। सहस्रिणम्। रयिम्। शतऽआत्मानम्। विवाससि॥ ४॥

हे [v]देव सोम [v]सः [v]त्वं [v]शश्वते पुत्रादिमत्त्वेन बहवे [v]मर्त्याय मनुष्याय [v]दाशुषे हविर्दत्तवते यजमानाय [v]वसु धनं[३] मह्यं च [v]विवाससि प्रेरयसि। एकवाक्यतापक्षे हि तिङन्तस्य हियोगादनिघातः स्यात्॥

वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः।
नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो॥ ५॥

---

१. त१.२.५–पूयमानः; त४–घूयमानः। २. भ१.२.७–अवस्थितः। ३. ग–धनं प्रयच्छति तथा सति हे इंदो सहस्रसंख्याकं बहुरूपं धनं।

वयम् । ते । अस्य । वृत्रऽहन् । वसो इति । वस्वः । पुरुऽस्पृहः ।
नि । नेदिष्ठऽतमाः । इषः । स्याम । सुम्नस्य । अध्रिगो इत्यध्रिऽगो ॥ ५ ॥

हे ᵛवृत्रहन् शत्रूणां हन्तः सोम ᵛअस्य एतादृशस्य ᵛते तव स्वभूताः ᵛवयं स्मः । ततो हे ᵛवसो वासयितः ᵛपुरुस्पृहः बहुभिः स्पृहणीयस्य ᵛवस्वः वसुनः धनस्य त्वया दीयमानस्य वयं ᵛनि नितरां ᵛनेदिष्ठतमाः अत्यन्तमन्तिकतमाः स्याम । तथा ᵛइषः अन्नस्य किंच हे ᵛअध्रिगो अधृतगमन सोम ᵛसुम्नस्य सुखस्य वयमन्तिकतमाः ᵛस्याम भवेम ॥

द्विर्यं पञ्च स्वयशसं स्वसारो अद्रिसंहतम् ।
प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त्यूर्मिणम् ॥ ६ ॥

द्विः । यम् । पञ्च । स्वऽयशसम् । स्वसारः । अद्रिऽसंहतम् ।
प्रियम् । इन्द्रस्य । काम्यम् । प्रऽस्नापयन्ति । ऊर्मिणम् ॥ ६ ॥

ᵛद्विः ᵛपञ्च दशसंख्याकाः ᵛस्वसारः कर्मकरणार्थमितस्ततो गच्छन्त्योऽङ्गुलयः ᵛस्वयशसं स्वभूतयशस्कम् ᵛअद्रिसंहतं ग्रावभिरभिषुतम् ᵛइन्द्रस्य ᵛप्रियं ᵛकाम्यं सर्वैः काम्यमानम् ᵛऊर्मिणं धाराभिस्तद्वन्तं ᵛयं सोमं ᵛप्रस्नापयन्ति वसतीवरीभिः प्रकर्षेण सेचयन्ति यजमानाः तं पुनन्तीत्युत्तरत्र संबन्धः ॥ ॥ २३ ॥

परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।
यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥ ७ ॥

परि । त्यम् । हर्यतम् । हरिम् । बभ्रुम् । पुनन्ति । वारेण ।
यः । देवान् । विश्वान् । इत् । परि । मदेन । सह । गच्छति ॥ ७ ॥

ᵛहर्यतं सर्वैः स्पृहणीयं ᵛहरिं हरितवर्णं ᵛबभ्रुं बभ्रुवर्णं च ᵛत्यं तं सोमं ᵛवारेण वालेन पवित्रेण ᵛपरि ᵛपुनन्ति परिशोधयन्ति । ᵛयः सोमः विश्वान् सर्वानिन्द्रादीन् ᵛदेवान् ᵛइत् देवानेव ᵛमदेन मादकेन रसेन ᵛसह ᵛपरि ᵛगच्छति ॥

अस्य वो ह्यवसा पान्तो दक्षसाधनम् । यः सूरिषु श्रवो बृहद्दधे स्वर्ण हर्यतः ॥८॥

अस्य । वः । हि । अवसा । पान्तः । दक्षऽसाधनम् ।
यः । सूरिषु । श्रवः । बृहत् । दधे । स्वः । न । हर्यतः ॥ ८ ॥

ᵛवः । छान्दसो वसादेशः । हिरवधारणे । वो यूयम् ᵛअस्य सोमस्य ᵛअवसा रक्षणेन ᵛदक्षसाधनं बलस्य साधनं रसं ᵛपान्तः पिबन्तो भवथ । ᵛस्वर्ण आदित्य इव ᵛहर्यतः सर्वैः काम्यमानः ᵛयः अयं सोमः ᵛसूरिषु स्तोत्राणि प्रेरयत्सु स्तोतृषु ᵛबृहत् महत् प्रभूतं ᵛश्रवः अन्नं ᵛदधे विदधे । स्थापयतीति यावत् ॥

स वो यज्ञेषु मानवी इन्दुर्जनिष्ट रोदसी ।
देवो देवी गिरिष्ठा असेधन्तं तुविष्वणिं ॥ ९ ॥

सः । वाम् । यज्ञेषु । मानवी इति । इन्दुः । जनिष्ट । रोदसी इति ।
देवः । देवी इति । गिरिऽस्थाः । अस्रेधन् । तम् । तुविऽस्वनि ॥ ९ ॥

हे vमानवी मानव्यौ मनोः स्वभूते हे vदेवी द्योतमाने हे vरोदसी द्यावापृथिव्यौ vवां युवयोः vयज्ञेषु vसः vइन्दुः सोमः vजनिष्ट अजनि अन्तरिक्षे vदेवः स्वतेजसा सर्वं प्रकाशयन् पृथिव्यां vगिरिष्ठाः प्रावसु तिष्ठन् । vतं जातं सोमं vतुविष्वणि बहुस्वने उपरे यज्ञे वा vअस्रेधन् ऋत्विजो प्रावभिरघ्नन् । अभ्यषुण्वन्निति यावत् ॥

इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।
नरे च दक्षिणावते देवाय सदनासदे ॥ १० ॥

इन्द्राय । सोम । पातवे । वृत्रऽघ्ने । परि । सिच्यसे ।
नरे । च । दक्षिणाऽवते । देवाय । सदनऽसदे ॥ १० ॥

हे vसोम vवृत्रघ्ने वृत्रस्य हन्त्रे vइन्द्राय । षष्ठ्यर्थे चतुर्थी । इन्द्रस्य vपातवे पानार्थं vपरि vषिच्यसे परितः पात्रेषु सिच्यसे । वमतीवरीभिर्वा । किंच vदक्षिणावते ऋत्विग्भ्यो दक्षिणादानेन तद्वते vदेवाय देवार्थं हवींषि दातुं vसदनसदे यज्ञगृहे सीदते vनरे मनुष्याय यजमानाय तस्मै फलप्रदानार्थं परिषिच्यसे ॥

ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन् ।
अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः ॥ ११ ॥

ते । प्रत्नासः । विऽउष्टिषु । सोमाः । पवित्रे । अक्षरन् ।
अपऽप्रोथन्तः । सनुतः । हुरःऽचितः । प्रातरिति । तान् । अप्रऽचेतसः ॥ ११ ॥

vव्युष्टिषु उषसां व्युच्छनेषु प्रकाशनेषु vप्रत्नासः प्रत्नाः vते vसोमाः vपवित्रे vअक्षरन् क्षरन्ति । ये सोमाः vसनुतः अन्तर्हितान् vअप्रचेतसः प्रज्ञानरहितान्[1] vहुरश्चितः । स्तेननामैतत् । कौटिल्येन चिन्वन्तीति । vतान् मायाविनः स्तेनान् vप्रातः प्रातःकाल एव vअपप्रोथन्तः । अपप्रोथनं चापप्रेरणम् । अपप्रेरयन्तः शब्देन निराकुर्वन्तो भवन्ति । ते क्षरन्तीति समन्वयः ॥

तं सखायः पुरोरुचं यूयं वयं च सूरयः ।
अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥ १२ ॥

तम् । सखायः । पुरःऽरुचम् । यूयम् । वयम् । च । सूरयः ।
अश्याम । वाजऽगन्ध्यम् । सनेम । वाजऽपस्त्यम् ॥ १२ ॥

हे vसखायः स्तोतारः vसूरयः प्राज्ञाः vयूयं vवयं vच यजमानाः vपुरोरुचं पुरतो रोचमानं vवाजगन्ध्यं बलकरसाधुगन्धोपेतं सोमम् अश्याम अश्नीयाम पिबेम । किंच vवाजपस्त्यम् अन्नयुक्त-गृहसहितं यद्वा बलकरं सोमं vसनेम संभजेमहि । सोमेन बलान्नगृहादीनि भवन्तीत्यर्थः ॥ ॥२४॥

१. ग-भ६-सु-प्रज्ञारहितान् ।

' आ हर्यताय ' इत्यष्टर्चं तृतीयं सूक्तम्। कश्यपगोत्रौ रेभसूनू एतत्संज्ञौ द्वावृषी। आद्या बृहती सप्तानुष्टुभः। पवमानसोमो देवता। तथा चानुक्रान्तम्—' आ हर्यतायाष्टौ रेभसूनू काश्यपौ बृहत्याद्या ' इति। गतो विनियोगः॥

आ हर्यताय धृष्णवे धनुस्तन्वन्ति पौंस्यम्।
शुक्रां वयन्त्यसुराय निर्णिजं विपामग्रे महीयुवः॥ १॥

आ। हर्यताय। धृष्णवे। धनुः। तन्वन्ति। पौंस्यम्।
शुक्राम्। वयन्ति। असुराय। निःऽनिर्जम्। विपाम्। अग्रे। महीयुवः॥ १॥

vहर्यताय सर्वैः स्पृहणीयाय vधृष्णवे शत्रूणां धर्षणशीलाय सोमाय vपौंस्यं पुंस्त्वस्याभिव्यञ्जकं vधनुः vआ vतन्वन्ति। धनुषि ज्यां कुर्वन्तीति। सोमस्य धाराविसर्गार्थं वितायमानं पवित्रमभिधीयते। तदेव[1] विवृणोति[2]। vमहीयुवः पूजाकामा ऋत्विजः vविपां मेधाविनां देवानाम् vअग्रे पुरस्तात् vशुक्रां शुक्लवर्णां vनिर्णिजं यया सोमो निर्णिज्यते ताम् vअसुराय बलवते[3] vवयन्ति वितन्वन्ति। दशापवित्रं विस्तारयन्तीत्यर्थः। वयतिर्गतिकर्मा॥

अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते।
यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे॥ २॥

अध। क्षपा। परिऽकृतः। वाजान्। अभि। प्र। गाहते।
यदि। विवस्वतः। धियः। हरिम्। हिन्वन्ति। यातवे॥ २॥

vक्षपा। ' सुपां सुलुक्' इति पञ्चम्या आकारः। क्षपाया रात्रेः vअध अनन्तरं प्रातःकाले vपरिष्कृतः। भूषणार्थे ' संपर्युपेभ्यः' इति करोतेः सुडागमः। अग्निरलंकृतः। यद्वा। क्षपयित्र्यां सेनायामलंकृतः। सोमः[4] vवाजान् अन्नानि बलानि वाभिलक्ष्य vप्र vगाहते प्रगच्छति। vविवस्वतः परिचरणवतो यजमानस्य vधियः कर्मसाधनभूता अङ्गुलयः vहरिं हरितवर्णमेतमंशुं vयातवे पात्राण्यभिगमनाय vयदि vहिन्वन्ति प्रेरयन्ति तर्हि सवनानि गच्छतीति॥

तमस्य मर्जयामसि मदो य इन्द्रपातमः।
यं गावं आसभिर्दुधुः पुरा नूनं च सूरयः॥ ३॥

तम्। अस्य। मर्जयामसि। मदः। यः। इन्द्रऽपातमः।
यम्। गावः। आसऽभिः। दुधुः। पुरा। नूनम्। च। सूरयः॥ ३॥

vअस्य सोमस्य vतं रसं vमर्जयामसि मर्जयामः शोधयामः। अलंकुर्मो वा। vयः vमदः मदकरो रसः vइन्द्रपातमः इन्द्रेणात्यन्तं पातव्यो भवति। किंच vगावः गन्तारः vसूरयः स्तोतारः vपुरा vच vनूनम् इदानीं च vयं सोमरसम् vआसभिः आस्यैः vदुधुः धारयन्ति। पिबन्तीति यावत्। यद्वा। गावो धेनवो यं सोमं तृणादिष्ववस्थितमासभिरास्यैर्दुधुर्धारयन्ति तृणरूपेण भक्षयन्ति॥

---

१. त१.२–तादृश च; त५-भ६–तादृक्। २. त१.२.३.४.५.६-भ१.२.४.६–विवृणोतीति। ३. ग-त३-भ५.६–बलवते सोमाय। ४. ग–तदनंतरं प्रातःसवने।

तं गार्थया पुराण्या पुनानमभ्यनूषत ।
उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥ ४ ॥

तम् । गार्थया । पुराण्या । पुनानम् । अभि । अनूषत ।
उतो इति । कृपन्त । धीतयः । देवानाम् । नाम । बिभ्रतीः ॥ ४ ॥

vपुनानं पूयमानं vतं सोमं vपुराण्या पुरा कृतया vगाथया स्तुत्या vअभ्यनूषत स्तोतारः अभिष्टुवन्ति । ' नू स्तवने ' । लुङि रूपम् । vउतो अपि च vनाम कर्मार्थं नमनं vबिभ्रतीः बिभ्राणाः vधीतयः अङ्गुलयः vदेवानां सोमरूपहविष्प्रदानाय vकृपन्त कल्पयन्ति समर्था भवन्ति । ' कृपू सामर्थ्ये ' ॥

तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम् ।
दूतं न पूर्वचित्तये आ शासते मनीषिणः ॥ ५ ॥

तम् । उक्षमाणम् । अव्यये । वारे । पुनन्ति । धर्णसिम् ।
दूतम् । न । पूर्वऽचित्तये । आ । शासते । मनीषिणः ॥ ५ ॥

vउक्षमाणम् अद्भिः सिच्यमानं vधर्णसिं सर्वस्य धारकं vतं सोमम् vअव्यये अविमये vवारे वाले पवित्रे vपुनन्ति शोधयन्ति । ततः vमनीषिणः मेधाविनो यजमानाः तमिमं सोमं vदूतं vन दूतमिव vपूर्वचित्तये देवानां पूर्वमेव प्रज्ञापनाय vआ vशासते प्रार्थयन्ते ॥ ॥ २५ ॥

स पुनानो मदिन्तमः सोमश्चमूषु सीदति ।
पशौ न रेत आदधत्पतिर्वचस्यते धियः ॥ ६ ॥

सः । पुनानः । मदिन्ऽतमः । सोमः । चमूषु । सीदति ।
पशौ । न । रेतः । आऽदधत् । पतिः । वचस्यते । धियः ॥ ६ ॥

vमदिन्तमः अत्यन्तं मादयिता[1] vसः vसोमः vपुनानः पूयमानः सन् vचमूषु चमसेषु vसीदति । ततः vपशौ vन यथा पशौ कश्चिद्वृषभो रेत आदधाति तद्वच्चमसादिषु vरेतः स्वीयं रसम् vआदधत् आदधानः vधियः कर्मणः vपतिः पालयितायं सोमः vवचस्यते अभिष्टूयते[2] ॥

स मृज्यते सुकर्मभिर्देवो देवेभ्यः सुतः ।
विदे यदासु संददिर्महीरपो वि गाहते ॥ ७ ॥

सः । मृज्यते । सुकर्मऽभिः । देवः । देवेभ्यः । सुतः ।
विदे । यत् । आसु । सम्ऽददिः । महीः । अपः । वि । गाहते ॥ ७ ॥

vदेवेभ्यः देवार्थं vसुतः अभिषुतः vदेवः द्योतमानः स्तोतव्यो वा vसः सोमः vसुकर्मभिः ऋत्विग्भिः vमृज्यते परिपूयते । vयत् यदायं सोमः vआसु प्रजासु vसंददिः सम्यग्धनदानशील इति vविदे ज्ञायते तदानीं vमहीः महतीः vअपः वसतीवरीः vवि vगाहते विशेषेणाभिगच्छति । यदा सोममभिषुण्वन्ति तदा तेभ्यो धनं प्रयच्छतीत्यर्थः ॥

---

१. त१.२.३.४.५.६-भ-मदयिता । २. त-भ२.४.६-सु-अभिपूयते; भ१.७-अभिसूयते ।

सुत इन्दो पवित्र आ नृभिर्यतो वि नीयसे ।
इन्द्राय मत्सरिन्तमश्चमूष्वा नि षीदसि ॥ ८ ॥

सुतः । इन्दो इति । पवित्रे । आ । नृऽभिः । यतः । वि । नीयसे ।
इन्द्राय । मत्सरिन्ऽतमः । चमूषु । आ । नि । सीदसि ॥ ८ ॥

हे vइन्दो vसुतः अभिषुतः vयतः आयतः सर्वतो विस्तृतस्त्वं vनृभिः कर्मनेतृभिर्ऋत्विग्भिः vपवित्रे vवि vनीयसे विशेषेण नीयमानो भवसि । ततः vमत्सरिन्तमः अतिशयेन मादयिता त्वम् vइन्द्राय इन्द्रार्थं vचमूषु चमसेषु vआ vनि vषीदसि[1] ॥ ॥ २६ ॥

'अभी नवन्ते' इति नवर्चं चतुर्थं सूक्तम् । पूर्ववदृषिदेवते । सर्वा अनुष्टुभः । तथा चानुक्रम्यते— 'अभी नवन्ते नव' इति । गतो विनियोगः ॥

अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।
वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥ १ ॥

अभि । नवन्ते । अद्रुहः । प्रियम् । इन्द्रस्य । काम्यम् ।
वत्सम् । न । पूर्वे । आयुनि । जातम् । रिहन्ति । मातरः ॥ १ ॥

यथा vमातरः गावः vपूर्वे प्रथमे vआयुनि वयसि vजातं vवत्सं vरिहन्ति लिहन्ति तथा vअद्रुहः अद्रोहा वसतीवर्याख्या आपः vइन्द्रस्य vप्रियं vकाम्यं सर्वैः काम्यमानं सोमम् vअभि vनवन्ते अभिगच्छन्ति ॥

पुनान इन्दवा भर सोम द्विबर्हसं रयिम् ।
त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ॥ २ ॥

पुनानः । इन्दो इति । आ । भर । सोम । द्विऽबर्हसम् । रयिम् ।
त्वम् । वसूनि । पुष्यसि । विश्वानि । दाशुषः । गृहे ॥ २ ॥

हे vइन्दो दीप्यमान हे vसोम vपुनानः पूयमानस्त्वं vद्विबर्हसं द्वयोः स्थानयोः परिबृंहणशीलं vरयिं धनमस्मभ्यम् vआ vभर आहर देहि । vत्वं हि vदाशुषः हविर्दत्तवतो यजमानस्य vगृहे स्थित्वा vविश्वानि सर्वाणि vवसूनि धनानि vपुष्यसि पोषयसि ॥

त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः ।
त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥ ३ ॥

त्वम् । धियम् । मनःऽयुजम् । सृज । वृष्टिम् । न । तन्यतुः ।
त्वम् । वसूनि । पार्थिवा । दिव्या । च । सोम । पुष्यसि ॥ ३ ॥

हे vसोम vत्वं vमनोयुजं मनसा युज्यमानां मनोवेगां vधियं ध्यातव्यां धारां vसृज पात्रेषु विसृज । तत्र दृष्टान्तः । vवृष्टिं vन vतन्यतुः । 'तनु विस्तारे' । 'ऋतन्यञि०' इत्यादिना यतुच्-प्रत्ययः । तनोति विस्तारयतीति तन्यतुर्मेघः । यथा मेघो वृष्टिं सृजति तद्वत् । ततो हे सोम vत्वं

१. त१.२.५—षीदति ।

vपार्थिवा पृथिव्यां भवानि vवसूनि धनानि तथा दिव्यानि दिवि भवानि धनानि vच vपुष्यसि अस्मभ्यं पोषयसि। प्रयच्छसीत्यर्थः ॥

परि ते जिग्युषो यथा धारा सुतस्य धावति।
रंहमाणा व्यव्ययं वारं वाजीव सानसिः ॥ ४ ॥

परि। ते। जिग्युषः। यथा। धारा। सुतस्य। धावति।
रंहमाणा। वि। अव्ययम्। वारम्। वाजीऽइव। सानसिः ॥ ४ ॥

vसुतस्य vते त्वदीया vसानसिः संभजनशीला यद्वा स्तोतृभिः संभजनीया vरंहमाणा वेगं कुर्वाणा vधारा vअव्ययम् अविमयं vवारं वालं पवित्रं vवि vपरि vधावति विशेषेण परितो गच्छति। तत्र दृष्टान्तः। vजिग्युषः शत्रूणां जेतुर्वीरस्य vवाजीव अश्वो यथा युद्धं परितो धावति तद्वत्। जयतेः क्वसौ 'सनलिटोर्जेः' इति कुत्वम्। vयथा इति पूरकः ॥

ऋत्वे दक्षाय नः कवे पवस्व सोम धारया।
इन्द्राय पातवे सुतो मित्राय वरुणाय च ॥ ५ ॥

ऋत्वे। दक्षाय। नः। कवे। पवस्व। सोम। धारया।
इन्द्राय। पातवे। सुतः। मित्राय। वरुणाय। च ॥ ५ ॥

हे vकवे क्रान्तदर्शिन् हे vसोम vनः अस्माकं vऋत्वे प्रज्ञानाय vदक्षाय बलाय च त्वं vधारया vपवस्व क्षर। कीदृशः। vइन्द्राय vपातवे पानार्थं तथा vमित्राय vवरुणाय vच vसुतः अभिषुतः खलु ॥ ॥ २७ ॥

पवस्व वाजसातमः पवित्रे धारया सुतः।
इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥ ६ ॥

पवस्व। वाजऽसातमः। पवित्रे। धारया। सुतः।
इन्द्राय। सोम। विष्णवे। देवेभ्यः। मधुमत्ऽतमः ॥ ६ ॥

हे vसोम vवाजसातमः अतिशयेनान्नस्य दाता vसुतः अभिषुतस्त्वं vपवित्रे vधारया सह[1] vपवस्व क्षर। ततो हे सोम त्वम् vइन्द्राय vविष्णवे चान्येभ्यो मित्रादिभ्यः vदेवेभ्यः च vमधुमत्तमः अतिशयेन माधुर्योपेतो भव ॥

त्वां रिहन्ति मातरो हरिं पवित्रे अद्रुहः।
वत्सं जातं न धेनवः पवमान विधर्मणि ॥ ७ ॥

त्वाम्। रिहन्ति। मातरः। हरिम्। पवित्रे। अद्रुहः।
वत्सम्। जातम्। न। धेनवः। पवमान। विऽधर्मणि ॥ ७ ॥

---

१. ग-स्त्वंत्या।

हे [v]पवमान सोम [v]विधर्मणि विविधं हविषां धारके यज्ञे [v]अद्रुहः द्रोहवर्जिताः [v]मातरः मातृभूता वसतीवर्यः [v]हरिं हरितवर्णं [v]त्वां [v]पवित्रे[1] स्थितं [v]रिहन्ति लिहन्ति आस्वादयन्ति । कथमिव । यथा [v]धेनवः [v]जातं [v]वत्सं लिहन्ति तथा ॥

पवमान महि श्रवश्चित्रेभिर्यासि राश्मिभिः ।
शर्धन् तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥ ८ ॥

पवमान । महि । श्रवः । चित्रेभिः । यासि । रश्मिऽभिः ।
शर्धन् । तमांसि । जिघ्नसे । विश्वानि । दाशुषः । गृहे ॥ ८ ॥

हे [v]पवमान [v]महि महत् [v]श्रवः श्रवणीयमन्तरिक्षं [v]चित्रेभिः चित्रैर्नानाविधैश्चायनीयैर्वा [v]रश्मिभिः परि [v]यासि परिगच्छसि । तथा [v]शर्धन् वेगं कुर्वंस्त्वं [v]दाशुषः हविर्दत्तवतो यजमानस्य [v]गृहे स्थित्वा [v]विश्वानि सर्वाणि [v]तमांसि तमोरूपाणि रक्षांसि [v]जिघ्नसे हंसि । एवं द्यावापृथिव्योः वर्तस इत्यर्थः ॥

त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।
प्रति द्रापिममुञ्चथाः पवमान महित्वना ॥ ९ ॥

त्वम् । द्याम् । च । महिऽव्रत । पृथिवीम् । च । अति । जभ्रिषे ।
प्रति । द्रापिम् । अमुञ्चथाः । पवमान । महिऽत्वना ॥ ९ ॥

हे [v]महिव्रत महाकर्मन् बहुविधकर्मन् सोम [v]त्वं [v]द्यां द्युलोकं [v]च [v]पृथिवीं [v]च [v]अति [v]जभ्रिषे अत्यन्तं बिभर्षि । 'डुभृञ् धारणपोषणयोः' । तस्य छान्दसे लिटि सर्वविधीनां छन्दसि विकल्पितत्वादत्रेडागमः । अन्तरिक्षे सोमात्मनेति पृथिव्यां लतारूपेणेत्येवं लोकद्वयवर्तित्वम् । हे [v]पवमान क्षरन् सोम त्वं [v]महित्वना महत्त्वेन युक्तः सन् [v]द्रापिं कवचं [v]प्रति [v]अमुञ्चथाः प्रतिमुञ्चसि संवृणोषि ॥ ॥ २८ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके
चतुर्थोऽध्यायः समाप्तः ॥

१. त१.२.५.७-म६–दशापवित्रे ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
विज्ञातवेदगाम्भीर्यस्तुर्यं व्याख्याय सप्तमे ।
सायणार्यस्ततोऽध्यायं पञ्चमं व्याचिकीर्षति ॥

तत्र ' पुरोजिती वः ' इति षोडशर्चमनुवाकापेक्षया पञ्चमं सूक्तम् । आद्यस्य तृचस्य इयावाश्व-पुत्रोऽन्धीगुर्नामर्षिः । द्वितीयस्य नहुषस्य राज्ञः पुत्रो ययातिर्नाम । तृतीयस्य मनोः पुत्रो नहुषो नाम राजर्षिः । चतुर्थस्य संवरणाख्यस्य राज्ञः पुत्रो मनुः । एवं द्वादश गताः । शिष्टस्य चतुर्ऋचस्य वाचः पुत्रो वैश्वामित्रो वा प्रजापतिर्ऋषिः । द्वितीयातृतीये गायत्र्यौ शिष्टाश्चतुर्दशानुष्टुभः । तथा चानुक्रम्यते– ' पुरोजिती षोळश इयावाश्विरन्धीगुर्ययातिर्नाहुषो नहुषो[1] मानवो मनुः सांवरण इति तृचाः शेषे प्रजापतिरुषाद्ये गायत्र्यौ ' इति । गतः सूक्तविनियोगः ॥

पुरोजिती वो अन्धसः सुतायं मादयित्नवे ।
अप श्वानं श्नथिष्टन सखायो दीर्घजिह्वयम् ॥ १ ॥
पुरःऽजिती । वः । अन्धसः । सुताय । मादयित्नवे ।
अप । श्वानम् । श्नथिष्टन । सखायः । दीर्घऽजिह्वयम् ॥ १ ॥

हे [v]सखायः सखिभूताः समानख्याना वा हे स्तोतारः [v]वः यूयं [v]पुरोजिती । षष्ठ्याः पूर्व-सवर्णदीर्घः । पुरःस्थितजयस्य [v]अन्धसः अदनीयस्य सोमस्य स्वभूताय [v]सुताय अभिषुताय [v]मादयित्नवे अत्यन्तं मदकराय रसाय [v]दीर्घजिह्वयम् । दीर्घा जिह्वा यस्य[2] सः । 'दीर्घजिह्वी च च्छन्दसि ' (पा. सू. ४. १. ५९) इति ङीषन्तत्वेन निपातितः । तादृशं [v]श्वानम्[3] [v]अप [v]श्नथिष्टन अपश्नथयत अपबाधध्वम् । यथा श्वा राक्षसा वा सुतं सोमं न लिहन्ति तथा कुरुतेत्यर्थः ॥

पवित्रेष्टयां द्वितीयस्याज्यभागस्य ' यो धारया ' इत्येषानुवाक्या । सूत्रितं च—' पावकवन्ता-वाज्यभागावग्नी रक्षांसि सेधति यो धारया पावकया ' (आश्व. श्रौ. २. १२) इति ॥

यो धारया पावकया परिप्रस्यन्दते सुतः । इन्दुरश्वो न कृत्व्यः ॥ २ ॥
यः । धारया । पावकया । परिऽप्रस्यन्दते । सुतः । इन्दुः । अश्वः । न । कृत्व्यः ॥ २ ॥

[v]सुतः अभिषुतः [v]कृत्व्यः । कृत्वेति कर्मनाम । कर्मणि साधुः [v]यः [v]इन्दुः सोमः [v]पावकया पापानां शोधयित्र्या[4] [v]धारया [v]परिप्रस्यन्दते परितः प्रक्षरति । कथमिव । [v]अश्वो [v]न अश्वो यथा वेगेन प्रगच्छति तद्वत् ॥

तं दुरोषमभी नरः सोमं विश्वाच्या धिया । यज्ञं हिन्वन्त्यद्रिभिः ॥ ३ ॥
तम् । दुरोषम् । अभि । नरः । सोमम् । विश्वाच्या । धिया । यज्ञम् । हिन्वन्ति । अद्रिऽभिः ॥ ३ ॥

[v]नरः कर्मनेतार ऋत्विजः [v]दुरोषम् । रोषतेर्हिंसार्थस्य रेफलोपे दीर्घाभाव ओषतेर्दाहार्थस्य[5] वा खलि[5] रूपमिति संदेहादनवग्रहः । [v]तं दुर्दहं दुर्धर्षं वा [v]यज्ञं यष्टव्यं तं[6] [v]सोमं [v]विश्वाच्या

---

१. त१.२.४.५-मु–नहुषो नाम । २. त-भ१.४.५.६–अस्य । ३. त१.२.४.५.७-भ६-मु–श्वानं च । ५. ग–अषतेर्वा दुष्पूर्वस्य वा णमुलि । ६. त१.२.४.५.७-भ६-मु–तं वा ।

सर्वान् कामानञ्जिभ्या ᵛधिया बुद्धया ᵛअद्रिभिः ग्रावभिः ᵛअभि ᵛहिन्वन्ति अभिप्रेरयन्ति। अभिषुण्वन्तीति यावत् ॥

पृष्ठ्यस्य षष्ठेऽहनि ब्राह्मणाच्छंसिशस्त्रे ' सुतासः ' इति तिस्रः। सूत्रितं च–' दधिक्राव्णोऽकारिषमित्यनुष्टुप् सुतासो मधुमत्तमा इति च तिस्रः' (आश्व. श्रौ. ८. ३) इति ॥

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः।
पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥ ४ ॥

सुतासः। मधुमत्ऽतमाः। सोमाः। इन्द्राय। मन्दिनः।
पवित्रऽवन्तः। अक्षरन्। देवान्। गच्छन्तु। वः। मदाः ॥ ४ ॥

ᵛमधुमत्तमाः अतिशयेन माधुर्योपेता अत एव ᵛमन्दिनः मदकराः ᵛसुतासः अभिषुताः ᵛसोमाः ᵛपवित्रवन्तः पवित्रे वर्तमानाः सन्तः ᵛइन्द्राय इन्द्रार्थम् ᵛअक्षरन् पात्रेषु क्षरन्ति। अथ प्रत्यक्षकृतः। ᵛवः युष्माकं ᵛमदाः मदहेतवो[१] रसाः ᵛदेवान् इन्द्रादीन् ᵛगच्छन्तु ॥

इन्दुरिन्द्राय पवत इति देवासो अब्रुवन्।
वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥ ५ ॥

इन्दुः। इन्द्राय। पवते। इति। देवासः। अब्रुवन्।
वाचः। पतिः। मखस्यते। विश्वस्य। ईशानः। ओजसा ॥ ५ ॥

ᵛइन्दुः सोमः ᵛइन्द्राय इन्द्रार्थं ᵛपवते कलशे क्षरति ᵛइति ᵛदेवासः स्तुतिकारिणः स्तोतारः ᵛअब्रुवन् वदन्ति। यदा स्तोतार एवं वदन्ति तदानीं ᵛवाचः स्तुतेः ᵛपतिः पालयिता। यद्वा। शब्दस्य स्वामी अत्यन्तं शब्दायमान इत्यर्थः। तादृशः सोमः ᵛमखस्यते स्तुतिभिः पूजामिच्छति। लालसायां सुगागमः। कीदृशः। ᵛओजसा बलेन[२] ᵛविश्वस्य सर्वस्य ᵛईशानः प्रभुः ॥ ॥ १ ॥

सहस्रधारः पवते समुद्रो वाचमीङ्खयः।
सोमः पतिं रयीणां सखेन्द्रस्य दिवेदिवे ॥ ६ ॥

सहस्रऽधारः। पवते। समुद्रः। वाचम्ऽईङ्खयः।
सोमः। पतिः। रयीणाम्। सखा। इन्द्रस्य। दिवेऽदिवे ॥ ६ ॥

ᵛसहस्रधारः बहुविधधारोपेतः ᵛसोमः ᵛपवते क्षरति। कीदृशः। ᵛसमुद्रः। यस्मात्समुद्रवन्ति रसाः। सरःस्थानीयः[३] ᵛवाचमीङ्खयः। ईङ्खतेर्ण्यन्तस्य सुप्युपपदे खच्प्रत्ययः। स्तुतीनां प्रेरयिता ᵛरयीणां धनानां ᵛपतिः प्रभुः। यद्वा। रयीणां हविषो दातॄणां यजमानानां पतिः पालयिता। ᵛदिवेदिवे प्रत्यहम् ᵛइन्द्रस्य ᵛसखा मित्रभूतः सोमः पवते ॥

अयं पूषा रयिर्भगः सोमः पुनानो अर्षति।
पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥ ७ ॥

---

१. त१.२.४.५.७-म६-मु–मदकरा। २. ग-त३-भ२.४–स्वबलेन; त६-भ७–स्वबलात्; भ१–स्वबालान्। ३. ग-त३.६-भ-मु–रसस्थानीयः; त१.२.४.५–सरस्थानीयः।

अयम् । पूषा । रयिः । भगः । सोमः । पुनानः । अर्षति ।
पतिः । विश्वस्य । भूमनः । वि । अख्यत् । रोदसी इति । उमे इति ॥ ७ ॥

[V]पूषा पोषकः सर्वेषां [V]भगः भजनीयः [V]रयिः धनहेतुः [V]अयं [V]सोमः [V]पुनानः पवित्रेण पूयमानः सन् [V]अर्षति कलशमभिगच्छति[1]। तथा [V]विश्वस्य सर्वस्य [V]भूमनः भूतजातस्य [V]पतिः पालयिता सोमः [V]उभे [V]रोदसी द्यावापृथिव्यौ [V]व्यख्यत् स्वतेजसा प्रकाशयति। अनेन लोकद्वयवर्तित्वं सूचितम् ॥

समु प्रिया अनूषत गावो मदाय घृष्वयः ।
सोमासः कृण्वते पथः पवमानास इन्दवः ॥ ८ ॥

सम् । ऊँ इति । प्रियाः । अनूषत । गावः । मदाय । घृष्वयः ।
सोमासः । कृण्वते । पथः । पवमानासः । इन्दवः ॥ ८ ॥

[V]प्रियाः प्रियतमाः [V]घृष्वयः अत्यन्तं दीप्ताः। यद्वा। अहं प्रथमतः स्तौमि अहं पुरस्तात् स्तौमीति परस्परं स्पर्धमानाः। [V]गावः स्तुतिलक्षणा वाचः सोमस्य मदार्थं [V]सम् [V]अनूषत संस्तुवन्ति। उः प्रसिद्धौ। यद्वा। गावो धेनवः सोमस्य मदाय शब्दायन्ते। ततः [V]पवमानासः पूयमानाः [V]इन्दवः दीप्ताः [V]सोमासः सोमाः [V]पथः मार्गान् [V]कृण्वते क्षरणार्थं कुर्वन्ति ॥

य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् ।
यः पञ्च चर्षणीरभि रयिं येन वनामहै ॥ ९ ॥

यः । ओजिष्ठः । तम् । आ । भर । पवमान । श्रवाय्यम् ।
यः । पञ्च । चर्षणीः । अभि । रयिम् । येन । वनामहै ॥ ९ ॥

हे [V]पवमान पूयमान सोम [V]ओजिष्ठः ओजस्वितमः [V]यः त्वदीयो रसोऽस्ति [V]तं [V]श्रवाय्यं श्रवणीयं रसम् [V]आ [V]भर अस्मभ्यमाहर। किंच [V]यः रसः [V]पञ्च [V]चर्षणीः पञ्च जनान्निषाद-पञ्चमांश्चतुरो वर्णान् [V]अभि तिष्ठति[2]। अपि च [V]येन रसेन वयं [V]रयिं धनं च [V]वनामहै संभजामहै। यद्वा। येन त्वां रयिं याचामहै तमा भर ॥

सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।
मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥ १० ॥

सोमाः । पवन्ते । इन्दवः । अस्मभ्यम् । गातुवित्ऽतमाः ।
मित्राः । सुवानाः । अरेपसः । सुऽआध्यः । स्वःऽविदः ॥ १० ॥

[V]गातुवित्तमाः अतिशयेन मार्गस्य लम्भकाः [V]इन्दवः दीप्ताः [V]सोमाः [V]पवन्ते [V]अस्मभ्यम् अस्मदर्थं क्षरन्त्यागच्छन्ति वा। कीदृशाः। [V]मित्राः देवानां सखिभूताः [V]सुवानाः अभिषूयमाणाः [V]अरेपसः पापरहिताः अत एव [V]स्वाध्यः शोभनध्यानाः[3] [V]स्वर्विदः सर्वज्ञाः स्वर्गप्रापका वा ॥ ॥२॥

१. त१.२.४.७–कलशेभि°; त५–कलशभि°; भ६–कलशानभि°। २. ग–गच्छति। ३. ग-त३. ४–शोभनाध्यानाः।

सुष्वाणासो व्यद्रिभिश्चितानो गोरधि त्वचि ।
इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥ ११ ॥

सुस्वानासः । वि । अद्रिऽभिः । चितानाः । गोः । अधि । त्वचि ।
इषम् । अस्मभ्यम् । अभितः । सम् । अस्वरन् । वसुऽविदः ॥ ११ ॥

vगोः अनडुहः vअधि vत्वचि अधिषवणचर्मणि vचितानाः ज्ञायमानाः vअद्रिभिः ग्रावभिर्विविधं vसुष्वाणासः सूयमानाः vवसुविदः वसुनो लम्भका एते सोमाः vअस्मभ्यम् vइषम् अन्नम् vअभितः vसमस्वरन् सम्यक् शब्दयन्ति । प्रयच्छन्तीति यावत् ॥

एते पूता विपश्चितः सोमासो दध्याशिरः ।
सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥ १२ ॥

एते । पूताः । विपःऽचितः । सोमासः । दधिऽआशिरः ।
सूर्यासः । न । दर्शतासः । जिगत्नवः । ध्रुवाः । घृते ॥ १२ ॥

vपूताः पवित्रेण परिपूताः vविपश्चितः मेधाविनः vदध्याशिरः दध्यामिश्रणाः vघृते वसतीवर्याख्ये उदके vजिगत्नवः गमनशीलाः vध्रुवाः तत्र स्थैर्येण वर्तमानाः vएते vसोमासः सोमाः vसूर्यासो vन सूर्या इव vदर्शतासः पात्रेषु सर्वैर्दर्शनीया भवन्ति ॥

प्र सुन्वानस्यान्धसो मर्तो न वृत तद्वचः ।
अप श्वानमराधसं हता मखं न भृगवः ॥ १३ ॥

प्र । सुन्वानस्य । अन्धसः । मर्तः । न । वृत । तत् । वचः ।
अप । श्वानम् । अराधसम् । हत । मखम् । न । भृगवः ॥ १३ ॥

vसुन्वानस्य अभिषूयमाणस्य vअन्धसः अदनीयस्य सोमस्य vतत् प्रसिद्धं vवचः वचनं घोषं vमर्तः मारकः कर्मविघ्नकारी श्वा vन vप्र vवृत न भजताम् । न शृणोत्विति यावत् । तथा हे स्तोतारः vअराधसं संसाधककर्मरहितं तं vश्वानम् vअप vहत । तत्र दृष्टान्तः । vमखं vन । यथा पुरापराद्धं मखमेतन्नामानं vभृगवः अपहतवन्तः तथापहतेत्यर्थः ॥

आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।
सरज्जारो न योषणां वरो न योनिमासदम् ॥ १४ ॥

आ । जामिः । अत्के । अव्यत । भुजे । न । पुत्रः । ओण्योः ।
सरत् । जारः । न । योषणाम् । वरः । न । योनिम् । आऽसदम् ॥ १४ ॥

vजामिः बन्धुभूतो[1] देवानां[1] सोमः vअत्के आच्छादके पवित्रे vआ vअव्यत आवृणोति । संबद्धो भवति । तत्र दृष्टान्तः । vभुजे vन यथा vओण्योः रक्षकयोर्मात्रापित्रोः भुजे vपुत्रः आवृणोति तद्वत् । ततः सोऽयं सोमः vयोनिं स्वस्थानभूतं कलशम् vआसदम् आसत्तुं vसरत् सरति ।

१. ग–र्यजमानानां ।

तत्र दृष्टान्तदूषणम्। vजारो vन यथा जारः vयोषणाम् असतीं स्त्रियं प्राप्तुं सरति। यथा वा vवरः कन्यां प्राप्तुं गच्छति तद्वत्॥

स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी।
हरिः पवित्रे अव्यत वेधा न योनिमासदम्॥ १५॥

सः। वीरः। दक्षऽसाधनः। वि। यः। तस्तम्भ। रोदसी इति।
हरिः। पवित्रे। अव्यत। वेधाः। न। योनिम्। आऽसदम्॥ १५॥

vदक्षसाधनः बलसाधनः vसः सोमः vवीरः समर्थो भवति। vयः सोमः vरोदसी द्यावापृथिव्यौ vवि vतस्तम्भ स्वतेजसा व्यस्तभ्नात्। आच्छादयतीत्यर्थः। किंच vहरिः हरितवर्णः सोमः vवेधा vन विधाता यजमानो यथा स्वगृहमासीदति तद्वत् vयोनिं स्वस्थानं कलशम् vआसदम् आसत्तुं vपवित्रे vअव्यत आवृणोति। संबद्धो भवति॥

अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि।
कनिक्रदद्वृषा हरिरिन्द्रस्याभ्येति निष्कृतम्॥ १६॥

अव्यः। वारेभिः। पवते। सोमः। गव्ये। अधि। त्वचि।
कनिक्रदत्। वृषा। हरिः। इन्द्रस्य। अभि। एति। निःऽकृतम्॥ १६॥

अयं vसोमः vअव्यः अवेः vवारेभिः वालैः पवित्रैः तेभ्यः vपवते कलशं प्रति क्षरति। किंच vगव्ये आनड्वहे vअधि vत्वचि चर्मणि vकनिक्रदत् शब्दायमानः vवृषा कामानां वर्षकः vहरिः हरितवर्णः सोमः vइन्द्रस्य स्वभूतं vनिष्कृतं संस्कृतं स्थानम् vअभ्येति अभिगच्छति॥ ॥ ३॥

'क्राणा शिशुः' इत्यष्टर्चं षष्ठं सूक्तमाहृत्यस्य त्रितस्यार्षम्। इदमुत्तराणि चत्वारि सूक्तान्यौष्णिहानि। पवमानः सोमो देवता। तथा चानुक्रम्यते—'क्राणाष्टौ त्रित औष्णिहं वै' इति। गतो विनियोगः॥

क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम्। विश्वा परि प्रिया भुवदध द्विता॥१॥

क्राणा। शिशुः। महीनाम्। हिन्वन्। ऋतस्य। दीधितिम्।
विश्वा। परि। प्रिया। भुवत्। अध। द्विता॥ १॥

vक्राणा। करोतेः शानचि 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'सुपां सुलुक्०' इति सुप आकारादेशः। यज्ञं कुर्वाणः vमहीनां महतीनां महनीयानां वा अपां vशिशुः पुत्रस्थानीयः सोमः vऋतस्य यज्ञस्य vदीधितिं प्रकाशकं धारकं वा स्वीयं रसं vहिन्वन् प्रेरयन् vविश्वा सर्वाणि vप्रिया प्रियाणि हवींषि vपरि vभुवत् परिभवति व्याप्नोति। vअध अपि च vद्विता द्विधा भवति। दिवि च पृथिव्यां च वर्तत इत्यर्थः॥

उप त्रितस्य पाष्यो३रभक्त यद्गुहा पदम्। यज्ञस्य सप्त धामभिरध प्रियम्॥२॥

उप। त्रितस्य। पाष्योः। अभक्त। यत्। गुहा। पदम्।
यज्ञस्य। सप्त। धामऽभिः। अध। प्रियम्॥ २॥

vत्रितस्य मम यज्ञे vगुहा गुहायां हविर्धाने वर्तमानयोः vपाष्योः पाषाणवद्दृढयोरधिषवण-फलकयोः vपदं स्थानं सोमः vयत् यदा vउप vअभक्त समभजत vअध अनन्तरं vयज्ञस्य vधामभिः धारकैः vसप्त सप्तभिश्छन्दोभिर्गायत्र्यादिभिः vप्रियं प्रीणयितारं सोममभिष्टुवन्ति ऋत्विजः[1]। अपि वा। सप्त सर्पणशीलैर्वसतीवर्यादिभिरुदकैः सोममभिषुण्वन्ति ॥

त्रीणि त्रितस्य धारया पृष्ठेष्वेरया रयिम्। मिमीते अस्य योजना वि सुक्रतुः ॥३॥

त्रीणि। त्रितस्य। धारया। पृष्ठेषु। आ। ईरय। रयिम्।
मिमीते। अस्य। योजना। वि। सुऽक्रतुः ॥ ३ ॥

हे सोम vत्रितस्य मम यज्ञस्य स्वभूतानि vत्रीणि सवनानि vधारया आत्मीयया विधारय। किंच vपृष्ठेषु सामसु vरयिं दातारमिन्द्रम् vआ vईरय आगमय। vसुक्रतुः सुप्रज्ञः स्तोता vअस्य इन्द्रस्य vयोजना योजनानि योजनकारीणि[2] स्तोत्राणि vवि vमिमीते करोति। यस्मादेवं तस्मादिन्द्रं सामसु प्रेरयेत्यर्थः ॥

जज्ञानं सप्त मातरो वेधामशासत श्रिये। अयं ध्रुवो रयीणां चिकेत यत् ॥ ४ ॥

जज्ञानम्। सप्त। मातरः। वेधाम्। अशासत। श्रिये। अयम्। ध्रुवः। रयीणाम्। चिकेत। यत् ॥४॥

vजज्ञानं प्रादुर्भूतं vवेधां कर्मणो विधातारं सोमं vसप्त सप्तसंख्याकाः vमातरः गङ्गाद्या नद्यः सप्त छन्दांसि वा vश्रिये यजमानानामैश्वर्याय vअशासत अनुशासति अनुशासनं कुर्वन्ति। शास्तेर्लङि व्यत्ययेनात्मनेपदम्। vयत् यस्मात् vध्रुवः vअयं सोमः[3] vरयीणां धनानि vचिकेत जानाति तस्मादस्यानुशासने कृते यजमानानां धनादिसमृद्धिर्भवति ॥

अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः। स्पार्हा भवन्ति रन्तयो जुषन्त यत् ॥५॥

अस्य। व्रते। सऽजोषसः। विश्वे। देवासः। अद्रुहः। स्पार्हाः। भवन्ति। रन्तयः। जुषन्त। यत् ॥५॥

vअद्रुहः द्रोहवर्जिताः vविश्वे सर्वे vदेवासः देवाः vअस्य सोमस्य vव्रते कर्मणि vसजोषसः संगताः सन्तः vस्पार्हाः स्पृहणीयाः vभवन्ति। vरन्तयः रमणशीला देवाः सुतमेनं सोमं vयत् यदि vजुषन्त सेवन्ते तर्हि स्पृहणीया भवन्ति ॥ ॥ ४ ॥

यमी गर्भमृतावृधो दृशे चारुमजीजनन्। कविं मंहिष्ठमध्वरे पुरुस्पृहम् ॥ ६ ॥

यम्। ईमिति। गर्भम्। ऋतऽवृधः। दृशे। चारुम्। अजीजनन्।
कविम्। मंहिष्ठम्। अध्वरे। पुरुऽस्पृहम् ॥ ६ ॥

vऋतावृधः यज्ञस्य वर्धयित्र्यो वसतीवर्याख्या आपः vगर्भं गर्भस्थानीयम् vईम् एनं vयं सोमम् vअध्वरे यज्ञे vदृशे दर्शनाय vअजीजनन् उदपादयन्। कीदृशम्। vचारुं सर्वेषां कल्याणरूपं vकविं क्रान्तप्रज्ञं vमंहिष्ठं पूज्यतमं दातृतमं वा अत एव vपुरुस्पृहं बहुभिः स्पृहणीयं सोमं देवाः सेवन्त इति पूर्वेण समन्वयः ॥

१. ग-त३.६-भ१.२.७-'ऋत्विजः' नास्ति। २. ग-त३-भ४.५-संयोजन°। ३. ग-त१.२.३.४.५.७-भ१.२.४.६-सोयं सोमः।

समीचीने अभि त्मना यह्वी ऋतस्य मातरा । तन्वाना यज्ञमानुषग्यदञ्जते ॥७॥

समीचीने इति सम्ऽईचीने । अभि । त्मना । यह्वी इति । ऋतस्य । मातरा ।
तन्वानाः । यज्ञम् । आनुषक् । यत् । अञ्जते ॥ ७ ॥

स सोमः Vसमीचीने परस्परं संगते Vयह्वी महत्यौ Vऋतस्य यज्ञस्य Vमातरा निर्मात्र्यौ द्यावापृथिव्यौ Vत्मना आत्मना स्वयमेव तदा Vअभि गच्छति । Vयत् यदा Vयज्ञं Vतन्वानाः अध्वर्यवः Vआनुषक् अनुषक्तं[1] वसतीवरीभिः Vअञ्जते सोमं मिश्रयन्ति तदा स्वयमभिगच्छति ॥

ऋत्वा शुक्रेभिरक्षभिर्ऋणोरप व्रजं दिवः । हिन्वन्नृतस्य दीधितिं प्राध्वरे ॥ ८ ॥

ऋत्वा । शुक्रेभिः । अक्षऽभिः । ऋणोः । अप । व्रजम् । दिवः ।
हिन्वन् । ऋतस्य । दीधितिम् । प्र । अध्वरे ॥ ८ ॥

हे सोम त्वं Vऋत्वा कर्मणा ज्ञानेन वा Vशुक्रेभिः शुक्रैर्दीप्यमानैः Vअक्षभिः अक्षैरिन्द्रियैरिवाश्वानैः स्वतेजोभिः Vव्रजम् अन्धकारसमूहं Vदिवः अन्तरिक्षात् Vअप Vऋणोः अपगमय विनाशय । 'ऋणु गतौ' । तानादिकः । किं कुर्वन् । Vअध्वरे हिंसारहिते यज्ञे Vऋतस्य यज्ञस्य Vदीधितिं धारकं स्वीयं रसं Vप्र Vहिन्वन् प्रेरयन्[2] । अनेन लोकद्वयवर्तित्वमभिहितम् ॥ ॥ ५ ॥

'प्र पुनानाय' इति षड्चं सप्तमं सूक्तमाहेयस्य द्वितस्यार्षम् । पूर्ववच्छन्दोदेवते । तथा चानुक्रम्यते—'प्र पुनानाय षड् द्वित आहेयः' इति । गतो विनियोगः ॥

प्र पुनानाय वेधसे सोमाय वच उद्यतम् । भृतिं न भरा मतिभिर्जुजोषते ॥ १ ॥

प्र । पुनानाय । वेधसे । सोमाय । वचः । उत्ऽयतम् ।
भृतिम् । न । भर । मतिऽभिः । जुजोषते ॥ १ ॥

द्वितो नामर्षिः स्वात्मानं प्रत्याह । Vपुनानाय पवित्रेण पूयमानाय Vवेधसे कर्मणो विधात्रे Vमतिभिः स्तुतिभिः Vजुजोषते प्रीयमाणाय । यद्वा मतिभिः स्तोतृभिः सह जुजोषते प्रीणयित्रे । Vसोमाय Vउद्यतम् उद्युक्तं Vवचः Vप्र Vभर प्रकर्षेण संपादय । अभिष्टुहीत्यर्थः । तत्र दृष्टान्तः । Vभृतिं Vन । यथा भृतका भृतिं संपादयन्ति तद्वत् ॥

परि वाराण्यव्यया गोभिरञ्जानो अर्षति । त्री षधस्था पुनानः कृणुते हरिः ॥२॥

परि । वाराणि । अव्यया । गोभिः । अञ्जानः । अर्षति ।
त्री । सधऽस्था । पुनानः । कृणुते । हरिः ॥ २ ॥

Vगोभिः गोविकारैः क्षीरादिभिः Vअञ्जानः अज्यमानः सोमः Vअव्यया अविमयानि Vवाराणि वालानि पवित्राणि Vपरि Vअर्षति परिगच्छति । अपि च Vहरिः हरितवर्णः सोमः Vपुनानः पूयमानः सन् Vत्री त्रीणि Vसधस्था । सह तिष्ठन्त्यत्रेति सधस्थं स्थानम् । द्रोणकलशाधवनीयपूतभृदात्मकानि त्रीणि स्थानानि Vकृणुते करोति ॥

---

१. त१.२.४.५.७-भ६-मु–अनुषक्तं च । २. ग-त६-भ१.४.७–प्रेरयन् अपगमयन्; त१.२.३.४.५.७-भ२.६–प्रेरयन् अपगमय ।

परि कोशं मधुश्चुतमव्यये वारे अर्षति । अभि वाणीरृषीणां सप्त नूषत ॥ ३ ॥
परि । कोशम् । मधुऽश्चुतम् । अव्यये । वारे । अर्षति ।
अभि । वाणीः । ऋषीणाम् । सप्त । नूषत ॥ ३ ॥

स सोमः vअव्यये अविमये vवारे वाले पवित्रे vमधुश्चुतं मधुररसस्य व्यावयितारं[1] द्रोणकलशं प्रत्यात्मीयं रसं vपरि vअर्षति गमयति। तमिमं सोमं vऋषीणां vसप्त vवाणीः छन्दांसि vअभि vनूषत अभिष्टुवन्ति । ' नू स्तवने ' । कुटादिः ॥

परि णेता मतीनां विश्वदेवो अदाभ्यः । सोमः पुनानश्चम्वोर्विशद्धरिः ॥ ४ ॥
परि । नेता । मतीनाम् । विश्वऽदेवः । अदाभ्यः । सोमः । पुनानः । चम्वोः । विशत् । हरिः ॥४॥

vहरिः हरितवर्णः सः vसोमः vपुनानः पूयमानः सन् vचम्वोः अधिषवणफलकयोः vपरि vविशत् परिविशति। कीदृशः । vमतीनां स्तुतीनां vनेता यद्वा मतीनां स्तोतॄणां स्वकर्मण्युपनेता vविश्वदेवः सर्वदेवः । सोमेऽभिपूयमाणे सतीन्द्रादयः सर्वे देवाः सोमं प्रत्यागच्छन्ति खलु । तस्मात् सर्वदेवोपेतः अत एव vअदाभ्यः अहिंसितः केश्चिदपि ॥

परि दैवीरनु स्वधा इन्द्रेण याहि सरथम् । पुनानो वाघद्वाघद्भिरमर्त्यः ॥ ५ ॥
परि । दैवीः । अनु । स्वधाः । इन्द्रेण । याहि । सऽरथम् । पुनानः । वाघत् । वाघत्ऽभिः । अमर्त्यः ॥५॥

हे सोम त्वम् vइन्द्रेण vसरथं समानं रथमारुह्य vदैवीः देवानां संबन्धीनि[2] vस्वधाः बलानि vअनु देवसेनाः vपरि vयाहि परिगच्छ। कीदृशः । vपुनानः पूयमानः vवाघद्भिः । वाघत इति ऋत्विङ्नाम । हविषां प्रेरकैर्ऋत्विग्भिः vवाघत् ऊह्यमानः vअमर्त्यः मनुष्यधर्मरहितः । यद्वा । वाघद्भिर्ऋत्विग्भिः पुनानः पूयमानो वाघत् स्तोतॄणां यष्टॄणां धनादीनि प्रापयन् परिगच्छ ॥

परि सप्तिर्न वाजयुर्देवो देवेभ्यः सुतः । व्यानशिः पवमानो वि धावति ॥ ६ ॥
परि । सप्तिः । न । वाजऽयुः । देवः । देवेभ्यः । सुतः । विऽआनशिः । पवमानः । वि । धावति ॥६॥

vसप्तिर्न अश्व इव vवाजयुः युद्धमिच्छन् vदेवः दीप्यमानः vदेवेभ्यः देवार्थं vसुतः अभिषुतः vव्यानशिः पात्रेषु व्यापी vपवमानः पवित्रेण पूयमानः एतादृशः सोमः vपरि vधावति परितः पात्राण्यभिगच्छति ॥ व्यानशिः। 'अशू व्याप्तौ ' । 'आदृगमहन' इत्यत्र ' उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात् ' इति किप्रत्ययः । ' अश्नोतेश्च ' इति नुडागमः ॥ ॥ ६ ॥ ॥ ६ ॥

सप्तमेऽनुवाके एकादश सूक्तानि । तत्र ' सखायः ' इति षड्वृचं प्रथमं सूक्तम् । काण्वौ पर्वतनारदावृषी । अथवा कश्यपस्य पुत्र्यौ शिखण्डिन्याख्ये द्वे अप्सरसावस्य सूक्तस्य द्रष्ट्र्यौ । पूर्ववच्छन्दोदेवते । तथा चानुक्रम्यते—' सखायः पर्वतनारदौ काश्यप्यौ द्वे शिखण्डिन्यौ वाप्सरसौ ' इति । गतः सूक्तविनियोगः ॥

सखाय आ नि षीदत पुनानाय प्र गायत । शिशुं न यज्ञैः परि भूषत श्रिये ॥१॥
सखायः । आ । नि । सीदत । पुनानाय । प्र । गायत ।
शिशुम् । न । यज्ञैः । परि । भूषत । श्रिये ॥ १ ॥

१. ग-त-३.६-म१.२.४.७–शारयितारं । २. ग–संबंधिनीः ।

हे vसखायः सखिभूताः स्तोतार ऋत्विजः vआ vनि vषीदत स्तोतुमुपविशत। अथ vपुनानाय पूयमानाय सोमाय vप्र vगायत प्रकर्षेण गायत। तमभिष्टुत। ततोऽभिपुतं सोमं vयज्ञैः यजनीयैः हविर्भिः मिश्रणैश्च vश्रिये शोभार्थं vपरि vभूषत परितोऽलंकुरुत। तत्र दृष्टान्तः। vशिशुं vन यथा शिशुं बालं पुत्रं पितर आभरणैरलंकुर्वन्ति तद्वत्॥

प्रवर्ग्येऽभिष्टवे 'समी वत्सम्' इत्येका। सूत्रितं च—'समी वत्सं न मातृभिः सं वत्स इव मातृभिः' (आश्व. श्रौ. ४. ७) इति॥

समी वत्सं न मातृभिः सृजता गयसाधनम्। देवाव्यं मदमभि द्विशवसम् ॥२॥

सम्। ईमिति। वत्सम्। न। मातृऽभिः। सृजत। गयऽसाधनम्।
देवऽअव्यम्। मदम्। अभि। द्विऽशवसम्॥ २॥

हे ऋत्विजः vगयसाधनं गृहस्य साधनम् vईम् एनं सोमं vमातृभिः[1] मातृभूताभिर्वसतीवरीभिः vसं vसृजत संमिश्रयत। कथमिव। vवत्सं vन यथा वत्सं vमातृभिः गोभिः संयोजयन्ति तद्वत्। कीदृशम्। vदेवाव्यं देवानां रक्षकं vमदं मदनहेतुं vद्विशवसं द्विगुणवेगमतिशयितबलं वा। यद्वा द्वयोर्लोकयोस्तत्र स्थिता देवमनुष्या इत्यर्थः। तेषां हविर्धनप्रदानेन वर्धयितारम्। तं सोमम् vअभि सं सृजत॥

पुनाता दक्षसाधनं यथा शर्धाय वीतये। यथा मित्राय वरुणाय शंतमः ॥ ३॥

पुनात। दक्षऽसाधनम्। यथा। शर्धाय। वीतये। यथा। मित्राय। वरुणाय। शम्ऽतमः॥३॥

vदक्षसाधनं बलस्य साधनं धनादिवृद्धेर्वा साधकं सोमं vपुनात पवित्रेण पुनीत॥ 'पूङ् पवने' क्र्यादिः। तस्माल्लोटि 'तप्तनप्तनथनाश्च' इति तस्य तबादेशः। पित्त्वादीत्वाभावः। असौ सोमः vशर्धाय वेगार्थं vवीतये देवानां पानार्थं vयथा भवति vयथा वा vमित्राय vवरुणाय च vशंतमः अतिशयेन सुखं करोति तथा पुनीतेत्यर्थः॥

अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत। गोभिष्टे वर्णमभि वासयामसि ॥ ४॥

अस्मभ्यम्। त्वा। वसुऽविदम्। अभि। वाणीः। अनूषत।
गोभिः। ते। वर्णम्। अभि। वासयामसि॥ ४॥

हे सोम vवसुविदं धनस्य दातारं vत्वा त्वाम् vअस्मभ्यं धनादिप्रदानार्थं vवाणीः अस्मदीया वाचः vअभि vअनूषत अभिष्टुवन्ति। 'नू स्तवने'। वयं vते तव vवर्णम् आवरकं रसं vगोभिः गोविकारैः क्षीरादिभिः vअभि vवासयामसि अभिवासयामः। अभित आच्छादयामः॥

स नो मदानां पत इन्दो देवप्सरा असि। सखेव सख्ये गातुवित्तमो भव ॥५॥

सः। नः। मदानाम्। पते। इन्दो इति। देवऽप्सराः। असि।
सखाऽइव। सख्ये। गातुवित्ऽतमः। भव॥ ५॥

---

१. ग-त-भ-'मातृभिः' नास्ति।

ᵛनः अस्मदीयानां ᵛमदानां[1] मदकानां[1] ᵛपते स्वामिन् हे ᵛइन्दो सोम ᵛसः त्वं ᵛदेवप्सरा ᵛअसि । प्सर इति रूपनाम । दीप्तरूपो भवसि । स त्वं ᵛसखेव यथा सखा सुहृत् ᵛसख्ये मित्राय सख्यं मार्गं ज्ञापयति तद्वदस्माकमपि ᵛमातुवित्तमः अत्यन्तं मार्गस्य लम्भकः ᵛभव ज्ञापको भव ॥

सनेमि कृध्य१स्मदा रक्षसं कं चिदत्रिणम् । अपादेवं द्रुयुमंहो युयोधि नः ॥६॥

सनेमि । कृधि । अस्मत् । आ । रक्षसम् । कम् । चित् । अत्रिणम् ।
अप । अदेवम् । द्रुयुम् । अंहः । युयोधि । नः ॥ ६ ॥

हे सोम ᵛअस्मत् अस्मासु ᵛसनेमि । पुराणनामैतत् । पुराणं सत्यं ᵛकृधि कुरु । ᵛआ अपि च ᵛअत्रिणम् अदनशीलं ᵛकं ᵛचित् ᵛरक्षसम् ᵛअप युध्यस्व । कीदृशम् । ᵛअदेवम् अदेवनशीलं ᵛद्रुयुं द्रुयवन्तं सत्यानृतयुक्तं बाह्याभ्यन्तरमायायुक्तं वा । किंच ᵛनः अस्माकम् ᵛअंहः पापं चाप ᵛयुयोधि संप्रहर । युध्यतेः 'बहुलं छन्दसि' इति शपः श्लुः । 'वा छन्दसि' इति हेर्ङित्त्वाभावाद्गुणः[2] । धलोपश्छान्दसः । यौतेर्वा श्लौ पूर्ववद्रूपम् ॥ ॥ ७ ॥

'तं वः' इति षड्वृचं द्वितीयं सूक्तं पर्वतनारदयोरार्षम् । अन्यत् पूर्ववत् । 'तं वः' इत्यनुक्रान्तम् । गतः सूक्तविनियोगः ॥

तं वः सखायो मदाय पुनानमभि गायत । शिशुं न यज्ञैः स्वदयन्त गूर्तिभिः ॥१॥

तम् । वः । सखायः । मदाय । पुनानम् । अभि । गायत ।
शिशुम् । न । यज्ञैः । स्वदयन्त । गूर्तिऽभिः ॥ १ ॥

हे ᵛसखायः ऋत्विजः ᵛवः यूयं ᵛमदाय देवानां मदार्थं ᵛपुनानं पूयमानं ᵛतं सोमम् ᵛअभि ᵛगायत अभिष्टुत । तमिमं सोमं ᵛशिशुं ᵛन शिशुमिवालंकारैः क्षीरादिभिश्च यथा[3] स्वादूकुर्वन्ति तद्वत् ᵛयज्ञैः हविर्भिर्मिश्रणैः ᵛगूर्तिभिः स्तुतिभिश्च ᵛस्वदयन्त स्वादूकुर्वन्ति ॥

प्रवर्ग्येऽभिष्टवे 'सं वत्स इव मातृभिः' इत्येका[4] । सूत्रं च 'समी वत्सम्' इत्यनया सहोक्तम् ॥

सं वत्सइव मातृभिरिन्दुर्हिन्वानो अज्यते । देवावीर्मदो मतिभिः परिष्कृतः ॥२॥

सम् । वत्सःऽइव । मातृऽभिः । इन्दुः । हिन्वानः । अज्यते ।
देवऽअवीः । मदः । मतिऽभिः । परिऽकृतः ॥ २ ॥

ᵛहिन्वानः प्रेर्यमाणः ᵛइन्दुः सोमो वसतीवरीभिः ᵛसम् ᵛअज्यते । सम्यक् सिक्तो[5] भवति । तत्र दृष्टान्तः । ᵛवत्सइव वत्सो यथा ᵛमातृभिः गोभिः समक्तो भवति तद्वत् । कीदृशः । ᵛदेवावीः देवानां रक्षकः ᵛमदः मदकरः ᵛमतिभिः स्तुतिभिः ᵛपरिष्कृतः अलंकृतः ॥ भूषणार्थे 'संपर्युपेभ्यः०' इति सुडागमः । 'परिनिविभ्यः०' (पा. सू. ८. ३. ७०) इति सुटः षत्वम् ॥

अयं दक्षाय साधनोऽयं शर्धाय वीतये । अयं देवेभ्यो मधुमत्तमः सुतः ॥ ३ ॥

अयम् । दक्षाय । साधनः । अयम् । शर्धाय । वीतये । अयम् । देवेभ्यः । मधुमत्ऽतमः । सुतः ॥३॥

---

१. भ६–मादकानां; म७–मदानां । २. त१.२.३.४.५.७-म१.२.४.५.६-मु–हेर्ङित्त्वाद्गुणः । ३. त-भ–'यथा' नास्ति । ४. भ६–इत्येषा । ५. भ६–अक्तो ।

[v]अयं सोमः [v]दक्षाय बलाय वर्धनाय वा [v]साधनः साधयिता भवति। तथा [v]अयं सोमः [v]शर्धाय वेगार्थं [v]वीतये देवानां भक्षणार्थं च भवति। [v]सुतः अभिषुतः [v]अयं सोमः [v]देवेभ्यः इन्द्रादिभ्यः [v]मधुमत्तमः अतिशयेन माधुर्ययुक्तो भवति। अत्यन्तं मदकरो भवतीति वा ॥

गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धन्व। शुचिं ते वर्णमधि गोषु दीधरम् ॥४॥

गोऽमत्। नः। इन्दो इति। अश्वऽवत्। सुतः। सुऽदक्ष। धन्व।
शुचिम्। ते। वर्णम्। अधि। गोषु। दीधरम् ॥ ४ ॥

हे [v]सुदक्ष सुबल हे [v]इन्दो सोम [v]सुतः अभिषुतस्त्वं [v]नः अस्माकं [v]गोमत् यज्ञसाधन-गोयुक्तम् [v]अश्ववत् अश्वयुक्तं धनं [v]धन्व गमय। धवि[1]गत्यर्थो भ्वादिः। ततोऽहं [v]शुचिं पूतं दीप्यमानं वा [v]ते तव [v]वर्णं रसं [v]गोषु गव्येषु क्षीरादिषु [v]अधि [v]दीधरम् अधिधारयामि मिश्रयामि ॥

स नो हरीणां पत इन्दो देवप्सरस्तमः। सखेव सख्ये नर्यो रुचे भव ॥ ५ ॥

सः। नः। हरीणाम्। पते। इन्दो इति। देवप्सरःऽतमः।
सखाऽइव। सख्ये। नर्यः। रुचे। भव ॥ ५ ॥

हे [v]हरीणां [v]पते [v]नः अस्मदीयानां हरितवर्णानां पशूनां[1] स्वामिन् हे [v]इन्दो सोम [v]देव-प्सरस्तमः अतिशयेन दीप्तरूपोपेतः [v]सः त्वं [v]नर्यः कर्मनेतृभ्य ऋत्विग्भ्यो हितः स त्वं [v]नः अस्माकं [v]रुचे [v]भव दीप्तिकरो भव। किमिव। [v]सखेव यथा सखा [v]सख्ये मित्राय दीप्तिकरो भवति तद्वत् ॥

सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणम्। साह्वाँ इन्दो परि बाधो अप द्वयुम् ॥६॥

सनेमि। त्वम्। अस्मत्। आ। अदेवम्। कम्। चित्। अत्रिणम्।
सह्वान्। इन्दो इति। परि। बाधः। अप। द्वयुम् ॥ ६ ॥

हे सोम [v]त्वं [v]सनेमि पुराणं सख्यम् [v]अस्मत् अस्मासु कुरु। [v]आ अपि च [v]अदेवम् अदेवनशीलं [v]कं [v]चित् अपि [v]अत्रिणम् अदनशीलं राक्षसमस्मदस्मत्तोऽपगमय। किंच हे [v]इन्दो [v]साह्वान् शत्रूनभिभवन् [v]बाधः बाधमानान् [v]परि जहि। तथा [v]द्वयुं द्वयवन्तं सत्यानृतयुक्तं बाह्याभ्यन्तरमायाद्वयोपेतं वा राक्षसमस्मत्तोऽपगमय ॥ ॥ ८ ॥

'इन्द्रमच्छ' इति चतुर्दशर्चं तृतीयं सूक्तमौदिग्रहं पवमानसोमदेवताकम्। प्रथमस्य तृचस्य चक्षुराख्यपुत्रोऽग्निर्ऋषिः। द्वितीयस्य मनुपुत्रश्चक्षुर्नामा। अप्सुनाम्नः पुत्रो मनुस्तृतीयस्य। एवं नवर्चो गताः। शिष्टानामपि पञ्चानां चाक्षुषोऽग्निः। तथा चानुक्रम्यते—'इन्द्रमच्छ षळूनाग्निश्चाक्षुषश्चक्षु-र्मानवो मनुराप्सव इति तृचाः पञ्चाग्निः' इति। गतो विनियोगः ॥

इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः। श्रुष्टी जातास इन्दवः स्वर्विदः ॥ १ ॥

इन्द्रम्। अच्छ। सुताः। इमे। वृषणम्। यन्तु। हरयः।
श्रुष्टी। जातासः। इन्दवः। स्वःऽविदः ॥ १ ॥

[v]श्रुष्टी। श्रुष्टीति क्षिप्रनाम। क्षिप्रं [v]जातासः जाताः [v]इन्दवः पात्रेषु क्षरन्तः [v]स्वर्विदः सर्वज्ञाः [v]हरयः हरितवर्णाः [v]सुताः अभिषुताः [v]इमे सोमाः [v]वृषणं कामानां सेक्तारम् [v]इन्द्रमच्छ [v]यन्तु अभिगच्छन्तु ॥

---

१. त६-भ७-पते पशूनां; भ६-पशूनां पते।

अयं भराय सानसिरिन्द्राय पवते सुतः । सोमो जैत्रस्य चेतति यथा विदे ॥२॥

अयम् । भराय । सानसिः । इन्द्राय । पवते । सुतः । सोमः । जैत्रस्य । चेतति । यथा । विदे ॥२॥

vभराय संग्रामाय तदर्थं vसानसिः भजनीयः vसुतः अभिषुतः vअयं vसोमः vइन्द्राय इन्द्रार्थं vपवते ग्रहादिषु क्षरति । ततः vसोमः vजैत्रस्य ॥ 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानसंज्ञा । 'चतुर्थ्यर्थे बहुलम्०' इति षष्ठी ॥ जयशीलमिन्द्रं vचेतति जानाति । vयथा इन्द्रः vविदे लोकैर्ज्ञायते तथा जानाति ॥

अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णीत सानसिम् । वज्रं च वृषणं भरत्समप्सुजित् ॥३॥

अस्य । इत् । इन्द्रः । मदेषु । आ । ग्राभम् । गृभ्णीत । सानसिम् ।

वज्रम् । च । वृषणम् । भरत् । सम् । अप्सुऽजित् ॥ ३ ॥

vआ अनन्तरम् vइन्द्रः vअस्येत् अस्य सोमस्यैव vमदेषु संजातेषु vसानसिं सर्वैः संभजनीयं vग्राभं ग्राहं ग्रहीतव्यं धनुः vगृभ्णीत गृह्णाति । 'हग्रहोर्भः०' इति भत्वम् । किंच vअप्सुजित् उदकार्थं वृत्रस्य जेता । यद्वा आप इत्यन्तरिक्षनाम । अन्तरिक्षेऽहिनामकस्य जेता । इन्द्रः vवृषणं वर्षितारं vवज्रं vच vसं vभरत् संबिभर्तु । बिभर्तेर्लेट्यडागमः ॥

प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव । द्युमन्तं शुष्ममा भर स्वर्विदम् ॥४॥

प्र । धन्व । सोम । जागृविः । इन्द्राय । इन्दो इति । परि । स्रव ।

द्युऽमन्तम् । शुष्मम् । आ । भर । स्वःऽविदम् ॥ ४ ॥

हे vसोम vजागृविः जागरणशीलस्त्वं vप्र vधन्व प्रक्षर । हे vइन्दो सोम vइन्द्राय vपरि vस्रव परितः पात्रेषु क्षर । किंच vद्युमन्तं दीप्तियुक्तं vस्वर्विदं सर्वस्य लम्भकं vशुष्मं शत्रूणां शोषकं बलम् vआ vभर आहर ॥

इन्द्राय वृषणं मदं पवस्व विश्वदर्शतः । सहस्रयामा पथिकृद्विचक्षणः ॥ ५ ॥

इन्द्राय । वृषणम् । मदम् । पवस्व । विश्वऽदर्शतः । सहस्रऽयामा । पथिऽकृत् । विऽचक्षणः॥५॥

हे सोम त्वं vवृषणं वर्षितारं vमदं मदहेतुं रसम् vइन्द्राय इन्द्रार्थं vपवस्व क्षर । कीदृशः । vविश्वदर्शतः सर्वैर्दर्शनीयः vसहस्रयामा बहुमार्गः vपथिकृत् यजमानानां सन्मार्गकरणशीलः vविचक्षणः सर्वस्य विद्रष्टा ॥ ॥ ९ ॥

अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः । सहस्रं याहि पथिभिः कनिक्रदत् ॥६॥

अस्मभ्यम् । गातुवित्ऽतमः । देवेभ्यः । मधुमत्ऽतमः ।

सहस्रम् । याहि । पथिऽभिः । कनिक्रदत् ॥ ६ ॥

हे सोम vअस्मभ्यं vगातुवित्तमः अत्यन्तं मार्गस्य लम्भकः तथा vदेवेभ्यः च vमधुमत्तमः अत्यन्तं स्वादुकारी त्वं vकनिक्रदत् शब्दं कुर्वन् vसहस्रं vपथिभिः बहुभिर्मार्गैः vयाहि कलशमागच्छ ॥

पवस्व देववीतय इन्दो धाराभिरोजसा । आ कलशं मधुमान्त्सोम नः सदः ॥७॥

पवस्व । देवऽवीतये । इन्दो इति । धाराभिः । ओजसा ।
आ । कलशम् । मधुऽमान् । सोम । नः । सदः ॥ ७ ॥

हे vइन्दो सोम vदेववीतये देवानां भक्षणाय vओजसा बलेन vधाराभिः आत्मीयाभिः vपवस्व क्षर । हे vसोम vमधुमान् मदकररसवांस्त्वं vनः अस्मदीयं vकलशं द्रोणाभिधानम् vआ vसदः । सदेर्लुङि रूपम् । आसीद ॥

तवं द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः । त्वां देवासो अमृताय कं पपुः ॥ ८ ॥
तवं । द्रप्साः । उदऽअप्रुतः । इन्द्रम् । मदाय । ववृधुः । त्वाम् । देवासः । अमृताय । कम् । पपुः॥८॥

vउदप्रुतः वसतीवर्याख्यमुदकं प्रति गच्छन्तः । यद्वा । उदकस्य निर्गमयितारः । vतव स्वभूताः vद्रप्साः द्रुतगामिनो रसाः vमदाय मदार्थम् vइन्द्रं vवावृधुः वर्धयन्ति । ततः vदेवासः देवा इन्द्रादयः vकं सुखकरं vत्वाम् vअमृताय अमरणार्थं vपपुः पिबन्ति ॥

आ नः सुतास इन्दवः पुनाना धावता रयिम् । वृष्टिद्यावो रीत्यापः स्वर्विदः ॥ ९ ॥
आ । नः । सुतासः । इन्दवः । पुनानाः । धावत । रयिम् ।
वृष्टिऽद्यावः । रीतिऽआपः । स्वःऽविदः ॥ ९ ॥

हे vसुतासः अभिषूयमाणा हे vइन्दवः दीप्ताः पात्रेषु क्षरन्तो वा हे vरीत्यापः यैः पृथिवीं प्रति स्रवणशीला आपः कृताः तादृशा हे सोमाः vपुनानाः पूयमाना यूयं vनः अस्मभ्यं vरयिम् vआ vधावत आगमयत । कीदृशाः । vवृष्टिद्यावः । वृष्टिमभि द्यौर्यैः क्रियते । वृष्ट्यभिमुखद्युलोकवन्तः vस्वर्विदः सर्वस्य लम्भकाः ॥

सोमः पुनान ऊर्मिणाव्यो वारं वि धावति । अग्रे वाचः पवमानः कनिक्रदत् ॥ १० ॥
सोमः । पुनानः । ऊर्मिणा । अव्यः । वारम् । वि । धावति ।
अग्रे । वाचः । पवमानः । कनिक्रदत् ॥ १० ॥

vपुनानः पूयमानः vसोमः vऊर्मिणा स्वीयया धारया vअव्यः अवेः vवारं वालं पवित्रं vवि vधावति विविधं गच्छति । कीदृशः सोमः[1] । vपवमानः पूतः vवाचः स्तोत्रस्य vअग्रे vकनिक्रदत् पुनःपुनः शब्दं कुर्वन् वि धावति ॥ ॥ १० ॥

धीभिर्हिन्वन्ति वाजिनं वने क्रीळन्तमत्यविम् ।
अभि त्रिपृष्ठं मतयः समस्वरन् ॥ ११ ॥
धीभिः । हिन्वन्ति । वाजिनम् । वने । क्रीळन्तम् । अतिऽअविम् ।
अभि । त्रिऽपृष्ठम् । मतयः । सम् । अस्वरन् ॥ ११ ॥

vवाजिनं बलवन्तं vवने वननीये वसतीवर्याख्ये उदके vक्रीळन्तं संक्रीडमानम् vअत्यविम् । अविशब्देन तद्रोमकृतं पवित्रमभिधीयते । अतिक्रान्तपवित्रं सोममृत्विजः vधीभिः स्तुतिभिः

---

१. त१.२.३.४.५.७-म२.६-मु-'सोमः' नास्ति ।

Vहिन्वन्ति वर्धयन्ति । यद्वा । धीभिः । वर्णलोपश्छान्दसः । धीतिभिरङ्गुलीभिर्हिन्वन्ति प्रेरयन्ति । ' हि गतौ वृद्धौ च ' स्वादिः । किंच Vत्रिपृष्ठम् । त्रीणि पवित्राणि द्रोणकलशाधवनीयपूतभृदाख्यानि[1] पात्राणि स्पृशतीति त्रीणि सवनानि वा स्पृशतीति स तथोक्तः । तं सोमं Vमतयः स्तुतयः Vअभि Vसमस्वरन् अभितः संस्तुवन्ति ॥

असर्जि कलशाँ अभि मीळ्हे सप्तिर्न वाजयुः । पुनानो वाचं जनयन्नसिष्यदत् ॥ १२ ॥

असर्जि । कलशान् । अभि । मीळ्हे । सप्तिः । न । वाजऽयुः ।
पुनानः । वाचम् । जनयन् । असिस्यदत् ॥ १२ ॥

Vवाजयुः यजमानानामन्नमिच्छन् स सोमः Vकलशान् अभिलक्ष्य कलशेषु Vअसर्जि सृज्यते । तत्र दृष्टान्तः । Vसप्तिर्न यथाश्वः Vमीळ्हे । संग्रामनामैतत् । संग्रामे सृज्यते तद्वत् । ततः Vपुनानः पूयमानः सोमः Vवाचं शब्दं Vजनयन् उत्पादयन् Vअसिष्यदत् पात्रेषु स्यन्दते ॥

पवते हर्यतो हरिरति ह्वरांसि रंह्या । अभ्यर्षन्त्स्तोतृभ्यो वीरवद्यशः ॥ १३ ॥

पवते । हर्यतः । हरिः । अति । ह्वरांसि । रंह्या । अभिऽअर्षन् । स्तोतृऽभ्यः । वीरऽवत् । यशः ॥ १३ ॥

Vहर्यतः स्पृहणीयः Vहरिः हरितवर्णः सोमः Vरंह्या । तृतीयाया आकारः । साधुवेगेन Vह्वरांसि कुटिलान्यनृजूनि पवित्राणि Vअति Vपवते अतीत्य गच्छति । किं कुर्वन् । Vस्तोतृभ्यो Vवीरवत् पुत्रयुक्तं Vयशः Vअभ्यर्षन् अभिगमयन् पवते ॥

अया पवस्व देवयुर्मधोर्धारा असृक्षत । रेभन्पवित्रं पर्येषि विश्वतः ॥ १४ ॥

अया । पवस्व । देवऽयुः । मधोः । धाराः । असृक्षत । रेभन् । पवित्रम् । परि । एषि । विश्वतः ॥ १४ ॥

हे सोम Vदेवयुः देवान् कामयमानस्त्वम् Vअया अनया धारया Vपवस्व क्षर । ततः Vमधोः मदकरस्य तव Vधाराः आत्मीयाः Vअसृक्षत सृज्यन्ते । अनन्तरं Vरेभन् शब्दायमानः Vपवित्रं Vविश्वतः Vपर्येषि सर्वतः परिगच्छसि ॥ ॥ ११ ॥

' परीतः ' इति षड्विंशत्यृचं चतुर्थं सूक्तम् । ' त्वं सोमासि ' (ऋ. सं. ९. ६७) इत्यत्रोक्ता भरद्वाजकश्यपाद्याः सप्तर्षयः । आद्या बृहती द्वितीया सतोबृहती । अयमेकः प्रगाथः । ' परि सुवानः ' इत्येषा तृतीयैकविंशत्यक्षरा भुरिग्विराड् द्विपदा । ' नृभिर्येमानः ' इति षोडशी विंशत्यक्षरा द्विपदा विराट् । चतुर्थ्यादिद्वौ प्रगाथौ । दशम्यादित्रयः सप्तदश्यादिपञ्च प्रगाथाः । पवमानः सोमो देवता । तथा चानुक्रम्यते—' परीतः षड्विंशतिः सप्तर्षयः प्रागाथं तृतीयाषोळश्यौ द्विपदे अष्टम्याद्ये बृहत्यौ ' इति । गतः सूक्तविनियोगः ॥

परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।
दधन्वाँ यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥ १ ॥

परि । इतः । सिञ्चत । सुतम् । सोमः । यः । उत्ऽतमम् । हविः ।
दधन्वान् । यः । नर्यः । अप्ऽसु । अन्तः । आ । सुसाव । सोमम् । अद्रिऽभिः ॥ १ ॥

१. त-१.२.३.४.५.७-म१.२.४.६-°पूतभृदात्मकानि ।

हे ऋत्विजः [v]सुतम् अभिषुतं सोमम् [v]इतः अस्मात् कर्मण ऊर्ध्वंमथवास्मात्प्रदेशादूर्ध्वं [v]परि [v]षिञ्चत वसतीवरीभिः ॥ ' इतो षिञ्चत ' इत्यत्र संहितायां ' छन्दसि[1] ' इति[1] रोरुत्वम् । ' आदेशप्रत्यययोः ' इति षत्वम् ॥ [v]यः [v]सोमः देवानाम् [v]उत्तमं प्रशस्यं [v]हविः भवति [v]आ अपि च [v]नर्यः मनुष्यहितः [v]यः च सोमः [v]अप्सु वसतीवरीष्वन्तरिक्षे वा [v]अन्तः [v]दधन्वान् गच्छन् भवति तं [v]सोममद्रिभिः ग्रावभिरध्वर्युः [v]सुषाव अभिषुतं चकार । तं परि षिञ्चतेति समन्वयः ॥

नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभितरः ।
सुते चित्त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ॥ २ ॥

नूनम् । पुनानः । अविऽभिः । परि । स्रव । अदब्धः । सुरभिम्ऽतरः ।
सुते । चित् । त्वा । अप्ऽसु । मदामः । अन्धसा । श्रीणन्तः । गोभिः । उत्ऽतरम् ॥ २ ॥

हे सोम [v]अदब्धः कैश्चिदप्यहिंसितः [v]सुरभितरः अत्यन्तं सुगन्धिस्त्वं [v]नूनम् इदानीं [v]पुनानः पूयमानः सन् [v]अविभिः अविवालकृतैः पवित्रैस्तेभ्यः [v]परि [v]स्रव परितः क्षर । [v]सुते [v]चित् अभिषुते सति [v]अन्धसा सक्तुलक्षणेनान्नेन [v]गोभिः गोविकारैः क्षीरैः क्षीरादिभिः [v]श्रीणन्तः मिश्रयन्तो वयम् [v]उत्तरम् उद्ततरम् [v]अप्सु वसतीवरीषु संस्थितं त्वां [v]मदामः मन्दामहे स्तुमः ॥

परि सुवानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥ ३ ॥

परि । सुवानः । चक्षसे । देवऽमादनः । क्रतुः । इन्दुः । विऽचक्षणः ॥ ३ ॥

[v]सुवानः अभिषूयमाणः सोमः [v]चक्षसे सर्वेषां दर्शनाय [v]परि स्रवति । कीदृशः । [v]देवमादनः देवानां तर्पयिता [v]क्रतुः कर्ता [v]इन्दुः पात्रेषु क्षरणशीलो दीप्तो वा [v]विचक्षणः सर्वस्य विद्रष्टा ॥

पुनानः सोम धारयापो वसानो अर्षसि ।
आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ॥ ४ ॥

पुनानः । सोम । धारया । अपः । वसानः । अर्षसि ।
आ । रत्नऽधाः । योनिम् । ऋतस्य । सीदसि । उत्सः । देव । हिरण्ययः ॥ ४ ॥

हे [v]सोम [v]पुनानः पूयमानस्त्वम् [v]अपः उदकानि वसतीवर्याख्यानि [v]वसानः आच्छादयन् [v]धारया [v]अर्षसि पवित्रं गच्छसि । ततः [v]रत्नधाः रत्नानां दाता त्वम् [v]ऋतस्य सत्यभूतस्य यज्ञस्य [v]योनिं स्थानम् [v]आ [v]सीदसि । हे [v]देव द्योतमान सोम [v]उत्सः प्रस्यन्दनशीलस्त्वं [v]हिरण्ययः हिरण्मयो हिरण्यस्योत्पत्तिस्थानं खलु । यद्वा देवानां हितरमणीयो भवसि ॥

दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ।
आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ॥ ५ ॥

दुहानः । ऊधः । दिव्यम् । मधु । प्रियम् । प्रत्नम् । सधऽस्थम् । आ । असदत् ।
आऽपृच्छ्यम् । धरुणम् । वाजी । अर्षति । नृऽभिः । धूतः । विऽचक्षणः ॥ ५ ॥

---

१. त३.६-म१.२.४.७-छांदसं ।

vमधु मदकरं vप्रियं प्रीणनकारि vदिव्यं दिवि भवम् vऊधः सोमवल्लीलक्षणं[1] vदुहानः सोमः vप्रत्नं पुरातनं vसधस्थम्। सह तिष्ठन्त्यत्रेति सधस्थं स्थानम्। अन्तरिक्षम् vआसदत् आसीदति। सदेर्लुकि रूपम्। ततः vआपृच्छ्यं कर्मण्याप्रष्टव्यं vधरुणं कर्मणो धारयितारं यजमानं vवाजी अन्नवान् सोमः vअर्षति। तस्मा अन्नं दातुमभिगच्छति। कीदृशः। vनृभिः कर्मनेतृभिर्ऋत्विग्भिः vधूतः अदाभ्यगृहे परिशोधितः। 'तैरेनं चतुराधूनोति पञ्चकृत्वः सप्तकृत्वो वा' इत्यापस्तम्बेन सूत्रितम्। vविचक्षणः सर्वस्य विद्रष्टा॥ ॥ १२ ॥

पुनानः सोम जागृविरव्यो वारे परि प्रियः।
त्वं विप्रो अभवोऽङ्गिरस्तमो मध्वा यज्ञं मिमिक्ष नः॥ ६॥

पुनानः। सोम। जागृविः। अव्यः। वारे। परि। प्रियः।
त्वम्। विप्रः। अभवः। आङ्गिरःऽतमः। मध्वा। यज्ञम्। मिमिक्ष। नः॥ ६॥

हे vसोम vजागृविः जागरणशीलः vप्रियः प्रीणयिता त्वं vपुनानः पूयमानः सन् vअव्यः अवेः vवारे वाले पवित्रे vपरि क्षरसि। किंच vविप्रः मेधावी vत्वम् vअङ्गिरस्तमः अङ्गिरसां वरिष्ठः पितॄणां नेता vअभवः[2] भवसि। स त्वं vनः अस्मदीयं vयज्ञं vमध्वा मधुनात्मीयेन रसेन vमिमिक्ष सिञ्च। मिहेः सेचनार्थस्य सनि रूपम्॥

सोमो मीढ्वान्पवते गातुवित्तम ऋषिर्विप्रो विचक्षणः।
त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि॥ ७॥

सोमः। मीढ्वान्। पवते। गातुवित्ऽतमः। ऋषिः। विप्रः। विऽचक्षणः।
त्वम्। कविः। अभवः। देवऽवीतमः। आ। सूर्यम्। रोहयः। दिवि॥ ७॥

vमीढ्वान् कामानां सेक्ता vसोमः vपवते क्षरति। कीदृशः। vगातुवित्तमः अत्यन्तं मार्गस्य लम्भकः vऋषिः सर्वस्य प्रदर्शकः vविप्रः मेधावी vविचक्षणः विद्रष्टा। किंच vकविः क्रान्तप्रज्ञः vत्वं vदेववीतमः अत्यन्तं देवकामः vअभवः भवसि। अपि च vदिवि द्युलोके vसूर्यम् vआ vरोहयः प्रादुर्भावयसि॥

सोम उ षुवाणः सोतृभिरधि ष्णुभिरवीनाम्।
अश्वयेव हरिता याति धारया मन्द्रया याति धारया॥ ८॥

सोमः। ऊँ इति। सुवानः। सोतृऽभिः। अधि। स्नुऽभिः। अवीनाम्।
अश्वयाऽइव। हरिता। याति। धारया। मन्द्रया। याति। धारया॥ ८॥

vसोतृभिः अभिषुण्वद्भिर्ऋत्विग्भिः vसुवानः अभिषूयमाणः vसोमः vअवीनां vस्नुभिः। 'मांसपृत्स्नूनामुपसंख्यानम्' (पा. सू. ६. १. ६३. १) इति सानुशब्दस्य स्नुभावः। समुच्छ्रितैर्वालैः पवित्रैः vअधि vयाति अधिकं गच्छति। vउ इति प्रसिद्धौ। vअश्वयेव यद्वयेव vहरिता हरितवर्णया vधारया vयाति। vमन्द्रया मदकारिण्या vधारया द्रोणकलशमभिगच्छति[3]॥

---

१. ग-त३.६-म१.७–सोमलक्षणं। २. त६-म१.२.७–वा। ३. त१.२.३.४.५.७-म२.६-मु–°मधिगच्छति।

अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।
समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥ ९ ॥

अनूपे । गोऽमान् । गोभिः । अक्षारिति । सोमः । दुग्धाभिः । अक्षारिति ।
समुद्रम् । न । सम्ऽवरणानि । अग्मन् । मन्दी । मदाय । तोशते ॥ ९ ॥

vगोमान् गोयुक्तः सोमः vअनूपे निम्ने देशे कलशे vगोभिः गोविकारैः क्षीरादिभिः सह vअक्षाः क्षरति । तदेवोच्यते । सः vसोमः आत्मनो मिश्रणार्थं vदुग्धाभिः गोभिः सह vअक्षाः क्षरति । क्षरतेर्लुङि रूपम् । किंच vसमुद्रं vन यथा समुद्रमुदकानि गच्छन्ति तद्वत् vसंवरणानि संभजनीयानि रसरूपाण्यन्नानि द्रोणकलशम् vअग्मन् गच्छन्ति । गमेर्लुङि च्लेर्लुकि रूपम् । किंच vमन्दी मदकरः सोमः vमदाय मदार्थं vतोशते हन्यतेऽभिषूयते । तोशतिर्वधकर्मा ॥

आ सोम सुवानो अद्रिभिस्तिरो वाराण्यव्यया ।
जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे ॥ १० ॥

आ । सोम । सुवानः । अद्रिऽभिः । तिरः । वाराणि । अव्यया ।
जनः । न । पुरि । चम्वोः । विशत् । हरिः । सदः । वनेषु । दधिषे ॥ १० ॥

हे vसोम vअद्रिभिः ग्रावभिः vसुवानः अभिषूयमाणस्त्वम् vअव्यया अविमयानि vवाराणि वालानि पवित्राणि vतिरः कुर्वन् व्यवधायकानि कुर्वाणः सन् vआ पवस[1] इति शेषः । vहरिः हरितवर्णः स सोमः vचम्वोः अधिषवणफलकयोः उपरि[2] स्थिते कलशे[2] vविशत् प्रविशति । तत्र दृष्टान्तः । vजनो vन यथा जनः vपुरि पुरे प्रविशति । स त्वं vवनेषु काष्ठनिर्मितेषु पात्रेषु vसदः स्थानं vदधिषे करोषि ॥ ॥ १३ ॥

स मामृजे तिरो अण्वानि मेष्यो मीळ्हे सप्तिर्न वाजयुः ।
अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ॥ ११ ॥

सः । ममृजे । तिरः । अण्वानि । मेष्यः । मीळ्हे । सप्तिः । न । वाजऽयुः ।
अनुऽमाद्यः । पवमानः । मनीषिऽभिः । सोमः । विप्रेभिः । ऋक्वऽभिः ॥ ११ ॥

vवाजयुः अन्नकामः vअण्वानि अणूनि सूक्ष्माणि vमेष्यः मेष्या अवे रोमाणि पवित्राणि vतिरः कुर्वन् vसः vसोमः vममृजे परिशोध्यते । अलंक्रियते वा । तत्र दृष्टान्तः । vससिर्न यथा जयकामैरश्वो vमीळ्हे संग्रामेऽलंक्रियते तद्वत् । कीदृशः । vअनुमाद्यः अनुमोदनीयः सर्वैः vपवमानो vमनीषिभिः ऋत्विग्भिः पूयमानः तथा vऋक्वभिः । ' छन्दसीवनिपौ ' इति वनिप् । स्तुतिमद्भिर्विप्रैर्मेधाविभिः अभिष्टुतो मृज्यते ॥

प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।
अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥ १२ ॥

---

१. त६-म१.७–पवस्व । २. ग-त३.६-म१.७–' उपरि स्थिते कलशे ' नास्ति ।

प्र । सोम । देवऽवीतये । सिन्धुः । न । पिप्ये । अर्णसा ।
अंशोः । पयसा । मदिरः । न । जागृविः । अच्छ । कोशम् । मधुऽश्चुतम् ॥ १२ ॥

हे vसोम vदेववीतये देवानां पानाय तदर्थम् vअर्णसा वसतीवर्याख्येनोदकेन vप्र vपिप्ये प्रप्यायसे । तत्र दृष्टान्तः । vसिन्धुर्न । यथा सिन्धुरुदकेन प्रपिप्ये प्रप्यायते तद्वत् । प्यायतेर्हिटि ' लिड्यङोश्च ' इति पीभावः । ततः स त्वं vमदिरो vन मदकरः सुरादिरिव vजागृविः जागरणशीलः । यद्वा । नः संप्रत्यर्थे । इदानीं मदकरो जागरणशीलस्त्वम् । vअंशोः लताखण्डस्य vपयसा रसेन vमधुश्चुतं मधुररसस्य क्षारयितारं[1] vकोशं द्रोणकलशम् vअच्छ अभिगच्छसि ॥

आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।
तमी हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥ १३ ॥

आ । हर्यतः । अर्जुने । अत्के । अव्यत । प्रियः । सूनुः । न । मर्ज्यः ।
तम् । ईम् । हिन्वन्ति । अपसः । यथा । रथम् । नदीषु । आ । गभस्त्योः ॥ १३ ॥

vहर्यतः स्पृहणीयः vप्रियः प्रीणयिता vसूनुर्न सूनुरिव vमर्ज्यः मार्जनीयः सोमः vअर्जुने अर्जुनवर्णे vअत्के रूपे पवित्रे vआ vअव्यत आवृणोति । vतमीम् एनं सोममृत्विजः vनदीषु नदमानासु वसतीवरीषु vगभस्त्योः बाह्वोः vआ आभिमुख्येन vहिन्वन्ति प्रेरयन्ति । तत्र दृष्टान्तः । vअपसो vयथा वेगवन्तो जनाः vरथं संग्रामेषु प्रेरयन्ति तद्वत् ॥

अभि सोमास आयवः पवन्ते मद्यं मदम् ।
समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ॥ १४ ॥

अभि । सोमासः । आयवः । पवन्ते । मद्यम् । मदम् ।
समुद्रस्य । अधि । विष्टपि । मनीषिणः । मत्सरासः । स्वःऽविदः ॥ १४ ॥

vआयवः गमनशीलाः vसोमासः सोमाः vमद्यं मदकरं vमदम् आत्मीयं रसम् vअभि vपवन्ते । अभितो निर्गमयन्ति । कुत्रेत्युच्यते । vसमुद्रस्य अन्तरिक्षस्य vअधि vविष्टपि अधिके समुच्छ्रिते पवित्रे । यद्वा । समुद्रस्य । समुद्रवन्त्यस्माद्रसाः[2] । तस्य कलशस्याध्युपरि विष्टपि स्थाने पवित्रे निर्गमयन्ति । कीदृशाः । vमनीषिणः मनस ईशितारः vमत्सरासः मदकराः vस्वर्विदः सर्वस्य लम्भकाः ॥

तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।
अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥ १५ ॥

तरत् । समुद्रम् । पवमानः । ऊर्मिणा । राजा । देवः । ऋतम् । बृहत् ।
अर्षत् । मित्रस्य । वरुणस्य । धर्मणा । प्र । हिन्वानः । ऋतम् । बृहत् ॥ १५ ॥

vपवमानः पूयमानः vदेवः द्योतमानः vबृहत् अत्यन्तम् vऋतं सत्यभूतो vराजा सोमः vसमुद्रम् अन्तरिक्षं कलशं वा vऊर्मिणा धारया vतरत् तरति । vहिन्वानः प्रेर्यमाणः vऋतं vबृहत् अत्यन्तं सत्यभूतः स सोमः vमित्रस्य vवरुणस्य मित्रावरुणयोः vधर्मणा धारणार्थं vप्र vअर्षत् प्रगच्छति ॥ ॥१५॥

---

१. त१.२.५–क्षावयितारं; त४-म६–च्यावयितारं । २. त-१.२.४.५.७–तस्मात् समुद्रवंति रसाः; त३-म२.४.६-मु–यस्मात् समुद्रवंति रसाः ।

नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥ १६ ॥

नृऽभिः । येमानः । हर्यतः । विऽचक्षणः । राजा । देवः । समुद्रियः ॥ १६ ॥

vनृभिः कर्मनेतृभिः vयेमानः नियम्यमानः vहर्यतः स्पृहणीयः vविचक्षणः विद्रष्टा vदेवः दीप्यमानः vसमुद्रियः अन्तरिक्षे भवः vराजा सोम इन्द्रार्थं पवत इत्युत्तरेण संबन्धः॥ 'समुद्राभ्राद्भः' इति भवार्थे[1] घप्रत्ययः ॥

इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।
सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥ १७ ॥

इन्द्राय । पवते । मदः । सोमः । मरुत्वते । सुतः ।
सहस्रऽधारः । अति । अव्यम् । अर्षति । तम् । ईमिति । मृजन्ति । आयवः ॥ १७ ॥

vमदः मादकः vसुतः अभिषुतः vसोमः vमरुत्वते मरद्भिरुह्यते vइन्द्राय इन्द्रार्थं vपवते क्षरति । ततः vसहस्रधारः बहुधारोपेतः सोमः vअव्यम् अविमयं पवित्रम् vअति vअर्षति अतिगच्छति । vतम् इमं सोमम् vआयवः मनुष्या ऋत्विजः vमृजन्ति शोधयन्ति ॥

पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति ।
अपो वसानः परि गोभिरुत्तरः सीदन्वनेष्वव्यत ॥ १८ ॥

पुनानः । चमू इति । जनयन् । मतिम् । कविः । सोमः । देवेषु । रण्यति ।
अपः । वसानः । परि । गोभिः । उत्ऽतरः । सीदन् । वनेषु । अव्यत ॥ १८ ॥

vचमू । सप्तम्याः पूर्वसवर्णदीर्घः । चम्वोरधिषवणफलकयोः vपुनानः पूयमानोऽभिषूयमाणः vमतिं स्तुतिं vजनयन् उत्पादयन् vकविः क्रान्तप्रज्ञ एतादृशः vसोमः vदेवेषु इन्द्रादिषु vरण्यति । किंच vअपः वसतीवरीः vवसानः आच्छादयन्[2] vवनेषु काष्ठेषु पात्रेषु vसीदन् सोमः vगोभिः गोविकारैः क्षीरादिभिः vपरि vअव्यत परिदीयते । आच्छाद्यते ॥

तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।
पुरूणि बभ्रो नि चरन्ति मामव परिधीँरति ताँ इहि ॥ १९ ॥

तव । अहम् । सोम । रारण । सख्ये । इन्दो इति । दिवेऽदिवे ।
पुरूणि । बभ्रो इति । नि । चरन्ति । माम् । अव । परिऽधीन् । अति । तान् । इहि ॥ १९ ॥

हे vइन्दो हे vसोम vतव vसख्ये सख्यिकर्मणि vअहं vदिवेदिवे अन्वहं vरारण[3]। रणेः लिट्युत्तमे णलि रूपम् । हे vबभ्रो बभ्रुवर्ण सोम vपुरूणि बहूनि रक्षांसि vमां तव सख्ये स्थितं vनि vअव vचरन्ति नीचीनं चरन्ति बाधन्ते । ये मां बाधन्ते vतान् vपरिधीन् राक्षसांस्त्वम् vअति vइहि अतीत्य गच्छ । जहीति यावत् ॥

---

१. त१.२.३.४.५.७-म२.६-भावार्थे । २. ग-त३.४-म१.२.४.६-आच्छादयत्तरः; त६-आच्छादयत्तरेषु । ३. त१.२.५.७-मु-रारण रमे; म६-रारण रणे ।

उताहं नक्तमुत सोम ते दिवा सख्याय बभ्रु ऊधनि ।
घृणा तपन्तमति सूर्यं परः शकुनाइव पप्तिम ॥ २० ॥

उत । अहम् । नक्तम् । उत । सोम । ते । दिवा । सख्याय । बभ्रो इति । ऊधनि ।
घृणा । तपन्तम् । अति । सूर्यम् । परः । शकुनाःऽइव । पप्तिम ॥ २० ॥

हे [v]बभ्रो बभ्रुवर्ण हे [v]सोम [v]उत अपि च [v]नक्तम् [v]उत अपि च [v]दिवा अहोरात्रयोः [v]सख्याय सख्यार्थं तव [v]ऊधनि समीपे [v]अहं रम इति[1] शेषः[1]। ते वयं [v]घृणा दीप्त्या [v]तपन्तं ज्वलन्तं [v]परः परमस्थानस्थितं[2] [v]सूर्यं तदात्मकं त्वाम् [v]अति [v]पप्तिम। तत्र स्थितं त्वां प्राप्तुमतिपेतिम[3]। कथमिव। [v]शकुनाइव। यथा सुपर्णादयः पक्षिणः सूर्यमतिगच्छन्ति तद्वत् ॥ 'पत्लृ गतौ'। अस्माच्छान्दसे लिटि 'तनिपत्योश्छन्दसि' इत्युपधालोपः ॥ ॥ १५ ॥

ग्रावस्तोत्रेऽभिरूपकरणे सोमे मृज्यमान एकस्तृचः। तत्र 'मृज्यमानः' इत्येषा तृतीया। सूत्रितं च—'मृज्यमानः सुहस्त्या दशभिर्विवस्वतः' (आश्व. श्रौ. ५. १२) इति ॥

मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।
रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥ २१ ॥

मृज्यमानः । सुऽहस्त्य । समुद्रे । वाचम् । इन्वसि ।
रयिम् । पिशङ्गम् । बहुलम् । पुरुऽस्पृहम् । पवमान । अभि । अर्षसि ॥ २१ ॥

हे [v]सुहस्त्य। हस्ते भवा हस्त्या अङ्गुलयः। शोभनाङ्गुलिक सोम [v]मृज्यमानः शोध्यमानस्त्वं [v]समुद्रे अन्तरिक्षे कलशे वा [v]वाचं शब्दम् [v]इन्वसि प्रेरयसि। किंच हे [v]पवमान पूयमान सोम [v]पिशङ्गं हिरण्यैः पिशङ्गवर्णं [v]बहुलं प्रभूतं [v]पुरुस्पृहं बहुभिः स्पृहणीयं [v]रयिं धनम् [v]अभ्यर्षसि स्तोतृणामभिक्षरसि प्रयच्छसि ॥

मृजानो वारे पवमानो अव्यये वृषा चक्रदो वने ।
देवानां सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥ २२ ॥

मृजानः । वारे । पवमानः । अव्यये । वृषा । अव । चक्रदः । वने ।
देवानाम् । सोम । पवमान । निःऽकृतम् । गोभिः । अञ्जानः । अर्षसि ॥ २२ ॥

हे [v]सोम [v]वृषा वर्षिता त्वं [v]मृजानः वसतीवरीभिर्मृज्यमानोऽलंक्रियमाणः [v]अव्यये अविमये [v]वारे वाले पवित्रे [v]पवमानः पूयमानः सन् [v]वने वननीय उदके काष्ठे कलशे वा [v]अव [v]चक्रदः अवक्रन्दसि शब्दायसे। ततो हे [v]सोम हे [v]पवमान त्वं [v]गोभिः गव्यैः क्षीरादिभिः [v]अञ्जानः अज्यमानः सन् [v]निष्कृतं संस्कृतं [v]देवानां स्थानम् [v]अर्षसि गच्छसि ॥

पवस्व वाजसातयेऽभि विश्वानि काव्या ।
त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥ २३ ॥

---

१. ग-त३.६-अ१.७-'इति शेषः' नास्ति। २. त-अ२-परस्थान°। ३. त६-°मतिपेतिम अतिगच्छेम; अ१.२-°मतिपेतिम इति शेषः।

पवस्व । वाजऽसातये । अभि । विश्वानि । काव्या ।
त्वम् । समुद्रम् । प्रथमः । वि । धारयः । देवेभ्यः । सोम । मत्सरः ॥ २३ ॥

हे सोम [v]विश्वानि सर्वाणि [v]काव्या कविकर्माणि स्तोत्राण्यभिलक्ष्य [v]वाजसातये अन्नलाभाय [v]पवस्व क्षर । हे [v]सोम [v]देवेभ्यः देवानां [v]मत्सरः मदकरः [v]प्रथमः सर्वदेवानां मुख्यः [v]त्वं [v]समुद्रम् अन्तरिक्षं कलशं वा [v]वि [v]धारयः विशेषेण धारयसि ॥

स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः ।
त्वां विप्रासो मतिभिर्विचक्षण शुभ्रं हिन्वन्ति धीतिभिः ॥ २४ ॥

सः । तु । पवस्व । परि । पार्थिवम् । रजः । दिव्या । च । सोम । धर्मऽभिः ।
त्वाम् । विप्रासः । मतिऽभिः । विऽचक्षण । शुभ्रम् । हिन्वन्ति । धीतिऽभिः ॥ २४ ॥

हे [v]सोम [v]सः तादृशस्त्वं [v]पार्थिवं [v]रजः लोकं प्रति दिव्यानि [v]च रजांसि[1] प्रति [v]धर्मभिः धारकैः[2] सह [v]तु क्षिप्रं [v]परि [v]पवस्व परितः क्षर । हे [v]विचक्षण विद्रष्टः सोम [v]विप्रासः विप्रा मेधाविनः [v]मतिभिः स्तुतिभिः [v]धीतिभिः अङ्गुलीभिश्च [v]शुभ्रं श्वेतवर्णं [v]त्वां [v]हिन्वन्ति प्रेरयन्ति ॥

पवमाना असृक्षत पवित्रमति धारया ।
मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥ २५ ॥

पवमानाः । असृक्षत । पवित्रम् । अति । धारया ।
मरुत्वन्तः । मत्सराः । इन्द्रियाः । हयाः । मेधाम् । अभि । प्रयांसि । च ॥ २५ ॥

[v]पवमानाः पूयमानाः सोमाः [v]धारया आत्मीयया [v]पवित्रम् अतीत्य [v]असृक्षत सृज्यन्ते । कीदृशाः । [v]मरुत्वन्तः मरुद्भिर्युक्ताः [v]मत्सराः मदकराः [v]इन्द्रियाः इन्द्रजुष्टाः । [v]मेधां स्तुतिं [v]प्रयांसि अन्नानि [v]च अभिलक्ष्य स्तोतृभ्यः उभयं[3] कर्तुं वा [v]हयाः गन्तार एते सृज्यन्ते ॥

अपो वसानः परि कोशमर्षतीन्दुर्हियानः सोतृभिः ।
जनयन्ज्योतिर्मन्दना अवीवशद्गाः कृण्वानो न निर्णिजम् ॥ २६ ॥

अपः । वसानः । परि । कोशम् । अर्षति । इन्दुः । हियानः । सोतृऽभिः ।
जनयन् । ज्योतिः । मन्दनाः । अवीवशत् । गाः । कृण्वानः । न । निःऽनिजम् ॥ २६ ॥

[v]अपः वसतीवरीः [v]वसानः आच्छादयन् [v]सोतृभिः अभिषुण्वद्भिः [v]हियानः प्रेर्यमाणः [v]इन्दुः सोमः [v]कोशं कलशं [v]परि [v]अर्षति प्रति गच्छति । किंच [v]ज्योतिः दीप्तिं [v]जनयन् उत्पादयन् [v]गाः गव्यानि क्षीरादीनि [v]निर्णिजम् आत्मनो रूपं [v]कृण्वानः कुर्वन् मिश्रयन् सोऽयं सोमः । नः संप्रत्यर्थे । इदानीं [v]मन्दनाः स्तुतीः [v]अवीवशत् कामयते । 'वश कान्तौ' । लुङि चङि रूपम् ॥ ॥१६॥

'पवस्व' इति षोडशर्चं पञ्चमं सूक्तम् । आद्यद्वयस्य गौरिवीतिर्नाम शक्तिपुत्र ऋषिः । तृतीयायाः शक्तिर्नाम वासिष्ठः । ततः पञ्चानां द्व्यानामूर्ध्वानामाङ्गिरस ऋजिश्वा नाम भारद्वाज

६. त-भ-मु-रक्षांसि । ७. ग-त३-भ५.६-धारकैरदकैः । ८. भ६-अभयं ।

ऊर्ध्वसद्मा नामाङ्गिरसः कृतयशा नाम कश्चित् सोऽप्याङ्गिरस ऋणंचयो नाम राजर्षिरित्येते क्रमेणर्षयः। एवं त्रयोदश गताः। ततस्तिसृणां वासिष्ठः शक्तिः। प्रथमातृतीयाद्या अयुजः ककुभः। द्वितीयाचतुर्थ्यौ युजः सतोबृहत्यः। ' स सुन्वे यो वसूनाम् ' इत्येषा तु यवमध्या गायत्री। पवमानः सोमो देवता। तथा चानुक्रम्यते—' पवस्व षोळश गौरिधीतिर्द्वादशं शक्तिरेकामूरुर्ऋजिश्चोर्ध्वसद्मा कृतयशा ऋणंचय इत्यृषयो दृचास्तिस्रः शक्तिः काकुभाः प्रगाथाः स सुन्वे गायत्री यवमध्या ' इति। गतो विनियोगः ॥

पव॑स्व॒ मधु॑मत्तम॒ इन्द्रा॑य सोम क्रतु॒वित्त॑मो॒ मदः॑। म॒हि द्यु॒क्षत॑मो॒ मदः॑ ॥ १ ॥

पव॑स्व। मधु॑मत्ऽतमः। इन्द्रा॑य। सो॒म॒। क्रतु॒वित्ऽतमः। मदः॑। म॒हि। द्यु॒क्षऽतमः। मदः॑ ॥१॥

हे ᵛसोम ᵛमधुमत्तमः अतिशयेन माधुर्योपेतस्त्वम् ᵛइन्द्राय इन्द्रार्थं ᵛमदः मदकरः सन् ᵛपवस्व क्षर। कीदृशः। ᵛक्रतुवित्तमः अत्यन्तं प्रज्ञायाः कर्मणो वा लम्भकः ᵛमहि महान् महनीयो वा ᵛद्युक्षतमः अत्यन्तं दीप्तः ᵛमदः मदहेतुः ॥

यस्य॑ ते॒ पी॒त्वा वृ॑ष॒भो वृ॑षा॒यते॒ऽस्य पी॒ता स्व॒र्विदः॑।
स सु॒प्रके॑तो अ॒भ्य॑क्रमी॒दिषोऽच्छा॒ वाज॑ं॒ नैत॑शः ॥ २ ॥

यस्य॑। ते॒। पी॒त्वा। वृ॒ष॒भः। वृ॒षऽय॑ते। अ॒स्य। पी॒ता। स्व॒रऽविदः॑।
सः। सु॒ऽप्रके॑तः। अ॒भि। अ॒क्र॒मी॒त्। इषः॑। अच्छ॑। वाज॑म्। न। ए॒त॒शः॥ २ ॥

ᵛवृषभः कामानां वर्षक इन्द्रः ᵛयस्य यं ᵛते त्वां ᵛपीत्वा ᵛवृषायते वृषभ इवाचरति। किंच ᵛस्वर्दृशः सर्वस्य दर्शकस्य ᵛअस्य ते तव ᵛपीता पाने सति ᵛसुप्रकेतः सुप्रज्ञः ᵛसः इन्द्रः ᵛइषः शत्रूणामन्नानि ᵛअभ्यक्रमीत् अभिक्रामति। तत्र दृष्टान्तः। ᵛवाजं[1] ᵛनैतशः। एतश इत्यश्वनाम। यथाश्वो वाजं संग्राममभिगच्छति तद्वत् ॥

त्वं ह्य१ङ्ग दै॒व्या प॑वमान॒ जनि॑मानि द्यु॒मत्त॑मः। अ॒मृ॒त॒त्वाय॑ घोषयः ॥ ३ ॥

त्वम्। हि। अ॒ङ्ग। दै॒व्या। प॒व॒मा॒न॒। जनि॑मानि। द्यु॒मत्ऽत॑मः। अ॒मृ॒त॒ऽत्वाय॑। घो॒ष॒यः॥३॥

हे ᵛपवमान पूयमान सोम ᵛद्युमत्तमः अतिशयेन दीप्तिमान् ᵛत्वं ᵛहि त्वमेव ᵛदैव्या देवसंबन्धीनि ᵛजनिमानि जन्मानि। देवानित्यर्थः[2]। तानभिलक्ष्य ᵛअमृतत्वाय तेषाममरणाय ᵛअङ्ग क्षिप्रं ᵛघोषयः शब्दायसे ॥ ' घुषिर् विशब्दने '। ण्यन्तस्य लेटि रूपम्। हिशब्दादनिघातः ॥

येना॒ नव॑ग्वो दध्यङ्ङपो॒र्णुते॒ येन॒ विप्रा॑स आपि॒रे।
दे॒वानां॑ सु॒म्ने अ॒मृत॑स्य॒ चारु॑णो॒ येन॒ श्रवां॑स्यान॒शुः ॥ ४ ॥

येन॑। नव॑ऽग्वः। दध्यङ्। अप॑ऽऊर्णुते। येन॑। विप्रा॑सः। आ॒पि॒रे।
दे॒वाना॑म्। सु॒म्ने। अ॒मृत॑स्य। चारु॑णः। येन॑। श्रवां॑सि। आ॒न॒शुः॥ ४ ॥

ᵛनवग्वः नवनीयगतिः यद्वा नवभिर्मासैः सत्रस्थानुष्ठाता ᵛदध्यङ् एतन्नामकोऽङ्गिराः ᵛयेन सोमेन पणिभिरपहृतानां गवां द्वारम् ᵛअपोर्णुते अपाच्छादयति विवृतमकार्षीत्। ᵛविप्रासः तन्मुखाः

---

१. त-म–' वाजं ' नास्ति। २. त१.२.४.५.७-म२.६–देवानित्यर्थः जानासीत्यर्थः।

सर्वे मेधाविनोऽङ्गिरसः vयेन च[1] सोमेन vआपिरे एतैरपहृता गा आप्नुवन्। किंच vदेवानाम् इन्द्रादीनां vसुम्ने सुखे यज्ञेन संजाते सति vचारुणः कल्याणस्य vअमृतस्य उदकस्य संबन्धीनि vश्रवांसि अन्नानि vयेन च सोमेन यजमानाः vआनशुः व्याप्नुवन् अलभन्त। स त्वं देवानाममृतत्वाय शब्दायस इति पूर्वेण समन्वयः॥

एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः। क्रीळन्नूर्मिरपामिव ॥५॥

एषः। स्यः। धारया। सुतः। अव्यः। वारेभिः। पवते। मदिन्ऽतमः।
क्रीळन्। ऊर्मिः। अपाम्ऽइव ॥ ५ ॥

vस्यः सः vएषः vसुतः अभिषुतः सोमः vअव्यः अवेः vवारेभिः वालैस्तेभ्यः पवित्रेभ्यः vधारया आत्मीयया vपवते कलशमभिलक्ष्य क्षरति। कीदृशः। vमदिन्तमः मादयितृतमः vअपामिव उदकानाम् vऊर्मिः संघात इव vक्रीळन् इतस्ततः संक्रीडमानः पवते ॥ ॥ १७ ॥

य उस्रिया अप्या अन्तरश्मनो निर्गा अकृन्तदोजसा।
अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ॥ ६ ॥

यः। उस्रियाः। अप्याः। अन्तः। अश्मनः। निः। गाः। अकृन्तत्। ओजसा।
अभि। व्रजम्। तत्निषे। गव्यम्। अश्व्यम्। वर्मीऽइव। धृष्णो इति। आ। रुज ॥ ६ ॥

vयः सोमः vउस्रियाः उत्सरणशीलाः vअप्याः। अप इत्यन्तरिक्षनाम। तस्मात् 'भवे छन्दसि' इति यत्। अन्तरिक्षस्था अहिप्रभृतिभिरसुरैरपहृत्य निहिताः vगाः अपः vअश्मनः। मेघनामैतत्। मेघात् vअन्तः vओजसा बलेन vनिः vअकृन्तत् निरच्छिनत् निरगमयत्। अन्तरिक्षात् वृष्टिमकार्षीदित्यर्थः। स त्वमसुरैरपहृतं vगव्यं गोसंबन्धिनम् vअश्व्यम् अश्वेषु भवं vव्रजं समूहम् vअभि vतत्निषे अभितो व्याप्नोषि ॥ 'तनु विस्तारे'। छान्दसे लिटि 'तनिपत्योश्छन्दसि' इत्युपधालोपः। किंच हे vधृष्णो शत्रुधर्षणशील सोम स त्वं vवर्मीव कवचीव शूरः vआ vरुज असुरानाजहि ॥

आ सोता परि षिञ्चताश्वं न स्तोममपुरं रजस्तुरम्। वनक्रक्षमुदप्रुतम् ॥ ७ ॥

आ। सोत। परि। सिञ्चत। अश्वम्। न। स्तोमम्। अपूऽतुरम्। रजःऽतुरम्।
वनऽक्रक्षम्। उदऽप्रुतम् ॥ ७ ॥

हे ऋत्विजः vआ vसोत सोममभिषुणुत ॥ 'षुञ् अभिषवे'। लोटि छान्दसो विकरणस्य लुक्। 'तप्तनप्तनथनाश्च' इति तस्य तबादेशः ॥ किंच vपरि vषिञ्चत परितस्तं वसतीवर्यादिभिः सिञ्चत। कीदृशम्। vअश्वं vन अश्वमिव वेगिनं vस्तोमं स्तोतव्यम् vअप्तुरम् अन्तरिक्षस्थितानामुदकानां प्रेरकं vरजस्तुरं तेजसां च प्रेरकम्। vवनक्रक्षम् उदकानां कर्षकम्। यद्वा। काष्ठेषु पात्रेषु विप्रकीर्णम्। vउदप्रुतम् उदके गच्छन्तं प्लवमानं सोममभिषुणुताभिषिञ्चत च[2] ॥

सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने।
ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥ ८ ॥

---

१. त१.२.४.५.७-भ६-मु-वा। २. त१.२.३.६.७-भ२.६.७-'च' नास्ति।

सहस्रऽधारम्। वृषभम्। पयःऽवृधम्। प्रियम्। देवाय। जन्मने।
ऋतेन। यः। ऋतऽजातः। विऽवव्रधे। राजा। देवः। ऋतम्। बृहत्॥ ८॥

vसहस्रधारं बहुधारोपेतं vवृषभं कामानां वर्षकं vपयोवृधम् उदकानां वर्धकं vप्रियं प्रीणयितारं तं सोमं vदेवाय देवसंबन्धिने vजन्मने देवेभ्यस्तदर्थमभिषुणुत। vऋतजातः उदकाज्जातः vयः vराजा सोमः vऋतेन वसतीवर्याख्येनोदकेन vविववृधे विशेषेण वर्धते। कीदृशः। vदेवः द्योतमानः स्तोतव्यो वा[1] vऋतं सत्यभूतः सन् vबृहत् महान्। तमाषुनुतेति पूर्वेण समन्वयः॥

अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुः। वि कोशं मध्यमं युव॥ ९॥
अभि। द्युम्नम्। बृहत्। यशः। इषः। पते। दिदीहि। देव। देवऽयुः।
वि। कोशम्। मध्यमम्। युव॥ ९॥

हे vइषस्पते अन्नस्य पते हे vदेव स्तोतव्य सोम vदेवयुः देवकामस्त्वं vद्युम्नं द्योतमानं vबृहत् प्रभूतं vयशः अन्नमस्मभ्यम् vअभि vदिदीहि आभिमुख्येन प्रकाशय। प्रयच्छेत्यर्थः। आमन्त्रितस्याविद्यमानवत्त्वेन[2] पादादित्वादनिघातः। किंच vमध्यमम् अन्तरिक्षस्थितं vकोशं मेघं vवि vयुव वृष्टयर्थं विगमय विश्लेषय॥

आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः।
वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः॥ १०॥
आ। वच्यस्व। सुऽदक्ष। चम्वोः। सुतः। विशाम्। वह्निः। न। विश्पतिः।
वृष्टिम्। दिवः। पवस्व। रीतिम्। अपाम्। जिन्व। गोऽइष्टये। धियः॥ १०॥

हे vसुदक्ष सुबल सोम vचम्वोः अधिषवणफलकयोः vसुतः अभिषुतः vविशां प्रजानां vवह्निर्न वोढा vविश्पतिः राजेव सर्वासां प्रजानां वोढा त्वम् vआ vवच्यस्व आगच्छ। कलशमापवस्व। वचेर्गत्यर्थस्य व्यत्ययेन इयनि रूपम्। किंच त्वं vवृष्टिं वृष्यमाणाम् vअपाम् उदकानां vरीतिं गतिं vदिवः द्युलोकात् vपवस्व कुरु। ततः vगविष्टये गामात्मन इच्छते यजमानाय vधियः कर्माणि vजिन्व आपूरय[3]॥ ॥ १८॥

एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहुः। विश्वा वसूनि बिभ्रतम्॥ ११॥
एतम्। ऊँ इति। त्यम्। मदऽच्युतम्। सहस्रऽधारम्। वृषभम्। दिवः। दुहुः।
विश्वा। वसूनि। बिभ्रतम्॥ ११॥

vदिवः देवान् कामयमाना ऋत्विजः vएतं vत्यं तमिमं सोममेव vदुहुः दुदुहुः दुहन्ति। 'ग्रावाणो वत्सा ऋत्विजो दुहन्ति' (तै. सं. ६. २. ११. ४) इति तैत्तिरीयकमाह्मणम्। कीदृशं सोमम्। vमदच्युतं मदस्य प्रेरकं vसहस्रधारं बहुधारं vवृषभं कामानां वर्षकं vविश्वा सर्वाणि vवसूनि धनानि vबिभ्रतं धारयन्तं सोमं दुहन्ति॥

१. त१.२.४.५.७-म६-'वा' नास्ति। २. त१.२.३.४.५.७-म-मु-°विद्यमानत्वेन। ३. त१. २.४.५.७-म६-पूरय।

वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपन्ज्योतिषा तमः ।
स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा ॥ १२ ॥

वृषा । वि । जज्ञे । जनयन् । अमर्त्यः । प्रऽतपन् । ज्योतिषा । तमः ।
सः । सुऽस्तुतः । कविऽभिः । निःऽनिजम् । दधे । त्रिऽधातु । अस्य । दंससा ॥ १२ ॥

वृषा कामानां वर्षकः अमर्त्यः मनुष्यधर्मरहितः सोमः वि जज्ञे विज्ञायते । किं कुर्वन् । जनयन् शब्दं ज्योतिर्वोत्पादयन् ज्योतिषा स्वीयेन तमः प्रतपन् प्रज्वलयन् विनाशयन् प्रादुर्भवति । ततः कविभिः मेधाविभिः स्तोतृभिः सुष्टुतः सः सोमः निर्णिजं निर्णेजनहेतुं मिश्रणं गव्यं दधे धारयति । अथ त्रिधातु त्रिषु सवनेषु देवानां पोषकम् । यद्वा । त्रयः सोमधारका द्रोणकलशादयो यस्मिन् । तद्यज्ञार्थं कर्म अस्य सोमस्य दंससा कर्मणा क्रियते खलु ॥

स सुन्वे यो वसूनां यो रायामानेता य इळानाम् । सोमो यः सुक्षितीनाम् ॥१३॥

सः । सुन्वे । यः । वसूनाम् । यः । रायाम् । आऽनेता । यः । इळानाम् ।
सोमः । यः । सुऽक्षितीनाम् ॥ १३ ॥

सः सोमः सुन्वे अभिसुषुवुः[1] ऋत्विग्भिः । यः सोमः वसूनां धनानाम् आनेता यः च रायाम् । रान्ति प्रयच्छन्ति क्षीरादिकमिति रायो गावः । तेषामानेता यः च इळानाम् अन्नानां च यः च सोमः सुक्षितीनां सुनिवासानां शोभनमनुष्ययुक्तानां गृहाणामानेता विद्यते सोऽभिषुतोऽभूदिति ॥

यस्य नु इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।
आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥ १४ ॥

यस्य । नुः । इन्द्रः । पिबात् । यस्य । मरुतः । यस्य । वा । अर्यमणा । भगः ।
आ । येन । मित्रावरुणा । करामहे । आ । इन्द्रम् । अवसे । महे ॥ १४ ॥

नः अस्मदीयं यस्य यं सोमम् इन्द्रः पिबात् पिबति । 'पा पाने' । लेट्याडागमः । यं च सोमं मरुतः पिबन्ति वा अपि च अर्यमणा एतन्नामकेन देवेन सह भगः देवः यं सोमं पिबति येन सोमेन मित्रावरुणा मित्रावरुणौ वयम् आ करामहे अभिमुखीकुर्महे तथा महे महते अवसे रक्षणाय येन च सोमेन इन्द्रम् अभिमुखीकुर्महे स सोमोऽभिषूयते[2] ॥

इन्द्राय सोम पातवे नृभिर्यतः स्वायुधो मदिन्तमः । पवस्व मधुमत्तमः ॥ १५ ॥

इन्द्राय । सोम । पातवे । नृऽभिः । यतः । सुऽआयुधः । मदिन्ऽतमः ।
पवस्व । मधुमत्ऽतमः ॥ १५ ॥

हे सोम मधुमत्तमः अतिशयेन माधुर्योपेतस्त्वम् इन्द्राय पातवे पानार्थं पवस्व क्षर । कीदृशः । नृभिः कर्मनेतृभिर्ऋत्विग्भिः यतः संयतः स्वायुधः शोभनस्रुक्कपालाद्यायुधोपेतः मदिन्तमः मादयितृतमः ॥

---

१. ग–अभिषूयते । २. ग–सोमोभिषुतः ।

इन्द्रस्य हार्दि सोमधानमा विश समुद्रमिव सिन्धवः ।
जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः ॥ १६ ॥

इन्द्रस्य । हार्दि । सोमऽधानम् । आ । विश । समुद्रम्ऽइव । सिन्धवः ।
जुष्टः । मित्राय । वरुणाय । वायवे । दिवः । विष्टम्भः । उत्ऽतमः ॥ १६ ॥

हे सोम त्वम् ᵛइन्द्रस्य ᵛहार्दि हृदयंगमं हृदयभूतं वा ᵛसोमधानम् । सोमो निधीयते अस्मिन्निति[1] सोमधानः कलशः । तम् ᵛआ ᵛविश प्रविश[2] । तत्र दृष्टान्तः । ᵛसमुद्रमिव यथा समुद्रं ᵛसिन्धवः नद्यः प्रविशन्ति तद्वत् । कीदृशस्त्वम् । ᵛमित्राय ᵛवरुणाय ᵛवायवे एतेभ्यः ᵛजुष्टः पर्याप्तः ᵛदिवः द्युलोकस्य ᵛविष्टम्भः विष्टम्भयिता स्थापयिता ᵛउत्तमः सर्वेषामुत्कृष्टतमस्त्वं कलशमाविश ॥ ॥ १९ ॥

'परि प्र' इति द्वाविंशत्यृचं द्वैपदं षष्ठं सूक्तम् । यज्ञे सदस्यवस्थितहोत्रीयादिधिष्ण्योपेता अग्नयो नामेश्वरपुत्रा ऋषयः । विंशतिका द्विपदा विराजः । पवमानः सोमो देवता । तथा चानुक्रान्तं– 'परि प्र ब्रध्निकाग्नयो धिष्ण्या ऐश्वरा द्वैपदम्' इति । गतो विनियोगः ॥

परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥ १ ॥

परि । प्र । धन्व । इन्द्राय । सोम । स्वादुः । मित्राय । पूष्णे । भगाय ॥ १ ॥

हे ᵛसोम ᵛस्वादुः स्वादुरसस्त्वम् ᵛइन्द्राय ᵛमित्राय ᵛपूष्णे ᵛभगाय एतेभ्यो देवेभ्यः ᵛपरि ᵛप्र ᵛधन्व परितः पात्रेषु प्रक्षर[3] ॥

इन्द्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ॥ २ ॥

इन्द्रः । ते । सोम । सुतस्य । पेयाः । क्रत्वे । दक्षाय । विश्वे । च । देवाः ॥ २ ॥

हे ᵛसोम ᵛसुतस्य अभिषुतस्य ᵛते तव स्वं भागम् ᵛइन्द्रः ᵛपेयाः पेयात् पिबतु ॥ पातेराशीर्लिङि रूपम् । पुरुषव्यत्ययः ॥ किमर्थम् । ᵛक्रत्वे क्रतवे प्रज्ञानाय ᵛदक्षाय बलाय च । किंच अमी ᵛविश्वे सर्वे ᵛदेवाः ᵛच त्वदीयमंशं पिबन्तु ॥

एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥ ३ ॥

एव । अमृताय । महे । क्षयाय । सः । शुक्रः । अर्ष । दिव्यः । पीयूषः ॥ ३ ॥

हे सोम ᵛशुक्रः दीप्तः ᵛदिव्यः दिवि भवः ᵛपीयूषः देवैः पातव्यः ᵛसः त्वम् ᵛअमृताय अमरणाय ᵛमहे महते ᵛक्षयाय निवासाय च ᵛएव ᵛअर्ष एवं पवस्व क्षर ॥

पवस्व सोम महान्त्समुद्रः पिता देवानां विश्वाभि धाम ॥ ४ ॥

पवस्व । सोम । महान् । समुद्रः । पिता । देवानाम् । विश्वा । अभि । धाम ॥ ४ ॥

हे ᵛसोम ᵛमहान् देवेभ्यो दीयमानत्वेन महत्त्वयुक्तः ᵛसमुद्रः समुन्दनः । यस्मात् समुद्रवन्ति रसास्तादृशः । ᵛपिता सर्वेषां पालयिता त्वं ᵛदेवानां ᵛविश्वा विश्वानि सर्वाणि ᵛधाम धामानि शरीराण्यभिलक्ष्य ᵛपवस्व ॥

१. ग-त३.६.म१.२.४.७–निधीय अत्रेति । २. ग–प्रविशेति; त१.२.४.५–प्रविशते । ३. ग-त३.४.७-म१.४.७–क्षर ।

शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ॥ ५ ॥

शुक्रः । पवस्व । देवेभ्यः । सोम । दिवे । पृथिव्यै । शम् । च । प्रऽजायै ॥ ५ ॥

हे [v]सोम [v]शुक्रः दीप्तस्त्वं [v]देवेभ्यः देवार्थं [v]पवस्व क्षर । किंच [v]दिवे [v]पृथिव्यै च द्यावापृथिवीभ्यां च ततः [v]प्रजायै प्रजाभ्यश्च [v]शं सुखं [v]च कुरु ॥

दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥ ६ ॥

दिवः । धर्ता । असि । शुक्रः । पीयूषः । सत्ये । विऽधर्मन् । वाजी । पवस्व ॥ ६ ॥

हे सोम [v]शुक्रः दीप्तः [v]पीयूषः पातव्यस्त्वं [v]दिवः द्युलोकस्य [v]धर्ता धारकः [v]असि । [v]वाजी बलवान् स त्वं [v]सत्ये सत्यभूते [v]विधर्मन् विधर्मणि । विविधकर्माण[1] ऋत्विजो यस्मिन् । यद्वा । विविधसोमादिहविषां धारके । अस्मिन् यज्ञे [v]पवस्व क्षर ॥

पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ॥ ७ ॥

पवस्व । सोम । द्युम्नी । सुऽधारः । महाम् । अवीनाम् । अनु । पूर्व्यः ॥ ७ ॥

हे [v]सोम [v]द्युम्नी । ' द्युम्नं द्योततेर्यशो वाऽन्नं वा ' इति यास्कः । अन्नवान् यशस्वी वा [v]सुधारः शोभनधारायुक्तः [v]पूर्व्यः पुरातनस्त्वं [v]महां महताम् [v]अवीनां रोम्णां रोमभ्यः[2] सकाशादनुक्रमेण [v]पवस्व क्षर ॥

नृभिर्येमानो जज्ञानः पूतः क्षरद्विश्वानि मन्द्रः स्वर्वित् ॥ ८ ॥

नृऽभिः । येमानः । जज्ञानः । पूतः । क्षरत् । विश्वानि । मन्द्रः । स्वःऽवित् ॥ ८ ॥

[v]नृभिः कर्मनेतृभिर्ऋत्विग्भिः [v]येमानः नियम्यमानः [v]जज्ञानः जायमानः [v]पूतः पवित्रेण शोधितः [v]मन्द्रः मोदमानः [v]स्वर्वित् सर्वज्ञः एतादृशः सोमः [v]विश्वानि सर्वाणि धनान्यस्मभ्यं [v]क्षरत् क्षरतु ददातु ॥

इन्दुः पुनानः प्रजामुराणः करद्विश्वानि द्रविणानि नः ॥ ९ ॥

इन्दुः । पुनानः । प्रऽजाम् । उराणः । करत् । विश्वानि । द्रविणानि । नः ॥ ९ ॥

[v]पुनानः पूयमानः [v]उराणः । ' उराण उरु कुर्वाणः ' (निरु. ६. १७) इति यास्कः । देवान् बहु कुर्वाणः [v]इन्दुः सोमः [v]नः अस्माकं [v]प्रजाम् अपत्यादिकां [v]विश्वानि व्याप्तानि [v]द्रविणानि धनानि च [v]करत् करोतु । करोतेर्लेङि रूपम् ॥

पवस्व सोम क्रत्वे दक्षायाश्वो न निक्तो वाजी धनाय ॥ १० ॥

पवस्व । सोम । क्रत्वे । दक्षाय । अश्वः । न । निक्तः । वाजी । धनाय ॥ १० ॥

हे [v]सोम [v]अश्वो [v]न अश्व इव [v]निक्तः वसतीवरीभिरद्भिर्निक्तः[3] [v]वाजी वेगवांस्त्वं [v]क्रत्वे क्रतवे प्रज्ञानाय [v]दक्षाय बलाय [v]धनाय धनार्थं च [v]पवस्व क्षर ॥ ॥ २० ॥

तं ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥ ११ ॥

तम् । ते । सोतारः । रसम् । मदाय । पुनन्ति । सोमम् । महे । द्युम्नाय ॥ ११ ॥

---

१. त१.२.३.४.५-भ२-विविधाः कर्मण; त६-भ७-विधाः कर्म; त७-विविधः कर्मणा; भ६-विविधकर्मणां । २. ग-त३.६-भ१.७-' रोमभ्यः ' नास्ति । ३. ग-त३-°र्निर्निक्तः ।

vसोतारः अभिषोतार ऋत्विजो हे सोम vते तव स्वभूतं vरसं vमदाय मदार्थं vपुनन्ति। तदेवोच्यते। vमहे महते vद्युम्नाय। 'द्युम्नं द्योततेर्यशो वाऽन्नं वा'। अन्नाय यशसे वा vसोमं पुनन्ति शोधयन्ति। यद्वा। सोममभिषूयमाणं तं रसं पुनन्तीत्येकवाक्यतया योजनीयम्॥

शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम्॥ १२॥

शिशुम्। जज्ञानम्। हरिम्। मृजन्ति। पवित्रे। सोमम्। देवेभ्यः। इन्दुम्॥ १२॥

vशिशुम् अपां पुत्रभूतं vजज्ञानं जायमानं vहरिं हरितवर्णम् vइन्दुं दीप्तं vसोमं vदेवेभ्यः देवार्थं vपवित्रे vमृजन्ति ऋत्विजो मार्जयन्ति॥

इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय॥ १३॥

इन्दुः। पविष्ट। चारुः। मदाय। अपाम्। उपऽस्थे। कविः। भगाय॥ १३॥

vचारुः कल्याणरूपः vकविः क्रान्तप्रज्ञः vइन्दुः सोमः vअपाम् उदकानाम् vउपस्थे उपस्थानेऽन्तरिक्षे पवित्रे वा vमदाय मदार्थं vभगाय भजनीयधनार्थं च vपविष्ट पवते॥

बिभर्ति चारिन्द्रस्य नाम येन विश्वानि वृत्रा जघान॥ १४॥

बिभर्ति। चारु। इन्द्रस्य। नाम। येन। विश्वानि। वृत्रा। जघान॥ १४॥

स सोमः vचारु कल्याणम् vइन्द्रस्य vनाम शरीरं vबिभर्ति धारयति पोषयति। vयेन शरीरेणेन्द्रः vविश्वानि सर्वाणि वृत्राणि पापरूपाणि रक्षांसि vजघान हतवान्॥

पिबन्त्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य॥ १५॥

पिबन्ति। अस्य। विश्वे। देवासः। गोभिः। श्रीतस्य। नृऽभिः। सुतस्य॥ १५॥

vविश्वे सर्वे vदेवासः देवाः vगोभिः गोविकारैः vश्रीतस्य मिश्रितं vनृभिः कर्मनेतृभिर्ऋत्विग्भिः vसुतस्य अभिषुतम् vअस्य अमुं सोमं vपिबन्ति। द्वितीयार्थे षष्ठ्यः[1]॥

प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम्॥ १६॥

प्र। सुवानः। अक्षारिति। सहस्रऽधारः। तिरः। पवित्रम्। वि। वारम्। अव्यम्॥ १६॥

vसुवानः अभिषूयमाणः अत एव vसहस्रधारः बहुधारायुक्तः सोमः vअव्यम् अविभवं vवारं वारकं vपवित्रं vतिरः व्यवधायकं कुर्वन् vप्र vअक्षाः विविधं प्रक्षरति। क्षरतेर्लुङि रूपम्॥

स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः॥ १७॥

सः। वाजी। अक्षारिति। सहस्रऽरेताः। अत्ऽभिः। मृजानः। गोभिः। श्रीणानः॥ १७॥

vवाजी वेगवान् बलवान् वा vसः सोमः vअक्षाः क्षरति। कीदृशः। vसहस्ररेताः बहुरेतस्को बहूदकः vअद्भिः वसतीवरीभिः vमृजानः मृज्यमानः vगोभिः गोविकारैः क्षीरादिभिः vश्रीणानः श्रीयमाणः॥

प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः॥ १८॥

प्र। सोम। याहि। इन्द्रस्य। कुक्षा। नृऽभिः। येमानः। अद्रिऽभिः। सुतः॥ १८॥

---

१. तै३.४.६-म२.६.७-षष्ठी।

हे vसोम vनृभिः ऋत्विग्भिः vयेमानः[1] नियम्यमानः vअद्रिभिः ग्रावभिः vसुतः अभिषुतः त्वम् vइन्द्रस्य vकुक्षा ॥ सप्तम्या डादेशः ॥ कुक्षावुदरभूते कलशे वा vप्र vयाहि प्रकर्षेण गच्छ ॥

असर्जि वाजी तिरः पवित्रमिन्द्राय सोमः सहस्रधारः ॥ १९ ॥

असर्जि । वाजी । तिरः । पवित्रम् । इन्द्राय । सोमः । सहस्रऽधारः ॥ १९ ॥

vवाजी बलवान् वेगवान् वा vपवित्रं तिरस्कुर्वन् vसहस्रधारः बहुधारः vसोमः vइन्द्राय इन्द्रार्थम् vअसर्जि सृज्यते ॥

अञ्जन्त्येनं मध्वो रसेनेन्द्राय वृष्ण इन्दुं मदाय ॥ २० ॥

अञ्जन्ति । एनम् । मध्वः । रसेन । इन्द्राय । वृष्णे । इन्दुम् । मदाय ॥ २० ॥

vवृष्णे कामानां वर्षित्रे vइन्द्राय इन्द्रस्य vमदाय मदार्थं vमध्वः मधुनः vरसेन गव्येन vएनम् vइन्दुं सोममृत्विजः vअञ्जन्ति संयोजयन्ति ॥

देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजन्ति ॥ २१ ॥

देवेभ्यः । त्वा । वृथा । पाजसे । अपः । वसानम् । हरिम् । मृजन्ति ॥ २१ ॥

हे सोम vअपः उदकानि vवसानम् आच्छादयन्तं vहरिं हरितवर्णं vत्वा त्वां vवृथा अनायासेन ऋत्विजः vमृजन्ति शोधयन्ति । किमर्थम् । vदेवेभ्यः देवानां पानार्थं vपाजसे तेषां बलार्थम् ॥

इन्दुरिन्द्राय तोशते नि तोशते श्रीणन्नुग्रो रिणन्नपः ॥ २२ ॥

इन्दुः । इन्द्राय । तोशते । नि । तोशते । श्रीणन् । उग्रः । रिणन् । अपः ॥ २२ ॥

vइन्दुः सोमः vइन्द्राय इन्द्रार्थं vतोशते हन्यते अभिषूयते । vनि vतोशते नितरामभिषूयते । तोशतिर्वधकर्मा । कीदृशः । vश्रीणन् गव्यैः क्षीरादिभिः श्रीयमाणः तानि मिश्रयन् वा vउग्रः उद्गूर्णबलः vअपः उदकानि वसतीवरीः vरिणन् प्रेरयन् सोमोऽभिषूयते ॥ ॥ २१ ॥

'पर्यू षु' इति द्वादशर्चं सप्तमं सूक्तम् । प्यरुणत्रसदस्यू राजर्षी अस्य सूक्तस्य द्रष्टारौ । आदितस्तिस्रः पिपीलिकमध्या अनुष्टुभो द्वादशकाष्टकद्वादशकवत्यः । ततः षड्ऋचो बृहत्यो द्वादशकत्रयवत्यः । अथ दशम्याद्यास्तिस्रो विराजः । पवमानः सोमो देवता । तथा चानुक्रान्तं—'पर्यू षु द्वादश प्यरुणत्रसदस्यू[2] तिस्रोऽनुष्टुभः पिपीलिकमध्याः षळूर्ध्वबृहत्यस्तिस्रश्च विराजः' इति । गतो विनियोगः ॥

पर्यू षु प्र धन्व वाजसातये परिं वृत्राणि सक्षणिः ।
द्विषस्तरध्या ऋणया न ईयसे ॥ १ ॥

परिं । ऊँ इति । सु । प्र । धन्व । वाजऽसातये । परिं । वृत्राणि । सक्षणिः ।
द्विषः । तरध्यै । ऋणऽयाः । नः । ईयसे ॥ १ ॥

हे सोम vसु[3] सुष्ठु vवाजसातये अस्मभ्यमन्नदानायैव vपरि vप्र vधन्व परितः प्रगच्छ । यद्वा । वाजसातयेऽन्नलाभाय संग्रामं प्रगच्छ । किंच vसक्षणिः सहनशीलस्त्वं vवृत्राणि शत्रून् vपरि

१. त१.२.४.५.७-भ६—पवमानो । २. त७-भ६-अनु.—°त्रसदस्यू राजानौ । ३. त—'सु' नास्ति ।

गच्छ। तदेवोच्यते। vनः अस्माकम् vऋणयाः ऋणवान् यापयिता विनाशयिता त्वं vद्विषः शत्रून् vतरध्यै तरीतुं हन्तुम् vईयसे परिगच्छसि[1] ॥

अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये।
वाजाँ अभि पवमान प्र गाहसे ॥ २ ॥

अनु। हि। त्वा। सुतम्। सोम। मदामसि। महे। समर्यऽराज्ये।
वाजान्। अभि। पवमान। प्र। गाहसे ॥ २ ॥

हे vसोम vसुतम् अभिषुतं vत्वा त्वां वयम् vअनु vमदामसि vहि अनुमदामः। अनुक्रमेणाभिषुमः खलु। हे vपवमान सोम स त्वं vमहे महति vसमर्यराज्ये महत् समनुष्यं त्वदीयं राज्यमनुपालयितुं vवाजान् शत्रुबलान्यभिलक्ष्य[2] vप्र vगाहसे प्रगच्छसि ॥

अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः।
गोजीरया रंहमाणः पुरंध्या ॥ ३ ॥

अजीजनः। हि। पवमान। सूर्यम्। विऽधारे। शक्मना। पयः।
गोऽजीरया। रंहमाणः। पुरम्ऽध्या ॥ ३ ॥

हे vपवमान सोम त्वं vपयः पयसः उदकस्य vविधारे विधारकेऽन्तरिक्षे vशक्मना समर्थेन बलेन vसूर्यम् vअजीजनो vहि उत्पादितवान् भवसि खलु। कीदृशः। vगोजीरया स्तोतॄन्यो गवां प्रेरकेण। स्तोतॄणां प्रेरितपशुकेनेत्यर्थः। तादृशेन vपुरंध्या बहुविधप्रज्ञानेन युक्तः vरंहमाणः वेगं कुर्वाणस्त्वं सूर्यमजीजनः ॥

अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः।
सदासरो वाजमच्छा सनिष्यदत् ॥ ४ ॥

अजीजनः। अमृत। मर्त्येषु। आ। ऋतस्य। धर्मन्। अमृतस्य। चारुणः।
सदा। असरः। वाजम्। अच्छ। सनिस्यदत् ॥ ४ ॥

हे vअमृत मरणधर्मरहित सोम त्वम् vऋतस्य सत्यभूतस्य vचारुणः कल्याणस्य vअमृतस्य उदकस्य vधर्मन् धारकेऽन्तरिक्षे सूर्यम् vअजीजनः। किमर्थम्। vमर्त्येष्वा मनुष्येष्वभिमुखीभवनाय। किंच vसनिष्यदत् संभजन् स त्वं vवाजमच्छ संग्राममभिलक्ष्य vसदा vअसरः ससरसि गच्छसि ॥

अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम्।
शयीभिर्न भरमाणो गभस्त्योः ॥ ५ ॥

अभिऽअभि। हि। श्रवसा। ततर्दिथ। उत्सम्। न। कम्। चित्। जनऽपानम्। अक्षितम्।
शयीभिः। न। भरमाणः। गभस्त्योः ॥ ५ ॥

१. भ६–परिगच्छ। २. त१.२.५.७-म६–शत्रुवतोन्य°; त६–बलान्य°।

हे सोम त्वं vअवसा अन्नेन हेतुना vअभ्यभि vततर्दिथ vहि पवित्रमभितृण्णवानसि छिन्नवानसि । तत्र दृष्टान्तद्वयम्[1] । vउत्सं vन यथा कश्चित् vजनपानम् । अस्मिन् जना उदकं पिबन्ति । तम् vअक्षितम् अक्षीणं vकं vचित् कंचन उत्सस्रुत्सरणशीलं वाप्यादिकमभितृणत्ति । अथवा कश्चित् vगमस्त्योः बाह्वोः vशर्याभिः अङ्गुलीभिः vभरमाणः उदकं संभरन् कंचिदभितृणत्ति तद्वत् ॥

आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।
वारं न देवः सविता व्यूर्णुते ॥ ६ ॥

आत् । ईम् । के । चित् । पश्यमानासः । आप्यम् । वसुऽरुचः । दिव्याः । अभि । अनूषत ।
वारम् । न । देवः । सविता । वि । ऊर्णुते ॥ ६ ॥

vआत् अनन्तरं vपश्यमानासः एनं पश्यन्तः vदिव्याः दिवि भवाः vवसुरुचः नाम vके vचित् vआप्यं बन्धुं साधुम् vईम् एनं सोमम् vअभ्यनूषत अभ्यस्तुवन् । कस्मादनन्तरमिति उच्यते । vदेवः द्योतमानः vसविता सर्वस्य प्रेरकः सूर्यः vवारम् आवरकमन्धकारं vन vव्यूर्णुते नापगमयति तदैनमस्तुवन् । सूर्योदयात् प्रागेव हि सोमं स्तुवन्ति खलु ॥ ॥ २२ ॥

त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।
स त्वं नो वीर वीर्याय चोदय ॥ ७ ॥

त्वे इति । सोम । प्रथमाः । वृक्तऽबर्हिषः । महे । वाजाय । श्रवसे । धियम् । दधुः ।
सः । त्वम् । नः । वीर । वीर्याय । चोदय ॥ ७ ॥

हे vसोम vप्रथमाः पुरातनाः । यद्वा । यष्टृत्वेन सर्वेषां जनानां मुख्याः । vवृक्तबर्हिषः । वृक्तं छिन्नं बर्हिर्यैर्यज्ञार्थमिति वृक्तबर्हिषो यजमानाः । vमहे महते vवाजाय बलाय[2] vश्रवसे अन्नाय[3] च vधियं बुद्धिं vत्वे त्वयि vदधुः निहितवन्तः । तस्मात् हे vवीर समर्थ सोम vसः तादृशः vत्वं vनः अस्मानपि संग्रामे vवीर्याय सामर्थ्याय vचोदय प्रेरय । यद्वा । वीर्याय वीरे पुत्रे भवाय सुखायास्मान् प्रेरय ॥

दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत ।
इन्द्रमभि जायमानं समस्वरन् ॥ ८ ॥

दिवः । पीयूषम् । पूर्व्यम् । यत् । उक्थ्यम् । महः । गाहात् । दिवः । आ । निः । अधुक्षत ।
इन्द्रम् । अभि । जायमानम् । सम् । अस्वरन् ॥ ८ ॥

vदिवः द्युलोकात् तत्र स्थितैर्देवैः vपीयूषं पातव्यं vपूर्व्यं प्रत्नं vयत् सोमरूपमन्नम् vउक्थ्यं प्रशस्यमस्ति तं सोमं vमहः महतः vगाहात् गहनात् vदिवः द्युलोकात् vनिरधुक्षत आभिमुख्येन[4] निर्दुहन्ति[5] । ततो दुग्धम् vइन्द्रम् अभिलक्ष्य vजायमानं तं सोमं vसमस्वरन् स्तोतारः संस्तुवन्ति ॥

---

१. त३.६-म१.२.४.७-दृष्टांतः । २. ग-अन्नाय । ३. ग-कीर्त्यै । ४. ग-धारया आभिमुख्येन; त३-म५-धावय आभिमुख्येन; म६-वारय आभिमुख्येन ।५. त१.२.४.५-हविर्दुहंति; म६-हविर्निर्दुहंति ।

अध॒ यदि॒मे प॑वमान॒ रोद॑सी इ॒मा च॒ विश्वा॒ भुव॑नाभि॒ मज्म॑ना ।
यू॒थे न नि॒ःष्ठा वृ॑ष॒भो वि ति॑ष्ठसे ॥ ९ ॥

अध॑ । यत् । इ॒मे इति॑ । प॒व॒मा॒न॒ । रोद॑सी॒ इति॑ । इ॒मा । च॒ । विश्वा॑ । भुव॑ना । अ॒भि । म॒ज्मना॑ ।
यू॒थे । न । नि॒ःऽस्थाः । वृ॒ष॒भः । वि । ति॒ष्ठ॒से ॥ ९ ॥

हे [v]पवमान सोम [v]अध अनन्तरं [v]यत् यथा [v]इमे [v]रोदसी द्यावापृथिव्यौ [v]इमा इमानि [v]विश्वा विश्वानि [v]भुवना भूतजातानि [v]च [v]मज्मना बलेन [v]अभि तिष्ठसि स त्वं तथा कुर्वन् भुवनेषु [v]वि [v]तिष्ठसे । तत्र दृष्टान्तः । [v]यूथे [v]न यथा कश्चित् [v]वृषभः गवां[1] यूथे[1] वृन्दे [v]निःष्ठाः निःस्थितो वर्तते तद्वद्यूथस्थानीयेषु भूतजातेषु निःस्थितो भवसि ॥

सोमः॑ पुना॒नो अ॒व्यये॒ वारे॒ शिशु॒र्न क्रीळ॒न्पव॑मानो अक्षाः ।
स॒हस्र॑धारः श॒तवा॑ज इन्दुः ॥ १० ॥

सोमः॑ । पु॒ना॒नः॑ । अ॒व्यये॑ । वारे॑ । शिशुः॑ । न । क्रीळ॑न् । पव॑मानः । अ॒क्षा॒रिति॑ ।
स॒हस्र॑ऽधारः । श॒तऽवा॑जः । इ॒न्दुः॑ ॥ १० ॥

[v]पुनानः पूयमानः [v]पवमानः पूतः [v]सोमः [v]अव्यये अविमये [v]वारे वाले पवित्रे [v]शिशुर्न शिशुरिव [v]क्रीळन् इतस्ततः संक्रीडमानः सन् [v]अक्षाः क्षरति । कीदृशः । [v]सहस्रधारः बहुधारायुक्तः [v]शतवाजः बहुबलः [v]इन्दुः दीप्तः ॥

ए॒ष पु॑ना॒नो मधु॑माँ ऋ॒तावेन्द्रा॑येन्दुः॑ पवते स्वा॒दुरू॒र्मिः ।
वा॒ज॒सनि॑र्वरिवो॒विद्व॒योधाः॑ ॥ ११ ॥

ए॒षः । पु॒ना॒नः॑ । मधु॑ऽमान् । ऋ॒तऽवा॑ । इन्द्रा॑य । इन्दुः॑ । पव॑ते । स्वा॒दुः॑ । ऊ॒र्मिः॑ ।
वा॒ज॒ऽसनिः॑ । व॒रि॒वः॒ऽवित् । व॒यः॒ऽधाः॑ ॥ ११ ॥

[v]पुनानः पूयमानः [v]मधुमान् माधुर्योपेतः [v]ऋतवा[2] ऋतवान् यज्ञवान्[3] [v]इन्दुः क्षरणशीलः [v]स्वादुः स्वादुकरः [v]ऊर्मिः [v]एषः रसधारासंघः [v]इन्द्राय इन्द्रार्थं [v]पवते क्षरति । कीदृशः । [v]वाजसनिः अन्नस्य दाता [v]वरिवोवित् धनस्य लम्भकः [v]वयोधाः आयुषो दाता ॥

स पव॑स्व सह॒मानः॑ पृत॒न्यून्त्सेध॒न्रक्षां॑स्यप॒ दुर्गहा॑णि ।
स्वा॒यु॒धः सा॑सह्वा॒न्त्सोम॑ शत्रू॒न् ॥ १२ ॥

सः । पव॑स्व । स॒ह॒मानः॑ । पृ॒त॒न्यून् । सेध॑न् । रक्षां॑सि । अप॑ । दुः॒ऽगहा॑नि ।
सु॒ऽआ॒यु॒धः॑ । स॒सह्वा॑न् । सोम॑ । श॒त्रू॒न् ॥ १२ ॥

हे [v]सोम [v]सः तादृशस्त्वं [v]पवस्व । किं कुर्वन् । [v]पृतन्यून् ॥ 'कम्यधरपृतनस्यर्चि क्रोपः' इति क्यचि परतोऽकारलोपः ॥ संग्रामकामान् शत्रून् [v]सहमानः अभिभवन् तथा [v]दुर्गहाणि

---

१. ग-त३.६-म१.२.४.७-यूथे गवां; त१.२.४.५-म६-गवां यूथेन । २. म२.६-ऋतावा ।
३. त-म-यज्ञमानः ।

कैश्चिदपि दुर्गमाणि ᵛरक्षांसि ᵛअप ᵛसेधन् अपगमयन् हिंसन्। किंच ᵛस्वायुधः शोभनायुधः सन् ᵛशत्रून् ᵛसासह्वान् अभिभवन्नभितपन् पवस्व ॥ ॥ २१ ॥

'अया रुचा' इति तृचमष्टमं सूक्तं परुच्छेपपुत्रस्यानानताख्यस्यार्षमत्यष्टिच्छन्दस्कं पवमानसोमदेवताकम्। तथा चानुक्रम्यते–'अया रुचा तृचमनानतः पारुच्छेपिरात्यष्टम्' इति। गतो विनियोगः ॥

अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुर्वभिः सूरो न स्वयुर्वभिः।
धारा सुतस्य रोचते पुनानो अरुषो हरिः।
विश्वा यद्रूपा परियात्यृक्वभिः ससास्येभिर्ऋक्वभिः ॥ १ ॥

अया। रुचा। हरिण्या। पुनानः। विश्वा। द्वेषांसि। तरति। स्वयुर्वऽभिः।सूरः। न। स्वयुर्वऽभिः।
धारा। सुतस्य। रोचते। पुनानः। अरुषः। हरिः।
विश्वा। यत्। रूपा। परिऽयाति। ऋक्वऽभिः। ससऽआस्येभिः। ऋक्वऽभिः ॥ १ ॥

ᵛपुनानः पूयमानः सोमः ᵛहरिण्या हरितवर्णया ᵛअया अनया ᵛरुचा रोचमानया धारया ᵛविश्वा सर्वाणि ᵛद्वेषांसि द्वेष्टॄणि रक्षांसि ᵛतरति विनाशयति। तत्र दृष्टान्तः। ᵛसूरो ᵛन यथा सूर्यः ᵛस्वयुर्वभिः स्वयं युक्तै रश्मिभिस्तमांसि हिनस्ति तद्वत्। ᵛस्वयुर्वभिः इति द्विरुक्तिरादरार्था। यद्वा। धारया युक्तः सोमः स्वीयैर्युक्तैस्तेजोभी रक्षांसि तरति। तस्य ᵛसुतस्य[1] अभिषुतस्य सोमस्य ᵛधारा[2] ᵛरोचते दीप्यते। ᵛपुनानः पूयमानः ᵛहरिः हरितवर्णः सोमः ᵛअरुषः आरोचमानो भवति। ᵛयत्[3] यः[3] सोमः ᵛससास्येभिः रसहरणशीलास्यैः ᵛऋक्वभिः स्तुतिमद्भिः ᵛऋक्वभिः तेजोभिः ᵛविश्वा विश्वानि व्याप्तानि ᵛरूपा रूपाणि नक्षत्राणि ᵛपरियाति गच्छति व्याप्नोति ॥

त्वं त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दमे ऋतस्य धीतिभिर्दमे।
परावतो न साम तद्यत्रा रणन्ति धीतयः।
त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥ २ ॥

त्वम्। त्यत्। पणीनाम्। विदः। वसु। सम्। मातृऽभिः। मर्जयसि। स्वे। आ। दमे।
ऋतस्य। धीतिऽभिः। दमे। पराऽवतः। न। साम। तत्। यत्र। रणन्ति। धीतयः।
त्रिधातुऽभिः। अरुषीभिः। वयः। दधे। रोचमानः। वयः। दधे ॥ २ ॥

हे सोम ᵛत्वं ᵛत्यत् ᵛपणीनां ᵛवसु पणिभिरपहृतं गवात्मकं धनं ᵛविदः अलभथाः। ᵛआ अपि च ᵛऋतस्य यज्ञस्य ᵛधीतिभिः धात्रीभिः ᵛमातृभिः वसतीवरीभिः ᵛस्वे आत्मीये ᵛदमे गृहभूते ᵛदमे यज्ञे ᵛसं ᵛमर्जयसि सम्यक् शुद्धो भवसि। ᵛपरावतो ᵛन दूरस्थादेशाद्यथा ᵛसाम सामध्वनिः श्रूयते तथा तव ᵛतत् सामध्वनिः सर्वैः श्रूयते। असौ सोमाभिषवाभिप्रायेणोक्तः। ᵛयत्र यस्मिन् शब्दे ᵛधीतयः कर्मणो धर्तारो यजमानाः ᵛरणन्ति रमन्ते। ᵛरोचमानः सोमः ᵛत्रिधातुभिः त्रयाणां लोकानां धारयित्रीभिर्मातृभिर्वसतीवरीभिः ᵛअरुषीभिः आरोचमानाभिर्दीप्तिभिः ᵛवयः अन्नं ᵛदधे स्तोतृभ्यः प्रयच्छति। पुनः ᵛवयो ᵛदधे इत्यादरार्थम् ॥

---

१. त४.५–तसुतस्य; भ६–तत्सुतस्य। २. त५-भ२.६–धारा पवंति। ३. त१.२.५.७–यतयः; भ६–यतः यः।

पूर्वामनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः।
अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन्।
वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥ ३ ॥

पूर्वाम्। अनु। प्रऽदिशम्। याति। चेकितत्। सम्। रश्मिऽभिः। यतते। दर्शतः। रथः। दैव्यः। दर्शतः। रथः। अग्मन्। उक्थानि। पौंस्या। इन्द्रम्। जैत्राय। हर्षयन्। वज्रः। च। यत्। भवथः। अनपऽच्युता। समत्ऽसु। अनपऽच्युता ॥ ३ ॥

[v]चेकितत् जानानः सोमः [v]पूर्वां प्राचीं [v]प्रदिशं प्रकृष्टां दिशम् [v]अनु [v]याति अनुगच्छति। किंच [v]दर्शतः सर्वैर्दर्शनीयः [v]दैव्यः देवेषु भवस्तव [v]रथः सूर्यरश्मिभिः [v]सं [v]यतते संगच्छते। पुनः [v]दर्शतो [v]रथः इत्यादरार्थम्। ततः [v]पौंस्या पुंस्त्वावगमानि [v]उक्थानि स्तोत्राणि [v]अग्मन् इन्द्रं गच्छन्ति। तथा [v]जैत्राय जयार्थं तानि स्तोत्राणि [v]इन्द्रं [v]हर्षयन् हर्षयन्ति। तथा तस्य [v]वज्रश्च तमिन्द्रं गच्छति। [v]यत् यदा [v]समत्सु संग्रामेषु [v]अनपच्युता अनपच्युतौ शत्रुभिरपराजितौ सोम त्वं चेन्द्रश्च युवां[1] सह [v]भवथः तदा स्तोत्रागमनादीनि भवन्ति। पुनः [v]अनपच्युता इत्यादरार्थम्॥ ॥ २४ ॥

'नानानम्' इति चतुर्ऋचं नवमं सूक्तमाङ्गिरसस्य शिशुनाम्न आर्षम्। पञ्चपदा पङ्क्तिश्छन्दः। पवमानः सोमो देवता। तथा चानुक्रान्तं—'नानानं चतुष्कं शिशुः पाङ्क्तं हि' इति। गतो विनियोगः॥

नानानं वा उ नो धियो वि व्रतानि जनानाम्।
तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥ १ ॥

नानानम्। वै। ऊँ इति। नः। धियः। वि। व्रतानि। जनानाम्।
तक्षा। रिष्टम्। रुतम्। भिषक्। ब्रह्मा। सुन्वन्तम्। इच्छति। इन्द्राय। इन्दो इति। परि। स्रव ॥ १ ॥

ऋषिरेतदादिभिस्त्रिभिः सूक्तैः अपरिस्रवतः[2] सोमस्याजामित्वाय मनसो विनोदनं कुर्वन्नाह। हे सोम [v]नः अस्माकं [v]धियः कर्माणि [v]नानानं नानाजातीयकानि बहूनि भवन्ति। वैशब्दः प्रसिद्ध्यर्थद्योतनार्थः। [v]उ इति पूरणः। तथान्येषामपि [v]जनानां [v]व्रतानि कर्माणि विविधानि भवन्ति। [v]तक्षा त्वष्टा [v]रिष्टं दारुतक्षणम् [v]इच्छति। तथा [v]भिषक् वैद्यश्चिकित्सकः [v]रुतं रोगमिच्छति। [v]ब्रह्मा ब्राह्मणः [v]सुन्वन्तं सोमाभिषवं कुर्वन्तं यजमानमिच्छति। तथाहं त्वत्परिस्रवणमिच्छामि। तस्मात्ते [v]इन्दो सोम [v]इन्द्राय इन्द्रार्थं [v]परि [v]स्रव परितः क्षर॥

जरतीभिरोषधीभिः पर्णेभिः शकुनानाम्।
कार्मारो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥ २ ॥

जरतीभिः। ओषधीभिः। पर्णेभिः। शकुनानाम्।
कार्मारः। अश्मऽभिः। द्युऽभिः। हिरण्यऽवन्तम्। इच्छति। इन्द्राय। इन्दो इति। परि। स्रव ॥ २ ॥

---

१. ग-त-भ-युवां समत्सु संग्रामेषु। २. ग-त३-परिस्रवतः; भ२-आपरिस्रवतः।

vजरतीभिः जीर्णाभिः[1] vओषधीभिः vइषवः क्रियन्ते । तथा vशकुनानां vपर्णेभिः इषूणां पक्षभूतैः पर्णैश्च क्रियन्ते । तथा vघृभिः दीप्ताभिरिषूणां तेजनार्थाभिः[2] vअश्मभिः[2] शिलाभिश्च क्रियन्ते । एतैः vकार्मारः अयस्कारः vहिरण्यवन्तम् आढ्यं पुरुषम् vइच्छति । तथाहं त्वत्परिस्रवणमिच्छामि । तस्मात् vइन्दो vइन्द्राय vपरि vस्रव ॥

कारुरहं ततो भिषगुपलप्रक्षिणी नना ।
नानाधियो वसूयवोऽनु गाइव तस्थिमेन्द्रायेन्दो परि स्रव ॥ ३ ॥

कारुः । अहम् । ततः । भिषक् । उपलऽप्रक्षिणी । नना ।
नानाऽधियः । वसुऽयवः । अनु । गाःऽइव । तस्थिम । इन्द्राय । इन्दो इति । परि । स्रव ॥३॥

ऋषिः प्रवृत्तसोमयागः सन् दशापवित्रात् सोमे क्षरति प्रतिबन्धकपापापनुत्तये पुरश्चरितानुकीर्तनपुरःसरमध्येषणां चकार । तावत् vअहं vकारुः स्तोमानां कर्तास्मि । vततः इति संताननाम । तन्यतेऽस्मादिति ततः पिता । तन्यतेऽसाविति वा ततः पुत्रः । vभिषक् भेषजकृत् । यज्ञस्य ब्रह्मोत्यर्थः । ' सर्वैः[3] ऋग्भा विद्यया भिषज्यति ' इति श्रुतेः । तथा vउपलप्रक्षिणी । उपलेषु वालुकासु[4] प्रक्षिणोति यवान् हिनस्ति भृज्जतीति । यद्वा । दृषदादिपूपलेषु भृष्टान् यवान् हिनस्ति चूर्णयतीति । अथवा धानासक्तुकरम्भादीनां कारिका वा । असौ vनना माता दुहिता वा । नमनक्रियायोग्यत्वात् । माता खल्वपत्थं प्रति स्तनपानादिना नमनशीला भवति । दुहिता वा शुश्रूषार्थम् । एवं सर्वेषां परिचरणेन vनानाधियः नानाकर्माणः vवसूयवः धनकामा वयम् vअनु vतस्थिम लोकमन्वास्थिताः स्मः । तत्र दृष्टान्तः । vगाइव । छन्दसो जसः शसादेशः । गावो यथा गोष्ठमनुतिष्ठन्ति स्वपयःप्रदानेन परिचरन्ति वा एवं वयमपि परिचरामः । एतज्ज्ञात्वा हे vइन्दो सोम vइन्द्राय vपरि vस्रव दशापवित्रात् क्षर । एवमेषाध्येषणा सत्कारपूर्विका व्यापारणा । अत्र निरुक्तम्—' उपलप्रक्षिणीत्युपलेषु प्रक्षिणात्युपलप्रक्षेपिणी[5] वा । कारुरहमस्मि कर्ता स्तोमानां ततो भिषक् । तत इति संताननाम पितुर्वा पुत्रस्य वा । उपलप्रक्षिणी[6] सक्तुकारिका नना नमतेर्माता वा[7] दुहिता वा । नानाधियो नानाकर्माणो वसूयवो वसुकामा अन्वास्थिताः स्मो गाव इव लोकम् ' (निरु. ६. ५-६) इति ॥

अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः ।
शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छतीन्द्रायेन्दो परि स्रव ॥ ४ ॥

अश्वः । वोळ्हा । सुऽखम् । रथम् । हसनाम् । उपऽमन्त्रिणः ।
शेपः । रोमण्ऽवन्तौ । भेदौ । वाः । इत् । मण्डूकः । इच्छति । इन्द्राय । इन्दो इति । परि । स्रव ॥४॥

vवोळ्हा लक्ष्यं[8] देशं[8] प्रापयन् vअश्वः vसुखं कल्याणं vरथम् vइच्छति । vउपमन्त्रिणः उपमन्त्रवन्तो नमंसचिवाः vहसनाम् उपहसनां वाचमिच्छन्ति । तथा vशेपः । ' शेपो वैतस इति पुंस्प्रजननस्य ' (निरु. ३.२१) इति यास्कः । यथा शेपः vरोमण्वन्तौ vभेदौ इच्छति । vमण्डूकः

१. त१.२.३.४.५.७-भ६-जीर्णाभिर्याभिः । २. त-भ२.६-तेजनार्थाभि रश्मिभिः । ३. त१.३.७-भ२-स च । ४. भ६-उलूखलासु । ५. त-प्रक्षिणोत्युपलेषु प्रक्षेपणा; भ१.७-प्रक्षिणात्यपलेषु प्रक्षिणा; भ२-प्रक्षिणात्युपलेषु प्रक्षेपणि; भ६-प्रक्षिणोत्युपलेषु प्रक्षपणा । ६. त१.२.४.५.७-भ२.६.७-भिषगुपलप्रक्षेपिणी; त३-भिषगुपलप्रक्षिणी । ७. त१.२.४.५-भ६-च । ८. ग-रथं स्वदेशं; त१.२.४.५.७-रथं देशं; त३-भ१.२.४-रथ्यं देशं; भ६-रथं देशं; मु-लक्षं देशं ।

ᵛवारित्[1]। इदवधारणे[2]। उदकमेवेच्छति। तथाहं त्वत्परिस्रवणमिच्छामि। तस्मात् ᵛइन्द्रायेन्दो ᵛपरि ᵛस्रव इति ॥ ॥ २५ ॥

'शर्यणावति' इत्येकादशर्चं दशमं सूक्तं मारीचस्य कश्यपस्यार्षम्। पूर्वत्र 'हि' इत्युक्त्वादिदमुत्तरं च पादुक्तम्। पवमानसोमदेवताकम्। तथा चानुक्रम्यते—'शर्यणावत्येकादश कश्यपः' इति। गतो विनियोगः ॥

शर्यणावति सोममिन्द्रः पिबतु वृत्रहा।
बलं दधान आत्मनि करिष्यन्वीर्यं महदिन्द्रायेन्दो परि स्रव ॥ १ ॥

शर्यणाऽवति। सोमम्। इन्द्रः। पिबतु। वृत्रऽहा।
बलम्। दधानः। आत्मनि। करिष्यन्। वीर्यम्। महत्। इन्द्राय। इन्दो इति। परि। स्रव ॥१॥

ᵛशर्यणावति। शर्यणावत्नाम कुरुक्षेत्रस्य जघनार्धे सरः। तत्र स्थितं ᵛसोमं ᵛवृत्रहा ᵛइन्द्रः ᵛपिबतु। कीदृशः। ᵛआत्मनि ᵛबलं ᵛदधानः बलं निदधानः अत एव ᵛमहत् ᵛवीर्यं ᵛकरिष्यन् शत्रून् प्रति। तस्मात् ᵛइन्द्रायेन्दो ᵛपरि ᵛस्रव ॥

आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः।
ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परि स्रव ॥ २ ॥

आ। पवस्व। दिशाम्। पते। आर्जीकात्। सोम। मीढ्वः।
ऋतऽवाकेन। सत्येन। श्रद्धया। तपसा। सुतः। इन्द्राय। इन्दो इति। परि। स्रव ॥ २ ॥

हे ᵛदिशां ᵛपते प्राच्यादीनां दिशां प्रकाशकत्वेन स्वामिन् हे ᵛमीढ्वः कामानां सेक्तर्हे ᵛसोम ᵛआर्जीकात्। ऋजीकानामदूरभव आर्जीको जनपदः। तस्मात् ᵛआ ᵛपवस्व अस्मद्यज्ञं प्रत्यागच्छ। यद्वा। आर्जीकादुत्तोरकुटिलात् पवित्रात् क्षर। कीदृशः। ᵛऋतवाकेन ऋतस्य वचनेन ᵛसत्येन। सत्यर्तयोरल्पो भेदो द्रष्टव्यः। ᵛश्रद्धया ᵛतपसा युक्तैर्दीक्षितैः ᵛसुतः अभिषुतस्त्वं पवस्व ॥

पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहितार्भरत्।
तं गन्धर्वाः प्रत्यगृभ्णन्तं सोमे रसमादधुरिन्द्रायेन्दो परि स्रव ॥ ३ ॥

पर्जन्यऽवृद्धम्। महिषम्। तम्। सूर्यस्य। दुहिता। आ। अभरत्।
तम्। गन्धर्वाः। प्रति। अगृभ्णन्। तम्। सोमे। रसम्। आ। अदधुः।
इन्द्राय। इन्दो इति। परि। स्रव ॥ ३ ॥

ᵛसूर्यस्य ᵛदुहिता श्रद्धा नाम। 'श्रद्धा वै सूर्यस्य दुहिता' (श. ब्रा. १२. ७. ३. ११) इति याजसनेयकम्। सा ᵛपर्जन्यवृद्धं पर्जन्यवत् समर्थम्। यद्वा। पर्जन्येन तत्कार्यत्वेनोदकेन प्रवृद्धम्। ᵛमहिषं महान्तं पूज्यं वा ᵛतं सोमम् ᵛआभरत् आहरत्। द्युलोकादाहृतवती। ᵛतम् आहियमाणं सोमं ᵛगन्धर्वाः विश्वावसुप्रभृतयः ᵛप्रत्यगृभ्णन् प्रत्यगृह्णन्। प्रतिगृहीतवन्तः। ह्रस्वहोर्भः। ततो गन्धर्वाः प्रतिगृहीतं ᵛरसं ᵛसोमे प्रत्यक्षम् ᵛआदधुः। दधातेर्लङि। तस्मात् ᵛपरि ᵛस्रव ॥

---

१. त४.५.७–वारि; त३.६-म१.२.४.७–वाः; म६–वारिद। २. त२-म६–इव धारणे।

ऋतं वदन्नृतद्युम्न सत्यं वदन्त्सत्यकर्मन् ।
श्रद्धां वदन्त्सोम राजन्धात्रा सोम परिष्कृत इन्द्रायेन्दो परि स्रव ॥ ४ ॥

ऋतम् । वदन् । ऋतऽद्युम्न । सत्यम् । वदन् । सत्यऽकर्मन् ।
श्रद्धाम् । वदन् । सोम । राजन् । धात्रा । सोम । परिऽकृतः । इन्द्राय । इन्दो इति । परि । स्रव ॥४॥

हे [v]ऋतद्युम्न ऋतेन द्योतमान सत्ययशस्क वा [v]सत्यकर्मन् यथार्थकर्मन्[1] हे [v]सोम अभिषूयमाण [v]राजन् सर्वेषां यज्ञनिष्पादकत्वेन स्वामिन् हे [v]सोम [v]ऋतं यज्ञं [v]वदन् [v]सत्यं [v]वदन् उच्चारयन् [v]श्रद्धां यजमानानामात्मनोपेक्षितां [v]वदन् [v]धात्रा कर्मणां धारकेण देवानां पोषकेण वा यजमानेन [v]परिष्कृतः अलंकृतस्त्वम् [v]इन्द्राय [v]परि [v]स्रव । 'संपर्युपेभ्यः' इति भूषणार्थे करोतेः सुट् ॥

सत्यमुग्रस्य बृहतः सं स्रवन्ति संस्रवाः ।
सं यन्ति रसिनो रसाः पुनानो ब्रह्मणा हर इन्द्रायेन्दो परि स्रव ॥ ५ ॥

सत्यम्ऽउग्रस्य । बृहतः । सम् । स्रवन्ति । सम्ऽस्रवाः ।
सम् । यन्ति । रसिनः । रसाः । पुनानः । ब्रह्मणा । हरे । इन्द्राय । इन्दो इति । परि । स्रव ॥५॥

[v]सत्यमुग्रस्य संग्रामे सत्येन शत्रूणामुद्गूरयितुः । यद्वा उद्गूर्णसत्यस्य । यद्वा । यथार्थभूतमुद्गूर्णं बलं यस्य तस्य । पृषोदरादित्वाद्रूपसिद्धिः । [v]बृहतः महतः सोमस्य तव [v]संस्रवाः सम्यक्स्रवणशीला[2] धाराः [v]सं [v]स्रवन्ति सम्यक् गच्छन्ति । किंच [v]रसिनः रसवतस्तव स्वभूताः [v]रसाः [v]सं [v]यन्ति संगच्छन्ते । तस्माद्धे [v]हरे हरितवर्ण सोम [v]ब्रह्मणा ब्राह्मणेन मन्त्रेण वा [v]पुनानः पूयमानः स त्वमिन्द्रार्थं [v]परि [v]स्रव ॥ ॥ २६ ॥

यत्र ब्रह्मा पवमान छन्दस्यां[3] वाचं वदन् ।
ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्निन्द्रायेन्दो परि स्रव ॥ ६ ॥

यत्र । ब्रह्मा । पवमान । छन्दस्याम् । वाचम् । वदन् ।
ग्राव्णा । सोमे । महीयते । सोमेन । आऽनन्दम् । जनयन् । इन्द्राय । इन्दो इति । परि । स्रव ॥६॥

हे [v]पवमान पूयमान सोम स्वदर्थं [v]छन्दस्यां सप्तच्छन्दोभिः कृतां तेषु भवां [v]वाचं स्तुतिं [v]वदन् उच्चारयन् [v]सोमे सोमाभिषवार्थं [v]ग्राव्णा अभिषवं कुर्वता युक्तस्तेनाभिषुतेन [v]सोमेन देवानाम् [v]आनन्दं संतोषं [v]जनयन् उत्पादयन् [v]ब्रह्मा ब्राह्मणः [v]यत्र यस्मिन् देशे [v]महीयते देवैः पूज्यते तत्र हे सोम त्वं [v]परि [v]स्रव ॥

यत्र ज्योतिरजस्रं यस्मिँल्लोके स्वर्हितम् ।
तस्मिन्मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परि स्रव ॥ ७ ॥

यत्र । ज्योतिः । अजस्रम् । यस्मिन् । लोके । स्वः । हितम् ।
तस्मिन् । माम् । धेहि । पवमान । अमृते । लोके । अक्षिते । इन्द्राय । इन्दो इति । परि । स्रव ॥७॥

---

१. ग-त-'यथार्थकर्मन्' नास्ति । २. त१.२.४.५.७-भ६-°सरणशीला ।

हे ᵛपवमान ᵛयत्र यस्मिँल्लोके ᵛज्योतिः सर्वं तेजः ᵛअजस्रं सर्वदाविनश्वरं वर्तते । ᵛयस्मिन् च ᵛलोके ᵛस्वः आदित्याख्यं ज्योतिः ᵛहितं निहितमस्ति । ᵛतस्मिन् ᵛअमृते मरणधर्मरहिते अत एव ᵛअक्षिते अक्षीणे ᵛलोके ᵛमां सोमाभिषवं कुर्वन्तं ᵛधेहि निधेहि[1] । तस्मात् मामुत्तमलोकं प्रापयितुं त्वम् ᵛइन्द्राय ᵛपरि ᵛस्रव ॥

यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।
यत्रामूर्यहतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥ ८ ॥

यत्र । राजा । वैवस्वतः । यत्र । अवऽरोधनम् । दिवः ।
यत्र । अमूः । यहतीः । आपः । तत्र । माम् । अमृतम् । कृधि । इन्द्राय । इन्दो इति । परि । स्रव ॥८॥

ᵛयत्र यस्मिँल्लोके ᵛवैवस्वतः विवस्वत्पुत्रः ᵛराजा भवति । ᵛयत्र च लोके ᵛदिवः आदित्यस्य ᵛअवरोधनं भूतानां प्रवेशनम् । किंच ᵛयत्र लोके ᵛयहतीः महत्यः ᵛअमूः इमा गङ्गाद्याः ᵛआपः तिष्ठन्ति । ᵛतत्र तादृशे लोके ᵛमाममृतं मरणधर्मरहितं ᵛकृधि कुरु । मम देवत्वं प्रापयेत्यर्थः । ततः कारणात्[2] ᵛपरि ᵛस्रव ॥

यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।
लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥ ९ ॥

यत्र । अनुऽकामम् । चरणम् । त्रिऽनाके । त्रिऽदिवे । दिवः ।
लोकाः । यत्र । ज्योतिष्मन्तः । तत्र । माम् । अमृतम् । कृधि । इन्द्राय । इन्दो इति । परि । स्रव ॥९॥

ᵛयत्र ᵛत्रिदिवे तृतीयस्यां दिवि द्युलोके ᵛत्रिनाके । तत्राधरमध्यमोत्तमभावेन त्रीणि स्थानानि सन्ति । तत्र तृतीये नाके उत्तमे स्थाने ᵛदिवः आदित्यस्य ᵛअनुकामं कामानुगुणं ᵛचरणम् अस्ति । किंच ᵛयत्र यस्मिँल्लोके ᵛलोकाः ᵛज्योतिष्मन्तः ज्योतिर्युक्तास्तिष्ठन्ति । ᵛतत्र तादृशे लोके ᵛमाममृतं ᵛकृधि । यथा ममोत्तमलोको भवति तथा त्वम् ᵛइन्द्राय ᵛपरि ᵛस्रव ॥

यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।
स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥ १० ॥

यत्र । कामाः । निऽकामाः । च । यत्र । ब्रध्नस्य । विष्टपम् ।
स्वधा । च । यत्र । तृप्तिः । च । तत्र । माम् । अमृतम् । कृधि । इन्द्राय । इन्दो इति । परि । स्रव ॥ १० ॥

ᵛयत्र यस्मिँल्लोके ᵛकामाः काम्यमाना देवाः ᵛनिकामाः नितरामवश्यं प्रार्थ्यमाना इन्द्रादयः ᵛच विद्यन्ते । यद्वा कामा निकामा अभिलाषा निकामाश्च यत्र विद्यन्ते । ᵛयत्र लोके ᵛब्रध्नस्य सर्वेषां प्रज्ञापकस्य । यद्वा । सूर्येण विना कर्माणि[3] न घटन्त इति सर्वेषां कर्मणां मूलभूतस्यादित्यस्य ᵛविष्टपं सहस्थानं यत्र विद्यते तत्र लोके । ᵛस्वधा अन्नं स्वधाकारेण वा दत्तमन्नं ᵛतृप्तिः तर्पणं हर्षकं हर्षः ᵛच ᵛयत्र विद्यते ᵛतत्र लोके ᵛमाममृतं ᵛकृधि ॥

१. त३.४-विधेहि । २. ग-त३-भ५-कारणात्त्वं । ३. ग-कर्मणि न प्रवर्तते ।

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्रासाः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥ ११ ॥

यत्र । आऽनन्दाः । च । मोदाः । च । मुदः । प्रऽमुदः । आसते ।
कामस्य । यत्र । आसाः । कामाः । तत्र । माम् । अमृतम् । कृधि ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ ११ ॥

Vयत्र यस्मिँल्लोके आनन्दादयः Vआसते । तेषामल्पो भेदो द्रष्टव्यः । Vयत्र च लोके Vकामस्य काम्यमानस्य देवस्य सर्वे Vकामाः Vआसाः प्राप्ता भवन्ति Vतत्र Vमाममृतं Vकृधि । एतत्तु त्वया विना न घटत इति हे सोम त्वं Vपरि Vस्रव ॥ ॥ २७ ॥

' य इन्दोः ' इति चतुर्ऋचमेकादशं सूक्तम् । ऋष्यादयाः पूर्ववत् । तथा चानुक्रम्यते—'य इन्दोश्चतुष्कम् ' इति । यतः सूक्तविनियोगः ॥

य इन्दोः पवमानस्यानु धामान्यक्रमीत् ।
तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इन्द्रायेन्दो परि स्रव ॥ १ ॥

यः । इन्दोः । पवमानस्य । अनु । धामानि । अक्रमीत् ॥ तम् । आहुः । सुऽप्रजाः ।
इति । यः । ते । सोम । अविधत् । मनः । इन्द्राय । इन्दो इति । परि । स्रव ॥ १ ॥

Vपवमानस्य पूयमानस्य Vइन्दोः सोमस्य Vधामानि स्थानानि द्रोणकलशादीनि यद्वा धामानि तेजांसि Vयः ब्राह्मणः Vअनु Vअक्रमीत् अनुक्रामति अनुगच्छति Vतं जनं Vसुप्रजाः शोभनप्रजननः[1] कल्याणपुत्रादिप्रजायुक्त इत्याहुः । ' नित्यमसिच् प्रजामेधयोः ' इत्यसिच् समासान्तः । यः सोममभिषुणोति स पुत्रादियुक्तो भवतीत्यर्थः । किंच हे Vसोम Vयः मनुष्यः Vते त्वदर्थं Vमनः Vअविधत् करोति । यद्वा । ते त्वदीयं मनोऽविधत् परिचरति । विधतिः परिचरणकर्मा । तमपि कल्याणजननमित्याहुः[2] । तस्मात्त्वं Vपरि Vस्रव ॥

ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः ।
सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिन्द्रायेन्दो परि स्रव ॥ २ ॥

ऋषे । मन्त्रऽकृताम् । स्तोमैः । कश्यप । उत्ऽवर्धयन् । गिरः ।
सोमम् । नमस्य । राजानम् । यः । जज्ञे । वीरुधाम् । पतिः ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ २ ॥

ऋषिः स्वात्मानं प्रत्याह । हे Vऋषे सूक्तद्रष्टर्हे Vकश्यप आत्मन् त्वं Vमन्त्रकृतां ऋषीणां Vस्तोमैः स्तोत्रैः Vगिरः स्तुतिरूपा वाचः Vउद्वर्धयन् उपर्युपरि वर्धयन् Vराजानं सर्वेषां स्वामिनं तं Vसोमं Vनमस्य पूजय[3] । नमसः पूजायां ' नमोवरिव° ' इति क्यच् । Vयः सोमः Vवीरुधां वनस्पतीनां Vपतिः पालकः Vजज्ञे जातः तं नमस्य । हे सोम यथात्मना सुतो भवसि तथा Vपरि Vस्रव ॥

---

१. त-भ२-°प्रजनः । २. त२.३-भ४-°जनमित्याहुः; भ१.२-°जनयिन्याहुः; भ६-°जनमित्यर्थ । ३. त१.२.५.६.७-भ६-मु-मनसा पूजय; भ७-नमसा पूजय ।

सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।
देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्दो परि स्रव ॥ ३ ॥

सप्त । दिशः । नानाऽसूर्याः । सप्त । होतारः । ऋत्विजः ।
देवाः । आदित्याः । ये । सप्त । तेभिः । सोम । अभि । रक्ष । नः ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ ३ ॥

vसप्त vदिशः । सोमो यस्यां दिशि वर्तते तद्व्यतिरिक्ताः सप्त भवन्ति । vनानासूर्याः नानाविधैः सूर्यैरधिष्ठिता ऋतवो भवन्ति । ' नानालिङ्गत्वाद्ऋतूनां नानासूर्यत्वम् ' (तै. आ. १.७) इत्याद्यात्मात् । यद्वा । नानासूर्या इति दिग्विशेषणम् । तथा vहोतारः वषट्कर्तारो होत्रादयः vसप्त vऋत्विजः भवन्ति । किंच vआदित्याः अदितेः पुत्रा धात्रादयो मार्ताण्डवर्जिताः vये vसप्त vदेवाः सन्ति । एतत्तु ' अष्टौ पुत्रासो अदितेः ' (ऋ. सं. १०. ७२. ८) इत्यत्र प्रपञ्चयिष्यते । हे vसोम vतेभिः तैर्दिगादिभिः सर्वैः vनः अस्मान् vअभि vरक्ष । एतत्तु त्वया विना न घटत इति तस्मात् vइन्द्राय vइन्दो vपरि vस्रव ॥

उपाकरणोत्सर्जनयोर्मण्डलाद्यन्तहोमे ' यत्ते राजन् ' इत्येषा । सूत्रितं च—' यत्ते राजञ्छृतं[1] हविरिति[1] द्वयोः समानी च आकूतिरित्येका ' (आश्व. गृ. ३. ५. ७-८) इति ॥

यत्ते राजञ्छृतं हविस्तेन सोमाभि रक्ष नः ।
अरातीवा मा नस्तारीन्मो च नः किं चनाममदिन्द्रायेन्दो परि स्रव ॥ ४ ॥

यत् । ते । राजन् । शृतम् । हविः । तेन । सोम । अभि । रक्ष । नः ।
अरातिऽवा । मा । नः । तारीत् । मो इति । च । नः । किम् । चन । आममत् ।
इन्द्राय । इन्दो इति । परि । स्रव ॥ ४ ॥

हे vराजन् सर्वेषां कर्मसाधनत्वेन स्वामिन् हे vसोम vते त्वदर्थं vशृतं पक्वं vयत् vहविः अस्ति । ' शृतं[2] पाके ' (पा. सू. ६. १. २७) इति निष्ठायां निपातितः । vतेन हविषा vनः अस्मान् vअभि vरक्ष । अभिपालय । तस्मात्त्वदभिरक्षितानस्मान् vअरातीवा अरातित्ववाञ्छत्रुः vनः अस्मान् vमा vतारीत् मा वधीत् । किंच vनः अस्माकं vकिं vचन किंचिदपि धनादिकं शत्रुः vमो vआममत् मा हिंसीत् । यदेतदेतैः सूक्तैरुक्तं तद्यथास्माकं भवति तथा हे vइन्दो vइन्द्राय vपरि vस्रव । एवं ' स्वादिष्ठया ' इत्यादिभिरेतदन्तैः सूक्तैर्बहुविधं सोममाहात्म्यमभ्यधायि तस्मादैहिकामुष्मिकफलसिद्धये सोमयागः करणीय इत्युक्तं भवति ॥ ॥ २८ ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे दाशतय्या नवमे मण्डले
सप्तमोऽनुवाकः समाप्तं च नवमं मण्डलम् ॥

१. त-म-सु—राजन्निति । २. त१.२.४.५.७—शृतं शृतं ।

॥ श्रीः ॥

॥ अथ दशमं मण्डलम् ॥

दशमे मण्डले द्वादशानुवाकाः। तत्र प्रथमानुवाके षोडश सूक्तानि। तत्र 'अग्ने बृहन्' इति सप्तर्चं प्रथमं सूक्तमाप्त्यस्य त्रितस्यार्षम्। अनादेशपरिभाषया त्रिष्टुप्। मण्डलादिपरिभाषयाग्निर्देवता। तथा चानुक्रम्यते—'अग्ने सप्त त्रितः' इति। प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छन्दसीदमादीन्यष्ट सूक्तान्यष्टमस्यान्त्यास्तिस्रो वर्जयित्वा। सूत्र्यते हि—'अग्ने नयाग्ने बृहन्नित्यष्टानामुत्तमादुत्तमास्तिस्र[1] उद्धरेदिति त्रैष्टुभम्' (आश्व. श्रौ. ४. १३) इति। 'प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य सहस्रावममोदेतोः शंसेत्' (आश्व. श्रौ. ६. ५) इति च। होमार्थं प्रणीत आहवनीये प्राग्धोमादुपशान्ते ज्योतिष्मद्रुणकाग्निदेवताका काचिदिष्टिः। तत्राद्या याज्या। सूत्रितं च—'इष्टिरग्निर्ज्योतिष्मान् वरुण उदग्ने शुचयस्तवाग्ने बृहन्नुषसामूर्ध्वो अस्थात्' (आश्व. श्रौ. ३. १२) इति। उपाकरणोत्सर्जनयोर्मण्डलादिहोमेऽप्येषा। सूत्रमुदाहृतम्॥

अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान्तमसो ज्योतिषागात्।
अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः॥ १॥

अग्ने। बृहन्। उषसाम्। ऊर्ध्वः। अस्थात्।
निःऽजगन्वान्। तमसः। ज्योतिषा। आ। अगात्। अग्निः। भानुना। रुशता। सुऽअङ्गः।
आ। जातः। विश्वा। सद्मानि। अप्राः॥ १॥

[v]बृहन् महानेषोऽग्निः [v]उषसाम् [v]अग्ने उषसामुपर्युषःकाले [v]ऊर्ध्वः प्रज्वलितः सन् ज्वालारूपेण [v]अस्थात् तिष्ठति। ततः [v]तमसः। रात्रिनामैतत्। रात्रेः [v]निर्जगन्वान् निर्गतः॥ गमेः क्वसाविडभावे रूपम्॥ निर्गतो निष्क्रान्तवान् सोऽग्निः [v]ज्योतिषा स्वीयेन तेजसा लक्षितः सन् [v]आगात्। गार्हपत्याद्विहियमाण आहवनीयं प्रत्यागच्छति। अनन्तरं [v]स्वङ्गः शोभनज्वालावयवः[2] [v]जातः कर्मार्थं समुत्पन्न एषः [v]अग्निः [v]रुशता। रोचतेर्ज्वलतिकर्मण इदं रूपम्। आरोचमानेन। यद्वा। रुशतिर्हिंसार्थः। तमसां हिंसकेन। [v]भानुना तेजसा [v]विश्वा [v]सद्मानि सर्वाँल्लोकान् यद्वा सदनानि यज्ञगृहाणि [v]आ [v]अप्राः आपूरयति। 'प्रा पूरणे'। 'तिङां तिङो भवन्ति' इति तिपः सिबादेशः। अत्र वाजसनेयकम्—'अग्ने बृहन्नुषसामूर्ध्वो अस्थादित्यग्ने ह्येष बृहन्नुषसामूर्ध्वस्तिष्ठति। निर्जगन्वान्तमसो ज्योतिषागादिति निर्जगन्वान् रात्रेस्तमसो ज्योतिषैति। अग्निर्भानुना रुशता स्वङ्ग इत्यग्निर्वा एष भानुना रुशता स्वङ्ग आ जातो विश्वा सद्मान्यप्रा इतीमे वै लोका विश्वा सद्मानि तानेव जात आपूरयति' (श. ब्रा. ६. ७. ३. १०) इति॥

स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु।
चित्रः शिशुः परि तमांस्यक्तून्प्र मातृभ्यो अधि कनिक्रदद्गाः॥ २॥

१. ग-त६-भ१.७-°मुत्तमास्तिस्र; त१.२.३.४.५-भ२.४.६-°मुत्तमोत्तमास्तिस्र। २. ग-शोभमानावयवः।

सः । जातः । गर्भः । असि । रोदस्योः । अग्ने । चारुः । विऽभृतः । ओषधीषु ।
चित्रः । शिशुः । परि । तमांसि । अक्तून् । प्र । मातृऽभ्यः । अधि । कनिक्रदत् । गाः ॥२॥

हे [v]अग्ने [v]जातः उत्पन्नः [v]चारुः कमनीयरूपः [v]ओषधीषु ओषधिविकारेष्वरणीषु [v]विभृतः विशेषेण मथितो यद्वा विभृतः आहवनीयाद्यात्मना विविधं हियमाण ओषधीषु वर्तमानः [v]सः त्वं [v]रोदस्योः द्यावापृथिव्योः [v]गर्भोऽसि गर्भो भवसि। अग्निरूप आदित्यरूपश्चेति । किंच [v]चित्रः चित्रवर्णः 'काली कराली च मनोजवा' (मु. उ. १. २. ४) इत्यादिसप्तजिह्वाभिः[1] नानारूपः यद्वा चित्रश्चायनीयः [v]शिशुः ओषधीनां शिशुरग्निः [v]तमांसि [v]अक्तून् रात्रिवत् कृष्णान् शत्रूंश्च [v]परि भवसि। स्वतेजसाभिभवसि । स त्वं [v]मातृभ्यः मातृभूताभ्य ओषधीभ्यः । अधिः पञ्चम्यर्थद्योतकः । ताभ्यः [v]कनिक्रदत् पुनःपुनः शब्दं कुर्वन् [v]प्र [v]गाः प्रगच्छसि प्रजायसे ॥

विष्णुरित्था परममस्य विद्वाञ्जातो बृहन्भि पाति तृतीयम् ।
आसा यदस्य पयो अक्त स्वं सचेतसो अभ्यर्चन्त्यत्र ॥ ३ ॥

विष्णुः । इत्था । परमम् । अस्य । विद्वान् । जातः । बृहन् । अभि । पाति । तृतीयम् ।
आसा । यत् । अस्य । पयः । अक्त । स्वम् । सऽचेतसः । अभि । अर्चन्ति । अत्र ॥ ३ ॥

[v]विद्वान् जानानः [v]जातः प्रादुर्भूतः [v]बृहन् महान् [v]विष्णुः[2] [v]इत्था इत्थमनेन प्रकारेण विष्णुः व्यापनशीलो ज्ञानादिगुणयुक्तोऽग्निः [v]अस्य इमं [v]तृतीयं त्रयाणां पूरकं त्रितं माम् [v]अभि [v]पाति अभिरक्षतु। 'एकतो द्वितस्त्रित इति त्रयो बभूवुः' (निरु. ४. ६) इति यास्केनोक्तम्। किंच [v]अस्य अग्नेः [v]स्वम् आत्मीयं [v]पयः उदकम् [v]आसा आस्येन [v]यत् यदा [v]अक्त कुर्वन्ति यजमाना याचन्ते तदानीम् [v]अत्र अस्मिँल्लोके स्थिताः स्तोतारः [v]सचेतसः समानमनस्का भूत्वैनम् [v]अभ्यर्चन्ति अभिष्टुवन्ति ॥

अतो उ त्वा पितुभृतो जनित्रीरन्नावृधं प्रति चरन्त्यन्नैः ।
ता ईं प्रत्येषि पुनरन्यरूपा असि त्वं विक्षु मानुषीषु होता ॥ ४ ॥

अतः । ऊँ इति । त्वा । पितुऽभृतः । जनित्रीः । अन्नऽवृधम् । प्रति । चरन्ति । अन्नैः ।
ताः । ईम् । प्रति । एषि । पुनः । अन्यऽरूपाः । असि । त्वम् । विक्षु । मानुषीषु । होता ॥४॥

हे अग्ने [v]अतः । [v]उ इत्यवधारणे । अस्मादेव कारणात्[3] [v]पितुभृतः पितुनाम्ना सर्वस्य जगतो धारयित्र्यः पोषयित्र्यो वा [v]जनित्रीः जनयित्र्य ओषधयः [v]अन्नावृधम् अन्नस्य वर्धकं [v]त्वा त्वाम् [v]अन्नैः हेतुभिः [v]प्रति [v]चरन्ति परिचरन्ति अभिगच्छन्ति । ततस्त्वम् [v]ईम् एनाः [v]ताः ओषधीः [v]प्रत्येषि प्रतिगच्छसि। पुनरपि [v]अन्यरूपाः जीर्णा ओषधीर्दावभूतस्त्वं गच्छसि । किंच [v]मानुषीषु मनुष्यजातिषु [v]विक्षु प्रजासु। यद्वा। विक्ष्वग्निहोत्रादिक्रियास्वभिनिविशन्तीषु मानुषीषु मनुष्यजातिषु। [v]होता देवानामाह्वाता होमनिष्पादको वा [v]असि भवसि । मनुष्येषु स्थित इत्यर्थे ब्राह्मणं— 'देवो ह्येष मर्त्येषु' (तै. सं. १. १. ४. ६-७) इति ॥

---

१. त१.२.५.७-भ६-°जिह्वादिभिः । २. ग-त३-भ५.६-विष्णुः इत्था अमुत्र लोके स्थितमस्याग्नेः स्वभूतं परममुत्तमं तृतीयं दिविष्ठमंशुं अभिपाति अभिरक्षति यद्वा । ३. त१.२.५.७-कारात् ।

आतिथ्यायां स्विष्टकृतोऽनुवाक्या 'होतारम्' इत्येषा। सूत्रितं च—'होतारं चित्ररथमध्वरस्य प्रप्रायमग्निर्भरतस्य शृण्व इति संयाज्ये' (आश्व. श्रौ. ४. ५) इति ॥

होतारं चित्ररथमध्वरस्य यज्ञस्यंयज्ञस्य केतुं रुशन्तम् ।
प्रत्यर्धिं देवस्यंदेवस्य मह्ना श्रिया त्वग्निमतिथिं जनानाम् ॥ ५ ॥

होतारम् । चित्रऽरथम् । अध्वरस्य । यज्ञस्यऽयज्ञस्य । केतुम् । रुशन्तम् ।
प्रतिऽअर्धिम् । देवस्यऽदेवस्य । मह्ना । श्रिया । तु । अग्निम् । अतिथिम् । जनानाम् ॥ ५ ॥

[v]अध्वरस्य [v]यज्ञस्य [v]होतारम् एतन्नामानमृत्विजं यद्वा होतारं देवानामाह्वातारं [v]चित्ररथं नानारूपरथमध्वरस्य रक्षोभिरहिंसितस्य [v]यज्ञस्य सर्वस्य यज्ञस्य [v]केतुं प्रज्ञापकं पताकास्थानीयं वा [v]रुशन्तं श्वेतवर्णं [v]मह्ना स्वमहत्त्वेन [v]देवस्यदेवस्य[1] सर्वेषां देवानाम् [v]अर्धिम् इन्द्रं [v]प्रति भवन्तम्। 'यत्सर्वेषामर्धिमिन्द्रं प्रति' इति ब्राह्मणम्। तादृशं [v]जनानां यजमानानाम् [v]अतिथिम् अतिथिवत् पूज्यम् [v]अग्निं [v]तु क्षिप्रं [v]श्रिया श्रियोऽर्थं[2] वयं स्तुमः ॥

स तु वस्राण्यध पेशनानि वसानो अग्निर्नाभा पृथिव्याः ।
अरुषो जातः पद इळायाः पुरोहितो राजन्यक्ष्विह देवान् ॥ ६ ॥

सः । तु । वस्राणि । अध । पेशनानि । वसानः । अग्निः । नाभा । पृथिव्याः ।
अरुषः । जातः । पदे । इळायाः । पुरःऽहितः । राजन् । यक्षि । इह । देवान् ॥ ६ ॥

हे [v]राजन् दीप्यमानाग्ने [v]वस्राणि आच्छादकानि तेजांसि [v]अध अपि च [v]पेशनानि तेषां तेजसां काण्र्यंशौक्ल्यादीनि[3] रूपाणि। यद्वा। अधानन्तरं पेशनानि। पेश इति हिरण्यनाम। हिरण्यवत् हिरण्यसदृशानि भास्वराणि तेजांसि। [v]वसानः आच्छादयन् [v]पृथिव्याः [v]नाभा नाभौ नाभिस्थानीये [v]इळायाः [v]पदे उत्तरवेद्याम्। 'एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः' (ऐ. ब्रा. १. २८) इत्याम्नानात्। तस्यां [v]जातः समुत्पन्नः [v]अरुषः आरोचमानो यः [v]अग्निः एवंविधोऽसि स त्वं [v]पुरोहितः पुरतो निहितः पूर्वस्यां दिशि आहवनीयायतने[4] स्थापितः सन् [v]इह अस्मिन् यज्ञे [v]देवान् इन्द्रादीन् [v]यक्षि यज पूजय ॥

आ हि द्यावापृथिवी अग्न उभे सदा पुत्रो न मातरा ततन्थ ।
प्र याह्यच्छोशतो यविष्ठाथा वह सहस्येह देवान् ॥ ७ ॥

आ । हि । द्यावापृथिवी इति । अग्ने । उभे इति । सदा । पुत्रः । न । मातरा । ततन्थ ।
प्र । याहि । अच्छ । उशतः । यविष्ठ । अथ । आ । वह । सहस्य । इह । देवान् ॥ ७ ॥

हे [v]अग्ने त्वम् [v]उभे [v]द्यावापृथिवी द्यावापृथिव्यौ [v]सदा सर्वदा [v]आ [v]ततन्थ आतेनिथ। स्वतेजोभिर्विस्तारयसि खलु ॥ 'बभूथा ततन्थ' इति थलि निपातितः ॥ तत्र दृष्टान्तः। [v]पुत्रो [v]न यथा पुत्रः [v]मातरा मातापितरौ क्षीणौ धनैस्तनोति तद्वत्। किंच हे [v]यविष्ठ युवतम स[5] त्वम्[5]

---

१. त-भ२.४.६-देवस्य। २. त-भ१.४.६.७-श्रियेयं। ३. त१.२.३.५.७-भ१-°शौक्ल्यादीनि; त४-°शौक्ल्यादीनि; भ२-°शौल्कादीनि। ४. ग-त१.२.३.७-भ१.२.४-आहवनीयात्मना; त४-आहवनीयायतनो; त५-आहवनीयातने। ५. ग-स तादृश; त१.२.४.५.७-तन्वं; मु-त्वं।

ऋ. ४-१८

vउशतः कामयमानान् vअच्छ अभिलक्ष्य vप्र vयाहि प्रकर्षेणागच्छ[1]। vअथ अनन्तरं हे vसहस्य सहसो बलस्य पुत्र हे अग्ने त्वम् vइह अस्मदीये यज्ञे vदेवान् इन्द्रादीन् vआ vवह प्रापय ॥ ॥२९॥

'पिप्रीहि' इति सप्तर्चं द्वितीयं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'पिप्रीहि' इत्यनुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोरुक्तः सूक्तविनियोगः। दर्शपूर्णमासयोराद्या स्विष्टकृतोऽनुवाक्या। सूत्रितं च—'अथ स्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्या' (आश्व. श्रौ. १. ६) इति ॥

पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँरृतुपते यजेह।
ये दैव्या ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः ॥ १ ॥

पिप्रीहि। देवान्। उशतः। यविष्ठ। विद्वान्। ऋतून्। ऋतुऽपते। यज। इह।
ये। दैव्याः। ऋत्विजः। तेभिः। अग्ने। त्वम्। होतॄणाम्। असि। आऽयजिष्ठः ॥ १ ॥

हे vयविष्ठ युवतमाग्ने vउशतः स्तुतीः श्रोतुं[2] कामयमानान् vदेवान् vपिप्रीहि हविर्भिः प्रीणय। हे vऋतुपते ऋतूनां देवयागकालानां स्वामिन्नग्ने vऋतून् यागकालान् vविद्वान् जानानस्त्वम् vइह अस्मिन्[3] यज्ञे तान् vयज पूजय। किंच हे vअग्ने vदैव्याः देवेषु भवाः 'अग्निर्होताश्विनावध्वर्यू त्वष्टाग्नीन्मित्र उपवक्ता' (तै. आ. ३. ३) इत्यत्रोक्ताः vये vऋत्विजः सन्ति vतेभिः तैः सह देवान् यज। यद्वा। दैव्या देवेषु भवा ऋत्विज आश्वलायनेनोक्ताः चन्द्रमा ब्रह्मादित्योऽध्वर्युः पर्जन्य उद्गाता (आश्व. गृ. १. २३. ८-९) इति। तैः सह यज। यस्मात् vत्वं vहोतॄणां मध्ये vआयजिष्ठः आभिमुख्येन देवानां यष्टृतमः vअसि भवसि ॥

वेषि होत्रमुत पोत्रं जनानां मन्धातासि द्रविणोदा ऋतावा।
स्वाहा वयं कृणवामा हवींषि देवो देवान्यजत्वग्निरर्हन् ॥ २ ॥

वेषि। होत्रम्। उत। पोत्रम्। जनानाम्। मन्धाता। असि। द्रविणःऽदाः। ऋतऽवा।
स्वाहा। वयम्। कृणवाम। हवींषि। देवः। देवान्। यजतु। अग्निः। अर्हन् ॥ २ ॥

हे अग्ने vजनानां यजमानार्थं vहोत्रं होतुः कर्म तेन क्रियमाणं स्तोत्रं vवेषि कामयसे। vउत अपि च vपोत्रं पोतुः कर्म तेन क्रियमाणां स्तुतिं कामयसे। किंच vमन्धाता मेधावी vऋतवा[4] सत्यवांस्त्वं vद्रविणोदाः vअसि धनस्य प्रदाता भवसि। अथ परोक्षकृतः। vवयं देवेभ्यः vहवींषि vस्वाहा vकृणवाम स्वाहा करवाम। प्रयच्छाम। ततः vदेवः दीप्यमानः vअर्हन् प्रशंस्यो[5] यजमानयोग्यो वा vअग्निः vदेवान् vयजतु। तैर्हविर्भिः पूजयतु ॥

दर्शपूर्णमासातिपरवादौ निमित्ते पाथिकृतीष्टिः कर्तव्या। तत्र 'आ देवानाम्' इत्येषा याज्या। सूत्रितं च—'केया हि वेधो अध्वन आ देवानामपि पन्थामगन्म' (आश्व. श्रौ. ३. १०) इति। प्राणीयाधामाग्नेयस्यैवैष याज्योदयनीयायां सैवानुवाक्या। सूत्रितं च—'अग्ने नय सुपथा राये अस्माना देवानामपि पन्थामगन्म' (आश्व. श्रौ. ४. ३) इति। विपरीताद्य याज्यानुवाक्या इति ॥

१. ग-त१.२.४.५-म६—प्रकर्षेण गच्छ। २. ग-त३-म१.४.५.६.७—श्रोतुं हवींषि चातुं। ३. ग-त३-म२.४.७—अस्मदीये। ४. ग-ऋतावा; त१.२.४.५.७-म६—ऋतवान्। ५. ग—नमस्यो; त-म४.६-मु—प्रशस्यो।

आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोळ्हुम् ।
अग्निर्विद्वान्त्स यजात्सेदु होता सो अध्वरान्त्स ऋतून्कल्पयाति ॥ ३ ॥

आ । देवानाम् । अपि । पन्थाम् । अगन्म । यत् । शक्नवाम । तत् । अनु । प्रऽवोळ्हुम् ।
अग्निः । विद्वान् । सः । यजात् । सः । इत् । ऊँ इति । होता ।
सः । अध्वरान् । सः । ऋतून् । कल्पयाति ॥ ३ ॥

[v]देवानां देवलोकादिगमनसाधनं देवानां स्वभूतं [v]पन्थां पन्थानं तम् [v]अपि वैदिकमार्गं वयम् [v]आ [v]अगन्म आगतवन्तो भवेम येन देवान् प्राप्नुमः । तथा वयं [v]यत् कर्म अनुष्ठातुं [v]शक्नवाम शक्नुमः समर्था भवामः [v]तत्[1] कर्म अनुक्रमेण [v]प्रवोळ्हुं प्रकर्षेण वोढुं समाप्तिं प्रापयितुं समर्था भवेम[2] । अनन्तरं [v]विद्वान् तं पन्थानं जानानः [v]सः [v]अग्निः [v]यजात् देवान् यजतु । [v]सेदु स एव खलु [v]होता मनुष्याणां होमनिष्पादकः । ततः [v]सः एवाग्निः [v]अध्वरान् यज्ञान् किंच [v]ऋतून् कालान्[3] [v]कल्पयाति कल्पयतु करोतु ॥

व्रतातिपत्तौ व्रातपतीष्टिः कर्तव्या । तत्र 'यद्वो वयम्' इत्येषा याज्या । सूत्रितं च—'त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानि' (आश्व. श्रौ. ३. १३) इति ॥

यद्वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।
अग्निष्टद्विश्वमा पृणाति विद्वान्येभिर्देवाँ ऋतुभिः कल्पयाति ॥ ४ ॥

यत् । वः । वयम् । प्रऽमिनाम । व्रतानि । विदुषाम् । देवाः । अविदुःऽतरासः ।
अग्निः । तत् । विश्वम् । आ । पृणाति । विद्वान् । येभिः । देवान् । ऋतुऽभिः । कल्पयाति ॥४॥

हे [v]देवाः [v]अविदुष्टरासः अविदुत्तरा अत्यन्तमजानन्तः [v]वयं [v]वः युष्माकं [v]यत् यत्किंचित् [v]व्रतानि कर्माणि [v]विदुषां भवतां जानतामेव [v]प्रमिनाम प्रहिंसितवन्तः । भवत्सु जानत्सु नित्य-नैमित्तिककर्माणि विलोपितवन्त इत्यर्थः । [v]विद्वान् एतत् सर्वं [v]जानानः [v]अग्निः स्विष्टकृत् [v]तत् एतत् [v]विश्वं सर्वं कर्मजातम् [v]आ [v]पृणाति आपूरयतु । फलसहितं करोत्वित्यर्थः । केनापूरयतु तत्राह । [v]येभिः [v]ऋतुभिः यागयोग्यैः कालैः [v]देवान् [v]कल्पयाति कल्पयति कर्माङ्गभावाय[4] समर्थयति तैरापूरयतु ॥

यत्पाकत्रा मनसा दीनदक्षा न यज्ञस्य मन्वते मर्त्यासः ।
अग्निष्टद्धोता क्रतुविद्विजानन्यजिष्ठो देवाँ ऋतुशो यजाति ॥ ५ ॥

यत् । पाकऽत्रा । मनसा । दीनऽदक्षाः । न । यज्ञस्य । मन्वते । मर्त्यासः ।
अग्निः । तत् । होता । क्रतुऽवित् । विऽजानन् । यजिष्ठः । देवान् । ऋतुऽशः । यजाति ॥५॥

[v]दीनदक्षाः सततयाजनेन दीनबला दीनोत्साहा वा [v]मर्त्यासः मर्त्या मनुष्या ऋत्विजः [v]पाकत्रा पाकेन । बहुलग्रहणादस्मादपि तृतीयार्थे त्राप्रत्ययः । पाकेन पक्वज्ञेन[5] विशिष्टज्ञानरहिते-

---

१. त-भ६—यत् । २. ग-त५.६-मु—भवामः; त१.२.३.४.७-भ१.२.४.६—भवाम । ३. ग-त३-भ५—यज्ञकालान् । ४. त१.२.४.५.७-भ६—कर्माङ्गभावेन । ५. त-भ६—पोषकेन ।

नास्येन वा vमनसा युक्ताः सन्तो यज्ञसंबन्धि vयत् कर्म vन vमन्यते न जानन्ति vतत् कर्म vविजानन् vहोता देवानामाह्वाता होमनिष्पादको वा vऋतुवित् कर्मवित् vयजिष्ठः देवानामतिशयेन यष्टा सः vअग्निः स्विष्टकृत् vऋतुशः ऋतावृतौ स्वे स्वे यागयोग्ये काले vदेवान् vयजाति यजतु हविर्भिः पूजयतु ॥

विश्वेषां ह्यध्वराणामनीकं चित्रं केतुं जनिता त्वा जजान ।
स आ यजस्व नृवतीरनु क्षाः स्पार्हा इषः क्षुमतीर्विश्वजन्याः ॥ ६ ॥

विश्वेषाम् । हि । अध्वराणाम् । अनीकम् । चित्रम् । केतुम् । जनिता । त्वा । जजान ।
सः । आ । यजस्व । नृऽवतीः । अनु । क्षाः । स्पार्हाः । इषः । क्षुऽमतीः । विश्वऽजन्याः ॥ ६ ॥

हे अग्ने vविश्वेषां सर्वेषाम् vअध्वराणां यज्ञानाम् vअनीकं मुखं[1] प्रधानं vचित्रं चायनीयं वानारूपं वा vकेतुं प्रज्ञापकं vत्वा त्वां vजनिता जनयिता प्रजापतिर्यजमानो वा vजजान जनयामास । उत्पादितः vसः त्वं vनृवतीः दासादियुक्ताः vक्षाः । पृथिवीनामैतत् । क्षयन्त्यत्रेति क्षा[2] भूमिः[2] । vअनु vआ vयजस्व अनुप्रयच्छ । यद्वा । नृवतीर्नृभिः संस्कृतानि क्षा अनु पृथिवीं वेदिलक्षणामनुगतानि वेद्यामासादितानि vस्पार्हाः स्पृहणीयानि vक्षुमतीः स्तुतिमन्त्रलक्षणशब्दवन्ति vविश्वजन्याः सर्वजनहितानि वृष्टियज्ञहेतुत्वात् तानि vइषः अन्नानि हविर्लक्षणानि यजस्व[3] देवेभ्यः प्रयच्छ ॥

य त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान ।
पन्थामनु प्रविद्वानिपितृयाणं द्युमदग्ने समिधानो वि भाहि ॥ ७ ॥

यम् । त्वा । द्यावापृथिवी इति । यम् । त्वा । आपः । त्वष्टा । यम् । त्वा । सुऽजनिमा । जजान ।
पन्थाम् । अनु । प्रऽविद्वान् । पितृऽयानम् । द्युऽमत् । अग्ने । सम्ऽइधानः । वि । भाहि ॥ ७ ॥

हे अग्ने vयं vत्वा त्वां vद्यावापृथिवी जनितवत्यौ आदित्यात्मनागन्त्र्यात्मना वा[4] । तथा vयं त्वाम् vआपः मेघोदरगता विद्युदात्मना स्थिता जनितवत्यः । यद्वा । आप इत्यन्तरिक्षनाम । द्यावापृथिवी अन्तरिक्षं चेमे त्रयो लोका यं त्वामजीजनन् । किंच vसुजनिमा शोभनजननः vत्वष्टा प्रजापतिः vयं vत्वां vजजान जनयामास हे अग्ने vपितृयाणं पितरो येन मार्गेण गच्छन्ति तं vपन्थां हविर्वहनमार्गम् vअनु vप्रविद्वान् प्रजानंस्त्वं vसमिधानः समिध्यमानः सन् vद्युमत् दीप्तियुक्तं यथा भवति तथा vवि vभाहि विशेषेण दीप्यसे ॥ ॥ १० ॥

'इनो राजन्' इति सप्तर्चं तृतीयं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'इनः' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्थो विनियोगः ॥

इनो राजन्नरतिः समिद्धो रौद्रो दक्षाय सुषुमाँ अदर्शि ।
चिकित्रि भाति भासा बृहतासिक्रीमेति रुशतीमपाजन् ॥ १ ॥

इनः । राजन् । अरतिः । सम्ऽइद्धः । रौद्रः । दक्षाय । सुसुऽमान् । अदर्शि ।
चिकित्र । वि । भाति । भासा । बृहता । असिक्रीम् । एति । रुशतीम् । अपऽअजन् ॥ १ ॥

---

१. त१.२.४.५-म४.६-मुखं; त६-म७-मुख्यं । २. त१.२.४.५-म१.४.६-ता भूमीः; त३.७-ता भूमिः । ३. त१.२.७-आयजस्व । ४. त-म-मु- च ।

हे ᵛराजन् दीप्यमानाग्ने त्वम् ᵛद्रुतः ईश्वरः सर्वस्य भवसि । अथ परोक्षः । ᵛअरतिः हविरादाय देवान् प्रति गन्ता[1] ᵛसमिद्धः संदीप्तः ᵛरौद्रः शत्रूणां भयंकरः ᵛसुषुमान् । ओषध्यात्मना स्थितोऽग्निः[2] सुष्ठु सूयत इति सुषुः सोमः । तेन तद्वान् शोभनप्रसवो वा सोऽग्निः ᵛदक्षाय यजमानानां धनादिवृद्ध्यर्थम्[3] ᵛअदर्शि सर्वैर्दृश्यते । किंच ᵛचिकित् सर्वं जानानोऽग्निः ᵛवि ᵛभाति विशेषेण दीप्यते । तथा ᵛबृहता महता ᵛभासा तेजसा ज्वालालक्षणेन ᵛअसिक्नीं रात्रिम् ᵛएति । सायंहोमसिद्ध्यर्थमेव[4] गच्छति । किं कुर्वन् । ᵛरुशतीं श्वेतवर्णां दीप्तिम् ᵛअपाजन् अपगमयन्[5] रात्रिं गच्छति । सामर्थ्याद्रात्रिं परित्यजन्नुषसं प्रातर्होमसिद्ध्यर्थं गच्छतीत्यर्थो लभ्यते ॥

कृष्णां यदेनीमभि वर्पसा भूज्जनयन्योषां बृहतः पितुर्जाम् ।
ऊर्ध्वं भानुं सूर्यस्य स्तभायन्दिवो वसुभिररतिर्वि भाति ॥ २ ॥

कृष्णाम् । यत् । एनीम् । अभि । वर्पसा । भूत् । जनयन् । योषाम् । बृहतः । पितुः । जाम् । ऊर्ध्वम् । भानुम् । सूर्यस्य । स्तभायन् । दिवः । वसुऽभिः । अरतिः । वि । भाति ॥ २ ॥

सोऽग्निः ᵛयत् यदा ᵛकृष्णां कृष्णवर्णाम् ᵛएनीं गच्छन्तीं रात्रिं ᵛवर्पसा आत्मीयेन ज्वालालक्षणेन रूपेण ᵛअभि ᵛभूत् अभिभवति । किं कुर्वन् । ᵛबृहतः महतः ᵛपितुः सर्वस्य जगतः पालयितुः पितृभूताद्वादित्यात् ᵛजां जायमानां ᵛयोषाम् उषसं ᵛजनयन् अभिव्यअयन्[6] । तदानीम् ᵛअरतिः गमनशीलोऽग्निः ᵛदिवः द्युलोकस्य ᵛवसुभिः वासयितृभिराच्छादकैः संधुक्षणसमर्थैरात्मीयैस्तेजोभिः ᵛसूर्यस्य ᵛभानुं दीप्तिम् ᵛऊर्ध्वम् उपरिष्टात् ᵛस्तभायन् स्तम्भयन् ᵛवि ᵛभाति विशेषेण दीप्यते ॥

भद्रो भद्रया सचमान आगात्स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन्रुशद्भिर्वर्णैरभि राममस्थात् ॥ ३ ॥

भद्रः । भद्रया । सचमानः । आ । अगात् । स्वसारम् । जारः । अभि । एति । पश्चात् । सुऽप्रकेतैः । द्युऽभिः । अग्निः । विऽतिष्ठन् । रुशत्ऽभिः । वर्णैः । अभि । रामम् । अस्थात् ॥ ३ ॥

ᵛभद्रः भजनीयः कल्याणः ᵛभद्रया भजनीयया दीप्त्योषसा वा ᵛसचमानः सेव्यमानः संगच्छमानो वाग्निः ᵛआगात् आजगाम । गार्हपत्यादाहवनीयमागच्छति । ततः ᵛपश्चात् ᵛजारः जरयिता शत्रूणां सः ᵛअग्निः ᵛस्वसारं स्वयंसारिणीं भगिनीं वा आगतामुषसम्[7] ᵛअभ्येति अभिगच्छति । तथा ᵛसुप्रकेतैः सुप्रज्ञानैः ᵛद्युभिः दीप्तैस्तेजोभिः सह ᵛवितिष्ठन् सर्वतो वर्तमानः सः ᵛअग्निः ᵛरुशद्भिः श्वेतैः[8] ᵛवर्णैः[8] वारकैरात्मीयैस्तेजोभिः ᵛरामं कृष्णं शार्वरं तमः ᵛअभि ᵛअस्थात् सायंहोमकालेऽभिभूय तिष्ठति ॥

---

१. त४.५–हंता; त६.७–गतः । २. त-भ१.२.६.७–स्थितेरंशुः । ३. ग-त३-भ२.५.६–°वृद्ध्यर्थं कर्मवृद्ध्यर्थं वा; त-मु–°वृद्ध्यर्थं वा । ४. त-भ१.२.४.६-मु–°सिद्ध्यर्थमेति; त३–°सिद्ध्यर्थं येन । ५. ग-त३-भ–अपगमयन् सर्वतो विकिरन् यद्वा उशतीं दीप्तामुषसं अपाजन् अपक्षिपन् परित्यजन् (ग–' परित्यजन् ' नास्ति); त–अपागमयन् । ६. ग-त-भ-मु–अभिव्यअयन् रात्रिमभ्यभूत् । ७. त४–अगत्य उषसं; त५–अगत्यमुषसं; त७–आ अगात् आगतामुषसं; भ६-आगात् त्वमुषसं । ८. त-भ६-मु–श्वेतवर्णैः ।

अस्य यामासो बृहतो न वग्नूनिन्धाना अग्नेः सख्युः शिवस्य ।
ईड्यस्य वृष्णो बृहतः स्वासो भामासो यामन्नक्तवश्चिकित्रे ॥ ४ ॥

अस्य । यामासः । बृहतः । न । वग्नून् । इन्धानाः । अग्नेः । सख्युः । शिवस्य ।
ईड्यस्य । वृष्णः । बृहतः । सुऽआसः । भामासः । यामन् । अक्तवः । चिकित्रे ॥ ४ ॥

वबृहतः महतः वअस्य वअग्नेः संबन्धिनः वइन्धानाः दीप्यमानाः वयामासः । यान्ति गच्छन्तीति यामा रश्मयः । वयून् स्तुतिकारिणो जनान् वन बाधन्ते । किंच वसख्युः स्तुत्यस्तोतृत्व-यष्टृयष्टव्यत्वलक्षणेन सख्येन सखिभूतस्य वशिवस्य कल्याणस्य भक्तानां सुखकरस्य वईड्यस्य स्तोत-व्यस्य वृष्णः कामानां वर्षितुः वबृहतः महतः वस्वासः शोभनास्यस्य अस्याग्नेः स्वभूताः वअक्तवः तमांस्यञ्जन्तोऽपगमयन्त आहुतिभिः संगता वा वभामासः । 'भाम क्रोधे' । तीक्ष्णा अप्रसह्या रश्मयः वयामन् । याति देवान् प्रति तर्पणाय यान्ति वा देवा एतं प्रत्यङ्गभावायेति यामा यज्ञः । तस्मिन् वचिकित्रे सर्वतो जज्ञिरे । प्रथिता अभूवन् ॥

स्वना न यस्य भामासः पवन्ते रोचमानस्य बृहतः सुदिवः ।
ज्येष्ठेभिर्यस्तेजिष्ठैः क्रीळुमद्भिर्वर्षिष्ठेभिर्भानुभिर्नक्षति द्याम् ॥ ५ ॥

स्वनाः । न । यस्य । भामासः । पवन्ते । रोचमानस्य । बृहतः । सुऽदिवः ।
ज्येष्ठेभिः । यः । तेजिष्ठैः । क्रीळुमत्ऽभिः । वर्षिष्ठेभिः । भानुऽभिः । नक्षति । द्याम् ॥५॥

वरोचमानस्य दीप्यमानस्य वबृहतः महतः वसुदिवः शोभनदीप्तेर्वा[1] वयस्य अग्नेः स्वभूताः वभामासः । 'भा दीप्तौ' । दीप्ता रश्मयः वस्वना वन स्वनन्तो मरुत इव वपवन्ते सर्वतः शब्दं कुर्वन्तो गच्छन्ति । किंच वयः अग्निः वज्येष्ठेभिः अत्यन्तं प्रशस्तैः वतेजिष्ठैः तेजस्वितमैः वक्रीळुमद्भिः क्रीडनवद्भिः वर्षिष्ठेभिः वृद्धतमैः वभानुभिः[2] आत्मीयैस्तेजोभिः वद्यां द्युलोकं वनक्षति व्याप्नोतीति । स त्वं देवानावहेत्युत्तरेण संबन्धः ॥

अस्य शुष्मासो ददृशानपवेर्जेहमानस्य स्वनयन्नियुद्भिः ।
प्रनेभिर्यो रुशद्भिर्देवतमो वि रेभद्भिररतिर्भाति विभ्वा ॥ ६ ॥

अस्य । शुष्मासः । ददृशानऽपवेः । जेहमानस्य । स्वनयन् । नियुत्ऽभिः ।
प्रनेभिः । यः । रुशत्ऽभिः । देवऽतमः । वि । रेभत्ऽभिः । अरतिः । भाति । विऽभ्वा ॥६॥

वददृशानपवेः दर्शनीयज्वालाग्नेः । यद्वा । पविर्वज्र आयुधम् । दृश्यमानायुधस्य । वजेहमानस्य । जेहृतिर्गतिकर्मा । हविरादाय देवान् प्रति गच्छतः वअस्य अग्नेः स्वभूताः वशुष्मासः शोषकाः वनियुद्भिः । 'नियुतो वायोः' इति वायोरश्वा नियुतः । तद्युक्तैः वायुभिः[3] संयुक्ता रश्मयः वस्वनयन् शब्दायन्ते । किंच वदेवतमः देवानां मुख्यः वअरतिः गन्ता वविभ्वा विभवनशीलो महान् वयः[4] अग्निः[4] वप्रनेभिः पुराणैः वरुशद्भिः श्वेतवर्णैः वरेभद्भिः शब्दायमानैस्तेजोभिः वि वभाति विविधं दीप्यते ॥

१. ग-शोभनदीप्तेः । २. त-म-सु-भानुमद्भिः । ३. ग-म२-वा नियुद्भिः; त३-म१-वायुद्भिः । त-म६-वा द्युभिः । ४. त१.२.५-स्याग्निः; त४-सोग्निः ।

स आ वक्षि महि न आ च सत्सि दिवस्पृथिव्योररतिर्युवत्योः ।
अग्निः सुतुकः सुतुकेभिरश्वै रभस्वद्भी रभस्वाँ एह गम्याः ॥ ७ ॥

सः । आ । वक्षि । महि । नः । आ । च । सत्सि । दिवःपृथिव्योः । अरतिः । युवत्योः ।
अग्निः । सुऽतुकः । सुऽतुकेभिः । अश्वैः । रभस्वतऽभिः । रभस्वान् । आ । इह । गम्याः ॥७॥

हे अग्ने [v]सः तादृशस्त्वं [v]नः अस्मदीये यज्ञे [v]महि महान्[1] देवान् [v]आ [v]वक्षि आवह प्रापय । किंच [v]युवत्योः परस्परं मिश्रितयोः तरुण्योर्वा[2] [v]दिवस्पृथिव्योः द्यावापृथिव्योर्मध्ये [v]अरतिः अग्निः सूर्यात्मना गन्ता त्वम् [v]आ[3] [v]सत्सि अस्माकं यज्ञमासीद । तथा [v]सुतुकः । तुकिर्गत्यर्थः । सुगमः स्तोतृभिः यष्टृभिश्च सुखेन प्राप्तव्यः [v]रभस्वान् वेगवान् [v]अग्निः अङ्गनादिगुणयुक्तस्त्वं [v]सुतुकेभिः सुगमैः [v]रभस्वद्भिः वेगवद्भिः [v]अश्वैः रोहिदाख्यैः सह [v]इह अस्मदीये यज्ञे [v]आ [v]गम्याः आगच्छ ॥ ॥ ३१ ॥

'प्र ते' इति सप्तर्चं चतुर्थं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'प्र ते' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु ।
धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ॥ १ ॥

प्र । ते । यक्षि । प्र । ते । इयर्मि । मन्म । भुवः । यथा । वन्द्यः । नः । हवेषु ।
धन्वन्ऽइव । प्रऽपा । असि । त्वम् । अग्ने । इयक्षवे । पूरवे । प्रत्न । राजन् ॥ १ ॥

हे अग्ने [v]ते तुभ्यं हविः [v]प्र [v]यक्षि प्रयच्छामि । यजिर्दानार्थः । तथा [v]मन्म मननीयां स्तुतिं [v]ते त्वदर्थं [v]प्र [v]इयर्मि प्रेरयामि प्रोच्चारयामि । [v]वन्द्यः सर्वैर्वन्दनीयस्त्वं [v]नः अस्मदीयेषु [v]हवेषु देवाह्वानेषु [v]यथा[4] त्वं संनिहितः [v]भुवः भवसि तथा हविः प्रयच्छामि स्तौमि च । हे [v]प्रत्न पुराण [v]राजन् सर्वस्य जगतः स्वामिन् हे [v]अग्ने सः [v]त्वम् [v]इयक्षवे यष्टुमिच्छते [v]पूरवे । पूरुरिति मनुष्यनाम[5] । मनुष्याय यजमानाय हविर्भिर्देवान् पूरयित्रे जनाय [v]धन्वन्निव [v]प्रपा [v]असि । यथा धन्वन् धन्वनि मरौ निरुदकप्रदेशे प्रपा । प्रपिबन्त्यत्रेति प्रपा । सा यथोदकप्रदानेन जनेभ्यः सुखदा भवति एवं त्वं धनदानेन तस्मै सुखदाता भवसि ॥

यं त्वा जनासो अभि संचरन्ति गावो उष्णमिव व्रजं यविष्ठ ।
दूतो देवानामसि मर्त्यानामन्तर्महाँश्चरसि रोचनेन ॥ २ ॥

यम् । त्वा । जनासः । अभि । सम्ऽचरन्ति । गावः । उष्णम्ऽइव । व्रजम् । यविष्ठ ।
दूतः । देवानाम् । असि । मर्त्यानाम् । अन्तः । महान् । चरसि । रोचनेन ॥ २ ॥

हे [v]यविष्ठ युवतम अग्ने [v]यं[6] [v]त्वा त्वां [v]जनासः जना यजमानाः फलप्राप्त्यर्थम् [v]अभि [v]संचरन्ति अभितः[7] परिचरन्ति[8] सेवन्ते । तत्र दृष्टान्तः । [v]गावः [v]उष्णमिव यथा गावः शीतार्ता उष्णं शीतजनितदुःखापनोदनार्थमुष्णं [v]व्रजं गोष्ठमभिगच्छन्ति तद्वत्[9] । स त्वं [v]देवानाम् इन्द्रादीनां

---

१. ग३.६-भ-महतो । २. त-तक्ष्ण्योर्वा । ३. त४-आ च । ४. त-भ६-तथा । ५. त-'मनुष्यनाम' नास्ति । ६. त-'यं' नास्ति । ७. त-'अभितः परिचरंति' नास्ति । ८. त-भ६-मु-'तद्वत्' नास्ति ।

vमर्त्यानां मनुष्याणां च vदूतः vअसि हविष्प्रापणद्वारा । ततः vमहान् त्वम् vअन्तः द्यावापृथिव्योर्मध्ये हवींष्यादाय vरोचनेन अन्तरिक्षेण लोकेन vचरसि गच्छसि । तं त्वां स्तुम इति शेषः ॥

शिशुं न त्वा जेन्यं वर्धयन्ती माता बिभर्ति सचनस्यमाना ।
धनोरधिं प्रवता यासि हर्यञ्जिगीषसे पशुरिवावसृष्टः ॥ ३ ॥

शिशुम् । न । त्वा । जेन्यम् । वर्धयन्ती । माता । बिभर्ति । सचनस्यमाना ।
धनोः । अधिं । प्रऽवता । यासि । हर्यन् । जिगीषसे । पशुःऽइव । अवऽसृष्टः ॥ ३ ॥

हे अग्ने vजेन्यं जयशीलं vत्वा त्वां vशिशुं vन पुत्रमिव vवर्धयन्ती[1] पोषयन्ती vमाता पृथिवी vसचनस्यमाना संपर्कमिच्छन्ती सती vबिभर्ति धारयति । स त्वं vहर्यन् कामयमानः[2] सन्नस्मिँल्लोके vधनोरधि । अधिः सप्तम्यर्थद्योतकः । अन्तरिक्षात् vप्रवता प्रवणेन मार्गेण vयासि यज्ञं प्रत्यागच्छसि । किंच त्वम् vअवसृष्टः यष्टृभिर्हविरादाय vजिगीषसे देवान् प्रति गन्तुमिच्छसि । कथमिव । vपशुरिव । यथा विमुक्तः पशुर्गोष्ठं प्रत्यागच्छति तद्वत् ॥

मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमङ्ग वित्से ।
शये वव्रिश्चरति जिह्वयादन्नेरिह्यते युवतिं विश्पतिः सन् ॥ ४ ॥

मूराः । अमूर । न । वयम् । चिकित्वः । महिऽत्वम् । अग्ने । त्वम् । अङ्ग । वित्से ।
शये । वव्रिः । चरति । जिह्वया । अदन् । रेरिह्यते । युवतिम् । विश्पतिः । सन् ॥ ४ ॥

हे vअमूर अमूढ अत एव vचिकित्वः चेतनवन् हे अग्ने vमूराः मूढाः vवयं तव माहात्म्यं vन जानीमः । किंतु हे vअग्ने vत्वमङ्ग । अङ्गेति निपात एवार्थे । त्वमेव तव vमहित्वं माहात्म्यं vवित्से जानासि । त्वत्तः कोऽन्यो वेदितुमर्हति । किंच vवव्रिः जीर्णः ओषधीसङ्गः vशये शेते तिष्ठति । यद्वा । ववरिरिति रूपनाम सामर्थ्याद्धान्तर्णीतमत्वर्थं द्रष्टव्यम् । आहवनीयाख्येन रूपेण रूपवान् शये चरति । अथ vजिह्वया[3] ज्वालाख्यया vअदन् हवींषि भक्षयन् vचरति । वाक्यभेदादनिघातः । किंच vविश्पतिः विशां स्वामी vसन् अग्निः vयुवतिम् आत्मनो मिश्रयित्रीमाहुतिं दीर्घप्रसृतया[4] ज्वालया जिह्वया vरेरिह्यते अत्यर्थं लेढि आस्वादयति ॥ ' लिह आस्वादने ' । यङि रूपम् । यद्वा । सोऽग्निर्युवतिं तरुणीं जीर्णौषधिकां[5] पृथिवीमास्वादयति ॥

कूचिज्जायते सनयासु नव्यो वने तस्थौ पलितो धूमकेतुः ।
अस्नातापो वृषभो न प्र वेति सचेतसो यं प्रणयन्त मर्ताः ॥ ५ ॥

कूऽचित् । जायते । सनयासु । नव्यः । वने । तस्थौ । पलितः । धूमऽकेतुः ।
अस्नाता । आपः । वृषभः । न । प्र । वेति । सऽचेतसः । यम् । प्रऽनयन्त । मर्ताः ॥५॥

vनव्यः नवतरः स्तुत्यो वाग्निः vकूचित् क्वचित् प्रदेशे vजायते । कुत्र । vसनयासु पुराणीषु जीर्णास्वोषधीष्वरण्योः । तथा vपलितः पालयिता श्वेतवर्णः vधूमकेतुः धूमप्रज्ञानोऽग्निः vवने सर्व-

१. त-म६–' वर्धयंती ' नास्ति । २. त-म६–कामानान् । ३. त१.४.५-म६–जिह्वा; त२.४.७-सु–जिह्वया जिह्वा । ४. त–°प्रमृतया । ५. त१.२.६.७-म६–जीर्णास्वधिकां; त४.५–जीर्णोस्वाधिकां

स्मिन्नरण्ये ᵛतस्थौ तिष्ठति। यद्वा। वन उदके मेघगते विद्युदात्मना तिष्ठति च। ᵛअस्नाता स्नानमकुर्वन्ननपेक्षितस्नानः सर्वदा शुद्धः सोऽग्निः ᵛआपः। शुद्ध्यर्थयः। अप उदकानि शान्त्यर्थं ᵛप्र ᵛवेति प्रगच्छति। तत्र दृष्टान्तः। ᵛवृषभो ᵛन। यथा वृषभस्तृष्णोपशमनार्थमरण्यमध्यस्थान्युदकानि प्रगच्छति तद्वत्। ᵛमर्ताः मनुष्या ऋत्विजः ᵛसचेतसः समानमनस्काः समानप्रज्ञानाः सन्तः ᵛयम् अग्निं ᵛप्रणयन्त इविर्भिः प्रीणयन्ति॥

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम्।
इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरङ्गैः॥ ६॥

तनूत्यजाऽइव। तस्करा। वनर्गू इति। रशनाभिः। दशऽभिः। अभि। अधीताम्। इयम्। ते। अग्ने। नव्यसी। मनीषा। युक्ष्व। रथम्। न। शुचयत्ऽभिः। अङ्गैः॥ ६॥

हे अग्ने ᵛवनर्गू वनगामिनौ ᵛतनूत्यजा[1] चौर्ये मतुं कृतनिश्चयौ दृष्टौ ᵛतस्करा तस्करौ यथा पथिकं मोषणार्थं रज्ज्वा बद्ध्वाकृष्य च क्वचित् प्रदेशे स्थापयतः तद्वत्[2]। तथा यास्कः—'तनूत्यक् तनूत्यक्ता वनर्गू वनगामिनावग्निमन्थनौ बाहू तस्कराभ्यामुपमिमीते' (निरु. ३. १४) इत्यादि[3]। अधीताम्॥ दधातेर्लुङि सिचो लुकि 'छन्दस्युभयथा' इति तस आर्धधातुकत्वेन ङित्त्वात् 'घुमास्था०' इतीकारः। ततो हे ᵛअग्ने ᵛते त्वदर्थं ᵛनव्यसी नवतरा ᵛइयं ᵛमनीषा स्तुतिर्मया क्रियते। एतज्ज्ञात्वा ᵛशुचयद्भिः सर्वं प्रकाशयद्भिरात्मीयैः ᵛअङ्गैः तेजोभिः आत्मानं मदीयं यज्ञं प्रति ᵛयुक्ष्व योजय। कथमिव। ᵛरथं ᵛन। यथा[4] रथमश्वैः संयोजयन्ति तद्वत्॥

उखासंभरणीयेष्टावग्नेर्ब्रह्मण्वतो याज्या 'ब्रह्म च ते' इत्येषा। सूत्रितं च—'ब्रह्म च ते जातवेदो नमश्च पुरूण्यग्ने पुरुधा त्वाया' (आश्व. श्रौ. ४. १) इति॥

ब्रह्म च ते जातवेदो नमश्चेयं च गीः सदमिद्वर्धनी भूत्।
रक्षा णो अग्ने तनयानि तोका रक्षोत नस्तन्वो अप्रयुच्छन्॥ ७॥

ब्रह्म। च। ते। जातऽवेदः। नमः। च। इयम्। च। गीः। सदम्। इत्। वर्धनी। भूत्। रक्ष। नः। अग्ने। तनयानि। तोका। रक्ष। उत। नः। तन्वः। अप्रऽयुच्छन्॥ ७॥

हे ᵛजातवेदः जातप्रज्ञाग्ने ᵛते त्वदर्थं ᵛब्रह्म अस्माभिर्दीयमानं हवीरूपमन्नं[5] ᵛवर्धनी वर्धनं ᵛभूत् भवतु। तथा ᵛनमः नमस्कारश्च। किंच ᵛइयम् इदानींक्रियमाणेषा स्तुतिः ᵛसदमित् सदैव ᵛवर्धनी वर्धयित्री ᵛभूत् भवतु। तस्माद्धे ᵛअग्ने ᵛनः अस्माकं ᵛतनयानि पुत्रान् ᵛतोका पौत्रांश्च ᵛरक्ष पालय। ᵛउत अपि च ᵛअप्रयुच्छन् अप्रमाद्यंस्त्वं ᵛनः अस्माकं ᵛतन्वः अङ्गानि ᵛरक्ष॥ ॥ ३२॥

'एकः समुद्रः' इति सप्तर्चं पञ्चमं सूक्तम्। ऋष्याद्याः पूर्ववत्। विनियोगश्च। 'एकः' इत्यनुक्रान्तम्॥

---

१. त१.२.६–तनूत्यजेव; भ६–तनूत्यजे। २. ग–तद्वत् अंगुलिभिर्दशभिः मम बाहू त्वामबध्नीतां। ३. त१.२.६.७–मु–इत्यादि रशनाभिर्दशभिरंगुलिभिः कृत्वा रज्जुभिः अभ्यधीतां अभ्यधायि। ४. त१.२.६.७–यथा रथिकः रथं अश्वैर्योजयति तद्वत् यज्ञं प्रति लक्ष योजय। कथमिव रथं न यथा। ५. त१.२.७–भ६–हवीरूपमद्भुतमन्नं।

एकः समुद्रो धरुणो रयीणामस्मद्ह्रदो भूरिजन्मा वि चष्टे ।
सिषक्त्यूर्ध्वो निण्योरुपस्थ उत्सस्य मध्ये निहितं पदं वेः ॥ १ ॥

एकः । समुद्रः । धरुणः । रयीणाम् । अस्मत् । ह्रदः । भूरिऽजन्मा । वि । चष्टे ।
सिसक्ति । ऊर्ध्वः । निण्योः । उपऽस्थे । उत्सस्य । मध्ये । निऽहितम् । पदम् । वेरिति वेः ॥ १ ॥

[v]समुद्रः यस्मादनाम्युदकानि वा समुद्रवन्तीति तादृशः [v]रयीणां धनानां [v]धरुणः धारयिता [v]एकः असहायः [v]भूरिजन्मा बहुविधजननो नानायज्ञेष्वाहवनीयादिभावेन बहुजननः सोऽग्निः [v]अस्मत् ॥ 'सुपां सुलुक्०' इति षष्ठ्या लुक् । अस्माकं [v]ह्रदः हृदयान्यभिलषितानि [v]वि [v]चष्टे विपश्यति[1] जानाति । उक्तं च—'मनो वै देवा मनुष्यस्य जानन्ति[2]' इति । किंच [v]निण्योः । अन्तर्हितनामैतत् । अन्तर्हितयोर्द्यौस्तिरोभ्यामाच्छादितयोः प्रातःसायंकालयोः [v]उपस्थे उपस्थाने समीपे वर्तमानम् [v]ऊर्ध्वः रात्रिं [v]सिषक्ति सेवते उपजीवति । यद्वा । निण्योरन्तर्हितस्यान्तरिक्षस्य समीपे वर्तमानमूर्ध्वो मेघं सेवते । अथ प्रत्यक्षः । हे अग्ने [v]उत्सस्य उदकधारकस्य[3] लोकस्य [v]मध्ये [v]पदम् अपां स्थानं [v]निहितम् । तत् माध्यमिकां वाचं [v]वेः गच्छ । यद्वा । उत्सस्य मेघस्य मध्ये निहितं पदं विद्युदाख्यं तत् स्वात्मतया[4] गच्छ ॥ वेः । वी गत्यादिषु । लडि सिपि रूपम् । वाक्यभेदादनिघातः ॥

समानं नीळं वृषणो वसानाः सं जग्मिरे महिषा अर्वतीभिः ।
ऋतस्य पदं कवयो नि पान्ति गुहा नामानि दधिरे पराणि ॥ २ ॥

समानम् । नीळम् । वृषणः । वसानाः । सम् । जग्मिरे । महिषाः । अर्वतीभिः ।
ऋतस्य । पदम् । कवयः । नि । पान्ति । गुहा । नामानि । दधिरे । पराणि ॥ २ ॥

[v]वृषणः आहुतीनां सेक्तारः [v]समानम् एकं [v]नीळं स्थानमग्निं [v]वसानाः मन्त्रत आच्छादयन्तः [v]महिषाः महान्तो यजमानाः [v]अर्वतीभिः वडवाभिः [v]सं [v]जग्मिरे समगच्छन्त । अश्ववन्तोऽभूवन् । यद्वा । अग्निमेवात्मीययज्ञं प्रत्यागन्तुं रोहिदाख्याभिर्वडवाभिः संयोजितवन्तः । तथा [v]कवयः मेधाविनः [v]ऋतस्य उदकस्य [v]पदम् आवासस्थानमग्निं [v]नि [v]पान्ति नितरां रक्षन्ति । हविर्भिः स्तुतिभिश्च आराधयन्तीत्यर्थः[5] । ततः [v]गुहा गुहायामन्तरिक्षे स्थितानि दिव्यानि [v]नामानि उदकानि [v]दधिरे धारयन्ति । यद्वा । गुहा गूढे संवृते हृदये [v]पराणि प्रधानान्यग्निर्जातवेदा वैश्वानर इत्यादीनि नामानि दधिरे कुर्वन्ति । स्तुवन्तीत्यर्थः ॥

ऋतायिनी मायिनी सं दधाते मित्वा शिशुं जज्ञतुर्वर्धयन्ती ।
विश्वस्य नाभिं चरतो ध्रुवस्य कवेश्चित्तन्तुं मनसा वियन्तः ॥ ३ ॥

ऋतयिनी इत्यृतऽयिनी । मायिनी इति । सम् । दधाते इति ।
मित्वा । शिशुम् । जज्ञतुः । वर्धयन्ती इति ।
विश्वस्य । नाभिम् । चरतः । ध्रुवस्य । कवेः । चित् । तन्तुम् । मनसा । विऽयन्तः ॥ ३ ॥

---

१. त–विनश्यति । २. त–म२–जानाति । ३. त३–म२–उदकधारस्य; म१.४.७–उदकाधारस्य लोकधारस्य; म६–उदकाधारकस्य । ४. ग–स्वात्मनोप; त१.२.५.७–स्वान्यतया; त४–स्वार्थतया; म२–स्वात्म्यतया । ५. त–म१.४.६–रोधयतीत्यर्थः ।

[v]ऋतायिनी ऋतवत्यौ सत्यवत्यौ अत एव [v]मायिनी प्रज्ञावत्यौ कर्मयुक्ते वा[1] द्यावापृथिव्यौ यज्ञसाधनभूते[2] अरणी वा इममग्निं [v]सं [v]दधाते सम्यक् धारयतः । अग्निसूर्यात्मना केवलाग्न्यात्मना वा संदधाते । [v]मित्वा कालपरिमाणं कृत्वा यद्वा संपरिच्छिद्य [v]शिशुं शंसनीयं बालमग्निं [v]जज्ञतुः जनयतः । [v]वर्धयन्ती वर्धयन्त्यौ द्यावापृथिव्यौ लोके यथा परिच्छेदाय पुत्रं पितरौ जनयतस्तद्वत् । ततः [v]विश्वस्य सर्वस्य [v]चरतः जङ्गमस्य [v]ध्रुवस्य स्थावरस्य च जगतः [v]नाभिं नाभिभूतं मध्यं प्रधानभूतं वा [v]कवेः मेधाविनोऽग्नेः [v]तन्तुं ततितारं वैश्वानराख्यमंशमेव [v]मनसा [v]वियन्तः विविधं गच्छन्तो मनुष्याः सुखेन युज्यन्त इति शेषः । तं वयं यजाम इति[3] ॥

ऋतस्य हि वर्तनयः सुजातमिषो वाजाय प्रदिवः सचन्ते ।
अधीवासं रोदसी वावसाने घृतैरन्नैर्वावृधाते मधूनाम् ॥ ४ ॥

ऋतस्य । हि । वर्तनयः । सुऽजातम् । इषः । वाजाय । प्रऽदिवः । सचन्ते ।
अधीवासम् । रोदसी इति । ववसाने इति । घृतैः । अन्नैः । ववृधाते इति । मधूनाम् ॥ ४ ॥

[v]ऋतस्य यज्ञस्य [v]वर्तनयः प्रवर्तकाः[4] [v]इषः अभिलषितानीच्छन्तः [v]प्रदिवः पुरातना ऋत्विग्यजमानाः [v]सुजातम् आधानकाले सुष्ठूत्पन्नमग्निं [v]वाजाय बलार्थमन्नार्थं वा [v]सचन्ते [v]हि सेवन्ते खलु । अपि च [v]वावसाने सर्वस्य जगत आच्छादयित्र्यौ [v]रोदसी द्यावापृथिव्यौ [v]अधीवासम् ओषधिनक्षत्राद्यात्मना निवसन्तम् । यद्वा । अधिरुपर्यर्थे । त्रयाणां लोकानामुपर्यग्निविद्युदादित्यात्मना निवसन्तम् । अग्निं [v]मधूनाम् उदकानां जन्यत्वेन संबन्धिभिः [v]घृतैरन्नैः पुरोडाशादिभिश्च [v]वावृधाते वर्धयां चक्रतुः । वर्धयतः । तस्माद्वयमपि तमग्निमभिष्टुम इत्यभिप्रायः ॥

सप्त स्वसॄररुषीर्वावशानो विद्वान्मध्व उज्जभारा दृशे कम् ।
अन्तर्येमे अन्तरिक्षे पुराजा इच्छन्नक्तिमविदत्पूषणस्य ॥ ५ ॥

सप्त । स्वसॄः । अरुषीः । वावशानः । विद्वान् । मध्वः । उत् । जभार । दृशे । कम् ।
अन्तः । येमे । अन्तरिक्षे । पुराऽजाः । इच्छन् । नक्तिम् । अविदत् । पूषणस्य ॥ ५ ॥

[v]वावशानः कामयमानो वाश्यमानः[5] स्तोतृभिः स्तूयमानो वा [v]विद्वान् सर्वं जानानः सोऽग्निः [v]अरुषीः आरोचमानाः [v]सप्त सप्तसंख्याकाः [v]स्वसॄः स्वयंसारिणीः 'काली कराली च' (मु. उ. १. २. ४) इत्यादिकाः सप्त जिह्वाः [v]मध्वः मदकरात् यज्ञात् [v]उज्जभार उज्जहार। ऊर्ध्वं हृतवान्। यज्ञे स्वतेजसा प्रादुर्भूत इत्यर्थः। किमर्थम्। [v]कं सुखेन [v]दृशे सर्वेषामेव पदार्थानां दर्शनार्थम्। किंच [v]पुराजाः पुराजातः सोऽग्निर्द्यावापृथिव्योः [v]अन्तः मध्ये [v]अन्तरिक्षे स्थितः[6] ता जिह्वाः [v]येमे नियमितवान्। सर्वत्र तेजोयुक्तो वर्तत इत्यर्थः। अपि च [v]इच्छन् यजमानान् कामयमानोऽग्निः [v]पूषणस्य। पूषेति पृथिवीनाम। पार्थिवस्य लोकस्य *वक्तिं रूपं पृश्निवर्णम् [v]अविदत् प्रायच्छत्। यद्वा। 'मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्' (ऋ. सं. १०.८८.१) इति मन्त्रान्तरे दर्शनादादित्यात्मनाग्निः स्तूयते। कामयमानः सूर्यात्माग्निः सप्तसंख्याकान् स्वसॄ रश्मीन् मध्वः समुद्रोदकादुदतवान्। ततोऽन्तरिक्षे विद्युदात्मना स्थित्वा वृष्टिलक्षणं रूपं पृथिव्याः प्रायच्छदिति ॥

---

१. त-भ६-'वा' नास्ति । २. त-°भूतौ । ३. त-भ१.२.४.६-मु-इति वा । ४. त-भ२.४.६-प्रवर्तनकाः । ५. ग-शब्द्यमानः; त-भ२.६-मु-वाश्यमानः वेष्टयमानः; भ५-शब्द्यमानः । ६. त-भ२.६-मु-तस्मिन्; भ१.४-वस्मिन्; भ७-च स्थितः ।

सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात् ।
आयोर्ह स्कम्भ उपमस्य नीळे पथां विसर्गे धरुणेषु तस्थौ ॥ ६ ॥

सप्त । मर्यादाः । कवयः । ततक्षुः । तासाम् । एकाम् । इत् । अभि । अंहुरः । गात् ।
आयोः । ह । स्कम्भः । उपऽमस्य । नीळे । पथाम् । विऽसर्गे । धरुणेषु । तस्थौ ॥ ६ ॥

[v]कवयः मेधाविन ऋषयः [v]सप्त [v]मर्यादाः । कामजेभ्यः क्रोधजेभ्यश्चोद्धृताः पानमक्षाः स्त्रियो मृगया दण्डः पारुष्यमन्यदूषणमिति सप्त मर्यादाः । यद्वा । ' स्तेयं गुरुतल्पारोहणं ब्रह्महत्या सुरापानं दुष्कृतकर्मणः पुनःपुनः सेवा पातकेऽनृतोद्यम् ' (निरु. ६. २७) इति निरुक्ते निर्दिष्टाः सप्त मर्यादाः । अवस्थिताः [v]ततक्षुः । तक्षतिः करोतिकर्मा । सुष्ठु लक्षनीयाश्चक्रुः । त्यक्तवन्त इत्यर्थः । [v]तासां मर्यादानाम् [v]एकामित् एकामेव [v]अंहुरः पापवान् पुरुषः [v]अभि [v]गात् अभिगच्छति । यस्त्वेवं करोति स पापवान् भवतीत्यर्थः । किंच [v]आयोः तस्य मनुष्यस्य [v]स्कम्भः स्कम्भयिता निरोधकोऽग्निः [v]उपमस्य समीपभूतस्यायोः [v]नीळे स्थाने [v]पथाम् आदित्यरूपस्य स्वस्य रश्मीनां [v]विसर्गे विसर्जनस्थानेऽन्तरिक्षमध्ये वर्तमानेषु [v]धरुणेषु उदकेषु [v]तस्थौ विद्युदात्मना तिष्ठति । अनेन लोकत्रयवर्तित्वमिति ॥

असच्च सच्च परमे व्योमन्दक्षस्य जन्मन्नदितेरुपस्थे ।
अग्निर्ह नः प्रथमजा ऋतस्य पूर्वे आयुनि वृषभश्च धेनुः ॥ ७ ॥

असत् । च । सत् । च । परमे । विऽओमन् । दक्षस्य । जन्मन् । अदितेः । उपऽस्थे ।
अग्निः । ह । नः । प्रथमऽजाः । ऋतस्य । पूर्वे । आयुनि । वृषभः । च । धेनुः ॥ ७ ॥

[v]असत् अव्याकृतं [v]सच्च व्याकृतम् । ' असदेवेदमग्र आसीत् तत्सदासीत् तत्समभवत् ' (छा. उ. ३. १९. १) इति श्रुतेः । सदसदात्मकं जगत् सर्वं [v]परमे उत्तमे ज्ञानसहिते [v]व्योमन् व्योमनि कारणात्मनि जातमभूत् सदा । [v]अदितेः पृथिव्याः [v]उपस्थे उपस्थाने समीपे [v]दक्षस्य प्रजापतेः । यद्वा दक्षस्य । ' स त्रेधात्मानं व्यभजतादित्यं तृतीयं वायुं तृतीयम् ' (श. ब्रा. १०. ६. ५. १) इति श्रुतेः तृतीयस्य द्युलोकस्याधिष्ठातृत्वादादित्यस्य । [v]जन्मन् जन्मनि । तत एवं सति मनुष्यस्य सृष्टिक्रमात् पूर्वम् [v]अग्निर्ह अग्निरेव [v]ऋतस्य[1] कर्मफलस्य भोक्तृणां [v]नः अस्माकं [v]प्रथमजाः प्रथममेव जातः समुत्पन्नः । ' तेजो रसो निरवर्ततााग्निः ' (श. ब्रा. १०. ६. ५. २; छ. उ. १. १. २. २) इति श्रवणात् । पश्चात् तत्प्रकरणे ' ततो मनुष्या अजायन्त ' इति प्रथमत एव मनुष्यसृष्टेरभिहितत्वात् अनन्तरं [v]पूर्वे उत्तरसृष्टिमपेक्ष्य पूर्वस्मिन् [v]आयुनि काले[2]ऽयमग्निरेव [v]वृषभश्च आसीत् । [v]धेनुः च अभवत् । स्त्रीपुंसवत् स्त्रीपुंसात्मकोऽभवदित्यर्थः ॥ ॥ ३३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाञ्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल-
साम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाशे ऋक्संहिताभाष्ये सप्तमाष्टके पञ्चमोऽध्यायः ॥

१. ग–ऋतस्य सत्यभूतस्य; त१–ऋतस्य भूतस्य ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
सप्तमस्याष्टकस्येत्थं व्याकार्षीत् पञ्चमं सुधीः।
सायणाङ्गस्ततः षष्ठमध्यायं व्याचिकीर्षति ॥

दशमे मण्डले प्रथमेऽनुवाके षोडश सूक्तानि। तत्र 'अयं स यस्य' इति सप्तर्चं षष्ठं सूक्तमाग्नेयस्य त्रितस्यार्षं त्रैष्टुभमाग्नेयम्। 'अयम्' इत्यनुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

अयं स यस्य शर्मन्नवोभिरग्नेरर्धते जरिताभिष्टौ।
ज्येष्ठेभिर्यो भानुभिर्ऋषूणां पर्येति परिवीतो विभावा ॥ १ ॥

अयम्। सः। यस्य। शर्मन्। अवःऽभिः। अग्नेः। एधते। जरिता। अभिष्टौ।
ज्येष्ठेभिः। यः। भानुऽभिः। ऋषूणाम्। परिऽएति। परिऽवीतः। विभाऽवा ॥ १ ॥

[v]जरिता स्तोता [v]अभिष्टौ यागे कृते[1] [v]यस्य [v]अग्नेः [v]अवोभिः पालनैः[2] [v]शर्मन् शर्मणि स्वगृहे [v]एधते वर्धते [v]सः [v]अयम् अग्निर्यागार्थमस्माभिराहूत इति शेषः। [v]विभावा दीप्तिमान् [v]यः अग्निः [v]ऋषूणां सूर्यरश्मीनां [v]ज्येष्ठेभिः प्रशस्तैः [v]भानुभिः तेजोभिः [v]परिवीतः परिवृतः [v]पर्येति सर्वतो गच्छति। यत्र यत्र गन्तव्यं तत्र तत्राप्रतिहतगतिर्गच्छतीत्यर्थः ॥

यो भानुभिर्विभावा विभात्यग्निर्देवेभिर्ऋतावाजस्रः।
आ यो विवाय सख्या सखिभ्योऽपरिह्वृतो अत्यो न सप्तिः ॥ २ ॥

यः। भानुऽभिः। विभाऽवा। विऽभाति। अग्निः। देवेभिः। ऋतऽवा। अजस्रः।
आ। यः। विवाय। सख्या। सखिऽभ्यः। अपरिऽह्वृतः। अत्यः। न। सप्तिः ॥ २ ॥

[v]ऋतवा सत्यवानुदकवान्[3] यज्ञवान् वा [v]अजस्रः अनुपक्षीणोऽहिंसितो वा। केनचिदनभिभूत इत्यर्थः। [v]विभावा दीप्तिमान् [v]यः [v]अग्निर्देवेभिः देवैर्द्योतमानैः [v]भानुभिः तेजोभिः [v]विभाति विविधं दीप्यते किंच [v]यः अग्निः [v]सख्या सख्यानि सखिभिः कर्तव्यानि कर्माणि हविरादीनि। कर्तुमिति शेषः। [v]सखिभ्यः सखिभूतानां यजमानानामर्थाय [v]अपरिह्वृतः अपरिहिंसितः। अपरिश्रान्त इत्यर्थः। [v]आ [v]विवाय आभिमुख्येन गच्छति। तत्र दृष्टान्तः। [v]सप्तिः। सदासर्पण[4] इत्यर्थः। [v]अत्यो [v]न यथा सततगमनसमर्थोऽश्वोऽपरिश्रान्तो गच्छति तद्वत्। सोऽयमग्निरस्माभिर्यागार्थमाहूत इति पूर्ववद्योज्यम् ॥

ईशे यो विश्वस्या देववीतेरीशे विश्वायुरुषसो व्युष्टौ।
आ यस्मिन्मना हवींष्यग्नावरिष्टरथः स्कभ्नाति शूषैः ॥ ३ ॥

---

१. ग-त१भ-कृते सति। २. त-पालकैः। ३. त१.२.५.६-भ६-सत्यवाकवान्; त४-सत्यवाक्यवान्; त७-सत्यवाक्वान्; मु-सत्यवान्। ४. ग-सदासर्पणशील; त२.४.६.७-सदामर्षण; त५-सदासर्षण; भ१.४-सदापर्वण।

ईशे । यः । विश्वस्याः । देवऽवीतेः । ईशे । विश्वऽआयुः । उषसः । विऽउष्टौ ।
आ । यस्मिन् । मना । हवींषि । अग्नौ । अरिष्टऽरथः । स्कभ्नाति । शूषैः ॥ ३ ॥

यः अग्निः विश्वस्याः देववीतेः सर्वस्य यज्ञस्य ईशे ईष्टे । अपि च विश्वायुः सर्वत्राप्रतिहतगमनः उषसो व्युष्टौ विवासन उदयकाले होमार्थं यजमानानाम् ईशे ईष्टे । शूषैः शत्रुबलैः अरिष्टरथः अहिंसितयज्ञरथः सर्व एव यजमानः यस्मिन् अग्नौ मना मननीयानि हवींषि आ स्कभ्नाति आदरेण प्रतिबध्नाति प्रक्षिपति । सोऽयमग्निरस्माभिर्यागार्थमाहूत इत्यर्थः ॥

शूषेभिर्वृधो जुषाणो अर्कैर्देवाँ अच्छा रघुपत्वा जिगाति ।
मन्द्रो होता स जुह्वा३ यजिष्ठः संमिश्लो अग्निरा जिघर्ति देवान् ॥ ४ ॥

शूषेभिः । वृधः । जुषाणः । अर्कैः । देवान् । अच्छ । रघुऽपत्वा । जिगाति ।
मन्द्रः । होता । सः । जुह्वा । यजिष्ठः । सम्ऽमिश्लः । अग्निः । आ । जिघर्ति । देवान् ॥ ४ ॥

वृधः वर्धितोऽग्निः शूषेभिः हविर्लक्षणैर्बलैः । बलनिमित्तैर्हविर्भिरित्यर्थः । अर्कैः स्तोत्रैश्च जुषाणः सेव्यमानः सन् देवान् इन्द्रादीन् अच्छ आप्तुं रघुपत्वा लघुपतनः शीघ्रगामी जिगाति गच्छति । गत्वा च मन्द्रः स्तुत्यः होता देवानामाह्वाता होमनिष्पादको वा यजिष्ठः यष्टृतमः संमिश्लः स्वगुणैर्देवैर्वा संप्रयुक्तः सः अग्निः देवान् प्रति हविः आ जिघर्ति आहारयति । देवेभ्यो हविर्ददातीत्यर्थः ॥

तमुस्रामिन्द्रं न रेजमानमग्निं गीर्भिर्नमोभिरा कृणुध्वम् ।
आ यं विप्रासो मतिभिर्गृणन्ति जातवेदसं जुह्वं सहानाम् ॥ ५ ॥

तम् । उस्राम् । इन्द्रम् । न । रेजमानम् । अग्निम् । गीःऽभिः । नमःऽभिः । आ । कृणुध्वम् ।
आ । यम् । विप्रासः । मतिऽभिः । गृणन्ति । जातऽवेदसम् । जुह्वम् । सहानाम् ॥ ५ ॥

हे ऋत्विजो यूयम् उस्रां भोगानामुत्स्राविणं दातारं रेजमानं ज्वालात्मना कम्पमानं तम् अग्निम् इन्द्रं न इन्द्रमिव गीर्भिः स्तुतिभिः नमोभिः हविर्भिश्च आ कृणुध्वम् । अस्मदभिमुखं कुरुत । विप्रासः मेधाविनः स्तोतारः सहानां शत्रुबलाभिभवितॄणां देवानां जुह्वम् आह्वातारं जातवेदसं जातधनं जातप्रज्ञं वा यम् अग्निम् आ गृणन्ति आदरेण स्तुवन्ति । तमा कृणुध्वमिति पूर्वेण संबन्धः ॥

सं यस्मिन्विश्वा वसूनि जग्मुर्वाजे नाश्वाः सप्तीवन्त एवैः ।
अस्मे ऊतीरिन्द्रवाततमा अर्वाचीना अग्न आ कृणुष्व ॥ ६ ॥

सम् । यस्मिन् । विश्वा । वसूनि । जग्मुः । वाजे । न । अश्वाः । सप्तिऽवन्तः । एवैः ।
अस्मे इति । ऊतीः । इन्द्रवातऽतमाः । अर्वाचीनाः । अग्ने । आ । कृणुष्व ॥ ६ ॥

१. म२–उषःकाले । २. त-म२.६–पंडितोग्निः; म१–पिंडितोग्निः । ३. त-म६–हविर्युक्तैर्बलैः । ४. त-सु–'गच्छति' नास्ति । ५. ग–यष्टृतमः होमसाधनज्वालया संगतः अग्निः देवानिंद्रादीनाजुहोति । ६. त-म६–कुरुष्व ।

हे अग्ने ᵛयस्मिन् त्वयि विश्वानि[1] ᵛवसूनि धनानि ᵛसं ᵛजग्मुः स्वस्त्येन संगतानि भवन्ति। तत्र दृष्टान्तः। ᵛएवैः[2] गमनैः ᵛसप्तीवन्तः सर्पणवन्तः शीघ्रगमनसमर्थाः[3] ᵛअश्वाः ᵛवाजे ᵛन यथा संग्रामे संगतास्तद्वत्। हे ᵛअग्ने स त्वम् ᵛइन्द्रवाततमाः इन्द्रेणाभिगताः ᵛऊतीः रक्षाः ᵛअस्मे अस्मासु ᵛअर्वाचीनाः अभिमुखीः ᵛआ ᵛकृणुष्व आदरेण कुरु ॥

अधा ह्यग्ने महा निषद्या सद्यो जज्ञानो हव्यो बभूथ।
तं ते देवासो अनु केतमायन्नधावर्धन्त प्रथमास ऊमाः ॥ ७ ॥

अध। हि। अग्ने। महा। निऽसद्य। सद्यः। जज्ञानः। हव्यः। बभूथ।
तम्। ते। देवासः। अनु। केतम्। आयन्। अध। अवर्धन्त। प्रथमासः। ऊमाः ॥ ७ ॥

ᵛअध[4] अनन्तरं ᵛहि यस्माद्धे ᵛअग्ने त्वं ᵛमहा महत्त्वेन ᵛजज्ञानः जायमानो ज्वलन् ᵛनिषद्य उपविश्य ᵛसद्यः तस्मिन् प्रजननकाल एव ᵛहव्यः हवनार्हं आहुतिप्रक्षेपार्हः ᵛबभूथ भवसि तस्मात् कारणात् ᵛदेवासः हविषां दातारः ऋत्विग्यजमानाः ᵛते तव स्वभूतं ᵛतं तादृशं ᵛकेतं प्रज्ञानलक्षणम् ᵛअनु ᵛआयन् अनुगच्छन्ति। दीप्ते त्वयि हवींषि जुह्वतीत्यर्थः। ᵛअध[5] अनन्तरमृत्विगादयः ᵛप्रथमासः क्रियाभिजनविद्यागुणैरुत्कृष्टाः ᵛऊमाः त्वया रक्षिताः सन्तः ᵛअवर्धन्त वर्धन्ते ॥ ॥१॥

'स्वस्ति नः' इति सप्तर्चं सप्तमं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'स्वस्ति' इत्यनुक्रान्तम्। उक्तः सूक्तविनियोगः। स्वस्त्ययन्यां प्रधानस्य 'स्वस्ति नः' इत्येषानुवाक्या। सूत्रितं च—'अग्निः स्वस्तिमान् स्वस्ति नो दिवो अग्ने पृथिव्याः' (आश्व. श्रौ. २. १०) इति ॥

स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव।
सचेमहि तव दस्म प्रकेतैरुरुष्या ण उरुभिर्देव शंसैः ॥ १ ॥

स्वस्ति। नः। दिवः। अग्ने। पृथिव्याः। विश्वऽआयुः। धेहि। यजथाय। देव।
सचेमहि। तव। दस्म। प्रऽकेतैः। उरुष्य। नः। उरुऽभिः। देव। शंसैः ॥ १ ॥

हे ᵛदेव दानादिगुणविशिष्ट ᵛअग्ने त्वं ᵛदिवः ᵛपृथिव्याः द्यावापृथिव्योः सकाशात् ᵛनः अस्मभ्यं ᵛविश्वायुः सर्वायुः ᵛस्वस्ति पुत्रादि[6] ᵛयजथाय देवयागार्थं ᵛधेहि प्रयच्छ। सर्वोपद्रवरहिताः सर्वायुष्पुत्रयुक्ताश्च[7] सन्तो वयं यथा यज्वानो भवेम तथास्मान् कुर्विति वाक्यशेषः। अपि च वयं ᵛसचेमहि[8]। हे ᵛदस्म दर्शनीय ᵛदेव अग्ने ᵛउरुभिः बहुभिः ᵛशंसैः शंसनीयैः ᵛतव संबन्धिभिः ᵛप्रकेतैः पालनोपायप्रज्ञानैः ᵛनः अस्मान् ᵛउरुष्य रक्ष ॥

इमा अग्ने मतयस्तुभ्यं जाता गोभिरश्वैरभि गृणन्ति राधः।
यदा ते मर्तो अनु भोगमानड्वसो दधानो मतिभिः सुजात ॥ २ ॥

---

१. ग-त३.७-भ५.६-मु-विश्वा विश्वानि; त१-विश्वा। २. त-एतैः। ३. त-भ६-मु-शीघ्रगमनशीलाः समर्थाः। ४. त२-अथ; भ१.४.७-अधाय; भ६-अधा। ५. त१.२.५.७-भ६-अथ; त३-भ१.२.४.७-अधाय। ६. ग-पुत्राद्यविनाशाय; त-पुत्रा; त३-भ५.६-पुत्राद्यविनाशं। ७. त-भ२.६-सर्वाद्यपुत्राश्च; त३-भ१.४.७-सर्वाद्यपुत्राश्च। ८. भ५-सचेमहि त्वां सेवेमहि।

इमाः । अग्ने । मतयः । तुर्म्यम् । जाताः । गोभिः । अश्वैः । अभि । गृणन्ति । राधः । यदा । ते । मर्तः । अनु । भोगम् । आनट् । वसो इति । दधानः । मतिऽभिः । सुऽजात ॥२॥

हे ᵛअग्ने ᵛइमाः इदंदृश्यः ᵛमतयः स्तुतयः ᵛतुर्म्यं त्वदर्थं ᵛजाताः अस्मदादिस्तोतृमुखादुत्पन्नाः[1] । उच्चारिता इत्यर्थः । ᵛगोभिरश्वैः च सहितं ᵛराधः त्वया दीयमानं हिरण्यादिकं धनम् ᵛअभि ᵛगृणन्ति अभिष्टुवन्ति । अस्मदस्तुत्यनुरूपान्नमस्मभ्यं त्वया दत्तमिति प्रशंसन्ति । ᵛयदा ᵛमर्तः अस्मदादिको मनुष्यः ᵛते त्वया दीयमानं ᵛभोगं भोगार्हं धनम् ᵛअनु ᵛआनट् प्राप्नोति लभते तदा हे ᵛवसो प्रशस्यवसुमन् । यद्वा । स्वेन तेजसा सर्वस्याच्छादयितः । हे ᵛसुजात शोभनकर्मार्थमुत्पन्नाग्ने[2] त्वं ᵛदधानः अस्मभ्यं धनं प्रयच्छन् ᵛमतिभिः अस्मदीयाभिः स्तूयस इति शेषः ॥

अग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरं सदमित्सखायम् ।
अग्नेरनीकं बृहतः सपर्यं दिवि शुक्रं यजतं सूर्यस्य ॥ ३ ॥

अग्निम् । मन्ये । पितरम् । अग्निम् । आपिम् । अग्निम् । भ्रातरम् । सदम् । इत् । सखायम् । अग्नेः । अनीकम् । बृहतः । सपर्यम् । दिवि । शुक्रम् । यजतम् । सूर्यस्य ॥ ३ ॥

अहं स्तोता ᵛपितरम् ᵛअग्निम् एव ᵛमन्ये जाने । ᵛआपिं बन्धुम् ᵛअग्निम् एव मन्ये । ᵛभ्रातरम् ᵛअग्निम् एव मन्ये । ᵛसदमित् सदैवाविसंवादिनं ᵛसखायम् अग्निमेव जानामि । ᵛबृहतः महतः ᵛअग्नेः ᵛअनीकम् आहवनीयाख्यं मुखं ᵛसपर्यं परिचरामि । तत्र लुप्तोपममेतत् । ᵛदिवि द्युलोके स्थितं ᵛयजतं यष्टव्यं पूजनीयं ᵛसूर्यस्य संबन्धि ᵛशुक्रं दीप्तिमत् मण्डलं यथा कश्चिदभिप्रेतार्थसिद्धये आराधयति तद्वत् ॥

सिधा अग्ने धियो अस्मे सनुत्रीर्यं त्रायसे दम आ नित्यहोता ।
ऋतावा स रोहिदश्वः पुरुक्षुर्द्युभिरस्मा अहभिर्वाममस्तु ॥ ४ ॥

सिधाः । अग्ने । धियः । अस्मे इति । सनुत्रीः । यम् । त्रायसे । दमे । आ । नित्यऽहोता । ऋतऽवा । सः । रोहित्ऽअश्वः । पुरुऽक्षुः । द्युऽभिः । अस्मै । अहऽभिः । वामम् । अस्तु ॥४॥

हे ᵛअग्ने ᵛसनुत्रीः संभवन्त्यः ᵛअस्मे अस्माकं संबन्धिन्यः ᵛधियः स्तुतयः ᵛसिधाः सिद्धा निष्पन्नाः । त्वदर्थमस्माभिः कृता इत्यर्थः । ᵛदम ᵛआ अस्मद्यज्ञगृहे मर्यादयावस्थितस्त्वं ᵛनित्यहोता सततं होमनिष्पादको देवानामाह्वाता वा सन् ᵛयं मां ᵛत्रायसे कर्मवैगुण्यात् रक्षसि ᵛसः अहं त्वत्प्रसादात् त्वत्सायुज्यं गतः सन् ᵛऋतवा यज्ञवान् सत्यवान् वा स्यामिति शेषः । ᵛरोहिदश्वः रोहित्संज्ञकाश्वः ᵛपुरुक्षुः बह्वन्नश्च स्याम् । किंच ᵛअस्मै ईदृग्भूताय तुभ्यं ᵛद्युभिः दीप्तेषु ᵛअहभिः अहःसु दिवसेषु ᵛवामं वननीयं हविः ᵛअस्तु ॥

---

१. त१.२.४.५–°स्तोत्रमुखोद्भुत्पन्नाः; त२–°स्तोत्रे मुखादुत्पन्नाः; त६-७–°स्तोत्रमुखादुत्पन्नाः; भ६–°स्तोत्रमवोचन्मुखादुत्पन्नाः । २. ग–°कर्मणोत्पन्नाग्ने; त२.४.५–°कर्मार्छत्यजाग्ने; त३.७-भ–°कर्मादुत्पन्नाग्ने; त६–°कर्मोत्पन्नाग्ने ।

शुभिर्हितं मित्रमिव प्रयोगं प्रत्नमृत्विजमध्वरस्य जारम् ।
बाहुभ्यामग्निमायवोऽजनन्त विक्षु होतारं न्यसादयन्त ॥ ५ ॥

शुऽभिः । हितम् । मित्रम्ऽइव । प्रऽयोगम् । प्रत्नम् । ऋत्विजम् । अध्वरस्य । जारम् । बाहुऽभ्याम् । अग्निम् । आयवः । अजनन्त । विक्षु । होतारम् । नि । असादयन्त ॥ ५ ॥

vशुभिर्हितं दीप्तैराहितं vमित्रमिव स्निग्धमिव vप्रयोगं प्रयोक्तव्यं vप्रत्नं पुराणम् vऋत्विजं होतृसंज्ञकम् । 'अग्निर्वै देवानां होतासीत्' (ऐ. ब्रा. २. ७; ३. १४) इति श्रुतेः । vअध्वरस्य यज्ञस्य vजारं समापयितारम् एवंभूतम् vअग्निमायवः यजमाना मनुष्याः vबाहुभ्याम् vअजनन्त जनितवन्तः । किंच vविक्षु मनुष्येषु[1] । तदाकारेषु देवेष्वित्यर्थः । vहोतारम् आह्वातारं vन्यसादयन्त नियमेन सादितवन्तः । देवानां यागार्थं निरूपितवन्त इत्यर्थः ॥

स्वयं यजस्व दिवि देव देवान् किं ते पाकः कृणवदप्रचेताः ।
यथायजऋतुभिर्देव देवानेवा यजस्व तन्वं सुजात ॥ ६ ॥

स्वयम् । यजस्व । दिवि । देव । देवान् । किम् । ते । पाकः । कृणवत् । अप्रऽचेताः ।
यथा । अयजः । ऋतुऽभिः । देव । देवान् । एव । यजस्व । तन्वम् । सुऽजात ॥ ६ ॥

हे vदेव द्योतमानाग्ने त्वं vदिवि द्युलोके स्थितान् vदेवान् इन्द्रादीन् vस्वयम् आत्मनैव vयजस्व । vपाकः पक्वज्ञप्रज्ञः vअप्रचेताः अप्रकृष्टज्ञानो[2] मनुष्यः vते तव vकिं vकृणवत् किं करोति । स्वयानधिष्ठितः[3] किंचिदपि न जानातीत्यर्थः । किंच हे vदेव त्वम् vऋतुभिः कालविशेषैः vदेवान् vयथायजः इष्टवानसि vएव एवं हे vसुजात शोभनजन्मन्नग्ने vतन्वम् आत्मानमपि vयजस्व ॥

भवा नो अग्नेऽवितोत गोपा भवा वयस्कृदुत नो वयोधाः ।
रास्वा च नः सुमहो हव्यदातिं त्रास्वोत नस्तन्वो अप्रयुच्छन् ॥ ७ ॥

भव । नः । अग्ने । अविता । उत । गोपाः । भव । वयःऽकृत् । उत । नः । वयःऽधाः ।
रास्व । च । नः । सुऽमहः । हव्यऽदातिम् । त्रास्व । उत । नः । तन्वः । अप्रऽयुच्छन् ॥ ७ ॥

हे vअग्ने त्वं vनः अस्माकम् vअविता दृष्टभयेभ्यो रक्षकः vभव भूयाः । vउत अपि च vगोपाः अदृष्टभयेभ्यो गोप्ता रक्षको भव । vउत अपि च vवयस्कृत् अन्नस्य कर्ता vभव । vवयोधाः अन्नस्य दाता भव । हे vसुमहः सुष्ठु पूजनीयाग्ने त्वं स्वभूतां vहव्यदातिं हविषो दातिं vनः अस्मभ्यं vरास्व vच प्रयच्छ । vउत अपि च vनः अस्माकं स्वभूताः vतन्वः शरीराणि vअप्रयुच्छन् अप्रमाद्यन् vत्रास्व पालय ॥ ॥२॥

'प्र केतुना' इति नवर्चमष्टमं सूक्तं त्रैष्टुभम् । त्वष्टृपुत्रस्त्रिशिरा नामर्षिः । आदितः षडाग्नेय-स्ततस्तिस्र ऐन्द्र्यः । तथा चानुक्रान्तं—'प्र केतुना नव त्रिशिरास्त्वाष्ट्रस्तृचोऽन्त्य ऐन्द्रः' इति । आदितः षण्णां प्रातरनुवाकाश्विनशस्त्रयोराग्नेयक्रतावुक्तो विनियोगः ॥

---

१. ग-त३-भ२.५-मु-विशो मनुष्याः; त१.२.६-भ१.४-विशो मनु; त७-भ७-विशो मनुः; म६-विशेषो मनुष्याः । २. त-प्रकृष्टज्ञानो । ३. ग-त३-भ-°धिष्ठितः सन् ।

प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति ।
दिवश्चिदन्ताँ उपमाँ उदानळपामुपस्थे महिषो ववर्ध ॥ १ ॥

प्र । केतुना । बृहता । याति । अग्निः । आ । रोदसी इति । वृषभः । रोरवीति ।
दिवः । चित् । अन्तान् । उपऽमान् । उत् । आनट् । अपाम् । उपऽस्थे । महिषः । ववर्ध ॥ १ ॥

[v]अग्निः [v]बृहता महता [v]केतुना प्रज्ञानेन युक्तः सन् [v]आ इदानीं [v]रोदसी द्यावापृथिव्यौ [v]प्र [v]याति प्रकर्षेण गच्छति । किंच देवानामाह्वानकाले [v]वृषभः इव [v]रोरवीति अत्यर्थं शब्दं करोति । [v]दिवश्चित् द्युलोकस्यापि [v]अन्तान् अवसानान् [v]उपमान् समीपांश्च प्रदेशान् ज्वलनात्मनादित्यात्मना वा स्थितः [v]उदानट् ऊर्ध्वं व्याप्नोति । [v]अपां वृष्टिलक्षणानामुदकानाम् [v]उपस्थे उपस्थानेऽन्तरिक्षे वैद्युतात्मना [v]महिषः महान् [v]ववर्ध वर्धते ॥

मुमोद गर्भो वृषभः ककुद्मानस्रेमा वत्सः शिमीवाँ अरावीत् ।
स देवताता हविषा कृणवन्त्स्वेषु क्षयेषु प्रथमो जिगाति ॥ २ ॥

मुमोद । गर्भः । वृषभः । ककुत्ऽमान् । अस्रेमा । वत्सः । शिमीऽवान् । अरावीत् ।
सः । देवऽताति । हविषा । कृणवन् । स्वेषु । क्षयेषु । प्रथमः । जिगाति ॥ २ ॥

[v]गर्भः द्यावापृथिव्योरन्तर्गतः [v]वृषभः कामानां वर्षिताग्निः [v]ककुद्मान् उन्नततेजस्कः [v]मुमोद मोदते । किंच [v]अस्रेमा । प्रशस्यनामैतत् । प्रशस्तः [v]वत्सः नक्तोषसोर्वत्सभूतः सायंप्रातराहुत्युपजीवनात् [v]शिमीवान्[1] हविर्वहनदेवाह्वानादिकर्मवानग्निः[1] [v]अरावीत् देवाह्वानादिशब्दं करोति । [v]सः अग्निः [v]देवताति यज्ञे [v]उद्यतानि उद्यम्युत्साहकर्माणि [v]कृण्वन् कुर्वन् [v]स्वेषु [v]क्षयेषु आहवनीयेष्वाहवनीयादिस्थानेषु स्थितः [v]प्रथमः देवानां स्थानेषु मुख्यः [v]जिगाति गच्छति ॥

आ यो मूर्धानं पित्रोररब्ध न्यधुरे दधिरे सूरो अर्णः ।
अस्य पत्मन्नरुषीरश्वबुध्ना ऋतस्य योनौ तन्वो जुषन्त ॥ ३ ॥

आ । यः । मूर्धानम् । पित्रोः । अरब्ध । नि । अधुरे । दधिरे । सूरः । अर्णः ।
अस्य । पत्मन् । अरुषीः । अश्वऽबुध्नाः । ऋतस्य । योनौ । तन्वः । जुषन्त ॥ ३ ॥

[v]यः अग्निः [v]पित्रोः मातापितृभूतयोर्द्यावापृथिव्योः [v]मूर्धानम् [v]आ [v]अरब्ध स्वतेजोभिरारभते । बद्ध्वा । मातापितृभूतयोररण्योर्मूर्धानं शिरोवत् प्रधानभूतं मन्थनप्रदेशम् । आङीषदर्थे । आरब्ध ईषद्विनस्ति । निर्मथनकालेऽपि दाहेन दग्धुं समर्थः । [v]सूरः सुवीर्यस्याग्नेः [v]अर्णः गमनशीलं तेजः [v]अध्वरे यज्ञे [v]नि [v]दधिरे । यष्टारो नियमेन धारयन्ति । [v]अस्य अग्नेः [v]पत्मन् पतने [v]अरुषीः आरोचमानाः [v]ऋतस्य यज्ञस्य [v]योनौ स्थाने [v]अश्वबुध्नाः व्याप्तमूला अशनबन्धना वा । हविराहाराश्विता इत्यर्थः । [v]तन्वः तदीयास्तनूः [v]जुषन्त कवयः सेवन्ते ॥

उषउषो हि वसो अग्रमेषि त्वं यमयोरभवो विभावा ।
ऋतायं सप्त दधिषे पदानि जनयन्मित्रं तन्वे स्वायै ॥ ४ ॥

१. ग–हविर्वहनात् देवानां आह्वानादिकर्मवेगत्वात् शिमीवानग्निः ।

उषःऽउषः । हि । वसो इति । अग्रम् । एषि । त्वम् । युमयोः । अभवः । विभाऽवा ।
ऋताय । सप्त । दधिषे । पदानि । जनयन् । मित्रम् । तन्वे । स्वायै ॥ ४ ॥

हे वसो स्वेन तेजसा सर्वस्याच्छादयितर्वसुमन् वा प्रशस्य वा अग्ने त्वम् उषउषः सर्वस्या एवोषसः अग्रं पूर्वम् एषि प्राप्नोषि । अपि च यमयोः युग्मयोः परस्परमवियुक्तयोरहोरात्रयोः विभावा दीप्तिमान् अभवः भवसि । तन्वे स्वायै आत्मीयाच्छरीरात् मित्रम् आदित्यं जनयन् उत्पादयन् सप्त पदानि सप्तसंख्याकानि धिष्ण्यादिस्थानानि ऋताय यज्ञार्थं दधिषे धारयसि ॥

भुवश्चक्षुर्महः क्रतस्य गोपा भुवो वरुणो यदृताय वेषि ।
भुवो अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः ॥ ५ ॥

भुवः । चक्षुः । महः । क्रतस्य । गोपाः । भुवः । वरुणः । यत् । ऋताय । वेषि ।
भुवः । अपाम् । नपात् । जातऽवेदः । भुवः । दूतः । यस्य । हव्यम् । जुजोषः ॥ ५ ॥

महः महतः क्रतस्य यज्ञस्य हे अग्ने त्वं चक्षुः इव प्रकाशकः भुवः भवसि । गोपाः यज्ञस्य रक्षकस्त्वमेव भवसि । यत् यदा ऋताय सोमरसलक्षणस्योदकस्यादानार्थं वरुणः आदित्यः वेषि गच्छसि तदा त्वमेव भुवः भवसि । हे जातवेदः जातप्रज्ञाग्ने अपां वृष्टिलक्षणानामुदकानां नपात् पौत्रस्त्वमेव भुवः भवसि । अद्भ्यो हि मेघो जायते मेघादग्निर्विद्युद्रूपो जायत इत्यपां पौत्रत्वमुच्यते । यस्य[1] यजमानस्य हव्यं हविः जुजोषः सेवसे तस्य दूतः भुवः भवसि ॥ ॥३॥

दर्शपूर्णमासयोराग्नेयस्य याज्या ' भुवो यज्ञस्य ' इत्येषा । सूत्रितं च—' तासां याज्यानुवाक्या अग्निर्मूर्धा भुवो यज्ञस्य ' (आश्व. श्रौ. १.६) इति । आग्नेयी काचित् काम्येष्टिः । तस्यामेषैव याज्या । सूत्रितं च—' आग्नेय्या उत्तरे नित्ये मूर्धन्वतः ' (आश्व. श्रौ. २. १०) इति ॥

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ॥ ६ ॥

भुवः । यज्ञस्य । रजसः । च । नेता । यत्र । नियुत्ऽभिः । सचसे । शिवाभिः ।
दिवि । मूर्धानम् । दधिषे । स्वःऽसाम् । जिह्वाम् । अग्ने । चकृषे । हव्यऽवाहम् ॥ ६ ॥

हे अग्ने त्वं यत्र यस्मिन्नन्तरिक्षे शिवाभिः कल्याणीभिः नियुद्भिः नियुत्संज्ञकाभिरश्वजातिभिः संबद्धं वायुं सचसे संगच्छसे तस्मिन्नन्तरिक्षे यज्ञस्य रजसश्च उदकस्य च नेता प्रापयिता भुवः भवसि । ' अग्निर्वा इतो वृष्टिं समीरयति[2] ' (निरु. ७. २४) इति श्रुतेः । किंच दिवि द्युलोके मूर्धानं शिरोवत्प्रधानभूतं स्वर्षां सर्वस्य संभक्तारमादित्यं दधिषे हविर्वहनद्वारेण धारयसि । हे अग्ने त्वं जिह्वां ज्वालां हव्यवाहं हविषां वोढ्रीं चकृषे करोषि ॥

अस्य व्रितः क्रतुना वव्रे अन्तरिच्छन्धीतिं पितुरेवैः परस्य ।
सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति ॥ ७ ॥

---

१. त–यज्ञस्य । २. ग-मु-नै.सं.२.४.१०.२; का. सं. ११. १०–उदीरयति; मै.सं.२.४.८ द्रष्टव्यम् ।

अस्य । त्रितः । क्रतुना । वज्रे । अन्तः । इच्छन् । धीतिम् । पितुः । एवैः । परस्य ।
सचस्यमानः । पित्रोः । उपऽस्थे । जामि । ब्रुवाणः । आयुधानि । वेति ॥ ७॥

अस्मिंस्तृच इममर्थं ब्रवीति । हे त्रित सर्वेषामायुधानि वेत्ता त्वं त्वष्टृपुत्रस्य त्रिशिरसो वधार्थं मम साहाय्यं कुर्वितीन्द्रेणैवं प्रेषितः स्ववीर्यवृद्ध्यर्थं यज्ञभागं वव्रे । स चेन्द्रस्तस्मै पाणिप्रक्षालनार्थं च जलं यज्ञभागं च दत्तवान् । अनेन यज्ञभागेन वृद्धवीर्यः ऽत्रितः एतत्संज्ञक ऋषिः ऽएवैः आत्मनो रक्षणैर्युक्तः ऽअन्तः यज्ञस्य मध्ये ऽधीतिं भागम् ऽइच्छन् ऽपरस्य उत्कृष्टस्य ऽपितुः सर्वस्य जगतः पालयितुः ऽअस्य इन्द्रस्य ऽक्रतुना त्रिशिरसो मम वधार्थं साहाय्यभूतेन कर्मणा निमित्तेन ऽवव्रे सख्यं वृतवान् । किंच ऽपित्रोः मातापितृभूतयोर्द्यावापृथिव्योः ऽउपस्थे समीपस्थे यज्ञे ऽसचस्यमानः ऋत्विग्भिः सेव्यमानश्चितः ऽजामि योग्यमिन्द्रस्यानुरूपं स्तोत्रं ऽब्रुवाणः इन्द्रस्य बलवृद्ध्यर्थमुच्चारयन् ऽआयुधानि स्वभूतानि ऽवेति । त्वष्टृपुत्रस्य मम वधार्थमागच्छति ॥

स पित्र्याण्यायुधानि विद्वानिन्द्रेषित आप्त्यो अभ्ययुध्यत् ।
त्रिशीर्षाणं सप्तरश्मिं जघन्वान्त्वाष्ट्रस्य चिन्निः ससृजे त्रितो गाः ॥ ८ ॥

सः । पित्र्याणि । आयुधानि । विद्वान् । इन्द्रऽइषितः । आप्त्यः । अभि । अयुध्यत् ।
त्रिऽशीर्षाणम् । सप्तऽरश्मिम् । जघन्वान् । त्वाष्ट्रस्य । चित् । निः । ससृजे । त्रितः । गाः॥८॥

ऽआप्त्यः आप्त्यस्य पुत्रोऽपां पुत्रो वा । तत्कारोपजनश्छान्दसः । ऽसः त्रितः ऽपित्र्याणि स्वपितृसंबन्धीनि ऽआयुधानि ऽविद्वान् जानन् ऽइन्द्रेषितः त्रिशिरसा मया सह युद्धार्थमिन्द्रेण प्रेषितः सन् ऽअभ्ययुध्यत् आभिमुख्येन युद्धवान् । तदनन्तरं ऽसप्तरश्मिं शत्रुनियमनार्थं सप्तप्रग्रहहस्तम् । यद्वा । सप्तरश्मिरादित्यः । तत्सदृशम् । ऽत्रिशीर्षाणं त्रिशिरस्कं मां ऽजघन्वान् हतवान् । मूर्च्छितं कृतवानित्यर्थः । किंच ऽत्रितः ऽत्वाष्ट्रस्य ऽचित् त्वष्टृपुत्रस्य ममापि ऽगाः पशून् ऽनिः ऽससृजे विसृष्टवान् । अपहृतवानित्यर्थः ॥

भूरीदिन्द्र उदिनक्षन्तमोजोऽवाभिनत् सत्पतिर्मन्यमानम् ।
त्वाष्ट्रस्य चिद्विश्वरूपस्य गोनामाचक्राणस्त्रीणि शीर्षा परा वर्क् ॥ ९ ॥

भूरि । इत् । इन्द्रः । उत्ऽइनक्षन्तम् । ओजः । अव । अभिनत् । सत्ऽपतिः । मन्यमानम् ।
त्वाष्ट्रस्य । चित् । विश्वऽरूपस्य । गोनाम् ।
आऽचक्राणः । त्रीणि । शीर्षा । परा । वर्गिति वर्क् ॥ ९ ॥

ऽसत्पतिः सतां पालकः ऽइन्द्रः ऽभूरीत् बह्वेव पूर्वतुल्यमतिरिक्तं वा ऽओजः बलम् ऽउदिनक्षन्तं व्याप्नुवन्तं ऽमन्यमानं शूरमित्यात्मानं चिन्तयन्तम् । यद्वा । मन्यतिर्दीप्तिकर्मा क्रोधकर्मा वा । दीप्यमानं क्रुध्यन्तं वा । त्वष्टृपुत्रं माम् ऽअवाभिनत् वज्रेण विदारितवान् । विदार्य ऽत्वाष्ट्रस्य ऽचित् त्वष्टृपुत्रस्यापि ऽगोनां गवाम् । स्वामिन इति शेषः । ऽविश्वरूपस्य मम ऽत्रीणि ऽशीर्षा शीर्षाणि ऽआचक्राणः आ समन्ताच्छन्दं कुर्वन् ऽपरा ऽवर्क् पराङ्मुखस्य वृक्णवान्[1] छिन्नवानित्यर्थः । ईदृशं भावि वस्तु विश्वरूपः स्वप्नान्तेऽनेन तृचेन दृष्टवान् ॥ ॥ ४ ॥

१. त-भ–वृणीतवान् ।

'आपो हि' इति नवर्चं नवमं सूक्तम्। अम्बरीषस्य राज्ञः पुत्रः सिन्धुद्वीप ऋषिस्त्वष्टृपुत्र-त्रिशिरा वा। 'इदमापः' इत्यादिके द्वे अनुष्टुभौ। 'ईशाना[1]' इति वर्धमाना। 'आपः पृणीत' इति प्रतिष्ठा[2]। शिष्टा गायत्र्यः। आपो देवता। तथा चानुक्रान्तम्—'आपो हि सिन्धुद्वीपो वाम्बरीष आर्षं गायत्रं अनुष्टुबन्तं पञ्चमी[3] वर्धमाना सप्तमी प्रतिष्ठा' इति[4]। गतः सूक्तविनियोगः। आश्विमास्ते 'आपो हि ष्ठा' इत्याद्यास्तिस्रः। सूत्रितं च—'आपो हि ष्ठेति तिस्रो वियतमप उपस्पृशन्' (आश्व. श्रौ. ५. २०) इति॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महे रणाय चक्षसे॥ १॥

आपः। हि। स्थ। मयःऽभुवः। ताः। नः। ऊर्जे। दधातन। महे। रणाय। चक्षसे॥१॥

ᵛहि यस्मात् कारणात् ᵛआपः या यूयं ᵛमयोभुवः सुखस्य भावयित्र्यः ᵛस्थ भवथ ᵛताः तादृश्यो यूयं ᵛनः अस्मान् ᵛऊर्जे अन्नाय ᵛदधातन धत्त। अन्नप्राप्तियोग्यानस्मान् कुरुत। अन्नमस्मभ्यं दत्तेत्यर्थः। ᵛमहे महते ᵛरणाय रमणीयाय[3] ᵛचक्षसे दर्शनाय सम्यग्ज्ञानाय च धत्त। अस्मान् सम्यग्ज्ञानं प्रति योग्यान् कुरुतेत्यर्थः॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ २॥

यः। वः। शिवऽतमः। रसः। तस्य। भाजयत। इह। नः। उशतीःऽइव। मातरः॥२॥

हे आपः ᵛवः युष्माकं स्वभूतः ᵛयः ᵛरसः ᵛशिवतमः सुखतमः ᵛइह अस्मिँल्लोके ᵛतस्य तं रसं ᵛनः अस्मान् ᵛभाजयत सेवयत। उपयोजयतेत्यर्थः। तत्र दृष्टान्तः। ᵛउशतीरिव उशत्य इव पुत्रसमृद्धिं कामयमानाः ᵛमातरः स्तन्यरसं यथा भाजयन्ति प्रापयन्ति तद्वत्।

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥ ३॥

तस्मै। अरम्। गमाम। वः। यस्य। क्षयाय। जिन्वथ। आपः। जनयथ। च। नः॥३॥

हे आपः यूयं ᵛयस्य पापस्य ᵛक्षयाय विनाशाय अस्मान् ᵛजिन्वथ प्रीणयथ ᵛतस्मै तादृशाय पापक्षयाय ᵛअरं क्षिप्रं ᵛवः युष्मान् ᵛगमाम गमयाम। वयं शिरसि प्रक्षिपामेत्यर्थः। यद्वा। यस्यास्यस्य क्षयाय निवासार्थं यूयमोषधीर्जिन्वथ तर्पयथ तस्मै तदन्नमुद्दिश्य वयमरमलं पर्याप्तं यथा भवति तथा वो युष्मान् गमाम गच्छाम। किंच हे ᵛआपः ᵛनः अस्मान् ᵛजनयथ ᵛच। पुत्रपौत्रादिजनने प्रयोजयतेत्यर्थः॥

शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभि स्रवन्तु नः॥ ४॥

शम्। नः। देवीः। अभिष्टये। आपः। भवन्तु। पीतये। शम्। योः। अभि। स्रवन्तु। नः॥४॥

ᵛनः अस्माकं पापापनोदद्वारेण ᵛशं सुखं ᵛभवन्तु ᵛदेवीः देव्यः ᵛआपः[4]। ᵛअभिष्टये अस्मद्यज्ञाय भवन्तु। यज्ञाङ्गभावाय च भवन्त्वित्यर्थः। ᵛपीतये पानाय च भवन्तु। तथा ᵛशम् उत्पन्नानां रोगाणां शमनं ᵛयोः बाधनमनुत्पन्नानां पृथक्करणं च कुर्वन्तु। अपि च ᵛनः अस्माकम् ᵛअभि उपरि ᵛस्रवन्तु सुखार्थं सिञ्चन्तु॥

---

१. ग-त-भ-'ईशाना...प्रतिष्ठा' नास्ति। २. ग-त१.२.३.४.५.६-भ१.४.६.७-'पंचमी... प्रतिष्ठेति' नास्ति। ३. ग-संग्रामाय। ४. त-'आपः' नास्ति।

ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् ॥ ५ ॥

ईशानाः । वार्याणाम् । क्षयन्तीः । चर्षणीनाम् । अपः । याचामि । भेषजम् ॥ ५ ॥

[v]वार्याणां वारिप्रभवानां व्रीहियवादीनां यद्वा वरणीयानां धनानाम् [v]ईशानाः ईश्वराः [v]चर्षणीनां मनुष्याणां [v]क्षयन्तीः निवासयित्रीः [v]अपः उदकानि [v]भेषजम् । सुखनामैतत् । पापापनोदनं[1] सुखं [v]याचामि अहं प्रार्थये ॥

अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशंभुवम् ॥ ६ ॥

अप्ऽसु । मे । सोमः । अब्रवीत् । अन्तः । विश्वानि । भेषजा । अग्निम् । च । विश्वऽशंभुवम् ॥ ६ ॥

आपः पृणीत भेषजं वरूथं तन्वे[2] मम । ज्योक्च सूर्यं दृशे ॥ ७ ॥

आपः । पृणीत । भेषजम् । वरूथम् । तन्वे । मम । ज्योक् । च । सूर्यम् । दृशे ॥ ७ ॥

इदमापः प्र वहत यत्किं च दुरितं मयि । यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥ ८ ॥

इदम् । आपः । प्र । वहत । यत् । किम् । च । दुःऽइतम् । मयि ।
यत् । वा । अहम् । अभिऽदुद्रोह । यत् । वा । शेपे । उत । अनृतम् ॥ ८ ॥

आपो अद्यान्वचारिषं रसेन सं समगस्महि ।
पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥ ९ ॥

आपः । अद्य । अनु । अचारिषम् । रसेन । सम् । अगस्महि ।
पयस्वान् । अग्ने । आ । गहि । तम् । मा । सम् । सृज । वर्चसा ॥ ९ ॥

'अप्सु मे सोमो अब्रवीत्' इत्यादिकाश्चतस्र ऋचः प्रथमाष्टके द्वितीयाध्याये विनियोगपुरःसरं व्याख्याताः (ऋ. सं. १. २३. २०–२३)[2] ॥ ॥ ५ ॥

'ओ चित्' इति चतुर्दशर्चं दशमं सूक्तम् । अत्रानुक्रम्यते—'ओ चित् षळृना वैवस्वतयोर्यमयम्योः संवादः षष्ठयष्टम्यर्थमी मिथुनार्थं यमं प्रोवाच स तां नवमीयुग्भिरनिच्छन् प्रत्याचष्टे' इति । ततः षष्ठ्यां प्रथमातृतीयाद्ययुक्षु विवस्वतः पुत्री यम्यृषिर्यमो देवता । 'यस्य वाक्यं स ऋषिर्या तेनोच्यते सा देवता' इति न्यायात् । तथा नवम्यां द्वितीयाचतुर्थीप्रभृतिषु युक्षु वैवस्वतो यम ऋषिर्यमी देवता । अनादेशपरिभाषया त्रिष्टुप् । गतो विनियोगः ॥

ओ चित्सखायं सख्या ववृत्यां तिरः पुरू चिदर्णवं जगन्वान् ।
पितुर्नपातमा दधीत वेधा अधि क्षमि प्रतरं दीध्यानः ॥ १ ॥

ओ इति । चित् । सखायम् । सख्या । ववृत्याम् । तिरः । पुरु । चित् । अर्णवम् । जगन्वान् ।
पितुः । नपातम् । आ । दधीत । वेधाः । अधि । क्षमि । प्रऽतरम् । दीध्यानः ॥ १ ॥

१. ग–पापापनोदनात्मकं; भ–पापापनोदकं । २. त७–पुस्तके ऋ. सं. १.२३.२०–२३ मन्त्राणां भाष्यं व्याकरणप्रक्रियां वर्जयित्वा षड्सप्तमाष्टमनवममन्त्रभाष्यत्वेनोद्धृतम् । उद्गीथाचार्येणापि स्वकीय ऋग्भाष्य एते मंत्रा न व्याख्याताः ।

अत्रास्मिन् सूक्ते वैवस्वतयोर्यमयम्योः संवाद उच्यते। अस्यामृचि यमं प्रति यमी प्रोवाच। vतिरः अन्तर्हितमप्रकाशमानम्। निर्जनप्रदेशमित्यर्थः। vपुरु vचित् बहूपि विस्तीर्णं च vअर्णवं समुद्रैकदेशमवान्तरद्वीपं vजगन्वान् गतवती यमी। vचित् इति पूजार्थे। पूजितमिष्टम्। श्रेष्ठमित्यर्थः। vसख्यं गर्भवासादारभ्य सखीभूतं यमं vसख्या सख्याय स्त्रीपुरुषसंपर्कजनितमित्रत्वाय vओ vवृत्याम् आवर्तयामि। आभिमुख्येन स्थित्वा लज्जां परित्यज्य त्वत्संभोगं करोमीत्यर्थः। 'धर्मस्य त्वरिता गतिः' इति न्यायेन कामस्य त्वरितत्वात्। अपि च vपितुः आवयोर्भविष्यतः पुत्रस्य पितृभूतस्य तवार्थाय vअधि vक्षमि अधि पृथिव्याम्। पृथिवीस्थानीये ममोदर इत्यर्थः। vप्रतरं प्रकृष्टम्। सर्वगुणोपेतमित्यर्थः। vनपातं गर्भलक्षणमपत्यं vवेधाः विधाता प्रजापतिः vदीध्यानः आवयोरनुरूपस्य पुत्रस्य जननार्थमावां ध्यायन् vआ vदधीत[1]। 'प्रजापतिर्धाता गर्भं दधातु ते' (ऋ. सं. १०. १८४. १) इत्युक्तत्वात्॥

न ते सखा सख्यं वष्ट्येतत्सलक्ष्मा यद्विषुरूपा भवाति।
महस्पुत्रासो असुरस्य वीरा दिवो धर्तार उर्विया परि ख्यन्॥ २॥

न। ते। सखा। सख्यम्। वष्टि। एतत्। सऽलक्ष्मा। यत्। विषुऽरूपा। भवाति।
महः। पुत्रासः। असुरस्य। वीराः। दिवः। धर्तारः। उर्विया। परि। ख्यन्॥ २॥

यम आत्मानं परोक्षीकृत्य यमीं प्रत्युवाच। हे यमि vते तव vसखा गर्भवासलक्षणेन सखीभूतो यमः vएतत् ईदृशं त्वयोक्तं स्त्रीपुरुषलक्षणं vसख्यं vन vवष्टि न कामयते। vयत् यस्मात् कारणात् यमी vसलक्ष्मा समानयोनित्वलक्षणा vविषुरूपा भगिनीत्वाद्विषमरूपा vभवाति भवति। तस्माच्च वष्टीत्यर्थः। इदानीं 'तिरः पुरु चिदर्णवं जगन्वान्' इत्यस्य प्रतिवचनमुच्यते। vमहः महतः vअसुरस्य प्राणवतः प्रज्ञावतो वा प्रजापतेः vपुत्रासः पुत्रभूताः vवीराः। 'वीरो वीरयत्यमित्रान् वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वा' (निरु. १. ७) इति निरुक्तम्। शत्रूणां विविधमीरयितारः[2] vधर्तारः धारयितारः[2] vदिवः द्युलोकस्य। प्रदर्शनमेतत्। द्युप्रभृतीनां लोकानामित्यर्थः[3]। — — —॥

उशन्ति घा ते अमृतास एतदेकस्य चित्त्यजसं मर्त्यस्य।
नि ते मनो मनसि धाय्यस्मे जन्युः पतिस्तन्वमा विविश्याः॥ ३॥

उशन्ति। घ। ते। अमृतासः। एतत्। एकस्य। चित्। त्यजसम्। मर्त्यस्य।
नि। ते। मनः। मनसि। धायि। अस्मे इति। जन्युः। पतिः। तन्वम्। आ। विविश्याः॥३॥

पुनरपि यमी यमं प्रत्युवाच। vघ इति निपातोऽप्यर्थे। हे यम vते प्रसिद्धाः vअमृतासः प्रजापत्यादयो[4] देवा अपि vएतत् ईदृशं शास्त्रेणागम्यत्वेनोक्तं vत्यजसम्। त्यज्यते परस्मै प्रदीयत इति त्यजसं दुहितृभगिन्यादिस्त्रीजातम्। vउशन्ति कामयन्ते। vएकस्य vचित् सर्वस्य जगतः मुख्यस्यापि प्रजापत्यादेः स्वदुहितृभगिन्यादीनां संबन्धोऽस्तीति शेषः। अतः कारणात् vते तव vमनः चित्तम्

---

१. ग–दधीत आदधातु; त-भ१–दधीत आदधाव; भ१.२–दधीत अदधात; भ४–दधीत आदधात। २. त१–विविधारयितारो; त२.४.५.६.७–विविधमाधारयितारो; भ–विविधमीरयितारो। ३. ग–°मित्यर्थः धर्तारः उर्विया उरवः मां परिचक्षते न कर्तव्यमिति वदंति। ४. त-भ६–प्राजापत्यादयो।

vअस्मे अस्माकम्। ममेत्यर्थः। vमनसि चित्ते vनि vधायि निधीयताम्। अहं त्वां कामये त्वं मामपि कामयस्वेत्यर्थः। अपि च। vजन्युः इति लुप्तोपममेतत्। जन्युरिव यथा जनयिता प्रजापतिः vपतिः भर्ता भूत्वा स्वदुहितुः शरीरं संभोगेनाविशत्तथा त्वमपि मम पतिर्भूत्वा vतन्वं मदीयं शरीरम् vआ vविविक्षाः संभोगेनाविश। योनौ प्रजननप्रक्षेपोपगूहनचुम्बनादिना मां संभुङ्क्ष्वेत्यर्थः ॥

न यत्पुरा चकृमा कद्ध नूनमृता वदन्तो अनृतं रपेम ।
गन्धर्वो अप्स्वप्या च योषा सा नो नाभिः परमं जामि तन्नौ ॥ ४ ॥

न। यत्। पुरा। चकृम। कत्। ह। नूनम्। ऋता। वदन्तः। अनृतम्। रपेम।
गन्धर्वः। अप्ऽसु। अप्या। च। योषा। सा। नः। नाभिः। परमम्। जामि। तत्। नौ ॥४॥

यमो यमीं पुनर्ब्रूते। vपुरा पूर्वं प्रजापतिः vयत् अगम्यागमनमपरिमितसामर्थ्योपेतत्वात् कृतवान् तथा वयं vन vचकृम नाकुर्म। वयम् vऋता ऋतानि सत्यानि vवदन्तः ब्रुवन्तः vअनृतम् असत्यं vकद्ध कदा खलु vनूनं[1] निश्चितं vरपेम वदेम। न कदाचिदपीत्यर्थः। अगम्यागमनं न कुर्म इति यावत्। अपि च vअप्सु। अन्तरिक्षनामैतत्। अन्तरिक्षे स्थितः vगन्धर्वः[2] गवां रश्मीनामुदकानां वा धारयिता[3] आदित्यः vअप्या अन्तरिक्षस्था vसा प्रसिद्धा vयोषा आदित्यस्य भार्या सरण्यूः vच vनः नावावयोः vनाभिः उत्पत्तिस्थानम्। मातापितरावित्यर्थः। vतत् तस्मात् कारणात् vनौ आवयोः vजामि बान्धवमुत्कृष्टम्[4]। एवं सत्यावयोरगम्यागमनरूपत्वात् कर्तुमयुक्तं तस्मादेतन्न करोमीत्यभिप्रायः ॥

गर्भे नु नौ जनिता दंपती कर्देवस्त्वष्टा सविता विश्वरूपः ।
नकिरस्य प्र मिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः ॥ ५ ॥

गर्भे। नु। नौ। जनिता। दंपती इति दम्ऽपती। कः। देवः। त्वष्टा। सविता। विश्वऽरूपः।
नकिः। अस्य। प्र। मिनन्ति। व्रतानि। वेद। नौ। अस्य। पृथिवी। उत। द्यौः ॥५॥

vत्वष्टा रूपाणां कर्ता vसविता सर्वेषां शुभाशुभस्य प्रेरकः vविश्वरूपः सर्वात्मकः vदेवः दानादिगुणयुक्तः vजनिता जनयिता प्रजापतिः vगर्भे vनु गर्भावस्थायामेव vनौ आवां vदंपती जायापती vकः कृतवान् एकोदरे सहवासित्वात्। vअस्य प्रजापतेः vव्रतानि कर्माणि vनकिः vप्र vमिनन्ति न केचित् प्रहिंसन्ति। न लोपयन्तीत्यर्थः। अतः कारणाद्गर्भावस्थायामेवावयोः प्रजापतिकृते दंपतित्वे सति संभोगं कुर्वित्यर्थः। अपि च vनौ आवयोः vअस्य इदं मातुरुदरे सहवासजमितं दंपतित्वं vपृथिवी भूमिः vवेद जानाति। vउत अपि च vद्यौः द्युलोकोऽपि जानाति ॥ ॥ ६ ॥

को अस्य वेद प्रथमस्याह्नः क ईं ददर्श क इह प्र वोचत् ।
बृहन्मित्रस्य वरुणस्य धाम कद्ब्रव आहनो वीच्या नॄन् ॥ ६ ॥

कः। अस्य। वेद। प्रथमस्य। अह्नः। कः। ईम्। ददर्श। कः। इह। प्र। वोचत्।
बृहत्। मित्रस्य। वरुणस्य। धाम। कत्। ऊँ इति। ब्रवः। आहनः। वीच्या। नॄन् ॥६॥

---

१. ग-त-म-'नूनं' नास्ति। २. त-म१.२.४.६-'गन्धर्वः' नास्ति। ३. त-म६-धारयिता गन्धर्वः। ४. ग-बांधवं परमुत्कृष्टं।

vप्रथमस्याङ्गः संबन्धि vअस्य इदमन्योन्यसंगमनं vकः vवेद जानाति। प्रथमेऽहनि पत्निकयते तदनुमानमाश्रित्य न कश्चिदपि ज्ञातुं शक्नोतीत्यर्थः। vइह अस्मिन् प्रदेशे प्रत्यक्षतः vक vईम् इदं संगमनं vददर्श पश्यति vकः vप्र vवोचत् प्रख्यापयति। न कोऽपीत्यर्थः। vमित्रस्य vवरुणस्य मित्रावरुणयोः vबृहत् महत् vधाम स्थानमहोरात्रं यदस्ति तत्र vनॄन्[1] मनुष्यान् vपीड्या नरकेण हे vआहनः आहन्तमर्यादया हिंसितः। स्वकृतशुभाशुभकर्मापेक्षया मनुष्यादिप्राणिनां नरकपातेन स्वर्गप्रापणेन निग्रहानुग्रहयोः कर्तरित्यर्थः। एवंभूत हे यम त्वं vकदु vअवः किं वा ब्रवीषि॥

यमस्य मा यम्यं१ काम आ गन्त्समाने योनौ सहशेय्याय।
जायेव पत्ये तन्वं रिरिच्यां वि चिद्वृहेव रथ्येव चक्रा॥ ७॥

यमस्य। मा। यम्यम्। कामः। आ। अगन्। समाने। योनौ। सहऽशेय्याय।
जायाऽइव। पत्ये। तन्वम्। रिरिच्याम्। वि। चित्। वृहेव। रथ्याऽइव। चक्रा॥ ७॥

vयमस्य तव vकामः अभिलाषः vयम्यं यमीं vमा मां प्रति vआगन् आगच्छतु। ममोपरि तव यमस्य संभोगेच्छा जायतामित्यर्थः। किमर्थम्। vसमाने vयोनौ एकस्मिन् स्थाने शय्याख्ये vसहशेय्याय सहशयनार्थम्। तदनन्तरं पूर्णमनोरथा सती vजायेव vपत्ये यथा भार्या पत्युरर्थाय परया प्रीत्या विश्वस्ता सती रतिकामा स्वशरीरं प्रकाशयति एवं vतन्वम् आत्मीयं शरीरं vरिरिच्यां विविच्याम्। त्वदर्थं प्रकाशयेयमित्यर्थः। किंच। vचित् इति पूरणः। vवि vवृहेव। 'वृहू उद्यमने'। धर्मार्थकामान् विविधमुद्यच्छावः। तत्र दृष्टान्तः। vरथ्येव vचक्रा। रथस्यावयवभूते चक्रे यथा रथमुद्यच्छतस्तद्वत्[2]॥

न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति।
अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा॥ ८॥

न। तिष्ठन्ति। न। नि। मिषन्ति। एते। देवानाम्। स्पशः। इह। ये। चरन्ति।
अन्येन। मत्। आहनः। याहि। तूयम्। तेन। वि। वृह। रथ्याऽइव। चक्रा॥ ८॥

यम्या प्रत्यातो यमः पुनराह। vइह अस्मिँल्लोके vदेवानां संबन्धिनः vये vस्पशः अहोरात्रावयवद्वारा vचरन्ति सर्वेषां शुभाशुभलक्षणकर्मप्रत्यवेक्षणार्थं परिभ्रमन्ति vएते चाराः क्षणमात्रमपि चरणव्यापाररहिताः vन vतिष्ठन्ति। vन vनि vमिषन्ति मेषणं[3] न कुर्वन्ति। शुभमशुभं वा यः करोति तं निरीक्षन्ते चेत्यर्थः। हे vआहनः ममापहन्त्रि असह्यभाषणेन दुःखयित्रि त्वं vमत् मत्तः vअन्येन स्वत्सदृशेन सह vतूयं क्षिप्रं vयाहि संगच्छ। गत्वा च vतेन vवि vवृह धर्मार्थकामानुद्यच्छ। तत्र दृष्टान्तः। vरथ्येव vचक्रा। यथा रथावयवभूते चक्रे रथमुद्यच्छतस्तद्वत्॥

रात्रीभिरस्मा अहभिर्दशस्येत् सूर्यस्य चक्षुर्मुहुरुन्मिमीयात्।
दिवा पृथिव्या मिथुना सबन्धू यमीर्यमस्य विमृयादजामि॥ ९॥

रात्रीभिः। अस्मै। अहऽभिः। दशस्येत्। सूर्यस्य। चक्षुः। मुहुः। उत्। मिमीयात्।
दिवा। पृथिव्या। मिथुना। सबन्धू इति सऽबन्धू। यमीः। यमस्य। विमृयात्। अजामि॥९॥

---

१. त-म६-त्रीन्। २. त-म६-°मुद्यतस्तद्वत्। ३. म-त४-म६-निमेषणं।

vरात्रिभिः vअहभिः अहोरात्रयोः vअस्मै यमाय कल्पितं भागं सर्वो यजमानः vदक्षस्येव प्रयच्छतु। vसूर्यस्य संबन्धि vचक्षुः तेजः vमुहुः मुहुः अस्मै यमाय vउन्मिमीयात् उदेतु। vदिवा vपृथिव्या वावापृथिवीभ्यां सह vमिथुना मिथुनौ vसबन्धू समानबन्धू अहोरात्रे अस्मै यमाय[1]। एतज्ज्ञात्वा इयं vयमीः vयमस्य vअजामि अभ्रातरं vविभृयात् धारयतु। यत्नेन परिगृह्णात्वित्यर्थः ॥

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि।
उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् ॥ १० ॥

आ। घ। ता। गच्छान्। उत्ऽतरा। युगानि। यत्र। जामयः। कृणवन्। अजामि।
उप। बर्बृहि। वृषभाय। बाहुम्। अन्यम्। इच्छस्व। सुऽभगे। पतिम्। मत् ॥ १० ॥

vयत्र येषु कालेषु vजामयः भगिन्यः vअजामि अभ्रातरं पतिं vकृणवन् करिष्यन्ति vता तानि vउत्तरा उत्तराणि vयुगानि कालविशेषाः vआ vगच्छान् आगमिष्यन्ति। vघ इति पूरणः। यस्मादेवं तस्मात्हे vसुभगे शोभनभगे त्वमिदानीं vमत् मत्तः vअन्यं vपतिं भर्तारम् vइच्छस्व कामयस्व। तदनन्तरं vवृषभाय तव योनौ रेतः सेक्त्रे पुरुषाय आत्मीयं vबाहुम् vउप vबर्बृहि। शयनकाले उपबर्हणं कुरु ॥ ॥ ७ ॥

किं भ्रातासद्यदनाथं भवाति किमु स्वसा यन्निर्ऋतिर्निगच्छात्।
काममूता बह्वेतद्रपामि तन्वा मे तन्वं सं पिपृग्धि ॥ ११ ॥

किम्। भ्राता। असत्। यत्। अनाथम्। भवाति।
किम्। ऊँ इति। स्वसा। यत्। निःऽऋतिः। निऽगच्छात्।
कामऽमूता। बह्वा। एतत्। रपामि। तन्वा। मे। तन्वम्। सम्। पिपृग्धि ॥ ११ ॥

यमी यमेन प्रत्याख्याता पुनराह। vयत् यस्मिन् भ्रातरि सति स्वस्रादिकम् vअनाथं नाथरहितं भवति सः vभ्राता vकिम् vअसत् किं भवति। न भवतीत्यर्थः। किंच यस्यां भगिन्यां सत्यां भ्रातरं vनिर्ऋतिः दुःखं vनिगच्छात् नियमेन गच्छति प्राप्नोति सा vस्वसा vकिमु किं वा भवति। भ्रातृभगिन्योश्च परस्परं प्रीतिर्येन केनचिदुपायेनावश्यं कार्येत्यभिप्रायः। साहं vकाममूता कामेन मूर्च्छिता सती vबहु नानाप्रकारम् vएतत् ईदृशमुक्तं वक्ष्यमाणं च vरपामि प्रलपामि। एतज्ज्ञात्वा vमे मम vतन्वा शरीरेण vतन्वं शरीरं vसं vपिपृग्धि संपर्चय। संभोगेन संश्लेषय। मां सम्यग्भुङ्क्ष्वेत्यर्थः ॥

न वा उ ते तन्वा तन्वं सं पपृच्यां पापमाहुर्यः स्वसारं निगच्छात्।
अन्येन मत्प्रमुदः कल्पयस्व न ते भ्राता सुभगे वष्ट्येतत् ॥ १२ ॥

न। वै। ऊँ इति। ते। तन्वा। तन्वम्। सम्। पपृच्याम्। पापम्। आहुः। यः। स्वसारम्। निऽगच्छात्।
अन्येन। मत्। प्रऽमुदः। कल्पयस्व। न। ते। भ्राता। सुऽभगे। वष्टि। एतत् ॥ १२ ॥

यमी यमीं प्रत्युक्तवान्। हे यमि vते तव vतन्वा शरीरेण vतन्वम् आत्मीयं शरीरं vन vवै vसं vपपृच्यां नैव संपर्चयामि। नैवाहं त्वां संभोक्तुमिच्छामीत्यर्थः। vयः भ्राता vस्वसारं भगिनीं

---

१. ग-त४-अ१.४—यमाय वहेतां; अ२—यमाय वहंता।

vनिगच्छात् नियमेनोपगच्छति । संभुङ्क्ते इत्यर्थः । तं vपापं पापकारिणम् vआहुः । शिष्टा वदन्ति । एतज्ज्ञात्वा हे vसुभगे सुष्ठु भजनीये हे यमि त्वं vमत् मत्तः vअन्येन त्वद्योग्येन पुरुषेण सह vप्रमुदः संभोगलक्षणान् प्रहर्षान् vकल्पयस्व समर्थय । vते तव vभ्राता यमः vएतत् ईदृशं त्वया सह मैथुनं कर्तुं vन vवष्टि न कामयते । नेच्छति ॥

बृतो बतासि यम नैव ते मनो हृदयं चाविदाम ।
अन्या किल त्वां कक्ष्येव युक्तं परि ष्वजाते लिबुजेव वृक्षम् ॥ १३ ॥

बृतः । बत । असि । यम । न । एव । ते । मनः । हृदयम् । च । अविदाम ।
अन्या । किल । त्वाम् । कक्ष्याऽइव । युक्तम् । परि । स्वजाते । लिबुजाऽइव । वृक्षम् ॥१३॥

यमी प्रत्युवाच । हे vयम त्वं vबतः दुर्बलः vअसि । vबत इति निपातः खेदानुकम्पयोः । अनुकम्प्यश्चासि । vते त्वदीयं vमनः मनोगतं संकल्पं vहृदयं vच बुद्धिगतमध्यवसायं च vनैव vअविदाम वयं न जानीम एव । मत्तः vअन्या काचित् स्त्री vत्वां vपरि vष्वजाते vकिल । तत्र दृष्टान्तद्वयमुच्यते । vकक्ष्येव vयुक्तम् । यथा कक्ष्या रज्जुर्युक्तमात्मना संबद्धमश्वं परिष्वजते[1] तद्वत् । vलिबुजेव vवृक्षम् । यथा लिबुजा अतितिगांढं वृक्षं परिष्वजते तद्वच । अन्यस्यां स्त्रियामासक्तस्त्वं मां परिष्वक्तुं[2] नेच्छसीत्यर्थः ॥

अन्यमू षु त्वं यम्यन्य उ त्वां परि ष्वजाते लिबुजेव वृक्षम् ।
तस्यं वा त्वं मन इच्छा स वा तवाधा कृणुष्व संविदं सुभद्राम् ॥ १४ ॥

अन्यम् । ऊँ इति । सु । त्वम् । यमि । अन्यः । ऊँ इति । त्वाम् । परि । स्वजाते । लिबुजाऽइव । वृक्षम् ।
तस्य । वा । त्वम् । मनः । इच्छ । सः । वा । तव । अध । कृणुष्व । सम्ऽविदम् । सुऽभद्राम् ॥१४॥

यमः पुनरप्याह । हे vयमि vत्वम् vअन्यमु अन्यं पुरुषमेव vसु सुष्ठु परिष्वज । vअन्य vउ अन्योऽपि पुरुषः vत्वां vपरि vष्वजाते । तत्र दृष्टान्तः । vलिबुजेव vवृक्षम् । यथा वल्ली गाढं वृक्षं परिष्वजते तद्वत् । तथा सति । वाशब्दः समुच्चये । vःत्वं vतस्य च पुरुषस्य vमनः vइच्छ कामय । तस्य त्वं वशवर्तिनी भवेत्यर्थः । vसः च पुरुषः vतव मन इच्छतु । vअध अथ परस्परवशवर्तित्वानन्तरं त्वं तेन सह vसुभद्रां सुकल्याणीं vसंविदं परस्परसंभोगसुखसंवित्तिं vकृणुष्व कुरुष्व ॥ ॥८॥

'वृषा' इति नवर्चमेकादशं सूक्तमाग्नेयैर्विधानस्यार्धमाग्नेयम्[3] । सप्तम्याद्यास्तिसृभिष्टुभः शिष्टा जगत्यः । तथा चानुक्रान्तं—'वृषा नवाग्नेयैर्विधान आग्नेयं तु त्रिष्टुबन्तम्' इति । गतः सूक्तविनियोगः ॥

वृषा वृष्णे दुदुहे दोहसा दिवः पयांसि यह्वो अदितेरदाभ्यः ।
विश्वं स वेद वरुणो यथा धिया स यज्ञियो यजतु यज्ञियाँ ऋतून् ॥ १ ॥

वृषा । वृष्णे । दुदुहे । दोहसा । दिवः । पयांसि । यह्वः । अदितेः । अदाभ्यः ।
विश्वम् । सः । वेद । वरुणः । यथा । धिया । सः । यज्ञियः । यजतु । यज्ञियान् । ऋतून् ॥१॥

---

१. त–परिष्वजाते । २. त-भ-मु–परिष्वक्तुं । ३. ग-त-भ–सूक्तमाग्नेयैर्विधान° ।

ᵛवृषा आहुतिर्द्वारेण वृष्टेर्वर्षिता[1] ᵛयद्वः महान् ᵛअदाभ्यः केनाप्यहिंस्योऽग्निः ᵛअधिर्वेः अक्षीण्यागक्रियस्य ᵛवृष्णः यज्ञद्वारेण स्तुतीनां इषिता वा वर्षितुर्यजमानस्यार्थाय ᵛदोहसा दोहनेन महता प्रक्षारणेन ᵛदिवः सकाशात् ᵛपयांसि वृष्टिलक्षणान्युदकानि ᵛदुदुहे दोग्धि प्रक्षारयति । किंच ᵛयया ᵛवरुणः आदित्यः ᵛधिया आत्मानुरूपया प्रज्ञया ᵛविश्वं सर्वं ᵛवेद जानाति तथा ᵛसः अयमग्निः जानातीत्यर्थः । ᵛयज्ञियः यज्ञार्हः ᵛसः अग्निः ᵛयज्ञियान् यज्ञार्हान् ᵛऋतून् ᵛयजतु पूजयतु ॥

रपद्गन्धर्वीरप्या च योषणा नदस्य नादे परि पातु मे मनः ।
इष्टस्य मध्ये अदितिर्नि धातु नो भ्राता नो ज्येष्ठः प्रथमो वि वोचति ॥२॥

रपत् । गन्धर्वीः । अप्याः । च । योषणा । नदस्य । नादे । परि । पातु । मे । मनः । इष्टस्य । मध्ये । अदितिः । नि । धातु । नः । भ्राता । नः । ज्येष्ठः । प्रथमः । वि । वोचति॥२॥

ᵛरपत् रपितवत्यग्निगुणानुक्तवती ᵛगन्धर्वीः गन्धर्वस्य स्त्री ᵛअप्या अग्निः संस्कृता ᵛयोषणा आहुतिलक्षणा स्त्री ᵛच । अग्निं तर्पितवतीति शेषः । ᵛनदस्य । स्तोतृनामैतत् । स्तोतुः ᵛमे मम स्वभूतं ᵛमनः ᵛनादे स्तुतिलक्षणे शब्दे ᵛपरि ᵛपातु अग्निः सम्यग्रक्षतु । अहं समाहितमना भूत्वा सम्यक् स्तुतिं करोमीत्यर्थः । किंच ᵛअदितिः अखण्डनीयोऽग्निः ᵛनः अस्मान् ᵛइष्टस्य यागस्य ᵛमध्ये ᵛनि ᵛधातु निदधातु नितरां स्थापयतु । ᵛप्रथमः सर्वेषां यजमानानां मुख्यः ᵛनः अस्माकं ᵛज्येष्ठः ᵛभ्राता ᵛवि ᵛवोचति विशेषेण ब्रवीति । स्तौतीत्यर्थः । नाहमेव केवलो यजनशीलः किंतु सर्वं एवास्मत्कुलीनो देवयागप्रिय इत्यर्थः ॥

सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवे स्वर्वती।
यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन् ॥ ३ ॥

सो इति । चित् । नु । भद्रा । क्षुऽमती । यशस्वती । उषाः । उवास । मनवे । स्वःऽवती । यत् । ईम् । उशन्तम् । उशताम् । अनु । क्रतुम् । अग्निम् । होतारम् । विदथाय । जीजनन् ॥३॥

ᵛभद्रा भजनीया ᵛक्षुमती शब्दवती ᵛयशस्वती अन्नवती कीर्तिमती वा ᵛसो ᵛचित् सैव प्रसिद्धा ᵛउषाः ᵛमनवे मनुष्याय यजमानाय ᵛस्वर्वती आदित्यवती सती ᵛनु क्षिप्रम् ᵛउवास उषितवती[2] । उदितवतीत्यर्थः[2]। कदोदितवती इत्युच्यते । ᵛयत् यदा ᵛउशन्तं स्तुतिं इच्छन्तं कामयमानम् ᵛउशतां यष्टुं[3] कामयमानानां[4] संबन्धिनं ᵛहोतारं देवानामाह्वातारं होमनिष्पादकं वा ᵛईम् एनम् ᵛअग्निम् ᵛअनु ᵛक्रतुं स्तुतिकर्मणः पश्चात् ᵛविदथाय यजनीयाय यज्ञार्थं ᵛजीजनन्[5]। ऋत्विग्यजमाना जनयन्तीत्यर्थः । तदोदितवतीति संबन्धः ॥

अध त्यं दृप्सं विभ्वं विचक्षणं विराभरदिषितः श्येनो अध्वरे ।
यदी विशो वृणते दस्ममार्यो अग्निं होतारमध धीरजायत ॥ ४ ॥

अध । त्यम् । दृप्सम् । विऽभ्वम् । विऽचक्षणम् । विः । आ । अभरत् । इषितः । श्येनः । अध्वरे । यदि । विशः । वृणते । दस्मम् । आर्यः । अग्निम् । होतारम् । अध । धीः । अजायत ॥४॥

---

१. त-म६–वर्षिता । २. त-म६–उषितवतीत्यर्थः । ३. त-म६–शब्दं । ४. त१-म२.५–कामयमानानां यजमानानां । ५. म-त३-म५–जीजनम् अजीजनन् ।

vअथ अथ अनन्तरं vश्येनः श्येनाख्यः vविः[1] पक्षी vअध्वरे यागे vहूयितः अग्निप्रेषितः vविभ्वं महान्तं vविचक्षणं सर्वस्य विशेषेण द्रष्टारं vरथं तं प्रसिद्धं vद्रप्सं नात्यल्पं नातिबहुलं सोमम् vआभरत् आहृतवान्। अपि च vयदि यदा vआर्याः अभिगमनीयं तं व्रजन्तः vविशः यजमाना मनुष्याः vदस्मं दर्शनीयं शत्रूणामुपक्षपयितारं वा vहोतारम् vअग्निं vवृणते प्रार्थयन्ते vअध तदा vधीः यागादिक्रिया vअजायत। यज्वभिः प्रतायत इत्यर्थः ॥

सदासि रण्वो यवसेव पुष्यते होत्राभिरग्ने मनुषः स्वध्वरः ।
विप्रस्य वा यच्छशमान उक्थ्यं१ वाजं ससवाँ उपयासि भूरिभिः ॥ ५ ॥

सदा । असि । रण्वः । यवसाऽइव । पुष्यते । होत्राभिः । अग्ने । मनुषः । सुऽअध्वरः ।
विप्रस्य । वा । यत् । शशमानः । उक्थ्यम् । वाजम् । ससऽवान् । उपऽयासि । भूरिऽभिः॥५॥

हे vअग्ने त्वं[2] vसदा सततं vरण्वः vअसि रमणीयो भवसि[3]। तत्र दृष्टान्तः । vयवसेव vपुष्यते । यथा यवसानि तृणानि स्वपुष्टिं कुर्वते हस्त्यश्वगोमहिषादिचतुष्पदाय सर्वदा रमणीयानि भवन्ति तद्वत्। अपि च हे अग्ने vमनुषः मनुष्यस्य स्वभूतैः vहोत्राभिः । होत्रेति यज्ञनामैतत्। यज्ञैः vस्वध्वरः शोभनयज्ञो भवेति शेषः । vविप्रस्य vवा स्तोतुर्वा vयत् यस्य यजमानस्य वा स्वभूतम् vउक्थ्यं स्तोत्रं vशशमानः प्रशंसन् vवाजं हविर्लक्षणमन्नं vससवान् संभजमानश्च vभूरिभिः[4] बहुभिर्देवैः सह vउपयासि उपगच्छसि ॥ ॥ ९ ॥

उदीरय पितरा जार आ भगमियक्षति हर्यतो हृत्त इष्यति ।
विवक्ति वह्निः स्वपस्यते मखस्तविष्यते असुरो वेपते मती ॥ ६ ॥

उत् । ईरय । पितरा । जारः । आ । भगम् । इयक्षति । हर्यतः । हृत्तः । इष्यति ।
विवक्ति । वह्निः । सुऽअपस्यते । मखः । तविष्यते । असुरः । वेपते । मती ॥ ६ ॥

हे अग्ने त्वदीयं ज्योतिः vपितरा पितरौ सर्वप्राणिनां मातापितृभूते द्यावापृथिव्यौ प्रति vउदीरय उद्गमय। तत्र दृष्टान्तः । आकार उपमार्थे। रात्रेर्नक्षत्रादिदीप्तीनां च जरयितृत्वात् vजारः आदित्यः । स यथा द्यावापृथिव्यौ प्रति vभगं भजनीयं स्वीयं ज्योतिरुद्गमयति तद्वत्। vहर्यतः यागं कामयमानान् प्रति vइयक्षति यजमानो यष्टुमिच्छति। vहृत्तः हृदयेन[5] च[5] vइष्यति। इषिरयं गत्यर्थः शुद्धोऽप्युपसर्गपूर्वो द्रष्टव्यः। अधीष्यति देवान् यष्टुमधिगच्छति। vविवक्ति विवक्षति। शब्दलक्षणाः स्तुतीर्वक्तुमिच्छति च। vवह्निः वोढा स्तुतीनां देवान् प्रति प्रापयिता होता च vस्वपस्यते शोभनमात्मीयं कर्म कर्तुमिच्छति। vमखः। यज्ञनामैतत्। अत्र तत्प्रयोक्ताध्वर्युरुच्यते। स च vतविष्यते। तविषिर्वृद्ध्यर्थः। स चात्रान्तर्णीतसनर्थश्च द्रष्टव्यः। तुतुविषति स्तोत्रलक्षणाः स्तुतीर्वर्धयितुमिच्छतीत्यर्थः। vअसुरः प्राणवान् प्रज्ञावान् वा। ब्रूयेति शेषः। vमती मत्या बुद्ध्या vवेपते। कर्मवैगुण्यात् विस्रवत् कम्पते। हे अग्ने यतो यजमानः सर्वर्त्विजश्च स्वस्वकर्म[6] कर्तुं त्वामागच्छन्ति अतस्त्वं शीघ्रमुद्गमयेत्यर्थः॥

यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे ।
इषं दधानो वहमानो अश्वैरा स द्युमाँ अमवान्भूषति द्यून् ॥ ७ ॥

---

१. ग–कश्चित् । २. त-भ६–'त्वं' नास्ति । ३. त-भ६–असि । ४. ग–त्वं भूरिभिः । ५. त-भ६-मु–हृदयेनैव । ६. त-मु–स्वकर्म ।

यः । ते । अग्ने । सुऽमतिम् । मर्तः । अक्षत् । सहसः । सूनो इति । अति । सः । प्र । शृण्वे । इषम् । दधानः । वर्हमानः । अर्वैः । आ । सः । युऽमान् । अमऽवान् । भूषति । द्यून् ॥७॥

हे [v]सहसः [v]सूनो बलस्य पुत्र [v]अग्ने [v]ते त्वदीयां [v]सुमतिं शोभनामनुग्राहिकां बुद्धिं [v]यः[1] [v]मर्तः मनुष्यो यजमानः [v]अक्षत् अश्नुते। अनुग्रहशीलं त्वां स्तुतिभिर्हविर्भिश्च परिचरतीत्यर्थः। [v]सः यजमानः [v]अति [v]प्र [v]शृण्वे सर्वेभ्यो लोकान्तरीत्य प्रकर्षेण श्रूयते। प्रख्यातो भवतीत्यर्थः। कीदृशः। [v]इषम् अन्नं [v]दधानः अस्मिभ्यः प्रयच्छन् [v]अर्वैः [v]वर्हमानः[2]। किंच [v]सः एव [v]युऽमान् दीप्तिमान् शरीरपतनानन्तरं पुरुत्थानवान् वा [v]अमवान् बलवान् [v]आ [v]द्यून्। द्युरित्यहर्नाम। 'कालाध्वनोरत्यन्तसंयोगे' इत्येषा द्वितीया। आदित्यकर्तृकाण्यहानि। आचन्द्रार्कमित्यर्थः। [v]भूषति भवति ॥

महाव्रते संस्थिते मरुत्वतीये 'यदग्न एषा' इत्यनया चतुर्गृहीतमाज्यं जुहुयात्। तथैव पञ्चमारण्यके[3] सूत्रितं—'यदग्न एषा समितिर्भवाति' (ऐ. आ. ५. १. १) इति[3] ॥

यदग्न एषा समितिर्भवाति देवी देवेषु यजता यजत्र ।
रत्ना च यद्विभजासि स्वधावो भागं नो अत्र वसुमन्तं वीतात् ॥ ८ ॥

यत् । अग्ने । एषा । सम्ऽइतिः । भवाति । देवी । देवेषु । यजता । यजत्र ।
रत्ना । च । यत् । विऽभजासि । स्वधाऽवः । भागम् । नः । अत्र । वसुऽमन्तम् । वीतात् ॥८॥

हे [v]यजत्र यष्टव्य [v]अग्ने [v]यत् यदा [v]एषा [v]समितिः अस्मत्कर्तृका स्तुतिसंहतिः[4] [v]यजता यजतेषु यष्टव्येषु [v]देवेषु मध्ये [v]देवी द्योतमाना [v]भवाति। यष्टव्या देवा अस्माभिः स्तूयन्त इज्यन्त इत्यर्थः। हे [v]स्वधावः हविर्लक्षणान्नवन्नग्ने त्वं [v]यत् यदा [v]रत्ना [v]च रत्नानि रमणीयानि धनानि स्तोतृभ्यो यष्टृभ्यश्च [v]विभजासि विभजसि [v]अत्र तदानीं तथा [v]नः अस्मान् प्रति [v]वसुमन्तं धनवन्तं नानाधनावयवसूतं [v]भागम् अंशं [v]वीतात्। वी[5] गत्यादिषु[5]। 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' (पा. सू. ७. १. ३५) इति हेः स्थाने तातङ्। अन्तर्णीतण्यर्थश्चात्र द्रष्टव्यः। वयय आगमश्च। अस्मभ्यं प्रयच्छेत्यर्थः ॥

श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथमृतस्य द्रवित्नुम् ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥ ९ ॥

श्रुधि । नः । अग्ने । सदने । सधऽस्थे । युक्ष्व । रथम् । अमृतस्य । द्रवित्नुम् ।
आ । नः । वह । रोदसी इति । देवपुत्रे इति देवऽपुत्रे । माकिः । देवानाम् । अप । भूः । इह । स्याः ॥९॥

हे [v]अग्ने [v]सधस्थे सहस्थाने सर्वदेवतासाधारणे[6] [v]सदने यज्ञगृहे स्थितः सन् [v]नः अस्मदीयं वचनं [v]श्रुधि शृणु। किं तद्वचनम् उच्यते। [v]अमृतस्य देवपानस्य मधुनः [v]द्रवित्नुं द्रावकं [v]रथम् आत्मीयं [v]युक्ष्व। आह्वानार्थं देवान् प्रति गमनाय अश्वैः संयुक्ष्व। संयुक्तेन रथेन गत्वा [v]नः अस्माकं

---

१. त-म-मु-'यः' नास्ति । २. ग-त३-म५-कृहमानः । उह्यमानः । ३. त-भ१.२.४-पंचमारण्यके; भ६-पंचमारण्यके यदग्न एषा समितिर्भवातीत्यत्र विभजाय वीयेति । ४. त-स्तुतिमंहतिश्च; भ१.२.४-स्तुतिसंहितत्वं; भ६-स्तुतिर्मंहतिश्च; मु-स्तुतिः संहतिश्च । ५. त१.२.६-भ१-'वी गत्यादिषु' नास्ति; त३.४.५-भ२.४-पुस्तकेषु 'वी गत्यादिषु' इत्यस्य स्थाने क्रियार्थिदवकाशो विद्यते; भ६-भक्षयतु । ६. त-सर्वदेवताधारणे ।

यज्ञं प्रति vदेवपुत्रे देवस्य प्रजापतेर्दुहितरौ । यद्वा[1] देवाः पुत्रा वयोस्ते । vरोदसी[2] द्यावापृथिव्यौ vआ vवह प्रापय । vदेवानां मध्ये कञ्चिदेवः vअप vभूः अपभवितास्मद्यज्ञादपगन्ता vमाकिः स्यात् । त्वं च vइह अस्मिन् यज्ञे vस्याः संनिहितो भव ॥ ॥ १० ॥

' द्यावा ' इति नवर्चं द्वादशं सूक्तमाग्नेयैर्विधानस्यार्थे[3] त्रैष्टुभमाग्नेयम् । ' द्यावा ' इत्यनुक्रान्तम् । गतो विनियोगः ॥

द्यावा॑ ह॒ क्षामा॑ प्रथ॒मे ऋ॒तेना॒भिश्रा॑वे भवतः सत्य॒वाचा॑ ।
दे॒वो यन्मर्ता॑न्य॒जथा॑य कृ॒ण्वन्त्सीद॒द्धोता॑ प्र॒त्यङ् स्वमसु॑ं यन् ॥ १ ॥

द्यावा॑ । ह॒ । क्षामा॑ । प्र॒थ॒मे इति॑ । ऋ॒तेन॑ । अ॒भि॒ऽश्रा॒वे । भ॒व॒तः॒ । स॒त्य॒ऽवाचा॑ ।
दे॒वः । यत् । मर्ता॑न् । य॒जथा॑य । कृ॒ण्वन् । सीद॑त् । होता॑ । प्र॒त्यङ् । स्वम् । असु॑म् । यन् ॥१॥

vसत्यवाचा सत्यवादिन्यौ vप्रथमे प्रधानभूते vद्यावा vक्षामा शुक्षामे द्यावापृथिव्यौ vऋतेन सत्यभूतेन देवयजनेन सह vअभिश्रावे। आभिमुख्येन श्रूयत इत्यभिश्राव आह्वानम्। तस्मिन् अस्मद्यज्ञनिमित्तेऽग्नेः संबन्धिन्याह्वाने vभवतः । लोडर्थे लट्। भवताम्। vयत् यदा vदेवः द्योतमानोऽग्निः vयजथाय यज्ञाय vमर्तान् मनुष्यान् vकृण्वन् प्रेरयन् vप्रत्यङ् आह्वानार्थं देवानां प्रत्यञ्चिता vस्वम् vअसुम् आत्मीयं ज्वालालक्षणं प्राणं vयन् प्राप्नुवन् vहोता देवानामाह्वाता vसीदत् वेद्यां निषीदति । तदास्मद्यागकाले द्यावापृथिवी प्रमुखोऽग्निः[4] आह्वयत्वित्यर्थः ॥

दे॒वो दे॒वान्प॑रि॒भूर्ऋ॒तेन॒ वहा॑ नो ह॒व्यं प्र॑थ॒मश्चि॑कि॒त्वान् ।
धू॒मके॑तुः स॒मिधा॒ भाऋ॑जीको म॒न्द्रो होता॒ नित्यो॒ वाचा॑ यजी॒यान् ॥ २ ॥

दे॒वः । दे॒वान् । प॒रि॒ऽभूः । ऋ॒तेन॑ । वह॑ । नः॒ । ह॒व्यम् । प्र॒थ॒मः । चि॒कि॒त्वान् ।
धू॒मऽके॑तुः । स॒म्ऽइधा॑ । भाः॒ऽऋ॑जीकः । म॒न्द्रः । होता॑ । नित्यः॑ । वाचा॑ । य॒जी॒यान् ॥२॥

vदेवः द्योतमानोऽग्निस्त्वं vदेवान् इन्द्रादीन् vपरिभूः आह्वानहविर्नयनद्वारेण परिभूः परिगृह्णन्[5] vऋतेन यज्ञेन सह vनः अस्माकं vहव्यं हविः vवह प्रापय । कीदृशस्त्वम् । vप्रथमः देवानां मुख्यः vचिकित्वान् सर्वं जानन् vधूमकेतुः धूमस्य कर्ता वा धूमध्वजो वा धूमप्रज्ञानो वा vसमिधा समिध्यनेन संदीपनेन vभाऋजीकः ऋजुदीप्तिः। ऊर्ध्वज्वलन इत्यर्थः। vमन्द्रः स्तुत्यः vहोता आह्वाता vनित्यः ध्रुवः vवाचा vयजीयान् अतिशयेन यष्टा च ॥

स्वा॑वृ॒ग्दे॒वस्या॒मृतं॒ यदी॒ गोरतो॑ जा॒तासो॑ धारयन्त उ॒र्वी ।
विश्वे॑ दे॒वा अनु॒ तत्ते॒ यजु॑र्गु॒र्दुहे॒ यदे॑नी॒ दि॒व्यं घृ॒तं वाः ॥ ३ ॥

स्वा॒वृ॒क् । दे॒वस्य॑ । अ॒मृत॑म् । यदि॑ । गोः । अतः॑ । जा॒तासः॑ । धा॒र॒य॒न्ते॒ । उ॒र्वी इति॑ ।
विश्वे॑ । दे॒वाः । अनु॑ । तत् । ते॒ । यजुः॑ । गुः॒ । दुहे॑ । यत् । एनी॑ । दि॒व्यम् । घृ॒तम् । वारिति॒ वाः॥३॥

---

१. त–' यद्वा ' नास्ति । २. त–' रोदसी ' नास्ति । ३. ग-त-भ–सूक्तमाग्नेयैर्वि° । ४. म१–प्रमुखोनग्निः; म४.६–प्रमुखानग्निः; म७–प्रमुखाग्नि । ५. त-भ२.६–परिगृहन्; म१.४–परिगृ; म७–परिभूः ।

vदेवस्य अग्नेः vस्वावृक् स्वार्जनम् vअमृतम् उदकं स्वतेजसः सकाशात् vयदि वर्धोत्पद्यते तदा vअतः अस्मात् vगोः उदकात् vजातासः उत्पन्ना ओषधयः vउर्वी द्यावापृथिव्यौ धारयन्ति। vविश्वे vदेवाः सर्वे स्तोतारः vते तव संबन्धि vतत् vयजुः उदकस्य तद्दानम् vअनु vगुः अनुगायन्ति। vएनी शेता दीप्तिः vदिव्यं दिवि भवं vघृतं क्षरत्[1] vयत् vवाः वृष्टिलक्षणं यदुदकं vदुहे दोग्धि ॥

अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे ।
अहा यद् द्यावोऽसुनीतिमयन्मध्वा नो अत्र पितरा शिशीताम् ॥ ४ ॥

अर्चामि । वाम् । वर्धाय । अपः । घृतस्नू इति घृतऽस्नू । द्यावाभूमी इति । शृणुतम् । रोदसी इति । मे । अहा । यत् । द्यावः । असुऽनीतिम् । अयन् । मध्वा । नः । अत्र । पितरा । शिशीताम् ॥४॥

हे अग्ने त्वम् vअपः मदीयं यज्ञरूपं कर्म vवर्धाय । प्रोत्सर्पिते सति हे vघृतस्नू वृष्ट्युदकस्य प्रसवित्र्यौ हे vद्यावाभूमी द्यावापृथिव्यौ vवां युवाम् vअर्चामि । 'ऋच स्तुतौ' । स्तौमि । हे vरोदसी द्यावापृथिव्यौ युवां vमे मदीयं स्तोत्रं vशृणुतम् । vयत् यस्मिन् vअहा । अहःशब्दसामर्थ्यादहोरात्रसाध्यं कर्मोच्यते । 'सुपां सुलुक्' इति सप्तम्येकवचनस्याजादेशः । अहनि अहोरात्रसाध्यकर्मणि vद्यावः स्तोतारः vअसुनीतिम् । असुः प्रज्ञा । तया नीयत इत्यसुनीतिः स्तुतिः । ताम् vअयन् गच्छन्ति vअत्र अस्मिन् कर्मणि vपितरा सर्वस्य मातापितृभूते द्यावापृथिव्यौ vनः अस्मान् वृष्ट्युदकेन vशिशीताम् । स्नानपानादिना संस्कुरुताम् ॥

किं स्विन्नो राजा जगृहे कदस्यातिं व्रतं चकृमा को वि वेद ।
मित्रश्चिद्धि ष्मा जुहुराणो देवाञ्छ्लोको न यातामपि वाजो अस्ति ॥ ५ ॥

किम् । स्वित् । नः । राजा । जगृहे । कत् । अस्य । अतिं । व्रतम् । चकृम । कः । वि । वेद । मित्रः । चित् । हि । स्म । जुहुराणः । देवान् । श्लोकः । न । यातम् । अपि । वाजः । अस्ति ॥५॥

किंस्विच्छब्दो वितर्कार्थे । किंवा[2] vराजा दीप्यमानोऽग्निः vनः अस्माकं स्वभूतानि हवींषि स्तुतीश्च vजगृहे परिगृह्णीयात् किंवा vअस्य अग्नेः vअतिं vव्रतम् अतिपूजितं परिचरणाख्यं कर्म vचकृम वयं क्रियास्म । कर्मवैगुण्यान्नीतस्य पूर्वार्धं एतद्वचनमुक्तम् । उत्तरार्धं इदानीं तन्निराक्रियते । vहि vस्म इतीमौ पूरणौ । vचित् इत्युपमार्थे । vजुहुराणः स्निग्धेनाहूयमानः vमित्रः स्निग्धो यथा गच्छेत् तथा । vन इति संप्रत्यर्थे । vश्लोकः अस्मदीया स्तुतिलक्षणा वाक् vदेवान् इन्द्रादीन् vयातां गच्छतु । vअपि vवाजः हविराख्यं चानं यत् vअस्ति तदपि देवान् प्रति गच्छतु । देवाः स्तुतिं हविश्च प्रतिगृह्णन्त्विवस्यर्थः ॥ ॥ ११ ॥

दुर्मन्त्वत्रामृतस्य नाम सलक्ष्मा यद्विषुरूपा भवाति ।
यमस्य यो मनवते सुमन्त्वग्ने तमृष्व पाह्यप्रयुच्छन् ॥ ६ ॥

दुःऽमन्तु । अत्र । अमृतस्य । नाम । सऽलक्ष्मा । यत् । विषुऽरूपा । भवाति ।
यमस्य । यः । मनवते । सुऽमन्तु । अग्ने । तम् । ऋष्व । पाहि । अप्रऽयुच्छन् ॥ ६ ॥*

---

१. त१.२.४.५.६ म१.६.७-जरयन्; त३.७-म२.४-जरयत्। २. ग-कत् किंवा। * ग-अत्रास्मिन् कर्मणि

यस्मिन्देवा विदथे मादयन्ते विवस्वतः सदने धारयन्ते ।
सूर्ये ज्योतिरदधुर्मास्य१क्तून्परि द्योतनिं चरतो अजस्रा ॥ ७ ॥

यस्मिन् । देवाः । विदथे । मादयन्ते । विवस्वतः । सदने । धारयन्ते ।
सूर्ये । ज्योतिः । अदधुः । मासि । अक्तून् । परि । द्योतनिम् । चरतः । अजस्रा ॥ ७ ॥

vयस्मिन् अग्नौ यज्ञस्य प्रधानांशे सति vदेवाः इन्द्रादयः vविदथे यज्ञे vमादयन्ते हविषा आत्मानं तर्पयन्ति तृप्यन्ति वा । अपि च vविवस्वतः मनुष्यस्य यजमानस्य स्वभूते vसदने वेद्याख्ये स्थाने vधारयन्ते आत्मानं स्थापयन्ति च । किंच vसूर्ये vज्योतिः अहराख्यं तेजः vअदधुः स्थापितवन्तः । vमासि चन्द्रमसि vअक्तून् रात्रीः स्थापितवन्तः । तदनन्तरम् vअजस्रा अनुपक्षीणौ सूर्याचन्द्रमसौ vद्योतनिं दीप्तिं vपरि vचरतः परिगच्छतः । सर्वत्र प्राप्नुतः ॥

यस्मिन्देवा मन्मनि संचरन्त्यपीच्ये३ न वयमस्य विद्म ।
मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् ॥ ८ ॥

यस्मिन् । देवाः । मन्मनि । सम्ऽचरन्ति । अपीच्ये । न । वयम् । अस्य । विद्म ।
मित्रः । नः । अत्र । अदितिः । अनागान् । सविता । देवः । वरुणाय । वोचत् ॥ ८ ॥

vदेवाः इन्द्रादयः vयस्मिन् अग्नौ vमन्मनि ज्ञानभूते ज्ञानवत्सर्वप्रकाशके सति vसंचरन्ति स्वाधिकारे संप्रवर्तन्ते[1] vअपीच्ये अन्तर्हिते स्थितमग्नेः स्वरूपं vवयं vन vविद्म तत्त्वतो न जानीमः । vअत्र अस्मिन् यज्ञेऽङ्गभावाय वर्तमानः vमित्रः vवरुणाय सर्वेषां पापानां निवारयित्रेऽग्नये vनः अस्मान् vअनागान् अपापान् vवोचत् ब्रवीतु । तथा vअदितिः देवमाता vसविता सर्वस्य प्रेरकः vदेवः च ब्रवीतु ॥

श्रुधी नो अग्ने सदने सधस्थे युक्ष्वा रथममृतस्य द्रविन्युम् ।
आ नो वह रोदसी देवपुत्रे माकिर्देवानामप भूरिह स्याः ॥ ९ ॥

श्रुधि । नः । अग्ने । सदने । सधऽस्थे । युक्ष्व । रथम् । अमृतस्य । द्रविन्युम् ।
आ । नः । वह । रोदसी इति । देवपुत्रे इति देवऽपुत्रे ।
माकिः । देवानाम् । अप । भूः । इह । स्याः ॥ ९ ॥

कृतेऽमृतस्य यमस्य नाम दुर्मतु दुर्वचनं भवति । यद्यस्मै सलक्ष्मा विषमरूपा भगिनी भार्या भवति । तत्तु न तथा इति यमं यः स्तौति सुवचनमस्य नामेति तं स्तोतारं दर्शनीयाग्ने अप्रयुच्छन् अप्रमाद्यन् रक्ष; त७-मु-यद्यस्य अमृतस्य मरणधर्मरहितस्य सूर्यस्य । अस्य मरणधर्माहित्यं तु सूर्ये विषमा सजामीत्यस्यां ऋचि प्रसिद्धं । तादृशस्य संबंधि नाम नामकमुदकं अत्र अस्यां पृथिव्यां विषुरूपा नानारूपं भवति भवति । उदकस्य नानारूपत्वं या आपो दिव्या इति मंत्रे स्फुटमुक्तं । कीदृशं तत् । दुर्मतु निरपराधं प्रह्वस्वभावत्वात् । पुनः कीदृशं । सलक्ष्मा मधुररसरूपलक्षणोपेतं (मु-°रसलक्षणोपेतं) । किंच यः सूर्यः यमस्य संयमिनोपतेः सुमंतु सुतरामपराधं मातृताडनरूपं मनवते अवबुध्यते सर्वज्ञत्वात् (मु-' सर्वज्ञत्वात् '-नास्ति) । यद्वा धातूनामनेकार्थत्वात् क्षमत इत्यर्थः । तं तादृशं जलजनकं सर्वज्ञं क्षमाशीलं सूर्यं हे ऋष्व महज्ञाने अप्रयुच्छन् अप्रमाद्यन् त्वं पाहि । आहुतिप्रदानेन रक्षणद्वारात्मरक्षणं प्रार्थयते ऋषिः । १. त-संवर्तते ।

'शुची नः' इत्येषा नवमी पूर्वसूक्ते व्याख्याता ॥ ॥ १२ ॥

'युजे वाम्' इति पञ्चर्चं त्रयोदशं सूक्तमदितेः पुत्रस्य विवस्वत आर्षम्। हविर्धानाख्ये द्वे शकटे तदेवत्यमिदम्। अन्त्या जगती शिष्टास्त्रिष्टुभः। तथा चानुक्रान्तं—'युजे पञ्च विवस्वानादित्यो हाविर्धानं[1] जगत्यन्तम्' इति। गतः सूक्तविनियोगः। हविर्धानप्रवर्तने 'युजे वाम्' इत्येका। सूत्रितं च—'अन्तरा वर्स्म पादथोर्युजे वां ब्रह्म पूर्व्यं नमोभिः' (आश्व. श्रौ. ४. ९) इति ॥

युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः ।
शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ॥ १ ॥

युजे । वाम् । ब्रह्म । पूर्व्यम् । नमःऽभिः । वि । श्लोकः । एतु । पथ्याऽइव । सूरेः ।
शृण्वन्तु । विश्वे । अमृतस्य । पुत्राः । आ । ये । धामानि । दिव्यानि । तस्थुः ॥ १ ॥

हे हविर्धानशकटे [v]वां युवामहं [v]पूर्व्यं पूर्वस्मिन् काले भवम्। अनादिकालप्रवृत्तैरित्यर्थः। एवंभूतं [v]ब्रह्म मन्त्रम्। उच्चार्येति शेषः। [v]नमोभिः सोमादिहविर्लक्षणैरन्नैः [v]युजे युनज्मि। युवयोरुपरि सोमादिकमारोप्य पत्नीशालातो हविर्धानं प्रति युवां नयामीत्यर्थः। एवंभूतयोर्युवयोः [v]श्लोकः शब्दः [v]वि [v]एतु विश्वान् देवान् प्रति विविधं गच्छतु। तत्र दृष्टान्तः। [v]पथ्येव [v]सूरेः। यथा स्तोतुः स्वभूता पथ्या परिणामसुखावहा[2] आहुतिः[2] विश्वान् देवान् प्रति विविधं गच्छति तद्वत्। [v]अमृतस्य अमरणधर्मणः प्रजापतेः [v]पुत्राः [v]विश्वे देवाः एवंभूतं शब्दं [v]शृण्वन्तु [v]ये देवाः [v]दिव्यानि दिवि भवानि [v]धामानि स्थानानि [v]आ [v]तस्थुः अधिष्ठितवन्तः[3]। ते शृण्वन्त्वित्यर्थः ॥

अत्रैव हविर्धानप्रवर्तने[4] 'यमेइव' इत्येषा। सूत्रितं च—'यमेइव यतमाने यदैतमधि द्वयोरदधा उक्थ्यं वच इत्यर्धर्चं आरमेत्' (आश्व. श्रौ. ४. ९) इति ॥

यमेइव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः ।
आ सीदतं स्वमु लोकं विदाने स्वास्थे भवतमिन्दवे नः ॥ २ ॥

यमे इवेति यमेऽइव । यतमाने इति । यत् । ऐतम् । प्र । वाम् । भरन् । मानुषाः । देवऽयन्तः ।
आ । सीदतम् । स्वम् । ऊँ इति । लोकम् । विदाने इति ।
स्वास्थे इति सुऽआस्थे । भवतम् । इन्दवे । नः ॥ २ ॥

[v]यमेइव यथा सहोत्पन्ने अपत्ये संचरतः तथा [v]यतमाने गमनहविर्धारणादिस्वाधिकारकर्मणि प्रवर्तमाने हविर्धानशकटे युवां[5] [v]यत्[6] यदा [v]ऐतं[6] हविर्धानस्थानं प्रतिगच्छथः तदा [v]देवयन्तः देवकामाः [v]मानुषाः यजमानाः [v]वां युवां [v]प्र [v]भरन् प्रभरन्ति। किंच युवां [v]स्वमु [v]लोकम् आत्मीयमेव हविर्धानाख्यं स्थानं [v]विदाने जानती [v]आ [v]सीदतम्[7]। ततः [v]नः अस्माकम् [v]इन्दवे सोमार्थं [v]स्वास्थे शोभननिवासस्थाने [v]भवतम्[8] ॥

---

१. त-भ१.२.४.६-सु-हविर्धानं। २. त२.५.६-°स्तुस्वाहुतिवान्; त४-भ६-°सुखावहा आहुतिर्वान्; त३-भ१.४.७-°सुखावहा आहुतिर्वा; भ२-°सुखावहा आहुतीर्वा। ३. त१.२.४.५.६-भ१.२.४.६-अधितिष्ठितवंतः। ४. त-भ-हविर्धाने। ५. त-भ६-युवयोः। ६. त१.२.३.६.७-भ१.२.६-यद्यदा एतं; त४.५-यद्यदा एत; भ४-यद्यदा एवं; भ७-यद्यदा येतं। ७. ग-त३.४-भ५.६-सीदतं निषीदतं। ८. त-भ४.६-भवतां।

पञ्च पदानि रुपो अन्वरोहं चतुष्पदीमन्वेमि व्रतेन ।
अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि ॥ ३ ॥

पञ्च । पदानि । रुपः । अनु । अरोहम् । चतुःऽपदीम् । अनु । एमि । व्रतेन ।
अक्षरेण । प्रति । मिमे । एताम् । ऋतस्य । नाभौ । अधि । सम् । पुनामि ॥ ३ ॥

vरुपः यष्टॄणां स्वर्गमारोपयितुर्यज्ञस्याङ्गत्वेन संबन्धीनि पञ्चसंख्याकानि धानासोमपशुपुरोडाशाज्याख्यानि[1] vपदानि पदितॄणि होतृत्वेन देवान् प्रति गन्तॄणि हवींषि vअन्वरोहम् अनुरोहामि । शकटे युवयोः स्थापनवहनानन्तरं करणं करोमीत्यर्थः । किंच vचतुष्पदीं चतुर्भिः पादैर्युक्तां[2] त्रिष्टुबादिच्छन्दसं क्रियां[3] vव्रतेन प्रयोगकर्मणा vअन्वेमि अनुगच्छामि । यथाकालं प्रयुनज्मीत्यर्थः । vअक्षरेण प्रणवाख्येन vएताम् उपस्थितां प्रतिगरक्रियां vप्रति vमिमे निर्ममे । अपि च vऋतस्य यज्ञस्य । vअधि इति सप्तम्यर्थानुवादी । vनाभौ नाभिभूते वेद्याख्ये स्थाने vसं vपुनामि संशोधयामि । दशापवित्रेण सोमं संस्करोमीत्यर्थः ॥

देवेभ्यः कमवृणीत मृत्युं प्रजायै कममृतं नावृणीत ।
बृहस्पतिं यज्ञमकृण्वत ऋषिं प्रियां यमस्तन्वं[4] प्रारिरेचीत् ॥ ४ ॥

देवेभ्यः । कम् । अवृणीत । मृत्युम् । प्रऽजायै । कम् । अमृतम् । न । अवृणीत ।
बृहस्पतिम् । यज्ञम् । अकृण्वत । ऋषिम् । प्रियाम् । यमः । तन्वम् । प्र । अरिरेचीत् ॥४॥

vदेवेभ्यः देवानां vमृत्युं मारयितारं vकं[4] स्वपुरुषम् vअवृणीत प्रार्थयते प्रयुङ्क्ते । किंच vप्रजायै देवव्यतिरिक्तायां मनुष्यादिकायाः प्रजायाः vअमृतम् अमारकमविनाशकं[5] vकं वा स्वपुरुषं vनावृणीत न प्रयुङ्क्ते । हविर्धारणक्रियायां प्रवृत्तायां सत्यां पूर्वोक्तानां सर्वेषां स्थितेरवश्यंभावित्वाच्च कंचिदपि विनाशकं स्वपुरुषं यमो निरूपयतीत्यर्थः[6] । अपि च vबृहस्पतिं बृहतां देवानां हविर्धारणे पालकं बृहतां मन्त्राणां स्वामिनं वा vऋषिं सर्वस्य दृष्टादृष्टफलस्य द्रष्टारं vयज्ञम् vअकृण्वत ऋत्विग्यजमानाः कुर्वन्ति । अपि च vयमः vप्रियां vतन्वम् अस्मदीयमिष्टं शरीरं vप्रारिरेचीत् । धातूनामनेकार्थत्वात् रिचिरत्र[7] परिहारार्थे वर्तते । प्रेरयति । मृत्योः सकाशात् परिहरति । कर्मवैगुण्यजनितदोषभावादस्माकं जीवितं नापहरतीत्यर्थः ॥

सप्त क्षरन्ति शिशवे मरुत्वते पित्रे पुत्रासो अप्यवीवतन्नृतम् ।
उभे इदस्योभयस्य राजत उभे यतेते उभयस्य पुष्यतः ॥ ५ ॥

सप्त । क्षरन्ति । शिशवे । मरुत्वते । पित्रे । पुत्रासः । अपि । अवीवतन् । ऋतम् ।
उभे इति । इत् । अस्य । उभयस्य । राजतः । उभे इति । यतेते इति । उभयस्य । पुष्यतः ॥५॥

vमरुत्वते । मरुतः स्तोतारः । स्तुतिद्वारेण तद्वते vपित्रे ऋत्विजां पितृभूताय vशिशवे शंसनीयाय हविर्धानशकटयोः सुखासीनभूताय सोमाय vसप्त छन्दांसि vक्षरन्ति स्तुतिरूपेण गच्छन्ति । अपि च

---

१. त-भ४-धना° । २. त-मु-पदैर्युक्तां । ३. त-भ-मु-' क्रियां' नास्ति । ४. त२.३.७-भ१.२.४.६-यं कं । ५. त-भ-अमारकं विनाशकं । ६. ग-निवारयति । प्रजायै मनुष्येभ्यो अमृतं अक्षावृणीत कमपि न वारयतीत्यर्थः; त-निरूपयति; भ१.२.४-न रूपयति । ७. त-रिरिचेरत्र; भ-रिरिचिरत्र ।

vपुत्रासः vअपि सोमस्य पुत्रभूता ऋत्विजोऽपि vऋतं सत्यभूतं स्तोत्रम् vअवीवतन् संगमयन्ति। सद्गुणग्राहिणीं स्तुतिं कुर्वन्तीत्यर्थः। vउभे vइत् द्वे एव हविर्धानशकटे vअस्य vउभयस्य देवजातस्य मनुष्यजातस्य च vराजतः ईशाते। vउभे एव शकटे vयतेते कर्मानुष्ठाने प्रयत्नं कुरुतः। vउभयस्य देवजातस्य मनुष्यजातस्य च vपुष्यतः। हविर्धारणद्वारेण पुष्टिं कुरुत इत्यर्थः॥ ॥ १३ ॥

'परेयिवांसम्' इति षोडशर्चं चतुर्दशं सूक्तं विवस्वतः पुत्रस्य यमस्यार्षम्। 'अङ्गिरसो नः पितरो नवग्वाः' इति षष्ठ्या अङ्गिरःपित्रथर्वभृगुलक्षणा लिङ्गोक्ता देवताः। 'प्रेहि' इत्याद्यास्तिस्रो लिङ्गोक्तदेवताकाः पितृदेवताका वा। 'अति द्रव सारमेयौ' इत्यादिकस्तृचः सरमापुत्रौ यौ श्वानौ परलोकमार्गमभितः स्थितौ तद्देवताकः। शिष्टा यमदेवत्याः। 'यमाय सोमम्' इति त्रयोदश्याद्या अनुष्टुभः। 'यमाय मधुमत्तमम्' इत्येषा बृहती। आदितो द्वादश त्रिष्टुभः। तथा चानुक्रान्तं— 'परेयिवांसं षोळश यमो यामं षष्ठी लिङ्गोक्तदेवता पराश्च तिस्रः पित्र्या वा तृचः श्वभ्यां परा अनुष्टुभो बृहत्युपान्त्या' इति। गतः सूक्तविनियोगः। महापितृयज्ञे यमयागाख्या याज्या। सूत्रितं च—'इमं यम प्रस्तरमा हि सीदेति द्वे परेयिवांसं प्रवतो महीरनु' (आश्व. श्रौ. २. १९) इति॥

परेयिवांसं प्रवतो महीरनु बहुभ्यः पन्थामनुपस्पशानम्।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा दुवस्य॥ १॥

परेयिऽवांसम्। प्रऽवतः। महीः। अनु। बहुऽभ्यः। पन्थाम्। अनुऽपस्पशानम्। वैवस्वतम्। सम्ऽगमनम्। जनानाम्। यमम्। राजानम्। हविषा। दुवस्य॥ १॥

हे मदीयान्तरात्मन् यजमान वा त्वं vराजानं पितॄणां स्वामिनं vयमं vहविषा पुरोडाशादिना vदुवस्य परिचर। कीदृशम्। vप्रवतः प्रकृष्टकर्मवतो भूलोकवर्तिभोगसाधनं पुण्यमनुष्ठितवतः पुरुषान् vमहीः तत्तद्भोगोचितभूप्रदेशविशेषान् vअनु vपरेयिवांसं क्रमेण मरणादूर्ध्वं प्रापितवन्तं तथा vबहुभ्यः स्वर्गार्थिभ्यः पुण्यकृद्भ्यः पुण्यकृतार्थे vपन्थां स्वर्गस्योचितं मार्गम् vअनुपस्पशानम् अबाधमानम्। पापिन एव पुरुषान् स्वर्गमार्गबाधेन नरकं प्रापयति[1] न तु पुण्यकृत इत्यर्थः। vवैवस्वतं विवस्वतः सूर्यस्य पुत्रं vजनानां पापिनां vसंगमनं गन्तव्यस्थानरूपम्॥

यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या अनु स्वाः॥ २॥

यमः। नः। गातुम्। प्रथमः। विवेद। न। एषा। गव्यूतिः। अपऽभर्तवै। ऊँ इति। यत्र। नः। पूर्वे। पितरः। पराऽईयुः। एना। जज्ञानाः। पथ्याः। अनु। स्वाः॥ २॥

vप्रथमः सर्वेषां मुख्यः vयमः vनः अस्माकं प्रजानां vगातुं शुभाशुभनिमित्तं vविवेद[2] जानाति। vएषा vगव्यूतिः vन vअपभर्तवा vउ। अतिशयज्ञानयोगात् यमस्य न केनचिदपहर्तुमपनेतुं शक्यत इत्यर्थः। vयत्र यस्मिन् मार्गे vनः अस्माकं vपूर्वे[3] vपितरः vपरेयुः[4] vएना अनेन मार्गेण गच्छन्तः[5] vजज्ञानाः जाताः सर्वे vस्वाः स्वभूताः vपथ्याः स्वकर्ममार्गभूता गतीः vअनु गच्छन्ति॥

---

१. त-भ-मु-प्रापयति। २. त१.४.५.७-म१.२.४.६-मा विवेद; त२.६-मां विवेद। ३. त-भ६-'पूर्वे' नास्ति। ४. त३-म१-पुस्तकयोः 'परेयुः' इत्यस्यानन्तरं कियांश्चिदवकाशो विद्यते; म२-परेयुः पित्रादयो गताः। ५. म१-पुस्तके 'गच्छन्तः' इत्यस्यानन्तरं कियांश्चिदवकाशः।

आग्निमारुते 'मातली कव्यैः' इत्येषा धाय्या। सूत्रितं च—'इमं यम प्रस्तरमा हि सीद मातली कव्यैर्यमो अङ्गिरोभिरुदीरतामवर उत्परासः' (आश्व. श्रौ. ५. २०) इति ॥

मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः।
यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति ॥ ३ ॥

मातली। कव्यैः। यमः। अङ्गिरःऽभिः। बृहस्पतिः। ऋक्वऽभिः। ववृधानः।
यान्। च। देवाः। ववृधुः। ये। च। देवान्। स्वाहा। अन्ये। स्वधया। अन्ये। मदन्ति ॥३॥

vमातली। मातलिरिन्द्रस्य सारथिः। तद्वानिन्द्रो मातली। स च vकव्यैः कव्यभाग्भिः[1] पितृभिः सह vववृधानः वर्धमानो भवति। vयमः[2] च[2] vअङ्गिरोभिः पितृविशेषैः सह वर्धमानो भवति। — — —। तत्र vदेवाः इन्द्रादयः vयांश्च कव्यभागादीन् पितॄन् vववृधुः वर्धयन्ति vये vच कव्यभागादयः पितरः vदेवान् इन्द्रादीन् वर्धयन्ति तेषां मध्ये vअन्ये इन्द्रादयः vस्वाहा vमदन्ति स्वाहाकारेण हृष्यन्ति। vअन्ये पितरः vस्वधया स्वधाकारेण हृष्यन्ति ॥

महापितृयज्ञे यमस्य 'इमं यम' इत्यादिके द्वे अनुवाक्ये। 'इमं यम प्रस्तरमा[3] हि सीदेति द्वे' (आश्व. श्रौ. २. १९) इति हि सूत्रितम्। सैषाग्निमारुतेऽपि[3] धाय्या। सूत्रं पूर्वमेवोदाहृतम् ॥

इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ ४ ॥

इमम्। यम। प्रऽस्तरम्। आ। हि। सीद। अङ्गिरःऽभिः। पितृऽभिः। सम्ऽविदानः।
आ। त्वा। मन्त्राः। कविऽशस्ताः। वहन्तु। एना। राजन्। हविषा। मादयस्व ॥ ४ ॥

हे vयम vअङ्गिरोभिः एतन्नामकैः vपितृभिः vसंविदानः ऐकमत्यं गतस्त्वम् vइमं vप्रस्तरं विस्तीर्णं यज्ञविशेषम् vआ vसीद आगत्योपविश। vहि यस्मादेवं तस्मात् vकविशस्ताः विद्वद्भिर्ऋत्विग्भिः प्रयुक्ताः vमन्त्राः vत्वा त्वाम् vआ vवहन्तु। हे vराजन् vएना एतेन vहविषा तुष्टः vमादयस्व यजमानं हर्षय ॥

अङ्गिरोभिरा गहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व।
विवस्वन्तं हुवे यः पिता तेऽस्मिन् यज्ञे बर्हिष्या निषद्य ॥ ५ ॥

अङ्गिरःऽभिः। आ। गहि। यज्ञियेभिः। यम। वैरूपैः। इह। मादयस्व।
विवस्वन्तम्। हुवे। यः। पिता। ते। अस्मिन्। यज्ञे। बर्हिषि। आ। निऽसद्य ॥ ५ ॥

हे vयम vवैरूपैः विविधरूपयुक्तैर्वैरूपसामप्रियैर्वा vयज्ञियेभिः यज्ञयोग्यैः vअङ्गिरोभिः सह vआ vगहि आगच्छ। आगत्य च vइह अस्मिन् यज्ञे vमादयस्व यजमानं हर्षय। vयः विवस्वान् vते तव vपिता अस्ति vअस्मिन् vयज्ञे तं vविवस्वन्तं vहुवे आह्वयामि। स चास्तीर्णे vबर्हिषि vआ vनिषद्य उपविश्य यजमानं हर्षयतु ॥ ॥ १४ ॥

---

१. ग१-उद्गीथ-कव्यनामभिः। २. त-भ-यज्ञ। ३. ग-त-भ-मु-प्रस्तरमित्येषाग्निमारुतेपि।

अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥ ६ ॥

अङ्गिरसः । नः । पितरः । नवऽग्वाः । अथर्वाणः । भृगवः । सोम्यासः ।
तेषाम् । वयम् । सुऽमतौ । यज्ञियानाम् । अपि । भद्रे । सौमनसे । स्याम ॥ ६ ॥

vअङ्गिरसः अङ्गिरोनामकाः vअथर्वाणः अथर्वनामकाः vभृगवः भृगुनामकाश्च vनः अस्माकं vपितरः vनवग्वाः अभिनवगमनयुक्ताः । सदा[1] नूतनवत्प्रीतिजनका इत्यर्थः । ते च vसोम्यासः । सोममर्हन्तीति सोम्याः । vयज्ञियानां यज्ञार्हाणां vतेषां vसुमतौ अनुग्रहयुक्तायां बुद्धौ vवयं vस्याम सर्वदा तिष्ठेम । vअपि च vसौमनसे vभद्रे सौमनसस्य कारणे कल्याणे फले स्याम सर्वदा तिष्ठेम ॥

सत्रमध्ये दीक्षितमरणे 'प्रेहि' इत्याद्याः पञ्चर्चस्तृतीयावर्जिता होत्रा शंसनीयाः । सूत्रितं च—'प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति पञ्चानां तृतीयामुद्धरेत्' (आश्व. श्रौ. ६. १०) इति ॥

प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणं च देवम् ॥ ७ ॥

प्र । इहि । प्र । इहि । पथिऽभिः । पूर्व्येभिः । यत्र । नः । पूर्वे । पितरः । पराऽईयुः ।
उभा । राजाना । स्वधया । मदन्ता । यमम् । पश्यासि । वरुणम् । च । देवम् ॥ ७ ॥

vयत्र यस्मिन् स्थाने vनः अस्माकं vपूर्वे पुरातनाः vपितरः पितामहादयः vपरेयुः[2] vपूर्व्येभिः पूर्वस्मिन् काले भवैः । अनादिकालप्रवृत्तैरित्यर्थः । vपथिभिः मार्गैः हे मदीयः पितः तत्स्थानं vप्रेहि प्रगच्छ क्षिप्रं गच्छ । गत्वा[3] च vस्वधया अमृतान्नेन vमदन्ता मदन्तौ तृप्यन्तौ vराजाना राजानौ vउभा उभौ vयमं vदेवं द्योतमानं vवरुणं vच vपश्यासि पश्य ॥

सं गच्छस्व पितृभिः सं यमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि सं गच्छस्व तन्वा सुवर्चीः ॥ ८ ॥

सम् । गच्छस्व । पितृऽभिः । सम् । यमेन । इष्टापूर्तेन । परमे । विऽओमन् ।
हित्वाय । अवद्यम् । पुनः । अस्तम् । आ । इहि । सम् । गच्छस्व । तन्वा । सुऽवर्चीः ॥८॥

हे मदीय पितः ततस्त्वं[4] vपरमे उत्कृष्टे vव्योमन् व्योमनि स्वर्गाख्ये स्थाने स्वभूतैः vपितृभिः सह vसं vगच्छस्व । vइष्टापूर्तेन श्रौतस्मार्तदानफलेन vसं गच्छस्व । तत इष्टापूर्तेन सहागम्य vअवद्यं पापं vहित्वा परित्यज्य vअस्तं म्रियमाणास्यं गृहम् vएहि आगच्छ । ततः vसुवर्चाः[5] । तृतीयार्थे प्रथमा । सुवर्चसा शोभनदीप्तियुक्तेन vतन्वा स्वशरीरेण vसं vगच्छस्व ॥

पैतृमेधिके कर्मणि श्मशानायतनं प्रोक्षति 'अपेत वीत' इति । सूत्रितं च—'गतोदकेन शमी-शाखया[6] त्रिः प्रसव्यमायतनं परिव्रजन् प्रोक्षत्यपेत वीत वि च सर्पतातः' (आश्व.गृ.४.२.१०) इति॥

---

१. त-म१.२.४—तदा । २. ग-त३.४-म५.६—परेयुः परेताः । ३. त३.४-म१.२.४.५—तत्र गत्वा; त५—तां गत्वा । ४. ग—त्वं; त-म-सु—अतस्त्वं । ५. ग-त-म—'सुवर्चाः' नास्ति । ६. त-म—शाखया ।

अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥ ९ ॥

अप । इत । वि । इत । वि । च । सर्पत । अतः । अस्मै । एतम् । पितरः । लोकम् । अक्रन् ।
अहःऽभिः । अत्ऽभिः । अक्तुऽभिः । विऽअक्तम् । यमः । ददाति । अवऽसानम् । अस्मै ॥ ९ ॥

इमशाने पूर्वं स्थिता हे पिशाचादयः ᵛअतः अस्मात् प्रमृज्यमानदहनस्थानात् ᵛअपेत अपगच्छत । ᵛवीत विशेषेण गच्छत । ᵛवि ᵛसर्पत ᵛच । इदं स्थानं परित्यज्य नानाभावेन दूरतरं देशं गच्छतेत्यर्थः । ᵛपितरः ᵛअस्मै मृतयजमानस्यार्थाय ᵛएतं ᵛलोकम् इदं दहनस्थानम् ᵛअक्रन् । यमस्याज्ञयान्वकुर्वन् । ᵛयमः अपि ᵛअहोभिः दिवसैः ᵛअद्भिः अभ्युक्षणोदकैः ᵛअक्तुभिः रात्रिभिः ᵛव्यक्तं संगतम् । शुद्धिनिमित्तैः कालोदकादिभिः शोधितमित्यर्थः । ᵛअवसानं दहनस्थानम् ᵛअस्मै मृतयजमानस्यार्थाय ᵛददाति दत्तवान् ॥

अनुत्तरण्या वृक्षौ पार्श्वयोराम्रफलाकृती । तावुद्धृत्य प्रेतस्य हस्तयोर्निदधाति 'अति द्रव सारमेयौ' इति द्वाभ्याम् । सूत्रितं च—'वृक्षावुद्धृत्य पाण्योरादध्यादति द्रव सारमेयौ श्वानौ' (आश्व. गृ. ४. ३. २०) इति ॥

अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन्त्सुविदत्राँ उपेहि यमेन ये सधमादं मदन्ति ॥ १० ॥

अति । द्रव । सारमेयौ । श्वानौ । चतुःऽअक्षौ । शबलौ । साधुना । पथा ।
अथ । पितॄन् । सुऽविदत्रान् । उप । इहि । यमेन । ये । सधऽमादम् । मदन्ति ॥ १० ॥

हे अग्ने ᵛसाधुना ᵛपथा समीचीनेन मार्गेण ᵛश्वानौ उभौ ᵛअति ᵛद्रव अतिक्रम्य गच्छ । यमसंबन्धिनौ यौ श्वानौ प्रेतस्य बाधकौ तौ परित्यज्य समीचीनेन मार्गेण प्रेतं नयेत्यर्थः । कीदृशौ श्वानौ । ᵛसारमेयौ । सरमा नाम काचित् प्रसिद्धा देवशुनी । तस्याः पुत्रौ ᵛचतुरक्षौ उपरिभागे पुनरप्यक्षिद्वयं यथोक्तारक्षौ । ᵛअथ शोभनमार्गेण गमनानन्तरं ᵛये पितरः ᵛयमेन ᵛसधमादं सहर्षं ᵛमदन्ति प्राप्नुवन्ति तान् ᵛसुविदत्रान् सुष्ठुभिज्ञान् ᵛपितॄन् ᵛउपेहि उपगच्छ ॥ ॥ १५ ॥

यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परि देहि राजन्त्स्वस्ति चास्मा अनमीवं च धेहि ॥ ११ ॥

यौ । ते । श्वानौ । यम । रक्षितारौ । चतुःऽअक्षौ । पथिरक्षी इति पथिऽरक्षी । नृऽचक्षसौ ।
ताभ्याम् । एनम् । परि । देहि । राजन् । स्वस्ति । च । अस्मै । अनमीवम् । च । धेहि ॥ ११ ॥

हे ᵛराजन् हे ᵛयम ᵛते त्वदीयौ ᵛयौ ᵛश्वानौ विद्येते ᵛताभ्यां श्वभ्यां हे राजन् यम ᵛएनं प्रेतं ᵛपरि ᵛदेहि रक्षार्थं प्रयच्छ । कीदृशौ श्वानौ । ᵛरक्षितारौ यमगृहस्य रक्षकौ ᵛचतुरक्षौ अक्षिचतुष्टयवन्तौ ᵛपथिरक्षी मार्गस्य रक्षकौ ᵛनृचक्षसौ मनुष्यैः ख्याप्यमानौ । श्रुतिस्मृतिपुराणाभिज्ञाः पुरुषास्तौ प्रख्यापयन्ति । ताभ्यां श्वभ्यां दत्त्वा ᵛअस्मै प्रेताय ᵛस्वस्ति ᵛच क्षेममपि ᵛअनमीवं ᵛच रोगाभावमपि ᵛधेहि संपादय ॥

उरूणसावसुतृपा उदुम्बलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दातामसुमद्येह भद्रम् ॥ १२ ॥

उरुऽनसौ । असुऽतृपौ । उदुम्बलौ । यमस्य । दूतौ । चरतः । जनान् । अनु ।
तौ । अस्मभ्यम् । दृशये । सूर्याय । पुनः । दाताम् । असुम् । अद्य । इह । भद्रम् ॥१२॥

[v]यमस्य संबन्धिनौ [v]दूतौ श्वानौ [v]जनाँ [v]अनु प्राणिनो लक्षीकृत्य सर्वत्र [v]चरतः । कीदृशौ । [v]उरूणसौ दीर्घनासिकायुक्तौ [v]असुतृपौ परकीयान् प्राणान् स्वीकृत्य तैस्तृप्यन्तौ [v]उदुम्बलौ उरुबलौ विस्तीर्णबलौ । [v]तौ उभौ दूतौ [v]सूर्याय [v]दृशये सूर्यस्य दर्शनार्थम् [v]अद्य दिने [v]इह कर्मणि [v]भद्रम् [v]असुं[1] समीचीनं प्राणं [v]पुनः [v]अस्मभ्यं [v]दाताम् अदत्ताम् ॥

यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ॥ १३ ॥

यमाय । सोमम् । सुनुत । यमाय । जुहुत । हविः ।
यमम् । ह । यज्ञः । गच्छति । अग्निऽदूतः । अरम्ऽकृतः ॥ १३ ॥

हे ऋत्विजः [v]यमाय यमदेवतार्थं [v]सोमं [v]सुनुत । लतात्मकं सोममभिषुणुत । तथा यमार्थं [v]हविः [v]जुहुत । अग्निर्दूतो यस्मिन् यज्ञे सोऽयम् [v]अग्निदूतः । अग्नेर्दूतत्वमन्यत्राप्यातम्—'अग्निर्देवानां दूत आसीत्' (तै. सं. २. ५. ८. ५) इति । [v]अरंकृतः बहुभिर्द्रव्यैरलंकाररूपैर्युक्तः तादृशः [v]यज्ञः [v]यमं [v]ह यममेव [v]गच्छति ॥

यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत ।
स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे ॥ १४ ॥

यमाय । घृतऽवत् । हविः । जुहोत । प्र । च । तिष्ठत ।
सः । नः । देवेषु । आ । यमत् । दीर्घम् । आयुः । प्र । जीवसे ॥ १४ ॥

हे ऋत्विजः यूयं [v]यमाय [v]घृतवत् आज्येन संयुक्तं [v]हविः पुरोडाशादिकं [v]जुहोत जुहुत । [v]प्र [v]तिष्ठत [v]च यमं यूयमुपतिष्ठध्वं च । [v]देवेषु मध्ये [v]सः यमो देवः [v]प्र [v]जीवसे प्रकृष्टजीवनार्थं [v]नः अस्माकं [v]दीर्घमायुः [v]आ [v]यमत् प्रयच्छतु ॥

यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन ।
इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥ १५ ॥

यमाय । मधुमत्ऽतमम् । राज्ञे । हव्यम् । जुहोतन ।
इदम् । नमः । ऋषिऽभ्यः । पूर्वऽजेभ्यः । पूर्वेभ्यः । पथिकृत्ऽभ्यः ॥ १५ ॥

हे ऋत्विजः [v]यमाय [v]राज्ञे [v]मधुमत्तमम् अतिशयेन मधुरं [v]हव्यं पुरोडाशादिकं हविः [v]जुहोतन जुहुत । [v]पूर्वजेभ्यः सृष्ट्यादावुत्पन्नेभ्यः अत एव [v]पूर्वेभ्यः[2] अस्मतः पूर्वभाविभ्यः [v]पथिकृद्भ्यः शोभनमार्गकारिभ्यः[3] [v]ऋषिभ्यः [v]इदं[4] प्रत्यक्षं यथा भवति तथा [v]नमः अस्तु ॥

---

१. त-म२.६-अमुं । २. त-म१.२.४-पूर्वजेभ्यः । ३. त-म-शोभनमार्गपथिकारिभ्यः । ४. त-म१. २.४.६-मु-य इदं ।

त्रिकद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत् ।
त्रिष्टुब्गायत्री छन्दांसि सर्वा ता यम आहिता ॥ १६ ॥
त्रिऽकद्रुकेभिः । पतति । षट् । उर्वीः । एकम् । इत् । बृहत् ।
त्रिऽस्तुप् । गायत्री । छन्दांसि । सर्वा । ता । यमे । आऽहिता ॥ १६ ॥

vत्रिकद्रुकेभिः । द्वितीयार्थे तृतीयैषा । त्रिकद्रुकान् । ज्योतिर्गौरायुरिति त्रयो यागविशेषा-स्त्रिकद्रुका[1] उच्यन्ते । तान् प्रत्यक्षभावाय संरक्षणार्थं च vपतति । यमस्तान् प्राप्नोति । षट्संख्याकाः vउर्वीः भूमीः कृताकृतप्रत्यवेक्षणाय प्राप्नोति । ताश्चोर्व्यः शाखान्तरमन्त्रे[2] समाम्नाताः—' षण्मोर्वीरंह-सस्पान्तु द्यौश्च पृथिवी चापश्चौषधयश्चोर्क् च सूनृता च ' इति । vएकमित् एकमेव vबृहत् महत् जगत् यमश्च प्रतिपालनीयः प्राप्नोति । किंच यानि त्रिष्टुब्गायत्र्यादीनि vछन्दांसि सन्ति vसर्वा vता सर्वाणि तानि च्छन्दांसि vयमे vआहिता आहितानि ऋत्विग्भिः स्तुतित्वेनावस्थितानि ॥ ॥ १६ ॥

' उदीरताम् ' इति चतुर्दशर्चं पञ्चदशं सूक्तम् । अत्रानुक्रम्यते—'उदीरतां षळृना शङ्खः पित्र्यं जगत्येकादशी ' इति । ' यामायनाः परे पञ्च ' (अनु.) इति वचनाद्यमपुत्रः शङ्खाख्य ऋषिः । ' अग्निष्वात्ताः ' इत्येषा जगती शिष्टास्त्रिष्टुभः । पितरो देवता । गतः सूक्तविनियोगः । अष्टकायाम् ' उदीरतामवरे ' इत्याद्या अष्टावृचो होमार्थाः । सूत्रितं च—'उदीरतामवर उत्परास इत्यष्टाभिर्हुत्वा' (आश्व. गृ. २. ४. ६) इति । महापितृयज्ञे ' पितरः सोमवन्तः ' इत्यस्यानुवाक्या ' उदीरताम् ' इत्येषा । सूत्रितं च— ' पितरोऽग्निष्वात्ता यम उदीरतामवर उत्परासः ' (आश्व. श्रौ. २. १९) इति । आग्निमारुतेऽप्येषा धाय्या । सूत्रितं च—' मातली कव्यैर्यमो अङ्गिरोभिरुदीरतामवर उत्परासः ' (आ. श्रौ. ५. २०) इति ॥

उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ १ ॥
उत् । ईरताम् । अवरे । उत् । परासः । उत् । मध्यमाः । पितरः । सोम्यासः ।
असुम् । ये । ईयुः । अवृकाः । ऋतऽज्ञाः । ते । नः । अवन्तु । पितरः । हवेषु ॥ १ ॥

त्रिविधाः पितर उत्तमा मध्यमा अधमाश्चेति । यथाविधं श्रौतं कर्मानुष्ठाय पितृत्वं प्राप्ता उत्तमाः । स्मार्तकर्ममात्रपरा मध्यमाः । अत्रापि कैश्चित्संस्कारैर्विकला अधमाः । एतदेवाभिप्रेत्य ' ये अग्निदग्धा ये अनग्निदग्धाः' इत्यादिमन्त्रः समाम्नातः । तेषु vअवरे निकृष्टाः vउदीरताम् उत्तमं हविः प्राप्नुवन्तु । vपरासः उत्तमाः vपितरः vउत् ईरताम् । vमध्यमाः पितरश्च vउत् ईरताम् । ते सर्वेऽप्य-स्मद्विधये vसोम्यासः सोम्या अनुग्रहपराः सन्तु । vये पितरः vअवृकाः वृकवदरण्यश्ववदस्मासु हिंसामकुर्वन्तः vऋतज्ञाः अस्मदनुष्ठितं यज्ञं जानन्तः vअसुम् अस्मत्प्राणम् vईयुः रक्षितुं प्राप्ताः vते vपितरः vहवेषु अस्मदीयेष्वाह्वानेषु vनः अस्मान् vअवन्तु रक्षन्तु ॥

महापितृयज्ञे ' पितरो बर्हिषदः ' इत्यस्य ' इदं पितृभ्यः ' इति द्वितीयानुवाक्या । सूत्रं तु पूर्वमेवोदाहृतम् (आश्व. श्रौ. २. १९) । आग्निमारुते ' इदं पितृभ्यः ' इत्येषा धाय्या । सूत्रितं च—' आहं पितृन्त्सुविदत्राँ अवित्सीदं पितृभ्यो नमो अस्त्वद्य स्वादुष्किलायमिति चतस्रः ' (आश्व. श्रौ. ५. २०) इति ॥

---

१. त-भ६—यागविशेषा । २. श. ब्रा. १.५.१.२२; ऋ. सं. ६,४७.३ भाष्यं द्रष्टव्यम् ।

इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु ॥ २ ॥

इदम् । पितृऽभ्यः । नमः । अस्तु । अद्य । ये । पूर्वासः । ये । उपरासः । ईयुः ।
ये । पार्थिवे । रजसि । आ । निऽसत्ताः । ये । वा । नूनम् । सुऽवृजनासु । विक्षु ॥ २ ॥

ᵛपूर्वासः यजमानोत्पत्तेः पूर्वमुत्पन्ना ज्येष्ठभ्रातृपितामहादयः ᵛये ᵛईयुः पितृलोकं प्राप्ताः । ᵛये चान्ये ᵛउपरासः यजमानजन्मन उपरि उत्पन्नाः कनिष्ठभ्रातृस्वपुत्रादय ईयुः पितृलोकं प्राप्ताः । ᵛये अप्यन्ये ᵛपार्थिवे पृथिवीसंबन्धिनि ᵛरजसि रजोगुणकार्येऽस्मिन् कर्मणि ᵛआ ᵛनिषत्ताः हविः स्वीकर्तुमागत्योपविष्टाः । ᵛये ᵛवा केचिदन्ये बन्धुवर्गरूपाः पितरः ᵛविक्षु बन्धुरूपासु प्रजासु आ निषत्ताः श्राद्धादिस्वीकारायागत्योपविष्टाः । कीदृशीषु विक्षु । ᵛसुवृजनासु । वृज्यते परित्यज्यते दारिद्र्यमनेनेति वृजनं धनम् । शोभनं वृजनं यासां ताः सुवृजनाः । तादृशीषु । धनसमृद्धया श्राद्धादिकर्मपरास्वित्यर्थः । सर्वेभ्य उक्तेभ्यः ᵛपितृभ्यः[१] ᵛअद्य अस्मिन् कर्मणि ᵛइदं ᵛनमः ᵛअस्तु । अयमाहुतिप्रदानपूर्वको नमस्कारो भवतु ॥

आहं पितॄन्त्सुविदत्राँ अवित्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहागमिष्ठाः ॥ ३ ॥

आ । अहम् । पितॄन् । सुऽविदत्रान् । अवित्सि । नपातम् । च । विऽक्रमणम् । च । विष्णोः ।
बर्हिऽसदः । ये । स्वधया । सुतस्य । भजन्त । पित्वः । ते । इह । आऽगमिष्ठाः ॥ ३ ॥

ᵛअहं यजमानः ᵛसुविदत्रान् मदीयां भक्तिं सुष्ठु जानतः ᵛपितॄन् ᵛअवित्सि आभिमुख्येन लब्धवानस्मि । ᵛविष्णोः व्यापिनो यज्ञस्य ᵛनपातं ᵛच विनाशाभावं च ᵛविक्रमणं ᵛच विशेषेण प्रवृत्तिं च लब्धवानस्मि । ᵛये पितरः ᵛबर्हिषदः बर्हिषि[२] सीदन्ति[२] ᵛते ᵛइह अस्मिन् कर्मणि ᵛआगमिष्ठाः अतिशयेनागताः । आदरपूर्वं समागत्य ᵛस्वधया पुरोडाशाद्यन्नेन सह ᵛसुतस्य अभिषुतस्य सोमलक्षणस्य ᵛपित्वः पितोरन्नस्य भागं ᵛभजन्त सेवन्ते उपयुञ्जते ॥

बर्हिषदः पितर ऊत्य१ वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गतावसा शंतमेनाथा नः शं योररपो दधात ॥ ४ ॥

बर्हिऽसदः । पितरः । ऊती । अर्वाक् । इमा । वः । हव्या । चकृम । जुषध्वम् ।
ते । आ । गत । अवसा । शम्ऽतमेन । अथ । नः । शम् । योः । अरपः । दधात ॥४॥

हे ᵛबर्हिषदः । यज्ञे सीदन्तीति बर्हिषदः । अत्रापि ' ये वै यज्वानस्ते पितरो बर्हिषदः ' (तै.ब्रा.१.६.९) इत्यत्र श्रुतस्वाद्यागं कृत्वा प्रेत्य पितृलोकं प्राप्ता बर्हिषदः । तादृशा हे ᵛपितरः ᵛअर्वाक् अर्वाचीनानामस्माकम् ᵛऊती रक्षा भवद्भिः कर्तव्येति शेषः । ᵛवः युष्मदर्थम् ᵛइमा ᵛहव्या एतानि हवींषि ᵛचकृम अतस्तानि ᵛजुषध्वम्[३] । ᵛते हविर्जुष्टवन्तो यूयं ᵛशंतमेन सुखतमेन ᵛअवसा रक्षणेन

---

१. त–' पितृभ्यः ' नास्ति । २. त-भ६–संति । ३. ग-त३.४-भ५–जुषध्वं सेवध्वं ।

निमित्तभूतेन ᵛआ[1] ᵛगत[1] आभिमुख्येनास्मान् प्राप्नुत[2]। ᵛअथ अनन्तरं ᵛनः अस्मभ्यं ᵛशं सुखं ᵛयोः दुःखवियोगम् ᵛअरपः पापरहितं च ᵛदधात दत्त ॥

महापितृयज्ञे ' पितरः सोमवन्तः ' इत्यस्य याज्या ' उपहूताः पितरः ' इत्येषा। सूत्रितं च— ' उपहूताः पितरः सोम्यासस्त्वं सोम प्र चिकितो मनीषा ' (आश्व. श्रौ. २. १९) इति ॥

उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥ ५ ॥

उपऽहूताः । पितरः । सोम्यासः । बर्हिष्येषु । निऽधिषु । प्रियेषु ।
ते । आ । गमन्तु । ते । इह । श्रुवन्तु । अधि । ब्रुवन्तु । ते । अवन्तु । अस्मान् ॥ ५ ॥

ᵛसोम्यासः सोम्या अस्मदनुग्रहपराः सोमसंपादिनो वा ᵛपितरः ᵛबर्हिष्येषु यागार्हेषु ᵛप्रियेषु तृप्तिकरेषु ᵛनिधिषु निधिसदृशेषु हविःषु निमित्तभूतेषु सत्सु ᵛउपहूताः अस्माभिराहूताः ᵛते पितरः ᵛआ ᵛगमन्तु आगच्छन्तु। आगत्य च ᵛइह अस्मिन् कर्मणि अस्माभिः प्रयुक्ताः स्तुतीः ᵛश्रुवन्तु शृण्वन्तु। श्रुत्वा च ᵛअधि ᵛब्रुवन्तु। साधुरयं यजमान इत्यादरेण कथयन्तु। ᵛते तादृशाः पितरः ᵛअस्मान् ᵛअवन्तु रक्षन्तु ॥ ॥ १७ ॥

आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे ।
मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥ ६ ॥

आऽअर्च्य । जानु । दक्षिणतः । निऽसद्य । इमम् । यज्ञम् । अभि । गृणीत । विश्वे ।
मा । हिंसिष्ट । पितरः । केन । चित् । नः । यत् । वः । आगः । पुरुषता । कराम ॥६॥

पितृणामयं स्वाभाविको धर्मः ' अथैनं पितरः प्राचीनावीतिनः सव्यं जान्वाच्य ' (श. ब्रा. २. ४. २. २) इति वचनात्। हे पितरः ᵛविश्वे सर्वे यूयं ᵛजानु ᵛआच्य भूमौ निपात्य ᵛदक्षिणतः दक्षिणपार्श्वे ᵛनिषद्य उपविश्य ᵛइमम् अस्मदीयं ᵛयज्ञमभि ᵛगृणीत अभिष्टुत। विशिष्टतृप्तियोगात् परया प्रीत्या सगुणोऽयं यज्ञ इति प्रशंसतेत्यर्थः। अपि च ᵛवः युष्माकं ᵛयत् किंचित् कर्मवैगुण्यजनितम् ᵛआगः अपराधं ᵛपुरुषता मनुष्यत्वेन हेतुना ᵛकराम वयं कृतवन्तः हे ᵛपितरः तेन ᵛकेन ᵛचित् अल्पापराधेन ᵛनः अस्मान् ᵛमा ᵛहिंसिष्ट ॥

आसीनासो अरुणीनामुपस्थे रयिं धत्त दाशुषे मर्त्याय ।
पुत्रेभ्यः पितरस्तस्य वस्वः प्र यच्छत त इहोर्जं दधात ॥ ७ ॥

आसीनासः । अरुणीनाम् । उपऽस्थे । रयिम् । धत्त । दाशुषे । मर्त्याय ।
पुत्रेभ्यः । पितरः । तस्य । वस्वः । प्र । यच्छत । ते । इह । ऊर्जम् । दधात ॥ ७ ॥

ᵛअरुणीनाम् आरोचमानानां ज्वालानां वा देवतानां वा ᵛउपस्थे समीपस्थाने वेद्याख्ये ᵛआसीनासः उपविष्टाः पितरो यूयं ᵛदाशुषे हविर्दत्तवते ᵛमर्त्याय मनुष्याय यजमानाय ᵛरयिं

१. त–आगती; भ१.४–आगतान् ; भ६–आगता । २. त–प्रापय ।

धनं vधत्त दत्त। हे vपितरः यूयं vतस्य यजमानस्य vपुत्रेभ्यः vवस्वः वसु धनं vप्र vयच्छत। vते तादृशा यूयम् vइह अस्मिन् अस्मदीये कर्मणि vऊर्जं धनं vदधात निधत्त ॥

ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः।
तेभिर्यमः संरराणो हवींष्युशन्नुशद्भिः प्रतिकाममत्तु ॥ ८ ॥

ये। नः। पूर्वे। पितरः। सोम्यासः। अनुऽऊहिरे। सोमऽपीथम्। वसिष्ठाः।
तेभिः। यमः। सम्ऽरराणः। हवींषि। उशन्। उशत्ऽभिः। प्रतिऽकामम्। अत्तु ॥ ८ ॥

vसोम्यासः सोमसंपादिनः vवसिष्ठाः। वस्तृतमाः कृताच्छादना धनवत्तमा वा vनः अस्माकं vये vपूर्वे vपितरः vसोमपीथं सोमपानम् vअनूहिरे आनुपूर्व्येण देवेभ्यश्च पितृभ्यश्च प्राप्तवन्तः। दत्तवन्त इत्यर्थः। vउशन् पितृभिः सह संभोगं कामयमानः vयमः पितृपतिः vउशद्भिः यमेन सह संभोगं कामयमानैः vतेभिः तैरस्मदीयैः पितृभिः सह vरराणः रममाणः vहवींषि अस्माभिर्दत्तानि vप्रतिकामं कामंकामं[1] प्रति vअत्तु। यानि यानि हवींषि कामयते तानि तानि भक्षयत्वित्यर्थः ॥

महापितृयज्ञे अग्नेः कव्यवाहनस्य 'ये तातृषुः' इत्येषा प्रथमानुवाक्या। सूत्रितं च—'ये तातृषुर्देवत्रा जेहमानास्त्वदग्ने काम्या त्वन्मनीषाः' (आश्व. श्रौ. २. १९) इति ॥

ये तातृषुर्देवत्रा जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः।
आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः ॥ ९ ॥

ये। ततृषुः। देवऽत्रा। जेहमानाः। होत्राऽविदः। स्तोमऽतष्टासः। अर्कैः।
आ। अग्ने। याहि। सुऽविदत्रेभिः। अर्वाङ्। सत्यैः। कव्यैः। पितृऽभिः। घर्मसत्ऽभिः ॥९॥

vदेवत्रा देवान् vजेहमानाः क्रमेण गच्छन्तः। क्रमेण देवत्वं प्राप्ता इत्यर्थः। vहोत्राविदः यज्ञान् सम्यक् कर्तुं वेदितारः vअर्कैः अर्चनीयैः स्तोत्रैः vस्तोमतष्टासः स्तोमानां च सम्यक्कर्तारः vये पितरः vतातृषुः तृप्यन्ति हे vअग्ने त्वं तैः vपितृभिः vअर्वाङ्[2] अस्मदभिमुखः vआ vयाहि आगच्छ। कीदृशैः। vसुविदत्रेभिः सुविदत्रैः vसत्यैः अविसंवादिभिः vकव्यैः। कव्यं नाम पितृदेवत्यं हविः। तत्संबन्धिभिः। यद्वा कव्यैः कविभिर्मेधाविभिः। स्वार्थिको यत्। vघर्मसद्भिः यज्ञसादिभिः ॥

ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः।
आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्घर्मसद्भिः ॥ १० ॥

ये। सत्यासः। हविःऽअदः। हविःऽपाः। इन्द्रेण। देवैः। सऽरथम्। दधानाः।
आ। अग्ने। याहि। सहस्रम्। देवऽवन्दैः। परैः। पूर्वैः। पितृऽभिः। घर्मसत्ऽभिः ॥१०॥

vसत्यासः सत्याः vये पितरः vहविरदः भक्षणयोग्यस्य हविषोऽत्तारो भक्षयितारः vहविष्पाः पानयोग्यस्य हविषः पातारः vइन्द्रेण vदेवैः vसरथं समानमेकं तुल्यं वा रथं vदधानाः। कर्मणि लानच्। गमनाय सदा धारयन्ति हे vअग्ने तैः vपितृभिः सह vआ vयाहि आगच्छ। कीदृशैः। vसहस्रम्। तृतीयार्थे प्रथमा। सहस्रेण। बहुभिरित्यर्थः। vदेववन्दैः देवसंबन्धिभिः स्तोत्रैर्युक्तैः vपरैः परकालीनैः vपूर्वैः पूर्वकालीनैः vघर्मसद्भिः यज्ञसादिभिर्महावीरसादिभिरादित्यसादिभिर्वा ॥ ॥१८॥

---

१. त-म-मु-कामं। २. त-म१.२.४-मु-आ अर्वाङ्।

महापितृयज्ञे ' पितरोऽग्निष्वात्ताः ' इत्यस्य ' अग्निष्वात्ताः पितरः ' इत्येषा प्रथमानुवाक्या। सूत्रितं च—' अग्निष्वात्ताः पितर एह गच्छत ये चेह पितरो ये च नेह ' (आश्व. श्रौ. २.१९) इति ॥

अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ॥ ११ ॥

अग्निऽस्वात्ताः । पितरः । आ । इह । गच्छत । सदःऽसदः । सदत । सुऽप्रनीतयः ।
अत्त । हवींषि । प्रऽयतानि । बर्हिषि । अथ । रयिम् । सर्वऽवीरम् । दधातन ॥ ११ ॥

vअग्निष्वात्ताः[1] अग्निना स्वादिता एतन्नामकाः vपितरः यूयम् vइह अस्मिन् पितृकर्मणि vआ vगच्छत । आगत्य च हे vसुप्रणीतयः अभिपूजितप्रणयनाः यूयं vसदःसदः तत्तत्स्थानं[2] vसदत सीदत । तत्र तत्र स्थाने यथेष्टमुपविशतेत्यर्थः । उपविश्य च vबर्हिषि आसादितानि vप्रयतानि शुचीनि vहवींषि vअत्त भक्षयत । vअथ अनन्तरं vसर्ववीरं सर्वैर्वीरैः पुत्रपौत्रैरुपेतं vरयिं धनं vदधातन अस्मभ्यं दत्त ॥

महापितृयज्ञे वषट्कारक्रियायां ' त्वमग्न ईळितः ' इत्येषा स्विष्टकृतो याज्या। सूत्रितं च—' योऽग्निः कव्यवाहनस्त्वमग्न ईळितो जातवेद इति संयाज्ये ' (आश्व. श्रौ. २. १९) इति ॥

त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥ १२ ॥

त्वम् । अग्ने । ईळितः । जातऽवेदः । अवाट् । हव्यानि । सुरभीणि । कृत्वी ।
प्र । अदाः । पितृऽभ्यः । स्वधया । ते । अक्षन् । अद्धि । त्वम् । देव । प्रऽयता । हवींषि ॥ १२ ॥

हे vजातवेदः । जातं सर्वं जगद्वेत्तीति जातवेदाः । तथाविध हे अग्ने vईळितः अस्माभिः स्तुतः vत्वं vहव्यानि अस्मदीयानि हवींषि vसुरभीणि सुगन्धीनि vकृत्वी कृत्वा vअवाट् वहनं कृतवानसि । कृत्वा च vपितृभ्यः vप्रादाः । vते च पितरः vस्वधया स्वधाकारेण दत्तं हविः vअक्षन् अदन्तु । हे vदेव vत्वम् अपि vप्रयता प्रयत्नसंपादितानि vहवींषि vअद्धि भक्षय ॥

महापितृयज्ञे ' ये चेह ' इति द्वितीयानुवाक्या। सूत्रमुक्तम् ॥

ये चेह पितरो ये च नेह यांश्च विद्म याँ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्यज्ञं सुकृतं जुषस्व ॥ १३ ॥

ये । च । इह । पितरः । ये । च । न । इह । यान् । च । विद्म । यान् । ऊँ इति ।
च । न । प्रऽविद्म ॥ त्वम् । वेत्थ । यति । ते । जातऽवेदः ।
स्वधाभिः । यज्ञम् । सुऽकृतम् । जुषस्व ॥ १३ ॥

---

१. त–' अग्निष्वात्ताः ' नास्ति । २. त–स्वत्तस्थानं; त३-भ१.२.४–सत्तस्थानं; भ३–स्वस्थानं; मु–खत्तस्थानं ।

vये vच vपितरः vइह अस्मत्समीपे वर्तन्ते vये vच vइह vन सन्ति। vयांश्च पितॄन् vविद्म संज्ञिकृष्टत्वाज्जानीमः vयाँ[1] vउ vच vन अपि[2] च न vप्रविद्म विप्रकृष्टत्वादुत्तमं न विजानीमः। vयति vते यावन्तस्ते[3] भवन्ति तान् सर्वान् यथोक्तान् हे vजातवेदः उत्पन्नसर्ववस्तुविषयज्ञानाग्ने vत्वं vवेत्थ जानासि[4]। vस्वधाभिः हविर्लक्षणैरन्नैः vसुकृतं साधु कृतं vयज्ञं vजुषस्व प्रीत्या गृहाण ॥

पूर्वोक्त एव यागे 'ये अग्निदग्धाः' इत्येषा याज्या। सूत्रितं च—'ये अग्निदग्धा ये अनग्निदग्धा इमं चमं प्रस्तरमा हि सीदेति द्वे' (आश्व. श्रौ. २. १९) इति ॥

ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।
तेभिः स्वराळसुनीतिमेतां यथावशं तन्वं कल्पयस्व ॥ १४ ॥

ये । अग्निऽदग्धाः । ये । अनग्निऽदग्धाः । मध्ये । दिवः । स्वधया । मादयन्ते ।
तेभिः । स्वऽराट् । असुऽनीतिम् । एताम् । यथाऽवशम् । तन्वम् । कल्पयस्व ॥ १४ ॥

vये पितरः vअग्निदग्धाः अग्निना भस्मीकृताः। इमशानं प्राप्ता इत्यर्थः। vये च पितरः vअनग्निदग्धाः इमशानकर्म न प्राप्ताः vमध्ये vदिवः द्युलोकस्य मध्ये vस्वधया हविर्लक्षणेनान्नेन vमादयन्ते तृप्यन्ति[5] हे अग्ने vस्वराट् स्वकर्मोपभोगेन दीप्यमानः vतेभिः तैः पितृभिः सहितः सन् vअसुनीतिं प्राणानां विषयेषु नेतारमस्मत्पितरन्तरात्मानम् vएतां vतन्वम् एतद्देवताशरीरं vयथावशं यथाकामं vकल्पयस्व समर्थयस्व। प्रापयेत्यर्थः[6]॥ ॥ १९ ॥

'मैनम्' इति चतुर्दशर्चं षोडशं सूक्तं यमपुत्रस्य दमनस्यार्षम्। आदितो दश त्रिष्टुभः ततश्चतस्रोऽनुष्टुभः। अग्निर्देवता। तथा चानुक्रान्तं—'मैनं दमन आग्नेयं चतुरनुष्टुबन्तम्' इति। दीक्षितमरण आद्याः षट्चः शंसनीयाः। सूत्रितं च—'मैनमग्ने वि दहो माभि शोच इति षट् पूषा त्वेतश्च्यावयतु प्र विद्वान्' (आश्व. श्रौ. ६. १०) इति। दह्यमानस्य प्रेतस्योपस्थानेऽप्येताः शंसनीयाः ॥

मैनमग्ने वि दहो माभि शोचो मास्य त्वचं चिक्षिपो मा शरीरम् ।
यदा शृतं कृणवो जातवेदोऽथेमेनं प्र हिणुतात्पितृभ्यः ॥ १ ॥

मा । एनम् । अग्ने । वि । दहः । मा । अभि । शोचः । मा । अस्य । त्वचम् । चिक्षिपः । मा । शरीरम् ।
यदा । शृतम् । कृणवः । जातऽवेदः । अथ । ईम् । एनम् । प्र । हिणुतात् । पितृऽभ्यः ॥ १ ॥

हे vअग्ने vएनं प्रेतं vमा vवि vदहः। विशेषेण दग्धं मषीभूतं मा कुरु। vमाभि vशोचः अभितः शोकेन संतापेन युक्तं मा कुरु। vअस्य vत्वचं vमा vचिक्षिपः इतस्ततो विक्षिप्तां मा[7] कुरु[8]। vशरीरम् अपि विक्षिप्तं vमा कुरु। हे vजातवेदः अग्ने vयदा[9] त्वं[9] vशृतं पक्वं सुदग्धं vकृणवः करिष्यसि vअथ तदानीम् vईमेनं प्रेतं vपितृभ्यः vप्र vहिणुतात् पितृसमीपे प्रेरय ॥

शृतं यदा करसि जातवेदोऽथेमेनं परि दत्तात्पितृभ्यः ।
यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति ॥ २ ॥

---

१. त-भ६-एषां; त३-भ१.२.४-तां। २. उद्गीथ-यानपि। ३. त-भ६-वार्यस्तते। ४. त-जानामि। ५. ग-वृत्ते वृथयंतु; त-भ-तृप्यंतु। ६. त-भ६-प्रासायेत्यर्थः; उद्गीथ-गाभयस्वेत्यर्थः। ७. त२.३. ७-भ-'मा कुरु' नास्ति। ८. ग-भ-त्वं यदा।

शृतम् । यदा । करसि । जातऽवेदः । अथ । ईम् । एनम् । परि । दत्तात् । पितृऽभ्यः ।
यदा । गच्छाति । असुंऽनीतिम् । एताम् । अथ । देवानाम् । वशाऽनीः । भवाति ॥ २ ॥

हे [v]जातवेदः [v]यदा प्रेतशरीरं [v]श्रृतं पक्वं [v]करसि करिष्यसि [v]अथ [v]ईम् तदानीमेव [v]एनं प्रेतं [v]पितृभ्यः [v]परि [v]दत्तात् प्रयच्छ । [v]यदा अयं प्रेतः [v]एताम् अग्निना कृताम् [v]असुनीतिं प्राणस्य नयनं प्राणप्रेरणं [v]गच्छाति[1] प्राप्नोति [v]अथ तदानीमेव [v]देवानां [v]वशनीः देवानां वशं प्रापितो भवति[2] ॥

सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा ।
अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः ॥ ३ ॥

सूर्यम् । चक्षुः । गच्छतु । वातम् । आत्मा । द्याम् । च । गच्छ । पृथिवीम् । च । धर्मणा ।
अपः । वा । गच्छ । यदि । तत्र । ते । हितम् । ओषधीषु । प्रति । तिष्ठ । शरीरैः ॥ ३ ॥

हे प्रेत त्वदीयं [v]चक्षुः इन्द्रियं [v]सूर्यं [v]गच्छतु प्राप्नोतु । [v]आत्मा प्राणः [v]वातं बाह्यं वायुं गच्छतु । अपि च त्वमपि [v]धर्मणा सुकृतेन तत्फलं भोक्तुं [v]द्यां [v]च । अत्र चशब्दो विकल्पार्थे । द्युलोकं वा [v]पृथिवीं [v]च पृथिवीं वा [v]गच्छ प्राप्नुहि[3] । [v]अपो [v]वा अन्तरिक्षलोकं [v]गच्छ प्राप्नुहि । [v]तत्र अन्तरिक्षे [v]हितं स्थापितं [v]ते तव कर्मफलम् । [v]ओषधीषु [v]शरीरैः शरीरावयवैः [v]प्रति [v]तिष्ठ ॥

अजो भागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः ।
यास्ते शिवास्तन्वो जातवेदस्ताभिर्वहैनं सुकृतामु लोकम् ॥ ४ ॥

अजः । भागः । तपसा । तम् । तपस्व । तम् । ते । शोचिः । तपतु । तम् । ते । अर्चिः ।
याः । ते । शिवाः । तन्वः । जातऽवेदः ।
ताभिः । वह । एनम् । सुऽकृताम् । ऊँ इति । लोकम् ॥ ४ ॥

[v]अजः जननरहितः शरीरेन्द्रियादिभागव्यतिरिक्तोऽन्तरपुरुषलक्षणो यः [v]भागः अस्ति हे अग्ने ते त्वदीयेन [v]तपसा तापनेन [v]तं तादृशं भागं [v]तपस्व तप्तं[4] कुरु । तथा [v]ते तव [v]शोचिः शोकहेतुः[5] ज्वालाविशेषः [v]तं भागं [v]तपतु संस्करोतु । अपि[6] च [v]ते तव [v]अर्चिः भासको ज्वालाविशेषः [v]तं भागं तपतु संस्करोतु[6] । तपःशोचिरर्चिःशब्दानां संतापतारतम्येन भेदः । हे [v]जातवेदः [v]ते तव [v]याः [v]तन्वः मूर्तयः [v]शिवाः सुखहेतवो न तु तापप्रदाः [v]ताभिः [v]एनं तनूभिः प्रेतं [v]सुकृतां शोभनकर्मकारिणां [v]लोकं स्थानं [v]वह प्रापय । उशब्दः पूरणः ॥

अव सृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः ।
आयुर्वसान उप वेतु शेषः सं गच्छतां तन्वा जातवेदः ॥ ५ ॥

अव । सृज । पुनः । अग्ने । पितृऽभ्यः । यः । ते । आऽहुतः । चरति । स्वधाभिः ।
आयुः । वसानः । उप । वेतु । शेषः । सम् । गच्छताम् । तन्वा । जातऽवेदः ॥ ५ ॥

---

१. ग-त-भ६.७-गच्छति; भ१.२ ४-गच्छति; सु-गच्छाति गच्छति । २. सु-भवाति । ३. त-भ६-प्राप्नुहि गाहि । ४. त-भ-तपनं । ५. त४-शोकहेतुत्वात् ; त५.६.७-शोकहेतु । ६. त-'अपि च ... ... संस्करोतु' नास्ति ।

हे ᵛअग्ने ᵛयः प्रेतः पुमान् ᵛआहुतः चितौ मन्त्रेण समर्पितः सन् ᵛस्वधाभिः स्वधाकारसमर्पितैः उदकादिभिः सह ᵛचरति तं प्रेतं ᵛपितृभ्यः पितृप्राप्त्यर्थं ᵛपुनः[1] ᵛअव ᵛसृज[2] भूयः प्रेरय । अथ प्रेतः ᵛआयुः जीवनं ᵛवसानः आच्छादयन् । आयुषा युक्त इत्यर्थः । ᵛएषः शिष्यमाणमस्थिलक्षणं यजनीयं शरीरम् ᵛउप ᵛएतु उपगच्छतु । हे ᵛजातवेदः तव प्रसादात् ᵛतम्वा शरीरेण ᵛसं ᵛगच्छतां संगतो भवतु ॥ ॥ २० ॥

यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ।
अग्निष्टद्विश्वादगदं कृणोतु सोमश्च यो ब्राह्मणाँ आविवेश ॥ ६ ॥

यत् । ते । कृष्णः । शकुनः । आऽतुतोद । पिपीलः । सर्पः । उत । वा । श्वापदः ।
अग्निः । तत् । विश्वऽअत् । अगदम् । कृणोतु । सोमः । च । यः । ब्राह्मणान् । आऽविवेश॥६॥

हे मृतशरीर ᵛते तव संबन्धि ᵛयत् अङ्गं ᵛकृष्णः ᵛशकुनः काकाख्यः ᵛआतुतोद । आङ् ईषदर्थे । ईषत्तुन्नवान् । तथा ᵛपिपीलः पिपीलिका वा ᵛसर्पः वा ᵛउत ᵛवा अपि वा ᵛश्वापदः श्वशृगालादिः । एतेषामन्यतमो यदि तुन्नवानित्यर्थः । ᵛविश्वात् सर्वस्मात्वा ᵛअग्निः ᵛतत् तादृशमङ्गम् ᵛअगदं ᵛकृणोतु दोषरहितं करोतु । संस्करोत्वित्यर्थः । तथा ᵛसोमश्च[2] देवतारूप ओषधिरूपो वा संस्करोतु । ᵛयः सोमः ᵛब्राह्मणान् ऋत्विगादीन् ᵛआविवेश प्रविष्टवान् ॥

अनुस्तरण्या वपया प्रेतस्य मुखम् ' अग्नेर्वर्म ' इत्यनया प्रोर्णुयात् । सूत्रितं च—'अनुस्तरण्या[3] वपामुत्खिद्य शिरोमुखं प्रच्छादयेदग्नेर्वर्म परि गोभिर्व्ययस्वेति ' (आश्व. गृ. ४. ३. १९) इति[3] ॥

अग्नेर्वर्म परि गोभिर्व्ययस्व सं प्रोर्णुष्व पीवसा मेदसा च ।
नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधृग्विधक्ष्यन्पर्यङ्ग्यातै ॥ ७ ॥

अग्नेः । वर्म । परि । गोभिः । व्ययस्व । सम् । प्र । ऊर्णुष्व । पीवसा । मेदसा । च ।
न । इत् । त्वा । धृष्णुः । हरसा । जर्हृषाणः । दधृक् । विऽधक्ष्यन् । परिऽअङ्ग्यातै ॥७॥

हे प्रेत ᵛअग्नेः स्वभूतं ᵛवर्म ज्वालालक्षणं कवचं ᵛगोभिः अनुस्तरणीगोचर्मणा ᵛपरि ᵛव्ययस्व परितः संवृणु । किंच ᵛपीवसा स्थूलेन ᵛमेदसा ᵛच ᵛसं सम्यक् ᵛप्रोर्णुष्व आच्छादय । एवं कृते सति ᵛहरसा तेजसा ᵛधृष्णुः धर्षणशीलः ᵛजर्हृषाणः अत्यर्थं हृष्यन् ᵛदधृक् दृष्टः प्रगल्भः । ' ऋत्विक् ' इत्यादिना दधृक्शब्दो निपातितः । ᵛविधक्ष्यन् विविधं भस्मीकरिष्यन् एवंभूतोऽग्निः ᵛत्वा त्वां ᵛनेत् ᵛपर्यङ्ग्यातै नैव सर्वतो विस्तारयति । अलेर्गत्यर्थाल्लेऽयाडागमः ॥

' इममग्ने चमसम् ' इत्यनया प्रणीताप्रणयनमनुमन्त्रयते । सूत्रितं च—' इममग्ने[4] चमसं मा वि जिह्वर इति प्रणीताप्रणयनमनुमन्त्रयते ' (आश्व. गृ. ४. ३. २४) इति[4] ॥

इममग्ने चमसं मा वि जिह्वरः प्रियो देवानामुत सोम्यानाम् ।
एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ते ॥ ८ ॥

---

१. त-म६-पुनरवासृजः; त३-म१.२.६.७-पुनरवासृज । २. त-सोम अश्व । ३. ग-त-म१.२.४.५-' अनुस्तरण्या.....इति ' नास्ति; म६—अग्नेर्वर्म परि गोभिर्व्ययस्वेतीति । ४. ग-त-म१.२.४.५.७-' इममग्ने.....इति ' नास्ति ।

इमम् । अग्ने । चमसम् । मा । वि । जिह्वरः । प्रियः । देवानाम् । उत । सोम्यानाम् ।
एषः । यः । चमसः । देवऽपानः । तस्मिन् । देवाः । अमृताः । मादयन्ते ॥ ८ ॥

हे ᵛअग्ने ᵛइमं ᵛचमसं प्रणीताप्रणयनं ᵛमा ᵛवि ᵛजिह्वरः मा विचालीः । यश्चमसः ᵛदेवानाम् इन्द्रादीनां ᵛप्रियः ᵛउत अपि च ᵛसोम्यानां सोमार्हाणां पितॄणां प्रियः । किंच ᵛयः ᵛएषः ᵛचमसः ᵛदेवपानः । देवाः पिबन्त्यस्मिन्निति । देवपानस्थानीयो भवति ᵛतस्मिन्[1] चमसे ᵛअमृताः मरणवर्जिताः ᵛदेवाः पितरश्च ᵛमादयन्ते हव्यैः कव्यैश्च हृष्टा भवन्ति[2] ॥

क्रव्यादमग्निं प्र हिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् ॥ ९ ॥

क्रव्यऽअदम् । अग्निम् । प्र । हिणोमि । दूरम् । यमऽराज्ञः । गच्छतु । रिप्रऽवाहः ।
इह । एव । अयम् । इतरः । जातऽवेदाः । देवेभ्यः । हव्यम् । वहतु । प्रऽजानन् ॥ ९ ॥

आहिताग्निमरण[3] एतदादिके[2] द्वे ऋचावौपासनोद्वासने विनियुक्ते । तत्र प्रथमायाः पूर्वार्धेन दक्षिणस्यां दिशि चतुष्पथादावौपासनाग्निं निरस्यति । उत्तरेण शान्तिकर्मार्थमादत्ते (आश्व. गृ.४.६)। ᵛक्रव्यादम् । क्रव्यमामिषम् । तस्यात्तारं तीव्रम् ᵛअग्निं ᵛदूरं विप्रकृष्टदेशे ᵛप्र ᵛहिणोमि प्रगमयामि । ' हि गतौ ' स्वादिः । ᵛरिप्रवाहः । रिप्रं पापम् । तस्य वोढा सोऽग्निः ᵛयमराज्ञः यमो राजा येषां तान् यमराजकान् अन्यप्रदेशान् ᵛगच्छतु प्राप्नोतु । ᵛअयं शान्तिकर्मार्थमुपादत्तः ᵛइतरः क्रव्यादादन्यः ᵛजातवेदाः जातानां वेदिता जातधनो वा ᵛप्रजानन् सर्वैर्विज्ञायमानोऽग्निः ᵛइहैव देशे ᵛदेवेभ्यः देवार्थं ᵛहव्यं हवनयोग्यं हविः ᵛवहतु प्रापयतु ॥

यो अग्निः क्रव्यात्प्रविवेश वो गृहमिमं पश्यन्नितरं जातवेदसम् ।
तं हरामि पितृयज्ञाय देवं स घर्ममिन्वात्परमे सधस्थे ॥ १० ॥

यः । अग्निः । क्रव्यऽअत् । प्रऽविवेश । वः । गृहम् । इमम् । पश्यन् । इतरम् । जातऽवेदसम् ।
तम् । हरामि । पितृऽयज्ञाय । देवम् । सः । घर्मम् । इन्वात् । परमे । सधऽस्थे ॥ १० ॥

ᵛयः क्रव्यादः ᵛअग्निः देवो युष्माकं गृहिणां ᵛगृहं ᵛप्रविवेश प्रविष्टवान् ᵛतं क्रव्यादं ᵛदेवं ᵛहरामि । गृहाद्बहिर्निष्कामयामीत्यर्थः । किमर्थम् । ᵛपितृयज्ञाय तदर्थम् । किं कुर्वन् । ᵛइमम् ᵛइतरं तस्मादन्यं हव्यवाहं ᵛजातवेदसं ᵛपश्यन् पर्यालोचयन् । तथा सति क्रव्यादात्परोऽग्निः ᵛपरमे उत्कृष्टे ᵛसधस्थे सहस्थाने ᵛघर्मं यज्ञम् ᵛइन्वात् प्राप्नोतु । पितृभिर्घर्मपैः सहेति शेषः ॥ ॥ २१ ॥

महापितृयज्ञे वषट्कारक्रियायां ' यो अग्निः कव्यवाहनः[3] ' इत्येषा स्विष्टकृतो याज्या । सूत्रितं च—' यो अग्निः कव्यवाहनस्त्वमग्न[4] ईळितो जातवेद इति संयाज्ये ' (आश्व. श्रौ. २. १९) इति ॥

यो अग्निः क्रव्यवाहनः पितॄन्यक्षदृतावृधः ।
प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ ॥ ११ ॥

---

१. त-' तस्मिन्...भवन्ति ' नास्ति । २. त-म६-अतिक्रमणे एतदादि; त३-अतिमरणे एतदादि; म१.२.४-अग्निमरणं एतदादि । ३. त१.७-म६-मु-क्रव्यवाहनः । ४. त२.७-म२.६-मु-क्रव्यवाहन° ।

यः । अग्निः । क्रव्यऽवाहनः । पितॄन् । यक्षत् । ऋतऽवृधः ।
प्र । इत् । ऊँ इति । हव्यानि । वोचति । देवेभ्यः । च । पितृऽभ्यः । आ ॥ ११ ॥

क्रव्यवाहनः[1] क्रव्यस्य[2] हविषो वोढा यो ऽग्निः यः पितॄन् ऋतावृधः ऋतस्य यज्ञस्योदकस्य वा वर्धयितॄन् सत्येन वृद्धान् वा देवान् । एतत्पितृविशेषणं वास्तु । तान् यक्षत् यजति । यजेर्लेटि सिबडागमः । सोऽग्निः हव्यानि हवींषि प्र वोचतु पितृयज्ञे प्रब्रवीतु । युष्मदर्थं मयानीतानीति । इत् पूरणौ । देवेभ्यः । देवेभ्यश्च पितृभ्यः च । आकारः समुच्चये ॥

महापितृयज्ञे ' उशन्तस्त्वा ' इत्येषा सामिधेनी । सूत्र्यते हि—' उशन्तस्त्वा नि धीमहीत्येतां त्रिरनवानं ताः सामिधेन्यः ' (आश्व. श्रौ. २. १९) इति ॥

उशन्तस्त्वा नि धीमह्युशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन्हविषे अत्तवे ॥ १२ ॥

उशन्तः । त्वा । नि । धीमहि । उशन्तः । सम् । इधीमहि ।
उशन् । उशतः । आ । वह । पितॄन् । हविषे । अत्तवे ॥ १२ ॥

हे अग्ने उशन्तः कामयमाना वयं त्वा त्वां नि धीमहि[3] कर्मार्थं स्थापितवन्तः । उशन्तः वयं समिधीमहि संदीपयामः । त्वमपि उशन् कामयमानः हविरादिकम् उशतः आगन्तुकामान् पितॄन् अस्मिन् यज्ञे आ वह । किमर्थम् । हविषे अस्माभिः प्रत्तं हविः अत्तवे अत्तुम् । अदेस्तुमर्थे तवेन्प्रत्ययः । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानसंज्ञा ॥

यं त्वमग्ने समदहस्तमु निर्वापया पुनः ।
कियाम्बुत्र रोहतु पाकदूर्वा व्यल्कशा ॥ १३ ॥

यम् । त्वम् । अग्ने । सम्ऽअदहः । तम् । ऊँ इति । निः । वापय । पुनरिति ।
कियाम्बु । अत्र । रोहतु । पाकऽदूर्वा । विऽअल्कशा ॥ १३ ॥

हे अग्ने त्वं पितृदहनकाले यं देशं समदहः पुरा सम्यग्दग्धवानसि । ' तिङि चोदात्तवति ' इति समो निघातः । तमु तमेव पुनः निर्वापय । अत्र अस्मिन् देशे कियाम्बु कियत्प्रमाणमुदकं यस्मिन् तत् पुष्करिण्यादिकं[4] रोहतु उत्पद्यताम् । किंच व्यल्कशा विविधशाखा पाकदूर्वा परिपक्वदूर्वा चोत्पद्यताम् ॥

अस्थिसंचयने क्षीरोदकेन शमीशाखया त्रिः प्रसव्यं श्मशानायतनं प्रोक्षति ' क्षीतिके क्षीतिकावति ' इत्यनया । सूत्रितं च—' क्षीरोदकेन[4] शमीशाखया त्रिः प्रसव्यं परिव्रजन् प्रोक्षति क्षीतिके क्षीतिकावतीति ' (आश्व. गृ. ४. ५. ३) इति[4] ॥

क्षीर्तिके क्षीर्तिकावति ह्लादिके ह्लादिकावति ।
मण्डूक्या सु सं गम इमं स्व१ग्निं हर्षय ॥ १४ ॥

---

१. त१.२.७-मु-उद्गीथ-क्रव्यवाहनः क्रव्यस्य । २. ग-त४-म१.२.४.५-धीमहि निदधीमहि; त५-धीमहि निधीमहि । ३. त१-मु-पुष्करिण्यादि । ४. ग-त-म-' क्षीरोदकेन...इति ' नास्ति ।

शीतिके । शीतिकाऽवति । ह्रादिके । ह्रादिकाऽवति ।
मण्डूक्या । सु । सम् । गमः । इमम् । सु । अग्निम् । हर्षय ॥ १४ ॥

हे ᵛशीतिके शैत्ययुक्ते हे ᵛशीतिकावति । शीतिकाः शैत्ययुक्ता ओषधयः । ताभिस्तद्वति हे ᵛह्रादिके आह्लादयित्रि हे ᵛह्रादिकावति आह्लादकफलयुक्तैर्वृक्षैस्तद्वति हे पृथिवि ᵛमण्डूक्या मण्डूकस्त्रिया वृष्टिप्रियया ᵛसु सुष्ठु ᵛसं ᵛगमः संगच्छस्व । गमेर्लुङि व्यत्ययेन परस्मैपदम् । ततः ᵛइमम् ᵛअग्निं ᵛसु सुष्ठु ᵛहर्षय ॥ ॥ २२ ॥ ॥ १ ॥

द्वितीयेऽनुवाके त्रयोदशसूक्तानि । तत्र 'त्वष्टा दुहित्रे' इत्येतच्चानुर्दशर्चं प्रथमं सूक्तम् । यमपुत्रो देवश्रवा नामर्षिः । आदितो द्वादश त्रिष्टुभः । त्रयोदशीचतुर्दश्यावनुष्टुभौ । यद्वा । त्रयोदशी पुरस्ताद्बृहती । आदितो द्वयोः सरण्यूर्देवता । 'पूषा त्वेतः' इत्याद्याश्चतस्रः पूषदेवत्याः । 'सरस्वतीं देवयन्तः' इत्याद्यास्तिस्रः सरस्वतीदेवताकाः । 'आपो अस्मान्' इत्याद्याः पञ्चर्चोऽब्देवताकाः । तत्र 'द्रप्सश्चस्कन्द' इत्याद्यास्तिस्रः सौमदेवत्या वा । तथा चानुक्रान्तं—'त्वष्टा देवश्रवा द्वे सरण्यूदेवते पौष्ण्यश्चतस्रः सारस्वत्यस्तिस्रः पञ्चाप्यो द्रप्सस्तिस्रः सौम्यो वान्त्ये अनुष्टुभावुपान्त्या पुरस्ताद्बृहती वा' इति । गतः सूक्तविनियोगः ॥ अत्रेतिहासमाचक्षते—त्वष्टृनामकस्य देवस्य सरण्यूस्त्रिशिराश्चेति स्त्रीपुंसात्मकमपत्यद्वयमभूत् । ततस्त्वष्टा सरण्यूनामिकां पुत्रीं विवस्वते प्रायच्छत् । ततस्तस्यां विवस्वतश्च सकाशात् यमयम्यौ विजज्ञाते । ततः कदाचित् आत्मसदृश्या[1] देवजनितायाः स्त्रियः समीपे तदपत्यद्वयं निधाय स्वयमाश्वं रूपं कृत्वोत्तरान् कुरून् प्रतिजगाम । अथ विवस्वानेतां स्त्रियं सरण्यूमिति मत्वा तामरंसीत् । तस्यां मनुर्नाम राजर्षिरजायत । ततो विवस्वानेषा सरण्यूर्न भवतीति विज्ञाय स्वयमप्यश्वो भूत्वा तामश्वरूपिणीं प्रायासीत् । ततः संक्रीडमानयोस्तयोः स्वभूतं रेतः पृथिव्यां पपात । अथ सा गर्भकामनया तत् पतितं रेत आजघ्रौ । ततस्तस्याः सकाशाद्यमसत्यो दस्रश्चेत्युभावश्विनावजायेतामिति ॥

त्वष्टा दुहित्रे वहतुं कृणोतीतीदं विश्वं भुवनं समेति ।
यमस्य माता पर्युह्यमाना महो जाया विवस्वतो ननाश ॥ १ ॥

त्वष्टा । दुहित्रे । वहतुम् । कृणोति । इति । इदम् । विश्वम् । भुवनम् । सम् । एति ।
यमस्य । माता । परिऽउह्यमाना । महः । जाया । विवस्वतः । ननाश ॥ १ ॥

ᵛत्वष्टा एतन्नामको देवः ᵛदुहित्रे । षष्ठ्यर्थे चतुर्थी । दुहितुः सरण्यूनामिकायाः ᵛवहतुं वहनं विवाहम् । 'एधिवह्योश्चतुः' (उ. सू. १. ७९) इति वहेश्चतुप्रत्ययः । तं ᵛकृणोति करोति । ᵛइति एतेन हेतुना ᵛइदं ᵛविश्वं सर्वं ᵛभुवनं भूतजातं ᵛसमेति तं विवाहं समागमत् । ᵛपर्युह्यमाना विवस्वतोद्वोढव्या ᵛयमस्य यम्याश्च ᵛमाता ᵛमहः महतः ᵛविवस्वतः ᵛजाया भार्या सरण्यूः ᵛननाश । उत्तरान् कुरून् प्रति नष्टा । अगच्छदित्यर्थः[2] ॥

अपागूहन्नमृतां मर्त्येभ्यः कृत्वी सवर्णामददुर्विवस्वते ।
उताश्विनावभरद्यत्तदासीदजहादु द्वा मिथुना सरण्यूः ॥ २ ॥

अप । अगूहन् । अमृताम् । मर्त्येभ्यः । कृत्वी । सऽवर्णाम् । अददुः । विवस्वते ।
उत । अश्विनौ । अभरत् । यत् । तत् । आसीत् । अजहात् । ऊँ इति । द्वा । मिथुना । सरण्यूः ॥ २ ॥

१. त१.२.५.६.७-भ६-आत्मसदृशा; त४-आत्मसादृश्यात् । २. त-भ६-आगच्छ° ।

vअमृतां मरणधर्मरहितामेतां सरण्यूं vमर्त्येभ्यः मनुष्येभ्यस्तदुत्पत्त्यर्थम् vअपागूहन् अपगूहितवन्तः संवृतवन्तः । देवा उपनीतवन्त इत्यर्थः । किंच vसवर्णां सरण्यूसदृशीमन्यां[1] स्त्रियं vकृत्वी कृत्वा तस्मै vविवस्वते देवाः vअदधुः प्रायच्छन् । vउत अपि च साश्वरूपिणी सरण्यूस्तदा vअश्विनावभरत् । स्वोदरे गर्भभूतौ धारितवती । vयत् यदा vतत् जायापतिभ्यामश्वरूपात्मना संभोगकाले रेतः[2] पतितम् vआसीत् तदाश्विनौ जनयामासेत्यर्थः। तथा vसरण्यूः सरणवत्येतन्नामिका vद्वा vमिथुना द्वौ मिथुनौ यमयम्यौ vअजहात् त्यक्तवती । जनितवतीत्यर्थः । यद्वा । सरण्यूरेतन्नामिका मध्यमस्थाना देवता मध्यममग्निं माध्यमिकां वाचं चोत्पादितवती ॥

दीक्षितमरणे ' पूषा त्वेतः ' इत्याद्याश्वतरः शंसनीयाः । सूत्रितं च—' पूषा त्वेतश्यावयतु प्र विद्वानिति चतस्रः ' (आश्व. श्रौ. ६. १०) इति ॥

पूषा त्वेतश्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परि ददत्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रियेभ्यः ॥ ३ ॥

पूषा । त्वा । इतः । श्यावयतु । प्र । विद्वान् । अनष्टऽपशुः । भुवनस्य । गोपाः ।
सः । त्वा । एतेभ्यः । परि । ददत् । पितृऽभ्यः । अग्निः । देवेभ्यः । सुऽविदत्रियेभ्यः ॥३॥

vपूषा पोषयितैतन्नामको देवः vत्वा त्वाम् vइतः अस्मादेशाल्लोकात् vप्र vश्यावयतु प्रकर्षेणोत्तमलोकं गमयतु । कीदृशः । vविद्वान् अस्मद्भक्ततां विजानानः vअनष्टपशुः अविनश्वरपशुयुक्तः । यस्मिन्[3] सर्वे पशवस्तिष्ठन्ति न तु नश्यन्तीत्यर्थः । vभुवनस्य भूतजातस्य[4] vगोपाः गोपायिता । किंच प्रक्रमव्य vसः पूषा vएतेभ्यः vपितृभ्यः vत्वा त्वां vपरि vददत् परिप्रयच्छतु । तथा vअग्निः च vसुविदत्रियेभ्यः । सुविदत्रं ज्ञानं धनं वा । तदर्हाः सुविदत्रियाः । छान्दसो घप्रत्ययः । शोभनज्ञानेभ्यः सुधनेभ्यो वा vदेवेभ्यः त्वां प्रयच्छतु । तेषां लोके स्थापयित्वित्यर्थः ॥

आयुर्विश्वायुः परि पासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥ ४ ॥

आयुः । विश्वऽआयुः । परि । पासति । त्वा । पूषा । त्वा । पातु । प्रऽपथे । पुरस्तात् ।
यत्र । आसते । सुऽकृतः । यत्र । ते । ययुः । तत्र । त्वा । देवः । सविता । दधातु ॥ ४ ॥

vविश्वायुः सर्वान्नः सर्वत्र गमनशीलो वा vआयुः । वकारलोपश्छान्दसः । वायुः । यद्वा । ' छन्दसीणः[5] ' इत्युण्प्रत्यये वृद्धौ च कृतायां रूपम् । गन्ता वायुः । vत्वा त्वां vपरि vपासति परिपातु । पूषानुज्ञया परितो रक्षतु । ' पा रक्षणे ' । लेटि सिप्यडागमः । vप्रपथे प्रकृष्टे मार्गे स्वर्गे vपुरस्तात् सर्वेषां प्रथममेव[6] वर्तमानः vपूषा स्वयमेव vत्वा त्वां प्रमितं यजमानं vपातु रक्षतु । vसुकृतः पुण्यकर्माणःvयत्र यस्मिन् देशे vआसते तिष्ठन्ति vयत्र वा vते vसुकृतः vययुः प्राप्ताः vतत्र[7] तस्मिन् स्थाने vदेवः दीप्यमानः vसविता सर्वस्य स्वस्वकर्मणि प्रेरक एतन्नामको देवः vत्वा त्वां vदधातु निदधातु ॥

एकादशिनस्य पौष्णस्य पशोर्हविषः ' पूषेमाः ' इत्यनुवाक्या । ' पूषेमा आशा अनु वेद सर्वाः शुकं ते अन्यद्यजतं ते अन्यत् ' (आश्व. श्रौ. ३. ७) इति हि सूत्रितम् ॥

---

१. त-भ-सु-°सदृशामन्यां । २. त-भ-' रेतः ' नास्ति । ३. ग-अस्मिन् । ४. त३.४-भ१. २.४-सर्वस्य भूतजातस्य । ५. त-भ६-छांदसीणः । ६. ग-त१.२.४-प्रथमत एव; त३-प्रथम एव । ७. त-तस्मिंस्तस्मिन् ।

पूषेमा आशा अनु वेद सर्वाः सो अस्माँ अभयतमेन नेषत् ।
स्वस्तिदा आघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रजानन् ॥ ५ ॥

पूषा । इमाः । आशाः । अनु । वेद । सर्वाः । सः । अस्मान् । अभयऽतमेन । नेषत् ।
स्वस्तिऽदाः । आघृणिः । सर्वऽवीरः । अप्रऽयुच्छन् । पुरः । एतु । प्रऽजानन् ॥ ५ ॥

[v]पूषा देवः [v]इमाः [v]सर्वाः [v]आशाः प्राच्याद्या दिशः [v]अनु [v]वेद आनुपूर्व्येण जानाति। इमाः सुखेन गन्तव्या असुखेनेति वैवमनुक्रमेण जानातीत्यर्थः। एवं सति अस्मान् प्रमिते यजमानो भवीति पुत्रमुखेन याजकमुखेन वा। [v]अस्मान्[1] [v]अभयतमेन अत्यन्तं भयरहितेन मार्गेण [v]नेषत् नयतु। कथम्। [v]स्वस्तिदाः कल्याणस्य दाता [v]आघृणिः आगतदीप्तियुक्तः [v]सर्ववीरः सर्वैर्वीरैः कर्मणि समर्थैर्ऋत्विग्भिरुपेतः [v]अप्रयुच्छन् अप्रमाद्यन् [v]प्रजानन् अस्माकं फलाफले विजानानः सन् [v]पुरः [v]एतु अस्माकं पुरस्ताद्गच्छतु। यथास्माकं भयं न[2] भवति तथा गच्छत्वित्यर्थः ॥ ॥ २३ ॥

एकादशिनस्य पौष्णस्य पशोः पुरोडाशस्य ' प्रपथे पथाम् ' इति याज्या। सूत्रितं च—' प्रपथे पथामजनिष्ट पूषा पथस्पथः परिपतिं वचस्या ' (आश्व. श्रौ. ३. ७) इति ॥

प्रपथे पथामजनिष्ट पूषा प्रपथे दिवः प्रपथे पृथिव्याः ।
उभे अभि प्रियतमे सधस्थे आ च परा च चरति प्रजानन् ॥ ६ ॥

प्रऽपथे । पथाम् । अजनिष्ट । पूषा । प्रऽपथे । दिवः । प्रऽपथे । पृथिव्याः ।
उभे इति । अभि । प्रियतमे इति प्रियऽतमे । सधस्थे इति सधऽस्थे ।
आ । च । परा । च । चरति । प्रऽजानन् ॥ ६ ॥

[v]पथाम् अन्तरिक्षगमनहेतुभूतानां मार्गाणां मध्ये [v]प्रपथे यः प्रकृष्टः पन्थास्ति तत्र [v]पूषा [v]अजनिष्ट प्रादुरभूत्। पुण्यकर्मणां सुगतिप्रापणार्थमवस्थित इति भावः। तथा [v]दिवः द्युलोकस्य च मार्गाणां मध्ये [v]प्रपथे प्रकृष्टे मार्गे जातः। तथा [v]पृथिव्याः [v]प्रपथे प्रकृष्टे मार्गे मनुष्याणां तत्तत्कर्मणि प्रवर्तनार्थं प्रादुर्भूत इत्यर्थः। सोऽयं पूषा [v]प्रियतमे सर्वस्येष्टतमे [v]सधस्थे सर्वेषां सहावस्थानभूते [v]उभे द्यावापृथिव्यावभिलक्ष्य [v]आ [v]चरति आभिमुख्येन चरति। सुकृतिनां सुकृतफलप्रदर्शनायानुकूलं चरतीत्यर्थः। तथा [v]परा चरति। दुष्कर्मणां प्रतिकूलं गच्छति। किं कुर्वन्। [v]प्रजानन् अनेनेदं कर्म कृतमस्य कर्मण इदं फलमित्यविशेषेण जानानः ॥

व्यूळहस्य वशरात्रस्य तृतीये छन्दोमे प्रउगशस्त्रे[3] सारस्वततृचस्य 'सरस्वतीं देवयन्तः' इत्येषाद्या। सूत्र्यते हि—' प्र ब्रह्माणो अङ्गिरसो नक्षन्त सरस्वतीं देवयन्तो हवन्ते ' (आश्व. श्रौ. ८. ११) इति ॥

सरस्वतीं देवयन्तो हवन्ते सरस्वतीमध्वरे तायमाने ।
सरस्वतीं सुकृतो अह्वयन्त सरस्वती दाशुषे वार्यं दात् ॥ ७ ॥

सरस्वतीम् । देवऽयन्तः । हवन्ते । सरस्वतीम् । अध्वरे । तायमाने ।
सरस्वतीम् । सुऽकृतः । अह्वयन्त । सरस्वती । दाशुषे । वार्यम् । दात् ॥ ७ ॥

---

१. ग-त३.४–अस्मान् स पूषा; भ६–अस्मान् पूषा। २. त–नर्य। ३. त-भ१.२.४.६-सु–प्रउगे।

vदेवयन्तः देवान्[1] यष्टुं स्तोतुं च[1] कामयमानाः यजमानाः vसरस्वतीम् एतन्नामिकां मध्यमस्थानदेवतां vहवन्ते कर्मावबद्धत्वाय आह्वयन्ति । तथा vताद्यमाने स्तुतिभिर्हविर्भिश्च विस्तीर्यमाणे[2] vअध्वरे यज्ञे vसरस्वतीं यजन्तीति शेषः । vसुकृतः पुण्यकर्माणः vसरस्वतीम् vआह्वयन्त फलप्रदानाय ह्वयन्ते । यत एवमतः कारणात् vसरस्वती देवी vदाशुषे हवींषि दत्तवते यजमानाय vवार्यं वरणीयं कर्मफलं vदात् प्रयच्छतु ॥

सर॑स्वति॒ या स॒रथं॑ य॒याथ॑ स्व॒धाभि॑र्देवि पि॒तृभि॒र्मद॑न्ती ।
आस॒द्यास्मि॒न्ब॒र्हिषि॑ मादयस्वानमी॒वा इष॒ आ धे॑ह्य॒स्मे ॥ ८ ॥

सर॑स्वति । या । स॒ऽरथ॑म् । य॒याथ॑ । स्व॒धाभिः॑ । दे॒वि॒ । पि॒तृऽभिः॑ । मद॑न्ती ।
आ॒ऽसद्य॑ । अ॒स्मिन् । ब॒र्हिषि॑ । मा॒द॒य॒स्व॒ । अ॒न॒मी॒वाः । इषः॑ । आ । धे॒हि॒ । अ॒स्मे इति॑ ॥८॥

हे vसरस्वति हे vदेवि vया त्वं vसरथं पितृभिः सह समानेन रथेन युक्तं यथा भवति तथा vययाथ । अस्मदीयं यज्ञं प्राप्नोसि । किं कुर्वती[3] । vपितृभिः सह vस्वधाभिः हविर्लक्षणैरन्नैः vमदन्ती माद्यन्ती यज्ञं गच्छसीति संबन्धः । सा त्वं vबर्हिषि vअस्मिन् वेदिस्तरणे यज्ञे vआसद्य उपविश्य vमादयस्व हविर्भिस्तृप्ता भव । आत्मानं तर्पय वा । ततस्तृप्ता सती त्वम् vअनमीवाः । अमीवा रोगः । तद्वर्जितान्यारोग्यजननानि vइषः अन्नानि vअस्मे अस्मभ्यम् vआ vधेहि पर्याप्तं प्रयच्छ ॥

सर॑स्वतीं॒ यां पि॒तरो॑ हवन्ते दक्षि॒णा य॒ज्ञम॑भि॒नक्ष॑माणाः ।
स॒ह॒स्रा॒र्धमि॒ळो अत्र॑ भा॒गं रा॒यस्पोषं॑ यज॒मानेषु॑ धेहि ॥ ९ ॥

सर॑स्वतीम् । याम् । पि॒तरः॑ । ह॒व॒न्ते॒ । द॒क्षि॒णा । य॒ज्ञम् । अ॒भि॒ऽनक्ष॑माणाः ।
स॒ह॒स्र॒ऽअ॒र्धम् । इ॒ळः । अत्र॑ । भा॒गम् । रा॒यः । पोष॑म् । य॒ज॒मानेषु॑ । धे॒हि॒ ॥ ९ ॥

vयां त्वां vसरस्वतीं vपितरो vहवन्ते आह्वयन्ति । कीदृशाः । vदक्षिणा ॥ 'दक्षिणादाच्' (पा. सू. ५. ३. ३६) इत्याच्प्रत्ययः ॥ दक्षिणत आगत्य vयज्ञमभिनक्षमाणाः अभितो गच्छन्तो व्याप्नुवन्तः । vअत्र अस्मिन् यज्ञे vसहस्रार्धं बहुभिः पूजनीयमुपथोज्यम् vइळः[4] अन्नस्य vभागं vरायः धनस्य vपोषं पुष्टिं च vयजमानेषु त्वं vधेहि स्थापय ॥

अवभृथस्थाने 'आपो अस्मान्' इत्येचा । सूत्रितं[5] च—'तत आचम्याप्लवन्त आपो अस्मान् मातरः शुन्धयन्तु' (आश्व. श्रौ. ९. १३) इति । दशमेऽहनि वपामार्जनेऽप्येचा[5] । सूत्रितं च—'इदमापः प्र वहतेत्येतस्याः स्थाने आपो अस्मान्मातरः शुन्धयन्तु' (आश्व. श्रौ. ८. १२) इति ॥

आपो॑ अ॒स्मान्मा॒तरः॑ शुन्धयन्तु घृ॒तेन॑ नो घृत॒प्वः॑ पुनन्तु ।
विश्वं॒ हि रि॒प्रं प्र॒वह॑न्ति दे॒वीरुदिदा॑भ्यः शु॒चिरा पू॒त ए॑मि ॥ १० ॥

आपः॑ । अ॒स्मान् । मा॒तरः॑ । शु॒न्ध॒य॒न्तु॒ । घृ॒तेन॑ । नः॒ । घृ॒तऽप्वः॑ । पु॒न॒न्तु॒ ।
विश्व॑म् । हि । रि॒प्रम् । प्र॒ऽवह॑न्ति । दे॒वीः । उत् । इत् । आ॒भ्यः॒ । शु॒चिः॑ । आ । पू॒तः । ए॒मि॒ ॥ १० ॥

---

१. ग–देवानेव यष्टुं स्तोतुं वा । २. ग-त-म२.४-सु–विस्तार्यमाणे । ३. म–कुर्वती । ४. त–इषः । ५. त-म६–'सूत्रितं...°प्येचा' नास्ति ।

vमातरः जगती मातृस्थानीयाः vआपः vअरमान् vक्लेदयन्तु प्रोक्षणेन शोधयन्तु। तथा vघृतप्वः। घृतमुदकम्। तेनाप्यान् पुनन्तीति। तास्तथोक्ता आपः। यद्वा घृतप्वः। घृतं गव्यम्। तेन पुनन्ति। तथा ब्राह्मणं—'घृतेन नो घृतप्वः पुनन्तीति तद्वै सुपूतं यद्घृतेन पूयते' (श. ब्रा. ३.१.२.११) इति। ता आपः vघृतेन प्रत्यक्षेणोदकेन vनः अस्मान् vपुनन्तु। vहि यस्मात् vदेवीः देव्यो देवनशीला आपः vविश्वं सर्वं vरिप्रं पापं vप्रवहन्ति[1] पुरुषसकाशात्[2] प्रगमयन्ति। अपनयन्तीति यावत्। अनन्तरम् vआग्मः अग्नयः vआ vपूतः आभिमुख्येन शुद्धः सन् स्तोताहम् vउत् vएमि उद्गच्छामि। ऊर्ध्वं स्वर्गं गच्छामीत्यर्थः॥ ॥ २४ ॥

सुत्येऽहनि 'द्रप्सश्चस्कन्द' इत्यादिके द्वे विप्रुड्होमार्थे। सूत्रितं च—'द्रप्सश्चस्कन्देति द्वाभ्यां विप्रुड्होमौ हुत्वा' (आश्व. श्रौ. ५. २) इति। स्कन्नहविरभिमर्शनेऽपि 'द्रप्सः' इत्येषा। आहुतिर्बर्हिष्परिधि यदि स्कन्देत् तदानीमाग्नीध्रोऽनया जुहुयात्। स्कन्नमभिमृशेदिति प्रकृत्य सूत्रितं—'द्रप्सश्चस्कन्देत्याहुतिश्चेद्बर्हिष्परिध्याग्नीध्र एनां जुहुयात्' (आश्व. श्रौ. ३. १३) इति॥

द्रप्सश्चस्कन्द प्रथमाँ अनु द्यूनिमं च योनिमनु यश्च पूर्वः।
समानं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः॥ ११॥

द्रप्सः। चस्कन्द। प्रथमान्। अनु। द्यून्। इमम्। च। योनिम्। अनु। यः। च। पूर्वः। समानम्। योनिम्। अनु। सम्ऽचरन्तम्। द्रप्सम्। जुहोमि। अनु। सप्त। होत्राः॥११॥

vद्रप्सः अभिषूयमाणस्य सोमस्य रसः vप्रथमान् पूर्वभाविनः पार्थिवाँल्लोकान् vद्यून् दीप्यमानान् द्युलोकांश्च vअनु लक्षीकृत्य vचस्कन्द स्कन्नवान् गतवान्। तदेवाह। vइमं परिदृश्यमानं vयोनिं स्थानभूतं लोकं vच vयश्च अस्मात् vपूर्वः अस्ति तम् vअनु गतवान्। vसमानं साधारणं vयोनिं द्यावापृथिवीलक्षणं स्थानम् vअनु vसंचरन्तं सम्यग्गच्छन्तं vद्रप्सं सोमरसं विप्रुड्लक्षणं vसप्त vहोत्राः सप्तसंख्याका विप्रुड्होमस्य कर्तारो होतृप्रभृतयो वयम् vअनु आनुपूर्व्येण vजुहोमि जुहुमः। यद्वा। होत्राः। सप्तहोतृभिः क्रियमाणा यागक्रिया होत्राः। ता अनु पश्चादध्वर्युरहं जुहोमि। यद्वा। द्रप्सः। द्रुतगामित्वाद्रप्स आदित्य उच्यते। स[3] आदित्यः पृथिवीं च दिवं च गच्छति समानं योनिमन्तरिक्षं लक्षीकृत्य। सम्यक्चरन्तं तं द्रप्समादित्यमुद्दिश्य सप्त होत्राः सप्तसंख्याका दिशः। यस्यां दिशि सूर्यो वर्तते तद्व्यतिरिक्ताः सप्तसंख्याका दिशः[4]। अनु पश्चाज्जुहोमि। यत्र यत्र वर्तते तां तां दिशं द्रव्यत्वेन प्रयच्छामि। प्रतिष्ठापयामीत्यर्थः। अत्र वाजसनेयकम्—'असौ वा आदित्यो द्रप्सः स दिवं च पृथिवीं च स्कन्दतीमं च योनिमनु यश्च पूर्व इतीमं च लोकममुं चेत्येतत् समानं योनिमनु संचरन्तमिति समानं ह्येव एतं योनिमनु संचरति[5] द्रप्सं जुहोम्यनु सप्त होत्रा इत्यसौ वा आदित्यो द्रप्सो दिशः सप्त होत्रा अमुं तदादित्यं दिक्षु प्रतिष्ठापयति' (श. ब्रा. ७. ४. १. २०) इति॥

यस्ते द्रप्सः स्कन्दति यस्ते अंशुर्बाहुच्युतो धिषणाया उपस्थात्।
अध्वर्योर्वा परि वा यः पवित्रात्तं ते जुहोमि मनसा वषट्कृतम्॥ १२॥

यः। ते। द्रप्सः। स्कन्दति। यः। ते। अंशुः। बाहुऽच्युतः। धिषणायाः। उपऽस्थात्। अध्वर्योः। वा। परि। वा। यः। पवित्रात्। तम्। ते। जुहोमि। मनसा। वषट्ऽकृतम्॥१२॥

---

१. त-भ६—वहति। २. त-भ—पुरुषात्सकाशात्। ३. त-भ६—'स' नास्ति। ४. त-भ६—दिशः सप्त। ५. त-भ१.२.४.६—संचरति।

हे सोम ᵛते त्वदीयः ᵛयः ᵛद्रप्सः रसः ᵛस्कन्दति अधिषवणचर्मणोऽन्यत्र गच्छति। ᵛयः च ᵛते त्वदीयः ᵛअंशुः रसादितरः सन् स्कन्दति। ᵛबाहुच्युतः अध्वर्योर्बाहुभ्यां प्रच्युतः सन् स्कन्दति। यद्वा। बाहुवत्साधनभूता ग्रावाणः। तैः प्रच्युतोऽभिषुतः सन् ᵛधिषणायाः। धिषणेत्यधिषवणफलक-नाम। प्रत्येकविवक्षयैकवचनम्। अधिषवणफलकयोः ᵛउपस्थात् समीपस्थात् प्रदेशादन्यत्र गच्छति। तथा ᵛअध्वर्योर्वा अभिषुण्वतोऽध्वर्योर्हस्तात् स्कन्दति। ᵛवा अपि[1] वा[1] ᵛपवित्रात् द्रप्सापवित्रात् ᵛपरि स्कन्दति। ᵛतं सर्वं द्रप्सं ᵛते त्वदीयं रसं ᵛमनसा अन्तःकरणेन स्तोत्रेण वा सह ᵛवषट्कृतं वषट्कारेण स्वाहाकारेण कृतं ᵛजुहोमि अग्नौ प्रक्षिपामि ॥

यस्ते द्रप्सः स्कन्नो यस्ते अंशुरवश्च यः परः सुचा।
अयं देवो बृहस्पतिः सं तं सिञ्चतु राधसे ॥ १३ ॥

यः। ते। द्रप्सः। स्कन्नः। यः। ते। अंशुः। अवः। च। यः। परः। सुचा।
अयम्। देवः। बृहस्पतिः। सम्। तम्। सिञ्चतु। राधसे ॥ १३ ॥

हे सोम ᵛते त्वदीयः ᵛयः ᵛद्रप्सः रसोऽन्यत्र ᵛस्कन्नः गतः ᵛयः च त्वदीयस्तव कारणभूतः ᵛअंशुः लताखण्डो रसादितरो भवति ᵛसुचा पात्रविशेषेण गृहीतः सोमः ᵛअवः अवस्तात् स्कन्दते ᵛपरः परस्ताद्वातिरिक्तो भवति ᵛतम् इमं सोमम् ᵛअयं ᵛबृहस्पतिः एतन्नामकः ᵛदेवः ᵛसं ᵛसिञ्चतु सम्यक् प्रक्षारयतु। किमर्थम्। ᵛराधसे अस्माकं धनार्थम्। स्कन्ने हि सोमे प्रजापश्वादिकमपस्कन्नं भवति खलु ॥

पर्यस्वतीरोषधयः पर्यस्वन्मामकं वचः।
अपां पर्यस्वदित्पयस्तेन मा सह शुन्धत ॥ १४ ॥

पर्यस्वतीः। ओषधयः। पर्यस्वत्। मामकम्। वचः।
अपाम्। पर्यस्वत्। इत्। पयः। तेन। मा। सह। शुन्धत ॥ १४ ॥

इयं प्रत्यक्षकृता। हे आपः ᵛओषधयः ᵛपयस्वतीः पयस्वत्यो वृष्टिलक्षणेनोदकेन सारवत्यो भवन्ति। ᵛमामकं मदीयं ᵛवचः वचनं वृष्टिप्रार्थनवचनं ᵛपयस्वत् सारवत् भवति। किं बहुना। यच्च इह किंचित् ᵛअपाम् उदकानां ᵛपयः क्षीरवत् सारभूतं[2] यदस्ति[2] तत्सर्वं पयस्वत् सारवदेव। ᵛतेन उदकसारेण ᵛसह ᵛमा मां ᵛशुन्धत यूयं शोधयत। 'आपो अद्यान्वचारिषं रसेन समगस्महि' (ऋ. सं. १. २३. २३) इति निगमान्तरम् ॥ ॥ २५ ॥

'परं मृत्यो' इति चतुर्दशर्चं द्वितीयं सूक्तं यमपुत्रस्य संकुसुकस्यार्षम्। एकादशी प्रस्तारपङ्क्तिः। आद्यौ जागतौ ततो द्वौ गायत्रौ। 'प्रस्तारपङ्क्तिः पुरतः' (पि. सू. ३. ४१) इति। त्रयोदशी जगती चतुर्दश्यनुष्टुप्। शिष्टास्त्रिष्टुभः। तत्राद्यौ चतस्रो मृत्युदेवत्याः। पञ्चमी धातृदेवताका। षष्ठी त्वष्टृदेवत्या। सप्तम्याद्याः त्रिष्टाः पितृमेधाभिधायिन्यः। अतस्तद्देवताकाः। अस्या त्वनिरुक्तत्वात् प्राजापत्या वा। तथा चानुक्रान्तं—'परं मृत्यो संकुसुकश्चतस्रो मृत्युदेवताः परा धात्री परा त्वाष्ट्री पराः पितृमेधा एकादशी प्रस्तारपङ्क्तिर्जगत्युपान्त्यान्त्यानुष्टुप् प्राजापत्या वा सानिरुक्ता' इति ॥

---

१. त१.५.६.७-म१.२.४-'अपि वा' नास्ति; त२-वा; त३.४-अपि च; म६-अथवा।
२. ग-त-म-सारभूतो योस्ति।

परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात् ।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजां रीरिषो मोत वीरान् ॥ १ ॥

परम् । मृत्यो इति । अनु । परा । इहि । पन्थाम् । यः । ते । स्वः । इतरः । देवऽयानात् । चक्षुष्मते । शृण्वते । ते । ब्रवीमि । मा । नः । प्रऽजाम् । रिरिषः । मा । उत । वीरान् ॥१॥

हे मृत्यो सर्वेषां मारकैतन्नामक देव परम् अन्यं पन्थां पन्थानम् अनु आनुपूर्व्येण परेहि पराङ्मुखो गच्छ । यजमानादिति शेषः । कोऽसौ पन्थाः । ते तव स्वः स्वभूतः देवयानात् । देवा अनेन मार्गेण गच्छन्तीति देवयानो देवमार्गः । तस्मात् इतरः यः पन्थाः तं प्रगच्छ । न केवलमतः परागच्छ अपि तु चक्षुष्मते दर्शनवते शृण्वते सर्वम् । अप्रतिहतसर्वेन्द्रियविज्ञानायेत्यर्थः । ते तुभ्यं ब्रवीमि कथयामि । नः अस्माकं प्रजां दुहितृदौहित्रात्मिकां मा रिरिषः मा हिंसीः । उत अपि च वीरान् पुत्रपौत्रादीन् मा हिंसीः । तत्परागमनेन रक्षेत्यर्थः ॥

मृत्योः पदं योपयन्तो यदैत द्राघीय आयुः प्रतरं दधानाः ।
आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवत यज्ञियासः ॥ २ ॥

मृत्योः । पदम् । योपयन्तः । यत् । ऐत । द्राघीयः । आयुः । प्रऽतरम् । दधानाः ।
आऽप्यायमानाः । प्रऽजया । धनेन । शुद्धाः । पूताः । भवत । यज्ञियासः ॥ २ ॥

हे मृतस्य ज्ञातयः मृत्योः परागच्छतः तस्य पदम् । पद्यतेऽस्मिन्निति पदं पितृयाणः । तं योपयन्तः विमोहयन्तः परिवर्जयन्तः यत् यस्मात् ऐत देवयानीयपथा गतवन्तः तस्मात् द्राघीयः दीर्घतरम् आयुः जीवनं प्रतरं प्रकृष्टतरमत्यर्थं दधानाः धारयन्तो भवथ । किंच हे यज्ञियासः यज्ञार्हा यज्ञसंपादिनो यजमानाः प्रजया पुत्रपौत्रादिकया धनेन गवाश्वादिकेन च आप्यायमानाः वर्धमानाः[1] सन्तः शुद्धाः जन्मान्तरसंचितदुरितक्षयात् शुद्धाः भवत । पूताः वर्तमानजन्मोपचितदुरितक्षयाच्च पूता भवत ॥

पैतृमेधिके कर्मणि अमात्याः ' इमे जीवा वि मृतैः ' इति सव्यावृतो व्रजन्ति । सूत्रितं च— ' इमे जीवा वि मृतैरिति सव्यावृतो व्रजन्ति ' (आश्व. गृ. ४. ४. ९) इति ॥

इमे जीवा वि मृतैराववृत्रन्नभूद्भद्रा देवहूतिर्नो अद्य ।
प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ॥ ३ ॥

इमे । जीवाः । वि । मृतैः । आ । अववृत्रन् । अभूत् । भद्रा । देवऽहूतिः । नः । अद्य ।
प्राञ्चः । अगाम । नृतये । हसाय । द्राघीयः । आयुः । प्रऽतरम् । दधानाः ॥ ३ ॥

इमे जीवाः जीवन्तः पुरुषाः मृतैः पित्रादिभिः । तेभ्य इत्यर्थः । वि आ अववृत्रन् व्यावृत्ता भवन्तु । एते न म्रियन्तामिति भावः । किंच अद्य अस्मिन् दिने नः अस्माकमग्नौचे क्रियते देवहूतिः देवानामाह्वानं यत्र स देवहूतिः पितृमेधाख्यो यज्ञः भद्रा कल्याणः अभूत्

१. ग-भ-प्रवर्तमानाः; त-मु-वर्तमानाः; उद्वीथ-प्रवर्धमानाः ।

भवतु। तत उत्तरं वयं ᵛप्राञ्चः प्राङ्मुखाञ्चनाः ᵛअगाम[1] गच्छेम। प्रत्यञ्च इति भावः। ᵛकृतये गर्तनाथ कर्मणि गात्रविक्षेपाय। स्वकर्मानुष्ठानायेति भावः। ᵛहसाय हसनाथ पुत्रादिभिः सह क्रीडनाय। कीदृशा वयम्। ᵛप्राचीय ᵛआयुः ᵛप्रतरं ᵛदधानाः॥

इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम्।
शतं जीवन्तु शरदः पुरूचीरन्तर्मृत्युं दधतां पर्वतेन॥ ४॥

इमम्। जीवेभ्यः। परिऽधिम्। दधामि। मा। एषाम्। नु। गात्। अपरः। अर्थम्। एतम्। शतम्। जीवन्तु। शरदः। पुरूचीः। अन्तः। मृत्युम्। दधताम्। पर्वतेन॥ ४॥

अनया जीवरक्षार्थं पाषाणं परिधिरूपेण स्थापयन्ति। ᵛजीवेभ्यः जीवत्रयः पुत्रपौत्रादिभ्यस्तेषां रक्षणार्थमेवं ᵛपरिधिं मृत्योः परिधानभूतं पाषाणं ᵛदधामि निदधामि[2]। ततः ᵛएषां जीवतां मध्ये ᵛअपरः अन्यः ᵛएतम् इमम् ᵛअर्थम्। अर्तेरिदं रूपम्। गन्तव्यं मरणाख्यं मार्गं ᵛनु क्षिप्रं ᵛमा ᵛगात् मा गच्छतु। एतदर्थं परिधिं स्थापयामीति संबन्धः। किंच ᵛपुरूचीः बहुजना बहुगमनाः ᵛशतं ᵛशरदः एतत्संख्याकान् वर्षान् ᵛजीवन्तु स्वस्वप्राणान् धारयन्तु। तथा ᵛपर्वतेन शिलोच्चयेन ᵛमृत्युं सर्वेषां मारकमेतन्नामकम् ᵛअन्तः ᵛदधताम् अन्तर्हितं कुर्वन्तु। यथा नागच्छति[3] तथा कुर्वतामित्यर्थः॥

यथाहान्यनुपूर्वं भवन्ति यथर्तवऋतुभिर्यन्ति साधु।
यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम्॥ ५॥

यथा। अहानि। अनुऽपूर्वम्। भवन्ति। यथा। ऋतवः। ऋतुऽभिः। यन्ति। साधु।
यथा। न। पूर्वम्। अपरः। जहाति। एव। धातः। आयूंषि। कल्पय। एषाम्॥ ५॥

ᵛयथा येन प्रकारेण ᵛअहानि अहोरात्रात्मकानि दिनानि ᵛअनुपूर्वं पूर्वपूर्वमनुक्रमेण ᵛभवन्ति परिवर्तन्ते। ᵛयथा च ᵛऋतवः वसन्तादयः ᵛऋतुभिः सह ᵛसाधु शोभनमविपर्यासेन ᵛयन्ति गच्छन्ति। ᵛयथा च ᵛपूर्वं पूर्वकालीनं पितरम् ᵛअपरः अर्वाक्कालीनः पुत्रः ᵛन ᵛजहाति न परित्यजति पूर्वमरणेन। ᵛएव एवं[4] तेनैवोक्तप्रकारेण हे ᵛधातः सर्वेषां धारयितरेतन्नामक देव ᵛएषाम् अस्मत्कुलीनानां जीवानाम् ᵛआयूंषि जीवनानि ᵛकल्पय समर्थय। कुर्वित्यर्थः॥ ॥ २६॥

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ।
इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः॥ ६॥

आ। रोहत। आयुः। जरसम्। वृणानाः। अनुऽपूर्वम्। यतमानाः। यति। स्थ।
इह। त्वष्टा। सुऽजनिमा। सऽजोषाः। दीर्घम्। आयुः। करति। जीवसे। वः॥ ६॥

हे मृतस्य स्वजनाः पुत्रपौत्रादयः ᵛजरसं जरां ᵛवृणानाः संभजमाना यूयम् ᵛआयुः जीवनम् ᵛआ ᵛरोहत अधितिष्ठत। ᵛअनुपूर्वम् आनुपूर्व्येण। अव्ययीभावः। पूर्वो ज्येष्ठः। ज्येष्ठानुपूर्व्या ᵛयतमानाः प्रयत्नं कुर्वन्तो यूयं[5] ᵛयति ᵛस्थ यत्संख्याका भवथ। यच्छब्दाच्छान्दसो डतिः।

१. त१.२.५–अनाम; त३.४–म–अगाम; मु–अयाम। २. त१.४–म६.७–'निदधामि' नास्ति; त२.५–दधामि; त७–स्थापयामि। ३. ग–त१.३.४.५.६–म–गच्छति। ४. त–एवं एवमु; म१.४–एवं एवमु। ५. त–म–वयं।

[v]सुजनिमा शोभनजनमनः [v]त्वष्टा पुत्रकामको देवः [v]सजोषाः भवद्भिः संगतः सन् [v]इह अस्मिन् कर्मणि प्रवृत्तानां [v]वः युष्माकं [v]जीवसे जीवनाय [v]दीर्घं प्रभूतम् [v]आयुः [v]करति करोतु ॥

इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा सं विशन्तु ।
अनश्रवोऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ॥ ७ ॥

इमाः । नारीः । अविधवाः । सुऽपत्नीः । आऽअञ्जनेन । सर्पिषा । सम् । विशन्तु ।
अनश्रवः । अनमीवाः । सुऽरत्नाः । आ । रोहन्तु । जनयः । योनिम् । अग्रे ॥ ७ ॥

[v]अविधवाः । धवः पतिः । अविगतपतिकाः । जीवद्भर्तृका इत्यर्थः । [v]सुपत्नीः शोभनपतिकाः [v]इमाः [v]नारीः नार्यः [v]आञ्जनेन सर्वतोऽञ्जनसाधनेन [v]सर्पिषा घृतेन अक्तनेत्राः सत्यः [v]सं [v]विशन्तु स्वगृहान् प्रविशन्तु । तथा [v]अनश्रवः अश्रुवर्जिता अरुदत्यः [v]अनमीवाः । अमीवा रोगः । तद्वर्जिताः । मानसदुःखवर्जिता इत्यर्थः । [v]सुरत्नाः शोभनधनसहिताः [v]जनयः । जनयन्त्यपत्यमिति जनयो भार्याः । ताः [v]अग्रे सर्वेषां प्रथमत एव [v]योनिं गृहम् [v]आ [v]रोहन्तु आगच्छन्तु ॥

देवरादिकः प्रेतपत्नीम् ' उदीर्ष्वं नारि ' इत्यनया भर्तृसकाशादुत्थापयेत् । सूत्रितं च— ' तामुत्थापयेद्देवरः[1] पतिस्थानीयोऽन्तेवासी जरद्दासो वोदीर्ष्वं नार्यभि जीवलोकम् ' (आश्व. गृ. ४. २. १८) इति[1] ॥

उदीर्ष्वं नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ॥ ८ ॥

उत् । ईर्ष्व । नारि । अभि । जीवऽलोकम् । गतऽअसुम् । एतम् । उप । शेषे । आ । इहि ।
हस्तऽग्राभस्य । दिधिषोः । तव । इदम् । पत्युः । जनिऽत्वम् । अभि । सम् । बभूथ ॥८॥

हे [v]नारि मृतस्य पत्नि [v]जीवलोकं जीवानां पुत्रपौत्रादीनां[2] लोकं स्थानं गृहमभिलक्ष्य [v]उदीर्ष्व अस्मात् स्थानादुत्तिष्ठ । 'ईर गतौ' आदादिकः । [v]गतासुम् अपक्रान्तप्राणम्[3] [v]एतं पतिम् [v]उप [v]शेषे तस्य समीपे स्वपिषि । तस्मात्त्वम् [v]एहि आगच्छ यस्मात्त्वं [v]हस्तग्राभस्य पाणिग्राहं कुर्वतः [v]दिधिषोः गर्भस्थ निधातुः [v]तव अस्य [v]पत्युः संबन्धादागतम् [v]इदं [v]जनित्वं जायात्वमभिलक्ष्य [v]सं [v]बभूथ संभूतासि अनुमरणनिश्चयमकार्षीः तस्मादागच्छ ॥

क्षत्रियस्य ' धनुर्हस्तात् ' इत्यनया धनुः प्रहरेत् । सूत्रितं च—'धनुर्हस्तादाददानो[4] मृतस्येति धनुः ' (आश्व. गृ. ४. २. २०) इति[4] ॥

धनुर्हस्तादाददानो मृतस्यास्मे क्षत्राय वर्चसे बलाय ।
अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम ॥ ९ ॥

धनुः । हस्तात् । आऽददानः । मृतस्य । अस्मे इति । क्षत्राय । वर्चसे । बलाय ।
अत्र । एव । त्वम् । इह । वयम् । सुऽवीराः । विश्वाः । स्पृधः । अभिऽमातीः । जयेम ॥९॥

---

१. ग-त-भ२.४.७–' तामुत्थापयेद्देवर...इति ' नास्ति; भ६–उदीर्ष्व नार्यभि जीवलोकमिति कर्ता दृश्ये जपेत् । २. त–' पुत्रपौत्रादीनां ' नास्ति । ३. त-भ–उपक्रांत°; उद्वीथ–उत्क्रांत° । ४. ग-त-भ१.२.४.५.७–' धनुर्हस्ता°...इति ' नास्ति ।

vमृतस्य क्षत्रियस्य vहस्तात् vधनुः vआददानः । किमर्थम् । vअस्मे अस्माकं vक्षत्राय प्रजापालनसमर्थाय बलाय vवर्चसे तेजसे vबलाय सेनालक्षणाय च धनुरादददानोऽहं भवीमीति शेषः। किमिति । vत्वम् vअत्रैव अस्मिन् स्थाने एव भव vवयं च vइह अस्मिँल्लोके vसुवीराः सुपुत्रयुक्ता भवन्तः vविश्वाः सर्वान् vअभिमातीः अभिमन्यमानान् vस्पृधः संघर्षयितॄन् बाधकान् शत्रून् vजयेम सहेमहि ॥

दीक्षितमरणे ' उप सर्प मातरम् ' इत्याद्याश्वतस्रः शंसनीयाः । सूत्रितं च—' उप सर्प मातरं भूमिमेतामिति चतस्रः सोम एकैकस्याः ' (आश्व. श्रौ. ६. १०) इति । ' उप सर्प ' इत्यनया संचिताऽन्यस्थीनि गर्ते निदध्युः (आश्व. गृ. ४. ५. ५) ॥

उप सर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् ॥ १० ॥

उप । सर्प । मातरम् । भूमिम् । एताम् । उरुऽव्यचसम् । पृथिवीम् । सुऽशेवाम् ।
ऊर्णऽम्रदाः । युवतिः । दक्षिणाऽवते । एषा । त्वा । पातु । निःऽऋतेः । उपऽस्थात् ॥ १० ॥

vमातरं मातृभूतां vभूमिम्[1] अस्माभिर्भूमौ निधीयमानस्त्वम् vउप vसर्प उपगच्छ । अनुप्रविशेत्यर्थः । कीदृशीम् । vउरुव्यचसं बहुव्याप्तिकां vपृथिवीं विस्तीर्णां vसुशेवां सुसुखाम् । सर्वेषां सुखदात्रीमित्यर्थः[2] । तामुपगच्छ । vयुवतिः यौवनान्विता स्त्रीरूपेयं भूमिः vदक्षिणावते ऋत्विग्भ्यो देयत्वेन धनवते यजमानाय vऊर्णम्रदाः । ऊर्णेव ऊर्णास्तुक इव मृदी भवति । सुकुमारा भवति । न बाधयित्रीत्यर्थः । सा vएषा पृथिवी vनिर्ऋतेः मृत्युदेवताया vउपस्थात् समीपस्थानात् vत्वा त्वामस्थिरूपं यजमानं vपातु रक्षतु ॥ ॥ २७ ॥

' उच्छ्वञ्चस्व ' इत्येतया पांसूनवकिरेत् । सूत्र्यते हि—' उत्तरया[3] पांसूनवकिरेत् ' (आश्व. गृ. ४. ५. ६) इति[3] ॥

उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना ।
माता पुत्रं यथा सिचाभ्येनं भूम ऊर्णुहि ॥ ११ ॥

उत् । श्वञ्चस्व । पृथिवि । मा । नि । बाधथाः । सुऽउपायना । अस्मै । भव । सुऽउपवञ्चना ।
माता । पुत्रम् । यथा । सिचा । अभि । एनम् । भूमे । ऊर्णुहि ॥ ११ ॥

हे vपृथिवि vउच्छ्वञ्चस्व । ऊर्ध्वगतोच्छ्वासमेनं कुरु । अवस्ताम्भा कृथा इत्यर्थः । किंच vमा vनि vबाधथाः मा संपीडय । तथा vअस्मै यजमानार्थं vसूपायना शोभनोपगमना सूपचारिका भवेत्यर्थः । vसूपवञ्चना । उपवञ्चनं प्रलम्भनम् । शोभनप्रलम्भा सुप्रतिष्ठा vभव । अपि च vमाता vपुत्रम् आत्मीयं बालकं vसिचा वस्त्रान्तेन vयथा आच्छादयति तद्वदे भूमि vएनम् अस्थिरूपं यजमानं त्वम् vअभि vऊर्णुहि आभिमुख्येनाच्छादय ॥

उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सुन्वत्रे ॥ १२ ॥

---

१. ग–एतां भूमिं । २. त–सुखदायिनीमित्यर्थः । ३. ग-त-म१.२.४.५.६–' उत्तरया...इति ' नास्ति ।

उत्ऽअर्च्यमाना । पृथिवी । सु । तिष्ठतु । सहस्रम् । मितः । उप । हि । श्रयन्ताम् ।
ते । गृहासः । घृतऽश्चुतः । भवन्तु । विश्वाहा । अस्मै । शरणाः । सन्तु । अत्र ॥ १२ ॥

पांसुभिः प्रच्छादयैनां पठन्ति । ᵛउच्छ्वञ्चमाना अस्थिकुम्भमवष्टभ्योर्ध्वं गच्छन्ती ᵛपृथिवी ᵛसु ᵛतिष्ठतु प्रतिष्ठिता भवतु । किंच ᵛसहस्रं सहस्रसंख्याकाः ᵛमितः प्रक्षिप्ताः ॥ मिनोतेरौणादिके कर्मणि क्विपि तुगागमः । ततो जस् । यद्वा । सहस्रम् । तृतीयार्थे प्रथमा । मित इति निष्ठान्तं रूपम् । व्यत्ययेन बहुवचनस्यैकवचनम् । स्वरो वृषादिरवाद्युदात्तव्यः ॥ सहस्रेण संमिता बहुसंख्याकाः । पार्थिवाः पांसवः ᵛउप ᵛश्रयन्ताम् । एनमुपसेवन्ताम् । संपरिवार्य तिष्ठन्त्वित्यर्थः । हिरवधारणे । तथा ᵛते पांसवोऽस्मै ᵛगृहासः गृहा भवन्तः ᵛघृतश्चुतः घृतस्योदकस्य सर्पिषो वा क्षारयितारः ᵛभवन्तु । ᵛअत्र अस्मिँल्लोके ᵛविश्वाहा सर्वेष्वहःसु सर्वदा ᵛअस्मै अस्य ᵛशरणाः सन्तु आश्रयभूता भवन्तु ॥

' उत्ते स्तभ्नामि ' इति कपालेनास्थीन्यपिदध्यात् । सूत्रितं च—' उत्ते[1] स्तभ्नामीति कपालेनापिधाय ' (आश्व. गृ. ४. ५. ८) इति[1] ॥

उत्ते स्तभ्नामि पृथिवीं त्वत्परीमं लोगं निदधन्मो अहं रिषम् ।
एतां स्थूणां पितरो धारयन्तु तेऽत्रा यमः सादना ते मिनोतु ॥ १३ ॥

उत् । ते । स्तभ्नामि । पृथिवीम् । त्वत् । परि । इमम् । लोगम् । निऽदधत् । मो इति । अहम् । रिषम् ।
एताम् । स्थूणाम् । पितरः । धारयन्तु । ते । अत्र । यमः । सदना । ते । मिनोतु ॥ १३ ॥

हे अस्थिकुम्भ ᵛत्वत्परि । परिशब्दयोगे पञ्चमी । तवोपरि ᵛते त्वदीयेन कपालेन ᵛपृथिवीम् ᵛउत् ᵛस्तभ्नामि प्रतिबध्नामि । यथा पृथिवी तवोपरि मा गच्छति तथापिदधामीत्यर्थः । ᵛइमं ᵛलोगं[2] कपाललक्षणं लोष्टं ᵛनिदधत् उपरि[3] स्थापयन् ᵛअहं ᵛमो ᵛरिषं मा हिंसिषम् । किंच ᵛएतां मया निहितां ᵛस्थूणां ᵛते त्वदीयां पृथिव्या[4] धारयित्रीं कपाललक्षणां ᵛपितरः ᵛधारयन्तु निश्चलां कुर्वन्तु । ततः ᵛते त्वदीये अस्मिन् स्थाने ᵛयमः पितृपतिः सदनानि स्थानानि ᵛमिनोतु परिच्छिनत्तु । करोत्वित्यर्थः ॥

प्रतीचीने मामहनीष्वाः पर्णमिवा दधुः ।
प्रतीचीं जग्रभा वाचमश्वं रशनया यथा ॥ १४ ॥

प्रतीचीने । माम् । अहनि । इष्वाः । पर्णम्ऽइव । आ । दधुः ।
प्रतीचीम् । जग्रभ । वाचम् । अश्वम् । रशनया । यथा ॥ १४ ॥* ॥ २८ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टके षष्ठोऽध्यायः ॥

---

१. त-भ२.४–' उत्ते...इति ' नास्ति । २. त-भ६–लोकं । ३. त१.२.६–उपस्थे उपरि । ४. त-भ२.४–पृथिव्याः । * त७-मु–अनया प्रजापतिः प्रार्थ्यते । हे प्रजापते प्रतीचीने प्रतिपूज्ये अहनि तदुपलक्षिते संवत्सरात्मके मां संकुसुकमृषिं आ दधुः निहितवंतः सर्वे देवाः । किमिव । इष्वाः बाणस्य पर्णमिव पक्षमिव । पक्षं यथा बाणस्य मूले स्थापयंति तद्वज्जगन्मूले त्वयि मां स्थापितवंतः । अतो मदीयां प्रतीचीं प्रतिपूज्यां (मु–पूज्यां) वाचं स्तुतिरूपां जग्रभ गृहाण । कथमित्युच्यते । अश्वं आशुगामिनं हयं रशनया रज्ज्वा यथा गृह्णंति तद्वत्कर्णाभ्यां मत्कृतां स्तुतिं गृहाणेत्यर्थः ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अष्टके सप्तमे षष्ठं व्याख्याय श्रुतिकोविदः।
सायणार्यस्ततोऽध्यायं सप्तमं व्याचिकीर्षति ॥

अथ द्वादशानुवाकात्मकस्य दशममण्डलस्य द्वितीयेऽनुवाके त्रयोदश सूक्तानि। तत्र 'नि वर्तध्वम्' इत्यष्टर्चं तृतीयं सूक्तम्। अस्य यमपुत्रो मथितास्य ऋषिर्वरुणपुत्रो भृगुर्वाथवा भार्गवश्च्यवनः। षष्ठी गायत्री शिष्टा अनुष्टुभः। इदमग्नेदेवताकं गोदेवताकं वा। 'अग्नीषोमा पुनर्वसू' इत्यर्धर्चोऽग्नीषोमदेवताकः। तथा चानुक्रान्तं—'नि वर्तध्वमष्टौ मथितो भृगुर्वा वारुणिर्भार्गवश्च्यवनो वापं गव्यं वानुष्टुभमग्नीषोमीयो द्वितीयोऽर्धर्चः षष्ठी गायत्री' इति। गतो विनियोगः ॥

नि वर्तध्वं मानु गातास्मान्त्सिषक्त रेवतीः।
अग्नीषोमा पुनर्वसू अस्मे धारयतं रयिम् ॥ १ ॥

नि। वर्तध्वम्। मा। अनु। गात। अस्मान्। सिसक्त। रेवतीः।
अग्नीषोमा। पुनर्वसू इति पुनःऽवसू। अस्मे इति। धारयतम्। रयिम् ॥ १ ॥

हे गावो हे आपो वा यूयं [v]नि [v]वर्तध्वम् अस्मान् प्रत्यागच्छत। [v]मानु [v]गात अस्मदुपतिरिक्तं यजमानं मा गच्छत। आगत्य च हे [v]रेवतीः रेवत्यो धनवत्यो यूयम् [v]अस्मान् [v]सिषक्त सेचयत। अवगाहनगोदोहनस्नानपानादिद्वारेण सेवध्वमित्यर्थः। हे [v]पुनर्वसू पुनःपुनर्वस्तारौ स्तोतृणां यज्ञानामाच्छादयितारौ हे [v]अग्नीषोमा अग्नीषोमौ एतन्नामकौ देवौ युवाम् [v]अस्मे अस्मासु [v]रयिं वीर्यादिलक्षणं धनं [v]धारयतं स्थापयतम् ॥

पुनरेना नि वर्तय पुनरेना न्या कुरु।
इन्द्रः एणा नि यच्छत्वग्निरेना उपाजतु ॥ २ ॥

पुनः। एनाः। नि। वर्तय। पुनः। एनाः। नि। आ। कुरु।
इन्द्रः। एनाः। नि। यच्छतु। अग्निः। एनाः। उपऽआजतु ॥ २ ॥

अत्र प्रस्तुतद्रष्टा स्वात्मानं प्रति ब्रूते। हे मदीयात्मन् त्वम् [v]एनाः एताः अन्यतोऽभिगच्छन्तीर्गा अपो वा [v]पुनः [v]नि [v]वर्तय पुनःपुनर्मदभिमुखीकुरु। तदनन्तरम् [v]एनाः एताः [v]पुनः भूयो भूयो [v]न्या [v]कुरु नियता आत्मायत्ताः कुरु। किंच [v]इन्द्रः अपि तव सहायभूतः सन् [v]एनाः एताः [v]नि [v]यच्छतु त्वदायत्ताः करोतु। [v]अग्निः च [v]एनाः एताः गा अपो वा [v]उपाजतु उपगमयतु उपक्षिपतु वा। उपयोग्याः करोत्वित्यर्थः ॥

पुनरेता नि वर्तन्तामस्मिन् पुष्यन्तु गोपतौ।
इहैवाग्ने नि धारयेह तिष्ठतु या रयिः ॥ ३ ॥

पुनः । एताः । नि । वर्तन्ताम् । अस्मिन् । पुष्यन्तु । गोऽपतौ ।
इह । एव । अग्ने । नि । धारय । इह । तिष्ठतु । या । रयिः ॥ ३ ॥

एता एता इंद्रस्यो गाव आपो वा [v]पुनः [v]नि [v]वर्तन्तां भूयो भूयो मां प्रत्यागच्छन्तु । आगत्य च [v]गोपतौ साध्वादिमतीनां धेनूनां वृष्टिलक्षणानामपां पालके[1] [v]अस्मिन् इंद्रस्यो मयि [v]पुष्यन्तु आत्मायत्तत्वेन स्थित्वा पुष्टा भवन्तु । पुष्टाः सतीस्ता हे [v]अग्ने त्वम् [v]इहैव अस्मिन्नेव मयि [v]नि [v]धारय नियमेन स्थापय । [v]या [v]रयिः यद्यपि व्रीह्यादिकं धनमस्ति तदपि धनं गोसहितम् [v]इह अस्मिन्नेव गोपतौ मयि [v]तिष्ठतु निवसतु ॥

यन्नियानं न्यर्यनं संज्ञानं यत्परायणम् ।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ॥ ४ ॥

यत् । निऽयानम् । निऽअर्यनम् । सम्ऽज्ञानम् । यत् । पराऽअर्यनम् ।
आऽवर्तनम् । निऽवर्तनम् । यः । गोपाः । अपि । तम् । हुवे ॥ ४ ॥

[v]नियानम् । अधिकरणे ल्युट् । नियमेन यान्त्यागच्छन्ति गावोऽत्रेति नियानं गोष्ठाख्यं स्थानम् । [v]यत् अस्तीति शेषः । यच्छब्दयोगात्तच्छब्दोऽध्याहर्तव्यः । हुव इति क्रियापदं सर्वत्रानुषज्यते । तत्स्थानं [v]हुवे आह्वयामि । आह्वानमभिमुखीकरणं तेन चात्र तत्पूर्विका प्रार्थना लक्ष्यते । गोसहितं गोष्ठं प्रार्थय इत्यर्थः । [v]न्ययनम् । भावे ल्युट् । नियमेन गृहं प्रति प्रासिलक्षणं गमनं यदस्ति तदपि प्रार्थये[2] । [v]निवर्तनं वने चरित्वा गृहं प्रति यदागमनमस्ति तदपि प्रार्थये । [v]यः [v]अपि [v]गोपाः गवां पालकोऽस्ति [v]तम् अपि हुवे प्रार्थये । सर्वगुणोपेता गाः प्रार्थय इत्यर्थः ॥

य उदानड् व्यर्यनं य उदानट् परायणम् ।
आवर्तनं निवर्तनमपि गोपा नि वर्तताम् ॥ ५ ॥

यः । उत्ऽआनट् । विऽअर्यनम् । यः । उत्ऽआनट् । पराऽअर्यनम् ।
आऽवर्तनम् । निऽवर्तनम् । अपि । गोपाः । नि । वर्तताम् ॥ ५ ॥

[v]यः [v]गोपाः गोपालः [v]व्ययनं नष्टानां गवामन्वेषणार्थं विविधं गमनम् [v]उदानट् व्याप्नोति अनुभवति । [v]यः [v]परायणं परागमनम् [v]उदानट् व्याप्नोति । वनं प्रति गवां चरणाय गमनमित्यर्थः । यश्च [v]आवर्तनं वनचारिणीभिर्गोभिः सह प्रवर्तनमनुभवति । यः [v]अपि गोपाः [v]निवर्तनं गोभिः सह वनाद्गृहं प्रति निर्गमनमनुभवति । सोऽपि गोपालः [v]नि [v]वर्ततां गोभिः सह वनाद्गृहं प्रति क्षेमेणागच्छतु ॥

आ निवर्त नि वर्तय पुनर्न इन्द्र गा देहि । जीवाभिर्मुनजामहै ॥ ६ ॥

आ । निऽवर्त । नि । वर्तय । पुनः । नः । इन्द्र । गाः । देहि । जीवाभिः । भुनजामहै ॥६॥

---

१. त१.२.३.७-भ-मु- च पालके । २. ग-प्रार्थये । यत्र संगच्छंते इतरेतरं जानंतस्तत् संज्ञानं । अथ ततश्चरणार्थं पराचीना यत्र यंति तत्परायणं । चरित्वाधा आवर्तंते तदावर्तनं; मु-प्रार्थये । संज्ञानं गोभिः सह ऐकमत्यं यदस्ति तदपि प्रार्थये । परायणं परागमनं वनं प्रति गवां चरणाय गमनं यदस्ति तदपि प्रार्थये । आवर्तनं वनचारिणीभिर्गोभिः सह प्रवर्तनं यदस्ति तदपि प्रार्थये ।

हे ᵛइन्द्र त्वम् ᵛआ ᵛनिवर्त आनिवर्तस्व अस्मदभिमुखो भव। ततोऽन्यतो गच्छन्तीर्गाः ᵛनि ᵛवर्तय अस्मदभिमुखीः कुरु। एवं कृत्वा च हे इन्द्र त्वं ᵛपुनः पश्चात् ᵛनः अस्मभ्यं ᵛगाः ᵛदेहि प्रयच्छ। त्वया दत्ताभिः ᵛजीवाभिः चिरं जीवन्तीभिः सर्वस्य जीवयित्रीभिर्वा गोभिः ᵛभुनजामहै वयं भुञ्जीमहि। यद्वा। भुजिरत्राभ्यवहारार्थः। देवपितॄन्[1] संभोजयेमहि ॥

परि॑ वो विश्व॒तो द॑ध ऊ॒र्जा घृ॒तेन॒ पय॑सा।
ये दे॒वाः के च॑ य॒ज्ञिया॒स्ते र॒य्या सं सृ॑जन्तु नः ॥ ७ ॥

परि॑। वः॒। वि॒श्व॒तः॑। द॒धे॒। ऊ॒र्जा। घृ॒तेन॑। पय॑सा।
ये। दे॒वाः॑। के। च॒। य॒ज्ञिया॑ः। ते। र॒य्या। सम्। सृ॒ज॒न्तु॒। नः॒ ॥ ७ ॥

हे देवाः ᵛविश्वतः सर्वतः स्थितान् ᵛवः युष्मान् ᵛऊर्जा गोसंबन्धिना दधिलक्षणेनान्नेन ᵛघृतेन आज्येन[2] ᵛपयसा क्षीरेण च ᵛपरि ᵛदधे संधारयामि। युष्मभ्यं हविर्द्वारेण प्रयच्छामि। न केवलमात्मानं पुष्णामीत्यर्थः। एतज्ज्ञात्वा ᵛये ᵛके ᵛच ᵛदेवाः ᵛयज्ञियाः यज्ञार्हाः सन्ति ᵛते देवाः ᵛनः अस्मान् ᵛरय्या गोलक्षणेन धनेन ᵛसं ᵛसृजन्तु संयोजयन्तु ॥

आ नि॑वर्तन वर्तय॒ नि नि॑वर्तन वर्तय।
भूम्या॒श्चत॑स्रः प्र॒दिश॒स्ताभ्य॑ एना॒ नि व॑र्तय ॥ ८ ॥

आ। नि॒ऽव॒र्त॒न॒। व॒र्त॒य॒। नि। नि॒ऽव॒र्त॒न॒। व॒र्त॒य॒।
भूम्याः॑। चत॑स्रः। प्र॒ऽदिशः॑। ताभ्यः॑। एना॑। नि। व॒र्त॒य॒ ॥ ८ ॥

मन्त्रद्रष्टर्षिः स्वात्मानं गाश्च संबोध्याह। हे मदीयात्मन् त्वं गाः ᵛआ ᵛवर्तय। आकारोऽन्यत्रापि संबध्यते। मदभिमुखीः[3] कुरु। स्तुत्या यागेन च ताः प्रसादोपनमयेत्यर्थः। हे गावः यूयमपि प्रसाद्यमानाः ᵛआ ᵛनिवर्तन आनिवर्तध्वम्। आभिमुख्येनागच्छत। पुनरप्याह। हे मदीयात्मन् त्वं ᵛनि ᵛवर्तय गोसंचरणस्थानादपगच्छन्तीर्गा इतोऽभिगन्त्रीः कुरु। यूयमपि हे गावो निवर्त्यमानाः सत्यः ᵛनिवर्तन निवर्तध्वम्। इदानीं स्वात्मा गावश्चापि प्रति ब्रुवते। हे ऋषे अहं कुतो गा निवर्तयामीति कुतो वयं निवर्तयामह इत्यात्मना गोभिश्च पृष्टः सन्नाह। ᵛभूम्याः पृथिव्याः ᵛचतस्रः ᵛप्रदिशः चतुःसंख्यायुक्ताः प्रकृष्टा वा दिशः सन्ति ᵛताभ्यः दिग्भ्यः ᵛएनाः गाः ᵛनि ᵛवर्तय हे आत्मन् मदभिमुखीः कुरु। हे गावो यूयमपि ताभ्यो दिग्भ्यो निवर्तध्वमिति सामर्थ्यालब्धम्। यद्वा। अन्यदेवतपक्षेऽपि सूक्तार्थो यथा घटते तथा योजना कर्तव्या ॥ ॥ १ ॥

'भद्रम्' इति दशर्चं चतुर्थं सूक्तम्। आद्यैकपदा दशाक्षरा विराट्। 'अग्निमीळे भुजाम्' इत्येचानुष्टुप्। नवमी विराट् दशमी त्रिष्टुप् मध्ये षट् गायत्र्यः। इदमादीनां सप्तसूक्तानामिन्द्रपुत्रः प्रजापतिपुत्रो वा विमद ऋषिर्वसुकृत्पुत्रो वसुकृदाख्यो वा। इदमुत्तरं चाग्नेयम्। तथा चानुक्रान्तं— 'सप्तोत्तराण्यैन्द्रो विमदः प्राजापत्यो वा वासुक्रो वसुकृद्वा भद्रं दशाग्नेयं तु गायत्रमाद्यैकपदा पाद एव वा साम्नश्चार्थः परानुष्टुबन्त्ये विराट्त्रिष्टुभौ' इति। गतो विनियोगः ॥

१. ग-त३-म५.६–देवपितॄंश्चान्। २. त-म-सु–आज्येन च। ३. त१.२.६.७-म२.६–मदभिमुखी; त४.५-सु–मदभिमुखी; ग-त३-म१.४.७–मदभिमुखं।

भद्रं नो अपि वातय मनः ॥ १ ॥

भद्रं नो अपि वातय मनः ॥ १ ॥

हे अग्ने त्वं vनः अस्माकं vमनः vभद्रं शुभयुक्तम् vअपि vवातय । अपिरत्र धात्वर्थानुवादी । आगमय । त्वत्संबन्धिस्तोत्रकरणे प्रेरयेत्यर्थः ॥

अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्धरीतुम् ।
यस्य धर्मन्त्स्व१रेनीः सपर्यन्ति मातुरूधः ॥ २ ॥

अग्निम् । ईळे । भुजाम् । यविष्ठम् । शासा । मित्रम् । दुःऽधरीतुम् ।
यस्य । धर्मन् । स्वः । एनीः । सपर्यन्ति । मातुः । ऊधः ॥ २ ॥

vभुजां हविर्भुजां देवानां मध्ये vयविष्ठम् अहन्यहन्यग्निहोत्रादिकर्मार्थं जायमानत्वादतिशयेन युवानं vशासा अनुशासनेन vमित्रम् । यस्मादिदं कर्तव्यमिदं न[1] कर्तव्यमिति[1] सर्वमनुशास्ति तस्मात्सर्वस्य मित्रभूतमित्यर्थः । vदुर्धरीतुं दुर्धरणीयं संग्रामे शत्रुभिर्दुर्निवारणीयमेवंभूतम् vअग्निम् vईळे स्तौमि । अपि च vयस्य अग्नेः vधर्मन् धर्मण्यग्निहोत्रादिके कर्मणि vस्वः द्युलोकमादित्यं सर्वं देवजातं वा vएनीः एन्यः प्रतिगन्त्र्य आहुतयः स्तुतयश्च vसपर्यन्ति परिचरन्ति सेवन्ते । यद्वा । स्वः सपर्यन्तीत्यनयोः सामानाधिकरण्यम् । अत्र स्वरित्ययं सर्वशब्दो निपातः । स्वः सर्वे देवाः एनीरात्मनः प्रतिगन्त्रीराहुतीः स्तुतीश्च सपर्यन्ति सेवन्ते । उपजीवन्तीत्यर्थः । तत्र दृष्टान्तः । लुप्तोपमामेतत् । vमातुः गोः vऊधः क्षीरोपसंहारस्थानं प्रति यथा वत्सा उपजीवन्ति तद्वत् । तमग्निमीळ इति पूर्वेण संबन्धः ॥

यमासा कृपनीळं भासाकेतुं वर्धयन्ति । भ्राजते श्रेणिदन् ॥ ३ ॥

यम् । आसा । कृपऽनीळम् । भासाऽकेतुम् । वर्धयन्ति । भ्राजते । श्रेणिऽदन् ॥ ३ ॥

स्तोतारो यष्टारश्च vआसा स्तुतिहविर्लक्षणेनोपासनेन vयम् अग्निं vवर्धयन्ति । कीदृशम् । vकृपनीळं कर्मस्थानम् । कर्माधारमित्यर्थः । vभासाकेतुं ज्वालालक्षणज्ञापकं दीप्तेः कर्तारं वा । यच्छब्दश्रुतेस्तच्छब्दोऽध्याहार्यः । सोऽग्निः vश्रेणिदन् स्तोतृभ्यो यष्टृभ्योऽभीष्टफलसमूहप्रदः शत्रुभ्यो ज्वालापङ्क्तिप्रदो वा एवंभूतः सन् vभ्राजते भासते ॥

अर्यो विशां गातुरेति प्र यदानट् दिवो अन्तान् । कविरभ्रं दीधानः ॥ ४ ॥

अर्यः । विशाम् । गातुः । एति । प्र । यत् । आनट् । दिवः । अन्तान् ।
कविः । अभ्रम् । दीधानः ॥ ४ ॥

vविशां यजमानमनुष्याणाम् vअर्यः गन्तव्यः vगातुः गमनशीलोऽग्निः vदीधानः दीप्यमानः vयत् यदा vएति ऊर्ध्वं गच्छति तदा vदिवः द्युलोकस्य vअन्तान् पर्यन्तान् vकविः मेधावी सोऽग्निः vप्र vआनट् प्रकर्षेण व्याप्नोति । vअभ्रं मेघोपलक्षितमन्तरिक्षं च व्याप्नोति ॥

१. ग–अकर्तव्यमिति; त–कर्तव्यमिति

जुषद्धव्या मानुषस्योर्ध्वस्तस्थावृभ्वा यज्ञे । मिन्वन्त्सप्त पुर एति ॥ ५ ॥

जुषत् । हव्या । मानुषस्य । ऊर्ध्वः । तस्थौ । ऋभ्वा । यज्ञे । मिन्वन् । सप्त । पुरः । एति ॥५॥

vमानुषस्य यजमानस्य vयज्ञे यजनीये यागे vहव्या हव्यानि हवींषि vजुषत् सेवमानोऽग्निः[1] vऋभ्वा उरुभूतो बहुज्वालोपेतः vऊर्ध्वस्तस्थौ उत्तिष्ठति । ऊर्ध्वं ज्वलतीत्यर्थः । अपि चायमग्निः प्राग्वंशादारभ्य vसप्त सदनं सौमिकीं वेदिं vमिन्वन् परिच्छिन्दन् vपुरः पुरस्तादुत्तरवेदिशालामुखीयात् प्रणीयमानः सन् vएति गच्छति ॥

स हि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गातुरेति । अग्निं देवा वाशीमन्तम् ॥ ६ ॥

सः । हि । क्षेमः । हविः । यज्ञः । श्रुष्टी । इत् । अस्य । गातुः । एति ।
अग्निम् । देवाः । वाशीऽमन्तम् ॥ ६ ॥

य उक्तगुणविशिष्टोऽग्निः । vहि इत्येतदवधारणे । vसः एवाग्निः vक्षेमः कुशलहेतुः । सर्वस्य परिपालनहेतुरित्यर्थः । vहविः पुरोडाशादिकं च स एव हविषस्तन्निमित्तत्वात् । vयज्ञः यागोऽपि स एव तस्यापि तद्धेतुत्वात् । किंच vश्रुष्टीत् क्षिप्रमेव vअस्य अग्नेः vगातुः गमनशीलोऽधिष्ठात्रात्मा vएति देवानामाह्वानार्थं गच्छति । गत्वा च प्रत्यागच्छन्तं vवाशीमन्तं स्तुतिलक्षणया वाचोपेतम् vअग्निं प्रति vदेवाः अपि गच्छन्तीति[2] शेषः ॥ ॥ २ ॥

यज्ञासाहं दुव इषेऽग्निं पूर्वस्य शेवस्य । अद्रेः सूनुमायुमाहुः ॥ ७ ॥

यज्ञऽसहम् । दुवः । इषे । अग्निम् । पूर्वस्य । शेवस्य । अद्रेः । सूनुम् । आयुम् । आहुः ॥७॥

अत्रैकवाक्यतायै यत्तच्छब्दावध्याहार्यौ । अपरार्धर्चः पूर्व व्याख्येयः । vआयुं देवानामाह्वानार्थं दूत्येन गन्तारं यम् vअग्निम् vअद्रेः vसूनुम् अभ्रनः पुत्रम् vआहुः 'त्वमद्रयस्त्वमश्मनस्परि' (ऋ. सं. २. १. १) इत्येवमादयो मन्त्रा वदन्ति । vयज्ञसहं यागस्य वोढारम् । धारयितारमित्यर्थः । तमग्निमभिलक्ष्य vदुवः परिचरणम् vइषे इच्छामि । किमर्थम् । vपूर्वस्य । अत्र पूर्वशब्द उत्कृष्टवाची । उत्कृष्टस्य vशेवस्य स्वर्गापवर्गलक्षणसुखस्य प्राप्त्यर्थमिति शेषः ॥

नरो ये के चास्मदा विश्वेत्ते वाम आ स्युः । अग्निं हविषा वर्धन्तः ॥ ८ ॥

नरः । ये । के । च । अस्मत् । आ । विश्वा । इत् । ते । वामे । आ । स्युरिति स्युः ।
अग्निम् । हविषा । वर्धन्तः ॥ ८ ॥

vनरः नेतारः vये vके vच ये केचित् पुत्रपौत्रादयः vअस्मत् अस्माकं सन्ति । आकारः पूरकः । vते पुत्रपौत्रादयः vवामे वननीये संभजनीये vविश्वेत् विश्वस्मिन्नेव पश्वादिधने vआ vस्युः आ समन्ताद्भवेयुः । उपविशेयुरित्याशास्महे । किं कुर्वन्तः । vअग्निम् अङ्गनादिगुणविशिष्टं देवं vहविषा पुरोडाशादिकेन vवर्धन्तः[3] वर्धयन्तः ॥

कृष्णः श्वेतोऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान् ।
हिरण्यरूपं जनिता जजान ॥ ९ ॥

---

१. त–पवमानोग्निः । २. ग-त३-भ५.६–आगच्छंतीति । ३. त१.२.३.४.५.६-भ–'वर्धन्तः' नास्ति ।

कृष्णः । श्वेतः । अरुषः । यामः । अस्य । ब्रध्नः । ऋज्रः । उत । शोणः । यशस्वान् ।
हिरण्यऽरूपम् । जनिता । जजान ॥ ९ ॥

अत्र यच्छब्दमध्याहृत्य योज्यम् । vयामः । याति गच्छत्यस्मिन्निति यामो रथः प्रजापतिना निर्मितः । कीदृशः । vकृष्णः असितवर्णः vश्वेतः सितवर्णः vअरुषः आरोचमानः vब्रध्नः महान् vऋज्रः ऋजुगामी vउत अपि च vशोणः रक्तवर्णः vयशस्वान् कीर्तिमान् । यद्वा । यश इति धननाम । हविर्लक्षणेन धनेन युक्तः । vहिरण्यरूपं सुवर्णसदृशं तं रथम् vअस्य अग्नेरर्थाय vजनिता सर्वस्य जगतो जनयिता प्रजापतिः vजजान जनयामास । अस्मै दत्तवानित्यर्थः । कथमेकस्यैव रथस्य कृष्णादिनानारूपत्वं संभवतीति चेत् अग्नेः सामर्थ्यातिशयेन संभवतीत्यर्थः । यद्वा । हिरण्यरूपमिति रथवाचिना शब्देन सह सामानाधिकरण्यात् कृष्णादिशब्दा द्वितीयान्तत्वेन योज्याः । अत्र सर्वगुणोक्तरथवत्तथाग्निः स्तूयत इत्यर्थः ॥

एवा ते अग्ने विमदो मनीषामूर्जो नपादमृतेभिः सजोषाः ।
गिर आ वक्षत्सुमतीरियान इषमूर्जं सुक्षितिं विश्वमाभाः ॥ १० ॥

एव । ते । अग्ने । विऽमदः । मनीषाम् । ऊर्जः । नपात् । अमृतेभिः । सऽजोषाः ।
गिरः । आ । वक्षत् । सुऽमतीः । इयानः ।
इषम् । ऊर्जम् । सुऽक्षितिम् । विश्वम् । आ । अभारित्यभाः ॥ १० ॥

एवमुक्तप्रकारेण हे vऊर्जो vनपात् ओषधिवनस्पतिपितृभूतस्याङ्गस्य पौत्र हे vअग्ने vअमृतेभिः अमृतैर्हविर्लक्षणैरन्नैः vसजोषाः संगतः vविमदः नामर्षिः vमनीषां प्रकृष्टां बुद्धिं कामयमानः सन् vते तुभ्यं vगिरः स्तुतिलक्षणा वाचः vआ vवक्षत् आभिमुख्येनोक्तवान् । वक्षेश्छन्दसि लेटि रूपम् । ततस्त्वमेतज्ज्ञात्वा vसुमतीरियानः शोभनलक्षणा बुद्धीः[1] संगमयन्[1] vइषम् अन्नम् vऊर्जं क्षीरादिकं रसं च vसुक्षितिं शोभननिवासम् । यद्वा । क्षितयो मनुष्याः । शोभनपुत्रपौत्रादिकं यत्किंचित् देवमस्ति तत् vविश्वं धनं च vआभाः तस्मै विमदायाहर देहि ॥ ॥ ३ ॥

'आग्निं न' इत्यष्टर्चं पञ्चमं सूक्तमास्तारपङ्क्तिच्छन्दस्कम् । आद्यौ गायत्रौ पादौ ततो द्वौ जागतौ सास्तारपङ्क्तिः । ऋषिदेवते पूर्ववत् । तथा चानुक्रान्तम्—'आग्निं नाष्टावास्तारपाङ्क्तम्' इति । पृष्ठ्यस्य चतुर्थेऽहनि 'आग्निं न स्ववृक्तिभिरित्याज्यम्' (आश्व. श्रौ. ७. ११) इति । महाव्रत आग्निमारुते यावतीष्वृक्षिवळान्दं साम स्तुवीरन् तदानीमादितस्तावत्य ऋचोऽनुरूपार्थाः । सूत्रितं च—'यदीळान्दं भूयसीषु चेत् स्तुवीरन्नाग्निं न स्ववृक्तिभिरिति तावतीरनुरूपः' (ऐ. आ. ५. ३. २) इति ॥

आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे शिरं पावकशोचिषं विवक्षसे ॥ १ ॥

आ । अग्निम् । न । स्ववृक्तिऽभिः । होतारम् । त्वा । वृणीमहे ।
यज्ञाय । स्तीर्णऽबर्हिषे । वि । वः । मदे । शिरम् । पावकऽशोचिषम् । विवक्षसे ॥ १ ॥

१. त१.२-बुद्धीः स्तागमयन्; त३-बुद्धीस्तंगमन; त५-बुद्धीः स्तगमयन्; त७-बुद्धीः तागमयन्; म१.२.४.७-बुद्धीस्ताः गमयन्; म६-बुद्धिः अगमयत् ।

हे अग्ने [v]वः[1] तव स्वभूते [v]विमदे एतदाख्य ऋषौ मयीयं स्तुतिः प्रवृत्तास्ति। [v]न इति संप्रत्यर्थे। अतो वयमिदानीं [v]स्ववृक्तिभिः स्वयंकृताभिर्दोषवर्जिताभिः स्तुतिभिः [v]होतारं देवानामाह्वातारं होमनिष्पादकं वा [v]अग्निं [v]त्वा त्वाम् [v]आ [v]वृणीमहे आभिमुख्येन संभजामहे। किमर्थम्। [v]स्तीर्णबर्हिषे [v]यज्ञाय। तादर्थ्ये चतुर्थी। यज्ञार्थम्। कीदृशम्। [v]शीरम् ओषध्यादिषु सर्वत्रानुशायिनं [v]पावकशोचिषं शोधकदीप्तिम्। [v]विवक्षसे[2]। महन्नामैतत्[3]। हे अग्ने त्वमपि महान् भवसि। यद्वा। विमदे यज्ञस्य संबन्धिनः सोमस्य पानजन्यविविधमदार्थं त्वामावृणीमह इति योज्यम्॥

त्वामु ते स्वाभुवः शुम्भन्त्यश्वराधसः।
वेति त्वामुपसेचनी वि वो मद ऋजीतिरग्न आहुतिर्विवक्षसे॥ २॥

त्वाम्। ऊँ इति। ते। सुऽआभुवः। शुम्भन्ति। अश्वऽराधसः।
वेति। त्वाम्। उपऽसेचनी। वि। वः। मदे। ऋजीतिः। अग्ने। आऽहुतिः। विवक्षसे॥२॥

[v]स्वाभुवः स्वप्रकाशेन दीप्यमानाः [v]अश्वराधसः व्याप्तधनाः[4] [v]ते यजमानाः हे अग्ने [v]त्वामु त्वामेव [v]शुम्भन्ति शोभयन्ति। यज्ञे हविर्भिर्दीपयन्तीत्यर्थः। किंच [v]उपसेचनी तवोपरि क्षरणशीला [v]ऋजीतिः ऋजुगामिनी हूयमाना [v]आहुतिः हे [v]अग्ने [v]त्वां [v]वेति गच्छति। किमर्थम्। [v]वः तव [v]मदे मदनिमित्ते। तृप्त्यर्थमित्यर्थः। किंच त्वमपि [v]विवक्षसे महान् भवसि॥

त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव।
कृष्णा रूपाण्यर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे॥ ३॥

त्वे इति। धर्माणः। आसते। जुहूभिः। सिञ्चतीःऽइव।
कृष्णा। रूपाणि। अर्जुना। वि। वः। मदे। विश्वाः। अधि। श्रियः। धिषे। विवक्षसे॥३॥

[v]धर्माणः यज्ञस्य धारयितार ऋत्विजः [v]जुहूभिः संपूर्णाहुतिभिर्होमपात्रैः [v]त्वे त्वामेव [v]आसते उपासते सेवन्ते। तत्र दृष्टान्तः। [v]सिञ्चतीरिव। वृष्टिलक्षणाः पृथिवीं सिञ्चन्त्यः[5] आपोऽग्निं[6] यथा स्वपितृत्वेन सेवन्ते तद्वत्। 'अग्नेरापः' (तै. आ. ८.१) इति श्रुतेस्तस्यापां पितृत्वम्। यद्वा। जुहूभिः सिञ्चतीरिव सिच्यमाना आहुतय इव धर्माणस्त्वया धार्यमाणा रश्मयस्त्वे त्वय्यासते निवसन्ति। हे अग्ने त्वं [v]कृष्णा कृष्णवर्णानि [v]अर्जुना अर्जुनानि श्वेतवर्णानि ज्वालान्तर्गतरूपाणि च [v]विश्वाः सर्वाः [v]श्रियः शोभाः [v]अधि [v]धिषे अधिकं यथा भवति तथा धारयसि। किमर्थम्। [v]वः युष्माकं सर्वेषां देवानां [v]विमदे विविधसोमपानजन्यमदार्थम्। यत एवमतः [v]विवक्षसे त्वं महान् भवसि॥

यमग्ने मन्यसे रयिं सहसावन्नमर्त्य।
तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा भर विवक्षसे॥ ४॥

यम्। अग्ने। मन्यसे। रयिम्। सहसाऽवन्। अमर्त्य।
तम्। आ। नः। वाजऽसातये। वि। वः। मदे। यज्ञेषु। चित्रम्। आ। भर। विवक्षसे॥ ४॥

---

१. त–'वः' नास्ति। २. त१.२.४.५–विवक्षते। ३. त–अहन्नामैतत्। ४. त-म–दीप्तधनाः। ५. त–सिंचति। ६. त३.४.५-म१.२–आपः अग्नीन्; त१.२.६.७–आप वृष्ट्युदकं पृथिवीं अग्नीन्; म७–आप इव अग्नीन्।

हे vअमर्त्य अमरणधर्मन् vसहसावन् बलवन् एवंभूत हे vअग्ने त्वं vयं vरयिं vमन्यसे सर्वेषु धनेषु यद्धनं वरिष्ठमिति जानासि vचित्र चायनीयं vतं रयिं vनः अस्माकं vवाजसातये अन्नलाभाय vआ vभर आहर प्रयच्छ। किमर्थम्। vवः युष्माकं सर्वेषां देवानां vयज्ञेषु vविमदे विविधसोमादि-हविर्जन्यमदनिमित्ते। यागेषु नानाप्रकारैर्हविर्भिर्युष्माकं तर्पणायेत्यर्थः। त्वमपि vविवक्षसे महान् भवसि॥

अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या।
भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे॥ ५॥

अग्निः। जातः। अथर्वणा। विदत्। विश्वानि। काव्या।
भुवत्। दूतः। विवस्वतः। वि। वः। मदे। प्रियः। यमस्य। काम्यः। विवक्षसे॥ ५॥

vअथर्वणा एतन्नाम्नर्षिणा vजातः जनितः vअग्निः। कथमवगम्यते। 'त्वामग्ने पुष्करादध्यथर्वा निरमन्थत' (ऋ. सं. ६. १६. १३) इति मन्त्रान्तरात्। vविश्वानि समस्तानि vकाव्या काव्यानि स्तोतृकर्माणि vविदत् वेत्ति। vविवस्वतः यजमानस्य vदूतः देवानामाह्वानार्थं vभुवत् भवति। किंच vयमस्य संयन्तुर्यजमानस्य vप्रियः इष्टः सन् vकाम्यः कमनीयः प्रार्थनीयो भवतीत्यर्थः। शिष्टं स्पष्टम्॥ ॥ ४॥

त्वां यज्ञेष्वीळतेऽग्ने प्रयत्यध्वरे।
त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे॥ ६॥

त्वाम्। यज्ञेषु। ईळते। अग्ने। प्रऽयति। अध्वरे।
त्वम्। वसूनि। काम्या। वि। वः। मदे। विश्वा। दधासि। दाशुषे। विवक्षसे॥ ६॥

हे vअग्ने vत्वां vप्रयति प्रकर्षेण गच्छति प्रवर्तमाने vअध्वरे यागे vयज्ञेषु यजनीयेषु हविःप्वासज्ञेषु सत्सु vईळते ऋत्विग्यजमानाः स्तुवन्ति। अपि च हे अग्ने vत्वं vविश्वा विश्वानि vकाम्या काम्यानि कमनीयानि vवसूनि धनानि vदाशुषे हविर्दत्तवते यजमानाय vविमदे सोमादिहविर्जन्यतृप्तौ सत्यां vदधासि प्रयच्छसि। अतः कारणात् vविवक्षसे त्वं महान् भवसि॥

त्वां यज्ञेष्वृत्विजं चारुमग्ने नि षेदिरे।
घृतप्रतीकं मनुषो वि वो मदे शुक्रं चेतिष्ठमक्षभिर्विवक्षसे॥ ७॥

त्वाम्। यज्ञेषु। ऋत्विजम्। चारुम्। अग्ने। नि। सेदिरे।
घृतऽप्रतीकम्। मनुषः। वि। वः। मदे। शुक्रम्। चेतिष्ठम्। अक्षऽभिः। विवक्षसे॥ ७॥

हे vअग्ने vत्वां मनुष्या यजमानाः vयज्ञेषु यागेषु vनि vषेदिरे नियमेन स्थापयन्ति। कीदृशम्। vऋत्विजं होतृनामकं[1] vचारुं रमणीयं vघृतप्रतीकम् आज्याहुतिपूर्णमुखं vशुक्रं ज्वलन्तम् vअक्षभिः व्याप्तैस्तेजोभिः vचेतिष्ठम् अतिशयेन ज्ञातारम्। किमर्थम्। vवि vवो vमदे तव सोमादिहविर्जन्यविविधतृप्त्यर्थम्। यस्मादेवं तस्मात् vविवक्षसे महान्[2] भवसि[3]॥

१. त–होम°। २. ग-त३.७-भ–त्वं महान्। ३. त–भवति।

अग्ने शुक्रेण शोचिषोरु प्रथयसे बृहत् ।
अभिक्रन्दन्वृषायसे वि वो मदे गर्भं दधासि जामिषु विवक्षसे ॥ ८ ॥

अग्ने । शुक्रेण । शोचिषा । उरु । प्रथयसे । बृहत् ।
अभिऽक्रन्दन् । वृषऽयसे । वि । वः । मदे । गर्भम् । दधासि । जामिषु । विवक्षसे ॥ ८ ॥

हे [v]अग्ने [v]बृहत् महांस्त्वं [v]शुक्रेण दीप्तेन [v]शोचिषा तेजसा [v]उरु [v]प्रथयसे विस्तीर्णो यथा भवति तथा प्रख्यातो भवसि । किंच [v]अभिक्रन्दन् आभिमुख्येन युद्धार्थं शत्रूनाह्वयन् [v]वृषायसे वृष इवाचरसि । युद्धकाले दर्पितवृष इव रोरुवद्भवसीत्यर्थः । त्वं[1] माध्यमिकः[1] सन् [v]जामिषु भगिनीभूतास्वोषधीषु [v]गर्भं बीजलक्षणं [v]दधासि वृष्टिद्वारेण धारयसि । एकस्माद् प्रजापतेः सकाशादुद्भूतत्वादन्योन्यौजोमिश्रत्वमुपचर्यते । कस्मिन् सति । [v]वि [v]वो [v]मदे तव विविधसोमादिहविर्जन्यमदे संजाते सति । यस्मादेवं कृतवानसि तस्मात्त्वं [v]विवक्षसे महान् भवसि । विवक्षस इति महन्नाम वक्तेर्वा वहतेर्वा सनन्तस्य रूपमिति ॥ ॥ ५ ॥

'कुह' इति पञ्चदशर्चं षष्ठं सूक्तमैन्द्रम् । पञ्चदशी त्रिष्टुप् पञ्चमीसप्तमीनवम्यस्तिस्रोऽनुष्टुभः शिष्टाः पुरस्ताद्बृहत्यः । आद्यद्वादशकाष्टकवती पुरस्ताद्बृहती । पूर्ववदृषिः । तथा चानुक्रान्तं—'कुह पञ्चोना पुरस्ताद्धार्हतं त्रिष्टुबन्तं त्वं त्या चिदा नस्त्वं नोऽनुष्टुभः' इति । चतुर्थेऽहनि निष्केवल्य एतत्सूक्तम् । सूत्रितं च—'कुह श्रुत इन्द्रो युष्मस्य त इति निष्केवल्यम्' (आश्व. श्रौ. ७. ११) इति ॥

कुह श्रुत इन्द्रः कस्मिन्नद्य जने मित्रो न श्रूयते ।
ऋषीणां वा यः क्षये गृहां वा चर्कृषे गिरा ॥ १ ॥

कुह । श्रुतः । इन्द्रः । कस्मिन् । अद्य । जने । मित्रः । न । श्रूयते ।
ऋषीणाम् । वा । यः । क्षये । गृहा । वा । चर्कृषे । गिरा ॥ १ ॥

[v]अद्य अस्मिन् दिने [v]इन्द्रः [v]कुह कुत्र स्थाने [v]श्रुतः विश्रुतः प्रख्यातः । [v]कस्मिन् [v]जने यजमाने इज्यत्वेन स्तुत्यत्वेनावस्थितः [v]श्रूयते प्रख्यायते । तत्र दृष्टान्तः । [v]मित्रो [v]न सूर्य इव सखेव वा तद्वत् । [v]यः इन्द्रः [v]ऋषीणां भृग्वादीनां [v]क्षये निवास आश्रमे [v]गृहा [v]वा गृहायामरण्ये वा [v]गिरा स्तुतिलक्षणया वाचा [v]चर्कृषे अत्यर्थमाकृष्यते । अत्यर्थं स्तूयत इत्यर्थः । स इन्द्रः कुह श्रुत इति पूर्वेण संबन्धः ॥

इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्रयृचीषमः ।
मित्रो न यो जनेष्वा यशश्चक्रे असाम्या ॥ २ ॥

इह । श्रुतः । इन्द्रः । अस्मे इति । अद्य । स्तवे । वज्री । ऋचीषमः ।
मित्रः । न । यः । जनेषु । आ । यशः । चक्रे । असामि । आ ॥ २ ॥

[v]इह अस्मिन् यज्ञे [v]इन्द्रः [v]श्रुतः प्रख्यातः । [v]अद्य अस्मिन्दिवसे [v]अस्मे अस्माभिः [v]स्तवे स्तूयते । कीदृशः । [v]वज्री वज्रवान् [v]ऋचीषमः । 'यद्वाव इन्द्र ते शतं शतं भूमीरुत स्युः न त्वा

---

१. त–त्वां मध्येकिमिकः ।

वज्रिन्' (ऋ. सं. ८. ७०. ५) इत्यादिकया स्तुत्या समानगुण इत्यर्थः । [v]यः इन्द्रः [v]मित्रो [v]न सूर्य इव स्निग्ध इव वा [v]जनेषु स्तोतृजनेषु [v]यशः अन्नं कीर्तिं वा [v]चक्रे करोति । कीदृशम् । [v]असामि असाधारणम् । स इन्द्रोऽस्माभिः स्तूयत इति पूर्वेण संबन्धः ॥

महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः ।
भर्ता वज्रस्य धृष्णोः पिता पुत्रमिव प्रियम् ॥ ३ ॥

महः । यः । पतिः । शवसः । असामि । आ । महः । नृम्णस्य । तूतुजिः ।
भर्ता । वज्रस्य । धृष्णोः । पिता । पुत्रम्ऽइव । प्रियम् ॥ ३ ॥

[v]यः इन्द्रः [v]महः महतः [v]शवसः बलस्य [v]पतिः ईश्वरः [v]असाम्या । आङ् मर्यादायाम् । आ समासेः । अनन्तगुण इत्यर्थः । [v]महः महतः [v]नृम्णस्य धनस्य च [v]तूतुजिः स्तोतृभ्यः प्रेरकः । किंच [v]धृष्णोः शत्रूणां धर्षकस्य [v]वज्रस्य स्वकीयस्यायुधस्य [v]भर्ता य इन्द्रो धारयिता । स इन्द्रोऽस्मान् पात्विति शेषः। तत्र दृष्टान्तः । [v]पिता [v]पुत्रमिव [v]प्रियम् । यथा पितेप्सितं सुतं पाति तद्वत् ॥

युजानो अश्वा वातस्य धुनी देवो देवस्य वज्रिवः ।
स्यन्ता पथा विरुक्मता सृजानः स्तोष्यध्वनः ॥ ४ ॥

युजानः । अश्वा । वातस्य । धुनी इति । देवः । देवस्य । वज्रिऽवः ।
स्यन्ता । पथा । विरुक्मता । सृजानः । स्तोषि । अध्वनः ॥ ४ ॥

हे [v]वज्रिवः वज्रवन्निन्द्र । एको मत्वर्थीयोऽनुवादकः । [v]देवः द्योतमानस्त्वं [v]देवस्य द्योतमानस्य [v]वातस्य वायोः [v]धुनी प्रेरकौ । वायोरपि शीघ्रगामिनावित्यर्थः । [v]अश्वा अश्वौ त्वदीयौ हरिनामकौ [v]युजानः स्वरथे संयोजयन् । कीदृशौ । [v]विरुक्मता विरोचनवता [v]पथा मार्गेण [v]स्यन्ता स्यन्तौ गच्छन्तौ । [v]अध्वनः युद्धे गमनमार्गान् [v]सृजानः उत्पादयन् [v]स्तोषि सततं स्तूयसे ॥

त्वं त्या चिद्वातस्याश्वागा ऋज्रा त्मना वहध्यै ।
ययोर्देवो न मर्त्यो यन्ता नकिर्विदाय्यः ॥ ५ ॥

त्वम् । त्या । चित् । वातस्य । अश्वा । आ । अगाः । ऋज्रा । त्मना । वहध्यै ।
ययोः । देवः । न । मर्त्यः । यन्ता । नकिः । विदाय्यः ॥ ५ ॥

यच्छब्दसंबन्धादुत्तरोऽर्धर्चः पूर्वं व्याख्यायते । [v]ययोः त्वदीययोः [v]यन्ता नियन्ता निवारयिता [v]देवो [v]न देवानां मध्ये कश्चिदपि देवो नास्ति [v]मर्त्यः मनुष्याणां मध्ये कश्चिदपि नास्ति [v]नकिः न कश्चिदपि [v]विदाय्यः वेत्ता । जवस्य बलस्येति वा शेषः । हे इन्द्र [v]त्वं [v]वातस्य वायोर्बलेन जवेन च युक्तौ [v]ऋज्रा ऋजुगामिनौ [v]त्या [v]चित् तावपि [v]अश्वा त्वदीयावश्वौ [v]त्मना आत्मनैव । सारथिनिरपेक्षेणेत्यर्थः । [v]वहध्यै वहनार्थम् । अभिप्रेतदेशप्रापणायेत्यर्थः । [v]आगाः आभिमुख्येन गच्छसि[1] ॥ ॥ ६ ॥

---

१. त-भ६—गच्छति ।

अध॒ ग्मन्तो॒शना॑ पृच्छते वां॒ कद॑र्था॒ न॒ आ गृ॒हम् ।
आ ज॑ग्मथुः परा॒काद्दि॒वश्च॒ ग्मश्च॒ मर्त्य॑म् ॥ ६ ॥

अध । ग्मन्ता । उ॒शना॑ । पृ॒च्छ॒ते । वा॒म् । कत्ऽअ॑र्था । न॒: । आ । गृ॒हम् ।
आ । ज॒ग्म॒थु॒: । प॒रा॒कात् । दि॒व: । च॒ । ग्म: । च॒ । मर्त्य॑म् ॥ ६ ॥

[v]अध अथ यज्ञसमाप्त्यनन्तरम् [v]उशना भार्गव ऋषिः हे इन्द्राग्नी [v]ग्मन्ता स्वस्थानं प्रति गच्छन्तौ [v]वां युवां [v]पृच्छते पृच्छति स्म । यद्वा । उशनेति विभक्तिव्यत्ययः । उशनसमिन्द्रस्य सखिभूतं भार्गवमिन्द्रं च युवां सर्वो यजमानः पृच्छति । किं पृष्टवानिति उच्यते । युवां [v]कदर्था कदर्थौ किंप्रयोजनवन्तौ सन्तौ [v]नः अस्मदीयम् । आकारः प्रतीत्यर्थे । [v]गृहं प्रति [v]पराकात् । दूरनामैतत् । दूरात् [v]आ [v]जग्मथुः आगतवन्तौ स्थः । तदेवोक्तम् । [v]दिवश्च द्युलोकाच्च [v]ग्मश्च भूलोकाच्च [v]मर्त्यं मनुष्यं मां प्रत्यागतवन्तौ । युवयोः कृतार्थत्वादत्रागमनमस्मदनुग्रहार्थमेव न स्वार्थमिति ध्वन्यनुव्रजतीत्यर्थः ॥

आ नं॑ इन्द्र पृक्षसे॒ऽस्माकं॒ ब्रह्मो॒द्यत॑म् ।
तत्त्वा॑ याचामहेऽव॒: शुष्णं॒ यद्धन्नमानुषम् ॥ ७ ॥

आ । न॒: । इ॒न्द्र॒ । पृ॒क्ष॒से॒ । अ॒स्माक॑म् । ब्रह्म॑ । उ॒त्ऽय॑तम् ।
तत् । त्वा॒ । या॒चा॒म॒हे॒ । अव॑: । शुष्ण॑म् । यत् । हन् । अ॒मा॒नुष॑म् ॥ ७ ॥

हे [v]इन्द्र त्वम् । न इति तृतीयार्थे षष्ठी । [v]नः अस्माभिः [v]उद्यतम् उत्क्षिप्तम् । दत्तमित्यर्थः । [v]अस्माकम् अस्मदीयं [v]ब्रह्म हविर्लक्षणमन्नम् । आङ् मर्यादायाम् । आ तृप्तेरित्यर्थः । [v]पृक्षसे आत्मना संपर्चय । 'पृची संपर्के' इति धातो रूपम् । आभक्षयेत्यर्थः । किंच वयमपि [v]त्वा एवंभूतं त्वां[1] [v]तत्[1] । यदुत्कृष्टमस्तीति शेषः । तत्तादृशमन्नम् [v]अवः तद्रक्षणं च [v]याचामहे प्रार्थयामहे । तथा [v]यत् [v]शुष्णं बलम् [v]अमानुषं मनुष्यादन्यं राक्षसादिकं [v]हन् हन्ति तदुत्कृष्टं बलं च याचामहे । यद्वा । हे इन्द्र त्वं शुष्णमेतन्नामानममानुषं मनुष्यव्यतिरिक्तमसुरं हन् हतवानसि । हत्वा च यत्नेन रक्षणेन त्रैलोक्यं पालितवानसि तदवः पालनमस्माकमपि भवेदिति त्वां याचामह इति वाक्यार्थः ॥

अक॑र्मा दस्यु॒रभि नो॑ अमन्तु॒रन्य॑व्रतो॒ अमा॑नुषः ।
त्वं तस्या॑मित्रहन् व॒धर्दा॒सस्य॑ दम्भय ॥ ८ ॥

अक॑र्मा । द॒स्यु॒: । अ॒भि । न॒: । अ॒म॒न्तु॒: । अ॒न्यऽव्र॑त: । अमा॑नुष: ।
त्वम् । तस्य॑ । अ॒मि॒त्र॒ऽह॒न् । व॒ध: । दा॒सस्य॑ । द॒म्भ॒य॒ ॥ ८ ॥

[v]अकर्मा अविद्यमानयागादिकर्मा [v]दस्युः उपक्षपयिता [v]अभि आभिमुख्येन स्वरूपतः [v]नः अस्मान् [v]अमन्तुः अज्ञाता । यद्वा । अत्र अवेत्युपसर्गस्य वकारलोपो द्रष्टव्यः । अवमन्तुरवमन्ताभिभविता । [v]अन्यव्रतः श्रुतिस्मृतिव्यतिरिक्तकर्मा [v]अमानुषः मनुष्यसंव्यवहाराद्बाह्यः । असुरप्रकृतिरित्यर्थः । य[2] एवंभूतोऽस्ति हे [v]अमित्रहन् शत्रूणां हन्तरिन्द्र [v]त्वं [v]दासस्य उपक्षपयितव्यस्य [v]वधः हन्ता सन् [v]दम्भय तं शत्रुं हिन्धि ॥

---

१. त-म१.२.४.७–त्वां मां; म६–त्वां । २. त-म६–'य' नास्ति ।

त्वं नं इन्द्र शूर शूरैरुत त्वोतासो बर्हणा ।
पुरुत्रा ते वि पूर्तयो नवन्त क्षोणयो यथा ॥ ९ ॥

त्वम् । नः । इन्द्र । शूर । शूरैः । उत । त्वाऽऊतासः । बर्हणा ।
पुरुऽत्रा । ते । वि । पूर्तयः । नवन्त । क्षोणयः । यथा ॥ ९ ॥

हे [v]शूर विक्रान्त [v]इन्द्र [v]त्वं [v]शूरैः भटैः मरुद्भिः सहितः सन् [v]नः अस्मान् पाहीति शेषः । [v]उत अपि च [v]त्वोतासः त्वया रक्षिता वयं [v]बर्हणा परिबर्हणायां शत्रूणां हिंसायां समर्था भवेम । किंच [v]ते त्वदीयाः [v]पूर्तयः कामानां पूरणानीप्सितार्थप्रदानानि [v]पुरुत्रा बहून् स्तोतॄन् [v]वि [v]नवन्त विविधं व्याप्नुवन्ति । [v]क्षोणयः । मनुष्यनामैतत् । मनुष्याः स्वकीयं स्वामिनं सेवार्थं [v]यथा व्याप्नुवन्ति तद्वत् ॥

त्वं तान् वृत्रहत्ये चोदयो नॄन् कार्पाणे शूर वज्रिवः ।
गुहा यदीं कवीनां विशां नक्षत्रशवसाम् ॥ १० ॥

त्वम् । तान् । वृत्रऽहत्ये । चोदयः । नॄन् । कार्पाणे । शूर । वज्रिऽवः ।
गुहा । यदि । कवीनाम् । विशाम् । नक्षत्रऽशवसाम् ॥ १० ॥

हे [v]वज्रिवः वज्रधर [v]शूर इन्द्र [v]त्वं [v]कार्पाणे । असिः कृपाणः । तेन साध्यं[1] युद्धं कार्पाणम् । तस्मिन् [v]वृत्रहत्ये शत्रुहननार्थं [v]नॄन् नरान् [v]तान् प्रसिद्धान् मरुद्गणान् [v]चोदयः चोदयसि प्रेरयसि । [v]यदि यदा त्वं [v]कवीनां मेधाविनां [v]नक्षत्रशवसां देवान् प्रतिगच्छत्स्तोतृबलानां [v]विशां स्तोतृजनानां संबन्धीनि [v]गुहा गूढानि गुणैः संवृतानि स्तोत्राणि शृणोषीति शेषः । तदा प्रेरयसीति पूर्वेणान्वयः ॥ ॥७॥

मक्षू ता ते इन्द्र दानाम्रस आक्षाणे शूर वज्रिवः ।
यद्ध शुष्णस्य दम्भयो जातं विश्वं सयावभिः ॥ ११ ॥

मक्षु । ता । ते । इन्द्र । दानऽअम्रसः । आक्षाणे । शूर । वज्रिऽवः ।
यत् । ह । शुष्णस्य । दम्भयः । जातम् । विश्वम् । सयावऽभिः ॥ ११ ॥

हे [v]शूर विक्रान्त [v]वज्रिवः वज्रोपेत [v]इन्द्र [v]दानाम्रसः दानकर्मणः । स्तोतृभ्यः सततमभीष्टफलप्रदस्येत्यर्थः । [v]ते तव स्वभूतानि [v]मक्षु क्षिप्राणि अविलम्बितानि । क्षिप्रकरणयुक्तानीत्यर्थः । [v]आक्षाणे वोढृभिर्व्याप्यमाने स्वस्मिन्नवस्थितानि [v]ता तानि कर्माणि स्तोतारः स्तुवन्तीति शेषः । [v]सयावभिः सहयातृभिर्मरुद्भिः सहितस्त्वं [v]शुष्णस्य असुरस्य [v]विश्वं [v]जातं सर्वमपत्यजातं [v]दम्भयः अदम्भयः । हिंसितवानसि । यद्वा । एवमादीनि यानि खलु कर्माणि सन्ति तानि स्तुवन्तीति पूर्वेण संबन्धः ॥

माकिर्नेङ्गिन्द्र शूर वस्वीरस्मे भूवन्नभिष्टयः ।
वयंवयं त आसां सुम्ने स्याम वज्रिवः ॥ १२ ॥

मा । अकिः । नेत् । इन्द्र । शूर । वस्वीः । अस्मे इति । भुवन् । अभिष्टयः ।
वयम्ऽवयम् । ते । आसाम् । सुम्ने । स्याम । वज्रिऽवः ॥ १२ ॥

---

१. त–कार्यं ।

हे [v]शूर विक्रान्त [v]इन्द्र [v]अस्मे अस्माकं स्वभूताः [v]वस्वीः महत्यः [v]अभिष्टयः आभिमुख्येष्टय इच्छाः। यद्वा। आभिमुख्येच्छा अभीप्सितप्रार्थनाः। [v]कुऽयक् कुत्सिताः। विफला इत्यर्थः। [v]मा [v]भूवन्। किं तर्हि हे [v]वज्रिवः वज्रिन्निन्द्र [v]ते तव प्रसादात् [v]वयंवयम् ऋत्विग्यजमानाः। द्विर्वचनमतित्वराप्रदर्शनार्थम्। [v]आसाम् इज्यानामिच्छानां वा संबन्धिनि [v]सुम्ने सुखे अवस्थिताः [v]स्याम भवेम। वयमभिष्टिजन्येन दृष्टादृष्टसुखेन युक्ताः क्षीघ्रं भवेमेत्याशास्महे इत्यर्थः॥

अस्मे ता ते इन्द्र सन्तु सत्याहिंसन्तीरुपस्पृशः।
विद्याम यासां भुजो धेनूनां न वज्रिवः॥ १३॥

अस्मे इति। ता। ते। इन्द्र। सन्तु। सत्या। अहिंसन्तीः। उपऽस्पृशः।
विद्याम। यासाम्। भुजः। धेनूनाम्। न। वज्रिऽवः॥ १३॥

हे [v]इन्द्र [v]अस्मे अस्माकं स्वभूताः। ता सत्या इत्युभयत्र प्रथमाबहुवचनस्य छान्दस आकारः सन्धिवति निर्देशविशेषणत्वात्। [v]ता तास्तादृश्यः [v]उपस्पृशः। त्वामुपगम्य स्पृशन्तीत्युपस्पृशः स्तुतयः। [v]ते तव प्रसादात् [v]सत्या सत्याः [v]सन्तु यथार्था भवन्तु। तव सद्गुणग्राहिण्य इत्यर्थः। अपि च [v]अहिंसन्तीः त्वामहिंसत्यश्च भवन्तु। सस्तुतित्वादनुद्वेजयन्त्यश्च भवन्त्वित्यर्थः। हे [v]वज्रिवः इन्द्र [v]यासां स्तुतीनां संबन्धिनः[1] [v]भुजः दृष्टादृष्टान् भोगान् [v]विद्याम वयं लभेमहि। तत्र दृष्टान्तः। [v]धेनूनां [v]न। गवां क्षीरादिभोगान् यथा गोस्वामी लभते तद्वत्। ताः सत्या भवन्त्विति पूर्वेणान्वयः॥

अहस्ता यदपदी वर्धत क्षाः शचीभिर्वेद्यानाम्।
शुष्णं परि प्रदक्षिणिद्विश्वायवे नि शिश्नथः॥ १४॥

अहस्ता। यत्। अपदी। वर्धत। क्षाः। शचीभिः। वेद्यानाम्।
शुष्णम्। परि। प्रऽदक्षिणित्। विश्वऽआयवे। नि। शिश्नथः॥ १४॥

हे इन्द्र [v]यत् यदा [v]क्षाः भूमिः [v]अहस्ता पाणिरहिता [v]अपदी चरणवर्जिता च। अमनुष्यकर्मकेत्यर्थः। [v]वेद्यानां स्तोत्रयोग्यानां स्वप्रभृतीनां देवानां संबन्धिभिः [v]शचीभिः कर्मभिः [v]वर्धत अवर्धत। धनधान्यादिभिः समृद्धेत्यर्थः। तदा त्वं [v]परि [v]प्रदक्षिणित् एवंभूतां पृथिवीं परिवेष्टय प्रदक्षिणं यथा भवति तथा स्थितं [v]शुष्णम् असुरं [v]विश्वायवे। तादर्थ्ये[2] चतुर्थी। सर्वत्राप्रतिहतगामिन एतदाख्यस्यौर्वशेयराज्ञोऽर्थाय [v]नि [v]शिश्नथः नितरां ताडितवानसि। यद्वा। यदा शुष्णस्याच्छादनार्थं हस्तपादवर्जिता काचित्पृथिवी वेदितव्यानामसुराणां मायारूपैः कर्मभिः शुष्णमसुरं परिवेष्टय प्रदक्षिणं यथा भवति तथावस्थितावर्धत तदानीं तां मायोत्पादितां पृथिवीं विश्वायवे[2] सर्वव्यापकस्य मरुद्गणस्य प्रवेशनार्थं नि शिश्नथः॥

पिबापिबेदिन्द्र शूर सोमं मा रिषण्यो वसवान वसुः सन्।
उत त्रायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः॥ १५॥

पिबऽपिब। इत्। इन्द्र। शूर। सोमम्। मा। रिषण्यः। वसवान। वसुः। सन्।
उत। त्रायस्व। गृणतः। मघोनः। महः। च। रायः। रेवतः। कृधि। नः॥ १५॥

---

१. त–'बन्धिन। २. त–'तादर्थ्ये...विश्वायवे' नास्ति।

vपिबपिब इति वीप्सातित्वराप्रदर्शनार्थम्। हे vशूर वीर vइन्द्र त्वमभिषुतं vसोमं क्षीघ्रं पिब। यागकालातिपातो यावन्न भवति तावच्छीघ्रं सोमं पिबेत्यर्थः। vइत् इति पूरणः। हे vवसवान वसूनां धनानामानेतः त्वं vवसुः प्रशस्तः vसन् vमा vरिषण्यः यागकालातिक्रमजातेन दोषेणास्मान्मा हिंसीः। प्रशस्तस्य तव कर्मवैगुण्यकरणेन[1] हिंसितुमयुक्तमित्यर्थः। vउत अपि च हे इन्द्र त्वं vगृणतः त्वां स्तुवतः स्तोतॄन् vमघोनः हविर्लक्षणधनवतो यजमानांश्च vत्रायस्व प्रमादजनितकर्मवैगुण्यदोषात् पालयस्व। किंच महश्च राय इत्युभयत्र तृतीयार्थे षष्ठी। vमहः महता vराधः धनेन च[2] vनः अस्मान् vरेवतः vकृधि धनवतः कुरु ॥ ॥ ८ ॥

'यजामहे' इति सप्तर्चं सप्तमं सूक्तम्। प्रथमासप्तम्यौ त्रिष्टुभौ। पञ्चम्यभिसारिणी। द्विर्दशकद्विर्द्वादशकवतीत्यभिसारिणीत्युच्यते। शिष्टाश्चतस्रो जगत्यः। पूर्ववद्विदेवते। तथा चानुक्रान्तं—'यजामहे सप्ताद्यास्ये त्रिष्टुभौ पञ्चम्यभिसारिणी' इति। चतुर्थेऽहनि माध्यंदिनसवने तृतीयापञ्चम्योरावर्तनेन त्रींस्तृचान् होत्रका एकैकं तृचमावपेरन्। सूत्रितं च—'यजामह इन्द्रं वज्रदक्षिणमिति द्वितीयानेवमेव' (आश्व. श्रौ. ७. ११) इति ॥

यजामहे इन्द्रं वज्रदक्षिणं हरीणां रथ्यं१ विव्रतानाम्।
प्र श्मश्रु दोधुवदूर्ध्वथा भूद्वि सेनाभिर्दयमानो वि राधसा ॥ १ ॥

यजामहे। इन्द्रम्। वज्रऽदक्षिणम्। हरीणाम्। रथ्यम्। विऽव्रतानाम्।
प्र। श्मश्रु। दोधुवत्। ऊर्ध्वऽथा। भूत्। वि। सेनाभिः। दयमानः। वि। राधसा॥१॥

वयम् vइन्द्रं vयजामहे सोमलक्षणैर्हविर्भिः पूजयामः। कीदृशम्। vवज्रदक्षिणं शत्रुवधाय सततं वज्रो दक्षिणे हस्ते यस्य तं vविव्रतानां रथवहनादिविविधकर्मणां vहरीणाम् एतत्संज्ञकानामश्वानां vरथ्यम् आनेतारम्। स इन्द्रः सोमपानानन्तरं vश्मश्रु स्वकीयानि श्मश्रूणि vदोधुवत् पुनःपुनः धुन्वानः सन् vऊर्ध्वथा ऊर्ध्वं vप्र vभूत् प्रादुरभूत्। किंच vसेनाभिः मरुदादिस्वकीयैः सैन्यैः vवि vदयमानः विविधं शत्रून् हिंसन् vराधसा। द्वितीयार्थे तृतीया। राधो धनम्। वीत्युपसर्गश्रुतेर्धोग्यक्रियाध्याहारः। विविधं स्तोतृभ्यो ददाति ॥

हरी नु वस्य या वने विदे वस्विन्द्रो मघैर्मघवा वृत्रहा भुवत्।
ऋभुर्वाजं ऋभुक्षाः पत्यते शवोऽवं क्ष्णौमि दासस्य नाम चित् ॥ २ ॥

हरी इति। नु। अस्य। या। वने। विदे। वसु। इन्द्रः। मघैः। मघऽवा। वृत्रऽहा। भुवत्।
ऋभुः। वाजः। ऋभुक्षाः। पत्यते। शवः। अवं। क्ष्णौमि। दासस्य। नाम। चित्॥ २ ॥

vअस्य इन्द्रस्य संबन्धिनौ vया यौ vहरी अश्वौ vवने। वन्यन्ते संभज्यन्तेऽस्मिन्[3] देवा इति वनं यज्ञोऽस्मं वा। तस्मिन् vवसु ऋजीषलक्षणं[4] धनं यवसलक्षणं वा vनु क्षिप्रं vविदे विन्देते लभेते। यद्वा। यौ हरी अस्येन्द्रस्य वने संभजनार्थं वसु[5] वसुनो लाभाय क्षिप्रं भवत इति शेषः। ताभ्यां हरिभ्यां vमघैः धनैः vमघवा धनवान् vइन्द्रः vवृत्रहा वृत्राख्यस्यासुरस्य मेघस्य वा हन्ता vभुवत् भवति। अपि च vऋभुः दीप्तः vवाजः बलवान् vऋभुक्षाः महानिन्द्रः vशवः शवसो

---

१. त—कर्मवैगुण्येन। २. त—'च' नास्ति। ३. त-भ—संभजंतेस्मिन्। ४. त-सु—ऋजीकलक्षणं। ५. त-भ१.२.४—'वसु' नास्ति।

वज्रस्य धनस्य वा ᵛपत्यते ईष्टे। यद्वा। शत्रूणां बलं प्रति पत्यते प्रतिपद्यते[1] गच्छति। अहमपि तस्य प्रसादात् ᵛदासस्य उपक्षपयितव्यस्य शत्रोः ᵛनाम ᵛचित्। नम्यतेऽनेनेति नाम शिरः। तदपि ᵛअव ᵛक्रणोमि अव हन्मि। किमुतान्यदङ्गम्। अथवा नामधेयमपि नाशयामि किमुत बाहुम्॥

यदा वज्रं हिरण्यमिदथा रथं हरी यमस्य वहतो वि सूरिभिः।
आ तिष्ठति मघवा सनश्रुत इन्द्रो वाजस्य दीर्घश्रवसस्पतिः॥ ३॥

यदा। वज्रम्। हिरण्यम्। इत्। अथ। रथम्। हरी इति। यम्। अस्य। वहतः। वि। सूरिऽभिः। आ। तिष्ठति। मघऽवा। सनऽश्रुतः। इन्द्रः। वाजस्य। दीर्घऽश्रवसः। पतिः॥ ३॥

ᵛयदा इन्द्रः ᵛहिरण्यं हितरमणीयं ᵛवज्रं स्वकीयमायुधं शत्रुहननाय गृह्णातीति शेषः। ᵛइत् इति पूरणः। ᵛअथ तदानीम् ᵛअस्य इन्द्रस्य ᵛहरी अश्वौ ᵛयं ᵛरथं ᵛवहतः गन्तृप्रदेशं[2] विशेषेण प्रापयतः ᵛमघवा धनवान् ᵛइन्द्रः ᵛसूरिभिः स्तोतृभिः कुत्सादिभिः सह तं रथम् ᵛआ ᵛतिष्ठति आरोहति। कीदृशः। ᵛसनश्रुतः चिरप्रख्यातः। जगति स्वभावत एव विख्यात इत्यर्थः। ᵛदीर्घश्रवसः बहुकीर्तेः ᵛवाजस्य अन्नस्य ᵛपतिः स्वामी। एवंभूत इन्द्रस्तं रथमारोहतीत्यर्थः॥

सो चिन्नु वृष्टिर्यूथ्या३ स्वा सचाँ इन्द्रः श्मश्रूणि हरिताभि प्रुष्णुते।
अव वेति सुक्षयं सुते मधूदिद्धूनोति वातो यथा वनम्॥ ४॥

सो इति। चित्। नु। वृष्टिः। यूथ्या। स्वा। सचा। इन्द्रः। श्मश्रूणि। हरिता। अभि। प्रुष्णुते। अव। वेति। सुऽक्षयम्। सुते। मधु। उत्। इत्। धूनोति। वातः। यथा। वनम्॥४॥

तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्तव्यः। या महती वृष्टिरस्ति ᵛसो सा ᵛवृष्टिः ᵛनु क्षिप्रम्। ᵛचित् इत्युपमार्थे। यथा सर्वं सिञ्चति तथा ᵛइन्द्रः ᵛस्वा स्वानि ᵛयूथ्या यूथानि मरुदादिगणलक्षणानि ᵛसचा सह स्वानि ᵛश्मश्रूणि च ᵛहरिता हरिद्वर्णेन सोमेन[3] ᵛअभि ᵛप्रुष्णुते। 'प्रुष प्लुष स्नेहनसेचनपूरणेषु[4]' इति धातुः। आभिमुख्येन स्थित्वा क्षिप्रं सिञ्चति। सोमं पाययति पिबति चेत्यर्थः। अपि च ᵛसुक्षयं शोभनं यज्ञगृहम् ᵛअव ᵛवेति अभिगच्छति। गत्वा च ᵛसुते सोमे अभिषुते सति ᵛमधु मधुररसोपेतं सोमं पीत्वा। मत्तः सन्निति शेषः। ᵛउदिद्धूनोति स्वशरीरमुत्कम्पयति। तत्र दृष्टान्तः। ᵛवातः वायुः ᵛयथा ᵛवनं वृक्षसमूहमुत्कम्पयति तद्वत्॥

यो वाचा विवाचो मृध्रवाचः पुरू सहस्राशिवा जघान।
तत्तदिदस्य पौंस्यं गृणीमसि पितेव यस्तविषीं वावृधे शवः॥ ५॥

यः। वाचा। विऽवाचः। मृध्रऽवाचः। पुरु। सहस्रा। अशिवा। जघान।
तत्ऽतत्। इत्। अस्य। पौंस्यम्। गृणीमसि। पिताऽइव। यः। तविषीम्। ववृधे। शवः॥ ५॥

ᵛयः इन्द्रः ᵛवाचा वाङ्मात्रेणैव ᵛविवाचः विविधवाचः स्वसैन्यान् ᵛमृध्रवाचः हिंसितवाचः। कृत्वेति शेषः। ᵛपुरु पुरूणि बहूनि ᵛअशिवा अशिवान्यसुखकराणि। दुःखकराणीत्यर्थः। ᵛसहस्रा शत्रूणां सहस्राणि ᵛजघान हन्ति। अपि च ᵛयः च इन्द्रः ᵛपितेव यथा पिता पुत्रस्य ᵛतविषीं

---

१. त-भ-सु-पद्यते। २. ग-गंतव्यप्रदेशं। ३. त-म६-सोमेन च। ४. त-म२-स्नेहनसेचन°।

बलमन्नप्रदानैः वर्धयति तथा वृष्टिद्वारेण सर्वस्य जगतः [v]शवः बलं [v]बर्बृहे वर्धयति [v]अस्य इन्द्रस्य [v]तत्तदित् तत्तदेव [v]पौंस्यं बलं [v]गृणीमसि वयं स्तुमः । इन्द्रो येन येन बलेन शत्रून् हन्ति तस्य तत्तद्बलं वयं स्तुम इत्यर्थः ॥

स्तोमं॑ त इन्द्र विम॒दा अ॑जीजन॒न्नपू॑र्व्यं पुरु॒तमं॑ सु॒दान॑वे ।
वि॒द्मा ह्य॑स्य॒ भोज॑नमि॒नस्य॒ यदा पशुं॒ न गो॒पाः क॑रामहे ॥ ६ ॥

स्तोम॑म् । ते॒ । इ॒न्द्र॒ । वि॒ऽम॒दाः । अ॒जी॒ज॒न॒न् । अपू॑र्व्यम् । पु॒रु॒ऽत॒मम् । सु॒ऽदान॑वे ।
वि॒द्म । हि । अ॒स्य॒ । भोज॑नम् । इ॒नस्य॑ । यत् । आ । पशु॑म् । न । गो॒पाः । क॒रा॒म॒हे ॥६॥

हे [v]इन्द्र [v]ते तुभ्यं [v]सुदानवे शोभनदानस्यार्थाय [v]विमदाः विमदनामानो वयं [v]स्तोमं स्तोत्रविशेषम् [v]अजीजनन् जनितवन्तः । कृतवन्त इत्यर्थः । अत्र पूर्वोत्तरयोरेकवाक्ययोः पुरुषव्यत्ययः। कीदृशम् । [v]अपूर्व्यम् अपूर्वमन्यैः पूर्वमकृतम् । उत्कृष्टमित्यर्थः । [v]पुरुतमं बहुतमम् । नानाप्रकारोपेतमित्यर्थः । [v]हि यस्मात्कारणात् हे इन्द्र [v]इनस्य ईश्वरस्य [v]अस्य ईदृशस्य तव [v]यत् [v]भोजनं धनमस्तीति [v]विद्म वयं जानीमः तस्मात् कारणात् त्वदीयं तद्धनम् [v]आ [v]करामहे वयमस्मदभिमुखं कुर्महे । तत्र दृष्टान्तः । [v]पशुं [v]न [v]गोपाः । यथा गोपालो धेनुमाह्वयन् स्वस्याभिमुखीं करोति तद्वत् ॥

मा॒किर्न॑ एना॒ सख्या॒ वि यौ॑षु॒स्तव॑ चेन्द्र विम॒दस्य॑ च ऋषेः ।
वि॒द्मा हि ते॑ प्रम॒तिं दे॑व जामि॒वदु॒स्मे ते॑ सन्तु॒ सख्या॑ शि॒वानि॑ ॥ ७ ॥

माकिः॑ । नः॒ । एना॑ । सख्या॑ । वि । यौ॒षुः॒ । तव॑ । च॒ । इ॒न्द्र॒ । वि॒ऽम॒दस्य॑ । च॒ । ऋषेः॑ ।
वि॒द्म । हि । ते॒ । प्रऽम॑तिम् । दे॒व॒ । जा॒मि॒ऽवत् । अ॒स्मे इति॑ । ते॒ । स॒न्तु॒ । सख्या॑ । शि॒वानि॑ ॥७॥

हे [v]इन्द्र [v]तव [v]च [v]विमदस्य [v]ऋषेः मम [v]च [v]नः । 'अस्मदो द्वयोश्च' (पा. सू. १. २. ५९) इति द्वयोर्बहुवचनम् । आवयोः [v]एना एनानि [v]सख्या[1] सख्यानि स्तुत्यस्तोतृत्वेज्ययष्टृत्वलक्षणानि सख्किर्माणि [v]माकिः [v]वि [v]यौषुः केचिदपि न विश्लथयेयुः । अपि च [v]हि यस्मात् कारणात् हे [v]देव द्योतमानेन्द्र [v]ते तव [v]प्रमतिं प्रकृष्टां मतिमनुग्राहिकां बुद्धिं [v]विद्म वयं जानीमः। तत्र दृष्टान्तः । [v]जामिवत् । यथा भ्राता स्वभगिन्यां स्नेहयुक्तां मतिं जानाति तद्वत् । तस्मात्कारणात् [v]अस्मे अस्माकं [v]ते तव च[1] [v]सख्या सख्यानि [v]शिवानि [v]सन्तु मङ्गलानि भवन्तु । अनपायानीत्यर्थः ॥ ॥ ९ ॥

'इन्द्र सोमम्' इति पङ्क्तिमष्टमं सूक्तम् । चतुर्थ्यास्तिस्रोऽनुष्टुभोऽश्विदेवत्याः । आदितस्तिस्र ऐन्द्र्यः आस्तारपङ्क्तिश्छन्दस्काः । आदितो द्वौ गायत्रौ ततो द्वौ जागतौ सास्तारपङ्क्तिः । ऋषिः पूर्ववत् । तथा चानुक्रान्तम्—'इन्द्र सोमं षळास्तारपाङ्क्तं त्वाश्विन्योऽन्त्यास्तिस्रोऽनुष्टुभः' इति । गतो विनियोगः ॥

इन्द्र॒ सोम॒मिमं पि॑ब॒ मधु॑मन्तं च॒मू सु॒तम् ।
अ॒स्मे र॒यिं नि धा॑रय॒ वि वो॒ मदे॑ सहस्रिणं पुरूवसो॒ विव॑क्षसे ॥ १ ॥

---

१. त५-'सख्या...च' नास्ति ।

इन्द्र । सोमम् । इमम् । पिब । मधुऽमन्तम् । चमू इति । सुतम् ।
अस्मे इति । रयिम् । नि । धारय । वि । वः । मदे ।
सहस्रिणम् । पुरुवसो इति पुरुऽवसो । विवक्षसे ॥ १ ॥

हे [v]इन्द्र [v]त्वम् [v]इमम् ईदृशं [v]सोमं [v]पिब । कीदृशम् । [v]मधुमन्तं [v]मधुररसोपेतं [v]चमू चम्वोः अभिषवणफलकयोः [v]सुतम् अभिषुतम् । तदनन्तरं [v]पुरुवसो बहुधन हे इन्द्र [v]वः तव [v]विमदे विशेषेण सोमजन्यमदे सति [v]अस्मे अस्मासु [v]रयिं धनं [v]नि [v]धारय नितरां स्थापय । कीदृशम् । [v]सहस्रिणं सहस्रसंख्यायुक्तम् । प्रभूतमित्यर्थः । त्वया दत्तेन धनेन यस्माद्वयं पुनरपि त्वदर्थं यागं कुर्मः तस्मादस्मासु धनं निधेहीत्यर्थः । अतः कारणात् [v]विवक्षसे । महत्त्वमैतत् । त्वं महान् भवसि ॥

त्वां यज्ञेभिरुक्थैरुप हव्येभिरीमहे ।
शचीपते शचीनां वि वो मदे श्रेष्ठं नो धेहि वार्यं विवक्षसे ॥ २ ॥

त्वाम् । यज्ञेभिः । उक्थैः । उप । हव्येभिः । ईमहे ।
शचीऽपते । शचीनाम् । वि । वः । मदे । श्रेष्ठम् । नः । धेहि । वार्यम् । विवक्षसे ॥ २ ॥

हे इन्द्र वयं [v]यज्ञेभिः यज्ञैः सोमयागादिभिः [v]उक्थैः शस्त्रलक्षणैः[1] स्तोत्रैः [v]हव्येभिः हव्यैः पुरोडाशादिभिश्च । उपेत्युपसर्गश्रुतेर्योग्यपदाध्याहारः । [v]त्वाम् उपेत्य [v]ईमहे अभिलषितं धनं याचामहे । अतो हे [v]शचीपते कर्मणां पालयितः त्वं केषांचित्कर्मणां पालको न भवसीति न किंतु [v]शचीनां सर्वेषां कर्मणां पालको भवसीत्यर्थः । एवं याचितस्त्वं [v]नः अस्मभ्यं वार्यं वरणीयं [v]श्रेष्ठं प्रशस्ततमं[2] पश्वादिधनं [v]धेहि देहि । शिष्टं स्पष्टम् ॥

यस्पतिर्वार्याणामसि रध्रस्य चोदिता ।
इन्द्र स्तोतृणामविता वि वो मदे द्विषो नः पाह्यंहसो विवक्षसे ॥ ३ ॥

यः । पतिः । वार्याणाम् । असि । रध्रस्य । चोदिता ।
इन्द्र । स्तोतृणाम् । अविता । वि । वः । मदे । द्विषः । नः । पाहि । अंहसः । विवक्षसे ॥ ३ ॥

हे इन्द्र [v]यः त्वं [v]वार्याणां वरणीयानां धनानां [v]पतिः [v]असि स्वामी भवसि । [v]रध्रस्य राधकस्य स्तोतुश्च [v]चोदिता धनदानेन कर्मसु नियोक्ता च भवसि । किंच हे [v]इन्द्र यस्त्वं [v]स्तोतृणामविता रक्षकोऽसि स त्वं [v]वि [v]वो [v]मदे तव विविधे सोमजन्यमदे सति [v]द्विषः द्वेष्टुः सकाशात् [v]नः अस्मान् [v]पाहि रक्ष । [v]अंहसः पापाच्च रक्ष । कस्मादेवमुच्यसे । यस्मात्त्वं [v]विवक्षसे महान् भवसि ॥

युवं शक्रा मायाविना समीची निरमन्थतम् ।
विमदेन यदीळिता नासत्या निरमन्थतम् ॥ ४ ॥

युवम् । शक्रा । मायाऽविना । समीची इति सम्ऽईची । निः । अमन्थतम् ।
विऽमदेन । यत् । ईळिता । नासत्या । निःऽअमन्थतम् ॥ ४ ॥

---

१. त–शास्त्रलक्षणैः । २. त१.७-भ६–प्रशस्यतमं; त५–प्रशस्यतमं ।

हे [v]शक्रा शक्तौ शत्रुवधादिकर्मसु समर्थौ हे अश्विनौ [v]मायाविना मायाविनौ प्रज्ञावन्तौ शत्रुबन्धनकुशलौ वा [v]युवं युवां [v]समीची परस्परं संगतौ [v]निरमन्थतम् अग्निं निरमन्थीतम्। 'अश्विनावध्वर्यू' (ऐ. ब्रा. १. १८) इति ब्राह्मणोक्तत्वादग्निमन्थनमध्यश्विनोरुपपद्यमिति। कदाश्विनौ निर्मथितवन्तौ उच्यते। [v]यत् यदा [v]नासत्या नासत्यौ युवां [v]विमदेन मया [v]ईळिता ईळितौ स्तुतौ [v]निरमन्थतं निरमन्थीतं तदानीं युवां परस्परं संगतौ निर्मथितवन्तौ[1] स्थ इत्यर्थः ॥

विश्वे देवा अकृपन्त समीच्योर्निष्पर्तन्त्योः।
नासत्यावब्रुवन् देवाः पुनरा वहतादिति ॥ ५ ॥

विश्वे। देवाः। अकृपन्त। सम्ऽईच्योः। निःऽपर्तन्त्योः।
नासत्यौ। अब्रुवन्। देवाः। पुनः। आ। वहतात्। इति ॥ ५ ॥

हे अश्विनौ युवाभ्यामग्निमन्थनकाले[2] प्रेर्यमाणयोः [v]समीच्योः परस्परेण संयुक्तयोररण्योः [v]निष्पतन्त्योः विस्फुलिङ्गान् निर्गमयन्त्योः सत्योः [v]विश्वे सर्वे इन्द्रादयो [v]देवाः [v]अकृपन्त युवामस्तुवन्। किंच [v]देवाः [v]नासत्यौ अश्विनौ युवाम् [v]अब्रुवन् अवोचन्। किमिति। [v]पुनरा [v]वहतादिति। पुनःपुनरीदृशानि जगत्स्थितिहेतुभूतानि कर्माणि युवामाभिमुख्येन स्थित्वावहतम्[3]। यद्वा। युवाभ्यासुत्पाद्यमानः पुनश्चायमग्निरस्मदीयानि[4] हवींष्यावहत्विति देवा नासत्यावब्रुवन् ॥

मधुमन्मे परायणं मधुमत्पुनरायनम्।
ता नो देवा देवतया युवं मधुमतस्कृतम् ॥ ६ ॥

मधुऽमत्। मे। पराऽअयनम्। मधुऽमत्। पुनः। आऽअयनम्।
ता। नः। देवा। देवतया। युवम्। मधुऽमतः। कृतम् ॥ ६ ॥

हे अश्विनौ [v]मे मदीयं [v]परायणं गृहात्परागमनं [v]मधुमत्। अत्र रसविशेषवाचिना मधुशब्देन तद्वता प्रीतिर्लक्ष्यते। युवयोः प्रसादात् प्रीतियुक्तं भवत्विति शेषः। [v]पुनरायनं गृहं प्रत्यागमनं [v]मधुमत् प्रीतियुक्तं भवतु। अपि च हे [v]देवा देवौ द्योतमानौ [v]ता तौ [v]युवं युवां [v]नः अस्मान् [v]मधुमतः प्रीतियुक्तान् [v]कृतं कुरुतम्। केनेति उच्यते। [v]देवतया देवत्वेन। अणिमादिदेवतैश्वर्ययोगेनेत्यर्थः ॥ ॥ १० ॥

'भद्रम्' इत्येकादशर्चं नवमं सूक्तम्। तुह्यादिपरिभाषयेदमप्यास्तारपाङ्क्तम्। सोमदेवताकम्। 'ऋषिश्चान्यस्मात्' इति परिभाषया प्राजापत्य ऐन्द्रो वा विमदो वा वासुको वसुकृद्वर्षिः। तथा चानुक्रान्तं—'भद्रमेकादश सौम्यम्' इति। गतो विनियोगः ॥

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम्।
अधा ते सख्ये अन्धसो वि वो मदे रणन् गावो न यवसे विवक्षसे ॥ १ ॥

भद्रम्। नः। अपि। वातय। मनः। दक्षम्। उत। क्रतुम्।
अध। ते। सख्ये। अन्धसः। वि। वः। मदे। रणन्। गावः। न। यवसे। विवक्षसे ॥ १ ॥

---

१. त–निर्मथितौ। २. त–सुताभ्याममि°; भ–युवाममि°। ३. त–सु–स्थित्वावहतां। ४. त–°मग्निमस्मदीयानि।

हे सोम त्वं ᵛनः अस्मदीयं ᵛमनः ᵛभद्रं कल्याणं ᵛकृतव गमय । अस्माकं भद्रः शुभसंकल्पं कुर्वित्यर्थः । तथा ᵛदक्षसुत दक्षमपि । 'दक्ष वृद्धौ' । वृद्धं सर्वेष्वापिगमन्तरात्मानमपि भद्रं शुभकारिबलक्षणं[1] प्रापय । अस्माकमन्तरात्मानं शुभकारिणं कुर्वित्यर्थः । उतापि च ᵛक्रतुं प्रज्ञानं भद्रं शुभाध्यवसायलक्षणं प्रापय । शुभाध्यवसायिनं कुर्वित्यर्थः । ᵛअध अथ स्तोतारः ᵛते तव ᵛसख्ये स्तुवस्तोतृत्वेऽप्यधृष्यत्वलक्षणे सख्यिकर्मणि ᵛरणन् रमन्ताम् । तत्र दृष्टान्तः । ᵛगावो ᵛन ᵛयवसे । यथा धेनवो घासे रमन्ते प्रीतिं कुर्वन्ति तद्वत् । कस्मिन् सति । ᵛअन्धसः सोमाख्यस्यान्नस्य संबन्धिनि ᵛवः तव ᵛविमदे विविधसोमजन्यमदनिमित्ते सति । कस्मादेवम् । यस्मात् ᵛविवक्षसे महान् भवसि ॥

हृदिस्पृशस्त आसते विश्वेषु सोम धामसु ।
अधा कामा इमे मम वि वो मदे वि तिष्ठन्ते वसूयवो विवक्षसे ॥ २ ॥

हृदिऽस्पृशः । ते । आसते । विश्वेषु । सोम । धामऽसु ।
अध । कामाः । इमे । मम । वि । वः । मदे । वि । तिष्ठन्ते । वसुऽयवः । विवक्षसे ॥२॥

हे ᵛसोम ᵛते तव ᵛहृदिस्पृशः स्तुतिभिर्हृदयं स्पृशन्त ऋत्विजो ᵛविश्वेषु ᵛधामसु सर्वेषु स्थानेषु ᵛआसते त्वां स्तुवन्तस्तिष्ठन्ति । ᵛअध अथ ईदृग्भूताः[2] ᵛकामाः अभिलाषाः ᵛवि ᵛवो ᵛमदे तव सोमपानजन्यविविधमदनिमित्ते सति । सोमयागार्थमित्यर्थः । ᵛवसूयवः वसुकामाः धनमिच्छन्तः ᵛमम । हृदयादिति शेषः । ᵛवि ᵛतिष्ठन्ते उत्तिष्ठन्ति । कस्मादेवम् । यस्मात् ᵛविवक्षसे महान् भवसि ॥

उत व्रतानि सोम ते प्राहं मिनामि पाक्या ।
अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे ॥ ३ ॥

उत । व्रतानि । सोम । ते । प्र । अहम् । मिनामि । पाक्या ।
अध । पिताऽइव । सूनवे । वि । वः । मदे । मृळ । नः । अभि । चित् । वधात् । विवक्षसे ॥३॥

ᵛउत अपि च हे ᵛसोम ᵛअहं ᵛते तुभ्यं ᵛव्रतानि यागादिकर्माणि ᵛपाक्या परिपक्वया सर्वार्थदर्शिन्या प्रज्ञया । यद्वा । पाक्येति व्रतविशेषणमेतत् । पाक्यानि परिपक्वानि परिनिष्ठितानीत्यर्थः । ᵛप्र ᵛमिनामि प्रहिनस्मि । प्रकर्षेण करोमीत्यर्थः । ᵛअध अथ यागानन्तरं ᵛवि ᵛवो ᵛमदे तव विविधे मदे सति ᵛनः अस्मान् ᵛमृळ सुखय । ᵛअभि ᵛचिद्वधात् आभिमुख्येन स्थित्वा शस्त्रादिवधाद्वास्मान् पालयेति शेषः । तत्र दृष्टान्तः । ᵛपितेव ᵛसूनवे । यथा पिता पुत्रार्थं सुखयति सर्वस्मात्पुत्रमेव पालयति तद्वत् । यस्मात् सुखयमानः पाल्यमानश्चाहं युष्मदर्थं पुनःपुनः सोमयागं करोमि तस्मान्मां सुखय पालय चेत्यर्थः । कस्मादेवमुच्यसे । यस्मात्त्वं ᵛविवक्षसे महान् भवसि । महान्तश्च भक्तान् सुखयन्ति पालयन्ति चेति यावत् ॥

सम्ऊ प्र यन्ति धीतयः सगोसोऽवताँइव ।
क्रतुं नः सोम जीवसे वि वो मदे धारया चमूसाँइव विवक्षसे ॥ ४ ॥

सम् । ऊँ इति । प्र । यन्ति । धीतयः । सऽगोसः । अवतान्ऽइव ।
क्रतुम् । नः । सोम । जीवसे । वि । वः । मदे । धारय । चमूसान्ऽइव । विवक्षसे ॥ ४ ॥

१. त-सु-शुभकारिलक्षणं । २. ग-इमे ।

हे [v]सोम [v]धीतयः देवतागुणान् दधति गृह्णन्तीति धीतयः स्तुतयोऽस्मदीयाः [v]सम् संभूयैव [v]प्र [v]यन्ति प्रकृष्टया गत्या त्वां गच्छन्ति। तत्र दृष्टान्तः। [v]सर्गासोऽवतानिव। विसृज्यन्त उदकपानार्थमिति सर्गा गोसंघा यन्त्रस्था घटसंघा वा। ते यथोदकपानार्थमादानार्थं वा अवतान्। कूपनामैतत्। कूपान् प्रति गच्छन्ति तद्वत्। त्वमप्येतज्ज्ञात्वा [v]क्रतुं यागादिकं कर्म प्रज्ञां वा [v]नः अस्माकं [v]जीवसे चिरंजीवनाय [v]धारय महतादरेण स्थापय। तत्र दृष्टान्तः। [v]चमसानिव। यथा [v]वः तव [v]विमदे विविधसोमजन्यमदे कर्तव्यत्वेन निमित्तभूते सत्यध्वर्युर्हविर्धाने महता यत्नेन चमसान् सोमपात्राणि स्थापयति तद्वत्। कस्मादेवमुच्यसे। यस्मात्त्वं [v]विवक्षसे महान्भवसि। यद्वा। धीतयः। अङ्गुलिनामैतत्। धयन्ति पिबन्त्याभिरिति धीतयोऽङ्गुलयः। हे सोम त्वां समु प्र यन्ति सहैव प्रकर्षेण त्वां प्राप्नुवन्ति। किमिव। अवतानिव। जलोद्धरणार्थं विसृज्यन्त इति सर्गा रज्जवः। यथा कूपान् प्रति गच्छन्ति तद्वत्। ततस्त्वं नोऽस्माकं जीवसे चिरंजीवनाय क्रतुं कर्म धारय। यथा संपूर्णं भवति तथा पूरय। किमिव। यथा चमसान् स्वयं पूरयसि[1] तद्वत्॥

तव॒ त्ये सो॑म शक्ति॒भिर्नि॑कामासो॒ व्यृ॑ण्विरे।
गृत्स॑स्य धीरास्त॒वसो॒ वि वो॒ मदे॒ व्रजं॑ गोम॑न्तमश्वि॒नं॑ वि॑वक्षसे ॥ ५ ॥

तव॑। त्ये। सो॑म। शक्ति॑ऽभिः। नि॒ऽका॑मासः। वि। ऋ॒ण्वि॒रे॒।
गृत्स॑स्य। धीराः। त॒वसः॑। वि। वः॒। मदे॑। व्रज॑म्। गोऽम॑न्तम्। अ॒श्वि॒नम्। वि॒व॒क्ष॒से॒ ॥५॥

[v]निकामासः[2] दृष्टादृष्टफले नियतकामाः [v]त्ये ते प्रसिद्धाः [v]धीराः मेधाविन ऋत्विजः [v]शक्तिभिः यागादिकर्मभिः सह हे [v]सोम [v]गृत्सस्य मेधाविनः [v]तवसः महतः [v]तव [v]व्यृण्विरे विविधाः स्तुतीर्गमयन्ति[3] प्रापयन्ति[3]। कुर्वन्तीत्यर्थः। अतः कारणात् [v]वि [v]वो [v]मदे तव सोमपानजन्यविविधमदनिमित्तभूते सत्यस्मभ्यं [v]गोमन्तं गोसहितम् [v]अश्विनम् अश्वसहितं [v]व्रजं गोष्ठम्। सामर्थ्यात् मन्दुरा लभ्यते। मन्दुरां च देहीति शेषः। कस्मादेवमुच्यसे। यस्मात् [v]विवक्षसे महान्भवसि॥ ॥११॥

पशुं॑ नः सोम रक्षसि पुरु॒त्रा विष्ठि॑तं॒ जग॑त्।
सुमाकृ॑णोषि जी॒वसे॒ वि वो॒ मदे॒ विश्वा॑ सं॒पश्य॒न्भुव॑ना॒ वि॑वक्षसे ॥ ६ ॥

पशु॑म्। नः॒। सो॑म। रक्ष॑सि। पु॒रु॒ऽत्रा। विऽस्थि॑तम्। जग॑त्।
सम्ऽआकृ॑णोषि। जी॒वसे॑। वि। वः॒। मदे॑। विश्वा॑। सम्ऽप॑श्यन्। भुव॑ना। वि॒व॒क्ष॒से॒ ॥६॥

हे [v]सोम त्वं [v]नः अस्मदीयं [v]पशुं देवयागार्थमुपाकृतं [v]रक्षसि पालयसि। न केवलं पशुं किंतु [v]पुरुत्रा बहुधा [v]विष्ठितं सुरनरतिर्यग्योन्यादिभावेनावस्थितं [v]जगत् च रक्षसि। किंच स त्वं [v]समाकृणोषि जगतो वृद्धिं सम्यगाकरोषीत्यर्थः। किमर्थम्। [v]जीवसे जीवनार्थम्। किं कुर्वन्। [v]विश्वा [v]भुवना विश्वानि भुवनानि भूतजातानि [v]संपश्यन्। किमर्थमेतदादिकं सर्वं करोषि उच्यते। [v]वि [v]वो [v]मदे युष्माकं सर्वेषां देवानां विविधहविर्जन्यतृप्त्यर्थम्। उक्तं हि—'इतः प्रदानमुत देवा उप जीवन्ति अमुतः प्रदानं मनुष्या उप जीवन्ति' (तै. सं. ३. २. ९. ७) इति। अत एव त्वं [v]विवक्षसे महान् भवसि। महतामेतत्सर्वमुचितमित्यर्थः॥

---

१. त१.२.६.७-पूरयति। २. ग-भ-निकामासो निकामाः। ३. त-स्तुतीर्गमयति।

त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।
सेधा राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ॥ ७ ॥

त्वम् । नः । सोम । विश्वतः । गोपाः । अदाभ्यः । भव ।
सेध । राजन् । अप । स्रिधः । वि । वः । मदे । मा । नः । दुःऽशंसः । ईशत । विवक्षसे ॥७॥

हे [v]सोम [v]अदाभ्यः केनाप्यहिंस्यः [v]त्वं [v]विश्वतः सर्वतः [v]नः अस्माकं [v]गोपाः रक्षिता [v]भव । अपि च हे [v]राजन् राजमान सोम त्वं [v]स्रिधः अस्माकमुपक्षपयितॄन् [v]अप [v]सेध अस्मत्तोऽपगमय अपजहि वा[1] । [v]नः अस्माकं [v]दुःशंसः विद्यमानानामविद्यमानानां कर्मणां शंसिता प्रख्यापयिता [v]मा [v]ईशत ईशिता मा भूत् । तव प्रसादादस्माकमपवक्ता कश्चिदपि मा भूदित्यर्थः । किमर्थमेतत्सर्वं प्रार्थ्यसे । [v]वि [v]वो [v]मदे तव विविधसोमादिहविर्जन्यतृप्त्यर्थम् । अतो [v]विवक्षसे त्वं महान्भवसि ॥

त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि ।
क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विवक्षसे ॥ ८ ॥

त्वम् । नः । सोम । सुऽक्रतुः । वयःऽधेयाय । जागृहि ।
क्षेत्रवित्ऽतरः । मनुषः । वि । वः । मदे । द्रुहः । नः । पाहि । अंहसः । विवक्षसे ॥८॥

हे [v]सोम [v]सुक्रतुः शोभनप्रज्ञः [v]क्षेत्रवित्तरः क्षेत्रस्यातिशयेन लम्भकः [v]त्वं [v]नः अस्माकं [v]वयोधेयाय अन्नदानाय [v]जागृहि । किंच [v]द्रुहः द्रोग्धुः [v]मनुषः मनुष्याच्छत्रोः सकाशात् [v]नः अस्मान् [v]पाहि रक्ष । [v]अंहसः पापाच्च नोऽस्मान् पाहि । किमर्थम् । [v]वि [v]वो [v]मदे । तव सोमादि-हविर्जन्यतृप्त्यर्थमित्यर्थः । [v]विवक्षसे त्वं महान्भवसि ॥

त्वं नो वृत्रहन्तुमेन्द्रस्येन्दो शिवः सखा ।
यत्सीं हवन्ते समिथे वि वो मदे युध्यमानास्तोकसातौ विवक्षसे ॥ ९ ॥

त्वम् । नः । वृत्रहन्ऽतम । इन्द्रस्य । इन्दो इति । शिवः । सखा ।
यत् । सीम् । हवन्ते । सम्ऽइथे । वि । वः । मदे । युध्यमानाः । तोकऽसातौ । विवक्षसे ॥९॥

हे [v]वृत्रहन्तम शत्रूणामतिशयेन हन्तर्हे [v]इन्दो हे सोम यः [v]त्वम् [v]इन्द्रस्य [v]शिवः सुखकरः [v]सखा मित्रभूतोऽसि स त्वं [v]नः अस्मान् पाहीति शेषः । कदेति उच्यते । [v]तोकसातौ । तोक इत्यपत्यनाम । सातिः । 'षणु दाने' इत्यस्माद्धातो रूपम् । दीयतेऽस्मिन्नपत्यमिति तोकसातिः संग्रामविशेषणम् । तस्मिन् । अतिमहतीत्यर्थः । [v]समिथे संग्रामे [v]युध्यमानाः युद्धं कुर्वाणाः शत्रुजनाः [v]सीं सर्वतः [v]यत्[2] यदा[2] [v]हवन्ते युद्धार्थमस्मानाह्वयन्ति । तदास्माकं रक्षिता भवेत्यर्थः । कस्मिन् निमित्ते । [v]वि [v]वो [v]मदे तव विविधहविर्जन्यहर्षनिमित्ते । [v]विवक्षसे त्वं महान्भवसि । महतां हि पालनं युक्तमेवेति ॥

अयं घ स तुरो मद इन्द्रस्य वर्धत प्रियः ।
अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद्विवक्षसे ॥ १० ॥

---

१. ब-म६-च । २. ग-न्त-भ-'यत् यदा' नास्ति ।

अयम्। घ। सः। तुरः। मदः। इन्द्रस्य। वर्धत। प्रियः।
अयम्। कक्षीवतः। महः। वि। वः। मदे। मतिम्। विप्रस्य। वर्धयत्। विवक्षसे ॥ १० ॥

vअयं vघ ईदृशः खलु vसः प्रसिद्धः अस्माभिरभिषुतः सोमः vतुरः सर्वकार्येषु त्वरणशीलः[1] vमदः मदकरः. vप्रियः vइन्द्रस्य तर्पयिता vवर्धत अस्मदीयां मतिमवर्धयत्। vअयं सोमः vकक्षीवतः एतदाख्यस्यर्षेः। कीदृशस्य। vमहः महतः vविप्रस्य मेधाविनः vमतिं प्रज्ञां vवर्धयत् अवर्धयत्। तद्वदस्माकमपि मतिं वर्धयेदित्यर्थः। शिष्टं गतम् ॥

अयं विप्राय दाशुषे वाजाँ इयर्ति गोमतः।
अयं सप्तभ्य आ वरं वि वो मदे प्रान्धं श्रोणं च तारिषद्विवक्षसे ॥ ११ ॥

अयम्। विप्राय। दाशुषे। वाजान्। इयर्ति। गोऽमतः।
अयम्। सप्तऽभ्यः। आ। वरम्। वि। वः। मदे।
प्र। अन्धम्। श्रोणम्। च। तारिषत्। विवक्षसे ॥ ११ ॥

vअयं सोमः vविप्राय मेधाविने vदाशुषे हविर्दत्तवते यजमानाय vगोमतः पशुयुक्तानि vवाजान्[2] अन्नानि vइयर्ति प्रेरयति। प्रयच्छतीत्यर्थः। किंच vअयम् एव सोमः vसप्तभ्यः होतृभ्यः vवरं वरणीयं धनम् vआ प्रयच्छति। vअन्धं नेत्रहीनं दीर्घतमसमृषिं चक्षुष्प्रदानेन vश्रोणं vच पङ्गुं परावृजमृषिं चरणप्रदानेन एवमुभावृषी vप्र vतारिषत् प्रकर्षेण वर्धितवान्। शिष्टं स्पष्टम् ॥ ॥१२॥

'प्र हि' इति नवर्चं दशमं सूक्तमानुष्टुभं पूषदेवताकम्। आद्याचतुर्ण्यावुष्णिहौ। ऋषिः पूर्ववत्। तथा चानुक्रान्तं—'प्र हि नव पौष्णमानुष्टुभमाद्याचतुर्ण्या उष्णिहौ' इति। गतो विनियोगः ॥

प्र ह्यच्छा मनीषाः स्पार्हा यन्ति नियुतः।
प्र दस्रा नियुद्रथः पूषा अविष्टु माहिनः ॥ १ ॥

प्र। हि। अच्छ। मनीषाः। स्पार्हाः। यन्ति। निऽयुतः।
प्र। दस्रा। नियुत्ऽरथः। पूषा। अविष्टु। माहिनः ॥ १ ॥

vहि यस्मात्कारणात् vमनीषाः अस्मदीयाः स्तुतिलक्षणा वाचः vअच्छ गुणग्रहणद्वारेण पूषणमभिप्राप्तुं vप्र vयन्ति प्रकर्षेण गच्छन्ति। कीदृश्यः। vस्पार्हाः सर्वगुणोपेतत्वात्स्पृहणीयाः vनियुतः। नियमनाद्वा नियोजनाद्वेत्येतद्रूपम्। अस्माभिर्नियमिता वा नियुक्ता वा। उच्चारिता इत्यर्थः। एतत् ज्ञात्वोपकारस्य प्रत्युपकारं कर्तुं vदस्रा दर्शनीयः vनियुद्रथः गमनाय सर्वदा नियतरथो[3] नियुक्तरथो वा vमाहिनः महान् vपूषा देवः vअविष्टु अस्मान् प्रकर्षेण रक्षतु। यद्वा। दस्रा दंसयितारौ कर्मणामुपक्षपयितारौ। परिसमापयितारावित्यर्थः। एवंभूतौ पत्नीयजमानौ पूषा रक्षत्विति योज्यम् ॥

यस्य त्यन्महित्वं वातार्प्यमयं जनः।
विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनाम् ॥ २ ॥

१. त-रमणशीलः; भ१.२.४–त्वरशरणशीलः। २. त-भ६–वाजानि। ३. भ६-मु–नियुतरथो।

यस्य । त्यत् । महिऽत्वम् । वाताप्यम् । अयम् । जनः ।
विप्रः । आ । वंसत् । धीतिऽभिः । चिकेत । सुऽस्तुतीनाम् ॥ २ ॥

[v]विप्रः मेधावी[1] [v]अयं [v]जनः यजमानः[1] [v]यस्य पूष्णः संबन्धि [v]त्यत्[2] तत् प्रसिद्धं [v]महित्वं महत्त्वं [v]वाताप्यं मण्डले संभृतं परिपक्वमुदकं [v]धीतिभिः यागादिकर्मभिः[3] [v]आ [v]वंसत् संभजते स देवः [v]सुष्टुतीनां तदीयाः शोभनाः स्तुतीः [v]चिकेत जानातु ॥

स वेद सुष्टुतीनामिन्दुर्न पूषा वृषा ।
अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति ॥ ३ ॥

सः । वेद । सुऽस्तुतीनाम् । इन्दुः । न । पूषा । वृषा ।
अभि । प्सुरः । प्रुषायति । व्रजम् । नः । आ । प्रुषायति ॥ ३ ॥

य उक्तगुणः [v]सः पूषा [v]सुष्टुतीनां शोभनस्तोत्राणाम् । स्वरूपमिति शेषः । [v]वेद जानाति । अपि च [v]इन्दुर्न सोम इव तथायं [v]पूषा [v]वृषा कामानां वर्षिता भवति । [v]प्सुरः रूपवान् सः [v]अभि अस्मानभिलक्ष्य [v]प्रुषायति सिञ्चति । तथा [v]नः अस्माकं [v]व्रजं गोष्ठं च [v]आ [v]प्रुषायति आभिमुख्येन सिञ्चति । अस्मभ्यं हिरण्यपश्वादिकं ददातीत्यर्थः ॥

मंसीमहि त्वा वयमस्माकं देव पूषन् ।
मतीनां च साधनं विप्राणां चाधवम् ॥ ४ ॥

मंसीमहि । त्वा । वयम् । अस्माकम् । देव । पूषन् ।
मतीनाम् । च । साधनम् । विप्राणाम् । च । आऽधवम् ॥ ४ ॥

हे [v]देव द्योतमान [v]पूषन् [v]वयं स्तोतारः [v]त्वा त्वां [v]मंसीमहि स्तुमः । कीदृशम् । [v]अस्माकम् अस्मदीयानां [v]मतीनां [v]च अभिलषितानां च [v]साधनं साधयितारं [v]विप्राणां [v]च मेधाविनामपि [v]आधवं परिचर्याद्वारेण कम्पयितारम् ॥

प्रत्यर्धिर्यज्ञानामश्वहयो रथानाम् ।
ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः ॥ ५ ॥

प्रतिऽअर्धिः । यज्ञानाम् । अश्वऽहयः । रथानाम् ।
ऋषिः । सः । यः । मनुःऽहितः । विप्रस्य । यावयत्ऽसखः ॥ ५ ॥

[v]ऋषिः सर्वस्य द्रष्टा [v]सः पूषा [v]यज्ञानां [v]प्रत्यर्धिः अर्धभाक् [v]रथानां [v]अश्वहयः । हयतिर्गतिकर्मा । रथानां संबन्धिभिरश्वैर्गमनशीलो भवति । अश्वयुक्तेन रथेन सदा गन्तेत्यर्थः । [v]मनुर्हितः मनुष्यहितः [v]यः [v]विप्रस्य मेधाविनः स्तोतुः [v]यावयत्सखः शत्रूणां पृथक्कर्ता सखा भवति स इति पूर्वेण संबन्धः ॥ ॥ १३ ॥

१. त–मेधावीयं यजमानजनः; त३-भ१.२.४–मेधावी अयं यजमानः; भ६-सु–मेधावी अयं यजमानजनः । २. त१.२-भ७–य तत् ; त३.४.५.६.७-भ२–यत् ; भ१.४.६–यत् तत् । ३. त-भ१.२.४–यागादिकर्म ।

आधीषमाणायाः पतिः शुचायाश्च शुचस्य च ।
वासोवायोऽवीनामा वासांसि मर्मृजत् ॥ ६ ॥

आऽधीषमाणायाः । पतिः । शुचायाः । च । शुचस्य । च ।
वासःऽवायः । अवीनाम् । आ । वासांसि । मर्मृजत् ॥ ६ ॥

[v]आधीषमाणायाः आत्मार्थं धीयमानायाः [v]शुचायाश्च दीप्तायाः अजायाश्च [v]पतिः स्वामी । न केवलं स्त्रीमात्रस्य किंतु [v]शुचस्य दीप्तस्य पुंपशोः [v]च पतिरित्यर्थः । पूर्वभूतः पूषा देवः [v]अवीनाम् उरणानां संबन्धिभी रोमभिः [v]वासोवायः दशापवित्रादीनि वस्त्राणि प्रेरयन् [v]वासांसि रजकशोध्यानि तानि वस्त्राणि [v]आ [v]ममृजत् आ समन्तात् प्रकाशोष्णाभ्यां शोधयन् भवति ॥

इनो वाजानां पतिरिनः पुष्टीनां सखा ।
प्र श्मश्रु हर्यतो दूधोद्वि वृथा यो अदाभ्यः ॥ ७ ॥

इनः । वाजानाम् । पतिः । इनः । पुष्टीनाम् । सखा ।
प्र । श्मश्रु । हर्यतः । दूधोत् । वि । वृथा । यः । अदाभ्यः ॥ ७ ॥

[v]इनः ईश्वरः पूषा [v]वाजानां हविरादीनां सर्वेषामन्नानां [v]पतिः स्वामी [v]इनः प्रभुः [v]पुष्टीनां सर्वेषां प्राणिनां स्वभूतानां पोषणानां[1] करणे[1] [v]सखा मित्रभूतः । सर्वस्योपकारित्वात् । किंच [v]हर्यतः कामयमानस्य यजमानस्य स्वभूतं सोमं पिबन्निति शेषः। [v]श्मश्रु श्मश्रूणि [v]वृथा अनायासेनाप्रयत्नेन [v]प्र [v]वि [v]अधूधोत् प्रकर्षेण विविधं कम्पयति [v]यः पूषा [v]अदाभ्यः शत्रुभिरहिंस्यः स इति पूर्वेण संबन्धः ॥

आ ते रथस्य पूषन्नजा धुरं ववृत्युः ।
विश्वस्यार्थिनः सखा सनोजा अनपच्युतः ॥ ८ ॥

आ । ते । रथस्य । पूषन् । अजाः । धुरम् । ववृत्युः ।
विश्वस्य । अर्थिनः । सखा । सनःऽजाः । अनपऽच्युतः ॥ ८ ॥

हे [v]पूषन् देव [v]ते स्वदीयस्य [v]रथस्य [v]धुरम् [v]अजाः वाहनत्वेन [v]आ [v]ववृत्युः आवर्तयन्ति । आवहन्तीत्यर्थः । यस्त्वं [v]विश्वस्य सर्वस्य [v]अर्थिनः याचकस्य अभिलषितार्थप्रदातृत्वात्सखिभूतः [v]सनोजाः चिरं जातः [v]अनपच्युतः स्वाधिकारादनपगतः[2] तस्य[2] ते रथमिति संबन्धः ॥

अस्माकमूर्जा रथं पूषा अविष्टु माहिनः ।
भुवद्वाजानां वृध इमं नः शृणवद्धवम् ॥ ९ ॥

अस्माकम् । ऊर्जा । रथम् । पूषा । अविष्टु । माहिनः ।
भुवत् । वाजानाम् । वृधः । इमम् । नः । शृणवत् । हवम् ॥ ९ ॥

[v]माहिनः महान् [v]पूषा [v]अस्माकं स्वभूतं [v]रथम्[3] [v]ऊर्जा बलेन[3] अन्नेन वा [v]अविष्टु अवतु रक्षतु । किंच [v]वाजानाम् अन्नानां [v]वृधः वर्धकः [v]भुवत् भवतु । [v]नः अस्मदीयम् [v]इमम् ईदृग्भूतं [v]हवम् आह्वानं [v]शृणवत् शृणोतु ॥ ॥ १४ ॥

---

१. ग-पोषकानां रक्षणे; त-मु-पोषकाणां करणे । २. त-भ२-°दनपगतस्य; भ१.२.७-°दन-पच्युतश्च तस्य । ३. त-रसं ऊर्जा बलेन; भ-रसं ऊर्जा बलेन ।

'असत्सु मे' इति चतुर्विंशत्यृचमेकादशं सूक्तमिन्द्रपुत्रस्य वसुक्रस्यार्षं त्रैष्टुभमैन्द्रम्। तथा चानुक्रान्तम्—'असत्सु चतुर्विंशतिरैन्द्रो वसुक्रः' इति। महाव्रते मरुत्वतीयशस्त्र एतत्सूक्तम्। तथैव पञ्चमारण्यके सूत्रितं च—'असत्सु मे जरितः साभिवेगः पिबा सोममभि वसुग्र तर्दः' (ऐ. आ. ५. १. १) इति॥

असत्सु मे जरितः साभिवेगो यत्सुन्वते यजमानाय शिक्षम्।
अनाशीर्दामहमस्मि प्रहन्ता सत्यध्वृतं वृजिनायन्तमाभुम्॥ १॥

असत्। सु। मे। जरितरिति। सः। अभिऽवेगः। यत्। सुन्वते। यजमानाय। शिक्षम्।
अनाशीःऽदाम्। अहम्। अस्मि। प्रऽहन्ता। सत्यऽध्वृतम्। वृजिनऽयन्तम्। आभुम्॥ १॥

वासुक्रेषु सूक्तेषु बाहुल्येनेन्द्रः स्तूयते। इदानीमिन्द्रो वसुक्रं स्तोतुमुद्यतं पुत्रं संबोध्य स्वसामर्थ्यं कथयति येन विज्ञातदेवतारूपः सन् सुखेन स्तोष्यतीति। यद्वा। कार्यकारणयोरैक्योपचारात् 'आत्मा वै पुत्रनामासि' (आश्व. गृ. १.१५.११) इति वचनादिन्द्ररूपेणावस्थितो वसुक्र आत्मानं स्तौति। क्वचित् क्वचिदिन्द्रं चेति। हे [v]जरितः स्तोतः [v]मे मम [v]सु शोभनः [v]सः तादृशः [v]अभिवेगः अभिगमनं मनसो वृत्तिविशेषः [v]असत् अस्ति विद्यते। [v]यत् येन अभिवेगेन [v]सुन्वते मदर्थं सोमाभिषवं कुर्वते [v]यजमानाय यज्वने [v]शिक्षम् अभिलषितमर्थं ददामि। किंच [v]अहम् [v]अनाशीर्दाम्। आशीरन्यत्र प्रार्थना इह तु[1] सामर्थ्यात् प्रार्थितं[2] हविरुच्यते। तन्मह्यमददतं जनम्। यद्वा। आशीरिति सोमाश्रवणं दध्युच्यते। तस्यादातारम्। असोमयाजिनमित्यर्थः। [v]प्रहन्ता [v]अस्मि प्रकर्षेण हिंसिता भवामि। कीदृशम्। [v]सत्यध्वृतं सत्यस्य हिंसकम्। अनृतवादिनं चेत्यर्थः। [v]वृजिनायन्तं पापं कर्तुमिच्छन्तम् [v]आभुं व्याप्नुवन्तम्॥

यदीदहं युधये संनयान्यदेवयून् तन्वा३ शूशुजानान्।
अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पञ्चदशं नि षिञ्चम्॥ २॥

यदि। इत्। अहम्। युधये। सम्ऽनयानि। अदेवऽयून्। तन्वा। शूशुजानान्।
अमा। ते। तुम्रम्। वृषभम्। पचानि। तीव्रम्। सुतम्। पञ्चऽदशम्। नि। सिञ्चम्॥ २॥

[v]यत् यदा [v]अहमित् अहमेव [v]युधये युद्धार्थम् [v]अदेवयून् देवान् यष्टुमनिच्छतोऽयज्वनः[3] [v]संनयानि संगमयामि। कीदृशान्। [v]तन्वा स्वशरीरेण [v]शूशुजानान् आत्मंभरित्वात्पुष्टिलक्षणया दीप्त्या युक्तान्। पुष्टानित्यर्थः। तदा हे इन्द्र अहम् [v]अमा ऋत्विगादिभिः सहितः [v]ते तुभ्यं [v]तुम्रं प्रेरकं बलिनम्। पीवानमित्यर्थः। [v]वृषभं सेचनसमर्थं पुंपशुं [v]पचानि। किंच [v]तीव्रं मदकररसं [v]सुतम् अभिषुतं [v]पञ्चदशम्। प्रतिपत्प्रभृति[4] पञ्चदशसंख्याकासु तिथिषु शुक्लपक्ष एकोत्तरवृद्धया पर्णानि आयन्ते। कृष्णपक्षे तु तद्वन्निहीयन्ते। एवंभूतत्वात्पञ्चदशः सोम उच्यते। तम्। यद्वा। त्रिवृत्पञ्चदश-स्तोमोपेतं माध्यंदिनसवनकमित्यर्थः। [v]नि [v]सिञ्चं दशापवित्रे द्रोणकलशे चमसपात्रेऽग्नौ वा[5] सिञ्चामि प्रक्षिपामीत्यर्थः॥

१. त–'तु' नास्ति। २. त–°मार्थ्यमानं। ३. त–°मिच्छतः अयजनः। ४. ग-त३-म१.२.४.५–°प्रभृतिषु। ५. त१.२.६.७–चमसपात्रेणाग्नौ च; त४.५–चमसपात्रे अग्नौ व; त३-म-सु–चमसपात्रे अग्नौ च।

नाहं तं वेद य इति ब्रवीत्यदेवयून्त्समरणे जघन्वान् ।
यदावाख्यत्समरणमृघावदादिद्धे मे वृषभा प्र ब्रुवन्ति ॥ ३ ॥

न । अहम् । तम् । वेद । यः । इति । ब्रवीति । अदेवऽयून् । सम्ऽअरणे । जघन्वान् ।
यदा । अवऽअख्यत् । सम्ऽअरणम् । ऋघावत् । आत् । इत् । ह । मे । वृषभा । प्र । ब्रुवन्ति ॥ ३ ॥

[v]यः जनः [v]अदेवयून् देवानकामयमानान्[1] देवद्विषो राक्षसादीन् [v]समरणे संग्रामे [v]जघन्वान् अहं हतवान् [v]इति [v]ब्रवीति वदति [v]तं तादृशं मद्व्यतिरिक्तं जनम् [v]अहं [v]न [v]वेद न जानामि । मत्तोऽन्यः संग्रामे शत्रूणां हन्ता नास्तीत्यर्थः । किंच [v]यदा यस्मिन्काले [v]समरणं संग्रामम् [v]अवाख्यत् अवाकृतं न्यक्कृतमहं पश्यामि । कीदृशम् । [v]ऋघावत् ऋघावन्तं परस्परं हिंसायुक्तम् । अत्यन्तक्रूरमित्यर्थः । [v]आत् तदानीं [v]मे मम स्वभूतानि [v]वृषभा वृषभकर्माणि दर्पितवृषभस्येव विक्रान्तकर्माणि [v]प्र[2] [v]ब्रुवन्ति[2] । विद्वज्जना इति शेषः । [v]इद्ध इतीमौ पदपूरणौ ॥

यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म आसन् ।
जिनामि वेत्क्षेम आ सन्तमाभुं प्र तं क्षिणां पर्वते पादगृह्य ॥ ४ ॥

यत् । अज्ञातेषु । वृजनेषु । आसम् । विश्वे । सतः । मघऽवानः । मे । आसन् ।
जिनामि । वा । इत् । क्षेमे । आ । सन्तम् । आभुम् ।
प्र । तम् । क्षिणाम् । पर्वते । पादऽगृह्य ॥ ४ ॥

[v]यत् यदा [v]अज्ञातेषु शरीरशस्त्रास्त्रबलादिभिरपरिज्ञातेषु [v]वृजनेषु[3] संग्रामेषु [v]आसम् अहं युद्धार्थमुपविशामि तदा [v]विश्वे सर्वे [v]मघवानः हविर्लक्षणतपोलक्षणधनवन्त ऋषयः [v]सतः एवं वर्तमानस्य [v]मे ममेन्द्रस्य समीपे [v]आसन् उपविशन्ति । मम वीर्यवृद्ध्यर्थं मां स्तुवन्तस्तिष्ठन्तीत्यर्थः । अपि च [v]क्षेमे जगत्पालने निमित्ते [v]आ [v]सन्तम् । आकारोऽभीत्यस्यार्थे वर्तते । सर्वमभिभवन्तम् [v]आभुं महान्तं शत्रुं [v]जिनामि [v]वा विनाशयाम्येव । नात्र विनाशे संशयः । [v]इत् इति पूरणः । [v]तं महान्तं शत्रुं [v]पादगृह्य पादौ गृहीत्वा [v]पर्वते गिरौ [v]प्र [v]क्षिणां प्रहिनस्मि प्रक्षिपामि ॥

न वा उ मां वृजने वारयन्ते न पर्वतासो यदहं मनस्ये ।
मम स्वनात्क्रुधुकर्णो भयात एवेदनु द्यून्किरणः समेजात् ॥ ५ ॥

न । वै । ऊँ इति । माम् । वृजने । वारयन्ते । न । पर्वतासः । यत् । अहम् । मनस्ये ।
मम । स्वनात् । क्रुधुऽकर्णः । भयाते । एव । इत । अनु । द्यून् । किरणः । सम् । एजात् ॥ ५ ॥

[v]वै [v]ऊ इत्येवैव । [v]वृजने संग्रामे [v]मां युद्धार्थमुपस्थितं सन्तं [v]न वारयन्ते केचिन्निवारयितुं समर्था न भवन्ति । [v]अहं [v]यत् कर्म [v]मनस्ये मनसा कर्तुमिच्छामि [v]पर्वतासः अवितरणक्षमा[4] हिमवदादयो गिरयस्तत्कर्म मनसा प्रोढुं [v]न शक्नुवन्तीत्यर्थः । किंच [v]मम इन्द्रस्य [v]स्वनात् शब्दादेव [v]क्रुधुकर्णः नामासुरः यद्वा क्रुधुकर्णो ह्रस्वकर्णो मन्दश्रवणेन्द्रियो बधिरः स्थावरपिपीलिकादिरपि

---

१. त-भ२-मु-देवान् कामयमानान् । २. ग-भ५-प्रकथयंति; त३-भ६-प्रब्रुवंति प्रकथयंति । ३. त-' वृजनेषु ' नास्ति । ४. त-भ-मु-अतितरणक्षमा; उद्गीथ-अतिभाक्षमाः ।

vभयाते बिभेति । अपि च vएवेत् एवमेव क्षुधुकर्णवत् vअनु vचून् प्रतिदिनमित्यर्थः । vकिरणः । अन्तर्णीतमत्वर्थमेतत् । किरणवान् रश्मिवानादित्यः vसमेजात् सम्यक्कम्पयते चलति । नियमेन प्रयातीत्यर्थः ॥ ॥ १५ ॥

दर्शन्वत्र शृतपाँ अनिन्द्रान्बाहुक्षदः शरवे पत्यमानान् ।
घृषुं वा ये निनिदुः सखायमध्यू न्वेषु पवयो ववृत्युः ॥ ६ ॥

दर्शान् । नु । अत्र । शृतऽपान् । अनिन्द्रान् । बाहुऽक्षदः । शरवे । पत्यमानान् ।
घृषुम् । वा । ये । निनिदुः । सखायम् । अधि । ऊँ इति । नु । एषु । पवयः । ववृत्युः ॥ ६ ॥

vअत्र अस्मिञ्जगति vशृतपान् शृतानि पक्वानि सोमादिहवींष्यपहृत्य पिबतः vअनिन्द्रान् इन्द्रेण सखा वर्जितान् vबाहुक्षदः बाहुभिर्यजमानान्भक्षकलीकुर्वतः vशरवे हिंसार्थं vपत्यमानान् अभिपततोऽसुरादीन् vनु क्षिप्रं vदर्शन् अहमिन्द्रः पश्यामि । एवंभूतेषु vएषु vअधि उपरि vपवयः मदीयान्यायुधानि vववृत्युः वर्तन्ते । वाशब्दः समुच्चये । vघृषुं महान्तं च vसखायं सखिवत्प्रियं हितस्य कर्तारं मां vये vनिनिदुः निन्दन्ति । vउ इति समुच्चये । एषु चोपरि मदीयान्यायुधानि क्षिप्रं वर्तन्ते ॥

अभूर्वोक्षीर्व्यु१ आयुरानड्दर्षन्पूर्वो अपरो नु दर्षत् ।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष ॥ ७ ॥

अभूः । ऊँ इति । औक्षीः । वि । ऊँ इति । आयुः । आनट् । दर्षत् । नु । पूर्वः । अपरः । नु । दर्षत् ।
द्वे इति । पवस्ते इति । परि । तम् । न । भूतः । यः । अस्य । पारे । रजसः । विवेष ॥ ७ ॥

अत्र मध्यमपुरुषेणेन्द्रस्योच्यमानत्वाद्युक्त इन्द्रं स्तौति । vउ इत्यवधारणे । हे इन्द्र vअभूः त्वमेव प्रादुर्भवसि । vऔक्षीः काले काले त्वमेव पृथिवीं सिञ्चसि नान्य इत्यर्थः । आनडित्यादौ सर्वत्र परोक्षनिर्देशो प्रत्यक्षीकरणार्थं मध्यमपुरुषेण प्रकृतत्वादेकवाक्यतायै युष्मच्छब्दसमानार्थो भवच्छब्दोऽध्याहर्तव्यः । vवि इति वैविध्ये । vउ इति चार्थे । आयुर्जीवितमुच्यते । इन्द्रो भवान् विविधम् vआयुः च vआनट् व्याप्नोति । आ[1] भूतसंप्लवाज्जीवतीत्यर्थः[1] । किंच vपूर्वः पुरातनो भवानिन्द्रः vनु क्षिप्रं vदर्षत् । ' दृ विदारणे ' । ' सिञ्चहुलं छेटि ' । वज्रेण शत्रून् विदारयति । vअपरः अन्यः शत्रुः vनु vदर्षत् । नु इति निषेधार्थे । भवन्तमिन्द्रं न विदारयति । भवानेव सर्वं शत्रुजातं हिनस्तीत्यर्थः । अपि च vयः भवानिन्द्रः vअस्य ईदृशस्य vरजसः लोकस्य । त्रैलोक्यस्येत्यर्थः । vपारे परतः । परमसूक्ष्मवायुरूपेण सृष्टिकारणात्मना स्थित्वेति शेषः । vविवेष सर्वतो व्याप्नोति vतं[2] भवन्तमिन्द्रं[2] vद्वे इति सामर्थ्यात् द्यावापृथिव्यौ vन vपरि vभूतः न परिभवतः । अभिभवितुं न शक्नुत इत्यर्थः । कीदृश्यौ । vपवस्ते । पवतिर्गतिकर्मा । अस्मादौणादिकोऽस्तप्रत्ययः । अतः ' अजाद्यतष्टाप् ' (पा. सू. ४. १. ४) इति टापि कृते प्रथमाद्विवचने चैतद्रूपं भवति । महत्त्वेन सर्वस्याभिभवनाय गच्छन्त्यौ ।

---

१. ग–आभूतसंप्लवं°; त–अभूत्संप्लवा°; म१.४–आभूतसंप्ल°; म१(२)-उद्वीव–आमहाभूतसंप्लवा°; म२–अभूतसंपूर्ण°; म६–अभूतसंप्लवा°; म७–आभूतं संप्लवं° । २. त१.२.६-मु–तमिंद्रं; त४–तं मद्रं ।

गावो यवं प्रयुता अर्यो अक्षन् ता अपश्यं सहगोपाश्चरन्तीः ।
हवा इदर्यो अभितः समायन्किय॑दासु स्वपतिश्छन्दयाते ॥ ८ ॥

गावः । यवम् । प्रऽयुताः । अर्यः । अक्षन् । ताः । अपश्यम् । सहऽगोपाः । चरन्तीः । हवाः । इत् । अर्यः । अभितः । सम् । आयन् । कियत् । आसु । स्वऽपतिः । छन्दयाते ॥८॥

ᵛगावः धेनवः ᵛप्रयुताः प्रकर्षेण मिश्रिताः परस्परेण सह भूताः ᵛयवं मद्दृष्टिजनितयवादि-घासम् ᵛअक्षन् अदन्ति भक्षयन्ति । ᵛअर्यः सर्वस्य स्वाम्यहं ᵛताः गाः ᵛअपश्यं पश्यामि । कीदृशीः । ᵛसहगोपाः पशुपालकेन सहिताः ᵛचरन्तीः घासं भक्षयन्तीः । एवंभूतास्ताः परया प्रीत्या पश्यामीत्यर्थः । किंच ᵛहवाः वाहनदोहनार्थमाह्वानार्हा गावः ᵛअर्यः । द्वितीयार्थे प्रथमा । अर्यं स्वामिनं प्रति ᵛअभितः सर्वतः[1] ᵛसमायन् । समित्येकीभावे । एकीभूयागच्छन्ति । ᵛइदिति पूरणः । आगतासु ᵛआसु गोषु ᵛस्वपतिः स्वानां गवां स्वामी ᵛकियत् क्षीरं ᵛछन्दयाते दोग्धुं कामयते । मदर्थं दोग्धीत्यर्थः[2] । ' गाव आशिरं दुदुहे ' (ऋ. सं. ८. ६९. ६) इति वचनात् ॥

सं यद्वयं यवसादो जनानामहं यवाद उर्वज्रे अन्तः ।
अत्रा युक्तोऽवसातारमिच्छादथो अयुक्तं युनजद्ववन्वान् ॥ ९ ॥

सम् । यत् । वयम् । यवसऽअदः । जनानाम् । अहम् । यवऽअदः । उरुऽअज्रे । अन्तरिति । अत्र । युक्तः । अवऽसातारम् । इच्छात् । अथो इति । अयुक्तम् । युनजत् । ववन्वान् ॥ ९ ॥*

अत्रेदु मे मंससे सत्यमुक्तं द्विपाच्च यच्चतुष्पात्संसृजानि ।
स्त्रीभिर्यो अत्र वृषणं पृतन्यादयुद्धो अस्य वि भजानि वेदः ॥ १० ॥

अत्र । इत् । ऊँ इति । मे । मंससे । सत्यम् । उक्तम् । द्विऽपात् । च । यत् । चतुःऽपात् । सम्ऽसृजानि । स्त्रीभिः । यः । अत्र । वृषणम् । पृतन्यात् । अयुद्धः । अस्य । वि । भजानि । वेदः ॥१०॥

ᵛमे मम ᵛअत्र अस्मिन् स्तोत्रे ᵛउक्तं मया कथितं ᵛसत्यमित् यथाभूतमेव ᵛमंससे त्वं जानीहि । अर्थवादरूपेण नैतदध्वारोपितगुणमित्यर्थः । ᵛउ इति पूरणः । किंच ᵛद्विपाच्च मनुष्यादिकं च ᵛचतुष्पात् च पश्वादिकं च ᵛयत् स्थावरजङ्गमात्मकं जगत् ᵛसंसृजानि अहमुत्पादयानीति त्वं जानीहि । ᵛअत्र अस्मिञ्जगति ᵛस्त्रीभिः स्त्रीसदृशैः बलादिहीनैः पुरुषैः सह ᵛयः शूरंमन्यो जनः ᵛवृषणम् अभिलषितस्य वर्षितारं मां । परित्यज्येति शेषः । ᵛपृतन्यात् युद्धं कर्तुमिच्छति अहम् ᵛअस्य ईदृशस्य

१. त–' सर्वतः ' नास्ति । २. त-भ१.२.४.६-मु-दोग्धीरित्यर्थः । *. त७-मु-अनया ऋषिर्इन्द्रप्रसादलब्धं स्वस्य सार्वात्म्यं प्रकाशयति । जनानां लोकानां मध्ये ये यवसादः तृणस्यात्तारः पशवः ते वयमिति सं सम्यक् जानीहि । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । ये च यवादः यवोपलक्षितस्यान्नस्य अत्तारो मनुष्यास्तेपि वयमिति संजानीहि । वस्तुतस्तु उर्वज्रे विस्तीर्णे अजिरेंगणे हार्दाकाशरूपे यत् अंतः अंतर्यामिरूपं ब्रह्म तदहमस्मि । अत्रास्मिन् हार्दाकाशे युक्तः समाहितो भवानिंद्रः अवसातारं आत्मनः संभक्तारं इच्छात् इच्छति आत्मसाक्षात्कर्तुं । अथो अपि च अयुक्तं अयोगिनं ववन्वान् । द्वितीयार्थे प्रथमा । ववन्वांसं अतिशयेन विषयान् सेवमानं पुरुषं युनजत् युनक्ति संसारे । शापानुग्रहसमर्थो भवदूपोहमेवास्मीति भावः ।

स्वभूतं [v]वेदः धनम् [v]अयुङ्क्तः तेन पुरुषेणाधोद्वा सन् बलादपहृत्य [v]वि [v]भजामि स्तोतृभ्यो बहुभ्यश्च ददामीत्यर्थः ॥ ॥ १६ ॥

यस्यानक्षा दुहिता जात्वास कस्तां विद्वाँ अभि मन्यात अन्धाम् ।
कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ॥ ११ ॥

यस्य । अनक्षा । दुहिता । जातु । आस । कः । ताम् । विद्वान् । अभि । मन्यात । अन्धाम् ।
कतरः । मेनिम् । प्रति । तम् । मुचाते । यः । ईम् । वहाते । यः । ईम् । वा । वरेऽयात् ॥ ११ ॥

[v]यस्य इन्द्रस्य मम कारणरूपेणावस्थितस्य [v]अनक्षा अक्षिवर्जिता दर्शनहीना । अचेतनेत्यर्थः । [v]दुहिता प्रकृत्याख्या [v]जातु कदाचित् [v]आस । असतेर्गत्यर्थस्य[1] लिटि[2] रूपम् । सामर्थ्यात् महाप्रलये मय्येव लीना सती सर्वत्र वर्तते [v]तां प्रकृतिं [v]विद्वान् मय्येव लीनां जानन् मत्तोऽन्यो देवः [v]कः भवति । न कोऽपीत्यर्थः । अपि च [v]अन्धां दर्शनहीनामचेतनां ताम् [v]अभि [v]मन्यात आत्मन्याश्रयप्रदानेन को देवोऽभिपूजयति । यद्वा । क्षीरोदकवत् घटाकाशवच्च मया सहैकीभूतां तामाभिमुख्येन को जानाति । अहमेव सर्वज्ञः स्वात्मन्याश्रयप्रदानेनाभिपूजयामि । मया सहैकीभूतां तां तत्त्वतोऽहमेव जानामि नान्य इति । किंच [v]कतरः देवः [v]मेनिं वज्रं [v]तं प्रसिद्धं वृत्रादिशत्रुं [v]प्रति [v]मुचाते मुञ्चति । स्वयमेव प्रभुस्तथाप्येदानीं प्रतिब्रूते । [v]यः देवः [v]ईम् एनं शत्रुं [v]वहाते वहति । अपि [v]वा [v]यः [v]ईम् एनं [v]वरेयात् वरयितुमिच्छति[3] । स चाहमेव नान्यो मत्सदृशोऽस्तीत्यर्थः ॥

कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।
भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा मित्रं वनुते जने चित् ॥ १२ ॥

कियती । योषा । मर्यतः । वधूऽयोः । परिऽप्रीता । पन्यसा । वार्येण ।
भद्रा । वधूः । भवति । यत् । सुऽउपेशाः । स्वयम् । सा । मित्रम् । वनुते । जने । चित् ॥ १२ ॥

[v]कियती किंपरिमाणा [v]योषा स्त्रीजातिः [v]मर्यतः मनुष्यसंबन्धिनो भोगानाचरतः [v]वधूयोः स्त्रीकामस्य सर्वात्मकस्यान्तर्यामिरूपेणावस्थितस्येन्द्रस्य [v]परिप्रीता अनुरक्ता । वशवर्तिनीत्यर्थः । कीदृशस्य । [v]वार्येण वरणीयेन [v]पन्यसा स्तोत्रेण स्तुतस्य सत इति शेषः । अपि च [v]यत् या [v]वधूः [v]भद्रा कल्याणी [v]सुपेशाः शोभनरूपा च [v]भवति [v]सा द्रौपदीदमयन्त्यादिका वधूः [v]स्वयम् आत्मनैव [v]जने [v]चित् जनमध्येऽवस्थितमिति [v]मित्रं प्रियमर्जुननलादिकं पतिं [v]वनुते याचते । स्वयंवरधर्मेण प्रार्थयते । स च प्रीयमाणो वरजनोऽहमेवेत्यभिप्रायः । ' रूपंरूपं प्रतिरूपो बभूव ' (ऋ. सं. ६. ४७. १८) इति मन्त्रलिङ्गात्सर्वात्मकत्वादिति ॥

पत्नो जगार प्रत्यञ्चमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम् ।
आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिम् ॥ १३ ॥

पत्नः । जगार । प्रत्यञ्चम् । अत्ति । शीर्ष्णा । शिरः । प्रति । दधौ । वरूथम् ।
आसीनः । ऊर्ध्वाम् । उपसि । क्षिणाति । न्यङ् । उत्तानाम् । अनु । एति । भूमिम् ॥ १३ ॥

---

१. त-म४-६-आसतेर्गत्यर्थस्य लेटि । २. त-म५.६-मु-वारयितुमिच्छति ।

अत्रादित्यात्मनेन्द्रः स्तूयते तदंशत्वात्। आदित्यरूपीन्द्रः ᵛपत्तः रश्म्याख्यैः पादैः ᵛजगार वृष्टिलक्षणमुदकं गिरति[1] गृह्णाति[2] वा। गृहीत्वा च ᵛप्रत्यञ्चम् आत्मानं प्रतिगतमुदकम् ᵛअत्ति भक्षयति। मण्डलेऽवस्थापयतीत्यर्थः। तदनन्तरं ᵛवरूथं वरणीयं वृष्टिलक्षणमुदकं[3] ᵛशीर्ष्णा शिरःस्थानीयेन रश्मिजालेन ᵛशिरः सर्वस्य लोकस्य मस्तकं ᵛप्रति ᵛदधौ दधाति। प्रतिक्षिपतीत्यर्थः। किंच ᵛउपसि उपस्थे स्वसमीपस्थाने मण्डले ᵛआसीनः उपविष्टः सन् ᵛऊर्वाम् उद्गतां स्वदीप्तिं ᵛक्षिणाति हिनस्ति। आलोककरणाय प्रक्षिपतीत्यर्थः। ᵛन्यक् रश्मिसमूहरूपेण नीचैरञ्चिता गन्ता सन् ᵛउत्तानां विस्तृतां ᵛभूमिम् ᵛअन्वेति अनुगच्छति ॥

बृहन्नच्छायो अपलाशो अर्वाँ तस्थौ माता विषितो अत्ति गर्भः।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः ॥ १४ ॥

बृहन्। अच्छायः। अपलाशः। अर्वाँ। तस्थौ। माता। विऽसितः। अत्ति। गर्भः।
अन्यस्याः। वत्सम्। रिहती। मिमाय। कया। भुवा। नि। दधे। धेनुः। ऊधः ॥ १४ ॥

वसुक्रोऽनयादित्यात्मानमिन्द्रं स्तौति[3]। ᵛबृहन् महान्नादित्यः ᵛअच्छायः छायावर्जितः। तमोरहित इत्यर्थः। ᵛअपलाशः पर्णरहितः पत्राशदनवर्जितः*। विनाशरहित इत्यर्थः[3]। ᵛअर्वाँ सततगामी ᵛतस्थौ तिष्ठति। किंच ᵛमाता वृष्टिप्रदानद्वारेण सर्वस्य जगतो निर्माता ᵛविषितः विमुक्तः। निरालम्बन इत्यर्थः। ᵛगर्भः त्रैलोक्यस्य गर्भभूत आदित्यात्मेन्द्रः ᵛअत्ति हवींषि भक्षयति। यद्वा। अनेन[4] विनाशनं[5] लक्ष्यते। पापानि नाशयति। किंच[6] ᵛअन्यस्याः अदित्यरूपाया देवमातुः ᵛवत्सम् अपत्यभूतमादित्यं ᵛरिहती आस्वादयन्ती उपजीवन्ती[7] वर्धयन्ती ᵛमिमाय निर्मिमीते। पूर्वस्यां दिश्यहन्यहन्युत्पादयन्तीत्यर्थः। ᵛकया ᵛभुवा केन भावेनाभिप्रायेण। भक्त्या भयेन वेत्यर्थः। ᵛधेनुः द्यौरुदकस्याधारत्वात् क्षरितृत्वाच्च ऊधःस्थानीयमादित्यं[8] ᵛनि ᵛदधे स्थापयति[9]। यद्वा। धेनुर्गौरूधो यथा तद्वदादित्यं द्यौर्धारयति ॥

सप्त वीरासो अधरादुदायन्नष्टोत्तरात्तात्समजग्मिरन् ते।
नव पश्चातात्स्थविमन्त आयन् दश प्राक्सानु वि तिरन्त्यश्नः ॥ १५ ॥

सप्त। वीरासः। अधरात्। उत्। आयन्। अष्ट। उत्तरात्तात्। सम्। अजग्मिरन्। ते।
नव। पश्चातात्। स्थविऽमन्तः। आयन्। दश। प्राक्। सानु। वि। तिरन्ति। अश्नः ॥ १५ ॥

अनयेन्द्रः प्रजापतिरूपेण स्तूयते। ᵛसप्त सप्तसंख्याकाः ᵛवीरासः प्रजापतेः पुत्रा विधाभिन्नादयः ᵛअधरात् प्रजापतेरधःकायात् ᵛउदायन् उत्पन्ना बभूवुः। ᵛअष्ट अष्टसंख्याकाः ᵛते प्रसिद्धा बालखिल्यादयः ᵛउत्तरात्तात् उत्तरात्कायप्रदेशात् ᵛसमजग्मिरन् संजज्ञिरे। ᵛस्थिविमन्तः स्थानवन्तः ᵛनव नवसंख्याका भृगवः ᵛपश्चातात् पृष्ठतः ᵛआयन् आगताः। उत्पन्ना इत्यर्थः। तथा ᵛदश दशसंख्याका अङ्गिरसः ᵛप्राक् अग्रत उत्पन्नाः सन्तः ᵛअश्नः अशनवतो द्युलोकस्य ᵛसानु उन्नतप्रदेशं

१. त–' गिरति ' नास्ति; भ–जिगर्ति। २. त–' गृह्णाति...°मुदकं ' नास्ति। ३. ग–तुष्टाव अयमादित्यः बृहन् महान् अच्छायः अपलाशः छायारहितपलाशरहितः। * त५–पराशवदनवर्जितः; भ१.४–परासदनवर्जितः; भ६–पलाशवदनवर्जितः। ४. उद्गीथ–अदनेन। ५. त१.२.७–विलाशं; त३-५-भ-उद्गीथ–विनाशं; मु–विनाशः। ६. त–किं। ७. भ१(२)–उपजीवयंती। ८. भ१(२)ऊधः ऊधःस्थानीय°। ९. भ१(२)स्वोदरे स्थापयति; उद्गीथ–स्वोदरे निदधाति।

vवि vतिरन्ति वर्धयन्ति । अपर आह । सप्तसंख्योपेता वीरा मरुतोऽधरादिन्द्रस्य दक्षिणभागादुदगमन् । अष्टसंख्याकास्ते मरुत उत्तरभागात् संगच्छन्ते । स्थानवन्तो नवसंख्याकास्ते मरुतः पृष्ठभागादागच्छन्ति । दशसंख्याकास्तेऽग्रोऽशनवत इन्द्रस्य प्राक्प्रदेशे स्थिताः समुच्छ्रितमुदकं तेजो वा vवि vतिरन्ति । मरुतः प्रतिदिशमवस्थायेन्द्रस्य साहाय्यं कुर्वन्तीत्यर्थः ॥ ॥ १७ ॥

दशानामेकं कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय ।
गर्भं माता सुधितं वक्षणास्ववेनन्तं तुषयन्ती बिभर्ति ॥ १६ ॥

दशानाम् । एकम् । कपिलम् । समानम् । तम् । हिन्वन्ति । क्रतवे । पार्याय ।
गर्भम् । माता । सुऽधितम् । वक्षणासु । अवेनन्तम् । तुषयन्ती । बिभर्ति ॥ १६ ॥

vदशानां दशसंख्याकानां पूर्वोक्तानामेवाङ्गिरसां मध्ये vएकं मुख्यं vकपिलम् एतन्नामानं vतं प्रसिद्धमृषिम् । कीदृशम् । vसमानं सदृशम् । केन । सामर्थ्यात् प्रजापतिना । vहिन्वन्ति अवशिष्टा अङ्गिरसः प्रेरयन्ति । किमर्थम् । vक्रतवे यज्ञादिजगत्प्रवर्तनकर्मणे । यद्वा । सम्यग्ज्ञानलक्षणप्रज्ञानाय । कीदृशाय । vपार्याय[1] परिसमापयितव्याय प्रणेतव्याय वा । यज्ञादिकर्मोपदेशनायेत्यर्थः । vमाता प्रकृत्याख्या च vवक्षणासु । वक्षणा इति नद्य उच्यन्ते । ताभिश्चात्रापो लक्ष्यन्ते । प्रकृतिस्थासु सूक्ष्मास्वप्सु vसुधितं सुहितम् । प्रजापतिना स्थापितमित्यर्थः । vअवेनन्तम् । वेनतिः कान्तिकर्मा । तत्र निवासमकामयमानं तादृशं प्रजापतेः vगर्भं vतुषयन्ती तुष्यन्ती सम्यग्ज्ञानादुपदेष्टुं[2] योग्योऽयमिति प्रीता सती vबिभर्ति प्रजाप्तेर्नियोगाद्धारयति ॥

पीवानं मेषमपचन्त वीरा न्युप्ता अक्षा अनु दीव आसन् ।
द्वा धनुं बृहतीमप्स्वन्तः पवित्रवन्ता चरतः पुनन्ता ॥ १७ ॥

पीवानम् । मेषम् । अपचन्त । वीराः । निऽउप्ताः । अक्षाः । अनु । दीवे । आसन् ।
द्वा । धनुम् । बृहतीम् । अप्ऽसु । अन्तरिति । पवित्रऽवन्ता । चरतः । पुनन्ता ॥ १७ ॥

vवीराः प्रजापतेः पुत्रा अङ्गिरसः vपीवानं स्थूलम् । मेदोमांसादियुक्तमित्यर्थः । vमेषम् अजम् vअपचन्त प्रजापतिरूपस्येन्द्रस्यार्थाय पक्वमकुर्वन्नभवन् । पशुयागं कुर्वन्त इत्यर्थः । किंच । लुप्तोपममेतत् । यथा देवानाम् vअक्षाः vदीवे देवने रमणस्थाने vन्युप्ताः निक्षिप्ताः सन्तः vअनु vआसन् संक्रीडमानयोर्द्वयोरेकतरस्यानुगता भवन्ति तथा सर्वेऽङ्गिरसः प्रजापतेरनुगता अभवन् । vद्वा[3] अङ्गिरसां[4] मध्ये द्वावङ्गिरसौ vधनुम् । धनुशब्दोऽत्र[5] धनुःशब्दपर्यायो धनशब्दपर्यायो वा । धनुर्यथा बलसाधनं तथाज्ञानादिबलसाधनं धनवत्प्रीतिकरं वा । कपिलमित्यर्थः । vबृहतीं प्रजापतेराज्ञया सर्वनिष्पन्नां प्रकृतिम् vअप्स्वन्तः प्रकृतिस्थानां सूक्ष्माणामुदकानां मध्ये vचरतः प्रजापत्यादेशादाराधयतः । कीदृशौ । vपवित्रवन्ता पवित्रवन्तौ । मन्त्रः पवित्रमुच्यते । ध्यानसाधनप्रणवमन्त्रवन्तौ vपुनन्ता शुद्धौ । प्रणवध्यानेनात्मानं संस्कुर्वन्तावित्यर्थः ॥

वि क्रोशनासो विष्वञ्च आयन् पचाति नेमो नहि पक्वदर्षः ।
अयं मे देवः सविता तदाह द्यौश्च इद्वनवत्सर्परण्यः ॥ १८ ॥

---

१. ग-त३-म५.६-पार्याय प्रापणीयाय । २. ग-त-म-मु-सम्यग्ज्ञानान्युपदेष्टुं । ३. त-म१.४.६.७-वद्वा अंगिरसां । ४. त-म६-धनुःशब्दोत्र ।

वि । क्रोशनासः । विष्वञ्चः । आयन् । पचाति । नेमः । नहि । पक्षत् । अर्धः ।
अयम् । मे । देवः । सविता । तत् । आह । द्रुऽअन्नः । इत् । वनवत् । सर्पिःऽअन्नः ॥१८॥

[v]वि [v]क्रोशनासः विविधं प्रजापतिं पितरमाह्वयन्तः [v]विष्वञ्चः नानागतयो नानापूजना वा सर्वेऽङ्गिरसः [v]आयन् आगच्छन् । प्रजापतेः सकाशादुत्पन्ना इत्यर्थः । उत्पद्यमानः [v]नेमः अर्धोऽङ्गिरसां मध्य एको भागः [v]पचाति प्रजापत्यर्थं हवींषि पचति । [v]अर्धः अपरो भागः [v]नहि [v]पक्षत् नहि पचति । एतत्सर्वं कथमज्ञायि उच्यते । [v]अयम् ईदृशः [v]देवः द्योतमानः [v]सविता सर्वस्य प्रेरक आदित्यो वा प्रजापतिर्वा [v]मे मह्यं [v]तत् सर्वं यथोक्तम् [v]आह । किंच [v]सर्पिरन्नः घृतौदनः [v]द्रुऽ [v]इत् दार्वौदनः अग्निरपि [v]वनवत् हविर्दानेन प्रजापतिं वनति संभजते ॥

अपश्यं ग्रामं वहमानमारादचक्रया स्वधया वर्तमानम् ।
सिषक्त्यूर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान् ॥ १९ ॥

अपश्यम् । ग्रामम् । वहमानम् । आरात् । अचक्रया । स्वधया । वर्तमानम् ।
सिसक्ति । अर्यः । प्र । युगा । जनानाम् । सद्यः । शिश्ना । प्रऽमिनानः । नवीयान् ॥१९॥

[v]अपश्यं वसुक्रोऽहं प्रजापतिरूपमिन्द्रं सम्यग्ज्ञानेन दृष्टवानस्मि । कीदृशम् । [v]ग्रामं भूतसंघं [v]वहमानं वाहयन्तम् । सृजन्तमित्यर्थः । कुतः । [v]आरात् दूरात् । उपादानकारणात्प्रकृतित इत्यर्थः । [v]अचक्रया चक्रवर्जितया रथहीनया [v]स्वधया स्वयमात्मानं धारयन्त्या सेनया [v]वर्तमानम् आगच्छन्तम् । एवंभूतमपश्यमित्यर्थः । किंच [v]अर्यः सर्वस्य स्वामीन्द्रः [v]जनानां यजमानानां कार्यत्वेन संबन्धिनः [v]युगा युगानि यज्ञकालविशेषान् [v]प्र [v]सिषक्ति प्रकर्षेण सेवते । कीदृशः । [v]सद्यः तदानीमेव [v]शिश्ना शिश्नानि । 'शिश्नं श्रथतेः' (निरु. ४. १९) इति निर्वचनात् श्रथितॄणि ताडयितॄणि राक्षसादिवृन्दानि [v]प्रमिनानः प्रकर्षेण हिंसन् [v]नवीयान् शरीरेण च बलपौरुषनयनादिभिश्च[1] नवतरः ॥

एतौ मे गावौ प्रमरस्य युक्तौ मो षु प्र सेधीर्मुहुरिन्ममन्धि ।
आपश्चिदस्य वि नशन्त्यर्थं सूरश्च मर्क उपरो बभूवान् ॥ २० ॥

एतौ । मे । गावौ । प्रऽमरस्य । युक्तौ । मो इति । सु । प्र । सेधीः । मुहुः । इत् । ममन्धि ।
आपः । चित् । अस्य । वि । नशन्ति । अर्थम् । सूरः । च । मर्कः । उपरः । बभूवान् ॥२०॥

कार्यकारणयोरभेदोपचारात् 'आत्मा वै पुत्रनामासि' (आश्व. गृ. १.१५.११) इति वचनाद्वेन्द्ररूपेणावस्थितस्य [v]प्रमरस्य प्रकर्षेण शत्रूणां मारयितुः [v]मे मम स्वभूतौ [v]एतौ एतादृशौ [v]युक्तौ रथे नियुक्तौ [v]सु सुष्ठु पूजितौ [v]गावौ शत्रून् यज्ञांश्च प्रति गन्तारौ हरी [v]मो [v]प्र [v]सेधीः । स्तुत्युपसंहारकरणेनास्मद्यज्ञान्प्रापगमय । किं तर्हि [v]मुहुरित् मुहुर्मुहुः [v]ममन्धि पुनःपुनः स्तुहि ममात्मन्नित्यर्थः । [v]आपश्चित् वृष्टिलक्षणाप्युदकान्यपि [v]अस्य इन्द्रस्य [v]अर्थं गतिं [v]वि [v]नशन्ति । विनशतिर्व्याप्तिकर्मा । व्याप्नुवन्ति । तथा [v]सूरश्च सूर्यश्च व्याप्नोति । कीदृशः । [v]मर्कः मार्जयिता सर्वस्य शोधयिता [v]उपरः मेघसदृशः [v]बभूवान् भवन् । मेघवच्छीघ्रगतिः सन्नित्यर्थः ॥ ॥ १८ ॥

---

१. त—बलयुध°; भ६—बलायुध° ।

अयं यो वज्रः पुरुधा विवृत्तोऽवः सूर्यस्य बृहतः पुरीषात् ।
अव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरन्ति ॥ २१ ॥

अयम् । यः । वज्रः । पुरुधा । विऽवृत्तः । अवः । सूर्यस्य । बृहतः । पुरीषात् ।
अवः । इत् । एना । परः । अन्यत् । अस्ति । तत् । अव्यथी । जरिमाणः । तरन्ति ॥ २१ ॥

[v]यः [v]अयं [v]वज्रः इन्द्रस्य स्वभूतः [v]सूर्यस्य आदित्यस्य [v]बृहतः महतः [v]पुरीषात् पूरकात् मण्डलात् [v]अवः अवस्तादधोभागे स्थितेषु[1] [v]विवृत्तः वृष्ट्यर्थं प्रवृत्तः पतितः । इच्छब्दोऽप्यर्थे । तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः । [v]परः परस्तादन्तरिक्षलोकस्योपरि स्थिते सूर्यमण्डले स्थितम् [v]एना एनत् । [v]अवः इत्यन्ननाम । तद्धेतुत्वादुदकं अव इत्युच्यते । यदप्युदकं मेघोदरगतादुदकात् [v]अन्यत् अपि [v]अस्ति [v]अव्यथी व्यथारहिताः [v]जरिमाणः स्तोतारो मरुदादयः [v]तत् तादृशमुदकं [v]तरन्ति अन्तरिक्षलोकं प्रत्यवतारयन्ति ॥

वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्र पतान्पूरुषादः ।
अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत् ॥ २२ ॥

वृक्षेऽवृक्षे । निऽयता । मीमयत् । गौः । ततः । वयः । प्र । पतान् । पुरुषऽअदः ।
अथ । इदम् । विश्वम् । भुवनम् । भयाते । इन्द्राय । सुन्वत् । ऋषये । च । शिक्षत् ॥ २२ ॥

[v]वृक्षेवृक्षे सर्वस्मिन् वृक्षमये धनुषि [v]नियता संबद्धा [v]गौः गोसंबन्धिनी स्नायुमती [v]मौर्वी [v]मीमयत् । मीमयतिः शब्दकर्मा । आकृष्यमाणा सती शब्दं करोति । [v]ततः तस्माद्धनुषः [v]पुरुषादः शत्रुजनानामत्तारः । मारयितार इत्यर्थः । [v]वयः पक्षिसदृशा गन्तारो बाणाः [v]प्र [v]पतान् शत्रून् प्रति प्रपतन्ति । [v]अथ तदानीम् [v]इन्द्राय इन्द्रार्थं [v]सुन्वत् सोमयागं कुर्वत्[2] [v]ऋषये [v]च [v]शिक्षत् कर्मणां द्रष्ट्रे ऋत्विजे च संपूर्णां दक्षिणां ददपि [v]इदम् ईदृशं [v]विश्वं समस्तं [v]भुवनं भूतजातं [v]भयाते इन्द्राद्बिभेति । अन्यत्किमुतेत्यर्थः ॥

देवानां माने प्रथमा अतिष्ठन् कृन्तत्रादेषामुपरा उदायन् ।
त्रयस्तपन्ति पृथिवीमनूपा द्वा बर्बूकं वहतः पुरीषम् ॥ २३ ॥

देवानाम् । माने । प्रथमाः । अतिष्ठन् । कृन्तत्रात् । एषाम् । उपराः । उत् । आयन् ।
त्रयः । तपन्ति । पृथिवीम् । अनुपाः । द्वा । बर्बूकम् । वहतः । पुरीषम् ॥ २३ ॥

[v]देवानां सर्वेषां [v]माने निर्माणे । सृष्टिकाल इत्यर्थः । जगत्स्थितिहेतुभूतरसानुप्रदानकर्मणि खट्व्यारूढेन [v]प्रथमा [v]अतिष्ठन् इन्द्रादेशादेते पूर्वं स्थिताः । क[3] एते । मेघाः । कुत एतदवगम्यते । परस्मिन् पादे तेषामनुकथनात् । ऊर्क हि मेघा एव माध्यमिका देवगणा इति (निरु. २. २२) । [v]एषाम् एवंभूतानां मेघानां [v]कृन्तत्रात् छेदनात् [v]उपराः । मेघनामैतत् । तत्रस्था[4] आप उच्यन्ते । मेघस्था आपः [v]उदायन्[5] उत्पन्नाः । वृष्टिभावेन भूमौ निपातिता[6] इत्यर्थः । पातितास्वप्स्विन्द्रस्याज्ञया पर्जन्यो वायुरादित्य इत्येते [v]त्रयः देवाः [v]पृथिवीं भूमिम् । तत्रस्था ओषधीरित्यर्थः । [v]तपन्ति

---

१. ग-त३.४-म६-स्थितेषु मेघेषु । २. त-म-कुर्वन् । ३. त-एका । ४. ग-अतः तत्रस्था; त-तत्र तत्रस्था; त३-म५-अत्र तत्रस्था । ५. त-म६-उदारयन् । ६. ग-त३-म६-निपतिता ।

दृष्टिशीतोष्णैः संतापयन्ति । पावयन्तीत्यर्थः । कीदृशाः । vअनूपाः वर्षादीनामानुपूर्व्येण वसारः प्रभावयितारः । प्रक्षेतार इत्यर्थः । vद्वा द्वौ वारुत्वादित्यौ पाचितास्वोषधीषु स्थितं vपुरीषं सर्वस्य प्रीणयितृ पूरयितृ वा vबृबूकम् उदकमादित्यमण्डलं प्रति vवहतः । वायुः शोषयन्नादित्यो रश्मिभिरादत्त इत्यर्थः ॥

सा ते जीवातुरुत तस्य विद्धि मा स्मैतादृगप गूहः समर्ये ।
आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते ॥ २४ ॥

सा । ते । जीवातुः । उत । तस्य । विद्धि । मा । स्म । एतादृक् । अप । गूहः । सऽमर्ये ।
आविः । स्वरिति स्वः । कृणुते । गूहते । बुसम् ।
सः । पादुः । अस्य । निःऽनिजः । न । मुच्यते ॥ २४ ॥

अत्रान्तरात्मनेन्द्रः स्तूयते । हे अन्तरात्मन् vते तव vसा तादृश्यादित्यात्मिका देवता vजीवातुः जीविका जीवनहेतुः । vउत अपि च vतस्य आदित्यस्य vएतादृक् ईदृशं स्वरूपं vसमर्ये । संग्रामवाची समर्यशब्दोऽत्र यज्ञवाची । यज्ञे vविद्धि जानीहि । स्तुत्यत्वेनेति शेषः । vमा vस्म vअप vगूहः मा खल्वपवृणोः । किंच vनिर्णिजः सर्वस्य शोधयितुरादित्यस्य vस vपादुः तच्च पादनं गमनं रश्मिद्वारेण गत्वा vस्वः सर्वं त्रैलोक्यम् vआविः vकृणुते प्रकाशीकरोति । vबुसम् उदकं vगूहते संवृणोति । आदत्त इत्यर्थः । अस्मै प्रयोजनद्वयायादित्येन निर्वेदनाच्छ्रमेण वा गमनं vन vमुच्यते । न कदाचित्परित्यज्यत इत्यर्थः ॥ ॥ १९ ॥

'विश्वो हि' इति द्वादशर्चं द्वादशं सूक्तं त्रैष्टुभम् । इन्द्रवसुक्रयोः पितापुत्रयोः संवादोऽत्र क्रियते । पुरा वसुक्रे यज्ञं कुर्वाणे सति इन्द्रः प्रच्छन्नरूप आजगाम । तं वसुक्रपत्नीन्द्रागमनाकाङ्क्षिणी विप्रकृष्टमिवाद्ययास्तौत् । अतस्तस्याः सर्षिः इन्द्रो देवता । अथ तस्याः प्रीत्यै वसुक्रेण सहेन्द्रः संवादमकरोत् । द्वितीयादियुजश्चतुर्थीरहिताः पञ्चर्चं इन्द्रवाक्यानि । अतस्तासां स ऋषिः । यद्यप्यासु वसुक्रः संबोध्यत्वादेवता तथापि ता ऋच ऐन्द्रे कर्मणि विनियोक्तव्या इन्द्रलिङ्गसद्भावात् । चतुर्थीसहिताः शिष्टास्तृतीयाद्या वसुक्रवाक्यानि । अतः स ऋषिस्तासामिन्द्रो देवता । तथा चानुक्रान्तं—'विश्वो हि द्वादशेन्द्रवसुक्रयोः संवाद ऐन्द्रः सूक्तस्य प्रथमयेन्द्रस्य स्तुषा परोक्षवदिन्द्रमाहेन्द्रस्य युजः शेषा ऋषेश्चतुर्थी च' इति । गतो विनियोगः ॥

विश्वो ह्यन्यो अरिराजगाम ममेदह श्वशुरो ना जगाम ।
जक्षीयाद्धाना उत सोमं पपीयात्स्वाशितः पुनरस्तं जगायात् ॥ १ ॥

विश्वः । हि । अन्यः । अरिः । आऽजगाम । मम । इत् । अह । श्वशुरः । न । आ । जगाम ।
जक्षीयात् । धानाः । उत । सोमम् । पपीयात् । सुऽआशितः । पुनः । अस्तम् । जगायात् ॥ १ ॥

अनया वसुक्रपत्नीन्द्रं स्तौति । vअन्यः इन्द्रव्यतिरिक्तः vअरिः अर्य ईश्वरः vविश्वो vहि सर्व एव देवगणः vआजगाम अस्मद्यज्ञं प्रत्यायया । vइत् इत्यवधारणे । vअह इत्यद्भुते । सर्वदेवगण आगते सति vमम एव vश्वशुरः इन्द्रः vना vजगाम । स इन्द्रो यद्यागच्छेत् तर्हि vधानाः भृष्टयवान् vजक्षीयात् भक्षयेत् । vउत अपि च vसोमम् अभिषुतं vपपीयात् पिबेत्[1] । ततः vस्वाशितः सुष्ठु भुक्तस्तृप्तः सन् vपुनः मूयः vअस्तं स्वगृहं प्रति vजगायात् गच्छेत् ॥

---

१. त-भ६—'पिबेत्' नास्ति ।

स रोरुवद्वृषभस्तिग्मशृङ्गो वर्ष्मन्तस्थौ वरिमन्ना पृथिव्याः ।
विश्वेष्वेनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पृणाति ॥ २ ॥

सः । रोरुवत् । वृषभः । तिग्मऽशृङ्गः । वर्ष्मन् । तस्थौ । वरिमन् । आ । पृथिव्याः ।
विश्वेषु । एनम् । वृजनेषु । पामि । यः । मे । कुक्षी इति । सुतऽसोमः । पृणाति ॥ २ ॥

[v]वृषभः कामानां वर्षिता [v]तिग्मशृङ्गः तीक्ष्णरश्मिः [v]सः इन्द्रोऽहं [v]पृथिव्याः अन्तरिक्षस्य [v]वर्ष्मन् वर्ष्मणि। वर्ष्मन्शब्द उन्नतवचनः स्थिरवचनो वा । एवंभूते [v]वरिमन् विस्तीर्णे प्रदेशे [v]रोरुवत् मृशं शब्दायमानः सन् [v]आ [v]तस्थौ आतिष्ठामि । एवंभूतोऽहं [v]विश्वेषु सर्वेषु [v]वृजनेषु संग्रामेषु [v]एनम् ईदृशं वसुकं यजमानं [v]पामि रक्षामि । [v]यः यजमानः [v]सुतसोमः अभिषुतसोमः [v]मे मम [v]कुक्षी उभौ पार्श्वौ [v]पृणाति सोमरसपुरोडाशादिहविर्भिः पूरयति । ईदृशं रक्षामीति संबन्धः॥

अद्रिणा ते मन्दिन इन्द्र तूयान्त्सुन्वन्ति सोमान्पिबसि त्वमेषाम् ।
पचन्ति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन्हूयमानः ॥ ३ ॥

अद्रिणा । ते । मन्दिनः । इन्द्र । तूयान् । सुन्वन्ति । सोमान् । पिबसि । त्वम् । एषाम् ।
पचन्ति । ते । वृषभान् । अत्सि । तेषाम् । पृक्षेण । यत् । मघऽवन् । हूयमानः ॥ ३ ॥

हे [v]इन्द्र [v]ते त्वदर्थं [v]मन्दिनः मादयितॄन् [v]तूयान् अविलम्बितान् सोमान्[1] [v]अद्रिणा अभिषवग्राव्णा [v]सुन्वन्ति यजमाना अभिषुण्वन्ति । [v]एषाम् अस्मदादियजमानानां संबन्धिनः[2] [v]सोमान् [v]त्वं [v]पिबसि । किंच त्वदर्थं[3] [v]वृषभान् पशून् ये च यजमानाः [v]पचन्ति [v]तेषां संबन्धिनो[4] हविर्भूतान् पशून् [v]अत्सि भक्षयसि । हे [v]मघवन् धनवन्निन्द्र त्वं यदा [v]पृक्षेण हविर्भूतेनान्नेन निमित्तेन [v]हूयमानः यजमानैर्हूयसे तदेति पूर्वेण संबन्धः ॥

इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहन्ति ।
लोपाशः सिंहं प्रत्यञ्चमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ॥ ४ ॥

इदम् । सु । मे । जरितः । आ । चिकिद्धि । प्रतिऽईपम् । शापम् । नद्यः । वहन्ति ।
लोपाशः । सिंहम् । प्रत्यञ्चम् । अत्सारिति । क्रोष्टा । वराहम् । निः । अतक्त । कक्षात् ॥ ४ ॥

हे [v]जरितः शत्रूणां जरयितरिन्द्र त्वं [v]मे मम [v]सु शोभनमपि [v]इदम् ईदृशं रूपं सामर्थ्यम् [v]आ [v]चिकिद्धि आ समन्ताज्जानीहि । कीदृशम् । [v]नद्यः गङ्गाद्याः सरितः [v]प्रतीपं प्रतिकूलं [v]शापम् उदकं [v]वहन्ति । अपि च [v]लोपाशः । लुप्यमानं तृणमश्नातीति लोपाशो मृगः । मया प्रेषितः सन् [v]प्रत्यञ्चम् आत्मानं प्रति गच्छन्तं [v]सिंहम् [v]अत्साः अत्सारीत् । आभिमुख्येन गच्छति । तथा [v]क्रोष्टा शृगालः [v]वराहं बलवन्तमपि सूकरं [v]कक्षात् अतिगहनदेशात् [v]निरतक्त निर्गमयति । एतदपि सर्वं सामर्थ्यं त्वत्पुत्रे मयि त्वत्प्रसादाल्लब्धमपि जानीहीत्यर्थः ॥

---

१. त-भ६–'सोमान्' नास्ति । २. त-भ१.२.४.६–संबंधान् । ३. ग-भ२–ते त्वदर्थं । ४. त-भ२.६–संबंधीन् ।

कथा ते एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषाम् ।
त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं ते मघवन् क्षेम्या धूः ॥ ५ ॥

कथा । ते । एतत् । अहम् । आ । चिकेतम् । गृत्सस्य । पाकः । तवसः । मनीषाम् ।
त्वम् । नः । विद्वान् । ऋतुऽथा । वि । वोचः । यम् । अर्धम् । ते । मघऽवन् । क्षेम्या । धूः ॥५॥

हे इन्द्र [v]पाकः पक्वज्ञप्रज्ञः [v]अहं [v]गृत्सस्य मेधाविनः [v]तवसः वृद्धस्य [v]ते तव [v]मनीषां स्तुतिम् । कर्तुमिति शेषः । [v]एतत् ईदृशं त्वदीयं सामर्थ्यं [v]कथा कथं केन प्रकारेण [v]आ [v]चिकेतम् आ समन्तात् जानामि । त्वदुपदेशं विना न जानामीत्यर्थः । तस्मात्कारणात् [v]विद्वान् सर्वज्ञः [v]त्वम् एव [v]नः अस्मभ्यम् [v]ऋतुथा कालेकाले[1] [v]वि [v]वोचः विशेषेण ब्रूहि । हे [v]मघवन् धनवन्निन्द्र [v]ते तव [v]अर्धं [v]यं स्तुत्यवयवं कुर्मः[2] सा स्तुतिः [v]धूः [v]क्षेम्या क्षेमे भवा क्लेशरहिता वोढुं शक्यास्ति । यस्मात्तव[3] स्तुत्यवयवमेव वयमक्लेशेन कर्तुं न[4] शक्नुमोऽस्माकं मन्दबुद्धित्वात् तस्मात्त्वमेवास्मभ्यं स्वसामर्थ्यं स्तुतिप्रकारं च पुनरपि कथयेत्यर्थः ॥

एवा हि मां तवसं वर्धयन्ति दिवश्चिन्मे बृहत उत्तरा धूः ।
पुरू सहस्रा नि शिशामि साकमशत्रुं हि मा जनिता जजान ॥ ६ ॥

एव । हि । माम् । तवसम् । वर्धयन्ति । दिवः । चित् । मे । बृहतः । उत्ऽतरा । धूः ।
पुरु । सहस्रा । नि । शिशामि । साकम् । अशत्रुम् । हि । मा । जनिता । जजान ॥ ६ ॥

[v]हि यस्मात्कारणात् [v]एव एवमुक्तप्रकारेण [v]तवसं प्रवृद्धं [v]मां स्तोतारः स्तुतिभिः स्तुवन्तो वीर्येण [v]वर्धयन्ति तस्मात्कारणात् [v]बृहतः महतः [v]मे मम इन्द्रस्य [v]दिवश्चित् द्युलोकादपि [v]धूः स्तुतिः [v]उत्तरा उद्ततराधिकतरा । किंच [v]पुरु पुरूणि बहूनि[5] [v]सहस्रा शत्रूणां सहस्राणि [v]साकं युगपत् [v]नि [v]शिशामि तनूकरोमि । हिनस्मीत्यर्थः[6] । [v]हि यस्मात्कारणात् [v]जनिता सर्वस्य जनयिता प्रजापतिः [v]मा मामिन्द्रम् [v]अशत्रुम् अविद्यमानशत्रुं[7] [v]जजान जनितवान् ॥ ॥ २० ॥

एवा हि मां तवसं जज्ञुरुग्रं कर्मन्कर्मन्वृषणमिन्द्र देवाः ।
वधीं वृत्रं वज्रेण मन्दसानोऽप व्रजं महिना दाशुषे वम् ॥ ७ ॥

एव । हि । माम् । तवसम् । जज्ञुः । उग्रम् । कर्मन्ऽकर्मन् । वृषणम् । इन्द्र । देवाः ।
वधीम् । वृत्रम् । वज्रेण । मन्दसानः । अप । व्रजम् । महिना । दाशुषे । वम् ॥ ७ ॥

[v]हि यस्मात्कारणात् [v]एव एवमनेनोक्तप्रकारेण हे [v]इन्द्र [v]देवाः मरुदादयः ऋत्विग्यजमाना वा [v]तवसं महान्तं त्वत्पुत्रं त्वद्रूपेणावस्थितं[8] सन्तं वसुकं [v]मां [v]कर्मन्कर्मन् वृत्रवधाग्निहोत्रादौ सर्वस्मिन् कर्मणि [v]उग्रं शूरमसह्यं वा [v]वृषणं वर्षितारं हविषां दातारं [v]जज्ञुः जानन्ति अतः [v]मन्दसानः मोदमानोऽहं [v]वज्रेण आयुधेन [v]वृत्रं मेघमसुरं वा [v]वधीं अवधिषम् । किंच [v]दाशुषे हविर्दत्तवते यजमानाय वृष्टिप्रदानार्थं [v]महिना महत्त्वेन [v]व्रजं मेघसमूहम् [v]अप [v]वम् अपावम् अपवृणोमि ॥

---

१. त–काले । २. त-भ-वयं कुर्मः । ३. त–यस्मादत; भ६–यस्मादतः । ४. त-भ–'न' नास्ति । ५. त१.२.६-भ६-मु–बहूनि मे; त५–बहूनि से । ६. त–हिनस्तीत्यर्थः । ७. त-भ६–'अविद्यमान-शत्रुं' नास्ति । ८. त-भ-मु–त्वद्रूपनिरूपणावस्थितं ।

देवासं आयन्परशूँरबिभ्रन् वना वृश्चन्तो अभि विड्भिरायन् ।
नि सुद्रुं दधतो वक्षणासु यत्रा कृपीटमनु तद्दहन्ति ॥ ८ ॥

देवासः । आयन् । परशून् । अबिभ्रन् । वना । वृश्चन्तः । अभि । विट्ऽभिः । आयन् ।
नि । सुऽद्रुम् । दधतः । वक्षणासु । यत्र । कृपीटम् । अनु । तत् । दहन्ति ॥ ८ ॥

[v]देवासः देवाः इन्द्रेण चोदिताः सन्तः [v]आयन् गच्छन्ति । मेघवधार्थं [v]परशून् वज्रान् [v]अबिभ्रन् धारयन्ति च । तदनन्तरं [v]विड्भिः मरुदादिप्रजाभिः सहिताः [v]वृश्चन्तः मेघांश्छिन्दन्तः [v]वना वनानि वृष्टिलक्षणान्युदकानि [v]अभि [v]आयन् आभिमुख्येन गच्छन्ति । ततः [v]सुद्रुं शोभनद्रवणं वृष्ट्युदकं [v]वक्षणासु नदीषु [v]नि [v]दधतः नियमेन स्थापयन्तः [v]यत्र यस्मिन्मेघजाते [v]कृपीटम् । उदकनामैतत् । निगूढमुदकं तिष्ठति त इमे देवाः [v]तत् मेघजातम् [v]अनु लक्षीकृत्य [v]दहन्ति उदकनिर्गमनार्थं शोषयन्ति ॥

शशः क्षुरं प्रत्यञ्चं जगारार्द्रिं लोगेन व्यभेदमारात् ।
बृहन्तं चिद्बृहते रन्धयानि वयद्वत्सो वृषभं शूशुवानः ॥ ९ ॥

शशः । क्षुरम् । प्रत्यञ्चम् । जगार । अद्रिम् । लोगेन । वि । अभेदम् । आरात् ।
बृहन्तम् । चित् । बृहते । रन्धयानि । वयत् । वत्सः । वृषभम् । शूशुवानः ॥ ९ ॥

वसुक इन्द्रं प्रतिब्रूते । [v]शशः एतत्संज्ञितो मया प्रेरितो मृगविशेषः [v]प्रत्यञ्चं वधायात्मानं प्रति गच्छन्तं [v]क्षुरं क्षुरवन्तं दृढदीर्घतीक्ष्णनखं सिंहव्याघ्रादिकम् । बलवत्क्रूरशूरमृगमित्यर्थः । [v]जगार गिरति गृह्णाति वा । किंच [v]लोगेन लोष्टेन [v]अद्रिं हिमवदादिकं पर्वतम् [v]आरात् दूरे स्थितमपि [v]वि [v]अभेदम् अहं भिनद्मि । [v]बृहन्तं [v]चित् महान्तमपि हस्त्यादिकम् [v]ऋहते ह्रस्वकायाल्पाय शशकादिकाय [v]रन्धयानि वशं गमयानि । [v]शूशुवानः वीर्येण वर्धमानः [v]वत्सो [v]वृषभं महोक्षं [v]वयत् युद्धाय गच्छति । हे इन्द्र एतदपि सर्वं त्वत्प्रसादादहं करोमीत्यर्थः ॥

सुपर्ण इत्था नखमा सिषायावरुद्धः परिपदं न सिंहः ।
निरुद्धश्चिन्महिषस्तर्ष्यावान् गोधा तस्मा अयथं कर्षदेतत् ॥ १० ॥

सुऽपर्णः । इत्था । नखम् । आ । सिसाय । अवऽरुद्धः । परिऽपदम् । न । सिंहः ।
निऽरुद्धः । चित् । महिषः । तर्ष्याऽवान् । गोधा । तस्मै । अयथम् । कर्षत् । एतत् ॥ १० ॥

[v]सुपर्णः पक्षिरूपा गायत्री [v]इत्था अमुत्र द्युलोके [v]नखम् आत्मीयम् [v]आ [v]सिषाय सोमाहरणकाल इन्द्रार्थमाबबन्ध । इन्द्रस्य प्रसादादिति पदं न्यस्तवतीत्यर्थः । तत्र दृष्टान्तः । [v]अवरुद्धः पञ्जरेणावृतः परिवेष्टितः [v]सिंहः [v]परिपदं [v]न यथा करस्योपरि सर्वतः पादमबबध्नाति । किंच । [v]चित् इत्युपमार्थे । यथा केनापि बद्धपादो [v]निरुद्धः [v]महिषः [v]तर्ष्यावान् उदकाभावे तृषावान्भवति एवमिन्द्रः सोमाहरणात्पूर्वं सोमाभावे तृषितवानभूदिति शेषः । [v]तस्मै । तादर्थ्ये चतुर्थी । तादृशस्य तृषितस्येन्द्रस्यार्थं [v]गोधा । गमयति वर्णानिति गौर्वाक् तत्र निधीयमानत्वात्[1] गायत्री[2] गोधा ।

१. म–निधीयमानात् । २. त–गा; भ६–गो ।

यद्वा । गुधिर्निष्कर्षणार्थः । निष्कृत्य सोमाहरणाद्गोधा गायत्री । vअयथम् अयत्नेन । कीलयेत्यर्थः । vएतत् सोमजातं vकर्षत् आकृष्टवती । दिवः सकाशादाहृतवतीत्यर्थः ॥

तेभ्यो गोधा अयथं कर्षदेतद्ये ब्रह्मणः प्रतिपीयन्त्यन्नैः ।
सिम उक्षणोऽवसृष्टाँ अदन्ति स्वयं बलानि तन्वः शृणानाः ॥ ११ ॥

तेभ्यः । गोधाः । अयथम् । कर्षत् । एतत् । ये । ब्रह्मणः । प्रतिऽपीयन्ति । अन्नैः ।
सिमः । उक्षणः । अवऽसृष्टान् । अदन्ति । स्वयम् । बलानि । तन्वः । शृणानाः ॥ ११ ॥

vये मरुदादिदेवगणाः vब्रह्मणः परिवृढस्येन्द्रस्य स्वभूतैः vअन्नैः सोमाख्यैः । तृप्ताः सन्त इति शेषः । vप्रतिपीयन्ति । पीयतिर्हिंसाकर्मा । इन्द्रादेशाद्धिंसकान् प्रतिहिंसन्ति vतेभ्यः तेषां देवगणानामर्थाय vगोधाः पूर्वोक्ता गायत्री vअयथम् अनायासेन vएतत् सोमजातं vकर्षत् आकृष्टवती । किंच vसिमः सिमाञ्श्रेष्ठान् । यद्वा । सिमशब्दः सर्वशब्दपर्यायः । सर्वान् । vउक्षणः सिञ्चतः[1] vअवसृष्टान् इन्द्रेण निसृष्टाननुज्ञातान् हविर्भूतान् सोमान् यज्ञेषु vअदन्ति भक्षयन्ति[2] । किं कुर्वन्तः[3] । vस्वयम् आत्मनैव vबलानि शत्रूणां सैन्यानि vतन्वः शरीराणि च vशृणानाः हिंसन्तः । गायत्री इन्द्रादेशादेवेभ्यः सोममाहृतवतीत्यर्थः ॥

एते शमींभिः सुशमी अभूवन् ये हिन्विरे तन्वः सोम उक्थैः ।
नृवद्वदन्नुप नो माहि वाजान् दिवि श्रवो दधिषे नाम वीरः ॥ १२ ॥

एते । शमीभिः । सुऽशमी । अभूवन् । ये । हिन्विरे । तन्वः । सोमे । उक्थैः ।
नृऽवत् । वदन् । उप । नः । माहि । वाजान् । दिवि । श्रवः । दधिषे । नाम । वीरः ॥ १२ ॥

vये देवर्ष्यादयः vतन्वः शरीराणि vसोमे सोमयागे vउक्थैः शस्त्रैः vहिन्विरे वर्धयन्ति vएते देवादय इन्द्रादेशात् सोमे आहूते सति vशमीभिः सोमयागकर्मभिः vसुशमी सुकर्माणः vअभूवन् । vनृवत् मनुष्यवत् vवदन् इदं युष्मभ्यं मया दत्तमिति व्यक्तां वाचमुच्चारयन् vनः अस्मभ्यम् vउप vमाहि उपगम्य vवाजान् अन्नानि बलानि वा हे इन्द्र त्वं देहीति शेषः । अतः कारणात् vवीरः दानशूरस्त्वं vदिवि द्युलोके vश्रवः दानपतिरिति कीर्तितं vनाम नामधेयं vदधिषे धारयसि ॥ १२ ॥

'वने न वा' इत्यष्टर्चं त्रयोदशं सूक्तं वसुकस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रान्तं च—'वने नाष्टौ' इति । चतुर्थेऽहनि स्तोमवृद्धौ ब्राह्मणाच्छंसिन एतत्सूक्तभावापार्थम् । सूत्रितं च—'स्तोमे वर्धमाने को अद्य नर्यो वने न वा यः' (आश्व. श्रौ. ७. १२) इति । महाव्रते निष्केवल्य एतत्सूक्तम् । सूत्रितं च—'प्र वो महे मन्दमानायान्धस इति निविद्धानं वने न वा यो न्यधायि चाकन्' (ऐ. आ. ५. ३. १) इति ॥

वने न वा यो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान् ॥ १ ॥

वने । न । वा । यः । नि । अधायि । चाकन् । शुचिः । वाम् । स्तोमः । भुरणौ । अजीगरिति ।
यस्य । इत् । इन्द्रः । पुरुऽदिनेषु । होता । नृणाम् । नर्यः । नृऽतमः । क्षपाऽवान् ॥ १ ॥

---

१. त-भ६-'सिञ्चतः' नास्ति । २. त-भ६-मु-'भक्षयन्ति' नास्ति । ३. भ-कुर्वतः ।

वने न वा यो न्यधायीति । ᵛवने ᵛन वन इव वृक्ष इव शकुनिः स्वे नीडे वायमाख्यीयं पुत्रं ᵛन्यधायि निदधाति शिशुकमजातपक्षम् । स यथा तत्र निहितः ᵛचाकन् पश्यन्[1] भवादिशो निरीक्षमाण आसीत् । अथवा कामयमानस्तदुत्सुकमना आसीत् । एवमयमस्मासु वृक्षस्य नीडभूतेषु शकुनिपुत्रभूतः ᵛशुचिः व्यपगतसर्वदोषो युवयोः स्वभूतः ᵛस्तोमः हे ᵛभुरणौ भर्तारावश्विनौ क्षिप्रौ वा । भुरण्युरिति क्षिप्रनामेति । किंच ᵛयस्य स्तोमस्य ᵛपुरुदिनेषु बहुष्वहःसु ᵛइन्द्रः ᵛहोता इन्द्रोऽप्याह्वाता भवति ममायं स्तोमः स्यादिति । किंलक्षणः[2] पुनरिन्द्र आह्वाता । यः ᵛनृणां मनुष्याणां ᵛनृतमः मनुष्याणामपि मनुष्यतमः । शूराणामपि मध्ये शूरतम इत्यर्थः । ᵛनर्यः च नृभ्यो हितो यः ᵛक्षपावान् च रात्रिपर्यायेषु स्तोमभागः । एवंगुणयुक्तेन यः स्तोम इन्द्रेणापि प्रार्थ्यतेऽस्मासु वर्तमानः स युवां प्रति ᵛअजीगः नित्यकालमेव गच्छतीत्यर्थः । एवं तावदेतामृचमाश्विनीमिति कृत्वा व्याचक्षते । तदसाधु । ऐन्द्रे हि सूक्ते प्रथमैवेयं भवति । तच्च पुनः पृष्ठ्यस्य षष्ठेऽहनि स्तोमे वर्धमाने माध्यंदिने सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुज्यते । हे भुरणौ भर्तारौ देवानां पती च एव स्तोमोऽस्मासु निहितः शुचिर्व्यपगतदोषः शकुनिपुत्र इव वने वनावयवे वृक्षे चाकन् पश्यन्निव कामयमान इव वेन्द्रमास्ते । यस्य स्तोमस्य किमिति । यस्येन्द्रः पुरुदिनेषु बहुष्वहःस्वाह्वाताभूत् अपि नाम मामकेन स्तोमेन स्तुयुरिति । किंलक्षणः पुनराह्वाता । यस्येदिन्द्र इति नृणां नृतमो नर्यश्च क्षपावांश्च समानमेतत्पूर्वेणार्थेन । यमेवमिन्द्रः प्रार्थयते स एव स्तोमस्तं प्रत्यजीगः गच्छतीत्यर्थः । अथवा स एव स्तोमोऽस्माभिरुदीर्यमाणस्तस्येन्द्रस्य गुणान्गृह्णातीति स्यात् । 'जिगर्तिर्गृह्णातिकर्मा' (निरु.३.८) इति शुष्कम् । एवमत्र चाकन्नित्यस्य चायन्निति वा कामयमान इति वेत्येतौ विपरिणामावुपपद्येते शब्दसारूप्यादर्थाविरोधाच्च । एतस्मिन्निगमे पदविभागगतः कश्चिद्विचारोऽस्ति । तमाह भाष्यकारः–'वेति च य इति च चकार शाकल्यः' (निरु. ६. २८) इति । वेति य इति च पदे चकार शाकल्यः पदकारः । तदेतद्विचार्यमाणं न साधु भवति । किं कारणम् । 'उदात्तं स्वेवमाख्यातमभविष्यत्' । एवमेतस्मिन् पदद्वये सति यदेतदाख्यातं न्यधायीति तदुदात्तमभविष्यत् । यद्धुत्तरस्य नित्यमाख्यातस्य निघातो न भवतीति लक्षणविदो मन्यन्ते । न चेदमुदात्तम् । तस्माद्य इति नेदं यद्वृत्तं किं तर्हि वाय इत्येकमेव पदम् । किंच । 'असुसमाप्तश्चार्थः' । अपुष्कलः । एवमेव तस्मिन्पदद्वये सति मन्त्रस्यार्थोऽसुसमाप्तो भवति ॥[3]

प्र ते अस्या उषसः प्रापरस्या नृतौ स्याम नृतमस्य नृणाम् ।
अनु त्रिशोकः शतमावहन्क्रत्वेन रथो यो असत्सनवान् ॥ २ ॥

प्र । ते । अस्याः । उषसः । प्र । अपरस्याः । नृतौ । स्याम । नृऽतमस्य । नृणाम् ।
अनु । त्रिऽशोकः । शतम् । आ । अवहत् । नन् । क्रत्वेन । रथः । यः । असत् । सऽसवान् ॥२॥

ᵛअस्याः वर्तमानाया इदानीम्याश्चोषसो ᵛनृतौ । 'नृ नये' नयने प्रापणे । उदयकाल इत्यर्थः । ᵛनृणां नेतॄणां मध्ये ᵛनृतमस्य अतिशयेन नेतुः ᵛते तव इन्द्रस्य स्तुत्या यागेन च ᵛप्र ᵛस्याम वयं प्रकृष्टा भवेम । तथा हे इन्द्र ᵛअपरस्याः आगामिन्याश्चोषसो नृतौ प्रापणे तव स्तुत्या यागेन च वयं प्रकृष्टा भवेमेत्याशास्महे । किंच ᵛत्रिशोकः नामर्षिः हे इन्द्र त्वामाराध्य त्वत्प्रसादात् ᵛशतं बहून् ᵛअनु

---

१. त१.२.६.७-मु–'पश्यन्' नास्ति । २. त-भ–किंच लक्षणः । ३. ग–पुस्तकस्थमेतन्मन्त्रभाष्यं—वने न वृक्ष इव वा यः पक्षनिहितः कामयमानः शुचिः सोमः तथा स्तोमः भुरणाविदकृत् सौ वां युवामजीगः निर्गमयति । यस्येत् यस्यैव पानेंद्रः पुरुदिनेषु बहुदिनेषु शत्रूणामाह्वाता नृणां मध्ये नृतमः श्रेष्ठः नर्यः नरहितः क्षपावान् शत्रुक्षपणशीलः; भ१.४.७–पुस्तकेषु अस्य मन्त्रस्य भाष्यं नास्ति ।

अनुचरभूतान् ᵛनॄन् मनुष्यान् ᵛआवहत् प्रापितवान् । लब्धवानित्यर्थः । तथा तव कुत्सस्य च ᵛससवान्[1] सनिता युगपदेव संभक्ता ᵛयः ᵛरथः ᵛअसत् अस्ति स रथः ᵛकुत्सेन कुत्सो लब्धवानिति शेषः । तथा च मन्त्रान्तरे श्रूयते—' यासि कुत्सेन सरथमवस्युः ' (ऋ. सं. ४. १६. ११) इति । यस्मादेवं तस्मात्त्वत्प्रसादाद्वयं प्रकृष्टा भवेमेत्यर्थः ॥

कस्ते॒ मद॑ इन्द्र॒ रन्त्यो॑ भू॒दुरो॒ गिरो॑ अ॒भ्यु॒ग्रो वि धा॑व ।
कद्वाहो॑ अ॒र्वागुप॑ मा मनी॒षा आ त्वा॑ शक्या॒मुप॑मं रा॒धो अन्नैः॑ ॥ ३ ॥

कः । ते॒ । मदः॑ । इ॒न्द्र॒ । रन्त्यः॑ । भू॒त् । दुरः॑ । गिरः॑ । अ॒भि । उ॒ग्रः॑ । वि । धा॒व॒ ।
कत् । वाहः॑ । अ॒र्वाक् । उप॑ । मा॒ । म॒नी॒षा । आ । त्वा॒ । श॒क्या॒म् । उप॑ऽमम् । रा॒धः॑ । अन्नैः॑ ॥३॥

हे ᵛइन्द्र ᵛते तवेषन्मध्यमोत्तमानां सोमजन्यानां मदानां मध्ये ᵛकः ᵛमदः ᵛरन्त्यः रमयिता प्रीतिकरः ᵛभूत् भवति । त्वत्प्रीतिकरमदयोग्यसोमदानाभिप्रायेणायं प्रश्नः । ᵛउग्रः ओजस्वी त्वं ᵛदुरः यज्ञगृहद्वाराणि ᵛगिरः स्तुतिलक्षणा वाचश्च ᵛअभि ᵛवि ᵛधाव अभ्यागच्छ । किंच ᵛकत् कदा ᵛवाहः । इन्द्रं प्रत्युद्वात इति वाहः सोम उच्यते । एवंभूतः[2] ᵛअर्वाक् त्वत्प्रसादात्फलदानायास्मदभिमुखो भविष्यतीति शेषः । अपि[3] च कदा ᵛमनीषा सर्वार्थदर्शिनी प्रज्ञा सर्वगुणग्राहिणी स्तुतिर्वा ᵛमा मां त्वत्प्रसादात् ᵛउप गमिष्यतीति शेषः[3] । कदा हे इन्द्र ᵛत्वा त्वाम् । ᵛआ इत्युपसर्गश्रुतेर्योग्यपदाध्याहारः । आराध्य वयम् ᵛअन्नैः सह ᵛराधः धनम् ᵛउपमं मत्समीपं ᵛशक्याम् । शकिरत्र गत्यर्थोऽन्तर्भावितण्यर्थः । संगमयेयम् ॥

कदु॒ द्युम्न॒मिन्द्र॒ त्वाव॑तो नॄ॒न्कया॑ धि॒या क॑रसे॒ कन्न॒ आग॑न् ।
मि॒त्रो न स॒त्य उ॑रुगाय भृ॒त्या अन्नै॑ समस्य॒ यदस॑न्मनी॒षाः ॥ ४ ॥

कत् । ऊँ इति॑ । द्युम्न॑म् । इ॒न्द्र॒ । त्वाऽव॑तः । नॄ॒न् । कया॑ । धि॒या । क॒र॒से॒ । कत् । नः॒ । आ । अ॒ग॒न् ।
मि॒त्रः । न । स॒त्यः । उ॒रु॒ऽगा॒य॒ । भृ॒त्यै । अन्नै॑ । स॒मस्य॑ । यत् । अस॑न् । म॒नी॒षाः ॥ ४ ॥

हे ᵛइन्द्र त्वं ᵛकदु कदा वा ᵛद्युम्नं हविर्लक्षणमस्मदीयमन्नं भुक्ष्वेति शेषः । ᵛकया ᵛधिया केन कर्मणा ᵛनॄन् नेतॄनस्मान् ᵛत्वावतः त्वत्सदृशान् ᵛकरसे करिष्यसि । ᵛकत् कदा ᵛनः अस्मान् प्रति ᵛआगन् आगमिष्यसि । ᵛसत्यः अनवद्य इत्यर्थः । ᵛमित्रो ᵛन सखेव तथा । हे ᵛउरुगाय बहुकीर्त इन्द्र त्वं ᵛभृत्यै भरणाय पोषणाय भवसीति शेषः । ᵛयत् यदा ᵛसमस्य अस्मदादिकस्य सर्वस्य जगतः ᵛअन्ने जगत्स्थितिनिमित्त आहारे ᵛमनीषाः अन्नाभिलक्षणा बुद्धयः ᵛअसन् भवेयुः । तदा सर्वस्य पोषणाय त्वं भवसीत्यर्थः ॥

प्रेर॑य॒ सूरो॒ अर्थं॒ न पा॒रं ये अ॑स्य॒ कामं॑ ज॒नि॒धाइ॑व॒ ग्मन् ।
गिर॑श्च॒ ये ते॑ तुविजात पू॒र्वीर्नरं॒ इन्द्र॑ प्रति॒शिक्ष॑न्त्यन्नैः ॥ ५ ॥

प्र । ई॒र॒य॒ । सूरः॑ । अर्थ॑म् । न । पा॒रम् । ये । अ॒स्य॒ । काम॑म् । ज॒नि॒धाःऽइ॑व । ग्मन् ।
गिरः॑ । च॒ । ये । ते॒ । तु॒वि॒ऽजा॒त॒ । पू॒र्वीः । नरः॑ । इ॒न्द्र॒ । प्र॒ति॒ऽशिक्ष॑न्ति । अन्नैः॑ ॥ ५ ॥

---

१. त-भ–' ससवान् ' नास्ति । २. ग-भ१.२.४.७–एवंभूतः सोमः; त१.२.४.५.१–एवंभूमः ।
३. त-भ१–' अपि च ... शेषः ' नास्ति ।

vसूरः सूर्यः vअर्थं vज यथातारं गन्तारं योगिनमनुगृह्णन् vपारं संसारस्यान्तमपवर्गं गमयति तथा हे इन्द्र त्वं यजमानान् संसारस्यान्तं vप्रेरय गमय। vये अस्मदादयो यजमानाः vअस्य तवेन्द्रस्य vकामं सोमपानेच्छां vग्मन्। गमिरत्र विपूर्वोऽन्तर्भावितण्यर्थश्च द्रष्टव्यः। विगमयन्ति महता सोमपानेनापनयन्ति। तत्र दृष्टान्तः। vजनिधाइव। जनीनां जायानां संभोगकाले शय्यासु धारयितारः पतयो यथा प्रभूतसंभोगप्रदानेन मैथुनेच्छामपनयन्ति तद्वत्। किंच vनरः नेतारोऽस्मदादयः vये यजमानाः हे vतुविजात बहुरूप। 'रूपंरूपं प्रतिरूपो बभूव' (ऋ. सं. ६.४७.१८) इति वचनात्। सर्वात्मन् vइन्द्र vते तुभ्यं vपूर्वीः अनादिकालप्रवृत्ताः vगिरश्च स्तुतिलक्षणा वाचश्च vअग्नेः पुरोडाशादिहविर्भिः सह vप्रतिशिक्षन्ति प्रतिकालं प्रयच्छन्ति तानस्मदीयान् यजमानान् पारं गमयेति पूर्वेण संबन्धः॥ ॥ २२ ॥

मात्रे नु ते सुमिते इन्द्र पूर्वी द्यौर्मज्मना पृथिवी काव्येन।
वराय ते घृतवन्तः सुतासः स्वाद्मन्भवन्तु पीतये मधूनि ॥ ६ ॥

मात्रे इति। नु। ते। सुमिते इति सुऽमिते। इन्द्र। पूर्वी इति। द्यौः। मज्मना। पृथिवी। काव्येन। वराय। ते। घृतऽवन्तः। सुतासः। स्वाद्मन्। भवन्तु। पीतये। मधूनि ॥ ६ ॥

हे vइन्द्र vते तव स्वभूतेन vमज्मना शत्रूणां मज्जकेन vकाव्येन कर्मणा vद्यौः vपृथिवी द्यावापृथिव्यौ vनु क्षिप्रं vसुमिते निर्मिते। कीदृश्यौ। vमात्रे निर्मात्र्यौ vपूर्वी पूर्व्यौ महत्यौ। यस्मादीदृशेन महत्त्वेन युक्तः तस्मात् vघृतवन्तः अग्निमुखत्वात् त्वां क्षरन्तो दीप्तिमन्तो वा सुसंस्कृतत्वात् बहाज्यसंयुक्ताः vसुतासः अभिषुताः सोमाः vवराय श्रेष्ठाय तुभ्यमिन्द्राय vस्वाद्मन् vभवन्तु। अस्माभिर्दत्ताः सन्तु। किमर्थम्। vपीतये पानाय। vमधूनि मधुररसात्मकानि पुरोडाशादीन्यन्नानि हवींषि भक्षणार्थं दत्तानि भवन्तु॥

आ मध्वो अस्मा असिचन्नमत्रमिन्द्राय पूर्णं स हि सत्यराधाः।
स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च ॥ ७ ॥

आ। मध्वः। अस्मै। असिचन्। अमत्रम्। इन्द्राय। पूर्णम्। सः। हि। सत्यऽराधाः। सः। ववृधे। वरिमन्। आ। पृथिव्याः। अभि। क्रत्वा। नर्यः। पौंस्यैः। च ॥ ७ ॥

vअस्मै vइन्द्राय अस्येन्द्रस्यार्थं vमध्वः मधुररसस्य सोमस्य vपूर्णम् vअमत्रं ग्रहचमसादिकं पात्रम् vआ vअसिचन् आभिमुख्येन स्थित्वा परया भक्त्यास्मदीया ऋत्विजः सिक्तवन्तः अग्नौ प्रक्षिप्तवन्तः। vहि यस्मात्कारणात् vसः इन्द्रः vसत्यराधाः सत्यधनः। यजमानेभ्यो दातव्यत्वेनाविसंवादिधन[1] इत्यर्थः। तस्मादसिचन्निति[2] संबन्धः। अप्रावासिक्तेन तेन पात्रेण तृप्तः vसः इन्द्रः vपृथिव्याः अन्तरिक्षस्य vवरिमन् अतिशयेन विस्तीर्णे स्थाने आगत्य vअभि vववृधे अभिवर्धते। कीदृश इन्द्रः। vनर्यः नृभ्यो हितः। vक्रत्वा वृत्रवधादिकर्मणा प्रज्ञानेन वा vपौंस्यैश्च[3] युक्त इति शेषः॥

व्यानळिन्द्रः पृतनाः स्वोजा आस्मै यतन्ते सख्याय पूर्वीः।
आ स्मा रथं न पृतनासु तिष्ठु यं भद्रया सुमत्या चोदयासे ॥ ८ ॥

१. त-भ-मु-दातव्येना°। २. त-म१.२.४.६-मु-तस्मादसिचन्निति। ३. ग-त४-पौंस्यैश्च वीर्यैश्च।

वि । आनट् । इन्द्रः । पृतनाः । सुऽओजाः । आ । अस्मै । यतन्ते । सख्याय । पूर्वीः । आ । स्म । रथम् । न । पृतनासु । तिष्ठ । यम् । भद्रया । सुऽमत्या । चोदयासे ॥ ८ ॥

vस्वोजाः शोभनबलः vइन्द्रः vपृतनाः शत्रुसेनाः vव्यानट् व्याप्नोति । इन्द्रः संग्रामेषु केनाप्यप्रतिहन्यमानः सन् शत्रून् जयतीत्यर्थः । किंच vपूर्वीः । अत्र पूर्वशब्द उत्कृष्टवाची । उत्कृष्टाः शत्रुसेना अप्रभवन्त्यः सत्यः vअस्मै अस्येन्द्रस्य vसख्याय संधित्वलक्षणाय[1] सखित्वाय vआ vयतन्ते । संधिं कर्तुमिच्छन्तीत्यर्थः । अपरोऽर्धर्चैः प्रत्यक्षकृतस्तवान्निम्नं वाक्यम् । हे इन्द्र त्वं vयं स्वीयं रथं vभद्रया कल्याण्या vसुमत्या शोभनया परानुग्रहया बुद्धया vचोदयासे यज्ञान् प्रति प्रेरयसि तं vरथम् अस्मद्यज्ञं प्रत्यागन्तुं महतादरेण vआ vतिष्ठ आरोह । तत्र दृष्टान्तः । vपृतनासु संग्रामेषु vरथं vन यथा[2] स्वरथं महतादरेणातिष्ठसि[3] तद्वत् । vस्म इति पदपूरणः ॥ ॥२३॥ ॥२॥

तृतीयेऽनुवाके त्रयोदश सूक्तानि । तत्र ' प्र देवत्रा ' इति पञ्चदशर्चं प्रथमं सूक्तम् । इलूष-पुत्रस्य कवषस्यार्षं त्रैष्टुभमग्निदेवत्यमपांनपादेवसाकं वा । तथा चानुक्रान्तं—' प्र देवत्रा पञ्चोना कवष ऐलूष आपमपोनप्त्रीयं वा ' इति । ' अप इव्य होतः ' इत्युक्तः सन् होता ' प्र देवत्रा ' इत्याद्या नवर्चोऽनुब्रूयात् । सूत्रितं च—' प्र देवत्रा ब्रह्मणे गातुरेत्विति नव हिनोता नो अध्वरं देवयज्येति दशमीम् ' (आश्व. श्रौ. ५. १) इति ॥

प्र देवत्रा ब्रह्मणे गातुरेत्वपो अच्छा मनसो न प्रयुक्ति ।
महीं मित्रस्य वरुणस्य धासिं पृथुज्रयसे रीरधा सुवृक्तिम् ॥ १ ॥

प्र । देवऽत्रा । ब्रह्मणे । गातुः । एतु । अपः । अच्छ । मनसः । न । प्रऽयुक्ति । महीम् । मित्रस्य । वरुणस्य । धासिम् । पृथुऽज्रयसे । रीरध । सुऽवृक्तिम् ॥ १ ॥

vब्रह्मणे । तृतीयार्थे चतुर्थी । ब्रह्मणा स्तोत्रेण । स्तूयमान इति शेषः । vगातुः देवानपो वा प्रतिगमनशीलः सोमः vदेवत्रा देवीर्द्योतमानाः vअपः वसतीवर्येकधनालक्षणान्युदकानि vअच्छ अभि vप्र vएतु प्रकर्षेण गच्छतु । तत्र दृष्टान्तः । vमनसो vन vप्रयुक्ति । यथा मनसः प्रयुक्तिः प्रयोग उद्योगः शीघ्रं गच्छति तद्वत् । एवं सोमेऽपः प्रतिगते सति हे मदीयात्मन् अध्वर्यो वा vमहीं vधासिं महत्सोम-लक्षणमन्नं vमित्रस्य vवरुणस्य चार्थाय vपृथुज्रयसे विस्तीर्णजवाय । महागतेरिन्द्रस्य[4] चार्था-येत्यर्थः[5] । vरीरध संसाधय संस्कुरु । दानयोग्यं कुरु । vसुवृक्तिं सुष्ठु दोषैर्वर्जितां स्तुतिं च कुरु ॥

अध्वर्यवो हविष्मन्तो हि भूताच्छाप इतोशतीरुशन्तः ।
अव याश्चष्टे अरुणः सुपर्णस्तमास्यध्वमूर्मिमद्या सुहस्ताः ॥ २ ॥

अध्वर्यवः । हविष्मन्तः । हि । भूत । अच्छ । अपः । इत । उशतीः । उशन्तः । अव । याः । चष्टे । अरुणः । सुऽपर्णः । तम् । आ । अस्यध्वम् । ऊर्मिम् । अद्य । सुऽहस्ताः ॥२॥

हे vअध्वर्यवः यूयं vहविष्मन्तो vहि अभिषोतव्येन सोमलक्षणेन हविषा युक्ताः खलु vभूत भवत । किंच हे vउशन्तः सोमाभिषवं कर्तुं कामयमाना अध्वर्यवो यूयम् vउशतीः सोमाभिषवा-

---

१. ग–सख्यित्वलक्षणाय; त-भ२.६–सु–संधित्वलक्षणाय ; उद्दीथ–सख्याय सखिभावाय सख्यित्व-लक्षणाय । २. ग–यथा रथी । ३. ग–महतादरेणातिष्ठति । ४. त-भ६–महतेरिंद्रस्य । ५. त–चार्थायेत्यर्थः; भ६–चार्यायेत्यर्थः ।

ह्रभावमभिलषन्तीरेकधनालक्षणाः ᵛअपः ᵛअच्छ आभिमुख्येन ᵛइत गच्छत। ᵛअरुणः रक्तवर्णः ᵛसुपर्णः सुपतनः सोमः ᵛअव अधस्तात् अन्तरिक्षे ᵛयाः मेघोदरगता अपः ᵛचष्टे पश्यति हे ᵛसुहस्ताः सोमाभिषवादिशोभनकर्मकारित्वात् सुवर्णमयपवित्राद्यलंकृताः। यद्वा शोभनहस्ताः। एतेऽध्वर्यवः यूयम् ᵛअद्य इदानीं ᵛतं तादृशम् ᵛऊर्मिं सोमसंघातं ताभिरद्भिः सह ᵛअस्यध्वम् आभिमुख्येन स्थित्वा महतादरेण दशापवित्रे शोधनार्थं प्रक्षिपत ॥

अध्वर्यवोऽप इता समुद्रमपां नपातं हविषा यजध्वम्।
स वो दददूर्मिमद्या सुपूतं तस्मै सोमं मधुमन्तं सुनोत ॥ ३ ॥

अध्वर्यवः। अपः। इत। समुद्रम्। अपाम्। नपातम्। हविषा। यजध्वम्।
सः। वः। ददत्। ऊर्मिम्। अद्य। सुऽपूतम्। तस्मै। सोमम्। मधुऽमन्तम्। सुनोत ॥ ३ ॥

हे ᵛअध्वर्यवः यूयम् ᵛअपः एकधनालक्षणाम्युदकानि। आहर्तुमिति शेषः। ᵛसमुद्रम् उदधिस्थानीयं जलाशयम् ᵛइत गच्छत। इदानीमुत्तरोऽर्धर्चो व्याख्यायते पश्चात् द्वितीयः पादः। आर्थिकोऽयं क्रमः। ᵛअद्य इदानीं ᵛसः अपां नपात् ᵛवः जलाशयं प्रतिगतेभ्यो युष्मभ्यं ᵛसुपूतं सुशुद्धम् ᵛऊर्मिं जलसमूहं ᵛददत् ददातु। यूयमपि तेन समूहेन ᵛतस्मै अपां नपाते ᵛमधुमन्तं मधुरस्वादूपेतं ᵛसोमं ᵛसुनोत अभिषुणुत। अभिषुतेन सोमाख्येन ᵛहविषा ᵛअपां ᵛनपातं वृष्टिकर्मण्यधिकृतं[१] देवं ᵛयजध्वम् ॥

यो अग्निध्मो दीदयदप्स्वन्तर्यं विप्रास ईळते अध्वरेषु।
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्याय ॥ ४ ॥

यः। अग्निध्मः। दीदयत्। अप्ऽसु। अन्तः। यम्। विप्रासः। ईळते। अध्वरेषु।
अपाम्। नपात्। मधुऽमतीः। अपः। दाः। याभिः। इन्द्रः। ववृधे। वीर्याय ॥ ४ ॥

उत्तरार्धस्य प्रत्यक्षकृतत्वादेकवाक्यतायै युष्मच्छब्देन समानार्थो भवच्छब्दः प्रथमार्धेऽध्याहार्यः। ᵛयः भवान् अपां नपात् ᵛअप्स्वन्तः अपां मध्ये मेघस्थाने ᵛअग्निध्मः काष्ठवर्जितः सन् ᵛदीदयत् दीप्यते। ᵛविप्रासः मेधाविन ऋत्विग्यजमानाः ᵛअध्वरेषु यागेषु ᵛयं भवन्तम् ᵛईळते स्तुवन्ति हे ᵛअपां ᵛनपात् स त्वं ᵛमधुमतीः मधुररसयुक्ताः ᵛअपः वृष्टिलक्षणाः ᵛदाः अस्मभ्यं देहि। ᵛयाभिः वसतीवर्येकधनाख्याभिः सोमेन मिश्रिताभिरद्भिः[२] ᵛइन्द्रः ᵛवीर्याय वृत्रवधादिशूरकर्मणे ᵛववृधे वर्धते ता अपो देहीति संबन्धः ॥

याभिः सोमो मोदते हर्षते च कल्याणीभिर्युवतिभिर्न मर्यः।
ता अध्वर्यो अपो अच्छा परेहि यदासिञ्चा ओषधीभिः पुनीतात् ॥ ५ ॥

याभिः। सोमः। मोदते। हर्षते। च। कल्याणीभिः। युवतिऽभिः। न। मर्यः।
ताः। अध्वर्यो इति। अपः। अच्छ। परा। इहि। यत्। आऽसिञ्चाः। ओषधीभिः। पुनीतात् ॥५॥

अभिषुतः ᵛसोमः ᵛयाभिः वसतीवर्येकधनाख्याभिरद्भिः सह ᵛमोदते मुदितो भवति ᵛहर्षते ᵛच। पुनरुक्तिरादरार्था। अत्यर्थं हृष्यतीत्यर्थः। तत्र दृष्टान्तः। ᵛकल्याणीभिः कमनीयाभिः ᵛयुवतिभिः तरुणीभिः स्त्रीभिः[३] सह ᵛमर्यो ᵛन यथा मनुष्यो मोदते तद्वत्। हे ᵛअध्वर्यो त्वं ᵛताः तादृशीः ᵛअपः

---

१. त–वृष्टिकर्मणाधिकृतं। २. त-मु–भृताभिरद्भिः। ३. त-ᴹ१–'स्त्रीभिः' नास्ति।

vअच्छ अभिप्राप्तुं vपरेहि जलाशयं प्रतिगच्छ। किंच vयत् यदा आहृताभिस्ताभिरद्भिः[1] vआसिञ्चाः आ समन्तात्सोमानासिञ्चसि तदा vओषधीभिः सोमैः सहापश्च vपुनीतात् दशापवित्रेण पुनीहि॥ ॥२७॥

एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ।
सं जानते मनसा सं चिकित्रेऽध्वर्यवो धिषणापश्च देवीः ॥ ६ ॥

एव। इत्। यूने। युवतयः। नमन्त। यत्। ईम्। उशन्। उशतीः। एति। अच्छ। सम्। जानते। मनसा। सम्। चिकित्रे। अध्वर्यवः। धिषणा। आपः। च। देवीः ॥ ६ ॥

vयुवतयः तरुण्यः स्त्रियः vयूने तरुणाय vनमन्त यथा प्रह्वीभवन्ति vएव[2] एवं वसतीवर्येकधनाख्या आपः सोमाय प्रह्वीभवन्ति[1]। यद्वा। युवतयः सोमेन सह मिश्रयित्र्य आपो यूने अभिषवादिकर्मणामात्मना सह मिश्रयित्रे कर्त्रेऽध्वर्यवे नमन्त प्रह्वीभवन्त्येव। vइत् इति पूरणः। कदा। vयत् यदा vउशन् अभिषवार्थं वसतीवरीः कामयमानः सोमः सोमाभिषवं कर्तुं कामयमानः अध्वर्युर्वा vउशतीः सोमेन सह मिश्रीभावमभिषवादिकर्माङ्गभावं च कामयमानाः vईम् एना अपः vअच्छ प्राप्तुम् vएति गच्छति तदोपनमन्ते। vअध्वर्यवो vधिषणा तदीया स्तुतिलक्षणा वाक् च vदेवीः देव्यः vआपश्च vमनसा विशिष्टया बुद्धया vसं vजानते सम्यग्जानन्ति vसं vचिकित्रे स्वं स्वमधिकारं परस्परोपकारं च चक्षुषा सम्यक् पश्यन्ति॥

यो वो वृताभ्यो अकृणोदु लोकं यो वो मह्या अभिशस्तेरमुञ्चत्।
तस्मा इन्द्राय मधुमन्तमूर्मिं देवमादनं प्र हिणोतनापः ॥ ७ ॥

यः। वः। वृताभ्यः। अकृणोत्। ऊँ इति। लोकम्। यः। वः। मह्याः। अभिऽशस्तेः। अमुञ्चत्। तस्मै। इन्द्राय। मधुऽमन्तम्। ऊर्मिम्। देवऽमादनम्। प्र। हिणोतन। आपः ॥ ७ ॥

vयः इन्द्रः vवृताभ्यः मेघैरावृताभ्यः परिवेष्टिताभ्यः vवः युष्मभ्यमद्भ्यः vलोकं मेघोदराच्छिर्गमनमार्गम् vअकृणोत् अकरोत्। vउ इति पूरणः। किंच vयो vवः युष्मानपः vमह्याः महत्याः vअभिशस्तेः मेघपरिवेष्टनाभिहिंसनात् vअमुञ्चत् मोचितवान्। हे vआपः यूयं vतस्मै तादृशाय vइन्द्राय vमधुमन्तं मधुरस्वादुयुक्तं vदेवमादनम् इन्द्रादिदेवानां सोमेन सह मिश्रीभूय तर्पयितारम् vऊर्मिम् अप्संघातं vप्र vहिणोतन अस्मत्पार्श्वं प्रति गमयत। सोमाभिषवकर्माङ्गभावाय प्रस्थापयत॥

प्रास्मै हिनोत मधुमन्तमूर्मिं गर्भो यो वः सिन्धवो मध्व उत्सः।
घृतपृष्ठमीड्यमध्वरेष्वापो रेवतीः शृणुता हवं मे ॥ ८ ॥

प्र। अस्मै। हिनोत। मधुऽमन्तम्। ऊर्मिम्। गर्भः। यः। वः। सिन्धवः। मध्वः। उत्सः। घृतऽपृष्ठम्। ईड्यम्। अध्वरेषु। आपः। रेवतीः। शृणुत। हवम्। मे ॥ ८ ॥

अत्र यच्छब्दसंबन्धाद्वितीयः पादः[3] पूर्वं व्याख्येयः। हे vसिन्धवः स्यन्दनशीला आपः vवः युष्माकं vयः vगर्भः vमध्वः मधुररसस्य vउत्सः उत्स्यन्दनः प्रस्रवणः। यच्छब्दयोगात्तच्छब्दोऽध्याहार्यः। तं vमधुमन्तं मधुररसोपेतम् vऊर्मिम् अप्संघातम्। सारमित्यर्थः। vअस्मै अस्येन्द्रस्यार्थाय

---

१. त–आहताभिस्ताभिः। २. त–'एव...प्रह्वीभवन्ति' नास्ति। ३. त–'पादः' नास्ति।

vप्र vहिनोत प्रहिणुत । प्रगमयत । कीदृशम् । vअध्वरेषु यज्ञेषु vघृतपृष्ठं घृतमाज्यं पृष्ठे यस्य तम् । पश्चाद्धृतपातिनमित्यर्थः । vईड्यं स्तुत्यम् । किंच हे vआपः यूयं vरेवतीः रेवत्यः अस्मभ्यं यानि धनानि दातव्यानि तैर्धनवत्यः vमे मदीयं vहवम् आह्वानं vशृणुत ॥

तं सिन्धवो मत्सुरमिन्द्रपानमूर्मिं प्र हेत य उभे इयर्ति ।
मदच्युतमौशानं नभोजां परि त्रितन्तुं विचरन्तमुत्सम् ॥ ९ ॥

तम् । सिन्धवः । मत्सुरम् । इन्द्रऽपानम् । ऊर्मिम् । प्र । हेत । यः । उभे इति । इयर्ति । मदऽच्युतम् । औशानम् । नभःऽजाम् । परि । त्रिऽतन्तुम् । विऽचरन्तम् । उत्सम् ॥ ९ ॥

हे vसिन्धवः स्यन्दनशीला आपः vयः युष्मदीयः सारभूतः समूहः vउभे अस्मभ्यं दृष्टादृष्टफले दाता सन् vइयर्ति कर्माङ्गभावं प्रतिपद्यते vमत्सरं मादयितारमिन्द्रादिदेवानां तर्पयितारम् vइन्द्रपानं देवानां प्रमुखेनेन्द्रेण पानीयं vतं तादृशम् vऊर्मिम् उदकसमूहं vप्र vहेत प्रगमयत अस्मद्यज्ञं प्रति प्रेरयत । कीदृशम् । vमदच्युतं मदस्य च्यावकम् vऔशानं सोमेन सह मिश्रीभावं कामयमानं vनभोजां नभस्यन्तरिक्षे वृष्टिरूपेण[1] जातं vपरि सर्वतः vत्रितन्तुं त्रयाणां लोकानां तनितारं विस्तारयितारं[2] vविचरन्तं यज्ञपात्रेषु गच्छन्तम् vउत्सम् उत्स्यन्दनम् । तर्पितारं देवान् प्रत्यूर्ध्वं गन्तारमित्यर्थः ॥

अपोनप्त्रीय एकधनास्वावृत्तासु ' आवर्वृततीः ' इत्येषा । सूत्रितं च—' आवर्वृततीरध नु द्विधारा इत्यावृत्तास्वेकधनासु ' (आश्व. श्रौ. ५. १) इति । तत्रैव ' हिनोता नः ' इत्येषा । सूत्रं पूर्वमुदाहृतम् ॥

आवर्वृततीरध नु द्विधारा गोषुयुधो न नियवं चरन्तीः ।
ऋषे जनित्रीर्भुवनस्य पत्नीरपो वन्दस्व सवृधः सयोनीः ॥ १० ॥

आऽवर्वृततीः । अध । नु । द्विऽधाराः । गोषुऽयुधः । न । निऽयवम् । चरन्तीः ।
ऋषे । जनित्रीः । भुवनस्य । पत्नीः । अपः । वन्दस्व । सऽवृधः । सऽयोनीः ॥ १० ॥

vअध अथानन्तरं vगोषुयुधो vन । गोष्वप्सु निमित्तभूतासु मेघैः सह युध्यत इति गोषुयुदिन्द्रः। तस्य यथा वृष्टिलक्षणा अपः vद्विधाराः । द्विशब्दोऽनेकत्ववाची[3] । अनेकधाराः । अपर्यन्तधारा इत्यर्थः । अस्माकमप्येवंस्थिताः vआवर्वृततीः आवृत्ताः vनियवं सोमं प्रति निश्चयेन vमिश्रीभावं vचरन्तीः गच्छन्तीः vभुवनस्य लोकस्य vजनित्रीः जनयित्रीः vपत्नीः पालयित्रीश्च vसवृधः सह सोमस्य वर्धयित्रीः vसयोनीः सोमेन सह समानस्थानाः हे vऋषे मदीयान्तरात्मन् अध्वर्यो वा त्वमेवंभूताः vअपः vनु क्षिप्रं vवन्दस्व स्तुहीत्यर्थः ॥ ॥ २५ ॥

हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम् ।
ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः ॥ ११ ॥

हिनोत । नः । अध्वरम् । देवऽयज्या । हिनोत । ब्रह्म । सनये । धनानाम् ।
ऋतस्य । योगे । वि । स्यध्वम् । ऊधः । श्रुष्टीऽवरीः । भूतन । अस्मभ्यम् । आपः ॥ ११ ॥

---

१. त१.२.५.७–विश्वरूपेण । २. त१.२.७–तारयितारं विस्तारयितारं । ३. त-म६–द्विशब्दोऽनेकत्ववाची ।

हे vऋत्विजः vहिनोत प्रहिणुत प्रगमयत प्रोत्सर्पयतैतम् vअध्वरं यज्ञं vदेवयज्या[1] देवयज्यायै देवयजनार्थम्। किंच प्रहिणुत vब्रह्म स्तुत्याख्यं यथाशास्त्रक्रमेण vसनये लब्धये vनः अस्माकं vधनानाम्। किंच vऋतस्य यज्ञस्य vयोगे संयोगे यदेतदूधरिव सोमपूर्णमधिषवणचर्म वर्तते। अथवा योगसंबन्धाच्छकटं योगः। तद्धि[2] तत्रैव[2] युज्यते। तेनाधिषवणचर्मणा ऊधसोऽधस्तादवस्थितेनेति मन्यमानो निरुक्तकारो ब्रवीति[3]—'याज्ञे शकट इति[3] वा' (निरु. ६. २२) इति। यदेतद्यज्ञशकटस्याधस्तादुपरि वाधिषवणचर्म एतत् vवि vव्यध्वं विमुञ्चध्वम्। ग्रहचमसस्थाल्यादिषु यो निषेकः सोमस्यैतद्विमोचनमधिषवणचर्मोधसः। तद्धि सोम उत्सिच्यमाने ऋधीमवति यथेतरदूरूधो दुह्यमानायां गवि। एवमृत्विज उक्त्वाधुनैव सोमसंमिश्रा अपो ब्रवीति। यूयमपि हे vआपः एभिः ऋत्विग्भिरुत्सिच्यमानाः vश्रुष्टीवरीः सुखवत्यः vभूतन भवत vअस्मभ्यम्। एवमत्र प्रशब्देनार्थस्य सुतरां प्रकटता भवतीति भाष्यकारेण प्रशब्दोऽध्याहृतः। प्रहिणुतेति। अध्वरमित्यनेन संबन्धाद्धिनोतेः गत्यर्थत्वमुपपद्यते। एतस्या ऋचो व्याख्यानं निरुक्तटीकाया उद्धृतम्॥[4]

प्रातरनुवाकस्य 'आपो रेवतीः' इत्येषा प्रतिपत्। सूत्रितं च—'आपो रेवतीः क्षयथा हि वस्व उप प्रयन्त इति सूक्ते' (आश्व. श्रौ. ४. १३) इति॥

आपो॑ रेवती॒ः क्षय॑था॒ हि व॑स्व॒ः क्रतुं॑ च॒ भद्रं॑ बिभृथामृतं॑ च।
रा॒यश्च॒ स्थ स्व॑पत्यस्य॒ पत्नी॒ः सर॑स्वती॒ तद्गृ॑णते॒ वयो॑ धात्॥ १२॥

आपः। रेवतीः। क्षयथ। हि। वस्वः। क्रतुम्। च। भद्रम्। बिभृथ। अमृतम्। च। रायः। च। स्थ। सुऽअपत्यस्य। पत्नीः। सरस्वती। तत्। गृणते। वयः। धात्॥१२॥

हे vआपो vरेवतीः रेवत्यो धनवत्यः यूयं vवस्वः वसुनः धनस्य vक्षयथ vहि ईशिध्वे खलु। किंच vभद्रं भजनीयं vक्रतुं vच सोमयागादिलक्षणं कर्म च vअमृतं vच अमरणरूपं तज्जन्यफलं च vबिभृथ धारयथ। पुष्णीथ वा। तथा vरायश्च धनस्य च vस्वपत्यस्य शोभनपुत्रस्य च vपत्नीः पत्न्यः पालयित्र्यः vस्थ भवथ। तथा vसरस्वती तदभिमानिनी देवता vगृणते स्तुवते मह्यं vतत् इदं सर्वं vवयः अन्नलक्षणं धनं vधात् ददातु[5]॥

अपोनप्त्रीये 'प्रति यदापः' इत्येषा। सूत्रितं च—'प्रति यदापो अदृश्रमायतीरिति प्रतिदृश्यमानासु' (आश्व. श्रौ. ५. १) इति॥

प्रति॒ यदापो॒ अदृ॑श्रमायती॒र्घृतं॒ पयां॑सि॒ बिभ्र॑तीर्मधू॑नि।
अ॒ध्व॒र्यु॒भि॒र्मन॑सा संविदा॒ना इन्द्रा॑य॒ सोमं॑ सुषु॒तं॑ भर॒न्तीः॥ १३॥

प्रति। यत्। आपः। अदृश्रम्। आऽयतीः। घृतम्। पयांसि। बिभ्रतीः। मधूनि। अध्वर्युऽभिः। मनसा। सम्ऽविदानाः। इन्द्राय। सोमम्। सुऽसुतम्। भरन्तीः॥ १३॥

हे vआपः vआयतीः अस्मद्यज्ञं प्रत्यागच्छन्तीः vयत्। 'सुपां सुलुक्' इति विभक्तेर्लुक्। याः युष्मान् vप्रति vअदृश्रं प्रतिपश्यामि vघृतं सोमसंसृष्टमाज्यं vमधूनि मधुसदृशानि मृष्टरसानि

---

१. त-भ-'देवयज्या' नास्ति। २. त-तद्धि तर्हि; भ-मु-तद्धि तर्हि। ३. त-भ-ब्रवीते शकट इति। ४. ग-पुस्तकस्थमेकादशमन्त्रभाष्यं—नोस्मार्क अध्वरं यज्ञं देवयागार्थं हिनोत प्रेरयत। अप्सु हि यज्ञाश्रितः ब्रह्मकर्मधनानां लाभाय हिनोत यज्ञस्य योगार्थं ऊधः आत्मीयं वि व्यध्वं विमुक्तं कुरुत। हे आपः यूयं श्रुष्टीवरीः सुखवत्यो भूतन भवतास्मभ्यं। ५. त-भ६-दधातु।

vपयांसि उदकानि च[1] संभूय vबिभ्रतीः यागकाले धारयन्तीः तथा[2] vअध्वर्युभिः vमनसा अन्तः-करणेन vसंविदानाः संभाषमाणाः किंच vइन्द्राय इन्द्रार्थं vसुषुतं सुष्ठु सुतं vसोमं vभरन्तीः धारयन्तीः * एवंभूतास्ता युष्मान्स्तौमीति शेषः[2] ॥

अपोनप्त्रीये ' एमा अग्मन् ' इति द्वे। सूत्रितं च—' एमा अग्मन्नेवतीर्जीवधन्या इति द्वे सङ्गासूत्तरया परिधाय ' (आश्व. श्रौ. ५ · १) इति ॥

एमा अग्मन्रेवतीर्जीवधन्या अध्वर्यवः सादयता सखायः ।
नि बर्हिषि धत्तन सोम्यासोऽपां नप्त्रा संविदानासं एनाः ॥ १४ ॥

आ । इमाः । अग्मन् । रेवतीः । जीवऽधन्याः । अध्वर्यवः । सादयत । सखायः ।
नि । बर्हिषि । धत्तन । सोम्यासः । अपाम् । नप्त्रा । सम्ऽविदानासः । एनाः ॥ १४ ॥

vरेवतीः रेवत्यः धनवत्यः vजीवधन्याः जीवानां पालयित्र्यः[3] प्रीणयित्र्यो वा vइमाः ईदृग्भूता आपः vआ vअग्मन् अस्मद्यज्ञं प्रत्यागच्छन्। एतज्ज्ञात्वा हे vसखायः सखिभूता हे vअध्वर्यवः यूयम् vअपां vनप्त्रा वृष्टिकर्मस्वधिकृतेन[4] देवेन सह vसंविदानाः संमन्त्रयमाणाः vएनाः एता अपः vसादयत स्थापयत। कुत्र सादयाम इति उच्यते। vसोम्यासः सोमसंपादिनोऽध्वर्यवः यूयं vबर्हिषि वेद्यामास्तीर्णे कुशमये vनि vधत्तन नियमेन स्थापयत ॥

आग्मन्नापं उशतीर्बर्हिरेदं न्यध्वरे असदन्देवयन्तीः ।
अध्वर्यवः सुनुतेन्द्राय सोममभूदु वः सुशका देवयज्या ॥ १५ ॥

आ । अग्मन् । आपः । उशतीः । बर्हिः । आ । इदम् । नि । अध्वरे । असदन् । देवऽयन्तीः ।
अध्वर्यवः । सुनुत । इन्द्राय । सोमम् । अभूत् । ऊँ इति । वः । सुऽशका । देवऽयज्या ॥ १५ ॥

vआपः वसतीवर्येकधनाख्याः vइदम् ईदृशं vबर्हिः वेदिस्तरणम् vउशतीः उशत्यः कामय-मानाः vआग्मन्[5] आगच्छन्। अस्मद्यज्ञं प्रति vआ आगत्य च vअध्वरे अस्मदीये यज्ञे vदेवयन्तीः देवान् कामयमानाः। तर्पयितुमिच्छन्त्य इत्यर्थः। vनि vअसदन् न्यसीदन्[6]। एतज्ज्ञात्वा हे vअध्वर्यवः यूयम् vइन्द्राय इन्द्रार्थं vसोमं vसुनुत अभिषुणुत। इदानीमपां प्रसादात् vवः युष्माकं vदेवयज्या देवानिन्द्रादीनुद्दिश्य क्रियमाणा यागक्रिया vसुशका सुष्ठु कर्तुं शक्या vअभूदु आसीदेव ॥ ॥ २६ ॥

' आ नः ' इत्येकादशर्चं द्वितीयं सूक्तं कवषस्यार्षं त्रैष्टुभं वैश्वदेवम्। अनुक्रान्तं च—' आ न एकादश वैश्वदेवम् ' इति। गतः सूक्तविनियोगः। एकादशिनस्य वैश्वदेवस्य पशोः पुरोडाशस्य ' आ नः ' इत्येषानुवाक्या। सूत्रितं च—' विश्वे अद्य मरुतो विश्व ऊत्या नो देवानामुप वेतु शंसः ' (आश्व. श्रौ. ३. ७) इति ॥

---

१. त–' च ' नास्ति । २. ग–एतद्धि सर्वं सरस्वत्या विद्यते । तदुक्तं घृतं पयो दुदुहे नाहुषायेति । तथा अध्वर्युभिः मनसा ऐकमत्यं गता इंद्रार्थं सुष्ठुभिषुतं सोमं भरंतीः । एवंभूताः प्रत्यपश्यमिति संबंधः । *. त-म६–' धारयन्तीः ' नास्ति । ३. त१.२.३.४.५.६-म६-मु–पाययित्र्यः; म१.४–पायित्र्यः; उद्गीथ–वर्धयित्र्यः । ४. ग-म५.६–वृष्टिकर्मण्यधिकृतेन । ५. त५.७-म-उद्गीथ–अग्मन् । ६. ग–न्यषीदन्; त-म-मु–निषीदन् ।

आ नो देवानामुप वेतु शंसो विश्वेभिस्तुरैरवसे यजत्रः ।
तेभिर्वयं सुषखायो भवेम तरन्तो विश्वा दुरिता स्याम ॥ १ ॥

आ । नः । देवानाम् । उप । वेतु । शंसः । विश्वेभिः । तुरैः । अवसे । यजत्रः ।
तेभिः । वयम् । सुऽसखायः । भवेम । तरन्तः । विश्वा । दुःऽइता । स्याम ॥ १ ॥

vदेवानां स्तोतॄणां vनः अस्माकं vशंसः स्तोतव्यः vयजत्रः यष्टव्यः एवंभूत इन्द्रः vतुरैः त्वरणशीलैः vविश्वेभिः सर्वैः मरुद्भिः सह vअवसे अस्मद्यज्ञरक्षणार्थम् vआ vउप vवेतु उपागच्छतु । vवयम् अपि vतेभिः तैः सह vसुसखायः शोभनसखायः vभवेम स्याम । किंच vविश्वा vदुरिता[1] विश्वानि[2] दुरितानि पापानि vतरन्तः vस्याम ॥

परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत् ।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् ॥ २ ॥

परि । चित् । मर्तः । द्रविणम् । ममन्यात् । ऋतस्य । पथा । नमसा । आ । विवासेत् ।
उत । स्वेन । क्रतुना । सम् । वदेत । श्रेयांसम् । दक्षम् । मनसा । जगृभ्यात् ॥ २ ॥

vमर्तः मनुष्यः यजमानः vपरि vचित् सर्वतः vद्रविणं विश्वेषां देवानां यागार्थं धनं vममन्यात् । मन्यतिः कान्तिकर्मा । कामयेत लब्धुमिच्छेत् । धनं लब्ध्वा च vऋतस्य यज्ञस्य vपथा मार्गेण vनमसा हविराख्येनान्नेन vआ vविवासेत् परिचरेत् । vउत अपि च vस्वेन आत्मीयेन vक्रतुना[3] प्रज्ञानेन[3] । मनसेत्यर्थः । vसं vवदेत । संवादोऽत्र समाध्यानमुच्यते । हविर्गृहीत्वा वषट्कुर्वन् विश्वान् देवान् मनसाध्यायेदित्यर्थः । विश्वेषां देवानां यागानन्तरं च तत्प्रसादात् vश्रेयांसम् अतिशयेन प्रशस्यमात्मानं vदक्षं[4] प्रवृद्धं सर्वव्यापिनं vमनसा ध्यानसाधनेनान्तःकरणेन vजगृभ्यात् गृह्णीयात् ॥

अधायि धीतिरससृग्रमंशास्तीर्थे न दृस्ममुप यन्त्यूमाः ।
अभ्यानशम सुवितस्य शूषं नवेदसो अमृतानामभूम ॥ ३ ॥

अधायि । धीतिः । असंसृग्रम् । अंशाः । तीर्थे । न । दृस्मम् । उप । यन्ति । ऊमाः ।
अभि । आनशम । सुवितस्य । शूषम् । नवेदसः । अमृतानाम् । अभूम ॥ ३ ॥

vधीतिः देवयागक्रिया vअधायि निहिता स्थापिता । अस्माभिः प्रवर्तितेत्यर्थः । तदनन्तरम् vऊमाः अवितारस्तर्पयितारः vअंशाः अस्माभिर्दत्ता हविर्भागाः vदृस्मं दर्शनीयं शत्रूणामुपक्षपयितारं वा vअससृग्रम् असमानसृष्टिम् । उत्कृष्टजन्मानमित्यर्थः[5] । एवंभूतं देवसंघम् vउप vयन्ति उपगच्छन्ति । तत्र दृष्टान्तः । vतीर्थे vन । यथा गङ्गादितीर्थे तर्पणमुखे विसृष्टा अपामंशाः देवसंघमुपगच्छन्ति तद्वत् । तदनन्तरं वयं vसुवितस्य सु हुतस्य सुष्ठु प्रासस्य स्वर्गादिकस्य vशूषं सुखम् vअभ्यानशम अभिप्राप्नवाम । किंच वयम् vअमृतानां देवानां vनवेदसः । न वेदेत्येतस्मिन्नर्थे नवेदः-

---

१. त–दुरितानि । २. भ–' विश्वानि ' नास्ति । ३. त–'क्रतुना प्रज्ञानेन' नास्ति । ४. त–' दक्षं ' नास्ति । ५. त मु–उप्रजन्मान° ।

शब्दो 'नञ्राप्नपात्रवेदा०' इति निपातितः । न न वेत्तारो वेत्तार एव । स्वरूपतो ज्ञातार एवेत्यर्थः । vअभूम भवेमेत्याशास्महे ॥

नित्यश्चाकन्यात्स्वपतिर्दमूना यस्मा उ देवः सविता जजान ।
भगो वा गोभिरर्यमेमनज्यात्सो अस्मै चारुश्छदयदुत स्यात् ॥ ४ ॥

नित्यः । चाकन्यात् । स्वऽपतिः । दमूनाः । यस्मै । ऊँ इति । देवः । सविता । जजान ।
भगः । वा । गोभिः । अर्यमा । ईम् । अनज्यात् । सः । अस्मै । चारुः । छदयत् । उत । स्यात्॥४॥

vनित्यः कल्पावस्थायी प्रजापतिः vचाकन्यात् । तस्मै दृष्टादृष्टफलं दातुं कामयतां । कीदृशः । vस्वपतिः स्वीयानां प्रजानां स्वामी धनपतिर्वा vदमूनाः दानमनाः । कस्मै कामयतामिति उच्यते । vउ उत अपि च vयस्मै यजमानाय मह्यं vसविता सर्वस्य प्रेरको vदेवः vजजान जनितवान् । दृष्टादृष्टफलं दत्तवानित्यर्थः । वाशब्दः समुच्चये । तथा vभगः देवश्च vगोभिः अस्मदीयाभिः स्तुतिरूपाभिः वाग्भिः स्तुतः vअर्यमा देवश्च vईम् ईदृग्भूतं दृष्टादृष्टफलम् vअनज्यात् व्यक्तीकुर्यात् । ददादित्यर्थः । vउत अपि च vस्यात् अन्योऽपि vयो देवगणोऽस्ति vचारुः रमणीयः vसः अपि देवगणः vअस्मै यजमानाय मह्यं vछदयत् दृष्टादृष्टफलं दातुं कामयतामित्येतदाशास्महे ॥

इयं सा भूया उषसामिव क्षा यद्ध क्षुमन्तः शवसा समायन् ।
अस्य स्तुतिं जरितुर्भिक्षमाणा आ नः शग्मास उप यन्तु वाजाः ॥ ५ ॥

इयम् । सा । भूयाः । उषसाम्ऽइव । क्षाः । यत् । ह । क्षुऽमन्तः । शवसा । सम्ऽआयन् ।
अस्य । स्तुतिम् । जरितुः । भिक्षमाणाः । आ । नः । शग्मासः । उप । यन्तु । वाजाः॥५॥

vक्षुमन्तः । क्षुशब्दोऽन्नवाची शब्दवाची वा । अन्नवन्तः स्तुतिमन्तः कीर्तिमन्तो वेत्यर्थः । एवंभूता देवाः vशवसा बलेन vयत् यामस्मदीयां स्तुतिं प्रति vसमायन् समागच्छन् संप्राप्ताः vसा vइयं स्तुतिर्देवानां प्राप्या vभूयाः भूयात् भवतु । vउषसामिव vक्षाः । यथा पृथिवी उषसां व्याप्या सर्वेषां प्राप्या भवति तद्वत् । किंच vजरितुः स्तोतुः vअस्य मम vस्तुतिं vभिक्षमाणाः याचमानाः vशग्मासः । शग्ममिति सुखनाम । सुखाः सुखकराः vवाजाः सुधन्वनः पुत्राख्ययोऽप्यृभुर्विभ्वा वाज इत्येते vनः अस्मानाभिमुख्येन vउप vयन्तु उपगच्छन्तु ॥ ॥ २७ ॥

अस्येदेषा सुमतिः पप्रथानाभवत्पूर्व्या भूमना गौः ।
अस्य सनीळा असुरस्य योनौ समाने आ भरणे बिभ्रमाणाः ॥ ६ ॥

अस्य । इत् । एषा । सुऽमतिः । पप्रथाना । अभवत् । पूर्व्या । भूमना । गौः ।
अस्य । सऽनीळाः । असुरस्य । योनौ । समाने । आ । भरणे । बिभ्रमाणाः ॥ ६॥

vइत् इदानीम् vअस्य देवगणसंबन्धिनी vएषा vसुमतिः सुष्टुतिः vपप्रथानाभवत् विस्तीर्यमाणाभूत् । अस्माभिः क्रियमाणेत्यर्थः । कीदृशी । vपूर्व्या पूर्वकालीना vभूमना भूम्ना बहुत्वेन युक्तेति शेषः । सर्वदेवसंबन्धित्वादृशं जातेत्यर्थः । vगौः देवान्प्रति गन्त्री । एतज्ज्ञात्वा सर्वे देवाः vअसुरस्य प्रजारूपबलवतः vअस्य मम संबन्धिनि vसमाने सर्वदेवसाधारणे vभरणे सर्वेषां देवानां पुष्टिकरे vयोनौ यज्ञाख्ये स्थाने vसनीळाः समानस्थानाः vबिभ्रमाणाः अस्मदर्थं दृष्टादृष्टफलं धारयन्तः vआ गच्छन्त्विति शेषः ॥

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त ॥ ७ ॥

किम् । स्वित् । वनम् । कः । ऊँ इति । सः । वृक्षः । आस । यतः । द्यावापृथिवी इति । निःऽततक्षुः ॥ संतस्थाने इति सम्ऽतस्थाने । अजरे इति । इतऊती इतीतःऽऊती । अहानि । पूर्वीः । उषसः । जरन्त ॥ ७ ॥

ᵛयतः यस्माद्वृक्षात् ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛनिष्टतक्षुः देवाः निःशेषेण कृतवन्तः ᵛसः तादृशः ᵛवृक्षः ᵛक ᵛउ ᵛआस कीदृग्वा बभूव । तदुत्पादकं ᵛवनम् अरण्यं ᵛकिं ᵛस्वित् । ᵛसंतस्थाने सम्यक्तिष्ठन्त्यौ ᵛअजरे जरावर्जिते ᵛइतऊती इत एतेभ्यो देवेभ्यो रक्षणं ययोस्ते । किंच ᵛअहानि सर्वाणि दिनानि ᵛपूर्वीः बह्वीः ᵛउषसः च देवा निष्टतक्षुः । एवंभूतान् देवान् ᵛजरन्त स्तोतारः स्तुवन्ति ॥

नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्ति ।
त्वचं पवित्रं कृणुत स्वधावान्यदीं सूर्यं न हरितो वहन्ति ॥ ८ ॥

न । एतावत् । एना । परः । अन्यत् । अस्ति । उक्षा । सः । द्यावापृथिवी इति । बिभर्ति । त्वचम् । पवित्रम् । कृणुत । स्वधाऽवान् । यत् । ईम् । सूर्यम् । न । हरितः । वहन्ति ॥८॥

द्यावापृथिव्योर्निर्माणरूपम् ᵛएतावत् देवजातं सामर्थ्येन युक्तमिति ᵛन अपि तु ᵛएना एतेभ्यो देवेभ्यः ᵛपरः उत्कृष्टः ᵛअन्यत् अन्यो हिरण्यगर्भः ᵛअस्ति । ᵛउक्षा सेक्ता । प्रजानां स्रष्टेत्यर्थः । हिरण्यगर्भः परमसूक्ष्मो वायुरूपो लिङ्गात्मा अपः प्रविश्य ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛबिभर्ति धारयति । किंच ᵛस्वधावान् बलवानन्नवान् वा स हिरण्यगर्भः ᵛपवित्रं पवित्रमयं ᵛत्वचम् आत्मीयं शरीरं दीप्तं मन्त्रं वा ᵛकृणुत करोति । कदेति उच्यते । ᵛयत् यदा ᵛईम् इमां त्वचं ᵛहरितः अश्वाः ᵛसूर्यं ᵛन ᵛवहन्ति न प्रापयन्ति तदेति । सृष्टेः प्रागित्यर्थः ॥

स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम ।
मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने न व्यसृष्ट शोकम् ॥ ९ ॥

स्तेगः । न । क्षाम् । अति । एति । पृथ्वीम् । मिहम् । न । वातः । वि । ह । वाति । भूम । मित्रः । यत्र । वरुणः । अज्यमानः । अग्निः । वने । न । वि । असृष्ट । शोकम् ॥ ९ ॥

ᵛस्तेगः । ' स्त्यै ष्ट्यै शब्दसंघातयोः ' । रश्मिसंघाती आदित्यः ᵛपृथ्वीं विस्तीर्णां ᵛक्षां भूमिं तेजसा ᵛन ᵛअत्येति नातिगच्छति । मर्यादया तिष्ठतीत्येवमादित्यः स्तूयते । ᵛवातः वायुरपि खलु ᵛभूम भूमिं ᵛमिहं वृष्टिं ᵛन ᵛवि ᵛवाति समर्थोऽपि सन् विविधं न गमयति । भूमिं प्रति सावशेषमेव वर्षयतीति[1] वातः स्तूयते । ᵛयत्र यस्मिन् प्रजापतौ ᵛमित्रः देवः ᵛअज्यमानः व्यज्यमानः व्यक्तीभवन् । उत्पाद्यमान[2] इत्यर्थः । ᵛशोकं स्वीयां दीप्तिं ᵛव्यसृष्ट विसृजति सर्वतो विक्षिपति तथा ᵛवरुणः च व्यक्तीभवन्[2] स्वदीप्तिं विक्षिपति । तत्र दृष्टान्तः । ᵛअग्निः देवः ᵛवने ᵛन यथा वृक्षसंघाते स्वदीप्तिं सर्वतो विसृजति तद्वत् । तादृशं प्रजापतिं स्तौमीति शेषः ॥

---

१. त१.२.६.७–न वर्षतीति; त३.४.५–भ६-मु-उद्गीथ–वर्षतीति; भ१.२.४–वर्षयति । २. त–' उत्पाद्यमान...व्यक्तीभवन् ' नास्ति ।

स्तरीर्यत्सूत सद्यो अज्यमाना व्यथिरव्यथीः कृणुत स्वगोपा ।
पुत्रो यत्पूर्वैः पित्रोर्जनिष्ट शम्यां गौर्जगार यद्ध पृच्छात् ॥ १० ॥

स्तरीः । यत् । सूत । सद्यः । अज्यमाना । व्यथिः । अव्यथीः । कृणुत । स्वऽगोपा ।
पुत्रः । यत् । पूर्वैः । पित्रोः । जनिष्ट । शम्याम् । गौः । जगार । यत् । ह । पृच्छान् ॥ १० ॥

अरण्योः कारणभूतां शमीं गोत्वेन रूपयति। [v]स्तरीः निवृत्तप्रसवा गौः [v]सद्यः क्षीघ्रम् [v]अज्यमाना निधिच्यमानरेतस्का सती [v]यत् यदा [v]सूत वत्सं प्रसूते तदा [v]व्यथिः दुःखानां बाधयित्री [v]स्वगोपा स्वायत्तगोप्तृका स्वभूतरक्षणा वा सती सा गौः [v]अव्यथीः व्यथारहिताः प्रजाः [v]कृणुत करोति। यदा शमी पुत्रस्थानीयमश्वत्थं प्रसूते तदानीमरण्याहरणाय तादृशमश्वत्थमन्विच्यतामृत्विजामश्वत्थस्य जनयित्री शमी सुखहेतुर्भवतीत्यर्थः। शमीगर्भादश्वत्थादरणी आहर्तव्ये। श्रूयते हि—'शमीगर्भादग्निं मन्थन्ति' (तै. ब्रा. १.१.९) इति। अपि च [v]पूर्वैः पुरातनैः [v]पुत्रः। पुत्रान्नो नरकात् त्राता। यद्वा। पुत्रस्थानीयोऽग्निः। [v]पित्रोः जनयित्र्योररण्योः सकाशात् [v]यत् यदा [v]जनिष्ट मथनेन प्रादुर्भवति तदानीं [v]गौः पृथिवी तयोररण्योर्मातृभूतां [v]शम्याम् अश्वत्थगर्भां तां शमीम्। 'सुपां सुलुक्' इति सुपो ङ्यादेशः। [v]जगार उद्गिरति। [v]यद्ध यां खलु शमीं [v]पृच्छान् ऋत्विजः पृच्छन्ति वीप्सन्ति गवेषयन्ति ॥

उत कण्वं नृषदः पुत्रमाहुरुत श्यावो धनमादत्त वाजी ।
प्र कृष्णाय रुशदपिन्वतोधर्ऋतमत्र नकिरस्मा अपीपेत् ॥ ११ ॥

उत । कण्वम् । नृऽसदः । पुत्रम् । आहुः । उत । श्यावः । धनम् । आ । अदत्त । वाजी ।
प्र । कृष्णाय । रुशत् । अपिन्वत । ऊधः । ऋतम् । अत्र । नकिः । अस्मै । अपीपेत् ॥ ११ ॥

[v]उत अपि च [v]कण्वम् ऋषिं [v]नृषदः [v]पुत्रमाहुः वेदवादिनो वदन्ति। [v]उत अपि च [v]वाजी हविर्लक्षणान्नवान् कण्वः [v]श्यावः श्यामवर्णः सवस्मादग्नेः सकाशात् [v]धनमादत्त अगृह्णात्। [v]कृष्णाय श्यामवर्णाय नार्षदाय कण्वायाग्नेः [v]ऊधः [v]रुशत् रोचमानरूपं [v]प्र [v]अपिन्वत प्रासिञ्चत्। [v]अत्र इत्थमग्निव्यतिरिक्तः कश्चिदपि देवः [v]अस्मै कण्वाय [v]ऋतं यज्ञं [v]नकिः [v]अपीपेत् नावर्धयत्। 'युवं श्यावाय रुशतीमदत्तम्' (ऋ. सं. १. ११७. ८) इत्युक्तम् ॥ ॥ २८ ॥

'प्र सु ग्मन्ता' इति नवर्चं तृतीयं सूक्तम्। आदितः पञ्च जगत्यः। अथ चतस्रस्त्रिष्टुभः। पूर्ववदग्निदेवते। तथा चानुक्रान्तं—'प्र सु ग्मन्ता नव पञ्चाद्या जगत्यः' इति। गतो विनियोगः ॥

प्र सु ग्मन्ता धियसानस्य सक्षणिं वरेभिर्वरॉं अभि षु प्रसीदतः ।
अस्माकमिन्द्रं उभयं जुजोषति यत्सोम्यस्यान्धसो बुबोधति ॥ १ ॥

प्र । सु । ग्मन्ता । धियसानस्य । सक्षणिं । वरेभिः । वरान् । अभि । सु । प्रऽसीदतः ।
अस्माकम् । इन्द्रः । उभयम् । जुजोषति । यत् । सोम्यस्य । अन्धसः । बुबोधति ॥ १ ॥

इन्द्रः स्वभूतौ हरी [v]धियसानस्य इन्द्रागमनं चिन्तयतो यजमानस्य मम संबन्धिनि [v]सक्षणिं सेवायां सहुणके[1] सेव्ये यज्ञे निमित्ते [v]ग्मन्ता आगच्छन्तौ [v]सु सुष्ठु प्रेरयति। ततः स इन्द्रः

१. त-भ६-सु-मद्रुणके; त३-तद्रुणके ।

[v]वरेभिः वरणीयैर्मार्गैः [v]प्रसीदतः हविरासादयतो यजमानस्य [v]वरान् उत्कृष्टान् हविर्विशेषान् स्तुतिविशेषांश्च [v]अभि लक्षीकृत्य [v]सु[1] सुष्ठु आगच्छतु। [v]इन्द्रः आगतः सन् [v]अस्माकं स्वभूतम् [v]उभयं हविश्च स्तुतिश्चेत्येतद्द्वयं [v]जुजोषति सेवताम्। भक्षयतु शृणोतु वेत्यर्थः। [v]यत् यदा [v]सोम्यस्य सोमसंपादिनो मम [v]अन्धसः अन्नरूपस्य सोमस्य[1] रसमिति शेषः। [v]जुजोषति बुध्यते जिह्वया विजानाति। सोमं पिबतीत्यर्थः। तदा जुजोषतीति पूर्वेण संबन्धः॥

वीन्द्र यासि दिव्यानि रोचना वि पार्थिवानि रजसा पुरुष्टुत।
ये त्वा वहन्ति मुहुरध्वराँ उप ते सु वन्वन्तु वग्वनाँ अराधसः॥ २॥

वि। इन्द्र। यासि। दिव्यानि। रोचना। वि। पार्थिवानि। रजसा। पुरुऽस्तुत।
ये। त्वा। वहन्ति। मुहुः। अध्वरान्। उप। ते। सु। वन्वन्तु। वग्वनान्। अराधसः॥ २॥

हे [v]इन्द्र [v]दिव्यानि दिवि भवानि [v]रोचना रोचनानि दीप्तिस्वभावकानि ज्योतींषि यद्वा दिव्यांल्लोकान् [v]वि [v]यासि व्याप्नोषि। हे [v]पुरुष्टुत बहुभिः स्तुतेन्द्र [v]पार्थिवानि पृथिव्यां भवानि [v]रजसा आत्मीयेन ज्योतिषा विद्युल्लक्षणेन। यद्वा। रजःशब्दाच्छस आकारः। पार्थिवांल्लोकान्। व्याप्नोषि। [v]ये त्वदीया अश्वाः [v]मुहुः पुनःपुनः [v]अध्वरान् अस्मदीयान् यज्ञान् प्रति [v]त्वा त्वाम् [v]उप[2] [v]वहन्ति समीपे प्रापयन्ति [v]ते अश्वाः [v]वग्वनान् वचनेन स्तुत्या संभक्तॄन् [v]अराधसः धनरहितानस्मान् [v]सु[3] सुष्ठु [v]वन्वन्तु धनप्रदानार्थं संभजन्ताम्॥

तदिन्मे छन्त्सद्वपुषो वपुष्टरं पुत्रो यज्जानं पित्रोरधीयति।
जाया पतिं वहति वग्नुना सुमत्पुंस इद्भद्रो वहतुः परिष्कृतः॥ ३॥

तत्। इत्। मे। छन्त्सत्। वपुषः। वपुःऽतरम्। पुत्रः। यत्। जानम्। पित्रोः। अधिऽइयति।
जाया। पतिम्। वहति। वग्नुना। सुऽमत्। पुंसः। इत्। भद्रः। वहतुः। परिऽकृतः॥३॥

[v]वपुषः। वपुः रूपम्। तद्वाञ्छब्द्यते। वपुष्मतोऽपि [v]वपुष्टरं रूपवत्तरमत्यन्तं सुरूपं [v]तत् यज्ञकर्म [v]मे मह्यं [v]छन्त्सत् इन्द्रः कामयताम्। [v]यत् यदा [v]पुत्रः [v]जानं जन्म आत्मन उत्पत्तिं [v]पित्रोः मातापित्रोः सकाशात् [v]अधीयति संकीर्तनद्वारेणाधिगच्छति। सुब्रह्मण्याह्वानकालेऽमुकशर्मणः पुत्रो यजत इत्यात्मनो जन्म संकीर्तयति। यद्वा। यज्जननादागतं धनं पित्रोः सकाशात्पुत्रोऽधिगच्छति तदेव मह्यमिच्छतु। [v]जाया पत्नी [v]पतिं यजमानं [v]सुमत् कल्याणेन [v]वग्नुना वाङ्मयेन शब्देन [v]वहति आत्मसमीपं प्रापयति। [v]भद्रः भजनीयः [v]परिष्कृतः सुसंस्कृतः[4] [v]पुंस [v]इत्[5] पत्युरेवेत्यर्थः। [v]वहतुः जायायै प्रदातव्यः। तदुक्तं—'सुभद्रमर्य भोजनं बिभर्षि' (ऋ. सं. ८. १. ३४) इति। यद्वा। पुंसोऽतिशूरस्येन्द्रस्यार्थाय भद्रो भजनीयो वहतुर्वहनशीलो देवान् प्रति स सोमः परिष्कृतः संस्कृतो भवति। तदेन्द्रः कामयतामित्यर्थः॥

तदित्सधस्थमभि चारु दीधय गावो यच्छासन्वहतुं न धेनवः।
मातेव यन्मन्तुर्यूथस्य पूर्व्याभि वाणस्य सप्तधातुरृञ्जनः॥ ४॥

---

१. त-भ१.२.४-मु-'सु' नास्ति। २. त-भ-मु-उपा। ३. त-भ१.२.४-मु-'सु' नास्ति। ४. ग-त-भ२.५-६-मु-संस्कृतः। ५. ग-त-भ१.२.४.७-मु-इत् पुंसः।

ऋ. ४-२५

तत् । इत् । सधऽस्थम् । अभि । चारु । दीधय । गावः । यत् । शासन् । वहतुम् । न । धेनवः ।
माता । यत् । मन्तुः । युथस्य । पूर्व्या । अभि । वाणस्य । ससऽधातुः । इत् । जनः ॥ ४॥

vतदित् तदेव vसधस्थम् । सह तिष्ठन्त्यत्रेति सधस्थं स्थानं यज्ञात्यम् । vचारु शोभनम् vअभि vदीधय हे इन्द्र अभितो दीप्यस्व । vयत् यत्र vगावः स्तुतिलक्षणा वाचः इन्द्र आगच्छ हरिव आगच्छ इत्येवमाद्याः vशासन् अस्मद्यज्ञं प्रति त्वदागमनमाशासते । तत्र दृष्टान्तः । vवहतुं vन vधेनवः[1] । यथा धेनवो नवप्रसूता गावः प्रापणसाधनं गृहमाशासते तद्वत् । यत आगत्य प्रकाशयेत्यत्र कारणमाह । vयत् यस्मात् vमन्तुः । मन्यतिरर्चतिकर्मा । अर्चकस्य मम स्वभूता[2] vमाता देवतागुणानां[2] निष्पादयित्री स्तुतिः vयूथस्य यष्टृस्तोतृगणस्य vपूर्व्या प्रथमभाविनी खलु । यस्माच्च vससधातुः । धार्यन्ते क्रियन्ते कर्माण्येष्विति धातवश्छन्दांस्यृतवो वा । ससच्छन्दस्कः ससर्तुकः ससहोत्रात्मको वायं vजनः vवाणस्य स्तुतिशब्दस्य vअभि कर्ता खलु । तस्माच्छीघ्रमागच्छेति भावः । यद्वा । यत्कल्याणं[3] तदेव स्थानमस्माकमभिधारय प्रयच्छ । यस्मिन् स्थाने धेनवः पयःप्रदानेन प्रीणयित्र्यो गावो वहतुम् । उह्यते पुरुषोऽनेनेति वहतुरश्वम् । पथोधृताधनुशासति । न संप्रत्यर्थे । इदानीं प्रयच्छन्ति । तथा यस्मिन् मन्तुर्मन्तव्या पूजनीया पुत्रसमूहस्य माताभिगच्छति वाणस्य वाचस्य ससधातुर्निषादादिससस्वरोपेतो जनोऽभिगच्छति तद्वत्तद्गुणोपेतं प्रयच्छेति[4] भावः ॥

प्र वोऽच्छा रिरिचे देवयुष्पदमेको रुद्रेभिर्याति तुर्वणिः ।
जरा वा येष्वमृतेषु दावने परि व ऊमेभ्यः सिञ्चता मधु ॥ ५ ॥

प्र । वः । अच्छ । रिरिचे । देवऽयुः । पदम् । एकः । रुद्रेभिः । याति । तुर्वणिः ।
जरा । वा । येषु । अमृतेषु । दावने । परि । वः । ऊमेभ्यः । सिञ्चत । मधु ॥ ५ ॥

हे यजमानाः vदेवयुः देवान् कामयमानो होता vवः युष्माकं vपदम् vअच्छ स्थानं प्रति vप्र vरिरिचे प्रतिरिक्तोऽभूत्[5] । अथ[6] होतृभ्यः[6] सकाशात् vएकः मुख्य इन्द्रः vरुद्रेभिः रुद्रपुत्रैः मरुद्भिः सह vतुर्वणिः क्षिप्रगामी सन् vयाति गच्छति युष्मदीयं यज्ञम् । vजरा vवा । वाशब्दोऽप्यर्थे । स्तुतिरपि vयेष्वमृतेषु मरणधर्मरहितेषु देवेषु vदावने धनप्रदानाय समर्था भवति । तस्मात् vवः यूयम् । छान्दसो वसादेशः । vऊमेभ्यः रक्षितृभ्यो देवेभ्यः vमधु मदकरं सोममग्निः vपरि vसिञ्चत ॥ ॥ २९ ॥

निधीयमानमपगूळ्हमप्सु प्र मे देवानां व्रतपा उवाच ।
इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ॥ ६ ॥

निऽधीयमानम् । अपऽगूळ्हम् । अप्ऽसु । प्र । मे । देवानाम् । व्रतऽपाः । उवाच ।
इन्द्रः । विद्वान् । अनु । हि । त्वा । चचक्ष । तेन । अहम् । अग्ने । अनुऽशिष्टः । आ । अगाम् ॥ ६ ॥

१. ग-त-म-सु-'धेनवः' नास्ति । २. ग-स्वभूतानां माता देवतागुणानां; त१.२.५.६.७-म६-स्वभूता नानादेवतागणानां; त३.४-स्वभूता नानादेवतागुणानां; म१.२.४.७-स्वभूतानां देवतागुणानां । ३. त-म१.२.४.६-कल्याणं । ४. ग-त३-म५.६-गृहं प्रयच्छेति । ५. त-प्रतिरिक्तोभूत् । ६. त-म२.४.६-अन्यहोतृभ्यः; म१.४-अन्यहोतृभ्यः ।

कुरुश्रवणस्य यज्ञे निधीयमानोऽग्निरभिधीयते। vनिधीयमानम् अध्वर्युणाहवनीयेऽग्नौ vअप्सु मातृभूतासु vअपगूळ्हम् अन्तर्हितं त्वां vदेवानां vव्रतपाः कर्मणो रक्षक इन्द्रः vमे मह्यं vप्र vऽवाच। प्रावादीत्। हे vअग्ने vविद्वान् जानानः vइन्द्रः स्वाधिकारमस्मद्रक्षकतां वा vत्वा त्वाम् vअनु vहि vचचक्ष अनुगतः पश्चादवर्शं। vतेन इन्द्रेण vअनुशिष्टः vअहम् अमेन पथा त्वया स्वर्गो गन्तव्य इत्येवमुपदिष्टः सन् vआगाम् आभिमुख्येन स्वर्गं[1] गच्छेयम् ॥

अक्षेत्रवित्क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः।
एतद्वै भद्रमनुशासनस्योत श्रुतिं विन्दत्यञ्जसीनाम् ॥ ७॥

अक्षेत्रऽवित्। क्षेत्रऽविदम्। हि। अप्राट्। सः। प्र। एति। क्षेत्रऽविदा। अनुऽशिष्टः। एतत्। वै। भद्रम्। अनुऽशासनस्य। उत। श्रुतिम्। विन्दति। अञ्जसीनाम् ॥ ७ ॥

सेयमनुशासनस्तुतिः प्रासङ्गिकी। vअक्षेत्रवित्। 'क्षि निवासगत्योः'। क्षीयते गम्यतेऽनेनेति क्षेत्रं पन्थाः। पन्थानमजानन् पुरुषः vक्षेत्रविदं क्षेत्रज्ञं[2] पुरुषम् vअप्राट् पृष्टवान्। vसः[2] vक्षेत्रविदा पथिज्ञेन तेन vअनुशिष्टः प्रदर्शितमार्गः सन् vप्रैति स्वाभिलषितं देशं गच्छति। vअनुशासनस्य मार्गोपदेशरूपस्य[3] vएतद्वै एतत्खलु vभद्रं भजनीयं कल्याणकरम्। किं तत्। vउत अपि च vअञ्जसीनाम् ऋजुना मार्गेण गन्तव्यानामपां vस्रुतिं मार्गं पिपासितः सन् vविन्दति लभते। यद्वा। अञ्जसीनामिति स्रुतेर्विशेषणम्। ऋजुमकुटिलमप्रयासेन गन्तव्यं मार्गं लभते खलु ॥

अद्येदु प्राणीदमम्निमाहापीवृतो अधयन्मातुरूधः।
एमेनमाप जरिमा युवानमहेळन्वसुः सुमना बभूव ॥ ८ ॥

अद्य। इत्। ऊँ इति। प्र। आनीत्। अमम्न्। इमा। अहा। अपीऽवृतः। अधयत्। मातुः। ऊधः। आ। ईम्। एनम्। आप। जरिमा। युवानम्। अहेळन्। वसुः। सुऽमनाः। बभुव ॥ ८॥

अयमग्निः vअद्येत् अद्यैवास्मिन्दिने vप्राणीत् मथनेन चेष्टितोऽभवत्। 'श्वस प्राणने अन च' इति धातुः। तदानीमेव vइमा इमानि vअहा अहानि सौमिकानि vअममन् नेतुममन्यत। 'मन ज्ञाने'। व्यत्ययेन श्लुः। तिङ उत्तरत्वादनिघातः। अपि च vअपीवृतः तेजोभिः परिवृतः सन् vमातुः पृथिव्याः vऊधः सारभूतं सोमादिकं हविः vअधयत् पिबति। तथा vयुवानं नित्यतरुणं देवानां हविषा मिश्रयन्तं वा vएनम् अग्निं vजरिमा। जरतिः स्तुतिकर्मा। तस्मादौणादिक इमनिच्। स्तोतृभिः क्रियमाणा स्तुतिः vआप आभिमुख्येन व्याप्नोति। vईम् इति पूरणः। ततः vअहेळन् अक्रुध्यन् स्तोतृम्प्रति vवसुः वासयिता सर्वेषां धनदानेनाच्छादयिता तेजोभिः शत्रूणां वा वसुमान् वाग्निः vसुमनाः शोभनमनस्को vबभूव ॥

---

१. त–'स्वर्गं' नास्ति। २. ग–पथिज्ञं हि यस्मात् अप्राट् पृच्छति। प्रच्छ ज्ञीप्सायां। स च पृष्टोभिगंतव्यमनेन मार्गेणेति वदति ततः पुरुषः; त–क्षेत्रज्ञं पुरुषमप्राट् पृष्टवान्; त३-भ५.६–पथिज्ञं हि यस्मात् अप्राट् पृच्छति। प्रच्छ ज्ञीप्सायां। स च कदाभिगंतव्यमानेन मार्गेण इति ततः स पुरुषः; म१.२.४.७–'क्षेत्रज्ञं...सः' नास्ति। ३. त–सर्गोपदेशरूपस्य।

एतानि भद्रा कलश क्रियाम कुरुश्रवण ददतो मघानि ।
दानः इद्वो मघवानः सो अस्त्वयं च सोमो हृदि यं बिभर्मि ॥ ९ ॥

एतानि । भद्रा । कलश । क्रियाम । कुरुऽश्रवण । ददतः । मघानि ।
दानः । इत् । वः । मघऽवानः । सः । अस्तु । अयम् । च । सोमः । हृदि । यम् । बिभर्मि ॥९॥

हे ᵛकलश कलावन् सर्वकलापरिपूर्ण । यद्वा । लुप्तमत्वर्थीयः । द्रोणकलशवन् हे ᵛकुरुश्रवण । कुरव ऋत्विजः । तेषां स्वभूतानां स्तुतीनां श्रोतर्हे इन्द्र ᵛमघानि धनानि स्तोतृभ्यो यष्टृभ्यश्च ᵛददतः प्रयच्छतस्तवेन्द्रस्यार्थम् ᵛएतानि ᵛभद्रा भजनीयानि हवींषि स्तोत्राणि च ᵛक्रियाम विधेयास्म । करोतेराशीर्लिङि ' रिङ्शयग्लिङ्क्षु ' (पा. सू. ७. ४. २८) इति रिङादेशः । अथ स्तोतॄन्प्रत्याह । हे ᵛमघवानः महनीयस्तोत्ररूपधनवन्तः ᵛवः युष्माकं ᵛसः इन्द्रः ᵛदान ᵛइत् धनादेर्दातैव ᵛअस्तु भवतु । ᵛअयं ᵛच यज्ञे स्थितः ᵛसोमः दातास्तु हृदय आत्मीये ᵛयं पीतं सोमं ᵛबिभर्मि धारयामि । ' डुभृञ् धारणपोषणयोः ' । जौहोत्यादिकः । ' भृञामित् ' इत्यभ्यासस्येत्वम् । यद्योगादनिघातः । यद्वा । हे कलशकुलजात हे कुरुश्रवणैतन्नामक त्रसदस्योः पुत्र राजन् ऋत्विग्भ्यो धनानि प्रयच्छतः तवेन्द्रार्थं वयं कर्माणि क्रियाम । मघवानः[1] कुरुश्रवणाः । पूजायां बहुवचनम् । एवं यागकर्म कुर्वाणस्य तवेन्द्रो दाता भवतु । अयं सोमश्च धनानि प्रयच्छतु ॥ ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्य-
धुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश
ऋक्संहिताभाष्ये सप्तमाष्टके सप्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथाष्टमोऽध्याय आरभ्यते । तत्र ' प्र मा ' इति नवर्चं चतुर्थं सूक्तमैलूषस्य कवषस्यार्षम् । आद्या त्रिष्टुप् सा च वैश्वदेवी । द्वितीयातृतीये बृहतीसतोबृहत्यौ ऐन्द्र्यौ । पराः षड्गायत्र्यः । ' कुरुश्रवणमावृणि ' इति द्वाभ्यां त्रसदस्युपुत्रस्य कुरुश्रवणनाम्नो राज्ञो दानं तुष्टाव । अतस्तद्देवताके । अथ ' यस्य प्रस्वादसः ' इत्यादिभिश्चतसृभिर्मित्रातिथिनाम्नि राज्ञि परलोकं गते शोकाभिभूतं तस्य पुत्रमुपश्रवोनामानं कवष ऋषिः स्नेहवशादभिगत्य विगतशोकमकरोत् । अतस्तासां तद्देवतात्वम् । तथा चानुक्रान्तं—' प्र माद्या वैश्वदेव्यैन्द्रः प्रगाथः परा गायत्र्यो द्वे कुरुश्रवणस्य त्रासदस्यवस्य दानस्तुतिः पराभिसृते मित्रातिथौ राज्ञि तत्स्नेहाद्विरुपमश्वसं पुत्रमस्य व्यशोकयत् ' इति । गतो विनियोगः ॥

प्र मा युयुज्रे प्रयुजो जनानां वहामि स्म पूषणमन्तरेण ।
विश्वे देवासो अध मामरक्षन् दुःशासुरागादिति घोष आसीत् ॥ १ ॥

---

१. त—' मघवानः ' नास्ति ।

प्र । मा । युयुज्रे । प्रऽयुजः । जनानाम् । वहामि । स्म । पूषणम् । अन्तरेण ।
विश्वे । देवासः । अध । माम् । अरक्षन् । दुःऽशासुः । आ । अगात् । इति । घोषः । आसीत् ॥१॥

[v]जनानां यजमानानां [v]प्रयुजः प्रयोक्तारो देवाः [v]मा मां कवषमृषिं [v]प्र [v]युयुज्रे कुत्सश्रवणं प्रति युक्तवन्तः । [v]अन्तरेण मार्गे [v]पूषणं देवम् अध्वनां पतिं सखायमहं [v]वहामि [v]स्म ऊढवानस्मि । तथा श्रूयते—'ऐन्द्राग्नमेकादशकपालं निर्वपेज्जनतामेष्यन्' इत्युपक्रम्य 'पौष्णं चरुमनु निर्वपेत्' (तै. सं. २.२.१.४) इति । [v]अध[1] अथ मार्गे [v]विश्वे देवाः [v]मां कवषम् [v]अरक्षन् रक्षितवन्तः । [v]दुःशासुः केनापि दुःशासनोऽयमृषिः [v]आगात् आगच्छति [v]इति [v]घोषः शब्दश्च मार्गे [v]आसीत् अभूत् ॥

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः ।
नि बाधते अमतिर्न्ग्नता जसुर्वेर्न वेवीयते मतिः ॥ २ ॥

सम् । मा । तपन्ति । अभितः । सपत्नीःऽइव । पर्शवः ।
नि । बाधते । अमतिः । नग्नता । जसुः । वेः । न । वेवीयते । मतिः ॥ २ ॥

[v]मा मां देवताप्रसादरहितं कवषं [v]पर्शवः पार्श्वास्थीनि अन्नाभावादौर्बल्यात् कुशयनाच्च[2] [v]सपत्नीरिव यथा सपत्न्यस्तद्वत् [v]अभितः उभयतः [v]सं [v]तपन्ति दुःखयन्तीत्यर्थः । किंच [v]अमतिः दारिद्र्यादागता दुर्मतिः सर्वार्थविषया सा[3] मां[3] [v]नि [v]बाधते मां पीडयति । वस्त्राभावादागता [v]नग्नता च मां नि बाधते । [v]जसुः अशनाभावादागत उपक्षयोऽपि मां नि बाधते । किंच [v]वेर्न यथा पक्षिणः मतिः शाकुनिकव्याधभयात्[4] कम्पयते तथा मे [v]मतिः शत्रोः [v]वेवीयते भृशं कम्पयते ॥

मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो ।
सकृत्सु नो मघवन्निन्द्र मृळयाधा पितेव नो भव ॥ ३ ॥

मूषः । न । शिश्ना । वि । अदन्ति । मा । आऽध्यः । स्तोतारम् । ते । शतक्रतो इति शतऽक्रतो ।
सकृत् । सु । नः । मघऽवन् । इन्द्र । मृळय । अध । पिताऽइव । नः । भव ॥ ३ ॥

हे [v]शतक्रतो बहुकर्मन् [v]मघवन् धनवंश्च[5] [v]इन्द्र [v]ते तव [v]स्तोतारं [v]मा मां कवषम् [v]आध्यः आधयः [v]मूषो [v]न यथा मूषिकाः [v]शिश्ना आस्नातानि सूत्राणि अश्नन्ति तथा [v]व्यदन्ति विविधमदन्ति । तथा च यास्कः—'संतपन्ति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्नातानि सूत्राणि व्यदन्ति । स्वाङ्गाभिधानं वा[6] स्याच्छिश्नानि व्यदन्तीति[7]। संतपन्ति माध्यः कामाः' (निरु. ४. ६) इति । तथा च सति [v]नः अस्मान् [v]सकृत् [v]सु [v]मृळय अभीष्टप्रदानेन सम्यक् सुखय । [v]अध अथ [v]नः अस्माकं [v]पितेव यथा पिता तद्वद्रक्षिता [v]भव ॥

कुरुश्रवणमावृणि राजानं त्रासदस्यवम् । मंहिष्ठं वाघतामृषिः ॥ ४ ॥

कुरुऽश्रवणम् । अवृणि । राजानम् । त्रासदस्यवम् । मंहिष्ठम् । वाघताम् । ऋषिः ॥ ४ ॥

---

१. त-म६-'अध' नास्ति । २. उद्गीथ-कुशशयनाच्च । ३. त-म६-रसा; म१.२.७-सं मा; म२-सरसा । ४. त१.२.५.६.७-°व्याधि°; उद्गीथ-°व्यधादि° । ५. त-'धनवंश्च' नास्ति; म१.४.६-धनवन् । ६. त-'वा' नास्ति । ७. त-म-व्यदंतीति वा ।

vऋषिः अतीन्द्रियार्थद्रष्टा कवषोऽहं vत्रासदस्यवं त्रसदस्योः पुत्रं vमंहिष्ठं धनानामतिशयेन दातारं vकुरुश्रवणम्। कुरव ऋत्विजः। तदीयानां स्तुतीनां श्रोतारं कुरुश्रवणं तन्नामकं vराजानं vयाचताम् ऋत्विजामर्थाय vअवृणि धनानि प्रार्थये ॥

यस्य मा हरितो रथे तिस्रो वहन्ति साधुया। स्तवै सहस्रदक्षिणे ॥ ५ ॥

यस्य। मा। हरितः। रथे। तिस्रः। वहन्ति। साधुऽया। स्तवै। सहस्रऽदक्षिणे ॥ ५ ॥

vयस्य कुरुश्रवणाख्यस्य राज्ञः स्वभूताः vतिस्रः vहरितः त्रयोऽश्वाः vरथे प्रस्थिते vमा मां कवषं vसाधुया साधु vवहन्ति कुरुश्रवणं राजानमहं vसहस्रदक्षिणे अस्मिन् यागे vस्तवै स्तौमि। प्रष्टिवाहिनं रथं परिगृह्य ऋषिराशास्ते ॥ ॥ १ ॥

अतः परं ' यस्य ' इत्यादिकेन सूक्तशेषेण मित्रातिथौ राज्ञि मृते तत्पुत्रस्योपमश्रवसः[1] समीपमागत्य कवषः स्नेहाच्छोकं निवारयति ॥

यस्य प्रस्वादसो गिरं उपमश्रवसः पितुः। क्षेत्रं न रण्वमूचुषे ॥ ६ ॥

यस्य। प्रऽस्वादसः। गिरः। उपमऽश्रवसः। पितुः। क्षेत्रम्। न। रण्वम्। ऊचुषे ॥ ६ ॥

हे राजन् vउपमश्रवसः[2] तव vपितुः vयस्य मित्रातिथेः vगिरः वाचः vप्रस्वादसः प्रकर्षेण स्वादयित्र्यः। तत्र दृष्टान्तः। vऊचुषे सेवमानाय दरिद्राय दानार्थं प्रकल्पितं vरण्वं रमणीयं vक्षेत्रं vन यथा क्षेत्रं स्वादयितृ[3] तद्वदित्यर्थः। उत्तरत्र संबन्धः ॥

अधि पुत्रोपमश्रवो नपान्मित्रातिथेरिहि। पितुष्टे अस्मि वन्दिता ॥ ७ ॥

अधि। पुत्र। उपमऽश्रवः। नपात्। मित्रऽअतिथेः। इहि। पितुः। ते। अस्मि। वन्दिता ॥ ७ ॥

हे vपुत्र vउपमश्रवः vमित्रातिथेः vनपात् पुत्र त्वम् vअधि vइहि मत्समीपमागच्छ। vते तव vपितुः तस्य मित्रातिथेरहं vवन्दिता स्तोता vअस्मि। एतज्ज्ञात्वा शोकं मा कुरु। यदेयं द्रव्यमस्ति तत्सर्वं मह्यं देहि ॥

यदीशीयामृतानामुत वा मर्त्यानाम्। जीवेदिन्मघवा मम ॥ ८ ॥

यत्। ईशीय। अमृतानाम्। उत। वा। मर्त्यानाम्। जीवेत्। इत्। मघऽवा। मम ॥ ८ ॥

vउत अपि च vयत् यदि vअमृतानां देवानां vमर्त्यानां मनुष्याणां vवा मरणहेतूनाम् vईशीय अहमीश्वरः स्यां तर्हि[4] vमम कवषस्य वाग्यः vमघवा धनवान् मित्रातिथी राजा vजीवेत् प्राणान् धारयेत्। तथा च नाहं मरणहेतोरीश्वरः तस्मादयं राजा मृत इत्यर्थः ॥

न देवानामति व्रतं शतात्मा चन जीवति। तथा युजा वि वावृते ॥ ९ ॥

न। देवानाम्। अति। व्रतम्। शतऽआत्मा। चन। जीवति। तथा। युजा। वि। ववृते ॥ ९ ॥

vदेवानां ब्रह्मादीनां vव्रतं मर्यादालक्षणं कर्म vअति[5] अतिक्रम्य vशतात्मा vचन शतसंवत्सरः कश्चन vन vजीवति। vतथा vयुजा सहायादिना vवि vववृते विवर्तते वियुक्तो भवतीति ज्ञात्वा शोकं मा कुर्वित्यर्थः ॥ ॥ २ ॥

---

१. त-म६-°स्योपश्रवसः। २. त-उपश्रवसः। ३. त-मु-स्वदयितृ। ४. त-तस्य। ५. त-म६-मु-' अति ' नास्ति।

'प्रावेपाः' इति चतुर्दशर्चं पञ्चमं सूक्तमैलूषस्य कवषस्यार्षं मुजवतः पुत्रस्याक्षाख्यस्य वा। सप्तमी जगती शिष्टाक्षयोदश त्रिष्टुभः। अत्र द्वादशी अक्षान् स्तौति नवम्याद्या च सप्तमी। अतस्ताः तद्देवत्याः। त्रयोदशी कृषिं स्तौति। अतस्तस्याः सा देवता। एवं पञ्च गताः। शिष्टाभिर्नवभिः कितवोऽक्षाश्च निन्द्यन्ते। अतस्ता अपि तद्देवत्याः। तथा चानुक्रान्तं—'प्रावेपाः चतुर्ना मौजवान्याक्षोऽक्षकृषिप्रशंसा चाक्षकितवनिन्दा च सप्तमी जगती' इति। गतो विनियोगः॥

प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः।
सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥ १ ॥

प्रावेपाः। मा। बृहतः। मादयन्ति। प्रवातेऽजाः। इरिणे। वर्वृतानाः।
सोमस्यऽइव। मौजऽवतस्य। भक्षः। विऽभीदकः। जागृविः। मह्यम्। अच्छान् ॥ १ ॥

[v]बृहतः महतो विभीतकस्य फलत्वेन संबन्धिनः [v]प्रवातेजाः प्रवणे देशे जाताः [v]इरिणे आस्कारे [v]वर्वृतानाः प्रवर्तमानाः [v]प्रावेपाः प्रवेपिणः कम्पनशीला अक्षाः [v]मा मां [v]मादयन्ति हर्षयन्ति। किंच [v]जागृविः जयपराजययोर्हर्षशोकाभ्यां कितवानां जागरणस्य कर्ता [v]विभीदकः विभीतकविकारोऽक्षो [v]मह्यं माम् [v]अच्छान् अत्यर्थं मादयति। तत्र दृष्टान्तः। [v]सोमस्येव यथा सोमस्य [v]मौजवतस्य। मुजवति पर्वते जातो मौजवतः। तस्य। तत्र ह्युत्तमः सोमो जायते। [v]भक्षः पानं यजमानान् देवांश्च मादयति तद्वदित्यर्थः। तथा च यास्कः—'प्रवेपिणो मा महतो विभीतकस्य फलानि मादयन्ति। प्रवातेजाः प्रवणेजा इरिणे वर्तमाना इरिणं निर्ऋणमृणातेरपार्णं भवत्यपरता अस्मादोषधय इति वा। सोमस्येव मौजवतस्य भक्षो मौजवतो मुजवति जातो मुजवान् पर्वतो मुञ्जवान् मुञ्जो विमुच्यत[1] इषीकयेषीकेषतेर्गतिकर्मण[1] इयमपीतरेषीकैतस्मादेव विभीतको विभेदनाज्जागृविर्जागरणान्मह्यमच्छदत्' (निरु. ९. ८) इति॥

न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत्।
अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम् ॥ २ ॥

न। मा। मिमेथ। न। जिहीळे। एषा। शिवा। सखिऽभ्यः। उत। मह्यम्। आसीत्।
अक्षस्य। अहम्। एकऽपरस्य। हेतोः। अनुऽव्रताम्। अप। जायाम्। अरोधम् ॥ २ ॥

[v]एषा अस्मदीया जाया[2] [v]मा मां कितवं [v]न [v]मिमेथ न च चुक्रोध [v]न [v]जिहीळे न च लज्जितवती। [v]सखिभ्यः अस्मदीयेभ्यः कितवेभ्यः [v]शिवा सुखकरी [v]आसीत् अभूत्। [v]उत अपि च [v]मह्यं शिवासीत्। इत्थम् [v]अनुव्रताम् अनुकूलां [v]जायाम् [v]एकपरस्य एकः परः प्रधानं यस्य तस्य [v]अक्षस्य [v]हेतोः कारणात् [v]अहम् [v]अप [v]अरोधं परित्यक्तवानस्मीत्यर्थः॥

द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम्।
अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम् ॥ ३ ॥

द्वेष्टि। श्वश्रूः। अप। जाया। रुणद्धि। न। नाथितः। विन्दते। मर्डितारम्।
अश्वस्यऽइव। जरतः। वस्न्यस्य। न। अहम्। विन्दामि। कितवस्य। भोगम् ॥ ३ ॥

---

१. त-मु-विमुंचतीषीकामिषीकैषते°; भ-विमुच्यतेषीकयेषीकेषते°। २. त-'जाया' नास्ति।

[v]अक्षूः जायाया माता गृहगतं कितवं [v]हेटि निन्दतीत्यर्थः। किंच [v]जाया भार्या [v]अप [v]रुणद्धि निरुणद्धि। अपि च [v]नाथितः याचमानः कितवो[1] धनं [v]मर्डितारं धनदानेन सुखयितारं [v]न [v]विन्दते न लभते। इत्थं बुद्ध्या विसृजन् [v]अहं [v]जरतः वृद्धस्य [v]वस्न्यस्य। वस्नं मूल्यम्। तदर्हस्य [v]अक्षस्येव [v]कितवस्य [v]भोगं [v]न [v]विन्दामि न लभे ॥

अन्ये जायां परि मृशन्त्यस्य यस्यागृधद्वेदने वाज्यक्षः।
पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतम् ॥ ४ ॥

अन्ये। जायाम्। परि। मृशन्ति। अस्य। यस्य। अगृधत्। वेदने। वाजी। अक्षः।
पिता। माता। भ्रातरः। एनम्। आहुः। न। जानीमः। नयत। बद्धम्। एतम् ॥ ४ ॥

[v]यस्य कितवस्य [v]वेदने धने [v]वाजी बलवान् [v]अक्षः देवः [v]अगृधत् अभिकाङ्क्षां करोति तस्य [v]अस्य कितवस्य [v]जायां भार्याम् [v]अन्ये प्रतिकितवाः [v]परि [v]मृशन्ति[2] वस्त्रकेशाद्याकर्षणेन संस्पृशन्ति। किंच [v]पिता[3] जननी च [v]भ्रातरः सहोदराश्च [v]एनं कितवम् [v]आहुः वदन्ति। [v]न वयमस्मदीयमेनं [v]जानीमः। रज्ज्वा [v]बद्धमेतं कितवं हे कितवाः यूयं [v]नयत यथेष्टदेशं प्रापयतेति ॥

यदादीध्ये न दविषाण्येभिः परायद्भ्योऽवं हीये सखिभ्यः।
न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव ॥ ५ ॥

यत्। आऽदीध्ये। न। दविषाणि। एभिः। परायत्ऽभ्यः। अवं। हीये। सखिभ्यः।
निऽउप्ताः। च। बभ्रवः। वाचम्। अक्रत। एमि। इत्। एषाम्। निःऽकृतम्। जारिणीऽइव ॥५॥

[v]यत् यदा अहम् [v]आदीध्ये ध्यायामि तदानीम् [v]एभिः अक्षैः [v]न [v]दविषाणि न दूषये न परितपामि। यद्वा। न दविषाणि न देविष्यामीत्यर्थः। [v]परायद्भ्यः स्वयमेव परागच्छद्भ्यः [v]सखिभ्यः[4] सखिभूतेभ्यः कितवेभ्यः [v]अव [v]हीये अवहितो भवामि। नाहं प्रथममक्षान् विसृजामीति। किंच [v]बभ्रवः बभ्रुवर्णा अक्षाः [v]न्युप्ताः कितवैरवक्षिप्ताः सन्तः [v]वाचमक्रत शब्दं कुर्वन्ति। तदा संकल्पं परित्यज्य अक्षव्यसनेनाभिभूयमानोऽहम् [v]एषाम् अक्षाणां [v]निष्कृतं स्थानं [v]जारिणीव यथा कामव्यसनेनाभिभूयमाना स्वैरिणी संकेतस्थानं याति तद्वत् [v]एमीत् गच्छाम्येव ॥ ॥ ३ ॥

सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा शूशुजानः।
अक्षासो अस्य वि तिरन्ति कामं प्रतिदीव्ने दधत आ कृतानि ॥ ६ ॥

सभाम्। एति। कितवः। पृच्छमानः। जेष्यामि। इति। तन्वा। शूशुजानः।
अक्षासः। अस्य। वि। तिरन्ति। कामम्। प्रतिऽदीव्ने। दधतः। आ। कृतानि ॥ ६ ॥

[v]तन्वा शरीरेण [v]शूशुजानः शोशुचानो दीप्यमानः [v]कितवः कोऽत्रास्ति धनिकस्तं [v]जेष्यामीति [v]पृच्छमानः पृच्छन् [v]सभां कितवसंबन्धिनीम् [v]एति गच्छति। तत्र [v]प्रतिदीव्ने प्रतिदेवित्रे कितवाय [v]कृतानि देवनोपयुक्तानि कर्माणि [v]आ [v]दधतः जयार्थमाभिमुख्येन मर्यादया वा दधतः [v]अस्य कितवस्य [v]कामम् इच्छाम् [v]अक्षासः अक्षाः [v]वि [v]तिरन्ति वर्धयन्ति ॥

---

१. ग-त-भ-'कितवो' नास्ति। २. त-भ६-मृजंति। ३. ग-पिता जनको माता। ४. त-भ६-'सखिभ्यः' नास्ति।

अक्षास इदङ्कुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः।
कुमारदेष्णा जयतः पुनर्हणो मध्वा संपृक्ताः कितवस्य बर्हणा ॥ ७ ॥

अक्षासः। इत्। अङ्कुशिनः। निऽतोदिनः। निऽकृत्वानः। तपनाः। तापयिष्णवः। कुमारऽदेष्णाः। जयतः। पुनःऽहनः। मध्वा। सम्ऽपृक्ताः। कितवस्य। बर्हणा ॥ ७ ॥

[v]अक्षास [v]इत् अक्षा एव [v]अङ्कुशिनः अङ्कुशवन्तः [v]नितोदिनः नितोदितवन्तश्च [v]निकृत्वानः पराजये निकर्तनशीलाश्छेत्तारो वा [v]तपनाः पराजये कितवस्य संतापकाः [v]तापयिष्णवः सर्वस्वहारकत्वेन कुटुम्बस्य संतापनशीलाश्च भवन्ति। किंच [v]जयतः [v]कितवस्य [v]कुमारदेष्णाः धनदानेन धान्यतां लम्भयन्तः कुमाराणां दातारो भवन्ति। अपि च [v]मध्वा मधुना [v]संपृक्ताः प्रतिकितवेन [v]बर्हणा परिवृद्धेन सर्वस्वहरणेन कितवस्य [v]पुनर्हणः पुनर्हन्तारो भवन्ति ॥

त्रिपञ्चाशः क्रीळति व्रात एषां देवइव सविता सत्यधर्मा।
उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इत्कृणोति ॥ ८ ॥

त्रिऽपञ्चाशः। क्रीळति। व्रातः। एषाम्। देवःऽइव। सविता। सत्यऽधर्मा।
उग्रस्य। चित्। मन्यवे। न। नमन्ते। राजा। चित्। एभ्यः। नमः। इत्। कृणोति ॥ ८ ॥

[v]एषाम् अक्षाणां [v]त्रिपञ्चाशः त्र्यधिकपञ्चाशत्संख्याकः [v]व्रातः संघः[1] [v]क्रीळति आस्फारे विहरति। अक्षिकाः प्रायेण तावद्भिरक्षैर्दीव्यन्ति हि। तत्र दृष्टान्तः। [v]सत्यधर्मा [v]सविता सर्वस्य जगतः प्रेरकः सूर्यो [v]देवइव। यथा सविता देवो जगति विहरति तद्वदक्षाणां संघ आस्फारे विहरतीत्यर्थः। किंच [v]उग्रस्य [v]चित् क्रूरस्यापि [v]मन्यवे क्रोधाय एते अक्षाः [v]न [v]नमन्ते न प्रह्वीभवन्ति। न वशे वर्तन्ते। तं[2] नमयन्तीत्यर्थः[2]। [v]राजा [v]चित् जगत ईश्वरोऽपि [v]एभ्यः[3] [v]नम [v]इत् नमस्कारमेव देवनवेलायां [v]कृणोति[4]। नावज्ञां करोतीत्यर्थः ॥

नीचा वर्तन्त उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते।
दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति ॥ ९ ॥

नीचा। वर्तन्ते। उपरि। स्फुरन्ति। अहस्तासः। हस्तऽवन्तम्। सहन्ते।
दिव्याः। अङ्गाराः। इरिणे। निऽउप्ताः। शीताः। सन्तः। हृदयम्। निः। दहन्ति ॥ ९ ॥

अपि चैतेऽक्षाः [v]नीचा नीचीनस्थले [v]वर्तन्ते। तथापि [v]उपरि पराजयात् भीतानां द्यूतकराणां कितवानां हृदयस्योपरि [v]स्फुरन्ति। [v]अहस्तासः हस्तरहिता अप्यक्षाः [v]हस्तवन्तं द्यूतकरं कितवं [v]सहन्ते पराजयकरणेनाभिभवन्ति। [v]दिव्याः दिवि भवा अपकृताः [v]अङ्गाराः अङ्गारसदृशा अक्षाः [v]इरिणे इन्धनरहिते आस्फारे [v]न्युप्ताः [v]शीताः शीतस्पर्शाः [v]सन्तः अपि [v]हृदयं कितवानामन्तःकरणं [v]निर्दहन्ति पराजयजनितसंतापेन भस्मीकुर्वन्ति ॥

१. त–'संघः' नास्ति। २. ग–तमपि जयंतीत्यर्थः; त१.२.५.६–तमयंतीत्यर्थः; त४–म१.२.४.७–तमपि यंतीत्यर्थः; त७–न नमयंतीत्यर्थः; म६–नमयंतीत्यर्थः। ३. ग–त४–म३.४–एभ्यः अक्षेभ्यः। ४. ग–म२.४–कृणोति करोति।

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥ १० ॥

जाया । तप्यते । कितवस्य । हीना । माता । पुत्रस्य । चरतः । क्व । स्वित् ।
ऋणऽवा । बिभ्यत् । धनम् । इच्छमानः । अन्येषाम् । अस्तम् । उप । नक्तम् । एति ॥ १० ॥

[v]क [v]स्वित् क्वापि [v]चरतः निर्वेदादुच्छृतः [v]कितवस्य [v]जाया भार्या [v]हीना परित्यक्ता सती [v]तप्यते वियोगजसंतापेन[1] संतप्ता भवति । [v]माता जनन्यपि [v]पुत्रस्य[2] क्वापि चरतः कितवस्य संबन्धाद्धीना[3] तप्यते । पुत्रशोकेन संतप्ता भवति । [v]ऋणावा अक्षपराजयाद्ऋणवान् कितवः सर्वतो [v]बिभ्यद्धनं स्तेयजनितम् [v]इच्छमानः कामयमानः [v]अन्येषां ब्राह्मणादीनाम् [v]अस्तं गृहम् । 'अस्तं पस्त्यम्' इति गृहनामसु पाठात् । [v]नक्तं रात्रौ [v]उप [v]एति चौर्यार्थमुपगच्छति ॥ ॥ ४ ॥

स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम् ।
पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरन्ते वृषलः पपाद ॥ ११ ॥

स्त्रियम् । दृष्ट्वाय । कितवम् । ततापं । अन्येषाम् । जायाम् । सुऽकृतम् । च । योनिम् ।
पूर्वाह्णे । अश्वान् । युयुजे । हि । बभ्रून् । सः । अग्नेः । अन्ते । वृषलः । पपाद ॥ ११ ॥

[v]कितवं कितवः । विभक्तिव्यत्ययः । [v]अन्येषां स्वव्यतिरिक्तानां पुरुषाणां [v]जायां जायाभूतां [v]स्त्रियं नारीं सुखेन वर्तमानां [v]सुकृतं सुष्ठु कृतं [v]योनिं गृहं [v]च[4] [v]दृष्ट्वाय मज्जाया दुःखिता गृहं चासंस्कृतमिति ज्ञात्वा [v]ततताप तप्यते । पुनः[5] [v]पूर्वाह्णे प्रातःकाले [v]बभ्रून् बभ्रुवर्णान् [v]अश्वान् व्यापकानक्षान् [v]युयुजे युनक्ति । पुनश्च [v]वृषलः वृषलकर्मा [v]सः कितवो रात्रौ [v]अग्नेरन्ते समीपे [v]पपाद शीतार्तः सन् शेते ॥

यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव ।
तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि ॥ १२ ॥

यः । वः । सेनाऽनीः । महतः । गणस्य । राजा । व्रातस्य । प्रथमः । बभूव ।
तस्मै । कृणोमि । न । धना । रुणध्मि । दश । अहम् । प्राचीः । तत् । ऋतम् । वदामि ॥ १२ ॥

हे अक्षाः [v]वः युष्माकं [v]महतो [v]गणस्य संघस्य [v]यः अक्षः [v]सेनानीः नेता [v]बभूव भवति [v]व्रातस्य च । गणव्रातयोरल्पो भेदः । [v]राजा ईश्वरः [v]प्रथमः मुख्यो बभूव [v]तस्मै अक्षाय [v]कृणोमि अहमञ्जलिं करोमि । अतः परं [v]धना धनानि अक्षार्थमहं [v]न [v]रुणध्मि न संपादयामीत्यर्थः । पुनरेव दर्शयति । [v]अहं [v]दश दशसंख्याका अङ्गुलीः [v]प्राचीः प्राङ्मुखीः करोमि । [v]तत् एतत् अहम् [v]ऋतं सत्यमेव [v]वदामि । नानृतं ब्रवीमीत्यर्थः ॥

अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः ।
तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥ १३ ॥

---

१. त-अ६-मु-वियोगसंतापेन । २. त-म-मु-पुत्रस्यापि । ३. ग-त-संबन्धिनी; भ-संबन्धीनी । ४. त-अ६-मु-'च' नास्ति । ५. त१.२.५.६.७-ततः; त४-अ६-ततः ।

अक्षैः । मा । दीव्यः । कृषिम् । इत् । कृषस्व । वित्ते । रमस्व । बहु । मन्यमानः ।
तत्र । गावः । कितव । तत्र । जाया । तत् । मे । वि । चष्टे । सविता । अयम् । अर्यः ॥१३॥

हे [v]कितव [v]बहु [v]मन्यमानः मद्वचने विश्वासं कुर्वंस्त्वम् [v]अक्षैर्मा [v]दीव्यः द्यूतं मा कुरु। [v]कृषिमित् कृषिमेव [v]कृषस्व कुरु। [v]वित्ते कृष्या संपादिते धने [v]रमस्व रतिं कुरु। [v]तत्र कृषौ [v]गावः भवन्ति। [v]तत्र [v]जाया भवति। [v]तत् एव धर्मरहस्यं श्रुतिस्मृतिकर्ता [v]सविता सर्वस्य प्रेरकः [v]अयं दृष्टिगोचरः [v]अर्यः ईश्वरः [v]वि [v]चष्टे विविधमाख्यातवान् ॥

मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु ।
नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥ १४ ॥

मित्रम् । कृणुध्वम् । खलु । मृळत । नः । मा । नः । घोरेण । चरत । अभि । धृष्णु ।
नि । वः । नु । मन्युः । विशताम् । अरातिः । अन्यः । बभ्रूणाम् । प्रऽसितौ । नु । अस्तु ॥१४॥

हे अक्षाः यूयं [v]मित्रं [v]कृणुध्वम् अस्मासु मैत्रीं कुरुत। [v]खलु इति पूरणः। [v]नः अस्मान् [v]मृळत सुखयत च। [v]नः अस्मान् [v]धृष्णु धृष्णुना। तृतीयार्थे प्रथमा। [v]घोरेण असह्येन [v]मा [v]अभि[1] [v]चरत मा गच्छत। किंच [v]वः युष्माकं [v]मन्युः क्रोधः [v]अरातिः अस्माकं शत्रुः [v]नि [v]विशताम् अस्मच्छत्रुषु तिष्ठतु। [v]अन्यः[2] अस्माकं[2] शत्रुः कश्चित् [v]बभ्रूणां बभ्रुवर्णानां युष्माकं [v]प्रसितौ प्रबन्धने [v]नु क्षिप्रम् [v]अस्तु भवतु ॥ ॥ ५ ॥

'अबुध्रम्' इति चतुर्दशर्चं षष्ठं सूक्तं धनाकपुत्रस्य लुशस्यार्षम्। इदमुत्तरं च वैश्वदेवम्। त्रयोदशीचतुर्दश्यौ त्रिष्टुभौ शिष्टा द्वादश जगत्यः। तथा चानुक्रान्तम्—'अबुध्रं लुशो धानाको वैश्वदेवं तु द्वित्रिष्टुबन्तं तु' इति। गतः सूक्तविनियोगः। एकादशिनस्य वैश्वदेवस्य पशोर्वपाधागस्यानुवाक्या 'विश्वे अद्य' इत्येषा। सूत्रितं च—'विश्वे अद्य मरुतो विश्व ऊत्या नो देवानामुप वेतु शंसः' (आश्व. श्रौ. ३. ७) इति ॥

अबुध्रमु त्य इन्द्रवन्तो अग्नयो ज्योतिर्भरन्त उषसो व्युष्टिषु ।
महो द्यावापृथिवी चेततामपोऽद्या देवानामव आ वृणीमहे ॥ १ ॥

अबुध्रम् । ऊँ इति । त्ये । इन्द्रऽवन्तः । अग्नयः । ज्योतिः । भरन्तः । उषसः । विऽउष्टिषु ।
महो इति । द्यावापृथिवी इति । चेतताम् । अपः । अद्य । देवानाम् । अवः । आ । वृणीमहे ॥१॥

[v]इन्द्रवन्तः यष्टव्यत्वेनेन्द्रसंबन्धिनः [v]त्ये ते अमी आहवनीयादयः[3] [v]अग्नयः [v]उषसो [v]व्युष्टिषु व्युच्छनेषु तमसां विवासनकालेषु [v]ज्योतिः तेजः [v]भरन्तः धारयन्तः [v]अबुध्रं प्रबुद्धा आसन्। [v]महो महत्यौ [v]द्यावापृथिवी द्यावापृथिव्यौ [v]अपः कर्म। 'अपोऽप्रः' इति कर्मनामसु पाठात्। [v]चेततां जानीताम्। [v]अद्य अस्मिन्नहनि [v]देवानाम् इन्द्रादीनाम् [v]अवः रक्षणं वयम् [v]आ [v]वृणीमहे ॥

दिवस्पृथिव्योरव आ वृणीमहे मातृन्तिस्रो धुन्पर्वताञ्छर्यणावतः ।
अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ॥ २ ॥

---

१. त-म-'अभि' नास्ति । २. त१.२.६-मु-नोस्माकमन्यः; त४.५.७-भ६-नोस्माकं । ३. त-वाहव°।

दिवःपृथिव्योः । अवः । आ । वृणीमहे । मातॄन् । सिन्धून् । पर्वतान् । शर्यणाऽवतः ।
अनागाःऽत्वम् । सूर्यम् । उषसम् । ईमहे । भद्रम् । सोमः । सुवानः । अद्य । कृणोतु । नः ॥ २ ॥

[v]दिवःपृथिव्योः द्यावापृथिव्योः कार्यत्वेन[1] संबन्धि [v]अवः रक्षणं धनम् [v]आ [v]वृणीमहे । किंच [v]मातॄन् लोकस्य निर्मातॄन् [v]सिन्धून् [v]शर्यणावतः सरसः संबन्धिनः [v]पर्वतान् शिलोच्चयांश्च तथा [v]सूर्यमुषसं च [v]अनागास्त्वं कर्मवैगुण्यजनितपापराहित्यम् [v]ईमहे वयं याचामहे । किंच [v]अद्य अस्मिन्नहनि [v]नः अस्माकं [v]सुवानः अभिषूयमाणः [v]सोमः [v]भद्रं कल्याणं [v]कृणोतु करोतु ॥

द्यावा नो अद्य पृथिवी अनागसो मही त्रायेतां सुवितायं मातरा ।
उषा उच्छन्त्यप बाधतामघं स्वस्त्यग्निं समिधानमीमहे ॥ ३ ॥

द्यावा । नः । अद्य । पृथिवी इति । अनागसः । मही इति । त्रायेताम् । सुवितायं । मातरा ।
उषाः । उच्छन्ती । अप । बाधताम् । अघम् । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ३ ॥

[v]मही महत्यौ [v]मातरा मातरौ सर्वस्य मातृभूते[2] [v]द्यावा [v]पृथिवी द्यावापृथिव्यौ [v]अद्य अस्मिन्नहनि [v]अनागसः अपराधरहितान् [v]नः अस्मान् [v]सुविताय सुखाय [v]त्रायेतां रक्षेताम्[3] । किंच [v]उच्छन्ती तमांसि विवासयन्ती [v]उषाः अस्माकम् [v]अघं पापम् [v]अप [v]बाधताम् अपनयतु । अपि च [v]समिधानं सम्यगदीप्यमानं [v]अग्निं [v]स्वस्ति सर्वप्रकाराविनाशम् [v]ईमहे वयं याचामहे ॥

इयं नं उषा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु ।
आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्यग्निं समिधानमीमहे ॥ ४ ॥

इयम् । नः । उषा । प्रथमा । सुऽदेव्यम् । रेवत् । सनिऽभ्यः । रेवती । वि । उच्छतु ।
आरे । मन्युम् । दुःऽविदत्रस्य । धीमहि । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ४ ॥

[v]रेवती धनवती [v]प्रथमा मुख्या [v]इयम् [v]उषा पापानामुत्सारिणी उषाः [v]सुदेव्यं शोभनदेवार्हं [v]रेवत् धनवत् प्रधानयागकालत्वं [v]सनिभ्यः भजमानेभ्यः [v]नः अस्मभ्यं प्रयच्छन्ती [v]व्युच्छतु तमांसि विवासयतु । किंच [v]दुर्विदत्रस्य दुर्धनस्य पुरुषस्य [v]मन्युं क्रोधम् [v]आरे दूरे [v]धीमहि निधीमहि । सिद्धमन्यत् ॥

प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरन्तीरुषसो व्युष्टिषु ।
भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्यग्निं समिधानमीमहे ॥ ५ ॥

प्र । याः । सिस्रते । सूर्यस्य । रश्मिऽभिः । ज्योतिः । भरन्तीः । उषसः । विऽउष्टिषु ।
भद्राः । नः । अद्य । श्रवसे । वि । उच्छत । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ५ ॥

[v]याः [v]उषसः [v]सूर्यस्य [v]रश्मिभिः किरणैः [v]प्र [v]सिस्रते संगच्छन्ते [v]व्युष्टिषु व्युच्छनेषु तमसां[4] विवासनकालेषु [v]ज्योतिः आत्मीयं तेजः [v]भरन्तीः भरन्ति च ता यूयं [v]नः अस्माकम् [v]अद्य अस्मिन्नहनि [v]श्रवसे अन्नाय [v]भद्राः भजनीया भवत [v]व्युच्छत तमांसि विवासयत च । सिद्धमन्यत् ॥ ॥६॥

---

१. त-सु-कार्येण । २. त३-भ-मातृभूतौ । ३. त-भ६-सु-रक्षतां । ४. त-तमांसि; भ६-तमस ।

अनमीवा उषस आ चरन्तु न उदग्नयो जिहतां ज्योतिषा बृहत् ।
आयुक्षातामश्विना तूतुजिं रथं स्वस्त्य१ग्निं समिधानमीमहे ॥ ६ ॥

अनमीवाः । उषसः । आ । चरन्तु । नः । उत् । अग्नयः । जिहताम् । ज्योतिषा । बृहत् । अयुक्षाताम् । अश्विना । तूतुजिम् । रथम् । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ६ ॥

vअनमीवाः रोगरहिताः vउषसः vनः अस्मान् vआ vचरन्तु आगच्छन्तु । vबृहत् बृहता महता vज्योतिषा तेजसा युक्ताः vअग्नयः अपि vउत् vजिहताम् उद्गच्छन्तु । vअश्विना अश्विनावपि vतूतुजिं क्षिप्रगामिनं vरथम् vआयुक्षाताम् । अस्मान् प्रत्यागन्तुं रासभाभ्यां युक्तवन्तौ । ' हरित आदित्यस्य रासभावश्विनोः ' (नि. १. १५. ३-४) इति पाठात् । सिद्धमन्यत् ॥

श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि ।
रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ॥ ७ ॥

श्रेष्ठम् । नः । अद्य । सवितः । वरेण्यम् । भागम् । आ । सुव । सः । हि । रत्नऽधाः । असि । रायः । जनित्रीम् । धिषणाम् । उप । ब्रुवे । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ७ ॥

हे vसवितः त्वम् vअद्य अस्मिन्नहनि vनः अस्मभ्यं vवरेण्यं वरणीयं vश्रेष्ठं प्रशस्यतमं vभागं भजनीयं धनम् vआ vसुव प्रेरय । देहीत्यर्थः । vहि यस्मात् vसः प्रार्थितस्त्वं vरत्नधाः श्रेष्ठानां धनानां संविभक्ता vअसि भवसि । तथा च निगमान्तरं—' विभक्तारं हवामहे वसोश्चित्रस्य राधसः सवितारं नृचक्षसम्' (ऋ. सं. १.२२.७) इति । vरायः धनस्य vजनित्रीं vधिषणां सर्वदेवस्तुतिरूपां वाचम् vउप vब्रुवे अहमुपब्रवीमि । यद्वा । धिषणां देवीमुप ब्रुवे उपस्तौमीत्यर्थः । सिद्धमन्यत् ॥

पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३ अमन्महि ।
विश्वा इदुस्राः स्पळदिति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे ॥ ८ ॥

पिपर्तु । मा । तत् । ऋतस्य । प्रऽवाचनम् । देवानाम् । यत् । मनुष्याः । अमन्महि । विश्वाः । इत् । उस्राः । स्पट् । उत् । एति । सूर्यः । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ८ ॥

vयत् vऋतस्य यज्ञस्य सत्यस्य वा संबन्धि vदेवानां vप्रवाचनं प्रकर्षेण गुणानां कथनं स्तोत्रं vमनुष्याः वयम् vअमन्महि कर्तुं जानीमः vतत् प्रवाचनं vमा मां vपिपर्तु पालयतु । किंच vसूर्यः vविश्वाः सर्वाः vउस्राः उषसः vस्पट् स्पृशन्नवगच्छन्[1] वा[2] vउदेति । सिद्धमन्यत् ॥

अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साधं ईमहे ।
आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्य१ग्निं समिधानमीमहे ॥ ९ ॥

अद्वेषः । अद्य । बर्हिषः । स्तरीमणि । ग्राव्णाम् । योगे । मन्मनः । साधे । ईमहे । आदित्यानाम् । शर्मणि । स्थाः । भुरण्यसि । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ ९ ॥

---

१. त-स्पर्शन्नव°; भ-स्पशन्नव° । २. त१.२.६.७-भ६-मु-'वा' नास्ति; त४.५- ब्रा ।

vअथ अस्मिञ्जहनि vबर्हिषः vस्तरीमणि देवां स्तरणे vमन्मनः मननीयस्याभीष्टस्य फलस्य vसाधने साधके vप्रावणाम् अभिषवपाषाणानां vयोगे सोमेन सह संयोगे च सति vअहेवः हेषवर्जितानादित्यान् vईमहे वयमभीष्टं याचामहे । हे स्तोतः त्वं तेषाम् vआदित्यानां देवानां vबर्मणि सुखे स्थाने वा[1] vस्थाः तिष्ठ । vभुरण्यसि कर्तव्यानि कर्माणि बिभर्षि गच्छसि वा । सिद्धमन्यत् ॥

आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतॄन् ।
इन्द्रं मित्रं वरुणं सातये भगं स्वस्त्य१ग्निं समिधानमीमहे ॥ १० ॥

आ । नः । बर्हिः । सधऽमादे । बृहत् । दिवि । देवान् । ईळे । सादय । सप्त । होतॄन् । इन्द्रम् । मित्रम् । वरुणम् । सातये । भगम् । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥१०॥

vनः अस्माकं vबृहत् बृहति महति vदिवि दीप्ते vसधमादे । सह माद्यन्ति देवा यत्र तस्मिन् । vबर्हिः बर्हिषि यज्ञे vसप्त सप्तसंख्याकान् vहोतॄन् वषट्कर्तॄन् vइन्द्रं vमित्रं च vवरुणं च vभगं च vदेवान् इतरानपि यष्टव्यान् देवान् हे अग्ने त्वम् vआ vसादय । अग्नेराभिमुख्यकरणम् 'इहाद्य दैव्यं जनं बर्हिरा सादया वसो' (ऋ. सं. १. ४५. ९) इत्येवमादिमन्त्रैरवगम्यते । तत्र त्वया आसादितांस्तानिन्द्रादीन् देवानहं vसातये धनलाभाय vईळे स्तौमि । सिद्धमन्यत् ॥ ॥ ७ ॥

त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः ।
बृहस्पतिं पूषणमश्विना भगं स्वस्त्य१ग्निं समिधानमीमहे ॥ ११ ॥

ते । आदित्याः । आ । गत । सर्वतातये । वृधे । नः । यज्ञम् । अवत । सऽजोषसः ।
बृहस्पतिम् । पूषणम् । अश्विना । भगम् । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥११॥

हे vआदित्याः येऽस्माभिराहूताः vते यूयं vसर्वतातये यज्ञार्थम् vआ vगत आगच्छत । आगत्य च हे vसजोषसः संगता यूयं vनः अस्माकं vवृधे वर्धनाय vयज्ञं प्रति vअवत गच्छत । वयं च vबृहस्पतिं vपूषणं च vअश्विना अश्विनौ च vभगं भगाख्यं देवं च vसमिधानं सम्यग्दीप्तम् vअग्निं च vस्वस्ति सर्वप्रकाराविनाशम् vईमहे याचामहे ॥

तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यम् ।
पक्षे तोकाय तनयाय जीवसे स्वस्त्य१ग्निं समिधानमीमहे ॥ १२ ॥

तत् । नः । देवाः । यच्छत । सुऽप्रवाचनम् । छर्दिः । आदित्याः । सुऽभरम् । नृऽपाय्यम् ।
पक्षे । तोकाय । तनयाय । जीवसे । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥ १२ ॥

हे vआदित्याः vदेवाः यूयं vसुप्रवाचनम् अत्यन्तं प्रशस्तं vसुभरं सुसमृद्धं vनृपाय्यं नृणां रक्षकं vतत् अस्मदभिलषितं vछर्दिः गृहं vनः अस्माकं vपक्षे पक्षाय vतोकाय[1] पुत्राय vतनयाय च पौत्राय च vजीवसे जीवनार्थं vयच्छत दत्त । सिद्धमन्यत् ॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥ १३ ॥

---

१. त–'तोकाय' नास्ति ।

विश्वे । अद्य । मरुतः । विश्वे । ऊती । विश्वे । भवन्तु । अग्नयः । समिऽइद्धाः ।
विश्वे । नः । देवाः । अवसा । आ । गमन्तु । विश्वम् । अस्तु । द्रविणम् । वाजः । अस्मे इति ॥ १३ ॥

vअद्य अस्मिन्नहनि प्रधानयागदिवसे vविश्वे सर्वे vमरुतः vविश्वे सर्वे मरुद्गणसहचरिता[1] रुद्रादयो देवाश्च vऊती ऊत्यै रक्षणाय भवन्तु । अपि च vविश्वे सर्वे vअग्नयः आहवनीयादयः vसमिद्धाः संदीप्ताः vभवन्तु । अपि च vविश्वे सर्वे इन्द्रादयः vदेवाः vनः अस्माकम् vअवसा रक्षणेन vआ vगमन्तु आगच्छन्तु । किंच vअस्मे अस्मासु vविश्वं सर्वं vद्रविणं धनं vवाजः अन्नं च vअस्तु भवतु[2] ॥

यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः ।
यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥ १४ ॥

यम् । देवासः । अवथ । वाजऽसातौ । यम् । त्रायध्वे । यम् । पिपृथ । अति । अंहः ।
यः । वः । गोऽपीथे । न । भयस्य । वेद । ते । स्याम । देवऽवीतये । तुरासः ॥ १४ ॥

हे vतुरासः अभीष्टप्रधाने क्षिप्राः vदेवासः देवा यूयं vवाजसातौ संग्रामे vयं मनुष्यम् vअवथ रक्षथ vयं च vत्रायध्वे शत्रोः पालयथ vयं च vअंहः पापम् vअति अतिनीय vपिपृथ कामैः पूरयथ vयः चापि मनुष्यः vवः युष्माकं कार्यत्वेन संबन्धिनि vगोपीथे रक्षणे vभयस्य भयं vन vवेद न जानाति vते[3] सर्वे वयं vदेववीतये यज्ञार्थं vस्याम भवेम ॥ ॥ ८ ॥

'उषासानक्ता' इति चतुर्दशर्चं सप्तमं सूक्तं धानाकस्य लुशस्यार्षम्। आदितो द्वादश जगत्यस्ततो द्वे त्रिष्टुभौ। विश्वे देवा देवता। पूर्वसूक्ते 'वैश्वदेवं तु द्वित्रिष्टुबन्तं तु' इत्युक्तत्वात्। 'उषासानक्ता' इत्यनुक्रान्तम्। आभिप्लविके षष्ठेऽहनि वैश्वदेव इदं वैश्वदेवनिविद्धानम्। सूत्रितं च—'कतरा पूर्वोषासानक्तेति वैश्वदेवम्' (आश्व. श्रौ. ७. ७) इति ॥

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा ।
इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः ॥ १ ॥

उषसानक्ता । बृहती इति । सुऽपेशसा । द्यावाक्षामा । वरुणः । मित्रः । अर्यमा ।
इन्द्रम् । हुवे । मरुतः । पर्वतान् । अपः । आदित्यान् । द्यावापृथिवी इति । अपः । स्वरिति स्वः ॥ १ ॥

vबृहती बृहत्यौ महत्यौ vसुपेशसा सुरूपे vउषासानक्ता राज्युषसौ vद्यावाक्षामा[4] द्यावापृथिव्यौ च vवरुणो vमित्रः मित्रावरुणौ च vअर्यमा च येऽत्र विहिता देवाः तानेतान् vइन्द्रं vमरुतः च vपर्वतान् च vअपः[5] उदकानि च vआदित्यान् च vद्यावापृथिवी द्यावापृथिव्यौ च । पुनर्द्यावापृथिव्योर्ग्रहणमादरार्थम् । vअपः अन्तरिक्षं च vस्वः सर्वं च यष्टव्यं देवजातं vहुवे ह्वयामि ॥

द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः ।
मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे ॥ २ ॥

---

१. ग–'सहचरा । २. त–भवतु । ३. त–'ते' नास्ति । ४. त–'द्यावाक्षामा' नास्ति । ५. ग-त३.४-भ–नोस्माकमपः ।

द्यौः । च । नः । पृथिवी । च । प्रऽचेतसा । ऋतावरी इत्यृतऽवरी । रक्षताम् । अंहसः । रिषः । मा । दुःऽविदत्रा । निःऽऋतिः । नः । ईशत । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥२॥

[v]प्रचेतसा सुबुद्धी [v]ऋतावरी यज्ञवत्यौ सत्यवत्यौ[1] [v]द्यौश्च [v]पृथिवी [v]च द्यावापृथिव्यावुभे [v]नः अस्मान् [v]रिषः हिंसकात्[2] [v]अंहसः पापाच्च[3] [v]रक्षताम्। किंच [v]दुर्विदत्रा कुत्सितज्ञाना [v]निर्ऋतिः मृत्युदेवता [v]नः अस्माकं [v]मा [v]ईशत ईश्वरी मा भूत्। किंच वयं [v]देवानां संबन्धि [v]तत् असाधारणम् [v]अवः रक्षणम् [v]अद्य अस्मिन्नहनि प्रधानयागादिवसे [v]वृणीमहे प्रार्थयामहे ॥

विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः ।
स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥ ३ ॥

विश्वस्मात् । नः । अदितिः । पातु । अंहसः । माता । मित्रस्य । वरुणस्य । रेवतः ।
स्वःऽवत् । ज्योतिः । अवृकम् । नशीमहि । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ३ ॥

[v]रेवतः धनवतः [v]मित्रस्य [v]वरुणस्य च धनवतोर्मित्रावरुणयोः [v]माता जननी [v]अदितिः देवी [v]नः अस्मान् [v]विश्वस्मात् सर्वस्मात् [v]अंहसः पापात् [v]पातु रक्षतु। किंच वयम् [v]अवृकं बाधकरहितं [v]स्वर्वत् सर्वं [v]ज्योतिः तेजः [v]नशीमहि। नशिः पलायनकर्मा। पलायनं च शीघ्रगमनम्। शीघ्रं प्राप्नुम इत्यर्थः। सिद्धमन्यत् ॥

ग्रावा वदन्नप रक्षांसि सेधतु दुष्वप्न्यं निर्ऋतिं विश्वमत्रिणम् ।
आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ॥ ४ ॥

ग्रावा । वदन् । अप । रक्षांसि । सेधतु । दुःऽस्वप्न्यम् । निःऽऋतिम् । विश्वम् । अत्रिणम् ।
आदित्यम् । शर्म । मरुताम् । अशीमहि । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ४ ॥

[v]ग्रावा अभिषवपाषाणः [v]वदन् अभिषववेलायां शब्दं कुर्वन् [v]रक्षांसि यागविघ्नकारीणि [v]अप [v]सेधतु विनिवारयतु। [v]दुःस्वप्न्यं दुःस्वप्नप्रभवमस्मदीयमनिष्टं चाप सेधतु। [v]निर्ऋतिं मृत्युदेवतां चाप सेधतु। [v]अत्रिणम् अदनशीलं [v]विश्वं सर्वं पिशाचादिकं चाप सेधतु। एवं निर्विघ्नत्वेन[4] निष्पन्ने यागे वयम् [v]आदित्यम् आदित्यानां संबन्धि [v]मरुतां च संबन्धि [v]शर्म सुखम् [v]अशीमहि प्राप्नुयाम। सिद्धमन्यत् ॥

इन्द्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु ।
सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ॥ ५ ॥

आ । इन्द्रः । बर्हिः । सीदतु । पिन्वताम् । इळा । बृहस्पतिः । सामऽभिः । ऋक्वः । अर्चतु ।
सुऽप्रकेतम् । जीवसे । मन्म । धीमहि । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥ ५ ॥

[v]इन्द्रः [v]बर्हिः [v]आ [v]सीदतु। [v]इळा माध्यमिका स्तनविस्नुलक्षणा वागपि [v]पिन्वतां सिञ्चतु। [v]सामभिः गीयमानैः[1] [v]ऋक्वः स्तुतिमान् [v]बृहस्पतिः अपि [v]अर्चतु अस्मान् पूजयतु।

---

१. त-म-सु-सत्यवत्यौ च । २. त२.६-हिंसकसकात् ; त५-हिंसकसकाशात् । ३. ग-त३-भ-पापात् । ४. ग-चाविघ्नेन; त-भ-सु-निर्विघ्नेन । ५. त१.२.३.४.५.७-भ-गीयमाने; त६-सु-गायमाने ।

किंच वयं vसुमकेतं सुप्रज्ञानं vमन्म मननीयं धनं स्तोत्रं वा vधीमहि निदधीमहि vजीवसे जीवनाय। सिद्धमन्यत्॥ ॥ ९ ॥

दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये।
प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ॥ ६ ॥

दिविऽस्पृशम्। यज्ञम्। अस्माकम्। अश्विना। जीरऽअध्वरम्। कृणुतम्। सुम्नम्। इष्टये। प्राचीनऽरश्मिम्। आऽहुतम्। घृतेन। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ ६ ॥

हे अश्विनौ युवां नोऽस्माकं vयज्ञं vदिविस्पृशं दिवि स्प्रष्टारं गन्तारं vकृणुतं कुरुतम्[1]। तथा vजीराध्वरं क्षिप्रं हिंसारहितं च यज्ञमस्माकं vकृणुतं कुरुतम्। vइष्टये अभिलषितसिद्धयर्थं vसुम्नं सुखं च कुरुतम्। किंच vघृतेन आज्येन vआहुतम् अग्निं vप्राचीनरश्मिं देवाभिमुखं कुरुतमित्यर्थः। सिद्धमन्यत्॥

उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शंभुवम्।
रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे ॥ ७ ॥

उप। ह्वये। सुऽहवम्। मारुतम्। गणम्। पावकम्। ऋष्वम्। सख्याय। शम्ऽभुवम्। रायः। पोषम्। सौश्रवसाय। धीमहि। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ ७ ॥

vसुहवं स्वाह्वानं vपावकं शोधकम् vऋष्वं दर्शनीयं vशंभुवं सुखस्य भावयितारं vरायः धनस्य vपोषं पोषकं vमारुतं मरुतां संबन्धिनं vगणं संघं vसख्याय सखिभावाय vउप vह्वये उपगम्य ह्वयामि। आगतं गणं vसौश्रवसाय शोभनान्नवत्त्वाय सुयशस्त्वाय[2] वा वयं vधीमहि बुद्धौ निदधीमहि। सिद्धमन्यत्॥

अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियम्।
सुरश्मिं सोममिन्द्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ॥ ८ ॥

अपाम्। पेरुम्। जीवऽधन्यम्। भरामहे। देवऽअव्यम्। सुऽहवम्। अध्वरऽश्रियम्। सुऽरश्मिम्। सोमम्। इन्द्रियम्। यमीमहि। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥८॥

vअपाम् उदकानां vपेरुं पालकं vजीवधन्यम्। धन्या जीवा यस्मिन्नसौ जीवधन्यः। तं vदेवाव्यं देवानां तर्पकं vसुहवं शोभनाह्वानं शोभनस्तुतिं वा vअध्वरश्रियं vसुरश्मिं शोभनांशुं vसोमं vभरामहे धारयामः। पत्नीशालातो हविर्धानं प्रति प्रापयामो वा। भृतं तं सोमम् vइन्द्रियं वीर्यं[3] vयमीमहि वयं याचामहे। सिद्धमन्यत्॥

सनेम तत्सुसनितो सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः।
ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ॥ ९ ॥

सनेम। तत्। सुऽसनितः। सनित्वऽभिः। वयम्। जीवाः। जीवऽपुत्राः। अनागसः। ब्रह्मऽद्विषः। विष्वक्। एनः। भरेरत। तत्। देवानाम्। अवः। अद्य। वृणीमहे ॥ ९ ॥

---

१. त-भ६-मु-'कुरुतं' नास्ति। २. त-शास्त्वाय। ३. त१.२.६.७-वीर्यं तत्।

vजीवाः जीवन्तः vजीवपुत्राः जीवन्मवत्पुत्राश्च[1] vअनागसः अपराधवर्जिताश्च vवयं धनाढ्या लुशाः vसनित्वभिः संभक्तृभिः पुत्रपौत्रादिभिः सह vसुसनिता शोभनेन भजनेन vतत् देवजातं vसनेम। स्तुत्या हविष्प्रदानेन च संभजेमहि। किंच vब्रह्मद्विषः ब्राह्मणानामस्माकं द्वेष्टारः vविष्वक्[2] नानागच्छत्[2] vएनः अस्मदीयं पापं vभरेरत आत्मनि धारयन्तु। पोषयन्तु। सिद्धमन्यत्॥

ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्दातन।
जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे॥ १०॥

ये। स्थ। मनोः। यज्ञियाः। ते। शृणोतन। यत्। वः। देवाः। ईमहे। तत्। ददातन। जैत्रम्। क्रतुम्। रयिमत्। वीरऽवत्। यशः। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥१०॥

हे vदेवाः vये यूयं vमनोः मनुष्यस्य vयज्ञियाः यज्ञार्हाः vस्थ भवथ vते यूयं vशृणोतन अस्मदीयां स्तुतिं vशृणुत। किंच हे देवाः vवः युष्मान् vयत् अभीष्टम् vईमहे याचामहे vतत् vजैत्रं जयशीलं vक्रतुं प्रज्ञानं vरयिमत् धनवत् vवीरवत्[3] पुत्रान्वितं vयशः च vददातन नोऽस्मभ्यं प्रयच्छत। सिद्धमन्यत्॥ ॥ १० ॥

महद्वद्य महतामा वृणीमहेऽवो देवानां बृहतामनर्वणाम्।
यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे॥ ११॥

महत्। अद्य। महताम्। आ। वृणीमहे। अवः। देवानाम्। बृहताम्। अनर्वणाम्। यथा। वसु। वीरऽजातम्। नशामहै। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥११॥

vअद्य अस्मिन्नहनि vमहतां श्रेष्ठानां vबृहतां वृद्धानाम् vअनर्वणाम् अप्रतिगतानां vदेवानाम् इन्द्रादीनां संबन्धि vमहत् अधिकम् vअवः रक्षणम् vआ vवृणीमहे प्रार्थयामहे। किंच वयं vयथा vवसु धनं vवीरजातम् अपत्यजातं च vनशामहै प्राप्नुयाम तथा ते देवाः कुर्वन्त्विति शेषः। सिद्धमन्यत्॥

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे॥ १२॥

महः। अग्नेः। सम्ऽइधानस्य। शर्मणि। अनागाः। मित्रे। वरुणे। स्वस्तये।
श्रेष्ठे। स्याम। सवितुः। सवीमनि। तत्। देवानाम्। अवः। अद्य। वृणीमहे॥ १२॥

vसमिधानस्य समिध्यमानस्य vमहः महतः vअग्नेः vशर्मणि सुखे वयं vस्याम भवेम। किंच वयम् vअनागाः अनागसः। वचनव्यत्ययः। स्याम। अपि च vमित्रे vवरुणे मित्रावरुणयोः। चतुर्थ्यर्थे सप्तमी। vसवितुः च vसवीमनि प्रसवे vस्वस्तये सर्वप्रकाराविनाशाय स्याम। सिद्धमन्यत्॥

ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः।
ते सौभगं वीरवद्गोमदग्नो दधातन द्रविणं चित्रमस्मे॥ १३॥

---

१. ग–जीवत्पुत्राश्च। २. त७–नानारूपं। ३. त–'वीरवत्' नास्ति।

ये । सवितुः । सत्यऽसवस्य । विश्वे । मित्रस्य । व्रते । वरुणस्य । देवाः ।
ते । सौभगम् । वीरऽवत् । गोऽमत् । अग्नेः । दधातन । द्रविणम् । चित्रम् । अस्मे इति ॥ १३ ॥

ये विश्वे देवाः सत्यसवस्य सत्यप्रसवस्य सवितुः मित्रस्य वरुणस्य मित्रावरुणयोश्च व्रते प्रसवात्मके कर्मणि भवन्ति ते यूयं सौभगं सौभाग्यं वीरवत् पुत्राद्युपेतं गोमत् गोयुक्तं चित्रं पूजनीयं द्रविणं धनं च अग्नेः कर्म च अस्मे मह्यं दधातन प्रयच्छत ॥

सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥ १४ ॥

सविता । पश्चातात् । सविता । पुरस्तात् । सविता । उत्तरात्तात् । सविता । अधरात्तात् ।
सविता । नः । सुवतु । सर्वऽतातिम् । सविता । नः । रासताम् । दीर्घम् । आयुः ॥ १४ ॥

पश्चातात् पश्चिमतः स्थितः सविता पुरस्तात् पूर्वतश्च स्थितः सविता उत्तरात्तात् उत्तरतः स्थितश्च सविता[1] नः अस्माकं सर्वतातिं सर्वमभिलषितं धनादिकं सुवतु प्रेरयतु । किंच सविता एव नः अस्मभ्यं दीर्घं बहुकालीनम् आयुः रासतां ददातु । बहुधा सवितृपदग्रहणमत्यन्तमादरार्थम् ॥ ॥ ११ ॥

'नमो मित्रस्य' इति द्वादशर्चमष्टमं सूक्तम् । अभितपा नाम सूर्यपुत्र ऋषिः । इदमादीनि पञ्च सूक्तानि जागतानि । अस्य सूक्तस्य दशमी त्रिष्टुप् । सूर्यो देवता । तथा चानुक्रान्तं—'नमो द्वादश सौर्योऽभितपाः सौर्यं जागतं वै त्रिष्टुदृशमी' इति । आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्यकाण्डे एतत्सूक्तम् । सूत्रितं च—'चित्रं देवानां नमो मित्रस्य' (आश्व. श्रौ. ६. ५) इति । विषुवति निष्केवल्य आद्यस्तृचोऽनुरूपः । सूत्रितं च—'विभ्राड्बृहत्पिबतु सोम्यं मधु नमो मित्रस्य वरुणस्य चक्षस इति स्तोत्रियानुरूपौ' (आश्व. श्रौ. ८. ६) इति । स्वपन्तमभ्यस्तमये सति रात्रिशेषं स्थित्वा प्रातः 'येन सूर्य ज्योतिषा' इत्यादिभिः पञ्चभिः सूर्यं उपस्थेयः । सूत्रितं च—'अभ्याधितं चेत्स्वपन्तमादित्योऽभ्यस्तमियाद्वाग्यतोऽनुपविशन् रात्रिशेषं भूत्वा येन सूर्य ज्योतिषा बाधसे तम इति पञ्चभिरादित्यमुपतिष्ठेत' (आश्व. गृ. ३.७.१) । स्वपन्तमभ्युदिते 'यस्य ते विश्वा' इत्यादिभिश्चतसृभिः सूर्य उपस्थेयः । सूत्रितं च—'अभ्युदियाद्वेदकर्मश्रान्तमनभिरूपेण कर्मणा वाग्यत इति समानमुत्तराभिश्चतसृभिरुपस्थानम्' (आश्व. गृ. ३. ७. २) इति । एकादशिनस्य सौर्यस्य पशोर्हविषो याज्या । सूत्रितं च—'शं नो भव चक्षसा शं नो अह्ना वायो भूष शुचिपाः' (आश्व. श्रौ. ३. ८) इति । होत्रकाणां शकलाधाने 'यद्वो देवाः' इत्येषा (आश्व. श्रौ. ६. १२) । विवाहे कन्यारोदनीये 'जीवं रुदन्ती' इत्येषा जप्या (आश्व. गृ. १. ८. ४) ॥

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत ।
दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥ १ ॥

नमः । मित्रस्य । वरुणस्य । चक्षसे । महः । देवाय । तत् । ऋतम् । सपर्यत ।
दूरेऽदृशे । देवऽजाताय । केतवे । दिवः । पुत्राय । सूर्याय । शंसत ॥ १ ॥

---

१. ग–सविता एवमुपरिष्टात् दक्षिणतश्च स्थितः सविता; त३-भ–सविता अधरात्तात् अधरतश्च स्थितः सविता एवमुपरिष्टात् दक्षिणतश्च स्थितः सविता; त४–एवमुपरिष्टात् दक्षिणतः स्थितः सविता ।

हे ऋत्विजः यूयं [v]मित्रस्य [v]वरुणस्य मित्रावरुणयोः [v]चक्षसे द्रष्टुं [v]महः महते [v]देवाय द्योतमानाय [v]दूरेदृशे दूरे सन्तमपि पश्यते [v]देवजाताय देवेषु जाताय [v]केतवे विश्वस्य प्रज्ञापकाय [v]दिवः [v]पुत्राय पुत्रभूताय। दिवि जायमानत्वात् तत्पुत्रत्वव्यपदेशः। [v]सूर्याय सूर्यार्थं [v]नमः हृत्वा [v]तत् विहितम् [v]ऋतं यागादिलक्षणं कर्म [v]सपर्यत पूजयत। [v]शंसत स्तुतिमपि कुरुत ॥

सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च।
विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः ॥ २ ॥

सा। मा। सत्यऽउक्तिः। परि। पातु। विश्वतः। द्यावा। च। यत्र। ततनन्। अहानि। च।
विश्वम्। अन्यत्। नि। विशते। यत्। एजति।
विश्वाहा। आपः। विश्वाहा। उत्। एति। सूर्यः ॥ २ ॥

[v]सा [v]सत्योक्तिः तत्सत्यवचनं [v]मा मां [v]विश्वतः सर्वतः [v]परि [v]पातु परिरक्षतु। यथा सत्योक्त्या [v]यत्र यस्मिन् देशे [v]द्यावा [v]च द्यावापृथिव्यौ [v]अहानि रात्रयः [v]च [v]ततनन् अतन्वन् तत्र [v]विश्वं सर्वम् [v]अन्यत् भूतजातं [v]नि [v]विशते विश्राम्यति। [v]यत् एतद्भूतजातम् [v]एजति कम्पते [v]विश्वाहा सर्वदा [v]आपः च स्यन्दन्ते [v]विश्वाहा सर्वदा [v]सूर्यः च [v]उदेति। सा सत्योक्तिर्मां परिपात्वित्यर्थः ॥

न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि।
प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥ ३ ॥

न। ते। अदेवः। प्रऽदिवः। नि। वासते। यत्। एतशेभिः। पतरैः। रथर्यसि।
प्राचीनम्। अन्यत्। अनु। वर्तते। रजः। उत्। अन्येन। ज्योतिषा। यासि। सूर्य ॥ ३ ॥

हे [v]सूर्य [v]ते तव समीपे [v]प्रदिवः प्रत्नः पुरातनः कश्चित् [v]अदेवः असुरो राक्षसो वा [v]न [v]नि [v]वासते न निवसति। कदेत्यत आह। [v]यत् यदा त्वं [v]पतरैः गमनशीलैः [v]एतशेभिः अश्वैः [v]रथर्यसि रथं कामयसे योक्तुम्। किंच [v]प्राचीनमन्यत् त्वदीयं ज्योतिः [v]रजः उदकम् [v]अनु [v]वर्तते। [v]अन्येन तेन [v]ज्योतिषा[1] [v]उत् [v]यासि उदेषि। यद्वा। प्राचीनमन्यत् रजश्चन्द्राख्यं ज्योतिस्त्वामनु वर्तते ततस्त्वमन्येन ज्योतिषा सहोदेषीत्यर्थः ॥

येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना।
तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्ष्वप्न्यं सुव ॥ ४ ॥

येन। सूर्य। ज्योतिषा। बाधसे। तमः। जगत्। च। विश्वम्। उत्ऽइयर्षि। भानुना।
तेन। अस्मत्। विश्वाम्। अनिराम्। अनाहुतिम्।
अप। अमीवाम्। अप। दुःऽस्वप्न्यम्। सुव ॥ ४ ॥

हे [v]सूर्य त्वं [v]येन [v]ज्योतिषा तेजसा [v]तमः अन्धकारं [v]बाधसे निवारयसि येन [v]च [v]भानुना तेजसा [v]विश्वं सर्वं [v]जगत् अङ्गमम् [v]उदियर्षि उद्गमयसि [v]तेन ज्योतिषा [v]अस्मत् अस्मत्तः

---

१. ग–ज्योतिषा तेजसा।

vअनिराम् अन्नाभावम् vअनादुतिम् अहोमं च vअमीवां रोगजातं च vअप vसुव अपगमय। vदुःस्वप्न्यं दुःस्वप्नप्रभवमनिष्टं च vअप सुव ॥

विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु।
यदद्य त्वा सूर्योपब्रुवामहै तं नो देवा अनु मंसीरत क्रतुम् ॥ ५ ॥

विश्वस्य। हि। प्रऽईषितः। रक्षसि। व्रतम्। अहेळयन्। उत्ऽचरसि। स्वधाः। अनु। यत्। अद्य। त्वा। सूर्य। उपऽब्रुवामहै। तम्। नः। देवाः। अनु। मंसीरत। क्रतुम्॥ ५॥

हे vसूर्य vप्रेषितः प्रेरितस्त्वम्[1] vअहेळयन् अक्रुध्यन् vविश्वस्य सर्वस्य यजमानस्य vव्रतं कर्म vरक्षसि vहि। यज्ञविध्वंसकेभ्यो राक्षसेभ्यः पालयसि। vस्वधाः हवींषि vअनु vउच्चरसि उद्गच्छसि च। प्रातर्होमे निवृत्ते सति पश्चादुद्गच्छसीत्यर्थः। तथा च यत् vयदा vअद्य अस्मिन्नहनि vत्वा त्वाम् vउपब्रुवामहै उपब्रूमः तदा vनः[2] अस्माकं vतं vक्रतुं तत्कर्म vदेवाः इन्द्रादयः vअनु vमंसीरत अनुमन्यन्ताम् ॥

तं नो द्यावापृथिवी तन्न आप इन्द्रः शृण्वन्तु मरुतो हवं वचः।
मा शूने भूम सूर्यस्य संदृशि भद्रं जीवन्तो जरणामशीमहि ॥ ६ ॥

तम्। नः। द्यावापृथिवी इति। तत्। नः। आपः। इन्द्रः। शृण्वन्तु। मरुतः। हवम्। वचः। मा। शूने। भूम। सूर्यस्य। सम्ऽदृशि। भद्रम्। जीवन्तः। जरणाम्। अशीमहि ॥ ६ ॥

vद्यावापृथिवी द्यावापृथिव्यौ vआपः च vइन्द्रः च vमरुतः च vनः अस्माकं vतं vहवम् आह्वानं vनः अस्माकं vतत् vवचः स्तुतिरूपं वाक्यं च। न इति द्विरुक्तिरादरार्था। vशृण्वन्तु। किंच वयं vसूर्यस्य vसंदृशि संदर्शने vशूने प्रवृद्धाय दुःखाय vमा vभूम मैव भवेम। किंतु vजीवन्तः चिरं प्राणान् धारयन्तो वयं vभद्रं कल्याणं vजरणां वृद्धत्वममरत्वं च vअशीमहि प्राप्नुयाम ॥ ॥ १२ ॥

विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः।
उद्यन्तं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ॥ ७ ॥

विश्वाहा। त्वा। सुऽमनसः। सुऽचक्षसः। प्रजाऽवन्तः। अनमीवाः। अनागसः। उत्ऽयन्तम्। त्वा। मित्रऽमहः। दिवेऽदिवे। ज्योक्। जीवाः। प्रति। पश्येम। सूर्य ॥ ७ ॥

हे vसूर्य vत्वा त्वां vसुमनसः प्रीतियुक्तमनस्काः vसुचक्षसः सुदर्शनाः vप्रजावन्तः पुत्राद्युपेताः vअनमीवाः रोगरहिताः vअनागसः अपराधवर्जिताश्च वयं vविश्वाहा सर्वदा यजेमेति शेषः। किंच हे vमित्रमहः मित्राणां पूजयितः vसूर्य vदिवेदिवे प्रतिदिनम् vउद्यन्तम् उदयं प्राप्नुवन्तं vत्वा त्वां vज्योक् चिरं vजीवाः जीवन्तो वयं vप्रति vपश्येम ॥

मह्नि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषेचक्षुषे मयः।
आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥ ८ ॥

---

१. ग-तृ३-भ५.१–स्तुतिभिः प्रेरितस्त्वं। २. त-भ१.२.४.७–'नः' नास्ति।

महि । ज्योतिः । बिभ्रतम् । त्वा । विऽचक्षण । भास्वन्तम् । चक्षुषेऽचक्षुषे । मयः ।
आऽरोहन्तम् । बृहतः । पाजसः । परि । वयम् । जीवाः । प्रति । पश्येम । सूर्य ॥ ८ ॥

हे ᵛविचक्षण विद्रष्टः ᵛसूर्य ᵛमहि महत् ᵛज्योतिः तेजः ᵛबिभ्रतं धारयन्तं ᵛभास्वन्तं दीप्तिमन्तं ᵛचक्षुषेचक्षुषे सर्वेषां द्रष्टॄणां चक्षुषे ᵛमयः सुखकरं ᵛबृहतः महतः ᵛपाजसः बलवतः ᵛपरि । महतो बलवतः समुद्रस्योदकस्योपरीत्यर्थः । ᵛआरोहन्तं ᵛत्वा त्वां ᵛजीवाः चिरं जीवन्तः ᵛवयं ᵛप्रति प्रतिदिनं ᵛपश्येम ॥

यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशन्ते अक्तुभिः ।
अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसोदिहि ॥ ९ ॥

यस्य । ते । विश्वा । भुवनानि । केतुना । प्र । च । ईरते । नि । च । विशन्ते । अक्तुऽभिः ।
अनागाःऽत्वेन । हरिऽकेश । सूर्य । अह्नाऽअह्ना । नः । वस्यसाऽवस्यसा । उत् । इहि ॥ ९ ॥

हे ᵛहरिकेश हरितवर्णकेश ᵛसूर्य ᵛयस्य ᵛते तव ᵛकेतुना प्रज्ञानेन ᵛविश्वा विश्वानि ᵛभुवनानि भूतजातानि ᵛप्र ᵛच ᵛईरते प्रकर्षेण गच्छन्ति ᵛअक्तुभिः रात्रिभिः ᵛनि ᵛविशन्ते ᵛच विश्राम्यन्ति च । स्वपन्तीत्यर्थः । स त्वं ᵛनः अस्माकम् ᵛअनागास्त्वेन अपराधवर्जितत्वेन ᵛवस्यसावस्यसा अत्यन्तश्रेयस्करेण वसुमत्तरेण वा ᵛअह्नाह्ना तेन तेन दिवसेन ᵛउदिहि उद्गच्छ ॥

शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन ।
यथा शमध्वञ्छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रम् ॥ १० ॥

शम् । नः । भव । चक्षसा । शम् । नः । अह्ना । शम् । भानुना । शम् । हिमा । शम् । घृणेन ।
यथा । शम् । अध्वन् । शम् । असत् । दुरोणे । तत् । सूर्य । द्रविणम् । धेहि । चित्रम् ॥ १० ॥

हे ᵛसूर्य त्वं ᵛचक्षसा तेजसा ᵛनः अस्माकं ᵛशं सुखकरः ᵛभव । ᵛअह्ना दिवसेन च ᵛशं सुखकरः ᵛनः अस्माकं भव । ᵛभानुना रश्मिना च ᵛशं भव अस्माकं सुखकरो भव । ᵛहिमा शैत्येन च ᵛशं भव । ᵛघृणेन औष्ण्येन च शंकरो भव । ᵛयथा यादृशेन ᵛनः अस्माकम् ᵛअध्वन् अध्वनि मार्गे ᵛशं भवति ᵛदुरोणे गृहे च ᵛशं सुखम् ᵛअसत् भवति ᵛतत् ᵛचित्रं पूजनीयं ᵛद्रविणं धनं ᵛधेहि अस्मभ्यं प्रयच्छ ॥

अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे ।
अदत्पिबदूर्जयमानमाशितं तदस्मे शं योररपो दधातन ॥ ११ ॥

अस्माकम् । देवाः । उभयाय । जन्मने । शर्म । यच्छत । द्विऽपदे । चतुःऽपदे ।
अदत् । पिबत् । ऊर्जयमानम् । आशितम् । तत् । अस्मे इति । शम् । योः । अरपः । दधातन ॥ ११ ॥

हे ᵛदेवाः सूर्येणाभ्यनुज्ञाता यूयम् ᵛअस्माकं ᵛद्विपदे मनुष्यात्मकाय ᵛचतुष्पदे पश्वात्मकाय च ᵛउभयाय उभयविधाय ᵛजन्मने भूतजाताय ᵛशर्म सुखं ᵛयच्छत दत्त । किंच यथास्मत्पुत्रादिकम् ᵛअदत् भक्षणीयं भक्षयत् ᵛपिबत् पानीयं पिबच्च ᵛऊर्जयमानं बलवन्तमिवात्मानमाचरच्च ᵛआशितं

सुहितं च भवति तथा [v]शं रोगशान्तिनिमित्तकं सुखं [v]योः विषययोगजनितं सुखं च [v]अरपः अपापं च [v]दधातन प्रयच्छत ॥

यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनम् ।
अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन ॥ १२ ॥

यत् । वः । देवाः । चकृम । जिह्वया । गुरु । मनसः । वा । प्रऽयुती । देवऽहेळनम् । अरावा । यः । नः । अभि । दुच्छुनऽयते । तस्मिन् । तत् । एनः । वसवः । नि । धेतन ॥ १२ ॥

हे [v]वसवः वासयितारः [v]देवाः [v]वः युष्माकं वयं [v]जिह्वया वाचा [v]मनसः [v]प्रयुती प्रयुत्या प्रयोगेण [v]गुरु महत् [v]देवहेळनं देवक्रोधनं च [v]यत् [v]एनः [v]चकृम अकार्ष्म [v]यः अस्मच्छत्रुः [v]नः अस्मान् [v]अभि प्रति [v]अरावा गमनवान् भूत्वा [v]दुच्छुनायते पापान्याचरति अस्मानुद्वेजयति वा [v]तस्मिन् अस्मच्छत्रौ [v]तत् [v]एनः अस्माभिः कृतं पापं [v]नि [v]धेतन सूर्यस्याज्ञया निधत्त । स्थापयतेत्यर्थः ॥ ॥ १२ ॥

'अस्मिन्नः' इति पञ्चर्चं नवमं सूक्तं जागतमैन्द्रम् । मुष्कविशिष्ट इन्द्राख्य ऋषिः । तथा चानुक्रान्तम्—'अस्मिन्नः पञ्च मुष्कवानिन्द्रः' इति । गतो विनियोगः । अपरे तु ताण्ड्यशाट्यायनका अस्य सूक्तस्य मुष्कवानिन्द्रो देवता लुश ऋषिरिति वर्णयन्ति ॥

अस्मिन्न इन्द्र पृत्सुतौ यशस्वति शिमीवति क्रन्दसि प्राव सातये ।
यत्र गोषाता धृषितेषु खादिषु विष्वक्पतन्ति दिद्यवो नृषाह्ये ॥ १ ॥

अस्मिन् । नः । इन्द्र । पृत्सुतौ । यशस्वति । शिमीऽवति । क्रन्दसि । प्र । अव । सातये । यत्र । गोऽसाता । धृषितेषु । खादिषु । विष्वक् । पतन्ति । दिद्यवः । नृऽसह्ये ॥ १ ॥

हे [v]इन्द्र त्वं [v]यशस्वति कीर्तिमति [v]शिमीवति परस्परप्रहारलक्षणकर्मवति[1] [v]अस्मिन् उपस्थिते [v]पृत्सुतौ संग्रामे [v]क्रन्दसि सिंहनादं करोषि । [v]सातये धनलाभाय [v]प्राव [v]नः अस्मान् प्ररक्षसि च । कस्मिन्नित्यत्राह । [v]यत्र यस्मिन् [v]गोषाता गोसातौ लब्धपशुके [v]नृषाह्ये नृणामभिभावुके च संग्रामे [v]खादिषु परस्परखादकेषु च योद्धृषु [v]धृषितेषु धृष्टेषु सत्सु [v]दिद्यवः आयुधानि [v]विष्वक् सर्वतः [v]पतन्ति ॥

स नः क्षुमन्तं सदने व्यूर्णुहि गोअर्णसं रयिमिन्द्र श्रवाय्यम् ।
स्याम ते जयतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि ॥ २ ॥

सः । नः । क्षुऽमन्तम् । सदने । वि । ऊर्णुहि । गोऽअर्णसम् । रयिम् । इन्द्र । श्रवाय्यम् । स्याम । ते । जयतः । शक्र । मेदिनः । यथा । वयम् । उश्मसि । तत् । वसो इति । कृधि ॥ २ ॥

हे [v]इन्द्र [v]सः सर्वानुग्राहकत्वेन प्रसिद्धस्त्वं [v]नः अस्माकं [v]सदने गृहे [v]क्षुमन्तम् अन्नवन्तं शब्दवन्तं वा [v]गोअर्णसम् । गावोऽर्णं उदकमिव प्रवृद्धा यस्मिन् । तं [v]श्रवाय्यं श्रवणीयं [v]रयिं धनं [v]व्यूर्णुहि विविधमाच्छादय । किंच हे [v]वसो वासक [v]शक्र इन्द्र [v]जयतः शत्रुं [v]ते तव प्रसादाद्वयं [v]मेदिनः मेदसा युक्ता बलवन्तः [v]स्याम भवेम । किं बहूक्त्या । [v]यथा यत् [v]वयमुश्मसि कामयामहे [v]तत् सर्वं [v]कृधि कुरु ॥

---

१. ग-त३-भ१.४.७-[1]लक्षणवति ।

यो नो दास आर्यो वा पुरुष्टुतादेव इन्द्र युधये चिकेतति ।
अस्माभिष्टे सुषहाः सन्तु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥ ३ ॥

यः । नः । दासः । आर्यः । वा । पुरुऽस्तुत । अदेवः । इन्द्र । युधये । चिकेतति ।
अस्माभिः । ते । सुऽसहाः । सन्तु । शत्रवः । त्वया । वयम् । तान् । वनुयाम । सम्ऽगमे ॥३॥

हे [v]पुरुष्टुत बहुस्तुत [v]इन्द्र [v]यः [v]दासः कर्मकरः शूद्रः [v]आर्यः त्रैवर्णिको [v]वा [v]अदेवः देवाद-न्योऽसुरो वा [v]नः अस्मान् [v]युधये युद्धाय [v]चिकेतति जानाति ते सर्वे [v]शत्रवः अस्मदरयः [v]ते तव प्रसादात् [v]अस्माभिः [v]सुसहाः स्वभिभवाः [v]सन्तु भवन्तु। किंच [v]वयं [v]त्वया सहायेन [v]तान् शत्रून् [v]संगमे संग्रामे [v]वनुयाम हन्याम ॥

यो दभ्रेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवोविन्नृषाह्ये ।
तं विखादे सन्निमद्य श्रुतं नरमवार्च्यमिन्द्रमवसे करामहे ॥ ४ ॥

यः । दभ्रेभिः । हव्यः । यः । च । भूरिऽभिः । यः । अभीके । वरिवःऽवित् । नृऽसह्ये ।
तम् । विऽखादे । सन्निम् । अद्य । श्रुतम् । नरम् । अर्वाच्यम् । इन्द्रम् । अवसे । करामहे ॥४॥

[v]नृसह्ये नृणामभिभावुके [v]विखादे विशेषेण भक्षके [v]अभीके[1] संग्रामे [v]वरिवोवित् धनस्य लम्भकः [v]यः इन्द्रः [v]दभ्रेभिः स्वल्पैः [v]हव्यः ह्वातव्यः [v]यश्च [v]भूरिभिः बहुभिः [v]हव्यः [v]तं [v]सन्निं शुचिं [v]श्रुतं सर्वत्र विख्यातं [v]नरं नेतारम् [v]इन्द्रम् [v]अद्य अस्मिन्नहनि [v]अवसे अस्मद्रक्षणाय [v]अर्वाच्यम् अस्मदभिमुखं [v]करामहे कुर्मः ॥

स्ववृजं हि त्वामहमिन्द्र शुश्रवानानुदं वृषभ रध्रचोदनम् ।
प्र मुञ्चस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसते ॥ ५ ॥

स्वऽवृजम् । हि । त्वाम् । अहम् । इन्द्र । शुश्रव । अननुऽदम् । वृषभ । रध्रऽचोदनम् ।
प्र । मुञ्चस्व । परि । कुत्सात् । इह । आ । गहि ।
किम् । ऊँ इति । त्वाऽवान् । मुष्कयोः । बद्धः । आसते ॥ ५ ॥

हे [v]वृषभ कामानां वर्षक [v]इन्द्र [v]स्ववृजं स्वयमेव च्छेत्तारम् [v]अननुदम् अनपेक्षितबलानुप्रदानं [v]रध्रचोदनं राधकस्य चोदकं प्रेरकं [v]त्वाम्[2] [v]अहं लुशः [v]शुश्रव अश्रौषं [v]हि यस्मात् तस्मात् [v]प्र [v]मुञ्चस्व। कुत्सेन वार्ध्रीशतेनाण्डयोर्बद्धमात्मानं बन्धनाद्विमुञ्च। अथ [v]परि सर्वतः परिवृतस्त्वं त्वत्सदृशैः [v]इह अस्मद्यागे [v]आ [v]गहि आगच्छ। [v]किमु [v]त्वावान् त्वत्सदृशोऽन्यः कश्चित् [v]मुष्कयोर्बद्ध [v]आसते । न कोऽप्येतादृशो निर्लज्जस्त्वत्तोऽन्योऽस्तीत्यभिप्रायः। तत्र शाट्यायनकं— ' कुत्सश्च लुशश्चेन्द्रं[3] व्यह्वयेतां स कुत्सस्याहवमागच्छत् तं शतेन वार्ध्रीभिराण्डयोरबध्नात् तं लुशोऽब्रवीत् स्ववृजं हि त्वामहमिन्द्र शुश्रवानानुदं वृषभ रध्रचोदनं प्र मुञ्चस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसत इति ताः सर्वाः संलुप्य लुशमभि प्रादुद्रुवत् ' इति । छन्दोगब्राह्मण-मपि—' कुत्सश्च लुशश्च युगपदिन्द्रमाहूतवन्तौ स्वं स्वं यज्ञं प्रत्यङ्गभावाय सक्थिवादिन्द्रः कुत्सं प्रति अगाम तं तु गतं वशित्वात्कुत्सो वार्ध्रीशतेनाण्डयोरबध्नात्[4] ' इति ॥ ॥ १४ ॥

---

१. त–' अभीके ' नास्ति । २. त१.२.३.६.७-म–त्वा त्वां । ३. त३.७-म–लुशश्चेन्द्रं । ४. त-म-मु–वध्रिशतेना° । ता. ब्रा. ९.२.२२ द्रष्टव्यम् ।

'यो वाम्' इति चतुर्दशर्चं दशमं सूक्तम्। कक्षीवतो दुहिता घोषा नाम ब्रह्मवादिन्यृषिः। अन्त्या त्रिष्टुप्। शिष्टा जगत्यः। अश्विनौ देवता। तथा चानुक्रान्तं—'यो वां चदूना काक्षीवती घोषाश्विनं हि त्रिष्टुबन्तम्' इति। प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दसीदमादीनि त्रीणि सूक्तानि। सूत्रितं च—'यो वां परिज्मेति त्रीणि त्रिश्चिन्नो अद्य' (आश्व. श्रौ. ४. १५) इति॥

यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता।
शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे॥ १॥

यः। वाम्। परिऽज्मा। सुऽवृत्। अश्विना। रथः। दोषाम्। उषसः। हव्यः। हविष्मता।
शश्वत्ऽतमासः। तम्। ऊँ इति। वाम्। इदम्। वयम्।
पितुः। न। नाम। सुऽहवम्। हवामहे॥ १॥

हे [v]अश्विना अश्विनौ [v]वां युवयोः [v]परिज्मा परितो गन्ता [v]सुवृत् सुष्ठु वर्तमानः [v]यः [v]रथः [v]दोषां रात्रिम् [v]उषसः च। अहोरात्रयोरित्यर्थः। [v]हविष्मता यजमानेन [v]हव्यः ह्वातव्यः [v]वां युवयोः स्वभूतं [v]सुहवं शोभनाह्वानं [v]तमु तमेव रथं [v]शश्वत्तमासः अतिशयेन चिरंतना वयं [v]पितुर्न यथा [v]पितुः [v]इदं [v]नाम तथा [v]हवामहे ह्वयामः॥

चोदयतं सूनृताः पिन्वतं धिय उत्पुरंधीरीरयतं तदुश्मसि।
यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतम्॥ २॥

चोदयतम्। सूनृताः। पिन्वतम्। धियः। उत्। पुरम्ऽधीः। ईरयतम्। तत्। उश्मसि।
यशसम्। भागम्। कृणुतम्। नः। अश्विना। सोमम्। न। चारुम्। मघवत्ऽसु। नः। कृतम्॥२॥

हे [v]अश्विना अश्विनौ युवां [v]सूनृताः वाच उषसो वा [v]चोदयतं प्रेरयतम्। अस्माकं [v]धियः कर्माणि च [v]पिन्वतं पूरयतम्। [v]पुरंधीः बह्वीः प्रज्ञाश्च [v]उत् [v]ईरयतम् उद्गमयतं प्रेरयतम्। उत्पादयतमित्यर्थः। [v]तत् एतत्त्रयम् [v]उश्मसि वयं कामयामहे। किंच [v]नः अस्माकं [v]यशसं यशस्विनं [v]भागं भजनीयं धनादिकं [v]कृणुतं कुरुतम्। [v]चारुं कल्याणं [v]सोमं [v]न सोममिव [v]नः अस्मान् [v]मघवत्सु धनवत्सु[1] [v]कृतं कुरुतम्॥

अमाजुरश्विद्भवथो युवं भगोऽनाशोश्विदवितारापमस्य चित्।
अन्धस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित्॥ ३॥

अमाऽजुरः। चित्। भवथः। युवम्। भगः। अनाशोः। चित्। अवितारा। अपमस्य। चित्।
अन्धस्य। चित्। नासत्या। कृशस्य। चित्।
युवाम्। इत्। आहुः। भिषजा। रुतस्य। चित्॥ ३॥

हे [v]नासत्या नासत्यौ [v]युवं युवाम् [v]अमाजुरश्वित् पितृगृहे जूर्यन्त्या[2] अपि[3] दुर्भगाया घोषायाः [v]भगः [v]भवथः। शोभनरूपेणात्मानं परिणमय्य पतिं दत्तवन्तौ स्थ इत्यर्थः। तथा च निगमान्तरं—

१. त–'धनवत्सु' नास्ति। २. त१.२.५.६.७–जूर्यतामिति; त४–जूर्यतामिति।

'घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम्' (ऋ. सं. १. ११७. ७) इति। vअनाशोश्रित् अनशनस्यापि vअवितारा रक्षितारौ युवां भवथः। vअपमस्य vचित् जात्यातिनिकृष्ट-स्यापि[1] रक्षितारौ भवथः। vअन्धस्य vचित् चक्षुर्विकलस्यापि रक्षितारौ भवथः। vकृशस्य vचित् दुर्बलस्यापि रक्षितारौ भवथः। किंच vयुवामित् युवामेव vऋतस्य vचित् यज्ञस्यापि[2] भिषजौ वैद्यौ vआहुः विद्वांसः॥

युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः।
निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या॥ ४॥

युवम्। च्यवानम्। सनयम्। यथा। रथम्। पुनः। युवानम्। चरथाय। तक्षथुः। निः। नौग्र्यम्। ऊहथुः। अत्ऽभ्यः। परि। विश्वा। इत्। ता। वाम्। सवनेषु। प्रऽवाच्या॥४॥

हे अश्विनौ vयुवं युवां vसनयं पुराणं vच्यवानम् ऋषिं vयथा vरथं जीर्णं रथमिव vपुनर्युवानं तरुणं vचरथाय चरणार्थं vतक्षथुः ततक्षथुः। अकुरुतमित्यर्थः। तथा च यास्कः—'युवं च्यवानं सनयं पुराणं यथा रथं पुनर्युवानं चरणाय ततक्षथुर्युवा प्रयौति कर्माणि तक्षतिः करोतिकर्मा' (निरु. ४. १९) इति। किंच युवां vनौग्र्यं तुग्रपुत्रं भुज्युम् vअद्भ्यः vपरि समुद्रस्योपरि vनिः vऊहथुः। किंच vवां युवयोः vविश्वा विश्वानि vता तानि कर्माणि vसवनेषु यज्ञेषु vप्रवाच्या प्रवाच्यानि प्रकर्षेण वक्तव्यानि॥

पुराणा वां वीर्या३ प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा।
ता वां नु नव्यावसे करामहेऽयं नासत्या श्रदरिर्यथा दधत्॥ ५॥

पुराणा। वाम्। वीर्या। प्र। ब्रव। जने। अथो इति। ह। आसथुः। भिषजा। मयःऽभुवा। ता। वाम्। नु। नव्यै। अवसे। करामहे। अयम्। नासत्या। श्रत्। अरिः। यथा। दधत्॥५॥

हे अश्विनौ vवां युवयोः vपुराणा पुराणानि वीर्याणि vजने लोके vप्र[3] vब्रव[3] प्रब्रवीमि। vअथो अपि च हे vनासत्या नासत्यौ युवां vमयोभुवा सुखस्य भावयितारौ vभिषजा भिषजौ वैद्यौ vआसथुः बभूवथुः। vता[4] तौ[4] युवाम् vअवसे रक्षणाय vनव्यै स्तुत्यै vकरामहे कुर्मः। vअयम् vअरिः गन्ता पतिर्यजमानः[5] vयथा vश्रत् vदधत् श्रद्दध्यादिति॥ ॥ १५॥

इयं वामह्वे शृणुतं मे अश्विना पुत्रायेव पितरा मह्यं शिक्षतम्।
अनापिरज्ञा असजात्यामतिः पुरा तस्या अभिशस्तेरव स्पृतम्॥ ६॥

इयम्। वाम्। अह्वे। शृणुतम्। मे। अश्विना। पुत्रायऽइव। पितरा। मह्यम्। शिक्षतम्। अनापिः। अज्ञाः। असजात्या। अमतिः। पुरा। तस्याः। अभिऽशस्तेः। अव। स्पृतम्॥६॥

हे vअश्विना अश्विनौ vवां युवाम् vइयं घोषा अहम् vअह्वे आह्वयामि। vमे मम संबन्धिनम् इममाह्वानं vशृणुतम्। श्रुत्वा चाह्वानं vमह्यं vपुत्रायेव यथा पुत्राय vपितरा मातापितरौ तद्वत्

---

१. ग–जात्या निकृष्टस्यापि; त-म६-सु-जात्यादिनिकृष्टस्यापि; त३-म१.२.४–जात्यादिकृष्टस्यापि; म७–जात्यादिकृष्वस्यापि। २. त७–कृणस्यापि। ३. त-म–'प्र ब्रव' नास्ति। ४. त–सातौ। ५. ग–एष यजमानः।

vशिक्षतं धनं दत्तम् । vअनापिः अबन्धुः vअज्ञा अकृतज्ञा vअसजात्यामतिः अश्रद्धेया याभिश्शस्तिः मामागच्छति । vतस्या vअभिशस्तेः vपुरा प्रागेव vअव vस्पृतं मामवपारयतम् ॥

युवं रथेन विमदाय शुन्ध्युवं न्यूहथुः पुरुमित्रस्य योषणाम् ।
युवं हवं वध्रिमत्या अगच्छतं युवं सुषुतिं चक्रथुः पुरंधये ॥ ७ ॥

युवम् । रथेन । विऽमदाय । शुन्ध्युवम् । नि । ऊहथुः । पुरुऽमित्रस्य । योषणाम् ।
युवम् । हवम् । वध्रिऽमत्याः । अगच्छतम् । युवम् । सुऽसुतिम् । चक्रथुः । पुरम्ऽधये ॥ ७ ॥

हे अश्विनौ vयुवं युवां vपुरुमित्रस्य पुरुमित्रनामधेयस्य vयोषणां दुहितरं vशुन्ध्युवं नाम जायां vविमदाय विमदनामधेयाय ऋषये vरथेन स्वसेनापरिवृतेन रथेन vन्यूहथुः प्रापयतम् । विमदस्य गृहं नीतवन्तौ स्थ इत्यर्थः । तथा च निगमान्तरं—' यावभंगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ' (ऋ. सं. १. ११६. १) इति । किंच vयुवं युवां vवध्रिमत्याः संग्रामे शत्रुभिश्छिन्नहस्तायाः vहवम् आह्वानम् vअगच्छतम् । आगत्य च[1] तस्यै[2] हिरण्मयं हस्तं प्रायच्छतम्[3] । तथा च निगमान्तरम्—' अजोहवीन्नासत्या करा वां महे यामन् पुरुभुजा पुरंधिः । श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तम् ' (ऋ. सं. १. ११६. १३) इति । किंच vयुवं युवां vपुरंधये बहुप्रज्ञायै वध्रिमत्यै vसुषुतिं सुप्रसवं शोभनमैश्वर्यं वा vचक्रथुः कृतवन्तौ स्थः ॥

युवं विप्रस्य जरणामुपेयुषः पुनः कलेरकृणुतं युवद्वयः ।
युवं वन्दनमृश्यदादुदूपथुर्युवं सद्यो विश्पलामेतवे कृथः ॥ ८ ॥

युवम् । विप्रस्य । जरणाम् । उपऽइयुषः । पुनरिति । कलेः । अकृणुतम् । युवत् । वयः ।
युवम् । वन्दनम् । ऋश्यऽदात् । उत् । ऊपथुः । युवम् । सद्यः । विश्पलाम् । एतवे । कृथः ॥ ८ ॥

हे अश्विनौ vयुवं युवां vविप्रस्य मेधाविनः vजरणां जराम् vउपेयुषः उपगतवतः vकलेः कलिनामधेयस्य ऋषेः vवयः vपुनः पुनरपि vयुवत् युवत्वयुक्तम् vअकृणुतम् अकुरुतम् । तथा च निगमान्तरं—' कलिं याभिर्वित्तजानिं दुवस्यथः ' (ऋ. सं. १. ११२. १५) इति । किंच vयुवं युवां vवन्दनं जायाविरहसंतापेन कूपपतितं वन्दनाख्यमृषिम् vऋश्यदात् कूपात् vउदूपथुः उदैरयतम् । तथा निगमान्तरम्—' उद्वन्दनमैरयतं स्वर्दृशे ' (ऋ. सं. १. ११२. ५) इति । किंच vयुवं युवां vविश्पलाम् । खेलस्य राज्ञः सेनायां योद्धी विश्पला नाम काचित् स्त्री । तां संग्रामे शत्रुभिश्छिन्नजङ्घां vसद्यः तदैव vएतवे गमनाय vकृथः अकुरुतम् । तथा च निगमान्तरं—' चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम् । सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम् ' (ऋ. सं. १. ११६. १५) इति ॥

युवं ह रेभं वृषणा गुहा हितमुदैरयतं ममुवांसमश्विना ।
युवमृबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः सप्तवध्रये ॥ ९ ॥

युवम् । ह । रेभम् । वृषणा । गुहा । हितम् । उत् । ऐरयतम् । ममुऽवांसम् । अश्विना ।
युवम् । ऋबीसम् । उत । तप्तम् । अत्रये । ओमन्ऽवन्तम् । चक्रथुः । सप्तऽवध्रये ॥ ९ ॥

---

१. त-भ६-मु-' च ' नास्ति । २. त-भ६-मु-तस्मै । ३. त-भ६-मु-प्रयच्छतं; त३-भ१.४-अप्रयच्छतं, भ२-अप्रायच्छतं ।

हे Vवृषणा वर्षितारौ Vअश्विना अश्विनौ Vयुवं युवां Vगुहा गुहायां Vहितम् अन्यैर्निहितं Vमनुषांसं म्रियमाणं Vरेभं रेभाख्यमृषिम् Vउदैरयतम् उत्तारितवन्तौ स्थः । तथा च निगमान्तरं—'दश रात्रीरशिवेना नव यूनवनद्धं भथितमप्स्वन्तः । विमुतं रेभमुदनि प्रवृक्तमुन्निन्थतुः सोममिव स्रुवेण' (ऋ. सं. १. ११६. २४) इति । Vउत किंच Vयुवं युवां Vतप्तम् Vऋबीसम् अग्निकुण्डम् Vअत्रये अत्रेरर्थाय Vओमन्वन्तम् अवनवन्तं Vचक्रथुः । वृष्ट्या निर्गमस्य शीतं कृतवन्तौ स्थ इत्यर्थः। तथा च निगमान्तरं—'हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् । ऋबीसे अग्निमश्विनावनीतमुन्निन्थुः सर्वगणं स्वस्ति' (ऋ. सं. १. ११६. ८) इति । किंच युवां Vसप्तवध्रये अश्वमेधेन राज्ञा केनचिदपराधेन काष्ठमयमञ्जूषायां निहितस्य सप्तवध्रिनामधेयस्य ऋषेरर्थाय चक्रथुः । मञ्जूषोद्घाटनं कृतवन्तौ स्थ इत्यर्थः । तथा च निगमान्तरं—'वि जिहीष्व वनस्पते योनिः सूष्यन्त्या इव । श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चतम्' (ऋ. सं. ५. ७८. ५) इति ॥

युवं श्वेतं पेदवेऽश्विनाश्वं नवभिर्वाजैर्नवती च वाजिनम् ।
चर्कृत्यं ददथुर्द्रावयत्सखं भगं न नृभ्यो हव्यं मयोभुवम् ॥ १० ॥

युवम् । श्वेतम् । पेदवे । अश्विना । अश्वम् । नवऽभिः । वाजैः । नवती । च । वाजिनम् । चर्कृत्यम् । ददथुः । द्रवयत्ऽसखम् । भगम् । न । नृऽभ्यः । हव्यम् । मयःऽभुवम् ॥ १० ॥

हे Vअश्विना अश्विनौ Vयुवं युवां Vपेदवे पेदुनामधेयाय राज्ञे Vश्वेतं श्वेतवर्णं Vवाजिनं बलिनं Vनवभिः Vनवती नवत्याधैः सहितं Vचर्कृत्यं संग्रामाणामत्यर्थं कर्तारं शत्रूणां जेतारं वा Vद्रवयत्सखं शत्रुसखीनां[1] द्रावयितारं[2] Vहव्यं ह्वातव्यं Vमयोभुवं सुखस्य भावयितारम् Vअश्वं Vनृभ्यः मनुष्येभ्यः Vभगं Vन भजनीयं धनमिव Vददथुः प्रायच्छतम्[3] ॥ ॥ १६ ॥

न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं नकिर्भयम् ।
यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्न्या सह ॥ ११ ॥

न । तम् । राजानौ । अदिते । कुतः । चन । न । अंहः । अश्नोति । दुःऽइतम् । नकिः । भयम् । यम् । अश्विना । सुऽहवा । रुद्रवर्तनी इति रुद्रऽवर्तनी । पुरःऽरथम् । कृणुथः । पत्न्या । सह ॥ ११ ॥

हे Vराजानौ ईश्वरौ Vअदिते अदीनौ सुहवौ स्वाह्वानौ Vरुद्रवर्तनी स्तोत्रयुक्तमार्गौ हे Vअश्विना अश्विनौ युवां Vयं जनं Vपुरोरथम् अग्रतोरथं Vपत्न्या Vसह स्वयंवरे Vकृणुथः कुरुथः Vतं जनं Vकुतश्चन कुतोऽपि Vअंहः पापं Vन Vअश्नोति न व्याप्नोति । Vदुरितं दुर्गतिरपि Vन Vअश्नोति । Vनकिः न च Vभयं संसारभयं न प्राप्नोति ॥

आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना ।
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥ १२ ॥

आ । तेन । यातम् । मनसः । जवीयसा । रथम् । यम् । वाम् । ऋभवः । चक्रुः । अश्विना । यस्य । योगे । दुहिता । जायते । दिवः ।
उभे इति । अहनी इति । सुदिने इति सुऽदिने । विवस्वतः ॥ १२ ॥

---

१. त-सु-°सखानां । २. ग-त१.२.६-म१.४.७-अभिद्रावयितारं; म५-अभिप्रावयितारं । ३. त-म-अप्रयच्छतं ।

हे vअश्विना अश्विनौ vवां युवयोः vयं vरथम् vऋभवश्चक्रुः अकार्षुः vयस्य रथस्य vयोगे संबन्धे सति vदिवः vदुहिता उषाः vजायते प्रादुर्भवति यस्य च योगे vविवस्वतः भास्करात् vउभे vअहनी अहोरात्रे vसुदिने शोभने जायेते vतेन रथेन vमनसः अपि vजवीयसा वेगवत्तरेण vआ vयातं युवामागच्छतम्[1] ॥

ता वर्तिर्यातं जयुषा वि पर्वतमर्पिन्वतं शयवे धेनुमश्विना ।
वृकस्य चिद्वर्तिकामन्तरास्याद्युवं शचीभिर्प्रसिताममुञ्चतम् ॥ १३ ॥

ता । वर्तिः । यातम् । जयुषा । वि । पर्वतम् । अर्पिन्वतम् । शयवे । धेनुम् । अश्विना ।
वृकस्य । चित् । वर्तिकाम् । अन्तः । आस्यात् । युवम् । शचीभिः । प्रसिताम् । अमुञ्चतम् ॥ १३ ॥

हे vअश्विना अश्विनौ vता तौ युवां vजयुषा जयशीलेन रथेन vपर्वतम् अद्रिं प्रति vवर्तिः मार्गं vवि vयातं विविधं गच्छथः । तथा च निगमान्तरं—'वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः' (ऋ. सं. ६. ६२. ७) इति । किंच युवां vशयवे शयोरर्थाय vधेनुम् vअपिन्वतम् । निवृत्तप्रसवां वृद्धां गां प्रभूतस्य पयसो दोग्ध्रीं कृतवन्तौ स्थ इत्यर्थः । तथा च निगमान्तरं—'युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय' (ऋ. सं. १. ११८. ८) इति । किंच vयुवं युवां vवृकस्य vअन्तः अनुप्रविष्टां vप्रसितां वृकेण ग्रस्तां vवर्तिकाम् । वर्तिका नाम चटका । ताम् vआस्यात् वृकस्य मुखात् vशचीभिः प्रज्ञाभिः कर्मभिर्वा vअमुञ्चतम् अमोचयतम् । तथा च निगमान्तरम्–'अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य' (ऋ. सं. १.११७.१६) इति ॥

एतं वां स्तोममश्विनावकर्मार्तक्षाम भृगवो न रथम् ।
न्यमृक्षाम योषणां न मर्ये नित्यं न सूनुं तनयं दधानाः ॥ १४ ॥

एतम् । वाम् । स्तोमम् । अश्विनौ । अकर्म । अतक्षाम । भृगवः । न । रथम् ।
नि । अमृक्षाम । योषणाम् । न । मर्ये । नित्यम् । न । सूनुम् । तनयम् । दधानाः ॥ १४ ॥

हे vअश्विना अश्विनौ vवां युवयोः vएतं यथोक्तं vस्तोमं स्तोत्रम् vअकर्म अकुर्म । तदेवाह । vभृगवो vन भृगव इव vरथम् vअतक्षाम वयं स्तोत्रं संस्कृतवन्तः । कर्मयोगाद्भवो भृगव उच्यन्ते । अथवा रथकारा भृगवः । किंच वयं vनित्यं शाश्वतं vतनयं यागादीनां कर्मणां तनितारं vसूनुं vन औरसं पुत्रमिव स्तोमं vदधानाः धारयन्तः vमर्ये मनुष्ये vन्यमृक्षाम । युवयोः स्तुतिं नितरां संस्कृतवन्तः । तत्र दृष्टान्तः । vयोषणां vन । यथा जायां तद्वदित्यर्थः ॥ ॥ १७ ॥

'रथं यान्तम्' इति चतुर्दशर्चमेकादशं सूक्तं काक्षीवत्या घोषाया आर्षं जागतमाश्विनम् । 'रथं यान्तम्' इत्यनुक्रान्तम् । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

रथं यान्तं कुह को ह वां नरा प्रति द्युमन्तं सुवितायं भूषति ।
प्रातर्यावाणं विभ्वं विशेविशे वस्तोर्वस्तोर्वहमानं धिया शमि ॥ १ ॥

रथम् । यान्तम् । कुह । कः । ह । वाम् । नरा । प्रति । द्युऽमन्तम् । सुवितायं । भूषति ।
प्रातःऽयावानम् । विऽभ्वम् । विशेऽविशे । वस्तोःऽवस्तोः । वहमानम् । धिया । शमि ॥ १ ॥

---

१. त-भ२.६-सु-°मागच्छतमस्मान् ।

हे vनरा कर्मणां नेतारावश्विनौ vवां युवयोः संबन्धिनं vद्युमन्तं दीप्तिमन्तं vप्रातर्यावाणं यज्ञं प्रति[1] प्रातःकाले गन्तारं vविभ्वं विभुं व्यापिनं vविशेविशे सर्वेषु मनुष्येषु vवस्तोर्वस्तोः अन्वहं vवहमानं धनं प्रापयन्तं vयान्तं गच्छन्तं vरथं vकुह कस्मिन् देशे vको vह कः खलु यजमानः vअमि यज्ञरूपे कर्मणि vधिया स्तुतिरूपेण कर्मणा vसुविताय अभ्युदयार्थं vप्रति vभूषति[2] अलंकरोति। कस्मिन् देशे यज्ञे कोऽन्यो यजमानो युवां स्तुतिभिर्हविर्भिश्च पूजितवान् येनास्मद्यज्ञं प्रति विलम्बेनागतवन्तौ स्थ इत्यभिप्रायः ॥

कुह॑ स्वि॒द्दो॒षा कु॒ह वस्तो॒रश्वि॑ना॒ कुहा॑भिपि॒त्वं क॑रतः॒ कुहो॑षतुः।
को वां॑ शयु॒त्रा वि॒धवे॑व दे॒वरं॑ मर्यं॒ न योषा॑ कृणुते॒ सध॒स्थ आ ॥ २ ॥

कुह॑ । स्वि॒त् । दो॒षा । कुह॑ । वस्तोः॑ । अश्वि॑ना । कुह॑ । अ॒भि॒ऽपि॒त्वम् । क॒र॒तः॒ । कुह॑ । ऊ॒ष॒तुः॒ ।
कः । वा॒म् । श॒यु॒ऽत्रा । वि॒धवा॑ऽइव । दे॒वर॑म् । मर्य॑म् । न । योषा॑ । कृ॒णु॒ते॒ । सध॑ऽस्थे । आ ॥२॥

हे vअश्विना अश्विनौ vकुह vस्वित् क्व चित् vदोषा रात्रौ भवथ इति शेषः। vकुह vवस्तोः क्व वा दिवा भवथः। vकुह क्व वा vअभिपित्वम् अभिप्राप्तिं vकरतः कुरुथः। vकुह क्व वा vऊषथुः वसथः। किंच vवां युवां vकः यजमानः vसधस्थे सहस्थाने वेद्यास्थे vआ vकृणुते आकुरुते[3]। परिचरणार्थमात्माभिमुखीकरोति। तत्र दृष्टान्तौ दर्शयति। vशयुत्रा शयने vविधवेव यथा मृतभर्तृका नारी vदेवरं भर्तृभ्रातरमभिमुखीकरोति। vमर्यं vन यथा च सर्वं मनुष्यं vयोषा सर्वा नारी संभोगकालेऽभिमुखीकरोति तद्वदित्यर्थः। तथा च यास्कः—'क स्विद्रात्रौ भवथः क्व दिवा क्वाभिप्राप्तिं कुरुथः क्व वसथः को वां शयने विधवेव देवरम्। देवरः कस्माद्द्वितीयो वर उच्यते। विधवा विधानृका भवति विधवनाद्वा विधावनाद्वेति चर्मशिरा अपि वा धव इति मनुष्यनाम तद्वियोगाद्विधवा। देवरो दीव्यतिकर्मा। मर्यो मनुष्यो मरणधर्मा। योषा यौतेराकुरुते सधस्थाने' (निरु. ३. १५) इति ॥

प्रा॒तर्जि॑रेथे॒ जर॑णेव॒ कार्प॑या॒ वस्तो॑र्वस्तोर्यज॒ता ग॑च्छथो गृ॒हम्।
कस्य॑ ध्व॒स्रा भव॑थः॒ कस्य॑ वा नरा राजपु॒त्रेव॒ सव॑नाव॒ गच्छ॑थः ॥ ३ ॥

प्रा॒तः। जि॒रे॒थे॒ इति॑। जर॑णाऽइव। कार्प॑या। वस्तो॑:ऽवस्तोः। य॒ज॒ता॒। ग॒च्छ॒थः॒। गृ॒हम्।
कस्य॑। ध्व॒स्रा॒। भव॑थः। कस्य॑। वा॒। नरा॒।
राजपु॒त्राऽइ॑व। सव॑ना। अव॑। गच्छ॑थः ॥ ३ ॥

हे vनरा नेतारावश्विनौ युवां vप्रातः प्रातःकाले vजरेथे स्तोतृभिः स्तूयेथे। तत्र दृष्टान्तः। vजरणेव। यथा जरणौ ऐश्वर्येण वृद्धौ राजानौ vकार्पया। प्रातःप्रबोधकस्य वन्दिनो वाणी कार्पा। तथा स्तूयेथे। तद्वदित्यर्थः। किंच vवस्तोर्वस्तोः अन्वहं vयजता यष्टव्यौ युवां vगृहं यजमानस्य मन्दिरं vगच्छथः प्राप्नुथः। तौ युवां vकस्य यजमानसंबन्धिनो दोषस्य vध्वस्रा ध्वंसकौ विनाशयितारौ vभवथः। vकस्य यजमानस्य vसवना सवनानि vराजपुत्रेव राजकुमाराविव[4] युवाम् vअव vगच्छथः प्राप्नुथः ॥

१. त-मु-प्रति विलंबेनग। २. त-भ२-भूषति। ३. त-'आकुरुते' नास्ति। ४. त-राजकुमारीव।

युवां मृगेव वारणा मृगण्यवो दोषा वस्तोर्हविषा नि ह्वयामहे ।
युवं होत्रामृतुथा जुह्वते नरेषं जनाय वहथः शुभस्पती ॥ ४ ॥

युवाम् । मृगाऽइव । वारणा । मृगण्यवः । दोषा । वस्तोः । हविषा । नि । ह्वयामहे ।
युवम् । होत्राम् । ऋतुऽथा । जुह्वते । नरा । इषम् । जनाय । वहथः । शुभः । पती इति ॥४॥

हे अश्विनौ [v]युवां [v]वारणा वारणौ [v]मृगेव यथा शार्दूलौ [v]मृगण्यवः मृगयवः तद्वद्वयं [v]दोषा रात्रौ [v]वस्तोः अहनि च [v]हविषा [v]नि [v]ह्वयामहे नियमेन ह्वयामः । किंच हे [v]नरा नेतारावश्विनौ [v]युवं युवाम् [v]ऋतुथा काले काले [v]होत्राम् आहुतिं [v]जुह्वते जुह्वति । यजमाना इति शेषः । किंच युवां [v]शुभः शुभस्य वृष्ट्युदकस्य [v]पती स्वामिनौ सन्तौ [v]जनाय जनार्थम् [v]इषम् अन्नं [v]वहथः प्रापयथः॥

युवां ह घोषा पर्यश्विना यती राज्ञ ऊचे दुहिता पृच्छे वां नरा ।
भूतं मे अह्ने उत भूतमक्तवेऽश्वावते रथिने शक्तमर्वते ॥ ५ ॥

युवाम् । ह । घोषा । परि । अश्विना । यती । राज्ञः । ऊचे । दुहिता । पृच्छे । वाम् । नरा ।
भूतम् । मे । अह्ने । उत । भूतम् । अक्तवे । अश्वऽवते । रथिने । शक्तम् । अर्वते ॥ ५ ॥

हे [v]नरा नेतारावश्विनौ [v]युवां खलु [v]परि परितो [v]यती गच्छन्ती [v]राज्ञः दीप्तस्य कक्षीवतः [v]दुहिता पुत्री [v]घोषा घोषाख्या अहम् [v]ऊचे संनिहितेभ्यो वृद्धेभ्य उक्तवत्यस्मि । किंच [v]वां युवां [v]पृच्छे वृद्धान् संनिहितान् कीदृशावश्विनाविति पृच्छामि । तथा सति [v]मे मम [v]अह्ने दिवसाय दिवसनिर्वर्त्यकर्मणे [v]भूतं भवतम् । [v]उत अपि च [v]अक्तवे रात्र्यै रात्रिनिर्वर्त्यकर्मणे [v]भूतं भवतम् । तथा [v]अश्ववते अश्वयुक्ताय [v]रथिने रथवते च [v]अर्वते भ्रातृव्याय [v]शक्तं निरसने शक्तौ भवतम्॥ ॥१८॥

युवं कवी ष्टः पर्यश्विना रथं विशो न कुत्सो जरितुर्नशायथः ।
युवोर्ह मक्षा पर्यश्विना मध्वासा भरत निष्कृतं न योषणा ॥ ६ ॥

युवम् । कवी इति । स्थः । परि । अश्विना । रथम् । विशः । न । कुत्सः । जरितुः । नशायथः ।
युवोः । ह । मक्षा । परि । अश्विना । मधु । आसा । भरत । निःऽकृतम् । न । योषणा ॥६॥

हे [v]अश्विना अश्विनौ [v]कवी मेधाविनौ [v]युवं युवां [v]रथं [v]परि [v]ष्टः परितो[1] भवथः[1]। अथ [v]जरितुः स्तोतुर्यज्ञं प्रति गमनाय [v]नशायथः रथं[2] प्राप्नुथः[2]। तत्र दृष्टान्तः । [v]कुत्सः [v]न । यथा कुत्सश्चेन्द्रश्च सरथमधितिष्ठतः । तथा च मन्त्रान्तरं—'यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः' (ऋ. सं. ४. १६. ११) इति । किंच हे [v]अश्विना अश्विनौ [v]युवोर्ह युवयोः खलु स्वभूतं [v]मधु [v]मक्षा मक्षिका [v]आसा आस्येन [v]परि [v]भरत बिभर्ति । तत्र दृष्टान्तः । [v]निष्कृतं [v]न यथा निष्कृतं संस्कृतं मधु [v]योषणा नारी तद्वदित्यर्थः । तथा च मन्त्रान्तरम्—'उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति' (ऋ. सं. १. ११९. ९) इति ॥

युवं ह भुज्युं युवमश्विना वशं युवं शिञ्जारमुशनामुपारथुः ।
युवो रराव परि सख्यमासते युवोरहमवसा सुम्नमा चके ॥ ७ ॥

---

१. ग-त३-भ१.४.७-परिभवथः । २. त-व्याप्नुथः ।

युवम्। ह। भुज्युम्। युवम्। अश्विना। वशम्। युवम्। शिञ्जारम्। उशनाम्। उप। आरथुः॥
युवोः। ररावा। परि। सख्यम्। आसते। युवोः। अहम्। अवसा। सुम्नम्। आ। चके॥७॥

हे अश्विना अश्विनौ युवं ह युवां खलु भुज्युं समुद्रमध्ये विपन्ननावं तुग्रपुत्रं भुज्युम् उपारथुः उत्तारयितुमुपगतवन्तौ भवथः। किंच युवं युवां वशं हस्तिबलेन शत्रुभिः पराजीयमानं वशनामधेयं राजानं रक्षणाय उपारथुः। किंच युवं युवां शिञ्जारम् अग्निमग्निकूटादुत्तारयितुम् उशनां कमनीयां स्तुतिं च श्रोतुमुपारथुः। तथा च मन्त्रान्तरम्—'अत्रिं शिञ्जारमश्विना' (ऋ. सं. ८. ५. २५) इति। किंच युवोः युवयोः सख्यं मित्रत्वं रराव हविषां प्रदाता यजमानः परि आसते पर्यास्ते। वचनव्यत्ययः। किंच युवोः युवयोः अवसा रक्षणेन अहं घोषा सुम्नं सुखम् आ चके कामये॥

युवं ह कृशं युवमश्विना शयुं युवं विधन्तं विधवामुरुष्यथः।
युवं सनिभ्यः स्तनयन्तमश्विनाप व्रजमूर्णुथः सप्तास्यम्॥ ८॥

युवम्। ह। कृशम्। युवम्। अश्विना। शयुम्। युवम्। विधन्तम्। विधवाम्। उरुष्यथः।
युवम्। सनिऽभ्यः। स्तनयन्तम्। अश्विना। अप। व्रजम्। ऊर्णुथः। सप्तऽआस्यम्॥ ८॥

हे अश्विना अश्विनौ युवं ह युवां खलु कृशं दुर्बलं कृशनामधेयं वा उरुष्यथः रक्षथः। किंच युवं युवां शयुं शयुनामानमृषिमुरुष्यथः। किंच युवं युवां विधन्तं परिचरन्तं मनुष्यं विधवां च अपतिकां वह्निमतीं योद्धीं स्त्रियं च उरुष्यथः। किंच हे अश्विना अश्विनौ युवं युवां स्तनयन्तं शब्दं कुर्वन्तं सप्तास्यं सर्पणशीलद्वारं व्रजं मेघम्। 'व्रजश्चरुः' इति मेघनामसु पाठात्। सनिभ्यः हविषां दातृभ्यः अप ऊर्णुथः विवृतद्वारं कृतवन्तौ स्थ इत्यर्थः॥

जनिष्ट योषा पतयत्कनीनको वि चारुहन्वीरुधो दंसना अनु।
आस्मै रीयन्ते निवनेव सिन्धवोऽस्मा अह्वे भवति तत्पतित्वनम्॥ ९॥

जनिष्ट। योषा। पतयत्। कनीनकः। वि। च। अरुहन्। वीरुधः। दंसनाः। अनु।
आ। अस्मै। रीयन्ते। निवनाऽइव। सिन्धवः। अस्मै। अह्वे। भवति। तत्। पतिऽत्वनम्॥९॥

हे अश्विनौ युवयोः प्रसादादियं घोषा योषा स्त्रीगुणोपेता सुभगा जनिष्ट जाता। अस्याः समीपं कनीनकः कन्याकामः पतिः पतयत् पततु। अस्मै कनीनकाय युवयोः दंसनाः अनु वृष्टिलक्षणानि कर्माणि लक्षीकृत्य वीरुधः ओषधयः वि चारुहन् विरोहन्तु प्रादुर्भवन्तु। अस्मै कनीनकाय निवनेव प्रवणेनेव सिन्धवः उदकानि आ रीयन्ते। ता वीरुधोऽभिगच्छन्तु। किंच अह्वे केनाप्यहन्तव्याय अस्मै कनीनकाय तत् संभोगसमर्थं पतित्वनं यौवनं भवति भवतु॥

जीवं रुदन्ति वि मयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे॥ १०॥

जीवम्। रुदन्ति। वि। मयन्ते। अध्वरे। दीर्घाम्। अनु। प्रऽसितिम्। दीधियुः। नरः।
वामम्। पितृऽभ्यः। ये। इदम्। सम्ऽएरिरे। मयः। पतिऽभ्यः। जनयः। परिऽस्वजे॥१०॥

हे अश्विनौ युवयोरनुग्रहात् vये vनरः पतयो जायानां vजीवं जीवनमुद्दिश्य vरुदन्ति । रोदनेनापि जायानां जीवनमेवाशासत इत्यर्थः । ता जायाः vअध्वरे यज्ञे vवि vमयन्ते निवेशयन्ति च किंच तासु vदीर्घां महतीं vप्रसितिं भुजयोः प्रबन्धनम् vअनु vदीधियुः अनुदधति । vहृदं vकामं वननीयमपत्यं vपितृभ्यः vसमीरिरे संप्रेरयन्ति च[1] । तेभ्यः vपतिभ्यः vजनयः जायाः vपरिष्वजे परिष्वङ्गार्थं vभयः सुखं कुर्वन्तीति शेषः ॥ ॥ १९ ॥

न तस्य विद्म तदु षु प्र वोचत युवा ह यद्युवत्याः क्षेति योनिषु ।
प्रियोऽस्रियस्य वृषभस्य रेतिनो गृहं गमेमाश्विना तदुश्मसि ॥ ११ ॥

न । तस्य । विद्म । तत् । ऊँ इति । सु । प्र । वोचत । युवा । ह । यत् । युवत्याः । क्षेति । योनिषु ।
प्रियऽउस्रियस्य । वृषभस्य । रेतिनः । गृहम् । गमेम । अश्विना । तत् । उश्मसि ॥ ११ ॥

हे vअश्विना अश्विनौ vतस्य vतत् सुखं वयं vन vविद्म न जानीमः । तत्सुखं यूयं[2] vसु[3] सुष्ठु vप्र vवोचत । बहुवचनं पूजार्थम् । vयुवा vह तरुणः खलु मत्पतिः vयुवत्याः यौवनान्वितायाः मम vयोनिषु गृहेषु vयत् vक्षेति निवसतीति । किंच vप्रियोस्रियस्य प्रियं युवतेः vवृषभस्य सेक्तुः vरेतिनः रेतस्विनो मत्पतेः vगृहं vगमेम गच्छेम । वयं vतत् गृहम् vउश्मसि कामयामहे ॥

आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अयंसत ।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्यां अशीमहि ॥ १२ ॥

आ । वाम् । अगन् । सुऽमतिः । वाजिनीवसू इति वाजिनीऽवसू ।
नि । अश्विना । हृत्ऽसु । कामाः । अयंसत ।
अभूतम् । गोपा । मिथुना । शुभः । पती इति । प्रियाः । अर्यम्णः । दुर्यान् । अशीमहि ॥१२॥

हे vवाजिनीवसू अन्नधनौ vशुभस्पती उदकस्य स्वामिनौ हे vअश्विना अश्विनौ vमिथुना मिथुनौ परस्परं सहितौ vवां युवां vसुमतिः vआ vअगन् आगच्छतु । vहृत्सु अस्मदीयेषु हृदयेषु vकामाः अभिलाषाः vनि vअयंसत नियम्यन्ताम् । किंच युवां vगोपा मम गोपायितारौ vअभूतं भवतम् । अपि च vप्रियाः सत्यो वयम् vअर्यम्णः पत्युः vदुर्यान् गृहान् vअशीमहि प्राप्नुयाम[4] ॥

ता मन्दसाना मनुषो दुरोण आ धत्तं रयिं सहवीरं वचस्यवे ।
कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामपं दुर्मतिं हतम् ॥ १३ ॥

ता । मन्दसाना । मनुषः । दुरोणे । आ । धत्तम् । रयिम् । सहऽवीरम् । वचस्यवे ।
कृतम् । तीर्थम् । सुऽप्रपानम् । शुभः । पती इति ।
स्थाणुम् । पथेऽस्थाम् । अप । दुःऽमतिम् । हतम् ॥ १३ ॥

हे अश्विनौ vमन्दसाना मन्दसानौ vता तौ युवां vमनुषः मनुष्यस्य मत्पतेः vदुरोणे गृहे vवचस्यवे युष्मत्स्तुतिकामायै मह्यं vसहवीरं पुत्रादिसहितं vरयिं धनम् vआ vधत्तं स्थापयतम् ।

१. त-भ६-मु-'च' नास्ति । २. ग-युवां । ३. त-भ-'सु' नास्ति । ४. त-भ-प्राप्नुयामः ।

किंच हे अश्विनौ [v]शुभस्पती उदकस्य स्वामिनौ युवां पतिगृहं गच्छन्त्या मम [v]तीर्थं पानाय [v]क्षुप्रपाणं [v]कृतं कुरुतम्। किंच युवां [v]पथेष्ठां मार्गस्थं [v]स्थाणुं वृक्षं [v]दुर्मतिं दुर्बुद्धिं परिपन्थिनं च [v]अप [v]हतम् अपगमयतम् ॥

क्व स्विदद्य कतमास्वश्विना विक्षु दस्रा मादयेते शुभस्पती।
क ईं नि येमे कतमस्य जग्मतुर्विप्रस्य वा यजमानस्य वा गृहम् ॥ १४ ॥

क्व। स्वित्। अद्य। कतमासु। अश्विना। विक्षु। दस्रा। मादयेते इति। शुभः। पती इति। कः। ईम्। नि। येमे। कतमस्य। जग्मतुः। विप्रस्य। वा। यजमानस्य। वा। गृहम् ॥ १४ ॥

हे [v]अश्विना अश्विनौ [v]दस्रा दर्शनीयौ [v]शुभस्पती उदकस्य पती स्वामिनौ भवन्तौ [v]क्व [v]स्वित् क्व स्थितौ[1] जनपदे [v]अद्य अस्मिन्नहनि [v]कतमासु कासु [v]विक्षु प्रजासु [v]मादयेते आत्मानं तर्पयतः। किंच [v]कः यजमानः [v]ईम् एतौ [v]नि [v]येमे नियच्छति। किंच भवन्तौ [v]कतमस्य [v]विप्रस्य मेधाविनः स्तोतुः[2] [v]यजमानस्य [v]गृहं [v]वा[2] [v]जग्मतुः गतवन्तौ ॥ ॥ २० ॥

'समानम्' इति तृचं द्वादशं सूक्तं घोषायाः पुत्रस्य सुहस्त्यस्यार्षं जागतमाश्विनम्। अनुक्रान्तं च—'समानं तृचं सुहस्त्यो घौषेयः' इति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

समानमु त्यं पुरुहूतमुक्थ्यं[1] रथं त्रिचक्रं सवना गनिग्मतम्।
परिज्मानं विदथ्यं सुवृक्तिभिर्वयं व्युष्टा उषसो हवामहे ॥ १ ॥

समानम्। ऊं इति। त्यम्। पुरुऽहूतम्। उक्थ्यम्। रथम्। त्रिऽचक्रम्। सवना। गनिग्मतम्। परिऽज्मानम्। विदथ्यम्। सुवृक्तिऽभिः। वयम्। विऽउष्टौ। उषसः। हवामहे ॥ १ ॥

हे अश्विनौ युवयोः [v]समानमु साधारणमेव [v]त्यं तं [v]पुरुहूतं बहुभिराहूतम् [v]उक्थ्यं प्रशस्यं [v]त्रिचक्रं [v]सवना सवनानि यज्ञान् [v]गनिग्मतं प्रतिगच्छन्तं [v]परिज्मानं परितो गन्तारं [v]विदथ्यं यज्ञार्हं [v]रथम् [v]उषसः [v]व्युष्टौ [v]सुवृक्तिभिः सुष्ठु दोषवर्जिताभिः स्तुतिभिः [v]वयं [v]हवामहे आह्वयामः ॥

प्रातर्युजं नासत्याधि तिष्ठथः प्रातर्यावाणं मधुवाहनं रथम्।
विशो येन गच्छथो यज्वरीर्नरा कीरेश्चिद्यज्ञं होतृमन्तमश्विना ॥ २ ॥

प्रातःऽयुजम्। नासत्या। अधि। तिष्ठथः। प्रातःऽयावानम्। मधुऽवाहनम्। रथम्। विशः। येन। गच्छथः। यज्वरीः। नरा। कीरेः। चित्। यज्ञम्। होतृऽमन्तम्। अश्विना ॥ २ ॥

हे [v]नासत्या नासत्यभूतौ[3] सत्यस्य प्रणेतारौ वा [v]नरा नेतारावश्विनौ युवां [v]प्रातर्युजं प्रातः-कालेऽन्यैर्युज्यमानं [v]प्रातर्यावाणं प्रातर्गन्तारं [v]मधुवाहनं मधुनोऽमृतस्य वाहकं तं [v]रथम् [v]अधि [v]तिष्ठथः[4]। आरोहतमित्यर्थः। [v]यज्वरीः यजनशीलाः [v]विशः प्रजाः [v]येन रथेन [v]गच्छथः। [v]येन च [v]कीरेश्चित् स्तोतुरपि [v]होतृमन्तम् ऋत्वियुक्तं [v]यज्ञं गच्छथः ॥

---

१. ग-त३-स्थित्वा; भ१.४.७-स्थिता। २. भ-मु-स्तोतुर्वा यजमानस्य वा गृहं। ३. ग-त३-भ६-सत्यभूतौ। ४. ग-न३-भ-तिष्ठथः अधितिष्ठतं।

अध्वर्युं वा मधुपाणिं सुहस्त्यमग्निधं वा धृतदक्षं दमूनसम् ।
विप्रस्य वा यत्सवनानि गच्छथोऽत आ यातं मधुपेयमश्विना ॥ ३ ॥

अध्वर्युम् । वा । मधुऽपाणिम् । सुऽहस्त्यम् । अग्निधम् । वा । धृतऽदक्षम् । दमूनसम् ।
विप्रस्य । वा । यत् । सवनानि । गच्छथः । अतः । आ । यातम् । मधुऽपेयम् । अश्विना ॥ ३ ॥

हे अश्विनौ युवां ᵛमधुपाणिं सोमपाणिम् ᵛअध्वर्युं ᵛवा ᵛसुहस्त्यं सुहस्त्यनामानमृत्विजं मां ᵛधृतदक्षं धृतबलं ᵛदमूनसं दानमनसम् ᵛअग्निधं ᵛवा ऋत्विग्विशेषं समायातम्[1] । तदेव दर्शयति । ᵛयत् यद्यपि ᵛविप्रस्य अन्यस्य मेधाविनः ᵛसवनानि यज्ञान् ᵛगच्छथः तथापि ᵛअतः तेभ्यो यज्ञेभ्यः ᵛमधुपेयम् अस्माकं सोमात्मकं पेयम् ᵛआ ᵛयातम् अभ्वागच्छतम् ॥ ॥ २१ ॥

' अस्तेव ' इत्येकादशर्चं त्र्यृचं सूक्तमाङ्गिरसस्य कृष्णाख्यस्यार्षं त्रैष्टुभमैन्द्रम् । अनुक्रान्तं च—' अस्तेवैकादश कृष्णः ' इति । आभिप्लविकेषूक्थ्येषु स्तोमवृद्धाविदं सूक्तं ब्राह्मणाच्छंसिन आवापार्थम् । सूत्रितं च—' यज्ञे दिव इति सूक्ते अस्तेव सु प्रतरम् ' (आश्व. श्रौ. ७. ९) इति ॥

अस्तेव सु प्रतरं लायमस्यन्भूषन्निव प्र भरा स्तोममस्मै ।
वाचा विप्रास्तरत वाचमर्यो नि रामय जरितः सोम इन्द्रम् ॥ १ ॥

अस्ताऽइव । सु । प्रऽतरम् । लायम् । अस्यन् । भूषन्ऽइव । प्र । भर । स्तोमम् । अस्मै ।
वाचा । विप्राः । तरत । वाचम् । अर्यः । नि । रमय । जरितरिति । सोमे । इन्द्रम् ॥ १ ॥

ᵛप्रतरं प्रवृद्धतरं ᵛलायं संश्लेषणं हृदयवेधिनं शरं ᵛसु सुष्ठु ᵛअस्यन् क्षिपन् ᵛअस्तेव यथा क्षेप्ता धानुष्कः ᵛभूषन्निव यथा च अलंकारमलंकुर्वन् अलंकर्ता तद्वत् ᵛस्तोममस्मै इन्द्राय ᵛप्र ᵛभर प्रापय । हे अन्तरात्मन् त्वमिति शेषः । किंच हे ᵛविप्राः मेधाविनः यूयं ᵛवाचा स्तुत्या ᵛअर्यः अरेः शत्रोः ᵛवाचं ᵛतरत नितरां[2] तरत[2] । निराकुरुतेत्यर्थः[3] । हे ᵛजरितः स्तोतः त्वं ᵛसोमे सोमयागे ᵛइन्द्रं ᵛनि ᵛरमय क्रीडय ॥

दोहेन गामुप शिक्षा सखायं प्र बोधय जरितर्जारमिन्द्रम् ।
कोशं न पूर्णं वसुना न्यृष्टमा च्यावय मघदेयाय शूरम् ॥ २ ॥

दोहेन । गाम् । उप । शिक्ष । सखायम् । प्र । बोधय । जरितः । जारम् । इन्द्रम् ।
कोशम् । न । पूर्णम् । वसुना । निऽऋष्टम् । आ । च्यवय । मघऽदेयाय । शूरम् ॥ २ ॥

हे ᵛजरितः त्वं ᵛदोहेन कामानां दोहनार्थं ᵛगां गोरूपं ᵛसखायं प्रियम् ᵛइन्द्रम् ᵛउप ᵛशिक्ष वशं नय । किंच ᵛजारं भूतानां जरयितारमिन्द्रं ᵛप्र ᵛबोधय स्तुतिभिः प्रबुद्धं कुरु । किंच ᵛपूर्णम् उदकेन पूरितं ᵛकोशं ᵛन पात्रमिव[4] ᵛवसुना हिरण्यादिना धनेन ᵛन्यृष्टं नीचैर्गतं ᵛशूरं वीरमिन्द्रं ᵛमघदेयाय धनदानाय ᵛआ ᵛच्यवय । अभिमुखं कुर्वित्यर्थः ॥

---

१. ग–मामागतं; त–मामायातं । २. ग-त-भ–' नितरां तरत ' नास्ति । ३. त१.२.६.७–नितरां कुरुतेत्यर्थः । ४. ग–पात्रमिव वीतिविभिः; त-भ२–पात्रमिव वाचिभिः; त३-म१.४.६.७–पात्रमिव वीचिभिः; म५–पात्रमिव वीधिभिः; सु–पात्रमिव वारिभिः ।

किमङ्ग त्वा मघवन्भोजमाहुः शिशीहि मा शिशयं त्वा शृणोमि ।
अप्रस्वती मम धीरस्तु शक्र वसुविदं भगमिन्द्रा भरा नः ॥ ३ ॥

किम् । अङ्ग । त्वा । मघऽवन् । भोजम् । आहुः । शिशीहि । मा । शिशयम् । त्वा । शृणोमि ।
अप्रस्वती । मम । धीः । अस्तु । शक्र । वसुऽविदम् । भगम् । इन्द्र । आ । भर । नः ॥ ३ ॥

अङ्गेति सामान्याह्वानम् । [v]अङ्ग हे [v]मघवन् धनवन् [v]शक्र इन्द्र [v]त्वा त्वां [v]किं[1] किमर्थं [v]भोजं स्तोतॄणां भोजकममीष्टम् [v]आहुः सर्वे विद्वांसः । यदि न ददासीत्यध्याहारः । तस्माद्दास्येव स्तोतृभ्यो धनानीत्यर्थः । तथा सति [v]मा[2] स्तोतारं [v]शिशीहि धनदानेन तीक्ष्णीकुरु । [v]त्वा त्वां [v]शिशयं स्तोतॄणां संस्कर्तारं [v]शृणोमि । किंच [v]मम [v]धीः बुद्धिः [v]अप्रस्वती कर्मवती [v]अस्तु भवतु । किंच [v]नः अस्माकं [v]वसुविदं धनस्य लम्भकं [v]भगं भाग्यम् [v]आ [v]भर आहर ॥

त्वां जना ममसत्येष्विन्द्र संतस्थाना वि ह्वयन्ते समीके ।
अत्रा युजं कृणुते यो हविष्मान्नासुन्वता सख्यं वष्टि शूरः ॥ ४ ॥

त्वाम् । जनाः । ममऽसत्येषु । इन्द्र । सम्ऽतस्थानाः । वि । ह्वयन्ते । सम्ऽईके ।
अत्र । युजम् । कृणुते । यः । हविष्मान् । न । असुन्वता । सख्यम् । वष्टि । शूरः ॥ ४ ॥

हे [v]इन्द्र [v]त्वां [v]जनाः [v]ममसत्येषु संग्रामेषु [v]वि [v]ह्वयन्ते विविधमाह्वयन्ति साहाय्यार्थम् । एतदेव दर्शयति । [v]समीके युद्धे [v]संतस्थानाः सह तिष्ठन्तो जना वि ह्वयन्त इति । [v]अत्र अस्मिन्नाह्वाने सः [v]शूरः वीर इन्द्रः तं[3] [v]युजं सखायं [v]कृणुते कुरुते [v]यो[4] [v]हविष्मान् भवति । [v]असुन्वता सोमाभिषवमकुर्वता पुरुषेण सह [v]सख्यं सख्यित्वं [v]न [v]वष्टि न कामयते ॥

धनं न स्पन्द्रं बहुलं यो अस्मै तीव्रान्त्सोमाँ आसुनोति प्रयस्वान् ।
तस्मै शत्रून्त्सुतुकान्प्रातरह्नो नि स्वष्ट्यान्युवति हन्ति वृत्रम् ॥ ५ ॥

धनम् । न । स्पन्द्रम् । बहुलम् । यः । अस्मै । तीव्रान् । सोमान् । आऽसुनोति । प्रयस्वान् ।
तस्मै । शत्रून् । सुऽतुकान् । प्रातः । अह्नः । नि । सुऽअष्ट्यान् । युवति । हन्ति । वृत्रम् ॥५॥

[v]प्रयस्वान् हविष्मान् [v]यः यजमानः [v]स्पन्द्रं स्पन्दनशीलं गवाश्वादिकं [v]बहुलं प्रभूतं [v]धनं [v]न यथा धनं दरिद्राय पात्रभूताय दातुं संस्करोति तद्वत् [v]अस्मै इन्द्राय [v]तीव्रान् तीव्ररसान् [v]सोमान् [v]आसुनोति अभिषुणोति । अभिषवाख्येन संस्कारेण संस्करोतीत्यर्थः । [v]तस्मै यजमानाय [v]प्रातरह्नः पूर्वाह्णे [v]सुतुकान् सुप्रेरणान् शोभनपुत्रसहितान्[5] वा[5] [v]स्वष्ट्यान्[6] शोभनायुधान्[6] [v]शत्रून् [v]नि [v]युवति स इन्द्रः पृथक्करोति । किंच [v]वृत्रं तदीयमुपद्रवं [v]हन्ति हिनस्ति ॥ ॥ २२ ॥

१. त-म६-'किं' नास्ति । २. ग-म७-मां; म६-मा मां । ३. त-म१.२.४.७-त्वं; म६-'तं' नास्ति । ४. त-'यो' नास्ति । ५. ग-शोभनपुत्रान्; त-शोभनसहितान् पुत्रान् वा; त३-शोभनसहितपुत्रान् वा; म१.४-शोभनरहितपुत्रान् वा; म२-शोभनसहिता पुत्रान् वा; म६-शोभनसहितान् पुत्रान् वा; मु-शोभनपुत्रान् वा । ६. त-म२-ज्ञानायुधान्; त३-म१.४-शोभायुधान् ।

यस्मिन्वयं दधिमा शंसमिन्द्रे यः शिश्राय मघवा कामंमस्मे ।
आराच्चित्सन्भयतामस्य शत्रुर्न्यस्मै द्युम्ना जन्या नमन्ताम् ॥ ६ ॥

यस्मिन् । वयम् । दधिम । शंसम् । इन्द्रे । यः । शिश्राय । मघऽवा । कामम् । अस्मे इति । आरात् । चित् । सन् । भयताम् । अस्य । शत्रुः । नि । अस्मै । द्युम्ना । जन्या । नमन्ताम् ॥६॥

[v]यस्मिन् [v]इन्द्रे [v]वयं धौषेयाः सुहस्त्याः [v]शंसं स्तुतिं [v]दधिम विदध्मः[1] । [v]यः च [v]मघवा धनवानिन्द्रः [v]अस्मे अस्मासु [v]कामम् अभिलाषं [v]शिश्राय श्राययति । [v]अस्य इन्द्रस्य [v]शत्रुः [v]आरात् दूर एव [v]सन् [v]चित् सन्नपि [v]भयतां बिभेतु । किंच [v]अस्मै इन्द्राय [v]जन्या जन्यानि शत्रुजनपदभवानि [v]द्युम्ना द्युम्नान्यन्नानि [v]नि [v]नमन्तां प्रह्वीभवन्तु । भोजनीयानि भवन्त्वित्यर्थः ॥

आराच्छत्रुमप बाधस्व दूरमुग्रो यः शम्बः पुरुहूत तेन ।
अस्मे धेहि यवमद्गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम् ॥ ७ ॥

आरात् । शत्रुम् । अप । बाधस्व । दूरम् । उग्रः । यः । शम्बः । पुरुऽहूत । तेन । अस्मे इति । धेहि । यवऽमत् । गोऽमत् । इन्द्र । कृधि । धियम् । जरित्रे । वाजऽरत्नाम् ॥ ७ ॥

हे [v]पुरुहूत बहुभिराहूत [v]इन्द्र तव [v]यः [v]उग्रः उद्गूर्णः [v]शम्बः वज्रः । तथा च यास्कः— 'शम्ब इति वज्रनाम शमयतेर्वा शातयतेर्वा' (निरु. ५. २४) इति । [v]तेन वज्रेण [v]शत्रुम् अस्मदरिम् [v]आरात् अस्मत्समीपात् [v]दूरम् [v]अप [v]बाधस्व त्वमपगमय । किंच [v]अस्मे[2] अस्मासु [v]यवमत् यवयुक्तं [v]गोमत् गोयुक्तं च धनं [v]धेहि निधेहि । किंच [v]जरित्रे स्तोत्रे मह्यं [v]वाजरत्नां रमणीयान्नं [v]धियं कर्म [v]कृधि कुरु ॥

प्र यमन्तर्वृषसवासो अग्मन् तीव्राः सोमा बहुलान्तासु इन्द्रम् ।
नाहं दामानं मघवा नि यंसन्नि सुन्वते वहति भूरि वामम् ॥ ८ ॥

प्र । यम् । अन्तः । वृषऽसवासः । अग्मन् । तीव्राः । सोमाः । बहुलऽअन्तासः । इन्द्रम् । न । अहं । दामानम् । मघऽवा । नि । यंसत् । नि । सुन्वते । वहति । भूरि । वामम् ॥८॥

[v]अन्तः जठरे [v]यम् [v]इन्द्रं [v]वृषसवासः वृषसवा अग्नौ सोमस्य वर्षितृभिरध्वर्युभिरभिषुताः [v]तीव्राः तीव्ररसाः [v]बहुलान्तासः बहुलमन्नादिकमन्ते येभ्यस्ते बहुलान्ताः [v]सोमाः [v]प्र [v]अग्मन् प्रगच्छन्ति स [v]मघवा धनवानिन्द्रः [v]दामानं दातारं यजमानं [v]नाह नैव [v]नि [v]यंसत् नियच्छति । किंतु [v]सुन्वते सोमाभिषवं कुर्वते यजमानाय [v]भूरि अधिकं [v]वामं वननीयं धनं [v]नि [v]वहति नितरां प्रापयति ॥

उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी विचिनोति काले ।
यो देवकामो न धना रुणद्धि समित्तं राया सृजति स्वधावान् ॥ ९ ॥

उत । प्रऽहाम् । अतिऽदीव्या । जयाति । कृतम् । यत् । श्वऽघ्नी । विऽचिनोति । काले । यः । देवऽकामः । न । धना । रुणद्धि । सम् । इत् । तम् । राया । सृजति । स्वधाऽवान् ॥ ९ ॥

---

१. ग-निदधामः; त-म-मु-विदधीमः । २. त-म-'अस्मे' नास्ति ।

ᵛउत अपि चेन्द्रः ᵛग्रहां ग्रहन्तारम् ᵛअतिदीव्य । अतिरभिपूजितार्थे वर्तते । दीव्यतिर्गत्यर्थे । अभिपूजितं गमयित्वा ᵛजयाति जयति । किंच ᵛयत् यथा । अत्र प्रकारवचनप्रत्ययस्य लोपो द्रष्टव्यः। ᵛअक्षी कितवः ᵛकृतं कृतसमयं प्रतिकितवं कितवानां मध्ये ᵛविचिनोति परीक्ष्य गृह्णाति तद्वदिन्द्रः ᵛकाले युद्धकाले बलवन्तं शत्रुं परीक्ष्य वधार्थं गृह्णातीत्यर्थः । किंच ᵛयः मनुष्यः ᵛदेवकामः देवान् यष्टुं स्तोतुं वा अभिलाषवान् भवति तस्यार्थाय ᵛधना धनानि ᵛन ᵛरुणद्धि नावृणोति । नाच्छादयतीत्यर्थः । किंतु ᵛस्वधावान् बलवानिन्द्रः ᵛतं देवकामं ᵛराया धनेन ᵛसं ᵛसृजति संयोजयत्येव ॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥ १० ॥

गोभिः । तरेम । अमतिम् । दुःऽएवाम् । यवेन । क्षुधम् । पुरुऽहूत । विश्वाम् ।
वयम् । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥ १० ॥

हे ᵛपुरुहूत बहुभिराहूतेन्द्र तव प्रसादात् ᵛदुरेवां दुष्टागमनां दारिद्र्यादागताम् ᵛअमतिं दुर्बुद्धिं ᵛवयं बांधेयाः सुहृस्थाः ᵛगोभिः पशुभिः ᵛतरेम निस्तरेम । किंच ᵛयवेन ᵛविश्वां व्याप्तां ᵛक्षुधं तरेम । किंच ᵛप्रथमाः मुख्यानि ᵛधनानि ᵛराजभिः धनानामीश्वरैः । लभेमहीति शेषः । यद्वा । प्रथमा वयमिति संबन्धः । किंच ᵛअस्माकेन अस्मदीयेन ᵛवृजनेन बलेन ᵛजयेम । शत्रूनिति शेषः ॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११ ॥

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः ।
इन्द्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥ ११ ॥

ᵛपश्चात् पश्चिमतो योऽघायुरागच्छति तस्मात् ᵛअघायोः पापकाच्छत्रोः ᵛनः अस्मान् ᵛबृहस्पतिः ᵛपरि[1] ᵛपातु रक्षतु । ᵛउत अपि च ᵛउत्तरस्मात् उत्तरतः ᵛअधरात् अधस्ताच्च योऽघायुरागच्छति तस्मादघायोः नोऽस्मान्[1] परि[2] पातु[2] । ᵛउत अपि च ᵛइन्द्रः ᵛपुरस्तात् पूर्वतः ᵛमध्यतः च योऽघायुरागच्छति तस्मादघायोः ᵛनः अस्मान् परि पातु । किंच ᵛसखा सखिभूतेन्द्रः ᵛसखिभ्यः प्रियेभ्योऽस्मभ्यं ᵛवरिवः धनं ᵛकृणोतु करोतु ॥ ॥ २३ ॥ ॥ ३ ॥

चतुर्थेऽनुवाकेऽष्टादश सूक्तानि । तत्र 'अच्छा मे' इत्येकादशर्चं प्रथमं सूक्तम् । दशम्येकादश्यौ त्रिष्टुभौ । शिष्टा जगत्यः । पूर्ववदृषिदेवते । तथा चानुक्रान्तम्—'अच्छा मे द्वित्रिष्टुबन्तम्' इति । उक्थ्ये ब्राह्मणाच्छंसिनस्तृतीयसवन एतत्सूक्तम् । सूत्रितं च—'अच्छा म इन्द्रं बृहस्पते युवमिन्द्रश्च वस्व इति याज्ये' (आश्व. श्रौ. ६. १) इति । षष्ठेऽहन्यप्यस्यैतत्सूक्तम् । सूत्रितं च—'अच्छा म इन्द्रमिति नित्यमैकाहिकम्' (आश्व. श्रौ. ८. ३) इति ॥

अच्छा म इन्द्रं मतयः स्वर्विदः सधीचीर्विश्वा उशतीरनूषत ।
परि ष्वजन्ते जनयो यथा पतिं मर्य न शुन्ध्युं मघवानमूतये ॥ १ ॥

---

१. त-म६-'परि...नोऽस्मान्' नास्ति । २. त३-म१.२.४-बृहस्पतिः परिपातु ।

अच्छ । मे । इन्द्रम् । मतयः । स्वःऽविदः । सध्रीचीः । विश्वाः । उशतीः । अनूषत ।
परि । स्वजन्ते । जनयः । यथा । पतिम् । मर्यम् । न । शुन्ध्युम् । मघऽवानम् । ऊतये ॥ १ ॥

आङ्गिरसस्य[1] कृष्णस्य[1] ऽमे मम ऽस्वर्विदः सर्वस्य लम्भयित्र्यः ऽसध्रीचीः संगताः ऽविश्वाः व्याप्ताः ऽउशतीः कामयमानाः ऽमतयः स्तुतयः ऽइन्द्रम् ऽअच्छ ऽअनूषत अभिष्टुवन्ति । किंच ऽजनयः जायाः ऽयथा ऽपतिं भर्तारं ऽमर्यं ऽन यथा च मनुष्यं ऽशुन्ध्युं शुद्धं दोषरहितं ऽमघवानं धनवन्तम् ऽऊतये रक्षणार्थं ऽपरि ऽस्वजन्ते आलिङ्गन्ति तद्वदिन्द्रं मे स्तुतयः परि ष्वजन्ते ॥

न घा त्वद्रिगप वेति मे मनस्त्वे इत्कामं पुरुहूत शिश्रय ।
राजेव दस्म नि षदोऽधि बर्हिष्यस्मिन्त्सु सोमेऽवपानमस्तु ते ॥ २ ॥

न । घ । त्वद्रिक् । अप । वेति । मे । मनः । त्वे इति । इत् । कामम् । पुरुऽहूत । शिश्रय ।
राजाऽइव । दस्म । नि । सदः । अधि । बर्हिषि । अस्मिन् । सु । सोमे । अवऽपानम् । अस्तु । ते ॥ २ ॥

हे ऽपुरुहूत बहुभिराहूत ऽदस्म दर्शनीयेन्द्र ऽत्वद्रिक् त्वदभिमुखं ऽमे मदीयं ऽमनः ऽन ऽघ न खलु ऽअप ऽवेति त्वत्तोऽपगच्छति । किंच ऽत्वे ऽइत् त्वय्येव ऽकामम् अभिलाषं ऽशिश्रय स्थापयामि । किंच ऽराजेव ईश्वर इव ऽबर्हिषि ऽअधि ऽनि ऽषदः निषीद । किंच ऽते तव ऽअस्मिन् ऽसोमे ऽअवपानमस्तु भवतु ॥

विषूवृदिन्द्रो अमतेरुत क्षुधः स इद्रायो मघवा वस्व ईशते ।
तस्येदिमे प्रवणे सप्त सिन्धवो वयो वर्धन्ति वृषभस्य शुष्मिणः ॥ ३ ॥

विषूऽवृत् । इन्द्रः । अमतेः । उत । क्षुधः । सः । इत् । रायः । मघऽवा । वस्वः । ईशते ।
तस्य । इत् । इमे । प्रवणे । सप्त । सिन्धवः । वयः । वर्धन्ति । वृषभस्य । शुष्मिणः ॥ ३ ॥

ऽइन्द्रः ऽअमतेः अस्माकं दुर्बुद्धेः प्रज्ञापहारिण्याः पिपासाया वा ऽविषूवृत् विष्वग्वर्तको भवतु । ऽउत अपि च ऽक्षुधः बुभुक्षाया विषूवृत् भवतु । किंच ऽसः ऽइत् स एव ऽमघवा धनवानिन्द्रः ऽवस्वः वासयितुः ऽरायः धनस्य ऽईशते ईष्टे । किंच ऽवृषभस्य वर्षितुः ऽतस्येत् इन्द्रस्यैव ऽइमे प्रसिद्धाः ऽसप्त सप्तसंख्याकाः ऽसिन्धवः नद्यः ऽप्रवणे देशे ऽवयः अन्नं ऽवर्धन्ति वर्धयन्ति ॥

वयो न वृक्षं सुपलाशमासदन्त्सोमास इन्द्रं मन्दिनश्चमूषदः ।
प्रैषामनीकं शवसा दविद्युतद्वि दत्स्व[2] र्मनवे ज्योतिरार्यम् ॥ ४ ॥

वयः । न । वृक्षम् । सुऽपलाशम् । आ । असदन् । सोमासः । इन्द्रम् । मन्दिनः । चमूऽसदः ।
प्र । एषाम् । अनीकम् । शवसा । दविद्युतत् । विदत् । स्वः । मनवे । ज्योतिः । आर्यम् ॥ ४ ॥

ऽवयो ऽन यथा पक्षिणः ऽसुपलाशं शोभनपर्णं ऽवृक्षम् आसीदन्ति[2] तद्वत् ऽमन्दिनः मदकराः ऽचमूषदः चमसपात्रेषु स्थातारः ऽसोमासः सोमाः ऽइन्द्रम् ऽआ ऽअसदन् आसीदन्ति । अधितिष्ठन्तीत्यर्थः । ऽएषाम् इन्द्रमधितिष्ठतां सोमानां ऽशवसा वेगेन युक्तम् ऽअनीकम् अग्रं ऽप्र ऽदविद्युतत्

---

१. ग–हे इंद्र यस्य सुहस्त्यस्य; त३-भ१.४.५.७–हे घोषे यस्य सुहस्त्यस्य । २. त१.२.६.७–आसदन् आसीदंति ।

प्रद्योतते । किंचायमिन्द्रः ᵛस्वः स्वात्मना ᵛआर्यं प्रेर्यं ᵛज्योतिः आदित्यात्मकं तेजः ᵛमनवे मनुष्येभ्यः ᵛविदत् प्रयच्छतु ॥

कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन्मघवा सूर्यं जयत् ।
न तत्ते अन्यो अनु वीर्यं शकन्न पुराणो मघवन्नोत नूतनः ॥ ५ ॥

कृतम् । न । श्वऽघ्नी । वि । चिनोति । देवने । सम्ऽवर्गम् । यत् । मघऽवा । सूर्यम् । जयत् । न । तत् । ते । अन्यः । अनु । वीर्यम् । शकत् । न । पुराणः । मघऽवन् । न । उत । नूतनः ॥५॥

ᵛश्वघ्नी परस्वानां हन्ता कितवः ᵛदेवने द्यूते ᵛकृतं ᵛन यथा कृतं ᵛवि ᵛचिनोति तद्वदिन्द्रः सूर्यं मृगयते । कदेत्यत आह । ᵛयत् यदा ᵛमघवा धनवानिन्द्रः ᵛसंवर्गं सम्यग्वृष्टेर्वर्जयितारं ᵛसूर्यम् आदित्यं ᵛजयत् तदीयरसापहरणद्वारेण जयति । अथ प्रत्यक्षस्तुतिः । हे ᵛमघवन् धनवन्निन्द्र ᵛते[1] तव ᵛतत्[1] सूर्यजयलक्षणं ᵛवीर्यं वीरत्वम् ᵛअन्यः त्वत्तोऽन्यो भविष्यत्कालीनः पुमान् ᵛअनु अनुकर्तुं ᵛन ᵛशकत् न शक्नोति । ᵛपुराणः पूर्वोऽपि त्वद्वीर्यमनुकर्तुं ᵛन[2] शकत्[2] न शक्नोति[3] । ᵛउत अपि च ᵛनूतनः वर्तमानकालीनोऽपि त्वदीयं वीर्यमनुकर्तुं ᵛन शक्नोति ॥ ॥ २४ ॥

विशंविशं मघवा पर्यशायत जनानां धेना अवचाकशद्वृषा ।
यस्याहं शक्रः सवनेषु रण्यति स तीव्रैः सोमैः सहते पृतन्यतः ॥ ६ ॥

विशम्ऽविशम् । मघऽवा । परि । अशायत । जनानाम् । धेनाः । अवऽचाकशत् । वृषा । यस्य । अहं । शक्रः । सवनेषु । रण्यति । सः । तीव्रैः । सोमैः । सहते । पृतन्यतः ॥ ६ ॥

ᵛवृषा कामानां वर्षिता ᵛमघवा धनवानिन्द्रः ᵛविशंविशं सर्वान् मनुष्यान् ᵛपर्यशायत परिशेते । किंच ᵛजनानां स्तोतृजनानां ᵛधेनाः स्तुतीः ᵛअवचाकशत् अभिपश्यति । किंच ᵛशक्रः इन्द्रः ᵛयस्याह यस्यैव यजमानस्य ᵛसवनेषु ᵛरण्यति रमते ᵛसः यजमानः ᵛतीव्रैः तीव्रकरैः प्रदीयमानैः ᵛसोमैः ᵛपृतन्यतः संग्राममिच्छतः शत्रून् ᵛसहते अभिभवति ॥

आपो न सिन्धुमभि यत्समक्षरन्त्सोमास इन्द्रं कुल्याइव ह्रदम् ।
वर्धन्ति विप्रा महो अस्य सादने यवं न वृष्टिर्दिव्येन दानुना ॥ ७ ॥

आपः । न । सिन्धुम् । अभि । यत् । सम्ऽअक्षरन् । सोमासः । इन्द्रम् । कुल्याःऽइव । ह्रदम् । वर्धन्ति । विप्राः । महः । अस्य । सदने । यवम् । न । वृष्टिः । दिव्येन । दानुना ॥ ७ ॥

ᵛयत् यदा ᵛसोमासः सोमाः ᵛइन्द्रम् ᵛअभि ᵛसमक्षरन् अभिक्षरन्ति । अभिगच्छन्तीत्यर्थः । तत्र दृष्टान्तौ दर्शयति । ᵛआपो ᵛन यथा आपः ᵛसिन्धुं समुद्रमभिसंक्षरन्ति । ᵛकुल्याइव यथा च कुल्याः ᵛह्रदम् अभिसंक्षरन्ति तद्वदित्यर्थः । तदानीम् ᵛअस्य इन्द्रस्य ᵛमहः महत्त्वं ᵛसदने यज्ञगृहे[4] ᵛविप्राः मेधाविनः ᵛवर्धन्ति । तत्र दृष्टान्तमाह । ᵛयवं ᵛन यथा यवं यवसस्यं ᵛवृष्टिः । कर्तरि क्त्वा । वर्षिता पर्जन्यः ᵛदिव्येन दिवि भवेन ᵛदानुना दानेन वर्षणेन वर्धयति[5] तद्वदित्यर्थः ॥

---

१. ग–तत्प्रकृतं; त-म–त्ते तव । २. त–'न शकत्' नास्ति । ३. त-म२–शक्नोति कत् । ४. त-म–ह्वे । ५. त-म–वर्धयति ।

वृषा न क्रुद्धः पतयद्रजःसा यो अर्यपत्नीरकृणोदिमा अपः ।
स सुन्वते मघवा जीरदानवेऽविन्दज्ज्योतिर्मनवे हविष्मते ॥ ८ ॥

वृषा । न । क्रुद्धः । पतयत् । रजःऽसु । आ । यः । अर्यऽपत्नीः । अकृणोत् । इमाः । अपः । सः । सुन्वते । मघऽवा । जीरऽदानवे । अविन्दत् । ज्योतिः । मनवे । हविष्मते ॥ ८ ॥

[v]रजःसु लोकेषु [v]वृषा [v]न यथा वृषभः [v]क्रुद्धः सन् प्रतिवृषभवधाय [v]पतयत् गच्छति तद्वत् [v]यः इन्द्रः क्रुद्धः सन् मेघवधाय पतयति हत्वा च मेघम् [v]अर्यपत्नीः सर्वस्य जगतः स्वामिन इन्द्रस्य पालयितव्याः [v]इमाः प्रसिद्धाः [v]अपः वृष्टयुदकानि [v]आ [v]अकृणोत् आकृणोति अस्मदभिमुखं करोति [v]सः [v]मघवा[1] धनवानिन्द्रः[1] [v]सुन्वते सोमाभिषवं कुर्वते [v]जीरदानवे क्षिप्रदानाय [v]हविष्मते [v]मनवे मनुष्याय । यजमानायेत्यर्थः । [v]ज्योतिः तेजः [v]अविन्दत् प्रायच्छत् ॥

उज्जायतां परशुर्ज्योतिषा सह भूया ऋतस्य सुदुघा पुराणवत् ।
वि रोचतामरुषो भानुना शुचिः स्वर्ण शुक्रं शुशुचीत सत्पतिः ॥ ९ ॥

उत् । जायताम् । परशुः । ज्योतिषा । सह । भूयाः । ऋतस्य । सुऽदुघा । पुराणऽवत् । वि । रोचताम् । अरुषः । भानुना । शुचिः । स्वः । न । शुक्रम् । शुशुचीत । सत्ऽपतिः ॥९॥

[v]परशुः इन्द्रस्य वज्रः [v]ज्योतिषा तेजसा [v]सह [v]उज्जायताम् । अस्मच्छत्रुवधे मेघवधे च व्याप्रियताभित्यर्थः । किंच [v]ऋतस्य सत्यस्य [v]सुदुघा माध्यमिका वाक् [v]पुराणवत् प्रत्नवत् काले [v]भूयाः भूयात् । पुरुषव्यत्ययः । किंच इन्द्रः [v]अरुषः आरोचमानः [v]भानुना दीप्त्या [v]शुचिः ज्वलन् [v]वि [v]रोचतां प्रकाशताम् । किंच [v]सत्पतिः सतां पतिरिन्द्रः [v]स्वर्न आदित्य इव [v]शुक्रं ज्वलन् [v]शुशुचीत [v]अत्यन्तं दीप्यताम् ॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥ १० ॥

गोभिः । तरेम । अमतिम् । दुःऽएवाम् । यवेन । क्षुधम् । पुरुऽहूत । विश्वाम् ।
वयम् । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥ १० ॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११ ॥

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः ।
इन्द्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥११॥

एतद्द्वयं प्रागेव व्याख्यातम् ॥ ॥ २५ ॥

'आ यातु' इत्येकादशार्चं द्वितीयं सूक्तमाङ्गिरसस्य कृष्णस्यार्षमैन्द्रम् । आदितस्तिस्रस्त्रिष्टुभः । ततः षट् जगत्यः । ततो द्वे त्रिष्टुभौ । तथा चानुक्रान्तम्—'आ यातु त्रित्रिष्टुबादि' इति । आभि-

---

१. त—मघवानिंद्रः ।

ध्रुविकेषूक्थ्येषु ब्राह्मणाच्छंसिनः स्तोमवृद्धाविदमावापार्यम् । सूत्रितं च—' आ यात्विन्द्रः स्वपतिरिमां धियमिति ब्राह्मणाच्छंसी ' (आश्व. श्रौ. ७. ९) इति ॥

आ यात्विन्द्रः स्वपतिर्मदाय यो धर्मणा तृतुजानस्तुविष्मान् ।
प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्ण्येन ॥ १ ॥

आ । यातु । इन्द्रः । स्वऽपतिः । मदाय । यः । धर्मणा । तृतुजानः । तुविष्मान् ।
प्रऽत्वक्षाणः । अति । विश्वा । सहांसि । अपारेण । महता । वृष्ण्येन ॥ १ ॥

यः इन्द्रः तृतुजानः त्वरमाणः तुविष्मान् वृद्धिमान् विश्वा विश्वानि सहांसि शत्रुबलानि अपारेण महता अधिकेन वृष्ण्येन बलेन प्रत्वक्षाणः प्रकर्षेण तनूकुर्वन् अति गच्छतीति शेषः । स्वपतिः धनपतिः इन्द्रः मदाय मदार्थं धर्मणा धारकेण रथेन आ यातु अस्मद्यज्ञं प्रत्यागच्छतु ॥

सुष्ठामा रथः सुयमा हरी ते मिम्यक्ष वज्रो नृपते गभस्तौ ।
शीभं राजन्त्सुपथा याह्यर्वाङ् वर्धाम ते पपुषो वृष्ण्यानि ॥ २ ॥

सुऽस्थामा । रथः । सुऽयमा । हरी इति । ते । मिम्यक्ष । वज्रः । नृऽपते । गभस्तौ ।
शीभम् । राजन् । सुऽपथा । आ । याहि । अर्वाङ् । वर्धाम । ते । पपुषः । वृष्ण्यानि ॥ २ ॥

हे नृपते नृणां पालकेन्द्र ते तव रथः सुष्ठामा शोभनावस्थानः हरी अश्वावपि सुयमा सुयमौ । सुबद्धावित्यर्थः । किंच तव गभस्तौ बाहौ वज्रः मिम्यक्ष संहतो भवति । तथा सति हे राजन् सर्वस्येश्वरेन्द्र शीभं[1] शीघ्रं सुपथा शोभनेन मार्गेण अर्वाङ् अस्मदभिमुखम् आ याहि आगच्छ । आगत्य पपुषः सोमं पीतवतः ते तव वृष्ण्यानि बलानि वर्धाम वयं वर्धयामः ॥

एन्द्रवाहो नृपतिं वज्रबाहुमुग्रमुग्रासस्तविषास एनम् ।
प्रत्वक्षसं वृषभं सत्यशुष्ममेमस्मत्रा सधमादो वहन्तु ॥ ३ ॥

आ । इन्द्रऽवाहः । नृऽपतिम् । वज्रऽबाहुम् । उग्रम् । उग्रासः । तविषासः । एनम् ।
प्रऽत्वक्षसम् । वृषभम् । सत्यऽशुष्मम् । आ । ईम् । अस्मऽत्रा । सधऽमादः । वहन्तु ॥ ३ ॥

नृपतिं नृणां पालकं वज्रबाहुं वज्रहस्तम् उग्रम् उद्गूर्णं प्रत्वक्षसं शत्रुबलानां प्रकर्षेण तनूकर्तारं वृषभं कामानां वर्षितारं सत्यशुष्मम् अविसंवादिबलम् एनम् इन्द्रम् । आ ईम् इति पूरणौ । उग्रासः उद्गूर्णाः तविषासः प्रवृद्धाः सधमादः सह माद्यन्तः इन्द्रवाहः इन्द्रस्य वोढारः अस्मत्रा अस्मासु आ वहन्तु ॥

एवा पतिं द्रोणसाचं सचेतसमूर्जः स्कम्भं धरुण आ वृषायसे ।
ओजः कृष्व सं गृभाय त्वे अप्यसो यथा केनिपानामिनो वृधे ॥ ४ ॥

---

१. त-म६.७—' शीभं ' नास्ति ।

एव। पतिम्। द्रोणऽसाचम्। सऽचेतसम्। ऊर्जः। स्कम्भम्। धरुणे। आ। वृषऽयसे।
ओजः। कृण्व। सम्। गृभाय। त्वे इति। अपि। असः। यथा। केऽनिपानाम्। इनः। वृधे॥ ४॥

हे इन्द्र त्वम् [v]एव एवं [v]पतिं पालकं [v]द्रोणसाचं द्रोणकलशस्य सेवितारं [v]सचेतसं सप्रज्ञम् [v]ऊर्जः [v]स्कम्भं बलस्य धारकं सोमं [v]धरुणे धारके जठरे [v]आ [v]वृषायसे आसिञ्चसे। धारयसीत्यर्थः। किंच मह्यम् [v]ओजः बलं [v]कृण्व कुरुष्व। [v]त्वे त्वयि अस्मान् [v]अपि [v]सं [v]गृभाय संगृहाण च। किंच [v]केनिपानां मेधाविनामस्माकम्। 'केनिप उशिजः' इति मेधाविनामसु पाठात्। [v]वृधे वर्धनाय [v]यथा यथावत् सर्वथा[1] [v]इनः स्वामी [v]असः भवसि॥

गर्मन्नस्मे वसून्या हि शंसिषं स्वाशिषं भरमा याहि सोमिनः।
त्वमीशिषे सास्मिन्ना सत्सि बर्हिष्यनाधृष्या तव पात्राणि धर्मणा॥ ५॥

गर्मन्। अस्मे इति। वसूनि। आ। हि। शंसिषम्। सुऽआशिषम्। भरम्। आ। याहि। सोमिनः।
त्वम्। ईशिषे। सः। अस्मिन्। आ। सत्सि। बर्हिषि।
अनाधृष्या। तव। पात्राणि। धर्मणा॥ ५॥

हे इन्द्र [v]वसूनि त्वदेयानि धनानि [v]अस्मे मयि[2] [v]आ[2] [v]गमन् आगच्छन्तु। [v]हि यस्मात् त्वामहं [v]शंसिषं स्तौमि। किंच [v]सोमिनः सोमवतो मम [v]स्वाशिषं शोभना आशिषो यस्मिंस्तं [v]भरं यज्ञम् [v]आ [v]याहि त्वमागच्छ। किंच [v]त्वमीशिषे धनस्येश्वरोऽसि। एवंविधः [v]सः त्वम् [v]अस्मिन् अस्मदीये वेद्यास्तृते [v]बर्हिषि [v]आ [v]सत्सि आसीद। किंच [v]तव सोमपात्राणि [v]धर्मणा राक्षसानां कर्मणा अनाधृष्याणि धर्षयितुमशक्यानि[3]॥ ॥ २१ ॥

पृथक् प्रायन् प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा।
न ये शेकुर्यज्ञियां नावमारुहमीमैव ते न्यविशन्त केपयः॥ ६॥

पृथक्। प्र। आयन्। प्रथमाः। देवऽहूतयः। अकृण्वत। श्रवस्यानि। दुस्तरा।
न। ये। शेकुः। यज्ञियाम्। नावम्। आऽरुहम्। ईर्मा। एव। ते। नि। अविशन्त। केपयः॥६॥

हे इन्द्र तव प्रसादात् ते [v]पृथक् [v]प्रायन् देवलोकान् पृथग्गच्छन्ति ये [v]प्रथमाः पूर्वे मुख्या वा [v]देवहूतयः देवानामाह्वातारः। कर्तरि क्विप्। किंच [v]दुष्टरा अन्यैर्दुस्तराणि [v]श्रवस्यानि श्रवणीयानि यशांसि [v]अकृण्वत[4] अकुर्वत। किंच [v]ये त्वत्प्रसादरहिता जनाः [v]यज्ञियां यज्ञसंबन्धिनीम्। यज्ञमयीमित्यर्थः। [v]नावम् [v]आरुहम् आरोढुं [v]न [v]शेकुः न शक्नुवन्ति [v]ते [v]केपयः कुत्सितपूयकर्माणः पापकर्माणो जनाः [v]ईर्मैव ऋणेनैव [v]न्यविशन्त नीचैरविशन्त। अधोगतिं प्राप्ता इत्यर्थः। तथा च यास्कः—'पृथक् प्रायन् पृथक् प्रथतेः प्रथमा देवहूतयो ये देवानाह्वयन्ताकुर्वत श्रवणीयानि यशांसि दुरनुकराण्यन्यैर्येऽशक्नुवन्यज्ञियां नावमारोळ्हुमथ ये नाशक्नुवन्यज्ञियां नावमारोळ्हुमीमैव ते न्यविशन्त ऋणेनैव ते न्यविशन्तास्मिन्नेव लोक इति वा' (निरु. ५. २५) इति॥

---

१. त-'सर्वथा' नास्ति। २. त१.२.६.७-अस्मासु। ३. त१.२.६.७-'मशक्यानि भवति शेषः।
४. त-कृण्वत।

एवैवापागपरे सन्तु दूळ्योऽश्वा येषां दुर्युज आयुयुज्रे ।
इत्था ये प्रागुपरे सन्ति दावने पुरूणि यत्र वयुनानि भोजना ॥ ७ ॥

एव । एव । अपाक् । अपरे । सन्तु । दुःऽध्यः । अश्वाः । येषाम् । दुःऽयुजः । आऽयुयुज्रे । इत्था । ये । प्राक् । उपरे । सन्ति । दावने । पुरूणि । यत्र । वयुनानि । भोजना ॥ ७ ॥

vएवैव एवमेव vदूळ्यः दुर्बुद्धयः vअपरे अन्ये । अयज्वान इत्यर्थः । vअपाक् अपाचीना अधोगन्तारः vसन्तु भवन्तु vयेषां यज्ञमकुर्वताम्[1] vअश्वाः vदुर्युजः दुर्योज्याः प्रबलाः vअश्वाः vआयुयुज्रे रथेषु युज्यन्ते । ये सत्यपि सामर्थ्ये न यजन्ति ते नरकं गच्छन्तीति भावः । किंच vइत्था इत्थं ते स्वर्गगामिनो भवन्ति[2] vये vउपरे यज्वानः vप्राक् मरणात्पूर्वमेव vदावने देवानां हविर्दानाय vसन्ति[3] भवन्ति[3] । vयत्र येषु च यज्ञकारिषु vवयुनानि प्रज्ञानानि कान्तानि वा vभोजना भोग्यानि धनानि vपुरूणि बहूनि देवेभ्यो दानाय सन्ति ॥

गिरींरज्रान्रेजमानाँ अधारयद् द्यौः क्रन्ददन्तरिक्षाणि कोपयत् ।
समीचीने धिषणे वि ष्कभायति वृष्णः पीत्वा मद उक्थानि शंसति ॥८॥

गिरीन् । अज्रान् । रेजमानान् । अधारयत् । द्यौः । क्रन्दत् । अन्तरिक्षाणि । कोपयत् ।
समीचीने इति सम्ऽईचीने । धिषणे इति । वि । स्कभायति ।
वृष्णः । पीत्वा । मदे । उक्थानि । शंसति ॥ ८ ॥

vगिरीन् मेघान् vअज्रान् गमनशीलान् vरेजमानान् कम्पमानान् vअधारयत् इन्द्रो[4] धारितवान्[4] । निश्चलान्[5] कृतवानित्यर्थः । किंच vद्यौः द्युलोकस्तन्निवासी वा जनोऽसुरराक्षसेभ्यो भीतः सन् vक्रन्दत् क्रन्दति । इन्द्रमाह्वयत्यात्मनः परित्राणार्थम् । किंचेन्द्रः vअन्तरिक्षाणि vकोपयत् कोपयति । संक्षोभयतीत्यर्थः । किंचेन्द्रः vसमीचीने परस्परं संगते vधिषणे द्यावापृथिव्यौ vवि vष्कभायति अन्तरिक्षेण स्तम्भयति । स्तम्भयतीत्यर्थः । किंचेन्द्रः vवृष्णः स्वोदरस्थासेक्तॄन् सोमान् vपीत्वा vमदे सति vउक्थानि प्रशस्यानि वचनानि vशंसति प्रब्रवीति ॥

इमं बिभर्मि सुकृतं ते अङ्कुशं येनारुजासि मघवञ्छफारुजः ।
अस्मिन्त्सु ते सवने अस्त्वोक्यं सुत इष्टौ मघवन्बोध्याभगः ॥ ९ ॥

इमम् । बिभर्मि । सुऽकृतम् । ते । अङ्कुशम् । येन । आऽरुजासि । मघऽवन् । शफऽआरुजः ।
अस्मिन् । सु । ते । सवने । अस्तु । ओक्यम् । सुते । इष्टौ । मघऽवन् । बोधि । आऽभगः ॥९॥

हे vमघवन् धनवन्निन्द्र vते तव vसुकृतं संस्कृतम् vइमम् vअङ्कुशं vबिभर्मि धारयामि । अत्राङ्कुशशब्देन प्रेरकत्वगुणयोगात् स्तुतिरुच्यते । स्तुतिं धारयामीत्यर्थः । vयेन स्तुतिलक्षणाङ्कुशेन[6] स्तुतः सन् त्वं vशफारुजः आभिमुख्येन परबलानां हन्तृनैरावतादीन् गजान् vआरुजासि

---

१. त१.२.६.७-म१.२.४–यज्ञं कुर्वतां; त४.५–यज्ञं कुर्वतां । २. त–'भवन्ति' नास्ति । ३. त-म६–संभवंति । ४. त–'इन्द्रो धारितवान्' नास्ति । ५. त-म६–लिखितान् । ६. ग-त३-म१.४.५.७–स्तुतिरूपेणाङ्कुशेन ।

आभिमुख्येन रुजसि । पीडयसीत्यर्थः । किंच ᵛते तव ᵛअस्मिन् अस्मदीये ᵛसवने ᵛओक्यम् ओको निवासः ᵛअस्तु भवतु । किंच हे ᵛमघवन् धनवन्निन्द्र ᵛआभगः आभजनीयस्त्वं ᵛसुते सुतसोमे ᵛइष्टौ यज्ञे ᵛनोधि अस्मदीयाः स्तुतीर्बुध्यस्व ॥

गोभिष्टरेमामतिं दुरेवां यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा धनान्यस्माकेन वृजनेना जयेम ॥ १० ॥

गोभिः । तरेम । अमतिम् । दुःऽएवाम् । यवेन । क्षुधम् । पुरुऽहूत । विश्वाम् ।
वयम् । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥ १० ॥

बृहस्पतिर्नः परि पातु पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुत मध्यतो नः सखा सखिभ्यो वरिवः कृणोतु ॥ ११ ॥

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः ।
इन्द्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥ ११ ॥

इदमृग्द्वयं व्याख्यातचरम् ॥ ॥ २७ ॥

' दिवस्परि ' इति द्वादशर्चं तृतीयं सूक्तं भालन्दनस्य वत्सप्रेरार्षं त्रैष्टुभमाग्नेयम् । तथा चानुक्रान्तं—' दिवस्परि द्वादश वत्सप्रिराग्नेयं तु ' इति । प्रातरनुवाकाश्विनशस्त्रयोरिदमादिके द्वे सूक्ते अस्य सूक्तस्यान्त्यां वर्जयित्वा । सूत्रितं च—' दिवस्परीति सूक्तयोः पूर्वस्योत्तमामुद्धरेत् ' (आश्व. श्रौ. ४. १३) इति । क्षामवत्याम् ' अक्रन्ददग्निः ' इत्येषा याज्या । सूत्रितं च—' अग्ने त्वमस्मद्युयोध्यमीवा अक्रन्ददग्निः स्तनयन्निव द्यौः ' (आश्व. श्रौ. ३. १३) इति ॥

दिवस्परि प्रथमं जज्ञे अग्निरस्मद् द्वितीयं परि जातवेदाः ।
तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ॥ १ ॥

दिवः । परि । प्रथमम् । जज्ञे । अग्निः । अस्मत् । द्वितीयम् । परि । जातऽवेदाः ।
तृतीयम् । अप्ऽसु । नृऽमनाः । अजस्रम् । इन्धानः । एनम् । जरते । सुऽआधीः ॥ १ ॥

ᵛअग्निः ᵛप्रथमं पूर्वं ᵛदिवः द्युलोकस्य ᵛपरि उपरि आदित्यात्मना ᵛजज्ञे जातः । ᵛजातवेदाः जातप्रज्ञो जातधनो वाग्निः ᵛद्वितीयम् ᵛअस्मत् अस्माकं ᵛपरि उपरि पार्थिवात्मना जज्ञे । ᵛनृमणाः नृषु मनुष्येष्वनुग्राहकतयासक्तचित्तोऽग्निः ᵛतृतीयमप्सु अन्तरिक्षे वैद्युतात्मना जज्ञे । एवंविधम् ᵛएनम् अग्निं ᵛस्वाधीः सुप्रज्ञाता[1] ᵛअजस्रम् अनवरतम् ᵛइन्धानः दीपयन् ᵛजरते स्तौति । यद्वा । वाजसनेयकोक्तप्रकारेणास्य मन्त्रस्यार्थो द्रष्टव्यः । तद्यथा—' दिवस्परि प्रथमं जज्ञे अग्निरिति । प्राणो वै द्यौः प्राणाद्वा एष प्रथममजायतास्मद्द्वितीयं परि जातवेदा इति यदेनमदो द्वितीयं पुरुषविधोऽजनयत्तृतीयमप्स्विति यदेनमदस्तृतीयमद्भ्योऽजनयन्नृमणा अजस्रमिति प्रजापतिर्वै नृमणा अग्निरजस्रमिन्धान एनं जरते स्वाधीरिति यो[2] वा एनमिन्धे स एनं जनयते स्वाधीः ' (श. ब्रा. ६. ७. ४. ३) इति[2] ॥

विश्वा ते अग्ने त्रेधा त्रयाणि विश्वा ते धाम विभृता पुरुत्रा ।
विश्वा ते नाम परमं गुहा यद्विश्वा तमुत्सं यत आजगन्थ ॥ २ ॥

---

१. त-भ६-मु-सुप्रज्ञो नेता; भ१.२.४.७-सुप्राज्ञो नेता । २. त-' यो वा...इति ' नास्ति ।

विद्म । ते । अग्ने । त्रेधा । त्रयाणि । विद्म । ते । धाम । विऽभृता । पुरुऽत्रा ।
विद्म । ते । नाम । परमम् । गुहा । यत् । विद्म । तम् । उत्ऽसम् । यतः । आऽजगन्थ ॥२॥

हे ᵛअग्ने ᵛते तव ᵛत्रेधा त्रिषु स्थानेषु पृथिव्यन्तरिक्षद्युलोकेषु स्थितानि ᵛत्रयाणि अग्निवाय्वादित्याख्यानि त्रीणि रूपाणि ᵛविद्म वयं जानीमः । किंच हे अग्ने ᵛते तव ᵛधाम[1] धामानि स्थानानि ᵛविभृता विभृतानि ᵛपुरुत्रा बहुधा बहूनि वा गार्हपत्याहवनीयान्वाहार्यपचनादीनि ᵛविद्म । किंच ᵛते तव ᵛगुहा गूढम् अवेदविद्भिरविज्ञातं[2] ᵛपरमम् उत्कृष्टं वेदे प्रसिद्धं ᵛयत् ᵛनाम अस्ति तत् ᵛविद्म वेदविदो वयं विजानीमः । किंच त्वं ᵛयतः यस्मात् ᵛआजगन्थ आगतवानसि । उत्पन्नवानित्यर्थः । ᵛतम् ᵛउत्सम् उत्स्यन्दयितारमुत्पादयितारं कारणात्मानं ᵛविद्म जानीमः ॥

समुद्रे त्वा नृमणा अप्स्व१न्तर्नृचक्षा ईधे दिवो अग्न ऊधन् ।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन् ॥ ३ ॥

समुद्रे । त्वा । नृऽमनाः । अप्ऽसु । अन्तः । नृऽचक्षाः । ईधे । दिवः । अग्ने । ऊधन् ।
तृतीये । त्वा । रजसि । तस्थिऽवांसम् । अपाम् । उपऽस्थे । महिषाः । अवर्धन् ॥ ३ ॥

हे ᵛअग्ने ᵛसमुद्रे महोदधौ जायमानम् ᵛअप्स्वन्तः अपां मध्ये वडवात्मना स्थितं ᵛत्वा त्वां ᵛनृमणाः नृषु मनुष्येष्वनुग्राहकतयासक्तचित्तो वरुणः ᵛईधे संदीपितवान् । किंच ᵛनृचक्षाः नृणां प्रत्यक्षेण द्रष्टादित्यः ᵛदिवः द्युलोकस्य संबन्धिनि ᵛऊधन् ऊधसि ऊधःस्थानीय आदित्यमण्डले यज्ञे वा ᵛईधे संदीपितवान् । किंच ᵛतृतीये त्रयाणां पूरके ᵛअपां वृष्टयुदकानाम् ᵛउपस्थे स्थाने ᵛरजसि अन्तरिक्षलोके ᵛतस्थिवांसं विद्युद्रूपेणावस्थितं ᵛत्वा त्वां ᵛमहिषाः महान्तो माध्यमिका देवगणा मरुदादयः स्तोतारः ᵛअवर्धन् स्तुतिभिरवर्धयन् । यद्वा । वाजसनेयकोक्तप्रकारेणार्थो द्रष्टव्यः । तथथा—'समुद्रे त्वा नृमणा अप्स्वन्तरिति । प्रजापतिर्वै नृमणा अप्सु त्वा[3] प्रजापतिरित्येतन्नृचक्षा ईधे दिवो अग्न ऊधन्निति प्रजापतिर्वै नृचक्षा आपो[4] दिव[4] ऊधस्तृतीये त्वा रजसि तस्थिवांसमिति द्यौर्वै तृतीयं रजोऽपामुपस्थे[5] महिषा अवर्धन्निति प्राणा वै महिषा दिवि त्वा प्राणा अवर्धन्नित्येतत्' (श. ब्रा. ६. ७. ४. ५) इति ॥

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अरुण्यदा रोदसी भानुना भात्यन्तः ॥ ४ ॥

अक्रन्दत् । अग्निः । स्तनयन्ऽइव । द्यौः । क्षाम । रेरिहत् । वीरुधः । सम्ऽअञ्जन् ।
सद्यः । जज्ञानः । वि । हि । ईम् । इद्धः । अरुण्यत् ।
आ । रोदसी इति । भानुना । भाति । अन्तरिति ॥ ४ ॥

दावरूपोऽग्निः स्तूयते[6] । ᵛअग्निः दावाग्निः ᵛस्तनयन्निव ᵛद्यौः यथा दीप्तो विद्युद्रूपः पर्जन्यो महान्तं शब्दं करोति तद्वत् ᵛअक्रन्दत् महान्तं शब्दं करोति । किं कुर्वन्नित्यत्राह । ᵛक्षाम क्षामां

१. त३-म-सद्म । २. त-म-मु-अवेदविद्भिर्द्रि° । ३. त-म-मु-तदा । ४. त-म-मु-आप इव । ५. त१.३.७-म२-रजो द्यामुपस्थे । ६. ग-त३-म५.६-अत्र स्तूयते ।

पृथिवीं ᵛरेरिहत् आस्वादयन् ᵛवीरुधः ओषधीश्च ᵛसमअन् अक्षयन्। संतापयन्नित्यर्थः। किंच ᵛसद्यः तत्क्षणे[1] समाने काले ᵛजज्ञानः जायमानः ᵛहृद्भः दीप्तः ᵛहंभ् इदं स्वेन दग्धं वस्तुजातं ᵛवि ᵛअरुषत् विविधं पश्यति। ᵛहि इति पादपूरणः। किंच ᵛरोदसी द्यावापृथिव्यौ ᵛअन्तः अन्तरेण ᵛभानुना स्वदीप्त्या ᵛभाति प्रकाशते। यद्वा। वाजसनेयकोक्तार्थो द्रष्टव्यः। तथा—' अक्रन्ददग्निः स्तनयन्निव द्यौरिति। क्रन्दतीव हि पर्जन्यः स्तनयन्[2] क्षामा[2] रेरिहद्वीरुधः समञ्जन्निति क्षामा वै रेरिह्यमाणो वीरुधः समनक्ति[3] सद्यो जज्ञानो वि हीमिद्धो अरुषदिति सद्यो वा[4] एष जज्ञान इदं सर्वं विरुषा-पयत्या[5] रोदसी भानुना भात्यन्तरितीमे वै द्यावापृथिवी रोदसी ते एष भानुना भात्यन्तः' (श. ब्रा. ६. ७. ३. २) इति वैद्युतस्य स्तुतिः[6]। यद्वा। इयं[6] द्यावाग्नेः स्तुतिरिति॥

श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः।
वसुः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः॥ ५॥

श्रीणाम्। उत्ऽआरः। धरुणः। रयीणाम्। मनीषाणाम्। प्रऽअर्पणः। सोमऽगोपाः। वसुः। सूनुः। सहसः। अप्ऽसु। राजा। वि। भाति। अग्रे। उषसाम्। इधानः॥ ५॥

ᵛश्रीणां विभूतीनाम् ᵛउदारः उद्गमयिता दाता ᵛरयीणां धनानां ᵛधरुणः धारकः ᵛमनीषा-णाम् ईप्सितार्थानां ᵛप्रार्पणः प्रापयिता ᵛसोमगोपाः सोमस्य गोपा ᵛवसुः सर्वस्य लोकस्य वासकः ᵛसहसः बलस्य ᵛसूनुः ᵛअप्सु उदकेषु स्थितः ᵛराजा सर्वस्येश्वरः[7] ᵛउषसाम् ᵛअग्रे प्रभातकाले ᵛइधानः अग्निहोत्रार्थं समिध्यमानोऽग्निः ᵛवि ᵛभाति प्रकाशते॥

विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणाज्जायमानः।
वीळुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च॥ ६॥

विश्वस्य। केतुः। भुवनस्य। गर्भः। आ। रोदसी इति। अपृणात्। जायमानः। वीळुम्। चित्। अद्रिम्। अभिनत्। पराऽयन्। जनाः। यत्। अग्निम्। अयजन्त। पञ्च॥ ६॥

ᵛविश्वस्य सर्वस्य ᵛकेतुः प्रज्ञापकः ᵛभुवनस्य उदकस्य ᵛगर्भः गर्भभूतोऽग्निः ᵛजायमानः प्रादुर्भवन्नेव ᵛरोदसी द्यावापृथिव्यौ ᵛआ ᵛअपृणात् आपूरयति। ᵛपरायन् परागच्छन् ᵛवीळुं ᵛचित् दृढमपि ᵛअद्रिं मेघम् ᵛअभिनत् भिनत्ति च। कदेत्यत्राह। ᵛयत् यदा ᵛपञ्च ᵛजनाः मनुष्याः ᵛअग्निमयजन्त यजन्ते॥ ॥ २८॥

उशिक्पावको अरतिः सुमेधा मर्तेष्वग्निरमृतो नि धायि।
इयर्ति धूममरुषं भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन्॥ ७॥

उशिक्। पावकः। अरतिः। सुऽमेधाः। मर्तेषु। अग्निः। अमृतः। नि। धायि। इयर्ति। धूमम्। अरुषम्। भरिभ्रत्। उत्। शुक्रेण। शोचिषा। द्याम्। इनक्षन्॥ ७॥

---

१. ग-त-भ१.२.४.५.६-ईक्षणेन; भ७-तत्क्षणोन। २. त-भ-मु-स्तनयन्निव द्यौः क्षामा। ३. ग-शन्यततक्ष्या; त-भ-शम्यं व्यनक्ति; मु-सम्यग्व्यनक्ति। ४. त-हवां; भ-हवा। ५. त-भ-विज्ञापयत्या। ६. त-भ२.६-स्तुतिभिरिर्येद्वेर्यं; भ१.४.७-स्तुतिभिरिति यद्वा यद्वयं। ७. त-सर्वस्येश्वरस्य।

vउशिक् इवींषि कामयमानः vपावकः सर्वस्य शोधकः vअरतिः गन्ता भूतानामारयिता[1] वा vसुमेधाः सुप्रज्ञः vअमृतः मरणधर्मरहितः vअग्निः vमर्तेषु मनुष्येषु vनि vदधि निहितः। सोऽयमग्निः vभूमन् vद्रविणे प्रेरयति। किंच vअरुषम् आरोचमानं रूपं vभरिभ्रत् धारयन् vशुक्रेण शुक्रेण vशोचिषा रोचिषा vद्यां दिवम् vहनक्षन् व्याप्नुवन् गच्छतीति शेषः ॥

दृशानो रुक्म उर्विया व्यद्यौदुर्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौर्जनयत्सुरेताः ॥ ८ ॥

दृशानः । रुक्मः । उर्विया । वि । अद्यौत् । दुःऽमर्षम् । आयुः । श्रिये । रुचानः ।
अग्निः । अमृतः । अभवत् । वयःऽभिः । यत् । एनम् । द्यौः । जनयत् । सुऽरेताः ॥८॥

vदृशानः प्रत्यक्षेण दृश्यमानः vरुक्मः रोचमानोऽग्निः vउर्विया उरु अत्यन्तं vव्यद्यौत् विद्योतते। किंच vआयुः गन्ता स सर्वतोऽयमग्निः vश्रिये vविभूत्यै vदुर्मर्षं दुरभिभवं यथा भवति तथा vरुचानः रोचमानो भवति। सोऽयम् vअग्निः vवयोभिः अन्नैर्वनस्पतिभिः vअमृतः मरणरहितः vअभवत्। vयत् यस्मात् कारणात् vएनम् अग्निं vसुरेताः शोभनरेतस्कः vद्यौः प्राण आदित्यो वा vजनयत् जनयति ॥

यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने ।
प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥ ९ ॥

यः । ते । अद्य । कृणवत् । भद्रऽशोचे । अपूपम् । देव । घृतऽवन्तम् । अग्ने ।
प्र । तम् । नय । प्रऽतरम् । वस्यः । अच्छ । अभि । सुम्नम् । देवऽभक्तम् । यविष्ठ ॥ ९ ॥

हे vभद्रशोचे कल्याणदीप्ते हे vदेव द्योतमान vयविष्ठ युवतम vअग्ने vते तुभ्यं vयः यजमानः vअद्य अस्मिन्नहनि vघृतवन्तं घृतेन युक्तम् vअपूपं पुरोडाशं vकृणवत् करोति vप्रतरं प्रकृष्टतरं यजमानं vवस्यः वसीयः vअच्छ प्रति vप्र vनय अत्यर्थं प्रापय। तथा vदेवभक्तं स्तुतिभिर्हविर्भिश्च देवानां संभक्तारं सेवितारं vतं यजमानं vसुम्नं सुखम् vअभि vप्रति vप्र vनय ॥

आ तं भज सौश्रवसेष्वग्न उक्थऽउक्थ आ भज शस्यमाने ।
प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनदुज्जनित्वैः ॥ १० ॥

आ । तम् । भज । सौश्रवसेषु । अग्ने । उक्थेऽउक्थे । आ । भज । शस्यमाने ।
प्रियः । सूर्ये । प्रियः । अग्ना । भवाति । उत् । जातेन । भिनदत् । उत् । जनिऽत्वैः ॥१०॥

हे vअग्ने त्वं vसौश्रवसेषु। शोभनानि श्रवांस्यन्नानि हवींषि येषु कर्मसु तानि सौश्रवसानि। तेषु क्रियमाणेषु vतं यजमानं स्तोतारं वा vआ vभज अभीष्टफलप्रदानेन[2] सेवस्व। किंच vउक्थे[3] शस्त्रे[3] vशस्यमाने पठ्यमाने सति vतम् vआ vभज अभीष्टफलप्रदानेनैव सेवस्व। सोऽयं यजमानः स्तोता

१. ग-भूतानामीरयिता; त१.२.६-म१.४.७-भूतानां मारयिता। २. त-म१.२.४-अभीष्टप्रदानेन। ३. ग-त३-उक्थे उक्थे शस्त्रे शस्त्रे; त१.२.६-म६-उक्थे उक्थे शस्त्रे; म२-उक्थे शस्त्रे शस्त्रे ।

वा ᵛसूर्ये ᵛप्रियो ᵛभवाति भवतु। तथा ᵛअग्ना अग्नावपि ᵛप्रियो भवाति[1]। किंच सोऽयं ᵛजातेन उत्पन्नेन पुत्रेण ᵛउत् ᵛभिनदत् शत्रून् विदारयतु। तथा ᵛजनित्वैः जनिष्यमाणैश्च पुत्रैः शत्रून् ᵛउत् भिनदत्॥

त्वामग्ने यजमाना अनु द्यून्विश्वा वसु दधिरे वार्याणि।
त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः॥ ११॥

त्वाम्। अग्ने। यजमानाः। अनु। द्यून्। विश्वा। वसु। दधिरे। वार्याणि।
त्वया। सह। द्रविणम्। इच्छमानाः। व्रजम्। गोऽमन्तम्। उशिजः। वि। वव्रुः॥ ११॥

हे ᵛअग्ने ᵛत्वां प्रति ᵛयजमानाः ᵛअनु ᵛद्यून् प्रत्यहं ᵛविश्वा विश्वानि ᵛवार्याणि वरणीयानि ᵛवसु वसूनि धनानि ᵛदधिरे धारयन्ति। किंच ᵛत्वया ᵛसह ᵛद्रविणम् असुरैरपहृतं गोरूपं धनम् ᵛइच्छमानाः कामयमानाः ᵛउशिजः मेधाविनो देवाः ᵛगोमन्तं पशुमन्तं ᵛव्रजं ᵛवि ᵛवव्रुः विवृत-द्वारं कृतवन्तः॥

अस्तावि अग्निर्नरां सुशेवो वैश्वानर ऋषिभिः सोमगोपाः।
अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम्॥ १२॥

अस्तावि। अग्निः। नराम्। सुऽशेवः। वैश्वानरः। ऋषिऽभिः। सोमऽगोपाः।
अद्वेषे इति। द्यावापृथिवी इति। हुवेम। देवाः। धत्त। रयिम्। अस्मे इति। सुऽवीरम्॥ १२॥

ᵛअद्वेषे[2] ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛहुवेम वयं ह्वयेम। किंच हे ᵛदेवाः यूयं ᵛसुवीरं शोभनपुत्रायुपेतं ᵛरयिं धनम् ᵛअस्मे अस्मासु ᵛधत्त धारयत[3]॥ ॥ २९॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्ये सप्तमाष्टकेऽष्टमोऽध्यायः समाप्तः॥

१. त२.३.४.६-भ१.२.४.७–भवति। २. ग-अग्निरस्तावि स्तुतः ऋषिभिरस्माभिः। कीदृशः। नरां मनुष्याणां सुशेवः सुसुखः वैश्वनरः विश्वनरहितः सोमगोपाः सोमेनारक्ष्यमाणः। अद्वेषे द्वेषरहिते द्यावा-पृथिवी हुवेमाह्वयामः। देवा यूयं सुवीरं शोभनपुत्रयुतं रयिं धनमस्मासु धत्त धारयत दत्तेत्यर्थः; त७–ऋषिभिर्मन्त्रैः अग्निर्दानादिगुणयुक्तो देवः अस्तावि स्तुतः। कीदृशोग्निः। नरां नृणां सुशेवः सुतरां सुखरूपः। शेवमिति सुखनाम शेवं शिवमिति तन्नामसु पाठात्। पुनः कीदृशः। वैश्वनरः विश्वेषु सर्वेषु नरेषु वर्तमानः। अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रित इति स्मृतः। पुनः के भूतः। सोमगोपाः सोमस्य रक्षकः। अतः अद्वेषे द्वेषरहिते द्यावापृथिवी अग्न्याधारभूते द्यावापृथिव्यौ हुवेम आह्वयेम। तयोरग्न्याधारभूतत्वं तु द्यावापृथिवीभ्यामेतं जातं देवा इत्यस्मिन् ब्राह्मणवाक्ये स्फुटमुक्तं। हे देवा अग्निप्रमुखा यूयं सर्वे सुवीरं शोभनपुत्रायुपेतं रयिं धनं अस्मे अस्मासु स्तोतृषु धत्त धारयत; सु–नरां कर्मनेतृणां पुंसां सुशेवः सुखसेव्यो वैश्वानरोग्निः ऋषिभिः मंत्रैः अस्तावि स्तुतः। कीदृशः। सोमगोपाः सोमस्य गोप्ता रक्षिता अद्वेषे द्यावापृथिवी द्यावापृथिव्यौ हुवेम वयं ह्वयेम। किंच हे देवाः यूयं सुवीरं शोभनपुत्रायुपेतं रयिं धनमस्मे अस्मासु धत्त धारयत।

ॐ

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
सप्तमेऽष्टममध्यायं व्याख्यायाचार्यवंशजः ।
अष्टमे सायणाचार्य आदिमं व्याकरोत्पथ ॥

'अच्छा म' इति चतुर्थेऽनुवाकेऽष्टादश सूक्तानि । तत्र 'प्र होता' इति दशर्चं चतुर्थं सूक्तम् । 'प्र होता दश' इत्यनुक्रान्तम् । अनुवर्तनाद्गालन्दनस्य वत्सप्रेरार्षम् । अनादेशपरिभाषया त्रैष्टुभमाग्नेयम्[1] । पूर्वसूक्तेन सहोक्तो विनियोगः ॥

प्र होता जातो महान्नभोविन्नृषद्वा सीददपामुपस्थे ।
दधिर्यो धायि स ते वयांसि यन्ता वसूनि विधते तनूपाः ॥ १ ॥

प्र । होता । जातः । महान् । नभःऽवित् । नृऽसद्वा । सीदत् । अपाम् । उपऽस्थे ।
दधिः । यः । धायि । सः । ते । वयांसि । यन्ता । वसूनि । विधते । तनूऽपाः ॥ १ ॥

यः [v]नृषद्वा अग्निः [v]अपाम् । अन्तरिक्षनामैतत् । अन्तरिक्षस्य [v]उपस्थे उत्सङ्गे वैद्युतरूपेण निषण्णोऽभूत् स इदानीं [v]होता यजमानानां होमनिष्पादकः [v]जातः प्रादुर्भूतः [v]महान् गुणैः पूज्यः [v]नभोवित् अन्तरिक्षस्य वेत्ता । यतस्तत्रोत्पन्नः अतस्तस्य ज्ञाता । [v]नृषद्वा नृषु सीदन् । सदेः क्विप् कृत्स्वरः । [v]प्र [v]सीदत् वेद्यां प्रसीदति । 'अपामुपस्थे महिषा अगृभ्णत' (ऋ. सं. ६. ८. ४) इति हि निगमः । यद्वा । अपाम् । अपसाम्रित्यर्थः । कर्मणामुपस्थ उपस्थाने समीपे वेद्यामुक्तलक्षणः सन् । अथवा । अपामुदकानामुपस्थे मध्ये योऽग्निर्हविर्वोढुमसहमानो निगूढः स देवैः पुनः प्रार्थितः उक्तविधः सन् वेद्यां प्रसीदति । [v]यः अग्निः [v]दधिः धाता यज्ञस्य धारकः सन् [v]धायि वेद्यां निहितोऽभूत् [v]सः अग्निः हे वत्सप्रे [v]विधते परिचरते [v]ते तुभ्यं [v]वयांसि अन्नानि [v]वसूनि धनानि च [v]यन्ता नियमिता भवतु । किंच [v]तनूपाः ते तन्वः पाता च भवत्विति शेषः ॥

इमं विधन्तो अपां सधस्थे पशुं न नष्टं पदैरनु ग्मन् ।
गुहा चतन्तमुशिजो नमोभिरिच्छन्तो धीरा भृगवोऽविन्दन् ॥ २ ॥

इमम् । विधन्तः । अपाम् । सधऽस्थे । पशुम् । न । नष्टम् । पदैः । अनु । ग्मन् ।
गुहा । चतन्तम् । उशिजः । नमःऽभिः । इच्छन्तः । धीराः । भृगवः । अविन्दन् ॥ २ ॥

[v]इमम् अग्निम् [v]अपाम् उदकानां [v]सधस्थे[2] सहस्थाने मध्ये निगूढं [v]विधन्तः[2] परिचरन्त उपचारं वदन्तो वा ऋषयश्च [v]पदैः पलायनमार्गव्यञ्जकैः [v]नष्टं चोरादिभिरपहृतं [v]पशुम् इव [v]अनु [v]ग्मन् अनुजग्मुः । गमेर्लुङि 'मन्त्रे घस०' इति च्लेर्लुक् । तेषु मध्ये [v]गुहा गुहायां [v]चतन्तम् ।

---

१. ग४-त४.६.८-म१.२.४.५.६–°माग्नेयं त्वित्युक्तत्वादाग्नेयं । २. त१.२.३.७-मु–मध्ये निगूढं विधंतः; भ–मध्ये विधंतः ।

ऋतिर्गतिकर्मा। अप्सु विलीनमित्यर्थः। vउशिजः कामयमानाः vनमोभिः नमस्कारैः स्तोत्रैर्वा vइच्छन्तः आत्मन इच्छन्तः vधीराः धीमन्तः vभृगवः vअविन्दन् लब्धवन्तः। अग्नेर्हविर्वोढुमसहमानस्य पलाय्याप्सु प्रवेशो देवानामन्वेषणं च 'अग्नेरयो ज्यायांसः' (तै. सं. २. १. १) इत्यत्र स्पष्टमाम्नातम्। अन्वेषणं कुर्वतां मध्ये भृगूणामग्निलाभः 'इमं विधन्तो अपां सधस्थे हितावधुर्भृगवः' (ऋ. सं. २. ४. २) इत्यत्रोक्तम्॥

इमं त्रितो भूर्यविन्ददिच्छन्वैभूवसो मूर्धन्यघ्न्यायाः।
स शेवृधो जात आ हर्म्येषु नाभिर्युवा भवति रोचनस्य॥ ३॥

इमम्। त्रितः। भूरि। अविन्दत्। इच्छन्। वैभुऽवसः। मूर्धनि। अघ्न्यायाः।
सः। शेऽवृधः। जातः। आ। हर्म्येषु। नाभिः। युवा। भवति। रोचनस्य॥ ३॥

vइमं vभूरि महान्तमग्निं vवैभूवसः विभूवसः[1] पुत्रः vत्रितः ऋषिः vइच्छन् लब्धुमिच्छन् vअघ्न्यायाः। अघ्न्या[2] भूमिः। तस्या[3] भूम्याः[3] vमूर्धनि[3]। भूम्यामित्यर्थः। तत्र vअविन्दत् लब्धवान्[4]। vसः अग्निः vशेवृधः सुखस्य[5] वर्धयिता सन्[5] vहर्म्येषु यजमानगृहेषु vआ सर्वतः vजातः प्रादुर्भूतः सन्[6] vरोचनस्य[7] रोचमानस्य स्वर्गाख्यस्य फलस्योक्तलक्षणस्य यज्ञस्य आदित्यस्य[8] वा vनाभिः बन्धकः vभवति॥

मन्द्रं होतारमुशिजो नमोभिः प्राञ्चं यज्ञं नेतारमध्वराणाम्।
विशामकृण्वन्नरतिं पावकं हव्यवाहं दधतो मानुषेषु॥ ४॥

मन्द्रम्। होतारम्। उशिजः। नमःऽभिः। प्राञ्चम्। यज्ञम्। नेतारम्। अध्वराणाम्।
विशाम्। अकृण्वन्। अरतिम्। पावकम्। हव्यऽवाहम्। दधतः। मानुषेषु॥ ४॥

vउशिजः कामयमाना ऋत्विजः vमन्द्रं मादनीयं vहोतारं होमनिष्पादकं vप्राञ्चं गार्हपत्यादाहवनीयं प्रति प्रागञ्चन्तं[9] vयज्ञं यजनीयम् vअध्वराणां यागानां vनेतारं प्रापयितारम् vअरतिं गन्तारं सर्वदा यागगृहे वर्तमानं vपावकं शोधकं vहव्यवाहं हविषो वोढारं vमानुषेषु मनुष्येषु मध्ये vदधतः दधाना ऋत्विजः vविशां यजमानानामर्थाय। यद्वा। विशां प्रजानामरतिमर्यम्। स्वामिनमित्यर्थः। vनमोभिः नमस्कारैः। स्तुतिभिरित्यर्थः। vअकृण्वन् अकुर्वन्। सुप्रीतं कृतवन्तः॥

प्र भूर्जयन्तं महां विपोधां मुरा अमूरं पुरां दर्माणम्।
नयन्तो गर्भं वनां धियं धुर्हिरिश्मश्रुं नार्वाणं धनर्चम्॥ ५॥

प्र। भूः। जयन्तम्। महाम्। विपःऽधाम्। मुराः। अमूरम्। पुराम्। दर्माणम्।
नयन्तः। गर्भम्। वनाम्। धियम्। धुः। हिरिऽश्मश्रुम्। न। अर्वाणम्। धनऽअर्चम्॥ ५॥

हे स्तोतः[10] त्वं vजयन्तं जेतव्यान्शत्रूञ्जयन्तं vमहां महान्तं vविपोधां मेधाविनो धर्तारमग्निं vप्र vभूः प्रभव समर्थो भव। स्तोतुमिति शेषः। उद्गीथस्तु भूर्जयन्तमित्येकपदं मत्वा भूरादीछीका-

---

१. त-मु-विभुवसः। २. ग-म२.८-आगत्याः; त१.२.३-अत्या; त७-मु-अहतव्याया। ३. म१. ४.७-गोमूर्धान। ४. म१.६.७-प्राप ततः। ५. म१.४.७-सुखरूपः। ६. त-म-स च। ७. ग-त४-युवा तेजसा मिश्रयिता अग्निः रोचनस्य। ८. भ-आदित्यस्य यज्ञस्य। ९. ग-क्रामंतं। १०. म-होतः।

अयन्तमिति व्याचक्षार। न केवलं त्वमेक एव अपि तु ᵛमूराः मूढाः सर्वेऽपि[1] पुरुषाः ᵛअमूरम् अमूढं ᵛपुरां ᵛदर्माणं दारकम्। औणादिको मनिः। प्रत्ययस्वरः। ᵛगर्भम् अरण्योर्गर्भभूतं ᵛवनां वननीयम्। 'वा छन्दसि' (पा. सू. ६. १. १०६-१०७) इति वचनादमि पूर्वाभावः। ᵛहिरिश्मश्रुं ᵛनार्वाणम्। नेत्युपमार्थीयः। श्मश्रुशब्दोऽत्र रोमसामान्यवचनः। हरितरोमोपेतमर्वाणमरणशीलमश्वमिव। उक्तलक्षणाश्वद्धरितकेशस्थानीयज्वालोपेतं ᵛधनर्चं प्रीणनस्तुतिम्। शकन्ध्वादित्वात् पररूपत्वम्। ईदृशमग्निं ᵛनयन्तः हविर्भिः प्रापयन्तः[2] ᵛधियं कर्म स्तोत्रं वा ᵛधुः प्रापयन्ति। 'गातिस्था०' इति सिचो लुक्॥ ॥ १ ॥

नि पस्त्यासु त्रितः स्तभूयन्परिवीतो योनौ सीददन्तः।
अतः संगृभ्या विशां दर्मूना विधर्मणायन्त्रैरीयते नॄन् ॥ ६ ॥

नि। पस्त्यासु। त्रितः। स्तभ्नुऽयन्। परिऽवीतः। योनौ। सीदत्। अन्तरिति। अतः। सम्ऽगृभ्य। विशाम्। दर्मूनाः। विऽधर्मणा। अयन्त्रैः। ईयते। नॄन्॥ ६ ॥

ᵛत्रितः त्रिषु स्थानेषु गार्हपत्यादिषु तायमानः ᵛस्तभूयन् यजमानगृहान् स्तम्भयितुमिच्छन्। इच्छार्थे क्यचि तदन्ताच्छतरि रूपम्। ᵛपरिवीतः परितो ज्वालाभिर्व्याप्तः सन् ᵛपस्त्यासु यागगृहेषु ᵛयोनौ ᵛअन्तः स्वीये वेद्यात्मके स्थाने ᵛनि ᵛषीदत् निषीदति। ᵛअतः अस्मात्स्थानात् ᵛविशां प्रजानां संबन्धीनि हवींषि ᵛसंगृभ्य[3] संगृह्य इन्द्रादीनुद्दिश्य प्रत्तानि[4] चरुपुरोडाशादीनि स्वीकृत्य ᵛदर्मूनाः देवेभ्यो दानमना यजमानाय वाभिमतप्रदानमनाः[5] ᵛविधर्मणा तासां विविधेन कर्मणा[6] निमित्तेन दानमना देवेभ्यो दानपक्षे विविधगमनरूपेण कर्मणा[6] ᵛअयन्त्रैः शत्रूणां नियमनैः सह ᵛनॄन्[7] देवान् ᵛईयते गच्छति॥

अस्याजरासो दमामरित्रा अर्चद्धूमासो अग्नयः पावकाः।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥ ७ ॥

अस्य। अजरासः। दमाम्। अरित्राः। अर्चत्ऽधूमासः। अग्नयः। पावकाः।
श्वितीचयः। श्वात्रासः। भुरण्यवः। वनऽसदः। वायवः। न। सोमाः॥ ७ ॥

अत्र बहुत्वेन स्तूयते। ᵛअस्य[8] यजमानस्य संबन्धिनः ᵛअजरासः जरारहिताः ᵛदमां दमनीयानां रक्षःप्रभृतीनाम्। दमेः क्विपि 'सावेकाचः' इति विभक्तेरुदात्तत्वम्। तेषाम् ᵛअरित्राः तारकाः ᵛअर्चद्धूमासः अर्चन्तः अर्चनीया धूमा धूमोपलक्षिता ज्वाला वा येषां ते तथोक्ताः ᵛपावकाः शोधकाः ᵛश्वितीचयः श्वेतिमानमञ्चन्तः। श्वितिः श्वेतम्। औणादिक इः। ᵛश्वात्रासः। क्षिप्रनामैतत्। क्षिप्रधर्मकाः ᵛभुरण्यवः भरणशीलाः ᵛवनर्षदः वनेषु सीदन्तः। संहितायां छान्दसं रुत्वम्। ᵛवायवो ᵛन ᵛसोमाः गन्तारः सोमा इव। हविर्दातुर्यजमानस्य शीघ्रा भवन्तीति॥

---

१. ग-भ-पूर्वेपि। २. भ१.४.७-पुष्टिं प्रापयेतः। ३. ग-भ-'संगृभ्य' नास्ति। ४. भ२. ५.६.८-प्रत्ता प्रत्तानि। ५. त६-वाभिमतफल°। ६. भ२-कर्मणा अकारोधिवाचकः तेनायमर्थः आवां शत्रूणां यंत्राः नियमनानि तैः सह शत्रुनिग्रहं कुर्वन् इत्यर्थः। ७. ग-भ२.६.८-मु-नॄन् नेतॄन्; त-नेतॄन्; भ१-नृणां नेतॄन्। ८. भ-यस्य।

प्र जिह्वया भरते वेपो अग्निः प्र वयुनानि चेतसा पृथिव्याः ।
तमायवः शुचयन्तं पावकं मन्द्रं होतारं दधिरे यजिष्ठम् ॥ ८ ॥

प्र । जिह्वया । भरते । वेपः । अग्निः । प्र । वयुनानि । चेतसा । पृथिव्याः ।
तम् । आयवः । शुचयन्तम् । पावकम् । मन्द्रम् । होतारम् । दधिरे । यजिष्ठम् ॥ ८ ॥

यः [v]अग्निः [v]जिह्वया ज्वालया [v]वेपः । कर्मनामैतत् । कर्म [v]प्र [v]भरते तथा सोऽग्निः [v]वयुनानि प्रज्ञावन्ति स्तोत्राणि [v]पृथिव्याः रक्षणाय [v]चेतसा अनुग्रहयुक्तेन मनसा [v]प्र भरते [v]तम् अग्निम् [v]आयवः गन्तारो मनुष्याः [v]शुचयन्तं दीप्यमानं [v]पावकं शोधकं [v]मन्द्रं स्तुत्यं[1] [v]होतारम् आह्वातारं होमनिष्पादकं वा [v]यजिष्ठम् अतिशयेन यष्टव्यं[2] यष्टृतमं वा[3] [v]दधिरे धारयन्ति ॥

द्यावा यमग्निं पृथिवी जनिष्टामापस्त्वष्टा भृगवो यं सहोभिः ।
ईळेन्यं प्रथमं मातरिश्वा देवास्ततक्षुर्मनवे यजत्रम् ॥ ९ ॥

द्यावा । यम् । अग्निम् । पृथिवी इति । जनिष्टाम् । आपः । त्वष्टा । भृगवः । यम् । सहःऽभिः ।
ईळेन्यम् । प्रथमम् । मातरिश्वा । देवाः । ततक्षुः । मनवे । यजत्रम् ॥ ९ ॥

[v]यमग्निं [v]द्यावापृथिवी द्यावापृथिव्यौ [v]जनिष्टाम् अजनिषाताम् । जनेर्लुङि व्यत्ययेन परस्मैपदम् । [v]आपः च [v]यम् उदपादयन् वैद्युतरूपेण [v]त्वष्टा च यमजनयत् [v]भृगवः च यं [v]सहोभिः बलैः स्तोत्रादिसाधनैर्लब्धवन्तः । 'भृगवोऽविन्दन्' (ऋ. सं. १०. ४६. २) इति श्रुतम् । किंच [v]ईळेन्यं स्तुत्यं यं [v]प्रथमं [v]मातरिश्वा वायुरुदपादयत् अन्ये [v]देवाः च [v]मनवे राज्ञे मनोरथाय [v]यजत्रं यष्टव्यं यमग्निं [v]ततक्षुः निष्पादितवन्तः ॥

यं त्वा देवा दधिरे हव्यवाहं पुरुस्पृहो मानुषासो यजत्रम् ।
स यामन्नग्ने स्तुवते वयो धाः प्र देवयन् यशसः सं हि पूर्वीः ॥ १० ॥

यम् । त्वा । देवाः । दधिरे । हव्यऽवाहम् । पुरुऽस्पृहः । मानुषासः । यजत्रम् ।
सः । यामन् । अग्ने । स्तुवते । वयः । धाः । प्र । देवऽयन् । यशसः । सम् । हि । पूर्वीः ॥ १० ॥

हे अग्ने [v]हव्यवाहं [v]यं [v]त्वा त्वां [v]देवा [v]दधिरे धारितवन्तः [v]मानुषासः मनुष्याश्च [v]पुरुस्पृहः बहुकामान् स्पृहयन्तः [v]यजत्रं यष्टव्यं [v]दधिरे धारितवन्तः हे [v]अग्ने [v]सः त्वं [v]यामन् यामनि यज्ञे [v]स्तुवते मह्यं [v]वयः अन्नं [v]धाः देहि । हे अग्ने त्वत्तः [v]देवयन् देवकामो यजमानः [v]पूर्वीः बह्वीः बहूनि [v]यशसः यशांसि । [v]सं [v]हि इत्युपसर्गश्रुतेर्योग्यक्रियाध्याहारः । संप्राप्नोति खलु ॥ ॥ २ ॥

'जगृभ्मा ते' इत्यष्टर्चं पञ्चमं सूक्तमाङ्गिरसस्य ससगुणान्न आर्षं त्रैष्टुभम् । विकुण्ठा नाम असुरस्त्री । सा चेन्द्रसदृशं पुत्रं कामयमाना कृच्छ्रचान्द्रायणादिकं तपस्तेपे । मत्सदृशोऽन्यः कस्मिन्ना जनिष्टेति बुद्धेनेन्द्र एव तस्याः पुत्रोऽजायत[4] । तादृशो वैकुण्ठ इन्द्रो देवता । तथा चानुक्रान्तं— 'जगृभ्माष्टौ ससगुर्वैकुण्ठमिन्द्रं तुष्टाव' इत्यादि । गतो विनियोगः ॥

१. भ१.४.७–मादनीयं । २. त–यष्टव्यं यजमाना धातुमिवा । ३. त–पुत्रो जातः ।

जगृभ्मा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम् ।
विद्मा हि त्वा गोपतिं शूर गोनामस्मभ्यं चित्रं वृषणं रयिं दाः ॥ १ ॥

जगृभ्म । ते । दक्षिणम् । इन्द्र । हस्तम् । वसुऽयवः । वसुऽपते । वसूनाम् ।
विद्म । हि । त्वा । गोऽपतिम् । शूर । गोनाम् । अस्मभ्यम् । चित्रम् । वृषणम् । रयिम् । दाः ॥ १ ॥

[v]वसूनां [v]वसुपते बहूनां धनानां[1] स्वामिन् हे [v]इन्द्र [v]ते तव [v]दक्षिणं [v]हस्तं [v]वसूयवः वसुकामा वयं [v]जगृभ्म गृह्णीमः । यथा बहुप्रदस्यार्थिनो[2] मह्यमदत्त्वा न गन्तव्यमिति हस्तं गृह्णन्ति तद्वत् । हे [v]शूर विक्रान्तेन्द्र [v]त्वा त्वां [v]गोनां [v]गोपतिम् । अत्र वृत्यवृत्तिभ्यां स्वामित्वं बहुत्वं च प्रतिपाद्यते । बह्वीनां गवां गोपतिं [v]विद्म जानीमः । अतः [v]अस्मभ्यं [v]चित्रं चायनीयं [v]वृषणं वर्षकं [v]रयिं धनं [v]दाः देहि ॥

स्वायुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम् ।
चर्कृत्यं शंस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रयिं दाः ॥ २ ॥

सुऽआयुधम् । सुऽअवसम् । सुऽनीथम् । चतुःऽसमुद्रम् । धरुणम् । रयीणाम् ।
चर्कृत्यम् । शंस्यम् । भूरिऽवारम् । अस्मभ्यम् । चित्रम् । वृषणम् । रयिम् । दाः ॥ २ ॥

[v]स्वायुधं शोभनवज्राद्यायुधं [v]स्ववसं शोभनरक्षणं सुगमनं वा [v]सुनीथं सुनयनं [v]चतुःसमुद्रं चतुरः[3] समुद्रान्[3] यो यशसा व्याप्नोति तं [v]धरुणं धारकम् । केषाम्[4] । [v]रयीणां धनानाम् । [v]चर्कृत्यं पुनःपुनः कर्तव्यं [v]शंस्यं स्तुत्यं [v]भूरिवारं भूरीणां दुःखानां वारकं बहुभिर्वरणीयं वा त्वां विद्मेति शेषः । तादृशोऽस्मभ्यमित्यादि[5] पूर्ववत् । यद्वा । हे इन्द्र उक्तगुणविशिष्टं पुत्राख्यं रयिं दाः देहि ॥

सुब्रह्माणं देववन्तं बृहन्तमुरुं गभीरं पृथुबुध्नमिन्द्र ।
श्रुतऋषिमुग्रमभिमातिषाहमस्मभ्यं चित्रं वृषणं रयिं दाः ॥ ३ ॥

सुऽब्रह्माणम् । देवऽवन्तम् । बृहन्तम् । उरुम् । गभीरम् । पृथुऽबुध्नम् । इन्द्र ।
श्रुतऽऋषिम् । उग्रम् । अभिमातिऽसहम् । अस्मभ्यम् । चित्रम् । वृषणम् । रयिम् । दाः ॥ ३ ॥

हे [v]इन्द्र त्वं [v]सुब्रह्माणम् । ब्रह्म परिवृढं स्तुतिलक्षणं कर्म । शोभनस्तुतिकमित्यर्थः । [v]देववन्तं [v]बृहन्तं महान्तम् [v]उरुं विस्तीर्णं [v]गभीरम् असुरादिभिरगम्यं [v]पृथुबुध्नं विस्तृतमूलं[6] [v]श्रुतऋषिं श्रुता ऋषयो येन तादृशमृषीणां ख्यापयितारं प्रथितज्ञानं वा [v]उग्रम् उद्गूर्णबलमत एव [v]अभिमाति-षाहम् अभिमातीनां शत्रूणामभिभवितारं हन्तारम् [v]अस्मभ्यं [v]चित्रं पूज्यं [v]वृषणं वर्षकं पुत्रं [v]रयिं धनं च [v]दाः देहि[7] । अथवा विशेषणविशेष्यभावः । उक्तलक्षणं पुत्राख्यं रयिं दाः ॥

---

१. त२.८–धनानां पते । २. त१.२.३–बहुवेदयमर्थितो; त७–बहुवदान्यस्यार्थिनो; भ१.२.४.८–बहुपदमर्थिनो; भ६.७–बहुप्रदमर्थिनो । ३. ग-भ–चतुःसमुद्रान् । ४. त-मु–तेषां । ५. ग-त४–तादृशस्त्वमस्मभ्य°; भ–तादृशायास्मभ्य° । ६. त-मु–विततमूलं । ७. ग-त१.२.३-म–'देहि' नास्ति ।

सनद्वाजं विप्रवीरं तरुत्रं धनस्पृतं शशुवांसं सुदक्षम् ।
दस्युहनं पूर्भिदमिन्द्र सत्यमस्मभ्यं चित्रं वृषणं रयिं दाः ॥ ४ ॥

सनत्ऽवाजम् । विप्रऽवीरम् । तरुत्रम् । धनऽस्पृतम् । शशुऽवांसम् । सुऽदक्षम् ।
दस्युऽहनम् । पुःऽभिदम् । इन्द्र । सत्यम् । अस्मभ्यम् । चित्रम् । वृषणम् । रयिम् । दाः ॥४॥

vसनद्वाजं[1] लब्धान्नं vविप्रवीरं मेधाविनं पुत्रं vतरुत्रं तारकं vधनस्पृतं धनानां पूरकं स्रष्टारं वा । स्पृणोतेः स्पृशतेर्वोत्तरपदम् । vशशुवांसं वर्धमानं vसुदक्षं शोभनबलं vदस्युहनं शत्रूणां हन्तारं vपूर्भिदं शत्रूणां पुरां भेत्तारं vसत्यं सत्यकर्माणम् । शिष्टमुक्तम् ॥

अश्वावन्तं रथिनं वीरवन्तं सहस्रिणं शतिनं वाजमिन्द्र ।
भद्रव्रातं विप्रवीरं स्वर्षामस्मभ्यं चित्रं वृषणं रयिं दाः ॥ ५ ॥

अश्वऽवन्तम् । रथिनम् । वीरऽवन्तम् । सहस्रिणम् । शतिनम् । वाजम् । इन्द्र ।
भद्रऽव्रातम् । विप्रऽवीरम् । स्वःऽसाम् । अस्मभ्यम् । चित्रम् । वृषणम् । रयिम् । दाः ॥ ५ ॥

vअश्वावन्तं बहुभिरश्वैरुपेतं vरथिनं रथवन्तं vवीरवन्तं वीरैः पुरुषैरुपेतं vसहस्रिणं सहस्रवन्तं vशतिनं[2] शतवन्तम्[2] । असंख्यातगवादियुक्तमित्यर्थः । vभद्रव्रातं भद्रगणं कल्याणसेवकैः परिवृतं vविप्रवीरं विप्रैर्वीरैश्चोपेतं vस्वर्षां सर्वस्य संभक्तारं vवाजं[3] बलवन्तं हे vइन्द्र[3] । शिष्टमुक्तम् ॥ ॥३॥

प्र सप्तगुमृतधीतिं सुमेधां बृहस्पतिं मतिरच्छा जिगाति ।
य आङ्गिरसो नमसोपसद्योऽस्मभ्यं चित्रं वृषणं रयिं दाः ॥ ६ ॥

प्र । सप्तऽगुम् । ऋतऽधीतिम् । सुऽमेधाम् । बृहस्पतिम् । मतिः । अच्छ । जिगाति ।
यः । आङ्गिरसः । नमसा । उपऽसद्यः । अस्मभ्यम् । चित्रम् । वृषणम् । रयिम् । दाः ॥ ६ ॥

vसप्तगुं मां vमतिः स्तुतिर्देवविषया vअच्छा vजिगाति अभिगच्छति । कीदृशं सप्तगुम् । vऋतधीतिं सत्यकर्माणं vसुमेधां शोभनप्रज्ञं बृहस्पतिं बृहतो मन्त्रस्य स्वामिनम् । vयः सप्तगुः vआङ्गिरसः अङ्गिरोगोत्रोत्पन्नोऽहं vनमसा नमस्कारेण देवान् vउपसद्यः उपगतः[4] । यद्वा । नमसाऽन्नेनोपसद्य उपसदनीयः । देवैरनुग्राह्य इत्यर्थः । तादृशाय vअस्मभ्यं मह्यं vचित्रं vवृषणं vरयिं vदाः॥

वनीवानो मम दूतास इन्द्रं स्तोमाश्चरन्ति सुमतीरियानाः ।
हृदिस्पृशो मनसा वच्यमाना अस्मभ्यं चित्रं वृषणं रयिं दाः ॥ ७ ॥

वनीवानः । मम । दूतासः । इन्द्रम् । स्तोमाः । चरन्ति । सुऽमतीः । इयानाः ।
हृदिऽस्पृशः । मनसा । वच्यमानाः । अस्मभ्यम् । चित्रम् । वृषणम् । रयिम् । दाः ॥ ७ ॥

---

१. ग-त-भ-मु-हे इंद्र सनद्वाजं । २. भ-'शतिनं शतवन्तं' नास्ति । ३. ग४-त३-मु-'वाजं... हे इन्द्र' नास्ति । ४. त१.२.३.७-उपगतव्यः ।

[v]वनीवाग: वननवन्त:[1]। 'छन्दसीवनिपौ' इति मत्वर्थीयो वनिप्। [v]मम सप्तगो: [v]दूतास: दूतसदृशा दूता यथा भर्तुरभिमतार्थं प्रापणीयं प्रापयन्ति तद्वत्स्तुत्यान् गुणान्[2] प्रापयन्त: [v]स्तोमा: स्तवा: [v]सुमती: तस्येन्द्रस्यास्मद्विषया अनुकूला बुद्धी: [v]इयाना: याचमाना: [v]इन्द्रं [v]चरन्ति प्राप्नुवन्ति। पुनश्च त एव विशेष्यन्ते। [v]हृदिस्पृश: हृदये स्पृशन्त:। स्तुत्यस्य प्रियभूता इत्यर्थ:। 'हृद्भुभ्यां डेरुपसंख्यानम्' इति सप्तम्या अलुक्। [v]मनसा सत्वोद्रिक्तेन [v]वच्यमाना: उच्यमाना:। अस्मभ्यमित्यादि गतम्॥

यत्त्वा यामि दद्धि तन्न इन्द्र बृहन्तं क्षयमसमं जनानाम्।
अभि तद्द्यावापृथिवी गृणीतामस्मभ्यं चित्रं वृषणं रयिं दा: ॥ ८ ॥

यत्। त्वा। यामि। ददि्ध। तत्। न:। इन्द्र। बृहन्तम्। क्षयम्। असमम्। जनानाम्। अभि। तत्। द्यावापृथिवी इति। गृणीताम्। अस्मभ्यम्। चित्रम्। वृषणम्। रयिम्। दा:॥८॥

हे [v]इन्द्र [v]त्वा त्वां [v]यत् वक्ष्यमाणं [v]यामि याचामि। वर्णलोपश्छान्दस:। याच्यमानं [v]तत् [v]दद्धि देहि। 'दद दाने'। लोटि व्यत्ययेन परस्मैपदम्। 'बहुलं छन्दसि' इति शपो लुक्। तदिति सामान्येन निर्दिष्टं विशेषयति। [v]बृहन्तं महान्तं [v]क्षयं निवासं [v]जनानाम् अन्येषाम् [v]असमम् असाधारणं देहि। त्वया दातव्यं [v]द्यावापृथिवी [v]अभि [v]गृणीताम्। अस्मभ्यमित्यादि[3] गतम्[3]॥॥४॥

'अहं भुवम्' इत्येकादशर्चं षष्ठं सूक्तम्। पूर्वसूक्तेन सप्तगुना स्तुतो हृष्ट: सन्निदमादिसूक्तत्रयेण स्वयमात्मानमस्तौत्। तस्मादैकुण्ठस्येन्द्रस्य वाक्यत्वात् 'यस्य वाक्यं स ऋषि:' इति परिभाषया इन्द्र ऋषि:। वैकुण्ठस्येन्द्रस्य[4] च स्तूयमानत्वात् 'या तेनोच्यते सा[5] देवता' इति परिभाषया इन्द्र एव देवता। दशभ्येकादशीसप्तम्यस्त्रिष्टुभ:। शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्य:। तथा चानुक्रान्तं—'स[6] सप्तगुस्तुतिसंहृष्ट आत्मानमुत्तरैस्त्रिभिस्तुष्टावाहं भुवमेकादशान्त्ये त्रिष्टुभौ सप्तमी च' इति। अतिरात्रे द्वितीयपर्याये होतु: शस्त्र एतत्सूक्तम्। सूत्रितं च—'अहं भुवमपाव्यस्यान्धसो मदायेति याज्या' (आश्व. श्रौ. ६. ४) इति। समूळ्हस्य दशरात्रस्य तृतीये छन्दोमे निष्केवल्येऽप्येतत्सूक्तम्। 'अहं भुवं तत्त इन्द्रियमिति निष्केवल्यम्' (आश्व. श्रौ. ८.७) इति हि सूत्रितम्॥

अहं भुवं वसुन: पूर्व्यस्पतिरहं धनानि सं जयामि शश्वत:।
मां हवन्ते पितरं न जन्तवोऽहं दाशुषे वि भजामि भोजनम् ॥ १ ॥

अहम्। भुवम्। वसुन:। पूर्व्य:। पति:। अहम्। धनानि। सम्। जयामि। शश्वत:। माम्। हवन्ते। पितरम्। न। जन्तव:। अहम्। दाशुषे। वि। भजामि। भोजनम्॥ १ ॥

[v]अहम् इन्द्र: [v]वसुन: धनस्य [v]पूर्व्य: मुख्योऽसाधारण: [v]पति: स्वामी [v]भुवम् अभवम्। भवतेर्लङि 'बहुलं छन्दसि' इति शपो लुक्। 'अचि श्नुधातुभ्रुवाम्' इत्यादिना उवङादेश:। अडभावश्छान्दस:। तथा [v]अहं [v]शश्वत:। बहुनामैतत्। बहो: शश्वो: संबन्धीनि [v]धनानि। [v]सम्

---

१. ग-भ४–वननवंत: वननं वनि:; त१.२.३.५–वननवंत: वननं वनै:; भ१.२.८–वननवंत: वननं विन:; भ७–वननवंत: वननेश्छंदसि क्कनिब्वनिपाविति। २. त-मु–गुणेन। ३. ग-त१.२.३.६.७.८-भ-मु–अभिमन्येतां; त४–अनुमन्येतां। ४. त-मु–वैकुंठास्यस्येंद्रस्य। ५. ग-त-भ–'सा देवता' नास्ति। ६. ग-त-मु–'स' नास्ति।

इत्येकीभावे । सह ᵛजयामि । किंच ᵛमाम् एव ᵛजन्तवः प्राणिनो यजमानाः ᵛहवन्ते आह्वयन्ति । ᵛपितरं ᵛन पितरमिव पुत्राः । ᵛअहं ᵛदाशुषे हविषो दात्रे यजमानाय ᵛभोजनम् अन्नं ᵛवि ᵛभजामि ददामि ॥

अहमिन्द्रो रोधो वक्षो अथर्वणस्तिराय गा अजनयमहेरधि ।
अहं दस्युभ्यः परि नृम्णमा ददे गोत्रा शिक्षन् दधीचे मातरिश्वने ॥ २ ॥

अहम् । इन्द्रः । रोधः । वक्षः । अथर्वणः । त्रिताय । गाः । अजनयम् । अहेः । अधि । अहम् । दस्युऽभ्यः । परि । नृम्णम् । आ । ददे । गोत्रा । शिक्षन् । दधीचे । मातरिश्वने ॥२॥

आद्यपादस्येतिहासमाहुः । आथर्वणं दध्यञ्चं मधुविद्यावन्तमिन्द्र आगत्य मधुविद्यां कस्यचिन्न ब्रूया इति नियमितवान् । यदि ब्रूयास्ते शिरो हरामीत्युक्तवान् । स चाथर्वणोऽश्विभ्यामुवाच । 'इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच' (श. ब्रा. १४.२.५.१६) 'अश्वस्य शीर्ष्णा प्र यदीमुवाच' (ऋ. सं. १. ११६. १२) इति हि श्रुतिः । स चेन्द्र आगत्य दधीचः शिरोऽहरदिति तदत्रोच्यते । ᵛइन्द्रः ᵛअहम् ᵛअथर्वणः अथर्वणः पुत्रस्य दधीचः ᵛवक्षः । तदुपलक्षितं शिर इत्यर्थः । तस्य ᵛरोधः रोधको हर्तास्मि । तथा ᵛत्रिताय एतन्नामकायाप्त्याय कूपपतितायोद्धरणार्थम्[१] ᵛअहेः मेघस्य ᵛअधि उपरि ᵛगाः उदकानि ᵛअजनयम् उदपादयम् । त्रितस्य कूपपतितस्येन्द्रं प्रत्युद्धरणप्रार्थनं 'सं मा तपन्त्यभितः' (ऋ. सं. १०.३३.२) इत्यत्र प्रतिपादितम् । तथा ᵛअहं ᵛदस्युभ्यः उपक्षपयितृभ्यः[२] शत्रुभ्यः सकाशात् ᵛनृम्णं धनम् ᵛआ ᵛददे आदत्तवानस्मि । किं कुर्वन् । ᵛगोत्रा गवामुदकानां रक्षकान् मेघान् ᵛशिक्षन् विनयन् । किमर्थम् । ᵛमातरिश्वने मातरिश्वनः पुत्राय ᵛदधीचे एतन्नामकायर्षये वर्षकामाय प्रवर्षयितुमिच्छन् ॥

मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासोऽवृजन्नपि क्रतुम् ।
ममानीकं सूर्यस्येव दुष्टरं मामार्यन्ति कृतेन कर्त्वेन च ॥ ३ ॥

मह्यम् । त्वष्टा । वज्रम् । अतक्षत् । आयसम् । मयि । देवासः । अवृजन् । अपि । क्रतुम् । मम । अनीकम् । सूर्यस्यऽइव । दुस्तरम् । माम् । आर्यन्ति । कृतेन । कर्त्वेन । च ॥ ३ ॥

ᵛमह्यं मदर्थं ᵛत्वष्टा देवः ᵛआयसम् अयोमयं ᵛवज्रम् आयुधम् ᵛअतक्षत्[३] संपादितवान्[४]। देवाः ᵛमयि विषये ᵛक्रतुं स्वविरोधिहननरूपं कर्म ᵛअपि ᵛअवृजन् समपादयन् । ᵛमम ᵛअनीकं सेनासमूहं सूर्यानीकमिव ᵛदुष्टरम् अन्येन तरीतुमशक्यम् । ᵛमाम् एव ᵛकृतेन कर्मणा ᵛकर्त्वेन इतः परं कर्तव्येन वृत्रवधादिरूपेण[४] ᵛआर्यन्ति[५] गच्छन्ति । आर्यतिर्गतिकर्मा । यद्वा । अर्यमीश्वरं कुर्वन्ति ॥

---

१. ग-त-मु–कूपपतिताय तदुद्धरणार्थं । २. ग-भ–उपक्षयितृभ्यः; त–उपलक्षयितृभ्यः । ३. ग-त१. २.४.६.७.८-भ–अतक्षत् साधु । ४. त२.३.५–संपादितवान् । देवा मयि विषये क्रतुं यज्ञं कुर्वति । मम अनीकं अश्वादि सूर्यस्य रवेरिव दुस्तरं दुरवगाहं वृत्रादिवधादिरूपेण; त७–संपादितवान् । अवृजन् कुर्वति । मम अनीकं अश्वादि सूर्यस्येव रवेरिव दुष्टरं दुरवगाहं वृत्रादिवधादिरूपेण; भ७–संपादितवान् । उतापि च देवासो देवाः मयि विषये क्रतुं यज्ञं अवृजन् कुर्वति । मम अनीकं अश्वादि च सूर्यस्येव रवेरिव दुष्टरं दुरवगाहं वृत्रादिशत्रूणां दारयितेति निरुक्तं । ईदृशं मां बलिनं वृत्रादिवधादिरूपेण; ग-त४–वृत्रवधाय मयि देवासो देवाः क्रतुं स्वविरोधिहननरूपं कर्मापिवृजन् मम तेजसानीकं सेनासमूहं वा सूर्यस्येव सूर्यानीकमिव दुष्टरमन्येन तरीतुमशक्यं मामेव कृतेन कर्मणा परं कर्तव्येन वृत्रवधादिरूपेण ५. त-भ–कर्मणा आर्यति ।

अहमेतं गव्ययमश्व्यं पशुं पुरीषिणं सायकेना हिरण्ययम् ।
पुरू सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमन्दिषुः ॥४॥

अहम् । एतम् । गव्ययम् । अश्व्यम् । पशुम् । पुरीषिणम् । सायकेन । हिरण्ययम् ।
पुरु । सहस्रा । नि । शिशामि । दाशुषे । यत् । मा । सोमासः । उक्थिनः । अमन्दिषुः॥४॥

vअहमेतं vगव्ययं गोमयम् vअश्व्यम् अश्वमयं[1] vहिरण्ययं[2] हिरण्यालंकारोपेतं vपुरीषिणम् । पुरीषमुदकं क्षीररूपम् । तद्वन्तं vपशुं शत्रुसंबन्धिनम् । जात्येकवचनम् । पशुसंघमित्यर्थः । तं vसायकेन आयुधेन अजयम् । तथा vपुरु पुरूणि vसहस्रा सहस्राणि शस्त्राणि vनि vशिशामि संस्करोमि vदाशुषे हविर्दत्तवते[3] यजमानाय । वैरिविनाशायेत्यर्थः । कदेति उच्यते । vयत् यदा vमा मां vसोमासः सोमाः vउक्थिनः शस्त्रोपेताः सन्तः अथवा[4] सोमेन शस्त्रैश्चोपेता यजमानाः vअमन्दिषुः तर्पयन्ति ॥

अहमिन्द्रो न परा जिग्य इद्धनं न मृत्यवेऽव तस्थे कदा चन ।
सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन ॥ ५ ॥

अहम् । इन्द्रः । न । परा । जिग्ये । इत् । धनम् । न । मृत्यवे । अव । तस्थे । कदा । चन ।
सोमम् । इत् । मा । सुन्वन्तः । याचत । वसु । न । मे । पूरवः । सख्ये । रिषाथन ॥ ५ ॥

vइन्द्रः सर्वस्य धनस्य स्वामी vअहं vधनम् आत्मीयं vन vपरा vजिग्य vइत् नैव पराभावयामि । मदीयं धनं न पराभूयत इत्यर्थः । किंचाहं vमृत्यवे सर्वेषां मारकाय vकदा vचन कदापि vन vअव vतस्थे नावस्थितो भवामि । इन्द्रभक्ता न मृत्युभाजो भवन्ति किल किमु वक्तव्यमिन्द्रस्य मृत्युविरहे । यस्मादेवं तस्मात् vसोमं vसुन्वन्तः हे यजमानाः vवसु युष्मदपेक्षितं धनं vमा vइत् मामेव vयाचत । हे vपूरवः मनुष्याः vमे vसख्ये vन vरिषाथन मा रिष्टा भवथ । मत्सख्यं मा विनाशयत ॥ ॥ ५ ॥

अहमेताञ्छाश्वसतो द्वाद्वेन्द्रं ये वज्रं युधयेऽकृण्वत ।
आह्वयमानाँ अव हन्मनाहनं दृळ्हा वदन्ननमस्युर्नमस्विनः ॥ ६ ॥

अहम् । एतान् । शाश्वसतः । द्वाऽद्वा । इन्द्रम् । ये । वज्रम् । युधये । अकृण्वत ।
आऽह्वयमानान् । अव । हन्मना । अहनम् । दृळ्हा । वदन् । अनमस्युः । नमस्विनः ॥ ६ ॥

vअहम् इन्द्रः vएतान् वक्ष्यमाणान् vशाश्वसतः भृशं प्राणतः[5] प्रवृद्धबलान् शत्रून् vद्वाद्वा द्वौ द्वौ । युग्ममूतानित्यर्थः[6] । तानहनमिति[7] संबन्धः । एतानित्युक्तं कानित्याह । vये शत्रवः vइन्द्रं शत्रूणां दारकम् । इन्द्रः शत्रूणां दारयिता इति निरुक्तम् (निरु. १०. ८) । ईदृशं vवज्रं बलिनं यद्वा वज्रवन्तं[8] vयुधये युद्धाय vअकृण्वत अकुर्वत तानेतानित्यर्थः । पुनः कीदृशान् । vआह्वयमानान् एहि

१. त–एतद्गोलक्षणकर्मायमक्षमश्वमयं । २. त६.८-म४.५.६–हिरण्ययं हिरण्मयं । ३. त–दत्तवते । ४. त–मद्यमथवा । ५. त-भ१.४.६.७–प्रीणतः । ६. त–युग्मभूतावित्यर्थः । ७. त–तानेतानिति । ८. ग–वज्रवंतं मां ।

युध्यस्वेत्याह्वयतः शत्रून् [v]नमस्विनः नमनवतो बलाद्नामयित्वा [v]अनमस्युः अप्रणतिशीलः सन् [v]इच्छन् दृढानि भयजनकानि स्थिराणि बन्धनानि [v]वदन् [v]अहं हतवानस्मि ॥

अभी३दमेकमेको अस्मि निष्षाळभी द्वा किमु त्रयः करन्ति ।
खले न पर्षान् प्रति हन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्राः ॥ ७ ॥

अभि । इदम् । एकम् । एकः । अस्मि । निष्षाट् । अभि । द्वा । किम् । ऊँ इति । त्रयः । करन्ति । खले । न । पर्षान् । प्रति । हन्मि । भूरि । किम् । मा । निन्दन्ति । शत्रवः । अनिन्द्राः ॥ ७ ॥

अहम् [v]इदम् इदानीम् [v]एकं शत्रुम् [v]एकः असहाय एव सन् [v]अभि [v]अस्मि अभिभवामि । किंच [v]निष्षाट्[1] सपत्नान्निःसहमाणोऽहं [v]द्वा द्वावप्यसह्यौ शत्रू [v]अभि अस्मि । [v]किमु किं वा [v]त्रयः शत्रवः [v]करन्ति कुर्वन्ति । तानप्यभिभवामीत्यर्थः । किं बहुना । [v]खले [v]न खलनिष्पादने यथा जीर्णव्रीह्यादिस्तम्बाननायासेन प्रतिहन्ति कर्षकः तद्वत् [v]पर्षान् निष्ठुरान् [v]भूरि बहून् शत्रून् [v]प्रति [v]हन्मि । [v]मा माम् [v]अनिन्द्राः इन्द्ररहिता इन्द्रमजानन्त इन्द्रविरोधिनः [v]शत्रवः मामिन्द्रं [v]किं [v]निन्दन्ति । निन्दितुमशक्ता इत्यर्थः । अत्र 'अभिभवामि' (निरु. ३. १०) इत्यादि निरुक्तं द्रष्टव्यम् ॥

अहं गुह्येभ्यो अतिथिग्वमिष्कृमिषं न वृत्रतुरं विक्षु धारयम् ।
यत्पर्णयन्न उत वा करञ्जहे प्राहं महे वृत्रहत्ये अशुश्रवि ॥ ८ ॥

अहम् । गुह्येऽभ्यः । अतिथिऽग्वम् । इष्कृम् । इषम् । न । वृत्रऽतुरम् । विक्षु । धारयम् । यत् । पर्णयऽन्ने । उत । वा । करञ्जऽहे । प्र । अहम् । महे । वृत्रऽहत्ये । अशुश्रवि ॥ ८ ॥

[v]अहम् इन्द्रः [v]गुह्येभ्यः एतन्नामकेभ्यो जनपदेभ्यो रक्षणाय [v]अतिथिग्वम् अतिथिगोः पुत्रं दिवोदासमृषिम् [v]इष्कृं निष्कर्तारं [v]वृत्रतुरं शत्रूणां हिंसकं [v]विक्षु प्रजासु मध्ये [v]इषं [v]न अन्नमिव तासामन्नं यथा भोगाय भवति तद्वदन्नस्थानीयं [v]धारयं धारितवानस्मि । कदेति उच्यते । [v]यत् यदा [v]पर्णयन्ने पर्णयनामकस्यासुरस्य हननवति [v]उत [v]वा अपि च [v]करञ्जहे एतन्नामकस्य हननोपेते [v]महे महति [v]वृत्रहत्ये संग्रामे [v]अशुश्रवि श्रुतोऽभवम्[2] ॥

प्र मे नमी साप्य इषे भुजे भूद्ववामेषे सख्या कृणुत द्विता ।
द्विधुं यदस्य समिथेषु मंहयमादिदेनं शंस्यमुक्थ्यं करम् ॥ ९ ॥

प्र । मे । नमी । साप्यः । इषे । भुजे । भूत् । गवाम् । एषे । सख्या । कृणुत । द्विता । द्विधुम् । यत् । अस्य । सम्ऽइथेषु । मंहयम् । आत् । इत् । एनम् । शंस्यम् । उक्थ्यम् । करम् ॥ ९ ॥

[v]मे मम मत्संबन्धी [v]नमी । नामकस्त्वाऽमः स्तोत्रम् । तदस्यास्तीति नमी स्तोता [v]साप्यः सर्वैराश्रयणीयः सन् [v]इषे अन्नाय [v]भुजे भोगाय [v]प्र [v]भूत् प्रभवति । तं मत्स्तोतारं मनुष्याः [v]गवामेषे अन्वेषणाय [v]सख्या सख्याय च [v]द्विता द्विविधं द्विप्रकाराय [v]कृणुत कुर्वन्ति । गवां

१. त-भ-स निष्षाट् । २. ग१-त-भ१.४.६.७—विश्रुतोभवं

दातारं[1] सख्यायं च[1] कुर्वन्तीत्यर्थः। यद्वा। गवामेव एषणे द्विता द्वैधाय सख्याय शारीराय[2] सैनिकाय च सख्याय कृण्वन्ति। कदेति उच्यते। [v]यत् यदा [v]अस्य मत्संबन्धिनः स्तोतुर्जयार्थं [v]समिथेषु संग्रामेषु [v]दिद्युम् आयुधं [v]मंहयं स्वीकुर्यामित्यर्थः। [v]आदित् अनन्तरमेव [v]एनं स्तोतारं [v]शंस्यं स्तुत्यम् [v]उक्थ्यम् उक्थार्हं [v]करम् अकरं करोमि॥

प्र नेमस्मिन्दद्दशे सोमो अन्तर्गोपा नेममाविरस्था कृणोति।
स तिग्मशृङ्गं वृषभं युयुत्सन् द्रुहस्तस्थौ बहुले बद्धो अन्तः॥ १०॥

प्र। नेमस्मिन्। ददृशे। सोमः। अन्तः। गोपाः। नेमम्। आविः। अस्था। कृणोति। सः। तिग्मऽशृङ्गम्। वृषभम्। युयुत्सन्। द्रुहः। तस्थौ। बहुले। बद्धः। अन्तरिति॥१०॥

[v]नेमस्मिन्। नेमशब्दोऽर्धपर्यायः[3]। यष्टा अयष्टा च द्वौ पुरुषौ युध्यन्तौ। तयोरेकस्मिन् यष्टरीत्यर्थः। तस्मिन् [v]अन्तः [v]सोमः [v]ददृशे दृश्यते। तं [v]नेमम् अर्धमेकं[4] [v]गोपाः गोपायितेन्द्रः [v]अस्था क्षेपणसाधनेन वज्रेण [v]आविः [v]कृणोति प्रकटयति। शत्रुभिरनभिभूतं करोतीत्यर्थः। [v]सः यत्र सोमो न दृश्यते सः [v]तिग्मशृङ्गं तीक्ष्णायुधं [v]वृषभं बाणान् वर्षयन्तमिन्द्रेणानुगृहीतं प्रति [v]युयुत्सन् योद्धुमिच्छन् [v]द्रुहः द्रोग्धा [v]बद्धः सन् [v]बहुले अन्धकारे [v]अन्तः तस्य मध्ये [v]तस्थौ तिष्ठति। यद्वा एवं व्याख्येयम्। नेमस्मिन्निन्द्रभक्तेऽन्तः सोमो ददृशे। नेममन्यं गोपाः स्वभक्तरक्षक इन्द्रोऽस्था अस्त्रेण वज्रेणाविष्कृणोति। आविष्करोति। वज्रेण पीडयतीत्यर्थः। स नेमो द्रुहस्तिग्मशृङ्गं वृषभमिन्द्रं युयुत्सन्। शिष्टं समानम्॥

आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम।
ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळ्हम्॥ ११॥

आदित्यानाम्। वसूनाम्। रुद्रियाणाम्। देवः। देवानाम्। न। मिनामि। धाम। ते। मा। भद्राय। शवसे। ततक्षुः। अपराऽजितम्। अस्तृतम्। अषाळ्हम्॥ ११॥

[v]आदित्यानां [v]वसूनां [v]रुद्रियाणां रुद्राणां यद्वा रुद्रपुत्राणां मरुतां च [v]देवानां [v]धाम स्थानं [v]देवः इन्द्रः [v]न [v]मिनाति न हिनस्ति। [v]ते[5] आदित्यादयः [v]मा मां [v]भद्राय [v]शवसे [v]ततक्षुः अनुगृह्णन्तु। [v]अपराजितमस्तृतम् अहिंसितम् [v]अषाळ्हम् अनभिभूतम्॥ ॥ ६ ॥

'अहं दाम्' इत्येकादशर्चं सप्तमं सूक्तम्। वैकुण्ठ[6] एवर्षिर्देवता च। द्वितीयैकादश्यौ[7] त्रिष्टुभौ। शिष्टा जगत्यः। अनुक्रान्तं च—'अहं दामन्त्योपाद्ये च' इति। द्वितीये[8] रात्रिपर्याये[8] मैत्रावरुणस्येदं सूक्तम्। सूत्रितं च—'अहं दां पाता सुतमिन्द्रो अस्तु सोमम्' (आश्व. श्रौ. ६. ४) इति॥

अहं दां गृणते पूर्व्यं वस्वहं ब्रह्म कृणवं मह्यं वर्धनम्।
अहं भुवं यजमानस्य चोदितायज्वनः साक्षि विश्वस्मिन्भरे॥ १॥

---

१. त-म-दातारः सख्यायश्च। २. ग-त-भ-मु-शरीराय। ३. भ-नेमशब्दोऽर्धशब्दपर्यायः। ४. ग-अर्धमेव; त१.२.७.८-भ-अर्धमेकः। ५. त-'ते' नास्ति। ६. ग-त१.२.६.७.८-भ-वैकुंठ इंद्र। ७. ग-त-भ-तृतीयैकादश्यौ। ८. ग-अतिरात्रे द्वितीयेपर्याये; त-मु-द्वितीयेऽपर्याये; भ-द्वितीये।

अहम्। दाम्। गृणते। पूर्व्यम्। वसु। अहम्। ब्रह्म। कृणवम्। मह्यम्। वर्धनम्।
अहम्। भुवम्। यजमानस्य। चोदिता। अयज्वनः। साक्षि। विश्वस्मिन्। भरे॥ १॥

vअहम् इन्द्रः vगृणते स्तुवते vपूर्व्यं मुख्यं vवसु धनं vदाम् अदाम्। vअहम् एव vब्रह्म परिवृढं कर्म स्तुतिलक्षणं vमह्यं vवर्धनं vकृणवं करोमि। स्तोतुः संबन्धि स्तोत्रं तस्मै धनं प्रयच्छन् महामेव वर्धनं करोमीत्यर्थः। तथा vअहं vयजमानस्य मामुद्दिश्य यष्टुर्धनस्य vचोदिता प्रेरकः vभुवं भवामि। vअयज्वनः अयष्टुः। अयष्टारमित्यर्थः। तं vविश्वस्मिन् vभरे सर्वस्मिन्नपि संग्रामे vसाक्षि अभिभवामि॥

मां धुरिन्द्रं नाम देवता दिवश्च ग्मश्चापां च जन्तवः।
अहं हरी वृषणा वित्रता रघू अहं वज्रं शवसे धृष्ण्वा ददे॥ २॥

माम्। धुः। इन्द्रम्। नाम। देवता। दिवः। च। ग्मः। च। अपाम्। च। जन्तवः।
अहम्। हरी इति। वृषणा। वित्रता। रघू इति। अहम्। वज्रम्। शवसे। धृष्णु। आ। ददे॥२॥

vइन्द्रं vनाम इन्द्रनामानं vमां vदेवता देवानां मध्ये vदिवः द्युलोकस्य। ग्मा पृथिव्यापोऽन्तरिक्षम्। एतेषु लोकेषु vजन्तवः जाताः vमा मामेव vधुः दधुः[1] धारयन्ति हविर्भिः स्तुतिभिश्च। vअहं यज्ञगमनाय संग्रामगमनाय वा vहरी हरितवर्णौ vवृषणा पुंस्त्वोपेतौ vवित्रता विविधकर्माणौ vरघू लघू शीघ्रगती अश्वौ नियोजयामि रथे। तथा vअहं vधृष्णु धर्षकं vवज्रम् आयुधं vशवसे बलाय vआ vददे स्वीकरोमि[2]॥

अहमत्कं कवये शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः।
अहं शुष्णस्य श्नथिता वधर्यमं न यो रर आर्यं नाम दस्यवे॥ ३॥

अहम्। अत्कम्। कवये। शिश्नथम्। हथैः। अहम्। कुत्सम्। आवम्। आभिः। ऊतिऽभिः।
अहम्। शुष्णस्य। श्नथिता। वधः। यमम्। न। यः। ररे। आर्यम्। नाम। दस्यवे॥३॥

vअहम् इन्द्रः vअत्कम् आच्छादकं शत्रुपुत्रं vकवये उशनस ऋषये तस्य सुखवासाय vहथैः बहुप्रकारैः प्रहारैः[3] तत्साधनैरायुधैर्वा vशिश्नथं ताडितवानस्मि। श्नथितिर्वधकर्मा। किंच vअहं vकुत्सम् एतन्नामकमृषिम् vआभिरूतिभिः वधादिरूपैः[4]। 'कुत्साय शुष्णमशुषं नि बर्हीः' (ऋ. सं. ४. १६. १२) इत्यादि मन्त्रान्तरम्। रक्षणैः vआवम् अरक्षम्। पूर्वमेव कृतान्यपि रक्षणानीदानीमिव कृतानीत्यनुवदति। कुत्सार्थं vशुष्णस्य एतन्नामकस्यासुरस्य vश्नथिता हिंसिता। तस्य हननायेत्यर्थः। vवधः वज्रं vयमं प्रहरणाय नियमितवानस्मि। अपि[5] च[5] vअहम् vआर्यम् आर्यसंबन्धि। आर्याणां देयमित्यर्थः। तादृशं vनाम। उदकनामैतत्। नामकमुदकं vदस्यवे शत्रवे उपक्षपयित्रे vन vररे न दत्तवानस्मि। यद्वा। आर्यं पूज्यमित्यसाधारणं नाम दस्यवे न दत्तवानस्मि। अत्रेन्द्रस्यात्मस्तुतौ कुत्सरक्षणशुष्णवधादिकम् 'आवः कुत्समिन्द्र यस्मिञ्चाकन्' (ऋ. सं. १. ३३. १४) 'शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र' (ऋ. सं. १. १०३. ८) इत्यादिषु बहुधा प्रपञ्चितम्। अतोऽत्र ग्रन्थविस्तरभयान्न वक्ष्यते॥

१. ग-त-भ५.६.८-मु-अधुः;म१.२.४·७-'दधुः' नास्ति। २. म१.२.७-स्वीकरिष्ये। ३. ग-भ४. ६.७-'प्रहारैः' नास्ति। ४. ग-त-भ-कुत्सवधादिरूपैः। ५. त-भ२.८-'अपि च' नास्ति।

अहं पितेव वेतसूँरभिष्टये तुग्रं कुत्साय स्मदिभं च रन्धयम् ।
अहं भुवं यजमानस्य राजनि प्र यद्भरे तुजये न प्रियाधृषे ॥ ४ ॥

अहम् । पिताऽइव । वेतसून् । अभिष्टये । तुग्रम् । कुत्साय । स्मत्ऽइभम् । च । रन्धयम् ।
अहम् । भुवम् । यजमानस्य । राजनि । प्र । यत् । भरे । तुजये । न । प्रिया । आऽधृषे ॥ ४ ॥

vअहम् इन्द्रः vपितेव पिता पुत्रायेव स यथा तस्मै निर्वाहार्थमभिमतं देशं प्रसाधयति तद्वत् vवेतसून् एतन्नामकान् जनपदान्[1] vअभिष्टये अभीच्छते vकुत्साय महर्षये vतुग्रं vस्मदिभं vच vरन्धयं वशमनयम् । vअहं vयजमानस्य vराजनि राजनार्थं vभुवम् अभवम् । समर्थं इति शेषः । vयत् यस्मात् vतुजये vन पुत्रायेव पिता तस्मै यजमानाय vआधृषे शत्रूणां धर्षणाय vप्रिया प्रियाणि vप्र vभरे प्रभरामि[2] तस्माद्यजमानस्य राजनि भुवमिति संबन्धः ॥

अहं रन्धयं मृगयं श्रुतर्वणे यन्माजिहीत वयुना चनानुषक् ।
अहं वेशं नम्रमायवेऽकरमहं सव्याय पड्गृभिमरन्धयम् ॥ ५ ॥

अहम् । रन्धयम् । मृगयम् । श्रुतर्वणे । यत् । मा । अजिहीत । वयुना । चन । आनुषक् ।
अहम् । वेशम् । नम्रम् । आयवे । अकरम् । अहम् । सव्याय । षट्ऽगृभिम् । अरन्धयम् ॥५॥

vअहम् इन्द्रः vमृगयम् एतन्नामकमसुरं vश्रुतर्वणे एतन्नामकाय महर्षये vरन्धयम् । रध्यतिर्वशगमने । वशमनयम् । vयत् यस्मात् श्रुतर्वा vमा माम् vअजिहीत । 'ओहाङ् गतौ' । आगच्छत् । तदेवोच्यते । vवयुना प्रज्ञानेन स्तोत्रेण vआनुषक् अनुषक्तोऽभूत् । vचन इति पूरणः । vअहं vवेशम् एतन्नामानं vनम्रं प्रह्वं vकरम्[3] अकार्षम् । करोतेर्लुङि 'कृमृदरुहिभ्यः' इति च्लेरङ् । अडभावश्छान्दसः । vअहं vसव्याय एतन्नामकाय vषड्गृभिम् एतन्नामकम् vअरन्धयं वशमनयम् ॥ ॥ ७ ॥

अहं स यो नववास्त्वं बृहद्रथं सं वृत्रेव दासं वृत्रहारुजम् ।
यद्वर्धयन्तं प्रथयन्तमानुषग्दूरे पारे रजसो रोचनाकरम् ॥ ६ ॥

अहम् । सः । यः । नवऽवास्त्वम् । बृहत्ऽरथम् । सम् । वृत्राऽइव । दासम् । वृत्रऽहा । अरुजम् ।
यत् । वर्धयन्तम् । प्रथयन्तम् । आनुषक् । दूरे । पारे । रजसः । रोचना । अकरम् ॥ ६ ॥

vअहम् इन्द्रः vसः[4] अस्मि[4] vयः अहं vनववास्त्वं vबृहद्रथं च vवृत्रेव वृत्रमिव vदासम् उपक्षपयितारमिव नववास्त्वं बृहद्रथं च vअरुजम् अहं भग्नमकरवम् । 'रुजो भङ्गे' । vयत् यदा vवर्धयन्तं वर्धमानं vप्रथयन्तं प्रथमानं चोभौ शत्रू vआनुषक् अनुषक्तः सन् vरोचना रोचनस्य vरजसः लोकस्य vदूरे vपारे vअकरं कृतवानस्मि ॥

अहं सूर्यस्य परि याम्याशुभिः प्रैतशेभिर्वहमान ओजसा ।
यन्मा सावो मनुष आह निर्णिज ऋधक्कृषे दासं कृत्व्यं हथैः ॥ ७ ॥

१. भ–' जनपदान् ' नास्ति । २. भ–प्रभराणि । ३. त-भ१.४–अकरं । ४. त१.२.७-भ–' सः अस्मि ' नास्ति ।

अहम् । सूर्यस्य । परि । यामि । आशुऽभिः । प्र । एतशेभिः । बहमानः । ओजसा ।
यत् । मा । सावः । मनुषः । आह । निःऽनिजे । ऋधक् । कृषे । दासम् । कृत्व्यम् । हथैः ॥७॥

[v]अहं [v]सूर्यस्य देवस्य [v]आशुभिः शीघ्रगामिभिः [v]एतशेभिः[1] एतशवर्णैरश्वैः [v]बहमानः उह्यमानः [v]ओजसा आत्मीयेन बलेन प्रकर्षेण [v]परि [v]यामि परिगच्छामि सूर्यात्मना । किंच [v]यत् यदा [v]मा मां [v]मनुषः मनुष्यस्य [v]सावः सोमाभिषवः [v]आह ब्रूते । आह्वयतीत्यर्थः । किमर्थमाह । [v]निर्णिजे । निर्णिगिति रूपनाम । यज्ञस्वरूपायेत्यर्थः । तदानीं [v]कृत्व्यं कर्तव्यम् । हन्तव्यमित्यर्थः । [v]दासम् उपक्षपयितारं शत्रुं [v]हथैः हननसाधनैः[2] [v]ऋधक्कृषे पृथक्करोमि । ऋधगित्यर्थं पृथगर्थे ॥

अहं संऽसहा नहुषो नहुष्टरः प्राश्रावयं शवसा तुर्वशं यदुम् ।
अहं न्य१न्यं सहसा सहस्करं नव व्राधतो नवतिं च वक्षयम् ॥ ८ ॥

अहम् । सस्ऽसहा । नहुषः । नहुःऽतरः । प्र । अश्रवयम् । शवसा । तुर्वशम् । यदुम् ।
अहम् । नि । अन्यम् । सहसा । सहः । करम् । नव । व्राधतः । नवतिम् । च । वक्षयम् ॥८॥

[v]अहं [v]ससहा ससंख्याकानां शत्रुपुरां हन्ता । ' सस यत्पुरः शर्म शारदीः ' (ऋ. सं. १. १७४. २) इत्युक्तम् । यद्वा । सस नमुच्यादीन् हतवान् । किंच [v]नहुषः बन्धकस्यापि [v]नहुष्टरः बन्धकतरोऽहं [v]शवसा बलेन [v]तुर्वशं [v]यदुं च [v]प्राश्रावयं शत्रुसंबन्धिगवादिप्रदानेन श्रावितवानस्मि । तौ यथा लोके श्रुतौ भवतः तथाकार्षमित्यर्थः । किंच [v]अहम् [v]अन्यं चास्मत्स्तोतारं [v]सहसा बलेन [v]सहः बलिनं [v]करम् [v]अकार्षम् । करोतेर्लुङि ' कृमृदरुहि° ' इति च्लेरङ् । अडभावः । किंच [v]नव नवसंख्याकाः [v]नवतिं [v]च नवतिसंख्याकाश्च । नवोत्तरनवतिमित्यर्थः । कथंभूताः । [v]व्राधतः वर्धमानाः [v]वक्षयम् अवहम् । व्यनाशयमित्यर्थः ॥

अहं सप्त स्रवतो धारयं वृषा द्रवित्न्वः पृथिव्यां सीरा अधि ।
अहमर्णांसि वि तिरामि सुक्रतुर्युधा विदं मनवे गातुमिष्टये ॥ ९ ॥

अहम् । सप्त । स्रवतः । धारयम् । वृषा । द्रवित्न्वः । पृथिव्याम् । सीराः । अधि ।
अहम् । अर्णांसि । वि । तिरामि । सुऽक्रतुः । युधा । विदम् । मनवे । गातुम् । इष्टये ॥ ९ ॥

[v]वृषा वर्षकः [v]अहं [v]सप्त [v]स्रवतः स्रवतीर्नदीः [v]धारयम् अधारयम् । कीदृश्यस्ताः । [v]द्रवित्न्वः द्रवन्तीः । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घाभावः । [v]सीराः सरणशीलाः । कुत्र । [v]पृथिव्याम् । [v]सुक्रतुः शोभनकर्मा [v]अहम् [v]अर्णांसि उदकानि [v]वि [v]तिरामि प्रयच्छामि । किंच [v]मनवे मनुष्याय [v]इष्टये तस्य गमनाय [v]गातुं मार्गं [v]युधा संप्रहारेण । निरोधपरिहारेणेत्यर्थः । [v]विदम् अलम्भयम् । प्रायच्छमित्यर्थः । विदेर्लाभार्थस्य ' पुषादि° ' (पा. सू. ३. १. ५५) इत्यादिना च्लेरङ् ॥

अहं तदासु धारयं यदासु न देवश्चन त्वष्टाधारयद्रुशत् ।
स्पार्हं गवामूधःसु वक्षणास्वा मधोर्मधु श्वात्र्यं सोममाशिरम् ॥ १० ॥

अहम् । तत् । आसु । धारयम् । यत् । आसु । न । देवः । चन । त्वष्टा । अधारयत् । रुशत् ।
स्पार्हम् । गवाम् । ऊधःऽसु । वक्षणासु । आ । मधोः । मधु । श्वात्र्यम् । सोमम् । आऽशिरम् ॥१०॥

---

१. त१.२.३-म-प्रैतशेभिः । २. त२.४.६.७-म-हननैः ।

vअहं vतत् प्रसिद्धं पयः vआसु गोषु vधारयं धृतवानस्मि । 'धृङ्[1] धारणे' । ण्यन्तस्य लङि रूपम् । vयत् पयः vआसु गोषु vदेवश्चन vत्वष्टा देवशिल्पी सूर्यो वा देवः vन vचन vअधारयत् धर्तुं नाशक्नोत् । कीदृक् पयोऽधारयमिति चेत् उच्यते । vरुशत् दीप्तं vस्पार्हं स्पृहणीयम् । केषु प्रदेशेष्विति उच्यते । vगवामूधःसु उच्चततरेषु गवां पयोधारणप्रदेशेषु । किंच vमधु[2] उदकं vवक्षणासु । नदीनामैतत् । वहनशीलासु नदीषु धारयामीत्यनुषज्यते । नद्युदकधारणस्यावधिरुच्यते । vआ vमधोः आ उदकोत्पत्तेः । आगामिवर्षासमयपर्यन्तमित्यर्थः । कीदृशं मधुवेति तदुच्यते । vश्नाथ्यम् । श्नाथ्रमिति क्षिप्रनाम । क्षिप्रगमनार्हम् । यद्वा । श्नाथ्यमित्युत्तरत्र संबध्यते । श्नाथ्यं सुखावहं vसोमं प्रति vआशिरं धारयम् ॥

एवा देवाँ इन्द्रो विव्ये नॄन् प्र च्यौत्नेन मघवा सत्यराधाः ।
विश्वेत्ता ते हरिवः शचीवोऽभि तुरासः स्वयशो गृणन्ति ॥ ११ ॥

एव । देवान् । इन्द्रः । विव्ये । नॄन् । प्र । च्यौत्नेन । मघऽवा । सत्यऽराधाः ।
विश्वा । इत् । ता । ते । हरिऽवः । शचीऽवः । अभि । तुरासः । स्वऽयशः । गृणन्ति ॥ ११ ॥

अथानयेन्द्र इन्द्रभावं परित्यज्य ऋषिभावेनाह । vएव एवमुक्तप्रकारेण vदेवान् vनॄन् च vइन्द्रः देवः vप्र vविव्ये प्रकर्षेण गमयति । 'तस्मात्पराचीः प्रजाः प्र वीयन्ते प्रतीचीर्जायन्ते' (तै. सं. ६. ३. १. ४) इति ब्राह्मणम् । किमन्यसहायेन नेत्याह । vच्यौत्नेन स्वीयेन बलेन । कीदृश इन्द्रः । vमघवा धनवान् vसत्यराधाः सत्यधनः । अथ प्रत्यक्षेणाह । हे vहरिवः हरिभ्यां लब्धृन् vशचीवः कर्मवन् हे vस्वयशः स्वायत्तकीर्तेऽन्नवन् वेन्द्र vता तानि vविश्वा सर्वाणि कर्माणि vते तव संबन्धीनि येषु कर्मसु vतुरासः त्वरमाणा ऋत्विजः vअभि vगृणन्ति अभिष्टुवन्ति ॥ ॥ ८ ॥

'प्र वो महे' इति सप्तर्चमष्टमं सूक्तम् । आदितो द्वे जगत्यौ । 'के ते नरः' इत्यादिके द्वे अभिसारिण्यौ । आदितो द्वौ दशाक्षरौ ततो द्वौ द्वादशकौ साभिसारिणी । तदुक्तं—'वैराजौ जागतौ चाभिसारिणी' (अनु. ९. ४) इति । ततस्त्रिष्टुबेका । ततो द्वे जगत्यौ । पूर्ववदृषिदेवते । तथा चानुक्रान्तं—'प्र वो महे सप्त द्विजगत्याद्यन्तं के तेऽभिसारिण्यौ' इति । महाव्रते निष्केवल्य एतत्सूक्तं निविद्धानम् । सूत्रितं च—'प्र वो महे मन्दमानायान्धस इति निविद्धानम्' (ऐ. आ. ५. ३. १) इति ॥

प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः ॥ १ ॥

प्र । वः । महे । मन्दमानाय । अन्धसः । अर्चा । विश्वानराय । विश्वऽभुवे ।
इन्द्रस्य । यस्य । सुऽमखम् । सहः । महि । श्रवः । नृम्णम् । च । रोदसी इति । सपर्यतः ॥ १ ॥

हे स्तोतः vवः त्वम्[3] । पूजार्थं बहुवचनम् । vमहे महते vअन्धसः । अन्धसेत्यर्थः । सोमेन vमन्दमानाय मोदमानाय vविश्वानराय सर्वस्य नेत्रे[4] । 'नरे संज्ञायाम्' इति सांहितिको दीर्घः । vविश्वाभुवे सर्वस्य भावयित्रे मह्यमिन्द्राय vप्र vअर्च । अर्चतिः स्तुतिकर्मा । प्रोच्चारय । vयस्य मम

---

१. ग-त-भ-मु-धृ । २. ग-मधुरसं; त-भ-मधु मधुरं । ३. त-भ१-मु-त्वमित्यर्थः; भ१.४-त्वर्थः; भ२-त्वदर्थः । ४. त१.२.३-भ-नेत्रे विश्वाभुवे ।

vइन्द्रस्य vसुमखं सुहु महनीयं vसहः बलं vमहि महत् vअवः अन्नं vनृम्णं सुखं[1] vच vरोदसी द्यावापृथिव्यौ vसपर्यतः पूजयतः। तस्मा इन्द्राय प्रार्चेति समन्वयः ॥

सो चिन्नु सख्या नर्यो इनः स्तुतश्चर्कृत्य इन्द्रो मावते नरे।
विश्वासु धूर्षु वाजकृत्येषु सत्पते वृत्रे वाप्स्व१भि शूर मन्दसे ॥ २ ॥

सः। चित्। नु। सख्या। नर्यः। इनः। स्तुतः। चर्कृत्यः। इन्द्रः। माऽवते। नरे। विश्वासु। धूःऽसु। वाजऽकृत्येषु। सत्ऽपते। वृत्रे। वा। अप्ऽसु। अभि। शूर। मन्दसे ॥२॥

vसो vचिन्नु स खलु vइन्द्रः vसख्या सखिभूतेन निमित्तेन vनर्यः नृभ्यो हितः vइनः सर्वस्येश्वरः vस्तुतः सर्वैरभिष्टुतः। सख्या स्तुत इति वा संबन्धः। vमावते मत्सदृशाय vनरे नराय[2] vचर्कृत्यः[3] पुनःपुनः कर्तव्यः। परिचरणीय इत्यर्थः। अथ प्रत्यक्षवादः। हे vसत्पते सतां पालकेन्द्र स त्वं vविश्वासु सर्वासु vधूर्षु वोढव्येषु[4] कार्यभारेषु vवाजकृत्येषु च बलकृत्येषु च vवृत्रे vवाप्सु मेघे वर्तमानेषूदकेषु च निमित्तेषु हे vशूर त्वम् vअभि vमन्दसे अभिष्टूयसे ॥

के ते नर इन्द्र ये ते इषे ये ते सुम्नं सधन्य१मिर्यक्षान्।
के ते वाजायासुर्याय हिन्विरे के अप्सु स्वासूर्वरासु पौंस्ये ॥ ३ ॥

के। ते। नरः। इन्द्र। ये। ते। इषे। ये। ते। सुम्नम्। सऽधन्यम्। इर्यक्षान्।
के। ते। वाजाय। असुर्याय। हिन्विरे। के। अप्ऽसु। स्वासु। उर्वरासु। पौंस्ये ॥ ३ ॥

हे vइन्द्र vते vके vनराः के मनुष्या इति प्रश्नः। ते महान्तो मया ज्ञातव्या इत्यभिप्रायः। प्रष्टव्यानाह। vये नराः vते तव vइषे अन्नाय प्रभवन्तीति शेषः। vये च vते vसुम्नं सुखं स्वदीयं vसधन्यं धनयुक्तम् vइयक्षान् गच्छन्ति। इयक्षतिर्गतिकर्मा। स्वदीयमन्नं सुखं धनं च ये लभन्ते ते के महात्मान इति। किंच vके[5] vते तव vअसुर्याय असुरसंबन्धिने तेषां वधनिमित्ताय vवाजाय बलाय vहिन्विरे[6] प्रेरयन्ति सोमादि हविः। vके वा vअप्सु vस्वासु स्वापेक्षितेषूदकेषु vउर्वरासु सर्वसस्याढ्यासु भूमिषु vपौंस्ये पुंस्त्वे चेति[7] तेषु[8] निमित्तभूतेषु हविः प्रेरयन्तीत्यनुवर्तते। उक्तविधा महान्तो दुर्लभा इति भावः ॥

'भुवस्त्वमिन्द्र' इति दर्शपूर्णमासयोर्माहेन्द्रस्य हविषो याज्या। सूत्रितं च—'महाँ इन्द्रो य ओजसा भुवस्त्वमिन्द्र ब्रह्मणा महान्' (आश्व. श्रौ. १. ६) इति। देवसुवां हविःष्विन्द्रस्य ज्येष्ठस्यैवैव[9] याज्या। 'भुवस्त्वमिन्द्र ब्रह्मणा महाननमीवास इळया' (आश्व. श्रौ. ४. ११) इति हि सूत्रितम्। एषैव भूनाम्न्येकाहे निष्केवल्ये सूक्तमुखीया। सूत्रितं च—'शस्यमुक्तं बृहस्पतिसवेन त्वं भुवः प्रतिमानं पृथिव्या भुवस्त्वमिन्द्र ब्रह्मणा महान्' (आश्व. श्रौ. ९. ५) इति ॥

भुवस्त्वमिन्द्र ब्रह्मणा महान्भुवो विश्वेषु सवनेषु यज्ञियः।
भुवो नॄँश्यौत्नो विश्वस्मिन् भरे ज्येष्ठश्च मन्त्रो विश्वचर्षणे ॥ ४ ॥

---

१. त-भ-'सुखं' नास्ति; मु-धनं। २. ग-जंगमाय; त-भ-मु-जनाय। ३. ग-त-भ२.५.६.८-मु-चर्कृत्यः कर्तव्यैः। ४. त-भ-बोढव्येषु। ५. ग-त-भ-मु-'के' नास्ति। ६. ग-त-भ-के हिन्विरे। ७. ग-त४.६.भ६-मु-च एतेषु; त१.२.३.७-भ४.८-चेतिषु। ८ ग-त१.२-भ-ज्येष्ठस्यैवमेव।

भुवः । त्वम् । इन्द्र । ब्रह्मणा । महान् । भुवः । विश्वेषु । सवनेषु । यज्ञियः ।
भुवः । नृन् । च्यौत्नः । विश्वस्मिन् । भरे । ज्येष्ठः । च । मन्त्रः । विश्वऽचर्षणे ॥ ४ ॥

हे [v]इन्द्र [v]त्वं [v]ब्रह्मणा अस्मत्कृतेन परिवृढेन स्तोत्रेण [v]महान् [v]भुवः अभवः । भवतेर्लेटि 'भूसुवोस्तिङि' इति गुणप्रतिषेध उवङादेशः । तथा [v]विश्वेषु सर्वेषु [v]सवनेषु [v]यज्ञियः यष्टव्यः [v]भुवः अभवः । तथा [v]विश्वस्मिन् सर्वस्मिन् [v]भरे संग्रामे [v]नॄन् नेतॄणां शत्रूणां [v]च्यौत्नः च्यावयिता भुवः । हे [v]विश्वचर्षणे सर्वस्य द्रष्टरिन्द्र [v]मन्त्रः मन्त्रयितव्यस्त्वं [v]ज्येष्ठश्च अभवः सर्वेषां मध्ये ॥

अवा नु कं ज्यायान् यज्ञवनसो महीं त ओमात्रां कृष्टयो विदुः ।
असो नु कमजरो वर्धीश्च विश्वेदेता सवना तूतुमा कृषे ॥ ५ ॥

अव । नु । कम् । ज्यायान् । यज्ञऽवनसः । महीम् । ते । ओमात्राम् । कृष्टयः । विदुः ।
असः । नु । कम् । अजरः । वर्धीः । च । विश्वा । इत् । एता । सवना । तूतुमा । कृषे ॥ ५ ॥

हे इन्द्र त्वं [v]ज्यायान् प्रशस्यतरस्त्वं [v]यज्ञवनसः संभक्तयज्ञान् स्तोतॄन् [v]नु [v]कं क्षिप्रम् [v]अव रक्ष । अध्येतारो नु कमिति पदद्वयं कुर्वन्ति तथापि हिकं नुकमित्यादीनि नवोत्तराणि पदानीत्युक्तवान् यास्काचार्यः (नि. ३. १२) । अतः केवलानां हिकं[1] नुकमित्येवमादीनां[1] यावानर्थः स एव[2] विशिष्टानामपि । तैत्तिरीया (तै. सं. १.२.१३.३) अप्येकमेव पदं कुर्वन्ति । अवेत्युक्तम् । इन्द्रस्यावनप्रसिद्धिं दर्शयति । हे इन्द्र [v]ते तव [v]ओमात्रां[3] रक्षणं [v]महीं महत् [v]विदुः [v]कृष्टयः मनुष्या ऋषयः । ओमात्राम् । अम गत्यादिषु । औणादिक आत्रन्प्रत्ययः । छान्दस उमादेशः । किंच त्वम् [v]अजरः जरारहितः [v]असः भव । [v]नु [v]कं क्षिप्रं [v]वर्धीश्च वर्धस्व च हविराज्यादिना[4] । किंच [v]विश्वेत् सर्वाण्यपि [v]एता एतानि [v]सवना सवनानि [v]तूतुमा तूर्णानि [v]कृषे करोषि ॥ कृषे । छान्दसे लिटि 'छन्दसि वा' इति द्विर्वचनाभावः ॥

एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे ।
वराय ते पात्रं धर्मणे तना यज्ञो मन्त्रो ब्रह्मोद्यतं वचः ॥ ६ ॥

एता । विश्वा । सवना । तूतुमा । कृषे । स्वयम् । सूनो इति । सहसः । यानि । दधिषे ।
वराय । ते । पात्रम् । धर्मणे । तना । यज्ञः । मन्त्रः । ब्रह्म । उत्ऽयतम् । वचः ॥ ६ ॥

हे इन्द्र [v]एता एतानि [v]विश्वा सर्वाणि [v]सवना[5] सवनानि [v]तूतुमा तूर्णानि [v]कृषे करोषि । एतानीत्युक्तं कानीति तत्राह । हे [v]सहसः बलस्य [v]सूनो पुत्र । बलवन्नित्यर्थः । [v]स्वयं [v]यानि[6] [v]दधिषे धारयसि । हे इन्द्र [v]ते तव [v]वराय शत्रूणां वारकाय ते तव स्वभूतं [v]पात्रं रक्षणं भवत्वस्माकम् । किंच [v]धर्मणे धारणाय [v]तना धनं भवत्विति शेषः । किंच तुभ्यं[7] [v]यज्ञो [v]मन्त्रः । इज्यतेऽनेनेति यज्ञकरणसाधनभूतो मन्त्रः । यजुरित्यर्थः । [v]ब्रह्म परिवृढम् । शस्त्रमित्यर्थः । तदुभयात्मकं [v]वचः [v]उद्यतं भवतीति शेषः ॥

---

१. त-भ४.६.८–हिनुसु इत्येवमादीनां । २. त३.४.५.६–भ–च । ३. ग-त-भ१.२.४.६.८–'ओमात्रां' नास्ति । ४. ग–°राज्यादिना । वृधु वृद्धौ । लेटिरूपं; त३-भ१.२-पुस्तकेषु ''राज्यादिना' इत्यस्यानंतरं कियांश्चिदवकाशोऽस्ति । ५. ग-भ–'सवना' नास्ति । ६. त-भ-सु–यानि सवनानि । ७. त१.२.३.८-भ१.२.६.७.८–'तुभ्यं' नास्ति ।

ये ते विप्र ब्रह्मकृतः सुते सचा वसूनां च वसुनश्च दावने ।
प्र ते सुम्नस्य मनसा पथा भुवन्मदे सुतस्य सोम्यस्यान्धसः ॥ ७ ॥

ये । ते । विप्र । ब्रह्मऽकृतः । सुते । सचा । वसूनाम् । च । वसुनः । च । दावने ।
प्र । ते । सुम्नस्य । मनसा । पथा । भुवन् । मदे । सुतस्य । सोम्यस्य । अन्धसः ॥ ७ ॥

हे [v]विप्र मेधाविन्निन्द्र [v]ते तुभ्यं [v]ये [v]ब्रह्मकृतः स्तोत्रकर्तारो हविष्कर्तारो वा स्तोतारः [v]सचा संधीभूताः [v]सुते सोमेऽभिषुते [v]वसूनां बहूनां धनानां [v]वसुनश्च एकस्य निवासयोग्यस्य धनस्य च [v]दावने दानाय परिचरन्तीति शेषः । अत्र वसूनामिति बहुवचनेन ऐहिकभोगसाधनानि[1] धनानि[2] अभिप्रेतानि । एकवचनान्तेन च निवासयोग्यं स्वर्गाख्यं धनमभिप्रेतमित्यवगन्तव्यम् । [v]ते अनुष्ठातारः [v]सुम्नस्य सुखस्य लाभाय [v]मनसा [v]पथा मनोमार्गेण । स्तोत्रवर्त्मनेत्यर्थः[2] । [v]प्र [v]भुवन् प्रभवन्तु । उक्तवसुदानाय योग्या भवन्त्विदमर्थः । कदेति उच्यते । [v]सुतस्य अभिषुतस्य [v]सोम्यस्य सोमसंबन्धिनः [v]अन्धसः अन्नस्य [v]मदे सति ॥ ॥ ९ ॥

'महत्तत्' इति नवर्चं नवमं सूक्तम् । वज्रभूतेन वषट्कारेण देवानां हविर्वहनेन च हतेषु भ्रातृषु कनिष्ठः सौचीको नामाग्निर्वषट्कारहविर्वहनाभ्यां भीतो देवेभ्यो निर्गत्यापः प्राविशत् । स च मरुद्भ्यः प्रदर्शितः सन्नन्वेष्टुमागतैर्देवैः सहेदमादिसूक्तत्रयेण संवादं कृतवान् । अस्य सूक्तस्य द्वितीयादियुजश्चतस्रो 'विश्वे देवाः शास्तन' इति षड्ऋमुत्तरसूक्तं चेति दशर्चोऽग्निवाक्यम् । अयुजः प्रथमाद्याः पञ्चर्चो 'यमैच्छाम मनसा' इत्येकादशर्चमुत्तरसूक्तं च देवानां वाक्यम् । तत्र 'तदद्य वाचः प्रथमं मसीय' इति द्वृचस्त्वग्नेर्वाक्यम् । अतोऽग्निवाक्येषु देवा देवताग्निर्ऋषिः । देवोक्तिष्वग्निर्देवता देवा ऋषयः । अनादेशपरिभाषयेदमुत्तरं च द्वे त्रैष्टुभे विशेषानभिधानात्[3] । तथा चानुक्रान्तं—'वषट्कारेण वृक्णेषु भ्रातृषु सौचीकोऽग्निरपः प्रविश्य देवैः समवददुत्तरैस्त्रिभिर्मरुत्सख तत्र[4] युजोऽग्निवाक्यं विश्व इत्युत्तरं षट्कमयुजो देवानां यमैच्छामेत्युत्तरं चैकादशकं तदग्नेति तु द्वृचोऽग्नेः[5]' इति । गतो विनियोगः । सूक्तत्रयोक्तार्थे तैत्तिरीयब्राह्मणम्—'अग्नेस्त्रयो ज्यायांसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थं वाव स्य आर्तिमारिष्यतीति स निलायत सोऽपः प्राविशत्तं देवताः[6] प्रैषमैच्छन्' (तै. सं. २. ६. ६) इत्यादि । तत्राथर्वा देवा अग्निमाहुः ॥

महत्तदुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवेशिथापः ।
विश्वा अपश्यद्बहुधा ते अग्ने जातवेदस्तन्वो देव एकः ॥ १ ॥

महत् । तत् । उल्बम् । स्थविरम् । तत् । आसीत् । येन । आऽविष्टितः । प्रऽविवेशिथ । अपः ।
विश्वाः । अपश्यत् । बहुधा । ते । अग्ने । जातऽवेदः । तन्वः । देवः । एकः ॥ १ ॥

[v]तदुल्बं वक्ष्यमाणं तत् प्रावरणं [v]महत् [v]स्थविरम् अत्यन्तं स्थूलं च [v]तत् तत् [v]आसीत् [v]येन उल्बेन [v]आविष्टितः आवेष्टितः सन् हे अग्ने [v]प्रविवेशिथापः उदकानि प्रविष्टवानसि । हे [v]अग्ने

१. ग-त१.२.३.६.७.८-म१.२.४.७–भोगसाधनधनानि; त४.५-भ६–भोगसाधनानि । २. ग-त-भ-मु–स्तोत्रेण वर्त्मनेत्यर्थः । ३. ग–°भिधानात् उत्तरसूक्ते अष्टमीवर्जं षष्ठाद्याः पंचर्चो जगत्यः । ४. ग-त७-अनु–अत्र । ५. ग–द्वृचोऽग्नेस्तंतुमाद्यजगत्यात्रमीवर्जं; अनु–द्वृचोऽग्नेस्तन्तुमाद्या जगत्योऽष्टमीवर्जम् । ६. त१.२.३.७-म१.२.४.८–देवाः ।

vजातवेदः जातप्रज्ञ vते vविश्वाः सर्वाः vतन्वः तनूः सर्वाण्यङ्गानि vबहुधा बहुप्रकारम् vएकः देवः vअपश्यत् दृष्टवान् ॥

को मा ददर्श कतमः स देवो यो मे तन्वो बहुधा पर्यपश्यत् ।
क्वाहं मित्रावरुणा क्षियन्त्यग्नेर्विश्वाः समिधो देवयानीः ॥ २ ॥

कः । मा । ददर्श । कतमः । सः । देवः । यः । मे । तन्वः । बहुधा । परिऽअपश्यत् ।
क्व । अहं । मित्रावरुणा । क्षियन्ति । अग्नेः । विश्वाः । सम्ऽइधः । देवऽयानीः ॥ २ ॥

इदमग्नेर्वाक्यम् । एको देवोऽपश्यदित्युक्ते पृच्छति । vको vमा मां vददर्श दृष्टवान् । vस vदेवः vकतमः vयो vमे मम vतन्वः तनूः vबहुधा बहुप्रकारं स्थिताः vपर्यपश्यत् परिदृष्टवान् । हे vमित्रावरुणा मित्रावरुणौ vअग्नेः मम vविश्वाः सर्वाः vसमिधः दीप्ताः vदेवयानीः देवयानसाधनभूताः तन्वो दृष्टा इत्युक्तं यदि दृष्टाश्चेत्तर्हि vक्व vक्षियन्ति क्व निवसन्तीत्येवं देवानां पुरतो वर्तमानौ मित्रावरुणावाहाग्निः ॥

ऐच्छाम त्वा बहुधा जातवेदः प्रविष्टमग्ने अप्स्वोषधीषु ।
तं त्वा यमो अचिकेच्चित्रभानो दशान्तरुष्यादतिरोचमानम् ॥ ३ ॥

ऐच्छाम । त्वा । बहुधा । जातऽवेदः । प्रऽविष्टम् । अग्ने । अप्ऽसु । ओषधीषु ।
तम् । त्वा । यमः । अचिकेत् । चित्रभानो इति चित्रऽभानो ।
दशऽअन्तरुष्यात् । अतिऽरोचमानम् ॥ ३ ॥

एवमग्निना पृष्टा देवा अग्निं ब्रुवन्ति । हे vजातवेदः जातप्रज्ञ vअग्ने vत्वा त्वाम् अनु vऐच्छाम । कीदृशं त्वाम् vअप्सु उदकेषु vओषधीषु च vबहुधा vप्रविष्टम् । अन्विष्य च vतं तादृशमप्रविष्टं vत्वा त्वां vयमः देवः vअचिकेत् ज्ञातवान् हे vचित्रभानो चायनीयरश्मे । कुत्र स्थितं ज्ञातवानिति तदुच्यते । vदशान्तरुष्यात् । अन्तरुष्यं गृहमावासस्थानं तच्च स्थानं दशसंख्योपेतम् । तादृशं स्थानम् vअतिरोचमानम् अतीत्य प्रकाशमानम् । अग्नेर्हि गृहानि दश स्थानानि भवन्ति । पृथिव्यादयस्त्रयो लोका अग्निवाय्वादित्यास्त्रयो देवा आप ओषधयो वनस्पतयः प्राणिशरीरमिति दश स्थानानि ॥

होत्रादहं वरुण बिभ्यदायं नेदेव मा युनजन्नत्र देवाः ।
तस्य मे तन्वो बहुधा निविष्टा एतमर्थं न चिकेताहमग्निः ॥ ४ ॥

होत्रात् । अहम् । वरुण । बिभ्यत् । आयम् । न । इत् । एव । मा । युनजन् । अत्र । देवाः ।
तस्य । मे । तन्वः । बहुधा । निऽविष्टाः । एतम् । अर्थम् । न । चिकेत । अहम् । अग्निः ॥४॥

अनया देवा मां ज्ञातवन्त इति निश्चित्य गूहनस्य प्रयोजनमाह । हे vवरुण देव vअहं vहोत्रात् होतव्यात्[1] । हविर्वहनादित्यर्थः । तस्मात् vबिभ्यत् vआयम् आगतवानस्मि । अतः vमा माम् vएव एवं पूर्वप्रकारेण vअत्र अस्मिन् हविर्वहने vनेत् vयुनजन् नैव योजयन्तु vदेवाः । vतस्य

---

१. त४.५.६.८-भ४.५.६.८–हव्यात् ।

तादृशस्य विभ्यतः ᵛअग्ने ᵛतन्वो ᵛबहुधा ᵛनिविष्टाः अप्सु। ᵛएतमर्थम् एतद्धविर्वहनकार्यम् ᵛअग्निः ᵛअहं ᵛन ᵛचिकेत न बुध्ये नाङ्गीकरोमि ॥

एहि मनुर्देवयुर्यज्ञकामोऽरंकृत्या तमसि क्षेष्यग्ने।
सुगान्पथः कृणुहि देवयानान् वह हव्यानि सुमनस्यमानः ॥ ५ ॥

आ। इहि। मनुः। देवऽयुः। यज्ञऽकामः। अरम्ऽकृत्य। तमसि। क्षेषि। अग्ने।
सुऽगान्। पथः। कृणुहि। देवऽयानान्। वह। हव्यानि। सुऽमनस्यमानः ॥ ५ ॥

अग्निनैवमुक्ता देवाः पुनरग्निमाह्वयन्ति। हे ᵛअग्ने ᵛएहि आगच्छ। ᵛमनुः मनुष्यो यष्टा मननीयो मनू राजा वा ᵛदेवयुः देवान् यष्टुमिच्छन् ᵛयज्ञकामश्च भवति। अत एहि। किं कुर्वन् यज्ञकामो भवतीति चेदुच्यते। ᵛअरंकृत्य केवलं तेजःपुञ्जमेवालंकुर्वन्। यद्वेदमुत्तरत्र संबध्यते। त्वं तु अलंकृत्यात्मानमलंकुर्वन् ᵛतमसि अन्यैर्शातुमशक्येऽन्धकारे ᵛक्षेषि निवससि। हे अग्ने आगत्य च ᵛदेवयानान् देवान् प्रति यैर्मनुष्या गच्छन्ति तान् ᵛपथः मार्गान् ᵛसुगान् ᵛकृणुहि कुरु। 'कृवि हिंसाकरणयोश्च'। 'धिन्विकृण्व्योरच' इत्युप्रत्ययः। संमत्या नो यज्ञनिष्पत्तेर्देवयानाः सुपथा भवन्ति। ᵛवह च ᵛहव्यानि अस्मदीयानि ᵛसुमनस्यमानः सौमनस्यमाचरंस्त्वम् ॥ ॥ १० ॥

अग्नेः पूर्वे भ्रातरो अर्थमेतं रथीवाध्वानमन्वावरीवुः।
तस्माद्भिया वरुण दूरमायं गौरो न क्षेप्नोरविजे ज्यायाः ॥ ६ ॥

अग्नेः। पूर्वे। भ्रातरः। अर्थम्। एतम्। रथीऽइव। अध्वानम्। अनु। आ। अवरीवुरिति।
तस्मात्। भिया। वरुण। दूरम्। आयम्। गौरः। न। क्षेप्नोः। अविजे। ज्यायाः ॥ ६ ॥

अनयाग्निः स्वपलायननिमित्तमाह। हे देवाः ᵛअग्नेः मम ᵛपूर्वे पूर्वमुत्पन्नाः ᵛभ्रातरः भूपतिभुंवनपतिभूतानां पतिरिति त्रयोऽप्रजाः ᵛएतम् ᵛअर्थं हविर्वहनाख्यमर्थम् ᵛअन्वावरीवुः अनुक्रमेण वृतवन्तः[1]। तत्र वृणोतेर्यङ्लुगन्ताल्लुङि श्लेश्छान्दसो लुक्। 'बहुलं छन्दसि' इत्युक्तम्। आवरणे दृष्टान्तः। ᵛरथीवाध्वानम्। अध्वानं यथा रथी वृणोति तद्वत्। ते भ्रातरस्तथा कुर्वन्तो हताः। ᵛतस्मात् मरणात् ᵛभिया भीत्या हे ᵛवरुण ᵛदूरं देशम् ᵛआयम्। किंच ᵛक्षेप्नोः इषुक्षेप्तुः धनुषः ᵛज्यायाः सकाशात् ᵛगौरो ᵛन गौरमृग इव स यथा बिभेति चलति वा तद्वत् ᵛअविजे अकम्पे। 'ओविजी भयचलनयोः'। अनुदात्तेत्त्वौदादिकः। तस्य लङ्युत्तमे रूपम् ॥

कूर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ॥ ७ ॥

कूर्मः। ते। आयुः। अजरम्। यत्। अग्ने। यथा। युक्तः। जातऽवेदः। न। रिष्याः।
अथ। वहासि। सुऽमनस्यमानः। भागम्। देवेभ्यः। हविषः। सुऽजात ॥ ७ ॥

इदं देवानां वाक्यम्। हे ᵛअग्ने ᵛयत् ᵛआयुः आयुष्यम् ᵛअजरं जरारहितमस्ति तत् ᵛते ᵛकूर्मः। ᵛयुक्तः तेनायुषा संयुक्तस्त्वं हे ᵛजातवेदः जातप्रज्ञ ᵛयथा ᵛन ᵛरिष्याः न म्रियसे तथा

---

१. त१.२.३.७–आदृतवंतः; त४.६.८-म४.५.८–आवृतवंतः।

कुर्मः । vअथ vवहासि वह vसुमनस्यमानः सौमनस्यं कुर्वन् वोढव्यं वहन्[1]। तदेव दर्शयति। vहविषः यजमानप्रस्तस्य vभागम्। केभ्यः। vदेवेभ्यः। हे vसुजात शोभनजन्मन्नग्ने ॥

प्रयाजान्मे अनुयाजाँश्च केवलानूर्जस्वन्तं हविषो दत्त भागम्।
घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः ॥ ८ ॥

प्रऽयाजान्। मे। अनुऽयाजान्। च। केवलान्। ऊर्जस्वन्तम्। हविषः। दत्त। भागम्।
घृतम्। च। अपाम्। पुरुषम्। च। ओषधीनाम्।
अग्नेः। च। दीर्घम्। आयुः। अस्तु। देवाः ॥ ८ ॥

अनेनाग्निर्हविर्वहने दातव्यान्युक्त्वा दत्तेति[2] प्रतिजानाति। हे देवाः vमे मह्यं vप्रयाजान् प्रधानस्य प्रमुखे यष्टव्यानेतन्नामकान् हविर्भागान् तथा vअनुयाजान् अनु प्रधानात्पश्चाद्यष्टव्यानेतन्नामकान् vकेवलान् असाधारणान् vदत्त प्रयच्छत। तथा vऊर्जस्वन्तं प्रत्यभिधारणात्सारवन्तं vहविषः सर्वस्यापि चरुपुरोडाशादेः vभागं स्विष्टकृदाख्यं भागं दत्त। अथवोर्जस्वन्तं हविषो भागं प्रयाजानुयाजाख्यं[3] दत्तेति योज्यम्। किंच vअपां सारभूतं तान्य उत्पन्नं वा vघृतम् आज्यभागादिसाधनम् vओषधीनाम् ओषधीभ्य उत्पन्नं vपुरुषं vच भागं दत्त। किंच vअग्नेः मम vदीर्घमायुः vच vअस्तु। वषट्कारकृतवधभयं मा भूदित्यर्थः। अमुमितिहासं प्रस्तुत्य कौषीतकिब्राह्मणं—' तस्मादाहुराग्नेयाः प्रयाजा आग्नेया अनुयाजा आग्नेयमाज्यमाग्नेयः पुरोडाशः ' इति। ' शरीरदाया ह वा अग्नयो भवन्ति ' इति च ब्राह्मणं ' पुरुषाहुतिर्यस्य प्रियतमा ' इति च ॥

तवं प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः।
तवाग्ने यज्ञोऽयमस्तु सर्वस्तुभ्यं नमन्तां प्रदिशश्चतस्रः ॥ ९ ॥

तव। प्रऽयाजाः। अनुऽयाजाः। च। केवले। ऊर्जस्वन्तः। हविषः। सन्तु। भागाः।
तव। अग्ने। यज्ञः। अयम्। अस्तु। सर्वः। तुभ्यम्। नमन्ताम्। प्रऽदिशः। चतस्रः ॥ ९ ॥

एवमग्निना[4] याच्यमाना देवाः प्रतिब्रुवते। हे अग्ने vतव vप्रयाजा vअनुयाजाश्च vकेवले असाधारणाः vऊर्जस्वन्तः बलवन्तः vहविषः vभागाः vसन्तु। हे अग्ने vअयं vसर्वः vयज्ञः च vतव vअस्तु। तथा vप्रदिशः प्रकृष्टा मुख्याः vचतस्रः दिशः vतुभ्यं vनमन्ताम्। अत एहि हविर्वहेति शेषः ॥ ॥ ११ ॥

' विश्वे देवाः शास्तन ' इति षड्र्चं दशमं सूक्तं सौचीकस्याग्नेरार्षं वैश्वदेवम्। गतः सूक्तविनियोगः। स्रुगादापनात्पूर्वभाविनि जपे विनियुक्ता। सूत्रितं च—' विश्वे देवाः शास्तन मा यथेहाराधि होता निषदा यजीयान् ' (आश्व. श्रौ. १. ४) इति ॥

विश्वे देवाः शास्तन मा यथेह होता वृतो मनवै यन्निषद्य।
प्र मे ब्रूत भागधेयं यथा वो येन पथा हव्यमा वो वहानि ॥ १ ॥

विश्वे। देवाः। शास्तन। मा। यथा। इह। होता। वृतः। मनवै। यत्। निऽसद्य।
प्र। मे। ब्रूत। भागऽधेयम्। यथा। वः। येन। पथा। हव्यम्। आ। वः। वहानि ॥ १ ॥

---

१. त-भ-कुर्वन्। २. ग-तान्; त१.२.३.४.५.८-भ१.४.६-वाति; त६-भ२.४.८-चाति; मुचानि। ३. भ१.२.७-प्रयाजाख्यं। ४. त१.२.३.६.७.८-भ-एवमग्निभिः।

एतत्सूक्तं कृत्स्नमाग्नेयम्। हे ᵛविश्वे ᵛदेवाः यूयं ᵛमा मां ᵛशास्तन अनुज्ञां दत्त। ᵛयथेह यज्ञे ᵛहोता देवानामाह्वाता सन् ᵛवृतः होतृत्वेन वृतोऽहं ᵛमनवै स्तौमि भवतः। ᵛयत् यस्मात् ᵛनिषद्य स्तौमि तस्माच्छास्तन। ᵛमे मम ᵛभागधेयं ᵛप्र ᵛब्रूत ᵛयथा ᵛवः यूयं भागं कल्पितवन्तः तथा[1] तं भागं प्र ब्रूत। ᵛयेन च ᵛपथा ᵛवः ᵛहव्यमा ᵛवहानि वहनं करोमि॥

अहं होता न्यसीदं यजीयान् विश्वे देवा मरुतो मा जुनन्ति।
अहरहरश्विनाध्वर्यवं वां ब्रह्मा समिद्भवति साहुतिर्वाम्॥ २॥

अहम्। होता। नि। असीदम्। यजीयान्। विश्वे। देवाः। मरुतः। मा। जुनन्ति।
अहःऽअहः। अश्विना। आध्वर्यवम्। वाम्।
ब्रह्मा। सम्ऽइत्। भवति। सा। आऽहुतिः। वाम्॥ २॥

ᵛयजीयान् यष्टृतमः ᵛअहं ᵛहोता सन् ᵛन्यसीदं निषण्णोऽस्मि। निषदने तं निषण्णं ᵛविश्वे व्याप्ताः ᵛमरुतः ᵛदेवाः ᵛजुनन्ति प्रेरयन्ति हविर्वहनाय। हे ᵛअश्विना[2] ᵛवां युवयोः ᵛआध्वर्यवम् ᵛअहरहः प्रतिदिनं कर्तव्यमिति शेषः। आध्वर्यवं भवन्नयामनुज्ञातव्यमित्यर्थः। ᵛब्रह्मा ᵛभवति भवतु। कः। ᵛसमित् समिद्धश्चन्द्रमाः। चन्द्रमा ब्रह्मा भवतु। किंच ᵛसा[3]। स[3] इत्यर्थः। स च समित् समिद्धश्चन्द्रमाः ᵛवां युवयोर्होमार्थं वां[4] युवाभ्यां क्रियमाणायाध्वर्यवकर्मणे ᵛआहुतिः भवति भवत्वित्यर्थः। सोमात्मको हि चन्द्रमा हूयते। 'एष वै सोमो राजा' इत्युपक्रम्य 'तदेवोभयं भवति' इति हि छन्दोगब्राह्मणम्। अथवैवं योजना। याहुतिराध्वर्यवमनुष्ठितवद्भ्यां होतव्या सा वां युवयोः युवाभ्यां भवति भवतु। आध्वर्यवं वामित्यस्यैव विवरणमेतत्॥

अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जन्ति देवाः।
अहरहर्जायते मासिमास्यर्था देवा दधिरे हव्यवाहम्॥ ३॥

अयम्। यः। होता। किः। ऊँ इति। सः। यमस्य।
कम्। अपि। ऊहे। यत्। सम्ऽअञ्जन्ति। देवाः।
अहःऽअहः। जायते। मासिऽमासि। अर्था। देवाः। दधिरे। हव्यऽवाहम्॥ ३॥

ᵛयः ᵛअयं ᵛहोता ᵛसः ᵛकिः को भवति। कीदृशो भवति। तस्य को व्यापार इत्यर्थः। तस्योत्तरमुच्यते। ᵛयमस्य मृत्योः[5] भीतः सन्निति शेषः। ᵛकमपि हुतम् ᵛऊहे वहति। यद्वा सर्वसृष्टिविज्ञातं नियमयतीति यमो यजमानः। तस्य कमपि हुतमूहे वहति देवान्प्रति। ᵛयत्समञ्जन्ति यद्धविः प्राप्नुवन्ति ᵛदेवाः। किंचाग्निः ᵛअहरहः प्रतिदिनमग्निहोत्रार्थं[6] ᵛजायते प्रादुर्भवति। तथा ᵛमासिमासि प्रतिमासं जायते पितृयज्ञार्थम्[7]। एतत्कालद्वयमुपलक्षणं पक्षचतुर्मासषण्मासससंवत्सरादीनाम्। अपरे पुनरेवमाहुः। अहरहः[8] सूर्यात्मना जायते मासिमासि चन्द्रात्मनेति। ᵛअथ तमिममग्निं ᵛदेवा[9] ᵛदधिरे ᵛहव्यवाहं हविषां वोढारम्। एवमग्निः स्वात्मानं स्वयमेवोक्तवान्॥

१. ग-त-भ-'तथा' नास्ति। २. त१.२.७-सु-अश्विनाश्विनौ। ३. ग१-भ६-सोम; ग४-त१.२.३.७-साम; सु-सा स सोम। ४. त१.२.३.६.७.८-भ१.२.६.८-'वां' नास्ति। ५. ग-त-भ-सु-मृतेः। ६. ग-त४.५-भ४-°होत्राद्यर्थं। ७. ग-त४.५-भ४-°यज्ञाद्यर्थं। ८. त१.२.३.७-भ-'अहरहः' नास्ति। ९. त-भ-'देवा' नास्ति।

मां देवा दधिरे हव्यवाहमपम्लुक्तं बहु कृच्छ्रा चरन्तम् ।
अग्निर्विद्वान्यज्ञं नः कल्पयाति पञ्चयामं त्रिवृतं सप्ततन्तुम् ॥ ४ ॥

माम् । देवाः । दधिरे । हव्यऽवाहम् । अपऽम्लुक्तम् । बहु । कृच्छ्रा । चरन्तम् ।
अग्निः । विद्वान् । यज्ञम् । नः । कल्पयाति । पञ्चऽयामम् । त्रिऽवृतम् । सप्तऽतन्तुम् ॥४॥

vमाम् अग्निं vदेवाः vहव्यवाहं हविर्वोढारं vदधिरे कृतवन्तः । कीदृशं माम् । vअपम्लुक्तम् अपक्रम्यागतं vबहु vकृच्छ्रा बहूनि कृच्छ्राणि स्थानानि vचरन्तं गच्छन्तम् । कया मनीषया दधिर इत्युच्यते । अथम् vअग्निर्विद्वान् सर्वं जानन् vनः अस्माकं vयज्ञं vकल्पयाति कल्पयति । कीदृशं यज्ञम् । vपञ्चयामं पञ्चविधगमनम् । पाङ्क्तो हि यज्ञः । vत्रिवृतं सवनत्रयभेदेन त्रिप्रकारं vसप्ततन्तुं सप्तभिश्छन्दोमयैः स्तुतिभिर्विस्तृतम् ॥

आ वो यक्ष्यमृतत्वं सुवीरं यथा वो देवा वरिवः करणि ।
आ बाह्वोर्वज्रमिन्द्रस्य धेयामथेमा विश्वाः पृतना जयाति ॥ ५ ॥

आ । वः । यक्षि । अमृतऽत्वम् । सुऽवीरम् । यथा । वः । देवाः । वरिवः । करणि ।
आ । बाह्वोः । वज्रम् । इन्द्रस्य । धेयाम् । अथ । इमाः । विश्वाः । पृतनाः । जयाति ॥५॥

हे देवाः vवः युष्मान् vआ vयक्षि आयाचे । किम् । vअमृतत्वम् अविनाशित्वं vसुवीरं सुपुत्रं च । हे vदेवाः vवः युष्माकं vवरिवः परिचर्यां हवीरूपं धनं वा vयथा vकरणि करवाणि तदर्थमित्यर्थः । किंच vइन्द्रस्य vबाह्वोः vवज्रम् vआ vधेयाम् । ग्राहयामीत्यर्थः । अग्नेर्होतृत्वाभावे इन्द्रस्य सोमाद्यभावाद्बलत्वेन वज्रधारणं नोपपद्यते । अतस्तत्कृत्वा वज्रं ग्राहयामीत्यर्थः । vअथ एवं सति vइमाः vविश्वाः सर्वाः vपृतनाः शत्रुसेनाः vजयाति जयति । जयतु वा ॥

त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्मा आदिद्धोतारं न्यसादयन्त ॥ ६ ॥

त्रीणि । शता । त्री । सहस्राणि । अग्निम् । त्रिंशत् । च । देवाः । नव । च । असपर्यन् ।
औक्षन् । घृतैः । अस्तृणन् । बर्हिः । अस्मै । आत् । इत् । होतारम् । नि । असादयन्त ॥६॥

vत्रीणि vशता शतानि त्रीणि vसहस्राणि vत्रिंशच्च vनव vच एतत्संख्याकाः vदेवाः vअग्निं माम् vअसपर्यन् पर्यचरन् । परिचर्याप्रकार[1] उच्यते । vघृतैः क्षरद्भिराज्यैः vऔक्षन् सिक्तवन्तः । vअस्मै अग्नये मह्यं vबर्हिः vअस्तृणन् आस्तृतवन्तः । vआदित् आस्तरणानन्तरं vहोतारम् आह्वातारं vन्यसादयन्त नियमेनासादितवन्तः ॥ ॥ १२ ॥

'धर्मेच्छाम' इत्येकादशर्चमेकादशं सूक्तम् । देवानां वाक्यत्वाद्देवा ऋषयः । 'तदद्य' इति द्वयृचस्य सौचीकोऽग्निर्ऋषिः । 'तन्तुं तन्वन्' इत्याद्या अष्टमीवर्जिता जगत्यः । अष्टमी शिष्टाश्च त्रिष्टुभः । तथा चानुक्रान्तं—'तन्तुमाद्या जगत्योऽष्टमीवर्जम्' इति । शिष्टमुक्तम् । गतः सूक्तविनियोगः ॥

---

१. ग-त१.२.३.७.८-भ१.२.५.६.७.८-सु-परिचार°; भअ-परिचरण° ।

यमैच्छाम मनसा सोऽयमागाद्यज्ञस्य विद्वान् परुषश्चिकित्वान् ।
स नो यक्षद्देवताता यजीयाञ्छि हि षत्सदन्तरः पूर्वो अस्मत् ॥ १ ॥

यम् । ऐच्छाम । मनसा । सः । अयम् । आ । अगात् । यज्ञस्य । विद्वान् । परुषः । चिकित्वान् । सः । नः । यक्षत् । देवऽताता । यजीयान् । नि । हि । सत्सत् । अन्तरः । पूर्वः । अस्मत् ॥ १ ॥

यम् अग्निम् ऐच्छाम अन्विष्टवन्तो वयं मनसा हविष्प्रापणबुद्ध्या मह्यं हविः प्रापयिष्यतीति बुद्ध्येत्यर्थः । सोऽयम् अग्निः आगात् आजगाम । कीदृशोऽग्निः । यज्ञस्य यज्ञं विद्वान् जानंस्तथा परुषः परूंषि संधातव्यान्यङ्गानि चिकित्वान् अभिगच्छन् । सः अग्निः यजीयान् यष्टृतमः नः अस्मान् देवताता देवतातौ यज्ञे यक्षत् यजतु । नि षत्सद्धि न्यसीदत् खलु वेद्यामिति शेषः । कीदृशः सन् । अन्तरः ऋत्विजां यष्टव्यानां देवानां च मध्ये संचरन् अस्मत् पूर्वः अस्मत्तो देवेभ्यः पूर्वभावी सन् । अग्निं समिध्य पश्चाद्धि देवा आहूयन्ते ॥

दर्शपूर्णमासयोः पुरा ' अराधि ' इत्येषा जप्या । सूत्रमुदाहृतम् ॥

अराधि होता निषदा यजीयानभि प्रयांसि सुधितानि हि ख्यत् ।
यजामहै यज्ञियान् हन्त देवाँ ईळामहा ईड्याँ आज्येन ॥ २ ॥

अराधि । होता । निऽसदा । यजीयान् । अभि । प्रयांसि । सुऽधितानि । हि । ख्यत् । यजामहै । यज्ञियान् । हन्त । देवान् । ईळामहे । ईड्यान् । आज्येन ॥ २ ॥

अयमग्निः होता होमनिष्पादकः यजीयान् यष्टृतमश्च सन् निषदा वेद्यां निषदनेन अराधि सिद्धोऽभूत् । आहुतियोग्योऽभूदित्यर्थः । तथाभूतोऽयं सुधितानि सुष्ठु निहितानि प्रयांसि चरुपुरोडाशाद्यन्नानि अभि हि ख्यत् अभिचष्टे सर्वतः पश्यति । हीति पूरणः । कथा बुद्ध्येति । यज्ञियान् यष्टव्यान् आहुतिभाजः देवान् हन्त शीघ्रम् आज्येन यजामहै[1] तथा ईड्यान् स्तुतिभाजो देवान् स्तुत्या ईळामहै इति बुद्ध्येति शेषः ॥

यस्मिन्यजमाने जीवति मृतशब्दो जायते तस्य सुरभिमतीष्टिः कर्तव्या । ' साध्वीमकः ' इत्येषा तत्र याज्या । सूत्रितं च—' अग्निर्होता न्यसीदद्यजीयान् साध्वीमकर्देववीतिं नो अद्य ' (आश्व. श्रौ. ३. १३) इति ॥

साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्याम् ।
स आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य ॥ ३ ॥

साध्वीम् । अकः । देवऽवीतिम् । नः । अद्य । यज्ञस्य । जिह्वाम् । अविदाम । गुह्याम् । सः । आयुः । आ । अगात् । सुरभिः । वसानः । भद्राम् । अकः । देवऽहूतिम् । नः । अद्य ॥ ३ ॥

अयमग्निः अद्य नः अस्माकं देववीतिं देवानामागमनवन्तं देवानां हविर्भक्षणोपेतं वा यज्ञं साध्वीमकः साधुमकरोत् । वयं च यज्ञस्य गुह्यां गूढतरां जिह्वामविदाम लब्धवन्तः स्म । अग्निर्हि यज्ञस्य जिह्वा तेन देवानां पानाज्जिह्वात्वेनोपचारः । सः तादृशोऽग्निः सुरभिः सुगन्धः

---

१. ग-त१.२.३.६.७.८-म-सु-यजामहै इति ।

vआयुः देवैः दत्तमायुष्यं vवसानः आच्छादयन् vआगात् आगच्छति । आगत्य च vनः अस्मदर्थं vदेवहूतिं देवानामाह्वानवन्तं[1] यज्ञं vभद्रामकः कल्याणं कृतवान् vअद्य इदानीम् ॥

दर्शपूर्णमासयोः सामिधेन्यर्थं प्रेषितेन होत्रा ' तदद्य वाचः ' इत्येषा जप्या । स्रुगादापनात् पूर्वमपि[2] जप्या । सूत्रितं च—' तदद्य वाचः प्रथमं मसीयेति समाप्य ' (आश्व.श्रौ. १.२) इति ॥

तदद्य वाचः प्रथमं मसीय येनासुराँ अभि देवा असाम ।
ऊर्जोद उत यज्ञियासः पञ्च जना मम होत्रं जुषध्वम् ॥ ४ ॥

तत् । अद्य । वाचः । प्रथमम् । मसीय । येन । असुरान् । अभि । देवाः । असाम ।
ऊर्जेऽअदः । उत । यज्ञियासः । पञ्च । जनाः । मम । होत्रम् । जुषध्वम् ॥ ४ ॥

इदमुत्तरं चाग्नेर्वाक्यमित्युक्तम् । vअद्य इदानीं vप्रथमम् । मुख्यनामैतत् । वाचां मुख्यं vतत् vवाचः वचः वचनं vमसीय मंसीय उच्चारयामि । vयेन वचसा अहं vदेवाः च वयम् vअसुरान् vअभि vअसाम अभिभवेम । किं तत् प्रथमं वचनमिति उच्यते । vऊर्जादः हे अन्नादः vउत अपि च vयज्ञियासः यज्ञार्हा हे vपञ्च vजनाः देवमनुष्यादयः यूयं vमम vहोत्रं vजुषध्वं सेवध्वमिति । एवं बहूच्यमानेऽग्निमनूद्यन्ति सर्वे देवा इत्यभिप्रायः । अत्र ' तदद्य वाचः ' (निरु. ३. ८) इत्यादि निरुक्तं द्रष्टव्यम् ॥

पञ्च जना मम होत्रं जुषन्तां गोजाता उत ये यज्ञियासः ।
पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥ ५ ॥

पञ्च । जनाः । मम । होत्रम् । जुषन्ताम् । गोऽजाताः । उत । ये । यज्ञियासः ।
पृथिवी । नः । पार्थिवात् । पातु । अंहसः । अन्तरिक्षम् । दिव्यात् । पातु । अस्मान् ॥५॥

vपञ्च vजनाः देवादयः vमम vहोत्रं हवमाह्वानं vजुषन्तां सेवन्ताम् । अपि च vगोजाताः भूम्यामुत्पन्नाः । यद्वा । गोशब्देन तज्जं पय आदिकमुच्यते । हविरर्थं प्रादुर्भूता इत्यर्थः । तादृशा ये सन्ति । vउत अपि च vये vयज्ञियासः यज्ञार्हाः[3] सन्ति ते मम होत्रं[4] जुषन्ताम् । किंच vपृथिवी पृथिवीदेवता vपार्थिवात् पृथिवीसंबन्धात् vनः अस्मान् vअंहसः पापात् vपातु रक्षतु । तथा vअन्तरिक्षम् अन्तरिक्षदेवता vदिव्यात् आन्तरिक्षादंहसः पापसकाशात्[5] vअस्मान् vपातु ॥ ॥१३॥

गार्हपत्यादारभ्याहवनीयाद्देदिं वेदतृणैरास्तृणाति ' तन्तुम् ' इत्यनया । सूत्रितं च—' अविधून्वन् संततं स्तृणन् सव्येन गार्हपत्यादाहवनीयमेति तन्तुं तन्वन्रजसो भानुमन्विहि ' (आश्व. श्रौ. १. ११) इति । अग्निहोत्रहोमेऽप्यनयोदकधारा स्रावणीया । सूत्रितं च—' गार्हपत्यादविच्छिन्नामुदकधारां हरेत्तन्तुं तन्वन्रजसो भानुमन्विहि ' (आश्व. श्रौ. २. २) इति । अन्यन्तराले श्वातिक्रमणेऽनया गार्हपत्याहवनीययोर्मध्यमुदकेन भस्मना च पूरयेत् । सूत्रितं च—' गार्हपत्याहवनीययोरन्तरं भस्मराज्योदकराज्या च संतनुयात् ' (आश्व. श्रौ. ३.१०) इति । आग्निमारुतेऽप्येषा धाय्या । सूत्रितं च—' तन्तुं तन्वन्रजसो भानुमन्विह्येवा न इन्द्रो मघवा विरप्शी ' (आश्व. श्रौ.५.२०) इति ॥

---

१ ग-त१.२.८-भ६–देवानां हवनवंतं, भ७–देवानां आह्वातारं । २. ग४–पूर्वमेव । ३. ग-त-भ४. मु–यज्ञार्हा देवाः । ४. त३-भ८–होत्रं हवमाह्वानं जुषंतां सेवंतां । ५. ग-त४.५-भ४–सकाशात्; त१.२.६.७.८-भ१.६.७-मु–पापात् सकाशात् ।

तन्तुं तन्वन्रजसो भानुमन्विहि ज्योतिष्मतः पथो रक्ष धिया कृतान् ।
अनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनम् ॥ ६ ॥

तन्तुम् । तन्वन् । रजसः । भानुम् । अनु । इहि । ज्योतिष्मतः । पथः । रक्ष । धिया । कृतान् ।
अनुल्बणम् । वयत । जोगुवाम् । अपः । मनुः । भव । जनय । दैव्यम् । जनम् ॥ ६ ॥

हे अग्ने [v]तन्तुं यज्ञं [v]तन्वन् विस्तारयन् [v]रजसः रञ्जनात्मकस्य लोकस्य [v]भानुं भासकमादित्यम् [v]अन्विहि अनुगच्छ । रश्मिद्वारा सूर्यमण्डलं प्रविशेत्यर्थः । किंच [v]ज्योतिष्मतः प्रकाशवतो यज्ञस्य [v]पथः गमनमार्गान् । अथवा ज्योतिष्मतो दीप्तिमतः स्वर्गस्य पथो मार्गान् देवयानान् । [v]रक्ष पालय । कीदृशान्मार्गान् । [v]धिया कर्मणा [v]कृतान् संपादितान् । किंच सोऽग्निः [v]जोगुवां स्तोतॄणाम् [v]अपः । कर्मनामैतत् । क्रियया व्याप्यं कर्म [v]अनुल्बणम् अनतिरिक्तं [v]वयत करोतु । 'यदेव यज्ञ उल्बणं क्रियते तस्यैवैषा शान्तिः' (तै. सं. ३. ४. ३. ७) इति हि ब्राह्मणम् । स त्वं [v]मनुर्भव मन्तव्यो भव । स्तुत्यो भवेत्यर्थः । किंच [v]दैव्यं [v]जनं देवसंघं [v]जनय उत्पादय । यज्ञाभिगमनवन्तं

अक्षानहो नह्यतनोत सोम्या इष्कृणुध्वं रशना ओत पिंशत ।
अष्टावन्धुरं वहताभितो रथं येन देवासो अनयन्नभि प्रियम् ॥ ७ ॥

अक्षऽनहः । नह्यतन । उत । सोम्याः । इष्कृणुध्वम् । रशनाः । आ । उत । पिंशत ।
अष्टाऽवन्धुरम् । वहत । अभितः । रथम् । येन । देवासः । अनयन् । अभि । प्रियम् ॥ ७ ॥

अत्र यज्ञजिगमिषवो देवाः परस्परं ब्रुवते । हे [v]सोम्याः सोमार्हा देवाः यूयम् [v]अक्षानहः अक्षेषु नद्धान् बन्धनीयानश्वान् [v]नह्यतन नह्यत बध्नीत[1] रथे । [v]उत अपि च [v]रशनाः अश्वबन्धनप्रग्रहान् [v]इष्कृणुध्वं निष्कुरुत सम्यक् संस्कुरुत । नकारलोपश्छान्दसः । [v]उत अपि च [v]आ [v]पिंशत । 'पिश अवयवे' । अश्वानलंकुरुतेत्यर्थः । [v]अष्टावन्धुरम् । बन्धुरं सारथिनिवासस्थानम् । अष्टसंख्याकबन्धुरोपेतं [v]रथं सूर्यसंबन्धिनम् [v]अभितः सर्वतः [v]वहत । सूर्यरथेन साकं युष्मदीयान्रथान् यज्ञं प्रति गमयतेत्यर्थः । [v]येन [v]देवासः देवाः [v]प्रियम् अस्मान्[2] [v]अनयन् अभिगमयन्ति तं रथमभितो वहतेति संबन्धः । यद्वा । तं यज्ञं प्रति वहतेति योज्यम् ॥

वैवाहिके प्रयाणे यदि नावा तार्या नदी स्यात् तदानीम् 'अश्मन्वती' इत्यर्धर्चेन वधूं नावमारोहयेत् । उत्तरेणार्धर्चेन नदीमुत्क्रमयेत् । सूत्रितं च—'अश्मन्वती रीयते सं रभध्वमित्यर्धर्चेन नावमारोहयेदुत्तरेणोत्क्रमयेत्' (आश्व. गृ. १. ८. २–३) इति ॥

अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्र तरता सखायः ।
अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभि वाजान् ॥ ८ ॥

अश्मन्ऽवती । रीयते । सम् । रभध्वम् । उत् । तिष्ठत । प्र । तरत । सखायः ।
अत्र । जहाम । ये । असन् । अशेवाः । शिवान् । वयम् । उत् । तरेम । अभि । वाजान् ॥ ८ ॥

---

१. त-म-मु-बध्नीत । २. ग-त-म-मु-आत्मानं ।

अनयापि देवा यज्ञजिगमिषवः परस्परं ब्रुवते। [v]अश्मन्वती नाम नदी [v]रीयते गच्छति। 'री गतिरेषणयोः'। तां यज्ञगमनायोत्तरीतुम् [v]उत्तिष्ठत उद्गच्छत। तथा कृत्वा [v]प्र [v]तरत तां नदीमुल्लङ्घयत। हे [v]सख्यायः यजमानस्य सखिभूता इति देवानां संबोधनम्। [v]अत्र अस्यां नद्यां [v]जहाम परित्यजाम। कानिति उच्यते। [v]ये [v]अशेवाः। शेवमिति सुखनाम। येऽसुखभूताः [v]असन् अभवन् अस्मानाश्रित्य वर्तन्ते ताञ्जहाम। तथा कृत्वा [v]शिवान् सुखकराणि[१] [v]वाजान् अन्नानि हवींषि [v]अभि प्राप्तुम् [v]उत्तरेम॥

त्वष्टा माया वेदपसामपस्तमो बिभ्रत्पात्रा देवपानानि शंतमा।
शिशीते नूनं परशुं स्वायसं येन वृश्चादेतशो ब्रह्मणस्पतिः॥ ९॥

त्वष्टा। मायाः। वेत्। अपसाम्। अपःऽतमः। बिभ्रत्। पात्रा। देवऽपानानि। शम्ऽतमा। शिशीते। नूनम्। परशुम्। सुऽआयसम्। येन। वृश्चात्। एतशः। ब्रह्मणः। पतिः॥९॥

अयं [v]त्वष्टा देवशिल्पी [v]मायाः। कर्मनामैतत्। कर्माणि पात्रनिर्माणविषयाणि [v]वेत् वेत्ति जानाति। स च[२] त्वष्टा [v]अपसां शोभनकर्मवतां मध्ये [v]अपस्तमः अतिशयेन शोभनकर्मा [v]देवपानानि देवाः पिबन्ति येषु तानि [v]पात्रा सोमपात्राणि [v]बिभ्रत् धारयन् वर्तत इति शेषः। स च त्वष्टा [v]नूनम् इदानीमग्नौ हविर्वहनायाङ्गीकृते सति [v]स्वायसं शोभनायःसारभूतं [v]परशुं [v]शिशीते तीक्ष्णयति। त्वष्टा पात्रसंपादनार्थं [v]येन परशुना [v]एतशः एतशवर्णः [v]ब्रह्मणस्पतिः ब्रह्मणो मन्त्रस्य पाता पात्रादिसंपादनरूपस्य कर्मणः स्वामी वा [v]वृश्चात् वृश्चति[३]॥

सतो नूनं कवयः सं शिशीत वाशीभिर्याभिरमृताय तक्षथ।
विद्वांसः पदा गुह्यानि कर्तन येन देवासो अमृतत्वमानशुः॥ १०॥

सतः। नूनम्। कवयः। सम्। शिशीत। वाशीभिः। याभिः। अमृताय। तक्षथ।
विद्वांसः। पदा। गुह्यानि। कर्तन। येन। देवासः। अमृतऽत्वम्। आनशुः॥ १०॥

हे [v]कवयः मेधाविनस्त्वष्टुर्मम शिष्या ऋभवः [v]सतः। सन्त इत्यर्थः। प्रशस्ता यूयं [v]नूनम् इदानीं [v]सं [v]शिशीत अत्यर्थं तीक्ष्णीकुरुत वाशीः[४]। [v]याभिः[५] [v]वाशीभिः[५] पात्राणि [v]अमृताय सोमाय। तत्पानायेत्यर्थः। यद्वा युष्माकममृतत्वाय। तदर्थं [v]तक्षथ संपादयथ। हे कवयः [v]विद्वांसः यूयं [v]गुह्यानि गोपनीयानि [v]पदा पदानि निवासस्थानानि [v]कर्तन कुरुत। [v]येन स्थानकरणेन [v]देवासः देवा यूयम् [v]अमृतत्वमानशुः प्राप्ता यूयम्। एवं स्वशिष्यानाह॥

गर्भे योषामदधुर्वत्समासन्यपीच्येन मनसोत जिह्वया।
स विश्वाहा सुमना योग्या अभि सिषासनिर्वनते कार इज्जितिम्॥ ११॥

गर्भे। योषाम्। अदधुः। वत्सम्। आसनि। अपीच्येन। मनसा। उत। जिह्वया।
सः। विश्वाहा। सुऽमनाः। योग्याः। अभि। सिसासनिः। वनते। कारः। इत्। जितिम्॥११॥

---

१. ग-त-भ-मु–सुखकरान्। २. ग-त-भ-मु–'च' नास्ति। ३. ग-त-भ४-मु–वृश्चति पात्राणि। ४. त१.२.६.७.८-भ–'वाशीः' नास्ति। ५. त१.२.६.७.८-भ१.२.६.७.८-वाशीभिर्याभिः।

ते[1] मरुतः[1] vगर्भे मृताया गोर्मध्ये प्राहके चर्मणि मृताया गोः संबन्धिनि vयोषां कांचिद्गाम् vअदधुः धारितवन्तः । 'निश्चर्मणो गामरिणीत धीतिभिः (ऋ. सं. १. १६१. ७) इत्युक्तम् । तथा vआसनि मृताया आस्ये vवत्सम् अदधुः । केन साधनेन vअपीच्येन[2] vमनसा देवत्वमाकाङ्क्षता vउत अपि च vजिह्वया । सादृश्यप्रधानोऽयं निर्देशः । जिह्वावदायतया वाश्येत्यर्थः । यद्वा[3] । जिह्वया युक्तां योषामिति संबन्धः । vसिषासनिः संभजनशीलः vसः ऋभुसंघः vविश्वाहा सर्वेष्वहःसु[4] सर्वदा vयोग्याः स्वोचिताः vसुमनाः[5] स्तुतीः vअभि vवनते । स च संघः vजिति शत्रुजयं कामं vकार vइत् कर्तैव शत्रुजयकर्तैव ॥ ॥ १४ ॥

'तां सु ते' इति षड्र्चं द्वादशं सूक्तं वामदेवगोत्रस्य बृहदुक्थस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं—'तां सु षड् बृहदुक्थो वामदेव्यः' इति । समूळ्हस्य दशरात्रस्य द्वितीये छन्दोम एतत्सूक्तम् । सूत्रितं च–' अपूर्व्या पुरुतमानि तां सु ते कीर्तिं त्वं महाँ इन्द्र ' (आश्व. श्रौ. ८. ७) इति । महाव्रते निष्केवल्य एतत्सूक्तम् । सूत्रितं च—' तां सु ते कीर्तिं मघवन्महित्वा भूय इद्वावृधे वीर्याय ' (ऐ. आ. ५. १. ६) इति ॥

तां सु ते कीर्तिं मघवन्महित्वा यत्त्वा भीते रोदसी अह्वयेताम् ।
प्रावो देवाँ आतिरो दासमोजः प्रजायै त्वस्यै यदशिक्ष इन्द्र ॥ १ ॥

ताम् । सु । ते । कीर्तिम् । मघऽवन् । महिऽत्वा । यत् । त्वा । भीते इति । रोदसी इति । अह्वयेताम् ।
प्र । आवः । देवान् । आ । अतिरः । दासम् । ओजः ।
प्रऽजायै । त्वस्यै । यत् । अशिक्षः । इन्द्र ॥ १ ॥

हे vइन्द्र vमघवन् धनवन् vते तव संबन्धिनीं vमहित्वा महत्त्वेनागतां vकीर्तिं vसु सुष्ठु कीर्तयामीति शेषः । किंच vयत् यदा vत्वा त्वां प्रति vभीते असुरैर्भयं प्राप्ते vरोदसी द्यावापृथिव्यौ vअह्वयेतां अवेत्यब्रूतां[6] तदानीं vदेवान् vप्रावः प्रारक्षः । तथा vदासं देवानामुपक्षपकर्तारमसुरम् vआतिरः व्यनाशयः । असुरान् हत्वा देवानां रक्षणेन द्यावापृथिव्योः भीतिं[7] पर्यहर इति यदस्ति किंच vत्वस्यै एकस्यै vप्रजायै यजमानरूपायै vयत्[8] बलम्[8] vअशिक्षः प्रायच्छः । तां कीर्तिं कीर्तयामीत्यर्थः॥

यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु ।
मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से ॥ २ ॥

यत् । अचरः । तन्वा । ववृधानः । बलानि । इन्द्र । प्रऽब्रुवाणः । जनेषु ।
माया । इत् । सा । ते । यानि । युद्धानि । आहुः । न । अद्य । शत्रुम् । ननु । पुरा । विवित्से॥२॥

हे vइन्द्र vतन्वा शरीरेण स्तोत्रेण वा vवावृधानः वर्धमानः vजनेषु प्राणिषु vबलानि vप्रब्रुवाणः वृत्रवधादिरूपाणि सामर्थ्यानि प्रकर्षेण कथयन् vअचरः इति vयत् संचारं कृतवानिति यदस्ति vते तव vसा गतिः vमायेत् मायैव । मृषेत्यर्थः[9] । किंच vयानि vयुद्धानि शत्रुविषयाणि vआहुः ब्रुवते

१. ग-त-तेमी मरुतो । २. ग-त-भ२–' अपीच्येन ' नास्ति । ३. त-भ४.५.६.८–यद्वा अपि च । ४. त१.३.७-मु–सर्वेष्वप्यहःसु । ५. त१.२.३.७–सुमनाः सममाना । ६. ग-त४.५–रशेत्यब्रूतां; त१.२.३.८-भ२.४.६.८–अहेत्यब्रूतां । ७. त१.२.३.७-मु–भारं । ८. त१.२.७-भ–तद्बलं; त३–तद्धनं । ९. त-मु–वृथेत्यर्थः ।

पुराविद्[1] ऋषयः तान्यपि मायैव। कुत इति आह। vअद्य इदानीं vशत्रुं हन्तव्यं vन vविवित्से न लभसे। अद्य मा भूत् पूर्वं हतवानस्मीति यत्[2] ब्रूषे तदपि नेत्याह। vननु इति प्रश्ने। किं vपुरा शत्रुमलभथाः। तदपि नेत्यर्थः॥

क उ नु ते महिमनः समस्यास्मत्पूर्व ऋषयोऽन्तमापुः।
यन्मातरं च पितरं च साकमजनयथास्तन्वः स्वायाः॥ ३॥

के। ऊँ इति। नु। ते। महिमनः। समस्य। अस्मत्। पूर्वे। ऋषयः। अन्तम्। आपुः। यत्। मातरम्। च। पितरम्। च। साकम्। अजनयथाः। तन्वः। स्वायाः॥ ३॥

हे इन्द्र vते तव vमहिमनः महिम्नः vसमस्य सर्वस्यापि vअन्तं पारम् vअस्मत्[3] अस्मत्तः vपूर्वे vऋषयः[4] vके[4] vआपुः प्राप्नुवन्। न केऽपीत्यर्थः। यद्यपि महत्त्वं प्रख्यापयन्ति तथापि न कात्स्न्र्येनेति। तत्र कारणमाह। vयत् यस्मात् vमातरं vच vपितरं vच। 'द्यौः पिता पृथिवी माता' (तै. ब्रा. ३.७.५.४-५) इति हि श्रुतम्। अतो द्यावापृथिव्यावित्यर्थः। ते उभे अपि vसाकं सहैव vस्वायाः vतन्वः स्वकीयाच्छरीरात् vअजनयथाः उदपादयः। अतो नापुरिति संबन्धः॥

चत्वारि ते असुर्याणि नामादाभ्यानि महिषस्य सन्ति।
त्वमङ्ग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ॥ ४॥

चत्वारि। ते। असुर्याणि। नाम। अदाभ्यानि। महिषस्य। सन्ति। त्वम्। अङ्ग। तानि। विश्वानि। वित्से। येभिः। कर्माणि। मघऽवन्। चकर्थ॥ ४॥

हे इन्द्र vमहिषस्य महतः पूज्यस्य vते तव vचत्वारि vअसुर्याणि असुरविघातीनि vअदाभ्यानि अन्यैरहिंस्यानि उत्तरसूक्त उपान्त्यवर्जिते 'दूरे तन्नाम' इत्यादिषु प्रतिपादितानि यानि vनाम नामकानि शरीराणि vसन्ति vअङ्ग सखे vत्वं vतानि vविश्वानि सर्वाणि vवित्से वेत्सि जानासि। vयेभिः यैः नामभिः vकर्माणि वृत्रवधादिरूपाणि vचकर्थ कुरुषे हे vमघवन् तानि वेत्सीति॥

त्वं विश्वा दधिषे केवलानि यान्यावियां च गुहा वसूनि।
काममिन्मे मघवन्मा वि तारीस्त्वमाज्ञाता त्वमिन्द्रासि दाता॥ ५॥

त्वम्। विश्वा। दधिषे। केवलानि। यानि। आविः। या। च। गुहा। वसूनि। कामम्। इत्। मे। मघऽवन्। मा। वि। तारीः। त्वम्। आऽज्ञाता। त्वम्। इन्द्र। असि। दाता॥ ५॥

हे इन्द्र vत्वं vविश्वा सर्वाणि vकेवलानि अन्येषामसाधारणानि vवसूनि धनानि vदधिषे धारयसि। विश्वानीत्युक्तं कथं विश्वत्वमित्यत आह। vयान्याविः आविर्भूतानि[5] सर्वैः प्रसिद्धानि वसूनि वासयोग्यानि[6] धनानि सन्ति vया vच vगुहा गुहायां निगूढे प्रदेशे वर्तमानानि वसूनि

---

१. त१.२.६.७.८-भ-मु-पुराणविदः। २. त-भ-मु-'यत्' नास्ति। ३. ग-अस्मदु। ४. ग२-भ१.२.४.६-के ऋषयः; ग४-त-भ७-ऋषयः। ५. त२.६.७.८-भ२.५.६-आविर्भूतानि तानि। ६. ग-त-मु-निवास°।

सन्ति तानि विश्वानि वधिव इति। यस्मादेवं तस्मात् ᵛमे मम ᵛकामं काङ्क्षितं हे ᵛमघवन् धनवन्निन्द्र ᵛमा ᵛवि ᵛतारीः मा हिंसीः। ᵛइत् इति पूरणः। वर्धयेति शेषः। हे ᵛइन्द्र ᵛत्वमाज्ञाता ᵛअसि प्रापयितासि[1] अभिलषितं धनम्। तथा हे इन्द्र ᵛत्वं ᵛदाता असि॥

यो अदधाज्ज्योतिषि ज्योतिरन्तर्यो असृजन्मधुना सं मधूनि।
अर्ध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि॥ ६॥

यः। अदधात्। ज्योतिषि। ज्योतिः। अन्तः। यः। असृजत्। मधुना। सम्। मधूनि। अर्ध। प्रियम्। शूषम्। इन्द्राय। मन्म। ब्रह्मऽकृतः। बृहत्ऽउक्थात्। अवाचि॥ ६॥

ᵛयः इन्द्रः ᵛज्योतिषि द्योतमाने आदित्यादिके तेजसि ᵛअन्तः ᵛज्योतिः तेजः ᵛअदधात् धारितवान्। यदादित्याग्न्यादिषु तेजोऽस्ति तदिन्द्रकृतमित्यर्थः। ᵛयः च ᵛमधुना मधुरेण रसेन[2] ᵛमधूनि सोमादिमधुरद्रव्याणि ᵛसम् ᵛअसृजत् समयोजयत्। यद्वा। मधुना। अत्र मधुशब्देन सर्वैः सेव्यमान आदित्य उच्यते। तेन सह मधूनि उदकानि समसृजत्। ᵛअध संप्रति तस्मै ᵛइन्द्राय ᵛप्रियं प्रीतिजनकं[3] ᵛशूषं बलं शत्रूणां शोषकत्वाद्बलकरं ᵛमन्म मननीयं स्तोत्रं ᵛब्रह्मकृतः मन्त्रकृतः ᵛबृहदुक्थात् प्रभूतशस्त्रयुक्तादेतन्नामकादृषेर्मत्तः ᵛअवाचि उक्तमभूत्॥ ॥ १५॥

'दूरे तत्' इत्यष्टर्चं त्रयोदशं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'दूरे' इत्यनुक्रान्तम्। गतः सूक्तविनियोगः॥

दूरे तन्नाम गुह्यं पराचैर्यत्त्वा भीते अह्वयेतां वयोधै।
उदस्तभ्नाः पृथिवीं द्यामभीके भ्रातुः पुत्रान्मघवन्तित्विषाणः॥ १॥

दूरे। तत्। नाम। गुह्यम्। पराचैः। यत्। त्वा। भीते इति। अह्वयेताम्। वयःऽधै। उत्। अस्तभ्नाः। पृथिवीम्। द्याम्। अभीके। भ्रातुः। पुत्रान्। मघऽवन्। तित्विषाणः॥ १॥

अनया 'चत्वारि ते असुर्याणि[4] नाम' इत्युक्तस्य आद्यं नाम स्तूयते। हे इन्द्र ᵛते तव ᵛतत् वक्ष्यमाणं ᵛनाम सर्वेषां नामकं शरीरं ᵛपराचैः पराङ्मुखैर्मनुष्यैः। मनुष्याणामित्यर्थः। ᵛगुह्यं गोपनीयमप्रकाशितं सत् ᵛदूरे इतो विप्रकृष्टे दूरदेशे वर्तत इति शेषः। ᵛयत् यदा ᵛत्वा त्वां ᵛरोदसी द्यावापृथिव्यौ ᵛभीते सती ᵛअह्वयेताम् अवेत्यब्रूताम्। किमर्थम्। ᵛवयोधै अन्नस्य निधानार्थम्। जगतोऽन्नस्य साधनायेत्यर्थः। तदानीं तेन शरीरेण ᵛअभीके। अन्तिकनामैतत्। तव समीप एव ᵛपृथिवीं ᵛद्यां च ᵛउत् ऊर्ध्वं परस्परवियुक्तं यथा भवति तथा ᵛअस्तभ्नाः स्तम्भितवानसि। किं कुर्वन्। हे ᵛमघवन् इन्द्र ᵛभ्रातुः पर्जन्यस्य ᵛपुत्रान् पुत्रस्थानीयानुदकसंस्थायान् ᵛतित्विषाणः दीपयन्[5]॥

महत्तन्नाम गुह्यं पुरुस्पृग्येन भूतं जनयो येन भव्यम्।
यदस्य प्रियं प्रियासः समविशन्त पश्व॥ २॥

---

१. त६.८-भ-नियमितासि। २. ग-त-मु-रसेन निमित्तेन। ३. ग-त-भ-मु-प्रियजनकं। ४. ग-त-भ-'असुर्याणि' नास्ति। ५. ग-त१.२.३.७-मु-दीपयन्निति (त७-भूवन्निति) विद्युद्रूपमिन्द्रमाह। विद्युदेवेंद्र (त१.२.७-मु-विद्युद्रूपेंद्र) इति च वाजसनेयकं। यद्वा पर्जन्यरूपमाह। तदानीं वायुरस्येंद्रस्य भ्रातावगंतव्यः।

महत्। तत्। नाम। गुह्यम्। पुरुऽस्पृक्। येन। भूतम्। जनयः। येन। भव्यम्। प्रत्नम्। जातम्। ज्योतिः। यत्। अस्य। प्रियम्। प्रियाः। सम्। अविशन्त। पञ्च ॥२॥

हे इन्द्र तव vतत् vगुह्यं गोपनीयमन्यैरविज्ञातं vपुरुस्पृक् बहुभिर्वृष्टयर्थिभिः स्पृहणीयमाकाशात्मकं vनाम शरीरं vमहत् अत्यन्तं प्रवृद्धं vयेन नाम्ना vभूतं vभव्यं च पूर्वं vजनयः उत्पादितवानसि। भूतभव्योभयान्वयाय येनेत्यस्यावृत्तिः[1] स्यात्। आकाशात्मकाद्धि परमेश्वरस्वरूपात् भूतभव्यात्मकं जगदुत्पद्यते। 'आकाशाद्वायुः' (तै. आ. ८. १) इत्यादिश्रुतेः। किंच vप्रत्नं पुराणं पूर्वकालीनं vयत् vज्योतिः द्योतमानमादित्याख्यमुदकाख्यं वा vअस्य इन्द्रस्य vप्रियं प्रियभूतं तत्त्वं vजातम् उत्पन्नं[2] vप्रियाः प्रीयमाणाः vपञ्च। पञ्च जना इति शेषः। भीमसेनो भीम इतिवदेकदेशलक्षणा। निषादपञ्चमाश्चत्वारो वर्णाः vसमविशन्त संविशन्ते। स्वनिर्वाहार्थं भजन्त इत्यर्थः ॥

आ रोदसी अपृणादोत मध्यं पञ्च देवाँ ऋतुशः सप्तसप्त।
चतुस्त्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन ॥ ३ ॥

आ। रोदसी इति। अपृणात्। आ। उत। मध्यम्। पञ्च। देवान्। ऋतुऽशः। सप्तऽसप्त। चतुःऽत्रिंशता। पुरुधा। वि। चष्टे। सऽरूपेण। ज्योतिषा। विऽव्रतेन ॥ ३ ॥

अयमिन्द्र आत्मीयेन शरीरेण तेजसा वा vरोदसी द्यावापृथिव्यौ vआ सर्वतः vअपृणात् पूरयति। vउत अपि च vमध्यं सुभूम्यपेक्षया मध्यभूतमन्तरिक्षमापृणादिति[3] वर्तते। तदपि स्वशरीरेण तेजसा वा पूरयति। किंच vपञ्च vदेवान् देवमनुष्यपित्रसुररक्षःसंज्ञकान् तथा[4] vसप्तसप्त। द्विरुक्त्या सप्तसंख्याकानि तत्त्वानि लोके यानि सन्ति तानि परिगृह्यन्ते। कानि तानीति। सप्त मरुद्गणान् सप्तादित्यरश्मीन् सप्तचेन्द्रियाणि सप्त लोकानन्यानपि सप्तसंख्योपेतान् vऋतुशः काले काले vचतुस्त्रिंशता चतुस्त्रिंशत्संख्याकेन[5] देवगणेन[5] सह vपुरुधा बहुप्रकारं vवि vचष्टे विपश्यति सर्वदेक्षते। अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च विराट् चेति चतुस्त्रिंशत्त्वं देवानाम्। केनेति तदुच्यते। vसरूपेण समानरूपेण vज्योतिषा प्रकाशकेन vविव्रतेन विविधेन कर्मणा ॥

यदुष औच्छः प्रथमा विभानामजनयो येन पुष्टस्य पुष्टम्।
यत्ते जामित्वमवरं परस्या महन्महत्या असुरत्वमेकम् ॥ ४ ॥

यत्। उषः। औच्छः। प्रथमा। विऽभानाम्। अजनयः। येन। पुष्टस्य। पुष्टम्।
यत्। ते। जामिऽत्वम्। अवरम्। परस्याः। महत्। महत्याः। असुरऽत्वम्। एकम् ॥४॥

अत्र प्रसङ्गात्सूर्यात्मकेन्द्रसंबन्धिन्युषाः स्तूयते। हे vउषः उषोदेवते vविभानां विभासकानां ग्रहनक्षत्रादीनां vप्रथमा प्रथमभूता सती vऔच्छः विभासनमकरोः[6]। अग्रे ह्युषसः प्रादुर्भवन्ति पश्चादन्यानि तेजांसि। vयेन च तेजसा vपुष्टस्य पोषयुक्तस्यापि पदार्थस्य vपुष्टम् अतिशयेन पोषयुक्तमादित्यम् vअजनयः उदपादयः। vयत् यच्च vते तव vजामित्वं बान्धवम् vअवरम् अवाङ्मुखम्। अस्मदभिमुखमित्यर्थः। कीदृश्यास्तवेति उच्यते। vपरस्याः। उपरि स्थिताया इत्यर्थः।

---

१. त६.८-भ-येनेत्यर्थस्यावृत्तिः। २. ग-त-भ२.५.६.८-उत्पन्नं तत्त्वं; मु-उत्पन्नं तत् तत्त्वं। ३. ग-त-भ-मु-मध्यमभूत°। ४. त-भ१.२.४.६.८-ते तथा। ५. त-भ-मु-°संख्याकदेवगणेन। ६. ग-विभानमकरोः; त-मु-विभातमकरोः।

ऋ. ४-३०

तदिदं ᵛमहत्याः तव ᵛमहत् अतिप्रवृद्धम् ᵛएकम् असाधारणमेकमेव वा ᵛअसुरत्वं प्रकृष्टबलवत्त्वम्। तव बलेन कृतमित्यर्थः ॥

महाव्रते निष्केवल्ये 'विधुं दद्राणम्' इत्येषा। सूत्रितं च—'आ याह्यर्वाङुप वन्धुरेष्टा विधुं दद्राणम्' (ऐ. आ. ५. ३. १) इति ॥

विधुं दद्राणं समने बहूनां युवानं सन्तं पलितो जगार।
देवस्य पश्य काव्यं महित्वाद्या ममार स ह्यः समान ॥ ५ ॥

विऽधुम्। दद्राणम्। समने। बहूनाम्। युवानम्। सन्तम्। पलितः। जगार।
देवस्य। पश्य। काव्यम्। महिऽत्वा। अद्य। ममार। सः। ह्यः। सम्। आन ॥ ५ ॥

अनया कालात्मक इन्द्रः स्तूयते। ᵛविधुं विधातारं सर्वस्य युद्धादेः कर्तारम्। विपूर्वो[1] दधातिः[1] करोत्यर्थे। तथा ᵛसमने। अननमनः प्राणनम्। सम्यगाननोपेते संग्रामे ᵛबहूनां शत्रूणां ᵛदद्राणं द्रावकं ईदृक्सामर्थ्योपेतं ᵛयुवानं ᵛसन्तं पुरुषं ᵛपलितः जरा[2] ᵛजगार निगिरतीन्द्राज्ञया। एवमुक्तलक्षणं वक्ष्यमाणलक्षणं च ᵛदेवस्य कालात्मकस्येन्द्रस्य ᵛमहित्वा महत्त्वेनोपेतं ᵛकाव्यं सामर्थ्यं ᵛपश्य पश्यत हे जनाः। तथा जरसा ग्रासः ᵛअद्य ᵛममार म्रियते। ᵛस ᵛह्यः परेद्युः ᵛसमान सम्यक् चेष्टते। पुनर्जन्मान्तरे प्रादुर्भवतीत्यर्थः। तदेवं चत्वारि नामानि शरीराण्युक्तानि ॥ ॥ १६ ॥

शाकमना शाको अरुणः सुपर्ण आ यो महः शूरः सनादनीळः।
यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ॥ ६ ॥

शाकमना। शाकः। अरुणः। सुऽपर्णः। आ। यः। महः। शूरः। सनात्। अनीळः।
यत्। चिकेत। सत्यम्। इत्। तत्। न। मोघम्। वसु। स्पार्हम्। उत। जेता। उत। दाता ॥६॥

ᵛशाकमना। शाकमेव शाकम। शाकमना बलेन ᵛशाकः शक्तः। 'शक्लृ[3] शक्तौ[3]'। स्वशक्त्यैव सर्वं कर्तुं शक्तः इत्यर्थः। न हीन्द्रस्य सहायान्तरापेक्षास्तीन्द्रस्वादेव। ᵛअरुणः अरुणवर्णः ᵛसुपर्णः कश्चिच्छोभनपर्णः पक्षी ᵛआ गच्छतीत्यध्याहारः। उपसर्गश्रुतेर्योग्यक्रियाध्याहारः। ᵛयः ᵛमहः महान् ᵛशूरः विक्रान्तः ᵛसनात् पुराणः ᵛअनीळः अनीडो नीडस्याकर्ता। नहीन्द्रोऽग्निवत् कुत्रचिदपि यज्ञे निकेतनं करोति। एवं सुपर्णरूपकेणेन्द्रमाह। स पक्षीन्द्रः ᵛयच्चिकेत कर्तव्यत्वेन जानाति ᵛतत् ᵛसत्यमित् सत्यमेव ᵛन तु ᵛमोघं व्यर्थं भवति। सः ᵛस्पार्हं स्पृहणीयं ᵛवसु ᵛउत[4] ᵛजेता जयति शत्रुभ्यः सकाशात् ᵛउत अपि[5] ᵛदाता प्रयच्छति च स्तोतृभ्यः। 'न लोकाव्यय०' इत्यादिना षष्ठीप्रतिषेधः ॥

ऐभिर्ददे वृष्ण्या पौंस्यानि येभिरौक्षद्वृत्रहत्याय वज्री।
ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजायन्त देवाः ॥ ७ ॥

आ। एभिः। ददे। वृष्ण्या। पौंस्यानि। येभिः। औक्षत्। वृत्रऽहत्याय। वज्री।
ये। कर्मणः। क्रियमाणस्य। मह्ना। ऋतेऽकर्मम्। उत्ऽअजायन्त। देवाः ॥ ७ ॥

१. भ-विदधातिः। २. ग-भ-'जरा' नास्ति। ३. त-भ-मु-'शक्लृ शक्तौ' नास्ति। ४. ग-त-भ-'उत' नास्ति। ५. ग-त-भ-मु-अपि च।

इन्द्रः [v]एभिः मरुद्भिः सह वृष्ण्यानि[1] वर्षकाणि [v]पौंस्यानि बलानि [v]आ [v]ददे आदत्ते। [v]एभिः मरुद्भिः सहितः [v]वृत्रहत्याय। प्राण्युपकारकवृष्टयावरकत्वाद्वृत्रः पापम्। तस्य हत्याय। मनुष्याणामुपद्रवशमनायेत्यर्थः। तदर्थं [v]वज्री वज्रवानिन्द्रः [v]औक्षत् वर्षति। [v]ये च मरुतः [v]देवाः [v]महा महतेन्द्रेण[2] [v]क्रियमाणस्य [v]कर्मणः वृष्टिप्रदानलक्षणस्य साहाय्यार्थम् [v]ऋतेकर्मम् ऋतकर्म वृष्टिप्रदानकर्म प्रति [v]उदजायन्त उन्मुखा जायन्ते स्वयमेव तैरेभिर्वेद इति समन्वयः ॥

युजा कर्माणि जनयन्विश्वौजा अशस्तिहा विश्वमनास्तुराषाट्।
पीत्वी सोमस्य दिव आ वृधानः शूरो निर्युधाधमद्दस्यून् ॥ ८ ॥

युजा। कर्माणि। जनयन्। विश्वऽओजाः। अशस्तिऽहा। विश्वऽमनाः। तुराषाट्।
पीत्वी। सोमस्य। दिवः। आ। वृधानः। शूरः। निः। युधा। अधमत्। दस्यून् ॥ ८ ॥

स इन्द्रः [v]युजा मरुतां साहाय्येन [v]कर्माणि प्रवर्षणादीनि [v]जनयन् उत्पादयन् [v]विश्वौजाः व्यासबलः [v]अशस्तिहा रक्षोहा [v]विश्वमनाः व्यासमनाः अत्यन्तं मनस्वी [v]तुराषाट् तूर्णमभिभविता शत्रूणाम्। एवंमहानुभाव इन्द्रः [v]सोमस्य सोमं [v]पीत्वी पीत्वा [v]दिवः द्युलोकादागत्य सोमं पीत्वा [v]वृधानः वर्धमानः [v]शूरः सन् [v]युधा आयुधेन प्रहारेण वा [v]दस्यून् शत्रून् [v]निः [v]अधमत् निर्धमति। युद्धेनासुरानपबाधत इत्यर्थः ॥ ॥ १७ ॥

'इदं ते' इति सप्तर्चं चतुर्दशं सूक्तम्। वामदेवपुत्रो बृहदुक्थ ऋषिः। चतुर्थीपञ्चमीषष्ठ्यो जगत्यः। आदितस्तिस्रः सप्तमी च त्रिष्टुभः। विश्वे देवा देवता। तथा चानुक्रान्तम्—'इदं ते सप्त वैश्वदेवं तु[3] चतुर्थ्याद्यास्तिस्रो जगत्यः' इति। गतः सूक्तविनियोगः। आहवनीये वाय्वादिकारणेनायतनान्निष्क्रम्य शम्यापरासादर्वाचीने देशे दीप्यमाने सति तमग्निमनया पुनरायतने संवपेत्। सूत्रितं च—'आहवनीयमवदीप्यमानमर्वाक् शम्यापरासादिदं त एकं पर ऊ त एकमिति संवपेत्' (आश्व. श्रौ. ३. १०) इति ॥

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा सं विशस्व।
संवेशने तन्वश्चारुरेधि प्रियो देवानां परमे जनित्रे ॥ १ ॥

इदम्। ते। एकम्। परः। ऊँ इति। ते। एकम्। तृतीयेन। ज्योतिषा। सम्। विशस्व।
सम्ऽवेशने। तन्वः। चारुः। एधि। प्रियः। देवानाम्। परमे। जनित्रे ॥ १ ॥

एतदादिभिर्बृहदुक्थो वाजिनं नाम स्वपुत्रं मृतं वदति। हे मृत पुत्र [v]ते तव [v]इदम्। उपरि[4] ज्योतिषेति वक्ष्यमाणत्वादत्रेदंशब्देन ज्योतिरभिधीयते। इदं ज्योतिरख्याख्यम् [v]एकम् एकोंऽशः। अतस्तमग्निं तव देहगताक्ष्यंशेन बाह्यमग्निं [v]सं [v]विशस्व संगच्छस्व। तथा [v]पर [v]उ अन्योऽपि [v]ते तव [v]एकं वाय्वाख्योंऽशः ते तव प्राणवायवाख्येनांशेन सं विशस्व। शरीराग्निप्राणवाय्वोर्बाह्याग्निवाय्वोरैक्यवादंशत्वमिति भावः। तथा [v]तृतीयेन [v]ज्योतिषा आदित्याख्येन तेजसा तवात्मना सं विशस्व। सूर्यगतात्मचैतन्यदेहगतात्मचैतन्ययोरभेदादंशत्वम्। तदुक्तं 'योऽहं सोऽसौ योऽसौ सोऽहं' 'सूर्य आत्मा जगतस्तस्थुषश्च' (ऋ. सं. १.११५.१) इति श्रुतेरात्मनः सूर्यप्रवेशो युक्तः। [v]तन्वः तन्वाः[5] [v]संवेशने

---

१. ग-त२.३.७-मु-वृष्ण्या वृष्ण्यानि। २. ग-त१.२.३.६.७.८-भ-महता तेंद्रेण। ३. त-'तु' नास्ति। ४. त-भ-परि। ५. त२.३-भ-'तत्' नास्ति। ६. ग-भ-'तन्वाः' नास्ति।

तस्मिन्सूर्ये संविश्व ᵛवाश्वेधि कल्याणो भव । कीदृशस्त्वम् । ᵛप्रियः तेन सह प्रीयमाणः । कीदृशे तस्मिन् । ᵛदेवानां ᵛपरमे उत्तमे ᵛजनित्रे जनके । ' देवानां ह्येतत्परमं जनित्रं यत्सूर्यः ' इति हि श्रुतिः ॥

तनूष्टे वाजिन्तन्वं१ नयन्ती वाममस्मभ्यं धातु शर्म तुभ्यम् ।
अहुतो महो धरुणाय देवान्दिवीव ज्योतिः स्वमा मिमीयाः ॥ २ ॥

तनूः । ते । वाजिन् । तन्वम् । नयन्ती । वामम् । अस्मभ्यम् । धातु । शर्म । तुभ्यम् ।
अहुतः । महः । धरुणाय । देवान् । दिविऽइव । ज्योतिः । स्वम् । आ । मिमीयाः ॥ २ ॥

हे ᵛवाजिन् एतन्नामक पुत्र ᵛते तव ᵛतन्वं शरीरं ᵛनयन्ती स्वशरीरं प्रापयन्ती ᵛतनूः इयं पृथिवी । उभयोरपि पार्थिवत्वात्तव शरीरस्य पृथिवीप्राप्तौ सत्यां तस्यास्तव शरीरनयनं युक्तम् । तादृशी पृथिवी ᵛवामं वननीयं धनम् ᵛअस्मभ्यं ᵛधातु दधातु ᵛशर्म च सुखं ᵛतुभ्यं धातु दधातु । स त्वम् ᵛअहुतः अनवपतितः सन् ᵛमहः महतः ᵛदेवान् तव कारणभूतान् ᵛदिवीव ᵛज्योतिः द्युलोके वर्तमानं सूर्यं च । इवशब्दश्चार्थे निपातानामनेकार्थत्वात् । तं च ᵛस्वं तव स्वभूतम् ᵛआ ᵛमिमीयाः आविश ॥

वाज्यसि वाजिनेना सुवेनीः सुवितः स्तोमं सुवितो दिवं गाः ।
सुवितो धर्म प्रथमानु सत्या सुवितो देवान्त्सुवितोऽनु पत्म ॥ ३ ॥

वाजी । असि । वाजिनेन । सुऽवेनीः । सुवितः । स्तोमम् । सुवितः । दिवम् । गाः ।
सुवितः । धर्म । प्रथमा । अनु । सत्या । सुवितः । देवान् । सुवितः । अनु । पत्म ॥ ३ ॥

हे पुत्र त्वं ᵛवाजिनेन अन्नरसेन बलेन वा ᵛवाज्यसि तद्वान् भवसि । कीदृशस्त्वम् । ᵛसुवेनीः सुष्ठु कान्तः । वी गत्यादिषु । तादृशस्त्वं ᵛसुवितः सुष्ठु प्रेरितस्त्वं ᵛस्तोमं पूर्वं त्वया कृतं स्तोत्रं तदभिमानिदेवम् ᵛअनु ᵛगाः अन्वगाः अनुगच्छ[1] । तथा ᵛसुवितो ᵛदिवं गाः । तथा ᵛसुवितो ᵛधर्म त्वया संपादितानि धर्माण्यनुगच्छ[2] । कीदृशानि । ᵛप्रथमा मुख्यानि ᵛसत्या सत्यफलानि । तथा ᵛसुवितो ᵛदेवान् इन्द्रादीन् । तथा ᵛसुवितः ᵛपत्म पतज्ज्योतिरादित्याख्यम् ᵛअनु गाः ॥

महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुम् ।
समविव्यचुरुत यान्यत्विषुरेषां तनूषु नि विविशुः पुनः ॥ ४ ॥

महिम्नः । एषाम् । पितरः । चन । ईशिरे । देवाः । देवेषु । अदधुः । अपि । क्रतुम् ।
सम् । अविव्यचुः । उत । यानि । अत्विषुः ।
आ । एषाम् । तनूषु । नि । विविशुः । पुनरिति ॥ ४ ॥

ᵛपितरश्चन अस्मत्पितरोऽप्यङ्गिरसः ᵛएषां देवानां ᵛमहिम्नः महत्त्वस्य ᵛईशिरे ईश्वरा अभवन् । ते ᵛदेवाः ᵛअपि देवत्वं प्राप्ता अङ्गिरसः ᵛदेवेषु इन्द्रादिषु ᵛक्रतुं संकल्पम् ᵛअदधुः धृतवन्तः । ᵛउत अपि च ᵛयानि तेजांसि ᵛअत्विषुः दीप्यन्ते तानि ᵛसमविव्यचुः संगता आसन् । ᵛएषां देवानां ᵛतनूषु शरीरेषु[3] ᵛनि ᵛविविशुः निविशन्ति पितरोऽङ्गिरसः । अतस्त्वमपि तथा कुर्वित्यर्थः ॥

---

१. त-म-मु-गच्छ । २. त-म-°गच्छन् । ३. ग-त४.५-मु-शरीरेषु पुनः; त३.७-शरीरेषु न ।

सहोभिर्विश्वं परि चक्रमू रजः पूर्वा धामान्यमिता मिमानाः ।
तनूषु विश्वा भुवना नि येमिरे प्रासारयन्त पुरुध प्रजा अनु ॥ ५ ॥

सहः ऽभिः । विश्वम् । परि । चक्रमुः । रजः । पूर्वा । धामानि । अमिता । मिमानाः ।
तनूषु । विश्वा । भुवना । नि । येमिरे । प्र । असारयन्त । पुरुध । प्रऽजाः । अनु ॥ ५ ॥

मदीयाः पितरः vसहोभिः बलैः स्वीयैः vविश्वं सर्वं vरजः लोकम् । 'लोका रजांस्युच्यन्ते' इति निरुक्तम् । vपूर्वा पूर्वाणि vधामानि स्थानानि vअमिता अन्यैरमितानि vमिमानाः परिच्छिन्दन्तः vपरि vचक्रमुः पर्यक्रामन् । किंच तथा कुर्वन्तः vविश्वा सर्वाणि vभुवना भूतजातानि vनि vयेमिरे नियमितवन्तः । किंच vपुरुध पुरुधा बहुप्रकारं vप्रजा vअनु ज्योतींष्युदकानि वा vप्रासारयन्त प्रसारितवन्तः । अस्मत्पितरः पूर्वेऽङ्गिरसः स्वसामर्थ्येन सर्वं लोकं व्याप्य पुरातनानि ग्रहनक्षत्रादीनि परिच्छिद्य सर्वभूतानि नियम्य प्रजा अनूदकानि तेजांसि वा प्रसारितवन्त इत्यर्थः । अतस्त्वमप्येवं कुर्विति भावः ॥

द्विधा सूनवोऽसुरं स्वर्विदमास्थापयन्त तृतीयेन कर्मणा ।
स्वां प्रजां पितरः पित्र्यं सह आवरेष्वदधुस्तन्तुमाततम् ॥ ६ ॥

द्विधा । सूनवः । असुरम् । स्वः ऽविदम् । आ । अस्थापयन्त । तृतीयेन । कर्मणा ।
स्वाम् । प्रऽजाम् । पितरः । पित्र्यम् । सहः । आ । अवरेषु । अदधुः । तन्तुम् । आऽततम् ॥ ६ ॥

vसूनवः आदित्यस्य पुत्रा देवा अङ्गिरसः । 'देवानां ह्येतत्परमं जनित्रं यत्सूर्यः' इति प्रदर्शितत्वादादित्यस्य[1] सूनव[1] इति गम्यते । vअसुरं बलवन्तं vस्वर्विदं सर्वज्ञं स्वर्गस्य लम्भकं वादित्यं vतृतीयेन vकर्मणा प्रजोत्पत्त्याख्येन । 'ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' (तै. सं. ६. ३. १०. ५) इति श्रुतेः प्रजोत्पादनस्य तृतीयकर्मत्वम् । तेन आदित्यं vद्विधा vआस्थापयन्त द्विप्रकारमास्थापयन्ति । उदितं चास्तमितं च कुर्वन्ति । 'उद्व्राभं च निव्राभं च ब्रह्म देवा अवीवृधन्' (तै. सं. १. १. १३. १) इति मन्त्रस्य ब्राह्मणे 'असौ वा आदित्य उद्यन्नुद्व्राभ एष निम्रोचन्निव्राभः' (तै. सं. ५. ४. ६. ६) इति श्रुतत्वाद्देवानामादित्यस्य द्विःस्थापनमुदयास्तमयकरणमिति गम्यते । किंच vपितरः मदीया अङ्गिरसः vस्वां vप्रजाम् । उत्पादयेति[2] शेषः । vपित्र्यं vसहः पितुरादित्यस्य संबन्धिनमपराभिभवक्षमं बलम् vअवरेषु vआ vदधुः निकृष्टेषु स्वप्रजाभूतेषु[3] मनुष्येषु स्थापितवन्तः । यथा पित्र्यं धनं सम्यक् परिरक्ष्य स्वपुत्रेभ्यः प्रयच्छन्ति तद्वत्पितुरादित्यस्य प्रकाशादिबलं मनुष्येषु न्यदधुरित्यर्थः । किंच vतन्तुं प्रजाम् vआततं विततं कृतवन्त इति शेषः । पुत्रपौत्रादिरूपेणानवच्छिन्नां प्रजामित्यर्थः । 'अथं ह्याततन्तुर्यत्प्रजाः' इति ब्राह्मणं 'प्रजातन्तुं मा व्यवच्छेत्सीः' (तै. आ. ७. ११. १) इति च । 'तन्तुं तन्वन्' (ऋ. सं. १०. ५३. ६) इत्यस्य ब्राह्मणं 'प्रजा वै तन्तुः' (ऐ. ब्रा. ३. ३८) इति ॥

नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा ।
स्वां प्रजां बृहदुक्थो महित्वावरेष्वदधादा परेषु ॥ ७ ॥

---

१. त१.२.३.६.७.८-भ-मु-°दादित्यसूनव । २. त१.२.३.७-भ४.६.८-उत्पादयेति । ३. त-भ-स्वप्रजाभूतासु ।

नावा । न । क्षोदः । प्रऽदिशः । पृथिव्याः । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा ।
स्वाम् । प्रऽजाम् । बृहत्ऽउक्थः । महिऽत्वा । आ । अवरेषु । अदधात् । आ । परेषु ॥ ७ ॥

vनावा vन उदकोत्तरणसाधनेनेव vक्षोदः उदकं यथा मनुष्या नावोदकमतितरन्ति यथा वा vस्वस्तिभिः क्षेमैः vविश्वा सर्वाणि vदुर्गाणि दुःखेन गन्तव्यान्यतितरन्ति तद्वत् vबृहदुक्थः vस्वां vप्रजां वाजिनं सुतं पुत्रं vमहित्वा स्वमहत्त्वेन vअवरेषु अन्यादिषु vआ vअदधात् कृतवान् । तदा vपरेषु दिव्येषु सूर्यादिष्वादधात् । एवमृषिर्भूते स्वयमेव वा स्वात्मानं परोक्षेणाह ॥ ॥ १८ ॥

' मा प्र गाम ' इति षड्चं पञ्चदशं सूक्तं गायत्रं वैश्वदेवम् । ऐक्ष्वाकोऽसमातिर्नाम राजा । तस्य बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुश्चेति चत्वारः पुरोहिता आसन् । ते च गौपायनाः । स च राजा तांस्त्यक्त्वान्यौ मायाविनावृषी पुरोहितत्वेनावृणीत । ततो बन्ध्वादयः क्रुद्धाः सन्त इमं राजानमभिचरितवन्तः । एतज्ज्ञात्वा मायाविनौ पुरोहितावेषामन्यतमं सुबन्धुं प्राणैर्वियोजितवन्तौ । मृतस्यास्य भ्रातरो बन्धुः श्रुतबन्धुर्विप्रबन्धुरित्येतेऽविनाशप्राप्तिहेतुभूतमिदं[1] दृष्ट्वा जपन्ति स्म । अतस्तेऽस्य सूक्तस्यर्षयः । प्रतिपाद्यत्वादावर्तमानं मनो देवता । तथा चानुक्रान्तम्—' अथ ऐक्ष्वाको राजासमातिर्गौपायनान्बन्ध्वादीन्पुरोहितांस्त्यक्त्वान्यौ मायाविनौ श्रेष्ठतमौ मत्वा पुरोदधे । तमितरे क्रुद्धा अभिचेरुः । अथ तौ मायाविनौ सुबन्धोः प्राणानाचिक्षिपतुरथ हास्य भ्रातरऋषयः । मा प्र गामेति षट्कं गायत्रं स्वस्त्ययनं जप्त्वा ' इति । अग्निसमीपादेशान्तरगमनसमय इदं सूक्तं जप्यम् । सूत्रितं च—' प्रव्रजेदनपेक्षमाणो मा प्र गामेति सूक्तं जपन् ' (आश्व. श्रौ. २. ५) इति । महापितृयज्ञेऽप्येतदस्विष्टिभर्जप्यम् । सूत्रितं च—' मा प्र गामाग्ने त्वं न इति जपन्तः ' (आश्व. श्रौ. २. १९) इति । निविदः स्थानातिपत्तौ विदं सूक्तं शस्त्वा सूक्तान्तरे निवित्प्रक्षेप्स्यन्वा । सूत्रितं च—' स्थानं चेन्निविदोऽतिहरेन्मा प्र गामेति पुरस्तात्सूक्तं शस्त्वा ' (आश्व. श्रौ. ६. ६) इति ॥

मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः । मान्तः स्थुर्नो अरातयः ॥ १ ॥

मा । प्र । गाम । पथः । वयम् । मा । यज्ञात् । इन्द्र । सोमिनः ।
मा । अन्तरिति । स्थुः । नः । अरातयः ॥ १ ॥

अत्रोक्ताख्याने शाट्यायनकम्—' असमातिं राथप्रौष्ठं गौपायना अभ्यगमंस्ते खाण्डवे सत्रमासताथ हासमातौ राथप्रौष्ठे किलाताकुली ऊषतुरसुरमायौ तं ह स्नानग्नौ निधायौदनं पचतोऽग्नौ मांसमथासुरास्त्रं दग्ध्वेदमब्रुवाकवः परावभूवुः । तमसमातिं राथप्रौष्ठं गौपायनानामाहुतयोऽभ्यतपन् सोऽब्रवीदिमौ किलाताकुली इमा वै मा गौपायनानामाहुतयोऽभितपन्तीति तावब्रूतां तस्य वा आवामेव भिषजौ स्व आवां प्रायश्चित्तिरावां तथा करिष्यावो यथा स्वेता नाभितपन्तीति । तौ परेत्य सुबन्धोर्गौपायनस्य स्वपतः प्रमत्तस्यासुमाहुस्यान्तःपरिधि न्यधत्ताम् ' इत्यादि । तं सुबन्धोरसुमादातुं खाण्डवादसमातिं प्रतिगच्छन्तो गौपायना वदन्ति । हे vइन्द्र vवयं गौपायनाः vपथः समीचीनान्मार्गात् vमा vप्र vगाम मा परागच्छाम । असमातिगृहमेव गच्छाम । vमा च vसोमिनः असमातेः vयज्ञात् मा प्र गाम । vमा vस्थुः मा तिष्ठन्तु vनः अस्माकम् vअन्तः मार्गमध्ये vअरातयः शत्रवः । यद्वा । सोमिनः सोमवतो यागान्मा प्र गाम ॥

यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः । तमाहुतं नशीमहि ॥ २ ॥

यः । यज्ञस्य । प्रऽसाधनः । तन्तुः । देवेषु । आऽततः । तम् । आऽहुतम् । नशीमहि ॥२॥

---

१. त६-अ-°भूतमिमं ।

vयः अयमग्न्याख्यः vतन्तुः आहवनीयादिरूपेण विस्तृतः vयज्ञस्य vप्रसाधनः प्रकर्षेण साधयिता vदेवेष्वाततः देवैः स्तोतृभिर्ऋत्विग्भिर्विस्तारितो वर्तते वेद्यां vतमाहुतं सर्वतो हूयमानं vनशीमहि प्राप्नुयाम । नशतिर्व्याप्तिकर्मा ॥

पिण्डपितृयज्ञे 'मनो न्वा हुवामहे' इति तृचेन पिण्डाभिमानिनः पितर उपस्थेयाः । सूत्रितं च—'मनो न्वा हुवामह इति च तिसृभिरर्थैनान्प्रवाहयेत्' (आश्व. श्रौ. २. ७) इति ॥

मनो न्वा हुवामहे नाराशंसेन सोमेन । पितॄणां च मन्मभिः ॥ ३ ॥

मनः । नु । आ । हुवामहे । नाराशंसेन । सोमेन । पितॄणाम् । च । मन्मऽभिः ॥ ३ ॥

वयं बन्धुश्रुतबन्ध्वादयः vमनः सुबन्धोः संबन्धि मायाविभिरपहृतं vनु क्षिप्रम् vआ vहुवामहे आह्वयामहे । केन साधनेनेति तदुच्यते । vनाराशंसेन नराशंसचमसगतेन vसोमेन । नरैः शस्यन्त इति नराशंसाः पितरः । तेषां चमसानां कम्पनमेव होमः । तथाविधेन सोमेन vपितॄणाम् अङ्गिरसां vमन्मभिः vच मननीयैः स्तोत्रैश्च ॥

आ त एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे ॥ ४ ॥

आ । ते । एतु । मनः । पुनरिति । क्रत्वे । दक्षाय । जीवसे । ज्योक् । च । सूर्यम् । दृशे ॥४॥

हे सुबन्धो vते vमनः vपुनः vआ vएतु अभिचरतः सकाशात् पुनरागच्छतु । किमर्थमिति उच्यते । vक्रत्वे कर्मणे लौकिकवैदिकविषयाय vदक्षाय बलाय च । यद्वा । क्रत्वे अपानाय दक्षाय प्राणाय । 'प्राणो वै दक्षोऽपानः क्रतुः' इति हि श्रुतिः । vजीवसे जीवनाय च vज्योक् चिरकालं vसूर्यं vच vदृशे सूर्यं द्रष्टुम् । अत्यन्तं चिरजीवनायेत्यर्थः ॥

पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातं सचेमहि ॥ ५ ॥

पुनः । नः । पितरः । मनः । ददातु । दैव्यः । जनः । जीवम् । व्रातम् । सचेमहि ॥ ५ ॥

vनः अस्माकं vपितरः पितृभूता अङ्गिरसः vजनः । तेषां संघ इत्यर्थः । स च vजीवं vव्रातं प्राणादीन्द्रियसंघातं vपुनः vददातु । तथा vदैव्यो जनः । जनशब्दः संघवचनः । देवानां संघोऽपि जीवं व्रातं च ददातु । वयं च तदुभयं vसचेमहि प्राप्नुयाम[1] ॥

वयं सोम व्रते तव मनस्तनूषु बिभ्रतः । प्रजावन्तः सचेमहि ॥ ६ ॥

वयम् । सोम । व्रते । तव । मनः । तनूषु । बिभ्रतः । प्रजाऽवन्तः । सचेमहि ॥ ६ ॥

हे vसोम देव vवयं बन्ध्वादयः vतव vव्रते स्वर्दाये कर्मणि । व्रतमिति कर्मनाम । तव vतनूषु स्वदीयेष्वङ्गेषु च vमनः[2] vबिभ्रतः तात्पर्ययुक्तां बुद्धिं धारयन्तः vप्रजावन्तः प्रजाभिः पुत्रपौत्रादिभिर्युक्ताः सन्तः vसचेमहि संगच्छेमहि । जीवं व्रातं चेति शेषः ॥ ॥ १९ ॥

'यत्ते यमम्' इति द्वादशर्चं षोडशं सूक्तमानुष्टुभम् । बन्ध्वादय ऋषयः[3] सुबन्धुदेहास्निर्गतस्येन्द्रियवर्गसहितस्य मनसः पुनस्तस्मिन्प्रवेशनार्थमिदं सूक्तं दृष्ट्वाजपन्[4] । अतस्तेऽस्यर्षयः । प्रतिपाद्यस्यादावर्तमानं मन[5] एव[5] देवता । तथा चानुक्रान्तं—'यत्त इति द्वादशर्चमानुष्टुभं मनआवर्तनं जेयुः' इति । गतो विनियोगः ॥

---

१. ग-त१.२.३.४.५.७.८-म१.२.४.६.८–प्राप्नुमः; त६–प्राप्नुयाः; म७-मु–प्राप्नुयामः । २. त-म-मु–मनः मनो । ३. म–'ऋषयः' नास्ति । ४. म–दृष्ट्वा जपेत् । ५. त-म–मनो ।

यत्ते यमं वैवस्वतं मनो जगाम दूरकम् । तत्त आ वर्तयामसीह क्षयाय जीवसे ॥१॥

यत् । ते । यमम् । वैवस्वतम् । मनः । जगाम । दूरकम् ।

तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ १ ॥

पुरुषस्य म्रियमाणस्य मनो नाम महद्भूतं बहुधा विशीर्णं भवति[1]। तस्य पुनःसंभरण-मत्रोच्यते। हे म्रियमाण पुरुष vयत्[2] vते तव vमनः vवैवस्वतं विवस्वतः पुत्रं vयमं vदूरकम् अत्यन्तं दूरं यथा भवति तथा vजगाम vते तव vतत् मनः vआ vवर्तयामसि आवर्तयामः । किमर्थम्। vइह vक्षयाय इह लोके निवासाय vजीवसे चिरकालजीवनाय ॥

यत्ते दिवं यत्पृथिवीं मनो जगाम दूरकम् । तत्त आ वर्तयामसीह क्षयाय जीवसे ॥२॥

यत् । ते । दिवम् । यत् । पृथिवीम् । मनः । जगाम । दूरकम् ।

तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ २ ॥

हे सुबन्धो vयत् vमनः vदिवं vजगाम vयत् च vपृथिवीं vदूरकम्। दूरकमिति क्रिया-विशेषणम् । vतत् vइह निवासाय जीवनाय चावर्तयामः ॥

यत्ते भूमिं चतुर्भृष्टिं मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ ३ ॥

यत् । ते । भूमिम् । चतुःऽभृष्टिम् । मनः । जगाम । दूरकम् ।

तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ ३ ॥

हे सुबन्धो vयत् vमनः vभूमिं vचतुर्भृष्टिम्। चतुर्दिक्षु भ्रंशो यस्याः सा । तां vजगाम vतत् आवर्तयामः ॥

यत्ते चतस्रः प्रदिशो मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ ४ ॥

यत् । ते । चतस्रः । प्रऽदिशः । मनः । जगाम । दूरकम् ।

तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ ४ ॥

हे सुबन्धो vयत्ते vमनः vप्रदिशः प्रकृष्टा महादिशः vचतस्रः vजगाम vतत् आवर्तयामः ॥

यत्ते समुद्रमर्णवं मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ ५ ॥

यत् । ते । समुद्रम् । अर्णवम् । मनः । जगाम । दूरकम् ।

तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ ५ ॥

---

१. त१.२.३.७-भ–भवतः । २. म-त-भ४.६.८-मु–'यत्' नास्ति ।

हे सुबन्धो यत्ते मनः अर्णवम्[1] अर्णांस्युदकानि[1] तद्वन्तं समुद्रं मेघं वा जगाम तत् इति गतम् ॥

यत्ते मरीचीः प्रवतो मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ ६ ॥

यत् । ते । मरीचीः । प्रऽवतः । मनः । जगाम । दूरकम् ।
तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ ६ ॥

हे सुबन्धो यत्ते मनः प्रवतः प्रगच्छन्तीः[2] मरीचीः दीप्तीः जगाम तत् इति गतम् ॥ ॥ २० ॥

यत्ते अपो यदोषधीर्मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ ७ ॥

यत् । ते । अपः । यत् । ओषधीः । मनः । जगाम । दूरकम् ।
तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ ७ ॥

यत्ते सूर्यं यदुषसं मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ ८ ॥

यत् । ते । सूर्यम् । यत् । उषसम् । मनः । जगाम । दूरकम् ।
तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ ८ ॥

यत्ते पर्वतान्बृहतो मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ ९ ॥

यत् । ते । पर्वतान् । बृहतः । मनः । जगाम । दूरकम् ।
तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ ९ ॥

यत्ते विश्वमिदं जगन्मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ १० ॥

यत् । ते । विश्वम् । इदम् । जगत् । मनः । जगाम । दूरकम् ।
तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ १० ॥

चतस्र ऋचो निगदसिद्धाः ॥

यत्ते पराः परावतो मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ ११ ॥

१. ग४-भ१.७-मु—अर्णवमुदकं; त-भ२.४.६.८—अर्णवः उदकं । २. ग-त-भ—प्रगच्छंत्यो ।

यत् । ते । परैः । पराऽवतः । मनः । जगाम । दूरकम् ।
तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ ११ ॥

हे सुबन्धो Vयत्ते Vमनः Vपराः Vपरावतः अत्यन्तं दूरदेशान् Vजगाम Vतत् इति गतम् ॥

यत्ते भूतं च भव्यं च मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥ १२ ॥

यत् । ते । भूतम् । च । भव्यम् । च । मनः । जगाम । दूरकम् ।
तत् । ते । आ । वर्तयामसि । इह । क्षयाय । जीवसे ॥ १२ ॥

हे सुबन्धो Vयत्ते Vमनः Vभूतं Vच Vभव्यं Vच इत्यनेन भूतभव्यात्मकव्यतिरेकेण कस्यचिद्-भावाद्वर्तमानस्य पृथगेवाभिधानात्[1] कृत्स्नं प्रपञ्चमुक्तं भवति। तत्र सर्वत्र गतं मनो जीवनाय निवासाय चावर्तयामः ॥ ॥ २१ ॥

'प्र तारि' इति दशर्चं सप्तदशं सूक्तं बन्ध्वादीनां त्रयाणां गौपायनानामार्षम्। आदितः सप्त त्रिष्टुभः। अष्टमी पञ्चाष्टका पङ्क्तिः। नवमी षडष्टका महापङ्क्तिः। दशमी पङ्क्त्युत्तरा। 'आद्यौ दशकावष्टकाश्चयः' (अनु. ९. ११) इत्युक्तलक्षणसद्भावात्[2]। एकाक्षराधिक्याद्भूरिग्विशेषणेयं वेदितव्या। सूक्तस्यादितश्चतस्रो देहात्प्राणाग्निर्गमयित्र्या निर्ऋतेर्निवृत्यर्थं बन्ध्वादयोऽजपन्। 'मो षु णः सोम' इति चतुर्थ्यामेव मृत्युनिवृत्यर्थं सोममस्तुवन्। अतश्चतसृणां निर्ऋतिर्देवता चतुर्थ्याः सोमश्च। 'असुनीते मनः' इति द्वाभ्यामसुनीतिनाम्नीं देवीमस्तुवन् अतस्तयोः सा देवता। 'पुनर्नो असुम्' इत्यस्याः पृथिव्याद्या लिङ्गोक्ता[3] देवताः[3]। ततस्तिसृभिः शिष्टाभिः[4] पङ्क्तिमहापङ्क्तिपङ्क्त्युत्तराभिर्द्यावापृथिव्याविति द्यावापृथिव्यौ देवते। 'समिन्द्र' इत्यर्ध-र्चस्येन्द्रो देवता। तथा चानुक्रान्तं—'प्र तारीति दशर्चे चतस्रो निर्ऋत्यपनोदनार्थं जेपुश्चतुर्थ्यां सोमं चास्तुवन्मृत्योरपगमायोत्तराभ्यां दैवीमसुनीतिं सप्तम्यां लिङ्गोक्तदेवताः शिष्टाभिः पङ्क्तिमहापङ्-क्तिपङ्क्त्युत्तराभिर्द्यावापृथिव्यौ समिन्द्रेतीन्द्रं चार्धर्चेन' इति। गतो विनियोगः ॥

प्र तार्यायुः प्रतरं नवीयः स्थातारेव क्रतुमता रथस्य ।
अध च्यवान उत्तवीत्यर्थं परातरं सु निर्ऋतिर्जिहीताम् ॥ १ ॥

प्र । तारि । आयुः । प्रऽतरम् । नवीयः । स्थातराऽइव । क्रतुऽमता । रथस्य ।
अध । च्यवानः । उत् । तवीति । अर्थम् । पराऽतरम् । सु । निःऽऋतिः । जिहीताम् ॥ १ ॥

सुबन्धोः Vआयुः आयुष्यं Vप्र Vतारि प्रवर्धतां । प्रपूर्वस्तिरतिर्वर्धनार्थः । कथं प्रवर्धतामिति उच्यते । Vप्रतरं प्रवृद्धतरं Vनवीयः नवतरम् । यौवनोपेतमित्यर्थः । निर्ऋत्यनुग्रहादेवमायुर्वर्धताम् । तत्र दृष्टान्तः । Vक्रतुमता कर्मवता सारथिना Vरथस्य Vस्थातारेव रथे स्थिताविव[5] वर्धेते[5] तद्वत् । Vअध अथ Vच्यवानः जीविताद्प्रच्यवमानः Vअर्थं स्वाभिलषितमायुर्लक्षणम् Vउत्तवीति वर्धयति । सुबन्धुप्राणापहर्त्री[6] Vनिर्ऋतिः पापदेवता Vपरातरम् अत्यन्तं दूरतरं Vजिहीतां[7] परित्यजतु गच्छतु ॥

---

१. म–पृथगभिधानादेव । २. त१.२.३.७–म१.२.४.६.८–इत्युक्तसद्भावात् । ३. त–म–सु–लिंगोक्तदेवताः । ४. ग–त–म–द्यावापृथिव्यौ अष्टाभिः । ५. ग४–त१.२.३.७–स्थिता वर्धते; म–स्थिता वर्धते; सु–स्थिता यथा वर्धते । ६. म–°प्राणापहर्त्री । ७. त१.२.३.६.७.८–म–परिजिहीतां ।

सामन्नु राये निधिमन्नव्यं करामहे सु पुरुध श्रवाँसि ।
ता नो विश्वानि जरिता ममत्तु परातरं सु निर्ऋतिर्जिहीताम् ॥ २ ॥

सामन् । नु । राये । निधिऽमत् । नु । अन्नम् । करामहे । सु । पुरुध । श्रवाँसि ।
ता । नः । विश्वानि । जरिता । ममत्तु । पराऽतरम् । सु । निःऽऋतिः । जिहीताम् ॥ २ ॥

vसामन्नु साम्नि गीयमाने सति । नु चार्थे । vराये जीवायूरूपधनार्थं vनिधिमत् निधानवत् vअन्नं हविश्च vकरामहे कुर्मः । अत्रापि vनु इति चार्थे । निर्ऋत्यै[1] स्तुतिं हविश्चोभयं कुर्म इत्यर्थः[2] । तदेवाह । vसु सुष्ठु vपुरुध पुरुधा बहुप्रकारं vश्रवांसि अन्नानि हवींषि करामहे । vता तानि हवींषि vनः अस्माकं संबन्धीनि vविश्वानि सर्वाणि vजरिता जीर्णा स्तुता वा । ' जरा स्तुतिः ' (निरु. १०. ८) । vममत्तु स्वदताम् । आस्वाद्य च vनिर्ऋतिः vपरातरम् अत्यन्तं दूरदेशं vजिहीतां गच्छतु ॥

अभी ष्व१र्यः पौंस्यैर्भवेम द्यौर्न भूमिं गिरयो नाज्रान् ।
ता नो विश्वानि जरिता चिकेत परातरं सु निर्ऋतिर्जिहीताम् ॥ ३ ॥

अभि । सु । अर्यः । पौंस्यैः । भवेम । द्यौः । न । भूमिम् । गिरयः । न । अज्रान् ।
ता । नः । विश्वानि । जरिता । चिकेत । पराऽतरम् । सु । निःऽऋतिः । जिहीताम् ॥३॥

वयम् vअर्यः अरीन् शत्रून् vपौंस्यैः पुंस्त्वैः बलैः vसु सुष्ठु vअभि vभवेम । vद्यौर्न vभूमिं सूर्यो यथा स्वरश्मिभिर्भूमिमभिभवति तद्वत् । vगिरयो vनाज्रान् । गिरिर्वज्रः । ते यथा अज्रान्[3] अजनशीलान् मेघानभिभवन्ति तद्वत् । vता तानि यानि vनः अस्माभिः कृतानि स्तोत्राणि तानि vविश्वानि सर्वाणि vजरिता स्तुता सती vनिर्ऋतिः vचिकेत जानाति । शिष्टमुक्तम् ॥

मो षु णः सोम मृत्यवे परा दाः पश्येम नु सूर्यमुच्चरन्तम् ।
द्युभिर्हितो जरिमा सू नो अस्तु परातरं सु निर्ऋतिर्जिहीताम् ॥ ४ ॥

मो इति । सु । नः । सोम । मृत्यवे । परा । दाः । पश्येम । नु । सूर्यम् । उत्ऽचरन्तम् ।
द्युऽभिः । हितः । जरिमा । सु । नः । अस्तु । पराऽतरम् । सु । निःऽऋतिः । जिहीताम् ॥४॥

हे vसोम vनः अस्मान् vसु सुष्ठु vमृत्यवे vमो vपरा vदाः मैव परादानं कुरु । मृत्ववधीनान् मा कार्षीः । किंतु vनु इदानीम् vउच्चरन्तम् ऊर्ध्वं गच्छन्तमुदयन्तं vसूर्यं vपश्येम[4] । चिरकालं जीवेमेत्यर्थः । जीवाभावे सूर्यदर्शनासंभवादित्यभिप्रायः । किंच vद्युभिः । अहर्नामैतत् । अहोभिः दिवसैः vहितः प्रेरितः vजरिमा जराभावः vनः अस्माकं vसु सुखकरः vअस्तु । शिष्टमुक्तम् ॥

असुनीते मनो अस्मासु धारय जीवातवे सु प्र तिरा नु आयुः ।
रारन्धि नः सूर्यस्य संदृशि घृतेन त्वं तन्वं वर्धयस्व ॥ ५ ॥

असुऽनीते । मनः । अस्मासु । धारय । जीवातवे । सु । प्र । तिर । नः । आयुः ।
ररन्धि । नः । सूर्यस्य । सम्ऽदृशि । घृतेन । त्वम् । तन्वम् । वर्धयस्व ॥ ५ ॥

---

१. त-भ-' निर्ऋत्यै ' नास्ति । २. त-भ-सु-निर्ऋत्यै इत्यर्थः । ३. ग-त-भ-सु-' अज्रान् ' नास्ति । ४. त-भ-सु-पश्येम पश्यामः ।

हे vअसुनीते मनुष्याणामसूनां नेत्रि देवि vअस्मासु vमनः पुनः vधारय। किंच vजीवातवे जीवितुं vसु vप्र vतिर सुष्ठु वर्धय vनः अस्माकम् vआयुः। किंच vररिध स्थापय vनः अस्मान् vसूर्यस्य vसंदृशि चिरसंदर्शने। vत्वं च vघृतेन अस्माभिर्दत्तेन vतन्वं शरीरं[1] vवर्धयस्व वर्धय ॥॥२२॥

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम्।
ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृळया नः स्वस्ति ॥ ६ ॥

असुऽनीते। पुनः। अस्मासु। चक्षुः। पुनरिति। प्राणम्। इह। नः। धेहि। भोगम्।
ज्योक्। पश्येम। सूर्यम्। उत्ऽचरन्तम्। अनुऽमते। मृळय। नः। स्वस्ति ॥ ६ ॥

हे vअसुनीते प्राणदायिनि[2] देवि vअस्मासु। अस्मदीये सुबन्धावित्यर्थः। vपुनः vचक्षुः प्रकाशकं नयनम्। ईक्षणसामर्थ्यमित्यर्थः। किंच vप्राणं vपुनः अस्मासु vधेहि स्थापय। वयं च vज्योक् चिरम् vउच्चरन्तम् उद्गच्छन्तं vसूर्यं[3] vपश्येम। हे vअनुमते देवि vस्वस्ति अविनाशं यथा स्यात्तथा[4] vनः अस्मान् vमृळय सुखय ॥

पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम्।
पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां३ या स्वस्तिः ॥ ७ ॥

पुनः। नः। असुम्। पृथिवी। ददातु। पुनः। द्यौः। देवी। पुनः। अन्तरिक्षम्।
पुनः। नः। सोमः। तन्वम्। ददातु। पुनरिति। पूषा। पथ्याम्। या। स्वस्तिः ॥ ७ ॥

vपृथिवी देवी vनः अस्मभ्यम् vअसुं प्राणं vददातु। vपुनः vद्यौः देवता असुं ददातु। तथा vअन्तरिक्षम् अन्तरिक्षदेवता असुं ददातु। तथा vसोमः vनः vतन्वं शरीरं vपुनः vददातु[5]। तथा vपूषा पोषाभिमानिनी[6] देवता[7] vपथ्याम्। 'पन्था अन्तरिक्षम्' (निरु. ११.४५)। तत्र भवां वाचम्। वागात्मकः शब्दो ह्याकाशादुत्पद्यते। तां vपुनः ददातु। vकिंच[8] vया vस्वस्तिः या लोके वेदे च स्वस्तिरुच्यते तामपि पूषा प्रयच्छतु[8]। यद्वा। पूषा पोषं प्रयच्छतु। या स्वस्तिर्वाग्ग्राह्मी देव्यस्ति सा पथ्यां वाचं प्रयच्छतु। 'वाग्वै पथ्या स्वस्तिः' (श. ब्रा. ३. २. ३. ८) इति ब्राह्मणम् ॥

शं रोदसी सुबन्धवे यह्वी ऋतस्य मातरा।
भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥ ८ ॥

शम्। रोदसी इति। सुऽबन्धवे। यह्वी इति। ऋतस्य। मातरा।
भरताम्। अप। यत्। रपः। द्यौः। पृथिवि। क्षमा। रपः।
मो इति। सु। ते। किम्। चन। आममत् ॥ ८ ॥

१. ग४-त१.२.३.७-स्वशरीरं। २. ग-त१.२.३.७.८-भ-सु-प्राणप्रदायिनि। ३. ग-त-भ५.६.८-सु-सूर्यं देवं। ४. ग-त-भ-सु-तथा। ५. भ-ददातु किंच या स्वस्तिर्वा लोके वेदे च स्वस्तिरुच्यते तामपि पूषा प्रयच्छतु। ६. त१.२.३.७-भ४.६.८-पोषाभिमानि। ७. त-भ-देवता या। ८. भ-'किंच.....प्रयच्छतु' नास्ति।

इदमादिभिस्तिसृभिः[1] द्यावापृथिव्योः स्तुतिः। vरोदसी द्यावापृथिव्यौ vसुबन्धवे vशं सुखं प्रयच्छताम्। कीदृश्यौ ते। vबृही महत्यौ vऋतस्य यज्ञस्योदकस्य वा vमातरा निर्मात्र्यौ। vयद्रपः पापं कृच्छ्रमस्ति[2] तत् vअप vभरताम् अपहरताम् अपनयताम्। हे vद्यौः हे vपृथिवि हे द्यावापृथिव्यौ vक्षमा क्षमायां सत्याम्। यद्वा क्षमा पृथगप्युच्यते। क्षमाप्यपहरतु[3]। एवमुक्त्वा सुबन्धुं बन्ध्वादयो ब्रुवते। हे सुबन्धो vते त्वां vमो vषु मैव सुष्ठु vकिं vचन vरपः कृच्छ्रम् vआममत् हिनस्तु॥

अर्व द्रुके अर्व त्रिका दिवश्चरन्ति भेषजा।
क्षमा चरिष्ण्वेककं भरतामप यद्रपो
द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥ ९ ॥

अर्व। द्रुके इति। अर्व। त्रिका। दिवः। चरन्ति। भेषजा।
क्षमा। चरिष्णु। एककम्। भरताम्। अप। यत्। रपः।
द्यौः। पृथिवि। क्षमा। रपः। मो इति। सु। ते। किम्। चन। आममत्॥ ९॥

vदिवः द्युलोकात् vभेषजा भेषजानि vद्रुके द्विकं vत्रिका त्रिकं च vअव vचरन्ति। अत्राश्विनौ[4] द्विकमवचरतः। इळा सरस्वती भारती त्रिकमवचरन्ति। vक्षमा क्षमायां vचरिष्णु चरति vएककम् एकं भेषजमित्यभिप्रायमाह। तानि सर्वाणि सुबन्धोः प्राणं परिरक्षन्त्विति शेषः॥

समिन्द्रेरय गामनड्वाहं य आवहदुशीनराण्या अनः।
भरतामप यद्रपो द्यौः पृथिवि क्षमा रपो मो षु ते किं चनाममत् ॥१०॥

सम्। इन्द्र। ईरय। गाम्। अनड्वाहम्। यः। आ। अवहत्। उशीनराण्याः। अनः।
भरताम्। अप। यत्। रपः। द्यौः। पृथिवि। क्षमा। रपः।
मो इति। सु। ते। किम्। चन। आममत्॥ १०॥

हे vइन्द्र vसम् vईरय संप्रेरय। किम्। vगां गन्तारम् vअनड्वाहम् अनोवहनसमर्थम्[5]। vयः अनड्वान् vआवहत् आवहत्यस्मान्प्रति। किम्। vअनः शकटम्। कस्य। vउशीनराण्याः एतन्नामिकाया ओषधेः। यथार्तमनुलिम्पन्ति सोशीनराणी। भरतामित्यादि गतम्॥ ॥ २३ ॥

'आ जनम्' इति द्वादशर्चमष्टादशं सूक्तम्। गौपायना बन्ध्वादय ऋषयः। षष्ठ्यास्त्वगस्त्यस्य स्वसैषां मातर्षिका। आदितः पञ्च गायत्र्यः। अष्टमीनवम्यौ पङ्क्ती। शिष्टा अनुष्टुभः। आदितश्चतसृणामसमातिनाम्नो राज्ञः स्तूयमानत्वात् स एव देवता। पञ्चम्या इन्द्रः। षष्ठ्या अप्यसमातिः। ततः पञ्चानां सुबन्धोर्जीविताङ्गानरूपोऽर्थो देवता। 'अयं मे हस्तः' इत्यस्या लब्धसंज्ञस्य सुबन्धोः स्पर्शनहेतुभूतो देवता। तथा चानुक्रमणिका—'आ जनमिति द्वादशर्चमानुष्टुभं चतसृभिरसमातिमस्तुवन्पञ्चम्येन्द्रं षष्ठ्यागस्त्यस्य स्वसा मातैषां राजानमस्तौत्पराभिः सुबन्धोर्जीवमाङ्गयंस्तमन्यथा लब्धसंज्ञमस्पृशन् पञ्चाद्या गायत्र्योऽष्टम्याद्ये पङ्क्ती' इति॥

१. त-भ२.४.८-मु–इदमादिभिस्त्रिभिः। २. त-भ२.४.८-मु–कृच्छं चास्ति। ३. म१.७-द्यौरप्यपहरतु। ४. त१.२.३.६.७.८ म-मु–तत्राश्विनौ। ५. त-भ२.८-मु–'समर्थं गां।

आ जनं त्वेषसंदृशं माहीनानामुपस्तुतम् । अगन्म बिभ्रतो नमः ॥ १ ॥

आ । जनम् । त्वेषऽसंदृशम् । माहीनानाम् । उपऽस्तुतम् । अगन्म । बिभ्रतः । नमः ॥१॥

इदमादिभिस्तिसृभी राजानं स्तुवन्ति । वयं वन्द्यादयः [v]जनं जनपदमसुनीतिस्वभूतम्[1] [v]आ [v]अगन्म अभिगताः । गमेर्लुङि 'मन्त्रे घस०' इति च्लेर्लुक् । 'स्वोश्च' इति मकारस्य नकारः । कीदृशं जनम् । [v]त्वेषसंदृशं दीप्तदर्शनं [v]माहीनानां महताम् [v]उपस्तुतम् उपगतस्तुतिम् । 'तादौ च०' इति गतेः प्रकृतिस्वरः । कीदृशा वयम् । [v]नमः नमस्कारं [v]बिभ्रतः धारयन्तः[2] । कुर्वन्त इत्यर्थः । यद्वा । जनमसमातिमित्यर्थः । शिष्टं समानम् । नमो[3] बिभ्रत[4] इति राजकृते नमस्कारं धारयन्त इत्यर्थः ॥

असमातिं नितोशनं त्वेषं निययिनं रथम् । भजेरथस्य सत्पतिम् ॥ २ ॥

असमातिम् । निऽतोशनम् । त्वेषम् । निऽययिनम् । रथम् । भजेऽरथस्य । सत्ऽपतिम् ॥२॥

[v]असमातिं राजानं [v]नितोशनं शत्रूणां हन्तारम् । नितोशतिर्वधकर्मा । [v]त्वेषं दीप्तम् । [v]निययिनं [v]रथम् इत्युपमाप्रधानो निर्देशः । रथवत् सर्वाभिमतप्राप्तिसाधनं [v]भजेरथस्य एतन्नामकस्य राज्ञो वंशे जातम् । यद्वा । एतन्नामा कश्चिदस्य शत्रुः । तस्य[5] निययिनम् । 'हलदन्तात्०' (पा. सू. ६. ३. ९) इति सप्तम्या अलुक् । [v]सत्पतिं सतां पालकम् ॥

यो जनान् महिषाँ इवातितस्थौ पवीरवान् । उतापवीरवान् युधा ॥ ३ ॥

यः । जनान् । महिषान्ऽइव । अतिऽतस्थौ । पवीरवान् । उत । अपऽवीरवान् । युधा ॥ ३ ॥

[v]यः असमातिः [v]जनान् स्वविरोधिभूतान् [v]अतितस्थौ अतिक्रम्य निष्ठति । पराभावयतीत्यर्थः[6] । क[6] इव[6] । [v]महिषान् सिंह [v]इव । कीदृशः सन् । [v]पवीरवान् । पवीरः पविः । खड्गवान् । [v]उत अपि च [v]अपवीरवान् अपगतखड्गः सन् । शस्त्रसाहाय्यमपि कदाचिन्नापेक्षत इत्यर्थः । किं कुर्वन् । [v]युधा योधनेन । युद्ध्वेत्यर्थः ॥

यस्येक्ष्वाकुरुप व्रते रेवान्मराय्येधते दिवीव पञ्च कृष्टयः ॥ ४ ॥

यस्य । इक्ष्वाकुः । उप । व्रते । रेवान् । मरायी । एधते । दिविऽइव । पञ्च । कृष्टयः ॥४॥

[v]यस्य जनपदस्य [v]इक्ष्वाकुः राजा [v]व्रते कर्मणि रक्षणरूपे [v]उप [v]एधते प्रवर्धते । कीदृशः सन् । [v]रेवान् रयिवान् [v]मरायी शत्रूणां मारकश्च सन् । विशेषणद्वयेन जनानां दानादिरूपेण धनलाभः पराजोपद्रवापत्तिश्चोक्ता भवति । एवं सति तद्विषयस्थाः [v]पञ्च [v]कृष्टयः निषादपञ्चमाश्चत्वारो वर्णाः [v]दिवीव द्युलोके यथा संकल्पसिद्धाः सन्तः सुखिनो भवन्ति तद्वत्सुखिनो भवन्तीति शेषः ॥

इन्द्र क्षत्रासमातिषु रथप्रोष्ठेषु धारय । दिवीव सूर्यं दृशे ॥ ५ ॥

इन्द्र । क्षत्रा । असमातिषु । रथऽप्रोष्ठेषु । धारय । दिविऽइव । सूर्यम् । दृशे ॥ ५ ॥

अनयेन्द्रमाह्वयतेऽसमात्यर्थम् । हे [v]इन्द्र [v]क्षत्रा क्षत्राणि बलानि [v]रथप्रोष्ठेषु [v]असमातिषु । एकस्मिन् बहुवचनं पूजार्थम् । रथप्रोष्ठेऽसमातौ [v]धारय । [v]दिवीव [v]सूर्यं दिवि यथा सूर्यं [v]दृशे सर्वेषां दर्शनाय स्थापितवानसि तद्वदत्र बलं धारय ॥

---

१. त१.२.३.७-म१.२.४.७–'मसुनीतिं असुनीतिस्वभूतं । २. त-म१.२.४.६.८–धारयतः । ३. त१.२.३.६.७.८-म–आबिभ्रत । ४. त२.३.७-म–'तस्य' नास्ति । ५. ग-त-मु–पराभवर्तीत्यर्थः; म–पराभवेत्यर्थः । ६. ग-त-म-मु–किमिव ।

अगस्त्यस्य नद्यः सप्ती युनक्षि रोहिता ।
पणीन्यंक्रमीरभि विश्वान्राजन्नराधसः ॥ ६ ॥

अगस्त्यस्य । नद्यः । सप्ती इति । युनक्षि । रोहिता ।
पणीन् । नि । अक्रमीः । अभि । विश्वान् । राजन् । अराधसः ॥ ६ ॥

अनयागस्त्यस्य स्वसा बन्ध्वादीनां माता राजानं स्तौति । हे ᵛराजन् असमाते त्वम् ᵛअगस्त्यस्य ऋषेः ᵛनद्यः नन्दयितृभ्यो बन्ध्वादिभ्यो निमित्तभूतेभ्यस्तेषां धनप्राप्तये ᵛसप्ती सर्पणस्वभावावश्वौ ᵛरोहिता रोहितवर्णौ ᵛयुनक्षि योजय रथे । तथा कृत्वा ᵛविश्वान् सर्वान् ᵛअराधसः अदातॄनयजमानान् ᵛपणीन् वणिजः लुब्धकान् ᵛनि निकृष्टं नितरां वा ᵛअभि ᵛअक्रमीः अभिभव ॥ ॥ २४ ॥

अयं मातायं पितायं जीवातुरागमत् । इदं तवं प्रसर्पणं सुबन्धवेहि निरिहि ॥७॥

अयम् । माता । अयम् । पिता । अयम् । जीवातुः । आ । अगमत् ।
इदम् । तवं । प्रऽसर्पणम् । सुबन्धो इति सुऽबन्धो । आ । इहि । निः । इहि ॥ ७ ॥

अत्र शेषे शाट्यायनकम्—' अथाग्निं द्वैपदेन सूक्तेनास्तुवन् । अग्निः स्तुत आजगाम । आगत्य चाह किंकामा मागच्छतेति । सुबन्धोरेवासुं पुनर्वनुयामेत्यब्रुवन् । एषान्तःपरिधीत्यब्रवीत्तमादद्भुमिति । तन्निराह[1] । अयं[1] मातायं पिता ' इति । शौनकश्च—' स्तुतः स राजा सुप्रीतस्तस्थौ गौपायनानभि ॥ सूक्तेन तेऽस्तुवन्नग्निं द्वैपदेन यथाग्निषु । अथाग्निरब्रवीदेतानयमन्तःपरिध्यसुः ॥ सुबन्धोरस्य चेक्ष्वाकोर्मया गुप्तो हितार्थिना । सुबन्धवे प्रदायासुं जीवेत्युक्त्वा च पावकः ॥ स्तुतो गौपायनैः प्रीतो जगाम त्रिदिवं प्रति । अयं मातेति हृष्टास्ते सुबन्धोरसुमाहयन् ॥ शरीरमभिनिर्दिश्य सुबन्धोः पतितं भुवि । सूक्तशेषं जगुश्चास्य चेतसो धारणाय ते' (बृहद्दे. ७. ९७. १०१) इति ॥ ᵛअयम् अग्निः ᵛमाता । ᵛअयम् एव ᵛपिता । ᵛअयं ᵛजीवातुः जीवयिता ᵛआगमत् आजगाम । अतो हे ᵛसुबन्धो जीवपरिधौ वर्तमान[2] ᵛइदं तव शरीरं ᵛतव ᵛप्रसर्पणं प्रकर्षेण सर्पणसाधनम् । अत इदं प्रति ᵛएहि आगच्छ । ᵛनिरिहि निर्गच्छ परिधेः सकाशात् । अन्य एवं व्याचक्षते । हे निर्गतप्राण सुबन्धो अयम् । विभक्तिव्यत्ययः । इयं मातायं पितायं जीवातुर्जीवनफलभूतः पुत्रश्चागमदिति संबध्यते । सर्वे त्वामागता दुःखिताः सन्तः । शिष्टं समानम् ॥

यथा युगं वरत्रया नह्यन्ति धरुणाय कम् ।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥ ८ ॥

यथा । युगम् । वरत्रया । नह्यन्ति । धरुणाय । कम् ।
एव । दाधार । ते । मनः । जीवातवे । न । मृत्यवे । अथो इति । अरिष्टऽतातये ॥ ८ ॥

ᵛयथा ᵛयुगं ᵛवरत्रया पाशेन ᵛनह्यन्ति बध्नन्ति ᵛधरुणाय रथादिधारणाय । ᵛकम् इति पादपूरणः । ᵛएव एवं ᵛते ᵛमनः ᵛदाधार परिधावग्निः । किमर्थम् । ᵛजीवातवे जीवनाय ᵛन ᵛमृत्यवे मरणाय न ᵛअथो अपि च ᵛअरिष्टतातये अविनाशाय । स्वार्थिकस्तातिः ॥

---

१. त१.२.३.७-म१.८-तन्निराहनयं; म४-तन्निराहनयं; म७-तन्निराहंनयं; मु-तं निराहरन्नयं
२. त-म१.२.७-वर्तमानं ।

यथेयं पृथिवी मही दाधारेमान्वनस्पतीन् ।
एवा दाधार ते मनो जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥ ९ ॥

यथा । इयम् । पृथिवी । मही । दाधार । इमान् । वनस्पतीन् ।
एव । दाधार । ते । मनः । जीवातवे । न । मृत्यवे । अथो इति । अरिष्टऽतातये ॥ ९ ॥

यथेयं पृथिवी मही[1] इमान् वनस्पतीन् वृक्षादीन् दाधार । शिष्टमुक्तम् ॥

यमादहं वैवस्वतात्सुबन्धोर्मन आभरम् ।
जीवातवे न मृत्यवेऽथो अरिष्टतातये ॥ १० ॥

यमात् । अहम् । वैवस्वतात् । सुऽबन्धोः । मनः । आ । अभरम् ।
जीवातवे । न । मृत्यवे । अथो इति । अरिष्टऽतातये ॥ १० ॥

इयं निगदसिद्धा ॥

न्यङ्वातोऽव वाति न्यक्तपति सूर्यः ।
नीचीनमघ्न्या दुहे न्यग्भवतु ते रपः ॥ ११ ॥

न्यक् । वातः । अव । वाति । न्यक् । तपति । सूर्यः ।
नीचीनम् । अघ्न्या । दुहे । न्यक् । भवतु । ते । रपः ॥ ११ ॥

वातः वायुर्लोकात् न्यक् नीचीनम् अव वाति गच्छति । सूर्यः च न्यक् तपति । अघ्न्या अहननीया गौः नीचीनं दुहे दुग्धे । एवं ते रपः पापं न्यक् नीचीनं भवतु ॥

अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः ॥ १२ ॥

अयम् । मे । हस्तः । भगऽवान् । अयम् । मे । भगवत्ऽतरः ।
अयम् । मे । विश्वऽभेषजः । अयम् । शिवऽअभिमर्शनः ॥ १२ ॥

अनया बन्ध्वादयो लब्धजीवं सुबन्धुं पाणिभिरस्पृशन् । अयं मे हस्तो भगवान्[2] यस्मात् सजीवं[3] सुबन्धुं स्पृशति तस्मात् । तथा अयं मे हस्तः भगवत्तरः अतिशयेन भगवान् । तथा अयं मे हस्तः विश्वभेषजः जीवचिकित्सासाधनसर्वौषधवान् तत्स्थानीयो वा । अयं शिवाभिमर्शनः मङ्गलस्पर्शनः । यतो जीवन्तं स्पृशत्यत इत्यर्थः ॥ ॥ २५ ॥ ॥ ४ ॥

पञ्चमेऽनुवाकेऽष्टौ सूक्तानि । तत्र 'इदमित्था' इति सप्तविंशत्यृचं प्रथमं सूक्तं मानवस्य नाभानेदिष्ठस्यार्षं त्रैष्टुभम् । इदमादीनि षट् सूक्तानि वैश्वदेवानि । तथा चानुक्रान्तम्—'इदमित्था सप्ताधिका नाभानेदिष्ठो मानवो वैश्वदेवं तत्' इति । पृष्ठस्य षष्ठेऽहनि वैश्वदेवशस्त्र आभिप्लविकाति-

---

१. ग-त४.५–मही महती; त१.२.३.७–महती । २. ग-त-मु–भगवान् भाग्यवान् । ३. त-भ१.६.८–सजीवः; भ२–सजीवि ।

वैखानसस्य उद्यतवचनका इत्थस्य स्थाने इदं सूक्तम्। सूत्रितं च—'उद्यृत्य[1] चोत्तमं[1] सूक्तं त्रीणीदमित्था रौद्रमिति' (आश्व. श्रौ. ८. १) इति[2]। अत्रैतरेयब्राह्मणं—'नाभानेदिष्ठं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजन्सोऽब्रवीदेत्य किं मह्यमभाक्षेत्येतमेव निष्ठावमवदितारमित्यब्रुवन्' (ऐ. ब्रा. ५. १४) इत्यादि। तत्र नाभानेदिष्ठो भ्रातृभिर्भागे निराकृतः पितृसामीप्यमागत्य किं मह्यं भागं न कल्पितवानसीत्यपृच्छत्। स च किमनेन भागेन। अङ्गिरसः स्वर्गार्थं सत्रमासीनाः षष्ठाहःपर्यन्तमनुद्वाप मुह्यन्ति। तान् 'इदमित्था' इति सूक्ते शंसय ते स्वर्गं यन्तो वसिष्ठा गाः[3] सहस्रसंख्याकान् दास्यन्तीति पित्रा प्रेरितोऽङ्गिरसां समीपमागत्य तेभ्यः सत्रपरिवेषणं गोसहस्रमुत्कोचं परिकल्प्य तानेते सूक्ते षष्ठेऽहन्यशंसयत्। ते च तत्सूक्तसामर्थ्याद्यज्ञं पारं प्रापय्य स्वर्जिगमिषवोऽस्मै गोसहस्रं प्रादुः। तं च तद्गोसहस्रं स्वीकुर्वाणं कञ्चन कृष्णशवासी पुरुष उत्तरत उत्थाय ब्राह्मण मदीयं[4] यज्ञशेषभागं मा स्वीकुर्विस्यब्रवीत्। स च मह्यमङ्गिरसः प्रादुरिति प्रत्यब्रवीत्। तर्हि ब्राह्मण तव पितरमेव पृच्छ कस्मै भागः प्राप्तुयादित्युक्तः पितृसमीपमागत्य पित्रा रुद्रायायं न्याय्य इति तेनोक्तस्तवैवायं भाग इति मम पिताब्रवीदिति प्रत्युवाच। ततो यथार्थकथनेन तुष्टः पुरुषो नाभानेदिष्ठायैव स्वं भागं प्रादादित्युक्तम्। तथाध्वर्युब्राह्मणेऽपि 'मनुः पुत्रेभ्यो दायं व्यभजत् स नाभानेदिष्ठं[5]' (तै. सं. ३. १. ९. ४) इत्यादिनायमर्थ उक्तः। तत्सर्वमत्रानुसंधेयम्॥

इदमित्था रौद्रं गूर्तवचा ब्रह्म कृत्वा शच्यामन्तराजौ।
क्राणा यदस्य पितरा मंहनेष्ठाः पर्षत्पक्थे अहना सप्त होतॄन्॥ १॥

इदम्। इत्था। रौद्रम्। गूर्तऽवचाः। ब्रह्म। कृत्वा। शच्याम्। अन्तः। आजौ।
क्राणा। यत्। अस्य। पितरा। मंहनेऽस्थाः। पर्षत्। पक्थे। अहन्। आ। सप्त। होतॄन्॥१॥

[v]गूर्तवचाः उद्यतवचनो नाभानेदिष्ठः [v]इदं [v]ब्रह्म स्तोत्रं [v]रौद्रं रुद्रप्रणीतम्[6] [v]इत्था इत्थमिदानीक्रियमाणप्रकारं [v]कृत्वा प्रज्ञानेन निष्पाद्य स्तोत्रं [v]शच्यामन्तः कर्मणि सत्रमध्ये [v]आजौ अङ्गिरसां संघे करोतीति शेषः। [v]यत् स्तोत्रं [v]क्राणा भागं कुर्वाणा भागं कुर्वाणौ [v]अस्य [v]पितरा पितरावन्ये च [v]मंहनेष्ठाः भागप्रदाने वर्तमानाः[7] भ्रातरश्च गोलाभसाध्वनस्वेनाकल्पयन्निति[8] शेषः। तेन नाभानेदिष्ठः [v]पक्थे पक्तव्ये [v]अहन् अहनि। षष्ठेऽहनीत्यर्थः। 'ते षष्ठंषष्ठमेवाहरागत्य[9] मुह्यन्ति[10] तानेते[10] सूक्ते षष्ठेऽहनि शंसय' (ऐ. ब्रा. ५.१४) इत्युक्तत्वात्। [v]सप्त [v]होतॄन् होतृप्रशास्तृब्राह्मणाच्छंस्यादिकान् [v]आ [v]पर्षत् सर्वतोऽपूरयत्। इदमित्थेति सूक्ताभ्यां यज्ञं पारं प्रापयामासेत्यर्थः॥

स इदानाय दभ्याय वन्वञ्च्यवानः सूदैरमिमीत वेदिम्।
तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इतऊति सिञ्चत्॥ २॥

सः। इत्। दानाय। दभ्याय। वन्वन्। च्यवानः। सूदैः। अमिमीत। वेदिम्।
तूर्वयाणः। गूर्तवचःऽतमः। क्षोदः। न। रेतः। इतःऽऊति। सिञ्चत्॥ २॥

[v]स [v]इत् स कृष्णशवासी पुरुषो रुद्राक्यः [v]दानाय स्तोतॄणां धनप्रदानाय [v]दभ्याय शत्रूणां वधाय च [v]वन्वन् स्तोतॄन् संभजन् [v]सूदैः सूदकैर्हिंसकैः[11] शस्त्रैः [v]च्यवानः रक्षांसि च्यावयन् [v]वेदिम्

---

१. त-भ-मु-उद्यृत। २. त-भ-मु-'इति' नास्ति। ३. त-भ-'गाः' नास्ति। ४. ग-त६.८-भ४.६-मु-अस्मदीयं; त१.२.३-भ२.८-मत्सदीयं। ५. ग-त-भ१.२.४.६.८-नाभानेदिष्ठं वै मानवं। ६. ग-त-मु-रुद्रदैवतं। ७. भ-प्रवर्तमाना। ८. भ-ऋणलाभ°। ९. त-भ-मु-षष्ठमेवा°। १०. त-भ-मुह्यंते। ११. ग-त-भ४.६.८-हिंसकैः; भ१.२.७-सूदकैः।

[v]अभिमीत परिमितवान्। यज्ञवास्त्वधिष्ठितवानित्यर्थः। 'तं कृष्णशवास्त्युत्तरत[1] उषोत्थाया-ग्नीन्मम[1] वा इदं मम वै वास्तुरिति' (ऐ. ब्रा. ५. १४) इति ब्राह्मणम्। तदेवाह। [v]तूर्णयाणः तूर्णगमनः [v]गूर्तवचस्तमः अत्यन्तमुद्यतवचा[2] रुद्रः [v]क्षोदो [v]न उदकमिव। उदकं यथा घनः सिञ्चति तद्वत् [v]रेतः स्वसामर्थ्यम् [v]इतऊति इतोगमनवद्यथा भवति तथा [v]सिञ्चत् प्रेरितवानित्यर्थः। यद्वा। अनेनोत्तरार्धेनोत्तराभ्यां च प्रासङ्गिक्यश्विनोः स्तुतिः क्रियते। तूर्वयाणस्तूर्णगमनोऽतिशयेनोद्यतवचनो रुद्रः क्षोदो न उदकमिव रेत उत्पादनसामर्थ्योपेतं रेत इतऊति सिञ्चत् जनयामासाश्विनौ। अन्यत्रेतऊतीत्यश्विनोरभिधानादन्यत्र तयो रुद्रपुत्रत्वसिद्धेश्चायमर्थो लभ्यते॥

मनो न येषु हवनेषु तिग्मं विपः शच्या वनथो द्रवन्ता।
आ यः शर्याभिस्तुविनृम्णो अस्याश्रीणीतादिशं गभस्तौ॥ ३॥

मनः। न। येषु। हवनेषु। तिग्मम्। विपः। शच्या। वनुथः। द्रवन्ता।
आ। यः। शर्याभिः। तुविऽनृम्णः। अस्य। अश्रीणीत। आऽदिशम्। गभस्तौ॥ ३॥

हे अश्विनौ युवां [v]मनो [v]न मन इव यथा मनः [v]तिग्मं तीक्ष्णमाशु धावति आगच्छति[3] एवं [v]येषु [v]हवनेषु आह्वानेषु [v]विपः स्तोतुः [v]शच्या प्रज्ञानेन गन्तव्यमिति बुद्ध्या [v]द्रवन्ता द्रवन्तौ गच्छन्तौ [v]वनुथः संभजथः[4]। [v]यः अध्वर्युः [v]आ आभिमुख्येन [v]तुविनृम्णः प्रभूतहविर्लक्षणधनः सन् [v]अस्य कर्मणि प्रवृत्तस्य मम संबन्धी [v]शर्याभिः अङ्गुलीभिः [v]अश्रीणीत श्रीणाति। किं कृत्वा। [v]गभस्तौ हस्ते धृत्वा [v]आदिशम् आदिश्य। इदमश्विभ्यामिति निर्दिश्येत्यर्थः। तादृशं मदीय-मध्वर्युं येषु हवनेषु [v]वनुथः संभजथः[5] तौ युवां हुव इत्युत्तरत्र संबन्धः॥

कृष्णा यद्गोष्वरुणीषु सीदद्दिवो नपाताश्विना हुवे वाम्।
वीतं मे यज्ञमा गतं मे अन्नं ववन्वांसा नेषमस्मृतध्रू॥ ४॥

कृष्णा। यत्। गोषु। अरुणीषु। सीदत्। दिवः। नपाता। अश्विना। हुवे। वाम्।
वीतम्। मे। यज्ञम्। आ। गतम्। मे। अन्नम्। ववन्वांसा। न। इषम्। अस्मृतध्रू इत्यस्मृतऽध्रू॥४॥

[v]कृष्णा रात्रिः [v]यत् यदा [v]अरुणीषु अरुणवर्णासु [v]गोषु [v]सीदत् निवसति। उषा विभासनाय[6] रथमधितिष्ठतीत्यर्थः। 'अरुण्यो गाव उषसाम्' इति निरुक्तम्। उषःकाले हे [v]दिवो [v]नपाता दीप्यमानस्य स्वर्गस्य प्रकाशात्मकस्य यागस्य[7] वा न पातयितारौ हे अश्विनौ [v]वां [v]हुवे आह्वये। [v]वीतं कामयेथां [v]मे [v]अन्नं हविर्लक्षणम्। तदर्थं [v]मे [v]यज्ञम् [v]आ [v]गतम् आगच्छतम्। [v]इषम् अन्नं [v]ववन्वांसा [v]न संभजमानावश्विव। तद्वदागतम्। कीदृशौ युवाम्। [v]अस्मृतध्रू अस्मृतद्रोहौ मयि द्रोहमस्मरन्तौ॥

प्रार्थिष्ट यस्य वीरकर्ममिष्णदनुष्ठितं नु नर्यो अपौहत्।
पुनस्तदा वृहति यत्कनायां दुहितुरा अनुभृतमनुर्वा॥ ५॥

---

१. त.म–कृष्णशवास्त्युपोत्थाया°। २. म१.२–अत्यंतं गूर्तवचा; म७–अत्यंतं गूर्भवचा। ३. ग४-त-मु–'आगच्छति' नास्ति; म१.४.८–एवति; म२–एजति। ४. ग-त-म२.४.८–'संभजथः' नास्ति। ५. ग-त-म६-मु–'संभजथः' नास्ति। ६. ग-त-म१.२.४.६.८-मु–विभानाय। ७. त१.२.३.७-मु–'यागस्य' नास्ति; म१.२.४.७.८–स्वर्गस्य।

प्रथिष्ट । यस्य । वीरऽकर्मम् । इष्णत् । अनुऽस्थितम् । नु । नर्यः । अप । औहत् ।
पुनरिति । तत् । आ । वृहति । यत् । कनायाः । दुहितुः । आः । अनुऽभृतम् । अनर्वा ॥५॥

यथा स्वांशेन भगवान् रुद्रः प्रजापतिर्वांस्तोष्पतिं रुद्रमसृजत् तदेतदादिभिस्तिसृभिर्वदति । यस्य प्रजापतेः इष्णत् एषणवत् वीरकर्मम् । लिङ्गव्यत्ययः। वीरकर्म[1] । रेत इत्यर्थः[1]। येन रेतसोत्पन्ना वीरा भवन्ति तादृग्रेतः प्रथिष्ट प्रथितमासीत् तद्रेतः अनुष्टितं प्रजापतिनापत्यार्थं निषिक्तं नर्यः नरेभ्यो हितो यद्वा नेतृभ्यो देवेभ्यो हितो रुद्रः अपौहत् अपोहति । तदेवाह । पुनस्तत् रेतः आ वृहति सर्वत उत्क्षिपति उद्गमयति पुरुषाकारेण स्वयमुत्पन्नः सन् । कीदृशं रेतः । यत् रेतः कनायाः कान्तायाः दुहितुः स्वपुत्र्याः तस्यामित्यर्थः । तत्र प्रजापतिना अनुभृतम् आः आसीत् । अस्तेः सिपि [illegible] । कीदृशो रुद्रः । अनर्वा अन्यस्मिन्नप्रवृतः। 'प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये' (ऐ. ब्रा. ३. ३३) इति ब्राह्मणम् ॥ ॥ २६ ॥

मध्या यत्कर्त्वमभवदभीके कामं कृण्वाने पितरि युवत्याम् ।
मनानग्रेतो जहतुर्वियन्ता सानौ निषिक्तं सुकृतस्य योनौ ॥ ६ ॥

मध्या । यत् । कर्त्वम् । अभवत् । अभीके । कामम् । कृण्वाने । पितरि । युवत्याम् ।
मनानक् । रेतः । जहतुः । विऽयन्ता । सानौ । निऽसिक्तम् । सुऽकृतस्य । योनौ ॥ ६ ॥

कामं यथेच्छं कृण्वाने कुर्वाणे पितरि[2] प्रजापतौ युवत्यां दुहितर्युषसि दिवि वा । 'दिवमित्यन्ये' इति हि ब्राह्मणं प्रदर्शितम् । मध्या तयोर्मध्येऽन्तरिक्षमध्ये वा अभीके समीपे[3] यत् कर्त्वं कर्म अभवत् मिथुनीभावात्स्थं तदानीं मनानक् अल्पं[4] रेतः जहतुः त्यक्तवन्तौ । किं कुर्वाणाविति तत्राह । वियन्तौ परस्परमभिगच्छन्तौ । प्रजापतिना सानौ समुच्छ्रिते स्थाने सुकृतस्य यज्ञस्य योनौ निषिक्तम् आसीदित्यर्थः । ततो रुद्र उत्पन्न इत्यर्थः ॥

पिता यत्स्वां दुहितरमधिष्कन् क्ष्मया रेतः संजग्मानो नि षिञ्चत् ।
स्वाध्योऽजनयन् ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन् ॥ ७ ॥

पिता । यत् । स्वाम् । दुहितरम् । अधिऽस्कन् । क्ष्मया । रेतः । सम्ऽजग्मानः । नि । सिञ्चत् ।
सुऽआध्यः । अजनयन् । ब्रह्म । देवाः । वास्तोः । पतिम् । व्रतऽपाम् । निः । अतक्षन् ॥७॥

पिता प्रजापतिः यत् यदा स्वां दुहितरं दिवमुषसं वा अधिष्कन् अध्यस्कन्दत् तदानीमेव क्ष्मया पृथिव्या सह संजग्मानः संगच्छमानः प्रजापतिरस्मिँल्लोके रोहितं भूतामृश्यो भूत्वा रेतः नि निषिञ्चत् निषेकमकरोत् । 'तामृश्यो भूत्वा रोहितं भूतामभ्यैत्' (ऐ. ब्रा. ३. ३३) इति ब्राह्मणम् । तदानीं स्वाध्यः सुध्यानाः सुकर्माणो वा देवाः ब्रह्म अजनयन् उदपादयन्[5]। किं तद्ब्रह्मेति तदाह । वास्तोष्पतिं यज्ञवास्तुस्वामिनं व्रतपां व्रतस्य कर्मणः रक्षःप्रभृतिभ्यः पालकं निरतक्षन् समुदपादयन्[6] । यज्ञवास्तुस्वामित्वं दत्त्वा कर्मरक्षकत्वेन निर्मितवन्त इत्यर्थः ॥

---

१. भ–'वीरकर्म...इत्यर्थः' नास्ति । २. त-भ–ते पितरि । ३. त१.२.६.७.८-भ४.८–प्रत्ये समीपे; त४.५-पत्ये समीपे; भ१.७–प्रेत्य समीपे; भ२–प्रत्य समीपे; भ६–प्रत्ये समीपे; मु–प्राप्ते समीपे । ४. त-भ–अल्पं । ५. ग-त-भ–उत्पादयन् । ६. ग–संपादयन्; त-भ४.६.८-मु–समपादयन्; भ१.२.७–समुत्पादयन् ।

त ईं वृषा न फेनमस्यदाजौ स्मदा परैदप दुश्चेतायाः ।
सरत्पदा न दक्षिणा पराङ्वृक् न ता नु मे पृशन्यो जगृभ्रे ॥ ८ ॥

सः । ईम् । वृषा । न । फेनम् । अस्यत् । आजौ । स्मत् । आ । परा । ऐत् । अप । दुश्चेतायाः ।
सरत् । पदा । न । दक्षिणा । पराऽवृक् । न । ताः । नु । मे । पृशन्यः । जगृभ्रे ॥ ८ ॥

अङ्गिरसां सत्रान्ते नाभानेदिष्ठो गोनिरोधायागच्छन्तं वास्तोष्पतिं पुरतः पश्यन् वदति । स ईं सौऽर्थं वृषा न वर्षक इन्द्र इव स यथा नमुचिवधार्थम् आजौ संग्रामे फेनमस्यत् क्षिप्तवान् तद्वत्क्षेपमना वास्तोष्पतिरिदानीं तथैव वास्तुभागो युक्त इति यथार्थकथनानन्तरं स्मत् अस्मत्तः आ अप परैत् अपपरागच्छति । दुश्चेतायाः अल्पमनस्को यः कश्चित् दक्षिणा दक्षिणार्धां गवां पराङ्वृक् परावर्जयिता सन् पदा पदानि न सरत् न सरति अस्मदभिमुखमागच्छति । मे मम संबन्धिन्यः ताः गाः अङ्गिरोभिर्दत्ताः पृशन्यः पथिकानामभिस्पर्शनकुशलो रुद्रः न जगृभ्रे न गृह्णातीत्येवमाशास्ते ॥

मक्षू न वह्निः प्रजाया उपब्दिरग्निं न नग्न उप सीददूर्ध्वः ।
सनितेध्मं सनितोत वाजं स धर्ता जज्ञे सहसा यवीयुत् ॥ ९ ॥

मक्षु । न । वह्निः । प्रऽजायाः । उपब्दिः । अग्निम् । न । नग्नः । उप । सीदत् । ऊर्ध्वः ।
सनिता । इध्मम् । सनिता । उत । वाजम् । सः । धर्ता । जज्ञे । सहसा । यविऽयुत् ॥ ९ ॥

वास्तोष्पतिना रुद्रेण गोष्यमाणेऽस्मिन् यज्ञे वह्निः वह्निवदाहको राक्षसादिः मक्षु[1] न शीघ्रं न उप सीदत् नागच्छति[2] । यो वह्निः प्रजायाः उपब्दिः उपपीडको भवति । यज्ञविघातार्थमागच्छति । ऋत्विगादिरूपायाः प्रजाया न पीडां करोत्यहमि । तथा ऊर्ध्वः । रात्रिनामैतत् । रात्रावपि अग्निं ज्वलन्तं नग्नः विवसनो राक्षसादिः न उप सीदत् । एवं रुद्रे रक्षितरि सति सः अग्निः इध्मं समिता जज्ञे उत्पन्नः । उत अपि च वाजम् अन्नं हविः सनिता जज्ञे । स धर्ता यज्ञस्य फलस्य वा धारक उत्पन्नः सोऽग्निः सहसा बलेन[3] यवीयुत् यज्ञमिश्रयितॄणां रक्षःप्रभृतीनां योद्धा जज्ञे ॥

मक्षू कनायाः सख्यं नवग्वा ऋतं वदन्त ऋतयुक्तिमग्मन् ।
द्विबर्हसो य उप गोपमागुरदक्षिणासो अच्युता दुदुक्षन् ॥ १० ॥

मक्षु । कनायाः । सख्यम् । नवऽग्वाः । ऋतम् । वदन्तः । ऋतऽयुक्तिम् । अग्मन् ।
द्विऽबर्हसः । ये । उप । गोपम् । आ । अगुः । अदक्षिणासः । अच्युता । दुधक्षन् ॥ १० ॥

नवग्वाः अङ्गिरसः । गवामयनाख्यं सत्रमनुतिष्ठतामङ्गिरसां मध्ये ये नवसु मासेषु खण्डशावः सन्त उत्थितास्ते नवग्वाः । ते ऋतं वदन्तः मक्षु शीघ्रं कनायाः कमनीयायाः स्तुतेर्गोभाजेदिष्टप्रेरिताया: सकाशात् ऋतयुक्तिम् उक्तयोगपरिसमाप्तिम् अग्मन् प्राप्ताः । यद्वा । ऋतयुक्तिं यज्ञयोगोपेतमृतं शब्दं स्तुतिं वदन्तोऽङ्गिरसः कनायाः पृश्न्याः सख्यमग्मन्निति योजना । द्विबर्हसः

---

१. त-भ-' मक्षु ' नास्ति । २. ' त-नागच्छति ' नास्ति; भ- न गच्छति । ३. ग-वस्य बलेन; त१. २.३.६.७.८-म२.४.५.६.८-यज्ञस्य बलेन; त४.५-जावस्य बलेन ।

द्वयोः स्थानयोर्द्यावापृथिव्योः परिषदः [v]ये अङ्गिरसः [v]गोषं गोपयितारं नाभानेदिष्ठमिन्द्रं वा [v]उप [v]आसुः उपगताः ते [v]अदक्षिणासः दक्षिणारहिताः। 'अदक्षिणानि सत्राणीत्याहुः' इति हि ब्राह्मणं 'ये यजमानास्त ऋत्विजः' इति। ते च [v]अच्युता उदकान्यक्षीणानि फलानि वा [v]दुदुक्षन् ॥ ॥ २० ॥

मक्षू कनायाः सख्यं नवीयो राधो न रेत ऋतमित्तुरण्यन्।
शुचि यत्ते रेक्ण आयजन्त सबर्दुघायाः पय उस्रियायाः ॥ ११ ॥

मक्षु। कनायाः। सख्यम्। नवीयः। राधः। न। रेतः। ऋतम्। इत्। तुरण्यन्।
शुचि। यत्। ते। रेक्णः। आ। अयजन्त। सबर्दुघायाः। पयः। उस्रियायाः ॥ ११ ॥

[v]मक्षु शीघ्रं [v]कनायाः कमनीयाया[1] धर्मदोग्ध्र्याः [v]नवीयः नवतरं [v]सख्यम्। प्राप्नोतीति शेषः। अथवा नवीय इति राधोविशेषणम्। नवतरं [v]राधः धनमिव [v]रेतः सिच्यमानम् [v]ऋतम् उदकं [v]तुरण्यन् दिवः सकाशात्प्रेरितवन्तः। हे इन्द्र [v]ते तुभ्यं [v]यत्[2] यदा[3] [v]रेक्णः पायोलक्षणं धनम् [v]आ अभिमुखम् [v]अयजन्त अपूजयन्। कीदृशं रेक्णः। [v]सबर्दुघायाः। सबरित्यमृतनाम। अमृतदोग्ध्र्याः [v]उस्रियायाः गोः [v]पयः पानयोग्यं रसम्[3]। तदोदकं तुरण्यन्निति। अत्राध्वर्युब्राह्मणम्—'अङ्गिरसो वै सत्रमासत तेषां पृश्निर्धर्मधुगासीत् सर्जीषेणाजीवत् तेऽब्रुवन् कस्मै नु सत्रमास्महे येऽस्य। आधीनं जनयाम इति ते दिवो वृष्टिमसृजन्त' (तै. ब्रा. २. १. १. १) इति ॥

पश्वा यत्पश्चा वियुता बुधन्तेति ब्रवीति वक्करी रराणः।
वसोर्वसुत्वा कारवोऽनेहा विश्वं विवेष्टि द्रविणमुप क्षु ॥ १२॥

पश्वा। यत्। पश्चा। विऽयुता। बुधन्त। इति। ब्रवीति। वक्करि। रराणः।
वसोः। वसुऽत्वा। कारवः। अनेहा। विश्वम्। विवेष्टि। द्रविणम्। उप। क्षु ॥ १२ ॥

[v]यत् यदा स्तोतारः [v]पश्वा पशुना। गोसमूहेनेत्यर्थः। तेन [v]वियुता वियुक्तानि स्वकीयानि गोस्थानानि [v]पश्चा पश्चात् [v]बुधन्त अजानन्। तदानीं [v]कारवः। कारुरित्यर्थः। स्तोता [v]इति [v]ब्रवीति इत्थं ब्रूते। किमिति। [v]वक्करि स्तोतरि [v]रराणः रममाणः [v]वसोः वासकात् [v]वसुत्वा अतिशयेन वासयिता। यद्वा। वसुत्वेति समूहार्थे त्वा[4] नामकरणः। गोरूपधनवतोऽतिशयेन गोसमूहवानित्यर्थः। [v]अनेहा अपाप इन्द्रः [v]विश्वं सर्वं[5] [v]द्रविणं गोरूपं पणिभिरपहृतं धनं [v]क्षु। मक्षित्यर्थः। शीघ्रम् [v]उप [v]विवेष्टि उपव्याप्नोति पुनरादातुम्। अयमर्थः। यदेन्द्रस्य स्तोतारोऽसुरैरपहृतमास्मीयं गोधनं जानन्ति[6] ततः प्रागेवागत्येन्द्रस्तं न्यरुधदिति[7] ॥

तदिद्वस्य परिषद्वानो अग्मन् पुरू सदन्तो नार्षदं बिभित्सन्।
वि शुष्णस्य संग्रथितमनर्वा विदत्पुरुप्रजातस्य गुहा यत् ॥ १३ ॥

तत्। इत्। नु। अस्य। परिऽसद्वानः। अग्मन्। पुरु। सदन्तः। नार्षदम्। बिभित्सन्।
वि। शुष्णस्य। सम्ऽग्रथितम्। अनर्वा। विदत्। पुरुऽप्रजातस्य। गुहा। यत् ॥ १३ ॥

---

१. ग-त-मु—कमनीयायाः पृश्न्याः। २. त-भ—यथा। ३. त-भ-मु—रसमयजंत। ४. त-भ-मु—त्वो। ५. ग४-त-भ२.६.८—'सर्वं' नास्ति। ६. ग-त१.२.३.६.७.८-भ१.२.४.६-मु—न जानंति। ७. ग४—निदध्यति; त-भ—निदध्यतिति।

vतद्वित् तत्रैव vनु क्षिप्रम् vअस्य इन्द्रस्य vपरिष्कृतानः परितो वर्तमानाः परिचारका रश्मयः vअन्मन् प्रकाशनार्थमगच्छन्। vपुरु पुरूणि कृन्निमाणि vसदन्तः सीदन्तोऽसुराः vमार्चदं मृचदः पुत्रं vविभित्सन् भेत्तुमैच्छन्। किंचायं vशुष्णस्य एतन्नामकस्यासुरस्य vपुरुप्रजातस्य बहुप्रादुर्भावस्य vसंग्रथितं मर्म vविदत् वेत्ति। अथाग्निः vयत् असुरस्य दुर्जेयं मर्म vगुहा गुहायां गोपितं तद्विदत्॥

भर्गो॑ ह॒ नामो॒त यस्य॑ देवाः स्व॑र्ण॒ ये त्रि॑षध॒स्थे नि॑षे॒दुः।
अ॒ग्निर्ह॒ नामो॒त जा॒तवे॑दाः॒ श्रुधी नो॑ होतर्ऋ॒तस्य॒ होता॑ध्रुक् ॥ १४ ॥

भर्गः। ह। नाम। उत। यस्य। देवाः। स्वः। न। ये। त्रिऽसधस्थे। निऽसेदुः।
अग्निः। ह। नाम। उत। जातऽवेदाः। श्रुधि। नः। होतः। ऋतस्य। होता। अध्रुक्॥ १४॥

vउत अपि च भर्गो vह vनाम तत्तेजः किल प्रसिद्धं vयस्य तेजस आग्नेयस्य संबन्धिनि vत्रिषधस्थे बर्हिषि vये vदेवाः सन्ति ते सर्वे vस्वर्णं स्वर्गं यथा तथैव vनिषेदुः निषीदन्ति। vउत अपि च तत्तेजः vअग्निर्ह vनाम अग्निः किल नाम। उतापि च vजातवेदाः जातप्रज्ञो जातानां वेदिता एतदपि तस्य तेजसो नाम। अग्नेर्भर्ग इत्यग्निरिति जातवेदा इति च त्रीणि नामानीत्यर्थः। अथ प्रत्यक्षकृतः। हे vहोतः होमनिष्पादकोक्तनामाग्ने vऋतस्य vहोता यज्ञस्य संबन्धिनां देवानामाह्वाता vअध्रुक् द्रोहरहितस्त्वं vनः अस्माकमाह्वानं vश्रुधि शृणु॥

उ॒त त्या मे॒ रौद्रा॑वर्चि॒मन्ता॒ नास॑त्याविन्द्र गू॒र्तये॒ यज॑ध्यै।
मनु॒ष्वद्वृ॒क्तब॑र्हिषे ररा॒णा म॒न्दू हि॒तप्र॑यसा विक्षु॒ यज्यू॑ ॥ १५ ॥

उत। त्या। मे। रौद्रौ। अर्चिऽमन्ता। नासत्यौ। इन्द्र। गूर्तये। यजध्यै।
मनुष्वत्। वृक्तऽबर्हिषे। रराणा। मन्दू इति। हितऽप्रयसा। विक्षु। यज्यू इति॥ १५॥

vउत अपि च हे vइन्द्र vत्या तौ प्रसिद्धौ vरौद्रौ[1] रुद्रपुत्रौ। 'क्षोदो न रेत इतऊति सिञ्चत्' (ऋ. सं. १०. ६१. २) इति हि रुद्रपुत्रत्वमुक्तम्। vअर्चिमन्ता दीप्तिमन्तौ vनासत्यौ अश्विनौ vमे vगूर्तये स्तुतये vयजध्यै यागाय[2] च भवेतामिति शेषः। किंच vमनुष्वत् मम पितुर्मनोरिव तस्य यज्ञे यथा तथैव vवृक्तबर्हिषे स्तीर्णबर्हिषे मह्यं vरराणा रममाणौ vमन्दू मदिष्णू vहितप्रयसा प्रेरितधनौ vविक्षु ऋत्विक्ष्वस्मदीयेषु तथा[3] vयज्यू यष्टव्यौ भवतमिति शेषः॥ ॥ २८ ॥

अ॒यं स्तु॒तो राजा॑ वन्दि॒ वेधा॒ अपश्च॒ विप्र॑स्तरति॒ स्वसे॑तुः।
स कक्षी॑वन्तं॒ रेज॑यत्सो॒ अग्निं॒ नेमिं॒ न च॒क्रमर्व॑तो रघु॒द्रु ॥ १६ ॥

अयम्। स्तुतः। राजा। वन्दि। वेधाः। अपः। च। विप्रः। तरति। स्वऽसेतुः।
सः। कक्षीवन्तम्। रेजयत्। सः। अग्निम्। नेमिम्। न। चक्रम्। अर्वतः। रघुऽद्रु॥ १६॥

vअयं vवेधाः सर्वस्य विधाता vराजा सोमः vस्तुतः सर्वैः vवन्दि स्तूयतेऽस्माभिः। किंच vविप्रः विशेषेण पूरको विप्रवच्चक्षुर्दो वा vस्वसेतुः यस्य स्वभूता रश्मयो जगद्बन्धकाः सन्ति स सोमः vअपश्च अन्तरिक्षं च vतरति लङ्घयति प्रतिदिनम्। vसः सोमः vकक्षीवन्तम् ऋषिं पर्वतमध्ये

१. त-म-'रौद्रौ' नास्ति। २. त१.२.३.७-म२.४.६.८-योगाय। ३. त-म१.२.४.६.८-ते।

सोमार्थं गतं ᵛरेजयत् अकम्पयत्। ᵛसः स एव ᵛअग्निः हविर्वोढुमशक्तं सन्तं पलाय्याप्सु प्रविष्टं रेजयत्। कम्पने दृष्टान्तः। ᵛनेमिं[1] नमनशीलं ᵛरघुं[2] लघुगमनं ᵛचक्रम् ᵛअर्वंतः अर्वन्तोऽश्वा इव ते यथा तथा रेजयत्। सुमभावश्छान्दसः॥

स द्विबन्धुर्वैतरणो यष्टा सबर्धुं धेनुमस्वं दुहर्ष्यै।
सं यन्मित्रावरुणा वृञ्ज उक्थैर्ज्येष्ठेभिर्यमणं वरूथैः॥ १७॥

सः। द्विऽबन्धुः। वैतरणः। यष्टा। सबःऽधुम्। धेनुम्। अस्वम्। दुहर्ष्यै।
सम्। यत्। मित्रावरुणा। वृञ्जे। उक्थैः। ज्येष्ठेभिः। अर्यमणम्। वरूथैः॥ १७॥

ᵛसः अग्निः ᵛद्विबन्धुः द्वयोर्लोकयोर्बन्धुभूतः ᵛवैतरणः सर्वस्य विशेषेण तारयिता। यद्वा। वितरणार्हो हविष्प्रदानार्हः। ᵛयष्टा देवानां याजकोऽग्निः ᵛसबर्धुम् अमृतोपमपयोदोग्ध्रीं ᵛधेनुम् ᵛअस्वम् अप्रसूतां निवृत्तप्रसवां शयवे ᵛदुहर्ष्यै दोहायाकरोत्। ᵛयत् यदा स शयुः मित्रावरुणौ ᵛअर्यमणं च ᵛज्येष्ठेभिः ज्येष्ठैः प्रशस्तैः ᵛवरूथैः वरणीयैः ᵛउक्थैः शस्त्रैः ᵛसं ᵛवृञ्जे सम्यक्स्तौति। यदा स शयुर्मित्रावरुणार्यम्णां स्तुतिं करोति तदा तेषामाज्ञयाग्निर्निवृत्तप्रसवां पयोदोग्ध्रीमकरोदिति॥

तद्बन्धुः सूरिर्दिवि ते धियंधा नाभानेदिष्ठो रपति प्र वेनन्।
सा नो नाभिः परमास्य वा घाहं तत्पश्चा कतिथश्चिदास॥ १८॥

तत्ऽबन्धुः। सूरिः। दिवि। ते। धियम्ऽधाः। नाभानेदिष्ठः। रपति। प्र। वेनन्।
सा। नः। नाभिः। परमा। अस्य। वा। घ।
अहम्। तत्। पश्चा। कतिथः। चित्। आस॥ १८॥

ᵛतद्बन्धुः। सैव पृथिवी बन्धुकोत्पत्त्यधिष्ठानत्वेन[3] यस्यासौ तद्बन्धुः। तन्मातृक इत्यर्थः। ᵛसूरिः स्तुतेः प्रेरकः ᵛदिवि वर्तमानस्य ᵛते तव स्वभूत इति शेषः। त्वदपत्यभूत इति यावत्। पद्दीसामर्थ्यात्संबन्धसामान्यं प्रतीयते। तच्चादित्यपुत्रो मनुर्मनोः पुत्रो नाभानेदिष्ठ इत्येवं सूर्यापत्यत्वेऽपि पर्यवस्यति। सूर्यनाभानेदिष्ठयोः संबन्धश्चरमपाद उत्तरमन्त्रे च वक्ष्यते। स च ᵛधियंधाः कर्मणां धारको ᵛनाभानेदिष्ठः ᵛवेनन् अङ्गिरोदत्तं गोसहस्रं वेनन् कामयन् ᵛप्र ᵛरपति प्रलपति। स्तौतीत्यर्थः। ᵛवा अपि खेत्यर्थः। ᵛसा द्यौः ᵛनः अस्माकं ᵛपरमा उत्कृष्टा ᵛनाभिः बन्धिका च ᵛअस्य आदित्यस्य अधिष्ठानभूतास्ति। ᵛघ इति पूरणः। ᵛअहं ᵛतत् तस्यादित्यस्य ᵛपश्चा[4] पश्चादनन्तरं ᵛकतिथः कतिपयानां पूरणः ᵛआस अभवम्। अनेन ममादित्येन जन्यजनकभावः संबन्धः संनिकृष्ट इत्युक्तं भवति॥

इयं मे नाभिरिह मे सधस्थमिमे मे देवा अयमस्मि सर्वः।
द्विजा अहं प्रथमजा ऋतस्येदं धेनुरदुहज्जायमाना॥ १९॥

इयम्। मे। नाभिः। इह। मे। सधऽस्थम्। इमे। मे। देवाः। अयम्। अस्मि। सर्वः।
द्विऽजाः। अहं। प्रथमऽजाः। ऋतस्य। इदम्। धेनुः। अदुहत्। जायमाना॥ १९॥

---

१. ग-त४.५.६-भ-नेमिं न। २. त-भ२.८-रघुं लघुं। ३. ग-त१.२.३.६.७.८-भ-मु-बन्धिकोत्पत्त्य°। ४. भ-'पश्चा' नास्ति।

ᵛऊर्ध्वं माध्यमिका वाक् ᵛमे ᵛआसिः सेनाहिनी। आदित्यस्य तस्याआभेदाद्यस्यैषाऽध्यात्मिका[1] वाग्व्यष्टिका भवति। तथा च ब्राह्मणं—'सा वा वागसौ स आदित्यः' (श. ब्रा. १०.५.१.७) इति ब्राह्मणम्। ᵛइह अस्मिन्मण्डले ᵛमे मम ᵛसधस्थं स्थानम्। ᵛइमे मे ᵛदेवाः द्योतमाना रश्मयः ᵛमे मम स्वभूताः। ᵛअयम् अहम् ᵛअस्मि ᵛसर्वः। सूर्यस्य स्वस्योक्तेन प्रकारेणाभेदात्तद्वारा सर्वात्मकत्वम्। ᵛअह किंचेत्यर्थः। ᵛद्विजाः विप्राः ᵛऋतस्य ᵛप्रथमजाः सत्यस्य प्रथमजाः सत्यभूतस्य ब्रह्मणः प्रथमोत्पन्नाः। ᵛधेनुः पृश्निदेवता माध्यमिका वाक् ᵛआयमाना ᵛइदं सर्वम् ᵛअदुहत् दुदोह। उदपादयदित्यर्थः॥

अधासु मन्द्रो अरतिर्विभावार्व स्यति द्विवर्तनिर्वनेषाट्।
ऊर्ध्वा यच्छ्रेणिर्न शिशुर्दन्मक्षू स्थिरं शेवृधं सूत माता॥ २०॥

अध। आसु। मन्द्रः। अरतिः। विभाऽवा। अर्व। स्यति। द्विऽवर्तनिः। वनेषाट्।
ऊर्ध्वा। यत्। श्रेणिः। न। शिशुः। दन्। मक्षु। स्थिरम्। शेऽवृधम्। सूत। माता॥२०॥

ᵛअध अथ ᵛआसु चतसृषु दिक्षु ᵛमन्द्रः मोदमानः ᵛअरतिः गन्ता ᵛविभावा दीप्तिमान् ᵛद्विवर्तनिः द्वयोः लोकयोः गन्ता ᵛवनेषाट् वने काष्ठानामभिभविताग्निः ᵛअव ᵛस्यति अवसक्तो भवति यागार्थम्। ᵛयत् च योऽग्निः ᵛऊर्ध्वा उन्मुखा ᵛश्रेणिर्न ᵛशिशुः शंसनीयः सेनेव ᵛमक्षु क्षीघ्रं[2] ᵛदन् शत्रून् दमयति तमिमं ᵛस्थिरं निश्चलं ᵛशेवृधं सुखस्य वर्धकं ᵛमाता अरणिः ᵛसूत यज्ञे जनयामास॥ ॥ २९ ॥

अधा गाव उपमातिं कनाया अनु श्मान्तस्य कस्य चित्परेयुः।
श्रुधि त्वं सुद्रविणो नस्त्वं याळाश्वघ्नस्य वावृधे सूनृताभिः॥ २१॥

अध। गावः। उपऽमातिम्। कनायाः। अनु। श्मान्तस्य। कस्य। चित्। परा। ईयुः।
श्रुधि। त्वम्। सुऽद्रविणः। नः। त्वम्। याट्। आश्वऽघ्नस्य। ववृधे। सूनृताभिः॥ २१॥

ᵛअध संप्रति ᵛकस्य ᵛचित् ᵛश्मान्तस्य प्रवृद्धस्य श्मान्तस्य वा[3]। आत्मनो निर्देशः। ईदृशस्य नामाजेर्विहृस्य ᵛकनायाः कमनीयायाः स्तुतेः ᵛगावः वाचः। बहुत्वं। वाचः स्तुतयः कनायाः कमनीयायाः स्तुतेः ᵛउपमातिम् उपमानभूतमिन्द्रम् ᵛअनु ᵛपरेयुः अनु परागच्छन्ति। हे ᵛसुद्रविणः सुधनाढ्ये ᵛत्वं ᵛश्रुधि शृणु। ᵛनः अस्माकमिममिन्द्रं ᵛयाट् अयाट् यज। ᵛत्वं च ᵛआश्वघ्नस्य अश्वाद्योऽश्वमेधयाजी मनुः तस्य पुत्रस्य मम ᵛसूनृताभिः स्तुतिभिः ᵛववृधे वर्धसे। पुरुषव्यत्ययः। अथवायं वर्धत इति परोक्षेण निर्देशः॥

अधा त्वमिन्द्र विद्रथ स्मान्महो राये नृपते वज्रबाहुः।
रक्षा च नो मघोनः पाहि सूरीन्नेहसस्ते हरिवो अभिष्टौ॥ २२॥

अध। त्वम्। इन्द्र। विद्धि। अस्मान्। महः। राये। नृऽपते। वज्रऽबाहुः।
रक्ष। च। नः। मघोनः। पाहि। सूरीन्। अनेहसः। ते। हरिऽवः। अभिष्टौ॥२२॥

---

१. ग-त-च१.२.४.६.८-°माध्यमिकी। २. ग-त-मु-क्षिप्रं। ३. ग-त४.५-मु-वेति; त१.६.३.७.८-म६.८-वे।

हे[1] vइन्द्र[1] vअध अधुना vवज्रबाहुः त्वम् vअस्मान् vमहः महते vराये धनाय vविधि जानीहि । हे इन्द्र vमघोनः हविष्मतः vसूरीन् स्तुतिप्रेरकान् vनः अस्मान् vरक्ष vच । हे vहरिवः हरिर्भ्यां तद्वद्भिन्द्र vते तव vअभिष्टौ अभिगमने vअनेहसः अपापाः स्यामेति शेषः ॥

अध॒ यद्रा॑जाना॒ गवि॑ष्टौ॒ सर॑त्सर॒ण्युः का॒रवे॑ जर॒ण्युः ।
विप्रः॑ प्रे॒ष्ठः स ह्ये॑षां ब॒भूव॒ परा॑ च॒ वक्ष॑दुत॒ पर्ष॑देनान् ॥ २३ ॥

अध । यत् । राजाना । गोऽइष्टौ । सरत् । सरण्युः । कारवे । जरण्युः ।
विप्रः । प्रेष्ठः । सः । हि । एषाम् । बभूव । परा । च । वक्षत् । उत । पर्षत् । एनान् ॥२३॥

हे vराजाना राजमानौ मित्रावरुणौ vअध अधुना सत्रसमाप्तौ vयत् यस्मात् vगविष्टौ गवामेषणायां सत्यां vसरण्युः सरणशीलो यमः vसरत् गच्छति vकारवे कर्माणि[2] कुर्वतेऽङ्गिरसां गणाय । किमिच्छन् । vजरण्युः तस्मा अङ्गिरसां गणाय स्तुतिमिच्छन्[3] । तस्मात् vसः vविप्रः मामाजेविद्वान् vएषाम् अङ्गिरसां vप्रेष्ठः प्रियतमः vबभूव भवतु । vहि इति पूरणः । तेषां कर्तव्यं vपरा च vवक्षत् परावहतु । vउत अपि च vएनान् अङ्गिरसः vपर्षत् पारयतु[4] इत्यात्मन[5] एवाशास्ते[6] ॥

अधा॒ न्वस्य॒ जेन्य॑स्य पु॒ष्टौ वृ॒था रे॑भन्त ईमहे॒ तदु॒ नु ।
सर॑ण्युरस्य सू॒नुरश्वो॑ विप्रश्चा॑सि श्रव॑सश्च सा॒तौ ॥ २४ ॥

अध । नु । अस्य । जेन्यस्य । पुष्टौ । वृथा । रेभन्तः । ईमहे । तत् । ऊँ इति । नु ।
सरण्युः । अस्य । सूनुः । अश्वः । विप्रः । च । असि । श्रवसः । च । सातौ ॥ २४ ॥

अनया वरुणं पृथक् स्तौति । vअध अथ vनु क्षिप्रम् vअस्य vजेन्यस्य जयशीलस्य स्तुत्वा जेतव्यस्य वा vतत् स्वभूतं गवादिधनं vपुष्टौ पोषे निमित्ते सति तस्य पुष्टयर्थं वा vवृथा अनायासेन vरेभन्तः स्तुवन्तः vनु क्षिप्रम् vईमहे याचामहे । vसरण्युः शीघ्रसरणशीलः vअश्वः vअस्य वरुणस्य vसूनुः पुत्रः । वरुणाद्भृग्व उत्पन्नः । अथ प्रत्यक्षकृतः । हे वरुण त्वं vविप्रश्चासि विप्रवत्पूज्यः शुद्धो वा भवसि । vश्रवसश्च अन्नस्य vसातौ लाभे अस्माकमन्नलाभाय प्रवृत्तश्च भवसि[7] ॥

यु॒वोर्यदि॑ सख्याया॒स्मे शर्धा॑य॒ स्तोम॑ जुजु॒षे नम॑स्वान् ।
वि॒श्वत्र॒ यस्मि॒न्ना गिरः॑ समी॒चीः पू॒र्वीरु॑ गा॒तुर्दा॑शदसू॒नृता॑यै ॥ २५ ॥

यु॒वोः । यदि॑ । सख्याय । अस्मे इति॑ । शर्धा॑य । स्तोम॑म् । जुजु॒षे । नम॑स्वान् ।
वि॒श्वत्र॑ । यस्मि॑न् । आ । गिरः॑ । स॒म्ऽई॒चीः । पू॒र्वीःऽइ॑व । गा॒तुः । दा॒श॒त् । सू॒नृता॑यै ॥२५॥

हे मित्रावरुणौ vयुवोः युवयोः vशर्धाय बलवते vअस्मे अस्माकं vसख्याय । यद्वा । युवयोः सख्याय अस्मे अस्माकं शर्धाय बलाय च । vयदि vनमस्वान् अन्नवानध्वर्युः स्तोत्रवान् होता वा vस्तोमं vजुजुषे सेवते । vयस्मिन् सख्ये सिद्धे सति vविश्वत्र विश्वस्मिन्जनपदे vगिरः अङ्गिरसां

१. ग४–हे नृपते नृणां पालक इंद्र । २. ग-त-म२.४.६.८-मु–कर्म । ३. त१.२.४.५.६.७.८-म–स्तुतिमिच्छन् जरण्युः । ४. ग४–प्रापयतु; त-म-मु–पारयति । ५. ग-त४.५–इत्यात्मानमेवाशास्ते; त१.२.३.६.७.८-म१–इत्यात्मान एवाशास्ते । ६. त-म–भवति ।

संबन्धिन्यः[1] [v]समीचीः समीच्यः [v]आ गच्छन्तीति शेषः। उदाराणां[2] गृह इवं गृहाण इवं गृहाणेत्येवंरूपाः भूयन्त इत्यर्थः। यद्वा। यागानुष्ठातृणां स्तुतिगिर आगच्छन्तीति। [v]पूर्वीव [v]गातुः प्राची दिगिव सा यथा गच्छतां सुखं प्रयच्छति तद्वत्[3]। यद्वा। पूर्वी[4] पुरा[5] प्रसिद्धा पुरातनीव गातुः सरणिरिव सा यथा गच्छतां सुखं प्रयच्छति तद्वत्। [v]सूनृतायै प्रियसत्यरूपायै स्तुतिवाचे [v]दाशत्[6] प्रयच्छतु[7]॥

स गृणानो अग्निर्देववानिति सुबन्धुर्नमसा सूक्तैः।
वर्धदुक्थैर्वचोभिरा हि नूनं व्यध्वैति पयस उस्रियायाः॥ २६॥

सः। गृणानः। अत्ऽअभिः। देवऽवान्। इति। सुऽबन्धुः। नमसा। सुऽउक्तैः।
वर्धत्। उक्थैः। वचःऽअभिः। आ। हि। नूनम्। वि। अध्वा। एति। पयसः।उस्रियायाः॥२६॥

[v]अग्निः देवताभिः [v]देववान् [v]सुबन्धुः शोभनबन्धनः [v]सः [v]वरुणः [v]इति इत्थंकृतप्रकारेण [v]नमसा नमस्कारेण [v]सूक्तैः च [v]गृणानः स्तूयमानः सन् [v]वर्धत वर्धताम्। [v]उक्थैर्वचोभिः उच्यमानैः प्रशस्तैर्वा स्तुतिवचोभिः [v]नूनम् इदानीम् [v]आ गच्छतिति शेषः। [v]हि इति पूरणः। तस्य यागार्थम् [v]उस्रियायाः गोः [v]पयसः [v]अध्वा मार्गः [v]वि [v]एति। स्तनाग्राणि क्षरन्तीत्यर्थः॥

त ऊ षु णो महो यजत्रा भूत देवास ऊतये सजोषाः।
ये वाजाँ अनयता वियन्तो ये स्था निचेतारो अमूराः॥ २७॥

ते। ऊँ इति। सु। नः। महः। यजत्राः। भूत। देवासः। ऊतये। सऽजोषाः।
ये। वाजान्। अनयत। विऽयन्तः। ये। स्थ। निऽचेतारः। अमूराः॥ २७॥

अनयर्षिरङ्गिरस आशास्ते। हे [v]यजत्राः यष्टव्याः [v]देवासः देवाः [v]ते यूयम्। [v]ऊ इति पूरणः। [v]महः महते [v]नः अस्माकम् [v]ऊतये रक्षणाय [v]सजोषाः संगताः [v]भूत भवत। [v]ये च यूयम् अङ्गिरसो मह्यं [v]वाजान् अन्नानि [v]अनयत प्रापयथ [v]वियन्तः सततमुक्थाय[1] विविधं गच्छन्तः सन्तः। [v]ये च यूयम् [v]अमूराः अमूढाः। षष्ठाद्दःप्रयोगमौदयरहिता इत्यर्थः। तादृशाः [v]निचेतारः गवां विविक्तारः [v]स्थ भवथ। ते सजोषा भूतेति समन्वयः॥ ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्य-
धुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्येऽष्टमाष्टके प्रथमोऽध्यायः॥

---

१. ग४-त२.३.७-म१.२.६.८-संबंधिनि। २. त-उदाहरणं। ३. ग-त-म१.२.४.६.८-'तद्वत्' नास्ति। ४. ग-त-म-पुरा पूर्वी। ५. ग-त-म२.४.६.८-'दाशत् प्रयच्छतु' नास्ति; भ७-दाशत; मु-दाशत् सुखं प्रयच्छतु। ६. ग४-सततमुधाय; त१.२.३-म१.२.४.६.८-सा उक्थाय। म१-सतत उत्थाय।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
व्याख्याय प्रथमं विद्वानष्टमस्याष्टकस्य सः ।
अध्यायं सायणामात्यो[1] द्वितीयं व्याचिकीर्षति ॥

तत्र 'ये यज्ञेन' इत्येकादशर्चमनुवाकापेक्षया द्वितीयं सूक्तं मानवस्य नाभानेदिष्ठस्यार्षम् । आदितश्चतस्रो जगत्यः । पञ्चम्यनुष्टुप् । षष्ठी बृहती । सप्तमी सतोबृहती । अष्टमीनवम्यावनुष्टुभौ । दशमी गायत्री । एकादशी त्रिष्टुप् । आदितः षण्णां विश्वे देवा अङ्गिरसो वा देवता । सप्तमी वैश्वदेवी । अष्टम्याद्यासु चतसृषु सावर्णेर्महाराजस्य दानं स्तूयते । अतस्तास्तद्देवताकाः । तथा चानुक्रम्यते— 'ये यज्ञैनैकादशाद्याः षळङ्गिरसां स्तुतिर्वान्त्या त्रिष्टुप्पञ्चम्यनुष्टुप्प्रगाथोऽनुष्टुभौ गायत्री चतस्रोऽन्त्याः सावर्णेर्दानस्तुतिः' इति । षष्ठेऽहनि वैश्वदेवशस्त्र एतत्सूक्तम् । सूत्रितं च—'इदमित्था रौद्रमिति प्रागुपोत्तमाया ये यज्ञेनेत्यावपते' (आश्व. श्रौ. ८. १) इति ॥

ये यज्ञेन दक्षिणया समक्ता इन्द्रस्य सख्यममृतत्वमानश ।
तेभ्यो भद्रमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥ १ ॥

ये । यज्ञेन । दक्षिणया । सम्ऽअक्ताः । इन्द्रस्य । सख्यम् । अमृतऽत्वम् । आनश ।
तेभ्यः । भद्रम् । अङ्गिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवम् । सुऽमेधसः ॥ १ ॥

नाभानेदिष्ठः स्वपित्रा मनुनाभ्यनुज्ञातः सत्रमासीनानङ्गिरसोऽभ्येत्य मां प्रतिगृह्णीत युष्मभ्यं यज्ञं प्रज्ञापयामीति यदुक्तवान् तदुच्यते । इतिहासस्तु इदमित्येति पूर्वसूक्ते 'नाभानेदिष्ठं शंसति नाभानेदिष्ठं वै मानवम्' (ऐ. ब्रा. ५. १४) इति ब्राह्मणानुसारेण 'मनुः पुत्रेभ्यो दायं व्यभजत्' (तै. सं. ३. १. ९. ४) इति तैत्तिरीयब्राह्मणानुसारेण च सम्प्रदायमभिहितः । तथा चास्या ऋचोऽयमर्थः । [v]यज्ञेन यजनीयेन हविषा [v]दक्षिणया ऋत्विग्भ्यो देयया [v]समक्ताः संगताः [v]ये अहीनैकाहसत्राणि[2] कुर्वन्तो यूयम् [v]इन्द्रस्य [v]सख्यं सखिकर्म अत एव [v]अमृतत्वम् अमरणधर्मं देवत्वम् [v]आनश आनशिध्वे प्राप्ताः स्थ । अश्नोतेर्लिटि मध्यमे व्यत्ययेन बहुवचनम् । 'अश्नोतेश्च' इति तुडागमः । यदवृत्तयोगादनिघातः । हे [v]अङ्गिरसः [v]तेभ्यः [v]वः युष्मभ्यं [v]भद्रं कल्याणं कर्म [v]अस्तु । हे [v]सुमेधसः सुप्रज्ञा हे अङ्गिरसः ते यूयमिदानीमागतं [v]मानवं मनोः पुत्रं मां [v]प्रति [v]गृभ्णीत प्रतिगृह्णीत । मयि प्रतिगृहीते सति यज्ञं साधु करिष्यामीति तदर्थं प्रतिगृह्णीत ॥

य उदाजन् पितरो गोमयं वस्वृतेनाभिन्दन् परिवत्सरे वलम् ।
दीर्घायुत्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥ २ ॥

ये । उत्ऽआजन् । पितरः । गोऽमयम् । वसु । ऋतेन । अभिन्दन् । परिवत्सरे । वलम् ।
दीर्घायुऽत्वम् । अङ्गिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवम् । सुऽमेधसः ॥ २ ॥

१. म—सायणाचार्यो । २. ग४-त१.२.७-म१—अहेनैकासहस्राणि; त३—अहीनैकासहसहस्राणि; म२—अहीनैकाहिकसहस्राणि; म४.६.७.८-मु—अहीनैकाहसहस्राणि ।

हे [v]अङ्गिरसः [v]पितरः अस्माकं पूर्वजत्वेन पितृभूताः [v]ये यूयं [v]गोमयं गवात्मकं पणिभिरपहृतं [v]वसु धनम् [v]उदाजन् तैरधिष्ठितात्पर्वतादुदगमयन् । किंच [v]ऋतेन सत्यभूतेन यज्ञेन [v]परिवत्सरे पर्यागते वत्सरे संपूर्णे । सत्रान्ते इत्यर्थः । तत्र [v]बलं बलनामानं गवामपहर्तारमसुरम् [v]अभिन्दन् व्यनाशयन् तेभ्यः [v]वः युष्मभ्यं [v]दीर्घायुत्वं प्रभूतजीवनम् [v]अस्तु । शेषं पूर्ववत् ॥

य ऋतेन सूर्यमारोहयन् दिव्यप्रथयन् पृथिवीं मातरं वि ।
सुप्रजास्त्वमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥ ३ ॥

ये । ऋतेन । सूर्यम् । आ । अरोहयन् । दिवि । अप्रथयन् । पृथिवीम् । मातरम् । वि ।
सुप्रजाःऽत्वम् । अङ्गिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवम् । सुऽमेधसः ॥ ३ ॥

हे [v]अङ्गिरसः [v]ये भवन्तः [v]ऋतेन सत्यभूतेन यज्ञेन [v]दिवि द्युलोके [v]सूर्यं सुष्ठु सर्वस्य प्रेरकमादित्यम् [v]आरोहयन् अस्थापयन् किंच [v]मातरं सर्वेषां निर्मात्रीं [v]पृथिवीं [v]वि [v]अप्रथयन् प्रसिद्धामकुर्वन् सत्रादिकर्मकरणेन तेभ्यः युष्मभ्यं [v]सुप्रजास्त्वं सुपुत्रत्वम् [v]अस्तु ॥ 'नित्यमसिच् प्रजामेधयोः' इत्यसिच् समासान्तः । तस्मादाशीर्लिङ्प्रत्ययः ॥

अयं नाभा वदति वल्गु वो गृहे देवपुत्रा ऋषयस्तच्छृणोतन ।
सुब्रह्मण्यमङ्गिरसो वो अस्तु प्रति गृभ्णीत मानवं सुमेधसः ॥ ४ ॥

अयम् । नाभा । वदति । वल्गु । वः । गृहे । देवऽपुत्राः । ऋषयः । तत् । शृणोतन ।
सुऽब्रह्मण्यम् । अङ्गिरसः । वः । अस्तु । प्रति । गृभ्णीत । मानवम् । सुऽमेधसः ॥ ४ ॥

हे [v]देवपुत्राः देवानां पुत्रा अग्नेः पुत्राः [v]ऋषयः अतीन्द्रियार्थस्य द्रष्टारो हे [v]अङ्गिरसः [v]अयं [v]नाभा[1] नाभानेदिष्ठः पुरोवर्ती जनः [v]वः युष्माकं [v]गृहे गृहभूते यज्ञे [v]वल्गु कमनीयं वचः [v]वदति । [v]तत् वाक्यं यूयं [v]शृणोतन महतादरेण शृणुत । 'शु श्रवणे' । 'तप्तनप्तनथनाश्च' इति तनबादेशः । तेभ्यो युष्मभ्यं [v]सुब्रह्मण्यं शोभनं ब्रह्मवर्चसम् [v]अस्तु । इदानीमागतं [v]मानवं मां [v]प्रति[2] [v]गृभ्णीत[2] प्रतिगृह्णीत ॥

विरूपास इदृषयस्त इद्गम्भीरवेपसः ।
ते अङ्गिरसः सूनवस्ते अग्नेः परि जज्ञिरे ॥ ५ ॥

विऽरूपासः । इत् । ऋषयः । ते । इत् । गम्भीरऽवेपसः ।
ते । अङ्गिरसः । सूनवः । ते । अग्नेः । परि । जज्ञिरे ॥ ५ ॥

परोक्षतयर्षिराह । [v]ऋषयः कर्मणां द्रष्टार एत ऋषयः [v]विरूपास [v]इत् अन्योन्यं वर्णतो[3] रूपतश्च नानारूपा भवन्ति । [v]त [v]इत् त एवामी अङ्गिरसः [v]गम्भीरवेपसः । वेप इति कर्मनाम । गम्भीरकर्माणो भवन्ति । [v]ते[4] इमे[4] [v]अङ्गिरसः [v]सूनवः पुत्राः सन्तु । तदेवाह । [v]ते इमे अङ्गिरसः [v]अग्नेः [v]परि [v]जज्ञिरे सर्वतो जाताः प्रादुर्भूताः । 'ये ऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्' (ऐ. ब्रा. ३. ३४) इति ब्राह्मणम् । अत्र निरुक्तं च द्रष्टव्यम् (निरु. ३. १७) ॥ ॥ १ ॥

---

१. म-त-म-'नाभा' नास्ति । २. ग-त-म-मु-'प्रति गृभ्णीत' नास्ति । ३. ग-त४.५-प्रमाणतो; त१.२.६.७.८-अ१.२.४.६.८-प्रणतो । ४. त१.२.३.७-अ२.६.८-ते त इमे ।

ये अग्नेः परि जज्ञिरे विरूपासो दिवस्परि ।
नवग्वो नु दशग्वो अङ्गिरस्तमः सचा देवेषु मंहते ॥ ६ ॥

ये । अग्नेः । परि । जज्ञिरे । विऽरूपासः । दिवः । परि ।
नवऽग्वः । नु । दशऽग्वः । अङ्गिरःऽतमः । सचा । देवेषु । मंहते ॥ ६ ॥

[v]विरूपासः विविधरूपाः [v]ये अङ्गिरसः [v]दिवस्परि द्युलोकात् [v]अग्नेः [v]परि [v]जज्ञिरे परितो जाताः । यद्वा । दिवस्परि । परिः पञ्चम्यर्थद्योतकः । स्वतेजसा दीप्यमानादग्नेर्जाताः । तेषां[1] मध्ये [v]नवग्वः [v]दशग्वः च [v]अङ्गिरस्तमः अङ्गिरसां वरिष्ठः । सत्रमासीनानामङ्गिरसां मध्ये केचन नवसु मास्सु कर्म ह्यवोदतिष्ठन् केचन दशसु मास्स्वित्येवमङ्गिरसामयनमुक्तम् । तेषामग्निर्नवग्वश्च दशग्वश्चोक्तः । तादृशः [v]देवेषु [v]सचा सहावस्थितः[2] सोऽग्निः [v]मंहते मह्यं धनं प्रयच्छति । मंहतिर्दानकर्मा ॥

इन्द्रेण युजा निः सृजन्त वाघतो व्रजं गोमन्तमश्विनम् ।
सहस्रं मे ददतो अष्टकर्ण्यः श्रवो देवेष्वक्रत ॥ ७ ॥

इन्द्रेण । युजा । निः । सृजन्त । वाघतः । व्रजम् । गोऽमन्तम् । अश्विनम् ।
सहस्रम् । मे । ददतः । अष्टऽकर्ण्यः । श्रवः । देवेषु । अक्रत ॥ ७ ॥

[v]वाघतः कर्मणां वोढारो विप्रा देवा अङ्गिरसो वा [v]इन्द्रेण [v]युजा सहायेन [v]निः [v]सृजन्त निरगमयन् । किम् । [v]गोमन्तं गोयुक्तम् [v]अश्विनम् अश्ववन्तं पणिभिरवरुद्धं [v]व्रजम् । ते [v]मे मां प्रति [v]सहस्रं सहस्रसंख्याकं धनं सत्रपरिवेषणम् [v]अष्टकर्ण्यः । अष्ट इति 'अशू व्याप्तौ' निष्ठायां रूपम् । विस्तृतकर्णाः । उपलक्षणमेतत् । व्याप्तसर्वावयवा गाश्च [v]ददतः मह्यं प्रयच्छन्तः [v]देवेषु इन्द्रादिषु [v]श्रवः हविर्लक्षणमन्नं कीर्तिं वा [v]अक्रत अकृपत । करोतेर्लुङि 'मन्त्रे घस' इति च्लेर्लुक् । एवं नाभानेदिष्ठेनाङ्गिरसः स्तुतास्तस्मै धनं प्रादुः । तदुक्तं शौनकेन—'अथोऽङ्गिरसस्तुष्टा यद्दुर्मानवाय तु । तत्पुण्याय च कर्माणि ये यज्ञेनेत्यकीर्तयत्[3]' ॥

उत्तराभिश्चतसृभिरस्मै मानवायर्क्षये सावर्णिना यद्दत्तं तत्प्रशस्यते । तदप्युक्तं शौनकेन— ' सावर्णिना च यद्दत्तं मानवाय महद्वसु । तदुक्तं सूक्तशेषेण प्र नूनं जायतामिति ' ॥

प्र नूनं जायतामयं मनुस्तोकमिव रोहतु ।
यः सहस्रं शतार्धं सद्यो दानाय मंहते ॥ ८ ॥

प्र । नूनम् । जायताम् । अयम् । मनुः । तोकम्ऽइव । रोहतु ।
यः । सहस्रम् । शतऽअर्धम् । सद्यः । दानाय । मंहते ॥ ८ ॥

[v]अयं सावर्णिः [v]मनुः [v]नूनं क्षिप्रं [v]प्र [v]जायतां प्रजातो भवतु । धनादिभिः पुत्रादिभिश्च [v]रोहतु प्रादुर्भवतु । तत्र दृष्टान्तः । [v]तोकमेव । यथा अलक्षिते बीजं प्रादुर्भवति एवं कर्मफलसंयुक्तः स मनुः पुत्रादिभिः रोहतु । [v]यः अयं मनुः [v]शतार्धं बह्वधसंयुक्तं [v]सहस्रं गवां [v]सद्यः तदानीमेव [v]दानाय [v]मंहते अस्मा ऋत्विजे दातुं प्रेरयति ॥

---

१. ग-त१.२.३-म१.२.४.६—तेषामेषां; त६.८-म७—तेषां येषां । २. त-म—सह स्थितः । ३. त-म१.६.८—यज्ञेनेति कीर्तयत्; म२.७-मु—यज्ञेनेति कीर्तयेत् ।

न तमꣳहोति कश्चन दिवईव सान्वारभम् ।
सावर्ण्यस्य दक्षिणा वि सिन्धुरिव पप्रथे ॥ ९ ॥

न । तम् । अꣳहोति । कः । चन । दिवःऽइव । सानु । आऽरभम् ।
सावर्ण्यस्य । दक्षिणा । वि । सिन्धुःऽइव । पप्रथे ॥ ९ ॥

ᵛतं सावर्णिं मनुं ᵛकश्चन कश्चिदपि ᵛआरभम् आरब्धुं स्वकर्मणा ᵛन ᵛअꣳहोति न व्याप्नोति । यथा मनुः प्रयच्छति तथान्यो दातुं न शक्नोतीत्यर्थः । कथंस्थितम् । ᵛदिवइव द्युलोकस्य ᵛसानु सशृङ्गिकूटं तेजसा कैश्चिदप्यप्रधृष्यमादित्यमिव स्थितम् । आरभम् । ' शकि णमुल्कमुलौ ' (पा. सू. ३. ४. १२) इति कमुल् । तस्य ᵛसावर्ण्यस्य मनोरियं गवादिदक्षिणा ᵛसिन्धुरिव स्यन्दमाना नदीव पृथिव्यां ᵛपप्रथे विप्रथते । विस्तीर्णा भवति ॥

उत दासा परिविषे स्मद्दिष्टी गोपरीणसा । यदुस्तुर्वश्च मामहे ॥ १० ॥

उत । दासा । परिऽविषे । स्मद्दिष्टी इति स्मत्ऽदिष्टी । गोऽपरीणसा ।
यदुः । तुर्वः । च । ममहे ॥ १० ॥

ᵛउत अपि च ᵛस्मद्दिष्टी कल्याणादेशिनौ ᵛगोपरीणसा गोपरीणसौ गोभिः परिवृतौ बहुगवादि-युक्तौ ᵛदासा दासवत् प्रेष्यवत् स्थितौ तेनाधिष्ठितौ ᵛयदुः च ᵛतुर्वश्च एतन्नामकौ राजर्षी ᵛपरिविषे अस्य सावर्णेर्मनोर्भोजनाय ᵛममहे पशून्प्रयच्छतः । प्रत्येकमन्वयादेकवचनम् ॥

सहस्रदा ग्रामणीर्मा रिषन्मनुः सूर्येणास्य यतमानैतु दक्षिणा ।
सावर्णेर्देवाः प्र तिरन्त्वायुर्यस्मिन्नश्रान्ता असनाम वाजम् ॥ ११ ॥

सहस्रऽदाः । ग्रामऽनीः । मा । रिषत् । मनुः । सूर्येण । अस्य । यतमाना । एतु । दक्षिणा ।
सावर्णेः । देवाः । प्र । तिरन्तु । आयुः । यस्मिन् । अश्रान्ताः । असनाम । वाजम् ॥ ११ ॥

ᵛसहस्रदाः[1] गवादीनां सहस्रस्य दाता ᵛग्रामणीः ग्रामाणां नेता कर्ता जनपदानामयं ᵛमनुः ᵛमा ᵛरिषत् न कैश्चिदपि रिष्टो हिंसितो भवतु । यद्वा । कर्मनेतृनस्मान्मा हिꣳसन्तु किंतु धनादिदानेन पूजयतु । ᵛअस्य ᵛयतमाना गच्छन्ती ᵛदक्षिणा ᵛसूर्येण सह ᵛएतु संगच्छताम् । त्रिषु लोकेषु प्रसिद्धा भवत्वित्यर्थः । तस्यास्य ᵛसावर्णेः सवर्णपुत्रस्य मनोः ᵛदेवाः इन्द्रादयः ᵛआयुः जीवनं ᵛप्र ᵛतिरन्तु प्रवर्धयन्तु । ᵛअश्रान्ताः कर्मसु[2] अनलसाः[3] सर्वं कर्म कुर्वन्तो वयं ᵛयस्मिन्[4] मनौ ᵛवाजं गोलक्षणमन्नम् ᵛअसनाम संभजेमहि । नामानेदिष्ठोऽहमलभ इत्याशास्ते ॥ ॥ २ ॥

' परावतो ये ' इति सप्तदशर्चं तृतीयं सूक्तं प्लतेः पुत्रस्य गयस्यार्षम् । बोधीसत्सदश्चौ त्रिष्टुभौ । पञ्चदशी त्रिष्टुब्जगती वा । शिष्टाश्चतुर्दश जगत्यः । ' स्वस्ति नः पथ्यासु ' इति द्वे पथ्या-स्वस्तिदेवताके । शिष्टा वैश्वदेव्यः । तथा चानुक्रान्तं—' परावतस्त्र्यृचा गयः प्लातो द्वित्रिष्टुबन्तं तु स्वस्ति पथिष्टुब्भ्यां सह बोधसा पथ्यास्वस्तिदेवत्या ' इति । पूर्वयाभिप्लवषडहोस्तृतीयेऽहनि

---

१. ग-त-म-मु-' सहस्रदाः ' नास्ति । २. ग-त-म-कर्मसु कर्मणि । ३. ग-त२.३.४.५.६-म-अनलसमानाः । ४. त-म६.८-मु-अस्मिन् ।

वैश्वदेवशस्त्रं एतत्सूक्तं वैश्वदेवनिविद्धानम्। सूत्रितं च—'अनश्वो जातः परावतो च इति वैश्वदेवम्' (आश्व. श्रौ. ७. ७) इति ॥

परावतो ये दिधिषन्त आप्यं मनुप्रीतासो जनिमा विवस्वतः ।
ययातेर्ये नहुष्यस्य बर्हिषि देवा आसते ते अधि ब्रुवन्तु नः ॥ १ ॥

परा३वतः । ये । दिधिषन्ते । आप्यम् । मनु३प्रीतासः । जनिम । विवस्वतः ।
ययातेः । ये । नहुष्यस्य । बर्हिषि । देवाः । आसते । ते । अधि । ब्रुवन्तु । नः ॥ १ ॥

ये देवाः परावतः दूरदेशादागत्य आप्यं ज्ञातेयं मनुष्यैः सह बन्धुत्वं दिधिषन्ते धारयन्ति । यद्वा । हविषां प्रदातृभिर्मनुष्यैः सह सख्यं कुर्म इति परस्परं शब्दायन्ते । 'धिष शब्दे' जौहोत्यादिकः । छान्दसो झस्यान्तादेशः । 'धिष धारणे' इति केश्चिदप्युपगम्यते । उक्तार्थमेव विशिनष्टि । मनुप्रीतासः मनुष्यैः प्रीता देवाः विवस्वतः विवस्वत्पुत्रस्य मनोः जनिम जन्मानि मनुष्यान् धारयन्ति । किंच ये देवाः नहुष्यस्य[1] नहुषपुत्रस्य ययातेः एतन्नामकस्य राजर्षेः बर्हिषि यज्ञे आसते उपविशन्ति ते देवाः नः अस्मान् अधि ब्रुवन्तु धनादिप्रदानेनास्मानधिकं वदन्तु । पूजयन्निवस्तुत्यर्थः ॥

विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यज्ञियानि वः ।
ये स्थ जाता अदितेरद्भ्यस्परि ये पृथिव्यास्ते म इह श्रुता हवम् ॥ २ ॥

विश्वा । हि । वः । नमस्यानि । वन्द्या । नामानि । देवाः । उत । यज्ञियानि । वः ।
ये । स्थ । जाताः । अदितेः । अत्ऽभ्यः । परि । ये । पृथिव्याः । ते । मे । इह । श्रुत । हवम् ॥२॥

हे देवाः इन्द्रादयः । हिरवधारणे । वः युष्माकमेव नामानि नमनीयानि विश्वा सर्वाणि शरीराणि नमस्यानि नमस्काराहाणि भवन्ति वन्द्या वन्द्यानि स्तोतव्यानि च भवन्ति । उत अपि च वः युष्माकं तानि शरीराणि यज्ञियानि यज्ञार्हाणि भवन्ति । ये[2] यूयम् अदितेः अदीनात् द्युलोकात् अद्भ्यः । अन्तरिक्षनामैतत् । अन्तरिक्षात् । परिः पञ्चम्यर्थद्योतकः । पृथिव्याः च जाताः प्रादुर्भूताः स्थ भवथ ते यूयम् इह अस्मिन्यज्ञे आगत्य मे मदीयं हवम् आह्वानं श्रुत शृणुत ॥

अग्निष्टोमे वैश्वदेवशस्त्रे 'येभ्यो माता' इत्येषा धाय्या । सूत्रितं च—'अयं वेनश्चोदयत्पृश्निगर्भा येभ्यो माता मधुमत्' (आश्व. श्रौ. ५. १८) इति ॥

येभ्यो माता मधुमत्पिन्वते पयः पीयूषं द्यौरदितिरद्रिबर्हाः ।
उक्थशुष्मान् वृषभरान्त्स्वप्नसस्ताँ आदित्याँ अनु मदा स्वस्तये ॥

येभ्यः । माता । मधुऽमत् । पिन्वते । पयः । पीयूषम् । द्यौः । अदितिः । अद्रिऽबर्हाः ।
उक्थऽशुष्मान् । वृषऽभरान् । सुऽअप्नसः । तान् । आदित्यान् ।

माता सर्वस्य निर्मात्री पृथिवी येभ्यः देवेभ्यो देवार्थं क्षीरं पिन्वते क्षरति । तथा अदितिः अदीना अद्रिबर्हाः

---

१. म—'नहुष्यस्य' नास्ति । २. म—ते ।

[v]द्यौः च [v]पीयूषं पिन्वते । आवाभ्यामित्यौ हविरित्यादयत इत्यर्थः । ऋषिरात्मानं संबोधयाह । [v]बृहद्-घुम्नान् स्तुतिबलान् [v]वृषभरान् वृष्टेराहर्तॄन् । ' हृग्रहोर्भः ' इति भः । [v]स्वग्नयः सुकर्मणः [v]तान्-दित्यान् अदितेः पुत्रान् देवान् [v]स्वस्तये अविनाशाय [v]अनु [v]मद अनुस्तुहि । मादयतेर्लोटि श्यत्यचेन शप् । मन्दतेर्वा स्तुत्यर्थस्य[1] ' अभित्यमागमशासनम् ' इति नुमभावः ॥

नृचक्षसो अनिमिषन्तो अर्हणा बृहद्देवासो अमृतत्वमानशुः ।
ज्योतीरथा अहिमाया अनागसो दिवो वर्ष्माणं वसते स्वस्तये ॥ ४ ॥

नृऽचक्षसः । अनिऽमिषन्तः । अर्हणा । बृहत् । देवासः । अमृतऽत्वम् । आनशुः ।
ज्योतिःऽरथाः । अहिऽमायाः । अनागसः । दिवः । वर्ष्माणम् । वसते । स्वस्तये ॥ ४ ॥

[v]नृचक्षसः कर्मनेतॄणां मनुष्याणां द्रष्टारः अत एव [v]अनिमिषन्तः निमेषमकुर्वाणाः सर्वदा जागरूकाः [v]देवासः देवाः [v]अर्हणा लोकस्य परिचरणार्थं स्तोतव्यत्वाय [v]बृहत् बृंहितम् [v]अमृतत्वम् अमरणधर्मम् [v]आनशुः प्राप्ताः । देवाः खलु मनुष्यैः पूज्याः । तस्मात्पूजार्हतां देवत्वमानशिरे । अत एव [v]ज्योतीरथाः दीप्यमानरथोपेताः [v]अहिमायाः कैश्चिदप्यहिंसितप्रज्ञाः [v]अनागसः पापरहिता आदित्याः [v]दिवः द्युलोकस्य [v]वर्ष्माणं नाभिस्थानं समुच्छ्रितं देशं [v]स्वस्तये अविनाशाय लोकस्य क्षेमकरणार्थं [v]वसते अधिवसन्ति । यद्वा स्वतेजसाच्छादयन्ति ॥

सम्राजो ये सुवृधो यज्ञमाययुरपरिह्वृता दधिरे दिवि क्षयम् ।
ताँ आ विवास नमसा सुवृक्तिभिर्महो आदित्याँ अदितिं स्वस्तये ॥ ५ ॥

सम्ऽराजः । ये । सुऽवृधः । यज्ञम् । आऽययुः । अपरिऽह्वृताः । दधिरे । दिवि । क्षयम् ।
तान् । आ । विवास । नमसा । सुवृक्तिऽभिः । महः । आदित्यान् । अदितिम् । स्वस्तये ॥५॥

[v]सम्राजः सर्वेषां राजानः स्वतेजोभिः सम्यग्राजमानाः [v]सुवृधः सुवृद्धाः [v]ये देवाः [v]यज्ञ-माययुः आचान्ति सोमादिहविर्भक्षणार्थम् । ततः [v]अपरिह्वृताः कैश्चिदप्यहिंसिता ये देवाः [v]दिवि द्युलोके [v]क्षयं निवासं [v]दधिरे विदधति कुर्वन्ति । ऋषिरात्मानमाह । [v]महः महतो गुणाधिक्येन [v]आदित्यान् अदितेः पुत्रान् [v]तान् प्रसिद्धान् देवान् [v]अदितिं तेषां मातरमेतन्नामिकां च [v]स्वस्तये अविनाशाय [v]नमसा हवीरूपेणान्नेन [v]सुवृक्तिभिः शोभनाभिः स्तुतिभिश्च [v]आ [v]विवास आभि-मुख्येन परिचर । विवासतिः परिचरणकर्मा ॥ ॥ ३ ॥

को वः स्तोमं राधति यं जुजोषथ विश्वे देवासो मनुषो यति ष्टुतं ।
को वोऽध्वरं तुविजाता अरं करद्यो नः पर्षदत्यंहः स्वस्तये ॥ ६ ॥

कः । राधति । यम् । जुजोषथ । विश्वे । देवासः । मनुषः । यति । स्तुतं ।
कः । वः । अध्वरम् । तुविऽजाताः । अरम् । करत् । यः । नः । पर्षत् । अति । अंहः । स्वस्तये ॥६॥

[v]के । हे देवाः [v]वः युष्माकं [v]कः स्तोता [v]स्तोमं त्रिवृत्पञ्चदशादि-भेदभिन्नं [v]राधति साधयति । यद्वा । मदन्यः को वो युष्मभ्यं स्तोमं करोति ।

यूयं [v]यं[1] स्तोतारं [v]शुओचथ सेवध्वे । 'शुची प्रीतिसेवनयोः' । लेटि शपः श्लुः । अडागमः । किंच हे [v]मनुषः मन्तारो ज्ञातारो हे [v]विश्वे [v]देवासः देवा यूयं [v]यति यत्संख्याः [v]स्थन भवथ । यच्छब्दादपि छान्दसो डतिर्द्रष्टव्यः । हे [v]तुविजाताः भात्रादिविभागेन बहुजनना हे देवा युष्मदर्थं [v]कः वा यजमानः [v]अध्वरं यज्ञम् [v]अरं [v]करत् अलंकरोति स्तुतिभिर्हविर्भिश्च । मदन्यो नास्तीत्यर्थः । [v]यः यज्ञः [v]नः अस्मान् [v]स्वस्तये अविनाशाय [v]अंहः पापरूपं मार्गमवैदिकम् [v]अति [v]पर्षत् अतिपारयति तं यज्ञं को वालंकरोतीति ॥

येभ्यो होत्राम् प्रथमामायेजे मनुः समिद्धाग्निर्मनसा सप्त होतृभिः ।
त आदित्या अभयं शर्म यच्छत सुगा नः कर्त सुपथा स्वस्तये ॥ ७ ॥

येभ्यः । होत्राम् । प्रथमाम् । आऽयेजे । मनुः । समिद्धऽअग्निः । मनसा । सप्त । होतृऽभिः । ते । आदित्याः । अभयम् । शर्म । यच्छत । सुऽगा । नः । कर्त । सुऽपथा । स्वस्तये ॥७॥

[v]समिद्धाग्निः हविर्भिः सम्यगदीप्ताग्निः [v]मनुः वैवस्वतो मनुष्याणां प्रथममावी श्रद्धानेन [v]मनसा [v]सप्त ससंख्याकैः [v]होतृभिः वषट्कर्तृभिर्ऋत्विग्भिश्च सह [v]येभ्यः युष्मभ्यं [v]प्रथमां प्रथमं मुख्यं यद्वा सर्वेषां मनुष्याणामग्रे क्रियमाणत्वादाद्यं [v]होत्राम् । हूयन्ते हवींष्यत्रेति होत्रा यज्ञः । तम् । यद्वा । आहूयन्ते देवाः स्तुतिभिरत्रेति । तं यज्ञम् [v]आयेजे आभिमुख्येनेष्टवान् । यजेर्लिटि रूपम् । यद्वा । लटि 'लोपस्त आत्मनेपदेषु' इति तलोपः । 'यजिवप्योरलिङ्ग्येत्वं वक्तव्यम्' (का. ६. ४. १२०. ४) इति वचनादेकारः । हे [v]आदित्याः अदितेः पुत्रा हे देवाः [v]ते यूयं नोऽस्मभ्यम् [v]अभयं [v]शर्म च सुखं प्रयच्छत । किंच [v]नः अस्माकं [v]स्वस्तये क्षेमाय [v]सुपथा सुपथानि शोभनान् वैदिकमार्गान् [v]सुगा सुष्ठु गन्तव्यान् [v]कर्त कुरुत । करोतेर्लोटि 'बहुलं छन्दसि' इति विकरणस्य लुक् । तबादेशः[2] ॥

य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः ।
ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये ॥ ८ ॥

ये । ईशिरे । भुवनस्य । प्रऽचेतसः । विश्वस्य । स्थातुः । जगतः । च । मन्तवः । ते । नः । कृतात् । अकृतात् । एनसः । परि । अद्य । देवासः । पिपृत । स्वस्तये ॥ ८ ॥

[v]प्रचेतसः प्रकृष्टज्ञानाः [v]मन्तवः सर्वस्य वेदितारः [v]ये देवाः [v]स्थातुः स्थावरस्य [v]जगतः जङ्गमस्य [v]विश्वस्य सर्वस्य [v]भुवनस्य लोकस्य [v]ईशिरे ईश्वरा भवन्ति । अथ प्रत्यक्षकृतः । हे [v]देवासः देवा य उक्तगुणाः [v]ते यूयं [v]नः अस्मान् [v]कृतात् कायिकात्पापात् [v]अकृतात् करचरणादिभिरकृतात् [v]एनसः किंतु मानसात्पापाच्च [v]अद्य अस्मिन्दिने [v]स्वस्तये अविनाशायायुषोऽभिवृद्धये [v]पिपृत पारयत । पापरहितान् कुरुतेत्यर्थः ॥

भरेष्विन्द्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनम् ।
अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये ॥ ९ ॥

भरेषु । इन्द्रम् । सुऽहवम् । हवामहे । अंहःऽमुचम् । सुऽकृतम् । दैव्यम् । जनम् । अग्निम् । मित्रम् । वरुणम् । सातये । भगम् । द्यावापृथिवी इति । मरुतः । स्वस्तये ॥ ९ ॥

---

१. त-म-'यं' नास्ति । २. ग-त-तस्य तबादेशः ।

[v]अंहोमुचम् अंहसः पापस्य मोचकं [v]सुहवं शोभनाह्वानम् [v]इन्द्रं [v]भरेषु। भृणन्ति भर्त्सयन्ति विनाशयन्ति शत्रूनत्रेति भराः संग्रामाः। तेषु [v]हवामहे रक्षणायाह्वयामः। किंच [v]सुकृतं सुकर्माणं [v]दैव्यं देवसंबन्धिनमन्यं [v]जनं चाह्वयामहे। तं जनमुद्दिशति। [v]अग्निं [v]मित्रं [v]वरुणं [v]अर्यमणं भजनीयमेतन्नामानं देवं [v]द्यावापृथिवी द्यावापृथिव्यौ [v]मरुतः च [v]सातये अन्नलाभाय [v]स्वस्तये अविनाशाय रक्षणायाह्वयामहे ॥

अदितिदेवताकस्य पशोः 'सुत्रामाणम्' इत्येषा वपायागस्य याज्या। सूत्रितं च—'अदितिर्ह्यजनिष्ट सुत्रामाणं पृथिवीं द्यामनेहसम्' (आश्व. श्रौ. ३. ८) इति। प्रायणीयेष्टावादित्यस्य इदमेव एषैवानुवाक्या सैवोदयनीयायां याज्या। सूत्रितं च—'सुत्रामाणं पृथिवीं द्यामनेहसं महीमू षु मातरं सुव्रतानाम्' (आश्व. श्रौ. ४. ३) इति। प्रयाणेऽनयैव नावमारोहेत्। सूत्रितं च—'सुत्रामाणं पृथिवीं द्यामनेहसमिति नावम्[१]' (आश्व. गृ. २. ६. ८) इति[१]॥

सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम्।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ॥ १० ॥

सुऽत्रामाणम्। पृथिवीम्। द्याम्। अनेहसम्। सुऽशर्माणम्। अदितिम्। सुऽप्रनीतिम्। दैवीम्। नावम्। सुऽअरित्राम्। अनागसम्। अस्रवन्तीम्। आ। रुहेम। स्वस्तये ॥१०॥

द्युलोकौ नौरूपकतया स्तूयते। [v]सुत्रामाणं सुष्ठु त्रायमाणां [v]पृथिवीं विस्तृताम् [v]अनेहसं पापरहितां [v]सुशर्माणं शोभनसुखयुक्ताम् [v]अदितिम् अदीनां [v]सुप्रणीतिं सुप्रणयनां सुष्ठु प्रणेत्रीं [v]दैवीं देवसंबन्धिनीं [v]स्वरित्रां शोभनारित्रां जलाहरणशीलदारुयुक्ताम्[२] [v]अनागसं पापरहिताम् [v]अस्रवन्तीं अगच्छन्तीमविनश्वरीं [v]नावं नावमिव स्थितां [v]द्यां [v]स्वस्तये अविनाशाय देववज्रास्तये [v]आ [v]रुहेम वयमारोहेम। रोहतेर्लिङि 'लिङ्याशिष्यङ्' इत्यङ्प्रत्ययः॥ ॥ ४ ॥

विश्वे यजत्रा अधि वोचतोतये त्रायध्वं नो दुरेवाया अभिह्रुतः।
सत्यया वो देवहूत्या हुवेम शृण्वतो देवा अवसे स्वस्तये ॥ ११ ॥

विश्वे। यजत्राः। अधि। वोचत। ऊतये। त्रायध्वम्। नः। दुःऽएवायाः। अभिऽहुतः।
सत्यया। वः। देवऽहूत्या। हुवेम। शृण्वतः। देवाः। अवसे। स्वस्तये ॥ ११ ॥

हे [v]यजत्राः यजनीया हे [v]विश्वे सर्वे देवा यूयम् [v]ऊतये रक्षणार्थम् [v]अधि [v]वोचत अस्मानधिकृत। आभाष्य च [v]अभिहुतः अभिहिंसिताया [v]दुरेवायाः दुर्गतेः [v]नः अस्मान् [v]त्रायध्वम्। यत्नेवं कुरुथ तर्हि हे [v]देवाः [v]शृण्वतः स्तोत्राण्यस्माभिरुक्तानि तादृशान् [v]वः युष्मान् [v]सत्यया यथार्थभूतया [v]देवहूत्या। देवा हूयन्तेऽनयेति[३] देवहूतिः स्तुतिः। तया वयं [v]हुवेम आह्वयेम। किमर्थम्। [v]अवसे रक्षणाय शत्रुभ्यः [v]स्वस्तये क्षेमाय जीवनाभिवृद्धये च ॥

---

१. ग-त१.२.३.७-भ२.७—नावं नवरथेनेति; त४.६.८-भ१.४.५—नावं न रथेनेति; त५—नावमारुहेमेति; भ२—नावं रथेनेति; भ८—नावं न रथेति। २. ग४—अल्पश्चरणशील°; त६.८—जलहेलाहरणशील°; भ१.८—जलाहृलाहरणशील°; भ२—जलादृलीहरणशील°; भ५—जलहेलाहारणशील°। ३. ग-त—आहूयते°।

अपामीवामप विश्वामनाहुतिमपारातिं दुर्विदत्रामघायतः ।
आरे देवा द्वेषो अस्मद्युयोतनोरु णः शर्म यच्छता स्वस्तये ॥ १२ ॥

अप । अमीवाम् । अप । विश्वाम् । अनाहुतिम् । अप । अरातिम् । दुःऽविदत्राम् । अघऽयतः ।
आरे । देवाः । द्वेषः । अस्मत् । युयोतन । उरु । नः । शर्म । यच्छत । स्वस्तये ॥ १२ ॥

हे देवाः अमीवां रोगादिकं यद्वा रोगवद्बाधकं शत्रुमस्मत्तो दूरे अप कुरुत पृथक्कुरुत । तथा विश्वां सर्वाम् अनाहुतिं देवानामनाह्वानबुद्धिं यद्वा देवानां महाशत्रुं पृथक्कुरुत । किंच अरातिम् अदानं लोभबुद्धिं यद्वा देवेभ्यो हविषामदातारं शत्रुम् अप गमयत । अपि च अघायतः पापमिच्छतः शत्रोः दुर्विदत्रां दुर्ज्ञानं दुष्टां बुद्धिम् हत्वा च द्वेषः द्वेष्टॄन् सर्वान्छत्रून् अस्मत् अस्मत्तः आरे दूरे युयोतन पृथक्कुरुत । एवं सति यूयं नः अस्मभ्यम् उरु विस्तीर्णं शर्म सुखं स्वस्तये कल्याणाय प्रयच्छत ॥

अरिष्टः स मर्तो विश्व एधते प्र प्रजाभिर्जायते धर्मणस्परि ।
यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये ॥ १३ ॥

अरिष्टः । सः । मर्तः । विश्वः । एधते । प्र । प्रऽजाभिः । जायते । धर्मणः । परि ।
यम् । आदित्यासः । नयथ । सुनीतिऽभिः । अति । विश्वानि । दुःऽइता । स्वस्तये ॥ १३ ॥

हे देवाः विश्वः सर्वः मर्तः सः मनुष्यः अरिष्टः कैश्चिदप्यहिंसितः सन् एधते पश्वादिभिर्वर्धते । तथा धर्मणस्परि धारकात्कर्मणोऽनन्तरं स मनुष्यः प्रजाभिः पुत्रादिभिः प्र जायते प्रकर्षेणाविर्भूतो भवति । हे आदित्यासः आदित्या देवाः यं मनुष्यं सुनीतिभिः सुनयनैः विश्वानि सर्वाणि दुरिता दुरितानि पापानि तद्रूपाञ्छत्रून्वा स्वस्तये क्षेमाय अति नयथ अतीत्य सन्मार्गे नयथ । स वर्धत इति समन्वयः ॥

यं देवासोऽवथ वाजसातौ यं शूरसाता मरुतो हिते धने ।
प्रातर्यावाणं रथमिन्द्र सानसिमरिष्यन्तमा रुहेमा स्वस्तये ॥ १४ ॥

यम् । देवासः । अवथ । वाजऽसातौ । यम् । शूरऽसाता । मरुतः । हिते । धने ।
प्रातःऽयावानम् । रथम् । इन्द्र । सानसिम् । अरिष्यन्तम् । आ । रुहेम । स्वस्तये ॥ १४ ॥

हे देवासः देवाः वाजसातौ अन्नभजनेऽन्नलाभे वा यं रथम् अवथ रक्षथ हे मरुतः शूरसाता । संग्रामनामैतत् शूराः स्थन्ति स्थिथन्तेऽत्रेति[1] शूराः सीथन्ते विनाश्यन्ते योद्भिरत्रेति[2] । तस्मिन्युद्धे यं रथं हिते निहिते धने धनमुद्दिश्य । ' निमित्तात्कर्मसंयोगे ' (पा. सू. २. ३. ३६. ६) इति सप्तमी । तदुद्दिश्य रक्षथ । सर्वेषां देवानां मुख्यत्वादिन्द्रमेवाभिलक्ष्य वदत्युत्तरार्धेन[3] । हे इन्द्र सर्वेषां मुख्य प्रातर्यावाणं प्रातरेव युद्धं प्रति गन्तारं सानसिं संभजनीयम् अरिष्यन्तं कैश्चिदप्यहिंसितम् । यद्वा । इन्द्रसहायानां मरुतामबाधकम् । तं रथं स्वस्तये अस्माकं रक्षणाय वयम् आ रुहेम आरोहेम ॥

१. ग–विथंतेत्रेति; त-भ–मिथंतेत्रेति । २. ग-त-भ–°रस्येति । ३. त-भ–वदत्युत्तरार्धेन ।

प्रायणीयेष्टौ पञ्चास्वस्तीर्वागस्य ' स्वस्ति नः पथ्यासु ' इत्येषानुवाक्या। उत्तरा याज्या। सूत्रितं च—' स्वस्ति नः पथ्यासु धन्वस्विति ह्येतेऽग्ने नय सुपथा राये अस्मान् ' (आश्व. श्रौ. ४. ३) इति। उदयनीयायामेत एव विपर्यस्ते याज्यानुवाक्ये। सूत्रितं च—' विपरीतास्तु याज्यानुवाक्याः ' इति ॥

स्वस्ति नः पथ्यासु धन्वसु स्वस्त्यप्सु वृजने स्वर्वति ।
स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन ॥ १५ ॥

स्वस्ति । नः । पथ्यासु । धन्वऽसु । स्वस्ति । अप्ऽसु । वृजने । स्वःऽवति ।
स्वस्ति । नः । पुत्रऽकृथेषु । योनिषु । स्वस्ति । राये । मरुतः । दधातन ॥ १५ ॥

हे [v]मरुतः मितराविणो देवाः [v]नः अस्माकं [v]पथ्यासु पथियोग्येषु सोदकेषु देशेषु[1] [v]स्वस्ति कल्याणं कुरुत। तथा [v]धन्वसु निरुदकेषु देशेषु[1] [v]स्वस्ति कल्याणमुदकजनलक्षणं कुरुत। तथा [v]अप्सु उदकेषु स्वस्ति। तथा [v]स्वर्वति सर्वैरायुधैर्युक्ते सेनालक्षणे [v]वृजने शत्रूणामावर्जके बले च कल्याणं कुरुत। [v]नः[2] अस्माकं[2] [v]पुत्रकृथेषु पुत्राणां कर्तृभूत्पादकेषु स्त्रीणां [v]योनिषु [v]स्वस्ति कल्याणं यथा गर्भा न पतन्ति तथा क्षेमं कुरुत। किंच नोऽस्माकं [v]राये धनाय गवादिलक्षणाय [v]स्वस्ति क्षेमं [v]दधातन धत्त कुरुत ॥

स्वस्तिरिद्धि प्रपथे श्रेष्ठा रेक्णस्वत्यभि या वाममेति ।
सा नो अमा सो अरणे नि पातु स्वावेशा भवतु देवगोपा ॥ १६ ॥

स्वस्तिः । इत् । हि । प्रऽपथे । श्रेष्ठा । रेक्णस्वती । अभि । या । वामम् । एति ।
सा । नः । अमा । सो इति । अरणे । नि । पातु । सुऽआवेशा । भवतु । देवऽगोपा ॥ १६ ॥

या पृथिवी गन्तुमुद्युक्तानां [v]प्रपथे प्रकृष्टाय मार्गाय [v]स्वस्तिरित् क्षेमकारिण्येव भवति[3] [v]श्रेष्ठा प्रशस्यतमा [v]रेक्णस्वती धनवती [v]या पृथिवी [v]वामं वननीयं यज्ञम् [v]अभि [v]एति उत्तरवेद्यात्मना वाभिप्राप्नोति [v]सा पृथिवी [v]नः [v]अस्माकम्[4] [v]अमा। गृहनामैतत्। गृहं[5] रक्षतु। तथा [v]सो सा उ सैव [v]अरणे गन्तव्ये देशेऽरणेऽरमणेऽरण्यादिके देशे वा नोऽस्मान् [v]नि [v]पातु नितरां रक्षतु। तथा [v]देवगोपा देवा गोपायितारो यस्याः सन्ति सा पृथिव्यस्माकं [v]स्वावेशा शोभननिवासा [v]भवतु ॥

एवा पितेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी ।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन ॥ १७॥

एव । पितेः । सूनुः । अवीवृधत् । वः । विश्वे । आदित्याः । अदिते । मनीषी ।
ईशानासः । नरः । अमर्त्येन । अस्तावि । जनः । दिव्यः । गयेन ॥ १७ ॥

हे [v]विश्वे [v]आदित्याः सर्वे देवाः हे [v]अदिते देवानां मातरेतन्नामिके[6] देवि [v]वः युष्मान् [v]मनीषी प्राज्ञः स्तोता [v]पितेः एतन्नामकस्यर्षेः [v]सूनुः पुत्रो गयो नाम [v]एव एवमुक्तरीत्या [v]अवीवृधत्

१. ग-त१.२.७–देशेषु च। २. ग-त-भ१.२.६.७.८–ततो नोस्माकं। ३. ग-त-म–भवतु। ४. ग-त-म–अस्मान्। ५. त–गृहे। ६. ग-त१.२.३.६.७.८-म–मातृभूते एतन्नामिके।

स्तुतिभिरवर्धयत् । वर्धतेर्ण्यन्तस्य लुङि रूपम् । ᵛअमर्त्येन मनुष्यधर्मरहितेन स्तुतेन येन देवजनेन ᵛनरः मनुष्याः ᵛईशानासः धनस्येश्वराः स्वामिनो भवन्ति सः ᵛदिव्यः दिवि भवः ᵛजनः देवगणः ᵛगयेन एतन्नामकेन मया ᵛअस्तावि अभिष्टुतोऽभूत् । स्तौतेः कर्मणि लुङि चङि रूपम् ॥ ॥ ५ ॥

' कथा ' इति सप्तदशर्चं चतुर्थं सूक्तं प्रातस्य गयस्यार्षं वैश्वदेवम् । ' यां मे धियम् ' इत्येषा द्वावशी षोडशीसप्तदश्यौ च त्रिष्टुभः शेषा[1] जगत्यः[2] । तथा चानुक्रान्तं—' कथा यां मे त्रिष्टुप् ' इति । गतो विनियोगः ॥

कथा देवानां कतमस्य यामनि सुमन्तु नाम शृण्वतां मनामहे ।
को मृळाति कतमो नो मयस्करत्कतम ऊती अभ्या ववर्तति ॥ १ ॥

कथा । देवानाम् । कतमस्य । यामनि । सुऽमन्तु । नाम । शृण्वताम् । मनामहे ।
कः । मृळाति । कतमः । नः । मयः । करत् । कतमः । ऊती । अभि । आ । ववर्तति ॥ १ ॥

ऋषिर्बहुधात्मानं वितर्कयति । ᵛयामनि । याम्ति गच्छन्त्यत्रेति यामा यज्ञः । तस्मिन् ᵛशृण्वताम् अस्माभिरुक्तानि स्तोत्राणि ᵛदेवानां मध्ये ᵛकतमस्य देवस्य ᵛसुमन्तु सुष्ठु मननीयं स्तोतव्यं ᵛनाम ᵛकथा कथं ᵛमनामहे उच्चारयामः । अस्मान् ᵛकः वा ᵛमृळाति । ' मृळतिरुपदयाकर्मा ' (निरु. १०. १५) इति यास्कः । कृपां करोति । ᵛकतमः वा ᵛनः अस्माकं ᵛमयः सुखं ᵛकरत् करोति । ᵛकतमः वा ᵛऊती । चतुर्थ्याः पूर्वसवर्णदीर्घः । ऊत्यै अस्माकं रक्षणाय ᵛअभ्या ᵛववर्तति अभ्यागच्छतीत्यर्थः ॥

क्रतुयन्ति क्रतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्या दिशः ।
न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत ॥ २ ॥

क्रतुऽयन्ति । क्रतवः । हृत्ऽसु । धीतयः । वेनन्ति । वेनाः । पतयन्ति । आ । दिशः ।
न । मर्डिता । विद्यते । अन्यः । एभ्यः । देवेषु । मे । अधि । कामाः । अयंसत ॥ २ ॥

ᵛहृत्सु हृदयेषु[2] ᵛधीतयः निधातव्या निहिताः ᵛक्रतवः प्रज्ञाः ᵛक्रतूयन्ति अग्निहोत्रादिकर्म कर्तुमिच्छन्ति । तदेवाह । ᵛवेनाः कान्ताः प्रज्ञाः ᵛवेनन्ति देवान् कामयन्ते । ' वेनो वेनतेः कान्तिकर्मणः ' (निरु. १०. ३८) इति यास्कः । तथा ᵛदिशः अस्माभिर्निर्दिश्यमानाः प्रेर्यमाणाः कामाः ᵛआ ᵛपतयन्ति देवान् फलावाप्तय आगच्छन्ति । यतः ᵛएभ्यः देवेभ्यः ᵛअन्यः देवः एषां कामानां ᵛमर्डिता सुखयिता ᵛन ᵛविद्यते । किं बहुना । ᵛदेवेषु ᵛअधि । अधिशब्दः सप्तम्यर्थद्योतकः । इन्द्रादिषु देवेषु ᵛमे मदीयाः ᵛकामाः ᵛअयंसत नियम्यन्ते । यच्छतेः कर्मणि लुङि रूपम् ॥

नरां वा शंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा ।
सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना ॥ ३ ॥

नराशंसम् । वा । पूषणम् । अगोह्यम् । अग्निम् । देवऽइद्धम् । अभि । अर्चसे । गिरा ।
सूर्यामासा । चन्द्रमसा । यमम् । दिवि । त्रितम् । वातम् । उषसम् । अक्तुम् । अश्विना ॥ ३ ॥

१. ग-त-भ—' शेषा जगत्यः ' नास्ति । २. ग-त—अस्माकं हृदयेषु ।

ऋषिः स्वात्मानं सर्वोऽभ्याह । [v]नराशंसम् । ' उभे वनस्पत्यादिषु युगपत् ' इत्युभयपदप्रकृतिस्वरत्वम् । संहितायां विप्रकर्षश्छान्दसः । नरैः शंसनीयमेतन्नामानं [v]पूर्वं स्तोतृणां धनदानेन पोषकमेतन्नामानं तथा [v]अगोह्यम् अगूहितमन्यैर्गन्तुमशक्यं [v]देवेडं वामदेवादिभिर्ऋषिभिर्ईडितम् [v]अग्निं च [v]गिरा स्तुत्या [v]अभ्यर्चसे अभिष्टुहि । तथा [v]सूर्यामासा [v]चन्द्रमसा[1] । मा इति[1] चन्द्रमसो विशेषणम् । मासेति पक्षमिति मासचन्द्रमाः । तौ सूर्याचन्द्रमसौ [v]दिवि द्युलोके स्थितं [v]यमं च [v]त्रितं त्रिषु लोकेषु ततं स्वमहिम्ना विस्तृतं त्रिस्थानं वा तमिन्द्रं [v]वातं वायुम् [v]उषसम् उषःकालम् [v]अर्कं रात्रिम् [v]अश्विना अश्विनौ चैतान्देवान् तत्तच्छस्त्रैः स्तोत्रैरभिष्टुहि ॥

कथा कविस्तुवीरवान् कया गिरा बृहस्पतिर्वावृधते सुवृक्तिभिः ।
अज एकपात्सुहवेभिरृक्वभिरहिः शृणोतु बुध्न्यो३ हवीमनि ॥ ४ ॥

कथा । कविः । तुविऽरवान् । कया । गिरा । बृहस्पतिः । ववृधते । सुवृक्तिऽभिः । अजः । एकऽपात् । सुऽहवेभिः । ऋक्वऽभिः । अहिः । शृणोतु । बुध्न्यः । हवीमनि ॥४॥

[v]कविः क्रान्तप्रज्ञोऽग्निः [v]कथा कथं केन प्रकारेण [v]तुवीरवान् बहुस्तोतृयुक्तो भवति ॥ मत्वर्थीयप्रत्ययाबृत्तिः । यद्वा । तुविशब्दस्य रो मत्वर्थीयः । बाहुल्ययुक्तदेवैः सहितो भवति ॥ [v]कया वा [v]गिरा स्तुत्या बहुमान् भवति । [v]बृहस्पतिः[2] एतन्नामको देवः [v]सुवृक्तिभिः शोभनाभिः स्तुतिभिस्तथा [v]वावृधते[3] । तथा [v]एकपात् । एकोऽसहाय एव पतति गच्छतीत्येकपात् । तादृशो दिवो धारयिता [v]अजः एतन्नामको देवश्च [v]सुहवेभिः शोभनाह्वानैः [v]ऋक्वभिः मन्त्रवद्भिः स्तोत्रैः [v]वावृधते एते त्रयो देवा वर्धन्ते । त्रिवापेक्षया बहुवचनम् । ' वृधु वृद्धौ ' । श्यत्ययेन शपः श्लुः । [v]अहिर्बुध्न्यः च एतन्नामको देवश्च [v]हवीमनि आह्वाने अस्मान् [v]शृणोतु ॥

दक्षस्य वादिते जन्मनि व्रते राजाना मित्रावरुणा विवाससि ।
अतूर्तपन्थाः पुरुरथो अर्यमा सप्तहोता विधुरूपेषु जन्मसु ॥ ५ ॥

दक्षस्य । वा । अदितेः । जन्मनि । व्रते । राजाना । मित्रावरुणा । आ । विवाससि । अतूर्तऽपन्थाः । पुरुऽरथः । अर्यमा । सप्तऽहोता । विधुऽरूपेषु । जन्मऽसु ॥ ५ ॥

हे [v]अदिते पृथिवि [v]दक्षस्य सूर्यस्य [v]जन्मनि तस्मिन्प्राते [v]व्रते तस्य यज्ञकर्मणि [v]राजाना राजन्तौ[4] मित्रावरुणौ[5] [v]विवाससि । वाशब्द उपमार्थः । यथा त्वं वेदिभूता सती तौ पर्यचरः एवमिदानीमप्यस्मद्यज्ञे कुर्विति पृथिवीमाशास्ते । सः [v]अर्यमा अरीणां तमसां यन्ता नियन्ता सूर्यः [v]विधुरूपेषु नानारूपेषु[6] [v]जन्मसु कर्मसु[7] अन्वहमुद्यन् [v]सप्तहोता । सप्त रश्मयो यस्मिन् रसान् जुह्वति प्रक्षिपन्ति स एतादृशो भवति । [v]अतूर्तपन्थाः अतूर्तस्वरारहितः पन्था यस्य सः । नियतगतित्वात् त्वरमाणो ह्यनियतगतिर्भवति । [v]पुरुरथः । रथो रंहतेः । प्रत्यहं भुक्तिभेदाद्बहुरंहणो भवति । यद्वा । हे अदिते प्रातस्तनि संध्ये दक्षस्यादित्यस्य जन्मन्युदयालये जन्मनि कर्मणि । उषस्यादित्य इत्यर्थः । वाशब्दः श्रुतिसामर्थ्यादक्षस्य वा जन्मनि स्वत्तस्तव वा जन्मनि दक्षादिति । राजाना[8] दीप्यमानौ

---

१. ग-त३.४.५.७–चंद्रमसा मासेति; त१.२.८-भ–चंद्रमसेति । २. त–बृहस्पतिर्वा बृहस्पतिः; भ१.६.७–बृहस्पतिः बृहस्पतिर्वा । ३. ग-त-भ२.६.८–वावृधते वर्धते । ४. त३-भ१.२.७–राजानौ । ५. ग-त४–मित्रावरुणा मित्रावरुणौ । ६. भ–' नानारूपेषु ' नास्ति । ७. ग-त-भ–' कर्मसु ' नास्ति । ८. ग-त-भ–तव राजाना ।

मित्रावरुणा । ' अहर्वै मित्रो रात्रिर्वरुणः ' (ऐ. ब्रा. ४.१०) इति श्रुतेरहोरात्रौ मित्रावरुणावुच्येते । तौ विवाससि परिचरसि । कथम् । तदनुप्रवेशेन । अर्धं हि संध्याया रात्रिमनुप्रविशत्यर्धमहरिति । उत्तरार्धः पूर्ववत् । ससहोता । ह्वयतेरर्चनिकर्मण इदं रूपम् । सप्तर्षयो भरद्वाजादयो होतारः स्तोतारः सन्तीति । अथवा ससहोना । मलिम्लुचांहसस्पतिसहिताः सप्तर्तवो यस्य होतारो भवन्ति तादृशः । अत्र निरुक्तं—' दक्षस्य वादिते जन्मनि कर्मणि[1] व्रते[1] राजानौ ' (निरु. ११.२३) इत्यादि ॥ ॥६॥

ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाताविव त्मना महो ये धनं समिथेषु जभ्रिरे ॥ ६ ॥

ते । नः । अर्वन्तः । हवनऽश्रुतः । हवम् । विश्वे । शृण्वन्तु । वाजिनः । मितऽद्रवः ।
सहस्रऽसाः । मेधसातौऽइव । त्मना । महः । ये । धनम् । सम्ऽइथेषु । जभ्रिरे ॥ ६ ॥

ᵛहवनश्रुतः आह्वानं शृण्वन्तः ᵛवाजिनः बलवन्तः ᵛमितद्रवः मितमार्गा अश्वानां परिस्किन्दन्तः ᵛविश्वे सर्वे प्रसिद्धाः[2] ᵛअर्वन्तः अश्वा इन्द्रादीनां वाहनभूता हर्यादयः ᵛनः अस्माकं ᵛहवम् आह्वानं ᵛशृण्वन्तु । कीदृशाः । ᵛमेधसाताविव । मेधाः स्तुतयः सायन्ते संभज्यन्तेऽत्रेति मेधसातिर्यज्ञः । तस्मिन्निव ᵛत्मना आत्मनैव ᵛसहस्रसाः सहस्रसंख्याकधनस्य दातारः ते शृण्वन्तु ᵛये अश्वाः ᵛसमिथेषु । संग्रामनामैतत् । संप्राप्यते योद्धृभिरत्रेति । तेषु संग्रामेषु ᵛमहः महत् धनं ᵛजभ्रिरे शत्रुभ्य आहरन्ति । हृग्रहोर्भः ॥

प्र वो वायुं रथयुजं पुरंधिं स्तोमैः कृणुध्वं सख्याय पूषणम् ।
ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सचितः सचेतसः ॥ ७ ॥

प्र । वः । वायुम् । रथऽयुजम् । पुरम्ऽधिम् । स्तोमैः । कृणुध्वम् । सख्याय । पूषणम् ।
ते । हि । देवस्य । सवितुः । सवीमनि । क्रतुम् । सचन्ते । सऽचितः । सऽचेतसः ॥ ७ ॥

हे स्तोतारः ᵛवः यूयं ᵛवायुं ᵛरथयुजं रथस्य योक्तारं ᵛपुरंधिम् बहुकर्माणमिन्द्रं ᵛपूषणम् एतन्नामानं च ᵛस्तोमैः त्रिवृत्पञ्चदशादिलक्षणैः ᵛसख्याय सख्यिकर्मणे ᵛप्र ᵛकृणुध्वं प्रकुरुध्वम् । यथा तेऽस्माकं धनादिप्रदानेन सखायो भवन्ति तथा कुरुत । ᵛहि यस्मात् ᵛसचितः ज्ञानयुक्ताः ᵛते देवाः ᵛसचेतसः परस्परं समानबुद्धयः सन्तः ᵛसवितुः सर्वस्य प्रेरकस्य ᵛदेवस्य आदित्यस्य ᵛसवीमनि प्रसवेऽह्नि ᵛक्रतुं यज्ञं ᵛसचन्ते सेवन्ते तस्मात् प्रकुरुध्वम् ॥

त्रिः सप्त सस्रा नद्यो महीरपो वनस्पतीन् पर्वताँ अग्निमूतये ।
कृशानुमस्तृन् तिष्यं सधस्थ आ रुद्रं रुद्रेषु रुद्रियं हवामहे ॥ ८ ॥

त्रिः । सप्त । सस्राः । नद्यः । महीः । अपः । वनस्पतीन् । पर्वतान् । अग्निम् । ऊतये ।
कृशानुम् । अस्तृन् । तिष्यम् । सधऽस्थे । आ । रुद्रम् । रुद्रेषु । रुद्रियम् । हवामहे ॥ ८ ॥

ᵛत्रिः ᵛसप्त एकविंशतिसंख्याकाः ᵛसस्राः सरन्तीः ᵛनद्यः नदीः । सरस्वती सरयुः सिन्धुरिति त्रयाणां गणानां प्रधानभूताः । तदाद्या नदीः ᵛमहीः महान्ति ᵛअपः तासामुदकानि सोमाभिषवकार्यं

---

१. त-मु-व्रते कर्मणि । २. ᵐ४.५.१.८-भ७-प्रवृद्धा ।

vवनस्पतीन् दारुमयांश्चमसादीन् vपर्वतान् सोमाभिषवार्थं ग्रावाणः vअग्निं होमनिष्पादकं vकृष्णाजुं सोमपाकमेतन्नामानं गन्धर्वम् vअप्सून् इषूणां क्षेप्तॄंस्तद्वदुचरान् गन्धर्वान् vऊतये सोमरक्षणाय vतिष्यं नक्षत्रं च vरुद्रियं रुद्रस्तोमार्हं[1] vरुद्रं हविर्भागिनं रुद्रमेतन्नामानं यद्वा यज्ञपरिशिष्टस्वामिनं रुद्रं च एतान् सर्वान् vसधस्थे। सह तिष्ठन्त्यत्रेति सधस्थो यज्ञः। तस्मिन् vरुद्रेषु स्तोत्रकारिषु तदर्थं vहवामहे स्तुत्यत्वेनाह्वयामहे ॥

सरस्वती सरयुः सिन्धुरूर्मिभिर्महो महीरवसा यन्तु वक्षणीः ।
देवीरापो मातरः सूदयित्नवो घृतवत्पयो मधुमन्नो अर्चत ॥ ९ ॥

सरस्वती । सरयुः । सिन्धुः । ऊर्मिऽभिः । महः । महीः । अवसा । आ । यन्तु । वक्षणीः ।
देवीः । आपः । मातरः । सूदयित्नवः । घृतऽवत् । पयः । मधुऽमत् । नः । अर्चत ॥ ९ ॥

vमहः महतोऽपि vमहीः महत्योऽत्यन्तं महत्यः vऊर्मिभिः सहिताः vसरस्वती vसरयुः vसिन्धुः एतदाद्या एकविंशतिसंख्याकाः vवक्षणीः इमा नद्यः vअवसा रक्षणेन हेतुना vआ vयन्तु अस्मदीयं यज्ञं प्रत्यागच्छन्तु। ततः vदेवीः देवनद्यीलाः vमातरः मातृभूताः vसूदयित्नवः प्रेरयित्र्यः तासाम् vआपः vघृतवत् घृतयुक्तं vमधुमत् मधुसहितमात्मीयं vपयः vनः अस्मभ्यम् vअर्चत प्रयच्छन्तु ॥

उत माता बृहद्दिवा शृणोतु नस्त्वष्टा देवेभिर्जनिभिः पिता वचः ।
ऋभुक्षा वाजो रथस्पतिर्भगो रण्वः शंसः शशमानस्य पातु नः ॥ १० ॥

उत । माता । बृहत्ऽदिवा । शृणोतु । नः । त्वष्टा । देवेभिः । जनिऽभिः । पिता । वचः ।
ऋभुक्षाः । वाजः । रथःपतिः । भगः । रण्वः । शंसः । शशमानस्य । पातु । नः ॥ १० ॥

vउत अपि च vबृहद्दिवा । 'महद्दिवा' (निरु. ११. ४९) इति यास्कः। महती दिवा दीप्तिर्यस्याः सा vमाता देवमाता vनः अस्माकमाह्वानं vशृणोतु। तथा vदेवेभिः देवैरिन्द्रादिभिः vजनिभिः देवपत्नीभिश्च vपिता सर्वेषां vत्वष्टा एतन्नामकोऽस्मदीयं vवचः शृणोतु। तथा vऋभुक्षाः इन्द्रः vवाजः तत्सहायो वाजो नाम सौधन्वनः कनीयान् vरथस्पतिः रथस्य पतिः vभगः च तथा vरण्वः रमणीयः vशंसः स्तुत्यो मरुद्गणश्च ततः vशशमानस्य शंसमानस्य स्तोतुः vनः अस्मान् vपातु रक्षतु ॥ ॥ ७ ॥

रण्वः संदृष्टौ पितुमाँइव क्षयो भद्रा रुद्राणां मरुतामुपस्तुतिः ।
गोभिः ष्याम यशसो जनेष्वा सदा देवास इळया सचेमहि ॥ ११ ॥

रण्वः । सम्ऽदृष्टौ । पितुमान्ऽइव । क्षयः । भद्रा । रुद्राणाम् । मरुताम् । उपऽस्तुतिः ।
गोभिः । स्याम । यशसः । जनेषु । आ । सदा । देवासः । इळया । सचेमहि ॥ ११ ॥

vसंदृष्टौ संदर्शने vरण्वः रमणीयो मरुद्गणः vपितुमानिव अन्नवानिव vक्षयः निवासः स्तोतॄणां भवति। vरुद्राणां रुद्रपुत्राणां तेषां vमरुताम् vउपस्तुतिः अनुग्रहबुद्धिः vभद्रा कल्याणी भवति।

१. ग–रुद्राणां स्तोमार्हं; त२.१.७.८-म१.२.१–रुद्राः स्तोमार्हं।

तस्मात् ᵛजनेषु जनानां मध्ये वयं ᵛगोभिः गवादिभिः ᵛयशसः यशस्विनः ᵛस्याम भवेम । ᵛआ अनन्तरं हे ᵛदेवासः देवा युष्मान् ᵛसदा सर्वदा ᵛइळया अन्नेन हविर्लक्षणेन ᵛसचेमहि सचेम[1] संगच्छेम[1] ॥

यां मे धियं मरुत इन्द्र देवा अददात वरुण मित्र युयम् ।
तां पीपयत पयसेव धेनुं कुविद्गिरो अधि रथे वहाथ ॥ १२ ॥

याम् । मे । धियम् । मरुतः । इन्द्र । देवाः । अददात । वरुण । मित्र । युयम् ।
ताम् । पीपयत । पयसाऽइव । धेनुम् । कुवित् । गिरः । अधि । रथे । वहाथ ॥ १२ ॥

हे ᵛमरुतः हे ᵛइन्द्र ᵛदेवाः हे ᵛवरुण हे ᵛमित्र ᵛयूयं ᵛयां ᵛधियं यत्कर्म ᵛमे मह्यम् ᵛअददात दत्तवन्तः स्थ । मरुत इत्यत्र वाक्यभेदादनिघातः । पूर्वपूर्वस्याविद्यमानत्वेनाद्युदात्तत्वम् । ᵛतां धियं ᵛपीपयत फलेनाप्याययत । तत्र दृष्टान्तः । ᵛपयसेव[2] ᵛधेनुम् । नवप्रसूतिकां गां क्षीरेण यथाप्याययन्ति तद्वत् । किंच ᵛगिरः अस्मदीयाः स्तुतीः ᵛअधि[3] ᵛरथे[3] आत्मीये रथे ᵛकुवित् बहुवारं ᵛवहाथ प्राप्ताः[4] स्थ[4] । स्तुतेषु सत्सु यज्ञं प्रत्यागमनाय रथारूढा भवथ ॥

कुविदङ्ग प्रति यथा चिदस्य नः सजात्यस्य मरुतो बुबोधथ ।
नाभा यत्र प्रथमं संनसामहे तत्रा जामित्वमदितिर्दधातु नः ॥ १३ ॥

कुवित् । अङ्ग । प्रति । यथा । चित् । अस्य । नः । सऽजात्यस्य । मरुतः । बुबोधथ ।
नाभा । यत्र । प्रथमम् । सम्ऽनसामहे । तत्र । जामिऽत्वम् । अदितिः । दधातु । नः ॥ १३ ॥

ᵛअङ्ग इति संबुद्धौ । हे ᵛमरुतः यूयं नोऽस्मान् ᵛकुवित् बहुवारं ᵛप्रति ᵛबुबोधथ तथा प्रतिबुध्यध्वम् । कुविच्छब्दयोगादनिघातः । ᵛयथा ᵛनः अस्मान् ᵛसजात्यस्य ᵛअस्य बान्धवस्य विषयभूतान् कुरुथ तथा जानीथ । ततः ᵛनाभा पृथिव्या नाभिस्थाने ᵛयत्र यस्मिन्नुत्तरवेदिलक्षणे देशे ᵛप्रथमम् एव ᵛसंनसामहे हविषा यत्र संगच्छेमहि ᵛतत्र एव देशे ᵛअदितिः देवानां माता ᵛनः अस्माकं ᵛजामित्वं मनुष्यैः सह बान्धवं ᵛदधातु विदधातु ॥

ते हि द्यावापृथिवी मातरा मही देवी देवाञ्जन्मना यज्ञिये इतः ।
उमे बिभृत उभयं भरीमभिः पुरू रेतांसि पितृभिश्च सिञ्चतः ॥ १४ ॥

ते इति । हि । द्यावापृथिवी इति । मातरा । मही इति ।
देवी इति । देवान् । जन्मना । यज्ञिये इति । इतः ।
उमे इति । बिभृतः । उभयम् । भरीमऽभिः । पुरु । रेतांसि । पितृऽभिः । च । सिञ्चतः ॥ १४ ॥

ᵛमातरा सर्वस्य जगतो निर्मात्र्यौ अत एव ᵛमही महत्यौ ᵛदेवी देवनशीले ᵛयज्ञिये यज्ञार्हे ᵛते ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛदेवान् इन्द्रादीन् ᵛजन्मना एव ᵛइतः ᵛहि प्राप्नुतः खलु ।

---

१. ग-त१.३.७-भ१.२.४.६.७.८–समवेमः संगच्छामः; त२.६.८-भ५–सचेमः संगच्छामः; त४.५–सचेम संगच्छेमः । २. ग-त-भ–पयसेव यथा । ३. त-भ-मु–रथेधिरथे । ४. त१.२.३.६.७.८-भ१.२.६.८–प्राप्ताः; त४.५–प्रापयथ; भ७–प्राप्त स्तुत ।

'इण् गतौ'। क्वटि रूपम्। किंच [v]उभे द्यावापृथिव्यौ [v]भरीमभिः भरणैर्नानाविधैः [v]उभयं अन्नं देवान्मनुष्यांश्च [v]बिभृतः धारयतः पोषयतः। तथा [v]पितृभिः पालकैर्देवैः संगते ते [v]पुरु पुरू-ण्यात्मीयानि [v]रेतांसि उदकानि [v]सिञ्चतः क्षरतः। प्रत्यक्षेण धारयतः॥

वि षा होत्रा विश्वमभोति वार्यं बृहस्पतिररमतिः पनीयसी।
ग्रावा यत्र मधुषदुच्यते बृहदवीवशन्त मतिभिर्मनीषिणः॥ १५॥

वि। सा। होत्रा। विश्वम्। अश्नोति। वार्यम्। बृहस्पतिः। अरमतिः। पनीयसी।
ग्रावा। यत्र। मधुऽसुत्। उच्यते। बृहत्। अवीवशन्त। मतिऽभिः। मनीषिणः॥ १५॥

[v]होत्रा। वाङ्नामैतत्। आहूयन्तेऽनया देवा इति। [v]सा वाक् [v]वार्यं वरणीयं [v]विश्वं सर्वं पश्वादिसहितं धनं [v]वि [v]अश्नोति विविधं व्याप्नुते। कीदृशी। [v]बृहस्पतिः बृहतां महतां पालयित्री [v]अरमतिः पर्याप्तस्तुतिः यद्वा कुत्राप्यनुपस्ता [v]पनीयसी अत्यन्तं देवानां स्तोत्रकारिणी। [v]यत्र यस्यां होत्रायां [v]मधुषुत् सोममभिषुण्वन् [v]बृहत् महान् [v]ग्रावा [v]उच्यते अभिधीयते। स्तूयत इत्यर्थः। तं स्तुतिमन्तं यज्ञं [v]मनीषिणः देवाः [v]मतिभिः स्तुतिभिः सह [v]अवीवशन्त कामयन्ते। वष्टेर्व्यत्ययेन शप्रत्ययस्य लुकि रूपम्। यद्वा। मनीषिणः स्तोतारः स्तुतिभिर्देवान्यज्ञं कामयमानान् कुर्वन्ति॥

एवा कविस्तुवीरवाँ ऋतज्ञा द्रविणस्युर्द्रविणसञ्चकानः।
उक्थेभिरत्र मतिभिश्च विप्रोऽपीपयद्वयो दिव्यानि जन्म॥ १६॥

एव। कविः। तुविऽरवान्। ऋतऽज्ञाः। द्रविणस्युः। द्रविणसः। चकानः।
उक्थेभिः। अत्र। मतिऽभिः। च। विप्रः। अपीपयत्। गयः। दिव्यानि। जन्म॥१६॥

[v]कविः क्रान्तप्रज्ञः [v]तुवीरवान्। मत्वर्थीयप्रत्ययवृत्तिः। बहुस्तुतियुक्तः [v]ऋतज्ञाः यज्ञस्य वेदिता [v]द्रविणस्युः धनकामः। 'सर्वप्रातिपदिकेभ्यो लालसायाम्' इति सुगागमः। तस्यैव विशदवचनं [v]द्रविणसञ्चकानः इति। पश्वादिधनं कामयमान इत्यर्थः। [v]विप्रः मेधावी [v]गयः नामर्षिः एवमुक्त-प्रकारेण [v]अत्र सूक्ते [v]उक्थेभिः शस्त्रैः [v]मतिभिः स्तुतिभिः [v]च [v]दिव्यानि दिवि जातानि [v]जन्म जननानि देवान् [v]अपीपयत् अवर्धयत्[1]। अस्तावीदित्यर्थः॥

एवा प्लुतेः सूनुरवीवृधद्वो विश्व आदित्या अदिते मनीषी।
ईशानासो नरो अमर्त्येनास्तावि जनो दिव्यो गयेन॥ १७॥

एव। प्लुतेः। सूनुः। अवीवृधत्। वः। विश्वे। आदित्याः। अदिते। मनीषी।
ईशानासः। नरः। अमर्त्येन। अस्तावि। जनः। दिव्यः। गयेन॥ १७॥

इति व्याख्याता॥ ॥ ८ ॥

'अग्निरिन्द्रः' इति पञ्चदशर्चं पञ्चमं सूक्तं वसुरुपुत्रस्य वसुकर्णस्यार्षं वैश्वदेवम्। पञ्चदशी त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रम्यते—'अग्निरिन्द्रः पञ्चदशा वासुको वसुकर्णोऽत्रिसुतस्तं तु' इति॥

---

१. म—'अवर्धयत्' नास्ति।

अग्निरिन्द्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः ।
आदित्या विष्णुर्मरुतः स्वर्बृहत्सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः ॥ १ ॥

अग्निः । इन्द्रः । वरुणः । मित्रः । अर्यमा । वायुः । पूषा । सरस्वती । सऽजोषसः । आदित्याः । विष्णुः । मरुतः । स्वः । बृहत् । सोमः । रुद्रः । अदितिः । ब्रह्मणः । पतिः ॥ १ ॥

अग्न्यादय आदित्यादयः vबृहत् बृहती vस्वः द्यौश्च सोमादय एते देवाः vसजोषसः संगताः सन्तोऽन्तरिक्षं स्वर्महिम्नापूरयन्तीत्युत्तरेण संबन्धः ॥

इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा३ समोकसा ।
अन्तरिक्षं महा पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन् ॥ २ ॥

इन्द्राग्नी इति । वृत्रऽहत्येषु । सत्पती इति सतऽपती । मिथः । हिन्वाना । तन्वा । समऽओकसा । अन्तरिक्षम् । महि । आ । पप्रुः । ओजसा । सोमः । घृतऽश्रीः । महिमानम् । ईरयन् ॥ २ ॥

vवृत्रहत्येषु वृत्रहननेषु युद्धेषु । यद्वा । कर्मणि छान्दसः क्यप् । वृत्राणि शत्रवो हन्यन्तेऽत्रेति वृत्रहत्या युद्धानि । तेषु vमिथः परस्परं vतन्वा शरीरेण तत्रस्थेन बलेन शत्रून् vहिन्वाना प्रेरयन्तौ vसत्पती सतां पती vसमोकसा समानस्थानौ vइन्द्राग्नी vघृतश्रीः उदकं वसतीवर्याख्यं श्रयमाणः vमहिमानम् आत्मीयम् vईरयन् सर्वत्रोदीरयद्बुद्धमयन् vसोमः च एते सर्वे च vमहि महत् vअन्तरिक्षम् vओजसा स्वबलेन vआ vपप्रुः आपूरयन्ति । 'प्रा पूरणे' ॥

तेषां हि महा महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम् ।
ये अप्सुवर्मर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः ॥ ३ ॥

तेषाम् । हि । महा । महताम् । अनर्वणाम् । स्तोमान् । इयर्मि । ऋतऽज्ञाः । ऋतऽवृधाम् । ये । अप्सुवम् । अर्णवम् । चित्रऽराधसः । ते । नः । रासन्ताम् । महये । सुऽमित्र्याः ॥ ३ ॥

vमहा स्वमहत्त्वेन vमहतामनर्वणाम् अन्यस्मिन्नप्रसृतानां शत्रुभिरनभिगन्तव्यानाम्[1] vऋतावृधां सत्यभूतेन यज्ञेन वृद्धानां vतेषाम् अग्न्यादीनां देवानामेव vऋतज्ञाः यज्ञस्य ज्ञाताहं vस्तोमान् vइयर्मि प्रेरयामि । 'ऋ गतिप्रापणयोः' । जौहोत्यादिकः । vचित्रराधसः चायनीयधनोपेता यद्वा पश्वादिलक्षणबहुधनाः vये देवाः vअप्सवम् । अप्स इति रूपनाम । रूपवन्तम् vअर्णवम् । 'अर्णसः सलोपश्च' (का. ५. २. १०९. २) इति मत्वर्थीयो वप्रत्ययः । उदकवन्तं मेघं वर्षन्ति ते vसुमित्र्याः शोभनसखिकर्माणः vते देवाः vनः अस्मभ्यं vमहये जनेषु मध्ये पूजार्थं धनं vरासन्तां प्रयच्छन्तु । 'रास दाने' ॥

स्वर्णरमन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कम्भुरोजसा ।
पृथाईव महयन्तः सुरातयो देवाः स्तवन्ते मनुषाय सूरयः ॥ ४ ॥

स्वःऽनरम् । अन्तरिक्षाणि । रोचना । द्यावाभूमी इति । पृथिवीम् । स्कम्भुः । ओजसा । पृथाऽइव । महयन्तः । सुऽरातयः । देवाः । स्तवन्ते । मनुषाय । सूरयः ॥ ४ ॥

---

१. ग-त१.२.३.७.८-भ-मु-°रभिगंतव्यानां; त४-५-°रगंतानां; त६-°रगंतव्यानां ।

vस्वर्णरं सर्वस्य स्वस्वकर्मणि नेतारमादित्यम् vअन्तरिक्षाणि । द्यावापृथिव्योरन्तरा मध्ये क्षियन्ति निवसन्तीत्यन्तरिक्षाणि । मध्यस्थितानि vरोचना आरोचमानानि तेजांसि vद्यावाभूमी द्यावापृथिव्यौ vपृथिवीं विस्तीर्णमन्तरिक्षं च एतानादित्यादीन् vओजसा स्वबलेनैव देवाः vस्कम्भुः धारयन्ति । स्कम्भु इति सौत्रो धातुः । लिटि रूपम् । किंच vपृक्षाहव दरिद्रेषु धनानि संपर्चयन्त इव अत एव vमहयन्तः स्तोतॄन् धनादिभिः पूजयन्तः vसुरातयः सुदानाः vमनुषाय मनुष्याय vसूरयः धनानां प्रेरका एते vदेवाः vस्तवन्ते अस्मिन्यज्ञे स्तूयन्ते ॥

मित्रायं शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः ।
ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ ॥ ५ ॥

मित्रायं । शिक्ष । वरुणाय । दाशुषे । या । सम्ऽराजा । मनसा । न । प्रऽयुच्छतः ।
ययोः । धाम । धर्मणा । रोचते । बृहत् ।
ययोः । उभे इति । रोदसी इति । नाधसी इति । वृतौ ॥ ५ ॥

vदाशुषे धनानि स्तोतृभ्यः प्रयच्छते vमित्राय vवरुणाय च vशिक्ष हवींषि प्रयच्छ । शिक्षतिर्दानकर्मा । vसम्राजा सम्राजौ सर्वस्य vया यौ मित्रावरुणौ vमनसा अन्तःकरणेनापि vन vप्रयुच्छतः न प्रमाद्यतः किमुत बाह्येन व्यापारेण । ' युच्छ प्रमादे ' । भौवादिकः । vययोः मित्रावरुणयोः vबृहत् महत् vधाम शरीरं vधर्मणा आत्मीयेन लोकप्रकाशनादिलक्षणेन कर्मणा vरोचते सम्यग्दीप्यते । vययोः च vनाधसी । ' णाध याच्ञोपतापैश्वर्याशीःषु ' । याचमाने vउभे vरोदसी द्यावापृथिव्यौ vवृतौ वर्तमाने भवतः । यद्वा । नाधसी देवमनुष्यैः सम्बद्धे द्यावापृथिव्यौ[1] तयोर्वृतौ वर्तमाने भवतः । तदधीने भवत इत्यर्थः ॥ ॥ ९ ॥

या गौर्वर्तनिं परेयिवांसं निष्कृतं पयो दुहाना व्रतनीरवारतः ।
सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥ ६ ॥

या । गौः । वर्तनिम् । परिऽएयिवांसम् । निःऽकृतम् । पयः । दुहाना । व्रतऽनीः । अवारतः ।
सा । प्रऽब्रुवाणा । वरुणाय । दाशुषे । देवेभ्यः । दाशत् । हविषा । विवस्वते ॥ ६ ॥

vया इयं मदीया vपयः क्षीरादिकं vदुहाना vव्रतनीः आश्रवणपथःप्रदानेन कर्मणो नेत्री vगौः vनिष्कृतं संस्कृतं vवर्तनिम् आवासस्थानं यज्ञम् vअवारतः अवरणेन अप्रार्थनेनैव vपरेयिवांसं परिगच्छति स्वयमेवागच्छति vप्रब्रुवाणा मया प्रस्तूयमाना vसा गौः vदाशुषे हविर्दत्तवते vवरुणाय vदेवेभ्यः अन्येभ्य इन्द्रादिभ्यश्च vहविषा अन्नेन vविवस्वते देवान् परिचरते मह्यं मां रक्षितुं vदाशत् पयः प्रयच्छतु । ' दाशृ दाने ' । लेट्यडागमः । यद्वा । गौरिति माध्यमिका वाक् या पय ऊर्जं दुहाना ' सा नो मन्द्रेषमूर्जं दुहाना ' (ऋ. सं. ८. १००. ११) इत्यादिषु दृष्टत्वात् । तत्परतया पूर्ववद्योज्यम् ॥

दिवर्धासो अमिजिह्वा ऋतावृधं क्रतुस्पुं योनिं विमृशन्त आसते ।
यां स्कम्भित्व्यप आ चक्रुरोजसा युजं जनित्वी तन्वी नि मामृजुः ॥ ७ ॥

---

१. ग-त१.२.३.६.७.८-म-द्यावापृथिवी ।

दिवक्षसः । अग्निऽजिह्वाः । ऋतऽवृधः । ऋतस्य । योनिम् । विऽमृशन्तः । आसते ।
याम् । स्कभित्वी । अपः । आ । चक्रुः । ओजसा । यज्ञम् । जनित्वी । तन्वि । नि । ममृजुः ॥७॥

[v]दिवक्षसः स्वतेजसा दिवं[1] व्याप्नुवन्तः[1] । 'अक्षू व्याप्तौ' । असुनि रूपम् । यद्वा दिवो बोढारः । [v]अग्निजिह्वाः अग्न्यास्याः । अग्निना हवींषि लिहन्त्यास्वादयन्तीति तन्मुखाः । [v]ऋतावृधः यज्ञवृधः यज्ञस्य वर्धयितारो वा देवाः [v]ऋतस्य सत्यभूतस्य यज्ञस्य [v]योनिं स्थानं [v]विमृशन्तः विचारयन्तः प्रतीक्षमाणाः सन्तः [v]आसते सर्वत्र तिष्ठन्ति । त इमे [v]द्यां द्युलोकं [v]स्कभित्वी स्कभित्वा तां धारयित्वा [v]ओजसा स्वबलेन [v]अपः अपेक्षितान्युदकानि [v]आ [v]चक्रुः आकुर्वन्ति । ततः [v]यज्ञं यजनीयं हविश्च [v]जनित्वी जनयित्वा [v]तन्वि स्वशरीरे [v]नि [v]ममृजुः निमृजन्ति नितरामलंकुर्वन्ति । हविर्भक्षयन्तीत्यर्थः[2] ॥

परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा ।
द्यावापृथिवी वरुणाय सव्रते घृतव्रत्यया महिषाय पिन्वतः ॥ ८ ॥

परिऽक्षिता । पितरा । पूर्वजावरी इति पूर्वऽजावरी । ऋतस्य । योना । क्षयतः । समऽओकसा ।
द्यावापृथिवी इति । वरुणाय । सव्रते इति सऽव्रते । घृतऽवत् । पयः । महिषाय । पिन्वतः ॥८॥

[v]परिक्षिता परितो निवसन्त्यौ सर्वत्र व्याप्नुत्यौ [v]पितरा सर्वेषां मातापितृभूते अत एव [v]पूर्वजावरी पूर्वं जाते [v]समोकसा समाननिवासस्थाने एते द्यावापृथिव्यौ [v]ऋतस्य यज्ञस्य [v]योना योनौ स्थाने [v]क्षयतः आहुत्यधिकरणत्वेन निवसतः । हविर्धानरूपे वा क्षियतः । किंच [v]सव्रते समानकर्मणी ते [v]महिषाय महते पूज्याय वा [v]वरुणाय तं यष्टुम् । उपलक्षणमेतत् । अन्यान् देवानपि [v]घृतवत् क्षरणवत्[3] [v]पयः उदकं [v]पिन्वतः सिञ्चतः । उदकेन ह्यन्नं जायते ॥

पर्जन्यावाता वृषभा पुरीषिणेन्द्रवायू वरुणो मित्रो अर्यमा ।
देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ॥ ९ ॥

पर्जन्यावाता । वृषभा । पुरीषिणा । इन्द्रवायू इति । वरुणः । मित्रः । अर्यमा ।
देवान् । आदित्यान् । अदितिम् । हवामहे । ये । पार्थिवासः । दिव्यासः । अप्ऽसु । ये ॥९॥

[v]पर्जन्यावाता पर्जन्यावातौ[4] पर्जन्यावायू[4] [v]वृषभा वृषभौ[5] कामानां सेक्तारौ [v]पुरीषिणा पुरीषिणौ । पुरीषमुदकम् । कर्तृत्वेन तद्वन्तौ तौ [v]इन्द्रवायू वरुणादयश्च एते स्वमहिम्ना सर्वत्र वर्तन्ते । द्वयोः पर्जन्येनेन्द्रेण च तत्कार्यापेक्षया सहोपादानम् । एतान् [v]आदित्यान् [v]देवान् [v]अदितिं तेषां मातरं च [v]हवामहे अस्मिन् यज्ञे वयमाह्वयामः । किंच [v]ये देवाः [v]पार्थिवासः पार्थिवाः पृथिव्यां भवा ये च दिव्या दिवि जाताः [v]ये च [v]अप्सु अन्तरिक्षे समुत्पन्नाः तानाह्वयामहे[5] ॥

१. त-ये व्याप्नुतः; भ१.२.४.६.८-इव व्याप्नुतः; भ७-दिवं व्याप्नुतः । २. त-भ१.२.४.६.८-हविर्भजयंतीत्यर्थः; भ७-हविर्भजंत इत्यर्थः । ३. त-भ-लक्षणवत् । ४. ग-त-भ-'पर्जन्यावातौ' नास्ति । ५. भ-वायूपर्जन्या । ६. त१.२.३.६.७.८-भ-'वृषभौ' नास्ति । ७. ग-त१.२.३.७-तानप्याह्वयामहे; भ-ते तथाह्वयामहे ।

त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये ।
बृहस्पतिं वृत्रखादं सुमेधसमिन्द्रियं सोमं धनसा उ ईमहे ॥ १० ॥

त्वष्टारम् । वायुम् । ऋभवः । यः । ओहते । दैव्या । होतारौ । उषसम् । स्वस्तये ।
बृहस्पतिम् । वृत्रऽखादम् । सुऽमेधसम् । इन्द्रियम् । सोमम् । धनऽसाः । ऊँ इति । ईमहे ॥ १० ॥

हे ऋभवः । ऋतेन सत्येन भान्तीत्यृभवः । उरु प्रभूतं स्वतेजसा भान्तीति वा । हे मेधाविनः यः सोमः स्वस्तये कल्याणाय युष्माकं मदाय त्वष्टृप्रभृतीन् ओहते । ओहीर्गत्यर्थः । भौवादिकः । आवहति प्राप्नोति । तथा बृहस्पतिं सुमेधसं सुप्रज्ञं वृत्रखादं वृत्रस्यासुरस्य खादितारमिन्द्रं च प्राप्नोति धनसाः धनं संभजमाना वयम् इन्द्रियम् इन्द्रजुष्टं तं सोमम् ईमहे धनं याचामहे । ईमह इति याच्ञाकर्मा । 'ईङ् गतौ' । दैवादिकः । 'बहुलं छन्दसि' इति विकरणस्य लुक् ॥ ॥ १० ॥

ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन् पृथिवीं पर्वतॉं अपः ।
सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ॥ ११ ॥

ब्रह्म । गाम् । अश्वम् । जनयन्तः । ओषधीः । वनस्पतीन् । पृथिवीम् । पर्वतान् । अपः ।
सूर्यम् । दिवि । रोहयन्तः । सुऽदानवः । आर्या । व्रता । विऽसृजन्तः । अधि । क्षमि ॥ ११ ॥

ब्रह्म वर्धनसाधनमन्नम् । अन्नेन हि सर्वाः प्रजा वर्धन्ते । गामश्वम् एतत्प्रभृतीन् पशून् तथा ओषधीर्वनस्पतीन् च तथा पृथिवीं विस्तीर्णां भूमिं पर्वतान् शिलोच्चयान् वृष्ट्या जगदापूरकान् मेघान्वा अपः उदकानि अन्तरिक्षं वा एतान् जनयन्तः उत्पादयन्तः किंच दिवि द्युलोके सूर्यम् आदित्यं रोहयन्तः सुदानवः शोभनदानास्तेऽमी देवाः अधि क्षमि । आत इति योगविभागात् (पा. सू. ६. ४. १४०) आकारलोपः । क्षमायां पृथिव्याम् आर्या श्रेष्ठानि कल्याणानि व्रता व्रतानि कर्माणि यागादीनि विसृजन्तः प्रसारयन्तः सर्वत्र वर्तयन्ते । तान् वयं धनं याचामह इति शेषः ॥

भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतम् ।
कमद्युवं विमदायोहथुर्युवं विष्णाप्वं[1] विश्वकायावं सृजथः ॥ १२ ॥

भुज्युम् । अंहसः । पिपृथः । निः । अश्विना । श्यावम् । पुत्रम् । वध्रिऽमत्याः । अजिन्वतम् ।
कमऽद्युवम् । विऽमदाय । ऊहथुः । युवम् । विष्णाप्वम् । विश्वकाय । अवं । सृजयः ॥ १२ ॥

हे अश्विना अश्ववन्तौ सर्वं व्याप्नुवन्तौ वैतन्नामकौ हे देवौ अंहसः उपद्रवकारिणः समुद्रात् भुज्युं तन्नामानं निः पिपृथः निष्पारयथः नितरां रक्षथः । 'पॄ पालनपूरणयोः' । जौहोत्यादिकः[2] । 'निष्टौर्व्यं पारयथः समुद्रात्' (ऋ. सं. १. ११८. ६) इति निगमः । तथा श्यावं[3] हिरण्यहस्तनामानं पुत्रं वध्रिमत्याः एतन्नामिकायाः अजिन्वतम् अप्रीणयतम् अदत्तम् । 'हिरण्यहस्तमश्विना. रराणा' (ऋ. सं. १. ११७. २४) इत्यादिनिगमः । तथा

१. म–गथा; त१.२.३.६.७.८-म–यथा; त४.५–यद्वा । २. म-त१.२.३.७-म–'जौहोत्यादिकः' नास्ति । ३. म-त५–श्यावं श्यामं; त१.२.३.६.७.८-म१.२.४.८–श्यावं श्या ।

[v]कमधुवं कामस्य दीपनीं वेनपुत्रीं जायां [v]विमदाय ऋघये [v]युवम्[1] [v]ऊहथुः प्रापयथः । 'युवं रथेन विमदाय' (ऋ. सं. १०. ३९. ७) इति निगमः । तथा [v]विष्णाप्वम् एतन्नामानं विनष्टं पुत्रं [v]विमदाय ऋघये आनीय [v]अव [v]सृजथः अदत्तम् । 'पशुं न नष्टमिव दर्शनाय' (ऋ. सं. १. ११६. २३) इति निगमः ॥

पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः ।
विश्वे देवासः शृणवन् वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥ १३ ॥

पावीरवी । तन्यतुः । एकऽपात् । अजः । दिवः । धर्ता । सिन्धुः । आपः । समुद्रियः ।
विश्वे । देवासः । शृणवन् । वचांसि । मे । सरस्वती । सह । धीभिः । पुरंध्या ॥ १३ ॥

[v]पावीरवी आयुधवती [v]तन्यतुः स्तनयित्नुर्वाग्माध्यमिका तथा [v]दिवः द्युलोकस्य [v]धर्ता धारयिता [v]अजः [v]एकपात् एक एव पद्यते गच्छतीति न जायत इत्येतत्संज्ञको देवः [v]सिन्धुः च [v]समुद्रियः । समुद्रमन्तरिक्षम् । तत्र भवाः [v]आपः च । 'समुद्राभ्राद्धः' इति भवार्थे घप्रत्ययः । [v]विश्वे देवाश्च [v]धीभिः कर्मभिर्युक्ताः [v]पुरंध्या बहुविधया प्रज्ञया सहिता [v]सरस्वती च [v]मे मदीयानि [v]वचांसि वक्तव्यानि स्तोत्राणि [v]शृणवन् शृण्वन्तु । 'पविः शल्यो भवति यद्विपुनाति कायम्' (निरु. १२.३०) इत्यादि निरुक्तमनुसंधेयम् ॥

विश्वे देवाः सह धीभिः पुरंध्या मनोर्यजत्रा अमृता ऋतज्ञाः ।
रातिषाचो अभिषाचः स्वर्विदः स्वर्गिरो ब्रह्म सूक्तं जुषेरत ॥ १४ ॥

विश्वे । देवाः । सह । धीभिः । पुरंध्या । मनोः । यजत्राः । अमृताः । ऋतऽज्ञाः ।
रातिऽसाचः । अभिऽसाचः । स्वःऽविदः । स्वः । गिरः । ब्रह्म । सुऽउक्तम् । जुषेरत ॥ १४ ॥

[v]धीभिः कर्मभिः सहिताः [v]पुरंध्या प्रज्ञानेन युक्ताः [v]मनोः मनुष्यस्य यज्ञे [v]यजत्राः यष्टव्याः [v]अमृताः मरणधर्मरहिताः [v]ऋतज्ञाः सत्यविदः [v]रातिषाचः दीयमानं हविः सेवमानाः [v]अभिषाचः आभिमुख्येन यज्ञं समवयन्तः संगतवन्तः [v]स्वर्विदः सर्वस्य लम्भकाः [v]विश्वे सर्वे इन्द्रादयः [v]देवाः [v]स्वः सर्वाः [v]गिरः अस्मदीयाः स्तुतीः [v]ब्रह्म महच्चात्रं [v]सूक्तं सुष्ठु वक्तव्यं स्तोमं यद्वा सुष्ठु मन्त्रेण सह दत्तमन्नं [v]जुषेरत सेवन्ताम् । 'जुषी प्रीतिसेवनयोः' । तौदादिकः । अनुदात्तेत् । लिङि[2] झस्य रञादेशाभावश्छान्दसः । 'बहुलं छन्दसि' इति रुडागमः ॥

देवान्वसिष्ठो अमृतान् ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥ १५ ॥

देवान् । वसिष्ठः । अमृतान् । ववन्दे । ये । विश्वा । भुवना । अभि । प्रऽतस्थुः ।
ते । नः । रासन्ताम् । उरुऽगायम् । अद्य । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १५ ॥

[v]वसिष्ठः वसिष्ठकुलजोऽयमृषिः [v]अमृतान् मरणरहितान् [v]देवान् [v]ववन्दे एवमस्तावीत् । [v]ये देवाः [v]विश्वा[3] विश्वानि भुवनानि[4] लोकान् [v]अभि [v]प्रतस्थुः स्वतेजसाभिभवन्ति । अभितः

---

१. ग-त-भ–युवां । २. त-भ–लिटि । ३. त-भ–'विश्वा' नास्ति । ४. ग-त१.२.३–भुवना भुवनानि ।

प्रतिहन्तीति वा । प्रपूर्वात्तिष्ठतेर्किप्रि रूपम् । समासस्वरः। [v]ते देवाः [v]अद्य अस्मिन्दिने [v]नः अस्मभ्यम् [v]उत्तमायं प्रभूतयशस्कमन्नं [v]दासन्तां प्रयच्छन्तु । हे देवाः [v]यूयं [v]स्वस्तिभिः कल्याणीभिरुक्तिभिः [v]नः अस्मान् [v]सदा सर्वदा [v]पात रक्षत ॥ ॥ ११ ॥

'देवान् हुवे' इति पञ्चदशर्चं षष्ठं सूक्तम् । ऋष्याद्याः पूर्ववत् । 'देवान् हुवे' इत्यनुक्रान्तम् । पृष्ठ्यामिष्टुवच्छस्त्रयोः पञ्चमेऽहनीदं वैश्वदेवनिविद्धानम् । सूत्रितं च—'इहेह व इति चतस्रो देवान् हुव इति वैश्वदेवम्' (आश्व. श्रौ. ७. ५) इति ॥

देवान् हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतसः ।
ये वावृधुः प्रतरं विश्ववेदस इन्द्रज्येष्ठासो अमृता ऋतावृधः ॥ १ ॥

देवान् । हुवे । बृहत्ऽश्रवसः । स्वस्तये । ज्योतिःऽकृतः । अध्वरस्य । प्रऽचेतसः ।
ये । ववृधुः । प्रऽतरम् । विश्वऽवेदसः । इन्द्रऽज्येष्ठासः । अमृताः । ऋतऽवृधः ॥ १ ॥

[v]बृहच्छ्रवसः प्रभूतान्नान् [v]ज्योतिष्कृतः आदित्याख्यस्य तेजसः कर्तॄन् [v]प्रचेतसः प्रकृष्टज्ञानांस्तान् [v]देवान् [v]अध्वरस्य अस्य यज्ञस्य [v]स्वस्तये अविनाशाय निर्विघ्नेन यज्ञपरिसमाप्तये [v]हुवे आह्वयामि । [v]विश्ववेदसः सर्वधनाः [v]इन्द्रज्येष्ठासः। इन्द्रो ज्येष्ठः प्रधानो येषाम् । इन्द्रनेतृका इत्यर्थः । [v]अमृताः मरणधर्मरहिताः [v]ऋतावृधः यज्ञेन प्रवृद्धाः [v]ये[1] देवाः[1] [v]प्रतरम् अत्यन्तं [v]ववृधुः वर्धन्ते ॥

इन्द्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागमानशुः ।
मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयन्त सूरयः ॥ २ ॥

इन्द्रऽप्रसूताः । वरुणऽप्रशिष्टाः । ये । सूर्यस्य । ज्योतिषः । भागम् । आनशुः ।
मरुत्ऽगणे । वृजने । मन्म । धीमहि । माघोने । यज्ञम् । जनयन्त । सूरयः ॥ २ ॥

[v]इन्द्रप्रसूताः इन्द्रेण तत्तत्कार्येषु प्रेरिताः [v]वरुणप्रशिष्टाः वरुणेनानुशिष्टा अनुमोदिताः [v]ये मरुतः [v]ज्योतिषः द्योतमानस्य [v]सूर्यस्य स्वस्वकर्मणि सर्वस्य प्रेरकस्यादित्यस्य [v]भागं भजनीयं लोकम् [v]आनशुः आनशिरे व्याप्तवन्तः । सूर्यमधिष्ठाय वर्तन्त इत्यर्थः । [v]वृजने शत्रूणां छेदके [v]माघोने मघवत इन्द्रस्य संबन्धिनि [v]मरुद्गणे तेषां मरुतां गणे [v]मन्म मननीयं स्तोत्रं [v]धीमहि दध्मः । कुर्मः । किंच [v]सूरयः प्राज्ञा यजमानास्तन्निमित्तमेव [v]यज्ञं [v]जनयन्त जनयन्ति । तेषां हविष्प्रदानाय कुर्वन्ति ॥

इन्द्रो वसुभिः परि पातु नो गयमादित्यैर्नो अदितिः शर्म यच्छतु ।
रुद्रो रुद्रेभिर्देवो मृळयाति नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ॥ ३ ॥

इन्द्रः । वसुऽभिः । परि । पातु । नः । गयम् । आदित्यैः । नः । अदितिः । शर्म । यच्छतु ।
रुद्रः । रुद्रेभिः । देवः । मृळयाति । नः । त्वष्टा । नः । ग्नाभिः । सुविताय । जिन्वतु ॥ ३ ॥

[v]वसुभिः एतन्नामकैरष्टभिर्देवैः सहितः [v]इन्द्रः [v]नः अस्मदीयं [v]गयम् । गृहनामैतत् । प्रातर्यं गायतेऽभ्यर्चतेऽत्रेति वा गयं गृहम् । [v]परि [v]पातु परिरक्षतु । तथा [v]अदितिः देवमाता [v]आदित्यैः

---

१. त६.८-म—देवा ये ।

देवैः सह vनः अस्मभ्यं vशर्म सुखं प्रयच्छतु । किंच vदेवः दीप्यमानः vरुद्रो vरुद्रेभिः स्वपुत्रैः मरुद्भिः सह vनः अस्मान् vमृळयाति सुखयतु । 'मृड सुखने' । लेट्याडागमः । अपि च vस्वहा प्रजापतिः vआभिः देवपत्नीभिश्छन्दोभिः vसुविताय सुष्ठु प्राप्तव्यायाभ्युदयाय vनः अस्मान् vजिन्वतु प्रीणयतु ॥

अदितिर्द्यावापृथिवी ऋतं महदिन्द्राविष्णू मरुतः स्वर्बृहत् ।
देवाँ आदित्याँ अवसे हवामहे वसून्रुद्रान्त्सवितारं सुदंससम् ॥ ४ ॥

अदितिः । द्यावापृथिवी इति । ऋतम् । महत् । इन्द्राविष्णू इति । मरुतः । स्वः । बृहत् । देवान् । आदित्यान् । अवसे । हवामहे । वसून् । रुद्रान् । सवितारम् । सुऽदंससम् ॥ ४ ॥

vअदितिर्द्यावापृथिवी द्यावापृथिव्यौ vमहत् महान् vऋतं सत्यभूतोऽग्निः vइन्द्राविष्णू vमरुतः च vबृहत् परिवृढः vस्वः आदित्यः एते देवाः सर्वत्र स्वमहिम्ना वर्तन्ते । एतान् vदेवान् आदित्यादीन् vसुदंससं सुकर्माणं vसवितारम् एतन्नामानं च vअवसे रक्षणाय vहवामहे वयमाह्वयामहे ॥

सरस्वान् धीभिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना ।
ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन् त्रिवरूथमंहसः ॥ ५ ॥

सरस्वान् । धीभिः । वरुणः । धृतऽव्रतः । पूषा । विष्णुः । महिमा । वायुः । अश्विना । ब्रह्मऽकृतः । अमृताः । विश्वऽवेदसः । शर्म । नः । यंसन् । त्रिऽवरूथम् । अंहसः ॥ ५ ॥

vधीभिः प्रज्ञाभिर्युक्तः vसरस्वान् एतन्नामा vधृतव्रतः धृतकर्मा vवरुणः च vपूषा vमहिमा महत्त्वेन युक्तः vविष्णुः च vवायुः vअश्विना अश्विनौ vब्रह्मकृतः कर्मकृतः स्तोतॄणामन्नदातारो वा vविश्ववेदसः सर्वधना व्याप्तज्ञाना वा vअंहसः पापरूपाणां शत्रूणां हन्तारः vअमृताः एते देवाः vनः अस्मभ्यं vत्रिवरूथं त्रिष्कम्भं[1] त्रिकक्ष्यं[2] vशर्म गृहम् । यद्वा । त्रिवरूथम् । द्रोणाधवनीयपूतभृत्संज्ञकानि त्रीणि पात्राणि यत्र त्रियन्ते संभज्यन्ते तद्यज्ञसाधनं गृहम् । vयंसन् प्रयच्छन्तु । यच्छतेर्लेटि सिप्यडागमः ॥ ॥ १२ ॥

वृषा यज्ञो वृषणः सन्तु यज्ञिया वृषणो देवा वृषणो हविष्कृतः ।
वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभः ॥ ६ ॥

वृषा । यज्ञः । वृषणः । सन्तु । यज्ञियाः । वृषणः । देवाः । वृषणः । हविःऽकृतः । वृषणा । द्यावापृथिवी इति । ऋतवरी इत्यृतऽवरी । वृषा । पर्जन्यः । वृषणः । वृषऽस्तुभः ॥६॥

vयज्ञः एषोऽस्मदीयः vवृषा कामानां वर्षितास्तु । तथा vयज्ञियाः यज्ञार्हा देवाश्च vवृषणः vसन्तु । किंच vदेवाः स्तुतिकारिण ऋत्विजः vवृषणः धनवर्षणे कारणानि सन्तु साधुस्तुतिकरणेन । तथा vहविष्कृतः हविषां कर्तारोऽध्वर्यवादयः vवृषणः अव्यथतया मन्त्रसाहित्येन च हविष्प्रदानेन । अपि च vऋतावरी यज्ञवत्यौ vद्यावापृथिवी द्यावापृथिव्यौ vवृषणा हविरुत्पादनेन कामानां वर्षयित्र्यौ

---

१. ग–त्रिःभूमिं; त१.२.३.६.७.८–भ–त्रिःक्रमं । २. त१.२.३.७–मु–त्रिकक्षं; त४.५–त्रिकक्षं ।

भवताम्। तथा ᵛपर्जन्यः इन्द्रः ᵛवृषा अपां वर्षिता भवतु। ᵛवृषस्तुभः वर्षणशीलस्तुतिभिर्देवान् स्तुवन्तः सर्वे ऋत्विजः ᵛवृषणः भवन्तु ॥

अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे।
यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः ॥ ७ ॥

अग्नीषोमा। वृषणा। वाजऽसातये। पुरुऽप्रशस्ता। वृषणौ। उप। ब्रुवे।
यौ। ईजिरे। वृषणः। देवऽयज्यया। ता। नः। शर्म। त्रिऽवरूथम्। वि। यंसतः ॥ ७ ॥

ᵛवृषणा वर्षणशीलौ ᵛपुरुप्रशस्ता बहुभिः प्रशस्तौ[1] ᵛअग्नीषोमा अग्नीषोमौ ᵛवाजसातये अन्नलाभाय ᵛउप ᵛब्रुवे अहमुपस्तौमि। पुनः ᵛवृषणौ इति आदरार्थम्। ᵛयौ देवौ ᵛवृषणः ऋत्विजः ᵛदेवयज्यया। देवा इज्यन्तेऽनेति देवयज्या यज्ञः। 'छन्दसि निष्टर्क्य०' इति निपातितः। तेन ᵛईजिरे यजन्ते हविर्भिः पूजयन्ति ᵛता तौ प्रसिद्धौ ᵛनः अस्मभ्यं ᵛत्रिवरूथं त्रिष्कर्मं[2] ᵛशर्म गृहं ᵛवि ᵛयंसतः विशेषेण प्रयच्छताम् ॥

घृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः।
अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृत्रतूर्ये ॥ ८ ॥

घृतऽव्रताः। क्षत्रियाः। यज्ञनिःऽकृतः। बृहत्ऽदिवाः। अध्वराणाम्। अभिऽश्रियः।
अग्निऽहोतारः। ऋतऽसापः। अद्रुहः। अपः। असृजन्। अनु। वृत्रऽतूर्ये ॥ ८ ॥

ᵛघृतव्रताः घृतकर्माणो जात्या ᵛक्षत्रियाः। यद्वा। क्षत्रं बलं तदर्हाः। ᵛयज्ञनिष्कृतः। यज्ञं प्रति निर्गमनं यज्ञनिः। तस्य कर्तारः ᵛबृहद्दिवाः महातेजस्काः ᵛअध्वराणां रक्षोभिरहिंसितानां यज्ञानाम् ᵛअभिश्रियः अभिसेवकाः ᵛअग्निहोतारः अग्निहोता आह्वाता येषां तादृशाः ᵛऋतसापः। 'षप समवाये'। सत्यभाजः अत एव ᵛअद्रुहः केषांचिदप्यद्रोग्धारः। यद्वा। द्रुहेः कर्मण्यौणादिकः क्विप्। कैश्चिदप्यहिंस्याः। एवंप्रभावा देवाः ᵛवृत्रतूर्ये। वृत्रस्तूर्यते हिंस्यतेऽनेति वृत्रतूर्यः संग्रामः। तस्मिन् अपामावरकस्यानुवधे ᵛअपः उदकानि ᵛअन्वसृजन् अन्वसारयन् ॥

द्यावापृथिवी जनयन्नभि व्रता अपो ओषधीर्वनिनानि यज्ञिया।
अन्तरिक्षं स्वरा पप्रुरूतये वशं देवासस्तन्वी३ नि मामृजुः ॥ ९ ॥

द्यावापृथिवी इति। जनयन्। अभि। व्रता। आपः। ओषधीः। वनिनानि। यज्ञिया।
अन्तरिक्षम्। स्वः। आ। पप्रुः। ऊतये। वशम्। देवासः। तन्वि। नि। ममृजुः ॥ ९ ॥

ᵛदेवासः देवा इन्द्रादयः ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛअभि[3] अभिलक्ष्य ᵛव्रता व्रतेन स्वेन कर्मणा ᵛआपः। सुब्व्यत्ययः। अप उदकानि ᵛओषधीः च तथा ᵛयज्ञिया यज्ञार्हान् ᵛवनिनानि वने भवान् पलाशादीन् वृक्षान् ᵛजनयन् उदपादयन्। किंच ते देवाः ᵛस्वः सर्वम् ᵛअन्तरिक्षम् ᵛआ ᵛपप्रुः तेजसापूरयन्ति। किमर्थम्। ᵛऊतये रक्षणाय शत्रुभ्यो बाधाभावाय। अपि च ᵛवशं काम्य-

१. त-भ-सु-प्रस्तुतौ। २. ग-त्रिष्छदिर्फ; त१.२.३.६.७.८-भ-त्रिष्कर्मं; त४-त्रिष्टुर्मं। ३. ग-त-भ-सु-'अभि' नास्ति।

मानम्। 'वशिरण्योरुपसंख्यानम्' (पा. सू. ३. ३. ५८. १) इत्यकर्तरि कारकेऽप्। तं यज्ञं vतस्मिन् स्वकारीरे vमि vमक्षुजः नितरां शुद्धमलंकृतं चक्रुः ॥

धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः ।
आप ओषधीः प्र तिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ॥१०॥

धर्तारः । दिवः । ऋभवः । सुऽहस्ताः । वातापर्जन्या । महिषस्य । तन्यतोः ।
आपः । ओषधीः । प्र । तिरन्तु । नः । गिरः । भगः । रातिः । वाजिनः । यन्तु । मे । हवम् ॥१०॥

vदिवः द्युलोकस्य vधर्तारः धारयितारः vऋभवः सत्येन भासमानाः vसुहस्ताः शोभनवज्रायुधयुक्तहस्ता देवास्तथा vमहिषस्य महतः vतन्यतोः शब्दस्य। 'तनु विस्तारे'। 'ऋतन्यञि'' इति यनुच्प्रत्ययः। शब्दस्य कर्तारौ vवातापर्जन्या वातश्च[1] पर्जन्यश्च[1] तत्कार्याः vआपः vओषधीः ओषधयश्च vनः अस्माकं vगिरः स्तुतीः vप्र vतिरन्तु प्रवर्धयन्तु। प्रपूर्वस्तिरतिर्वृद्ध्यर्थः। तथा vरातिः दाना vभगः भजनीयोऽर्यमा च vवाजिनः। 'अग्निर्वायुः सूर्यस्ते वै वाजिनः' (तै. ब्रा. १. ६. ३. ९) इति तैत्तिरीयब्राह्मणम्। एते देवाश्च vमे मदीयं vहवम् आह्वानं vयन्तु अभिगच्छन्तु ॥ ॥ १३ ॥

समुद्रः सिन्धू रजो अन्तरिक्षमज एकपात्तनयित्नुरर्णवः ।
अहिर्बुध्न्यः शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ॥ ११ ॥

समुद्रः । सिन्धुः । रजः । अन्तरिक्षम् । अजः । एकऽपात् । तनयित्नुः । अर्णवः ।
अहिः । बुध्न्यः । शृणवत् । वचांसि । मे । विश्वे । देवासः । उत । सूरयः । मम ॥ ११ ॥

vसमुद्रः समुन्दनशीलः स्यन्दमानोदकः vसिन्धुः एतन्नामकः vअन्तरिक्षं द्यावापृथिव्योरन्तरा मध्ये क्षितमुषितं vरजः मध्यमलोकम् vअज vएकपात्। अजायमान एक एव पद्यते। एतत्संज्ञको देवः vअर्णवः उदकवान् vतनयित्नुः स्तनयित्नुर्मेघः vबुध्न्यः अन्तरिक्षे भवः vअहिः एतत्संज्ञक एते देवाः vमे मम vवचांसि वक्तव्यानि स्तोत्राणि vशृणवत् प्रत्येकं शृणोतु। vउत अपि च vसूरयः प्राज्ञाः vविश्वे vदेवासः देवाः vमम स्तोत्राणि शृण्वन्तु ॥

स्याम वो मनवो देववीतये प्राञ्चं नो यज्ञं प्र णयत साधुया ।
आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ॥ १२ ॥

स्याम । वः । मनवः । देवऽवीतये । प्राञ्चम् । नः । यज्ञम् । प्र । नयत । साधुऽया ।
आदित्याः । रुद्राः । वसवः । सुऽदानवः । इमा । ब्रह्म । शस्यमानानि । जिन्वत ॥ १२ ॥

हे देवाः vमनवः मनुष्या वयं vवः युष्मदीयाय vदेववीतये। देवानां वीतिर्भक्षणं यस्मिन् स यज्ञः। तस्मै यज्ञाय vस्याम यज्ञकर्तारो भवेम। ततः vनः अस्मदीयं vयज्ञं vसाधुया। सुपो याजादेशः। साधु कल्याणं vप्राञ्चं प्राचीनं vप्र vणयत प्रकृष्टाञ्चनं कुरुत। हे vआदित्याः हे vरुद्राः रुद्रपुत्रा मरुतः हे vसुदानवः शोभनदाना हे vवसवः vइमा इमानि vशस्यमानानि vब्रह्म ब्रह्माणि स्तोत्राणि vजिन्वत प्रीणयत ॥

---

१. ग-तर.३.६.७.८-भ-पर्जन्यवायू च।

अक्षोर्वामेऽच्छावाकातिरिक्तोक्थस्य ' दैव्या होतारा ' इत्येषा परिधानीया । सूत्रितं च—' उभा उ नूनं दैव्या होतारा प्रथमा पुरोहितेति परिधानीया ' (आश्व. श्रौ. ९. ११) इति ॥

दैव्या होतारा प्रथमा पुरोहित ऋतस्य पन्थामन्वेमि साधुया ।
क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान्देवाँ अमृताँ अप्रयुच्छतः ॥ १३ ॥

दैव्या । होतारा । प्रथमा । पुरःऽहिता । ऋतस्य । पन्थाम् । अनु । एमि । साधुऽया ।
क्षेत्रस्य । पतिम् । प्रतिऽवेशम् । ईमहे । विश्वान् । देवान् । अमृतान् । अप्रऽयुच्छतः ॥ १३ ॥

vप्रथमा[1] मुख्यौ vपुरोहिता पुरतो निहितौ vदैव्या देवसंबन्धिनौ vहोतारा होतारावेतन्नामानौ अग्न्यादित्यौ vअन्वेमि[2] हविर्भिरनुगच्छामि । ततः vऋतस्य यज्ञस्य vपन्थां पन्थानं vसाधुया कल्याणं विघ्नराहित्येन vअन्वेमि अनुगच्छामि । अनन्तरं vप्रतिवेशं समीपे वर्तमानं vक्षेत्रस्य vपतिं पालयितारमेतन्नामानम् vअमृतान् मरणधर्मरहितान् vअप्रयुच्छतः अप्रमाद्यतः vविश्वान् सर्वान् vदेवान् च vईमहे धनं याचामहे ॥

वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये ।
प्रीताईव ज्ञातयः काममेत्यास्मे देवासोऽव धूनुता वसु ॥ १४ ॥

वसिष्ठासः । पितृऽवत् । वाचम् । अक्रत । देवान् । ईळानाः । ऋषिऽवत् । स्वस्तये ।
प्रीताःऽईव । ज्ञातयः । कामम् । आऽइत्य । अस्मे इति । देवासः । अव । धूनुत । वसु ॥ १४ ॥

vऋषिवत् पूर्व ऋषय इव vदेवान् vईळानाः स्तुवन्तः vवसिष्ठासः वसिष्ठकुलजाता ऋषयः vपितृवत् वसिष्ठवत् vस्वस्तये अविनाशाय vवाचं स्तोत्रम् vअक्रत कुर्वन्ति । करोतेर्लुङि ' मन्त्रे घस ' इति च्लेर्लुक् । हे vदेवासः देवाः यूयं vकामम् अस्मदभिलाषम् vएत्य आगत्य vअस्मे अस्मासु vवसु गवादिलक्षणं धनम् vअव vधूनुत अभिमुखं प्रेरयत । तत्र दृष्टान्तः । vप्रीताइव यथा प्रीताः संहृष्टाः vज्ञातयः बन्धवः स्वजनस्य धनं प्रेरयन्ति तद्वद्धविर्दानेन स्तुतिकरणेन च बन्धुत्वदस्मासु धनं प्रेरयतेति भावः ॥

देवान् वसिष्ठो अमृतान् ववन्दे ये विश्वा भुवनाभि प्रतस्थुः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥ १५ ॥

देवान् । वसिष्ठः । अमृतान् । ववन्दे । ये । विश्वा । भुवना । अभि । प्रऽतस्थुः ।
ते । नः । रासन्ताम् । उरुऽगायम् । अद्य । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ १५ ॥

एषा ऋक् पूर्वमेव व्याख्याता ॥ ॥ १४ ॥

' इमां धियम् ' इति द्वादशर्चं सप्तमं सूक्तमाङ्गिरसस्यार्षास्यस्यार्चं त्रैष्टुभम् । इदमुत्तरं च बृहस्पतिदेवताकम् । तथा चानुक्रान्तम्—' इमां धियं द्वादशायास्यो बार्हस्पत्यं तु ' इति । आभि-

---

१. त१.२.३.४.५.६.८-म१.२.६.७.८–प्रथमौ; त७-मु–प्रथमा प्रथमौ । २. ग४-त१.२.३.६,७.८-म–' अन्वेमि ' नास्ति ।

प्लविकेषूक्थ्येषु स्तोमवृद्धौ ब्राह्मणाच्छंसिन इदं सूक्तमावापार्थम्। सूत्रितं च—'इमां धियमिति ब्राह्मणाच्छंसी विष्णोर्नु कमिति सूक्ते' (आश्व. श्रौ. ७. ९) इति ॥

इमां धियं सप्तशीर्ष्णीं पिता नः ऋतप्रजातां बृहतीमविन्दत्।
तुरीयं स्विज्जनयद्विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन् ॥ १ ॥

इमाम्। धियम्। सप्तऽशीर्ष्णीम्। पिता। नः। ऋतऽप्रजाताम्। बृहतीम्। अविन्दत्। तुरीयम्। स्वित्। जनयत्। विश्वऽजन्यः। अयास्यः। उक्थम्। इन्द्राय। शंसन् ॥ १ ॥

अत्रेतिहासमाचक्षते। पुरा किलाङ्गिरा नामर्षिर्बृहस्पतिं पुत्रमलभत। स तु देवानां हितोपदेशनायेन्द्रस्य पुरोहितोऽभवत्। कदाचित्तस्य गावः पणिनामकैरसुरैरपहृत्य वलपुरं प्रापय्य त्रिषु स्थानेषु तमसावृतेषु स्थापिता आसन्। अथ तासामन्वेषणायेन्द्रेण[1] प्रेरितो बृहस्पतिर्मरुद्भिः सह तत्रागत्य गवां गुहास्थितानां दर्शनाय सूर्यं जनयित्वा वलनामानमसुरं तदनुचरान् पणींश्च हत्वा गा आजहारेति। तदत्र दर्शयिष्यते। तथा चास्या ऋचोऽयमर्थः। vधियं कर्मणां धात्रीं vसप्तशीर्ष्णीं सप्तशिरस्कां सप्तभिः शिरःस्थानीयैस्तद्वत्प्रधानभूतैर्मरुद्गणैरुपेताम्। यद्वा सप्तच्छन्दोमयशिरस्काम्। vऋतप्रजातां यज्ञार्थमुत्पन्नां vबृहतीं महतीम् vइमां तनुं vनः अस्माकं vपिता अङ्गिराः vअविन्दत् लब्धवान्। कर्मणां ध्यातारं बृहस्पतिं पुत्रमलभतेत्यर्थः। 'येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन् यदङ्गाराः पुनरवशान्ता उददीप्यन्त तद्बृहस्पतिरभवत्' (ऐ. ब्रा. ३. ३४) इति ब्राह्मणम्। तथा vतुरीयं vस्वित्[2] नक्षारमपि vजनयत् अजनयत्[3] vविश्वजन्यः सर्वजनहितः vइन्द्राय ईश्वराय बृहस्पतय इन्द्राय वा vउक्थं स्तोत्रं vशंसन् अयम् vअयास्यः नामर्षिः। पूर्वमेव नोऽस्माकं पिताकार्षीदित्याह ॥

ऋतं शंसन्त ऋजु दीध्यानाः दिवस्पुत्रासो असुरस्य वीराः।
विप्रं पदमङ्गिरसो दधानाः यज्ञस्य धाम प्रथमं मनन्त ॥ २ ॥

ऋतम्। शंसन्तः। ऋजु। दीध्यानाः। दिवः। पुत्रासः। असुरस्य। वीराः।
विप्रम्। पदम्। अङ्गिरसः। दधानाः। यज्ञस्य। धाम। प्रथमम्। मनन्त ॥ २ ॥

vऋतं सत्यभूतं स्तोत्रं vशंसन्तः स्तुवन्तः vऋजु कल्याणं vदीध्यानाः कर्माणि ध्यायन्तः vदिवः दीप्तस्य vअसुरस्य प्रज्ञावतः अग्नेः vअङ्गिरसः पुत्राः[4]। अङ्गिरसो ह्यङ्गारेभ्यो जाता इत्युक्तम्। 'अङ्गारेभ्यङ्गिराः' (निरु. ३. १७) इति। vवीराः विक्रान्तप्रज्ञा एतेऽङ्गिरसः vविप्रं प्रज्ञापकं vयज्ञस्य vधाम धारकं[5] vपदं बृहस्पत्याख्यं vदधानाः कर्मणा धारयन्तः सन्तः vप्रथमम् आदित एव vमनन्त स्तुवन्ति। प्रज्ञापकं ह्येतस्थानं यद्बृहस्पतिरिति ॥

देवसुवां हविःषु बृहस्पतये वाचस्पतय इत्यस्य याज्या 'हंसैरिव' इत्येषा। सूत्रितं च—'बृहस्पते प्रथमं वाचो अग्रं हंसैरिव सखिभिर्वावदद्भिः' (आश्व. श्रौ. ४. ११) इति ॥

हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन्।
बृहस्पतिरभिकनिक्रदद्वा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥ ३ ॥

---

१. ग-त-तेषामन्वेष°। २. ग-त-भ-'स्वित्' नास्ति। ३. ग-त-भ२.४.६.८-अजनयदिति; भ१.७-इति। ४. ग४-पुत्रासः। ५. त-भ-कारकं।

हंसैःऽइव । सखिऽभिः । वावदत्ऽभिः । अश्मन्ऽमयानि । नहना । विऽअस्यन् ।
बृहस्पतिः । अभिऽकनिक्रदत् । गाः । उत । प्र । अस्तौत् । उत् । च । विद्वान् । अगायत् ॥३॥

ᵛहंसैरिव मधुरवाग्भिः ᵛसखिभिः सखिभूतैः ᵛवावदद्भिः अत्यर्थं शब्दायमानैर्मरुद्भिः ᵛअश्मन्मयानि अश्ममयानि[1] ᵛनहना गवां बन्धकाम्यावरकाण्यसुराणां स्थानानि ᵛव्यस्यन् विक्षिपन् विशिलष्यन् ᵛअभिकनिक्रदत् आभिमुख्येन शब्दयन् ᵛगाः पणिभिरपहृतान् पशूनाजिहीर्षुः सः ᵛबृहस्पतिः वर्तते । यद्वा । वावदद्भिरत्यन्तं स्तुवद्भिः स्तोतृभिः सह गाः स्तोत्रलक्षणा वाचोऽभिकनिक्रदत् आभिमुख्येनोच्चारयन् । ᵛउत अपि च ᵛप्रास्तौत् । कर्मणि प्रवृत्तौ यज्ञस्य सखिभिः सहासीनः साम गातुं प्रस्तौति । ᵛविद्वान् सर्वं जानानः स उद्गाता भूत्वा ᵛउत् ᵛअगायत् देवान् उद्गायति अभिष्टौति ॥

अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ ।
बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥ ४ ॥

अवः । द्वाभ्याम् । परः । एकया । गाः । गुहा । तिष्ठन्तीः । अनृतस्य । सेतौ ।
बृहस्पतिः । तमसि । ज्योतिः । इच्छन् ।
उत् । उस्राः । आ । अकः । वि । हि । तिस्रः । आवरित्यावः ॥ ४ ॥

पणयो गा आहृत्य त्रिषु स्थानेषु निदधुः । ᵛअवः अवस्तास्थिताः ᵛअनृतस्य तमसः ᵛसेतौ स्थाने ᵛगुहा गुहायां ᵛतिष्ठन्तीः ᵛगाः ᵛद्वाभ्यां स्थानाभ्यामुदाजत् । ततः ᵛपरः परस्तादवस्थिता गाः ᵛएकया एकेन स्थानेन उदगमयत् । तदेवाह । ᵛबृहस्पतिः तस्मिन् ᵛतमसि ᵛज्योतिः कर्तुम् ᵛइच्छन् तत्र स्थिताः ᵛउस्राः गाः ᵛउत् ᵛआकः उदकार्षीत् । प्रादुर्भूता अकार्षीत् । इत्थमयं ᵛतिस्रः असुराणां द्वारः ᵛवि ᵛआवः विवृतवान् खलु । वृणोतेर्लुङि 'मन्त्रे घस' इति च्लेर्लुक् । 'बहुलं छन्दसि' इत्याडागमः ॥

विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृन्तत् ।
बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥ ५ ॥

विऽभिद्य । पुरम् । शयथा । ईम् । अपाचीम् । निः । त्रीणि । साकम् । उदऽधेः । अकृन्तत् ।
बृहस्पतिः । उषसम् । सूर्यम् । गाम् । अर्कम् । विवेद । स्तनयन्ऽइव । द्यौः ॥ ५ ॥

सः ᵛबृहस्पतिः ᵛशयथा ᵛउपशयेन[2] स्थित्वा[2] ᵛअपाचीं पराङ्मुखीम् ᵛईम् इमाम् असुरपुरीं ᵛविभिद्य विदार्य ᵛउदधेः बलात् मेघरूपादसुरात् ᵛसाकं सह युगपत् ᵛत्रीणि ᵛउषसं ᵛसूर्यं ᵛगाम् एतानि त्रीणि ᵛनिः ᵛअकृन्तत् निर्गतमकार्षीत् । तमसावृतेषु स्थानेषूषःकालं ततः पश्चाद्रात्रिमं सूर्यं च जनयित्वा पशुभिरगमयदित्यर्थः । सोऽयम् ᵛअर्कम् अर्कीयं मन्त्रं सूर्यं ᵛविवेद प्रज्ञापयति । कथमिव । यथा ᵛस्तनयन् शब्दं कुर्वन् ᵛद्यौः ᵛइव स्थितः ॥

१. त१.२.३.६.७.८-म-'अश्ममयानि' नास्ति । २. ग-त-उपशयनेन स्थित्वा; म-उप उपशयनेन स्थित्वा; मु-उपशयनेन स्थित्वा ।

इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्त्त रवेण ।
स्वेदाञ्जिभिराशिरमिच्छमानोऽरोदयत्पणिमा गा अमुष्णात् ॥ ६ ॥

इन्द्रः । वलम् । रक्षितारम् । दुघानाम् । करेणऽइव । वि । चकर्त । रवेण ।
स्वेदाञ्जिऽभिः । आऽशिरम् । इच्छमानः । अरोदयत् । पणिम् । आ । गाः । अमुष्णात् ॥ ६ ॥

[v]इन्द्रः ईश्वरो बृहस्पतिः [v]दुघानां क्षीरस्य दोग्ध्रीणां गवां [v]रक्षितारं [v]वलम् असुरं [v]करेणेव सायुधकरेण इव स्थितेन [v]रवेण शब्देन वलं [v]वि [v]चकर्त विचिच्छेद । किंच [v]स्वेदाञ्जिभिः । स्वेदा-अथो मरुतः क्षरदाभरणाः । तैः सह [v]आशिरम् आश्रयणं संयोगम् [v]इच्छमानः कामयमानः सः [v]पणिं वलस्यानुचरमेतन्नामानमसुरम् [v]अरोदयत् व्यनाशयत् । ततस्तेनापहृताः [v]गाः [v]अमुष्णात् आजहार ॥ ॥ १५ ॥

स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट् ॥ ७ ॥

सः । ईम् । सत्येभिः । सखिऽभिः । शुचत्ऽभिः । गोऽधायसम् । वि । धनऽसैः । अदर्दरित्यदर्दः ।
ब्रह्मणः । पतिः । वृषऽभिः । वराहैः । घर्मऽस्वेदेभिः । द्रविणम् । वि । आनट् ॥ ७ ॥

[v]सः बृहस्पतिः [v]सत्येभिः यथार्थबलैः [v]सखिभिः सखिभूतैः [v]शुचद्भिः दीप्यमानैः [v]धनसैः धनस्य संभक्तृभिर्मरुद्भिः सह [v]गोधायसं गवां धारकम् [v]ईम् एनं वलं [v]वि [v]अदर्दः व्यदारयत् । ततः [v]ब्रह्मणः ऋग्यजुःसामलक्षणस्य स्तोत्रस्य [v]पतिः अधिपतिः सः [v]वृषभिः वर्षितृभिः [v]वराहैः वराहारैर्वरस्य वरणीयस्योदकस्याहर्तृभिः [v]घर्मस्वेदेभिः दीप्तागमनैः । यद्वा क्षरदुदकैः । अथवा घर्मो यज्ञः । तं प्रति गन्तृभिः मरुद्भिः [v]द्रविणं गोलक्षणं धनं [v]व्यानट् व्याप्नोत् ॥

ते सत्येन मनसा गोपतिं गा इयानासः इषणयन्त धीभिः ।
बृहस्पतिर्मिथोअवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ॥ ८ ॥

ते । सत्येन । मनसा । गोऽपतिम् । गाः । इयानासः । इषणयन्त । धीभिः ।
बृहस्पतिः । मिथःऽअवद्यपेभिः । उत् । उस्रियाः । असृजत । स्वयुक्ऽभिः ॥ ८ ॥

[v]गाः पणिभिरपहृतान् पशून् [v]इयानासः अभिगच्छन्तः [v]सत्येन यथार्थभूतेन [v]मनसा युक्ताः [v]ते मरुतः [v]धीभिः आत्मीयैः कर्मभिरेतं बृहस्पतिं [v]गोपतिं तदाहरणेन गवां स्वामिनं कुर्म इति [v]इषणयन्त ऐच्छन् । [v]बृहस्पतिः च [v]मिथोअवद्यपेभिः । पातेः कर्मण्यौणादिकः कप्रत्ययः । अवद्य-रूपादसुराद्रक्षितव्या गावो येषु मरुत्सु परस्परं संगच्छन्त इति ते तथोक्ताः । तैः [v]स्वयुग्भिः स्वयमेव युक्तैर्मरुद्भिः [v]उस्रियाः गाः [v]उत् [v]असृजत पर्वताद्भिरगमयत् ॥

तं वर्धयन्तो मतिभिः शिवाभिः सिंहमिव नानदतं सधस्थे ।
बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम् ॥ ९ ॥

---

१. त-भ–साधुकर । २. ग-त१.२.३.६.७.८-भ–' स्वेदाञ्जिभिः ' नास्ति ।

तम् । वर्धयन्तः । मतिऽभिः । शिवाभिः । सिंहम्ऽइव । नानदतम् । सधऽस्थे ।
बृहस्पतिम् । वृषणम् । शूरऽसातौ । भरेऽभरे । अनु । मदेम । जिष्णुम् ॥ ९ ॥

[v]सधस्थे । सह तिष्ठन्त्यत्र देवा इति सधस्थमन्तरिक्षम् । तस्मिन् [v]सिंहमिव [v]नानदतं पुनः-पुनः शब्दायमानं [v]वृषणं कामानां वर्षितारं [v]जिष्णुं जयशीलं [v]तं [v]बृहस्पतिं [v]वर्धयन्तः मरुतो वयं [v]शूरसातौ शूरैः संभजनीये [v]भरेभरे संग्रामे [v]शिवाभिः कल्याणीभिः स्तुतिभिः [v]अनु [v]मदेम अनुहृमः । स्तोतृपरत्वेन वा योजनीयम् ॥

यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म ।
बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा ॥ १० ॥

यदा । वाजम् । असनत् । विश्वऽरूपम् । आ । द्याम् । अरुक्षत् । उत्ऽतराणि । सद्म ।
बृहस्पतिम् । वृषणम् । वर्धयन्तः । नाना । सन्तः । बिभ्रतः । ज्योतिः । आसा ॥ १० ॥

स बृहस्पतिः [v]यदा यस्मिन् काले [v]विश्वरूपं नानारूपं [v]वाजं गोलक्षणमन्नम् [v]असनत् भजते यदा वाहृतपशुकः सन् [v]द्यां द्युलोकम् [v]अरुक्षत् आरोहति अथवा [v]उत्तराणि वा [v]सद्म स्थानान्या-रोहति । रुहेर्लुङि च्लेः 'शल इगुपधादनिटः क्सः' (पा. सू. ३. १. ४५) । तदानीं [v]वृषणं वर्षितारं [v]बृहस्पतिम् [v]आसा आस्येन देवाः [v]वर्धयन्तः भवन्ति । तथा [v]नाना दिक्षु [v]सन्तः भवन्तः [v]ज्योतिः [v]बिभ्रतः धारयन्तो देवाश्च स्तुवन्ति ॥

सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः ।
पश्चा मृधो अप भवन्तु विश्वास्तद्रोदसी शृणुतं विश्वमिन्वे ॥ ११ ॥

सत्याम् । आऽशिषम् । कृणुत । वयःऽधै । कीरिम् । चित् । हि । अवथ । स्वेभिः । एवैः ।
पश्चा । मृधः । अप । भवन्तु । विश्वाः ।
तत् । रोदसी इति । शृणुतम् । विश्वमिन्वे इति । विश्वम्ऽइन्वे ॥ ११ ॥

हे बृहस्पतिप्रभृतयो देवाः [v]वयोधै अन्नस्य निधानायास्मदीयाम् [v]आशिषं स्तुतिं [v]सत्यां यथार्थां [v]कृणुत कुरुत । तथा यूयं [v]स्वेभिः आत्मीयैः [v]एवैः गमनैः [v]कीरिं स्तोतारं माम् [v]अवथ रक्षथ । हिरवधारणे । [v]पश्चा[1] । 'पश्चा च च्छन्दसि' (पा. सू. ५. ३. २३) इति निपातितः । पश्चात् [v]विश्वाः सर्वाः [v]मृधः हिंसिक्याः [v]अप [v]भवन्तु नश्यन्तु । [v]तत् इदमस्माभिरुक्तं वचनं हे [v]विश्वमिन्वे विश्वस्य प्रीणयित्र्यौ हे [v]रोदसी द्यावापृथिव्यौ [v]शृणुतम् ॥

इन्द्रो महा महतो अर्णवस्य वि मूर्धानमभिनदर्बुदस्य ।
अहन्नहिमरिणात्सप्त सिन्धून् देवैर्द्यावापृथिवी प्रावतं नः ॥ १२ ॥

इन्द्रः । महा । महतः । अर्णवस्य । वि । मूर्धानम् । अभिनत् । अर्बुदस्य ।
अहन् । अहिम् । अरिणात् । सप्त । सिन्धून् । देवैः । द्यावापृथिवी इति । प्र । अवतम् । नः ॥ १२ ॥

---

१. त१.२.३.६.७.८-अ१.२.४.७-मु-पश्च ।

[v]इन्द्रः ईश्वरः [v]मह्ना महत्त्वेन युक्तो बृहस्पतिः [v]महतो [v]अर्णवस्य उदकवतः [v]अर्बुदस्य अम्बुदस्य मेघस्य [v]मूर्धानं शिरः [v]वि [v]अभिनत् व्यच्छिनत्। तदुच्यते। [v]अहिम् अहन्तव्यमपामावरकं शत्रुम् [v]अहन् अवधीत्। ततः [v]सप्त सर्पणशीलाः [v]सिन्धून् स्यन्दमाना अपः। यद्वा। सप्तसंख्याका गङ्गाद्या नदीः। [v]अरिणात् समुद्रं प्रत्यगमयत्। अन्नावयद्वा। अथ प्रत्यक्षकृतः। हे द्यावापृथिव्यौ [v]देवैः सह [v]नः अस्मान् [v]प्रावतं प्ररक्षतम्॥ ॥ १६ ॥

'उदप्रुतः' इति द्वादशर्चमष्टमं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'उदप्रुतः' इत्यनुक्रान्तम्। उक्थे ब्राह्मणाच्छंसिन एतत्सूक्तम्। सूत्रितं च—'प्र मंहिष्ठायोदप्रुतोऽच्छा म इन्द्रम्' (आश्व.श्रौ.६.१) इति॥

उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन् ॥ १ ॥

उदऽप्रुतः। न। वयः। रक्षमाणाः। वावदतः। अभ्रियस्यऽइव। घोषाः।
गिरिऽभ्रजः। न। ऊर्मयः। मदन्तः। बृहस्पतिम्। अभि। अर्काः। अनावन्॥ १ ॥

[v]उदप्रुतः उदकस्योन्मथितारः [v]वयः पक्षिणः पक्षात्सस्यात् [v]रक्षमाणाः कृषीवलाः। [v]न उपमार्थे। यथा शब्दायन्ते। यथा च [v]वावदतः पुनःपुनः शब्दायमानस्य [v]अभ्रियस्येव अभ्रसमूहस्य [v]घोषाः शब्दा यथा भवन्ति। किंच [v]गिरिभ्रजः गिरिभ्यो मेघेभ्यो भ्रष्टा निर्गताः [v]ऊर्मयः अप्समूहा यथा [v]मदन्तः शब्दायमाना भवन्ति। तथा [v]अर्काः अर्चकाः स्तोतारः [v]बृहस्पतिम् [v]अभि [v]अनावन् अभिष्टुवन्ति। 'नु स्तवने'॥

सं गोभिराङ्गिरसो नक्षमाणो भगइवेदर्यमणं निनाय।
जने मित्रो न दंपती अनक्ति बृहस्पते वाजयाशूँरिवाजौ ॥ २ ॥

सम्। गोभिः। आङ्गिरसः। नक्षमाणः। भगःऽइव। इत्। अर्यमणम्। निनाय।
जने। मित्रः। न। दंपती इति दम्ऽपती। अनक्ति।
बृहस्पते। वाजय। आशून्ऽइव। आजौ॥ २ ॥

[v]आङ्गिरसः अङ्गिरसः पुत्रः [v]नक्षमाणः स्वतेजसा व्याप्नुवन् [v]भगइवेत्[1] भगो देव इव स्थितो बृहस्पतिरेव [v]अर्यमणं स्तुतेः प्रेरकं स्तोतारं [v]गोभिः सह [v]सं [v]निनाय संनयति संयोजयति। [v]मित्रो [v]न मित्रो यथा [v]जने जनपदे स्वरश्मीन् संयोजयति तद्वत् [v]दंपती जायापती [v]अनक्ति संगमयति। स्वसामर्थ्येन तत्र स्थापयतीत्यर्थः। हे [v]बृहस्पते आशून् व्याप्तान् स्वरश्मीन् [v]वाजय तव स्तोतृषु गमय स्थापय। [v]आशूनिव[2] व्याप्तानश्वान् [v]आजौ संग्रामे योद्धारो यथा संगमयन्ति तद्वत्॥

साध्वर्या अतिथिनीरिषिराः स्पार्हाः सुवर्णा अनवद्यरूपाः।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्यः ॥ ३ ॥

साधुऽअर्याः। अतिथिनीः। इषिराः। स्पार्हाः। सुऽवर्णाः। अनवद्यऽरूपाः।
बृहस्पतिः। पर्वतेभ्यः। विऽतूर्य। निः। गाः। ऊपे। यवम्ऽइव। स्थिविऽभ्यः॥ ३ ॥

---

१. ग-त-म-मु—भगइव। २. ग-त-म-मु—यथा आशूनिव।

vसाध्वर्याः साधूनां कल्याणानां पथसां नेत्रीः vअतिथिनीः सततं गच्छन्तीः vदुहिराः दुहीयाः vस्पार्हाः[1] स्पृहणीयाः[1] vसुवर्णाः शोभनसुवर्णादिवर्णोपेताः vअनवद्यरूपाः प्रशस्यरूपा एताः vगाः vपर्वतेभ्यः वलसंबन्धिभ्यः vवितूर्य निर्गमय्य vऊधः देवसमीपे निर्वपति प्रापयति। तत्र दृष्टान्तः। vयवमिव। यथा यवं vस्थलेभ्यः कुसीदेभ्य आदाय निर्वपति। 'डुवप् बीजसंताने'। लिटि रूपम्। यद्वा। साधुनयनादिगुणयुक्ता गा अपः पर्वतेभ्यो मेघेभ्य आहृत्य सर्वत्र वर्षति॥

आप्रुषायन्मधुना[2] ऋतस्य योनिमवक्षिपन्नर्क उल्कामिव द्योः।
बृहस्पतिरुद्धरन्नश्मनो गा भूम्या उद्नेव वि त्वचं बिभेद॥ ४॥

आऽप्रुषायन्। मधुना। ऋतस्य। योनिम्। अवऽक्षिपन्। अर्कः। उल्काम्ऽइव। द्योः। बृहस्पतिः। उद्धरन्। अश्मनः। गाः। भूम्याः। उद्नाऽइव। वि। त्वचम्। बिभेद॥४॥

vमधुना[2] उदकेन vआप्रुषायन् पृथिवीमाभिमुख्येन सिञ्चन्। 'प्रुष प्लुष स्नेहनसेचनपूरणेषु'। व्यत्ययेन विकरणस्य शायजादेशः। vऋतस्य उदकस्य vयोनिं मेघम् vअवक्षिपन् वृष्ट्यर्थमवकिरन् vअर्कः अर्चनीयः vबृहस्पतिः vद्योः द्युलोकात् vउल्कामिव उल्कां यथोद्धरति तद्वत् vअश्मनः शिलोच्चयाद्वलेनाधिष्ठितात् vगाः पणिभिरपहृतान् पशून् vउद्धरन् ऊर्ध्वं गमयन् vभूम्याः vत्वचं तेषां शफैः vवि vबिभेद विभिन्नामकार्षीत्। सर्वत्र गा वितता अकार्षीदित्यर्थः। तत्र दृष्टान्तः। vउद्नेव। यथा वृष्ट्युदकेन पर्जन्यो भूमित्वचं विभिनत्ति तद्वत्॥

अप ज्योतिषा तमो अन्तरिक्षादुद्नः शीपालमिव वात आजत्।
बृहस्पतिरनुमृश्या वलस्याभ्रमिव वातो आ चक्र आ गाः॥ ५॥

अप। ज्योतिषा। तमः। अन्तरिक्षात्। उद्नः। शीपालम्ऽइव। वातः। आजत्।
बृहस्पतिः। अनुऽमृश्य। वलस्य। अभ्रम्ऽइव। वातः। आ। चक्रे। आ। गाः॥ ५॥

सः vबृहस्पतिः vज्योतिषा तमसावृते पर्वतविवरे कृतेन सूर्येण vअन्तरिक्षात् vतमः vअप vआजत् अपागमयत्। तत्र दृष्टान्तः। vउद्नः vशीपालमिव। यथोदकात् vवातः वायुः शीपालं शैवालमपगमयति तद्वत्। ततः सोऽयम् vअनुमृश्य अत्र गावस्तिष्ठन्तीति विचार्य निश्चित्य vवलस्य स्वभूतस्य पर्वतस्यान्तर्गताः vगाः vआ vचक्रे समन्तादकार्षीत्। कथमिव। vअभ्रमिव। यथा वायुरन्तरिक्षस्थितमभ्रं मेघमाकिरति तद्वत्।

यदा वलस्य पीयतो जसुं भेद्बृहस्पतिरग्नितपोभिरर्कैः।
दद्भिर्न जिह्वा परिविष्टमाददाविर्निधीँरकृणोदुस्रियाणाम्॥ ६॥

यदा। वलस्य। पीयतः। जसुम्। भेत्। बृहस्पतिः। अग्नितपःऽभिः। अर्कैः।
दत्ऽभिः। न। जिह्वा। परिऽविष्टम्। आदत्।
आविः। निऽधीन्। अकृणोत्। उस्रियाणाम्॥ ६॥

---

१. ग४-त४-प्राप्तव्या अत एव स्पार्हाः (त४-अस्पार्हाः) सर्वैः स्पृहणीयाः; इतरलिखितपुस्तकेषु 'स्पार्हाः स्पृहणीयाः' नास्ति। २. ग४-त-म१.२.४.६.८-अधुना।

vपीयतः । पीयतिर्हिंसाकर्मा । हिंसकस्य vबलस्य vजसुम् आयुधं vयदा यस्मिन्काले vभेत् भिनत्ति । केन साधनेन । vअग्नितपोभिः अग्निवत्तपनशीलैः vअर्कैः अर्चनीयैः रश्मिभिः अपि वा मन्त्रैर्भिनत्ति । किंच vदन्नैः । 'पदन्नोमास्' इत्यादिना दन्तशब्दस्य दन्नावः । यथा दन्तैः परिविष्टं भक्ष्यं vजिह्वा भक्षयति तद्वत् सः vपरिविष्टं पर्वते पणिभिः परिवृतं बलनामानं यदा vआदत् अभक्षयत् अवधीत् तदानीं तैरपहृतानाम् vउस्रियाणां गवां vनिधीन् vआविः vअकृणोत् आविर्भूतमकरोत् ॥ ॥ १७ ॥

बृहस्पतिरमत हि त्यदासां नाम स्वरीणां सदने गुहा यत् ।
आण्डेव भित्त्वा शकुनस्य गर्भमुदुस्रियाः पर्वतस्य त्मनाजत् ॥ ७ ॥

बृहस्पतिः । अमत । हि । त्यत् । आसाम् । नाम । स्वरीणाम् । सदने । गुहा । यत् ।
आण्डाऽईव । भित्त्वा । शकुनस्य । गर्भम् । उत् । उस्रियाः । पर्वतस्य । त्मना । आजत् ॥७॥

vबृहस्पतिः vगुहा गुहायां vसदने स्थाने vस्वरीणां शब्दायमानानाम् vआसां गवां vत्यत् तत् प्रसिद्धं vनाम नामधेयं vयत् यदा vअमत vहि ज्ञातवान् खलु । 'मनु अवबोधने' । लुङि 'तनादिभ्यस्तथासोः' (पा. सू. २. ४. ७९) इति सिचो लुक् । तदानीं vपर्वतस्य[1] अन्तःस्थिताः[1] vउस्रियाः गाः vत्मना आत्मनैवासहायेन पर्वतं vभित्त्वा vउत् vआजत् उदगमयत् । तत्र दृष्टान्तः । vआण्डेव यथा vशकुनस्य पक्षिण आण्डानि भित्त्वा तत्र स्थितं vगर्भम् उद्गमयति तद्वत् ॥

अश्मापिनद्धं मधु पर्यपश्यन्मत्स्यं न दीन उदनि क्षियन्तम् ।
निष्टज्जभार चमसं न वृक्षाद्बृहस्पतिर्विरवेणा विकृत्य ॥ ८ ॥

अश्मा । अपिऽनद्धम् । मधु । परि । अपश्यत् । मत्स्यम् । न । दीने । उदनि । क्षियन्तम् ।
निः । तत् । जभार । चमसम् । न । वृक्षात् । बृहस्पतिः । विऽरवेण । विऽकृत्य ॥ ८ ॥

vबृहस्पतिः vअश्मा अश्मना व्यासया शिलया vअपिनद्धं पिहितं vमधु गोलक्षणं vपर्यपश्यत् परितोऽद्राक्षीत् । तत्र दृष्टान्तः । vमत्स्यं vन यथा vदीने शुष्के vउदनि । उदकशब्दस्योदन्नादेशः । उदके vक्षियन्तं निवसन्तं मत्स्यं यथा पश्यति तद्वत् । दृष्ट्वा च vतत् गोलक्षणं मधु vविरवेण विविधेन शब्देन vविकृत्य बलं छित्त्वा vनिः vजभार पर्वतान्निर्जहार । कथमिव । vचमसं vन । चमन्ति भक्षयन्त्यत्रेति चमसः सोमपात्रम् । तं यथा vवृक्षात् निर्हरति तद्वत् । हरतेर्लिटि रूपम् । हृग्रहोर्भः ॥

सोषामविन्दत्स स्वः सो अग्निं सो अर्केण वि बबाधे तमांसि ।
बृहस्पतिर्गोवपुषो बलस्य निर्मज्जानं न पर्वणो जभार ॥ ९ ॥

सः । उषाम् । अविन्दत् । सः । स्वरिति स्वः । सः । अग्निम् ।
सः । अर्केण । वि । बबाधे । तमांसि ।
बृहस्पतिः । गोऽवपुषः । बलस्य । निः । मज्जानम् । न । पर्वणः । जभार ॥ ९ ॥

१. भ–पर्वतस्थिताः ।

vसः vबृहस्पतिः तत्र पर्वतविवरे गवां दर्शनाय vउषां उषसम् vअविन्दत् अलभत। vसः एव vस्वः आदित्यं vसः vअग्निं लब्ध्वा vअर्केण अर्चनीयेन तेजसा vतमांसि vवि vबबाधे अत्यर्थं बाधितवान्। ततः सः vगोवपुषः गोरूपधारीरस्य पणुभिः परिवृतस्य vबलस्य vपर्वणः पर्वतात् ता गाः vनिः vअभार बलेन निर्जहार। बलादाहरणे दृष्टान्तः। vमज्मानं vन vपर्वणः[1]। अस्मो मज्मानं यथा अतिक्लेशेन निर्हरन्ति तद्वत्॥

हिमेव पर्णा मुषिता वनानि बृहस्पतिनाकृपयद्बलो गाः।
अनानुकृत्यमपुनश्चकार यात्सूर्यामासा मिथ उच्चरातः॥ १०॥

हिमाऽइव। पर्णा। मुषिता। वनानि। बृहस्पतिना। अकृपयत्। बलः। गाः। अननुऽकृत्यम्। अपुनरिति। चकार। यात्। सूर्यामासा। मिथः। उत्ऽचरातः॥ १०॥

vहिमेव यथा हिमेन vपर्णा पर्णानि पद्मपत्राणि vमुषिता मुषितानि भवन्ति तद्वद्बलेन vवनानि वननीयानि गोधनानि मुषितान्यभूवन्। अथ गवामन्वेषणाय vबृहस्पतिना आगतेन हेतुना vबलः vअकृपयत् अस्मै ता मुषिताः vगाः प्रायच्छत्। तत्र vअननुकृत्यम् अननुकरणीयम् vअपुनः कर्तव्यं च तत्कर्म vचकार। यथा तत्पश्चात्करणीयं न भवति यथा पुनरकरणीयं तथाकार्षीदित्यर्थः। किं तदिति आह। vसूर्यामासा सूर्याचन्द्रमसौ vमिथः परस्परमहोरात्रयोः vउच्चरातः उच्चरत इति vयात्[2] तच्चकार। यादिति दीर्घश्छान्दसः॥

अभि श्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामपिंशन्।
रात्र्यां तमो अदधुर्ज्योतिरह्नबृहस्पतिर्भिनदद्रिं विदद्गाः॥ ११॥

अभि। श्यावम्। न। कृशनेभिः। अश्वम्। नक्षत्रेभिः। पितरः। द्याम्। अपिंशन्। रात्र्याम्। तमः। अदधुः। ज्योतिः। अह्न्। बृहस्पतिः। भिनत्। अद्रिम्। विदत्। गाः॥ ११॥

vपितरः पालयितारो देवाः vद्यां द्युलोकं vनक्षत्रेभिः अश्विन्यादिभिः[3] vअभि vअपिंशन् अभितोऽदीपयन्। 'पिश अवयवे'। अयं दीपनार्थां वर्तते। तत्र दृष्टान्तः। vश्यावं vन यथा श्यामवर्णम् vअश्वं vकृशनेभिः सौवर्णैराभरणैरलंकुर्वन्ति तद्वत्। तथा vरात्र्यां vतमः निहितवन्तः। किंच vअह्न् अह्नि vज्योतिः आदित्याख्यम् vअदधुः। अदधुरित्युत्तरवाक्येन संबन्धः करणीयः। अन्यथा स्वरो न घटेत[4]। अत्र तु वाक्यभेदादनिघातः। यदा vबृहस्पतिः vअद्रिं बलेनाभिहितं शिलोच्चयं vअभिनत् अभिनत् विभिद्य च तत्र स्थितान् vगाः पशून् vविदत् अविन्दत् अलभत। विदेर्लुङि लृदित्वादङ्। तदा देवा एवमकार्षुरित्यर्थः॥

इदमकर्म नमो अभ्रियाय यः पूर्वीरन्वानोनवीति।
बृहस्पतिः स हि गोभिः सो अश्वैः स वीरेभिः स नृभिर्नो वयो धात्॥ १२॥

इदम्। अकर्म। नमः। अभ्रियाय। यः। पूर्वीः। अनु। आऽनोनवीति।
बृहस्पतिः। सः। हि। गोभिः। सः। अश्वैः।
सः। वीरेभिः। सः। नृऽभिः। नः। वयः। धात्॥ १२॥

---

१. ग-त-म–यथा पर्वणः। २. ग४-म७–यत्; त-म१.२.४.६.८-मु–यावत्। ३. ग४-त१.२.३.७–आदित्यादिभिः; म–आदिभिः। ४. ग-त-म-मु–घटते।

vअग्नियाय अग्नेषु भवायान्तरिक्षाय मध्यमाय बृहस्पतये vइदम् उक्थं vनमः स्तोत्रम् vअकर्म वयमकार्ष्म। vयः बृहस्पतिः vपूर्वीः बह्वीर्ऋचः vअनु अनुक्रमेण vआनोनवीति अत्यर्थमाभिमुख्येन ब्रवीति vसः vबृहस्पतिः एव vगोभिः vअश्वैः च युक्तं vवीरेभिः पुत्रैः vनृभिः भृत्यादिभिश्च सहितं vवयः अन्नं vनः अस्मभ्यं स्तोतृभ्यः vधात् दधातु प्रयच्छतु। तच्छब्दादृत्तिः आदरार्था ॥ ॥ १८ ॥ ॥ ५ ॥

षष्ठेऽनुवाके षोडश सूक्तानि। ' भद्राः ' इति द्वादशर्चं प्रथमं सूक्तंवध्र्यश्वपुत्रस्य सुमित्रस्यार्षम्। आदितो द्वे जगत्यावथ दश त्रिष्टुभः। अग्निर्देवता। तथा चानुक्रम्यते—' भद्राः सुमित्रो वाध्र्यश्च आग्नेयं द्विजगत्यादि ' इति। गतो विनियोगः ॥

भद्रा अग्नेर्वध्र्यश्वस्य संदृशो वामी प्रणीतिः सुरणा उपेतयः।
यदीं सुमित्रा विशो अग्निमिन्धते घृतेनाहुतो जरते दविद्युतत् ॥ १ ॥

भद्राः। अग्नेः। वध्रिऽअश्वस्य। सम्ऽदृशः। वामी। प्रऽनीतिः। सुऽरणाः। उपऽइतयः। यत्। ईम्। सुऽमित्राः। विशः। अग्निम्। इन्धते। घृतेन। आऽहुतः। जरते। दविद्युतत् ॥ १ ॥

vअग्नेः वक्ष्यमाणगुणस्य vसंदृशः संदृष्टयः vवध्र्यश्वस्य एतन्नामकस्य मम पितुः vभद्राः कल्याणकारिण्यो भवन्तु। यद्वा। वध्र्यश्वस्य वध्र्यश्वकुले जातस्याग्नेः संदृष्टयो भजनीया भवन्तु[1]। vप्रणीतिः तस्य प्रणयनं vवामी कल्याणी[2] च भवतु। तथा vउपेतयः यज्ञं प्रत्युपगतयः vसुरणाः शोभनरमणा भवन्तु[3]। vसुमित्राः एतन्नामधेयाः vविशः अमी मनुष्याः vईम् एनमग्निम् vअग्निं प्रथमं vयत् यदा vइन्धते हविर्भिर्दीपयन्ति तदा vघृतेनाहुतः हविर्भिश्च vदविद्युतत् भृशं द्योतमानः। ' दाधर्ति दर्धर्ति° ' इत्यादिना निपातितः। सोऽग्निः vजरते अस्माभिः स्तूयते ॥

घृतमग्नेर्वध्र्यश्वस्य वर्धनं घृतमन्नं घृतमस्यास्य मेदनम्।
घृतेनाहुत उर्विया वि पप्रथे सूर्यइव रोचते सर्पिरासुतिः ॥ २ ॥

घृतम्। अग्नेः। वध्रिऽअश्वस्य। वर्धनम्। घृतम्। अन्नम्। घृतम्। ऊँ इति। अस्य। मेदनम्। घृतेन। आऽहुतः। उर्विया। वि। पप्रथे। सूर्यःऽइव। रोचते। सर्पिःऽआसुतिः ॥ २ ॥

vवध्र्यश्वस्य संबन्धिनः vअग्नेः vघृतं दीयमानं हविः vवर्धनं भवतु। तथा vघृतमन्नम् अदनीयं भवतु। तथा vअस्य अग्नेः vघृतमेव vमेदनं पुष्टिकरं भवतु। येनाग्निः पुष्टो भवति तन्मेदनम्। तेन vघृतेनाहुतः अग्निः vउर्विया उर्वन्त्यन्तं vवि vपप्रथे स्वतेजसा विप्रथितो भवति। तथा vसर्पिरासुतिः सर्पिरासूयते यस्मिन्निति सोऽग्निः vसूर्यइव vरोचते दीप्यते ॥

यत्ते मनुर्यदनीकं सुमित्रः समीधे अग्ने तदिदं नवीयः।
स रेवच्छोच स गिरो जुषस्व स वाजं दर्षि स इह श्रवो धाः ॥ ३ ॥

यत्। ते। मनुः। यत्। अनीकम्। सुऽमित्रः। सम्ऽईधे। अग्ने। तत्। इदम्। नवीयः। सः। रेवत्। शोच। सः। गिरः। जुषस्व। सः। वाजम्। दर्षि। सः। इह। श्रवः। धाः ॥ ३ ॥

---

१. ग–भवंती; त१.२.३.७-भ–भवंति; त४.५.६–भवतु। २. ग-त-भ-सु–कल्याणी। ३. ग–भवंती; त१.२.३.७-भ-सु–भवंति; त४.५.६–भवतु।

हे [v]अग्ने [v]ते त्वदीयं [v]यत् [v]अनीकं रश्मिसंघं [v]मनुः एतन्नामकः यथा [v]समीधे हविर्भिः सम्यग्दीपयति [v]सुमित्रः एतन्नामकोऽहं समीधे सम्यग्दीपयामि। 'णिहन्धी दीप्तौ'। णिटि 'हन्धि-भवतिभ्यां च' इति किरवाक्लोपः। [v]तदिदं लोऽयं रश्मिसंघः [v]नवीयः नवतरो भवतु। [v]सः त्वं [v]रेवत् धनयुक्तं यथा भवति तथा [v]द्योत प्रज्वल। [v]सः एव त्वं [v]गिरः अस्मदीयाः स्तुतीः [v]जुषस्व सेवस्व। [v]सः त्वं [v]वाजं शत्रुबलं [v]दर्षि विदारय। तथा [v]इह मयि [v]श्रवः अन्नं [v]धाः धेहि॥

यं त्वा पूर्वमीळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व।
स नः स्तिपा उत भवा तनूपा दात्रं रक्षस्व यदिदं ते अस्मे॥ ४॥

यम्। त्वा। पूर्वम्। ईळितः। वध्रिऽअश्वः। सम्ऽईधे। अग्ने। सः। इदम्। जुषस्व।
सः। नः। स्तिऽपाः। उत। भव। तनूऽपाः।
दात्रम्। रक्षस्व। यत्। इदम्। ते। अस्मे इति॥ ४॥

[v]ईळितः। व्यत्ययेन कर्तरि क्तः। स्तोता [v]वध्र्यश्वः मम पिता [v]पूर्वं पूर्वस्मिन्काले संजातं [v]यं [v]त्वा त्वां [v]समीधे हविर्भिः सम्यगदीपयत्[1] [v]सः त्वमिदानीं मया क्रियमाणम् [v]इदं स्तोत्रं [v]जुषस्व सेवस्व। यद्वा। वध्र्यश्वस्य पुत्रोऽहं सम्यग्दीपितवानस्मि। [v]सः त्वं [v]नः अस्माकं [v]स्तिपाः। पृषोदरादिः। पस्त्यं गृहम्। तस्य रक्षकः [v]भव। यद्वा। उपस्थितान् ज्योतिष्टोमादीन्यागान् पालयतीति स्तिपाः। अस्मदीयानां यज्ञानां पालयिता भव। [v]उत अपि च [v]तनूपाः स्वाङ्गानां रक्षको भव। किंच [v]दात्रं तद्धनं [v]रक्षस्व [v]यदिदं धनं [v]ते तव स्वभूतेषु [v]अस्मे अस्मासु तिष्ठति॥

भवा द्युम्नी वाध्र्यश्वोत गोपा मा त्वा तारीदभिमातिर्जनानाम्।
शूरइव धृष्णुश्च्यवनः सुमित्रः प्र नु वोचं वाध्र्यश्वस्य नाम॥ ५॥

भव। द्युम्नी। वाध्रिऽअश्व। उत। गोपाः। मा। त्वा। तारीत्। अभिऽमातिः। जनानाम्।
शूरःऽइव। धृष्णुः। च्यवनः। सुऽमित्रः। प्र। नु। वोचम्। वाध्रिऽअश्वस्य। नाम॥ ५॥

हे [v]वाध्र्यश्व वध्र्यश्वकुले जाताग्ने [v]द्युम्नी। 'द्युम्नं द्योततेर्यशो वान्नं वा'। तद्वान् [v]भव। [v]उत अपि च [v]गोपाः गोपायिता भव। किंच [v]त्वा त्वाम् कश्चिदपि [v]मा [v]तारीत् मा हिनस्तु। यतः [v]जनानां शत्रूणाम् [v]अभिमातिः अभिभवनशीलमानयुक्तोऽभिभविता[2] भवसि। किंच [v]शूरइव बलवानिव [v]धृष्णुः शत्रुधर्षणशीलः तस्मात् [v]च्यवनः तेषां च्यावयिता भवसि। अथ [v]वाध्र्यश्वस्य अग्नेरेव [v]नाम अग्निर्जातवेदा वैश्वानर इत्यादीनि नामानि [v]नु क्षिप्रं [v]सुमित्रः [v]अहं [v]प्र [v]वोचं प्रब्रवीमि। तस्मान्मेऽन्नादियुक्तो भव॥

समज्या पर्वत्या३ वसूनि दासा वृत्राण्यार्या जिगेथ।
शूरइव धृष्णुश्च्यवनो जनानां त्वमग्ने पृतनायूँरभि ष्याः॥ ६॥

सम्। अज्र्या। पर्वत्या। वसूनि। दासा। वृत्राणि। आर्या। जिगेथ।
शूरःऽइव। धृष्णुः। च्यवनः। जनानाम्। त्वम्। अग्ने। पृतनाऽयून्। अभि। ष्याः॥६॥

---

१. ग४-त१.२.६.७.८-म४.६.७-सम्यग्दीपयत; त४.५-सम्यग्दीपयन्, म१-सम्यग्दीपति।
२. ग-शील्मनोयुक्तो'।

हे [v]अग्ने [v]अज्रया। अजन्ति गच्छन्तीत्यज्रयो जनाः। तेभ्यो हितानि [v]पर्वत्या पर्वतभवानि [v]वसूनि गवादिलक्षणानि [v]सं [v]जिगेथ शत्रुभ्यः संजितवानसि। तथा [v]आर्या बलवद्भिः कृतान् [v]दासा दासैरसुरैः कृतान् [v]वृत्राणि उपद्रवान् [v]सं [v]जिगेथ। तान् हतवानसीत्यर्थः। 'जि जये'। लिटि रूपम्। [v]शूरइव [v]धृष्णुः [v]जनानां [v]व्यचनः [v]त्वं [v]पृतनायून् संग्रामकामान् [v]अभि [v]ष्याः अभिभव। पृतनायूनित्यत्र लोपाभावश्छान्दसः। 'अश्वाघस्यात्' इत्यात्वं विधीयमानमस्मादपि व्यत्ययेन भवति॥ ॥ १९ ॥

दीर्घतन्तुर्बृहदुक्षायमग्निः सहस्रस्तरीः शतनीथ ऋम्वा।
द्युमान् द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु ॥ ७ ॥

दीर्घऽतन्तुः। बृहत्ऽउक्षा। अयम्। अग्निः। सहस्रऽस्तरीः। शतऽनीथः। ऋम्वा। द्युऽमान्। द्युमत्ऽसु। नृऽभिः। मृज्यमानः। सुऽमित्रेषु। दीदयः। देवयत्ऽसु ॥ ७ ॥

[v]दीर्घतन्तुः। यैर्यज्ञं संतनोति ते तन्तवः स्तोत्रादयः। प्रभूतस्तुतिमान् [v]बृहदुक्षा। उक्षा सेचको रश्मिः। प्रभूतरश्मियुक्तः [v]सहस्रस्तरीः हवीरूपबह्वाच्छादनः [v]शतनीथः आहवनीयादिद्वारेण बहुविधनयनः [v]ऋम्वा महान् [v]द्युमत्सु दीप्तिमत्सु मध्ये [v]द्युमान् अतिशयेन दीप्तिमान् [v]अयमग्निः [v]नृभिः कर्मनेतृभिर्ऋत्विग्भिः [v]मृज्यमानः अलंक्रियमाणो भवति। 'मृजू शौचालंकारयोः'। स त्वं [v]देवयत्सु देवान् कामयमानेषु [v]सुमित्रेषु अस्मासु [v]दीदयः दीप्यस्व। दीदयतिर्दीप्तिकर्मा॥

त्वे धेनुः सुदुघा जातवेदोऽसश्चतेव समना सबर्धुक्।
त्वं नृभिर्दक्षिणावद्भिरग्ने सुमित्रेभिरिध्यसे देवयद्भिः ॥ ८ ॥

त्वे इति। धेनुः। सुऽदुघा। जातऽवेदः। असश्चताऽइव। समना। सबःऽधुक्।
त्वम्। नृऽभिः। दक्षिणावत्ऽभिः। अग्ने। सुऽमित्रेभिः। इध्यसे। देवयत्ऽभिः ॥ ८ ॥

हे [v]जातवेदः जातप्रज्ञ [v]अग्ने [v]त्वे त्वयि [v]सुदुघा सुष्ठु पयसो दोग्ध्री काचिद्धोमसाधनभूता [v]धेनुः अस्ति। कीदृशी। [v]असश्चतेव संगतवर्जितेनैवैकत्र स्थित्यभावात्कुत्रापि न संयुक्तेनादित्येन [v]समना संगता [v]सबर्धुक् अमृतं दुहाना गोरूपा माध्यमिका वाग्वैद्युते त्वय्यस्तीति भावः। तादृशः [v]त्वं [v]नृभिः कर्मनेतृभिः [v]दक्षिणावद्भिः ऋत्विग्भ्यो देयत्वेन तद्वद्भिः [v]देवयद्भिः देवकामैः [v]सुमित्रेभिः अस्माभिः [v]इध्यसे हविर्भिर्दीप्यसे॥

देवाश्चित्ते अमृता जातवेदो महिमानं वाज्यश्व प्र वोचन्।
यत्संपृच्छं मानुषीर्विश आयन्त्वं नृभिरजयस्त्वावृधेभिः ॥ ९ ॥

देवाः। चित्। ते। अमृताः। जातऽवेदः। महिमानम्। वाज्ऽइअश्व। प्र। वोचन्।
यत्। सम्ऽअपृच्छम्। मानुषीः। विशः। आयन्। त्वम्। नृऽभिः। अजयः। त्वाऽवृधेभिः ॥९॥

हे [v]जातवेदः हे [v]वाज्यश्व अग्ने [v]ते तव [v]महिमानम् [v]अमृताः [v]देवाश्चित् देवा अपि [v]प्र [v]वोचन् प्रब्रुवन्ति। [v]यत् यदा [v]मानुषीः मनुष्यसंबन्धिन्यः [v]विशः प्रजाः [v]संपृच्छं देवैः सह को वा असुरान् हन्तीत्येवमादिकं संप्रश्नम् [v]आयन् प्राप्तवन्तः तदा [v]त्वं [v]नृभिः सर्वस्य नेतृभिः [v]त्वावृधेभिः त्वया वर्धितैर्देवैः सह कर्मविघ्नकारिणस्तान् [v]अजयः जितवानसि॥

पितेव पुत्रमभिभरुपस्थे त्वामग्ने वध्र्यश्वः सपर्यन् ।
जुषाणो अस्य समिधं यविष्ठोत पूर्वीं अवनोर्व्राधतश्चित् ॥ १० ॥

पिताऽइव । पुत्रम् । अभिऽभः । उपऽस्थे । त्वाम् । अग्ने । वध्रिऽअश्वः । सपर्यन् ।
जुषाणः । अस्य । सम्ऽइधम् । यविष्ठ । उत । पूर्वीन् । अवनोः । व्राधतः । चित् ॥ १० ॥

हे ᵛअग्ने ᵛत्वाम् ᵛउपस्थे पृथिव्या उपस्थाने उत्तरवेद्यां ᵛसपर्यन् । परिचर्याकर्मा । परिचरन् ᵛवध्र्यश्वः मम पिता ᵛअभिभः धृतवान् हविर्भिः पोषितवान्वा । कथमिव । ᵛपितेव यथा पिता समीपे ᵛपुत्रं स्थापयति पोषयति वा । ' डुभृञ् धारणपोषणयोः ' । लकि[1] तिपि गुणे कृते हल्ङ्यादिना तिपो लोपः । हे ᵛयविष्ठ युवतमाग्ने ᵛउत अपि च ᵛअस्य वध्र्यश्वस्य पितुर्वा मम वा ᵛसमिधं ᵛजुषाणः सेवमानः सन् ᵛपूर्वान् प्रत्नान् ᵛव्राधतश्चित् बाधकानपि शत्रून् ᵛअवनोः अवधीः । वनति-हिंसायां भौवादिकः । व्यत्ययेनोप्रत्ययः ॥

शश्वदग्निर्वध्र्यश्वस्य शत्रूनृभिर्जिगाय सुतसोमवद्भिः ।
समनं चिददहश्चित्रभानोऽव व्राधन्तमभिनद्दुधश्चित् ॥ ११ ॥

शश्वत् । अग्निः । वध्रिऽअश्वस्य । शत्रून् । नृऽभिः । जिगाय । सुतसोमवत्ऽभिः ।
समनम् । चित् । अदहः । चित्रभानो इति चित्रऽभानो ।
अव । व्राधन्तम् । अभिनत् । वधः । चित् ॥ ११ ॥

सः ᵛअग्निः ᵛवध्र्यश्वस्य ᵛसुतसोमवद्भिः अभिषुतसोमैः । अनुवादको मत्वर्थीयः । तैः ᵛनृभिः ऋत्विग्भिः ᵛशश्वत् सर्वदा ᵛशत्रून् ᵛजिगाय जितवान् । अथ प्रत्यक्षः । हे ᵛचित्रभानो नानातेजस्क चायनीयदीप्तिमन् वाग्ने त्वं ᵛसमनं ᵛचित् । समनमिति संग्रामनाम । तमपि ᵛअदहः स्वतेजोभिः । अथ तव स्तोता वध्र्यश्वः वृधश्चित् स्वयं वृद्धो भवन् ᵛव्राधन्तं वर्धमानं हिंसकं वा ᵛअव ᵛअभिनत् अवाक्सुखं कृत्वा अच्छिनत् । यद्वा त्वमेव तमवाभिनत् । अवाक्सुखं कृत्वाभिनः अच्छिनः । प्रथम-मध्यमयोः समानमेतद्रूपम् ॥

अयमग्निर्वध्र्यश्वस्य वृत्रहा सनकात्प्रेद्धो नमसोपवाक्यः ।
स नो अजामीरुत वा विजामीन्यभि तिष्ठ शशधतो वाध्र्यश्व ॥ १२ ॥

अयम् । अग्निः । वध्रिऽअश्वस्य । वृत्रऽहा । सनकात् । प्रऽइद्धः । नमसा । उपऽवाक्यः ।
सः । नः । अजामीन् । उत । वा । विऽजामीन् । अभि । तिष्ठ । शशधतः । वाध्रिऽअश्व ॥ १२ ॥

ᵛवृत्रहा शत्रूणां हन्ता ᵛअयमग्निः ᵛसनकात् चिरादारभ्य ᵛवध्र्यश्वस्य इषिणा ᵛप्रेद्धः प्रकर्षेण दीपितो भवति । तथा तस्य ᵛनमसा नमस्कारेण सह ᵛउपवाक्यः उपस्तोतव्यो भवति । हे ᵛवाध्र्यश्व वध्र्यश्वकुले मथनेन समुत्पन्नाग्ने ᵛसः त्वं ᵛनः अस्माकम् ᵛअजामीन् अज्ञातीन् शत्रून् ᵛउत ᵛवा अपि वा ᵛशशधतः हिंसतः ᵛविजामीन् विविधान् ज्ञातीनपि ᵛअभि ᵛतिष्ठ अभिभव ॥ ॥ २० ॥

---

१. ग४-स-म१.४.६.७.८-मु-लिकि ।

'इमां मे' इत्येकादशर्चं द्वितीयं सूक्तं वाध्यश्वस्य सुमित्रस्यार्षं त्रैष्टुभम्। तत्रूनपाद्वर्जिताः सनराशंसाः समिदादयः प्रत्यृचं देवताः। तथा चानुक्रान्तम्—'इमां म एकादशाग्रम्' इति। वध्यश्वगोत्राणां पशाविदमाग्रीसूक्तम्। सूत्रितं च—'समिद्धो अद्येति सर्वेषां यथर्षि वा' (आश्व. श्रौ. १. २) इति॥

इमां मे अग्ने समिधं जुषस्वेळस्पदे प्रति हर्या घृताचीम्।
वर्ष्मन् पृथिव्याः सुदिनत्वे अह्नामूर्ध्वो भव सुकृतो देवयज्या॥ १॥

इमाम्। मे। अग्ने। सम्ऽइधम्। जुषस्व। इळः। पदे। प्रति। हर्य। घृताचीम्।
वर्ष्मन्। पृथिव्याः। सुदिनऽत्वे। अह्नाम्। ऊर्ध्वः। भव। सुकृतो इति सुऽकृतो। देवऽयज्या॥ १॥

हे अग्ने इळस्पदे इळायास्पदे। 'एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः' (ऐ. ब्रा. १. २८) इति ब्राह्मणम्। उत्तरवेद्याम् इमां मे मदीयां समिधं जुषस्व सेवस्व। तथा घृताचीं घृतमञ्चन्तीं स्रुचं प्रति हर्य प्रतिकामयस्व। किंच हे सुकृतो सुप्रज्ञ पृथिव्याः वर्ष्मन् वर्ष्मणि समुच्छ्रिते पूर्वोक्ते देशे अह्नां सुदिनत्वे तन्निमित्तं देवयज्या देवयागेन हेतुना ऊर्ध्वः ज्वालाभिरुन्नतः भव॥

आ देवानामग्रयावेह यातु नराशंसो विश्वरूपेभिरश्वैः।
ऋतस्य पथा नमसा मियेधो देवेभ्यो देवतमः सुषूदत्॥ २॥

आ। देवानाम्। अग्रऽयावा। इह। यातु। नराशंसः। विश्वऽरूपेभिः। अश्वैः।
ऋतस्य। पथा। नमसा। मियेधः। देवेभ्यः। देवऽतमः। सुसूदत्॥ २॥

देवानामग्रयावा अग्रे गन्ता नराशंसः। 'उभे वनस्पत्यादिषु युगपत्' इति पूर्वोत्तरपदयोः युगपत्प्रकृतिस्वरत्वम्। नरैः शंसनीय एतन्नामकोऽग्निः विश्वरूपेभिः नानारूपैः अश्वैः रोहिदाख्यैः सह इह अस्मिन् यज्ञे आ यातु। आगत्य च मियेधः मेध्यो यज्ञहितः स्तुतियोग्यो वा देवतमः देवानां मुख्यः सोऽग्निः हविर्नयनयोग्येन ऋतस्य यज्ञस्य पथा मार्गेण नमसा स्तोत्रेण सह देवेभ्यः इन्द्रादिभ्यः सुषूदत् हविः प्रेरयतु॥

शश्वत्तममीळते दूत्याय हविष्मन्तो मनुष्यासो अग्निम्।
वहिष्ठैरश्वैः सुवृता रथेना देवान् वक्षि नि षदेह होता॥ ३॥

शश्वत्ऽतमम्। ईळते। दूत्याय। हविष्मन्तः। मनुष्यासः। अग्निम्।
:। अश्वैः। सुऽवृता। रथेन। आ। देवान्। वक्षि। नि। सद। इह। होता॥ ३॥

शश्वत्तमम् अत्यन्तं नित्यम् अग्निं हविष्मन्तः संभृतहविष्काः मनुष्यासः मनुष्याः यजमानाः दूत्याय। 'दूतस्य भागकर्मणी' इति यत्प्रत्ययः। दूतकर्मणे हविर्वहनलक्षणाय तन्निमित्तम् ईळते स्तुवन्ति। स त्वमेवं स्तुतः वहिष्ठैः वोढृतमैः अश्वैः सुवृता सुवर्तनेन रथेन च सह देवान् इन्द्रादीन् आ वक्षि अस्मदीयं यज्ञं प्रत्यावह प्रापय। ततस्त्वं होता भवन् इह अस्मिन् यज्ञे नि षद निषीद॥

वनस्पते रशनया नियूया देवानां पाथ उप वक्षि विद्वान् ।
स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे ॥ १० ॥

वनस्पते । रशनया । निऽयूय । देवानाम् । पाथः । उप । वक्षि । विद्वान् ।
स्वदाति । देवः । कृणवत् । हवींषि । अवताम् । द्यावापृथिवी इति । हवम् । मे ॥ १० ॥

हे वनस्पते वनस्पतिविकार यूप विद्वान् जानानस्त्वं रशनया रज्ज्वा नियूय बद्ध्वा परिष्याय पाथः अन्नं देवानाम् इन्द्रादीनाम् उप वक्षि उपवह प्रापय । ततः देवः वनस्पतिः स्वदाति हविष्प्रापणेन स्वदयतु । तथा हवींषि अस्माभिर्दत्तानि कृणवत् देवानां करोतु । तथा मे मदीयं हवं देवविषयाह्वानं द्यावापृथिवी द्यावापृथिव्यौ अवतां रक्षताम् ॥

आग्ने वह वरुणमिष्टये न इन्द्रं दिवो मरुतो अन्तरिक्षात् ।
सीदन्तु बर्हिर्विश्व आ यजत्राः स्वाहा देवा अमृता मादयन्ताम् ॥ ११ ॥

आ । अग्ने । वह । वरुणम् । इष्टये । नः । इन्द्रम् । दिवः । मरुतः । अन्तरिक्षात् ।
सीदन्तु । बर्हिः । विश्वे । आ । यजत्राः । स्वाहा । देवाः । अमृताः । मादयन्ताम् ॥ ११ ॥

हे अग्ने त्वं नः अस्माकम् इष्टये यागाय इन्द्रं वरुणं च मरुतः च दिवः द्युलोकात् अन्तरिक्षात् च अस्मदीयं यज्ञम् आ वह प्रापय । आगतास्ते यजत्राः यष्टव्याः विश्वे सर्वे देवाः बर्हिः आ सीदन्तु तत्रासक्ता भवन्तु । ततः अमृताः मरणधर्मरहिताः देवाः स्वाहा स्वाहाकारेण दत्तैर्हविर्भिः मादयन्ताम् आत्मानं मादयन्तु ॥ ॥ २२ ॥

'बृहस्पते' इत्येकादशर्चं तृतीयं सूक्तम् आङ्गिरसस्य बृहस्पतेरार्षम् । नवमी जगती शिष्टा दश त्रिष्टुभः । अनेन सूक्तेनर्षिः परमपुरुषार्थसाधनं परब्रह्मज्ञानं स्तुतवान् । अतस्तद्देवत्यमिदम् । उक्तं हि बृहद्देवतायां—' सुज्योतिः परमं ब्रह्म यद्योगात्समुपाश्नुते । तज्ज्ञानमभितुष्टाव सूक्तेनाथ बृहस्पतिः ' (बृहद्दे. ७. १०९) इति । अनुक्रान्तं च—' बृहस्पते बृहस्पतिर्ज्ञानं तुष्टाव नवमी जगती ' इति । सूक्तविनियोगो गतः । देवसुवां हविःषु बृहस्पतिर्वाचस्पतिरित्यस्य प्रथमानुवाक्या । सूत्रितं च—' बृहस्पते प्रथमं वाचो अग्रं हंसैरिव सखिभिर्वावदद्भिः ' (आश्व. श्रौ. ४. ११) इति ॥

बृहस्पते प्रथमं वाचो अग्रं यत्प्रैरत नामधेयं दधानाः ।
यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः ॥ १ ॥

बृहस्पते । प्रथमम् । वाचः । अग्रम् । यत् । प्र । ऐरत । नामऽधेयम् । दधानाः ।
यत् । एषाम् । श्रेष्ठम् । यत् । अरिप्रम् । आसीत् ।
प्रेणा । तत् । एषाम् । निऽहितम् । गुहा । आविः ॥ १ ॥

बृहस्पतिरनेन सूक्तेन विदितवेदार्थान् बालान् दृष्ट्वा स्मयमानः[1] स्वात्मानं संबोध्याह । हे बृहस्पते अन्तरात्मन् प्रथमम् उत्पत्त्यनन्तरमितरवागुच्चारणात्प्रागेव नामधेयं नाम दधानाः

१. ग-त-सु-विस्मयमानः ।

पदार्थेषु निदधाना बालाः vयत् vप्रैरत प्रेरितवन्तः तत् vवाचोऽग्रं भवति। यत्तत तातेत्यादिकं वाक्यं पूर्वमभिधाय पश्चादन्या वाचो वदिष्यन्ति खलु तस्माद्वाचोऽग्रम्। अस्यां दशायामवस्थितान् बालान् पश्य। तथेदानीम् vएषां vश्रेष्ठं प्रशस्यतमं vयत् यच्च vअरिप्रं पापरहितं वेदार्थज्ञानम् vआसीत् vएषां तज्ज्ञानं vगुहा गुहायां vनिहितं गोप्यं vतत् vप्रेणा। मकारलोपश्छान्दसः। प्रेम्णाधिर्भवति। वेदाभ्यासकाले सरस्वती स्वार्थमेभ्यः प्रकाशयतीत्यर्थः। एवं विस्मये 'बृहस्पते प्रथमं वाचो अग्रम्' (ऐ. आ. १. ३. ६) इत्यादिकमारण्यकमनुसंधेयम्॥

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि॥ २॥

सक्तुम्ऽइव। तितउना। पुनन्तः। यत्र। धीराः। मनसा। वाचम्। अक्रत।
अत्र। सखायः। सख्यानि। जानते। भद्रा। एषाम्। लक्ष्मीः। निऽहिता। अधि। वाचि॥ २॥

vतितउना। परिपूयतेऽनेनेति। यद्वा। तता विस्तृता भृष्टयवा अत्रेति तितउः। 'तनोतेर्डउः सन्वच्च' (उ. सू. ५. २२) इति डउप्रत्ययः। सन्वद्भावादित्वम्। उक्तनिर्वचनेन सूर्पेण vसक्तुमिव यथा कश्चित्सक्तुं दुर्धावं पुनाति तद्वत् प्रकृतितः प्रत्ययतश्च शब्दानुत्पुनन्तः vधीराः धीमन्तो विद्वांसः vयत्र यस्मिन् काले विद्वत्संघे वा vमनसा प्रज्ञायुक्तेन vवाचमक्रत अकृषत कुर्वन्ति। करोतेर्लुङि रूपम्। vअत्र तत्र काले vसखायः समानख्यानाः शास्त्रादिविषयज्ञानास्ते vसख्यानि तेषु भवानि ज्ञानानि vजानते जानन्ति। यद्वा। सखायो वाचा बद्धसख्यास्ते तस्यास्तस्या वाचः सख्यानि जानन्ति। वाक्ययुक्तानभ्युदयाँल्लभन्त इत्यर्थः। तस्मात् vएषां vवाचि vभद्रा कल्याणी vनिहिता vलक्ष्मीः भवति। अधिः सप्तम्यर्थद्योतकः। अर्थज्ञानं वाचि पश्याम इत्यर्थः। 'तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा तिलमात्रतुन्नमिति वा सक्तुमिव तितउना' (निरु. ४. १०) इत्यादि निरुक्तमनुसंधेयम्॥

वाग्देवत्यपशोर्वपापुरोडाशयोः 'यज्ञेन वाचः' इत्यादिके द्वे क्रमेण याज्ये। सूत्रितं च—'यज्ञेन वाचः पदवीयमायन्निति द्वे देवीं वाचमजनयन्त देवाः' (आश्व. श्रौ. ३. ८) इति॥

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते॥ ३॥

यज्ञेन। वाचः। पदऽवीयम्। आयन्। ताम्। अनु। अविन्दन्। ऋषिषु। प्रऽविष्टाम्।
ताम्। आऽभृत्य। वि। अदधुः। पुरुऽत्रा। ताम्। सप्त। रेभाः। अभि। सम्। नवन्ते॥३॥

विदितार्था धीराः vपदवीयम्। वेतेः 'अचो यत्'। संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः। पदेन यातव्याः पन्थाः पदवीयः। तं vवाचः मार्गं vयज्ञेन vआयन् प्राप्तवन्तः। vऋषिषु अतीन्द्रियार्थदर्शिषु vप्रविष्टां vतां वाचम् vअविन्दन् अलभन्त। अनन्तरं vतां वाचम् vआभृत्य आहृत्य vपुरुत्रा बहुषु देशेषु vव्यदधुः व्यकार्षुः। सर्वान् मनुष्यानध्यापयामासुरित्यर्थः। एतादृशीं वाचं[1] vरेभाः शब्दायमानाः पक्षिणः पक्षिरूपाणि गायत्र्यादीनि vसप्त छन्दांसि vअभि vसं vनवन्ते अभितः संगच्छन्ते॥

---

१. ग-त४.५-तां वाचं; त१.२.३.७-तां सप्त।

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् ।
उतो त्वस्मै तन्वं१ वि सस्रे जायेव पत्य उशती सुवासाः ॥ ४ ॥

उत । त्वः । पश्यन् । न । ददर्श । वाचम् । उत । त्वः । शृण्वन् । न । शृणोति । एनाम् ।
उतो इति । त्वस्मै । तन्वम् । वि । सस्रे । जायाऽइव । पत्ये । उशती । सुऽवासाः॥ ४ ॥

त्वशब्द एकवाची । एकः । उतशब्दोऽप्यर्थे । पश्यन् अपि मनसा पर्यालोचयन्नपि वाचं न ददर्श दर्शनफलाभावान्न पश्यति । त्वः एकः शृण्वन् अपि एनां वाचं न शृणोति श्रवणफलाभावात् । इत्यनेनार्धेन अविद्वानभिहितः । तृतीयपादेन विदितवेदार्थमाह । त्वस्मै एकस्मै अपि तन्वम् आत्मीयं शरीरं वि सस्रे स्वयं वाग्विविधं गमयति । आत्मानं विवृणुते प्रकाशयतीत्यर्थः । तत्र दृष्टान्तः । जायेव यथा उशती संभोगं कामयमाना सुवासाः शोभनवसना जाया पत्ये भर्त्रे ऋतुकाले संभोगार्थं स्वयमात्मानं विवृणुते । तद्वदेनां पश्यति शृणोति चेति विदितवेदार्थस्य प्रशंसा । 'अप्येकः पश्यन्न पश्यति वाचम्' (निरु. १. १९) इत्यादि निरुक्तमत्र द्रष्टव्यम् ॥

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति मायया एष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥ ५ ॥

उत । त्वम् । सख्ये । स्थिरऽपीतम् । आहुः । न । एनम् । हिन्वन्ति । अपि । वाजिनेषु ।
अधेन्वा । चरति । मायया । एषः । वाचम् । शुश्रुऽवान् । अफलाम् । अपुष्पाम् ॥ ५ ॥

त्वम् उत एकमपि सख्ये विदुषां संसदि । या सत्कथा सा सखिकर्मत्वात्सख्यमित्युच्यते । सा च वाचा क्रियते । अतो वाक्संबन्धाद्वाक्सख्ये स्थिरपीतम् । मधु यस्य हृदये स्थिरं भवति । यद्वा स्थिरपीतं[1] स्थिरग्राहिम् । आहुः । यद्वा । तस्मिन्ज्ञातार्थमाहुः । लोके यथा ज्ञातार्थं पुरुषं पीतार्थमिति वदन्ति । किंच एनं विज्ञातार्थं पुरुषं वाजिनेषु । वाक् इना ईश्वरा येषां[2] ते वाजिना अर्थो वाच आयत्ताः खलु । वाग्ज्ञेयेष्वर्थेषु न अपि हिन्वन्ति । अपिशब्दोऽन्वर्थे । केचिदपि नानुगच्छन्ति । अयमेवातिशयेन विद्वानित्यर्थः । यद्वा । वाजिनेषु सारभूतेषु निरूपणीयेष्वर्थेष्वेनं न हिन्वन्ति न बहिः कुर्वन्ति । एनं पुरस्कृत्यैव सर्वं वेदार्थं विचारयन्तीत्यर्थः । इत्यर्थज्ञः[3] प्रशस्तः । अनन्तरमुत्तरार्धेन केवलपाठको निन्द्यते । एषः अविज्ञातार्थः पुरुषः अधेन्वा धेनुत्वविवर्जितया कामानामदोग्ध्र्या देवमनुष्यस्थानेषु वाक्प्रतिरूपया मायया चरति । किं कुर्वन् । अफलामपुष्पाम् । वाचोऽर्थः पुष्पफलम् । अर्थवर्जिताम् । यद्वा । वाचोऽर्थो याज्ञदैवते । यज्ञे भवं ज्ञानं याज्ञं देवतासु भवं ज्ञानं दैवतम् । तद्वर्जितां कर्मादिविषयज्ञानवर्जितां वाचं शुश्रुवान् । केवलं पाठमात्रेणैव श्रुतवान् स चरति । यथा वन्ध्या पीना गौः किं द्रोणमात्रं क्षीरं दोग्धीति मायामुत्पादयन्ती चरति यथा वन्ध्यो वृक्षोऽकाले पल्लवादियुक्तः सन् पुष्पति फलतीति भ्रान्तिमुत्पादयंस्तिष्ठति तथा पाठं प्रमुखाणः चरतीत्यर्थः । 'अप्येकं वाक्सख्ये स्थिरपीतम्' (निरु. १.२०) इत्यादि निरुक्तमत्रानुसंधेयम् ॥ ॥२३॥

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥ ६ ॥

---

१. त३-सु-स्थिरपीतं पीतं । २. ग-येषामर्थानां । ३. त४.५.६.८-भ१.२.६.८-इत्यर्थः ।

यः । तित्याज । सचिऽविदम् । सखायम् । न । तस्य । वाचि । अपि । भागः । अस्ति । यत् । ईम् । शृणोति । अलकम् । शृणोति । नहि । प्रऽवेद । सुऽकृतस्य । पन्थाम् ॥ ६ ॥

vसचिविदम् । सचिशब्दः सखिवाची । सखिविदम् । योऽध्येता स वेदस्य सखा संप्रदायोच्छेदनिवारकत्वेन वेदं प्रत्युपकारित्वात् । तादृशमुपकारिणमध्येतारं वेत्तीति सचिवित् । तमभिशं vसखायम् अध्येतॄणां पुरुषाणां स्वार्थबोधनेनोपकारित्वात्सखिभूतं वेदं vयः पुमान् vतित्याज तत्याज परार्थविनियोगेन परित्यजति । त्यजतेर्लिटि ' अपस्पृधेथामानृचुः ' ' इत्यादिना निपातितः । vतस्य पुरुषस्य vवाचि सर्वस्यां लौकिक्यां शास्त्रीयायां वाच्यपि vभागः भजनीयः कश्चिदर्थः vन vअस्ति । vईम् अयं पुरुषः vयत् वेदव्यतिरिक्तं vशृणोति तत् vअलकम् अलीकं व्यर्थमेव vशृणोति । vहि यस्मात्कारणात् vसुकृतस्य vपन्थां पन्थानं vन vप्रवेद श्रद्धाराहित्यादनुष्ठानमार्गं न जानाति । तस्मात्तदीयश्रवणमपि निष्फलमित्यर्थः । द्वितीयचतुर्थपादयोरभिप्राय आरण्यके दर्शितः ' न तस्यानूक्ते भागोऽस्ति ' (ऐ. आ. ३. २. ४) इत्यादिना । तथा ' तं योऽनूत्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाभ्युक्ता ' (तै. आ. २. १५. ५) इत्यध्वर्युभिश्च ॥

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे हृदाईव स्नात्वा उ त्वे ददृश्रे ॥ ७ ॥

अक्षण्ऽवन्तः । कर्णऽवन्तः । सखायः । मनःऽजवेषु । असमाः । बभूवुः ।
आदघ्नासः । उपऽकक्षासः । ऊँ इति । त्वे । हृदाःऽइव । स्नात्वाः । ऊँ इति । त्वे । ददृश्रे ॥७॥

vअक्षण्वन्तः अक्षिमन्तः । ' छन्दस्यपि दृश्यते ' इत्यक्षिशब्दादनङ् । ' अनो नुट् ' इति नुट् । अनेन दृश्यते सर्वमित्यक्षि । यद्वा । तैजसत्वात् अन्येभ्योऽक्षेभ्यो[1] व्यक्ततरम् । तथा च श्रूयते—' तस्मादेते व्यक्ततरे इव ' इति । तादृशाक्षियुक्ताः vकर्णवन्तः । कर्णौ निकृत्तद्वारः । गर्भावस्थायामेव केनापि निर्मितबिल इत्यर्थः । यद्वा शरीरस्य शिरसो वोर्ध्वं गते उच्चैः स्थिते । कर्णविलक्षणाकाशवन्तः । तथा चाम्नायते—' ऋच्छन्ती इव खे उदगन्ताम् ' इति । तादृशाः vसखायः । समानं ख्यानं ज्ञानं येषामिति सखायः । तेषु वाक्येषु बाह्येष्विन्द्रियेषु समानज्ञाना इत्यर्थः । ते vमनोजवेषु । मनसा गम्यन्ते ज्ञायन्त इति मनोजवाः प्रज्ञाद्याः । तेषु vअसमाः अतुल्याः vबभूवुः भवन्ति । तेषु मध्ये केचित् vआदघ्नासः । आस्यशब्दस्य पृषोदरादित्वादाकारादेशः । आस्यदघ्ना आस्यप्रमाणोदका हृदा इवेति मध्यमप्रज्ञानाह । अथ vत्वे एके । सर्वनामत्वाज्जसः शीभावः । vउपकक्षासः । कक्षसमीपप्रमाणोदका हृदा इव । अल्पोदका इत्यर्थः । अनेनाल्पप्रज्ञानाह । तथा vत्वे एके vस्नात्वाः । स्नातेः कृत्यार्थे क्त्वन्प्रत्ययः (पा. सू. ३.४.१४) । स च ' अर्हे कृत्यतृचश्च ' (पा. सू. ३.३.१६९) इत्यर्हार्थे च भवति । स्नानार्हा अल्पोदकाः vहृदाइव vददृश्रे दृश्यन्ते । अनेन महाप्रज्ञानाह । उः पूरणः । ' अक्षिमन्तः कर्णवन्तः सखायोऽक्षि चष्टेः ' (निरु. १. ९) इत्यादिकं निरुक्तमत्र द्रष्टव्यम् ॥

हृदा तष्टेषु मनसो जवेषु यद्ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं वि जहुर्वेद्याभिरोहब्रह्माणो वि चरन्त्यु त्वे ॥ ८ ॥

हृदा । तष्टेषु । मनसः । जवेषु । यत् । ब्राह्मणाः । सम्ऽयजन्ते । सखायः ।
अत्र । अह । त्वम् । वि । जहुः । वेद्याभिः । ओहऽब्रह्माणः । वि । चरन्ति । ऊँ इति । त्वे ॥८॥

---

१. ग—अन्येभ्यो द्वारेभ्यो ।

vसखायः समानख्यानाः vब्राह्मणाः vहृदा बुद्धिमतां हृदयेन vतष्टेषु निश्चितेषु परिकल्पितेषु vमनसो vजवेषु गन्तव्येषु वेदार्थेषु गुणदोषनिरूपणाः vयत्[1] यदा[1] vसंयजन्ते संगच्छन्ते। यजिरत्र संगतिकरणवाची[2]। vअत्र अस्मिन् ब्राह्मणसंघे vस्वम् अविज्ञातार्थमेकं पुरुषं vविद्याभिः वेदितव्याभिः विद्याभिः प्रवृत्तिभिर्वा vवि vजहुः विशेषेण परिग्रथ्नन्ति। vअह इति विनिग्रहे। vओहब्राह्मणः। ऊह्यमानं ब्रह्म विद्याश्रुतिमतिबुद्धिलक्षणं येषां ते तथोक्ताः। तादृशास्त एके विद्वांसः vवि vचरन्ति यथाकामं वेदार्थेषु विनिश्चयार्थं प्रवर्तन्ते। उः प्रसिद्धौ। 'हृदा तष्टेषु मनसां प्रजवेषु' (निरु. ११. १३) इत्यादिकं निरुक्तं द्रष्टव्यम्॥

इमे ये नार्वाङ् परश्चरन्ति न ब्राह्मणासो न सुतेकरासः।
त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञयः॥ ९॥

इमे। ये। न। अर्वाक्। न। परः। चरन्ति। न। ब्राह्मणासः। न। सुतेऽकरासः। ते। एते। वाचम्। अभिऽपद्य। पापया। सिरीः। तन्त्रम्। तन्वते। अप्रऽजज्ञयः॥९॥

अनया वेदार्थानभिज्ञा निन्द्यन्ते। vइमे vये अविद्वांसः vअर्वाक् अर्वाचीनमधोभाविन्यस्मिँल्लोके ब्राह्मणैः सह vन vचरन्ति ये vपरः परस्तात् देवैः सह vन चरन्ति ते vब्राह्मणासः ब्राह्मणाः वेदार्थतत्पराः vन भवन्ति। तथा vसुतेकरासः। सोमं सुतमभिषुतं कुर्वन्तीति सुतेकरा ऋत्विजः। तेऽपि vन भवन्ति। vअप्रजज्ञयः। जानातेः[3] 'आदृगमहनः०' इति किप्रत्ययः। अविद्वांसः vत vएते मनुष्याः vवाचं लौकिकीम् vअभिपद्य प्राप्य तया vपापया पापकारिण्या वाचा युक्तास्ते vसिरीः। 'छन्दसीवनिपौ' इतीप्रत्ययः। 'सुपां सुलुक्०' इति जसः सुः। सीरिणो भूत्वा vतन्त्रं कुत्सितलक्षणं vतन्वते विस्तारयन्ति। कुर्वन्तीत्यर्थः। सर्वथा वेदार्थो ज्ञेय इत्यभिप्रायः॥

सोमप्रवहणे[4] 'सर्वे नन्दन्ति' इत्येषा। सूत्रितं च—'सोम यास्ते मयोभुव इति तिस्रः सर्वे नन्दन्ति यशसागतेन' (आश्व. श्रौ. ४. ४) इति॥

सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः।
किल्बिषस्पृत्पितुषणिर्हि षामरं हितो भवति वाजिनाय॥ १०॥

सर्वे। नन्दन्ति। यशसा। आऽगतेन। सभाऽसहेन। सख्या। सखायः।
किल्बिषऽस्पृत्। पितुऽसनिः। हि। एषाम्। अरम्। हितः। भवति। वाजिनाय॥१०॥

vसखायः समानख्यानाः समानज्ञानाः vसर्वे सभ्या मनुष्याः vसभासहेन[5] सभां सोढुं शक्नुवता vसख्या ऋत्विजां सखिभूतेन यज्ञं प्रति vआगतेन vयशसा यशस्विना सोमेन हेतुना vनन्दन्ति हृष्टा भवन्ति। य vहि स एव सोमः vएषां जनानां vकिल्बिषस्पृत्। यः स्वस्माद्न्यः पुरुषः श्रेष्ठतामश्नुते[6] स किल्बिषं भवति बाध्यत्वेन। यथा पापं सदाचारैः बाधितव्यं[7] भवति तद्वत्। पापरूपस्य शत्रोर्बाधकः। यद्वा। यज्ञे साध्वनुप्रवचनाकरणेन यत्किल्बिषमेषां जायते तथो[8] बाधते स किल्बिषस्पृत्। तथा त्वं vपितुषणिः। पितुरिस्थन्नाम दक्षिणा वा। तमन्नेन सोमेन

---

१. त-भ-मु-यथा। २. ग-भ-मु-संगतकरणवाची। ३. ग४-त१.२.४.६.८-ज्ञातेः। ४. ग४-त१. २.३.६.७.८-भ-मु-सोमप्रवणे; त४-सोमप्रवाहणे; त५-सोमप्रवाहा। ५. ग४-त-भ२.६.८-मु-सभासाहेन। ६. ग४-यः श्रेष्ठत्वमश्नुते; त-भ-यः श्रेष्ठतामश्नुते। ७. ग-बाधितं। ८. ग-त-भ-तं यो।

सनोति यजमानः संभजत इति तादृशः । तेषामन्नदक्षिणादातेत्यर्थः । किंच vहितः पात्रेषु निहितः सोमः vवाजिनाय । इन्द्रियं वीर्यं वाजिनम् । तेषां वीर्याय तत्कर्तुम् vअरम् अलं पर्याप्तः समर्थो vभवति । 'सर्वे नन्दन्ति यशसागतेनेत्यन्वाह यशो वै सोमो राजा' इत्यादिकम् 'इन्द्रियं वै वीर्यं वाजिनमाजरसं हास्मै वाजिनं नापच्छिद्यते' इत्यन्तं ब्राह्मणमनुसंधेयम् (ऐ. ब्रा. १. १३) ॥

ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥ ११ ॥

ऋचाम् । त्वः । पोषम् । आस्ते । पुपुष्वान् । गायत्रम् । त्वः । गायति । शक्वरीषु ।
ब्रह्मा । त्वः । वदति । जातऽविद्याम् । यज्ञस्य । मात्राम् । वि । मिमीते । ऊँ इति । त्वः ॥ ११ ॥

अनया होत्राद्यृत्विक्कर्मणां विनियोगमाचष्टे । vत्वः एको होता vऋचां vपोषं यथाविधि कर्मणि प्रयोगं vपुपुष्वान् । एको धातुरनुवादार्थः । बह्वीर्ऋचः पुष्यन् शंसन् vआस्ते । vत्वः एक उद्गाता vशक्वरीषु । शक्वर्य ऋचः । आभिर्ऋग्भिर्बृहन्तुमिच्छन्दः समर्थोऽभूदिति शक्वर्यः[1] । तासु vगायत्रं साम vगायति । vत्वः एकः vब्रह्मा च vजातविद्यां जाते जाते कर्तव्ये प्रायश्चित्तादौ वेदविन्नीं वाचं vवदति । ब्रह्मा हि सर्वं वेदितुं योग्यो भवति खलु । 'चादिलोपे विभाषा' इति न निघातः । vत्वः एकोऽध्वर्युश्च vयज्ञस्य vमात्रां यज्ञो यया मीयतेऽभिषवग्रहणादिकया क्रियया तां मात्रां यज्ञशरीरं vवि vमिमीते अत्यर्थं निर्मिमीते । 'ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनी' (निरु. १. ८) इत्यादिनिरुक्तानुसारेणार्थोऽभ्यधायि । एवं बृहस्पतिर्विदितवेदार्थ[2] स्तुष्टाव ॥ ॥ २४ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरसायणाचार्य-विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके द्वितीयोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्राज्ञः श्रीसायणाचार्यो व्याख्याय चरमेऽष्टके ।
स्फुटं द्वितीयमध्यायं तृतीयं वक्तुमुद्यतः ॥

तत्र 'देवानाम्' इति नवर्चमनुवाकापेक्षया चतुर्थं सूक्तमानुष्टुभं देवदेवत्यम् । लोकनाथः पुत्रो बृहस्पतिराङ्गिरस एव वा बृहस्पतिर्ऋषिः । अथवा दक्षस्य दुहितादितिर्ऋषिः । तथा चानुक्रान्तं—'देवानां नव लौक्यो वा बृहस्पतिर्दाक्षायण्यदितिर्वा दैवमानुष्टुभम्' इति । गतः सूक्तविनियोगः ॥

देवानां नु वयं जाना प्र वोचाम विपन्यया ।
उक्थेषु शस्यमानेषु यः पश्यादुत्तरे युगे ॥ १ ॥

---

१. ग४-त-मु-शाक्वर्य ऋचः । २. ग-त-मु-°वेदार्थज्ञानं ।

देवानाम् । नु । वयम् । जाना । प्र । वोचाम । विपन्यया ।
उक्थेषु । शस्यमानेषु । यः । पश्यात् । उत्ऽतरे । युगे ॥ १ ॥

अदितिर्दाक्षायण्यनेन सूक्तेन स्वयं यथादित्यानजनयत्तद्ब्रवीति । बृहस्पत्यृषिपक्षे स ऋषिरदितेः सकाशादादित्योत्पत्तिप्रकारमाह । vवयं vदेवानाम् आदित्यानां vजाना जन्मानि vप्र vवोचाम प्रकथयाम । vविपन्यया विस्पष्टया वाचा । वयमिति वोचामेति चोभयत्र पूजार्थं बहुवचनम् । अथैकवदाह । vयः देवानां गणः पूर्वे युग उत्पन्नोऽपि vउक्थेषु vशस्यमानेषु यागे शस्त्रेष्वनुष्ठीयमानेषु vउत्तरे vयुगे वर्तमानं स्तुवन्तं स्तोतारं vपश्यात् पश्यति । अनेकेष्वपि युगेषु गतेषु कर्मसु स्तूयमानो[1] वर्तत इत्यर्थः ॥

ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् । देवानां पूर्व्ये युगेऽसतः सदजायत ॥ २ ॥
ब्रह्मणः । पतिः । एता । सम् । कर्मारःऽइव । अधमत् ।
देवानाम् । पूर्व्ये । युगे । असतः । सत् । अजायत ॥ २ ॥

vब्रह्मणः अन्नस्य vपतिः अदितिः vएता एतानि देवानां जन्मानि vकर्मारइव स यथा भस्त्रयाग्निमुपधमति प्रज्वलनार्थमेवं vसम्[2] vअधमत्[2] उदपादयदित्यर्थः । vदेवानां vपूर्व्ये vयुगे । आदिसृष्टावित्यर्थः । तेषामुपादानकारणात्[3] vअसतः नामरूपवर्जितत्वेनासत्समानाद्ब्रह्मणः सकाशात् vसत् नामरूपविशिष्टं देवादिकम् vअजायत प्रादुरभूत् । ' असद्वा इदमग्र आसीत्ततो वै सदजायत ' (तै. उ. २. ७) इति हि श्रुतिः । न सदात्मकस्य प्रपञ्चस्यासत्कारणत्वं युक्तमिति वाच्यं, छन्दोगैः ' कथमसतः सज्जायेत ' इति असत्कारणत्वमाक्षिप्य ' सत्त्वेव सोम्येदमग्र आसीत् ' (छा. उ. ६. २. २) इत्यवधारितत्वात् । तर्ह्यसत्कारणप्रतिपादकवाक्यानां का गतिरिति चेत् तेषामव्याकृतत्वाभिप्रायत्वात् ' तद्धेदं तर्ह्यव्याकृतमासीत् ' (श. ब्रा. १४. ४. २. १५) इति श्रुतेः । यद्येवं तर्ह्यदितेः सकाशात्कथं देवाद्युत्पत्तिः । ' वायोरग्निः ' (तै. आ.८.१) इत्यादिवत् अधिष्ठानसकाशादुत्पत्तेः । यद्वा देवानां कारणभूतं सत् असतो ब्रह्मणः सकाशादुत्पन्नमिति योजनादुक्तन्यायोऽस्मिन्पक्षेऽपि समान एव ॥

देवानां युगे प्रथमेऽसतः सदजायत ।
तदाशा अन्वजायन्त तदुत्तानपदस्परि ॥ ३ ॥
देवानाम् । युगे । प्रथमे । असतः । सत् । अजायत ।
तत् । आशाः । अनु । अजायन्त । तत् । उत्तानऽपदः । परि ॥ ३ ॥

पूर्वार्धमुक्तम् । vतत् vअनु vआशाः दिशः vअजायन्त vतत् vपरि तदभित्यर्थः । vउत्तानपदः । उत्तानमूर्ध्वतानं पद्यन्त इत्युत्तानपदो वृक्षाः । ते अजायन्त प्रादुरभवन् ॥

भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त ।
अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ॥ ४ ॥
भूः । जज्ञे । उत्तानऽपदः । भुवः । आशाः । अजायन्त ।
अदितेः । दक्षः । अजायत । दक्षात् । ऊँ इति । अदितिः । परि ॥ ४ ॥

---

१. त-म२.१.७.८-यजमानो; म४·५-सुयजमानो । २. त-म-संधमत् । ३. त४.५.६-म५.७-एषामु° ।

vभूः[1] vउत्तानपदः[1] वृक्षात् vजज्ञे । तथा vभुवः सकाशात् vआशाः vअजायन्त । तथा vअदितेः vदक्षः vअजायत उत्पन्नः । vदक्षादु दक्षादपि vअदितिः vपरि अजायत । न स्वोत्पन्नं कार्यं स्वस्यैव कारणमपि भवतीति विप्रतिषिद्धमिति वाच्यम् । यास्काचार्यं इदमेव[2] वाक्यमुदाहृत्य विरोधमाशङ्क्य पर्यहरत् । तथा हि—' अदितेर्दक्षो अजायत दक्षाद्वदितिः परीति च । तत्कथमुपपद्येत समानजन्मानौ[3] स्यातामित्यपि वा देवधर्मेणेतरेतरजन्मानौ स्यातामितरेतरप्रकृती[4] ' (निरु. ११. २३) इति ॥

अदितिदेवताके पशौ ' अदितिर्ह्यजनिष्ट ' इत्येषा हविषोऽनुवाक्या । सूत्रितं च— ' अदितिर्ह्यजनिष्ट सुत्रामाणं पृथिवीं द्यामनेहसम् ' (आश्व. श्रौ. ३. ८) इति ॥

अदितिर्ह्यजनिष्ट दक्ष या दुहिता तव ।
तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ॥ ५ ॥

अदितिः । हि । अजनिष्ट । दक्ष । या । दुहिता । तव ।
ताम् । देवाः । अनु । अजायन्त । भद्राः । अमृतऽबन्धवः ॥ ५ ॥

हे vदक्ष vतव[4] vया[4] vदुहिता अभूत् सा vअदितिः vअजनिष्ट vहि पुत्रानादित्यान् । तदेवाह । vतां vदेवा vअन्वजायन्त vभद्राः स्तुत्या भजनीयाः vअमृतबन्धवः अमरणबन्धनाः ॥ ॥ १ ॥

यद्देवा अदः सलिले सुसंरब्धा अतिष्ठत ।
अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत ॥ ६ ॥

यत् । देवाः । अदः । सलिले । सुऽसंरब्धाः । अतिष्ठत ।
अत्र । वः । नृत्यताम्ऽइव । तीव्रः । रेणुः । अप । आयत ॥ ६ ॥

अनयोत्तरेण चादित्याः स्तूयन्ते । vयत् यदा हे vदेवाः vअदः अमुष्मिन् vसलिले यूयं vसुसंरब्धाः सुष्ठु लब्धात्मानः vअतिष्ठत स्थितवन्तः । ' आपो वा इदं सर्वम् ' (तै. आ. १०. २२) ' अप एव ससर्जादौ ' (मनु.१. ८) इति श्रुतिस्मृती । vअत्र अस्मिन् सलिले vनृत्यताम्इव vवः युष्माकं संबन्धी vतीव्रः दुःसहः vरेणुः अंशभूत एकः vअपायत अपागच्छत् । दिवं प्रति गत इति सूर्याभिप्रायम् । ' परा मार्ताण्डमास्यत् ' इति वक्ष्यति ॥

यद्देवा यतयो यथा भुवनान्यपिन्वत ।
अत्रा समुद्र आ गूळ्हमा सूर्यमजभर्तन ॥ ७ ॥

यत् । देवाः । यतयः । यथा । भुवनानि । अपिन्वत ।
अत्र । समुद्रे । आ । गूळ्हम् । आ । सूर्यम् । अजभर्तन ॥ ७ ॥

१. त-भ-भूरिति उत्तानपदो । २. ग१—मामेव; ग२-त१.२.३.६.७.८-भ—अमुमेव । ३. ग-त-भ२. ४.६.८—समानधर्माणौ । ४. ग-त-सु—या तव ।

• vयत् यदा हे vदेवाः vयतयो vयथा। इष्टया नियमवन्तीति वा वर्षणेन[1] यातयन्तीति वा यतयो मेघाः। ते यथोदकैः vभुवनानि[2] लोकं पूरयन्ति तद्वत्स्वतेजोभिः vअपिन्वत पूरितवन्तः। vअत्र vसमुद्रे अप्सु vआ vगूळहं vनिगूळहं vसूर्यं प्रातरुदयाय vआ vअजभर्तन आहृतवन्तः॥

अष्टौ पुत्रासो अदितेर्ये जातास्तन्व१स्परि।
देवाँ उप प्रैत्सप्तभिः परा मार्ताण्डमास्यत्॥ ८॥

अष्टौ। पुत्रासः। अदितेः। ये। जाताः। तन्वः। परि।
देवान्। उप। प्र। ऐत्। सप्तऽभिः। परा। मार्ताण्डम्। आस्यत्॥ ८॥

vअष्टौ vपुत्रासः पुत्रा मित्रादयः vअदितेः भवन्ति vये अदितेः vतन्वस्परि शरीरात् vजाताः उत्पन्नाः। अदितेरष्टौ पुत्रा अध्वर्युब्राह्मणे परिगणिताः। तथा हि—'ताननुक्रमिष्यामो मित्रश्च वरुणश्च धाता चार्यमा चांशश्च भगश्च विवस्वानादित्यश्च' (तै. आ. १. १३. ३) इति। तथा तत्रैव प्रदेशान्तरेऽदितिं प्रस्तुत्याम्नातं—'तस्या उच्छेषणमददुस्तत्प्राश्नात्[3] सा रेतोऽधत्त तस्यै चत्वार आदित्या अजायन्त सा द्वितीयमपच्यत्' इत्यादिनाष्टानामादित्यानामुत्पत्तिर्वर्णिता (तै. सं. ६. ५. ६. १)। सादितिः vसप्तभिः पुत्रैः vदेवानुप vप्रैत् उपागच्छत्। अष्टमं पुत्रं vमार्ताण्डं सूर्यं vपरा vआस्यत् उपरि प्राक्षिपदित्यर्थः॥

सप्तभिः पुत्रैरदितिरुप प्रैत्पूर्व्यं युगम्।
प्रजायै मृत्यवे त्वत्पुनर्मार्ताण्डमाभरत्॥ ९॥

सप्तऽभिः। पुत्रैः। अदितिः। उप। प्र। ऐत्। पूर्व्यम्। युगम्।
प्रऽजायै। मृत्यवे। त्वत्। पुनः। मार्ताण्डम्। आ। अभरत्॥ ९॥

पूर्वमन्त्रोक्त एवार्थः पुनरत्रोच्यते। vसप्तभिः मार्ताण्डव्यतिरिक्तैर्मित्रादिभिः vअदितिः vपूर्व्यं पुराणं vयुगम् vउप vप्रैत् उपगता। अथ vप्रजायै प्राणिनामुत्पत्तये vमृत्यवे तेषां मरणाय vमार्ताण्डं[4] मृताण्ड्यादण्डाजातं मार्ताण्डनामानं सूर्यं[5] vपुनः vआभरत् आहरत्। द्युलोकेऽधारयत्। प्राणिमरणजननादीनां सूर्योदयास्तमयाधीनता स्फुटा। 'तस्यै मृद्भाण्डमजायत' (तै. सं. १. ५. १. १) इत्यादि ब्राह्मणम्॥ ॥ २॥

'अनिष्टाः' इत्येकादशर्चं पञ्चमं सूक्तं शक्तिपुत्रस्य गौरिवीतेरार्षं मारुतं त्रैष्टुभम्। तथा चानुक्रान्तं—'अनिष्टा एकादश गौरिवीतिः' इति। अग्निष्टोमे मरुत्वतीयशस्त्रे इदं सूक्तं निविद्धानम्। सूत्रितं च—'अनिष्टा उग्र इत्येकभूयसीः शस्त्वा मरुत्वतीयां निविदं दध्यात्' (आश्व. श्रौ. ५. १४) इति। सौमिकचातुर्मास्येषु वैश्वदेवेऽप्येतन्मरुत्वतीयं निविद्धानम्। सूत्रितं च—'अनिष्टा उग्र उग्रो जज्ञ इति माध्यंदिनः' (आश्व. श्रौ. ९. २) इति। महाव्रतेऽपि निष्केवल्य एतत्सूक्तम्। तथैव पञ्चमारण्यके सूत्रितं—'अनिष्टा उग्रः सहसे तुरायेति निविद्धानम्' (ऐ. आ. ५. १. १) इति॥

---

१. ग—अवर्षेण; त-म-मु—अवर्षणेन। २. ग-त-भ—'भुवनानि' नास्ति। ३. ग४-त१. २. १. ७-म२. ४. ६—°मददुस्तान् प्राश्नात्। ४. त-म४. ७—मार्तंडं। ५. ग१—वा सूर्यं; त३-म२. ८—मा सूर्यं; ग४-त७—आ सूर्यं।

जनिष्ठा उग्रः सहसे तुराय मन्द्र ओजिष्ठो बहुलाभिमानः ।
अवर्धन्निन्द्रं मरुतश्चिदत्र माता यद्वीरं दधनद्धनिष्ठा ॥ १ ॥

जनिष्ठाः । उग्रः । सहसे । तुराय । मन्द्रः । ओजिष्ठः । बहुलऽअभिमानः ।
अवर्धन् । इन्द्रम् । मरुतः । चित् । अत्र । माता । यत् । वीरम् । दधनत् । धनिष्ठा ॥ १ ॥

हे इन्द्र [v]सहसे बलाय [v]तुराय शत्रूणां हिंसनाय त्वम् [v]उग्रः उद्गूर्णबलः [v]जनिष्ठाः अजायथाः । कीदृशस्त्वम् । [v]मन्द्रः स्तुत्यः [v]ओजिष्ठः । ओजः शरीरबलम्[1] । अतिशयेन तद्वान् । [v]बहुलाभिमानः भूयिष्ठाभिमानी [v]इंदृशं महानुभावम् [v]इन्द्रम् [v]अत्र वृत्रवधे [v]मरुतश्चित् मरुतोऽपि [v]अवर्धन् स्तुत्या साहाय्येन वा वर्धितवन्तः । [v]यत् यदा [v]धनिष्ठा धारयित्रीन्द्रमाता[2] [v]वीरं [v]दधनत् अधारयत् ॥

द्रुहो निषत्ता पृशनी चिदेवैः पुरू शंसेन वावृधुष्ट इन्द्रम् ।
अभीवृतेव ता महापदेन ध्वान्तात्प्रपित्वादुदरन्त गर्भाः ॥ २ ॥

द्रुहः । निऽसत्ता । पृशनी । चित् । एवैः । पुरु । शंसेन । ववृधुः । ते । इन्द्रम् ।
अभिवृताऽइव । ता । महाऽपदेन । ध्वान्तात् । प्रऽपित्वात् । उत् । अरन्त । गर्भाः ॥ २ ॥

[v]द्रुहः द्रोग्धुरिन्द्रस्य [v]पृशनी [v]चित् सेनापि [v]निषत्ता तत्संनिधौ निषण्णाभूत् । [v]एवैः गन्तृभिर्मरुद्भिः सहितमिन्द्रं निषण्णेति संबन्धः । [v]ते अपि मरुतः [v]पुरु प्रभूतेन [v]शंसेन स्तोत्रेण [v]इन्द्रं [v]ववृधुः अवर्धयन् वृत्रं जिघांसन्तम् । अथ [v]महापदेन महता व्रजेन [v]अभीवृतेव परिवृतानीव गवादीनि तानि यथावरणापगमे निर्गच्छन्ति तद्वत् तान्युदकानि[3] [v]ध्वान्तात् अन्धकाररूपात् [v]प्रपित्वात् आसन्नात्प्राप्ताद्वृत्रात् [v]गर्भाः गर्भभूतान्युदकानि [v]उदरन्त उदगच्छन् ॥

ऋष्वा ते पादा प्र यजिगास्यवर्धन्वाजा उत ये चिदत्र ।
त्वमिन्द्र सालावृकान्त्सहस्रमासन्दधिषे अश्विना ववृत्याः ॥ ३ ॥

ऋष्वा । ते । पादा । प्र । यत् । जिगासि । अवर्धन् । वाजाः । उत । ये । चित् । अत्र ।
त्वम् । इन्द्र । सालावृकान् । सहस्रम् । आसन् । दधिषे । अश्विना । आ । ववृत्याः ॥ ३ ॥

हे इन्द्र [v]ते [v]पादा पादौ [v]ऋष्वा महान्तौ । तादृशस्त्वं [v]यत् यदा [v]जिगासि गच्छसि तदानीं [v]वाजाः ऋभवः [v]अवर्धन् अवर्धयन् । [v]उत अपि च [v]ये [v]चित् ये केचन देवाः सन्ति तेऽप्यवर्धयन् । हे [v]इन्द्र [v]त्वं [v]सहस्रं [v]सालावृकान् [v]आसन् आस्ये [v]दधिषे धारयसि । तदानीम् [v]अश्विना अश्विनावपि [v]आ [v]ववृत्याः आवर्तयेः[4] ॥

सुमना तूर्णिरुप यासि यज्ञमा नासत्या सुरुचा रथेन ।
वसाव्यामिन्द्र धारयः सहस्राश्विना शूर ददतुर्मघानि ॥ ४ ॥

---

१. ग-त२.३-भ२-मु-शारीर° । २. ग४-°माता तं । ३. ग४-ता तान्युदकानि । ४. ग-आवर्तय; त४.५-अवर्तयः ।

सुमना । तूर्णिः । उप । यासि । यज्ञम् । आ । नासत्या । सख्याय । वक्षि ।
वसाव्याम् । इन्द्र । धारयः । सहस्रा । अश्विना । शूर । ददतुः । मघानि ॥ ४ ॥

हे इन्द्र [v]समना संग्रामे [v]तूर्णिः त्वरमाणोऽपि [v]यज्ञम् [v]उप [v]यासि उपगच्छसि । तदानीं [v]नासत्या अश्विनौ [v]सख्याय [v]वक्षि वहसि । हे [v]इन्द्र [v]वसाव्यां वसुसमूहं [v]सहस्रा सहस्रां[1] बहुसंख्यां [v]धारयः धारयस्यस्माकमर्थाय । हे [v]शूर [v]अश्विना अश्विनावपि तवानुचरौ [v]मघानि धनानि [v]ददतुः अस्मभ्यं प्रयच्छतः ॥

मन्दमान ऋतादधि प्रजाये सखिभिरिन्द्र इषिरेभिरर्थम् ।
आभिर्हि माया उप दस्युमागान्मिहः प्र तम्रा अवपत्तमांसि ॥ ५ ॥

मन्दमानः । ऋतात् । अधि । प्रऽजायै । सखिऽभिः । इन्द्रः । इषिरेभिः । अर्थम् ।
आ । आभिः । हि । मायाः । उप । दस्युम् । आ । अगात् ।
मिहः । प्र । तम्राः । अवपत् । तमांसि ॥ ५ ॥

[v]इन्द्रः[2] [v]ऋतात् यज्ञात् [v]अधि [v]इषिरेभिः गमनशीलैः [v]सखिभिः मरुद्भिः सह [v]मन्दमानः माद्यन् [v]प्रजायै यजमानाय [v]अर्थं धनं प्रयच्छति । स चेन्द्रः [v]आभिः प्रजाभिर्निमित्तभूताभिः [v]मायाः दस्युसंबन्धिनीर्विनाशयितुं [v]दस्युम् [v]उप [v]आगात् । स दस्युः [v]तम्राः अवर्षणेन शोषयित्रीः [v]मिहः वृष्टीः [v]प्र [v]अवपत् व्यनाशयदित्यर्थः । [v]तमांसि - - - ॥ ॥ ३ ॥

सनामाना चिद् ध्वसयो न्यस्मा अवाहन्निन्द्र उषसो यथानः ।
ऋष्वैरगच्छः सखिभिर्निकामैः साकं प्रतिष्ठा हृद्या जघन्थ ॥ ६ ॥

सऽनामाना । चित् । ध्वसयः । नि । अस्मै । अव । अहन् । इन्द्रः । उषसः । यथा । अनः ।
ऋष्वैः । अगच्छः । सखिऽभिः । निऽकामैः । साकम् । प्रतिऽस्था । हृद्या । जघन्थ ॥ ६ ॥

अयमिन्द्रो वृत्रं हन्तुं [v]संनामाना [v]चित् समाननामानौ [v]नि [v]ध्वसयः न्यगमयत् । अथ [v]इन्द्रः तं [v]वृत्रम् [v]अवाहन् अवहतवान् । [v]यथा [v]उषसः [v]अनः शकटमवनाशितवान् तद्वत् । अथ प्रत्यक्षेणोच्यते । हे इन्द्र त्वम् [v]ऋष्वैः दीप्तैः महद्भिर्वा [v]निकामैः नितरां वृत्रवधं कामयमानैः [v]सखिभिः मरुद्भिः [v]साकं वृत्रं हन्तुम् [v]अगच्छः । आगत्य च [v]प्रतिष्ठा प्रतिष्ठानानि शरीराणि [v]हृद्या हृद्यानि रमणीयानि [v]जघन्थ हतवानसि । हन्तेस्थलि ' उपदेशेऽत्वतः ' इतीट्प्रतिषेधः ॥

त्वं जघन्थ नमुचिं मखस्युं दासं कृण्वान ऋषये विमायम् ।
त्वं चकर्थ मनवे स्योनान्पथो देवत्राञ्जसेव यानान् ॥ ७ ॥

त्वम् । जघन्थ । नमुचिम् । मखस्युम् । दासम् । कृण्वानः । ऋषये । विऽमायम् ।
त्वम् । चकर्थ । मनवे । स्योनान् । पथः । देवऽत्रा । अञ्जसाऽइव । यानान् ॥ ७ ॥

हे इन्द्र [v]त्वं [v]नमुचिम् एतत्संज्ञकमसुरं [v]जघन्थ हतवानसि । कीदृशम् । [v]मखस्युम् ऋषेर्यज्ञं विघातुमिच्छन्तं[3] यद्वा स्वदीयं धनमिच्छन्तम् । किं कुर्वन् । [v]दासम् उपक्षपयितारं नमुचिमसुरम्

१. त-भ-सहस्रं । २. ग-त-भ-हे इंद्र । ३. ग-भ-त१.२.३.६.७.८-म१.४-विघातुमिच्छंतं; त४.५-विघातुमिच्छंतं ।

[v]ऋचये मनवे [v]विमायं विगतमायं [v]कृण्वानः कुर्वन्। [v]किंच त्वं [v]देवत्रा देवेषु मध्ये [v]मनवे ऋचये सामान्येन मनुष्याय वा [v]पथः मार्गान् [v]स्योनान् [v]चकर्थ कृतवानसि। अथवा [v]देवत्रा देवेषु मध्ये गन्तव्यान् मार्गानिति वा संबन्धः। स्योनांश्चकर्थेत्युक्तमेव विवृणोति। [v]अञ्जसेव [v]यानान् इति। इवेत्येवकारार्थे। अञ्जसैवाकुटिलेनैव यानान् गन्तॄन् मार्गानकरोः अथवा मार्गेणाकुटिलेनैव गन्तॄंश्चकर्थ। यथा लोकेऽध्वानं गतो मार्गः काञ्चीं गतो मार्ग इति मार्गस्य गन्तृत्वोपचारः तद्वदत्रापि यातृत्वं द्रष्टव्यम्॥

त्वमेतानि पप्रिषे वि नामेशान इन्द्र दधिषे गभस्तौ।
अनु त्वा देवाः शवसा मदन्त्युपरिबुध्नान्वनिनश्चकर्थ ॥ ८ ॥

त्वम्। एतानि। पप्रिषे। वि। नाम। ईशानः। इन्द्र। दधिषे। गभस्तौ।
अनु। त्वा। देवाः। शवसा। मदन्ति। उपरिऽबुध्नान्। वनिनः। चकर्थ ॥ ८ ॥

हे इन्द्र [v]त्वमेतानि [v]नाम नामानि नामकान्युदकानि [v]वि [v]पप्रिषे विपूरयसि। हे [v]इन्द्र [v]ईशानः सर्वस्येश्वरस्त्वं [v]गभस्तौ हस्ते [v]दधिषे धारयसि वज्रं धनं वा। किंच [v]त्वा त्वां [v]शवसा बलेनोपेतं [v]देवाः सर्वे [v]अनु [v]मदन्ति अनुष्टुवन्ति। स त्वं [v]वनिनः उदकवतो मेघान् रश्मीन्वा [v]उपरिबुध्नान् उपरिमूलान् अधोमुखान् [v]चकर्थ कृतवानसि ॥

चक्रं यदस्याप्स्वा निषत्तमुतो तदस्मै मध्वच्छद्यात्।
पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु ॥ ९ ॥

चक्रम्। यत्। अस्य। अप्ऽसु। आ। निऽसत्तम्। उतो इति। तत्। अस्मै। मधु। इत्।
चच्छद्यात्। पृथिव्याम्। अतिऽसितम्। यत्। ऊधः। पयः। गोषु। अदधाः। ओषधीषु ॥९॥*

अश्वादियायेति यद्वदन्त्योजसो जातमुत मन्य एनम्।
मन्योरियाय हर्म्येषु तस्थौ यतः प्रजज्ञ इन्द्रो अस्य वेद ॥ १० ॥

---

* ग१.२–अस्येंद्रस्य चक्रमायुधं यदप्सु अंतरिक्षे निषण्णं उतो अपि च तदायुधमस्मा इंद्राय मधु चच्छद्यात् वशं नयति। यत् पृथिव्यामातिषितं निमित्तं ऊधः ऊधसो मेघात् तदुदकं पयः गोष्वोषधीषु चादधाः स्थापितवानसि; ग४– – – – – पृथिव्यामतिषितं विमुक्तं यदूधः उदरमस्ति तत् त्वया गोष्वोषधीषु चादधा इति; त१.२-मु–परामासित्वे हननार्थं उतो चित् अपि वा अस्मा इंद्राय मध्वित् (मध्वित्-मु) उदकमपि चच्छद्यात् वरान् प्रति ('वरान्प्रति' नास्ति-मु) पृथिव्यामतिषितं विमुक्तं यदुधर्मस्ति (यदधर्मस्ति-मु) उदकमस्ति ननापो गोष्ठादिषु वादधा इति; त७–हे इंद्र अस्य सूर्यरूपस्य तव यत् चक्रं रश्मिवृंदं अप्सूदकेषु आ निषत्तं आ समंतात् निषण्णं भवति रात्रौ उतो अनंतरं तत् रश्मिवृंदं अस्मै तुभ्यं मधु जलं चच्छद्यात् समर्पयति किंच यच्चक्रं ऊधः रात्रिरूपं सत् पृथिव्यां अतिषितं अतिशयेन बद्धं भवति तेन चक्रेण गोषु ओषधीषु च पयः क्षीरं अंबु च अदधाः धृतवानसि। अयमर्थः कृष्णं नियानं (ऋ. सं. १. १६४. ४७) इति मंत्रे व्यक्तीकृतः। इदिति पूरणः॥ सामवेदसंहितासायणभाष्ये (१. ४.१.४.९) अस्य मन्त्रस्य भाष्यमुपलभ्यते तद्यथा–अस्येन्द्रस्य चक्रमायुधमप्स्वन्तरिक्ष आ सर्वतो निषत्तं निषण्णमासीन्मेघहननार्थमुतो तदपि चास्मा इन्द्राय मध्वुदकमपि चच्छद्यात् वशं नयति। पृथिव्यामतिषितं विमुक्तं यदूधरुदकमस्ति तत्पयो गोष्वोषधीषु चादधाः आदधाति॥

अश्वात्। इयाय। इति। यत्। वदन्ति। ओजसः। जातम्। उत। मन्ये। एनम्।
मन्योः। इयाय। हर्म्येषु। तस्थौ। यतः। प्रऽजज्ञे। इन्द्रः। अस्य। वेद ॥ १० ॥

इन्द्रसामर्थ्यं दृष्ट्वा केचिदेनम् vअश्वात् आदित्यात् vइयाय उदितवान् vइति vवदन्ति vयत्[1] यद्यपि vउत तथापि अहम् vएनं vओजसः बलात् vजातं vमन्ये जानामि। अस्य तेजस्वित्वं दृष्ट्वा सूर्यादुत्पन्न[2] इति तेषां मतिः। अहं त्वोजःपदार्थाजात इति मन्ये यतोऽयं वृत्रादीन् हतवानिति। अथवायं vमन्योः क्रोधात् vइयाय उदितवान्। अतः vहर्म्येषु शत्रुसंबन्धिषु युद्धेषु हर्म्येष्वेव वा vतस्थौ तिष्ठति। vयतः अयं vप्रजज्ञे उत्पन्न इति vइन्द्रः एव vअस्य। स्वस्येत्यर्थः। सामर्थ्यं vवेद जानाति न ह्यन्यो ज्ञातुमीष्टे ॥

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः।
अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥ ११ ॥

वयः। सुऽपर्णाः। उप। सेदुः। इन्द्रम्। प्रियऽमेधाः। ऋषयः। नाधमानाः।
अप। ध्वान्तम्। ऊर्णुहि। पूर्धि। चक्षुः। मुमुग्धि। अस्मान्। निधयाऽइव। बद्धान्॥ ११॥

vवयः गन्तारः vसुपर्णाः सुपतना आदित्यरश्मयः vइन्द्रम् vउप vसेदुः उपसन्ना अभवन्। कीदृशाः। vप्रियमेधाः प्रिययज्ञाः vऋषयः द्रष्टारः vनाधमानाः प्रज्ञां याचमानाः। याचनप्रकार उच्यते। हे इन्द्र vध्वान्तम् अन्धकारम् vअप vऊर्णुहि परिहर vपूर्धि पूरय च vचक्षुः तेजः। vमुमुग्धि मोचय च vअस्मान् vनिधयेव vबद्धान्। निधा पाइया भवति। पाइया पाशसमूहः। पाशसमूहेन बद्धान् यथा मुञ्चन्ति तद्वत्। अत्र 'वयो वेर्बहुवचनम्' (निरु. ४. ३) इत्यादि निरुक्तं द्रष्टव्यम् ॥ ॥ ४ ॥

'वसूनाम्' इति षड्वृचं षष्ठं सूक्तम्। ऋष्याद्याः पूर्ववत्। 'वसूनां षट्' इत्यनुक्रान्तम्। गतो विनियोगः ॥

वसूनां वा चर्कृषे इयक्षन्धिया वा यज्ञैर्वा रोदस्योः।
अवन्तो वा ये रयिमन्तः सातौ वनुं वा ये सुश्रुणं सुश्रुतो धुः ॥ १ ॥

वसूनाम्। वा। चर्कृषे। इयक्षन्। धिया। वा। यज्ञैः। वा। रोदस्योः।
अवन्तः। वा। ये। रयिऽमन्तः। सातौ।
वनुम्। वा। ये। सुऽश्रुणम्। सुऽश्रुतः। धुरिति धुः ॥ १ ॥

vइयक्षन् धनानि दातुमिच्छन्निन्द्रः vवसूनां धनानां लाभाय vवा vचर्कृषे अपकृष्यते। vधिया vवा। धीः कर्म धार्यमाणत्वात्। युद्धादिकर्मणा वा निमित्तेनाकृष्यते। vयज्ञैर्वा निमित्तभूतैः कृष्यते। कैरिति उच्यते। vरोदस्योः द्यावापृथिव्योः संबन्धिभिर्देवैः मनुष्यैश्चेत्यर्थः। vसातौ संग्रामे जेतव्ये सति vये vअवन्तो vवा गच्छन्तः vरयिमन्तः भवन्ति तैरप्याकृष्यते। vये vवनुं vवा हिंसां वा vसुश्रुणं सुप्रसिद्धामत्यन्तदुर्जयविषयां vसुश्रुतः सुश्रवसः प्रसिद्धाः कुर्वन्ति तैरपीन्द्र आकृष्यत इति ॥

---

१. त-भ१.६.७.८–'यत्' नास्ति। २. ग-त-भ–सूर्य उत्पन्न।

हवं एषामसुरो नक्षत द्यां श्रवस्यता मनसा निंसत क्षाम् ।
चक्षाणा यत्र सुवितायं देवा द्यौर्न वारेभिः कृणवन्त स्वैः ॥ २ ॥

हवः । एषाम् । असुरः । नक्षत । द्याम् । श्रवस्यता । मनसा । निंसत । क्षाम् ।
चक्षाणाः । यत्र । सुवितायं । देवाः । द्यौः । न । वारेभिः । कृणवन्त । स्वैः ॥ २ ॥

[v]एषाम् अनुष्ठातृणामङ्गिरसां [v]हवः आह्वानशब्दः [v]असुरः इन्द्रस्य प्रेरकः [v]द्यां दिवं [v]नक्षत व्याप्नोत् । तत्रत्या इन्द्रसंबन्धिनो देवाः [v]श्रवस्यता अन्नमिच्छता [v]मनसा [v]क्षां पृथिवीं [v]निंसत प्राप्तवन्तः । [v]यत्र यस्यां पृथिव्यां [v]चक्षाणाः पणिभिरपहृता गाः पश्यन्तः [v]देवाः [v]सुविताय सुष्ठु हिताय स्वात्मनोऽभ्युदयाय [v]द्यौर्न आदित्य इव [v]वारेभिः वरणीयैः [v]स्वैः तेजोभिः [v]कृणवन्त प्रकाशमकुर्वन् । गवां प्रदानायान्धकारमपनेतुमिति शेषः । अथवा । एषां यज्विनामपहृतानां गवां हवोऽसुर इन्द्रस्य प्रेरयिता सन्नक्षत । इन्द्रप्रेरिता अङ्गिरसः [v]श्रवस्यता अन्नं कीर्तिं वेच्छता मनसा क्षां भूमिं निंसत । अनुष्ठातॄणां गाः प्रदर्शयितुमित्यर्थः । इतरत्समानम् ॥

इयमेषाममृतानां गीः सर्वताता ये कृपणन्त रत्नम् ।
धियं च यज्ञं च साधन्तस्ते नो धान्तु वसव्य१मसामि ॥ ३ ॥

इयम् । एषाम् । अमृतानाम् । गीः । सर्वऽताता । ये । कृपणन्त । रत्नम् ।
धियम् । च । यज्ञम् । च । साधन्तः । ते । नः । धान्तु । वसव्यम् । असामि ॥ ३ ॥

[v]इयमेषाममृतानां यष्टव्यानां देवानां [v]गीः स्तुतिः क्रियत इति शेषः । [v]ये देवाः [v]सर्वताता सर्वतातौ यज्ञे [v]कृपणन्त प्रयच्छन्ति[1] याच्यन्ते वा [v]रत्नं रमणीयं धनम् । [v]धियं [v]च अस्मदीयां स्तुतिं च [v]यज्ञं [v]च [v]साधन्तः साधयन्तः [v]ते [v]नः अस्मभ्यं [v]वसव्यं वसुसमूहम् [v]असामि अनल्पमसाधारणं वा [v]धान्तु प्रयच्छन्तु ॥

आ तत्त इन्द्रायवः पनन्ताभि य ऊर्वं गोमन्तं तितृत्सान् ।
सकृत्स्वं१ ये पुरुपुत्रां महीं सहस्रधारां बृहतीं दुदुक्षन् ॥ ४ ॥

आ । तत् । ते । इन्द्र । आयवः । पनन्त । अभि । ये । ऊर्वम् । गोऽमन्तम् । तितृत्सान् ।
सकृत्ऽस्वम् । ये । पुरुऽपुत्राम् । महीम् । सहस्रऽधाराम् । बृहतीम् । दुदुक्षन् ॥ ४ ॥

हे [v]इन्द्र [v]ते तव [v]आयवः मनुष्या अङ्गिरसः [v]तत् तदा [v]पनन्त [v]आ सर्वतः पनन्त स्तूयन्ते । [v]ये[2] अङ्गिरसः [v]गोमन्तम् [v]ऊर्वं संघं पणिभिरपहृतं प्राप्तं [v]तितृत्सान् हिंसितुमैच्छन् । तृदेर्हिंसार्थस्य सनन्तस्य लेट्यागमः । यद्योगादनिघातः । अभ्यस्तस्वरः । [v]ये चाङ्गिरसः [v]सकृत्स्वम् । या सकृत्सूते सा सकृत्सूः । तां सकृत्प्रजातां [v]पुरुपुत्रां बह्वोषधिवनस्पतिरूपपुत्रां[3] [v]सहस्रधारां बहुलकामानामुत्पादयित्रीं [v]बृहतीं विस्तृतां [v]महीं भूमिम् । यद्वा । पुरुपुत्रां बह्वोषधिवनस्पतिरूपपुत्रां सहस्रधारां बहुकामवर्षित्रीं महीं महतीं पूज्यां वा बृहतीं परिमाणरहितां दिवं [v]दुदुक्षन् दुदुहुः । ते पनन्तेति संबन्धः । ' सकृद्ह द्यौरजायत ' (ऋ. सं. ६. ४८. २२) इत्याद्युक्तम् ॥

१. त१.२.३.७–प्रियंति; भ–प्रयंति । २. ग-त-भ-मु–' ये ' नास्ति । ३. ग-भ२–वृष्टिलक्षण-बहुपुत्रोपेतां ।

शचीव इन्द्रमवसे कृणुध्वमनानतं दमयन्तं पृतन्यून् ।
ऋभुक्षणं मघवानं सुवृक्तिं भर्ता यो वज्रं नर्यं पुरुक्षुः ॥ ५ ॥

शचीऽवः । इन्द्रम् । अवसे । कृणुध्वम् । अनानतम् । दमयन्तम् । पृतन्यून् ।
ऋभुक्षणम् । मघऽवानम् । सुऽवृक्तिम् । भर्ता । यः । वज्रम् । नर्यम् । पुरुऽक्षुः ॥ ५ ॥

हे [v]शचीवः कर्मवन्तो यजमानाः । व्यत्ययेनैकवचनम् । [v]इन्द्रं देवम् [v]अवसे रक्षणाय [v]कृणुध्वं कुरुध्वम् । कीदृशमिन्द्रम् । [v]अनानतं कदाचिदपि परेषामनवनतं [v]पृतन्यून् पृतना इच्छतः शत्रून् [v]दमयन्तं वशं प्रापयन्तं [v]ऋभुक्षणं महान्तं [v]मघवानं धनवन्तं [v]सुवृक्तिं सुष्टुतिम् । [v]यः [v]पुरुक्षुः बहुशब्द इन्द्रः [v]नर्यं नरेभ्यो हितम् । असुरविघातित्वात्[1] । तादृशं [v]वज्रं [v]भर्ता बिभर्ति तमिन्द्रमवसे कृणुध्वमिति ॥

निष्केवल्ये ' यद्वावान ' इत्येषा धाय्या । सूत्रितं च—' यद्वावानेति धाय्या पिबा सुतस्य रसिन इति सामप्रगाथः ' (आश्व. श्रौ. ५. १५) इति । महाव्रतेऽप्येषा । तथैव पञ्चमारण्यके सूत्रितं च—' यद्वावानेति धाय्या सूददोहाः ' (ऐ. आ. ५. २. २) इति ॥

यद्वावानं पुरुतमं पुराषाळा वृत्रहेन्द्रो नामान्यप्राः ।
अचेति प्रासहस्पतिस्तुविष्मान् यदीमुश्मसि कर्तवे करत्तत् ॥ ६ ॥

यत् । ववानं । पुरुऽतमम् । पुराषाट् । आ । वृत्रऽहा । इन्द्रः । नामानि । अप्राः ।
अचेति । प्रऽसहः । पतिः । तुविष्मान् । यत् । ईम् । उश्मसि । कर्तवे । करत् । तत् ॥ ६ ॥

[v]यत् यदा [v]पुरुतमम् अत्यन्तं प्रवृद्धतमं वृत्रं [v]ववान हन्ति [v]पुराषाट् शत्रुपुराणामभिभविता इन्द्रः तदानीम् [v]आ अनन्तरमेव [v]वृत्रहेन्द्रः [v]नामानि उदकानि [v]अप्राः[2] पूरयति । व्यत्ययेन मध्यमः । सोऽयमिन्द्रः [v]प्रासहः शत्रूणां प्रकर्षेणाभिभविता [v]पतिः सर्वस्य स्वामी [v]तुविष्मान् । तुवीति बहुनाम तत्सामर्थ्याद्धनं परिगृह्यते । बहुधन इत्यर्थः । ईदृशः सन् [v]अचेति सर्वैः प्रज्ञातः[3] । स महानिन्द्रः [v]यदीं यदेतत्कर्म [v]उश्मसि वयं कामयामहे [v]तत् [v]करत् करोत्येव । इदं भवत्विदं भवत्विति यत्कामयामहे तत्तदानीमेव करोत्येव नोदास्त इत्यर्थः । ' सैतदेव प्रत्यपद्यत यद्वावान पुरुतमं पुराषाट् ' (ऐ. ब्रा. ३. २२) इत्यादिकं ब्राह्मणमत्र द्रष्टव्यम् ॥ ॥ ५ ॥

' प्र सु वः ' इति नवर्चं सप्तमं सूक्तं प्रियमेधपुत्रस्य सिन्धुक्षित आर्षं जागतं नदीदेवताकम् । तथा चानुक्रान्तं—' प्र सु नव सिन्धुक्षित्प्रैयमेधो नदीस्तुतिर्जागतं तु ' इति । गतो विनियोगः ॥

प्र सु वः आपो महिमानमुत्तमं कारुर्वोचाति सदने विवस्वतः ।
प्र सप्तसप्त त्रेधा हि चक्रमुः प्र सृत्वरीणामति सिन्धुरोजसा ॥ १ ॥

प्र । सु । वः । आपः । महिमानम् । उत्ऽतमम् । कारुः । वोचाति । सदने । विवस्वतः ।
प्र । सप्तऽसप्त । त्रेधा । हि । चक्रमुः । प्र । सृत्वरीणाम् । अति । सिन्धुः । ओजसा ॥ १ ॥

---

१. ग४-त१.२.३-म२-मु—असुरविघातकत्वात्; म१.४.६.८—असुरविघातत्वात् । २. ग-त७—आप्राः । ३. ग—अज्ञायि ।

हे [v]आपः[१] [v]वः युष्माकं [v]महिमानं महत्त्वं स्तोत्रम् [v]उत्तमम् उत्कृष्टतमं [v]कारुः स्तोता सिन्धुक्षितदहं [v]विवस्वतः परिचरणवतो यजमानस्य [v]सदने यज्ञगृहे [v]सु[२] सुष्ठु [v]प्र [v]वोचाति प्रब्रवीमि। ता नद्यः [v]सप्तसप्त भूत्वा [v]त्रेधा पृथिव्यामन्तरिक्षे दिवि चेति [v]त्रेधा त्रिप्रकारं [v]चक्रमुः प्रावहन्। [v]सृत्वरीणाम् आसां मध्ये [v]सिन्धुः एतन्नामिका नदी [v]ओजसा स्वबलेन [v]अति सर्वा अपि नदीरतिक्रम्य [v]प्र वहतीति शेषः ॥

प्र ते॑ऽरदद्वरु॒णो या॑तवे॒ पथः॑ सिन्धो॒ यद्वाजाँ॑ अ॒भ्यद्र॑व॒स्त्वम्।
भूम्या॒ अधि॒ प्रव॑ता॒ यासि॒ सानु॑ना॒ यदे॑षाम॒ग्रं ज॒गता॑मिर॒ज्यसि॑ ॥ २ ॥

प्र। ते॒। अ॒र॒द॒त्। व॒रु॒णः। या॒त॒वे। पथः॑। सि॒न्धो॒ इति॑। यत्। वाजा॑न्। अ॒भि। अ॒द्र॒वः॒। त्वम्।
भूम्याः॑। अधि॑। प्रऽव॑ता। यासि॑। सानु॑ना। यत्। ए॒षा॒म्। अ॒ग्रम्। ज॒गता॑म्। इ॒र॒ज्यसि॑ ॥२॥

हे [v]सिन्धो देवि [v]ते तव [v]यातवे गमनाय [v]वरुणः देवः [v]पथः मार्गान् [v]प्र [v]अरदत् प्राचीनं व्यलिखत्। सा हि प्राक् प्रवहति। अथवा प्रकृष्टमितरनदीभ्योऽप्यत्यन्तं विस्तृतं व्यदारयत्। [v]यत् यस्मात् हे सिन्धो [v]वाजान्[३] अन्नान्यभिलक्ष्य [v]त्वम् [v]अभ्यद्रवः अभ्यगच्छः[४]। किंच त्वं [v]भूम्याः [v]अधि उपरि [v]सानुना समुच्छ्रितेन [v]प्रवता मार्गेण[५] [v]यासि गच्छसि। सिन्धुः खलु पर्वतान्विभिद्य गता। [v]यत् येन समुच्छ्रितेन मार्गेण गच्छन्ती त्वम् [v]एषां सर्वेषां [v]जगतां जङ्गमानां प्राणिनाम् [v]अग्रं प्रत्यक्षम् [v]इरज्यसि ईशिषे ॥

दि॒वि स्व॒नो य॑तते॒ भूम्योप॑र्यन॒न्तं शु॒ष्ममु॑दि॒यर्ति॑ भा॒नुना॑।
अ॒भ्रादि॑व॒ प्र स्त॑नयन्ति वृ॒ष्टय॑ः सिन्धु॒र्यदेति॑ वृष॒भो न रो॑रु॒वत् ॥ ३ ॥

दि॒वि। स्व॒नः। य॒त॒ते॒। भूम्या॑। उप॑रि। अ॒न॒न्तम्। शु॒ष्मम्। उत्। इ॒य॒र्ति॒। भा॒नुना॑।
अ॒भ्रात्ऽइ॑व। प्र। स्त॒न॒य॒न्ति॒। वृ॒ष्टय॑ः। सि॒न्धुः॑। यत्। एति॑। वृ॒ष॒भः। न। रो॒रु॒वत्॥३॥

[v]भूम्योपरि भूमेरुपरि प्रवर्तमानः [v]स्वनः [v]दिवि [v]यतते गच्छति। दिवं व्याप्नोति। सेयं सिन्धुः [v]अनन्तम् अपर्यन्तं [v]शुष्मं वेगं [v]भानुना दीप्तेनोर्मिणा [v]उदियर्ति उद्गमयति। [v]अभ्रादिव अन्तरिक्षाद्यथा [v]वृष्टयः [v]प्र [v]स्तनयन्ति तद्वदस्याः[६] शब्दाः प्रादुर्भवन्ति। [v]यत् यदा [v]सिन्धुः इयं [v]रोरुवत् भृशं शब्दयन्[७] [v]वृषभो [v]न वृषभ इव [v]एति गच्छति तदैवं भवति ॥

अ॒भि त्वा॑ सिन्धो शिशु॒मिन्न मा॒तरो॑ वा॒श्रा अ॑र्षन्ति॒ पय॑सेव धे॒नवः॑।
राजे॑व यु॒ध्वा न॑यसि॒ त्वमित्सिचौ॒ यदा॑सा॒मग्रं॑ प्रव॒ता॒मिन॑क्षसि ॥ ४ ॥

अ॒भि। त्वा॒। सि॒न्धो॒ इति॑। शि॒शु॒म्। इत्। न। मा॒तरः॑। वा॒श्राः। अ॒र्ष॒न्ति॒। पय॑साऽइव। धे॒नवः॑।
राजा॑ऽइव। यु॒ध्वा। न॒य॒सि॒। त्वम्। इत्। सिचौ॑।
यत्। आ॒सा॒म्। अग्र॑म्। प्रऽव॑ताम्। इन॑क्षसि ॥ ४ ॥

---

१. ग–आपः महानद्यः। २. त-भ–'सु' नास्ति। ३. त-भ-मु–वाजानभि। ४. ग–अभ्यगच्छः। महानद्यस्तत्र सप्त वरुणं गंतुमुद्यताः। प्रजार्थं वरुणो मार्गमकरोत् सरितां पतिरिति स्मृतेः। ५. ग-त-भ–'मार्गेण' नास्ति। ६. त-भ–तद्वदस्याः। ७. ग–शब्दायमानः।

हे vसिन्धो vत्वा त्वां vशिशुमिव vमातरः मातरः पुत्रमिव vवाश्राः शब्दयन्त्य इतरा नद्यः vअभि vअर्षन्ति अभिगच्छन्ति। vपयसेव vधेनवः पयसा युक्ता नवप्रसूतिका गाव इव। किंच vयुग्वा युक्तृत् vराजेव त्वमित् त्वमेव vसिचौ सिच्यमानौ तटौ vनयसि उदकपूरं vयत् यदा vआसां vप्रवतां त्वया सह गच्छन्तीनाम् vअग्रम् अग्रे vइनक्षसि व्याप्नोषि। सर्वासां पुरतो गच्छसि ॥

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।
असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥ ५ ॥

इमम्। मे। गङ्गे। यमुने। सरस्वति। शुतुद्रि। स्तोमम्। सचत। परुष्णि। आ।
असिक्न्या। मरुत्ऽवृधे। वितस्तया। आर्जीकीये। शृणुहि। आ। सुऽसोमया ॥ ५ ॥

अत्र प्रधानभूताः सप्त नद्यस्तदवयवभूता नद्यस्तिस्रः[1] स्तूयन्ते। हे vगङ्गे हे vयमुने हे vसरस्वति हे vशुतुद्रि हे vपरुष्णि। हे vअसिक्न्या अवयवभूतया सहिते vमरुद्वृधे हे vवितस्तया vसुषोमया च सहिते vआर्जीकीये त्वं च एवं सप्त नद्यो यूयं vमे vस्तोमं स्तोत्रमस्मदीयम् vआ vसचत आसेवध्वम्। vशृणुहि शृणुत च। आर्जीकीयाया वितस्तया सुषोमया च सहित्यं निरुक्त उक्तं—' वितस्तया चार्जीकीय आ शृणुहि सुषोमया च ' इति। अत्र ' गङ्गा गमनात् ' (निरु. ९.२६) इत्यादि निरुक्तं द्रष्टव्यम् ॥ ॥ ६ ॥

तृष्टामया प्रथमं यातवे सजूः सुसर्त्वा रसया श्वेत्या त्या।
त्वं सिन्धो कुभया गोमतीं क्रुमुं मेहत्न्वा सरथं याभिरीयसे ॥ ६ ॥

तृष्टऽअमया। प्रथमम्। यातवे। सऽजूः। सुऽसर्त्वा। रसया। श्वेत्या। त्या।
त्वम्। सिन्धो इति। कुभया। गोऽमतीम्। क्रुमुम्। मेहत्न्वा। सऽरथम्। याभिः। ईयसे ॥६॥

हे vसिन्धो vत्वं vक्रुमुं क्रमणशीलां vगोमतीं नदीं vयातवे[2] प्रतियातुं पर्वतादवरूढा vप्रथमं vतृष्टामया नद्या vसजूः संगतासि। पश्चात् vसुसर्त्वा vरसया vश्वेत्या vत्या vकुभया vमेहत्न्वा च सह सजूर्भव vयाभिः त्वं vसरथं समानं रथमारूढा vईयसे गच्छसि ॥

ऋजीत्येनी रुशती महित्वा परि ज्रयांसि भरते रजांसि।
अदब्धा सिन्धुरपसामपस्तमाश्वा न चित्रा वपुषीव दर्शता ॥ ७ ॥

ऋजीती। एनी। रुशती। महिऽत्वा। परि। ज्रयांसि। भरते। रजांसि।
अदब्धा। सिन्धुः। अपसाम्। अपःऽतमा। अश्वा। न। चित्रा। वपुषीऽइव। दर्शता ॥७॥

vऋजीती ऋजुगामिनी vएनी श्वेतवर्णा vरुशती दीप्यमाना सिन्धुः vज्रयांसि वेगवन्ति vरजांसि उदकानि vपरि vभरते प्रभरति। तादृशी vअदब्धा अहिंसिता vसिन्धुः vअपसां कर्मवतीनां मध्ये vअपस्तमा वेगाख्यकर्मवती भवति। vअश्वा vन यथैव vचित्रा चायनीया vवपुषी वपुष्मती योषित् vइव vदर्शता दर्शनीया भवति ॥

---

१. त-मु–तिस्रः। २. त-म–' यातवे ' नास्ति।

स्वश्वा सिन्धुः सुरथा सुवासा हिरण्ययी सुकृता वाजिनीवती ।
ऊर्णावती युवतिः सीलमावत्युताधि वस्ते सुभगा मधुवृधम् ॥ ८ ॥

सुऽअश्वा । सिन्धुः । सुऽरथा । सुऽवासाः । हिरण्ययी । सुऽकृता । वाजिनीऽवती ।
ऊर्णाऽवती । युवतिः । सीलमाऽवती । उत । अधि । वस्ते । सुऽभगा । मधुऽवृधम् ॥ ८ ॥

सेयं vसिन्धुः vस्वश्वा शोभनाश्वोपेता vसुरथा शोभनरथा vसुवासाः शोभनवसना vहिरण्ययी हिरण्मयाभरणा vसुकृता vवाजिनीवती अन्नवती vऊर्णावती । तस्याः समीपे देशे हि सन्त्यूर्णाः यासां रोमभिः कम्बलाः क्रियन्ते । vयुवतिः नित्यतरुणी सर्वदा हीनोदका vसीलमावती[1] । सीराणि यथौषध्या रज्जुभूतया बध्यन्ते सा सीलमेति निगद्यते कृषीवलैः । तादृगोषध्युपेता । vउत अपि च vसुभगा सिन्धुः vमधुवृधं मधुवर्धकं निर्गुण्डयादिकम् vअधि vवस्ते आच्छादयति । तस्यास्तीरे निर्गुण्ड्यादीनि बहूनि सन्ति ॥

सुखं रथं युयुजे सिन्धुरश्विनं तेन वाजं सनिषदस्मिन्नाजौ ।
महान् ह्यस्य महिमा पनस्यतेऽदब्धस्य स्वयशसो विरप्शिनः ॥ ९ ॥

सुऽखम् । रथम् । युयुजे । सिन्धुः । अश्विनम् । तेन । वाजम् । सनिषत् । अस्मिन् । आजौ ।
महान् । हि । अस्य । महिमा । पनस्यते । अदब्धस्य । स्वऽयशसः । विऽरप्शिनः ॥ ९ ॥

vसिन्धुः देवता vसुखं सुखकरं शोभनद्वारं वा vअश्विनम् अश्ववन्तं vरथं vयुयुजे युनक्ति । vतेन रथेन vवाजम् अन्नं vसनिषत् प्रयच्छतु । vअस्मिन्नाजौ संग्रामे यज्ञे वा vअस्य सिन्धुरथस्य vमहिमा vमहान् vहि vपनस्यते स्तूयते । कीदृशस्यास्य । vअदब्धस्य अन्यैरहिंस्यस्य vस्वयशसः स्वायत्तकीर्तेः vविरप्शिनः । महन्नामैतत् । महतः ॥ ॥ ७ ॥

'आ वः' इत्यष्टर्चमष्टमं सूक्तम् । इरावतः पुत्रस्य सर्पजातेर्जरत्कर्णनाम्न आर्षं जागतम् । सोमाभिषवार्था ये प्रावाणस्तद्देवत्यम् । तथा चानुक्रान्तम्—'आ वोऽष्टौ सर्प ऐरावतो जरत्कर्णो प्राण्णोऽस्तौत्' इति । प्रावस्तोत्र एतत्सूक्तम् । सूत्रितं च—'आ व ऋञ्जसे प्र वो प्रावाण इति सूक्तपोरन्तरोपरिष्टात्पुरस्ताद्वा' (आश्व. श्रौ. ५. १२) इति ॥

आ वः ऋञ्जस ऊर्जो व्युष्टिष्विन्द्रं मरुतो रोदसी अनक्तन ।
उभे यथा नो अहनी सचाभुवा सदःसदो वरिवस्यात उद्भिदा ॥ १ ॥

आ । वः । ऋञ्जसे । ऊर्जाम् । विऽउष्टिषु । इन्द्रम् । मरुतः । रोदसी इति । अनक्तन ।
उभे इति । यथा । नः । अहनी इति । सचाऽभुवा । सदःऽसदः । वरिवस्यातः । उत्ऽभिदा ॥ १ ॥

हे प्रावाणः vवः युष्मान् vऊर्जां सारभूतानामन्नवतीनां वोषसां vव्युष्टिषु विभातेषु[2] सत्सु vआ vऋञ्जसे आप्रसाधयामि । यूयं सोमेन vइन्द्रं vमरुतो vरोदसी द्यावापृथिव्यौ च vअनक्तन व्यञ्जयत । vनः अस्मान् vउभे vसचाभुवा सहोत्पन्ने[3] vअहनी द्यावापृथिव्यौ vसदःसदः सर्वेषु यागगृहेषु vवरिवस्यातः परिचरतः । vउद्भिदा उद्भेदकेन धनेन पूरयतामिति[4] ॥

---

१. त-भ१.२.४.६.८-मु-सीरमावती । २. ग४-विभावेषु; त-भ१.२.४.६.८-मु-विभागेषु ।
३. ग४-त-भ-सहोत्पन्नेन । ४. त-भ-मु-पूरयतमिति ।

तदु श्रेष्ठं सवनं सुनोतनात्यो न हस्तयतो अद्रिः सोतरि ।
विदद्धर्यो अभिभूति पौंस्यं महो राये चित्तरुते यदर्वतः ॥ २ ॥

तत् । ऊँ इति । श्रेष्ठम् । सवनम् । सुनोतन । अत्यः । न । हस्तऽयतः । अद्रिः । सोतरि ।
विदत् । हि । अर्यः । अभिऽभूति । पौंस्यम् । महः । राये । चित् । तरुते । यत् । अर्वतः ॥२॥

हे प्राव्णः यूयं ᵛतदु तमेव[1] ᵛश्रेष्ठं प्रशस्यं ᵛसवनं सोमं ᵛसुनोतन अभिषुणुत । अथैकवदाह । ᵛअद्रिः अभिषवग्रावा ᵛहस्तयतः हस्ताभ्यां गृहीतः सन् ᵛअत्यो ᵛन धृतोऽश्व इव भवति ᵛसोतरि अभिषवकर्तर्यध्वर्यौ । स यथा हस्ताभ्यां दृढं गृहीतोऽपि वल्गति तद्वत् । ᵛअर्यः प्राव्णामभिषवाय प्रेरको यजमानः ᵛअभिभूति शत्रूणामभिभावुकं ᵛपौंस्यं बलं ᵛविदद्धि लभते खलु देवेभ्यः । यद्वा । अभिषवायाध्वर्वादेः[2] प्रेरितो[3] ग्रावाभिभूति पौंस्यं विदद्यजमानार्थम् । किंच ᵛमहे महते ᵛराये ᵛचित् धनायापि ᵛयत् यो ग्रावा ᵛअर्वतः अश्वान् ᵛतरुते तनुते प्रयच्छति ॥

तदिद्धर्यस्य सवनं विवेरपो यथा पुरा मनवे गातुमश्रेत् ।
गोअर्णसि त्वाष्टे अश्वनिर्णिजि प्रेमध्वरेष्वध्वराँ अशिश्रयुः ॥ ३ ॥

तत् । इत् । हि । अस्य । सवनम् । विवेः । अपः । यथा । पुरा । मनवे । गातुम् । अश्रेत् ।
गोऽअर्णसि । त्वाष्टे । अश्वऽनिर्निजि । प्र । ईम् । अध्वरेषु । अध्वरान् । अशिश्रयुः ॥ ३ ॥

ᵛइत् इति पूरणः । ᵛअस्य ग्राव्णः ᵛतत् ᵛसवनम् अभिषवोपेतमस्मदीयं सोमयागाख्यम् ᵛअपः कर्म ᵛविवेः व्याप्नोतु । विपूर्वस्य वेतेर्लङ्यदादित्वाच्छपो लुक् । वेतेर्विपूर्वस्य वा छान्दसे श्लौ वापररूपमिति संदेहादनवग्रहः । समासस्वरः । ᵛयथा ᵛपुरा ᵛमनवे राज्ञे ᵛगातुं गमनम् ᵛअश्रेत् आजगाम तद्वत्[4] व्याप्नोतु । किंच ᵛगोअर्णसि गोरूपे अपहृतैर्गोभिः परिवृते तथा ᵛअश्वनिर्णिजि । निर्णिगिति रूपनाम । अश्वरूपे । अपहृतैरश्वैर्वृत इत्यर्थः । ईदृशे ᵛत्वाष्टे त्वष्टुः पुत्रे हन्तव्ये सतीति शेषः । ᵛईम् एतान् ᵛअध्वरान् असुरैरहिंस्यानध्वरसाधकान् वोपलान् ᵛअध्वरेषु ᵛअशिश्रयुः आश्रयन्ति पूर्वे यजमानाः ॥

अप हत रक्षसो भङ्गुरावतः स्कभायत निर्ऋतिं सेधतामतिम् ।
आ नो रयिं सर्ववीरं सुनोतन देवाव्यं भरत श्लोकमद्रयः ॥ ४ ॥

अप । हत । रक्षसः । भङ्गुरऽवतः । स्कभायत । निःऽऋतिम् । सेधत । अमतिम् ।
आ । नः । रयिम् । सर्वऽवीरम् । सुनोतन । देवऽअव्यम् । भरत । श्लोकम् । अद्रयः ॥४॥

हे ᵛअद्रयः यूयम् ᵛअप ᵛहत विनाशयत ᵛरक्षसः राक्षसान् । कीदृशान् । ᵛभङ्गुरावतः भङ्गकेन कर्मणा तद्वतः । तथा ᵛस्कभायत दूरे परिहरत ᵛनिर्ऋतिं पापदेवताम् । यथामुं यज्ञं नागच्छन्ति तथा । किंच[5] ᵛसेधत निषेधत ᵛअमतिं हिंसामतिं रक्षःप्रभृतिम्[5] । किंच ᵛनः अस्माकं ᵛसर्ववीरं बहुपुत्रान्नोपेतं ᵛरयिं धनम् ᵛआ ᵛसुनोतन । अभिषवेन पुत्रधनादीनां लाभादेवमुक्तम् । किंच ᵛदेवाव्यं देवप्रीणनं ᵛश्लोकं[6] ᵛभरत संपादयत ॥

---

१. त–तदेव । २. भ–अभिषवायाध्वर्वादयः । ३. ग-त१.२.३.४.५.७-भ२–प्रेरयिता; त६.८-भ१.४.६–प्रेरिता । ४. त-भ–तत् । ५. त६.८-भ–'किंच ... ... रक्षःप्रभृतिं' नास्ति । ६. ग–श्लोकं शब्दं हे अद्रयः ।

दिवश्चिदा वोऽमवत्तरेभ्यो विभ्वना चिदाश्वपस्तरेभ्यः ।
वायोश्चिदा सोमरभस्तरेभ्योऽग्नेश्चिदर्च पितुकृत्तरेभ्यः ॥ ५ ॥

दिवः । चित् । आ । वः । अमवत्ऽतरेभ्यः । विऽभ्वना । चित् । आश्वपःऽतरेभ्यः ।
वायोः । चित् । आ । सोमरभःऽतरेभ्यः । अग्नेः । चित् । अर्च । पितुकृत्ऽतरेभ्यः ॥५॥

vदिवश्चित् आदित्यादपि vअमवत्तरेभ्यः अत्यन्तं बलवद्भ्यः vवः युष्मभ्यम् vआ vअर्चं अस्तौदध्वर्युः। यद्वा । हे अध्वर्वादयः वो यूयमुच्यमानलक्षणेभ्यो ग्रावभ्य आ सर्वतोऽर्चं अर्चतेत्येवं प्रतिवाक्यं योज्यम्। vविभ्वना vचित् । विभ्वा सुधन्वनः पुत्रः । तेनापि vआश्वपस्तरेभ्यः शीघ्रकर्मभ्य इत्यर्थः । विभ्वादीनां त्रयाणां चमसादिशीघ्रकर्म प्रसिद्धम् । vवायोश्चित् वायोरपि vसोमरभस्तरेभ्यः सोमाभिषवार्थेनात्यन्तेन वेगेन युक्तेभ्यः । वायोरपि ग्रावाणो वेगवन्तो भवन्ति सोमाभिषवार्थम् । vअग्नेश्चित् अग्नेरपि vपितुकृत्तरेभ्यः अत्यन्तमन्नसाधकेभ्यः । ईदृशेभ्यो ग्रावभ्यः प्रीणनाय यूयमर्चतेति॥ ॥८॥

भुरन्तु नो यशसः सोत्वन्धसो ग्रावाणो वाचा दिविता दिवित्मता ।
नरो यत्र दुहते काम्यं मध्वाघोषयन्तो अभितो मिथस्तुरः ॥ ६ ॥

भुरन्तु । नः । यशसः । सोतु । अन्धसः । ग्रावाणः । वाचा । दिविता । दिवित्मता ।
नरः । यत्र । दुहते । काम्यम् । मधु । आऽघोषयन्तः । अभितः । मिथःऽतुरः ॥ ६ ॥

vयशसः यशस्विनः vग्रावाणः vनः अस्मभ्यं vसोतु सुतम् vअन्धसः सोमस्य रसं vभुरन्तु भरन्तु संपादयन्तु । उकारश्छान्दसः । किंच vदिवित्मता दीप्तिमत्या । लिङ्व्यत्ययः । vवाचा स्तुतिवाचा vदिविता दिवितायां दीप्तिमत्तायां वास्मान् कुर्वन्तु । सोमयागे स्थापयन्त्वित्यर्थः । कैषा[1] दीप्तिमत्तेति उच्यते । vनरः नेतार ऋत्विजः vयत्र यागे vकाम्यं कमनीयं vमधु सोमरसं vदुहते । किं कुर्वन्तः । vआघोषयन्तः सर्वतोऽभिषवशब्दं स्तोत्रशस्त्रादिरूपं वा शब्दं कुर्वन्तः । vअभितः सर्वतः vमिथस्तुरः त्वरमाणाः । सा दीप्तिमत्तेति ॥

सुन्वन्ति सोमं रथिरासो अद्रयो निरस्य रसं गविषो दुहन्ति ते ।
दुहन्त्यूधरुपसेचनाय कं नरो हव्या न मर्जयन्त आसभिः ॥ ७ ॥

सुन्वन्ति । सोमम् । रथिरासः । अद्रयः । निः । अस्य । रसम् । । गोऽइषः । दुहन्ति । ते ।
दुहन्ति । ऊधः । उपऽसेचनाय । कम् । नरः । हव्या । न । मर्जयन्ते । आसऽभिः ॥७॥

vरथिरासः रथवन्तो[2] रंहणवन्तः vअद्रयः ग्रावाणः vसोमं vसुन्वन्ति । ग्रावाणः vअस्य सोमस्य vरसं vनिः vदुहन्ति निःशेषेण दुहन्ति । vगविषः स्तुतिवाचमिच्छन्तः सन्तः । vदुहन्ति vऊधः रसं सोमसंबन्धिनम् । किमर्थम् । vउपसेचनाय अग्नेः । vकम् इति पादपूरणः । vनरः नेतारोऽभिषवकर्तार ऋत्विजः vहव्या vन हवींषि चाग्न्युपसेचनानन्तरम् vआसभिः स्वास्यैः vमर्जयन्ते शोधयन्ति । शेषभक्षणेन शुद्धीकुर्वन्ति । यद्वा । अग्नौ होतुर्दशापवित्रात्पुरासभिरास्यो-पलक्षितैः स्तोत्रैर्मर्जयन्ते ॥

१. ग-त१.२.३.७.८-भ-सु-कैषा; त६-केषा । २. ग-त१.२.३.६.७.८-भ-'रथवन्तो' नास्ति ।

एते नरः स्वपसो अभूतन य इन्द्राय सुनुथ सोममद्रयः ।
वामंवामं वो दिव्याय धाम्ने वसुंवसु वः पार्थिवाय सुन्वते ॥ ८ ॥

एते । नरः । सुऽअपसः । अभूतन । ये । इन्द्राय । सुनुथ । सोमम् । अद्रयः ।
वामम्ऽवामम् । वः । दिव्याय । धाम्ने । वसुंऽवसु । वः । पार्थिवाय । सुन्वते ॥ ८ ॥

हे ᵛनरः नेतारः हे ᵛअद्रयः ᵛएते यूयं ᵛस्वपसोऽभूतन शोभनाभिश्वकर्माणो भवत । ᵛये यूयम् ᵛइन्द्राय ᵛसोमं ᵛसुनुथ ᵛवः यूयं ᵛवामंवामं यद्यद्धनमीयं धनमस्ति तत्तत् ᵛदिव्याय ᵛधाम्ने तेजसे कुरुत । तथा ᵛवसुवसु यद्यद्वासयोग्यं धनमस्ति तत् ᵛवः यूयं ᵛपार्थिवाय ᵛसुन्वते यजमानाय कुरुत ॥ ॥ ९ ॥

' अभ्रप्रुषः ' इत्यष्टर्चं नवमं सूक्तं भृगुगोत्रस्य स्यूमरश्मेरार्षं मरुद्देवताकम् । पञ्चमी जगती शिष्टाः सप्त त्रिष्टुभः । तथा चानुक्रान्तम्—' अभ्रप्रुषः स्यूमरश्मिर्भार्गवो मारुतं तु पञ्चमी जगती ' इति । गतो विनियोगः ॥

अभ्रप्रुषो न वाचा प्रुषा वसु हविष्मन्तो न यज्ञा विजानुषः ।
सुमारुतं न ब्रह्माणमर्हसे गणमस्तोष्येषां न शोभसे ॥ १ ॥

अभ्रऽप्रुषः । न । वाचा । प्रुषा । वसु । हविष्मन्तः । न । यज्ञाः । विऽजानुषः ।
सुऽमारुतम् । न । ब्रह्माणम् । अर्हसे । गणम् । अस्तोषि । एषाम् । न । शोभसे ॥ १ ॥

ᵛअभ्रप्रुषो ᵛन मेघास्निर्गच्छन्त उदकबिन्दव इव ᵛवाचा स्तुत्या प्रीता मरुतः ᵛवसु धनं ᵛप्रुष सिञ्चन्ति । व्यत्ययेन बहुवचनम् । किंच ᵛहविष्मन्तो ᵛन ᵛयज्ञाः हविर्भिर्युक्ता यागा इव ᵛविजानुषः जगतो विजनयितारौ भवन्ति । अथ समुदायेनाह । तेषाम् ᵛएषां ᵛसुमारुतं[1] शोभनानां मरुतां ᵛब्रह्माणं महान्तं ᵛगणम् ᵛअर्हसे पूजार्थं ᵛन ᵛअस्तोषि नास्तौषम् । न स्तुतवानस्मीतः पूर्वम् । तथा ᵛशोभसे शोभार्थमपि मारुतं गणं ᵛन अस्तोषि । अत इदानीं नूतनेन स्तोत्रेण स्तौमीत्यर्थः ॥

श्रिये मर्यासो अञ्जीरकृण्वत सुमारुतं न पूर्वीरति क्षपः ।
दिवस्पुत्रास एता न येतिर आदित्यासस्ते अक्रा न वावृधुः ॥ २ ॥

श्रिये । मर्यासः । अञ्जीन् । अकृण्वत । सुऽमारुतम् । न । पूर्वीः । अति । क्षपः ।
दिवः । पुत्रासः । एताः । न । येतिरे । आदित्यासः । ते । अक्राः । न । ववृधुः ॥ २ ॥

ᵛश्रिये शोभार्थं[2] ᵛमर्यासः मारका मनुष्यरूपा वा मरुतः । पूर्वं मनुष्याः सन्तः पश्चात्सुकृतविशेषेण श्यामरा आसन् । ते ᵛअञ्जीन् अञ्जकान्त्याभरणानि ᵛअकृण्वत कुर्वन्ति । किमर्थम् । ᵛश्रिये स्वशरीरशोभनार्थम्[3] । ᵛसुमारुतं[4] शोभनानां मरुतां गणं ᵛपूर्वीः बह्व्यः ᵛक्षपः क्षपयित्र्यः सेनाः ᵛन ᵛअति न पराभावयन्तीति शेषः । किंच ᵛदिवः द्युदेवतायाः ᵛपुत्रासः पुत्राः ᵛएताः गन्तारः ᵛन ᵛयेतिरे निर्गच्छन्ति । ᵛते ᵛआदित्यासः अदितेः पुत्राः ᵛअक्राः आक्रमणशीला मरुतः ᵛन ᵛवावृधुः न वर्धन्ते । यतोऽस्माभिर्न स्तुता अत इति भावः ॥

---

१. ग-त-म–सुमारुतं न । २. ग-त४.५–शोमनार्थं । ३. ग४–°शोभार्थं । ४. त-भ–तं सुमारुतं ।

प्र ये दिवः पृथिव्या न बर्हणा त्मना रिरिच्रे अभ्राञ्च सूर्यः ।
पाजस्वन्तो न वीराः पनस्यवो रिशादसो न मर्या अभिद्यवः ॥ ३ ॥

प्र । ये । दिवः । पृथिव्याः । न । बर्हणा । त्मना । रिरिच्रे । अभ्रात् । न । सूर्यः ।
पाजस्वन्तः । न । वीराः । पनस्यवः । रिशादसः । न । मर्याः । अभिऽद्यवः ॥ ३ ॥

ये मरुतः दिवः पृथिव्या न पृथिव्याश्च । नेति चार्थे । बर्हणा महत्त्वेन त्मना आत्मनैव रिरिच्रे रिरिचिरे अतिरिक्ता अभवन् स्वशरीरेण अभ्राञ्च[1] अभ्रादिव[2] सूर्यः[2] । किंच पाजस्वन्तो न वीराः बलवन्तो वीरा इव पनस्यवः स्तुतिकामा भवन्ति । किंच रिशादसो न मर्याः रिशतामसितारो मनुष्या इव अभिद्यवः अभिगतदीप्तयो भवन्ति ॥

युष्माकं बुध्ने अपां न यामनि विथुर्यति न मही श्रथुर्यति ।
विश्वप्सुर्यज्ञो अर्वागयं सु वः प्रयस्वन्तो न सत्राच आ गत ॥ ४ ॥

युष्माकम् । बुध्ने । अपाम् । न । यामनि । विथुर्यति । न । मही । श्रथुर्यति ।
विश्वऽप्सुः । यज्ञः । अर्वाक् । अयम् । सु । वः । प्रयस्वन्तः । न । सत्राचः । आ । गत ॥४॥

हे मरुतः युष्माकं बुध्ने परस्परसंघाते अपां न यामनि प्रवृद्धानामुदकानां गमन इव महती भूः न विथुर्यति न व्यथते । नापि श्रथुर्यति न विशीर्णा भवति । शीघ्रगतयोऽपि यूयमेनां न पीडयध्वमित्यर्थः । विश्वप्सुः विश्वरूपः अयं यज्ञः यागसाधनं हविः वः युष्माकम् अर्वाक् अभिमुखं सु सुष्ठु गच्छति । प्रयस्वन्तो न अन्नवन्तः परिष्कर्तार इव सुखप्रदाः सन्तः सत्राचः सहाञ्चनाः आ गत आगच्छत । संघाकारेणागच्छतेत्यर्थः । 'सप्तगणा वै मरुतः' (तै. सं. २. २. ५. ७) इति श्रुतेः ॥

यूयं धूर्षु प्रयुजो न रश्मिभिर्ज्योतिष्मन्तो न भासा व्युष्टिषु ।
श्येनासो न स्वयशसो रिशादसः प्रवासो न प्रसितासः परिप्रुषः ॥ ५ ॥

यूयम् । धूःऽसु । प्रऽयुजः । न । रश्मिऽभिः । ज्योतिष्मन्तः । न । भासा । विऽउष्टिषु ।
श्येनासः । न । स्वऽयशसः । रिशादसः । प्रवासः । न । प्रऽसितासः । परिऽप्रुषः ॥ ५ ॥

हे मरुतः यूयं धूर्षु रथसंबन्धिनीषु रश्मिभिः योक्त्रैः प्रयुजः प्रयुक्ता बद्धा अश्वा इव परिप्रुषः परितो गन्तारः स्थ । तथा ज्योतिष्मन्तो न तेजस्वन्त आदित्यादय इव भासा युक्ता भवथ व्युष्टिषु उषःसूदितासु । किंच श्येनासो न श्येना इव[3] स्वयशसः स्वायत्तयशसः ते यथा रिशादसः रिशतामसितारस्तद्वद्रिशादसः स्वायत्तयशसश्च । किंच प्रवासो न प्रवासिन इव पथिका इव प्रसितासः प्रसिद्धयानाः । उक्तरूपा मरुतः परिप्रुषः परितो गन्तारो भवथ ॥ ॥१०॥

प्र यद्वहध्वे मरुतः पराकाद्यूयं महः संवरणस्य वस्वः ।
विदानासो वसवो राध्यस्याराच्चिद्द्वेषः सनुतर्युयोत ॥ ६ ॥

---

१. ग-त-भ-अभ्राञ्च सूर्यः । २. भ-' अभ्रादिव सूर्यः ' नास्ति । ३. त-भ-सु-इव किंच ।

प्र । यत् । वहध्वे । मरुतः । पराकात् । यूयम् । महः । सम्ऽवरणस्य । वस्वः ।
विदानासः । वसवः । राध्यस्य । आरात् । चित् । द्वेषः । सनुतः । युयोत ॥ ६ ॥

हे vमरुतः vयूयं vयत् यदा vपराकात् अत्यन्तं दूरदेशात् vवहध्वे[1] आगच्छथ तदानीं[2] vमहः महत् vसंवरणस्य संवरणीयं vराध्यस्य संराधनीयं vवस्वः वसु धनं vविदानासः प्रयच्छन्तो हे vवसवः यूयम् vआरात्चित् दूरादेव vयुयोत पृथक्कुरुत । कानिति उच्यते । vद्वेषः द्वेष्टॄन् । कीदृशान् । vसनुतः अन्तर्हितान् । निगूढानित्यर्थः । सनुतरित्यन्तर्हितनाम ॥

य उदृचि यज्ञे अध्वरेष्ठा मरुद्भ्यो न मानुषो ददाशत् ।
रेवत्स वयो दधते सुवीरं स देवानामपि गोपीथे अस्तु ॥ ७ ॥

यः । उत्ऽऋचि । यज्ञे । अध्वरेऽस्थाः । मरुत्ऽभ्यः । न । मानुषः । ददाशत् ।
रेवत् । सः । वयः । दधते । सुऽवीरम् । सः । देवानाम् । अपि । गोऽपीथे । अस्तु ॥७॥

vअध्वरेष्ठाः यागे सीदन् vमानुषः vयः[3] यजमानः vयज्ञे vउदृचि सति । ऋक्शब्देन स्तोत्रमुपलक्ष्यते । यज्ञे समाप्तस्तुतिके सति संपूर्णे सति vमरुद्भ्यो vन मरुद्भय इवान्येषामध्वर्युभ्यः[4] ऋत्विगादिभ्यः vददाशत् दद्यात् । यद्वा यज्ञ उदृच्युपक्रान्त इत्यर्थः । तस्मिन् यज्ञे मरुद्भय इवान्यस्मै इन्द्राय ददाशत् ददाति । vसः यजमानः vरेवत् धनवत्[5] vसुवीरं शोभनपुत्राद्युपेतं vवयः अन्नं vदधते धारयति । व्यत्ययेनैकवचनम् । vस vदेवानाम् इन्द्रादीनाम् vअपि vगोपीथे सोमपाने vअस्तु भवतु ॥

ते हि यज्ञेषु यज्ञियासु ऊमा आदित्येन नाम्ना शंभविष्ठाः ।
ते नोऽवन्तु रथतूर्मनीषां महश्च यामन्नध्वरे चकानाः ॥ ८ ॥

ते । हि । यज्ञेषु । यज्ञियासः । ऊमाः । आदित्येन । नाम्ना । शम्ऽभविष्ठाः ।
ते । नः । अवन्तु । रथऽतूः । मनीषाम् । महः । च । यामन् । अध्वरे । चकानाः ॥ ८ ॥

vते vहि ते खलु vयज्ञेषु यागेषु vयज्ञियासः यज्ञार्हा यष्टव्याः vऊमाः अवितारः vआदित्येन vनाम्ना आदित्यसंबन्धिनोदकेन vशंभविष्ठाः सुखस्य भावयितारः । यद्वा । आदित्याख्येन नाम्नादित्यनामकेन देवेन सह शंभविष्ठाः । vते मरुतः vनः अस्मान् vअवन्तु । vरथतूः रथतुरो रथस्य यज्ञगमनसाधनस्य त्वरयितारः सन्तः vमनीषां स्तुतिमवन्तु रक्षन्तु । कीदृशास्ते । vअध्वरे vयामन् यागगमने vमहः महद्भिः vचकानाः कामयमानाः ॥ ॥ ११ ॥

' विप्रासः ' इत्यष्टर्चं दशमं सूक्तम् । पञ्चम्याद्यास्तिस्रो द्वितीया चेति चतस्रो जगत्यः । शिष्टाश्चतस्रस्त्रिष्टुभः । पूर्ववदृषिदेवते । तथा चानुक्रान्तं—' विप्रासो द्वितीया पञ्चम्याद्याश्च तिस्रो जगत्यः ' इति । गतो विनियोगः ॥

विप्रासो न मन्मभिः स्वाध्यो देवाध्यो न यज्ञैः स्वर्णरसः ।
राजानो न चित्राः सुसंदृशः क्षितीनां न मर्या अरेपसः ॥ १ ॥

---

१. ग–प्रवहध्वे । २. ग-त४.५–तदानीं यूयं; त१.२.३.६.७.८-म१.२.४.६.८–तदानीं सूर्य । ३. त-म-मु–' यः ' नास्ति । ४. त-मु–°मध्वर्युप्रभृतिभ्यः । ५. त१.२.३.७-मु–रयिमत् ; भ–' धनवत् ' नास्ति ।

विप्रासः । न । मन्मऽभिः । सुऽआध्यः । देवऽअव्यः । न । यज्ञैः । सुऽअग्मसः ।
राजानः । न । चित्राः । सुऽसंदृशः । क्षितीनाम् । न । मर्याः । अरेपसः ॥ १ ॥

vविप्रासो vन विप्रा ब्राह्मणा इव ते यथा vमन्मभिः स्तुतिभिः vस्वाध्यः शोभनाध्याना भवन्ति एवं[1] मरुतोऽप्यस्मदीयैर्मन्मभिर्मननीयैः स्तोत्रैः स्वाध्यः सुमनसो भवन्ति । अथवा । मन्मभिः स्तोत्रैर्युक्ता विप्रासो न मेधाविनः स्तोतार इव स्वाध्यो यज्ञे यजमाने वा सुध्याना इत्यर्थः । तथा vयज्ञैः यागैः vदेवाव्यो vन देवानां तर्पयितारो यजमाना इव vसुअग्मसः । अग्म इति कर्मनाम । शोभनकर्माणः । ते यथा कर्मसु व्यापृता भवन्ति तद्वद्वृष्टिप्रदानादिकर्मसु व्यापृता इत्यर्थः । vराजानो vन मूर्धाभिषिक्ताः क्षितिपतय इव vचित्राः चायनीयाः पूजनीयाः । यद्वा चित्राभरणाः । तथा vसुसंदृशः सुष्ठु दर्शनीयाः । तथा vक्षितीनां निवासानां स्वामिनः vमर्याः vन मनुष्या इव vअरेपसः अपापाः । यथा प्रतिप्रहार्थमन्यत्रागत्वा स्वगृह एवानुतिष्ठन्तो निर्दोषा भवन्ति तादृशा इत्यर्थः । ईदृशाः शोभन्त इत्यर्थः ॥

अग्निर्न ये भ्राजसा रुक्मवक्षसो वातासो न स्वयुजः सुधऊतयः ।
प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते ॥ २ ॥

अग्निः । न । ये । भ्राजसा । रुक्मऽवक्षसः । वातासः । न । स्वऽयुजः । सुधःऽऊतयः ।
प्रऽज्ञातारः । न । ज्येष्ठाः । सुऽनीतयः । सुऽशर्माणः । न । सोमाः । ऋतम् । यते ॥ २ ॥

हे मरुतः vअग्निर्न अग्निरिव स[2] यथा[3] vभ्राजसा तेजसा शोभते तद्वद्भ्राजसा युक्ताः किंच vरुक्मवक्षसः रुक्मालंकृतवक्षस्काः vवातासो vन प्रत्यक्षवाता इव vस्वयुजः स्वयं[4] युज्यमानाः[4] vसधऊतयः सद्योगमनाः vप्रज्ञातारो vन प्रकर्षेण ज्ञातारो ज्ञानिन इव vज्येष्ठाः पूज्याः vसुनीतयः सुनयनाः vसुशर्माणो vन vसोमाः सुसुखाः सोमा इव ते यूयम् vऋतं vयते यज्ञं गच्छते यजमानाय गच्छतेति ॥

वातासो न ये धुनयो जिगत्नवोऽग्नीनां न जिह्वा विरोकिणः ।
वर्मण्वन्तो न योधाः शिमीवन्तः पितॄणां न शंसाः सुरातयः ॥ ३ ॥

वातासः । न । ये । धुनयः । जिगत्नवः । अग्नीनाम् । न । जिह्वाः । विऽरोकिणः ।
वर्मण्ऽवन्तः । न । योधाः । शिमीऽवन्तः । पितॄणाम् । न । शंसाः । सुऽरातयः ॥ ३ ॥

vये मरुतः vवातासो vन वायव इव vधुनयः शत्रूणां कम्पयितारः vजिगत्नवः गमनशीलाः । अत्र मारुते सूक्ते मरुतामेव दृष्टान्तकथनं संचरणस्वभाववायुपदार्थतदभिमानिदेवताभेदेनाविरुद्धम् । तथा vअग्नीनां vन vजिह्वाः अग्नीनां ज्वाला इव vविरोकिणः विरोचनशीलमुखाः । तथा vवर्मण्वन्तो vन vयोधाः कवचिनो योद्धार इव vशिमीवन्तः शौर्यकर्मवन्तः । तथा vपितॄणां vन vशंसाः पितॄणां जनकानां शंसा वाच इव vसुरातयः सुदानाः । एवंमहानुभावा एते मरुतोऽस्मद्यज्ञमागच्छन्तु ॥

---

१. त-मु-एवमेते । २. ग-त-भ-'स' नास्ति । ३. त४.५.७-'यथा' नास्ति । ४. त-भ१.२.४.६.८-स्वयुज्यमानाः ।

रथानां न येऽराः सनाभयो जिगीवांसो न शूरा अभिद्यवः ।
वरेयवो न मर्यो घृतप्रुषोऽभिस्वर्तारो अर्कं न सुष्टुभः ॥ ४ ॥

रथानाम् । न । ये । अराः । सऽनाभयः । जिगीवांसः । न । शूराः । अभिऽद्यवः ।
वरेऽयवः । न । मर्यः । घृतऽप्रुषः । अभिऽस्वर्तारः । अर्कम् । न । सुऽस्तुभः ॥ ४ ॥

vरथानां vन रथचक्राणामिव vअराः ते यथा बहवोऽपि vसनाभयः समाननाभयो भवन्ति तद्वत् vये परस्परं सनाभयः समानबन्धना एकस्मिन्नेवान्तरिक्षे वर्तमानाः । परस्परं बन्धुभूता इत्यर्थः । vजिगीवांसो vन vशूराः जयशीलाः शूरा इव vअभिद्यवः अभिगतदीप्तयः किंच vवरेयवो vन vमर्याः वृतं वरं परस्मै प्रदातुमिच्छन्तो मनुष्या इव vघृतप्रुषः उदकसेक्तारः । उदकपूर्वं हि वराणि वसूनि दीयन्ते नियमेन । वृष्टयुदकप्रदा इत्यर्थः । किंच vअभिस्वर्तारः vअर्कं vन अर्कमर्चनीयं स्तोत्रमभिस्वर्तारोऽभितः शब्दयितारो वन्दिन इव vसुष्टुभः सुशब्दाः ॥

अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः ।
आपो न निम्नैरुदभिर्जिगत्नवो विश्वरूपा अङ्गिरसो न सामभिः ॥ ५ ॥

अश्वासः । न । ये । ज्येष्ठासः । आशवः । दिधिषवः । न । रथ्यः । सुऽदानवः ।
आपः । न । निम्नैः । उदऽभिः । जिगत्नवः । विश्वऽरूपाः । अङ्गिरसः । न । सामऽभिः ॥५॥

vये मरुतः vअश्वासो vन अश्वा इव vज्येष्ठासः ज्येष्ठाः प्रशस्यतमाः vआशवः शीघ्रगमनाः । तथा vदिधिषवो vन वसूनां धारका इव vरथ्यः रथस्वामिनः vसुदानवः सुदानाः । तथा vआपो vन आप इव vनिम्नैः प्रवणगैः vउदभिः उदकैः सह vजिगत्नवः गमनशीलाः । तथा vविश्वरूपाः नानारूपाः vसामभिः युक्ताः vअङ्गिरसो vन अङ्गिरस इव । सर्वदा सामगा इत्यर्थः ॥ ॥ १२ ॥

ग्रावाणो न सूरयः सिन्धुमातर आदर्दिरासो अद्रयो न विश्वहा ।
शिशूला न क्रीळयः सुमातरो महाग्रामो न यामन्नुत त्विषा ॥ ६ ॥

ग्रावाणः । न । सूरयः । सिन्धुऽमातरः । आऽदर्दिरासः । अद्रयः । न । विश्वहा ।
शिशूलाः । न । क्रीळयः । सुऽमातरः । महाऽग्रामः । न । यामन् । उत । त्विषा ॥ ६ ॥

vसूरयः उदकस्य प्रेरकाः vग्रावाणो vन मेघा इव vसिन्धुमातरः नदीनिर्मातारः । vआदर्दिरासः आदरणशीलानि vअद्रयो vन वज्रा आद्यायुधानीव vविश्वहा सर्वदा शत्रूणां हन्तार इत्यर्थः । यद्वा । सर्वदा अद्रयो न वज्रा इव शत्रूणामादर्दिरास आदरणशीलाः । vसुमातरः शोभनमातृकाः vशिशूला vन शिशव इव vक्रीळयः विहर्तारः । vउत अपि च vमहाग्रामो vन महाजनसंघ इव vयामन् यामनि गमने vत्विषा दीप्त्या युक्ता भवन्ति । तेऽस्मद्यज्ञमागच्छन्तु ॥

उषसां न केतवोऽध्वरश्रियः शुभंयवो नाञ्जिभिर्व्यश्वितन् ।
सिन्धवो न युयियो भ्राजदृष्टयः परावतो न योजनानि ममिरे ॥ ७ ॥

उषसाम् । न । केतवः । अध्वरऽश्रियः । शुभम्ऽयवः । न । अञ्जिऽभिः । वि । अश्वितन् ।
सिन्धवः । न । युयियः । भ्राजत्ऽऋष्टयः । पराऽवतः । न । योजनानि । ममिरे ॥ ७ ॥

ये मरुतः उक्षसां न केतवः उक्षसां रश्मय इव अध्वरश्रियः यज्ञस्याश्रयितारो[1] भवन्ति। तथा सुभंयवो न कल्याणकामा वरा इव अग्निभिः आभरणैः व्यश्वितन् दीप्यन्ते। 'श्विता वर्णे'। लङि रूपम्। तथा सिन्धवो न नद्य इव ययियः गमनशीलाः भ्राजदृष्टयः दीप्यमानायुधाः परावतो न दूराध्वनीना वडवा इव योजनानि दूरदेशान् ममिरे परिच्छिन्दन्ति। तेऽस्मद्यज्ञमागच्छन्त्विति ॥

सुभागाञ्नो देवाः कृणुता सुरत्नान्त्समान्त्स्तोतृन्मरुतो वावृधानाः।
अधि स्तोत्रस्य सख्यस्य गात सनाद्धि वो रत्नधेयानि सन्ति ॥ ८ ॥

सुऽभागान्। नः। देवाः। कृणुत। सुऽरत्नान्। अस्मान्। स्तोतॄन्। मरुतः। ववृधानाः। अधि। स्तोत्रस्य। सख्यस्य। गात। सनात्। हि। वः। रत्नऽधेयानि। सन्ति ॥ ८ ॥

अनया स्तुतिमुपसंहरति। हे मरुतः देवाः ववृधानाः स्तुत्या वर्धमाना यूयं स्तोतॄन् नः अस्मान् सुभागान् सुधनान् कृणुत कुरुत। तथा सुरत्नान् शोभनरत्नान् कृणुत। यद्वा। सुरत्नान् शोभनरमणीयस्तोत्रानस्मानिति संबन्धनीयम्। किंच यूयं सख्यस्य स्तोत्रस्य सखिभूतं स्तोत्रम् अधि गात अधिगच्छत। वः युष्माकं रत्नधेयानि रत्नदानानि अस्मद्विषयाणि सनाद्धि चिरकालादारभ्य खलु सन्ति ॥ ॥ १३ ॥

'अपश्यम्' इति सप्तर्चमेकादशं सूक्तमाग्नेयं त्रैष्टुभम्। सौचीकगुणोऽग्निर्ऋषिर्वैश्वानरगुणो वाथवा सप्तिर्नाम वाजंभरपुत्रः। तथा चानुक्रान्तम्—'अपश्यं सप्त सौचीकोऽग्निर्वैश्वानरो वा सप्तिर्वा वाजंभर आग्नेयं तु' इति। प्रातरनुवाकाश्विनशस्त्रयोश्चैष्टुभे छन्दसीदमादिके द्वे सूक्ते। सूत्रितं च—'अपश्यमस्य महत इति सूक्ते' (आश्व. श्रौ. ४. १३) इति ॥

अपश्यमस्य महतो महित्वममर्त्यस्य मर्त्यासु विक्षु।
नाना हनू विभृते सं भरेते असिन्वती बप्सती भूर्यत्तः ॥ १ ॥

अपश्यम्। अस्य। महतः। महिऽत्वम्। अमर्त्यस्य। मर्त्यासु। विक्षु।
नाना। हनू इति। विऽभृते इति विऽभृते। सम्। भरेते इति।
असिन्वती इति। बप्सती इति। भूरि। अत्तः ॥ १ ॥

अस्य अग्नेः महतः महनीयस्य महिस्वं महत्त्वम् अपश्यं पश्यामि। कीदृशस्यास्य। मर्त्यासु विक्षु मनुष्यरूपासु प्रजासु तासां हृदये अमर्त्यस्य अमरणस्वभावस्य वैश्वानररूपेण वर्तमानस्य। यद्वा। मर्त्यासु विक्ष्वृत्विग्यजमानरूपासु प्रजास्वमर्त्यस्य सर्वदा जागरितस्य। अथ दावाग्निरूपोऽग्निरुच्यते। अस्याग्नेः हनू शिप्रे नाना विभृते विभिन्ने सं भरेते संभरतो दन्तैः। तथा कृत्वा असिन्वती असंखादन्त्यौ स्तोतारं बप्सती भक्षयन्त्यौ भूरि प्रभूतं काष्ठमरण्ये वर्तमानम् अत्तः भक्षयतः ॥

गुहा शिरो निहितमृधग्रक्षी असिन्वन्नत्ति जिह्वया वनानि।
अत्राण्यस्मै पड्भिः सं भरन्त्युत्तानहस्ता नमसाधि विक्षु ॥ २ ॥

---

१. ग-त-भ१.२.४.६.८-यज्ञस्य सेवितारो।

गुहा । शिरः । निऽहितम् । ऋधक् । अक्षी इति । असिन्वन् । अत्ति । जिह्वया । वनानि । अत्राणि । अस्मै । पट्ऽभिः । सम् । भरन्ति । उत्तानऽहस्ताः । नमसा । अधि । विक्षु ॥२॥

अस्याग्नेः [v]शिरः मूर्धा [v]गुहा गुहायां [v]निहितं मनुष्योदरेषु वर्तते । अस्य [v]अक्षी अक्षिणी [v]ऋधक् पृथग्निहितं निहिते चन्द्रसूर्यात्मना । तावेवाक्षिणी इत्यर्थः । ईदृशो योऽग्निः [v]असिन्वन् दन्तैरसंस्खादन् [v]जिह्वया [v]वनानि [v]अत्ति काष्ठानि भक्षयति दाहभूतः [v]अस्मै अग्नयेऽध्वर्यवादयः [v]पट्भिः पादैरभिगत्य [v]अत्राणि[1] [v]सं [v]भरन्ति संपादयन्ति हवींषि । कथंभूताः । [v]उत्तानहस्ताः पात्रधारणार्थमुन्नतकराः [v]नमसा नमस्कारेण युक्ताः । कुत्र । [v]अधि [v]विक्षु प्रजास्वृत्विक्षु मध्ये ॥

प्र मातुः प्रतरं गुह्यमिच्छन् कुमारो न वीरुधः सर्पदुर्वीः ।
ससं न पक्वमविदच्छुचन्तं रिरिह्वांसं रिप उपस्थे अन्तः ॥ ३ ॥

प्र । मातुः । प्रऽतरम् । गुह्यम् । इच्छन् । कुमारः । न । वीरुधः । सर्पत् । उर्वीः ।
ससम् । न । पक्वम् । अविदत् । शुचन्तम् । रिरिह्वांसम् । रिपः । उपऽस्थे । अन्तरिति ॥३॥

अयमग्निः [v]मातुः पृथिव्याः संबन्धिनीः [v]उर्वीः बह्वीः [v]वीरुधः लताः [v]इच्छन् तथा [v]प्रतरं प्रकृष्टतरं [v]गुह्यं गोप्यं तासां वीरुधां मूलमपीच्छन् कामयमानः [v]प्र [v]सर्पत् प्रसर्पति प्रसरति । किमिव । [v]कुमारो [v]न कुमार इव । स यथा स्तन्यं पातुं जानुभ्यां सर्पति तद्वत् । [v]ससं [v]न [v]पक्वं पक्वमन्नमिव [v]शुचन्तं दीप्यमानं नीरसं वृक्षं [v]रिपः पृथिव्याः [v]उपस्थे [v]अन्तः उत्सङ्गेऽन्तः [v]अविदत् विन्दति । पुनः कीदृशम् । [v]रिरिह्वांसम् आकाशमास्वादयन्तम् । यद्वा । मूलैर्मातरं पृथिवीं रिरिह्वांसम् ॥

तद्वामेतं रोदसी प्र ब्रवीमि जायमानो मातरा गर्भो अत्ति ।
नाहं देवस्य मर्त्यश्चिकेताग्निरङ्ग विचेताः स प्रचेताः ॥ ४ ॥

तत् । वाम् । ऋतम् । रोदसी इति । प्र । ब्रवीमि । जायमानः । मातरा । गर्भः । अत्ति ।
न । अहम् । देवस्य । मर्त्यः । चिकेत । अग्निः । अङ्ग । विऽचेताः । सः । प्रऽचेताः ॥४॥

हे [v]रोदसी द्यावापृथिव्यौ [v]वां युवां [v]तत् [v]ऋतं सत्यं [v]प्र [v]ब्रवीमि यदरणीभ्यां [v]जायमानः उत्पन्नः [v]गर्भः गर्भस्थानीयोऽग्निः [v]मातरा अरणी [v]अत्ति भक्षयति । [v]देवस्य द्योतनादिगुणस्याग्नेः[2] वर्तनं [v]मर्त्यः मनुष्यः [v]अहं [v]न [v]चिकेत न जानामि । हे [v]अङ्ग वैश्वानर [v]अग्निः अरणीभ्यामुत्पन्नः [v]विचेताः विविधज्ञानवान् [v]स [v]प्रचेताः[3] प्रकृष्टज्ञानः[4] । अतो न जानामीत्यर्थः । अथवाङ्गेत्यात्मानमेव संबोध्य ब्रवीमि । अग्निरेव विचेताः बहुधा जानाति स प्रचेताः[4] स एव जानाति । स्वमहिमानं नाहं स्तोतुं प्रभवामीत्यर्थः ॥

यो अस्मा अन्नं तुव्राधदात्याज्यैर्घृतैर्जुहोति पुष्यति ।
तस्मै सहस्रमक्षभिर्वि चक्षेऽग्ने विश्वतः प्रत्यङ्ङसि त्वम् ॥ ५ ॥

---

१. ग-त-भ-'अत्राणि' नास्ति । २. त१.२.३.६.७.८-भ४.६.८-मु-द्योतमानादिगुणस्याग्नेः; त४.५-द्योतमानस्याग्नेः; भ१.२.७-दानादिगुणस्याग्नेः । ३. ग-त-प्रचेताः स एव । ४. भ-'प्रकृष्टज्ञानः ... प्रचेताः' नास्ति ।

यः । अस्मै । अन्नम् । तृषु । आऽदधाति । आज्यैः । घृतैः । जुहोति । पुष्यति ।
तस्मै । सहस्रम् । अक्षऽभिः । वि । चक्षे । अग्ने । विश्वतः । प्रत्यङ् । असि । त्वम् ॥ ५ ॥

[v]यः यजमानः [v]अस्मै अग्नये [v]तृषु क्षिप्रम् [v]अन्नम् [v]आदधाति करोति [v]आज्यैर्घृतैः क्षरद्रूपैः[1] दीप्तैर्वा सोमरसैः [v]जुहोति [v]पुष्यति पुष्णाति चैनं काष्ठैः [v]तस्मै । तमित्यर्थः । तं [v]सहस्रं सहस्र-संख्याकैः [v]अक्षभिः अक्षिस्थानीयाभिरपरिमिताभिर्ज्वालाभिः [v]वि [v]चक्षे विचष्टे[2] विपश्यति[2] । अथ प्रत्यक्षकृतः । हे [v]अग्ने [v]त्वं [v]विश्वतः सर्वतः [v]प्रत्यङ्ङसि प्रत्यगञ्चनो भवसि । अस्मदानुकूल्येन प्रवर्तमानो[3] भवसि ॥

किं देवेषु त्यज एनश्चकर्थाग्ने पृच्छामि नु त्वामविद्वान् ।
अक्रीळन् क्रीळन् हरितेवेऽदन्वि पर्वशश्चकर्त गामिवासिः ॥ ६ ॥

किम् । देवेषु । त्यजः । एनः । चकर्थ । अग्ने । पृच्छामि । नु । त्वाम् । अविद्वान् ।
अक्रीळन् । क्रीळन् । हरितः । अत्तवे । अदन् ।
वि । पर्वऽशः । चकर्त । गाम्ऽइव । असिः ॥ ६ ॥

हे [v]अग्ने [v]त्वां [v]नु क्षिप्रं [v]देवेषु [v]किं [v]त्यजः क्रोधम् [v]एनः पापं च[4] [v]चकर्थ कृतवानसीति [v]अविद्वान् अहं [v]पृच्छामि । खाण्डवं दहन्तमग्निं पृच्छामि । किंच [v]अक्रीळन् क्वचिद्देशेऽविहरन् [v]क्रीळन् क्वचिद्देशे विनोदयन्लीलया दहन् [v]हरितः हरितवर्णः सन् [v]अत्तवे अत्तव्यम् [v]अदन् अन्नकाष्ठादिकं [v]पर्वशः संधौ संधौ [v]वि [v]चकर्थ विविधं करोषि । [v]गामिवासिः गां यथा असिः स्वधितिः पर्वशश्छिनत्ति तद्वत् ॥

विषूचो अश्वान्युयुजे वनेजा ऋजीतिभी रशनाभिर्गृभीतान् ।
चक्षदे मित्रो वसुभिः सुजातः समानृधे पर्वभिर्वावृधानः ॥ ७ ॥

विषूचः । अश्वान् । युयुजे । वनेऽजाः । ऋजीतिऽभिः । रशनाभिः । गृभीतान् ।
चक्षदे । मित्रः । वसुऽभिः । सुऽजातः । सम् । आनृधे । पर्वऽभिः । ववृधानः ॥ ७ ॥

अयमग्निः [v]विषूचः विष्वगञ्चनान् [v]अश्वान् व्याप्तान् महतो वृक्षान् सर्वतो गन्तॄनश्वानेव वा [v]युयुजे युङ्क्ते [v]वनेजाः वने प्रवृद्धः संपन्नः सन् । कीदृशानश्वान् । [v]ऋजीतिभिः ऋजुगामिनीभिः [v]रशनाभिः रशनास्थानीयाभिर्लताभिः [v]गृभीतान्[5] परिगृहीतान् वेष्टितान् । साक्षादश्वपक्षे ऋजुगतिभिः[6] प्रसिद्धाभी रशनाभिर्गृभीतान् गृहीतान् स्वकीयानश्वान् शीघ्रदाहाय रथे योजितवानित्यर्थः । तादृशोऽग्निः [v]चक्षदे चक्षाद[7] शकलीकरोति वसूनि [v]मित्रः अस्माकं मित्रभूतः [v]वसुभिः वासकैः रश्मिभिः [v]सुजातः सुष्ठु प्रवृद्धः सन् । किंच [v]समानृधे सम्यग्वर्धते [v]पर्वभिः काष्ठखण्डैः [v]वावृधानः वर्धमानः ॥ ॥ १२ ॥

---

१. त-भ-अक्षरद्रूपैः । २. त१.२-विचक्षे विपश्यति; त३.६.८-भ६.८-विचष्टे विपश्यति; त४.५-विचष्टे; भ१.२.४.७-विचष्टे पश्यति । ३. त२.३.६.७.८-भ४.६.८-प्रवर्तनो । ४. ग-त-भ-' च ' नास्ति । ५. त-भ-'गृभीतान्' नास्ति । ६. ग-ऋजुगंत्रीभिः; त१.२.३-भ-ऋजुगतित्रीभिः । ७. ग-त-भ-' चक्षाद ' नास्ति ।

'अग्निः सप्तिम्' इति सप्तर्चं द्वादशं सूक्तं सौचीकस्य वैश्वानरस्याग्नेरार्षं त्रैष्टुभमाग्नेयम्। 'अग्निः सप्तिम्' इत्यनुक्रान्तम्। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिःष्ठाम्।
अग्नी रोदसी वि चरत्समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरंधिम् ॥ १ ॥

अग्निः। सप्तिम्। वाजम्ऽभरम्। ददाति। अग्निः। वीरम्। श्रुत्यम्। कर्मनिःऽस्थाम्।
अग्निः। रोदसी इति। वि। चरत्। सम्ऽअञ्जन्।
अग्निः। नारीम्। वीरऽकुक्षिम्। पुरम्ऽधिम् ॥ १ ॥

अयम् vअग्निः vसप्तिं सर्पणस्वभावमश्वं vवाजंभरं युद्धे शत्रून् जित्वान्नसंपादकं vददाति स्तोतृभ्यः। तथा vअग्निर्वीरं वीर्यवन्तं पुत्रं vश्रुत्यं पितृव्यपदेशकं vकर्मनिःष्ठां यागेऽनन्यचित्तं ददाति। vअग्नी vरोदसी द्यावापृथिव्यौ vसमञ्जन् सम्यगञ्जयन् vवि vचरत् विविधं चरति। अयम् vअग्निर्नारीं योषितं vवीरकुक्षिं वीरप्रसवकुक्षिं vपुरंधिं च करोति ॥

अग्नेरग्नसः समिदस्तु भद्राग्निर्मही रोदसी आ विवेश।
अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि ॥ २ ॥

अग्नेः। अग्नसः। सम्ऽइत्। अस्तु। भद्रा। अग्निः। मही इति। रोदसी इति। आ। विवेश।
अग्निः। एकम्। चोदयत्। समत्ऽसु। अग्निः। वृत्राणि। दयते। पुरूणि ॥ २ ॥

vअग्नसः कर्मवतः vअग्नेः vसमित् vभद्रा vअस्तु। अयम् vअग्निः vमही महत्यौ[1] vरोदसी द्यावापृथिव्यौ vआ vविवेश आविष्टवान् स्वतेजसा। तथायम् vअग्निरेकम् असहायमेव vचोदयत् चोदयति प्रेरयति vसमत्सु संग्रामेषु[2]। युद्धे स्वभक्तं स्वयं सहायः सन् जयिनं करोतीत्यर्थः। तथा vअग्निर्वृत्राणि vपुरूणि बहून् शत्रून् vदयते हन्ति ॥

अग्निर्ह त्यं जरितः कर्णमावाग्निरन्धो निरदहज्जरूथम्।
अग्निरत्रिं घर्म उरुष्यदन्तराग्निर्नृमेधं प्रजयासृजत्सम् ॥ ३ ॥

अग्निः। ह। त्यम्। जरितः। कर्णम्। आव। अग्निः। अत्ऽम्यः। निः। अदहत्। जरूथम्।
अग्निः। अत्रिम्। घर्मे। उरुष्यत्। अन्तः। अग्निः। नृऽमेधम्। प्रऽजया। असृजत्। सम् ॥३॥

vअग्निर्ह अयमग्निः खलु vत्यं तं प्रसिद्धं vजरतः vकर्णं जरत्कर्णनामानमृषिम् vआव ररक्ष। तथायम् vअग्निः vअत्म्यः vजरूथम् एतन्नामानमसुरम् vनिरदहत् निर्दग्धवान्। तथा vअग्निरत्रिं महर्षिं vघर्मे vअन्तः ऋक्षीसेऽवस्थितम् vउरुष्यत् ररक्ष। तथायम् vअग्निर्नृमेधम् एतन्नामकमृषिं vप्रजया पुत्रादिलक्षणया vसम् vअसृजत् संयुयोज[3] ॥

अग्निर्दाद्द्रविणं वीरपेशा अग्निर्ऋषिं यः सहस्रा सनोति।
अग्निर्दिवि हव्यमा ततानाग्नेर्धामानि विभृता पुरुत्रा ॥ ४ ॥

---

१. ग-त-म-मह्यौ। २. त१.२.३-म-संग्रामे। ३. ग-समयोजयत्।

अग्निः । दात् । द्रविणम् । वीरऽपेशाः । अग्निः । ऋषिम् । यः । सहस्रा । सनोति ।
अग्निः । दिवि । हव्यम् । आ । ततान । अग्नेः । धामानि । विऽभृता । पुरुऽत्रा ॥ ४ ॥

अयम् vअग्निः vवीरपेशाः प्रेरकज्वालारूपः vद्रविणं धनं vदात् ददाति । तथा vअग्निर्ऋषिं मन्त्रद्रष्टारं पुत्रं प्रयच्छतीति शेषः । ऋषिः[1] विशेष्यते । vयः ऋषिः vसहस्रा गवां सहस्राणि vसनोति भजते दक्षिणात्वेन तमृषिं ददातीति । तथा vअग्निः vदिवि द्युलोके vहव्यं यजमानैर्हुतम् vआ vततान देवेषु विस्तारयति । तथा vअग्नेर्धामानि शरीराणि vविभृता विभृतानि संभृतानि vपुरुत्रा बहुषु स्थानेष्वाहवनीयधिष्ण्यादिषु क्षित्यादिषु वा ॥

अग्निमुक्थैर्ऋषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः ।
अग्निं वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परि याति गोनाम् ॥ ५ ॥

अग्निम् । उक्थैः । ऋषयः । वि । ह्वयन्ते । अग्निम् । नरः । यामनि । बाधितासः ।
अग्निम् । वयः । अन्तरिक्षे । पतन्तः । अग्निः । सहस्रा । परि । याति । गोनाम् ॥ ५ ॥

vअग्निमुक्थैः शस्त्रैः vऋषयः पूर्वे vवि vह्वयन्ते विविधमाह्वयन्ति यज्ञे स्वीये । vअग्निं vनरः मनुष्याः vयामनि संग्रामे । यातिर्वधकर्मसु पठितः । vबाधितासः शत्रुभ्यो बाधिताः प्राप्नुवन्ति जयार्थम् । तथा vअग्निं vवयः पक्षिगः vअन्तरिक्षे vपतन्तः पश्यन्ति रात्रिषु । ' तस्मादिमां वयांसि नक्तं नाध्यासते ' (तै. सं. ५. ६. ४. ४) इति ब्राह्मणम् । यद्वा दावभूतमग्निमन्तरिक्षगा वयः पतन्ति । तथा vअग्निः vगोनां गवां vसहस्रा सहस्राणि vपरि परितः vयाति गच्छति ॥

अग्निं विशं ईळते मानुषीर्या अग्निं मनुषो नहुषो वि जाताः ।
अग्निर्गान्धर्वीं पथ्यामृतस्याग्नेर्गव्यूतिर्घृत आ निषत्ता ॥ ६ ॥

अग्निम् । विशः । ईळते । मानुषीः । याः । अग्निम् । मनुषः । नहुषः । वि । जाताः ।
अग्निः । गान्धर्वीम् । पथ्याम् । ऋतस्य । अग्नेः । गव्यूतिः । घृते । आ । निऽसत्ता ॥ ६ ॥

vअग्निं vविशः प्रजा ऋत्विग्यजमानलक्षणाः vईळते स्तुवन्ति । vयाः vमानुषीः मानुष्यो मनुष्याजाताः ता ईळते । तथा vअग्निं vमनुषः मनुष्याः vनहुषः राज्ञः सकाशात् vजाताः प्रजा विविधं स्तुवन्तीति । vअग्निर्गान्धर्वीम् । वाङ्नामैतत् । वाचं शृणोति । कीदृशीं गान्धर्वीम् । vऋतस्य यज्ञस्य vपथ्यां पथि हिताम् । vअग्नेः महात्मनः vगव्यूतिः मार्गः vघृते आज्ये[2] vआ vनिषत्ता सर्वतो निषण्णो भवति ॥

अग्नये ब्रह्म ऋभवस्तक्षुरग्निं महामवोचामा सुवृक्तिम् ।
अग्ने प्राव जरितारं यविष्ठाग्ने महि द्रविणमा यजस्व ॥ ७ ॥

अग्नये । ब्रह्म । ऋभवः । ततक्षुः । अग्निम् । महाम् । अवोचाम । सुऽवृक्तिम् ।
अग्ने । प्र । अव । जरितारम् । यविष्ठ । अग्ने । महि । द्रविणम् । आ । यजस्व ॥ ७ ॥

१. त४.५-स : । २. त-भ-आज्येन ।

vअग्नये vब्रह्म स्तोत्रम् vऋभवः मेधाविनः vततक्षुः अकुर्वन्। वयं च vमहां महान्तम् vअग्निं प्रति vसुवृक्तिं स्तुतिम् vअवोचाम। हे vयविष्ठ युवतम vअग्ने vजरितारं स्तोतारं vप्राव प्ररक्ष। हे vअग्ने vमहि महत् vद्रविणं धनम् vआ vयजस्व प्रयच्छेत्यर्थः। अत्र प्रतिवाक्यमन्यभिधानं तस्य स्तुत्यत्वप्रदर्शनार्थम्॥ ॥ १५ ॥

'य इमा' इति सप्तर्चं त्रयोदशं सूक्तं भुवनपुत्रस्य विश्वकर्मण आर्षं त्रैष्टुभं विश्वकर्मदेवत्यम्। तथा चानुक्रान्तं—'य इमा विश्वकर्मा भौवनो वैश्वकर्मणं तु' इति। गतः सूक्तविनियोगः। अत्र वाजसनेयकं—'ब्रह्म वै स्वयंभु तपोऽतप्यत। तदैक्षत न वै तपस्यानन्त्यमस्ति हन्ताहं भूतेष्वात्मानं जुहवानि भूतानि चात्मनीति तत्सर्वेषु भूतेष्वात्मानं हुत्वा' (श. ब्रा. १३. ७. १) इत्यादि॥

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश॥ १॥

यः। इमा। विश्वा। भुवनानि। जुह्वत्। ऋषिः। होता। नि। असीदत्। पिता। नः।
सः। आऽशिषा। द्रविणम्। इच्छमानः। प्रथमऽच्छत्। अवरान्। आ। विवेश॥ १॥

अत्र निरुक्तं—'विश्वकर्मा सर्वमेधे सर्वाणि भूतानि जुहवांचकार स आत्मानमप्यन्ततो जुहवांचकार। तदभिवादिन्येषगर्भवति य इमा विश्वा भुवनानि जुह्वदिति' (निरु. १०.२६) इति। vयः विश्वकर्मैतन्नामकः vऋषिः भुवनपुत्रः vहोता होमनिष्पादकः सन् vविश्वा सर्वाणि vभुवनानि vजुह्वत् होमं कुर्वन्। प्रथमं सर्वं जगद्धुत्वेत्यर्थः। पश्चादग्नौ vन्यसीदत् vपिता जनकः। आत्मकृतेन कर्मणा देहोत्पत्तेः। न चैकस्य जन्यजनकभावो विरुध्यते तपोबलेन शरीरद्वयस्वीकारात्। 'स एकधा भवति' (छा. उ. ७. २६. २) इत्यादिश्रुतेः। vसः ऋषिः vआशिषा आशीःप्रतिपादकेन सूक्तवाकादिना vद्रविणं धनं स्वर्गाख्यम् vइच्छमानः कामयमानः vप्रथमच्छत् प्रथममग्नेर्भुवनैराच्छादयिता vअवरान् विप्रकृष्टान् भूतान् स्वात्मनाहुतान् vआ[1] vविवेश आविष्टवानग्निमित्युक्तार्थ एव पुनर्विशेषेणोक्तः। एवमुत्तरत्राधियज्ञपरतया योज्यम्। अथाध्यात्मप्रसिद्ध्योच्यते। यो विश्वकर्मा[2] परमेश्वर इमा विश्वा भुवनानि जुह्वत् प्रलयकाले[3] पृथिव्यादीनिमान् सप्त लोकान् स्वात्मन्याहुतिप्रक्षेपवत्संहरन्नृषिरतीन्द्रियद्रष्टा सर्वज्ञो होता संहाररूपस्य होमस्य कर्ता नोऽस्माकं पिता जनको निषसाद स्वयं स्थितवान्। अयमर्थः। प्रलयकाले प्राप्ते सति सर्वाँल्लोकान् संहृत्यास्माकमपि संहर्ता पुनः स्रष्टा च सन् सर्वज्ञो यः परमेश्वरः स्वयमेक एवासीत्। तथा हि श्रुतयः—'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. आ. २. ४. १) 'सदेव सोम्येदमग्र आसीत्' (छा. उ. ६. २. १) इत्यादिकाः। स तादृशः परमेश्वर आशिषा 'बहुः[4] स्यां प्रजायेय' इत्येवंरूपया पुनःपुनः सिसृक्षया द्रविणमिच्छमानः धनोपलक्षितं जगद्भोगमाकाङ्क्षमाणः प्रथमच्छत् प्रथमं मुख्यं निष्प्रपञ्चं पारमार्थिकं रूपमावृण्वन्नवरान् स्वसृष्टान् प्राणिहृदयप्रदेशाना विवेश आविष्टवान् जीवरूपेण। तथा च श्रूयते—'सोऽकामयत बहुः स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किंच तत्सृष्ट्वा तदेवानुप्राविशात्' (तै. आ. ८. ६) इति। एवमन्या अप्युपनिषद उदाहार्याः॥

वैश्वदेवस्य पशोर्वपाया अनुवाक्या 'किं स्वित्' इत्येषा। सूत्रितं च—'किं स्विदासीदधिष्ठानं यो नः पिता जनिता' (आश्व. श्रौ. ३. ८) इति॥

१. त-भ-अन्वा। २. त-विश्वकर्ता। ३. त१.२.३-भ५.७-प्रथमकाले। ४. ग-त४.५.६.७-बहु।

किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् ।
यतो भूमिं जनयन्विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥ २ ॥

किम् । स्वित् । आसीत् । अधिऽस्थानम् । आऽरम्भणम् । कतमत् । स्वित् । कथा । आसीत् ।
यतः । भूमिम् । जनयन् । विश्वऽकर्मा । वि । द्याम् । और्णोत् । महिना । विश्वऽचक्षाः ॥२॥

पूर्वमन्त्रे जगत्प्रलयकाले संहृत्य पश्चात्सिसृक्षायां सर्वं सृष्ट्वा तत्र प्रविष्ट इत्युक्तम् । अत्र तस्य द्वितीयस्याधिष्ठानजगदुपादानकारणाद्यसंभवात्सृष्टिरनुपपन्नेत्याक्षिपति । लोके हि घटं चिकीर्षुः कुलालो गृहादिकं किंचित्स्थानमधिष्ठाय मृद्रूपेणारम्भद्रव्येण[1] चक्रादिरूपैरुपकरणैर्घटं निष्पादयति । तद्वदीश्वरस्य जगदाश्रयद्यावापृथिव्योरुत्पादनवेलायाम् vअधिष्ठानं vकिं vस्विदासीत् किं नामाभूत् । न किंचिदित्यर्थः । तथा तयोः vआरम्भणं vकतमत्स्वित्[2] । आरम्भ्यतेऽनेनेत्यारम्भणमुपादानकारणम् । तदपि कतमदासीत् । तदपि नेत्यर्थः । यद्यपि संभवेदारम्भणं[3] vकथासीत् कथमभूत् । किं स्वयं सदसद्वा भवेदित्यर्थः । उभयमपि नोपपद्यते । सच्चेदद्वैतभङ्गप्रसङ्गः । असच्चेत् सदात्मकयोर्द्यावापृथिव्योरुपादानानर्हत्वात् ' नान्यत्किंचन मिषत् ' (ऐ. आ. २. ४. १) इति श्रुतेश्चेत्यभिप्रायः । vयतः यस्मादधिष्ठानादारम्भणाच्च vविश्वचक्षाः[4] सर्वद्रष्टा vविश्वकर्मा परमेश्वरः vभूमिं vजनयन् वर्तते तथा vद्यां दिवं vवि vऔर्णोत् व्यवृणोत् सृष्टवान् vमहिना स्वमहत्त्वेन[5] । किं स्विदासीदिति[6] ॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन्देव एकः ॥ ३ ॥

विश्वतःऽचक्षुः । उत । विश्वतःऽमुखः । विश्वतःऽबाहुः । उत । विश्वतःऽपात् ।
सम् । बाहुऽभ्याम् । धमति । सम् । पतत्रैः । द्यावाभूमी इति । जनयन् । देवः । एकः ॥३॥

अनया सर्वात्मकत्वेन कुलालादिविलक्षणत्वादधिष्ठानाद्यभावेऽपि स्रष्टुं शक्नोतीत्याह । vविश्वतश्चक्षुः सर्वतो व्याप्तचक्षुः । vउत अपि च vविश्वतोमुखः । तथा[6] vविश्वतोबाहुः । vउत अपि च vविश्वतस्पात् । स एवंविधः परमेश्वरः स्वस्मिन्नैलोक्यमुत्पादयतीत्यर्थः । कथमिति उच्यते । vबाहुभ्यां दिवं vसं vधमति । धमतिर्गतिकर्मा । सम्यक्प्रेरयति । तथा vपतत्रैः गमनशीलैः पादैः पृथिवीं vसं धमतीति । उभयोरेव श्रवणं प्राधान्याभिप्रायम् । एवं vद्यावाभूमी[7] vजनयन् दिवं च पृथिवीं चोत्पादयन् vदेवः द्योतमानः स्वयंप्रकाशः परमेश्वरः vएकः असहाय एव वर्तते ॥

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥ ४ ॥

किम् । स्वित् । वनम् । कः । ऊँ इति । सः । वृक्षः । आस ।
यतः । द्यावापृथिवी इति । निःऽततक्षुः । मनीषिणः । मनसा । पृच्छत । इत् । ऊँ इति । तत् ।
यत् । अधिऽअतिष्ठत् । भुवनानि । धारयन् ॥ ४ ॥

---

१. ग-त-°णारंभकद्रव्येण । २. ग-त-भ२.६—कतमत्स्विदासीत् । ३. ग-त-भ२.६.८—संभवदारंभणं । ४. ग-त-भ—भूमिं विश्वचक्षाः । ५. भ७—स्वमहत्त्वेन स्वरूपेण किं पदार्थं रूपोभूदिति प्रश्नार्थः । न किंस्विदासीदिति । ६. ग-त१.२.३.६.७.८-भ—स तथा । ७. ग-त६.८—द्यावापृथिवीं; त-भ२.४.५—द्यां पृथिवीं; भ७—द्यावापृथिवी ।

विश्वऽकर्मा । विऽमनाः । आत् । विऽहायाः । धाता । विऽधाता । परमा । उत । सम्ऽदृक् ।
तेषाम् । इष्टानि । सम् । इषा । मदन्ति । यत्र । सप्तऽऋषीन् । परः । एकम् । आहुः ॥ २ ॥

अयं मन्त्रोऽधियज्ञाध्यात्मयोर्भेदेन द्विधा व्याख्येयः । तत्र प्रथमं दैवतमधिकृत्योच्यते । vविश्वकर्मा बहुविधप्रकाशवृष्टिप्रदानादिकर्मणां कर्तादित्यः स च vविमनाः विभूतमनाः । vआत् इत्यनर्थकः सर्वत इत्यर्थे वा । vविहायाः विविधमासा । महानित्यर्थः । vधाता वृष्ट्यादिकर्ता च vविधाता जगतः कर्ता च vपरमा परमः vसंदृक् संद्रष्टा च भूतानाम् । vतेषां सप्तर्षीणाम्[1] । ज्योतिषां रश्मीनामित्यर्थः । चरमपादे वक्ष्यमाणत्वात्[2] । vइष्टानि स्थानानि शरीराणि वा vइषा उदकेन vसं vमदन्ति संमोदन्ते vयत्र यस्मिन्नादित्ये ते देवं vसप्तर्षीन् । सप्तर्षिभ्य इत्यर्थः । तेभ्यः vपरः परस्तात् vएकम् एव आदित्यम् vआहुः मन्त्रविदः । अध्यात्मपक्ष उच्यते । विश्वकर्मा यः परमात्मा प्राणप्रकाशाभ्यामुपेतः सन् बहुकर्मा भवति । स च विमना विभूतमना विहाया वस्तुतो महान् विशेषेण सुकृतदुष्कृतफलस्यासा धाता विधाता च परमोत संदृक् परमश्च संद्रष्टेन्द्रियाणाम् । तेषां सप्तर्षीणां द्रष्टृणामिन्द्रियाणामिष्टानि स्वरूपाणीषान्नेन सह सं मदन्ति संमोदन्ते यत्र यस्मिन्नात्मनि तमात्मानं सप्तर्षीन् सप्तसंख्याकेभ्यः सर्पणस्वभावेभ्यो वा परः परस्ताद्वर्तमानमिन्द्रियाद्यतीतमेकं परमात्मानमाहुस्तत्त्वविदः । अत्र ' विश्वकर्मा विभूतमना व्यासा ' (निरु. १०. २६) इत्यादि निरुक्तमनुसंधेयम् ॥

पूर्वोक्त एव पशौ पुरोडाशस्य ' यो नः पिता ' इत्येषा याज्या । सूत्रितं च—' यो नः पिता जनिता यो विधाता या ते धामानि परमाणि यावमा ' (आश्व. श्रौ. ३. ८) इति ॥

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तं सम्प्रश्नं भुवना यन्त्यन्या ॥ ३ ॥

यः । नः । पिता । जनिता । यः । विऽधाता । धामानि । वेद । भुवनानि । विश्वा ।
यः । देवानाम् । नामऽधाः । एकः । एव । तम् । सम्ऽप्रश्नम् । भुवना । यन्ति । अन्या ॥३॥

vयः विश्वकर्मा vनः अस्माकं vपिता पालयिता । न केवलं पालकः किंतु vजनिता उत्पादकः । किमनेनास्माकमुत्पादक इति संकोचेन । vयो vविधाता सर्वस्य जगत उत्पादको यो विश्वकर्मा नोऽस्माकमुत्पन्नानि vधामानि देवानां तेजःस्थानानि vवेद वेत्ति । किं बहुना । vविश्वा विश्वानि vभुवना भूतजातानि वेद वेत्ति । vयः च vदेवानाम् अग्निवाय्वादीनां vनामधाः नाम्नां धाता इन्द्रादीन्निर्माय तेषामिन्द्रादि नाम कृत्वा तत्तत्पदेषु स्थापयिता vएक vएव । vतं देवम् vअन्या अन्यानि vभुवना भूतजातानि vप्रश्नं कः परमेश्वर इति पृच्छां vयन्ति प्राप्नुवन्ति ॥

त आयजन्त द्रविणं समस्मा ऋषयः पूर्वे जरितारो न भूना ।
असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥ ४ ॥

ते । आ । अयजन्त । द्रविणम् । सम् । अस्मै । ऋषयः । पूर्वे । जरितारः । न । भूना ।
असूर्ते । सूर्ते । रजसि । निऽसत्ते । ये । भूतानि । सम्ऽअकृण्वन् । इमानि ॥ ४ ॥

---

१. त–सप्तर्षीणां सप्तार्षाणां । २. ग४–त–म२.४.८–व्याचक्षमाणत्वात् ; भ७–व्याख्यानत्वात् ।

vते vपूर्वे vऋषयः vअस्मै विश्वकर्मणे vद्रविणं चरुपुरोडाशादिलक्षणं[1] धनं vसं सम्यक् vआयजन्त सर्वतो यजन्ते। vजरितारो vन vभूना स्तोतारो यथा भूम्ना महता स्तोत्रेण[2] यजन्ति तद्वत्। vये महर्षयः vअमूर्ते सरणवर्जिते vमूर्ते सरणसहिते स्थावरजङ्गमात्मके vरजसि लोके vनिषत्ते निषण्णे निश्चलमवस्थिते vइमानि vभूतानि भुवनानि। प्राणिन इत्यर्थः। vसमकृण्वन् सम्यग्धनादिनापूजयन्। अथवायमर्थः। ये स्थावरजङ्गमात्मके जगति वर्तमानानेतान् प्राणिनस्तेजसा समकृण्वन् ते[3] पूर्वे ऋषयो द्रष्टारो रश्मयोऽस्मा आदित्यात्मकाय विश्वकर्मणे द्रविणं तेज आयजन्त॥

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति।
कं स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समपश्यन्त विश्वे ॥ ५ ॥

परः। दिवा। परः। एना। पृथिव्या। परः। देवेभिः। असुरैः। यत्। अस्ति।
कम्। स्वित्। गर्भम्। प्रथमम्। दध्रे। आपः। यत्र। देवाः। सम्ऽअपश्यन्त। विश्वे॥५॥

यदीश्वरतत्त्वं vदिवा vपरः द्युलोकादपि परस्ताद्वर्तमानं तथा vएना अस्याः vपृथिव्याः vपरः परस्ताद्वर्तमानं तथा vदेवेभिः देवैः[4] परस्ताद्वर्तमानम् vअसुरैः परस्ताद्वर्तमानं[4] च vयदस्ति तद्गुहायामवस्थितं vकं vस्विद्गर्भं गर्भवत्सर्वस्य ग्राहकं तत्त्वम् vआपः vप्रथमं vदध्रे धृतवत्यः। vयत्र यस्मिन् गर्भे vदेवाः इन्द्रादयः vविश्वे सर्वेऽपि vसमपश्यन्त संगताः परस्परं पश्यन्ति। एवं जानन्नेव कश्चित्तत्त्ववित्प्रश्नं करोति॥

तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे।
अजस्य नाभावध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥ ६ ॥

तम्। इत्। गर्भम्। प्रथमम्। दध्रे। आपः। यत्र। देवाः। सम्ऽअगच्छन्त। विश्वे।
अजस्य। नाभौ। अधि। एकम्। अर्पितम्। यस्मिन्। विश्वानि। भुवनानि। तस्थुः॥ ६॥

अनया पूर्वमन्त्रोक्तस्य प्रश्नस्योत्तरमभिधीयते। vतमित् तमेव विश्वकर्माणं vगर्भं गर्भस्थानीयं vप्रथमम् इतरसृष्टेः पूर्वम् vआपः vदध्रे धृतवत्यः। vयत्र गर्भे vविश्वे सर्वे vदेवाः इन्द्रादयः vसमगच्छन्त[5] संगता भवन्ति। तस्य vअजस्य vनाभावधि नाभौ। अधीति सप्तम्यर्थानुवादी। vएकमर्पितम् इत्यण्डाभिप्रायेणोक्तम्। अण्डं हि प्राक्सर्गान्नाभिस्थाने तिष्ठति। vयस्मिन् अण्डे vविश्वानि vभुवनानि सर्वाणि भूतजातानि vतस्थुः तिष्ठन्ति। अथवा। अजस्य जन्मरहितस्य ब्रह्मणः स्वसृष्टे जले शयानस्य नाभौ सर्वजगद्बन्धक उदक एकं ब्रह्माण्डमर्पितं स्थापितम्। शिष्टं समानम्। अथास्मिन्नर्थे स्मृतिः—'अप एव ससर्जादौ तासु वीर्यमवाकिरत्। तदण्डमभवद्धैमं सूर्यकोटिसमप्रभम्' (मनु. १.८-९) इति॥

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव।
नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति ॥ ७ ॥

न। तम्। विदाथ। यः। इमा। जजान। अन्यत्। युष्माकम्। अन्तरम्। बभूव।
नीहारेण। प्रावृताः। जल्प्या। च। असुऽतृपः। उक्थऽशासः। चरन्ति॥ ७॥

---

१. ग४-त-भ६.८—चपुरोडाशा°। २. त-भ—स्तोत्रेण यथा। ३. त-भ—'ते' नास्ति। ४. त-भ—देवैरसुरैश्च यत्परः परस्ताद्वर्तमानं। ५. त-भ—समगच्छंति।

हे नराः [v]तं विश्वकर्माणं [v]न [v]विदाथ न जानीथ [v]य [v]इमा इमानि भूतानि [v]जजान उत्पादितवान्। देवदत्तोऽहं यज्ञदत्तोऽहमिति वयमात्मानं विश्वकर्माणं जानीम इति यदुच्येत तदसत् न ह्यहंप्रत्ययगम्यं जीवरूपं विश्वकर्मणः परमेश्वरस्य तत्त्वं किंतु [v]युष्माकम् अहंप्रत्ययगम्यानां जीवानाम् [v]अन्तरम् [v]अन्यत् अहंप्रत्ययगम्यादतिरिक्तं सर्ववेदान्तवेद्यमीश्वरतत्त्वं [v]बभूव भवति विद्यते। जीवरूपवत्तदपि कुतो न विद्म इति चेत् श्रूयताम्। [v]नीहारेण [v]प्रावृताः यूयं नीहारसदृशेनाज्ञानेनाच्छन्नाः। अतो न जानीथ। यथा नीहारो नात्यन्तमसन् दृष्टेरावरकत्वात् नाप्यत्यन्तं सन् काष्ठपाषाणादिरूपान्तरेण संबन्धुमयोग्यत्वात् एवमज्ञानमपि नात्यन्तमसदीश्वरतत्त्वावरकत्वात् नापि सत् बोधमात्रनिवर्त्यत्वात्। ईदृशेनाज्ञानेन भवन्तः सर्वे जीवाः प्रावृताः। न केवलं प्रावृतत्वं किंतु [v]जह्व्या [v]च देवोऽहं मनुष्योऽहमित्याद्यनृतजल्पनेन प्रावृताः। किंच [v]असृतृपः केनाप्युपायेन असून्प्राणांस्तृप्यन्तः। उदरंभरा इत्यर्थः। न तु पारमेश्वरं तत्त्वं विचारितवन्तः। न केवलमिहलोकभोगमात्रतृप्ताः [v]उक्थशासः नानाविधेषु यज्ञेषु उक्थं प्रउगनिष्केवल्यादिकं शंसन्तः [v]चरन्ति पृथिव्यां वर्तन्ते। केवलमैहिकामुष्मिकभोगपरा वर्तध्वेऽतो विश्वकर्माणं देवं न जानीथेत्यर्थः॥ ॥ १७ ॥

'यस्ते मन्यो' इति सप्तर्चं पञ्चदशं सूक्तम्। मन्युर्नाम तपसः पुत्र ऋषिः। आद्या जगती शिष्टास्त्रिष्टुभः। इदमुत्तरं च मन्युदेवत्यम्। तथा चानुक्रान्तं—'यस्ते मन्यो मन्युस्तापसो मान्यवं तु जगत्यादि' इति। अजिरनाम्न्यभिचारसाधने यज्ञ एतत्सूक्तं निविद्धानम्। सूत्रितं च—'त्वया मन्यो यस्ते मन्यो' (आश्व. श्रौ. ९. ७) इति॥

यस्ते॑ म॒न्योऽवि॑धद्वज्र सायक॒ सह॒ ओजः॑ पुष्यति॒ विश्व॑मानुषक्।
साह्या॑म॒ दास॒मार्यं॒ त्वया॑ यु॒जा सह॑स्कृतेन॒ सह॑सा॒ सह॑स्वता॥ १॥

यः। ते। म॒न्यो इति॑। अवि॑धत्। व॒ज्र॒। सा॒यक॒। सहः॑। ओजः॑। पु॒ष्य॒ति॒। विश्व॑म्। आ॒नु॒षक्। सह्या॑म। दास॑म्। आर्य॑म्। त्वया॑। यु॒जा। सहः॑ऽकृतेन। सह॑सा। सह॑स्वता॥ १॥

हे [v]मन्यो क्रोधाभिमानिन् देव। 'मन्युर्मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वधकर्मणो वा' (निरु. १०. २९) इति निरुक्तम्। [v]यः यजमानः [v]ते तुभ्यम् [v]अविधत् परिचरति हे [v]वज्र वज्रवत्सारभूत [v]सायक सायकवच्छत्रूणां हिंसक स मनुष्यः [v]सहः बलं बाह्यम् [v]ओजः शारीरं बलं च [v]आनुषक् अनुषक्तं [v]पुष्यति त्वदनुग्रहात्संग्रामे। यस्मादेवं तस्माद्वयं [v]दासम् उपक्षयकर्तारम् [v]आर्यम् अस्मत्तोऽधिकं चोभयविधं शत्रुं [v]साह्याम अभिभवेम। केन साधनेनेति तदुच्यते। [v]त्वया [v]युजा त्वया सहायेन। सहायो विशेष्यते। [v]सहस्कृतेन बलोत्पादितेन [v]सहसा सहमानेन परान् [v]सहस्वता बलवता। ईदृशेन त्वया[1] सहायेनेत्यर्थः[2]॥

म॒न्युरिन्द्रो॑ म॒न्युरे॒वास॑ दे॒वो म॒न्युर्होता॒ वरु॑णो जा॒तवे॑दाः।
म॒न्युं विश॑ ईळते मानु॒षीर्याः पा॒हि नो॑ मन्यो तप॒सा स॒जोषाः॥ २॥

म॒न्युः। इन्द्रः॑। म॒न्युः। ए॒व। आ॒स॒। दे॒वः। म॒न्युः। होता॑। वरु॑णः। जा॒तऽवे॑दाः।
म॒न्युम्। विशः॑। ई॒ळ॒ते॒। मा॒नु॒षीः। याः। पा॒हि। नः॒। म॒न्यो इति॑। तप॒सा। स॒ऽजोषाः॥२॥

अयं [v]मन्युरिन्द्रः [v]मन्युरेव [v]देवः सर्वोऽपि मन्युरेव [v]आस अभवत्। [v]मन्युः एव [v]होता होमनिष्पादकोऽग्निः। तथा मन्युः [v]वरुणः अपि [v]जातवेदाः जातप्रज्ञो वरुणश्च। सर्वेष्वपि तेजस्विषु

---

१. ग४-त-म२.६—महता त्वया; भ१.४.८—मता त्वया। २. म-त-म२.६—सहायेनाभिभवेमेत्यर्थः।

मन्युसन्नावात्। [v]याः [v]मानुषीः मनुषोऽपत्यभूताः [v]विशः प्रजाः सन्ति ताः [v]मन्युं एव देवम् [v]ईळते स्तुवन्ति। हे [v]मन्यो [v]तपसा एतन्नामकेनास्मत्पित्रा [v]सजोषाः समानप्रीतिस्त्वं [v]पाहि रक्ष ॥

अभीहि मन्यो तवसस्तवीयान् तपसा युजा वि जहि शत्रून्।
अमित्रहा वृत्रहा दस्युहा च विश्वा वसून्या भरा त्वं नः ॥ ३ ॥

अभि। इहि। मन्यो इति। तवसः। तवीयान्। तपसा। युजा। वि। जहि। शत्रून्।
अमित्रऽहा। वृत्रऽहा। दस्युऽहा। च। विश्वा। वसूनि। आ। भर। त्वम्। नः ॥ ३ ॥

हे [v]मन्यो त्वम् [v]अभीहि अभिगच्छास्मद्यज्ञम्। कीदृशस्त्वम्। [v]तवसः बलवतोऽपि [v]तवीयान् अत्यन्तं बलवान्। स त्वं [v]तपसा अस्मत्पित्रा [v]युजा सहायेन [v]शत्रून् [v]वि [v]जहि। किंच [v]अमित्रहा अमित्राणां हन्ता। अमित्रोऽस्निग्धः। तथा [v]वृत्रहा आवरकाणां शत्रूणां हन्ता तथा [v]दस्युहा [v]च। दस्युरुपक्षपणकारी शत्रुः। तादृश मन्युदेव [v]त्वं [v]विश्वा सर्वाणि [v]वसूनि धनानि [v]नः अस्मभ्यम् [v]आ [v]भर आहर ॥

त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अभिमातिषाहः।
विश्वचर्षणिः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ॥ ४ ॥

त्वम्। हि। मन्यो इति। अभिभूतिऽओजाः। स्वयम्ऽभूः। भामः। अभिमातिऽसहः।
विश्वऽचर्षणिः। सहुरिः। सहावान्। अस्मासु। ओजः। पृतनासु। धेहि ॥ ४ ॥

हे [v]मन्यो [v]त्वम् [v]अभिभूत्योजाः परेषामभिभावुकबलः [v]स्वयंभूः स्वयमेवोत्पन्नः [v]भामः क्रुद्धः [v]अभिमातिषाहः। अभितो हिंसन्तीत्यभिमातयः शत्रवः। तेषामभिभविता। [v]विश्वचर्षणिः सर्वेषां द्रष्टा [v]सहुरिः सहनशीलः [v]सहावान् सहनवान् ईदृशस्त्वम् [v]अस्मासु [v]पृतनासु संग्रामेषु [v]ओजः बलं [v]धेहि देहि ॥

अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः।
तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि ॥ ५ ॥

अभागः। सन्। अप। पराऽइतः। अस्मि। तव। क्रत्वा। तविषस्य। प्रचेत इति प्रऽचेतः।
तम्। त्वा। मन्यो इति। अक्रतुः। जिहीळ।
अहम्। स्वा। तनूः। बलऽदेयाय। मा। आ। इहि ॥ ५ ॥

हे [v]प्रचेतः प्रकृष्टज्ञान [v]मन्यो [v]तविषस्य महतः [v]तव [v]क्रत्वा कर्मणा [v]अभागः भागरहितः [v]सन्। त्वां यज्ञेऽयाजकः सन्नित्यर्थः। त्वदनुकूलरहितोऽहम् [v]अप [v]परेतोऽस्मि युद्धे शत्रुभिरभिभूतः सन् दूरं गतोऽस्मि। [v]तं तादृशं भागरहितं [v]त्वा त्वां हे [v]मन्यो [v]अक्रतुः कर्मरहितः [v]अहं [v]जिहीळ क्रुद्धं कृतवानित्यर्थः। यद्वा अहमेव त्वत्सहायमेव क्रोधितवान्। अथेदानीं [v]स्वा [v]तनूः मम शरीरभूतस्त्वं [v]बलदेयाय बलदानाय [v]मेहि मां प्राप्नुहि ॥

अयं ते अस्म्युप मेह्यर्वाङ् प्रतीचीनः सहुरे विश्वधायः ।
मन्यो वज्रिन्नभि मामा ववृत्स्व हनाव दस्यूँरुत बोध्यापेः ॥ ६ ॥

अयम् । ते । अस्मि । उप । मा । आ । इहि । अर्वाङ् । प्रतीचीनः । सहुरे । विश्वऽधायः ।
मन्यो इति । वज्रिन् । अभि । माम् । आ । ववृत्स्व । हनाव । दस्यून् । उत । बोधि । आपेः ॥६॥

हे [v]सहुरे शत्रूणां सहनशील [v]विश्वधायः विश्वस्य धर्तर्मन्यो [v]अयं जनोऽहं [v]ते तव [v]अस्मि कर्मकृत् । यत एवमतः [v]प्रतीचीनः प्रतिगन्ता [v]अर्वाङ् अस्मदभिमुखं [v]मा मां [v]उप [v]इहि उपागच्छ । हे [v]मन्यो [v]वज्रिन् [v]माम् [v]अभि [v]आ [v]ववृत्स्व अभ्यावर्तस्व । किमर्थमभ्यागमनमिति चेदुच्यते । [v]हनाव आवां [v]दस्यून् शत्रून् । [v]उत अपि च [v]आपेः बन्धुं [v]बोधि बुध्यस्व ॥

अभि प्रेहि दक्षिणतो भवा मेऽधा वृत्राणि जङ्घनाव भूरि ।
जुहोमि ते धरुणं मध्वो अग्रमुभा उपांशु प्रथमा पिबाव ॥ ७ ॥

अभि । प्र । इहि । दक्षिणतः । भव । मे । अध । वृत्राणि । जङ्घनाव । भूरि ।
जुहोमि । ते । धरुणम् । मध्वः । अग्रम् । उभौ । उपऽअंशु । प्रथमा । पिबाव ॥ ७ ॥

हे मन्यो [v]अभि [v]प्रेहि अभिगच्छ । मम युद्धं गत्वा च [v]मे मम [v]दक्षिणतो [v]भव । [v]अध अथ आवां [v]वृत्राणि शत्रून् [v]भूरि प्रभूतं [v]जङ्घनाव हनाव । [v]ते तुभ्यम् [v]अग्रं श्रेष्ठं [v]मध्वः मधु सोमरसं [v]जुहोमि । [v]उभौ त्वं चाहं च [v]उपांशु अप्रकाशं [v]प्रथमा प्रथमौ सन्तौ [v]पिबाव ॥ ॥१८॥

'त्वया मन्यो' इति सप्तर्चं षोडशं सूक्तम् । आदितस्तिस्रस्त्रिष्टुभस्ततश्चतस्रो जगत्यः । पूर्ववदृषिदेवते । तथा चानुक्रान्तं—'त्वया मन्यो चतुर्जगत्यन्तम्' इति । अजिरनाम्येकाह इदं सूक्तं मरुत्वतीयशस्त्रे निविद्धानम् । सूत्रं पूर्वसूक्त एवोदाहृतम् । विनुत्यभिभूतिषु वज्रेषुष्वेकाहेष्वेते सूक्ते मरुत्वतीयनिष्केवल्ययोः शस्त्रे । सूत्रितं च—'विनुत्यभिभूत्योरिषुवज्रयोश्च मन्युसूक्ते[1]' (आश्व. श्रौ. ९. ८) इति ॥

त्वया मन्यो सरथमारुजन्तो हर्षमाणासो धृषिता मरुत्वः ।
तिग्मेषव आयुधा संशिशाना अभि प्र यन्तु नरो अग्निरूपाः ॥ १ ॥

त्वया । मन्यो इति । सऽरथम् । आऽरुजन्तः । हर्षमाणासः । धृषिताः । मरुत्वः ।
तिग्मऽइषवः । आयुधा । सम्ऽशिशानाः । अभि । प्र । यन्तु । नरः । अग्निऽरूपाः ॥१॥

हे [v]मन्यो हे [v]मरुत्वः [v]त्वया [v]सरथं समानमेकमेव रथमारुहेति शेषः । [v]आरुजन्तः[2] गच्छन्तः [v]हर्षमाणासः हृष्टाः [v]धृषिताः धृष्टाः [v]तिग्मेषवः तीक्ष्णबाणाः [v]आयुधा आयुधानि [v]संशिशानाः सम्यग्निश्यन्तः [v]नरः युद्धस्य नेतार इन्द्रादयो देवास्त्वदनुचरा वा [v]अग्निरूपाः अग्निवत्तीक्ष्णदाहादिकर्माणो यद्वा संज्ञद्वाः कवचिनः [v]अभि [v]प्र [v]यन्तु युद्धे सहायार्थम् । अत्र 'त्वया मन्यो सरथमारुजन्तः' (निरु. १०. ३०) इत्यादि निरुक्तमनुसंधेयम् ॥

---

१. ग-त१.२.३.६.७.८-म–मन्युसूक्तयोः । २. त-म१–रुजंतो ।

अग्निरिव मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि ।
हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व ॥ २ ॥

अग्निःऽइव । मन्यो इति । त्विषितः । सहस्व । सेनाऽनीः । नः । सहुरे । हूतः । एधि ।
हत्वाय । शत्रून् । वि । भजस्व । वेदः । ओजः । मिमानः । वि । मृधः । नुदस्व ॥ २ ॥

हे ᵛमन्यो ᵛअग्निरिव ᵛत्विषितः ज्वलितः ᵛसहस्व अभिभव शत्रून् । हे ᵛसहुरे सहनशील ᵛसेनानीः ᵛएधि भव ᵛनः अस्माकं संग्रामे ᵛहूतः सन् । किंच ᵛहत्वाय हत्वा ᵛशत्रून्वि ᵛभजस्व प्रयच्छास्माकं ᵛवेदः धनं शत्रुसंबन्धि । किंच ᵛओजो ᵛमिमानः अस्माकं बलं कुर्वन् ᵛमृधः शत्रून् ᵛवि ᵛनुदस्व घातयेत्यर्थः ॥

सहस्व मन्यो अभिमातिमस्मे रुजन् मृणन् प्रमृणन् प्रेहि शत्रून् ।
उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयस एकज त्वम् ॥ ३ ॥

सहस्व । मन्यो इति । अभिऽमातिम् । अस्मे इति ।
रुजन् । मृणन् । प्रऽमृणन् । प्र । इहि । शत्रून् ।
उग्रम् । ते । पाजः । ननु । आ । रुरुध्रे । वशी । वशम् । नयसे । एकऽज । त्वम् ॥ ३ ॥

हे ᵛमन्यो ᵛअस्मे अस्माकम् ᵛअभिमातिम् अभिगन्तारं शत्रुं ᵛसहस्व अभिभव । ᵛरुजन् हिंसन्[1] ᵛमृणन्[1] ᵛप्रमृणन् प्रकर्षेण हिंसन् यथा पुनर्न जीवेत्तथा कुर्वस्त्वं[2] ᵛशत्रून् प्रति ᵛप्रेहि । ᵛते तव ᵛपाजः बलम् ᵛउग्रम् उद्भूर्णं के ᵛननु ᵛआ ᵛरुरुध्रे आरुन्धन्ति । न तथा संभवति हे ᵛएकज ᵛत्वम् असहायः ᵛवशी त्वं ᵛवशं ᵛनयसे प्रापयसि शत्रुम् ॥

एको बहूनामसि मन्यवीळितो विशंविशं युधये सं शिशाधि ।
अकृत्तरुक्त्वया युजा वयं द्युमन्तं घोषं विजयाय कृण्महे ॥ ४ ॥

एकः । बहूनाम् । असि । मन्यो इति । ईळितः । विशम्ऽविशम् । युधये । सम् । शिशाधि ।
अकृत्तऽरुक् । त्वया । युजा । वयम् । द्युऽमन्तम् । घोषम् । विऽजयाय । कृण्महे ॥ ४ ॥

हे ᵛमन्यो ᵛईळितः स्तुतस्त्वम् ᵛएकः एव असहाय एव ᵛबहूनां शत्रूणाम् ᵛअसि भवसि पर्याप्तो हन्तुम् । अतः ᵛविशंविशं तां तामस्मद्विरोधिनीं प्रजां ᵛयुधये युद्धाय ᵛसं ᵛशिशाधि सम्यक् तीक्ष्णीकुरु । किंच हे ᵛअकृत्तरुक् अच्छिन्नदीप्ते ᵛत्वया ᵛयुजा सहायेन ᵛवयं ᵛद्युमन्तं दीप्तिमन्तं ᵛघोषं सिंहनादवन्तं ᵛविजयाय विशिष्टजयार्थं[3] ᵛकृण्महे कुर्मः[3] ॥

विजेषकृदिन्द्र इवानवब्रवोऽस्माकं मन्यो अधिपा भवेह ।
प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ ॥ ५ ॥

---

१. त–मृणन् हिंसन् ; भ–हिंसन् । २. ग-त-भ१.२.४.६.८–कुर्वन् । ३. त१.२.३.६.७.८-भ–कृण्महे ।

विजेषऽकृत् । इन्द्रःऽइव । अनवऽव्रवः । अस्माकम् । मन्यो इति । अधिऽपाः । भव । इह ।
प्रियम् । ते । नाम । सहुरे । गृणीमसि । विद्म । तम् । उत्सम् । यतः । आऽबभूथ ॥५॥

हे ᵛमन्यो ᵛइन्द्रइव ᵛविजेषकृत् विजयकर्ता । तथा ᵛअनवद्यवः अनिन्दितवचनः । 'अनवद्यवोऽनवक्षिप्तवचनः' (निरु. ६. २९) इति यास्कः । ईदृशस्त्वम् ᵛअस्माकम् ᵛअधिपाः अधिकं पाता रक्षिता ᵛभव ᵛइह अस्मिन्यज्ञे । हे ᵛसहुरे शत्रूणां सहनशील ᵛते ᵛप्रियं ᵛनाम स्तोत्रं ᵛगृणीमसि गृणीमः स्तुमः । ᵛयतः यस्मात् स्तोत्रात् त्वम् ᵛआबभूथ आभवसि प्रवृद्धो भवसि ᵛतमुत्सं बलस्योद्गमयितारं ᵛविद्म जानीमः ॥

आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम् ।
क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि ॥ ६ ॥

आऽभूत्या । सहऽजाः । वज्र । सायक । सहः । बिभर्षि । अभिऽभूते । उत्ऽतरम् ।
क्रत्वा । नः । मन्यो इति । सह । मेदी । एधि । महाऽधनस्य । पुरुऽहूत । सम्ऽसृजि ॥६॥

हे ᵛवज्र वज्रवत्सारभूत हे ᵛसायक शत्रूणामन्तकर ᵛअभिभूते शत्रूणामभिभावुक मन्यो ᵛआभूत्या । आभूतिरभिभवः । तेन ᵛसहजाः सहैवोत्पन्नस्त्वं ᵛउत्तरम् उत्कृष्टतरं ᵛसहः बलं ᵛबिभर्षि धारयसि । हे ᵛमन्यो ᵛक्रत्वा कर्मणा ᵛसह ᵛनः अस्माकं ᵛमेद्येधि स्निग्धो भव । कुत्रेति तदुच्यते । ᵛमहाधनस्य । संग्रामनामैतत् । संग्रामस्य ᵛसंसृजि सर्गे । हे ᵛपुरुहूत बहुभिराहूतेति मन्युसंबोधनम् ॥

संसृष्टं धनमुभयं समाकृतमस्मभ्यं दत्तां वरुणश्च मन्युः ।
भियं दधानाः हृदयेषु शत्रवः पराजितासो अप नि लयन्ताम् ॥ ७ ॥

सम्ऽसृष्टम् । धनम् । उभयम् । सम्ऽआकृतम् । अस्मभ्यम् । दत्ताम् । वरुणः । च । मन्युः ।
भियम् । दधानाः । हृदयेषु । शत्रवः । पराऽजितासः । अप । नि । लयन्ताम् ॥ ७ ॥

ᵛसंसृष्टम् अविभागमापन्नम् ᵛउभयम् उभयविधं ᵛधनं ᵛसमाकृतं सम्यगानीतम् ᵛअस्मभ्यं ᵛदत्ताम् । कः[1] । ᵛवरुणश्च देवः ᵛमन्युः च । ᵛभियं भयं ᵛहृदयेषु ᵛदधानाः ᵛशत्रवः अस्मद्विरोधिनः ᵛपराजितासः पराजिताः ᵛअप ᵛनि ᵛलयन्तां अपनिलीना भवन्तु ॥ ॥ १९ ॥ ॥ ६ ॥

सप्तमेऽनुवाके षट् सूक्तानि । तत्र 'सत्येन' इति सप्तचत्वारिंशदृचं प्रथमं सूक्तं सवितृसुतायाः सूर्याया आर्षम् । 'नवोनवः' इति तिस्रः 'अनृक्षराः' इति द्वे 'गृभ्णामि' इति द्वे 'यदश्विना पृच्छमानौ' इत्येका 'पूषा त्वेतो नयतु' इत्येका 'अघोरचक्षुः' इति चैवमेता दशर्चस्त्रिष्टुभः । 'तृष्टमेतत्' इत्येषोरोबृहत्यष्टकद्वादशद्व्यष्टकवती । 'पूर्वापरं चरतः' 'इह प्रियं प्रजया' 'आ नः प्रजां जनयतु' इत्येतास्तिस्रो जगत्यः । शिष्टाश्चयस्त्रिंशदनुष्टुभः । आदितः पञ्चानामृचां सोमो देवता । तत एकादशभिः सूर्या स्वविवाहं स्तुतवती । अतस्तत्र योऽर्थः प्रतिपाद्यते स एव देवतात्वेन विज्ञेयः । 'या तेनोच्यते सा देवता' इति न्यायात् । सप्तदश्या देवा देवता । अष्टादश्याः सोमार्कौ । एकोनविंश्याअश्विनः । 'सुकिंशुकम्' इत्याद्या नवर्चो विवाहमन्त्रा आशिषः प्रतिपादकाः । अतस्तत्र तत्र प्रतिपाद्योऽर्थो देवता । 'परा देहि' 'अश्लीरा तनूः' इति द्वे वध्वा विवाहकाले परिहितस्य वाससः

---

१. त२.३.६७-म२.५-कौ ।

संस्पर्शमिन्द्रियिन्थौ । ' ये बध्यश्चन्द्रम् ' इति दंपत्योः क्षयरोगस्य नाशिनी । अतस्तद्देवताका[1] । परिशिष्टानां षोडशानां सूर्या देवता । तथा चानुक्रान्तं—' सत्येन सप्तचत्वारिंशत् ' सर्वमनुक्रान्तम्[2] । सूक्तविनियोगो लैङ्गिकः ॥

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥ १ ॥

सत्येन । उत्तभिता । भूमिः । सूर्येण । उत्तभिता । द्यौः ।
ऋतेन । आदित्याः । तिष्ठन्ति । दिवि । सोमः । अधि । श्रितः ॥ १ ॥

vसत्येन ब्रह्मणानन्तात्मना । ब्रह्मा खलु देवानां मध्ये सत्यभूतः । तेनाधःस्थितेन vभूमिः vउत्तभिता उपरि स्तम्भिता[3] । यथाधो न पतेत्तथा कृता । यद्वा । सत्येन अनृतप्रतियोगिना धर्मेण भूमिरुत्तभितोद्धृता फलिता भवतीत्यर्थः । असति सत्ये भूम्यां सस्यादयो न फलन्ति । तथा vसूर्येण देवेन vद्यौः vउत्तभिता । सूर्यो हि द्युस्थानत्वाद्दिवं दधार । vऋतेन यज्ञेन vआदित्याः अदितेः पुत्रा देवाः vतिष्ठन्ति । यज्ञे यजमानदत्तेन खल्वाहुत्या देवा उपजीवन्ति । vदिवि द्युलोके vसोमः देवानामाप्यायनकारी[4] वल्लीरूपो देवतारूपश्च vअधि vश्रितः अधितिष्ठति । इति स्वपतिं सोमं सूर्या स्तौति॥

सोमेनादित्या बलिनः सोमेन पृथिवी मही ।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥ २ ॥

सोमेन । आदित्याः । बलिनः । सोमेन । पृथिवी । मही ।
अथो इति । नक्षत्राणाम् । एषाम् । उपऽस्थे । सोमः । आऽहितः ॥ २ ॥

vसोमेनादित्याः अदितेः पुत्रा इन्द्रादयः vबलिनः भवन्ति । ऐन्द्रवायवादिग्रहपरिग्रहादिति[5] भावः । तथा vसोमेन आहुत्यात्मनाग्नौ हुतेन vपृथिवी भूमिः vमही महती भवति । आहुत्या वृष्टिद्वारेण सस्यादिसंपत्तेः । vअथो अपि चायं सोमः vनक्षत्राणामेषाम् । न क्षं त्रायन्त इति नक्षत्रा ग्रहचमसादयः । तेषामेषाम् vउपस्थे vसोमः रसात्मकः vआहितः । यद्वा । प्रसिद्धानामेव नक्षत्राणामुपस्थ उपस्थाने द्युलोके सोम आहितः । ' तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरत् ' (तै. ब्रा. ३. २. १. १) इत्यादिश्रुतेः । देवतारूपसोमपक्षे । सोमेनादित्या देवा बलिनो बलवन्तो भवन्ति तस्यैकैककलास्वादनात् । ' प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः ' इत्यादिस्मृतेः । सोमेन पृथिवी मही । अमृतसेकेनौषध्याद्यभिवृद्ध्या[6] पृथिव्या बलवत्त्वम् । चन्द्रस्य नक्षत्राणामुपस्थे स्थितिः प्रसिद्धा ॥

सोमं मन्यते पपिवान् यत्सम्पिंषन्त्योषधिम् ।
सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ॥ ३ ॥

सोमम् । मन्यते । पपिऽवान् । यत् । सम्ऽपिंषन्ति । ओषधिम् ।
सोमम् । यम् । ब्रह्माणः । विदुः । न । तस्य । अश्नाति । कः । चन ॥ ३ ॥

---

१. त-भ–अतस्तद्देवताकाः । २. ग४-त१.२.७–पुस्तकेषु संपूर्णः पाठो दत्तः । ३. त-भ–स्तभिता । ४. त-भ१.४.६.७.८–देवतानामा° । ५. ग१.२–°ग्रहपानादिति; ग४–°ग्रहप्रचारादिति; त-भ१.२.४.६.८–°ग्रहपरादिति । ६. त-भ१.२.४.६.८–°भिवृद्धये ।

तं vसोमं vमन्यते । कः[1] । यः vपपिवान् । वर्धनकामार्थं चिकित्सार्थं पीतः सोमो येन । vयत् यमित्यर्थः । यं सोमम् vओषधिं वह्नीरूपं vसंपिंषन्ति सामर्थ्यादासायिकाः । न च स साक्षात्सोमः । तर्हि कः । उच्यते । vसोमं हि तं मन्यते vयं vब्राह्मणाः । यद्ब्रह्मशब्दो ब्राह्मणशब्दपर्यायोऽस्ति । 'कुतो नु चरसि ब्रह्मन्' 'तस्मै मा ब्रूया निधिपाय ब्रह्मन्' इत्यादिप्रयोगात् । ब्राह्मणा इत्यर्थः । ते चर्त्विजो यजमानश्च[2] यागसाधनभूतं संस्कर्तुं vविदुः जानन्ति vतस्य अंशम् । यद्वा । कर्मणि षष्ठी । तं सोमं vकश्चन vन vअश्नाति । कश्चिदप्ययज्ञेति शेषः । यज्ञैर्नं[3] भक्षयितुमर्हति नान्य इत्यर्थः । एवमोषधिपक्षे । अथ चन्द्रपक्ष उच्यते । तं सोमं मन्यते पपिवान् पीतवान्[4] यजमानो यद्यप्योषधिरूपं संपिष्टस्यभिषवप्रावभिरध्वर्वादयो यजमानश्च[5] । न च स सोमः । कस्तर्हि । यं ब्रह्माणो ब्राह्मणा अभिज्ञा दैवज्ञा विदुः कथयन्ति चन्द्रमसं न तस्याश्नाति कश्चनादेवो देवेभ्योऽन्यो मनुष्यादिः । देवा अग्न्यादयो रश्मयो वा । यज्ञार्हसोमस्यासोमत्वं न निन्दायै अपि तु इतरस्य स्तुत्यै इति मन्तव्यम् । 'अपशवो वा अन्ये गोअश्वेभ्यः' (तै. सं. ५. २. ९. ४) इत्यादिवत् । एवमत्र सोम्या उभयथा योज्याः ॥

आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः ।
ग्राव्णामिच्छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः ॥ ४ ॥

आच्छत्ऽविधानैः । गुपितः । बार्हतैः । सोम । रक्षितः ।
ग्राव्णाम् । इत् । शृण्वन् । तिष्ठसि । न । ते । अश्नाति । पार्थिवः ॥ ४ ॥

हे vसोम vआच्छद्विधानैः । आच्छादयन्ति विधानानि येषां विद्यन्ते त आच्छद्विधानाः । तैः vगुपितः । तथा vबार्हतैः गुपितः स्वानभ्राजाङ्गार्यादिभिः[6] सप्तभिः सोमपालैः vरक्षितः त्वम् । 'एते वा अमुष्मिँल्लोके सोममरक्षन्' (तै. सं. ६.१.१०.५) इति ब्राह्मणम् । vग्राव्णामिच्छृण्वन् अभिषवग्राव्णां ध्वनिं शृण्वन्नेव vतिष्ठसि । vते त्वां vपार्थिवः पार्थिवो जनः vन vअश्नाति । न हि पुरुषश्चन्द्ररूपः सोमोऽत्रत्यैः पानयोग्यो भवति । 'चन्द्रमा वै सोमो देवानामन्नं तं पौर्णमास्यामभिषुण्वन्ति' (श. ब्रा. ११.१.५.३) इति वाजसनेयकम् ॥

यत्त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥ ५ ॥

यत् । त्वा । देव । प्रऽपिबन्ति । ततः । आ । प्यायसे । पुनरिति ।
वायुः । सोमस्य । रक्षिता । समानाम् । मासः । आऽकृतिः ॥ ५ ॥

हे vदेव सोम vयत् यदा vत्वा त्वां vप्रपिबन्ति ओषधिरूपं त्रिष्वपि सवनेषु vततः अनन्तरमेव vपुनः vआ vप्यायसे । 'आ प्यायस्व समेतु' (ऋ. सं. १. ९१. १६) इति प्रातःसवने 'सं ते पयांसि' (ऋ. सं. १. ९१. १८) इत्युत्तरयोः सवनयोराप्यायसे । किंच vवायुः तव vसोमस्य

---

१. ग४–ध्यामानकः; त१.२.३.६.७–न्यः नकः; त८–न्यनेकः; भ१–न्यनः क; भ२–न्यं नकः; भ४.६.८–न्यनकः । २. त-भ२.८–यजमानाश्च । ३. ग–यज्ञैव तत् ; त-भ–यज्ञैतत् । ४. ग४–पीतवान् पाता; त१.२.३.६.७–पीतवान् पीतसोमो; भ–पीतवान् पीत । ५. त-भ१.२.४.६–यजमानाश्च । ६. त-भ–स्वानभ्राजांधारादिभिः ।

[v]रक्षिता । यथा न शुष्यति तथा । वायुः शोषकः प्रसिद्धो लोके । किंच [v]मासः । ' मसी परिमाणे '। मस्यते परिमीयत इति मासः सोमः । स च [v]समानां संवत्सराणाम् [v]आकृतिः आकर्ता व्यवच्छेदको भवति । संवत्सरे संवत्सरे[1] वसन्तादिकालेष्वनुष्ठीयमानत्वात् ' वसन्ते वसन्ते ज्योतिषा यजेत ' इति श्रुतेः । यद्वा । सोमाधारवनस्पतिविकारग्रहद्वारेण वायुः सोमरसस्य[2] रक्षिता भवति । ' वायुगोपा वनस्पतयः ' इति श्रुतेः । एवं वल्लीरूपसोमपक्षे योजना । चन्द्रपक्षे तु । हे देव सोम यद्यदा त्वा त्वां प्रपिबन्ति रश्मयोऽपरपक्षे ततोऽनन्तरमेव पूर्वपक्षे पुनराप्यायसे । वायुश्च सोमस्य तव रक्षिता । वाय्वधीनत्वाच्चन्द्रगतेः । किंच समानां संवत्सराणां मासः । षष्ठ्येकवचनमेतत् । मासस्याकृतिश्च कर्ता त्वं चासि । एकैककलाह्रासवृद्धिभ्यां हि मासः पूर्यते तैः संवत्सर इति ॥ ॥ २० ॥

रैभ्यासीदनुदेयी नाराशंसी न्योचनी ।
सूर्यायाः भद्रमिद्वासो गाथयैति परिष्कृतम् ॥ ६ ॥

रैभी । आसीत् । अनुऽदेयी । नाराशंसी । निऽओचनी ।
सूर्यायाः । भद्रम् । इत् । वासः । गाथया । एति । परिऽकृतम् ॥ ६ ॥

आभिः सूर्या स्वविवाहमस्तौदित्युक्तम् । सूर्या सावित्री ब्रूते । [v]रैभी । रैभ्यः काश्यनर्चः । ' रैभीः शंसति रेभन्तो वै देवाश्चर्षयश्च स्वर्गं लोकमायन् ' (ऐ. ब्रा. ६. ३२) इत्यादिब्राह्मणविहिता रैभ्यः[3] । सा[3] रैभी [v]अनुदेयी [v]आसीत् । दीयमानवधूविनोदनायानुदीयमाना वयस्यासीत् । तथा [v]नाराशंसी । ' प्राता रत्नम् ' (ऋ. सं. १. १२५. १) इत्यादिका मनुष्याणां स्तुतयो नाराशंस्यः । सा नाराशंसी [v]न्योचनी । उचतिः सेवाकर्मा । सा वधूश्वश्रूषार्थं दीयमाना दास्यभवत् । [v]सूर्यायाः मम [v]भद्रं [v]वासः विचित्रं दुकूलादिकमाच्छादनयोग्यं वस्त्रं [v]गाथया [v]परिष्कृतम् अलंकृतम् [v]एति । ' गाथा गीयते ' इत्यादिब्राह्मणोक्ता गाथा । तया गाथया यत्परिष्कृतमस्ति तद्वासोऽभवदिति ॥

चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम् ।
द्यौर्भूमिः कोश आसीद्यदयात्सूर्या पतिम् ॥ ७ ॥

चित्तिः । आः । उपऽबर्हणम् । चक्षुः । आः । अभिऽअञ्जनम् ।
द्यौः । भूमिः । कोशः । आसीत् । यत् । अयात् । सूर्या । पतिम् ॥ ७ ॥

[v]चित्तिः देवता [v]उपबर्हणम् [v]आः आसीत् । [v]चक्षुः [v]अभ्यञ्जनम् [v]आः आसीत् । तथा हि । वृत्रस्य कनीनिका परापतत्त्रिककुन्नाम पर्वते । तेन त्रैककुदेनाञ्जनसजातीयेन चक्षुषी आञ्जते । तच्चक्षुरेवाञ्जनमासीदिति । [v]द्यौः च [v]भूमिः च [v]कोशः [v]आसीत्[4] । कोशस्थानीये[5] अभूताम् । [v]यत् यदा [v]सूर्या [v]पतिं स्वकीयं नवभर्तारं सोमम् [v]अयात् अगच्छत् तदैवमुपकरणान्यासन् ॥

स्तोमा आसन्प्रतिधयः कुरीरं छन्द ओपशः ।
सूर्यायै अश्विना वराग्निरासीत्पुरोगवः ॥ ८ ॥

---

१. त१.२.३.६.७.८-भ-' संवत्सरे ' नास्ति । २. ग-त-भ-सोमस्य । ३. त१.२.३.६.८-भ४. ६८-रैभ्यासीः; त७-भ२-रेभ्यासीत् ; भ१.७-रेभ्यासिः । ४. ग-त-भ-' आसीत् ' नास्ति । ५. ग२-कोशस्थानीयौ; ग४-कोशस्थानीय; त-भ-कोशस्थानीया ।

स्तोमाः । आसन् । प्रतिऽधर्यः । कुरीरम् । छन्दः । ओपशः ।
सूर्यायाः । अश्विना । वरा । अग्निः । आसीत् । पुरःऽगवः ॥ ८ ॥

सूर्यायाः रथस्य [v]स्तोमाः ऋचादयः [v]प्रतिधयः [v]आसन् । प्रतिधीयन्त इति प्रतिधय ईषातिर्यग्गायतकाष्ठादयः । तथा [v]कुरीरं [v]छन्दः कुरीरनामकं छन्दोऽनसः [v]ओपशः अभवत् । येनोपशेरते स ओपशः । तादृशायाः [v]सूर्यायाः [v]अश्विना अश्विनौ [v]वरा वरावास्तामिति शेषः । तस्या विवाहे [v]पुरोगवः पुरोगन्ता पुरतो गन्ता[1] यः पूर्वमेव प्रस्तावार्थं गच्छति तत्स्थानीयः [v]अग्निरासीत् । 'प्रजापतिर्वै[2] सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं तस्यै सर्वे देवा वरा आगच्छन्' (ऐ. ब्रा. ४.७) इत्यादि हि ब्राह्मणम् । अत्रायमभिप्रायः । प्रजापतिः सविता स्वदुहितरं सोमाय[3] प्रायच्छत्[3] । सोमाय दास्यामीति मनीषामकरोत् । तस्मिन् समये पुष्या उपचारार्थं प्रदानान्युक्तान्यभवन् । तथा च सत्यश्विनौ प्रबलौ[4] सन्तावाजिं पुरतो गत्वा तामलभेतामिति । उत्तरत्रापि 'सोमो वधूयुरभवत्' इत्यादिनायमेवार्थः स्पष्टो भविष्यति । 'योषावृणीत जेन्या' (ऋ.सं.१.११९.५) इत्यादिकमुक्तम् ॥

सोमो वधूयुरभवदश्विनास्तामुभा वरा ।
सूर्यां यत्पत्ये शंसन्तीं मनसा सवितादंदात् ॥ ९ ॥

सोमः । वधूऽयुः । अभवत् । अश्विना । आस्ताम् । उभा । वरा ।
सूर्याम् । यत् । पत्ये । शंसन्तीम् । मनसा । सविता । अददात् ॥ ९ ॥

[v]सोमो [v]वधूयुः वधूकामो वरः [v]अभवत् । तस्मिन् समये [v]अश्विना अश्विनौ [v]उभा उभौ [v]वरा वरौ [v]आस्ताम् अभूताम् । [v]यत् यदा [v]सूर्यां [v]पत्ये [v]शंसन्तीं पतिं कामयमानाम् । पर्यायसयौवनामित्यर्थः। सूर्यां [v]मनसा सहिताय[5] सोमाय वराय [v]सविता तत्पिता [v]अददात् प्रादात् दित्सां चकार ॥

मनो अस्या अनं आसीद् द्यौरासीदुत च्छदिः ।
शुक्रावनड्वाहावास्तां यदयात्सूर्या गृहम् ॥ १० ॥

मनः । अस्याः । अनः । आसीत् । द्यौः । आसीत् । उत । छदिः ।
शुक्रौ । अनड्वाहौ । आस्ताम् । यत् । अयात् । सूर्या । गृहम् ॥ १० ॥

[v]अस्याः सूर्यायाः पत्युर्गृहं गच्छन्त्याः [v]अनः रथः [v]मनः [v]आसीत् । या पतिगृहं त्वया गच्छामीति मतिरस्ति सा अन आसीत् । [v]उत अपि च तस्या अनसः [v]द्यौः द्युलोकः [v]छदिः उपर्यपिधानम् [v]आसीत् । [v]शुक्रौ दीप्तौ सूर्याचन्द्रमसौ [v]अनड्वाहौ रथस्य वोढारौ [v]आस्ताम् अभवताम् । [v]यत् यदा [v]सूर्या [v]गृहं सोमम् [v]अयात् अगात् ॥ ॥ २१ ॥

ऋक्सामाभ्यामभिहितौ गावौ ते सामनावितः ।
श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश्चराचरः ॥११ ॥

ऋक्ऽसामाभ्याम् । अभिऽहितौ । गावौ । ते । सामनौ । इतः ।
श्रोत्रम् । ते । चक्रे इति । आस्ताम् । दिवि । पन्थाः । चराचरः ॥ ११ ॥

---

१. ग-त-भ-गंतासीत् । २. त-भ-प्रजापतिः । ३. त-भ-'सोमाय प्रायच्छत्' नास्ति । ४. त१. २.६.७.८-भ१.२.४.६.८-प्रबलौ सबलौ । ५. त४.५-सहितां ।

हे सूर्ये देवि [v]ते तव [v]ऋक्सामाभ्याम् अभिधानीस्थानाभ्याम् [v]अभिहितौ [v]गावौ[1] गोस्थानीयौ सूर्याचन्द्रमसौ [v]सामनौ सामानौ[2] सन्तौ [v]इतः गच्छतः। अनोवाहौ[3] पत्युर्गृहं प्रति गच्छतः। [v]ते तव [v]श्रोत्रम्। श्रोत्रे इत्यर्थः। वरस्य गुणग्राहिणी श्रोत्रे एव [v]चक्रे [v]आस्ताम्। मनोरूपस्य रथस्य श्रोत्रे चक्रे अभवतामित्यर्थः। [v]दिवि [v]पन्थाश्चराचरः चलाचलोऽत्यन्तं गमनसाधनभूतो मार्गोऽभूत्। रथसंचारप्रदेशो द्युलोक आसीत्॥

शुची ते चक्रे यात्या व्यानो अक्ष आहतः।
अनो मनस्मयं सूर्यारोहत्प्रयती पतिम् ॥ १२ ॥

शुची इति। ते। चक्रे इति। यात्याः। विऽआनः। अक्षः। आऽहतः।
अनः। मनस्मयम्। सूर्या। आ। अरोहत्। प्रऽयती। पतिम्॥ १२ ॥

[v]यात्याः गच्छन्त्याः [v]ते तव अनसः [v]चक्रे चक्रमणशीले रथाङ्गे [v]शुची श्रोत्रे आस्ताम्। [v]व्यानः तव व्यानो वायुः [v]अक्षः। उभयरथचक्रच्छिद्रगामिनी या काष्ठा सा च रथस्य सर्वं भारं वहति। सोऽक्षो व्यानोऽभूत्। [v]मनस्मयं मनोमयम् [v]अनः शकटं [v]सूर्या[4] [v]पतिं[4] सोमं प्रति [v]प्रयती प्रकर्षेण गच्छन्ती [v]आरोहत् आरूढवती। पतिं प्रति जिगमिषोर्मनोरूपस्य रथस्य पत्युर्गुणश्राविणी श्रोत्रे एव चक्रे अभूतां व्यानो धारको वायुश्रेष्ठकोऽक्षोऽभूदित्यर्थः[5]॥

सूर्याया वहतुः प्रागात्सविता यमवासृजत्।
अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते ॥ १३ ॥

सूर्यायाः। वहतुः। प्र। अगात्। सविता। यम्। अवऽअसृजत्।
अघासु। हन्यन्ते। गावः। अर्जुन्योः। परि। उह्यते॥ १३ ॥

सोमाय प्रदिश्यमानायाः [v]सूर्याया [v]वहतुः। कन्याप्रियार्थं दातव्यो गवादिपदार्थो वहतुः। स च [v]प्रागात् तस्या अपि पूर्वमगच्छत्। [v]यं वहतुं [v]सविता अस्याः पिता [v]अवासृजत् अवसृष्टवान्। प्रादादित्यर्थः। कदा सागच्छत् कदा वहतुरित्युभयोः काल उच्यते। [v]अघासु। मघास्वित्यर्थः। मघानक्षत्रेषु [v]गावः सवित्रा दत्ता गावः सोमगृहं प्रति [v]हन्यन्ते दण्डैस्ताड्यन्ते प्रेरणार्थम्। [v]अर्जुन्योः। फल्गुन्योरित्यर्थः। तयोर्नक्षत्रयोः सवितुः सकाशात् [v]परि सोमगृहं प्रति [v]उह्यते नीयते रथेन[6]॥

यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः।
विश्वे देवा अनु तद्वामजानन् पुत्रः पितराववृणीत पूषा ॥ १४ ॥

यत्। अश्विना। पृच्छमानौ। अयातम्। त्रिऽचक्रेण। वहतुम्। सूर्यायाः।
विश्वे। देवाः। अनु। तत्। वाम्। अजानन्। पुत्रः। पितरौ। अवृणीत। पूषा॥ १४ ॥

---

१. ग४–नियमितौ गावौ। २. ग-त१.२.३.४.५.७-म७–'सामानौ' नास्ति। ३. ग-त१.२.३.६.७-म२.८–अनोवोढ्रा; त४.५–अनोवोप्रा; भ४.६.७–अनोवोढा। ४. त-म–सूर्यां प्रति। ५. ग-त-म१.२.४.६.८–वायुश्चेत्यष्टको°। ६. ग१.२–रथेन प्राप्यते मघाभिर्गाव इत्यादि दृश्यं; ग४-त४.५-म१.२.६–पुस्तकेषु 'रथेन' इत्यस्यानन्तरं किंयाश्चिदवकाशो विद्यते।

ऋ. ४–१७

हे ᵛअश्विना अश्विनौ ᵛयत् यदा ᵛपृच्छमानौ सवितारं प्रभुम् ᵛअयातम् अगच्छतम्। केन साधनेनायातं तदुच्यते। ᵛत्रिचक्रेण चक्रत्रययुक्तेन रथेन। किं पृच्छमानौ। ᵛसूर्यायाः ᵛवहतुम्। विवाहमित्यर्थः। ᵛतत् तदानीं ᵛवां युवां सवितारं प्रति गच्छन्तौ ᵛविश्वे सर्वे ᵛदेवाः ᵛअनु ᵛअजानन् अनुज्ञातवन्तः। तथा ᵛपितरौ ᵛपुत्रः अश्विनोः पुत्रः ᵛपूषा ᵛअवृणीत वृतवान्॥

यदयातं शुभस्पती वरेयं सूर्यामुप।
कꣳ चक्रं वामासीत्कꣳ देष्ट्रायꣳ तस्थथुः॥ १५॥

यत्। अयातम्। शुभः। पती इति। वरेऽयम्। सूर्याम्। उप।
कम्। एकम्। चक्रम्। वाम्। आसीत्। कम्। देष्ट्राय। तस्थथुः॥ १५॥

हे ᵛशुभस्पती उदकस्य स्वामिनौ ᵛयत् यौ ᵛअयातम् अगच्छतम्। कं प्रति। ᵛवरेयं वरणीयायाः सूर्यायाः संबन्धिनं वरैर्याचितव्यं वा। सवितारमित्यर्थः। किमर्थम्। ᵛसूर्यामुप गन्तुम्। ᵛवां भवतोः संप्रति दृश्यमानमिदम् ᵛएकं ᵛचक्रं ᵛक ᵛआसीत् पुरा। ᵛक वां युवां ᵛदेष्ट्राय दानाय प्रवृत्तौ ᵛतस्थथुः इत्यश्विनोर्निवासं पृच्छति॥ ॥ २२॥

द्वे ते चक्रे सूर्ये ब्रह्माणऋतुथा विदुः।
अथैकꣳ चक्रं यद्गुहा तदद्धातय इद्विदुः॥ १६॥

द्वे इति। ते। चक्रे इति। सूर्ये। ब्रह्माणः। ऋतुऽथा। विदुः।
अथ। एकम्। चक्रम्। यत्। गुहा। तत्। अद्धातयः। इत्। विदुः॥ १६॥

अथ स्वयमेव स्वात्मानं प्रति सूर्या वदति। हे ᵛसूर्ये ᵛते तव ᵛद्वे ᵛचक्रे प्रज्ञाते पुरा दृष्टे द्वे एव चन्द्रसूर्यात्मके ᵛऋतुथा ऋतुषु विनिर्दिष्टे चक्रे ᵛब्रह्माणः ब्राह्मणाः ᵛविदुः। ᵛअथैकं ᵛचक्रं तृतीयं संवत्सरात्मकं ᵛगुहा गुहायां निहितं ᵛयत् अस्ति ᵛतदद्धातय ᵛइत्। एतन्मेधाविनामसु पठितम् (नि. ३. १५. २१)। मेधाविन एव ᵛविदुः जानन्ति॥

सूर्यायै देवेभ्यो मित्राय वरुणाय च।
ये भूतस्य प्रचेतस इदं तेभ्योऽकरं नमः॥ १७॥

सूर्यायै। देवेभ्यः। मित्राय। वरुणाय। च।
ये। भूतस्य। प्रऽचेतसः। इदम्। तेभ्यः। अकरम्। नमः॥ १७॥

ᵛसूर्यायै सूर्यस्य पत्न्यै ᵛदेवेभ्यः अग्न्यादिभ्यः ᵛमित्राय ᵛवरुणाय ᵛच ᵛये च ᵛभूतस्य भूतजातस्य ᵛप्रचेतसः सुमतयोऽभिमतप्रदा भवन्ति ᵛतेभ्यः सर्वेभ्यः ᵛइदं ᵛनमः नमस्कारम् ᵛअकरं करोमि॥

पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम्।
विश्वान्यन्यो भुवनाभिचष्टे ऋतूँरन्यो विदधज्जायते पुनः॥ १८॥

पूर्वऽअपरम्। चरतः। मायया। एतौ। शिशु इति। क्रीळन्तौ। परि। यातः। अध्वरम्।
विश्वानि। अन्यः। भुवना। अभिऽचष्टे। ऋतून्। अन्यः। विऽदधत्। जायते। पुनरिति॥ १८॥

कश्चित्पूर्वं गच्छति सूर्यः। अन्वस्तमनुचरति चन्द्रमाः। एवं vपूर्वापरं पौर्वापर्येण vमायया स्वप्रज्ञानेन vएतौ आदित्यचन्द्रौ vवस्तः गच्छतो दिवि। तौ vशिशू। शिशुवक्रमणाज्जायमानत्वाद्वा शिशू इत्युच्येते। शिशू सन्तौ vक्रीळन्तौ अन्तरिक्षे विहरन्तौ vअध्वरं vपरि vयातः यज्ञं प्रतिगच्छतः। तयोः vअन्यः आदित्यः vविश्वानि vभुवना भुवनानि vअभिचष्टे अभिपश्यति। vऋतून् वसन्तादीन् vअन्यः चन्द्रमाः vविदधत् कुर्वन् मासानर्धमासांश्च कुर्वन् vपुनः vजायते। यद्यप्युभयोरपि पुनर्जनिरस्ति तथापि सूर्यस्य सर्वदा प्रवृद्धेरुदयो नाभिप्रेतः। चन्द्रस्य तु ह्रासवृद्धिसद्भावात्पुनःपुनर्जायत इत्युक्तिर्युक्ता। 'चन्द्रमा वै जायते पुनः' (तै. ब्रा. ३. ९. ५. ४) इत्यादिश्रुतेः[1] ॥

अतिमूर्तिनाम्न्येकाहे शुक्लपक्षे चान्द्रमसीष्टिः। तत्र 'नवोनवः' इत्येषा याज्या। सूत्रितं च— 'नवोनवो भवति जायमानस्तरणिर्विश्वदर्शतः' (आश्व. श्रौ. ९. ८) इति ॥

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।
भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरते दीर्घमायुः ॥ १९ ॥

नवःऽनवः। भवति। जायमानः। अह्नाम्। केतुः। उषसाम्। एति। अग्रम्। भागम्। देवेभ्यः। वि। दधाति। आऽयन्। प्र। चन्द्रमाः। तिरते। दीर्घम्। आयुः ॥ १९ ॥

अयं चन्द्रमाः vजायमानः प्रतिदिनं जायमान एकैककलाधिक्येनोत्पद्यमानः सन् vनवोनवो vभवति प्रतिदिनं नूतन एव भवति। एतत्पूर्वपक्षाद्यभिप्रायम्। तथा vअह्नां दिवसानां vकेतुः प्रज्ञापकः प्रतिपदादीनां तिथीनां चन्द्रकलाह्रासवृद्ध्यधीनत्वात्। तादृशश्चन्द्रमाः vउषसां प्रभातीनाम्[2] vअग्रम् vएति। एतत्कृष्णपक्षान्ताभिप्रायम्। केचनैतं पादमादित्यदैवत्यमाहुः[3]। तस्मिन् पक्षेऽह्नां केतुत्वमुषसामग्रगतिश्च प्रसिद्धे। vदेवेभ्यः vभागं हविर्भागं vवि vदधाति करोति उभयपक्षान्ते। किं कुर्वन्। vआयन् प्रतिदिनं ह्रासवृद्ध्या पक्षान्तमभिगच्छन्। एतदर्धमासाभिप्रायम्। vचन्द्रमाः उक्तलक्षणो देवः vदीर्घमायुः vतिरते वर्धयति ॥

सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम्।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥ २० ॥

सुऽकिंशुकम्। शल्मलिम्। विश्वऽरूपम्। हिरण्यऽवर्णम्। सुऽवृतम्। सुऽचक्रम्। आ। रोह। सूर्ये। अमृतस्य। लोकम्। स्योनम्। पत्ये। वहतुम्। कृणुष्व ॥ २० ॥

vसुकिंशुकं शोभनकिंशुकवृक्षनिर्मितं तथा vशल्मलिं शल्मलिवृक्षनिर्मितं vविश्वरूपं नानारूपं vहिरण्यवर्णं हितरमणीयवर्णं हिरण्यालंकारयुक्तं वा vसुवृतं सुष्ठुवर्तनं vसुचक्रं शोभनचक्रोपेतं रथं हे vसूर्ये vआ vरोह। vअमृतस्य vलोकं स्थानं vस्योनं सुखकरं vपत्ये सोमाय vवहतुं वहनमात्मनः प्रापणं vकृणुष्व कुरुष्व। अत्र निरुक्तं (१२. ८) द्रष्टव्यम् ॥ ॥ २३ ॥

उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं नमसा गीर्भिरीळे।
अन्यामिच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्यं विद्धि ॥ २१ ॥

---

१. ग-त-°श्रुतेश्च। २. ग-त-म१.२.४.६.८-प्रमातानां। ३. ग-°देवत्यमाहुः।

उत् । ईर्ध्व । अतः । पतिऽवती । हि । एषा । विश्वऽवसुम् । नमसा । गीःऽभिः । ईळे ।
अन्याम् । इच्छ । पितृऽसदम् । विऽअक्ताम् । सः । ते । भागः । जनुषा । तस्य । विद्धि ॥२१॥

आभिर्नूनां विवाहः स्तूयते । हे विश्वावसो ᵛअतः स्थानात् कन्यासमीपात् ᵛउदीर्ध्व उत्तिष्ठ । यतः ᵛएषा कन्या ᵛपतिवती ᵛहि संजाता अत उदीर्ध्वेति वा अतःशब्दो योज्यः । ᵛविश्वावसुम् एतन्नामानं गन्धर्वं ᵛनमसा नमस्कारेण ᵛगीर्भिः स्तुतिभिश्च ᵛईळे स्तौमि । तर्हीनां विहाय कां स्वीकरोमीति चेत् ब्रूषे तर्हि ᵛअन्यां ᵛपितृषदं पितृकुले स्थितां ᵛव्यक्ताम् अनूढेति परिस्फुटां विगताऽनां वा । स्तन्योद्गमादिराहित्येनाप्रौढामित्यर्थः । ᵛसः तादृशः पदार्थः ᵛते तव ᵛभागः कल्पितः । ᵛतस्य तं[1] भागं ᵛविद्धि जानीहि ᵛजनुषा जन्मना । लभस्वेत्यर्थः ॥

उदीर्ष्वातो विश्वावसो नमसेळामहे त्वा ।
अन्यामिच्छ प्रफर्व्यं[1] सं जायां पत्या सृज ॥ २२ ॥

उत् । ईर्ध्व । अतः । विश्वऽवसो इति विश्वऽवसो । नमसा । ईळामहे । त्वा ।
अन्याम् । इच्छ । प्रऽफर्व्यम् । सम् । जायाम् । पत्या । सृज ॥ २२ ॥

ᵛअतः अस्माच्छयनात् हे ᵛविश्वावसो कन्यास्वामिन् गन्धर्व ᵛउदीर्ध्व उत्तिष्ठ । 'ईर गतौ' । आदादिकः । अनुदात्तेत् । तस्य लोटि रूपम् । 'विश्वावसुर्नाम गन्धर्वः कन्यानामधिपतिर्यतः । लभामि तेन कन्याम्' इति हि मन्त्रः । तादृश देव त्वां ᵛनमसा नमस्कारेण ᵛईळामहे स्तुमः । स त्वम् ᵛअन्यां ᵛप्रफर्व्यं बृहच्चितम्बां[2] कन्याम् ᵛइच्छ । ᵛजायां मां ᵛपत्या सह पुनः ᵛसं ᵛसृज ॥

अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
समर्यमा सं भगो नो निनीयात्सं जास्पत्यं सुयममस्तु देवाः ॥ २३ ॥

अनृक्षराः । ऋजवः । सन्तु । पन्थाः । येभिः । सखायः । यन्ति । नः । वरेऽयम् ।
सम् । अर्यमा । सम् । भगः । नः । निनीयात् ।
सम् । जाःपत्यम् । सुऽयमम् । अस्तु । देवाः ॥ २३ ॥

हे देवाः ᵛपन्थाः पन्थानो मार्गाः ᵛअनृक्षराः । ऋक्षरः कण्टक उच्यते । कण्टकरहिताः ᵛऋजवः अकुटिलाश्च ᵛसन्तु ᵛयेभिः यैः पथिभिः ᵛनः अस्माकं ᵛसखायः वरप्रेषिताः ᵛवरेयं वरैर्याचितव्यं पितरं प्रति ᵛयन्ति गच्छन्ति ते पन्था इति । किंच ᵛअर्यमा देवः[3] ᵛनः अस्मान्[4] ᵛसं ᵛनिनीयात् सम्यङ् प्रापयेत् । तथा ᵛभगः देवः ᵛसं निनीयात् । हे ᵛदेवाः आसंगतमस्तु पतिकुलमिति शेषः । तत्रेदं ᵛजास्पत्यं जायापत्योर्युगलं ᵛसुयममस्तु सुमिथुनमस्तु ॥

पन्था योक्त्रविमोचने 'प्र त्वा मुञ्चामि' इत्येषा । सूत्रितं च—'अथास्या योक्त्रं विवृहेत्प्र त्वा मुञ्चामि वरुणस्य पाशात्' (आश्व. श्रौ. १. ११) इति ॥

प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥ २४ ॥

१. त-भ-ते । २. ग-त१.२.३.६.७.८.भ-'बृहच्चितम्बां' नास्ति । ३. त-भ-देवोऽर्यमान् ।

प्र । त्वा । मुञ्चामि । वरुणस्य । पाशात् । येन । त्वा । अबध्नात् । सविता । सुऽशेवः । ऋतस्य । योनौ । सुऽकृतस्य । लोके । अरिष्टाम् । त्वा । सह । पत्या । दधामि ॥ २४ ॥

जातं प्राणिनं सवित्रा प्रेरितो वरुण आत्मपाशैर्बध्नाति । तस्मात् ᵛवरुणस्य ᵛपाशात् हे वधु ᵛत्वा त्वां ᵛप्र ᵛमुञ्चामि ᵛयेन पाशेन ᵛत्वा त्वां ᵛसविता वरुणस्य प्रेरकः ᵛसुशेवः सुसुखः ᵛअबध्नात् बन्धनं कृतवान् । यज्ञविनियोगपक्षे पत्नीं योक्त्रेण बध्नाति । बन्धनस्य वरुणोऽभिमानी । अतो वरुणपाशाद्योक्त्रात्प्र मुञ्चामि येन योक्त्रेण सविता कर्मणामनुज्ञाता देव ऋत्विक्पाशेनाबध्नात्[1] । तं[2] मोचयित्वा च ᵛऋतस्य यज्ञस्य ᵛयोनौ स्थाने यागभूमौ ᵛसुकृतस्य ᵛलोके कर्मक्षेत्रे भूलोके च ᵛअरिष्टाम् अहिंसितां त्वां पुत्राद्यर्थं ᵛपत्या ᵛसह ᵛदधामि स्थापयामि ॥

प्रेतो मुञ्चामि नामुतः सुबद्धामुतस्करम् ।
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ॥ २५ ॥

प्र । इतः । मुञ्चामि । न । अमुतः । सुऽबद्धाम् । अमुतः । करम् ।
यथा । इयम् । इन्द्र । मीढ्वः । सुऽपुत्रा । सुऽभगा । असति ॥ २५ ॥

ᵛइतः पितृकुलात् ᵛप्र ᵛमुञ्चामि त्वां ᵛनामुतः भर्तृगृहात्प्रमुञ्चामि । ᵛअमुतः भर्तृगृहे ᵛसुबद्धां ᵛकरम् । ᵛयथेयं कन्या हे ᵛइन्द्र ᵛमीढ्वः सेक्तः ᵛसुपुत्रा ᵛसुभगा सुष्ठुभाग्या वा ᵛअसति भवति तथा कुरु ॥ ॥ २४ ॥

विवाहानन्तरभाविनि प्रयाणे ' पूषा त्वेतो नयतु ' इत्यनया रथादियानमारोहयेत् । सूत्रितं च—' पूषा त्वेतो नयतु हस्तगृह्येति यानमारोहयेत् ' (आश्व. गृ. १. ८. १) इति ॥

पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥ २६ ॥

पूषा । त्वा । इतः । नयतु । हस्तऽगृह्य । अश्विना । त्वा । प्र । वहताम् । रथेन ।
गृहान् । गच्छ । गृहऽपत्नी । यथा । असः । वशिनी । त्वम् । विदथम् । आ । वदासि॥२६॥

ᵛहस्तगृह्य ग्राह्यहस्तः ᵛपूषा ᵛत्वा त्वाम् ᵛइतः ᵛनयतु प्रापयतु । ᵛअश्विना अश्विनौ ᵛत्वा त्वां ᵛरथेन ᵛप्र ᵛवहतां प्रगमयताम् । ᵛगृहान् भर्तृसंबन्धिनः ᵛगच्छ त्वं[3] ᵛगृहपत्नी ᵛयथासः भवसि स्वगृहस्वामिनी भवसि । ᵛवशिनी सर्वेषां गृहगतानां वशं प्रापयित्री पत्युर्वशे वर्तमाना वा ᵛविदथं पतिगृहम् ᵛआ ᵛवदासि आवदसि । गृहस्थितं भृत्यादिजनमावद ॥

' इह प्रियम् ' इत्येषा वध्वा गृहप्रवेशनी । सूत्रितं च—' इह प्रियं प्रजया ते समृध्यतामिति गृहं प्रवेशयेत् ' (आश्व. गृ. १. ८. ८) इति ॥

इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ सं सृजस्वाधा जिव्री विदथमा वदाथः ॥ २७ ॥

---

१. ग-स४-ऋत्विग्यजेनाबध्नात्; त१.२.३.५.६.८-म२.४.६-ऋत्वियजेनाबध्नात् । २. ग-त-म१. २.४.६.८-' तं ' नास्ति । ३. त-म-त्वं यथा ।

इह । प्रियम् । प्रऽजया । ते । सम् । ऋध्यताम् । अस्मिन् । गृहे । गार्हऽपत्याय । जागृहि ।
एना । पत्या । तन्वम् । सम् । सृजस्व । अध । जिम्री इति । विदथम् । आ । वदाथः ॥२७॥

हे वधु ᵛते तव ᵛइह अस्मिन् पतिकुले ᵛप्रियं ᵛप्रजया सह ᵛसमृध्यताम् । ᵛअस्मिन्गृहे ᵛगार्हपत्याय गृहपतित्वाय ᵛजागृहि बुध्यस्व । ᵛएना अनेन ᵛपत्या सह ᵛतन्वं स्वीयं शरीरं ᵛसं ᵛसृजस्व । संसृष्टा भव । ᵛअध अथ ᵛजिम्री जीर्णौ जायापती युवां ᵛविदथं गृहम् ᵛआ ᵛवदाथः आभिमुख्येन वदतम्[1] ॥

नीललोहितं भवति कृत्यासक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥ २८ ॥

नीलऽलोहितम् । भवति । कृत्या । आसक्तिः । वि । अज्यते ।
एधन्ते । अस्याः । ज्ञातयः । पतिः । बन्धेषु । बध्यते ॥ २८ ॥

ᵛकृत्या अभिचाराभिमानिनी देवता ᵛनीललोहितं ᵛभवति । नीलं च लोहितं च तस्या रूपं भवतीत्यर्थः । सा कृत्या ᵛआसक्तिः आसक्तास्यां संबद्धा ᵛव्यज्यते । त्यज्यत इत्यर्थः । तस्यां कृत्यायामपगतायाम् ᵛअस्याः वध्वाः ᵛज्ञातयः ᵛएधन्ते वर्धन्ते । ᵛपतिः च ᵛबन्धेषु सांसारिकेषु ᵛबध्यते ॥

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु ।
कृत्यैषा पद्वती भूत्वा जाया विशते पतिम् ॥ २९ ॥

परा । देहि । शामुल्यम् । ब्रह्मऽभ्यः । वि । भज । वसु ।
कृत्या । एषा । पत्ऽवती । भूत्वी । आ । जाया । विशते । पतिम् ॥ २९ ॥

ᵛशामुल्यम् । शामलमित्यर्थः । शमलं शारीरं मलम् । शरीरावच्छन्नस्य[2] मलस्य धारकं वस्त्रं ᵛपरा ᵛदेहि परात्यज । प्रतप्रायश्चित्तार्थं ᵛब्रह्मभ्यः ब्राह्मणेभ्यः ᵛवसु धनं ᵛवि ᵛभज प्रयच्छेत्यर्थः । किमर्थं वधूवासःपरित्याग इति चेत् उच्यते । ᵛएषा ᵛकृत्या ᵛपद्वती पादवती सती ᵛजाया ᵛभूत्वी[1] भूत्वा ᵛपतिं ᵛविशते । कृत्यारूपवासःप्रवेशात् कृत्या जाया भूत्वा विशत इत्युपचर्यते । अतस्तत्परित्यागे कृत्यैव त्यक्ता भवतीत्यर्थः । यदि वधूवासः स्वयं निधत्ते तदैवं भवतीति वधूवासःसंस्पर्शनं निन्दायुक्तम् ॥

अश्रीरा तनूर्भवति रुशती पापयामुया ।
पतिर्यद्वध्वो३ वाससा स्वमङ्गमभिधित्सते ॥ ३० ॥

अश्रीरा । तनूः । भवति । रुशती । पापया । अमुया ।
पतिः । यत् । वध्वः । वाससा । स्वम् । अङ्गम् । अभिऽधित्सते ॥ ३० ॥

१. ग४-त४.५-वदथः; त१.२.३.६.८-म-वदतः । २. ग-त१.२.३.७-शरीराच्छन्नस्य; त४.५-शरीरोच्छंतस्य; त६-म७-शरीरामरीछन्नस्य; त८-शरीरामरीछन्नस्य; म१.४.७.८-छिन्नस्य । ३. ग-त-म-'भूत्वी' नास्ति ।

अत्रापि कधूवासःसंस्पर्शनिन्दोच्यते । vतनूः वरस्य संबन्धिनी vअशीराः अशीका vभवति । कथं स्यादेवेति उच्यते । vदृशती । दृशादिति वर्णनाम । दीप्तया vअमुया अनया vपापया पापरूपया कृत्यया[1] युक्ता चेत्तनूः । तदेवाह । vपतियंत् यदि vवध्वो vवासस vस्वमङ्गमभिधित्सते परिधातुमिच्छति ॥ ॥ २५ ॥

ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनादनु ।
पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः ॥ ३१ ॥

ये । वध्वः । चन्द्रम् । वहतुम् । यक्ष्माः । यन्ति । जनात् । अनु ।
पुनरिति । तान् । यज्ञियाः । देवाः । नयन्तु । यतः । आऽगताः ॥ ३१ ॥

vवध्वश्चन्द्रं[2] हिरण्यरूपं vवहतुं vये vयक्ष्माः व्याधयः vअनु vयन्ति प्राप्नुवन्ति vजनात् अस्मद्विरोधिनः सकाशात् । यद्वा । जनाद्यमाख्यात् । vतान्[3] vपुनः vनयन्तु प्रापयन्तु vयज्ञियाः यज्ञार्हाः vदेवाः इन्द्रादयः । vयत vआगताः यस्मात्ते यक्ष्मा आगतास्तत्र तान्नयन्तु ॥

वध्वाः प्रयाणे 'मा विदन्' इत्येषा जप्या । सूत्रितं च—'कल्याणेषु देशवृक्षचतुष्पथेषु मा विदन् परिपन्थिन इति जपेत्' (आश्व. गृ. १. ८. ६) इति ॥

मा विदन् परिपन्थिनो य आसीदन्ति दंपती ।
सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥ ३२ ॥

मा । विदन् । परिऽपन्थिनः । ये । आऽसीदन्ति । दंपती इति दम्ऽपती ।
सुऽगेभिः । दुःऽगम् । अतिं । इताम् । अप । द्रान्तु । अरातयः ॥ ३२ ॥

vपरिपन्थिनः पर्यवस्थातारः शत्रवः vमा vविदन् मा प्रापयन् vये परिपन्थिनः vदंपती vआसीदन्ति अभिगच्छन्ति । vसुगेभिः सुगैर्मार्गैः vदुर्गं दुःखेन गन्तुं शक्यं दुर्गमं देशम् vअतीतां अतिगच्छताम् । vअरातयः अदातारः शत्रवः vअप vद्रान्तु अपगच्छन्तु[4] ॥

सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वायाथास्तं वि परेतन ॥ ३३ ॥

सुऽमङ्गलीः । इयम् । वधूः । इमाम् । सम्ऽएत । पश्यत ।
सौभाग्यम् । अस्यै । दत्त्वाय । अथ । अस्तम् । वि । परा । इतन ॥ ३३ ॥

vइयं vवधूः vसुमङ्गलीः शोभनमङ्गला । अतः vइमां सर्वे आशीःकर्तारः vसमेत संगच्छत । तां vपश्यत च । तां संगताश्च दृष्ट्वा vअस्यै ऊढायै vसौभाग्यं vदत्त्वाय दत्त्वा vअथ vअस्तम् । गृहनामैतत् । स्वस्वसंबन्धिनं vवि vपरेतन विविधं परागच्छत ॥

---

१. ग-त-भ-कृत्यया यदि । २. त-भ-ये वध्वश्चंद्रं । ३. ग-त-तान् यक्ष्मान् । ४. ग४-अपगच्छंतु । विधिवासदेशे वध्वा निशिक्षमागतान् मनुष्यान् सुमंगलीरित्यनया ईक्षते । तथा च सूत्रितं-वासे वासे सुमंगलीरियं वधूरितीक्षकानीक्षेत (आश्व. गृ. १.८.७) इति ।

तृष्टमेतत्कटुकमेतदपाष्ठवद्विषवदेतदत्तवे ।
सूर्यां यो ब्रह्मा विद्यात्स इद्वार्धूयमर्हति ॥ ३४ ॥

तृष्टम् । एतत् । कटुकम् । एतत् । अपाष्ठऽवत् । विषऽवत् । न । एतत् । अत्तवे ।
सूर्याम् । यः । ब्रह्मा । विद्यात् । सः । इत् । वार्धूऽयम् । अर्हति ॥ ३४ ॥

अनयापि वधूवस्त्रपरित्यागः प्रतिपाद्यते । [v]एतत् वस्त्रं [v]तृष्टं दाहजनकम् । तथा [v]एतत् [v]कटुकम् । तथा [v]अपाष्ठवत् । अपाष्ठमपस्थितमृजीषम् । तद्वत् । तथा [v]विषवत् । [v]नैतत् वस्त्रम् [v]अत्तवे अत्तव्यम् । अनुपयोग्यम् । [v]यो [v]ब्रह्मा ब्राह्मणः [v]सूर्याम् इदानीं प्रस्तुतां देवीं [v]विद्यात् सम्यग्जानीयात् [v]स [v]इत् स एव [v]वार्धूयं वधूवस्त्रम् [v]अर्हति[1] ॥

आशसनं विशसनमथो अधिविकर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ॥ ३५ ॥

आऽशसनम् । विऽशसनम् । अथो इति । अधिऽविकर्तनम् ।
सूर्यायाः । पश्य । रूपाणि । तानि । ब्रह्मा । तु । शुन्धति ॥ ३५ ॥

[v]आशसनं तूषाधानम् । तच्चान्यवर्णं भवति । [v]विशसनं शिरसि निधीयमानम् । तादृशं दशान्ते निधीयमानम् [v]अधिविकर्तनं यत्त्रिधा वासो विकृन्तन्ति । तान्याशसनादीनि वासांस्यवस्थितानि [v]सूर्यायाः [v]रूपाणि भवन्ति । तानि [v]पश्य । एवंभूतान्याशसनादीनि पुरा सूर्यास्वशरीरे स्थितान्यमङ्गलानि वासांसि विधत्ते । [v]तानि रूपाणि सूर्यावित् [v]ब्रह्मा [v]तु ब्राह्मण एव तस्माद्वाससः सकाशात् [v]शुन्धति अपनयति ॥ ॥ २६ ॥

विवाहे कन्याहस्तग्रहणे ' गृभ्णामि ' इत्येषा । सूत्रितं च—' गृभ्णामि ते सौभगत्वाय हस्तमित्यङ्गुष्ठमेव गृह्णीयात् ' (आश्व. गृ. १. ७. ३) इति ॥

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥ ३६ ॥

गृभ्णामि । ते । सौभगऽत्वाय । हस्तम् । मया । पत्या । जरत्ऽअष्टिः । यथा । असः ।
भगः । अर्यमा । सविता । पुरम्ऽधिः । मह्यम् । त्वा । अदुः । गार्हऽपत्याय । देवाः ॥ ३६ ॥

हे वधु [v]ते तव [v]हस्तम् अहं [v]गृभ्णामि गृह्णामि । किमर्थम् । [v]सौभगत्वाय सौभाग्याय । [v]मया [v]पत्या त्वं [v]यथा [v]जरदष्टिः प्राप्तवार्धक्या [v]असः भवसि । [v]भगो [v]अर्यमा [v]सविता [v]पुरंधिः पूषा पूते[2] [v]देवाः [v]त्वा त्वां [v]मह्यम् [v]अदुः दत्तवन्तः । किमर्थम् । [v]गार्हपत्याय । यथाहं गृहपतिः स्यामिति ॥

तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।
या नः ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् ॥ ३७ ॥

१. ग—अर्हति । अन्यस्तु प्रतिगृह्यानः प्रत्यवै चारैतव्रतः सूर्यावित्वे वधूवस्त्रं दद्यादिति । २. त-ग—त्वेति ।

ताम्। पूषन्। शिवऽतमाम्। आ। ईरयस्व। यस्याम्। बीजम्। मनुष्याः। वपन्ति।
या। नः। ऊरू इति। उशती। विऽश्रयाते। यस्याम्। उशन्तः। प्रऽहराम। शेपम्॥३७॥

हे ᵛपूषन् पोषकैतन्नामक देव ᵛशिवतमाम् अत्यन्तमङ्गलभूतां ᵛताम्[1] ᵛएरयस्व आ ईरय सर्वतः प्रेरय। ᵛयस्याम् ऊरौ ᵛबीजं रेतोलक्षणं ᵛमनुष्या ᵛवपन्ति आदधते। ᵛया ᵛनः अस्माकम् ᵛऊरू ᵛउशती कामयमाना ᵛविश्रयाते। ᵛयस्याम् ऊरौ ᵛउशन्तः कामयमाना वयं ᵛशेपं स्पर्शनयोग्यं पुंस्प्रजननं ᵛप्रहराम। ऊरौ व्यञ्जनसंबन्धं करवामेत्यर्थः॥

तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह॥ ३८॥

तुभ्यम्। अग्रे। परि। अवहन्। सूर्याम्। वहतुना। सह।
पुनरिति। पतिऽभ्यः। जायाम्। दाः। अग्ने। प्रऽजया। सह॥ ३८॥

गन्धर्वा हे अग्ने ᵛतुभ्यमग्रे ᵛपर्यवहन्। प्रायच्छन्नित्यर्थः। काम्। ᵛसूर्याम्। केन सह। ᵛवहतुना ᵛसह। त्वं च तां सूर्यां वहतुना सह सोमाय प्रायच्छः। तद्वदिदानीमपि हे ᵛअग्ने ᵛपुनः ᵛपतिभ्यः अस्मभ्यं ᵛजायां ᵛप्रजया ᵛसह ᵛदाः देहि॥

पुनः पत्नीमग्निरदादायुषा सह वर्चसा।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम्॥ ३९॥

पुनरिति। पत्नीम्। अग्निः। अदात्। आयुषा। सह। वर्चसा।
दीर्घऽआयुः। अस्याः। यः। पतिः। जीवाति। शरदः। शतम्॥ ३९॥

ᵛपुनः स्वगृहीतां ᵛपत्नीम् ᵛअग्निः ᵛआयुषा[2] ᵛसह ᵛवर्चसा सह[2] ᵛअदात् प्रायच्छत्। ᵛअस्याः अग्निदत्ताया: ᵛयः ᵛपतिः पुमान् सः ᵛदीर्घायुः सन् ᵛशरदः ᵛशतं शतसंवत्सरं ᵛजीवाति जीवतु॥

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ ४०॥

सोमः। प्रथमः। विविदे। गन्धर्वः। विविदे। उत्ऽतरः।
तृतीयः। अग्निः। ते। पतिः। तुरीयः। ते। मनुष्यऽजाः॥ ४०॥

जातां कन्यां ᵛसोमः प्रथमभावी सन् ᵛविविदे लब्धवान्। ᵛगन्धर्वः ᵛउत्तरः सन् ᵛविविदे लब्धवान्। ᵛअग्निः ᵛतृतीयः ᵛपतिः ᵛते तव। पश्चात् ᵛमनुष्यजाः पतिः ᵛतुरीयः चतुर्थः॥ ॥२७॥

सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये।
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम्॥ ४१॥

---

१. त-भ-तां ऊरू। २. ग-त-मु-आयुषा वर्चसा च सह; भ-आयुषा सह वर्चसा च।

सोमः । ददत् । गन्धर्वाय । गन्धर्वः । ददत् । अग्नये ।
रयिम् । च । पुत्रान् । च । अदात् । अग्निः । मह्यम् । अथो इति । इमाम् ॥ ४१ ॥

Vसोमः Vगन्धर्वाय च प्रथमं Vददत् प्रादात् । Vगन्धर्वः Vअग्नये प्रादात् । Vअथो अपि च Vअग्निः Vइमां कन्यां Vरयिं धनं Vपुत्रांश्च Vमह्यम् Vअदात् ॥

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥ ४२ ॥

इह । एव । स्तम् । मा । वि । यौष्टम् । विश्वम् । आयुः । वि । अश्नुतम् ।
क्रीळन्तौ । पुत्रैः । नप्तृऽभिः । मोदमानौ । स्वे । गृहे ॥ ४२ ॥

Vइहैव Vस्तम् इहैवास्मिँल्लोके स्तं भवतम् । Vमा Vवियौष्टं मा पृथग्भूतम् । Vविश्वमायुर्व्यश्नुतं प्राप्नुतम् । किंच[1] Vपुत्रैर्नप्तृभिः पौत्रैः सह Vस्वे Vगृहे Vमोदमानौ भवतमिति शेषः ॥

गृहप्रवेशे ' आ नः प्रजां जनयतु ' इत्याद्याश्वलायनो होमार्याः । सूत्रितं च—' आ नः प्रजां जनयतु प्रजापतिरिति चतसृभिः प्रत्यृचं हुत्वा ' (आश्व. गृ. १. ८. ९) इति ॥

आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं चतुष्पदे ॥ ४३ ॥

आ । नः । प्रऽजाम् । जनयतु । प्रजाऽपतिः । आऽजरसाय । सम् । अनक्तु । अर्यमा ।
अदुःऽमङ्गलीः । पतिऽलोकम् । आ । विश । शम् । नः । भव । द्विऽपदे । शम् । चतुःऽपदे ॥ ४३ ॥

Vप्रजापतिः देवः Vनः अस्माकं Vप्रजाम् Vआ Vजनयतु । Vअर्यमा च Vआजरसाय जरापर्यन्तं जीवनाय Vसमनक्तु संगमयतु । सा त्वम् Vअदुर्मङ्गलीः दुर्मङ्गलरहिता सुमङ्गली । यद्वा । या मङ्गलाचारान् दूषयति सा दुर्मङ्गली । ततोऽन्या अदुर्मङ्गली । तादृशी सती Vपतिलोकं पतिसमीपम् Vआ Vविश प्राप्नुहि । Vनः अस्माकं Vद्विपदे Vशं Vभव । तथा च Vशं Vचतुष्पदे भव ॥

अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥ ४४ ॥

अघोरऽचक्षुः । अपतिऽघ्नी । एधि । शिवा । पशुऽभ्यः । सुऽमनाः । सुऽवर्चाः ।
वीरऽसूः । देवऽकामा । स्योना । शम् । नः । भव । द्विऽपदे । शम् । चतुःऽपदे ॥ ४४ ॥

हे वधु[2] Vत्वम् Vअघोरचक्षुः क्रोधादभयंकरचक्षुः[3] Vएधि भव । तथा Vअपतिघ्नी भव । तथा Vपशुभ्यः Vशिवा हितकरी भव Vसुमनाः Vसुवर्चाः च भव । Vवीरसूः पुत्राणामेव प्रसवित्री Vदेवकामा Vस्योना सुखकरा च भव ॥

---

१. ग२—किंच क्रीळती । २. ग-स-म—वधूः । ३. स-म—क्रोधादभयंकरचक्षुः ।

इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।
दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ॥ ४५ ॥

इमाम् । त्वम् । इन्द्र । मीढ्वः । सुऽपुत्राम् । सुऽभगाम् । कृणु ।
दश । अस्याम् । पुत्रान् । आ । धेहि । पतिम् । एकादशम् । कृधि ॥ ४५ ॥

हे ᵛइन्द्र ᵛत्वम् ᵛइमां वधूं ᵛसुपुत्रां ᵛसुभगां च ᵛकृणु कृधि । ᵛअस्यां वध्वां ᵛदश ᵛपुत्रान् ᵛआ ᵛधेहि । ᵛपतिमेकादशं ᵛकृधि । दश पुत्राः पतिरेकादशो यथा स्यात्तथा कृधि कृणु ॥

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥ ४६ ॥

सम्ऽराज्ञी । श्वशुरे । भव । सम्ऽराज्ञी । श्वश्वाम् । भव ।
ननान्दरि । सम्ऽराज्ञी । भव । सम्ऽराज्ञी । अधि । देवृषु ॥ ४६ ॥

हे वधु श्वशुरादिषु त्वं ᵛसम्राज्ञी ᵛभव । ᵛदेवृषु । देवरेष्वित्यर्थः ॥

'समञ्जन्तु' इत्येषा वरस्य दधिप्राशने वधूवरयोर्हृदयस्पर्शने वा विनियुक्ता । तथा च सूत्रितं —'समञ्जन्तु विश्वे देवा इति दध्नः' प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानक्ति हृदये' (आश्व. गृ. १. ८. ९) इति ॥

समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥ ४७ ॥

सम् । अञ्जन्तु । विश्वे । देवाः । सम् । आपः । हृदयानि । नौ ।
सम् । मातरिश्वा । सम् । धाता । सम् । ऊँ इति । देष्ट्री । दधातु । नौ ॥ ४७ ॥

ᵛविश्वे ᵛदेवाः सर्वे देवाः ᵛनौ ᵛहृदयानि मानसानि ᵛसमञ्जन्तु सम्यगञ्जन्तु । अपगतदुःखादिक्लेशानि कृत्वा लौकिकवैदिकविषयेषु प्रकाशयुक्तानि कुर्वन्त्वित्यर्थः । ᵛआपः च ᵛसम् अञ्जन्तु । तथा ᵛमातरिश्वा नौ हृदयानि ᵛसं ᵛदधातु । आवयोर्बुद्धीः परस्परानुकूलाः करोत्वित्यर्थः । ᵛधाता च ᵛसं दधातु । ᵛदेष्ट्री दात्री फलानाम् । सरस्वतीत्यर्थः । सा च ᵛसं दधातु संधानं करोतु ॥ ॥२८॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्येऽष्टमाष्टके तृतीयोऽध्यायः ॥

१. ग१.२-त-भ१.२.४.७.८–दधि ।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अष्टमाष्टकस्य चतुर्थोऽध्याय आरभ्यते। तत्र 'वि हि' इति त्रयोविंशत्यृचं द्वितीयं सूक्तम्। वृषाकपिर्नामेन्द्रस्य पुत्रः। स चेन्द्राणीन्द्रश्चैते त्रयः संहताः संविवादं कृतवन्तः। तत्र 'वि हि सोतोरसृक्षत' 'किं सुबाहो स्वङ्गुरे' 'इन्द्राणीमासु नारिषु' इति द्वे 'उक्षणो हि मे' 'अयमेमि' इति चतस्र इत्येता नवर्चं इन्द्रवाक्यानि। अतस्तासामिन्द्रः ऋषिः। 'परा हीन्द्र' इति पञ्च 'अवीराम्' इति द्वे 'वृषभो न तिग्मशृङ्गः' इत्याद्याश्चतस्र इत्येकादशर्चं इन्द्राण्या वाक्यानि। अतस्तासामिन्द्राण्यृषिः। 'उवे अम्ब' 'वृषाकपायि रेवति' 'पशुर्ह नाम' इति तिस्रो वृषाकपेर्वाक्यानि। अतस्तासां वृषाकपिर्ऋषिः। सर्वं सूक्तमैन्द्रं पञ्चपदापङ्क्तिश्छन्दस्कम्। तथा चानुक्रान्तं—'वि हि व्यधिकैन्द्रो वृषाकपिरिन्द्राणीन्द्रश्च समूदिरे पाङ्क्तम्' इति। षष्ठेऽहनि ब्राह्मणाच्छंसिन उक्थ्यशस्त्र[1] एतत्सूक्तम्। सूत्रितं च—'अथ वृषाकपिं शंसेद्यथा होताज्याद्यां चतुर्थे' (आश्व. श्रौ. ८. ३) इति। यदि षष्ठेऽहन्युक्थ्यस्तोत्राणि द्विपदासु न स्तुवीरन् सामगा यदि वेदमहरग्निष्टोमः स्यात्तदानीं ब्राह्मणाच्छंसी माध्यंदिने सवन आरम्भणीयाया[2] ऊर्ध्वमेतत्सूक्तं शंसेद्विश्वजित्यपि। तथा च सूत्रितं—'सुकीर्तिं ब्राह्मणाच्छंसी वृषाकपिं च पङ्क्तिशंसम्' (आश्व. श्रौ. ८. ४) इति ॥

वि हि सोतोरसृक्षत नेन्द्रं देवममंसत।
यत्रामदद्वृषाकपिर्यः पुष्टेषु मत्सखा विश्वस्मादिन्द्र उत्तरः ॥ १ ॥

वि। हि। सोतोः। असृक्षत। न। इन्द्रम्। देवम्। अमंसत।
यत्र। अमदत्। वृषाकपिः। अयः। पुष्टेषु। मत्ऽसखा। विश्वस्मात्। इन्द्रः। उत्ऽतरः ॥१॥

[v]सोतोः सोमाभिषवं कर्तुं [v]वि [v]असृक्षत। यागं प्रति मया विसृष्टा अनुज्ञाताः स्तोतारो वृषाकपेर्यष्टारः। [v]हि इति पूरणः। तत्र [v]देवं द्योतमानम् [v]इन्द्रं मां [v]न [v]अमंसत। मया प्रेरिताः सन्तोऽपि ते स्तोतारो न स्तुतवन्तः। किंतु मम पुत्रं वृषाकपिमेव स्तुतवन्तः। [v]यत्र येषु [v]पुष्टेषु सोमेन प्रवृद्धेषु यागेषु [v]अयः स्वामी [v]वृषाकपिः मम पुत्रः मत्सखा मम सखिभूतः सन् [v]अमदत् सोमपानेन हृष्टोऽभूत्। यद्यप्येवं तथापि[4] [v]इन्द्रः अहं [v]विश्वस्मात् सर्वस्माज्जगतः [v]उत्तरः उत्कृष्टतरः। माधवभट्टास्तु वि हि सोतोरित्येषर्गिन्द्राण्या वाक्यमिति मन्यन्ते। तथा च तद्भाष्यम्। इन्द्राण्यै कल्पितं हविः कश्चिन्मृगोऽदूदुषदिन्द्रपुत्रस्य वृषाकपेर्विषये वर्तमानः। तत्रेन्द्रमिन्द्राणी वदति। तस्मिन्पक्षे त्वस्या ऋचोऽयमर्थः। सोतोः सोमाभिषवं कर्तुं वि ह्यसृक्षत। उपरतसोमाभिषवा आसन् यजमाना इत्यर्थः। किंच मम पतिमिन्द्रं देवं नामंसत स्तोतारो न स्तुवन्ति। कुत्रेति अत्राह। यत्र यस्मिन् जनपदे पुष्टेषु प्रवृद्धेषु धनेष्वयः स्वामी वृषाकपिरमदत्। मत्सखा मत्प्रियश्चेन्द्रो विश्वस्मात् सर्वस्माज्जगत उत्तरः उत्कृष्टतरः ॥

परा हीन्द्र धावसि वृषाकपेरति व्यथिः।
नो अह्रुतप्र विन्दस्यन्यत्र सोमपीतये विश्वस्मादिन्द्र उत्तरः ॥ २ ॥

---

१. त४.५.८-म-अत आसामिन्द्र। २. त१.२.३-उक्थिशस्त्र; त७-म-उक्थशस्त्र। ३. त-म-आरंभणीयाया। ४. त-म-तथा हि।

परा । हि । इन्द्र । धावसि । वृषाकपेः । अति । व्यथिः ।
नो इति । अह । प्र । विन्दसि । अन्यत्र । सोमऽपीतये । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२॥

हे ᵛइन्द्र त्वम् ᵛअति[1] अत्यन्तं ᵛव्यथिः चलितः ᵛवृषाकपेः वृषाकपिं ᵛपरा ᵛधावसि प्रतिगच्छसि । ᵛअन्यत्र ᵛसोमपीतये सोमपानाय ᵛनो ᵛअह नैव च ᵛप्र ᵛविन्दसि प्रगच्छसीत्यर्थः । सोऽयम् ᵛइन्द्रः ᵛविश्वस्मात् ᵛउत्तरः ॥

किमयं त्वां वृषाकपिश्चकार हरितो मृगः ।
यस्मा इरस्यसीदु न्व१र्यो वा पुष्टिमद्वसु विश्वस्मादिन्द्र उत्तरः ॥ ३ ॥

किम् । अयम् । त्वाम् । वृषाकपिः । चकार । हरितः । मृगः ।
यस्मै । इरस्यसि । इत् । ऊँ इति । नु । अर्यः । वा । पुष्टिऽमत् । वसु ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ ३ ॥

हे इन्द्र ᵛत्वां प्रति ᵛहरितः हरितवर्णः ᵛमृगः मृगभूतः ᵛअयं ᵛवृषाकपिः । मृगजातिर्हि वृषाकपिः । ᵛकिं प्रियं ᵛचकार अकार्षीत् । ᵛयस्मै[2] वृषाकपये ᵛपुष्टिमत् पोषयुक्तं ᵛवसु धनम् ᵛअर्यो ᵛवा उदार इव स त्वं ᵛनु क्षिप्रम् ᵛइरस्यसीत् प्रयच्छस्येव । यः ᵛइन्द्रः ᵛविश्वस्मात् ᵛउत्तरः ॥

यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि ।
श्वा न्वस्य जम्भिषदपि कर्णे वराहयुर्विश्वस्मादिन्द्र उत्तरः ॥ ४ ॥

यम् । इमम् । त्वम् । वृषाकपिम् । प्रियम् । इन्द्र । अभिऽरक्षसि ।
श्वा । नु । अस्य । जम्भिषत् । अपि । कर्णे । वराहऽयुः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥४॥

हे ᵛइन्द्र ᵛत्वं ᵛप्रियम् इष्टं पुत्रं ᵛयमिमं ᵛवृषाकपिम् ᵛअभिरक्षसि परिपालयसि ᵛअस्य एनं वृषाकपिम् । द्वितीयार्थे षष्ठी । ᵛवराहयुः वराहमिच्छन् ᵛश्वा ᵛनु क्षिप्रं ᵛजम्भिषत् भक्षयतु । ᵛअपि च ᵛकर्णे गृह्वात्विति शेषः । श्वानो हि वराहमिच्छन्ति । सिद्धमन्यत् ॥

प्रिया तृष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ।
शिरो न्वस्य राविषं न सुगं दुष्कृते भुवं विश्वस्मादिन्द्र उत्तरः ॥ ५ ॥

प्रिया । तृष्टानि । मे । कपिः । विऽअक्ता । वि । अदूदुषत् ।
शिरः । नु । अस्य । राविषम् । न । सुऽअगम् । दुःऽकृते । भुवम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥५॥

ᵛमे मह्यमिन्द्राग्नी ᵛतृष्टानि यजमानैः कल्पितानि ᵛप्रिया प्रियाणि ᵛ[illegible] व्यक्ताभ्यक्तान्याज्यैर्विशेषेणाक्तानि हवींषि कश्चित् वृषाकपेर्विषये वर्तमानः ᵛकपिः ᵛव्यदूदुषत् [illegible]मास । ततोऽहम् ᵛअस्य तत्कपित्वाभिनो वृषाकपेः ᵛशिरो ᵛनु क्षिप्रं ᵛराविषं लुनीयाम् । ᵛदुष्कृते दुष्टस्य कर्मणः कर्त्रे वृषाकपयेऽस्मै ᵛसुगं सुखं न ᵛभुवम् अहं न भवेयम् । अस्मै सुखप्रदात्री न भवामीत्यर्थः । अस्या[3] मम पतिः ᵛइन्द्रः ᵛविश्वस्मात् ᵛउत्तरः ॥ ॥ १ ॥

---

१. त-म-'अति' नास्ति । २. त-तस्मै । ३. ग-त१.२.३.६.७.८-भ-यस्या ।

न मत्स्त्री सुभसत्तरा न सुयाशुतरा भुवत् ।
न मत्प्रतिच्यवीयसी न सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः ॥ ६ ॥

न । मत् । स्त्री । सुभसत्ऽतरा । न । सुयाशुऽतरा । भुवत् ।
न । मत् । प्रतिऽच्यवीयसी । न । सक्थि । उत्ऽयमीयसी । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥६॥

[v]मत् मत्तोऽन्या [v]स्त्री नारी [v]सुभसत्तरा अतिशयेन सुभगा [v]न [v]भुवत् न भवति । नास्तीत्यर्थः । किंच मत्तोऽन्या स्त्री [v]सुयाशुतरा अतिशयेन सुपुत्रा वा [v]न भवति । तथा च मन्त्रान्तरं—'ददाति मह्यं यादुरी याशूनां भोज्या शता' (ऋ. सं. १. १२६. ६) इति । किंच [v]मत् मत्तोऽन्या[1] [v]प्रतिच्यवीयसी पुमांसं प्रति शरीरस्यात्यन्तं च्यावयित्री [v]न अस्ति । किंच मत्तोऽन्या स्त्री [v]सक्थ्युद्यमीयसी संभोगेऽत्यन्तमुत्क्षेप्त्री [v]न अस्ति । न मत्तोऽन्या काचिदपि नारी मैथुनेऽनुगुणं सक्थ्युद्यच्छतीत्यर्थः । मम पतिः [v]इन्द्रः [v]विश्वस्मात् [v]उत्तरः उत्कृष्टः ॥

उवे अम्ब सुलाभिके यथैवाङ्ग भविष्यति ।
भसन्मे अम्ब सक्थि मे शिरो मे वीव हृष्यति विश्वस्मादिन्द्र उत्तरः ॥ ७॥

उवे । अम्ब । सुऽलाभिके । यथाऽइव । अङ्ग । भविष्यति ।
भसत् । मे । अम्ब । सक्थि । मे । शिरः । मे । विऽइव । हृष्यति ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ ७ ॥

एवमिन्द्राण्या शक्रो वृषाकपिर्ब्रवीति । [v]उवे इति संबोधनार्थो निपातः । हे [v]अम्ब मातः [v]सुलाभिके शोभनलाभे त्वया [v]यथैव येन प्रकारेणैवोक्तं तथैव तत् [v]अङ्ग क्षिप्रं [v]भविष्यति भवतु । किमनेन त्वदनुप्रोतिकारिणा ग्रहेण मम प्रयोजनम् । किंच [v]मे मम पितुः त्वदीयो [v]भसत् भग उपयुज्यताम् । किंच मम पितुस्त्वदीयं [v]सक्थि चोपयुज्यताम् । किंच [v]मे मम पितरमिन्द्रं त्वदीयं [v]शिरः च प्रियालापेन [v]वीव यथा कांकिलादिः पक्षी तद्वत् [v]हृष्यति हर्षयतु । मम पिता [v]इन्द्रः [v]विश्वस्मात् [v]उत्तरः ॥

किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने ।
शूरपत्नि नस्त्वमभ्यमीषि वृषाकपिं विश्वस्मादिन्द्र उत्तरः ॥ ८ ॥

किम् । सुऽबाहो इति सुऽबाहो । सुऽअङ्गुरे । पृथुस्तो इति पृथुऽस्तो । पृथुऽजघने ।
किम् । शूरऽपत्नि । नः । त्वम् । अभि । अमीषि । वृषाकपिम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥८॥

कुद्दामि[2] उत्तरयति । हे [v]सुबाहो हे शोभनबाहो [v]स्वङ्गुरे शोभनाङ्गुलिके [v]पृथुष्टो पृथुकेशसंघाते [v]पृथुजघने विस्तीर्णजघने [v]शूरपत्नि वीरभार्ये हे इन्द्राणि [v]त्वं [v]नः अस्मदीयं [v]वृषाकपिं [v]किं किमर्थम् [v]अभ्यमीषि अभिक्रुध्यसि । एकः किंशब्दः पूरणः । यस्य पिता [v]इन्द्रः अहं [v]विश्वस्मात् [v]उत्तरः ॥

---

१. म४–मत्तोन्या स्त्री । २. म,त४–कुद्दामिद्राणोमिद्र; त३.५.६.७–कुद्दामिद्राणीद्र ।

अवीरामिव मामयं शरारुरभि मन्यते ।
उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः ॥ ९ ॥

अवीराम्ऽइव । माम् । अयम् । शरारुः । अभि । मन्यते ।
उत । अहम् । अस्मि । वीरिणी । इन्द्रेऽपत्नी । मरुत्ऽसखा । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥९॥

पुनरिन्द्रमिन्द्राणी[1] ब्रवीति[1] । vशरारुः घातुको[2] मृगः vअयं वृषाकपिः vमाम् इन्द्राणीम् vअवीरामिव vअभि vमन्यते विजानाति । vउत अपि च vइन्द्रपत्नी इन्द्रस्य भार्या vअहम् इन्द्राणी vवीरिणी पुत्रवती vमरुत्सखा मरुद्भिर्युक्ता च vअस्मि भवामि । यस्या मम पतिः vइन्द्रः vविश्वस्मात् vउत्तरः ॥

संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।
वेधा ऋतस्य वीरिणीन्द्रपत्नी महीयते विश्वस्मादिन्द्र उत्तरः ॥ १० ॥

सम्ऽहोत्रम् । स्म । पुरा । नारी । समनम् । वा । अव । गच्छति ।
वेधाः । ऋतस्य । वीरिणी । इन्द्रेऽपत्नी । महीयते । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ १० ॥

vनारी स्त्री vऋतस्य सत्यस्य vवेधाः विधात्री vवीरिणी पुत्रवती vइन्द्रपत्नी इन्द्रस्य भार्येन्द्राणी vसंहोत्रं vस्म समीचीनं यज्ञं खलु vसमनं संग्रामं vवा । 'समितिः समनम्' इति संग्रामनामसु पाठात् । vअव प्रति vपुरा vगच्छति । vमहीयते स्तोतृभिः स्तूयते च । तस्या मम पतिः vइन्द्रः vविश्वस्मात् vउत्तरः ॥ ॥ २ ॥

इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ।
नह्यस्या अपरं चन जरसा मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥ ११ ॥

इन्द्राणीम् । आसु । नारिषु । सुऽभगाम् । अहम् । अश्रवम् ।
नहि । अस्याः । अपरम् । चन । जरसा । मरते । पतिः । विश्वस्मात् । इन्द्रः । उत्ऽतरः॥११॥

अथेन्द्राणीमिन्द्रः स्तौति । vआसु सौभाग्यवत्तया प्रसिद्धासु vनारिषु स्त्रीषु[3] स्त्रीणां मध्ये vइन्द्राणीं vसुभगां सौभाग्यवतीम् vअहम् इन्द्रः vअश्रवम् अश्रौषम् । किंच vअस्याः इन्द्राण्याः vपतिः पालकः vविश्वस्मात् vउत्तरः उत्कृष्टतरः[4] vइन्द्रः vअपरं vचन अन्यद्भूतजातमिव vजरसा वयोहान्या vनहि vमरते न खलु म्रियते । यद्वा । इदं वृषाकपेर्वाक्यम् । तस्मिन्[5] पक्षे त्वहमिति शब्दो वृषाकपिपरतया योज्यः । अन्यत्समानम् ॥

नाहमिन्द्राणि रारण सख्युर्वृषाकपेऋते ।
यस्येदमप्यं हविः प्रियं देवेषु गच्छति विश्वस्मादिन्द्र उत्तरः ॥ १२ ॥

न । अहम् । इन्द्राणि । ररण । सख्युः । वृषाकपेः । ऋते ।
यस्य । इदम् । अप्यम् । हविः । प्रियम् । देवेषु । गच्छति । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१२॥

---

१. त–पुनरिंद्राणी ब्रूते । २. ग-त-भ–'घातुको' नास्ति । ३. त-भ१.२.४–'स्त्रीषु' नास्ति । ४. त-भ–उत्कृष्टः । ५. त-भ१.२.४.६.८–यस्मिन् ।

हे ᵛइन्द्राणि ᵛअहम् इन्द्रः ᵛसख्युः मम सखिभूतात् ᵛवृषाकपेर्गृहे प्रियं वृषाकपिं विना ᵛन ᵛरण न रमे। ᵛअप्यम् अप्सु भवमन्निर्वा संस्कृतं ᵛप्रियं प्रीतिकरम् ᵛइदम् उपस्थितं ᵛहविः ᵛदेवेषु देवानां मध्ये ᵛवस्य ममेन्द्रस्य[1] सकाशं ᵛगच्छति। यश्चाहम् ᵛइन्द्रः ᵛसर्वस्मात् ᵛउत्तरः। यद्वा। अयमर्थः। हे इन्द्राणि वृषाकपेः सख्युरिन्द्रादृतेऽहं वृषाकपिनं रारण न रमे। अन्यत्समानम् ॥

वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे।
घसत्त इन्द्र उक्षणः प्रियं काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः ॥ १३ ॥

वृषाकपायि। रेवति। सुऽपुत्रे। आत्। ऊँ इति। सुऽस्नुषे।
घसत्। ते। इन्द्रः। उक्षणः। प्रियम्। काचित्ऽकरम्। हविः। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥१३॥

हे ᵛवृषाकपायि। कामानां वर्षकत्वादभीष्टदेशगमनाच्चेन्द्रो वृषाकपिः। तस्य पत्नि। यद्वा। वृषाकपेर्मम मातरित्यर्थः। ᵛरेवति धनवति ᵛसुपुत्रे शोभनपुत्रे ᵛसुस्नुषे शोभनस्नुषे हे इन्द्राणि ᵛते तवायम् ᵛइन्द्रः ᵛउक्षणः सेचनसमर्थान् ᵛआदु अनन्तरमेव। शीघ्रमेवेत्यर्थः। पशून् ᵛघसत् प्राश्नातु। किंच[2] ᵛकाचित्करम्। कं सुखम्। तस्याचित् संघः। तत्करं हविः ᵛप्रियम् इष्टं कुर्विति शेषः। किंच ते पतिः ᵛइन्द्रः ᵛविश्वस्मात् ᵛउत्तरः। तथा च यास्कः—'वृषाकपायि रेवति सुपुत्रे मध्यमेन सुस्नुषे माध्यमिकया वाचा। स्नुषा साधुसादिनीति[3] वा साधुसानिनीति वा। प्रियं कुरुष्व सुखाचयकरं हविः सर्वस्माच्च इन्द्र उत्तरः' (निरु. १२. ९) इति ॥

उक्षणो हि मे पञ्चदश साकं पचन्ति विंशतिम्।
उताहमद्मि पीव इदुभा कुक्षी पृणन्ति मे विश्वस्मादिन्द्र उत्तरः ॥ १४ ॥

उक्षणः। हि। मे। पञ्चऽदश। साकम्। पचन्ति। विंशतिम्।
उत। अहम्। अद्मि। पीवः। इत्। उभा। कुक्षी इति। पृणन्ति। मे।
विश्वस्मात्। इन्द्रः। उत्ऽतरः॥ १४ ॥

अथेन्द्रो ब्रवीति। ᵛमे मदर्थं ᵛपञ्चदश पञ्चदशसंख्याकान् ᵛविंशतिं विंशतिसंख्याकांश्च ᵛउक्षणः वृषभान् ᵛसाकं सह मम भार्ययेन्द्राण्या प्रेरिता यष्टारः ᵛपचन्ति। ᵛउत अपि च ᵛअहमद्मि तान् भक्षयामि। अत्त्वा चाहं ᵛपीव ᵛइत् स्थूल एव भवामीति शेषः। किंच ᵛमे मम ᵛउभा उभौ[4] ᵛकुक्षी ᵛपृणन्ति सोमेन पूरयन्ति यष्टारः। सोऽहम् ᵛइन्द्रः ᵛसर्वस्मात् ᵛउत्तरः ॥

वृषभो न तिग्मशृङ्गोऽन्तर्यूथेषु रोरुवत्।
मन्थस्त इन्द्र शं हृदे यं ते सुनोति भावयुर्विश्वस्मादिन्द्र उत्तरः ॥ १५ ॥

वृषभः। न। तिग्मऽशृङ्गः। अन्तः। यूथेषु। रोरुवत्।
मन्थः। ते। इन्द्र। शम्। हृदे। यम्। ते। सुनोति। भावयुः। विश्वस्मात्। इन्द्रः। उत्ऽतरः॥१५॥

अथेन्द्राणी ब्रवीति। ᵛतिग्मशृङ्गः तीक्ष्णशृङ्गः ᵛवृषभो ᵛन यथा वृषभः ᵛयूथेषु गोसंघेषु ᵛअन्तः मध्ये ᵛरोरुवत् शब्दं कुर्वन् गा अभिरमयति तथा हे इन्द्र त्वं मामभिरमयेति शेषः। किंच

---

१. त-म-महेंद्रस्य। २. त-किंच त्वं। ३. त१.२.३.६-साधुवादिनीति। ४. त-उभौ च।

vहे इन्द्र vते तव vहृदे हृदयाय vमन्थः दध्नो मथनवेलायां शब्दं कुर्वन् vशं[1] शंकरो भवत्विति शेषः । किंच vते तुभ्यं vयं सोमं vभावयुः भावमिच्छन्तीन्द्राणी vसुनोति अभिषुणोति सोऽपि शंकरो भवत्विरयर्थः । मम पतिः vइन्द्रः vविश्वस्मात् vउत्तरः ॥ ॥ ३ ॥

न सेशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृत् ।
सेदीशे यस्य रोमशं निषेदुषो विजृम्भते विश्वस्मादिन्द्र उत्तरः ॥ १६ ॥

न । सः । ईशे । यस्य । रम्बते । अन्तरा । सक्थ्या । कपृत् ।
सः । इत् । ईशे । यस्य । रोमशम् । निऽसेदुषः । विऽजृम्भते ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ १६ ॥

हे इन्द्र vसः जनः vन vईशे मैथुनं कर्तुं नेष्टे न शक्नोति vयस्य जनस्य vकपृत् शेपः[2] vसक्थ्या सक्थिनी vअन्तरा vरम्बते लम्बते । vसेत् स एव क्लीबने vईशे मैथुनं कर्तुं शक्नोति vयस्य जनस्य vनिषेदुषः शयानस्य vरोमशम् उपस्थं vविजृम्भते विवृतं भवति। यस्य च पतिः vइन्द्रः vविश्वस्मात् vउत्तरः ॥

न सेशे यस्य रोमशं निषेदुषो विजृम्भते ।
सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या३ कपृद्विश्वस्मादिन्द्र उत्तरः ॥ १७ ॥

न । सः । ईशे । यस्य । रोमशम् । निऽसेदुषः । विऽजृम्भते ।
सः । इत् । ईशे । यस्य । रम्बते । अन्तरा । सक्थ्या । कपृत् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ १७ ॥

vसः जनः vन vईशे मैथुनं कर्तुं नेष्टे vयस्य जनस्य vनिषेदुषः शयानस्य vरोमशम् उपस्थं vविजृम्भते विवृतं भवति । vसेत् स एव जनः vईशे ईष्टे मैथुनं कर्तुं शक्नोति vयस्य जनस्य vकपृत् प्रजननं vसक्थ्या सक्थिनी vअन्तरा vरम्बते लम्बते । सिद्धमन्यत् । पूर्वोक्तव्यतिरेकोऽत्र द्रष्टव्यः । पूर्वस्यामृचि वियप्सुरिन्द्राणीन्द्रं वदति । अत्र त्ववियप्सुरिन्द्र इन्द्राणीं वदतीत्यविरोधः ॥

अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत् ।
असिं सूनां नवं चरुमादेधस्यान आचितं विश्वस्मादिन्द्र उत्तरः ॥ १८ ॥

अयम् । इन्द्र । वृषाकपिः । परस्वन्तम् । हतम् । विदत् ।
असिम् । सूनाम् । नवम् । चरुम् । आत् । एधस्य । अनः । आऽचितम् ।
विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥ १८ ॥

हे vइन्द्र vअयं vवृषाकपिः vपरस्वन्तं परस्वमात्मनो विषयेऽवर्तमानं vहतं हिंसितं vविदत् विन्दतु । तथा हतस्य[3] विशसनाय vअसिं शस्त्रं vसूनाम् उद्धानं पाकार्थं vनवं प्रत्यग्रं vचरुं भाण्डम्[4] vआत् अनन्तरम् vएधस्य काष्ठस्य vआचितं पूर्णम् vअनः शकटं च विन्दतु । मम पतिः vइन्द्रः vविश्वस्मात् vउत्तरः ॥

---

१. ग-त-भ-'शं' नास्ति । २. त-शेपः प्रजननं । ३. त-भ१.२.४.६.८-हतस्य तस्य । ४. त-भांडं च ।

अयमेमि विचाकशद्विचिन्वन् दासमार्यम् ।
पिबामि पाकसुत्वनोऽभि धीरमचाकशं विश्वस्मादिन्द्र उत्तरः ॥ १९ ॥

अयम् । एमि । विऽचाकशत् । विऽचिन्वन् । दासम् । आर्यम् ।
पिबामि । पाकऽसुत्वनः । अभि । धीरम् । अचाकशम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः॥१९॥

अथेन्द्रो ब्रवीति । vविचाकशत् पश्यन् यजमानान् vदासम् उपक्षपयितारमसुरम् vआर्यम् अपि च vविचिन्वन् पृथक्कुर्वन् vअयम् अहमिन्द्रः vएमि यज्ञं[1] प्रति गच्छामि[1]। यज्ञं गत्वा च vपाकसुत्वनः । पचतीति पाकः । सुनोतीति सुत्वा । हविषां पक्तुः सोमस्याभिषोतुर्यजमानस्य पाकेन विपक्केन मनसा सोमस्याभिषोतुर्वा यजमानस्य संबन्धिनं सोमं vपिबामि । तथा vधीरं धीमन्तं यजमानम् vअभि vअचाकशम् अभिपश्यामि । योऽहम् vइन्द्रः vविश्वस्मात् vउत्तरः ॥

धन्व च यत्कृन्तत्रं च कति स्वित्ता वि योजना ।
नेदीयसो वृषाकपेऽस्तमेहि गृहाँ उप विश्वस्मादिन्द्र उत्तरः ॥ २० ॥

धन्व । च । यत् । कृन्तत्रम् । च । कति । स्वित् । ता । वि । योजना ।
नेदीयसः । वृषाकपे । अस्तम् । आ । इहि । गृहान् । उप । विश्वस्मात् । इन्द्रः । उत्ऽतरः॥२०॥

vधन्व निरुदकोऽरण्यरहितो देशः । vकृन्तत्रं कर्तनीयमरण्यम् । vयत् यत् vच vधन्व vच कृन्तत्रं च भवति[2] । मृगोद्वासमरण्यमेवंविधं भवति न त्वत्यन्तविपिनम् । तस्य शत्रुनिलयस्यास्मदीयगृहस्य च मध्ये vकति vस्वित् vता तानि vयोजना योजनानि स्थितानि । नात्यन्तदूरे तन्नवतीत्यर्थः । अतः vनेदीयसः अतिशयेन समीपस्थाच्छत्रुनिलयात् हे vवृषाकपे त्वम् vअस्तम् अस्माकं गृहं vवि vएहि विशेषेणागच्छ । आगत्य च vगृहान् यज्ञगृहान् vउप गच्छ । यतोऽहम् vइन्द्रः सर्वस्मादुत्कृष्टः ॥

पुनरेहि वृषाकपे सुविता कल्पयावहै ।
य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः ॥ २१ ॥

पुनः । आ । इहि । वृषाकपे । सुविता । कल्पयावहै ।
यः । एषः । स्वप्नऽनंशनः । अस्तम् । एषि । पथा । पुनः । विश्वस्मात् । इन्द्रः । उत्ऽतरः॥२१॥

आगत्य प्रतिगतं वृषाकपिमिन्द्रो ब्रवीति । हे vवृषाकपे त्वं vपुनरेहि अस्मान् प्रत्यागच्छ । आगते च त्वयि vसुविता सुवितानि कल्याणानि त्वच्चित्तप्रीतिकराणि[3] कर्माणि vकल्पयावहै इन्द्राण्यहं च आवामुभौ पर्यालोच्य कुर्याव । किंच vयः vस्वप्ननंशनः उदयेन सर्वस्य प्राणिनः स्वप्नानां नाशयिता आदित्यः सः vएषः त्वं vपथा मार्गेण vअस्तम् आत्मीयमावासं vपुनः vएषि गच्छसि । यतोऽहम् vइन्द्रः vविश्वस्मात् vउत्तरः । तथा च यास्कः—'सुप्रसूतानि वः कर्माणि कल्पयावहै य एष स्वप्ननंशनः स्वप्नाज्ञाशयस्यादित्य उदयेन सोऽस्तमेषि पथा पुनः' (निरु. १२. २८) इति ॥

१. त–'यज्ञं प्रति गच्छामि' नास्ति । २. त१.२.४.५.६-भ२.४.६–भवत; त३-भ८–भवतः । ३. भ–°प्रीतिकरणानि ।

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन ।
क्व१ स्य पुल्वघो मृगः कमगञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः ॥ २२ ॥

यत् । उदञ्चः । वृषाकपे । गृहम् । इन्द्र । अजगन्तन ।
क्व । स्यः । पुल्वघः । मृगः । कम् । अगन् । जनऽयोपनः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२२॥

गत्वा पुनरागतं वृषाकपिमिन्द्रः पृच्छति । हे [v]इन्द्र परमैश्वर्यवन् हे [v]वृषाकपे यूयम् [v]उदञ्चः उद्गामिनः सन्तो मद्गृहम् [v]अजगन्तन आगच्छ[1] । एकस्यापि बहुवचनं पूजार्थम् । तत्र भवतः संबन्धी [v]पुल्वघः बहूनां भौमरसानामत्ता [v]स्यः सः [v]मृगः [v]क्व अभूत् [v]जनयोपनः जनानां मोदयिता मृगः [v]कं वा देशम् [v]अगन् अगच्छत् । सोऽहम् [v]इन्द्रः [v]विश्वस्मात् [v]उत्तरः । यद्वा इन्द्राणीवाक्यमिदम् । अत्र यास्कः—' यदुदञ्चो वृषाकपे गृहमिन्द्राजगमत क्व स्य पुल्वघो मृगः क्व स बह्वादी मृगः । मृगो मार्ष्टेर्गतिकर्मणः । कमगमदेशं जनयोपनः ' (निरु. १३. ३) इति ॥

पर्शुर्ह नाम मानवी साकं ससूव विंशतिम् ।
भद्रं भल त्यस्या अभूद्यस्या उदरमामयद्विश्वस्मादिन्द्र उत्तरः ॥ २३ ॥

पर्शुः । ह । नाम । मानवी । साकम् । ससूव । विंशतिम् ।
भद्रम् । भल । त्यस्यै । अभूत् । यस्याः । उदरम् । आमयत् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२३॥

इन्द्रविसृज्यमानमनेन[2] मन्त्रेण[3] वृषाकपिराशास्ते । हे [v]भल इन्द्रेण विसृज्यमान शर । भलतिर्भेदनकर्मा । [v]पर्शुः [v]नाम मृगी । [v]ह इति पूरणः । [v]मानवी मनोर्दुहितेयं [v]विंशतिं विंशतिसंख्याकान् पुत्रान् [v]साकं सह [v]ससूव अजीजनत् । [v]त्यस्यै तस्यै [v]भद्रं भजनीयं कल्याणम् [v]अभूत् भवतु । लोडर्थे लुङ् । [v]यस्या [v]उदरमामयत् गर्भस्थैर्विंशतिभिः पुत्रैः पुटमासीत् । मम पिता [v]इन्द्रः [v]विश्वस्मात् [v]उत्तरः ॥ ॥ ४ ॥

' रक्षोहणम् ' इति पञ्चविंशत्यृचं तृतीयं सूक्तम् । पायुर्नाम भारद्वाज ऋषिः । द्वाविंशाद्याश्चतस्रोऽनुष्टुभः । शिष्टा एकविंशतिस्त्रिष्टुभः । रक्षोहाग्निर्देवता । तथा चानुक्रान्तं—' रक्षोहणं पञ्चाधिका पायुराग्नेयं राक्षोघ्नं चतुरनुष्टुबन्तम् ' इति । गतः सूक्तविनियोगः । अङ्गाराभिविहरणे ' परि त्वाग्ने ' इत्येषा जप्या । सूत्रितं च—' धिष्ण्यावताम्[3] ' इत्यादिना ' परि त्वाग्ने पुरं वयम् ' (आश्व. श्रौ. ५. १३) इत्यन्तेन ॥

रक्षोहणं वाजिनमा जिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥ १ ॥

रक्षःऽहनम् । वाजिनम् । आ । जिघर्मि । मित्रम् । प्रथिष्ठम् । उप । यामि । शर्म ।
शिशानः । अग्निः । क्रतुऽभिः । सम्ऽइद्धः । सः । नः । दिवा । सः । रिषः । पातु । नक्तम् ॥१॥

[v]रक्षोहणं रक्षसां हन्तारं [v]वाजिनं बलवन्तमन्नवन्तं वाग्निम् [v]आ [v]जिघर्मि घृतेनाजुहोमि । किंच [v]मित्रं यजमानानां सखायं [v]प्रथिष्ठं पृथुतमं [v]शर्म गृहम्[4] [v]उप [v]यामि उपगच्छामि । सोऽयम्

---

१. ग२–आगच्छत । २. ग४–इंद्रेण विज्यमानं शरमनेन मंत्रेण; त–हे इंद्र विसृज्यमानं अनंतरमंत्रेण; म–हे इंद्र विसृज्यमानमनेन मंत्रेण । ३. त–यै धिष्ण्यावतां; आश्व. श्रौ.–धिष्ण्यवतां । ४. भ–शरणं ।

vअग्निः vशिशानः ज्वालास्तीक्ष्णीकुर्वन् vक्रतुभिः कर्मपरैः पुरुषैः vसमिद्धः[1] प्रज्वालितो भवति। किंच vसः अग्निः vनः अस्मान् vदिवा अह्नि vरिषः हिंसकाद्रक्षसः vपातु रक्षतु। vसः अग्निः vनक्तं रात्रौ चास्मान्रक्षसः पातु ॥

अयोदंष्ट्रो अर्चिषा यातुधानानुप स्पृश जातवेदः समिद्धः।
आ जिह्वया मूरदेवान् रभस्व क्रव्यादो वृक्त्व्यपि धत्स्वासन् ॥ २ ॥

अयःऽदंष्ट्रः। अर्चिषा। यातुऽधानान्। उप। स्पृश। जातऽवेदः। सम्ऽइद्धः।
आ। जिह्वया। मूरऽदेवान्। रभस्व। क्रव्यऽअदः। वृक्त्वी। अपि। धत्स्व। आसन्॥२॥

हे vजातवेदः जातधन जातप्रज्ञ वा त्वं vसमिद्धः सम्यग्दीप्तः vअयोदंष्ट्रः अयोमयदंष्ट्रः। तीक्ष्णदंष्ट्रः[2] सन्नित्यर्थः। vयातुधानान् राक्षसान् vअर्चिषा ज्वालया vउप vस्पृश संदहेत्यर्थः। किंच त्वं vमूरदेवान् मूढदेवान् मारकव्यापारान् राक्षसान् vजिह्वया ज्वालया vआ vरभस्व मारयेत्यर्थः। मारयित्वा च vक्रव्यादः मांसभक्षकान् राक्षसान् vवृक्त्वी छित्त्वा vआसन् आस्ये vअपि vधत्स्व अपिधेहि। आच्छादयेत्यर्थः ॥

उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च।
उतान्तरिक्षे परि याहि राजञ्जम्भैः सं धेह्यभि यातुधानान् ॥ ३ ॥

उभा। उभयाविन्। उप। धेहि। दंष्ट्रा। हिंस्रः। शिशानः। अवरम्। परम्। च।
उत। अन्तरिक्षे। परि। याहि। राजन्। जम्भैः। सम्। धेहि। अभि। यातुऽधानान् ॥३॥

हे vउभयाविन् उभाभ्यां दंष्ट्राभ्यां युक्ताग्ने त्वं vहिंस्रः राक्षसानां हिंसकस्त्वं vउभा उभे vदंष्ट्रा दंष्ट्रे vशिशानः तीक्ष्णीकुर्वन् vउप vधेहि वधार्हेषु राक्षसेषु प्रतिष्ठापय। किंच vअवरं vपरं vच जगत् रक्ष। vउत अपि च हे vराजन् दीप्ताग्ने त्वम् vअन्तरिक्षे स्थितान् राक्षसान् vपरि vयाहि परिगच्छ। परिगत्य च तान् vयातुधानान् राक्षसान् vजम्भैः भक्षणसाधनभूताभिः दंष्ट्राभिः[3] vअभि vसं vधेहि संयोजय। भक्षयेत्यर्थः ॥

यज्ञैरिषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर्दिहानः।
ताभिर्विध्य हृदये यातुधानान् प्रतीचो बाहून् प्रति भङ्ध्येषाम् ॥ ४ ॥

यज्ञैः। इषूः। सम्ऽनममानः। अग्ने। वाचा। शल्यान्। अशनिऽभिः। दिहानः।
ताभिः। विध्य। हृदये। यातुऽधानान्। प्रतीचः। बाहून्। प्रति। भङ्धि। एषाम् ॥ ४ ॥

हे vअग्ने त्वं vयज्ञैः अस्मदीयैर्बलकरैर्यागैः vवाचा अस्मदीयया स्तुत्या च vइषूः बलकान् बाणान् vसंनममानः संनमयन् vशल्यान् तासां शल्यान् vअशनिभिः दीप्तिभिः vदिहानः[4] तीक्ष्णीकुर्वन् vताभिः इषुभिः vयातुधानान् राक्षसान् vहृदये vविध्य। ततः vएषां यातुधानानां संबन्धिनः vप्रतीचः युद्धाय त्वां[5] प्रतिगतान् vबाहून् vप्रति vभङ्धि प्रत्यामर्दय ॥

१. भ-'समिद्धः' नास्ति। २. त-भ१.४.७-'तीक्ष्णदंष्ट्रः' नास्ति। ३. त१.२.३.६.७.८-भ-'दंष्ट्राभिः' नास्ति। ४. त१.२.३.६.७.८-भ-संदिहानः। ५. त-भ-'त्वां' नास्ति।

अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर्हरसा हन्त्वेनम् ।
प्र पर्वाणि जातवेदः शृणीहि क्रव्यात्क्रविष्णुर्वि चिनोतु वृक्णम् ॥ ५ ॥

अग्ने । त्वचम् । यातुऽधानस्य । भिन्धि । हिंस्रा । अशनिः । हरसा । हन्तु । एनम् ।
प्र । पर्वाणि । जातऽवेदः । शृणीहि । क्रव्यऽअत् । क्रविष्णुः । वि । चिनोतु । वृक्णम् ॥५॥

हे vजातवेदः जातधन जातप्रज्ञ वा vअग्ने त्वं vयातुधानस्य राक्षसस्य vत्वचं vभिन्धि दारय[1]। vएनं भिन्नत्वचं यातुधानं vहिंस्रा हिंसनशीलं[2] तव vअशनिः वज्रं vहरसा तापेन vहन्तु हिनस्तु। हतस्य राक्षसस्य vपर्वाणि शरीरपर्वाणि च vप्र vशृणीहि छिन्द्धीत्यर्थः। छिन्नेषु च शरीरसंधिषु सत्सु vवृक्णं छिन्नसंधिमेनं यातुधानं vक्रविष्णुः मांसमिच्छन्[3] vक्रव्यात्[3] मांसभक्षको वृकादिः vवि चिनोतु। भक्षयत्वित्यर्थः ॥ ॥ ५ ॥

यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम् ।
यद्वान्तरिक्षे पथिभिः पतन्तं तमस्ता विध्य शर्वा शिशानः ॥ ६ ॥

यत्र । इदानीम् । पश्यसि । जातऽवेदः । तिष्ठन्तम् । अग्ने । उत । वा । चरन्तम् ।
यत् । वा । अन्तरिक्षे । पथिऽभिः । पतन्तम् । तम् । अस्ता । विध्य । शर्वा । शिशानः ॥६॥

हे vजातवेदः उत्पन्नप्रज्ञ vअग्ने त्वं vयत्र पृथिव्यां vतिष्ठन्तम् vउत अपि च vचरन्तं vयद्वान्तरिक्षे vपथिभिः आकाशमार्गैः[4] vपतन्तं गच्छन्तं यातुधानम् vइदानीं संप्रति vपश्यसि vतं यातुधानम् vअस्ता शराणां क्षेप्ता त्वं vशिशानः शरांस्तीक्ष्णीकुर्वन् vशर्वा शरेण vविध्य ॥

उतालब्धं स्पृणुहि जातवेद आलेभानाद्दृष्टिभिर्यातुधानात् ।
अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विङ्कास्तमदन्त्वेनीः ॥ ७ ॥

उत । आऽलब्धम् । स्पृणुहि । जातऽवेदः । आऽलेभानात् । ऋष्टिऽभिः । यातुऽधानात् ।
अग्ने । पूर्वः । नि । जहि । शोशुचानः । आमऽअदः । क्ष्विङ्काः । तम् । अदन्तु । एनीः ॥७॥

vउत अपि च हे vजातवेदः vअग्ने त्वम् vआलब्धं हन्तुं हस्ताभ्यामारब्धं साधुं मां स्तोतारं यष्टारं वा vआलेभानात् आलभमानात् vयातुधानात् राक्षसात् vऋष्टिभिः आत्मीयैरायुधविशेषैः vस्पृणुहि पारय। रक्षेत्यर्थः। किंच vपूर्वः मुख्यस्त्वं vशोशुचानः प्रज्वलन् vनि vजहि मां हन्तुमुद्युक्तं यातुधानं मारय। किंच vतं यातुधानम् vआमादः अपक्वस्य मांसस्य भक्षकाः vक्ष्विङ्काः शब्दकारिण्यः। 'ट्टक्षु शब्दे'। यद्वा। क्ष्विङ्का नाम पक्षिविशेषाः। vएनीः गम्यः[5] vअदन्तु भक्षयन्तु ॥

इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति ।
तमा रभस्व समिधा यविष्ठ नृचक्षसश्चक्षुषे रन्धयैनम् ॥ ८ ॥

इह । प्र । ब्रूहि । यतमः । सः । अग्ने । यः । यातुऽधानः । यः । इदम् । कृणोति ।
तम् । आ । रभस्व । सम्ऽइधा । यविष्ठ । नृऽचक्षसः । चक्षुषे । रन्धय । एनम् ॥ ८ ॥

---

१. त-विदारय । २. ग-त-भ-हिंसनशीला । ३. त-भ-' मांसमिच्छन् क्रव्यात् ' नास्ति ।
४. त-भ-आकाशमार्गे । ५. ग१.२-गंन्यः श्वेता वा ।

हे ᵛयविष्ठ युवतम ᵛअग्ने ᵛयः ᵛयातुधानः राक्षसोऽस्मद्यज्ञविघ्नकारी ᵛयः चान्योऽपि पिशाचादिः ᵛइदं यज्ञदूषणादि ᵛकरोति ᵛसः ᵛयतमः । तमवधारणार्थम् । ᵛइह अस्मिन्स्वद्विषद्यागकर्मणि वर्तमानाय मह्यं ᵛप्र ᵛब्रूहि । ᵛतं पापकारिणं ᵛसमिधा स्वकीयेन तेजसा ᵛआ ᵛरभस्व हन्तुं प्रारभस्व । ततः ᵛएनं पापिष्ठं ᵛनृचक्षसः नृणां द्रष्टुस्तव ᵛचक्षुषे तेजसे ᵛरन्धय वशं नय । तेजसा संदहेत्यर्थः ॥

तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञं प्राञ्चं वसुभ्यः प्र णय प्रचेतः ।
हिंस्रं रक्षांस्यभि शोशुचानं मा त्वा दभन्यातुधाना नृचक्षः ॥ ९ ॥

तीक्ष्णेन । अग्ने । चक्षुषा । रक्ष । यज्ञम् । प्राञ्चम् । वसुऽभ्यः । प्र । नय । प्रचेत इति प्रऽचेतः । हिंस्रम् । रक्षांसि । अभि । शोशुचानम् । मा । त्वा । दभन् । यातुऽधानाः । नृऽचक्षः ॥ ९ ॥

हे ᵛअग्ने त्वं ᵛतीक्ष्णेन तिग्मेन ᵛचक्षुषा तेजसा ᵛयज्ञम् अस्मदीयं यागं ᵛरक्ष पालय । किंच हे ᵛप्रचेतः प्रकृष्टज्ञानाग्ने ᵛप्राञ्चं प्राञ्चितारं यज्ञं ᵛवसुभ्यः वसूनामर्थाय ᵛप्र ᵛणय प्रकर्षेण नय । किंच हे ᵛनृचक्षः नृणां द्रष्टरग्ने ᵛरक्षांसि ᵛहिंस्रं हिंसनशीलम् ᵛअभि ᵛशोशुचानम् अभिप्रदीप्तं ᵛत्वा त्वां ᵛयातुधानाः राक्षसाः ᵛमा ᵛदभन् मा हिंसिषुः ॥

नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्यग्रा ।
तस्याग्ने पृष्टीर्हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥ १० ॥

नृऽचक्षाः । रक्षः । परि । पश्य । विक्षु । तस्य । त्रीणि । प्रति । शृणीहि । अग्रा । तस्य । अग्ने । पृष्टीः । हरसा । शृणीहि । त्रेधा । मूलम् । यातुऽधानस्य । वृश्च ॥ १० ॥

हे ᵛअग्ने ᵛनृचक्षाः नृणां द्रष्टा त्वं ᵛविक्षु मनुष्येषु हिंसकत्वेन वर्तमानं ᵛरक्षः राक्षसं ᵛपरि ᵛपश्य सर्वतोऽवलोकय । अवलोक्य च ᵛतस्य रक्षसः ᵛत्रीणि ᵛअग्रा[1] अग्राणि शिरांसि ᵛप्रति ᵛशृणीहि छिन्द्धीत्यर्थः । ततः ᵛतस्य रक्षसः ᵛपृष्टीः पार्श्वस्थान् राक्षसानपि ᵛहरसा स्वकीयेन तेजसा ᵛशृणीहि मारय । एवं ᵛत्रेधा ᵛयातुधानस्य तस्य राक्षसस्य ᵛमूलं पादं ᵛवृश्च छिन्द्धि ॥ ॥ ६ ॥

त्रिर्यातुधानः प्रसितिं त एत्वृतं यो अग्ने अनृतेन हन्ति ।
तमर्चिषा स्फूर्जयञ्जातवेदः समक्षमेनं गृणते नि वृङ्धि ॥ ११ ॥

त्रिः । यातुऽधानः । प्रऽसितिम् । ते । एतु । ऋतम् । यः । अग्ने । अनृतेन । हन्ति । तम् । अर्चिषा । स्फूर्जयन् । जातऽवेदः । सम्ऽअक्षम् । एनम् । गृणते । नि । वृङ्धि ॥ ११ ॥

हे ᵛजातवेदः जातप्रज्ञ ᵛअग्ने ᵛते स्वदीयं[2] ᵛप्रसितिं ऽज्वालाप्रबन्धनं ᵛयातुधानः राक्षसः ᵛत्रिः त्रीन्वारान् ᵛएतु गच्छतु । त्रिर्बद्धं यत्तत्सुबद्धं भवति हि । किंच ᵛयः यातुधानः राक्षसः ᵛऋतं सत्यम् ᵛअनृतेन असत्येन ᵛहन्ति हिनस्ति ᵛतं यातुधानम् ᵛअर्चिषा स्वकीयेन तेजसा ᵛस्फूर्जयन् निष्पिंषन् । स्फूर्जतिरत्र निष्पेषणकर्मा । ᵛएनं यातुधानं ᵛगृणते स्तोत्रं कुर्वते मह्यं ᵛसमक्षं प्रत्यक्षं[3] ᵛनि ᵛवृङ्धि । निगृह्य वर्जय वृकेण ॥

---

१. त-भ-'अग्रा नास्ति । २. त-भ-स्वदीयां । ३. त२.३.६.७.८-भ-'प्रत्यक्षं' नास्ति ।

तदग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानम् ।
अथर्ववज्ज्योतिषा दैव्येन सत्यं धूर्वन्तमचितं न्योष ॥ १२ ॥

तत् । अग्ने । चक्षुः । प्रति । धेहि । रेभे । शफऽआरुजम् । येन । पश्यसि । यातुऽधानम् । अथर्वऽवत् । ज्योतिषा । दैव्येन । सत्यम् । धूर्वन्तम् । अचितम् । नि । ओष ॥ १२ ॥

हे [v]अग्ने त्वं [v]रेभे शब्दायमाने राक्षसे [v]तत् [v]चक्षुः तेजः [v]प्रति [v]धेहि प्रक्षिप [v]येन चक्षुषा [v]शफारुजं शफाभ्यामारुजन्तं शफसदृशैर्नखैः साधूनामाभिमुख्येन भक्षकं [v]यातुधानं राक्षसं [v]पश्यसि। किंच [v]सत्यं [v]धूर्वन्तम् असत्येन हिंसन्तम् [v]अचितम् अज्ञानं [v]दैव्येन दिवि भवेन [v]ज्योतिषा तेजसा [v]अथर्ववत् [v]न्योष नितरां दह। दध्यङ्ङथर्वा[1] रक्षसां हन्तेति प्रागुक्तम् ॥

यदग्ने अद्य मिथुना शपातो यद्वाचस्तृष्टं जनयन्त रेभाः ।
मन्योर्मनसः शरव्या[3] जायते या तया विध्य हृदये यातुधानान् ॥ १३ ॥

यत् । अग्ने । अद्य । मिथुना । शपातः । यत् । वाचः । तृष्टम् । जनयन्त । रेभाः ।
मन्योः । मनसः । शरव्या । जायते । या । तया । विध्य । हृदये । यातुऽधानान् ॥ १३ ॥

हे [v]अग्ने [v]यत्[2] यदा [v]अद्य अस्मिन्नहनि[2] [v]मिथुना स्त्रीपुंसौ [v]शपातः परस्परमाक्रोशतः [v]यत् यदा [v]रेभाः स्तोतारः [v]वाचः संबन्धि [v]तृष्टं कटुकं परस्पराक्रोशलक्षणमधरं वा [v]जनयन्त। परस्पर-माक्रोशन्तीत्यर्थः। तदा [v]मन्योः दीप्तस्य क्रुद्धस्य वा तव। तथा च यास्कः—'मन्युर्मन्यतेर्दीप्ति-कर्मणः क्रोधकर्मणो वधकर्मणो वा' (निरु. १०. २९) इति। [v]मनसः सकाशात् [v]या [v]शरव्या इषुः [v]जायते [v]तया शरव्यया [v]यातुधानान् राक्षसान् [v]हृदये [v]विध्य ताडय। मारयेत्यर्थः ॥

परा शृणीहि तपसा यातुधानान् पराग्ने रक्षो हरसा शृणीहि ।
परार्चिषा मूरदेवाञ्छृणीहि परासुतृपो अभि शोशुचानः ॥ १४ ॥

परा । शृणीहि । तपसा । यातुऽधानान् । परा । अग्ने । रक्षः । हरसा । शृणीहि ।
परा । अर्चिषा । मूरऽदेवान् । शृणीहि । परा । असुऽतृपः । अभि । शोशुचानः ॥ १४ ॥

हे [v]अग्ने [v]यातुधानान्[3] [v]तपसा तापेन [v]परा [v]शृणीहि मारय। किंच [v]रक्षो [v]हरसा त्वदीयेनौष्ण्येन [v]परा [v]शृणीहि। किंच [v]मूरदेवान् मारकव्यापारान् राक्षसान् [v]अर्चिषा स्वकीयेन तेजसा [v]परा [v]शृणीहि। अपि च [v]असुतृपः मनुष्याणामसुभिस्तृप्ता ये तानपि [v]परा शृणीहीत्यर्थः ॥

पराद्य देवा वृजिनं शृणन्तु प्रत्यगेनं शपथा यन्तु तृष्टाः ।
वाचास्तेनं शरव ऋच्छन्तु मर्मन् विश्वस्यैतु प्रसितिं यातुधानः ॥ १५ ॥

परा । अद्य । देवाः । वृजिनम् । शृणन्तु । प्रत्यक् । एनम् । शपथाः । यन्तु । तृष्टाः ।
वाचाऽस्तेनम् । शरवः । ऋच्छन्तु । मर्मन् । विश्वस्य । एतु । प्रऽसितिम् । यातुऽधानः ॥ १५ ॥

---

१. त-भ-आथर्वणो दध्यङ्ङथर्वा । २. त१.२.३.६.७.८-भ-मु-अद्यास्मिन्नहनि; त४-यद्यास्मिन्नहनि; त५-यद्यास्मिन्नहनि । ३. ग-त१.२.३.६.७.८-भ-' यातुधानान् ' नास्ति ।

vअद्य अस्मिन्नहनि vदेवाः अग्निपुरोगाः सर्वे देवाः vसूजिनं प्राणिनां प्राणैर्वर्जितारं यातुधानं vपरा vशृणन्तु[1] । अथ vएनम् आयान्तं राक्षसं vतृष्टाः कटुका अस्माभिरुक्ताः vशपथाः vप्रत्यक्[2] vयन्तु[3] । किंच vवाचास्तेनम् अनृतवचनमेनं यातुधानं vशरवः शराः vमर्मन् मर्मणि vऋच्छन्तु गच्छन्तु । vविश्वस्य[3] व्याप्तस्याग्नेः vप्रसितिं जालम् । तथा च यास्कः—'प्रसितिः प्रसयनात्तन्तुर्वा[4] जालं वा' (निरु. ६. १२) इति । जालं vयातुधानः राक्षसः vएतु गच्छतु ॥ ॥ ७ ॥

यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः ।
यो अघ्न्याया भरति क्षीरमग्ने तेषां शीर्षाणि हरसापि वृश्च ॥ १६ ॥

यः । पौरुषेयेण । क्रविषा । सम्ऽअङ्क्ते । यः । अश्व्येन । पशुना । यातुऽधानः ।
यः । अघ्न्यायाः । भरति । क्षीरम् । अग्ने । तेषाम् । शीर्षाणि । हरसा । अपि । वृश्च ॥१६॥

vयः vयातुधानः राक्षसः vपौरुषेयेण पुरुषसंबन्धिना vक्रविषा मांसेन vसमङ्क्ते आत्मानं संगमयति । vयः च vअश्व्येन अश्वसमूहेन । तदीयेन मांसेनेत्यर्थः । आत्मानं संगमयति । यो वा यातुधानोऽन्येन vपशुना आत्मानं संगमयति । vयः वा यातुधानः vअघ्न्यायाः गोः vक्षीरं vभरति हरति । हे vअग्ने त्वं vतेषां सर्वेषामपि राक्षसानां vशीर्षाणि शिरांसि vहरसा त्वदीयेन तेजसा vवृश्च छिन्धि ॥

संवत्सरीणं पय उस्रियायास्तस्य माशीद्यातुधानो नृचक्षः ।
पीयूषमग्ने यतमस्तितृप्सात्तं प्रत्यञ्चमर्चिषा विध्य मर्मन् ॥ १७ ॥

संवत्सरीणम् । पयः । उस्रियायाः । तस्य । मा । अशीत् । यातुऽधानः । नृऽचक्षः ।
पीयूषम् । अग्ने । यतमः । तितृप्सात् । तम् । प्रत्यञ्चम् । अर्चिषा । विध्य । मर्मन् ॥१७॥

हे vनृचक्षः नृणां द्रष्टः vअग्ने vउस्रियायाः अस्मदीयाया गोः । 'उस्रिया अही' इति गोनामसु पाठात् । vसंवत्सरीणं संवत्सरेण भवं यत् vपयः अस्ति vयातुधानः राक्षसः vतस्य vमाशीत् तत्पयः मा भक्षयतु । किंच vयतमः यो राक्षसः vपीयूषं पीयूषेण । विभक्तिव्यत्ययः । अस्मदीयाया गोः पयसा vतितृप्सात् आत्मानं तर्पयितुमिच्छति vतं vप्रत्यञ्चं युद्धायात्मानं प्रतिगतं राक्षसं vमर्मन् मर्मणि प्राणवियोगस्थाने vअर्चिषा स्वकीयेन तेजसा vविध्य ताडय । मारयेत्यर्थः ॥

विषं गवां यातुधानाः पिबन्त्वा वृश्च्यन्तामदितये दुरेवाः ।
परैनान् देवः सविता ददातु परा भागमोषधीनां जयन्ताम् ॥ १८ ॥

विषम् । गवाम् । यातुऽधानाः । पिबन्तु । आ । वृश्च्यन्ताम् । अदितये । दुःऽएवाः ।
परा । एनान् । देवः । सविता । ददातु । परा । भागम् । ओषधीनाम् । जयन्ताम् ॥१८॥

हे अग्ने vयातुधानाः राक्षसाः vगवां पशूनां गृहे स्थितं vविषं vपिबन्तु । किंच vअदितये अदित्यर्थं vदुरेवाः दुस्तरा यातुधानाः vआ vवृश्च्यन्तां त्वदीयैरायुधैराच्छिद्यन्ताम् । किंच vसविता vदेवः vएनान् राक्षसान् vपरा vददातु हिंस्रेभ्यः प्रयच्छतु । अपि च तेऽमी राक्षसाः vओषधीनां स्वभूतं vभागं भजनीयमन्नं vपरा vजयन्तां लभन्तामित्यर्थः[5] ॥

---

१. ग-त-भ१.२.४.६.८—शृणंतु पराशृण्वंतु । २. त—प्रत्यगेनमार्यंतु । ३. ग-त४—किंच विश्वस्य । ४. ग-त-भ—प्रसहनात्तं तुर्वा । ५. ग४—न लभंतामित्यर्थः ।

सनादग्ने मृणसि यातुधानान्न त्वा रक्षाँसि पृतनासु जिग्युः ।
अनु दह सहमूरान् क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥ १९ ॥

सनात् । अग्ने । मृणसि । यातुऽधानान् । न । त्वा । रक्षांसि । पृतनासु । जिग्युः ।
अनु । दह । सहऽमूरान् । क्रव्यऽअदः । मा । ते । हेत्याः । मुक्षत । दैव्यायाः ॥ १९ ॥

हे [v]अग्ने त्वं [v]सनात् चिरादेवारभ्य [v]यातुधानान् राक्षसान् [v]मृणसि बाधसे । तथापि [v]त्वा त्वां [v]पृतनासु संग्रामेषु [v]रक्षांसि राक्षसाः [v]न [v]जिग्युः नाजयन् । किंच स त्वमधुना [v]अनु अनुक्रमेण [v]सहमूरान् मूलेन सहितान् मारकव्यापारेण युक्तान् [v]क्रव्यादः मांसभक्षकान् राक्षसान् [v]दह तेजसा भस्मीकुरु । किंच तव संबन्धिनः [v]दैव्यायाः दैव्यात् [v]हेत्याः आयुधात् [v]ते यातुधानाः [v]मा [v]मुक्षत मुक्ता मा भूवन् ॥

त्वं नो अग्ने अधरादुदक्तात्त्वं पश्चादुत रक्षा पुरस्तात् ।
प्रति ते ते अजरासस्तपिष्ठा अघशंसं शोशुचतो दहन्तु ॥ २० ॥

त्वम् । नः । अग्ने । अधरात् । उदक्तात् । त्वम् । पश्चात् । उत । रक्ष । पुरस्तात् ।
प्रति । ते । ते । अजरासः । तपिष्ठाः । अघऽशंसम् । शोशुचतः । दहन्तु ॥ २० ॥

हे [v]अग्ने [v]त्वं [v]नः अस्मान् [v]अधरात् दक्षिणतः । उत्तरादिदिक्समभिव्याहारादधरशब्दोऽत्र दक्षिणदिक्परः इति विज्ञायते । [v]उदक्तात् उत्तरतश्च [v]रक्ष पाहि । [v]उत अपि च हे अग्ने [v]त्वं [v]पश्चात् पश्चिमतः [v]पुरस्तात् पूर्वतश्च नोऽस्मान् रक्ष । चतसृषु दिक्ष्ववस्थितेभ्यो राक्षसेभ्योऽस्मान् पाहीत्यर्थः । किंच [v]ते[1] तव संबन्धिनः [v]ते [v]तपिष्ठाः अतिशयेन तप्यमानाः [v]अजरासः जरावर्जिताः [v]शोशुचतः ज्वलन्तः सन्तो रश्मयः [v]अघशंसं पापशंसकं राक्षसं [v]प्रति [v]दहन्तु भस्मीकुर्वन्तु ॥ ॥ ८ ॥

पश्चात्पुरस्तादधरादुदक्तात्कविः काव्येन परि पाहि राजन् ।
सखे सखायमजरो जरिम्णेऽग्ने मर्तां अमर्त्यस्त्वं नः ॥ २१ ॥

पश्चात् । पुरस्तात् । अधरात् । उदक्तात् । कविः । काव्येन । परि । पाहि । राजन् ।
सखे । सखायम् । अजरः । जरिम्णे । अग्ने । मर्तान् । अमर्त्यः । त्वम् । नः ॥ २१ ॥

हे [v]राजन् दीप्ताग्ने [v]कविः क्रान्तदर्शनस्त्वं [v]काव्येन कविकर्मणा [v]पश्चात् पश्चिमतः [v]पुरस्तात् पूर्वतः [v]अधरात् दक्षिणतश्च [v]उदक्तात् उत्तरतश्च अस्मान् [v]परि [v]पाहि परितो रक्ष । किंच हे [v]सखे मित्रभूताग्ने [v]अजरः जरारहितस्त्वं मां [v]सखायं [v]जरिम्णे जरायै कुरु । त्वत्प्रसादादहं चिरं जीवामीत्यर्थः । एतदेव दर्शयति । हे [v]अग्ने [v]अमर्त्यः मरणधर्मरहितः [v]त्वं [v]मर्तान् मरणधर्मवतः [v]नः अस्मान् जरिम्णे जरायै[2] कुर्विति शेषः[2] ॥

परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।
धृषद्वर्णं दिवेदिवे हन्तारं भङ्गुरावताम् ॥ २२ ॥

---

१. ग-त.म-' ते ' नास्ति । २. त१.२.३.६.७.८-म-कुर्वित्यर्थः ।

परि । त्वा । अग्ने । पुरम् । वयम् । विप्रम् । सहस्य । धीमहि ।
धृषत्ऽवर्णम् । दिवेऽदिवे । हन्तारम् । भङ्गुरऽवताम् । ॥ २२ ॥

हे ᵛसहस्य सहसे हित सहसो जात वा ᵛअग्ने ᵛपुरं पूरकं ᵛविप्रं मेधाविनं ᵛधृषद्वर्णं धर्षकरूपं ᵛभङ्गुरावतां भङ्गुरकर्मयुक्तानां रक्षसां ᵛदिवेदिवे प्रत्यहं ᵛहन्तारं हिंसितारं ᵛत्वा त्वां ᵛवयं पायुनामधेया भारद्वाजा रक्षसां हननाय ᵛपरि ᵛधीमहि ॥

विषेण भङ्गुरावतः प्रति ष्म रक्षसो दह ।
अग्ने तिग्मेन शोचिषा तपुरग्राभिर्ऋष्टिभिः ॥ २३ ॥

विषेण । भङ्गुरऽवतः । प्रति । स्म । रक्षसः । दह ।
अग्ने । तिग्मेन । शोचिषा । तपुःऽअग्राभिः । ऋष्टिऽभिः ॥ २३ ॥

हे ᵛअग्ने त्वं ᵛभङ्गुरावतः भञ्जनकर्मयुक्तान् ᵛरक्षसः राक्षसान् ᵛविषेण व्याप्तेन ᵛतिग्मेन तीक्ष्णेन ᵛशोचिषा तेजसा ᵛप्रति ᵛदह भस्मीकुरु । तथा ᵛतपुरग्राभिः तपनशीलाग्राभिः ᵛऋष्टिभिः । ऋष्टय आयुधविशेषाः । ताभिरपि प्रति दह ॥

प्रत्यग्ने मिथुना दह यातुधानाँ किमीदिनः ।
सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभिः ॥ २४ ॥

प्रति । अग्ने । मिथुना । दह । यातुऽधानान् । किमीदिनः ।
सम् । त्वा । शिशामि । जागृहि । अदब्धम् । विप्र । मन्मऽभिः ॥ २४ ॥

हे ᵛअग्ने त्वं ᵛमिथुना मिथुनभूतानि ᵛकिमीदिना । किमिदानीमिति ये चरन्ति ते किमीदिनः । तान् । तथा च यास्कः—' किमीदिने किमिदानीमिति चरते किमिदं किमिदमिति वा ' (निरु. ६. ११) इति । ᵛयातुधाना यातुधानाञ्राक्षसान् ᵛप्रति ᵛदह । किंच हे ᵛविप्र मेधाविन्नग्ने ᵛअदब्धं केनाप्यहिंसितं ᵛत्वा त्वां ᵛमन्मभिः स्तुतिभिरहं ᵛसं ᵛशिशामि स्तौमीत्यर्थः । अतस्त्वं ᵛजागृहि निद्रां मा कुरु । बुध्यस्वेत्यर्थः ॥

प्रत्यग्ने हरसा हरः शृणीहि विश्वतः प्रति ।
यातुधानस्य रक्षसो बलं वि रुज वीर्यम् ॥ २५ ॥

प्रति । अग्ने । हरसा । हरः । शृणीहि । विश्वतः । प्रति ।
यातुऽधानस्य । रक्षसः । बलम् । वि । रुज । वीर्यम् ॥ २५ ॥

हे ᵛअग्ने त्वं ᵛहरसा त्वदीयेन तेजसा । तथा च यास्कः—' हरो हरतेर्ज्योतिर्हर उच्यते ' (निरु. ४. १९) इति । ᵛयातुधानस्य राक्षसस्य[1] ᵛहरः[2] हरणशीलं ᵛबलं ᵛप्रति ᵛशृणीहि नाशयेत्यर्थः । तथा ᵛरक्षसः राक्षसस्य ᵛवीर्यं च ᵛवि ᵛरुज भञ्जय ॥ ॥ ९ ॥

---

१. ग२–राक्षसस्य बलं । २. त-म१.२.४.६.८–' हरः ' नास्ति ।

' हविष्पान्तम् ' इत्येकोनविंशत्यृचं चतुर्थं सूक्तं त्रैष्टुभम्। मूर्धन्वानृषिः। स चाङ्गिरसो वामदेव्यो वा। सूर्यो वैश्वानरगुणकोऽग्निश्च समुदितो देवता। तथा चानुक्रान्तं—' हविरेकोनाङ्गिरसो मूर्धन्वान्वामदेव्यो वा सौर्यवैश्वानरीयम् ' इति। व्यूढस्य दशरात्रस्य पञ्चमेऽहन्याग्निमारुत एतद्वैश्वानरीयनिविद्धानम्। सूत्रितं च—' हविष्पान्तमग्निर्होता गृहपतिः स राजा ' (आश्व. श्रौ. ८. ८) इति ॥

हविष्पान्तमजरं स्वर्विदं दिविस्पृशमाहुतं जुष्टमग्नौ।
तस्य भर्मणे भुवनाय देवा धर्मणे कं स्वधया पप्रथन्त ॥ १ ॥

हविः। पान्तम्। अजरम्। स्वःऽविदं। दिविऽस्पृशं। आऽहुतम्। जुष्टम्। अग्नौ।
तस्य। भर्मणे। भुवनाय। देवाः। धर्मणे। कम्। स्वधया। पप्रथन्त ॥ १ ॥

vपान्तं पानीयं सोमात्मकम् vअजरं जरारहितं vजुष्टं देवानां प्रियं यत् vहविः vस्वर्विदि सूर्यस्य वेदितरि vदिविस्पृशि दिवि स्पष्टरि vअग्नौ vआहुतम् अभिहुतं vतस्य सोमात्मकस्य हविषः vभर्मणे भरणाय vभुवनाय भावनाय च vधर्मणे धारणाय च vकं सर्वस्य सुखकरमिममग्निं vदेवाः vस्वधया अन्नेन vपप्रथन्त प्रथयन्ति। तथा च यास्कः—' हविर्यत्पानीयमजरं सूर्यविदि दिविस्पृश्यभिहुतं जुष्टमग्नौ तस्य भरणाय च भावनाय च धारणाय चैतेभ्यः सर्वेभ्यः कर्मभ्यो देवा इममग्निमन्नेनापप्रथन्त ' (निरु. ७. २५) इति ॥

गीर्णं भुवनं तमसापगूळ्हमाविः स्वरभवज्जाते अग्नौ।
तस्य देवाः पृथिवी द्यौरुतापोऽरण्यन्नोषधीः सख्ये अस्य ॥ २ ॥

गीर्णम्। भुवनम्। तमसा। अपऽगूळ्हम्। आविः। स्वः। अभवत्। जाते। अग्नौ।
तस्य। देवाः। पृथिवी। द्यौः। उत। आपः। अरण्यन्। ओषधीः। सख्ये। अस्य ॥ २ ॥

vगीर्णं पूर्वं[1] निगीर्णं[1] vतमसा अन्धकारेण vअपगूढम् आच्छादितं vस्वः सर्वं vभुवनम् vअग्नौ यस्मिन् वैश्वानरे vजाते उत्पन्ने सति vआविः vअभवत् आविर्भवति vतस्य vअस्य वैश्वानरस्याग्नेः vसख्ये सख्यकर्मणि vदेवाः इन्द्रादयः vपृथिवी भूमिश्च vद्यौः च vआपः अन्तरिक्षं चोदकानि च vओषधीः ओषध्यश्च vअरण्यन् अरमन्त। प्रीतिं कृतवन्त इत्यर्थः ॥

देवेभिर्नु इषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहन्तम्।
यो भानुना पृथिवीं द्यामुतेमामाततान रोदसी अन्तरिक्षम् ॥ ३ ॥

देवेभिः। नु। इषितः। यज्ञियेभिः। अग्निम्। स्तोषाणि। अजरम्। बृहन्तम्।
यः। भानुना। पृथिवीम्। द्याम्। उत। इमाम्। आऽततान। रोदसी इति। अन्तरिक्षम् ॥ ३ ॥

vयज्ञियेभिः यज्ञार्हैः vदेवेभिः देवैरिन्द्रादिभिः vनु क्षिप्रम् vइषितः[2] अहम् vअजरं जरारहितं vबृहन्तं महान्तम् vअग्निं तं वैश्वानराग्निं vस्तोषाणि स्तोषामि[3]। vयः वैश्वानराग्निः vभानुना तेजसा vपृथिवीं भूमिम् vउत अपि च vइमां vद्यां दिवं च[4] vआततान[4] आतनोति। तदेव दर्शयति। vरोदसी द्यावापृथिव्यौ चाततान आतनोति। विस्तारयतीत्यर्थः ॥

---

१. त–भुवनं गीर्णं; म१.२.७–पूर्णं निगीर्णं। २. ग–इषितः प्रेषितः। ३. ग–मु–स्तौमि। ४. ग–त४.५–अंतरिक्षं च; त१.२.३.६–मु–चांतरिक्षं च।

यो होतासीत्प्रथमो देवजुष्टो यं समाञ्जन्नाज्येना वृणानाः ।
स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः ॥ ४ ॥

यः । होता । आसीत् । प्रथमः । देवऽजुष्टः । यम् । सम्ऽआञ्जन् । आज्येन । वृणानाः ।
सः । पतत्रि । इत्वरम् । स्थाः । जगत् । यत् । श्वात्रम् । अग्निः । अकृणोत् । जातऽवेदाः ॥४॥

[v]यः वैश्वानरोऽग्निः [v]देवजुष्टः देवैः सेवितः [v]प्रथमः मुख्यः [v]होता [v]आसीत् अभूत् [v]यं च वैश्वानराग्निं यजमानाः [v]वृणानाः [v]आज्येन [v]समाञ्जन् समञ्जन्ति [v]जातवेदाः जातप्रज्ञो जातधनो वा [v]सः वैश्वानरः [v]अग्निः [v]पतत्रि पतनशीलं पक्षिजातम् [v]इत्वरं गमनशीलं सरीसृपादिकं [v]स्थाः स्थावरं वृक्षादिरूपं च [v]जगत् । स्थावरं जङ्गमं च जगदित्यर्थः । [v]श्वात्रं क्षिप्रमेव [v]अकृणोत् अजनयत् । तथा च यास्कः—' स पतत्रि चेत्वरं स्थावरं जङ्गमं च यत्तक्षिप्रमग्निरकरोज्जातवेदाः ' (निरु.५.३)इति ॥

यज्जातवेदो भुवनस्य मूर्धन्नतिष्ठो अग्ने सह रोचनेन ।
तं त्वाहेम मतिभिर्गीर्भिरुक्थैः स याज्ञियो अभवो रोदसिप्राः ॥ ५ ॥

यत् । जातऽवेदः । भुवनस्य । मूर्धन् । अतिष्ठः । अग्ने । सह । रोचनेन ।
तम् । त्वा । अहेम । मतिऽभिः । गीःऽभिः । उक्थैः । सः । याज्ञियः । अभवः । रोदसिऽप्राः ॥५॥

हे [v]जातवेदः जातप्रज्ञ [v]अग्ने [v]यत् यस्त्वं [v]भुवनस्य त्रैलोक्यस्य [v]मूर्धन् मूर्धनि [v]रोचनेन आदित्येन [v]सह [v]अतिष्ठः स्थितवानसि [v]तं वैश्वानराग्निं [v]त्वा त्वां [v]मतिभिः अर्चनीयाभिः [v]गीर्भिः स्तुतिभिः [v]उक्थैः शस्त्रैश्च [v]अहेम प्रपद्यामहे । ' हि गतौ ' इति धातुः । [v]सः वैश्वानरस्त्वं [v]रोदसिप्राः द्यावापृथिव्योः पूरयिता [v]याज्ञियः यज्ञार्हश्च [v]अभवः भवसि ॥ ॥ १० ॥

मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन् ।
मायामु तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन् ॥ ६ ॥

मूर्धा । भुवः । भवति । नक्तम् । अग्निः । ततः । सूर्यः । जायते । प्रातः । उत्ऽयन् ।
मायाम् । ऊँ इति । तु । यज्ञियानाम् । एताम् । अपः । यत् । तूर्णिः । चरति । प्रऽजानन् ॥६॥

[v]अग्निः वैश्वानरोऽग्निः [v]नक्तं रात्रौ [v]भुवः भूतजातस्य [v]मूर्धा शिरोवत्प्रधानभूतः [v]भवति । रात्रौ सर्वप्राणिनामालोकस्य तदधीनत्वात् । [v]ततः रात्रेरनन्तरं [v]प्रातरुद्यन् [v]सूर्यो [v]जायते । अहनि स एव वैश्वानरोऽग्निः सूर्यो भवतीत्यर्थः । किंच [v]यज्ञियानां यज्ञसंपादिनां देवानां [v]मायामु प्रज्ञामेव [v]एतां मन्यन्ते कवय इति शेषः । [v]यत् [v]प्रजानन् प्रज्ञायमानः सूर्यः [v]तूर्णिः त्वरमाणः सन् [v]अपः अन्तरिक्षं कर्म वा [v]चरति । तथा च यास्कः—' मूर्धा मूर्तमस्मिन्धीयते मूर्धा यः सर्वेषां भूतानां भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्नस्य एव[1] । प्रज्ञां त्वेतां मन्यन्ते यज्ञियानां देवानां यज्ञसंपादिनामपो यत्कर्म चरति प्रजानन्त्सर्वाणि स्थानान्यनुसंचरति त्वरमाणः ' (निरु. ७. २७) इति ॥

इन्द्रेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा ।
तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुह्वुस्तनूपाः ॥ ७ ॥

---

१. त-भ-एष ।

दृशेन्यः । यः । महिना । सम्ऽइद्धः । अरोचत । दिविऽयोनिः । विभाऽवा ।
तस्मिन् । अग्नौ । सुक्तऽवाकेन । देवाः । हविः । विश्वे । आ । अजुहवुः । तनूऽपाः ॥७॥

vयः वैश्वानरोऽग्निः vमहिना महत्त्वेन vदृशेन्यः सर्वैर्दर्शनीयः vसमिद्धः सम्यग्दीप्तः vदिवियोनिः द्युस्थानः vविभावा दीप्तिमांश्च सन् vअरोचत दीप्यते vतस्मिन् वैश्वानरे vअग्नौ vतनूपाः शरीराणां रक्षकाः vविश्वे सर्वे vदेवाः vसूक्तवाकेन 'इदं द्यावापृथिवी' इत्यादिवाक्येन स्तोत्राणां वचनेन वा vहविः vआजुहवुः आभिमुख्येन जुहुवुः ॥

सूक्तऽवाकं प्रथममादिदग्निमादिद्धविरजनयन्त देवाः ।
स एषां यज्ञो अभवत्तनूपास्तं द्यौर्वेद तं पृथिवी तमापः ॥ ८ ॥

सूक्तऽवाकम् । प्रथमम् । आत् । इत् । अग्निम् । आत् । इत् । हविः । अजनयन्त । देवाः ।
सः । एषाम् । यज्ञः । अभवत् । तनूऽपाः । तम् । द्यौः । वेद । तम् । पृथिवी । तम् । आपः ॥८॥

vप्रथमं पूर्वं vसूक्तवाकम् 'इदं द्यावापृथिवी' इत्यादि वाक्यं मनसा निरूपयन्ति vआदित् अनन्तरमेव vअग्निं मथनेनोत्पादयन्ति । vआदित् अनन्तरमेव vदेवाः vहविरजनयन्त जनयन्ति । vसः वैश्वानरोऽग्निः vएषां देवानां vयज्ञः यष्टव्यः vअभवत् भवति । सः vतनूपाः शरीराणां रक्षिता च भवति । vतम् अग्निं vद्यौः द्युलोकः vवेद जानाति । vतम् अग्निं vपृथिवी भूमिरपि च जानाति । vतम् अग्निम् vआपः अन्तरिक्षं च जानाति ॥

यं देवासोऽजनयन्ताग्निं यस्मिन्नाजुहवुर्भुवनानि विश्वा ।
सो अर्चिषा पृथिवीं द्यामुतेमामृजूयमानो अतपन्महित्वा ॥ ९ ॥

यम् । देवासः । अजनयन्त । अग्निम् । यस्मिन् । आ । अजुहवुः । भुवनानि । विश्वा ।
सः । अर्चिषा । पृथिवीम् । द्याम् । उत । इमाम् । ऋजूऽयमानः । अतपत् । महिऽत्वा ॥९॥

vयं वैश्वानरम् vअग्निं vदेवासः देवाः vअजनयन्त उत्पादितवन्तः vयस्मिन् च उत्पन्ने वैश्वानरेऽग्नौ vविश्वा विश्वानि vभुवनानि भूतानि vआजुहवुः आभिमुख्येन[1] जुहुवुः[1] सर्वमेधे vसः वैश्वानरोऽग्निः vअर्चिषा तेजसा vपृथिवीम् अन्तरिक्षम् । 'आपः पृथिवी' इत्यन्तरिक्षनामसु पाठात् । vद्यां दिवं च vउत अपि च vइमां भूमिं च vऋजूयमानः ऋजुगमनः vमहित्वा महत्त्वेन vअतपत् सर्वं तपति ॥

स्तोमेन हि दिवि देवासो अग्निमजीजनन्छक्तिभी रोदसिप्राम् ।
तमू अकृण्वन्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः ॥ १० ॥

स्तोमेन । हि । दिवि । देवासः । अग्निम् । अजीजनन् । शक्तिऽभिः । रोदसिऽप्राम् ।
तम् । ऊँ । इति । अकृण्वन् । त्रेधा । भुवे । कम् । सः । ओषधीः । पचति । विश्वऽरूपाः ॥१०॥

---

१. ग४-त१.२.५.६-आभिमुख्येनाजुहवुः; त४-आभिमुख्येनाजुहुवुः; भ१.४.६-आभिमुख्येन जुहवुः; भ७-आभिमुख्येन जहवुः ।

vदेवासः देवाः vशक्तिभिः कर्मभिः vरोदसिप्रा द्यावापृथिव्योरापूरयितारम् vअग्निं सूर्यात्मकं vदिवि द्युलोके vस्तोमेन vहि स्तुत्या खलु vअजीजनन् उत्पादितवन्तः। अपि च vतमु तमेव vकं सुखकरमग्निं यज्ञे vत्रेधा vभुवे त्रेधाभावाय vअकृण्वन् कुर्वन्ति। vसः पृथिव्यां वर्तमानः vविश्वरूपाः सर्वरूपाः vओषधीः व्रीह्याद्यास्तेन तेनोपकारेण vपचति। अत्र यास्कः—'स्तोमेन यं[1] हि[1] दिवि देवासोऽग्निमजनयन् शक्तिभिः[2] कर्मभिर्द्यावापृथिव्योः पूरणं[3] तमकुर्वन्त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः। यदस्य दिवि तृतीयं तदसावादित्य इति हि ब्राह्मणम्' (निरु. ७.२८) इति ॥ ॥ ११ ॥

यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम्।
यदा चरिष्णू मिथुनावभूतामादित्प्रापश्यन्भुवनानि विश्वा ॥ ११ ॥

यदा। इत्। एनम्। अदधुः। यज्ञियासः। दिवि। देवाः। सूर्यम्। आदितेयम्।
यदा। चरिष्णू इति। मिथुनौ। अभूताम्। आत्। इत्। प्र। अपश्यन्। भुवनानि। विश्वा॥११॥

vयदेत् यदैव प्रातः vआदितेयम् अदितेः पुत्रं vसूर्यम् vएनम् अग्निं च vयज्ञियासः यज्ञार्हाः vदेवाः vदिवि द्युलोके vअदधुः धृतवन्तः। vयदा चेमौ vचरिष्णू चरणशीलौ सूर्यवैश्वानरौ vमिथुनावभूतां प्रादुरभूताम्। vआदित् अनन्तरमेव vविश्वा विश्वानि vभुवनानि भूतजातानि vप्रापश्यन् तौ पश्यन्ति। अत्र यास्कः—'यदैनमदधुर्यज्ञियाः सर्वे दिवि देवाः सूर्यमदितेः[4] पुत्रं[4] यदा चरिष्णू मिथुनौ प्रादुरभूतां सर्वदा सहचारिणावुषाश्चादित्यश्च। मिथुनौ कस्मान्मिनोतेः श्रयतिकर्मा थु इति नामकरणस्थकारो वा नयतेः परो वनिर्वा समाश्रितावन्योन्यं नयतो वनुतो वा। मनुष्यमिथुनावप्येतस्मादेव मेथन्तावन्योन्यं वनुत इति वा' (निरु. ७. २९) इति ॥

विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्।
आ यस्तताने उषसो विभातीरपो ऊर्णोति तमो अर्चिषा यन् ॥ १२ ॥

विश्वस्मै। अग्निम्। भुवनाय। देवाः। वैश्वानरम्। केतुम्। अह्नाम्। अकृण्वन्।
आ। यः। ततान। उषसः। विऽभातीः। अपो इति। ऊर्णोति। तमः। अर्चिषा। यन्॥१२॥

vदेवाः इन्द्रादयः vविश्वस्मै[5] vभुवनाय[6] vवैश्वानरं विश्वनरहितम् vअग्निम् vअह्नां दिवसानां vकेतुं प्रज्ञापकम् vअकृण्वन् अकुर्वन्। vयः वैश्वानरोऽग्निः vउषसो vविभातीः विविधं दीप्यमानः vआ vतनोति विस्तारयति। किंच सोऽयं vयन् गच्छन् vतमः अन्धकारम् vअर्चिषा तेजसा vअपो vऊर्णोति अपगमयति ॥

वैश्वानरं कवयो यज्ञियासोऽग्निं देवा अजनयन्नजुर्यम्।
नक्षत्रं प्रत्नममिनच्चरिष्णु यक्षस्याध्यक्षं तविषं बृहन्तम् ॥ १३ ॥

वैश्वानरम्। कवयः। यज्ञियासः। अग्निम्। देवाः। अजनयन्। अजुर्यम्।
नक्षत्रम्। प्रत्नम्। अमिनत्। चरिष्णु। यक्षस्य। अधिऽअक्षम्। तविषम्। बृहन्तम्॥१३॥

---

१. त१.३-म-हि यं। २. म-'शक्तिभिः' नास्ति। ३. त१.२.७-आपूरणं। ४. ग-त२.७-सूर्यमादितेयमदितेः पुत्रं; त१.६-सूर्यमदितेः यमदिते पुत्रं। ५. ग-त-विश्वस्मै सर्वस्मै। ६. त-म-हवनाय।

[v]कवयः मेधाविनः [v]यज्ञियासः यज्ञार्हा यज्ञसंपादिनो वा [v]देवाः [v]अजुर्यं जरावर्जितमहिंस्यं वा [v]वैश्वानरं विश्वनरहितं सूर्यात्मकम् [v]अग्निम् [v]अजनयन् उत्पादितवन्तः। स च देवैरुत्पादितोऽग्निः [v]नक्षत्रं कृत्तिकादि [v]प्रत्नं पुराणं [v]चरिष्णु चरणशीलं [v]यक्षस्य। यक्षतिः पूजार्थः। 'प्रयक्षम्' (ऋ. सं. २. ५. १) इत्यादौ दर्शनात्। यक्षस्य पूज्यस्य देवस्य [v]अध्यक्षं प्रत्यक्षं स्वामिनं वा [v]तविषं वृद्धं [v]बृहन्तं महान्तम् [v]अमिनत् हिंसितवान्। तेजसाभिभूतवानित्यर्थः॥

वैश्वानरं विश्वहा दीदिवांसं मन्त्रैरग्निं कविमच्छा वदामः।
यो महिम्ना परिबभूवोर्वी उतावस्तादुत देवः परस्तात् ॥ १४ ॥

वैश्वानरम्। विश्वहा। दीदिऽवांसम्। मन्त्रैः। अग्निम्। कविम्। अच्छ। वदामः।
यः। महिम्ना। परिऽबभूव। उर्वी इति। उत। अवस्तात्। उत। देवः। परस्तात् ॥१४॥

[v]विश्वहा सर्वदा [v]दीदिवांसं दीप्तं [v]कविं क्रान्तप्रज्ञं [v]वैश्वानरम् [v]अग्निं [v]मन्त्रैः [v]अच्छा [v]वदामः अभिष्टुमः। [v]यः वैश्वानरोऽग्निः [v]महिम्ना महत्त्वेन [v]उर्वी द्यावापृथिव्यौ [v]परिबभूव परिभवति। [v]उत अपि च अयम् [v]अवस्तात् अधस्तात् तपति। [v]उत अपि चायं सूर्यात्मकः [v]देवः [v]परस्तात् उपरिष्टाच्च तपतीत्यर्थः॥

द्वे स्रुती अशृणवं पितॄणामहं देवानामुत मर्त्यानाम्।
ताभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरं च ॥ १५ ॥

द्वे इति। स्रुती इति। अशृणवम्। पितॄणाम्। अहम्। देवानाम्। उत। मर्त्यानाम्।
ताभ्याम्। इदम्। विश्वम्। एजत्। सम्। एति। यत्। अन्तरा। पितरम्। मातरम्। च ॥१५॥

[v]पितॄणां [v]देवानां च [v]उत अपि[1] [v]मर्त्यानां मनुष्याणां च [v]द्वे [v]स्रुती द्वौ मार्गौ देवयानपितृयाणाख्यौ [v]अहम् [v]अशृणवम् अश्रौषम्। [v]यत् विश्वं [v]पितरं पालकत्वेन पितृभूतां द्यां [v]मातरं [v]च धारकत्वेन मातृभूतां पृथिवीं च [v]अन्तरा द्यावापृथिव्योर्मध्ये भवति तत् [v]इदं [v]विश्वम् अग्निना संस्कृतं सत् [v]एजत् देवलोकं पितृलोकं च गच्छत् [v]ताभ्यां देवयानपितृयाणाख्याभ्यां मार्गाभ्यां [v]समेति गच्छति। तौ च मार्गौ भगवता दर्शितौ—'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्तते॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्तते पुनः॥ नैते सृती पार्थ जानन्योगी मुह्यति कश्चन' (भ.गी.८.२४-२७) इति॥१२॥

द्वे संमीची बिभृतश्चरन्तं शीर्षतो जातं मनसा विमृष्टम्।
स प्रत्यङ् विश्वा भुवनानि तस्थावप्रयुच्छन् तरणिर्भ्राजमानः ॥ १६ ॥

द्वे इति। समीची इति सम्ऽईची। बिभृतः। चरन्तम्। शीर्षतः। जातम्। मनसा। विऽमृष्टम्।
सः। प्रत्यङ्। विश्वा। भुवनानि। तस्थौ। अप्रऽयुच्छन्। तरणिः। भ्राजमानः॥ १६॥

---

१. ग-त-म१.४.६.७—अपि च।

[v]समीची संगते [v]द्वे द्यावापृथिव्यौ [v]चरन्तं गच्छन्तं [v]शीर्षतः शिरसः [v]जातम् उत्पन्नम् । तथा च निगमान्तरम्—' उत मन्येऽहमेनमनयोर्हि शिरस्तोऽयं प्रातर्जायते ' इति । यद्वा । सर्वशिरोभूतादादित्याज्जातमित्यर्थः । [v]मनसा । मन्यतिरर्चतिकर्मा । अर्चनीयया स्तुत्या [v]विमृष्टं शोधितं संस्कृतमग्निं [v]बिभृतः धारयतः । [v]सः [v]अप्रयुच्छन् अप्रमाद्यन् [v]तरणिः क्षिप्रकारी [v]भ्राजमानः दीप्यमानोऽग्निः [v]विश्वा विश्वानि [v]भुवनानि[1] [v]प्रत्यङ् अभिमुखः [v]तस्थौ तिष्ठति । तथा च श्रूयते—' तस्मात्सर्व एव मन्यन्ते मां प्रत्युदगात् ' (तै. सं. ६. ५. ४. २) इति ॥

यत्रा॒ वदे॑ते॒ अव॑रः॒ परश्च॒ यज्ञ॒न्योः॑ कत॒रो नौ॒ वि वेद॑ ।
आ शे॑कु॒रित्सध॒मादं॒ सखा॑यो॒ नक्ष॑न्त॒ यज्ञं॒ क इ॒दं वि वो॑चत् ॥ १७ ॥

यत्र । वदे॑ते इति । अव॑रः । परः॑ । च । यज्ञ॒ऽन्योः॑ । क॒त॒रः । नौ । वि । वेद॑ ।
आ । शे॒कुः॒ । इत् । सध॒ऽमाद॑म् । सखा॑यः । नक्ष॑न्त । यज्ञ॑म् । कः । इ॒दम् । वि । वो॒च॒त् ॥ १७ ॥

[v]यत्र यस्मिन्काले [v]अवरः पार्थिवोऽग्निर्हव्यो होता [v]परश्च मध्यमो वायुश्च उभौ [v]वदेते विवादं कुर्वाते [v]यज्ञन्योः यज्ञस्य नेत्रोः [v]नौ आवयोर्मध्ये [v]कतरः भूयिष्ठं यज्ञं [v]वि [v]वेद वेत्ति तत्र [v]सखायः समानख्याना ऋत्विजः [v]सधमादं यज्ञम् [v]आ [v]शेकुः कर्तुं शकुवन्ति । तथा [v]यज्ञं [v]नक्षन्त अश्नुवतेऽनुतिष्ठन्ति च ये तेषां विदुषां यज्ञमश्नुवानानां मध्ये [v]कः विद्वाननुष्ठाता वा [v]इदम् अस्य विवादस्य[2] निर्णयरूपं वाक्यं [v]वि [v]वोचत् ब्रवीति । माध्यमिकमिममग्निं ब्रवीति । तथा च यास्कः—' यत्र विवदेते दैव्यौ होतारावयं चाग्निरसौ च मध्यमः कतरो नौ यज्ञे भूयो वेदेत्याशकुवन्ति तत्सहमदनं समानख्याना ऋत्विजस्तेषां यज्ञं समश्नुवानानां को न इदं विवक्ष्यति ' (निरु. ७. ३०) इति॥

कत्य॒ग्नय॒ः कति॒ सूर्या॑सः॒ कत्यु॒षास॒ः कत्यु॒ स्विदापः॑ ।
नोप॒स्पिज॑ं वः पितरो वदामि पृ॒च्छामि॑ वः कवयो॒ विद्म॑ने॒ कम् ॥ १८ ॥

कति॑ । अ॒ग्नयः॑ । कति॑ । सूर्या॑सः । कति॑ । उ॒षसः॑ । कति॑ । ऊँ॒ इति॑ । स्वित् । आपः॑ ।
न । उप॑ऽस्पिजम् । वः॒ । पि॒तरः॒ । व॒दामि॑ । पृ॒च्छामि॑ । वः॒ । क॒वयः॒ । विद्म॑ने । कम् ॥ १८ ॥

एवं विवदमानावग्निवायू पितॄन् प्रश्नमेयतुः । तत्र मध्यमस्तान् पृच्छति । [v]कत्यग्नयः । अग्नयः कति कतिसंख्याकाः [v]सूर्यासः सूर्याश्च कतिसंख्याकाः । [v]उषासः उषसश्च कतिसंख्याकाः । [v]आपः च [v]कति । [v]उ इति पूरणः । स्विच्छब्दोऽत्र विचारणार्थः । हे [v]पितरः [v]वः युष्माकम् [v]उपस्पिजम् । उपस्पिजमिति स्पर्धायुक्तं वचनमुच्यते । पूर्वोक्तं प्रश्नवचनमेतत् [v]न [v]वदामि[3] । किं तर्ह्यहमजानन् हे [v]कवयः मेधाविनः युष्मान् [v]विद्मने विज्ञानाय [v]कं सुखं स्वरूपपर्यालोचनक्लेशमन्तरेण [v]पृच्छामि । अत्रोक्तराणि बालखिल्यसंहितायां दर्शितानि—' एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः । एकैवोषाः सर्वमिदं विभात्येकं वा इदं वि बभूव सर्वम् ' (ऋ. सं. ८. ५८. २) इति ॥

याव॑न्मा॒त्रमु॑ष॒सो न प्र॒तीकं॑ सुप॒र्ण्यो॑३॑ वस॑ते मातरिश्वः ।
तावद्द॑धा॒त्युप॑ य॒ज्ञमा॑यन् ब्रा॒ह्म॒णो होतु॒रव॑रो नि॒षीद॑न् ॥ १९ ॥

याव॑त्ऽमात्रम् । उ॒ष॒सः॑ । न । प्र॒तीक॑म् । सु॒ऽप॒र्ण्यः॑ । वस॑ते । मा॒त॒रि॒श्वः॒ ।
तावत् । द॒धा॒ति॒ । उप॑ । य॒ज्ञम् । आ॒ऽय॒न् । ब्रा॒ह्म॒णः । होतुः॑ । अव॑रः । नि॒ऽसीद॑न् ॥ १९ ॥

---

१. ग१.२–भुवना भुवनानि । २. त–विधानस्य । ३. ग-त१.३.६.८-म२.८–वदामि न वक्ष्यामि ।

प्रकृतस्य वैश्वानरस्य विषये यः प्रशस्तस्य निर्णयमनया वदन्ति। हे vमातरिश्वः मातर्यन्तरिक्षे श्वसन् माध्यमिक वायो vयावन्मात्रं यावदेव vसुपर्ण्यः सुपतना रात्रयः vउषसः vप्रतीकं मुखं प्रकाशात्मकं दर्शनं वा। vन इति पूरणः। vवसते आच्छादयन्ति vतावत् एव vब्राह्मणः होता vअवरः निकृष्टः[1] vहोतुः अस्याग्नेर्वैश्वानरस्य दैव्यस्य होतुः[2] vनिषीदन्[2] हौत्रं कर्म कर्तुमुपविशन् vयज्ञमायन् उपगच्छन्[3] vउप vदधाति। होतृकर्म स्वबुद्धौ धारयति। तथा च यास्कः—'यावन्मात्रमुषसः प्रत्यक्षं भवति प्रतिदर्शनमिति वास्युपमानस्य संप्रत्यर्थे प्रयोग इहेव निधेहीति यथा सुपर्ण्यः सुपतना एता रात्रयो वसते मातरिश्वञ्ज्योतिर्वर्णस्य तावदुपदधाति यज्ञमागच्छन् ब्राह्मणो होतास्याग्नेर्होतुरवरो निषीदन् होतृजपस्त्वनग्निर्वैश्वानरीयो भवति' (निरु. ७. ३१) इति॥ ॥ १३ ॥

'इन्द्रं स्तव' इत्यष्टादशर्चं पञ्चमं सूक्तं वैश्वामित्रस्य रेणोरार्षं त्रैष्टुभमैन्द्रम्। अनुक्रान्तं च—'इन्द्रं स्तव द्वयूना रेणुः' इति। सूर्यस्तुत्याग्न्येकाह इदं सूक्तं निष्केवल्यनिविद्धानम्। सूत्रितं च—'सूर्यस्तुता यशस्कामः पिबा सोममभीन्द्रं स्तवेति मध्यंदिनः[4]' (आश्व. श्रौ. ९. ८) इति॥

इन्द्रं॑ स्तवा नृत॑मं॒ यस्य॑ म॒ह्ना वि॑बबा॒धे रो॑च॒ना वि ज्मो अन्ता॑न्।
आ यः पप्रौ॑ चर्षणी॒धृद्वरो॑भिः प्र सिन्धु॑भ्यो रिरिचा॒नो म॑हि॒त्वा ॥ १ ॥

इन्द्र॑म्। स्त॒व॒। नृऽत॑मम्। यस्य॑। म॒ह्ना। वि॒ऽब॒बा॒धे। रो॒च॒ना। वि। ज्मः। अन्ता॑न्।
आ। यः। पप्रौ॑। च॒र्ष॒णि॒ऽधृत्। वरः॑ऽभिः। प्र। सिन्धु॑ऽभ्यः। रि॒रि॒चा॒नः। म॒हि॒ऽत्वा ॥१॥

हे स्तोतः त्वं vनृतमं नेतृतमम् vइन्द्रं vस्तव स्तुहि। vयस्य इन्द्रस्य vमह्ना महत्त्वम्। विभक्तिव्यत्ययः। vरोचना परेषां तेजांसि vविबबाधे विबाधते। अभिभवतीत्यर्थः। vवि vज्मः पृथिव्याश्च vअन्तान् पर्यन्तानभिभवति। vयः चेन्द्रः vचर्षणीधृत् मनुष्याणां धर्ता vसिन्धुभ्यः समुद्रेभ्योऽपि vमहित्वा महत्त्वेन vप्र vरिरिचानः प्रवर्धमानश्च सन् vवरोभिः तमसां वारकैस्तेजोभिः vआ vपप्रौ द्यावापृथिव्यावापूरयति॥

स सू॒र्यः पर्यु॒रू वरां॑स्येन्द्रो॑ वव॒र्त्याद्र॒थ्ये॑व च॒क्रा।
अति॑ष्ठन्तमप॒स्यं॑[1] न सर्गं॑ कृ॒ष्णा तमां॑सि॒ त्विष्या॑ जघान ॥ २ ॥

सः। सूर्यः। परि। उरु। वरांसि। आ। इन्द्रः। ववृत्यात्। रथ्याऽइव। चक्रा।
अतिष्ठन्तम्। अपस्यम्। न। सर्गम्। कृष्णा। तमांसि। त्विष्या। जघान ॥ २ ॥

vसूर्यः सुवीर्यः vसः प्रसिद्धः vइन्द्रः vउरु बहूनि vवरांसि तेजांसि vपरि vआ vववृत्यात् पर्यावर्तयति। तत्र दृष्टान्तः। vरथ्येव यथा[1] सारथी[2] रथसंबन्धीनि vचक्रा चक्राणि आवर्तयति तद्वदित्यर्थः। किंच सोऽयम् vअतिष्ठन्तं शीघ्रं गच्छन्तम् vअपस्यं vन कर्मण्यमिव vसर्गम्। सृज्यत इति सर्गोऽश्वः। तं vकृष्णा कृष्णानि vतमांसि vत्विष्या दीप्त्या vजघान हन्ति॥

१. ग-त-भ-अग्नेः निकृष्टः। २. ग१.२-होतुर्वा निषीदन्; त-भ४.८-होतुर्ज्ञाननिषीदन्; भ१-होतुज्ञनिदन्; भ२-होतुरवरो निषीदन; भ६-मु-होतुर्ज्ञानं निषीदन्। ३. त-उपागच्छन्। ४. ग-त-भ-मु-माध्यंदिनः। ५. ग-भ-यथा रथी; त-सारथी।

समानमस्मा अनपावृदर्च क्ष्मया दिवो असमं ब्रह्म नव्यम् ।
वि यः पृष्ठेव जनिमान्यर्य इन्द्रश्चिकाय न सखायमीषे ॥ ३ ॥

समानम् । अस्मै । अनपऽवृत् । अर्च । क्ष्मया । दिवः । असमम् । ब्रह्म । नव्यम् ।
वि । यः । पृष्ठाऽइव । जनिमानि । अर्यः । इन्द्रः । चिकाय । न । सखायम् । ईषे ॥ ३ ॥

हे स्तोतः त्वं [v]समानं मया सह [v]अनपावृत् अपगतिरहितं [v]क्ष्मया [v]दिवः दिवः पृथिव्याश्च [v]असमम् अत्यन्तमतिरिक्तम् । महदित्यर्थः । [v]नव्यं नवतरमन्यैरकृतपूर्वं [v]ब्रह्म स्तोत्रम् [v]अस्मै इन्द्राय [v]अर्च उच्चारय । [v]यः [v]इन्द्रः [v]जनिमानि यज्ञेषु जातानि [v]पृष्ठेव पृष्ठसंज्ञकानि स्तोत्राणीव [v]अर्यः अरीन् शत्रून् [v]वि [v]चिकाय विचिनोति [v]सखायं च [v]न [v]ईषे नेच्छति ॥

इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात् ।
यो अक्षेणेव चक्रिया शचीभिर्विष्वक्तस्तम्भ पृथिवीमुत द्याम् ॥ ४ ॥

इन्द्राय । गिरः । अनिशितऽसर्गाः । अपः । प्र । ईरयम् । सगरस्य । बुध्नात् ।
यः । अक्षेणऽइव । चक्रिया । शचीभिः । विष्वक् । तस्तम्भ । पृथिवीम् । उत । द्याम् ॥४॥

[v]इन्द्राय इन्द्रार्थम् [v]अनिशितसर्गाः अतनूकृतविसर्गा उपर्युपरि वर्तमाना याः [v]गिरः स्तुतयः ताभिर्गीर्भिः [v]सगरस्य अन्तरिक्षस्य[1] । 'सगरं समुद्रः' इत्यन्तरिक्षनामसु पाठात् । [v]बुध्नात् प्रदेशात् [v]अपः उदकानि [v]प्रेरयं प्रेरयानि । [v]यः[2] [v]इन्द्रः [v]शचीभिः कर्मभिः [v]पृथिवीम् [v]उत अपि च [v]द्यां दिवं [v]चक्रिया रथचक्राणि [v]अक्षेणेव यथा रथाक्षेण[3] तद्वत् [v]विष्वक् सर्वतः [v]तस्तम्भ अस्तभ्नात् ॥

आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी ।
सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥ ५ ॥

आपान्तऽमन्युः । तृपलऽप्रभर्मा । धुनिः । शिमीऽवान् । शरुऽमान् । ऋजीषी ।
सोमः । विश्वानि । अतसा । वनानि । न । अर्वाक् । इन्द्रम् । प्रतिऽमानानि । देभुः ॥५॥

[v]आपान्तमन्युः आपातितमन्युः[4] [v]तृपलप्रभर्मा प्रावभिः क्षिप्रप्रहारी [v]धुनिः शत्रूणां कम्पयिता [v]शिमीवान् कर्मवान् [v]शरुमान् आयुधवान् [v]ऋजीषी ऋजीषवान् [v]सोमो [v]विश्वानि सर्वाणि [v]अतसा अतसमयानि [v]वनानि अरण्यानि वर्धयतीति शेषः । [v]प्रतिमानानि प्रतिमानभूतानि समानानि द्रव्याणीत्यर्थः । [v]इन्द्रम् [v]अर्वाक् [v]न [v]देभुः । दम्भोतिरत्राकर्षणकर्मा । तुलया मीयमाना-न्यात्माभिमुखतया नाकर्षयन्ति । लघूनि भवन्तीत्यर्थः । अन्यत्र प्रतिनिधीयमानानि[5] गुरूणि ताम्या-त्माभिमुखमाकर्षन्ति नैवमिन्द्रं कुर्वन्तीति । सर्वेभ्यो महानिन्द्र इत्यर्थः । त्रयः पादाः सौम्यास्तुरीय-स्त्वैन्द्रः । तथा च यास्कः—'आपातितमन्युस्तृपप्रहारी क्षिप्रप्रहारी[6] सोमो वेन्द्रो वा धुनिर्धूनोतेः शिमीति कर्मनाम शमयतेर्वा शक्नोतेर्वर्जीषी सोमो यस्सोमस्य पूयमानस्यातिरिच्यते तदृजीषमपार्जितं भवति तेनर्जीषी सोमोऽथाप्यैन्द्रो निगमो भवत्यृजीषी वज्रीति । सोमः सर्वाण्यतसानि वनानि

१. त-भ-अंतरिक्षं च । २. ग१.२-त-भ-मु-'यः' नास्ति । ३. त२.७-भ-रथाक्षेणेव । ४. ग२-आपादित° । ५. त-भ-प्रतिनिधायमानानि । ६. त१.२.७-मु-क्षिप्रप्रहारी सृपप्रहारी ।

द्यावाऽग्निम् प्रतिमानानि दम्नुवन्ति यैरेनं प्रतिमिमते नैनं तानि दम्नुवन्ति' (निरु. ५. १२) इति ॥ ॥ १४ ॥

न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः ।
यदस्य मन्युरधिनीयमानः शृणाति वीळु रुजति स्थिराणि ॥ ६ ॥

न । यस्य । द्यावापृथिवी इति । न । धन्व । न । अन्तरिक्षम् । न । अद्रयः । सोमः । अक्षारिति । यत् । अस्य । मन्युः । अधिऽनीयमानः । शृणाति । वीळु । रुजति । स्थिराणि ॥ ६ ॥

vद्यावापृथिवी द्यावापृथिव्यौ vयस्य इन्द्रस्य प्रतिमानभूते[1] vन भवतः[1]। vन[2] vधन्व उदकमपि प्रतिमानभूतं न भवति। vनान्तरिक्षम्[3] अन्तरिक्षमपि प्रतिमानभूतं न भवति। vनाद्रयः[4] पर्वताश्च प्रतिमानभूता न भवन्ति। तस्येन्द्रस्य vसोमः vअक्षाः क्षरति। किंच vयत् यदा vअस्य इन्द्रस्य vमन्युः क्रोधः vअधिनीयमानः शत्रूणामुपरि प्राप्यमाणो भवति तदानीमयमिन्द्रः vवीळु दृढं vशृणाति हिनस्ति। vस्थिराणि vरुजति भिनत्ति च ॥

जघान वृत्रं स्वधितिर्वनेव रुरोज पुरो अरदन्न सिन्धून् ।
बिभेद गिरिं नवमिन्न कुम्भमा गा इन्द्रो अकृणुत स्वयुग्भिः ॥ ७ ॥

जघान । वृत्रम् । स्वऽधितिः । वनाऽइव । रुरोज । पुरः । अरदत् । न । सिन्धून् । बिभेद । गिरिम् । नवम् । इत् । न । कुम्भम् । आ । गाः । इन्द्रः । अकृणुत । स्वयुक्ऽभिः ॥ ७ ॥

इन्द्रः vवृत्रम् असुरं vजघान हतवान्। अपि च vस्वधितिः परशुः vवनेव वनानीव vपुरः शत्रुनगरीः vरुरोज रुजति भिनत्ति। शत्रुनगरीर्भित्त्वा च vसिन्धून् नदीः vअरदत् वृष्ट्युदकेनालिखत्। vन इति संप्रत्यर्थे। किंच vगिरिं मेघं vनवं vन नवमिव vकुम्भं कलशं vबिभेद vइत् भिनत्त्येव। किंच vइन्द्रः vस्वयुग्भिः स्वयं युज्यमानैर्मरुद्भिः vगाः उदकानि vआ vअकृणुत अस्मदभिमुखं करोति ॥

त्वं ह त्यदृणया इन्द्र धीरोऽसिर्न पर्व वृजिना शृणासि ।
प्र ये मित्रस्य वरुणस्य धाम युजं न जना मिनन्ति मित्रम् ॥ ८ ॥

त्वम् । ह । त्यत् । ऋणऽयाः । इन्द्र । धीरः । असिः । न । पर्व । वृजिना । शृणासि । प्र । ये । मित्रस्य । वरुणस्य । धाम । युजम् । न । जनाः । मिनन्ति । मित्रम् ॥ ८ ॥

vइन्द्र vधीरः प्राज्ञः vत्वं vह त्वं खलु vत्यत् तत् vऋणयाः स्तोतृविषयाणामृणानां प्रापयितासि। किंच त्वम् vअसिर्न शस्त्रमिव vपर्व पशूनां पर्वाणि vवृजिना वृजिनानि स्तोतृणामुपद्रवाणि[5] vशृणासि हंसि। किंच vमित्रस्य vवरुणस्य मित्रावरुणयोः vधाम धारकं कर्म vयुजं vन युक्तमिव vमित्रं vये अज्ञा नृशंसाः vजनाः vप्र vमिनन्ति प्रकर्षेण हिंसन्ति तानपि शृणासीत्यर्थः ॥

प्र ये मित्रं प्रार्यमणं दुरेवाः प्र संगिरः प्र वरुणं मिनन्ति ।
न्य१ मित्रेषु वधमिन्द्र तुम्रं वृषन् वृषाणमरुषं शिशीहि ॥ ९ ॥

---

१. त-प्रतिमानभूते न भवति; भ-प्रमाणभूते न भवतः। २. त-भ-'न' नास्ति। ३. त-भ-अंतरिक्षं। ४. त-भ-अद्रयः। ५. त-भ१.२.४.६-°मुपद्रवाणां; भ८-°मुपद्रव्याणां।

प्र । ये । मित्रम् । प्र । अर्यमणम् । दुःऽएवाः । प्र । सम्ऽगिरः । प्र । वरुणम् । मिनन्ति ।
नि । अमित्रेषु । वधम् । इन्द्र । तुम्रम् । वृषन् । वृषाणम् । अरुषम् । शिशीहि ॥ ९ ॥

vये vदुरेवाः दुष्टगमना जनाः vमित्रं देवं vप्र vमिनन्ति प्रहिंसन्ति vअर्यमणं च देवं vप्र मिनन्ति vसंगिरः समीचीनस्तुतिमतो मरुतश्च vप्र मिनन्ति vवरुणं च देवं vप्र मिनन्ति तेषु vअमित्रेषु शत्रुषु । तानुद्दिश्येत्यर्थः। हे vवृषन् कामानां वर्षक vइन्द्र त्वं vतुम्रं गमनशीलं vवृषाणं कामानां वर्षकम् vअरुषम् आरोचमानं vवधं वज्रम् । ' वधः वज्रः ' इति वज्रनामसु पाठात् । vनि vशिशीहि तीक्ष्णीकुरु ॥

इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम् ।
इन्द्रो वृधामिन्द्र इन्मेधिराणामिन्द्रः क्षेमे योगे हव्य इन्द्रः ॥ १० ॥

इन्द्रः । दिवः । इन्द्रः । ईशे । पृथिव्याः । इन्द्रः । अपाम् । इन्द्रः । इत् । पर्वतानाम् ।
इन्द्रः । वृधाम् । इन्द्रः । इत् । मेधिराणाम् । इन्द्रः । क्षेमे । योगे । हव्यः । इन्द्रः ॥ १० ॥

vदिवः द्युलोकस्य vइन्द्रः vईशे ईष्टे vपृथिव्याः भूमेरपि vइन्द्रः ईशे ईश्वरो[1] भवति । vअपाम् उदकानामपि vइन्द्रः ईश्वरो भवति । vपर्वतानां मेघानामपि vइन्द्रः ईश्वरो भवति । vवृधां वृद्धानामपि vइन्द्रः एवेश्वरः । vमेधिराणां प्राज्ञानामपि vइन्द्रः एव ईश्वरो भवति । किंच vइन्द्रः vक्षेमे लब्धस्य धनस्य परिपालने vहव्यः ह्वातव्यः vयोगे अलब्धस्य धनस्य लाभेऽपि vइन्द्रः एव ह्वातव्यो भवति ॥ ॥ १५ ॥

प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः प्रान्तरिक्षात्प्र समुद्रस्य धासेः ।
प्र वातस्य प्रथसः प्र ज्मो अन्तात्प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः ॥ ११ ॥

प्र । अक्तुऽभ्यः । इन्द्रः । प्र । वृधः । अहऽभ्यः । प्र । अन्तरिक्षात् । प्र । समुद्रस्य । धासेः ।
प्र । वातस्य । प्रथसः । प्र । ज्मः । अन्तात् । प्र । सिन्धुऽभ्यः । रिरिचे । प्र । क्षितिऽभ्यः ॥ ११ ॥

vइन्द्रः vअक्तुभ्यः रात्रिभ्यः vप्र vवृधः प्रवृद्धः । vअहभ्यः दिवसेभ्योऽपि vप्र वृधः अधिकः । vअन्तरिक्षात् अपि प्रवृद्धः । vसमुद्रस्य अब्धेः vधासेः धारकात्स्थानादपि प्रवृद्धः । vवातस्य वायोः vप्रथसः प्रथिम्नोऽपि प्रवृद्धः । vज्मः पृथिव्याः vअन्तात् पर्यन्तादपि प्रवृद्धः । vसिन्धुभ्यः नदीभ्यश्च vप्र vरिरिचे अतिरिच्यते । महान् भवतीत्यर्थः । vक्षितिभ्यः मनुष्येभ्योऽपि vप्र रिरिचे ॥

प्र शोशुचत्या उषसो न केतुरसिन्वा ते वर्ततामिन्द्र हेतिः ।
अश्मेव विध्य दिव आ सृजानस्तपिष्ठेन हेषसा द्रोघमित्रान् ॥ १२ ॥

प्र । शोशुचत्याः । उषसः । न । केतुः । असिन्वा । ते । वर्तताम् । इन्द्र । हेतिः ।
अश्माऽइव । विध्य । दिवः । आ । सृजानः । तपिष्ठेन । हेषसा । द्रोघऽमित्रान् ॥ १२ ॥

हे vइन्द्र vते तव vअसिन्वा भेदनरहितं[2] vहेतिः वज्रात्मकमायुधं vशोशुचत्याः ज्वलन्त्याः vउषसो vन यथोषसः vकेतुः पताकास्थानीयो रश्मिस्तद्वच्छत्रुषु vप्र vवर्तताम् । किंच vतपिष्ठेन

१. त१.२.३.७-मु-एव ईश्वरो । २. ग४-सु-भेदनरहिता; त-भ-भेदेन रहिता ।

अतिशयेन शत्रूणां तापयित्र्या ᵛहेषसा शब्दकारिण्या हेत्या ᵛद्रोघमित्रान् । द्रुग्धानि मित्राणि येषां ते द्रोघमित्राः । तान् शत्रून् ᵛविध्य ताडय । तत्र दृष्टान्तः । ᵛदिव ᵛआ ᵛसृजानः सृज्यमानः ᵛअश्मेव । यथाशनिः[1] वृक्षान्[2] विध्यति तद्वदित्यर्थः ॥

अन्वह मासा अन्विदनान्यन्वोषधीरनु पर्वतासः ।
अन्विन्द्रं रोदसी वावशाने अन्वापो अजिहत जायमानम् ॥ १३ ॥

अनु । अह । मासाः । अनु । इत् । वनानि । अनु । ओषधीः । अनु । पर्वतासः ।
अनु । इन्द्रम् । रोदसी इति । वावशाने इति । अनु । आपः । अजिहत । जायमानम् ॥ १३ ॥

ᵛजायमानं प्रादुर्भवन्तम् ᵛइन्द्रं ᵛमासाः चैत्रादयः ᵛअनु ᵛअजिहत अनुगच्छन्ति । ᵛअह इति पूरणः । ᵛवनानि अरण्यान्यपीन्द्रम् ᵛअनु अजिहत । ᵛइत् इति पूरणः । ᵛओषधीः ओषध्योऽपि इन्द्रम् ᵛअनु गच्छन्ति । ᵛपर्वतासः पर्वता अपीन्द्रम् ᵛअनु गच्छन्ति । ᵛवावशाने कामयमाने ᵛरोदसी द्यावापृथिव्यावपि ᵛइन्द्रम् अनु गच्छतः । ᵛआपः उदकान्यपीन्द्रम् ᵛअनु गच्छन्ति । मासाद्यधिष्ठातृदेवताः प्रादुर्भवन्तमिन्द्रमनुगच्छन्तीत्यर्थः ॥

कहिं स्वित्सा ते इन्द्र चेत्यासदघस्य यद्भिनदो रक्ष एषत् ।
मित्रक्रुवो यच्छसने न गावः पृथिव्या आपृगमुया शयन्ते ॥ १४ ॥

कहिं । स्वित् । सा । ते । इन्द्र । चेत्या । असत् । अघस्य । यत् । भिनदः । रक्षः । आऽईषत् ।
मित्रऽक्रुवः । यत् । शसने । न । गावः । पृथिव्याः । आऽपृक् । अमुया । शयन्ते ॥ १४ ॥

हे ᵛइन्द्र ᵛते तव ᵛसा हेतिरिषुर्वा ᵛचेत्या चेतयितव्या शत्रुषु क्षेसव्या ᵛकहिं ᵛस्वित् कदा वा ᵛअसत् भविष्यति । ᵛयत् यया हेत्या त्वम् ᵛअघस्य । द्वितीयार्थे षष्ठी । अहतम् ᵛएषत् युद्धार्थमागच्छत् ᵛरक्षः ᵛभिनदः अभिनः । ᵛयत् यया च शक्त्या ᵛमित्रक्रुवः मित्राणां क्रूरस्य कर्मणः कर्तारो जनाः ᵛपृथिव्याः संबन्धिनि ᵛशसने विशसनस्थाने ᵛगावो ᵛन पशव इव ᵛआपृक् आपर्चनाहताः सन्तः ᵛअमुया अनया पृथिव्या संगता युद्धे ᵛशयन्ते शेरते ॥

शत्रूयन्तो अभि ये नस्ततस्रे महि व्राधन्त ओगणासः इन्द्र ।
अन्धेनामित्रास्तमसा सचन्तां सुज्योतिषो अक्तवस्ताँ अभि ष्युः ॥ १५ ॥

शत्रुऽयन्तः । अभि । ये । नः । ततस्रे । महि । व्राधन्तः । ओगणासः । इन्द्र ।
अन्धेन । अमित्राः । तमसा । सचन्ताम् । सुऽज्योतिषः । अक्तवः । तान् । अभि । स्युरिति स्युः ॥ १५ ॥

हे ᵛइन्द्र[3] ᵛशत्रूयन्तः[4] ᵛमहि अत्यन्तं ᵛव्राधन्तः अस्मान् बाधमानाः ᵛओगणासः संघीभूताः ᵛये शत्रवः ᵛनः अस्मान् ᵛअभि ᵛततस्रे निक्षिपन्ति ᵛते ᵛअमित्राः शत्रवः ᵛअन्धेन ᵛतमसा महताम्धकारेण ᵛसचन्तां संगच्छन्ताम् । किंच ᵛतान् अमित्रान् ᵛसुज्योतिषः दिवसाः ᵛअक्तवः रात्रयश्च ᵛअभि ᵛष्युः अभिभवन्तु ॥

१. त४.५–यथाश्मा । २. ग–त४.५–वृक्षादीन् ; त१.२.३.६.७–वृक्षाश्मान् । ३. त१.२.३.६.७.८–भ–'इंद्र' नास्ति । ४. ग४–शत्रूर्यतः शत्रुत्वमिच्छंतः ।

पुरूणि हि त्वा सवना जनानां ब्रह्माणि मन्दन् गृणतामृषीणाम् ।
इमामाघोषन्नवसा सहूतिं तिरो विश्वाँ अर्चतो याह्यर्वाङ् ॥ १६ ॥

पुरूणि । हि । त्वा । सवना । जनानाम् । ब्रह्माणि । मन्दन् । गृणताम् । ऋषीणाम् ।
इमाम् । आऽघोषन् । अवसा । सऽहूतिम् । तिरः । विश्वान् । अर्चतः । याहि । अर्वाङ् ॥ १६ ॥

हे इन्द्र ᵛत्वा त्वां ᵛजनानां संबन्धीनि ᵛपुरूणि बहूनि ᵛसवना सवनानि ᵛब्रह्माणि स्तोत्राणि च ᵛमन्दन् स्तुवन्ति मोदयन्ति वा । ᵛगृणतां स्तुवताम्[1] ᵛऋषीणाम् ᵛइमां ᵛसहूतिं स्तुतिं त्वम् ᵛआघोषन् महती शोभना चेयं स्तुतिरिति वदन् ᵛअर्चतः स्तुवतोऽस्मान् ᵛविश्वान् सर्वानपि ᵛतिरः तिरस्कृत्य ᵛअवसा रक्षणेन सह ᵛअर्वाङ् अस्मदभिमुखं ᵛयाहि गच्छ[2] ॥

एवा ते वयमिन्द्र भुञ्जतीनां विद्याम सुमतीनां नवानाम् ।
विद्याम वस्तोरवसा गृणन्तो विश्वामित्रा उत ते इन्द्र नूनम् ॥ १७ ॥

एव । ते । वयम् । इन्द्र । भुञ्जतीनाम् । विद्याम । सुऽमतीनाम् । नवानाम् ।
विद्याम । वस्तोः । अवसा । गृणन्तः । विश्वामित्राः । उत । ते । इन्द्र । नूनम् ॥ १७ ॥

हे ᵛइन्द्र ᵛते तवैव ᵛभुञ्जतीनां रक्षन्तीः प्रियाः ᵛवयं विश्वामित्रपुत्रा रेणवः ᵛविद्याम लभेमहि । ᵛउत अपि च हे ᵛइन्द्र ᵛते तव ᵛनवानां नूतनाः ᵛसुमतीनां सुमतीरनुग्रहबुद्धीः ᵛवस्तोः अहनि ᵛअवसा रक्षणार्थं ᵛगृणन्तः ᵛनूनं त्वां स्तुवन्त एव ᵛविश्वामित्राः विश्वामित्रपुत्रा वयं ᵛविद्याम लभेमहि ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ १८ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ १८ ॥

ᵛअस्मिन्भरे संग्रामे ᵛशुनं वृद्धं ᵛमघवानं धनवन्तं ᵛशृण्वन्तम् अस्मदीयस्याह्वानस्य श्रोतारम् ᵛउग्रम् उद्गूर्णं ᵛसमत्सु संग्रामेषु ᵛवृत्राणि शत्रून् ᵛघ्नन्तं मारयन्तं ᵛधनानां शत्रुधनानां ᵛसंजितं सम्यगेव जेतारम् ᵛइन्द्रं ᵛवाजसातौ अन्नस्य लाभाय ᵛऊतये रक्षणाय च ᵛहुवेम आह्वयेम ॥ ॥ १६ ॥

'सहस्रशीर्षा' इति षोडशर्चं षष्ठं सूक्तम् । नारायणो नामर्षिरन्त्या त्रिष्टुप् शिष्टा अनुष्टुभः । अष्टकमहदादिविलक्षणश्रेतनो यः पुरुषः 'पुरुषान्न परं किंचित्' (क. उ. ३. ११) इत्यादिश्रुतिषु प्रसिद्धः स देवता । तथा चानुक्रान्तं—'सहस्रशीर्षा षोळशा नारायणः पौरुषमानुष्टुभं त्रिष्टुबन्तं तु' इति । गतो विनियोगः ॥

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥

---

१. त१.२.३.६.७.८-म–'स्तुवतां' नास्ति । २. ग-त४.५–आगच्छ ।

सहस्रऽशीर्षा। पुरुषः। सहस्रऽअक्षः। सहस्रऽपात्।

सः। भूमिम्। विश्वतः। वृत्वा। अति। अतिष्ठत्। दशऽअङ्गुलम्॥ १॥

सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः [v]पुरुषः[1] सोऽयं [v]सहस्रशीर्षा। सहस्रशब्दस्योपलक्षणत्वादनन्तैः शिरोभिर्युक्त इत्यर्थः। यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वम्। एवं सहस्राक्षित्वं सहस्रपादत्वं च। [v]सः पुरुषः [v]भूमिं ब्रह्माण्डगोलकरूपां [v]विश्वतः सर्वतः [v]वृत्वा परिवेष्ट्य [v]दशाङ्गुलं दशाङ्गुलपरिमितं देशम् [v]अत्यतिष्ठत् अतिक्रम्य व्यवस्थितः। दशाङ्गुलमित्युपलक्षणम्। ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः॥

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति॥ २॥

पुरुषः। एव। इदम्। सर्वम्। यत्। भूतम्। यत्। च। भव्यम्।

उत। अमृतऽत्वस्य। ईशानः। यत्। अन्नेन। अतिऽरोहति॥ २॥

यत् [v]इदं वर्तमानं जगत् तत् [v]सर्वं [v]पुरुष [v]एव। [v]यत् च [v]भूतम् अतीतं जगत् [v]यच्च [v]भव्यं भविष्यज्जगत् तदपि पुरुष एव। यथास्मिन् कल्पे वर्तमानाः प्राणिदेहाः[2] सर्वेऽपि विराट्पुरुषस्यावयवाः तथैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यमित्यभिप्रायः। [v]उत अपि च [v]अमृतत्वस्य देवत्वस्य अयम् [v]ईशानः स्वामी। [v]यत् यस्मात्कारणात् [v]अन्नेन प्राणिनां भोग्येनान्नेन[3] निमित्तभूतेन[4] [v]अतिरोहति स्वकीयां कारणावस्थामतिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुत्वमित्यर्थः[5]॥

एतावानस्य महिमातो ज्यायाँश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि॥ ३॥

एतावान्। अस्य। महिमा। अतः। ज्यायान्। च। पुरुषः।

पादः। अस्य। विश्वा। भूतानि। त्रिऽपात्। अस्य। अमृतम्। दिवि॥ ३॥

अतीतानागतवर्तमानरूपं जगद्यावदस्ति [v]एतावान् सर्वोऽपि [v]अस्य पुरुषस्य [v]महिमा स्वकीयसामर्थ्यविशेषः। न तु तस्य वास्तवस्वरूपम्। वास्तवस्तु [v]पुरुषः [v]अतः महिम्नोऽपि [v]ज्यायान् अतिशयेनाधिकः। एतच्चोभयं स्पष्टीक्रियते। [v]अस्य पुरुषस्य [v]विश्वा सर्वाणि [v]भूतानि कालत्रयवर्तीनि प्राणिजातानि [v]पादः चतुर्थोऽशः[6]। [v]अस्य पुरुषस्य अवशिष्टं [v]त्रिपात् स्वरूपम् [v]अमृतं विनाशरहितं सत् [v]दिवि द्योतनात्मके स्वप्रकाशस्वरूपे व्यवतिष्ठत इति शेषः। यद्यपि 'सत्यं ज्ञानमनन्तं ब्रह्म' (तै. आ. ८.१; तै. उ. २.१) इत्याम्नातस्य परब्रह्मण इयत्ताभावात्[7] पादचतुष्टयं निरूपयितुमशक्यं तथापि जगदिदं ब्रह्मस्वरूपापेक्षयाल्पमिति विवक्षितत्वात् पादत्वोपन्यासः॥

१. त१.२.३.६.७.८-म-'पुरुषः' नास्ति। २. त१.२.३-भ२.७.८-प्राणिदेहाः। ३. त-भ-मु-अन्नेन भोग्येन। ४. त१.२.३.६.७.८-भ-मु-निमित्तेन। ५. ग-त-वस्तुतत्त्वमित्यर्थः। ६. त-भ-चतुर्थोंशश्च। ७. ग-त४.५-मु-इयत्ताया अभावात्; त२.३.६.७.८-म४.८-इयत्ता अभावात्।

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत् पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥ ४ ॥

त्रिऽपात् । ऊर्ध्वः । उत् । ऐत् । पुरुषः । पादः । अस्य । इह । अभवत् । पुनरिति ।
ततः । विष्वङ् । वि । अक्रामत् । साशनानशने इति । अभि ॥ ४ ॥

योऽयं [v]त्रिपात् [v]पुरुषः संसाररहितो[1] ब्रह्मस्वरूपः[2] सोऽयम् [v]ऊर्ध्वं [v]उदैत् अस्मादज्ञानकार्यात्संसाराद्बहिर्भूतोऽत्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान् । तस्य[3] [v]अस्य सोऽयं[4] [v]पादः लेशः सोऽयम् [v]इह मायायां [v]पुनः [v]अभवत् सृष्टिसंहाराभ्यां पुनःपुनरागच्छति । अस्य सर्वस्य जगतः परमात्मलेशत्वं भगवताप्युक्तं—'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' (भ. गी. १०. ४२) इति । [v]ततः मायायामागत्यानन्तरं [v]विष्वङ् देवमनुष्यतिर्यगादिरूपेण[5] विविधः सन् [v]व्यक्रामत् व्याप्तवान् । किं कृत्वा । [v]साशनानशने अभिलक्ष्य । साशनं भोजनादिव्यवहारोपेतं चेतनं प्राणिजातम्[6] अनशनं तद्रहितमचेतनं गिरिनद्यादिकम् । तदुभयं यथा स्यात्तथा स्वयमेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥

तस्माद्विराळजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥ ५ ॥

तस्मात् । विऽराट् । अजायत । विऽराजः । अधि । पुरुषः ।
सः । जातः । अति । अरिच्यत । पश्चात् । भूमिम् । अथो इति । पुरः ॥ ५ ॥

विष्वङ् व्यक्रामदिति यदुक्तं तदेवात्र प्रपञ्च्यते । [v]तस्मात् आदिपुरुषात् [v]विराट् ब्रह्माण्डदेहः [v]अजायत उत्पन्नः । विविधानि[7] राजन्ते वस्तून्यत्रेति[8] विराट् । [v]विराजोऽधि विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा [v]पुरुषः तद्देहाभिमानी कश्चित् पुमान् अजायत । सोऽयं सर्ववेदान्तवेद्यः परमात्मा स्वयमेव[9] स्वकीयया मायया विराड्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् । एतच्चाथर्वणिका उत्तरतापनीये विस्पष्टमामनन्ति—'स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव' (नृ. ता. २. १. ९) इति । [v]स [v]जातः विराट् पुरुषः [v]अत्यरिच्यत अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् । [v]पश्चात् देवादिजीवभावादूर्ध्वं [v]भूमिं ससर्जेति शेषः । [v]अथो भूमिसृष्टेरनन्तरं तेषां जीवानां [v]पुरः ससर्ज । पूर्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणि ॥॥१७॥

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥ ६ ॥

यत् । पुरुषेण । हविषा । देवाः । यज्ञम् । अतन्वत ।
वसन्तः । अस्य । आसीत् । आज्यम् । ग्रीष्मः । इध्मः । शरत् । हविः ॥ ६ ॥

१. ग-त-भ४-मु-संसारस्पर्शरहितो । २. ग-त१.२.३.६.७.८-भ-बहुलस्वरूपः । ३. ग-तस्य ; त-भ४.७-तस्य सोऽयं । ४. त-भ-देवतिर्यगादिरूपेण । ५. त-मु-प्राणिजातं लक्ष्यते । ६. ग-त४.५-भ-विविधं । ७. त६-भ८-वसून्यत्रेति । ८. त-भ-स एव ।

vयत् यदा पूर्वोक्तक्रमेणैव[1] शरीरेषूत्पन्नेषु[1] सत्सु vदेवाः उत्तरसृष्टिसिद्ध्यर्थं बाह्यद्रव्यस्यानुत्पन्नत्वेन हविरन्तरासंभवात् पुरुषस्वरूपमेव मनसा हविष्टेन संकल्प्य vपुरुषेण पुरुषाख्येन vहविषा मानसं vयज्ञम् vअतन्वत अन्वतिष्ठन् तदानीम् vअस्य यज्ञस्य vवसन्तः वसन्तर्तुरेव vआज्यम् vआसीत् अभूत्। तमेवाज्यत्वेन संकल्पितवन्त इत्यर्थः। एवं vग्रीष्म vइध्मः आसीत्। तमेवेध्मत्वेन संकल्पितवन्त इत्यर्थः। तथा vशरद्धविः आसीत्। तामेव[2] पुरोडाशादिहविष्टेन संकल्पितवन्त इत्यर्थः। पूर्वं[3] पुरुषस्य हविःसामान्यरूपत्वेन संकल्पः। अनन्तरं वसन्तादीनामाज्यादिविशेषरूपत्वेन[4] संकल्प इति द्रष्टव्यम्॥

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥ ७ ॥

तम्। यज्ञम्। बर्हिषि। प्र। औक्षन्। पुरुषम्। जातम्। अग्रतः।
तेन। देवाः। अयजन्त। साध्याः। ऋषयः। च। ये ॥ ७ ॥

vयज्ञं यज्ञसाधनभूतं vतं पुरुषं पशुत्वभावनया[1] यूपे बद्धं vबर्हिषि मानसे यज्ञे vप्रौक्षन् प्रोक्षितवन्तः। कीदृशमित्यत्राह। vअग्रतः सर्वसृष्टेः पूर्वं vपुरुषं vजातं पुरुषत्वेनोत्पन्नम्। एतच्च प्रागेवोक्तं 'तस्माद्विराळजायत विराजो अधि पूरुषः' इति। vतेन पुरुषरूपेण पशुना vदेवा vअयजन्त। मानसयागं निष्पादितवन्त इत्यर्थः। के ते देवा इत्यत्राह। vसाध्याः सृष्टिसाधनयोग्याः प्रजापतिप्रभृतयः तदनुकूलाः vऋषयः मन्त्रद्रष्टारः vच vये सन्ति। ते सर्वेऽप्ययजन्तेत्यर्थः॥

तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्।
पशूंस्ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥ ८ ॥

तस्मात्। यज्ञात्। सर्वऽहुतः। सम्ऽभृतम्। पृषत्ऽआज्यम्।
पशून्। तान्। चक्रे। वायव्यान्। आरण्यान्। ग्राम्याः। च। ये ॥ ८ ॥

vसर्वहुतः। सर्वात्मकः पुरुषः यस्मिन् यज्ञे हूयते सोऽयं सर्वहुत्। तादृशात् vतस्मात् पूर्वोक्तात् मानसात् vयज्ञात् vपृषदाज्यं दधिमिश्रमाज्यं vसंभृतं संपादितम्। दधि चाज्यं चेत्येवमादिभोग्यजातं सर्वं संपादितमित्यर्थः। तथा vवायव्यान् वायुदेवताकाँल्लोकप्रसिद्धान् vआरण्यान् vपशून् vचक्रे उत्पादितवान्। आरण्या हरिणादयः। तथा vये vच vग्राम्याः गवाश्वादयः तानपि चक्रे। पशूनामन्तरिक्षद्वारा वायुदेवत्यत्वं यजुर्ब्राह्मणे समाम्नायते—'वायवः स्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षाः। अन्तरिक्षदेवत्याः खलु वै पशवः। वायव एवैनान्परिददाति' (तै. ब्रा. ३. २. १. ३) इति॥

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥ ९ ॥

तस्मात्। यज्ञात्। सर्वऽहुतः। ऋचः। सामानि। जज्ञिरे।
छन्दांसि। जज्ञिरे। तस्मात्। यजुः। तस्मात्। अजायत ॥ ९ ॥

---

१. त१.२.३.४.५.६.७-भ८–°क्रमेण देवशरीरे°। २. त-भ–तमेव। ३. त-मु–एवं। ४. ग–°माज्यादिरूपविशेषत्वेन। ५. त–पशुत्वभावाय; भ७–पशुत्वभावनाय।

[v]सर्वहुतः [v]तस्मात् पूर्वोक्तात् [v]यज्ञात् [v]ऋचः [v]सामानि च [v]जज्ञिरे उत्पन्नाः। [v]तस्मात् यज्ञात् [v]छन्दांसि गायत्र्यादीनि [v]जज्ञिरे। [v]तस्मात् यज्ञात् [v]यजुः अपि [v]अजायत ॥

तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥ १० ॥

तस्मात्। अश्वाः। अजायन्त। ये। के। च। उभयादतः।
गावः। ह। जज्ञिरे। तस्मात्। तस्मात्। जाताः। अजावयः ॥ १० ॥

[v]तस्मात् पूर्वोक्तयज्ञात् [v]अश्वा [v]अजायन्त उत्पन्नाः। तथा [v]ये [v]के [v]च अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च [v]उभयादतः ऊर्ध्वाधोभागयोरुभयोः दन्तयुक्ताः सन्ति तेऽप्यजायन्त[1]। तथा [v]तस्मात् यज्ञात् [v]गावः च [v]जज्ञिरे। किंच [v]तस्मात् यज्ञात् [v]अजावयः च [v]जाताः ॥ ॥ १८ ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्य कौ बाहू का ऊरू पादा उच्येते ॥ ११ ॥

यत्। पुरुषम्। वि। अदधुः। कतिधा। वि। अकल्पयन्।
मुखम्। किम्। अस्य। कौ। बाहू इति। कौ। ऊरू इति। पादौ। उच्येते इति ॥ ११ ॥

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते। प्रजापतेः प्राणरूपा देवाः [v]यत् यदा [v]पुरुषं विराड्रूपं [v]व्यदधुः संकल्पेनोत्पादितवन्तः[2] तदानीं [v]कतिधा कतिभिः प्रकारैः [v]व्यकल्पयन् विविधं कल्पितवन्तः। [v]अस्य पुरुषस्य [v]मुखं [v]किम्[3] आसीत्। [v]कौ [v]बाहू अभूताम् [v]का [v]ऊरू। कौ च [v]पादावुच्येते। प्रथमं सामान्यरूपः प्रश्नः पश्चात् मुखं[3] किमित्यादिना विशेषविषयाः प्रश्नाः ॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥ १२ ॥

ब्राह्मणः। अस्य। मुखम्। आसीत्। बाहू इति। राजन्यः। कृतः।
ऊरू इति। तत्। अस्य। यत्। वैश्यः। पत्ऽभ्याम्। शूद्रः। अजायत ॥ १२ ॥

इदानीं पूर्वोक्तानां प्रश्नानामुत्तराणि दर्शयति। [v]अस्य प्रजापतेः [v]ब्राह्मणः ब्राह्मणत्वजातिविशिष्टः पुरुषः [v]मुखमासीत् मुखादुत्पन्न इत्यर्थः। योऽयं [v]राजन्यः क्षत्रियत्वजातिमान्[4] पुरुषः सः [v]बाहू [v]कृतः बाहुत्वेन निष्पादितः। बाहुभ्यामुत्पादित इत्यर्थः। [v]तत् तदानीम् [v]अस्य प्रजापतेः [v]यत् यौ [v]ऊरू तद्रूपः [v]वैश्यः संपन्नः। ऊरुभ्यामुत्पन्न इत्यर्थः। तथास्य [v]पद्भ्यां पादाभ्यां [v]शूद्रः शूद्रत्वजातिमान् पुरुषः [v]अजायत। इत्थं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिर्यजुःसंहितायां सप्तमकाण्डे 'स मुखतस्त्रिवृतं निरमिमीत' (तै. सं. ७. १. १. ४) इत्यादौ विस्पष्टमाम्नाता। अतः प्रश्नोत्तरे उभे अपि तत्परतयैव[5] योजनीये ॥

---

१. त१.२.६.७–तस्मादप्यजायत। २. त–कालेनोत्पादितवंतः। ३. त–'किम्...मुखं' नास्ति। ४. त-मु–क्षत्रियत्वजातिविशिष्टः। ५. ग-म२–तत्परेणैव; त१.३.४.५.६.८–तत्परेणैव; त७-मु–तत्परत्वेनैव।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥ १३ ॥

चन्द्रमाः । मनसः । जातः । चक्षोः । सूर्यः । अजायत ।
मुखात् । इन्द्रः । च । अग्निः । च । प्राणात् । वायुः । अजायत ॥ १३ ॥

यथा दध्याज्यादिद्रव्याणि गवादयः पशव ऋगादिवेदा ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्ना एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह । प्रजापतेः ᵛमनसः सकाशात् ᵛचन्द्रमाः ᵛजातः । ᵛचक्षोः च चक्षुषः ᵛसूर्यः अपि ᵛअजायत । अस्य ᵛमुखादिन्द्रश्चाग्निश्च देवावुत्पन्नौ । अस्य ᵛप्राणाद्वायुरजायत ॥

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन् ॥ १४ ॥

नाभ्याः । आसीत् । अन्तरिक्षम् । शीर्ष्णः । द्यौः । सम् । अवर्तत ।
पत्ऽभ्याम् । भूमिः । दिशः । श्रोत्रात् । तथा । लोकान् । अकल्पयन् ॥ १४ ॥

यथा चन्द्रादीन् प्रजापतेर्मनःप्रभृतिभ्योऽकल्पयन्[1] ᵛतथा अन्तरिक्षादीन् ᵛलोकान् प्रजापतेः नाभ्यादिभ्यो[2] देवाः[2] ᵛअकल्पयन् उत्पादितवन्तः । एतदेव दर्शयति । ᵛनाभ्याः प्रजापतेर्नाभेः ᵛअन्तरिक्षमासीत् । ᵛशीर्ष्णः शिरसः ᵛद्यौः ᵛसमवर्तत उत्पन्ना । अस्य ᵛपद्भ्यां पादाभ्यां ᵛभूमिः उत्पन्ना । अस्य ᵛश्रोत्रात् ᵛदिशः उत्पन्नाः ॥

सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ॥ १५ ॥

सप्त । अस्य । आसन् । परिऽधयः । त्रिः । सप्त । सम्ऽइधः । कृताः ।
देवाः । यत् । यज्ञम् । तन्वानाः । अबध्नन् । पुरुषम् । पशुम् ॥ १५ ॥

ᵛअस्य सांकल्पिकयज्ञस्य[3] गायत्र्यादीनि ᵛसप्त छन्दांसि ᵛपरिधयः ᵛआसन् । ऐष्टिकस्याहवनीयस्य त्रयः परिधय उत्तरवेदिकाश्रय आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः । अत एवाम्नायते— 'न पुरस्तात्परि दधात्यादित्यो ह्येवोदेति पुरस्ताद्रक्षांस्यपहन्ति' (तै. सं. २.६.६.३) इति । तत एत आदित्यसहिताः सप्त परिधयोऽत्र सप्त छन्दोरूपाः । तथा ᵛसमिधः ᵛत्रिः ᵛसप्त त्रिगुणीकृतसप्तसंख्याकाः एकविंशतिः ᵛकृताः । 'द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंशः' (तै. सं. ५.१.१०.३) इति श्रुताः पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः । ᵛयत् यः पुरुषो वैराजोऽस्ति तं ᵛपुरुषं ᵛदेवाः प्रजापतिप्राणेन्द्रियरूपाः ᵛयज्ञं ᵛतन्वानाः मानसं यज्ञं तन्वानाः कुर्वाणाः ᵛपशुम् ᵛअबध्नन् विराट्पुरुषमेव पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वत्र 'यत्पुरुषेण हविषा' इत्युक्तम् ॥

---

१. त-म२.४.६.८–प्रजापतेर्मनःप्रभृतयो°; भ७–प्रजापतेर्मनसःप्रभृतयो° । २. त१-२-६–नाभ्यादयो देवा अवयवा; त३.७–नाभ्यदयोवयवाः; त८-भ–नाभ्यादयो देवा । ३. त–सांकल्पिकस्य यज्ञस्य ।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ १६ ॥

यज्ञेन । यज्ञम् । अयजन्त । देवाः । तानि । धर्माणि । प्रथमानि । आसन् ।
ते । ह । नाकम् । महिमानः । सचन्त । यत्र । पूर्वे । साध्याः । सन्ति । देवाः ॥ १६ ॥

पूर्वं प्रपञ्चेनोक्तमर्थं संक्षिप्यात्र दर्शयति । vदेवाः प्रजापतिप्राणरूपाः vयज्ञेन यथोक्तेन मानसेन संकल्पेन vयज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिम् vअयजन्त पूजितवन्तः । तस्मात्पूजनात् vतानि प्रसिद्धानि vधर्माणि जगद्रूपविकाराणां धारकाणि vप्रथमानि मुख्यानि[1] vआसन् । एतावता सृष्टिप्रतिपादकसूक्तभागार्थः संगृहीतः । अथोपासनतत्फलानुवादकभागार्थः संगृह्यते । vयत्र यस्मिन् विराट्प्राप्तिरूपे नाके vपूर्वे vसाध्याः पुरातना विराडुपास्तिसाधकाः vदेवाः vसन्ति तिष्ठन्ति तत् vनाकं विराट्प्राप्तिरूपं स्वर्गं vते vमहिमानः तदुपासका महात्मानः vसचन्त समवयन्ति प्राप्नुवन्ति ॥ ॥ १९ ॥ ॥ ० ॥

अष्टमेऽनुवाके नव सूक्तानि । ' सं जागृवद्भिः ' इति पञ्चदशर्चं प्रथमं सूक्तं वीतहव्यपुत्रस्याङ्गणनाम्न आर्षमग्निदेवत्यम् । अन्त्या त्रिष्टुप् शिष्टा जगत्यः । तथा चानुक्रान्तं—' सं जागृवद्भिः पञ्चोनाङ्गणो वैतहव्य आग्नेयम् ' इति । प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दसीदं सूक्तम् । सूत्रितं च—' सं जागृवद्भिश्चित्र इच्छिशोर्वसुं न चित्रमहसमिति जागतम् ' (आश्व. श्रौ. ४. १३) इति ॥

सं जागृवद्भिर्जरमाण इध्यते दमे दमूना इषयन्निळस्पदे ।
विश्वस्य होता हविषो वरेण्यो विभुर्विभावा सुषखा सखीयते ॥ १ ॥

सम् । जागृवत्ऽभिः । जरमाणः । इध्यते । दमे । दमूनाः । इषयन् । इळः । पदे ।
विश्वस्य । होता । हविषः । वरेण्यः । विऽभुः । विभाऽवा । सुऽसखा । सखिऽयते ॥ १ ॥

हे अग्ने vजागृवद्भिः जागरणशीलैः स्तोतृभिः vजरमाणः स्तूयमानः vदमूनाः दममना दान्तमना वा vइळः इळायाः vपदे स्थाने उत्तरवेद्याम् vइषयन् अन्नमिच्छन् vविश्वस्य सर्वस्य vहविषः vहोता vवरेण्यः वरणीयः vविभुः व्याप्तः vविभावा दीप्तिमान् vसुषखा शोभनसखा भवान् vसखीयते सखित्वमिच्छते यजमानाय vसम् vइध्यते सम्यग्दीप्यते ॥

स दर्शतश्रीरतिथिर्गृहेगृहे वनेवने शिश्रिये तक्ववीरिव ।
जनेजनं जन्यो नाति मन्यते विश आ क्षेति विश्यो३ विशंविशम् ॥ २ ॥

सः । दर्शतऽश्रीः । अतिथिः । गृहेऽगृहे । वनेऽवने । शिश्रिये । तक्ववीःऽइव ।
जनम्ऽजनम् । जन्यः । न । अति । मन्यते । विशः । आ । क्षेति । विश्यः । विशम्ऽविशम् ॥ २ ॥

vदर्शतश्रीः दर्शनीयविभूतिः vअतिथिः[2] अतिथिभूतः vसः अग्निः vगृहेगृहे यजमानानां गृहेषु vवनेवने सर्वेषु वनेषु[3] च vशिश्रिये श्रयति । किंच vजन्यः जनहितः सोऽग्निः vजनंजनं सर्वं जनं[4]

---

१. त—मुख्यानि भूतानि । २. ग-त३.४.५.६-मु—' अतिथिः ' नास्ति । ३. ग-त४—वृक्षेषु; त१. २-३.५.६.८-म२.४.८—वृक्षेषु । ४. ग-त-म२.४.५.८—जातं ।

vतक्वीरिव गच्छन्निव vनाति vमन्यते न विसृज्य गच्छतीत्यर्थः । तदेव दर्शयति । vविश्यः विड्भ्यो हितः सोऽग्निः vविशो मनुष्यान् vआ vक्षेति अभिगच्छति । किंच vविशंविशं सर्वां विशः प्रजा अधितिष्ठतीति शेषः ॥

सुदक्षो दक्षैः क्रतुनासि सुक्रतुरग्ने कविः काव्येनासि विश्ववित् ।
वसुर्वसूनां क्षयसि त्वमेक इद् द्यावा च यानि पृथिवी च पुष्यतः ॥ ३ ॥

सुऽदक्षः । दक्षैः । क्रतुना । असि । सुऽक्रतुः । अग्ने । कविः । काव्येन । असि । विश्वऽवित् । वसुः । वसूनाम् । क्षयसि । त्वम् । एकः । इत् । द्यावा । च । यानि । पृथिवी इति । च । पुष्यतः ॥ ३ ॥

हे vअग्ने त्वं vदक्षैः बलैः vसुदक्षः सुबलः vअसि भवसि । किंच vक्रतुना कर्मणा vसुक्रतुः शोभनकर्मासि । किंच vकाव्येन मेधाविकर्मणा vकविः मेधावी vअसि । किंच vविश्ववित् सर्वज्ञोऽसि । किंच vवसूनां धनानां vवसुः वासयितासि । किंच हे अग्ने vत्वमेक vइत् एक एव vक्षयसि निवससि । किंच vद्यावा vच vपृथिवी vच द्यावाभूमी vयानि वसूनि vपुष्यतः संवर्धयतः[1] तेषां दिव्यानां पार्थिवानां च धनानामीशिष इत्यर्थः[2] ॥

प्रजानन्नग्ने तव योनिमृत्वियमिळायास्पदे घृतवन्तमासदः ।
आ ते चिकित्र उषसामिवेतयोऽरेपसः सूर्यस्येव रश्मयः ॥ ४ ॥

प्रऽजानन् । अग्ने । तव । योनिम् । ऋत्वियम् । इळायाः । पदे । घृतऽवन्तम् । आ । असदः । आ । ते । चिकित्रे । उषसाम्ऽइव । एतयः । अरेपसः । सूर्यस्यऽइव । रश्मयः ॥ ४ ॥

हे vअग्ने vतव vऋत्वियम् ऋतौ भवं vघृतवन्तं घृतेन सहितं vयोनिं निवासस्थानम् vइळायास्पदे उत्तरवेद्यां vप्रजानन् त्वम् vआसदः आसीदसि । किंच vते तव vरश्मयः vउषसामिव यथोषसाम् vएतयः प्रज्ञाः प्रकाशलक्षणा आगतयो वा निर्गता रश्मयो दृश्यन्ते तद्वत् vआ vचिकित्रे प्रज्ञायन्ते । vसूर्यस्येव यथा सूर्यस्य vअरेपसः पापरहिता निर्गताः vरश्मयः दृश्यन्ते तद्वदा चिकित्रे प्रज्ञायन्ते ॥

तव श्रियो वर्ष्यस्येव विद्युतश्चित्राश्चिकित्र उषसां न केतवः ।
यदोषधीरभिसृष्टो वनानि च परि स्वयं चिनुषे अन्नमास्ये ॥ ५ ॥

तव । श्रियः । वर्ष्यस्यऽइव । विऽद्युतः । चित्राः । चिकित्रे । उषसाम् । न । केतवः । यत् । ओषधीः । अभिऽसृष्टः । वनानि । च । परि । स्वयम् । चिनुषे । अन्नम् । आस्ये ॥ ५ ॥

हे अग्ने vतव vश्रियः रश्मिलक्षणा विभूतयः vचित्राः विचित्राः vचिकित्रे प्रज्ञायन्ते । तत्र दृष्टान्तः । vवर्ष्यस्येव यथा वर्षितुर्मेघस्य संबन्धिन्यः vविद्युतः vउषसां vन यथा चोषसां vकेतवः प्रज्ञानास्तत्स्थाः प्रकाशाः प्रज्ञायन्ते तद्वदित्यर्थः । कदेत्यत्राह । vयत् यदा त्वम् vओषधीः व्रीह्याद्याः[3]

---

१. ग-त४-५-संवधयतः; त१.२.३.६.७-संबंधयत् । २. ग-त-मु-इति शेषः । ३. ग-त-मु-व्रीहियवाद्या; भ२-व्रीह्यायात्या; भ४.६.८-व्रीह्याद्यान्या ।

vवनानि अरण्यानि vच vअभिसृष्टः सृष्टो दग्धुं विसृष्टः सन्[1] vस्वयम्[1] आत्मना vआस्ये मुखे vअन्नम् अदनीयं स्थावरलक्षणं vपरि vचिनुषे परिक्षिपसीत्यर्थः[2] ॥ ॥ २० ॥

तमोषधीर्दधिरे गर्भमृत्वियं तमापो अग्निं जनयन्त मातरः ।
तमित्समानं वनिनश्च वीरुधोऽन्तर्वतीश्च सुवते च विश्वहा ॥ ६ ॥

तम् । ओषधीः । दधिरे । गर्भम् । ऋत्वियम् । तम् । आपः । अग्निम् । जनयन्त । मातरः ।
तम् । इत् । समानम् । वनिनः । च । वीरुधः । अन्तःऽवतीः । च । सुवते । च । विश्वहा ॥६॥

vऋत्वियम् ऋतौ प्राप्तं vगर्भं गर्भभूतं vतं प्रकृतमग्निम् vओषधीः ओषध्यः vदधिरे धारयन्ति । vतम् एव vअग्निं vमातरः धारकत्वेन मातृस्थानीया vआपः च vजनयन्त जनयन्ति । किंच vवनिनः वनस्पतयः vच vसमानं गर्भभावेन प्रवेशात् स्वतुल्यं vतमित् तमेवाग्निं जनयन्ति । किंच तमेवाग्निम् vअन्तर्वतीः गर्भवत्यः vवीरुधः ओषधयः vच vविश्वहा सर्वदा vसुवते जनयन्ति ॥

वातोपधूत इषितो वशाँ अनु तृषु यदन्ना वेविषद्वितिष्ठसे ।
आ ते यतन्ते रथ्यो३ यथा पृथक्शर्धांस्यग्ने अजराणि धक्षतः ॥ ७ ॥

वातऽउपधूतः । इषितः । वशान् । अनु । तृषु । यत् । अन्ना । वेविषत् । विऽतिष्ठसे ।
आ । ते । यतन्ते । रथ्यः । यथा । पृथक् । शर्धांसि । अग्ने । अजराणि । धक्षतः ॥ ७ ॥

हे vअग्ने vयत्[3] यदा त्वं[3] vवातोपधूतः वायुना कम्पितः vवशान् कान्तान् वनस्पतीन् vअनु प्रति vतृषु क्षिप्रम् vइषितः प्रेरितश्च[4] सन् vअन्ना अदनीयानि वनस्पत्यादीनि स्थावराणि vवेविषत् व्याप्नुवन् vवितिष्ठसे इतस्ततो गच्छसि तदानीं vधक्षतः काष्ठानि दहतः vते तव vअजराणि जरारहितानि vशर्धांसि तेजांसि vयथा vरथ्यः रथिनः तद्वत् vपृथक्[5] vआ vयतन्ते गच्छन्ति[6] ॥

मेधाकारं विदथस्य प्रसाधनमग्निं होतारं परिभूतमं मतिम् ।
तमिदर्भे हविष्या समानमित्तमिन्महे वृणते नान्यं त्वत् ॥ ८ ॥

मेधाऽकारम् । विदथस्य । प्रऽसाधनम् । अग्निम् । होतारम् । परिऽभूतमम् । मतिम् ।
तम् । इत् । अर्भे । हविषि । आ । समानम् । इत् । तम् । इत् । महे । वृणते । न । अन्यम् । त्वत् ॥८॥

vमेधाकारं प्रज्ञायाः कर्तारं vविदथस्य यज्ञस्य vप्रसाधनं प्रकर्षेण साधकं[7] vहोतारं देवानामाह्वातारं vपरिभूतमम् अतिशयेन शत्रूणां परिभवितारं vमतिं मन्तारं यं त्वाम् vअग्निं वृणीमह इति शेषः । vतमित् तमेवाग्निम्[8] vअर्भे अल्पे vहविषि चरुपुरोडाशादिके हविषि vसमानमित् सहैव ऋत्विजः vआ vवृणते प्रार्थयन्ते । vमहे महति सोमात्मके हविष्यपि vतमित् तमेवाग्निं vवृणते । vत्वत् त्वत्तः vअन्यम् अतिरिक्तं देवं vन वृणते ॥

---

१. ग-सततं; त-म२.४.६.८-सन् तं । २. ग२-प्रक्षिपसीत्यर्थः; ग४-त३.४.५-प्रक्षेपसीत्यर्थः; त१.७-प्रक्षेपामीत्यर्थः; त२.६-प्रक्षेपमीत्यर्थः; त८-पक्षिपमीत्यर्थः; म-पक्षिपसीत्यर्थः । ३. ग४-यद्यदा; त१.२.६.८-म-त्वं यद्यदा त्वं; त३.४.५.७-मु-त्वं यद्यदा । ४. ग-त१.२.३.६.७.८-म-प्रेषितश्च । ५. ग-त-मु-पृथक् पृथक् । ६. त-मु-आगच्छंति । ७. त-साधनं । ८. ग-त-म-तमेवाग्निं त्वां ।

त्वामिदत्र वृणते त्वायवो होतारमग्ने विदथेषु वेधसः ।
यद्देवयन्तो दधति प्रयांसि ते हविष्मन्तो मनवो वृक्तबर्हिषः ॥ ९ ॥

त्वाम् । इत् । अत्र । वृणते । त्वाऽयवः । होतारम् । अग्ने । विदथेषु । वेधसः ।
यत् । देवऽयन्तः । दधति । प्रयांसि । ते । हविष्मन्तः । मनवः । वृक्तऽबर्हिषः ॥ ९ ॥

हे [v]अग्ने [v]होतारं[1] देवानां ह्वातारमग्निं [v]त्वामित् त्वामेव [v]त्वायवः त्वत्कामाः [v]वेधसः कर्मणां कर्तॄर ऋत्विजः [v]अत्र अस्मिँल्लोके [v]विदथेषु यज्ञेषु [v]वृणते प्रार्थयन्ते । कदेत्यत्राह । [v]यत् यदा [v]देवयन्तः देवान्यष्टुं स्तोतुं वेच्छन्तः [v]वृक्तबर्हिषः छिन्नबर्हिषः [v]हविष्मन्तः संस्कृतहविष्काः [v]मनवः मनुष्या ऋत्विजः [v]ते तुभ्यं [v]प्रयांसि हवींषि [v]दधति धारयन्ति । प्रयच्छन्तीत्यर्थः ॥

तवाग्ने होत्रं तव पोत्रमृत्वियं तव नेष्ट्रं त्वमग्निरुतायतः ।
तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे ॥ १० ॥

तव । अग्ने । होत्रम् । तव । पोत्रम् । ऋत्वियम् । तव । नेष्ट्रम् । त्वम् । अग्निः । ऋतऽयतः ।
तव । प्रऽशास्त्रम् । त्वम् । अध्वरिऽयसि । ब्रह्मा । च । असि । गृहऽपतिः । च । नः । दमे ॥ १० ॥

हे [v]अग्ने [v]तव [v]होत्रं होतृकर्म । त्वया विना तस्याभावात् । किंच [v]तव एव[2] [v]ऋत्वियम् ऋतौ भवं प्रातरनुष्ठानकालं [v]पोत्रं पोतृकर्म । त्वया विना तस्याप्यभावात् । किंच [v]तव एव [v]नेष्ट्रं नेष्टृकर्म । किंच [v]ऋतायतः ऋतं यज्ञं कर्तुमिच्छतो यजमानस्य [v]त्वम् एव [v]अग्निः नान्यः कश्चित् । किंच [v]तव एव [v]प्रशास्त्रं प्रशास्तृकर्म । किंच हे अग्ने [v]त्वम् एव [v]अध्वरीयसि अध्वरं यज्ञं कर्तुमिच्छसि । तव हेतुत्वात्कर्तृत्वम् । किंच त्वमेव [v]ब्रह्मा [v]असि । त्वया विना तस्याभावात् । किंच [v]नः अस्माकं [v]दमे गृहे [v]गृहपतिः यजमानोऽसि । त्वया विनास्माकं यजमानत्वाभावात् ॥ ॥ २१ ॥

यस्तुभ्यमग्ने अमृताय मर्त्यः समिधा दाशदुत वा हविष्कृति ।
तस्य होता भवसि यासि दूत्यमुप ब्रूषे यजसि ध्वरीयसि ॥ ११ ॥

यः । तुभ्यम् । अग्ने । अमृताय । मर्त्यः । सम्ऽइधा । दाशत् । उत । वा । हविःऽकृति ।
तस्य । होता । भवसि । यासि । दूत्यम् । उप । ब्रूषे । यजसि । अध्वरिऽयसि ॥ ११ ॥

हे [v]अग्ने [v]अमृताय मरणधर्मरहिताय [v]तुभ्यं [v]यः [v]मर्त्यः मनुष्यः [v]समिधा समिधम्[3] । द्वितीयायाः ' सुपां सुलुक्' इत्याकारः । [v]दाशत् ददाति प्रयच्छति [v]उत [v]वा अपि वा [v]हविष्कृति । हविषां कृत् करणं यस्मिन् स हविष्कृत् । तस्मिन्यज्ञे हवींषि ददातीति[4] शेषः । [v]तस्य मनुष्यस्य [v]होता देवानामाह्वाता [v]भवसि । किंच त्वं [v]दूत्यं देवान् प्रति दूतकर्म कर्तुं [v]यासि गच्छसि । किंच त्वं ब्रह्मा भूत्वास्मिन् कर्मणि युष्मन्यमिमानि हवींषि यजमानेन प्रहितानीति [v]उप [v]ब्रूषे उपक्रम्य ब्रवीषि । किंच त्वं [v]यजसि यजमानो भूत्वा देवेभ्यो हवींषि ददासि । किंच त्वं तथा[5] पूर्वोक्तप्रकारेण[6] [v]अध्वरीयसि अध्वर्युरिवाचरसि । अथवान्यं[7] यज्ञं कर्तुमिच्छसि ॥

---

१. त-भ-'होतारं' नास्ति । २. त-मु-'एव' नास्ति । ३. त-समिद्धः; भ१.२-समिधः; भ४.६.८-समिधः । ४. त-मु-ददातीति संस्कृतं यस्मिन् तद्यज्ञमनुतिष्ठतीति; भ-ददातीति संस्कृतिर्यस्मिन् तद्यज्ञमनुतिष्ठतीति । ५. त-यथा । ६. ग-°प्रकारेण तस्य । ७. त-मु-अन्यथा ।

इमा अस्मै मतयो वाचो अस्मदाँ ऋचो गिरः सुष्टुतयः समग्मत ।
वसूयवो वसवे जातवेदसे वृद्धासु चिद्वर्धनो यासु चाकनत् ॥ १२ ॥

इमाः । अस्मै । मतयः । वाचः । अस्मत् । आ । ऋचः । गिरः । सुऽस्तुतयः । सम् । अग्मत ।
वसुऽयवः । वसवे । जातऽवेदसे । वृद्धासु । चित् । वर्धनः । यासु । चाकनत् ॥ १२ ॥

vजातवेदसे जातप्रज्ञाय vवसवे वासयित्रे vअस्मै अग्नये vमतयः पूजयित्र्यः vइमाः vवाचः vवसूयवः अस्मदर्थं धनकामाः सत्यः vअस्मत् अस्मत्तो निर्गत्य vआ vसमग्मत आभिमुख्येन संगच्छन्ते । तमिममग्निं प्रीणयन्त्वित्यर्थः[1] । काः पुनस्ताः । vसुष्टुतयः शोभनस्तुतिरूपाः vऋचः ऋगात्मिकाः vगिरः वाचः । तथा vयासु vवृद्धासु vचित् स्वत एव वृद्धास्वपि[2] vवर्धनः पुनरपि वर्धयिता सन्नग्निः vचाकनत् स्तोतॄन् कामयते । इमा मतय इत्यन्वयः ॥

इमां प्रत्नाय सुष्टुतिं नवीयसीं वोचेयमस्मा उशते शृणोतु नः ।
भुया अन्तरा हृद्यस्य निस्पृशे जायेव पत्य उशती सुवासाः ॥ १३ ॥

इमाम् । प्रत्नाय । सुऽस्तुतिम् । नवीयसीम् । वोचेयम् । अस्मै । उशते । शृणोतु । नः ।
भुयाः । अन्तरा । हृदि । अस्य । निऽस्पृशे । जायाऽइव । पत्ये । उशती । सुऽवासाः ॥ १३ ॥

vप्रत्नाय पुराणाय vउशते स्तोत्रं कामयमानाय vअस्मै अग्नये vनवीयसीं नवतरामन्यैः अकृतपूर्वां vसुष्टुतिं शोभनां स्तुतिं vवोचेयम् अहं वक्ष्यामि । सोऽग्निरस्मदीयां स्तुतिं vशृणोतु । किंचाहम् vअस्य अग्नेः vहृदि हृदये तत्रापि vअन्तरा मध्ये vनिस्पृशे संस्पर्शनाय । गुणैरनुरञ्जनायेत्यर्थः । vभूयाः भूयासम् । व्यत्ययेन मध्यमः । अग्नेर्हृदिस्पृगहं स्यामित्यर्थः । अथवा मम सुष्टुतेरनुप्रवेष्टा[3] भवेति योज्यम् । समानमन्यत् । तत्र दृष्टान्तः । vपत्ये पत्युर्हृदयस्य मध्ये vसुवासाः शोभनवस्त्रादिना मण्डिता vजाया vउशती कामयमाना यथेष्टतमा भवति तद्वदित्यर्थः ॥

यस्मिन्नश्वास ऋषभास उक्षणो वशा मेषा अवसृष्टास आहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिं जनये चारुमग्नये ॥ १४ ॥

यस्मिन् । अश्वासः । ऋषभासः । उक्षणः । वशाः । मेषाः । अवऽसृष्टासः । आऽहुताः ।
कीलालऽपे । सोमऽपृष्ठाय । वेधसे । हृदा । मतिम् । जनये । चारुम् । अग्नये ॥ १४ ॥

vयस्मिन्[4] अग्नौ vउक्षणः उक्षाणः । 'वा षपूर्वस्य निगमे' इति दीर्घविकल्पः । सेचनसमर्थाः vअश्वासः अश्वाः vऋषभासः वृषभाश्च vवशाः स्वभावबन्ध्याश्च[5] vमेषाः च vअवसृष्टासः देवतार्थम् अवसृष्टाः परित्यक्ताः सन्तोऽग्नमेधे vआहुताः आभिमुख्येन हुता भवन्ति vकीलालपे सौत्रामण्यां सुरां पिबते । 'कीलालम्' इत्युदकनामसु पाठात् । उदकं[6] पिबते vसोमपृष्ठाय सोमयुक्तः पृष्ठ उपरिभागो यस्य तस्मै सोमपृष्ठाय vवेधसे विधात्रे तस्मै vअग्नये vहृदा हृदयेन vचारुं कमनीयां vमतिं स्तुतिं vजनये जनयामि । उत्पादयामि ॥

---

१. भ–पूजयंत्वित्यर्थः । २. त-मु–प्रवृद्धास्वपि । ३. ग–मनसि सुष्टु अनुप्रविष्टो । ४. त–अस्मिन् । ५. त–स्वभावतर्वध्याश्च । ६. ग-त–'उदकं' नास्ति ।

अहाव्यग्ने हविरास्ये ते स्रुचीव घृतं चम्वीव सोमः ।
वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥ १५ ॥

अहावि । अग्ने । हविः । आस्ये । ते । स्रुचिऽइव । घृतम् । चम्विऽइव । सोमः ।
वाजऽसनिम् । रयिम् । अस्मे इति । सुऽवीरम् । प्रऽशस्तम् । धेहि । यशसम् । बृहन्तम् ॥ १५ ॥

हे [v]अग्ने [v]ते तव [v]आस्ये मुखे [v]हविः पुरोडाशादिहविरस्माभिः [v]अहावि सततं प्रक्षिप्यते । तत्र दृष्टान्तौ । [v]घृतम् आज्यं [v]स्रुचीव यथा स्रुचि । [v]चम्वीव [v]सोमः । यथा चमसे सोमः तद्वदित्यर्थः । तथा त्वं [v]वाजसनिम् अन्नस्य दातारं [v]सुवीरं शोभनपुत्रोपेतं [v]प्रशस्तं सुवर्णादिकं [v]यशसं यशस्विनं कीर्तिमन्तं [v]बृहन्तम् अपरिमितं महान्तं वा [v]रयिं रमणीयं धनम् [v]अस्मे अस्मभ्यं [v]धेहि देहि ॥ ॥ २२ ॥

'यज्ञस्य' इति पञ्चदशर्चं द्वितीयं सूक्तं मनोः पुत्रस्य शार्यातस्यार्षं जागतं बहुदेवताकम् । तथा चानुक्रान्तं—'यज्ञस्य शार्यातो मानवो वैश्वदेवं तु जागतम्' इति । चातुर्विंशिक आरम्भणीयेऽहनि वैश्वदेवशस्त्र इदं सूक्तं वैश्वदेवनिविद्धानम् । सूत्रितं च—'ते हि द्यावापृथिवी यज्ञस्य वो रथ्यम्' (आश्व. श्रौ. ७. ४) इति । पृष्ठ्याभिश्चषडहस्यौर्द्वितीयेऽहन्यपीदं[1] वैश्वदेवनिविद्धानम् । 'चातुर्विंशिकेन तृतीयसवनम्' (आश्व. श्रौ. ७. ६) इति सूत्रकृतातिदिष्टत्वात् ॥

यज्ञस्य वो रथ्यं विशपतिं विशां होतारमक्तोरतिथिं विभावसुम् ।
शोचञ्छुष्कासु हरिणीषु जर्भुरद्वृषा केतुर्यजतो द्यामशायत ॥ १ ॥

यज्ञस्य । वः । रथ्यम् । विशपतिम् । विशाम् । होतारम् । अक्तोः । अतिथिम् । विभाऽवसुम् ।
शोचन् । शुष्कासु । हरिणीषु । जर्भुरत् । वृषा । केतुः । यजतः । द्याम् । अशायत ॥ १ ॥

हे देवाः [v]वः यूयं [v]यज्ञस्य [v]रथ्यं नेतारं [v]विशपतिं मनुष्याणां पालकं स्वामिनं वा[2] [v]विशां देवानां [v]होतारम् आह्वातारम् [v]अक्तोः रात्रेः [v]अतिथिम् अतिथिभूतं [v]विभावसुं विविधदीप्तधनं तमग्निं परिचरतेति शेषः । [v]शुष्कासु शुष्कभूतास्वोषधीषु [v]शोचन् ज्वलन् [v]हरिणीषु हरितवर्णासु आर्द्रास्वोषधीषु [v]जर्भुरत् भक्षयन् कुटिलं गच्छन् वा [v]वृषा कामानां वर्षिता [v]केतुः प्रज्ञापकः [v]यजतः यष्टव्योऽग्निः [v]द्यां दिवम् [v]अशायत प्रतिशेते ॥

इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम् ।
अक्तुं न यह्वमुषसः पुरोहितं तनूनपातमरुषस्य निंसते ॥ २ ॥

इमम् । अञ्जःऽपाम् । उभये । अकृण्वत । धर्माणम् । अग्निम् । विदथस्य । साधनम् ।
अक्तुम् । न । यह्वम् । उषसः । पुरःऽहितम् । तनूऽनपातम् । अरुषस्य । निंसते ॥ २ ॥

[v]उभये देवमनुष्याः [v]अञ्जस्पाम् अञ्जसा रक्षकं [v]धर्माणं धारकम् [v]इमम् [v]अग्निं [v]विदथस्य यज्ञस्य [v]साधनं साधयितारम् [v]अकृण्वत अकुर्वत । किंच [v]अरुषस्य आरोचमानस्य वायोः [v]तनूनपातं पुत्रं [v]यह्वं महान्तं [v]पुरोहितम्[3] [v]उषसः [v]अक्तुं [v]न स्वरश्मिभिरक्तमादित्यमिव [v]निंसते चुम्बयन्ति । आश्रयन्त इत्यर्थः ॥

---

१. त१.२.६.८-म१.२.४.६.८–षष्ठ्याभिप्लव°। २. त-म–'वा' नास्ति। ३. ग-त-मु–पुरोहितमिममग्निं ।

वळस्य नीथा वि पणेश्च मन्महे वया अस्य प्रहुता आसुरर्त्तवे ।
यदा घोरासो अमृतत्वमाशतादिज्जनस्य दैव्यस्य चर्किरन् ॥ ३ ॥

वट् । अस्य । नीथा । वि । पणेः । च । मन्महे । वयाः । अस्य । प्रऽहुताः । आसुः । अर्त्तवे । यदा । घोरासः । अमृतऽत्वम् । आशत । आत् । इत् । जनस्य । दैव्यस्य । चर्किरन्॥३॥

[v]विपणेः अस्माभिर्विविधं पणितव्यस्य स्तुत्यस्याग्नेः [v]नीथा नीथान्यस्मत्संबन्धीनि प्रज्ञानानि [v]वट् सत्यानि स्युरिति [v]मन्महे वयं कामयामहे । किंच [v]अस्य अग्नेः [v]वयाः अस्मदीया अन्नाहुतयः [v]अर्त्तवे भक्षणाय [v]प्रहुताः [v]आसुः भवेयुरिति कामयामहे । किंच [v]यदा यस्मिन् काले [v]घोरासः घोराः[1] अग्नेर्ज्वालाः [v]अमृतत्वम् अविनाशित्वम् [v]आशत प्राप्नुवन्ति [v]आदित् अनन्तरमेवास्माकमृत्विजः [v]दैव्यस्य देवेषु भवस्य [v]जनस्य अग्नेरर्थाय [v]चर्किरन् किरेयुः[2]। अग्नौ हवींषि प्रक्षिपेयुरित्यर्थः ॥

ऋतस्य हि प्रसितिर्द्यौरुरु व्यचो नमो मह्यरमतिः पनीयसी ।
इन्द्रो मित्रो वरुणः सं चिकित्रिरेऽथो भगः सविता पूतदक्षसः ॥ ४ ॥

ऋतस्य । हि । प्रऽसितिः । द्यौः । उरु । व्यचः । नमः । मही । अरमतिः । पनीयसी । इन्द्रः । मित्रः । वरुणः । सम् । चिकित्रिरे । अथो इति । भगः । सविता । पूतऽदक्षसः ॥४॥

[v]ऋतस्य यज्ञस्य संबन्धिनमेनमग्निं प्रति [v]प्रसितिः विस्तृता [v]द्यौः [v]उरु विस्तीर्णं [v]व्यचः व्याप्तमन्तरिक्षं च [v]पनीयसी स्तुत्यतमा [v]अरमतिः पर्यन्तरहिता [v]मही पृथिवी च [v]नमः नमनं कुर्वन्तीति शेषः । [v]अथो अपि च एनमग्निम् [v]इन्द्रो [v]मित्रः च [v]वरुणः च [v]भगः च [v]सविता [v]पूतदक्षसः शुद्धबला एते देवा एनमग्निं [v]सं [v]चिकित्रिरे ज्ञैष्ठ्याय संजानते ॥

प्र रुद्रेण ययिना यन्ति सिन्धवस्तिरो महीमरमतिं दधन्विरे ।
येभिः परिज्मा परियन्नुरु ज्रयो वि रोरुवद्जठरे विश्वमुक्षते ॥ ५ ॥

प्र । रुद्रेण । ययिना । यन्ति । सिन्धवः । तिरः । महीम् । अरमतिम् । दधन्विरे । येभिः । परिऽज्मा । परिऽयन् । उरु । ज्रयः । वि । रोरुवत् । जठरे । विश्वम् । उक्षते॥५॥

[v]सिन्धवः स्वन्दनशीला आपः [v]ययिना गमनशीलेन [v]रुद्रेण रुद्रपुत्रेण मरुद्गणेन सह [v]प्र [v]यन्ति[3]। अथ बहुवदाह । तेऽमी मरुतः [v]अरमतिम् । रमतिर्विरामोऽवसानम् । तद्रहितामपर्यन्तां [v]महीं पृथिवीं [v]तिरः [v]दधन्विरे तिरस्कुर्वन्तीत्यर्थः । [v]परिज्मा परितो गन्तेन्द्रः [v]परियन् परितो गच्छन् [v]येभिः यैः मरुद्गणैः सह [v]उरु [v]ज्रयः बहुवेगं करोतीति शेषः । किंच [v]जठरे अन्तरिक्षे [v]रोरुवत् शब्दं कुर्वन् पर्जन्यो यैर्मरुद्गणैः सह [v]विश्वं भुवनम् [v]उक्षते सिञ्चते[4] ॥ ॥ २३ ॥

क्राणा रुद्रा मरुतो विश्वकृष्टयो दिवः श्येनासो असुरस्य नीळयः ।
तेभिश्चष्टे वरुणो मित्रो अर्यमेन्द्रो देवेभिरर्वशेभिरर्वशः ॥ ६ ॥

---

१. ग-त-सु-घोरा भयंकराः । २. ग-त-सु-प्रकिरेयुः । ३. ग-यंति प्रगच्छंति । ४. त-सिंचति ।

क्राणाः । रुद्राः । मरुतः । विश्वऽकृष्टयः । दिवः । श्येनासः । असुरस्य । नीळयः ।
तेभिः । चष्टे । वरुणः । मित्रः । अर्यमा । इन्द्रः । देवेभिः । अर्वशेभिः । अर्वशः ॥ ६ ॥

vअसुरस्य मेघस्य vनीळयः आवासभूताः vदिवः अन्तरिक्षस्य संबन्धिनः vश्येनासः श्येनाः शंसनीयगतयः vविश्वकृष्टयः व्याप्तमनुष्याः vरुद्राः रुद्रपुत्रा ये vमरुतः vक्राणाः स्वाधिकारकर्माणि कुर्वाणा आसत इति शेषः । vतेभिः तैः vअर्वशेभिः अश्ववद्भिः सोमवद्भिर्वा vदेवेभिः देवैः सह vअर्वशः अश्ववान् सोमवान्वा vइन्द्रः vचष्टे पश्यति । vवरुणः च vमित्रः च vअर्यमा च सोमवद्भिः मरुद्भिः सह पश्यन्ति ॥

इन्द्रे भुजं शशमानास आशत सूरो दृशीके वृषणश्च पौंस्ये ।
प्र ये न्वस्यार्हणा ततक्षिरे युजं वज्रं नृषदनेषु कारवः ॥ ७ ॥

इन्द्रे । भुजम् । शशमानासः । आशत । सूरः । दृशीके । वृषणः । च । पौंस्ये ।
प्र । ये । नु । अस्य । अर्हणा । ततक्षिरे । युजम् । वज्रम् । नृऽसदनेषु । कारवः ॥ ७ ॥

ये vशशमानासः शशमानाः[1] स्तोतारः vइन्द्रे स्तुते सति vभुजं पालनम् vआशत प्राप्नुवन्ति । vसूरः सूर्ये स्तुते सति vदृशीके दर्शनं सर्ववस्तुविषयं प्राप्नुवन्ति । vवृषणः वर्षितरीन्द्रे स्तुते vपौंस्यं बलं च प्राप्नुवन्ति । किंच vये vकारवः स्तोतारः vअस्य इन्द्रस्य vअर्हणा पूजनानि vनु क्षिप्रं vततक्षिरे प्रकृष्टानि कुर्वन्ति ते स्तोतारः vनृषदनेषु नरः कर्तृत्वेन येषु सीदन्ति तिष्ठन्ति तेषु यज्ञेषु vयुजं सहायमिन्द्रस्य vवज्रं प्राप्नुवन्ति ॥

सूरश्चिदा हरितो अस्य रीरमदिन्द्रादा कश्चिद्भयते तवीयसः ।
भीमस्य वृष्णो जठरादभिश्वसो दिवेदिवे सहुरिः स्तनन्नबाधितः ॥ ८ ॥

सूरः । चित् । आ । हरितः । अस्य । रीरमत् । इन्द्रात् । आ । कः । चित् । भयते । तवीयसः ।
भीमस्य । वृष्णः । जठरात् । अभिऽश्वसः । दिवेऽदिवे । सहुरिः । स्तनन् । अबाधितः ॥८॥

vसूरः सूर्योऽपि vअस्य इन्द्रस्य परमेश्वरस्य परमात्मन आज्ञां परिपालयितुं मन्वानः vहरितः अश्वान् प्रेरयतीति शेषः । प्रेरयन्नध्वनि vआ vरीरमत् आभिमुख्येन रमयति । यः vकश्चित् देवोऽपि सृष्टौ[2] vभयते बिभेति स देवः vतवीयसः प्रवृद्धात् vइन्द्रात् परमात्मनो भयादेव बिभेति । तथा च तैत्तिरीये पठितं—' भीषास्माद्वातः पवते ' (तै. उ. २. ८) इत्यादिना । किंच vवृष्णः कामानां वर्षितुः vभीमस्य सर्वभयंकरस्य परमात्मनः परमेश्वरस्य vदिवेदिवे अन्वहम् vअभिश्वसः आभिमुख्येन श्वसतः vजठरात् उदरादन्तरिक्षात् vसहुरिः सहनशीलः[3] vअबाधितः बाधरहितः vस्तनन् स्तनयति शब्दं करोति ॥

स्तोमं वो अद्य रुद्राय शिक्वसे क्षयद्वीराय नमसा दिदिष्टन ।
येभिः शिवः स्ववाँ एवयावभिर्दिवः सिषक्ति स्वयशा निकामभिः ॥ ९ ॥

---

१. ग-त४.५–शंसमानाः; त१.२.३.६.७–शंसमानासः । २. ग–इह; त१.२.३.६.७–दृष्टौ; त४.५–दृष्टो । ३. त-मु–सहनशीलः सन् ।

स्तोमम्। वः। अद्य। रुद्राय। शिक्वसे। क्षयत्ऽवीराय। नमसा। दिदिष्टन।
येभिः। शिवः। स्वऽवान्। एवयावऽभिः। दिवः। सिसक्ति। स्वऽयशाः। निकामऽभिः॥९॥

एवयावभिः अश्वैरागच्छद्भिः येभिः यैर्मरुद्भिः सह[1] स्ववान् ज्ञातिमान् स्वयशाः स्वभूतकीर्तिः शिवः सुखकरः परमेश्वरः दिवः द्युलोकाद्यजमानान्[2] सिषक्ति सेवते हे ऋत्विजः यूयम् अद्य अस्मिन् यागे निकामभिः नियताभिलाषैः[3] तैर्मरुद्भिः सहिताय क्षयद्वीराय क्षितशत्रवे[4] शिक्वसे शरणे शक्ताय रुद्राय नमसा अन्नेन नमस्कारेण वा सह स्तोमं स्तोत्रं दिदिष्टन दिशत सृजत। गमयतेत्यर्थः॥

ते हि प्रजाया अभरन्त वि श्रवो बृहस्पतिर्वृषभः सोमजामयः।
यज्ञैरथर्वा प्रथमो वि धारयद्देवा दक्षैर्भृगवः सं चिकित्रिरे॥१०॥

ते। हि। प्रऽजायाः। अभरन्त। वि। श्रवः। बृहस्पतिः। वृषभः। सोमऽजामयः।
यज्ञैः। अथर्वा। प्रथमः। वि। धारयत्। देवाः। दक्षैः। भृगवः। सम्। चिकित्रिरे॥१०॥

हि यस्मात्कारणात् वृषभः कामानां वर्षिता बृहस्पतिः सोमजामयः अन्ये सोमबन्धवः[5] ते विश्वे देवाः प्रजायाः अर्थाय श्रवः अन्नं वि अभरन्त विभरन्ति वृष्टिद्वारेण पोषयन्ति तस्मात्कारणात् तासां[6] प्रजानां मध्ये अथर्वा नामर्षिः प्रथमः[7] प्रथममेव[8] क्रियमाणैः[9] यज्ञैः वि धारयत् देवान् कर्ममार्गान् वा विधृतानकरोत्। अत्र निगमः—'यज्ञैरथर्वा प्रथमः पथस्ततेः' (ऋ. सं. १. ८३. ५) इति। अथ दक्षैः बलैः सह देवाः विश्वे भृगवः ऋषयश्च सं चिकित्रिरे अथर्वणा कृतं यज्ञं गत्वा पशून् संज्ञातवन्तः॥ ॥ २४॥

ते हि द्यावापृथिवी भूरिरेतसा नराशंसश्चतुरङ्गो यमोऽदितिः।
देवस्त्वष्टा द्रविणोदा ऋभुक्षणः प्र रोदसी मरुतो विष्णुरर्हिरे॥११॥

ते इति। हि। द्यावापृथिवी इति। भूरिऽरेतसा। नराशंसः। चतुःऽअङ्गः। यमः। अदितिः।
देवः। त्वष्टा। द्रविणःऽदाः। ऋभुक्षणः। प्र। रोदसी इति। मरुतः। विष्णुः। अर्हिरे॥११॥

भूरिरेतसा बहूदके द्यावापृथिवी द्यावापृथिव्यौ यमः देवः अदितिः च देवः त्वष्टा च द्रविणोदाः अग्निश्च ऋभुक्षणः ऋभवश्च रोदसी रुद्रस्य पत्नी च मरुतः देवाश्च विष्णुः[10] च[10] एते विश्वे देवाः चतुरङ्गः चतुर्भिरङ्गैर्युक्तस्तस्मिन्[11] नराशंसः नराशंसनामधेये यज्ञे प्र[12] अर्हिरे अस्माभिः स्तोतृभिः पूज्यन्ते[12]॥

उत स्य नः उशिजामुर्विया कविरर्हिः शृणोतु बुध्न्यो हवीमनि।
सूर्यामासा विचरन्ता दिविक्षिता धिया शमीनहुषी अस्य बोधतम्॥१२॥

१. त-म१.२.४.६.८–सहजाः। २. त-म६.८–द्युलोकानयजमाना वा; म१.२.४.७–द्युलोकाद्यजमानो वा। ३. त-म–नियताभिलषितैः। ४. ग४–क्षपितशत्रवे; त१.२.७-म४.६.८–रक्षितशत्रवे; त३–क्षतशत्रवे; म१.२–भक्षितशत्रवे। ५. ग-म–सोमबंधकाः; त-मु–सोमबंधुकाः। ६. ग-त-म१.४.५.६–तेषां। ७. ग-म–'प्रथमः' नास्ति। ८. त–'प्रथममेव' नास्ति। ९. त–विक्रियमाणैः। १०. त–ऋभवश्च त। ११. त-मु–चतुर्भिर्युक्तोग्निस्तस्मिन्। १२. त-मु–विष्णुरस्माभिः स्तोतृभिरर्हिरे प्रपूज्यते।

उत । स्यः । नः । उशिजाम् । उर्विया । कविः । अहिः । शृणोतु । बुध्न्यः । हवीमनि ।
सूर्यामासा । विऽचरन्ता । दिविऽक्षिता । धिया । शमीनहुषी इति । अस्य । बोधतम् ॥१२॥

vउत अपि च vनः अस्माकम् vउशिजां कामयमानानामृत्विजाम् vउर्विया उर्वीं बहुलां स्तुतिं vकविः मेधावी vबुध्न्यः बुध्ने अन्तरिक्षे भवः सः vअहिः देवः vहवीमनि हूयन्ते यत्र देवेभ्यो हवींषि तस्मिन्यज्ञे vशृणोतु । vदिविक्षिता दिवि वसन्तौ vविचरन्ता विशेषेण चरन्तौ vसूर्यामासा सूर्याचन्द्रमसौ vधिया बुद्धया vअस्य स्तोत्रमिदं vबोधतं बुध्येताम् । vशमी कर्मवती पृथिवी । 'शमी' इति कर्मनामसु पाठात् । vनहुषी द्यौः । अत्र वाजसनेयकं—'द्यौर्नहुषीयं वै शमी तस्या एष गर्भः' इति । हे द्यावापृथिव्यौ युवां[1] स्तोत्रं धिया स्वीयया प्रज्ञया बुध्येतमवगच्छतमित्यर्थः ॥

प्र नः पूषा चरथं विश्वदेव्योऽपां नपादवतु वायुरिष्टये ।
आत्मानं वस्यो अभि वातमर्चत तदश्विना सुहवा यामनि श्रुतम् ॥ १३ ॥

प्र । नः । पूषा । चरथम् । विश्वऽदेव्यः । अपाम् । नपात् । अवतु । वायुः । इष्टये ।
आत्मानम् । वस्यः । अभि । वातम् । अर्चत । तत् । अश्विना । सुऽहवा । यामनि । श्रुतम् ॥१३॥

vपूषा देवः vन अस्माकं संबन्धि vचरथं जङ्गमं vप्र vअवतु प्रकर्षेण रक्षतु । vकिंच vविश्वदेव्यः विश्वदेवसहितः vअपां vनपात् vवायुः vइष्टये यज्ञस्य निष्कृत्यर्थं प्रावतु । किंच vआत्मानं सर्वेषामात्मभूतं vवातं वायुं vवस्यः वसीयः प्रशस्यतरमन्नं प्राप्तुम् । अस्मभ्यमन्नं कामयमानमिति शेषः । हे vअश्विना अश्विनौ vसुहवा स्वाह्वानौ युवां vयामनि यागगमने vतत् इदं स्तोत्रं vश्रुतं शृणुतम् ॥

विशामासामभयानामधिक्षितं गीर्भिरु स्वयशसं गृणीमसि ।
ग्राभिर्विश्वाभिरदितिमनर्वणमुक्तोर्युवानं नृमणा अधा पतिम् ॥ १४ ॥

विशाम् । आसाम् । अभयानाम् । अधिऽक्षितम् । गीःऽभिः । ऊँ इति । स्वऽयशसम् । गृणीमसि ।
ग्राभिः । विश्वाभिः । अदितिम् । अनर्वणम् । अक्तोः । युवानम् । नृऽमनाः । अध । पतिम् ॥१४॥

vअभयानां संसारभयरहितानाम् vआसां vविशां मनुष्याणाम् vअधिक्षितम् अन्तर्निवसन्तं[2] vस्वयशसं स्वयं समुपार्जितकीर्तिमेनमग्निं vगीर्भिः स्तुतिभिः vगृणीमसि वयं स्तुमः । किंच vअनर्वणम् अप्रस्तृतां पत्युरपत्यान्तत्वेनाप्रतिगताम् vअदितिम् अदीनां देवमातरं vविश्वाभिः सर्वाभिः vग्राभिः देवपत्नीभिः सहितां स्तुमः । किंच vअक्तोः रात्रेः vयुवानं स्वतेजसा मिश्रयितारं चन्द्रमसं स्तुमः । किंच vनृमणाः नृषु मनुष्येष्वनुग्राहकमना यः तमादित्यं स्तुमः । vअध अथ vपतिं सर्वस्य पालकमिन्द्रं स्तुमः ॥

रेभदत्र जनुषा पूर्वो अङ्गिरा ग्रावाण ऊर्ध्वा अभि चक्षुरध्वरम् ।
येभिर्विहाया अभवद्विचक्षणः पाथः सुमेकं स्वधितिर्वनन्वति ॥ १५ ॥

रेभत् । अत्र । जनुषा । पूर्वः । अङ्गिराः । ग्रावाणः । ऊर्ध्वाः । अभि । चक्षुः । अध्वरम् ।
येभिः । विऽहायाः । अभवत् । विऽचक्षणः । पाथः । सुऽमेकम् । स्वऽधितिः । वनन्ऽवति ॥१५॥

---

१. त१.२.३.६.७–युवां बुद्धया; त४.५.८-म-युवां बुध्न्या । २. त-म२.४.६.८–अंतरधिनिवसंतं ।

अङ्गिरा नामर्षिरार्त्विज्येन वृतः सन् देवान् स्तौति। ᵛअत्र अस्मिन् यज्ञे ᵛजनुषा जन्मना ᵛपूर्वः प्रत्नः ᵛअङ्गिराः नामर्षिः ᵛरेभत् देवान् स्तौति। ᵛप्रावाणः च ᵛऊर्ध्वाः उद्यताः सन्तः ᵛअध्वरं यज्ञसाधनं सोमम् ᵛअभि ᵛचक्षुः अभिपश्यन्ति। ᵛविचक्षणः विद्रष्टेन्द्रः ᵛयेभिः यैः प्रावभिरभिषव-संबन्धिभिः शब्दैः ᵛविहायाः महान् ᵛअभवत्। हृष्टोऽभूदित्यर्थः। अस्येन्द्रस्य ᵛस्वधितिः वज्रः ᵛवनन्वति उदकवति मार्गे ᵛपाथः अन्नसाधनं ᵛसुमेकं शोभनमुदकं निरगमयदिति शेषः ॥ ॥२५॥

'महि' इति पञ्चदशर्चं तृतीयं सूक्तम्। तान्वो नाम पृथोः पुत्र ऋषिः। द्वितीयातृतीये त्रयोदशी चेति तिस्रोऽनुष्टुभः। नवम्यक्षरसंख्यया पङ्क्तिर्न पादैः। एकादशी स्यङ्कुसारिण्यष्टकद्वादशक-द्वयष्टकवती। पञ्चदशी पुरस्तादबृहत्यावयद्वादशकद्व्यष्टका। शिष्टा नव प्रस्तारपङ्क्तिच्छन्दस्काः। आद्यौ जागतौ[1] द्वौ[1] गायत्री सा प्रस्तारपङ्क्तिः। विश्वे देवा देवता। तथा चानुक्रान्तं—'महि तान्वः पार्थः प्रस्तारपाङ्क्तं पुरस्तादबृहत्यन्तं त्रयोदश्युपाधे चानुष्टुभो नवम्यक्षरैः पङ्क्तिरेकादशी स्यङ्कु-सारिणी' इति। गतो विनियोगः ॥

महि द्यावापृथिवी भूतमुर्वी नारी यह्वी न रोदसी सदं नः।
तेभिर्नः पातं सह्यस एभिर्नः पातं शृषणि ॥ १ ॥

महि। द्यावापृथिवी इति। भूतम्। उर्वी इति। नारी इति। यह्वी इति। न। रोदसी इति। सदम्। नः।
तेभिः। नः। पातम्। सह्यसः। एभिः। नः। पातम्। शृषणि ॥ १ ॥

हे ᵛद्यावापृथिवी द्यावापृथिव्यौ युवां ᵛमहि अत्यन्तं यथा भवति तथा ᵛउर्वी विस्तीर्णे ᵛभूतं भवतम्। किंच ᵛयह्वी महत्यौ ᵛरोदसी द्यावापृथिव्यौ ᵛनारी ᵛन स्त्रियाविव ᵛनः अस्माकं ᵛसदं सदा भवतम्। किंच युवां ᵛशृषणि ᵛनः अस्माकं शत्रुबले युष्मदीयैः ᵛएभिः पालनैः ᵛपातं रक्षतम्। किंच युष्मदीयैः ᵛतेभिः तैः पालनैः ᵛनः अस्माकं ᵛसह्यसः अतिशयेनास्मानभिभवितुः शत्रोरपि ᵛपातं रक्षतम् ॥

यज्ञेयज्ञे स मर्त्यो देवान्त्सपर्यति। यः सुम्नैर्दीर्घश्रुत्तम आविवासात्येनान् ॥ २ ॥

यज्ञेऽयज्ञे। सः। मर्त्यः। देवान्। सपर्यति।
यः। सुम्नैः। दीर्घश्रुत्ऽतमः। आऽविवासाति। एनान् ॥ २ ॥

ᵛस ᵛमर्त्यः मनुष्यः ᵛयज्ञेयज्ञे सर्वेषु यज्ञेषु ᵛदेवान्[2] सर्वान्[2] ᵛसपर्यति परिचरति ᵛयः ᵛदीर्घश्रुत्तमः अतिशयेन दीर्घस्य बहोः शास्त्रस्य श्रोता यो मनुष्यः ᵛसुम्नैः सुखकरैर्हविर्भिः ᵛएनान् देवान् ᵛआविवासाति[3] परिचरति। असुखकरैर्हविर्भिः कृतमपि कर्म समर्थं[4] न[4] भवतीत्यर्थः ॥

विश्वेषामिरज्यवो देवानां वार्महः। विश्वे हि विश्वमहसो विश्वे यज्ञेषु यज्ञियाः ॥३॥

विश्वेषाम्। इरज्यवः। देवानाम्। वाः। महः।
विश्वे। हि। विश्वऽमहसः। विश्वे। यज्ञेषु। यज्ञियाः ॥ ३ ॥

---

१. ग-त-मु—द्वौ जागतौ ततो द्वौ। २. त-मु—सर्वान् देवान्। ३. त-मु—आविवासति। ४. त१-२—सपर्यीति सपर्यायै न; त३.८-मु—सपर्यायै; त४.५.६.७—सपर्यति सपर्यायै।

हे [v]विश्वेषामिरज्यवः भुवनानामीश्वराः [v]देवानां द्योतनादिगुणयुक्तानां भवतां [v]महः महत् [v]वाः वरणीयं धनं विद्यत इति शेषः। तदस्मभ्यं दत्तेति भावः। किंच [v]विश्वे सर्वे यूयं [v]विश्वमहसः व्याप्ततेजस्काः। किंच [v]विश्वे यूयं [v]यज्ञेषु [v]यज्ञियाः यष्टव्याः॥

ते घा॒ राजा॑नो अ॒मृत॑स्य म॒न्द्रा अ॑र्य॒मा मि॒त्रो वरु॑ण॒: परि॑ज्मा।
कद्रु॒द्रो नृ॒णां स्तु॒तो म॒रुत॑: पू॒षणो॒ भग॑: ॥ ४ ॥

ते। घ॒। राजा॑नः। अ॒मृत॑स्य। म॒न्द्राः। अ॒र्य॒मा। मि॒त्रः। वरु॑णः। परि॑ऽज्मा।
कत्। रु॒द्रः। नृ॒णाम्। स्तु॒तः। म॒रुत॑ः। पू॒षणः। भगः॥ ४ ॥

[v]अर्यमा देवः [v]मित्रः च [v]परिज्मा सर्वतोगामी सर्वत्राप्रतिहतगतिः [v]वरुणः[1] अन्यो देवजनश्चिभिः [v]स्तुतः [v]रुद्रः च [v]पूषणः सर्वस्य पोषयितारो [v]मरुतः च [v]भगः च एते[2] देवाः [v]मन्द्राः सर्वैः स्तुत्याः सन्तः [v]नृणां मनुष्याणां [v]कत् सुखं प्रयच्छतेति शेषः। [v]ते सर्वे [v]अमृतस्य अमृतसदृशस्य हविषः [v]राजानः [v]घ ईश्वराः खलु॥

उ॒त नो॒ नक्त॑मपां वृष॒ण्वसू॒ सूर्या॑मासा॒ सद॑नाय सध॒न्या॑।
सचा॒ यत्सा॒धथो॒ अह॑र्बु॒ध्नेषु॑ बु॒ध्न्य॑: ॥ ५ ॥

उ॒त। नः॒। नक्त॑म्। अ॒पाम्। वृ॒ष॒ण्वसु॑ इति॑ वृषण्ऽवसू। सूर्या॑मासा। सद॑नाय। स॒ऽध॒न्या॑।
सचा॑। यत्। सा॒धथः॑। अह॑ः। बु॒ध्नेषु॑। बु॒ध्न्यः॥ ५ ॥

[v]उत अपि च हे [v]वृषण्वसू वर्षणधनावश्विनौ युवाम् [v]अपाम् उदकानां संबन्धिनौ [v]सधन्या सधन्यौ समानधनौ [v]सूर्यामासा सूर्याचन्द्रमसौ [v]बुध्नेषु अन्तरिक्षेषु निवासस्थानेषु मेघेषु [v]यत्[3] यः [v]अहिर्बुध्न्यः देवः[4] [v]सादि सीदति तिष्ठति [v]एषाम्[5] एभिः[5] [v]सचा सह युवां [v]नक्तं रात्रावहनि चोरुण्यतमिति[6] वक्ष्यमाणेन संबन्धः॥ ॥ २६ ॥

उ॒त नो॑ दे॒वावश्विना॒ शुभ॒स्पती॒ धाम॑भिर्मि॒त्रावरु॑णा उरुष्यताम्।
म॒हः स रा॒य ए॑षते॒ऽति॒ धन्वे॑व दुरि॒ता ॥ ६ ॥

उ॒त। नः॒। दे॒वौ। अ॒श्विना॑। शुभः॑। पती॒ इति॑। धाम॑ऽभिः। मि॒त्रावरु॑णौ। उ॒रु॒ष्य॒ता॒म्।
म॒हः। सः। रा॒यः। आ। ई॒षते॑। अति॑। धन्व॑ऽइव। दुः॒ऽइ॒ता॥ ६ ॥

[v]उत अपि च [v]शुभस्पती शुभस्योदकस्य[7] पती [v]अश्विना अश्विनौ [v]देवौ [v]नः अस्मान् [v]धामभिः आत्मीयैः शरीरैः[8] [v]उरुष्यतां रक्षताम्। किंच [v]मित्रावरुणौ आत्मीयैः शरीरैरुरुष्यतां रक्षताम्। यं यजमानं पुरुषममी देवा रक्षन्ति [v]सः [v]महः महान्ति [v]रायः धनानि [v]एषते आभिमुख्येन गच्छति प्राप्नोति। किंच [v]दुरिता दुरितानि शीघ्रम् [v]अति अतिगन्तातिक्रान्ता च भवति। तत्र दृष्टान्तः। [v]धन्वेव। यथा पथिको निरुदकान् देशानतिक्रामति तद्वदित्यर्थः॥

१. त-भ१.२.४.६.८–'वरुणः' नास्ति। २. त-भ१.४.८–ये एते। ३. ग-त-भ–'यत्' नास्ति। ४. त-भ–देवो यत्। ५. ग–तेषामिति; त-भ–तैरेषामेति। ६. ग-त-भ–चोरुण्यतामिति। ७. त-भ–उदकस्य। ८. भ–'शरीरैः' नास्ति।

उत नो रुद्रा चिन्मृळतामश्विना विश्वे देवासो रथुस्पतिर्भगः ।
ऋभुर्वाजः ऋभुक्षणः परिज्मा विश्ववेदसः ॥ ७ ॥

उत । नः । रुद्रा । चित् । मृळताम् । अश्विना । विश्वे । देवासः । रथःपतिः । भगः ।
ऋभुः । वाजः । ऋभुक्षणः । परिऽज्मा । विश्वऽवेदसः॥ ७ ॥

vउत vचित् अपि च vरुद्रा रुद्रपुत्रौ vअश्विना अश्विनौ vनः अस्मान् vमृळतां सुखयताम् । किंच vरथस्पतिः रथस्य पतिः पूषा vऋभुः vवाजः अन्नवान् vभगः च vपरिज्मा परितो गन्ता वायुश्चेति[1] vविश्वे सर्वे vदेवासः देवाः सुखयन्तु । हे vविश्ववेदसः विश्ववेदाः सर्वप्रज्ञाः सर्वधना वा हे vऋभुक्षणः महान्तो ब्रह्मादयो देवा यूयं सुखयत ॥

ऋभुर्ऋभुक्षा ऋभुर्विधतो मदु आ ते हरी जूजुवानस्य वाजिना ।
दुष्टरं यस्य सामं चिदृधग्यज्ञो न मानुषः ॥ ८ ॥

ऋभुः । ऋभुक्षाः । ऋभुः । विधतः । मदः । आ । ते । हरी इति । जुजुवानस्य । वाजिना ।
दुस्तरम् । यस्य । सामं । चित् । ऋधक् । यज्ञः । न । मानुषः ॥ ८ ॥

vऋभुक्षाः महानिन्द्रः vऋभुः यज्ञेन भाति । किंच vविधतः त्वां परिचरतो यजमानस्य vमदः हर्षोऽपि vऋभुः यज्ञेन भाति[2] । हे इन्द्र vआ vजूजुवानस्य यागं प्रति शीघ्रमागच्छतः vते तव vहरी अश्वावपि vवाजिना वाजिनौ बलवन्तौ । किंच vयस्य इन्द्रस्य संबन्धि vसाम vचित् गीयमानं सामापि vदुष्टरं रक्षोभिरप्रापणीयम् । एषः vयज्ञः vमानुषः मनुष्यसाधारणः vन किंच vऋधक् पृथक् । दिव्य इत्यर्थः ॥

कृधी नो अद्रयो देव सवितः स चं स्तुषे मघोनाम् ।
सहो न इन्द्रो वह्निभिर्नि षीषधं चर्षणीनां चक्रं रश्मिं न योयुवे ॥ ९ ॥

कृधि । नः । अद्रयः । देव । सवितरिति । सः । च । स्तुषे । मघोनाम् ।
सहो इति । नः । इन्द्रः । वह्निऽभिः । नि । षीषधम् । एषाम् ।
चर्षणीनाम् । चक्रम् । रश्मिम् । न । योयुवे ॥ ९ ॥

हे vसवितः प्रेरक vनः अस्मान् vअद्रयः अनवनतवदनानलजितान् vकृधि कुरु । किंच vसः त्वं vमघोनां धनवतां यजमानानां संबन्धिभिर्मत्विग्भिः vस्तुषे स्तूयसे । vइन्द्रः vवह्निभिः वोढृभिः मरुद्भिः सह vसहः बलं vचर्षणीनां मनुष्याणां vनः अस्माकं vनि vयोयुवे भृशं निमिश्रयतु । तत्र दृष्टान्तः । vचक्रं रथस्य चक्रं vरश्मिं vन । यथा रश्मिं चक्रादिकं तद्वदित्यर्थः ॥

ऐषु द्यावापृथिवी धातं महदस्मे वीरेषु विश्वचर्षणि श्रवः ।
पृक्षं वाजस्य सातये पृक्षं रायोत तुर्वणे ॥ १० ॥

---

१. ग-त-सु-वायुश्चैते; म७-सूर्यश्चेति । २. ग-भ-भवति; त-भवंति ।

आ । एषु । द्यावापृथिवी इति । धातम् । महत् । अस्मे इति । वीरेषु । विश्वऽचर्षणि । श्रवः । पृक्षम् । वाजस्य । सातये । पृक्षम् । राया । उत । तुर्वणे ॥ १० ॥

हे [v]द्यावापृथिवी द्यावापृथिव्यौ युवाम् [v]अस्मे अस्माकं संबन्धिषु [v]एषु [v]वीरेषु पुत्रेषु [v]विश्वचर्षणि सर्वमनुष्योपेतं [v]महत् [v]श्रवः यशः [v]आ [v]धातम् आधत्तं दत्तम् । किंच [v]वाजस्य बलस्य [v]सातये संभजनाय [v]पृक्षं पालकमन्नं दत्तम् । [v]उत अपि च [v]तुर्वणे शत्रूणां तरणाय [v]राया धनेन सह [v]पृक्षम् अन्नं दत्तम् ॥ ॥ २७ ॥

एतं शंसमिन्द्रास्मयुष्ट्वं कूचित्सन्तं सहसावन्नभिष्टये सदा पाह्यभिष्टये ।
मेदतां वेदतां वसो ॥ ११ ॥

एतम् । शंसम् । इन्द्र । अस्मऽयुः । त्वम् । कूऽचित् । सन्तम् । सहसाऽवन् । अभिष्टये । सदा । पाहि । अभिष्टये । मेदताम् । वेदता । वसो इति ॥ ११ ॥

हे [v]वसो वासयितः [v]सहसावन् बलवन् [v]इन्द्र [v]अस्मयुः अस्मान्कामयमानः [v]त्वं [v]कूचित् क्वचिदपि [v]सन्तं स्थितम् [v]एतम् इमं [v]शंसं स्तोतारम् [v]अभिष्टये अभिलषितसिद्ध्यर्थमपि च [v]अभिष्टये यागार्थं [v]सदा सर्वदा [v]पाहि रक्ष । किंच [v]वेदता त्वदीयेन प्रज्ञानेन स्तोतारं मां [v]मेदतां बुध्यस्व ॥

एतं मे स्तोमं तना न सूर्ये द्युतद्यामानं वावृधन्त नृणाम् ।
समवनंनं नाश्व्यं तष्टेवानपच्युतम् ॥ १२ ॥

एतम् । मे । स्तोमम् । तना । न । सूर्ये । द्युतत्ऽयामानम् । ववृधन्त । नृणाम् ।
सम्ऽअवनंनम् । न । अश्व्यम् । तष्टाऽइव । अनपऽच्युतम् ॥ १२ ॥

[v]नृणां नेतॄणां देवशत्रूणां[1] [v]संवननं [v]न संभजनं सम्यग्हिंसनमिवावस्थितं [v]मे मदीयम् [v]एतम्[2] इदं [v]स्तोमं[3] स्तोत्रं [v]ववृधन्त ऋत्विजो वर्धयन्तु। तत्र दृष्टान्तः । [v]सूर्ये [v]द्युतद्यामानं दीप्तगमनं [v]तना [v]न विस्तृतान् रश्मीन् वर्धयन्ति तद्वदित्यर्थः । [v]अनपच्युतं च्युतिरहितम् [v]अश्व्यम् अश्वार्हं रथं [v]तष्टेव यथा वर्धकी रथिष्वागतेषु संस्कृतं रथं संस्कारस्थानात्प्रेरयति तद्वदित्यर्थः ॥

वावर्त येषां राया युक्तैषां हिरण्ययी ।
नेमधिता न पौंस्या वृथेव विष्टान्ता ॥ १३ ॥

ववर्त । येषाम् । राया । युक्ता । एषाम् । हिरण्ययी ।
नेमऽधिता । न । पौंस्या । वृथाऽइव । विष्टऽअन्ता ॥ १३ ॥

[v]येषां[4] देवानां स्वभूतेन [v]राया अस्मभ्यं दातव्येन धनेन [v]युक्ता स्तुतिः आववर्त तेषां [v]एषाम् अर्थाय [v]हिरण्ययी हिरण्मयी हिरण्यालंकारवत् प्रीतिकरास्मन्मुखात्[5] पुनःपुनरावर्तत इत्यर्थः । तत्र

---

१. ग-त-भ-मु-देवानां शत्रूणां । २. ग-त-भ-एतमिमं । ३. ग-त-'स्तोमं' नास्ति । ४. ग१.२-त-भ१.२.४.६.८-एषां । ५. ग-प्रीतिकरसन्मुखा; भ१.२.४.६.८-प्रीतिकरासन्मुखा; भ७-प्रीतिकरी सती मुखात् ।

दृष्टान्तः। [v]पौंस्या पौंस्यानि बलानि [v]नेमधिता [v]न नेमधितौ संग्रामे [v]विष्टान्ता व्याप्तावसाना [v]वृत्रेव यथा घटिकायन्त्रमाला[1] तद्वदित्यर्थः॥

प्र तदुःशीमे पृथवाने वेने प्र रामे वोचमसुरे मघवत्सु।
ये युक्त्वाय पञ्च शतास्मयु पथा विश्राव्येषाम् ॥ १४ ॥

प्र। तत्। दुःऽशीमे। पृथवाने। वेने। प्र। रामे। वोचम्। असुरे। मघवत्ऽसु।
ये। युक्त्वाय। पञ्च। शता। अस्मऽयु। पथा। विऽश्राव्ये। एषाम्॥ १४ ॥

[v]ये देवाः [v]पञ्च [v]शता शतानि रथान् [v]युक्त्वाय अश्वैर्युक्त्वा [v]अस्मयु अस्मत्कामाः सन्तः [v]पथा यज्ञमार्गेण गच्छन्ति तेषाम् [v]एषां देवानां [v]विश्राव्ये देवानां लोके वा विशेषेण श्रावकगुणयुक्तं[2] [v]तत् स्तोत्रं [v]दुःशीमे दुःशीमनाम्नि [v]पृथवाने। पृथवानः पृथिः। तस्मिन् [v]वेने च [v]असुरे बलवति [v]रामे चैतेषु राजसु [v]प्र [v]वोचं प्रब्रवीमि। प्रख्यापयामीत्यर्थः। [v]मघवत्सु अन्येषु धनवत्सु च प्रख्यापयामीत्यर्थः॥

अधीक्वत्रे सप्ततिं च सप्त च।
सद्यो दिदिष्ट तान्वः सद्यो दिदिष्ट पार्थ्यः सद्यो दिदिष्ट मायवः ॥ १५ ॥

अधि। इत्। नु। अत्रे। सप्ततिम्। च। सप्त। च।
सद्यः। दिदिष्ट। तान्वः। सद्यः। दिदिष्ट। पार्थ्यः। सद्यः। दिदिष्ट। मायवः॥ १५ ॥

[v]अत्र एषु राजसु [v]तान्वः नामर्षिः गवां [v]सप्त [v]च सप्ततिं [v]च [v]नु क्षिप्रं [v]सद्यः [v]इत् सद्य एव [v]अधि [v]दिदिष्ट। अधिपूर्वो दिशिर्याचनार्थः। ययाचे। किंच [v]पार्थो[3] नाम युवनाश्वनामकस्य कुले पृथोः पुत्रः कश्चित् [v]सद्यः एव गवां सप्तसप्ततिमधि [v]दिदिष्ट। किंच [v]मायवः अपि [v]सद्यः एवाधि [v]दिदिष्ट॥ ॥ २८ ॥

'प्रैते' इति चतुर्दशर्चं चतुर्थं सूक्तं कण्वाः पुत्रस्य सर्पस्यार्बुदस्यार्षम्। पञ्चमी सप्तमी चतुर्दशी त्रिष्टुभः शिष्टा एकादश जगत्यः। सोमाभिषवार्था ग्रावाणोऽत्र देवता। तथा चानुक्रान्तं—'प्रैते पञ्चना सर्पोऽर्बुदः काद्रवेयो ग्राव्णोऽस्तौत्पञ्चभ्यन्त्ये त्रिष्टुभौ सप्तमी च' इति। ग्रावस्तोत्र एतत्सूक्तम्। सूत्रितं च—'प्रैते वदन्त्यर्थार्बुदं[4] प्रागुत्तमाया आ व ऋञ्जसे प्र वो ग्रावाण इति सूक्तयोः' (आश्व. श्रौ. ५. १२) इति। यद्वा। इदमेकमेव सूक्तं ग्रावस्तोत्रम्। सूत्रितं च—'अर्बुदमेवेत्येके प्र वो ग्रावाण इत्येके' (आश्व. श्रौ. ५. १२) इति॥

प्रैते वदन्तु प्र वयं वदाम ग्रावभ्यो वाचं वदता वदद्भ्यः।
यदद्रयः पर्वताः साकमाशवः श्लोकं घोषं भरथेन्द्राय सोमिनः ॥ १ ॥

प्र। एते। वदन्तु। प्र। वयम्। वदाम। ग्रावऽभ्यः। वाचम्। वदत। वदत्ऽभ्यः।
यत्। अद्रयः। पर्वताः। साकम्। आशवः। श्लोकम्। घोषम्। भरथ। इन्द्राय। सोमिनः॥१॥

---

१. ग–घटिका यन्त्रस्य यथा माला; त४.५–घटिकात्रयकाला; म७–घटितात्रयंत्रमाल। २. त–म१. २.४.६.८–श्रावकं गुणयुक्तं। ३. त२–मु–पार्थ्यो म१–पाथ्यो; म७–पार्थ्यौ। ४. त–म१.७–मु–वदत्यर्बुदं।

vएते ग्रावाण उपलाः vप्र vवदन्तु अभिषवशब्दं कुर्वन्तु। vवयं यजमानाः vवदन्नयः अभिषवशब्दं कुर्वन्नयः vग्रावभ्यः ग्राव्णामर्थाय vवाचं vप्र vवदाम। किंच हे ऋत्विजो यूयमपि स्तुतिलक्षणां वाचं vवदत पठत। vयत् यदा vअद्रयः आदरणीया इडाः vआशवः सोमाभिषवार्थं[1] क्षिप्रकारिणः vपर्वताः ग्रावाणः सर्वे यूयं vसाकं सह vइन्द्राय इन्द्रार्थं vश्लोकं श्रोतव्यं vघोषम् अभिषवशब्दं vभरथ पोषयथ तदानीं vसोमिनः सोमवन्तः सोमेन तृप्ता[2] भवथ[2] ॥

एते वदन्ति शतवत्सहस्रवदभि क्रन्दन्ति हरितेभिरासभिः।
विष्टी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्यमाशत ॥ २ ॥

एते। वदन्ति। शतऽवत्। सहस्रऽवत्। अभि। क्रन्दन्ति। हरितेभिः। आसऽभिः। विष्टी। ग्रावाणः। सुऽकृतः। सुऽकृत्यया। होतुः। चित्। पूर्वे। हविःऽअद्यम्। आशत ॥२॥

vशतवत्सहस्रवत् यथा शतं मनुष्याः सहस्रवदपरिमिता मनुष्याश्च वदन्ति तद्वत् vएते ग्रावाणः[3] vवदन्ति शब्दं कुर्वन्ति। किंच vहरितेभिः सोमसंसर्गाद्धरितवर्णैः vआसभिः आस्यैः vअभि vक्रन्दन्ति। सोममभिलक्ष्य देवानाह्वयन्तीत्यर्थः। किंच vसुकृतः शोभनकर्माणः vग्रावाणः vविष्टी यज्ञं प्राप्य vहोतुः देवानामाह्वातुरग्नेः vपूर्वे vचित् पूर्वमेव vअद्यं भक्षणीयं vहविः vआशत प्राप्नुवन्ति ॥

एते वदन्त्यविदन्मना मधु न्यूङ्खयन्ते अधि पक्व आमिषि।
वृक्षस्य शाखामरुणस्य बप्सतस्ते सूभर्वो वृषभाः प्रेमरावीषुः ॥ ३ ॥

एते। वदन्ति। अविदन्। अना। मधु। नि। ऊङ्खयन्ते। अधि। पक्वे। आमिषि। वृक्षस्य। शाखाम्। अरुणस्य। बप्सतः। ते। सूभर्वः। वृषभाः। प्र। ईम्। अरावीषुः ॥३॥

vअरुणस्य अरुणवर्णस्य vवृक्षस्य vशाखां vबप्सतः भक्षयन्तः vते vसूभर्वः शोभनभक्षाः vवृषभाः vप्रेमरावीषुः प्ररुवन्ति। यथा vपक्वे vआमिषि vअधि आमिषे क्रव्यादो मांसभक्षकाश्च मांसविषये यथा vन्यूङ्खयन्ते शब्दविशेषं कुर्वन्ति तद्वत् vएते ग्रावाणः vवदन्ति शब्दं कुर्वन्ति। किंच vमधु मदकरं[4] सोमम् vअना आस्येन vअविदन् लभन्ते ॥

बृहद्वदन्ति मदिरेण मन्दिनेन्द्रं क्रोशन्तोऽविदन्मना मधु।
संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः ॥ ४ ॥

बृहत्। वदन्ति। मदिरेण। मन्दिना। इन्द्रम्। क्रोशन्तः। अविदन्। अना। मधु। सम्ऽरभ्य। धीराः। स्वसृऽभिः। अनर्तिषुः। आऽघोषयन्तः। पृथिवीम्। उपब्दिऽभिः॥४॥

vमदिरेण मदकरेण vमन्दिना अभिषूयमाणेन सोमेन vइन्द्रं vक्रोशन्तः आह्वयन्त एते ग्रावाणः vबृहत् अत्यन्तं vवदन्ति शब्दायन्ते। किंच vअना आस्येन vमधु मदकरं सोमम् vअविदन् अलभन्त। किंच vसंरभ्य संरब्धा भूत्वा vधीराः दृष्टाः सन्तः vउपब्दिभिः शब्दैः vपृथिवीम् vआघोषयन्तः पूरयन्तः vस्वसृभिः अङ्गुलिभिः सह vअनर्तिषुः नृत्यन्ति ॥

---

१. तं-भ-सोममभिषवार्थं। २. ग-भ५-लिप्सा भवथ; त-तृप्ता अभवन्; भ१.१.८-लिप्सा भवतः; भ२-लिप्सा भवतः; भ४.७-लिप्सा भवत। ३. त-'ग्रावाणः' नास्ति। ४. भ१.२.७-मधुरं।

सुपर्णा वाचमक्रतोप द्यव्याखरे कृष्णा इषिरा अनर्तिषुः ।
न्यङ्नि यन्त्युपरस्य निष्कृतं पुरू रेतो दधिरे सूर्यश्वितः ॥ ५ ॥

सुऽपर्णाः । वाचम् । अक्रत । उप । द्यवि । आऽखरे । कृष्णाः । इषिराः । अनर्तिषुः । न्यक् । नि । यन्ति । उपरस्य । निःऽकृतम् । पुरु । रेतः । दधिरे । सूर्यऽश्वितः ॥ ५ ॥

सुपर्णाः सुपतना ग्रावाणः उप उपलक्ष्य समीपे द्यवि अन्तरिक्षे वाचम् अभिषवशब्दम् अक्रत कुर्वन्ति । किंच आखरे । मृगाणां व्रज आखरः । तस्मिन् इषिराः गमनशीलाः कृष्णाः कृष्णमृगा इव सूर्यश्वितः सूर्यवच्छ्वेतवर्णा द्रप्साः अनर्तिषुः नृत्यन्ति । निष्कृतं ग्रावभिः पीडितं सत् उपरस्य उपलस्य न्यक् अधोमुखं सोमं नि यन्ति निगमयन्ति । किंच पुरु बहु रेतः सोमलक्षणमुदकं दधिरे धारयन्ति ॥ ॥ २९ ॥

उग्राइव प्रवहन्तः समायमुः साकं युक्ता वृषणो बिभ्रतो धुरः ।
यच्छ्वसन्तो जग्रसाना अराविषुः शृण्व एषां प्रोथथो अर्वतामिव ॥ ६ ॥

उग्राःऽइव । प्रऽवहन्तः । सम्ऽआयमुः । साकम् । युक्ताः । वृषणः । बिभ्रतः । धुरः । यत् । श्वसन्तः । जग्रसानाः । अराविषुः । शृण्वे । एषाम् । प्रोथथः । अर्वताम्ऽइव ॥ ६ ॥

वृषणः । फलं वर्षतीति वृषा यज्ञः । तस्य धुरः धुरं भारं बिभ्रतः धारयन्त एते ग्रावाणः साकं सोमेन सह युक्ताः सन्तः प्रवहन्तः रथं प्रकर्षेण वोढारः उग्राः उदूर्णा[1] अश्वाः इव समायमुः समायच्छन्ति । आयता भवन्तीत्यर्थः । यत् यदा श्वसन्तः अभिषवसमये उत्पतननिपतनव्यापारजनितेन वायुना श्वसन्त इव स्थिता ग्रावाणः जग्रसानाः सोमं ग्रसमानाः अराविषुः शब्दायन्ते तदानीम् एषां ग्राव्णां संबन्धी प्रोथथः मुखाच्छब्दः शृण्वे श्रूयते । तत्र दृष्टान्तः । अर्वतामिव । अश्वानां संबन्धिनो मुखाद्घोषाशब्दो यथा तद्वदित्यर्थः ॥

दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः ।
दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः ॥ ७ ॥

दशावनिऽभ्यः । दशऽकक्ष्येभ्यः । दशऽयोक्त्रेभ्यः । दशऽयोजनेभ्यः । दशाभीशुऽभ्यः । अर्चत । अजरेभ्यः । दश । धुरः । दश । युक्ताः । वहत्ऽभ्यः ॥ ७ ॥

दशावनिभ्यः । कर्माण्यवन्ति गच्छन्तीत्यवनयः । दशावनयोऽङ्गुलयो येषां ग्राहकत्वेन संबन्धिनस्ते दशावनयः । तान् ग्राव्णः । द्वितीयार्थे चतुर्थी । दशकक्ष्येभ्यः । कक्ष्याः प्रकाशका अङ्गुलयो येषां ते दशकक्ष्याः । तान् । दशयोक्त्रेभ्यः । योक्त्रवद्बन्धनसाधनभूता दशाङ्गुलयो[2] येषां तान् । दशयोजनेभ्यः । सोमेन सह योजने साधनभूता दशाङ्गुलयो येषां तान् । दशाभीशुभ्यः । कर्माण्यभितो व्याप्नुवन्तीत्यभीशवोऽङ्गुलयो दश येषां तान् । अजरेभ्यः जराविवर्जितान् दश दशभिः धुरः धूर्भिः हिंसितृभिः तृतीयार्थे प्रथमा । युक्ताः युक्तान् । द्वितीयार्थे प्रथमा । वहद्भ्यः वहतोऽभिषवाख्ये कर्मणि व्याप्रियमाणान् अर्चत स्तुत । हे ऋत्विज इति शेषः । अत्र

१. त-उदूर्णिवर्णा । २. ब-त-भ-'दशाङ्गुलयो' नास्ति ।

यास्कः—' अवनयोऽङ्गुलयो भवन्त्यवनन्ति कर्माणि । कक्ष्याः प्रकाशयन्ति कर्माणि । योक्त्राणि योजनानीति व्याख्यातमभीशवोऽभ्यश्नुवते कर्माणि । दश धुरो दश युक्ता वहन्त्यः । धूर्धूर्वतेर्वधकर्मण इयमपीतरा धूरेतस्मादेव विहन्ति वहं धारयतेर्वा ' (निरु. ३. ९) इति ॥

ते अद्रयो दशयन्त्रास आशवस्तेषामाधानं पर्येति हर्यतम् ।
त ऊं सुतस्य सोम्यस्यान्धसोऽशोः पीयूषं प्रथमस्य भेजिरे ॥ ८ ॥

ते । अद्रयः । दशऽयन्त्रासः । आशवः । तेषाम् । आऽधानम् । परि । एति । हर्यतम् ।
ते । ऊं इति । सुतस्य । सोम्यस्य । अन्धसः । अंशोः । पीयूषम् । प्रथमस्य । भेजिरे ॥ ८ ॥

vअद्रयः आदरणीयाः vआशवः क्षिप्रकारिणः vते[1] एते[1] प्रकृता ग्रावाणः vदशयन्त्रासः दशयन्त्राः । vतेषाम् एषां ग्राव्णां संबन्धि यत् vआधानं प्रक्षेपणमभिषवकर्म vहर्यतं स्पृहणीयं vपर्येति परितो गच्छति । vते एते ग्रावाण एव vसुतस्य अभिषुतस्य vसोम्यस्य सोमस्य[2] संबन्धिनः[2] vअंशोः खण्डस्वरूपस्य vअन्धसः अन्नस्य vपीयूषम् अमृतं[3] प्रथमं[3] vभेजिरे[4] ॥

ते सोमादो हरी इन्द्रस्य निंसतेऽशुं दुहन्तो अध्यासते गवि ।
तेभिर्दुग्धं पपिवान्त्सोम्यं मध्विन्द्रो वर्धते प्रथते वृषायते ॥ ९ ॥

ते । सोमऽअदः । हरी इति । इन्द्रस्य । निंसते । अंशुम् । दुहन्तः । अधि । आसते । गवि ।
तेभिः । दुग्धम् । पपिऽवान् । सोम्यम् । मधु । इन्द्रः । वर्धते । प्रथते । वृषऽयते ॥ ९ ॥

vसोमादः सोमस्यात्तारः vते प्रकृता[1] एते[1] ग्रावाणः vइन्द्रस्य vहरी अश्वौ vनिंसते निक्षन्ति चुम्बन्ति । प्राप्नुवन्तीत्यर्थः । किंच vगवि अधिषवणचर्मणि[5] vअंशुं सोमं vदुहन्तः vआसते[6] । किंच vइन्द्रः vतेभिः तैः vदुग्धं vसोम्यं सोममयं vमधु अमृतं vपपिवान् पीतवान् vवर्धते वृद्धशरीरो भवति । vप्रथते विस्तीर्णशरीरश्च भवति । vवृषायते वृषेवाचरति ॥

वृषा वो अंशुर्न किला रिषाथनेळावन्तः सदमित्स्थनाशिताः ।
रैवत्येव महसा चारवः स्थन यस्य ग्रावाणो अजुषध्वमध्वरम् ॥ १० ॥

वृषा । वः । अंशुः । न । किल । रिषाथन । इळाऽवन्तः । सदम् । इत् । स्थन । आशिताः ।
रैवत्याऽईव । महसा । चारवः । स्थन । यस्य । ग्रावाणः । अजुषध्वम् । अध्वरम् ॥ १० ॥

vअंशुः सोमः vवः युष्माकं vवृषा यज्ञे वर्षिता भविष्यति । यूयमपि vन vरिषाथन vकिल न vरिष्यथ न[7] क्षीर्णा[8] भवथ किल । किंच vइळावन्तः अन्नवन्त इव यूयं vसदमित् सदैव vआशिताः भोजिताः[9] vस्थन भवथ । किंच vरैवत्येव यथा रेवन्तस्तेजसा युक्ता भवन्ति तद्वत् vमहसा तेजसा युक्ताः vचारवः कल्याणाः vस्थन भवथ । हे vग्रावाणः यूयं vयस्य यजमानस्य vअध्वरं यज्ञम् vअजुषध्वम् असेवध्वम् ॥ ॥ ३० ॥

---

१. त१.२.७-भ४.६.८–ते उ ते । २. ग-त-मु–सोमसंबंधिनः । ३. त१.२.३.७-मु–अमृतं प्रथमस्य; भ२–प्रथममृतं । ४. त–भेजिरे भजंत इति । ५. भ–प्रकृष्टा । ६. त-मु–'एते' नास्ति । ७. त-म१.२.४.६.८–अधिषवणकर्मणि । ८. भ७–अध्यासते । ९. ग–विशीर्णा; भ–विस्तीर्णा । १०. त-मु–भोजयिताः ।

तृदिला अतृदिलासो अद्रयोऽश्रमणा अश्रथिता अमृत्यवः ।
अनातुरा अजराः स्थामविष्णवः सुपीवसो अतृषिता अतृष्णजः ॥ ११ ॥

तृदिलाः । अतृदिलासः । अद्रयः । अश्रमणाः । अश्रथिताः । अमृत्यवः ।
अनातुराः । अजराः । स्थ । अमविष्णवः । सुऽपीवसः । अतृषिताः । अतृष्णऽजः ॥११॥

vअश्रमणाः श्रमणवर्जिताः[1] vअश्रथिताः अन्यैरशिथिलीकृताः vअमृत्यवः अमारिताः vअनातुराः अरोगाः vअजराः जरारहिताः vस्थ भवथ । किंच vअमविष्णवः उत्क्षेपणावक्षेपणगत्युपेता[2] हे ग्रावाणः vतृदिलाः अन्येषां भेदकाः vअतृदिलासः स्वयमन्येनाभिन्नाः[3] vसुपीवसः[4] सुबलाः vअतृषिताः तृष्णारहिताः vअतृष्णजः निःस्पृहा भवथ ॥

ध्रुवा एव वः पितरो युगेयुगे क्षेमकामासः सदसो न युञ्जते ।
अजुर्यासो हरिषाचो हरिद्रव आ द्यां रवेण पृथिवीमशुश्रवुः ॥ १२ ॥

ध्रुवाः । एव । वः । पितरः । युगेऽयुगे । क्षेमऽकामासः । सदसः । न । युञ्जते ।
अजुर्यासः । हरिऽसाचः । हरिद्रवः । आ । द्याम् । रवेण । पृथिवीम् । अशुश्रवुः ॥ १२ ॥

हे ग्रावाणः vयुगेयुगे सर्वेषु युगेषु vध्रुवा vएव निश्चला एव vवः युष्माकं vपितरः पितृभूताः पर्वताः vक्षेमकामासः क्षेमकामाः[5] vसदसः सदांसि[6] आत्मना vन vयुञ्जते न संयोजयन्ति[6] । vअजुर्यासः जरारहिताः vहरिषाचः सोमस्य संभक्तारः vहरिद्रवः सोमसंसर्गाद्धरितवर्णाः vद्यां दिवं vपृथिवीं च vरवेण अभिषवशब्देन vअशुश्रवुः श्रावयन्ति ॥

तदिद्वदन्त्यद्रयो विमोचने यामन्नञ्जस्पाइव घेदुपब्दिभिः ।
वपन्तो बीजमिव धान्याकृतः पृञ्चन्ति सोमं न मिनन्ति बप्सतः ॥ १३ ॥

तत् । इत् । वदन्ति । अद्रयः । विऽमोचने । यामन् । अञ्जःपाःऽइव । घ । इत् । उपब्दिऽभिः ।
वपन्तः । बीजम्ऽइव । धान्यऽकृतः । पृञ्चन्ति । सोमम् । न । मिनन्ति । बप्सतः ॥ १३ ॥

vअद्रयः आदरणीया ग्रावाणः vयामन् यामनि गमने vअञ्जस्पाः । अञ्जसा पान्ति[7] रक्षन्तीत्यञ्जस्पाः[7] । तेषां रथानाम् vइव vउपब्दिभिः vतदित् तदेवाभिषवकर्म vविमोचने vघेत्[8] तत्[8] सोमरसविमोचनवेलायामपि vवदन्ति प्रकाशयन्ति । किंच vबप्सतः सोमं भक्षयन्तो ग्रावाणः vवपन्तः

१. ग-त-म१.२.४.६.८-मु-श्रमवर्जिताः । २. ग१.२-उत्क्षेपणापक्षेपणाभ्यां युताः; ग४-त१.२.६-उत्क्षेपणापक्षेपणगत्या ता अतृष्णजः; त४.५-उत्क्षेपणापक्षेपणगत्यामुपीवसः; त७.८-म१.२.४.८-उत्क्षेपणावक्षेपणगत्या ता (म४-'ता' नास्ति) अतृष्णजः (म८-अतृजः); म७-उत्क्षेपणवक्षेपणगःस्योपेता । ३. म१.२.७-स्वयमन्योन्याभिन्नाः । ४. ग-त-म१.२.४.६.८-' सुपीवसः ' नास्ति । ५. त-म-क्षेमकामाः सदसो न कामासः । ६. ग४-म५-सदमिषो न युंजते अजुर्यासो हरिषाचो हरिद्रवः आ द्यां रवेण सदांसि आत्मना न युंजते न संयोजयंति; त-म१.२.४.६.७.८-'सदांस्यात्मना...संयोजयन्ति' नास्ति । ७. ग-यांति गच्छंती°, त-म१.२-याति गच्छती°; म८-याति गच्छती° । ८. ग-त-अप्येतत्; म-ज्येतत् ।

[v]धान्याकृतः कृषीवलाः [v]बीजमिव यथा पृञ्चन्ति तद्वत् [v]सोमं [v]पृञ्चन्ति । संपर्चयन्तीत्यर्थः । [v]न एनं [v]मिनन्ति । न हिंसन्तीत्यर्थः ॥

सुते अध्वरे अधि वाचमक्रता क्रीळयो न मातरं तुदन्तः ।
वि षू मुञ्चा सुषुवुषो मनीषां वि वर्तन्तामद्रयश्चार्यमानाः ॥ १४ ॥

सुते । अध्वरे । अधि । वाचम् । अक्रत । आ । क्रीळयः । न । मातरम् । तुदन्तः ।
वि । सु । मुञ्च । सुषुऽवुषः । मनीषाम् । वि । वर्तन्ताम् । अद्रयः । चार्यमानाः ॥ १४ ॥

[v]चार्यमानाः पूज्यमानाः [v]अद्रयः आदरणीया ग्रावाणः [v]अध्वरेऽधि यज्ञे [v]सुते सोमेऽभिषुते [v]मातरं [v]तुदन्तः हस्तेन ताडयन्तः [v]आ [v]क्रीळयो [v]न आक्रीडकाः कुमाराः शब्दं यथा कुर्वन्ति तथा [v]वाचं शब्दम् [v]अक्रत कृण्वन्ति । [v]सुषुवुषः सोममभिषुतवतः प्राज्ञः [v]मनीषां स्तुतिं [v]वि [v]मुञ्च विशेषेण[1] मुञ्च[1] । किंच अद्रयः [v]वि [v]वर्तन्ताम् अभिषवशब्दं विमुञ्चन्तु ॥ ॥ ३१ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके चतुर्थोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अष्टकेऽष्टमकेऽध्यायश्चतुर्थः संप्रदर्शितः ।
धीमता सायणार्येण पञ्चमोऽथ प्रदर्श्यते ॥

तत्र 'हये जाये' इत्यष्टादशर्चं पञ्चमं सूक्तं त्रैष्टुभम् । अत्रानुक्रमणिका—'हये द्वयूनोर्वशीमैळः पुरूरवाः पूर्वोषितात्कामात्[2] पुनरासाद्यावरोढुमैच्छत्सा तमनिच्छन्ती प्रत्याचष्टे हय इषुर्या कदा सुदेवोऽन्तरिक्षप्रां सचेति तिस्रश्चैळवाक्यं शिष्टा उर्वश्याः' इति । 'हये जाये' 'इषुर्न श्रिये' 'या सुजूर्णिः' 'कदा सूनुः' 'सुदेवो अद्य' 'अन्तरिक्षप्रां' 'सचा यदासु जहतीषु' इत्याद्यास्तिस्रश्चेति नवर्चं ऐळस्य पुरूरवसो वाक्यानि । अतस्तासां स ऋषिः । शिष्टा नवोर्वश्या वाक्यानि । अतस्तासु सर्षिका । उभयोर्वाक्ययोर्यो ऽर्थः प्रतिपाद्यते सा देवता । गतो विनियोगः ॥

ऐळोर्वशीतिहासोऽत्र वैशद्याय[3] प्रवर्ण्यते । मित्रश्च वरुणश्चोभौ दीक्षितौ प्रेक्ष्य चोर्वशीम् ॥१॥
रेतः सिषिचतुः सद्यस्तत्कुम्भे न्यदधुस्तदा । तां शप्तवन्तौ मनुजभोग्या भूम्यां भवेति तौ ॥२॥
अत्रान्तरे इळो राजा मनोः पुत्रश्च संयुतः । मृगयां संचरन् साध्वो देवीक्रीडं विवेश ह ॥३॥
यत्र[4] देवं गिरिसुता सर्वैर्भावैरतोषयत् । अत्राविशन्पुमान्स्त्री स्यादित्युक्त्वा तत्र चाविशत् ॥४॥
स्त्री भूत्वा क्रीडितः सोऽगाच्छरणं शिवमंजसा । इयं प्रसाद्यतां राजन्नित्युक्तः शंभुना नृपः ॥५॥
जगाम शरणं देवीमात्मनः पुंस्त्वसिद्धये । अकरोत्सा नृपं देवी षण्मासात्प्राप्तपुंस्त्वकम् ॥६॥
ततः कदाचित्क्रीकाले बुधः सौन्दर्यमोहितः । अप्सरोभ्यो विशिष्टां तामिळां संगतवान् मुदा ॥७॥

१. म–'विशेषेण मुञ्च' नास्ति । २. त-भ१.२.४.६.८–पूर्वोषितान् कामान् ; अनु–पूर्वोषितां कामात् । ३. त१.२.३.६.७–वैशद्यार्थं । ४. त–तत्र ।

तदेळाथां सोमपुत्राजातो राजा पुरूरवाः । तमुर्वशी तु चकमे प्रतिष्ठानपुरे स्थितम् ॥८॥
तल्पादन्यत्र नग्नं त्वां द्रष्टा यामि यथागतम्[1] । सुता उरणकौ त्वं[2] च[3] समीपं कुरु मे द्रुतम् ॥९॥
इति सा समयं कृत्वा रमयामास तं नृपम् । चतुरब्दे गते रात्रौ देवैरुरणकद्वयम् ॥१०॥
हृतं तस्य ध्वनिं श्रुत्वा नग्न एव स भूपतिः । उत्थाय जित्वा तावागच्छेत्येवं जल्पकोऽब्रवीत्[3]॥११॥
विद्युता दर्शितोऽस्यै[4] स[5] नग्न एव पुरूरवाः । अथ सा दृष्टसमया[4] ह्युर्वशी तु दिवं ययौ[6]॥१२॥
तत उन्मत्तवद्राजा दिदृक्षुस्तामितस्ततः । कुर्वन्नन्वेषणं तीरे सरसो मानसस्य ताम् ॥१३॥
विहरन्तीमप्सरोभिः सहापश्यत्पुरूरवाः । पुनः स चकमे भोक्तुमुर्वशीं च पुरूरवाः ॥१४॥
साश्रं सापश्यदुक्ता च प्रत्याचष्टे व्रजेति तम् । इत्युर्वश्यैळसंवादमिममेषोऽप्यसूचयत्[7] ॥१५॥इति॥

अत्र वाजसनेयकम्—'उर्वशी ह्याप्सराः पुरूरवसमैळं चकमे तँ ह विन्दमानोवाच त्रिः स्म माह्नो[8] वैतसेन दण्डेन हतादकामाँ स्म मा निपद्यासै मो स्म त्वा नग्नं दर्शमेष वै न स्त्रीणामुपचार इति । सा हास्मिञ्ज्योगुवासापि हास्मादुबिभ्यास तावज्ज्योग्घास्मिञ्जुवास ततो ह गन्धर्वाः समूदिरे ज्योग्वा इयमुर्वशी मनुष्येष्ववात्सीदुपजानीत यथेयं पुनरागच्छेदिति तस्यै हाविद्वुर्युरणा शयन उपबद्धास ततो ह गन्धर्वा अन्यतरमुरणं प्रमेथुः । सा होवाचावीर इव वत मेऽजन इव पुत्रै हरन्तीति द्वितीयं प्रमेथुः सा ह तथैवोवाच । अथ हायमीक्षांचक्रे कथं नु तदवीरं कथमजनँ[9] स्याद्यत्राहँ स्यामिति स नग्न एवानूत्पपात चिरं तन्मेने बद्वासः पर्यधास्यत ततो ह गन्धर्वा विद्युतं जनयांचक्रुस्तं यथा दिवैवं नग्नं ददर्श ततो हैवेयं तिरोबभूव पुनरैमीत्येत्तिरोभूतौँ स आध्या जल्पन्कुरुक्षेत्रैँ समया चचारान्यतःप्लक्षेति बिसवती तस्यै हाध्यन्तेन वव्राज तद्ध ता अप्सरस आतयो भूत्वा परिपुप्लुविरे । तँ हेयं ज्ञात्वोवाच अयं वै स मनुष्यो यस्मिन्नहमवात्समिति ता होचुस्तस्मै वा आविरसामेति तथेति तस्मै हाविरासुः । तौँ हायं ज्ञात्वाभिपरोवाद हये जाये मनसा' (श. ब्रा. ११. ५. १) इत्यादि ॥

हये जाये मनसा तिष्ठ घोरे वचांसि मिश्रा कृणवावहै नु ।
न नौ मन्त्रा अनुदितास एते मयस्करन् परतरे चनाहन् ॥ १ ॥

हये । जाये । मनसा । तिष्ठ । घोरे । वचांसि । मिश्रा । कृणवावहै । नु ।
न । नौ । मन्त्राः । अनुदितासः । एते । मयः । करन् । परऽतरे । चन । अहन् ॥ १ ॥

पुरूरवसो[10] वाक्यम् । जायां पश्यन् वदति । [v]हये हे [v]घोरे । अस्माकं दुःखजनकत्वात् । घोरकारिणि [v]जाये [v]मनसा अस्मदुपर्यनुरागवता मनसा युक्ता सती [v]तिष्ठ क्षणमात्रं संनिधावेव निवस । हये इत्यस्य निघाताभावश्छान्दसः । किमर्थं संस्थानमिति तत्राह । [v]वचांसि वाक्यानि मिश्राणि[11] उक्तिप्रत्युक्तिरूपाणि [v]नु अद्य क्षिप्रं वा [v]कृणवावहै करवावहै । 'कृवि हिंसाकरणयोः' । 'धिन्विकृण्व्योरच' इत्युप्रत्ययः । किमर्थं वचसः करणमिति[12] चेदुच्यते । [v]नौ आवयोः [v]मन्त्राः रहस्यार्थाः [v]एते विवक्षिताः [v]अनुदितासः अन्याहियमाणाः[13] परस्परमसंभाष्यमाणा गुम्फिताः सन्तः [v]परतरे [v]चनाहन् । चनेति निपातसमुदायश्चार्थे । अनेकेषु दिवसेषु चरमेऽप्यहनि [v]मयः । सुखनामैतत् । सुखं [v]न [v]करन् कुर्वन्ति[14] । अतः कृणवावहा इति ॥

---

१. त१.३.४.५.७–तथागतं; त२.६.८-म१.२.८–तथागतां । २. त१.२.३.६–त्वस्य । ३. त१.२.३.६.७–जल्पको नृपः; त४.४–जल्पको नृपा । ४. म२–दर्शिता रात्रौ । ५. म५–नष्टसमया । ६. म२–गता । ७. म५–°संवादमितिहासोप्य° । ८. त१-म२.८–माह्नो श्रयो । ९. म५–कथं नु तदजनं । १०. त-मु–हये जाये पुरूरवसो । ११. ग–मिश्रा मिश्राणि । १२. त१.६.७.८-म–कारणमिति । १३. त–अव्याक्रियमाणाः । १४. ग-त४–न कुर्वंति ।

किमेता वाचा कृणवा तवाहं प्राक्रमिषमुषसामग्रियेव ।
पुरूरवः पुनरस्तं परेहि दुरापना वातइवाहमस्मि ॥ २ ॥

किम् । एता । वाचा । कृणव । तव । अहम् । प्र । अक्रमिषम् । उषसाम् । अग्रियाऽइव ।
पुरूरवः । पुनः । अस्तम् । परा । इहि । दुःऽआपना । वातःऽइव । अहम् । अस्मि ॥ २ ॥

अनया तमुर्वशी प्रत्युवाच । एता एतया वाचा केवलया पुनःसंभोगरहितया किं कृणव किं करवाव । अहं खिदानीं स्वत्सकाशात् प्राक्रमिषम् अतिक्रान्तवत्यस्मि । अतिक्रमे दृष्टान्तः । उषसामग्रियेव । बह्वीनामुषसां मध्येऽग्र्याग्रे भवा पूर्वोषाः प्राक्रमीद्यथा तथाहमपीति । यस्मादेवं तस्माद्हे पुरूरवः त्वं पुनः अस्मत्सकाशात् अस्तं गृहं परेहि परागच्छ । मा मय्यभिलाषं कार्षीः । स्वस्या दुर्ग्रहत्वमाह । अहं वातइव वायुरिव दुरापना दुष्प्रापा दुरापा वा अस्मि । 'दुरापा वा अहं स्वयैतर्ह्यस्मि पुनर्गृहानिहीति हैवैनं तदुवाच' (श. ब्रा. ११. ५. १. ७) इति वाजसनेयकम् ॥

इषुर्न श्रिय इषुधेरसना गोषाः शतसा न रंहिः ।
अवीरे क्रतौ वि दविद्युतन्नोरा न मायुं चितयन्त धुनयः ॥ ३ ॥

इषुः । न । श्रिये । इषुऽधेः । असना । गोऽसाः । शतऽसाः । न । रंहिः ।
अवीरे । क्रतौ । वि । दविद्युतत् । न । उरा । न । मायुम् । चितयन्त । धुनयः ॥ ३ ॥

अनया पुरूरवाः स्वस्य विरहजनितं वैक्लव्यं तां प्रति ब्रूते । इषुधेः । इषवो धीयन्तेऽत्रेतीषुधिर्निषङ्गः । ततः सकाशात् इषुः असना असनायै प्रक्षेप्तुं न भवति श्रिये विजयार्थम् । स्वद्विरहाद्युद्धस्य बुद्धावप्यनिधानात् । तथा रंहिः वेगवानहं शत्रुसकाशात् गोषाः तेषां शत्रूणां गवां संभक्ता न अभवम् । तथा शतसाः शतानामपरिमितानां शत्रुधनानां संभक्ता नाभवम् । किंच अवीरे वीरवर्जिते क्रतौ राजकर्मणि सति न वि दविद्युतत् न विद्योतते मत्सामर्थ्यम् । किंच धुनयः कम्पयितारोऽस्मदीया भटाः उरा उरौ । 'सुपां सुलुक्०' इति सप्तम्या डादेशः । विस्तीर्णे संग्रामे मायुम् । मीयते प्रक्षिप्यत इति मायुः शब्दः । 'कृवापाजि०' इत्यादिनोण् । सिंहनादं न चितयन्त न बुध्यन्ते । 'चिती संज्ञाने' । अस्माण्णिचि संज्ञापूर्वकस्य विधेरनित्यत्वाल्लघूपधगुणाभावः । छान्दसो लुक्[3] ॥

सा वसु दधती श्वशुराय वय उषो यदि वष्ट्यन्तिगृहात् ।
अस्तं ननक्षे यस्मिञ्चाकन्दिवा नक्तं श्रथिता वैतसेन ॥ ४ ॥

सा । वसु । दधती । श्वशुराय । वयः । उषः । यदि । वष्टि । अन्तिऽगृहात् ।
अस्तम् । ननक्षे । यस्मिन् । चाकन् । दिवा । नक्तम् । श्रथिता । वैतसेन ॥ ४ ॥

इदमुत्तरं[4] चोर्वशीवाक्यम्[5]। आद्येन[6] पुरात्मना कृतमुषसे[6] निवेदयति । हे उषः सा इयमुर्वशी वसु वासकं वयः अन्नं श्वशुराय भर्तुः पुरूरवसः पित्रे दधती प्रयच्छन्ती तत्र गृहे

१. ग-त३.४.५-भ-' प्रक्षेप्तुं ' नास्ति; त१.२.६.७.८-प्रक्षिप्तुं । २. भ-' क्रतौ ' नास्ति । ३. त-लुक्; भ-लुक् । ४. त-मु-इयमुत्तरा । ५. त-मु-चोर्वशीवाक्ये । ६. ग-अनेन परमात्मना कृतमुषसे; त-आद्येन पुत्रात्मना कृतमुषसे; भ७-आद्येन पुरातनकृतमुषसे ।

ऋ. ४-४१

स्थिता ᵛयदि पतिं ᵛवष्टि कामयते तदा ᵛअन्तिगृहात्। स्वभर्तृभोगगृहान्तिके यत् श्वशुरस्य भोजनगृहं तदन्तिगृहम्। तस्मादन्तिगृहात्सोर्वशी ᵛअस्तं पतिगृहं ᵛजनक्षे व्याप्नोति। ᵛयस्मिन्[1] गृहे ᵛचाकन् कामयत उर्वशी। सा[2] चोर्वशी[2] ᵛदिवा ᵛनक्तम् अहनि रात्रौ च ᵛवैतसेन। 'शेपो वैतस इति पुंस्प्रजननस्य' (निरु. ३. २१) इति निरुक्तम्। पुंस्प्रजननेन ᵛअधिता ताडिता च[3] भवति। एवमुर्वश्यात्मानं परोक्षेण निर्दिदेश ॥

त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि।
पुरूरवोऽनु ते केतमायं राजा मे वीर तन्वस्तदासीः ॥ ५ ॥

त्रिः। स्म। मा। अह्नः। श्नथयः। वैतसेन। उत। स्म। मे। अव्यत्यै। पृणासि।
पुरूरवः। अनु। ते। केतम्। आयम्। राजा। मे। वीर। तन्वः। तत्। आसीः ॥ ५ ॥

अनेन पुरूरवसमेव संबोध्योक्तवती। हे पुरूरवः त्वं ᵛमा माम् ᵛअह्नः अहनि ᵛवैतसेन दण्डेन पुंस्त्वजनेन ᵛत्रिः त्रिवारम्। 'द्वित्रिचतुर्भ्यः सुच्' (पा. सू. ५.४.१८)। ᵛश्नथयः ᵛस्म। अश्नथयः अताडयः। 'कृत्वोऽर्थप्रयोगे[4]' (पा. सू. २. ३. ६४) इति कालवाचिनोऽहःशब्दादधिकरणे षष्ठी। ᵛउत अपि च। ᵛस्म इति पूरणः। ᵛअव्यत्यै। सपत्नीभिः सह पर्यायेण पतिमागच्छति सा व्यती। न तादृश्यव्यती। तस्यै ᵛमे मह्यं ᵛपृणासि पूरयसि। एवं बुद्ध्या हे ᵛपुरूरवः ᵛते तव ᵛकेतं गृहम् ᵛअनु ᵛआयम् अन्वगमं पूर्वम्। हे ᵛवीर ᵛराजा त्वं च ᵛमे मम ᵛतन्वः शरीरस्य ᵛतत् तदा ᵛआसीः अभवः। सुखयितेति शेषः। परमप्येवं[4] मन्तव्यं[4] किमिति कातरो[5] भवसीत्युवाच ॥ ॥१॥

या सुजूर्णिः श्रेणिः सुम्नआपिर्हृदेचक्षुर्न ग्रन्थिनी चरण्युः।
ता अञ्जयोऽरुणयो न सस्रुः श्रिये गावो न धेनवोऽनवन्त ॥ ६ ॥

या। सुऽजूर्णिः। श्रेणिः। सुम्नेऽआपिः। हृदेऽचक्षुः। न। ग्रन्थिनी। चरण्युः।
ताः। अञ्जयः। अरुणयः। न। सस्रुः। श्रिये। गावः। न। धेनवः। अनवन्त ॥ ६ ॥

पुरूरवसो वाक्यम्। ᵛया ᵛसुजूर्णिः सुजवा एतन्नामिकास्ति तथा या ᵛश्रेणिः या ᵛसुम्नआपिः या ᵛहृदेचक्षुः। नकारः समुच्चये। ताभिश्चतसृभिरालिभूताभिर्मानिनीभिः सहिता ᵛग्रन्थिनी ग्रन्थनवती संदर्भवती ᵛचरण्युः चरणशीलोर्वश्याजगाम। यद्वा। ग्रन्थिनीत्येतत्सखिभूताप्सरोनामधेयम्। या सुजूर्णिः सुजवोर्वशी सा ताभिः सह जगाम[6]। ᵛताः अप्सरसः ᵛअञ्जयः आभरणोपेताः ᵛअरुणयः अरुणवर्णाः ᵛन ᵛसस्रुः पूर्ववन्न गच्छन्ति। ᵛश्रिये श्रयणाय ᵛधेनवः नवप्रसूताः ᵛगावो ᵛन गाव इव। आश्रयार्थं[7] यथा गावः ᵛअनवन्त शब्दायन्ते तथा न शब्दयन्तीति व्यतिरेके दृष्टान्तः ॥

समस्मिञ्जायमान आसत ग्या उतेमवर्धन्नद्यः स्वगूर्ताः।
महे यत्त्वा पुरूरवो रणायावर्धयन् दस्युहत्याय देवाः ॥ ७ ॥

सम्। अस्मिन्। जायमाने। आसत। ग्याः। उत। ईम्। अवर्धन्। नद्यः। स्वऽगूर्ताः।
महे। यत्। त्वा। पुरूरवः। रणाय। अवर्धयन्। दस्युऽहत्याय। देवाः ॥ ७ ॥

---

१. त-मु-तस्मिन्। २. त१.२.३.६.७-पुरूरवसो वाचं; त४.५-पुरूरवसा चोर्वशी। ३ ग-त-'च' नास्ति। ४. ग-भ-परमप्युपरंतव्यं। ५. भ१-कामतरो; भ४-कामवशो; भ७-कामुकतरो। ६. ग-आजगाम। ७. ग-भ-मु-आशिरार्थं।

अनयैताभिः सह संसर्गस्त्वयानुभूत इत्युर्वशी वदति। [v]अस्मिन् पुरूरवसि [v]जायमाने सति[1] [v]ग्राः अप्सरसो देववेश्या अपि [v]सम् [v]आसत संगता अभवन्। अथवा जायमाने यज्ञार्थं प्रवर्धमाने[2] सति ग्रा देवपत्न्योऽपि समासत समभवन्। [v]उत अपि च [v]ईम् एनं पुरूरवसं [v]स्वगूर्ताः स्वर्यं-गामिन्यः [v]नद्यः तासामाश्रयभूता अवर्धयन्। किंच हे [v]पुरूरवः [v]यत् यस्मात् [v]त्वा त्वां [v]महे महते [v]रणाय रमणीयाय संग्रामाय [v]दस्युहत्याय दस्युहननाय[3] [v]देवाः [v]त्वाम् [v]अवर्धयन्॥

सचा यदासु जहतीष्वत्कममानुषीषु मानुषो निषेवे।
अप स्म मत्तरसन्ती न भुज्युस्ता अत्रसन्रथस्पृशो नाश्वाः॥ ८॥

सचा। यत्। आसु। जहतीषु। अत्कम्। अमानुषीषु। मानुषः। निऽसेवे।
अप। स्म। मत्। तरसन्ती। न। भुज्युः। ताः। अत्रसन्। रथऽस्पृशः। न। अश्वाः॥८॥

इदमादित्रीण्यैळवाक्यानि। तत्रादितो द्वाभ्यामुर्वशीमन्याश्च सह स्तौति। [v]यत् यदा [v]सचा सहायभूतः पुरूरवाः [v]अत्कं स्वकीयं रूपम्। अत्क इति रूपनाम। [v]जहतीषु परित्यजन्तीषु [v]अमानुषीषु देवताभूतास्वप्सरःसु [v]मानुषः सन् [v]निषेवे अभिमुखं गच्छति तदानीं [v]ताः अप्सरसः [v]मत् मत्तः [v]अप अपसृत्य [v]अत्रसन्। त्रसतिर्गतिकर्मा। गच्छन्ति। पलायने दृष्टान्तः। [v]तरसन्ती [v]भुज्युः[4] [v]न[4]। तरसन्नाम मृगः। तस्य स्त्री भुज्युर्भोगसाधनभूता स्त्री मृगी। सा यथा व्याधाद्भीता पलायते। किंच [v]रथस्पृशो [v]नाश्वाः रथे नियुक्ता अश्वा इव। यथा[5] ते[5] पलायन्ते तद्वत्पलायन्त इति। उर्वश्यानेकाभिरस्माभिः सह भोगमनुभुक्तवानसीत्युक्तः प्रत्याचष्टे॥

यदासु मर्तो अमृतासु निस्पृक्सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते।
ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दन्दशानाः॥ ९॥

यत्। आसु। मर्तः। अमृतासु। निऽस्पृक्। सम्। क्षोणीभिः। क्रतुऽभिः। न। पृङ्क्ते।
ताः। आतयः। न। तन्वः। शुम्भत। स्वाः। अश्वासः। न। क्रीळयः। दन्दशानाः॥९॥

[v]यत् यदा [v]आसु [v]अमृतासु अप्सरःसु [v]मर्तः मनुष्यः पुरूरवाः [v]निस्पृक् निःशेषेण स्पृशन् [v]क्षोणीभिः वाग्भिः [v]क्रतुभिर्न कर्मभिश्च [v]सं पृङ्क्ते संपर्कं करोति। नकारः समुच्चयार्थः। [v]ताः अप्सरसः [v]आतयः आतिभूतास्तदानीं [v]स्वाः [v]तन्वः आत्मीयानि रूपाणि [v]न [v]शुम्भत न प्रकाश-यन्ति। [v]अश्वासो [v]न अश्वा इव [v]क्रीळयः संक्रीडमानाः [v]दन्दशानाः दन्दशूका जिह्वाभिरात्मीयाः सृक्का भक्षयन्तः। ते यथा चापल्येन धावन्तः स्वरूपं न प्रयच्छन्ति रथिकाय तद्वदिति दुःखाद्ब्रूते॥

विद्युश्च या पतन्ती दविद्योद्भरन्ती मे अप्या काम्यानि।
जनिष्टो अपो नर्यः सुजातः प्रोर्वशी तिरत दीर्घमायुः॥ १०॥

विऽद्युत्। न। या। पतन्ती। दविद्योत्। भरन्ती। मे। अप्या। काम्यानि।
जनिष्टो इति। अपः। नर्यः। सुऽजातः। प्र। उर्वशी। तिरत। दीर्घम्। आयुः॥१०॥

---

१. ग-त१.२.६.७.८-भ४.५.६.८-वर्धमाने; त३-सु-'सति' नास्ति; भ२-सति वर्धमाने। २. त१. २.३.६.७.८-भ२.६.८-प्रवृद्धमाने; त४.५-प्रवर्तमाने। ३. ग-त-दस्युहननाय च। ४. त३.७-न भुज्युः। ५. ग-त-ते यथा।

अनयोर्वक्षी स्तौति। [v]या उर्वशी [v]विद्युन्न विद्युदिव [v]पतन्ती गच्छन्ती [v]दविद्योत् द्योतते। किं कुर्वती। [v]अप्या। अप इत्यन्तरिक्षनाम। तत्संबन्धीनि व्याप्तानि[1] वा[1] [v]काम्यानि अस्मदभिमतान्युदकानि वा [v]मे मह्यं [v]भरन्ती संपादयन्ती। यदा आगतायास्तस्याः सकाशात्[2] [v]अपः व्याप्तः कर्मसु कर्मवान्[3] वा [v]नर्यः[3] नरेभ्यो हितः [v]सुजातः सुजननः पुत्रः [v]जनिष्टो अजनिष्ट उत्पद्यते तदानीं मम[4] [v]उर्वशी[4] [v]दीर्घमायुः [v]प्र [v]तिरत प्रवर्धयति। 'प्रजामनु प्र जायसे तदु ते मर्त्यामृतम्' (तै. ब्रा. १. ५. ५. ६) इति हि मन्त्रः॥ ॥ २ ॥

जज्ञिष इत्था गोपीथ्याय हि दधाथ तत्पुरूरवो म ओजः।
अशासं त्वा विदुषी सस्मिन्नहन्न म आशृणोः किमभुग्वदासि॥ ११॥

जज्ञिषे। इत्था। गोऽपीथ्याय। हि। दधाथ। तत्। पुरूरवः। मे। ओजः।
अशासम्। त्वा। विदुषी। सस्मिन्। अहन्।
न। मे। आ। अशृणोः। किम्। अभुक्। वदासि॥ ११॥

[v]इत्था इत्थं [v]गोपीथ्याय। गौः पृथिवी। पीथं पालनम्। स्वार्थिकस्तद्धितः। भूमे रक्षणाय [v]जज्ञिषे [v]हि जातोऽसि खलु पुत्ररूपेण। 'आत्मा वै पुत्रनामा' इति श्रुतेः। पुनस्तदेवाह। हे [v]पुरूरवः [v]मे ममोदरे मयि [v]ओजः अपत्योत्पादनसामर्थ्यं [v]दधाथ[5] मयि निहितवानसि। [v]तत् तथास्तु। अथापि स्थातव्यमिति चेत् तत्राह। अहं [v]विदुषी भावि कार्यं जानती[6] [v]सस्मिन्नहन्[7] सर्वस्मिन्नहनि त्वया[8] कर्तव्यं [v]त्वा त्वाम् [v]अशासं शिक्षितवत्यस्मि। त्वं [v]मे मम वचनं [v]न [v]आशृणोः न शृणोषि। [v]किं त्वम् [v]अभुक् अभोक्तापालयिता प्रतिज्ञातार्थमपालयन् [v]वदासि[9] हये जाय इत्यादिकरूपं प्रलापम्। वदेलेंड्यागमः। दिवसे[10] त्रिवारं यभस्व एडकद्वयमस्माकं पुत्रत्वेन परिकल्पय अपत्योत्पादनपर्यन्तं[11] वसामि नग्नं त्वां यदाद्राक्षं तदा गच्छामीत्येवंरूपो मिथःसमयः 'उर्वशी ह्याप्सराः पुरूरवसमेळं चकमे तं ह विन्दमानोवाच त्रिः स्म माह्नो वैतसेन दण्डेन' (श. ब्रा. ११. ५. १) इत्यादि वाजसनेयकमुदाहृतम्॥

कदा सूनुः पितरं जात इच्छाच्चक्रन्नाश्रु वर्तयद्विजानन्।
को दंपती समनसा वि युयोदध यदग्निः श्वशुरेषु दीदयत्॥ १२॥

कदा। सूनुः। पितरम्। जातः। इच्छात्। चक्रन्। न। अश्रु। वर्तयत्। विऽजानन्।
कः। दंपती इति दम्ऽपती। सऽमनसा। वि। युयोत्।
अध। यत्। अग्निः। श्वशुरेषु। दीदयत्॥ १२॥

---

१. त-आप्यानि; मु-अप्यानि। २. ग४-म५-सकाशाद्यदि; त१.२.३.६.८-म१.४-सकाशाद्यद्वि; त४-सकाशादादि; त७-सकाशाद्यद्वि; म२.६.७-सकाशाद्यद्धि। ३. ग१.२-कृतवान्वा नर्यो; त१.२.३.६-नवान्नर्यो; त४-कर्मवान्वा नर्यो; ग४-नवा नर्यो; त७-तव त्वां नर्यो; त८-म१.२.४.६.८-तवान्वा नर्यो; म७-श्रवतन्वा नर्यो। ४. त-प्रोर्वशी। ५. ग-त-मु-दधाथ निदधाथ। ६. ग-त-म-जानती त्वं। ७. ग४-त्वनस्मिन्नहन्; त२.६-त्वंस्मिन्नहन्; त३.४.५-त्वमस्मिन्नहन्। ८. त-मु-त्वया यत्। ९. ग-त४.५-म५-वदासि वदसि; त८-म२.८-वदसि। १०. ग-त-म-अहनि दिवसे। ११. त१.२.३.६.७-पुत्रोत्पादनपर्यंतं।

इदं पुरूरवसो वाक्यम्। vकदा कस्मिन् काले vसूनुः तयोदरजातः सन् vपितरं माम् vइच्छात् इच्छेत्। 'इषु इच्छायाम्'। लेटि शपि 'इषुगमियमां छः' इति छादेशः। 'लेटोऽडाटौ' इत्यडागमः। कदा वा vविजानन् पितरं मामधिगच्छन् vचक्रन् क्रन्दमानः vनाशु vवर्तयत्[1]। नेति चार्थे। किंच vकः किंविधः सन् सूनुः vसमनसा समनसौ समनस्कौ[2] vदंपती जायापती त्वां मां च vवि vयूयोत् विश्लेषयेत्। 'यु मिश्रणामिश्रणयोः'। यौतेश्छान्दसः शपः श्लुः। तुजादित्वादभ्यासस्य दीर्घः। vअध अधुना vयत् यदा vअग्निः तव हृदयस्थितस्तेजोरूपो गर्भः vश्वशुरेषु vदीदयत् दीप्यते। दीदयतिर्दीप्तिकर्मेति[3] नैरुक्तो धातुः॥

प्रति ब्रवाणि वर्तयते अश्रु चक्रन्न क्रन्ददाध्ये शिवायै।
प्र तत्ते हिनवा यत्ते अस्मे परेह्यस्तं नहि मूर मापः॥ १३॥

प्रति। ब्रवाणि। वर्तयते। अश्रु। चक्रन्। न। क्रन्दत्। आऽध्ये। शिवायै।
प्र। तत्। ते। हिनव। यत्। ते। अस्मे इति।
परा। इहि। अस्तम्। नहि। मूर। मा। आपः॥ १३॥

इदमुर्वशीवाक्यम्। हे पुरूरवः त्वां vप्रति vब्रवाणि प्रतिवच्मि। त्वदपत्यम्[4] vअश्रु बाष्पं vवर्तयते वर्तयिष्यति। vआध्ये आध्याते वस्तुनि vशिवायै शिवे कल्याणे समुपस्थिते सति vचक्रन् रुद्धजलश्रुणि विमुञ्चन् vन vक्रन्दन्। नकारश्चार्थे। रोरयति चेत्यर्थः। vतत् त्वदपत्यं vते तुभ्यं vहिनव प्रहिणोमि vयत् अपत्यं vते तव संबन्धि vअस्मे अस्मासु निहितम्। त्वं vपरेह्यस्तम्। अस्तमिति गृहनाम। स्वगृहं प्रतिगच्छ। हे vमूर मूढ vमा मां vनहि vआपः न प्राप्नोषि। हिनवेत्यत्र हिनोतेः 'छन्दसि लुङ्लङ्लिटः' इति भविष्यदर्थे लङि मिपोऽमादेशः। गुणः। अन्त्यलोपश्छान्दसः। बहुलवचनादडभावः। आपः। 'आप्लृ व्याप्तौ'। लिटि 'तिङां तिङो भवन्ति' इति थलो थल्॥

सुदेवो अद्य प्रपतेदनावृत्परावतं परमां गन्तवा उ।
अधा शयीत निर्ऋतेरुपस्थेऽधैनं वृका रभसासो अद्युः॥ १४॥

सुऽदेवः। अद्य। प्रऽपतेत्। अनावृत्। पराऽवतम्। परमाम्। गन्तवै। ऊँ इति।
अध। शयीत। निःऽऋतेः। उपऽस्थे। अध। एनम्। वृकाः। रभसासः। अद्युः॥ १४॥

अथ परिवृतः पुरूरवा उवाच। vसुदेवः त्वया सह सुक्रीडः पतिः vअद्य vप्रपतेत्। अत्रैव प्रपततु। अथवा vअनावृत् अनावृत्तः सन् vपरमां vपरावतं दूरादपि दूरदेशं vगन्तवै गन्तुं महाप्रस्थानगमनं कुर्यात्। vअध अथवा यत्रकुत्रापि गन्तुमसमर्थः vनिर्ऋतेः पृथिव्याः vउपस्थे vशयीत शयनं कुर्यात्। यद्वा। निर्ऋतिः पापदेवता। तस्या उपस्थे उत्संगे संनिधौ म्रियतामित्यर्थः। vअध अथवा vएनं vवृकाः आरण्याः श्वानः vरभसासः[5] वेगवन्तः vअद्युः भक्षयन्तु। अत्र वाजसनेयकं—'सुदेवोऽद्योद्वा वक्षीत प्र वा पतेत्तदेनं वृका वा श्वानो वाद्युरिति हैव तदुवाच' (श. ब्रा. ११. ५. १. ८) इति॥

---

१. ग-त७-वर्तयत् वर्तयेत्; त१.२.६.८-भ-वर्तयत् वर्तयेत। २. ग-त-भ-मु-'समनस्कौ' नास्ति। ३. त४-दीधीङ् दीप्तिदेवनयोः। अस्माण्ण्यताल्लुटि वटि रुदंदीदितदीप्तिकर्मेति। ४. ग.त१.२.३.६.७. ८-भ-तदपत्यं; त४.५-यदपत्यं। ५. त-रभसासो रभसः।

पुरूरवो मा मृथा मा प्र पप्तो मा त्वा वृकासो अशिवास उ क्षन् ।
न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता ॥ १५ ॥

पुरूरवः । मा । मृथाः । मा । प्र । पप्तः । मा । त्वा । वृकासः । अशिवासः । ऊँ इति । क्षन् । न । वै । स्त्रैणानि । सख्यानि । सन्ति । सालावृकाणाम् । हृदयानि । एता ॥ १५ ॥

तमितरा प्रत्युवाच । हे ᵛपुरूरवः त्वं ᵛमा ᵛमृथाः मृतिं मा प्रामुहि । म्रियतेर्लुङि थासि 'हस्वादङ्गात्' इति सिचो लोपः । तथा ᵛमा ᵛप्र ᵛपप्तः अत्रैव पतनं मा कार्षीः । पतेर्लुङि तृदिस्वात् 'पुषादि०' इत्यादिना च्लेरङ् । 'पतः पुम्' इति पुम् । तथा ᵛत्वा त्वाम् ᵛअशिवासः अशुभाः ᵛवृकासः वृकाः ᵛमा ᵛउ ᵛक्षन् । उ इत्येवकारार्थे । अक्षन् । मांस्यवहारयन्तु । किमित्येवमस्मदुपर्याग्रहं करोषि । मा कार्षीरित्यर्थः । अदेर्लुङि 'लुङ्सनोर्घस्लृ' (पा. सू. २. ४. ३७) इति घस्लादेशः । 'मन्त्रे घस०' इति च्लेर्लुक् । 'गमहन०' इत्यादिनोपधालोपः । 'शासिवसि०' इत्यादिना षत्वम् । 'खरि च' इति चर्त्वम् । बाहुलकादडभावः । अथ[1] स्वस्नेहस्यासारतामाह[2] । ᵛस्त्रैणानि स्त्रीणां कृतानि ᵛसख्यानि ᵛन ᵛवै ᵛसन्ति । न सन्ति खलु । अभावे कारणमाह । ᵛएता एतानि सख्यानि ᵛसालावृकाणां ᵛहृदयानि तेषां हृदयानि यथा वत्सादीनां विश्वासापन्नानां घातुकानि तद्वत् । अत्र वाजसनेयकं—'मैतदादृथा न वै स्त्रैणं सख्यमस्ति पुनर्गृहानिहीति हैवैनं तदुवाच' (श. ब्रा. ११. ५. १. ९) इति ॥ ॥ ३ ॥

यद्विरूपाचरं मर्त्येष्ववसं रात्रीः शरदश्चतस्रः ।
घृतस्य स्तोकं सकृदह्न आश्नां तादेवेदं तातृपाणा चरामि ॥ १६ ॥

यत् । विऽरूपा । अचरम् । मर्त्येषु । अवसम् । रात्रीः । शरदः । चतस्रः ।
घृतस्य । स्तोकम् । सकृत् । अह्नः । आश्नाम् । तात् । एव । इदम् । ततृपाणा । चरामि ॥ १६ ॥

ᵛयत् यदा ᵛविरूपा[3] मनुष्यसंपर्काद्विगतसहजभूतदेवरूपा परयानुकूल्येन नानारूपा वा ᵛमर्त्येषु मनुष्येषु ᵛअचरं तदानीं ᵛरात्रीः प्रसवित्रीः ᵛचतस्रः ᵛशरदः ᵛअवसं व्यवसम् । अत्यन्तसंयोगे द्वितीया । तदानीं ᵛघृतस्य ᵛस्तोकं ᵛसकृदह्न ᵛआश्नाम् । ᵛतादेव तेनैव स्तोकेनाहम् ᵛइदं संप्रति ᵛततृपाणा तृप्ता सती ᵛचरामि ॥

अन्तरिक्षप्रां रजसो विमानीमुप शिक्षाम्युर्वशीं वसिष्ठः ।
उप त्वा रातिः सुकृतस्य तिष्ठान्नि वर्तस्व हृदयं तप्यते मे ॥ १७ ॥

अन्तरिक्षऽप्राम् । रजसः । विऽमानीम् । उप । शिक्षामि । उर्वशीम् । वसिष्ठः ।
उप । त्वा । रातिः । सुऽकृतस्य । तिष्ठात् । नि । वर्तस्व । हृदयम् । तप्यते । मे ॥ १७ ॥

ᵛअन्तरिक्षप्रां स्वतेजसान्तरिक्षस्य पूरयित्रीं तथा ᵛरजसः रजकस्योदकस्य ᵛविमानीं निर्मात्रीम् ᵛउर्वशीं ᵛवसिष्ठः समानानां मध्येऽतिशयेन वासयिताहम् ᵛउप ᵛशिक्षामि वशं नयामि । ᵛसुकृतस्य शोभनकर्मणः ᵛरातिः दाता पुरूरवाः ᵛत्वा त्वाम् ᵛउप ᵛतिष्ठात् उपतिष्ठतु । ᵛमे ᵛहृदयं ᵛतप्यते[4] । अतो ᵛनि ᵛवर्तस्व । एवं राजोवाच[5] ॥

---

१. त-मु-अथास्य स्नेहस्या° । २. त-मु-विरूपा पुरे । ३. भ-'तप्यते...राजोवाच' नास्ति ।

इति॑ त्वा दे॒वा इ॒म आ॑हु॒रैळ॒ यथे॑मे॒तद्भ॑वसि मृ॒त्युब॑न्धुः ।
प्र॒जा ते॑ दे॒वान् ह॒विषा॑ यजाति स्व॒र्ग उ॒ त्वमपि॑ मादयासे ॥ १८ ॥

इति॑ । त्वा । दे॒वाः । इ॒मे । आ॒हुः॒ । ऐ॒ळ॒ । यथा॑ । ई॒म् । ए॒त॒त् । भ॒व॒सि॒ । मृ॒त्युऽब॑न्धुः ।
प्र॒ऽजा । ते॒ । दे॒वान् । ह॒विषा॑ । य॒जा॒ति॒ । स्वः॒ऽगे । ऊँ॒ इति॑ । त्वम् । अपि॑ । मा॒द॒या॒से ॥१८॥

हे[1] ᵛऐळ पुरूरवः ᵛत्वा त्वाम् ᵛइमे ᵛदेवाः ᵛइति ᵛआहुः । ᵛमृत्युबन्धुः मृत्योः[2] बन्धकः मृत्योर्बन्धुभूतो वा मृत्युवशमप्राप्तुवंस्त्वं ᵛयथें यथा ᵛएतद्भवसि[3] भविष्यसि ᵛप्रजा प्रकर्षेण जायमानस्त्वं[4] ᵛते तव संबन्धिनो यष्टव्यान् ᵛदेवान् ᵛहविषा ᵛयजासि यजसि । ᵛस्वर्ग ᵛउ स्वर्ग एव ᵛत्वमपि ᵛमादयासे मादयसेऽस्माभिः सह । एवमाहुरित्यर्थः । यस्मादेवं करोषि तस्मादभिलाषं हित्वा सुखी भवेति[5] सेयं पुरूरवसं प्रत्युवाच ॥ ॥ ४ ॥

अथ ' प्र ते महे ' इति त्रयोदशर्चं षष्ठं सूक्तम् । बरुर्नामाङ्गिरस ऋषिः इन्द्रस्य पुत्रः सर्वहरिर्वा नाम । द्वादशीत्रयोदश्यौ त्रिष्टुभौ शिष्टा एकादश जगत्यः । इन्द्रस्याश्वौ हरी । तयोरत्र स्तूयमानत्वात्तद्देवताकमिदम् । तथा चानुक्रान्तं—' प्र ते सप्तोना बरुः सर्वहरिर्वैन्द्रो हरिस्तुतिर्द्वित्रिष्टुबन्तम्[6] ' इति । अतिरात्रे तृतीये पर्याये ब्राह्मणाच्छंसिन एतत्सूक्तम् । सूत्रितं च—' प्र ते मह ऊती शचीवस्तव वीर्येणेति याज्या ' (आश्व. श्रौ. ६. ४) इति । षोडशिशस्त्रेऽप्याद्यस्तृचः शंसनीयः । सूत्रितं च—' प्र ते महे विदथे शंसिषं हरी इति तिस्रो जगत्यः ' (आश्व. श्रौ. ६. २) इति ॥

प्र ते॑ म॒हे वि॒दथे॑ शंसिषं॒ हरी॒ प्र ते॑ वन्वे वनुषो॒ हर्य॑तं॒ मद॑म् ।
घृ॒तं न यो हरि॑भिश्चा॒रु सेच॑त॒ आ त्वा॑ विशन्तु॒ हरि॑वर्पसं॒ गिरः॑ ॥ १ ॥

प्र । ते॒ । म॒हे । वि॒दथे॑ । शं॒सि॒ष॒म् । हरी॒ इति॑ । प्र । ते॒ । व॒न्वे॒ । व॒नु॒षः॒ । हर्य॑तम् । मद॑म् ।
घृ॒तम् । न । यः । हरि॑ऽभिः । चा॒रु । सेच॑ते । आ । त्वा॒ । वि॒श॒न्तु॒ । हरि॑ऽवर्पसम् । गिरः॑ ॥ १ ॥

हे इन्द्र ᵛते तव ᵛहरी अश्वौ ᵛमहे महति ᵛविदथे यज्ञे ᵛप्र ᵛशंसिषम् अशंसिषम् । अस्ताविषम् । तथा ᵛवनुषः । ' वनु हिंसायाम् ' । हिंसकस्य ᵛते तव ᵛहर्यतम् । ' हर्य गतिकान्त्योः ' । तस्यौणादिकोऽतच् । चित्स्वरेणान्तोदात्तः । कमनीयं ᵛमदं ᵛप्र ᵛवन्वे प्रयाचेऽस्मदभिमतम् । ' वनु याचने ' । ᵛयः इन्द्रः ᵛहरिभिः हरितवर्णैरश्वैः मद्यागं[7] गत्वा ᵛचारु चरणीयं ᵛघृतं ᵛन घृतमिव सुपूतमुदकं ᵛसेचते वर्षति तं तादृशं ᵛहरिवर्पसम् । वर्प इति रूपनाम । हरितरूपं ᵛत्वा त्वाम् ᵛआ ᵛविशन्तु ᵛगिरः अस्मदीयाः स्तुतिवाचस्तव मदाय ॥

हरिं॒ हि योनि॒मभि ये स॒मस्व॑रन् हि॒न्वन्तो॒ हरी॑ दि॒व्यं यथा॒ सदः॑ ।
आ यं पृ॑ण॒न्ति॒ हरि॑भि॒र्न धे॒नव॒ इन्द्रा॑य शू॒षं हरि॑वन्तमर्चत ॥ २ ॥

हरि॑म् । हि । योनि॑म् । अ॒भि । ये । स॒म्ऽअस्व॑रन् । हि॒न्वन्तः॑ । हरी॒ इति॑ । दि॒व्यम् । यथा॑ । सदः॑ ।
आ । य॒म् । पृ॒ण॒न्ति॒ । हरि॑ऽभिः । न । धे॒नवः॑ । इन्द्रा॑य । शू॒षम् । हरि॑ऽवन्तम् । अ॒र्च॒त॒ ॥२॥

---

१. भ–' हे ... ... मृत्योः ' नास्ति । २. त–एतद्भवति । ३. त–जायमानाः । ४. त–भवति । ५. त१.२.३.६.८-भ१.२.४.७.८–°स्तुतिस्त्रिष्टुबंतं । ६. ग-भ१.४.५.६.८–मेघान्; त१.२.३.७–मेघानं; त६.८–मघानं; भ२–मघोन् ।

vये पूर्वे स्तोतार ऋषयः vयोनिम् इन्द्रस्य स्थानभूतम् vहरिम् अश्वम् vअभि vसमस्वरन्। 'स्वृ शब्दोपतापयोः'। अभिसंस्तुवन्ति। किं कुर्वन्तः। vदिव्यं देवसंबन्धि vसदः आगमगृहं vयथा प्रेरयन्तीन्द्रं तथा vहरी अश्वौ vहिन्वन्तः प्रेरयन्तः। सोमेऽभिषुते सति स्वयमेवेन्द्रो रथेऽश्वौ प्रेरयति अतः स्तोतृणां हरिप्रेरणत्वम्। यद्वा[1]। दिव्यं सद इन्द्रः प्राप्नुयाद्यथा[2] तथा[2] हरी[3] स्तुतिभिर्हिन्वन्तः प्रेरयन्तः। vयम् इन्द्रम् vधेनवः नवप्रसूता गावो यथा पृणन्ति क्षीरादिभिः। अत्र पुरस्तादुपाचारोऽपि नकार उपमार्थीयः। vहरिभिः हरितवर्णैः सोमैः vआ vपृणन्ति पूरयन्ति च[4]। तथा यूयमपि vइन्द्राय इन्द्रस्य vहरिवन्तं vशूषं बलम् vअर्चत पूजयत हे स्तोतारः स्तुतिभिः॥

सो अंस्य वज्रो हरितो य आयसो हरिर्निकामो हरिरा गभस्त्योः।
द्युम्नी सुशिप्रो हरिमन्युसायक इन्द्रे नि रूपा हरिता मिमिक्षिरे॥ ३॥

सः। अस्य। वज्रः। हरितः। यः। आयसः। हरिः। निऽकामः। हरिः। आ। गभस्त्योः। द्युम्नी। सुऽशिप्रः। हरिमन्युऽसायकः। इन्द्रे। नि। रूपा। हरिता। मिमिक्षिरे॥ ३॥

vअस्य इन्द्रस्य vसः[5] vवज्रः vहरितः हरितवर्णः vय vआयसः अयःसारभूतोऽस्ति निर्मितः। स च vहरिः[6] हरितवर्णो वज्रः vनिकामः नितरां कमनीयः। सः vआ हन्ता शत्रूणाम्। तादृशो वज्रः vगभस्त्योः हस्तयोर्वर्तत इति शेषः। अयमिन्द्रः vद्युम्नी। द्युम्नं द्योतमानं धनम्। तद्वान् vसुशिप्रः शोभनहनुः vहरिमन्युसायकः। यस्य मन्युः[7] सायकः शत्रुहन्ताभिगन्ता वा भवति। यद्वा शत्रुहन्ता कोपः सायकश्च यस्य स तादृशो भवति। किं बहुना। vइन्द्रे vरूपा रूपाणि सर्वाणि vहरिता हरितानि vनि vमिमिक्षिरे निषिक्तानि बभूवुः। मिहेः सनन्तात्कर्मणि लिटि रूपम्॥

दिवि न केतुरधि धायि हर्यतो विव्यचद्वज्रो हरितो न रंह्या।
तुददहिं हरिशिप्रो य आयसः सहस्रशोका अभवद्धरिभ्यः॥ ४॥

दिवि। न। केतुः। अधि। धायि। हर्यतः। विव्यचत्। वज्रः। हरितः। न। रंह्या। तुदत्। अहिम्। हरिऽशिप्रः। यः। आयसः। सहस्रऽशोकाः। अभवत्। हरिम्ऽभरः॥ ४॥

vदिवि अन्तरिक्षे vकेतुः प्रकाशेन सर्वस्य प्रज्ञापक आदित्य इव स यथाधि निहित एवमयमिन्द्रः vअधि vधायि अध्यधायि[8] स्तोतृभिरधिनिहितः। किंचेन्द्रस्य vवज्रः vहर्यतः स्पृहणीयः सन् vविव्यचत् व्याप्नोति[9] व्याप्तव्यं शत्रुसंघम्। तत्र दृष्टान्तः। vहरितो vन हरितवर्णौ अश्वाहर्तारौ[10] वाश्वा आदित्यसंबन्धिनः। ते यथा vरंह्या रंहणेन वेगेन व्याप्नुवन्ति व्याप्तव्यम्। vयः अस्य वज्रः vआयसः अयोविकारः vअहिं वृत्रं मेघं वा vतुदत् हिनस्ति। योऽयं[11] महानुभावः vहरिशिप्रः सोमपानरभसेन[12] हरितवर्णनासिकस्तद्वर्णहनुर्वा vहरिभरः हर्योर्भर्तेन्द्रः[13] vसहस्रशोकाः vअभवत्। 'शुच दीप्तौ'। अपरिमितदीप्तिर्भवति॥

---

१. ग–यद्वा यथा। २. ग-त-भ–प्राप्नुयात्तथा। ३. त-भ–हरी रथाय। ४. ग–आप्रीणयंति वा; त४.५.८-भ१.२.४.६.८–वा; त१.२.३.६.७-मु–'च' नास्ति। ५. त-भ–'सः' नास्ति। ६. त-भ–'हरिः' नास्ति। ७. ग-त-भ–'मन्युः' नास्ति। ८. त१.२.३.६.७.८-भ–'अध्यधायि' नास्ति। ९. त१.२.३.६.७.८-भ२.६.८-मु–विव्याप्नोति। १०. ग-भ२.८–असाध्वाहर्तारौ, त४.५–असाधा वर्तते; भ६–अस्याश्वाहर्तारौ। ११. ग–सोयं। १२. त४.५–°रसेन। १३. ग-भ–हर्यो भर्तेंद्रः।

त्वंत्वमहर्यथा उपस्तुतः पूर्वेभिरिन्द्र हरिकेश यज्वभिः ।
त्वं हर्यसि तव विश्वमुक्थ्य१मसामि राधो हरिजात हर्यतम् ॥ ५ ॥

त्वम्ऽत्वम् । अहर्यथाः । उपऽस्तुतः । पूर्वेभिः । इन्द्र । हरिऽकेश । यज्वऽभिः ।
त्वम् । हर्यसि । तव । विश्वम् । उक्थ्यम् । असामि । राधः । हरिऽजात । हर्यतम् ॥ ५ ॥

हे [v]इन्द्र हे [v]हरिकेश हरितरोमवदश्व [v]त्वंत्वं[1] त्वमेव सर्वत्र यज्ञे [v]अहर्यथाः अकामयथाः स्तोत्रं हविर्वा । कीदृशस्त्वम् । [v]पूर्वेभिः पूर्वैतनैः [v]यज्वभिः यजमानैः [v]उपस्तुतः सन् । हे [v]हरिजात हरितवर्णः सन् प्रादुर्भूत हारकप्रादुर्भाव वा । शत्रुवधार्थं प्रादुर्भूतेत्यर्थः । हे तादृशेन्द्र [v]त्वं [v]तव । स्वभूतमिति शेषः । [v]विश्वं व्याप्तं सोमचरुपुरोडाशादिरूपं सर्वं वा । यद्वा । यत्र यानि यानि हवींषि दीयन्ते तत्सर्वं वा । तथा [v]उक्थ्यं प्रशस्यम् [v]असामि असाधारणमसमं कृत्स्नं [v]हर्यतं कान्तं [v]राधः अन्नं हविर्लक्षणं [v]हर्यसि कामयसे ॥ ॥ ५ ॥

ता वज्रिणं मन्दिनं स्तोम्यं मद इन्द्रं रथे वहतो हर्यता हरी ।
पुरूण्यस्मै सवनानि हर्यत इन्द्राय सोमा हरयो दधन्विरे ॥ ६ ॥

ता । वज्रिणम् । मन्दिनम् । स्तोम्यम् । मदे । इन्द्रम् । रथे । वहतः । हर्यता । हरी इति ।
पुरूणि । अस्मै । सवनानि । हर्यते । इन्द्राय । सोमाः । हरयः । दधन्विरे ॥ ६ ॥

[v]ता तौ प्रसिद्धौ [v]हर्यता हर्यतौ गन्तारौ कान्तौ वा [v]हरी हरितवर्णावश्वौ [v]मन्दिनं मोदमानं [v]स्तोम्यं स्तुत्यर्हं [v]वज्रिणम् [v]इन्द्रं [v]मदे निमित्ते[2] [v]रथे [v]वहतः धारयतः[3] । यज्ञमस्मदीयं प्रापयतः। [v]अस्मै [v]हर्यते कान्ताय [v]इन्द्राय [v]पुरूणि बहूनि [v]सवनानि प्रातरादीनि [v]हरयः हरितवर्णाः [v]सोमाः [v]दधन्विरे निधीयन्ते ॥

अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन् हरयो हरी तुरा ।
अर्वद्भिर्यो हरिभिर्जोषमीयते सो अस्य कामं हरिवन्तमानशे ॥ ७ ॥

अरम् । कामाय । हरयः । दधन्विरे । स्थिराय । हिन्वन् । हरयः । हरी इति । तुरा ।
अर्वत्ऽभिः । यः । हरिऽभिः । जोषम् । ईयते । सः । अस्य । कामम् । हरिऽवन्तम् । आनशे ॥ ७ ॥

[v]अरम् अलं पर्याप्तं [v]कामाय इन्द्रकामनाय [v]हरयः हरितवर्णाः सोमाः [v]दधन्विरे । ते च [v]हरयः [v]स्थिराय युद्धेऽपलायितायेन्द्राय [v]तुरा तुरौ त्वरमाणौ [v]हरी अश्वौ [v]हिन्वन् प्रेरयन्ति । [v]यः [v]अर्वद्भिः अरणकुशलैः [v]हरिभिः अश्वैः [v]जोषं शूरैः सेव्यं संग्रामम् [v]ईयते गच्छति [v]सः रथः [v]अस्य इन्द्रस्य स्वभूतं [v]कामं कमनीयं [v]हरिवन्तं सोमवन्तं यज्ञम् [v]आनशे व्याप्नोति ॥

हरिश्मश्रुर्हरिकेश आयसस्तुरस्पेये यो हरिपा अवर्धत ।
अर्वद्भिर्यो हरिभिर्वाजिनीवसुरति विश्वा दुरिता पारिषद्धरी ॥ ८ ॥

---

१. त-मु-र्त्वं । २. त४.५-मदनिमित्ते । ३. त४.५-प्रापयतः ।

हरिंऽश्मशारुः । हरिंऽकेशः । आयसः । तुरःऽपेयें । यः । हरिंऽपाः । अवर्धत ।
अवैत्ऽभिः । यः । हरिंऽभिः । वाजिनींऽवसुः ।
अतिं । विश्वा । दुःऽइता । पारिषत् । हरी इतिं ॥ ८ ॥

[v]हरिश्मशारुः हरितवर्णश्मश्रुः [v]हरिकेशः [v]हरितवर्णकेशः [v]आयसः अयोमयहृदयः[1] । शत्रूणां घातक इत्यर्थः । एतादृशः [v]यः इन्द्रः [v]तुरस्पेये तूर्णं पातव्ये सोमे [v]हरिपाः हरितवर्णसोमपाः [v]अवर्धत वर्धते [v]यः च [v]अवैद्भिः गन्तृभिः [v]हरिभिः अश्वैः सोमैर्वा [v]वाजिनीवसुः । वाजिनमन्नं हविर्लक्षणम् । तदस्या अस्तीति वाजिनी क्रिया । सैव वसु धनं यस्य स तथोक्तः । यज्ञधन इत्यर्थः । यद्वा । वाजिनमेव वाजिनी । तदेव धनं यस्य । स एवमुक्तलक्षण इन्द्रः [v]हरी रथे योजयित्वा [v]विश्वा विश्वानि सर्वाणि [v]दुरिता अस्माकं दुरितानि [v]पारिषत् पारयतु[2] । पारयतेर्लेटि सिप्यडागमः ॥

स्रुवेंव यस्य हरिंणी विपेततुः शिप्रे वाजायं हरिंणी दविंध्वतः ।
प्र यत्कृते चमसे मर्मृजद्धरीं पीत्वा मदस्य हर्यतस्यान्धसः ॥ ९ ॥

स्रुवाऽइव । यस्य । हरिंणी इतिं । विऽपेततुः । शिप्रे इतिं । वाजाय । हरिंणी इतिं । दविंध्वतः ।
प्र । यत् । कृते । चमसे । मर्मृजत् । हरी इतिं । पीत्वा । मदस्य । हर्यतस्य । अन्धसः ॥ ९ ॥

[v]यस्य इन्द्रस्य [v]हरिणी हरितवर्णावश्वौ [v]विपेततुः रथ इन्द्रमारोप्य विपततो यज्ञमस्मदीयम् । यद्वा । यस्य हरिणी हरितवर्णे कनीनिके विपेततुः सोमं प्रति विपततः । तत्र दृष्टान्तः । [v]स्रुवेव । यथा स्रुवा स्रुवौ हविषा पूर्णौ पात्रविशेषौ होमार्थं विपततः तद्वत् । तथा यस्य च [v]हरिणी हरितवर्णे [v]शिप्रे इनू [v]वाजाय सोमलक्षणायान्नाय [v]दविध्वतः कम्पयतः पुरतः प्रत्तस्य[3] सोमस्य प्रीत्या[4] चलतः[4] । तथा [v]यत् यदा [v]कृते संस्कृते [v]चमसे वर्तमानं [v]मदस्य मदकरं [v]हर्यतस्य कान्तम् [v]अन्धसः अन्नं सोमं [v]पीत्वा [v]हरी अश्वौ [v]प्र [v]मर्मृजत् प्रमार्ष्टि । तदानीं स्तुत इत्यर्थः ॥

उत स्म सद्म हर्यतस्य पस्त्योऽ३रत्यो न वाजं हरिंवाँ अचिक्रदत् ।
मही चिद्धि धिषणाहर्यदोजसा बृहद्दधे दधिषे हर्यतश्चिदा ॥ १० ॥

उत । स्म । सद्म । हर्यतस्य । पस्त्योः । अत्यः । न । वाजम् । हरिंऽवान् । अचिक्रदत् ।
मही । चित् । हि । धिषणा । अहर्यत् । ओजसा । बृहत् । दधिषे । हर्यतः । चित् । आ ॥ १० ॥

[v]उत अपि च [v]हर्यतस्य कमनीयस्येन्द्रस्य [v]सद्म सदनं [v]पस्त्योः द्यावापृथिव्योः संबन्धि । सोऽयम् [v]अत्यो [v]न अश्व इव [v]वाजं संग्रामं [v]हरिवान् अश्ववान् [v]अचिक्रदत् गच्छति । तथा [v]हि यस्माद्धे इन्द्र त्वां [v]मही महती [v]धिषणा स्तुतिः [v]ओजसा बलेन युक्तमिन्द्रम् [v]अहर्यत् कामयते । [v]चित् इति पूरणः । अतो वाजमचिक्रदत् । तथा सति हे इन्द्र [v]हर्यतः कामयमानस्य यजमानस्य[5] [v]बृहत् महत् [v]वयः अन्नम् [v]आ [v]दधिषे धारयसि[6] । आप्रयच्छसि । [v]चित् इति पूरणः ॥ ॥ ६ ॥

---

१. त१.२.३.६.७-मु-°हृदयोस्य । २. त-भ-पारयति । ३. त१.२.६.७-प्रयत् प्रत्यस्य । ४. ग-प्रियौ चलतः; त-प्रिया चलतः; भ१.७-प्रियबलजः; भ२.४-प्रियबलतः; भ६-प्रियाबलतः; भ८-प्रियाबलतः । ५. ग-त१.२.३.६.७-भ१.२.४.७.८-यजमानाय । ६. ग-त१२३६७-भ-मु-'धारयसि' नास्ति ।

आ रोदसी हर्यमाणो महित्वा नव्यंनव्यं हर्यसि मन्म नु प्रियम् ।
प्र पस्त्यमसुर हर्यतं गोराविष्कृधि हरये सूर्याय ॥ ११ ॥

आ । रोदसी इति । हर्यमाणः । महिऽत्वा । नव्यम्ऽनव्यम् । हर्यसि । मन्म । नु । प्रियम् ।
प्र । पस्त्यम् । असुर । हर्यतम् । गोः । आविः । कृधि । हरये । सूर्याय ॥ ११ ॥

हे इन्द्र ᵛहर्यमाणः कामयमानः ᵛमहित्वा महत्त्वेन ᵛरोदसी द्यावापृथिव्यौ ᵛआ । पूरयसीति शेषः । तथा ᵛनव्यंनव्यं नवतरं ᵛप्रियं प्रियकरं ᵛमन्म मननीयं स्तोत्रं ᵛनु क्षिप्रं ᵛहर्यसि कामयसे । हे ᵛअसुर बलवन् । असुः प्राणः । तद्वन् । मत्वर्थीयो रः । तादृशेन्द्र ᵛगोः । जात्येकवचनम् । गवां ᵛहर्यतं स्पृहणीयं ᵛपस्त्यं गृहं गोरुदकस्योक्तगुणकं स्थानं वा ᵛहरये उदकस्य हर्त्रे ᵛसूर्याय ᵛप्र प्रकर्षेण ᵛआविष्कृधि प्रकटीकुरु ॥

आ त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र ।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन्यज्ञं सधमादे दशोणिम् ॥ १२ ॥

आ । त्वा । हर्यन्तम् । प्रऽयुजः । जनानाम् । रथे । वहन्तु । हरिऽशिप्रम् । इन्द्र ।
पिब । यथा । प्रतिऽभृतस्य । मध्वः । हर्यन् । यज्ञम् । सधऽमादे । दशऽओणिम् ॥ १२ ॥

हे ᵛइन्द्र ᵛहरिशिप्रं हरितवर्णशिप्रं ᵛत्वा त्वां ᵛहर्यन्तं यज्ञं कामयमानं ᵛप्रयुजः रथे प्रयुक्ता अश्वाः ᵛरथे स्थापयित्वा ᵛजनानाम् ऋत्विग्यजमानानामन्तिकं[1] ᵛवहन्तु[2] प्रापयन्तु । ᵛयथा येन प्रकारेण ᵛप्रतिभृतस्य ग्रहादिषु संभृतं ᵛमध्वः मधु सोमरसं ᵛयज्ञं यागसाधनं ᵛदशोणिम् । ओणयोऽङ्गुलयः । दशभिरङ्गुलिभिः संपादितं सोमं ᵛहर्यन् कामयमानः सन् ᵛपिब पिबसि ᵛसधमादे संग्रामे[3] जयार्थं[3] तथा वहन्त्वित्यर्थः ॥

'अपाः पूर्वेषाम्' इत्येषा षोडशिशस्त्रस्य याज्या । सूत्रितं च—'एवा हि शक्रो वशी हि शक्र इति जपित्वापाः पूर्वेषां हरिवः सुतानामिति यजति' (आश्व. श्रौ. ६. २) इति ॥

अपाः पूर्वेषां हरिवः सुतानामथो इदं सवनं केवलं ते ।
ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व ॥ १३ ॥

अपाः । पूर्वेषाम् । हरिऽवः । सुतानाम् । अथो इति । इदम् । सवनम् । केवलम् । ते ।
ममद्धि । सोमम् । मधुऽमन्तम् । इन्द्र । सत्रा । वृषन् । जठरे । आ । वृषस्व ॥ १३ ॥

हे इन्द्र[4] ᵛसुतानाम् अभिषुतानां ᵛपूर्वेषां प्रातःसवनसंपादितानाम् । कर्मणि षष्ठ्यावेते । अभिषुतान् प्रातःसवनिकान् सोमानित्यर्थः । तान् ᵛअपाः अपिबः । हे ᵛहरिवः इतीन्द्रसंबोधनम् । हरिभ्यामश्वाभ्यां तद्वन् । यद्वा ऋक्सामात्मकाभ्यां हरिभ्यां युक्त । 'ऋक्सामे वा इन्द्रस्य हरी' (ऐ. ब्रा. २. २४; तै. सं. १. ५. ९. २) । 'ताभ्यामेष हरति' इति ब्राह्मणम् । ᵛअथो अपि च ᵛइदं माध्यंदिनं ᵛसवनं ᵛकेवलं ᵛते तवैवासाधारणम् । 'माध्यंदिनं सवनं केवलं ते' (ऋ. सं.

१. त४.५-यजमाना° । २. ग-त-भ-मु-प्रति वहंतु । ३. त-भ-संग्रामजयार्थं । ४. ग-त-मु-इंद्र त्वं ।

४. ३५. ७) इति हि मन्त्रान्तरम्। तस्मिन् सवने हे ᵛइन्द्र ᵛमधुमन्तं माधुर्योपेतं ᵛसोमं ᵛममद्धि पिब। आस्वादयेत्यर्थः। मदिरत्रास्वादनकर्मा। पिबन्तु मदन्तु वियन्तु इति च मन्त्रः। ᵛसत्रा ᵛवृषन्। सत्राशब्दो भूयिष्ठवचनः। हे भूयिष्ठवर्षितरिन्द्र ᵛजठर ᵛआ ᵛवृषस्व आसिञ्चस्व ॥ ॥७॥

' या ओषधीः ' इति त्रयोविंशत्यृचं सप्तमं सूक्तम्। अथर्वणः पुत्रस्य भिषङ्नाम्न आर्षम्। आनुष्टुभमोषधिदेवताकम्। तथा चानुक्रान्तं—' या ओषधीस्त्र्यधिकाथर्वणो भिषगोषधिस्तुतिरानुष्टुभम् ' इति। दीक्षितानां ज्वरार्तुपतापे संजातेऽनेन सूक्तेन मार्जयेत्। सूत्रितं च—' ओषधिसूक्तेन चाङ्गान्यानुमृजेत् ' (आश्व. श्रौ. ६. ९) इति ॥

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।
मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥ १ ॥

याः। ओषधीः। पूर्वाः। जाताः। देवेभ्यः। त्रिऽयुगम्। पुरा।
मनै। नु। बभ्रूणाम्। अहम्। शतम्। धामानि। सप्त। च ॥ १ ॥

ᵛयाः ᵛओषधीः ओषधयः ᵛपूर्वाः पुरातन्यः ᵛजाताः उत्पन्नाः। केभ्यः सकाशात्। ᵛदेवेभ्यः जगन्निर्मातृभ्यः। यद्वा। देवा द्योतमाना ऋतवः। तेभ्यः। कस्मिन् काले। ᵛत्रियुगं त्रियु[1] युगेषु[1]। विशेषेण[2] प्रादुर्भावापेक्षया कृतादियुगत्रयमुक्तं कलौ स्वल्पत्वादुपेक्षितम्। अथवा त्रिषु युगेषु वसन्ते प्रावृषि शरदि चेत्यर्थः। ᵛअहं ᵛबभ्रूणां बभ्रुवर्णानां सोमाख्योषधीनां ᵛशतं ᵛसप्त ᵛच ᵛधामानि अनुलेपमार्जनाभिषेकादिरूपेणाश्रयभूतानि[3] स्थानानि ᵛनु क्षिप्रं ᵛमनै मन्ये। संभावयामीत्यर्थः। अत्र वाजसनेयकं—' या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरेत्यृतवो वै देवास्तेभ्य एतास्त्रिः पुरा जायन्ते वसन्ते प्रावृषि शरदि मनै नु बभ्रूणामहमिति सोमो वै बभ्रुः सोम्या ओषधय ओषधः पुरुषः शतं धामानीति यदिदं शतायुः शतार्धः[4] शतवीर्य एतानि हास्य तानि* शतं धामानि सप्त चेति। य एवेमे सप्त शीर्षन्प्राणास्तानेतदाह ' (श. ब्रा. ७. २. ४. २६) इति। अत्र निरुक्तं च—' या ओषधयः[4] पूर्वा जाता देवेभ्यस्त्रीणि युगानि पुरा मन्ये नु तद्बभ्रूणामहं बभ्रुवर्णानां भरणानां हरणानामिति वा शतं धामानि सप्त चेति। धामानि त्रयाणि भवन्ति स्थानानि नामानि जन्मानीति। जन्मान्यत्राभिप्रेतानि[5] सप्तशतानि सप्त शतं पुरुषस्य मर्मणां तेष्वेना दधति ' (निरु. ९.२८) इति॥

शतं वो अम्ब धामानि सहस्रमुत वो रुहः।
अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥ २ ॥

शतम्। वः। अम्ब। धामानि। सहस्रम्। उत। वः। रुहः।
अध। शतऽक्रत्वः। यूयम्। इमम्। मे। अगदम्। कृत ॥ २ ॥

हे ᵛअम्ब मातर ओषधयः ᵛवः युष्माकं ᵛधामानि स्थानानि जन्मानि वा ᵛशतम् अपरिमितानि। ᵛउत अपि च ᵛवः युष्माकं ᵛरुहः प्ररोहः प्रोद्गमः ᵛसहस्रम् अपरिमितः[6]। ᵛअध अपि च हे ᵛशतक्रत्वः शतकर्माणः ᵛयूयमिमं ᵛमे मां मदीयं वा जनमात्मयप्रस्तम् ᵛअगदम्। गदो रोगः। तद्रहितं ᵛकृत कुरुत ॥

१. त-म–त्रियुगेषु। २. त-म२.४.६.८–विशेष°। ३. ग-त-मु–अनुलेपसंमार्जनाभिषेक°। ४. म–' शतार्धः ... ... ओषधयः ' नास्ति। * त-मु–' तानि ' नास्ति। ५. त४.५–स्थानान्यत्रा°। ६. ग-त-म-मु–अपरिमितं।

ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वाइव सजित्वरीर्वीरुधः पारयिष्णवः ॥ ३ ॥

ओषधीः । प्रति । मोदध्वम् । पुष्पऽवतीः । प्रऽसूवरीः ।
अश्वाःऽइव । सऽजित्वरीः । वीरुधः । पारयिष्णवः ॥ ३ ॥

हे ᵛओषधीः ओषधयः ᵛप्रति ᵛमोदध्वं इमं रुग्णं प्रति मुदिता हृष्टा भवत । कीदृश्यो यूयम् । ᵛपुष्पवतीः पुष्पवत्यः ᵛप्रसूवरीः । प्रकर्षेण सूयन्त उपभोगायेति प्रसवाः फलानि । तद्वत्यः । किंच ᵛअश्वाइव अश्नुवाना हया इव ᵛसजित्वरीः सह रोगं जयन्त्यः ᵛवीरुधः विरोहन्त्यः ᵛपारयिष्णवः रुग्णं पुरुषं पारयन्त्यो रोगात् ॥

ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।
सनेयमश्वं गां वासं आत्मानं तव पूरुष ॥ ४ ॥

ओषधीः । इति । मातरः । तत् । वः । देवीः । उप । ब्रुवे ।
सनेयम् । अश्वम् । गाम् । वासः । आत्मानम् । तव । पुरुष ॥ ४ ॥

हे ᵛओषधीः ओषधयः ᵛदेवीः देव्यो द्योतनादिगुणका हे ᵛमातरः जनानां मातृभूताः । मातृवद्धित-कारित्वान्मातृत्वोपचारः । अथवा मातर आरोग्यनिर्माण्यः ᵛवः युष्माकं संबन्धिनं भिषजं ᵛतत् वक्ष्यमाणम् ᵛइति इत्थम् ᵛउप ᵛब्रुवे उप ब्रवीमि । किं तदिति चेत् उच्यते । ओषध्यर्थमहम् ᵛअश्वं ᵛगां ᵛवासः अंशुकं किं बहुना ᵛआत्मानम् अपि हे ᵛपुरुष चिकित्सक ᵛतव तुभ्यं ᵛसनेयं ददामि ॥

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ५ ॥

अश्वत्थे । वः । निऽसदनम् । पर्णे । वः । वसतिः । कृता ।
गोऽभाजः । इत् । किल । असथ । यत् । सनवथ । पुरुषम् ॥ ५ ॥

हे ओषधिदेवताः ᵛवः युष्माकम् ᵛअश्वत्थे ᵛनिषदनं नितरां वर्तनम् । तथा ᵛवः युष्माकं ᵛपर्णे पलाशे ᵛवसतिः निवासः ᵛकृता । 'तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरत्तस्य पर्णमच्छिद्यत तत्पर्णोऽभवत् तत्पर्णस्य पर्णत्वम्' (तै. ब्रा. १. १. ३. १०) इति ब्राह्मणात्पलाशस्य पर्णत्वप्रसिद्धिः । अश्वत्थपलाशयोर्यज्ञयोग्यत्वप्राधान्यापेक्षयोपादानम् । किंच ᵛगोभाज ᵛइत्किल गवां भाजयित्र्य एव ᵛअसथ भवथ खलु । ᵛयत् यदि ᵛसनवथ संभजध्वे ᵛपुरुषं तर्ह्येवं भवथेति । 'वन षण संभक्तौ' । लेट्यडागमः । व्यत्ययेनोप्रत्ययः । यद्वा । औत्सर्गिकः शप्चेति द्विविकरणता ॥ ॥ ८ ॥

यत्रौषधीः समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषग्रक्षोहामीवचातनः ॥ ६ ॥

यत्र । ओषधीः । सम्ऽअग्मत । राजानः । समितौऽइव ।
विप्रः । सः । उच्यते । भिषक् । रक्षःऽहा । अमीवऽचातनः ॥ ६ ॥

यत्र यस्मिन् देशे ओषधीः ओषधयः[1] समग्मत संगच्छन्ते[2]। राजानः समितावि संग्रामे यथा संगता भवन्ति तद्वत्। तासां नानाविधानामोषधीनां संगमनं यस्मिन् देशेऽस्ति तत्र विप्रः प्राज्ञः ब्राह्मणः सः भिषक् उच्यते रक्षोहा रक्षोहन्ता। अमीवचातनः। अमीवा व्याधिः। तस्य चातनश्चातयिता नाशयिता[3] च भवति तदानीम् ॥

अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम्।
आविवित्स सर्वा ओषधीरस्मा अरिष्टतातये ॥ ७ ॥

अश्वऽवतीम्। सोमऽवतीम्। ऊर्जयन्तीम्। उत्ऽओजसम्।
आ। अविवित्स। सर्वाः। ओषधीः। अस्मै। अरिष्टऽतातये ॥ ७ ॥

अश्वावत्यादयः प्रधानभूता ओषधयश्चतस्रः[4]। ताः सर्वा ओषधीः आविवित्स आजाने। स्वीमीत्यर्थः। अस्मा अरिष्टतातये[5]। अमुं रोगं विनाशयितुमित्यर्थः ॥

उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते।
धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥ ८ ॥

उत्। शुष्माः। ओषधीनाम्। गावः। गोस्थात्ऽइव। ईरते।
धनम्। सनिष्यन्तीनाम्। आत्मानम्। तव। पुरुष ॥ ८ ॥

ओषधीनां शुष्माः बलानि उत् ईरते उद्गच्छन्ति। रुग्णे स्वर्वार्थं प्रोद्गमयन्तीत्यर्थः। गावो गोष्ठादिव। ता यथा गवः सकाशादुदीरते तद्वत्। कीदृशीनामोषधीनाम्। उच्यते। धनं स्वसामर्थ्यलक्षणं सनिष्यन्तीनां दातुमिच्छन्तीनाम्। किं प्रतीति उच्यते। हे पूरुष पुरुष रोगग्रस्त तव आत्मानं शरीरं प्रति। यद्वा। प्ररोहन्तीरोषधीर्दृष्ट्वा वदति। हे पुरुष प्रियङ्ग्वाद्योषधिस्वामिन् तवात्मानं वर्धयितुं[6] धनं सनिष्यन्तीनां व्रीह्याद्योषधीनां शुष्मा उदीरते ॥

इष्कृतिर्नाम वो माताथो यूयं स्थ निष्कृतीः।
सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ॥ ९ ॥

इष्कृतिः। नाम। वः। माता। अथो इति। यूयम्। स्थ। निःऽकृतीः।
सीराः। पतत्रिणीः। स्थन। यत्। आमयति। निः। कृथ ॥ ९ ॥

हे ओषधयः वो माता जननी इष्कृतिर्नाम। सर्वेषां रुग्णानां निष्कर्त्रीति प्रसिद्धा। यस्मात्सा रुग्णं निष्करोति। अथ अतो यूयम् अपि निष्कृतीः निष्कृतयः स्थ भवथ। किंच यूयं सीराः सरणशीलाः पतत्रिणीः पतनवत्यश्च स्थन भवथ। 'तसनप्' इति तसादेशः। किंच पुरुषः यत् यदि आमयति व्याधितो भवति तं निष्कृथ संस्कुरुथ ॥

अति विश्वाः परिष्ठाः स्तेनइव व्रजमक्रमुः।
ओषधीः प्राचुच्यवुर्यत्किं च तन्वो३ रपः ॥ १० ॥

१. ग-त-म-मु-ओषध्यः। २. ग२-समगच्छन्त। ३. त-म-मु-'नाशयिता' नास्ति। ४. ग-त-म-ओषध्यश्चतस्रः। ५. त-मु-अरिष्टतातये अस्मै रोगाय। ६. त४.५-दर्शयितुं।

अति । विश्वाः । परिऽस्थाः । स्तेनःऽइव । व्रजम् । अक्रमुः ।
ओषधीः । प्र । अचुच्यवुः । यत् । किम् । च । तन्वः । रपः ॥ १० ॥

Vविश्वाः व्यासाः Vपरिष्ठाः परितः स्थिता ओषधयः Vअति Vअक्रमुः व्याधीनतिक्रान्तवत्यः । Vस्तेनइव Vव्रजम् । यथा स्तेनो व्रजमत्यक्रमीत् तद्वत् । तथा कृत्वा Vओषधीः ओषधयः Vप्राचुच्यवुः प्रत्यावयन्ति Vयत्किं Vच Vतन्वः रुग्णशरीरस्य Vरपः पापं व्याधिलक्षणमस्ति तदिति ॥ ॥ ९ ॥

यदिमा वाजयन्नहमोषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ११ ॥

यत् । इमाः । वाजयन् । अहम् । ओषधीः । हस्ते । आऽदधे ।
आत्मा । यक्ष्मस्य । नश्यति । पुरा । जीवऽगृभः । यथा ॥ ११ ॥

Vअहं Vयत् यदि Vइमाः ओषधीः Vहस्त Vआदधे आधारयामि । किं कुर्वन् । Vवाजयन् रुग्णं बलिनं कुर्वन् । ततः Vपुरा Vयक्ष्मस्य रोगस्य Vआत्मा Vनश्यति नष्टो भवति Vजीवगृभो Vयथा । जीवानां शकुन्यादीनां ग्राहकाद्व्याधाद्यथा जीवा नश्यन्ति तद्वत् । यद्वा । जीवगृभो मृत्योः सकाशाज्जीवोऽपहियते तद्वत् ॥

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः । ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥ १२ ॥

यस्य । ओषधीः । प्रऽसर्पथ । अङ्गम्ऽअङ्गम । परुःऽपरुः ।
ततः । यक्ष्मम् । वि । बाधध्वे । उग्रः । मध्यमशीःऽइव ॥ १२ ॥

हे Vओषधीः ओषधयः[1] Vयस्य रुग्णस्य Vअङ्गमङ्गं यद्यदङ्गं Vपरुःपरुः यद्यत्पर्व Vप्रसर्पथ प्रकर्षेणाश्रयथ Vततः अङ्गपर्वणश्च Vयक्ष्मं व्याधिं Vवि Vबाधध्वे । Vउग्रः उद्गूर्णबलः Vमध्यमशीः मध्यमस्थाने वर्तमानो राजा यथा[2] उपद्रवकारिणः समनन्तरशत्रून् पदे पदे विबाधते तद्वत् ॥

साकं यक्ष्म प्र पत चाषेण किकिदीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ १३ ॥

साकम् । यक्ष्म । प्र । पत । चाषेण । किकिदीविना ।
साकम् । वातस्य । ध्राज्या । साकम् । नश्य । निऽहाकया ॥ १३ ॥

हे अस्मदीयस्य पुरुषस्य शरीराधिष्ठायिन् Vयक्ष्म व्याधे त्वं Vसाकं सहैव Vप्र Vपत प्रकर्षेण शीघ्रं गच्छ । केन साकमिति । उच्यते । Vचाषेण अतिशीघ्रं पतता चाषाख्येन पक्षिणा सह । तथा Vकिकिदीविना पक्षिणा च सह । तथा Vवातस्य शीघ्रं गच्छतो वायोः Vध्राज्या । 'ध्रज गतौ' । गत्या वेगेन सह गच्छ । तथा Vनिहाकया गोधिकया Vसाकं Vनश्य नाशं प्राप्नुहि ॥

अन्या वो अन्यामवत्वन्यान्यस्या उपावत ।
ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥ १४ ॥

---

१. ग-त-भ—ओषध्यः । २. ग-त-भ—' यथा ' नास्ति ।

अन्या । वः । अन्याम् । अवत्तु । अन्या । अन्यस्याः । उप । अवत ।
ताः । सर्वाः । सम्ऽविदानाः । इदम् । मे । प्र । अवत । वचः ॥ १४ ॥

हे ओषधयः वः युष्माकं मध्ये अन्या ओषधिः अन्याम् ओषधिम् अवतु प्राप्नोतु । अवतिरत्र गत्यर्थः । तथा अन्यान्यस्याः समीपम् उपावत उपगच्छत । एवं याः सन्ति स्त्रियामोषधयः ताः सर्वाः संविदानाः परस्परमैकमत्यं प्राप्ताः सत्यः इदं मे मदीयं वचः प्रार्थनालक्षणं वचनं प्रावत प्ररक्षत ॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ १५ ॥

याः । फलिनीः । याः । अफलाः । अपुष्पाः । याः । च । पुष्पिणीः ।
बृहस्पतिऽप्रसूताः । ताः । नः । मुञ्चन्तु । अंहसः ॥ १५ ॥

याः फलिनीः फलवत्यः या अफलाः फलवर्जिताः याः अपुष्पाः पुष्परहिताः याश्च पुष्पिणीः पुष्पवत्यः बृहस्पतिप्रसूताः । बृहस्पतिर्मन्त्राभिमानी देवः । तेनानुज्ञाताः । ताः नः अस्मान् अंहसः मुञ्चन्तु मोचयन्तु ॥ ॥ १० ॥

मुञ्चन्तु मा शपथ्या३दथो वरुण्यादुत ।
अथो यमस्य पड्वीशात् सर्वस्माद्देवकिल्बिषात् ॥ १६ ॥

मुञ्चन्तु । मा । शपथ्यात् । अथो इति । वरुण्यात् । उत ।
अथो इति । यमस्य । पड्वीशात् । सर्वस्मात् । देवऽकिल्बिषात् ॥ १६ ॥

मा माम् ओषधयः शपथ्यात् शपथसंजातादेनसः सकाशात्[1] मुञ्चन्तु । अथो अपि च वरुण्यात् वरुणसंभवात् मां मुञ्चन्तु । वरुणोऽपि स्वपाशेन जातमात्रं पुरुषं बध्नाति । उत इति पूरणः । अथो अपि च यमस्य पड्वीशात् पादबन्धनाच्छिगडाम्मुञ्चन्तु । न केवलं वरुणादेः पापात् किंतु सर्वस्माद्देवकिल्बिषात् देवैः कृतात्पापान्मुञ्चन्तु ॥

अवपतन्तीरवदन् दिव ओषधयस्परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥१७॥

अवऽपतन्तीः । अवदन् । दिवः । ओषधयः । परि ।
यम् । जीवम् । अश्नवामहै । न । सः । रिष्याति । पुरुषः ॥ १७ ॥

दिवः द्युलोकात् अवपतन्तीः अवपतन्त्यः ओषधयः इत्थं परि अवदन् । किमिति उच्यते । यं जीवं[2] जीवन्तम्[3] अश्नवामहै व्याप्नुमः न सः पूरुषः पुरुषः रिष्याति रिष्यति विनश्यति[4] ॥

---

१. ग-त१.२.३.६.७.८-म-मु-पापात् । २. त-'जीवं' नास्ति । ३. म-'जीवन्तं' नास्ति ।
४. ग-त७-मु-न हिंस्यते; त१.२-म हिंस्यते; त३.६-म हिंस्यैत; त८-म-न हिंस्यात् ।

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
तासां त्वमस्युत्तमारं कामाय शं हृदे ॥ १८ ॥

याः । ओषधीः । सोमऽराज्ञीः । बह्वीः । शतऽविचक्षणाः ।
तासाम् । त्वम् । असि । उत्ऽतमा । अरम् । कामाय । शम् । हृदे ॥ १८ ॥

vया vओषधीः ओषधयः vसोमराज्ञीः सोमो राजा स्वामी यासां तास्तथोक्ताः vबह्वीः असंख्याताः vशतविचक्षणाः बहुदर्शना हे सोमाख्ये ओषधे vतासाम् ओषधीनां vत्वम् vउत्तमा vअसि । यस्मादेवं तस्मात् vअरम् अलमत्यर्थं vकामाय काम्ताय vहृदे हृदयाय vशं सुखकरी भवेति शेषः ॥

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यम् ॥ १९ ॥

याः । ओषधीः । सोमऽराज्ञीः । विऽस्थिताः । पृथिवीम् । अनु ।
बृहस्पतिऽप्रसूताः । अस्यै । सम् । दत्त । वीर्यम् ॥ १९ ॥

vया vओषधीः ओषधयः[1] vसोमराज्ञीः vपृथिवीमनु vविष्ठिताः विविधं स्थिताः दिवः सकाशादागत्य पृथिव्यां नानाभेदेन स्थिताः vबृहस्पतिप्रसूताः बृहस्पतिमानुज्ञाताः सत्यो यूयम् vअस्यै रुग्णतन्वे vवीर्यं vसं vदत्त संधत्त ॥

मा वो रिषत्खनिता यस्मै चाहं खनामि वः ।
द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् ॥ २० ॥

मा । वः । रिषत् । खनिता । यस्मै । च । अहम् । खनामि । वः ।
द्विऽपत् । चतुःऽपत् । अस्माकम् । सर्वम् । अस्तु । अनातुरम् ॥ २० ॥

हे ओषधयः vवः युष्मान् vमा vरिषन् मा हिंस्यात् । कः । vखनिता भूमेः खननकर्ता । vयस्मै रुग्णाय vचाहं vखनामि vवः युष्मान् । किंच vअस्माकं संबन्धि vद्विपत् पुत्रभृत्यादिकं[2] vचतुष्पत् गोमहिष्यादिकं च यदस्ति तत् vसर्वम् vअनातुरम् अरोगम् vअस्तु ॥

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
सर्वाः संगत्य वीरुधोऽस्यै सं दत्त वीर्यम् ॥ २१ ॥

याः । च । इदम् । उपऽशृण्वन्ति । याः । च । दूरम् । पराऽगताः ।
सर्वाः । सम्ऽगत्य । वीरुधः । अस्यै । सम् । दत्त । वीर्यम् ॥ २१ ॥

vयाश्च ओषधयः vइदं स्तोत्रम् vउपशृण्वन्ति vयाश्च ओषधयः vदूरं vपरागताः vसर्वाः vवीरुधः vसंगत्य संगताः सत्यो हे vवीरुधः vअस्यै रुग्णतन्वे vवीर्यं vसं vदत्त ॥

---

१. ग-त-म-' ओषधयः ' नास्ति । २. त१.२.३.६.७.८-म-पुत्रप्रभृत्यादिकं ।

ओषधयः सं वदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥ २२ ॥

ओषधयः । सम् । वदन्ते । सोमेन । सह । राज्ञा ।
यस्मै । कृणोति । ब्राह्मणः । तम् । राजन् । पारयामसि ॥ २२ ॥

vओषधयः सर्वाः vसोमेन vराज्ञा vसह vसं vवदन्ते संवादं कुर्वन्ति । किमिति तदुच्यते । vयस्मै रुग्णाय vब्राह्मणः ओषधिसामर्थ्यज्ञो ब्राह्मणो वैद्यः vकृणोति करोति चिकित्सां vतं रुग्णं हे vराजन् vपारयामसि पारयामः ॥ इदन्तो मसिः ॥

त्वमुत्तमास्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सोऽस्माकं यो अस्माँ अभिदासति ॥ २३ ॥

त्वम् । उत्ऽतमा । असि । ओषधे । तव । वृक्षाः । उपस्तयः ।
उपस्तिः । अस्तु । सः । अस्माकम् । यः । अस्मान् । अभिऽदासति ॥ २३ ॥

हे vओषधे सोमाख्ये vत्वम् ओषधीनामन्यासाम्[1] vउत्तमासि । vतव vवृक्षाः सर्वे vउपस्तयः अधःशायिन एव । तथा सति vसः vउपस्तिरस्तु अधःशायी भवतु vयोऽस्मान् vअभिदासति अभिहिनस्ति भ्रातृव्य इति ॥ ॥ ११ ॥

'बृहस्पते प्रति' इति द्वादशर्चमष्टमं सूक्तं त्रैष्टुभं बृहस्पतिमित्रादिसर्वदेवताकम् । ऋष्टिषेणपुत्रो देवापिर्नामर्षिः । तथा चानुक्रान्तं—'बृहस्पते द्वादशार्ष्टिषेणो देवापिर्वृष्टिकामो देवांस्तुष्टाव' । गतः सूक्तविनियोगः । अस्य सूक्तस्याख्यानं निरुक्तकारः प्रदर्शयति—'देवापिरार्ष्टिषेणः शंतनुश्च कौरव्यौ भ्रातरौ बभूवतुः । स शंतनुः कनीयानभिषेचयांचक्रे देवापिस्तपः[2] प्रतिपेदे । ततः शंतनो राज्ये द्वादश वर्षाणि देवो न ववर्ष । तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति । स शंतनुर्देवापिं शिशिक्ष राज्येन । तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति । तस्यैतद्वर्षकामसूक्तम्' (निरु. २. १०) इति ॥

बृहस्पते प्रति मे देवतामिहि मित्रो वा यद्वरुणो वासि पूषा ।
आदित्यैर्वा यद्वसुभिर्मरुत्वान्त्स पर्जन्यं शंतनवे वृषाय ॥ १ ॥

बृहस्पते । प्रति । मे । देवताम् । इहि । मित्रः । वा । यत् । वरुणः । वा । असि । पूषा ।
आदित्यैः । वा । यत् । वसुऽभिः । मरुत्वान् । सः । पर्जन्यम् । शम्ऽतनवे । वृषय ॥ १ ॥

तत्र ब्रह्मत्वे प्रवृत्तो बृहस्पतिमनुधावति । हे vबृहस्पते vमे मम वृष्टयर्थं[3] प्रति vदेवतां vप्रति vइहि प्रतिगच्छ । यष्टव्या देवताः प्रतिगच्छ । यदि त्वं vमित्रो vवा vअसि अथवा[4] vवरुणः असि vयद्वा vपूषा असि अथवा[5] vआदित्यैः द्वादशादित्यैरुरुणादिभिः vवसुभिः वासकैरष्टवसुभिर्रुद्रादिभिः सह vमरुत्वान् । मरुतो देवाः । तद्वानसि । vसः त्वं vपर्जन्यं तर्पयितारं मेघं vशंतनवे राज्ञे vवृषाय वर्षय । 'छन्दसि शायजपि' इति व्यत्ययेन शपोऽपि शायजादेशः ॥

---

१. ग-त-म—ओषधीनामन्येषां । २. ग-त१.२.३.६.८-म४.५.८—स देवापिस्तपः । ३. त१.२.३.६.७.८-म१.२.४.८—वृष्ट्यर्थं । ४. त१.२.३.६.७—वा अथवा; त४.५—वा यद्वा । ५. ग४—वा अथवा ।

आ देवो दूतो अजिरश्चिकित्वान् त्वद्देवापे अभि मामगच्छत् ।
प्रतीचीनः प्रति मामा ववृत्स्व दधामि ते द्युमतीं वाचमासन् ॥ २ ॥

आ । देवः । दूतः । अजिरः । चिकित्वान् । त्वत् । देवऽआपे । अभि । माम् । अगच्छत् । प्रतीचीनः । प्रति । माम् । आ । ववृत्स्व । दधामि । ते । द्युऽमतीम् । वाचम् । आसन् ॥२॥

[v]देवः क्रिमित् [v]दूतः [v]अजिरः गमनशीलः [v]चिकित्वान् चेतनावान् हे [v]देवापे [v]त्वत् त्वत्तः सकाशात् त्वया प्रेषितः सन् [v]माम् [v]अभि [v]आ [v]अगच्छत् अभ्यागच्छतु । हे बृहस्पते [v]प्रतीचीनः अस्मदभिमुखः [v]मां [v]प्रति [v]आ [v]ववृत्स्व मां प्रत्यागच्छ । [v]ते तुभ्यं त्वदर्थं [v]द्युमतीं दीप्तियुक्तां [v]वाचं स्तुतिरूपां [v]दधामि[1] [v]आसन् आस्येऽस्मदीये ॥

अस्मे धेहि द्युमतीं वाचमासन् बृहस्पते अनमीवामिषिराम् ।
यया वृष्टिं शंतनवे वनाव दिवो द्रप्सो मधुमाँ आ विवेश ॥ ३ ॥

अस्मे इति । धेहि । द्युऽमतीम् । वाचम् । आसन् । बृहस्पते । अनमीवाम् । इषिराम् । यया । वृष्टिम् । शम्ऽतनवे । वनाव । दिवः । द्रप्सः । मधुऽमान् । आ । विवेश ॥ ३ ॥

हे [v]बृहस्पते त्वम् [v]अस्मे अस्मासु [v]द्युमतीं दीप्तिमतीं [v]वाचं स्तोत्रात्मिकाम् [v]आसन् आस्येऽस्मदीये [v]धेहि स्थापय । कीदृशीं वाचम् । [v]अनमीवाम् अमीवारहिताम् । वाचोऽमीवा नाम गद्गदादिदोषः । तथा [v]इषिरां गमनशीलाम् । [v]यया वाचा स्तुत्यात्मिकया देवानिष्ट्वा [v]शंतनवे वृष्टिकामाय [v]वनाव संभजेवहि [v]वृष्टिं त्वं चाहं च [v]दिवः द्युलोकात् । त्वयाधिष्ठितः [v]द्रप्सः उदकस्यन्दः [v]मधुमान् माधुर्योपेतः [v]आ [v]विवेश आविशति । तां वाचमिति समन्वयः ॥

आ नो द्रप्सा मधुमन्तो विशन्त्विन्द्रं देवाधिरथं सहस्रम् ।
नि षीद होत्रमृतुथा यजस्व देवान् देवापे हविषा सपर्य ॥ ४ ॥

आ । नः । द्रप्साः । मधुऽमन्तः । विशन्तु । इन्द्रं । देहि । अधिऽरथम् । सहस्रम् । नि । सीद । होत्रम् । ऋतुऽथा । यजस्व । देवान् । देवऽआपे । हविषा । सपर्य ॥ ४ ॥

[v]नः अस्मान् [v]द्रप्साः वृष्टिसंस्थाथाः [v]मधुमन्तः माधुर्योपेताः [v]आ [v]विशन्तु । हे [v]इन्द्र परमेश्वर बृहस्पते [v]अधिरथं रथस्याध्युपरि वर्तमानं [v]सहस्रं सहस्रसंख्याकं धनं [v]देहि[2] धेहि । यद्वा । रथमधिकं यस्य सहस्रस्य तादृशं गोसहस्रम् । हे [v]देवापे [v]नि [v]षीद [v]होत्रम् । आत्विज्ये निषीद । निषण्णश्च त्वम् [v]ऋतुथा काले काले [v]यजस्व यष्टव्यान् [v]देवान् स्तुत्या [v]हविषा च [v]सपर्य परिचर ॥

आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान् ।
स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि ॥ ५ ॥

आर्ष्टिषेणः । होत्रम् । ऋषिः । निऽसीदन् । देवऽआपिः । देवऽसुमतिम् । चिकित्वान् । सः । उत्ऽतरस्मात् । अधरम् । समुद्रम् । अपः । दिव्याः । असृजत् । वर्ष्याः । अभि ॥ ५ ॥

---

१. ग-त४.५-दधामि धारयामि । २. त-भ-'देहि' नास्ति ।

vआर्ष्टिषेणः ऋष्टिषेणस्य पुत्रः vदेवापिः vऋषिः vदेवसुमतिं देवानां कल्याणीं मतिं स्तुतिं vचिकित्वान् जानन् vहोत्रं होतृकर्म कर्तुं vनिषीदन् निषण्णो भवति। vस vउत्तरस्मात् उपरि वर्तमानादन्तरिक्षाख्यात् समुद्रात् vअधरम् अधो वर्तमानं पार्थिवं vसमुद्रम् vअभि vदिव्याः दिवि भवाः vवर्ष्याः वर्षभवाः vअपः vअसृजत् सृजतु। अत्र 'आर्ष्टिषेण ऋष्टिषेणस्य पुत्रः' (निरु. २. ११) इत्यादि निरुक्तं द्रष्टव्यम्॥

अस्मिन्त्समुद्रे अध्युत्तरस्मिन्नापो देवेभिर्निवृता अतिष्ठन्।
ता अद्रवन्नार्ष्टिषेणेन सृष्टा देवापिना प्रेषिता मृक्षिणीषु॥ ६॥

अस्मिन्। समुद्रे। अधि। उत्ऽतरस्मिन्। आपः। देवेभिः। निऽवृताः। अतिष्ठन्। ताः। अद्रवन्। आर्ष्टिषेणेन। सृष्टाः। देवऽआपिना। प्रऽईषिताः। मृक्षिणीषु॥ ६॥

vअस्मिन् पार्थिवे vसमुद्रे पूरणीये सति। vअधि इति सप्तम्यर्थानुवादी। vउत्तरस्मिन् समुद्रे अन्तरिक्षाख्ये vआपः उदकानि vदेवेभिः द्योतमानैः vनिवृताः निरुद्धाः vअतिष्ठन्। vताः आपः vआर्ष्टिषेणेन ऋष्टिषेणस्य पुत्रेण vदेवापिना vसृष्टाः vप्रेषिताः प्रकर्षेणेच्छां प्राप्ताः काङ्क्षिताः vमृक्षिणीषु सृष्टवतीषु परिमृष्टासु स्थलीषु vअद्रवन् स्रवन्ति॥ ॥ १२॥

यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत्।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत्॥ ७॥

यत्। देवऽआपिः। शम्ऽतनवे। पुरःऽहितः। होत्राय। वृतः। कृपयन्। अदीधेत्। देवऽश्रुतम्। वृष्टिऽवनिम्। रराणः। बृहस्पतिः। वाचम्। अस्मै। अयच्छत्॥ ७॥

vयत् यदा vदेवापिः आर्ष्टिषेणः vशंतनवे स्वभ्रात्रे कौरव्याय vपुरोहितः सन् vहोत्राय होत्रार्थं vवृतः सन् vदेवश्रुतम्। देवा एनं शृण्वन्तीति देवश्रुत्। तं तथा vवृष्टिवनिं वृष्टियाचिनं बृहस्पतिम् vअदीधेत् अन्वध्यायत् स च vरराणः रममाणः vबृहस्पतिः देवः vअस्मै देवापये vवाचम् vअयच्छत्॥

यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे।
विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम्॥ ८॥

यम्। त्वा। देवऽआपिः। शुशुचानः। अग्ने। आर्ष्टिषेणः। मनुष्यः। सम्ऽईधे। विश्वेभिः। देवैः। अनुऽमद्यमानः। प्र। पर्जन्यम्। ईरय। वृष्टिऽमन्तम्॥ ८॥

हे vअग्ने vयं vत्वा त्वां vशुशुचानः स्तोत्रेण ज्वलन् vमनुष्यः vआर्ष्टिषेणः vदेवापिः vसमीधे सम्यग्दीपयति स त्वं vविश्वेभिः सर्वैः vदेवैः vअनुमद्यमानः अनुमाद्यमानः[1] सन् vपर्जन्यं मेघं vवृष्टिमन्तं वर्षणवन्तं vप्र vईरय गमय॥

त्वां पूर्व ऋषयो गीर्भिरायन् त्वामध्वरेषु पुरुहूत विश्वे।
सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि॥ ९॥

१. ग-तथ.५-भ-अनुमोद्यमानः।

त्वाम् । पूर्वे । ऋषयः । गीःऽभिः । आयन् । त्वाम् । अध्वरेषु । पुरुऽहूत । विश्वे ।
सहस्राणि । अधिऽरथानि । अस्मे इति । आ । नः । यज्ञम् । रोहित्ऽअश्व । उप । याहि ॥९॥

हे अग्ने [v]त्वां [v]पूर्वे [v]ऋषयः [v]गीर्भिः स्तुतिभिः [v]आयन् आगच्छन् । तथा हे [v]पुरुहूत बहुभिराहूताग्ने [v]विश्वे सर्वेऽपीदानींतना यजमानाः [v]अध्वरेषु यज्ञेषु स्तुतिभिः गच्छन्तीति[1] शेषः । किंच[2] [v]सहस्राणि सहस्रसंख्यानि गोयूथानि [v]अधिरथानि रथाधिकानि [v]अस्मे* अस्माकं शंतनुना दक्षिणात्वेन संकल्पितानि भवन्विति शेषः[2] । हे [v]रोहिदश्व [v]नो [v]यज्ञम् [v]उप [v]याहि उपागच्छ ॥

एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा ।
तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि ॥ १० ॥

एतानि । अग्ने । नवतिः । नव । त्वे इति । आऽहुतानि । अधिऽरथा । सहस्रा ।
तेभिः । वर्धस्व । तन्वः । शूर । पूर्वीः । दिवः । नः । वृष्टिम् । इषितः । रिरीहि ॥ १० ॥

हे [v]अग्ने गवां [v]नवतिः [v]नव च तथा [v]एतानि अधिरथानि [v]सहस्रा सहस्राणि च रथाधिकानि गवां सहस्राणि च [v]त्वे त्वयि [v]आहुतानि त्वयि प्रीणयितव्ये सत्याहुतानि । यद्वा । त्वे त्वयि आहुतानि[3] समर्पितानीत्यर्थः । [v]तेभिः तैः प्रचैः [v]पूर्वीः बह्वीः [v]तन्वः तनूः युष्मदीयाः [v]वर्धस्व वर्धय । [v]नः अस्मदर्थं [v]दिवः द्युलोकात् [v]वृष्टिम् [v]इषितः प्रार्थितः सन् [v]रिरीहि पूरय ॥

एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इन्द्राय भागम् ।
विद्वान् पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि ॥ ११ ॥

एतानि । अग्ने । नवतिम् । सहस्रा । सम् । प्र । यच्छ । वृष्णे । इन्द्राय । भागम् ।
विद्वान् । पथः । ऋतुऽशः । देवऽयानान् । अपि । औलानम् । दिवि । देवेषु । धेहि ॥ ११ ॥

हे [v]अग्ने गवाम् [v]एतानि [v]नवतिं [v]सहस्रा सहस्राणि च [v]वृष्णे वर्षित्रे [v]इन्द्राय [v]भागं [v]सं [v]प्र [v]यच्छ । तत्प्रीत्यर्थमृत्विग्भ्यो देहि । किंच [v]देवयानान् [v]पथः देवयानान् मार्गान् [v]विद्वान् त्वम् [v]ऋतुशः काले काले [v]औलानम् [v]अपि कुरुकुलजातमपि शान्तनवं [v]देवेषु मध्ये [v]धेहि निधेहि स्थापय ॥

अग्ने बाधस्व वि मृधो वि दुर्गहापामीवामप रक्षाँसि सेध ।
अस्मात्समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह ॥ १२ ॥

अग्ने । बाधस्व । वि । मृधः । वि । दुःऽगहा । अप । अमीवाम् । अप । रक्षाँसि । सेध ।
अस्मात् । समुद्रात् । बृहतः । दिवः । नः । अपाम् । भूमानम् । उप । नः । सृज । इह ॥ १२ ॥

हे [v]अग्ने[4] [v]दुर्गहा दुर्गहाणि दुःखेन गाहितव्यानि शत्रुपुराणि [v]वि [v]बाधस्व । तथा [v]अमीवां रोगम् [v]अप [v]सेध । तथा [v]रक्षांसि [v]अप सेध अपवारय । [v]अस्मात् [v]समुद्रात् समुद्रवणसाधनात्[5]

---

१. ग–स्तुवंतीति; त-भ– यच्छंतीति । २. ग–स त्वमधिरथानि सहस्राणि रथोपरि वर्तमानानि धनानि सहस्रसंख्याकानि अस्मभ्यं यच्छेति शेषः । * त-भ–'अस्मे' नास्ति । ३. ग१.२–आहुतानि आहूतानि; ग४–आहुतावाहुतानि; त२–आहुतानि आहतानि; त६.८-भ१.४.७–आहुतानि आहुतानि । ४. ग१.२–अग्ने मृधः शत्रून् विबाधस्व तथा । ५. ग४–समुद्रतरणसाधनात्; त१.२.३.७-भ१.३.४.८–समुद्रचरणसाधनात् ।

vबृहतः महतः vदिवः द्युलोकादन्तरिक्षाद्वा vअपाम् उदकानां vभूमानं बहुभावं वृष्टिसंस्थापयम् vइह अस्मिँल्लोके vउप vसृज प्रयच्छेत्यर्थः ॥ ॥ १३ ॥

'कं नः' इति द्वादशर्चं नवमं सूक्तं वैखानसस्य वज्रस्यार्षं त्रैष्टुभमैन्द्रम्। तथा चानुक्रान्तं —कं नो वज्रो वैखानसः' इति। गतो विनियोगः ॥

कं नश्चित्रमिषण्यसि चिकित्वान् पृथुग्मानं वाश्रं वावृधध्यै।
कत्तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमर्पिन्वत् ॥ १ ॥

कम्। नः। चित्रम्। इषण्यसि। चिकित्वान्। पृथुऽग्मानम्। वाश्रम्। ववृधध्यै। कत्। तस्य। दातु। शवसः। विऽउष्टौ। तक्षत्। वज्रम्। वृत्रऽतुरम्। अर्पिन्वत् ॥ १ ॥

हे इन्द्र vनः अस्माकं vचित्रं चायनीयं vकं धनविशेषम् vइषण्यसि प्रेरयसि। vचिकित्वान् सर्वथा प्रेरणीयमिति जानन्। कीदृशं तम्। vपृथुग्मानं पृथुभावं प्राप्नुवन्तं vवाश्रं शब्दनीयं स्तुत्यम्। किमर्थम्। vववृधध्यै अस्माकं वर्धनाय। किंच vतस्य इन्द्रस्य vशवसः बलस्य vव्युष्टौ व्युष्टे सति vकत् vदातु किं[1] दानमस्माकं भवतीति शेषः। यं vवज्रं vवृत्रतुरं वृत्रस्यावरकस्य पापस्य हिंसकं त्वष्टा vतक्षत् अतक्षत् साधु संपादितवान् vअपिन्वत् असिञ्चच्च। तस्य शवसो व्युष्टाविति संबन्धः। यद्वा। हे इन्द्र कत्[2] किं तस्य[2] वज्रस्य दानं भवति यं वज्रमिन्द्रार्थं तक्षदिति योजना। 'महां त्वष्टा वज्रमतक्षदायसम्' (ऋ. सं. १०. ४८. ३) इति मन्त्रान्तरम् ॥

स हि द्युता विद्युता वेति साम पृथुं योनिमसुरत्वा ससाद।
स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः ॥ २ ॥

सः। हि। द्युता। विऽद्युता। वेति। साम। पृथुम्। योनिम्। असुरऽत्वा। आ। ससाद। सः। सऽनीळेभिः। प्रऽसहानः। अस्य। भ्रातुः। न। ऋते। सप्तथस्य। मायाः ॥ २ ॥

vस[3] vहि[3] स खल्विन्द्रः vद्युता द्योतमानेन vविद्युता एतन्नामकेनायुधेन युक्तः सन् vसाम स्तोत्रात्मकं यज्ञसंबन्धि vवेति गच्छति। तथा[4] vअसुरत्वा असुरत्वेन बलेन युक्तः सन् vपृथुं विस्तीर्णं vयोनिं फलस्योत्पादकं यज्ञं vससाद संगतो भवति। vसः इन्द्रः vसनीळेभिः। नीडं विमानम्। सविमानैर्मरुद्भिर्युक्तः सन् vप्रसहानः अभिभवन् भवति। तस्य vसप्तथस्य आदित्यानां धात्रादीनां मध्ये सप्तमस्येन्द्रस्य vभ्रातुः भागैर्भक्तव्यस्य vमाया आसुरी vऋते यज्ञे vन संभवतीति शेषः ॥

स वाजं यातापदुष्पदा यन्त्स्वर्षाता परिषदत्सनिष्यन्।
अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत् ॥ ३ ॥

सः। वाजम्। याता। अपदुःऽपदा। यन्। स्वःऽसाता। परि। सदत्। सनिष्यन्। अनर्वा। यत्। शतऽदुरस्य। वेदः। घ्नन्। शिश्नऽदेवान्। अभि। वर्पसा। भूत् ॥ ३ ॥

---

१. त-म-'किं' नास्ति। २. ग४-किं त्वस्य; त१.२.३.६.७.८-म-किं तस्य; त४.५-क त्वस्य। ३. त-म-'स हि' नास्ति। ४. म-यथा।

ᵛवाजं शूरैर्गन्तव्यं संग्रामं ᵛयाता ᵛसः इन्द्रः । 'न लोकाव्यय' इति षष्ठीप्रतिषेधः । ᵛअपदुष्पदा अपगतदुष्टपतनेन ᵛयन् गच्छन् ᵛसनिष्यन् तत्र शत्रुधनानि संभक्तुमिच्छन् ᵛपरि ᵛवदत् परिषीदति । कुत्रेति उच्यते । ᵛस्वर्षाता स्वर्षातौ सर्वलाभोपेते संग्रामे[1]। किंच ᵛअनर्वा युद्धे अप्रत्यृत[2] इन्द्रः ᵛशतदुरस्य शतद्वारस्य शत्रुपुरस्य अन्तर्निहितं ᵛयत् ᵛवेदः धनमस्ति तद्धनं ᵛवर्पसा आवरकेण बलेन ᵛअभि ᵛभूत्[2] अभिभवति । किं कुर्वन् । ᵛशिश्नदेवान् अनह्मचर्यान् शतद्वारेषु शत्रुपुरसंबन्धिषु वर्तमानान् ᵛअन् हिंसन् ॥

स यह्वयो॒ऽवनी॑र्गो॒ष्वर्वा जु॑होति प्रध॒न्या॑सु स॒स्निः ।
अपादो यत्र युज्या॑सो॒ऽरथा द्रो॒ण्यश्वा॑स ईरते घृ॒तं वाः ॥ ४ ॥

सः । यह्व॑यः । अव॑नीः । गोषु॑ । अर्वा॑ । आ । जु॒हो॒ति॒ । प्र॒ऽध॒न्या॑सु । स॒स्निः ।
अपा॑दः । यत्र॑ । युज्या॑सः । अ॒रथाः॑ । द्रो॒णिऽअ॑श्वासः । ईर॑ते । घृ॒तम् । वारि॑ति॒ वाः ॥४॥

ᵛसः इन्द्रः ᵛअर्वा मेघेष्वभिगन्ता ᵛसस्निः सरणकुशलः ᵛप्रधन्यासु प्रकृष्टधननिमित्तासु ᵛगोषु भूमिषु ᵛयह्वयः । महन्नामैतत् । महतीः ᵛअवनीः । अवन्तीत्यवनय आपः । ताः ᵛआ ᵛजुहोति आक्षिपति । ᵛयत्र यासु भूमिषु ᵛअपादः पादरहिताः ᵛअरथाः रथवर्जिताः । पादरहिताः केचन रथेन गच्छन्ति । केनापि शून्याः ᵛद्रोण्यश्वासः द्रुतव्यापनाः ᵛयुज्यासः युज्या इन्द्रस्य सख्यो नद्यः ᵛवाः वारकं ᵛघृतम् उदकम् ᵛईरते प्रेरयन्ति तत्राजुहोति ॥

स रु॒द्रेभि॒रश॑स्तवार ऋ॒म्वा हि॒त्वी गय॑मारे॒अव॒द्य आगा॑त् ।
व॒ज्रस्य॑ मन्ये मिथु॒ना वि॑व॒व्री अन्न॒मभी॑त्यारोदयन्मु॒षाय॑न् ॥ ५ ॥

सः । रु॒द्रेभिः॑ । अश॑स्तऽवारः । ऋ॒म्वा । हि॒त्वी । गय॑म् । आ॒रेऽअ॑वद्यः । आ । अ॒गा॒त् ।
व॒ज्रस्य॑ । म॒न्ये॒ । मि॒थु॒ना॒ । वि॒व॒व्री इति॑ विऽव॒व्री । अन्न॑म् । अ॒भिऽइत्य॑ । अ॒रो॒द॒य॒त् । मु॒षाय॑न् ॥५॥

ᵛसः इन्द्रः ᵛरुद्रेभिः रुद्रपुत्रैर्मरुद्भिः सहितः ᵛआगात् आगच्छतु । कीदृशः[3] । ᵛअशस्तवारः स्तोतृभिरप्रार्थितधनः । स्वयमेव प्रशस्तेत्यर्थः । तथा ᵛऋम्वा महान् ᵛगयं ᵛहित्वी हित्वा स्वस्थानं परित्यज्यागात् आगच्छतु[4] । तत्र संबन्धः । ᵛआरेअवद्यः दूरेगतगर्हः । किंच ᵛवज्रस्य एतन्नामकस्य ऋषेर्मम ᵛमिथुना मिथुनौ मातापितरौ ᵛविवव्री विगतज्वरौ ᵛमन्ये अवगच्छामि । अयं वज्रः ᵛअन्नं शत्रुसंबन्धि ᵛअभीत्य अभिप्राप्य ᵛमुषायन् मुष्णन् ᵛअरोदयत् रोदयति । 'छन्दसि शायजपि' इत्यहापि मुषेः भः शायजादेशः ॥

स इद्दासं॒ तुवी॑रवं॒ पति॒र्दन् ष॒ळक्षं॒ त्रिशी॑र्षाणं॒ दम॒न्यत् ।
अ॒स्य त्रि॒तो न्वोज॑सा वृधा॒नो वि॒पा व॑रा॒हम॑यो॒अग्र॑या हन् ॥ ६ ॥

सः । इत् । दास॑म् । तुवि॑ऽरवम् । पतिः॑ । दन् । ष॒ट्ऽअ॒क्ष॒म् । त्रि॒ऽशी॒र्षा॒णम् । द॒म॒न्य॒त् ।
अ॒स्य । त्रि॒तः । नु । ओज॑सा । वृ॒धा॒नः । वि॒पा । व॒रा॒हम् । अयः॑ऽअग्र॑या । ह॒नि॒ति॒ हन् ॥ ६ ॥

---

१. त-भ-'संग्रामे' नास्ति । २. भ-'अप्रत्यृत ..... भूत्' नास्ति । ३. ग-त-कीदृशः सः । ४. ग-त-भ-आगच्छति ।

vस vइत् स एवेन्द्रः vपतिः सर्वस्य स्वामी vदासम् उपक्षपयितारं vतुवीरवं बहुशब्दं संग्रामे भयंकरं शब्दं कुर्वाणं वृत्रं vवन् वृणवन् vषळक्षम् अक्षिषट्कोपेतं vत्रिशीर्षाणं त्रिशिरस्कं स्वदुः पुत्रं विश्वरूपं vदमन्यत् दभितुं प्रहर्तुमैच्छत्। अवधीदित्यर्थः। यद्वा। दमयतीति दमनः। नन्द्यादित्वात् ल्युः। स इवाचरति। ' उपमानादाचारे ' (पा. सू. ३. १. १०) इति क्यच्यन्यलोपश्छान्दसः। ततो ऋचि ' बहुलं छन्दसि ' इत्यडभावः। किंच vत्रितः एतन्नामा महर्षिः vअस्य इन्द्रस्य vओजसा बलेन vवृधानः वर्धमानः vविपा अङ्गुल्या। कीदृश्या। vअयोअग्रया अयोवत्कठिननखया vवराहं वराहारम्[1] उदकवन्तं मेघं व्यहन्[2] विहतवान्॥ ॥ १४ ॥

स दुह्वणे मनुष ऊर्ध्वसान आ साविषदर्शसानाय शरुम्।
स नृतमो नहुषोऽस्मत्सुजातः पुरोऽभिनदर्हन् दस्युहत्ये ॥ ७ ॥

सः। दुह्वणे। मनुषे। ऊर्ध्वसानः। आ। साविषत्। अर्शसानाय। शरुम्।
सः। नृऽतमः। नहुषः। अस्मत्। सुऽजातः। पुरः। अभिनत्। अर्हन्। दस्युऽहत्ये ॥७॥

vसः इन्द्रः vदुह्वणे द्रुह्वणाय दंडं शत्रुभिर्हातव्याय vमनुषे मनुष्याय घोद्रे स्वभक्ताय vऊर्ध्वसानः। ऊर्ध्वं उच्छ्रितः शौर्यादिभिर्गुणैरधिकः सन्[3] स्यति शत्रूणामन्तं करोतीत्यूर्ध्वसः। स[3] इवाचरन्। ऊर्ध्वसशब्दादाचारार्थे क्विबन्ताच्छानच्[4]। vअर्शसानाय शत्रूणां हिंसित्रे vशरुं हिंसकमायुधम् vआ vसाविषत् आभिमुख्येन प्रसौति यच्छति। यद्वा। दुह्वणे मनुषे द्रोग्धव्याय मनुष्यायार्शसानाय स्वभक्तहिंसित्रे तस्य वधार्थमूर्ध्वसानः सन् शरुम् आ साविषत् वज्रं प्रेरयति। vसः एवेन्द्रः vनहुषः मनुष्यात् नृतमः मनुष्याणां नेतृतमः संग्रामे शूराणां गमयितृतमः। यद्वा। नृतमो नहुषो बन्धकश्च। vअस्मत् अस्मदर्थं vसुजातः सुष्ठु प्रादुर्भूतः vअर्हन् पूज्यः सन् vदस्युहत्ये। दस्यवः उपक्षपयितारः शत्रवः। तेषां हत्यं हननं यस्मिन् तादृशे[5] संग्रामे vपुरः शत्रूणां शरीराणि vअभिनत् भिन्नवान्॥

सो अभ्रियो न यवस उदन्यन् क्षयाय गातुं विदन्नो अस्मे।
उप यत्सीददिन्दुं शरीरैः श्येनोऽयोपाष्टिर्हन्ति दस्यून् ॥ ८ ॥

सः। अभ्रियः। न। यवसे। उदन्यन्। क्षयाय। गातुम्। विदत्। नः। अस्मे इति।
उप। यत्। सीदत्। इन्दुम्। शरीरैः। श्येनः। अयःऽअपाष्टिः। हन्ति। दस्यून् ॥ ८ ॥

vसः इन्द्रः vअभ्रियो vन। न भ्राजन्तेऽपो बिभ्रतीति वाभ्राणि मेघाः। तेषां संघोऽभ्रियः[6]। स इव vयवसे गवादिभक्षणसाधनाय तृणाय vउदन्यन् उदकं दातुमिच्छन्। तथा vक्षयाय गमनाय निवासाय वा vअस्मे अस्माकं vगातुं मार्गं vविदत् लम्भयन्। vनः इति पूरणः। तादृशः सन् vयत् यदा vइन्दुं सोमं vशरीरैः स्वशरीरावयवैरङ्गैः vउप vसीदत् उपगच्छति। यच्छब्दयोगादनिघातः। तदानीं vश्येनः। सादृश्यप्रधानोऽयं[7] निर्देशः। श्येनसदृशः श्येनवच्छंसनीय...मनः

१. त१.२.३.६.७-मु-' वराहारं ' नास्ति; त४.५-वराहाकारं। २ त१.२.३.६.७-व्यवहन्। ३. ग-त-म-' सन् ... ... स ' नास्ति। ४. त-१.२.३.७-क्विबन्तादसानच्; भ-क्विबन्तादस्तानच्। ५. त-स तादृशे; भ-सा तादृशे। ६. त४.५-संबंधी अभ्रियः। ७. त-भ-गातुमस्माकं। ८. ग२-त-भ-सदृश°; ग४-तादृश°।

[v]अधोपार्ष्णिः । अपष्टिर्ष्णिर्यस्य स प्रदेशोऽपार्ष्णिः पार्ष्णिः । अधोमधोऽपार्ष्णिः पार्ष्णिर्यस्य सः । [v]दस्यून् शत्रून् [v]हन्ति हिनस्ति ॥

स घा॒र्धतः॒ शव॑सानेभिरस्य कु॒त्साय॒ शुष्णं॑ कृ॒पणे॒ परा॑दात् ।
अ॒यं क॒विर्म॑नय॒च्छस्य॑मानमत्कं॒ यो अ॑स्य॒ सनि॑तो॒त नॄ॒णाम् ॥ ९ ॥

सः । ह॒ । अ॒र्धतः॑ । शव॑सा । ए॒भिः॒ । अ॒स्य॒ । कु॒त्साय॑ । शुष्ण॑म् । कृ॒पणे॑ । परा॑ । अ॒दा॒त् ।
अ॒यम् । क॒विम् । अ॒न॒य॒त् । शस्य॑मानम् । अ॒त्क॑म् । यः । अ॒स्य॒ । सनि॑ता । उ॒त । नॄ॒णाम् ॥ ९ ॥

[v]सः इन्द्रः [v]ह [1]अर्धतः । महन्नामैतत् । महतोऽपि शत्रून् [v]शवसानेभिः बलमाचरद्भिरायुधैः [v]अस्य अस्यतु । 'असु क्षेपणे' । व्यत्ययेन मध्यमः । [v]कुत्साय [2]एतन्नामकाय [v]कृपणे स्तोत्रे । कृपतिः स्तुतिकर्मा । [v]शुष्णं शोषकमेतन्नामकमसुरं [v]परादात् पराभूय खण्डितवान् [3] । 'कुत्साय शुष्णमशुषं नि बर्हीः' (ऋ. सं. ४. १६. १२) इति मन्त्रान्तरम् । किंच [v]अयम् इन्द्रः [v]कविम् उशनसम् । कविरिति पितृनाम्ना पुत्रस्यापि व्यवहार उपचारात् । [v]शस्यमानं स्तुवन्तम् [v]अनयत् वशं प्रापयत्तस्य विरोधिनम् । यद्वा । कविं भार्गवमेव स्तोतृभिः शस्यमानं स्ववशमनयत् । [v]यः कविः [v]अस्य इन्द्रस्य [v]अत्कं रूपं [4] [v]सनिता संभक्ता भवति । 'न लोकाव्यय०' इति षष्ठीप्रतिषेधः । [v]उत अपि च [v]नॄणां वृष्ट्यादिनेतॄणामिन्द्रानुचराणां मरुतां यः कविः सनिता तमनयदिति ॥

अ॒यं द॒शस्य॑न्न॒र्येभि॑रस्य दु॒स्मो दे॒वेभि॒र्वरु॑णो॒ न मा॒यी ।
अ॒यं क॒नीन॑ ऋ॒तुपा॑ अवे॒द्यमि॑मीत॒ारुं॑ यश्चतु॒ष्पात् ॥ १० ॥

अ॒यम् । द॒शस्य॑न् । न॒र्येभिः॑ । अ॒स्य॒ । दु॒स्मः । दे॒वेभिः॑ । वरु॑णः । न । मा॒यी ।
अ॒यम् । क॒नीन॑ः । ऋ॒तुऽपाः॑ । अ॒वे॒दि॒ । अमि॑मीत । अ॒रारु॑म् । यः । च॒तुः॒ऽपात् ॥ १० ॥

[v]अयम् इन्द्रः [v]दशस्यन् स्तोतृभ्यो धनं प्रयच्छन् । दशस्यतिर्दानकर्मा । [v]नर्येभिः [4] नर्यैर्नृहितैः मरुद्भिः [v]अस्य अस्यति । छान्दसस्तिपो लोपः । यद्वा । व्यत्ययेन लोप्मध्यमः । तथा [v]देवेभिः द्योतमानैः स्वतेजोभिः [v]दस्मः दर्शनीयः [v]वरुणो [v]न वरुण इव । वरुणस्तमोवारक आदित्यो वरुण एव वा । स इव [v]मायी मायावान् [5] । तथा [v]अयं [v]कनीनः कमनीयः [v]ऋतुपाः ऋतौ पाता [v]अवेदि अज्ञायि । तथा [v]अररुम् असुरमेतन्नामानम् [v]अमिमीत अमिनात् । [v]यः अररुः [v]चतुष्पात् पादचतुष्टयोपेतः । 'मीङ् हिंसायाम्' । लङि 'बहुलं छन्दसि' इति विकरणस्य श्लुः ॥

अ॒स्य स्तोमे॑भिरौशि॒ज ऋ॒जिश्वा॒ व्रज॑ं दर॒यद्वृ॑ष॒भेण॒ पिप्रोः॑ ।
सु॒त्वा यद्य॑जतो दी॒दय॒द्द्यौः पुरं॑ इ॒यानो॒ अ॒भि व॒र्पसा॑ भूत् ॥ ११ ॥

अ॒स्य । स्तोमे॑भिः । औ॒शि॒जः । ऋ॒जिश्वा॑ । व्रज॑म् । द॒र॒यत् । वृ॒ष॒भेण॑ । पिप्रोः॑ ।
। यत् । य॒ज॒तः॒ । दी॒दय॑त् । द्यौः । पुरः॑ । इ॒यानः॑ । अ॒भि । व॒र्पसा॑ । भू॒त् ॥ ११ ॥

१. ग१.२-त१.२.३.६.७.८-भ-ह्यर्धतो ह्यर्धन् । २. ग-यः कुत्साय; त-भ१.२.४,८-ह्यवः कुत्साय । ३. ग४-खंडितवान् दो (अवखं)डने लेटि रूपं । ४. ग४-आत्मीयरूपं । ५. ग१.२-त-भ१. २.४.८-स नर्येभिः । ६. ग-त१.२.३.६.७-मु-मायावान् प्रज्ञावान् ।

vअस्य इन्द्रस्य vस्तोमेभिः स्तोत्रैः vऔशिजः उशिजः पुत्रः vऋजिश्वा एतन्नामा vवृषभेण[1] वज्रेण वृषभेण वा युक्तं vव्रजं गोष्ठं vपिप्रोः एतन्नामकस्यासुरस्य संबन्धिनं तेनापहृत्य पाकिर्तं vदरवत् अदारयत्। vयत् यदा vसुत्वा सोमस्य सोता। 'सुषजोर्ङनिप्' इति वनिप्। 'हस्वस्य पिति°' इति तुक्। vयजतः यष्टौशिजः vगीः स्तुतिवाचः vदीदयत् दीपितवान्। तथा यथदा vइयानः[2] गच्छन् vपुरः शत्रुपुराणि। यद्वा। पुरः पुर इव संघीभूतानि पादानि। vअभि vभूत् अभिभवति। केन साधनेन। vवर्पसा। रूपनामैतत्। रूपेणेन्द्रानुगृहीतेन। यदैवमकरोत् तदा व्रजं दरवदिति संबन्धः॥

एवा महो असुर वक्षथाय वज्रकः पट्भिरुप सर्पदिन्द्रम्।
स इयानः करति स्वस्तिमस्मा इषमूर्जं सुक्षितिं विश्वमाभाः॥ १२॥

एव। महः। असुर। वक्षथाय। वज्रकः। पट्ऽभिः। उप। सर्पत्। इन्द्रम्।
सः। इयानः। करति। स्वस्तिम्। अस्मै।
इषम्। ऊर्जम्। सुऽक्षितिम्। विश्वम्। आ। अभारित्यभाः॥ १२॥

अनया स्तुतिमुपसंहृत्याभिमतं वज्रकः प्रार्थयते। हे vअसुर बलवन्निन्द्र त्वाम् vएव एवमुक्तप्रकारेण vमहः महतो हविषः स्तोत्रस्य वा vवक्षथाय बृहनाय महतः स्वर्गादेः प्रापणाय वा vपट्भिः पादैः vउप vसर्पत् उपागमत्। vसः vइयानः उपागम्यमानः[3] सन् vकरति करोतु vस्वस्तिम् अविनाशम् vअस्मै वज्रकाय। तथा vइषम् अन्नम् vऊर्जं रसं vसुक्षितिं सुनिवासं सम्यक् vविश्वं सर्वम् vआभाः आहरतु॥ ॥ १५॥ ॥ ८॥

नवमेऽनुवाके त्रयोदश सूक्तानि। तत्र 'इन्द्र दृह्य' इति द्वादशर्चं प्रथमं सूक्तं वन्दनपुत्रस्य दुवस्योरार्षं वैश्वदेवम्। द्वादशी त्रिष्टुप्। शिष्टा जगत्यः। तथा चानुक्रान्तम्—'इन्द्र दुवस्युर्वान्दनो वैश्वदेवं त्वन्त्या त्रिष्टुप्' इति। गतो विनियोगः॥

इन्द्र दृह्य मघवन्त्वावदिद्भुज इह स्तुतः सुतपा बोधि नो वृधे।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे॥ १॥

इन्द्र। दृह्य। मघऽवन्। त्वाऽवत्। इत्। भुजे। इह। स्तुतः। सुतऽपाः। बोधि। नः। वृधे।
देवेभिः। नः। सविता। प्र। अवतु। श्रुतम्। आ। सर्वऽतातिम्। अदितिम्। वृणीमहे॥ १॥

हे vइन्द्र vमघवन् धनवन् त्वं vत्वावदित् त्वत्सदृशमेव शत्रुबलं vदृह्य मारय। किमर्थम्। vभुजे अस्माकं भोगाय[4]। तदर्थम् vइह अस्मिन् यज्ञे vस्तुतः सन् vसुतपाः सुतस्य अभिषुतस्य सोमस्य पाता vबोधि बुध्यस्व। अभेत्यर्थः। किमर्थम्। vनः अस्माकं vवृधे वर्धनाय। किंच vदेवेभिः देवैः सह vनः अस्माकं vश्रुतं विश्रुतं यज्ञं vसविता सर्वस्य स्वस्वकर्मसु प्रेरको देवः vप्रावतु प्ररक्षतु। किंच vसर्वतातिम्। स्वार्थिकस्तातिल्। सर्वां सर्वात्मिकाम्। यद्वा। सर्वे तायन्तेऽस्यामिति सर्वतातिः। छान्दसो दीर्घः। तादृशीम् vअदितिम् अखण्डनीयां देवमातरम् vआ vवृणीमहे॥

---

१. ग-त१.२.३.६.७-मु-वृषभेण वर्धनेन। २. ग.१.२-त-म-'इयानः' नास्ति। ३. त१.२.३.४.५.६-म१.२.४.७-उपगम्यमानः। ४. त४.५-गोक्षाभाव।

भरा॑य॒ सु भ॑रत भा॒गमृ॒त्वियं॒ प्र वा॒यवे॑ शुचि॒पे क्र॒न्ददि॑ष्टये ।
गौर॑स्य॒ यः पय॑सः पी॒तिमा॒नश॒ आ सर्व॑ता॒तिमदि॑तिं वृणीमहे ॥ २ ॥

भरा॑य । सु । भ॒र॒त॒ । भा॒गम् । ऋ॒त्विय॑म् । प्र । वा॒यवे॑ । शु॒चि॒ऽपे । क्र॒न्दत्ऽइ॑ष्टये ।
गौर॑स्य । यः । पय॑सः । पी॒तिम् । आ॒न॒शे । आ । सर्व॑ऽता॒तिम् । अदि॑तिम् । वृ॒णी॒म॒हे ॥२॥

[v]भराय संग्रामकारिणे सर्वेषां पोषकाय वेन्द्राय [v]ऋत्वियं काले जातं प्राप्तकालं [v]भागं [v]सु [v]भरत सुष्ठु संपादयत हे ऋत्विजः । तथा [v]शुचिपे शुद्धस्य सोमस्य पात्रे [v]क्रन्ददिष्टये शब्दितगमनाय । वायोः शीघ्रगमने हि शब्दः प्रत्यक्षः । तादृशाय [v]वायवे [v]देवाय [v]प्र भरत भागमिति शेषः । [v]यः देवः [v]गौरस्य गौरवर्णस्य पशोः [v]पयसः [v]पीतिं पानम् [v]आनशे प्राप्नोति तस्मै वायवे । शिष्टमुक्तम् ॥

आ नो॑ दे॒वः स॑वि॒ता सा॑विष॒द्वयं ऋजू॑यते यजमानाय सुन्व॒ते ।
यथा॑ दे॒वान् प्र॑ति॒भूषे॑म पाक॒वदा सर्व॑ता॒तिमदि॑तिं वृणीमहे ॥ ३ ॥

आ । नः॒ । दे॒वः । स॒वि॒ता । सा॒वि॒ष॒त् । वय॑ः । ऋजु॑ऽयते । यजमानाय । सु॒न्व॒ते ।
यथा॑ । दे॒वान् । प्र॒ति॒ऽभूषे॑म । पा॒क॒ऽवत् । आ । सर्व॑ऽता॒तिम् । अदि॑तिम् । वृ॒णी॒म॒हे ॥३॥

[v]सविता सर्वस्य प्रेरकः सूर्यः [v]नः अस्माकं संबन्धिने [v]ऋजूयते ऋजुकामाय [v]सुन्वते अभिषवं कुर्वते [v]यजमानाय [v]वयः अन्नं [v]पाकवत् पाकोपेतम् । व्यवहितमप्येतदत्र संबध्यते । [v]आ [v]साविषत् आभिमुख्येन प्रसौति[1] । सौतेर्ण्यन्ताल्लेटि रूपम् । [v]यथा येन प्रकारेण [v]देवान् [v]प्रतिभूषेम प्रतिभवेम । भवतेर्लिङि सिप्शपौ । द्विर्विकरणता । यद्वा । 'भूष अलंकारे' । भौवादिकः । भूषयेमेत्यर्थः ॥

इन्द्रो॑ अ॒स्मे सु॒मना॑ अस्तु वि॒श्वहा॒ राजा॒ सोम॑ः सु॒वि॒तस्याध्ये॑तु नः ।
यथा॑यथा मि॒त्रधि॑तानि॒ संद॒धुरा सर्व॑ता॒तिमदि॑तिं वृणीमहे ॥ ४ ॥

इन्द्रः॑ । अ॒स्मे इति॑ । सु॒ऽम॒नाः॑ । अ॒स्तु॒ । वि॒श्वहा॑ । राजा॑ । सोमः॑ । सु॒वि॒तस्य॑ । अधि॑ । ए॒तु॒ । नः॒ ।
यथा॑ऽयथा । मि॒त्रऽधि॑तानि । सम्ऽद॒धुः॒ । आ । सर्व॑ऽता॒तिम् । अदि॑तिम् । वृ॒णी॒म॒हे॒ ॥ ४ ॥

[v]इन्द्रः देवः [v]अस्मे अस्माकं [v]सुमनाः सुमनस्कः अनुग्रहचेताः [v]अस्तु भवतु । [v]विश्वहा सर्वेष्वप्यहःसु । [v]राजा [v]सोमः च [v]नः अस्माकं [v]सुवितस्य सुवितं स्तोत्रम् [v]अध्येतु अधिगच्छतु । [v]यथायथा येन येन प्रकारेण अस्माकं [v]मित्रधितानि मित्रनिहितानि धनानि [v]संदधुः तथाधिगच्छतु सोमः । तथेन्द्रोऽपि सुमना अस्विति समन्वयः ॥

इन्द्रं॒ उ॒क्थेन॒ शव॑सा पर॒ुर्द॑धे बृह॒स्पते॑ प्रतरी॒तास्यायु॑षः ।
य॒ज्ञो मनु॒ः प्रम॑तिर्नः पि॒ता हि कम॑ा सर्व॑ता॒तिमदि॑तिं वृणीमहे ॥ ५ ॥

इन्द्रः॑ । उ॒क्थेन॑ । शव॑सा । पर॑ुः । द॒धे॒ । बृ॒ह॒स्पते॑ । प्र॒ऽत॒री॒ता । अ॒सि॒ । आयु॑षः ।
य॒ज्ञः । मनु॑ः । प्रऽम॑तिः । नः॒ । पि॒ता । हि । कम्॑ । आ । सर्व॑ऽता॒तिम् । अदि॑तिम् । वृ॒णी॒म॒हे ॥५॥

---

१. त-भ-सु-प्रस्तौति ।

अयम् vइन्द्रः vउक्थेन vशवसा स्तुत्येन बलेन vपरः पूर्वं यज्ञियमस्मदीयं वा vदृळ्हे धारयति। हे vबृहस्पते vआयुषः ममायुष्यस्य vप्रतरीता प्रवर्धयिता vअसि भव। तथा vयज्ञो vमनुः मन्ता vप्रमतिः प्रकृष्टा मतिर्यस्य सः vनः vपिता पालकः सन् vकं सुखं प्रयच्छतु। यद्वा। यज्ञो मन्त्रो बुद्धिश्च प्रत्येकं सुखं प्रयच्छतु ॥

इन्द्रस्य नु सुकृतं दैव्यं सहोऽग्निर्गृहे जरिता मेधिरः कविः ।
यज्ञश्च भूद्विदथे चारुरन्तम आ सर्वतातिमदितिं वृणीमहे ॥ ६ ॥

इन्द्रस्य । नु । सुऽकृतम् । दैव्यम् । सहः । अग्निः । गृहे । जरिता । मेधिरः । कविः ।
यज्ञः । च । भूत् । विदथे । चारुः । अन्तमः । आ । सर्वऽतातिम् । अदितिम् । वृणीमहे ॥ ६ ॥

vदैव्यं देवानां हितं vसहः बलं यदस्ति[1] तत् vइन्द्रस्य* vसुकृतं इन्द्रेण खलु सुष्ठु संपादितम्। यद्वा। यत्सुकृतं दैव्यं सहो बलं[1] मरुत्संज्ञकमस्ति तदिन्द्रस्य नु इन्द्रस्य संबन्धि खलु। अथवा। इन्द्रस्य नु[2] संबन्धि सुकृतं दैव्यं सहो देवार्हं बलम् vअग्निर्गृहे अस्मदीये यागगृहे वर्तत इति शेषः। इन्द्रस्य संबन्धी सुष्ठु संपादितो देवानां बलभूतोऽग्निर्गार्हपत्यः सन् वर्तत इत्यर्थः। स चाग्निः vजरिता देवानां स्तोता vमेधिरः। मेधो यज्ञो हविर्वा। तद्वान् vकविः क्रान्तप्रज्ञः vयज्ञः यष्टव्यः vच vभूत् भवति। कुत्र। vविदथे यज्ञे। किंच सोऽग्निः vचारुः चरणीयः vअन्तमः अस्माकमन्तिकतमश्च ॥ ॥ १६ ॥

न वो गुहा चकृम भूरि दुष्कृतं नाविष्यवे वसवो देवहेळनम् ।
माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ॥ ७ ॥

न । वः । गुहा । चकृम । भूरि । दुःऽकृतम् । न । आविःऽत्यम् । वसवः । देवऽहेळनम् ।
माकिः । नः । देवाः । अनृतस्य । वर्पसः । आ । सर्वऽतातिम् । अदितिम् । वृणीमहे ॥ ७ ॥

हे देवाः[3] vवः युष्माकं vगुहा गुहायां प्रच्छन्ने देशे vभूरि प्रभूतं vदुष्कृतं पापम्। द्रोहमित्यर्थः। vन vचकृम। तथा vआविष्टयम् आविः संभूतं vदेवहेळनं देवानां क्रोधनं तन्निमित्तं द्रोहं vन चकृम हे vवसवः वासका देवाः। किंच हे vदेवाः vनः अस्माकम् vअनृतस्य vवर्पसः रूपस्य प्राप्तिः vमाकिः मा भूत्। इतः परं मानुषं रूपं मा भूदित्यर्थः। क्लिष्टमुक्तम् ॥

अपामीवां सविता साविषदप दुर्ष्वरीय इदघं सेधन्त्वद्रयः ।
ग्रावा यत्र मधुषुदुच्यते बृहदा सर्वतातिमदितिं वृणीमहे ॥ ८ ॥

अप । अमीवाम् । सविता । साविषत् । न्यक् । वरीयः । इत् । अप । सेधन्तु । अद्रयः ।
ग्रावा । यत्र । मधुऽसुत् । उच्यते । बृहत् । आ । सर्वऽतातिम् । अदितिम् । वृणीमहे ॥ ८ ॥

vसविता सर्वस्य प्रेरकः सवितृदेवोऽस्माकं संबन्धिनम् vअमीवां रोगम् vअप vसाविषत् अपप्रेरयतु। अपगमयत्वित्यर्थः। तथा vवरीय vइत् उरुतरमपि पापं vन्यक् नीचीनम् vअप vसेध-

---

१. ग-म-'यदस्ति...बलं' नास्ति। * ग४-इंद्रस्य नु। २. ग-त८-म७-मु-नु इंद्रस्य; त१.२.३.७-म१.२.४.८-नु इंद्रस्य सु। ३. त१.२.३.७-म१.२.४.८-देव।

स्वद्रवः पर्वताभिमानिनो[1] देवा[1] अभिषवाश्मानो वा। एतत्सर्वं कुत्र भवतीति चेत् उच्यते। [v]यत्र यस्मिन् प्रदेशे यस्मिन् यागे वा मधुरस्य[2] सोमस्य सोता [v]प्रावा [v]बृहत् प्रवृद्धम् [v]उच्यते स्तूयते तत्र ॥

ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि विश्वा द्वेषाँसि सनुतर्युयोत ।
स नो देवः सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे ॥ ९ ॥

ऊर्ध्वः । ग्रावा । वसवः । अस्तु । सोतरि । विश्वा । द्वेषांसि । सनुतः । युयोत ।
सः । नः । देवः । सविता । पायुः । ईड्यः । आ । सर्वऽतातिम् । अदितिम् । वृणीमहे ॥९॥

हे [v]वसवः देवाः [v]सोतरि सोमाभिषवकर्तरि मयि [v]ग्रावा [v]ऊर्ध्वः उन्नतः [v]अस्तु। तेनोच्छ्रितेन [v]विश्वा [v]द्वेषांसि सर्वानपि द्वेष्टॄन् [v]सनुतः निगूढान् [v]युयोत पृथक्कुरुत। [v]सः [v]सविता [v]देवः [v]नः अस्माकं [v]पायुः पालयिता। 'कृवापाजि०' इत्यादिनोण्[3]। प्रत्ययस्वरः[3]। सः [v]ईड्यः स्तोतव्यश्च ॥

ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ध्वे ।
तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे ॥ १० ॥

ऊर्जम् । गावः । यवसे । पीवः । अत्तन । ऋतस्य । याः । सदने । कोशे । अङ्ध्वे ।
तनूः । एव । तन्वः । अस्तु । भेषजम् । आ । सर्वऽतातिम् । अदितिम् । वृणीमहे ॥ १० ॥

हे [v]गावः आशिरार्थाः यूयं [v]यवसे तृणवति देशे [v]पीवः प्रवृद्धम् [v]ऊर्जं रसम् [v]अत्तन अत्त। [v]याः[4] [v]ऋतस्य यज्ञस्य [v]सदने गृहे [v]कोशे गोष्ठे दोहनस्थाने [v]अङ्ध्वे व्यञ्जयथ ता अत्तन। [v]तनूरेव। जन्ये जनकशब्दः। तनूरेव क्षीरमेव [v]तन्वः सोमरसस्य [v]भेषजम् [v]अस्तु। यद्वा। पृथगेव वाक्यम्। अस्माकं तन्वो भेषजमस्तु। किंच तनूरेव पशुशरीरमेव। पशुना यागे सति स्वर्गस्य संपादयितुं शक्यत्वात् ॥

ऋतुप्रावा जरिता शश्वतामव इन्द्र इद्भद्रा प्रमतिः सुतावताम् ।
पूर्णमूर्वदिव्यं यस्य सिक्त्य आ सर्वतातिमदितिं वृणीमहे ॥ ११ ॥

ऋतुऽप्रावा । जरिता । शश्वताम् । अवः । इन्द्रः । इत् । भद्रा । प्रऽमतिः । सुतऽवताम् ।
पूर्णम् । ऊर्वः । दिव्यम् । यस्य । सिक्त्ये । आ । सर्वऽतातिम् । अदितिम् । वृणीमहे ॥ ११ ॥

[v]ऋतुप्रावा कर्मणां पूरकः। 'प्रा पूरणे'। 'आतो मनिन्०' इत्यादिना वनिप्। [v]जरिता स्तोता। यजमानं साधु सोमः कृत इति स्तौति[5]। यद्वा। [v]शश्वतां सर्वेषां जरयिता [v]इन्द्र [v]इत् इन्द्र एव [v]सुतावतां सोमवतां यजमानानाम् [v]अवः रक्षकः [v]भद्रा भद्रया स्तुत्या [v]प्रमतिः। [v]यस्य इन्द्रस्य [v]सिक्त्ये सेकाय पानाय [v]ऊर्वः उद्धततरं द्रोणकलशं [v]पूर्णं सोमेन पूर्णं भवति स एवावः[6] स एव प्रमतिरिति ॥

---

१. ग-त३-पर्वताभिमानिदेवाः; त१.२.६.७.८-भ-पर्वताभिमानिदेवताः। २. ग-मधुसुत् मधुरस्य। ३. त३.७-सु-इत्यादिना उण्प्रत्ययः। ४. ग-त-भ-या युष्मान्। ५. ग-त-भ-स्तौति अथवा स्तुत्यर्थः। ६. त-भ-एवाश्वः।

चित्रस्ते मानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।
रजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्युः ॥ १२ ॥

चित्रः । ते । भानुः । क्रतुऽप्राः । अभिष्टिः । सन्ति । स्पृधः । जरणिऽप्राः । अधृष्टाः ।
रजिष्ठया । रज्या । पश्वः । आ । गोः । तूतूर्षति । परि । अग्रम् । दुवस्युः ॥ १२ ॥

हे इन्द्र [v]ते [v]भानुः प्रकाशः [v]चित्रः आश्चर्यभूतश्चायनीयो वा । तथा [v]क्रतुप्राः स भानुरस्माकं कर्मणां पूरकः [v]अभिष्टिः अभ्येषणीयः । हे इन्द्र ते [v]जरणिप्राः स्तोतॄणां धनस्य पूरयित्र्यः [v]अधृष्टाः अन्यैरप्रधृष्याः [v]स्पृधः स्पर्धाः [v]सन्ति । यस्मादेवं तस्मात् [v]रजिष्ठया ऋजुतमया [v]रज्या रज्ज्वा [v]गोः [v]पश्वः पशोः [v]अग्रं [v]दुवस्युः परिचरणमिच्छन्नेतन्नामर्षिः [v]परि [v]तूतूर्षति अभित्वरयति ॥ ॥ १७ ॥

'उद्बुध्यध्वम्' इति द्वादशर्चं द्वितीयं सूक्तं सोमपुत्रस्य बुधस्यार्षम् । 'आ वो धियम्' इति नवमी 'कपृक्षरः' इत्यन्त्या च द्वे जगत्यौ । चतुर्थीषष्ठ्यौ गायत्र्यौ 'निराहावान्' इति पञ्चमी बृहती । शिष्टास्त्रिष्टुभः । विश्वे देवा देवता । ऋत्विक्स्तुतिरूपोऽर्थो वा देवता । तथा चानुक्रान्तम्— 'उद्बुध्यध्वं बुधः सौम्य ऋत्विक्स्तुतिर्वा नवम्यन्त्ये जगत्यौ गायत्र्योर्मध्ये पञ्चमी बृहती' इति । गतः सूक्तविनियोगः ॥

उद्बुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः ।
दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः ॥ १ ॥

उत् । बुध्यध्वम् । सऽमनसः । सखायः । सम् । अग्निम् । इन्ध्वम् । बहवः । सऽनीळाः ।
दधिऽक्राम् । अग्निम् । उषसम् । च । देवीम् । इन्द्रऽवतः । अवसे । नि । ह्वये । वः ॥ १ ॥

अग्निं चेध्यमाना ऋत्विजो वदन्ति । हे [v]सखायः सखिभूता ऋत्विजः [v]समनसः समानमनस्काः परस्परमद्रोग्धारः । अन्योन्यं कर्मानुकूला इत्यर्थः । तादृशा यूयम् [v]उत् उत्कृष्टं [v]बुध्यध्वं जानीध्वम् । उत्तरत्र युष्माकं कर्तव्यमेवोपदिशति । तथा [v]अग्निं [v]सम् [v]इन्ध्वं सम्यग्दीपयध्वम् । 'णिद्न्धी दीप्तौ' । रौधादिकः । छोटि 'असोरल्लोपः' इत्यल्लोपः । [v]बहवः अनेके [v]सनीळाः समाननिवासा एकस्यामेव शालायां निवसन्तः । अहं च [v]दधिक्राम् एतन्नामिकां देवताम् [v]अग्निमुषसं [v]च [v]देवीम् एतांश्चान् देवान् [v]इन्द्रावतः इन्द्रेण युक्तान् [v]वः युष्मान् [v]अवसे अस्माकं रक्षणाय [v]नि नितरां [v]ह्वये आह्वयामि ॥

मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।
इष्कृणुध्वमायुधार कृणुध्वं प्राञ्चं यज्ञं प्र णयता सखायः ॥ २ ॥

मन्द्राः । कृणुध्वम् । धियः । आ । तनुध्वम् । नावम् । अरित्रऽपरणीम् । कृणुध्वम् ।
इष्कृणुध्वम् । आयुधा । अरम् । कृणुध्वम् । प्राञ्चम् । यज्ञम् । प्र । नयत । सखायः ॥ २ ॥

[v]मन्द्रा मन्द्राणि मदकराणि स्तोत्राणि [v]कृणुध्वं कुरुध्वं हे सखायः । 'कृवि हिंसाकरणयोः'[1] । 'घिन्विकृण्व्योरच्' इत्युप्रत्ययः । अकारश्चान्तादेशः । यद्वा करोतेर्व्यत्ययेन श्नुः । तथा [v]धियः

१. त-सु-हिंसाकरणयोश्च ।

कर्माणि चयनप्रदेशकर्षणादीनि vआ vतनुध्वं विस्तारयत। तथा vअरित्रपरणीं कर्षणादिरूपेणारित्रेण पारयितव्यां vनावं चयनार्थां vकृणुध्वं कुरुध्वम्। तथा vआयुधा आयुधानि सीरयुगादीनि vअरम् अलं vकृणुध्वम्। हे vसखायः ऋत्विजः vप्राञ्चं प्रागञ्चनं vयज्ञं यष्टव्यमग्निं vप्र vणयत प्रकर्षेण नयत। आदौ कर्षणं प्राञ्चं कुरुतेत्यर्थः॥

युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम्।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात्॥ ३॥

युनक्त। सीरा। वि। युगा। तनुध्वम्। कृते। योनौ। वपत। इह। बीजम्।
गिरा। च। श्रुष्टिः। सऽभराः। असत्। नः। नेदीयः। इत्। सृण्यः। पक्वम्। आ। इयात्॥३॥

हे सखायो यूयं vसीरा सीराणि vयुनक्त युक्ष्वमनड्वद्भिः सह। युजेर्लोटि ' तसनसनथनाश्च ' इति तबादेशः[1]। अत एव अङ्गित्वात् "असोरल्लोपः" इत्यल्लोपाभावः। तदर्थं vयुगा युगानि vवि vतनुध्वं विस्तारयध्वम्। vकृते च vयोनौ vइह सीतायां vबीजं ग्राम्यमारण्यं च vवपत निधत्त। तिलमाषव्रीह्यादिकं ग्राम्यसप्तकं वेणुश्यामाकनीवारादिकमारण्यबीजसप्तकं च कृष्टाकृष्टयोर्निवपतेत्यर्थः। ' सप्त ग्राम्याः कृष्टे सप्तारण्या अकृष्टे ' इत्यापस्तम्बः। तथा vनः अस्माकं vगिरा स्तुत्या प्रशस्त्या सहास्माकं vश्रुष्टिः अन्नं vसभराः सभरम् vअसत् भवति भवतु। तथा vनेदीय vइत् अन्तिकमेव[2] vसृण्यः। सृणिरङ्कुशः। अङ्कुशवद्वक्रो लवित्रः। vपक्वं स्तम्बम् vएयात् आभिमुख्येन गच्छतु[3]। श्रुष्टिः सभरा असत् सृण्यः पक्वमेयादिति चशब्दानुवृत्तेः ' चवायोगे प्रथमा ' इति प्रथमस्य निघाताभावः॥

सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक्। धीरा देवेषु सुम्नया॥ ४॥

सीरा। युञ्जन्ति। कवयः। युगा। वि। तन्वते। पृथक्। धीराः। देवेषु। सुम्नऽया॥ ४॥

vकवयः मेधाविन ऋत्विजः vसीरा[4] सीराणि कर्षणसाधनानि vयुञ्जन्ति योजयन्ति। vयुगा युगान्यपि vपृथक् परस्परं vवि vतन्वते भिन्नप्रदेशानि[5] कुर्वन्ति। कीदृशाः कवयः। vदेवेषु विषये vधीराः धीमन्तः। किमर्थम्। vसुम्नया। सुम्नमिति सुखनाम। सुखेच्छया। सुम्नशब्दात् क्यजन्ताद्भावे ' अ प्रत्ययात् ' इत्यकारप्रत्ययः। ' सुपां सुलुक्° ' इति तृतीयाया आकारः। अथवा धीरा धीमन्तो देवेषु सुम्नया सुम्नेन। देवेषु सुखं भूयादिति। ' सुपां सुलुक्° ' इति विभक्तेर्याजादेशः॥

निराहावान् कृणोतन सं वरत्रा दधातन।
सिञ्चामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम्॥ ५॥

निः। आऽहावान्। कृणोतन। सम्। वरत्राः। दधातन।
सिञ्चामहै। अवतम्। उद्रिणम्। वयम्। सुऽसेकम्। अनुपऽक्षितम्॥ ५॥

हे सखायः vआहावान्। आहूयन्ते पानार्थं गावोऽत्रेत्याहावा निपानानि। अत्रौचित्यादग्निचयन-प्रदेशकर्षणार्थगोपानसाधनद्रुममयपानपात्राण्युच्यन्ते। तानाहावान् vनिः vकृणोतन निष्कुरुत। आह्वयतेः ' निपानमाहावः ' (पा. सू. ३. ३. ७४) इति निपातितः। थाथादिस्वरः। कृणोतन।

---

१. त-भ-तनवादेशः। २. ग-त१.२.३.६.७.८-भ-मु-अंतिक एव; त४.५-अंतरिक्ष एव। ३. ग१. २-त-भ-मु-गच्छति; ग४-गच्छत। ४. त-सुसीराः। ५. त-भ-भिन्नप्रदेशान्।

'तत्सप्' इत्यादिना तप्। पित्त्वेनाङित्त्वाद्गुणः[1]। 'आभ्यस्तयोरातः' इत्याकारलोपः। किमर्थमाहावकरणं वरत्रस्थापनं[2] चेति। अत्रोच्यते। ᵛवयम् ᵛअवतम् अवटं ᵛसिञ्चामहै। कीदृशमवटम्। ᵛउद्रिणम् उद्गावन्तं ᵛसुषेकं सुष्ठु सेकुं शक्यम् ᵛअनुपक्षितम् अनुपक्षीणं कदाचिदप्युदकोपक्षयरहितम्॥

इष्कृताहावमवतं सुवरत्रं सुषेचनम्। उद्रिणं सिञ्चे अक्षितम् ॥ ६ ॥

इष्कृतऽआहावम्। अवतम्। सुऽवरत्रम्। सुऽसेचनम्। उद्रिणम्। सिञ्चे। अक्षितम् ॥ ६ ॥

ᵛइष्कृताहावं संस्कृताहावं ᵛअवतम् अवटं द्रोणं ᵛसिञ्चे सेचयामि। पुनः कीदृशमवतम्। ᵛसुवरत्रं शोभनवरत्रोपेतं ᵛसुषेचनं शोभनोदकसेकोपेतम् ᵛउद्रिणम् उद्गावन्तम् ᵛअक्षितम् अक्षीणम्॥१८॥

प्रीणीताश्वान् हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वम्।
द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम् ॥ ७ ॥

प्रीणीत। अश्वान्। हितम्। जयाथ। स्वस्तिऽवाहम्। रथम्। इत्। कृणुध्वम्।
द्रोणऽआहावम्। अवतम्। अश्मऽचक्रम्। अंसत्रऽकोशम्। सिञ्चत। नृऽपानम् ॥ ७ ॥

हे ऋत्विजो यूयम् ᵛअश्वान् व्यापनशीलान् बलीवर्दान् ᵛप्रीणीत उचितघासोदकादिप्रदानेन प्रीणयत। यथा क्षेत्रकर्षणाय प्रभवन्ति तथा कुरुतेत्यर्थः। तथा कृत्वा ᵛहितं चयनायोचितं कर्षणं ᵛजयाथ जयथ संपादयथ। तथा ᵛरथं चयनाख्यं हलाख्यं वा ᵛस्वस्तिवाहम् ᵛइत् सुखस्य वाहकमेव ᵛकृणुध्वं कुरुध्वम्। तदर्थं ᵛद्रोणाहावम्। आह्वयन्त्यत्र पानार्थं बलीवर्दानित्याहावो जलाधारः पात्रविशेषः। स च द्रोणमयो द्रुममय आहावो यस्य तादृशम् ᵛअवतम् अवटवच्छिद्रभूतम् ᵛअश्मचक्रं व्यासक्रमणमश्ममयचक्रं वा ᵛअंसत्रकोशम् अंसत्रं कवचं यथा कायं रक्षति तद्वदुदकस्य कोशं[3] कोशस्थानीयं ᵛनृपाणं नृणां कर्मनेतॄणां पानयोग्यमीदृशमवतं ᵛसिञ्चत हे ऋत्विजः। एवमृत्विक्स्तुतिरिति[4] पक्षे[5]। सूक्तस्य वैश्वदेवपक्ष एवं योजना। प्रीणीत प्रीणयताश्वान्। स्नानपानयोग्यान्। संग्रामयोग्यान् कुरुतेत्यर्थः। हितं जयाथ। हितमिति क्रियाविशेषणम्। कथं जयथ। बन्धुसुहृद्गणो यथा हितं भवति तथा जयथ संग्रामम्। स्वस्तिवाहम्। स्वस्तीत्यविनाशनाम[6]। अविनाशवाहनं रथमिद्रथं च कृणुध्वम्[7]। इदिति चार्थे। अश्वं रथं च दृढं कृत्वा संग्रामभूमिं गत्वा। द्रोणाहावमित्यादीनि द्वितीयान्तानि कूपाख्यसंग्रामविशेषणानि सिञ्चतेत्यनेन संबध्यन्ते। द्रोणो द्रुममयः स एव रथ आहाव आहावस्थानीयो यस्य संग्रामस्य तम्। अवतम्[8]। कूपनामैतत्। कूपं संग्रामाख्यम्। अश्मचक्रं कूपप्रान्तनिबद्धाश्मसदृशप्रहरणायुधवन्तम्। असनानि वा क्षेपणानि वा चक्राख्यायुधविशेषा यस्मिन् तम्। व्यासचरणवन्तं व्यासक्रमणवन्तं वा। 'चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वा' (निरु.४.२७) इति निरुक्तम्। अंसत्रकोशम्। अंसत्राणि धनूंषि कवचानि च कोशस्थानीयानि यस्मिन् तं सिञ्चत[9]। नृपाणं यस्मिन् योद्धार उदकवत्पीयन्ते मार्यन्ते तम्। ईदृशं[9] कूपसदृशं संग्रामं सिञ्चत हे अस्मदीया योद्धारः। सूक्तस्य वैश्वदेवत्वाद्धे सैनिका विशेषां देवानां प्रसादेन सर्वमेतत्कुरुतेत्यर्थः। एवं 'निराहावान्' इत्यादिषु कूपरूपकव्याजेन संग्रामवर्णनमवगन्तव्यम्॥

---

१. ग४–पित्त्वेनाङित्त्वाद्गुणः। तथा वरत्राणि सं दधातन। लुंगेलबंधनसाधनानि प्रग्रहान् दधातन स्थापयत। यद्वा प्रधनो क्षरणसाधनरूपो वा आहावः। तस्मिन्नाहावे वरत्रान्युदकोन्नयसाधनान्युच्यंते। अत्रापि पूर्वप···प्रदेशः। २. त-म–वरस्थापनं। ३. त-म–'कोशं' नास्ति। ४. त-मु–एवमृत्विक्स्तुतिपक्षे। ५. ग-त–'त्यविनाशिनाम। ६. ग-त–कृणुर्ध्वं कुरुर्ध्वं। ७. त४.५–अवतं अवटं। ८. ग-त-मु– सिंचत उत्सिंचत। ९. ग-त-म-मु–कीदृशं।

व्रजं कृणुध्वं स हि वो नृपाणो वर्मं सीव्यध्वं बहुला पृथूनि ।
पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दंहता तम् ॥ ८ ॥

व्रजम् । कृणुध्वम् । सः । हि । वः । नृऽपानः । वर्मं । सीव्यध्वम् । बहुला । पृथूनि ।
पुरः । कृणुध्वम् । आयसीः । अधृष्टाः । मा । वः । सुस्रोत् । चमसः । दंहत । तम् ॥८॥

हे ऋत्विजः ᵛव्रजं ᵛकृणुध्वं व्रजं गोष्ठं कुरुध्वम् । आशिरदोहार्थं गोस्थानं कुरुत । ᵛस ᵛहि स खलु ᵛवः ᵛनृपाणः नेतॄणां देवानां पातव्यः । देवपानसाधन इति । सांनाय्यरूपेण वाशिररूपेण वा गोः पयआदिकं देवाः पिबन्ति खलु । ᵛवर्म वर्माणि ᵛसीव्यध्वम् । वर्मवत्प्रधानस्योभयत आच्छादकत्वात् प्रयाजादीनि प्राच्यानि प्रतीच्यानि चाङ्गानि वर्माणि । तानि सीव्यध्वं दृलयध्वम् । कुरुध्वमित्यर्थः । कीदृशानि वर्माणि । ᵛबहुला बहुलान्यनेकानि । तानि च ᵛपृथूनि विस्तीर्णानि । तथा ᵛपुरः पुराणि धिष्ण्यादीनि यष्टव्यानां देवानां वा पुरः शरीराणि ᵛआयसीः अयोमयवत्सारभूताः ᵛअधृष्टाः अन्यैः अधृष्याः । पूरणीया ग्रहा वा पुर इत्युच्यन्ते । तानुक्तलक्षणान् कुरुत । ᵛवः युष्मदीयः ᵛचमसः यज्ञाख्यो भक्षणसाधनश्चमस एव वा । चमसपक्षे सामान्येनैकवचनम् । ᵛमा ᵛसुस्रोत् मा स्रवेत् । स्रवतेर्लङि ' बहुलं छन्दसि ' इति शपः श्लुः । ᵛतं ᵛदंहत दृढीकुरुत । यथा विकलो न भवति तथा कुरुत । ' दृह दृहि वृद्धौ ' । भौवादिकः । तस्मालोटि हृदिस्वास्तम् । ऋत्विक्स्तुतिपक्ष एवम् । वैश्वदेवपक्षे । अस्मदीया योद्धारो यूयम्[1] । नरो योद्धारः पिबन्ति प्रत्यर्थिनां प्राणानिति नृपाणः । स तादृशो युष्मदीयः खलु । गोष्ठपक्षे नराणां पानसाधनः स खलु । पातेः ' करणाधिकरणयोश्च ' इति ल्युट् । वर्म वर्माणि कवचानि सीव्यध्वं बहुलानि पृथूनि च यथा भवन्ति तथा । पुरः पुरीः कृणुध्वमायसीरन्यैरधृष्टाश्च । वश्चमसो-ऽन्नसाधनो मा सुस्रोत् मा स्रवेत् । तं दंहतेति । इति देवतानुग्रहलब्धबलो वदति ॥

आ वो धियं यज्ञियां वर्त ऊतये देवीं देवां यजतां यज्ञियामिह ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥ ९ ॥

आ । वः । धियम् । यज्ञियाम् । वर्ते । ऊतये । देवीः । देवान् । यजताम् । यज्ञियाम् । इह ।
सा । नः । दुहीयत् । यवसाऽइव । गत्वी । सहस्रऽधारा । पयसा । मही । गौः ॥ ९ ॥

हे ᵛदेवाः स्तोतार ऋत्विजः ᵛवः युष्माकम् ᵛऊतये ᵛयज्ञियां यज्ञार्हां ᵛधियं बुद्धिम् ᵛआ ᵛवर्ते प्रवर्तये । यद्वा । हे देवा ऋत्विजः वो यज्ञियां धियं युष्माकं कर्तव्यत्वेन संबन्धिनीमस्माकमूतये[2] रक्षणाय आ वर्त । अपि वा देवा एव संबोध्याः । ह देवाः वो युष्माकं धियं बुद्धिमा वर्ते आवर्तयामि । किमर्थम् । ऊतयेऽस्माकं रक्षणाय । कीदृशीं धियम् । ᵛयज्ञियां यज्ञार्हां ᵛदेवीं द्योतमानां ᵛयजतां पूज्याम् । ᵛइह अस्मिन् यागे अस्यां भूमौ वा । एको यज्ञियामिति शब्दः पूरणः । ᵛसा धीः ᵛनः अस्माकं ᵛदुहीयत् दुह्यात् । तत्र दृष्टान्तः । ᵛयवसेव यवसानि भक्षयित्वेव ᵛगत्वी पुनर्गोष्ठं गत्वा । पीत्वीतिवत् । ᵛपयसा ᵛसहस्रधारा ᵛमही महती ᵛगौः यथा दुग्धे तद्वत् ॥

---

१. ग४–यूयं विश्वेषां देवानां आनुकूल्येनैव कुरुतेति सूक्तद्रष्टा यजमानो ब्रूते । भवि व्रजं कृणुध्वं व्रजःसंघात्मकः स···र्मसंग्रामः तं कृणुध्वं । अथवा शत्रुसंघं कृणुध्वं । अवारणं कुरुध्वमित्यर्थः । वो नृपाणः । २. त-भ–संबंधिनाम° ।

ऋ. ४–४३

आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।
परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वहिं युनक्त ॥ १० ॥

आ । तु । सिञ्च । हरिम् । ईम् । द्रोः । उपऽस्थे । वाशीभिः । तक्षत । अश्मन्ऽमयीभिः । परि । स्वजध्वम् । दश । कक्ष्याभिः । उभे इति । धुरौ । प्रति । वहिम् । युनक्त ॥ १० ॥

हे अध्वर्यो त्वम् ᵛईम् एनं ᵛहरिं हरितवर्णं सोमं ᵛद्रोः द्रुमविकारस्य पात्रस्य ᵛउपस्थे उपरि ᵛआ ᵛसिञ्च आसेकं कुरु । ᵛतु इति पूरणः । तदर्थं हे पात्रसंपादिनः ᵛअश्मन्मयीभिः अयःशिलासारभूताभिः ᵛवाशीभिः ᵛतक्षत पात्राणि । नकारोपजनश्छान्दसः । मयटः टित्त्वात् ङीप् । तानि पात्राणि सोमपूर्णानि ᵛदश दशसंख्याकानि ᵛकक्ष्याभिः प्रकारैः पर्यायेण ᵛपरि ᵛस्वजध्वं संस्कुरुध्वम् । आसादयत । यद्वा । वाशीभिरश्मन्मयीभिर्हविर्धानशकटे तक्षत । ते च दश कक्ष्याभिर्दशसंख्याकाभिः रज्जुभिः परि स्वजध्वम् । ᵛउभे ᵛधुरौ युगसंबन्धिन्यौ ᵛप्रति ᵛवह्नी वाहकावनड्वाहौ ᵛयुनक्त[1] । अथवायं मन्त्रश्चयनक्षेत्रकर्षणसाधनहलविषयतया व्याख्येयः ॥

उभे धुरौ वहिरापिब्दमानोऽन्तर्योनेव चरति द्विजानिः ।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ॥ ११ ॥

उभे इति । धुरौ । वहिः । आऽपिब्दमानः । अन्तः । योनाऽइव । चरति । द्विऽजानिः । वनस्पतिम् । वने । आ । अस्थापयध्वम् । नि । सु । दधिध्वम् । अखनन्तः । उत्सम् ॥ ११ ॥

हविर्धानशकटस्य ᵛउभे ᵛधुरौ ᵛआपिब्दमानः आपिशब्दमानः ᵛवहिः हविर्वाहकोऽनड्वान् ᵛयोनौ ᵛअन्तः ᵛइव ᵛद्विजानिः द्विजायाः तयोरन्तः[2] ᵛचरति । तं ᵛवनस्पतिं वनस्पतिविकारं शकटं ᵛवने वनसंबन्धिनि वृक्षे । मेथीभूत इत्यर्थः । तत्र ᵛआस्थापयध्वम् । यद्वा । वने वननीये देश आस्थापयध्वम् । तत्पश्चात्[3] तत्रस्थं सोमं ᵛसु[4] सुष्ठु ᵛनि ᵛदधिध्वं सुखं यथा भवति तथा स्थापयतासन्धाम् । अभिषवप्रदेशे च[5] पश्चात् ᵛउत्सं तद्रसम् ᵛअखनन्तः संपादयतेत्यर्थः । अथवायमपि मन्त्रः कर्षणपरो व्याख्येयः । यस्य लाङ्गलस्योभे धुरावापिब्दमानोऽपिशब्दमानो वहिरनड्वान् अन्तर्योनाविवेत्यादि समानम् । तादृशं वनस्पतिं वनस्पतिविकारं लाङ्गलं वने वननीये वपनार्थं[6] कर्षणप्रदेश आस्थापयध्वम् । सु सुष्ठु सर्वत्र तं लाङ्गलं नि दधिध्वम् । उत्सं सेकसाधनं गर्तं सिक्तं वा प्रदेशमखनन्तः ॥

षष्ठेऽहनि ब्राह्मणाच्छंसिशस्त्रे ' कपृन्नरः ' इत्येषा । ' कपृन्नरो यद्ध प्राचीरजगन्नेति चैते '(आश्व. श्रौ. ८. ३) इति ॥

कपृन्नरः कपृथमुद्धातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये ॥ १२ ॥

कपृत् । नरः । कपृथम् । उत् । दधातन । चोदयत । खुदत । वाजऽसातये । निष्टिग्र्यः । पुत्रम् । आ । च्यवय । ऊतये । इन्द्रम् । सऽबाधः । इह । सोमऽपीतये ॥ १२ ॥

---

१. ग४-त४.५-युनक्त योजयत । २. ग-त-भ-तेषामंतः । ३. ग-त-मु-आस्थापयत पश्चात् । ४. त-भ-' सु ' नास्ति । ५. ग-त-भ-मु-वा । ६. ग-त१.२.६-चयनार्थं ।

हे [v]नरः नेतार ऋत्विजः एष इन्द्रः [v]कपृत्। सुखस्य पूरको यष्टॄणां स्तोतॄणां च। कमिति सुखनाम। तं [v]कपृथं सुखस्य पूरयितारमिन्द्रं [v]चोदयत प्रेरयत [v]खुदत खुर्दत क्रीडयत। 'खुर्द क्रीडायां' भौवादिकः। व्यत्ययेन शः। रेफलोपश्छान्दसः। संपिंष्ट संस्कुरुतेत्यर्थः। किमर्थम्। [v]वाज-सातये अन्नस्य लाभाय। तदेवाह। हे होतः [v]निष्टिग्र्यः [v]पुत्रम्। निर्ष्टिं दितिं स्वसपत्नीं गिरतीति निष्टिग्रीरदितिः। तस्याः पुत्रम् [v]इन्द्रं [v]सबाधः। सह पापैः प्रयासरूपैः कर्मभिर्बाध्यन्त इति सबाध ऋत्विजः। तथाविधा यूयं [v]सोमपीतये तस्य सोमपानाय [v]ऊतये अस्माकं रक्षणाय वा [v]आ [v]व्यवय। व्यत्ययेनैकवचनम्। आव्यावयतेत्यर्थः॥ ॥ १९ ॥

'प्र ते रथम्' इति द्वादशर्चं तृतीयं सूक्तम्। भर्म्यश्वपुत्रो मुद्गल ऋषिः। आद्या तृतीयान्त्या चेति तिस्रो बृहत्यः। शिष्टा नव त्रिष्टुभः। द्रुघणो नाम मुद्गरः। तद्देवत्यमिदमिन्द्रदेवत्यं वा। तथा चानुक्रान्तं—'प्र ते मुद्गलो भार्म्यश्व ऋषभेण द्रुघणेन चाजिं जिगायेति द्रौघणं वाद्या तृतीयान्त्या च बृहत्यः' इति। गतो विनियोगः। अत्राहुः—'मुद्गलस्य हता गावश्चोरैस्त्यक्त्वा जरद्गवम्। स शिष्टं शकटे कृत्वा गत्वैक ऋजुराहवम्। द्रुघणं युयुजेऽभ्यत्र चोरमार्गानुसारकः। द्रुघणं चाग्रतः क्षिप्त्वा चोरेभ्यो जगृहे स्वगाः' इति। तथा निरुक्तेऽपीयं कथा सूचिता—'मुद्गलो भार्म्यश्व ऋषिर्वृषभं च द्रुघणं च युक्त्वा संग्रामे व्यवहृत्याजिं जिगाय' (निरु. ९. २३) इति॥

प्र ते॒ रथं॑ मिथू॒कृ॒त॒मिन्द्रो॑ऽवतु धृष्णु॒या।
अ॒स्मिन्ना॒जौ पु॑रुहूत श्रवा॒य्ये॑ धनभ॒क्षेषु॑ नोऽव॥ १॥

प्र। ते॒। रथ॑म्। मि॒थु॒ऽकृ॒त॒म्। इन्द्रः॑। अ॒व॒तु॒। धृ॒ष्णु॒ऽया।
अ॒स्मिन्। आ॒जौ। पु॒रु॒ऽहू॒त॒। श्र॒वा॒य्ये॑। ध॒न॒ऽभ॒क्षेषु॑। नः॒। अ॒व॥ १॥

हे मुद्गल [v]ते [v]रथं [v]मिथूकृतं मिथःकृतमसहायं कृतम्। अथवा मिथुरिति मिथ्यानाम। अश्वादिभिः शून्यं कृतं [v]धृष्णुया धर्षणशीलः [v]इन्द्रोऽवतु रक्षतु। यद्वा। धृष्णुया धर्षणशीलेन वज्रेण। उभयत्र 'सुपां सुलुक्०' इति सुपो याजादेशः। अथ प्रत्यक्षकृतः। हे [v]पुरुहूत बहुभिराहूतेन्द्र [v]अस्मिन्नाजौ संग्रामेऽपहृतगोभिश्चौरैः कृते संग्रामे। कीदृशे। [v]श्रवाय्ये श्रोतव्ये। विश्रुत इत्यर्थः। 'श्रुदक्षि०' (उ. सू. ३.९६) इत्यादिना आय्यप्रत्ययः। [v]धनभक्षेषु अस्मासु गोरूपधनभजनकामेषु सत्सु। यद्वा। गोरूपधनस्य भक्षकेषु चौरेषु जेतव्येषु सत्सु। [v]नः[1] अस्मान्[1] [v]अव रक्ष॥

उत्स्म॒ वातो॑ वहति॒ वासो॑ अस्या॒ अधि॒रथं॑ यदज॒यत्स॒हस्र॑म्।
र॒थीर॑भून्मुद्ग॒लानी॒ गवि॑ष्टौ॒ भरे॑ कृ॒तं व्यचेदिन्द्रसे॒ना॥ २॥

उत्। स्म॒। वातः॑। व॒ह॒ति॒। वासः॑। अ॒स्याः॒। अधि॑ऽरथम्। यत्। अ॒ज॒य॒त्। स॒हस्र॑म्।
र॒थीः। अ॒भ॒त्। मु॒द्ग॒लानी॑। गोऽइ॑ष्टौ। भरे॑। कृ॒तम्। वि। अ॒चे॒त्। इ॒न्द्र॒ऽसे॒ना॥ २॥

[v]अस्याः 'रथीरभून्मुद्गलानी' इति वक्ष्यमाणत्वादस्य मुद्गलस्य पत्न्याः सारथिभूतायाः [v]वासः अंशुकं [v]वातः वायुः [v]उत् [v]वहति ऊर्ध्वं प्रापयति। श्रमजनितस्वेदापनयाय। अथवा शीघ्ररथधावन-जनितो वायुरंशुकं चालयतीत्यर्थः। कदेति उच्यते। [v]यत् यदा [v]अधिरथम् अधिकं रथमारुह्य [v]सहस्रं सहस्रसंख्याकं गोसंघम् [v]अजयत् तदा। यथा गोसहस्रमजयदस्या इति वा योज्यम्। यद्योगाज्जयतेर्न

---

१. त१.२.३.६.७—नोस्माकं।

निघातः । ᵛगविष्टौ गवामपहतानामेषणे ᵛमुद्गलानी मुद्गलस्य स्त्री ᵛरथीरभूत् सारथिरभवत् । छान्दस आनुक् । ᵛइन्द्रसेना स्तुत्या परितुष्टस्येन्द्रस्य सेना । यद्वा । इन्द्रस्य शत्रूणां दारयितुर्मुद्गलस्य सेनानीरूपा[1] मुद्गलानी । ᵛभरे संग्रामे ᵛकृतं संपादितं गोसंघं ᵛव्यचेत् व्यचिनोत् । शत्रुभ्यः पृथक्कृतवती । चयतेर्लेङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥

अन्तर्यच्छ जिघांसतो वज्रमिन्द्राभिदासतः ।
दासस्य वा मघवन्नार्यस्य वा सनुतर्यवया वधम् ॥ ३ ॥

अन्तः । यच्छ । जिघांसतः । वज्रम् । इन्द्र । अभिऽदासतः ।
दासस्य । वा । मघऽवन् । आर्यस्य । वा । सनुतः । यवय । वधम् ॥ ३ ॥

हे ᵛइन्द्र ᵛजिघांसतः हन्तुमिच्छतः ᵛअभिदासतः अभिद्रुह्यतः शत्रोः ᵛवज्रम् ᵛअन्तर्यच्छ अन्तर्गमय । तदेवाह । हे ᵛमघवन् धनवन्निन्द्र ᵛदासस्य ᵛवा उपक्षीणस्याल्पस्य ᵛआर्यस्य अभिगन्तव्यस्य महतो ᵛवा शत्रोः ᵛवधम् । वज्रनामैतत् । हननसाधनं वज्रं ᵛसनुतः । अन्तर्हितनामैतत् । अन्तर्हितं गूढं प्रयुज्यमानं ᵛयवय पृथक्कुरु ॥

उद्रो हृदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति ।
प्र मुष्कभारः श्रव इच्छमानोऽजिरं बाहू अभरत्सिषासन् ॥ ४ ॥

उद्रः । हृदम् । अपिबत् । जर्हृषाणः । कूटम् । स्म । तृंहत् । अभिऽमातिम् । एति ।
प्र । मुष्कऽभारः । श्रवः । इच्छमानः । अजिरम् । बाहू इति । अभरत् । सिसासन् ॥ ४ ॥

अत्र वृषभः स्तूयते । वृषभः ᵛउद्रः उदकस्य ᵛहृदम् अगाधजलाशयम् ᵛअपिबत् ᵛजर्हृषाणः अत्यन्तं हर्षितः सन् । तथा ᵛकूटं पर्वतशृङ्गं चौरैर्गोपिधानार्थं निहितं ᵛतृंहत् ᵛस्म शृङ्गेण विहिंसितवान् । व्यदारयदित्यर्थः । तथा कृत्वा ᵛअभिमातिमेति शत्रुं गच्छति हन्तुम् । पश्चात् ᵛमुष्कभारः प्रवृद्धमुष्कः । प्रवृद्धस्य वृषभस्य हि मुष्कवृद्धिर्भवति । तथा प्रवृद्धो वृषभः ᵛश्रवः । श्रूयत इति श्रवो यशः । ᵛइच्छमानः इच्छन् ᵛअजिरं गमनशीलं शत्रुं ᵛबाहू बाहुभ्यां बाह्वोर्वा ᵛप्र ᵛअभरत् प्रहृतवान्[2] । यद्वा अजिरमिति क्षिप्रनाम । क्षिप्रं ᵛसिषासन् संभक्तुमिच्छन् बाहू प्राभरत् । प्रसारितवानित्यर्थः ॥

न्यक्रन्दयन्नुपयन्त एनममेहयन् वृषभं मध्य आजेः ।
तेन सूभर्वं शतवत्सहस्रं गवां मुद्गलः प्रधने जिगाय ॥ ५ ॥

नि । अक्रन्दयन् । उपऽयन्तः । एनम् । अमेहयन् । वृषभम् । मध्ये । आजेः ।
तेन । सूभर्वम् । शतऽवत् । सहस्रम् । गवाम् । मुद्गलः । प्रऽधने । जिगाय ॥ ५ ॥

मुद्गल आह । तेनेति तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यम् ᵛएनं वृषभं ᵛन्यक्रन्दयन् नितरां क्रन्दनमकुर्वन् । के । ᵛउपयन्तः समीपे गच्छन्तो नराः । यथा प्रचण्डेन क्रन्दनेन शत्रवो भीताः पलायन्ते तथाकुर्वन् । किम् । ᵛवृषभं वर्षकं सेक्तारम् ᵛआजेः संग्रामस्य ᵛमध्ये ᵛअमेहयन् मूत्रपुरीषोत्सर्ग

१. ग४–सेवारूप; त१.२.३.६.७.८-म१.२.४.८–सेनारूपी; त४.५–सेनारूपा; म७–सेनानीरूपी ।
२. त३.७-म-मु–प्रहतवान् ।

विश्रामार्थं कारितवन्तः । ᵛसूभवम् । भवतिरत्तिकर्मा । शोभनचणकादिभक्षकम् । तादृशो यथा भवति तथा कृत्वेत्यर्थः । यद्वा एतद्दोसहस्रविशेषणम् । ᵛतेन उक्तरूपेण वृषभेण सूभवं सुष्ठु यवसास्वादि ᵛशतवत् शतोपेतं ᵛगवां ᵛसहस्रं ᵛमुद्गलः एतन्नामाहं ᵛप्रधने संग्रामे ᵛजिगाय अजैषम् ॥

कर्कर्दवे वृषभो युक्त आसीदवावचीत्सारथिरस्य केशी ।
दुर्धेर्युक्तस्य द्रवतः सहानस ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् ॥ ६ ॥

कर्कर्दवे । वृषभः । युक्तः । आसीत् । अवावचीत् । सारथिः । अस्य । केशी ।
दुर्धेः । युक्तस्य । द्रवतः । सह । अनसा । ऋच्छन्ति । स्म । निःऽपदः । मुद्गलानीम् ॥ ६ ॥

ᵛकर्कर्दवे हिंसनाय शत्रूणां ᵛवृषभः वर्षिता गौः ᵛयुक्त ᵛआसीत् रथे संबद्धोऽभूत् । ᵛकेशी केशवान् प्रग्रहवान् ᵛअस्य राज्ञः रथस्य वा ᵛसारथिः । मुद्गलानीत्यर्थः । सारथ्यभिप्रायेण केशीति पुँल्लिङ्गता । ᵛअवावचीत् वृषभभयजनकं शत्रुभयजनकं वाक्शोशमकरोत् । अथवा । केशी केशिनी सारथिरस्य । अमुमित्यर्थः । अमुं वृषभं शब्दमकारयत् । ' वच परिभाषणे ' इत्यस्य केवलस्यान्तर्णीत-ण्यर्थस्य यङ्लुगन्तस्य लुङि रूपम् । अथवा । अस्य सारथिः सहायभूतः केशी प्रकृष्टकेशो वृषभोऽ-वावचीत् भृशमशब्दयत् । एवंभूतस्य ᵛदुर्धेः दुर्धरस्य ᵛअनसा ᵛसह ᵛद्रवतः शीघ्रं शत्रुमध्ये रथेन सह धावतो वृषभस्य भयंकरशब्देन ᵛनिष्पदः निर्गच्छन्तो योद्धारः ᵛमुद्गलानीं मुद्गलस्य योषितं सारथिभूतां प्रति ᵛऋच्छन्ति ᵛष्म अगच्छन्नित्यर्थः । ' पाघ्रा° ' इत्यादिना ऋच्छादेशः ॥ ॥ २० ॥

उत प्रधिमुदहन्नस्य विद्वानुपायुनग्वंसगमत्र शिक्षन् ।
इन्द्र उदावत्पतिमघ्न्यानामरेहत पद्याभिः ककुद्मान् ॥ ७ ॥

उत । प्रऽधिम् । उत् । अहन् । अस्य । विद्वान् । उप । अयुनक् । वंसगम् । अत्र । शिक्षन् ।
इन्द्रः । उत् । आवत् । पतिम् । अघ्न्यानाम् । अरेहत । पद्याभिः । ककुत्ऽमान् ॥ ७ ॥

ᵛउत अपि च ᵛविद्वान् स[1] मुद्गलः ᵛअस्य रथस्य ᵛप्रधिम् । प्रधिरक्षच्छिद्रकाष्ठः प्रान्तकाष्ठः । स च रथावयवानामुपलक्षकः । रथावयवम् ᵛउदहन् उद्गमयत् । रथं संननाहेत्यर्थः । तदनन्तरम् ᵛअत्र रथे ᵛवंसगं वननीयगमनं वृषभं ᵛशिक्षन् शिक्षयन् रज्जुषु स्थापयन् ᵛउपायुनक् रथसमीपे युगेऽयोजयत् । युजेर्लङि तिपो हल्ङ्यादिलोपः । एवं सति ᵛइन्द्रः देवः ᵛअघ्न्यानाम् अहन्तव्यानां गवां ᵛपतिम् ᵛउत् उत्कृष्टम् ᵛआवत् रक्षामकरोत् । पश्चात् ᵛककुद्मान् वृषभः ᵛपद्याभिः सरणिभिः ᵛअरेहत वेगेनागमत् । रहिर्गत्यर्थः ॥

शुनमष्ट्वाव्यचरत्कपर्दी वरत्रायां दार्वानह्यमानः ।
नृम्णानि कृण्वन् बहवे जनाय गाः पस्पशानस्तविषीरधत्त ॥ ८ ॥

शुनम् । अष्टाऽवी । अचरत् । कपर्दी । वरत्रायाम् । दारु । आऽनह्यमानः ।
नृम्णानि । कृण्वन् । बहवे । जनाय । गाः । पस्पशानः । तविषीः । अधत्त ॥ ८ ॥

ᵛशुनम् इति सुखनाम । सुखं यथा भवति तथा । ᵛअष्टावी । अष्टा प्रतोदः तद्वान् । छान्दसो विनिः । ᵛकपर्दी कपर्दवान् ᵛअचरत् संचरति । किं कुर्वन् । ᵛवरत्रायां वध्रौ ᵛदारु काष्ठं रथाङ्गभूतम्

---

१. ग-त-भ१.२.४.८-मु-' स ' नास्ति ।

Vआनह्यमानः सर्वतो बध्नन्। पुनः किं कुर्वन्। Vबहवे Vजनाय स्वपुत्रभृत्यादिलक्षणाय Vनृम्णानि धनानि शत्रुसंबन्धीनि सुखानि वा Vकृण्वन्। Vगाः Vपस्पशानः स्पृशन्। 'स्पश बाधनस्पर्शनयोः'। छान्दसो[1] लिटि कानच्। एवं कुर्वन् Vतविषीः बलानि Vअधत्त धत्ते। जयं प्राप्नोतीत्यर्थः॥

इमं तं पश्य वृषभस्य युज्रं काष्ठाया मध्ये दुघणं शयानम्।
येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु॥ ९॥

इमम्। तम्। पश्य। वृषभस्य। युज्रम्। काष्ठायाः। मध्ये। द्रुघनम्। शयानम्। येन। जिगाय। शतऽवत्। सहस्रम्। गवाम्। मुद्गलः। पृतनाज्येषु॥ ९॥

कंचन सखायं सेनादिसहायाभावेन जयविषय उपहासं कुर्वाणं प्रति ब्रवीति। राजा द्रुघणेन वृषभेण चाजिं[2] जिगायेत्युक्तवान्[3]। पूर्वं वृषभो वर्णितः। अत्र द्रुघणो वर्ण्यते। हे सखे Vतम् Vइमं Vद्रुघणं Vपश्य। कीदृशमित्युच्यते। 'युजेरसमासे' (पा. सू. ७. १. ७१) इति नुम्। Vयुज्रम्। युज्यत इति युक् सखा। Vवृषभस्य सखिभूतम्। वृषभो यावन्तमर्थं साधयति तावन्तमेव साधयन्तमित्यर्थः। पुनः कीदृशम्। Vकाष्ठाया Vमध्ये। 'आज्यन्तोऽपि काष्ठोच्यते' (निरु. २.१५) इति निरुक्तम्। आज्यन्तस्य मध्ये। संग्राम इत्यर्थः। तत्र Vशयानं हन्तव्यान् सर्वान् हत्वा सुखेन स्वपन्तं निर्व्यापारत्वेन वर्तमानम्। ईदृशं द्रुममयं घनं पश्येत्यर्थः। Vयेन द्रुघणेन Vशतवत् शतोपेतं Vगवां Vसहस्रं Vपृतनाज्येषु[4] संग्रामेषु[4] Vजिगाय अहमजैषं तमिमं पश्येति समन्वयः। जयतेर्लिट्। 'सन्लिटोर्जेः' इत्यभ्यासादुत्तरस्य कुत्वम्। मिपो णल्॥

आरे अघा को नि ित्था ददर्श यं युज्रन्ति तम्वा स्थापयन्ति।
नास्मै तृणं नोदकमा भरन्त्युत्तरो धुरो वहति प्रदेदिशत्॥ १०॥

आरे। अघा। कः। नु। इत्था। ददर्श। यम्। युज्रन्ति। तम्। ऊँ इति। आ। स्थापयन्ति। न। अस्मै। तृणम्। न। उदकम्। आ। भरन्ति। उत्ऽतरः। धुरः। वहति। प्रऽदेदिशत्॥ १०॥

यः Vआरे समीप एव Vअघा अघानि दुःखानि शत्रुरूपाणि करोति तं Vकः नरः Vनु इदानीम् Vइत्था इत्थं Vददर्श पश्यति। किंच Vयं द्रुघणं Vयुज्रन्ति रथे Vतमु तमेव Vआ Vस्थापयन्ति आरोहयन्तीत्यर्थः[5]। अथवा। यं रथे युज्रन्ति तमेव प्रहरणार्थमा स्थापयन्ति। उभयविधकार्यमेकः करोतीत्यर्थः। किंच Vअस्मै Vतृणं Vन Vआ Vभरन्ति नाहरन्ति। तथा Vउदकं Vन आहरन्ति। 'हृग्रहोर्भः' इति भत्वम्। ईदृशो द्रुघणः Vउत्तरः दक्षिणस्य वृषभस्य स्वयमुत्तरः सन् Vधुरः रथभारस्य रथधुरं Vवहति Vप्रदेदिशत् प्रकर्षेण जयं स्वामिने प्रदिशन् शत्रूणां वा भयं प्रदिशन् वहति। 'दिश अतिसर्जने' इत्यस्माद्यङ्लुगन्ताच्छतरि रूपम्॥

परिवृक्तेव पतिविद्यमानट् पीप्याना कूचक्रेणेव सिञ्चन्।
एवेष्या चिद्रध्या जयेम सुमङ्गलं सिनवदस्तु सातम्॥ ११॥

---

१. ग१.२.त-भ१.४.७-८–छांदसे। २. ग-भ१.४.७.८–वाजिं। ३. ग-त१.२.३.६.७-मुक्तवात्। ४. ग-त-भ–प्रधने संग्रामे। ५. त-भ–आरोहतीत्यर्थः।

परिवृक्ताऽइव । पतिऽविद्यम् । आनट् । पीप्याना । कूचक्रेणऽइव । सिञ्चन् ।
एषऽएष्या । चित् । रथ्या । जयेम । सुऽमङ्गलम् । सिनऽवत् । अस्तु । सातम् ॥ ११ ॥

अत्र मुद्गलानी सारथिः स्तूयते । एषा मुद्गलानी ᵛपरिवृक्तेव । ' वृजी वर्जने ' । परित्यक्ता पत्या पत्या[1] वियुक्ता योषिदिव । सा यथा ᵛपतिविद्यम् । विद्यो वेद्यो लम्भनीयः । पतिश्चासौ विद्यश्च । पतिविद्यमानयो तद्वत्पतिविद्यम् ᵛआनट् । आनड् व्याप्तिकर्मा । नशेर्लुकि ' मन्त्रे घस° ' इति च्लेर्लुक् । ' छन्दस्यपि दृश्यते ' (पा. सू. ६. ४. ७३) इत्यनजादीनामप्याडागमः । अश्नोतेर्वा लिटि तलोपश्छान्दसः । तथा पतिसमीपं सारथित्वेनागत्य ᵛपीप्याना वर्धमाना भवति । किमिव । ᵛकूचक्रेणेव ᵛसिञ्चन् । कुः पृथिवी । तस्याश्चक्रो वलयः कूचक्रः । तेन वर्षणीयत्वेन निमित्तेन सिञ्चन् जलं वर्षन्मेघ इव । स यथान्तरिक्षे स्वरूपमात्रोऽपि वर्षणसमये महान्भवति तद्वदियमपि शत्रुमध्ये शरधारा वर्षन्ती वर्धत इत्यर्थः । तथा ᵛएषैष्या । एषितव्यो गोसंघ एषः । तमिच्छतीत्येषैषी । ईदृश्या तथा ᵛरथ्या सारथिभूतया ᵛजयेम शत्रुभिरपहृतं गोसंघम् । तस्याः ᵛसातं दत्तं संभजनं वा ᵛसुमङ्गलं शोभनमङ्गलवत् ᵛसिनवत् । सिनमन्नम् । तद्वच्च ᵛअस्तु गोरूपान्नवच्च भवतु ॥

त्वं विश्वस्य जगतश्चक्षुरिन्द्रासि चक्षुषः ।
वृषा यदाजिं वृषणा सिषाससि चोदयन् वध्रिणा युजा ॥ १२ ॥

त्वम् । विश्वस्य । जगतः । चक्षुः । इन्द्र । असि । चक्षुषः ।
वृषा । यत् । आजिम् । वृषणा । सिसाससि । चोदयन् । वध्रिणा । युजा ॥ १२ ॥

सूक्तस्य विकल्पेनैन्द्रत्वादादाविन्द्रस्य[2] स्तुतत्वादन्तेऽपीन्द्रः स्तूयते । हे ᵛइन्द्र ᵛत्वं ᵛविश्वस्य सर्वस्य ᵛजगतः ᵛचक्षुषः चक्षुष्मतः पश्यतो वा जगतः ᵛचक्षुः ᵛअसि । प्रत्येकमुत्पत्तिविशिष्टचक्षुःसद्भावेऽपि सर्वस्य साधारणं चक्षुरसि । त्वया दृष्टया द्रष्टव्यानैहिकामुष्मिकपदार्थान् पश्यन्तीत्यर्थः । त्वामेव हि यज्ञादिना लब्ध्वा पुरुषार्थान् साधयन्ति । यद्वा । विश्वस्य जगतो यच्चिज्जं चक्षुरस्ति तस्यापि चक्षुषस्त्वं चक्षुरसि । ᵛयत् यस्मात् ᵛवृषा अभिमतवर्षकस्त्वम् ᵛआजिं मुद्गलस्य मम संग्रामं ᵛवध्रिणा पाशेन ᵛयुजा युजौ युक्तौ ᵛवृषणा वृषणौ वर्षकावश्वौ रथे योजयित्वा ᵛचोदयन् शत्रुषु प्रेरयन् ᵛसिषाससि आजिं संभक्तुमिच्छसि तस्माच्चक्षुरसि ॥ ॥ २१ ॥

' आशुः शिशानः ' इति त्रयोदशर्चं चतुर्थं सूक्तमिन्द्रपुत्रस्याप्रतिरथनाम्न आर्षम् । त्रयोदश्यनुष्टुप् शिष्टाश्चिष्टुभः । ' बृहस्पते परि दीय ' इत्यस्या बृहस्पतिर्देवता । ' अमीषां चित्तम् ' इत्यस्या अप्वाख्या देवी देवता । शिष्टा ऐन्द्र्यः । त्रयोदशी विकल्पेन मारुती । तथा चानुक्रान्तम्—' आशुः सप्तोनैन्द्रोऽप्रतिरथश्चतुर्थी बार्हस्पत्योपान्त्याप्वादेव्यन्त्यानुष्टुग्मारुती वा ' इति । साग्निचित्ये क्रतौ चित्यमिषु प्रणीयमानेषु दक्षिणतो व्रजता ब्रह्मणैतत्सूक्तं जप्यम् । तथा च सूत्रितं—' दक्षिणतश्च व्रजन्नपत्याशुः शिशान इति सूक्तं समाप्य ' (आश्व. श्रौ. १. १२) इति । ' ब्रह्माप्रतिरथं जपित्वा ' (आश्व. श्रौ. ४. ८) इति च । युद्धार्थं राज्ञः संनहनेऽनेन सूक्तेन राजेक्षितव्यः । सूत्रितं च—' अथैनमन्वीक्षेताप्रतिरथशाससौपर्णैः ' (आश्व. गृ. १. १२. १३) इति ॥

आशुः शिशानो वृषभो न भीमो धनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ॥ १ ॥

---

१. ग-त-' पत्या ' नास्ति । २. ग-त-भ-विकल्पेनेंद्रत्वा° ।

आशुः । शिशानः । वृषभः । न । भीमः । घनाघनः । क्षोभणः । चर्षणीनाम् ।
सम्ऽक्रन्दनः । अनिऽमिषः । एकऽवीरः । शतम् । सेनाः । अजयत् । साकम् । इन्द्रः ॥ १ ॥

अयमिन्द्रः ᵛआशुः शीघ्रकारी व्यापको वा ᵛशिशानः निशितः । शत्रूणां भयजनक इत्यर्थः । क इव । ᵛवृषभो ᵛन ᵛभीमः । बिभेत्यस्मादिति भीमः । तादृशो वृषभ इव । स यथा तीक्ष्णाभ्यां शृङ्गाभ्यां भीमो भवति तद्वत् । अथवा शिशानस्तीक्ष्णमतिः । व्यत्ययेनात्मनेपदम् । वृषभो न भीमः वृषभो यथा शृङ्गाभ्यां भयजनकः तद्वच्छत्रूणां भयजनकश्च । ᵛघनाघनः घातकः शत्रूणाम् । हन्तेः पचाद्यचि ' हन्तेर्धश्च ' (पा.सू.६.१.१२.७) इति द्विर्वचनमभ्यासस्याङागमो धत्वं च धात्वभ्यासयोः । ᵛचर्षणीनाम् । चर्षणयो मनुष्याः । मनुष्याणां द्वेष्याणां ᵛक्षोभणः क्षोभयिता । ᵛसंक्रन्दनः सम्यक्क्रन्दयिता प्राणिनामाकर्षणेन प्रहारेण वा । ᵛअनिमिषः चक्षुर्निमेषरहितः । सर्वदा स्वयञ्जगमन-युद्धादिकार्येष्वनलस इत्यर्थः । ᵛएकवीरः । वीरयत्यभित्रानिति वीरः । एकश्चासौ वीरश्च । अथवा एक एव विक्रान्तः । असाहाय्येन कार्यक्षम इत्यर्थः । ईदृशोऽयम् ᵛइन्द्रः ᵛशतं ᵛसेनाः ᵛसार्कं सह एकोद्यो-गेनैव ᵛअजयत् जयति ॥

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा ॥ २ ॥

सम्ऽक्रन्दनेन । अनिऽमिषेण । जिष्णुना । युत्ऽकारेण । दुःऽश्यवनेन । धृष्णुना ।
तत् । इन्द्रेण । जयत । तत् । सहध्वम् । युधः । नरः । इषुऽहस्तेन । वृष्णा ॥ २ ॥

अस्तु नामेन्द्र उक्तविधः तथाप्यस्माकं किमिति चेत् तत्राह । ᵛसंक्रन्दनेनानिमिषेण चोक्त-लक्षणेन ᵛजिष्णुना जयशीलेन ᵛयुत्कारेण । योधनं युत् । युद्धकारिणा । कर्मण्यण् । ᵛदुश्यवनेन अन्यैरविचाल्येन । ' च्युङ् प्रुङ् गतौ ' । ' छन्दसि गत्यर्थेभ्यः' (पा. सू. ३. ३. १२९) इति युच् । ᵛधृष्णुना धर्षकेण ईदृशेन ᵛइन्द्रेण ᵛतत् युद्धं ᵛजयत । ᵛतत् शत्रुबलं ᵛसहध्वम् अभिभवत । हे ᵛयुधः योद्धारो हे ᵛनरः नेतारः । ' विभाषितं विशेषवचने बहुवचनम् ' (पा. सू. ८. १. ७४) इति पूर्वस्याविद्यमानवत्त्वनिषेधादुत्तरं निहन्यते । पुनः कीदृशेनेन्द्रेणेति । ᵛइषुहस्तेन ᵛवृष्णा वर्षित्रा च ॥

स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥ ३ ॥

सः । इषुऽहस्तैः । सः । निषङ्गिऽभिः । वशी । सम्ऽस्रष्टा । सः । युधः । इन्द्रः । गणेन ।
संसृष्टऽजित् । सोमऽपाः । बाहुऽशर्धी । उग्रऽधन्वा । प्रतिऽहिताभिः । अस्ता ॥ ३ ॥

पूर्वमन्त्र इन्द्रेण जयत इत्युक्तम् । अत्र इन्द्रस्य जयसाधनसमर्थत्वं दर्शयति । ᵛसः इन्द्रः ᵛइषु-हस्तैः मरुदादिभिः ᵛवशी वशयैस्तद्वान् । तथा ᵛनिषङ्गिभिः युक्तः । निषङ्गः खड्गः । तद्वद्भिः ᵛवशी । ᵛसः च ᵛइन्द्रः ᵛयुधः युध्यमानः सन् । इगुपधलक्षणः कः । अथवा युधो युद्धहेतोः ᵛगणेन शत्रुसंघेन सह ᵛसंस्रष्टा एकीभवनशीलः । अत एवंविधोऽतः ᵛसंसृष्टजित् । ये परस्परैकमत्येन युद्धाय संसृष्टा भवन्ति तेषां जेता । तथा ᵛसोमपाः सोमस्य पाता । ᵛबाहुशर्धी । शर्धो बलम् । बाह्वोर्बलं बाहुबलम् । तद्वान् । मत्वर्थीय इनिः । यद्वा । ' शृधु प्रसहने ' । बाहुभ्यां शर्धयत्यभिभवतीति बाहुशर्धी । ' सुप्यजातौ णिनिस्ताच्छील्ये ' (पा. सू. ३. २. ७८) इति णिनिः । ᵛउग्रधन्वा उद्यत-

धन्वा ᵛप्रतिहिताभिः शत्रुषु प्रेरिताभिरिषुभिः ᵛअस्ता मारयिता। यत्रेषून्मुञ्चति तत्र वृथा न भवन्तीत्यर्थः। ईदृशेनेन्द्रेण जयतेति संबन्धः ॥

बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥ ४ ॥

बृहस्पते। परि। दीय। रथेन। रक्षःऽहा। अमित्रान्। अपऽबाधमानः।
प्रऽभञ्जन्। सेनाः। प्रऽमृणः। युधा। जयन्। अस्माकम्। एधि। अविता। रथानाम्॥४॥

हे ᵛबृहस्पते बृहतां पातः[1] पालयितर्देव ᵛरथेन ᵛपरि ᵛदीय परिगच्छ। दीयतिर्गतिकर्मा। आगत्य च ᵛरक्षोहा रक्षसां हन्ता ᵛअमित्रान् शत्रून् ᵛअपबाधमानः सर्वतो नाशयन् तथा ᵛसेनाः शत्रुसंबन्धिनीः ᵛप्रभञ्जन् प्रकर्षेण नाशयन् ᵛप्रमृणः प्रकर्षेण हिंसन्। 'मृण हिंसायाम्'। इगुपधलक्षणः कः। केन हिंसन्। ᵛयुधा युद्धेन। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्। ᵛजयन् एवं सर्वत्र जयं प्रतिपद्यमानः ईदृशस्त्वम् ᵛअस्माकं ᵛरथानाम् ᵛअविता[2] ᵛएधि भव ॥

बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ॥ ५ ॥

बलऽविज्ञायः। स्थविरः। प्रऽवीरः। सहस्वान्। वाजी। सहमानः। उग्रः।
अभिऽवीरः। अभिऽसत्वा। सहःऽजाः। जैत्रम्। इन्द्र। रथम्। आ। तिष्ठ। गोऽवित्॥५॥

सर्वस्य भूतस्य[3] बलं विजानातीति ᵛबलविज्ञायः। यद्वा। बलं ममायमिति सर्वैर्बलत्वेन विज्ञायत इति बलविज्ञायः। सर्वस्य बलभूत इत्यर्थः। ᵛस्थविरः महान् ᵛप्रवीरः प्रकर्षेण वीरः ᵛसहस्वान् पराभिभवसामर्थ्यवान् ᵛवाजी वेजनवानन्नवान्वा ᵛसहमानः शत्रूणामभिभविता ᵛउग्रः उद्भूर्णबलः ᵛअभिवीरः। अभिगता वीरा वीर्यवन्तोऽनुचरा यस्य स तथोक्तः। ᵛअभिसत्वा अभिगतसत्वा ᵛसहोजाः सहसो बलाज्जातः एवंमहानुभावस्त्वं हे ᵛइन्द्र ᵛजैत्रं जयशीलं ᵛरथम् ᵛआ ᵛतिष्ठ अस्मत्सहायार्थमारोढुमर्हसि। त्वं च ᵛगोवित् उदकस्य स्तुतेर्वा लब्धा वेदिता वा ॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्मं प्रमृणन्तमोजसा।
इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वम् ॥ ६ ॥

गोत्रऽभिदम्। गोऽविदम्। वज्रऽबाहुम्। जयन्तम्। अज्मम्। प्रऽमृणन्तम्। ओजसा।
इमम्। सऽजाताः। अनु। वीरयध्वम्। इन्द्रम्। सखायः। अनु। सम्। रभध्वम् ॥ ६ ॥

ᵛगोत्रभिदम्। गा उदकानि त्रायन्त इति गोत्रा मेघाः। यद्वा गौर्भूमिः। तां त्रायन्त इति गोत्राः पर्वताः। तेषां भेत्तारं ᵛगोविदम् उदकस्य लब्धारं ᵛवज्रबाहुं वज्रहस्तम्। 'प्रहरणार्थेभ्यः०' (पा. सू. २. २. ३५. ४) इति परनिपातः। ᵛजयन्तं जयनशीलम् ᵛअज्मं गमनशीलं शत्रुबलम् ᵛओजसा बलेन जयन्तं यद्वा अज्मं आजिं जयन्तमोजसा बलेन ᵛप्रमृणन्तं शत्रूनभिभवन्तमीदृशं महानुभावम् ᵛइमम् इन्द्रं हे ᵛसजाताः सहोत्पन्ना योद्धारो यूयम् ᵛअनु ᵛवीरयध्वम्। एनमग्रतः

१. त१.२.३.६.७-मु-पते। २. त-अविता रक्षिता। ३. ग-त-भ-'भूतस्य' नास्ति।

कृत्वासु पञ्चाङ्गीरवध्वं वीरकर्म युधं कुरुध्वम्। 'शूर वीर विक्रान्तौ'। वीरशब्दात् 'तत्करोति तदाचष्टे' इति णिच्। हे ᵛसखायः परस्परं सखिभूता यूयमिमम् ᵛइन्द्रं संरभमाणम् ᵛअनु ᵛसं ᵛरभध्वम्॥॥२२॥

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः।
दुश्च्यवनः पृतनाषाळयुध्योऽस्माकं सेना अवतु प्र युत्सु ॥ ७ ॥

अभि। गोत्राणि। सहसा। गाहमानः। अदयः। वीरः। शतऽमन्युः। इन्द्रः।
दुःऽच्यवनः। पृतनाषाट्। अयुध्यः। अस्माकम्। सेनाः। अवतु। प्र। युत्ऽसु ॥ ७ ॥

अयम् ᵛइन्द्रः ᵛगोत्राणि अभ्राणि मेघान् ᵛसहसा बलेन ᵛअभि ᵛगाहमानः प्रविशन् ᵛअदयः निर्दयः ᵛवीरः विक्रान्तः ᵛशतमन्युः बहुयज्ञो बहुक्रोधो वा ᵛदुश्च्यवनः अन्यैरचाल्यः। स्वयं ᵛपृतनाषाट् शत्रुसेनानामभिभविता। 'छन्दसि सहः' इति ण्विः। 'सहेः साडः सः' इति मूर्धन्यादेशः। ᵛअयुध्यः संप्रहर्तुमशक्यः। 'युध संप्रहारे'। छान्दसः क्यप्। ईदृगिन्द्रः ᵛअस्माकं ᵛसेनाः ᵛयुत्सु संग्रामेषु ᵛप्र ᵛअवतु प्रकर्षेण रक्षतु ॥

इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ॥ ८ ॥

इन्द्रः। आसाम्। नेता। बृहस्पतिः। दक्षिणा। यज्ञः। पुरः। एतु। सोमः।
देवऽसेनानाम्। अभिऽभञ्जतीनाम्। जयन्तीनाम्। मरुतः। यन्तु। अग्रम् ॥ ८ ॥

ᵛआसाम् अस्मत्सहायार्थमागतानाम्[1] अयम् ᵛइन्द्रः ᵛनेता नायकोऽस्तु। तथा तस्य ᵛबृहस्पतिः ᵛपुर ᵛएतु। एवं ᵛदक्षिणा ᵛयज्ञः ᵛसोमः च पुर एत्विति प्रत्येकं संबन्धः। तथा ᵛदेवसेनानामभिभञ्जतीनाम् अस्मदमित्रानभिमुख्येन मर्दयन्तीनां ᵛजयन्तीनाम्। "छन्दसि" इति नाम उदात्तत्वं जयन्तीनामित्यत्र बहुलवचनान्न भवति (पा. सू. ६. १. १७८)। तासाम् ᵛअग्रं ᵛमरुतो ᵛयन्तु गच्छन्तु ॥

इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम्।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ॥ ९ ॥

इन्द्रस्य। वृष्णः। वरुणस्य। राज्ञः। आदित्यानाम्। मरुताम्। शर्धः। उग्रम्।
महाऽमनसाम्। भुवनऽच्यवानाम्। घोषः। देवानाम्। जयताम्। उत्। अस्थात् ॥ ९ ॥

ᵛवृष्णः वर्षकस्य ᵛइन्द्रस्य ᵛराज्ञः ᵛवरुणस्य ᵛआदित्यानां ᵛमरुतां च ᵛउग्रम् उद्गूर्णं ᵛशर्धः बलमस्माकं भवत्विति शेषः। किंच ᵛमहामनसाम् उदारमनसां ᵛभुवनच्यवानां भुवनानां व्यावर्तयितॄणां ᵛदेवानां ᵛघोषः जयशब्दः ᵛउदस्थात् उत्तिष्ठति। अनूर्ध्वकर्मत्वादात्मनेपदाभावः (पा. सू. १. ३. २४) ॥

उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां मनांसि।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः ॥ १० ॥

---

१. ग-त-मु-°भागतानां देवसेनानां।

उत् । हर्षय । मघऽवन् । आयुधानि । उत् । सत्वनाम् । मामकानाम् । मनांसि ।
उत् । वृत्रऽहन् । वाजिनाम् । वाजिनानि । उत् । रथानाम् । जयताम् । यन्तु । घोषाः ॥१०॥

हे ᵛमघवन् इन्द्र अस्मदीयानि ᵛआयुधानि ᵛउद्धर्षय उत्कृष्टं हर्षय । प्रहरणेषूद्युक्तानि भवन्त्विति शेषः । ᵛमामकानां मदीयानां ᵛसत्वनां प्राणिनां सैनिकानां ᵛमनांसि च ᵛउत् हर्षय । हे ᵛवृत्रहन् इन्द्र ᵛवाजिनाम् अश्वानां ᵛवाजिनानि वेगाः ᵛउत् ᵛयन्तु । तथा ᵛजयतां ᵛरथानां ᵛघोषाः ᵛउत् यन्तु ॥

अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ॥ ११ ॥

अस्माकम् । इन्द्रः । सम्ऽऋतेषु । ध्वजेषु । अस्माकम् । याः । इषवः । ताः । जयन्तु ।
अस्माकम् । वीराः । उत्ऽतरे । भवन्तु । अस्मान् । ऊँ इति । देवाः । अवत । हवेषु॥११॥

ᵛअस्माकं संबन्धिष्वेव ᵛसमृतेषु परसेनां संप्राप्तेषु ᵛध्वजेषु ध्वजवत्सु सैनिकेषु ᵛइन्द्रः रक्षिता भवतु । तथा ᵛअस्माकं ᵛया ᵛइषवः सन्ति ᵛताः एव ᵛजयन्तु शत्रून्[1] । तथा ᵛअस्माकं ᵛवीराः भटाः ᵛउत्तरे उपरि ᵛभवन्तु । हे ᵛदेवाः ᵛअस्माँ ᵛउ अस्मानेव ᵛअवत रक्षत ᵛहवेषु संग्रामेषु ॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥ १२ ॥

अमीषाम् । चित्तम् । प्रतिऽलोभयन्ती । गृहाण । अङ्गानि । अप्वे । परा । इहि ।
अभि । प्र । इहि । निः । दह । हृत्ऽसु । शोकैः । अन्धेन । अमित्राः । तमसा । सचन्ताम्॥१२॥

हे ᵛअप्वे पापाभिमानिनि देवते ᵛअमीषां योद्धृणां शत्रूणां ᵛचित्तं ᵛप्रतिलोभयन्ती विमोहयन्ती सती ᵛअङ्गानि तेषामवयवान् शिरआदिकान् ᵛगृहाण स्वीकुरु । ᵛअभि ᵛप्रेहि ᵛअभिगच्छ । तेषां समीपं गत्वा च ᵛहृत्सु हृदयेषु ᵛशोकैः ᵛनिर्दह नितरां भस्मीकुरु । ते ᵛअमित्राः अस्मच्छत्रवः ᵛअन्धेन ᵛतमसा ᵛसचन्तां संगच्छन्ताम् ॥

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥ १३ ॥

प्र । इत । जयत । नरः । इन्द्रः । वः । शर्म । यच्छतु ।
उग्राः । वः । सन्तु । बाहवः । अनाधृष्याः । यथा । असथ ॥ १३ ॥

हे ᵛनरः नेतारः संग्रामस्य निर्वोढारो योद्धारः ᵛप्रेत प्रकर्षेण गच्छत । गत्वा च ᵛजयत तान्प्रतिभटान् । तिङः परत्वात् ' तिङ्ङतिङः ' इति निघाताभावः । ᵛवः युष्माकम् ᵛइन्द्रः ᵛशर्म सुखं ᵛयच्छतु प्रयच्छतु । ᵛवः ᵛबाहवः ᵛउग्राः उद्पूर्णबलाः ᵛसन्तु भवन्तु । ᵛअनाधृष्याः अन्यैरनभिभाव्याः ᵛयथा यूयम् ᵛअसथ भविष्यथ तथोग्राः सन्तु वो बाहवः ॥ ॥ २३ ॥

' असावि ' इत्येकादशर्चं पञ्चमं सूक्तं वैश्वामित्रस्याष्टकस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तम्—' असाव्येकादशाष्टको वैश्वामित्रः ' इति । गतः सूक्तविनियोगः ॥

---

१. ग-त-भ-शत्रूणां ।

असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयम् ।
तुभ्यं गिरो विप्रवीरा इयाना दधन्विरे इन्द्र पिबा सुतस्य ॥ १ ॥

असावि । सोमः । पुरुऽहूत । तुभ्यम् । हरिऽभ्याम् । यज्ञम् । उप । याहि । तूयम् । तुभ्यम् । गिरः । विप्रऽवीराः । इयानाः । दधन्विरे । इन्द्र । पिब । सुतस्य ॥ १ ॥

हे [v]पुरुहूत बहुभिः स्तोतृभिराहूत [v]तुभ्यं[1] त्वदर्थं [v]सोमः [v]असावि अभिषुतोऽभूत् । ' षुञ् अभिषवे ' इत्यस्मात्कर्मणि लुङ् । अतः [v]हरिभ्यां हरितवर्णाभ्यामश्वाभ्यां [v]यज्ञम् अस्मदीयं [v]तूयं तूर्णम् [v]उप [v]याहि उपागच्छ । [v]तुभ्यं त्वदर्थं [v]गिरः अस्मदीयाः स्तुतयः [v]विप्रवीराः । विप्रा मेधाविनो वीरा विशेषेण प्रेरयितारः प्रोद्गमयितारो यासां तास्तथोक्ताः । [v]इयानाः गमनशीलाः [v]दधन्विरे गम्यन्ते । अस्माभिर्युष्मत्प्रीणनाय प्राप्यन्त इत्यर्थः । ' ईङ् गतौ ' । ताच्छीलिकः शानच् । छान्दसो विकरणस्य लुक् । धविर्गत्यर्थः । इदित्वाद्नुम् । कर्मणि छान्दसो लिट् । यत एवमतः [v]सुतस्य अभिषुतस्यांशं सुतं सोमं वा [v]पिब ॥

प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे ' अप्सु धूतस्य ' इत्येषा याज्या । सूत्रितं च—' अप्सु धूतस्य हरिवः पिबेहेति याज्या ' (आश्व. श्रौ. ६. ४) इति ॥

अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।
मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः ॥ २ ॥

अप्ऽसु । धूतस्य । हरिऽवः । पिब । इह । नृऽभिः । सुतस्य । जठरम् । पृणस्व । मिमिक्षुः । यम् । अद्रयः । इन्द्र । तुभ्यम् । तेभिः । वर्धस्व । मदम् । उक्थऽवाहः ॥ २ ॥

हे [v]हरिवः । ' ऋक्सामे वा इन्द्रस्य हरी ' (ऐ. ब्रा. २. २४) इति श्रुतेः स्तोत्रशस्त्राधारभूताभ्यामृक्सामाभ्यां हरिभ्यां तद्वन्निन्द्र [v]अप्सु एकधनादिषूदकेषु [v]धूतस्य कम्पितस्य । अभिषुतस्येत्यर्थः । तथा [v]नृभिः कर्मनेतृभिः कर्मनिर्वाहकैरध्वर्वादिभिः [v]सुतस्य अभिषुतस्य । उभयत्र ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानसंज्ञायां ' चतुर्थ्यर्थे बहुलं छन्दसि ' इति षष्ठी । ईदृशं सोमम् [v]इह अस्मिन्यज्ञे [v]पिब । पीत्वा च [v]जठरं स्वकीयं [v]पृणस्व पूरय च । ' चादिलोपे विभाषा ' इति प्रथमा तिङ्विभक्तिर्न निहन्यते । [v]यं सोमम् [v]अद्रयः अभिषवप्रावाणो हे [v]इन्द्र [v]तुभ्यं त्वदर्थं [v]मिमिक्षुः सेक्तुमभिषोतुमैच्छन् । अभिषवमकुर्वन्नित्यर्थः । ' मिह सेचने ' इत्यस्य सनि लिङ्युसि रूपम् । हे [v]उक्थवाहः उक्थैः शस्त्रैरुह्यमान [v]तेभिः तैः [v]मदं [v]वर्धस्व ॥

द्वितीये पर्याये ब्राह्मणाच्छंसिनः ' प्रोग्राम् ' इत्येषा याज्या । सूत्रितं च—' अश्वावति प्रथमः प्रोग्रां पीतिं वृष्ण इयर्मि सत्यामिति याज्या ' (आश्व. श्रौ. ६. ४) इति ॥

प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यम् ।
इन्द्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ॥ ३ ॥

प्र । उग्राम् । पीतिम् । वृष्णे । इयर्मि । सत्याम् । प्रऽयै । सुतस्य । हरिऽअश्व । तुभ्यम् । इन्द्र । धेनाभिः । इह । मादयस्व । धीभिः । विश्वाभिः । शच्या । गृणानः ॥ ३ ॥

---

१. त-म-ते तुभ्यं ।

हे [v]हर्यश्व इन्द्र [v]वृष्णे वर्षकाय [v]तुभ्यम् [v]उक्थम् उदूर्णा[1] [v]सत्यां [v]पीतिं सोमपानं [v]प्र [v]हर्यामि प्रेरयामि। किमर्थम्। [v]प्रये प्रगमनाय। कस्य पीतिम्। [v]सुतस्य अभिषुतस्य। अतो हे [v]इन्द्र [v]शच्या शक्त्या कर्मणा वा युक्तः [v]गृणानः स्तूयमानस्त्वं [v]विश्वाभिः सर्वाभिः [v]धेनाभिः स्तुतिवाग्भिः विश्वाभिः [v]धीभिः सर्वैः कर्मभिश्च [v]इह अस्मिन् यज्ञे [v]मादयस्व तृप्यस्व। 'मद तृप्तियोगे'। आत्मनेपदम्॥

तृतीये पर्याये ब्राह्मणाच्छंसिनः शस्त्रे 'ऊती शचीवः' इत्येषा याज्या। 'ऊती शचीवस्तव वीर्येणेति याज्या' (आश्व. श्रौ. ६. ४) इति सूत्रितम्॥

ऊ॒ती शची॑व॒स्तव॑ वी॒र्येण॒ वयो॒ दधा॑ना उ॒शिज॑ ऋत॒ज्ञाः।
प्र॒जाव॑दिन्द्र॒ मनु॑षो दुरो॒णे त॒स्थुर्गृ॒णन्तः॑ सध॒माद्या॑सः॥ ४॥

ऊ॒ती। शची॑ऽवः। तव॑। वी॒र्येण॑। वयः॑। दधा॑नाः। उ॒शिज॑ः। ऋ॒त॒ऽज्ञाः।
प्र॒जाऽव॑त्। इ॒न्द्र॒। मनु॑षः। दु॒रो॒णे। त॒स्थुः॒। गृ॒णन्तः॑। स॒ध॒ऽमाद्या॑सः॥ ४॥

हे [v]शचीवः शक्तिवन् [v]इन्द्र [v]तव [v]ऊती ऊत्या रक्षणेन तव [v]वीर्येण [v]वयः अन्नं [v]प्रजावत् प्रजोपेतं [v]दधानाः धारयन्तः [v]उशिजः त्वामेव कामयमानाः [v]ऋतज्ञाः ऋतं यज्ञमहर्जानन्तः। अङ्गिरसः सत्रमनुतिष्ठन्तः षष्ठेऽहनि प्रयोगमूढाः सन्तो नाभानेदिष्ठेन पारं गता यतः अतस्तेषामृतज्ञत्वम्। ईदृशोऽङ्गिरसः [v]मनुषः मनुष्यस्य यजमानस्य [v]दुरोणे यज्ञगृहे [v]गृणन्तः त्वां स्तुवन्तः [v]सधमाद्यासः सह माद्यन्तः [v]तस्थुः तिष्ठन्ति। मादयतेः 'कृत्यल्युटो बहुलम्' इति वचनात् कर्तरि 'अचो यत्' इति यत्। छान्दसः सधादेशः। अतो वयमपि तिष्ठेमेत्यर्थः॥

प्र॒णी॒तिभि॑ष्टे हर्यश्व सु॒ष्टुः सु॒षु॒म्नस्य॑ पुरुरुचो॒ जना॑सः।
मंहि॑ष्ठामू॒तिं वि॒तिरे॒ दधा॑नाः॒ स्तोता॑र इन्द्र॒ तव॑ सू॒नृता॑भिः॥ ५॥

प्र॒णी॒तिऽभिः॑। ते॒। हरि॑ऽअश्व। सु॒ऽस्तोः॑। सु॒ऽसु॒म्नस्य॑। पु॒रु॒ऽरु॒चः॒। जना॑सः।
मंहि॑ष्ठाम्। ऊ॒तिम्। वि॒ऽतिरे॑। दधा॑नाः। स्तोता॑रः। इ॒न्द्र॒। तव॑। सू॒नृता॑भिः॥ ५॥

हे [v]हर्यश्व हरितवर्णाश्वोपेत [v]इन्द्र [v]सुष्टोः सुष्ठु स्तूयमानस्य [v]सुषुम्नस्य सुसुखस्य सुधनस्य वा [v]पुरुरुचः बहुदीप्तेः [v]ते तव [v]प्रणीतिभिः प्रणयनैर्धनादिप्रदानैः [v]जनासः जनाः [v]स्तोतारः [v]सूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भिः। एतत्प्रणीतिभिरित्यनेन समुच्चीयते। [v]वितिरे अन्येभ्योऽर्थिभ्यो वितरणाय [v]मंहिष्ठाम् अतिशयेन मंहनीयां [v]तव संबन्धिनीम् [v]ऊतिं रक्षां [v]दधानाः आसत इति शेषः॥ ॥ २४॥

उप॒ ब्रह्मा॑णि हरिवो हरि॒भ्यां सोम॑स्य याहि पी॒तये॑ सु॒तस्य॑।
इन्द्रं॑ त्वा यु॒ज्ञः क्ष्म॒माण॒मान॑ड् दा॒श्वाँ अ॑स्यध्व॒रस्य॑ प्र॒के॒तः॥ ६॥

उप॑। ब्रह्मा॑णि। ह॒रि॒ऽवः॒। ह॒रि॒ऽभ्याम्। सोम॑स्य। याहि॑। पी॒तये॑। सु॒तस्य॑।
इन्द्र॑। त्वा॒। यु॒ज्ञः। क्ष्म॒माण॑म्। आन॑ट्। दा॒श्वान्। अ॒सि॒। अ॒ध्व॒रस्य॑। प्र॒ऽके॒तः॥ ६॥

---

१. म-त-भ१.२.४.८-मु-उदूर्णा।

हे ᵛहरिवः हरिवन्निन्द्र ᵛसुतस्य अभिषुतस्य ᵛसोमस्य ᵛपीतये पानाय ᵛब्रह्मणि परिवृढास्मदीयानि कर्माणि स्तोत्राणि वा ᵛउप ᵛयाहि उपागच्छ। केन साधनेनेति तदुच्यते। ᵛहरिभ्याम् अश्वाभ्याम्। ताभ्यां युक्तेन रथेनेत्यर्थः। यद्वा। हरिभ्यां हरिव इति संबन्धनीयम्। हे ᵛइन्द्र ᵛक्षममाणं ᵛत्वा त्वां ᵛयज्ञः सोमयागः ᵛआनट् व्याप्नोति। नशतेर्लुङि 'मन्त्रे घस°' इति च्लेर्लुक्। 'छन्दस्यपि दृश्यते' इत्याडागमः। अश्नोतेरेव वा लिटि छान्दसस्तप्रत्ययस्य लोपः। 'अश्नोतेश्च' इति तुडागमः। ᵛअध्वरस्य यागस्य ᵛप्रकेतः प्रकर्षेण जानंस्त्वं ᵛदाशानसि दातासि कर्मफलस्य ॥

सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिम् ।
उप भूषन्ति गिरो अप्रतीतमिन्द्रं नमस्या जरितुः पनन्त ॥ ७ ॥

सहस्रऽवाजम्। अभिमातिऽसहम्। सुतेऽरणम्। मघऽवानम्। सुऽवृक्तिम्।
उप। भूषन्ति। गिरः। अप्रतिऽइतम्। इन्द्रम्। नमस्याः। जरितुः। पनन्त ॥ ७ ॥

ᵛसहस्रवाजम् अपरिमितान्नमपरिमितबलं वा ᵛअभिमातिषाहम् अभिमातीनां सर्वतो हिंसकानां शत्रूणामभिभवितारं ᵛसुतेरणम् अभिषुते सोमे रममाणं ᵛमघवानं धनवन्तं ᵛसुवृक्तिं शोभनस्तुतिकम् ᵛअप्रतीतं युद्धेऽन्यैरप्रतिगतम् ᵛइन्द्रं ᵛगिरः स्तुतिरूपा वाचः ᵛउप ᵛभूषन्ति अलंकुर्वन्ति। तदेवाह। ᵛजरितुः स्तोतुः ᵛनमस्याः स्तुतयः ᵛपनन्त स्तुवन्ति ॥

सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुमतर इन्द्र पूर्भित् ।
नवतिं स्रोत्या नव च स्रवन्तीर्देवेभ्यो गातुं मनुषे च विन्दः ॥ ८ ॥

सप्त। आपः। देवीः। सुऽरणाः। अमृक्ताः। याभिः। सिन्धुम्। अतरः। इन्द्र। पुरःऽभित्।
नवतिम्। स्रोत्याः। नव। च। स्रवन्तीः। देवेभ्यः। गातुम्। मनुषे। च। विन्दः ॥ ८ ॥

हे इन्द्र त्वदाज्ञया ᵛसप्त एतत्संख्याकाः ᵛआपः अम्बूपाः[1] ᵛदेवीः देव्यो गङ्गाद्याः ᵛसुरणाः सुष्ठु रममाणाः शोभनशब्दा वा। रणिः शब्दार्थः। 'वशिरण्योरुपसंख्यानम्' (पा. सू. ३.३.५८. ३) इति भावेऽप्। बहुव्रीहौ 'आद्युदात्तं द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्। ᵛअमृक्ताः अहिंसिताः प्रवहन्तीति शेषः। हे ᵛइन्द्र ᵛपूर्भित् पुरां भेत्ता त्वं ᵛयाभिः गङ्गादिभिः सप्तनदीभिः ᵛसिन्धुं समुद्रम् ᵛअतरः। प्रावर्धय इत्यर्थः। यद्वा। सप्त सर्पणस्वभावा उत्कलक्षणा आपो देव्यस्त्वया सृष्टाः प्रवहन्ति याभिः सिन्धुं नदीमतरः। किंच त्वं[2] ᵛनवतिं ᵛनव ᵛच नवोत्तरनवतिसंख्याकाः ᵛस्रवन्तीः प्रवहन्तीः ᵛस्रोत्याः। नदीनामैतत्। नदीः ᵛदेवेभ्यः हविरर्थं ᵛमनुषे मनुष्याय भोगार्थं ᵛच ᵛगातुं गन्तव्यं तासां मार्गं च ᵛविन्दः अलभथाः ॥

अपो महीरभिशस्तेरमुञ्चोऽजागरास्वधि देव एकः ।
इन्द्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः ॥ ९ ॥

अपः। महीः। अभिऽशस्तेः। अमुञ्चः। अजागराः। आसु। अधि। देवः। एकः।
इन्द्र। याः। त्वम्। वृत्रऽतूर्ये। चकर्थ। ताभिः। विश्वऽआयुः। तन्वम्। पुपुष्याः ॥ ९ ॥

---

१. ग–अम्बूपा नद्यः; त१.२.३.७–अम्बूपा द्या; त४.५.८–भ१.२.४.८–अम्बूपा द्याः। २. ग१.२-त१.२.३.६.७.८-भ–'त्वं' नास्ति।

हे इन्द्र [v]महीः महतीः [v]अपः उदकानि [v]अभिशस्तेः अभिशंसकाद्वृत्रात् [v]अमुञ्चः। [v]आसु मुक्तास्वप्सु [v]देवः त्वम् [v]एकः एक एव असहायः सन् [v]अधि [v]अजागः अप्रमत्तो भवसि। यद्वा। अधीति सप्तम्यर्थानुवादी। हे [v]इन्द्र [v]त्वं [v]याः अपः [v]वृत्रतूर्ये वृत्रहत्यायां मेघहनने [v]चकर्थ करोषि [v]ताभिः अद्भिः [v]विश्वाभिः सर्वाभिः त्वं [v]तनुं स्वकीयं शरीरं [v]पुपुरयाः पोषयेः। 'पुष पुष्टौ' इत्यस्य व्यत्ययेन श्लुः ॥

वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे ।
आर्दयद्वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः ॥ १० ॥

वीरेण्यः । क्रतुः । इन्द्रः । सुऽशस्तिः । उत । अपि । धेना । पुरुऽहूतम् । ईट्टे ।
आर्दयत् । वृत्रम् । अकृणोत् । ऊँ इति । लोकम् । ससहे । शक्रः । पृतनाः । अभिष्टिः ॥ १० ॥

[v]इन्द्रः [v]वीरेण्यः वीरैर्गन्तव्योऽतिशयेन वीरो वा [v]क्रतुः कर्मवान्[1] [v]सुशस्तिः शोभनस्तुतिकः [v]उत अपि च। [v]अपि इत्यनर्थकः। अपि च [v]धेना। वाङ्नामैतत्। प्रीणयित्री स्तुतिवाक् [v]पुरुहूतम् इन्द्रम् [v]ईट्टे स्तौति पूजयति वा। यत उक्तलक्षणः अतः स्तौतीत्यर्थः। किंचायं [v]वृत्रम् आवरकमेतन्नामकमसुरम् [v]आर्दयत् हतवानित्यर्थः। [v]उ अपि च [v]लोकम्। लोक्यत इति लोकः प्रकाशः। तम् [v]अकृणोत् अकरोत्। आवरकमसुरं हत्वा प्रकाशं कृतवानित्यर्थः। न केवलं तमेकमेव अपि तु [v]शक्रः शक्त इन्द्रः [v]अभिष्टिः शत्रूणामभिगन्ता [v]पृतनाः शत्रुसेनाः [v]ससाहे अभ्यभवत् ॥

शुनं हुवेम मघवानमिन्द्रमस्मिन्भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ॥ ११ ॥

शुनम् । हुवेम । मघऽवानम् । इन्द्रम् । अस्मिन् । भरे । नृऽतमम् । वाजऽसातौ ।
शृण्वन्तम् । उग्रम् । ऊतये । समत्ऽसु । घ्नन्तम् । वृत्राणि । सम्ऽजितम् । धनानाम् ॥ ११ ॥

पूर्वं व्याख्याता[2] ॥ ॥ २५ ॥

'कदा' इत्येकादशर्चं षष्ठं सूक्तमैन्द्रम्। कुत्सपुत्रो नाम्ना[3] दुर्मित्रो गुणतः सुमित्रः यद्वा नाम्ना सुमित्रो गुणतो दुर्मित्रः स ऋषिः। 'हरी यस्य सुयुजा' 'वज्रं यश्चक्रे' इति द्वे पिपीलिकमध्ये एकादशषट्कैकादशके उष्णिहौ। अन्त्या त्रिष्टुप्। आद्या गायत्री वा। अक्षरव्यूहेन पक्षान्तर उष्णिक्। शिष्टाः सर्वाः सप्तोष्णिहः। तथा चानुक्रान्तं—'कदा कौत्सो दुर्मित्रो नाम्ना सुमित्रो गुणतः सुमित्रो वा नाम्ना दुर्मित्रो गुणत औष्णिहं हरी वज्रं पिपीलिकमध्ये त्रिष्टुबन्त्याद्या गायत्री वा' इति। गतो विनियोगः ॥

---

१. ग४—कर्मवान् प्रज्ञावान् वा। २. त७—इयं पूर्वं व्याख्याता। मंत्रार्थस्तु हे इंद्र वाजसातौ वाजस्यान्नस्य सातिर्लाभो यस्मिन् सोयं वाजसातिः। तस्मिन् भरे। बिभ्रति जयलक्ष्मीमनेन योद्धार इति भरः संग्रामः। तस्मिन् संग्रामे शुनमुत्साहेन प्रवृद्धं मघवानं धनवंतं अत एव इंद्रं निरतिशयैश्वर्यसंपन्नं नृतमं सर्वस्य जगतोतिशयेन नेतारं त्वां हुवेम कुशिका वयं यज्ञार्थमाह्वयाम। तथा शृण्वंति अस्माभिः क्रियमाणां स्तुतिं शृण्वंतं उग्रं शत्रूणां भयंकरं समत्सु संग्रामेषु वृत्राणि वृत्रोपलक्षितानि सर्वाणि रक्षांसि घ्नंतं हिंसंतं धनानां शत्रुसंबंधिनां संजितं सम्यग्जेतारं त्वां ऊतये रक्षणाय वयमाह्वयेम। ३. त-मु—नामतः।

कदा वसो स्तोत्रं हर्यत आ अर्व इमशा रुधद्वाः । दीर्घं सुतं वाताप्याय ॥ १ ॥

कदा । वसो इति । स्तोत्रम् । हर्यते । आ । अर्व । इमशा । रुधत् । वारिति वाः । दीर्घम् । सुतम् । वाताप्याय ॥ १ ॥

हे [v]वसो वासयितरिन्द्र [v]स्तोत्रम् अस्मत्कर्तृकं [v]हर्यते कामयमानाय कामयमानं त्वाम् । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थी । [v]कदा कस्मिन् काले [v]अव [v]रुधत् अवरोत्स्यति । अवरुध्य च कदा [v]वाः वारयिष्यति । तादृशः कालः कदास्माकं संभविष्यतीत्याशास्ते । रुधेर्लुङि 'इरितो वा' इति च्लेरङादेशः । वारिति वृणोतेर्ण्यन्ताल्लुङि छान्दसः शपो लुक् । 'छन्दस्युभयथा' इति तिप आर्धधातुकत्वात् 'णेरनिटि' इति लोपे[1] 'हल्ङ्याब्भ्यः०' इति तिलोपः । तत्र दृष्टान्तः । अश्नुते क्षेत्रमिति [v]इमशा कुल्या । लुप्तोपममेतत् । यथा कुल्येतस्तत उदकान्यवरुणद्धि अवरुध्य च वारयति तथेत्यर्थः । किमुद्दिश्यावरोध इति तत्राह । [v]दीर्घं सवनत्रयरूपेणायतं [v]सुतम् अभिषुतं सोमं प्रति । किमर्थमिति तदाह । [v]वाताप्याय । वातेनाप्यतेऽधस्तान्निपात्यत इति वाताप्यमुदकम् । तस्य प्रदानायेत्यर्थः ॥

हरी यस्य सुयुजा विव्रता वेरर्वन्तानु शेपा ।
उभा रजी न केशिना पतिर्दन् ॥ २ ॥

हरी इति । यस्य । सुऽयुजा । विऽव्रता । वेः । अर्वन्ता । अनु । शेपा ।
उभा । रजी इति । न । केशिना । पतिः । दन् ॥ २ ॥

[v]यस्य इन्द्रस्य [v]हरी हरितवर्णावश्वौ [v]सुयुजा[2] सुष्ठु नियोज्यौ । सुशिक्षितावित्यर्थः । [v]विव्रता । व्रतमिति कर्मनाम । विशिष्टकर्माणौ अर्वन्तौ अरणकुशलौ [v]शेपा शेपवन्तौ । मत्वर्थो लुप्यते । प्रशस्तपुंस्त्वावित्यर्थः । [v]उभा उभौ [v]रजी [v]न रजसी द्यावापृथिव्याविव । यद्वा महान्तौ रजकौ सूर्याचन्द्रमसाविव । [v]केशिना केशिनौ प्रकाशमानौ केशवन्तौ वा ईदृशावश्वौ हे इन्द्र यस्य ते तव स्वभूतौ तयोः [v]पतिः स्वामी त्वं [v]दन् धनानि प्रयच्छन् [v]अनु [v]वेः स्तुतशस्त्रादीन्यनुकामयस्व । दन्निति ददातेः शतरि 'छन्दस्युभयथा' इत्यार्धधातुकत्वात् 'आतो लोप इटि च' इत्याकारलोपः । अत एव श्नुत्वाभावश्च[3] ॥

अप योरिन्द्रः पापज आ मर्तो न शश्रमाणो विभीवान् ।
शुभे यद्युयुजे तविषीवान् ॥ ३ ॥

अप । योः । इन्द्रः । पापजे । आ । मर्तः । न । शश्रमाणः । विभीवान् ।
शुभे । यत् । युयुजे । तविषीऽवान् ॥ ३ ॥

यः [v]इन्द्रः [v]पापजे । [v]आ इत्यनर्थकः । पापाज्जायत इति पापजो वृत्रः । तस्मिन् [v]मर्तो [v]न मनुष्य इव [v]शश्रमाणः तेन सह युद्धे श्राम्यन् [v]विभीवान् विभ्यच्च भवति । श्राम्यतेश्छन्दसि लिट् । तस्य व्यत्ययेन कानच् । स इन्द्रः [v]यत् यदा [v]तविषीवान् महन्निर्बलैर्बलवान् [v]युयुजे युज्यते संपद्यते [v]शुभे शोभार्थं तदानीम् [v]अप [v]योः । तस्य वृत्रस्यापयोरपयोजयिता भवति ॥

१. त१.२.३.६.७-मु-णिलोपे । २. ग-त-म-सुयुजौ । ३. त-म-श्नवभावश्च ।

सचायोरिन्द्रश्चर्कृषे आँ उपानसः सपर्यन् । नदयोर्विव्रतयोः शूर इन्द्रः ॥ ४ ॥

सचा । आयोः । इन्द्रः । चर्कृषे । आ । उपानसः । सपर्यन् ।
नदयोः । विऽव्रतयोः । शूरः । इन्द्रः ॥ ४ ॥

vआयोः । मनुष्यनामैतत् । मनुष्यस्य स्तोतुः vचर्कृषे पुनःपुनर्विलेखनाय । धनप्रदानायेत्यर्थः । vसचा सह दातव्यैर्धनैः सहितः । यद्वा । आयोः सचा सहायभूतः । vउपानसः अनः उपागतवान्[1] । ' अत्यादयः क्रान्ताद्यर्थे द्वितीयया ' (पा. स. २. २. १८. ४) इति प्रादिसमासः । ' अनसन्ताक्पुंसकात्°' (पा. सू. ५. ४. १०३) इति समासान्तष्टच् । आरूढरथ इत्यर्थः । vसपर्यन् धनैः स्तोतारं पूजयन् । यद्वा । व्यत्ययेन कर्तृप्रत्ययः[2] । स्तुतिभिर्हविर्भिश्च पूज्यमानः । उक्तगुणविशिष्टः सन् vआ आगच्छति । उपसर्गश्रुतेरुचितक्रियाध्याहारः । कीदृश इन्द्रः । vनदयोः हेषाशब्दं कुर्वतोः vविव्रतयोः विशिष्टकर्मणोरश्वयोर्नियन्ता vशूरः विक्रान्तः ॥

अधि यस्तस्थौ केशवन्ता व्यचस्वन्ता न पुष्टये ।
वनोति शिप्राभ्यां शिप्रिणीवान् ॥ ५ ॥

अधि । यः । तस्थौ । केशऽवन्ता । व्यचस्वन्ता । न । पुष्टये ।
वनोति । शिप्राभ्याम् । शिप्रिणीऽवान् ॥ ५ ॥

vयः इन्द्रः vकेशवन्ता केशिनौ vव्यचस्वन्ता व्यचनवन्तौ व्याप्तिमन्तौ । vन* इत्यनर्थको निपातः । ईदृशावश्वौ[3] vपुष्टये पोषणाय यजमानस्यात्मनो वा vअधि vतस्थौ अधितिष्ठति आरोहति । ' अधिशीङ्स्थासां कर्म ' (पा. सू. १. ४. ४६) इति कर्मणोऽधिकरणसंज्ञा । यद्वा नेति चार्थे । तेन गुणौ समुच्चीयेते । प्रशस्तकेशौ व्यचस्वन्तौ चेत्यर्थः । सः vशिप्राभ्यां हनूभ्यां[4] vशिप्रिणीवान् शिप्रवानिन्द्रः । एको मत्वर्थीयोऽनुवादः । vवनोति सोमान् याचते । ' वनु याचने ' । यद्वा । वनुष्यतिर्हन्तिकर्मा । शत्रून् हिनस्ति* ॥ ॥ २६ ॥

प्रास्तौदुष्वौजा ऋष्वेभिस्ततक्ष शूरः शवसा । ऋभुर्न क्रतुभिर्मातरिश्वा ॥ ६ ॥

प्र । अस्तौत् । ऋष्वऽओजाः । ऋष्वेभिः । ततक्ष । शूरः । शवसा ।
ऋभुः । न । क्रतुऽभिः । मातरिश्वा ॥ ६ ॥

vऋष्वौजाः[5] दर्शनीयबलः व्याप्तबलो वा vऋष्वेभिः दर्शनीयैर्मरुद्भिः सह vप्रास्तौत् प्रस्तौति । स्तुत्यादिकं सम्यक्कृतमनेनेति प्रशंसति । यद्वा । कर्मणि कर्तृप्रत्ययः । प्रकर्षेण स्तुतोऽभूत् । य इन्द्रः vशूरः विक्रान्तः vमातरिश्वा वृष्टेर्निर्मातर्यन्तरिक्षे श्वसन् वर्तमानः सन् vशवसा बलेन vक्रतुभिः

---

१. ग४-त२.३.७-भ-मु-उपगतवान् । २. त४.५-शतृप्रत्ययः । * ग१.२-न इदानीं पुष्टये पुष्टयर्थं अधि तस्थौ अधितिष्ठति । शिप्राभ्यां शिप्रिणीवान् प्रशस्तहनुकः वनोति शत्रूनभिभवति । ३. त-भ-कीदृशावश्वौ । ४. त१.२.३.६.७.८-भ२.८-मु-हनूभ्यां प्रशस्ताभ्यां । ५. ग१.२-पुस्तकस्थं षष्ठमन्त्रभाष्यं—ऋष्वौजा महौजा ऋष्वेभिः महद्भिः सह युद्धं प्रास्तौत् प्रस्तौति । शवसा बलेनोपेत इंद्रः शूरः ततक्ष शत्रून् तनूकरोति । तत्र दृष्टांतः । ऋभुर्न उरु भासमानो मातरिश्वा वायुर्यथा क्रतुभिः कर्मभिः धनस्य तनूकरोति तद्वदित्यर्थः ।

क्रियमाणैः कर्मभिः । यद्वा । क्रतुरिति प्रज्ञानाम । बलेन प्रज्ञाभिश्च ^ततश्च वृत्रवधादिकं चकार । तत्र दृष्टान्तः । ^ऋभुर्न ऋभव इव । 'सुपां सुलुक्०' इति जसः सुरादेशः । ऋभवो यथा कर्मभिः प्रज्ञाभिश्चानन्यसाधारणरथचमसादिनिर्माणमकुर्वन् तद्वदित्यर्थः ॥

वज्रं यश्चक्रे सुहनाय दस्यवे हिरीमशो हिरीमान् । अरुतहनुरद्भुतं न रजः ॥७॥

वज्रम् । यः । चक्रे । सुऽहनाय । दस्यवे । हिरीमशः । हिरीमान् ।
अरुतऽहनुः । अद्भुतम् । न । रजः ॥ ७ ॥

^यः इन्द्रः ^सुहनाय सुष्ठु हननीयाय ^दस्यवे उपक्षपयित्रे शत्रवे तस्य वधाय ^वज्रं महत्पर्वतादिभेदनसाधनमायुधं ^चक्रे कृतवान् स त्वं वृजिना शिशीहीत्युत्तरत्र संबन्धः । कीदृश इन्द्रः । ^हिरीमशः हरितश्मश्रुः । पृषोदरादिः । ^हिरीमान् हरिताश्वो हरितवर्णो वा ^अरुतहनुः अबाधितहनुः । किमिव । ^अद्भुतं ^न ^रजः । अद्भुतमिति महन्नाम । रज इति रजकमन्तरिक्षमुच्यते । महदन्तरिक्षमिव । तद्यथान्यैरबाध्यं भवति तद्वत्[1] ॥

अव नो वृजिना शिशीह्यृचा वनेमानृचः । नाब्रह्मा यज्ञ ऋधग्जोषति त्वे ॥ ८ ॥

अव । नः । वृजिना । शिशीहि । ऋचा । वनेम । अनृचः ।
न । अब्रह्मा । यज्ञः । ऋधक् । जोषति । त्वे इति ॥ ८ ॥

हे इन्द्र ^नः अस्माकं ^वृजिना वृजिनानि वर्जनीयानि पापानि ^अव ^शिशीहि अत्यर्थं तनूकुरु । विनाशयेत्यर्थः । वयं च ^ऋचा स्तुत्या साधनेन ^अनृचः अस्तुतिकानयजमानान् ^वनेम हिंसाम । ^अब्रह्मा । ब्रह्म परिवृढं स्तोत्रम् । स्तुतिविरहितः ^यज्ञः ^ऋधक् सस्तुतिकाद्यज्ञात्पृथग्भूतः ^त्वे त्वयि ^न ^जोषति न सेवते त्वाम् । न प्रीणयतीत्यर्थः । 'जुषी प्रीतिसेवनयोः' । व्यत्ययेन शप् परस्मैपदं च[2] ॥

ऊर्ध्वा यत्ते त्रेतिनी भूद्यज्ञस्य धूर्षु सद्मन् । सजूर्नावं स्वयशसं सचायोः ॥ ९ ॥

ऊर्ध्वा । यत् । ते । त्रेतिनी । भूत् । यज्ञस्य । धूःऽसु । सद्मन् ।
सऽजूः । नावम् । स्वऽयशसम् । सचा । आयोः ॥ ९ ॥

हे[3] इन्द्र ^ते तव स्वभूता ^त्रेतिनी । त्रेताग्नित्रयम् । तद्वती त्रेतिनी क्रिया । सा ^यत् यदा ^ऊर्ध्वा उन्नता प्रवृत्ता ^भूत् अभूत् । यद्योगादनिघातः । कुत्र स्थाने इति । ^यज्ञस्य यागस्य ^सद्मन् सदने । केष्विति । ^धूर्षु कर्मणां वोढृवृत्तिषु । तदानीं ^सजूः यजमानेन मरुद्भिर्वा सह

१. ग१.२–पुस्तकस्थं सप्तममन्त्रभाष्यं–य इंद्रः सुहनाय हंतुं शक्याय दस्यवे उपक्षयित्रे शत्रवे वज्रं चक्रे करोति हंतुं । वज्रमादत्त इत्यर्थः । कीदृशः । हिरीमशः हरिन्मश्रुः हिरीमान् हरिवान् अरुतहनुः अशब्दितहंतव्यः एवंभूत इंद्रः अद्भुतं न महच्च तेजः प्रादत्तवानित्यर्थः । २. ग१.२–पुस्तकस्थमष्टममन्त्रभाष्यं–नोस्माकं वृजिना शत्रुबलानि अवशिशीहि नाशय । ऋचा मंत्रेण अनृचः अमंत्रान् वनेम हन्याम । अब्रह्मा अस्तुतिर्यज्ञः त्वे त्वयि जोषति सेवमाने ऋधक् वृद्धो न भवति । ३. ग१.२–पुस्तकस्थं नवममन्त्रभाष्यं–यज्ञस्य धूर्षु धिष्ण्येषु सद्मन् स्वे स्थाने यदा ते त्वदर्थं त्रेतिनी अग्नित्रेता ऊर्ध्वा उन्मुखा भूत् भवति तदानीं सजूः मरुद्भिः संगतस्त्वं आयोः यजमानस्य सहायः स्वयशसं नावं करोषि । यज्ञं पापतारणसमर्थं करोषीति यावत् ।

प्रीयमाणः सन् vआयोः मनुष्यस्य यजमानस्य vसचा सह तेन साकं vस्वयशसं स्वायत्तयशस्कं यशःसाधनं vनावं तरणसाधनं तरणिम्। आरोहसीति शेषः। एकमेव रथं[1] यजमान आरोहति स्वतरणार्थं तमेव तस्य साधकमारोहसीत्यर्थः[2]। यद्वा। नावं रथं स्वयशसमायोर्यजमानस्य सचा सहायभूतः सजूस्तेन सह प्रीयमाण आरोहेत्यर्थः॥

श्रिये ते पृश्निरुपसेचनी भूच्छ्रिये दर्विरेरेपाः। यया स्वे पात्रे सिञ्चस उत्॥१०॥

श्रिये। ते। पृश्निः। उपऽसेचनी। भूत्। श्रिये। दर्विः। अरेपाः।
यया। स्वे। पात्रे। सिञ्चसे। उत्॥ १०॥

हे इन्द्र vते तव संबन्धिनः सोमस्य vश्रिये श्रयणाय vपृश्निः गौः पृश्निवर्णा vउपसेचनी पयसो[3] दोग्ध्री vभूत् भवतु। तथा vदर्विः अपि vअरेपाः अपापा सती ते vश्रिये हविषः श्रयणाय vभूत् भवतु। vयया दर्व्या vस्वे स्वकीये vपात्रे पानसाधने मुखे vउत् vसिञ्चसे उपर्याकृष्य पिबसि सा श्रियेऽभूदिति संबन्धः[4]॥

शतं वा यदसुर्य प्रति त्वा सुमित्र इत्थास्तौद्दुर्मित्र इत्थास्तौत्।
आवो यद्दस्युहत्ये कुत्सपुत्रं प्रावो यद्दस्युहत्ये कुत्सवत्सम्॥ ११॥

शतम्। वा। यत्। असुर्य। प्रति। त्वा। सुऽमित्रः। इत्था। अस्तौत्। दुःऽमित्रः। इत्था। अस्तौत्।
आवः। यत्। दस्युऽहत्ये। कुत्सऽपुत्रम्। प्र। आवः। यत्। दस्युऽहत्ये। कुत्सऽवत्सम्॥ ११॥

हे vअसुर्य बलवन्निन्द्र। अवध्यत्वेनासुरसंबन्धित्वात्[5]। vत्वा त्वां vप्रति[6] vशतं vवा शतसंख्याकं धनम्। वाशब्देनापरिमितं धनं वा। vयत् यदा कामितवानित्यर्थः। vयत् यदा च vदस्युहत्ये दस्युहनने शत्रुवधे vकुत्सपुत्रं दुर्मित्रम् vआवः रक्षितवानसि। तथा vकुत्सवत्सं कुत्सपुत्रं vप्रावः प्रकर्षेण रक्षितवानसि। अव रक्षणादौ। लङि 'आडजादीनाम्' इत्याडागमः। पादादित्वादनिघातः। पुनरुक्तिरादरार्था। तदानीं vसुमित्रः नाम्नेत्थम् vअस्तौत्। तथा vदुर्मित्रः गुणत इत्थम् vअस्तौत्। तद्विपरीतं वा द्रष्टव्यम्। 'सुमित्रो नाम्ना दुर्मित्रो गुणतः' इति कात्यायनेन तथोक्तेः। स vइत्था इत्थमनेन कृतप्रकारेणास्तौत् अस्तावीत्। इत्थास्तौदिति द्विरुक्तिः स्तुतिसमाप्त्यर्था[7]॥ ॥ २७॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थाश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके पञ्चमोऽध्यायः॥

---

१. त-मु-रथं यज्ञं। २. त१.३.६.७-साधकेनारोहसी°; त४.५-सायाकमारोहसी°; त८-साधकेन रोहसी°; भ२-साधिकेन रोहसी°। ३. त-भ-मु-पयसां। ४. ग१.२-पुस्तकस्थं दशममन्त्रभाष्यं-ते तव श्रिये श्रयणाय पृश्निर्गौः उपसेचनी दोग्ध्री भूत् भवति। श्रिये सेवनाय दर्विः भूमिः अरेपाः अपापा भवति। यया उत्पादितं सोमं स्वकीये पानसाधन आस्ये उत्सिंचसे उत्क्षरसि। ५. त-भ-वध्यत्वेना°। ६. त-भ-'प्रति' नास्ति। ७. ग१.२-पुस्तकस्थमेकादशमन्त्रभाष्यं-शतं वा शतमपि यद्भवति सोमपात्रं तत् हे असुर्य असुरर्हतः त्वां प्रति भवति। तादृशं त्वामयं सुमित्रो गुणतः नाम्ना दुर्मित्रः इत्था इत्थमस्तौत् स्तुतवान्। यद्यस्मात् दस्युहत्ये युद्धे कुत्सपुत्रमावः अरक्षः यस्मात् युद्धे कुत्सं प्रावः प्रकर्षेणारक्षः। पुनरुक्तिरादरार्था।

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
अष्टमे पञ्चमाध्यायं व्याख्याय श्रुतिकोविदः ।
सायणार्यस्ततोऽध्यायं षष्ठं च व्याचिकीर्षति ॥

तत्र 'उभा उ नूनम्' इत्येकादशर्चमाद्यमनुवाकापेक्षया सप्तमं सूक्तं त्रैष्टुभमश्विदेवत्यम्। कश्यपपुत्रो भूतांशो नामर्षिः। तथा चानुक्रम्यते—'उभौ भूतांशः काश्यप आश्विनम्' इति। अस्योर्ध्वमेऽध्यायावाकातिरिक्तोक्थ एतत्सूक्तम्। सूत्रितं च—'उभा उ नूनं दैव्या होतारा प्रथमा पुरोहितेति परिधानीया' (आश्व. श्रौ. ९. ११) इति ॥

उभा उ नूनं तदिदर्थयेथे वि तन्वाथे धियो वस्त्रापसेव ।
सध्रीचीना यातवे प्रेमजीगः सुदिनेव पृक्ष आ तंसयेथे ॥ १ ॥

उभौ । ऊँ इति । नूनम् । तत् । इत् । अर्थयेथे इति ।
वि । तन्वाथे इति । धियः । वस्त्रा । अपसाऽइव ।
सध्रीचीना । यातवे । प्र । ईम् । अजीगरिति । सुदिनाऽइव । पृक्षः । आ । तंसयेथे इति॥१॥

हे अश्विनौ ᵛउभौ युवां ᵛनूनम् इदानीं ᵛतदित् अस्माभिर्दीयमानं हविः क्रियमाणं स्तोत्रमेव ᵛअर्थयेथे प्रार्थयथः। 'अर्थ याच्ञायाम्'। चौरादिकः। अनुदात्तेत्। उः पूरणः। संप्रार्थ्य च ᵛधियः कर्माणि स्तुतीर्वा ᵛवि ᵛतन्वाथे विस्तारयथः। 'तनु विस्तारे'। तानादिकः। तत्र दृष्टान्तः। ᵛअपसेव अपसा अपस्विनौ कुविन्दौ यथा ᵛवस्त्रा वस्त्राणि विस्तारयतः॥ अपःशब्दान्मत्वर्थीयो विनिः। तस्य 'बहुलं छन्दसि' इति लुक्। प्रातिपदिकस्वरेणान्तोदात्तः। उभयत्र सुप आकारः॥ ᵛईम् अयं यजमानः ᵛसध्रीचीना सध्रीचीनौ सहाञ्चनौ युवाम्॥ सहपूर्वादञ्चतेः क्विनि 'सहस्य सध्रिः' इति सध्र्यादेशः। 'विभाषाञ्चेरदिक्स्त्रियाम्' इति खः। सुप आजादेशः॥ तौ ᵛयातवे॥ तुमर्थे तवेन्प्रत्ययः॥ अभिमतप्राप्त्यर्थं ᵛप्र ᵛअजीगः प्रकर्षेण स्तौति। यद्वा युवां प्रति स्तुतीरुद्गिरति॥ 'गृ शब्दे'। 'गृ निगरणे' वा। एताभ्यां लडि 'बहुलं छन्दसि' इति विकरणस्य श्लुः। 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम्। दीर्घश्छान्दसः। गुणे कृते हल्ङ्यादिना तिपो लोपः॥ किंच ᵛसुदिनेव सुदिनेष्वहानि यथालंकुर्वन्ति। यद्वा। सुदिना सुदिनौ। अहोरात्रयोः प्रवर्तकत्वेन तद्वन्तौ सूर्याचन्द्रमसौ स्वरश्मिभिर्यथाह्न्यलंकुरुतः। तद्वद्युवां ᵛपृक्षः। अन्ननामैतत्। भोक्तृभिः संपृच्यन्त इति पृक्षोऽन्नानि। ᵛआ ᵛतंसयेथे समन्तादलंकुरुथः॥ 'तसि भूष अलंकारे'। चौरादिकः[1] ॥

उष्टारेव फर्वरेषु श्रयेथे प्रायोगेव श्रात्र्या शासुरेथः ।
दूतेव हि ष्ठो यशसा जनेषु मा पर्ष्टं महिषेवावपानात् ॥ २ ॥

उष्टाराऽइव । फर्वरेषु । श्रयेथे इति । प्रायोगाऽइव । श्रात्र्या । शासुः । आ । इथः ।
दूताऽइव । हि । स्थः । यशसा । जनेषु । मा । अर्प । स्थातम् । महिषाऽइव । अवऽपानात्॥२॥

---

१. त-म-मु—तौदादिकः ।

[v]उष्टारेव । उष्टः कामयेते गन्तव्यं देशमित्युष्टारौ प्रासङ्गस्य बोढारावनड्वाहाविव ॥ 'वश कान्तौ' इत्यस्मात्तृचि छान्दसं संप्रसारणमिडभावश्च ॥ तौ यथा संपूर्णघासेषु संचरतः तद्वत् [v]फर्वरेषु स्तुतिभिर्हविर्भिश्च पूरयितृषु जनेषु [v]श्रयेथे । तस्त्वीकरणार्थमाश्रयथः ॥ फर्वतिः पूरणार्थः । अस्मादौणादिको रप्रत्ययः ॥ [v]प्रायोगेव प्रायोगौ प्रयोक्तव्यावनड्वाहाविव । प्रपूर्वाद्युजेः कर्मणि घञ्युपसर्गस्य दीर्घः । थाथादिस्वरेणान्तोदात्तः ॥ तौ यथा [v]श्वात्र्या श्वात्र्यौ । शु क्षिप्रमतनं श्वात्रम् । तत्र साधू भवतः तद्वत् । यद्वा । युद्धार्थं प्रयोक्तव्यावश्वाविव श्वात्र्यौ । श्वात्र्यमिति धननाम । तत्र भवौ । धनस्य साधकावित्यर्थः । तौ युवां [v]शासुः शंसितुः स्तोतुः स्तुतिं प्रति [v]एथः आगच्छथः । 'इण् गतौ' । आदादिकः । [v]दूतेव दूताविव यथा राज्ञः प्रियतमौ दूतौ जनपदेषु यशस्विनौ भवतः तद्वत् [v]जनेषु स्तोतृषु [v]यशसा यशस्विनौ [v]स्थः [v]हि भवथः खलु ॥ अस्तेर्लेटि रूपम् । हियोगाद्निघातः ॥ [v]महिषेव महिषाविव यथा श्रान्तौ महिषौ [v]अवपानात् । पीयतेऽस्मिन्निति पानं ह्रदादि । अधिकरणे ल्युट् । पानमेवावपानम् । संनिकृष्टात् पानान्नापगच्छतः तद्वद्युवामस्मदीयाद्धविषः स्तोत्राच्च [v]माप [v]स्थातं मापक्रम्य तिष्ठतम् ॥ तिष्ठतेर्लुङि 'गातिस्था°' इति सिचो लुक् । 'न माङ्योगे' इत्यडभावः[1] ॥

साकंयुजा शकुनस्येव पक्षा पश्वेव चित्रा यजुरा गमिष्टम् ।
अग्निरिव देवयोर्दीदिवांसा परिज्मानेव यजथः पुरुत्रा ॥ ३ ॥

साकम्ऽयुजा । शकुनस्यऽइव । पक्षा । पश्वाऽइव । चित्रा । यजुः । आ । गमिष्टम् ।
अग्निःऽइव । देवऽयोः । दीदिऽवांसा । परिज्मानाऽइव । यजथः । पुरुऽत्रा ॥ ३ ॥

[v]शकुनस्येव पक्षिण इव यथा पक्षिणः [v]पक्षा पक्षौ संहत्य वर्तमानौ तद्वत् [v]साकंयुजा साकंयुजौ सहाधियुज्य वर्तमानौ भवथः ॥ युजेः 'सरसूद्विष°' इत्यादिना क्विप् ॥ [v]पश्वेव पशू इव ॥ सुप आकारः ॥ तौ यथा चायनीयौ तद्वत् [v]चित्रा चित्रौ चायनीयौ युवां [v]यजुः यजनावस्मदीयौ [v]आ [v]गमिष्टम् आगच्छतम् ॥ यजेरौणादिको भाव उसिन्प्रत्ययः । गमिष्टम् । गमेर्लेटि 'सिब्बहुलं लेटि' इति सिप् । सिप आर्धधातुकत्वात् 'गमेरिट् परस्मैपदेषु' (पा. सू. ७. २. ५८) इतीडागमः ॥ [v]देवयोः देवानिच्छतो यजमानस्य यज्ञे [v]अग्निरिव[2] अग्निर्यथा हविर्भिः स्तुतिभिश्च दीप्यते तद्वत् [v]दीदिवांसा दीदिवांसौ स्तुतिभिर्दीप्तौ भवथः ॥ दीप्यतेः क्वसौ 'वस्वेकाजात्°' इति नियमादिडभावः । वलि लोपे तुजादित्वादभ्यासदीर्घः ॥ [v]परिज्मानेव परिज्मानाविव परितो अजतो गच्छतः कर्मकरणार्थमिति परिज्मानावध्वर्यू इव स्थितौ युवां [v]पुरुत्रा बहुषु देशेषु [v]यजथः देवान् पूजयथः । 'अश्विनौ हि देवानामध्वर्यू' (ऐ. ब्रा. १. १८) इत्याम्नानात् । यद्वा । परिज्मानेव परितो गन्तारौ पुरो वा पश्माद्वा तौ यथा बहुषु देशेषु यजथः संगच्छमानौ भवथः ॥ 'यज देवपूजासंगतिकरणदानेषु' । पुरुत्रा । 'देवमनुष्य°' इत्यादिना त्राप्रत्ययः ॥

आपी वो अस्मे पितरेव पुत्रोग्नेव रुचा नृपतीव तुर्यै ।
इर्येव पुष्टयै किरणेव भुज्यै श्रुष्टीवानेव हवमा गमिष्टम् ॥ ४ ॥

आपी इति । वः । अस्मे इति । पितराऽइव । पुत्रा । उग्राऽइव । रुचा । नृपती इतिनृपतीऽइव । तुर्यै ।
इर्याऽइव । पुष्टयै । किरणाऽइव । भुज्यै । श्रुष्टीवानाऽइव । हवम् । आ । गमिष्टम् ॥ ४ ॥

---

१. त-मु-इत्यडागमाभावः । २. त-भ-'अग्निरिव' नास्ति ।

vअस्मे अस्माकं vवः युवाम्। पूजायां बहुवचनम्। vआपी[1] प्रातौ[1] बन्धुभूतौ भवथः। vपितरेव पितराविव यथान्न पितरौ प्रति vपुत्रा पुत्रौ बन्धुभूतौ भवतः तद्वत्। यद्वा। पुत्रा। वड्यग आकारः। पुत्राणां पितरौ बन्धू। तथा vउग्रेव उग्राविव यथोग्रौ स्वतेजसोदूर्णावग्न्यादित्यौ यथा रोचमानौ[2] भवतः तद्वत् vरुचा दीप्त्या युक्तौ। रोचतेर्भावे क्विप्। 'सावेकाचः' इति विभक्तेः उदात्तत्वम्। यद्वा। रुचा आरोचमानौ भवथः। रोचतेरिगुपधलक्षणः कः। सुप आकारः॥ vनृपतीव यथा नृणां पालयितारौ राजानौ संभ्रमयुक्ताये सेनाये रक्षकत्वेन भवतः तद्वत् vनुर्ये कर्मार्थं त्वरमाणाये संभ्रमवत्ये जनताये युवामभीष्टदातृत्वेन भवथः॥ 'तुर त्वरणे'। 'इगुपधात्कित्' (उ. सू. ४. ११९) इतीग्प्रत्ययः। 'कृदिकारादक्तिनः' (पा. सू. ४. १. ४५ ग.) इति ङीप्। 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम्॥ vइर्येव इर्याविव। इराशब्दः। तत्र भवौ। भवार्थे यत्। अन्नवन्तावन्नौ स्वजनपरितोषणाय भवतः। तद्वद्युवां vपुष्टये धनादिदानेनास्माकं परितोषणाय भवथः। vकिरणेव किरणाविव यथाग्न्यादित्यकिरणौ[3] सर्वेषां प्रकाशनादिद्वारेण भोगाय भवतः तद्वत् vभुज्यै स्तोतॄणां परिभोगाय भवथः। vअुष्टीवानेव अुष्टिवन्ताविव। अुष्टीति क्षिप्रनाम। मत्वर्थीयो वनिप्। तद्वन्तावश्वौ यथा लक्ष्यं देशं प्रति शीघ्रं गच्छतः तद्वत्। यद्वा। अुष्टीवानेव। अुष्टीति सुखनाम। तद्वन्तौ पुरुषौ यथा क्रीडार्थमागच्छतः तद्वद्युवां vहवम् अस्मदीयमाह्वानं प्रति vआ vगमिष्टम् आगच्छतम्॥ हवम्। 'भावेऽनुपसर्गस्य' इति ह्वयतेरप् संप्रसारणं च॥

वंसगेव पूष्यौ शिम्बातां मित्रेव ऋता शतरा शातपन्ता।
वाजेवोचा वयसा घर्म्येष्ठा मेषेवेषा संपूर्यां पुरीषा॥ ५॥

वंसगाऽइव। पूष्यौ। शिम्बातां। मित्राऽइव। ऋता। शतरा। शातपन्ता।
वाजाऽइव। उचा। वयसा। घर्म्येऽस्था। मेषाऽइव। इषा। संपूर्यां। पुरीषा॥ ५॥

vवंसगेव वंसगाविव वननीयगमनौ वृषभाविव तौ यथा vपूष्यौ पूष्णौ पूष्णे भवौ। पुष्टावथवाविस्यर्थः। तद्वद्युवां स्फीताङ्गावश्वौ। 'पुष पुष्टौ'। अस्मादौणादिको भावेऽरम्प्रत्ययः। तद्वत्तात् 'भवे छन्दसि' इति यत्। तित्स्वरितम्। तथा vशिम्बाता शिम्बातौ। सुखनामैतत् शिम्बेन दुःखानां तनूकरणेन हेतुना आतं ग्यासमिति। 'शिन् निशाने'। अस्माच्छिम्बमिति बाहुलकाद्रप्रत्ययो मुक्च निपात्यते। अततेः कर्मणि घञ्। सुप आकारादेशः। सुखकरौ भवथः। vमित्रेव मित्राविव। मित्रशब्देन वरुणोऽप्युपलक्ष्यते सहावस्थानात्। मित्रावरुणाविव vऋता ऋतौ सत्यभूतौ तद्वद्यथार्थदर्शिनौ भवथः। तथा vशतरा शतं शतसंख्याकानि बहूनि रायो धनानि ययोः सन्ति तौ तथोक्तौ। सुपो डादेशः। यद्वा। शतमनेकमिन्द्रियप्रसादादि राति ददातीति शतरा सुखम्। तेन तद्वन्तौ। vशातपन्ता शातपन्तौ तीक्ष्णस्तुतिकौ। शातं तीक्ष्णम्। पन्तम्। पनतेर्बाहुलकात्तन् (उ. सू. ३. ८६)। यद्वा शातपन्ता। शातेन दुःखानां तनूकरणेन पन्यते स्तूयत इति शातपन्तं सुखम्। 'शो तनूकरणे'। निङ्। पनतेस्तन्। तेन युवां सुखवन्तौ भवथः। यद्यपि शिम्बाता शतरा शातपन्ता इति त्रीण्यपि सुखनामानि तथापि कालत्रयेऽप्यश्विनोः सुखकरत्वस्य विवक्षितत्वेन विशेषभेदादपौनरुक्त्यम्। vवाजेव वाजाविव यथाश्वौ वासादिनोह्यतौ संपूर्णावयवौ तद्वत् vवयसा हवीरूपेणान्नेन हेतुना vउचा उच्चैर्वर्तमानौ। पुष्टावित्यर्थः॥ उचा। उच्चैःशब्दात्सुपो डादेशः। डित्त्वाट्टि-

---

१. त–आपूव्यौ; भ१.२.४.८–आपी आप्तव्यौ; भ७–आपीव्यौ। २. भ२–रुचा रोचमानौ। ३. त-भ-सु–यथाग्नेयादित्यकिरणौ।

लोपः ॥ [V]धर्म्येष्ठा धर्मस्थौ । धर्म दीप्तमन्तरिक्षम् । तत्संबन्धिनि देशे सूर्याचन्द्रमसौ रूपेणावस्थितौ भवथः । ' सूर्याचन्द्रमसौ ' (निरु. १२. १) इति यास्कः । यद्वा । धर्म्ये प्रवर्ग्ये भवं धर्म्यं हविः । तत्र देवतात्वेनावस्थितौ भवथः ॥ तिष्ठतेः ' अन्येभ्योऽपि दृश्यन्ते ' इति क्विप् । ' तत्पुरुषे कृति बहुलम् ' इति पूर्वपदस्य सप्तम्या अलुक् ॥ [V]मेषेव मेषाविव । तौ यथाक्रमेण परिचरणीयौ तद्वद्युवाम् [V]इषा इच्छारूपेणान्नेन [V]सपर्या सपर्यौ परिचरणीयौ भवथः । सपरशब्दः कण्ड्वादिः । सपर्यतिः परिचरणकर्मा । [V]पुरीषा पुरीषौ धनादिदानेन स्तोतॄणां पोषयितारौ यद्वा इषिर्भिः पोषणीयौ भवथः । ' पुरीषं पुष्णातेः पोषयतेर्वा ' (निरु. २. २२) इति यास्कः ॥ ॥ १ ॥

सृण्येव जर्भरी तुर्फरीतू नैतोशेव तुर्फरी पर्फरीका ।
उदन्यजेव जेमना मदेरू ता मे जराय्वजरं मरायु ॥ ६ ॥

सृण्याऽइव । जर्भरी इति । तुर्फरीतू इति । नैतोशाऽइव । तुर्फरी इति । पर्फरीका ।
उदन्यजाऽइव । जेमना । मदेरू इति । ता । मे । जरायु । अजरम् । मरायु ॥ ६ ॥

[V]सृण्येव सृण्याविव । सृणिरङ्कुशः । ' तत्र साधुः ' इति यत् । अङ्कुशार्हौ मत्तगजाविव [V]जर्भरी गात्रविनामं कुर्वन्तौ ॥ ' जभ जृभि गात्रविनामे ' । अस्मादौणादिको रिप्रत्ययः ॥ यद्वा । सृण्येव । सृणिर्द्विविधा । मत्तगजस्यैकत्रावस्थापयित्र्येका । अपरा बाधयित्री ॥ ' सर्तेः किच्च ' (उ. सू. ४. ४९; १०४) इत्यौणादिको निप्रत्ययः । किच्चादगुणः । ' कृदिकारादक्तिनः ' इति ङीष् । सुप आकारः । ' उदात्तस्वरितयोर्यणः° ' इति स्वरितः ॥ तादृश्यौ सृण्याविव जर्भरी भर्तारावेकत्रैवावस्थापकौ । तथा [V]तुर्फरीतू तर्फितारौ शत्रूणां हन्तारौ । जर्भरी । भरतेर्यङ्लुगन्तादौणादिक इप्रत्ययः । अभ्यासस्य जकारश्छान्दसः । ' तृफ तृम्फ हिंसायाम् ' । अस्मात्तृजन्तस्य तुर्फरीतारावित्यस्य पृषोदरादित्वाद्वर्णविकारः । यद्वा । अस्माद्बाहुलकादौणादिकोऽरीतुप्रत्यय उत्वं च । अत्र निरुक्तं— ' द्विविधा सृणिर्भवति भर्ता च हन्ता च तथाश्विनौ चापि भर्तारौ जर्भरी भर्तारावित्यर्थस्तुर्फरीतू[1] हन्तारौ' (निरु. १३. ५) इत्यादि । [V]नैतोशेव । नितोशतिर्वधकर्मा । नितोशयतीति नितोशः । तस्यापत्यं नैतोशः । ताविव [V]तुर्फरी शत्रूणां हन्तारौ ॥ तृफतिर्हिंसार्थः । अस्मादौणादिको रिप्रत्यय उत्वं च ॥ [V]पर्फरीका पर्फरीकौ शत्रूणां विदारयितारौ ॥ ' भिफला विशरणे ' । अस्मात् ' पर्फरीकादयश्च ' (उ. सू. ४. २०) इतीकप्रत्ययान्तो निपात्यते ॥ यद्वा । स्तोतृजनानां धनादिदानेन पूरयितारौ ॥ ' पॄ पालनपूरणयोः ' । अस्मादीकनि पूर्ववत्सर्वं निपात्यते । फर्वतेः पूरणार्थाद्वा ॥ [V]उदन्यजेव उदन्यजे इव । उदके भवमुदन्यम् ॥ ' पद्दोमास्° ' (पा. सू. ६. १. ६३) इत्यादिनाशस्प्रभृतिष्वप्युदञ्शब्दादेशः ॥ तत्र जाते रत्ने इव निर्मलौ । कान्तियुक्ताविव्यर्थः । [V]जेमना जेमनौ जयशीलौ ॥ जयतेः ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । दीर्घाभावश्छान्दसः ॥ [V]मदेरू बलातिशयेन मत्तौ स्तुत्यौ वा । [V]ता तौ पूर्वोक्तगुणावश्विनौ युवां [V]मे मदीयं [V]जरायु[2] जरायुजम् अत एव [V]मरायु मरणशीलं शरीरम् [V]अजरं जरारहितं मरणधर्मरहितं कुरुतम् ॥ ' नञो जरमरमित्रमृताः ' इति नञ उत्तरस्य जरशब्दस्याद्युदात्तत्वम् ॥

पज्रेव चर्चरं जारं मरायु क्षत्रेवार्येषु तर्तरीथ उग्रा ।
ऋभू नापत्खरमजा खरज्रुर्वायुर्न पर्फरत्क्षयद्रयीणाम् ॥ ७ ॥

---

१. त-मु-भर्तारावित्यस्य तूर्फरीतू । २. त-भ-' जरायु ' नास्ति ।

पत्राऽइव । चचरम् । जारम् । मरायु । क्षत्राऽइव । अर्येषु । तर्तरीथः । उग्रा ।
ऋभू इति । न । आपत् । खरमज्रा । खरऽज्रुः । वायुः । न । पर्फरत् । क्षयत् । रयीणाम् ॥७॥

हे [v]उग्रा उग्रावुद्गूर्णतेजस्कावश्विनौ [v]पत्रेव पत्राविव प्राप्तिजितबलौ वीराविव स्थितौ । यद्वा । पत्रेव । 'जि घ्रि अभिभवे' । पादाभ्यामभिभवन्तौ समर्थाविव स्थितौ । युवां [v]चचरं चरणशीलं [v]जारं जरायुक्तम् अत एव [v]मरायु मरणशीलं मदीयं शरीरम् [v]अर्येषु गन्तव्येषु तरीतव्येष्वापदादिषु [v]क्षत्रेव । उदकनामैतत् । उदकमिव [v]ततरीथः अत्यन्तं तारयथः ॥ 'तॄ प्लवनतरणयोः' । बहुलगन्ताल्लटि 'छन्दस्युभयथा' इति थस[1] आर्धधातुकत्वेनेडागमः । 'वृतो वा' (पा. सू. ७. २. ३८) इति दीर्घः ॥ [v]ऋभू [v]न ऋभू इव । दार्ष्टान्तिकसाम्यादत्र द्विवचनम् । ऋभू यथा स्वनिर्मितो रथ [v]आपत् तद्वत् [v]खरमज्रा खरं तीक्ष्णं मज्जयितारौ शोधयितारौ । अत्यन्तं शुद्धबलाविरित्यर्थः ॥ 'टुमस्जो शुद्धौ' । अस्मादौणादिको रप्रत्ययः ॥ तादृशौ युवां [v]खरज्रुः तीक्ष्णगतिरतिशयेन वेगवान् ऋभुभिर्दत्तो रथो युवाम् [v]आपत् आप्नोत् ॥ 'आप्लृ व्याप्तौ' । लुङि लृदित्त्वात् च्लेरङ् ॥ स रयः [v]वायुर्न वायुरिव [v]पर्फरत् सर्वत्रापूरयत् । सर्वत्र व्याप्तवानित्यर्थः ॥ 'फर्व पूरणे' । अस्माल्लेटि 'बहुलं छन्दसि' इति शपः श्लुः । अभ्यासस्य रुगागमो वलोपश्च । 'लेटोऽडाटौ' इत्यडागमः ॥ ततः स रयः [v]रयीणां धनानां धनानि [v]क्षयत् शत्रुभ्य आगमयत् ॥ 'क्षि निवासगत्योः' । अस्मादन्तर्णीतण्यर्थाल्लेट्यडागमः ॥ यद्वा । क्षयतिरैश्वर्यकर्मा । धनानामीष्टे ॥ छान्दसमनुदात्तत्वम् ॥

घर्मेव मधु जठरे सनेरू भगेविता तुर्फरी फारिवारम् ।
पतरेव चचरा चन्द्रनिर्णिङ्मनऋज्रा मनन्या[2] न जग्मी ॥ ८ ॥

घर्माऽइव । मधु । जठरे । सनेरू इति । भगेऽअविता । तुर्फरी इति । फारिवा । अरम् ।
पतराऽइव । चचरा । चन्द्रऽनिर्निक् । मनःऽऋज्रा । मनन्या । न । जग्मी इति ॥ ८ ॥

[v]घर्मेव घर्माविव महावीराविव [v]जठरे स्वोदरे [v]मधु मधुनः । षष्ठ्या लुक् । घृतस्य [v]सनेरू संभक्तारौ ॥ 'वन षण संभक्तौ' । अस्मादौणादिक एरुप्रत्ययः ॥ [v]भगेविता । भगो धनम् । तद्विषयरक्षणयुक्तौ ॥ अवतेर्भावे क्तः । 'तत्पुरुषे कृति बहुलम्' इति बहुलवचनात् बहुव्रीहावप्यलुक् । यद्वा । अवतेस्तृजन्तस्य सुपो डादेशः । स्वरस्तु छान्दसः ॥ [v]अरम् अलं [v]तुर्फरी शत्रूणां हिंसितारौ अत एव [v]फारिवा । फारिरायुधम् । तद्वन्तौ भवतः । स्फुरतिर्वधकर्मा । अस्माण्णिचि 'चिस्फुरोर्णौ' (पा. सू. ६. १. ५४) इत्यात्वम् । तदन्तादिप्रत्ययः । सकारलोपश्छान्दसः । 'छन्दसीवनिपौ' इति मत्वर्थीयो वनिप् । सुपो डादेशः ॥ [v]पतरेव पतराविव पतनशीलौ पक्षिणाविव [v]चचरा संचरन्तौ [v]चन्द्रनिर्णिक् । निर्णिगिति रूपनाम । सुपो लुक् । चन्द्रनिर्णिजौ चन्द्ररदशरूपयुक्तौ । यद्वा । चन्द्रमाह्लादकं रूपं ययोस्तौ वर्तेते । [v]मनऋज्रा मनसा प्रसाधनं ययोस्तौ । ऋञ्जतिः प्रसाधनकर्मा । अस्मात्रावे धनू । बहुव्रीहिस्वरः । [v]मनन्या [v]न[2] मनन्यौ यया । मनने साधू । स्तुत्यादित्यर्थः ॥ मनश्शब्दात् 'तत्र साधुः' इति यत् । तित्स्वरितम् ॥ तादृशाविव [v]जग्मी यज्ञे प्रत्यागमनशीलौ भवतः ॥ गमेः 'आदृगमहन०' इति किन्प्रत्ययः ॥

बृहन्तेव शुम्भरेषु प्रतिष्ठां पादेव गाधं तरते विदाथः ।
कर्णेव शासुरनु हि स्मरार्थोऽक्षेव नो मजतं चित्रमभ्रः ॥ ९ ॥

---

१. त१.२.३-म१.४.८-मु-थास्; त७-म१-थास् । २. ग-त-भ-'न' नास्ति ।

बृहन्ताऽइव । गम्भरेषु । प्रतिऽस्थाम् । पादाऽइव । गाधम् । तरते । विदाथः ।
कर्णाऽइव । शासुः । अनु । हि । स्मराथः । अंशाऽइव । नः । भजतम् । चित्रम् । अभ्रः ॥९॥

[v]बृहन्तेव बृहन्ताविव प्रांशू पुरुषौ यथा [v]गम्भरेषु[1] गहनेषु जलेषु प्रतिष्ठां विन्दतः तद्वत् गहनेषु गम्भीरेषु दुष्प्रवेशेषु स्थानेषु [v]प्रतिष्ठाम् अवस्थितिमामदं युवां [v]विदाथः[2] जानीथः । [v]पादेव पादाविव यथा [v]तरते । षष्ठ्यर्थे चतुर्थी । तरतः पुरुषस्य पादौ यथा [v]गाधं जलं वित्तः तद्वद्युवां तार्येषु जलेषु गाधं विदाथः जानीथः । ' विद ज्ञाने ' । लेट्याडागमः । [v]कर्णेव यथा कर्णावुक्तं शब्दं विदतुः तद्वद्युवां [v]शासुः शासितारं स्तुतिं कुर्वाणं जनम् [v]अनु [v]हि [v]स्मराथः अनुकूलं जानीथः खलु । स्मरतेर्लेट्याडागमः । हियोगादनिघातः । ' अधीगर्थदयेशां कर्मणि ' (पा. सू. २. ३. ५२) इति शासुरित्यस्य षष्ठी । [v]अंशेव अंशाविव यथावयवौ[3] तद्वन्तं यज्ञं भजेते तद्वद्युवां [v]नः अस्मदीयं [v]चित्रं चायनीयम् [v]अभ्रः कर्म [v]भजतम् आश्रयतम् ॥ अभ्रः । ' आप्लृ व्याप्तौ ' । अस्मादापः कर्मण्याप्यां ' हस्वो नुट् च वा ' (उ. सू. ४. २०७) इत्यसुन् तत्संनियोगेन ह्रस्वो नुडागमश्च । निस्स्वरेणाद्युदात्तः ॥

आरक्षरेव मध्वेरयेथे सारघेव गर्वि नीचीनबारे ।
कीनारेव स्वेदमासिष्विदाना क्षामेवोर्जा सुयवसात् सचेथे ॥ १० ॥

आरक्षराऽइव । मधु । आ । ईरयेथे इति । सारघाऽइव । गर्वि । नीचीनऽबारे ।
कीनाराऽइव । स्वेदम् । आऽसिस्विदाना । क्षामाऽइव । ऊर्जा । सुयवसऽअत् । सचेथे इति ॥ १० ॥

[v]आरक्षरेव । ' गृ शब्दे ' । अस्माद्भावे क्रदोरप् । अरमलं पर्याप्तं गरः शब्दनम् । तस्य संबन्धिनौ ॥ ' तस्येदम् ' इत्यण् ॥ शब्दवन्तौ मेघाविव यथा [v]मधु जलं प्रेरयतः तद्वद्युवाम् [v]ईरयेथे प्रेरयथः ॥ ' ईर प्रेरणे ' । चौरादिकः ॥ [v]सारघेव सारघाविव । सरघा मधुमक्षिका । सरघैव सारघा । प्रज्ञादित्वादण् (पा. सू. ५. ४. ३८) । ते[4] यथा[4] [v]नीचीनबारे नीचीनद्वारे मधुपुष्पे मधु प्रेरयतः तद्वद्युवां नीचीनबारे स्वयम्भूतद्वारे [v]गवि गोरूपसि क्षीरं प्रक्षिपथः । [v]कीनारेव कीनाराविव कुत्सित-मनुष्यौ यथा स्विद्यमानौ भवतः तद्वत् [v]स्वेदं स्विद्यमानं जलम् [v]आसिस्विदाना आ समन्तात् स्वेदयन्तौ प्रक्षारयन्तौ भवथः ॥ ' ष्विदा गात्रप्रक्षरणे ' । अनुदात्तेत् । तस्माच्छान्दसे लिटि कानजादेशः ॥ [v]क्षामेव । ' क्षै जै वै क्षये ' । अस्मादातो मनिन् । ह्रस्वश्छान्दसः । क्षामा क्षीणा गौः [v]सुयवसात् । अदेः किप् । शोभनं यवसं घासादिकं भक्षयन्ती क्षीररूपेणान्नेन समवेता यथा भवति तद्वद्युवाम् [v]ऊर्जा हवीरूपेणान्नेन [v]सचेथे संगच्छेथे ॥ ' षच समवाये ' ॥

ऋध्याम स्तोमं सनुयाम वाजमा नो मन्त्रं सरथेहोप यातम् ।
शो न पक्वं मधु गोष्वन्तरा भूतांशो अश्विनोः काममप्राः ॥ ११ ॥

ऋध्याम । स्तोमम् । सनुयाम । वाजम् । आ । नः । मन्त्रम् । सऽरथा । इह । उप । यातम् ।
यशः । न । पक्वम् । मधु । गोषु । अन्तः । आ । भूतऽअंशः । अश्विनोः । कामम् । अप्राः ॥ ११ ॥

---

१. त-भ-' गम्भरेषु ' नास्ति । २. ग-त-भ-' विदाथः ' नास्ति । ३. ग४-त४.५-यथा यज्ञ-स्यावयवौ । ४. त-भ-तथा ।

हे अश्विनौ वयं vस्तोमं त्रिवृत्पञ्चदशादिकम् vऋभ्याम ऋभ्वास्म वर्धयेम ॥ 'ऋधु वृद्धौ'। अस्मादाशीर्लिङि 'किदाशिषि' इति यासुटः किस्वम् ॥ vवाजं हविर्लक्षणमन्नं युवाभ्यां vसनुयाम प्रयच्छेम ॥ 'षणु दाने'। तानादिकः। विधिलिङ्। वाक्यभेदादनिघातः ॥ तस्माद्युवां vसरथा सरथौ समानरथावेकमेव रथमारूढौ सन्तौ vइह अस्मिन् कर्मणि vनः अस्मदीयं vमन्त्रं मननीयं स्तोत्रम् vउप vयातम् उपागच्छतम्। vगोभ्वन्तः। गोरूधस्यवस्थितं vपक्वं परिणतम् अत एव vमधु मधुरं vयशो vन। यश इत्यन्ननाम। नञर्थे। क्षीराज्यादिलक्षणं महावीरेऽवनीयमानमन्नं चापेक्ष्यागच्छतमिति संबन्धः। एवमुक्तप्रकारेण vभूतांशः एतन्नामर्षिः vअश्विनोः vकामम् अभिलाषमात्मीयाभिः स्तुतिभिः vआ vअप्राः आपूरयत्। संपूर्णमकार्षीदित्यर्थः ॥ 'प्रा पूरणे'। आदादिकः। व्यत्ययेन मध्यमः ॥ अत्राश्विने सूक्ते सर्वाण्यपि पदानि दुर्व्युत्पादान्यस्माभिर्दिङ्मात्रं प्रदर्शितानि। एवं निरुक्तव्याकरणादिभिरर्थविशेषे बुद्धिमद्भिरुन्नेयानि ॥ ॥ २ ॥

'आविः' इत्येकादशर्चमष्टमं सूक्तम्। विश्वो नामाङ्गिरस ऋषिः। प्रजापतेः सुता दक्षिणा सा वा ऋचिका। 'शतधारं वायुम्' इति चतुर्थी जगती शिष्टा दश त्रिष्टुभः। अनेन सूक्तेन ऋत्विग्भ्यो दीयमाना दक्षिणा तद्दातारो यजमाना वा स्तूयन्ते। अतः सैव देवता। तथा चानुक्रान्तम्–'आविर्दिव्यो दक्षिणा वा प्राजापत्या दक्षिणां तद्दातॄन्वास्तौच्चतुर्थी जगती' इति। गतो विनियोगः ॥

आविरभून्महि माघोनमेषां विश्वं जीवं तमसो निरमोचि।
महि ज्योतिः पितृभिर्दत्तमागादुरुः पन्था दक्षिणाया अदर्शि ॥ १ ॥

आविः। अभूत्। महि। माघोनम्। एषाम्। विश्वम्। जीवम्। तमसः। निः। अमोचि।
महि। ज्योतिः। पितृऽभिः। दत्तम्। आ। अगात्। उरुः। पन्थाः। दक्षिणायाः। अदर्शि॥ १॥

इदं सूक्तं दक्षिणाया वा तद्दातॄणां वा स्तावकम्। दक्षिणा तु यागाङ्गं यागस्तु सायंकाले न क्रियते। 'न सायमस्ति देवया अजुष्टम्' (ऋ. सं. ५. ७७. २) इत्यादिश्रवणात्। तस्मात् अह्नयेव कर्तव्यः। अहश्च सूर्योदयात्पश्चान्नवतीति सूक्तादौ सूर्योदयोऽभिधीयते। vमाघोनम्। मघवेन्द्रः[1]। इन्द्रश्च सूर्यः 'चैत्रमासे तथोरिन्द्रः' इति स्मरणात्। तस्य संबन्धि ॥ 'तस्येदम्' इत्यण्। अतद्धिते प्रत्यये संप्रसारणमभिहितम् (पा. सू. ६. ४. १३३)। सर्वविधीनां छन्दसि विकल्पितत्वादत्र तद्धितेऽपि संप्रसारणम् ॥ सूर्यात्मकस्येन्द्रस्य स्वभूतं vमहि महत् तेजः vएषां यजमानानां यागसिद्ध्यर्थम् vआविरभूत्। प्रकाशितमुद्गतमभूत्। तत्र vविश्वं सर्वं vजीवं स्थावरजङ्गमात्मकं जगत् vतमसः सकाशात् vनिरमोचि[2] निर्मुक्तमभूत[2]। मुञ्चतेः[3] कर्मलुकि चिणि रूपम्। अथानन्तरं vपितृभिः यत् पितृभिर्देवैः vदत्तं नो* हविषामागमनाय तत्[3] vमहि महत् vज्योतिः सूर्याख्यम् vआगात् आगच्छति। पश्चात् vदक्षिणायाः यागाङ्गभूताया vउरुः महान् vपन्थाः मार्गः vअदर्शि सर्वैर्यजमानैर्दृष्टोऽभूत्। सर्वे यागं कृत्वा ऋत्विग्भ्यो दक्षिणां दत्तवन्त इत्यर्थः ॥

उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण।
हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम प्र तिरन्त आयुः ॥ २ ॥

---

१. त-म-मघोन इंद्रः। २. म-'निरमोचि निर्मुक्तमभूत्' नास्ति; त४.५-तेन निर्मुक्तमभूत्। ३. म-'मुञ्चतेः...तत्' नास्ति। * त४.५-आत्मनो।

उद्धा । दिवि । दक्षिणाऽवन्तः । अस्थुः । ये । अश्वऽदाः । सह । ते
हिरण्यऽदाः । अमृतऽत्वम् । भजन्ते । वासःऽदाः । सोम । प्र । तिरन्ते । आयुः ॥ २ ॥

vदक्षिणावन्तः दक्षिणाया देयत्वेन तद्वन्तो दक्षिणां दत्तवन्तो यजमानाः vउद्धा उद्धैः स्थानैः स्थिते vदिवि द्युलोके vअस्थुः तिष्ठन्ति । सामान्येनोक्त्वा दातृविशेषाणां फलविशेषमाह । vअश्वदाः अश्वानां दातारः vये यजमानाः vते vसूर्येण सर्वस्य स्वस्वकर्मणि प्रेरकेणादित्येन vसह तिष्ठन्ति । ये vहिरण्यदाः[1] हिरण्यदातारः ते vअमृतत्वम् अमरणधर्मत्वं देवत्वं vभजन्ते । 'अमृतं वै हिरण्यम्' (तै. सं. ५.२.७.२) इत्याम्नानात् । तथा 'सौम्यं वै वासः' (तै. ब्रा. २.२.५) इति श्रवणात् सोम एव संबोध्यते । हे vसोम vवासोदाः त्वद्देवत्यवस्त्राणां[2] दातारो ये सन्ति ते त्वया सह तिष्ठन्तीति शेषः । एते सर्वे vआयुः जीवनं vप्र vतिरन्ते प्रवर्धयन्ति । प्रपूर्वस्तिरतिर्वृद्ध्यर्थः ॥

दैवी पूर्तिर्दक्षिणा देवयज्या न कवारिभ्यो नहि ते पृणन्ति ।
अथा नरः प्रयतदक्षिणासोऽवद्यभिया बहवः पृणन्ति ॥ ३ ॥

दैवी । पूर्तिः । दक्षिणा । देवऽयज्या । न । कवऽअरिभ्यः । नहि । ते । पृणन्ति ।
अथ । नरः । प्रयतऽदक्षिणासः । अवद्यऽभिया । बहवः । पृणन्ति ॥ ३ ॥

vदैवी देवसंबन्धिनी ॥ 'देवाद्यञञौ' (पा. सू. ४. १. ८५. ३) इत्यञ् । तादृशी vपूर्तिः पालिनी तत्साध्या vदेवयज्या ॥ 'छन्दसि निष्टर्क्यं०' (पा. सू. ३. १. १२३) इति निपातितः ॥ देवयागः । तदङ्गभूता vदक्षिणा vन vकवारिभ्यः ॥ 'ऋ गतौ' इत्यस्य 'अच इः' (उ. सू. ४.१३८) इतीप्रत्ययः ॥ कुत्सितगन्तृभ्योऽयष्टृभ्यः । एतेभ्यो न भवति । यद्वा । देवानां स्वभूता पूर्तिः पूरयित्री स्तुतिभिर्हविर्भिश्च तादृशी देवयज्या दक्षिणा च तेभ्यो न भवतः । तत्र हेतुरुच्यते । हि यस्मात् vते कुत्सितगन्तारः vनहि vपृणन्ति देवान् स्तुतिभिर्हविर्भिश्च न प्रीणयन्ति । 'पृण प्रीणने' । तौदादिकः । vअथ इति प्रश्ने । यष्टॄणां देवयागादि कथं भवति । उच्यते । vनरः कर्मणां नेतारः अत एव vप्रयतदक्षिणासः दत्तदक्षिणाः vबहवः यजमानाः vअवद्यभिया ॥ 'अवद्यपण्यवर्या गर्ह्य०' (पा. सू. ३. १. १०१) इति यत्प्रत्ययान्तत्वेन निपातितः ॥ पापभिया । विहिताननुष्ठाने दुरितानि भवन्ति खलु । तस्मात्तद्भीत्या vपृणन्ति देवान् प्रीणयन्ति । तस्माद्यष्टॄणां देवपालनयागदक्षिणा भवतीत्यर्थः[3] ॥

शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते हविः ।
ये पृणन्ति प्र च यच्छन्ति संगमे ते दक्षिणां दुहते सप्तमातरम् ॥ ४ ॥

शतऽधारम् । वायुम् । अर्कम् । स्वःऽविदम् । नृऽचक्षसः । ते । अभि । चक्षते । हविः ।
ये । पृणन्ति । प्र । च । यच्छन्ति । सम्ऽगमे । ते । दक्षिणाम् । दुहते । सप्तऽमातरम् ॥ ४ ॥

vशतधारं बहुधारेणोपेतं vवायुम् एतन्नामकं vस्वर्विदं स्वर्गस्य लम्भकं सर्वस्य वेत्तारं वा vअर्कम् अर्चनीयमादित्यं च एतौ vनृचक्षसः नृणां द्रष्टॄनन्यानिन्द्रादीन् देवांश्चाभिलक्ष्य vते यजमानाः vहविः vचक्षते । तेभ्यो दातुं पश्यन्ति जानन्ति[4] । चष्टेर्लटि रूपम् । किंच vसंगमे । कर्मकरणार्थम्

---

१. त-भ–'हिरण्यदाः' नास्ति । २. त-भ-मु–तद्देवत्य° । ३. त-भ१.२.४.८–भवतीत्यर्थः । ४. त-भ–'जानन्ति' नास्ति ।

ऋत्विजोऽत्र संगच्छन्त इति संगमः ॥ 'ग्रहभृदनिश्रिगमश्च' इत्यधिकरणेऽप् । थाथादिस्वरः ॥ तस्मिन् यज्ञे ये यष्टारः स्तुतिभिः प्रीणयन्ति । ये च तेभ्यो देवेभ्यो हवींषि प्र यच्छन्ति । उभयत्र यजोगादिनिघातः । ते सप्तमातरम् । सप्तसंख्याका मातृभूता अग्निष्टोमादिसंस्था यस्यां भवन्ति सा । यद्वा । सप्तसंख्याका मातरः कर्मणां निर्मातारः कर्तारो होत्रादयः सन्ति । तादृशीं दक्षिणां दुहते ऋत्विग्भ्यो दुहन्ति ॥

दक्षिणावान् प्रथमो हूत एति दक्षिणावान् ग्रामणीरग्रमेति ।
तमेव मन्ये नृपतिं जनानां यः प्रथमो दक्षिणामाविवाय ॥ ५ ॥

दक्षिणाऽवान् । प्रथमः । हूतः । एति । दक्षिणाऽवान् । ग्रामऽनीः । अग्रम् । एति ।
तम् । एव । मन्ये । नृऽपतिम् । जनानाम् । यः । प्रथमः । दक्षिणाम् । आऽविवाय ॥ ५ ॥

हूतः ऋत्विग्भिराहूतः दक्षिणावान् यजमानः प्रथमः सर्वेषां मुख्यः सन् एति सर्वत्र गच्छति । तथा ग्रामणीः ग्रामाणां नेता धनवत्त्वेन तेषां कर्ता दक्षिणावान् सः अग्रमेति । सर्वेषां प्रथममेव गच्छति । तमेव नृपतिं नराणां पालयितारमिति मन्ये ऋषिरहमवबुध्ये प्रथमः यः[1] जनानां दक्षिणाम् आविवाय आगमयति । वी गत्यादिषु । तस्य लिटि रूपम् । तं नृपतिमिति मन्ये । यद्वा । जनानामिति पूर्ववाक्यशेषः । जनानां मध्ये तमेव मनुष्याणां स्वामिनमिति मन्ये ॥ ॥ ३ ॥

तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम् ।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ॥ ६ ॥

तम् । एव । ऋषिम् । तम् । ऊँ इति । ब्रह्माणम् । आहुः । यज्ञऽन्यम् । सामऽगाम् । उक्थऽशासम् ।
सः । शुक्रस्य । तन्वः । वेद । तिस्रः । यः । प्रथमः । दक्षिणया । रराध ॥ ६ ॥

तमेव दक्षिणाया दातारम् ऋषिम् अतीन्द्रियार्थदर्शिनं यद्वा सत्कर्मकरणेन ऋषिमित्याहुः । तथा तमु तमेव ब्रह्माणमाहुः । किंच तमेव यज्ञन्यम् ॥ 'णीञ् प्रापणे' । क्विप् । 'उदात्तस्वरितोदयमः' इत्यमः स्वरितत्वम् ॥ यज्ञस्य नेतारमध्वर्युमित्याहुः । तमेव सामगां साम्नां गातारमिति । तथा उक्थशासम् । 'शन्सु स्तुतौ' । क्विप् । संहितायां दीर्घश्छान्दसः । उक्थशासं शस्त्राणां शंसितारं होतारमिति ब्रुवन्ति । दक्षिणादानेन तत्कर्मणः परिग्रहात् । सः दाता शुक्रस्य दीप्यमानस्य ज्योतिषः तिस्रः तन्वः अग्निवैद्युतादित्यात्मकानि त्रीणि शरीराणि वेद जानाति । यद्वा । शुक्रस्य दीप्तस्याग्नेराहवनीयाद्यात्मकानि[2] त्रीणि शरीराणि जानाति । प्रथमः मुख्यः यः जनः दक्षिणया रराध ऋत्विगादीनाराधयति ॥ 'राध संसिद्धौ' । लिटि रूपम् । लित्स्वरः ॥

दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम् ।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन् ॥ ७ ॥

दक्षिणा । अश्वम् । दक्षिणा । गाम् । ददाति । दक्षिणा । चन्द्रम् । उत । यत् । हिरण्यम् ।
दक्षिणा । अन्नम् । वनुते । यः । नः । आत्मा । दक्षिणाम् । वर्म । कृणुते । विऽजानन् ॥ ७ ॥

---

१. त१.३.४.५.७.८-म-मु—यो जनः । २. त-म-मु—°राहवनीयात्मकानि ।

Vदक्षिणा तद्दातृभ्यः Vअश्वं Vददाति । तथा Vगां च ददाति । तथा Vवस्त्रं सुवर्णं ददाति । Vउत अपि च Vयद्धिरण्यं रजतमस्ति । 'रजतं हिरण्यम्' (तै. सं.१.५.१,२) इत्याम्नानात् । तच्च ददाति । किंच सा Vअजां[1] Vवनुते ददाति । वनोतिरत्र दानार्थः । तस्मात् Vनः अस्मदीयः Vयः Vआत्मा अस्ति सः Vवर्म Vविजानन् कवचं यथायुधानां निवारकं तद्वद्धरितानि वारयतीति कवचमिति विजानन् Vदक्षिणाम् अश्वादिदानशीलां Vकृणुते । ऋत्विग्भ्यः करोति ॥

न भोजा मम्रुर्न न्यर्थमीयुर्न रिष्यन्ति न व्यथन्ते ह भोजाः ।
इदं यद्विश्वं भुवनं स्वश्चैतत्सर्वं दक्षिणैभ्यो ददाति ॥ ८ ॥

न । भोजाः । मम्रुः । न । निऽअर्थम् । ईयुः । न । रिष्यन्ति । न । व्यथन्ते । ह । भोजाः । इदम् । यत् । विश्वम् । भुवनम् । स्वः[1] रिति स्वः । च । एतत् । सर्वम् । दक्षिणा । एभ्यः । ददाति ॥ ८ ॥

Vभोजाः भोजयितारो धनादिदानेन दातारः Vन Vमम्रुः न म्रियन्ते । देवत्वं भजन्त इत्यर्थः । अत एव Vन्यर्थम् ॥ 'ऋ गतौ' । उषिकुषिगार्तिभ्यस्थन् (उ. सू. २. ४) । समासे थाथादिस्वरः ॥ निकृष्टां गतिं Vन Vईयुः न प्राप्नुवन्ति ॥ 'इण् गतौ' । लिटि 'दीर्घ इणः किति' (पा. सू. ७. ४. ६९) इति दीर्घः ॥ तथा Vन Vरिष्यन्ति । कैश्चिदप्यहिंसिता भवन्ति । कर्मणि व्यत्ययेन परस्मैपदम् । अत एव Vभोजाः दातारः Vन Vव्यथन्ते । परस्परं न भीता न बाधिता वा भवन्ति । Vह प्रसिद्धौ । किंच Vइदं परिदृश्यमानं Vविश्वं सर्वं Vभुवनं Vयत् भूतजातमस्ति Vस्वश्च स्वर्गलोकश्च Vएतत्सर्वं Vदक्षिणा स्वयम् Vएभ्यः तद्दातृभ्यः Vददाति प्रयच्छति ॥

भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं[1] या सुवासाः ।
भोजा जिग्युरन्तःपेयं सुरायाभोजा जिग्युर्ये अहूताः प्रयन्ति ॥ ९ ॥

भोजाः । जिग्युः । सुरभिम् । योनिम् । अग्रे । भोजाः । जिग्युः । वध्वम् । या । सुऽवासाः । भोजाः । जिग्युः । अन्तःऽपेयम् । सुरायाः । भोजाः । जिग्युः । ये । अहूताः । प्रऽयन्ति ॥ ९ ॥

Vभोजाः दातारः Vअग्रे प्रथममेव Vयोनिं क्षीरादेरुत्पत्तिस्थानं Vसुरभिं धेनुं Vजिग्युः । शत्रुभ्यो जितवन्तः ॥ 'जि जये' । लिटि 'सन्लिटोर्जेः' इत्यभ्यासादुत्तरस्य कवर्गादेशः ॥ तथा Vभोजाः दातारः Vवध्वं वधूं नवोढां स्त्रीं Vजिग्युः । Vया स्त्रीः Vसुवासाः शोभनवासा अस्ति तां जिग्युः । किंच Vभोजाः शत्रूणां Vसुरायाः Vअन्तःपेयम् अन्तःपानं Vजिग्युः ॥ 'पा पाने' । भावे यत् । 'ईयति' इतीत्वम् । आर्धधातुकलक्षणो गुणः । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ Vये शत्रवः Vअहूताः बलाधिक्येनानाहूयमानाः Vप्रयन्ति प्रमुखमागच्छन्ति तान् Vभोजाः दक्षिणाया दातारो जनाः Vजिग्युः जयन्ति ॥

भोजायाश्वं सं मृजन्त्याशुं भोजायास्ते कन्या[1] शुम्भमाना ।
भोजस्येदं पुष्करिणीव वेश्म परिष्कृतं देवमानेव चित्रम् ॥ १० ॥

भोजाय । अश्वम् । सम् । मृजन्ति । आशुम् । भोजाय । आस्ते । कन्या । शुम्भमाना ।
भोजस्य । इदम् । पुष्करिणीऽइव । वेश्म । परिऽकृतम् । देवमानाऽइव । चित्रम् ॥ १० ॥

---

१. त१.२.३.६.७.८-भ१.४.७-अजं च ।

vभोजाय दात्रे vआशुं शीघ्रगामिनम् vअश्वं vसं vसृजन्ति। परिचारकाः सम्यगलंकुर्वन्ति। 'सृजू शौचालंकारयोः'। तथा vकन्या। कन्यात्वेनात्र संनिकर्षादभिनवं यौवनं लक्ष्यते। अभिनवयौवना vशुम्भमाना शरीरावयवविशेषशोभया वस्त्राद्यलंकारशोभया च शोभमाना स्त्री तस्मै vभोजाय दात्रे vआस्ते। तथा vभोजस्य दातुरेव हृदयाह्लादकरं vवेश्म गृहं भवति। कीदृशम्। vपुष्करिणीव। पुष्कराणि पद्मानि यस्याः सन्तीति पुष्करिणी सरसी। सा यथा पद्महंसादिभिरलंकृता भवति तद्वत् vपरिष्कृतं वितानादिभिरलंकृतम्॥ परिपूर्वस्य करोतेर्भूषणार्थे संहितायां सुडागमः। 'परिनिविभ्यः' इति सुटः षत्वम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्॥ तथा vदेवमानेव। 'सुपां सुलुक्' इति प्रथमैकवचनस्याकारः॥ देवमानमिव देवयानमिव vचित्रं मनोहरं वेश्म तस्य भवति॥

भोजमश्वाः सुष्ठुवाहो वहन्ति सुवृद्रथो वर्तते दक्षिणायाः।
भोजं देवासोऽवता भरेषु भोजः शत्रून्त्समनीकेषु जेता॥ ११॥

भोजम्। अश्वाः। सुष्ठुऽवाहः। वहन्ति। सुऽवृत्। रथः। वर्तते। दक्षिणायाः।
भोजम्। देवासः। अवत। भरेषु। भोजः। शत्रून्। सम्ऽअनीकेषु। जेता॥ ११॥

vसुष्ठुवाहः॥ 'वह प्रापणे'। 'वहश्च' इति ण्विप्रत्ययः। शोभनवहनसमर्थाः vअश्वाः vभोजं दातारं vवहन्ति। लक्ष्यं देशं प्रापयन्ति। ततः vदक्षिणायाः दातुर्यजमानस्य vसुवृत् सुष्ठु चक्रादिवर्तनं यस्य सोऽश्वादिसहितः vरथः vवर्तते। अथ प्रत्यक्षः। हे vदेवासः हे देवा इन्द्रादयः vभरेषु। भ्रियते[1] आहवनीयादिरूपेणाग्निरत्रेति भरा यज्ञाः। यद्वा। 'भृ भर्त्सने'। भृणन्ति भर्त्सयन्ति योद्धारः अत्रेति भराः संग्रामाः। तेषु vभोजं दातारम् vअवत रक्षत। ततो युष्माभिः पालितः vभोजः धनादिदानेन जनानां भोजयिता सन् vसमनीकेषु संग्रामेषु vशत्रून् vजेता जयशीलो भवति॥ 'जि जये'। ताच्छीलिकस्तृन्। अत एव 'न लोकाव्यय०' इति शत्रुशब्दस्य षष्ठीप्रतिषेधः॥ ॥ ४॥

'किमिच्छन्ती' इत्येकादशर्चं नवमं सूक्तं त्रैष्टुभम्। ऐन्द्रपुरोहितस्य बृहस्पतेर्गोषु बलनाम्नोऽसुरस्य भटैः पणिनामकैरसुरैरपहृत्य गुहायां निहितासु सतीषु बृहस्पतिप्रेरितेनेन्द्रेण गवामन्वेषणाय सरमा नाम देवशुनी प्रेषिता। सा च महतीं नदीमुत्तीर्य बलपुरं प्राप्य गुप्तस्थाने नीतास्ता गा ददर्श। अथ तस्मिन्नन्तरे पणय इदं वृत्तान्तमवगच्छन्त एनां मित्रीकर्तुं संवादमकुर्वन्। तत्र प्रथमातृतीयाद्या अयुजोऽन्त्यावर्जिताः पणीनां वाक्यानि। अत्र त ऋषयः सरमा देवता। द्वितीयाचतुर्थ्यौद्या युज्य एकादशी च षट् सरमाया वाक्यानि। अतस्तासु सर्षिः पणयो देवता। तथा चानुक्रान्तं—'किमिच्छन्ती पणिभिरसुरैर्निगूळहा गा अन्वेषुं सरमां देवशुनीमिन्द्रेण प्रहितामयुग्भिः पणयो मित्रीयन्तः प्रोचुः सा तान्युग्मान्स्याभिरनिच्छन्ती प्रत्याचष्टे' इति। गतो विनियोगः॥

किमिच्छन्ती सरमा प्रेदमानड् दूरे ह्यध्वा जगुरिः पराचैः।
कास्मेहितिः का परितक्म्यासीत्कथं रसाया अतरः पयांसि॥ १॥

किम्। इच्छन्ती। सरमा। प्र। इदम्। आनट्। दूरे। हि। अध्वा। जगुरिः। पराचैः।
का। अस्मेऽहितिः। का। परिऽतक्म्या। आसीत्। कथम्। रसायाः। अतरः। पयांसि॥१॥

अनयागच्छन्तीं सरमां दृष्ट्वा पणयो वदन्ति। vसरमा सरणशीलैतन्नामिका देवशुनी vकिमिच्छन्ती[2] किं प्रार्थयमाना सती vइदम् अस्मदीयं स्थानं vप्र vआनट् प्राप्नोत्॥ आङ्पूर्वो नशिः

१. त१.२.३.६.७.८-म२.५-हियत। २. त-भ-मु-'किमिच्छन्ती' नास्ति।

प्यासिकर्मा। तस्य लुकि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक्। छन्दस्यपि दृश्यत इत्याडागमः॥ ᵛपराचैः पराञ्चि पराङ्मुखान्यावृत्तिवर्जितानि यानि गमनानि तैः ᵛजगुरिः उद्गूर्णः। महता प्रयत्नेनापि गन्तुं न शक्यत इत्यर्थः॥ 'गृ निगरणे'। 'आदृगमहन०' इत्यादिना किन्प्रत्ययः। 'बहुलं छन्दसि' (पा. सू. ७. १. १०३) इत्युत्वम्॥ तादृशोऽथम् ᵛअध्वा ᵛदूरे ᵛहि विप्रकृष्टः खलु। यद्वा। पराचैः पराञ्चनैर्जगुरिरित्यर्थं गन्त्री पार्ष्णिभागमनालोकमाना सतीदं स्थानं प्राप्नोति। दूरेऽयमध्वा यदृच्छया गन्तुं न शक्यते। अतो वयमेतां पृच्छामः। हे सरमे ᵛका कीदृशी ᵛअस्मेहितिः। कोऽस्मास्वर्थहितिः। कोऽस्मासु त्वदपेक्षितार्थो निहितः। यद्वा। अस्मासु कोऽर्थो गतः। दधातेर्हिनोतेर्वा क्तिनि रूपम्। आगच्छन्त्यास्तव ᵛका कीदृशी ᵛपरितक्म्या रात्रिः ᵛआसीत्। यद्वा। तकतिर्गत्यर्थः। परितकनं परितो गमनं भ्रमणं वा कीदृशमासीत्। ᵛकथं च[1] ᵛरसायाः शब्दायमानाया अन्तरिक्षनद्या योजनशतविस्तीर्णायाः ᵛपयांसि उदकानि ᵛअतरः तीर्णवत्यसि। एतद्वद। अत्र 'किमिच्छन्ती सरमेदं प्रानट्' (निरु. ११. २५) इत्यादिकं निरुक्तं द्रष्टव्यम्॥

इन्द्रस्य दूतीरिषिता चरामि महो इच्छन्ती पणयो निधीन्वः।
अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि॥ २॥

इन्द्रस्य। दूतीः। इषिता। चरामि। महः। इच्छन्ती। पणयः। निऽधीन्। वः।
अतिऽस्कदः। भियसा। तत्। नः। आवत्। तथा। रसायाः। अतरम्। पयांसि॥ २॥

अनया तान् सरमा[2] प्रत्युवाच[2]। हे ᵛपणयः एतन्नामका असुराः ᵛइन्द्रस्य ᵛदूतीः। 'सुपां सुलुक्०' इति प्रथमैकवचनस्य सुभ्छान्दसः। अहम् ᵛइषिता तेनैव प्रेषिता सती ᵛचरामि। युष्मदीयं स्थानमागच्छामि। किमर्थम्। ᵛवः युष्मदीयान् युष्मदीये पर्वतेऽधिष्ठापितान् ᵛमहः महतः ᵛनिधीन् बृहस्पतेर्गोनिधीन् ᵛइच्छन्ती कामयमाना सती चरामि। किंच ᵛअतिष्कदः॥ 'स्कन्दिर्गतिशोषणयोः'। भावे क्विप्। अतिष्कन्दनादतिक्रमणाज्जातेन ᵛभियसा भयेन ᵛतत् नदीजलं ᵛनः। पूजायां बहुवचनम्। माम् ᵛआवत् अरक्षत्। ᵛतथा तेन प्रकारेण ᵛरसायाः नद्याः ᵛपयांसि उदकानि ᵛअतरं तीर्णवत्यस्मि॥

कीदाङिन्द्रः सरमे का दृशीका यस्येदं दूतीरसरः पराकात्।
आ च गच्छान्मित्रमेना दधामाथा गवां गोपतिर्नो भवाति॥ ३॥

कीदृङ्। इन्द्रः। सरमे। का। दृशीका। यस्य। इदम्। दूतीः। असरः। पराकात्।
आ। च। गच्छात्। मित्रम्। एन। दधाम। अथ। गवाम्। गोऽपतिः। नः। भवाति॥३॥

तेषां वाक्यम्। हे ᵛसरमे तव स्वामी ᵛइन्द्रः ᵛकीदृक्। कियत्पराक्रमवान्। ᵛका ᵛदृशीका। तस्य कीदृशी दृष्टिः। दृष्टिरूपा सेना कियती। ᵛयस्य ᵛदूतीः दूती त्वम् ᵛइदम् अस्मदीयं स्थानं ᵛपराकात् अतिदूरात् ᵛअसरः आगमः। इति तामुक्त्वा इदानीं ते परस्परमाहुः। एषा सरमा ᵛआ ᵛगच्छात् ᵛच आगच्छतु च। गमेर्लेट्याडागमः। स्वामी ᵛभवाति भवतु। न ह्येकस्या गोः किंतु बहूनां गवां स्वामी भवतु। वृत्यवृत्तिभ्यां स्वाभित्वं बाहुल्यं च विवक्ष्यते॥

---

१. ग-त-म१.२.४.८-मु-वा। २. ग-सरमा प्र ऊचे; त-भ-मु-सरमेत्यूचे।

नाहं तं वेद दभ्यं दभत्स यस्येदं दूतीरसरं पराकात् ।
न तं गूहन्ति स्रवतो गभीरा हता इन्द्रेण पणयः शयध्वे ॥ ४ ॥

न । अहम् । तम् । वेद । दभ्यम् । दभत् । सः । यस्य । इदम् । दूतीः । असरम् । पराकात् ।
न । तम् । गूहन्ति । स्रवतः । गभीराः । हताः । इन्द्रेण । पणयः । शयध्वे ॥ ४ ॥

सरमा वदति । हे पणयः [v]तम् इन्द्रं [v]दभ्यं हन्तव्यमिति [v]न [v]वेद न[1] जानामि । दभेः अचो यत् । कथम् । [v]सः इन्द्रः [v]दभत् सर्वान् जनान् दभति हिनस्त्येव ॥ दभेर्लेटि रूपम् । वाक्यभेदादनिघातः ॥ [v]यस्य [v]दूतीः दूती अहम् [v]इदं युष्मदीयं स्थानं [v]पराकात् अतिदूरादेशात् [v]असरं प्राप्तोऽभूवम् । इन्द्रो हिंसितव्यो[2] न भवतीत्यत्र युक्तिमाह । [v]स्रवतः । स्रवणं स्रवः । तमाचरन्ति ॥ आचारार्थे क्विप् । तुगागमः । जसि रूपम् ॥ स्रवणशीलाः [v]गभीराः गम्भीरा नद्यः [v]तम् इन्द्रं [v]न [v]गूहन्ति न संवृण्वन्ति । नाच्छादयन्ति । किंत्वाविष्कुर्वन्ति । वयं यस्य महिम्ना समुद्रं प्रतिसरामः । तस्मादहिंस्य इत्येनं प्रकटीकुर्वन्ति । 'गुहू संवरणे' । भौवादिकः । तस्माद्धे [v]पणयः यूयम् [v]इन्द्रेण तादृशपराक्रमेण [v]हताः सन्तः [v]शयध्वे ॥ 'शीङ् स्वप्ने' । 'बहुलं छन्दसि' इति शपो लुगभावः ॥

इमा गावः सरमे या ऐच्छः परि दिवो अन्तान्त्सुभगे पतन्ती ।
कस्ते एना अव सृजादयुध्व्युतास्माकमायुधा सन्ति तिग्मा ॥ ५ ॥

इमाः । गावः । सरमे । याः । ऐच्छः । परि । दिवः । अन्तान् । सुऽभगे । पतन्ती ।
कः । ते । एनाः । अव । सृजात् । अयुध्वी । उत । अस्माकम् । आयुधा । सन्ति । तिग्मा ॥ ५ ॥

क्रुद्धाः पणयः प्रत्यूचुः । हे [v]सुभगे शोभनसौभाग्यवति[3] हे [v]सरमे [v]दिवः द्युलोकस्य [v]अन्तान् पर्यन्तान् [v]परि [v]पतन्ती कुत्र गावस्तिष्ठन्तीति परितो गच्छन्ती त्वम् [v]इमाः परिदृश्यमानाः [v]याः [v]गावः । सुब्व्यत्ययः । गाः [v]ऐच्छः कामयसे ताः [v]एनाः गाः [v]ते त्वदीयः [v]कः [v]अयुध्वी अयुद्ध्वा [v]अव [v]सृजात् । अस्मात् पर्वतादवसृजेत् । विनिर्गमयेत् । सृजेर्लेटि रूपम् । अयुध्वी । युधेः क्वाप्रत्यये 'स्नात्व्यादयश्च' इति निपातितः । नञ्समासत्वाल्ल्यबादेशाभावः । नञः प्रकृतिस्वरत्वम् । [v]उत अपि च [v]अस्माकं [v]तिग्मा तीक्ष्णानि [v]आयुधा आयुधानि [v]सन्ति । तस्मादस्माभिर्युद्धमकृत्वा को वा गा आहरति[4] ॥ ॥ ५ ॥

असेन्या वः पणयो वचांस्यनिषव्यास्तन्वः सन्तु पापीः ।
अधृष्टो व एतवा अस्तु पन्था बृहस्पतिर्व उभया न मृळात् ॥ ६ ॥

असेन्याः । वः । पणयः । वचांसि । अनिषव्याः । तन्वः । सन्तु । पापीः ।
अधृष्टः । वः । एतवै । अस्तु । पन्थाः । बृहस्पतिः । वः । उभया । न । मृळात् ॥ ६ ॥

सा ताञ्जिराह । हे [v]पणयः [v]वः युष्माकं [v]वचांसि पूर्वोक्तानि वचनानि [v]असेन्या असेन्यानि । सेनार्हाणि न भवन्ति ॥ सेनाशब्दात् तदर्हतीत्यर्थे 'छन्दसि च' इति यत्प्रत्ययः । नञा समासः । 'यचतोऽतदर्थे' (पा. सू. ६. २. १५६) इत्युत्तरपदाद्युदात्तत्वम् ॥ तथा [v]तन्वः युष्मदीयानि

१. त-म-मु-'न' नास्ति । २. म५-हिंसितो । ३. त-मु-शोभनभाग्यवति । ४. त२-हरेदिति ।

शरीरादि Vअभिवक्ष्यः इत्यर्थोऽपि न Vसम्भवति पराक्रमराहित्येन। पूर्ववत् प्रत्ययः। 'औरुगुणः' (पा. सू. १. ४. १९६) इति गुणः। स्वरश्च तादृक्। यतः Vपापीः पापयुक्तानि खलु ॥ 'छन्दसीवनिपौ' इतीप्रत्ययः। अतः सुः। किंच Vवः युष्मदीयः Vपन्थाः मार्गः Vएतवै गन्तुम् Vअशुष्टः असमर्थः Vअस्तु ॥ 'इण् गतौ' इत्यस्य तुमर्थे तवैप्रत्ययः। 'तवै चान्तश्च युगपत्' (पा. सू. १. २. ५१) इति धातोः प्रत्ययस्य च युगपदुदात्तत्वम्। तत्र हेतुमाह। Vवः युष्मदीयान् Vउभया उभयविधान् पूर्वोक्तांस्तन्वो देहान् Vबृहस्पतिः इन्द्रप्रेरितः Vन Vमृळात् न सुखयेत्। किंतु बाधेत ॥ 'मृड सुखने'। लेट्याडागमः ॥

अयं निधिः सरमे अद्रिबुध्नो गोभिरश्वेभिर्वसुभिर्न्यृष्टः।
रक्षन्ति तं पणयो ये सुगोपा रेकुं पदमलकमा जगन्थ ॥ ७ ॥

अयम्। निऽधिः। सरमे। अद्रिऽबुध्नः। गोभिः। अश्वेभिः। वसुऽभिः। निऽऋष्टः।
रक्षन्ति। तम्। पणयः। ये। सुऽगोपाः। रेकुं। पदम्। अलकम्। आ। जगन्थ ॥ ७ ॥

ते पुनराहुः। हे Vसरमे Vअयं Vनिधिः अस्मदीयः कोशः Vअद्रिबुध्नः। 'बन्ध बन्धने'। 'बन्धेर्मेधिबुधी च' (उ. सू. ३. ५) इति नप्रत्ययो बुध इत्यादेशः। अद्रिर्बन्धको यस्य तादृशः। तथा आहृतैः Vगोभिरश्वेभिः अश्वैश्च Vवसुभिः आत्मीयैर्धनैश्च Vन्यृष्टः नितरां प्राप्तो भवति ॥ 'ऋषी गतौ'। क्तप्रत्यये 'श्वीदितो निष्ठायाम्' इति प्रतिषेधः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् ॥ Vसुगोपाः। 'गुपू रक्षणे'। आयादयः [गुप्] न्तात् किपि अतोलोपयलोपौ। सुष्ठु गोपायितारः Vये Vपणयः तेऽसुराः Vतं निधिं Vरक्षन्ति [पणयन्ति][1]। Vरेकुं। 'रेकृ शङ्कायाम्'। औणादिक उप्रत्ययः। शङ्कितं गोभिः शब्दायमानं Vपदम् अस्माभिः पालितं स्थानम् Vअलकं व्यर्थमेव Vआ Vजगन्थ आगतवत्यसि ॥ गमेर्लिटि[2] रूपम् ॥

एह गमन्नृषयः सोमशिता अयास्यो अङ्गिरसो नवग्वाः।
त एतमूर्वं वि भजन्त गोनामथैतद्वचः पणयो वमन्नित् ॥ ८ ॥

आ। इह। गमन्। ऋषयः। सोमऽशिताः। अयास्यः। अङ्गिरसः। नवऽग्वाः।
ते। एतम्। ऊर्वम्। वि। भजन्त। गोनाम्। अथ। एतत्। वचः। पणयः। वमन्। इत् ॥८॥

सरमा पुनः प्रत्युवाच। हे पणयः Vसोमशिताः सोमेन तीक्ष्णीकृताः सोमपानेन मत्ताः ॥ 'शिन् निशाने'। कर्मणि क्तप्रत्ययः। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् ॥ तादृशाः Vनवग्वाः नवगतयः। यद्वा। अङ्गिरसां सत्रमासीनानां मध्ये केचन नवसु मासूदतिष्ठन् ते नवग्वाः। अनेन दशग्वा अप्युपलक्ष्यन्ते। उभयविधास्ते Vअङ्गिरसः Vऋषयः तेषां प्रथमः Vअयास्यः एतन्नामा च त एते Vइह युष्मदीये स्थाने Vआ Vगमन् आगच्छेयुः ॥ गमेः 'छन्दसि लुङ्लङ्लिटः' इति सार्वकालिको लुङ्। लृदित्त्वाच्च्लेरङ्॥ आगत्य च Vते Vगोनाम् ॥ 'गोः पादान्ते' इति छन्दसि नुडागमः ॥ गवाम् Vऊर्वं तं समूहं Vवि Vभजन्त विभागं कुर्युः ॥ अत्रापि पूर्ववत् सार्वकालिको लुङ् ॥ Vअथ अनन्तरं Vपणयः यूयम् Vएतद्वचः पूर्वं यत् व्यर्थमागतासीति यद्वाक्यमवोचत तद्वाक्यं तदा Vवमन्नित् वमन्तः परित्यजन्त एव भवथ ॥ 'वमु उद्गिरणे'। शतरि 'सुपां सुलुक्०' इति असो लुक्। नुमागमः। संयोगान्तस्य लोपः। यद्वा। लटि रूपम्। स्वरश्छान्दसः ॥

---

१. त४.५—पालयंति तस्मात्स्वं। २. त-मु—गमेर्लिटि।

एवा च त्वं सरम आजगन्थ प्रबाधिता सहसा दैव्येन ।
स्वसारं त्वा कृणवै मा पुनर्गा अप ते गवां सुभगे भजाम ॥ ९ ॥

एव । च । त्वम् । सरमे । आऽजगन्थ । प्रऽबाधिता । सहसा । दैव्येन ।
स्वसारम् । त्वा । कृणवै । मा । पुनः । गाः । अप । ते । गवाम् । सुऽभगे । भजाम ॥ ९ ॥

तयैवमुक्ते सति पणयः प्रणयवाक्यमाहुः । हे ᵛसरमे ᵛत्वं ᵛदैव्येन देवसंबन्धिना ᵛसहसा बलेन ᵛप्रबाधिता यथा तथा बलपुरं प्राप्य तत्र स्थिता गा दृष्ट्वा पुनरागच्छेति तेन प्रपीडिता ᵛत्वम् एवं[1] खेत् ᵛआजगन्थ आगतवत्यसि ॥ चशब्दश्चेदर्थे । 'निपातैर्यद्यदिहन्त°' इति तिङो निघाताभावः । गमेर्लिटि थलि रूपम् । 'सह सुपा' इत्यत्र सहेति योगविभागात् समासः । 'तिङि चोदात्तवति' इति गतेर्निघातः[2] । स्त्रियाम्[3] ॥ तर्हि ᵛत्वा त्वां ᵛस्वसारं भगिनीं ᵛकृणवै करवै । समूहापेक्षयैकवचनम् । त्वं तु ᵛपुनः ᵛमा ᵛगाः । इन्द्रादीन् मा गच्छ । अपि तर्हि हे ᵛसुभगे सरमे ᵛते त्वदीयानां ᵛगवां समूहं पर्वतादपगमय्य ᵛभजाम । त्वं च वयं च विभजाम । विभागं करवामेत्यर्थः ॥

नाहं वेद भ्रातृत्वं नो स्वसृत्वमिन्द्रो विदुरङ्गिरसश्च घोराः ।
गोकामा मे अच्छदयन्यदायमपार्त इत पणयो वरीयः ॥ १० ॥

न । अहम् । वेद । भ्रातृऽत्वम् । नो इति । स्वसृऽत्वम् । इन्द्रः । विदुः । अङ्गिरसः । च । घोराः ।
गोऽकामाः । मे । अच्छदयन् । यत् । आयम् । अप । अर्तः । इत । पणयः । वरीयः ॥ १० ॥

सा[4] तान्[4] प्रत्याचष्टे । हे पणयः ᵛअहं ᵛभ्रातृत्वं ᵛन ᵛवेद न जानामि । तथा ᵛस्वसृत्वं च ᵛनो वेद नैव जानामि । के जानन्ति तानाह । ᵛइन्द्रः ᵛघोराः शत्रूणां भयंकराः ᵛअङ्गिरसश्च ᵛविदुः जानन्ति । किंच अस्मात् स्थानादहं ᵛयत् यदा ᵛआयम् इन्द्रादीन् प्राप्तवम् ॥ 'अय पय गतौ' । लङि रूपम् ॥ तदा ᵛमे मदीयाः ᵛगोकामाः युष्माभिरपहृता गाः कामयमाना इन्द्रादयः ᵛअच्छदयन् । युष्मदीयं स्थानमाच्छादयन्ति । 'छद अपवारणे' । ᵛअतः कारणाद्धे ᵛपणयः[5] ᵛवरीयः उरुतरं गवां बृन्दं परित्यज्य ᵛअप ᵛइत अन्यस्यानं प्रति गच्छत । बहु । वरीयः प्रभूतमतिदूरं देशं गच्छत ॥ इत । 'इण् गतौ' । लोटि रूपम् । वरीयः । उरुशब्दादीयसुनि 'प्रियस्थिर°' इत्यादिना वरादेशः ॥

दूरमित पणयो वरीय उद्गावो यन्तु मिनतीर्ऋतेन ।
बृहस्पतिर्या अविन्दन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः ॥ ११ ॥

दूरम् । इत । पणयः । वरीयः । उत् । गावः । यन्तु । मिनतीः । ऋतेन ।
बृहस्पतिः । याः । अविन्दत् । निऽगूळ्हाः । सोमः । ग्रावाणः । ऋषयः । च । विप्राः ॥ ११ ॥

हे ᵛपणयः यूयं ᵛवरीयः उरुतरं ᵛदूरं दूरदेशम्[6] ᵛइत गच्छत । युष्माभिरपहृताः ᵛगावः ᵛऋतेन सत्येन ᵛमिनतीः मिनत्यो द्वारस्य पिधायकं पर्वतं हिंसत्यो विदारयन्त्यः ᵛउत् ᵛयन्तु

---

१. ग२-एवा च एवं । २. त-भ-गमेर्निघातः । ३. त१.२.३ ६.७.८-भ१.४.५.७-तित्स्वरः; त४.५.भ८-मु-नित्स्वरः; भ२-तित्स्वारितः । ४. ग-अन्यान् स तान्; त-भ-अन्यान् सा तान् । ५. ग२-त४.५-पणयो यूयं । ६. त१.२.३.७-भ१.४-मु-देशं ।

तस्मादुद्गच्छन्तु। यद्वा। भिनत्तीः। व्यत्ययेन कर्मणि क्तृ[1]। भीयमाना युष्माभिर्बाध्यमानास्ताः गावः। सुव्यत्ययः। गा ऋतेन स्तुतिभिर्गन्तव्येनेन्द्रेण सहायेन बृहस्पत्यादय उद्यन्तु पर्वतादुद्गमन्तु। vनिगूढाः भितरां स्थापिताः vयाः गाः vबृहस्पतिः vअविन्दत् लप्स्यते तथा vसोमः तदभिषवकारिणः vप्रावाणः च vविप्राः मेधाविनः vऋषयः अङ्गिरसः vच लप्स्यन्ते॥ 'विदॢ लाभे'। तौदादिकः। तस्मात् 'छन्दसि लुङ्लङ्लिटः' इति भविष्यदर्थे लङ्। 'क्षे मुचादीनाम्' इति नुमागमः॥ ॥ ६ ॥

'तेऽवदन्' इति सप्तर्चं दशमं सूक्तम्। जुहूर्नाम ब्रह्मवादिन्यृषिः। ब्रह्मपुत्र ऊर्ध्वनाभा नाम वा। षष्ठीसप्तम्यावनुष्टुभौ। शिष्टाः पञ्च त्रिष्टुभः। विश्वे देवा देवता। तथा चानुक्रान्तं—'तेऽवदन्सप्त जुहूर्ब्रह्मजाया ब्राह्मो वोर्ध्वनाभा वैश्वदेवं त्र्यनुष्टुबन्तम्' इति। गतो विनियोगः॥

तेऽवदन्प्रथमा ब्रह्मकिल्बिषेऽकूपारः सलिलो मातरिश्वा
वीळुहरास्तप उग्रो मयोभूरापो देवीः प्रथमजा ऋतेन ॥ १ ॥

ते। अवदन्। प्रथमाः। ब्रह्मऽकिल्बिषे। अकूपारः। सलिलः। मातरिश्वा।
वीळुऽहराः। तपः। उग्रः। मयःऽभूः। आपः। देवीः। प्रथमऽजाः। ऋतेन॥ १ ॥

अत्रेतिहासमाचक्षते। जुहूरिति वाङ्नाम। सा ब्रह्मणो जाया च। बृहस्पतेर्वाचस्पतित्वाद्बृहस्पतेर्जुहूर्नाम भार्यां बभूव। कदाचिदस्य किल्बिषमस्या दौर्भाग्यरूपेणासांचक्रे। अत एव स एनां पर्यत्याक्षीत्। अनन्तरमादित्यादयो देवा मिथो विचार्यैनामकिल्बिषां कृत्वा पुनर्बृहस्पतये प्रादुरिति। तदत्र वर्ण्यते। vप्रथमाः मुख्याः vते देवाः vब्रह्मकिल्बिषे॥ षष्ठीसमासः। समासस्वरः॥ ब्रह्मणो बृहस्पतेः किल्बिषे पापे जुहूदौर्भाग्यरूपे विषये vअवदन्। निष्कृत्युपायमवोचन्॥ वकारपरत्वादत्र प्रकृतिभावाभावः॥ के ते। vअकूपारः। अत्र यास्कः—'आदित्योऽप्यकूपार उच्यतेऽकूपारो भवति दूरपारः' (निरु. ४. १८) इति। अकुत्सितपारो महागतिरादित्यः vसलिलः अब्देवता वरुणः vमातरिश्वा वायुः vवीळुहराः॥ हरतेरसुनि रूपं हर इति। हरति विनाशयति तमांसीति हरस्तेजः। प्रभूततेजस्कः। vतपः। तृतीयायाः सुः। तपसा तापनेन vउग्रः उद्गूर्णोऽग्निः vमयोभूः सुखस्य भावयिता सोमः vदेवीः देव्यः vआपः। कीदृश्यः। vऋतेन सत्यभूतेन ब्रह्मणा vप्रथमजाः आदित एवोत्पादिताः। एत उपायमुक्त्वा प्रायश्चित्तमप्यकारयन्निति भावः॥

सोमो राजा प्रथमो ब्रह्मजायां पुनः प्रायच्छदहृणीयमानः।
अन्वर्तिता वरुणो मित्र आसीदग्निर्होता हस्तगृह्या निनाय ॥ २ ॥

सोमः। राजा। प्रथमः। ब्रह्मऽजायाम्। पुनरिति। प्र। अयच्छत्। अहृणीयमानः।
अनुऽअर्तिता। वरुणः। मित्रः। आसीत्। अग्निः। होता। हस्तऽगृह्य। आ। निनाय॥२॥

vप्रथमः मुख्यः vसोमो vराजा vअहृणीयमानः पापापगमनेनालज्जमानः सन् तामेनामकिल्बिषां vब्रह्मजायां vपुनः बृहस्पतये vप्रायच्छत्। ततः vवरुणः vअन्वर्तिता॥ ऋतिः सौत्रो धातुर्हृणायां वर्तते। तस्य तृचि रूपम्॥ सोममनुमोदयिता vआसीत्। सर्वथा त्वं परिगृहाणेति दयामकार्षीत्। तथा vमित्रः च। अनन्तरं vहोता देवानामाह्वाता[2] मनुष्याणां होमनिष्पादको वा vअग्निः vहस्तगृह्य

१. ग-त-म-शता। २. त-भ-देवानां।

तौ हस्ते गृहीत्वा ᵛआ ᵛनिनाय आनेनैत्। प्रादादित्यर्थः ॥ हस्तगृह्य। 'स्त्रियं हस्ते पाण्यावुपयमने' (पा. सू. १. ४. ७७) इति हस्तशब्दस्य गतिसंज्ञायां प्रहिणा समासे ल्यप्। एकारलोपश्छान्दसः। यद्वा। हस्तशब्दात् परस्य गृहेश्छान्दसौ समासल्यपौ ॥

हस्तेनैव ग्राह्या आधिरस्या ब्रह्मजायेयमिति चेदवोचन्।
न दूताय प्रह्ये तस्थ एषा तथा राष्ट्रं गुपितं क्षत्रियस्य ॥ ३ ॥

हस्तेन। एव। ग्राह्याः। आऽधिः। अस्याः। ब्रह्मऽजायाः। इयम्। इति। च। इत्। अवोचन्। न। दूताय। प्रऽह्ये। तस्थे। एषा। तथा। राष्ट्रम्। गुपितम्। क्षत्रियस्य ॥ ३ ॥

देवा बृहस्पतिमूचुः। हे बृहस्पते ᵛअस्याः ᵛआधिः। आधीयन्त आमरणान्यत्रेत्याधिः शरीरम्॥ 'उपसर्गे घोः किः' (पा. सू. ३. ३. ९२) इति किप्रत्ययः। अस्याः शरीरं ᵛहस्तेनैव ᵛग्राह्याः ग्रहीतव्यमेव। पुनस्ते देवा इदानीम् ᵛइयं ᵛब्रह्मजाया ᵛइति एव ᵛअवोचन् अवादिषुः॥ चशब्दश्चेदर्थे। अत एव 'निपातैर्यद्यदिहन्त°' इति तिङो निघाताभावः। 'ब्रूञ् व्यक्तायां वाचि'। लुङि ब्रुवो वचिः। 'अस्तिवक्तिख्यातिभ्योऽक्' इति ष्लेरङादेशः। 'वच उम्' इत्युमागमः। अडागमस्वरः॥ ᵛइत् अवधारणे। ᵛएषा ब्रह्मजाया पुरा ᵛग्राह्ये॥ 'हि गतौ वृद्धौ च'। कर्मण्यौणादिकः क्यप्। तुगभावश्छान्दसः। क्ङिति च संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः। 'उदात्तस्वरितयोर्यणः°' इति सुपः स्वरितत्वम्॥ प्रहिताय त्वया भार्यान्वेषणार्थं प्रेषिताय ᵛदूताय ᵛतथा ᵛन ᵛतस्थे। स्वात्मानं न प्रकाशयति॥ तिष्ठतेर्लिटि 'प्रकाशनस्थेयाख्ययोश्च' (पा. सू. १. ३. २३) इत्यात्मनेपदम्। 'श्रावद्भुक्स्थाशपाम्°' (पा. सू. १. ४. ३४) इति दूतस्य संप्रदानसंज्ञा॥ तत्र दृष्टान्तः। यथा ᵛक्षत्रियस्य राज्ञः ᵛगुपितं रक्षितं ᵛराष्ट्रं राज्यं शत्रवे यथा न प्रकाशयति तद्वदसौ दौर्मांग्ययुक्ततया तस्मै स्वात्मानं न प्रकाशितवती। इदानीं तु तद्राहित्येन प्रकाशमानेयं[1] ब्रह्मजायैवेत्यब्रुवन्॥

देवा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसे ये निषेदुः।
भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ॥ ४ ॥

देवाः। एतस्याम्। अवदन्त। पूर्वे। सप्तऽऋषयः। तपसे। ये। निऽसेदुः।
भीमा। जाया। ब्राह्मणस्य। उपऽनीता। दुःऽधाम्। दधाति। परमे। विऽओमन्॥ ४ ॥

ᵛपूर्वे चिरंतनाः ᵛदेवाः आदित्यादयः ᵛएतस्यां विजये ᵛअवदन्त[2]। इमं पापरहितेत्यवादिषुः। तथा ᵛये ᵛसप्तर्षयः। समासस्वरः। सप्तसंख्याका ऋषयः ᵛतपसे तपश्चरणाय ᵛनिषेदुः निषण्णा बभूवुः। सदेर्लिटि रूपम्। उपसर्गेण समासः। यद्योगादभिघातः। तेऽप्यवादिषुः। ततः ᵛभीमा शत्रुरूपाणां पापानां भयंकरी सुकृतवती एषा ᵛजाया ᵛब्राह्मणस्य बृहस्पतेः ᵛउपनीता। समीपे देवैः स्थापिता॥ 'णीञ् प्रापणे'। कर्मणि क्तः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। तथा हि। तपःप्रभावः ᵛदुर्धां दुर्धामपि ᵛपरमे ᵛव्योमन् व्योमन्युत्तमे स्थाने ᵛदधाति विदधाति खलु। तस्माद् एतामपि देवतापरिग्रहरूपस्तपोमहिमा बृहस्पतेरग्निके स्थापयति॥

---

१. त-म१.२.४.८-°मानेदं। २. त४,५-अवदन्।

ब्रह्मचारी चरति वेविषद्विषः स देवानां भवत्येकमङ्गम् ।
तेन जायामन्वविन्दद्बृहस्पतिः सोमेन नीतां जुहूं१ न देवाः ॥ ५ ॥

ब्रह्मऽचारी । चरति । वेविषत् । विषः । सः । देवानाम् । भवति । एकम् । अङ्गम् ।
तेन । जायाम् । अनु । अविन्दत् । बृहस्पतिः । सोमेन । नीताम् । जुहूम् । न । देवाः ॥५॥

एवं स्वपतिर्मामलभतेति जुहूः परोक्षतया वदति । हे ᵛदेवाः पूर्वं सः ᵛब्रह्मचारी जायाभावेन ब्रह्मचारी ᵛचरति । अत एव ᵛविषः सर्वेषु यज्ञेषु व्याप्तवान् देवान् ᵛवेविषत् स्तुतिभिर्हविर्भिश्च व्याप्नुवन् ᵛदेवानाम् ᵛएकम् ᵛअङ्गं ᵛभवति । जायापती यज्ञस्य द्वे अङ्गे खलु ॥ वेविषत् । 'विष्लृ व्याप्तौ' । जौहोत्यादिकः । 'निजां त्रयाणां गुणः श्लौ' (पा. सू. ७. ४. ७५) इत्यभ्यासस्य गुणः । शतुः 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥ ᵛतेन देवानां परिचरणेन ᵛबृहस्पतिः ᵛजायां जुहूनामिकां माम् ᵛअन्वविन्दत् । अनुगम्य अलभत[1] । मशब्द उपमार्थे । पूर्वं यथा ᵛसोमेन ᵛनीतां 'सोमो ददद्गन्धर्वाय' (ऋ. सं. १०. ८५. ४१) इत्यादिक्रमेण नीतां ᵛजुहूं जुहूं यथा लब्धवान् तद्वदिदानीमपि ॥ जुहूम् । 'हु दानादनयोः' । 'अन्येभ्योऽपि दृश्यते' इति क्विप् । 'जुहोतेर्द्वे च' इति द्विर्वचनं दीर्घश्च । 'उदात्तयणो हल्पूर्वात्' इति विभक्त्युदात्तत्वे प्राप्ते 'नोकृधात्वोः' इति प्रतिषेधे 'उदात्तस्वरितयोर्यणः०' इति स्वरितत्वम् ॥

पुनर्वै देवा अददुः पुनर्मनुष्या उत ।
राजानः सत्यं कृण्वाना ब्रह्मजायां पुनर्ददुः ॥ ६ ॥

पुनः । वै । देवाः । अददुः । पुनः । मनुष्याः । उत ।
राजानः । सत्यम् । कृण्वानाः । ब्रह्मऽजायाम् । पुनः । ददुः ॥ ६ ॥

लाभहेतुमाह । ᵛदेवाः ᵛब्रह्मजायां जुहूं बृहस्पतये ᵛपुनः ᵛअददुः । वैशब्दः प्रसिद्धिवाची । ᵛउत अप्यर्थे । ᵛमनुष्याः अपि ᵛपुनः अददुः । एवं देवमनुष्यैः कृतं दानं ᵛसत्यं यथार्थं ᵛकृण्वानाः कुर्वाणाः ᵛराजानः अपि ᵛपुनः तस्मै ᵛददुः । एवमन्यवहार्यत्वनिमित्तं[2] पापमपि व्यनाशयन्निति भावः ॥

पुनर्दाय ब्रह्मजायां कृत्वी देवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्त्वायोरुगायमुपासते ॥ ७ ॥

पुनःऽदाय । ब्रह्मऽजायाम् । कृत्वी । देवैः । निऽकिल्बिषम् ।
ऊर्जम् । पृथिव्याः । भक्त्वाय । उरुऽगायम् । उप । आसते ॥ ७ ॥

ᵛदेवैः । 'सुपां सुपो भवन्ति' इति जसस्तृतीयादेशः ॥ देवाः ᵛनिकिल्बिषम् ॥ अर्थाभावे अव्ययीभावः । समासस्वरः ॥ तस्याः किल्बिषाभावं ᵛकृत्वी ॥ 'ल्यब्लोपे कर्मण्यधिकरणे च' इति निपातितः ॥ कृत्वा ᵛब्रह्मजायां ब्रह्मणो बृहस्पतेर्भार्यां ᵛपुनर्दाय पुनर्दत्वा ॥ 'पुनश्चसोश्छन्दसि गतिसंज्ञा वक्तव्या' (वा. सू. १. ४. ६०. २) इति पुनःशब्दस्य गतिसंज्ञायां समासस्यपौ । 'न ल्यपि' (पा. सू. ६.

१. त१.२.३–अभवत; त७–भ१.२.४.८–अभवत् ; भ७–अभ्यवत् । २. ग–एवं देवमनुष्या अव्यव° ।

४. ६९) इतीत्वप्रतिषेधः । कृवृसरपदप्रकृतिस्वरत्वम् ॥ [v]पृथिव्याः [v]ऊर्जं रसभूतमन्नं हवीरूपं [v]भक्षयाय ॥ ' क्यो वक् ' (पा. सू. ७. १. ४७) इति यगागमः ॥ भक्षयित्वा विभज्य [v]उरुगायं बहुकीर्तिं बहुभिः स्तोतव्यं वा वाईस्पत्यं यज्ञम् [v]उपासते सेवन्ते ॥ ॥ ७ ॥

' समिद्धः ' इत्येकादशर्चमेकादशं सूक्तं त्रैष्टुभम् । भार्गवो जमदग्निर्ऋषिः । तस्य पुत्रो रामो वा यः परशुराम इति प्रख्यातः । आप्रीसूक्तमिदम् । अतः समिदाद्याः सतनूनपात्तो नराशंसवर्जिताः प्रत्यृचं देवताः । तथा चानुक्रान्तं—' समिद्ध एकादश जमदग्निस्तत्सुतो वा राम आग्नेयः ' इति । पशौ जामदग्न्यानामिदमाप्रीसूक्तं यद्वाविशेषेण सर्वेषाम् । सूत्रितं च—' समिद्धो अद्येति सर्वेषां यथर्षि वा ' (आश्व. श्रौ. ३. २) इति । अग्निचयनाङ्गभूते प्राजापत्ये पशौ सर्वेषां नित्यमिदमाप्रीसूक्तम् । सूत्रितं च—' प्राजापत्ये तु जामदग्न्यः सर्वेषाम् ' (आश्व. श्रौ. ३. २) इति ॥

समिद्धो अद्य मनुषो दुरोणे देवो देवान्यजसि जातवेदः ।
आ च वह मित्रमहश्चिकित्वान्त्वं दूतः कविरसि प्रचेताः ॥ १ ॥

सम्ऽइद्धः । अद्य । मनुषः । दुरोणे । देवः । देवान् । यजसि । जातऽवेदः ।
आ । च । वह । मित्रऽमहः । चिकित्वान् । त्वम् । दूतः । कविः । असि । प्रऽचेताः ॥ १ ॥

हे [v]जातवेदः जातप्रज्ञाग्ने [v]देवः स्वतेजसा दीप्यमानस्त्वं [v]मनुषः मनुष्यस्य यष्टुः [v]दुरोणे । गृहनामैतत् । दुरवने आयासेन रक्षितव्ये गृहे [v]अद्य अस्मिन् कर्मणि [v]समिद्धः सम्यक् प्रज्वालितः सन् [v]देवान् इन्द्रादीन् [v]यजसि । हविर्भिः पूजय ॥ समिद्धः । ' इन्धी दीप्तौ ' । कर्मणि क्तः । ' श्वीदितो निष्ठायाम् ' इतीट्प्रतिषेधः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥ हे [v]मित्रमहः स्तुत्यस्तोतृलक्षणत्वेन मित्रभूतानां स्तोतॄणां पूजयितः तैः पूज्यमान वाग्ने [v]चिकित्वान् तैः कृताः स्तुतीः प्रजानन् चेतनावान् वा त्वमस्मदीये यज्ञे देवान् [v]आ [v]वह [v]च । आप्रापय ॥ ' वह प्रापणे ' । लोटि रूपम् । ' चवायोगे प्रथमा ' इति न निघातः ॥ तथा [v]कविः क्रान्तप्रज्ञः अत एव [v]प्रचेताः प्रकृष्टज्ञानः [v]त्वं [v]दूतः देवानां हविष्प्रापणेन हितकारी भवसि ॥

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व ।
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥ २ ॥

तनूऽनपात् । पथः । ऋतस्य । यानान् । मध्वा । सम्ऽअञ्जन् । स्वदय । सुऽजिह्व ।
मन्मानि । धीभिः । उत । यज्ञम् । ऋन्धन् । देवऽत्रा । च । कृणुहि । अध्वरम् । नः ॥ २ ॥

हे [v]तनूनपात् । नप्तादित्यनन्तरापत्यनामधेयम् । गौरत्र[1] तनूरुच्यते[1] ततो अस्यां भोगाः क्षीरादय इति । तस्याः पयो जायते पयस आज्यं तस्मादग्निः । यद्वा । अन्तरिक्षे ततो आपस्तन्वः ताभ्य ओषध्यादयः तेभ्योऽग्निरिति । एवंरूप हे [v]सुजिह्व शोभनज्वाल । यद्वा जिह्वेति वाङ्नाम । शोभनवाग्ने [v]ऋतस्य यज्ञस्य [v]यानान् फलप्राप्तिहेतून् [v]पथः मार्गान् हविरात्मना [v]मध्वा मदकरेण रसेन यद्वा वाग्व्यक्तिहेतुना रसेन [v]समञ्जन् सम्यग्दीपयन् [v]स्वदय स्वादय । स्वादूकुरु ॥ ''स्वद आस्वादने ' । णिच्युपधावृद्ध्यभावश्छान्दसः ॥ किंच [v]मन्मानि । मन्यतेरर्थेतिकर्मणः । मननीयानि अस्मदभिप्रेतानि स्तोत्राणि [v]धीभिः प्रज्ञाभिः कर्मभिर्वा [v]उत अपि च [v]यज्ञं यजनीयं हविश्च [v]ऋन्धन्

---

१. त१.२.३.४.५.६.८-म–गीर्यते ।

सप्तम्यानि कुर्वन् vनः अस्मदीयम् vअध्वरं यज्ञं vदेवत्रा देवेषु vकृणुहि कुरु ॥ देवशब्दात् 'देव-मनुष्य०' इत्यादिना सप्तम्यर्थे त्राप्रत्ययः ॥

आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥ ३ ॥

आऽजुह्वानः । ईड्यः । वन्द्यः । च । आ । याहि । अग्ने । वसुऽभिः । सऽजोषाः ।
त्वम् । देवानाम् । असि । यह्व । होता । सः । एनान् । यक्षि । इषितः । यजीयान् ॥३॥

हे vअग्ने त्वमस्मत्कर्मणि[1] vआ vयाहि आगच्छ । कीदृशः । vआजुह्वानः देवानामाह्वाता । 'हु दानादनयोः' । जौहोत्यादिकः । अभ्यस्तस्वरः । vईड्यः । ईडिरध्येषणाकर्मा । अध्येष्यः प्रार्थ्यमानः[2] vवन्द्यः स्तोतव्यः vवसुभिः देवैः vसजोषाः सह प्रीयमाणः । आगत्य च हे vयह्व । महच्चामैतत् । हे महन् सः vत्वं vदेवानां vहोता आह्वाता vअसि । ततः vयजीयान् ॥ यष्टृशब्दादीयसुनि 'तुरिष्ठेमेयःसु' इति तृचो लोपः ॥ यष्टृतरः vसः त्वम् vइषितः अस्माभिरध्येषितः प्रार्थितः सन् एतान् देवान् vयक्षि यज । हविषा पूजय ॥

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्युं प्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ॥ ४ ॥

प्राचीनम् । बर्हिः । प्रऽदिशा । पृथिव्याः । वस्तोः । अस्याः । वृज्यते । अग्रे । अह्नाम् ।
वि । ऊँ इति । प्रथते । विऽतरम् । वरीयः । देवेभ्यः । अदितये । स्योनम् ॥ ४ ॥

यदिदं vप्राचीनं प्राङ्मुखं vबर्हिः अस्ति तदिदं vपृथिव्याः वेदिलक्षणायाः vवस्तोः ॥ 'वस आच्छादने' । तुन्प्रत्ययः । 'चतुर्थ्यर्थे बहुलं छन्दसि' इति षष्ठी । यद्वा । भावलक्षणे तोसुन् द्रष्टव्यः । वसनायाच्छादनार्थम् vअह्नाम् vअग्रे पूर्वाह्णे vप्रदिशा प्रकर्षेण दिश्यमानेन मन्त्रेण vअस्याः प्राच्या दिशः vवृज्यते स्तूयते आहियते । तथा च निगमः—'त आ वहन्ति कवयः पुरस्तात्' (तै. सं. १.१.२.१) इत्यादि । तच्चाहृतं vवरीयः उरुतरं बर्हिः vवितरं विस्तीर्णतरं यथा भवति तथा vवि vप्रथते । विविधमेव वेद्यां प्रस्तृतं भवति । तथा vदेवेभ्यः vअदितये[3] वेदिलक्षणायै पृथिव्यै च vस्योनं सुखकरं भवति । विस्तीर्णे बर्हिषि देवाः सुखं निषीदन्ति ॥

व्यचस्वतीरुर्विया वि श्रयन्तां पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः ॥ ५ ॥

व्यचस्वतीः । उर्विया । वि । श्रयन्ताम् । पतिऽभ्यः । न । जनयः । शुम्भमानाः ।
देवीः । द्वारः । बृहतीः । विश्वम्ऽइन्वाः । देवेभ्यः । भवत । सुप्रऽअयनाः ॥ ५ ॥

vव्यचस्वतीः । व्यचो व्यापनम् । तद्वत्यः ॥ 'वा छन्दसि' इति पूर्वसवर्णदीर्घः ॥ ता द्वारदेवताः vउर्विया ॥ उरुशब्दात्तृतीयैकवचने 'इयाडियाजीकाराणामुपसंख्यानम्' (पा. सू. ७. १.

---

१. ग-त-भ२.८-त्वस्मिन् कर्मणि; भ१-त्वमस्मि कर्मणि; भ४-त्वमस्मित्कर्मणि;. भ७-त्वमस्म कर्मणि । २. त४.५-पूज्यमानः । ३. ग१.२-अदितये अदीनायै ।

२९. १) इतीषादेशः ॥ उरुत्वेन ᵛवि ᵛअयन्तां विशेषेणाश्रिता भवन्तु। तत्र दृष्टान्तः। ᵛपतिभ्यो ᵛन यथा पतीनामर्थाय संभोगकाले ᵛशुम्भमानाः शोभमानाः ᵛजनयः जाया विश्रयन्ति तद्वदस्मिन् कर्मणि[1] विश्रयन्ताम्। हे ᵛबृहतीः महत्यो हे ᵛविश्वमिन्वाः ॥ इविः प्रीणनार्थः। तस्मात् कर्मण्युपपदे अण्। इदिरावासुम्। 'तत्पुरुषे कृति बहुलम्' इत्यत्र बहुलवचनात् द्वितीयाया अप्यलुक् ॥ सर्वस्य प्रीणयित्र्यो हे ᵛद्वारः ᵛदेवीः द्वाराभिमानिन्यो हे देव्यः यूयं ᵛदेवेभ्यः देवानामर्थाय ᵛसुप्रायणाः सुगमनाः सुविवृताः ᵛभवत ॥ ॥ ८ ॥

आ सुष्वयन्ती यजते उपाके उषासानक्ता सदतां नि योनौ।
दिव्ये योषणे बृहती सुरुक्मे अधि श्रियं शुक्रपिशं दधाने ॥ ६ ॥

आ। सुस्वयन्ती इति। यजते इति। उपाके इति। उषसानक्ता। सदताम्। नि। योनौ।
दिव्ये इति। योषणे इति। बृहती इति। सुरुक्मे इति सुऽरुक्मे।
अधि। श्रियम्। शुक्रऽपिशम्। दधाने इति ॥ ६ ॥

ᵛसुस्वयन्ती। 'अय पय गतौ'। शतर्युपसर्गस्य सोर्द्विर्वचनं छान्दसम्। सुष्ठु अयन्त्यौ गच्छन्त्यौ। यद्वा। स्वपेर्यङन्तस्य वर्णलोपः ॥ सुष्वापयन्त्यौ। ᵛयजते यज्ञे ᵛउपाके उपकान्ते ᵛउषासानक्ता उषाश्च नक्तं च ॥ द्वन्द्वे 'उषासोषसः' (पा. सू. ६. ३. २१) इत्युषासादेशः[2]। 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ॥ अहोरात्रदेव्यौ ᵛयोनौ अस्मिन् यज्ञस्थाने ᵛनि[3] नितरां निश्चयेन वा ᵛआ ᵛसदताम् आसीदताम्। सदेर्लुङि लुदित्त्वाच्च्लेरङ्। कीदृश्यौ। ᵛदिव्ये दिवि भवे ᵛयोषणे योषितावित्र प्रीणयित्र्यौ। यद्वा। योषणे समिते[4] परस्परतोऽविविक्ते। ᵛबृहती गुणैर्महत्यौ ᵛसुरुक्मे शोभनदीप्ते ॥ रुक्मम्। रोचतेर्मकारान्तस्य कुत्वे च कृते रूपम् ॥ ᵛशुक्रपिशं शोभमानरूपां[5] ᵛश्रियम् ᵛअधि ᵛदधाने अधिकं धारयन्त्यौ ॥

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥ ७ ॥

दैव्या। होतारा। प्रथमा। सुऽवाचा। मिमाना। यज्ञम्। मनुषः। यजध्यै।
प्रऽचोदयन्ता। विदथेषु। कारू इति। प्राचीनम्। ज्योतिः। प्रऽदिशा। दिशन्ता ॥ ७ ॥

ᵛदैव्या ॥ 'देवाद्यञञौ' इति यञ्प्रत्ययः[6]। देवसंबन्धिनौ होतारौ होमनिष्पादकौ होतृनामकावन्यादित्यावस्मिन् यज्ञे आसीदताम्। कीदृशौ। ᵛप्रथमा मनुष्यहोतृभ्यः पूर्वभाविनौ ᵛसुवाचा शोभनस्तोत्रौ ᵛमनुषः मनुष्यस्य सर्वस्य यजोः ᵛयजध्यै यागनिष्पत्तये ॥ यजेस्तुमर्थे सध्यैप्रत्ययः ॥ ᵛयज्ञं ᵛमिमाना निर्मिमाणावुत्पादयन्तौ ᵛविदथेषु विदन्त्यत्रर्त्विजः स्वस्वकर्माणीति विदथा यज्ञाः। तेष्वृत्विजो यजमानांश्च ᵛप्रचोदयन्ता प्रेरयन्तौ ᵛकारू स्तुतीनां कर्तारौ ᵛप्राचीनं पूर्वस्यां दिशि यद्दृश्यत्वेन स्थितमाहवनीयाख्यं ᵛज्योतिः ᵛप्रदिशा प्रकृष्टेनोपदिष्टमार्गेण यद्वा प्रदिश्यमानेन मन्त्रेण ᵛदिशन्ता निर्वहन्तौ ॥

---

१. त४.५–यज्ञकर्मणि। २. त४.५–°देशः सुपो डादेशः। ३. त-भ–'नि' नास्ति। ४. त-भ–संमिते। ५. त४.५–शोभमानरूपां। ६. त-भ–प्रत्ययः।

आ नो यज्ञं भारती तूयमेत्विळा मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदं स्योनं सरस्वती स्वपसः सदन्तु ॥ ८ ॥

आ । नः । यज्ञम् । भारती । तूयम् । एतु । इळा । मनुष्वत् । इह । चेतयन्ती ।
तिस्रः । देवीः । बर्हिः । आ । इदम् । स्योनम् । सरस्वती । सुऽअपसः । सदन्तु ॥ ८ ॥

vभारती । भरत आदित्यः । तस्य स्वभूता दीप्तिः ॥ 'तस्येदम्' इत्यर्थे उत्सादित्वादञ् (पा. सू. ४. १. ८६) । 'टिड्ढाणञ्' इति ङीप् । vनः अस्मदीयं vयज्ञं vतूयं[1] क्षिप्रम् vआ vएतु आगच्छतु । तथा vमनुष्वत् मनुष्यो यथा इदं मया कर्तव्यमिति जानाति तद्वत् vचेतयन्ती जानाना vइळा देवी च vइह अस्मिन् कर्मण्यागच्छतु । तथा vसरस्वती च । vस्वपसः सुकर्माणः । अप इति कर्मनाम ॥ आप्नोतेरसुनि आपः कर्मास्यायां[2] ह्रस्वः । बहुव्रीहौ 'आधुदात्तं ह्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् ॥ एताः vतिस्रो vदेवीः देव्यः vस्योनं सुखकरम् vइदं vबर्हिः इमं यज्ञम् vआ vसदन्तु आसीदन्तु प्राप्नुवन्तु ॥ सदेर्लोटि सीदादेशाभावश्छान्दसः ॥

त्वाष्ट्रस्य पशोर्वपायां 'य इमे' इत्येषानुवाक्या । सूत्रितं च—'य इमे द्यावापृथिवी जनित्री तन्नस्तुरीपमध पोषयित्नु' (आश्व. श्रौ. ३. ८) इति ॥

य इमे द्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान् देवं त्वष्टारमिह यक्षि विद्वान् ॥ ९ ॥

यः । इमे इति । द्यावापृथिवी इति । जनित्री इति । रूपैः । अपिंशत् । भुवनानि । विश्वा ।
तम् । अद्य । होतः । इषितः । यजीयान् । देवम् । त्वष्टारम् । इह । यक्षि । विद्वान् ॥ ९ ॥

vयः त्वष्टा देवः vजनित्री विश्वस्य जनयित्र्यौ vइमे vद्यावापृथिवी ॥ द्वन्द्वे 'दिवो द्यावा' इति द्यावादेशः । आधुदात्तः । पृथिवीशब्दो ङीषन्तत्वेनान्तोदात्तः[3] । 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोः प्रकृतिस्वरत्वम्[4] ॥ द्यावापृथिव्यौ vरूपैः देवतिर्यङ्मनुष्याद्याकारैः vअपिंशत् रूपवत्यावकरोत् ॥ 'पिश अवयवे' । तौदादिकः । 'शे मुचादीनाम्' इति नुमागमः ॥ तथा vविश्वा सर्वाणि vभुवनानि भूतजातानि रूपयुक्तान्यकरोत् । हे vहोतः vयजीयान् यष्टृतमः vविद्वान् सर्वं जानानः त्वम् vइषितः अस्माभिरभ्येषितः प्रार्थितः सन् vइह अस्मिन् कर्मणि vअद्य अस्मिन् दिने vतं vत्वष्टारं vदेवं vयक्षि । स्तुतिभिर्हविर्भिर्वा यज पूजय ॥

उपावसृज त्मन्या समञ्जन् देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिः शमिता देवो अग्निः स्वदन्तु हव्यं मधुना घृतेन ॥ १० ॥

उपऽअवसृज । त्मन्या । सम्ऽअञ्जन् । देवानाम् । पाथः । ऋतुऽथा । हवींषि ।
वनस्पतिः । शमिता । देवः । अग्निः । स्वदन्तु । हव्यम् । मधुना । घृतेन ॥ १० ॥

हे वनस्पते यूप vत्मन्या ॥ आत्मन्शब्दस्य तृतीयैकवचने यादेशः । 'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः ॥ आत्मनैव vऋतुथा ऋतौ ऋतौ प्राप्ते काले vदेवानाम् अर्थाय vपाथः पशुकल्पन-

---

१. त१.२.३.६.७.८-भ-'तूर्य' नास्ति । २. त४.५-कर्मास्यायां ह्रस्वो नुट् चेति । ३. त-म-मु-ङीषंतत्वेनाद्युदात्तः । ४. त४.५-युगपत्प्रकृतिस्वरत्वं ।

मज्जमन्यानि च ᵛहवींषि ᵛसमञ्जन् सम्यग्व्यक्तीकुर्वन् ᵛउपावसृज उपागम्य प्रयच्छ ॥ 'गतिर्गंतौ' (पा. सू. ८. १. ७०) इति गतेर्निघातः ॥ किंच ᵛवनस्पतिः योऽयं यूपः ᵛशमिता एतन्नामकः ᵛदेवः यद्वा शामित्रः ᵛअग्निः देवो दीप्यमान आहवनीयास्थोऽग्निश्चैते त्रयः ᵛमधुना मधुरेण ᵛघृतेन। यद्वा मधुनोदकेन प्रोक्षणोपनयनादिगतेन घृतेन च। ᵛहव्यं हवनयोग्यं ᵛस्वदन्तु स्वादूकुर्वन्तु ॥

सद्यो जातो व्यमिमीत यज्ञमग्निर्देवानामभवत्पुरोगाः ।
अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥ ११ ॥

सद्यः । जातः । वि । अमिमीत । यज्ञम् । अग्निः । देवानाम् । अभवत् । पुरःऽगाः ।
अस्य । होतुः । प्रऽदिशि । ऋतस्य । वाचि । स्वाहाऽकृतम् । हविः । अदन्तु । देवाः ॥ ११ ॥

अयमग्निः ᵛसद्यः तदानीमेव ᵛजातः जायमान एव ᵛयज्ञं ᵛव्यमिमीत विशेषेण निर्मिमीते। उत्पादयति ॥ 'माङ् माने शब्दे च'। जौहोत्यादिकः ॥ अत एवायम् ᵛअग्निः ᵛदेवानां ᵛपुरोगाः प्रथमगामी मुख्यः ᵛअभवत् ॥ गमेर्विट्प्रत्यय आत्वे च कृते रूपम् ॥ ततः ᵛप्रदिशि प्रकृष्टायां दिशि प्राच्याम् ᵛऋतस्य आहवनीयात्मनागतस्य ᵛअस्य ᵛहोतुः होमनिष्पादकस्याग्नेः ᵛवाचि। अत्र वागाश्रय आस्यं लक्ष्यते। वाच्यास्ये ᵛस्वाहाकृतं स्वाहाकारेण प्रक्षिप्तं ᵛहविः सर्वे ᵛदेवाः ᵛअदन्तु भक्षयन्तु। इदं सूक्तं यास्केन सम्यगन्वधायि (निरु. ८.५–२१)। तदत्रानुसंधीयताम् ॥ ॥ ९ ॥

'मनीषिणः' इति दशर्चं द्वादशं सूक्तं वैरूपस्याष्टादंष्ट्रस्यार्षं त्रैष्टुभमैन्द्रम्। तथा चानुक्रम्यते— 'मनीषिणो दशाष्टादंष्ट्रः' इति। गतो विनियोगः ॥

मनीषिणः प्र भरध्वं मनीषां यथायथा मतयः सन्ति नृणाम् ।
इन्द्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः ॥ १ ॥

मनीषिणः । प्र । भरध्वम् । मनीषाम् । यथाऽयथा । मतयः । सन्ति । नृणाम् ।
इन्द्रम् । सत्यैः । आ । ईरयाम । कृतेभिः । सः । हि । वीरः । गिर्वणस्युः । विदानः ॥ १ ॥

हे ᵛमनीषिणः स्तोतारः ᵛमनीषां मनस ईशित्रीं स्तुतिमिन्द्राय ᵛप्र ᵛभरध्वं कुरुत। ᵛनृणां कर्मनेतॄणां युष्माकं ᵛयथायथा[1] ᵛमतयः ᵛसन्ति भवन्ति तथा बुद्ध्यनुसारेण स्तुतिं कुरुध्वम्[2]। वयं च ᵛकृतेभिः कृतैः ᵛसत्यैः यथार्थभूतैः स्तोत्रैः ᵛइन्द्रम् ᵛएरयाम यज्ञं प्रत्यागमयाम ॥ 'ईर गतौ'। ण्यन्तस्य लोट् ॥ ᵛहि यतः ᵛविदानः जानानः समर्थः[3] स इन्द्रः ᵛगिर्वणस्युः। गीर्भिर्वनन्ति संभजन्ति[4] इति गीर्वणसः स्तोतारः ॥ वनतेरसुनि रूपम्। उपपदस्य दीर्घाभावश्छान्दसः। तदन्तात् क्यप्। 'क्याच्छन्दसि' इत्युप्रत्ययः ॥ स्तोतॄन् कामयमानः खलु। अतस्तमभिष्टुत ॥

ऋतस्य हि सदसो धीतिरद्यौत्सं गार्ष्टेयो वृषभो गोभिरानट् ।
उदतिष्ठत्त्रिषणा रवेण महान्ति चित्सं विव्याचा रजांसि ॥ २ ॥

ऋतस्य । हि । सदसः । धीतिः । अद्यौत् । सम् । गार्ष्टेयः । वृषभः । गोभिः । आनट् ।
उत् । अतिष्ठत् । त्रिऽसेन । रवेण । महान्ति । चित् । सम् । विव्याच । रजांसि ॥ २ ॥

---

१. त१.२.३.६.७.८-म-यथा । २. ग-त१.२.३.६.७.८-म-प्रकुरुध्वं । ३. ग-वीरः समर्थः । ४. ग-संभजंति ।

[v]ऋतस्य उदकस्य [v]सदसः स्थानस्यान्तरिक्षस्य [v]धीतिः धारकः स इन्द्रः [v]अद्यौत् द्योतते प्रकाशते। [v]हि प्रसिद्धौ ॥ 'द्युत दीप्तौ'। लुङि 'द्युद्भ्यो लुङि' इति परस्मैपदम्। च्लेर्लुक् छान्दसः। हलन्तलक्षणा वृद्धिरपि ॥ यद्वा। अद्यौत्। तादृश इन्द्रो यज्ञमभिगच्छति ॥ 'द्यु अभिगमे[1]' आदादिकः। लङ्[2]। 'उतो वृद्धिर्लुकि हलि' इति वृद्धिः ॥ [v]गार्ष्टेयः। सकृत्प्रसूता धेनुर्गृष्टिः। तस्या अपत्यं [v]वृषभो [v]नोभिः [v]स्वम् [v]आनट् संव्याप्नोति। तथैषोऽपि सर्वं स्वमहिम्ना व्याप्नोति। तथा [v]तविषेण। महत्त्वमैतत्। महता [v]रवेण शब्देन [v]उदतिष्ठत्। उच्छ्रित उन्नतोऽभवत्। अत एव [v]महान्ति [v]चित् महान्त्यपि [v]रजांसि उदकानि भुवनानि वा [v]सं [v]विव्याच संव्याप्नोति ॥

इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय ।
आन्मेनां कृण्वन्नर्च्युतो भुवद्गोः पतिर्दिवः सनजा अप्रतीतः ॥ ३ ॥

इन्द्रः । किल । श्रुत्यै । अस्य । वेद । सः । हि । जिष्णुः । पथिऽकृत् । सूर्याय ।
आत् । मेनाम् । कृण्वन् । अर्च्युतः । भुवत् । गोः । पतिः । दिवः । सनऽजाः । अप्रतिऽइतः ॥३॥

[v]अस्य अस्मदीयस्य स्तोत्रस्य [v]श्रुत्यै श्रवणाय [v]इन्द्रः [v]किल इन्द्र एव [v]वेद जानाति। [v]स [v]हि स एव [v]जिष्णुः शत्रूणां जयशीलः [v]सूर्याय [v]पथिकृत् मार्गकर्ता भवति। किंच [v]अर्च्युतः शत्रुभिरगन्तव्यो वृषणश्वस्य [v]मेनाम् आत्मानं [v]कृण्वन् कुर्वन् इन्द्रः [v]आत्। आगच्छत्यस्मदीयं यज्ञम्। 'मेनाभवो वृषणश्वस्य सुक्रतो' (ऋ. सं. १. ५१. १३) इति मन्त्रान्तरम् ॥ 'अस गतिदीप्त्यादानेषु'। भौवादिकः। ---॥ [v]दिवः द्युलोकस्य च [v]पतिः[3] [v]भुवत् अभूत् ॥ भवतेर्लेट्। वाक्यभेदादनिघातः ॥

इन्द्रो महा महतो अर्णवस्य व्रताभिनादङ्गिरोभिर्गृणानः ।
पुरूणि चिन्नि ततानाजांसि दाधार यो धरुणं सत्यतातां ॥ ४ ॥

इन्द्रः । महा । महतः । अर्णवस्य । व्रता । अभिनात् । अङ्गिरःऽभिः । गृणानः ।
पुरूणि । चित् । नि । ततान । रजांसि । दाधार । यः । धरुणम् । सत्यऽतातां ॥ ४ ॥

[v]इन्द्रः [v]अङ्गिरोभिः ऋषिभिः [v]गृणानः स्तूयमानः सन् [v]महतो [v]अर्णवस्य ॥ 'अर्णसः सलोपश्च' (का. ५. २. १०९. ३) इति वप्रत्ययः ॥ उदकवतो मेघस्य [v]व्रता[4] व्रतानि कर्माणि [v]महा स्वमहिम्नैव [v]अभिनात् अहिंसीत् ॥ 'मीङ् हिंसायाम्'। लङि 'मीनातेर्निगमे' इति ह्रस्वः ॥ ततः [v]पुरूणि [v]चित् बहून्येव [v]रजांसि उदकानि [v]नि [v]ततान नीचीनान्यकरोत्। [v]यः इन्द्रः [v]सत्यतातां सत्यैर्देवैस्तते। यद्वा। सत्यशब्दादपि स्वार्थिकस्तातिल् द्रष्टव्यः। सत्ये। द्युलोके [v]धरुणं धारकं बलं [v]दाधार[5] अधारयत्[5] ॥

इन्द्रो दिवः प्रतिमानं पृथिव्या विश्वा वेद सवना हन्ति शुष्णम् ।
महीं चिदुषामातनोत्सूर्येण चास्कम्भ चित्कम्भनेन स्कभीयान् ॥ ५ ॥

---

१. त४.५–अभिगमने। २. त-भ–लुङ्। ३. ग-त४.५–पतिः स्वामी। ४. त-भ–'व्रता' नास्ति। ५. त-भ–दाधारमत्।

इन्द्रः । दिवः । प्रतिऽमानम् । पृथिव्याः । विश्वा । वेद । सवना । हन्ति । शुष्णम् ।
महीम् । चित् । याम् । आ । अतनोत् । सूर्येण । चास्कम्भ । चित् । स्कम्भनेन । स्कभीयान् ॥५॥

[v]दिवः द्युलोकस्य [v]पृथिव्याः च [v]प्रतिमानं महत्त्वेन प्रतिनिधिः [v]इन्द्रः [v]विश्वा सर्वाणि [v]सवना सवनानि [v]वेद सोमपानार्थं जानाति । [v]शुष्णं सर्वस्य शोषकमेतन्नामानमसुरं [v]हन्ति । वाक्यभेदादनिघातः । अपि च [v]महीं [v]चित् महतीमपि[1] [v]यां [v]सूर्येण [v]अतनोत् । सर्वत्र प्रकाश-युक्तामकरोत् । [v]स्कभीयान् स्कम्भयितृणां मध्ये श्रेष्ठः सः [v]स्कम्भनेन [v]चित् निरोधनसाधनेन सामर्थ्येनैव [v]चास्कम्भ । द्युलोकमवरुद्धमकरोत् ॥ स्कम्भिः सौत्रो धातुः । लिटि 'तुजादीनाम्०' इति दीर्घः । चित्स्कम्भनेन इत्यत्र संहितायां सलोपः । उत्पूर्वस्य स्तम्भेः 'उदः स्थास्तम्भोः०' (पा.सू. ८. ४. ६१) इति सलोप उक्तः । चित्पूर्वस्य स्कम्भेरपि भवति छन्दोविषयत्वात् ॥ ॥ १० ॥

वज्रेण हि वृत्रहा वृत्रमस्तरदेवस्य शूशुवानस्य मायाः ।
वि धृष्णो अत्र धृषता जघन्थार्थाभवो मघवन् बाह्वोजाः ॥ ६ ॥

वज्रेण । हि । वृत्रऽहा । वृत्रम् । अस्तः । अदेवस्य । शूशुवानस्य । मायाः ।
वि । धृष्णो इति । अत्र । धृषता । जघन्थ । अर्थ । अभवः । मघऽवन् । बाहुऽओजाः ॥६॥

हे इन्द्र [v]वृत्रहा वृत्रस्य हन्ता [v]वज्रेण [v]वृत्रम् [v]अस्तः अस्तृणाः । अवधीः ॥ स्तृणातेर्लङि 'बहुलं छन्दसि' इति विकरणस्य लुक् । सिपि गुणः । हिशब्दादनिघातः ॥ अनन्तरं हे [v]धृष्णो धर्षण-शील त्वम् [v]अदेवस्य अद्योतमानस्य [v]शूशुवानस्य स्वबलेन वर्धमानस्य तस्य [v]मायाः [v]धृषता समर्थेन वज्रेण [v]अत्र अस्मिन् काले एव [v]वि [v]जघन्थ विनाशितवानसि ॥ हन्तेर्लिटि थलि 'अभ्यासाच्च' इति कुत्वम् ॥ [v]अथ हे [v]मघवन् धनवन्निन्द्र [v]बाह्वोजाः भुजबलवान् [v]अभवः ॥

सचन्त यदुषसः सूर्येण चित्रामस्य केतवो रामविन्दन् ।
आ यन्नक्षत्रं ददृशे दिवो न पुनर्यतो नकिरद्धा नु वेद ॥ ७ ॥

सचन्त । यत् । उषसः । सूर्येण । चित्राम् । अस्य । केतवः । राम् । अविन्दन् ।
आ । यत् । नक्षत्रम् । ददृशे । दिवः । न । पुनः । यतः । नकिः । अद्धा । नु । वेद ॥ ७ ॥

[v]यत् यदा [v]उषसः उषःकालाः [v]सूर्येण सूर्यात्मकेनेन्द्रेण [v]सचन्त संगच्छन्ते । 'षच समवाये' । औणादिकः । तदानीम् [v]अस्य स्वभूताः [v]केतवः सर्वस्य प्रज्ञापका रश्मयः [v]चित्रां नानावर्णां [v]रां रायं श्रियम् [v]अविन्दन् अलभन्त । [v]पुनः उदयानन्तरं [v]यत् यदा [v]दिवः [v]नक्षत्रं [v]न [v]ददृशे न दृश्यते ॥ दृशेः कर्मणि लिट् । थलोगादनिघातः ॥ तदानीं [v]यतः ॥ इणः[2] सप्तम्यन्तस्य ङसिः 'शतुरनुमो नद्यजादी' इति विभक्तेरुदात्तत्वम् ॥ सर्वत्र गच्छतोऽस्य रश्मीन् [v]नकिः न कश्चित् [v]नु [v]वेद जानाति । एतत् [v]अद्धा सत्यमेव ॥

दूरं किल प्रथमा जग्मुरासामिन्द्रस्य याः प्रसवे सस्रुरापः ।
क्व स्विदग्नं क्व वृत्र आसामापो मध्यं क्व वो नूनमन्तः ॥ ८ ॥

---

१. त-भ-महीमपि । २. त-भ-सु-'इणः' नास्ति ।

दूरम् । किल । प्रथमाः । जग्मुः । आसाम् । इन्द्रस्य । याः । प्रऽसवे । सस्रुः । आपः ।
क्व । स्वित् । अग्रम् । क्व । बुध्नः । आसाम् । आपः । मध्यम् । क्व । वः । नूनम् । अन्तः ॥८॥

[v]आसाम् अपां मध्ये [v]प्रथमाः प्रथमगामिन्यस्ता आपः [v]दूरं [v]किल [v]जग्मुः । दूरमेव[1] गताः[1] । [v]याः [v]आपः [v]इन्द्रस्य [v]प्रसवे प्रेरणे ॥ ' षू प्रेरणे ' । ' अवसवौ वेति वक्तव्यम् ' (पा. सू. ३. ३. ५६. ४) इत्यबपवादेऽच् । ' थाथघञ्क्ताजबित्रकाणाम् ' इत्युत्तरपदाद्युदात्तत्वम् ॥ तस्य आज्ञायां [v]सस्रुः सरन्ति । गच्छन्ति खलु । अथ प्रत्यक्षकृतः । हे [v]आपः [v]आसां युष्माकम् [v]अग्रं [v]क्व [v]स्वित् । कुत्र वर्तते । [v]बुध्नः मूलं च [v]क्व । तथा [v]वः युष्माकं [v]मध्यं च [v]क्व [v]नूनम् इदानीं युष्माकम् [v]अन्तः अवसानं च क्व । सर्वगतत्वादनिर्ज्ञायमानगमना आसन्नित्यर्थः ॥ क्व । किंशब्दात् सप्तम्यर्थे ' किमोऽत् ' इत्यत्प्रत्ययः । ' क्वाति ' इति क्वादेशः । तित्स्वरितः । अन्तः । अमेर्गत्यर्थस्य ' असिहसि° ' इत्यादिना तन्प्रत्ययः[2] ॥

सृजः सिन्धूँरहिना जग्रसानाँ आदिदेताः प्र विविज्रे जवेन ।
मुमुक्षमाणा उत या मुमुच्रेऽधेदेता न रमन्ते नितिक्ताः ॥ ९ ॥

सृजः । सिन्धून् । अहिना । जग्रसानान् । आत् । इत् । एताः । प्र । विविज्रे । जवेन ।
मुमुक्षमाणाः । उत । याः । ममुच्रे । अध । इत् । एताः । न । रमन्ते । निऽतिक्ताः ॥ ९ ॥

हे इन्द्र [v]अहिना अहन्तव्येन वृत्रेण मेघेन वा [v]जग्रसानान् ॥ ' ग्रस अदने ' । अनुदात्तेत् । छन्दसि लिटः कानच् ॥ ग्रस्ताः [v]सिन्धून् स्यन्दमाना अपः [v]सृजः असृजः[3] निरगमयः । [v]आदित् । इदवधारणे । अनन्तरमेव [v]एताः आपः [v]जवेन वेगेन [v]प्र [v]विविज्रे । सर्वत्र अत्यन्तं चलिता बभूवुः ॥ ' ओविजी भयचलनयोः ' । अनुदात्तेत् । लिटि ' इरयो रे ' (पा. सू. ६.४.७६) इतीरयो रेआदेशः ॥ [v]उत अपि च [v]मुमुक्षमाणाः इन्द्रेण मोचयितुमिष्यमाणाः [v]याः आपः [v]मुमुच्रे इन्द्रेण मोचिता अभूवन् ॥ मुचेः कर्मणि लिट् ॥ [v]अधेत् अनन्तरमेव [v]नितिक्ताः नितरां शुद्धा आपः [v]न [v]रमन्ते । एकत्र न क्रीडन्ति । किंतु सर्वत्र गमनशीला इत्यर्थः ॥

सध्रीचीः सिन्धुमुशतीरिवायन्त्सनाज्जार आरितः पुभिदासाम् ।
अस्तमा ते पार्थिवा वसून्यस्मे जग्मुः सुनृता इन्द्र पूर्वीः ॥ १० ॥

सध्रीचीः । सिन्धुम् । उशतीःऽइव । आयन् । सनात् । जारः । आरितः । पुःऽभित् । आसाम् ।
अस्तम् । आ । ते । पार्थिवा । वसूनि । अस्मे इति । जग्मुः । सुनृताः । इन्द्र । पूर्वीः ॥१०॥

[v]सध्रीचीः ॥ ' सहस्य सध्रिः ' इति सध्रीत्यादेशः । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । अलोपदीर्घौ । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः ॥ सहाञ्चनाः सहगमना आपः [v]सिन्धुं समुद्रं भर्तारम् [v]आयन् आगच्छन् । तत्र दृष्टान्तः । [v]उशतीरिव यथा कामयमानाः स्त्रियः स्वपतिमभिगच्छन्ति तद्वत् । [v]जारः शत्रूणां जारयिता [v]पूर्भित् इन्द्रः [v]सनात् चिरादेव [v]आसाम् अपाम् [v]आरितः प्रेरकत्वेन स्वामी भवति । हे [v]इन्द्र [v]अस्मे अस्माकं स्वभूतानि [v]पार्थिवा पार्थिवानि [v]वसूनि धनवद्भीणयितृणि हवींषि [v]पूर्वीः बह्वयः [v]सूनृताः वाचः स्तुतिलक्षणाश्च [v]ते त्वदीयम् [v]अस्तं

---

१. त-भ१.४.८-मु-दूरमेवागताः । २. त-तत्प्रत्ययः । ३. त-भ-' असृजः ' नास्ति ।

गृहम् ᵛआ ᵛजग्मुः आगच्छन्तु । यद्वा अस्मदीयाः स्तुतयस्ते गृहं गच्छन्तु । अस्माकं गृहं स्वदीयानि पार्थिवानि धनान्यभिगच्छन्तु ॥ गमेश्छन्दसि सार्वकालिको लिट् ॥ ॥ ११ ॥

' इन्द्र पिब ' इति दशर्चं त्रयोदशं सूक्तं त्रैष्टुभमैन्द्रम् । नभःप्रभेदनो नाम विरूपगोत्र ऋषिः । तथा चानुक्रम्यते—' इन्द्र पिब नभःप्रभेदनः ' इति । गतो विनियोगः ॥

इन्द्र पिबं प्रतिकामं सुतस्य प्रातःसावस्तव हि पूर्वपीतिः ।
हर्षस्व हन्तवे शूर शत्रूनुक्थेभिष्टे वीर्या३ प्र ब्रवाम ॥ १ ॥

इन्द्र । पिब । प्रतिऽकामम् । सुतस्य । प्रातःऽसावः । तव । हि । पूर्वऽपीतिः ।
हर्षस्व । हन्तवे । शूर । शत्रून् । उक्थेभिः । ते । वीर्या । प्र । ब्रवाम ॥ १ ॥

हे ᵛइन्द्र त्वं ᵛप्रतिकामं ये ये कामास्तांस्तान्प्रति । अव्ययीभावसमासः । तस्य स्वरः । यथेच्छं ᵛसुतस्य अभिषुतस्य सो भागस्तुभ्यं दातव्यस्तं ᵛपिब ॥ आमन्त्रितस्याविद्यमानत्वेन पादादित्वाद-निघातः ॥ ᵛप्रातःसावः प्रातःसवनेऽभिषूयमाणः सोमः ᵛतव ᵛहि । तृतीयार्थे षष्ठी । त्वयैव ᵛपूर्वपीतिः प्रथमत एव पातव्यः । यद्वा । प्रातःसावः । सप्तम्याः सुः । प्रातःसवने तवैव प्रथमपानं खलु । ऐन्द्रवायवग्रहे ह्यादित एवेन्द्रः पिबति ॥ तत्पुरुषे कृतीभारादित्वात्पूर्वपदान्तोदात्तत्वम् । यद्वा बहुव्रीहिः ॥ ततो हे ᵛशूर समर्थ त्वं ᵛशत्रून् ᵛहन्तवे हन्तुं ᵛहर्षस्व हृष्टो भव । अथ ᵛते त्वदीयानि ᵛवीर्या वृत्रहननादिलक्षणानि वीर्याणि ᵛउक्थेभिः उक्थैः शस्त्रैः ᵛप्र ᵛब्रवाम प्रकर्षेण वदाम ॥

यस्ते रथो मनसो जवीयानेन्द्र तेन सोमपेयाय याहि ।
तूयमा ते हरयः प्र द्रवन्तु येभिर्यासि वृषभिर्मन्दमानः ॥ २ ॥

यः । ते । रथः । मनसः । जवीयान् । आ । इन्द्र । तेन । सोमऽपेयाय । याहि ।
तूयम् । आ । ते । हरयः । प्र । द्रवन्तु । येभिः । यासि । वृषऽभिः । मन्दमानः ॥ २ ॥

हे ᵛइन्द्र ᵛमनसः अपि ᵛजवीयान् अतिशयेन[1] गन्ता ᵛते त्वदीयः ᵛयः ᵛरथः अस्ति ᵛतेन रथेन ᵛसोमपेयाय अस्मदीयं सोमं पातुम् ᵛआ ᵛयाहि आगच्छ ॥ ' पा पाने '। भावेऽचो यत् । ' ईयति ' इतीत्वम् । आर्धधातुकलक्षणो गुणः । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ तथा ᵛते त्वदीयाः ᵛहरयः रथे संयुक्ता अश्वाः ᵛतूयं क्षिप्रम् ᵛआ आभिमुख्येन ᵛप्र ᵛद्रवन्तु प्रगच्छन्तु । ᵛवृषभिः सेक्तृभिः ᵛयेभिः यैरश्वैः ᵛमन्दमानः मोदमानः सन् ᵛयासि गच्छसि । ' हरी इन्द्रस्य ' (नि. १. १५. १) इति वक्ष्यमाणेन्द्रस्य द्वावेवाश्वाविति न चोदनीयम् ' आ त्वा सहस्रमा शतम् ' (ऋ. सं. ८. १. २४) इत्यादिनिगमान्तरे दर्शनात् ॥

हरित्वता वर्चसा सूर्यस्य श्रेष्ठैं रूपैस्तन्वं स्पर्शयस्व ।
अस्मामिरिन्द्र सखिभिर्हुवानः सध्रीचीनो मादयस्वा निषद्य ॥ ३ ॥

हरित्वता । वर्चसा । सूर्यस्य । श्रेष्ठैः । रूपैः । तन्वम् । स्पर्शयस्व ।
अस्मामिः । इन्द्र । सखिऽभिः । हुवानः । सध्रीचीनः । मादयस्व । निऽसद्य ॥ ३ ॥

---

१. त-म-' अतिशयेन ' नास्ति ।

हे vइन्द्र vहरित्वता ॥ हरिच्छब्दान्मतुपः 'मयः' (पा. सू. ८.२.१०) इति वत्वम् ॥ हरिद्वर्णयुक्तेन vसूर्यस्य vवर्चसा तेजसा तत्सदृशैः vश्रेष्ठैः प्रशस्यतमैरात्मीयैः vरूपैः vतन्वम् आत्मीयं शरीरं मदीयं वा । यद्वा । तायत इति तनूर्यज्ञः । तं vस्पर्शयस्व । तेजोयुक्तं कुरु । किंच vसध्रीचीनः ॥ 'विभाषाञ्चेरदिक्स्त्रियाम्' इति खप्रत्ययः ॥ मरुद्भिः सहाञ्चनस्त्वं vसखिभिः सखिभूतैः vअस्माभिः vहुवानः आह्वयमानः सन् vनिषद्य यज्ञे निषण्णो भूत्वा vमादयस्व । सोमपानेन हृष्टो भव ॥

यस्य॒ त्यत्ते॒ महि॒मानं॒ मदे॑ष्वि॒मे मही॒ रोद॑सी॒ नावि॑विक्ताम् ।
तदो॑क॒ आ हरि॑भिरिन्द्र यु॒क्तैः प्रि॒येभि॑र्याहि प्रि॒यमन्न॒मच्छ॑ ॥ ४ ॥

यस्य॑ । त्यत् । ते॒ । म॒हि॒मान॑म् । मदे॑षु । इ॒मे इति॑ । मही इति॑ । रोद॑सी॒ इति॑ । न । अवि॑विक्ताम् ।
तत् । ओकः॑ । आ । हरि॑ऽभिः । इ॒न्द्र॒ । यु॒क्तैः॑ । प्रि॒येभिः॑ । या॒हि॒ । प्रि॒यम् । अन्न॑म् । अच्छ॑ ॥४॥

हे vइन्द्र vइमे vमही महत्यौ vरोदसी द्यावापृथिव्यौ vयस्य vते तव सोमपानेन जनितेषु vमदेषु संभूतं vत्यत् तं vमहिमानं vन vअविविक्तां न पृथक्कुरुतः किंतु[1] यस्य[1] महिम्न्येव तिष्ठतः ॥ 'विचिर् पृथग्भावे'। जौहोत्यादिकः। लङि 'संज्ञापूर्वको विधिरनित्यः' इत्यभ्यासस्य गुणाभावः। यद्योगादनिघातः ॥ vप्रियेभिः प्रियतमैः रथे vयुक्तैः vहरिभिः अश्वैः vप्रियं प्रीणनकरम् vअन्नं सोमलक्षणम् vअच्छ अभिलक्ष्य vतदोकः अस्मदीयं यज्ञसदनम् vआ vयाहि आगच्छ ॥

यस्य॒ शश्व॑त्पपि॒वाँ इ॑न्द्र॒ शत्रू॒ननानुकृत्या॒ रण्या॒ चक॑र्थ ।
स ते॒ पुरं॑धिं तवि॒षीमि॑यर्ति॒ स ते॒ मदा॑य सु॒त इ॑न्द्र॒ सोमः॑ ॥ ५ ॥

यस्य॑ । शश्व॑त् । पपि॑ऽवान् । इ॒न्द्र॒ । शत्रू॑न् । अन॑नुऽकृत्या । रण्या॑ । चक॑र्थ ।
सः । ते॒ । पुर॑न्ऽधिम् । ता॒वे॒षीम् । इ॒य॒र्ति॒ । सः । ते॒ । मदा॑य । सु॒तः । इ॒न्द्र॒ । सोमः॑ ॥५॥

हे vइन्द्र vपपिवान् ॥ पिबतेः[2] क्वसौ 'वस्वेकाजाद्घसाम्' इतीडागमः ॥ सोमं पीतवांस्त्वम् vअननुकृत्या अनुकरणरहितेन सकृत्प्रहारेण शत्रुहननसमर्थेन vरण्या सांयुगीनेनायुधेन[3]। रणशब्दात् साध्वर्थे प्राग्घितीयो[4] यत् ॥ vयस्य यजमानस्य vशत्रून् vशश्वत् बहुवारं vचकर्थ हतवानसि ॥ 'कृञ् हिंसायाम्'। लिटि थलि यद्योगादनिघाते लित्स्वरः ॥ vसः यष्टा[5] vते त्वदर्थं vतविषीं महतीं vपुरंधिं बहुविधां स्तुतिम् vइयर्ति प्रेरयति ॥ 'ऋ गतौ'। जौहोत्यादिकः। 'अर्तिपिपर्त्योः०' इत्यभ्यासस्येत्वम्। 'अभ्यासस्यासवर्णे' इतीयङ् ॥ हे vइन्द्र vसुतः अभिषुतः vसः vसोमः vते vमदाय समर्थो भवति। यद्वा। स यष्टा सुतः सोमः। सुब्व्यत्ययः। अभिषुतं सोमं त्वन्मदाय प्रेरयति ॥ ॥ १२ ॥

इ॒दं ते॒ पात्रं॑ सन॒वित्त॒मिन्द्र॒ पिबा॒ सोम॑मे॒ना श॑तक्रतो ।
पूर्णं॑ आ॒हावो॑ म॒दिर॑स्य॒ मध्वो॒ यं विश्व॒ इद॑भि॒हर्य॑न्ति॒ देवाः॑ ॥ ६ ॥

इ॒दम् । ते॒ । पात्र॑म् । स॒न॒ऽवित्त॑म् । इ॒न्द्र॒ । पिब॑ । सोम॑म् । ए॒ना । श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो ।
पूर्णः॑ । आ॒ऽहा॒वः । म॒दिर॑स्य । मध्वः॑ । यम् । विश्वे॑ । इत् । अ॒भि॒ऽहर्य॑न्ति । देवाः॑ ॥६॥

१. ग२–इंद्रस्य; त१.२.३.६.७.८-भ१.२.४.८-मु–किंतु तस्य; भ७–किंतु । २. ग-त१.२.३.६.७.८-भ-मु–पातेः । ३. त-भ-मु–संयुगीनेनायुधेन । ४. त-भ–प्राग्वहतीयो । ५. ग-त-भ–यथा ।

हे ᵛइन्द्र ᵛते त्वदर्थं ᵛपात्रं चमसादिकं ᵛसनवित्तम्। अस्माभिरादेव लब्धम्। 'विदु लाभे'। कर्मणि निष्ठा। हे ᵛशतक्रतो बहुकर्मन्निन्द्र ᵛएना एनेन पात्रेण ᵛसोमं ᵛपिब। यतः ᵛमदिरस्य मदकरस्य ᵛमध्वः मधुनः सोमस्य ᵛआहावः पानस्थानीयपात्रविशेषः ᵛपूर्णः पूरितोऽभूत्॥ 'ह्वेञ् स्पर्धायाम्'। 'निपानमाहावः' (पा. सू. ३. ३. ७४) इति निपातितः। स्तुतिभिराहूयमाना देवा अत्र सोमं पिबन्तीति। शाखादिस्वरः॥ ᵛयम् ᵛइत् यमाहावमेव ᵛविश्वे सर्वे ᵛदेवाः ᵛअभिहर्यन्ति अभिकामयन्ते। 'हर्य गतिकान्त्योः'। भौवादिकः। यद्योगात्तिङो निघाताभावे 'तिङि चोदात्तवति' इति गतेर्निघातः॥

वि हि त्वामिन्द्र पुरुधा जनासो हितप्रयसो वृषभ ह्वयन्ते।
अस्माकं ते मधुमत्तमानीमा भुवन्त्सवना तेषु हर्य॥ ७॥

वि। हि। त्वाम्। इन्द्र। पुरुधा। जनासः। हितऽप्रयसः। वृषभ। ह्वयन्ते।
अस्माकम्। ते। मधुमत्ऽतमानि। इमा। भुवन्। सवना। तेषु। हर्य॥ ७॥

हे ᵛइन्द्र ᵛवृषभ कामानां वर्षक ᵛहितप्रयसः। प्रय इत्यन्ननाम प्रीणनकारित्वात्। संभृतहविष्काः ᵛजनासः जनाः ᵛपुरुधा बहुधा। हिरवधारणे। ᵛत्वाम् एव ᵛवि ᵛह्वयन्ते विविधमाह्वयन्ति॥ 'ह्वेञ् स्पर्धायाम्'। 'निसमुपविभ्यो ह्वः' इत्यात्मनेपदम्॥ ᵛअस्माकं स्वभूतानि ᵛइमा इमानि ᵛसवना सवनानि ᵛते त्वदर्थं ᵛमधुमत्तमानि [illegible]येन सोमवन्ति ᵛभुवन् अभवन्। तस्मात्त्वं ᵛतेषु सवनेषु ᵛहर्य सोमान् कामयस्व॥

प्र ते इन्द्र पूर्व्याणि प्र नूनं वीर्या वोचं प्रथमा कृतानि।
सतीनमन्युरश्रथायो अद्रिं सुवेदनामकृणोर्ब्रह्मणे गाम्॥ ८॥

प्र। ते। इन्द्र। पूर्व्याणि। प्र। नूनम्। वीर्या। वोचम्। प्रथमा। कृतानि।
सतीनऽमन्युः। अश्रथयः। अद्रिम्। सुऽवेदनाम्। अकृणोः। ब्रह्मणे। गाम्॥ ८॥

हे ᵛइन्द्र ᵛते त्वदीयानि ᵛप्रथमा आदि ᵛकृतानि ᵛपूर्व्याणि पुरातनानि च ᵛवीर्या[1] वीर्याणि ᵛनूनम् इदानीं ᵛप्र ᵛवोचं प्रकर्षेण वदामि। एकः प्रशब्दः पूरणः॥ वोचम्। लुङि ब्रुवो वचिः। च्लेरङ्॥ कानि तानि ᵛसतीनमन्युः। सतीनमित्युदकनाम। उदकाभिवर्षणबुद्धियुक्तस्त्वम् ᵛअद्रिं मेघम् ᵛअश्रथयः वज्रेणाहिंसीः। ᵛब्रह्मणे बृहस्पतये ᵛगां पणिभिरपहृतां ᵛसुवेदनां सुष्ठु ज्ञापनीयाम् ᵛअकृणोः अकरोरित्यादीनि॥

नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम्।
न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च॥ ९॥

नि। सु। सीद। गणऽपते। गणेषु। त्वाम्। आहुः। विप्रऽतमम्। कवीनाम्।
न। ऋते। त्वत्। क्रियते। किम्। चन। आरे। महाम्। अर्कम्। मघऽवन्। चित्रम्। अर्च॥ ९॥

हे ᵛगणपते त्वं ᵛगणेषु स्तोतृगणेषु ᵛसु सुष्ठु ᵛनि ᵛसीद। स्तुतिश्रवणार्थं निषण्णो भव। यतः ᵛकवीनां क्रान्तप्रज्ञानां मध्ये ᵛत्वां ᵛविप्रतमम् अतिशयेन मेधाविनमिति ᵛआहुः। किंच ᵛत्वत्

---

१. त-म-स्पर्धायां वाचि। २. ग-त४.५-म-'वीर्या' नास्ति।

vऋते ॥ ' अन्यारादितरर्ते• ' (पा. सू. २. ३. २९) इति पञ्चमी ॥ त्वां वर्जयित्वा vकिं vचन कर्म vआरे दूरे समीपे वा vन क्रियते। तस्मात्त्वामेव। ततो हे vमघवन् धनवन्निन्द्र vमहां महान्तम् vअर्कम् अर्चनीयमस्मदीयं त्रिष्टुप्पञ्चदशादिलक्षणं स्तोमं vचित्रं नानारूपं कृत्वा vअर्च पूजय। विधेहि ॥ ' अर्च पूजायाम् '। भौवादिकः ॥

अभिख्या नो मघवन्नार्धमानान्त्सखे बोधि वसुपते सखीनाम्।
रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥ १० ॥

अभिऽख्या । नः । मघऽवन् । नार्धमानान् । सखे । बोधि । वसुऽपते । सखीनाम् ।
रणम् । कृधि । रणऽकृत् । सत्यऽशुष्म । अभक्ते । चित् । आ । भज । राये । अस्मान् ॥ १० ॥

हे vमघवन् धनवन्निन्द्र vनार्धमानान् ॥ ' नाधृ नाधृ याच्ञोपतापैश्वर्याशीःषु '। भौवादिकः। अनुदात्तेत् ॥ याचमानान् vनः अस्मान् vअभिख्या[1] अभिख्यापनेन तेजसा युक्तान् कुरु। प्रसिद्धान् वा कुरु। हे vसखे धनदानेन हे vवसुपते वसूनां स्वामिन् त्वं vसखीनां स्तोतृत्वेन सखिभूतानामस्माकं स्वभूतानि स्तोत्राणि vबोधि बुध्यस्व ॥ ' बुध अवगमने '। भौवादिकः। लोटि छान्दसः शपो लुक्। ' छन्दस्युभयथा ' इति हेरार्धधातुकत्वेनाङित्त्वात् ' अङितश्च ' इति हेर्धिभावः। अत एव गुणः। सार्वधातुकत्वेन ङित्त्वादन्नोदात्तत्वम्। वर्णलोपश्छान्दसः ॥ हे vरणकृत् शत्रुभिः सह युद्धकर्तः अत एव हे vसत्यशुष्म यथार्थबलोपेत त्वं vरणं vकृधि कुरु। शत्रून् जहि ॥ करोतेर्लोटि ' शृण्वपृकृवृभ्यश्छन्दसि ' इति हेर्धिः ॥ किंच vअभक्ते vचित् असंभजनीये स्थानेऽपि vअस्मान् vराये धनाय vआ vभज भागिनः कुरु ॥ ' ह्यचोऽतस्तिङः ' इति संहितायां दीर्घः ॥ ॥१३॥ ॥९॥

दशमेऽनुवाके षोडश सूक्तानि। तत्र ' तमस्य ' इति दशर्चं प्रथमं सूक्तमैन्द्रम्। शतप्रभेदनो नाम वैरूप ऋषिः। अन्त्या त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रान्तं–' तमस्य शतप्रभेदनस्त्रिष्टुबन्तम्[2] ' इति। दशरात्रस्याष्टमेऽहनि अग्निष्टुतीय एतत्सूक्तम्। सूत्रितं च—' तमस्य द्यावापृथिवी महीं इन्द्रो नृवदिति मरुत्वतीयम् ' (आश्व. श्रौ. ८. ७) इति ॥

तमस्य द्यावापृथिवी सचेतसा विश्वेभिर्देवैरनु शुष्ममावताम्।
यदैत्कृण्वानो महिमानमिन्द्रियं पीत्वी सोमस्य क्रतुभाँ अवर्धत ॥ १ ॥

तम् । अस्य । द्यावापृथिवी इति । सऽचेतसा । विश्वेभिः । देवैः । अनु । शुष्मम् । आवताम् ।
यत् । ऐत् । कृण्वानः । महिमानम् । इन्द्रियम् । पीत्वी । सोमस्य । क्रतुऽमान् । अवर्धत ॥ १ ॥

vसचेतसा सह चेतयन्त्यौ vद्यावापृथिवी द्यावापृथिव्यौ vविश्वेभिः सर्वैः vदेवैः सह vअस्य ॥ अन्वादेशेऽशादेशोऽनुदात्तः (पा. सू. २. ४. ३२) ॥ एतस्येन्द्रस्य vतं vशुष्मं शत्रूणां शोषकं बलम् vअनु vआवतां रक्षताम्। तस्य बलं पूर्वमस्मान् रक्षतु पश्चादेतेऽपि रक्षतामिति भावः। अवतेर्लुङ्। vकृण्वानः वृत्रवधादिकं कुर्वाणः सः vमहिमानम् vइन्द्रियम् इन्द्रस्यात्मनः पर्याप्तं वीर्यं च vयत् यदा vऐत् प्राप्नोत् ॥ ' इण् गतौ '। आदादिकः। ' आडजादीनाम् ' इत्याडागमः ॥ तदा vक्रतुमान् कर्मवान् सः vसोमस्य vपीत्वी सोमं पीत्वा vअवर्धत ॥ ' क्रियाग्रहणं कर्तव्यम् ' इति वः संप्रदानसंज्ञा। ' चतुर्थ्यर्थे बहुलम् ' इति षष्ठी। पीत्वी। ' स्नात्व्यादयश्च ' इति निपातितः ॥

---

१. त-भ–' अभिख्या ' नास्ति । २. अनु–शतप्रभेदनोऽन्त्या त्रिष्टुप् ।

तमस्य विष्णुर्महिमानमोजसांशुं दधन्वान्मधुनो वि रप्शते ।
देवेभिरिन्द्रो मघवा सयावभिर्वृत्रं जघन्वाँ अभवद्वरेण्यः ॥ २ ॥

तम् । अस्य । विष्णुः । महिमानम् । ओजसा । अंशुम् । दधन्वान् । मधुनः । वि । रप्शते । देवेभिः । इन्द्रः । मघऽवा । सयावऽभिः । वृत्रम् । जघन्वान् । अभवत् । वरेण्यः ॥ २ ॥

[v]विष्णुः एतन्नामकः । व्याप्तो यज्ञो वा । [v]मधुनः मदकरस्य सोमस्य [v]अंशुं लताखण्डं [v]दधन्वान् प्रेरयन् ॥ धवेर्गत्यर्थस्य क्वसौ इदित्त्वान्नुमागमे कृते वलि लोपः ॥ [v]ओजसा स्ववीर्येण संजातम् [v]अस्य इन्द्रस्य [v]तं [v]महिमानं [v]वि [v]रप्शते विविधं शब्दयति । स्तौति । [v]मघवा धनवान् [v]सयावभिः ॥ यातेः 'आतो मनिन्०' इति क्वनिप् ॥ सहगन्तृभिः [v]देवेभिः देवैः मरुद्भिश्च [v]वृत्रं [v]जघन्वान् हतवान् [v]इन्द्रः [v]वरेण्यः सर्वैर्वरणीयः संभजनीयः [v]अभवत् ॥

वृत्रेण यदहिना बिभ्रदायुधा समस्थिथा युधये शंसमाविदे ।
विश्वे ते अत्र मरुतः सह त्मनावर्धन्नुग्र महिमानमिन्द्रियम् ॥ ३ ॥

वृत्रेण । यत् । अहिना । बिभ्रत् । आयुधा । सम्ऽअस्थियाः । युधये । शंसम् । आऽविदे । विश्वे । ते । अत्र । मरुतः । सह । त्मना । अवर्धन् । उग्र । महिमानम् । इन्द्रियम् ॥३॥

[v]युधये योधनाय [v]आयुधा आयुधानि वज्रादीनि [v]बिभ्रत् धारयन्निन्द्रस्त्वं [v]यत् यदा [v]अहिना आहन्तव्येन [v]वृत्रेण[1] [v]समस्थिथाः सहास्थाः ॥ तिष्ठतेर्लुङि 'समवप्रविभ्यः स्थः' (पा. सू. १. ३. २२) इत्यात्मनेपदम् । 'स्थाघ्वोरिच्च' इति सिचः किरादेशश्चान्तादेशः । 'हस्वादङ्गात्' (पा. सू. ८. २. २७) इति सिचो लोपः । यद्योगादनिघातः । 'तिङि चोदात्तवति' इति गतेर्निघातः ॥ तत् [v]आविदे ॥ कृत्यार्थे केन्प्रत्ययः ॥ तव वृत्रवधादिकं वीर्यं प्रज्ञापयितुं [v]शंसम् अशंसम् । शब्दैरहं स्तौमि ॥ 'शन्सु स्तुतौ' । लङ् । वाक्यभेदाद्यवघातः ॥ किंच हे [v]उग्र उद्गूर्णबल [v]अत्र अस्मिन् काले एव [v]ते त्वदीयं [v]महिमानमिन्द्रियं वीर्यं च [v]विश्वे सर्वे [v]मरुतः [v]त्मना आत्मना [v]सह एव [v]अवर्धन् । वर्णलोपश्छान्दसः । अवर्धयन् । मरुतो ह्यिन्द्रस्य वीर्यं भवति ॥

जज्ञान एव व्यधत स्पृधः प्राप्श्यद्वीरो अभि पौंस्यं रणम् ।
अवृश्चदद्रिमव सस्यदः सृजदस्तभ्नान्नाकं स्वपस्यया पृथुम् ॥ ४ ॥

जज्ञानः । एव । वि । अबाधत । स्पृधः । प्र । अपश्यत् । वीरः । अभि । पौंस्यम् । रणम् । अवृश्चत् । अद्रिम् । अव । सऽस्यदः । सृजत् । अस्तभ्नात् । नाकम् । सुऽअपस्यया । पृथुम् ॥४॥

स इन्द्रः [v]जज्ञान [v]एव ॥ 'जनी प्रादुर्भावे' । छान्दसस्य लिटः कानच् ॥ जायमान एव [v]स्पृधः शत्रून् [v]व्यबाधत अत्यर्थमपीडयत् ॥ स्पृधः । 'स्पर्ध संघर्षे' । क्विप् । 'अपस्पृधेथाम्०' इति निपातनेनैकत्र संप्रसारणदर्शनादत्रापि भवति ॥ अत एव [v]वीरः समर्थः सः [v]रणं संग्रामम् अभिलक्ष्य [v]पौंस्यम् आत्मीयं बलं [v]प्रापश्यत् । अस्यैतावद्बलमिति प्रकर्षेण पश्यति । जानाति । किंच [v]अद्रिं मेघम् [v]अवृश्चत् वर्षणार्थमच्छिनत्[2] । अनन्तरं [v]सस्यदः ॥ 'स्यन्दू प्रस्रवणे' । क्विप् । शसि नलोपः । सह स्यन्दमाना अपः [v]अव [v]सृजत् अवाङ्मुखमसृजत् निरगमयत् । तथा सः [v]पृथुं

१. त१.२.३-म-वृत्रेणास्थिताः । २. त१.२.३.६.७,८-म१.२.४.८-वर्षणार्थम् ।

महान्तं vनाकं द्युलोकं vस्वपत्यया ॥ सुप आत्मनः क्यच् । ' अ प्रत्ययात् ' (पा. सू. ३.३.१०२) इति स्त्रियामप्रत्ययः ॥ शोभनकर्मेच्छया vअस्तम्नात् । निरुद्धमकरोत् ॥ स्तम्भिः सौत्रो धातुः ॥

आदिन्द्रः सुत्रा तविषीरपत्यत वरीयो द्यावापृथिवी अबाधत ।
अवाभरद्वृषितो वज्रमायसं शेवं मित्राय वरुणाय दाशुषे ॥ ५ ॥

आत् । इन्द्रः । सुत्रा । तविषीः । अपत्यत । वरीयः । द्यावापृथिवी इति । अबाधत ।
अव । अभरत् । वृषितः । वज्रम् । आयसम् । शेवम् । मित्राय । वरुणाय । दाशुषे ॥ ५ ॥

vआत् अपि च स vइन्द्रः vतविषीः महतीः सेनाः vसत्रा सहैव vअपत्यत अगच्छत् । ' पद गतौ ' । दैवादिकः । वर्णव्यत्ययः ॥ यद्वा । पत्यत इत्यैश्वर्यकर्मा । सेनानामीष्टे[1] । तासामीश्वरोऽभवदित्यर्थः । स एव vद्यावापृथिवी द्यावापृथिव्यौ vवरीयः ॥ तृतीयायाः सुः ॥ उरुतरेण महिम्ना vअबाधत । तयोरन्तःस्थितान् शत्रूनवधीदित्यर्थः । vवृषितः शत्रुवधे प्रगल्भः सन् vआयसम् अयोमयं vवज्रम् vअवाभरत् अधारयत्[2] । किमर्थम् । vमित्राय vवरुणाय vदाशुषे हविर्दत्तवते यज्वने च vशेवं सुखं कर्तुम् ॥ ॥ १४ ॥

इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे ।
वृत्रं यदुग्रो व्यवृश्चदोजसापो बिभ्रतं तमसा परीवृतम् ॥ ६ ॥

इन्द्रस्य । अत्र । तविषीभ्यः । विऽरप्शिनः । ऋघायतः । अरंहयन्त । मन्यवे ।
वृत्रम् । यत् । उग्रः । वि । अवृश्चत् । ओजसा । अपः । बिभ्रतम् । तमसा । परिऽवृतम् ॥ ६ ॥

vअत्र अस्मिन् काल एव vविरप्शिनः महतो विविधं शब्दायमानस्य वा vऋघायतः शत्रून् हिंसतः vइन्द्रस्य vतविषीभ्यः । षष्ठ्यर्थे चतुर्थी । बलानां vमन्यवे प्रख्यापनाय[3] vअरंहयन्त । आपो निरगच्छन् । रहिर्गत्यर्थः । vउग्रः उद्गूर्णः सः vअपः उदकानि vबिभ्रतं धारयन्तं vतमसा vपरीवृतं परितो वेष्टितम् । वृणोतेः कर्मणि क्तः । ' गतिरनन्तरः ' इति स्वरः । संहितायाम् ' उपसर्गस्य घञि ' (पा. सू. ६. ३. १२२) इति दीर्घः ॥ तं vवृत्रं vयत् यस्मिन् काले vओजसा स्ववीर्येण vव्यवृश्चत् अत्यर्थमवधीत् ॥

या वीर्याणि प्रथमानि कर्त्वी महित्वेभिर्यतमानौ समीयतुः ।
ध्वान्तं तमोऽव दध्वसे हत इन्द्रो मह्ना पूर्वहूतावपत्यत ॥ ७ ॥

या । वीर्याणि । प्रथमानि । कर्त्वी । महिऽत्वेभिः । यतमानौ । सम्ऽईयतुः ।
ध्वान्तम् । तमः । अव । दध्वसे । हते । इन्द्रः । मह्ना । पूर्वऽहूतौ । अपत्यत ॥ ७ ॥

vमहित्वेभिः महनीयैः स्वबलैः vयतमानौ युद्धाय प्रयत्नं कुर्वन्तौ इन्द्रवृत्रौ[4] vप्रथमानि पूर्वभावीनि vकर्त्वा । कृत्यार्थे त्वन्प्रत्ययः । कर्तव्यानि vया यानि vवीर्याणि vसमीयतुः संयोजयामासतुः ॥ ' इण् गतौ ' । लिटि ' दीर्घ इणः किति ' (पा. सू. ७. ४. ६९) इति दीर्घः ॥ तयोर्मध्ये

---

१. त१.२१.७-म१.४.७.८-सेना ईष्टे; भ२-सेनामीष्टे । २. त१.२.३.६.८-म१.४-आधारयत् ।
३. त-म-अप्रख्यापनाय । ४. त-इन्द्रवृत्रौ ' नास्ति ।

इन्द्रेण वृत्रे vहते सति vध्वान्तम् अतिनिबिडं vतमः vअव vदध्वसे। अवध्वस्तं विनष्टमभूत्॥ ध्वंसेर्लिट्। किरवाऋलोपः॥ vइन्द्रः तु vमह्ना स्वमहिम्ना vपूर्वहूतौ प्रथमाह्वाने vअपत्यत अगच्छत्। शूराणां मध्येऽयमेव प्रथममाहूयमानोऽभवदित्यर्थः॥

विश्वे देवासो अध वृष्ण्यानि तेऽवर्धयन्त्सोमव्रत्या वचस्यया।
रद्धं वृत्रमहिमिन्द्रस्य हन्मनाग्निर्न जम्भैस्तृष्वन्नमावयत्॥ ८॥

विश्वे। देवासः। अध। वृष्ण्यानि। ते। अवर्धयन्। सोमऽव्रत्या। वचस्यया।
रद्धम्। वृत्रम्। अहिम्। इन्द्रस्य। हन्मना। अग्निः। न। जम्भैः। तृषु। अन्नम्। आवयत्॥८॥

हे इन्द्र vअध वृत्रहननानन्तरं vविश्वे vदेवासः देवा ऋत्विजः vसोमवत्या सोमयुक्तया vवचस्यया स्तुतीच्छया vते स्वदीयानि vवृष्ण्यानि बलानि vअवर्धयन्[1] वर्धयन्ति[1]। vइन्द्रस्य vहन्मना हननसाधनेन वज्रेण vरद्धम्। 'रध हिंसासंराध्योः'। हिंसितम् vअहिं vवृत्रम् अपामावरकं मेघं vतृषु शीघ्रम् vअन्नमावयत् अभक्षयत्। तज्जन्येनोदकेन संपादितमन्नं जनोऽभक्षयदित्यर्थः। आवयतिरत्तिकर्मा। तत्र दृष्टान्तः। vअग्निर्न यथाग्निः vजम्भैः आत्मीयैर्दन्तैरन्नं भक्षयति तद्वत्॥

भूरि दक्षेभिर्वचनेभिरृक्वभिः सख्येभिः सख्यानि प्र वोचत।
इन्द्रो धुनिं च चुमुरिं च दम्भयञ्छ्रद्धामनस्या शृणुते दभीतये॥ ९॥

भूरि। दक्षेभिः। वचनेभिः। ऋक्वऽभिः। सख्येभिः। सख्यानि। प्र। वोचत।
इन्द्रः। धुनिम्। च। चुमुरिम्। च। दम्भयन्। श्रद्धाऽमनस्या। शृणुते। दभीतये॥ ९॥

हे स्तोतारः vदक्षेभिः वर्धनहेतुभिः vऋक्वभिः॥ 'छन्दसीवनिपौ' इति वनिप्प्रत्ययः। अयस्मयादित्वेन भत्वाजश्त्वाभावः। पदत्वात् कुत्वम् (का. १. ४. २०)॥ मन्त्रयुक्तैः vसख्येभिः॥ तदर्हतीत्यर्थे 'छन्दसि च' इति यप्प्रत्ययः[2]॥ सख्युरिन्द्रस्य योग्यैः vवचनेभिः वक्तृभिः स्तोत्रैः vसख्यानि स्तुत्यस्तोतृलक्षणान्यभिलक्ष्य vभूरि बहुवारम् इन्द्रं vप्र vवोचत प्रब्रूत अभिष्टुत। vइन्द्रः तु vदभीतये एतन्नामकाय राजर्षये vधुनिं vच vचुमुरिं vच एतन्नामकौ द्वावसुरौ vदम्भयन् हिंसन् vश्रद्धामनस्या। मनःशब्दात् क्यच्। श्रद्धायुक्तया मनस इच्छया vशृणुते। युष्माभिः कृतानि स्तोत्राणि शृणोति॥

त्वं पुरूण्या भर स्वश्व्या येभिर्मंसै निवचनानि शंसन्।
सुगेभिर्विश्वा दुरिता तरेम विदो षु ण उर्विया गाधमद्य॥ १०॥

त्वम्। पुरूणि। आ। भर। सुऽअश्व्या। येभिः। मंसै। निऽवचनानि। शंसन्।
सुऽगेभिः। विश्वा। दुःऽइता। तरेम। विदो इति। सु। नः। उर्विया। गाधम्। अद्य॥ १०॥

हे इन्द्र vत्वं vस्वश्व्या स्वश्व्यानि शोभनाश्वयुक्तानि vपुरूणि बहूनि धनानि मह्यम् vआ vभर आहर प्रयच्छ। vनिवचनानि नितरां वक्तव्यानि स्तोत्राणि vशंसन् अहं vयेभिः धनैः vमंसै।

१. त-म-अवर्धयंति। २. त-म-मु-यप्रत्ययः

मन्यतिरर्चतिकर्मा । देवान् पूजयानि तानि देहि ॥ मन्यतेर्लोटि 'बहुलं छन्दसि' इति विकरणस्य लुक् । सिप्यडागमः । सिपः पित्त्वेनानुदात्तत्वाद्धातुस्वरः ॥ [v]सुगेभिः सुष्ठु गन्तव्यैस्तैर्धनैः स्तोत्रैर्वा [v]विश्वा सर्वाणि [v]दुरिता दुरितानि पापानि [v]तरेम । हे इन्द्र [v]अद्य अस्मिन् कर्मणि [v]गार्धं प्रध्यमानं क्रियमाणं [v]नः अस्मदीयं स्तोत्रम् [v]उर्विया उरुत्वेन बहुमानेन [v]सु[1] सुष्ठु [v]विदो । विद ड । जानीहेव ॥ ॥ १५ ॥

'घर्मो' इति दशर्चं द्वितीयं सूक्तं वैश्वदेवम् । सध्रिर्नाम वैरूप ऋषिः । तपसः पुत्रो घर्मो वा । चतुर्थी जगती । शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तं—'घर्मा सध्रिस्तापसो वा घर्मो वैश्वदेवं चतुर्थी जगती' इति । गतो विनियोगः ॥

घर्मा समन्ता त्रिवृतं व्यापतुस्तयोर्जुष्टिं मातरिश्वा जगाम ।
दिवस्पयो दिधिषाणा अवेषन्विदुर्देवाः सहसामानमर्कम् ॥ १ ॥

घर्मा । समऽअन्ता । त्रिऽवृतम् । वि । आपतुः । तयोः । जुष्टिम् । मातरिश्वा । जगाम ।
दिवः । पयः । दिधिषाणाः । अवेषन् । विदुः । देवाः । सहऽसामानम् । अर्कम् ॥ १ ॥

[v]समन्ता समन्तौ संव्याप्तदिगन्तौ [v]घर्मा । 'घृ क्षरणदीप्त्योः' । घर्मौ दीप्यमानावग्न्यादित्यौ [v]त्रिवृतम् । 'त्रयो वा इमे त्रिवृतो लोकाः' (ऐ. आ. १. १. २) इत्याम्नानात् । त्रैलोक्यं [v]व्यापतुः । स्वतेजोभिर्व्याप्तवन्तौ । [v]मातरिश्वा अन्तरिक्षे वर्तमानो वायुः [v]तयोः अग्न्यादित्ययोः [v]जुष्टिं प्रीतिं [v]जगाम गतवान् । यदा [v]सहसामानम् । सामशब्द उपलक्षकः । वेदत्रयतेजःसहितम् । 'सर्वं तेजः सामरूप्यं ह शश्वत्' (तै. ब्रा. ३. १२. ९. २) इत्याम्नानात् । ईदृशम् [v]अर्कम् अर्चनीयं सूर्यं [v]देवाः दीप्यमानाः स्वरश्मयः [v]विदुः विविदुः लेभिरे प्रापुः तदा [v]दिधिषाणाः लोकधारणशीलास्ते [v]दिवः द्युलोकस्य संबन्धि [v]पयः उदकम् [v]अवेषन् व्याप्तवन्तः । ववर्षुरित्यर्थः[2] ॥ दिवस्पय इत्यत्र 'षष्ठ्याः पतिपुत्र०' इति सत्वम् । दिधिषाणाः । 'धिष[3] धारणे' । चानश् । शपः श्लुः । यद्वा । 'धि धारणे' । समन्तस्य चानश् । 'अज्झनगमां सनि' इति दीर्घाभावश्छान्दसः । यद्वा । समन्तौ संगतौ घर्मौ स्वयं दीप्यमानौ जीवेश्वरौ त्रिवृतं सत्त्वरजस्तमोगुणात्मिकां मायां व्यापतुः । नियन्तृनियम्यत्वभावेन मातरिश्वा परमात्मा तयोर्जुष्टिं संभोक्तव्यपदार्थैः संजातां प्रीतिं जगाम । गतवान्[4] । तं परमात्मानं वेदमयमिमं सूर्यमिति देवा जानन्ति ॥

तिस्रो देष्ट्राय निर्ऋतीरुपासते दीर्घश्रुतो वि हि जानन्ति वह्नयः ।
तासां नि चिक्युः कुवयो निदानं परेषु या गुह्येषु व्रतेषु ॥ २ ॥

तिस्रः । देष्ट्राय । निःऽऋतीः । उप । आसते । दीर्घऽश्रुतः । वि । हि । जानन्ति । वह्नयः ।
तासाम् । नि । चिक्युः । कुवयः । निऽदानम् । परेषु । याः । गुह्येषु । व्रतेषु ॥ २ ॥

[v]निर्ऋतीः । पृथिवीनामैतत् । अनेनेतरलोकावुपलक्ष्येते । तत्राधिष्ठिताः [v]तिस्रः अग्न्यादिदेवताः [v]देष्ट्राय हविषां प्रदानाय [v]उपासते । यजमाना उपासनं कुर्वते । ततः [v]दीर्घश्रुतः प्रभूतकीर्तयः [v]वह्नयः जगतः प्रापिकास्ता देवताः [v]वि [v]जानन्ति । एतैः कृतामुपासनां मन्वत एव । यद्वा ।

---

१. ग-त-भ-मु-'सु' नास्ति । २. त१.२.३.६.७.८-भ-ववर्षुः त४.५-ववृधुरित्यर्थः । ३. ग-त२. ३.६.७.८-भ-धिषु । ४. ग-त१.२.३.६.७.८-भ१.२.४.५.८-गमितवान् ।

निर्ऋतीः । निःशेषेण ऋच्छन्ति गच्छन्तीति निर्ऋतयः । तास्तिस्रः सृष्टिस्थितिसंहृतीः देष्ट्वात्मनः कर्मभोगदानायोपासते ते दीर्घश्रुतो दीर्घ[1] संसारे शृण्वन्तो मन्तव्यदृश्यादिपदार्थं जानन्तः । मन्त्रदृश्यादिरूपमजानन्त इत्यर्थः । अत एव वह्वयः संसारस्य वोढारस्ता न जानन्ति । ᵛकवयः क्रान्तदर्शिनस्तु ᵛतासां सृष्ट्यादीनामन्त्यादीनां वा ᵛनिदानं मूलकारणं परमात्मानं ᵛनि ᵛचिक्युः नितरां चिन्वन्ति जानन्ति । ᵛपरेषु उत्कृष्टेषु वा ᵛगुह्येषु वा गोप्तव्येषु कर्मसु यमनियमादिषु ᵛव्रतेषु[2] ᵛयाः प्रवृत्तयः सन्ति तासां निदानं नि चिक्युः जानन्ति ॥ 'चिञ् चयने' । लिटि 'विभाषाञेः' इत्यन्यासादुत्तरस्य कवर्णादेशः[3] । यद्वा । चायतेर्लिटि 'चायः की' (पा. सू. ६. १. ३५) इति छन्दसि की इत्यादेशः ॥

चतुष्कपर्दा युवतिः सुपेशा घृतप्रतीका वयुनानि वस्ते ।
तस्यां सुपर्णा वृषणा नि षेदतुर्यत्र देवा दधिरे भागधेयम् ॥ ३ ॥

चतुःऽकपर्दा । युवतिः । सुऽपेशाः । घृतऽप्रतीका । वयुनानि । वस्ते ।
तस्याम् । सुऽपर्णा । वृषणा । नि । सेदतुः । यत्र । देवाः । दधिरे । भागऽधेयम् ॥ ३ ॥

ᵛचतुष्कपर्दा चतुष्कोणा ᵛयुवतिः स्त्रीरूपा ᵛसुपेशाः शोभनालंकारा ᵛघृतप्रतीका घृतप्रमुखहविष्का एतादृशी वेदिः ᵛवयुनानि ज्ञातव्यानि पदार्थजातानि कर्माणि स्तोत्राणि वा ᵛवस्ते आच्छादयति । ᵛतस्यां वेद्यां ᵛवृषणा वृषणौ हविषां वर्षितारौ ᵛसुपर्णा सुपर्णौ सुपतनौ जायापती यजमानब्रह्माणौ वा ᵛनि ᵛषेदतुः निषण्णौ भवतः । ᵛयत्र यस्यां वेद्यां ᵛदेवाः अग्न्यादयः ᵛभागधेयम् । स्वार्थिको धेयप्रत्ययः । स्वस्वभागं हविः ᵛदधिरे[4] धारयन्ति । यद्वा । चतुष्कपर्दा नामाख्यातोपसर्गनिपाताश्चत्वारः कपर्दस्थानीया यस्याः सा युवतिस्तरुणी नित्या घृतप्रतीका दीप्यमानवर्णावयवौपनिषदी वाग्वयुनानि ज्ञानानि वस्ते आच्छादयति । तस्यां वाचि सुपर्णा सुपर्णौ जीवपरमात्मानौ निषण्णौ भवतः । यत्र । 'इतराभ्योऽपि दृश्यन्ते' इति तृतीयार्थे त्रल्प्रत्ययः । यया वाचा देवा भागं धारयन्ति ॥

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसापश्यमन्तितस्तं माता रेळिह स उ रेळिह मातरम् ॥ ४ ॥

एकः । सुऽपर्णः । सः । समुद्रम् । आ । विवेश । सः । इदम् । विश्वम् । भुवनम् । वि । चष्टे ।
तम् । पाकेन । मनसा । अपश्यम् । अन्तितः
तम् । माता । रेळिह । सः । ऊँ इति । रेळिह । मातरम् ॥ ४ ॥

ᵛएकः सर्वकार्येष्वसहायः ᵛसुपर्णः सुपतनो मध्यमस्थानो देवः ᵛसमुद्रम् अन्तरिक्षम् ᵛआ ᵛविवेश आविशति । आविश्य च ᵛस ᵛइदं ᵛविश्वं सर्वं ᵛभुवनं भूतजातं ᵛवि ᵛचष्टे । अनुग्राह्यतयाभिपश्यति । ᵛतम् एवंरूपं देवं ᵛपाकेन परिपक्वेन ᵛमनसा ᵛअन्तितः समीपेऽहम् ᵛअपश्यम् अदर्शम् । किंच ᵛमाता उदकानां निर्मात्री माध्यमिका वाक् तां ᵛरेळिह आस्वादयति । उपजीवनमात्रमत्र लक्ष्यते । ᵛस ᵛउ स खलु ᵛमातरं वाचं ᵛरेळिह लेढि । तामेवोपजीवति । 'लिह आस्वादने' । यद्वा । सुपर्णः पक्षवाग्विराधारसंचार्येकः प्राणवायुः परमात्मा वा समुद्रम् । समुद्द्रवन्ति

---

१. त-म१.२.४.८–दीर्घे । २. ग-त-म–'व्रतेषु' नास्ति । ३. त-म-मु–कवर्गादेशः । ४. त१.२. ३.६.७.८-भ२.४.८–दधते ।

आपोऽस्मादिति समुद्रमन्तरिक्षम्। यद्वा। समुद्द्रवणं[1] सर्वतो[2] गमनम्। तच्छीलं प्रपञ्चजातमाविष्टवान्। 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै. आ. ८. ६) इति श्रुतेः। वायुपक्षे[2] वाय्वादिरूपेण[3] आविवेश। स इदं विश्वं सर्वं लोकं वि चष्टे विशेषेण ख्यापयति। सति हि प्राणे परमात्मनि वा जीवन्तः पुरुषा लोकं विख्यातं कुर्वन्ति। तं देवमुपासकोऽहं[4] पाकेन परिपक्वज्ञानेन मनसा अभितः॥ अन्तिकशब्दात्तसिः। अन्तिकस्य तसि कादिलोपो भवत्याद्युदात्तत्वं च (पा. सू. ६. ४. १४९. ८) इति कादिलोपः॥ अन्तिके समीपे स्वहृदयेऽपश्यम्। तं प्राणं माता वाक् रेळिह[5]। वाक् प्राणेऽन्तर्भवतीत्यर्थः। स्वापे हि वाग्व्यापारो न दृश्यते प्राणव्यापारस्तु दृश्यत इति॥

सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति।
छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश॥ ५॥

सुऽपर्णम्। विप्राः। कवयः। वचःऽभिः। एकम्। सन्तम्। बहुधा। कल्पयन्ति।
छन्दांसि। च। दधतः। अध्वरेषु। ग्रहान्। सोमस्य। मिमते। द्वादश॥ ५॥

[v]विप्राः मेधाविनः [v]कवयः क्रान्तप्रज्ञा मनुष्याः [v]सुपर्णं सुपतनम् [v]एकं [v]सन्तं परमात्मानं [v]वचोभिः स्तुतिलक्षणैर्वचनैः [v]बहुधा बहुप्रकारं [v]कल्पयन्ति कुर्वन्ति। किंच त एव कवयः [v]अध्वरेषु यज्ञेषु [v]छन्दांसि गायत्र्यादीनि सप्त छन्दांसि [v]दधतः स्तोत्रशस्त्रादिना धारयन्तो द्वादशसंख्याकान्[6] [v]सोमस्य [v]ग्रहान् ग्रहणसाधनानि पात्राण्युपांश्वन्तर्यामादीनि [v]मिमते निर्मिमते॥ ग्रहान्। गृह्यत एभिरिति ग्रहाः। 'ग्रहवृदृनिश्चिगमश्च' इति करणेऽप्प्रत्ययः। सोमस्येति कर्मणि षष्ठी। द्वादश इत्यत्र 'संख्या' (पा. सू. ६. २. ३५) इति पूर्वपदप्रकृतिस्वरत्वम्॥ ॥ १६॥

षट्त्रिंशाँश्च चतुरः कल्पयन्तश्छन्दांसि च दधत आद्वादशम्।
यज्ञं विमाय कवयो मनीष ऋक्सामाभ्यां प्र रथं वर्तयन्ति॥ ६॥

षट्ऽत्रिंशान्। च। चतुरः। कल्पयन्तः। छन्दांसि। च। दधतः। आऽद्वादशम्।
यज्ञम्। विऽमाय। कवयः। मनीषा। ऋक्ऽसामाभ्याम्। प्र। रथम्। वर्तयन्ति॥ ६॥

पूर्वं सामान्येन यज्ञग्रहानुक्त्वेदानीं सर्वग्रहादिपूर्वको यज्ञोऽभिधीयते। [v]षट्त्रिंशान्। द्वावुपांश्वन्तर्यामौ[7]। ऐन्द्रवायवादयस्त्रयो द्विदेवत्यग्रहाः। द्वौ शुक्रामन्थिनौ। आग्रयण उक्थ्यो ध्रुवश्चेति त्रयः। ऋतुग्रहा द्वादश। ऐन्द्राग्नो वैश्वदेवश्च द्वौ। त्रयो मरुत्वतीयाः। एको माहेन्द्रः। आदित्यसावित्रौ द्वौ। वैश्वदेवः पात्नीवतो हारियोजन इति त्रयो[8] ग्रहाः। एवं षट्त्रिंशद्भवन्ति। अत्यग्निष्टोमे पूर्वे षटत्रिंशद्ग्रहा द्वावंश्वदाभ्यौ दधिग्रहः षोडशीति चेति चत्वारः। एतांश्चत्वारिंशत्संख्याकान् ग्रहान् [v]कल्पयन्तः सोमेन पूरयन्तः। किंच [v]आद्वादशम्॥ 'आङ् मर्यादाभिविध्योः' (पा. सू. २. १. १३) इत्यव्ययीभावसमासः। तस्य स्वरः॥ द्वादशसंख्याकप्रउगादिशस्त्रसमाप्तिपर्यन्तं

---

१. ग–समुंदनं; त१.२.३.६.७.८–समंदनं; त४.५–समुंदजं; भ२.४.८–सुमंदनं; भ७–समुद्रनं। २. त१.२.३.६.७.८-भ–'सर्वतो ..... वायुपक्षे' नास्ति। ३. ग–बाह्यवायुरूपेण; त१.२.३.६.७.८-भ–वायुरूपेण। ४. त१.२.३.६.७.८-भ२.४.८–सदेवमु°। ५. त४.५–रेळिह। अध्ययनकाले वाग्व्यापारो दृष्टः। सह प्राणो हि मातरं वाचं रेळिह। ६. ग–द्वादश द्वादशसंख्याकान्। ७. त४–षडुत्तरान् त्रिंशत्संख्याकान् ततश्चतुरश्च ग्रहान्। एते तैत्तिरीयारण्यके ज्योतिष्टोमे समाम्नायंते प्राणापानाम्यामेवोपांश्वंतर्यामौ। ८. त-भ–'त्रयो' नास्ति।

vछन्दांसि गायत्र्यादीनि vदधतः स्तुतशस्त्रादिरूपेण धारयन्तः vकवयो vमनीषा । तृतीयाया आकारः । मनीषया बुद्ध्या एवं vयज्ञं vविमाय निर्माय vरथम् । रमन्त्यत्रेति[1] रथो यज्ञः । तं vरथं यज्ञम् vऋक्सामाभ्यां vप्र vवर्तयन्ति प्रकर्षेण संपादयन्ति ॥ चतुर इत्यत्र ' चतुरः शसि ' (पा. सू. ६. १. १६७) इत्यन्तोदात्तत्वम् ॥

चतुर्दशान्ये महिमानो अस्य तं धीरा वाचा प्र णयन्ति सप्त ।
आप्नानं तीर्थं क इह प्र वोचद्येन पथा प्रपिबन्ते सुतस्य ॥ ७ ॥

चतुःऽदश । अन्ये । महिमानः । अस्य । तम् । धीराः । वाचा । प्र । नयन्ति । सप्त ।
आप्नानम् । तीर्थम् । कः । इह । प्र । वोचत् । येन । पथा । प्रऽपिबन्ते । सुतस्य ॥ ७ ॥

vअस्य यज्ञरूपस्य परमात्मनः vअन्ये vचतुर्दश[2] चतुर्दशसंख्याकाः[2] vमहिमानः विभूतयो भवन्ति । vतं यज्ञं vसप्त[3] सप्तसंख्याकाः vधीराः धीमन्तो होत्रादयः vवाचा शस्त्ररूपया vप्र vणयन्ति प्रकर्षेण नयन्ति । vआप्नानम् ॥ ' आप्लृ व्याप्तौ ' । ताच्छीलिके चानशि व्यत्ययेन विकरणस्य व्यत्ययः[4] ॥ व्यापनशीलं vतीर्थं पापोत्तारणसमर्थं चात्वालोत्करमध्यदेशम् vइह अस्मिन् यज्ञे vकः vप्र vवोचत् को वक्ति । न कोऽपीत्यर्थः । vयेन vपथा येन यज्ञमार्गेण vसुतस्य अभिषुतं सोमं vप्रपिबन्ते देवा अतिशयेन पिबन्ति ॥ ' पा पाने ' । ' पाघ्रा ' इत्यादिना पिबादेशः । व्यत्ययेन आत्मनेपदम् । उपसर्गेण समासः । यद्योगादनिघाते ' तिङि चोदात्तवति ' इति गतेर्निघातः ॥

सहस्रधा पञ्चदशान्युक्था यावद्द्यावापृथिवी तावदित्तत् ।
सहस्रधा महिमानः सहस्रं यावद्ब्रह्म विष्ठितं तावती वाक् ॥ ८ ॥

सहस्रधा । पञ्चऽदशानि । उक्था । यावत् । द्यावापृथिवी इति । तावत् । इत् । तत् ।
सहस्रधा । महिमानः । सहस्रम् । यावत् । ब्रह्म । विऽस्थितम् । तावती । वाक् ॥ ८ ॥

vसहस्रधा सहस्रसंख्याकेषु ब्रह्मादिस्तम्बपर्यन्तेषु देहेषु vपञ्चदशानि । चक्षुः श्रोत्रं मनो वाक् प्राण इत्येतानि पञ्च । तदाधारत्वेन मातापित्रोः सकाशादागतानि पृथिव्यसेजोवाय्वाकाशरूपाणि भूतानि मिलितानि दश । एवं पञ्चदशसंख्याकानि vउक्था उक्थान्युत्कृष्टान्यङ्गानि विद्यन्ते प्राणिदेहेषु[5] जातेषु । vद्यावापृथिवी ॥ षष्ठीद्विवचनस्य ' सुपां सुलुक् ' ' इति पूर्वसवर्णदीर्घः ॥ द्यावापृथिव्योः vयावत् यत्परिमाणमस्ति vतावदित् तत्परिमाणमेवात्माधिष्ठितं प्राणिदेहजातं भवति । यावत्तावच्छब्दयोः[6] ' यत्तदेतेभ्यः परिमाणे वतुप् ' (पा. सू. ५. २. ३९) ' आ सर्वनाम्नः ' (पा. सू. ६. ३. ९१) इति दीर्घः ॥ किंच vसहस्रधा सहस्रसंख्याकेषु vसहस्रं vमहिमानः सहस्रसंख्याका महान्तो व्यवहारविशेषा भवन्ति । प्रतिविषयं प्रतिक्षणं दर्शनश्रवणादिव्यवहारनिष्पत्तेः[7] । सहस्रशब्दोऽत्र विधार्थे धाप्रत्ययः । vब्रह्म जगत्कारणं वस्तु vयावत् नानाविधप्राणिदेहरूपेण यावत्परिमाणं भूत्वा vविष्ठितं विशेषेण स्थितं vवाक् vतावती तत्परिमाणा भवति । एकैकस्याभिधेयार्थस्यैकैकनामापेक्षणात् ।

१. ग२–ग्मतेत्रेति । २. ग-त-भ–चतुर्दशलोकाः; मु–चतुर्दशसंख्याका लोकाः । ३. ग-त-भ-मु–' सप्त ' नास्ति । ४. ग–श्ना; त१.२.३.६.७.८ भ–च; त४.५–ना । ५. ग२-त४.५–इत्थं प्राणिदेहेषु; त१.२.३.६.७-भ–उक्थप्राणिदेहेषु । ६. ग-त४.५–यत्तच्छब्दयोः । ७. त-भ१.४.८–°व्यवहारत्व-निष्पत्तेः; भ२–°व्यवहारत्वनिष्पत्तेः ।

अन्यत्रापि श्रूयते—' सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते ' (तै. आ.३.१२.७) इति । ' सहस्रधा पञ्चदशान्युक्थेति पञ्च हि दशतो भवन्ति ' (ऐ. आ. १. ३. ८) इत्यादिकमारण्यकमन्त्रानुसंधेयम् ॥

कश्छन्दसां योगमा वेद धीरः को धिष्ण्यां प्रति वाचं पपाद ।
कमृत्विजामष्टमं शूरमाहुर्हरी इन्द्रस्य नि चिकाय कः स्वित् ॥ ९ ॥

कः । छन्दसाम् । योगम् । आ । वेद । धीरः । कः । धिष्ण्याम् । प्रति । वाचम् । पपाद । कम् । ऋत्विजाम् । अष्टमम् । शूरम् । आहुः । हरी इति । इन्द्रस्य । नि । चिकाय । कः । स्वित् ॥ ९ ॥

vधीरः धीमान् vकः मानुषः vछन्दसां गायत्र्यादीनां vयोगं स्तुतशस्त्रात्मना नियोगम् vआ vवेद आजानाति । vकः वा vधिष्ण्याम् । धिष्ण्यानि होत्रादीनां सप्त स्थानानि[1] । तदर्हां vवाचं vप्रति vपपाद प्रतिपादयति । करोति । किंच vऋत्विजां होत्रादीनां सप्तानाम् vअष्टमम् अष्टसंख्यापूरकं vशूरं स्वतन्त्रं vकम् vआहुः वदन्ति । vकः vस्वित् कः खलु vइन्द्रस्य vहरी ऋक्सामरूपौ द्वावश्वौ । ' ऋक्सामे वा इन्द्रस्य हरी ' (तै. सं. ६.५.९.२) इत्याम्नायते । तादृशौ हरी vनि vचिकाय नितरां पूजयति । जानाति । वेदिता प्रतिपादयिताष्टसंख्यापूरकस्य देवस्य ज्ञाता वा परमात्मनोऽन्यो नास्तीत्यर्थः ॥

भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः ।
श्रमस्य दायं वि भजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः ॥ १० ॥

भूम्याः । अन्तम् । परि । एके । चरन्ति । रथस्य । धूःऽसु । युक्तासः । अस्थुः ।
श्रमस्य । दायम् । वि । भजन्ति । एभ्यः । यदा । यमः । भवति । हर्म्ये । हितः ॥ १० ॥

vएके केचन सप्ताश्वाः vभूम्याः पृथिव्याः । अनेन द्युलोकोऽप्युपलक्ष्यते । द्युलोकस्य च vअन्तं पर्यन्तं vपरि vचरन्ति । तदानीं सर्वत आगच्छन्ति । तदा च तेऽश्वाः vरथस्य vधूर्षु युगादिभारेषु vयुक्तासः युक्ताः सन्तः vअस्थुः तिष्ठन्ति । vएभ्यः अश्वेभ्यः vश्रमस्य vदायम् ॥ ' दो अवखण्डने ' । घञ् । ' कर्षात्वतः० ' इत्यन्तोदात्तत्वम् ॥ श्रमस्य नाशकं घासादिकं vवि vभजन्ति देवाः प्रयच्छन्ति । vयदा यस्मिन् काले vयमः नियन्ता सूर्यः vहर्म्ये हर्म्यस्थानीये रथे vहितः निहितः vभवति । तदैते भजन्तीत्यर्थः[2] ॥ ॥ १७ ॥

' चित्रः ' इति नवर्चं तृतीयं सूक्तमाग्नेयम् । उपस्तुतो नाम वृष्टिहव्यपुत्र ऋषिः । अष्टमी त्रिष्टुप् । नवमी शाक्करी । आदितः सप्त जगत्यः । तथा चानुक्रान्तं—' चित्र इत्रव वार्ष्टिहव्य उपस्तुत आग्नेयं जागतं त्रिष्टुप्शाक्वर्यन्तम् ' इति । प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दसीदं सूक्तम् । सूत्रितं च—' चित्र इच्छिशोर्वसुं न चित्रमहसमिति जागतम् ' (आश्व. श्रौ. ४. १३) इति ॥

चित्र इच्छिशोस्तरुणस्य वक्षथो न यो मातरावप्येति धातवे ।
अनूधा यदि जीजनदधा च नु ववक्ष सद्यो महि दूत्यं[1] चरन् ॥ १ ॥

---

१. ग–स्थानानि मार्जालीयश्च; त१.२.३.६.७.८–भ१.२.४.८–स्थानानि मार्ज्म; त४.५–स्थानानि मार्जारश्च; भ७–स्थानानि मार्ज्मत । २. ग-त-भ–भवंतीत्यर्थः ।

चित्रः । इत् । शिशोः । तरुणस्य । वक्षथः । न । यः । मातरौ । अपिऽएति । धातवे ।
अनूधाः । यदि । जीजनत् । अध । च । नु । ववक्ष । सद्यः । महि । दूत्यम् । चरन् ॥१॥

[v]शिशोः शिशुभूतस्य अत एव [v]तरुणस्य नूतनस्याग्नेः [v]वक्षथः ॥ वक्षेरौणादिकोऽथप्रत्ययः[1] ॥ हविर्वहनं [v]चित्र [v]इत् आश्चर्यभूतमेव [v]यः जातोऽग्निः [v]मातरौ सर्वस्य निर्मात्र्यौ मातृपितृभूते द्यावापृथिव्यावरण्यौ वा [v]धातवे [v]न [v]अप्येति ॥ 'धेट् पाने'। तुमर्थे तवेन्प्रत्ययः ॥ स्तनपानायापि न गच्छति ॥ 'इण् गतौ'। लट्युपसर्गेण समासः। 'तिङि चोदात्तवति' इति गतेर्निघातः ॥ [v]अनूधाः ॥ नञ्बहुव्रीहिः। समासान्तस्यानङः स्त्रियामिष्टत्वादन्नानङभावः (पा. सू. ५.४.१३१)। प्रत्येकविवक्षयैकवचनम् ॥ ऊधोरहितोऽयं लोकोऽसौ लोकस्तेनमग्निं [v]यदि [v]जीजनत् अजीजनत् अजनयत्। तर्हि स्तनपानाय न गच्छतीति युक्तम्। तथा न भवति। किंतु द्यावापृथिव्यौ[2] सर्वेषां कामदुघे खलु। तथापि न याति। तस्मादस्य हविर्वहनं चित्रम्[3]। [v]अध [v]च उत्पत्त्यनन्तरमेव [v]नु अद्य अस्मिन् दिने [v]सद्यः तदानीमेव शीघ्रं [v]महि महत् [v]दूत्यम् ॥ 'दूतस्य भागकर्मणी' (पा. सू. ४. ४. १२०) इति कर्मणि यत्प्रत्ययः ॥ दूतकर्म [v]चरन्[4] [v]ववक्ष । देवान् प्रति हवींषि वहति ॥

अग्निर्ह नाम धायि दस्मपस्तमः सं यो वना युवते भस्मना दता ।
अभिप्रमुरा जुह्वा स्वध्वर इनो न प्रोथमानो यवसे वृषा ॥ २ ॥

अग्निः । ह । नाम । धायि । दस्मऽपस्तमः । सम् । यः । वना । युवते । भस्मना । दता ।
अभिऽप्रमुरा । जुह्वा । सुऽअध्वरः । इनः । न । प्रोथमानः । यवसे । वृषा ॥ २ ॥

[v]अपस्तमः ॥ अपःशब्दस्यान्तोदात्तत्वेन मत्वर्थो लुप्त इति ज्ञायते। अन्यथा 'आपः कर्मण्याम्' इत्यसुनि कृत आद्युदात्तत्वमेव स्यात् ॥ अपस्वितमः कर्मवत्तमः [v]अग्निः [v]नाम ॥ तृतीयाया लुक् ॥ नाम्ना नमयितृणा हविषा स्तोत्रेण वा [v]धायि यजमानैर्ध्यायते खलु। यतः [v]दस्मं बहूनां धनदाता ॥ 'डुदाञ् दाने'। हेतौ[5] 'छन्दस्युभयथा' इति शतुरार्धधातुकत्वेन आकारलोपः। अत एव शपोऽसंभवः ॥ [v]यः अग्निः [v]भस्मना भासकेन प्रकाशकेन तेजसा [v]दता दन्तेन च [v]वना[6] वनान्यरण्यानि [v]सं [v]युवते संयुनक्ति। संदहतीति यावत्। 'यु मिश्रणामिश्रणयोः'। व्यत्ययेन शः। आत्मनेपदं च। दता। दन्तशब्दस्य 'पदन्०' इत्यादिना दद्भावः। 'ऊडिदम्०' इति विभक्तेराद्युदात्तत्वम् ॥ किंच [v]अभिप्रमुरा ॥ 'मूर्च्छा मोहसमुच्छ्राययोः'। अस्मात् क्विपि 'राल्लोपः' इति ककारलोपः। 'मुर संवेष्टने' इत्यस्माद्वा क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ अभितः समुच्छ्रितेनोद्यतेन यद्वा सर्वतो हविर्भिः संवेष्टितेन [v]जुह्वा एतन्नामकेन पात्रविशेषेण [v]स्वध्वरः शोभनयज्ञोऽग्निः अहनीये[7] हविषि चरतीति शेषः। तत्र दृष्टान्तः। [v]इनः समर्थः [v]प्रोथमानः पर्याप्तः पुष्टाङ्गः [v]वृषा [v]यवसे [v]न यथा वृषभो घासादिषु चरति ॥

तं वो विं न दुवसे देवमन्धस इन्दुं प्रोथन्तं प्रवपन्तमर्णवम् ।
आसा वह्निं न शोचिषा विरप्शिनं महिव्रतं न सुरजन्तमध्वनः ॥ ३ ॥

---

१. ग-त१.२.३.६.७.८-म-सु-वहेरौणादिको°। २. ग-द्यावापृथिव्यौ हि; त१.२.३.६.७.८-म१.४.७-द्यावापृथिव्यौ तु; म२.८-द्यावापृथिव्यौ नु। ३. त-म-'चित्रं' नास्ति। ४. ग-चरन् आचरन्। ५. ग-हेतौ शतरि। ६. त-म-'वना' नास्ति। ७. ग-त१.२.३.७.८-म१.२.४.७-खादनीये; त६-म८-स्वादनीये।

तम् । वः । विम् । न । द्रुऽसदम् । देवम् । अन्धसः । इन्दुम् । प्रोथन्तम् । प्रऽवपन्तम् । अर्णवम् । आसा । वह्निम् । न । शोचिषा । विऽरप्शिनम् । महिऽव्रतम् । न । सुरजन्तम् । अध्वनः ॥३॥

हे स्तोतारः वः यूयं तम् अग्निमभिष्टुत । कीदृशम् । विं न पक्षिणमिव द्रुषदम् । द्रुषदः । अरणिलक्षणे वृक्षे सीदन्तं देवं द्योतमानम् अन्धसः हृन्दुं स्तोतृणामन्नस्य क्लेदयितारं प्रापयितारम् ॥ 'उन्देरिच्चादेः' (उ. सू. १. १३) इत्युप्रत्ययः । 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम् ॥ प्रोथन्तं शब्दायमानं प्रवपन्तम् अत्यर्थं वनानां दाहकम् अर्णवम् ॥ 'अर्णसः सलोपश्च' इति मत्वर्थीयो वः ॥ 'अग्नौ प्रास्ताहुतिः' इत्यादिक्रमेण उदकवन्तम् आसा ॥ आस्यशब्दस्य 'पदन्०' इत्यादिनासन्नादेशः । वर्णलोपश्छान्दसः ॥ आस्येन वह्निं[1] हविषां वोढारम् । यद्वा । आसा । अन्तिकनामैतत् । देवानां समीपे हविषां प्रापकम् । वहने दृष्टान्तः । वह्निं न । 'वह्निर्वा अनड्वान्' (तै. ब्रा. १. ८. २. ५) इति श्रवणादनड्वाहमिव वहने समर्थं शोचिषा स्वदीप्त्या विरप्शिनम् । महन्नामैतत् । महान्तं महिव्रतं न महाकर्माणमादित्यमिव अध्वनः सरजन्तम् । मार्गान् सह युगपदेव रञ्जयन्तम् । एवंगुणमग्निमभिष्टुत ॥ सरजन्तम् । 'रञ्ज रागे' । रञ्जेः शतरि 'रञ्जेश्च' (पा. सू. ६. ४. २६) इति नलोपे सहस्य सभावे च कृते रूपम् । यद्वा । सरतीति सरः । सरस्योदकस्य जनयितारम् । जनेः तप्रत्यये[2] कृते रूपमिति वा । व्युत्पत्त्यनवधारणादनवग्रहः ॥

वि यस्य ते ज्रयसानस्याजर धक्षोर्न वाताः परि सन्त्यच्युताः ।
आ रण्वासो युयुधयो न सत्वनं त्रितं नशन्त प्र शिषन्त इष्टये ॥ ४ ॥

वि । यस्य । ते । ज्रयसानस्य । अजर । धक्षोः । न । वाताः । परि । सन्ति । अच्युताः ।
आ । रण्वासः । युयुधयः । न । सत्वनम् । त्रितम् । नशन्त । प्र । शिषन्तः । इष्टये ॥ ४ ॥

हे अजर जरारहित अग्ने ज्रयसानस्य ॥ ज्रयतिर्गत्यर्थः ॥ बाहुलकादस्मादप्यसानच्प्रत्ययः ॥ गमनशीलस्य धक्षोः ॥ दहेः सन् । 'द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्' (का. ६.१.८.१) इति द्विर्वचनाभावः । तदन्तादुप्रत्ययः । अरण्यदहनेच्छोः यस्य ते तव स्वभूताः अच्युताः शत्रुभिः अच्यवनीयाः प्रभावाः वाता न वायव इव वि परि सन्ति सर्वतो विशेषेण वर्तन्ते ॥ सन्ति । अस्तेर्लट् । थथोगादनिघातः ॥ युयुधयो न ॥ युधेः किन्प्रत्ययः ॥ योद्धार इव रण्वासः शीघ्रं गन्तारः शब्दायमाना वा ऋत्विजः इष्टये यागाय प्र शिषन्तः प्रकर्षेण सिषन्तः सिषासन्तः संभक्तुमिच्छन्तः सत्वनं बलवन्तं त्रितं[3] त्रिष्वाहवनीयादिषु स्थानेषु ततं विस्तृतं त्वाम् आ नशन्त । स्तुतिभिर्हविर्भिश्च व्याप्नुवन्ति । आङ्पूर्वो नशिर्व्याप्तिकर्मा । 'आक्षाण आनट्' इति व्याप्तिकर्मसु पाठात् ॥

स इद्अग्निः कण्वतमः कण्वसख्यः परस्यान्तरस्य तरुषः ।
अग्निः पातु गृणतो अग्निः सूरीनग्निर्ददातु तेषामवो नः ॥ ५ ॥

सः । इत् । अग्निः । कण्वऽतमः । कण्वऽसखा । अर्यः । परस्य । अन्तरस्य । तरुषः ।
अग्निः । पातु । गृणतः । अग्निः । सूरीन् । अग्निः । ददातु । तेषाम् । अवः । नः ॥ ५ ॥

---

१. ग-त-भ-'वह्निं' नास्ति । २. त-भ-प्रत्यये । ३. त-भ-'त्रितं' नास्ति ।

vकण्वतमः ॥ कणतेः शब्दार्थात् 'अशिप्रुषि०' इत्यादिना कन्प्रत्ययः ॥ अतिशयेन स्तोता अत एव vकण्वसखा ॥ बहुव्रीहित्वात् समासान्तोदात्ताभावः[1] ॥ कण्वाः स्तोतारः सखायो यस्य स तादृशः vअर्यः ॥ 'स्वामिन्यन्तोदात्तत्वं वक्तव्यम्' (पा. सू. ३.१.१०३. १) इत्यन्तोदात्तत्वम् ॥ स्वामी सर्वस्येश्वरः vस vइत् स एव vअग्निः vपरस्य विप्रकृष्टस्य बाह्यस्य vअन्तरस्य अव्यवहितस्य समीपे वर्तमानस्य च शत्रोः vतरुषः तारयिता विनाशयिता भवति। सः vअग्निः vगृणतः स्तोतॄन् अस्मान् vपातु रक्षतु ॥ 'गृ शब्दे'। क्र्यादिकः। 'शतुरनुमो नद्यजादी' इति विभक्तेरुदात्तत्वम् ॥ तथा vसूरीन्। 'षू प्रेरणे'। हविषां प्रेरयितॄनस्मान् रक्षतु। किंच vतेषाम् एषां vनः अस्माकम् vअवः रक्षणमन्नं वा vअग्निर्ददातु प्रयच्छतु[2] ॥ ॥ १८ ॥

वाजिन्तमाय सह्यसे सुपित्र्य तृषु च्यवानो अनु जातवेदसे ।
अनुद्रे चिद्यो धृषता वरं सते महिन्तमाय धन्वनेदविष्यते ॥ ६ ॥

वाजिन्ऽतमाय । सह्यसे । सुऽपित्र्य । तृषु । च्यवानः । अनु । जातऽवेदसे ।
अनुद्रे । चित् । यः । धृषता । वरम् । सते । महिन्ऽतमाय । धन्वना । इत् । अविष्यते॥६॥

हे vसुपित्र्य । पितुरागतः पित्र्यः ॥ 'पितुर्यच्च' (पा. सू. ४. ३. ७९) इति यत्प्रत्ययः ॥ शोभनपित्र्य हे अग्ने vवाजिन्तमाय अतिशयेनान्नवते अत्यन्तं[3] बलवते वा ॥ 'नाद्यस्य' इति नुडागमः ॥ vसह्यसे सहीयसे शत्रूणामतिशयेनाभिभवित्रे vजातवेदसे जातप्रज्ञाय तुभ्यं[4] त्वां[4] स्तोतुं vतृषु क्षिप्रम् vअनु vच्यवानः स्तुतिभिरनुगत उद्युक्तोऽस्मि ॥ 'क्रियार्थोपपदस्य च कर्मणि' इति जातवेदःशब्दस्य चतुर्थी। सह्यसे। सहस्विन्शब्दादीयसुनि 'विन्मतोर्लुक्' इतीयसुन ईकारलोपः छान्दसः[5] ॥ vअनुद्रे vचित् उदकवर्जिते स्थले। आपदीत्यर्थः। शत्रुभिः संजातायामापदि vधृषता शत्रुधर्षणसमर्थेन vधन्वनेत् आत्मीयेन धनुषैव vअविष्यते पालकाय vसते भूम्ने ॥ 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् ॥ vमहिन्तमाय पूज्यतमाय दातृतमाय वा ईदृशायाग्नये vयः अहं vवरं वरणीयं हविः प्रयच्छामि सोऽहं स्तुतिमपि तस्मै करोमीत्यर्थः ॥

एवाग्निर्मर्तैः सह सूरिभिर्वसुः ष्टवे सहसः सूनरो नृभिः ।
मित्रासो न ये सुधिता ऋतायवो द्यावो न द्युम्नैरभि सन्ति मानुषान् ॥७॥

एव । अग्निः । मर्तैः । सह । सूरिऽभिः । वसुः । स्तवे । सहसः । सूनरः । नृऽभिः ।
मित्रासः । न । ये । सुऽधिताः । ऋतऽयवः । द्यावः । न । द्युम्नैः । अभि । सन्ति । मानुषान् ॥७॥

vसहसः बलस्य vसूनरः सुष्ठु प्रेरकः। यद्वा। सूनुरित्यस्य वर्णव्यत्ययः। सूनरः सूनुः। बलेन मथ्यमानत्वात्तस्य पुत्रः। vअग्निः vनृभिः कर्मनेतृभिः vमर्तैः मनुष्यैः vसह vसूरिभिः विद्वद्भिः[6] अस्माभिः vवसु धनमभिलक्ष्य vएव एवं vस्तवे स्तूयते। वसु ष्टवे इत्यत्र संहितायां 'पूर्वपदात्०' इति षत्वम् ॥ vमित्रासो vन सुहृद इव vसुधिताः सुहितास्तृप्ताः ॥ दधातेर्निष्ठायां 'सुधित-

---

१. त१.२.६.७—समासांतस्य टचो चोपसंभवं; त३.८-म२.५.८—समासांतस्य टचो संभवं; ग—समासांतस्य चो संभवः; म१.४—समासांतस्य चो संभवं; म७—समासांतस्य। २. त१.१.३.६.७.८-म—रक्षतु। ३. ग-त-म—अत्यर्थं। ४. त-म—त्वां तुभ्यं। ५. ग-त४.५—छांदसः। अनुद्रे चिदनुदकस्थलेपि धृषता धृष्णेन धन्वनेत्। धन्व इत्युदकनाम। उदकेनैव अविष्यते स्तोतॄणां रक्षकाय। यद्वा। ६. त-म२. ८—'विद्वद्भिः' नास्ति।

वसुधित° ' (पा. सू. ७. ४. ४५) इति निपातितः। ' सुधितार्थास्तृप्तयर्थाः ' इति काशिकाया-मुक्तम् ॥ vऋतायवः यज्ञं कामयमानाः ॥ ' न छन्दस्यपुत्रस्य ' इति दीर्घत्वयोः प्रतिषेधः ॥ ईदृशाः vये सूरयः vद्यावो vन द्योतमानाः[1] इव[2] vद्युभिः। ' द्युभं द्योततेर्यशो वाजं वा ' (निरु. ५. ५) इति यास्कः। अग्निप्रदत्तैर्बलैरात्मीयैर्यशोभिर्वा vमानुषान् शत्रवान् जनान्[2] vअभि vसन्ति अभिभवन्ति ॥ यदृक्तयोगादनिघातः ॥

ऊर्जो नपात्सहसावन्निति त्वोपस्तुतस्य वन्दते वृषा वाक्।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥ ८ ॥

ऊर्जः। नपात्। सहसाऽवन्। इति। त्वा। उपऽस्तुतस्य। वन्दते। वृषा। वाक्। त्वाम्। स्तोषाम। त्वया। सुऽवीराः। द्राघीयः। आयुः। प्रऽतरम्। दधानाः ॥ ८ ॥

vऊर्जो vनपात्। नपादित्यपत्यनाम। अन्नस्य पुत्र। ' अन्नं वा आज्यम् ' इति श्रवणात्तेन प्रवृध्यमानत्वात्। बलस्य वा पुत्र ॥ ' सुबामन्त्रिते पराङ्गवत्स्वरे ' इत्यूर्ज इत्यस्य पराङ्गवद्भावेन आमन्त्रितत्वे ' आमन्त्रितस्य च ' इति षाष्टिकमाद्युदात्तत्वम् ॥ हे vसहसावन् सहस्विन्नग्ने vत्वा त्वाम् vइति एवम् vउपस्तुतस्य एतन्नामकस्यर्षेर्मम vवृषा हविषां वर्षयित्री तैः सहिता vवाक् स्तुतिः vवन्दते स्तौति ॥ वृषा। ' इगुपधज्ञा° ' इति कः। अजाद्यतष्टाप् ॥ किंच वयं vत्वां vस्तोषाम स्तवाम। स्तौतेर्लेट्याडागमः। ततः vत्वया vसुवीराः शोभनपुत्राः स्याम। vद्राघीयः दीर्घतमम् vआयुः जीवनं vप्रतरम् अत्यर्थं vदधानाः धारयन्तो भवेम ॥

इति त्वाग्ने वृष्टिहव्यस्य पुत्रा उपस्तुतास ऋषयोऽवोचन्।
ताँश्च पाहि गृणतश्च सूरीन् वषट्वषळित्यूर्ध्वासो
अनक्षन्नमो नम इत्यूर्ध्वासो अनक्षन् ॥ ९ ॥

इति। त्वा। अग्ने। वृष्टिऽहव्यस्य। पुत्राः। उपऽस्तुतासः। ऋषयः। अवोचन्। तान्। च। पाहि। गृणतः। च। सूरीन्। वषट्। वषट्। इति। ऊर्ध्वासः। अनक्षन्। नमः। नमः। इति। ऊर्ध्वासः। अनक्षन् ॥ ९ ॥

हे vअग्ने vत्वा त्वाम् vइति एवमुक्तप्रकारेण vवृष्टिहव्यस्य एतन्नामकस्यर्षेः vपुत्राः vउपस्तुतासः उपस्तुता एतदभिधानाः vऋषयः सूक्तद्रष्टारः vअवोचन् अभ्यष्टुवन्। vतान् ऋषीन् vच त्वं vपाहि रक्ष ॥ ' चवायोगे प्रथमा ' इति न निघातः ॥ तथा vगृणतः स्तोतॄन् vसूरीन् विदुषः vच पाहि। vवषट् vवषडिति मन्त्रेण vऊर्ध्वासः हविष्प्रदानार्थमूर्ध्वमुखहस्ताः सन्तः vअनक्षन् व्याप्नुवन्[3]। नक्षतिर्व्याप्तिकर्मा। vनमो vनम vइति एवम् vऊर्ध्वासः स्तोतुमुद्युक्ताः vअनक्षन्। य उक्तगुणाः तानुभयविधान् यष्टॄन् स्तोतॄन् पालय ॥ ॥ १९ ॥

' पिब ' इति नवर्चं चतुर्थं सूक्तं त्रैष्टुभमैन्द्रम्। स्थूरनाम्नः पुत्रोऽग्नियुताख्य ऋषिरग्नियूपाख्यो वा। तथा चानुक्रम्यते—' पिब स्थौरोऽग्नियुतोऽग्नियूपो वा ' इति। गतो विनियोगः ॥

---

१. ग–द्योतमाना देवाः; त१.२.३.६.७.८-भ–' द्योतमानाः ' नास्ति; त४.५–द्योतमाना वा। २. त१.२.३.६.७.८-भ–' इव...जनान् ' नास्ति। ३. ग-भ–त्वां व्याप्नुवन्।

पिबा सोमं महत इन्द्रियाय पिबा वृत्राय हन्तवे शविष्ठ ।
पिब राये शवसे हूयमानः पिब मध्वस्तृपदिन्द्रा वृषस्व ॥ १ ॥

पिब । सोमम् । महते । इन्द्रियाय । पिब । वृत्राय । हन्तवे । शविष्ठ ।
पिब । राये । शवसे । हूयमानः । पिब । मध्वः । तृपत् । इन्द्र । आ । वृषस्व ॥ १ ॥

हे इन्द्र त्वं ᵛमहते प्रभूताय ᵛइन्द्रियाय इन्द्रस्यात्मनो जुष्टाय वीर्याय ᵛसोमम् अस्माभिर्दीयमानं[1] ᵛपिब ॥ 'इन्द्रियमिन्द्रलिङ्ग°' (पा. सू. ५. २. ९३) इत्यादिनेन्द्रियशब्दो यजन्तत्वेन निपातितः ॥ हे ᵛशविष्ठ अतिशयेन प्रवृद्ध ᵛवृत्राय ᵛहन्तवे वृत्रं हन्तुं सोमं ᵛपिब ॥ 'क्रियाग्रहणं कर्तव्यम्' इति वृत्रस्य संप्रदानत्वम् ॥ तथा ᵛहूयमानः अस्माभिराहूयमानस्त्वं ᵛराये धनाय ॥ 'ऊडिदम्°' इत्यादिना विभक्तेरुदात्तत्वम् ॥ ᵛशवसे अन्नाय[2] । धनान्नयोः प्रदानाय सोमं ᵛपिब । ᵛमध्वः मदकरान् सर्वान् सोमान् ᵛपिब ॥ 'वा छन्दसि' इति पूर्वसवर्णदीर्घाभावः । अनन्तरं हे ᵛइन्द्र ᵛतृपत् तृप्तो भवन् ᵛआ ᵛवृषस्व । अस्मदभिलषितान्यासिञ्च[3] । ददस्व ॥ तृपत् । 'तृन्प तृप्तौ' । तौदादिकः । 'अनित्यमागमशासनम्' इति नुमभावः ॥

अस्य पिब क्षुमतः प्रस्थितस्येन्द्र सोमस्य वरमा सुतस्य ।
स्वस्तिदा मनसा मादयस्वार्वाचीनो रेवते सौभगाय ॥ २ ॥

अस्य । पिब । क्षुऽमतः । प्रऽस्थितस्य । इन्द्र । सोमस्य । वरम् । आ । सुतस्य ।
स्वस्तिऽदाः । मनसा । मादयस्व । अर्वाचीनः । रेवते । सौभगाय ॥ २ ॥

हे ᵛइन्द्र ᵛक्षुमतः स्तुतियुक्तस्य यद्वा हवीरूपान्नवतः ᵛप्रस्थितस्य हविर्धानादुत्तरवेदिं प्रति प्रस्थापितस्य ᵛसुतस्य अभिषुतस्य ᵛअस्य ᵛसोमस्य ᵛवरं वरणीयं त्वदीयं भागम् ᵛआ आभिमुख्येन ᵛपिब ॥ प्रस्थितस्य । तिष्ठतेः कर्मणि निष्ठा । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् ॥ ततः ᵛस्वस्तिदाः कल्याणस्य दाता त्वं ᵛमनसा अन्तःकरणेन ᵛमादयस्व हृष्टो भव । यद्वा । अस्मानपि हृष्टान् कुरु । तदेवोच्यते । ᵛरेवते धनवते ᵛसौभगाय[4] सौभाग्याय तदस्मभ्यं दातुम् ᵛअर्वाचीनः अभिमुखाञ्चनो भव ॥ 'विभाषाञ्चेरदिक्स्त्रियाम्' इति खः । रयिशब्दात् मतुपः 'छन्दसीरः' इति वत्वम् । 'रयेर्मतौ बहुलम्' इति संप्रसारणम् । पूर्वरूपत्वे गुणः । सौभगाय । उद्गात्रादिषु सुभगमन्त्र इति पठ्यते । तस्योत्तरपदस्य 'हृद्भग°' इति वृद्धिर्नेष्यते सर्वविधीनां छन्दसि विकल्पितत्वात् । भित्स्वरेणाद्युदात्तत्वम् ॥

ममत्तु त्वा दिव्यः सोम इन्द्र ममत्तु यः सुयते पार्थिवेषु ।
ममत्तु येन वरिवश्चकर्थ ममत्तु येन निरिणासि शत्रून् ॥ ३ ॥

ममत्तु । त्वा । दिव्यः । सोमः । इन्द्र । ममत्तु । यः । सुयते । पार्थिवेषु ।
ममत्तु । येन । वरिवः । चकर्थ । ममत्तु । येन । निऽरिणासि । शत्रून् ॥ ३ ॥

१. त-भ-अस्माभिर्दीप्यमानं । २. ग-अन्नायास्मभ्यं । ३. त१.२.३.६.७.८-म२.८-अस्मदभिलषितानासिंच; त४.५-अस्मदभिमतानासिंच, भ१.४.७-अस्मदभिलक्षितानासिंच । ४. त-भ-'सौभगाय' नास्ति ।

हे [v]इन्द्र [v]त्वा त्वां [v]दिव्यः दिवि भवः [v]सोमः [v]ममत्तु । आत्मीयकलाप्रदानेन मादयतु । देवा ह्यपरपक्षे सोमस्य कलां पिबन्ति ॥ मदेर्लोटि व्यत्ययेन श्लुः । 'भीहीं०' (पा. सू. ६. १. १९२) इत्यादिना पितः पूर्वस्योदात्तत्वम् ॥ तथा [v]पार्थिवेषु पृथिव्यां भवेषु देवयजनेषु [v]यः सोमोऽस्माभिः [v]सूयते अभिषूयते सोऽप्यस्माभिर्दत्तः [v]ममत्तु त्वां हर्षयतु । [v]येन सोमेन [v]वरिवः वरणीयं धनं [v]चकर्थ कृतवानसि स च [v]ममत्तु ॥ करोतेर्लिट् । यद्योगादनिघाते लित्स्वरः ॥ किंच [v]येन [v]शत्रून् [v]निरिणासि निर्गमयसि[1] सोऽपि [v]ममत्तु त्वां मादयतु ॥ रिणासि । 'री गति-रेषणयोः' । क्र्यादिः । प्वादीनां ह्रस्वत्वम् ॥

आ द्विबर्हा अमिनो यात्विन्द्रो वृषा हरिभ्यां परिषिक्तमन्धः ।
गव्या सुतस्य प्रभृतस्य मध्वः सत्रा खेदामरुशहा वृषस्व ॥ ४ ॥

आ । द्विऽबर्हाः । अमिनः । यातु । इन्द्रः । वृषा । हरिऽभ्याम् । परिऽसिक्तम् । अन्धः । गवि । आ । सुतस्य । प्रऽभृतस्य । मध्वः । सत्रा । खेदाम् । अरुशऽहा । आ । वृषस्व ॥४॥

[v]द्विबर्हाः द्वयोर्लोकयोः परिवृढः । यद्वा । द्वाभ्यां स्तुतशस्त्राभ्यां वर्धनीयः ॥ बृहेर्वर्धनार्थस्य कर्तरि कर्मणि वा असुन् ॥ [v]अमिनः । अमतेर्गत्यर्थादौणादिक इनच् । सर्वत्र गन्ता । यद्वा । कान्त्यर्थात् । सर्वैः काम्यमानः । अत एव [v]वृषा अभिलषितानां वर्षकः [v]इन्द्रः [v]परिषिक्तं वसतीवरीभिः परितः सिक्तम् [v]अन्धः अस्मदीयं सोमलक्षणमन्नं प्रति [v]हरिभ्याम् एतन्नामकाभ्यामश्वाभ्यां सह [v]आ [v]यातु आगच्छतु । अथ प्रत्यक्षः । हे इन्द्र [v]अरुशहा । अरुशाः शत्रवः । तेषां हन्ता ॥ अर्तेरौणादिक उशन् । 'बहुलं छन्दसि' इति हन्तेः क्विप् ॥ [v]सत्रा । सप्तम्या डादेशः । अस्मदीये सत्रे यज्ञे [v]गवि आनडुहे चर्मणि [v]सुतस्य अभिषुतस्य [v]प्रभृतस्य पात्रेषु प्रहृतस्य । हृग्रहोर्भः । ईदृशस्य [v]मध्वः मदकरस्य सोमस्य पानेन हृष्टः सन् [v]खेदां खिद्यमानानां शत्रूणामुत्खित्तये आभिमुख्येन [v]वृषस्व वृष इवाचर ॥ वृषशब्दादाचारार्थे क्विप् । व्यत्ययेनात्मनेपदम् । खेदाम् । 'खिद दैन्ये' । कर्मणि घञन्तस्यामि नुडभावश्छान्दसः ॥

नि तिग्मानि भ्राशयन् भ्राश्यान्यव स्थिरा तनुहि यातुजूनाम् ।
उग्राय ते सहो बलं ददामि प्रतीत्या शत्रून् विगदेषु वृश्च ॥ ५ ॥

नि । तिग्मानि । भ्राशयन् । भ्राश्यानि । अव । स्थिरा । तनुहि । यातुऽजूनाम् । उग्राय । ते । सहः । बलम् । ददामि । प्रतिऽइत्या । शत्रून् । विऽगदेषु । वृश्च ॥ ५ ॥

हे इन्द्र [v]भ्राश्यानि प्रकाश्यानि [v]तिग्मानि तीक्ष्णान्यायुधानि नितरां [v]भ्राशयन् प्रकाशयन् । 'भ्राश्च दीप्तौ' । स त्वं [v]यातुजूनाम् ॥ जु इति सौत्रो धातुः । 'भ्राजभास०' इत्यत्र जवतेर्दीर्घः (का. ३. २. १७७. १) । 'क्विच्च' इति क्विप् । दीर्घस्यामि नुडागमश्छान्दसः ॥ यातुधानानां [v]स्थिरा[2] स्थिराणि दृढान्यपि शरीराणि [v]अव [v]तनुहि । अवस्तात्तनुभूतान् पातय । [v]उग्राय उद्गूर्णबलाय [v]ते तुभ्यं [v]सहः शत्रुसहनसमर्थं [v]बलं बलहेतुकं हविः [v]ददामि अहं प्रयच्छामि । ततः [v]विगदेषु[3] । विविधं गदन्ति शब्दायन्ते[4] ॥ गदेः 'घञर्थे कविधानम्' इत्यधिकरणे कः ॥ [v]शत्रून् [v]प्रतीत्य प्रतिगम्य प्रतिकूलं गत्वा [v]वृश्च तांश्छिन्धि ॥ 'ओव्रश्चू छेदने' । तौदादिकस्य लोट ॥ ॥२०॥

---

१. ग–स्वस्थानात्रिर्गमयसि । २. त-भ–'स्थिरा' नास्ति । ३. ग–विगदेषु संग्रामेषु । ४. ग–शब्दायंतेत्रेति ।

व्य१र्य इन्द्र तनुहि श्रवांस्योजः स्थिरेव धन्वनोऽभिमातीः ।
अस्मद्र्यग्वावृधानः सहोभिरनिभृष्टस्तन्वं वावृधस्व ॥ ६ ॥

वि । अर्यः । इन्द्र । तनुहि । श्रवांसि । ओजः । स्थिराऽइव । धन्वनः । अभिऽमातीः । अस्मद्र्यक् । वावृधानः । सहःऽभिः । अनिऽभृष्टः । तन्वम् । वावृधस्व ॥ ६ ॥

हे [v]इन्द्र [v]अर्यः स्वामी त्वं [v]श्रवांसि अन्नानि । अव इत्यन्ननाम । अस्मभ्यं [v]वि [v]तनुहि विस्तारय । प्रयच्छ ॥ तनोतेर्लोटि 'उतश्च प्रत्ययाच्छन्दसि वावचनम्' (पा. सू.-६. ४.१०६. १) इति हेर्लुगभावः ॥ तथा [v]अभिमातीः । अभितो मातिर्मानं येषां तेऽभिमातयः शत्रवः । तान् प्रति [v]ओजः आत्मीयं वीर्यं [v]स्थिरेव स्थिराण्येव [v]धन्वनः धनूंषि च विस्तारय । तैः शत्रूनहीत्यर्थः । अपि च [v]अस्मद्र्यक् अस्मदभिमुखाञ्चनः ॥ 'विष्वग्देवयोश्च टेरद्र्यञ्चतौ०' (पा. सू. ६. ३. ९२) इत्यद्र्यादेशः अद्रिसधोरन्तोदात्तत्वेन निपातनात् (पा. सू. ६. ३. ९५. १) 'उदात्तस्वरितयोर्यणः०' इति धातोरकारस्यानुदात्तस्य स्वरितत्वम् ॥ [v]सहोभिः आत्मीयैर्बलैः [v]वावृधानः प्रवृद्धः अत एव [v]अनिभृष्टः शत्रुभिरपरिभवनीयस्त्वं [v]तन्वम् आत्मीयं शरीरं [v]वावृधस्व वर्धय[1] । यद्वा । तन्वम् । तन्यत[2] इति तनूर्यज्ञः । तं वर्धय । त्वदागमनेन हि यज्ञो वर्धते ॥

इदं हविर्मघवन् तुभ्यं रातं प्रति सम्राळहृणानो गृभाय ।
तुभ्यं सुतो मघवन् तुभ्यं पक्वोऽद्धीन्द्र पिब च प्रस्थितस्य ॥ ७ ॥

इदम् । हविः । मघऽवन् । तुभ्यम् । रातम् । प्रति । सम्ऽराट् । अहृणानः । गृभाय । तुभ्यम् । सुतः । मघऽवन् । तुभ्यम् । पक्वः । अद्धि । इन्द्र । पिब । च । प्रऽस्थितस्य ॥ ७ ॥

हे [v]मघवन् धनवन् [v]सम्राट् सम्यग्राजमान सर्वेषामीश्वरेति वा [v]इदं सोमादिलक्षणं [v]रातम् अस्माभिर्दत्तं [v]हविः हे इन्द्र [v]तुभ्यम् [v]अहृणानः अक्रुध्यन् [v]प्रति [v]गृभाय प्रतिगृहाण ॥ ग्रहेर्लोटि आमत्ययस्य 'छन्दसि शायजपि' इति शायजादेशः । ह्रग्रहोर्भः । संनिपातपरिभाषाया अनित्यत्वाद्धेर्लुक् ॥ हे [v]मघवन् [v]तुभ्यम् एव अयं सोमः [v]सुतः ॥ 'क्रयि च' (पा. सू. ६. १. २१२) इत्याद्युदात्तत्वम् ॥ [v]तुभ्यम् एवायं पुरोडाशादिः [v]पक्वः । हे [v]इन्द्र तं पुरोडाशम् [v]अद्धि भक्षय । किंच [v]प्रस्थितस्य हविर्धानादुत्तरवेदिं प्रति प्रस्थापितं सोमं [v]पिब ॥ वाक्यभेदादनिघातः । यद्वा । आमन्त्रितस्याविद्यमानत्वेन तिङ उत्तरत्वादनिघातः ॥

अद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम् ।
पर्यस्वन्तः प्रति हर्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः ॥ ८ ॥

अद्धि । इत् । इन्द्र । प्रऽस्थिता । इमा । हवींषि । चनः । दधिष्व । पचता । उत । सोमम् । पर्यस्वन्तः । प्रति । हर्यामसि । त्वा । सत्याः । सन्तु । यजमानस्य । कामाः ॥ ८ ॥

हे [v]इन्द्र [v]प्रस्थिता प्रस्थितान्युत्तरवेदिं प्रति [v]इमा इमानि । उभयत्र डादेशः । हवींषि [v]अद्धीत् । इदवधारणे । भक्षयैव । [v]चनः । चन इत्यन्ननाम । तत्[3] [v]दधिष्व[4] धारय । उदरे प्रक्षिप ॥

१. ग-त-म-प्रवर्धय । २. ग-त४.५-तायते । ३. त१.२.३.७.-म-तस्यत । ४. त१.२.३.६.७.८-तव दधिष्व; म१-नधा दधिष्व; म२-तधा दधिष्व; म४-तत्रा दधिष्व; म७-तधा दधिष्व; म८-तवा दधिष्व ।

समौ चिद्धस्तौ न समं विविष्टः संमातरा चिन्न समं दुहाते ।
यमयोश्चिन्न समा वीर्याणि ज्ञाती चित्सन्तौ न समं पृणीतः ॥ ९ ॥

समौ । चित् । हस्तौ । न । समम् । विविष्टः । सम्ऽमातरा । चित् । न । समम् । दुहाते इति । यमयोः । चित् । न । समा । वीर्याणि । ज्ञाती इति । चित् । सन्तौ । न । समम् । पृणीतः ॥९॥

अतिथिभ्यो धनमप्रयच्छन्नपि मम भ्राता दास्यतीति चेत् तत्र हेतुमाह । [v]समौ [v]चिद्धस्तौ समावपि [v]समं समानं [v]न [v]विविष्टः कार्यं न व्याप्नुतः ॥ ' विष्लृ व्याप्तौ ' । जौहोत्यादिकः । संज्ञापूर्वकस्य विधेरनित्यत्वाद्भ्यासस्य गुणाभावः ॥ तथा [v]संमातरा[1] वत्सस्य मातरौ धेनू समे अपि [v]समं समानं पयः [v]न [v]दुहाते । [v]यमयोश्चित् सहजातयोः पुत्रयोरपि [v]समा समानि [v]वीर्याणि [v]न सन्ति । तस्मात् [v]ज्ञाती [v]चित् एकस्मिन् कुले [v]सन्तौ जातावपि [v]समं [v]न [v]पृणीतः न प्रयच्छतः॥ तस्माद्यस्य धनमस्ति स एव दद्यादित्यर्थः ॥ ॥ २३ ॥

' अग्ने हंसि ' इति नवर्चं षष्ठं सूक्तममहीयुगौत्रस्यौरुक्षयस्यार्षं गायत्रम् । रक्षोहाग्निर्देवता । तथा चानुक्रम्यते—' अग्ने हंस्युरुक्षय आमहीयव आग्नेयं राक्षोघ्नं गायत्रं तु ' इति । मध्यमानेऽग्नावजायमान इदमनुवक्तव्यम् । सूत्रितं च—' अजायमाने त्वेतस्मिन्नेवावसानेऽग्ने हंसि न्यत्रिणमिति सूक्तमावपेत ' (आश्व. श्रौ. २. १६) इति । प्रातरनुवाकाश्विनशस्त्रयोरपि गायत्रे छन्दसीदं सूक्तम् । सूत्रितं च—' अग्ने हंस्यग्निं हिन्वन्तु नः ' (आश्व. श्रौ. ४. १३) इति । दशमेऽहनि धिष्ण्याग्नाराभिविहरण आद्या जप्या । सूत्रितं च—' परि त्वाग्ने पुरं वयमित्येतस्याः स्थानेऽग्ने हंसि न्यत्रिणम् ' (आश्व. श्रौ. ८. १२) इति ॥

अग्ने हंसि न्यत्रिणं दीद्यन् मर्त्येष्वा । स्वे क्षये शुचिव्रत ॥ १ ॥

अग्ने । हंसि । नि । अत्रिणम् । दीद्यत् । मर्त्येषु । आ । स्वे । क्षये । शुचिऽव्रत ॥ १ ॥

हे [v]शुचिव्रत पूतकर्मन्[2] दीप्यमानतेजस्क वा हे [v]अग्ने [v]अत्रिणम् अत्तारं शत्रुं तमोरूपं नितरां [v]हंसि विनाशय ॥ आमन्त्रितस्यादिद्यमानत्वेन पादादित्वादनिघातः ॥ किं कुर्वन् । [v]मर्त्येषु मनुष्येषु यजमानेष्वाभिमुख्येन [v]दीद्यत् कर्मसिद्ध्यर्थं प्रकाशमानः । दीदेतिर्दीप्तिकर्मा । तथा [v]स्वे आत्मीये [v]क्षये[3] निवासभूते आहवनीयादिस्थाने दीप्यमानः ॥ ' क्षयो निवासे ' (पा. सू. ६. १. २०१) इत्याद्युदात्तत्वम् ॥

उत्तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे । यत्त्वा स्रुचः समस्थिरन् ॥ २ ॥

उत् । तिष्ठसि । सुऽआहुतः । घृतानि । प्रति । मोदसे । यत् । त्वा । स्रुचः । सम्ऽअस्थिरन् ॥२॥

हे अग्ने [v]स्वाहुतः अस्माभिः सुष्ठु आहूयमानः सन् [v]उत्तिष्ठसि । अरणीभ्यामुद्गतो भव ॥ ऊर्ध्वकर्मत्वादात्मनेपदाभावः (पा. सू. १. ३. २४) ॥ उद्गत्य च [v]घृतानि घृतसहितान्यस्माभिर्दीयमानानि हवींषि [v]प्रति [v]मोदसे हृष्टो भव ॥ ' मुद हर्षे ' । भौवादिकः । अनुदात्तेत् ॥ [v]यत् यदा [v]त्वा त्वां [v]स्रुचः जुह्वादीनि पात्राणि [v]समस्थिरन् संगतान्यभवन् ॥ ' समवप्रविभ्यः स्थः ' (पा. सू. १. ३. २२) इति लुक्यात्मनेपदम् । ' स्थाध्वोरिच्च ' (पा. सू. १. २. २७) इति सिचः किरवमिकारश्चान्तादेशः । ' हस्वादङ्गात् ' इति सिचो लोपः । व्यत्ययेन झस्य रन् । ' तिङि चोदात्तवति ' इति गतेर्निघातः ॥

---

१. त-भ-मातरा । २. त४.५-सुकर्मन् । ३. त-भ-मु-' क्षये ' नास्ति ।

स आहुतो वि रोचतेऽग्निरीळेन्यो गिरा । स्रुचा प्रतीकमज्यते ॥ ३ ॥

सः । आऽहुतः । वि । रोचते । अग्निः । ईळेन्यः । गिरा । स्रुचा । प्रतीकम् । अज्यते ॥३॥

vआहुतः आभिमुख्येन हुतः ॥ ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरः ॥ vगिरा स्तुतिलक्षणया वाचा vईळेन्यः स्तोतव्यः vसः vअग्निः vवि vरोचते अत्यर्थं दीप्यते । तथा vप्रतीकं सर्वेषां देवानां पूर्वमेव vस्रुचा घृतसहितया vअज्यते सिच्यते ॥

घृतेनाग्निः समज्यते मधुप्रतीक आहुतः । रोचमानो विभावसुः ॥ ४ ॥

घृतेन । अग्निः । सम् । अज्यते । मधुऽप्रतीकः । आऽहुतः । रोचमानः । विभाऽवसुः ॥४॥

vअग्निः vघृतेन हविषा vसमज्यते सम्यक् सिक्तो भवति । कीदृशः । vमधुप्रतीकः घृतप्रयुक्तावयवः vआहुतः स्तुतिभिर्हविर्भिर्वा vरोचमानः दीप्यमानः vविभावसुः स्वदीप्त्या सर्वमाच्छादयन् । यद्वा । दीप्तिरेव धनं यस्य सः ॥

असौर्यामे होतुरतिरिक्तोक्थ्ये ' जरमाणः समिध्यसे ' इत्यनुरूपस्तृचः । सूत्रितं च—' जराबोध तद्विविड्ढि जरमाणः समिध्यसे ' (आश्व. श्रौ. ९. ११) इति ॥

जरमाणः समिध्यसे देवेभ्यो हव्यवाहन । तं त्वा हवन्त मर्त्याः ॥ ५ ॥

जरमाणः । सम् । इध्यसे । देवेभ्यः । हव्यऽवाहन । तम् । त्वा । हवन्त । मर्त्याः ॥ ५ ॥

हे vहव्यवाहन हव्यानां प्रापयितः ॥ ' हव्येऽनन्तःपादम् ' (पा. सू. ३. २. ६६) इति क्युट् ॥ vजरमाणः स्तोतृभिः स्तूयमानः । जरतिः स्तुतिकर्मा । स त्वं vदेवेभ्यः देवार्थं vसमिध्यसे हविर्भिः सम्यग्दीप्यसे । vतं तादृशं vत्वा त्वां vमर्त्याः मनुष्येषु साधवो यजमानाः vहवन्त आह्वयन्ति ॥ ह्वयतेर्लटि ' बहुलं छन्दसि ' इति संप्रसारणम् ॥ ॥ २४ ॥

तं मर्ता अमर्त्यं घृतेनाग्निं सपर्यत । अदाभ्यं गृहपतिम् ॥ ६ ॥

तम् । मर्ताः । अमर्त्यम् । घृतेन । अग्निम् । सपर्यत । अदाभ्यम् । गृहऽपतिम् ॥ ६ ॥

हे vमर्ताः ऋत्विजः vअमर्त्यं मनुष्यधर्मरहितम् vअग्निं vघृतेन हविषा vसपर्यत परिचरत ॥ सपरशब्दः कण्ड्वादिः ॥ कीदृशम् । vअदाभ्यं कैश्चिदप्यहिंस्यम् ॥ ' दभेरिति वक्तव्यम् ' (पा. सू. ३. १. १२४. ३) इति ण्यत् ॥ vगृहपतिं गृहस्य स्वामिनं यजमानरूपम् ॥ ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरः ॥

अदाभ्येन शोचिषाग्ने रक्षस्त्वं दह । गोपा ऋतस्य दीदिहि ॥ ७ ॥

अदाभ्येन । शोचिषा । अग्ने । रक्षः । त्वम् । दह । गोपाः । ऋतस्य । दीदिहि ॥ ७ ॥

हे vअग्ने vत्वम् vअदाभ्येन अहिंस्येन vशोचिषा तेजसा vरक्षः । जातावेकवचनम् । सर्वान् राक्षसान् vदह विनाशय । किंच vऋतस्य यज्ञस्य vगोपाः[1] गोपायिता सन् vदीदिहि दीप्यस्व ॥

स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः । उरुक्षयेषु दीदयत् ॥ ८ ॥

सः । त्वम् । अग्ने । प्रतीकेन । प्रति । ओष । यातुऽधान्यः । उरुऽक्षयेषु । दीदयत् ॥ ८ ॥

---

१. त-म-' यज्ञस्य गोपाः ' नास्ति ।

हे vअग्ने vस vत्वं vप्रतीकेन त्वदवयवभूतेन तेजसा vयातुधान्यः यातुधानी राक्षसीः vप्रत्योष प्रतिकूलं दह ॥ ' उष दाहे ' । भौवादिकः । लोटि हेर्लुक् । ' जातेरस्त्रीविषयात्° ' (पा. सू. ४. १. ६३) इति यातुधानशब्दस्य ङीष्[1] । ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् ॥ किं कुर्वन् । vउरुक्षयेषु विस्तीर्णेषु निवासेष्वाहवनीयादिषु vदीद्यत् दीप्यमानः ॥

तं त्वा गीर्भिरुरुक्षया हव्यवाहं समीधिरे । यजिष्ठं मानुषे जने ॥ ९ ॥

तम् । त्वा । गीःऽभिः । उरुऽक्षयाः । हव्यऽवाहम् । सम् । ईधिरे । यजिष्ठम् । मानुषे । जने ॥९॥

हे अग्ने vउरुक्षयाः बहुनिवासा यजमानाः vहव्यवाहं हविषां वोढारं vमानुषे मनुष्यसंबन्धिनि vजने जनमध्ये vयजिष्ठं यष्टृतमं vतं vत्वा त्वां vगीर्भिः स्तुतिभिस्तत्सहितैर्हविर्भिः vसमीधिरे सम्यगदीदिपन्[2] ॥ इन्धेर्लिटि ' इन्धिभवतिभ्यां च[3] ' (पा.सू.१.२. ६) इति किरवे नलोपः॥ ॥२५॥

' इति वै ' इति त्रयोदशर्चं सप्तमं सूक्तं गायत्रम् । इन्द्रो लवरूपमास्थाय सोमपानं कुर्वन् तदानीमृषिभिः दृष्टः सन् स्वात्मानमनेन सूक्तेनास्तावीत् । अतो लवरूपापन्न इन्द्र ऋषिः । स एव देवता । तथा चानुक्रम्यते—' इति वै सप्तोनैन्द्रो लव आत्मानं तुष्टाव ' इति । गतो विनियोगः ॥

इति वा इतिं मे मनो गामश्वं सनुयामितिं । कुवित्सोमस्यापामितिं ॥ १ ॥

इतिं । वै । इतिं । मे । मनः । गाम् । अश्वम् । सनुयाम् । इतिं । कुवित् । सोमस्य । अपाम् । इतिं ॥१॥

vइति vवै इत्रि खलु vइति एवंप्रकारेण vमे मदीयं vमनः वर्तते । तं प्रकारं दर्शयति । vगामश्वं च vसनुयां स्तोतृभ्यः प्रयच्छामि vइति । ' षणु दाने ' । तानादिकः । इतिशब्दो हेतौ । यस्मात् vकुवित् बहुवारं vसोमस्य सोमम् vअपां पीतवानस्मि ॥ ' क्रियाग्रहणं कर्तव्यम् ' इति सोमस्य संप्रदानसंज्ञा । ' चतुर्थ्यर्थे बहुलम्° ' इति षष्ठी । ' पा पाने ' । लुङि ' गातिस्था° ' इति सिचो लुक् । कुवित्योगादनिघातः ॥

प्र वातांइव दोधतः उन्मा पीता अयंसत । कुवित्सोमस्यापामितिं ॥ २ ॥

प्र । वातांःऽइव । दोधतः । उत् । मा । पीताः । अयंसत । कुवित् । सोमस्य । अपाम् । इतिं ॥२॥

vदोधतः भृशं कम्पयमानाः vवाताइव वायवो यथा वृक्षादीनुद्यच्छन्ते तद्वत् vपीताः सोमाः vमा मां प्रकर्षेण vउत् vअयंसत उद्यच्छन्ते ॥ यमेर्लुङि ' समुदाङ्भ्यो यमोऽग्रन्थे ' (पा. सू. १. ३. ७५) इत्यात्मनेपदम् ॥ यस्माद्बहुवारं सोमम् vअपाम् ॥

उन्मा पीता अयंसत रथमश्वाइवाशवः । कुवित्सोमस्यापामितिं ॥ ३ ॥

उत् । मा । पीताः । अयंसत । रथम् । अश्वाःऽइव । आशवः । कुवित् । सोमस्य । अपाम् । इतिं ॥३॥

vपीताः सोमाः माम् vउत् vअयंसत उद्यच्छन्ते । तत्र दृष्टान्तः । vरथमश्वाइव यथा vआशवः क्षिप्रगामिनो गमनेन व्याप्ता वाश्वा रथमुन्नमयन्ति तद्वत् ॥

उप मा मतिरस्थित वाश्रा पुत्रमिव प्रियम् । कुवित्सोमस्यापामितिं ॥ ४ ॥

उप । मा । मतिः । अस्थित । वाश्रा । पुत्रम्ऽइव । प्रियम् । कुवित् । सोमस्य । अपाम् । इतिं ॥४॥

---

१. त-म-मु–ङीप् । २. ग–सम्यगदीपयन् । ३. ग-त-म१.२.४.८–' च ' नास्ति ।

vमतिः स्तोतृभिः क्रियमाणा स्तुतिः vमा माम् vउप vअस्थित संयोजयति ॥ 'उपादेव-पूजासंगतिकरण०' (पा. सू. १. ३. २५. १) इत्यात्मनेपदम्। कथमिव। vधाना vपुत्रमिव यथा धाना शब्दायमाना धेनुः vप्रियं पुत्रं[1] वत्सं संगच्छति तद्वत् ॥

अहं तष्टेव वन्धुरं पर्येचामि हृदा मतिम्। कुवित्सोमस्यापामिति ॥ ५ ॥

अहम्। तष्टाऽइव। वन्धुरम्। परि। अचामि। हृदा। मतिम्। कुवित्। सोमस्य। अपाम्। इति॥५

vतष्टेव तक्षा यथा vवन्धुरं सारथिनिवासस्थानम्। तद्वान् वोपलक्ष्यते। तस्थानं रथं वा साधु-करोति तद्वत् vअहं vमतिं स्तुतिं vहृदा आत्मीयेन मनसा vपर्येचामि। साधुकरणाय परिगच्छामि ॥

नहि मे अक्षिपच्चनाच्छान्त्सुः पञ्च कृष्टयः। कुवित्सोमस्यापामिति ॥ ६ ॥

नहि। मे। अक्षिऽपत्। चन। अच्छान्त्सुः। पञ्च। कृष्टयः। कुवित्। सोमस्य। अपाम्। इति॥६

vचन इति निपातसमुदायोऽप्यर्थे। vपञ्च vकृष्टयः अपि निषादपञ्चमाश्चत्वारो वर्णाः पञ्च जनाः। यद्वा। देवमनुष्यादयः। vमे मदीयम् vअक्षिपत् चक्षुःपतनं दृष्टिसंचारं vनहि vअच्छान्त्सुः न व्याप्नुवन्ति[2]। 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' (श. ब्रा. १४. ७. १. २३) इति हि श्रुतेः। 'छदि अपवारणे'। 'चुरादीनाम्' इति वा ण्यन्तत्वादत्र ण्यभावे लुकि हलन्तलक्षणा वृद्धिः (पा. सू. ७. २. ३)॥ यस्माद्बहुवारं[3] सोमम् vअपाम्॥ ॥ २६ ॥

नहि मे रोदसी उभे अन्यं पक्षं चन प्रति। कुवित्सोमस्यापामिति ॥ ७ ॥

नहि। मे। रोदसी इति। उभे इति। अन्यम्। पक्षम्। चन। प्रति। कुवित्। सोमस्य। अपाम्। इति ॥ ७ ॥

vउभे vरोदसी द्यावापृथिव्यौ vमे मदीयम् vअन्यं vपक्षं vचन पक्षमपि vप्रति समाने न भवतः॥

अभि द्यां महिना भुवमभीमां पृथिवीं महीम्। कुवित्सोमस्यापामिति ॥८॥

अभि। द्याम्। महिना। भुवम्। अभि। इमाम्। पृथिवीम्। महीम्। कुवित्। सोमस्य। अपाम्। इति ॥ ८ ॥

उक्तमर्थं प्रतिपादयति। vमहिना महिम्नात्मीयेन vद्यां द्युलोकम् vअभि vभुवम् अभिभवामि। तथा vमहीं महतीम् vइमां vपृथिवीं स्वमहिम्ना vअभि भवामि ॥ भवतेर्लटि छान्दसो विकरणस्य लुक्। 'भूसुवोस्तिङि' (पा. सू. ७. ३. ८८) इति गुणे प्रतिषिद्धे उवङादेशः ॥

हन्ताहं पृथिवीमिमां नि दधानीह वेह वा। कुवित्सोमस्यापामिति ॥ ९ ॥

हन्त। अहम्। पृथिवीम्। इमाम्। नि। दधानि। इह। वा। इह। वा। कुवित्। सोमस्य। अपाम्। इति ॥ ९ ॥

vहन्त इति संभावनायामनुज्ञायां वा। संभावयाम्येतदनुजानामि वा। किं तत्। vअहम् vइमां vपृथिवीम् vइह vवा अन्तरिक्षे vनि vदधानि। vइह vवा द्युलोके इति हस्तेन निर्दिशति ॥ दधातेर्लोटि[4] मेर्निः ॥

---

१. त४.५–पुत्रमिव। २. त१.२.३.६.७.८–म२.४.८–व्यापनुवन्ति; त४.५–व्यापिवृण्वंति। ३. ग–त१.२.३.४.५.६.८–म–यस्माद्बहु। ४. त–म–'दधातेर्लोटि' नास्ति।

ओषमित्पृथिवीमहं जङ्घनानीह वेह वा । कुवित्सोमस्यापामिति ॥ १० ॥

ओषम् । इत् । पृथिवीम् । अहम् । जङ्घनानि । इह । वा । इह । वा ।
कुवित् । सोमस्य । अपाम् । इति ॥ १० ॥

vअहं vपृथिवीम् अभिलक्ष्य vओषं स्वतेजसा तापकमादित्यम् vइह vवा अन्तरिक्षे vइह vवा द्युलोके vजङ्घनानि भृशं यापयानि[1] । vइत् इति पूरणः ॥ हन्तेर्गत्यर्थस्य यङ्लुगन्तस्य लोटि शपो लुगभावश्छान्दसः ॥

दिवि मे अन्यः पक्षो३ऽधो अन्यमचीकृषम् । कुवित्सोमस्यापामिति ॥११॥

दिवि । मे । अन्यः । पक्षः । अधः । अन्यम् । अचीकृषम् ।
कुवित् । सोमस्य । अपाम् । इति ॥ ११ ॥

vमे मदीयः vअन्यः vपक्षः vदिवि द्युलोके स्थापितः । vअधः ॥ ' पूर्वाधरावराणामसि० ' (पा. सू. ५. ३. ३९) इत्यादिनासिप्रत्ययः । प्रकृतेरधादेशश्च ॥ अधस्तात्पृथिव्याम् vअन्यं पक्षम् vअचीकृषम् अकार्क्षम् ॥ ' कृष विलेखने ' । ण्यन्तस्य लुङि चङि ' नित्यं छन्दसि ' (पा. सू. ७. ४. ८) इत्यृकारादेशः ॥ विलेखनं नामोत्पादनम् । उदपादयम् । आस्थापयमित्यर्थः ॥

अहमस्मि महामहोऽभिनभ्यमुदीषितः । कुवित्सोमस्यापामिति ॥ १२ ॥

अहम् । अस्मि । महाऽमहः । अभिऽनभ्यम् । उत्ऽईषितः ।
कुवित् । सोमस्य । अपाम् । इति ॥ १२ ॥

vअभिनभ्यं नाभौ मध्यस्थाने भवं नभ्यमन्तरिक्षम् । ' उगवादिभ्यो यत् ' (पा. सू. ५. १) इति यत्प्रत्ययः । तत्रैव पाठान्नभादेशश्च । ' लक्षणेनाभिप्रती आभिमुख्ये ' (पा. सू. ५. ४. ९०) इत्यव्ययीभावः । समासस्वरः । अन्तरिक्षमभि vउदीषितः उद्गतः सूर्यात्मा vअहं vमहाम् महतामपि महानस्मि । यद्वा । महत् प्रभूतं महस्तेजो यस्य । प्रभूततेजस्कोऽस्मि ॥ (पा. सू. ६. ३. ४६) इत्यात्वम् ॥

गृहो याम्यरंकृतो देवेभ्यो हव्यवाहनः । कुवित्सोमस्यापामिति

गृहः । यामि । अरम्ऽकृतः । देवेभ्यः । हव्यऽवाहनः । कुवित् । सोमस्य

vगृहः हविषां ग्रहीता vअरंकृतः यजमानैरलंकृतोऽहं vदेवेभ्यः इन्द्रादिभ्यः हविषां वोढा प्रापयिता अग्न्यात्मा सन् vयामि हवींषि प्रापयामि ॥ ' यमन्तःपादम् ' इति वहेर्ण्युट् । अित्त्वादाद्युदात्तः । समासे कृदुत्तरपदप्रकृतिस्वरः vकुवित् बहुवारं vसोमस्य सोमम् vअपां पीतवानस्मि । तस्मादेतत्स्तावीत् ॥ ॥ २७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्च
इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबु
विरचिते माधवीये वेदार्थप्रकाश ऋक्संहित

१. ग-त४.५–प्रापयानि । २. ग–अन्येभ्यः; त

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ सप्तमो व्याख्यायते । दशममण्डलस्य दशमेऽनुवाके सूक्तसप्तकं व्याख्यातम् । 'तदित्' इति नवर्चमष्टमं सूक्तमथर्वणः पुत्रस्य बृहद्दिवस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं—'तदिद्बाथर्वणो बृहद्दिवः' इति । चातुर्विंशिकेऽहनि निष्केवल्यस्य इदं सूक्तम् । सूत्रितं च—'तदिदासेति च पुरस्तात्सूक्तस्य शंसेत्' (आश्व. श्रौ. ७. ३) इति । व्योमविश्वदेवस्तुत्यप्रशस्तारदीयेष्वप्येकाहेष्विदमेव निष्केवल्यनिविद्धानम् । सूत्रितं च—'एतेषां त्रयाणां कया शुभा तदिदासेति मध्यंदिनः' (आश्व. श्रौ. ९. ८) इति । राशिभरायाख्ययोरेकाहयोरपीदं निष्केवल्यनिविद्धानम् । सूत्रितं च—'राशिभरायथोश्च कयाशुभीयतदिदासीये' (आश्व. श्रौ. ९. ८) इति । महाव्रते निष्केवल्येऽप्येतत्सूक्तम् । तथैव पञ्चमारण्यके शौनकेन सूत्रितं—'तदिदास भुवनेषु ज्येष्ठं तां सु ते कीर्तिं मघवन् महित्वा' (ऐ. आ. ५. १. ६) इति ॥

तदिदास॒ भुव॑नेषु ज्ये॒ष्ठं यतो॑ ज॒ज्ञ उ॒ग्रस्त्वे॒षनृ॑म्णः ।
स॒द्यो ज॑ज्ञा॒नो नि रि॑णाति॒ शत्रू॒ननु॒ यं वि॒श्वे मद॑न्त्यू॒माः ॥ १ ॥

तत् । इत् । आस । भुवनेषु । ज्येष्ठम् । यतः । जज्ञे । उग्रः । त्वेषऽनृम्णः ।
सद्यः । जज्ञानः । नि । रिणाति । शत्रून् । अनु । यम् । विश्वे । मदन्ति । ऊमाः ॥ १ ॥

[v]तत् जगत्कारणत्वेन सर्ववेदान्तप्रसिद्धम् । इच्छन्दोऽवधारणे । [v]भुवनेषु ॥ 'भू सत्तायाम्' ॥
[v]विष्यादिषु लोकेषु मध्ये जगत्कारणं ब्रह्मैव [v]ज्येष्ठं प्रशस्ततमम् [v]आस बभूव । तस्य परमार्थ-
[v]तिरिक्तानां व्यावहारिकत्वाच्च[1] । यद्वा । ज्येष्ठं वृद्धतमं जगत्कारणत्वेन सर्वेषामादिभूतं
[v]र्लिटि 'छन्दस्युभयथा' इति सार्वधातुकत्वात् 'अस्तेर्भूः' (पा. सू. २. ४. ५२)
वः । यद्वा । बृंहं तदेव ब्रह्म स्वप्रकाशतया आस दिदीपे । 'अस गतिदीप्त्यादानेषु' ।
। [v]यतः उपादानभूतात् यस्मात् ब्रह्मणः [v]उग्रः उद्गूर्णः [v]त्वेषनृम्णः प्रदीप्तबलः
। जातो बभूव । श्रूयते हि—'चक्षोः सूर्यो अजायत' (ऋ. सं. १०. ९०.
दमसौ धाता यथापूर्वमकल्पयत्' (ऋ. सं. १०. १९०. ३) इति च ॥
। सू. १. ४. ३०) इति प्रकृतेरपादानसंज्ञायां यत इति पञ्चमी । अनेर्लिटि
धालोपः । 'द्विर्वचनेऽचि' इति तस्य स्थानिवद्भावात् द्विर्वचनादि ।
तप्रतिषेधः ॥ स च [v]जज्ञानः आयमान एव [v]सद्यः शीघ्रं [v]शत्रून्
[v]नि [v]रिणाति निर्हिनस्ति । यद्वा उपासकानां पापरूपान् शत्रून्
ो ह्येष जातः पाप्मानमपाहत' (ऐ. आ. १. ३. ४) इति ॥
तत् । रिणाति । 'री गतिरेषणयोः' । क्र्यादिः । 'प्वादीनां ह्रस्वः'
अवन्ति रक्षन्तीत्यूमाः प्राणिनः । अवतेरौणादिको मन्प्रत्ययः ।
ाने उट् ॥ सर्वे प्राणिनः [v]यं सूर्यात्मकमुग्रमिन्द्रमनुलक्ष्य
[v]न्ति ॥ 'मदी हर्षे' । व्यत्ययेन शप् ॥ तथा च

---

[1] त्वात् । ३. ग-घ-व्यावहारिकसत्वाच्च; त-व्यावहारिक-
ट्टः ।

ब्राह्मणं—' भूतानि वै विश्व ऊमास्त एनमनुमदन्त्युदगादुदगादिति ' (ऐ. आ. १. ३. ४) इति। तैत्तिरीयकं च—'तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति' (तै. सं. ६. ५. ४. २) इति। यद्वा। यं स्तुत्यादिभिर्माद्यन्तमनु पश्चात् सर्वे प्राणिनोऽभीष्टप्राप्त्या हृष्यन्ति॥ ' अनुर्लक्षणे ' (पा. सू. १.४.८४) इत्यनोः कर्मप्रवचनीयत्वात् कर्मप्रवचनीययुक्त इति द्वितीया॥ स इन्द्रो जज्ञ इत्यन्वयः॥

वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति।
अव्यनच्च व्यनच्च सस्नि सं ते नवन्त प्रभृता मदेषु॥ २॥

ववृधानः। शवसा। भूरिऽओजाः। शत्रुः। दासाय। भियसम्। दधाति।
अविऽअनत्। च। विऽअनत्। च। सस्नि। सम्। ते। नवन्त। प्रऽभृता। मदेषु॥ २॥

[v]शवसा बलेन [v]ववृधानः वर्धमानः अत एव [v]भूर्योजाः बहुबलः [v]शत्रुः शातयितेन्द्रः [v]दासाय उपक्षयकारिणे शत्रवे [v]भियसं भीतिं [v]दधाति विदधाति। करोति। [v]अव्यनत्। विविधमनिति श्वसितीति [v]व्यनत्[1] प्राणवज्जङ्गमम्। तद्विलक्षणमव्यनत् स्थावरम्। तदुभयमपि [v]सस्नि संस्नातमिन्द्रेण सम्यक् शोधितं भवति॥ स्नातेः ' आदृगमहन° ' इति व्यत्ययेन कर्मणि किन्प्रत्ययः॥ यद्वा अन्तर्णीतण्यर्थात् कर्तर्येव किन्। वृष्ट्यादिना सम्यक् स्नापयिता शोधयिता भवति॥ ' न लोकाव्यय° ' इति कर्मणि षष्ठ्याः प्रतिषेधः॥ शिष्टः पादः प्रत्यक्षकृतः। हे इन्द्र [v]ते तव [v]मदेषु हर्षेषु हविषा स्तुत्या च जातेषु[2] सत्सु [v]प्रभृता प्रभृतानि प्रकर्षेण धृतानि पोषितानि वा सर्वाणि भूतजातानि [v]सं [v]नवन्त संगच्छन्ते। स्तोतुं हवींषि च दातुं समूहीभवन्तीत्यर्थः। नवतिर्गतिकर्मा॥ प्रभृता[3]। बिभर्तेः कर्मणि निष्ठा। ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः। ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम्॥

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः।
स्वादोः स्वादीयः स्वादुना सृजा समदः सु मधु मधुनाभि योधीः॥ ३॥

त्वे इति। क्रतुम्। अपि। वृञ्जन्ति। विश्वे। द्विः। यत्। एते। त्रिः। भवन्ति। ऊमाः।
स्वादोः। स्वादीयः। स्वादुना। सृज। सम्। अदः। सु। मधु। मधुना। अभि। योधीः॥ ३॥

हे इन्द्र [v]त्वे त्वयि॥ ' सुपां सुलुक्° ' इति सप्तम्येकवचनस्य शेआदेशः॥ [v]विश्वे सर्वे यजमानाः [v]क्रतुम् अनुष्ठेयं कर्म [v]वृञ्जन्ति समापयन्ति। अपिशब्दो ब्राह्मणोक्तसर्वभूतानां सर्वमनसां समुच्चयार्थः। सर्वाणि पृथिव्यादीनि भूतानि सर्वेषां प्राणिनां [illegible]सि सर्वे यज्ञक्रतवश्च व्याप्ते त्वय्येव यजमानैः परिसमाप्यन्त इत्यर्थः। तथा च ब्राह्मणं—' [illegible]मानि सर्वाणि भूतानि सर्वाणि मनांसि सर्वे क्रतवोऽपि वृञ्जन्तीत्येव तदाह ' (ऐ. आ. १. [illegible]) इति। [v]यत् यस्मात् [v]एते [v]ऊमाः तर्पकाः॥ अवतेस्तर्पणार्थादौणादिको मन्प्रत्ययः। ' ज्वरत्वर° ' इत्यादिना वकारोपधयोः ऊठ्॥ ईदृशा यजमानाः पूर्वमेकाकिनः सन्तः पश्चात् [v]द्विः द्विवारं स्त्रीरूपेण पुंरूपेण च जाताः सन्तः पुनरपत्येन सार्धं [v]त्रिः त्रिवारं जन्मभाजः [v]भवन्ति। एक एवात्मा स्त्रीपुंसरूपेण जायते। 'अर्धो वा एष आत्मनो यत्पत्नी ' (तै. ब्रा. ३. ३. ३) इति श्रुतेः। पुत्रोऽप्यात्मैव। ' आत्मा वै पुत्रनामासि ' (श. ब्रा.

१. त-भ–व्यनत्स । २. ग-त१.२.३.६.७.८-भ–जन्येषु । ३. त१.२.६.८-भ१.४–प्रसूर्वात्; त३.४.५.७-भ२–प्रपूर्वात्।

१४. ९. ४. २६) इति श्रुतेः । यत एवमेतेऽभिवृद्धा भवन्ति ततोऽवगम्यते त्वय्येवानुष्ठितं सर्वं कर्म परिसमापयन्तीति । तथा च ब्राह्मणं—' द्वौ वै सन्तौ मिथुनौ प्रजायेते प्रजात्यै ' (ऐ. आ. १. ३. ४) इति । हे इन्द्र त्वं[1] ᵛस्वादोः प्रियात् गृहधनादेरपि ᵛस्वादीयः स्वादुतरं प्रियतरमपत्यं ᵛस्वादुना स्वादुभूतेन मिथुनेन मातापित्रात्मकेन ᵛसं ᵛसृज संयोजय । यद्वा । स्वादुना भावेनोत्पन्नं तदपत्यमपि संयोजय । एतदेवाह । ᵛअदः तदपत्यं ᵛमधु मधुरं ᵛमधुना मदहेतुना मिथुनान्तरेण पौत्रेण[2] वा ᵛसु[3] सुष्ठु ᵛअभि ᵛयोधीः अभियोधय । अभितः क्रीडय ॥ धातूनामनेकार्थत्वात् युध्यतिरत्र क्रीडार्थे वर्तते ॥ ' मिथुनं वै स्वादु प्रजा स्वादु ' (ऐ. आ. १.३.४) इत्यादि ब्राह्मणमत्रानुसंधेयम् ॥

इति चिद्धि त्वा धना जयन्तं मदेमदे अनुमदन्ति विप्राः ।
ओजीयो धृष्णो स्थिरमा तनुष्व मा त्वा दभन्यातुधाना दुरेवाः ॥ ४ ॥

इति । चित् । हि । त्वा । धना । जयन्तम् । मदेऽमदे । अनुऽमदन्ति । विप्राः ।
ओजीयः । धृष्णो इति । स्थिरम् । आ । तनुष्व ।
मा । त्वा । दभन् । यातुऽधानाः । दुःऽएवाः ॥ ४ ॥

ᵛइति ᵛचिद्धि एवमेव खलु हे इन्द्र ᵛमदेमदे सोमपानजन्ये हर्षे सति ᵛधना शत्रुधनानि ᵛजयन्तं जयेन प्राप्नुवन्तं त्वाम् ᵛअनु पश्चात् । लक्षणेऽनोः कर्मप्रवचनीयत्वम् । ᵛविप्राः मेधाविनः स्तोतारः ᵛमदन्ति हृष्यन्ति । यद्वा त्वामनुमदन्ति अनुक्रमेण स्तुवन्ति । मदतिः स्तुतिकर्मा । ' हि च ' इति निघातप्रतिषेधः । हे ᵛधृष्णो शत्रूणां धर्षयितरिन्द्र । ' ऋसिगृधिधृषिक्षिपेः क्नुः ' । ᵛओजीयः[4] । ओजस्विशब्दादीयसुनि ' विन्मतोर्लुक् ' इति विनो लुक् । ' टेः ' इति टिलोपः । बलवत्तरम् अत एव ᵛस्थिरं दृढं धनम् ᵛआ ᵛतनुष्व अभितोऽस्मदर्थं विस्तारय । ᵛत्वा त्वां च ᵛमा ᵛदभन् मा हिंसन्तु ᵛदुरेवाः दुर्गतयः ᵛयातुधानाः राक्षसाः ॥

त्वया वयं शाशदहे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि ते आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि ॥ ५ ॥

त्वया । वयम् । शाशदहे । रणेषु । प्रऽपश्यन्तः । युधेन्यानि । भूरि ।
चोदयामि । ते । आयुधा । वचःऽभिः । सम् । ते । शिशामि । ब्रह्मणा । वयांसि ॥ ५ ॥

हे इन्द्र ᵛत्वया अनुगृहीताः ᵛवयं ᵛरणेषु संग्रामेषु ᵛशाशदहे भृशं शत्रून् शातयामः ॥ ' शदॢ शातने ' । अस्माद्यङन्तात् महिङः ' छन्दस्युभयथा ' इति आर्धधातुकत्वादतोलोपयलोपौ ॥ किं कुर्वन्तः । ᵛयुधेन्यानि योधनार्हाणि ॥ ' कृत्यार्थे तवैकेन्केन्यत्वनः ' इति युधेरर्हार्थे केन्यप्रत्ययः[5] । ᵛभूरि बहूनि बलानि ॥ ' सुपां सुलुक्° ' इति इ पाल्लुक् । ᵛप्रपश्यन्तः प्रकर्षेण जानन्तः । अपि च ᵛते तव ᵛआयुधा आयुधानि आयोधनसाधनानि वज्रादीनि । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । ᵛवचोभिः स्तुतिभिः ᵛचोदयामि शत्रून् प्रति प्रेरयामि । ᵛते त्वदर्थं ᵛब्रह्मणा मन्त्रेण स्तुतिरूपेण सहितानि ᵛवयांसि ॥ अन्ननामैतत् । इन्द्रियैर्क्षणान्यन्नानि ᵛसं ᵛशिशामि सम्यक्शिश्यामि । संस्करोमीत्यर्थः ॥ ' शो तनूकरणे ' । छान्दसो विकरणस्य श्लुः । ' बहुलं छन्दसि ' इत्यभ्यासस्येत्वम् ॥॥१॥

---

१. ग-त-भ२.४-त्वं च । २. ग-त१.२.३.६.७.८-भ-' पौत्रेण ' नास्ति । ३. त-भ-' सु ' नास्ति ।
४. ग-त४.५-ओजीयः ओजस्वितरं । ५. त-भ-केन्प्रत्ययः ।

स्तुषेय्यं पुरुवर्पसमृम्भ्रमिनतममाप्त्यमाप्त्यानाम् ।
आ दर्षते शवसा सप्त दानून् प्र साक्षते प्रतिमानानि भूरि ॥ ६ ॥

स्तुषेय्यम् । पुरुऽवर्पसम् । ऋम्भ्रम् । इनऽतमम् । आप्त्यम् । आप्त्यानाम् ।
आ । दर्षते । शवसा । सप्त । दानून् । प्र । साक्षते । प्रतिऽमानानि । भूरि ॥ ६ ॥

vस्तुषेय्यं स्तोतव्यम् । 'स्तुवः क्सेय्यश्छन्दसि' (उ. सू. ३. ९९) इत्यौणादिकः क्सेय्यप्रत्ययः । vपुरुवर्पसं बहुरूपम् vऋम्भ्रम् उरु भासमानमुरुभूतं वा vइनतमम् अतिशयेनेश्वरम् vआप्त्यानाम् आप्तव्यानां मध्ये vआप्त्यम् आप्तव्यमेवंभूतमिन्द्रं स्तौमीति शेषः । य इन्द्रः vशवसा बलेन vसप्त सप्तसंख्याकान् vदानून् दानवान् वृत्रनमुचिकुयवादीन् vआ vदर्षते आदृणाति हिनस्ति ॥ 'दृ विदारणे' । अस्माल्लेटि व्यत्ययेनात्मनेपदम् । 'लेटोऽडाटौ' इत्यडागमः[1] । 'सिब्बहुलम्' इति सिप् ॥ तथा vप्रतिमानानि असुराणां प्रतिरूपाणि vभूरि भूरीणि बहून्यसुरबलानि vप्र vसाक्षते य इन्द्रः प्रसहते । यद्वा बहूनि प्रतिमानान्यसुराणां स्थानानि प्र साक्षते प्राप्नोति । 'साक्षतिराप्नोतिकर्मा' (निरु. ११. २१) इति यास्कः ॥ 'षह अभिभवे' । लेट्यडागमः[2] । 'सिब्बहुलम्०' इति सिप् । ढत्वकत्वषत्वानि । छान्दसो दीर्घः ॥

नि तदधिषेऽवरं परं च यस्मिन्नाविथावसा दुरोणे ।
आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्वरा पुरूणि ॥ ७ ॥

नि । तत् । दधिषे । अवरम् । परम् । च । यस्मिन् । आविथ । अवसा । दुरोणे ।
आ । मातरा । स्थापयसे । जिगत्नू इति । अतः । इनोषि । कर्वरा । पुरूणि ॥ ७ ॥

vतत् तस्मिन् यजमानस्य गृहे vअवरम् अल्पं भौमं धनं vपरम् उत्कृष्टं दिवि भवं धनं vच हे इन्द्र त्वं vनि vदधिषे निदधासि । निक्षिपसि । vयस्मिन् vदुरोणे गृहे vअवसा । अन्ननामैतत् । तर्पकेणान्नेन हविर्लक्षणेन vआविथ अवसि तृप्यसि ॥ अवतेस्तृप्त्यर्थात् 'छन्दसि लुङ्लङ्लिटः' इति सार्वकालिको लिट् । 'अत आदेः' इत्यभ्यासस्यात्वम्[3] । 'यद्वृत्तान्नित्यम्' इति निघातप्रतिषेधः ॥ अपि च vमातरा सकलस्य भूतजातस्य निर्मात्र्यौ द्यावापृथिव्यौ vजिगत्नू गमनशीले इतस्ततः प्रचलन्त्यौ vआ vस्थापयसे स्वकीये स्थानेऽवस्थापयसि । नैश्चल्येन यथावतिष्ठेते तथा करोषीत्यर्थः । 'विष्कभ् तस्तम्भ पृथिवीमुत द्याम्' (ऋ. सं. १०. ८९. ४) इति निगमान्तरम् । हे इन्द्र vअतः कारणात् vपुरूणि बहूनि vकर्वरा कर्मनामैतत् । कर्वराणि ॥ 'शेश्छन्दसि बहुलम्' इति शेर्लोपः ॥ कर्माणि लौकिकानि वैदिकानि[4] । vइनोषि प्राप्नोषि ॥ 'इण् गतौ' । व्यत्ययेन क्षुः ॥

इमा ब्रह्म बृहद्दिवो विवक्तीन्द्राय शूषमङ्गिरः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजो दुरश्च विश्वा अवृणोदप स्वाः ॥ ८ ॥

इमा । ब्रह्म । बृहत्ऽदिवः । विवक्ति । इन्द्राय । शूषम् । अङ्गिरः । स्वःऽसाः ।
महः । गोत्रस्य । क्षयति । स्वऽराजः । दुरः । च । विश्वाः । अवृणोत् । अप । स्वाः ॥ ८ ॥

---

१. त-भ-इत्याडागमः । २. त-भ१.२.४.८-लेट्याडागमः । ३. त-भ-°सस्येत्वं ।

vबृहद्दिवः ऋषिः vइमा इमानि vब्रह्म ब्रह्माणि[1] vइन्द्राय vसूनृतं सुखं यथा भवति तथा vविवक्ति। प्रब्रवीतीत्यात्मन एव परोक्षनिर्देशः। 'वच परिभाषणे'। आदादिकः। छान्दसः शपः श्लुः। 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम्। ऋषिर्विशेष्यते। vअग्नियः अग्नेभवः। ऋषीणां प्रमुखः श्रेष्ठ इत्यर्थः॥ 'घष्ठौ च' (पा. सू. ४. ४. ११७) इत्यग्रशब्दाद्भवार्थे घच्। vस्वर्षाः स्वर्गस्य संभक्ता। यद्वा। स्वरादित्य इन्द्रः। 'असौ वा आदित्य इन्द्रः' (तै. सं.५.७.१.३) इति श्रुत्यन्तरात्। तस्य संभक्ता सेवक इत्यर्थः। 'वन षण संभक्तौ'। जनसनखनक्रमगमो विट्। 'विड्वनोरनुनासिकस्यात्' इत्यात्वम्। 'सनोतेरनः' इति षत्वम्। य इन्द्रः vमहः महतः vगोत्रस्य पर्वतस्य बलेनासुरेण गवां पिधानार्थं निहितस्य vस्वराजः स्वयमेव राजमानस्य। 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। ईदृशं पर्वतं vक्षयति अपगमयति। 'क्षि क्षये'। भौवादिकः। यद्वा। गोशब्दात् समूहार्थे 'इनिव्रजक्षच्च' (पा. सू. ४. २. ५१) इति व्रप्रत्ययः। गोव्रस्य गोसमूहस्य महः महतः स्वराजः स्वयमेव राजमानस्य य इन्द्रः क्षयति ईष्टे। क्षयतिरैश्वर्यकर्मा। स्वशब्दोपपदात् राजतेः 'सत्सूद्विष०' इति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। vदुरश्च बिलद्वाराणि च vविश्वाः सर्वाः vस्वाः बलासुरस्य स्वभूताः vअप vअवृणोत् अपगतावरणा अकरोत्। उद्घाटितवानित्यर्थः। यद्वा। दुरश्चापावृणोत् विश्वाः सर्वाः स्वाः स्वभूता गा बिलमध्ये वर्तमाना अलभतेति शेषः। एवंभूतो य इन्द्रस्तस्मा इन्द्राय विवक्तीत्यन्वयः॥

एवा महान् बृहद्दिवो अथर्वावोचत्स्वां तन्वमिन्द्रमेव।
स्वसारो मातरिश्वरीररिप्रा हिन्वन्ति च शवसा वर्धयन्ति च॥ ९॥

एव। महान्। बृहत्ऽदिवः। अथर्वा। अवोचत्। स्वाम्। तन्वम्। इन्द्रम्। एव।
स्वसारः। मातरिश्वरीः। अरिप्राः। हिन्वन्ति। च। शवसा। वर्धयन्ति। च॥ ९॥

vमहान् गुणैरधिकः vअथर्वा। उपचाराज्जन्ये जनकशब्दः। अथर्वणः पुत्रो बृहद्दिवाख्य[2] ऋषिर्देवेषु मध्ये vइन्द्रमेव प्रति vस्वाम् आत्मीयां vतन्वं विस्तृतां स्तुतिम् एवम्[3] vअवोचत् प्रोक्तवान्। वचेर्लुङि 'अस्यतिवक्ति०' इत्यादिना च्लेरङादेशः। 'वच उम्' इत्युमागमः। पादादित्वान्न निहन्यते। अपि चैनमेव vइन्द्रं vमातरिश्वरीः मातरि सकलस्य भूतजातस्य निर्मात्र्यां भूमौ भवन्त्यो वर्तमानाः। भवतेः 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप्। 'वनो र च' इति ङीब्रेफौ। जसि 'वा छन्दसि' इति पूर्वसवर्णदीर्घः। पृषोदरादित्वाद्वर्णलोपः। vअरिप्राः अपापाः vस्वसारः स्वयमेव सरन्त्यः परस्परं भगिन्यो वा गङ्गाद्या नद्यः vहिन्वन्ति यागसाधनत्वेन प्रीणयन्ति। हिविः प्रीणनार्थः। भौवादिकः। व्यत्ययेन शः। इदित्त्वात् नुम्। यद्वा। 'हि गतौ वृद्धौ च'। स्वादिभ्यः श्नुः। वृद्ध्यर्थं तमिन्द्रमुपगच्छन्ति। गत्वा च vशवसा[4] यागजन्येन बलेन तं vवर्धयन्ति vच॥ ॥२॥

'हिरण्यगर्भः' इति दशर्चं नवमं सूक्तं [illegible]पतिपुत्रस्य हिरण्यगर्भाख्यस्यार्षं त्रैष्टुभम्। कशब्दाभिधेयः प्रजापतिर्देवता। तथा चानुक्रान्तं [illegible] 'हिरण्यगर्भो दश हिरण्यगर्भः प्राजापत्यः कायम्' इति। गतः सूक्तविनियोगः। प्राजापत्यस्य पशोर्वपापुरोडाशहविषां क्रमेणादितस्तिस्रोऽनुवाक्यास्तस्तिस्रो याज्याः। सूत्रितं च—'हिरण्यगर्भः समवर्तताग्र इति षट् प्राजापत्याः' (आश्व. श्रौ. ३. ८) इति। वरुणप्रघासेषु कायस्य हविषो हिरण्यगर्भ इत्येषा याज्या। सूत्रितं च—'कया नश्चित्र आ भुवदिरण्यगर्भः समवर्ततेति प्रतिप्रस्थाता वाजिने तृतीयः' (आश्व श्रौ. २. १७) इति॥

---

१. ग-त४,५–ब्रह्माणि स्तोत्राणि। २. त-भ–बृहद्दिवा। ३. ग२–एवा एवं।

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥ १ ॥

हिरण्यऽगर्भः । सम् । अवर्तत । अग्रे । भूतस्य । जातः । पतिः । एकः । आसीत् ।
सः । दाधार । पृथिवीम् । द्याम् । उत । इमाम् । कस्मै । देवाय । हविषा । विधेम ॥१॥

vहिरण्यगर्भः हिरण्मयस्याण्डस्य गर्भभूतः प्रजापतिर्हिरण्यगर्भः । तथा च तैत्तिरीयकं— ' प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय ' (तै. सं. ५. ५. १. २) इति । यद्वा हिरण्मयोऽण्डो गर्भवद्यस्योदरे वर्तते सोऽसौ सूत्रात्मा हिरण्यगर्भ इत्युच्यते । vअग्रे प्रपञ्चोत्पत्तेः प्राक् vसमवर्तत । मायाध्यक्षात् सिसृक्षोः परमात्मनः समजायत । यद्यपि परमात्मैव हिरण्यगर्भः तथापि तदुपाधिभूतानां वियदादीनां ब्रह्मण उत्पत्तेस्तदुपहितोऽप्युत्पन्न इत्युच्यते । स च vजातः जातमात्र एव vएकः अद्वितीयः सन् vभूतस्य विकारजातस्य ब्रह्माण्डादेः सर्वस्य जगतः vपतिः ईश्वरः vआसीत् । न केवलं पतिरासीदेव अपि तर्हि vसः हिरण्यगर्भः vपृथिवीं विस्तीर्णां vद्यां दिवम् vउत अपि च vइमाम् अस्माभिर्दृश्यमानां पुरोवर्तिनीमिमां भूमिम् । यद्वा पृथिवीत्यन्तरिक्षनाम । अन्तरिक्षं दिवं भूमिं च vदाधार धारयति ॥ ' छन्दसि लुङ्लङ्लिटः ' इति सार्वकालिको लिट् । तुजादित्वादभ्यासदीर्घः ॥ vकस्मै । अत्र किंशब्दोऽनिर्ज्ञातस्वरूपत्वात् प्रजापतौ वर्तते । यद्वा । सृष्टयर्थं कामयत इति कः । कमेर्डप्रत्ययः । यद्वा । कं सुखं । तद्रूपत्वात् क इत्युच्यते । अथवा इन्द्रेण पृष्टः प्रजापतिर्मदीयं महत्त्वं तुभ्यं प्रदायाहं कः कीदृशः स्यामित्युक्तवान् । स इन्द्रः प्रत्यूचे यदीदं ब्रवीष्यहं कः स्यामिति तदेव त्वं भवेति । अतः कारणात् क इति प्रजापतिराख्यायते । ' इन्द्रो वै वृत्रं हत्वा सर्वां विजितीर्विजित्याब्रवीत् ' (ऐ. ब्रा. ३.२१) इत्यादिकं ब्राह्मणमत्रानुसंधेयम् ॥ यदासौ किंशब्दस्तदा सर्वनामत्वान् स्मैभावः सिद्धः । यदा तु यौगिकस्तदा व्यत्ययेनेति द्रष्टव्यम् । 'सावेकाचः०' इति प्राप्तस्य ' न गोश्वन्स्ववर्ण०' इति प्रतिषेधः । ' क्रियमाणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वाच्चतुर्थी । कं प्रजापतिं vदेवाय देवं दानादिगुणयुक्तं vहविषा प्राजापत्यस्य पशोर्वपारूपेणैककपालात्मकेन[1] पुरोडाशेन वा vविधेम वयमृत्विजः परिचरेम । विधतिः परिचरणकर्मा ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥ २ ॥

यः । आत्मऽदाः । बलऽदाः । यस्य । विश्वे । उपऽआसते । प्रऽशिषम् । यस्य । देवाः ।
यस्य । छाया । अमृतम् । यस्य । मृत्युः । कस्मै । देवाय । हविषा । विधेम ॥ २ ॥

vयः प्रजापतिः vआत्मदाः[2] आत्मानं हि सर्वे तस्मात् परमात्मन उत्पद्यन्ते । यथाग्नेः सकाशाद्विस्फुलिङ्गाः आत्मदां शोधयिता । ' दैप् शोधने ' । ' आतो मनिन्० ' इति विच् । vबलदाः बलस्य शोधयिता वा vयस्य च vप्रशिषं प्रकृष्टं शासनमाज्ञां vविश्वे सर्वे प्राणिनः vउपासते प्रकृष्टं ते सेवन्ते वा । शासु अनुशिष्टौ ' । ' शास इत्० ' (पा. सू. ६.४.३४) इत्युपधाया इत्वम् । शासिवसिघसीनां च ति षत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । आसेरनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । ' तिङ उदात्तवति ' इति गतिरनुदात्ता । तथा vदेवाः अपि vयस्य प्रशासनमुपासते । अपि च vअमृतम् तत्त्वम् । भावप्रधानो निर्देशः ।

---

१. त४.५-°कपालाख्येन । २. त१.२.३.६.७.८-भ-' आत्म ' नास्ति ।

यद्वा। अमृतम्। मरणं नास्त्यस्मिन्नित्यमृतं सुखं। बहुव्रीहौ 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम्। तदपि ᵛयस्य प्रजापतेः ᵛछाया छायेव वर्तते भवति। ᵛमृत्युः यमश्च प्राणापहारी छायेव भवति। तस्मै ᵛकस्मै ᵛदेवाय इत्यादि समानं पूर्वेण ᵛहविषा पुरोडाशात्मनेति तु विशेषः॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ ३॥

यः। प्राणतः। निऽमिषतः। महिऽत्वा। एकः। इत्। राजा। जगतः। बभूव।
यः। ईशे। अस्य। द्विऽपदः। चतुःऽपदः। कस्मै। देवाय। हविषा। विधेम॥ ३॥

ᵛयः हिरण्यगर्भः ᵛप्राणतः प्रश्वसतः[1]॥ 'अन प्राणने'। आदादिकः। 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम्॥ ᵛनिमिषतः अक्षिपक्ष्मचलनं कुर्वतः॥ अत्रापि पूर्ववद्विभक्तिरुदात्ता॥ ᵛजगतः जङ्गमस्य प्राणिजातस्य ᵛमहित्वा महत्त्वेन॥ 'सुपां सुलुक्०' इति तृतीयाया आकारः॥ माहात्म्येन ᵛएक ᵛइत् अद्वितीय एव सन् ᵛराजा ᵛबभूव ईश्वरो भवति॥ भवतेर्णलि 'लिति' (पा. सू. ६. १. १९३) इति प्रत्ययात्पूर्वस्योदात्तत्वम्॥ ᵛअस्य परिदृश्यमानस्य ᵛद्विपदः पादद्वययुक्तस्य मनुष्यादेः ᵛचतुष्पदः गवाश्वादेश्च ᵛयः प्रजापतिः ᵛईशे ईष्टे॥ 'ईश ऐश्वर्ये'। आदादिकोऽनुदात्तेत्। 'लोपस्त आत्मनेपदेषु' इति तलोपः। अनुदात्तेरवाल्लसार्वधा० आनुदात्तत्वे धातुस्वरः। अस्य। 'ऊदिदम्०' इतीदमो विभक्तिरुदात्ता। द्वौ पादौ यस्य स द्वि[2]। 'संख्यासुपूर्वस्य' (पा. सू. ५. ४. १४०) इति पादस्यान्त्यलोपः समासान्तः। भसंज्ञाय पादः पत्' (पा. सू. ६.४.१३०) इति पद्भावः। 'द्वित्रिभ्यां पाद्०' (पा. सू. ६. २. १९७ इत्येकदेशविकृतस्यानन्यत्वादुत्तरपदान्तोदात्तत्वम्। स्वरवर्जमेवैव चतुष्पद इत्यत्रापि प्रक्रिया। बहुव्रीहौ प्रकृत्या०' इति पूर्वपदप्रकृतिस्वरः। पूर्वपदस्य 'ञ्नित्यादिर्नित्यम्' (फि. सू.२.५) इत्याद्युदात्तत्वम्। 'इदुदुपधस्य चाप्रत्ययस्य' इति विसर्जनीयस्य षत्वम्॥ ईदृशो यः प्रजापतिस्तस्मै कस्मै इत्यादि सुबोधं ᵛहविषा हृदयाद्यात्मनेत्यपमत्र विशेषः॥

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम॥ ४॥

यस्य। इमे। हिमऽवन्तः। महिऽत्वा। [illegible]। समुद्रम्। रसया। सह। आहुः।
यस्य। इमाः। प्रऽदिशः। यस्य। बा[illegible] इति। कस्मै। देवाय। हविषा। विधेम॥ ४॥

हिमा अस्मिन् सन्तीति हिमवान् तेन[3] बहुव[illegible] पर्वता लक्ष्यन्ते। यथा छत्रिणो गच्छन्तीति। ᵛहिमवन्तः हिमवदुपलक्षिताः ᵛइमे इदं [illegible]। ᵛयस्य प्रजापतेः ᵛमहित्वा महत्त्वं माहात्म्यमैश्वर्यमिति ᵛआहुः। ते सृष्टत्वात्तदुपे[illegible]। तथा ᵛरसया। रसो जलम्। तद्वती रसा नदी॥ अर्शआदित्वादच्॥ तावेकवचनम्। [illegible]र्णवादीभिः ᵛसह ᵛसमुद्रम्। पूर्ववदेकवचनम्। सर्वान् समुद्रान् ᵛयस्य म[illegible]ख्यमिति ᵛआहुः प्रथयन्ति सृष्टत्वमिति। ᵛयस्य च ᵛइमाः ᵛप्रदिशः प्राच्यादिरूपा आग्नेय्याद्याः [illegible]णदिशः ईक्षितव्याः। तथा ᵛबाहू। बध्नन्त्यनयोः। बाहवो भुजाः। भुजवत्प्राधान्ययुक्ताः प्रदि ᵛयस्य स्वभूताः। तस्मै ᵛकस्मै इत्यादि समानं पूर्वेण॥

---

१. म०—श्वसतः। २. ग-म- [illegible]। च।

येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥ ५ ॥

येन । द्यौः । उग्रा । पृथिवी । च । दृळ्हा । येन । स्वः१रिति स्वः । स्तभितम् । येन । नाकः । यः । अन्तरिक्षे । रजसः । विऽमानः । कस्मै । देवाय । हविषा । विधेम ॥ ५ ॥

ᵛयेन प्रजापतिना ᵛद्यौः अन्तरिक्षम् ᵛउग्रा उद्गूर्णं विशेषागहनरूपं वा । ᵛपृथिवी भूमिः ᵛच ᵛदृळ्हा येन स्थिरीकृता । ᵛस्वः स्वर्गश्च ᵛयेन ᵛस्तभितं स्तब्धं कृतम् । यथाधो न पतति तथोपरि अवस्थापितमित्यर्थः ॥ 'ग्रसितस्कभितस्तभित०' इति निपात्यते ॥ तथा ᵛनाकः आदित्यश्च ᵛयेन अन्तरिक्षे स्तभितः[1] । ᵛयः च ᵛअन्तरिक्षे ᵛरजसः उदकस्य ᵛविमानः निर्माता । तस्मै ᵛकस्मै इत्यादि गतम् ॥ ॥ ३ ॥

यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥ ६ ॥

यम् । क्रन्दसी इति । अवसा । तस्तभाने इति । अभि । ऐक्षेताम् । मनसा । रेजमाने इति । यत्र । अधि । सूरः । उत्ऽईतः । विऽभाति । कस्मै । देवाय । हविषा । विधेम ॥ ६ ॥

क्रन्दितवान् रोदितवाननयोः प्रजापतिरिति ᵛक्रन्दसी द्यावापृथिव्यौ । श्रूयते हि—'यदरोदीत्तदनयो रोदस्त्वम्' (तै. ब्रा. २. २. ९. ४) इति । ते ᵛअवसा रक्षणेन हेतुना लोकस्य रक्षणार्थं ᵛतस्तभाने प्रजापतिना सृष्टे[2] लब्धस्थैर्ये सत्यौ ᵛयं प्रजापतिं ᵛमनसा बुद्धया ᵛअभ्यैक्षेताम् आवयोर्महत्त्वमनेन इत्यभ्यपश्येताम् ॥ 'ईक्ष दर्शने' । लङि अडादित्वादाद्युदात्तः[3] ॥ कीदृश्यौ द्यावापृथिव्यौ । ᵛरेजमाने राजमाने दीप्यमाने ॥ आकारस्य[4] व्यत्ययेनैत्वम् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वा । लिटः कानच् । 'फणां च सप्तानाम्' (पा. सू. ६. ४. १२५) इत्येत्वाभ्यासलोपौ । 'छन्दस्युभयथा' इति सार्वधातुकत्वाच्छप् । अत एव 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥ ᵛयत्राधि यस्मिन्नाधारभूते प्रजापतौ ᵛसूरः सूर्यः ᵛउदितः उदयं प्राप्तः सन् ᵛविभाति प्रकाशते ॥ उत्पूर्वादेतेः कर्मणि निष्ठा । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् ॥ तस्मै ᵛकस्मै इत्यादि सुज्ञानम् ॥

आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् ।
ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम ॥ ७ ॥

आपः । ह । यत् । बृहतीः । विश्वम् । आयन् । गर्भम् । दधानाः । जनयन्तीः । अग्निम् । ततः । देवानाम् । सम् । अवर्तत । असुः । एकः । कस्मै । देवाय । हविषा । विधेम ॥ ७ ॥

ᵛबृहतीः बृहत्यो महत्यः ॥ जसि 'वा छन्दसि' इति पूर्वसवर्णदीर्घः । 'बृहन्महतोरुपसंख्यानम्' इति ङीप उदात्तत्वम् ॥ ᵛअग्निम् । उपलक्षणमेतत् । अग्न्युपलक्षितं सर्वं वियदादि-

१. ग-त१.२.३.६.८-मु-स्तंभितः । २. ग-भ५-स्तब्धे । ३. त-भ-अजादित्वादाद्युदात्तः । ४. त-भ-अकारस्य ।

भूतजातं vजनयन्तीः जनयन्त्यः तदर्थं vगर्भं हिरण्मयाण्डस्य गर्भभूतं प्रजापतिं vदधानाः धारयन्त्यः vआपो vह आप एव vविश्वमायन् सर्वं जगत् व्याप्नुवन् vयत्[1] यस्मात् vततः तस्माद्धेतोः vदेवानां देवादीनां सर्वेषां प्राणिनाम् vअसुः प्राणभूतः vएकः प्रजापतिः vसमवर्तत समजायत । यद्वा[1] । यत् यं गर्भं दधाना आपो विश्वात्मनावस्थिताः ततो गर्भभूतात्प्रजापतेर्देवादीनां प्राणात्मको वायुरजायत । अथवा । यत् । लिङ्गवचनयोर्व्यत्ययः । उक्तलक्षणा या आपो विश्वमावृत्य स्थिताः[2] ततस्ताभ्योऽग्रयः सकाशादेकोऽद्वितीयोऽसुः प्राणात्मकः प्रजापतिः समवर्तत निश्चक्राम । तस्मै vकस्मै इत्यादि गतम् ॥

यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयन्तीर्यज्ञम् ।
यो देवेष्वधि देव एक आसीत्कस्मै देवाय हविषा विधेम ॥ ८ ॥

यः । चित् । आपः । महिना । परिऽअपश्यत् । दक्षम् । दधानाः । जनयन्तीः । यज्ञम् ।
यः । देवेषु । अधि । देवः । एकः । आसीत् । कस्मै । देवाय । हविषा । विधेम ॥ ८ ॥

vयज्ञं यज्ञोपलक्षितं विकारजातं vजनयन्तीः उत्पादयन्तीः तदर्थं vदक्षं प्रपञ्चात्मना वर्धिष्णुं प्रजापतिमात्मनि vदधानाः धारयित्रीः ॥ दधातेर्हेतौ शानच् । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥ ईदृशीः vआपः । व्यत्ययेन प्रथमा । अपः प्रलयकालीनाः vमहिना महिम्ना । छान्दसो मलोपः । स्वमाहात्म्येन vयश्चित् यश्च प्रजापतिः vपर्यपश्यत् परितो दृष्टवान् vयः च vदेवेष्वधि देवेषु मध्ये vदेवः तेषामपीश्वरः सन् vएकः अद्वितीयः vआसीत् भवति ॥ अस्तेश्छान्दसो लङ् । 'अस्तिसिचोऽपृक्ते' (पा. सू. ७. ३. ९६) इतीडागमः ॥ तस्मै vकस्मै इत्यादि गतम् ॥

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ॥ ९ ॥

मा । नः । हिंसीत् । जनिता । यः । पृथिव्याः । यः । वा । दिवम् । सत्यऽधर्मा । जजान ।
यः । च । अपः । चन्द्राः । बृहतीः । जजान । कस्मै । देवाय । हविषा । विधेम ॥ ९ ॥

स प्रजापतिः vनः अस्मान् vमा vहिंसीत् मा बाधताम् । vयः vपृथिव्याः भूमेः vजनिता जनयिता स्रष्टा ॥ 'जनिता मन्त्रे' इति णिलोपो निपात्यते । 'उदात्तयणो हल्पूर्वात्' इति पृथिवीशब्दाद्विभक्तेरुदात्तत्वम् ॥ vयो vवा यश्च vसत्यधर्मा सत्यमवितथं धर्मं जगतो धारणं यस्य स तादृशः प्रजापतिः vदिवम् अन्तरिक्षोपलक्षितान् सर्वान् लोकान् vजजान जनयामास ॥ 'जनी प्रादुर्भावे' । णिचि वृद्धौ 'जनीजृष्क्नसुरञ्जः' इति मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वत्वम् । ततो लिटि 'अमन्त्रे' (पा. सू. ३. १. ३५) इति निषेधादाम्प्रत्ययाभावे तिपो णलि वृद्धौ 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम् ॥ vयश्च vबृहतीः महतीः vचन्द्राः आह्लादिनीः vअपः उदकानि vजजान जनयामास ॥ 'ऊडिदम्' इत्यादिना अप्शब्दादुत्तरस्य शस उदात्तत्वम् ॥ तस्मै vकस्मै इत्यादि गतम् ॥

इळादधात्यस्य इष्टयजने प्राजापत्यस्य हविषः 'प्रजापते' इत्येषानुवाक्या । सूत्रितं च—'प्राजापत्य इळादधः प्रजापते न त्वदेतान्यन्यः' (आश्व. श्रौ. २. १४) इति । केशनखकीटादिभिः दुष्टानि हवींष्यनयैवाप्सु प्रक्षिपेत् । सूत्रितं च—'अपोऽभ्यवहरेयुः प्रजापते न त्वदेतान्यन्यः'

१. त-भ१.४.७-'यत्...यद्वा' नास्ति । २. त-मु-स्थितास्ताः ।

(आश्व. श्रौ. ३. १०) इति। चौलादिकर्मस्वप्येषा होमार्था। सूत्रितं च—' तेषां पुरस्ताच्चतस्र आज्याहुतीर्जुहुयादग्न आयूंषि पवस इति तिसृभिः प्रजापते न त्वदेतान्यन्य इति च ' (आश्व. गृ. १. ४. ४) इति ॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ १० ॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् ॥ १० ॥

हे [v]प्रजापते [v]त्वत् त्वत्तोऽन्यः कश्चित् [v]एतानि इदानीं वर्तमानानि [v]विश्वा विश्वानि सर्वाणि ॥ ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः ॥ [v]जातानि प्रथमविकारभाञ्जि [v]ता तानि सर्वाणि भूतजातानि [v]न [v]परि [v]बभूव न परिगृह्णाति। न व्याप्नोति। त्वमेवैतानि परिगृह्य स्थातुं शक्नोषीति भावः। परिपूर्वो भवतिः परिग्रहार्थः। वयं च [v]यत्कामाः यत्फलं कामयमानाः [v]ते तुभ्यं [v]जुहुमः हवींषि प्रयच्छामः [v]तत् फलं [v]नः अस्माकम् [v]अस्तु भवतु। तथा [v]वयं च [v]रयीणां धनानां [v]पतयः ईश्वराः [v]स्याम भवेम ॥ ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् ॥ ॥ ४ ॥

' वसुं न ' इत्यष्टर्चं दशमं सूक्तं वसिष्ठपुत्रस्य चित्रमहस आर्षमाग्नेयम्। आद्यापञ्चमी त्रिष्टुभौ शिष्टा जगत्यः। तथा चानुक्रान्तं—' वसुं नाष्टौ चित्रमहा वासिष्ठ आग्नेयं जागतमाद्यां पञ्चमीं चर्ते ' इति। प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ जागते छन्दसीदं सूक्तम्। सूत्रितं च—' वसुं न चित्रमहसमिति जागतम् ' (आश्व. श्रौ. ४. १३) इति ॥

वसुं न चित्रमहसं गृणीषे वामं शेवमतिथिमद्विषेण्यम् ।
स रासते शुरुधो विश्वधायसोऽग्निर्होता गृहपतिः सुवीर्यम् ॥ १ ॥

वसुम् । न । चित्रऽमहसम् । गृणीषे । वामम् । शेवम् । अतिथिम् । अद्विषेण्यम् ।
सः । रासते । शुरुधः । विश्वऽधायसः । अग्निः । होता । गृहऽपतिः । सुऽवीर्यम् ॥ १ ॥

[v]वसुं [v]न वासकं सूर्यमिव [v]चित्रमहसं चायनीयतेजस्कमग्निं [v]गृणीषे गृणे स्तौमि ॥ ' गृ शब्दे '। क्र्यादिकः। पुरुषव्यत्ययः। ष्वादित्वात्सुः ॥ यद्वा। चित्रमहसमिति प्रथमार्थे द्वितीया। न इति संप्रत्यर्थे। संप्रति वासकमग्निमहं चित्रमहाः स्तौमि। कीदृशम्। [v]वामं वननीयं [v]शेवं सुखकरम् [v]अतिथिम् अतिथिवत्पूज्यं यद्वा हविर्वहनाय सततगामिनम् [v]अद्विषेण्यं द्वेष्यरहितम् ॥ द्विषेः[1] ' कृत्यार्थे तवैकेन्° ' इति केन्यप्रत्ययः। नञा ' बहुव्रीहौ नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् ॥ [v]सः [v]अग्निः [v]शुरुधः[2] शोकस्य रोधयित्रीर्निवारयित्रीः [v]विश्वधायसः क्षीरप्रदानादिना विश्वं सर्वं जगद्धारयन्तीर्गाः [v]सुवीर्यं शोभनवीर्यं च [v]रासते यजमानेभ्यो ददाति ॥ ' रा दाने '। अस्माल्लेट्यडागमः। ' सिऽबहुलम्° ' इति सिप्। व्यत्ययेनात्मनेपदम्। विश्वशब्दोपपदाद्धातेः ' वहिहाधाभ्यः° ' इत्यसुन्। ' णित् ' इत्यनुवृत्तेः ' आतो युक्चिण्° ' (पा. सू. ७.३.३३) इति युक्। भरद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् ॥ कीदृशोऽग्निः। [v]होता देवानामाह्वाता होमनिष्पादको वा [v]गृहपतिः यजमानगृहाणा-

---

१. त-म-' द्विषेः ' नास्ति। २. ग-त४.५-म२-शुरुधः ; शुचः।

मीश्वरः ॥ 'गेहे कः' (पा. सू. ३. १. १४४) इति ग्रहेः कप्रत्ययः । 'ग्रहिज्या०' (पा. सू. ६. १. १६) इत्यादिना संप्रसारणम् । 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम् । शोभनं वीर्यं यस्येति बहुव्रीहौ 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् ॥

जुषाणो अग्ने प्रति हर्य मे वचो विश्वानि विद्वान् वयुनानि सुक्रतो ।
घृतनिर्णिग्ब्रह्मणे गातुमेरय तवं देवा अजनयन्ननु व्रतम् ॥ २ ॥

जुषाणः । अग्ने । प्रति । हर्य । मे । वचः ।
विश्वानि । विद्वान् । वयुनानि । सुक्रतो इति सुऽक्रतो ।
घृतऽनिर्निक् । ब्रह्मणे । गातुम् । आ । ईरय । तव । देवाः । अजनयन् । अनु । व्रतम् ॥२॥

हे अग्ने जुषाणः प्रीयमाणस्त्वं मे मम वचः वचनं स्तोत्रं प्रति हर्य कामयस्व । 'हर्यं गतिकान्त्योः' । तथा हे सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा त्वं विश्वानि सर्वाणि वयुनानि । ज्ञाननामैतत् इह[1] ज्ञातव्ये वर्तते । ज्ञातव्यान्यर्थजातानि विद्वान् जानन् वर्तसे । हेतौ शतृप्रत्ययः । यतो जानासि ततो हतोर्मद्वचनं कामयस्वेत्यर्थः । हे घृतनिर्णिक् घृतेनाज्येन निर्णिज्यमान पुष्यमाणशरीर । 'णिजिर् शौचपोषणयोः' । यद्वा । निर्णिगिति रूपनाम । दीप्तरूपाग्ने ब्रह्मणे ब्राह्मणाय यजमानाय गातुं गातव्यं ज्ञातव्यं[2] वा यज्ञम् एरय आगमय । तव व्रतं त्वदीयं यज्ञकर्म अनु पश्चात् देवाः इन्द्रादयः सर्वे अजनयन् । यजमानाय फलानि जनयन्ति । अतस्त्वदीयं यज्ञं यजमानाय प्रापयेत्यर्थः ॥ लक्षणेऽनोः कर्मप्रवचनीयत्वम् । व्रतमिति कर्मप्रवचनीययुक्त इति द्वितीया । अनेर्ण्यन्ताच्छान्दसो लङ् । 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वत्वम् ॥

सप्त धामानि परियन्नमर्त्यो दाशद्दाशुषे सुकृते मामहस्व ।
सुवीरेण रयिणाग्ने स्वाभुवा यस्त आनट् समिधा तं जुषस्व ॥ ३ ॥

सप्त । धामानि । परिऽयन् । अमर्त्यः । दाशत् । दाशुषे । सुऽकृते । ममहस्व ।
सुऽवीरेण । रयिणा । अग्ने । सुऽआभुवा । यः । ते । आनट् । सम्ऽइधा । तम् । जुषस्व ॥३॥

हे अग्ने सप्त सप्तसंख्याकानि धामानि स्थानानि पृथिव्यादिलोकात्मकानि परियन् परितो गच्छन् अमर्त्यः मरणधर्मरहितस्त्वं यो यजमानः पुरोडाशादीनि[3] हवींषि दाशत् प्रयच्छति तस्मै दाशुषे दत्तवते सुकृते सुष्ठु यागं कृतवते मामहस्व । अपेक्षितं धनं ददस्व । महतिर्दानकर्मा ॥ 'सुकर्मपाप०' (पा. सू. ३. २. ८९) इत्यादिना सुपूर्वात्कृञो भूते काले क्विप् ॥ यः च यजमानः समिधा समिन्धनसाधनेनेध्मेन हे अग्ने ते त्वाम् आनट् प्राप्नोति ॥ नशतिर्गतिकर्मा । अस्माच्छान्दसो लङ् । 'बहुलं छन्दसि' इति शपो लुक् । 'छन्दस्यपि दृश्यते' इत्याडागमः । अश्नोतेर्वा व्यत्ययेन अम् ॥ तं यजमानं सुवीरेण । शोभनवीराः पुत्रा यस्य ॥ 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् ॥ तादृशेन स्वाभुवा सुष्ठु आ समन्तात्भूष्णुना वर्धिष्णुना[4] रयिणा धनेन दातव्येन सार्धं जुषस्व[5] ॥

---

१. ग-त४.५-भ२–इह तु । २. ग-त-भ–'ज्ञातव्यं' नास्ति । ३. ग-त४.५-भ२–चरुपुरोडाशादीनि । ४. त१.२.३.६.७.८-भ–'वर्धिष्णुना' नास्ति । ५. ग-त४.५-भ२–जुषस्व सेवस्व ।

यज्ञस्य केतुं प्रथमं पुरोहितं हविष्मन्त ईळते सप्त वाजिनम् ।
शृण्वन्तमग्निं घृतपृष्ठमुक्षणं पृणन्तं देवं पृणते सुवीर्यम् ॥ ४ ॥

यज्ञस्य । केतुम् । प्रथमम् । पुरःऽहितम् । हविष्मन्तः । ईळते । सप्त । वाजिनम् ।
शृण्वन्तम् । अग्निम् । घृतऽपृष्ठम् । उक्षणम् । पृणन्तम् । देवम् । पृणते । सुऽवीर्यम् ॥ ४ ॥

vयज्ञस्य यागस्य vकेतुं प्रज्ञापकं vप्रथमं सर्वेषु देवेषु मुख्यं प्रथमस्थानं वा vपुरोहितं पुरतो हितकारिणम् । यद्वा । पुरस्तात् पूर्वस्यां दिश्याहवनीयरूपेण निहितम् ॥ ' पूर्वाधरा° ' (पा. सू. ५. ३. ३९) इत्यादिना पूर्वशब्दादसिःप्रत्ययः । तस्संनियोगेन प्रकृतेः पुरादेशश्च । ' तद्धितश्चासर्वविभक्तिः ' (पा. सू. १. १. ३८) इत्यव्ययसंज्ञायां ' पुरोऽव्ययम् ' (पा. सू. १. ४. ६७) इति गतिसंज्ञा । धात्रः कर्मणि निष्ठा । दधातेर्हिः । ततः समासे ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥ vवाजिनं बलवन्तमन्नवन्तं वा vशृण्वन्तम् अस्मत्स्तुतीः श्रोत्रेण जानन्तं vघृतपृष्ठं दीप्तपृष्ठं दीप्ताङ्गम् vउक्षणं यागद्वारेण वृष्टेः संभक्तारं यद्वा सेचनसमर्थं युवानं vपृणते हविर्भिः प्रीणयित्रे यजमानाय ॥ ' पृण प्रीणने ' । तौदादिकः । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वाच्चतुर्थी ॥ हविर्भिः प्रीणयन्तं यजमानं vपृणन्तं धनैः प्रीणयन्तम् । यद्वा । पृणतिर्दानकर्मा । हवींषि ददते यजमानाय पृणन्तं धनानि प्रयच्छन्तम् । vसुवीर्यं शोभनवीर्योपेतं vदेवं द्योतमानं दानादिगुणयुक्तं वा एवंगुणविशिष्टम् vअग्निं vहविष्मन्तः हविर्भिर्युक्ताः vसप्त होतृप्रमुखा वषट्कर्तारः vईळते स्तुवन्ति ॥ ' ईड स्तुतौ ' । आदादिकः ॥

त्वं दूतः प्रथमो वरेण्यः स हूयमानो अमृताय मत्स्व ।
त्वां मर्जयन् मरुतो दाशुषो गृहे त्वां स्तोमेभिर्भृगवो वि रुरुचुः ॥ ५ ॥

त्वम् । दूतः । प्रथमः । वरेण्यः । सः । हूयमानः । अमृताय । मत्स्व ।
त्वाम् । मर्जयन् । मरुतः । दाशुषः । गृहे । त्वाम् । स्तोमेभिः । भृगवः । वि । रुरुचुः ॥५॥

हे अग्ने vत्वं vदूतः देवानां दूतकर्मणि नियुक्तः vप्रथमः मुख्यः प्रथितः प्रख्यातो वा vवरेण्यः संभजनीयश्चासि । vसः त्वम् vअमृताय अमरणाय तदर्थं नोऽस्माभिः vहूयमानः हविषा तर्प्यमाणो वा सन् vमत्स्व तृप्यस्व ॥ ' मदी हर्षे ' । छान्दसो विकरणस्य लुक् ॥ अपि च vत्वां मध्यमस्थाने वैश्वानररूपेण वर्तमानं vमरुतः तत्रत्या देवगणाः vमर्जयन् मार्जयन्ति अलंकुर्वन्ति । तथा vदाशुषः हवींषि दत्तवतो यजमानस्य vगृहे vस्तोमेभिः स्तोमैः स्तोत्रैः vभृगवः भृगुगोत्रा ऋषयस्त्वां vविvरुरुचुः विशेषेण दीपयन्ति ॥ भृगुशब्दादुत्तरस्य तद्धितस्य ' अत्रिभृगुकुत्स° ' (पा. सू. २.४.६५) इत्यादिना बहुषु लुक् । रुरुचुः[1] । ' रुच दीप्तौ ' । अस्माच्छान्दसो लिट् ॥ ॥ ५ ॥

इषं दुहन्त्सुदुघां विश्वधायसं यज्ञप्रिये यजमानाय सुक्रतो ।
अग्ने घृतस्नुस्त्रिर्ऋतानि दीधरद्वर्तिर्यज्ञं परियन्त्सुक्रतूयसे ॥ ६ ॥

इषम् । दुहन् । सुऽदुघाम् । विश्वऽधायसम् । यज्ञऽप्रिये । यजमानाय । सुक्रतो इति सुऽक्रतो ।
अग्ने । घृतऽस्नुः । त्रिः । ऋतानि । दीधरत् । वर्तिः । यज्ञम् । परिऽयन् । सुक्रतुऽयसे ॥६॥

---

१. ग-त-भ१.२.४.८–' रुरुचुः । रुच दीप्तौ ' नास्ति ।

हे [v]सुक्रतो सुकर्मन् शोभनप्रज्ञ वा [v]अग्ने [v]यज्ञप्रिये यज्ञैर्हविर्भिर्देवान् प्रीणयित्रे [v]यजमानाय [v]विश्वधायसं विश्वस्य सर्वस्य धारयित्रीं [v]सुदुघां दोग्धुं सुशकां यज्ञरूपिणीं गाम् [v]इषम् इष्यमाणं यागफलरूपं पयः [v]दुहन् क्षारयन् तथा [v]घृतस्नुः घृतेनाज्येन प्रस्नातः ॥ स्नातेरौणादिकः कुप्रत्ययः॥ यद्वा। घृतो[1] दीप्तः[1] स्नुः सानुः समुच्छ्रितो ज्वालासमूहो यस्य स तथोक्तः ॥ 'पदादिषु मांस्मूर्त्स्नूनामुपसंख्यानम्' (पा. सू. ६. १. ६३. १) इति सानुशब्दस्य स्नुभावः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ ईदृशस्त्वं [v]त्रिः त्रिवारमावृत्तानि [v]ऋतानि सत्यभूतानि पृथिव्यादीनि त्रीणि स्थानानि । यद्वा[2] गार्हपत्यादीनि स्थानानि[2] [v]दीयत् दीपयन् [v]वर्तिः सर्वं यज्ञगृहं सर्वमनुष्ठीयमानं यागं च [v]परियन् परितो गच्छन् तत्तद्यज्ञगृहं तं तं यज्ञं च प्रामुवन् [v]सुक्रत्वयसे। शोभनं क्रतुं यज्ञमात्मन इच्छसि । यद्वा। शोभनः क्रतुर्यस्यासौ सुक्रतुर्यजमानः। स इवाचरसि। स यथा सम्यगनुष्ठाने प्रवर्तते एवं त्वमपि स्वयमेव यागस्थ सम्यग्निष्पत्त्यर्थं प्रवर्तस इत्यर्थः ॥

त्वामिदस्या उषसो व्युष्टिषु दूतं कृण्वाना अयजन्त मानुषाः ।
त्वां देवा महयाय्याय वावृधुराज्यमग्ने निमृजन्तो अध्वरे ॥ ७ ॥

त्वाम् । इत् । अस्याः । उषसः । विऽउष्टिषु । दूतम् । कृण्वानाः । अयजन्त । मानुषाः ।
त्वाम् । देवाः । महयाय्याय । ववृधुः । आज्यम् । अग्ने । निऽमृजन्तः । अध्वरे ॥ ७ ॥

[v]अस्याः इदानीं दृश्यमानायाः [v]उषसः [v]व्युष्टिषु विवासनेषु प्रभातेषु सत्सु हे [v]अग्ने [v]त्वामित् त्वामेव देवानां [v]दूतं [v]कृण्वानाः कुर्वाणाः [v]मानुषाः मनुष्याः [v]अयजन्त यजन्ति । सर्वदेवात्मकं त्वामेव यजन्तीत्यर्थः । तथा [v]देवाः अपि [v]त्वां [v]महयाय्याय पूजायै ॥ 'मह पूजायाम्' । अस्मादौणादिको भाव आय्यप्रत्ययः ॥ आत्मनः पूजार्थं [v]वावृधुः वर्धयन्ति । किं कुर्वन्तः । [v]अध्वरे । ध्वरो हिंसानिमित्तः प्रत्यवायः । तद्रहिते यागे [v]आज्यम् । उपलक्षणमेतत् । आज्योपलक्षितं सर्वं हविः [v]निमृजन्तः त्वयि निमार्जयन्तः । प्रक्षिपन्त इत्यर्थः ॥

नि त्वा वसिष्ठा अहन्त वाजिनं गृणन्तो अग्ने विदथेषु वेधसः ।
रायस्पोषं यजमानेषु धारय यूयं पात स्वस्तिभिः सदा नः ॥ ८ ॥

नि । त्वा । वसिष्ठाः । अहन्त । वाजिनम् । गृणन्तः । अग्ने । विदथेषु । वेधसः ।
रायः । पोषम् । यजमानेषु । धारय । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥ ८ ॥

हे [v]अग्ने [v]विदथेषु । विदन्त्यस्मिन् यष्टव्यान् देवानिति विदथो यज्ञः । तेषु [v]वेधसः कर्मणां विधातारः [v]गृणन्तः स्तुवन्तः [v]वसिष्ठाः वसिष्ठपुत्रा ऋषयः [v]वाजिनम् अन्नवन्तं बलवन्तं वात्वां[3] [v]नि [v]अहन्त नितरामाहूयन् । अस्ताविषुर्वा ॥ हेझो लुकि 'निसमुपविभ्यो ह्वः' (पा. सू. १.३. ३०) इत्यात्मनेपदम् । 'आत्मनेपदेष्वन्यतरस्याम्' (पा. सू.३.१.५४) इति श्लेरकादेशः । वसिष्ठशब्दाद्विहितस्यापत्यार्थप्रत्ययस्य 'अत्रिभृगुकुत्स०' (पा. सू. २. ४. ६५) इत्यादिना बहुषु लुक् ॥ स त्वं [v]यजमानेषु अस्मासु [v]रायः धनस्य [v]पोषं पुष्टं [v]धारय अवस्थापय ॥ 'ऊडिदम्०' इत्यादिना रैशब्दात् षष्ठ्या उदात्तत्वम् । 'षष्ठ्याः पतिपुत्र०' (पा. सू. ८. ३. ५३) इति विसर्जनीयस्य सत्वम् ॥ गतमन्यत् एकस्मिन्नप्यग्नौ पूजार्थं बहुवचनम् ॥ ॥ ६ ॥

१. त१.२.३.६.७.८-भ८-घृतदीप्तः; भ१.२.७-घृतवद्दीप्तः । २. ग-त-भ१.४.७.८-'यद्वा... स्थानानि' नास्ति । ३. भ७-त्वा त्वां ।

' अयं वेनः ' इत्यष्टर्चमेकादशं सूक्तं भार्गवस्य वेनस्यार्षं त्रैष्टुभम्। वेनो देवता। तथा चानुक्रान्तम्—' अयं वेनो वैन्यम् ' इति। प्रवर्ग्येऽभिष्टव आद्यानुवक्तव्या। सूत्रितं च—' स्रुचे द्रप्सस्यायं वेनश्चोदयत्पृश्निगर्भाः ' (आश्व. श्रौ. ४. ६) इति। वैश्वदेवशस्त्रेऽप्येषा धाय्या। सूत्रितं च—' तक्षन्नथमयं वेनश्चोदयत्पृश्निगर्भाः ' (आश्व. श्रौ. ५. १८) इति ॥

अयं वेनश्चोदयत्पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने।
इमम्पां संगमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति ॥ १ ॥

अयम्। वेनः। चोदयत्। पृश्निऽगर्भाः। ज्योतिःऽजरायुः। रजसः। विऽमाने।
इमम्। अपाम्। सम्ऽगमे। सूर्यस्य। शिशुम्। न। विप्राः। मतिऽभिः। रिहन्ति ॥१॥

वेनः कान्त एतत्संज्ञो मध्यस्थानो देवः ज्योतिर्जरायुः। ज्योतिर्द्योतमानो मेघो जरायुः। उदरे गर्भो येन वेष्टितोऽवतिष्ठते तज्जरायु। तदिव वेष्टको यस्य स तथोक्तः। मेघमध्ये गर्भवदवस्थित इत्यर्थः। विमाने। विमीयन्ते[1] निर्मीयन्ते[1] अस्मिन्नाप इति विमानमन्तरिक्षम्। रजसः उदकस्य निर्मातर्यन्तरिक्षे स्थितः सन् अयं वेनः पृश्निगर्भाः। पृश्निरादित्यः। तस्य गर्भभूताः। यद्वा। पृश्नयः सप्तोज्ज्वलवर्णाः सूर्यरश्मयः तेषां गर्भभूता अन्तरिक्षस्था अपः चोदयन्। पृथिवीं प्रति प्रेरयति। अपाम् उदकानामान्तरिक्ष्याणां सूर्यस्य च संगमे संगमनेऽन्तरिक्षे स्थितम् इमं वेनं विप्राः मेधाविनः स्तोतारः मतिभिः स्तुतिभिः रिहन्ति। रिहतिरर्चतिकर्मा। अर्चन्ति। पूजयन्ति। स्तुवन्तीत्यर्थः। शिशुं न। यथा बालं पुत्रं मातापित्राद्या बान्धवाः स्तुतिपदैरुपलालयन्ति तद्वत् ॥

तस्मिन्नेवाभिष्टवे ' समुद्रादूर्मिम् ' इत्येषा। सूच्यते हि—' समुद्रादूर्मिमुदियर्ति वेनो द्रप्सः समुद्रमभि यज्जिगाति ' (आश्व. श्रौ. ४. ७) इति ॥

समुद्रादूर्मिमुदियर्ति वेनो नभोजाः पृष्ठं हर्यतस्य दर्शि।
ऋतस्य सानावधि विष्टपि भ्राट् समानं योनिमभ्यनूषत व्राः ॥ २ ॥

समुद्रात्। ऊर्मिम्। उत्। इयर्ति। वेनः। नभःऽजाः। पृष्ठम्। हर्यतस्य। दर्शि।
ऋतस्य। सानौ। अधि। विष्टपि। भ्राट्। समानम्। योनिम्। अभि। अनूषत। व्राः॥२॥

समुद्रवन्त्यस्मादाप इति समुद्रमन्तरिक्षम्। तस्मात् ऊर्मिं जलसमूहम् अयं वेनः उदियर्ति उद्गमयति। अधः पातयतीत्यर्थः। कीदृशः। नभोजाः। नभस्याकाशे - - -। इमं वेनमभि शब्दायन्ते ॥ ' नु स्तुतौ '। कुटादिः। छान्दसो लुङ् ॥

समानं पूर्वीरभि वावशानास्तिष्ठन् वत्सस्य मातरः सनीळाः।
ऋतस्य सानावधि चक्रमाणा रिहन्ति मध्वो अमृतस्य वाणीः ॥ ३ ॥

समानम्। पूर्वीः। अभि। वावशानाः। तिष्ठन्। वत्सस्य। मातरः। सऽनीळाः।
ऋतस्य। सानौ। अधि। चक्रमाणाः। रिहन्ति। मध्वः। अमृतस्य। वाणीः ॥ ३ ॥

१. त-भ-विमायंते निर्मायंते।

[v]पूर्वीः बह्वयः [v]समानं वेनस्यात्मनश्च साधारणं स्थानं प्राप्य [v]अभि [v]वावशानाः अभितः शब्दायमानाः । यद्वा । तमेव वेनमभिकामयमानाः । [v]वत्सस्य वत्सस्थानीयस्य वैद्युताग्नेः [v]मातरः मातृभूताः [v]सनीळाः समाननिलया एवंविधा आन्तरिक्ष्या आपः [v]तिष्ठन् तिष्ठन्ति । अपि च [v]ऋतस्य उदकस्य [v]सानावधि सानौ[1] समुच्छ्रितेऽन्तरिक्षस्थाने [v]चक्रमाणाः प्रवर्तमानाः [v]मध्वः मधुरस्य [v]अमृतस्य उदकस्य [v]वाणीः वाण्यः शब्दाः [v]रिहन्ति इमं वेनमर्चन्ति । अलंकुर्वन्तीत्यर्थः ॥

जानन्तो रूपमकृपन्त विप्रा मृगस्य घोषं महिषस्य हि ग्मन् ।
ऋतेन यन्तो अधि सिन्धुमस्थुर्विदद्गन्धर्वो अमृतानि नाम ॥ ४ ॥

जानन्तः । रूपम् । अकृपन्त । विप्राः । मृगस्य । घोषम् । महिषस्य । हि । ग्मन् ।
ऋतेन । यन्तः । अधि । सिन्धुम् । अस्थुः । विदत् । गन्धर्वः । अमृतानि । नाम ॥ ४ ॥

[v]विप्राः मेधाविनः स्तोतारोऽस्य वेनस्य [v]रूपं [v]जानन्तः [v]अकृपन्त स्तुवन्ति । कृपतिः स्तुतिकर्मा । कथमस्य रूपं जानन्तीत्यत आह । [v]मृगस्य अन्वेषणीयस्य [v]महिषस्य । महन्नामैतत् । महतो वेनस्य [v]घोषं गर्जितलक्षणं मेघस्थं शब्दं [v]हि यस्मात् [v]ग्मन् अभिगच्छन्ति अतस्तदीयं रूपं जानन्तीत्यर्थः ॥ गमेश्छान्दसे लङि ' बहुलं छन्दसि ' इति शपो लुक् । ' गमहन° ' इत्युपधालोपः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' (पा. सू. ६. ४. ७५) इत्यडभावः । अपि च [v]ऋतेन सत्यभूतेन स्तोत्रेण यज्ञेन वा [v]यन्तः तं वेनं गच्छन्तः प्राप्नुवन्तो जनाः [v]सिन्धुं स्यन्दनशीलं जलसमूहम् [v]अधि [v]अस्थुः अधितिष्ठन्ति । तैषां स वेनो वृष्टिं करोतीत्यर्थः । तत्र किं कारणमिति चेत् यतोऽयं [v]गन्धर्वः गवामुदकानां धर्ता वेनः [v]अमृतानि अमरणहेतुभूतानि [v]नाम । उदकनामैतत् । नमनशीलानि उदकानि [v]विदत् वेद जानाति । तस्य वशे वर्तन्त इत्यर्थः । अतस्तदुक्तानां वृष्टिः सुलभा ॥

अप्सरा जारमुपसिष्मियाणा योषा बिभर्ति परमे व्योमन् ।
चरत्प्रियस्य योनिषु प्रियः सन्त्सीदत्पक्षे हिरण्यये स वेनः ॥ ५ ॥

अप्सराः । जारम् । उपऽसिष्मियाणा । योषा । बिभर्ति । परमे । विऽओमन् ।
चरत् । प्रियस्य । योनिषु । प्रियः । सन् । सीदत् । पक्षे । हिरण्यये । सः । वेनः ॥ ५ ॥

[v]अप्सराः अपां सारथिष्वप्सु क्रीडार्थं सरन्ती वा [v]उपसिष्मियाणा कान्तसमीपमुपगम्येषद्धसन्ती ॥ ' स्मिङ् ईषद्धसने ' । छान्दसो लिट् । तस्य ' लिटः कानज्वा ' इति कानच् ॥ ईदृशी [v]योषा स्त्री विद्युद्रूपा [v]जारम् अपां जरयितारम् । यद्वा । जार उपपतिः । स इव प्रियम् । इमं वेनं [v]परमे उत्कृष्टे [v]व्योमन् व्योमन्यन्तरिक्षे [v]बिभर्ति पोषयति । धारयति वा । यथा काचिद्रूपवती योषिज्जारमुपगम्येषद्धसन्ती तं निर्जने स्थले पुष्णाति तद्वदनेन वेनेन विद्युद्रूपवत इत्यर्थः । [v]प्रियस्य अस्य वेनस्य [v]योनिषु स्थानेषु [v]चरत् । विद्युद्रूपा योषिच्चरति गच्छति । अभिसारिकावृत्त्या स्वयमेव गच्छति । [v]सः च [v]वेनः [v]प्रियः अस्या अनुकूलतमः [v]सन् [v]हिरण्यये हिरण्मये हिरण्मयवद्भास्वरे हितरमणीयरूपे वा [v]पक्षे आत्मनः पक्षभूते मेघे [v]सीदत् सीदति । तया सहोपविशति ॥ ॥ ७ ॥

अभिष्टवे ' नाके सुपर्णम् ' इत्येषा । सूत्रितं च—' नाके सुपर्णमुप यत्पतन्तमिति समाप्य प्रणवेनोपविशेत् ' (आश्व. श्रौ. ४. ७) इति ॥

---

१. ग-त४.५-म२–' सानौ ' नास्ति ।

नाकें सुपर्णमुप यत्पतन्तं हृदा वेनन्तो अभ्यचक्षत त्वा ।
हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम् ॥ ६ ॥

नाकें । सुऽपर्णम् । उप । यत् । पतन्तम् । हृदा । वेनन्तः । अभि । अचक्षत । त्वा ।
हिरण्यऽपक्षम् । वरुणस्य । दूतम् । यमस्य । योनौ । शकुनम् । भुरण्युम् ॥ ६ ॥

हे वेन [v]त्वा त्वां [v]हृदा हृदयेन मनसा [v]वेनन्तः कामयमानाः स्तोतारः [v]नाके अन्तरिक्षे [v]यत्[1] यदा[1] [v]अभ्यचक्षत अभिपश्यन्ति तदानीं त्वम् [v]उप आगच्छसीति शेषः । कथंभूतम् । [v]सुपर्णं शोभनपतनं [v]पतन्तम् अन्तरिक्षे गच्छन्तं [v]हिरण्यपक्षं हिरण्मयाभ्यां पक्षाभ्यामुपेतं [v]वरुणस्य जलाभिमानिनो देवस्य [v]दूतं चारं[2] [v]यमस्य नियामकस्य वैद्युताग्नेः [v]योनौ स्थानेऽन्तरिक्षे [v]शकुनं पक्षिरूपेण वर्तमानं [v]भुरण्युं भर्तारम् । यद्वा । वृष्टिप्रदानादिना सर्वस्य जगतः पोषकम् ॥ 'भुरण धारणपोषणयोः' । कण्ड्वादिः । अस्मादौणादिक उप्रत्ययः ॥

ऊर्ध्वो गन्धर्वो अधि नाकें अस्थात्प्रत्यङ् चित्रा बिभ्रदस्यायुधानि ।
वसानो अत्कं सुरभिं दृशे कं स्वर्णं नाम जनत प्रियाणि ॥ ७ ॥

ऊर्ध्वः । गन्धर्वः । अधि । नाकें । अस्थात् । प्रत्यङ् । चित्रा । बिभ्रत् । अस्य । आयुधानि ।
वसानः । अत्कम् । सुरभिम् । दृशे । कम् । स्वः । न । नाम । जनत । प्रियाणि ॥ ७ ॥

[v]ऊर्ध्वः उपरिदेशे वर्तमानः [v]गन्धर्वः गवामुदकानां धर्ता ॥ 'गवि गन् धृञो वः' इति गोशब्दोपपदात् 'धृञ् धारणे' इत्यस्माद्वप्रत्यय उपपदस्य गन्भावश्च ॥ ईदृशो वेनः [v]प्रत्यङ् अस्मत्प्रत्यञ्चनोऽभिमुखः सन् [v]नाके [v]अधि अन्तरिक्षे [v]अस्थात् तिष्ठति । किं कुर्वन् । [v]अस्य आत्मनः स्वभूतानि [v]चित्रा चित्राणि चायनीयान्याश्चर्यभूतानि वा [v]आयुधानि [v]बिभ्रत् धारयन् ॥ बिभर्तेः शतरि 'भृञामित्' इत्यभ्यासस्येत्वम् । 'नाभ्यस्ताच्छतुः' इति नुम्प्रतिषेधः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥ तथा [v]सुरभिं शोभनम् [v]अत्कम् आत्मीयं व्याप्तं रूपं [v]वसानः सर्वत्राच्छादयन् । किमर्थम् । [v]दृशे दर्शनार्थम् ॥ 'दृशे विख्ये च' इति केप्रत्ययान्तो निपात्यते ॥ [v]कम् इति पूरणः । तत्र दृष्टान्तः । [v]स्वर्णं । स्वः शोभनारण आदित्यः । स यथात्मीयं रूपं दर्शनाय सर्वत्राच्छादयति तद्वत् । तदनन्तरं [v]नाम नामानि नमनशीलान्युदकानि [v]प्रियाणि सर्वेषामनुकूलानि [v]जनत जनयति । वृष्टिमुत्पादयतीत्यर्थः ॥

प्रवर्ग्येऽभिष्टवे 'द्रप्सः समुद्रम्' इत्येषा । सूत्रितं च—'द्रप्सः समुद्रमभि यज्जिगाति सखे सखायमभ्या ववृत्स्व' (आश्व. श्रौ. ४. ७) इति ॥

द्रप्सः समुद्रमभि यज्जिगाति पश्यन् गृध्रस्य चक्षसा विधर्मन् ।
भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि ॥ ८ ॥

द्रप्सः । समुद्रम् । अभि । यत् । जिगाति । पश्यन् । गृध्रस्य । चक्षसा । विऽधर्मन् ।
भानुः । शुक्रेण । शोचिषा । चकानः । तृतीये । चक्रे । रजसि । प्रियाणि ॥ ८ ॥

१. ग-त-'यद्यदा' नास्ति । २. ग-चामरं; त१.२.३.६.७.८-म१.२.७.८-चारपरं ।

[v]विधर्मन् विधर्मणि विधारकेऽन्तरिक्षे स्थितः [v]द्रप्सः द्रवणशीलः । यद्वा । द्रप्सा उदकबिन्दवः । तद्वान् ॥ अर्शआदित्वादच् । [v]गृभ्रस्य गृधो रसानभिकाङ्क्षतः सूर्यस्य [v]चक्षसा तेजसा [v]पश्यन् प्रकाशमानो वेनः [v]यत् यदा [v]समुद्रं समुन्दनशीलं मेघम् [v]अभि [v]जिगाति अभिगच्छति तदानीं [v]भानुः सूर्यः [v]शुक्रेण शुभ्रेण [v]शोचिषा तेजसा [v]तृतीये [v]रजसि लोके [v]चकानः दीप्यमानः [v]प्रियाणि सर्वेषामभीष्टान्युदकानि [v]चक्रे करोति ॥ ॥८॥

'इमं नो अग्ने' इति नवर्चं द्वादशं सूक्तम् । द्वितीयाद्याभिस्तिसृभिरग्निर्ऋषिर्भूत्वा स्वात्मानं देवतारूपिणमस्तौत् । अतस्तासां स एवर्षिर्देवता च । शिष्टाभिरग्निवरुणसोमा अस्तुवन् । अतस्तासां षण्णां त ऋषयः । आद्याग्नेयी । नवमीन्द्रदेवत्या । शिष्टासु चतसृषु लिङ्गोक्तदेवता । सप्तमी जगती शिष्टास्त्रिष्टुभः । तथा चानुक्रान्तम्—'इमं नो नवैन्द्युत्तमा निहवोऽग्निवरुणसोमानामाद्याग्नेयी तिस्रआग्नेरात्मस्तवः शिष्टा यथानिपातं सप्तमी जगती' इति । गतो विनियोगः ॥

इमं नो अग्न उप यज्ञमेहि पञ्चयामं त्रिवृतं सप्ततन्तुम् ।
असो हव्यवाळुत नः पुरोगा ज्योगेव दीर्घं तम आशयिष्ठाः ॥ १ ॥

इमम् । नः । अग्ने । उप । यज्ञम् । आ । इहि । पञ्चऽयामम् । त्रिऽवृतम् । सप्तऽतन्तुम् । असः । हव्यऽवाट् । उत । नः । पुरःऽगाः । ज्योक् । एव । दीर्घम् । तमः । आ । अशयिष्ठाः ॥ १ ॥

भ्रातृषु हविर्वहनेषु मृतेषु मरणभीत्या कृतपलायनं गुहायां निगूढमग्निमन्याद्याः सूक्तद्रष्टार ऋषयोऽनयाह्वयन् । हे [v]अग्ने [v]नः अस्माकम् [v]इमं [v]यज्ञम् [v]उप [v]एहि उपागच्छ । प्रामुहि । मा पलायिष्ठाः। कीदृशम् । [v]पञ्चयामं यजमानपञ्चमैर्ऋत्विग्भिर्नियमितम् । यद्वा । धानाकरम्भादिभिः पञ्चभिः हविर्भिः पञ्चभिः प्रयाजैर्वा प्राप्तम् । [v]त्रिवृतं पाकयज्ञहविर्यज्ञसोमयज्ञभेदेन सवनत्रयात्मना वा त्रिगुणं [v]सप्ततन्तुं सप्त तन्तवस्तनितारः कर्मणां विस्तारयितारो होत्राद्याः सप्त वषट्कर्तारो यस्य । यद्वा । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोळशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्तधा विस्तीर्यमाणम्[1] । ईदृशं यज्ञमुपगत्य चानन्तरं [v]नः अस्माकं [v]हव्यवाट् हव्यानां हवियां वोढा [v]असः भव ॥ अस्तेर्लेट्यडागमः ॥ [v]उत अपि च [v]नः अस्माकं [v]पुरोगाः पुरतो गन्ता भव ॥ जनसनखनक्रमगमो विट् । 'विड्वनोरनुनासिकस्यात्' इत्यात्वम् ॥ [v]ज्योक् चिरकालम् [v]एव अस्मान् परित्यज्य [v]दीर्घं [v]तमः महदन्धकारं गुहायाम् [v]आशयिष्ठाः । आस्थाय[2] शयनमकार्षीः । इत ऊर्ध्वं तस्मात् स्थानादस्मानागच्छेत्यर्थः ॥

अदेवादेवः प्रचता गुहा यन् प्रपश्यमानो अमृतत्वमेमि ।
शिवं यत्सन्तमशिवो जहामि स्वात्सख्यादरणीं नाभिमेमि ॥ २ ॥

अदेवात् । देवः । प्रऽचता । गुहा । यन् । प्रऽपश्यमानः । अमृतऽत्वम् । एमि ।
शिवम् । यत् । सन्तम् । अशिवः । जहामि । स्वात् । सख्यात् । अरणीम् । नाभिम् । एमि ॥ २ ॥

[v]अदेवात् अदेवनशीलात् [v]गुहा गुहायां वर्तमानात् ॥ 'सुपां सुलुक्०' इति सप्तम्या लुक् ॥ [v]प्रचता देवानां प्रयाजेन हेतुना [v]यन् निर्गच्छन् [v]देवः देवनशीलोऽहं [v]प्रपश्यमानः देवैर्मदर्थं कल्पितं प्रयाजानुयाजादिलक्षणं हविर्भागं प्रपश्यमानो निरीक्षमाणः सन् [v]अमृतत्वमेमि । मरणधर्मराहित्यं देवत्वं प्राप्नोमि ॥ इशेर्व्यत्ययेनात्मनेपदम् ॥ हविर्वहनाजीतः पलायितोऽवादिषु स्थानेषु

---

१. ग-त१.२.३.६.७.८-म१.२.४.८—विस्तार्यमाणं । २. त१.२.३.७-म१.२.४.८—आस्थापय ।

निगूढः पुनर्देवैर्हविर्वहनाय प्रार्थ्यमानस्तैर्दत्तेन हविषा अहं देवत्वं प्राप्तवानस्मीत्यर्थः । यद्यप्यहं गुहातो निर्गत्य प्रकाशमानः सन् शोभनं यज्ञं निवर्तयामि तथापि ᵛशिवं शोभनं ᵛसन्तं भवन्तं यज्ञम् ᵛअशिवः अशोभनरूपोऽप्रकाशमानः सन् ᵛयत् यस्मिन् समाप्तिकाले ᵛजहामि परित्यजामि तदानीं ᵛनाभिं नहनशीलां बन्धनशीलाम् ᵛअरणीम् अश्वत्थमेव ᵛस्वात्सख्यात् आत्मीयात् सख्यित्वाच्चिरकालमश्वरूपोऽहं तत्र न्यवात्समिति स्नेहवशात् ᵛएमि प्राप्नोमि ॥

पश्यन्नन्यस्या अतिथिं वयाया ऋतस्य धाम वि मिमे पुरूणि ।
शंसामि पित्रे असुराय शेवमयज्ञियाद्यज्ञियं भागमेमि ॥ ३ ॥

पश्यन् । अन्यस्याः । अतिथिम् । वयायाः । ऋतस्य । धाम । वि । मिमे । पुरूणि ।
शंसामि । पित्रे । असुराय । शेवम् । अयज्ञियात् । यज्ञियम् । भागम् । एमि ॥ ३ ॥

मम स्थानभूता या पृथिवी ततः ᵛअन्यस्याः ᵛवयायाः गन्तव्यायाः दिवः संबन्धिनम् ᵛअतिथिं सततगामिनं सूर्यं ᵛपश्यन्[1] जानन् सूर्यस्य गतिमनुसृत्य वसन्तादिकाले ᵛऋतस्य यज्ञस्य ᵛधाम धामानि शरीराणि ᵛपुरूणि बहूनि ᵛवि ᵛमिमे निर्मिमे निष्पादयामि । ततः ᵛपित्रे पितृभूताय द्युलोकवर्तिने देवजनाय ᵛअसुराय शत्रुक्षेपणकुशलाय ᵛशेवं सुखमुद्दिश्य होता भूत्वा अहं उक्थानि ᵛशंसामि । यत एवं तस्मात्कारणात् ᵛअयज्ञियात् यज्ञानर्हात्प्रदेशान्निर्गत्य ᵛयज्ञियं यज्ञार्हं वेदिलक्षणं भूभागं हविर्लक्षणं वा ᵛएमि प्राप्नोमि ॥ यज्ञशब्दादर्हार्थे 'यज्ञर्त्विग्भ्यां घखञौ' (पा. सू. ५. १. ७१) इति घप्रत्ययः ॥

बह्वीः समा अकरमन्तरस्मिन्निन्द्रं वृणानः पितरं जहामि ।
अग्निः सोमो वरुणस्ते च्यवन्ते पर्यावर्द्राष्ट्रं तदवाम्यायन् ॥ ४ ॥

बह्वीः । समाः । अकरम् । अन्तः । अस्मिन् । इन्द्रम् । वृणानः । पितरम् । जहामि ।
अग्निः । सोमः । वरुणः । ते । च्यवन्ते । परिऽआवर्त् । राष्ट्रम् । तत् । अवामि । आऽयन् ॥ ४ ॥

ᵛअस्मिन् वेदिलक्षणस्थाने ᵛबह्वीः ᵛसमाः बहून् संवत्सरान् ᵛअकरम् अकार्षम् । चिरकालं न्यवात्सम् । तत्र ᵛइन्द्रं ᵛवृणानः संभजमानः ᵛपितरम् उत्पादकमरण्यात्मकं ᵛजहामि परित्यजामि । यदा त्वहं देवेभ्यो निर्गत्य गुहायां निगूढः तदा ᵛते देवाः ᵛअग्निः ᵛसोमो ᵛवरुणः च ᵛच्यवन्ते । राष्ट्रात् प्रच्युता अभवन् । एकस्याप्यग्नेर्हविर्वोढृत्वरूपेण देवतात्मना च पृथक्त्वात्परोक्षनिर्देशः । ᵛआयन्[2] पुनरागच्छन्नहं यद्राष्ट्रमसुरैरपहृतं ᵛपर्यावर्त् पर्यावर्तमानं मदभिमुखं पुनरावर्तमानं ᵛतत् ᵛराष्ट्रं राज्यं यज्ञभूमिम् ᵛअवामि असुरेभ्यो रक्षामि ॥ पर्यावर्त् । उपसृष्टादृतेः 'अन्येभ्योऽपि दृश्यन्ते' (पा. सू. ३. २. ७५) इति क्विप् । 'रात्सस्य' (पा. सू. ८. २. २४) इति नियमात् 'संयोगान्तस्य०' (पा. सू. ८. २. २३) इति लोपाभावः ॥

निर्मीया उ त्ये असुरा अभूवन् त्वं च मा वरुण कामयासे ।
ऋतेन राजन्ननृतं विविञ्चन् मम राष्ट्रस्याधिपत्यमेहि ॥ ५ ॥

---

१. ग-त१.२.३.६.७.८-म२.४.८–संपश्यन् । २. त१.३.६.७.८-म१.२.४.५.८–आयन् पुरागत्य ।

निःऽमायाः । ऊँ इति । त्ये । असुराः । अभुवन् । त्वम् । च । मा । वरुण । का मयासे ।
ऋतेन । राजन् । अनृतम् । विऽविश्वन् । ममं । राष्ट्रस्यं । अधिऽपत्यम् । आ । इहि ॥५॥

त्ये ते असुराः मय्यागते सति निर्मायाः मायारहिताः अभूवन् । आसुर्यः सर्वा माया मया दग्धा आसन्नित्यर्थः । हे वरुण त्वं च ॥ अयं चशब्दश्चेदर्थे वर्तमानश्चणिति निपातान्तरम् । अनेन युक्तत्वात् कामयासे इति तिङ्विभक्तेः ' निपातैर्यद्यदिहन्त° ' (पा. सू. ८. १. ३०) इति निघातप्रतिषेधः॥ हे वरुण त्वं चेत् मा कामयासे मां कामयेथाः तर्हि हे राजन् ईश्वर ऋतेन सत्येनास्मदीयेन कर्मणा अनृतम् असत्यभूतं मायामयमासुरं चरित्रं विविञ्चन् पृथक्कुर्वन् अपसारयन् मम राष्ट्रस्य मया यत्साधितं राज्यं तस्य अधिपत्यम् अधिपतित्वमीश्वरत्वम् एहि प्रामुहि ॥ ॥९॥

इदं स्वरिदमिदास वाममयं प्रकाश उर्वन्तरिक्षम् ।
हनाव वृत्रं निरेहि सोम हविष्मा सन्तं हविषा यजाम ॥ ६ ॥

इदम् । स्वः । इदम् । इत् । आस । वामम् । अयम् । प्रऽकाशः । उरु । अन्तरिक्षम् ।
हनाव । वृत्रम् । निःऽएहि । सोम । हविः । त्वा । सन्तम् । हविषा । यजाम ॥ ६ ॥

इयमृगग्नेर्वरुणस्य वा वाक्यम् । हे सोम इदं स्वः अयं द्युलोकः यद्वायं शोभनारणः सूर्यः इदमित् इदमेव वामं वननीयम् आस बभूव । इदंशब्देन प्रकृतं स्वः परामृश्यते । अयं च प्रकाशः प्रकाशस्याधारभूतः उरु विस्तीर्णमिदम् अन्तरिक्षं हे सोम एतत्सर्वं[1] पश्य । अत एव अस्मिन्समये[2] आवां वृत्रं हनाव हिनसाव[3] । तदर्थं निरेहि निष्क्रम्यागच्छ । हविः सन्तं लतारूपेण हविर्भवन्तं देवतात्मानं त्वां हविषा चरुपुरोडाशादिना वयं यजाम ॥

कविः कवित्वा दिवि रूपमासजदग्रभूती वरुणो निरपः सृजत् ।
क्षेमं कृण्वाना जनयो न सिन्धवस्ता अस्य वर्ण शुचयो भरिभ्रति॥ ७ ॥

कविः । कविऽत्वा । दिवि । रूपम् । आ । असजत् । अग्रऽभूती । वरुणः । निः । अपः । सृजत् ।
क्षेमम् । कृण्वानाः । जनयः । न । सिन्धवः । ताः । अस्य । वर्णम् । शुचयः । भरिभ्रति ॥ ७ ॥

कविः क्रान्तदर्शी मित्रः कवित्वा कवित्वेन ॥ ' सुपां सुलुक्° ' इति तृतीयाया आकारः ॥ क्रान्तदर्शनेन दिवि द्युलोके रूपम् आत्मीयं तेजः आसजत् आसक्तं करोति ॥ ' षन्ज संगे ' । अस्माल्लडि शपि ' दंशसञ्जस्वञ्जां शपि ' (पा. सू. ६. ४. २५) इति नलोपः ॥ अग्रभूती अग्रभूत्या ॥ ' सुपां सुलुक्° ' इति तृतीयायाः पूर्वसवर्णदीर्घः ॥ अग्रभूष्णुना[4] अल्पेनैव यत्नेन वरुणः मेघात् अपः निः सृजत् निरगमयत् । वरुणेन विसृष्टास्ता आपः सिन्धवः स्यन्दनशीला नद्यो भूत्वा जनयो न जाया इव यथा जायाः पत्युः क्षेमकारिण्यो भवन्ति तथा क्षेमं कुर्वाणा जगतो रक्षणं कुर्वाणाः शुचयः शुद्धा दीप्यमाना वा अस्य वरुणस्य वर्णं शुक्लं भास्वररूपं भरिभ्रति । भृशं बिभ्रति धारयन्ति ॥ दाधर्त्यादिसूत्रे (पा. सू. ७. ४. ६५) ' भरिभ्रत् ' इति निपातनाद्बिभर्तेः यङ्लुक्यभ्यासस्य जश्त्वाभावः[5] ॥

---

१. त-भ१.१.४.८–एतत्सोमं । २. ग-त-भ१.२.८–एतस्मिन् समय; भ७–एतत्समय । ३. त१.२.३.६.७.८-भ१.४.७.८–हिनवाव । ४. त-भ–अभभूणा । ५. ग-त१.२.३.६.७.८-भ१.४.७.८–जश्त्वादेशः ।

ता अस्य ज्येष्ठमिन्द्रियं सचन्ते ता ईमा क्षेति स्वधया मदन्तीः ।
ता ईं विशो न राजानं वृणाना बीभत्सुवो अप वृत्रादतिष्ठन् ॥ ८ ॥

ताः । अस्य । ज्येष्ठम् । इन्द्रियम् । सचन्ते । ताः । ईम् । आ । क्षेति । स्वधया । मदन्तीः ।
ताः । ईम् । विशः । न । राजानम् । वृणानाः । बीभत्सुवः । अप । वृत्रात् । अतिष्ठन् ॥८॥

[v]ताः पूर्वोक्ता वृष्टा आपः [v]अस्य वरुणस्य [v]ज्येष्ठं वृद्धतमम् [v]इन्द्रियं वीर्यं [v]सचन्ते समवयन्ति संभजन्ते । धारयन्तीत्यर्थः । 'आपो वरुणस्य पत्नय आसन्' (तै. सं. ५.५.४.१) इति श्रुतेः । [v]स्वधया । अन्ननामैतत् । हविर्लक्षणेनान्नेन [v]मदन्तीः माद्यन्तीः । यद्वा । व्रीह्याद्युत्पादनद्वारेण हविषा मादयन्तीः । [v]ताः अपः [v]ईम् अयं वरुणः [v]आ [v]क्षेति अभिगच्छति ॥ 'क्षि निवासगत्योः' । छान्दसो विकरणस्य लुक् ॥ [v]ताः च [v]ईम् एनं वरुणं [v]विशो [v]न विशः प्रजा यथा [v]राजानं स्वामिनं संभजन्ते तथा [v]वृणानाः संभजमानाः [v]बीभत्सुवः भयेन कम्पमानाः । यद्वा । बद्धा वृत्रेणावृताः सत्यः । तस्मिन् हते सति तस्मात् [v]वृत्रात् [v]अप [v]अतिष्ठन् । अपक्रम्य तत्र तत्रावतिष्ठन्ते ॥ 'बध बन्धने' इत्यस्माद्धातोः[1] 'मान्बधदान्शान्भ्यः' (पा. सू. ३.१.६) इति सन् अभ्यासस्य च दीर्घः । 'सनाशंसभिक्ष उः' (पा. सू. ३. २. १६८) इत्युप्रत्ययः । जसि छान्दस उवङादेशः ॥

बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् ।
अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं नि चिक्युः कवयो मनीषा ॥ ९ ॥

बीभत्सूनाम् । सऽयुजम् । हंसम् । आहुः । अपाम् । दिव्यानाम् । सख्ये । चरन्तम् ।
अनुऽस्तुभम् । अनु । चर्चूर्यमाणम् । इन्द्रम् । नि । चिक्युः । कवयः । मनीषा ॥ ९ ॥

[v]बीभत्सूनां कम्पमानावयवानां यद्वा मेघेन बद्धानाम् । हन्ति गच्छतीति हंसः सूर्यः । तं [v]सयुजं सखायम् [v]आहुः । ब्रह्मवादिनः कथयन्ति । एतदेवाह । [v]दिव्यानां दिवि भवानामान्तरिक्षाणाम् [v]अपां [v]सख्ये सख्यित्वे[2] [v]चरन्तं वर्तमानम् । [v]अनुष्टुभम् अनुष्टोभनीयं[3] स्तोतव्यम् । यद्वा । अनुष्टुप्शब्देन तत्संबद्धो यागः स्तुतिर्वा लक्ष्यते । अनुष्टुप्संबद्धं यागमनुष्टुप्छन्दसा युक्तं स्तुतिविशेषं वा । अनुलक्ष्य [v]चर्चूर्यमाणं पुनःपुनश्चरन्तं गच्छन्तम् ॥ चरतेर्यङि 'उपरस्यातः' (पा. सू. ७. ४. ८८) इत्यभ्यासादुत्तरस्याकारस्योत्वम् । 'चरफलोश्च' (पा. सू. ७. ४. ८७) इति नुकि प्राप्ते व्यत्ययेनाभ्यासस्य रुगागमः ॥ एवंगुणविशिष्टम् [v]इन्द्रं [v]कवयः क्रान्तदर्शिन ऋषयः [v]मनीषा मनीषया स्तुत्या [v]नि [v]चिक्युः पूजयन्ति । यद्वा । मनीषा बुद्धया नि चिक्युः जानन्ति ॥ मनीषाशब्दात्तृतीयायाः 'सुपां सुलुक्०' इति लुक् । 'चायृ पूजानिशामनयोः' इत्यस्माच्छान्दसे लिटि 'चायः की' (पा. सू. ६. १.३५) इति प्रकृतेः कीभावः । 'एरनेकाचः०' (पा. सू. ६. ४. ८२) इति यण् ॥ ॥१०॥

'अहम्' इत्यष्टर्चं त्रयोदशं सूक्तम् । अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत् । अतः सर्षिः । सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता । तेन ह्येषा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं[4] भवामीति स्वात्मानं स्तौति । द्वितीया जगती शिष्टाः

---

१. ग-त-भ-इत्यस्मात् । २. त१.२.३.६.७.८-भ-सखित्वं । ३. ग-त-भ-मु-अनुस्तोभनीयं । ४. ग-त४.५-भ-'सर्वं' नास्ति ।

सप्त त्रिष्टुभः। तथा चानुक्रान्तम्—' अहमष्टौ वागाम्भृणी तुष्टावात्मानं द्वितीया जगती ' इति। गतो विनियोगः॥

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥ १॥

अहम्। रुद्रेभिः। वसुऽभिः। चरामि। अहम्। आदित्यैः। उत। विश्वऽदेवैः।
अहम्। मित्रावरुणा। उभा। बिभर्मि। अहम्। इन्द्राग्नी इति। अहम्। अश्विना। उभा॥ १॥

ᵛअहं सूक्तस्य द्रष्टृी वागाम्भृणी यद्ब्रह्म जगत्कारणं तद्रूपा भवन्ती ᵛरुद्रेभिः रुद्रैरेकादशभिः। इत्थंभावे तृतीया। तदात्मना ᵛचरामि। एवं ᵛवसुभिः इत्यादौ तत्तदात्मना चरामीति योज्यम्[1]। तथा ᵛमित्रावरुणा मित्रं च वरुणं च॥ ' सुपां सुलुक्° ' इति द्वितीयाया आकारः॥ ᵛउभा उभौ ᵛअहम् एव ब्रह्मीभूता ᵛबिभर्मि धारयामि। ᵛइन्द्राग्नी अपि ᵛअहम् एव धारयामि। ᵛउभा उभौ ᵛअश्विना अश्विनावपि ᵛअहम् एव धारयामि। मयि हि सर्वं जगच्छुक्तौ रजतमिवाध्यस्तं सदृश्यते। माया च जगदाकारेण विवर्तते। तादृश्या मायाया आधारत्वेनासङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योत्पत्तिः॥

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम्।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये३ यजमानाय सुन्वते॥ २॥

अहम्। सोमम्। आहनसम्। बिभर्मि। अहम्। त्वष्टारम्। उत। पूषणम्। भगम्।
अहम्। दधामि। द्रविणम्। हविष्मते। सुप्रऽअव्ये। यजमानाय। सुन्वते॥ २॥

ᵛआहनसम् आहन्तव्यमभिषोतव्यं ᵛसोमं यद्वा शत्रूणामाहन्तारं दिवि वर्तमानं देवतात्मानं सोमम् ᵛअहम् एव ᵛबिभर्मि। तथा ᵛत्वष्टारम् ᵛउत अपि च ᵛपूषणं ᵛभगं च ᵛअहम् एव बिभर्मि। तथा ᵛहविष्मते हविर्भिर्यक्ताय ᵛसुप्राव्ये शोभनं हविर्देवानां प्रापयित्रे तर्पयित्रे॥ अवनेस्तर्पणार्थात् ' अवितृस्तृतन्त्रिभ्य ईः ' (उ. सू. ३. १५८) इतीकारप्रत्ययः। चतुर्थ्येकवचने यणि ' उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ' इति सुपः स्वरितत्वम्॥ ᵛसुन्वते सोमाभिषवं कुर्वते॥ ' शतुरनुमः° ' इति चतुर्थ्या उदात्तत्वम्॥ ईदृशाय ᵛयजमानाय ᵛद्रविणं धनं यागफलरूपम् ᵛअहम् एव ᵛदधामि धारयामि। एतच्च ब्रह्मणः फलदातृत्वं ' फलमत उपपत्तेः ' (वे. सू. ३. २. ३८) इत्यधिकरणे भगवता भाष्यकारेण समर्थितम्॥

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम्॥ ३॥

अहम्। राष्ट्री। सम्ऽगमनी। वसूनाम्। चिकितुषी। प्रथमा। यज्ञियानाम्।
ताम्। मा। देवाः। वि। अदधुः। पुरुऽत्रा। भूरिऽस्थात्राम्। भूरि। आऽवेशयन्तीम्॥ ३॥

ᵛअहं ᵛराष्ट्री। ईश्वरनामैतत्। सर्वस्य जगत ईश्वरी। तथा ᵛवसूनां धनानां ᵛसंगमनी संगमयित्र्युपासकानां प्रापयित्री। ᵛचिकितुषी यत्साक्षात्कर्तव्यं परं ब्रह्म तज्ज्ञातवती स्वात्मतया

---

१. त४.५—योज्यं। उतापि च आदित्यैः सर्वं चरामि। उतापि च विश्वदेवैश्च।

साक्षात्कृतवती। अत एव ᵛयज्ञियानां यज्ञार्हाणां ᵛप्रथमा मुख्या। या एवंगुणविशिष्टाहं ᵛतां मां ᵛभूरिस्थात्रां बहुभावेन प्रपञ्चात्मनावतिष्ठमानां ᵛभूरि भूरीणि बहूनि भूतजातानि ᵛआवेशयन्तीं जीवभावेनात्मानं प्रवेशयन्तीमीदृशीं मां ᵛपुरुत्रा बहुषु देशेषु ᵛव्यदधुः ᵛदेवाः विदधति कुर्वन्ति। उक्तप्रकारेण वैश्वरूप्येणावस्थानात्[1]। यद्यत्कुर्वन्ति तत्सर्वं मामेव कुर्वन्तीत्यर्थः ॥

मया॑ सो अन्न॑मत्ति॒ यो वि॒पश्य॑ति॒ यः प्राणि॑ति॒ य ई॒ शृ॒णोत्यु॒क्तम् ।
अम॑न्तवो॒ मां त उप॑ क्षियन्ति श्रु॒धि श्रु॑त श्रद्धि॒वं ते॑ वदामि ॥ ४ ॥

मया॑ । सः । अन्न॑म् । अ॒त्ति॒ । यः । वि॒ऽपश्य॑ति । यः । प्राणि॑ति । यः । ई॒म् । शृ॒णोति॑ । उ॒क्तम् ।
अम॑न्तवः । माम् । ते । उप॑ । क्षि॒य॒न्ति॒ । श्रु॒धि । श्रु॒त॒ । श्र॒द्धि॒ऽवम् । ते॒ । व॒दामि॒ ॥ ४ ॥

ᵛयः ᵛअन्नमत्ति ᵛसः भोक्तृशक्तिरूपया ᵛमया एवान्नमत्ति। ᵛयः च ᵛविपश्यति। आलोकयतीत्यर्थः। ᵛयः च ᵛप्राणिति श्वासोच्छ्वासरूपं व्यापारं करोति सोऽपि मयैव। यश्च ᵛउक्तं ᵛशृणोति॥ 'श्रु श्रवणे'। 'श्रुवः श्रृ च' इति श्रुप्रत्ययः। धातोः श्रृभावः ॥ य ईदृशीमन्तर्यामिरूपेण स्थितां ᵛमां न जानन्ति ᵛते[2] ᵛअमन्तवः अमन्यमाना अजानन्तः ᵛउप ᵛक्षियन्ति। उपक्षीणाः संसारेण हीना भवन्ति ॥ मनेरौणादिकस्तुप्रत्ययः। नञ्समासे व्यत्ययेनान्तोदात्तत्वम्। यद्वा। भावे तुप्रत्ययः। ततो बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। माममन्तवो मद्विषयज्ञानरहिता इत्यर्थः ॥ हे ᵛश्रुत विश्रुत सखे ᵛश्रुधि। मया वक्ष्यमाणं शृणु ॥ छान्दसो विकरणस्य लुक्। 'श्रुशृणुपृकृवृभ्यः०' इति हेर्धिभावः ॥ किं तच्छ्रोतव्यम्। ᵛश्रद्धिवम्। श्रद्धिः श्रद्धा। तया युक्तम्। श्रद्धायत्नेन लभ्यमित्यर्थः। श्रदन्तरोरुपसर्गवद्वृत्तिरिष्यते (पा.सू. १. ४.५७.२) इति श्रच्छब्दस्योपसर्गवद्वर्तमानत्वात् 'उपसर्गे घोः किः' इति किप्रत्ययः। मत्वर्थीयो वः ॥ ईदृशं ब्रह्मात्मकं वस्तु ᵛते तुभ्यं ᵛवदामि उपदिशामि ॥

अ॒हमे॒व स्व॒यमि॒दं व॑दामि॒ जुष्टं॑ दे॒वेभि॑रु॒त मानु॑षेभिः ।
यं का॒मये॒ तं॑तमु॒ग्रं कृ॑णोमि॒ तं ब्र॒ह्माणं॑ तमृ॒षिं॒ तं सु॑मे॒धाम् ॥ ५ ॥

अ॒हम् । ए॒व । स्व॒यम् । इ॒दम् । व॒दामि॒ । जुष्ट॑म् । दे॒वेभिः॑ । उ॒त । मानु॑षेभिः ।
यम् । का॒मये॑ । तम्ऽत॑म् । उ॒ग्रम् । कृ॒णोमि॒ । तम् । ब्र॒ह्माण॑म् । तम् । ऋ॒षिम् । तम् । सु॒ऽमे॒धाम् ॥५॥

ᵛअहं ᵛस्वयम् ᵛएव ᵛइदं वस्तु ब्रह्मात्मकं ᵛवदामि उपदिशामि। ᵛदेवेभिः देवैरिन्द्रादिभिरपि ᵛजुष्टं सेवितम्। ᵛउत अपि च ᵛमानुषेभिः मनुष्यैरपि जुष्टम्। ईदृग्वस्त्वात्मिकाहं ᵛयं ᵛकामये यं पुरुषं रक्षितुमहं वाञ्छामि ᵛतंतं पुरुषम् ᵛउग्रं ᵛकृणोमि। सर्वेभ्योऽधिकं करोमि। ᵛतम् एव ᵛब्रह्माणं स्रष्टारं करोमि। ᵛतम् एव ᵛऋषिम् अतीन्द्रियार्थदर्शिनं करोमि। ᵛतम् एव ᵛसुमेधां शोभनप्रज्ञं च करोमि ॥ ॥ ११ ॥

अ॒हं रु॒द्राय॒ धनु॒रा त॑नोमि ब्र॒ह्मद्वि॒षे शर॑वे॒ हन्त॒वा उ॑ ।
अ॒हं जना॑य॒ समदं॑ कृणोम्य॒हं द्यावा॑पृथि॒वी आ वि॑वेश ॥ ६ ॥

अ॒हम् । रु॒द्राय॑ । धनुः॑ । आ । त॒नो॒मि॒ । ब्र॒ह्मऽद्वि॑षे । शर॑वे । ह॒न्त॒वै । ऊँ॒ इति॑ ।
अ॒हम् । जना॑य । सऽमद॑म् । कृ॒णो॒मि॒ । अ॒हम् । द्यावा॑पृथि॒वी इति॑ । आ । वि॒वे॒श॒ ॥ ६ ॥

---

१. त-मु-विश्वरूपेणावस्थानात्। २. त१.२.३.६.७-भ-ते मां।

पुरा त्रिपुरविजयसमये ᵛरुद्राय रुद्रस्य । षष्ठ्यर्थे चतुर्थी । महादेवस्य ᵛधनुः चापम् ᵛअहम् ᵛआ ᵛतनोमि । ज्ययाततं करोमि । किमर्थम् । ᵛब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं ᵛशरवे शरं हिंसकं त्रिपुरनिवासिनमसुरं ᵛहन्तवै हन्तुं हिंसितुम् ॥ हन्तेः ' तुमर्थे सेसेन्° ' (पा. सू. ३.४.९) इति तवैप्रत्ययः । ' अन्तश्च तवै युगपत् ' (पा. सू. ६. १. २००) इत्याद्यन्तयोर्युगपदुदात्तत्वम् । ' शृ हिंसायाम् ' इत्यस्मात् ' शृस्वृस्निहि° ' इत्यादिना उप्रत्ययः । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वाच्चतुर्थी ॥ उशब्दः पूरकः । ᵛअहम् एव ᵛसमदम् । समानं माद्यन्त्यस्मिन्निति समत्संग्रामः । स्तोतृजनार्थं शत्रुभिः सह संग्राममहमेव ᵛकृणोमि करोमि । तथा ᵛद्यावापृथिवी दिवं च पृथिवीं चान्तर्यामितया ᵛअहम् एव ᵛआ ᵛविवेश प्रविष्टवती ॥

अहं सुवे पितरमस्य मूर्धन्मम योनिरप्स्वन्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोप स्पृशामि ॥ ७ ॥

अहम् । सुवे । पितरम् । अस्य । मूर्धन् । मम । योनिः । अप्ऽसु । अन्तरिति । समुद्रे ।
ततः । वि । तिष्ठे । भुवना । अनु । विश्वा । उत । अमूम् । द्याम् । वर्ष्मणा । उप । स्पृशामि ॥७॥

' द्यौः[1] पिता ' (तै. ब्रा. ३.७.५.४) इति श्रुतेः पिता द्यौः । ᵛपितरं दिवम् ᵛअहं ᵛसुवे प्रसुवे जनयामि । ' आत्मन आकाशः संभूतः ' (तै. आ. ८. १) इति श्रुतेः । कुत्रेति तदाह । ᵛअस्य परमात्मनः ᵛमूर्धन् मूर्धन्युपरि[2] । कारणभूते[2] तस्मिन् हि वियदादिकार्यजातं सर्वं वर्तते तन्तुषु पट इव । ᵛमम च ᵛयोनिः कारणं ᵛसमुद्रे । समुद्रवन्न्यस्माद्भूतजातानीति समुद्रः परमात्मा । तस्मिन् ᵛअप्सु व्यापनशीलासु धीवृत्तिषु ᵛअन्तः मध्ये यद्ब्रह्म चैतन्यं तन्मम कारणमित्यर्थः । यत इदंभूता अहमस्मि ᵛततः हेतोः ᵛविश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि ᵛअनु प्रविश्य ᵛवि ᵛतिष्ठे । विविधं व्याप्य तिष्ठामि ॥ ' समवप्रविभ्यः स्थः ' (पा. सू. १.३.२२) इत्यात्मनेपदम् ॥ ᵛउत अपि च ᵛअमूं ᵛद्यां विप्रकृष्टदेशेऽवस्थितं स्वर्गलोकम् । उपलक्षणमेतत् । एतदुपलक्षितं कृत्स्नं विकारजातं ᵛवर्ष्मणा कारणभूतेन मायात्मकेन मदीयेन देहेन ᵛउप ᵛस्पृशामि । यद्वा । अस्य भूलोकस्य[3] मूर्धन् मूर्धन्युपर्यहं पितरमाकाशं सुवे । समुद्रे जलधावप्सूदकेष्वन्तर्मध्ये मम योनिः कारणभूतोऽम्भृणाख्य ऋषिर्वर्तते । यद्वा । समुद्रेऽन्तरिक्षेऽप्स्वम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्म चैतन्यं वर्तते । ततोऽहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि । अन्यत्समानम् ॥

अहमेव वातइव प्र वाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ॥ ८ ॥

अहम् । एव । वातःऽइव । प्र । वामि । आऽरभमाणा । भुवनानि । विश्वा ।
परः । दिवा । परः । एना । पृथिव्या । एतावती । महिना । सम् । बभूव ॥ ८ ॥

ᵛविश्वा विश्वानि सर्वाणि ᵛभुवनानि भूतजातानि कार्याणि ᵛआरभमाणा कारणरूपेणोत्पादयन्ती ᵛअहमेव परेणानधिष्ठिता स्वयमेव ᵛप्र ᵛवामि प्रवर्ते । ᵛवातइव यथा वातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत् । उक्तं सर्वं निगमयति । ᵛपरो ᵛदिवा । पर इति सकारान्तं परस्तादित्यर्थे वर्तते यथा अध इत्यधस्तादर्थे । तद्योगे च तृतीया सर्वत्र दृश्यते । दिव आकाशस्य परस्तात् । ᵛएना

१. त७—द्यौर्वः । २. म७—मूर्धनि परमकारणभूते । ३. म७—भूतस्य ।

vपृथिव्या ॥ 'द्वितीयाटौः स्वेनः' (पा. सू. २. ४. ३४) इतीदम एनादेशः[1]। अस्याः पृथिव्याः vपरः परस्तात्। द्यावापृथिव्योरुपादानमुपलक्षणम्। एतदुपलक्षितात् सर्वस्मात् विकारजातात्[2] परस्ताद्वर्तमाना सङ्कोदासीनकूटस्थब्रह्मचैतन्यरूपाहं vमहिना महिम्ना vएतावती vसं vबभूव। एतच्छब्देनोक्तं सर्वं परामृश्यते। एतत्परिमाणमस्याः ॥ 'यत्तदेतेभ्यः परिमाणे०' (पा. सू. ५. २. ३९) इति वतुप्। 'आ सर्वनाम्नः (पा. सू. ६. ३. ९१) इत्यात्वम् ॥ सर्वजगदात्मनाहं संभूतास्मि ॥ महच्छब्दादिमनिचि 'टेः' (पा. सू. ६. ४. १५५) इति टिलोपः। ततः तृतीयायामुदात्तनिवृत्तिस्वरेण तस्या उदात्तत्वम्। छान्दसो मलोपः ॥ ॥१२॥

'न तम्' इत्यष्टर्चं चतुर्दशं सूक्तं शिलूषपुत्रस्य कुल्मलबर्हिषस्यार्षं वामदेवपुत्रस्यांहोमुङ्नाम्नो वा। वैश्वदेवम्। अष्टमी त्रिष्टुप् शिष्टा उपरिष्टाद्बृहत्यः। त्र्यष्टकद्वादशकवत्युपरिष्टाद्बृहती। 'अन्त्यश्चेदुपरिष्टाद्बृहती' (अनु. ७. ४) इति हि तल्लक्षणम्। तथा चानुक्रान्तं—'न तं शैलूषः[3] कुल्मलबर्हिषो[4] वामदेव्यो वांहोमुग्वैश्वदेवमुपरिष्टाद्बार्हतमन्त्या त्रिष्टुप्' इति। गतो विनियोगः ॥

न तमंहो न दुरितं देवासो अष्ट मर्त्यम्।
सजोषसो यमर्यमा मित्रो नयन्ति वरुणो अति द्विषः ॥ १ ॥

न। तम्। अंहः। न। दुःऽइतम्। देवासः। अष्ट। मर्त्यम्।
सऽजोषसः। यम्। अर्यमा। मित्रः। नयन्ति। वरुणः। अति। द्विषः ॥ १ ॥

हे vदेवासः देवाः ॥ आज्जसेरसुक् ॥ vतं vमर्त्यं मनुष्यम् vअंहः पापं vदुरितं तत्फलरूपं दुर्गमनं च vन vअष्ट न प्राप्नोति ॥ अशेश्छान्दसे लुङि 'झलो झलि' इति सिचो लोपः। अडभावश्छान्दसः ॥ अरीरिषच्छतीति vअर्यमा प्रमीतेस्त्रायको देवः vमित्रः पापानां निवारयिता देवः vवरुणः। एते त्रयो देवाः vसजोषसः संगताः समानं प्रीयमाणा वा भवन्तः vद्विषः द्वेष्टॄन् शत्रूनतिक्रम्य vयं स्तोतारं vनयन्ति अभिमतं देशं प्रापयन्ति तं नाष्टेत्यन्वयः ॥

तद्वि वयं वृणीमहे वरुण मित्रार्यमन्।
येना निरंहसो यूयं पाथ नेथा च मर्त्यमति द्विषः ॥ २ ॥

तत्। हि। वयम्। वृणीमहे। वरुण। मित्र। अर्यमन्।
येन। निः। अंहसः। यूयम्। पाथ। नेथ। च। मर्त्यम्। अति। द्विषः ॥ २ ॥

हिरवधारणे। vतद्धि तदेव रक्षणं vवयं vवृणीमहे प्रार्थयामहे ॥ 'सतिशिष्टोऽपि विकरणस्य स्वरो लसार्वधातुकस्वरं न बाधते' (पा. म. ६. १. १५८. ११) इति वचनात्तिङ एव स्वरः शिष्यते। 'हि च' इति निघातप्रतिषेधः ॥ हे vवरुण हे vमित्र हे vअर्यमन् vयेन रक्षणेन vमर्त्यं स्तोतारम् vअंहसः पापात् vयूयं vनिः vपाथ निःशेषेण रक्षथ ॥ 'पा रक्षणे'। आदादिकः। 'यङ्लुक्शित्यम्' इति निघातप्रतिषेधः ॥ येन च[5] रक्षणेन मर्त्यं मनुष्यं स्तोतारं vद्विषः vअति vनेथ अतीत्य नयथ अभीष्टं प्रापयथ तद्वृणीमह इत्यन्वयः ॥ नयतेश्छान्दसः शपो लुक् ॥

१. त१.२.६.७-भ२-एनादेशः। सुपां सुलुगिति तृतीयाया अजादेशः। २. त४.५-भूतजातात्। ३. त७-अनु-शैलूषिः। ४. अनु-कुल्मुल°। ५. त१.२.३.६.७.८-भ-'च' नास्ति।

ते नूनं नोऽयमूतये वरुणो मित्रो अर्यमा ।
नयिष्ठा उ नो नेषणि पर्षिष्ठा उ नः पुर्षण्यति द्विषः ॥ ३ ॥

ते । नूनम् । नः । अयम् । ऊतये । वरुणः । मित्रः । अर्यमा ।
नयिष्ठाः । ऊँ इति । नः । नेषणि । पर्षिष्ठाः । ऊँ इति । नः । पर्षणि । अति । द्विषः ॥ ३ ॥

ᵛअयं ᵛवरुणो ᵛमित्रः च ᵛअर्यमा च देवाः ᵛनः अस्माकम् ᵛऊतये रक्षणाय ᵛनूनम् अवश्यं भवन्तु । ᵛनेषणि नेतव्ये विषये हे वरुणादयः यूयं ᵛनः अस्मान् ᵛनयिष्ठाः नयत ॥ वचनव्यत्ययः । यद्वा । प्रत्येकाभिप्रायेणैकवचनम् । छान्दसो लुङ् ॥ उशब्दः समुच्चये पदपूरणार्थो वा । ᵛपर्षणि पारयितव्ये विषये ᵛनः अस्मान् ᵛद्विषः ᵛअति ᵛपर्षिष्ठाः अतिपारयथ ॥ नयिष्ठा इतिवत्प्रक्रिया ॥

यूयं विश्वं परि पाथ वरुणो मित्रो अर्यमा ।
युष्माकं शर्मणि प्रिये स्याम सुप्रणीतयोऽति द्विषः ॥ ४ ॥

यूयम् । विश्वम् । परि । पाथ । वरुणः । मित्रः । अर्यमा ।
युष्माकम् । शर्मणि । प्रिये । स्याम । सुऽप्रनीतयः । अति । द्विषः ॥ ४ ॥

हे देवा वरुणादयः ᵛयूयं ᵛविश्वं सर्वं जगत् ᵛपरि ᵛपाथ परितो रक्षथ । हे ᵛसुप्रणीतयः शोभनप्रणयना मित्रादयः ᵛयुष्माकं युष्मदीये युष्माभिर्दत्ते ᵛप्रिये अनुकूले वेद्ये ᵛशर्मणि सुखे वयं ᵛस्याम भवेम । ᵛद्विषः द्वेष्टॄंश्च ᵛअति क्रामेम ॥

आदित्यासो अति स्रिधो वरुणो मित्रो अर्यमा ।
उग्रं मरुद्भी रुद्रं हुवेमेन्द्रमग्निं स्वस्तयेऽति द्विषः ॥ ५ ॥

आदित्यासः । अति । स्रिधः । वरुणः । मित्रः । अर्यमा ।
उग्रम् । मरुत्ऽभिः । रुद्रम् । हुवेम । इन्द्रम् । अग्निम् । स्वस्तये । अति । द्विषः ॥ ५ ॥

ᵛआदित्यासः अदितेः पुत्रा वरुणादयो देवाः ᵛस्रिधः हिंसकान् शत्रूनस्मान् ᵛअति नयन्तु । ᵛमरुद्भिः पुत्रैः सहितम् ᵛउग्रम् उद्गूर्णतेजसं[1] ᵛरुद्रम् ᵛइन्द्रमग्निं च ᵛस्वस्तये क्षेमाय ᵛहुवेम आह्वयेमहि ॥ ह्वयतेराशीर्लिङि 'बहुलं छन्दसि' इति संप्रसारणम् । लिङ्याशिष्यङ् ॥ आहूतास्ते अस्मान् ᵛद्विषः द्वेष्टॄन् ᵛअति नयन्तु ॥

नेतार ऊ षु णस्तिरो वरुणो मित्रो अर्यमा ।
अति विश्वानि दुरिता राजानश्चर्षणीनामति द्विषः ॥ ६ ॥

नेतारः । ऊँ इति । सु । नः । तिरः । वरुणः । मित्रः । अर्यमा ।
अति । विश्वानि । दुःऽइता । राजानः । चर्षणीनाम् । अति । द्विषः ॥ ६ ॥

ᵛनेतारः नयनकुशलाः ॥ नयतेः साधुकारिणि तृन् ॥ वरुणादयो देवाः ᵛनः अस्माकं पापानि ᵛसु[2] सुष्ठु ᵛतिरः तिरोधानमदर्शनं नयन्तु । ᵛउ इति पूरणः । ᵛचर्षणीनां मनुष्याणां ᵛराजानः

---

१. ग–उद्गूर्णतेजस्कं । २. त-भ१.२.४.८–'सु' नास्ति ।

स्वामिनो वरुणादयो देवाः ᵛविश्वानि सर्वाणि ᵛदुरिता दुरितानि दुर्गमनानि पापफलरूपाण्यस्मान् ᵛअति नयन्तु । ᵛद्विषः द्वेष्टॄन् शत्रूंश्च ᵛअति नयन्तु ॥ 'नामन्यतरस्याम्' इति चर्षणिशब्दात्परस्य नाम उदात्तत्वम् ॥

शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा ।
शर्म यच्छन्तु सप्रथ आदित्यासो यदीमहे अति द्विषः ॥ ७ ॥

शुनम् । अस्मभ्यम् । ऊतये । वरुणः । मित्रः । अर्यमा ।
शर्म । यच्छन्तु । सऽप्रथः । आदित्यासः । यत् । ईमहे । अति । द्विषः ॥ ७ ॥

वरुणादयो देवाः ᵛऊतये रक्षायै ᵛशुनं सुखम् ᵛअस्मभ्यं स्तोतृभ्यः प्रयच्छन्तु । तथा ᵛआदित्यासः अदितेः पुत्रास्ते ᵛसप्रथः सर्वतः पृथु विस्तीर्णं ᵛशर्म सुखं च ᵛयच्छन्तु अस्मभ्यं ददतु । ᵛयत् शर्म वयम् ᵛईमहे याचामहे । ᵛद्विषः च ᵛअति नयन्तु ॥

यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः ।
एवो ष्वस्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥ ८ ॥

यथा । ह । त्यत् । वसवः । गौर्यम् । चित् । पदि । सिताम् । अमुञ्चत । यजत्राः ।
एवो इति । सु । अस्मत् । मुञ्चत । वि । अंहः । प्र । तारि । अग्ने । प्रऽतरम् । नः । आयुः ॥ ८ ॥

हे ᵛवसवः वासकाः हे ᵛयजत्राः यागार्हा मित्रादयो देवाः ॥ 'अमिनक्षि०' (उ. सू. ३. १०५) इत्यादिना यजेरत्रन्प्रत्ययः ॥ ᵛत्यत् ते प्रसिद्धा यूयम् ॥ 'सुपां सुलुक्०' इति विभक्तेर्लुक् ॥ ᵛयथा ᵛह यथा खलु ᵛपदि पादे ᵛसितां बद्धाम् । 'पद्दन्०' इत्यादिना पादशब्दस्य पदादेशः । 'ऊडिदं-पदादि०' (पा. सू. ६. १. १७१) इत्यादिना सप्तम्या उदात्तत्वम् । 'षिञ् बन्धने' इत्यस्मा-न्निष्ठा ॥ ईदृशीं ᵛगौर्यं[2] गौरीं गौरवर्णां सोमक्रयणीं गाम् ॥ 'षिद्गौरादिभ्यश्च' (पा. सू. ४. १. ४१) इति ङीष् । 'अमि पूर्वः' (पा. सू. ६. १. १०७) इत्यत्र 'वा छन्दसि' (पा. सू. ६. १. १०६) इत्यनुवर्तनात्पूर्वरूपस्य पूर्वसवर्णदीर्घस्य चाभावे यण् । 'उदात्तस्वरितयोर्यणः०' इति परस्यानुदात्तस्य स्वरितत्वम् ॥ ईदृशीं गाम् ᵛअमुञ्चत यथा खलु यूयं विश्वावसोर्गन्धर्वान्मोचितवन्तः ᵛएवो एवमेव ᵛअस्मत् अस्मत्तः ᵛअंहः पापं सुष्ठु ᵛवि ᵛमुञ्चत विश्लेषयत । हे ᵛअग्ने ᵛनः अस्माकम् ᵛआयुः जीवनं ᵛप्रतरं ᵛप्र ᵛतारि । प्रकर्षेण त्वया प्रवर्धताम् । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ प्रशब्दात्तरपि 'अमु च च्छन्दसि' (पा. सू. ५. ४. १२) इत्यमुप्रत्ययः ॥ ॥ १३ ॥

'रात्री' इत्यष्टर्चं पञ्चदशं सूक्तं सोभरिपुत्रस्य कुशिकस्यार्षम् । यद्वा । भारद्वाजस्य सुता राज्याख्या अस्य सूक्तस्यर्षिका । गायत्रं रात्रिदेवताकम् । तथा चानुक्रान्तं–'रात्री कुशिकः सौभरो रात्रिर्वा भारद्वाजी रात्रिस्तवं गायत्रम्' इति । दुःस्वप्नदर्शन उपोषितेन कर्त्रा पायसेन होतव्यम् । तत्रैतत्सूक्तं करणत्वेन विनियुक्तम् । तथा चारण्यके श्रूयते–'स यद्येतेषां किंचित्पश्येदुपोष्य पायसं स्थालीपाकं श्रपयित्वा रात्रीसूक्तेन प्रत्यृचं हुत्वा' (ऐ. आ. ३. २. ४) इति ॥

रात्री व्यख्यदायती पुरुत्रा देव्यक्षभिः । विश्वा अधि श्रियोऽधित ॥ १ ॥

रात्री । वि । अख्यत् । आऽयती । पुरुऽत्रा । देवी । अक्षऽभिः ।
विश्वाः । अधि । श्रियः । अधित ॥ १ ॥

---

१. ग२–गृहं । २. ग–त४.५–भ२–गौर्यं चित् ।

vआयती आगच्छन्ती ॥ आङ्पूर्वादेतेः शतर्यदादित्वाच्छपो लुक् । ' इणो यण् ' (पा. सू. ६. ४.८१) इति यणादेशः । ' उगितश्च ' (पा. सू. ४. १. ६) इति ङीप् । ' शतुरनुमः° ' इति नद्या उदात्तत्वम् ॥ vअक्षभिः[1] अक्षिस्थानीयैः प्रकाशमानैर्नक्षत्रैः ॥ ' छन्दस्यपि दृश्यते ' इत्यक्षिशब्दस्यानङादेशः ॥ यद्वा । अक्षभिरशकैः तेजोभिः[2] । vपुरुत्रा बहुषु देशेषु vदेवी देवनशीला ॥ ' देवमनुष्यपुरुषपुरुमर्त्येभ्यः° ' इत्यादिना पुरुशब्दात्सप्तम्यर्थे त्राप्रत्ययः ॥ vरात्री इयं रात्रिदेवता vव्यख्यत् विचष्टे विशेषेण पश्यति ॥ ' रात्रेश्चाजसौ ' (पा. सू. ४. १. ३१) इति ङीप् । ख्यातेश्छान्दसे लुङि ' अस्यतिवक्ति° ' इत्यादिना च्लेरङादेशः ॥ अपि चैषा vविश्वाः सर्वाः vश्रियः शोभाः vअधि vअधित अधिधारयति ॥ दधातेर्लुङि[3] ' स्थाघ्वोरिच्च ' इतीत्वम् । सिचः कित्त्वम् । ' हस्वादङ्गात् ' इति सिचो लोपः ॥

ओर्वप्रा अमर्त्या निवतो देव्युद्वतः । ज्योतिषा बाधते तमः ॥ २ ॥

आ । उरु । अप्राः । अमर्त्या । निऽवतः । देवी । उत्ऽवतः । ज्योतिषा । बाधते । तमः ॥२॥

vअमर्त्या मरणरहिता vदेवी देवनशीला रात्रिः vउरु विस्तीर्णमन्तरिक्षम् vआ vअप्राः । प्रथमतस्तमसापूरयति ॥ ' प्रा पूरणे ' । आदादिकः । लङि व्यत्ययेन मध्यमः ॥ तथा vनिवतः नीचीनान्लतागुल्मादीन् vउद्वतः उच्छ्रितान् वृक्षादींश्च स्वकीयेन तेजसावृणोति[4] । तदनन्तरं तत् vतमः अन्धकारं vज्योतिषा ग्रहनक्षत्रादिरूपेण तेजसा vबाधते पीडयति ॥

निरु स्वसारमस्कृतोषसं देव्यायती । अपेदु हासते तमः ॥ ३ ॥

निः । ऊँ इति । स्वसारम् । अकृत । उषसम् । देवी । आऽयती ।
अप । इत् । ऊँ इति । हासते । तमः ॥ ३ ॥

vआयती आगच्छन्ती vदेवी देवनशीला रात्रिः vस्वसारं भगिनीम् vउषसं vनिः vअकृत निष्करोति । प्रकाशेन संस्करोति । निवर्तयतीत्यर्थः । तस्यामुषसि जातायां नैशं vतमः vअपेत् vहासते अपैव गच्छति ॥ ' ओहाङ् गतौ ' । लेट्यडागमः । ' सिब्बहुलम् ' इति सिप् ॥

सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि । वृक्षे न वसतिं वयः ॥ ४ ॥

सा । नः । अद्य । यस्याः । वयम् । नि । ते । यामन् । अविक्ष्महि । वृक्षे । न । वसतिम् । वयः ॥४॥

vअद्य अस्मिन् काले vनः अस्माकं vसा रात्रिदेवता प्रसीदतु vयस्याः रात्रेः vयामन् यामनि प्राप्तौ सत्यां vवयं vनि vअविक्ष्महि निविशामहे सुखेन गृह आस्महे ॥ विशेर्लङि ' नेर्विशः ' (पा. सू. १. ३. १७) इत्यात्मनेपदम् । छान्दसः शपो लुक् ॥ तत्र दृष्टान्तः । vवयः पक्षिणः vवृक्षे vन यथा वृक्षे नीडाश्रये vवसतिं रात्रौ निवासं कुर्वन्ति तथा निवसाम इत्यर्थः ॥

नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः । नि श्येनासश्चिदर्थिनः ॥ ५ ॥

नि । ग्रामासः । अविक्षत । नि । पत्ऽवन्तः । नि । पक्षिणः । नि । श्येनासः । चित् । अर्थिनः ॥५॥

vग्रामासः ग्रामाः । अत्र ग्रामशब्दो जनसमूहे वर्तते यथा ग्राम आगत इति । सर्वे जनाः vनि vअविक्षत । तस्यां रात्रावागतायां निविशन्ते । शेरते ॥ निपूर्वाद्विशतेश्छान्दसे लुङि पूर्ववदात्मनेपदम् ।

---

१. त१.२.३.६.८-भ-अक्षिभिः । २. ग-तमोभिः । ३. त१.२.३.६.७.८-भ-तथा दधातेर्लुङि । ४. ग-तमसावृणोति ।

'शल इगुपधादनिटः क्सः' (पा. सू. ३. १. ४५), 'क्सस्याचि' (पा. सू. ७.३.७२) इत्यकारलोपः ॥ तथा Vपद्वन्तः पादयुक्ता गवाश्वादयश्च निविशन्ते । तथा Vपक्षिणः पक्षोपेताश्च निविशन्ते । Vअर्थिनः । अर्तेरर्थो गमनम् । शीघ्रगमनयुक्ताः । Vश्येनासश्चित् श्येना[1] अपि तस्यां रात्र्यां निविशन्ते एषा रात्रिः सर्वाणि भूतजातान्यहनि[2] संचारेण श्रान्तानि स्वयमागत्य सुखयतीत्यर्थः ॥

यावया वृक्यं वृकं यवय स्तेनमूर्म्ये । अथा नः सुतरा भव ॥ ६ ॥

यवय । वृक्यम् । वृकम् । यवय । स्तेनम् । ऊर्म्ये । अथ । नः । सुऽतरा । भव ॥ ६ ॥

हे Vऊर्म्ये । रात्रिनामैतत् । रात्रे Vवृक्यं वृकस्य स्त्रियं Vवृकं चास्मान् हिंसन्तं Vयवय । अस्मत्तः पृथक्कुरु । अस्मान् बाधितुं यथा न प्राप्नोति तथा । Vस्तेनं तस्करं च Vयवय । अस्मत्तो वियोजय । Vअथ अनन्तरं Vनः अस्माकं Vसुतरा सुखेन तरणीया क्षेमकरी Vभव ॥

उप मा पेपिशत्तमः कृष्णं व्यक्तमस्थित । उष ऋणेव यातय ॥ ७ ॥

उप । मा । पेपिशत् । तमः । कृष्णम् । विऽअक्तम् । अस्थित । उषः । ऋणाऽइव । यातय ॥ ७ ॥

Vपेपिशत् भृशं पिंशत् सर्ववस्तुप्वाश्लिष्टं Vतमः अन्धकारं Vकृष्णं कृष्णवर्णं Vव्यक्तं विशेषेण स्वभासा सर्वस्याञ्जकं स्पष्टरूपं वा ईदृशं नैशं तमो माम् Vउप Vअस्थित उपागच्छत् ॥ संगतकरण आत्मनेपदम् ॥ हे Vउषः उषोदेवते त्वम् Vऋणेव ऋणानीव ततमो Vयातय अपगमय । स्तोतृणामृणानि यथा धनप्रदानेनापाकरोषि तथा तमोऽप्यपसारयेत्यर्थः ॥

उष ते गाइवाकरं वृणीष्व दुहितर्दिवः । रात्रि स्तोमं न जिग्युषे ॥ ८ ॥

उष । ते । गाःऽइव । आ । अकरम् । वृणीष्व । दुहितः । दिवः । रात्रि । स्तोमम् । न । जिग्युषे ॥ ८ ॥

हे Vरात्रि रात्रिदेवते Vते त्वां Vगाइव पयसो दोग्ध्रीर्धेनूरिव उपेत्य Vआकरं स्तुतिभिरभिमुखीकरोमि ॥ करोतेश्छान्दसे लुङि 'कृमृदरुहिभ्यः' इति च्लेरङादेशः ॥ Vदिवः Vदुहितः द्योतमानस्य सूर्यस्य पुत्रि यद्वा दिवसस्य तनये ॥ 'परमपि च्छन्दसि' (पा. सू. २. १. २. ६) इति परस्य षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावात् पदद्वयसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् ॥ त्वत्प्रसादात् Vजिग्युषे शत्रून् जिग्युषो[3] मम Vस्तोमं Vन स्तोत्रमिव हविरपि Vवृणीष्व त्वं भजस्व ॥ जयतेर्लिटः क्वसुः । 'सनलिटोर्जेः' इत्यभ्यासादुत्तरस्य जकारस्य कुत्वम् । 'षष्ठ्यर्थे चतुर्थी वक्तव्या' इति चतुर्थी । 'वसोः संप्रसारणम्' इति संप्रसारणम् ॥ ॥ १४ ॥

'ममाग्ने' इति नवर्चं षोडशं सूक्तमाङ्गिरसस्य विहव्यस्यार्षं वैश्वदेवम् । अन्त्या जगती शिष्टास्त्रिष्टुभः । अनुक्रम्यते हि—'ममाग्ने नव विहव्यो वैश्वदेवं जगत्यन्तम्' इति । संसवे निमित्तभूते वैश्वदेवसूक्तस्य पुरस्तादेतत् शंस्यम् । सूत्रितं च—'ममाग्ने वर्च इति वैश्वदेवसूक्तस्यापि वैतेष्वेव निविदो दध्यात्' (आश्व. श्रौ. ६.६) इति । समावर्तनेऽनेन सूक्तेन सिष्णासुना प्रत्यृचं समिदाधातव्या । सूत्रितं च—'ममाग्ने वर्च इति प्रत्यृचं समिधोऽभ्यादध्यात्' (आश्व. गृ.३.९.२) इति ॥

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
महं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम ॥ १ ॥

---

१. ग-त४.५-भ२-श्येना गृध्राः । २. त१.२.३.६.७.८-भ-भूतान्यहनि । ३. ग-जितवतो ।

मम॑ । अग्ने॑ । वर्चः॑ । विऽहवे॑षु । अस्तु॑ । व॒यम् । त्वा॒ । इन्धा॑नाः । त॒न्व॑म् । पु॒षेम॑ ।
मह्य॑म् । नमन्ताम् । प्रऽदिशः॑ । चतस्रः॑ । त्वया॑ । अधि॑ऽअक्षेण । पृत॑नाः । जये॑म ॥ १ ॥

हे ᵛअग्ने । विविधमाहूयन्ते येषु शूरा इति विहवाः संग्रामाः । यद्वा । विविधं यागार्थं देवा आहूयन्त एभ्यो विहवा यज्ञाः ॥ 'हृः संप्रसारणं च न्यभ्युपविषु' (पा. सू. ३. ३. ७२) इत्यधिकरणेऽप् संप्रसारणं च । थाथादिनोत्तरपदान्तोदात्तत्वम् । संग्रामेषु यज्ञेषु वा ᵛवर्चः दीप्तिः त्वदनुग्रहात् ᵛमम ᵛअस्तु भवतु । ᵛवयं च ᵛत्वा त्वाम् ᵛइन्धानाः समिद्भिर्दीपयन्तः ᵛतन्वं तव शरीरं ᵛपुषेम हविर्भिर्वर्धयेम ॥ इन्धेः शानचि श्नसोरल्लोप उदात्तनिवृत्तिस्वरेण शानच आद्युदात्तत्वे प्राप्ते 'विभाषा वेण्विन्धानयोः' (पा. सू. ६. १. २१५) इत्याद्युदात्तत्वम् ॥ तन्वं[1] पुषेम ॥ पुषेर्लिङि लिङ्याशिष्यङ् ॥ अपि च ᵛमह्यं मदर्थम् । 'हयि च' (पा. सू. ६. १. २१२) इत्यस्मद आद्युदात्तत्वम् ॥ ᵛचतस्रः ᵛप्रदिशः प्रकृष्टा दिशः । तद्वासिनो जना इत्यर्थः । ᵛनमन्तां स्वत एव प्रह्वीभवन्तु । नमतेः कर्मकर्तरि लोटि 'न दुहस्नुनमाम्°' इति यक्प्रतिषेधः ॥ ᵛत्वया अस्माभिर्हविर्भिः प्रवर्धितेन ᵛअध्यक्षेण ईश्वरेण सता ᵛपृतनाः शत्रुसेनाः ᵛजयेम अभिभवेम ॥

मम॑ देवा विऽहवे॑ सन्तु॒ सर्वे॑ इन्द्रे॒वन्तो॑ मरुतो॒ विष्णु॑रग्निः ।
मम॒ान्तरि॑क्षमुरुलो॒कम॑स्तु॒ मह्यं॒ वातः॑ पवतां॒ काम॑े अ॒स्मिन् ॥ २ ॥

मम॑ । देवाः॑ । विऽहवे॑ । सन्तु॑ । सर्वे॑ । इन्द्रे॑ऽवन्तः । मरुतः॑ । विष्णुः॑ । अग्निः॑ ।
मम॑ । अ॒न्तरि॑क्षम् । उरु॑ऽलो॒कम् । अ॒स्तु॒ । मह्य॑म् । वातः॑ । प॒व॒ता॒म् । काम॑े । अ॒स्मिन् ॥२॥

ᵛसर्वे ᵛदेवाः ᵛविहवे संग्रामे यज्ञे वा ᵛमम ᵛसन्तु ममैव साधका भवन्तु । के पुनस्ते । ᵛइन्द्रवन्तः इन्द्रेण युक्ताः ᵛमरुतो ᵛविष्णुरग्निः च । तथा ᵛअन्तरिक्षं ᵛमम ᵛउरुलोकं विस्तीर्णप्रकाशकम् ᵛअस्तु ॥ 'लोकृ दर्शने' । भावे घञ् । लोक आलोकः प्रकाशः । उरुर्लोको यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ अपि च ᵛअस्मिन् ᵛकामे कामयितव्ये फले निमित्तभूते सति ᵛवातः वायुः ᵛपवताम् अनुगुणं प्रवातु ॥ 'पूङ् पवने' । भौवादिकः । 'ऊडिदम्°' इत्यादिना इदमः सप्तम्या उदात्तत्वम् ॥

मयि॑ देवा द्रविण॒मा य॑जन्तां म॒य्याशीर॑स्तु॒ मयि॑ देव॒हूतिः॑ ।
दैव्या॒ होता॑रा वनुषन्त॒ पूर्वेऽरि॑ष्टाः स्याम त॒न्वा॑ सु॒वीराः॑ ॥ ३ ॥

मयि॑ । देवाः॑ । द्रवि॑णम् । आ । य॒ज॒न्ता॒म् । मयि॑ । आऽशीः॑ । अ॒स्तु॒ । मयि॑ । दे॒व॒ऽहूतिः॑ ।
दैव्याः॑ । होता॑रः । व॒नु॒ष॒न्त॒ । पूर्वे॑ । अरि॑ष्टाः । स्या॒म॒ । त॒न्वा॑ । सु॒ऽवीराः॑ ॥ ३ ॥

ᵛदेवाः सर्वे ᵛद्रविणं धनं ᵛमयि स्तोतरि ᵛआ ᵛयजन्तां गमयन्तु । मह्यं ददत्वित्यर्थः । तथा ᵛआशीः आशंसनीयं यज्ञफलं च ᵛमयि एव ᵛअस्तु । देवानां हूतिराह्वानमस्मिन्निति ᵛदेवहूतिः यज्ञः । स च ᵛमयि अस्तु । अपि च देवानामिमे ᵛदैव्याः । 'देवाद्यञञौ' इति यञ् । तादृशाः ᵛहोतारः साधुहोमनिष्पादका मदीया ऋत्विजः ᵛपूर्वे अन्यर्दाग्रेभ्य ऋत्विग्भ्यः प्रथमभाविनः सन्तः ᵛवनुषन्त देवान् संभजन्ताम् ॥ वनतेश्छान्दसे लडि 'व्यत्ययो बहुलम्' इति श्नो विकरणो उप्रत्ययः सिप्शपौ च । अडभावश्छान्दसः ॥ वयं च ᵛतन्वा शरीरेण ᵛअरिष्टाः अहिंसिताः ᵛसुवीराः सुपुत्राश्च ᵛस्याम भवेम ॥ 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् ॥

---

१. त-भ-प्राप्तं ।

मह्यं यजन्तु मम यानि हव्याकूतिः सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं विश्वे देवासो अधि वोचता नः ॥ ४ ॥

मह्यम् । यजन्तु । मम । यानि । हव्या । आऽकूतिः । सत्या । मनसः । मे । अस्तु ।
एनः । मा । नि । गाम् । कतमत् । चन । अहम् । विश्वे । देवासः । अधि । वोचत । नः ॥४॥

vमह्यं मदर्थं vयजन्तु ऋत्विजो देवान् हविर्भिर्यजन्तु । यद्वा । षष्ठ्यर्थे चतुर्थी । मह्यं मदीया ऋत्विज इत्यर्थः । vमम स्वभूतानि हव्यानि vयानि हवींषि चरुपुरोडाशादीनि सन्ति तैर्हविर्भिरित्यर्थः । तथा vमे vमनसः vआकूतिः संकल्पनमभीष्टस्य प्रार्थनं vसत्या यथार्थम्[1] vअस्तु । अपि च vअहं vकतमच्चन किमपि vएनः पापं vमा vनि vगां मा नियतं निकृष्टतरं वा गच्छेयम् । पापं मा कार्षमित्यर्थः ॥ एतेर्माङि लुङि 'इणो गा लुङि' इति गादेशः । 'गातिस्था०' इति सिचो लुक् ॥ अपि च हे vविश्वे सर्वे vदेवासः देवाः यूयं vनः अस्माकम् vअधि vवोचत विवादपदेषु पक्षपातेन ब्रूत ॥ वक्तेर्लोटि व्यत्ययेनाङ् । 'वच उम्' इत्युमागमः ॥

देवीः षळुर्वीरुरु नः कृणोत विश्वे देवास इह वीरयध्वम् ।
मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥ ५ ॥

देवीः । षट् । उर्वीः । उरु । नः । कृणोत । विश्वे । देवासः । इह । वीरयध्वम् ।
मा । हास्महि । प्रऽजया । मा । तनूभिः । मा । रधाम । द्विषते । सोम । राजन् ॥ ५ ॥

हे vषट् vउर्वीः षट्संख्याका उर्व्यः । एताश्चान्यत्राम्नायन्ते—'षण्मे वीरंहसः पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च' इति । ईदृश्यो हे vदेवीः देव्यः ॥ जसि 'वा छन्दसि' इति पूर्वसवर्णदीर्घः । 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इत्यस्याविद्यमानत्वनिर्देशेन षळुर्वीरित्यनयोरामन्त्रितयोः पदात्परत्वादाष्टमिकमामन्त्रितानुदात्तत्वम् ॥ ता यूयम् vउरु विस्तीर्णं धनं vनः अस्माकं vकृणोत कुरुत ॥ 'कृवि हिंसाकरणयोश्च' । 'धिन्विकृण्व्योरच्' इत्युप्रत्ययः । 'तसनसनथनाश्च' इति तस्य तबादेशः ॥ हे vविश्वे सर्वे vदेवासः देवाः यूयं च vइह अस्मिन् धने प्राप्तव्ये विषये vवीरयध्वं विक्रामयत । यथा वयं तद्धनं लभेमहि तथा वीर्यवन्तो यूयं प्रयतध्वमित्यर्थः ॥ 'वीर विक्रान्तौ' । अपि च vप्रजया पुत्रादिरूपया vमा vहास्महि वयं मा परित्यज्येमहि[2] । vमा च vतनूभिः शरीरैस्त्यज्येमहि[3] । अस्मान् कदाचिदपि पुत्रादयः शरीराणि च मा परित्याक्षुरित्यर्थः ॥ 'ओहाक् त्यागे' । अस्मात् कर्मणि लुङि चिण्व्रश्चावाभावे रूपमेतत् ॥ तथा हे vराजन् राजमान यद्वास्माकं स्वामिन् हे vसोम vद्विषते अप्रीतिं कुर्वते ॥ द्विषेः शतरि अदादित्वात् शपो लुक् । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् । 'षष्ठ्यर्थे चतुर्थी वक्तव्या' इति चतुर्थी ॥ द्विषतः शत्रोः vमा vरधाम मा वशं प्रामुयाम तथा त्वं कुर्वित्यर्थः । 'रध्यतिर्वशगमने' (निरु. ६. ३२) इति यास्कः । यद्वा । द्विषते शत्रवे तदर्थं मा रधाम । परिपक्वा हननार्हा मा भूम ॥ 'रध हिंसासंराद्धयोः' । संराद्धिः पाक इति तद्वृत्तिः । माङि लुङि पुषादित्वात् च्लेरङादेशः ॥ ॥ १५ ॥

अग्ने मन्युं प्रतिनुदन् परेषामदब्धो गोपाः परि पाहि नस्त्वम् ।
प्रत्यञ्चो यन्तु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधां वि नेशत् ॥ ६ ॥

---

१. ग-त-भ-मु-यथार्था । २. त-भ-परित्यजेमहि । ३. त-भ-°स्त्यजेमहि ।

अग्ने । मन्युम् । प्रतिऽनुदन् । परेषाम् । अदब्धः । गोपाः । परि । पाहि । नः । त्वम् ।
प्रत्यञ्चः । यन्तु । निऽगुतः । पुनरिति । ते । अमा । एषाम् । चित्तम् । प्रऽबुधाम् । वि । नेशत् ॥ ६ ॥

हे ᵛअग्ने ᵛपरेषां शत्रूणां ᵛमन्युं क्रोधं ᵛप्रतिनुदन् प्रतिमुखं प्रेरयन् तिरस्कुर्वन् ᵛअदब्धः केनाप्यहिंसितो ᵛगोपाः गोपायिता ॥ ' गुपू रक्षणे ' इत्यस्मात् आयप्रत्ययान्तात् किपि वेरपृक्तस्य लोपात् पूर्वं वलि लोपे रूपमेतत् ॥ ईदृशः ᵛत्वं ᵛनः अस्मान् ᵛपरि ᵛपाहि परितः सर्वतो रक्ष । ᵛते शत्रवः ᵛप्रत्यञ्चः प्रत्यञ्चन्तः प्रतिनिवर्तमानाः ᵛनिगुतः ॥ ' गुङ् अव्यक्ते शब्दे ' । अस्मात् किपि तुक् ॥ भयेन गद्गदरूपमव्यक्तं शब्दं नितरां कुर्वन्तः ᵛपुनः ᵛयन्तु स्वकीयं स्थानं पुनर्गच्छन्तु । अपि च ᵛप्रबुधां प्रबुध्यमानानाम् ᵛएषां[1] शत्रूणां[1] ᵛचित्तं ज्ञानसाधनं मनः ᵛअमा सह युगपदेव ᵛवि ᵛनेशत् विनश्यतु ॥ प्रत्येकाभिप्रायेणैकवचनम् । ' णश अदर्शने ' इत्यस्माच्छान्दसो लुङ् । पुषादित्वात् च्लेरङादेशः । ' नशिमन्योरलिट्येत्वं वक्तव्यम् ' (पा.सू. ६.४.१२०.५) इत्यकारस्यैत्वम् ॥

धाता धातॄणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहम् ।
इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात् ॥ ७ ॥

धाता । धातॄणाम् । भुवनस्य । यः । पतिः । देवम् । त्रातारम् । अभिमातिऽसहम् ।
इमम् । यज्ञम् । अश्विना । उभा । बृहस्पतिः । देवाः । पान्तु । यजमानम् । निऽअर्थात् ॥ ७ ॥

ᵛधातॄणां स्रष्टॄणामपि ᵛधाता स्रष्टा ᵛभुवनस्य कृत्स्नस्य भूतजातस्य ᵛयः इन्द्रः सविता वा ᵛपतिः पालयिता तं ᵛदेवं देवनशीलं ᵛत्रातारं सर्वेभ्यो भयेभ्यः पालयितारम् ᵛअभिमातिषाहम् अभिमातीनां शत्रूणां सोढारमभिभवितारम् एवंगुणविशिष्टमिन्द्रं सवितारं वा स्तौमीति शेषः ॥ ' षह अभिभवे ' । ' छन्दसि सहः ' इति ण्विप्रत्ययः । छान्दसं विभक्त्युदात्तत्वम् ॥ ᵛउभा उभावश्विनौ ᵛबृहस्पतिः चैतत्प्रमुखाः सर्वे ᵛदेवाः ᵛइमं ᵛयज्ञम् अनुष्ठीयमानं ᵛयजमानं च ᵛन्यर्थात् निकृष्टादर्थात् पापात् । यद्वा । अर्थस्य प्रयोजनस्याभावो न्यर्थम् । तस्मात् ᵛपान्तु रक्षन्तु सफलं कुर्वन्त्वित्यर्थः ॥ ' नेरनिधाने ' (पा. सू. ६. २. १९२) इत्युत्तरपदान्तोदात्तत्वम् ॥

उरुव्यचा नो महिषः शर्म यंसदस्मिन् हवे पुरुहूतः पुरुक्षुः ।
स नः प्रजायै हर्यश्व मृळयेन्द्र मा नो रीरिषो मा परा दाः ॥ ८ ॥

उरुऽव्यचाः । नः । महिषः । शर्म । यंसत् । अस्मिन् । हवे । पुरुऽहूतः । पुरुऽक्षुः ।
सः । नः । प्रऽजायै । हरिऽअश्व । मृळय । इन्द्र । मा । नः । रिरिषः । मा । परा । दाः ॥ ८ ॥

ᵛउरुव्यचाः विस्तीर्णव्यापनः ᵛमहिषः महान् पूज्यो वा ᵛपुरुहूतः बहुभिर्यजमानैराहूतः ᵛपुरुक्षुः बहुनिवासः ॥ क्षियतेः ' मितद्वादिभ्य उपसंख्यानम् ' (पा. सू. ३. २. १८०. १) इति डुप्रत्ययः ॥ यद्वा । पुरुभिर्बहुभिः शब्द्यमानः[2] स्तूयमानः ॥ पूर्ववत् डुप्रत्ययः । औणादिके कर्मणि किपि वा ' अनित्यमागमशासनम् ' इति तुगभावः ॥ ईदृशः इन्द्रः ᵛअस्मिन् ᵛहवे यज्ञे । हूयन्ते अस्मिन् हवींषीति हवो यज्ञः । जुहोतेरधिकरणेऽप् ॥ यद्वा । अस्मिन् हवे स्वद्विषये आह्वाने ॥ ' भावेऽनुपसर्गस्य ' इति ह्वयतेरप् संप्रसारणं च ॥ ᵛनः अस्मभ्यं ᵛशर्म सुखं ᵛयंसत् यच्छतु ददात्वित्यर्थः ॥

१. ग–अजानतामेषां गुरूणां; त४.५-ग२–जानतामेतेषां शत्रूणां । २. त४.५–शंस्यमानः ।

यमेर्लेऽडागमः। 'सिब्बहुलम्' इति सिप्॥ हे ᵛहर्यश्व हरी अश्वौ यस्य तादृश हे ᵛइन्द्र ᵛसः त्वं ᵛनः अस्माकं ᵛप्रजायै। द्वितीयार्थे चतुर्थी। प्रजां पुत्रपौत्रादिकां ᵛमृळय सुखय। ᵛनः अस्मान् ᵛमा ᵛरीरिषः मा हिंसीः। ᵛमा च ᵛपरा ᵛदाः। परादानं परित्यागः। मा परित्याक्षीरित्यर्थः॥

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान्।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्॥ ९॥

ये। नः। सऽपत्नाः। अप। ते। भवन्तु। इन्द्राग्निऽभ्याम्। अव। बाधामहे। तान्।
वसवः। रुद्राः। आदित्याः। उपरिऽस्पृशम्। मा। उग्रम्। चेत्तारम्। अधिऽराजम्। अक्रन्॥९॥

ᵛनः अस्माकं ᵛये ᵛसपत्नाः शत्रवः ᵛते ᵛअप ᵛभवन्तु अपगता भवन्तु। स्वस्थानादपगताः प्रच्युता भवन्तु। ᵛतान् सपत्नान् ᵛइन्द्राग्निभ्यां हविर्भिः स्तुत्या च प्रसन्नाभ्यामनुगृहीता वयम् ᵛअव ᵛबाधामहे निकृष्टतरं विनाशयामः। अपि च ᵛवसवो ᵛरुद्रा ᵛआदित्याः च ᵛमा माम् ᵛउपरिस्पृशम् उन्नतपदस्य संस्पष्टारं सर्वेभ्यः श्रेष्ठम् ᵛअक्रन् कुर्वन्तु। तथा ᵛउग्रम् उद्गूर्णबलं ᵛचेत्तारं चेतितारम्॥ छान्दस इडभावः॥ सर्वस्य ज्ञातारम् ᵛअधिराजं सर्वेषामधीश्वरं च मां कुर्वन्तु॥ करोतेश्छान्दसे लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक्॥ ॥ १६ ॥ ॥ १० ॥

एकादशेऽनुवाके त्रयोविंशतिसंख्याकानि सूक्तानि। तत्र 'नासदासीत्' इति सप्तर्चं प्रथमं सूक्तं त्रैष्टुभम्। परमेष्ठी नाम प्रजापतिर्ऋषिः। वियदादिभावानां सृष्टिस्थितिप्रलयादीनामत्र प्रतिपाद्यत्वात् तेषां[1] कर्ता परमात्मा देवता। तथा चानुक्रान्तं—'नासत्सप्त प्रजापतिः परमेष्ठी भाववृत्तं तु' इति। गतो विनियोगः॥

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत्।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम्॥ १॥

न। असत्। आसीत्। नो इति। सत्। आसीत्। तदानीम्।
न। आसीत्। रजः। नो इति। विऽओम। परः। यत्।
किम्। आ। अवरीवरिति। कुह। कस्य। शर्मन्। अम्भः। किम्। आसीत्। गहनम्। गभीरम्॥१॥

'तपसस्तन्महिनाजायतैकम्' इत्यादिनाग्रे सृष्टिः प्रतिपादयिष्यते। अधुना ततः प्रागवस्था निरस्तसमस्तप्रपञ्चा या प्रलयावस्था सा निरूप्यते। ᵛतदानीं प्रलयदशायामवस्थितं यदस्य जगतो मूलकारणं तत् ᵛअसत् शशविषाणवन्निरुपाख्यं ᵛन ᵛआसीत्। न हि तादृशात् कारणादस्य सतो जगत उत्पत्तिः संभवति। तथा ᵛनो ᵛसत् नैव सदात्मवत् सत्त्वेन निर्वाच्यम् ᵛआसीत्। यद्यपि सदसदात्मकं प्रत्येकं विलक्षणं भवति तथापि भावाभावयोः सहावस्थानमपि[2] संभवति। कुतस्तयोः तादात्म्यमिति उभयविलक्षणमनिर्वाच्यमेवासीदित्यर्थः। ननु नो सदिति पारमार्थिकसत्त्वस्य निषेधः। तर्ह्यात्मनोऽप्यनिर्वाच्यत्वप्रसङ्गः। अथोच्येत। न[3]। आनीदवातमिति तस्य सत्त्वमग्रे वक्ष्यते परिशेषान्नायाया एवात्र सत्त्वं निषिध्यत इति। एवमपि तदानीमिति विशेषणानर्थक्यं व्यवहारदशायामपि

१. त१.२.३.६.७.८-भ-एषां। २. ग-त-भ२.५-सद्भावावस्थानमपि। ३. ग-त१.२.३.६.७.८-भ-'न' नास्ति।

तस्याः पारमार्थिकसत्त्वाभावात्[1]। अथ व्यावहारिकसतां पृथिव्यादीनां भावानां[2] विद्यमानत्वात् कथं नो सदिति निषेधः। तत्राह। vनासीद्रज इत्यादि। 'लोका रजांस्युच्यन्ते' (निरु. ४. १९) इति यास्कः। अत्र च सामान्यापेक्षमेकवचनम्। द्यौष्णो वक्ष्यमाणत्वात्तस्याधस्तनाः पातालादयः पृथिव्यन्ता नासन्नित्यर्थः। तथा vव्योम अन्तरिक्षं तदपि vनो नैवासीत्। पर इति सकारान्तं परस्तादित्यर्थे वर्तते। परशब्दाच्छान्दसोऽस्तातेरर्थेऽसिप्रत्ययः। vपरः व्योम्नः परस्तादुपरिदेशो द्युलोकप्रभृतिसत्यलोकान्तं vयत् अस्ति तदपि नासीदित्यर्थः। अनेन चतुर्दशभुवनगर्भं ब्रह्माण्डं स्वरूपेण निषिद्धं भवति। अथ तदावरकत्वेन[3] पुराणेषु प्रसिद्धानि यानि वियदादिभूतानि तेषामवस्थानप्रदेशं तदावरणनिमित्तं चाक्षेपमुखेन क्रमेण निषेधयति किमावरीवरिति। vकिम् आवरणीयं तत्त्वमावरकभूतजातम् vआवरीवः। अत्यन्तमावृणुयात्। आवार्याभावात् तदावरकमपि[4] नासीदित्यर्थः॥ वृणोतेर्यङ्लुगन्ताच्छान्दसे लङि तिपि रूपमेतत्॥ यद्वा। किमिति प्रथमैव। किं तत्त्वमावरकमावृणुयात्। आवियमाणवत्तदपि स्वरूपेण नासीदित्यर्थः। आवृण्वत् तत्सत्त्वं vकुह कुत्र देशेऽवस्थायावृणोति। आधारभूतस्तादृशो देशोऽपि नासीदित्यर्थः॥ किंशब्दात् सप्तम्यर्थे हप्रत्ययः। 'कु तिहोः' (पा. सू. ७.२.१०४) इति प्रकृतेः ककादेशः॥ vकस्य vशर्मन् कस्य वा भोक्तुर्जीवस्य शर्मणि[5] सुखदुःखसाक्षात्कारलक्षणे भोगे निमित्तभूते सति तदावरकं तत्त्वमावृणुयात्। जीवानामुपभोगार्था हि सृष्टिः। तस्यां हि सत्यां ब्रह्माण्डस्य भूतैरावरणं प्रलयदशायां च भोक्तारो जीवा उपाधिविलयात् प्रलीना[6] इति कस्य[7] कश्चिदपि भोक्ता[8] न संभवतीत्यावरणस्य निमित्ताभावादपि तत्र घटत इत्यर्थः। एतेन भोग्यप्रपञ्चवत् भोक्तृप्रपञ्चोऽपि तदानीं नासीदित्युक्तं भवति॥ किंशब्दादुत्तरस्य ङसः 'सावेकाचः०' इति प्राप्तस्योदात्तत्वस्य[9] 'न गोश्वन्साववर्ण०' इति प्रतिषेधः। 'सुपां सुलुक्०' इति शर्मणः सप्तम्या लुक्॥ यद्यपि सावरणस्य ब्रह्माण्डस्य निषेधेन तदन्तर्गतमप्सत्त्वमपि[9] निराकृतं तथापि 'आपो वा इदमग्रे सलिलमासीत्' (तै. सं. ७. १. ५. १) इति श्रुत्या कश्चिदपां सद्भावमाशङ्क्य तं प्रत्याचष्टे अम्भः किमासीत् इति। vगहनं दुष्प्रवेशं vगभीरं दुरवस्थानमत्यगाधम् ईदृशम् vअम्भः vकिमासीत्। तदपि नैवासीदित्यर्थः। श्रुतिस्ववान्तरप्रलयविषया॥

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत्प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किं चनास॥ २॥

न। मृत्युः। आसीत्। अमृतम्। न। तर्हि। न। रात्र्याः। अह्नः। आसीत्। प्रऽकेतः।
आनीत्। अवातम्। स्वधया। तत्। एकम्।
तस्मात्। ह। अन्यत्। न। परः। किम्। चन। आस॥ २॥

ननूक्तस्य प्रतिसंहारस्य संहर्त्रपेक्षत्वात् स एव संहर्ता मृत्युर्विद्यत इत्यत आह vन vमृत्युरासीत् इति। ननु यदि स नासीत् तर्हि तदभावकृतम् vअमृतम् अमरणं प्राणिनामवस्थानं तदानीमपि

१. त–°सत्त्वाभावात् इति तु न प्रलयदशाया एव वर्णनीयत्वेन तदुपादानौचित्यात् तदानीमपि तत्सत्त्वेन तदबाधात्। २. त१.३–भावानां तदामि; त७–भावानां तदपि। ३. ग–त१.२.३.६.७.८–भ–तदावरणत्वेन; त४.५–तदावरत्वेन। ४. त२.७–भ२.४.८–तद्रक्षकमपि; त३.८–भ५–तत्रक्षकमपि; त६–ततक्षकमपि। ५. त१.३.७–भ२.८–मु–शर्मणि सुखे। ६. ग–त१.२.३.६.७.८–भ–मु–प्रविलीना। ७. ग–कस्यचिदपि भोगो; त१.७–भ२.४.७.८–कस्यचिदपि भोगो; त२.३.६.८–कांस्यंचिदपि भोगो। ८. ग–त४.५–भ२ प्राप्तस्योदात्तस्य; त१.२.३.६.७.८–भ–मु–प्राप्तस्य। ९. त१.२.६.७–भ२.८–°मप्तत्वमपि; त४–°महत्त्वमपि; त५–°माप्राप्तत्वमपि; त८–भ२–°मतत्त्वमपि; भ४.७–°मसत्त्वमपि।

स्यात् तत्राह । vअमृतं vन vतर्हि इति । तर्हि तस्मिन् प्रतिहारसमये । अयं भावः । सर्वेषां प्राणिनां परिपक्वं भोगहेतुभूतं सर्वं कर्म यदोपभुक्तमासीत् तदा भोगाभावान्निष्प्रयोजनमिदं जगदिति परमेश्वरस्य मनसि संजिहीर्षा जायते । तथैव स मृत्युः[१] सर्वं जगत् संहरत[२] इति किमनेन मृत्युना संहर्त्रा तदभावकृतं वा कथममरणं स्यादिति । एतदेवाभिप्रेत्य कठैराम्नायते–' यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ' (क. उ. २. २५) इति । नन्वेतस्य सर्वस्याधिकरणभूतः कालो विद्यत इत्यत आह न रात्र्या इति । vरात्र्याः vअह्नः च vप्रकेतः प्रज्ञानं vन vआसीत् । तद्धेतुभूतयोः सूर्याचन्द्रमसोरभावात् । एतेनाहोरात्रनिषेधेन तदात्मको मासर्तुसंवत्सरप्रभृतिकः सर्वः कालः प्रत्याख्यातः । कथं तर्हि नो सदासीत्तदानीमिति कालवाची प्रत्ययः । उपचारादिति ब्रूमः । यथेदानींतननिषेधस्य कालोऽवच्छेदकस्तथा मायापि तदवच्छेदहेतुरित्यवच्छेदकत्वसाम्येनाकालेऽपि कालवाची प्रत्ययः । यदवादिष्म ब्रह्मणः परमार्थसत्त्वमग्रे वक्ष्यत इति तदिदानीं दर्शयत्यानीदिति । vतत् सकलवेदान्तप्रसिद्धं ब्रह्मतत्त्वम् vआनीत् प्राणितवत् । नन्वेवं प्राणनकर्तृजीवभावापन्नस्यैव ब्रह्मणः सत्त्वं स्यात् न विवक्षितस्य निरुपाधिकस्य ब्रह्मणः । ' अप्राणो ह्यमनाः शुद्धः ' इति तस्य प्राणसंबन्धाभावात् तत्राह आनीदवातमिति । अयमाशयः । आनीदित्यत्र धात्वर्थक्रिया तत्कर्ता तस्य च भूतकालसंबन्ध इति त्रयोऽर्थाः प्रतीयन्ते । तत्र समुदायो न विधीयते यथाग्नेयोऽष्टाकपाल इति येन ब्रह्मणः सत्त्वं न स्यात् । किं तर्ह्यनेन कर्तृत्वमनद्य भूतकालसत्तालक्षणो गुणो विधीयते दक्षा[३] जुहोतीति वाक्यान्तरविहिताग्निहोत्रानुवादेन तत्र गुणविधानम् । तत्राप्यनेन कर्तृत्वविशिष्टस्य न पूर्वकालसत्ता विधीयते[४] तन्निषेधानुपपत्तिप्रसङ्गात् अतोऽनेन कर्तृत्वेन इदानींतनेनोपलक्षितं यन्निरुपाधिकं परं ब्रह्म तस्यैव भूतकालसत्ता विधीयत इति न कश्चिद्दोष इति । नन्वीदृशस्य ब्रह्मणो मायया सह संबन्धासंभवात् सांख्याभिमता स्वतन्त्रा सद्रूपा सत्त्वरजस्तमोगुणात्मिका मूलप्रकृतिरेवाभिमतेति कथं[५] नो सदिति निषेधः । तत्राह vस्वधया इति । स्वस्मिन् धीयते ध्रियत आश्रित्य वर्तत इति स्वधा माया । तया तद्ब्रह्मैकमविभागापन्नमासीत् । ' सहयुक्तेऽप्रधाने ' (पा. सू. २. ३. १९) इति तृतीया सहशब्दयोगाभावेऽपि सहार्थयोगे भवति ' वृद्धो यूना०' (पा. सू. १. २. ६५) इति निपातनाल्लिङ्गात् । अत्र प्रकृतिप्रत्ययाभ्यां तस्याः स्वातन्त्र्यं निवार्यते । यद्यपि असङ्गस्य ब्रह्मणस्तया सह संबन्धो न संभवति तथापि तस्मिन्नविद्यया तत्स्वरूपमिव संबन्धोऽप्यध्यस्यते यथा शुक्तिकायां रजतस्य । एतेन सद्रूपत्वमपि तस्याः प्रत्याख्यातम् । ननु यदि माया ब्रह्मणा सहाविभागापन्ना तर्हि तस्या अनिर्वाच्यत्वात् ब्रह्मणोऽपि तत्प्रसङ्ग इति कथं तस्य सत्त्वमुक्तम् आनीदवातमिति । ब्रह्मणो वा सत्त्वात्तस्या अपि सत्त्वप्रसङ्ग इति कथं नो सदासीदिति सत्त्वप्रतिषेधः । मैवम् । अयुक्तिदृष्टयैक्यावभासेऽपि[६] युक्त्या विविच्य मायांशस्यानिर्वाच्यत्वं ब्रह्मणः सत्त्वं च प्रतिपादितम् । ननु इदइत्यादिति द्वावेव पदार्थौ आनीदवातं स्वधयेति तौ चेदङ्गीक्रियेते तत्किमपरमवशिष्यते यत् नासीद्रजः इत्यादिना प्रतिषिध्येत तत्राह तस्मादिति । vतस्माद्ध तस्मात् खलु पूर्वोक्तान्मायासहितात् ब्रह्मणः vअन्यत् vकिं vचन किमपि वस्तु भूतभौतिकात्मकं जगत् vन vआस न बभूव ॥ ' छन्दस्युभयथा ' इति लिटः सार्वधातुकत्वादस्तेर्भूभावाभावः ॥ ननु तदानीमन्यस्य सत्त्वनिषेधो न शक्यः । असत्त्वे चाप्रसक्तत्वान्[७] निषेधायोग इत्यत आह पर इति । vपरः परस्तात् सृष्टेरूर्ध्वं वर्तमानमिदं जगत् तदानीं न बभूवेत्यर्थः । अन्यथा उक्तरीत्या[८] क्वचिदपि निषेधो न स्यादिति भावः ॥

---

१. त१.२.३.४.५.६.८-म२ ८–मृत्युर्वै; म४–मृत्यर्कं; म७–मृत्युर्दकं । २. १.२.३.६.७.८-म–संहियते; त४.५–संहृत्य । ३. म२–यथा दक्षा । ४. त-म–विधीयते वा । ५. त२.३.६.७.८-म ४.५.७.८–किं । ६. त१७ म२.५–मु–अनुभवदृष्टया ऐक्यावभासेऽपि; त२.३.६.८-म८–अनुभवदृष्टया ऐक्यावभावेऽपि; त४.५–अयुक्तित्वात् दृष्टया एक्यावभासेऽपि; म७–अनुभवदृष्टया ऐक्याभावेऽपि । ७. त४.५–एव प्रेरकत्वान्न । ८. त-म–उक्तनीत्या ।

तम॑ आसी॒त्तम॑सा गू॒ळ्हमग्रे॒ऽप्रके॑तं स॒लि॒लं सर्व॑मा॒ इद॑म् ।
तु॒च्छ्येना॒भ्वपि॑हितं॒ यदासी॒त्तप॑स॒स्तन्म॑हि॒नाजा॑यतैक॑म् ॥ ३ ॥

तमः । आसीत् । तमसा । गूळ्हम् । अग्रे । अप्रऽकेतम् । सलिलम् । सर्वम् । आः । इदम् ।
तुच्छ्येन । आभु । अपिऽहितम् । यत् । आसीत् ।
तपसः । तत् । महिना । अजायत । एकम् ॥ ३ ॥

ननूक्तप्रकारेण यदि पूर्वमिदं जगन्नासीत् कथं तर्हि तस्य जन्म । जायमानस्य जनिक्रियायां कर्तृत्वेन कारकत्वात् कारकं च कारणावान्तरविशेष इति कारकस्य सतो नियतपूर्वक्षणवर्तित्वस्य अवश्यंभावात् । अथैतद्दोषपरिजिहीर्षया जनिक्रियायाः प्रागपि तद्विद्यत इत्युच्यते[1] । कथं तस्य जन्म । अत आह तमसा गूळ्हमग्रे इति । vअग्रे सृष्टेः प्राक् प्रलयदशायां भूतभौतिकं सर्वं जगत् vतमसा vगूळ्हम् । यथा नैशं तमः सर्वपदार्थजातमावृणोति तद्वत् । आत्मतत्त्वस्यावरकत्वान्माथापरसंज्ञं भावरूपाज्ञानमत्र तम इत्युच्यते । तेन तमसा निगूढं संवृतं कारणभूतेन तेनाच्छादितं भवति । आच्छादकात् तस्मात्तमसो नामरूपाभ्यां यदाविर्भवनं तदेव तस्य जन्मेत्युच्यते । एतेन कारणावस्थायामसदेव कार्यमुत्पद्यते इत्यसद्वादिनोऽसत्कार्यवादिनो ये मन्यन्ते ते प्रत्याख्याताः । ननु कारणे तमसि तज्जगदात्मकं कार्यं विद्यते चेत् कथं नासीद्रज इत्यादिनिषेधः[2] । तत्राह vतम vआसीत् इति । तमो भावरूपाज्ञानं मूलकारणम् । तद्रूपता तदात्मनाम् । यतः सर्वं जगत् प्राक् तम आसीदतो निषिध्यत इत्यर्थः । नन्वावरकत्वादावरकं तमः कर्तृ आवार्यत्वाज्जगत्कर्म । कथं तयोः कर्मकर्त्रोस्तादात्म्यम् । तत्राह अप्रकेतमिति । vअप्रकेतम् अप्रज्ञायमानम् । अयमर्थः । यद्यपि जगतस्तमसश्च कर्मकर्तृभावो यौक्तिको विद्यते तथापि व्यवहारदशायामिव तस्यां दशायां नामरूपाभ्यां विस्पष्टं न ज्ञायत इति तादात्म्यवर्णनम् ॥ अत एव मनुना स्मर्यते—' आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः ' (मनु. १. ५) इति । कुतो वा न प्रज्ञायते तत्राह । vसलिलम् । ' षल गतौ ' । औणादिक इलच् । vइदं दृश्यमानं vसर्वं जगत् सलिलं कारणेन संगतमविभागापन्नम् vआः आसीत् । अस्तेर्लङि तिपि ' बहुलं छन्दसि ' इतीडभावे ' हल्ङ्याब्भ्यः ' इति तिलोपे ' तिप्यनस्तेः ' (पा. सू. ८. २. ७३) इति पर्युदासाद्दकाराभावः । यद्वा सलिलमिति लुप्तोपमम् । सलिलमिव । यथा क्षीरेणाविभागापन्नं नीरं दुर्विज्ञानं तथा तमसाविभागापन्नं जगन्न शक्यविज्ञानमित्यर्थः । ननु विविधविचित्ररूपभूयसः[3] प्रपञ्चस्य कथमतितुच्छेन तमसा क्षीरेण नीरस्येवाभिभवः । तथा तमोऽपि क्षीरवद्बहुलवदित्येवोच्यते । तर्हि दुर्बलस्य जगतः सर्गसमयेऽपि नोद्भवसंभव इत्यत आह तुच्छ्येन इति । आ समन्ताद्भवतीति vआभु vतुच्छ्येन । छान्दसो यकारोपजनः । तुच्छेन तुच्छकल्पेन सदसद्विलक्षणेन भावरूपाज्ञानेन vअपिहितं छादितम् vआसीत् । दधातेः कर्मणि निष्ठा । दधातेर्हि । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । vएकम् एकीभूतं कारणेन तमसाविभागतां प्राप्तमपि तत्कार्यजातं vतपसः स्रष्टव्यपर्यालोचनरूपस्य[4] vमहिना माहात्म्येन vअजायत उत्पन्नम् । तपसः स्रष्टव्यपर्यालोचनरूपत्वं[4] चान्यत्राम्नायते—' यः सर्वज्ञः सर्ववित्यस्य ज्ञानमयं तपः ' (मु. उ. १. १. ९) इति ॥

---

१. त–इत्युच्येत । २. त४.५.भ२–इत्यादिना तन्निषेधः । ३. त–भ२.४.८–विविधविचित्रभूयसः । ४. त१.२.६.७–भ५–यत्पर्यालोचनरूपत्वं परमेश्वस्य तपः तस्य महिना महिम्ना महत्त्वेन । छांदसो वर्णलोपः । अजायत तस्मात्तमोरूपात् कारणात् पुनः प्रादुरासीत् । परमेश्वरस्य तपसः स्रष्टव्यपर्यालोचनरूपत्वं; त३.४.५.८–भ२.४.८–यत् पर्यालोचनरूपत्वं ।

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ ४ ॥

कामः । तत् । अग्रे । सम् । अवर्तत । अधि । मनसः । रेतः । प्रथमम् । यत् । आसीत् ।
सतः । बन्धुम् । असति । निः । अविन्दन् । हृदि । प्रतिऽइष्या । कवयः । मनीषा ॥ ४ ॥

ननूक्तरीत्या यदीश्वरस्य पर्यालोचनं जगतः पुनरुत्पत्तौ कारणं तदेव[1] किंनिबन्धनमित्यत आह कामस्तदग्र इति । vअग्रे अस्य विकारजातस्य सृष्टेः प्रागवस्थायां परमेश्वरस्य मनसि vकामः vसमवर्तत सम्यगजायत । सिसृक्षा जातेत्यर्थः । ईश्वरस्य सिसृक्षा वा किंहेतुकेत्यत आह मनस इति । vमनसः अन्तःकरणस्य संबन्धि वासनाशेषेण मायायां विलीनेऽन्तःकरणे समवेतम् । सामान्यापेक्षमेकवचनम् । सर्वप्राण्यन्तःकरणेषु समवेतमित्यर्थः । एतेनात्मनो गुणाधारत्वं प्रत्याख्यातम् । तादृशं vरेतः भाविनः प्रपञ्चस्य बीजभूतं vप्रथमम् अतीते कल्पे प्राणिभिः कृतं पुण्यात्मकं[2] कर्म vयत् यतः कारणात् सृष्टिसमये vआसीत् अभवत् । भूष्णु वर्धिष्णवजायत परिपक्वं सत् फलोन्मुखमासीदित्यर्थः । तत्ततो हेतोः फलप्रदस्य सर्वसाक्षिणः कर्माध्यक्षस्य परमेश्वरस्य मनसि सिसृक्षा अजायतेत्यर्थः । तस्यां च जातायां स्रष्टव्यं पर्यालोच्य ततः सर्वं जगत् सृजति । तथा चाम्नायते—'सोऽकामयत बहुः स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वेदं सर्वमसृजत यदिदं किंच' (तै. आ. ८. ६) इति श्रुतिः । आत्मनेत्थमवगमितेऽर्थे विद्वदनुभवमप्यनुग्राहकत्वेन प्रमाणयति सत इति । vसतः सत्त्वेन इदानीमनुभूयमानस्य सर्वस्य जगतः vबन्धुं बन्धकं हेतुभूतं कल्पान्तरे प्राण्यनुष्ठितं कर्मसमूहं vकवयः क्रान्तदर्शना अतीतानागतवर्तमानाभिज्ञा योगिनः vहृदि हृदये निरुद्धया vमनीषा मनीषया बुद्ध्या । 'सुपां सुलुक्०' इति तृतीयाया लुक् । vप्रतीष्य विचार्य । 'अन्येषामपि०' इति सांहितिको दीर्घः । vअसति सद्विलक्षणेऽव्याकृते कारणे vनिरविन्दन् निष्कृष्यालभन्त । विविच्याजानन्नित्यर्थः ॥

तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधा आसन्महिमान आसन्त्स्वधा अवस्तात्प्रयतिः परस्तात् ॥ ५ ॥

तिरश्चीनः । विऽततः । रश्मिः । एषाम् । अधः । स्वित् । आसी३त् । उपरि । स्वित् । आसी३त् ।
रेतःऽधाः । आसन् । महिमानः । आसन् । स्वधा । अवस्तात् । प्रऽयतिः । परस्तात् ॥५॥

एवमविद्याकामकर्माणि सृष्टेर्हेतुत्वेनोक्तानि । अधुना तेषां स्वकार्यजनने शैघ्र्यं प्रतिपाद्यते । येयं नासदासीदित्यविद्या प्रतिपादिता यश्च कामस्तदग्रे इति कामो मनसो रेतः प्रथमं यदासीदिति यत्कर्म vएषाम् अविद्याकामकर्मणां वियदादिभूतजातानि सृजतां vरश्मिः रश्मिसदृशो यथा सूर्यरश्मिः उदयानन्तरं निमेषमात्रेण युगपत् सर्वं जगत् व्याप्नोति तथा शीघ्रं सर्वत्र व्याप्नुवन् यः कार्यवर्गः vविततः विस्तृतः vआसीत् । स्विदासीत् इति वक्ष्यमाणमन्त्रापि संबध्यते । 'विचार्यमाणानाम्' (पा. सू. ८. २. ९७) इति प्लुतः । तत्रोदात्त इत्यनुवृत्तेः स चोदात्तः । vस्वित् इति वितर्के । स कार्यवर्गः प्रथमतः किं vतिरश्चीनः तिर्यंगवस्थितो मध्ये स्थित आसीत् किंवा vअधः अधस्तात् vआसीत् । आहोस्वित् vउपरि उपरिष्टात् किमासीत् । 'उपरि स्विदासीदिति च' (पा. सू. ८.२. १०२) इत्यनुदात्तः प्लुतः । 'आत्मन आकाशः संभूत आकाशाद्वायुर्वायोरग्निः' (तै. आ. ८. १) इत्यादिकया पञ्चम्यश्रुत्या तत उद्गातारं ततो होतारमितिवत् क्रमप्रतिपत्तौ सत्यामपि विद्युत्प्रकाशवत्

१. त-भ-तदेव वा । २. भ२-पुण्यापुण्यात्मकं ।

सर्गस्य शीघ्रव्यापनेन[1] तस्य क्रमस्य दुर्लक्षणत्वादेतेषु त्रिषु स्थानेषु प्राथम्यं कुत्रेति विचार्यते। एवं नाम शीघ्रं सर्वतो दिक्षु सर्गो निष्पन्न इत्यर्थः। एतदेव विभजते। सृष्टेषु कार्येषु मध्ये केचिन्नावाः vरेतोधाः रेतसो बीजभूतस्य कर्मणो विधातारः कर्तारो भोक्तारश्च जीवाः vआसन् अन्ये भावाः vमहिमानः। स्वार्थिक इमनिच्। महान्तो वियदादयो भोग्याः vआसन्। एवं मायासहितः परमेश्वरः सर्वं जगत् सृष्ट्वा स्वयं चानुप्रविश्य भोक्तृभोग्यादिरूपेण विभागं कृतवानित्यर्थः। अयमेवार्थस्तैत्तिरीयके 'तत्सृष्ट्वा तदेवानुप्राविशत्' (तै. आ. ८. ६) इत्यारभ्य प्रतिपाद्यते। तत्र च भोक्तृभोग्ययोर्मध्ये vस्वधा अन्ननामैतत्। भोग्यप्रपञ्चः vअवस्तात् अवरो निकृष्ट आसीत्। vप्रयतिः प्रयतिता भोक्ता vपरस्तात् पर उत्कृष्ट आसीत्। भोग्यप्रपञ्चं भोक्तृप्रपञ्चस्य शेषभूतं कृतवानित्यर्थः। 'विभाषा परावराभ्याम्' (पा. सू. ५. ३. २९) इति प्रथमार्थे अस्तातिः। 'अस्तातिं च' (पा. सू. ५. ३. ४०) इत्यवरशब्दस्यावादेशः। अवस्तादिति संहितायाम् ईषाअक्षादित्वात् प्रकृतिभावः॥

को अद्धा वेद क इह प्र वोचत्कुत आजाता कुत इयं विसृष्टिः।
अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव॥ ६॥

कः। अद्धा। वेद। कः। इह। प्र। वोचत्। कुतः। आऽजाता। कुतः। इयम्। विऽसृष्टिः। अर्वाक्। देवाः। अस्य। विऽसर्जनेन। अथ। कः। वेद। यतः। आऽबभूव॥ ६॥

एवं भोक्तृभोग्यरूपेण सृष्टिः संग्रहेण प्रतिपादिता। 'एतावद्वा इदमग्रे चैवास्तादश्च सोम एवास्तमग्निरास्ताद्'(श. ब्रा. १..४.२ १३) इतिवत्। अथेदानीं सा सृष्टिर्दुर्विज्ञानेति न विस्तरेणाभिहितेत्याह को अद्धेति। vकः पुरुषः vअद्धा पारमार्थ्येन vवेद जानाति। vकः वा vइह अस्मिँल्लोके vप्र vवोचत् प्रब्रूयात्। vइयं दृश्यमाना vविसृष्टिः विविधा भूतभौतिकभोक्तृभोग्यादिरूपेण बहुप्रकारा सृष्टिः vकुतः कस्मादुपादानकारणात्। vकुतः कस्माच्च निमित्तकारणात् vआजाता समन्ताज्जाता प्रादुर्भूता। एतदुभयं सम्यक् को वेद को वा विस्तरेण वक्तुं शक्नुयादित्यर्थः। ननु देवाः अजानन्तः। सर्वज्ञास्ते ज्ञास्यन्ति वक्तुं च शक्नुवन्तीत्यत[2] आह अर्वागिति। vदेवाः च vअस्य जगतो विसर्जनेन vवियदादिभूतोत्पत्त्यनन्तरं विविधं यद्भौतिकं सर्जनं सृष्टिस्तेन vअर्वाक् अर्वाचीनाः कृताः। भूतसृष्टेः पश्चाज्जाता इत्यर्थः। तथाविधास्ते कथं स्वोत्पत्तेः पूर्वकालीनां सृष्टिं जानीयुः। अजानन्तो वा कथं प्रब्रूयुः। उक्तं दुर्विज्ञानत्वं[3] निगमयति। vअथ एवं सति देवा अपि न जानन्ति किल[4]। तद्व्यतिरिक्तः vकः नाम मनुष्यादिः vवेद तज्जगत्कारणं जानाति vयतः कारणात् कृत्स्नं जगत् vआबभूव अजायत[5]॥

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद॥ ७॥

इयम्। विऽसृष्टिः। यतः। आऽबभूव। यदि। वा। दधे। यदि। वा। न।
यः। अस्य। अधिऽअक्षः। परमे। विऽओमन्। सः। अङ्ग। वेद। यदि। वा। न। वेद॥७॥

उक्तप्रकारेण यथेदं जगत्सर्जनं दुर्विज्ञानं एवं सृष्टं तज्जगत् दुर्धरमपीत्याह इयमिति। vयतः[6] उपादानभूतात् परमात्मनः vइयं vविसृष्टिः विविधा गिरिनदीसमुद्रादिरूपेण विचित्रा सृष्टिः

१. त४.५-म७-शीघ्रव्यापने। २. ग-म-शक्ष्यंतीत्यत। ३. ग-त१.२.३.६.७.८म-दुर्ज्ञानत्वं। ४. त१.२.३.६.७.८-म-'किल' नास्ति। ५. ग-त२.३.६.७.८-आजायत। ६. त-म-'यतः' नास्ति।

vआबभूव आजाता सोऽपि किल vयदि vवा vदधे धारयति vयदि vवा vन धारयति। एवं च को नाम अन्यो धर्तुं शक्नुयात्। यदि धारयेदीश्वर एव धारयेन्नान्य इत्यर्थः। एतेन कार्यस्य धारयितृत्वप्रतिपादनेन ब्रह्मण उपादानकारणत्वमुक्तं भवति। तथा च पारमर्षं सूत्रं—'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' (वे. सू. १. ४.२३) इति। यद्वा। अनेनार्धर्चेन पूर्वोक्तं सृष्टेर्दुर्ज्ञानत्वमेव द्रढयति। को वेदेत्यनुवर्तते। इयं विविधा सृष्टिः यत[1] आबभूव आ समन्तादजाययेति को वेद। न कोऽपि। नास्येव जगतो[2] जन्म न कदाचिदनीदृशं जगदिति बहवो भ्रान्ता भवन्त्यपि। यतः। 'जनिकर्तुः प्रकृतिः' (पा. सू. १.४.३०) इत्यपादानसंज्ञायां पञ्चम्यास्तसिल्। यस्मात् परमात्मन उपादानभूतादाबभूव[3] तं परमात्मानं को वेद। न कोऽपि। प्रकृतितः परमाणुभ्यो वा जगज्जन्मेति हि बहवो भ्रान्ताः। तथा स एवोपादानभूतः परमात्मा स्वयमेव निमित्तभूतोऽपि सन् यदि वा दधे विदधे इदं जगत् ससर्ज यदि वा न ससर्ज। असंदिग्धे संदिग्धवचनमेतच्छास्त्राणि चेत्प्रमाणं स्युरिति यथा। स एव विदधे। तं को वेद। अजानन्तोऽपि बहवो जडात् प्रधानादकर्तृकमेवेदं जगत् स्वयमजायतेति विपरीतं प्रतिपन्ना विदधतो[4] विधानमजानन्तोऽपि[4]। स एव उपादानभूत इत्यपि को वेद। न कोऽपि। उपादानादन्यः तटस्थ एवेश्वरो विदधे इति हि बहवः प्रतिपन्नाः। देवा अपि यस्य जानन्ति तदर्वाचीनानामेषां तत्परिज्ञाने कैव कथेत्यर्थः। यद्येवं जगत्सृष्टिरत्यन्तदुरवबोधा न तर्हि सा प्रमाणपद्धतिमध्यास्त इत्याशङ्क्य तत्सद्भाव ईश्वरमेव प्रमाणयति यो अस्येति। vअस्य भूतभौतिकात्मकस्य जगतः vयः vअध्यक्षः ईश्वरः vपरमे उत्कृष्टे सत्यभूते vव्योमन् व्योमन्याकाशे आकाशवन्निर्मले स्वप्रकाशे। यद्वा॥ अवतेस्तर्पणार्थात् 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्। 'नेड्वशि कृति' इतीट्प्रतिषेधः। 'उरण्रपरः' इत्यादिना वकारोपधयोः ऊठ्। सप्तम्या लुक्। 'न ङिसंबुद्धयोः' इति नलोपप्रतिषेधः॥ व्योमनि विशेषेण तृप्ते[5]। निरतिशयानन्दस्वरूपे इत्यर्थः। यद्वा। अवतिर्गत्यर्थः। व्योमनि विशेषेण गते व्याप्ते। देशकालवस्तुभिरपरिच्छिन्न इत्यर्थः। अथवा। अवतिर्ज्ञानार्थः। व्योमनि विशेषेण ज्ञातरि विशिष्टज्ञानात्मनि। ईदृशे स्वात्मनि प्रतिष्ठितः। श्रूयते हि सनत्कुमारनारदयोः संवादे—'स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि' (छा. उ. ७.२४.१) इति। ईदृशो यः परमेश्वरः vसो vअङ्ग। अङ्गेति प्रसिद्धौ। सोऽपि नाम vवेद जानाति। vयदि vवा vन vवेद न जानाति। को नाम अन्यो जानीयात्। सर्वज्ञ ईश्वर एव तां सृष्टिं जानीयात् नान्य इत्यर्थः॥ ॥ १७ ॥

'यो यज्ञः' इति सप्तर्चं द्वितीयं सूक्तं प्रजापतिपुत्रस्य यज्ञाख्यस्यार्षम्। आद्या जगती शिष्टास्त्रिष्टुभः। अत्रापि यज्ञादीनां केषांचिद्भावानां सृष्टिः प्रतिपाद्यते। अतः स्रष्टव्यत्वेन प्रधानभूतो योऽर्थः सैव देवता। तत्कर्तॄ[6] प्रजापतिरेव देवता। तथा चानुक्रान्तं—'यो यज्ञो यज्ञः प्राजापत्यो जगत्याद्या' इति। गतो विनियोगः॥

यो यज्ञो विश्वतस्तन्तुभिस्तत एकशतं देवकर्मेभिरायतः।
इमे वयन्ति पितरो य आययुः प्र वयाप वयेत्यासते ततेः॥ १॥

यः। यज्ञः। विश्वतः। तन्तुऽभिः। ततः। एकऽशतम्। देवऽकर्मेभिः। आऽयतः।
इमे। वयन्ति। पितरः। ये। आऽययुः। प्र। वय। अप। वय। इति। आसते। ततेः॥१॥

१. ग-त-भ-'यतः' नास्ति। २. त-भ-'जगतो' नास्ति। ३. त-भ-उपादानाद्बभूव। ४. त१. २.३.६.७.८-भ२.४.८-विदधानोपि विदधानं तं जानतोपि; त४.५-विदधतोपि दधानं जानंतोपि; भ७-विदधेतं जातं जानंतोपि। ५. ग-भ२.४.८-तृप्ते नित्यं तृप्ते। ६. ग-त१.२.३.६.८-भ२.४.८-तद्वत् कर्ता।

vतन्तुभिः तनितृभिर्विस्तारयितृभिर्वियदादिभूतैः vयः सर्गात्मकः vयज्ञः vविश्वतः सर्वतः vततः विस्तृतः । तथा vएकशतम् । एकं च शतं चैकशतम् । ' संख्या ' इति पूर्वपदप्रकृतिस्वरत्वम् । एकोत्तरशतमित्यर्थः । ब्रह्मा येषु शतसंख्येषु आत्मीयसंवत्सरेषु जीवति तदभिप्रायेणात्र शतसंख्या[1] । जीवता तेन प्रजापतिना सार्धमेकशतमित्युच्यते । यथा ' शतायुर्वै पुरुषः शतवीर्य आत्मैकशतः ' (तै. ब्रा. १.७.६.४) इति । अत्यन्तसंयोगे द्वितीया । ब्रह्मणः शतसंवत्सरपर्यन्तं vदेवकर्मेभिः देवानुद्दिश्य भोक्तृभिः कृतैः कर्मभिः vआयतः दीर्घीभूतः । तावत्कालावस्थायी । एवमायामविस्तारवान् यः उक्तः सर्गात्मको यज्ञस्तं यज्ञम् vइमे vपितरः पालकाः प्रजापतेः प्राणभूता विश्वसृजो देवाः vवयन्ति निर्मिमते । vये देवाः vआययुः स्रष्टव्यं सर्वं जगत् सर्जनेन व्यापुः । अपि च vप्र vवयाप vवयेति । प्रवाणं नाम प्रकृष्टस्य चेतनस्य भोक्तृप्रपञ्चस्य सर्जनम् । अपवानं नाम अपकृष्टस्य निकृष्टस्य अचेतनस्य भोग्यप्रपञ्चस्य सर्जनम् । ' वेञ् तन्तुसंताने ' । ' समुच्चयेऽन्यतरस्याम् ' (पा. सू. ३. ४. ३) इति लोट् । तस्य ' °लोटो हिस्वौ° ' इत्यनुवृत्तेर्हिरादेशः । शबादेशाः । ' अतो हेः ' इति लुक् । प्र वयाप वयेति वयन्तः प्रवाणमपवानं च कुर्वन्त इत्यर्थः । एवंभूताः सन्तस्ते विश्वसृजः vतते विस्तृते सत्यलोके vआसते प्राणरूपेण प्रजापतिमुपासते । यद्वा ज्योतिष्टोमादिर्यज्ञ एवंरूपकत्वेन पटात्मना वर्ण्यते । यो यज्ञो ज्योतिष्टोमादिस्तन्तुभिः तन्तुस्थानीयैः अग्निष्टोमात्यग्निष्टोमादिसंस्थाभेदैः सप्तभिश्छन्दोभिर्वा विश्वतः सर्वतस्ततो विस्तृतः । तथैकशतम् । तृतीयार्थे प्रथमा । एकाधिकेनाग्निचयनेन[2] युक्तैः देवकर्मेभिः[3] गवामयनप्रभृतिकैः विश्वसृजामयनान्तैः एकाहादिसत्रात्मकैर्वा आयतो दीर्घीभूत एवमायामविस्तारवान् यज्ञात्मकोऽयं पटः प्रजापतिना सृष्टः । तं पटं पितरोऽस्माकं पितृभूता इमेऽङ्गिरसो वयन्ति । तस्य पटस्य प्राचीनतन्तुस्थानीयानि स्तुतशस्त्राणि प्र[4] वय[4] त्वं कुरु अप वय तिरश्चीनतन्तुस्थानीयानि यजूंषि त्वं कुरु इत्येवं परस्परं नियुञ्जाना आसते नियुञ्जन्ति[5]॥ एवं विस्तृतस्य यज्ञस्य प्रजापतेः सकाशादुत्पत्तिरुत्तरया प्रतिपाद्यते ॥

पुमाँ एनं तनुत उत्कृणत्ति पुमान्वि तत्ने अधि नाके अस्मिन् ।
इमे मयूखा उप सेदुरू सदः सामानि चक्रुस्तसराण्योतवे ॥ २ ॥

पुमान् । एनम् । तनुते । उत् । कृणत्ति । पुमान् । वि । तत्ने । अधि । नाके । अस्मिन् ।
इमे । मयूखाः । उप । सेदुः । ऊँ इति । सदः । सामानि । चक्रुः । तसराणि । ओतवे ॥ २ ॥

vपुमान् पुरुष आदिपुरुषः प्रजापतिः vएनं यज्ञं vतनुते विस्तारयति । सृष्टवानित्यर्थः । तथा च ब्राह्मणं — ' स प्रजापतिर्यज्ञमतनुत तमाहरत्तेनायजत ' (ऐ. ब्रा. ५.३२) इति ' प्रजापतिर्यज्ञमसृजत यज्ञं सृष्टमनु ब्रह्मक्षत्रे असृज्येताम् ' (ऐ. ब्रा. ७.१९) इति च । स एव पुमान् सृष्टं तं यज्ञम् vउत्कृणत्ति उद्वेष्टयति । ' कृती वेष्टने ' । रौधादिकः । स एव vपुमान् प्रजापतिः vअस्मिन् भूलोके vनाके । अकं दुःखं नास्त्यस्मिन्निति नाकः स्वर्गलोकः । ' नञ्राण्नपात्° ' इत्यादिना नञः प्रकृतिभावः । तत्र च vवि vतत्ने इमं यज्ञं विस्तारयति । अधिः सप्तम्यर्थानुवादी । तनोतेर्लिटि ' तनिपत्योश्छन्दसि ' इत्युपधालोपः । तस्य स्थानिवद्भावात् द्विर्वचनम् । vमयूखाः रश्मिभूतास्तस्य प्रजापतेः प्राणात्मकाः vइमे विश्वसृजो देवाः vसदः सदनं देवयजनस्थानम् vउप vसेदुः । विश्वसर्जनहेतुभूतं विश्वसृजामयनाख्यं यज्ञं कर्तुमुपसीदन्ति । उपसद्य च vसामानि रथन्तरादीनि vओतवे वयनाय यज्ञाख्यं वस्त्रमोतुं[6] vतसराणि तिर्यक्सराणि[7] तिरश्चीनसूत्राणि vचक्रुः[8] ॥

---

१. ८३.४.५.८-म२.४.७.८—शतपालकाः । २. त१.२.३.६.७.८-म२.४.८—एकविधेनाग्निचयनेन ।
३. ग—देवकर्मेभिः देवानां कर्मभिः; त३.७—म२.८—देवकर्मेभिः देवकर्मभिः । ४. त-म२.४.८—' प्र यव ' नास्ति । ५. ग—निषीदंति । ६. त-भ—वस्त्रं वातुं । ७. ग-त४.५—तिर्यक्सरणानि । ८. ग२—चक्रुः कृतवंतः ।

कासीत्प्रमा प्रतिमा किं निदानमाज्यं किमासीत्परिधिः क आसीत् ।
छन्दः किमासीत्प्रउगं किमुक्थं यद्देवा देवमयजन्त विश्वे ॥ ३ ॥

का । आसीत् । प्रऽमा । प्रतिऽमा । किम् । निऽदानम् ।
आज्यम् । किम् । आसीत् । परिऽधिः । कः । आसीत् ।
छन्दः । किम् । आसीत् । प्रऽउगम् । किम् । उक्थम् । यत् । देवाः । देवम् । अयजन्त । विश्वे ॥३॥

विश्वसर्जनोपायत्वेन प्रजापतिना सृष्टे यज्ञे विश्वस्य स्रष्टारो विश्वसृजो देवा विश्वसर्जनाय तं यज्ञमन्वतिष्ठन् । तस्मिन् समये जगतोऽनुत्पत्तेर्जगदन्तःपातिनो यागोपकरणभूताः पदार्थाः कथमासन्नित्यनया प्रश्नः क्रियते । यत् यदा विश्वे सर्वे साध्याः देवाः देवं प्रजापतिम् अयजन्त तदानीं तस्य यज्ञस्य प्रमा प्रमाणम् इयत्ता का कथंभूता आसीत् । तथा प्रतिमा । हविष्प्रतियोगित्वेन मीयते निर्मीयत इति प्रतिमा देवता । सा च[1] तस्य यज्ञस्य कासीत् । तथा निदानम् आदिकारणं यागेऽप्रवृत्तस्य प्रवर्तकं फलं किम् आसीत् । तथा आज्यं घृतमेतदुपलक्षितं हविर्वा तस्य यज्ञस्य किमासीत् । तथा परिधिः । परितो धीयन्त इति त्रयः परिधयो बाहुमात्राः पलाशादिवृक्षजन्याः । परिपूर्वात् दधातेः 'उपसर्गे घोः किः' (पा. सू. ३. ३. ९२) इति किप्रत्ययः । सामान्यापेक्षमेकवचनम् । परिधयः क आसन्नित्यर्थः । तथा तस्य यज्ञस्य गायत्र्यादिकं छन्दः किमासीत् । तथा प्रउगम उक्थम् । उपलक्षणमेतत् । आज्यप्रउगादीन्युक्थानि शस्त्राणि वा कान्यासन् । एतेषु प्रश्नेषु त्रयाणामुत्तरं द्वयेनाह ॥

अग्नेर्गायत्र्यभवत् सयुग्वोष्णिहया सविता सं बभूव ।
अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत् ॥ ४ ॥

अग्नेः । गायत्री । अभवत् । सऽयुग्वा । उष्णिहया । सविता । सम् । बभूव ।
अनुऽस्तुभा । सोमः । उक्थैः । महस्वान् । बृहस्पतेः । बृहती । वाचम् । आवत् ॥ ४ ॥

सयुग्वा सहयुक्ता अग्नेः सहायभूता गायत्र्यभवत् । यष्टव्यात् प्रजापतेर्मुखादजायत । देवतासु मध्येऽग्निः छन्दःसु गायत्री च उभावप्यजायेतामित्यर्थः । तथा च तैत्तिरीयकं—'प्रजापतिरकामयत प्र जायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवतान्वसृज्यत गायत्री छन्दः' (तै. सं. ७. १. १. ४) इति । उष्णिहया[2] उष्णिक्छन्दसा सह सविता देवः सं बभूव तस्मात् प्रजापतेर्जज्ञे । 'टापं[3] चापि[3] हलन्तानाम्' इति वचनादुष्णिहशब्दात् टाप् । तथा[4] महस्वान् तेजस्वी सोमः उक्थैः स्तुतशस्त्रैः अनुष्टुभा अनुष्टुप्छन्दसा च सार्धं तस्मादेव प्रजापतेरजायत । तथा बृहस्पतेः देवस्य वाचं वाक्यं बृहती छन्दः आवत् अरक्षत् अगच्छद्वा । बृहत्या[5] सार्धं[5] बृहस्पतिरपि तस्मात् प्रजापतेर्जज्ञ इत्यर्थः ॥

विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः ।
विश्वान् देवाञ्जगत्या विवेश तेन चाकॢप्र ऋषयो मनुष्याः ॥ ५ ॥

१. त-भ-मु-ञ्ञा । २. ग-भ२-तथाष्णिहया । ३. त४.५-भ७-आपं चैव । ४. त१.२.३.६.७ तथा त्र । ५. त१.२.३.६.७.८-भ१.४.७.८-'बृहत्या सार्धं' नास्ति ।

विऽराट् । मित्रावरुणयोः । अभिऽश्रीः । इन्द्रस्य । त्रिऽस्तुप् । इह । भागः । अह्नः ।
विश्वान् । देवान् । जगती । आ । विवेश । तेन । चाकॢप्रे । ऋषयः । मनुष्याः ॥ ५ ॥

अपि च vमित्रावरुणयोः देवयोः vविराट् छन्दः vअभिश्रीः अभिश्रिता आश्रितासीत् । विराजा सह मित्रावरुणावपि प्रजापतेः सकाशादजायेतामित्यर्थः । vइह अस्मिन् यज्ञे vअह्नः सवनत्रयरूपस्य vभागः मध्यंदिनसवनाख्यः अंशः vत्रिष्टुप् छन्दश्च इन्द्रस्य अभिश्रयणीयौ आस्ताम् । तावित्यन्द्रश्च प्रजापतेः सकाशादजायन्तेत्यर्थः । तथा च तैत्तिरीयकम्—' उरसो बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवतान्वसृज्यत त्रिष्टुप्छन्दो बृहत्साम ' (तै. सं. ७.१.१.४) इति । तथा vविश्वान् सर्वान् vदेवान् vजगती छन्दः vआ vविवेश प्रविष्टवती । विश्वे देवा जगती च प्रजापतेरजायन्तेत्यर्थः । तथा च तैत्तिरीयकं—' तं विश्वे देवा देवता अन्वसृज्यन्त जगती छन्दो वैरूपं साम ' (तै. सं. ७. १. १. ५) इति । उक्तेन प्रकारेण प्रतिमा कासीत् छन्दः किमासीत् प्रउगं किमुक्थमिति त्रयाणामुत्तरं जातम् । आज्यं किमासीत् परिधिः क आसीदित्यनयोरुत्तरं पुरुषसूक्ते द्रष्टव्यम् । तत्र इहेवमाम्नायते—' देवा यज्ञमतन्वत वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ' ' सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ' (ऋ. सं. १०. ९०. ६; १५) इति । अयमर्थः । सर्वरसोत्पादको वसन्तः तस्य जगत्सर्जनसाधनस्य यज्ञस्याज्यमासीत् । आज्यदध्यादिभी[1] रसैः सार्धं तादृशो वसन्तोऽजायतेत्यर्थः । सर्वरसानां शोषको ग्रीष्म ऋतुरिध्म आसीत् । शुष्कैः काष्ठैः सार्धं ग्रीष्मोऽजायतेत्यर्थः[2] । पच्यमानव्रीहियुक्तः शरदृतुरस्य यज्ञस्य हविरासीत् । सप्त छन्दांसि त्रिः सप्तैकविंशतिधा भूत्वा अष्टादश समिधस्त्रयः परिधयश्चासन् । कासीत् प्रमा प्रतिमा किं निदानमित्यनयोरपि प्रश्नयोरप्येवमुत्तरं ' पूर्वे विश्वसृजोऽमृताः शतं वर्षसहस्राणि दीक्षिताः सत्रमासत ' इति ' एतेन वै विश्वसृज इदं विश्वमसृजन्त ' (तै. ब्रा. ३. १२. ९. २; ८) इति च तैत्तिरीयके समाम्नायते । अतस्तस्य यज्ञस्य सहस्रसंवत्सरपरिमितः कालः प्रमाणम् । विश्वस्य जगतः सर्जनमादिकारणं प्रवर्तकं फलमित्यर्थः । एतदुक्तं भवति । यदा[3] विश्वसृजो देवा देवं प्रजापतिं विश्वसृजामयनाख्येन यागेनायजन् तदोक्ताः सर्वयागोपकरणाः प्रजापतेः सकाशादजायन्तेति । यतोऽग्न्यादिदेवताभिः सह गायत्र्यादीनि सप्त छन्दांसि जातानि अतो हेतोस्तेषां छन्दसामग्न्यादयो देवता इति । छन्दोविचितौ सूत्रितं च—' अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वे देवा देवताः ' (पि. सू. ३.६३) इति । एवं प्राजापत्यो यज्ञोऽनुष्ठितः । vतेन यज्ञेन vऋषयः vमनुष्याः च vचाक्लृप्रे चक्लृपिरे । क्लृप्ताः सृष्टा आसन् ॥ कृपेः कर्मणि लिटि ' इरयोः ' ' इति रेआदेशः । ' कृपो रो लः ' (पा. सू. ८.२.१८) इति लत्वम् । तुजादित्वात् अभ्यासदीर्घः । तेनैव यज्ञेन सर्वं जगदसृजन्नित्यर्थः ॥

चाकॢप्रे तेन ऋषयो मनुष्या यज्ञे जाते पितरो नः पुराणे ।
पश्यन् मन्ये मनसा चक्षसा तान् य इमं यज्ञमयजन्त पूर्वे ॥ ६ ॥

चाकॢप्रे । तेन । ऋषयः । मनुष्याः । यज्ञे । जाते । पितरः । नः । पुराणे ।
पश्यन् । मन्ये । मनसा । चक्षसा । तान् । ये । इमम् । यज्ञम् । अयजन्त । पूर्वे ॥ ६ ॥

vपुराणे चिरंतने अस्मिन्[4] vयज्ञे vजाते विश्वसृष्टिर्देवैः सम्यगनुष्ठिते सति vतेन यज्ञेन vऋषयो vमनुष्याः vनः अस्माकं vपितरः पूर्वपुरुषाश्च vचाकॢप्रे अकल्प्यन्त । असृज्यन्त । vइमम्

१. त४.५-ओषध्यादिभिः । २. ग-त४.५-भ२.८-ग्रीष्मर्तुरजायतेत्यर्थः । ३. त-भ-यद्वा । ४. त१. २.३.६.७.८-भ-तस्मिन् ।

ईदृशं [v]यज्ञं [v]ये [v]पूर्वे साध्या देवाः प्रजापतेः प्राणभूताः [v]अयजन्त अन्वतिष्ठन् [v]तान् देवान् प्राणात्मना सर्वत्र वर्तमानान् [v]चक्षसा दर्शनहेतुना [v]मनसा [v]पश्यन् जानन् [v]मन्ये। तानेव विश्वस्रष्टॄन्[1] देवान् स्तौमि। मन्यतिरर्चतिकर्मा ॥

सहस्तोमाः सहछन्दस आवृतः सहप्रमा ऋषयः सप्त दैव्याः।
पूर्वेषां पन्थामनुदृश्य धीरा अन्वालेभिरे रथ्यो३ न रश्मीन् ॥ ७ ॥

सहऽस्तोमाः। सहऽछन्दसः। आऽवृतः। सहऽप्रमाः। ऋषयः। सप्त। दैव्याः। पूर्वेषाम्। पन्थाम्। अनुऽदृश्य। धीराः। अनुऽआलेभिरे। रथ्यः। न। रश्मीन् ॥ ७ ॥

स्तोमैः त्रिवृत्पञ्चदशादिभिः सह वर्तमानाः [v]सहस्तोमाः [v]सहछन्दसः गायत्र्यादिभिः छन्दोभिः सह वर्तमानाः [v]आवृतः आवर्तमानाः [v]सहप्रमाः। प्रमितिः प्रमा यज्ञस्येयत्तापरिज्ञानम्। तेन सह वर्तमानाः [v]दैव्याः देवस्य प्रजापतेः संबन्धिनः यद्वा देवानां यष्टव्यानां संबन्धिनः [v]ऋषयः द्रष्टारः सप्तसंख्याकाः शीर्षण्याः। यद्वा। मरीचिप्रमुखाः सप्तर्षयो होत्रादयः सप्त वषट्कर्तारो[2] वा। एवंविधा एते [v]पूर्वेषां पूर्वपुरुषाणामङ्गिरःप्रभृतीनां विश्वसृजां देवानां वा [v]पन्थां पन्थानमनुष्ठानमार्गम् [v]अनुदृश्य क्रमेण ज्ञात्वा [v]धीराः धीमन्तः सन्तः [v]अन्वालेभिरे अनुक्रमेण आरब्धवन्तः। यागानुष्ठाने प्रवृत्ता इत्यर्थः। [v]रथ्यो [v]न यथा रथिनो रथेन युक्ता रथस्य नेतारः सूताः [v]रश्मीन् अश्वनियोजनार्थान्[3] प्रग्रहान् सम्यग्रथस्य नयनाय हस्तेनान्वारभन्ते। अन्वारभ्य च सम्यक् तं रथं प्रवर्तयन्ति एवमेतेऽप्यनुष्ठानमार्गं श्रुतितोऽवगम्य सम्यगन्वतिष्ठन्नित्यर्थः ॥ ॥१८॥

'अप प्राचः' इति सप्तर्चं तृतीयं सूक्तं कक्षीवतः पुत्रस्य सुकीर्तेरार्षम्। चतुर्थ्यनुष्टुप् शिष्टाः षट् त्रिष्टुभः। चतुर्थीपञ्चम्यावश्विदेवत्ये शिष्टा ऐन्द्र्यः। तथा चानुक्रान्तम्—'अप प्राचः सुकीर्तिः काक्षीवतो मध्येऽनुष्टुप्सोत्तरा चाश्विन्यौ' इति। षष्ठेऽहनि ब्राह्मणाच्छंसिन उक्थशस्त्र एतत्सूक्तम्। सूत्रितं च—'सुकीर्तेर्ब्राह्मणाच्छंसी वृषाकपेश्च पङ्क्तिशंसम्' (आश्व. श्रौ. ८. ४) इति। चातुर्विंशिकेऽहनि माध्यंदिने सवने मैत्रावरुणस्य 'अप प्राचः' इत्येषारम्भणीया कद्रुत्प्रगाथानन्तरं शंसनीया। सूत्रितं च—'कद्रुन्तः प्रगाथा अप प्राच इन्द्र विश्वाँ अमित्रान्' (आश्व. श्रौ. ७.४) इति। अहर्गणेष्वपि द्वितीयादिष्वहःसु तस्यैव तस्मिन्नेव शस्त्र आरम्भणीया। सूत्रितं च—'आरम्भणीयाः पर्यासान् कद्रुतोऽहरहःशस्यानीति होत्रका द्वितीयादिष्वेव' (आश्व. श्रौ.७.१) इति ॥

अप प्राचः इन्द्र विश्वाँ अमित्रानपापाचो अभिभूते नुदस्व।
अपोदीचो अप शूराधराचः उरौ यथा तव शर्मन् मदेम ॥ १ ॥

अप। प्राचः। इन्द्र। विश्वान्। अमित्रान्। अप। अपाचः। अभिऽभूते। नुदस्व।
अप। उदीचः। अप। शूर। अधराचः। उरौ। यथा। तव। शर्मन्। मदेम ॥ १ ॥

. हे [v]इन्द्र [v]प्राचः प्रमुखमञ्चतः प्राग्देशे वर्तमानान्। अस्मत्तः पूर्वभागे वर्तमानानित्यर्थः। प्रपूर्वादञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन्। 'अनिदिताम्' इति नलोपः। शसि 'अचः' इत्यकारलोपे 'चौ' इति दीर्घत्वम्। 'अनिगन्तोऽञ्चतौ वप्रत्यये' (पा. सू. ६.२ ५२) इति गतेः

---

१. ग-त१.२.३.६.७.८-भ-विश्वस्य स्रष्टॄन्। २. त-भ१.२.४.८—वषट्कारो। ३. ग-त१.२.३.६.७.८-भ-मु-रथे अश्वनियोजनार्थान्।

प्रकृतिस्वरत्वम्। तादृशान् [v]विश्वान् सर्वान् [v]अमित्रान् शत्रून् [v]अप [v]नुदस्व अस्मत्तोऽपगमय। तथा हे [v]अभिभूते शत्रूणामभिभवितरिन्द्र [v]अपाचः अपमुखमञ्चतः पृष्ठभागे वर्तमानान् सर्वान् शत्रून् अप नुदस्व। अपि च [v]उदीचः ऊर्ध्वमञ्चतः उपरिवर्तमानान्। उत्पूर्वादञ्चतेः पूर्ववत् क्विनि 'उद ईत्' इत्यञ्चतेरकारस्येकारः। पूर्ववत्स्वरः। तथाविधानपि शत्रून् [v]अप नुदस्व। तथा हे [v]शूर शौर्यवन्निन्द्र [v]अधराचः अधरदेशमधोभागमञ्चतश्च अधस्तनानपि शत्रून् [v]अप नुदस्व। अधरशब्दोपपदादञ्चतेः शसि पूर्ववत् प्रक्रिया। 'चौ' इति पूर्वपदस्यान्तोदात्तः। [v]उरौ विस्तीर्णे [v]तव संबन्धिनि त्वया दत्ते [v]शर्मन् शर्मणि गृहे सुखे वा [v]यथा वयं [v]मदेम निरुपद्रवाः सन्तो हृष्येम तथा त्वं सर्वत्र वर्तमानानस्मदीयान् शत्रून् विनाशयेत्यर्थः॥

कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय।
इहेहैषां कृणुहि भोजनानि ये बर्हिषो नमोवृक्तिं न जग्मुः॥ २॥

कुवित्। अङ्ग। यवऽमन्तः। यवम्। चित्। यथा। दान्ति। अनुऽपूर्वम्। विऽयूय। इहऽइह। एषाम्। कृणुहि। भोजनानि। ये। बर्हिषः। नमःऽवृक्तिम्। न। जग्मुः॥ २॥

[v]अङ्ग हे इन्द्र [v]यवमन्तः यवादिधान्ययुक्ताः कर्षकाः [v]यवं [v]चित्। उपलक्षणमेतत्। यवगोधूमादीन् [v]अनुपूर्वं यो यो धान्यविशेषः प्रथमं पच्यते तेनानुपूर्व्येण [v]वियूय पृथक्कृत्य [v]यथा [v]कुवित् बहुलं [v]दान्ति लुनन्ति। 'दाप् लवने'। आदादिकः। विपूर्वात् यौतेर्ल्यपि 'युप्लुवोर्दीर्घश्छन्दसि' (पा. सू. ६.४.५८) इति दीर्घः। एवम् [v]इहेह अस्मिन्नस्मिन् देशे सर्वस्मिन् [v]एषां यजमानानां [v]भोजनानि। धननामैतत्। भोगसाधनानि धनानि [v]कृणुहि कुरु। यस्मिन्[1] यस्मिन् देशे यद्धनमपेक्षितं तदनुगुणं प्रयच्छेत्यर्थः॥ 'उतश्च प्रत्ययाच्छन्दसि वावचनम्' (पा. सू. ६.४.१०६.१) इति हेर्लुगभावः। एषामित्युक्ते के पुनरिमे इत्यत आह। [v]ये यजमानाः [v]बर्हिषः यज्ञस्य [v]नमोवृक्तिं नमसो हविर्लक्षणस्यान्नस्य नमस्कारात्मकस्य स्तोत्रस्य वा वर्जनमकरणं [v]न [v]जग्मुः न प्राप्नुवन्ति किंतु सर्वदा हविर्भिर्यजन्ति स्तुतिभिः स्तुवन्ति च। एषां कृणुहीत्यन्वयः॥

नहि स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु।
गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः॥ ३॥

नहि। स्थूरि। ऋतुऽथा। यातम्। अस्ति। न। उत। श्रवः। विविदे। सम्ऽगमेषु। गव्यन्तः। इन्द्रम्। सख्याय। विप्राः। अश्वऽयन्तः। वृषणम्। वाजयन्तः॥ ३॥

एकेन धुर्येण युक्तमनः स्थूरि इत्युच्यते। [v]ऋतुथा ऋतौ यद्यस्मिन् काले प्राप्तव्यं तद्योग्यकाले [v]स्थूरि [v]अनः [v]यातं तं देशं प्राप्तं [v]नहि [v]अस्ति न हि भवति। एकेन धुर्येण युक्तः शकटः शीघ्रं गन्तव्यं न प्राप्नोतीत्यर्थः। [v]उत अपि च [v]संगमेषु संग्रामेषु[2] [v]श्रवः अन्नं यशो वा [v]न [v]विविदे न लभते। इन्द्रस्तु उक्तविलक्षणः। [v]वृषणं वर्षितारं तम् [v]इन्द्रं [v]गव्यन्तः गा इच्छन्तः [v]विप्राः मेधाविनो वयं [v]सख्याय सख्यिकर्मणे आह्वयाम इति शेषः। कथंभूताः। [v]अश्वायन्तः अश्वानप्यात्मन इच्छन्तः [v]वाजयन्तः अन्नकामा[3] बलकामाश्च[3]॥

सौत्रामण्यां सुराग्रहाणां पुरोनुवाक्या 'युवम्' इत्येषा। सूत्रितं च—'युवं सुराममश्विनेति ग्रहाणां पुरोनुवाक्या' (आश्व. श्रौ. ३.९) इति॥

---

१. त-भ२.४.८-मु-यस्य। २. त२.६.७-संगमनेषु। ३. त७-अन्नकामाश्च।

युवं सुरामंमश्विना नमुचावासुरे सचा ।
विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥ ४ ॥

युवम् । सुरामम् । अश्विना । नमुचौ । आसुरे । सचा ।
विऽपिपाना । शुभः । पती इति । इन्द्रम् । कर्मऽसु । आवतम् ॥ ४ ॥

हे [v]अश्विना अश्विनौ हे [v]शुभस्पती उदकस्य शोभनालंकारस्य वा पती पालयितारौ [v]सुरामं सुष्ठु रमणसाधनमिदं हविः [v]विपिपाना विशेषेण पीतवन्तौ [v]युवं युवां [v]सचा सन्तौ संगतौ [v]आसुरे असुरपुत्रे [v]नमुचौ एतत्संज्ञे असुरे हन्तव्ये सति [v]कर्मसु योधनकर्मसु [v]इन्द्रम् [v]आवतम् अरक्षतम् ॥ विपिपाना । 'पा पाने' इत्यस्मात् लिटः कानच् । 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम् । शुभस्पती इति 'सुबामन्त्रिते०' इति पष्ठयन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वम् ॥

पूर्वोक्तानामेव ग्रहाणां 'पुत्रमिव' इति याज्या । सूत्रितं च—'पुत्रमिव पितराविश्विनोभेति याज्या' (आश्व. श्रौ. ३.९) इति ॥

पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः सरस्वती त्वा मघवन्नभिष्णक् ॥ ५ ॥

पुत्रम्ऽइव । पितरौ । अश्विना । उभा । इन्द्र । आवथुः । काव्यैः । दंसनाभिः ।
यत् । सुरामम् । वि । अपिबः । शचीभिः । सरस्वती । त्वा । मघऽवन् । अभिष्णक् ॥५॥

हे [v]इन्द्र त्वां [v]पितरौ मातापितरौ [v]पुत्रमिव ॥ 'पिता मात्रा' (पा. सू. १.२.७०) इति पितुः शेषः । [v]उभा उभौ अश्विनौ [v]काव्यैः प्रशस्यैः [v]दंसनाभिः आत्मीयैः कर्मभिः [v]आवथुः । मध्यमो व्यत्ययेन । आवतुः ररक्षतुः । त्वं च [v]सुरामं सुखेन रमणसाधनं हविः [v]यत् यदा [v]शचीभिः शक्तिभिः सार्धं [v]व्यपिबः विशेषेण पीतवानसि तदा हे [v]मघवन् धनवन्निन्द्र [v]सरस्वती देवी [v]त्वा त्वाम् [v]अभिष्णक् उपासेवत । भिष्णक् उपसेवायाम् । कण्ड्वादिः । छान्दसो यगभावः । लङि 'बहुलं छन्दसि' इति शपो लुक् । 'हल्ङ्याब्भ्यः०' इति लोपः ॥

इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥ ६ ॥

इन्द्रः । सुऽत्रामा । स्वऽवान् । अवःऽभिः । सुऽमृळीकः । भवतु । विश्वऽवेदाः ।
बाधताम् । द्वेषः । अभयम् । कृणोतु । सुऽवीर्यस्य । पतयः । स्याम ॥ ६ ॥

तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु ॥ ७ ॥

तस्य । वयम् । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ।
सः । सुऽत्रामा । स्वऽवान् । इन्द्रः । अस्मे इति । आरात् । चित् । द्वेषः । सनुतः । युयोतु ॥७॥

'त्रातारमिन्द्रम्' इत्यस्मिन् वर्गे व्याख्याते (ऋ. सं. १.४७.१२–१३) । अक्षरार्थस्तु । सुष्ठु त्राता धनवान् सर्वस्य वेदिता इन्द्रो रक्षणैः सुष्ठु सुखयिता भवतु शत्रूंश्च हिनस्तु भयराहित्यं च करोत्वस्माकम् । अतो वयं शोभनधीयोपेतस्य धनस्य स्वामिनो भवेमेति ॥ सप्तम्यास्तु । तस्य यज्ञार्हस्य इन्द्रस्यानुग्रहबुद्धौ भजनीये सौमनस्ये च वयं विषयभूता भवेम । सुष्ठु त्राता धनवान् स इन्द्रोऽस्मत्तो दूरदेशे द्वेष्टॄनन्तर्धानं योजयत्विति ॥ ॥ १९ ॥

'ईजानम्' इति सप्तर्चं चतुर्थं सूक्तं नृमेधपुत्रस्य शकपूतस्यार्षं मित्रावरुणदेवताकम् । आद्या तु लिङ्गोक्तद्युभूम्यग्निदेवताका न्यङ्कुसारिणी द्वितीयद्वादशकन्यष्टकवती । द्वितीयाषष्ठ्यौ प्रस्तारपङ्क्ती द्विद्वादशकन्यष्टकवती । सप्तमी महासतोबृहती न्यष्टकद्विद्वादशकवती । शिष्टास्तिस्रो विराड्रूपा एकादशिनत्र्यष्टकेति लक्षणलक्षिताः । तथा चानुक्रान्तम्—'ईजानं शकपूतो नार्मेधो मैत्रावरुणं न्यङ्कुसारिण्याद्या लिङ्गोक्तदेवतान्त्या[1] महासतोबृहत्युपाद्योपान्त्ये[2] प्रस्तारपङ्क्ती शेषा विराड्रूपाः' इति । गतो विनियोगः ॥

ईजानमिद् द्यौर्गूर्तवसुरीजानं भूमिरभि प्रभूषणि ।
ईजानं देवावश्विनावभि सुम्नैरवर्धताम् ॥ १ ॥

ईजानम् । इत् । द्यौः । गूर्तऽवसुः । ईजानम् । भूमिः । अभि । प्रऽभूषणि ।
ईजानम् । देवौ । अश्विनौ । अभि । सुम्नैः । अवर्धताम् ॥ १ ॥

[v]गूर्तवसुः । गूर्तमुद्यतं स्तोतृभ्यो दानाय हस्ते धृतं वसु धनं यस्याः सा तथोक्ता ॥ 'गुरी उद्यमने' । निष्ठा । 'ऋदितो निष्ठायाम्' इतीट्प्रतिषेधः । 'नसत्तनिषत्त०' इत्यादिना निपातनान्निष्ठानत्वाभावः । 'अन्येषामपि०' इति सांहितिको दीर्घः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ ईदृशी [v]द्यौः द्युलोकाभिमानिनी देवता [v]ईजानम् [v]इत् यज्ञैः इष्टवन्तमेव पुरुषमभिवर्धयति । यजेर्लिटः कानच् । 'वचिस्वपि०' इति संप्रसारणे द्विर्वचनम् । तथा [v]भूमिः च [v]प्रभूषणि प्रभवने यद्वा प्रकृष्टभूषणे अलंकारे निमित्तभूते सति [v]ईजानम् अभिवर्धयति । अपि च [v]देवौ दानादिगुणयुक्तौ [v]अश्विनौ [v]ईजानम् इष्टवन्तं पुरुषं [v]सुम्नैः धनैः [v]अभि [v]अवर्धताम् अभिवर्धयतः । वृधेरन्तर्भावितण्यर्थात् छान्दसो लङ् ॥

ता वां मित्रावरुणा धारयत्क्षिती सुषुम्नेषितत्वता यजामसि ।
युवोः क्राणाय सख्यैरभि ष्याम रक्षसः ॥ २ ॥

ता । वाम् । मित्रावरुणा । धारयत्क्षिती इति धारयत्ऽक्षिती । सुऽसुम्ना । इषितत्वता । यजामसि ।
युवोः । क्राणाय । सख्यैः । अभि । स्याम । रक्षसः ॥ २ ॥

हे [v]मित्रावरुणा मित्रावरुणौ [v]धारयत्क्षिती धियमाणभूमिकौ । यद्वा क्षितिरिति मनुष्यनाम । हवींषि धारयन्तः क्षितयो मनुष्या यथोः स्वभूतास्तथाविधौ । [v]सुषुम्ना सुषुम्नौ सुधनौ[3] सुसुखौ वा [v]ता तौ [v]वां युवाम् [v]इषितत्वता इषितत्वेन । तृतीयैकवचने छान्दसस्तकारोपजनः । यद्वा । भावप्रत्ययान्तात् पुनरपि भावप्रत्ययो विकरणद्वयवत् । इषितव्यत्वेन प्राप्तव्यत्वेन । हेतौ तृतीया । यतो

---

१. अनु.–मैत्रावरुणमाद्या लिङ्गोक्तदेवता न्यङ्कुसारिण्यन्त्या । २. त१.२.३.१.८म१.४.७.८–°द्योपान्त्ये च । ३. ग२-त४.५-म२–शोभनधनौ; त१.२.३.७-म१.४.७.८–'सुधनौ' नास्ति ।

युवां देवेषु मध्ये प्राप्तव्यौ ततो हेतोः ᵛयजामसि हविर्भिर्यजामः । 'इदन्तो मसि' इति मस इकारागमः । एवं च ᵛयुवोः युवयोः ᵛसख्यैः सख्रित्वैः । सख्युर्थः । ᵛक्षाणाय कुर्वते यजमानाय । करोतेः शानचि छान्दसो विकरणस्य लुक् । तादर्थ्ये चतुर्थी । यजमानार्थं ᵛरक्षसः यज्ञस्य बाधकान् राक्षसान् ᵛअभि ᵛष्याम अभिभवेम । 'उपसर्गप्रादुर्भ्याम्०' (पा. सू. ८. ३. ८७) इत्यस्तेः सकारस्य षत्वम् ॥

अधा चिन्नु यदिधिषामहे वामभि प्रियं रेक्णः पत्यमानाः ।
दद्वाँ वा यत्पुष्यति रेक्णः सम्वारन्नकिरस्य मघानि ॥ ३ ॥

अध । चित् । नु । यत् । दिधिषामहे । वाम् । अभि । प्रियम् । रेक्णः । पत्यमानाः ।
दद्वान् । वा । यत् । पुष्यति । रेक्णः । सम् । ऊँ इति । आरन् । नकिः । अस्य । मघानि ॥३॥

हे मित्रावरुणौ ᵛवां युवाभ्यां युवयोरर्थं ᵛयत् यदा ᵛदिधिषामहे हवींषि धारयामः । यद्वा । 'धिष शब्दे' । वां युवां स्तुमहे । ᵛअधा ᵛचित् अनन्तरमेव ᵛनु क्षिप्रं ᵛप्रियम् अभीष्टं ᵛरेक्णः । धननामैतत् । धनम् ᵛअभि ᵛपत्यमानाः अभिपतन्तोऽभिप्राप्नुवन्तो भवामः । ᵛदद्वान् ददिवान् । ददातेर्लिटः क्वसुः । 'छन्दस्युभयथा' इति वसोः सार्वधातुकत्वात् 'भाभ्यस्तयोरातः' इत्याकारलोपः । अत एवेडभावश्च । संहितायां नकारस्य 'दीर्घादटि समानपादे' इति रुत्वम् । 'आतोऽटि नित्यम्' इति सानुनासिक आकारः । वाशब्दश्चार्थे । हवींषि दत्तवांश्च ᵛयत् यो यजमानः ᵛरेक्णः धनं ᵛपुष्यति वर्धयति ᵛअस्य दत्तवतो यजमानस्य ᵛमघानि धनानि ᵛनकिः ᵛसम् ᵛआरन् नैवाप-गच्छन्ति । किंतु तमेव सर्वदा भजन्ते । समिरयेतत् अपेरयेतस्यार्थे । ᵛउ इति पूरणः । अर्तेश्छान्दसे लुङि 'सर्तिशास्त्यर्तिभ्यश्च' इति च्लेरङादेशः । 'ऋदृशोऽङि गुणः' (पा. सू. ७. ४.१६) ॥

असावन्यो असुर सूयत द्यौस्त्वं विश्वेषां वरुणासि राजा ।
मूर्धा रथस्य चाकन्नैतावतैनसान्तकध्रुक् ॥ ४ ॥

असौ । अन्यः । असुर । सूयत । द्यौः । त्वम् । विश्वेषाम् । वरुण । असि । राजा ।
मूर्धा । रथस्य । चाकन् । न । एतावता । एनसा । अन्तकऽध्रुक् ॥ ४ ॥

हे ᵛअसुर तमसः क्षेपक । यद्वा असवः प्राणाः । तान् ददाति मनुष्येभ्यः स्वोदयेन प्रयच्छतीत्यसुरः । ईदृश हे मित्र ᵛद्यौः द्युलोको देवनशीलादितिर्वा ᵛअन्यः । 'सुपां सुलुक्०' इति द्वितीयायाः स्वादेशः । वरुणापेक्षया अन्यम् ᵛअसौ अमुं नभसि दृश्यमानं त्वां ᵛसूयत असूत ॥ 'षूङ् प्राणि-प्रसवे' । छान्दसोऽडभावः ॥ हे ᵛवरुण ᵛत्वं च ᵛविश्वेषां सर्वेषां प्राणिनां ᵛराजा ᵛअसि ईश्वरो भवसि । तादृशयोर्युवयोः ᵛरथस्य ᵛमूर्धा शिरः ᵛचाकन् अस्मद्यज्ञं कामयते । यद्वा । रथस्य रंहण-शीलस्य यज्ञस्य मूर्धा न मूर्धेव प्रधानः सोमश्चाकन् युवां कामयते ॥ 'कन दीप्तिकान्तिगतिषु' । अस्माद्यङ्लुगन्ताच्छान्दसो लङ् ॥ यत एवमतः कारणात् ᵛअन्तकध्रुक् अन्तकस्य हननशीलस्य राक्षसादेर्यमस्यैव वा द्रोग्धा । 'द्रुह जिघांसायाम्' । 'सत्सूद्विष०' इत्यादिना क्विप् । 'वा द्रुहमुहष्णुहष्णिहाम्' (पा. सू. ८. २. ३३) इति षत्वम् । भष्भावः । ईदृशः स यज्ञः ᵛएतावता ᵛएनसा इयत्परिमाणेनापि पापलेशेनापि ᵛन युज्यते ॥

अस्मिन्त्स्वे३तच्छकपूत एनो हिते मित्रे निर्गतान् हन्ति वीरान् ।
अवोर्वा यद्वात्तनूष्ववः प्रियासु यज्ञियास्ववी ॥ ५ ॥

अस्मिन्। सु। एतत्। शकऽपूते। एनः। हिते। मित्रे। निऽगतान्। हन्ति। वीरान्।
अवोः। वा। यत्। धात्। तनूषु। अवः। प्रियासु। यज्ञियासु। अर्वा ॥ ५ ॥

योऽयं शकपूताख्य ऋषिः अस्मिन् शकपूते स्थितम् एतत् एनः पापं शत्रूणां पापकरमायुधं वा मित्रे देवे हिते हिताचरणपरेऽनुकूले सति निगतान् निगन्तव्यान् हननार्थं नियमेन प्राप्तव्यान् वीरान् शत्रोः पुत्रादीन् सु[1] सुष्ठु हन्ति हिनस्ति। अस्मिन्सूक्ते समवेतं[2] यत्पापं तस्मिन्मित्रस्य प्रसादेन तदीयेषु शत्रुषु स्वकार्यं दुःखं जनयतीत्यर्थः। निगतान्। निपूर्वाद्गमेः कर्मणि निष्ठा। 'गतिरनन्तरः[2]' इति गतेः प्रकृतिस्वरत्वम्। कदेत्यत आह। अवोः हविर्भिस्तर्पयितुः। अवतेरौणादिके उप्रत्ययः। तस्य यजमानस्य यज्ञियासु यज्ञार्हासु क्रियासु तनूषु शरीरेषु अर्वा अभिगन्ता मित्रो वरुणो वा यत् यदा[3] अवः रक्षणं धात् दधाति निदधाति स्थापयति। यद्वा। यदा[4] अर्वा अभिगन्ता स ऋषिः अवितुः रक्षितुर्मित्रस्य वरुणस्य वा यागार्हासु प्रियासु तनूषु शरीरेषु अवो हविर्लक्षणमन्नं धात् धारयति। तदानीं मित्रे वरुणे चानुकूले सति तदेनो वीरान् हन्तीत्यर्थः ॥

युवोर्हि माताऽदितिर्विचेतसा द्यौर्न भूमिः पयसा पुपूतनि।
अव प्रिया दिदिष्टन सूरो निनिक्त रश्मिभिः ॥ ६ ॥

युवोः। हि। माता। अदितिः। विऽचेतसा। द्यौः। न। भूमिः। पयसा। पुपूतनि।
अव। प्रिया। दिदिष्टन। सूरः। निनिक्त। रश्मिऽभिः ॥ ६ ॥

हे विचेतसा विशिष्टज्ञानौ मित्रावरुणौ युवोर्हि युवयोःखलु माता जननी अदितिः अदीना अखण्डनीया वा भवति। सैव भूमिः। 'इयं वा अदितिः' (तै. सं.२.२.६.१) इति श्रुतेः। द्यौर्न यथा द्युलोकः पयसा वृष्ट्युदकेन सर्वं जगत् पुनाति एवमेषा[5] सा भूमिः पयसा आत्मीयेन रसेन हविरात्मना परिणतेन पुपूतनि परिपवने यजमानानां पापस्य शोधने हेतुर्भवतीत्यर्थः ॥ पूतशब्दादाचारे क्विबन्तादौणादिकः कनिप्रत्ययः[6]। छान्दसं द्विर्वचनम्। तौ युवामतिदिश्य यूयं प्रिया प्रियाणि धनानि अव दिदिष्टन अवाङ्मुखमस्मदभिमुखं दिशत दत्त ॥ 'दिश अतिसर्जने'। अस्मालोटि छान्दसः शपः श्लुः। 'तप्तनप्तनथनाश्च' इति तशब्दस्य तनादेशः ॥ अपि च सूरः सूर्यस्य रश्मिभिः किरणैः निनिक्त अस्मान् शोधयत पोषयत वा। 'णिजिर् शौचपोषणयोः'। जौहोत्यादिकः। 'संज्ञापूर्वको विधिरनित्यः' इति 'निजां त्रयाणां०' (पा. सू. ७. ४. ७५) इत्यभ्यासस्य गुणो न क्रियते ॥

युवं ह्यप्नराजावसीदतं तिष्ठद्रथं न धूर्षदं वनर्षदम्।
ता नः कणूकयन्तीर्नृमेधस्तत्रे अंहसः सुमेधस्तत्रे अंहसः ॥ ७ ॥

युवम्। हि। अप्नऽराजौ। असीदतम्। तिष्ठत्। रथम्। न। धुःऽसदम्। वनऽसदम्।
ताः। नः। कणूकऽयन्तीः। नृऽमेधः। तत्रे। अंहसः। सुऽमेधः। तत्रे। अंहसः ॥ ७ ॥

हे मित्रावरुणौ युवं हि युवां खलु अप्नराजौ अप्नसा कर्मणा, प्रवर्षणप्रकाशनादिना राजमानौ दीप्यमानौ सन्तौ असीदतं स्वकीये स्थाने निषीदथः आसाथे ॥ अप्न इति कर्मनाम। 'आपः

१. त-भ-'सु' नास्ति। २. त१.२.३.६.७.८-म१.४.७.८-'समवेतं...गतिरनंतरः' नास्ति। ३. त-भ-यद्वा। ४. त-भ-'यदा' नास्ति। ५. ग-त१.२.३.६.७.८-भ-एवमेव। ६. ग-त४.५-म२.७-कनिन्प्रत्ययः।

कर्मण्याया हस्वो नुट्च वा' (उ. सू. ४. २०७) इत्याप्नोतेः असुन् तस्य नुडागमो धातोर्हस्वश्च। तस्मिन्नुपपदे राजतेः 'सत्सूद्विष०' इत्यादिना क्विप्। 'पीवोपवसनादीनां छन्दसि लोपो वक्तव्यः' (पा. म. ६. ३. १०९. ६) इत्यम्नसः सकारलोपः॥ तौ मित्रावरुणौ ᵛकणूकयन्तीः। कणतिः शब्दार्थः। कणनमाक्रोशरूपं शब्दनमिच्छन्तीः ᵛताः प्रसिद्धाः शात्रवीः प्रजा अभिभवितुम्। ᵛअ संप्रत्यर्थे। संप्रति ᵛरथं ᵛतिष्ठत् अभितिष्ठताम्। तिष्ठतेर्लेट्यडागमः। 'इतश्च लोपः' इतीकारलोपः। प्रत्येकाभिप्रायेणैकवचनम्। कीदृशं रथम्। ᵛधूर्षदं धुर्यश्वयोर्वहनदेशे सीदन्तं ᵛवनर्षदं[1] वनेषूद्यानेषु क्रीडार्थं निषीदन्तम्[1]। यद्वा। वनमित्युदकनाम। समुद्रमध्ये हि वरुणो निवसति। वने समुद्रोदके निषीदन्तम्। उभयत्रापि पूर्ववत् क्विप्। वनसदमित्यत्र छान्दसः सांहितिको रेफोपजनः। हे मित्रावरुणौ युवाभ्यां ᵛनृमेधः मम पिता ᵛअंहसः पापात् ᵛतत्रे ररक्षे रक्षितो बभूव। 'त्रैङ् पालने' इत्यस्मात् कर्मणि लिट्। यद्वा उपचाराज्जन्ये जनकशब्दः। नृमेधस्य पुत्रः शकपूतोऽहं पापात् युवाभ्यां तत्रे रक्षितोऽस्मि। ᵛसुमेधः अन्योऽपि सुयज्ञो यजमानः ᵛअंहसः पापात् ᵛतत्रे युवाभ्यामेवारक्ष्यत। 'भीत्रार्थानाम्' (पा. सू. १. ४. २५) इत्यंहसोऽपादानसंज्ञा॥ ॥२०॥

'प्रो षु' इति सप्तर्चं पञ्चमं सूक्तं पिजवनपुत्रस्य सुदास आर्षमैन्द्रम्। आद्यस्तृचः शाक्करः। षट्पञ्चाशदक्षरा शक्करी। द्वितीयस्तृचो महापाङ्क्तः। षळृचका महापङ्क्तिः। सप्तमी त्रिष्टुप्। तथा चानुक्रान्तं—'प्रो षु सुदाः पैजवनः शाक्करमहापाङ्क्तावाद्यौ तृचावन्त्या[2] त्रिष्टुप्' इति। षोळशिशस्त्र आद्यस्तृचः शंसनीयः। सूत्रितं च—'त्रिकद्रुकेषु महिषो यवाशिरं प्रो ष्वस्मै पुरोरथमिति तृचावातिच्छन्दसौ' (आश्व. श्रौ. ६. २) इति। महाव्रते माध्यंदिनसवने ब्रह्मशस्त्रेऽनुरूपतृचस्य 'प्रो ष्वस्मै' इत्येका। तथैव पञ्चमारण्यके सूत्रितं च—'प्रो ष्वस्मै पुरोरथमित्यतोऽनुरूपः[3]' (ऐ. आ. ५. १. १) इति॥

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत।
अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं बोधि चोदिता
नभन्तामन्यकेषां ज्याका अधि धन्वसु॥ १॥

प्रो इति। सु। अस्मै। पुरःऽरथम्। इन्द्राय। शूषम्। अर्चत।
अभीके। चित्। ऊँ इति। लोकऽकृत्। सम्ऽगे। समत्ऽसु। वृत्रऽहा।
अस्माकम्। बोधि। चोदिता। नभन्ताम्। अन्यकेषाम्। ज्याकाः। अधि। धन्वऽसु॥१॥

ᵛअस्मै ᵛइन्द्राय। षष्ठ्यर्थे चतुर्थी। अस्येन्द्रस्य ᵛपुरोरथं रथस्य पुरः पुरतः। 'पुरोऽव्ययम्' इति गतित्वाद्गतिसमासः। रथस्याग्रतो वर्तमानं ᵛशूषं बलं ᵛसु ᵛप्रो ᵛअर्चत। हे स्तोतारः सुष्ठु प्रपूजयत। प्र उ इति निपातसमुदायः प्रो इति। 'ओत्' इति प्रगृह्यसंज्ञम्। इन्द्रो विशेष्यते। समत्सु। समानं माद्यन्त्यत्रेति समदः संग्रामाः। औणादिकोऽधिकरणे क्विप्। 'समानस्य च्छन्दसि०' इति सभावः। ᵛसमत्सु संग्रामेषु ᵛसंगे संगमनीये शत्रुबले। 'ङोऽन्यत्रापि दृश्यते' (पा. सू. ३. २. ४८) इति गमेर्डः। ᵛअभीके ᵛचित् अभ्यर्णेऽपि निकटं प्राप्तेऽपि केशाकेश्यवस्थायामपि ᵛलोककृत् स्थितिकृत्न पलायिता[4] स्थित्वा च ᵛवृत्रहा वृत्राणामावरकाणां हन्ता एवंविधः स इन्द्रः ᵛअस्माकं स्तोतॄणां ᵛचोदिता धनानां प्रेरिता सन् ᵛबोधि। अस्माभिः कृतानि परिचरणानि बुध्यताम्।

---

१. त१.२.३.६.७.८-म१.४.५.७.८-'वनर्षदं...निषीदन्तं' नास्ति। २.अनु.-तृचौ त्रिष्टुबन्त्या। ३. त१.२.३.७-म१.२.८-°मित्यनुरूपः। ४. ग१-त४.५-म७.८-पालयिता।

बुधेश्छान्दसे लुङि ' दीपजनबुध० ' इत्यादिना कर्तरि च्लेश्श्रिणादेशः। ' बहुलं छन्दस्यमाङ्योगेऽपि ' इत्यडभावः। अपि च vअन्यकेषां कुत्सितानामन्येषां शत्रूणाम् vअधि[1] vधन्वसु धनुःष्वधिरोपिता vज्याकाः कुत्सिता ज्या vनभन्तां हिंस्यन्तां नश्यन्तु। ज्याशब्दात् कुत्सायां प्राग्विवाक्षः (पा. सू. ५. ३. ७०; ७४)। ' नभ तुभ हिंसायाम् '। क्रैयादिकः। श्यस्थयेन शप् ॥

त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम्।
अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे
नभन्तामन्यकेषाँ ज्याका अधि धन्वसु ॥ २॥

त्वम्। सिन्धून्। अव। असृजः। अधराचः। अहन्। अहिम्।
अशत्रुः। इन्द्र। जज्ञिषे। विश्वम्। पुष्यसि। वार्यम्। तम्। त्वा। परि। स्वजामहे।
नभन्ताम्। अन्यकेषाम्। ज्याकाः। अधि। धन्वऽसु ॥ २ ॥

हे vइन्द्र vत्वं vसिन्धून् स्यन्दनशीलान् जलपूरान् vअधराचः अधरमधोमुखमञ्चतो गन्तॄन् vअवासृजः मेघाङ्गिरगम्यः। यतस्त्वम् vअहिम् अन्तरिक्षे गतं मेघम् vअहन् हतवानसि। यद्वा। अहिमागत्य हन्तारं सर्वस्य जगत आवरकं वृत्रमसुरमहन् हतवानसि। अतो हे vइन्द्र त्वम् vअशत्रुः शत्रुरहितः vजज्ञिषे जायसे। न सन्ति शत्रवोऽस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम्। जनेर्लिटि ' गमहन० ' इत्यादिनोपधालोपः। ' द्विर्वचनेऽचि ' इति स्थानिवद्भावात् द्विर्वचनम्। तथा vविश्वं सर्वं vवार्यं वरणीयं संभजनीयं धनं vपुष्यसि वर्धयसि। ' वृङ् संभक्तौ '। ऋहलोर्ण्यत्। ' ईडवन्दवृशंसदुहां ण्यतः ' इत्याद्युदात्तत्वम्। vतं तादृशं vत्वा त्वां vपरि vष्वजामहे इविर्भिः स्तुतिभिश्चालिङ्गनं कुर्मः। वशीकुर्म इत्यर्थः। ' ष्वञ्ज परिष्वङ्गे '। ' दंशसञ्जस्वञां शपि ' (पा. सू. ६. ४. २५) इत्यनुनासिकलोपः। गतमन्यत् ॥

वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः।
अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति या ते रातिर्ददिर्वसु
नभन्तामन्यकेषाँ ज्याका अधि धन्वसु ॥ ३ ॥

वि। सु। विश्वाः। अरातयः। अर्यः। नशन्त। नः। धियः।
अस्ता। असि। शत्रवे। वधम्। यः। नः। इन्द्र। जिघांसति। या। ते। रातिः। ददिः। वसु।
नभन्ताम्। अन्यकेषाम्। ज्याकाः। अधि। धन्वऽसु ॥ ३ ॥

vविश्वाः सर्वाः vअरातयः अदात्र्यः vअर्यः अभिगन्त्र्यः vनः अस्माकं शत्रुभूताः प्रजाः vसु[2] सुष्ठु vवि vनशन्त विनश्यन्तु। हे इन्द्र त्वदर्थं vधियः कर्माणि स्तुतयो वा प्रवर्तन्ताम्। हे vइन्द्र vयः vनः अस्मान् vजिघांसति हन्तुमिच्छति। हन्तेः सनि ' अज्झनगमां सनि ' इति दीर्घः। ' अभ्यासाच्च ' इति कुत्वम्। तस्मै vशत्रवे vवधं हननसाधनमायुधम् vअस्तासि क्षेप्ता भवसि। ' असु क्षेपणे '। ताच्छीलिकस्तृन्। vते तव vया vरातिः धनप्रदानहेतुर्हस्तः। ' रा दाने '। करणे क्तिन्।

---

१. त-भ-' अधि ' नास्ति। २. त-भ-' सु ' नास्ति।

'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' इति क्त्रिन उदात्तत्वम्। सा रातिः ᵛवसु धनं ᵛददिः अस्मभ्यं दाता भवतु। 'आदृगमहन०' इति ददातेः किप्रत्ययः। 'न लोकाव्यय०' इति वसुशब्दात् षष्ठ्यभावः। सिद्धमन्यत्॥

यो नं इन्द्राभितो जनो वृकायुरादिदेशति।
अधस्पदं तमीं कृधि विबाधो असि सासहिर्नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥४॥

यः। नः। इन्द्र। अभितः। जनः। वृकऽयुः। आऽदिदेशति।
अधःऽपदम्। तम्। ईम्। कृधि। विऽबाधः। असि। ससहिः।
नभन्ताम्। अन्यकेषाम्। ज्याकाः। अधि। धन्वऽसु॥ ४॥

हे ᵛइन्द्र ᵛयः ᵛजनः ᵛवृकायुः। वृको हिंसकोऽरण्यश्वा स्तेनो वा। स इवाचरन् ᵛनः अस्मान् ᵛअभितः सर्वतः ᵛआदिदेशति अभिलक्ष्य आयुधान्यतिसृजति। दिशतेर्लेळ्यडागमः। छान्दसः शपः श्लुः। 'नाभ्यस्तस्याचि पिति' इत्यत्र 'बहुलं छन्दसीति वक्तव्यम्' इति वचनात् प्रतिषेधाभावे लघूपधगुणः। 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। ᵛतमीं तमिमं जनम् ᵛअधस्पदं पादस्याधस्ताद्वर्तमानं ᵛकृधि कुरु। करोतेश्छान्दसो विकरणस्य लुक्। 'श्रुशृणुपृकृवृभ्यः' इति हेर्धिः। यतस्त्वं ᵛविबाधः विशेषेण बाधिता शत्रूणां ᵛसासहिः ᵛअभिभविता च ᵛअसि[1]। सिद्धः शेषः॥

यो नं इन्द्राभिदासति सनाभिर्यश्च निष्टयः।
अव तस्य बलं तिर महीव द्यौरध त्मना नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥५॥

यः। नः। इन्द्र। अभिऽदासति। सऽनाभिः। यः। च। निष्टयः।
अव। तस्य। बलम्। तिर। महीऽइव। द्यौः। अध। त्मना।
नभन्ताम्। अन्यकेषाम्। ज्याकाः। अधि। धन्वऽसु॥ ५॥

हे ᵛइन्द्र ᵛयः[2] ᵛसनाभिः समानजन्मा शत्रुः ᵛनः अस्मान् ᵛअभिदासति उपक्षयति ᵛयश्च ᵛनिष्टयः निकृष्टजन्मा अस्मानुपक्षयति॥ जातार्थे निकृष्टवाचिनो निःशब्दादव्ययात्यप् (पा. सू. ४. २. १०४)। 'ह्रस्वान्तादौ तद्धिते' (पा. सू. ८. ३. १०१) इति षत्वम्॥ ᵛअध अनन्तरमेव ᵛमहीव ᵛद्यौः महती द्यौरिव विस्तृतं ᵛतस्य शत्रोः ᵛबलं ᵛत्मना आत्मना। 'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः। स्वयमेव ᵛअव[3] ᵛतिर जहि[3]। अवतिरतिर्वधकर्मा। गतमन्यत्॥

वयमिन्द्र त्वायवः सखित्वमा रभामहे।
ऋतस्य नः पथा नयाति विश्वानि दुरिता नभन्तामन्यकेषां ज्याका अधि धन्वसु॥६॥

वयम्। इन्द्र। त्वाऽयवः। सखिऽत्वम्। आ। रभामहे॥ ऋतस्य। नः। पथा। नय।
अति। विश्वानि। दुःऽइता। नभन्ताम्। अन्यकेषाम्। ज्याकाः। अधि। धन्वऽसु॥ ६॥

हे ᵛइन्द्र ᵛत्वायवः त्वामात्मन इच्छन्तः ᵛवयं ᵛसखित्वं सखिकर्म यज्ञात्मकम् ᵛआ ᵛरभामहे उपक्रमामहे। ᵛऋतस्य सत्यस्य यज्ञस्य ᵛपथा मार्गेण। अस्य टेर्लोपः। उदात्तनिवृत्तिस्वरेण तृतीयाया

---

१. ग–असि भवसि। २. त-भ–'यः' नास्ति। ३. त-भ–अवति रक्षति।

उदात्तत्वम्। ᵛविश्वानि सर्वाणि ᵛदुरिता दुरितानि दुर्गमनानि पापानि तत्फलानि च ᵛनः अस्मान् ᵛअति ᵛनय अतिपारय। गतमन्यत्॥

अस्मभ्यं सु त्वमिन्द्र तां शिक्ष या दोहते प्रति वरं जरित्रे।
अच्छिद्रोधी पीपयद्यथा नः सहस्रधारा पयसा मही गौः॥ ७॥

अस्मभ्यम्। सु। त्वम्। इन्द्र। ताम्। शिक्ष। या। दोहते। प्रति। वरम्। जरित्रे।
अच्छिद्रऽऊधी। पीपयत्। यथा। नः। सहस्रऽधारा। पयसा। मही। गौः॥ ७॥

हे ᵛइन्द्र ᵛत्वं ᵛतां गाम् ᵛअस्मभ्यं स्तोतृभ्यः ᵛसु ᵛशिक्ष प्रदेहि। शिक्षतिर्दानकर्मा। ᵛया गौः ᵛजरित्रे स्तोत्रे ᵛवरं वरणीयं पयः ᵛप्रति ᵛदोहते प्रतिदिनं नैरन्तर्येण दुग्धे॥ दुहेः 'बहुलं छन्दसि' इति शपो लुगभावः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वम्। धातुस्वरः शिष्यते। वरम्। 'वृञ् वरणे' इत्यस्मात् 'ग्रहवृदृनिश्चिगमश्च' इति कर्मण्यप्॥ सा प्रत्ता ᵛगौः ᵛअच्छिद्रोधी निबिडोधस्का अत एव ᵛसहस्रधारा बहुभिः क्षीरधाराभिरुपेता ᵛमही महती सती ᵛयथा ᵛनः अस्मान् ᵛपयसा क्षीरेण ᵛपीपयत् प्रवर्धयेत् तथा तां कुर्विति शेषः॥ 'ओप्यायी वृद्धौ'। व्यन्ताच्छान्दसो लुङ्। व्यत्ययेन धातोः पीभावः। अडभावश्छान्दसः॥ ॥२१॥

'उभे यत्' इति सप्तर्चं षष्ठं सूक्तं युवनाश्वपुत्रस्य मान्धातुरार्षम्। 'पूर्वेण[1]' इत्यर्धर्चसहितायाः सप्तम्यास्तु गोधा नाम ब्रह्मवादिन्यृषिः। सप्तमी पङ्क्तिः। शिष्टाः षळृष्टका महापङ्क्तयः। इन्द्रो देवता। तथा चानुक्रान्तम्—'उभे यन्मान्धाता यौवनाश्वो महापाङ्क्तं पङ्क्तिरन्त्या तामध्यर्धां गोधापश्यत्' इति। गतः सूक्तविनियोगः। चातुर्विंशिकेऽहनि माध्यंदिनेऽच्छावाकस्याध्यस्तृचो वैकल्पिकः स्तोत्रियः। सूत्रितं च—'उभे यदिन्द्र रोदसी अव यत्वं शतक्रतो' (आश्व. श्रौ. ७. ४) इति॥

उभे यदिन्द्र रोदसी आपप्राथोषाइव।
महान्तं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत्॥१॥

उभे इति। यत्। इन्द्र। रोदसी इति। आऽपप्राथ। उषाःऽइव।
महान्तम्। त्वा। महीनाम्। सम्ऽराजम्। चर्षणीनाम्।
देवी। जनित्री। अजीजनत्। भद्रा। जनित्री। अजीजनत्॥ १॥

हे ᵛइन्द्र ᵛउभे ᵛरोदसी द्यावापृथिव्यौ ᵛयत् यस्त्वम् ᵛआपप्राथ तेजसाप्रासि आपूरयसि। 'प्रा पूरणे'। आदादिकः। छान्दसो लिट्। ᵛउषाइव यथोषाः स्वभासा सर्वं जगदापूरयति तद्वत्। तं ᵛमहीनां महतां देवानामपि ᵛमहान्तम् अधिकं ᵛचर्षणीनां मनुष्याणामपि ᵛसम्राजम् ईश्वरमिन्द्रं ᵛत्वा त्वां ᵛदेवी देवनशीला ᵛजनित्री साधु जनयित्री अदितिः ᵛअजीजनत् अजनयत्। जनेर्ण्यन्तात् लुङि च्लौ रूपमेतत्। यस्मादेषा ᵛजनित्री ईदृशं पुत्रम् ᵛअजीजनत् अतः कारणात् सा[2] ᵛभद्रा कल्याणी प्रशस्ता जाता। जनेर्ण्यन्तात् साधुकारिणि तृन्। 'जनिता मन्त्रे' इतीडादौ णिलोपो[3] निपात्यते। 'अत्रेभ्यः' इति ङीप्॥

---

१. ग-भ१.७–ऋतस्य; त-भ२.४.८–ऋतस्य न। २. भ७–असौ। ३. त-भ–णिनिलोपो।

अव॑ स्म दुर्हणायतो मर्तस्य तनुहि स्थिरम् ।
अधस्पदं तमीं कृधि यो अस्माँ आदिदेशति
देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ २ ॥

अव॑ । स्म । दुःऽहनायतः । मर्तस्य । तनुहि । स्थिरम् ।
अधःऽपदम् । तम् । ईम् । कृधि । यः । अस्मान् । आऽदिदेशति ।
देवी । जनित्री । अजीजनत् । भद्रा । जनित्री । अजीजनत् ॥ २ ॥

[v]दुर्हणायतः दुःखप्रदं हननमाचरतः [v]मर्तस्य मनुष्यस्य शत्रोः [v]स्थिरं दृढं बलम् [v]अव [v]तनुहि । अवततं[1] नीचीनं कुरु । [v]स्म इति पूरकः । [v]तं शत्रुम् [v]ईम् एनम् [v]अधस्पदं पादयोरधस्ताद्वर्तमानं [v]कृधि कुरु । [v]यः शत्रुः [v]अस्मानादिदेशति जिघांसति । समानमन्यत् ॥

अव॑ त्या बृ॒हतीरिषो॑ वि॒श्वश्च॑न्द्रा अमित्रहन् ।
शची॑भिः शक्र धूनुहीन्द्र वि॒श्वाभि॒रूति॑भिर्देवी
जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ३ ॥

अव॑ । त्याः । बृ॒हतीः । इषः॑ । वि॒श्वऽच॑न्द्राः । अमित्रऽहन् ।
शची॑भिः । शक्र । धूनुहि । इन्द्र । वि॒श्वाभिः॑ । ऊतिऽभिः॑ ।
देवी । जनित्री । अजीजनत् । भद्रा । जनित्री । अजीजनत् ॥ ३ ॥

हे [v]अमित्रहन् अमित्राणां शत्रूणां हन्तर्हे [v]शक्र [v]इन्द्र [v]शचीभिः आत्मीयाभिः शक्तिभिः आत्मीयैः कर्मभिर्वा [v]त्याः ताः प्रसिद्धाः [v]बृहतीः महतीः । 'बृहन्महतोरुपसंख्यानम्' इति ङीप उदात्तत्वम् । [v]विश्वश्चन्द्राः । विश्वानि सर्वाणि चन्द्राणि हिरण्यानि यासां तादृशीः । 'हस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सुडागमः । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम् । एवंभूताः [v]इषः अन्नानि [v]विश्वाभिः सर्वाभिः [v]ऊतिभिः रक्षाभिः सार्धम् [v]अव [v]धूनुहि अस्मास्ववाङ्मुखं कम्पय । अस्मदभिमुखं गमयेत्यर्थः । गतमन्यत् ॥

चानुर्वैशिकेऽहनि माध्यंदिनेऽच्छावाकस्य 'अव यत्त्वम्' इति तृचो वैकल्पिकोऽनुरूपः । सूत्रं तु सूक्तादावुदाहृतम् ॥

अव॑ यत्त्वं श॒तक्र॑तविन्द्र वि॒श्वानि॑ धूनुषे ।
र॒यिं न सु॒न्व॒ते सचा॑ सहस्रिणी॒भिरू॒तिभि॑र्देवी
जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥ ४ ॥

अव॑ । यत् । त्वम् । श॒तऽक्र॑तो इति॑ शत॑ऽक्रतो । इन्द्र॑ । वि॒श्वानि॑ । धूनुषे ।
र॒यिम् । न । सु॒न्व॒ते । सचा॑ । सहस्रिणी॒भिः । ऊतिऽभिः॑ ।
देवी । जनित्री । अजीजनत् । भद्रा । जनित्री । अजीजनत् ॥ ४ ॥

---

१. ःत-भ-अवर्तं ।

हे [v]शतक्रतो बहुकर्मन् बहुप्रज्ञ वा [v]इन्द्र [v]सुन्वते सोमाभिषवं कुर्वते। सुनोतेर्लटः शतृ। 'हुश्नुवोः सार्वधातुके' इति यण्। 'शतुरनुमः' इति विभक्तेरुदात्तत्वम्। ईदृशाय यजमानाय [v]यत् यदा [v]स्वं [v]विश्वानि व्याप्तान्यन्नानि धनानि वा [v]अव [v]धूनुषे अभिगमयसि ददासीत्यर्थः। तदा [v]रयिं [v]न रयिं च पुत्ररूपं धनं च [v]सहस्रिणीभिः सहस्रसंख्यायुक्ताभिः [v]ऊतिभिः रक्षाभिः [v]सचा सह प्रदेहि। गतमन्यत् ॥

अव स्वेदाइवाभितो विष्वक्पतन्तु दिद्यवः ।
दूर्वायाइव तन्तवो व्यस्मदेतु दुर्मतिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥५॥

अव । स्वेदाःऽइव । अभितः । विष्वक् । पतन्तु । दिद्यवः ।
दूर्वायाःऽइव । तन्तवः । वि । अस्मत् । एतु । दुःऽमतिः ।
देवी । जनित्री । अजीजनत् । भद्रा । जनित्री । अजीजनत् ॥ ५ ॥

[v]स्वेदाइव गात्रात्[1] स्वेदबिन्दव इव [v]अभितः सर्वतः [v]दिद्यवः द्योतमानान्यायुधानीन्द्रस्य दीप्तयो वा [v]विष्वक् नानामुखाः [v]अव [v]पतन्तु निपतन्तु। [v]दूर्वायाइव [v]तन्तवः। यथा दूर्वाकाण्डा बहुशः प्ररोहन्ति एवं बहुशो विस्तृता दृश्यन्ते। [v]दुर्मतिः दुष्टाभिसंधिः शत्रुः [v]अस्मत् अस्मत्तः [v]वि [v]एतु वियुत्य गच्छतु। गतमन्यत् ॥

दीर्घं ह्यङ्कुशं यथा शक्तिं बिभर्षि मन्तुमः ।
पूर्वेण मघवन्पदाजो वयां यथा यमो देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् ॥६॥

दीर्घम् । हि । अङ्कुशम् । यथा । शक्तिम् । बिभर्षि । मन्तुऽमः ।
पूर्वेण । मघऽवन् । पदा । अजः । वयाम् । यथा । यमः ।
देवी । जनित्री । अजीजनत् । भद्रा । जनित्री । अजीजनत् ॥ ६ ॥

[v]दीर्घम् आयतम् [v]अङ्कुशं सृणिं [v]यथा [v]बिभर्षि एवमायतां [v]शक्तिं हे [v]मन्तुमः[2]। मन्तुर्ज्ञानम्। तद्वन्। 'मतुवसो रुः' इति संबुद्धौ नकारस्य रुत्वम्। ईदृशेन्द्र [v]बिभर्षि धारयसि। 'डुभृञ् धारणपोषणयोः'। जौहोत्यादिकः। श्लौ 'भृञामित्' इत्यभ्यासस्येत्वम्। हे [v]मघवन् धनवन्निन्द्र [v]यथा [v]पूर्वेण देहस्य पूर्वभागे वर्तमानेन [v]पदा पादेन [v]अजः छागः [v]वयां शाखामाकर्षति तथा पूर्वोक्तया शक्त्याकृष्य [v]यमः शत्रून् नियच्छसि। यमेर्लेट्यडागमः। 'बहुलं छन्दसि' इति शपो लुक्। गतमन्यत् ॥

नकिर्देवा मिनीमसि नकिरा योपयामसि मन्त्रश्रुत्यं चरामसि ।
पक्षेभिरपिकक्षेभिरत्राभि सं रभामहे ॥ ७ ॥

नकिः । देवाः । मिनीमसि । नकिः । आ । योपयामसि । मन्त्रऽश्रुत्यम् । चरामसि ।
पक्षेभिः । अपिऽकक्षेभिः । अत्र । अभि । सम् । रभामहे ॥ ७ ॥

हे [v]देवाः इन्द्रादयः युष्मद्विषये [v]नकिः [v]मिनीमसि न किमपि हिंस्मः। 'मीङ् हिंसायाम्'। क्र्यादिकः। 'मीनातेर्निगमे' इति ह्रस्वः। इदन्तो मसिः। आकारः समुच्चये। [v]नकिः[3] न किंच[3]

१. ग–वक्त्रात्। २. त२.३.७-म१.२.४.८–'मंतुमः' नास्ति। ३. त१.२.३.७-म१.४.८–नकिराव; भ२.७–नकिरा।

[v]योपयामसि योपयामः। अननुष्ठानेन विमोहयामः। ' युप विमोहने '। किं तर्हि । [v]मन्त्रश्रुत्यं मन्त्रेण स्मार्यं श्रुतौ विधिवाक्ये प्रतिपाद्यं युष्मद्विषयं कर्म तत् [v]चरामसि आचरामः। अनुतिष्ठामः। अपि च [v]पक्षेभिः पक्षैः पक्षस्थानीयैः स्तुतशस्त्रैः [v]अपिकक्षेभिः। अपिकक्षो नाम बाह्वोर्मध्यभागः। यज्ञस्य अपिकक्षभूतैर्हविर्भिः [v]अत्र अस्मिन् यज्ञेऽभितः सर्वतो युष्मान् [v]सं [v]रभामहे सम्यगवलम्बामहे ॥ ॥ २२ ॥

' यस्मिन् ' इति सप्तर्चं सप्तमं सूक्तं यमगोत्रस्य कुमारस्यार्षमानुष्टुभं यमदेवत्यम्। तथा चानुक्रान्तं—' यस्मिन् कुमारो यामायनो याममानुष्टुभं तु[1] ' इति ॥

यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः ।
अत्रा नो विश्पतिः पिता पुराणाँ अनु वेनति ॥ १ ॥

यस्मिन् । वृक्षे । सुऽपलाशे । देवैः । सम्ऽपिबते । यमः ।
अत्र । नः । विश्पतिः । पिता । पुराणान् । अनु । वेनति ॥ १ ॥

[v]वृक्षे । लुप्तोपममेतत् । वृक्षवत् [v]सुपलाशे शोभनपलाशोपेते शोभनोद्यानसहिते। यद्वा। शोभनपर्णोपेने वृक्षे। तादृशस्य वृक्षस्य मूलं यथौष्ण्यजनितश्रमापनोदनेन सुखकरं भवति तद्वत् सुखकरे [v]यस्मिन् स्थाने [v]देवैः परिजनभूतैः [v]यमः नियन्ता वैवस्वतः [v]संपिबते सह भुङ्क्ते[2]। पिबतीत्यर्थः। [v]विश्पतिः विशां प्रजानामधिपतिः [v]पिता [v]नः। व्यत्ययेन बहुवचनम्। मम नचिकेतसो[2] जनको वाजश्रवसः [v]अत्र अस्मिन् यमस्य स्थाने [v]पुराणान् पुरातनान् अत्र चिरकालं निवसतः पितॄन् [v]अनु तेषां पश्चात् तत्समीपे निवसत्वयमिति [v]वेनति मां कामयते। नचिकेता नाम कुमारो वाजश्रवसेन पित्रा यमलोकं प्रस्थापितः सन् यमं दृष्ट्वा प्रसाद्य पुनरपीमं लोकमाजगाम। अयमर्थ इदमादिकैर्मन्त्रैः प्रतिपाद्यते। यद्वा। कुमारो नाम नचिकेतसोऽन्यः कश्चिदृषिः। यच्छतीति यम आदित्यः। तमनेन सूक्तेन तुष्टाव। सुपलाशे वृक्ष इव यस्मिन् शोभने स्थाने यम आदित्यो देवैः[3]। दीव्यन्तीति देवा रश्मयः। तैः संपिबते संगच्छते। उपसर्गवशात् पिबतिरत्र[4] गत्यर्थः। व्यत्ययेनात्मनेपदम्। अत्र अस्मिन् स्थाने स्थितो विश्पतिर्विशां प्रजानां प्रकाशनप्रवर्षणादिना पालयिता[4] प्राणात्मना सर्वेषां जनकः स आदित्यः पुराणांश्चिरंतनान् स्तोतॄन् नोऽस्मानपि वेनति अनुग्राह्यत्वेन कामयते। यद्वा। अत्र स्थाने स्थितान् नोऽस्माकं पुराणान् पूर्वपुरुषाननु वेनति अनुक्रमेण कामयते॥

पुराणाँ अनुवेनन्तं चरन्तं पापयामुया ।
असूयन्नभ्यचाकशं तस्मा अस्पृहयं पुनः ॥ २ ॥

पुराणान् । अनुऽवेनन्तम् । चरन्तम् । पापया । अमुया ।
असूयन् । अभि । अचाकशम् । तस्मै । अस्पृहयम् । पुनरिति ॥ २ ॥

[v]पुराणान् पुरातनान् पितॄन् [v]अनुवेनन्तं मामनुगतं कामयमानम् [v]अमुया अनया [v]पापया निकृष्टया बुद्ध्या सह [v]चरन्तं वर्तमानं पितरं वाजश्रवसम् [v]असूयन् सुखेन जीवन्तं मां मृत्युसमीपं प्रेहीत्युक्तवानिति मानसेनोपतापेन युक्तः सन् प्रथमम् [v]अभ्यचाकशम्। अयं पश्यतिकर्मा। अभ्य-

१. अनु.–हि । २. त१.२.३.६.७.८-भ–' भुङ्क्ते...नचिकेतसः ' नास्ति । ३. त-भ–' देवौः ' नास्ति । ४. ग-त१.२.३.६.७.८-भ–' पिबतिरत्र ..... पालयिता ' नास्ति ।

पश्यम् । ' असुञ् मानस उपतापे ' । कण्ड्वादिः । ᵛपुनः पश्चात् ᵛतस्मा ᵛअस्पृहयं पितुराज्ञया तं मृत्युं प्राप्तुमैच्छम् । ' स्पृह ईप्सायाम् ' । चुरादिरदन्तः । ' स्पृहेरीप्सितः ' (पा. सू. १.४.३६) इति संप्रदानसंज्ञायां तच्छब्दाच्चतुर्थी । यद्वा । पुराणान् चिरंतनान् स्तोतॄन् पूर्वपुरुषान् पितॄन् वा अनुवेनन्तमनुक्रमेण कामयमानं चरन्तम् उदयास्तमयाभ्यां दिवि परिवर्तमानमनया पापया निकृष्टया स्तोतुमसमर्थया बुद्ध्या असूयन् । गुणेषु दोषाविष्करणमसूया । परकीयगुणेषु दोषानाविष्कुर्वन्नभ्यचाकशम् । अयमपि कश्चिदिति सामान्यरूपेणाभ्यपश्यम् । इदानीं तु पुनस्तस्यादित्यस्य माहात्म्यं जानन्[१] तस्मा अस्पृहयम् । तमेवादित्यं स्तुतिभिः परिचरणात्मकैः कर्मभिश्च प्राप्तुमैच्छम्[२] ॥

यं कुमार नवं रथमचक्रं मनसाकृणोः ।
एकेषं विश्वतः प्राञ्चमपश्यन्नधि तिष्ठसि ॥ ३ ॥

यम् । कुमार । नवम् । रथम् । अचक्रम् । मनसा । अकृणोः ।
एकऽईषम् । विश्वतः । प्राञ्चम् । अपश्यन् । अधि । तिष्ठसि ॥ ३ ॥

नचिकेतःसंज्ञं कुमारं यमोऽनयोत्तरया च प्रलोभयति[३] । हे ᵛकुमार ᵛनवम् अभिनवमितः पूर्वमदृष्टम् । अभिनवत्वमेव व्यनक्ति । ᵛअचक्रं चक्ररहितं तम्[४] ᵛएकेषम्[४] एकेषा यस्य तादृशं तथापि ᵛविश्वतः सर्वतः ᵛप्राञ्चं प्रकर्षेणाञ्चन्तं गच्छन्तं ᵛयं ᵛरथं ᵛमनसाकृणोः मत्समीपं प्रतिगमनाय अध्यवसायात्मकमीदृशं यं रथमकरोः कृत्वा[५] च ᵛअपश्यन् कर्तव्याकर्तव्यविभागमजानन्[६] ᵛअधि ᵛतिष्ठसि रथमारोहसि । यद्वा । स्तोतारं कुमारास्यमृषिमादित्यः प्रत्यक्षः सन् देहात्मनोर्विवेकं बोधयति । हे कुमार ऋषे चक्ररहितम् एकेषम् । एकः प्राण ईषास्थानीयो यस्य । ईदृशमभिनवं सर्वतो गच्छन्तं शरीरात्मकं यं रथं मनसान्तःकरणेन अकृणोः अकरोः । संकल्पात्मकेन मनसा हि कामो जायते[७] । सत्यां हि कामनायां पुण्यपापात्मकं कर्म[८] क्रियते । तेन च भोगप्रदानायेदं शरीरमारभ्यत इति परंपरया मनसः शरीरनिष्पादकत्वम् । तं शरीरात्मकं[८] रथमपश्यन्नजानन् । ' लक्षणहेत्वोः° ' (पा. सू. ३.२.१२६) इति हेतौ शतृप्रत्ययः । मत्स्वरूपापरिज्ञानाद्धेतोरधितिष्ठसि । भोगायतनत्वेन स्वीकरोषि॥

यं कुमार प्रावर्तयो रथं विप्रेभ्यस्परि ।
तं सामानु प्रावर्तत समितो नाव्याहितम् ॥ ४ ॥

यम् । कुमार । प्र । अवर्तयः । रथम् । विप्रेभ्यः । परि ।
तम् । साम । अनु । प्र । अवर्तत । सम् । इतः । नावि । आऽहितम् ॥ ४ ॥

हे ᵛकुमार नचिकेतः ᵛयं पूर्वोक्तमधिष्ठितं ᵛरथं ᵛप्रावर्तयः मत्समीपं प्रत्यगमयः ᵛविप्रेभ्यः मेधाविभ्यः ᵛपरि उपरि भूलोके वर्तमानानां मेधाविनां बान्धवानामुपरिष्टात् । अन्तरिक्ष इत्यर्थः । ' पञ्चम्याः परावध्यर्थे ' इति विसर्जनीयस्य सत्वम् । ᵛतं रथं ᵛसाम पित्रा कृतं सान्त्वनं यमसमीपं गत्वा एवमेव त्वया वक्तव्यमिति प्रत्यागमनकारणमुपायोपदेशनम् ᵛअनु ᵛप्रावर्तत । ᵛइतः अस्माल्लोकादन्यत्रगच्छत् । कथंभूतम् । ᵛनावि नौवत्तरणसाधनायां बुद्धौ ᵛसम् ᵛआहितं सम्यगर्पितम् । यद्वा ।

१. त४.५–जानन्नहं । २. ग-त२.३.६.७.८-भ–आप्तुमैच्छं । ३. त४.५–प्रचोदयति । ४. त-भ–' तमेकेषं ' नास्ति । ५. त१.२.३.६.७.८-भ१.२.४.८–कृत्वा वा । ६. त-भ–कर्तव्यविभाग° । ७. त-भ–जन्यते । ८. त-भ–' कर्म ... ... शरीरात्मकं ' नास्तिः ।

हे कुमार ऋषे यं शरीरात्मकं रथमधिष्ठितं प्रावर्तयः संसारे प्रवर्तितवानसि मेधाविनां मध्ये तं रथमनुसाम । उपलक्षणमेतत् । ऋक्सामादिसाध्यं स्तोत्रं नावि नौवत्तारयित्र्यां वाचि वेदात्मिकायां समाहितं सम्यक्प्रतिपाद्यत्वेन हितं कर्म च इतः अस्माल्लोकात्[1] प्रावर्तत प्रवृत्तमभूत् । इत्थमात्मस्वरूपापरिज्ञानेन शरीरबन्धनं तेन[2] कर्तव्यं व्यवहारजातं चोक्तम् । अथ तु सत्यज्ञानादिस्वरूपमकर्तारं परमात्मानं यदि स्वात्मतया साक्षात्करोति तदोक्तं[3] न संभवतीत्यभिप्रायः ॥

कः कुमारमजनयद्रथं को निरवर्तयत् ।
कः स्वित्तद्य नो ब्रूयादनुदेयी यथाभवत् ॥ ५ ॥

कः । कुमारम् । अजनयत् । रथम् । कः । निः । अवर्तयत् ।
कः । स्वित् । तत् । अद्य । नः । ब्रूयात् । अनुऽदेयी । यथा । अभवत् ॥ ५ ॥

vकः पुरुषः इमं vकुमारमजनयत् । अधिक्षेपे किंशब्दः । ईदृशं[4] बालं यमसमीपं प्रहिण्वन् कथं पिता समीचीनः स्यात् । तत्तावदास्ताम् । vकः वा पुरुषोऽस्य बालस्य यमसमीपं प्रतिगमनाय तं vरथं vनिरवर्तयत् निर्वर्तितवान्[5] । सोऽपि मूर्ख इत्यर्थः । vयथा येन प्रकारेणायं कुमारः vअनुदेयी अनुदातव्यः vअभवत् भवति vतत् तदनुगुणं वचनमुपायकथनम् vअद्य अस्मिन् काले vनः अस्माकं vकः vस्वित् को नाम vब्रूयात् अभिदध्यात् । प्रथमं यमसमीपं गत्वा पश्चात् ततो निर्गमनोपायं ब्रुवन्नपि न प्राज्ञ इत्यर्थः । अथवा । कुमारात्म ऋषिरात्मनः सार्वात्म्यमवगच्छन् स्वव्यतिरिक्तस्यान्यस्यासंभवं किंशब्देनाक्षेपवाचिना दर्शयति । कुमारं मां कः पिताजनयत् । न कोऽपि । ' अजो नित्यः शाश्वतः ' (क. उ. २.१८) इति श्रुत्युक्तरूपोऽहं भवामि । कश्च शरीरात्मकं रथं निरवर्तयत् निर्वर्तयति । मद्व्यतिरिक्तस्य निर्वर्तयितुरभावात् तथा निर्वर्त्यस्यान्यस्यासंभवाच्च । अद्य अस्मिन् काले सार्वात्म्यानुभवदशायां तं तं प्रकारं कः स्वित् को नाम नोऽस्माकं ब्रूयात् यथा येन प्रकारेण अनुदेयी अनुदातव्या मद्व्यतिरिक्तान्यपदार्थसत्ता अभवत् भवति । म प्रकारोऽपि दुर्वचन इत्यर्थः ॥

यथाभवदनुदेयी ततो अग्रमजायत ।
पुरस्ताद्बुध्न आततः पश्चान्निरयणं कृतम् ॥ ६ ॥

यथा । अभवत् । अनुऽदेयी । ततः । अग्रम् । अजायत ।
पुरस्तात् । बुध्नः । आऽततः । पश्चात् । निःऽअयनम् । कृतम् ॥ ६ ॥

vअनुदेयी अनुदातव्यः vयथा येन प्रकारेण पितरमनुलक्ष्य अयं कुमारो यमेन दत्तः vअभवत् भवति तथा vततः तस्माद्वाजश्रवसात् पितुः vअग्रं यमसमीपं गच्छेति वचनस्याग्रतो वर्तमानं नचिकेतसा यमेन सह वदितव्यं ' तं वै प्रवसन्तं गन्तासीति होवाच ' (तै. ब्रा. ३.११.८.२) इत्यादिकं ब्राह्मणान्तरोक्तम् vअजायत प्रादुरभवत् । पितोपदिष्टवानित्यर्थः । vपुरस्तात् ततः पूर्वं vबुध्नः उक्तस्याग्रस्य मूलभूतं यमस्य गृहं प्रतिगच्छ इति वचनम् vआततः अतिविस्तृतमासीत् । अतः तदशक्यपरिहारमिति vपश्चात् क्रोधं परित्यज्य vनिरयणं तस्माद्यमान्निर्गमनोपायं vकृतं पित्राचरितम् । यद्वा । अनुदेयी आत्मानमनु दातव्यात्मस्वरूपव्यतिरिक्तान्यपदार्थसत्ता यथाभवत् भवति तदनुगुणं

---

१. ग-त-भ-अस्मिन् लोके । २. त-भ-च तेन । ३. ग-त१.२.३.५.६.७.८-भ-तस्योक्तं; त४-तदस्योक्तं । ४. त-भ-कीदृशं । ५. त-भ-निवर्तितवान् ।

ततस्तस्मान्मायाविशिष्टादात्मनोऽग्रे स्रष्टव्यस्य विकारजातस्याद्यं मनस्तत्त्वं सिसृक्षाकारणमजायत उदपद्यत। पुरस्तात् सृष्टेः प्रागवस्थायां बुध्नो मूलमव्याकृतं मायात्मकं कारणमेवाततः। आ समन्तात् ततं विस्तृतमासीत्। पश्चात्तमस उत्पन्नत्वनन्तरं निरयणं तदुतानां कार्याणां तस्मात् कारणान्निर्गमनं घटपटादिभेदेन स्वरूपालम्भनं[1] कृतम्। ब्रह्मणा निर्मितम्। तथा मृद्विकारो घटादिर्मृदोऽन्यो न भवति। आदित्यानुग्रहात् ब्रह्मभावं प्राप्तस्य मम विकारः प्रपञ्चो मदन्यो न भवतीति व्यतिरिक्तस्य[2] पित्रादेराक्षेपः पूर्वोक्तः समर्थितः ॥

इदं यमस्य सादनं देवमानं यदुच्यते ।
इयमस्य धम्यते नाळीरयं गीर्भिः परिष्कृतः ॥ ७ ॥

इदम् । यमस्य । सदनम् । देवऽमानम् । यत् । उच्यते ।
इयम् । अस्य । धम्यते । नाळीः । अयम् । गीःऽभिः । परिऽकृतः ॥ ७ ॥

vइदं vयमस्य नियन्तुरादित्यस्य वैवस्वतस्य वा vसदनं स्थानम्। छान्दसः सांहितिको दीर्घः। vयत् सदनं vदेवमानं देवैर्निर्मितमिति vउच्यते सर्वत्र अभिधीयते। यद्वा। देवानां रश्मीनां निर्माण-साधनमिति गीयते। vअस्य यमस्य प्रीणनाय vइयं vनाळीः वाद्यविशे[3]___वेणुः vधम्यते वाद्यते। यद्वा। नाळीति वाङ्नाम। इयं स्तुतिरूपा वागस्य प्रीणनाय धम्यते उच्चार्यते। एवं सति vअयं यमः vगीर्भिः स्तुतिभिः vपरिष्कृतः अलंकृतोऽभूत्। 'संपर्युपेभ्यः०' इति सुडागमः। 'परिनिविभ्यः०' इति षत्वम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् ॥ ॥ २३ ॥

'केशी' इति सप्तर्चमष्टमं सूक्तमग्निसूर्यवायुदेवताकम्[4]। वातरशनपुत्रा जूतिवातजूतिप्रभृतयः प्रत्यृचं क्रमेणर्षयः। तथा चानुक्रान्तं—'केशी मुनयो वातरशना जूतिर्वातजूतिर्विप्रजूतिर्वृषाणकः करिक्रत एतश ऋष्यश्रृङ्गश्चर्चाः केशिनम्' इति। गतो विनियोगः ॥

केश्य१ग्निं केशी विषं केशी बिभर्ति रोदसी ।
केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥ १ ॥

केशी । अग्निम् । केशी । विषम् । केशी । बिभर्ति । रोदसी इति ।
केशी । विश्वम् । स्वः । दृशे । केशी । इदम् । ज्योतिः । उच्यते ॥ १ ॥

केशाः केशस्थानीया रश्मयः। तद्वन्तः केशिनोऽग्निर्वायुः सूर्यश्च। एते त्रयः स्तूयन्ते। vकेशी रश्मिभिर्युक्तः प्रकाशमानो वा सूर्यः vअग्निं vबिभर्ति। हविर्भिः पोषयति धारयति वा। कालविशेषे ह्यग्नेः पोषणाय होमः। स च कालविशेषः सूर्यगत्यधीन इति सूर्य एव बिभर्तीत्युच्यते। तथा vविषम्। उदकनामैतत्। उदकं रश्मिभिर्घर्मसमय आहृतमयमेव vकेशी बिभर्ति विस्रष्टुम्। तथा vरोदसी द्यावापृथिव्यौ अपि अयमेव बिभर्ति। अपि च vविश्वं व्याप्तं vस्वः सर्वं जगत् vदृशे दर्शनाय अयमेव vकेशी करोति। प्रकाशयतीत्यर्थः। इत्थंमहानुभावः केशी को नामेत्यत आह। vइदं दृश्यमानं मण्डलस्थं यत् vज्योतिः vइदम् एव vकेशी इति vउच्यते। नान्य इत्यर्थः ॥

मुनयो वातरशनाः पिशङ्गा वसते मला ।
वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥ २ ॥

---

१. त-भ-रूपलंभनं। २. ग-मद्व्यतिरिक्तस्य। ३. त-भ-विद्याविशेषो। ४. त४.५-सूक्तमनुष्टुभमग्नि°।

मुनयः । वातऽरशनाः । पिशङ्गा । वसते । मला ।
वातस्य । अनु । ध्राजिम् । यन्ति । यत् । देवासः । अविक्षत ॥ २ ॥

वातरशनाः वातरशनस्य पुत्राः मुनयः अतीन्द्रियार्थदर्शिनो जूतिवातजूतिप्रभृतयः पिशङ्गा पिशङ्गानि कपिलवर्णानि मला मलिनानि वल्कलरूपाणि वासांसि वसते आच्छादयन्ति । 'वस आच्छादने' । आदादिकः । ईदृशास्ते यत् यदा देवासः देवाः तपसो महिम्ना दीप्यमानाः सन्तः अविक्षत देवतास्वरूपं प्राविशन् । विशेर्लुङि शल इगुपधादनिटः क्सः । व्यत्ययेनात्मनेपदम् । तदा ते वातस्य वायोः ध्राजिं गतिम् अनु यन्ति अनुगच्छन्ति । प्राणोपासनया प्राणरूपिणो वायुभावं प्रपन्ना इत्यर्थः ॥

उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम् ।
शरीरेदस्माकं यूयं मर्तासो अभि पश्यथ ॥ ३ ॥

उत्ऽमदिताः । मौनेयेन । वातान् । आ । तस्थिम । वयम् ।
शरीरा । इत् । अस्माकम् । यूयम् । मर्तासः । अभि । पश्यथ ॥ ३ ॥

मौनेयेन मुनिभावेन लौकिकसर्वव्यवहारविसर्जनेन[1] उन्मदिताः उन्मत्ता उन्मत्तवदाचरन्तः । यद्वा । उत्कृष्टं मदं हर्षं प्राप्ताः । वयं वातान् वायूनस्माभिरुपास्यमानान् आ तस्थिम आस्थितवन्तः । हे मर्तासः मनुष्याः अस्माकं शरीरेत् शरीराण्येव यूयं केवलम् अभि पश्यथ । नास्मान्[2] । यतो वयं नीरूपेण वायुना सायुज्यं प्राप्ताः ॥

अन्तरिक्षेण पतति विश्वा रूपावचाकशत् ।
मुनिर्देवस्यदेवस्य सौकृत्याय सखा हितः ॥ ४ ॥

अन्तरिक्षेण । पतति । विश्वा । रूपा । अवऽचाकशत् ।
मुनिः । देवस्यऽदेवस्य । सौकृत्याय । सखा । हितः ॥ ४ ॥

मुनिः अस्यर्चो द्रष्टा वृषाणक ऋषिर्वातरूपतां सूर्यात्मतां वा तत्तदुपासनया प्राप्तः सन् अन्तरिक्षेण आकाशेन पतति गच्छति । किं कुर्वन् । विश्वा विश्वानि सर्वाणि रूपाणि रूप्यमाणानि पदार्थजातानि अवचाकशत् अभिपश्यन् स्वतेजसा दर्शयन् । तथा देवस्यदेवस्य । 'नित्यवीप्सयोः' इति द्विर्वचनम् । 'अनुदात्तं च' इति परस्याम्रेडितस्यानुदात्तत्वम् । सर्वस्यापि देवस्य सखा सखिभूतः अत एव सौकृत्याय । सुष्ठु देवानुद्दिश्य क्रियमाणं यागात्मकं कर्म सुकृतम् । तस्य भावाय सम्यगनुष्ठापनाय हितः निहितः स्थापितो भवति ॥

वातस्याश्वो वायोः सखाथो देवेषितो मुनिः ।
उभौ समुद्रावा क्षेति यश्च पूर्व उतापरः ॥ ५ ॥

वातस्य । अश्वः । वायोः । सखा । अथो इति । देवऽइषितः । मुनिः ।
उभौ । समुद्रौ । आ । क्षेति । यः । च । पूर्वः । उत । अपरः ॥ ५ ॥

---

१. त-भ-लौकिकस्य सर्व° । २. त-भ-मु-नोस्मान् ।

वातस्य वायोर्गतिरिव अश्वः व्याप्तः। यद्वा। वायोः अशिता भोक्ता। वायुरेव तस्याहार इत्यर्थः। अत एव वायोः सखा मित्रभूतः अथो अपि च देवेषितः देवेन द्योतमानेन वायुना सूर्येण वा इषितः प्राप्तः[1]। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम्। ईदृशो मुनिः करिक्रतास्य ऋषिरुक्तप्रकारेण वायुरूपः सूर्यरूपो वा सन् उभौ समुद्रौ उदधी आ क्षेति अभिगच्छति। 'क्षि निवासगत्योः'। छान्दसो विकरणस्य लुक्। कौ तौ समुद्रौ। यश्च पूर्वः समुद्रः। उतशब्दश्चार्थे। यश्च अपरः समुद्रः॥

अप्सरसां गन्धर्वाणां मृगाणां चरणे चरन्।
केशी केतस्य विद्वान्त्सखा स्वादुर्मदिन्तमः॥ ६॥

अप्सरसाम्। गन्धर्वाणाम्। मृगाणाम्। चरणे। चरन्।
केशी। केतस्य। विद्वान्। सखा। स्वादुः। मदिन्ऽतमः॥ ६॥

अप्सरसां देवस्त्रीणां गन्धर्वाणां चरणे संचारभूते दिव्यन्तरिक्षे च तथा मृगाणां सिंहादीनां संचारस्थले पृथिव्यां चरन् व्याप्य संचरन् केशी अग्निर्वायुः सूर्यो वा केतस्य ज्ञातव्यस्य सर्वस्यार्थजातस्य विद्वान् यद्वा ज्ञातव्यस्यास्यर्षेरेतच्छस्य सखा विद्वान् अविशेषात् सर्वं जानन् स्वादुः स्वादयिता[2] रसयिता सर्वस्य रसस्योत्पादकः अत एव मदिन्तमः मादयितृतमो भवति। 'नाद्धस्य' इति नुडागमः॥

वायुरस्मा उपामन्थत्पिनष्टि स्मा कुनंनमा।
केशी विषस्य पात्रेण यद्रुद्रेणापिबत्सह॥ ७॥

वायुः। अस्मै। उप। अमन्थत्। पिनष्टि। स्म। कुऽनंनमा।
केशी। विषस्य। पात्रेण। यत्। रुद्रेण। अपिबत्। सह॥ ७॥

केशी रश्मिभिर्युक्तः सूर्यः रुद्रेण रुद्रपुत्रेण मरुद्गणेन। यद्वा। 'रुद्रो वा एष यदग्निः' (तै. सं. ५.४.३.१) इति श्रवणाद्रुद्रो वैद्युताग्निः। तेन सह वर्तमानो विषस्य। उदकनामैतत्। 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। विषमुदकं पात्रेण पानसाधनेन रश्मिजालेन यत् यदा[3] अपिबत् पिबति तदा अस्मै केशिने वायुः उपामन्थत्। भृशं सर्वं रसमुपमथ्नाति। यद्वा। यदापिबत् पीतवान् भवति तदा सूर्यमण्डले घनीभूतमस्थ तदुदकं वायुरुपमथ्नाति। मन्थनेन वैद्युताग्निनालोडयति। तथा कुनंनमा कुत्सितमपि भृशं नमयित्री स्वयं नमयितुमशक्या स्वतन्त्रा माध्यमिका वाक् पिनष्टि स्म। यथाधस्तात् स्रवति तथा चूर्णीकरोति। स्मेति प्रसिद्धौ। कुपूर्वान्नमयतेः पचाद्यचि 'यङोऽचि च' इति यङो लुक्। थाथादिनोत्तरपदान्तोदात्तत्वम्॥ ॥ २४॥

'उत देवाः' इति सप्तर्चं नवमं सूक्तमानुष्टुभं वैश्वदेवं भरद्वाजकश्यपगोतमात्रिविश्वामित्रजमदग्निवसिष्ठा इति क्रमेण प्रत्यृचमृषयः। तथा चानुक्रान्तम्—'उत देवाः सप्तर्षय एकर्चा वैश्वदेवम्' इति। गतो विनियोगः॥

उत देवा अवहितं देवा उन्नयथा पुनः। उतागश्चक्रुषं देवा देवा जीवयथा पुनः॥१॥

---

१. त४.५–व्याप्तः। २. ग–स्वदयिता। ३. त-भ-मु–'यदा' नास्ति।

उत । देवाः । अवऽहितम् । देवाः । उत् । नयथ । पुनरिति । उत । आगः । चक्रुषम् । देवाः । देवाः । जीवयथ । पुनरिति ॥ १ ॥

vउत[1] अपि च हे vदेवाः vअवहितम् vउन्नयथ[1]। vउत अपि च हे vदेवाः vआगः अपराधं vचक्रुषं कृतवन्तं मां तस्मादागसो रक्षत। हे vदेवाः रक्षित्वा च vपुनः पश्चात् vजीवयथ चिरजीविनं कुरुत ॥

द्वाविमौ वातौ वात आ सिन्धोरा परावतः ।
दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः ॥ २ ॥

द्वौ । इमौ । वातौ । वातः । आ । सिन्धोः । आ । पराऽवतः ।
दक्षम् । ते । अन्यः । आ । वातु । परा । अन्यः । वातु । यत् । रपः ॥ २ ॥

vइमौ दृश्यमानौ vद्वौ vवातौ पुरोवातः पश्चाद्वातश्च vआ vसिन्धोः आ समुद्रात्। मर्यादायामाकारः। यद्वा vआ vपरावतः समुद्रादपि यो दूरदेशः तं देशमवधीकृत्य vवातः गच्छतः। 'वा गतिगन्धनयोः'। आदादिकः। तयोर्वातयोः vअन्यः एको हे स्तोतः vते तव vदक्षं बलम् vआ vवातु आगमयतु। vअन्यः च त्वदीयं vयद्रपः पापं तत् vपरा vवातु परागमयतु ॥

आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ॥ ३ ॥

आ । वात । वाहि । भेषजम् । वि । वात । वाहि । यत् । रपः ।
त्वम् । हि । विश्वऽभेषजः । देवानाम् । दूतः । ईयसे ॥ ३ ॥

हे vवात vभेषजं सुखं व्याध्युपशमनमौषधं वा vआ vवाहि आगमय। हे vवात vयद्रपः अस्मदीयं पापं तत् vवि vवाहि विगमय। अस्मत्तो विश्लेषय। vत्वं vहि खलु vदेवानां vदूतः vविश्वभेषजः। विश्वानि भेषजानि यस्मिन्। 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम्। ईदृशश्च सन् vईयसे सततं गच्छसि ॥ 'ईङ् गतौ'। दैवादिकः। इयनो णित्त्वात् 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वम्। 'हि च' इति निघातप्रतिषेधः ॥

आ त्वागमं शंतातिभिरथो अरिष्टतातिभिः ।
दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते ॥ ४ ॥

आ । त्वा । अगमम् । शंतातिऽभिः । अथो इति । अरिष्टतातिऽभिः ।
दक्षम् । ते । भद्रम् । आ । अभार्षम् । परा । यक्ष्मम् । सुवामि । ते ॥ ४ ॥

---

१. ग–उतापि च हे देवाः अवहितमधोनिहितं पुनश्चोन्नयथ दारिद्र्यपीडितमाढ्यं कुरुथ; त१.३.४.५.६.८–'उत ... ... उन्नयथ' नास्ति; त७–उतापि च हे देवा यूयं अवहितं दारिद्र्येणाधः पातितं मां पश्यतेति शेषः। हे देवाः मां दृष्ट्वा पुनः पश्चात् उन्नयथ उद्धरत उत्कृष्टं स्थानं प्रापयतेत्यर्थः; भ–उतापि च हे देवा अवहितं।

हे स्तोतः ᵛस्वा त्वां ᵛशंतातिभिः सुखकरैः ᵛअथो अपि च ᵛअरिष्टतातिभिः अहिंसाकरैश्च रक्षणैः ᵛआ ᵛअगमम् आगतवानस्मि। 'शिवशमरिष्टस्य करे' (पा. सू. ४. ४. १४३) इत्युभयत्र तातिल्प्रत्ययः। 'लिति' इति प्रत्ययात् पूर्वस्योदात्तत्वम्। अपि च ᵛभद्रं कल्याणं ᵛते तव ᵛदक्षं बलम् ᵛआभार्षम् आहार्षं वायुसकाशादानैषम्। तथा ᵛते तव ᵛयक्ष्मं रोगं च[1] ᵛपरा ᵛसुवामि विनाशयामि॥

त्रायन्तामिह देवास्त्रायतां मरुतां गणः।
त्रायन्तां विश्वा भूतानि यथायमरपा असत्॥ ५॥

त्रायन्ताम्। इह। देवाः। त्रायताम्। मरुताम्। गणः।
त्रायन्ताम्। विश्वा। भूतानि। यथा। अयम्। अरपाः। असत्॥ ५॥

ᵛइह अस्मिन् देशे सर्वे ᵛदेवाः ᵛत्रायन्ताम् अस्मान् पालयन्ताम्। तथा ᵛमरुतां ᵛगणः संघः स ᵛत्रायताम्। ᵛविश्वा विश्वानि सर्वाण्यन्यानि च ᵛभूतानि भूतजातानि ᵛत्रायन्ताम् अस्मान् रक्षन्तु। ᵛयथायम् अस्मदीयः शरीरादिः ᵛअरपाः ᵛअसत् पापरहितो भवति तथेत्यर्थः। रप इति पापनाम। नञा बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। अस्तेर्लेट्यडागमः। 'यावद्यथाभ्याम्' (पा. सू. ८. १. ३६) इति निघातभावः॥

आप इद्वा उ भेषजीरापो अमीवचातनीः।
आपः सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम्॥ ६॥

आपः। इत्। वै। ऊँ इति। भेषजीः। आपः। अमीवऽचातनीः।
आपः। सर्वस्य। भेषजीः। ताः। ते। कृण्वन्तु। भेषजम्॥ ६॥

ᵛआप ᵛइद्वै आप एव खलु ᵛभेषजीः भेषजभूताः। स्नानपानादिना सुखहेतवः। यद्वा। ओषधिरूपेण परिणता रोगोपशमनहेतवो भवन्ति। 'केवलमामक°' (पा. सू. ४. १. ३०) इत्यादिना भेषजशब्दात् ङीप्। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम्। जसि 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्। यत एवमतः कारणात् ᵛआपः ᵛअमीवचातनीः अमीवचातन्यः रोगाणां नाशयित्र्यो भवन्ति। चातयतिर्वधकर्मा। किंच ᵛआपः ᵛसर्वस्य प्राणिजातस्य ᵛभेषजीः भेषजभूता भवन्ति न कतिपयस्य। ᵛताः तथाविधा आपः ᵛते तव ᵛभेषजं ᵛकृण्वन्तु कुर्वन्तु॥

हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी।
अनामयित्नुभ्यां त्वा ताभ्यां त्वोप स्पृशामसि॥ ७॥

हस्ताभ्याम्। दशऽशाखाभ्याम्। जिह्वा। वाचः। पुरःऽगवी।
अनामयित्नुऽभ्याम्। त्वा। ताभ्याम्। त्वा। उप। स्पृशामसि॥ ७॥

ᵛदशशाखाभ्यां दशाङ्गुलयः शाखाभूता ययोः तादृशाभ्यां प्रजापतेः ᵛहस्ताभ्यां सृज्यमाना ᵛजिह्वा रसना ᵛवाचः शब्दस्य ᵛपुरोगवी पुरतो गन्त्री जाता। यत्र यत्र शब्दस्तत्र सर्वत्र तस्य

---

१. त१.२.३.६.७-भ१.४-चा।

शब्दस्योच्चारणाय पुरतो व्याप्रियत इत्यर्थः। [v]अनामयित्नुभ्यां[1] सम्यगारोग्यहेतुभ्यां [v]ताभ्यां हस्ताभ्यां हे स्तोतः [v]त्वा त्वाम् [v]उप [v]स्पृशामसि उपस्पृशामः। इदन्तो मसिः। [v]त्वा इति पुनरुक्तिः पादपूरणार्था ॥ ॥ २५ ॥

'तव त्ये' इति षड्चं दशमं सूक्तमुरुनाम्नः पुत्रस्याङ्गाख्यस्यार्षं जागतमैन्द्रम्। तथा चानुक्रान्तं—'तव त्ये षळङ्ग औरवं जागतम्' इति। गतो विनियोगः ॥

तव॒ त्य इ॑न्द्र सु॒ख्येषु॒ वह्न॑य ऋ॒तं म॑न्वा॒ना व्य॑दर्दिरु॒र्वल॑म्।
यत्रा॑ दश॒स्यन्नु॒षसो॑ रि॒णन्न॒पः कुत्सा॑य॒ मन्म॑न्नह्यश्च॒ दं॑सयः ॥ १ ॥

तव। त्ये। इन्द्र। सुख्येषु। वह्नयः। ऋतम्। मन्वानाः। वि। अदर्दिरुः। वलम्।
यत्र। दशस्यन्। उषसः। रिणन्। अपः। कुत्साय। मन्मन्। अह्यः। च। दंसयः ॥ १ ॥

हे [v]इन्द्र [v]तव [v]सख्येषु सखित्वेषु सत्सु [v]त्ये ते प्रसिद्धाः [v]वह्नयः वोढारो हविषां स्तुतीनां वा अत एव [v]ऋतं यज्ञं [v]मन्वानाः अवबुध्यमानाः अङ्गिरसः [v]वलं गवामपहर्तारमेतत्संज्ञकमसुरं [v]व्यदर्दिरुः अत्यर्थं व्यदारयन्। 'दृ विदारणे'। अस्मात् यङ्लुगन्तात् लुङि 'सिजभ्यस्त०' इति च्लेर्जुः। 'जुसि च' इति गुणः। व्यत्ययेनेत्वम्। अपि च [v]यत्र यस्मिन् काले [v]मन्मन् मन्मनि स्तोत्रे सति [v]कुत्साय महर्षये [v]उषसः उषःकालान् वृत्रेणावृतत्वात् पूर्वमसत्प्रायांस्तदपनोदनेन [v]दशस्यन् प्रयच्छन् तथा [v]अपः वृत्रेणावृतान्युदकानि च [v]रिणन् तस्मान्निर्गमयन् वर्तसे। 'री गतिरेषणयोः'। क्र्यादिकः। प्वादीनां ह्रस्वत्वम्। तदानीम् [v]अह्यः अहेर्वृत्रस्य [v]च [v]दंसयः कर्माणि वितथान्यासन्नित्यर्थः ॥

अवा॑सृजः प्र॒स्वः॑ स्रष्ट्र॒यो॑ गि॒रीनुदा॑ज उ॒स्रा अपि॑बो॒ मधु॒ प्रिय॑म्।
अव॑र्धयो व॒निनो॑ अस्य॒ दंस॑सा शु॒शोच॒ सूर्यं॑ ऋ॒तजा॑तया गि॒रा ॥ २ ॥

अव। असृजः। प्रऽस्वः। स्रष्ट्रयः। गिरीन्। उत्। आजः। उस्राः। अपिबः। मधु। प्रियम्।
अवर्धयः। वनिनः। अस्य। दंससा। शुशोच। सूर्यं। ऋतऽजातया। गिरा ॥ २ ॥

हे इन्द्र [v]प्रस्वः। प्रसूतिर्जन्म। तद्धेतुभूता अपः [v]अवासृजः। आवरकान्मेघादधः पातितवानसि। तथा [v]गिरीन् पर्वतान् वलेन गोमतो बिलस्य पिधानाय निहितान् [v]स्रष्ट्रयः अगमयः। अभैत्सीरित्यर्थः। 'स्रष्टृ गतौ'। अस्माण्ण्यन्ताल्लुङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः। 'समानवाक्ये[2] निघातयुष्मदस्मदादेशा वक्तव्याः' (पा. सू. ८. १. १८. ५) इति वचनात् पूर्वपदस्यासमानवाक्यगतत्वेनास्य 'तिङ्ङतिङः' इति निघाताभावः[2]। तथा वलासुरेण बिले निहिता [v]उस्राः गाः पर्वतभेदनानन्तरम् [v]उदाजः उदगमयः। ततः पयोदध्याज्यादिकं [v]प्रियम् अनुकूलं [v]मधु मधुरं हविः [v]अपिबः पीतवानसि। यद्वा। श्रयणसाधनासु तासु गोष्वागतासु यजमानैः प्रियमभीष्टं मधु सोमात्मकमपिबः पिबसि। तथा [v]वनिनः वनसंबद्धान् वृक्षान्। यद्वा। वनमित्युदकनाम। तद्युक्तान् समुद्रान्। [v]अवर्धयः वृष्टिप्रदानेन वर्धयसि। [v]ऋतजातया। ऋतं यज्ञम्। तदर्थं जातं जन्म यस्याः तया [v]गिरा वेदात्मिकया वाचा स्तूयमानस्य [v]अस्य इन्द्रस्य [v]दंससा कर्मणा

१. म२–अनामयित्नुभ्यां अनामयहेतुभ्यां। २. त१.२.३.६.७.८-भ१.४.७.८–'समानवाक्ये .. निघाताभावः' नास्ति।

आवृण्वतो वृत्रादेरपि नोदनात्मकेन ᵛसूर्यः ᵛशुशोच नभसि प्रदिदीपे । यद्वा । ऋतजातया गिरेति सूर्यस्यैव विशेषणम् । त्रयीरूपया वाचा प्रदीप्यत इत्यर्थः । ' ऋग्भिः पूर्वाह्णे दिवि देव ईयते ' (तै. ब्रा. ३. १२. ९. १) इत्यादिकं तैत्तिरीयकमत्रानुसंधेयम् ॥ शुशोचेत्यस्य पदात्परत्वेऽपि पादादित्वादपादादाविति पर्युदासस्यानुवृत्तेर्निघाताभावः ॥

वि सूर्यो मध्ये अमुचद्रथं दिवो विदद्दासाय प्रतिमानमार्यः ।
दृळ्हानि पिप्रोरसुरस्य मायिन इन्द्रो व्यास्यच्चकृवाँ ऋजिश्वना ॥ ३ ॥

वि । सूर्यः । मध्ये । अमुचत् । रथम् । दिवः । विदत् । दासाय । प्रतिऽमानम् । आर्यः ।
दृळ्हानि । पिप्रोः । असुरस्य । मायिनः । इन्द्रः । वि । आस्यत् । चकृऽवान् । ऋजिश्वना ॥३॥

ᵛदिवः द्युलोकस्य ᵛमध्ये ᵛसूर्यः ᵛआदित्यः ᵛरथं प्रस्थानाय ᵛवि ᵛअमुचत् विमुक्तवान् । मुचेर्लुङि लृदित्वात् च्लेरङादेशः । कदेति चेत् उच्यते । यदा ᵛआर्यः ऋभिज्ञः इन्द्रः ᵛदासाय उपक्षपयित्रे वृत्रादये ᵛप्रतिमानं प्रतिकृतिं प्रतीकारं ᵛविदत् वेत्ति जानाति । अलभत वा । अपि च ᵛमायिनः मायाविनः ॥ मायाशब्दस्य व्रीह्यादिषु पाठात् ' व्रीह्यादिभ्यश्च ' इतीनिप्रत्ययः ॥ ᵛपिप्रोः एतन्नाम्नः ᵛअसुरस्य ᵛदृळ्हानि दृढानि स्थिराणि पुराणि बलानि वा ᵛऋजिश्वना राजर्षिणा ᵛचकृवान् सख्यं कुर्वन् ᵛइन्द्रः ᵛव्यास्यत् व्यक्षिपत् । विविधमाक्षिपवान् । व्यनीनशदित्यर्थः । ' असु क्षेपणे ' ॥

अनाधृष्टानि धृषितो व्यास्यन्निधीँरदेवाँ अमृणद्यार्यः ।
मासेव सूर्यो वसु पुर्यमा ददे गृणानः शत्रूँरशृणाद्विरुक्मता ॥ ४ ॥

अनाधृष्टानि । धृषितः । वि । आस्यत् । निऽधीन् । अदेवान् । अमृणत् । अयार्यः ।
मासाऽइव । सूर्यः । वसु । पुर्यम् । आ । ददे । गृणानः । शत्रून् । अशृणात् । विरुक्मता ॥४॥

ᵛधृषितः शत्रूणां धर्षयिता प्रगल्भ इन्द्रः ᵛअनाधृष्टानि हतः पूर्वं शत्रुभिरप्रधृष्टानि अबाधितान्यसुरबलानि ᵛव्यास्यत् व्याक्षिपवान् । तथा ᵛअयार्यः अयासनीयश्चालयितुमशक्यः । यद्वा । अयास्योऽङ्गिराः । स्तोतृवाचिना शब्देन स्तुत्यो लक्ष्यते । अयास्येनर्षिणा स्तुत्य इन्द्रः ᵛनिधीन् असुरैर्निहितान् धनसमूहान् । यद्वा । निधातॄन्नितरां बलानां धारयितॄन् ᵛअदेवान् देवविरोधिनोऽसुरान् ᵛअमृणत् अहिंसीत् । ' मृण हिंसायाम् ' । तौदादिकः । अपि च ᵛसूर्यः ᵛमासेव मासेनेव । ' पद्दन्० ' इत्यादिना मासशब्दस्य मासभावः । स यथा मासविशेषेण भौमान् रसानादत्ते तथा ᵛपुर्यम् असुराणां पुरि भवम् । ' भवे छन्दसि ' इति यत् । ' हलि च ' इति दीर्घस्य ' न भकुर्छुराम् ' (पा. सू. ८. २. ७९) इति प्रतिषेधः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । ईदृशं ᵛवसु धनम् ᵛआ ᵛददे आदत्ते स्म ॥ ' आङो दोऽनास्यविहरणे ' इत्यात्मनेपदम् । तथा ᵛगृणानः स्तोतृभिः स्तूयमानः सन् ॥ व्यत्ययेन कर्मणि कर्तृप्रत्ययः ॥ ᵛशत्रून् शातयितॄनसुरान् ᵛविरुक्मता विरोचमानेन वज्रेण ᵛअशृणात् अहिंसीत् ॥

अयुद्धसेनो विभ्वा विभिन्दता दाशद्वृत्रहा तुज्यानि तेजते ।
इन्द्रस्य वज्रादबिभेदभिश्नथः प्राक्रामच्छुन्ध्यूरजहादुषा अनः ॥ ५ ॥

अयुद्धऽसेनः । विऽभ्वा । विऽभिन्दता । दाशत् । वृत्रऽहा । तुज्यानि । तेजते ।
इन्द्रस्य । वज्रात् । अबिभेत् । अभिऽश्नथः । प्र । अक्रामत् । शुन्ध्यूः । अजहात् । उषाः । अनः ॥५॥

[v]विश्वा विभुना व्याप्तेन [v]विभिन्दता विदारयता एवंविधेनापि परकीयबलेन [v]अयुद्धसेनः अप्रहृतसेनः। यद्वा। विश्वा विभुर्व्याप्तो विभिन्दता शत्रुबलानि विदारयता वज्रेण। [v]वृत्रहा वृत्रं हतवान् एवंविध इन्द्रः [v]दाशत् दाशति। स्तोतृभ्यो धनं प्रयच्छति। 'दाशृ दाने'। लेट्यडागमः। तथा [v]तुज्यानि प्रेर्याणि शत्रुबलानि [v]तेजते तनूकरोति अल्पीकरोति। 'तिज निशाने'। यद्वा। शत्रून् प्रति प्रेर्याण्यायुधानि तेजते निश्यति तीक्ष्णीकरोति। ईदृशस्य [v]इन्द्रस्य [v]अभिश्नथः अभितो हिंसकात् [v]वज्रात् सर्वं शत्रुजातम् [v]अबिभेत् भीतिं प्राप्नोत्। एवमसुरेष्विन्द्रेण निरस्तेषु [v]द्युन्ध्यूः शोधयितादित्यः [v]प्राक्रामत् जगत्प्रकाशनाय गन्तुं प्रक्रान्तवान्। [v]उषाः उषोदेवता च [v]अनः स्वकीयं शकटं रथम् [v]अजहात् गन्तुं पर्यरयजत्। 'ओहाक् त्यागे'॥

एता त्या ते श्रुत्यानि केवला यदेक एकमकृणोरयज्ञम्।
मासां विधानमदधा अधि द्यवि त्वया विभिन्नं भरति प्रधिं पिता॥ ६॥

एता। त्या। ते। श्रुत्यानि। केवला। यत्। एकः। एकम्। अकृणोः। अयज्ञम्।
मासाम्। विऽधानम्। अदधाः। अधि। द्यवि। त्वया। विऽभिन्नम्। भरति। प्रऽधिम्। पिता॥६॥

हे इन्द्र [v]त्या तानि [v]ते तव त्वदीयानि वीर्यकर्माणि [v]एता एतान्येव [v]केवला केवलानि [v]श्रुत्यानि श्रोतव्यानि स्तुत्यर्हाणि[1]। नान्यदीयानि। कानि पुनस्तानि। [v]एकः असहायस्त्वम् [v]एकं[2] प्रधानभूतम् [v]अयज्ञं यज्ञरहितमसुरम् [v]अकृणोः अहिंसीरिति [v]यत् एतदेकं कर्म॥ 'कृवि हिंसाकरणयोश्च'। अत्र हिंसार्थः। इदिश्वासुम्। 'धिन्विकृण्व्योरच्च' इत्युप्रत्ययोऽकारान्तादेशश्च। तस्य[3] लोपे[3] सति स्थानिवद्भावाल्लघूपधगुणाभावः॥ तथा [v]मासां मासानाम्॥ 'पद्दन्०' इत्यादिना मासशब्दस्य मास्भावः। 'ऊडिदम्०' इत्यादिना विभक्तेरुदात्तत्वम्॥ मासानां [v]विधानं विधातारं कर्तारं सूर्यम् [v]अधि [v]द्यवि द्युलोक उपरि [v]अदधाः अधारयः॥ विपूर्वात् दधातेः 'कृत्यल्युटो बहुलम्' इति कर्तरि ल्युट्॥ इदमपरं कर्म। तथा [v]पिता पालको द्युलोकः [v]विभिन्नं विदारितं वृत्राद्विभक्तं [v]प्रधिं रथचक्रस्य पार्श्वम्। पार्श्वफलके प्रधी इत्युच्येते। ईदृशं सूर्यरथसंबन्धिनं प्रधिमन्यैर्धारयितुमशक्यं [v]त्वया एव [v]भरति धारयति। इदमपरं कर्म। एतत्प्रभृतीनि त्वया कृतानि कर्माणि परेषामसाधारणानि सर्वदा स्तोतव्यानीत्यर्थः॥ ॥ २६ ॥

'सूर्यरश्मिः' इति षड्चमेकादशं सूक्तं त्रैष्टुभम्। विश्वावसुर्नाम गन्धर्व ऋषिः। स च पूर्वेण तृचेन सवितारं स्तुतवान् उत्तरेण स्वात्मानम्। अतः प्रथमतृचस्य सविता देवता द्वितीयस्य गन्धर्वः। तथा चानुक्रान्तं—'सूर्यरश्मिर्देवगन्धर्वो विश्वावसुरात्मानमस्तौत् पूर्वार्धे[4] सवितारम्' इति। गतो विनियोगः॥

सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ अजस्रम्।
तस्य पूषा प्रसवे याति विद्वान्त्संपश्यन्विश्वा भुवनानि गोपाः॥ १॥

सूर्यऽरश्मिः। हरिऽकेशः। पुरस्तात्। सविता। ज्योतिः। उत्। अयान्। अजस्रम्।
तस्य। पूषा। प्रऽसवे। याति। विद्वान्। सम्ऽपश्यन्। विश्वा। भुवनानि। गोपाः॥ १॥

१. त-भ-स्तुत्यार्हाणि। २. त-भ१.२.४.८-एवं। ३. ग-त४.५-तस्यातो लोपे; त१.२.३.६.७.८-भ२.८-तस्य योगे; भ१-तस्यायोपे; भ४-तस्याद्योपे। ४. अनु.-पूर्वार्धं।

सूर्यरश्मिः । उषसः प्रादुर्भावानन्तरं सूर्यस्योदयात् पूर्वं यः कालस्तस्य कालस्याभिमानी देवः सवितेत्युच्यते । vसूर्यरश्मिः सूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य रश्मिरेव रश्मिर्यस्य स तथोक्तः vहरिकेशः हरयो हरणशीला हरितवर्णा वा केशाः केशस्थानीयाः प्रकाशमाना वा दीप्तयो यस्य ईदृशः vसविता सर्वस्य प्रेरको देवः vपुरस्तात् पूर्वस्यां दिशि vअजस्रम्[1] अनवरतं vज्योतिः तेजः vउदयान् उद्यति उद्गमयति ॥ यातेरन्तर्भावितण्यर्थात् छान्दसो लङ् । व्यत्ययेन बहुवचनम् । संहितायां ' दीर्घादटि समानपादे ' इति नकारस्य रुत्वम् । ' आतोऽटि नित्यम् ' इति सानुनासिक आकारः ॥ vतस्य सवितुः vप्रसवे प्रेरणेऽनुज्ञायां सत्यां vविद्वान् जानन् vगोपाः गोपायिता रक्षिता vपूषा पोषको देव आदित्यः vयाति नभसि गच्छति । किं कुर्वन् । vविश्वा विश्वानि सर्वाणि vभुवनानि भूतजातानि vसंपश्यन् सम्यक् प्रकाशयन् ॥

नृचक्षा एष दिवो मध्य आस्त आपप्रिवान्रोदसी अन्तरिक्षम् ।
स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् ॥ २ ॥

नृऽचक्षाः । एषः । दिवः । मध्ये । आस्ते । आपप्रिऽवान् । रोदसी इति । अन्तरिक्षम् ।
सः । विश्वाचीः । अभि । चष्टे । घृताचीः । अन्तरा । पूर्वम् । अपरम् । च । केतुम् ॥ २ ॥

vनृचक्षाः नॄन् मनुष्यान् पश्यन् यद्वा नृभिर्नेतृभिः रश्मिभिः प्रकाशमानः vएषः सविता vदिवः[2] द्युलोकस्य vमध्ये vआस्ते निषीदति । किं कुर्वन् । vरोदसी द्यावापृथिव्यौ vअन्तरिक्षं च vआपप्रिवान् स्वतेजसा आपूरयन् ॥ ' प्रा पूरणे ' । अस्माच्छान्दसो लिट् । ' क्वसुश्च ' इति तस्य क्वसुरादेशः । ' वस्वेकाजाद्घसाम् ' इतीडागमः ॥ vसः देवः vविश्वाचीः विश्वमञ्चन्तीः सर्वव्यापिनीः प्राच्यादिमहादिशः vअभि vचष्टे प्रकाशयति । तथा vघृताचीः घृतं दीप्तं रूपमञ्चन्तीः आग्नेय्यादिविदिशश्च प्रकाशयति ॥ अञ्चतेः क्विनन्तात् ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । ततो भसंज्ञायाम् ' अचः ' इत्यकारलोपे ' चौ ' इति दीर्घत्वम् । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वे प्राप्ते ' चौ ' इति पूर्वस्याच उदात्तत्वम् ॥ तथा vपूर्वं पूर्वभागं vकेतुं प्रज्ञापनीयम् vअपरं पृष्ठभागं vच vअन्तरा अन्तरालं च अभि चष्टे प्रकाशयति ॥

रायो बुध्नः संगमनो वसूनां विश्वा रूपाभि चष्टे शचीभिः ।
देवइव सविता सत्यधर्मेन्द्रो न तस्थौ समरे धनानाम् ॥ ३ ॥

रायः । बुध्नः । सम्ऽगमनः । वसूनाम् । विश्वा । रूपा । अभि । चष्टे । शचीभिः ।
देवःऽइव । सविता । सत्यऽधर्मा । इन्द्रः । न । तस्थौ । सम्ऽअरे । धनानाम् ॥ ३ ॥

vरायः धनस्य vबुध्नः बन्धको मूलभूतो वा ॥ 'ऊडिदम्' इत्यादिना रैशब्दाद्विभक्तेरुदात्तत्वम् ॥ तथा vवसूनां धनानां vसंगमनः संगमयिता प्रापयिता ईदृशः सविता vशचीभिः दीप्तिभिः vविश्वा vरूपा सर्वाणि रूपाणि निरूपणीयानि पदार्थजातानि vअभि vचष्टे अभिपश्यति । प्रकाशयति । अपि च vदेवइव अयं vसविता सावको देवः vसत्यधर्मा सत्यमवितथं धर्मं धारणं धारणहेतुभूतं कर्म वा यस्य तादृशो भवति । तथा vइन्द्रो vन इन्द्र इव vधनानां vसमरे संग्रामे सम्यक्प्रापणे vतस्थौ । अयं सविता उद्युक्तः संस्तिष्ठति ॥

---

१. त-भ१.२.४.८–अजस्रं जस्रं । २. त१.२.३.६.७–देवः ।

विश्वावसुं सोम गन्धर्वमापो दृदृशुषीस्तदृतेना व्यायन् ।
तदन्ववैदिन्द्रो रारहाण आसां परि सूर्यस्य परिधीँरपश्यत् ॥ ४ ॥

विश्वऽवसुम् । सोम । गन्धर्वम् । आपः । ददृशुषीः । तत् । ऋतेन । वि । आयन् ।
तत् । अनुऽअवैत् । इन्द्रः । ररहाणः । आसाम् । परि । सूर्यस्य । परिऽधीन् । अपश्यत् ॥ ४ ॥

हे [v]सोम त्वया सहितं [v]गन्धर्वं गीतरूपां गां शब्दं धारयन्तं [v]विश्वावसुम् एतत्संज्ञं माम् । उत्तरत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यत् [v]आपः वसतीवर्याख्याः [v]ददृशुषीः दृष्टवत्यः ॥ दृशेर्लिटः क्वसुः । ' उगितश्च ' इति ङीप् । ' वसोः संप्रसारणम् ' इति संप्रसारणम् । जसि ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः ॥ [v]तत् तदानीम् [v]ऋतेन यज्ञेन हेतुना [v]व्यायन् विविधमगच्छन् यष्टृजनाः । [v]तत् गमनम् [v]आसाम् अपां [v]ररहाणः गमयिता [v]इन्द्रः [v]अन्ववैत् अन्वबुध्यत । बुद्ध्वा च कुत्र यज्ञः प्रवृत्त इति [v]सूर्यस्य [v]परिधीन् परितो धीयमानान् प्राच्यादिदिग्भागान् [v]परि [v]अपश्यत् परितो दृष्टवान् ॥

विश्वावसुरभि तन्नो गृणातु दिव्यो गन्धर्वो रजसो विमानः ।
यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः ॥ ५ ॥

विश्वऽवसुः । अभि । तत् । नः । गृणातु । दिव्यः । गन्धर्वः । रजसः । विऽमानः ।
यत् । वा । घ । सत्यम् । उत । यत् । न । विद्म ।
धियः । हिन्वानः । धियः । इत् । नः । अव्याः ॥ ५ ॥

[v]विश्वावसुः [v]गन्धर्वः [v]नः अस्माकं [v]तत् [v]अभि [v]गृणातु अभिमुखं ब्रवीतु ॥ ' गृ शब्दे ' । क्र्यादिकः । प्वादित्वात् ह्रस्वः ॥ कीदृशः । [v]दिव्यः दिवि भवः तथा [v]रजसः उदकस्य [v]विमानः निर्माता । किं पुनस्तत् । [v]यद्वा [v]घ यच्च खलु [v]सत्यम् अवितथं यथार्थफलं कर्मजातम् । उतशब्दश्चार्थे । [v]यत् च [v]न [v]विद्म न जानीमः तदुभयं ब्रवीत्वित्यर्थः ॥ ' ऋचि तुनुघ° ' इत्यादिना घशब्दस्य सांहितिको दीर्घः ॥ शिष्टः पादः प्रत्यक्षकृतः । हे विश्वावसो [v]धियः कर्माणि [v]हिन्वानः सोमेन प्रवर्धयन् ॥ ' हि गतौ वृद्धौ च ' । यद्वा । धियः स्तुतीर्हिन्वानः प्राप्नुवन् [v]नः अस्माकं [v]धिय [v]इत् कर्माण्येव बुद्धीरेव वा [v]अव्याः रक्ष ॥

सन्निमविन्दच्चरणे नदीनामपावृणोद्दुरो अश्मव्रजानाम् ।
प्रासां गन्धर्वो अमृतानि वोचदिन्द्रो दक्षं परि जानादहीनाम् ॥ ६ ॥

सन्निम् । अविन्दत् । चरणे । नदीनाम् । अप । अवृणोत् । दुरः । अश्मऽव्रजानाम् ।
प्र । आसाम् । गन्धर्वः । अमृतानि । वोचत् । इन्द्रः । दक्षम् । परि । जानात् । अहीनाम् ॥ ६ ॥

[v]सन्निम् अद्रिः संस्नातं प्रकर्षेण सर्वस्य जगतः स्नापयितारं मेघम् । ' ष्णा शौचे ' । ' आदृगमहन° ' इति किन्प्रत्ययः । लिङ्वन्नावात् द्विर्वचनम् । [v]नदीनां[1] शब्दकारिणीनामपां [v]चरणे संचरणस्थानेऽन्तरिक्षे [v]अविन्दत् । इन्द्रोऽलभत । लब्ध्वा च [v]अश्मव्रजानाम् । अश्मा व्याप्तो मेघः । तत्र व्रजन्तीनाम् । यद्वा । मेघो व्रजो गोष्ठं निवासस्थानं यासां तादृशीनाम् । अपां

१. ग-भ१.२.८–नदीनां नदनानां; भ७–नदीनां नदमानानां ।

vदुरः द्वाराणि मेघान्निर्गमनप्रदेशान् vअपावृणोत् अपावृतवान्। यद्वा। अश्मसु शिलासु व्रजन्तीनां गच्छन्तीनां व्याप्तगमनानां वा नदीनां गङ्गायमुनादीनां चरणे संचरणे प्रवहणे निमित्तभूते सति तदर्थमिन्द्रः सन्नि मेघमविन्दत् अलभत। लब्ध्वा चान्तर्गतानामपां निर्गमसाधनानि मेघस्य दुरो द्वाराणि अपावृणोत् अपावृतवान्। तथा vआसां नदीनाम् vअमृतानि अमरणसाधकानि[1] उदकानि vगन्धर्वः गोर्वज्रस्य धर्ता विश्वावसुरूपेण वर्तमानः vइन्द्रः vप्र vवोचत् प्रब्रवीति। प्रवोढुमनुजानाति। तथा vदक्षम्। दक्षस्युदकं प्रयच्छतीति दक्षो वर्षणसमर्थो मेघः। तादृशं मेघम् vअहीनां मेघानां मध्ये vपरि vजानात् परितः सर्वतो जानाति। 'ज्ञा अवबोधने'। लेट्याडागमः। 'ज्ञाजनोर्जा' इति जादेशः॥ ॥ २७ ॥

'अग्ने तव' इति षड्चं द्वादशं सूक्तम्। पावकगुणविशिष्टोऽग्निर्ऋषिः। शुद्धाग्निर्देवता। आद्या विष्टारपङ्क्तिरष्टकद्विद्वादशाष्टकवती। अथ तिस्रः सतोबृहत्यः 'अयुजौ जागतौ' (अनु. ८. ४) इति लक्षणोपेताः। पञ्चम्युपरिष्टाज्ज्योतिः। षष्ठी त्रिष्टुप्। तथा चानुक्रान्तम्—'अग्ने तवाग्निः पावक आग्नेयं विष्टारपङ्क्तिस्तिस्रः सतोबृहत्य उपरिष्टाज्ज्योतिः' इति। महाव्रत आग्निमारुतशस्त्र इदं सूक्तं स्तोत्रियानुरूपार्थम्। तथैव पञ्चमारण्यके सूत्रितम् (ऐ. आ. ५. ३. २)॥

अग्ने तव श्रवो वयो महि भ्राजन्ते अर्चयो विभावसो।
बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे॥ १॥

अग्ने। तव। श्रवः। वयः। महि। भ्राजन्ते। अर्चयः। विभावसो इति विभाऽवसो। बृहद्भानो इति बृहत्ऽभानो। शवसा। वाजम्। उक्थ्यम्। दधासि। दाशुषे। कवे॥१॥

हे vअग्ने vतव vवयः अन्नं vश्रवः श्रवणीयं प्रशस्यम्। हविरात्मकस्य तस्य मन्त्रसंस्कृतत्वेन प्रशस्तत्वात्। अन्नेषु मध्ये तवैवान्नं श्रेष्ठमित्यर्थः। हे vविभावसो। विशिष्टा दीप्तिर्विभा। सैव वसु धनं यस्य तादृशाग्ने vअर्चयः दीप्तयः vमहि महत् बहुलं vभ्राजन्ते दीप्यन्ते। 'भ्राजृ दीप्तौ'। अनुदात्तेत्। भौवादिकः। हे vबृहद्भानो प्रौढदीप्ते vकवे क्रान्तदर्शिन्नग्ने एवंमहानुभावस्त्वं vशवसा बलेनोपेतम् vउक्थ्यं प्रशस्यम्। यद्वा। उक्थो यज्ञः। तद्योग्यं vवाजम् अन्नं vदाशुषे हवींषि दत्तवते यजमानाय vदधासि ददासि प्रयच्छसि॥

पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना।
पुत्रो मातरा विचरन्नुपावसि पृणक्षि रोदसी उभे॥ २॥

पावकऽवर्चाः। शुक्रऽवर्चाः। अनूनऽवर्चाः। उत्। इयर्षि। भानुना।
पुत्रः। मातरा। विऽचरन्। उप। अवसि। पृणक्षि। रोदसी इति। उभे इति॥ २॥

vपावकवर्चाः शोधकदीप्तिः vशुक्रवर्चाः निर्मलतेजस्कः vअनूनवर्चाः संपूर्णतेजस्कः। हे अग्ने ईदृशस्त्वं vभानुना तेजसा vउदियर्षि उद्गच्छसि। 'ऋ सृ गतौ'। जौहोत्यादिकः। 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्येत्वम्। स त्वं vपुत्रः सन् vमातरा मातृभूते[2] अरण्यौ vविचरन् यागावसाने विशेषेण प्राप्नुवन् vउपावसि उपगतान् यजमानान् रक्षसि। तथा vउभे vरोदसी द्यावापृथिव्यौ vपृणक्षि संयोजयसि। हविषा द्युलोकं वृष्ट्येमं लोकं च पूरयसीत्यर्थः। 'पृची संपर्के'। रौधादिकः[2]॥

---

१. ग-म २—°साधनानि। २. ग—द्यावापृथिव्यौ विचरन् सन् उपावसि उपरक्षसि। उभे रोदसी द्यावापृथिव्यौ पृणक्षि तेजसा पूरयसि। धूमेनामुं लोकं पूरयति वृष्ट्येमं इति वाजसनेयकं।

ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व धीतिभिर्हितः ।
त्वे इषः सं दधुर्भूरिवर्पसश्चित्रोतयो वामजाताः ॥ ३ ॥

ऊर्जः । नपात् । जातऽवेदः । सुशस्तिऽभिः । मन्दस्व । धीतिऽभिः । हितः ।
त्वे इति । इषः । सम् । दधुः । भूरिऽवर्पसः । चित्रऽऊतयः । वामऽजाताः ॥ ३ ॥

हे ᵛऊर्जो ᵛनपात् ऊर्जः अन्नस्य पार्थिवस्यारण्यादेः पुत्र हे ᵛजातवेदः जातानां वेदितरग्ने ᵛसुशस्तिभिः अस्माभिः क्रियमाणैः ᵛमन्दस्व मोदस्व । तथा ᵛधीतिभिः कर्मभिरस्माभिः क्रियमाणैः अग्निहोत्रादिभिः ᵛहितः सुहितः तृप्तो भव । अपि च ᵛभूरिवर्पसः । वर्प इति रूपनाम । बहुविधरूपाः ᵛचित्रोतयः चित्रा विचित्रोतिस्तृप्तिर्यासां तास्तथोक्ताः ᵛवामजाताः वामं वननीयं जातं जन्म यासां तादृशीः ᵛइषः अन्नानि हविर्लक्षणानि ᵛत्वे त्वय्येव ᵛसं ᵛदधुः संदधति । सम्यगनुष्ठुति यजमानाः । यद्वा । भूरिवर्पस इत्यादिकं कर्तृविशेषणम् । तदानीं चित्रोतय इत्यस्य विचित्ररक्षा इति योज्यम् ॥

इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य ।
स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिं क्रतुम् ॥ ४ ॥

इरज्यन् । अग्ने । प्रथयस्व । जन्तुऽभिः । अस्मे इति । रायः । अमर्त्य ।
सः । दर्शतस्य । वपुषः । वि । राजसि । पृणक्षि । सानसिम् । क्रतुम् ॥ ४ ॥

हे ᵛअग्ने ᵛजन्तुभिः जातैः शत्रुभिः सह ᵛइरज्यन् ईर्ष्यन् स्पर्धां कुर्वन् । 'इरज् ईर्ष्यायाम्' । कण्ड्वादिः । यद्वा इरज्यतिरैश्वर्यकर्मा । जन्तुभिर्जायमानैरात्मीयैस्तेजोभिः इरज्यन् ईश्वरो भवन् । हे ᵛअमर्त्य मरणरहित ᵛअग्ने ᵛअस्मे अस्माकम् । 'सुपां सुलुक्०' इति षष्ठ्याः शेआदेशः । ᵛरायः धनानि ᵛप्रथयस्व विस्तारय । रयिशब्दाच्छसः स्थाने व्यत्ययेन जस् । शसो वा व्यत्ययेन 'ऊडिदम्०' इति विभक्त्युदात्तत्वं न क्रियते । ᵛसः त्वं ᵛदर्शतस्य दर्शनीयस्य ᵛवपुषः तेजोमयस्य शरीरस्य ᵛवि ᵛराजसि । तृतीयार्थे षष्ठी वा । ईदृशेन शरीरेण विशेषेण दीप्यसे । यद्वा । राजतिरैश्वर्यकर्मा । वपुरिति च रूपनाम । दर्शनीयेन रूपेण वि राजसि विशेषेण ईशिषे । अत एव ᵛसानसिं संभजनीयं ᵛक्रतुं कर्म ᵛपृणक्षि अस्माभिः संपर्चयसि । फलेन वा संयोजयसि ॥

इष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसो महः ।
रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिम् ॥ ५ ॥

इष्कर्तारम् । अध्वरस्य । प्रऽचेतसम् । क्षयन्तम् । राधसः । महः ।
रातिम् । वामस्य । सुऽभगाम् । महीम् । इषम् । दधासि । सानसिम् । रयिम् ॥ ५ ॥

ᵛइष्कर्तारं निष्कर्तारम् । छान्दसो वर्णलोपः । ᵛअध्वरस्य यज्ञस्य निष्कर्तारं संस्कर्तारं ᵛप्रचेतसं प्रकृष्टज्ञानं ᵛमहः महतः ᵛराधसः धनस्य ᵛक्षयन्तम् ईश्वरम् । क्षयतिरैश्वर्यकर्मा । ᵛवामस्य वननीयस्य धनस्य ᵛरातिं दातारम् । रातेः कर्तरि क्तिच् । ईदृशं त्वां स्तुम इति शेषः । स त्वं ᵛसुभगां सौभाग्योपेतां ᵛमहीं महतीम् ᵛइषम् अन्नं ᵛसानसिं संभक्तव्यं ᵛरयिं धनं च ᵛदधासि स्तोतृभ्यो ददासि ॥

ऋतावानं महिषं विश्वदर्शतमग्निं सुम्नाय दधिरे पुरो जनाः ।
श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा ॥ ६ ॥

ऋतऽवानम् । महिषम् । विश्वऽदर्शतम् । अग्निम् । सुम्नाय । दधिरे । पुरः । जनाः ।
श्रुत्ऽकर्णम् । सुप्रथःऽतमम् । त्वा । गिरा । दैव्यम् । मानुषा । युगा ॥ ६ ॥

ऋतावानं सत्यवन्तं यज्ञवन्तं वा । 'छन्दसीवनिपौ' इति मत्वर्थीयो वनिप् । महिषं महान्तं पूज्यं वा विश्वदर्शतं विश्वैः सर्वैर्दर्शनीयम् । यद्वा विश्वं दर्शनं यस्य । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम् । ईदृशम् अग्निं सुम्नाय सुखार्थं जनाः ऋत्विग्यजमानरूपाः पुरः दधिरे पुरो दधते । सर्वकर्मभ्यः पुरस्ताद्धारयन्ति । यद्वा पुरः पुरस्तात् पूर्वस्यां दिशि आहवनीयरूपेण धारयन्ति । परोऽर्धर्चः प्रत्यक्षकृतः । अपि च हे अग्ने श्रुत्कर्णं श्रुत् स्तुतीः सम्यक् शृण्वन् कर्णः श्रोत्रेन्द्रियं यस्य तादृशं सप्रथस्तमम् अतिशयेन प्रख्यातं यद्वा सर्वतो विस्तार्यमाणं दैव्यं देवानां हविर्वोढृत्वेन संबन्धिनम् ईदृशं त्वा त्वां मानुषा मानुषाणि मनोरपत्यानि युगा युगानि युगलानि पत्नीयजमानरूपाणि गिरा स्तुत्या स्तुवन्तीति शेषः ॥ ॥ २८ ॥

'अग्ने' इति षड्चं त्रयोदशं सूक्तं तापसगुणविशिष्टस्याग्नेरार्षं वैश्वदेवमानुष्टुभम् । तथा चानुक्रान्तम्—'अग्नेऽच्छाग्निस्तापसो वैश्वदेवमानुष्टुभं हि' इति । गतो विनियोगः ॥

अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव ।
प्र नो यच्छ विशस्पते धनदा असि नस्त्वम् ॥ १ ॥

अग्ने । अच्छ । वद । इह । नः । प्रत्यङ् । नः । सुऽमनाः । भव ।
प्र । नः । यच्छ । विशः । पते । धनऽदाः । असि । नः । त्वम् ॥ १ ॥

हे अग्ने इह अस्मिन् देशे नः अस्मान् अच्छ वद आभिमुख्येन प्रियं ब्रूहि । तथा प्रत्यङ् नः[1] अस्मान् प्रत्यञ्चन् सुमनाः शोभनमनस्को भव । हे विशस्पते यजमानलक्षणायाः प्रजायाः पालयितः नः अस्मभ्यं प्र यच्छ धनानि प्रदेहि यतः त्वं नः अस्माकं धनदाः असि धनानां दाता भवसि ॥

प्र नो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः ।
प्र देवाः प्रोत सूनृता रायो देवी ददातु नः ॥ २ ॥

प्र । नः । यच्छतु । अर्यमा । प्र । भगः । प्र । बृहस्पतिः ।
प्र । देवाः । प्र । उत । सूनृता । रायः । देवी । ददातु । नः ॥ २ ॥

अर्यमा अरीणां नियन्ता अर्याणां निर्माता वैतत्संज्ञो देवः नः अस्मभ्यं प्र यच्छतु धनम् । तथा भगः एतत्संज्ञको देवश्च प्र यच्छतु । बृहस्पतिः च प्र यच्छतु । सर्वे देवाः च प्र यच्छन्तु । उत अपि च सूनृता प्रियसत्यवाग्रूपा देवी देवनशीला सरस्वती रायः धनानि नः अस्मभ्यं प्र ददातु ॥ 'ऊडिदम्०' इत्यादिना रायो विभक्तिरुदात्ता ॥

---

१. त-म-मु—'नः' नास्ति ।

सोमं राजानमवसेऽग्निं गीर्भिर्हवामहे ।
आदित्यान्विष्णुं सूर्यं ब्रह्माणं च बृहस्पतिम् ॥ ३ ॥

सोमम् । राजानम् । अवसे । अग्निम् । गीःऽभिः । हवामहे ।
आदित्यान् । विष्णुम् । सूर्यम् । ब्रह्माणम् । च । बृहस्पतिम् ॥ ३ ॥

vराजानं राजमानमीश्वरं वा vसोमम् vअग्निं च vगीर्भिः स्तुतिभिः vअवसे रक्षणार्थं vहवामहे आह्वयामहे । तथा vआदित्यान् अदितेः पुत्रान् मित्रादीन् vविष्णुं vसूर्यं vब्रह्माणं प्रजापतिं vबृहस्पतिं vच रक्षणार्थमाह्वयामहे ॥

इन्द्रवायू बृहस्पतिं सुहवेह हवामहे ।
यथा नः सर्व इज्जनः संगत्यां सुमना असत् ॥ ४ ॥

इन्द्रवायू इति । बृहस्पतिम् । सुऽहवौ । इह । हवामहे ।
यथा । नः । सर्वः । इत् । जनः । सम्ऽगत्याम् । सुऽमनाः । असत् ॥ ४ ॥

इन्द्रश्च वायुश्च vइन्द्रवायू । 'उभयत्र वायोः प्रतिषेधो वक्तव्यः' (पा. सू. ६. ३. २६. १) इत्यानङः प्रतिषेधः । 'नोत्तरपदेऽनुदात्तादौ' इति 'देवताद्वन्द्वे च' इति प्राप्तस्योभयपदप्रकृतिस्वरस्य निषेधः । 'समासस्य' इत्यन्तोदात्तत्वम् । vबृहस्पतिं बृहतां देवानां पालकम् । 'तद्बृहतोः करपत्योः०' (पा. सू. ६. १. १५७) इति सुट्तलोपौ । वनस्पत्यादित्वादुभयपदप्रकृतिस्वरत्वम् । vसुहवा सुह्वानौ इन्द्रवायू बृहस्पतिं च vइह अस्मिन् कर्मणि vहवामहे आह्वयामहे । vयथा vनः अस्माकं vसर्व vइत् सर्व एव vजनः vसंगत्यां संगमने धनस्य प्राप्तौ vसुमनाः vअसत् शोभनमनस्को भवेत् तथा आह्वयामह इत्यर्थः । अस्तेर्लेट्यडागमः ॥

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय ।
वातं विष्णुं सरस्वतीं सवितारं च वाजिनम् ॥ ५ ॥

अर्यमणम् । बृहस्पतिम् । इन्द्रम् । दानाय । चोदय ।
वातम् । विष्णुम् । सरस्वतीम् । सवितारम् । च । वाजिनम् ॥ ५ ॥

हे स्तोतः अर्यमादीन् देवान् vदानाय धनप्रदानाय vचोदय स्तुत्या प्रेरय । तथा vवातं वायुं vविष्णुं vसरस्वतीं vवाजिनम् अन्नवन्तं बलवन्तं वा vसवितारं vच दानाय प्रेरय ॥

त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय ।
त्वं नो देवतातये रायो दानाय चोदय ॥ ६ ॥

त्वम् । नः । अग्ने । अग्निऽभिः । ब्रह्म । यज्ञम् । च । वर्धय ।
त्वम् । नः । देवऽतातये । रायः । दानाय । चोदय ॥ ६ ॥

हे vअग्ने vत्वम् vअग्निभिः त्वद्विभूतिभूतैरन्यैरग्निभिः सार्धं vनः अस्माकं vब्रह्म स्तोत्रं vयज्ञं vच vवर्धय । तथा vत्वं vनः अस्माकं vदेवतातये । यज्ञनामैतत् । यागार्थं vरायः धनस्य vदानाय प्रदानाय vचोदय दातॄन् प्रेरय ॥ ॥ २९ ॥

'अयमग्ने' इत्यष्टर्चं चतुर्दशं सूक्तमाग्नेयम्। शार्ङ्ग इति पक्षिविशेषस्याख्या। शार्ङ्गजातयो जरितृप्रभृतयश्चत्वारश्चतुर्णां द्वृचानां क्रमेण द्रष्टारः। आदितो द्वे जगत्यौ। अथ चतस्रस्त्रिष्टुभः। ततो द्वे अनुष्टुभौ। तथा चानुक्रान्तम्—'अयमष्टौ द्वृचाः शार्ङ्गा जरिता द्रोणः सारिसृक्तः स्तम्बमित्रश्चाग्नेयमाद्ये जगत्यौ चतस्रश्च त्रिष्टुभः' इति। गतो विनियोगः॥

अयमग्ने जरिता त्वे अभूदपि सहसः सूनो नह्यन्यदस्त्याप्यम्।
भद्रं हि शर्म त्रिवरूथमस्ति त आरे हिंसानामप दिद्युमा कृधि॥ १॥

अयम्। अग्ने। जरिता। त्वे इति। अभूत्। अपि।
सहसः। सूनो इति। नहि। अन्यत्। अस्ति। आप्यम्।
भद्रम्। हि। शर्म। त्रिऽवरूथम्। अस्ति। ते।
आरे। हिंसानाम्। अप। दिद्युम्। आ। कृधि॥ १॥

हे [v]अग्ने [v]त्वे त्वयि। 'सुपां सुलुक्०' इति सप्तम्याः शेआदेशः। [v]अयम् ऋषिः [v]जरिता स्तोता [v]अभूदपि। अपिशब्दः संभावनायाम्। इदानीं स्तोतृत्वेन संभाव्यते। तत्र कारणमाह। हे [v]सहसः [v]सूनो बलस्य पुत्र त्वत्तः [v]अन्यत् [v]आप्यम् आप्तव्यं [v]नहि [v]अस्ति न खलु विद्यते। अतः प्राप्तव्यं त्वामेव स्तुत्या प्राप्नोमि। [v]भद्रं कल्याणं [v]त्रिवरूथं दुःखत्रयस्य निवारकं [v]शर्म सुखं [v]हि यस्मात् [v]ते तव [v]अस्ति विद्यते। अथवा शोभनं त्रिवरूथं त्रिभूमिकं गृहं तवास्ति हि। अतः [v]हिंसानां हिंस्यमानानामस्माकम् [v]आरे दूरे [v]दिद्युं दीप्यमानामात्मीयां ज्वालाम् [v]अप [v]आ [v]कृधि अपाकुरु निवारय। करोतेश्छान्दसो विकरणस्य लुक्। 'श्रुश्रुणुपृकृवृभ्यः०' इति हेर्धिभावः॥

प्रवत्ते अग्ने जनिमा पितूयतः साचीव विश्वा भुवना न्यृञ्जसे।
प्र सप्तयः प्र सनिषन्त नो धियः पुरश्चरन्ति पशुपाइव त्मना॥ २॥

प्रऽवत्। ते। अग्ने। जनिम। पितुऽयतः। साचीऽइव। विश्वा। भुवना। नि। ऋञ्जसे।
प्र। सप्तयः। प्र। सनिषन्त। नः। धियः। पुरः। चरन्ति। पशुपाःऽइव। त्मना॥ २॥

हे [v]अग्ने [v]पितूयतः पितुमन्नं भक्ष्यमिच्छतः [v]ते तव [v]जनिम जन्म प्रादुर्भवनं[1] [v]प्रवत् प्रकृष्टमुत्कृष्टं भवति। 'उपसर्गाच्छन्दसि धात्वर्थे' इति वतिः। स त्वं [v]साचीव सचिव इव [v]विश्वा विश्वानि व्याप्तानि भुवनानि भूतजातानि [v]न्यृञ्जसे[2] प्रसाधयसि। वशीकरोषीत्यर्थः। [v]सप्तयः सर्पणशीलाः [v]नः अस्माकं [v]धियः स्तुतयः तादृशं त्वां [v]प्र [v]सनिषन्त प्रकर्षेण संभजन्ते। एकः प्रशब्दः पूरकः। यद्वा। सप्तयः। लुप्तोपममेतत्। सर्पणशीला अश्वा यथाजिं प्रकर्षेण संभजन्ते तथा अस्मदीया धिय इत्यर्थः। अनन्तरं [v]पुरः तव पुरस्तात् [v]त्मना आत्मना स्वयमेव [v]चरन्ति व्याप्य वर्तन्ते। [v]पशुपाइव यथा पशूनां पालका गोपालाः पालयितव्यानां पुरस्तात् संचरन्ति तद्वत्॥

उत वा उ परि वृणक्षि बप्सद्वृहोरग्न उलपस्य स्वधावः।
उत खिल्या उर्वराणां भवन्ति मा ते हेतिं तविषीं चुकुधाम॥ ३॥

---

१. त१.३.६.७.८–प्रादुर्भवेत्; त४.५-म४–प्रादुर्भवत्; म१.२.४.७–प्रादुर्भवन्। २. त-म–ऋंजसे।

उत । वै । ऊँ इति । परि । वृणक्षि । बप्सत् । बहोः । अग्ने । उलपस्य । स्वधाऽवः ।
उत । खिल्याः । उर्वराणाम् । भवन्ति । मा । ते । हेतिम् । तविषीम् । चुक्रुधाम ॥ ३ ॥

हे [v]स्वधावः दीप्तिमन् [v]अग्ने [v]बप्सत् दहन् । ' भस भर्त्सनदीप्त्योः ' । जौहोत्यादिकः । शतरि ' घसिभसोर्हलि च ' (पा. सू. ६. ४. १००) इत्युपधालोपः । ' नाभ्यस्ताच्छतुः ' इति नुमः प्रतिषेधः । [v]बहोः बहुलस्य [v]उलपस्य तृणजातस्य । कर्मणि षष्ठी । सर्वं वनम् [v]उत [v]वै अपि खलु [v]परि [v]वृणक्षि परिवर्जयसि विनाशयसि । [v]उ इति पूरकः । [v]उत अपि च [v]उर्वराणाम् । सस्याढ्या भूमय उर्वराः । तासां संबन्धिनः प्रदेशाः [v]खिल्याः खिलाः प्राणिभिर्गन्तुं योग्याः [v]भवन्ति । त्वया दग्धा इति शेषः । [v]तविषीं महतीं [v]ते तव [v]हेतिं हननहेतुभूतां ज्वालां [v]मा [v]चुक्रुधाम मा क्रोधयाम । अपि तु स्तुतिभिः प्रसाधयाम ॥ ' ऊतियूति° ' इत्यादिना हन्तेः क्तिनि ' हेतिः ' इत्यन्तोदात्तो निपात्यते । चुक्रुधामेति क्रुधेर्ण्यन्तालुङि चङि रूपम् ॥

यदुद्वतो निवतो याभि बप्सत्पृथगेषि प्रगर्धिनीव सेना ।
यदा ते वातो अनुवाति शोचिर्वप्तेव श्मश्रु वपसि प्र भूम ॥ ४ ॥

यत् । उत्ऽवतः । निऽवतः । यासि । बप्सत् । पृथक् । एषि । प्रगर्धिनीऽइव । सेना ।
यदा । ते । वातः । अनुऽवाति । शोचिः । वप्ताऽइव । श्मश्रु । वपसि । प्र । भूम ॥ ४ ॥

[v]यत् यदा [v]उद्वतः उद्गतानुच्छ्रितान् [v]निवतः नीचीनांस्तरुगुल्मादीन् हे अग्ने [v]बप्सत् दहन् [v]यासि प्राप्नोषि तदानीं बह्वीभिर्ज्वालाभिः [v]पृथक् विभिन्नः[1] सन् [v]एषि गच्छसि । तत्र दृष्टान्तः । [v]प्रगर्धिनीव [v]सेना । ' गृधु अभिकाङ्क्षायाम् ' । परराष्ट्रं[2] गच्छतो राज्ञः सेना तत्रस्थं धनजातमभिकाङ्क्षमाणा इतस्ततः संघशो गच्छति तद्वत् । [v]वातः वायुश्च [v]ते तव [v]शोचिः दीप्तिं [v]यदा यस्मिन् काले [v]अनुवाति अनुगुणं प्रवर्तते तदा [v]श्मश्रु । श्म शरीरम् । तत्र श्रितं स्थितं केशरोमादिकं [v]वप्तेव यथा वप्ता नापितो वपति मुण्डयति तथा [v]भूम भूमिं [v]प्र [v]वपसि प्रकर्षेण मुण्डयसि । सर्वं वनं निःशेषेण दहसीत्यर्थः ॥

प्रत्यस्य श्रेणयो ददृश्र एकं नियानं बहवो रथासः ।
बाहू यदग्ने अनुमर्मृजानो न्यङ्ङुत्तानामन्वेषि भूमिम् ॥ ५ ॥

प्रति । अस्य । श्रेणयः । ददृश्रे । एकम् । निऽयानम् । बहवः । रथासः ।
बाहू इति । यत् । अग्ने । अनुऽमर्मृजानः । न्यङ् । उत्तानाम् । अनुऽएषि । भूमिम् ॥ ५ ॥

[v]अस्य अग्नेर्दहतः [v]श्रेणयः ज्वालापङ्क्तयः [v]प्रति [v]ददृश्रे प्रतिदृश्यन्ते । [illegible] तद्वत् । अत्र सामर्थ्यादुपमानप्रतीतिः । हे [v]अग्ने [v]बाहू । तृतीयार्थे प्रथमा । बाहुभ्यां बाहुस्थानीयैर्ज्वालासमूहैः [v]अनुमर्मृजानः सर्वं वनं मृजन्शोधयन् । दहन्नित्यर्थः । [v]न्यङ् न्यञ्चन् प्रह्वीभवन् [v]उत्तानाम् ऊर्ध्वाभिमुखां [v]भूमिं [v]यत् यदा [v]अन्वेषि अनुगच्छसि तदानीमस्य श्रेणयो ददृश्र इत्यन्वयः ॥

---

१. त१.२,३.६.७.८–विभिन्नाभिः । २. भ२–यथा परराष्ट्रं ।

उत्ते शुष्मा जिहतामुत्ते अर्चिरुत्ते अग्ने शशमानस्य वाजाः ।
उच्छ्वञ्चस्व नि नम वर्धमान आ त्वाद्य विश्वे वसवः सदन्तु ॥ ६ ॥

उत् । ते । शुष्माः । जिहताम् । उत् । ते । अर्चिः । उत् । ते । अग्ने । शशमानस्य । वाजाः ।
उत् । श्वञ्चस्व । नि । नम । वर्धमानः । आ । त्वा । अद्य । विश्वे । वसवः । सदन्तु ॥६॥

हे [v]अग्ने [v]ते तव [v]शुष्माः शोषका ज्वालाः [v]उत् [v]जिहताम् उद्गच्छन्तु । तथा [v]ते तव [v]अर्चिः दीप्तिश्च उद्गच्छतु । [v]शशमानस्य स्तूयमानस्य । यद्वा । ' शश प्लुतगतौ ' । अस्मात्ताच्छीलिक-श्चानश् । तस्य सार्वधातुकत्वे सति लसार्वधातुकत्वाभावात् ' चितः ' इत्यन्तोदात्तत्वमेव शिष्यते । शशमानस्य सर्वं वनमाक्रम्य शीघ्रं गच्छतः । तव [v]वाजाः वेगाः[1] हे अग्ने उज्जिहताम् । स त्वं [v]वर्धमानः सन् [v]उच्छ्वञ्चस्व वन उद्गच्छस्व ॥ ' श्वचि गतौ ' । भौवादिकः । इदिरवाक्षुम् ॥ तथा [v]नि [v]नम प्रह्वीभव । उन्नतं वृक्षादिकं प्राप्य उच्छ्रितो भव । अवनतं गुल्मादिकं प्राप्यावनतो भवेत्यर्थः । ईदृशं [v]त्वा त्वाम् [v]अद्य अस्मिन् काले [v]विश्वे सर्वे [v]वसवः वासयितारो रश्मयो देवा वा [v]आ [v]सदन्तु आसीदन्तु प्राप्नुवन्तु । सदेर्व्यत्ययेन सीदादेशाभावः । शपि प्राप्ते व्यत्ययेन श्लुर्वा कर्तव्यः ॥

अपामिदं न्ययनं समुद्रस्य निवेशनम् ।
अन्यं कृणुष्वेतः पन्थां तेन याहि वशाँ अनु ॥ ७ ॥

अपाम् । इदम् । निऽअयनम् । समुद्रस्य । निऽवेशनम् ।
अन्यम् । कृणुष्व । इतः । पन्थाम् । तेन । याहि । वशान् । अनु ॥ ७ ॥

इत्थं खाण्डववनस्य दाहे प्रवृत्तमग्निं ऋषिप्रभृतयः स्वात्मनो रक्षणकामास्तुष्टुवुः । इदानीं च[2] स्तम्बमित्रः स्वनिवासभूमेर्दहनाभावाय अग्नेरन्यत्र गमनं प्रार्थयते । [v]इदम् अस्मदीयं निवासस्थानम् [v]अपाम् उदकानां [v]न्ययनम् । नियन्ति नितरां गच्छन्त्यस्मिन्निति न्ययनं ह्रदः । तथा [v]समुद्रस्य उदधेश्च [v]निवेशनं गृहम् । यथा ह्रदः समुद्रस्य स्थानं च यथा दग्धुं न शक्यते तथा दाहयोग्यं न भवस्वित्यर्थः । [v]इतः अस्मादस्मदीयात् स्थानात् [v]अन्यं[3] [v]पन्थां[3] पन्थानं मार्गं हे अग्ने [v]कृणुष्व कुरुष्व । [v]तेन पथा [v]वशाननु यथाकामं [v]याहि गच्छ ॥

आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः ।
ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ॥ ८ ॥

आऽअयने । ते । पराऽअयने । दूर्वाः । रोहन्तु । पुष्पिणीः ।
ह्रदाः । च । पुण्डरीकाणि । समुद्रस्य । गृहाः । इमे ॥ ८ ॥

अनयापि स्वनिवासस्य दाहानर्हता प्रतिपाद्यते । हे अग्ने [v]ते तव [v]आयने आगमने [v]परायणे परागमने वा सति अस्यां[4] निवासभूमौ [v]पुष्पिणीः पुष्पवत्यो [v]दूर्वाः [v]रोहन्तु प्ररोहन्तु । तथा

१. त१.२.३.६.७.८-म१.४.८-खगा । २. त१.२.३.६.७-म१.२.८-च तु; त४.५-चतुर्थी; म२-चतुर्थ; म७-चस्तु । ३. त१.२.३.७-अत्यंतं; म१.७-यं तं पंथां; म२-अन्यं तं पंथां; म४-अन्यंतं; म८-अन्यंतं पंथां । ४. त१.२.३.६.७.८-म-अस्मिन् ।

vह्रदाः अशोभ्योदका जलाशयाः vच भवन्तु vपुण्डरीकाणि पद्मानि च तेषु ह्रदेषु जायन्ताम्। किं बहुना। vसमुद्रस्य जलधेः vहृमे अस्मिन्निवासप्रदेशे[1] vगृहाः आश्रयभूता भवन्तु। यथा समुद्रावासभूमिः कदाचिदपि न दह्यते एवं कदाचिदप्यस्मत्स्थानं न दह्यतामित्यर्थः। एतदुक्तं भवति। दूर्वाकाण्डप्ररोहणप्रार्थनेन स्वाश्रयस्य शीतलत्वं ह्रदप्रार्थनेन तृष्णोपशमनकारणस्य जलस्य सत्त्वं पुण्डरीकसद्भावप्रार्थनेनोपभोग्यस्य फलादेः सत्ता समुद्रगृहत्वप्रार्थनेन दाहानर्हता चेत्येतत्सर्वं प्रतिपादयत इति ॥ ॥ ३० ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टके सप्तमोऽध्यायः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

दशमे मण्डल एकादशेऽनुवाके चतुर्दश सूक्तानि व्याकृतानि। 'त्यं चित्' इति षट्चं पञ्चदशं सूक्तं सांख्यपुत्रस्यात्रेरार्षमानुष्टुभमश्विदेवताकम्[2]। तथा चानुक्रान्तं—'त्यं षट् सांख्योऽत्रिराश्विनम्' इति। प्रातरनुवाकाश्विनशस्त्रयोरानुष्टुभे छन्दसीदं सूक्तम्। सूच्यते हि—'आ नो विश्वाभिस्त्यं चिदत्रिभित्यानुष्टुभम्' (आश्व. श्रौ. ४. १५) इति ॥

त्यं चिदत्रिमृतजुरमर्थमश्वं न यातवे।
कक्षीवन्तं यदी पुना रथं न कृणुथो नवम् ॥ १ ॥

त्यम्। चित्। अत्रिम्। ऋतऽजुरम्। अर्थम्। अश्वम्। न। यातवे।
कक्षीवन्तम्। यदि। पुनरिति। रथम्। न। कृणुथः। नवम् ॥ १ ॥

हे अश्विनौ शतद्वारे पीडायन्त्रगृहेऽसुरैः प्रक्षिप्तौ बद्धाक्षौ योऽत्रिरस्ति vत्यं vचित् तमपि vअत्रिम् vऋतजुरम्। ऋतं स्तोत्रं यज्ञो वा। तेन जीर्यन्तम्। सर्वदा युवयोः परिचरणशीलमित्यर्थः॥ जीर्यतेः क्विपि 'बहुलं छन्दसि' इति उत्वम्॥ यद्वा। ऋतेन प्राप्तेनासुरकृतोपद्रवेण ज्वरितं रुग्णम्॥ 'ज्वर रोगे'। 'ज्वरत्वर°' इत्यादिना वकारस्योपधायाश्च स्थाने ऊठ्। 'जूरी हिंसागत्योः' इत्यस्माद्वा क्विप्। अनयोः पक्षयोश्छान्दसो ह्रस्वः॥ ईदृशं तमत्रिम् vअर्थम् अर्थनीयं प्राप्तव्यं vयातवे गन्तुं युवां कृतवन्तौ। तत्र दृष्टान्तः। vअश्वं vन। यथाश्वो बन्धाद्विमुक्तः सन् शीघ्रं गच्छति एवमयमपि युवयोः प्रसादात् असुरकृतादुपद्रवजातात् विमुच्यमानो यथास्थानमगच्छदित्यर्थः॥ 'या प्रापणे' इत्यस्मात् 'तुमर्थे सेसेन्°' (पा. सू. ३. ४. ९) इति तवेन्प्रत्ययः॥ vयदि[3]। अपि च इत्यर्थः। vकक्षीवन्तम्। कक्ष्या रज्जुरश्वस्य। तद्वन्तम्॥ 'आसन्दीवदष्ठीवत्' (पा. सू. ८. २. १२) इत्यादौ निपातनात् संप्रसारणम्॥ दीर्घतमसः पुत्रम् उशिक्प्रसूतमृषिं मन्दबुद्धिं सन्तं युवां vपुनः vनवं पुनरभिनवप्रज्ञं vकृणुथः अकृणुतम् अकुरुतम्। vरथं vन। यथा कश्चिच्छिल्पी जीर्णं रथं पुनरभिनवं

१. त१.२.३-भ१.२.४.८—°प्रदेशा; त७-भ७—°प्रदेशाः। २. त-भ—सांख्यपुत्रस्या°। ३. त१.२.३.६.७.८-भ—यदि वा।

करोति तद्वत् ॥ ' कृवि हिंसाकरणयोश्च ' । इदित्त्वात्नुम् । लङर्थे व्यत्ययेन लट् । ' धिन्विकृण्व्योरच ' इत्युप्रत्ययः । तत्संनियोगेनाकारान्तादेशश्च । तस्यातो लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः । ' सतिशिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधते ' (पा. म. ६. १. १५८. ११) इति वचनात् तिङ एव स्वरः शिष्यते । ' निपातैर्यद्यदिहन्त° ' इति निघातप्रतिषेधः ॥

त्यं चिदश्वं न वाजिनमरेणवो यमत्नत ।
दृळ्हं ग्रन्थिं न वि ष्यतमत्रिं यविष्ठमा रजः ॥ २ ॥

त्यम् । चित् । अश्वम् । न । वाजिनम् । अरेणवः । यम् । अत्नत ।
दृळ्हम् । ग्रन्थिम् । न । वि । स्यतम् । अत्रिम् । यविष्ठम् । आ । रजः ॥ २ ॥

vअरेणवः अहिंस्यमानाः प्रबला असुराः vवाजिनं वेगवन्तम् vअश्वं vन अश्वमिव vयम् अत्रिम् vअत्नत अतन्वत बद्धमकृषत ॥ तनोतेर्लुङि ' तनिपत्योश्छन्दसि ' इत्युपधालोपः । vत्यं vचित् तं च vअत्रिं vयविष्ठं युवतमं स्तुतेर्मिश्रयितृतमं वा vरजः । रजन्यस्मिन् जना इति रजो भूलोकः । रज इमं लोकम् vआ अभि हे अश्विनौ vवि vष्यतं व्यमुञ्चतम् । दृढं स्थिरतरं vग्रन्थिं vन ग्रन्थिमिव । यथा कश्चित् तादृशं ग्रन्थिमयत्नेन विमुञ्चति तथा युवां तमृषिमसुरकृताद्बन्धनात् मोचितवन्तावित्यर्थः ॥ स्यतमिति ' षोऽन्तकर्मणि ' इत्यस्माल्लङि इयनि ' ओतः इयनि ' इत्योकारलोपे रूपम् । छान्दसोऽडभावः ॥ यद्वा । अत्रिं मां बन्धाद्धि ष्यतं विमुञ्चतमित्यृषिः असुरैर्बद्धः सन् अश्विनौ प्रार्थयते ॥

नरा दंसिष्ठावत्रये शुभ्रा सिषासतं धियः ।
अथा हि वां दिवो नरा पुनः स्तोमो न विशसे ॥ ३ ॥

नरा । दंसिष्ठौ । अत्रये । शुभ्रा । सिसासतम् । धियः ।
अथ । हि । वाम् । दिवः । नरा । पुनरिति । स्तोमः । न । विऽशसे ॥ ३ ॥

हे vनरा नरौ नेतारौ vदंसिष्ठौ दर्शनीयतमौ vशुभ्रा शोभमानौ ईदृशौ हे अश्विनौ vअत्रये ऋषये मह्यं vधियः कर्माणि बुद्धीर्वा vसिषासतं दातुमिच्छतम् । ' षणु दाने ' । यद्वा । अत्रये इति षष्ठ्यर्थे चतुर्थी । अत्रेर्मम धियः स्तुतीः कर्माणि वा सिषासतं संभक्तुमिच्छतम् । सेवेथामित्यर्थः ॥ ' षन षण संभक्तौ ' । अस्मात्सनतेः सनोतेर्वा सनि ' सनीवन्तर्ध° ' इति विकल्पनादिडभावे ' जनसनखनाम्° ' इत्यात्वम् । शुभ्रेत्यस्यामन्त्रितस्य ' आमन्त्रितं पूर्वमविद्यमानवत् ' इत्यविद्यमानवत्त्वेन पदादित्वात् ' तिङ्ङतिङः ' इति निघाताभावः । अनुपदेशाल्लसार्वधातुकानुदात्तत्वे सनो निरनुबन्धत्वादाद्युदात्तत्वम् ॥ vअथा[1] vहि अनन्तरमेव vदिवः । दीव्यतीति स्तौतीति द्यौः स्तोता । तस्य मम vस्तोमो vन । नशब्दश्चार्थे । स्तोत्रं च हे vनरा नेतारावश्विनौ vवां युवां vपुनः vविशसे । पुनरेवाद्यापि विशेषेण शंसितुं प्रभवतीति शेषः ॥

चित्रं तद्वां सुराधसा रातिः सुमतिराश्विना ।
आ यन्नः सदने पृथौ सप्तने पप्थो नरा ॥ ४ ॥

१. त१.२.३.६.७.८-भ–तथा ।

चिते । तत् । वाम् । सुऽराधसा । रातिः । सुऽमतिः । अश्विना ।
आ । यत् । नः । सदने । पृथौ । समने । पर्षथः । नरा ॥ ४ ॥

हे ᵛसुराधसा शोभनदानौ[1] ᵛअश्विना हे अश्विनौ ᵛसुमतिः शोभना स्तुतिरस्मदीया ᵛरातिः हविर्दानं च ᵛतत् तस्मात्कारणात् ᵛवां युवयोः ᵛचिते ज्ञानाय भवति ॥ 'चिती संज्ञाने' । अस्मात् संपदादिलक्षणो भावे क्विप् । 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् ॥ ᵛयत् यस्मात्कारणात् ᵛसदने यज्ञगृहे[2] ᵛपृथौ विस्तीर्णे ᵛसमने[2] यज्ञे ᵛनः अस्मान् हे ᵛनरा नेतारौ ᵛआ ᵛपर्षथः आपूरयथः अभितो रक्षथो[3] वा तस्माद्युवामस्मदीयं परिचरणं ज्ञातवन्तावित्यनुमीमहे ॥ 'पॄ पालनपूरणयोः' इत्यस्माल्लेटि 'सिब्बहुलम्०' इति सिप् । ततः शप् ॥

युवं भुज्युं समुद्र आ रजसः पार ईङ्खितम् ।
यातमच्छा पतत्रिभिर्नासत्या सातये कृतम् ॥ ५ ॥

युवम् । भुज्युम् । समुद्रे । आ । रजसः । पारे । ईङ्खितम् ।
यातम् । अच्छ । पतत्रिऽभिः । नासत्या । सातये । कृतम् ॥ ५ ॥

हे अश्विनौ ᵛयुवं युवां ᵛसमुद्रे उदधौ निमग्नं ᵛरजसः उदकस्य ᵛपारे प्रान्ते तरङ्गसमूहे ᵛईङ्खितं डोलायितम् एवंभूतं ᵛभुज्युं तुग्रपुत्रम् ᵛअच्छ अभि ᵛपतत्रिभिः पक्षोपेतैर्नौविशेषैः सह ᵛआ ᵛयातम् आगतवन्तौ स्थः । आगत्य च हे ᵛनासत्या सत्यस्य नेतारौ सत्यस्वभावौ वा हे अश्विनौ ᵛसातये युवयोः संभजनाय समर्थं ᵛकृतं पुनर्युवामकुरुतम् ॥ करोतेर्लङि[4] छान्दसो विकरणस्य लुक् । अडभावश्च[5] । लुङि वा 'मन्त्रे घस०' इति च्लेर्लुक्[5] ॥

आ वां सुम्नैः शंयूइव मंहिष्ठा विश्ववेदसा ।
सम्मस्मे भूषतं नरोत्सं न पिप्युषीरिषः ॥ ६ ॥

आ । वाम् । सुम्नैः । शंयूइवेति शंयूऽइव । मंहिष्ठा । विश्वऽवेदसा ।
सम् । अस्मे इति । भूषतम् । नरा । उत्सम् । न । पिप्युषीः । इषः ॥ ६ ॥

हे ᵛविश्ववेदसा सर्वज्ञौ सर्वधनौ वा हे ᵛनरा नेतारौ ᵛवां युवां ᵛशंयूइव सुखयुक्तौ राजानाविव ᵛमंहिष्ठा[6] दातृतमावतिशयेन पूज्यौ वा सन्तौ ᵛसुम्नैः अस्मभ्यं दातव्यैः सुखैः सार्धम् ᵛआ । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः । आगच्छतम् । यद्वा । उपसर्गस्य भूषतमित्यनेन संबन्धः । मंहिष्ठेत्यपि संबोधनम् । हे मंहिष्ठा दातृतमौ उक्तगुणावश्विनौ वां युवां सुम्नैः सार्धं शंयूइव ᵛअस्मे अस्मान् सम्यक् आ ᵛभूषतम् अभिप्राप्नुतम् ॥ 'भू प्राप्तौ' । अस्माल्लोटि व्यत्ययेन सिप्शपौ । यद्वा । 'भूष अलंकारे' ॥ आ[7] समन्तात् सम्यक् भूषतम् अलंकुरुतम् । ᵛपिप्युषीः प्रवृद्धानि ᵛइषः इष्यमाणानि पयांसि ᵛउत्सं ᵛन गोरूध इव । यथा बहुभिः पयोभिः ऊधः अलंकृतं सत् इष्यते अस्मानप्येवं बहुभिर्धनैरलंकुरुतमित्यर्थः ॥ पिप्युषीरिति प्यायतेर्लिटः क्सुः । 'लिड्यङोश्च' इति यीभावः । जसि

---

१. त४.५-शोभनधनौ । २. त१.२.३.६.७.८-भ१.४.७.८-'यज्ञगृहे ... समने' नास्ति । ३. त-भ-रक्षको । ४. त४-करोतेर्लेटि । ५. त४.५-'अडभावश्च.....च्लेर्लुक्' नास्ति । ६. त४.५-मंहिष्ठा मंहिष्ठौ । ७. त-भ-'आ' नास्ति । ८. त-भ-प्रवृद्धाः ।

'वा छन्दसि' इति पूर्वसवर्णदीर्घः। यद्वा। उत्सः प्रवाहो यथा पिप्युषीः वृद्धानीघोऽन्नान्यलंकरोति[1] तद्वत्॥ ॥ १ ॥

'अयं हि' इति षड्र्चं षोडशं सूक्तं तार्क्ष्यपुत्रस्य सुपर्णस्यार्षं यमगोत्रस्योर्ध्वकृशनस्य वा। आद्या गायत्री द्वितीया बृहती तृतीयाचतुर्थ्यौ गायत्र्यौ पञ्चमी सतोबृहती षष्ठी विष्टारपङ्क्तिरष्टक-द्विर्द्वादशाष्टकवती। अनादेशपरिभाषया इन्द्रो देवता। तथा चानुक्रान्तम्—'अयं हि तार्क्ष्यपुत्रः सुपर्णो यामायनो वोर्ध्वकृशनो गायत्री बृहती गायत्र्यौ सतोबृहती विष्टारपङ्क्तिः' इति। गतो[2] विनियोगः[2] ॥

अयं हि ते अमर्त्य इन्दुरत्यो न पत्यते। दक्षो विश्वायुर्वेधसे ॥ १ ॥

अयम्। हि। ते। अमर्त्यः। इन्दुः। अत्यः। न। पत्यते। दक्षः। विश्वऽआयुः। वेधसे ॥ १ ॥

हे इन्द्र [v]वेधसे विधात्रे [v]ते तुभ्यं त्वदर्थम् [v]अमर्त्यः मरणरहितोऽमृतत्वप्रापकः [v]अयं [v]हि अयं खलु [v]इन्दुः सोमः [v]अत्यो [v]न सततगाम्यश्व इव [v]पत्यते गच्छति। यद्वा। पत्यतिरैश्वर्यकर्मा। तव स्वभूतोऽयं सोमः [v]वेधसे विधानाय मदस्य करणायेष्टे। कीदृश इन्दुः। [v]दक्षः प्रवृद्धो बल-हेतुर्वा [v]विश्वायुः विश्वैः सर्वैरेतव्यः प्राप्तव्यः। यद्वा। विश्वेषामायुर्जीवनहेतुः। अथवा। आयुरित्य-न्ननाम। सर्वैश्चरुपुरोडाशादिभिरन्नैर्हविर्भिरुपेतः॥

अयमस्मासु काव्य ऋभुर्वज्रो दास्वते।
अयं विभर्त्यूर्ध्वकृशनं मदमृभुर्न कृत्व्यं मदम् ॥ २ ॥

अयम्। अस्मासु। काव्यः। ऋभुः। वज्रः। दास्वते।
अयम्। बिभर्ति। ऊर्ध्वऽकृशनम्। मदम्। ऋभुः। न। कृत्व्यम्। मदम् ॥ २ ॥

[v]अस्मासु स्तोतृषु [v]काव्यः स्तुत्यः [v]अयम् इन्द्रः [v]ऋभुः दीप्तः सन् [v]दास्वते दानयुक्ताय यज-मानाय [v]वज्रः शत्रूणां वर्जको भवति। यद्वा। दास्वत इति षष्ठ्यर्थे चतुर्थी। अस्मासु दास्वते दानवत इन्द्रस्य वज्रः कुलिशः ऋभुः उरु भासमानो भवति। अपि च [v]अयम् [v]ऊर्ध्वकृशनम् उद्वततैक्ष्ण्यमेतत्संज्ञं वा यामायनमृषिं [v]मदं स्तोतारं [v]बिभर्ति पोषयति। तथा [v]ऋभुर्न सौधन्वनः। पुत्राणामाद्य ऋभुः। स इव [v]कृत्व्यं कर्मणां कर्तारम् अत एव [v]मदं मोदयितारं[3] यजमानं च बिभर्ति॥

घृषुः श्येनाय कृत्वन आसु स्वासु वंसगः। अव दीधेदहीशुवः ॥ ३ ॥

घृषुः। श्येनाय। कृत्वने। आसु। स्वासु। वंसगः। अव। दीधेत्। अहीशुवः ॥ ३ ॥

[v]घृषुः घर्षयिता दीप्तो वा [v]स्वासु स्वकीयासु [v]आसु यजमानलक्षणासु प्रजासु [v]वंसगः वननीय-गतिः एवंभूत इन्द्रः [v]कृत्वने कर्मणां कर्त्रे॥ करोतेः 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्॥ [v]श्येनाय सुपर्णाय तार्क्ष्यपुत्राय मन्त्रकृषये [v]अहीशुवः अहीनव्यापनान् अहीनवृद्धीन् वा अस्मदीयान् पुत्रादीन् [v]अव [v]दीधेत् दीपयतु॥ 'दीधीङ् दीप्तिदेवनयोः'। अस्माच्छान्दसे लिङि[4] व्यत्ययेन परस्मैपदम्॥ यद्वा। हे इन्द्र त्वदीयः सोमो घृष्टयादिगुणयुक्तः सन् दीप्यत इति योज्यम्॥

---

१. त-म-वृद्धा इवो°। २. त-म१.२.४.८-'गतो विनियोगः' नास्ति। ३. त४.५-म२-मादयितारं। ४. त-म-लकि।

यं सुपर्णः परावतः श्येनस्य पुत्र आभरत् । शतचक्रं योऽह्यो वर्तनिः ॥ ४ ॥
यम् । सुऽपर्णः । पराऽवतः । श्येनस्य । पुत्रः । आ । अभरत् ।
शतऽचक्रम् । यः । अह्यः । वर्तनिः ॥ ४ ॥

[v]श्येनस्य तार्क्ष्यस्य [v]पुत्रः तनयः [v]सुपर्णः [v]यं सोमं [v]परावतः परागतात् दूरात् द्युलोकात् [v]आभरत् आहरत् । कीदृशम्[1] । [v]शतचक्रम् । शतमिति बहुनाम । बहुधनस्य कर्तारम् ॥ मूलविभुजादित्वात् कप्रत्ययः (पा. सू. ३. २. ५. २) ॥ यद्वा । शतकरणसाधनम् । बहुयागनिष्पादनमित्यर्थः ॥ ' धनर्थे कविधानम् ' (पा. सू. ३. ३. ५८. ४) इति कप्रत्ययः । ' कृत्रादीनां के ' (का. ६.१.१२.१) इति द्विर्वचनम् । [v]यः सोमः [v]अह्यः अहेर्वृत्रस्य [v]वर्तनिः वर्तयिता प्रेरयिता । यद्वा । ' अह गतौ ' । अह्यो गन्तव्यो वर्तनिर्मार्गभूतः । एना वय इति वक्ष्यमाणेनैकवाक्यता ॥

यं ते श्येनश्चारुमवृकं पदाभरदरुणं मानमन्धसः ।
एना वयो वि तार्यायुर्जीवसे एना जागार बन्धुता ॥ ५ ॥
यम् । ते । श्येनः । चारुम् । अवृकम् । पदा । आ । अभरत् । अरुणम् । मानम् । अन्धसः ।
एना । वयः । वि । तारि । आयुः । जीवसे । एना । जागार । बन्धुता ॥ ५ ॥

हे इन्द्र [v]ते तुभ्यं त्वदर्थं [v]श्येनः सुपर्णः पक्षिराट् [v]यं सोमं [v]पदा । वचनव्यत्ययः । पद्भ्याम्[2] [v]आभरत् द्युलोकादाहरत् । ' दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् ' (ऋ. सं. ८. १००. ८) इति निगमान्तरम् । कीदृशम् । [v]चारुं शोभनम् [v]अवृकं बाधकरहितम्[3] [v]अरुणम् आरोचमानमरुणवर्णं वा [v]अन्धसः अन्नस्य [v]मानं यागद्वारा निर्मातारम् । [v]एना एनेनानेन सोमेन तुभ्यं दीयमानेन [v]वयः अन्नं [v]जीवसे जीवनाय [v]आयुः जीवितं च [v]वि [v]तारि प्रादायि । तथा [v]एना एनेनैव सोमेन [v]बन्धुता बन्धुसमूहः [v]जागार जजागार जाग्रत्प्रबुद्धः सन् वर्तते ॥ जागर्तेर्लिटि ' छन्दसि वेति वक्तव्यम् ' (पा. सू. ६. १. ८. १) इति द्विर्वचनाभावः ॥

एवा तदिन्द्र इन्दुना देवेषु चिद्धारयाते महि त्यजः ।
कृत्वा वयो वि तार्यायुः सुकृतो कृत्वायमस्मदा सुतः ॥ ६ ॥
एव । तत् । इन्द्रः । इन्दुना । देवेषु । चित् । धारयाते । महि । त्यजः ।
कृत्वा । वयः । वि । तारि । आयुः । सुकृतो इति सुऽकृतो ।
कृत्वा । अयम् । अस्मत् । आ । सुतः ॥ ६ ॥

[v]एव एवमुक्तेन[4] प्रकारेण [v]तत् तेन [v]इन्दुना सोमेन तृप्यन् [v]इन्द्रः [v]देवेषु [v]चित् देवेष्वस्मासु च [v]महि महत् [v]त्यजः तेजो दुःखस्य वर्जयितृ रक्षणं वा [v]धारयाते धारयति । शिष्टः प्रत्यक्षकृतः । हे [v]सुकृतो शोभनकर्मन्निन्द्र [v]कृत्वा कृतुना अस्माभिरनुष्ठितेन कर्मणा प्रीतेन त्वया [v]वयः अन्नम् [v]आयुः जीवनं च [v]वि [v]तारि अस्मभ्यं प्रादायि । यः [v]अयम् इन्दुः [v]कृत्वा कर्मणा प्रज्ञानेन

---

१. त१.२.३.६.७.८-भ५-कीदृशं तं । २. त४.५-भ२-पद्भ्यां पादाभ्यां । ३. त४.५-बाधरहितं । ४. त१.२.३.६.७-मु-एवमनेन ।

वा vअस्मत् अस्माभिः vआ vसुतः अभिषुतः। यद्वा। अस्मत् अस्मत्तस्त्वदाभिमुख्येन सुतः प्रेरितः। तेनेन्वुनेत्यन्वयः॥ ॥ २ ॥

'इमाम्' इति षड्वृचं सप्तदशं सूक्तमिन्द्राण्या आर्षम्। षष्ठी पङ्क्तिः शिष्टा अनुष्टुभः। अनेन सूक्तेन सपत्न्या बाधनं प्रतिपाद्यते। अत एतत्सूक्तजपादिना सपत्न्या विनाशो भवति। अतस्तद्देवताकमिदम्। तथा चानुक्रान्तम्—'इमामिन्द्राण्युपनिषत्सपत्नीबाधनमानुष्टुभं तु षड्क्त्यन्तम्' इति। अस्य सूक्तस्य विनियोगो भगवतापस्तम्बेन कस्मिंश्चित् सपत्नीघ्नप्रयोगविशेषे[1] दर्शितः—'त्रिःसप्तैर्यवैः पाठां परिकिरति यदि वारुण्यसि वरुणात्त्वा निष्क्रीणामि यदि सौम्यसि सोमात्त्वा निष्क्रीणामीति। श्वोभूत उत्तरयोत्थाप्योत्तराभिस्तिसृभिरभिमन्त्र्योत्तरया प्रतिच्छन्नां[2] हस्तयोराबध्य शय्याकाले बाहुभ्यां भर्तारं परिगृह्णीयादुपधानलिङ्गया। वश्यो भवति। सपत्नीबाधनं च' (आप. गृ. ९. ५. ८) इति। अयमर्थः। आद्यया पाठा नामौषधिः खातव्या। ततस्तिसृभिरोषधेरभिमन्त्रणम्। षष्ठ्याबद्धा सौषधिर्यथा भर्तारं स्पृशति तथा तस्य भर्तुरालिङ्गनमिति॥

इमां खनाम्योषधिं वीरुधं बलवत्तमाम्।
यया सपत्नीं बाधते यया संविन्दते पतिम्॥ १॥

इमाम्। खनामि। ओषधिम्। वीरुधम्। बलवत्ऽतमाम्।
यया। सऽपत्नीम्। बाधते। यया। सम्ऽविन्दते। पतिम्॥ १॥

vइमामोषधिं पाठाख्यां vवीरुधं लतारूपां vबलवत्तमां स्वकार्यकरणे अतिशयेन बलवतीं vखनामि उन्मूलयामि। vयया ओषध्या vसपत्नीम्। समान एकः पतिर्यस्याः सा सपत्नी। तामेषा वधूः vबाधते हिनस्ति। vयया च vपतिं भर्तारं vसंविन्दते सम्यगसाधारण्येन लभते॥

उत्तानपर्णे सुभगे देवजूते सहस्वति।
सपत्नीं मे परा धम पतिं मे केवलं कुरु॥ २॥

उत्तानऽपर्णे। सुऽभगे। देवऽजूते। सहस्वति।
सऽपत्नीम्। मे। परा। धम। पतिम्। मे। केवलम्। कुरु॥ २॥

हे vउत्तानपर्णे उत्तानान्यूर्ध्वमुखानि पर्णानि पत्राणि यस्यास्तादृशि हे vसुभगे सौभाग्यहेतुभूते हे vदेवजूते देवेन त्वष्ट्रा प्रेरिते हे vसहस्वति अभिभवनवति ईदृशे हे पाठे vमे मम vसपत्नीं स्त्रियं vपरा vधम परागमय। धमतिर्गतिकर्मा। vपतिं च vमे ममैव vकेवलम् असाधारणं vकुरु॥

उत्तराहमुत्तर उत्तरेदुत्तराभ्यः। अथा सपत्नी या ममाधरा साधराभ्यः॥ ३॥

उत्ऽतरा। अहम्। उत्ऽतरे। उत्ऽतरा। इत्। उत्ऽतराभ्यः।
अथ। सऽपत्नी। या। मम। अधरा। सा। अधराभ्यः॥ ३॥

हे vउत्तरे उत्कृष्टतरे पाठे vअहम् vउत्तरा उत्कृष्टतरा भूयासम्। vउत्तराभ्यः लोकेभ्यो वा उत्कृष्टतराः सन्ति ताभ्योऽप्यहम् vउत्तरा उत्कृष्टतरैव त्वत्प्रसादाज्जायेयम्। vअथ अनन्तरं vमम vया vसपत्नी vसा vअधराभ्यः निकृष्टाभ्योऽपि vअधरा निकृष्टतरा भवतु॥

१. त-म१.२.४.८-सु—सपत्नीघ्ने प्रयोगविशेषे; भ७—सपत्नीप्रयोगविशेषे। २. भ५—अभिच्छन्नां।

नह्यस्या नाम गृभ्णामि नो अस्मिन्रमते जने ।
परामेव परावतं सपत्नीं गमयामसि ॥ ४ ॥

नहि । अस्याः । नाम । गृभ्णामि । नो इति । अस्मिन् । रमते । जने ।
पराम् । एव । पराऽवतम् । सऽपत्नीम् । गमयामसि ॥ ४ ॥

vअस्याः सपत्न्याः vनाम संज्ञामपि vनहि vगृभ्णामि नैव गृह्णामि उच्चारयामि । vनो न खलु काचित् vअस्मिन् vजने सपत्न्याख्ये vरमते क्रीडति । अपि च तां vसपत्नीं vपरां vपरावतम् vएव अतिशयेन दूरदेशमेव vगमयामसि गमयामः प्रापयामः । अतिशयेन भर्त्रा वियोजयाम इत्यर्थः ॥

अहमस्मि सहमानाथ त्वमसि सासहिः ।
उभे सहस्वती भूत्वी सपत्नीं मे सहावहै ॥ ५ ॥

अहम् । अस्मि । सहमाना । अथ । त्वम् । असि । ससहिः ।
उभे इति । सहस्वती इति । भूत्वी । सऽपत्नीम् । मे । सहावहै ॥ ५ ॥

हे ओषधि vअहं त्वत्प्रसादात् vसहमाना vअस्मि सपत्न्या अभिभवित्री भवामि । vअथ अपि च vत्वम् अपि vसासहिः vअसि तस्या अभिभवित्री भवसि । आवाम् vउभे अपि vसहस्वती अभिभवित्र्यौ vभूत्वी भूत्वा vमे मम vसपत्नीं vसहावहै अभिभवाव ॥

उप तेऽधां सहमानामभि त्वाधां सहीयसा ।
मामनु प्र ते मनो वत्सं गौरिव धावतु पथा वारिव धावतु ॥ ६ ॥

उप । ते । अधाम् । सहमानाम् । अभि । त्वा । अधाम् । सहीयसा ।
माम् । अनु । प्र । ते । मनः । वत्सम् । गौःऽइव । धावतु । पथा । वाःऽइव । धावतु ॥६॥

हे पते vते तव vसहमानां सपत्न्या अभिभवित्रीमिमामोषधिम् vउप vअधाम् । शिरस उपाधानं करोमि । vसहीयसा अभिभवितृतरेण तेनोपधानेन त्वाम् vअभि vअधाम् अभितो धारयामि । vते तव भर्तुः vमनः vमाम् अनुलक्ष्य vप्र vधावतु प्रकर्षेण शीघ्रं गच्छतु । तत्र निदर्शनद्वयमुच्यते । vगौरिव यथा गौः vवत्सं शीघ्रं गच्छति vपथा निम्नेन मार्गेण vवारिव वारुदकं यथा स्वभावतो गच्छति तद्वत् । अनेन निदर्शनद्वयेनौत्सुक्यातिशयः स्वाभाविकत्वं च प्रतिपाद्यते ॥ ॥३॥

'अरण्यानि' इति षड्चमष्टादशं सूक्तमिरंमदपुत्रस्य देवमुनेरार्षम् । महदरण्यमरण्यानी । तद्देवताकम् । आनुष्टुभम् । तथा चानुक्रान्तम्—'अरण्यान्यैरंमदो देवमुनिररण्यानीं तुष्टाव' इति । गतो विनियोगः ॥

अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि ।
कथा ग्रामं न पृच्छसि न त्वा भीरिव विन्दती३ ॥ १ ॥

अरण्यानि । अरण्यानि । असौ । या । प्रऽइव । नश्यसि ।
कथा । ग्रामम् । न । पृच्छसि । न । त्वा । भीःऽइव । विन्दती३ ॥ १ ॥

हे ᵛअरण्यानि । अरण्यस्य पालयित्री काचिदधिदेवतारण्यानीति नैरुक्ताः । वैयाकरणास्तु ' हिमारण्ययोर्महत्त्वे ' (पा. सू. ४. १. ४९. १) इत्यरण्यस्य महत्त्वे ङीषं स्मरन्ति । अरण्याधिदेवते ᵛअरण्यानि कान्तारादि प्रति ᵛया ᵛअसौ त्वं ᵛप्रेव ᵛनश्यसि । इवः संप्रत्यर्थे । नशतिः प्राप्तिकर्मा । अत्र श्न्यत्ययेन श्यन् । संप्रति रक्षणाय प्राप्नोषि । यद्वा निर्जने देशे वर्तमानत्वान्नष्टेव प्रतीयसे । सा त्वं ᵛकथा कथं ᵛग्रामं ᵛन ᵛपृच्छसि । निर्जनेऽरण्ये कथं रमसे । नूनं ᵛत्वा त्वां ᵛभीः भयं ᵛन ᵛविन्दति न लभते किम् । वितर्के प्लुतः । इवः संप्रत्यर्थे परिभयार्थे वा । अत्र निरुक्तम्— ' अरण्यान्यरण्यस्य पत्न्यरण्यमपार्णं भवति ग्रामादरमणं भवतीति वा । अरण्यानीत्येनामामन्त्रयते । यासावरण्यानि वनानि पराचीव नश्यसि कथं ग्रामं न पृच्छसि न त्वा भीर्विन्दतीवेतीवः परिभयार्थे वा ' (निरु. ९. २९-३०) इति ॥

वृषारवाय वदते यदुपावति चिच्चिकः ।
आघाटिभिरिव धावयन्नरण्यानिर्महीयते ॥ २ ॥

वृषऽरवाय । वदते । यत् । उपऽअवति । चिच्चिकः ।
आघाटिभिःऽइव । धावयन् । अरण्यानिः । महीयते ॥ २ ॥

ᵛवृषारवाय । वृषा सेचनसमर्थो रवः शब्दो यस्य सूक्ष्मजन्तुविशेषस्य झिल्ल्याख्यस्य स तथोक्तः । कटुकशब्दवानित्यर्थः । तस्मै वृषारवाख्याय ᵛवदते चीचीशब्दं कुर्वते ᵛचिच्चिकः चीचीशब्दं कुर्वन्नन्यो जन्तुः ᵛयत् यदा ᵛउपावति वृषारवोक्तस्य शब्दस्य प्रत्युत्तररूपेण चीचीशब्दकरणेनोपगच्छति । उपेत्य पालयति वा । तत्र दृष्टान्तः । ᵛआघाटिभिरिव । आघाटयो घाटलिकाः काण्डवीणाः । ताभिः ᵛधावयन् निषादादिसप्तस्वराणि शोधयन् गायक इव । तदा ᵛअरण्यानिः सा अरण्यानी[1] ᵛमहीयते पूज्यते ॥ 'इन्द्रवरुण' (पा. सू. ४. १. ४९) इत्यादिना ङीष् । तस्संनियोगेनानुनासिकागमः । छान्दसो ह्रस्वः । अत एव हल्ङ्यादिसुलोपाभावः ॥

उत गावइवादन्त्युत वेश्मेव दृश्यते ।
उतो अरण्यानिः सायं शकटीरिव सर्जति ॥ ३ ॥

उत । गावःऽइव । अदन्ति । उत । वेश्मऽइव । दृश्यते ।
उतो इति । अरण्यानिः । सायम् । शकटीःऽइव । सर्जति ॥ ३ ॥

ᵛउत अपि च ᵛगावइव गवयाद्या मृगा अस्यामरण्यान्याम् ᵛअदन्ति तृणादिकं भक्षयन्ति । ᵛउत अपि च लतागुल्मादिकं ᵛवेश्मेव गृहमिव ᵛदृश्यते । ᵛउतो अपि च ᵛअरण्यानिः इयमरण्यानी ᵛसायं सायंकाले । इवः संप्रत्यर्थे । संप्रति ᵛशकटीः शकटान्[2] दार्वाद्याहरणायागतान् ᵛसर्जति विसर्जयति । यद्वा । शकटीः सर्जतीव दृश्यते । अहनि महदरण्यं शकटीभिः प्राप्य सर्वे जना अपेक्षितं काष्ठादिकं शकटीष्वध्यारोप्य सायंकाले तस्माद्गिरिं गच्छन्ति । तदभिप्रायेणेदं वचनम् ॥

गामङ्गैष आ ह्वयति दार्वङ्गैषो अपावधीत् ।
वसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते ॥ ४ ॥

---

१. त-भ२.८–अरण्यानिः । २. त१.२.३.६.७.–शकटानिव ।

गाम्। अङ्ग। एषः। आ। ह्वयति। दारु। अङ्ग। एषः। अप। अवधीत्।
वसन्। अरण्यान्याम्। सायम्। अक्रुक्षत्। इति। मन्यते॥ ४॥

vअङ्ग हे अरण्यानि vएषः त्वदधिष्ठिते महारण्ये संप्रति वर्तमानः vगाम्[1] vआ vह्वयति[2]। vएषः[3] चान्यः vदारु काष्ठम् vअपावधीत् अपहन्ति[3]। तथा vसायं[4] सायंकाले रात्रौ vअरण्यान्यां[5] महारण्ये[5] निवसन् मनुष्यो नानाविधं पक्षिमृगादिशब्दं शृण्वन् vअक्रुक्षत् कश्चित्तस्करादि-राक्रोशति vइति भीतः सन् vमन्यते बुध्यते॥

न वा अरण्यानिर्हन्त्यन्यश्चेनाभिगच्छति।
स्वादोः फलस्य जग्ध्वाय यथाकामं नि षद्यते॥ ५॥

न। वै। अरण्यानिः। हन्ति। अन्यः। च। इत्। न। अभिऽगच्छति।
स्वादोः। फलस्य। जग्ध्वाय। यथाऽकामम्। नि। षद्यते॥ ५॥

vन vवै न खलु vअरण्यानिः अरण्यानी vहन्ति तत्र निवसन्तं हिनस्ति। यदि vअन्यः व्याघ्र-चौरादिः vनाभिगच्छति। तर्हि vस्वादोः रसवत आम्रादेः vफलस्य। द्वितीयार्थे षष्ठी। फलं vजग्ध्वाय भक्षयित्वा तत्र निवसन् पुरुषः vयथाकामं यथेच्छं vनि vषद्यते निगच्छति वर्तते॥ क्त्वाप्रत्यये 'अदो-जग्धिर्ल्यप्ति किति' (पा. सू. २. ४. ३६) इति जग्ध्यादेशः। 'क्त्वो यक्' (पा. सू. ७. १. ४७) इति यक्॥

आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीवलाम्।
प्राहं मृगाणां मातरमरण्यानिमशंसिषम्॥ ६॥

आञ्जनऽगन्धिम्। सुरभिम्। बहुऽअन्नाम्। अकृषिऽवलाम्।
प्र। अहम्। मृगाणाम्। मातरम्। अरण्यानिम्। अशंसिषम्॥ ६॥

vआञ्जनगन्धिम्। अञ्जनस्येदमाञ्जनं कस्तूर्यादि। तस्य गन्ध इव गन्धो यस्यास्तादृशीं। 'उपमानाच्च' (पा. सू. ५. ४. १३७) इति गन्धस्येदन्तादेशः। अत एव vसुरभिं सौरभ्योपेतां vबह्वन्नां बहुभिरन्नैरदनीयैः फलमूलादिभिरुपेताम् vअकृषीवलाम्। कृषिरेषामस्तीति कृषीवलाः कर्षकाः। 'रजःकृषि०' (पा. सू. ५.२.११२) इत्यादिना वलच्। 'वले' (पा. सू. ६.३.११८) इति दीर्घः। तैर्वियुक्तां तादृशीं vमृगाणां vमातरं जनयित्रीम् vअरण्यानिम् अरण्यानीम् vअहं vप्र vअशंसिषम् उक्तेन प्रकारेण स्तुतवानस्मि॥ ॥ ४॥

'अत्ते' इति पञ्चर्चमेकोनविंशं सूक्तं शिरीषपुत्रस्य सुवेदस आर्षम्। पञ्चमी त्रिष्टुप् शिष्टा जगत्यः। इन्द्रो देवता। अनुक्रम्यते हि—'अत्ते पञ्च सुवेदाः शैरीषिस्त्रिष्टुबन्तम्' इति। तृतीये रात्रिपर्याये प्रशास्तुः शस्त्र इदं सूक्तम्। सूत्रितं च—'अत्ते दधामीदं त्वत्पात्रमिन्द्रपानमिति याज्या' (आश्व. श्रौ. ६. ४) इति॥

---

१. ग-त१.२.३.६.७.८-भ-त्वां। २. ग-ह्वयति नष्टा गामन्विच्छ चैवमूते; त४.५-ह्वयति निष्टां गामन्विहन् त्वदीयं तमोच्यते; भ२-ह्वयति नष्टां गामन्विष्यन् त्वदीयं नामोच्चैर्ब्रूते। ३. त१.२.३.६.७.८-भ-'एषः.....अपहन्ति' नास्ति। ४. त-भ-'सायं' नास्ति। ५. त१.२.३.६.७.८-भ८-अरण्ये।

श्रत्ते दधामि प्रथमाय मन्यवेऽहन्यद्वृत्रं नर्यं विवेरपः ।
उभे यत्त्वा भवतो रोदसी अनु रेजेते शुष्मात्पृथिवी चिदद्रिवः ॥ १ ॥

श्रत् । ते । दधामि । प्रथमाय । मन्यवे । अहन् । यत् । वृत्रम् । नर्यम् । विवेः । अपः ।
उभे इति । यत् । त्वा । भवतः । रोदसी इति । अनु ।
रेजते । शुष्मात् । पृथिवी । चित् । अद्रिऽवः ॥ १ ॥

हे इन्द्र [v]ते तव [v]मन्यवे कोपाय तेजसे वा [v]प्रथमाय मुख्याय [v]श्रत् [v]दधामि । श्रद्धा नामादरातिशयः । तद्विषयं करोमि । [v]यत् येन मन्युना त्वं [v]वृत्रम् आवरकमसुरं मेघं वा [v]नर्यं नेतव्यम् [v]अहन् अवधीः हत्वा च तेनावृताः [v]अपः उदकानि च [v]विवेः इमं लोकं प्रत्यागमयः । तस्मै मन्यव इत्यन्वयः । [v]यत् यदा [v]उभे [v]रोदसी द्यावापृथिव्यौ [v]त्वा त्वामनुसृत्य [v]भवतः वर्तेते । त्वदधीने अभूतामित्यर्थः । तदानीं [v]पृथिवी [v]चित् । पृथिवीत्यन्तरिक्षनाम । प्रथितं विस्तीर्णमन्तरिक्षमपि हे [v]अद्रिवः वज्रवन्निन्द्र [v]शुष्मात् त्वदीयाद्बलात् [v]रेजते कम्पते ॥

त्वं मायाभिरनवद्य मायिनं श्रवस्यता मनसा वृत्रमर्दयः ।
त्वामिन्नरो वृणते गविष्टिषु त्वां विश्वासु हव्यास्विष्टिषु ॥ २ ॥

त्वम् । मायाभिः । अनवद्य । मायिनम् । श्रवस्यता । मनसा । वृत्रम् । अर्दयः ।
त्वाम् । इत् । नरः । वृणते । गोऽइष्टिषु । त्वाम् । विश्वासु । हव्यासु । इष्टिषु ॥ २ ॥

हे [v]अनवद्य अवद्यरहित प्रशस्येन्द्र [v]त्वं [v]मायिनं मायाविनं [v]वृत्रं [v]मायाभिः वज्रनाभिबुद्धिविशेषैर्वा [v]श्रवस्यता श्रवः श्रवणीयं यशोऽन्नं वेच्छता [v]मनसा[1] [v]अर्दयः अहिंसीः । अपि च [v]नरः नेतारोऽङ्गिरसः [v]त्वामित् त्वामेव [v]गविष्टिषु गवां पणिभिरपहृतानामेषणेषु प्रापणेषु विषयभूतेषु [v]वृणते संभजन्ते । तथा [v]विश्वासु सर्वासु [v]हव्यासु आह्वातव्यासु प्रार्थनीयासु [v]इष्टिषु यागक्रियासु [v]त्वाम् एव [v]वृणते[2] ॥

ऐषु चाकन्धि पुरुहूत सूरिषु वृधासो ये मघवन्नानशुर्मघम् ।
अर्चन्ति तोके तनये परिष्टिषु मेधसाता वाजिनमह्ये धने ॥ ३ ॥

आ । एषु । चाकन्धि । पुरुऽहूत । सूरिषु । वृधासः । ये । मघऽवन् । आनशुः । मघम् ।
अर्चन्ति । तोके । तनये । परिष्टिषु । मेधऽसाता । वाजिनम् । अह्ये । धने ॥ ३ ॥

हे [v]पुरुहूत बहुभिराहूतेन्द्र [v]एषु [v]सूरिषु स्तोतृषु [v]आ [v]चाकन्धि अत्यर्थमभिदीप्यस्व अभिकामयस्व वा ॥ 'कनी[3] दीप्तिकान्तिगतिषु' । अस्माभिर्कर्तितमेतत् ॥ हे [v]मघवन् धनवन्निन्द्र [v]ये सूरयः [v]वृधासः त्वत्प्रसादाद्वर्धमानाः सन्तः [v]मघं धनम् [v]आनशुः प्राप्नुवन्ति[4] । अपि च [v]मेधसाता मेधसातौ यज्ञे [v]वाजिनं बलवन्तमन्नवन्तं[5] वेजनवन्तं वा त्वां ये [v]अर्चन्ति पूजयन्ति [v]तोके पुत्रे [v]तनये तत्पुत्रे [v]परिष्टिषु परित इष्यमाणेष्वन्येष्वपि फलेषु [v]अह्ये अलज्जाकरे [v]धने च । एतेषु निमित्तभूतेषु सत्सु त्वामेव स्तुत्यादिभिः पूजयन्तीत्यर्थः ॥

---

१. ग-त१.२.३.६.७.८-भ–मनसा च । २. त१.२.३.६.७–वृणते । ३. म१.४.७–कन ।
४. त१.२.३.६.७.८-भ५.८-सु–आप्नुवंति । ५. त१.२.३.७-भ१.४.७.८–बलवंतं ।

स इत्नु रायः सुभृतस्य चाकनन्मदं यो अस्य रंह्यं चिकेतति ।
त्वावृधो मघवन्दाश्वध्वरो मक्षू स वाजं भरते धना नृभिः ॥ ४ ॥

सः । इत् । नु । रायः । सुऽभृतस्य । चाकनत् । मदम् । यः । अस्य । रंह्यम् । चिकेतति ।
त्वाऽवृधः । मघऽवन् । दाशुऽअध्वरः । मक्षु । सः । वाजम् । भरते । धना । नृऽभिः ॥४॥

[v]स [v]इत् स एव स्तोता [v]सुभृतस्य सुष्ठु संपादितस्य [v]रायः धनस्य । द्वितीयार्थे षष्ठी । ईदृशं धनं [v]नु क्षिप्रं [v]चाकनत् कामयते । लभत इत्यर्थः । [v]रंह्यम् । रंहो वेगः । तदर्हम् [v]अस्य इन्द्रस्य [v]मदं सोमपानजन्यं हर्षं [v]यः स्तोता [v]चिकेतति स्तुतिपदैर्जानाति । हे [v]मघवन् [v]त्वावृधः त्वया वर्धितः [v]दाश्वध्वरः दत्तयज्ञो यजमानः [v]नृभिः नेतृभिर्ऋत्विग्भिर्भृत्यैर्वा [v]धना धनानि [v]वाजम् अन्नं च [v]मक्षु शीघ्रं [v]भरते संपादयति ॥

त्वं शर्धाय महिना गृणान उरु कृधि मघवञ्छग्धि रायः ।
त्वं नो मित्रो वरुणो न मायी पित्वो न दस्म दयसे विभक्ता ॥ ५ ॥

त्वम् । शर्धाय । महिना । गृणानः । उरु । कृधि । मघऽवन् । शग्धि । रायः ।
त्वम् । नः । मित्रः । वरुणः । न । मायी । पित्वः । न । दस्म । दयसे । विऽभक्ता ॥५॥

हे इन्द्र [v]त्वं [v]महिना महता स्तोत्रेण [v]गृणानः स्तूयमानः सन् [v]शर्धाय शर्धं बलम् [v]उरु [v]कृधि विस्तीर्णं कुरु । हे [v]मघवन् [v]रायः धनानि च [v]शग्धि अस्मभ्यं प्रयच्छ । हे [v]दस्म दर्शनीयेन्द्र [v]विभक्ता विशेषेण धनानां भाजयिता [v]त्वं [v]मित्रो [v]वरुणो [v]न मित्रवद्वरुणवच्च [v]मायी प्रज्ञायुक्तः सन् [v]नः अस्मभ्यम् । नः संप्रत्यर्थे । संप्रति [v]पित्वः अन्नानि [v]दयसे प्रयच्छसि ॥ ॥ ५ ॥

' सुष्वाणासः ' इति पञ्चर्चं विंशं सूक्तं वेनपुत्रस्य पृथोरार्षं त्रैष्टुभमैन्द्रम् । अनुक्रान्तं च— ' सुष्वाणासः पृथुर्वैन्यः ' इति । गतो विनियोगः ॥

सुष्वाणासः इन्द्र स्तुमसि त्वा ससवांसश्च तुविनृम्ण वाजम् ।
आ नो भर सुवितं यस्य चाकन्त्मना तना सनुयाम त्वोताः ॥ १ ॥

सुस्वानासः । इन्द्र । स्तुमसि । त्वा । ससऽवांसः । च । तुविऽनृम्ण । वाजम् ।
आ । नः । भर । सुवितम् । यस्य । चाकन् । त्मना । तना । सनुयाम । त्वाऽऊताः ॥१॥

हे [v]इन्द्र [v]सुष्वाणासः सोममभिषुतवन्तो वयं त्वां [v]स्तुमसि स्तुमः । हे [v]तुविनृम्ण बहुबल बहुधन वा [v]वाजं चरुपुरोडाशादिलक्षणमन्नं [v]ससवांसः संभक्तवन्तः [v]च वयं त्वां स्तुमः । यत एवमतो हेतोः [v]नः अस्मभ्यं [v]सुवितं सुष्ठु प्रास्तव्यं[1] शोभनं धनम्[2] [v]आ [v]भर आहर प्रयच्छ । [v]यस्य यद्धनमतिप्रियत्वेन [v]चाकन् त्वं कामयसे तद्धनमा भरेत्यर्थः । वयं च [v]त्वोताः त्वया रक्षिताः सन्तः [v]तना[2] । धननामैतत् । विस्तृतानि धनानि [v]त्मना आत्मना स्वयमेवान्यनैरपेक्ष्येणैव [v]सनुयाम तव प्रसादाल्लभेमहि ॥

१. त१.२.३.६.८-भ१.४.७.८-व्याख्यातव्यं । २. भ-' धनं.....तना ' नास्ति ।

ऋष्वस्त्वमिन्द्र शूर जातो दासीर्विशः सूर्येण सह्याः ।
गुहा हितं गुह्यं गूळ्हमप्सु बिभृमसि प्रस्रवणे न सोमम् ॥ २ ॥

ऋष्वः । त्वम् । इन्द्र । शूर । जातः । दासीः । विशः । सूर्येण । सह्याः ।
गुहा । हितम् । गुह्यम् । गूळ्हम् । अप्ऽसु । बिभृमसि । प्रऽस्रवणे । न । सोमम् ॥ २ ॥

हे ᵛशूर शौर्यवन् ᵛइन्द्र ᵛऋष्वः महान् दर्शनीयो वा ᵛत्वं ᵛजातः जातमात्र एव ᵛदासीः । उपक्षयकारिणो दासा असुराः । तत्संबन्धिनीः ᵛविशः प्रजाः ᵛसूर्येण सूर्यात्मना ᵛसह्याः अभ्यभवः । तथा ᵛगुहा गुहायां ᵛहितं निहितमत एव ᵛगुह्यम् अदृश्यं वलाख्यमसुरम् ᵛअप्सु उदकेषु ᵛगूढं निगूढं कुयवाख्यं च त्वमभिभूतवानसि । वयमपि ᵛप्रस्रवणे प्रवर्षणे सति । नः संप्रत्यर्थे । संप्रति ᵛसोमं ᵛबिभृमसि त्वदर्थं बिभृमः धारयामः ॥

अर्यो वा गिरो अभ्यर्च विद्वानृषीणां विप्रः सुमतिं चकानः ।
ते स्याम ये रणयन्त सोमैरेनोत तुभ्यं रथोळ्ह भक्षैः ॥ ३ ॥

अर्यः । वा । गिरः । अभि । अर्च । विद्वान् । ऋषीणाम् । विप्रः । सुऽमतिम् । चकानः ।
ते । स्याम । ये । रणयन्त । सोमैः । एना । उत । तुभ्यम् । रथऽओळ्ह । भक्षैः ॥ ३ ॥

ᵛविप्रः मेधावी ᵛऋषीणां मन्त्रदर्शिनां ᵛसुमतिं सुष्टुतिं[1] ᵛचकानः कामयमानः ᵛविद्वान् जानन् ᵛअर्यो ᵛवा स्वामी च भवन् हे इन्द्र ईदृशस्त्वं ᵛगिरः स्तोतॄन् स्तुतीर्वा ᵛअभ्यर्च । सम्यक्स्तुतमित्यभिपूजय । अपि च ᵛते वयं ᵛस्याम सर्वदा भवेम ᵛये ᵛसोमैः त्वां ᵛरणयन्त रमयन्ति । ᵛउत अपि च हे ᵛरथोळ्ह रथैरभ्युह्यमान ॥ आ ऊढ ओढः । रथेन ओढो रथोढः । 'ओमाङोश्च' (पा. सू. ६. १. ९५) इति पररूपम् ॥ ईदृशेन्द्र ᵛभक्षैः भक्षणीयैश्चरुपुरोडाशादिभिः सार्धम् ᵛएना इमानि स्तोत्राणि ᵛतुभ्यं त्वदर्थं क्रियन्ते ॥

इमा ब्रह्मेन्द्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः ।
तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन् ॥ ४ ॥

इमा । ब्रह्म । इन्द्र । तुभ्यम् । शंसि । दाः । नृऽभ्यः । नृणाम् । शूर । शवः ।
तेभिः । भव । सऽक्रतुः । येषु । चाकन् । उत । त्रायस्व । गृणतः । उत । स्तीन् ॥ ४ ॥

हे ᵛइन्द्र त्वदर्थम् ᵛइमा इमानि पुरोवर्तीनि ᵛब्रह्म[2] ब्रह्माणि परिवृढानि स्तोत्राणि ᵛशंसि अशंसिषत । क्रियन्ते । शंसेश्छान्दसे कर्मणि लुङि व्यत्ययेनैकवचनम् । हे ᵛशूर शौर्यवन्निन्द्र त्वं ᵛनृणां मनुष्याणां मध्ये ᵛनृभ्यः स्तुत्यादेः नेतृभ्यः[3] ᵛशवः बलं ᵛदाः देहि । अपि च ᵛतेभिः तैः ᵛसक्रतुः समानकर्मा समानप्रज्ञो वा ᵛभव ᵛयेषु स्तोतृषु ᵛचाकन् हविरादि[4] कामयसे ॥ 'कन दीप्तिकान्तिगतिषु' । अस्माद्धलुगन्ताच्छान्दसे लङि सिपि रूपमेतत् । क्मेर्वा पूर्ववत् । सिपि 'मो नो धातोः' इति नत्वम् ॥ ᵛउत अपि च ᵛगृणतः स्तोतॄन् ᵛत्रायस्व पालय । ᵛउत अपि च ᵛस्तीन् । स्तायतेरेतद्रूपम् । संघीभूय स्थितान् यजमानानपि त्रायस्व ॥

---

१. त१.२.३.७-म१.४.७.८-'सुष्टुतिं' नास्ति । २. त१.२.३.७-म१.४.७.८-'ब्रह्म' नास्ति ।
३. ग-त४.५-भ२-नेतृभ्यो जनेभ्यः । ४. ग-त४.५-भ२-हविरादिकं ।

श्रुधी हवमिन्द्र शूर पृथ्या उत स्तवसे वेन्यस्यार्कैः ।
आ यस्ते योनिं घृतवन्तमस्वार्ऊर्मिर्न निम्नैर्द्रवयन्त वक्वाः ॥ ५ ॥

श्रुधि । हवम् । इन्द्र । शूर । पृथ्याः । उत । स्तवसे । वेन्यस्य । अर्कैः ।
आ । यः । ते । योनिम् । घृतऽवन्तम् । अस्वाः । ऊर्मिः । न । निम्नैः । द्रवयन्त । वक्वाः ॥५॥

हे [v]शूर [v]इन्द्र [v]पृथ्याः पृथोरपत्यस्य मम [v]हवम् आह्वानं [v]श्रुधि शृणु । [v]उत अपि च [v]वेन्यस्य वेनपुत्रस्य मम [v]अर्कैः मन्त्रैः [v]स्तवसे स्तूयसे । यकि प्राप्ते व्यत्ययेन शप् । [v]यः स्तोता [v]घृतवन्तम् उदकवन्तं [v]ते तव [v]योनिं निवासभूमिम् [v]आ [v]अस्वाः अभ्यस्वार्षीत् अभ्यष्टौत् ॥ 'स्वृ शब्दोपतापयोः' । अस्माल्लुङि तिपि 'बहुलं छन्दसि' इतीडभावे हल्ङ्यादिलोपे च 'रात्सस्य' इति सलोपः[1]॥ यद्वा । घृतवन्तमाज्यादिना हविषोपेतं योनिम् । गृहनामैतत् । यज्ञगृहं प्राप्य ते त्वां योऽभिष्टौति तस्य वेन्यस्य अर्कैरित्यन्वयः । अपि च [v]वक्वाः वक्वानः ॥ वक्वेः 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप् । अन्त्यविकारश्छान्दसः । जसि पृषोदरादित्वाद्वर्णलोपः ॥ अन्येऽपि सर्वे स्तोतारः [v]निम्नैः प्रवणैर्मार्गैः [v]ऊर्मिर्न उदकसंघ इव [v]द्रवयन्त । स्तुतिभिस्त्वामेवाभिद्रवन्ति अभिगच्छन्ति ॥ ॥६॥

'सविता यन्त्रैः' इति पञ्चर्चमेकविंशं सूक्तं हिरण्यस्तूपपुत्रस्यार्चत आर्षं त्रैष्टुभं सवितृदेवत्यम् । अनुक्रान्तं च—'सवितार्चन्[2] हैरण्यस्तूपः सावित्रम्' इति । गतो विनियोगः ॥

सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत् ।
अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्ते बद्धं सविता समुद्रम् ॥ १ ॥

सविता । यन्त्रैः । पृथिवीम् । अरम्णात् । अस्कम्भने । सविता । द्याम् । अदृंहत् ।
अश्वम्ऽइव । अधुक्षत् । धुनिम् । अन्तरिक्षम् । अतूर्ते । बद्धम् । सविता । समुद्रम् ॥ १ ॥

[v]सविता सर्वस्य प्रसविता प्रेरको मध्यमस्थानो देवः सोऽयं [v]यन्त्रैः यमनसाधनैर्वृष्टिप्रदानादिभिरुपायैर्वायवीयैः पाशैर्वा [v]पृथिवीं प्रथितां भूमिम् [v]अरम्णात् अरमयत् । सुखेनावस्थापयति । तथा स एव [v]सविता [v]अस्कम्भने । पतनप्रतिबन्धकस्तूलम्बनं स्कम्भनम् । तद्रहिते स्थले [v]द्यां द्युलोकमपि [v]अदृंहत् दृढीकृतवान् । यथाधो न पतति तथाग्नीयैरेवोपायैरवस्थापितवानित्यर्थः । [v]अश्वमिव [v]धुनिं कम्पयितव्यं कम्पयितारं वा [v]अन्तरिक्षम् अन्तरा क्षान्तं मध्यमस्थानगतम् [v]अतूर्ते केनाप्यहिंसितेऽस्वरमाणे वा नभसि वायवीयैः पाशैः [v]बद्धं [v]समुद्रं[3] मेघमयमेव[4] [v]सविता [v]अधुक्षत् उदकानि दोग्धि । यद्वा । अन्तरिक्षमिति सप्तम्यर्थे प्रथमा । अतूर्तेऽन्तरिक्षे बद्धं[4] समुदितारं धुनिं कम्पनीयं मेघमश्वमिवाधुक्षत् । सविता क्लेशयति । 'धुक्ष धिक्ष संदीपनक्लेशनजीवनेषु' । यथा शिक्षकः सादी अश्वं क्लेशयत्येवं वर्षणाय मेघं क्लेशयतीत्यर्थः[5] । अत्र निरुक्तं—'सविता यन्त्रैः पृथिवीमरमयदनारम्भणेऽन्तरिक्षे सविता द्यामदृंहदधमिवाधुक्षद्धुनिमन्तरिक्षे मेघं बद्धमतूर्ते बद्धमतूर्णं इति वात्वरमाण इति वा सवितासमुदितारम्' (निरु. १०. ३२) इति ॥

---

१. त१.२.३.६.७.८–'सलोपः .....वेन्यस्य' नास्ति । २. ग-त८-भ–सवितार्चतो; त४-५–सवितार्चतो । ३. त४ ५–समुदितारं । ४. त१.२.३.६.७.८-भ१.४.७.८–'मेघमयमेव...बद्धं' नास्ति । ५. ग–क्लेदयतीत्यर्थः ।

यत्रा समुद्रः स्कभितो व्यौनदपां नपात्सविता तस्य वेद ।
अतो भूरत आ उत्थितं रजोऽतो द्यावापृथिवी अप्रथेताम् ॥ २ ॥

यत्र । समुद्रः । स्कभितः । वि । औनत् । अपाम् । नपात् । सविता । तस्य । वेद ।
अतः । भूः । अतः । आः । उत्थितम् । रजः । अतः । द्यावापृथिवी इति । अप्रथेताम् ॥२॥

[v]यत्र यस्मिन्नन्तरिक्षे [v]समुद्रः समुन्दनशीलो मेघः [v]स्कभितः स्तम्भितो वायुपाशैर्बद्धः सन् [v]व्यौनत् विशेषेण भूमिमुनत्ति उदकैः क्लेदयति । 'उन्दी क्लेदने' । अस्माच्छान्दसे लङि रूपमेतत् । हे [v]अपां [v]नपात् मध्यमस्थान वैद्युताग्ने तव संबन्धी [v]सविता प्रेरको देवः [v]तस्य तत्स्थानं [v]वेद वेत्ति जानाति । [v]अतः अस्मादेव सवितुः [v]भूः भूमिरासीत् । [v]अतः एव [v]उत्थितम् ऊर्ध्वमवस्थितं [v]रजः अन्तरिक्षं च [v]आः आसीत् अजायत । अस्तेर्लङि 'बहुलं छन्दसि' इतीडभावः । 'हल्ङ्याब्भ्यः' इति लोपः । [v]अतः अस्मादेव सवितुः [v]द्यावापृथिवी द्यावापृथिव्यौ [v]अप्रथेतां विस्तीर्णेऽप्यभूताम् ॥

पश्चेदमन्यदभवद्यजत्रममर्त्यस्य भुवनस्य भूना ।
सुपर्णो अङ्ग सवितुर्गरुत्मान्पूर्वो जातः स उ अस्यानु धर्मं ॥ ३ ॥

पश्चा । इदम् । अन्यत् । अभवत् । यजत्रम् । अमर्त्यस्य । भुवनस्य । भूना ।
सुऽपर्णः । अङ्ग । सवितुः । गरुत्मान् । पूर्वः । जातः । सः । ऊँ इति । अस्य । अनु । धर्मं ॥३॥

[v]अन्यत् सवितृव्यतिरिक्तम् [v]इदं देवतान्तरं [v]पश्चा पश्चात् । 'पश्च पश्चा च च्छन्दसि' (पा. सू. ५. ३. ३३) इति निपात्यते । सवितृप्रेरणानन्तरमेव [v]यजत्रं यष्टव्यम् [v]अभवत् । केन साधनेन । [v]अमर्त्यस्य मरणरहितस्य [v]भुवनस्य लोकस्य[1] स्वर्गाख्यस्य संबन्धिना [v]भूना भूतेन । स्वर्गं उत्पन्न सोमेनेत्यर्थः । यद्वा । अमर्त्यस्य भुवनस्य संबन्धीदं देवतान्तरं भूना भूम्ना बहुत्वेन युक्तं यष्टव्यमभवत् । कुत इत्यत आह । हे [v]अङ्ग स्तोतः [v]सुपर्णः शोभनपतनः [v]गरुत्मान् सोमस्याप्रहर्ता तार्क्ष्यः [v]सवितुः प्रेरकादस्मादेवात् [v]पूर्वः प्रथमभावी सन् [v]जातः । अतो हेतोः सुपर्णो[2] गरुत्मान् [v]अस्य सवितुः [v]धर्मं धारणमनुसृत्य वर्तते । सवितृप्रेरणाधीनत्वात्सर्वगतीनां सोमाहरणमपि तदधीनमिति सवितृप्रेरणानन्तरमेव सर्वे सोमयागाः प्रवर्तन्त इत्यर्थः । [v]उ इति पूरकः ॥

गावइव ग्रामं यूयुधिरिवाश्वान्वाश्रेव वत्सं सुमना दुहाना ।
पतिरिव जायामभि नो न्येतु धर्ता दिवः सविता विश्ववारः ॥ ४ ॥

गावःऽइव । ग्रामम् । युयुधिःऽइव । अश्वान् । वाश्राऽइव । वत्सम् । सुऽमनाः । दुहाना ।
पतिःऽइव । जायाम् । अभि । नः । नि । एतु । धर्ता । दिवः । सविता । विश्वऽवारः ॥४॥

[v]गावइव यथारण्ये संचरन्तो गावः [v]ग्रामं शीघ्रमभिगच्छन्ति । [v]युयुधिरिव यथा योद्धा युद्धार्थम् [v]अश्वान् अभिगच्छति । 'युध संप्रहारे' । 'आदृगमहनजन०' इत्यत्र 'उत्सर्गश्छन्दसि०' (पा. सू. ३.२.१७१.२) इति वचनात् किन्प्रत्ययः । छान्दसं सांहितिकमभ्यासदीर्घत्वम् । [v]सुमनाः

---

१. त१.३.६.७.८-म१.२.४.८–भूलोकस्य । २. ग–स सुपर्णो ।

शोभनमनस्का [v]दुहाना दोग्ध्री बहुपयस्का [v]वाश्रेव हम्भारवात्मकं शब्दं कुर्वती गौर्यथात्मीयं [v]वत्सम् अभिगच्छति । [v]पतिरिव यथा भर्ता [v]जायां स्वभार्यां क्षीघ्रमभिगच्छति एवमेव [v]सविता [v]नः अस्मान् [v]नि [v]अभि [v]एतु नितरामभिगच्छतु । कीदृशः । [v]दिवः द्युलोकस्य [v]धर्ता धारयिता अवस्थापयिता वा अत एव [v]विश्वधारः सर्वैर्वरणीयः ॥

हिरण्यस्तूपः सवितर्यथा त्वाङ्गिरसो जुह्वे वाजे अस्मिन् ।
एवा त्वार्चन्नवसे वन्दमानः सोमस्येवांशुं प्रति जागराहम् ॥ ५ ॥

हिरण्यऽस्तूपः । सवितः । यथा । त्वा । आङ्गिरसः । जुह्वे । वाजे । अस्मिन् ।
एव । त्वा । अर्चन् । अवसे । वन्दमानः । सोमस्यऽइव । अंशुम् । प्रति । जागर । अहम् ॥५॥

हे [v]सवितः प्रेरक [v]त्वा त्वाम् [v]आङ्गिरसः अङ्गिरसः पुत्रः [v]हिरण्यस्तूपः मम पिता [v]अस्मिन् [v]वाजे अन्ने निमित्तभूते सति[1] [v]यथा [v]जुह्वे आहूतवान् [v]एव[2] एवम् [v]अर्चन्[2] एतत्संज्ञोऽहं [v]त्वा त्वाम् [v]अवसे अवनाय रक्षणार्थं [v]वन्दमानः स्तुवन् आह्वयामीति शेषः । आहूय च [v]सोमस्येवांशुं यथा सोमलतां प्रति यजमाना जाग्रति यागपर्यन्तं तद्रक्षणे प्रबुद्धा वर्तन्ते तथा [v]अहं त्वत्परिचर्यां [v]प्रति [v]जागर जागर्मि । जागर्तेर्णल्युत्तमैकवचने रूपम् । अत्र निरुक्तं—' हिरण्यस्तूपो हिरण्मयस्तूपो[3] हिरण्मयः स्तूपोऽस्येति[3] वा[4] । स्तूपः स्थायनेः संघातः । सवितर्यथा त्वाङ्गिरसो जुह्वे[5] वाजेऽन्नेऽस्मिन्नेवं[6] त्वार्चन्नवनाय वन्दमानः सोमस्येवांशुं प्रतिजागर्म्यहम् ' (निरु. १०. ३३) इति ॥ ॥ ७ ॥

' समिद्धः ' इति पञ्चर्चं द्वाविंशं सूक्तं वसिष्ठपुत्रस्य मृळीकस्यार्षमाग्नेयम् । चतुर्थीपञ्चम्यावुपरिष्टाज्ज्योतिषी त्रिद्वादशाष्टकवत्यौ । अक्षरव्यूहेन चतुर्थी जगती वा । शिष्टा बृहत्यः । तथा चानुक्रान्तं—' समिद्धो मृळीको[7] वासिष्ठ[7] आग्नेयं बार्हतमन्त्ये उपरिष्टाज्ज्योतिषी जगत्युपान्त्या वा ' इति । गतो विनियोगः ॥

समिद्धश्चित्समिध्यसे देवेभ्यो हव्यवाहन ।
आदित्यै रुद्रैर्वसुभिर्न आ गहि मृळीकाय न आ गहि ॥ १ ॥

सम्ऽइद्धः । चित् । सम् । इध्यसे । देवेभ्यः । हव्यऽवाहन ।
आदित्यैः । रुद्रैः । वसुऽभिः । नः । आ । गहि । मृळीकाय । नः । आ । गहि ॥ १ ॥

हे [v]हव्यवाहन हव्यानां हविषां वोढरग्ने [v]समिद्धश्चित् संदीप्तोऽपि [v]देवेभ्यः यागार्थं [v]समिध्यसे । पुनरप्यृत्विग्भिः समिद्भिः संदीप्यसे । स त्वम् [v]आदित्यैः आदित्यादिभिस्त्रिभिर्गणैः सार्धं [v]नः अस्मान् [v]आ [v]गहि आगच्छ । तथा [v]नः अस्माकं [v]मृळीकाय सुखाय तदर्थमपि [v]आ [v]गहि । यद्वा । मृळीकायैतत्संज्ञाय नो मह्यमृषये श्रेयांसि कर्तुमागच्छ ॥

इमं यज्ञमिदं वचो जुजुषाण उपागहि ।
मर्तासस्त्वा समिधान हवामहे मृळीकाय हवामहे ॥ २ ॥

---

१. ग-त-भ-सति त्वा त्वां । २. त१.२.३.६.७.८-भ-' एवैवमर्चन् ' नास्ति । ३. त१.२.३.४.५.६.८-भ-' हिरण्मयस्तूपोस्येति । ४. त१.२.३-भ-' वा ' नास्ति । ५. ग-जुह्वे ह्वयत्र; त१.२.३.६.८-भ-जुह्वे ह्वयत । ६. त-भ-वाजेऽन्ने एवं । ७. अनु.-वासिष्ठो मृळीकः ।

इमम्। यज्ञम्। इदम्। वचः। जुजुषाणः। उपऽआगहि।
मर्तासः। त्वा। समूऽइधान। हवामहे। मृळीकाय। हवामहे॥ २॥

हे अग्ने vइमम् अस्माभिः क्रियमाणं पुरोवर्तिनं vयज्ञमिदं vवचः स्तोत्रं च vजुजुषाणः सेवमानः vउपागहि उपागच्छ। हे vसमिधान समिध्यमान vमर्तासः मर्ता मनुष्याः vत्वा त्वां vहवामहे आह्वयामहे। vमृळीकाय सुखायैतत्संज्ञाय वा ऋषये त्वामेवाह्वयामहे॥

त्वामु जातवेदसं विश्ववारं गृणे धिया।
अग्ने देवाँ आ वह नः प्रियव्रतान् मृळीकाय प्रियव्रतान्॥ ३॥

त्वाम्। ऊँ इति। जातऽवेदसम्। विश्वऽवारम्। गृणे। धिया।
अग्ने। देवान्। आ। वह। नः। प्रियऽव्रतान्। मृळीकाय। प्रियऽव्रतान्॥ ३॥

हे vअग्ने vविश्ववारं विश्वैः सर्वैर्वरणीयं vजातवेदसं vजातानां वेदितारं जातप्रज्ञं जातधनं वा vत्वामु त्वामेव vधिया स्तुत्या vगृणे स्तौमि। 'गृ शब्दे'। क्रैयादिकः। प्वादित्वाद्धूस्वः। vप्रियव्रतान् प्रियाणि व्रतानि कर्माणि येषां तादृशान् vदेवान् vनः अस्मदर्थम् vआ vवह vआनय। अस्मद्यज्ञं प्रापय। vमृळीकाय सुखार्थमेतत्संज्ञाय वा मह्यं vप्रियव्रतान् तानेवावह॥

अग्निर्देवो देवानामभवत्पुरोहितोऽग्निं मनुष्याऽ ऋषयः समीधिरे।
अग्निं महो धनसातावहं हुवे मृळीकं धनसातये॥ ४॥

अग्निः। देवः। देवानाम्। अभवत्। पुरःऽहितः। अग्निम्। मनुष्याः। ऋषयः। सम्। ईधिरे।
अग्निम्। महः। धनऽसातौ। अहम्। हुवे। मृळीकम्। धनऽसातये॥ ४॥

vदेवः दानादिगुणयुक्तः vअग्निः vदेवानाम् अन्येषां vपुरोहितः पुरस्ताद्धृतः vअभवत्। यद्वा पुरोहितवद्धितकार्यमभवत्। यत एवमतः कारणात् तमेव vअग्निम् vऋषयः अतीन्द्रियार्थदर्शिनो vमनुष्याः मानवा यजमानाः vसमीधिरे संदीपयन्ति। अपि च तम् vअग्निं vमहः महतः vधनसातौ धनस्य संभजने निमित्तभूते vअहं vहुवे आह्वये। विशेषणसापेक्षस्यापि धनशब्दस्य छान्दसः समासः। यद्वा। महतो यागस्य कर्तारमग्निमित्यर्थः। vधनसातये धनलाभार्थं vमृळीकं सुखमेतत्संज्ञं वा मां सोऽग्निः करोत्वित्यर्थः॥

अग्निरत्रिं भरद्वाजं गविष्ठिरं प्रावन्नः कण्वं त्रसदस्युमाहवे।
अग्निं वसिष्ठो हवते पुरोहितो मृळीकाय पुरोहितः॥ ५॥

अग्निः। अत्रिम्। भरत्ऽवाजम्। गविष्ठिरम्। प्र। आवत्। नः। कण्वम्। त्रसदस्युम्। आऽहवे।
अग्निम्। वसिष्ठः। हवते। पुरःऽहितः। मृळीकाय। पुरःऽहितः॥ ५॥

vअत्रिं vभरद्वाजं vगविष्ठिरं vकण्वं vत्रसदस्युं च vनः अस्मान् vआहवे संग्रामे अयम् vअग्निः vप्रावत् प्ररक्षतु। vपुरोहितः पुरोहितवद्धितकारी[1] मम पिता vवसिष्ठः ऋषिः vअग्निं vहवते स्तुतिभिराह्वयति। स चाहूतः vमृळीकाय सुखार्थमेतत्संज्ञाय वा मह्यं vपुरोहितः पुरोधा[2] देवानां पुरःस्थापयिता भवतु॥ ॥ ८॥

१. त-भ-पुरोहितकारी। २. ग२-त४,५-म२-पुरोधाता।

'श्रद्धया' इति पञ्चर्चं त्रयोविंशं सूक्तमानुष्टुभं श्रद्धादेवतयम्। कामगोत्रजा श्रद्धा नामर्षिका। तथा चानुक्रम्यते—'श्रद्धया श्रद्धा कामायनी श्राद्धमानुष्टुभं तु' इति। लैङ्गिको विनियोगः॥

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः।
श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि॥ १॥

श्रद्धया। अग्निः। सम्। इध्यते। श्रद्धया। हूयते। हविः।
श्रद्धाम्। भगस्य। मूर्धनि। वचसा। आ। वेदयामसि॥ १॥

पुरुषगतोऽभिलाषविशेषः श्रद्धा। तया vश्रद्धया vअग्निः गार्हपत्यादिः vसमिध्यते संदीप्यते। यदा हि[1] पुरुषे श्रद्धाग्निगोचर आदरातिशयो जायते तदैव पुरुषोऽग्नीन् प्रज्वालयति नान्यदा। vश्रद्धया एव vहविः पुरोडाशादिहविश्च vहूयते। आहवनीये प्रक्षिप्यते। यद्वा। अस्य सूक्तस्य द्रष्ट्या श्रद्धास्त्ययाग्निः समिध्यते[2]। vश्रद्धाम् उक्तलक्षणायाः श्रद्धाया अभिमानिदेवतां vभगस्य भजनीयस्य धनस्य vमूर्धनि प्रधानभूते स्थानेऽवस्थितां vवचसा वचनेन स्तोत्रेण vआ vवेदयामसि अभितः प्रख्यापयामः। इदन्तो मसिः॥

प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः।
प्रियं भोजेषु यज्वस्विदं म उदितं कृधि॥ २॥

प्रियम्। श्रद्धे। ददतः। प्रियम्। श्रद्धे। दिदासतः।
प्रियम्। भोजेषु। यज्वऽसु। इदम्। मे। उदितम्। कृधि॥ २॥

हे vश्रद्धे vददतः चरुपुरोडाशादीनि प्रयच्छतो यजमानस्य vप्रियम् अभीष्टफलं कुरु। vदिदासतः दातुमिच्छतश्च हे vश्रद्धे vप्रियं कुरु। vमे मम संबन्धिषु vभोजेषु भोक्तृषु भोगार्थिषु vयज्वसु कृतयज्ञेषु जनेषु च vइदम् vउदितम् उक्तं vप्रियं vकृधि कुरु॥

यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे।
एवं भोजेषु यज्वस्वस्माकमुदितं कृधि॥ ३॥

यथा। देवाः। असुरेषु। श्रद्धाम्। उग्रेषु। चक्रिरे।
एवम्। भोजेषु। यज्वऽसु। अस्माकम्। उदितम्। कृधि॥ ३॥

vदेवाः इन्द्रादयः vअसुरेषु उद्गूर्णबलेषु vयथा vश्रद्धां vचक्रिरे अवश्यमिमे हन्तव्या इत्यादरातिशयं कृतवन्तः vएवं श्रद्धावत्सु vभोजेषु भोक्तृषु भोगार्थिषु vयज्वसु यष्टृषु vअस्माकम् अस्मत्संबन्धिषु तेषु vउदितं तैरुक्तं प्रार्थितं फलजातं vकृधि कुरु॥

श्रद्धां देवा यजमाना वायुगोपा उपासते।
श्रद्धां हृदय्य१याकूत्या श्रद्धया विन्दते वसु॥ ४॥

श्रद्धाम्। देवाः। यजमानाः। वायुऽगोपाः। उप। आसते।
श्रद्धाम्। हृदय्यया। आऽकूत्या। श्रद्धया। विन्दते। वसु॥ ४॥

---

१. त-भ१.२.४.८-च। २. ग-समिध्यते हविश्च हूयते।

Vदेवा Vयजमानाः मनुष्याश्च Vवायुगोपाः वायुर्गोपा रक्षिता येषां ते[1] तादृशाः सन्तः Vश्रद्धां देवीम् Vउपासते प्रार्थयन्ते । Vहृदय्यया । हृदये भवा हृदय्या । तथाविधया Vआकूत्या संकल्परूपया क्रियया Vश्रद्धाम् एव परिचरन्ति सर्वे जनाः । कुत इत्यत आह । यतः कारणात् Vश्रद्धया हेतुभूतया Vवसु धनं Vविन्दते लभते श्रद्धावाञ्जनः । तत इत्यर्थः ॥

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि ।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥ ५ ॥

श्रद्धाम् । प्रातः । हवामहे । श्रद्धाम् । मध्यंदिनम् । परि ।
श्रद्धाम् । सूर्यस्य । निऽम्रुचि । श्रद्धे । श्रत् । धापय । इह । नः ॥ ५ ॥

Vश्रद्धां देवीं Vप्रातः पूर्वाह्णे Vहवामहे[2] । तथा Vमध्यंदिनं Vपरि । लक्षणे परेः कर्मप्रवचनीयत्वम् । मध्यंदिनं परिलक्ष्य । मध्यंदिन इत्यर्थः । मध्याह्नेऽपि तां Vश्रद्धाम् आह्वयामहे । Vसूर्यस्य सर्वस्य प्रेरकस्यादित्यस्य Vनिम्रुचि अस्तमयवेलायां सायंसमयेऽपि तामेव Vश्रद्धाम् आह्वयामहे । ईदृग्रूपे हे Vश्रद्धे Vनः अस्मान् Vइह[3] लोके कर्मणि वा Vश्रद्धापय श्रद्धावतः कुरु ॥ ॥९॥ ॥११॥

द्वादशेऽनुवाके चत्वारिंशत्सूक्तानि । तत्र 'शास इत्था' इति पञ्चर्चं प्रथमं सूक्तं भरद्वाजपुत्रस्य शासनाम्न आर्षमानुष्टुभमैन्द्रम् । अनुक्रान्तं च—'शासः शासो भारद्वाजः' इति । युद्धाय संनद्धं राजानमनेनेक्षेत । तथा च सूत्रितम्—'अथैनमन्वीक्षेताप्रतिरथशाससौपर्णैः' (आश्व. गृ. ३. १२. १३) इति ॥

शास इत्था महाँ असि मित्रखादो अद्भुतः ।
न यस्य हन्यते सखा न जीयते कदा चन ॥ १ ॥

शासः । इत्था । महान् । असि । अमित्रऽखादः । अद्भुतः ।
न । यस्य । हन्यते । सखा । न । जीयते । कदा । चन ॥ १ ॥

Vशासः एतत्संज्ञोऽहम् Vइत्था इत्थमनेन वक्ष्यमाणप्रकारेणेन्द्रं स्तौमीति शेषः । हे इन्द्र त्वं Vमहान् Vअसि सर्वेभ्योऽधिको भवसि । Vअमित्रखादः अमित्राणां शत्रूणां[4] खादिता विनाशयिता अत एव Vअद्भुतः आश्चर्यभूतश्च भवसि । Vयस्य इन्द्रस्य Vसखा मित्रभूतः पुरुषः Vकदा Vचन कदाचिदपि Vन Vहन्यते न हिंस्यते Vन Vजीयते न च शत्रुभिः पराजितो भवति स त्वं महाँ असीत्यन्वयः ॥

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतु नः सोमपा अभयंकरः ॥ २ ॥

स्वस्तिऽदाः । विशः । पतिः । वृत्रऽहा । विऽमृधः । वशी ।
वृषा । इन्द्रः । पुरः । एतु । नः । सोमऽपाः । अभयम्ऽकरः ॥ २ ॥

१. ग-त-म२.७.८-'ते' नास्ति; म१.४-ता । २. म२-हवामहे आह्वयामहे । ३. ग-इहास्मिन् । ४. ग-शत्रूणां खादः ।

vस्वस्तिदाः स्वस्तेरविनाशस्य दाता vविशस्पतिः सर्वस्याः प्रजायाः पालयिता vवृत्रहा वृत्राणां शत्रूणां हन्ता vविमृधः संग्रामकारी vवशी[1] वशीकर्ता vवृषा वर्षिता कामानां vसोमपाः सोमस्य पाता एवंविधः vइन्द्रः vअभयंकरः अभयस्य भयराहित्यस्य कर्ता सन् vनः अस्माकं vपुर vएतु पुरतो गच्छतु ॥

वि रक्षो वि मृधो जहि वि वृत्रस्य हनू रुज ।
वि मन्युमिन्द्र वृत्रहन्नमित्रस्याभिदासतः ॥ ३ ॥

वि । रक्षः । वि । मृधः । जहि । वि । वृत्रस्य । हनू इति । रुज ।
वि । मन्युम् । इन्द्र । वृत्रऽहन् । अमित्रस्य । अभिऽदासतः ॥ ३ ॥

हे इन्द्र vरक्षः राक्षसजातं vवि vजहि विनाशय । vमृधः संग्रामकारिणः शत्रूंश्च vवि जहि । vवृत्रस्य आवरकस्यासुरस्य vहनू कपोलप्रान्तौ vवि vरुज विशेषेण भग्नौ कुरु । हे vवृत्रहन् vइन्द्र vअभिदासतः अस्मानुपक्षयतः vअमित्रस्य शत्रोः vमन्युं क्रोधमपि विनाशय ॥

'वि न इन्द्र' इति वैमृधस्य हविषोऽनुवाक्या । सूत्रितं च—'वि न इन्द्र मृधो जहि मृगो न भीमः कुचरो गिरिष्ठाः' (आश्व. श्रौ. २. १०) इति ॥

वि नं इन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
यो अस्माँ अभिदासत्यधरं गमया तमः ॥ ४ ॥

वि । नः । इन्द्र । मृधः । जहि । नीचा । यच्छ । पृतन्यतः ।
यः । अस्मान् । अभिऽदासति । अधरम् । गमय । तमः ॥ ४ ॥

हे vइन्द्र vनः अस्माकं vमृधः संग्रामकारिणः शत्रून् vवि vजहि विनाशय । तथा vपृतन्यतः पृतनाः सेना आत्मन इच्छतो युयुत्समानानपि vनीचा vयच्छ । नीचीनमवाङ्मुखं यच्छ । गमय । vयः शत्रुः vअस्मान् vअभिदासति अभित उपक्षपयति तम् vअधरं निकृष्टं vतमः अन्धकारं मरणलक्षणं vगमय प्रापय ॥

अपेन्द्र द्विषतो मनोऽप जिज्यासतो वधम् ।
वि मन्योः शर्म यच्छ वरीयो यवया वधम् ॥ ५ ॥

अप । इन्द्र । द्विषतः । मनः । अप । जिज्यासतः । वधम् ।
वि । मन्योः । शर्म । यच्छ । वरीयः । यवय । वधम् ॥ ५ ॥

हे vइन्द्र vद्विषतः द्वेष्टुः शत्रोः vमनः vअप जहि । vजिज्यासतः[2] अस्माकं वयोहानिमिच्छतश्च vवधं हननसाधनमायुधं च vअप जहि । vमन्योः शत्रुसंबन्धिनः क्रोधात्तस्मान् रक्ष[3] । vवरीयः उरुतरं vशर्म सुखं विशेषेण vयच्छ देहि । vवधं शत्रुकृतं हननं च vयवय अस्मत्तः पृथक्कुरु ॥ ॥१०॥

---

१. त-भ-'वशी' नास्ति । २. त४.५—अपजिज्यासतो । ३. ग-त१.२.३.६.७.८-भ—रक्षन् ।

'ईङ्खयन्तीः' इति पञ्चर्चं गायत्रमैन्द्रं द्वितीयं सूक्तम्। देवानां स्वसृभूता इन्द्रमातरो नामर्षिकाः। तथा चानुक्रान्तम्—'ईङ्खयन्तीर्देवजामय इन्द्रमातरो गायत्रम्' इति। द्वितीये पर्याये प्रशास्तुः शस्त्रं इदं सूक्तम्। सूत्रितं च—'ईङ्खयन्तीरहं दां पाता सुतम्' (आश्व. श्रौ. ६. ७) इति। महाव्रतेऽपि प्रातःसवनिके ब्रह्मशस्त्रं एतत्सूक्तम्' ॥

ईङ्खयन्तीरपस्युव इन्द्रं जातमुपासते। भेजानासः सुवीर्यम् ॥ १ ॥

ईङ्खयन्तीः। अपस्युवः। इन्द्रम्। जातम्। उप। आसते। भेजानासः। सुऽवीर्यम् ॥ १ ॥

vईङ्खयन्तीः गच्छन्त्यः स्तुत्यादिभिरिन्द्रं प्राप्नुवत्यः vअपस्युवः अपः कर्म आत्मन इच्छन्त्य इन्द्रमातरोऽस्य सूक्तस्य द्रष्ट्र्यः vजातं प्रादुर्भूतम् vइन्द्रम् vउपासते परिचरन्ति। vसुवीर्यं शोभनवीर्योपेतं धनं च vभेजानासः। तस्मादिन्द्रात् संभक्तव्यो भवन्ति ॥

त्वमिन्द्र बलादधि सहसो जात ओजसः। त्वं वृषन्वृषेदसि ॥ २ ॥

त्वम्। इन्द्र। बलात्। अधि। सहसः। जातः। ओजसः।

त्वम्। वृषन्। वृषा। इत्। असि ॥ २ ॥

हे vइन्द्र vत्वं vसहसः परेषामभिभावुकात् vबलात् vअधि vजातः असि। अधिः पञ्चम्यर्थानुवादकः। वृत्रादिवधहेतुभूताद्बलाद्धेतोस्त्वं प्रख्यातो भवसीत्यर्थः। अपि च vओजसः। ओजो नाम बलहेतु हृदयगतं धैर्यम्। तस्मादपि त्वं जातोऽसि। हे vवृषन् वर्षितः vत्वं vवृषेदसि कामानां वर्षितैव भवसि ॥

त्वमिन्द्रासि वृत्रहा व्यन्तरिक्षमतिरः। उद् द्यामस्तभ्ना ओजसा ॥ ३ ॥

त्वम्। इन्द्र। असि। वृत्रऽहा। वि। अन्तरिक्षम्। अतिरः।

उत्। द्याम्। अस्तभ्नाः। ओजसा ॥ ३ ॥

हे vइन्द्र vत्वं vवृत्रहा vअसि। शत्रूणां हन्ता भवसि। vअन्तरिक्षं मध्यमस्थानं च vवि vअतिरः। आवरकापनोदनेन प्रावर्धयः। vद्यां द्युलोकं च vओजसा बलेन vउत् vअस्तभ्नाः। ऊर्ध्वमस्तम्भीः। यथाधो न पतति तथोपर्यवस्थापितवानित्यर्थः ॥

त्वमिन्द्र सजोषसमर्कं बिभर्षि बाह्वोः। वज्रं शिशान ओजसा ॥ ४ ॥

त्वम्। इन्द्र। सऽजोषसम्। अर्कम्। बिभर्षि। बाह्वोः। वज्रम्। शिशानः। ओजसा ॥४॥

हे vइन्द्र vत्वं vसजोषसं सह प्रीयमाणम् vअर्कं स्तुत्यं vवज्रम् आत्मीयमायुधम् vओजसा बलेन vशिशानः निश्चयंस्तीक्ष्णीकुर्वन् vबाह्वोः हस्तयोः vबिभर्षि धारयसि शत्रूणां वधार्थम् ॥

त्वमिन्द्राभिभूरसि विश्वा जातान्योजसा। स विश्वा भुव आभवः ॥ ५ ॥

त्वम्। इन्द्र। अभिऽभूः। असि। विश्वा। जातानि। ओजसा।

सः। विश्वाः। भुवः। आ। अभवः ॥ ५ ॥

१. ग१.२—एतत्सूक्तं। सूत्रितं च ईङ्खयंतीरपस्युव इति ब्राह्मणाच्छंस्यावपेत (ऐ. आ. ५. १. १) इति; त१.१.३.६.७.८-म१.४.५.८—सूत्रितं च; त४.५-म२—एतत्सूक्तं सूत्रितं च।

हे vइन्द्र vत्वं vविश्वा सर्वाणि vजातानि जनिमन्ति भूतानि vओजसा बलेन vअभिभूरसि अभिभविता भवसि । तथा vसः तादृशस्त्वं vविश्वा vभुवः सर्वा भूमीः प्राप्तव्यानि सर्वाण्यपि स्थानानि vआभवः अभितः प्राप्नोः । ' भू प्राप्तौ ' ॥ ॥११॥

' सोमः ' इति पञ्चर्चं तृतीयं सूक्तमानुष्टुभम् । विवस्वतो दुहिता यम्यृषिः । म्रियमाणानां यजमानादीनां वर्तनमत्र प्रतिपाद्यते । अतस्तद्देवताकमिदम् । तथा चानुक्रान्तं—' सोमो यमी भाववृत्तमानुष्टुभं तु ' इति । प्रेतोपस्थान एतत्सूक्तम् । सूत्रितं च—' सोम एकेभ्य उरूणसावसुतृपा उदुम्बलौ ' (आश्व. श्रौ. ६. १०) इति ॥

सोम॒ एके॑भ्यः पवते घृ॒तमेक॒ उपा॑सते ।
ये॑भ्यो॒ मधु॒ प्रधा॑वति॒ ताँश्चि॑दे॒वापि॑ गच्छतात् ॥ १ ॥

सोमः । एके॑भ्यः । पव॑ते । घृ॒तम् । एके॑ । उप॑ । आस॑ते ।
ये॑भ्यः । मधु॑ । प्र॒ऽधाव॑ति । तान् । चि॒त् । ए॒व । अपि॑ । ग॒च्छ॒ता॒त् ॥ १ ॥

vएकेभ्यः केभ्यश्चित् पितृभ्यः vसोमः vपवते । उपभोगाय कुल्यारूपेण प्रवहति । एषां गोत्रजाः सामानि ब्रह्मयज्ञसमयेऽधीयते । श्रूयते हि—' यत्सामानि सोम एभ्यः पवते ' (तै. आ. २. १०) इति । vएके अन्ये पितरः vघृतम् आज्यम् vउपासते उपगच्छन्ति । उपभुञ्जत इत्यर्थः । एषां पुत्रादयो यजूंषि ब्रह्मयज्ञकालेऽधीयते । श्रुतिश्च भवति—'यद्यजूंषि घृतस्य कुल्या ' इति । vयेभ्यः पितृभ्यः । तादर्थ्ये चतुर्थी । उपभोगार्थं vमधु क्षौद्रं vप्रधावति प्रवाहरूपेण शीघ्रं गच्छति । य आथर्वणान् मन्त्रान् ब्रह्मयज्ञार्थमधीयते तेषां पितॄन् मधुकुल्या[1] प्रवहति । तथा चाम्नायते—' यदाथर्वणाङ्गिरसो मधोः कुल्या ' इति । vतांश्चिदेव तान् पूर्वोक्तान् सर्वानेव हे प्रेत त्वं vअपि vगच्छतात् अपिगच्छ प्रामुहि ॥

तप॑सा॒ ये अ॑नाधृ॒ष्यास्तप॑सा॒ ये स्व॑र्य॒युः ।
तपो॒ ये च॑क्रि॒रे म॑हस्ताँश्चि॑दे॒वापि॑ गच्छतात् ॥ २ ॥

तप॑सा । ये । अ॒ना॒धृ॒ष्याः । तप॑सा । ये । स्वः॑ । य॒युः ।
तपः॑ । ये । च॒क्रि॒रे । म॒हः॒ । तान् । चि॒त् । ए॒व । अपि॑ । ग॒च्छ॒ता॒त् ॥ २ ॥

vये जनाः vतपसा कृच्छ्रचान्द्रायणादिना युक्ताः सन्तः vअनाधृष्याः पापैरप्रधृष्या भवन्ति । vये च vतपसा यागादिरूपेण[2] साधनेन vस्वर्ययुः स्वर्गं यान्ति प्राप्नुवन्ति । vये च vमहः महत् vतपः अन्यैर्दुष्करं राजसूयाश्वमेधादिकं हिरण्यगर्भोपासनं वा vचक्रिरे कुर्वन्ति एतेषु प्रवर्तन्ते[3] तेषु लोकेषु । vतांश्चित् तानेव तपस्विनो हे प्रेत अपिगच्छ ॥

ये यु॒ध्यन्ते॒ प्र॒ध॒नेषु॒ शूरा॑सो॒ ये त॑नू॒त्यजः॑ ।
ये वा॑ स॒हस्र॑दक्षिणा॒स्ताँश्चि॑दे॒वापि॑ गच्छतात् ॥ ३ ॥

ये । यु॒ध्यन्ते॑ । प्र॒ऽध॒नेषु॑ । शूरा॑सः । ये । त॒नू॒ऽत्यजः॑ ।
ये । वा॒ । स॒हस्र॑ऽदक्षिणाः । तान् । चि॒त् । ए॒व । अपि॑ । ग॒च्छ॒ता॒त् ॥ ३ ॥

---

१. ग-त४-प्रति बहुकुल्या; भ२-प्रति मधुकुल्या । २. त४-नियमादिरूपेण । ३. त४-लोकेषु वर्तते; भ-लोकेषु प्रवर्तते ।

vप्रधनेषु । प्रकीर्णान्यस्मिन् धनानि भवन्तीति प्रधनाः संग्रामाः । तेषु vशूरासः शौर्यवन्तः vये vयुध्यन्ते शत्रून् संप्रहरन्ति । vये च vतनूत्यजः शरीराणां तत्र त्यक्तारो भवन्ति । vये vवा ये च vसहस्रदक्षिणाः सहस्रदक्षिणान् क्रतून् अनुष्ठितवन्तः । vतान् सर्वान् vएव त्वमपिगच्छ । येषूत्तमेषु लोकेषु ते निवसन्ति तं लोकं प्राप्नुहीत्यर्थः ॥

ये चित्पूर्वे ऋतसाप ऋतावान ऋतावृधः ।
पितॄन्तपस्वतो यम ताँश्चिदेवापि गच्छतात् ॥ ४ ॥

ये । चित् । पूर्वे । ऋतऽसापः । ऋतऽवानः । ऋतऽवृधः ।
पितॄन् । तपस्वतः । यम । तान् । चित् । एव । अपि । गच्छतात् ॥ ४ ॥

vये vचित् ये च vपूर्वे पूर्वपुरुषाः vऋतसापः ऋतं सत्यं यज्ञं वा स्पृशन्तः अत एव vऋतावानः ऋतेन युक्ताः vऋतावृधः ऋतस्य वर्धकाश्च भवन्ति vतपस्वतः तपसा युक्तान् vतान्[1] vएव vपितॄन्[1] हे vयम नियत त्वमपिगच्छ ॥

सहस्रणीथाः कवयो ये गोपायन्ति सूर्यम् ।
ऋषीन् तपस्वतो यम तपोजाँ अपि गच्छतात् ॥ ५ ॥

सहस्रऽनीथाः । कवयः । ये । गोपायन्ति । सूर्यम् ।
ऋषीन् । तपस्वतः । यम । तपःऽजान् । अपि । गच्छतात् ॥ ५ ॥

vसहस्रनीथाः सहस्रनयनाः vकवयः क्रान्तदर्शिनः vये vसूर्यम् अमुमादित्यं vगोपायन्ति रक्षन्ति vतपस्वतः तपसा युक्तान् vतपोजान् तपसः सकाशादेवोत्पन्नान् तान् vऋषीन् हे vयम नियत त्वमपिगच्छ ॥ ॥१२॥

'अरायि' इति पञ्चर्चं चतुर्थं सूक्तं भरद्वाजपुत्रस्य शिरिम्बिठस्यार्षमानुष्टुभम् । जपहोमादिभिरिदं सूक्तमग्नीनाशकरम् । तत्राद्योपान्त्ययोस्तादृशोऽर्थ एव देवता । द्वितीयातृतीये ब्राह्मणस्पत्ये । पञ्चमी वैश्वदेवी । अनुक्रम्यते हि—'अरायि शिरिम्बिठो भारद्वाजोऽलक्ष्मीघ्नं द्वितीयातृतीये ब्राह्मणस्पत्ये अन्त्या वैश्वदेवी' इति । गतो विनियोगः ॥

अरायि काणे विकटे गिरिं गच्छ सदान्वे ।
शिरिम्बिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि ॥ १ ॥

अरायि । काणे । विऽकटे । गिरिम् । गच्छ । सदान्वे ।
शिरिम्बिठस्य । सत्वऽभिः । तेभिः । त्वा । चातयामसि ॥ १ ॥

हे vअरायि अदायिनि दानविरोधिनि हे vकाणे कुत्सितशब्दकारिणि कुत्सितदर्शने वा हे vविकटे विकृतगमने विकृताङ्गि वा हे vसदान्वे सदानोनुवे सर्वदाक्रोशकारिणि दुर्भिक्षादिदेवते vगिरिं पर्वतं निर्जनं देशं vगच्छ । अस्मान् मा बाधिष्ठाः । vशिरिम्बिठस्य । बिठमन्तरिक्षम् । शीर्यते

---

१. त४.५–तान् देवपितॄन् ।

त्रिष्ठेऽन्तरिक्ष इति शिरिम्बिठो मेघः। तस्य [v]सत्वभिः अन्तर्वर्तमानैरुदकैः [v]तेभिः तैः [v]त्वा त्वां [v]चातयामसि चातयामः विनाशयामः। यद्वा। शिरिम्बिठस्यैतत्संज्ञकस्य भरद्वाजपुत्रस्य तेभिस्तैः अनुष्ठितैः सत्वभिः कर्मभिर्हे अलक्ष्मि त्वां विनाशयामः। इतस्त्वमेव शीघ्रं गिरिं गच्छ॥

चत्तो इतश्चत्तामुतः सर्वा भ्रूणान्यारुषी।
अराय्यं ब्रह्मणस्पते तीक्ष्णशृङ्गोदृषन्निहि॥ २॥

चत्तो इति। इतः। चत्ता। अमुतः। सर्वा। भ्रूणानि। आरुषी।
अराय्यम्। ब्रह्मणः। पते। तीक्ष्णऽशृङ्ग। उत्ऽऋषन्। इहि॥ २॥

सालक्ष्मीः [v]इतः अस्माल्लोकात् [v]चत्तः चत्तैवास्माभिर्नाशितैव [v]अमुतः अमुष्मादपि[1] लोकात् [v]चत्ता हिंसिता भवतु। यालक्ष्मीः [v]सर्वा सर्वाणि [v]भ्रूणानि गर्भजातानि सर्वासामोषधीनामङ्कुराणि या दुर्भिक्षाधिदेवता [v]आरुषी आहन्त्री भवति [v]अराय्यम् अदात्रीं दानविरोधिनीं तां हे [v]ब्रह्मणस्पते मन्त्रस्य पालयितर्देव हे [v]तीक्ष्णशृङ्ग तीक्ष्णतेजस्क [v]उदृषन् अस्मात्स्थानादुद्गमयन् [v]इहि गच्छ॥

अदो यद्दारु प्लवते सिन्धोः पारे अपूरुषम्।
तदा रभस्व दुर्हणो तेन गच्छ परस्तरम्॥ ३॥

अदः। यत्। दारु। प्लवते। सिन्धोः। पारे। अपुरुषम्।
तत्। आ। रभस्व। दुर्हनो इति दुःऽहनो। तेन। गच्छ। परःऽतरम्॥ ३॥

[v]अदः विप्रकृष्टदेशे वर्तमानम् [v]अपूरुषं निर्मात्रा पुरुषेण रहितं [v]यद्दारु दारुमयं पुरुषोत्तमाख्यं देवताशरीरं [v]सिन्धोः [v]पारे समुद्रतीरे [v]प्लवते जलस्योपरि वर्तते [v]तत् दारु हे [v]दुर्हणो दुःखेन हननीय केनापि हन्तुमशक्य हे स्तोतः [v]आ [v]रभस्व आलम्बस्व। उपास्स्वेत्यर्थः। [v]तेन दारुमयेन देवेनोपास्यमानेन [v]परस्तरम् अतिशयेन तरणीयमुत्कृष्टं वैष्णवं लोकं [v]गच्छ। अपर आह। हे दुर्हणो दुःखेन हननीये दुष्टहनुयुक्ते वा हे अलक्ष्मि सिन्धोः पारे समुद्रतीरप्रान्तेऽपूरुषं पुरुषैर्जनैर्वियुक्तमदोऽस्मत्तो दूरे देशे वर्तमानं यद्दारु दारुमयी नौः प्लवते तद्दारु आ रभस्व परिगृहाण। गृहीत्वा च तेन दारुणा परस्तरमतिशयेन तरणीयं ब्रह्मणस्पतिना प्रेरिता सती द्वीपान्तरं गच्छ॥

षष्ठेऽहनि तृतीयसवने ब्रह्मशस्त्रे 'यद्ध प्राचीः' इत्येषा। सूत्रितं च—'कपृञ्जरो यद्ध प्राचीरजगन्तेति चैते' (आश्व. श्रौ. ८. ३) इति॥

यद्ध प्राचीरजगन्तोरो मण्डूरधाणिकीः।
हता इन्द्रस्य शत्रवः सर्वे बुद्बुदयाशवः॥ ४॥

यत्। ह। प्राचीः। अजगन्त। उरः। मण्डुरऽधाणिकीः।
हताः। इन्द्रस्य। शत्रवः। सर्वे। बुद्बुदऽयाशवः॥ ४॥

हे [v]मण्डूरधाणिकीः मण्डूरवत्[2] कुत्सितशब्दकारिण्यो मन्दनस्य धनस्य धारयित्र्यो वालक्ष्म्यः [v]उरः॥ उर्वी हिंसार्थः। अस्मात्किपि 'राल्लोपः' इति वलोपः। ततो जसि रूपमेतत्॥ हिंसित्र्यो

---

१. त१.२.३.६.७.८-भ१.४.८–अस्मादपि। २. त५–मंडूकवत्।

यूयं vप्राचीः प्रकर्षेणाञ्चन्त्यः प्रकृष्टगमनाः सत्यो vयद् यदा खलु vअजगन्त अगच्छत ॥ गमेर्लङि मध्यमबहुवचने छान्दसः शपः श्लुः । ' तप्तनप्तनथनाश्च ' इति तस्य तबादेशः । अत एव क्रिस्वाभावादनुनासिकलोपो न भवति ॥ तदानीमेव vसर्वे vइन्द्रस्य vशत्रवः vबुद्बुदयाशवः । यान्ति गच्छन्तीति याः । अश्नुवत इत्याशवः । याश्च त आशवश्च याशवः । बुद्बुदवद्यातारो व्यापनशीलाश्च सन्तः vहताः नष्टा आसन् ॥

परीमे गामनेषत पर्यग्निमहृषत । देवेष्वक्रत श्रवः क इमाँ आ दधर्षति ॥ ५ ॥

परि । इमे । गाम् । अनेषत । परि । अग्निम् । अहृषत ।
देवेषु । अक्रत । श्रवः । कः । इमान् । आ । दधर्षति ॥ ५ ॥

vइमे विश्वे देवाः vगाम् । जात्यभिप्रायमेकवचनम् । पणिभिरपहृताः सर्वा देवगवीः vपरि vअनेषत पर्यनयन् । यद्वृत्तक्रिरसः परिप्रापयन् । ततः vअग्निं च vपरि vअहृषत परितो व्यहरन् । यागार्थं तत्र तत्र गार्हपत्यादिरूपेण स्थापितवन्त इत्यर्थः । एवं कृत्वा vदेवेषु यष्टव्येष्विन्द्रादिषु vश्रवः अन्नम् vअक्रत अकृषत । vकः शत्रुरसुरादिः vइमान् विश्वान् देवान् vआ vदधर्षति अभिभवितुं शक्नोति । न कश्चिदित्यर्थः ॥ ॥ १३ ॥

' अग्निं हिन्वन्तु नः ' इति पञ्चर्चं पञ्चमं सूक्तमग्निपुत्रस्य केतुनाम्न आर्षं गायत्रमाग्नेयम् । तथा चानुक्रान्तम्—' अग्निं केतुराग्नेय आग्नेयं गायत्रम् ' इति । प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छन्दसीदं शस्यम् । सूत्रितं च—'अग्निं हिन्वन्तु नः प्राग्नये वाचमिति सूक्ते ' (आश्व.श्रौ.४.१३) इति ॥

अग्निं हिन्वन्तु नो धियः सप्तिमाशुमिवाजिषु । तेन जेष्म धनंधनम् ॥ १ ॥

अग्निम् । हिन्वन्तु । नः । धियः । सप्तिम् । आशुम्ऽइव । आजिषु ।
तेन । जेष्म । धनम्ऽधनम् ॥ १ ॥

vनः अस्माकं vधियः कर्माणि स्तुतयो[1] वा vअग्निं vहिन्वन्तु प्रेरयन्तु । यागार्थमुद्योजयन्तु वर्धयन्तु वा । ' हि गतौ वृद्धौ च ' । तत्र दृष्टान्तः । vआजिषु संग्रामेषु vआशुमिव यथा आशुं शीघ्रगामिनं vसप्तिं सर्पणशीलमश्वं योद्धारः प्रेरयन्ति तद्वत् । vतेन अग्निना vधनंधनं सर्वं धनं vजेष्म वयं जयेम ॥

यया गा आकरामहे सेनयाग्ने तवोत्या । तां नो हिन्व मघत्तये ॥ २ ॥

यया । गाः । आऽकरामहे । सेनया । अग्ने । तव । ऊत्या । ताम् । नः । हिन्व । मघत्तये ॥ २ ॥

हे vअग्ने vसेनया इनेन सह वर्तमानया सेनारूपया वा vयया vतव vऊत्या रक्षया vगाः vआकरामहे आभिमुख्येन कुर्महे । लभामह इत्यर्थः । vताम् ऊतिं vनः अस्मान् vहिन्व गमय । किमर्थम् । vमघत्तये धनस्य दानार्थम्[2] । अस्माकं धनलाभायेत्यर्थः ॥

आभिप्लविकेषूक्थ्येषु प्रशास्तुः शस्त्रे ' आग्ने स्थूरम् ' इति तृचो वैकल्पिकोऽनुरूपः । सूत्रितं च—' आ ते वत्सो मनो यमदाग्ने स्थूरं रयिं भर ' (आश्व. श्रौ. ७. ८) इति ॥

आग्ने स्थूरं रयिं भर पृथुं गोमन्तमश्विनम् । अङ्धि खं वर्तया पणिम् ॥ ३ ॥

---

१. त४.५-बुद्धयो । २. त४-५-लाभार्थं ।

आ । अग्ने । स्थूरम् । रयिम् । भर । पृथुम् । गोऽमन्तम् । अश्विनम् ।
अङ्धि । खम् । वर्तय । पणिम् ॥ ३ ॥

हे vअग्ने vस्थूरं स्थूलं वृद्धं vपृथुं विस्तीर्णं vगोमन्तं गोभिर्युक्तम् vअश्विनम् अश्वैश्चोपेतं vरयिं धनम् vआ vभर अस्मभ्यमाहर । प्रयच्छ । vखम् अन्तरिक्षम् vअङ्धि वृष्टयुदकैः सिञ्च । यद्वा । आत्मीयैस्तेजोभिर्व्याप्नुहि प्रकाशय । vपणिं वणिजमदातारमसुरं वा vवर्तय इतो निर्गमय । यद्वा । दाने प्रवर्तय ॥

अग्ने नक्षत्रमजरमा सूर्यं रोहयो दिवि । दधज्ज्योतिर्जनेभ्यः ॥ ४ ॥
अग्ने । नक्षत्रम् । अजरम् । आ । सूर्यम् । रोहयः । दिवि । दधत् । ज्योतिः । जनेभ्यः ॥४॥

हे vअग्ने vनक्षत्रम् ॥ नक्षति सततं गच्छतीति नक्षत्रः । ' नक्षि गतौ ' । ' अमिनक्षि° ' इत्यादिनात्रन्प्रत्ययः ॥ सततं गन्तारम् vअजरं जरारहितं vसूर्यं सर्वस्य प्रेरकमादित्यं vदिवि अन्तरिक्षे vआ vरोहयः उपर्यवस्थापितवानसि । यद्वा । नक्षत्रं कृत्तिकादिकं सूर्यं च दिव्यारोहयः । किं कुर्वन् । vजनेभ्यः सर्वेभ्यः प्राणिभ्यो व्यवहारार्थं vज्योतिः प्रकाशं vदधत् विदधत् कुर्वन् । यथा सर्वेषां प्रकाशो[1] भवति तथोन्नते देशे सूर्यमगमय इत्यर्थः ॥

अग्ने केतुर्विशामसि प्रेष्ठः श्रेष्ठ उपस्थसत् । बोधा स्तोत्रे वयो दधत् ॥ ५ ॥
अग्ने । केतुः । विशाम् । असि । प्रेष्ठः । श्रेष्ठः । उपस्थऽसत् । बोध । स्तोत्रे । वयः । दधत् ॥५॥

हे vअग्ने vविशां प्रजानां यजमानानां vकेतुः केतयिता vअसि ज्ञापयिता भवसि । अत एव vप्रेष्ठः प्रियतमः vश्रेष्ठः प्रशस्यतमश्च भवसि । स त्वम् vउपस्थसत् उपस्थाने यज्ञगृहे निषीदन् vबोध अस्मदीयं स्तोत्रमवगच्छ । किं कुर्वन् । vस्तोत्रे स्तुवते जनाय vवयः अन्नं vदधत् विदधत् कुर्वन् प्रयच्छन् ॥ ॥१४॥

' इमा नु कम् ' इति पञ्चर्चं षष्ठं सूक्तमप्यपुत्रस्य भुवनस्यार्षं[2] भुवनपुत्रस्य साधनसंज्ञस्य वा वैश्वदेवम् । सर्वा द्विपदाश्चिष्टुभः । तथा चानुक्रान्तम्—' इमा नु कं भुवन आप्यः साधनो वा भौवनो वैश्वदेवं द्वैपदं त्रैष्टुभम् ' इति । दशरात्रस्य द्वितीये छन्दोमे वैश्वदेवशस्त्रे वैश्वदेवान्निविद्धानात् पूर्वमिदं शंसनीयम् । सूत्रितं च—' आ याहि वनसेमा नु कं बभ्रुरेक इति द्विपदासूक्तानि ' (आश्व. श्रौ. ८.७) इति । षष्ठेऽहनि तृतीयसवने ब्राह्मणाच्छंसिन[3] उक्थ्यशस्त्र[3] आद्यस्तृचः स्तोत्रियः । ततो द्वे अनुरूपार्ये । सूत्रितं च—' ब्राह्मणाच्छंसिन इमा नु कं भुवना सीषधामेति पञ्च ' (आश्व. श्रौ. ८. ३) इति ॥

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ॥ १ ॥
इमा । नु । कम् । भुवना । सीसधाम । इन्द्रः । च । विश्वे । च । देवाः ॥ १ ॥

vइमा इमानि प्रदृश्यमानानि vभुवना भुवनानि vनु क्षिप्रं vसीषधाम साधयामः वशीकुर्मः । vकम् इति पूरकः । यद्वा । इमानि सर्वाणि भूतजातान्यस्मभ्यं कं सुखं सीषधाम । साधयन्तु । पुरुषव्यत्ययः । vइन्द्रश्च vविश्वे सर्वे अन्ये vदेवाः vच स्तुत्या प्रीता इममर्थं साधयन्तु ॥

---

१. त४.५–प्रकाशको । २. ग-त४.५–भुवनाख्यस्यार्षं । ३. त१.२.३.६.७.८–भ१.४.८–ब्राह्मणाच्छंसिशस्त्रे उक्थ्ये (? °क्थ्ये)।

यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः सह चीक्लृपाति ॥ २ ॥

यज्ञम् । च । नः । तन्वम् । च । प्रऽजाम् । च । आदित्यैः । इन्द्रः । सह । चीक्लृपाति ॥२॥

ᵛनः अस्माकं ᵛयज्ञं ज्योतिष्टोमादिकं यागं ᵛतन्वं शरीरं ᵛच ᵛप्रजां पुत्रादिकां[1] ᵛच ᵛआदित्यैः अदितिपुत्रैरन्यैर्देवैः ᵛसह वर्तमानः ᵛइन्द्रः ᵛचीक्लृपाति कल्पयतु । यज्ञादिकं स्वव्यापारसमर्थं करोतु ॥

आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम् ॥ ३ ॥

आदित्यैः । इन्द्रः । सऽगणः । मरुत्ऽभिः । अस्माकम् । भुवत् । अविता । तनूनाम् ॥ ३ ॥

ᵛआदित्यैः अदितिपुत्रैर्मित्रादिभिः ᵛमरुद्भिः च ᵛसगणः सहितः ᵛइन्द्रः ᵛअस्माकं ᵛतनूनां शरीराणां तनयानां वा ᵛअविता ᵛभूत रक्षिता भवतु ॥

हत्वाय देवा असुरान् यदायन् देवा देवत्वमभिरक्षमाणाः ॥ ४ ॥

हत्वाय । देवाः । असुरान् । यत् । आयन् । देवाः । देवऽत्वम् । अभिऽरक्षमाणाः ॥४॥

ᵛदेवाः इन्द्रादयः ᵛअसुरान् क्षेप्तॄन् वृत्रादीन् ᵛहत्वाय हत्वा विनाश्य ᵛयत् यदा ᵛआयन् आगच्छन् स्वकीयं स्थानं प्राप्नुवन् तदानीं ते ᵛदेवाः ᵛदेवत्वम् आत्मीयममृतत्वम् ᵛअभिरक्षमाणाः अभितः सर्वतो रक्षन्तोऽभूवन् । बाधकाभावात् सर्वत्र प्रस्थापितवन्त इत्यर्थः ॥

प्रत्यञ्चमर्कमनयञ्छचीभिरादित्स्वधामिषिरां पर्यपश्यन् ॥ ५ ॥

प्रत्यञ्चम् । अर्कम् । अनयन् । शचीभिः । आत् । इत् । स्वधाम् । इषिराम् । परि । अपश्यन् ॥५॥

ᵛशचीभिः कर्मभिः परिचरणात्मकैः सार्धम् ᵛअर्कम् अर्चनसाधनं स्तोत्रं ᵛप्रत्यञ्चम् इन्द्रादीन् प्रत्यञ्चत्[2] ᵛअनयन् स्तोतारः प्रापयन् । यदैवम् ᵛआदित् अनन्तरमेव ᵛइषिरां गमनशीलां[3] ᵛस्वधां वृष्ट्युदकं ᵛपर्यपश्यन् सर्वे जनाः परितः पश्यन्ति । यद्वा । इषिरामेषणीयां स्वधाम् । अन्ननामैतत् । हविर्लक्षणमन्नं सर्वे देवाः परिपश्यन्ति ॥ ॥ १५ ॥

'सूर्यः' इति पञ्चर्चं सप्तमं सूक्तं सूर्यपुत्रस्य चक्षुःसंज्ञस्यार्षं सूर्यदेवत्यं गायत्रम् । तथा चानुक्रान्तं—'सूर्यो नश्चक्षुः सौर्यः सौर्यं गायत्रम्' इति । आश्विनशस्त्रे सूर्योदयादुत्तरकाले[4] सौर्यकाण्डे इदं सूक्तम् । सूत्रितं च—'सूर्यो नो दिव उदु त्यं जातवेदसमिति नव' (आश्व. श्रौ. १. ५) इति । दर्शपूर्णमासयोः स्रुगादापनात्पूर्वभाविनि जपे 'सूर्यो नः' इत्येषा[5] । सूत्रितं च—'सूर्यो नो दिवस्पातु नमो महद्भ्यो नमो अर्भकेभ्यः' (आश्व. श्रौ. १. ४) इति ॥

सूर्यो नो दिवस्पातु वातो अन्तरिक्षात् । अग्निर्नः पार्थिवेभ्यः ॥ १ ॥

सूर्यः । नः । दिवः । पातु । वातः । अन्तरिक्षात् । अग्निः । नः । पार्थिवेभ्यः ॥ १ ॥

ᵛसूर्यः सर्वस्य प्रेरकः शोभनरश्मिर्वा देवः ᵛदिवः द्युलोकात् द्युलोकवर्तिनो जनात् ᵛनः अस्मान् ᵛपातु रक्षतु । ᵛवातः वायुश्च ᵛअन्तरिक्षात् मध्यमस्थानगताद्बाधकादस्मान् रक्षतु । तथा पृथिवीस्थानः ᵛअग्निः च ᵛपार्थिवेभ्यः पृथिव्यां वर्तमानेभ्यः शत्रुभ्यः ᵛनः अस्मान् रक्षतु ॥

---

१. ग-त४.५-भ४-पुत्रादिकं । २. त१.२.३.६.७.८-भ१.२.४.८-प्रत्यंचतं; त४-भ७-प्रत्यंचर्तं; त५-प्रत्यंचं । ३. त-भ-मु-गमनशीलां । ४. ग-भ१.२.४.५.८-मु-°दुत्तरकालीने; त१.२.३.६.७.८-भ७-°दुत्तरकालीनो । ५. ग-त४-भ-इत्येषा जप्या ।

जोषा सवितर्यस्य ते हरः शतं सवाँ अर्हति । पाहि नो दिद्युतः पतन्त्याः ॥२॥

जोष । सवितः । यस्य । ते । हरः । शतम् । सवान् । अर्हति ।
पाहि । नः । दिद्युतः । पतन्त्याः ॥ २ ॥

हे [v]सवितः सर्वस्य प्रेरक सूर्य [v]जोष अस्मत्स्तुत्यादिकं सेवस्व । [v]यस्य [v]ते तव [v]हरः रसहरणशीलं[1] तेजः [v]शतं [v]सवान् बहून् यज्ञान् प्रति [v]अर्हति योग्यं भवति । यद्वा । प्रकाशनादिद्वारा पूजयति । स त्वं [v]नः अस्मान् [v]पतन्त्याः निपतन्त्याः शत्रुभिरस्मासु क्षिप्यमाणायाः [v]दिद्युतः । वज्रनामैतत् । द्योतमानायाः शक्तेरायुधात् [v]पाहि रक्ष ॥

चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः । चक्षुर्धाता दधातु नः ॥ ३ ॥

चक्षुः । नः । देवः । सविता । चक्षुः । नः । उत । पर्वतः । चक्षुः । धाता । दधातु । नः ॥३॥

[v]सविता प्रेरकः [v]देवः [v]नः अस्माकं [v]चक्षुः प्रकाशकमिन्द्रियमिन्द्रियानुग्राहकं तेजो वा [v]दधातु । [v]उत अपि च [v]पर्वतः इन्द्रसहचरः पर्वताख्योऽपि देवः [v]नः अस्माकं [v]चक्षुः विदधातु । [v]धाता सर्वस्य विधातादित्यानामन्यतमश्च [v]नः अस्माकं [v]चक्षुः विदधातु ॥

चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः । सं चेदं वि चं पश्येम ॥ ४ ॥

चक्षुः । नः । धेहि । चक्षुषे । चक्षुः । विऽख्यै । तनूभ्यः ।
सम् । च । इदम् । वि । च । पश्येम ॥ ४ ॥

[v]नः अस्माकं [v]चक्षुषे रूपोपलब्धिकारणायेन्द्रियाय[2] [v]चक्षुः प्रकाशकं तदनुग्राहकं तेजो हे सूर्य [v]धेहि विधेहि कुरु । यद्वा । न इति व्यत्ययेन बहुवचनम् । चक्षुषे चक्षुःसंज्ञाय नो मह्यं चक्षुरिन्द्रियं वा तेजो वा हे सूर्य धेहि प्रयच्छ । [v]तनूभ्यः अस्माकं शरीरेभ्यस्तनयेभ्यो वा [v]विख्यै विख्यानाय प्रकाशनाय [v]चक्षुः त्वदीयं प्रकाशं विधेहि । यत एवं तस्मात्कारणात् त्वदीयेन तेजसा वयं [v]च [v]इदं सर्वं जगत् [v]सं [v]पश्येम । सम्यग्द्रष्टारो भवेम । [v]वि पश्येम [v]च । विविधं च सविशेषं द्रष्टारो भवेम ॥

सुसंदृशं त्वा वयं प्रति पश्येम सूर्य । वि पश्येम नृचक्षसः ॥ ५ ॥

सुऽसंदृशम् । त्वा । वयम् । प्रति । पश्येम । सूर्य । वि । पश्येम । नृऽचक्षसः ॥ ५ ॥

हे [v]सूर्य [v]सुसंदृशं सुष्ठु संद्रष्टारं [v]त्वा त्वां [v]वयं [v]प्रति [v]पश्येम प्रत्येकं द्रष्टारो भूयास्म । तथा [v]नृचक्षसः नृभिर्मनुष्यैरस्माभिर्द्रष्टव्यान् पदार्थान् [v]वि [v]पश्येम विद्रष्टारो भवेम । यद्वा । नृचक्षसो नृणां शत्रुमनुष्याणां हिंसकाः सन्तो वयं विशिष्टज्ञाना भवेम ॥ ॥ १६ ॥

'उदसौ' इति षड्चमष्टमं सूक्तमानुष्टुभम् । पुलोमतनया शची स्वात्मानमनेनास्तौत् । अतः सैवर्षिः सैव देवता । तथा चानुक्रान्तम्—'उदसौ षट् पौलोमी शच्यात्मानं तुष्टावानुष्टुभम्' इति । विनियोगो लिङ्गादवगन्तव्यः । आपस्तम्बस्तु सपत्नीनाशने सूर्योपस्थान इदं सूक्तं विनियुक्तवान् । सूच्यते हि—'एतेनैव कामेनोत्तरेणानुवाकेन सदादित्यमुपतिष्ठते' (आप. गृ. ९. ९) इति । अत्र एतेन इति प्रकृतं सपत्नीबाधनं परामृश्यते ॥

---

१. त१.२.३.६.७.८-भ-हरणशीलं; त४-संहरणशीलं । २. ग-°करणाये° ।

उदसौ सूर्यो अगादुदयं मामको भगः ।
अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः ॥ १ ॥

उत् । असौ । सूर्यः । अगात् । उत् । अयम् । मामकः । भगः ।
अहम् । तत् । विद्वला । पतिम् । अभि । असाक्षि । विऽससहिः ॥ १ ॥

vअसौ द्युलोकस्थः vसूर्यः vउत् vअगात् उदयं प्राप्तवान् । vमामकः मदीयः vभगः भजनीयः vअयम् इन्द्रश्च सूर्यात्मनोदगात् । यद्वा मामको भगो मदीयमिदं सौभाग्यमुदगात् । vतत् उद्यतं सूर्यस्य तेजः vविद्वला ज्ञातवती यद्वा vपतिं भर्तारं विद्वला लब्धवती vअहं vविषासहिः विशेषेणाभिभवित्री सती vअभ्यसाक्षि अभ्यभूवम् । सपत्नीरिति शेषः । सहतेरभिभवार्थस्य लुङ्येतद्रूपम् । यद्वा । विषासहिः सपत्नीनामभिभवित्री सती पतिमभ्यसाक्षि । भर्तारमप्यभ्यभूवम् । यथा मय्येव वशीकृतश्चिरं वर्तते[1] तथाकार्षमित्यर्थः ॥

अहं केतुरहं मूर्धाहमुग्रा विवाचनी । ममेदनु क्रतुं पतिः सेहानाया उपाचरेत् ॥ २ ॥

अहम् । केतुः । अहम् । मूर्धा । अहम् । उग्रा । विऽवाचनी ।
मम । इत् । अनु । क्रतुम् । पतिः । सेहानायाः । उपऽआचरेत् ॥ २ ॥

vअहं vकेतुः केतयित्री सर्वस्य ज्ञात्री[2] भवामि । vअहं vमूर्धा सर्वेष्ववयवेषु शिर इव प्रधानभूता च भवामि । vअहम् vउग्रा उद्गूर्णा सती vविवाचनी विशेषेण पतिं वाचयित्री भवामि । क्रोधाविष्टमपि पतिं मयि सर्वदा प्रियवचनयुक्तं करोमीत्यर्थः । vसेहानायाः सपत्नीनामभिभवित्र्याः vममेत् ममैव vक्रतुं कर्म बुद्धिं वा अनुलक्ष्य vपतिः पालयिता भर्ता vउपाचरेत् उपागच्छेत् । नान्यासां पत्नीनाम् ॥

मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् ।
उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः ॥ ३ ॥

मम । पुत्राः । शत्रुऽहनः । अथो इति । मे । दुहिता । विऽराट् ।
उत । अहम् । अस्मि । सम्ऽजया । पत्यौ । मे । श्लोकः । उत्ऽतमः ॥ ३ ॥

vमम एव vपुत्राः तनयाः vशत्रुहणः शत्रूणां सपत्नानां[3] हन्तारो भवन्ति । vअथो अपि च vमे मदीया vदुहिता पुत्री vविराट् विशेषेण राजमाना भवति । vउत अपि च vअहं vसंजया सम्यग्जेत्री सपत्नीनाम् vअस्मि । ता[4] अभिभवामि । अतो हेतोः vपत्यौ भर्तरीन्द्रे vमे मम vश्लोकः उपश्लोकनीयं यशः vउत्तमः उद्गततममतिशयेनोत्कृष्टं विद्यते ॥

येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः ।
इदं तदक्रि देवा असपत्ना किलाभुवम् ॥ ४ ॥

येन । इन्द्रः । हविषा । कृत्वी । अभवत् । द्युम्नी । उत्ऽतमः ।
इदम् । तत् । अक्रि । देवाः । असपत्ना । किल । अभुवम् ॥ ४ ॥

१. भ२.५–वर्तते । २. त१.२.३.६.७.८-भ–राज्ञी । ३. त-मु–सपत्नीनां । ४. त-भ–' ता ' नास्ति ।

vयेन vहविषा vइन्द्रः मम भर्ता vकृत्वी कर्मणां कर्ता vअभवत् भवति । तथा vद्युम्नी । द्युम्नं द्योतमानं यशोऽन्नं वा । तद्वान् vउत्तमः उत्कृष्टतमश्च येन हविषा भवति । हे vदेवाः स्तोतार ऋत्विजः vतत् vइदं हविः vअक्रि अकारि । जयार्थिभिर्भवद्भिः क्रियताम् । यद्वा । हे यष्टव्या देवाः तदिदं हविरकृयहमपि । करोतेर्लुङीटि ' मन्त्रे घस० ' इति च्लेर्लुक् । अत एव कारणादहम् vअसपत्ना vकिल शत्रुरहिता खलु vअभुवम्[1] अभूवम् । छान्दसो ह्रस्वः ॥

असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी ।
आवृक्षमन्यासां वर्चो राधो अस्थेयसामिव ॥ ५ ॥

असपत्ना । सपत्नऽघ्नी । जयन्ती । अभिऽभूवरी ।
आ । अवृक्षम् । अन्यासाम् । वर्चः । राधः । अस्थेयसाम्ऽइव ॥ ५ ॥

vअसपत्ना अशत्रुका भवामि । कुत इत्यत आह । vसपत्नघ्नी शत्रूणां हन्त्री अत एव vजयन्ती जयं प्राप्नुवती[2] vअभिभूवरी अभिभवित्री ॥ भवतेः ' अन्येभ्योऽपि दृश्यन्ते ' इति क्वनिप् । ' वनो र च ' इति ङीब्रेफौ ॥ ईदृश्यहम् vअन्यासां सपत्नीनां vवर्चः तेजः vराधः धनं च vआवृक्षम् आ समन्तादवृक्षम् । अवृश्चिषम् । अच्छिदम् ॥ व्रश्चेर्लुङि ऊदिरवादिडभावे संयोगादिलोपे छान्दसं संप्रसारणम् ॥ तत्र दृष्टान्तः । vअस्थेयसामिव । अस्थिरतराणां शत्रूणां यथा धनमप्रयत्नेन[3] वृश्च्यते तथेत्यर्थः ॥ स्थिरशब्दादीयसुनि ' प्रियस्थिर० ' इत्यादिना स्थादेशः ॥

समजैषमिमा अहं सपत्नीरभिभूवरी ।
यथाहमस्य वीरस्य विराजानि जनस्य च ॥ ६ ॥

सम् । अजैषम् । इमाः । अहम् । सऽपत्नीः । अभिऽभूवरी ।
यथा । अहम् । अस्य । वीरस्य । विऽराजानि । जनस्य । च ॥ ६ ॥

vअभिभूवरी अभिभवित्री vअहम् vइमाः vसपत्नीः vसमजैषं सम्यगभ्यभूवम् । vयथा येन प्रकारेण vअहमस्य vवीरस्य इन्द्रस्य तदीयपरिजनस्य vच vविराजानि विशेषेण राजमाना भवानि । तथा समजैषमित्यर्थः ॥ ॥ १७ ॥

' तीव्रस्य ' इति पञ्चर्चं नवमं सूक्तं वैश्वामित्रस्य पूरणस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं— ' तीव्रस्य पञ्च पूरणो वैश्वामित्रः ' इति । तीव्रसोमाख्य एकाह इदं निष्केवल्यनिविद्धानम् । सूत्रितं च—' क्व स्य वीरस्तीव्रस्याभिवयस इति मध्यंदिनः '(आश्व. श्रौ. ९. ७) इति । महाव्रतेऽपि माध्यंदिने सवने ब्रह्मशस्त्रेऽप्येतत्सूक्तम् । तथैव पञ्चमारण्यके सूत्रितं—' तीव्रस्याभिवयसो अस्य पाहीति माध्यंदिने ' (ऐ. आ. ५. १. १) इति ॥

तीव्रस्याभिवयसो अस्य पाहि सर्वरथा वि हरी इह मुञ्च ।
इन्द्र मा त्वा यजमानासो अन्ये नि रीरमन् तुभ्यमिमे सुतासः ॥ १ ॥

१. त२.४.५.६.८-म१.४.७-' अभुवं ' नास्ति । २. त२.३.६.७-म४.७—प्राप्नुवती । ३. त४. ५—स्थानमप्रयत्नेन ।

तीव्रस्य । अभिऽवयसः । अस्य । पाहि । सर्वऽरथा । वि । हरी इति । इह । मुञ्च ।
इन्द्र । मा । त्वा । यजमानासः । अन्ये । नि । रीरमन् । तुभ्यम् । इमे । सुतासः ॥ १ ॥

vतीव्रस्य तीक्ष्णस्य क्षिप्रंमदकरस्य vअभिवयसः । वय इत्यन्ननाम । अभिगतं चरुपुरोडाशाद्यन्नं यस्य तादृशस्य vअस्य सोमस्य । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । ईदृशं सोमं हे इन्द्र vपाहि पिब । पिबतेश्छान्दसः शपो लुक् । तदर्थं vसर्वरथा सरणशीलरथौ vहरी अश्वौ vइह अस्मिन् यज्ञगृहे vवि vमुञ्च रथाद्विसृज । हे vइन्द्र अस्मत्तः vअन्ये vयजमानासः यजमानाः vत्वा त्वां vमा vनि vरीरमन् नितरां मा रमयन्तु । वयमेव रमयाम इत्यर्थः । ततः vतुभ्यं त्वदर्थमेव vसुतासः सुता अभिषुताः vइमे प्रत्यक्षेणोपलभ्यमानाः सोमा वर्तन्ते ॥

तुभ्यँ सुतास्तुभ्यमु सोत्वासस्त्वां गिरः श्वात्र्या आ ह्वयन्ति ।
इन्द्रेदमद्य सवनं जुषाणो विश्वस्य विद्वाँ इह पाहि सोमम् ॥ २ ॥

तुभ्यम् । सुताः । तुभ्यम् । ऊँ इति । सोत्वासः । त्वाम् । गिरः । श्वात्र्याः । आ । ह्वयन्ति ।
इन्द्र । इदम् । अद्य । सवनम् । जुषाणः । विश्वस्य । विद्वान् । इह । पाहि । सोमम् ॥२॥

हे इन्द्र vतुभ्यं त्वदर्थमेव vसुताः अभिषुताः सर्वे सोमाः vसोत्वासः इतःपरमभिषोतव्याश्च vतुभ्यमु त्वदर्थमेव । सुनोतेः 'कृत्यार्थे तवैकेन्०' इति त्वन्प्रत्ययः । vश्वात्र्याः शु आशु शीघ्रमतन्त्यः प्रवर्तमानाः vगिरः स्तुतिरूपा वाचश्च vत्वाम् एव vआ vह्वयन्ति आक्रोशयन्ति । हे vइन्द्र vअद्य अस्मिन् काले vइदं vसवनं प्रातःसवनादिकं vजुषाणः सेवमानः vविश्वस्य सर्वस्य vविद्वान् ज्ञाता त्वम् vइह अस्मिन् यज्ञे vसोमं vपाहि पिब ॥

य उशता मनसा सोममस्मै सर्वहृदा देवकामः सुनोति ।
न गा इन्द्रस्तस्य परा ददाति प्रशस्तमिच्चारुमस्मै कृणोति ॥ ३ ॥

यः । उशता । मनसा । सोमम् । अस्मै । सर्वऽहृदा । देवऽकामः । सुनोति ।
न । गाः । इन्द्रः । तस्य । परा । ददाति । प्रऽशस्तम् । इत् । चारुम् । अस्मै । कृणोति ॥३॥

vय[1] vउशता कामयमानेन vसर्वहृदा । सर्वमविकलं हृदयं यस्य । यद्वा । सर्वेषामृत्विजां हृदयेन । सामर्थ्यान्मत्वर्थो लक्ष्यते । हृदयवता vमनसा vअस्मै इन्द्राय vदेवकामः देवमिन्द्रं कामयमानो यजमानः vसोमं vसुनोति अभिषुणोति । vइन्द्रस्तस्य यजमानस्य vगाः vन vपरा vददाति । परादानं विनाशः । न विनाशयति । vअस्मै यजमानाय vचारुं शोभनमत एव vप्रशस्तम् । vइत् इत्यवधारणे । प्रशंसनीयमेव धनं vकृणोति करोति ॥

अनुष्टुप्टो भवत्येषो अस्य यो अस्मै रेवान्न सुनोति सोमम् ।
निररब्धौ मघवा तं दधाति ब्रह्मद्विषो हन्त्यनानुदिष्टः ॥ ४ ॥

अनुऽस्पष्टः । भवति । एषः । अस्य । यः । अस्मै । रेवान् । न । सुनोति । सोमम् ।
निः । अरब्धौ । मघऽवा । तम् । दधाति । ब्रह्मऽद्विषः । हन्ति । अननुऽदिष्टः ॥ ४ ॥

---

१. त१.२.३.७-म२.७.८-'य' नास्ति ।

[v]अस्य यजमानस्य [v]एषः इन्द्रः [v]अनुस्पष्टः दृष्टिगोचरो भवति [v]यः [v]रेवान् धनवान् [v]अस्मै इन्द्राय [v]सोमं [v]सुनोति अभिषुणोति । [v]मघवा धनोपेत इन्द्रः [v]तं यजमानम् [v]अरत्नौ इन्ते [v]निः [v]दधाति भयान्निकृष्य धारयति रक्षिता सन् धृत्वा च [v]अननुदिष्टः तेनानुक्तोऽप्रार्थित एव सन् [v]ब्रह्मद्विषः ब्राह्मणद्वेष्टॄन् शत्रून् [v]हन्ति हिनस्ति ॥

शुनासीरीये पर्वणि 'इन्द्राय शुनासीराय पुरोडाशं द्वादशकपालम्' इत्यस्य 'अश्वायन्तः' इत्येषा याज्या। इन्द्रो वा शुन इति वैकल्पिकस्यापि हविष इयमेव याज्या । सूत्रितं च—'अश्वायन्तो गव्यन्तो वाजयन्तः शुनं हुवेम मघवानमिन्द्रम्' (आश्व. श्रौ. २. २०) इति ॥

अश्वायन्तो गव्यन्तो वाजयन्तो हवामहे त्वोपगन्तवा उ ।
आभूषन्तस्ते सुमतौ नवायां वयमिन्द्र त्वा शुनं हुवेम ॥ ५ ॥

अश्वऽयन्तः । गव्यन्तः । वाजयन्तः । हवामहे । त्वा । उपऽगन्तवै । ऊँ इति ।
आऽभूषन्तः । ते । सुऽमतौ । नवायाम् । वयम् । इन्द्र । त्वा । शुनम् । हुवेम ॥ ५ ॥

[v]अश्वायन्तः अश्वानात्मन इच्छन्तः ॥ क्यचि 'अश्वाघस्यात्' (पा. सू.७.४.३७) इत्यात्वम् ॥ [v]गव्यन्तः गा आत्मन इच्छन्तः ॥ 'वान्तो यि प्रत्यये' (पा. सू. ६. १. ७९) इत्यवादेशः ॥ [v]वाजयन्तः अग्नीन् वाजनेन शूर्पादिना प्रज्वलयन्तः ॥ 'वा गतिगन्धनयोः'। णिचि 'वो विधूनने°' (पा. सू. ७. ३. ३८) इति जुगागमः। अस्माच्छतर्यदुपदेशाल्लसार्वधातुकस्वरेणानुदात्तत्वे[1] शपश्च पित्त्वादनुदात्तत्वे[2] ततो णिच एव स्वरः शिष्यते ॥ अपर आह। वाजमन्नमात्मन इच्छन्त इति। तदानीमवग्रहाभावस्वरौ[3] छान्दसौ द्रष्टव्यौ। एवंभूता वयं हे इन्द्र त्वाम् [v]उपगन्तवै उपगन्तुं प्राप्तुं [v]हवामहे आह्वयामहे ॥ गमेः 'तुमर्थे सेसेन्°' इति तवैप्रत्ययः। गतिसमासे 'तवै चान्तश्च युगपत्' इति गतेः प्रकृतिस्वरत्वमुत्तरपदस्यान्तोदात्तत्वम्॥ [v]उ इति पूरकः। हे [v]इन्द्र [v]ते तव [v]नवायाम् अभिनवायां प्रशस्तायां [v]सुमतौ शोभनबुद्धौ[4] [v]आभूषन्तः आ समन्ताद्भवन्तो वर्तमानाः। यद्वा। आ समन्ताद्भूषयन्तोऽलंकुर्वन्तस्त्वानुग्रहबुद्धौ वर्तमानाः [v]वयं [v]शुनं सुखकरं त्वां [v]हुवेम आह्वयेम॥ ॥१८॥

'मुञ्चामि' इति पञ्चर्चं दशमं सूक्तं प्रजापतिपुत्रस्य यक्ष्मनाशनास्यस्यार्षम् । अन्त्यानुष्टुप् शिष्टास्त्रिष्टुभः । अनादेशो त्विन्द्रो देवता । तथा चानुक्रान्तं—'मुञ्चामि प्राजापत्यो यक्ष्मनाशनो राजयक्ष्मघ्नमन्त्यानुष्टुप्' इति । हृदयरोगप्रमुखस्य[5] व्याधिजातस्योपशमनार्थमनेन सूक्तेन होतव्यम्। सूच्यते हि—'व्याधितस्यातुरस्य[6] यक्ष्मगृहीतस्य वा पलाहुतिश्चरुर्मुञ्चामि त्वा हविषा जीवनाय कमित्येतेन' (आश्व. गृ. ३. ६. ४-५) इति ॥

मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।
ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ॥१ ॥

मुञ्चामि । त्वा । हविषा । जीवनाय । कम् । अज्ञातऽयक्ष्मात् । उत । राजऽयक्ष्मात् ।
ग्राहिः । जग्राह । यदि । वा । एतत् । एनम् ।
तस्याः । इन्द्राग्नी इति । प्र । मुमुक्तम् । एनम् ॥ १ ॥

१. त१.२.३.६.७.८-भ-°नुदात्ते; त४.५-°नुदात्तं। २. त-भ-मु-°दनुदात्तत्वं। ३. त-भ-इदानीम°। ४. ग-भ२-शोभनबुद्धौ अनुग्रहबुद्धौ। ५. ग-त४.५-हृदयरोगप्रमुखस्य। ६. त२.३.४.५.६.८-भ-व्याधितस्याधितस्य।

हे यक्ष्माभिभूत ᵛहविषा अनेन चरुणा साधनेन[1] होमेन[1] ᵛत्वा त्वाम् ᵛअज्ञातयक्ष्मात्। अयमेतत्संज्ञ[2] इत्यप्रज्ञातः शरीरगतो रोगोऽज्ञातयक्ष्मः। तादृशाद्रोगात् ᵛमुञ्चामि विश्लेषयामि। किमर्थम्। ᵛजीवनाय ᵛकं जीवनार्थम्। इह लोके चिरकालावस्थानार्थमित्यर्थः। कमिति पूरकः। ᵛउत अपि च ᵛराजयक्ष्मात्। यक्ष्माणां राजा यक्ष्मरोगो राजयक्ष्मः। राजदन्तादिस्वादुपसर्जनस्य परनिपातः (पा. सू. २. २. ३१)। तस्मादपि त्वां मुञ्चामि। ᵛयदि ᵛवा यदि च ᵛएतत् एतस्मिन् समये ᵛएनं व्याधितं पुरुषं ᵛग्राहिः ग्रहणशीला ग्रहरूपा देवता ᵛजग्राह गृहीतवती ᵛतस्याः देवताया: सकाशाद्धे ᵛइन्द्राग्नी ᵛएनं ᵛप्र ᵛमुमुक्तं प्रमोचयतम्॥

यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव।
तमा हरामि निर्ऋतेरुपस्थादस्पार्षमेनं शतशारदाय॥ २॥

यदि। क्षितऽआयुः। यदि। वा। पराऽइतः। यदि। मृत्योः। अन्तिकम्। निऽइतः। एव। तम्। आ। हरामि। निःऽऋतेः। उपऽस्थात्। अस्पार्षम्। एनम्। शतऽशारदाय॥२॥

ᵛयदि स रोगग्रस्तः ᵛक्षितायुः क्षीणायुर्भवति ᵛयदि ᵛवा ᵛपरेतः अस्माल्लोकात् परागतो भवति ᵛयदि च ᵛमृत्योः वैवस्वतस्य ᵛअन्तिकं निकटं ᵛनीतः नितरां प्राप्तः ᵛएव भवति एवंभूतमपि ᵛतं पुरुषं ᵛनिर्ऋतेः पापदेवताया आयुषः[3] क्षयकारिण्याः ᵛउपस्थात् उपस्थानात्[4] ᵛआ ᵛहरामि आनाययामि आवर्तयामि। आहृत्य च ᵛएनं ᵛशतशारदाय शतसंवत्सरजीवनार्थम् ᵛअस्पार्षं प्रबलं करोमि। 'स्पृ प्रीतिबलनयोः'॥

सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम्।
शतं यथेमं शरदो नयातीन्द्रो विश्वस्य दुरितस्य पारम्॥ ३॥

सहस्रऽअक्षेण। शतऽशारदेन। शतऽआयुषा। हविषा। आ। अहार्षम्। एनम्। शतम्। यथा। इमम्। शरदः। नयाति। इन्द्रः। विश्वस्य। दुःऽइतस्य। पारम्॥ ३॥

ᵛसहस्राक्षेण। सहस्रमिति बहुनाम। सहस्रमक्षीणि चक्षूंषि यस्य हविषः फलत्वेन विद्यन्ते तत् सहस्राक्षम्॥ 'बहुव्रीहौ सक्थ्यक्ष्णोः' (पा. सू. ५. ४. ११३) इति पच् समासान्तः। शरदः संबन्धी शारदः संवत्सरः। शतं शारदा यस्य तत्तथोक्तम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। अत एव ᵛशतायुषा शतसंवत्सरपरिमितमायुर्जीवनं फलभूतं यस्य तादृशेन[5] ᵛहविषा। यद्वा। सहस्राक्ष इन्द्रः। तेन शतशारदेन शरदां संवत्सराणां शतस्य दातृत्वेन संबन्धिना कर्त्रा शतायुषा हविषा करणभूतेन। ᵛएनं यक्ष्मगृहीतम् ᵛआहार्षं रोगादनैषम्[6]। ᵛयथा येन प्रकारेण ᵛइमं पुरुषं ᵛशतं ᵛशरदः संवत्सरान्। अत्यन्तसंयोगे द्वितीया। एतावन्तं कालम् ᵛइन्द्रो ᵛविश्वस्य सर्वस्य ᵛदुरितस्य दुःखस्य ᵛपारम् अवसानं दुःखराहित्यं ᵛनयाति नयेन तथाहार्षमित्यर्थः॥

शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान्।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः॥ ४॥

---

१. त-भ१.२.४.८–साधनहोमेन। २. त-भ१.२.४.८–अनेन तत्संज्ञ। ३. त१.२.३.७-भ१.२.४.८–मानुषः; भ७–मनुष्य। ४. ग-त४.५-भ२–उपस्थानात् समीपात्। ५. ग-त१.२.३.६.७.८-भ–तादृशेनानेन; त४.५–तादृशमनेन। ६. ग-त४.५-भ२–रोगादानैषं; त१.२.३.६.७–रोगादानैषां।

शतम् । जीव । शरदः । वर्धमानः । शतम् । हेमन्तान् । शतम् । ऊँ इति । वसन्तान् । शतम् । इन्द्राग्नी इति । सविता । बृहस्पतिः । शतऽआयुषा । हविषा । इमम् । पुनः । दुः ॥४॥

हे यक्ष्माद्विमुक्त ᵛवर्धमानः अहरहरभिवृद्धिं प्राप्नुवंस्त्वं ᵛशतं ᵛशरदः शतसंख्याकान् शरदृतून् ᵛजीव प्राणान् धारय । पूर्ववदत्यन्तसंयोगे द्वितीया । ᵛशतं ᵛहेमन्तान् हेमन्तर्तूंश्च जीव ᵛशतं ᵛवसन्तान् च । उशब्दः समुच्चये । अपि च ᵛइन्द्राग्नी इन्द्रश्चाग्निश्च ᵛसविता प्रेरको देवश्च ᵛबृहस्पतिः बृहतां देवानां पालयिता देवश्च ᵛशतायुषा शतसंवत्सरपरिमितस्यायुषो हेतुभूतेन ᵛहविषा तर्प्यमाणाः सन्तः ᵛइमं जनं ᵛपुनर्दुः पुनरस्मभ्यं प्रादुः ॥

आहार्षं त्वाविदं त्वा पुनरागाः पुनर्नव ।
सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ॥ ५ ॥

आ । अहार्षम् । त्वा । अविदम् । त्वा । पुनः । आ । अगाः । पुनःऽनव ।
सर्वाऽअङ्ग । सर्वम् । ते । चक्षुः । सर्वम् । आयुः । च । ते । अविदम् ॥ ५ ॥

हे व्याधिगृहीत ᵛत्वा त्वाम् ᵛआहार्षं मृत्योः सकाशादाहृतवानस्मि । अत एव ᵛत्वा त्वाम् ᵛअविदम् अलप्सि । हे ᵛपुनर्नव पुनरभिनव[1] ᵛपुनरागाः पुनरस्मत्समीपमागच्छ । हे ᵛसर्वाङ्ग सर्वैरविकलैरङ्गैरुपेत ᵛते तव ᵛसर्वं ᵛचक्षुः । उपलक्षणमेतत् । इन्द्रियवर्गं सकलम् ᵛअविदं लब्धवानस्मि । ᵛते तव ᵛआयुः जीवनं ᵛच ᵛसर्वं संपूर्णमविदम् ॥ ॥ १९ ॥

'ब्रह्मणाग्निः' इति षड्ऋचमेकादशं सूक्तमानुष्टुभम् । ब्रह्मपुत्रो रक्षोहा नामर्षिः । अपप्रसवसमाधानरूपस्य गर्भरक्षणस्य[2] प्रतिपाद्यत्वात्तद्देवताकमिदम् । अनुक्रान्तं च—'ब्रह्मणा षड् ब्राह्मो रक्षोहा गर्भसंस्रावे प्रायश्चित्तमानुष्टुभं हि' इति । विनियोगो लिङ्गादवगन्तव्यः ॥

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः ।
अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥ १ ॥

ब्रह्मणा । अग्निः । सम्ऽविदानः । रक्षःऽहा । बाधताम् । इतः ।
अमीवा । यः । ते । गर्भम् । दुःऽनामा । योनिम् । आऽशये ॥ १ ॥

ᵛब्रह्मणा मन्त्रेण सह ᵛसंविदानः ऐकमत्यं प्राप्तः ᵛरक्षोहा रक्षसां हन्ता ᵛअग्निः ᵛइतः अस्मात्स्थानात् राक्षसादिकं ᵛबाधतां हिनस्तु । ᵛयः राक्षसः ᵛअमीवा रोगरूपः सन् ᵛते तव ᵛगर्भम् ᵛआशये आशेते । 'लोपस्त आत्मनेपदेषु' इति तलोपः । हन्तुं प्राप्नोति । ᵛदुर्नामा अर्शआख्यो रोगः । तद्रूपः सन् यश्च ते तव ᵛयोनिं रेतस आधानं गर्भस्थानमाशेते[3] तं बाधतामित्यन्वयः॥

यस्ते गर्भममीवा दुर्णामा योनिमाशये ।
अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ॥ २ ॥

यः । ते । गर्भम् । अमीवा । दुःऽनामा । योनिम् । आऽशये ।
अग्निः । तम् । ब्रह्मणा । सह । निः । क्रव्यऽअदम् । अनीनशत् ॥ २ ॥

---

१. ग-त१.६-पुनरभिनवमुत्पन्न; त२.३-पुनरभिवमुत्पन्न; त७-पुनरभिषमुत्पन्न; भ१.४.८-पुनरभिभवमुत्सन्न; भ२-पुनरभिभवमुत्पन्न । २. त४.५-गर्भलक्षणस्य । ३. त४.५-गर्भस्यायतनमाशेते ।

गतः पूर्वोऽर्धर्चः । यं यक्ष्मादं मांसाशिनं राक्षसादिकं यब्रह्मणा सहितः यअग्निः निःशेषेण यअनीनशत्[1] नाशयतु ॥

यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम् ।
जातं यस्ते जिघांसति तमितो नाशयामसि ॥ ३ ॥

यः । ते । हन्ति । पतयन्तम् । निऽसत्स्नुम् । यः । सरीसृपम् ।
जातम् । यः । ते । जिघांसति । तम् । इतः । नाशयामसि ॥ ३ ॥

हे योषित् यते तव गर्भाशये यपतयन्तं पतन्तं रेतोरूपेण गच्छन्तं तदनन्तरं तत्र यनिषत्स्नुं निषीदन्तं च गर्भं यः राक्षसादिः यहन्ति हिनस्ति ततो मासत्रयादूर्ध्वं प्राप्तसर्वावयवं यसरीसृपं सर्पणशीलं च गर्भं यः[2] हन्ति यजातं[2] दशसु मासेषूत्पन्नं यते तव शिशुं यः राक्षसादिः यजिघांसति हन्तुमिच्छति यतमितः स्थानात् यनाशयामसि नाशयामः[3] ॥

यस्ते ऊरू विहरत्यन्तरा दंपती शये ।
योनिं यो अन्तरारेळिह तमितो नाशयामसि ॥ ४ ॥

यः । ते । ऊरू इति । विऽहरति । अन्तरा । दंपती इति दम्ऽपती । शये ।
योनिम् । यः । अन्तः । आऽरेळिह । तम् । इतः । नाशयामसि ॥ ४ ॥

हे योषित् यते तव यऊरू पादमूलौ यः राक्षसादिः यविहरति गर्भघाताय विश्लिष्टौ करोति यदंपती यअन्तरा जायापत्योर्मध्ये गर्भहननार्थं यश्च यशये शेते यः च योनिम् यअन्तः प्रविश्य यआरेळिह निषिक्तं रेतो जिह्वया आस्वादयति ॥ भक्षयतीत्यर्थः । 'लिह आस्वादने' । आदादिकः । कपिलकादित्वाल्लत्वविकल्पः ॥

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते ।
प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥ ५ ॥

यः । त्वा । भ्राता । पतिः । भूत्वा । जारः । भूत्वा । निऽपद्यते ।
प्रऽजाम् । यः । ते । जिघांसति । तम् । इतः । नाशयामसि ॥ ५ ॥

हे योषित् यः राक्षसः यभ्राता भ्रातृरूपो यभूत्वा यपतिः भर्तृरूपो वा भूत्वा त्वां यनिपद्यते अभिगच्छति । अथवा यजारः उपपतिरूपो वा यभूत्वा अभिगच्छति । एवंभूतः यः राक्षसादिः यते तव यप्रजां यजिघांसति हन्तुमिच्छति । स्पष्टमन्यत् ॥

यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते ।
प्रजां यस्ते जिघांसति तमितो नाशयामसि ॥ ६ ॥

यः । त्वा । स्वप्नेन । तमसा । मोहयित्वा । निऽपद्यते ।
प्रऽजाम् । यः । ते । जिघांसति । तम् । इतः । नाशयामसि ॥ ६ ॥

१. त-भ-अनीनशत् नाशयत् । २. त४.५-योनिजातं । ३. त-भ-नाशयाम ।

हे योषित् [v]यः राक्षसादिः [v]स्वप्नेन स्वप्नावस्थया[1] [v]तमसा निद्रया[2] [v]त्वा त्वां [v]मोहयित्वा मूढतां प्रापय्य [v]निपद्यते गर्भघाताय गच्छति। अन्यद्गतम् ॥ ॥ २० ॥

'अक्षीभ्याम्' इति षड्चं द्वादशं सूक्तमानुष्टुभम्। काश्यपगोत्रोत्पन्नो विवृहा नामर्षिः। यक्ष्मनाशनप्रतिपाद्यत्वात्तद्देवताकं कृत्स्नं सूक्तम्। अनुक्रान्तं च—'अक्षीभ्यां विवृहा काश्यपो यक्ष्मघ्नम्' इति। लैङ्गिको विनियोगः ॥

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥ १ ॥

अक्षीभ्याम्। ते। नासिकाभ्याम्। कर्णाभ्याम्। छुबुकात्। अधि।
यक्ष्मम्। शीर्षण्यम्। मस्तिष्कात्। जिह्वायाः। वि। वृहामि। ते ॥ १ ॥

हे यक्ष्मगृहीत [v]ते तव [v]अक्षीभ्यां चक्षुर्भ्यां यक्ष्मरोगं [v]वि [v]वृहामि उद्धारयामि। विश्लेषयामीत्यर्थः ॥ 'ई च द्विवचने' (पा. सू. ७. १. ७७) इत्यक्षिशब्दस्येकारान्तादेशः। स चोदात्तः ॥ तथा [v]नासिकाभ्यां घ्राणेन्द्रियाच्च [v]कर्णाभ्यां श्रोत्राभ्यां च [v]छुबुकात् चुबुकादोष्ठस्याधःप्रदेशाच्च। अधिरनर्थकः[3]। अपि च [v]शीर्षण्यम्। शिरसि[4] भवो रोगः शीर्षण्यः। 'भवे छन्दसि' इति यत्। 'ये च तद्धिते' (पा. सू. ६. १. ६१) इति शिरसः शीर्षन्नादेशः। 'ये चाभावकर्मणोः' (पा. सू. ६. ४. १६८) इति प्रकृतिभावः ॥ ईदृशं [v]यक्ष्मं रोगं [v]ते तव [v]मस्तिष्कात्। शिरसोऽन्तरवस्थितो मांसविशेषो मस्तिष्कः। तस्मात् [v]जिह्वायाः रसनायाश्च सकाशाद्वि वृहामि उद्धारयामि। पृथक्करोमीत्यर्थः। 'वृहू उद्यमने' इति धातुः ॥

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्।
यक्ष्मं दोषण्यं१ मंसाभ्यां बाहुभ्यां वि वृहामि ते ॥ २ ॥

ग्रीवाभ्यः। ते। उष्णिहाभ्यः। कीकसाभ्यः। अनूक्यात्।
यक्ष्मम्। दोषण्यम्। अंसाभ्याम्। बाहुऽभ्याम्। वि। वृहामि। ते ॥ २ ॥

हे व्याधिगृहीत [v]उष्णिहाभ्यः ऊर्ध्वाभिमुखं स्निग्धाभ्य उत्स्नाताभ्यो[5] वा स्नायुभ्यः [v]ग्रीवाभ्यः गलगताभ्यो धमनीभ्यः [v]ते तव [v]यक्ष्मं [v]वि [v]वृहामि। तथा [v]कीकसाभ्यः अस्थिभ्यः [v]अनूक्यात् अस्थिसंधेश्च यक्ष्मं वि वृहामि। 'उच समवाये'। अनूच्यते समवेयत इत्यस्थ्नः संधिरनूक्यः। ऋहलोर्ण्यत्। 'चजोः कु घिण्ण्यतोः' इति कुत्वम्। तित्स्वरितः। अपि च दोष्णोर्भवं [v]दोषण्यम्। पूर्ववद्यति 'पहन्' इत्यादिना दोःशब्दस्य दोषन्नादेशः। पूर्ववत्प्रकृतिभावः। तमपि[6] यक्ष्मं रोगं [v]ते तव [v]अंसाभ्यां [v]बाहुभ्यां च वि वृहामि। हस्तयोरूर्ध्वभागावंसावधोभागौ बाहू ॥

आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि।
यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते ॥ ३ ॥

---

१. त१.२.६.८-भ१-स्वप्नावस्थया; त४.५.७-भ४-मु-स्वप्नावस्थायां। २. त४.५-निद्रायां। ३. त-भ-मु-अधिर्निरर्थकः। ४. त-भ-शिरसो। ५. त४.५-उत। ६. त-भ-कर्म तमपि।

आन्त्रेभ्यः । ते । गुदाभ्यः । वनिष्ठोः । हृदयात् । अधि ।
यक्ष्मम् । मतस्नाभ्याम् । यकृः । प्लाशिऽभ्यः । वि । वृहामि । ते ॥ ३ ॥

हे यक्ष्माभिभूत ᵛते तव[1] ᵛआन्त्रेभ्यः । आन्त्रं पुरीतदन्नपानयोराधानभूतम्[2] । तत्संबन्धिभ्यः स्नायुभ्यः ᵛगुदाभ्यः याभिर्नाडीभिरन्नरसः समानवायुना धातुषु नीयते ताभ्यो नाडीभ्यश्च सकाशात् यक्ष्मं वि वृहामि । तथा ᵛवनिष्ठोः स्थविरान्त्रात् ᵛहृदयादधि हृदयपुण्डरीकाच्च यक्ष्मं वि वृहामि । अपि च ᵛते तव ᵛमतस्नाभ्याम् । मतस्नौ पार्श्वयोर्वर्तमानावाम्रफलाकृती वृक्कौ । ताभ्यां ᵛयक्नः । हृदयसमीपे वर्तमानः कालमांसविशेषो यकृत् । तस्माच्च । 'पहन्°' इत्यादिना यकृच्छब्दस्य यकन्नादेशः । ᵛप्लाशिभ्यः अन्येभ्योऽपि क्लोमप्लीहादिसंज्ञेभ्यश्च मांसेभ्यश्च ᵛयक्ष्मं रोगं ᵛवि ᵛवृहामि उत्क्षिपामि ॥

ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं श्रोणिभ्यां भासदाद्भंससो वि वृहामि ते ॥ ४ ॥

ऊरुऽभ्याम् । ते । अष्ठीवत्ऽभ्याम् । पार्ष्णिऽभ्याम् । प्रऽपदाभ्याम् ।
यक्ष्मम् । श्रोणिऽभ्याम् । भासदात् । भंससः । वि । वृहामि । ते ॥ ४ ॥

हे रुग्ण ᵛते तव ᵛऊरुभ्याम् ᵛअष्ठीवद्भ्यां जानुभ्यां च ᵛयक्ष्मं ᵛवि ᵛवृहामि । तथा ᵛपार्ष्णिभ्यां पादस्यापरभागाभ्यां ᵛप्रपदाभ्यां पादाग्राभ्यां च यक्ष्मं वि वृहामि । अपि च ᵛश्रोणिभ्यां जघनाभ्यां च यक्ष्मं वि वृहामि । तथा ᵛभासदात् । भसत् कटिप्रदेशः । तत्संबन्धात् ᵛभंससः भासमानात् पायोः ᵛते तव यक्ष्मं वि वृहामि ॥

मेहनाद्वनंकरणाल्लोमभ्यस्ते नखेभ्यः ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥ ५ ॥

मेहनात् । वनम्ऽकरणात् । लोमऽभ्यः । ते । नखेभ्यः ।
यक्ष्मम् । सर्वस्मात् । आत्मनः । तम् । इदम् । वि । वृहामि । ते ॥ ५ ॥

ᵛवनंकरणात् । वनमुदकं शारीरम्[3] । तत्क्रियते विसृज्यते येन तद्वनंकरणम् । तस्मात् ᵛमेहनात् मेढ्रात् ᵛते तव ᵛलोमभ्यः ᵛनखेभ्यः च ᵛयक्ष्मं ᵛवि ᵛवृहामि । किं बहुना । ᵛइदम् इदानीं ᵛतं यक्ष्मं ᵛसर्वस्मादात्मनः कृत्स्नादेव ᵛते तव शरीरात् वि वृहामि ॥

अङ्गादङ्गाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि ।
यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते ॥ ६ ॥

अङ्गात्ऽअङ्गात् । लोम्नःऽलोम्नः । जातम् । पर्वणिऽपर्वणि ।
यक्ष्मम् । सर्वस्मात् । आत्मनः । तम् । इदम् । वि । वृहामि । ते ॥ ६ ॥

ᵛअङ्गादङ्गात् सर्वेभ्योऽङ्गेभ्यः ᵛलोम्नोलोम्नः सर्वेभ्यो लोमभ्यश्च ᵛपर्वणिपर्वणि अवयववान्[4] संधौ ᵛजातम् उत्पन्नं ᵛयक्ष्मं ᵛवि ᵛवृहामि । अन्यद्गतम् ॥ ॥२१॥

---

१. त१.२.३.७-म१.२.८-तव त्वं । २. त१.२.३.६.७-°राधारभूतं । ३. त-भ-मु-शरीरं । ४. भ२-संधौ संधौ ।

'अपेहि' इति पञ्चर्चं त्रयोदशं सूक्तमाङ्गिरसस्य प्रचेतस आर्षम्। तृतीया त्रिष्टुप् पञ्चमी पङ्क्तिः। दुःस्वप्ननाशनं देवता। तथा चानुक्रान्तम्—'अपेहि पञ्च प्रचेता दुःस्वप्नघ्नं पङ्क्त्यन्तं त्रिष्टुम्मध्यम्' इति। लैङ्गिको विनियोगः॥

अपेहि मनसस्पतेऽप क्राम परश्चर।
परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः॥ १॥

अप। इहि। मनसः। पते। अप। क्राम। परः। चर।
परः। निःऽऋत्यै। आ। चक्ष्व। बहुधा। जीवतः। मनः॥ १॥

हे [v]मनसस्पते स्वप्नावस्थस्य मनसः स्वामिन् दुःस्वप्नाधिदेव [v]अपेहि अपगच्छ। स्वप्नावस्थावतो मत्तो निर्गच्छ। निर्गत्य च [v]अप [v]क्राम। देशान्तरं गन्तुं पादौ विक्षिप। दूरदेशं गच्छेत्यर्थः। अपक्रम्य च [v]परः परस्ताद्विप्रकृष्टे देशे [v]चर यथेच्छं वर्तस्व। अपि च [v]निर्ऋत्यै पापदेवतायै [v]परः परस्ताद्वर्तमानायै [v]आ [v]चक्ष्व। वयं न बाधनीया इति प्रब्रूहि। [v]जीवतः मम [v]मनः [v]बहुधा बहुप्रकारं भवति। भोक्तव्येषु बहुषु विषयेषूत्सुकं सत् वर्तते। अतस्तद्विनाशकं दुःस्वप्नदर्शनं नश्यत्वित्यर्थः॥

भद्रं वै वरं वृणते भद्रं युञ्जन्ति दक्षिणम्।
भद्रं वैवस्वते चक्षुर्बहुत्रा जीवतो मनः॥ २॥

भद्रम्। वै। वरम्। वृणते। भद्रम्। युञ्जन्ति। दक्षिणम्।
भद्रम्, वैवस्वते। चक्षुः। बहुऽत्रा। जीवतः। मनः॥ २॥

[v]भद्रं [v]वै शोभनमेव [v]वरं वरणीयं दुःस्वप्नविनाशरूपं फलं [v]वृणते सर्वे जनाः प्रार्थयन्ते। [v]दक्षिणं प्रवृद्धं [v]भद्रं शोभनं तत्फलं [v]युञ्जन्ति प्राप्नुवन्ति च। [v]वैवस्वते विवस्वतः पुत्रे यमे विषये [v]भद्रं शोभनमेव [v]चक्षुः दर्शनमहं प्रार्थये। दुःस्वप्नाधिदेवो वैवस्वतोऽस्मान्मा बाधताम्। भद्रमेव दर्शनमिह लोकेऽवस्थानलक्षणं करोत्वित्यर्थः। [v]बहुत्रा बहुषु हि विषयेषु [v]जीवतः मम [v]मनः वर्तते॥

यदाशसा निःशसाभिशसोपारिम जाग्रतो यत्स्वपन्तः।
अग्निर्विश्वान्यप दुष्कृतान्यजुष्टान्यारे अस्मद्दधातु॥ ३॥

यत्। आऽशसा। निःऽशसा। अभिऽशसा। उपऽआरिम। जाग्रतः। यत्। स्वपन्तः।
अग्निः। विश्वानि। अप। दुःऽकृतानि। अजुष्टानि। आरे। अस्मत्। दधातु॥ ३॥

[v]यत् दुष्कृतम् [v]आशसा आशंसनेनाभिलाषेण [v]जाग्रतः जागरणावस्थायां वर्तमाना वयम् [v]उपारिम उपगतवन्तः स्म [v]यत् च [v]स्वपन्तः स्वप्नावस्थां प्राप्ता उपगतवन्तः स्म। तथा [v]निःशसा निश्शंसनेन निर्गताभिलाषेण [v]अभिशसा अभिगताभिलाषेण च कारणेनावस्थाद्वये यद्दुष्कृतमुपागच्छेम[1]। तानि [v]विश्वानि सर्वाणि [v]अजुष्टानि असेव्यान्यप्रियाणि वा [v]दुष्कृतानि दुष्कर्माणि [v]अग्निः [v]अस्मत् [v]आरे अस्मत्तो दूरदेशे [v]अप [v]दधातु अपकृष्य स्थापयतु॥

---

१. त१.२.३.७-म१.२.८-°मुपागच्छाम; भ७-°मुपगच्छेम।

यदिन्द्र ब्रह्मणस्पतेऽभिद्रोहं चरामसि । प्रचेता न आङ्गिरसो द्विषतां पात्वंहसः ॥४॥

यत् । इन्द्र । ब्रह्मणः । पते । अभिऽद्रोहम् । चरामसि ।
प्रऽचेताः । नः । आङ्गिरसः । द्विषताम् । पातु । अंहसः ॥ ४ ॥

हे ᵛइन्द्र हे ᵛब्रह्मणस्पते युवयोर्विषये ᵛयत् ᵛअभिद्रोहम् अभितो द्रोहकं पापं दुःस्वप्नकारणं ᵛचरामसि आचरामः कुर्मः तस्मादभिद्रोहादस्मात् रक्षतमिति शेषः । अपि च ᵛआङ्गिरसः अङ्गिरोभिः स्तोतृभिः सबान्धवः[1] ᵛप्रचेताः प्रकृष्टज्ञानो वरुणश्च ᵛद्विषतां द्वेष्टॄणाम् ᵛअंहसः तत्कर्तृकादस्मद्विषयात्पापात् ᵛनः अस्मान् ᵛपातु रक्षतु । यद्वा । विभक्तिव्यत्ययः । आङ्गिरसमङ्गिरोगोत्रं प्रचेतसमृषिं नः । वचनव्यत्ययः । मां द्विषतामंहसः पातु । प्रकृतत्वादिन्द्र इति गम्यते ॥

अजैष्माद्यासनाम चाभूमानागसो वयम् ।
जाग्रत्स्वप्नः संकल्पः पापो यं द्विष्मस्तं स ऋच्छतु यो नो द्वेष्टि तमृच्छतु ॥५॥

अजैष्म । अद्य । असनाम । च । अभूम । अनागसः । वयम् ।
जाग्रत्ऽस्वप्नः । सम्ऽकल्पः । पापः । यम् । द्विष्मः । तम् । सः । ऋच्छतु ।
यः । नः । द्वेष्टि । तम् । ऋच्छतु ॥ ५ ॥

ᵛअद्य अस्मिन् काले ᵛअजैष्म । जेतव्यानि सर्वाणि जितवन्तोऽभूम दुःस्वप्नस्य नष्टत्वात् । तदनन्तरम् ᵛअसनाम ᵛच संभक्तव्यानि च समभजाम । तथा ᵛवयम् ᵛअनागसः अनपराधाश्च ᵛअभूम । जाग्रत्स्वप्नावस्थयोः संबन्धी ᵛपापः पापफलरूपः ᵛसः ᵛसंकल्पः दुःस्वप्नाध्यवसायः ᵛयं शत्रुं वयं ᵛद्विष्मः ᵛतम् ᵛऋच्छतु प्राप्नोतु । ᵛयः च ᵛनः अस्मान् ᵛद्वेष्टि ᵛतमृच्छतु प्राप्नोतु[2] ॥

'देवाः' इति पञ्चर्चं चतुर्दशं सूक्तं निर्ऋतिपुत्रस्य कपोतास्यस्यार्षं त्रैष्टुभं वैश्वदेवम् । तथा चानुक्रान्तं—'देवा नैर्ऋतः कपोतः कपोतोपहतौ प्रायश्चित्तं[3] वैश्वदेवम्' इति । कपोतो यदि गृहं प्रविशेत् तदानेन सूक्तेन होतव्यम् । सूत्र्यते हि—'कपोतश्चेदगारमुपहन्यादनुपवेद्वा देवाः कपोत इति प्रस्तृचं जुहुयाज्जपेद्वा' (आश्व. गृ. ३. ७. ७) इति ॥

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम ।
तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥१॥

देवाः । कपोतः । इषितः । यत् । इच्छन् । दूतः । निःऽऋत्याः । इदम् । आऽजगाम ।
तस्मै । अर्चाम । कृणवाम । निःऽकृतिम् । शम् । नः । अस्तु । द्विऽपदे । शम् । चतुःऽपदे ॥ १ ॥

हे ᵛदेवाः ᵛइषितः प्राप्तः ᵛनिर्ऋत्याः पापदेवतायाः ᵛदूतः अनुचरः ᵛकपोतः ᵛयत् बाधनम् ᵛइच्छन् अभिलषन् ᵛइदम् अस्मदीयं गृहम् ᵛआजगाम प्राप्नोत् ᵛतस्मै बाधनाय तद्बाधननिवृत्यर्थम् ᵛअर्चाम । युष्मान् हविषा पूजयाम । ततः ᵛनिष्कृतिं कपोतप्रवेशाजन्यस्य दोषस्य परिहृतिं ᵛकृणवाम । अनेन हविर्दानेन करवाम । अतः ᵛनः अस्माकं ᵛद्विपदे पुत्राय[4] ᵛशं सुखम् ᵛअस्तु ᵛचतुष्पदे गवाश्वप्रभृतये च ᵛशं सुखमस्तु ॥

---

१. त१.२.३.७-म१.२.४.८-संबंधः; भ७-संबंधवः । २. अनु.-प्रायश्चित्तमिदं । ३. ग-त४.५-पुत्रादये ।

शिवः कपोतं इषितो नो अस्त्वनागा देवाः शकुनो गृहेषु ।
अग्निर्हि विप्रो जुषतां हविर्नः परि हेतिः पक्षिणी नो वृणक्तु ॥ २ ॥

शिवः । कपोतः । इषितः । नः । अस्तु । अनागाः । देवाः । शकुनः । गृहेषु ।
अग्निः । हि । विप्रः । जुषताम् । हविः । नः । परि । हेतिः । पक्षिणी । नः । वृणक्तु ॥ २ ॥

हे [v]देवाः [v]नः अस्माकं [v]गृहेषु [v]इषितः गतः कपोताख्यः [v]शकुनः पक्षी [v]शिवः सुखकरः [v]अनागाः अपापहेतुश्च [v]अस्तु । [v]हि यस्मात् [v]विप्रः मेधावी [v]अग्निः [v]नः अस्माकं [v]हविः युष्मभ्यं परिकल्पितं [v]जुषतां जुषते अतो युष्मत्प्रसादात् [v]पक्षिणी पक्षोपेता [v]हेतिः हननहेतुः कपोतः [v]नः अस्मान् [v]परि [v]वृणक्तु अस्मान् परित्यजतु । मा बाधतामित्यर्थः ॥

हेतिः पक्षिणी न दभात्यस्मानाष्ट्र्यां पदं कृणुते अग्निधाने ।
शं नो गोभ्यश्च पुरुषेभ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः ॥ ३ ॥

हेतिः । पक्षिणी । न । दभाति । अस्मान् । आष्ट्र्याम् । पदम् । कृणुते । अग्निऽधाने ।
शम् । नः । गोभ्यः । च । पुरुषेभ्यः । च । अस्तु ।
मा । नः । हिंसीत् । इह । देवाः । कपोतः ॥ ३ ॥

[v]पक्षिणी पक्षोपेता [v]हेतिः हननहेतुः कपोतः [v]अस्मान् [v]न [v]दभाति न हिनस्तु । [v]आष्ट्र्यां व्याप्तायामरण्यान्याम् [v]अग्निधाने अग्निर्निधीयतेऽस्मिन्नित्यग्निसहिते प्रदेशे [v]पदं स्थानं [v]कृणुते करोति । तत्रैव प्रदेशे निवसत्वित्यर्थः । यद्वा[1] । अभ्यन्यस्मिन्नित्याष्ट्री पचनशाला । तस्याम् । अग्निधाने यत्र पचनाग्निर्निधीयते तस्मिन् प्रदेशे पदं पादनिधानं[2] कृणुते करोति । तद्धेतुको बाधो नोऽस्माकं न भवत्वित्यर्थः । अपि च [v]नः अस्माकं [v]गोभ्यश्च [v]पुरुषेभ्यश्च [v]शं सुखं शंसनीयानां दोषाणां शान्तिर्वा [v]अस्तु भवतु । हे [v]देवाः [v]इह अस्मिन् गृहे [v]कपोतः [v]नः अस्मान् [v]मा [v]हिंसीत् । युष्मदनुग्रहात् मा बाधताम् ॥

यदुलूको वदति मोघमेतद्यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥ ४ ॥

यत् । उलूकः । वदति । मोघम् । एतत् । यत् । कपोतः । पदम् । अग्नौ । कृणोति ।
यस्य । दूतः । प्रऽहितः । एषः । एतत् । तस्मै । यमाय । नमः । अस्तु । मृत्यवे ॥ ४ ॥

[v]उलूकः घूकसंज्ञः पक्षी [v]यत् अशोभनं [v]वदति ब्रवीति आत्मीयेन शब्देन सूचयति [v]एतत् [v]मोघं निष्फलमस्तु । [v]कपोतः च [v]अग्नौ अग्निमति गृहमध्ये [v]यत् [v]पदं [v]कृणोति करोति एतदपि मोघं निर्वीर्यमस्तु । [v]प्रहितः प्रेषितः [v]एषः कपोतः [v]यस्य स्वामिनः [v]दूतः अनुचरो भवति [v]तस्मै[3] नाम[4] [v]मृत्यवे मारयित्रे [v]यमाय[5] [v]एतत्[6] [v]नमः प्रणामः [v]अस्तु भवतु ॥

---

१. त-भ–' यद्वा ' नास्ति । २. त-भ–पदा निधानं । ३. त-भ–तस्य । ४. ग२–यमाय । ५. ग-त४. ५–' यमाय ' नास्ति । ६. त१.२.३.६.७.८-भ–एतन्नामकाय; त४.५–एवं ।

ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परि गां नयध्वम् ।
संयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्र पतात्पतिष्ठः ॥ ५ ॥

ऋचा । कपोतम् । नुदत । प्रऽनोदम् । इषम् । मदन्तः । परि । गाम् । नयध्वम् ।
सम्ऽयोपयन्तः । दुःऽइतानि । विश्वा । हित्वा । नः । ऊर्जम् । प्र । पतात् । पतिष्ठः॥५॥

हे देवाः ᵛऋचा मन्त्रेण स्तूयमानाः सन्तो यूयं ᵛप्रणोदं प्रकर्षेण नोदनीयं बहिष्कर्तव्यं ᵛकपोतं पक्षिणं ᵛनुदत अस्माद्गृहात् प्रेरयत निर्गमयत । तथा ᵛमदन्तः अस्माभिर्दत्तैर्हविर्भिर्माद्यन्तः ᵛइषम् अन्नं ᵛगां च ᵛपरि ᵛनयध्वं परितोऽस्मभ्यं प्रापयत । किं कुर्वन्तः । ᵛविश्वा विश्वानि सर्वाणि ᵛदुरितानि कपोतोपहतिजन्यानि दोषजातानि ᵛसंयोपयन्तः अदृश्यानि कुर्वन्तः । अपि च ᵛपतिष्ठः अतिशयेन पतिता शीघ्रोत्पातकः[१] कपोतः ᵛनः अस्माकम् ᵛऊर्जम् अन्नं ᵛहित्वा परित्यज्य ᵛप्र ᵛपतात् प्रकर्षेण पततु । पक्षाभ्यामुत्पततु ॥ ॥२३॥

'ऋषभम्' इति पञ्चर्चं पञ्चदशं सूक्तं वैराजस्य शाक्करस्य वर्षभाख्यस्यार्षं पञ्चमी षडृचका महापङ्क्तिः[२] । सपत्ननाशनरूपोऽर्थो देवता । तथा चानुक्रान्तम्—'ऋषभमृषभो वैराजः शाक्करो वा सपत्नघ्नमानुष्टुभं महापङ्क्त्यन्तम्' इति । प्रयाणसमये [illegible] जपेत् । सूत्रितं च—'ऋषभं मा समानानामित्यभिक्रामन्' (आश्व. गृ. २. ६. १३) इति ॥

ऋषभं मा समानानां सपत्नानां विषासहिम् ।
हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम् ॥ १ ॥

ऋषभम् । मा । समानानाम् । सऽपत्नानाम् । विऽससहिम् ।
हन्तारम् । शत्रूणाम् । कृधि । विऽराजम् । गोऽपतिम् । गवाम् ॥ १ ॥

हे सपत्ननाशनाभिमानिन्निन्द्र[३] ᵛमा मां ᵛसमानानां सदृशानामस्मत्कुलीनानां मध्ये ᵛऋषभम् ऋषभवत्प्रशस्तं ᵛकृधि कुरु । तथा ᵛसपत्नानां शत्रूणां ᵛविषासहिं विशेषेणाभिभवितारं कुरु । येऽस्मत्कुल एव जाता अस्माकमेवानिष्टमाचरन्ति ते सपत्नाः । अपि च ᵛशत्रूणाम् अन्येषामपि शातयितॄणां वैरिणां ᵛहन्तारं[४] हिंसितारं ᵛकृधि कुरु । तथा ᵛविराजं विशेषेण राजमानं ᵛगोपतिं गोस्वामिनं च मां कुरु । न केवलमेकस्या एव गोः पतिम् अपि तु सर्वासामित्याह ᵛगवाम् इति ॥

अहमस्मि सपत्नहेन्द्रइवारिष्टो अक्षतः ।
अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ॥ २ ॥

अहम् । अस्मि । सपत्नऽहा । इन्द्रःऽइव । अरिष्टः । अक्षतः ।
अधः । सऽपत्नाः । मे । पदोः । इमे । सर्वे । अभिऽस्थिताः ॥ २ ॥

१. त-भ२.४.८–शीघ्रोत्पादनः; भ१–शीघ्रोत्पादकः । २. भ७–महापंक्तिः । शिष्टा अनुष्टुभः ।
३. त१.२.३.६.७.८-भ१.४.७.८–सपत्नाभिमानिन्निंद्र । ४. ग-त१.२.३.६.७.८-भ४.५–हंतारं मां; भ२.८–हंतारं मा ।

vअहं vसपत्नहा सपत्नानां शत्रूणां हन्ता vअस्मि भवामि। vइन्द्रइव इन्द्रो यथा केनाप्यहिंसितो भवति तथाहमपि vअरिष्टः अहिंसितः vअक्षतः अव्रणश्च भवामि। vइमे दृश्यमानाः vसर्वे vसपत्नाः vमे मम vपदोः पादयोः vअधः अधस्तात् vअभिष्ठिताः आक्रान्ता भवन्तु ॥

अत्रैव वोऽपि नह्याम्युभे आर्त्नीइव ज्यया ।
वाचस्पते नि षेधेमान्यथा मदधरं वदान् ॥ ३ ॥

अत्र । एव । वः । अपि । नह्यामि । उभे इति । आर्त्नी इवेत्यार्त्नीऽइव । ज्यया ।
वाचः । पते । नि । सेध । इमान् । यथा । मत् । अधरम् । वदान् ॥ ३ ॥

हे सपत्नाः यत्र देशे यूयं निवसथ vअत्रैव अस्मिन्नेव देशे vवः युष्मान् vअपि vनह्यामि अपिनद्धान् पाशैर्बद्धान् करोमि vज्यया मौर्व्या vउभे vआर्त्नीइव। यथा द्वे धनुषः कोटी दृढं बध्येते तथेत्यर्थः। हे vवाचस्पते वाचः शब्दस्य पालयितर्देव vइमान् सपत्नान् vनि vषेध प्रतिषेध। vयथा येन प्रकारेण vमत् मत्तः vअधरं निकृष्टतरं vवदान् वदन्ति तथा निरुद्धवाचः कुर्वित्यर्थः ॥

अभिभूरहमागमं विश्वकर्मेण धाम्ना ।
आ वश्चित्तमा वो व्रतमा वोऽहं समितिं ददे ॥ ४ ॥

अभिऽभूः । अहम् । आ । अगमम् । विश्वऽकर्मेण । धाम्ना ।
आ । वः । चित्तम् । आ । वः । व्रतम् । आ । वः । अहम् । सम्ऽइतिम् । ददे ॥ ४ ॥

हे सपत्नाः vअभिभूः अभिभविता vअहं vविश्वकर्मेण सर्वकर्मक्षमेण vधाम्ना धारकेण तेजसा बलेन वा सार्धम् vआगमम् आगतवानस्मि। अतः vवः युष्माकं vचित्तं मनः vआ vददे गृह्णामि। मनोगतं धैर्यं हरामीत्यर्थः। vवः युष्माकं vव्रतं कर्म चाहम् vआ ददे। vवः युष्मदीयः यः समितिः संग्रामः तं च vअहम् vआ ददे अपहरामि ॥

योगक्षेमं व आदायाहं भूयासमुत्तम आ वो मूर्धानमक्रमीम् ।
अधस्पदान्म उद्वदत मण्डूकाइवोदुकान्मण्डूका उदुकादिव ॥ ५ ॥

योगऽक्षेमम् । वः । आऽदाय । अहम् । भूयासम् । उत्ऽतमः । आ । वः । मूर्धानम् । अक्रमीम् ।
अधःऽपदात् । मे । उत् । वदत । मण्डूकाःऽइव । उदकात् । मण्डूकाः । उदकात्ऽइव ॥५॥

हे सपत्नाः vवः युष्माकं vयोगक्षेमम्। अप्राप्तस्य धनस्य[1] प्राप्तियोगः। प्राप्तस्य रक्षणं क्षेमः। तदुभयम् vआदाय युष्मत्तो गृहीत्वा vअहम् vउत्तमः श्रेष्ठः vभूयासम्। ततः vवः युष्माकं vमूर्धानं शिरः vआ vअक्रमीम् आक्रमिषम्। पादेनाधितिष्ठामि ॥ क्रमेर्लुङि अमो मश् (पा. सू. ७.१.४०)। 'इट ईटि' (पा. सू. ८. २. २८) इति सिचो लोपः ॥ अनन्तरं vमे मम vअधस्पदात् पादस्याधस्ताद्वर्तमाना यूयम् vउद्वदत उच्चैराक्रोशत। vउदकात् वृष्टाजलादधःप्रदेशे वर्तमानाः vमण्डूकाइव। यथा ते भृशमाक्रोशन्ति तथोद्वदतेत्यर्थः। vमण्डूका vउदकादिव इति पुनरुक्तिरादरार्था ॥ ॥२४॥

---

१. त१.२.१.६.७.८-म२.४.५-'धनस्य' नास्ति।

'तुभ्येदम्' इति चतुर्ऋचं षोडशं सूक्तं विश्वामित्रजमदग्न्योरार्षं जागतमैन्द्रम्। 'सोमस्य राज्ञः' इत्येषा तृतीया वरुणविधान्वनुमतिधातृसोमबृहस्पतीतिलिङ्गोक्तदेवताका। तथा चानुक्रान्तं—'तुभ्येदं चतुष्कं विश्वामित्रजमदग्नी जागतं तृतीया लिङ्गोक्तदेवता वा[१]' इति। पक्षे इन्द्र एव देवता अन्ये तु निपातभाज इति वाशब्दस्यार्थः। गतो विनियोगः॥

तुभ्येदमिन्द्र परि षिच्यते मधु त्वं सुतस्य कलशस्य राजसि।
त्वं रयिं पुरुवीरामु नस्कृधि त्वं तपः परितप्याजयः स्वः॥ १॥

तुभ्य। इदम्। इन्द्र। परि। सिच्यते। मधु। त्वम्। सुतस्य। कलशस्य। राजसि।
त्वम्। रयिम्। पुरुऽवीराम्। ऊँ इति। नः। कृधि।
त्वम्। तपः। परिऽतप्य। अजयः। स्वरिति स्वः॥ १॥

हे ᵛइन्द्र ᵛइदं ᵛमधु सोमलक्षणं तुभ्यं त्वदर्थं ᵛपरि ᵛषिच्यते आहवनीये प्रक्षिप्यते। ᵛत्वम् एव ᵛसुतस्य अभिषुतस्य ᵛकलशस्य द्रोणकलशावस्थितस्य सोमस्य ᵛराजसि ईशिषे। राजतिरैश्वर्यकर्मा। सः ᵛत्वं ᵛनः अस्माकं ᵛपुरुवीरां बहुपुत्रं[२] ᵛरयिं धनं ᵛकृधि कुरु। उशब्दः पूरकः। यद्वा अवधारणे। बहुपुत्रोपेतमेव धनं कुरु न केवलमित्यर्थः। तथा ᵛत्वं ᵛतपः शतसंख्याश्वमेधलक्षणं ᵛपरितप्य अनुष्ठाय ᵛस्वः स्वर्गम् ᵛअजयः जितवानसि॥

स्वर्जितं महिं मन्दानमन्धसो हवामहे परि शक्रं सुताँ उप।
इमं नो यज्ञमिह बोध्या गहि स्पृधो जयन्तं मघवानमीमहे॥ २॥

स्वःऽजितम्। महिं। मन्दानम्। अन्धसः। हवामहे। परि। शक्रम्। सुतान्। उप।
इमम्। नः। यज्ञम्। इह। बोधि। आ। गहि। स्पृधः। जयन्तम्। मघऽवानम्। ईमहे॥ २॥

ᵛस्वर्जितम् उक्तप्रकारेण स्वर्गस्य जेतारं ᵛमहि महान्तम् ᵛअन्धसः अन्नस्य सोमस्य पानेन ᵛमन्दानं मोदमानं हृष्यन्तं ᵛशक्रं सर्वकार्येषु शक्तमिन्द्रं ᵛसुतानुप अभिषुतान् सोमान् प्रति ᵛपरि ᵛहवामहे। परित आह्वयामहे। हे इन्द्र इत्थमाहूयमानस्त्वं ᵛनः अस्माकम् ᵛइमं ᵛयज्ञम् ᵛइह अस्मिन् देशे ᵛबोधि बुध्यस्व। बुद्ध्वा च ᵛआ ᵛगहि आगच्छ। ᵛस्पृधः स्पर्धमानाः शत्रुसेनाः ᵛजयन्तम् अभिभवन्तं ᵛमघवानं धनवन्तं त्वाम् ᵛईमहे। अपेक्षितानि धनानि याचामहे॥

सोमस्य राज्ञो वरुणस्य धर्मणि बृहस्पतेरनुमत्या उ शर्मणि।
तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशाँ अभक्षयम्॥ ३॥

सोमस्य। राज्ञः। वरुणस्य। धर्मणि। बृहस्पतेः। अनुऽमत्याः। ऊँ इति। शर्मणि।
तव। अहम्। अद्य। मघऽवन्। उपऽस्तुतौ।
धातः। विधातरिति विऽधातः। कलशान्। अभक्षयम्॥ ३॥

ᵛराज्ञः राजमानस्य ᵛसोमस्य ᵛवरुणस्य च[३] संबन्धिनि[३] ᵛधर्मणि[४] धारके यज्ञे वर्तमानस्तथा ᵛबृहस्पतेरनुमत्याः संबन्धिनि ᵛशर्मणि शरणे यज्ञगृहे वर्तमानः ᵛअहं हे ᵛमघवन् इन्द्र ᵛतव ᵛउप-

१. अनु.–'वा' नास्ति। २. त-भ-मु–बहुपुत्रां। ३. त१.२.३.६.७.८-भ-मु–तत्संबंधिनि। ४. त१. २.३.६.७.८-भ१.४.५. ८-मु–कर्मणि।

स्तुतौ स्तोत्रे ᵛअद्य इदानीं प्रवृत्तोऽस्मि । हे ᵛधातः हे एतत्संज्ञक देव हे ᵛविधातः एतत्संज्ञक देव युवाभ्यामनुज्ञातः ᵛकलशान् कलशस्थान् हुतशिष्टान् सोमान् ᵛअभक्षयं भक्षितवानस्मि ॥

प्रसूतो भक्षमकरं चरावपि स्तोमं चेमं प्रथमः सूरिरुन्मृजे ।
सुते सातेन यद्यागमं वां प्रति विश्वामित्रजमदग्नी दमे ॥ ४ ॥

प्रऽसूतः । भक्षम् । अकरम् । चरौ । अपि । स्तोमम् । च । इमम् । प्रथमः । सूरिः । उत् । मृजे । सुते । सातेन । यदि । आ । अगमम् । वाम् । प्रति । विश्वामित्रजमदग्नी इति । दमे ॥ ४ ॥

हे इन्द्र ᵛप्रसूतः त्वया प्रेरितोऽहं ᵛचरौ चरणीये चरुणा वा युक्ते यज्ञे ᵛभक्षम् ᵛअपि भक्षणीयं चर्वादि हविश्च ᵛअकरं त्वदर्थमकार्षम् । ᵛप्रथमः मुख्यः ᵛसूरिः स्तोताहम् ᵛइमं ᵛस्तोमं स्तोत्रं ᵛच त्वदर्थम् ᵛउन्मृजे उन्मार्ज्मि संस्करोमि । उच्चारयामीत्यर्थः । इदानीमिन्द्रः अन्तरात्मरूपः सन् सूक्तस्य द्रष्टारावृषी संबोध्य ब्रूते । हे ᵛविश्वामित्रजमदग्नी ᵛवां युवां ᵛप्रति ᵛदमे यज्ञगृहे ᵛसुते अभिषुते सोमे सति ᵛसातेन संभक्तव्येन धनेन सार्धं ᵛयदि यदा यस्मिन् कालेऽहम् ᵛआगमम् आगच्छामि तदा युवां स्तोत्रं कुरुतमित्यर्थः ॥ ॥ २५ ॥

'वातस्य' इति चतुर्ऋचं सप्तदशं सूक्तं वातगोत्रस्यानिलाख्यस्यार्षं त्रैष्टुभं वायुदेवताकम् । तथा चानुक्रान्तं—'वातस्यानिलो वातायनो वायव्यम्' इति । गतो विनियोगः ॥

वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः ।
दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणुमस्यन् ॥ १ ॥

वातस्य । नु । महिमानम् । रथस्य । रुजन् । एति । स्तनयन् । अस्य । घोषः ।
दिविऽस्पृक् । याति । अरुणानि । कृण्वन् । उतो इति । एति । पृथिव्या । रेणुम् । अस्यन् ॥ १ ॥

ᵛवातस्य वायोः ᵛरथस्य रंहणशीलस्य ᵛमहिमानं माहात्म्यं ᵛनु क्षिप्रं प्रब्रवीमि । ᵛअस्य वायोः ᵛघोषः शब्दः ᵛस्तनयन् गिरिगह्वरादिषु विविधं शब्दमुत्पादयन् ᵛरुजन् सर्वं स्थावरजङ्गमजातं भञ्जन् ᵛएति गच्छति । स च वायुः ᵛदिविस्पृक् दिवमाकाशं स्पृशन् व्याप्नुवन् ᵛअरुणानि अरुणवर्णानि विकृतरूपाणि दिगन्तराणि ᵛकृण्वन् कुर्वन् ᵛयाति प्राप्नोति । ᵛउतो अपि च ᵛपृथिव्या भूमेः ᵛरेणुं पांसुम् ᵛअस्यन् गृहीत्वा सर्वत्र विक्षिपन् ᵛएति गच्छति । अत एव अरुणानि कृण्वन् इत्युक्तम् ॥

सं प्रेरते अनु वातस्य विष्ठा एनं गच्छन्ति समनं न योषाः ।
ताभिः सयुक्सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य राजा ॥ २ ॥

सम् । प्र । ईरते । अनु । वातस्य । विऽस्थाः । आ । एनम् । गच्छन्ति । समनम् । न । योषाः ।
ताभिः । सऽयुक् । सऽरथम् । देवः । ईयते । अस्य । विश्वस्य । भुवनस्य । राजा ॥ २ ॥

ᵛविष्ठाः विशेषेणावस्थिताः पर्वताद्याः ᵛवातस्य वायोरनुगुणं ᵛसं ᵛप्रेरते संप्रगच्छन्ति । यदभिमुखो वायुर्वर्तते तदभिमुखाः प्रकम्पन्त इत्यर्थः । ᵛसमनं ᵛन संग्राममिव ᵛएनं वायुं ᵛयोषाः अश्वयोषितो वडवाः ᵛआ ᵛगच्छन्ति । ᵛताभिः वडवाभिः ᵛस्वयुक् स्वयमेव युज्यमानं ᵛसरथं समान-

मेकं रथमारुह्य [v]देवः दीप्यमानः वायुः [v]ईयते गच्छति । 'ईङ् गतौ' । [v]अस्य [v]विश्वस्य सर्वस्य [v]भुवनस्य द्वितीयविकारभाजो भूतजातस्य [v]राजा स्वामी भवति । यद्वा । समनं हृष्टं पुरुषं घोषाः कामिन्य इव एवं वायुं तरुगुल्मादिरूपाः स्त्रियोऽभिगच्छन्ति । ताभिः सरथं सहरथं देव ईयत इति ॥

अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः ।
अपां सखा प्रथमजा ऋतावा क्व स्विज्जातः कुत आ बभूव ॥ ३ ॥

अन्तरिक्षे । पथिऽभिः । ईयमानः । न । नि । विशते । कतमत् । चन । अहरिति ।
अपाम् । सखा । प्रथमऽजाः । ऋतऽवा । क्व । स्वित् । जातः । कुतः । आ । बभूव ॥३॥

[v]अन्तरिक्षे नभसि विद्यमानैः [v]पथिभिः मार्गैः [v]ईयमानः गच्छन् वायुः [v]कतमच्चनाहः एकमपि दिनं [v]न [v]नि [v]विशते नोपविशति । किंतु सर्वदैव गच्छति । 'नेर्विशः' (पा. सू. १.३.१७) इत्यात्मनेपदम् । अपि च [v]अपाम् उदकानां [v]सखा । 'वायुर्वै क्षेपिष्ठा[1] देवता' (तै. सं. २.४.९.१) इति श्रुतेः । [v]प्रथमजाः सर्वेभ्यः प्राणिभ्यः पूर्वोत्पन्न एव [v]ऋतावा सत्यवान् यज्ञवान् वा एवंभूतो वायुः [v]क्व [v]स्वित् कुत्र खलु देशे [v]जातः उत्पन्नः [v]कुतः कस्माच्च देशान्निष्क्रम्य [v]आ [v]बभूव इदं सर्वं जगद्व्याप्नोत् । सर्वदा सर्वत्र वर्तमानत्वादस्योत्पत्तिर्व्यक्तिप्रकारश्च न केनापि ज्ञातुं शक्यत इत्यर्थः ॥

आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम ॥ ४ ॥

आत्मा । देवानाम् । भुवनस्य । गर्भः । यथाऽवशम् । चरति । देवः । एषः ।
घोषाः । इत् । अस्य । शृण्विरे । न । रूपम् । तस्मै । वाताय । हविषा । विधेम ॥ ४ ॥

अयं वायुः [v]देवानाम् इन्द्रादीनामपि [v]आत्मा जीवरूपेण तेष्ववस्थानात् [v]भुवनस्य अपि भूतजातस्य [v]गर्भः गर्भवत्प्राणरूपेणान्तर्वर्तमानः [v]एषः ईदृशः [v]देवः [v]यथावशं यथाकामं यथेच्छं [v]चरति वर्तते । अनिवारितगतिः सन् क्वचिच्छीघ्रं गच्छति क्वचिच्छनैर्गच्छति कुतश्चिच्छरीराच्चिरकालमति अन्यच्च शरीरं प्रविशतीत्येवं यथेच्छं वर्तत इत्यर्थः । [v]अस्य वायोरागच्छतः [v]घोषा [v]इत् शब्दा एव [v]शृण्विरे श्रूयन्ते । [v]रूपं स्वरूपं तु [v]न दृश्यते नीरूपत्वात् । अदृग्विषयत्वेन शब्देनैवानुमीयत इत्यर्थः । [v]तस्मै [v]वाताय वायवे [v]हविषा चरुपुरोडाशादिलक्षणेन [v]विधेम परिचरेम ॥ ॥ २६ ॥

'मयोभूः' इति चतुर्ऋचमष्टादशं सूक्तं कक्षीवद्घौत्रस्य शबरस्यार्षं त्रैष्टुभं गोदेवत्यम् । अनुक्रान्तं च—'मयोभूः शबरः काक्षीवतो गव्यम्' इति । घासाय वनं प्रतिष्ठमाना गा आदितो द्वाभ्यामभिमन्त्रणीयाः । सूत्रितं च—'गाः प्रतिष्ठमाना अनुमन्त्रयेत मयोभूर्वातो अभि वातूस्रा इति द्वाभ्याम्' (आश्व. गृ. २. १०. ५) इति ॥

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् ।
पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृळ ॥ १ ॥

मयःऽभूः । वातः । अभि । वातु । उस्राः । ऊर्जस्वतीः । ओषधीः । आ । रिशन्ताम् ।
पीवस्वतीः । जीवऽधन्याः । पिबन्तु । अवसाय । पत्ऽवते । रुद्र । मृळ ॥ १ ॥

---

१. त१.२.३.६.७.८-भ१.४.८-ईशते ।

[v]वातः वायुः [v]मयोभूः सुखस्य भावयिता सन् [v]उस्राः गाः [v]अभि [v]वातु अभिगच्छतु। ताश्च गावः [v]ऊर्जस्वतीः रसवतीः [v]ओषधीः बलवन्ति[1] तृणानि [v]आ [v]रिशन्ताम् अभितः स्वादयन्तु। तथा [v]पीवस्वतीः प्रवृद्धाः [v]जीवधन्याः जीवानां प्रीणयित्रीरपश्च [v]पिबन्तु। हे [v]रुद्र ज्वरादिरोगस्य प्रेक्षणेन संहर्तर्देव [v]पद्वते पादयुक्ताय [v]अवसाय अन्नाय गोरूपाय [v]मृळ उपदर्यां कुरु। मा बाधस्वेत्यर्थः ॥

याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद ।
या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥ २ ॥

याः । सऽरूपाः । विऽरूपाः । एकऽरूपाः । यासाम् । अग्निः । इष्ट्या । नामानि । वेद ।
याः । अङ्गिरसः । तपसा । इह । चक्रुः । ताभ्यः । पर्जन्य । महि । शर्म । यच्छ ॥ २ ॥

[v]याः गावः [v]सरूपाः समानरूपा याश्च [v]विरूपाः विभिन्नरूपा याश्च[2] [v]एकरूपाः एकेनैव वर्णेनोपेताः[2] [v]यासां च गवां [v]नामानि ईडे रन्तेऽदित इत्यादीनि [v]इष्ट्या यागेन हेतुना [v]अग्निः [v]वेद जानाति [v]याः च गाः [v]अङ्गिरसः ऋषयः [v]तपसा पशुप्राप्तिसाधनेन चित्रायागादिलक्षणेन [v]इह अस्मिँल्लोके [v]चक्रुः कृतवन्तः [v]ताभ्यः सर्वाभ्यो गोभ्यो हे [v]पर्जन्य [v]महि महत् [v]शर्म सुखं [v]यच्छ प्रदेहि ॥

'या देवेषु' इति द्वाभ्यां सायं गृहमागच्छन्तीर्गाः अनुमन्त्रयेत[3]। सूत्र्यते हि—'या देवेषु तन्वमैरयन्तेति च सूक्तशेषम्। आगावीयमेके' (आश्व. गृ. २. १०. ६-७) इति ॥

या देवेषु तन्वमैरयन्त यासां सोमो विश्वा रूपाणि वेद ।
ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र गोष्ठे रिरीहि ॥ ३ ॥

याः । देवेषु । तन्वम् । ऐरयन्त । यासाम् । सोमः । विश्वा । रूपाणि । वेद ।
ताः । अस्मभ्यम् । पयसा । पिन्वमानाः । प्रजाऽवतीः । इन्द्र । गोऽस्थे । रिरीहि ॥ ३ ॥

[v]याः गावः [v]देवेषु यष्टव्येषु [v]तन्वम् आत्मीयं शरीरम् [v]ऐरयन्त हवीरूपेण प्रेरयन्ति [v]यासां च गवां [v]विश्वा सर्वाणि [v]रूपाणि रूप्यमाणानि क्षीरादीनि श्रयणद्रव्याणि [v]सोमः [v]वेद जानाति [v]अस्मभ्यम् अस्मदर्थं [v]पयसा क्षीरेण [v]पिन्वमानाः वर्धमाना अत एव [v]प्रजावतीः प्रजाभिर्वत्सैरुपेताः [v]ताः गाः हे [v]इन्द्र [v]गोष्ठे अस्मदीये[4] [v]रिरीहि गमय ॥ 'री गतिरेषणयोः'। छान्दसो विकरणस्य श्लुः ॥

प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः संविदानः ।
शिवाः सतीरुप नो गोष्ठमाकस्तासां वयं प्रजया सं सदेम ॥ ४ ॥

प्रजाऽपतिः । मह्यम् । एताः । रराणः । विश्वैः । देवैः । पितृऽभिः । सम्ऽविदानः ।
शिवाः । सतीः । उप । नः । गोऽस्थम् । आ । अकरित्यकः ।
तासाम् । वयम् । प्रऽजया । सम् । सदेम ॥ ४ ॥

---

१. त-भ–'बलवन्ति' नास्ति। २. त१.२.३.६.७.८-भ–एकेनैव रूपेणोपेताः; त४.५–अनेकरूपेणोपेताः। ३. त१.२.३.६.७.८-भ-मु–अनुमंत्रयितव्याः; त४.५–अनुमंत्रयीत। ४. त४.५-भ२–अस्मदीये व्रजे।

vप्रजापतिः विधाता vमह्यं स्तोत्रे vएताः गाः vराणः प्रयच्छन् ॥ रातेर्ण्यत्ययेन शानच्। छान्दसः शपः श्लुः। 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥ vविश्वैः सर्वैः vदेवैः vपितृभिः च vसंविदानः ऐकमत्यं गतः सन् vशिवाः vसतीः कल्याणीर्भवन्तीर्गाः vनः अस्माकं vगोष्ठं व्रजम् vउप गोष्ठसमीपे vअकः करोतु। vतासां गवां vप्रजया संतानेन vवयं vसं vसदेम संगच्छेमहि ॥ सदेराशिषि लिङि लिङ्याशिष्यङ् ॥ ॥ २७ ॥

'विभ्राट्' इति चतुर्ऋचमेकोनविंशं सूक्तं सूर्यपुत्रस्य विभ्राट्संज्ञकस्यार्षं सूर्यदेवत्यम्। आदौ तिस्रो जगत्यः। द्व्यष्टकद्विद्वादशकवत्यास्तारपङ्क्तिश्चतुर्थी। तथा चानुक्रान्तं—'विभ्राड्विभ्राट् सौर्यः सौर्यं जागतमास्तारपङ्क्त्यन्तम्' इति। विषुवति निष्केवल्य आद्यस्तृचः स्तोत्रियः। सूत्रितं च—'विभ्राड्बृहत्पिबतु सोम्यं मधु नमो मित्रस्य वरुणस्य चक्षस इति स्तोत्रियानुरूपौ' (आश्व. श्रौ. ८. ६) इति। वाजपेयेऽतिरिक्तोक्थस्य विभ्राडित्येषा शस्त्रे याज्या। सूत्र्यते हि—'विभ्राड्-बृहत्पिबतु सोम्यं मध्विति याज्या तस्य गवां शतानाम्' (आश्व. श्रौ. ९. ९) इति ॥

विभ्राड् बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविंहुतम्।
वातजूतो यो अभिरक्षति त्मना प्रजाः पुपोष पुरुधा वि राजति ॥ १ ॥

विऽभ्राट्। बृहत्। पिबतु। सोम्यम्। मधु। आयुः। दधत्। यज्ञऽपतौ। अविंऽहुतम्। वातऽजूतः। यः। अभिऽरक्षति। त्मना। प्रऽजाः। पुपोष। पुरुधा। वि। राजति ॥१॥

vविभ्राट् विभ्राजमानो विशेषेण दीप्यमानः सूर्यः vबृहत् महत्[1] परिवृढं vसोम्यं सोममयं vमधु vपिबतु। किं कुर्वन्। vयज्ञपतौ यजमाने vअविंहुतम् अकुटिलम् vआयुः vदधत् कुर्वन्। vयः सूर्यः vवातजूतः वातेन महावायुना प्रेर्यमाणः सन् vत्मना आत्मना स्वयमेव vअभिरक्षति सर्वं जगदभिपश्यन् पालयति। राशिचक्रस्य वायुप्रेर्यत्वात् सूर्यस्यापि तत्प्रेर्यत्वम्। स सूर्यः vप्रजाः vपुपोष वृष्ट्यादिप्रदानेन पोषयति vपुरुधा बहुधा vवि vराजति विशेषेण दीप्यते च ॥

विभ्राड् बृहत्सुभृतं वाजसातमं धर्मन् दिवो धरुणे सत्यमर्पितम्।
अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा ॥ २ ॥

विऽभ्राट्। बृहत्। सुऽभृतम्। वाजऽसातमम्। धर्मन्। दिवः। धरुणे। सत्यम्। अर्पितम्। अमित्रऽहा। वृत्रऽहा। दस्युहम्ऽतमम्। ज्योतिः। जज्ञे। असुरऽहा। सपत्नऽहा ॥ २ ॥

vविभ्राट् विभ्राजमानं vबृहत् प्रौढं vसुभृतं सुपुष्टं vवाजसातमं वाजस्यान्नस्य बलस्य वा दातृतमं vधर्मन् धर्मणि वायुना धारयितव्ये vदिवः द्युलोकस्य vधरुणे धारके सूर्यमण्डले vअर्पितं निक्षिप्तं vसत्यम् अविनश्वरम् vअमित्रहा अमित्राणामप्रियाणां हन्तृ vवृत्रहा वृत्राणामावृण्वतां हन्तृ vदस्युहंतमं दस्यूनामुपक्षपयितृणां हन्तृतमम् vअसुरहा असुराणां क्षेप्तृणां घातकं vसपत्नहा सपत्नानां सहजशत्रूणामपि घातकमीदृग्भूतं vज्योतिः सौरं तेजः vजज्ञे प्रादुर्भवति ॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम् ॥ ३ ॥

१. त१.२.३.६.७.८-भ–'महत्' नास्ति।

इदम् । श्रेष्ठम् । ज्योतिषाम् । ज्योतिः । उत्ऽउत्तमम् । विश्वऽजित् । धनऽजित् । उच्यते । बृहत् । विश्वऽभ्राट् । भ्राजः । महि । सूर्यः । दृशे । उरु । पप्रथे । महः । ओजः । अच्युतम् ॥३॥

[v]इदं सौरं तेजः [v]श्रेष्ठं प्रशस्यतमं [v]ज्योतिषाम् अन्येषां ग्रहनक्षत्रादीनामपि [v]ज्योतिः प्रकाशकमत एव [v]उत्तमम् उत्कृष्टं [v]विश्वजित् विश्वस्य सर्वस्य जेतृ [v]धनजित् धनस्य च जेतृ [v]बृहत् प्रभूतम् [v]उच्यते । एवंगुणविशिष्टमिति सर्वैरभिधीयते । अपि च [v]विश्वभ्राट् विश्वस्य प्रकाशयिता [v]भ्राजः भ्राजमानः [v]महि महान् [v]सूर्यः [v]दृशे दर्शनाय [v]उरु विस्तीर्णं [v]महः तमसोऽभिभवितृ [v]अच्युतं च्युतिरहितमविनाशम् [v]ओजः तेजोरूपं बलं [v]पप्रथे विस्तारयति ॥

विभ्राजञ्ज्योतिषा स्वरगच्छो रोचनं दिवः ।
येनेमा विश्वा भुवनान्याभृता विश्वकर्मणा विश्वदेव्यावता ॥ ४ ॥

विऽभ्राजन् । ज्योतिषा । स्वः । अगच्छः । रोचनम् । दिवः ।
येन । इमा । विश्वा । भुवनानि । आऽभृता । विश्वऽकर्मणा । विश्वदेव्यऽवता ॥ ४ ॥

हे सूर्य [v]ज्योतिषा तेजसा [v]स्वः सर्वं जगत् [v]विभ्राजन् विभ्राजयन् [v]दिवः संबन्धि [v]रोचनं रोचमानं स्थानम् [v]अगच्छः प्राप्नोः । [v]विश्वकर्मणा सर्वव्यापारहेतुना [v]विश्वदेव्यावता । विश्वेषां देवानां हितो यागादिर्विश्वदेव्यः । तद्वता [v]येन सौरेण तेजसा [v]इमा इमानि परिदृश्यमानानि [v]विश्वा सर्वाणि [v]भुवनानि उदकानि भौमानि [v]आभृता धर्मकाल आभृतानि भवन्ति । यद्वा । सर्वाणि भूतजातान्याभृता समन्ताद्धृतानि पोषितानि भवन्ति । तेन ज्योतिषा हृयन्वयः ॥ ॥ २८ ॥

'त्वं त्यम्' इति चतुर्ऋचं विंशं सूक्तं भृगुपुत्रस्येटस्यार्षं गायत्रमैन्द्रम् । अनुक्रान्तं च— 'त्वं त्यमिटो भार्गवो गायत्रम्' इति । गतो विनियोगः ॥

त्वं त्यमिटो रथमिन्द्र प्रावः सुतावतः । अशृणोः सोमिनो हवम् ॥१॥

त्वम् । त्यम् । इटतः । रथम् । इन्द्र । प्र । आवः । सुतऽवतः । अशृणोः । सोमिनः । हवम् ॥१॥

हे [v]इन्द्र [v]सुतावतः[1] सुतेनाभिषुतेन सोमेन युक्तस्य [v]इटतः इटस्य । 'सुपां सुलुक्०' इति ङसस्तस् । एतत्संज्ञस्यर्षेः [v]त्यं तं प्रसिद्धं [v]रथं [v]प्रावः प्रारक्षः । [v]सोमिनः सोमयुक्तस्य मम [v]हवम् आह्वानम् [v]अशृणोः शृणु ॥

त्वं मखस्य दोधतः शिरोऽव त्वचो भरः । अगच्छः सोमिनो गृहम् ॥२॥

त्वम् । मखस्य । दोधतः । शिरः । अव । त्वचः । भरः । अगच्छः । सोमिनः । गृहम् ॥ २ ॥

हे इन्द्र [v]त्वं [v]मखस्य यज्ञस्य [v]दोधतः कम्पमानस्य देवेभ्यः पलायमानस्य [v]शिरः प्रवर्ग्यरूपं [v]त्वचः त्वगुपलक्षिताच्छरीरात् [v]अव [v]भरः । अवयुत्य पृथक्कृत्य हृतवानसि । देवेभ्यो निष्क्रान्तस्य पुरुषाकारस्य धन्विनो यज्ञस्य शिर इन्द्रो वज्ररूपेण ज्याघातनद्वारा पुरा चिच्छेद । तदभिप्रायेणेदमुक्तम् । श्रूयते हि—'तस्येन्द्रो वज्ररूपेण धनुर्ज्यामच्छिनद्यदस्य स्नेव धनुरार्त्निः शिर उत्पिपेष स प्रवर्ग्योऽभवत्' (तै. आ. १. ५. २) इति । स त्वं [v]सोमिनः सोमवतो मम [v]गृहम् [v]अगच्छः आगच्छ ॥

---

१. ग-भ७—त्वं सुतावतः ।

त्वं त्यमिन्द्र मर्त्यमास्त्रबुध्नाय वेन्यम् । मुहुः श्रथ्ना मनस्यवे ॥ ३ ॥

त्वम् । त्यम् । इन्द्र । मर्त्यम् । आस्त्रऽबुध्नाय । वेन्यम् । मुहुः । श्रथ्नाः । मनस्यवे ॥ ३ ॥

हे [v]इन्द्र [v]त्वं [v]त्यं तं [v]मर्त्यं मनुष्यं [v]वेन्यं वेनस्य पुत्रं पृथुम् [v]आस्त्रबुध्नाय । अस्त्रबुध्नो नाम कश्चित् । तस्य पुत्राय [v]मनस्यवे मननीयं स्तोत्रमिच्छते [v]मुहुः शश्वत् [v]श्रथ्नाः अहिंसीः[1] । वशमनय[2] इत्यर्थः ॥

त्वं त्यमिन्द्र सूर्यं पश्चा सन्तं पुरस्कृधि । देवानां चित्तिरो वशम् ॥४॥

त्वम् । त्यम् । इन्द्र । सूर्यम् । पश्चा । सन्तम् । पुरः । कृधि । देवानाम् । चित् । तिरः । वशम् ॥४॥

हे [v]इन्द्र [v]त्वं [v]त्यं[3] [v]सूर्यं सायंसमये [v]पश्चा पश्चात् [v]सन्तं भवन्तं [v]पुरः परेद्युः प्रातःकाले पुरस्तात् [v]कृधि करोषि । लकारव्यत्ययः । कीदृशम् । [v]देवानां [v]चित् देवानामपि [v]तिरः तिरोहितं तैरपि क्व गत इति दुर्विज्ञातं [v]वशं कान्तम् ॥ ॥ २९ ॥

'आ याहि' इति चतुर्ऋचमेकविंशं सूक्तमाङ्गिरसस्य संवर्तस्यार्षमुपोदेवताकम् । चतस्रोऽपि विंशतिका द्विपदा विराजः । तथा चानुक्रान्तम्—'आ याहि संवर्त उषस्यं द्विपदम्' इति । प्रथमे छन्दोमे वैश्वदेवसूक्तात्पूर्वमिदं सूक्तम् । सूत्रितं च—'आ याहि वनसेमा नु कं बभ्रुरेक इति द्विपदासूक्तानि' (आश्व. श्रौ. ८. ७) इति । महाव्रतेऽपि निष्केवल्य एतत् । तथैव पञ्चमारण्यके सूत्रितम्—'आ याहि वनसा सहेति नव समाम्नाताः' (ऐ. आ. ५. २. २) इति ॥

आ याहि वनसा सह गावः सचन्त वर्तनिं यदूधभिः ॥ १ ॥

आ । याहि । वनसा । सह । गावः । सचन्त । वर्तनिम् । यत् । ऊधऽभिः ॥ १ ॥

हे उषः [v]वनसा वननीयेन तेजसा धनेन वा सार्धम् [v]आ [v]याहि आगच्छ । [v]गावः उषसो वाहनभूताः [v]वर्तनिं रथं [v]सचन्त सेवन्ते । अतस्तेन रथेनायाहीत्यर्थः । [v]यत् या गावः [v]ऊधभिः उपलक्षिताः प्रभूताः । पीना इत्यर्थः । ता गाव इति संबन्धः ॥

आ याहि वस्व्या धिया मंहिष्ठो जारयन्मखः सुदानुभिः ॥ २ ॥

आ । याहि । वस्व्या । धिया । मंहिष्ठः । जारयत्ऽमखः । सुदानुऽभिः ॥ २ ॥

हे उषः [v]वस्व्या प्रशस्तया [v]धिया अनुग्रहबुद्ध्या कर्मणा स्तुत्या वा सार्धम् [v]आ [v]याहि आगच्छ । स चोषःकालः [v]सुदानुभिः शोभनदानैर्नृभिः पुरुषैः [v]मंहिष्ठः धनानां दातृतमः अत एव [v]जारयन्मखः समापयद्यज्ञश्च भवति ॥

पितुभृतो न तन्तुमित्सुदानवः प्रति दध्मो यजामसि ॥ ३ ॥

पितुऽभृतः । न । तन्तुम् । इत् । सुऽदानवः । प्रति । दध्मः । यजामसि ॥ ३ ॥

[v]पितुभृतो [v]न अन्नस्य भर्तार इव [v]सुदानवः शोभनदाना वयं [v]तन्तुमित् तन्तुं[4] विस्तीर्णमेवं[5] [v]प्रति [v]दध्मः । उषसं प्रत्युपायनरूपेण धारयामः । तेन च यज्ञेन तामुषसं [v]यजामसि ॥

---

१. त-भ-अहिंसीत् । २. त१.२.३.६.८-भ२-वशमानय । ३. त७-त्यं तं । ४. ग-त-भ१.४.८-ततं; भ२-तं तं । ५. ग-विस्तीर्णं यज्ञमेव ।

दशमेऽहनि प्रातरनुवाक उपस्ये क्रतौ 'उषो भद्रेभिः' इत्यस्याः स्थाने 'उषा अप स्वसुः' इत्येषा[1]। सूत्रितं च—'उषा अप स्वसुस्तम इति[2] पच्छो द्विपदां त्रिरुपस्ये' (आश्व. श्रौ. ८. १२) इति ॥

उषा अप स्वसुस्तमः सं वर्तयति वर्तनिं सुजाततां ॥ ४ ॥

उषाः । अप । स्वसुः । तमः । सम् । वर्तयति । वर्तनिम् । सुऽजाततां ॥ ४ ॥

इयम् Vउषाः Vस्वसुः भगिन्या रात्रेः संबन्धि Vतमः अन्धकारम् Vअप Vसं Vवर्तयति। आत्मीयेन तेजसापगमयति। Vसुजाताता सुजातत्वमात्मनः सुप्रजातत्वं च Vवर्तनिं रथं प्रापयति॥३०॥

'आ त्वा' इति षड्चं द्वाविंशं सूक्तमाङ्गिरसस्य ध्रुवस्यार्षमानुष्टुभम्। अभिषिक्तस्य राज्ञः स्तुतिरूपोऽर्थो देवता। तथा चानुक्रान्तम्—'आ त्वा षड् ध्रुवो राज्ञः स्तुतिस्त्वानुष्टुभं तु' इति। राज्ञो युद्धाय संनहनेऽनेन सूक्तेनाभिमन्त्रणं पुरोधसा कर्तव्यम्। सूत्रितं च—'आ त्वाहार्षमन्तरेधीति पश्चाद्रथस्यावस्थाय' (आश्व. गृ. ३. १२. २) इति ॥

आ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ॥ १ ॥

आ । त्वा । अहार्षम् । अन्तः । एधि । ध्रुवः । तिष्ठ । अविऽचाचलिः ।
विशः । त्वा । सर्वाः । वाञ्छन्तु । मा । त्वत् । राष्ट्रम् । अधि । भ्रशत् ॥ १ ॥

हे राजन् Vत्वा त्वाम् Vआ Vअहार्षम् अस्मद्राष्ट्रस्य स्वामित्वेनानैषम्। स त्वम् Vअन्तः अस्मासु मध्ये Vएधि स्वामी भव। Vध्रुवः नित्यः सन् Vअविचाचलिः अतिशयेन चलनरहित[2] एव[2] सन् Vतिष्ठ राष्ट्रमधितिष्ठ। Vसर्वाः च Vविशः प्रजाः Vत्वा त्वां Vवाञ्छन्तु। अयमेव अस्माकं[3] राजास्त्विति कामयन्तु। 'वाछि इच्छायाम्'। Vत्वत् त्वत्तः सकाशात् Vराष्ट्रं राज्यं Vमा Vअधि Vभ्रशत् मा भ्रश्यतु। मा वियुक्तं भवतु। 'भ्रन्शु अधःपतने' ॥

इहैवैधि माप च्योष्ठाः पर्वत इवाविचाचलिः ।
इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय ॥ २ ॥

इह । एव । एधि । मा । अप । च्योष्ठाः । पर्वतःऽइव । अविऽचाचलिः ।
इन्द्रःऽइव । इह । ध्रुवः । तिष्ठ । इह । राष्ट्रम् । ऊँ इति । धारय ॥ २ ॥

हे राजन् Vइह अस्मिन् Vएव राज्ये[4] Vएधि स्वामित्वेन सर्वदा वर्तमानो भव। Vमाप Vच्योष्ठाः अपच्युतो मा भूः। मापगमः[5]। Vपर्वतइव यथा पर्वतो नैश्चल्येनावतिष्ठते एवम् Vअविचाचलिः चलनरहितो भव। Vइन्द्रइव यथा स्वर्गे इन्द्रः एवम् Vइह लोके त्वं Vध्रुवस्तिष्ठ स्थिरो भव। Vराष्ट्रमु राष्ट्रं च Vइह लोके Vधारय। स्वे स्वे कर्मण्यवस्थापय ॥

---

१. त१.२.३.६.७.८-भ१.४.५.८–इति। २. ग-त१.२.३.६.७.८-भ–चलनरहितश्च। ३. ग२–सर्वथास्माकं; त१.२.३.६.७.८-भ१.२.४.५.८–सर्वास्माकं। ४. भ७–राष्ट्रे। ५. त-भ१.२.४.८–मापगमयः।

इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा ।
तस्मै सोमो अधि ब्रवत्तस्मा उ ब्रह्मणस्पतिः ॥ ३ ॥

इमम् । इन्द्रः । अदीधरत् । ध्रुवम् । ध्रुवेण । हविषा ।
तस्मै । सोमः । अधि । ब्रवत् । तस्मै । ऊँ इति । ब्रह्मणः । पतिः ॥ ३ ॥

vइमम् अभिषिक्तं vध्रुवेण स्थिरेण vहविषा तर्प्यमाणः vइन्द्रः vध्रुवं स्थिरम् vअदीधरत् धारयतु । vसोमः च vतस्मै राज्ञे vअधि vब्रवत् अधिब्रवीतु । मदीयोऽयमिति पक्षपातवचनं करोतु । vतस्मा vउ तस्मा एव vब्रह्मणस्पतिः मन्त्रस्य पालको देवश्चाधिब्रवीतु ॥

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ॥ ४ ॥

ध्रुवा । द्यौः । ध्रुवा । पृथिवी । ध्रुवासः । पर्वताः । इमे ।
ध्रुवम् । विश्वम् । इदम् । जगत् । ध्रुवः । राजा । विशाम् । अयम् ॥ ४ ॥

vद्यौः vध्रुवा स्थिरा भवति । vपृथिवी च vध्रुवा स्थिरा भवति । vइमे दृश्यमानाः vपर्वताः महीधराश्च vध्रुवासः स्थिराः । vइदं vविश्वं सर्वं vजगत् vध्रुवं स्थिरं भवति । एवमेव vअयं vविशां प्रजानां vराजा स्वामी सन् vध्रुवः स्थिरो भवतु ॥

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम् ॥ ५ ॥

ध्रुवम् । ते । राजा । वरुणः । ध्रुवम् । देवः । बृहस्पतिः ।
ध्रुवम् । ते । इन्द्रः । च । अग्निः । च । राष्ट्रम् । धारयताम् । ध्रुवम् ॥ ५ ॥

हे राजन् vते तव राष्ट्रं vराजा राजमानः vवरुणः vध्रुवं स्थिरं धारयतु । vदेवः दानादि-गुणयुक्तः vबृहस्पतिः vध्रुवं धारयतु । vइन्द्रश्च vअग्निश्च उभावपि vते तव vराष्ट्रं vध्रुवं स्थिरं vधारयताम् । इन्द्राग्न्योरुभयोरपेक्षया ध्रुवशब्दस्य द्विः प्रयोगः ॥

ध्रुवं ध्रुवेण हविषाभि सोमं मृशामसि ।
अथो त इन्द्रः केवलीर्विशो बलिहृतस्करत् ॥ ६ ॥

ध्रुवम् । ध्रुवेण । हविषा । अभि । सोमम् । मृशामसि ।
अथो इति । ते । इन्द्रः । केवलीः । विशः । बलिऽहृतः । करत् ॥ ६ ॥

vध्रुवेण स्थिरेण vहविषा पुरोडाशादिना[1] युक्तं vध्रुवं स्थिरं vसोमम् vअभि vमृशामसि अभिमृशामः । देवतामभिलक्ष्य यागार्थं वयमृत्विजः संस्पृशामः । vअथो अथानन्तरमेव vइन्द्रः vविशः प्रजाः vते तवैव vकेवलीः असाधारणाः सतीः vबलिहृतः करस्य[2] प्रदात्रीः vकरत् करोतु ॥ ॥ ३१ ॥

---

१. त१.२.३.६.७—चरुपुरोडाशादि; त४.५.८-म१.२.४.८—पुरोडाशादि । २. त१.२.३.७-म१.२.४.८—कारस्य ।

' अभीवर्तेन ' इति पञ्चर्चं त्रयोविंशं सूक्तमाङ्गिरसस्याभीवर्तोख्यस्यार्षमानुष्टुभम्। पूर्ववद्राजस्तुतिर्देवता। तथा चानुक्रान्तम्—' अभीवर्तेन पञ्चाभीवर्तः ' इति। पुरोहित इदं सूक्तं राजानं युद्धाय कृतसंनाहं वाचयीत। सूत्र्यते हि—' अथैनं सारयमाणमुपारुह्याभीवर्तं वाचयति[1] ' (आश्व. गृ. ३. १२. १२) इति[1] ॥

अभीवर्तेन हविषा येनेन्द्रो अभिवावृते।
तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्राय वर्तय ॥ १ ॥

अभिऽवर्तेन। हविषा। येन। इन्द्रः। अभिऽववृते।
तेन। अस्मान्। ब्रह्मणः। पते। अभि। राष्ट्राय। वर्तय ॥ १ ॥

vअभीवर्तेन। अभिगच्छत्यनेनेत्यभीवर्तः ॥ करणे घञ्। थाथादिस्वरेणोत्तरपदान्तोदात्तत्वम्। ' उपसर्गस्य घञ्यमनुष्ये बहुलम् ' (पा. सू. ६. ३. १२२) इति दीर्घः ॥ ईदृशेन vयेन vहविषा साधनेन vइन्द्रः vअभिववृते सर्वमभिजगाम vतेन हविषेष्टवतः vअस्मान् हे vब्रह्मणस्पते vराष्ट्राय राज्यं प्राप्तुम् vअभि vवर्तय अभिगमय ॥

अभिवृत्य सपत्नानभि या नो अरातयः।
अभि पृतन्यन्तं तिष्ठाभि यो नो दरस्यति ॥ २ ॥

अभिऽवृत्य। सऽपत्नान्। अभि। याः। नः। अरातयः।
अभि। पृतन्यन्तम्। तिष्ठ। अभि। यः। नः। दरस्यति ॥ २ ॥

हे राजन् vसपत्नान् शत्रून् vअभिवृत्य अभितो गमयित्वा vनः अस्माकं vयाः vअरातयः अदानशीलाः प्रजाः सन्ति ता अपि vअभि vतिष्ठ अभिभव। vपृतन्यन्तं पृतनाः सेना आत्मन इच्छन्तं युयुत्सुं च vअभि तिष्ठ ॥ पृतनाशब्दात् क्यचि ' कव्यध्वरपृतनस्य° ' इत्यन्तलोपः ॥ vयः च vनः अस्मभ्यम् vदरस्यति ईर्ष्यति। दरस् तिरस् ईर्ष्यायां कण्ड्वादिः। तमपि vअभि तिष्ठ। यद्वा। प्रकृतो ब्रह्मणस्पतिरेवात्रापि संबोध्यः ॥

अभि त्वा देवः सविताभि सोमो अवीवृतत्।
अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ॥ ३ ॥

अभि। त्वा। देवः। सविता। अभि। सोमः। अवीवृतत्।
अभि। त्वा। विश्वा। भूतानि। अभिऽवर्तः। यथा। अससि ॥ ३ ॥

हे राजन् vदेवः दानादिगुणयुक्तः vसविता vत्वा त्वाम् vअभि vअवीवृतत् अभिवर्तयतु। अभिगमयतु राष्ट्रम्। vसोमः च vअभि वर्तयतु। vविश्वा विश्वानि सर्वाण्यपि vभूतानि पृथिव्यादीनि त्वाम् vअभि वर्तयन्तु। vयथा येन प्रकारेण त्वम् vअभीवर्तः vअससि अभितः सर्वत्र वर्तमानो भवसि ॥ अस्तेश्छान्दसः शपो लुगभावः ॥

येनेन्द्रो हविषा कृत्व्यभवद् द्युम्न्युत्तमः।
इदं तदक्रि देवा असपत्नः किलाभुवम् ॥ ४ ॥

---

१. त१.२.३.७-वाचयीत; म२.४.८-वाचयीत इति।

येन । इन्द्रः । हविषा । कृत्वी । अभवत् । द्युम्नी । उत्ऽउत्तमः ।
इदम् । तत् । अक्रि । देवाः । असपत्नः । किल । अभुवम् ॥ ४ ॥

vयेन vहविषा अस्माभिर्दत्तेन माद्यन् vइन्द्रः vकृत्वी वृत्रवधादेः कर्मणः कर्ता vअभवत् vद्युम्नी । द्युम्नं द्योततेर्यशो वाज्ञं वा । तद्वान् अत एव vउत्तमः उत्कृष्टतमश्चाभवत् vतत् vइदं हविः हे vदेवाः vअक्रि अकारि । यद्वा । अहमकार्षम् । अत एवाहम् vअसपत्नः vकिल vअभुवम् । शत्रुरहितोऽप्यभवं[1] खलु ॥

असपत्नः सपत्नहाभिराष्ट्रो विषासहिः ।
यथाहमेषां भूतानां विराजानि जनस्य च ॥ ५ ॥

असपत्नः । सपत्नऽहा । अभिऽराष्ट्रः । विऽससहिः ।
यथा । अहम् । एषाम् । भूतानाम् । विऽराजानि । जनस्य । च ॥ ५ ॥

vसपत्नहा सपत्नानां शत्रूणां हन्ता अत एव vअसपत्नः शत्रुरहितोऽहमभूवम् । vअभिराष्ट्रः अभिगतराष्ट्रः प्राप्तराज्यः सन् vविषासहिः शत्रूणां विशेषेणाभिभविता चाभूवम् । vयथा येन प्रकारेण vअहमेषां[2] दृश्यमानानां सर्वेषां vभूतानां प्राणिनां vजनस्य vच सेवकस्यामात्यादेश्च vविराजानि यथेश्वरो भवानि तथा सपत्नहा विषासहिश्चाभूवमित्यर्थः ॥ ॥ ३२ ॥

'प्र वः' इति चतुर्ऋचं चतुर्विंशं सूक्तं गायत्रम् । अर्बुदस्य सर्पयेः पुत्र ऊर्ध्वग्रावा नामर्षिः । सोमाभिषवार्था ग्रावाणो देवता । तथा चानुक्रान्तं—'प्र वस्रतुष्कमूर्ध्वग्रावार्बुदिर्ग्रावाणोऽस्तौद्गायत्रम्' इति । ग्रावस्तोत्र एतत्सूक्तम् । सूत्रितं च—'आ व ऋञ्जसे प्र वो ग्रावाण इति सूक्तयोः' (आश्व. श्रौ. ५. १२) इति । यद्वा । इदमेकमेव सूक्तं ग्रावस्तोत्रम् । सूय्यते हि—'प्र वो ग्रावाण इत्येक उक्तं सर्पणम्' (आश्व. श्रौ. ५. १२) इति ॥

प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा । धुर्षु युज्यध्वं सुनुत ॥ १ ॥

प्र । वः । ग्रावाणः । सविता । देवः । सुवतु । धर्मणा । धुःऽसु । युज्यध्वम् । सुनुत ॥ १ ॥

हे vग्रावाणः सोमाभिषवार्थाः पाषाणाः vवः युष्मान् vसविता प्रेरकः vदेवः vधर्मणा आत्मीयेन धारणेन कर्मणा vप्र vसुवतु अभिषवार्थं प्रेरयतु । 'षू प्रेरणे' । तौदादिकः । यूयं च vधुर्षु अभिषवस्थानेषु प्राच्यादिमहादिक्षु vयुज्यध्वं युक्ता भवत । अनन्तरं vसुनुत अभिषुणुत सोमम् ॥

ग्रावाणो अप दुच्छुनामप सेधत दुर्मतिम् । उस्राः कर्तन भेषजम् ॥ २ ॥

ग्रावाणः । अप । दुच्छुनाम् । अप । सेधत । दुःऽमतिम् । उस्राः । कर्तन । भेषजम् ॥ २ ॥

हे vग्रावाणः vदुच्छुनां दुःखकारिणीं शत्रुभूतां प्रजाम् vअप vसेधत अस्मत्तोऽपगमयत । 'षिधु गत्याम्' । तथा vदुर्मतिं दुष्टाभिसंधिं च vअप सेधत । vभेषजं सुखमस्माकं यथा भवति तथा vउस्राः गाः vकर्तन कुरुत ॥ करोतेश्छान्दसो विकरणस्य लुक् । 'तनादिभ्यस्तथासोः' इति तनादेशः ॥

ग्रावाण उपरेष्वा महीयन्ते सजोषसः । वृष्णे दधतो वृष्ण्यम् ॥ ३ ॥

ग्रावाणः । उपरेषु । आ । महीयन्ते । सऽजोषसः । वृष्णे । दधतः । वृष्ण्यम् ॥ ३ ॥

---

१. त१.२.३.६.७.८–'शत्रुरहितोऽप्यभवं' नास्ति । २. त-म–एषामहं ।

vग्रावाणः दिक्षववस्थिताः पाषाणाः vसजोषसः सह प्रीयमाणाः संगताः सन्तो वा vउपरेषु। उपरो नामाभिषवाय चतुर्णां ग्रावणां मध्ये स्थापितो विस्तृतः पाषाणः। प्रदेशापेक्षं बहुवचनम्। उपरस्य प्रान्तेषु vमहीयन्ते प्रकाशन्ते। आकारः पूरणः। किं कुर्वन्तः। vवृष्णे वर्षित्रे सोमाय vवृष्ण्यं वीर्यं vदधतः प्रयच्छन्तः॥

ग्रावाणः सविता नु वो देवः सुवतु धर्मणा। यजमानाय सुन्वते॥ ४॥

ग्रावाणः। सविता। नु। वः। देवः। सुवतु। धर्मणा। यजमानाय। सुन्वते॥ ४॥

vदेवः दानादिगुणयुक्तः vसविता हे vग्रावाणः vवः युष्मान् vधर्मणा आत्मीयेन धारणेन vनु क्षिप्रं vसुवतु अभिषवे प्रेरयतु। किमर्थम्। vसुन्वते सोमाभिषवं कुर्वते vयजमानाय यजमानार्थम्। तस्य यागनिष्पत्तय इत्यर्थः॥ ॥ ३३॥

'प्र सूनवः' इति चतुर्ऋचं पञ्चविंशं सूक्तम्। ऋभुपुत्राः सूनुर्नामर्षिः। द्वितीया गायत्री शिष्टास्तिस्त्रोऽनुष्टुभः। आद्यर्भुदेवस्या शिष्टा आग्नेय्यः। तथा चानुक्रान्तं—'प्र सूनवः सूनुरार्भव आग्नेयमानुष्टुभं द्वितीया गायत्र्याद्यार्भवी' इति। गतो विनियोगः॥

प्र सूनव ऋभूणां बृहन्नवन्त वृजना।
क्षामा ये विश्वधायसोऽभ्रन् धेनुं न मातरम्॥ १॥

प्र। सूनवः। ऋभूणाम्। बृहत्। नवन्त। वृजना।
क्षाम। ये। विश्वऽधायसः। अभ्रन्। धेनुम्। न। मातरम्॥ १॥

vसूनवः एतत्संज्ञाः vऋभूणाम्। ऋभुर्विभ्वा वाज इति त्रयाणामपि प्रथमेन व्यपदेशः। तेषां पुत्राः vबृहत् प्रभूतं vवृजना। संग्रामनामैतत्। वृजनं संग्रामं vप्र vनवन्त। नवतिर्गतिकर्मा। प्रगच्छन्ति। प्रकर्षेण गच्छन्ति। प्रकृष्टगमनेन जयो लक्ष्यते। तत्र शत्रूञ्जयन्तीत्यर्थः। सूनुर्नामर्षिरात्मानमेव परोक्षेण निरदिशत्। एकस्मिन्नपि पूजार्थं बहुवचनम्। vये ऋभवः vविश्वधायसः विश्वस्य धारकाः vक्षाम भूमिम् vअभ्रन् व्याप्नुवन्[1]। 'अशू व्याप्तौ'। व्यत्ययेन क्षा। vधेनुं vन। धेनुः प्रीणयित्री गौः। तामिव तेषामृभूणामित्यन्वयः। यद्वा। सूर्यरश्मयोऽप्यृभव उच्यन्ते। य उरु भासमानाः सूर्यरश्मयो विश्वधायसो विश्वं सर्वं रसं धयन्तः[2] पिबन्तः[3]। यद्वा। वृष्ट्यादिप्रदानेन सर्वस्य धारकाः। पूर्वभूताः सन्तः क्षाम भूमिमभ्रन् अभुञ्जत तदीयं सर्वं रसमपिबन्। तत्र दृष्टान्तः। vमातरं जननीं धेनुं पयस्विनीं गां यथा वत्सः पिबति तथा। य ऋभवोऽभ्नन्ति तेषामृभूणामित्यन्वयः॥

अग्निप्रणयने 'प्र देवम्' इति तृचोऽनुवाक्यः। सूत्रितं च—'प्रेषितोऽग्निप्रणयनीयाः प्रतिपद्यते प्र देवं देव्या धियेति तिस्रः' (आश्व. श्रौ. २. १७) इति॥

प्र देवं देव्या धिया भरता जातवेदसम्। हव्या नो वक्षदानुषक्॥ २॥

प्र। देवम्। देव्या। धिया। भरत। जातऽवेदसम्। हव्या। नः। वक्षत्। आनुषक्॥ २॥

हे ऋत्विग्यजमानाः vदेवं दानादिगुणयुक्तं vजातवेदसं जातानां वेदितारं जातप्रज्ञं जातधनं वा इध्मसमिधं vप्र vभरत प्रकर्षेण हरत। यद्वा। प्राञ्चं नयत। केन साधनेनेति तदाह। vदेव्या दैवीया vधिया प्रज्ञया कर्मणा वा। यद्वा। एषा सहयोगे तृतीया। देव्या धिया युक्तम्। किं प्रयो-

---

१. त१.२.३.६.७.८-भ१.४.८-'व्याप्नुवन्' नास्ति। २. त१.२.३.६.७.८-भ१.४.८-धयंत्यः। ३. त६-पिबंत्यः; भ७-पिबंति।

जनमिति चेत्। ᵛनः अस्माकं ᵛहव्या हव्यानि हवींषि ᵛआनुषक् आनुपूर्व्यादनुक्रमेण ᵛवक्षत्। अयमग्निर्वहेत्। देवान् प्रापयेत्॥ वहेर्लेटि ' सिब्बहुलम्°' इति सिप्॥

अयमु ष्य प्र देवयुर्होता यज्ञाय नीयते।
रथो न योरभीवृतो घृणीवाञ्चेतति त्मना॥ ३॥

अयम्। ऊँ इति। स्यः। प्र। देवऽयुः। होता। यज्ञाय। नीयते।
रथः। न। योः। अभिऽवृतः। घृणिऽवान्। चेतति। त्मना॥ ३॥

ᵛअयमु अयमेव ᵛस्यः सोऽग्निः ᵛदेवयुः[1] देवान् यष्टुमिच्छन् भवति॥ देवशब्दात्क्यचि ' न च्छन्दस्यपुत्रस्य°' इतीत्वदीर्घयोः प्रतिषेधः॥ अयमेव ᵛहोता देवानामाह्वाता। अयमेव ᵛयज्ञाय यागार्थं ᵛप्र ᵛणीयते आहवनीयदेशं प्रति प्रकर्षेण नीयते। अपि च ᵛरथः रंहणशीलः सूर्यो रथवान् वा॥ छान्दसो मत्वर्थीयस्य लोपः॥ स यथा ᵛघृणीवान् दीप्तिमान् तद्वदीप्तः ᵛयोः मिश्रयिता हविषां देवैः संगमयिता॥ यौतेः ' अन्येभ्योऽपि दृश्यन्ते ' इति विच्॥ ᵛअभीवृतः ऋत्विग्यजमानैरावेष्टितः॥ वृणोतेः कर्मणि ' अन्येषामपि° ' इति पूर्वपदस्य दीर्घः। ' गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्॥ एवंभूतोऽग्निः ᵛत्मना आत्मना स्वयमेव ᵛचेतति सम्यग्देवान् यष्टुं जानाति॥ ' मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः॥

अयमग्निरुरुष्यत्यमृतादिव जन्मनः। सहसश्चित् सहीयान् देवो जीवातवे कृतः॥४॥

अयम्। अग्निः। उरुष्यति। अमृतात्ऽइव। जन्मनः।
सहसः। चित्। सहीयान्। देवः। जीवातवे। कृतः॥ ४॥

ᵛअयमग्निः ᵛअमृतात् अमरणाद्देवादेवनिमित्ताद्भयादिव[2] ᵛजन्मनः जायमानात् मनुष्यात् मनुष्यनिमित्ताद्भयादपि ᵛउरुष्यति तस्माद्रक्षति॥ ' उरुष्यती रक्षाकर्मा ' (निरु. ५. २३) इति यास्कः। भाववाचिनोऽमृतशब्दस्य नञा बहुव्रीहौ ' नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम्। ' भीत्रार्थानाम्°' (पा. सू. १. ४. २५) इत्यपादानसंज्ञा॥ अपि चायं ᵛदेवः ᵛसहसश्चित्॥ सह इति बलनाम। तस्मादुत्तरस्य मत्वर्थीयस्य ' बहुलं छन्दसि' इति लुक्॥ चिच्छब्दोऽप्यर्थे। सहस्वतो बलवतोऽपि ᵛसहीयान् बलवत्तरः॥ सहस्विशब्दादीयसुनि ' विन्मतोः°' इति विनो लुक्। ' टेः ' इति टिलोपः॥ एवंभूतो देवः ᵛजीवातवे जीवनहेतवे यागाय ᵛकृतः ब्रह्मणा सृष्टः॥ ॥ ३४ ॥

' पतङ्गम् ' इति तृचं षड्विंशं सूक्तं प्रजापतिपुत्रस्य पतङ्गस्यार्षम्। आद्या जगती ततस्त्रिष्टुभौ। मायाभेदस्य प्रतिपाद्यत्वात्तद्देवत्यमिदं सूक्तम्। अनुक्रान्तं च—' पतङ्गं तृचं पतङ्गः प्राजापत्यो मायाभेदं जगत्यादि ' इति। प्रवर्ग्येऽभिष्टव आद्ये ऋचौ। सूत्रितं च—' पतङ्गमक्तमसुरस्य मायया यो नः सनुत्यः ' (आश्व. श्रौ. ४. ६) इति॥

पतङ्गमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः।
समुद्रे अन्तः कवयो वि चक्षते मरीचीनां पदमिच्छन्ति वेधसः॥ १॥

पतङ्गम्। अक्तम्। असुरस्य। मायया। हृदा। पश्यन्ति। मनसा। विपःऽचितः।
समुद्रे। अन्तरिति। कवयः। वि। चक्षते। मरीचीनाम्। पदम्। इच्छन्ति। वेधसः॥१॥

१. त१.२.३.६.७.८-भ-मु-यो देवयुः। २. त-भ-°द्भयादेव।

vअसुरस्य असनकुशलस्य[1] सर्वोपाधिविहीनस्य परब्रह्मणः संबन्धिन्या vमायया त्रिगुणात्मिकया vअक्तं व्यक्तमभिव्यक्तम्। यद्वा। मायेति प्रज्ञानाम। प्रज्ञया संबद्धं सर्वज्ञं vपतङ्गम्। पतति गच्छतीति पतङ्गः सूर्यः। तं vविपश्चितः विद्वांसः vहृदा हृत्स्थेन। तास्थ्यात्ताच्छब्द्यम्। हृदि निरुद्धेन vमनसा vपश्यन्ति जानन्ति। vकवयः क्रान्तदर्शिनस्ते vसमुद्रे। समुद्रवन्त्यस्माद्रश्मय इति समुद्रं सूर्यमण्डलम्। तस्मिन् vअन्तः मध्ये vवि vचक्षते विपश्यन्ति। मण्डलान्तर्वर्तिनं हिरण्मयं पुरुषमपि जानन्तीत्यर्थः। य एवं vवेधसः विधातार उक्तप्रकारेण सूर्योपासनस्य कर्तारस्ते vमरीचीनां रश्मीनां vपदं स्थानं सूर्यमण्डलम् vइच्छन्ति अभिलषन्ति। तदुपासनया प्राप्नुवन्तीत्यर्थः। यद्वा। मायया व्यक्तं जीवरूपेणाभिव्यक्तमात्मानं विपश्चितो वेदान्ताभिज्ञा हृत्स्थेनान्तर्मुखेन मनसा पतङ्गम्। पतति व्याप्नोतीति पतङ्गः परमात्मा। तं पश्यन्ति। उपाधिपरित्यागेन जीवात्मनः परमात्मना तादात्म्यं साक्षात्कुर्वन्तीत्यर्थः। अपि च ते कवयः क्रान्तदर्शिनो वेदान्ताभिज्ञाः समुद्रे। समुद्रवन्त्यस्मात्सृतानीति समुद्रः परमात्मा। तस्मिन्नधिष्ठानभूतेऽन्तर्मध्ये सर्वं दृश्यजातमध्यस्तत्वेन वि चक्षते विपश्यन्तीति। अतो दृग्व्यतिरिक्तस्य सर्वस्य मिथ्यात्वाद्वेधसो विधातारस्ते मरीचीनां वृत्तिज्ञानानां पदमधिष्ठानभूतं सच्चित्सुखात्मकं यत्परं ब्रह्म तदेवेच्छन्ति। तद्भावप्राप्तिमेव कामयन्ते ॥

वाग्देवाख्ये पशौ 'पतङ्गो वाचम्' इति पुरोडाशस्थानुवाक्या। सूत्रितं च—'यद्वाग्वदन्त्यविचेतनानि पतङ्गो वाचं मनसा बिभर्ति' (आश्व. श्रौ. ३. ८) इति ॥

पतङ्गो वाचं मनसा बिभर्ति तां गन्धर्वोऽवदद्गर्भे अन्तः।
तां द्योतमानां स्वर्यं मनीषामृतस्य पदे कवयो नि पान्ति ॥ २ ॥

पतङ्गः। वाचम्। मनसा। बिभर्ति। ताम्। गन्धर्वः। अवदत्। गर्भे। अन्तरिति। ताम्। द्योतमानाम्। स्वर्यम्। मनीषाम्। ऋतस्य। पदे। कवयः। नि। पान्ति ॥ २ ॥

vपतङ्गः सूर्यः vवाचं त्रयीरूपां vमनसा प्रज्ञया vबिभर्ति धारयति। श्रूयते हि—'ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः' (तै. ब्रा.३.१२.९.१) इति। vताम् एव वाचं vगर्भे शरीरस्य मध्ये वर्तमानः vगन्धर्वः। गाः शब्दान् धारयतीति गन्धर्वः प्राणवायुः। vअन्तः मध्ये vअवदत् वदति प्रेरयति। 'मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम्' (पा. शि. ७) इति स्मरणात्। vद्योतमानां vस्वर्यं स्वर्गमयित्रीं स्वर्गाय हितां वा vमनीषां मनस ईशित्रीं vतां त्रयीरूपां वाचम् vऋतस्य यज्ञस्य सत्यभूतस्य सूर्यस्य वा vपदे स्थाने vकवयः मेधाविन ऋषयः vनि vपान्ति। अध्यापनेन नितरां रक्षन्ति। यद्वा। पतङ्गः सर्वोपाधिशून्यो व्यासः परमात्मा। स[2] सृष्ट्यादौ वाग्वं मनसा बिभर्ति। कानि कानि सृष्टव्यानीति पर्यालोचनेन मनसा सकलार्थप्रतिपादकं वेदं परामृष्टवानित्यर्थः। स्मर्यते हि—'वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः' इति। गर्भे हिरण्मये ब्रह्माण्डेऽन्तर्वर्तमानो गन्धर्वो हिरण्यगर्भस्तां वाचमवदत् प्रथममुच्चारितवान्। द्योतमानत्वादिगुणविशिष्टां तां वाचं कवयः क्रान्तदर्शिनो देवा ऋतस्य सत्यस्य ब्रह्मणः पदे स्थाने नि पान्ति निभृतं रक्षन्ति ॥

प्रवर्ग्येऽभिष्टवे 'अपश्यं गोपाम्' इत्येषा। सूत्रितं च—'अपश्यं गोपामनिपद्यमानं सखे द्रप्सस्य' (आश्व. श्रौ. ४. ६) इति ॥

---

१. त१.२.३-भ–असुरनकुलस्य; त७–असुरकुलस्य। २. त१.२.३.६.८–'स' नास्ति।

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥ ३ ॥

अपश्यम् । गोपाम् । अनिऽपद्यमानम् । आ । च । परा । च । पथिऽभिः । चरन्तम् ।
सः । सध्रीचीः । सः । विषूचीः । वसानः । आ । वरीवर्ति । भुवनेषु । अन्तरिति ॥ ३ ॥

व्याख्यातेयमस्यवामीयसूक्ते (ऋ. सं. १. १६४. ३१) । vगोपां गोपायितारमादित्यम् vअपश्यम् अज्ञासिषम् । एष हि सर्वाणि भूतजातान्युदयास्तमयादिकर्मणा गोपायति । कीदृशम् । vअनिपद्यमानम् उच्चैर्गच्छन्तम् । न ह्यसौ कदाचिन्नीचैः पद्यते । vपथिभिः आकाशमार्गैः पूर्वाह्णे vआ vचरन्तम् अस्मानभिलक्ष्य गच्छन्तं सायंसमये vपरा चरन्तं पराङ्मुखं गच्छन्तम् । प्रकारद्वयसमुच्चयार्थौ चशब्दौ । vसः सूर्यः vसध्रीचीः सहाञ्चन्तीः vविषूचीः विविधं पृथक्पृथगञ्चन्तीः स्वस्वव्यापाराय गच्छन्तीः । प्राच्याद्या महादिशः सध्रीच्यो विषूच्यः कोणदिशः । vवसानः स्वभासाच्छादयन् प्रकाशयन् vभुवनेषु लोकेषु vअन्तः मध्ये vआ vवरीवर्ति । पुनःपुनरुद्यन् अस्तं गच्छंश्चावर्तते । यद्वा । गोपां शरीरस्य गोपायितारमनिपद्यमानमविनाशिनमविपन्नमा[1] च परा चाभिमुखेन च पराङ्मुखेन च पथिभिर्नाडीलक्षणैर्मार्गैश्चरन्तं[2] शरीरे वर्तमानं प्राणमपश्यम्[3] अहमदर्शम् ॥ ॥३५॥

'त्यमू षु' इति तृचं सप्तविंशं सूक्तं तार्क्ष्यपुत्रस्यारिष्टनेमेरार्षं त्रैष्टुभं तार्क्ष्यदेवताकम् । तथा चानुक्रान्तं—'त्यमू ष्वरिष्टनेमिस्तार्क्ष्यस्तार्क्ष्यम्' इति । अहर्गणेषु द्वितीयादिष्वहःसु निष्केवल्यसूक्तानां पुरस्तादिदं सूक्तं शंसनीयम् । सूत्रितं च—'त्यमू षु वाजिनं देवजूतमिति तार्क्ष्यमग्रे निष्केवल्यसूक्तानाम्' (आश्व. श्रौ. ७. १) इति । विषुवति तु निष्केवल्यसूक्तानामन्त एव तत्सूक्तम् । सूय्यते हि—'त्यमू ष्वितीह तार्क्ष्यमन्ततः' (आश्व. श्रौ. ८. ६) इति । महाव्रतेऽपि निष्केवल्य एतत् । तथैव पञ्चमारण्यके सूय्यते (ऐ. आ. ५. ३. १) ॥

त्यमू षु वाजिनं देवजूतं सहावानं तरुतारं रथानाम् ।
अरिष्टनेमिं पृतनाजमाशुं स्वस्तये तार्क्ष्यमिहा हुवेम ॥ १ ॥

त्यम् । ऊँ इति । सु । वाजिनम् । देवऽजूतम् । सहऽवानम् । तरुतारम् । रथानाम् ।
अरिष्टऽनेमिम् । पृतनाजम् । आशुम् । स्वस्तये । तार्क्ष्यम् । इह । हुवेम ॥ १ ॥

vत्यमु तं प्रसिद्धमेव vतार्क्ष्यं तृक्षपुत्रं सुपर्णम् ॥ तृक्षाद्यञ् । गर्गादिः ॥ vस्वस्तये क्षेमाय vइह अस्मिन् कर्मणि vहुवेम भृशमाह्वयेमहि[4] ॥ 'बहुलं छन्दसि' इति ह्वयतेः संप्रसारणम् । लिङ्याशिष्यङ् । यद्वा । प्रार्थनायां लिङि व्यत्ययेन शः ॥ कीदृशम् । vवाजिनं बलवन्तमन्नवन्तं वा vदेवजूतं देवैः सोमाहरणाय प्रेरितम् ॥ जु इति गत्यर्थः सौत्रो धातुः । अस्मात् कर्मणि निष्ठा । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् ॥ यद्वा । देवैः प्रीयमाणं तर्प्यमाणम् । यदाह[5] यास्कः—'जूतिर्गतिः प्रीतिर्वा देवजूतं देवगतं देवप्रीतं वा' (निरु. १०. २८) इति । vसहावानं सहस्वन्तं बलवन्तमभिभवनवन्तं वा अत एव vरथानाम् अन्यदीयानां vतरुतारं संग्रामे जेतारम्[6] । यद्वा । रंहणशीला

---

१. त१.२.३.६.७.८-भ-°विनाशिनमा । २. भ७-°मार्गैरंतश्चरंतं । ३. त१.२.३.६.७ ८-भ१. ४.७.८-अपश्यं । ४. त१.२.३.६.७.८-भ-भृशमाह्वयेमहीति । ५. त१.२.३.७-मु-तदाह । ६. त१. २.३.६.७.८-भ७-नेतारं; त४.५-तारं; भ१.२.४.५-नेतारं; भ८-नतारं ।

इमे लोका रथाः। तान् सोमाहरणसमये शीघ्रं तरीतारम्[1]। श्रूयते हि—'एष हीमाल्लोकान्सद्य-स्तरति' (ऐ. ब्रा. ४. २०) इति॥ तरतेस्तृचि 'ग्रसितस्कभित°' इत्यादावुडागमो निपात्यते (पा. सू. ७. २. ३४)॥ ᵛअरिष्टनेमिम् अहिंसितरथम्। यद्वा। नेमिर्नमनशीलमायुधम्। अहिंसि-तायुधम्। अथवा। उपचाराज्जनके जन्यशब्दः। अरिष्टनेमेर्मम जनकम्। ᵛपृतनाजं पृतनानां शत्रु-सेनानां प्राजितारं प्रगमयितारं जेतारं वा। 'अज गतिक्षेपणयोः'। अस्माद्विप्। 'वलादावार्धधातुके विकल्प इष्यते' (का. २. ४. ५६. २) इति वचनाद्वीभावाभावः। जयतेर्वा डप्रत्ययः। ᵛआशुं शीघ्रगामिनम्॥

इन्द्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवा रुहेम।
उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम॥ २॥

इन्द्रस्यऽइव। रातिम्। आऽजोहुवानाः। स्वस्तये। नावम्ऽइव। आ। रुहेम।
उर्वी इति। न। पृथ्वी इति। बहुले इति। गभीरे इति।
मा। वाम्। आऽईतौ। मा। पराऽइतौ। रिषाम॥ २॥

ᵛइन्द्रस्येव तार्क्ष्यस्य ᵛरातिं दानम् ᵛआजोहुवानाः पुनःपुनराह्वयन्तो वयं ᵛस्वस्तये अविना-शाय ᵛनावमिव नौर्यथा दुरवगाहं समुद्रं तारयति तथा दुःखस्य तारयित्रीं ताम् ᵛआ ᵛरुहेम आरूढा भूयास्म॥ रुहेराशीर्लिङि लिङ्याशिष्यङ्॥ हे ᵛउर्वी उर्व्यौ विस्तीर्णे हे ᵛपृथ्वी पृथिवी प्रथिते विख्याते हे ᵛबहुले अनन्ते ᵛगभीरे गाम्भीर्योपेते ईदृश्यौ हे द्यावापृथिव्यौ। नशब्दः संप्रत्यर्थे। संप्रति ᵛवां युवयोः संबन्धिनि ᵛएतौ तार्क्ष्यस्यागमे ᵛपरेतौ परागमने च वयं ᵛमा ᵛरिषाम हिंसिता मा भूम॥ आङ्पराभ्यामुत्तरस्येणो भावे क्विन्। 'तादौ च निति°' इति गतेः प्रकृतिस्वरत्वम्॥

सद्यश्चिद्यः शवसा पञ्च कृष्टीः सूर्यइव ज्योतिषापस्ततान।
सहस्रसाः शतसा अस्य रंहिर्न स्मा वरन्ते युवतिं न शर्याम्॥ ३॥

सद्यः। चित्। यः। शवसा। पञ्च। कृष्टीः। सूर्यःऽइव। ज्योतिषा। अपः। ततान।
सहस्रऽसाः। शतऽसाः। अस्य। रंहिः। न। स्म। वरन्ते। युवतिम्। न। शर्याम्॥३॥

ᵛयः ᵛचित् योऽपि तार्क्ष्यः ᵛसद्यः शीघ्रं ᵛशवसा आत्मीयेन बलेन ᵛअपः उदकानि अमृत-लक्षणानि ᵛतान विस्तारितवान् ᵛसूर्यइव यथा सूर्यः सर्वस्य प्रेरक आदित्यः ᵛज्योतिषा आत्मीयेन तेजसा वर्षतौ अपो विस्तारयति तद्वत्। कृष्टयो मनुष्याः। ᵛपञ्च ᵛकृष्टीः पञ्चविधान् कृष्टीन् मनुष्यान् प्रति। निषादपञ्चमांश्चतुरो वर्णानित्यर्थः। ᵛअस्य तार्क्ष्यस्य ᵛरंहिः गतिः ᵛसहस्रसाः सहस्रसंख्यस्य धनस्य दात्री संभक्त्री वा भवति। तथा ᵛशतसाः शतस्य च दात्री संभक्त्री वा भवति॥ सनतेः सनोतेर्वा 'जनसनखन°' इति विट्। 'विड्वनोरनुनासिकस्यात्' इत्यात्वम्। ᵛन ᵛस्म न खल्वीदृशीं तार्क्ष्यस्य ते गतिं ᵛवरन्ते के चन वारयन्ति। तत्र दृष्टान्तः। ᵛशर्यां शरकाण्डमयीमिषुं धनुषो मुक्तां ᵛयुवतिं ᵛन लक्ष्येण मिश्रीभवन्तीमिव। सा यथा दुर्निवारा तथैषा कैश्चिदपि वारयितुमशक्येत्यर्थः। अत्र निरुक्तं—'सद्योऽपि यः शवसा बलेन तनोत्यपः सूर्यइव ज्योतिषा पञ्च मनुष्यजातानि सहस्रसानिनी शतसानिन्यस्य सा गतिर्न स्मैनां वारयन्ति प्रयुवतीमिव शरमयीमिषुम्' (निरु. १० २९) इति॥ ॥ ३६ ॥

---

१. ग२-त४.५-भ१.४.७-तरितारं; त१.२.३.६.७-नेतारं। २. त-भ-मु-संबंधि।

' उत्तिष्ठत ' इति तृचमष्टाविंशं सूक्तमैन्द्रम्। आद्यानुष्टुप् शिष्टे त्रिष्टुभौ। उशीनरपुत्रः शिबिर्नाम राजा प्रथमाया ऋषिः। काशीनामधिपतिः प्रतर्दनो नाम द्वितीयायाः। रोहिदश्वपुत्रो वसुमना नाम तृतीयायाः। तथा चानुक्रान्तम्—' उत्तिष्ठतैकर्चाः शिबिरौशीनरः काशिराजः प्रतर्दनो रौहिदश्वो वसुमना आद्यानुष्टुप् ' इति। दधिघर्म आद्या वक्तव्या। सूत्रितं च—' होतर्वदस्वेत्युक्त उत्तिष्ठताव पश्यतेत्याह ' (आश्व. श्रौ. ५. १३) इति ॥

उत्तिष्ठतावं पश्यतेन्द्रस्य भागमृत्वियम्।
यदिं श्रातो जुहोतन यद्यश्रातो ममत्तन ॥ १ ॥

उत्। तिष्ठत। अवं। पश्यत। इन्द्रस्य। भागम्। ऋत्वियम्।
यदिं। श्रातः। जुहोतन। यदिं। अश्रातः। ममत्तन ॥ १ ॥

हे ऋत्विजः [v]उत्तिष्ठत। आसनादूर्ध्वमुत्तिष्ठत। नोपविशत। ऊर्ध्वकर्मत्वादात्मनेपदाभावः (पा. सू. १. ३. २४)। उत्थाय [v]ऋत्वियम् ऋतौ वसन्तादिकाले भवम् [v]इन्द्रस्य [v]भागं भजनीयं दधिघर्मं पच्यमानम् [v]अव [v]पश्यत निरीक्षध्वम्॥ ऋतुशब्दाद्भवार्थे छन्दसि घस्। ' सिति च ' (पा. सू. १. ४. १६) इति पदसंज्ञया भसंज्ञाया बाधादोर्गुणाभावः। भजेः कर्मणि घञन्तो भागशब्दः। ' कर्षात्वतः[०] ' इत्यन्तोदात्तत्वम्॥ [v]यदि स भागः [v]श्रातः पक्वस्तर्हि [v]जुहोतन। इन्द्रार्थमग्नौ जुहुत। ' तप्तनप्तनथनाश्च ' इति तस्य तनबादेशः। ' भीह्री[०] ' (पा. सू. ६. १. १९२) इत्यादिना पिति प्रत्ययात्पूर्वस्योदात्तत्वम्। [v]यद्यश्रातः अपक्वः तर्हि [v]ममत्तन माद्यत। यद्वा। स्तुतिभिर्मादयत॥ अत्र तेनैव सूत्रेण तनबादेशः॥

तस्यैव दधिघर्मस्य ' श्रातं हविः ' इत्येषानुवाक्या। सूत्रितं च—' श्रातं हविरित्युक्तः श्रातं हविरित्यन्वाह ' (आश्व. श्रौ. ५. १३) इति ॥

श्रातं हविरो ष्विन्द्र प्र याहि जगाम सूरो अध्वनो विमध्यम्।
परिं त्वासते निधिभिः सखायः कुलपा न व्राजपतिं चरन्तम् ॥ २ ॥

श्रातम्। हविः। ओ इतिं। सु। इन्द्र। प्र। याहि। जगाम। सूरः। अध्वनः। विऽमध्यम्।
परिं। त्वा। आसते। निधिऽभिः। सखायः। कुलऽपाः। न। व्राजऽपतिम्। चरन्तम्॥२॥

हे [v]इन्द्र [v]हविः दधिघर्माख्यं त्वदीयं[१] [v]श्रातं पक्वम्॥ ' श्रीञ् पाके ' इत्यस्मान्निष्ठायाम् ' अपस्पृधेथाम्[०] ' इत्यादौ श्राभावो निपात्यते। [v]ओ आ उ [v]सु सुष्ठु [v]प्र [v]याहि प्रकर्षेण शीघ्रमागच्छ। [v]सूरः सूर्यः [v]अध्वनः गन्तव्यस्य मार्गस्य [v]विमध्यं विकलमध्यमीषदूनं मध्यभागं [v]जगाम गतवान्। तव यागार्थं मध्याह्नो जात इत्यर्थः। [v]सखायः समानख्याना ऋत्विजश्च [v]निधिभिः निहितैः अभिन्यासादितैः[२] सोमैः[२] सार्धं [v]त्वा त्वां [v]परि [v]आसते पर्युपासते। तत्र दृष्टान्तः। [v]कुलपा [v]न कुलस्य वंशस्य रक्षकाः पुत्रा यथा [v]व्राजपतिम्। व्राजा गन्तव्या गृहाः। तेषां पतिं [v]चरन्तं गच्छन्तमुपासते तथेत्यर्थः॥ ' व्रज गतौ '। अस्मात्कर्मणि घञ्। ' अजिव्रज्योश्च ' (पा. सू. ७. ३. ६०) इति कुत्वनिषेधः। ' कर्षात्वतः[०] ' इत्यन्तोदात्तत्वे ' परयावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरत्वम्॥

तस्यैव दधिघर्मस्य ' श्रातं मन्ये ' इत्येषा याज्या। सूत्र्यते हि—' श्रातं मन्य ऊधनि श्रातमग्नाविति यजति ' (आश्व. श्रौ. ५. १३) इति ॥

---

१. त-भ-मु-तदीयं। २. त४.५-अभिष्टुत्या सहितैः।

श्रातं मन्य ऊधनि श्रातमग्नौ सुश्रातं मन्ये तदृतं नवीयः ।
माध्यंदिनस्य सवनस्य दध्नः पिबेन्द्र वज्रिन् पुरुकृज्जुषाणः ॥ ३ ॥

श्रातम् । मन्ये । ऊधनि । श्रातम् । अग्नौ । सुऽश्रातम् । मन्ये । तत् । ऋतम् । नवीयः ।
माध्यंदिनस्य । सवनस्य । दध्नः । पिब । इन्द्र । वज्रिन् । पुरुऽकृत् । जुषाणः ॥ ३ ॥

vऊधनि गोरूधस्येतद्धधिधर्माख्यं हविः पयोरूपेण vश्रातं पक्वमिति vमन्ये जाने । पुनश्च दुग्धं पयः vअग्नौ अपि vश्रातं पक्वम् । इदानीं दध्यवस्थमप्यग्नौ पच्यते । अतः vसुश्रातं सुपक्वमिति vमन्ये जाने । अत एतद्धविः[1] vऋतं सत्यभूतं vनवीयः नवतरं प्रत्यग्रतरं भवति । हे vवज्रिन् वज्रवन् हे vपुरुकृत् बहुकर्मकृत् vइन्द्र vजुषाणः प्रीयमाणस्त्वं vमाध्यंदिनस्य मध्यंदिने भवस्य vसवनस्य सोमस्य संबन्धिनः vदध्नः । कर्मणि षष्ठी । दधिधर्माख्यं हविः[2] vपिब ॥ ॥ ३७ ॥

' प्र ससाहिषे ' इति तृचमेकोनत्रिंशं सूक्तमिन्द्रपुत्रस्य जयस्यार्षं त्रैष्टुभमैन्द्रम् । तथा चानुक्रान्तं—' प्र ससाहिषे जय ऐन्द्रः ' इति । गतः सूक्तविनियोगः । दर्शे इन्द्रस्य हविषः ' प्र ससाहिषे ' इत्येषा याज्या । सूत्रितं च—' प्र ससाहिषे पुरुहूत शत्रून् महाँ इन्द्रो य ओजसा ' (आश्व. श्रौ.१.६) इति । एकादशिन ऐन्द्रपशौ पुरोडाशस्येयमेव याज्या । सूत्रितं च—' प्र ससाहिषे पुरुहूत शत्रून् स्वस्तये वाजिभिश्च प्रणेतः ' (आश्व. श्रौ. ३. ७) इति । देवसुवां हविःषु इन्द्रस्येयमेवानुवाक्या । सूत्रितं च—' प्र ससाहिषे पुरुहूत शत्रून् भुवस्त्वमिन्द्र ब्रह्मणा महान् ' (आश्व. श्रौ. ४.११) इति ॥

प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु ।
इन्द्रा भर दक्षिणेना वसूनि पतिः सिन्धूनामसि रेवतीनाम् ॥ १ ॥

प्र । ससहिषे । पुरुऽहूत । शत्रून् । ज्येष्ठः । ते । शुष्मः । इह । रातिः । अस्तु ।
इन्द्र । आ । भर । दक्षिणेन । वसूनि । पतिः । सिन्धूनाम् । असि । रेवतीनाम् ॥ १ ॥

हे vपुरुहूत बहुभिराहूतेन्द्र vशत्रून् वैरिणः vप्र vससाहिषे प्रकर्षेणाभिभवसि । vते तव vशुष्मः शोषकं बलं vज्येष्ठः प्रशस्यतमं वृद्धतमं वा भवति । vइह अस्मिन् कर्मणि vरातिः तव दानम् vअस्तु अस्मभ्यं भवतु । तदर्थं हे vइन्द्र vदक्षिणेन हस्तेन vवसूनि धनानि vआ vभर आहर आनय । त्वं vरेवतीनां रयिमतीनां बहुधनानां vसिन्धूनां स्यन्दनशीलानां नदीनां vपतिः vअसि स्वामी भवसि ॥ रयिशब्दान्मतुपि ' रयेर्मतौ बहुलम् ' इति संप्रसारणम् । ' छन्दसीरः ' इति मतुपो वत्वम् । ' रेशब्दाच्च° ' (का. ६.१.१७६.१) इति तस्योदात्तत्वम् ॥

वैमृधस्य हविषः ' मृगो न ' इत्येषा याज्या । सूत्रितं च—' वि न इन्द्र मृधो जहि मृगो न भीमः कुचरो गिरिष्ठाः ' (आश्व. श्रौ. २. १०) इति ॥

मृगो न भीमः कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः ।
सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून् ताळ्हि वि मृधो नुदस्व ॥ २ ॥

मृगः । न । भीमः । कुचरः । गिरिऽस्थाः । पराऽवतः । आ । जगन्थ । परस्याः ।
सृकम् । सम्ऽशाय । पविम् । इन्द्र । तिग्मम् । वि । शत्रून् । ताळ्हि । वि । मृधः । नुदस्व ॥ २ ॥

---

१. त–एव हविः । २. त१.२.३.६.७.८–भ–दधि हविः ।

vकुचरः कुत्सितचरणः vगिरिष्ठाः पर्वतनिवासी vमृगो vन सिंह इव हे इन्द्र त्वं vभीमः भयंकरोऽसि । स त्वं vपरस्याः vपरावतः अतिशयेन दूरात् द्युलोकात् vआ vजगन्थ आगच्छ ॥ गमेश्छान्दसे लिटि[1] क्रादिनियमप्राप्तस्येटः 'उपदेशेऽत्वतः' (पा. सू. ७.२.६२) इति प्रतिषेधः ॥ आगत्य च vसृकं सरणशीलं vतिग्मं तीक्ष्णं vपविं वज्रं vसंशाय सम्यक् तीक्ष्णीकृत्य vशत्रून् अस्मदीयान् वैरिणो हे vइन्द्र तेन वज्रेण vवि vताळ्हि विशेषेण ताडय । विनाशयेत्यर्थः ॥ 'तड आघाते' । अस्माल्लोटि ण्यन्ताद्रूपमेतत् ॥ तथा vमृधः संग्रामोद्युक्तान् युयुत्सूनन्यानपि vवि vनुदस्व विशेषेण[2] तिरस्कुरु ॥

इन्द्र क्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम् ।
अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरु लोकम् ॥ ३ ॥

इन्द्र । क्षत्रम् । अभि । वामम् । ओजः । अजायथाः । वृषभ । चर्षणीनाम् ।
अप । अनुदः । जनम् । अमित्रऽयन्तम् । उरुम् । देवेभ्यः । अकृणोः । ऊँ इति । लोकम् ॥ ३ ॥

हे vइन्द्र vक्षत्रं क्षतात्त्रायकं vवामं वननीयं vओजः बलमभिलक्ष्य vअजायथाः उत्पन्नोऽसि । हे vवृषभ कामानां वर्षितः vचर्षणीनां मनुष्याणामस्माकम् ॥ 'नामन्यतरस्याम्' इति नाम उदात्तत्वम् ॥ vअमित्रयन्तम् । अमित्रः शत्रुः । स इवाचरन्तं vजनम् vअपानुदः अपागमयः । vदेवेभ्यः च vउरुं विस्तीर्णं vलोकं स्वर्गाख्यम् vअकृणोः अकार्षीः । उशब्दः समुच्चये ॥ ॥ ३८ ॥

'प्रथः' इति तृचं त्रिंशं सूक्तं वैश्वदेवं त्रैष्टुभम् । वासिष्ठः प्रथसंज्ञ ऋषिः प्रथमायाः । भारद्वाजः सप्रथास्य ऋषिर्द्वितीयायाः । सूर्यपुत्रो घर्म ऋषिस्तृतीयायाः । तथा चानुक्रान्तं—'प्रथश्चैकर्चः प्रथो वासिष्ठः सप्रथो भारद्वाजो घर्मः सौर्यो वैश्वदेवम्' इति । प्रवर्ग्येऽभिष्टव एतत्सूक्तम् । सूत्रितं च—'गणानां त्वा प्रथश्च यस्य' (आश्व. श्रौ. ४. ६) इति ॥

प्रथश्च यस्य सप्रथश्च नामानुष्टुभस्य हविषो हविर्यत् ।
धातुर्द्युतानात्सवितुश्च विष्णो रथंतरमा जभारा वसिष्ठः ॥ १ ॥

प्रथः । च । यस्य । सऽप्रथः । च । नाम । आनुष्टुभस्य । हविषः । हविः । यत् ।
धातुः । द्युतानात् । सवितुः । च । विष्णोः । रथम्ऽतरम् । आ । जभार । वसिष्ठः ॥ १ ॥

vयस्य वसिष्ठस्य vप्रथः vनाम पुत्रो यस्य भरद्वाजस्य vसप्रथः नाम पुत्रः तयोर्मध्ये vवसिष्ठः vआनुष्टुभस्य अनुष्टुच्छन्दसा युक्तस्य vहविषः घर्माख्यस्य vयत् vहविः हविष्ट्वापादकं vरथन्तरम् । रथंहःसाधनं साम तद्रथन्तरम् । vधातुः धातृसंज्ञादेवात् vद्युतानात् द्योतमानात् vसवितुश्च vविष्णोः च vआ vजभार आजहार । हृतवान् ॥ 'हृग्रहोर्भः' इति भावम् । रथशब्दोपपदात्तरतेः संज्ञायां 'भृतृवृजि०' इति खच् । 'अरुर्द्विषदजन्तस्य' इति मुमागमः ॥

अविन्दन् ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् ।
धातुर्द्युतानात्सवितुश्च विष्णोर्भरद्वाजो बृहदा चक्रे अग्नेः ॥ २ ॥

अविन्दन् । ते । अतिऽहितम् । यत् । आसीत् । यज्ञस्य । धाम । परमम् । गुहा । यत् ।
धातुः । द्युतानात् । सवितुः । च । विष्णोः । भरत्ऽवाजः । बृहत् । आ । चक्रे । अग्नेः ॥ २ ॥

---

१. त४–लिटि थलि । २. त४.५–विशेषेण प्रेरय ।

Vते धात्रादयः तत् Vअविन्दन् अलभन्त Vयत् बृहत्सामाख्यं घर्मस्य हविषः संस्कारकम् Vअतिहितं तिरोहितम् Vआसीत् । Vयत् च बृहत्साम Vयज्ञस्य ज्योतिष्टोमादेः Vपरमम् उत्कृष्टं Vधाम धारकं शरीरभूतं वा Vगुहा गुहायामस्मदादिविषये निहितमासीत् तत्ते धात्रादयोऽलभन्त । तेभ्यः Vअग्नेः Vच सकाशात्तत् Vबृहत् साम Vभरद्वाजः ऋषिः Vआ Vचक्रे आभिमुख्येन कृतवान् । आहृतवानित्यर्थः ॥

तेऽविन्दन्मनसा दीध्यानाः यजुः स्कन्नं प्रथमं देवयानम् ।
धातुर्द्युतानात्सवितुश्च विष्णोरा सूर्यादभरन् घर्ममेते ॥ ३ ॥

ते । अविन्दन् । मनसा । दीध्यानाः । यजुः । स्कन्नम् । प्रथमम् । देवऽयानम् ।
धातुः । द्युतानात् । सवितुः । च । विष्णोः । आ । सूर्यात् । अभरन् । घर्मम् । एते ॥ ३ ॥

Vते धात्रादयः Vदीध्यानाः दीप्यमानाः सन्तः Vमनसा बुद्ध्या Vअविन्दन् अलभन्त । किं तत् । Vयजुः यागसाधनं Vस्कन्नं स्कन्दनीयमासेचनीयं प्रवृज्ञनसाधनं Vप्रथमं मुख्यं Vदेवयानं देवानां प्राप्तिसाधनं Vघर्मम् । एवं धात्रादिभिः प्रथममुपलब्धं तं घर्मं Vधातुः द्योतमानात् Vसवितुः Vविष्णोः Vसूर्यात् Vच Vएते ऋत्विजः Vआ Vअभरन् आहरन् । आनीतवन्त इत्यर्थः ॥ ॥ ३९ ॥

'बृहस्पतिः' इति तृचमेकत्रिंशं सूक्तं बृहस्पतिदेवत्यं त्रैष्टुभम् । बृहस्पतिपुत्रस्तपुर्मूर्धा नामर्षिः । तथा चानुक्रान्तं—'बृहस्पतिस्तपुर्मूर्धा बार्हस्पत्यो बार्हस्पत्यम्' इति । गतो विनियोगः ॥

बृहस्पतिर्नयतु दुर्गहा तिरः पुर्नर्नेषदघशंसाय मन्म ।
क्षिपदश्रस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥ १ ॥

बृहस्पतिः । नयतु । दुःऽगहा । तिरः । पुनः । नेषत् । अघऽशंसाय । मन्म ।
क्षिपत् । अशस्तिम् । अप । दुःऽमतिम् । हन् । अथ । करत् । यजमानाय । शम् । योः ॥ १ ॥

Vबृहस्पतिः बृहतां देवानां पतिः पालयिता ॥ 'तद्धितनोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च' (पा. म. ६. १. १५७) इति सुडागमस्तलोपश्च । 'उभे वनस्पत्यादिषु' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ॥ Vदुर्गहा दुर्गमनानां हन्ता स देवः Vतिरः Vनयतु तिरस्कर्तव्यानि पापान्यपसारयतु । Vअघशंसाय अस्माकमनर्थमाशंसमानाय पुरुषाय Vमन्म । मन्यतेर्दीप्तिकर्मणो मन्म । दीप्तमायुधं Vपुनर्नेषत् नयतु । नयतेर्लेड्यडागमः । 'सिब्बहुलम्' इति सिप् । अपि च Vअशस्तिम् अयशस्विनं शत्रुं Vक्षिपत् क्षिपतु अस्मत्तः प्रेरयतु । Vदुर्मतिं दुर्बुद्धिं च Vअप Vहन् अपहन्तु । Vअथ अनन्तरं Vशं रोगाणां शमनं Vयोः भयानां यावनं च Vकरत् ॥

नराशंसो नोऽवतु प्रयाजे शं नो अस्त्वनुयाजो हवेषु ।
क्षिपदश्रस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥ २ ॥

नराशंसः । नः । अवतु । प्रऽयाजे । शम् । नः । अस्तु । अनुऽयाजः । हवेषु ।
क्षिपत् । अशस्तिम् । अप । दुःऽमतिम् । हन् । अथ । करत् । यजमानाय । शम् । योः ॥२॥

पञ्चसु प्रयाजेषु द्वितीयः प्रयाजो नराशंसदेवताकः । तस्मिन् Vप्रयाजे देवताभूतः Vनराशंसः नरैः शंसनीयोऽग्निः Vनः अस्मान् Vअवतु रक्षतु । Vहवेषु आह्वानेषु सत्सु Vअनुयाजः । त्रयोऽनुयाजाः । द्वितीयोऽनुयाजो नराशंसः । तस्यानुयाजस्य देवताभूतो नराशंसोऽग्निश्च Vनः अस्माकं Vशं सुखकरः Vअस्तु । बृहस्पतिश्च Vअशस्तिं Vक्षिपत् इत्यादि पूर्ववत् ॥

तपुर्मूर्धा तपतु रक्षसो ये ब्रह्मद्विषः शरवे हन्तवा उ ।
क्षिपदश्नस्तिमप दुर्मतिं हन्नथा करद्यजमानाय शं योः ॥ ३ ॥

तपुःऽमूर्धा । तपतु । रक्षसः । ये । ब्रह्मऽद्विषः । शरवे । हन्तवै । ऊँ इति ।
क्षिपत् । अश्नस्तिम् । अप । दुःऽमतिम् । हन् । अथ । करत् । यजमानाय । शम् । योः ॥३॥

[v]तपुर्मूर्धा तापकशिरस्को बृहस्पतिः [v]रक्षसः [v]ये [v]ब्रह्मद्विषः ब्राह्मणद्वेष्टारो राक्षसाः तान् राक्षसान् [v]तपतु तापयतु । दहत्वित्यर्थः । किमर्थम् । [v]शरवे शरुं हिंसकं रक्षसामधिपतिं [v]हन्तवै हन्तुम् । अनुचरान् पूर्वं नाशयतु पश्चादेनमपि नाशयत्वित्यर्थः । 'शॄ[1] हिंसायाम्' इत्यस्मात् 'शॄस्वृस्निहि०' इत्यादिना उप्रत्ययः । 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम् । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थी । हन्तेः 'तुमर्थे सेसेन्०' इति तवैप्रत्ययः । 'अन्तश्च तवै युगपत्' इत्यादयन्तयोर्युगपदुदात्तत्वम् । उशब्दः पूरकः ॥ ॥ ४० ॥

'अपश्यम्' इति तृचं द्वात्रिंशं सूक्तं त्रैष्टुभम् । प्रजापतिपुत्रः प्रजावान्नामर्षिः । ऋचः क्रमेण यजमानपत्नीहोतॄणामाशिषः प्रतिपादिकाः । अतस्तद्देवताकाः । तथा चानुक्रान्तम्—'अपश्यं प्रजावान् प्राजापत्योऽन्वृचं यजमानपत्नीहोत्राशिषः' इति । प्रवर्ग्येऽभिष्टव एतत्सूक्तम् । सूत्र्यते हि—'अपश्यं त्वेत्येतस्याद्यया यजमानमीक्षते द्वितीयया पत्नीं तृतीययात्मानम्' (आश्व. श्रौ. ४. ६) इति ॥

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् ।
इह प्रजामिह रयिं रराणः प्र जायस्व प्रजया पुत्रकाम ॥ १ ॥

अपश्यम् । त्वा । मनसा । चेकितानम् । तपसः । जातम् । तपसः । विऽभूतम् ।
इह । प्रऽजाम् । इह । रयिम् । रराणः । प्र । जायस्व । प्रऽजया । पुत्रऽकाम ॥ १ ॥

हे यजमान [v]त्वा त्वां [v]मनसा बुद्ध्या [v]अपश्यम् अदर्शम् । कीदृशम् । [v]चेकितानं कर्माणि भृशं जानन्तं [v]तपसः दीक्षारूपाद्धेतोः[2] [v]जातं पुनरुत्पन्नं यद्वा जन्मान्तरानुष्ठितात्सुकृतादुत्पन्नं [v]तपसः अनुष्ठीयमानाद्यज्ञाद्धेतोः [v]विभूतं व्याप्तं सर्वत्र प्रख्यातम् । हे [v]पुत्रकाम पुत्रान् कामयमान स त्वम् [v]इह अस्मिँल्लोके [v]प्रजां पुत्रपौत्रादिरूपां [v]रराणः रमयन् [v]रयिं धनम्[3] [v]इह अस्मिँल्लोके रमयन् [v]प्रजया प्रजनेन [v]प्र [v]जायस्व[4] पुत्रादिरूपेणोत्पद्यस्व[5] । प्रजा उत्पादयेत्यर्थः ॥

अपश्यं त्वा मनसा दीध्यानां स्वायां तनू ऋत्व्ये नाधमानाम् ।
उप मामुच्चा युवतिर्बभूयाः प्र जायस्व प्रजया पुत्रकामे ॥ २ ॥

अपश्यम् । त्वा । मनसा । दीध्यानाम् । स्वायाम् । तनू इति । ऋत्व्ये । नाधमानाम् ।
उप । माम् । उच्चा । युवतिः । बभूयाः । प्र । जायस्व । प्रऽजया । पुत्रऽकामे ॥ २ ॥

हे पत्नि[6] [v]दीध्यानां दीप्यमानां [v]स्वायाम् आत्मीयायां [v]तनू तन्वां शरीरे [v]ऋत्व्ये । ऋतुकाले भवं गर्भधारणरूपं कर्म ऋत्वियम् । तस्मिन्निमित्तभूते [v]नाधमानां भर्तुरुपगमनं याचमानां [v]त्वा त्वां [v]मनसा [v]अपश्यम् अद्राक्षम् । हे [v]पुत्रकामे पुत्रान् कामयमाने [v]माम् [v]उप मत्समीपं

---

१. त१.२.३.६.७–शरवे शॄ; त८–किमर्थं शरवे शॄ । २. त१.२.३.६.७.८-म२.४.८–ईक्षारूपा° । ३. त४.५–धनं च । ४. त१.२.३.६.७.८-भ–जायस्व प्रजा उत्पादय; त४.५–जायस्व प्रजा उत्पादयस्व । ५. त१.२.६.८-म१.४.७–°णोत्पाद्यस्व । ६. त४.५–युवति ।

प्राप्य सा त्वम् [v]उषा उच्चैर्भृशं [v]युवतिः तरुणी [v]बभूयाः भूयाः। 'छन्दस्युभयथा' इत्यार्धधातुकत्वाच्छप्। तस्य छान्दसः श्लुः। अलिट्यपि व्यत्ययेन 'भवतेरः' (पा. सू. ७. ४. ७३) इत्यभ्यासस्यात्वम्। युवतिर्भूत्वा च [v]प्रजया प्रजनेन [v]प्र [v]जायस्व पुत्रान् प्रसूष्व। 'जनी प्रादुर्भावे'। श्यनि 'श्नाजनोर्जा' इति जादेशः॥

अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः।
अहं प्रजा अजनयं पृथिव्यामहं जनिभ्यो अपरीषु पुत्रान्॥ ३॥

अहम्। गर्भम्। अदधाम्। ओषधीषु। अहम्। विश्वेषु। भुवनेषु। अन्तरिति।
अहम्। प्रऽजाः। अजनयम्। पृथिव्याम्। अहम्। जनिऽभ्यः। अपरीषु। पुत्रान्॥ ३॥

[v]अहं होता [v]ओषधीषु शाल्यादिषु फलार्थं [v]गर्भमदधां धारयामि। [v]विश्वेषु सर्वेष्वन्येष्वपि [v]भुवनेषु भूतजातेषु [v]अन्तः मध्ये [v]अहम् एव गर्भं धारयामि। तथा [v]पृथिव्यां भूम्यां [v]प्रजाः सर्वान् मनुष्यान् [v]अहम् [v]अजनयं जनयामि। [v]जनिभ्यः जायाभ्यः [v]अपरीषु अन्यास्वपि[1] स्त्रीषु [v]पुत्रान् [v]अहम् अजनयं जनयामि। मत्साध्येन यागेन सर्वस्योत्पत्तेरहं सर्वजननहेतुर्भवामीत्यर्थः॥ ॥४१॥

'विष्णुः' इति तृचं त्रयस्त्रिंशं सूक्तमानुष्टुभम्। गर्भाणां कर्ता त्वष्टा नामर्षिः प्रजापतिपुत्रो विष्णुर्वा। लिङ्गोक्ता विष्णुत्वष्टृप्रजापतिसिनीवालीसरस्वत्यश्विन इति देवताः। तथा चानुक्रान्तं—'विष्णुस्त्वष्टा गर्भकर्ता विष्णुर्वा प्राजापत्यो गर्भार्थाशीर्लिङ्गोक्तदेवतमानुष्टुभम्' इति। लैङ्गिको विनियोगः॥

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु।
आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते॥ १॥

विष्णुः। योनिम्। कल्पयतु। त्वष्टा। रूपाणि। पिंशतु।
आ। सिञ्चतु। प्रजाऽपतिः। धाता। गर्भम्। दधातु। ते॥ १॥

[v]विष्णुः व्यापको देवः [v]योनिं गर्भाधानस्थानं [v]कल्पयतु करोतु। [v]त्वष्टा तनुकर्ता एतत्संज्ञको देवश्च [v]रूपाणि निरूपकाणि स्त्रीत्वपुंस्त्वाभिव्यञ्जकानि चिह्नानि [v]पिंशतु अवयवीकरोतु॥ 'पिश अवयवे'। सुचादित्वाद्धम्॥ एवं प्रकल्पितायां योन्यां [v]प्रजापतिः रेतः [v]आ [v]सिञ्चतु निषिञ्चतु। विसृजत्वित्यर्थः। [v]धाता धारको देवो हे जाये [v]ते तव [v]गर्भं गर्भरूपेण परिणतं तद्रेतः [v]दधातु। तत्रैव धारयतु। स्रावपातापप्रसवा मा भूवन्नित्यर्थः॥

गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति।
गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा॥ २॥

गर्भम्। धेहि। सिनीवालि। गर्भम्। धेहि। सरस्वति।
गर्भम्। ते। अश्विनौ। देवौ। आ। धत्ताम्। पुष्करऽस्रजा॥ २॥

हे [v]सिनीवालि एतत्संज्ञे देवि [v]गर्भं [v]धेहि। निषिक्तं गर्भं धारय। हे[2] [v]सरस्वति त्वं च निषिक्तं [v]गर्भं धारय[2]। हे जाये [v]पुष्करस्रजा पुष्करमालिनौ स्वर्णकमलाभरणौ [v]अश्विनौ [v]देवौ [v]ते तव [v]गर्भम् [v]आ [v]धत्तां प्रक्षिपताम्। कुरुतामित्यर्थः॥

हिरण्ययी अरणी यं निर्मन्थतो अश्विना।
तं ते गर्भं हवामहे दशमे मासि सूतवे॥ ३॥

---

१. त४.५–अपरास्वपि। २. त१.२.३.६.७.८-म२.४.५.८–'हे सरस्वति.....धारय' नास्ति।

हिरण्ययी इति । अरणी इति । यम् । निःऽमन्थतः । अश्विना ।
तम् । ते । गर्भम् । हवामहे । दशमे । मासि । सूतवे ॥ ३ ॥

vहिरण्ययी हिरण्मय्यौ vअरणी vयं गर्भमुद्दिश्य vअश्विना अश्विनौ देवौ vनिर्मन्थतः निर्मथितवन्तौ हे जाये vते तुभ्यं त्वदर्थं vतं vगर्भं vहवामहे आह्वयामहे । vदशमे vमासि vसूतवे प्रसोतुम् ॥ ' पहन् ' इत्यादिना मासशब्दस्य मासभावः । सूतेः ' तुमर्थे सेसेन् ' इति तवेन्प्रत्ययः ॥ ॥४२॥

' महि ' इति तृचं चतुस्त्रिंशं सूक्तं वरुणपुत्रस्य सत्यधृतेरार्षं गायत्रमादित्यदेवताकम् । तथा चानुक्रान्तं—' महि सत्यधृतिर्वारुणिरादित्यं स्वस्त्ययनं गायत्रं वा ' इति । धनलिप्सया प्रवसन्तं शिष्यमाचार्योऽनेन सूक्तेनाभिमन्त्रयते । सूय्यते हि—' महि त्रीणामित्यनुमन्त्र्यैवमतिसृष्टस्य न कुतश्चिद्भयं भवतीति विज्ञायते ' (आश्व. गृ. ३. १०. ७-८) इति ॥

महि त्रीणामवोऽस्तु द्युक्षं मित्रस्यार्यम्णः । दुराधर्षं वरुणस्य ॥ १ ॥

महि । त्रीणाम् । अवः । अस्तु । द्युक्षम् । मित्रस्य । अर्यम्णः । दुःऽआधर्षम् । वरुणस्य ॥ १ ॥

vत्रीणां त्रयाणां vमित्रस्य vअर्यम्णः vवरुणस्य च vद्युक्षं दीप्यमत एव vदुराधर्षम् अन्यैर्धर्षितुं बाधितुमशक्यं vमहि महत् vअवः रक्षणमस्माकम् vअस्तु । ' त्रीणामित्यपि छन्दसि दृश्यते ' (का. ७. १. ५३. १) इति वचनात् त्रयादेशाभावः । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् ॥

नहि तेषाममा चन नाध्वसु वारणेषु । ईशे रिपुरघशंसः ॥ २ ॥

नहि । तेषाम् । अमा । चन । न । अध्वऽसु । वारणेषु । ईशे । रिपुः । अघऽशंसः ॥ २ ॥

vअमेति गृहनाम । vअमा vचन गृहेष्वपि vतेषां वरुणमित्रार्यम्णां तदनुगृहीतानां स्तोतॄणां वा vअघशंसः अघमनर्थमाशंसमानः vरिपुः शत्रुः vनहि vईशे न[1] खलु[1] हिंसितुमीष्टे ॥ ' लोपस्त आत्मनेपदेषु ' इति तलोपः । अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते[2] ॥ तथा vअध्वसु मार्गेषु vवारणेषु यत्र पुरुषा निवार्यन्ते तेषु च स्थानेषु शत्रुर्निवारयितुं vन ईष्टे ॥

यस्मै पुत्रासो अदितेः प्र जीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रम् ॥ ३ ॥

यस्मै । पुत्रासः । अदितेः । प्र । जीवसे । मर्त्याय । ज्योतिः । यच्छन्ति । अजस्रम् ॥ ३ ॥

vअदितेः अदीनाया देवमातुः vपुत्रासः पुत्रा मित्रादयः vयस्मै vमर्त्याय मनुष्याय स्तोत्रे vअजस्रम् अविच्छिन्नं vज्योतिः तेजः vजीवसे जीवितुं vप्र vयच्छन्ति तस्य शत्रुर्नेश्वर इत्यर्थः ॥ ॥४३॥

' वातः ' इति तृचं पञ्चत्रिंशं सूक्तं वातगोत्रस्योलस्यार्षं गायत्रं वायुदेवताकम् । तथा चानुक्रान्तं—' वातो वातायन उलो वायव्यम् ' इति । गतो विनियोगः ॥

वात आ वातु भेषजं शंभु मयोभु नो हृदे । प्र ण आयूंषि तारिषत् ॥ १ ॥

वातः । आ । वातु । भेषजम् । शम्ऽभु । मयःऽभु । नः । हृदे ।
प्र । नः । आयूंषि । तारिषत् ॥ १ ॥

vवातः वायुः vनः अस्माकं vहृदे हृदयाय vभेषजम् औषधमुदकं वा vआ vवातु आगमयतु । कीदृग्भूतम्[3] । vशंभु रोगशमनस्य भावयितृ vमयोभु सुखस्य च भावयितृ । अपि च vनः अस्माकम् vआयूंषि vप्र vतारिषत् प्रवर्धयतु ॥

---

१. त१.२.३.६.७.८-भ-न हि त्वा खलु । २. त१.२.३.६.७.८-भ-' शिष्यते ' नास्ति । ३. त१.२.३.६.७.८-भ-मु-ईदृग्भूतं ।

उत वात पितासि न उत भ्रातोत नः सखा । स नो जीवातवे कृधि ॥२ ॥

उत । वात । पिता । असि । नः । उत । भ्राता । उत । नः । सखा ।
सः । नः । जीवातवे । कृधि ॥ २ ॥

vउत अपि च हे vवात त्वं vनः अस्माकं vपिता vअसि उत्पादको भवसि । vउत अपि च vभ्राता भवसि[1] । vउत अपि च vनः अस्माकं vसखा समानस्थानो मित्रभूतश्च भवसि । vसः त्वं vनः अस्मान् vजीवातवे जीवनहेतवे यागाय vकृधि कुरु ॥ करोतेश्छान्दसो विकरणस्य लुक् । 'श्रुश्रृणुपृकृवृम्भ्यः०' इति हेर्धिः ॥

यदुदो वात ते गृहेऽमृतस्य निधिर्हितः । ततो नो देहि जीवसे ॥ ३ ॥

यत् । अदः । वात । ते । गृहे । अमृतस्य । निऽधिः । हितः । ततः । नः । देहि । जीवसे ॥३॥

हे vवात वायो vते तव vगृहे स्थाने vयददः योऽसौ vअमृतस्य अमरणस्य vनिधिः निक्षेपः vहितः स्थापितो वर्तते vततः तस्मान्निधेराहृत्यामृतत्वं vजीवसे vनः अस्माकं जीवनाय vदेहि प्रयच्छ ॥ ॥ ४४ ॥

'प्राग्नये' इति पञ्चर्चं षट्त्रिंशं सूक्तमग्नेः पुत्रस्य वत्सस्यार्षं गायत्रमाग्नेयम् । तथा चानुक्रान्तं —'प्राग्नये पञ्चाग्नेयो वत्स आग्नेयं तु' इति । प्रातरनुवाकाश्विनशस्त्रयोर्गायत्रे छन्दसीदमादिके द्वे सूक्ते । सूत्र्यते हि—'प्राग्नये वाचमिति सूक्त इमां मे अग्ने समिधम्' (आश्व. श्रौ. ४. १३) इति । दशरात्रस्य नवमेऽहन्याग्निमारुत इदं जातवेदसं निविद्धानम् । सूत्रितं च—'मरुतो यस्य हि प्राग्नये वाचमित्याग्निमारुतम्' (आश्व. श्रौ. ८. ११) इति ॥

प्राग्नये वाचमीरय वृषभाय क्षितीनाम् । सः नः पर्षदति द्विषः ॥ १ ॥

प्र । अग्नये । वाचम् । ईरय । वृषभाय । क्षितीनाम् । सः । नः । पर्षत् । अति । द्विषः ॥१॥

हे स्तोतः vअग्नये स्तुतिरूपां vवाचं vप्र vईरय उच्चारय । कथंभूताय । vक्षितीनां मनुष्याणां यजमानानां vवृषभाय कामानां वर्षित्रे । किं प्रयोजनमिति चेत् । vसः अग्निः vनः अस्मान् vद्विषः द्वेष्टॄन् vअति vपर्षत् अतिपारयेत् ॥

यः परस्याः परावतस्तिरो धन्वातिरोचते । स नः पर्षदति द्विषः ॥ २ ॥

यः । परस्याः । पराऽवतः । तिरः । धन्व । अतिऽरोचते । सः । नः । पर्षत् । अति । द्विषः ॥२॥

vयः अग्निः vपरस्याः vपरावतः अतिशयिताद्दूरदेशात् vतिरः । प्रासनामैतत् । प्रासंबन्धं vधन्व मरुभूमिं जलवर्जितं देशम् vअतिरोचते अतिक्रम्य प्रज्वलति । यद्वा । धन्व अन्तरिक्षम् । धन्वन्यन्तरिक्षे तिरस्तिर्यगतिरोचते भृशं प्रकाशते । गतमन्यत् ॥

यो रक्षांसि निजूर्वति वृषा शुक्रेण शोचिषा । स नः पर्षदति द्विषः ॥ ३ ॥

यः । रक्षांसि । निऽजूर्वति । वृषा । शुक्रेण । शोचिषा । सः । नः । पर्षत् । अति । द्विषः ॥३॥

vवृषा वर्षिता vयः अग्निः vशुक्रेण निर्मलेन शुभ्रवर्णेन वा vशोचिषा तेजसा vरक्षांसि यज्ञस्य हन्तॄणि vनिजूर्वति निहिनस्ति । जूर्वी हिंसार्थः । गतमन्यत् ॥

यो विश्वाभि विपश्यति भुवना सं च पश्यति । स नः पर्षदति द्विषः ॥ ४ ॥

यः । विश्वा । अभि । विऽपश्यति । भुवना । सम् । च । पश्यति । सः । नः । पर्षत् । अति । द्विषः ॥४॥

१. भ–असि ।

vयः अग्निः सूर्यरूपेण vविश्वा विश्वानि सर्वाणि भूतजातानि vअभि अभिमुखं vविपश्यति विशेषेण तेजसा प्रेक्षते । प्रकाशयतीत्यर्थः । vभुवना भुवनानि भूतजातानि vसं vपश्यति vच सम्यग्जानाति च । अन्यत्सिद्धम्[1] ॥

यो अस्य पारे रजसः शुक्रो अग्निरजायत । स नः पर्षदति द्विषः ॥ ५ ॥

यः । अस्य । पारे । रजसः । शुक्रः । अग्निः । अजायत । सः । नः । पर्षत् । अति । द्विषः ॥५॥

vअस्य vरजसः[2] लोकस्यान्तरिक्षस्य vपारे उपरिदेशे[3] vशुक्रः शुभ्रवर्णः vयः vअग्निः विद्युदात्मना[4] सूर्यात्मना वा vअजायत प्रादुर्भवति vसः vनः अस्मान् vद्विषः द्वेष्टॄन् vअति vपर्षत् अतिपारयतु ॥ ॥ ४५ ॥

'प्र नूनम्' इति तृचं सप्तत्रिंशं सूक्तमग्निपुत्रस्य इध्मवाहस्यार्षं गायत्रम् । जातवेदोगुणकोऽग्निर्देवता । तथा चानुक्रान्तं—'प्र नूनं तृचमाग्नेयः इध्मो जातवेदसीयम्' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

प्र नूनं जातवेदसमश्वं हिनोत वाजिनम् । इदं नो बर्हिरासदे ॥ १ ॥

प्र । नूनम् । जातऽवेदसम् । अश्वम् । हिनोत । वाजिनम् । इदम् । नः । बर्हिः । आऽसदे ॥१॥

vजातवेदसं जातानां वेदितारं जातधनादिकं वा vअश्वं कर्मभिर्व्याप्नुवन्तं vवाजिनम् अन्नवन्तं हे ऋत्विग्यजमानाः vनूनम् अवश्यं vप्र vहिनोत प्रवर्धयत । यद्वा । अश्वमिव स्तुतिभिः प्रेरयत । 'हि गतौ वृद्धौ च' । अस्माल्लोटि तशब्दस्य 'तप्तनप्तनथनाश्च' इति तबादेशः । किमर्थम् । vनः अस्माकम् vइदं vबर्हिः आस्तीर्णम् vआसदे आसत्तुं प्राप्तुम् । बर्हिरासीदत्वित्यर्थः ॥ सदेः 'कृत्यार्थे तवैकेन्०' इति केन्प्रत्ययः ॥

अस्य प्र जातवेदसो विप्रवीरस्य मीळ्हुषः । महीमियर्मि सुष्टुतिम् ॥ २ ॥

अस्य । प्र । जातऽवेदसः । विप्रऽवीरस्य । मीळ्हुषः । महीम् । इयर्मि । सुऽस्तुतिम् ॥ २ ॥

vजातवेदसः जातानां वेदितुः vविप्रवीरस्य । विप्रा मेधाविनो यजमाना वीराः पुत्रा यस्य । तादृशस्य vमीळ्हुषः सेक्तुः vअस्य अग्नेः vमहीं[5] महतीं vसुष्टुतिं शोभनां स्तुतिं vप्र vइयर्मि प्रेरयामि ॥ 'ऋ गतौ' । जौहोत्यादिकः । 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्येत्वम् ॥

या रुचो जातवेदसो देवत्रा हव्यवाहनीः । ताभिर्नो यज्ञमिन्वतु ॥ ३ ॥

याः । रुचः । जातऽवेदसः । देवऽत्रा । हव्यऽवाहनीः । ताभिः । नः । यज्ञम् । इन्वतु ॥३॥

vजातवेदसः अग्नेः vयाः vरुचः रोचमानाः कालीकरालीप्रभृतयः सप्त जिह्वाः vदेवत्रा देवान् प्रति ॥ 'देवमनुष्यपुरुषपुरुमर्त्येभ्यः०' (पा.सू. ५.४.५६) इत्यादिना द्वितीयार्थे त्राप्रत्ययः ॥ vहव्यवाहनीः[6] हव्यानां हविषां वोढ्र्यः प्रापयित्र्यो भवन्ति ॥ 'वा छन्दसि' इति जसि पूर्वसवर्णदीर्घः ॥ vताभिः जिह्वाभिः vनः अस्माकं vयज्ञं यागसाधनं हविः vइन्वतु देवान्[7] प्रापयतु । 'इवि व्याप्तौ' । इदित्वान्नुम् ॥ ॥ ४६ ॥

'आयं गौः' इति तृचमष्टात्रिंशं सूक्तं गायत्रम् । सार्पराज्ञी नामर्षिका । सैव देवता सूर्यो वेति । तथा चानुक्रान्तम्—'आयं गौः सार्पराज्ञ्यात्मदैवतं सौर्यं वा' इति । अविवाक्येऽहनि मानसग्रह

---

१. त१.२.३.६.७.८-भ-'अन्यत्सिद्धं' नास्ति । २. त४.५-'रजसः' नास्ति । ३. त४.५-उपरिदेशे रजसः रक्तवर्णः । ४. त१.२.३.६.७.८-भ-मु-वैद्युतात्मना । ५. त१.२.३.७-भ१.२.४.८-'महीं' नास्ति; भ७-महि । ६. त-भ-'हव्यवाहनीः' नास्ति । ७. त१.२.३.६.७.८-भ१.२.४.८-'देवान् प्रापयतु' नास्ति ।

पुत्तसूक्तं शंसनीयम्। सूत्रितं च—'आयं गौः पृश्निरक्रमीदित्युपांशु तिस्रः पराचीः शस्त्वा' (आश्व. श्रौ. ८. १३) इति ॥

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः ॥ १ ॥

आ। अयम्। गौः। पृश्निः। अक्रमीत्। असदत्। मातरम्। पुरः।
पितरम्। च। प्रऽयन्। स्वरिति स्वः ॥ १ ॥

[v]गौः गमनशीलः [v]पृश्निः प्राप्तवर्णः प्राप्ततेजाः [v]अयं सूर्यः [v]आ [v]अक्रमीत् आक्रान्तवान्। उदयाचलं प्राप्तवानित्यर्थः। आक्रम्य च [v]पुरः पुरस्तात् पूर्वस्यां दिशि [v]मातरं सर्वस्य भूतजातस्य निर्मात्रीं पृथिवीम् [v]असदत् आसीदति प्राप्नोति। सदेश्छान्दसो लुङ्। लृदित्वाच्च्लेरङादेशः। ततः [v]पितरं पालकं द्युलोकं[1] चशब्दादन्तरिक्षं च [v]प्रयन्[2] प्रकर्षेण शीघ्रं गच्छन् [v]स्वः स्वरणः शोभनगमनो भवति। यद्वा। पितरं स्वर्गलोकं प्रयन् वर्तते ॥

अन्तश्चरति रोचनास्य प्राणादपानती। व्यख्यन्महिषो दिवम् ॥ २ ॥

अन्तरिति। चरति। रोचना। अस्य। प्राणात्। अपऽअनती।
वि। अख्यत्। महिषः। दिवम् ॥ २ ॥

[v]अस्य सूर्यस्य [v]रोचना रोचमाना दीप्तिः [v]अन्तः शरीरमध्ये मुख्यप्राणात्मना [v]चरति वर्तते। किं कुर्वती। [v]प्राणादपानती। मुख्यप्राणस्य प्राणाद्याः पञ्च वृत्तयः। तत्र प्राणनं नाडीभिरूर्ध्वं वायोर्निर्गमनम्। तथाविधात् प्राणात् प्राणनादनन्तरमपानती। अपानं नाडीभिरवाङ्मुखं वायोर्नयनम्। तत्कुर्वती ॥ अपपूर्वादनितेर्लटः शतृ। अदादित्वाच्छपो लुक्। 'उगितश्च' इति ङीप्। 'शतुरनुमः०' इति नद्या उदात्तत्वम् ॥ यद्वा। अन्तर्द्यावापृथिव्योर्मध्ये अस्य सूर्यस्य रोचना रोचमाना दीप्तिः चरति गच्छति ॥ 'रुच दीप्तौ'। 'अनुदात्तेतश्च हलादेः' (पा. सू. ३. २. १४९) इति युच् ॥ किं कुर्वती। प्राणात्प्राणनादुदयानन्तरमपानती सायंसमयेऽस्तं गच्छन्ती। ईदृश्या दीप्त्या युक्तः। अत एव [v]महिषः महान् सूर्यो [v]दिवम् अन्तरिक्षमुदयास्तमययोर्मध्ये [v]व्यख्यत् विचष्टे। प्रकाशयति ॥ महेः 'अविमथ्योष्टिषच्' (उ. सू. १. ४६) इत्यौणादिकष्टिषच्प्रत्ययः। चक्षिङः ख्याञ्। छान्दसे लुङि 'अस्यतिवक्ति०' इत्यादिना च्लेरङादेशः ॥

त्रिंशद्धाम वि राजति वाक्पतङ्गाय धीयते। प्रति वस्तोरह द्युभिः ॥ ३ ॥

त्रिंशत्। धाम। वि। राजति। वाक्। पतङ्गाय। धीयते। प्रति। वस्तोः। अह। द्युऽभिः ॥३॥

[v]त्रिंशद्धाम[3] धामानि स्थानानि। वचनव्यत्ययः। [v]वस्तोः वासरस्याहोरात्रस्यावयवभूतानि। अहशब्दोऽवधारणे। [v]द्युभिः सूर्यस्य दीप्तिभिरेव [v]वि राजति विराजन्ते विशेषेण दीप्यन्ते। व्यत्ययेनैकवचनम्। मुहूर्तान्यत्र धामान्युच्यन्ते। पञ्चदश रात्रेः पञ्चदशाह्नः। [v]पतङ्गाय। पतति गच्छतीति पतङ्गः सूर्यः। तस्मै[4] स्तुतिरूपा [v]वाक् [v]प्रति [v]धीयते प्रतिमुखं[5] स्तोतृभ्यः[5] क्रियते[6]। यद्वा। वस्तोरहनि त्रिंशद्धामानि। घटिकाभिप्रायमेतत्। त्रिंशद्घटिकाः। अत्यन्तसंयोगे द्वितीया। एतावन्तं कालं [v]द्युभिः दीप्तिभिरसौ सूर्यो वि राजति। विशेषेण दीप्यते। तस्मिंश्च समये वाक् त्रयीरूपा तस्मै सूर्यरूपाय[7] पतङ्गाय प्रति धीयते प्रतिमुखं धार्यते। सूर्यं सेवत इत्यर्थः। श्रूयते हि—'ऋभिः

---

१. त१.२.३.६.७.८-भ१.२.७.८—भूलोकं। २. त१.२.३.६.७.८—प्रयच्छति; भ१.२.४.८—प्रयच्छन्। ३. त१.२.३.७-भ२.४.८—त्रिंशत्। ४. त४.५—तस्मै सूर्याय। ५. त१.२.३.६.७.८-भ—'प्रतिमुखं स्तोतृभ्यः' नास्ति। ६. त४.५—अभिधीयते। ७. त१.२.३.६.७.८-भ—'सूर्यरूपाय' नास्ति।

पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्ये अह्नः ' (तै. ब्रा. ३. १२. ९. १) इत्यादि । यदा त्विदं सूक्तं सार्परराज्ञ्या आत्मस्तुतिः तदा सूर्यात्मना स्तूयत इत्यवगन्तव्यम् ॥ ॥ ४७ ॥

' ऋतम् ' इति तृचमेकोनचत्वारिंशं सूक्तं मधुच्छन्दसः पुत्रस्याघमर्षणस्यार्षमानुष्टुभम् । राज्यादीनां भावानां सृष्ट्यादिप्रतिपादकत्वात्तादृग्रूप एवार्थो देवता । तथा चानुक्रान्तम्—'ऋतं माधुच्छन्दसोऽघमर्षणो भाववृत्तमानुष्टुभं तु ' इति । लिङ्गाद्विनियोगोऽवगन्तव्यः ॥

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥१॥

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः ॥ १ ॥

ऋतमिति सत्यनाम । ऋतं मानसं यथार्थसंकल्पनं सत्यं वाचिकं यथार्थभाषणम् । चकाराभ्यामन्यदपि शास्त्रीयं धर्मजातं समुच्चीयते । तत्सर्वमभीद्धादभितप्ताद्ब्रह्मणा पुरा सृष्ट्यर्थं कृतात्तपसोऽधि । अध्युपर्यर्थे । उपर्यजायत । उदपद्यत । ' तपस्तप्त्वेदं सर्वमसृजत ' (तै. आ. ८. ६) इति श्रुतेः । तपश्चात्र स्रष्टव्यपर्यालोचनलक्षणम् । ' यस्य[1] ज्ञानमयं तपः ' (मु. उ. १. १. ९) इति श्रुत्यन्तरात् ॥ अभिपूर्वादिन्धेः कर्मणि निष्ठा । ' श्वीदितो निष्ठायाम् ' (पा. सू. ७. २. १४) इतीट्प्रतिषेधः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । ' स्वरितो वानुदात्ते पदादौ ' इत्येकादेशः स्वर्यते ॥ यद्वा । अभीद्धादभितः प्रकाशमानात्[2] परमात्मनो मायाधिष्ठानरूपादुपादानभूतादृतं सत्यं[3] चाजायत[3] ॥ ' जनिकर्तुः प्रकृतिः ' (पा. सू. १. ४. ३०) इति प्रकृतेरपादानसंज्ञा ॥ ततस्तस्मादेवेश्वरात्रात्री । उपलक्षणमेतदह्नोऽपि । अहश्च रात्रिश्चाजायत ॥ ' रात्रेश्चाजसौ ' (पा. सू. ४. १. ३१) इति ङीप् । ततस्तस्मादेवेश्वरादर्णवोऽर्णसोदकेन युक्तः समुद्रश्चाजायत । समुद्रशब्दोऽन्तरिक्षोदध्योः साधारण इत्यभिमतार्थस्य प्रकाशनायार्णवशब्देन विशेष्यते । ' अर्णसः सलोपश्च ' (का. ५. २. १०९. ३) इति मत्वर्थीयो वप्रत्ययः सलोपश्च ॥

समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥२॥

समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥ २ ॥

अर्णवात्समुद्रात्सृष्टादध्यूर्ध्वं संवत्सरः संवत्सरोपलक्षितः सर्वः कालोऽजायत । श्रूयते हि—' सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्ताः काष्ठाश्च ' (तै. आ. १०. १. २) इति । स चेश्वरोऽहोरात्राण्येतदुपलक्षितानि सर्वाणि भूतजातानि विदधत् कुर्वन् सृजन् ॥ ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । ततः समासे कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ मिषतो[4] निमिषादियुक्तस्य विश्वस्य सर्वस्य प्राणिजातस्य वशी स्वामी भूत्वा वर्तते[4] ॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥३॥

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः ॥ ३ ॥

---

१. त१.२.३.७-म२.४.८-' यस्य ' नास्ति । २. त४.५-प्रकाशमानात् स्वप्रकाशात् । ३. त४.५-च सत्यं वाजायत । ४. त३.४.५.८-म४.५.७.८-' मिषतो ... वर्तते ' नास्ति; म२-विश्वस्य त्रैलोक्यस्य मिषतः जायमानः वशी स्वामी; त१.२.६.७-स तादृशो धाता परमेश्वरः सूर्यादिदेवान् पृथिव्यादिलोकांश्च यथापूर्वं अतीतसृष्टौ यस्य यादृशं रूपं तादृशमनतिक्रम्य अकल्पयत् संकल्पमात्रेण संपादितवान् । दिवं चेत्युपात्तत्वात् स्वःशब्देन भोगविशेषो विवक्षितः । अघमर्षणं कृत्वा । तत ऊर्ध्वमवगाहनार्थास्तिस्र ऋचो दर्शयति । तैत्रीउपनिषदे बृहन्नारायणे माधवीव्याख्यापंक्तिः; त३.४.५.८-म४.५.८-पुस्तकेषु तृतीयमंत्रस्य भाष्यं नास्ति ।

सूर्याचन्द्रमसौ कालस्य ध्वजभूतौ[1] दिवं च पृथिवीं चान्तरिक्षं च इत्थं त्रिभुवनं स्वः । स्वःशब्दः सुखवाची । दिवो विशेषणम् । सुखरूपां दिवम् । तदेतत्सर्वं धाता विधाता यथापूर्वं पूर्वस्मिन् कल्पे अकल्पयत् सृष्टवान् तथैवागामिन्यपि कल्पे कल्पयिष्यतीत्यर्थः ॥ ॥ ४८ ॥

'संसम्' इति चतुर्ऋचं चत्वारिंशं सूक्तं संवननस्यार्षम् । 'समानो मन्त्रः' इति तृतीया त्रिष्टुप् शिष्टास्तिस्रोऽनुष्टुभः । प्रथमायाः अग्निर्देवता[2] । शिष्टानां संज्ञानम् । अनुक्रम्यते च—'संसं चतुष्कं संवननः संज्ञानमाद्याग्नेयी तृतीया त्रिष्टुप् तृतीया त्रिष्टुप्[3] ' इति[4] । 'आनुष्टुभं तु' इति पूर्वमुक्त्वादवशिष्टानामनुष्टुप्त्वम् । सूक्तविनियोगो लैङ्गिकः ॥

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इळस्पदे समिध्यसे स नो वसून्या भर ॥१॥

सम्ऽसम् । इत् । युवसे । वृषन् । अग्ने । विश्वानि । अर्यः । आ ।
इळः । पदे । सम् । इध्यसे । सः । नः । वसूनि । आ । भर ॥ १ ॥

हे [v]वृषन् कामानां वर्षितः [v]अग्ने [v]अर्यः ईश्वरस्त्वम् । 'अर्यः स्वामिवैश्ययोः' (पा. सू. ३. १. १०३) इति यत्प्रत्ययान्तो निपातितः । 'अर्यः स्वाम्याख्यायाम्' (फि. सू. १. १८) इत्यन्तोदात्तत्वम् । स त्वं [v]विश्वानि सर्वाणि भूतजातानि [v]संसम् । 'प्रसमुपोदः पादपूरणे' (पा. सू. ८. १. ६) इति समो द्विर्वचनम् । इच्छन्दोऽवधारणे । [v]आ समन्तात् सं [v]युवसे मिश्रयसि । देवेषु मध्ये त्वमेव सर्वाणि भूतजातानि वैश्वानरात्मना व्याप्नोषि[4] । नान्य इत्यर्थः । किंच [v]इळः इडायाः पृथिव्याः [v]पदे स्थाने उत्तरवेदिलक्षणे[5] । 'एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः' (ऐ. ब्रा. १.२८) इति ब्राह्मणम् । तत्र त्वं [v]समिध्यसे ऋत्विग्भिः संदीप्यसे । [v]सः[6] तादृशस्त्वं [v]नः अस्माकं [v]वसूनि धनानि [v]आ [v]भर आहर ॥

सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे संजानाना उपासते ॥ २ ॥

सम् । गच्छध्वम् । सम् । वदध्वम् । सम् । वः । मनांसि । जानताम् ।
देवाः । भागम् । यथा । पूर्वे । सम्ऽजानानाः । उपऽआसते ॥ २ ॥

हे स्तोतारः यूयं [v]सं [v]गच्छध्वम् । संगताः[7] संभूता भवत[7] ॥ 'समो गम्यृच्छि' इत्यादिना गमेरात्मनेपदम् ॥ तथा [v]सं [v]वदध्वं सह वदत । परस्परं विरोधं परित्यज्यैकविधमेव वाक्यं ब्रूतेति यावत् । 'व्यक्तवाचां समुच्चारणे' (पा. सू. १. ३. ४८) इति वदेरात्मनेपदम् । [v]वः युष्माकं [v]मनांसि [v]सं [v]जानताम् । समानमेकरूपमेवार्थमवगच्छन्तु ॥ 'संप्रतिभ्यामनाध्याने' (पा. सू. १. ३. ४६) इति ज्ञानातेरात्मनेपदम् ॥ [v]यथा [v]पूर्वे पुरातनाः [v]देवाः [v]संजानानाः ऐकमत्यं प्राप्ता इविर्भागम् [v]उपासते यथास्वं स्वीकुर्वन्ति तथा यूयमपि वैमत्यं परित्यज्य धनं स्वीकुरुतेति शेषः ॥

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।
समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥ ३ ॥

---

१. भ२–ध्वजभूतौ स्यातां । २. त१.२.३.६.७.८-भ–अग्निर्देवता । ३. त७–त्रिष्टुबिति तदेतत्सूक्तसहस्रं सप्तसप्तदशकं सपादाधिकमृग्वेदे पारायणपाठे शाकल्ये शैशिरीयके नमः शौनकाय नमः शौनकायेति इति सर्वानुक्रमसमाप्तः । ४. त-भ–त्वमेव व्याप्नोषि । ५. त-भ–वेदिलक्षणे । ६. त१.२.३.६.७.८-भ–'सः' नास्ति । ७. त१.२.३.६.७.८-भ–संगता अभवन्; त४.५–संगताः संभूता भवत ।

समानः । मन्त्रः । सम्ऽइतिः । समानी । समानम् । मनः । सह । चित्तम् । एषाम् ।
समानम् । मन्त्रम् । अभि । मन्त्रये । वः । समानेन । वः । हविषा । जुहोमि ॥ ३ ॥

पूर्वोऽर्धचैः परोक्षकृतः उत्तरः प्रत्यक्षकृतः । vएषाम् एकस्मिन् कर्मणि सह प्रवृत्तानामृत्विजां स्तोतॄणां वा vमन्त्रः स्तुतिः शस्त्राद्यात्मका गुसभाषणं वा vसमानः एकविधोऽस्तु । तथा vसमितिः प्राशिरपि vसमानी एकरूपास्तु ॥ 'केवलमामक०' इत्यादिना समानशब्दात् ङीप् । उदात्तनिवृत्ति-स्वरेण ङीप उदात्तत्वम् । तथा[1] vमनः मननसाधनमन्तःकरणं चैषां vसमानम् एकविधमप्यस्तु । vचित्तं विचारजं ज्ञानं तथा[2] vसह सहितं परस्परस्यैकार्थेनैकीभूतमस्तु । अहं च vवः युष्माकं vसमानम्[3] एकविधं vमन्त्रम् vअभि vमन्त्रये । ऐकविध्याय संस्करोमि । तथा vवः युष्माकं स्वभूतेन vसमानेन साधारणेन vहविषा चरुपुरोडाशादिना अहं vजुहोमि ॥ 'तृतीया च होश्छन्दसि' (पा. सू. २. ३. ३) इति कर्मणि कारके तृतीया ॥ वषट्कारेण हविः प्रक्षेपयामीत्यर्थः ॥

समानी व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥ ४ ॥

समानी । वः । आऽकूतिः । समाना । हृदयानि । वः ।
समानम् । अस्तु । वः । मनः । यथा । वः । सुऽसहं । असति ॥ ४ ॥

हे ऋत्विग्यजमानाः vवः युष्माकम् vआकूतिः संकल्पोऽध्यवसायः vसमानी एकविधोऽस्तु । तथा vवः युष्माकं vहृदयानि vसमाना समानान्येकविधानि सन्तु । तथा vवः युष्माकं vमनः अन्तःकरणम् । प्रत्येकापेक्षयैकवचनम् । तदपि vसमानमस्तु । vयथा vवः युष्माकं vसुसह शोभनं साहित्यम् vअसति भवति तथा समानमस्त्वित्यन्वयः ॥ अस्तेर्लेटि 'बहुलं छन्दसि' इति शपो लुगभावः ॥ ॥ ४९ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाश ऋक्संहिताभाष्येऽष्टमाष्टकेऽष्टमोऽध्यायः संपूर्णः ॥

॥ इति दशमं मण्डलं समाप्तम् ॥

॥ ऋग्वेदसंहिता समाप्ता ॥

१. त१.२.३.६.७.८-भ-यथा । २. त४.५-तथा चित्तं । ३. त१.२.३.७-भ२.८-'समानं' नास्ति ।

खिलानि

(KHILĀNI)

PREFACE

Introductory:—The Ṛgveda Saṁhitā has, according to the Śākala śākhā, 1017 hymns. According to the Caraṇavyūha, the Ṛgveda Saṁhitā has come down in five[1] recensions: Śākala, Bāṣkala, Āśvalāyana, Śāṅkhāyana[2] and Māṇḍūkāyana. Of these, the Śākala recension is well known and has come down in a definite form. The other recensions did not differ much from the Śākala recension except an omission or addition of certain hymns or verses within or without the Maṇḍalas and also within or without the hymns, as well as certain changes in the order of hymns or verses. No definite conclusions seem to have been drawn as to the exact nature of each of these recensions for want of decisive data. The additional hymns or verses called *Khilāni* have come down traditionally even though it has not been possible to attribute them to definite recensions and it is customary to publish them as a supplement to the Ṛgveda Saṁhitā in the Śākala recension. Thus Prof. Max Müller has published at the end of his great edition[3] of Ṛgveda Saṁhitā with the commentary of Sāyaṇācārya, 32 Khilas with or without accents which he found in certain MSS. of Ṛgveda. Prof. Theodor Aufrecht in his edition[4] of Ṛgveda Saṁhitā printed in Roman characters has published 25 Khilas some of which are different from those in Max Müller's edition. The Bombay edition[5] of Ṛgveda Saṁhitā with Sāyaṇabhāṣya edited by the two Mahāmahopādhyāyas Rajaramaśastri Bodas and Śivaramaśastri Gore gives a good number of Khilas including the Nivids, *Praiṣas*, *Purorucas*, Kuntāpas etc. under the title *Pariśiṣṭāni*. The Nirnayasagar edition of Ṛgveda Saṁhitā (Bombay 1891) also gave the Khilas. Prof. Peterson in his Catalogue of MSS. in the Alwar State Library has reproduced a few, though not all, Khilas with accents found in certain Saṁhitā and Pada MSS. of Ṛgveda deposited in that Library. Recently Pandit S. D. Satavalekar of Aundh (Dist. Satara) has published in his edition of Ṛgveda Saṁhitā (Aundh, 1940) 36 Khilas, some of which are not found in the abovementioned editions either fully or in part. Pandit Satavalekar, however, has not

1. Besides these five, many more Śākhās (21, 25 or 27) are said to have existed.
2. It is to be noted that Kauṣitaki is different from Śāṅkhāyana. A Kauṣītaki Gṛhya Sūtra as different from the Śāṅkhāyana Gṛhya has recently been published (Dr. T. R. Chintamani, Madras, 1944) and the publication of other Kauṣītaki texts is also promised.
3. Second edition, Oxford 1890-2.
4. Second edition, Bonn 1877.
5. Bombay, Śaka 1810-12.

mentioned the MSS. material on which he has based his edition of Khilas, at least the additional portion of them.[1] In all these editions the places where the particular Khilas are to be recited are also denoted, and in most cases they agree with each other.

By far the most important and extensive collection of Khilas is preserved in a MS. of Ṛgveda Saṁhitā discovered in Kashmir by Prof. G. Bühler and described for the first time in his "Detailed Report of a tour in search of Sanskrit MSS.", Bombay 1877, pp. 35–6. The MS. was procured for the library of the Deccan College, Poona, which is now transferred to the Bhandarkar Oriental Research Institute, Poona, where it is deposited at present. The MS. was transcribed by Dr. H. Wenzel and the transcript was examined by Max Müller, Macdonell and other scholars in Europe. Macdonell made use of this transcript in his edition of Bṛhaddevatā (Harvard Oriental Series Vol. 5 & 6, 1904) and while describing in his introduction the Khila portions in the MS. he remarked that "there seems reason to believe that a satisfactory edition of the text of these Khilas could be produced from the Kashmir MS." (p. xxiii). The credit of editing the Kashmir Khilas and bringing out their critical value goes to Dr. phil. J. Scheftelowitz who prepared and published in Roman characters a critical edition of the same at Bonn in 1906 under the title "Apokryphen des Ṛgveda." Since the Kashmir MS. gives a comprehensive collection of authentic Khilas, I propose to present here all Khilas in the Kashmir MS. with a comparative study of those published in other editions and also of those available in MSS.

The Kashmir MS. :—The MS. is written on birch bark and consists of 191 leaves each measuring 10¼" by 9½". The birch bark being very thin, each leaf of the MS. is made up of two sheets pasted back to back so as to make it rather thick and serviceable for writing purposes. The leaves are written on both sides and are arranged in the form of a modern book. Thirty-two lines on an average are written on each page and there are 40 letters in a line. Several leaves are much injured. Borders of the first and last few leaves have worn out. The MS. is written in Śāradā characters and the handwriting is bold, legible and correct.[2] The colophon of the MS. runs thus :—इति श्रीऋग्वेदे शाकलके शाखायां दशममंडले ऋग्वेदः खिलसहितस्संहितारण्यसाहितश्च संपूर्णस्समाप्तं। सं ५१ भा शु ति १३ लिखितं॥ भट्टभीमस्वामिनो रामिस्वामिनः पुत्रः शबलस्वामिनः पौत्रस्संपाथतं समाप्तं॥ शुभमस्तु॥. Thus the copyist of the MS. is the son of भट्टभीमस्वामिन् रामिस्वामिन् and grandson of शबलस्वामिन्. According to A. B.

1. He has kindly lent me two MSS. of Śāṅkhāyana Saṁhitā of Ṛgveda which he must have used. See p. 894. He has, however, obviously used some additional material. Pandit Anant Yajñeswar Dhupkar Sastri of Marcell Goa (Portuguese India) who worked for the second edition of Aundh Ṛgveda, informs me by letter that for editing the Khilas he used a MS. of his own, about 200 years old. For two Khilas inserted in the Aundh edition by conjecture, see notes to Khilas II. 1 ; IV. 9.

2. Cf. Catalogue of the Government Collections of Manuscripts, Deccan College, Poona 1916, MS. No. 1 ; Scheftelowitz, pp. 32-3.

Keith,[1] these concluding words are written by a later hand and probably denote an owner of the MS. He also adds that the same hand has here and there made some corrections in the text. According to Bühler the MS. is 400 years old. The century in the date given in the colophon is lost, but Bühler adds that [ससर्पि] सं ५१ corresponds to A.D. 75. According to Keith सं ५१ most probably corresponds to A.D. 1575. The only alternatives are A.D. 1475 and 1675, but he doubts whether the MS. is so old as the former or so modern as the latter of these dates.

In leaves 1–176 Ṛgveda Saṁhitā is written along with the Sarvānukramaṇī of Kātyāyana. The Adhyāya system is followed in the enumeration of the Saṁhitā, the whole Ṛgveda being divided into 64 Adhyāyas. There is also the Maṇḍala division, but the Aṣṭaka division is totally absent. At the end of each Maṇḍala there is a sentence indicating the conclusion of the last and the commencement of the next Maṇḍala. There is no division of the Anuvākas nor that of the Sūktas; the Adhyāyas are divided into Vargas, but the number of verse is not shown. This method often makes it impossible to know where a hymn begins or ends. The end of a verse or half verse is denoted either by a perpendicular stroke or by the absence of Sandhi where in fact it is expected according to the Sandhi rules. Like the Ṛgveda Saṁhitā, the Sarvānukramaṇī is also divided into Adhyāyas and the Anukramaṇī portion belonging to each Adhyāya is given at the beginning of the same. The MS. belongs to the Śākala śākhā as is clearly stated in the concluding words of Maṇḍala X and at the end of the whole MS.

The Khila Portion :—The Khila portion is contained in folios 176 B—189B of the MS.[2] All Khilas are divided into five Adhyāyas, each Adhyāya again being divided into Vargas. Scheftelowitz has shown this Varga number while I have dropped it. Yet there was no clue to know where a Khila began or ended. The Khilānukramaṇī helped in this respect. At the beginning of each Adhyāya there is the Khilanukramaṇī portion belonging to it. It records the number of verses in a Khila, its author, metre and deity. Thus we are in a position to reproduce the Khilas at least as they stood in the time of the Khilāṇukramaṇī. The information of the Khilānukramaṇī agrees with that in the Brāhmaṇas, Ṛkprātiśākhya, Bṛhaddevatā, Ṛgvidhāna, Śrautasūtras and Gṛhyasūtras. The MS. quotes at the end of each Khila the *Pratīka* of the next Ṛgvedic verse before which the particular Khila is to be recited. If a number of Khilas stand together, the *Pratīka* stands at the end of the last Khila.

The copyist of this MS. did not write the Saṁhitā or the Khilas by mere memory; he probably copied from a text written in Śāradā script,

1. JRAS 1907, p. 225.

2. At the end of the Khilas there is some portion of the Aitareyāraṇyaka (folios 189B–191). It is divided into three Adhyāyas, the first two of which form the third Āraṇyaka. The third Adhyāya giving *Saṁhitāraṇyam* is reproduced by Scheftelowitz in his edition.

as is clear from the several writing mistakes.[1] The text is accented throughout. The method of marking accents is peculiar. Generally in Vedic MSS. the Anudātta and Svarita are denoted by horizontal and vertical strokes respectively, while in this MS. only the Udātta and primary Svarita are marked. The Udātta is marked by a small vertical stroke. This kind of marking Udātta is also found in the Maitrāyaṇī Saṃhitā (Cf. Schröder, Preface p. xxx). The primary Svarita is denoted by the sign ˓. This sign occurs twice in the Khila portion (I. 11. 4; 12. 7). In Kāṭhaka Saṁhitā a strong curve above the line comes as a sign of the primary Svarita, while in Maitrāyaṇī Saṁhitā the curve lies below the line (Cf. Schröder, ibid.). If the next syllable is accented, the primary Svarita is denoted by '३' (*Trikampa*) even though the preceding syllable is short. This '३' which stands after the Svarita syllable has either a horizontal stroke below the line or a perpendicular stroke above the line. Scheftelowitz has retained this method of accentuation in his edition; the same has been followed here too. In the case of certain supplementary hymns and verses also he has mostly marked the Udātta. I have given all of them without accents. In certain editions and MSS. these later Khilas are found accented, but the accents are not unanimous. It is to be noted that Max Müller has, in his edition, printed all such Khilas without accents.

Additional Material :—For the constitution of the text of the Khilas, I have also used two MSS. of Śāṅkhāyana śākha of Ṛgveda kindly lent to me by Pandit S. D. Satavalekar of Aundh. They come from Junagadh and Navanagar in Kathiawar. The Junagadh MS. was written in Saṁwat 1754–5 and the accents were marked in red ink in Saṁwat 1755–8. The colophon at the end of Aṣṭaka VIII runs—

संवत् १७५४ वर्षे भाद्रपद शुदि ५ बुधे श्रीजीर्णदुर्गनिवासीय आभ्यंतरनागरज्ञातीय पंडा श्री ॥ गोविंदसुत् पंडा श्री ॥ भवानीदास सुत् रघुनाथेन लिखितं ॥

सं. १७५८ वर्षे कार्तिक शुदि २ बुधे पं। श्री ॥ भवानीदाससुत रघुनाथेन स्व० ॥

The Navanagar MS. was written in Saṁwat 1894–5 and the accents were marked in red in Saṁwat 1898. The colophon at the end of Aṣṭaka VIII runs—

संवत् १८९४ ना मार्गशिर्ष शुदि ११ प्रारंभः सं। १८९५ ना कार्तिक शुक्ल १२ भोमे अद्य श्रीनवानगरवास्तव्यं आभ्यंतरवृद्धनागरज्ञातीय आचार्य श्री ५ भवानसुत् गोविंदजियेन पंड्या श्री ५ जगजीवनसुत् रणछोडजीसुत् मोतिरामने कृष्णार्पण लिखिदत्वा.....

The text in both the MSS. is divided into 64 Adhyāyas. There is no Aṣṭaka division, while the beginning and the end of a Maṇḍala are mentioned. On comparison, I find that both these MSS. are exactly identical with each other except a few scribal errors. So I have preferred to refer only to the Junagadh MS. by the designation जुना, on account of its older age and its peculiarity of marking accents. The accents in the Navanagar MS. are marked in the usual manner, i. e. the Anudātta by a horizontal stroke below the letter and the Svarita by a perpendicular stroke above the letter.

1. For the orthographical peculiarities of this MS., see Scheftelowitz, pp. 47–8.

In the Junagadh MS., however, the Svarita is marked by a horizontal line through the body of the letter and the Anudātta is marked as usual.[1] This method is exactly the same as that in part of one of the Alwar MSS. of Ṛgveda Saṁhitā which are described in the Catalogue as belonging to the Śāṅkhāyana śākhā (See 'A Second Report of operations in search of Sanskrit MSS. in the Bombay Circle', 1883–84 by Peter Peterson; Extra No. JBBRAS 1884). There is no direct proof in the MSS. themselves showing their Śāṅkhāyana character, just as there is none also in the Alwar MSS. One does not know what was the position of the Khilas found in these MSS. in the Śāṅkhāyana śākhā. It is to be noted that most of the Khilas are included within Varga numbers in both the Alwar and Junagadh MSS. The peculiarity of the Śāṅkhāyana redaction as denoted in the commentary on Caraṇavyūha is found in these MSS., namely that the 10th Vālakhilya hymn (VIII. 58) is absent and two of its three verses are inserted after ṚV. X. 88. 18 *as a Khila*. Whether this peculiarity exists in the Alwar MSS., is not known from Peterson's description. An exhaustive comparison of the Junagadh MS. with the Alwar MSS. could not be made, since the latter were not available on loan. Arrangements to obtain the required information could not also prove successful. I have, therefore, to rely on Peterson's description of the MSS. and the text of some of the Khilas given by him.

A comparison of the Junagadh and Alwar MSS. reveals certain differences in the Khila portion :

(1) The Khila सूक्तान्ते तृणान्यग्नावरण्ये comes in Alwar MS. after ṚV. V. 49; in the Junagadh MS. it comes after ṚV. VI. 48.

(2) The Alwar MS. does not contain Śrīsūkta (Khila II. 6) which is present in the Junagadh MS.

(3) The Śivasaṁkalpasūkta (*Yenedam* IV. 11) which seems to be absent in the Alwar MS., is found in the Junagadh MS.

(4) Khilas III 19; 20; IV. 12 are found in the Junagadh MS.; they do not exist in the Alwar MS.

(5) In three Khilas the number of verses in both the MSS. is different :

(*a*) Khila II. 12 has two verses in the Alwar MS., 3 in the Junagadh MS.

(*b*) In Khila II. 13 the Junagadh MS. gives 3 additional verses after the first 3 verses.

(*c*) In Khila IV. 2 (Rātrīsūkta) the Junagadh MS. reveals two more verses than the Alwar MS., one of which is found in the Nirnayasagar edition of Ṛgveda and the other is quite a new one.

Barring these differences, the Junagadh and Alwar MSS. agree with each other. One is inclined to gather from these differences in Śāṅkhāyana MSS., that the Khilas were probably not enumerated as a part

1. It may, by the way, be noted that both these MSS. ma '१' instead of 'ऽ' in three places (Vāl. I. 3; VI. 7; VII. 1) in the Vālakhilya hymns.

of the Saṁhitā in spite of their enumeration within the Varga number. The question, however, remains, which Khilas were recognised as Khilas in the Śāṅkhāyana śākhā. Peterson has described the Alwar MSS. in comparison to Aufrecht's edition of Khilas, and one is not sure about the position of the Alwar MSS. with regard to the Khilas not found in Aufrecht. The end of the Khila portion is exactly the same in both MSS. After giving the Khila विदा मघवन् विदा, both the MSS. have अभिर्देवेद्धः विदा मघवन्विदा. The text of the Khilas in the Junagadh MS. is mostly identical with that in the Alwar MSS. I have fully recorded the variants in the Junagadh MS. I have also recorded the additional verses found in it (See Khilas II. 13; IV. 2). In the Kashmir MS. the beginning portion in Khila III. 20 was broken to the extent of four syllables. This Khila has fortunately been found in the Junagadh MS. I, therefore, filled in the blank on its authority by inserting यच्च कृतं found in it and have shown it in brackets. Scheftelowitz has conjectured the lost text as यदचित्तं. In two Khilas, III. 19; IV. 12 the Junagadh MS. presented a better text than the Kashmir MS. to a great extent. I have, therefore, adopted it in preference to the Kashmir text.

Scheftelowitz has, in his edition, also used two MSS. (No. 30 and 155 Müncher Sanskrit MSS. = Haug's Verzeichnis d. orient. Handschr. No. 34 & 318) which he designates as M_1 and M_2 respectively. Both these contain portions of the fifth Adhyāya. MS. No. 30 contains Nivids, Praiṣas, Purorucas and Kuntāpādhyāya. No. 155 contains only the Nivids and Praiṣas. Scheftelowitz has recorded all readings from these MSS. Since, however, most of these readings were found identical with those from other sources, I have not referred to them. In very rare cases where the MSS. gave peculiar readings, I have recorded them without mentioning the source.

Khila IV. 11 is the Śivasaṁkalpopaniṣad coming after ṚV. X. 166. In the Kashmir MS. it consists of 13 verses. The same hymn has 28 verses in a MS. of Ṛgveda Saṁhitā, No. Add 5351 in the British Museum, London. All the 13 verses in the Kashmir Khila are covered by the Khila in the British Museum MS., though in a different order. The Khila with the same 28 verses with identical text is also found in another MS., No. 2131 in the India Office Library, London. Scheftelowitz has published[1] the text of the 28-versed Khila along with notes and German translation. I have reproduced it in the notes to the shorter Khila in the Kashmir MS.[2] This larger version of Śivasaṁkalpopaniṣad is also found in the Junagadh MS. The Aundh edition also gives the same Khila of 26 verses, some of which are different from those in the British Museum MS. The order of verses in the Aundh edition as well as the variants in the same are also recorded in the notes to the same.

1. ZDMG 1921, Band 75, pp. 201–12.

2. In verse 7^a the Kashmir MS. has lost one letter; the British Museum MS. supplied it and made up the word गृह्यं.

Scheftelowitz has also made a text-critical and historical study[1] of Khilas V. 1–4 after the publication of his book and has recorded the variants found by him in certain MSS.[2] Out of these, only those readings have been noted by me which were different from those already recorded, without mentioning the source. For full particulars the reader may refer to the original articles. The points of historical importance contained in them are added as English notes to the Khilas concerned.

Khila II. 6 is the well known Śrīsūkta. This hymn addressed to the Goddess Śrī is often read and recited in India from old times, as is clear from a large number of MSS. of the same found in all parts of India, and a number of commentaries written on it. It is also quoted in later Vedic literature as well as in a number of books dealing with religious rites. After the publication of the Kashmir Khila edition, Scheftelowitz collated six MSS. of Śrīsūkta in the British Museum, India Office Library, London, and the Bodleian Library, Oxford and published[3] the critical apparatus along with an exegetical study of the same. Since the additional variants recorded there were found of no special significance, I have not recorded them here.

In this connection I may add that I have collated no less than 44 MSS. of Śrīsūkta from different libraries like the Tanjore Maharaja Sarfoji's Sarasvati Mahal Library, Tanjore, Government Oriental Manuscripts Library, Tirupati, Theosophical Society's Library, Adyar and other sources. Since, however, they did not disclose different readings of any significance from those already recorded from other sources, I did not think it proper to make use of the material in the notes which have already exceeded their limit. A few independent readings found in them are, however, recorded without mentioning the source. I must add that I also collated 8 MSS.[4] of the Rātrīsūkta (Khila IV. 2) with accents and a MS.[5] containing four other Khilas[6] also with accents from the Tanjore Library. Since the MSS. did not exhibit any different readings from those already recorded, I thought it unnecessary to add their variants.

The two MSS. of Āśvalāyana Mantra Saṁhitā in the India Office Library (Nos. 378 [1970] and 379 [781]) have recently been described[7] in

1. Zeitschrift für Indologie und Iranistik, Band I, 1922, pp. 50–68.

2. The *Saṁjñāna* hymn is found in the following MSS.:—(1) Bodleian MS. Wilson 429-32, (2) Bod. Wilson 445, (3) British Museum MS. No. 5351, (4) India Office MS. No. 2131. The last three MSS. also contain the *Nairhastya* hymn and the last two contain the *Prādhvarāṇām*. The *Mahānāmnyaḥ* are contained in (1) British Museum No. 5356d Fol. 106B, (2) Br. Museum No. Add. 5351, (3) India Office No. 2131.

3. For the critical apparatus as well as for the study of the character of the deity and a German translation of the hymn, see ZDMG 1921, Band 75, pp. 37–50.

4. Nos. 329–36, T. M. S. S. M. Library, Tanjore.

5. No. 335.

6. Khila II. 1 supple.; II. 14 with supple.; IV. 7 supple.; V. 1. 5; Comp. Catalogue of T. M. S. S. M. Library, Vol. I. p. 201.

7. Annals of the Bhandarkar Oriental Research Institute, Poona, 1938–39, Vol. XX, Parts III–IV, pp. 249–61.

detail by Dr. V. M. Apte, according to whom the work "gives all the Ṛgveda Mantras cited by their *Pratīkas* in the Gṛhya and Śrauta sūtras of Āśvalāyana..... An interesting aspect of this work is that its versions of certain hymns are different in many respects from those in the editions of Müller and Aufrecht or in 'Die Apokryphen des Ṛgveda' by Dr. Scheftelowitz." I have recorded in the notes to the Khilas concerned the information regarding the different versions or other peculiarities contained in this work with regard to the Khilas. I have designated the MSS. Nos. 378 and 379 by आश्वमंसं[1] and आश्वमंसं[2] respectively. Where the text of both is identical, I simply mention आश्वमंसं.

There are, in the library of the Royal Asiatic Society of Bengal two MSS. of Ṛgveda (Saṁhitā, No. 120 [6607], Pada text No. 140 [6608])[1] which deserve attention. I tried to procure these MSS. for consultation but could not succeed, since they could not be lent out, being sent out of Calcutta for safety in war period. I can simply record the peculiarities of these MSS. with regard to the Khilas on the basis of the information about them supplied by the compiler of the Catalogue.

MS. No. 120 [6607] contains 12 batches of leaves. Batch VIII contains portion of Aṣṭaka VII probably written in the 18th century. It contains the Khila पावमानीः स्वस्त्ययनीः (III. 10 with supple.) conforming to its extent in Max Müller's edition. Batch XII comprising Aṣṭaka VIII is probably written in the 15th century. It contains the Khila अविधवा भव वर्षाणि (III. 17 with supple.). It also probably contains the Khila येनेदं भूतं (IV. 11 with supple.) with 28 verses as given in the British Museum MS. No. Add 5351 already mentioned, since the Catalogue quotes the verse गोभिर्जुष्टो धनेन which is the 19th verse in the abovementioned MS., and since the Khila is extended to 5 Vargas as stated in the Catalogue. Then again, it has the following Khilas : (1) संज्ञानमुशना, (2) नैर्हस्यं सेनादरणं, (3) प्राध्वराणां पते and (4) विदा मघवन् विदा,, namely Khilas V. 1–4. Here the MS. ends. MS. No. 140 [6608] comprises the Padapāṭha of Aṣṭaka VI written in Saṁwat 1653. The compiler says that the MS. "seems to belong to a recension of the Ṛgveda different from that published by Max Müller. For instance, in VI. 4 there is one hymn more in Max Müller's edition than in the present MS." The compiler probably meant some, perhaps the 10th, Vālakhilya hymn.

The 11 Vālakhilya hymns occur in the Kashmir collection (see Khila I. 4 ; 6 ; III. 1–8 ; 18). They are, therefore, reproduced in the proper place even though they were printed in Maṇḍala VIII (Vol. III) in accordance with the usual practice. The Kashmir MS. exhibits a number of variants in their text.[2]

There is a commentary of Vidvāraṇya, among a few others, on the first 15 verses of Śrīsūkta. Max Müller has published the same along with

1. Catalogue by MM. Haraprasad Śastri, Vol. II, Vedic MSS., Calcutta 1923.

2. For the value of these variants cf. Scheftelowitz pp. 35–45 and Oldenberg, Noten, II. pp. 116 ff.

the Śrīsūkta in his Ṛgveda edition. I have collated over a dozen MSS.[1] of Śrīsūktabhāṣya of Vidyāraṇya, as a result of which an improved text of the same is given in the footnotes to the Śrīsūkta. I did not think it essential to record the different readings in the bhāṣya, since they did not exhibit any material difference in its meaning.

Editorial Work :—Scheftelowitz has based his edition of the Khilas on the Kashmir MS. The MS. has, however, certain incorrect readings which he has had to reject in preference to those either found in parallel passages in the Vedic literature or conjectured by him. In such cases, he has noted the incorrect readings in the MS. He has also consulted other editions of Khilas and has recorded their different readings. He has, moreover, made a comparative study of the Khilas with the help of the whole Vedic literature and has noted parallel constructions. While giving notes to the Khilas I have, to a certain extent, made use of the material so laboriously and skilfully collected by him. I have, however, verified each and every parallel quotation and, as a result of that, have made alterations wherever necessary. For this purpose, I have used new editions of Sanskrit works that could be available—e.g. the Paippalāda Atharvaveda edition of Dr. Raghu Vira, Lahore, and the critical edition of the Mahābhārata being published by the Bhandarkar Oriental Research Institute, Poona. The verification of all parallel passages proved advantageous in that certain inaccuracies, more or less important, that had occurred as a result either of the printing mistakes or of oversight, could be removed. I have also made certain additions on the basis of the additional material already described. Certain additional verses and supplementary Khilas not recorded by Scheftelowitz have been noted[2] by me.

In a good many Khilas the Kashmir MS. gave broken text and Scheftelowitz has restored it in many places[3] on the authority of parallel Vedic passages and has put it into brackets. I have adopted it as given by him, but have dropped the brackets. There still remained certain passages where the text in the MS. was broken. In respect of some such blanks, the Aundh edition proved useful. It contains some Khilas which are not found in Max Müller, Aufrecht and also in the Bombay edition and are evidently based on certain MSS. unknown to us.[4] I have, therefore, adopted its text in such places and have shown it into brackets.[5] As already

1. R. A. S. Bengal No. G 5831 ; B. O. R. I. Poona No. 3 (1872-3) ; Panjab Univ. Lib. No. 281 ; T. M. S. S. M. Tanjore No. 652-3 ; G. O. MSS. Lib., Tirupati No. D 23, D 24, D 17501, R 1979 ; Adyar Lib. No. IX. B 36, XXXV B 9, XIX C 54, XXX F 1, XXII R 6, XXII H 16, XXIX F 6, XXIX C 35.

2. Cf. Khila II. 1, II. 6 (2nd supple.), II. 13, IV. 2.

3. Comp. Apokr. des RV. Khila I. 3. 1-2, III. 1. 8-10, III. 10. 3-6 ; III. 11 ; III. 22. 5-10 ; IV. 5. 19-21 ; IV. 6. 1-3 ; IV. 7. 2 ; IV. 11. 9 ; V. 1. 5.

4. See Note 1 p. 892. The different readings in all Khilas in the Aundh edition are not necessarily noted. Reference is made to additional verses, changed order of verses and important variants in certain Khilas.

5. Comp. Khila IV. 5. 7-9 ; 11 ; 12 ; IV. 11. 9.

stated, I have filled in the broken word in the beginning of Khila III. 20 on the authority of the Junagadh MS. There still remain a number of *lacunæ*[1] in the Kashmir MS. which it is impossible to fill in for want of MSS. or other authentic material.

As for the text of the Khilas, I have generally followed Scheftelowitz, though in doubtful cases I have referred to the original MS. also. In certain cases, he has retained incorrect readings, but has suggested correct readings in the Notes. I have adopted some of such suggested readings in the text[2] especially in the Sauparṇa hymns. In such cases where he has adopted a reading different from the Kashmir MS., I have not recorded the incorrect reading in it. I have also not referred to his notes in connection with the interpretation of the Khilas, determination of their age, emendations regarding the accents and other things not directly connected with the constitution of the text. In a few cases[3] I have adopted readings different from Scheftelowitz, not conjecturally but on the authority of some parallel quotations or MS. evidence. In three cases[4] I have adopted readings suggested by A. B. Keith in his review[5] of Scheftelowitz's work since the printed text seemed defective.

I have given all notes in Sanskrit in accordance with our practice in all the volumes of the Ṛgveda edition. In order to attain brevity, I have used certain signs the denotations of which are given along with the list of abbreviations of Sanskrit works. Notes or references in connection with works in other languages are given in English. Abbreviations in English, being common, are not given in the list. The Sanskrit notes are given in the following order :—

(1) The Khilānukramaṇī to each Adhyāya, given at the beginning of the same, with variants,[6] if any.

(2) Place in the Ṛgveda Saṁhitā where a Khila is to be inserted. Difference of opinion, if any, is recorded.

(3) Names of works (in abbreviated form) where the Khila occurs fully or in part.

(4) General notes as to the occurrence of the Khila in particular works, and different order of verses, if any.

(5) Variants in the order of verses. In each case the adopted text comes first in bold type with its authority and the variants with their sources follow. When the variant has very few sources, the authority of the adopted text is not denoted, meaning that it has got substantial support.

1. Comp. Khila III. 15. 14 ; 22–27 ; 29 ; III. 20 ; IV. 9. 2 ; 3.
2. Comp. Khila I. 2. 3 ; 6 ; 7 ; 13 ; I. 3. 5 ; I. 4. 8 ; I. 5. 10 ; I. 9. 2 ; I. 12. 4.
3. Comp. Khila II. 13. 5 ; III. 3. 1 ; III. 13 ; III. 18. 1 ; III. 19 ; IV. 12 ; V. 3. 4 ; V. 4. 5 ; V. 22. 10 etc.
4. Comp. Khila I. 2. 4b ; III. 15. 20b ; III. 16. 5b.
5. JRAS 1907, pp. 224–29.
6. Macdonell in his Bṛhaddevatā Part II has sometimes quoted the Khilānukramaṇī which differs from Scheftelowitz's text in some cases. Some of his readings have been accepted by me.

(6) Supplementary verses occurring in certain editions and other works.

(7) Variants in the supplementary verses.

Scheftelowitz has, in his work as well as in his articles written after the publication of the same, discussed many problems concerning the Khilas. I think it advisable to record his main points with regard to the antiquity of the Khilas and their relation to the Ṛgveda Saṁhitā. Certain views expressed by him are not likely to be universally accepted, as is evident from the review of the work by A. B. Keith.

Antiquity of Khilas and their Relation to Ṛgveda Saṁhitā :— The term *Khila* first occurs in the Anuvākānukramaṇī and Ārṣānukramaṇī attributed to Śaunaka. Khilas are those hymns or verses which are not included in the Saṁhitā and Pada text of the Ṛgveda in the Śākala recension and as such are excluded from the enumeration in Sarvānukramaṇī, Anuvākānukramaṇī etc., while their position within or without the recognised hymns of the Ṛgveda is traditionally fixed.

The Khilas belong to the Vedic period. Khila verses coming in other Vedas and Brāhmaṇas are the oldest proof for their original form and ritual application. In Brāhmaṇas themselves there are Khilas (e.g. *Nakulasūkta*, *Kuntāpa*, *Vālakhilya*) used in ritual where they do not suit according to their contents and their original purpose. This shows the high value and sanctity that the Khilas received already before the Brāhmaṇa period.

Individual Khilas do not belong to the same period. Many reach back to the oldest Ṛgveda period (e.g. *Purorucas*, *Nivids*, *Praiṣas*). Many belong to the end of the Ṛgveda period (e.g. *Mahānāmnī*, *Vālakhilya*, *Kuntāpa*). Many belong to the oldest Yajurveda period ; some are later Vedic texts and presuppose knowledge of many Yajurveda hymns (e.g. *Subheṣaja* hymn). For the determination of the age of individual Khilas each one must be examined separately. The general conclusion is that all Khilas reckoned in the *Khilānukramaṇī* belonged to the Vedic period and that most of them belonged to that period in which the Yajus, Sāma and Atharva Saṁhitās were compiled, and stood in the same condition in which they are preserved today. Very few Khilas belong to the later Brāhmaṇa period. A good many must have been composed before the peculiarities of the liturgical practice of Brāhmaṇa period were established, since most of the Khilas were applied in ritual without standing in close relation to particular rites in which they are used. On the other hand, the later Khilas which originated in the Yajurveda or Brāhmaṇa period are usually composed in connection with the ritual which gradually arose in that period.[1] Thus, for example,

1. With regard to the date of the Khilas, A. B. Keith holds that "the language, style and contents of the vast bulk of the Khilas undoubtedly belong to the latest period of the Ṛgveda. It is quite possible that some verses now preserved as Khilas were parts of the Māṇḍukeya śākhā, but the probability is not great. The really significant fact is that Śākalya did not deal with Khilas in the Padapāṭha..... It is most probable therefore that the Khilas are somewhat later in date than the Ṛgveda Saṁhitā. It is undeniably the case with a good deal of the matter and in no case is it impossible." JRAS 1907, pp. 224-29.

the *Medhāsūkta* stands in close relation to the Upanayana ceremony that comes for the first time in AV. XI. 5, the *Subheṣajasūkta* is presupposed as well known in Gopatha Br. V. 23 and the *Śrīsūkta* stands in relation to the worship of *Śrī* and *Lakṣmī* coming in Yajurveda period. The eleven *Suparṇa* hymns occurring after RV. I. 73 are, according to the *Khilānukramaṇī*, composed by the authors of the *Suparṇa* race. The text of these hymns was unknown before, even though certain sources in the old works had denoted their existence.[1] The Khilānukramaṇī describes these hymns more closely ; it gives their Ṛṣis. It also says that the authors whose race is not given here, belong to the *Suparṇa* race.[2]

Śākalya, who redacted the Ṛgveda Saṁhitā lived, as Geldner has shown, in the later Vājasaneya period; he was a contemporary of Āruṇi mentioned in many Brāhmaṇas, as well as of Yājñavalkya who flourished a little later. Thus the śākala śākhā is as old as the Vājasaneyi Saṁhitā. Śākalya can therefore scarcely be placed, following Oldenberg, at the end of the Brāhmaṇa period.[3] Now most of the Khila texts existed long before the time of Śākalya and were enveloped by the halo of sanctity. Why then did Śākalya not incorporate either the new or the old apocryphal texts in his codex ? And why did he not compose a Padapāṭha for them ? He has treated them in the same way as the following verses in Ṛgveda : VII. 59·12 ; X. 20.1 ; 121. 10 ; 190. But while these Khila verses, not analysed in the Padapāṭha, were incorporated into the Ṛgveda Saṁhitā, were considered as recognised texts, were later also provided with a Padapāṭha and were accordingly enumerated in all Anukramaṇīs, why did our Khilas not obtain the same treatment as those Ṛgveda verses not looked upon as of equal authority by Śākalya ? In fact many Khila verses in our Khila collection are really older than those redacted by Śākalya. The only explanation seems to be that the Khila texts belonged to a recension different from that redacted by him. The fact that many old apocryphal verses did not originate independently, but were very closely related by contents to those Ṛgveda hymns to which they are annexed, makes it probable that originally many Ṛgveda hymns had been existing in several recensions, just as a hymn of the Paippalāda śākhā of Atharvaveda is distinguished from the corresponding hymn of the Śaunakīya Atharvaveda not only by its greater extent but also by a different order of verses and by different readings.

The case of Purorucas, Nivids and Praiṣas in the fifth Adhyāya of the Khila collection, to which no particular place is assigned in the Ṛgveda,

1. Ṛgvi. I 108 ; Bṛhad. III. 119 ; Āśva. Gṛ. III. 12. 14 ; ABr. VIII. 10. 4 ; VI 25. 7 with Sāyaṇa.

2. For the place of Suparṇa hymns in Ṛgveda see Scheftelowitz, ZDMG 74, pp. 192-203.

3. A. B. Keith is not inclined to accept Geldner's view. He says, "Oldenberg's arguments (Hymnen des Ṛgveda, Band I, pp. 384 ff.) for the priority of the Brāhmaṇas to the adoption of the rules of *Sandhi* and the still later Padapāṭha are not adequately met." JRAS 1907, p. 226.

is rather different. They belong to the older Ṛgveda period.[1] The Nivids form the oldest prose preserved from the Ṛgvedic time. They are certainly older than certain Ṛgveda hymns.[2] Many Ṛgveda verses appear to be poetical compositions from individual Nivids. The word Nivid comes already in the Ṛgveda as the term for these prose texts. The Praiṣas were considered as an appendix to the Ṛgveda in very old time.[3] The Purorucas also belong to the same period as that of Nivids and Praiṣas.[4] According to Scheftelowitz, the character of Nivids, Purorucas and Praiṣas lends support to Hillebrandt's theory that along with the tradition which orally transmitted the treasure of hymns, a tradition relating to the ritual technique developed independently and the majority of Vedic hymns had a place in the ritual. The Saṁhitā was certainly not edited on the basis of the hymn material used in the ritual on account of the many very small ritual ingredients ; on the other hand, the hymns used in the ritual did not stand in need of a redaction in the Saṁhitā in order to be inserted in the ritual.[5] Several old verses which belong to certain Ṛgveda hymns in accordance with the ritual tradition are not incorporated into the Ṛgveda Saṁhitā, but have come down as *Khilāni*. That all Khilas which have not found admission to Ṛgveda must have belonged to the so-called ritual tradition, cannot be accepted, because certain very old Khilas (i. e. Suparṇa, Vālakhilya, Kuntāpa, Nakula, Mahānāmnī) originally stand in no relation whatsoever to the ritual in view of their contents, in which they are used in the Brāhmaṇas, Śrautasūtras and Gṛhyasūtras, but are used in the ritual only secondarily. The Khilas composed in later Vedic period were composed from the first in connection with certain newly accepted ceremonies.

The examination of the Khilas leads to the conclusion that they were really admitted to some lost śākhā. This is proved by our information of the Bāṣkala śākhā. The Anuvākānukramaṇī (verses 21, 36) provides us with some peculiarities of the Bāṣkala śākhā. Thus in it the Kutsa hymns (ṚV. I. 94–115) stood after the Paruccheṣa hymns (I 127–139), then it enumerated eight hymns more than the Śākala recension of 1017 hymns. The modern commentator of Caraṇavyūha, mentions these eight hymns : The Bāṣkala śākhā placed the first two Vālakhilya hymns at the very place where we read them today. The next five Vālakhilyas followed ṚV. VIII. 94. At the end of the whole Saṁhitā, after X 191, followed the *Saṁjñāna* hymn of 15 verses in the Bāṣkala śākhā. That the *Saṁjñāna* hymn of the Bāṣkala

1. Comp. AV. XI. 7. 19 ; VS. XIX 25 ; TS. II 5. 9 ; ABr. II 3. 4 ; SB. I. 4. 2.

2. For the antiquity of Nivids and Praiṣas see Scheftelowitz, ZDMG Band 73, 1919, pp. 30-51.

3. See Ṛkprāti. I. 57 ; Bṛhad. VIII. 103 ; Nir. VIII. 22.

4. Regarding the antiquity of Purorucas, see Scheftelowitz, ZDMG, Band 74, 1920, pp. 204-7.

5. H. Oldenberg has raised an objection to this theory of Hillebrandt (Hymnen des Ṛgveda I. pp. 519 ff). A. B. Keith also does not accept the theory ; cf. JRAS 1907, p. 226. See also W. D. Whitney, Atharvaveda, p. 848.

śākhā originally consisted of 15 verses is impossible, for then the Bāṣkala śākhā should have 10 more hymns and not 8, since the so-called 15-versed *Saṁjñāna* hymn is really divided into three separate hymns. The confusion seems to have arisen from the fact that the same verse *Tacchaṁyorāvṛṇīmahe* forms the last verse of the first as well as the third hymn. The 8 (10) regular hymns of the Bāṣkala recension were considered in the Śākala śākhā as *Khilāni*. Now a good number of Khilas are as old as the Vālakhilyas and the *Saṁjñāna* hymn, and many of them are still older and are already used in the ritual of the Brāhmaṇas belonging to the Ṛgveda just like the Ṛgveda hymns. The fact that the Brāhmaṇas and Śrauta and Gṛhya sūtras treat the verses called *Khilāni* at present just like *Ṛcaḥ* and quote them by merely the beginning words just as in the case of *Ṛcaḥ*, leads to the conclusion that they had been standing in a collection related to the Ṛgveda in their time. The wholly extinct Māṇḍūkeya śākhā which is mentioned in Ṛkprāti. III. 14 and Aitareyāraṇyaka could have admitted all old Khilas as equally authentic texts. According to the Purāṇic tradition,[1] there were three śākhās, Śākala, Bāṣkala and Māṇḍūkeya.[2] The Khilas admitted by the other recensions existed at the time of Śākalya who fixed the present order of hymns. He seems to have excluded them only because different hymns and verses had not come down in a unanimous tradition. That many hymns in the Khila collection did not hold an undisputed position in the Ṛgveda Saṁhitā is evident from the fact that certain Khilas (e. g. II. 15, III. 17, IV. 14) are fully quoted by Āśvalāyana and Śāṅkhāyana, while usually they cite merely the beginning words of the Ṛgveda hymns and most of the Khilas.

1. Devi Purāṇa says :— शाखाश्च त्रिविधा भूप शाकला बाष्कमाण्डकाः. Comp. Weber, Ind. Stu. III. p. 253.

2. According to the Caraṇavyūha there were five Śākhās of Ṛgveda. Of these, according to Oldenberg, the Āśvalāyana and Śāṅkhāyana were looked upon as independent Śākhās only in a restricted sense. So there remained only three, which number is also referred to in the Purāṇic tradition as stated above. Of these, again, the Māṇḍūkeya remains out of consideration, because the name of Māṇḍūkeya though mentioned in the Āraṇyaka and Prātiśākhya is not at all concerned with the śākhā of the Ṛgveda. The knowledge of this Māṇḍūkeya śākhā was lost even in early period. So, according to Oldenberg, the only śākhā that requires a thorough examination besides the Śākala, is the Bāṣkala śākhā (Hymnen I. pp. 490-91).

According to the commentary on Caraṇavyūha, the Āśvalāyana śākhā was formed simply by adding eleven Vālakhilya hymns. The difference in the Śāṅkhāyana was that the 10th Vālakhilya hymn (RV. VIII. 58) was absent, the first two verses of which were inserted as a Khila after RV. X. 88. 18. This Khila is found in the Kashmir MS. It is to be noted that the two MSS. of the Śāṅkhāyana śākhā of Ṛgveda Saṁhitā procured by Pandit Satavalekar omit the 10th Vālakhilya and give its two verses as a Khila after RV. X. 88. 18. From the statement in the Caraṇavyūhabhāṣya regarding the Śāṅkhāyana śākhā we can be allowed to surmise that that śākhā contained certain Khilas even though they were not enumerated as part of the Saṁhitā. Oldenberg says that the quotation in Śāṅkhāyana of the Sandhi-termination *Upadruta* which is peculiar to the Bāṣkalas and the allusion in Śāṅkh. Gr. IV. 5. 9 of *Tacchaṁyor* as the last verse of Ṛgveda, suggest the probability of Śāṅkhāyana being a follower of the Bāṣkala śākhā (Hymnen I, p. 517).

Scheftelowitz follows the arguments of Benfey (Sāmaveda xxviii) and Weber and holds that originally Sāmaveda arose from the same material from which the Ṛgveda was compiled. This is supported by the fact that in Sāmaveda there are 71 verses which are not in the Ṛgveda, some of which are preserved as Khilas to the Ṛgveda. It is also argued that Sāmaveda contains the Ṛgvedic verses in an older form since the variants in the Sāmaveda are generally in a more abstruse and incomprehensible form than those found in Ṛgveda in their places. Then following Hillebrandt[1] he argues that many hymns composed in the Ṛgvedic period are preserved in Atharvaveda or Yajurveda and they cannot be considered as later because they are found in Atharvaveda or Yajurveda. It is, therefore, quite natural that several Khilas are found in them. In this connection it is to be noted that Benfey's arguments regarding the older tradition of Sāmaveda are not proved. Theodor Aufrecht has shown that the divergent readings of the Sāmaveda are due only to arbitrary, intentional or accidental alterations.[2]

In the codification of Ṛgveda Śākalya seems to have recognised only those hymns which had already become general property and were recognised by all as traditional national hymns ; on the other hand he seems to have considered those hymns as doubtful Ṛcas (*Khilāni*) which lead an isolated life in the tradition of individual families. And in those cases in which he could not decide whether a particular verse had really come down from old with equal authority, he appears to have admitted it in his Saṁhitā, but did not analyse it in the Padapāṭha, like RV. VII. 59. 12; X. 20. 1 ; 120. 10 ; 190. On the other hand, another recension (like the Bāṣkala śākhā) recognised several hymns from the doubtful material as authorised text and incorporated them into the Saṁhitā, and again another śākhā (like the Māṇḍūkeya) might have accepted the whole old Khila portion as authorised text. However, they were considered as sacred texts by the Śākala śākhā even though it denied them equal rights with the Ṛgveda hymns, as is evident from its descendants in the Śrauta and Gṛhya sūtras as well as Śaunaka. The Bāṣkala śākhā has also preserved the texts not recognised by it, for Bṛhad. VIII. 85 states that the Bāṣkala śākhā considered the verb *Ādadhe* in the second verse of *Nejameṣa* hymn as third person singular perfect. This *Nejameṣa* hymn is found in the Khila collection. Thus the Khilas were treated by the Bāṣkalas with the same accuracy as the Ṛgveda hymns. This alone can explain the fact that these apocryphal verses and hymns were never denoted by the term Khila in the oldest time but were always regarded as Ṛcas. Although at the time of the compilation of the Āraṇyakas all the Khilas mentioned in the Khilānukramaṇī already existed, and although many citations from them are found in the Āraṇyakas, the term *Khilāni* did

1. GGA 1889. p. 406.
2. Cf. Winternitz, History of Indian Literature, Vol. I, p. 164 ; A. B. Keith, JRAS 1907, p. 227.

not exist in that period, for in TĀ II. 9. 10 where all sacred texts are enumerated, *Khilāni* are not mentioned.[1]

Looking to the old works relating to the study of Vedic literature we find that the Khilas were looked upon by them as Ṛcas and the term Khila was unknown to them. Yāska in his Nirukta cites several Khila verses and denotes them as *Nigama*.[2] In Śaunaka's time the term Khila did not exist; Khilas were considered by him as Ṛcas that really belonged to the Ṛgveda but were not counted in Anuvākas. He, therefore, explains Khilas in his Prātiśākhya.[3] Bṛhaddevatā and Ṛgvidhāna also do not know the term Khila and understand by Ṛk verses also the so-called Khilas. Both these works are not composed by Śaunaka himself but by his followers. Among the Ṛgvedic deities Bṛhaddevatā mentions also those which relate only to the apocryphal hymns.[4] A good many Khilas from the Khila collection are treated in Bṛhaddevatā. There are, besides, certain citations in it which are found neither in the Ṛgveda nor in the Khila collection.[5] The Ṛgvidhāna deals with 23 Khilas in this collection.[6] From the absence of many Khilas in Ṛgvidhāna or in Bṛhaddevatā one cannot conclude that at the time of the composition of both these works these excluded Khilas were not recognised; for many Ṛgveda hymns themselves are not quoted in them. While in Ṛkprātiśākhya and in Bṛhaddevatā the Vālakhilyas and the Subheṣaja hymn are mentioned, they are not treated in the Ṛgvidhāna; on the other hand the hymn *Saṁvatīḥ* (II. 13) is not mentioned in Bṛhaddevatā while it is treated in Ṛgvidhāna. These Khilas were, however, not counted in the enumeration of Ṛgveda hymns.[7]

---

1. In this connection Keith observes that "it is not to be expected that so paltry a species of literature as the Khilas would find a place in such enumerations of the great literary genera." JRAS 1907, p. 227.

2. Comp. A. B. Keith, ibid. p. 226 ff.: "Examination will show that all the cited texts occur in other Vedic texts, and in any case such citations could not prove that he considered the passages as belonging to the Ṛgveda Saṁhitā."

3. Comp. A. B. Keith, ibid.—"In the case of Śaunaka that he did not know the Khilas as such is still less convincing. The fact that the Khilas are included in Prātiśākhya proves nothing exept what is admitted, viz., that the Khilas existed in connection with the Ṛgveda at the time of the composition of the Prātiśākhya which, it may be added, is quite possibly later as we have it than Śaunaka."

4. Thus *Lākṣā* (I. 129, II. 84), *Śrī* (II. 84), *Medhā* (II. 84), *Niṣad* and *Upaniṣad* (II. 82); comp. Khila IV. 7, II. 6, IV. 8, I. 3.

5. See Bṛhad. VII. 104, I. 48, IV. 87-8, V. 157.

6. *Sauparṇa* hymns (I. 2-12), *Śrīsūkta* (II. 6), *Agniretu* (II. 11), *Śaṁvatīḥ* (II. 13), *Uttudainam* (III. 16), *Yāṁ Kalpayanti* (IV. 5), *Āyuṣyam* (IV. 6), *Medhāṁ Mahyam* (IV. 8), *Yenedam* (IV. 11), *Nejameṣa* (IV. 13), *Saṁjñānam* (V. 1), *Nairhastyam* (V. 2), *Mahānāmnyaḥ* (V. 4).

7. "The evidence of the Bṛhaddevatā shows that Śaunaka did not include these hymns in his enumeration of the hymns of the Ṛgveda. Why he did not do so is of course open to dispute, but it is perfectly fair to argue that he may have done so because they were in his day regarded as not Ṛgvedic in the proper sense and the evidence given above is in favour of his having used the term Khila of them. That this expression does not occur in the Bṛhaddevatā or the Ṛgvidhāna is no more surprising than it does not occur in the Prātiśākhya."—A. B. Keith, ibid. pp. 227 ff.

The Anuvākānukramaṇī and Ārṣānukramaṇī are said to have been composed by Śaunaka. Since, however, they expressly use the term Khila,[1] they cannot be attributed to him. Ārṣānukramaṇī is much later than Anuvākānukramaṇī; the composer of the former work holds the Khila collection as a unitary work composed by Gautama Vāmadeva.[2] Āśvalāyana and Śāṅkhāyana do not know the term Khila. The sanctity of Khilas was much degraded in the period of Dharmaśāstra.[3] Ṣaḍguruśiṣya, the commentator of Sarvānukramaṇī who flourished at the end of the 12th century A.D., had the same ignorance about the Khilas as at present.[4] The ignorance regarding the Khilas gradually grew so far that several modern popular hymns with religious contents which originated in connection with popular cults (e.g. Serpent-cult, Durgā-cult) began to be considered as *Khilāni*. These later hymns are partly added to some old Khilas without regard to their different contents, so that consequently several Khila texts were affected by modern supplements (e.g. II. 1; 6; 12; 14; III. 10; 12; 17; IV. 20). Only in a few quite modern Khila MSS. such later texts are given as independent texts. The term *Pariśiṣṭāni* is met with only in modern works like the Prayogaratna.

Acknowledgments:—I have to perform the pleasant duty of acknowledging the help received by me in accomplishing this work. I have already stated that I have chiefly based the text of the Khilas on that in the Kashmir MS. published by Dr. Scheftelowitz in his "Apokryphen des Ṛgveda." It is, therefore, my first duty to acknowledge my indebtedness to him. I began the study of the Khilas three years ago when the dark clouds of war had suffocated the atmosphere of the whole world. Copies of Scheftelowitz's work were not easily available, and it was with the utmost efforts that I could procure one for my purpose. It is a matter of relief that the war has come to an end before the publication of this work. I must also acknowledge the help I obtained from other editions of Khilas and other Sanskrit works, and I express my thanks to their editors. To the various MSS. libraries I am indebted for allowing me to use the valuable MSS. of Khilas in their possession. I have especially to thank Pandit Satavalekar of Aundh (Dist. Satara) for kindly keeping at my disposal his two MSS. of Śāṅkhāyana śākhā of Ṛgveda. I have also derived help from the writings of Oldenberg, Hillebrandt, Macdonell, Keith, and others to whom my thanks are due. I must also acknowledge the help I received from certain scholars who kindly procured for me certain valuable and rare printed books. Last, but not least, I must also thank those scholars who gave me their valuable advice with regard to the preparation of this work.

C. G. KASHIKAR

1. Comp. Anuvākānu. Verses 7, 17, 36, 39.
2. Ārṣānu. X. 102. For different views regarding the date and authorship of Ārṣānukramaṇī, see Macdonell, Bṛhaddevatā, Part I, Preface, p. xxiii; Festgruss an R. von Roth, p. 112; A. B. Keith, JRAS 1907, pp. 226 ff.
3. Comp. Manu. III. 232.
4. Comp. Sarvānu. I. 99.

प्रास्ताविकम्

अथैतावत्पर्यन्तमृग्वेदस्य शाकलसंहितां मुद्राप्याधुना खिलानि संगृह्यन्ते। चरणव्यूहमते ऋग्वेदसंहितायाः पञ्च शाखा वर्तन्ते शाकलवाष्कलाश्वलायनशाङ्खायनमाण्डूकायना इति। केषांचिन्मते ऋग्वेदस्यैकविंशतिः पञ्चविंशतिः सप्तविंशतिर्वा शाखा विद्यन्ते। शाङ्खायनशाखा कौषीतकिशाखा चेत्येकस्या एव शाखाया नामद्वयमित्येतावत्कालपर्यन्तं निर्धारितमासीत्। किंत्वधुना कौषीतकिशाखायाः शाङ्खायनशाखाया भिन्नत्वं सिद्धम्। मद्रपुरे (मद्रासनगरे) डॉ. टी. आर्. चिन्तामणिमहोदयैः कौषीतकिगृह्यसूत्रं शाङ्खायनगृह्यसूत्राद्भिन्नमधुनैव मुद्रापितं वर्तते। कौषीतकिश्रौतसूत्रं कौषीतकिब्राह्मणं चेति ग्रन्थद्वयं शाङ्खायनश्रौतसूत्रब्राह्मणाभ्यां भिन्नमचिरादेव प्रकाशयिष्यत इत्यपि तैरुद्घोषितम्। तयोर्मुद्रणानन्तरमृग्वेदसंहितायाः कौषीतकिशाखायां को विशेष आसीदिति ज्ञातुं सुशकं भवेदित्याशास्यते।

ऋग्वेदसंहितायाः सर्वासु शाखासु शाकलशाखैव सर्वत्र प्रसिद्धा। इतरासां शाकलशाखायाः कीदृशो भेद आसीदिति निश्चितं वक्तुमशक्यप्रायम्। तथापि बहोः कालादारभ्येतरशाखागताभ्यधिकानि सूक्तानि मन्त्रा वा खिलसंज्ञया प्रसिद्धाः परंपरयागता लिखितपुस्तकेषूपलब्धा मुद्रापिताश्च। एवं मॅक्समुल्लरमुद्रिते ऋग्वेदभाष्यपुस्तके ३२ खिलानि मुद्रापितानि। आउफरेख्टमहाशयै रोमनलिप्यां मुद्रिते ऋग्वेदपुस्तके २५ खिलानि वर्तन्ते येषु मध्ये कानिचित् मॅक्समुल्लरखिलेभ्यो भिन्नानि। मुम्बापुरीमुद्रिते ऋग्वेदभाष्यपुस्तके बहूनि परिशिष्टानि निश्चिप्रैषपुरोरुक्कुम्तापसहितानि मुद्रापितानि सन्ति। एवं निर्णयसागरयन्त्रालये मुद्रिते ऋग्वेदसंहितापुस्तकेऽपि खिलान्यन्तर्भावितानि। पीटर्सनमहाशयैः अलवरनगरस्थलिखितपुस्तकानां सूची आरचिता। तत्र कानिचित् खिलानि मुद्रापितानि वर्तन्ते। औन्धनगरे पं. सातवलेकरमहोदयैरधुनैव प्रकाशिते ऋग्वेदसंहितापुस्तके खिलसूक्तानि मुद्रापितानि तेषु कानिचिदुपरिनिर्दिष्टपुस्तकेष्वनुपलब्धानि। खिलानां 'परिशिष्टम्' इति संज्ञा केषुचिदर्वाचीनग्रन्थेष्वेव दृश्यते।

काश्मीरदेशे ऋग्वेदसंहिताया एकं प्राचीनं लिखितपुस्तकं सखिलं शारदालिप्यां लिखितं बुल्हरमहाशयैः संपादितम्। तत्र दशममण्डलान्ते सर्वाणि खिलसूक्तानि क्रमेण संगृहीतानि वर्तन्ते। पुण्यपत्तनस्थ-डेक्कन कॉलेज-ग्रंथालयार्थं संपादितमेतल्लिखितपुस्तकमधुना पुण्यपत्तनस्थ-भाण्डारकर-प्राच्यविद्यासंशोधनमन्दिरे स्थापितमस्ति। एतत्काश्मीरपुस्तकगतानि खिलानि टिप्पण्यादिभिरुपोद्घातेन च संयोज्य शेफ्टेलोविट्झमहाशयैः १९०६ खिस्ताब्दे शार्मण्यदेशे रोमनलिप्यां मुद्रापितानि। पूर्वतनान् सर्वान् खिलसंग्रहानतीत्यायं खिलग्रन्थो वर्तते। अतस्तमेवानुसृत्यात्र खिलानां मुद्रापणमुचितं मन्ये।

एतत्काश्मीरपुस्तकं भूर्जपत्रेषु लिखितमतीव जीर्णम्। एतत् ४०० वर्षेभ्यः प्राक् लिखितमिति बुल्हरमहाशयानां मतम्। तस्य १९१ पत्राणि सन्ति। १७६ पत्रपर्यन्तं शाकलसंहिता कात्यायनीयसर्वानुक्रमण्या सहिता लिखितास्ति। तत्र मण्डलानां गणनमस्ति नाष्टकानाम्। चतुःषष्टावध्यायेषु संहिता विभक्ता। अनुवाकानां सूक्तानां च परिगणनं नास्ति। अध्यायेषु वर्गाः परिगणिताः। प्रत्यध्यायं तावत्परिमाणा सर्वानुक्रमणी आदौ दत्ता। ऋग्वेदसंहितान्ते १७६–१८९ पत्रेषु खिलग्रन्थो लिखितः। स पञ्चस्वध्यायेषु विभक्तः। खिलानामृषिच्छन्दोदेवतादिप्रतिपादिकानुक्रमण्यपि वर्तते। अध्यायादौ च तस्य तस्याध्यायस्यानुक्रमण्यंशो दत्तः। अनुक्रमण्यां प्रतिसूक्तं मन्त्रसंख्यापि दत्ता। तेन खिलस्याद्यन्तयोर्ज्ञानं सुशकं भवति। ब्राह्मणकल्पसूत्रबृहद्देवताप्रातिशाख्यादिग्रन्थेषु खिलविषये यल्लिखितं तदनुकूलमेव खिलानुक्रमणीवचनम्। खिलान्ते ऋङ्मन्त्रस्य प्रतीकमुद्धृतम्। ऋग्वेद-

संहितायां यत्र तत्खिलं निवेशनीयं पठनीयं वा तस्य तज्ज्ञापकम्। यद्यप्येकानि खिलान्येकत्र वर्तन्ते तर्हि अन्त्यखिलान्ते ऋक्मन्त्रप्रतीकमुद्धृतम्।

एतत्पुस्तकलेखकेन न केवलं स्वकल्पनयैतल्लिपिबद्धं कृतं किंतु किंचित् शारदालिपिलिखितं पुस्तकं दृष्ट्वा लिखितमिति तदृताशुद्धिभ्यो ज्ञायते। अस्मिन् पुस्तके संहिता खिलानि च स्वरचिह्नयुतानि। किंत्वस्य स्वरलेखनपद्धतिः सर्वथा भिन्ना वर्तते। प्रायेण लिखितपुस्तकेषु स्वरितमुपरिचिह्नाङ्कितं वर्ततेऽनुदात्तं चाधस्ताच्चिह्नाङ्कितम्। अस्मिन् पुस्तके तावदुदात्तः जात्यस्वरितश्चेति द्वावेव दर्शितौ अनुदात्त इतरस्वरितश्च वर्जितौ। उदात्तः उपरिस्थितरेखया प्रदर्शितः जात्यस्वरितश्च ८ अनेन चिह्नेन। खिलेष्वेतच्चिह्नं द्विवारमागतम् (१.११.४;१२.७)। परं पदमाद्युदात्तं स्वरितादि वा चेत् जात्यस्वरसिद्धकम्पेनैव दर्शितः। स्वरितस्य ह्रस्वत्वेऽपि त्रिकम्प एव लिखितः। तस्याधस्तादनुदात्तचिह्नमुपरि वा स्वरितचिह्नं कृतम्। इयं स्वरपद्धतिः मैत्रायणीकाठकसंहितयोः स्वरपद्धत्या साम्यमावहति तस्या आधारभूता चेति शेफ्टेलोविट्समहाशयानां मतम्। तैः स्वकीयपुस्तक इयमेव स्वरलेखनपद्धतिरवलम्बिता। मयाप्यत्र सैव स्वीकृता। काश्मीरखिलेभ्योऽधिकानि यानि खिलानि तैः स्वकीयपुस्तके मुद्रापितानि तेषां मध्ये केषुचित् सूक्तेष्वेतद्रीत्यैवोदात्तस्वरो दर्शितः। मया तावदधिकानि खिलानि स्वररहितमेव मुद्रापितानि यतस्तेषां स्वरविषये मुद्रितपुस्तकानां लिखितपुस्तकानां चैकमत्यं नास्ति। मॅक्समुल्लरमहोदयैरपि स्वकीयपुस्तके खिलानि प्रायः स्वररहितान्येव मुद्रापितानि।

खिलपाठनिर्धारणविषये ये ये ग्रन्था मया समवलोकितास्तेषां मध्ये औंधनगरस्थ-पण्डित-सातवळेकरमहोदयैः प्रदत्तं ऋग्वेदस्य शाङ्खायनशाखाया नागरीलिप्यां लिखितं पुस्तकद्वयं प्रथमं निर्देशमर्हति। तयोरेकं पुस्तकं गुर्जरदेशे जीर्णदुर्गे (= जुनागडनगरे) संवत् १७५४ वर्षे लिखितमपरं च नवानगरे संवत् १८९४ वर्षे लिखितमस्ति। उभयोश्चतुःषष्टावध्यायेषु संहिता विभक्ता। अष्टकानि न परिगणितानि। मण्डलानामादिरन्तश्च दर्शितः। स्वरा रक्तवर्णेनाङ्किताः। नवानगरपुस्तके अनुदात्तस्वरितौ प्रचलितरीत्यैव दर्शितौ। जुनागडपुस्तके अनुदात्तो यथापूर्वं दर्शितः स्वरितस्तु अनुदात्तवदेव किंतु अक्षरं मध्ये भिन्त्वा दर्शितः। पीटर्सन्महाशयैः अलवरनगरस्थानि ऋग्वेदस्य शाङ्खायनसंहितायाः पदपाठस्य च पुस्तकानि दृष्ट्वा सूचीपत्रे तान्युपवर्णितानि। तत्रस्थ एकस्मिन् संहितापुस्तके स्वरितचिह्नमेतद्रीत्या दत्तमिति तैर्लिखितम्। जुनागड-नवानगरपुस्तकयोः पाठसाम्यात् केवलं तयोः प्राचीनतरं जुनागडपुस्तकमेवास्मिन् ग्रन्थे मयोपयुक्तं 'जुना' इति संज्ञया तत्र तत्र निर्दिष्टं च। अस्य पुस्तकस्य शाङ्खायनशाखीयत्वे लिखितं प्रमाणं नास्ति। अलवरनगरस्थानि लिखितपुस्तकान्यपि शाङ्खायनशाखानुसारीणि इति पीटर्सन्महाशयानां मतम्। तेष्वपि शाङ्खायनशाखीयत्वे लिखितं प्रमाणं नास्ति। किंतु गुर्जरदेशीया ब्राह्मणाः शाङ्खायनिन इति लोकप्रसिद्धिमाश्रित्यैतेषां पुस्तकानां शाङ्खायनशाखीयत्वमनुमन्तुमुचितम्। एतत्पुस्तकस्थानि खिलानि शाङ्खायनशाखायां संहितान्तर्गतानि खिलत्वेनैव वा तेषां तत्रान्तर्भाव इति वक्तुं दुष्करम्। पुस्तकेषु तावत् खिलानि प्रत्यध्यायं वर्गेष्वन्तर्भूतानि सन्तीति स्पष्टम्। चरणव्यूहभाष्ये शाङ्खायनशाखाया वैशिष्ट्यं दर्शितं तद्यथा—'यमृत्विजो' इति दशमं वालखिल्यसूक्तं (ऋ. सं. ८. ५८) अपठित्वा तत्रस्थौ 'एक एवाग्निः' 'यमृत्विजो' इति द्वौ मन्त्रौ ऋ. सं. १०. ८८.१८ अनन्तरं ('कत्यग्नयः कति सूर्यासः' इति मन्त्रस्यानन्तरं) खिलत्वेन पठनीयाविति। एतदनुसारेण जुनागडपुस्तके दशमं वालखिल्यसूक्तं वर्जयित्वा तस्थौ द्वौ मन्त्रौ 'कत्यग्नयः' इत्यस्यानन्तरं लिखितौ। अलवरपुस्तक इदं शाङ्खायनशाखावैशिष्ट्यं वर्तते न वा इति न ज्ञायते। पीटर्सन्महाशयानां कृतायां सूच्यां तत्र दर्शितम्। आउफ्रेख्ट्महाशयमुद्रितऋग्वेदपुस्तकस्य तुलनया पीटर्सन्महाशयैः अलवरपुस्तके खिलानि दृष्टानि वर्णितानि च। आउफ्रेख्ट्पुस्तकेऽविद्यमानानि खिलानि अलवरपुस्तके वर्तन्ते न

वा, वर्तन्ते चेत् कीदृशस्तेषां पाठ इत्यस्मिन् विषये जिज्ञासावशिष्यत एव । अलवरपुस्तकानि स्वयं द्रष्टुं मे मनीषासीत् किंतु लिखितपुस्तकानि पुस्तकालयाद्बहिर्न नेयानीति पुस्तकालयाधिकारिणां नियमवशात् न द्रष्टुं पारितवान् । तत्रस्थपुस्तकानां पीटर्सन्महाशयकृतं वर्णनमनुसृत्यैव कार्यं निर्वर्तनीयम् ।

अलवर-जुनागडपुस्तकयोस्तुलनया अधोलिखिता विशेषाः खिलविषये दृष्टिगोचरा भवन्ति—

(१) ' यस्तृणैरध्ययनम् ' इति खिलं अलवरपुस्तके ऋ. सं. ५. ४९ अनन्तरं वर्तते । जुनागडपुस्तके तु ऋ. सं. ६. ४८ अनन्तरम् ।

(२) श्रीसूक्तं (२. ६) अलवरपुस्तके नास्ति । जुनागडपुस्तके विद्यते ।

(३) शिवसंकल्पसूक्तं (४. ११) अलवरपुस्तके नास्ति । जुनागडपुस्तके विद्यते ।

(४) ३. १९, ३. २०, ४. १२ इति त्रीणि खिलानि जुनागडपुस्तके विद्यन्ते । अलवरपुस्तके तेषामभावो दृश्यते ।

(५) २. १२ खिलं जुनागडपुस्तके तृचं अलवरपुस्तके द्वयम् । २. १३ खिले तृतीयमन्त्रानन्तरं जुनागडपुस्तके त्रयो मन्त्रा अधिकाः । ४. २ खिले (रात्रिसूक्ते) जुनागडपुस्तके अलवरपुस्तकापेक्षया मन्त्रद्वयमधिकम् ।

एतान् विशेषान् वर्जयित्वा अलवर-जुनागडपुस्तकयोरन्यत्सर्वं समानम् । एतस्माद्भेदादनुमीयते यदेतानि खिलानि यद्यपि प्रायः वर्गगणनायामन्तर्भावितानि तथापि ऋग्वेदस्य शाङ्खायनसंहितायां न परिगणितान्यासन्निति । केषां केषां खिलानां शाङ्खायनशाखायां खिलत्वेनान्तर्भाव आसीदित्ययं तावद्परो विषयः । ' विदा मघवन् विदा ' इत्युभयोः पुस्तकयोरन्त्यं खिलम् । तदनन्तरं ' अग्निर्देवेद्धः विदा मघवन्विदो ' इत्यंशोऽप्युभयोः समान एव । उभयोः पुस्तकयोः खिलपाठोऽपि प्रायः समानः । जुनागडपुस्तके ये पाठभेदा उपलभ्यन्ते ते सर्वे मया तत्र तत्र प्रदर्शिताः । उपरिनिर्दिष्टेषु खिलेषु जुनागडपुस्तकस्य यद्वैशिष्ट्यं तदपि तत्र तत्र टिप्पणीषु दर्शितमेव ।

शार्मण्यदेशे म्युनिकूनगरस्थपुस्तकालये खिलानां लिखितपुस्तकद्वयं (३०, १५५ क्रमाङ्कयुतं) वर्तते । तयोः केवलं निविरपुरोरुक्प्रैषकुन्तापात्मको खिलभागोऽस्ति । तस्थाः पाठभेदाः शेफ्टेलोवित्झमहाशयैः स्वकीयटिप्पण्यां दत्ताः । तेषु बहूनां पाठभेदानामितरपुस्तकपाठैः साम्यान्न ते मयोद्धृताः । ये विशिष्टाः पाठभेदाः क्वचिद्वर्तन्ते ते मूलपुस्तकमनिर्दिश्य प्रदर्शिताः ।

अस्मिन् खिलसंग्रहे त्रयोदशमन्त्रात्मिका शिवसंकल्पोपनिषद् (खिल ४. ११) विद्यते । लण्डननगरे ब्रिटिश म्युझीअम्-संज्ञकसंग्रहालये वर्तमाने ऋग्वेदसंहितापुस्तके (क्रमाङ्कः Add. 5351) सैवाष्टाविंशतिमन्त्रात्मिकास्ति । शेफ्टेलोवित्झमहाशयैः एकस्मिन्निबन्धे प्रकाशितस्तस्य पाठो मया तस्य खिलस्य टिप्पण्यां समुद्धृतः । जुनागडपुस्तके तत्समान एव पाठः । पं. सातवळेकरमहोदयैर्मुद्रितायां ऋग्वेदसंहितायां २६ मन्त्रात्मिका शिवसंकल्पोपनिषद् क्वचिद्विभिन्नपाठेन विभिन्नक्रमेण च मुद्रिता ।

सुविज्ञातं श्रीसूक्तमस्मिन् खिलग्रन्थे २. ६ खिलत्वेनागतम् । प्राचीनकालादारभ्यैतत् भारतवर्षे वैदिकधर्मानुयायिभिः पठ्यते । श्रुतिस्मृत्यादिग्रन्थेषु तद्धृताः केचन मन्त्रा उद्धृताः सन्ति । अस्य श्रीसूक्तस्यासंख्यातानि लिखितपुस्तकानि भारतवर्षे उपलभ्यन्ते । श्रीसूक्तस्य मन्त्रसंख्याविषये मन्त्रक्रमविषये पाठविषये च बह्व्यः परंपरा दृश्यन्ते । शेफ्टेलोवित्झमहाशयैः इंग्लंडदेशे विद्यमानानि श्रीसूक्तस्य लिखितपुस्तकानि समवलोक्य तद्धृताः पाठभेदा अन्यत्र निबन्धरूपेण संगृहीताः । तेषु विशेषवैचित्र्यस्याभावान्न मया तेऽत्रोद्धृताः । श्रीसूक्तपाठविनिश्चयार्थं मयापि विभिन्नग्रन्थालयस्थानि श्रीसूक्तस्य ४४ लिखितपुस्तकान्यवलोकितानि । परं तेषां पाठभेदानां पूर्वसंकलितपाठैः प्रायः समानत्वात् तत्तल्लिखितपुस्तकपाठोद्धरणमनावश्यकमित्याकलयामि । ये केचन विशिष्टाः पाठ-

भेदास्तेषूपलब्धास्ते मूलपुस्तकमनिर्दिश्य संगृहीताः। श्रीसूक्तस्यादिमेषु पञ्चदशसु मन्त्रेषु विद्यारण्यस्वामिनो भाष्यं विद्यते। मॅक्समुल्लरमहोदयैः स्वकीय ऋग्वेदभाष्यपुस्तक एतन्मुद्रापितम्। मयापि श्रीसूक्तभाष्यस्य बहूनि लिखितपुस्तकानि नानाग्रन्थालयस्थानि दृष्ट्वा भाष्यं परिशोधितं श्रीसूक्तस्याधस्ताम्मुद्रापितं च। तत्पाठभेदोद्धरणमनावश्यकं मन्ये।

रात्रिसूक्तस्य कानिचिल्लिखितपुस्तकानि अन्येषामपि केषांचन चतुर्णां खिलानामेकं पुस्तकं तञ्जौरनगरस्थसरस्वतीमहालग्रन्थालयस्थं मया समवलोकितम्। परं तत्रस्थखिलेषु पाठभेदानां विभिन्नत्वाभावात्तेषामपि नामनिर्देशो न कृतः।

लण्डननगरे इण्डिया-ऑफिसग्रन्थालये आश्वलायनमन्त्रसंहितायाः पुस्तकद्वयं (३७८, ३७९ क्रमाङ्कितं) अस्ति। आश्वलायनश्रौतसूत्रे गृह्यसूत्रे च ये ऋङ्मन्त्राः प्रतीकत्वेनोद्धृतास्तेऽस्मिन् संगृहीताः। तेषूद्धृतानां खिलसूक्तानां पाठा मुद्रितपुस्तकपाठेभ्यः क्वचिद्भिन्नाः। इयमाश्वलायनमन्त्रसंहिता डॉ. वि. म. आपटे-महोदयैरेकस्मिन्निबन्धे सविस्तरमुपवर्णिता। तद्वर्णनमनुसृत्य तत्पुस्तकस्थाः खिलसूक्तपाठविशेषा मया तत्तत्स्थानेषु संगृहीताः। तत्र ३७८ क्रमाङ्कयुतस्य पुस्तकस्य "आश्वमंसं[१]" इति संज्ञा मया दत्ता ३७९-तमस्य पुस्तकस्य च "आश्वमंसं[२]" इति। यत्रोभयोः पाठः समानस्तत्र केवलं "आश्वमंसं" इति संज्ञा।

कलिकातानगरस्थ-रॉयल एशियाटिक सोसायटी-ग्रन्थालये ऋग्वेदस्य पुस्तकद्वयं (संहिता क्रमाङ्कः १२० [६६०७] पदानि क्रमाङ्कः १४०[६६०८]) वर्तते। तस्मिन् खिलान्यन्तर्भूतानि दृश्यन्ते। तत्पुस्तकद्वयसंपादनार्थं बहु प्रयतितेऽपि महायुद्धसंहारभिया देशान्तरे प्रेषितत्वात्तदुपलब्धुं नाशक्नवम्। तस्य ग्रन्थालयस्य सूचीपत्रे एतयोः पुस्तकयोर्यद्वैशिष्ट्यं प्रदर्शितं तदनुसृत्य तत्रस्थखिलविषये विचारयामि। संहितापुस्तके सप्तमाष्टकमष्टादशखिस्तशताब्दे नागरीलिप्यां लिखितमस्ति। तस्मिन् 'पावमानीः स्वस्ययनीः' इति खिलं मॅक्समुल्लरपाठानुसारि लिखितम्। तत्रैवाष्टमाष्टकं पञ्चदशखिस्तशताब्दे लिखितमस्ति। तस्मिन् 'अविधवा भव वर्षाणि' इति खिलं (३.१७) लिखितं वर्तते। तथा च 'येनेदं भूतम्' इत्याद्या शिवसंकल्पोपनिषद् (खिल ४. ११) २८ मन्त्रात्मिका तत्र लिखिता स्यात् यतः 'गोभिर्जुष्टो धनेन' इत्येकोनविंशो मन्त्रस्तस्मिन् विद्यत इति सूचीपत्राज्ज्ञायते। एवमेव 'संज्ञानमुशना' 'नैर्ऋत्यं सेनादरणं' 'प्राध्वराणां पते' 'विदा मघवन् विदा' इति खिलान्यपि तत्र लिखितानि। पदपुस्तके षष्ठाष्टकस्य पदपाठः संवत् १६५३ मध्ये लिखितोऽस्ति। चतुर्थाध्याये एतत्पुस्तकापेक्षया एकं सूक्तं मॅक्समुल्लरपुस्तकेऽधिकमस्तीति सूचीपत्रकारैर्लिखितम्। कस्यचित् (नूनं दशमस्य) वालखिल्यसूक्तस्याधिक्यं तेषामभिप्रेतमिति प्रतिभाति।

औन्धपुस्तके कियांश्चित् खिलभाग इतरपुस्तकापेक्षयाधिको वर्तते। तस्य पाठादिवैशिष्ट्यं मया टिप्पणीषु प्रदर्शितमेव। खिलद्वये (४. ५; ४. ११) काश्मीरपुस्तके वर्तमानस्त्रुटितो भाग औन्धपुस्तक उपलब्धः स तत्र विनिवेशितः। ३. २० खिले काश्मीरपुस्तके वर्तमाना त्रुटिः जुनागडपुस्तकाधारेण परिपूरिता। अन्यत्रापि बहुषु स्थलेषु काश्मीरपुस्तके त्रुटयो विद्यन्ते किंतु तासां पूरणं लिखितपुस्तकाभावान्मुद्रितपुस्तकाभावाच्चाशक्यम्।

एकादश वालखिल्यसूक्तानि यद्यपि परिपाटीमनुसृत्याष्टमे मण्डले मुद्रापितानि तथापि काश्मीरपुस्तके खिलग्रन्थे तेषां समावेशादत्रापि तानि यथास्थलं (१. ४; ६; ३. १-८; १८) मुद्रापितानि। काश्मीरपुस्तके वालखिल्यसूक्तेषु पाठभेदा उपलभ्यन्ते तेऽवश्यं द्रष्टव्याः।

काश्मीरखिलग्रन्थे क्वचन अशुद्धा अपि पाठा उपलभ्यन्ते। एतादृशेषु स्थलेषु शेफ्टेलोविच्छ्रीमहाशयैः समानवैदिकपाठाधारेण अभ्यूहेन वा शुद्धाः पाठाः स्वीकृताः पुस्तकस्था अशुद्धाः पाठाः टिप्पणीषु समुल्लिखिताश्च। पूर्वं निर्दिष्टानि मुद्रितखिलपुस्तकान्यपि तैर्दृष्टानि तस्थाः पाठभेदा

अपि निर्दिष्टाः। खिलानां संहितादिग्रन्थानां च यत्र रचनासाम्यं विद्यते तादृशानि स्थलानि तत्संबद्धाः पाठभेदाश्च तैः समुल्लिखिताः। ताननुसृत्य मयापि प्रतिखिलं टिप्पणी दत्ता किंतु न तस्य टिप्पणी यथातथमुद्धृता। रचनासाम्यविषये मूलग्रन्थानवलोक्य आवश्यकतानुसारं शोधनं न्यूनपूरणं च संपादितम्। येऽधिकाः खिलमन्त्राः पाठभेदा वा मुद्रितपुस्तकेषु लिखितपुस्तकेषु चोपलब्धास्ते टिप्पण्यां संगृहीताः। काश्मीरपुस्तकस्थखिलपाठः शेफ्टेलोवित्सुमहाशयैः यथा मुद्रितः प्रायस्तथैव मयापि स्वीकृतः। यत्र क्वचित् पाठविषय आशङ्कासीत्तत्र काश्मीरपुस्तकमपि मयावलोकितम्। यत्र काश्मीरपुस्तकस्थं पाठं त्यक्त्वा शुद्धः पाठः साधारं तैः स्वीकृतः अशुद्धः पाठश्च टिप्पण्यां निर्दिष्टस्तत्र तादृशोऽशुद्धः पाठो मया न निर्दिष्टः। केषुचित्स्थलेष्वशुद्धं पाठं खिले तथैव स्थापयित्वा शुद्धः पाठः तैः टिप्पण्यां संसूचितः। एतादृशाः केचन सूचिताः पाठा विशेषतः सौपर्णसूक्तगता मया मूले विनिवेशिताः। पाठविनिश्चितिं वर्जयित्वान्येऽपि केचन विषयास्तेषां टिप्पणीष्वागतास्ते तत्रैव द्रष्टव्याः। क्वचित् लिखितपुस्तकस्थमशुद्धं पाठं त्यक्त्वा मुद्रितपुस्तकाधारेण लिखितपुस्तकाधारेण वा शुद्धः पाठो मयापि स्वीकृतः। ए. बी. कीथमहाशयैः काश्मीरखिलग्रन्थविमर्शसमये त्रयः शुद्धाः पाठाः संसूचितास्तेऽत्र स्वीकृताः।

खिलानां टिप्पण्यो मया संस्कृतभाषायामेव लिखिताः। लेखनसंक्षेपसिद्ध्यर्थं कानिचिच्चिह्नानि प्रयुक्तानि तानि संक्षेपविवरणे प्रदर्शितानि। टिप्पणीलेखने तावदयं क्रमः स्वीकृतः —

(१) अध्यायस्यानुक्रमणी अध्यायस्यादौ दत्ता। अनुक्रमणीपाठभेदा अप्यत्रैव निर्दिष्टाः।

(२) ऋग्वेदसंहितायां खिलं यत्र पठनीयं तस्य स्थानस्य निर्देशः।

(३) येषु येषु ग्रन्थेषु खिलं पूर्णतयांशतो वा मुद्रितं तेषां नामनिर्देशः।

(४) येषु येषु वैदिकग्रन्थेष्वितरग्रन्थेषु च खिलं पूर्णत्वेनांशतो वा मन्त्रक्रमभेदेन पाठभेदेन वागतं तेषां नामादिनिर्देशः।

(५) मन्त्रक्रमेण पाठभेदनिदर्शनम्। स्वीकृतपाठः स्थूलाक्षरैः प्रथमं विन्यस्तः तदाधारभूतग्रन्थनामभिः सह। अनन्तरं पाठभेदास्तत्तद्ग्रन्थनिर्देशेन दत्ताः। यत्र स्वीकृतपाठस्याधारो न प्रदर्शितः पाठभेदस्याधारश्चाल्पः तत्र स्वीकृतपाठाधारस्य बलीयस्त्वान्निर्देशो न कृत इति मन्तव्यम्।

(६) मुद्रितखिलपुस्तकेषु इतरग्रन्थेषु च विद्यमाना अधिका मन्त्राः।

(७) अधिकानां मन्त्राणां पाठभेदाः।

खिलसूक्तानां निर्माणकालस्तेषामृग्वेदसंहितया बाष्कलादिशाखाभिः संबन्धश्चेत्येतस्मिन् विषये शेफ्टेलोवित्सुमहाशयैः जर्मनभाषायां लिखिते स्वीये पुस्तके निबन्धेषु च बहु प्रपञ्चितम्। तस्य सारोऽत्रैवाङ्ग्लभाषानिबद्धायां प्रस्तावनायामुद्धृतः।

शेफ्टेलोवित्सुमहाशयैर्मुद्रितं काश्मीरखिलग्रन्थमनुसृत्य मयात्र खिलानि संगृहीतानीति पूर्वमेवोक्तम्। अतस्तेभ्यः प्रथमं धन्यवादवितरणमुचितं मन्ये। इतराणि मुद्रितखिलपुस्तकानि अन्ये संस्कृतग्रन्थाश्च खिलपाठनिर्धारणे मयोपयुक्तास्तेषां कर्तारोऽपि धन्यवादार्हाः। औन्धनगरस्थाः पंडितसातवलेकरमहोदयाः स्वसंपादितऋग्वेदशाङ्खायनसंहितापुस्तकद्वयमुपयोगार्थं दत्त्वा मामुपकृतवन्तोऽतस्ते विशेषतो धन्यवादार्हाः। तथा च तञ्जौर-तिरुपती-अड्यार-हृत्यादिनगरस्थग्रन्थालयगतानि बहूनि लिखितखिलपुस्तकानि मया दृष्टानि। तेषामधिकृतेभ्योऽपि मया धन्यवादा वितीर्यन्ते। आङ्ग्लजर्मनभाषयोर्लिखिताः केचन ग्रन्था निबन्धाश्च मयास्य ग्रन्थस्य रचनार्थमवलोकितास्तेषां कर्तारोऽपि धन्यवादार्हाः। अन्ते चास्मिन् खिलमुद्रणविषये यैर्विद्वद्भिः संसूचनेन मुद्रितपुस्तकप्रदानेनान्यप्रकारेण वा साहाय्यमाचरितं तेभ्योऽपि धन्यवादान् वितरति

विद्वद्वशंवदः
वि. ग. काशीकरः

खिलटिप्पणीषु निर्दिष्टानां ग्रन्थानां संक्षेपसूची

अथर्व = अथर्ववेदसंहिता
अन्वे = अन्वेष्टृकृतः (मुम्बापुरीमुद्रितः)
अल = पीटर्सनमहोदयेन प्रकाशितानि अलवरनगरस्थलिखितपुस्तकगतानि ऋग्वेदपरिशिष्टानि[1] ।
आउ = आउफ्रेख्ट्महोदयप्रकाशिता ऋग्वेदसंहिता
आचं = आह्निकचन्द्रिका
आपगृ = आपस्तम्बगृह्यसूत्रम्
आपमं = आपस्तम्बमन्त्रपाठः
आपश्रौ = आपस्तम्बश्रौतसूत्रम्
आर्षानु = आर्षानुक्रमणी (बिब्लिओथिका इंडिका सेरिज्, कलकत्ता)
आश्वगृ = आश्वलायनगृह्यसूत्रम्
आश्वमंसं = आश्वलायनमन्त्रसंहिता[2]
आश्वश्रौ = आश्वलायनश्रौतसूत्रम्
आसू = आह्निकसूत्रावलिः (मुम्बापुरीमुद्रिता)
ऋविध = ऋग्विधानम् (लवपुरे पं. जगदीशशास्त्रिणा मुद्रापितम्, संवत् १९९७)
ऋप्रा = ऋग्वेदप्रातिशाख्यम् (डॉ. मंगलदेवशास्त्रिभिः संपादितम्)
ऋब्र = ऋग्वेदीयब्रह्मकर्मसमुच्चयः (मुम्बापुर्यां मुद्रितः)
ऋमं = ऋग्वेदमन्त्रपाठः (मुम्बापुर्यां निर्णयसागरयन्त्रालये १८९१ खिस्ताब्दे मुद्रितः)
ऋसं = ऋग्वेदसंहिता
ऐआ = ऐतरेयारण्यकम्
ऐब्रा = ऐतरेयब्राह्मणम्
औंध = औंधनगरे पं. सातवळेकरमहोदयैः मुद्रिता ऋग्वेदसंहिता (द्वितीयावृत्तिः)
कपिसं = कपिष्ठलकठसंहिता
का = काश्मीरदेशे शारदालिप्यां लिखितो खिलग्रन्थः[3]
कासं = काठकसंहिता
कौसू = कौशिकगृह्यसूत्रम्
क्रिप्रसं = क्रियमाणप्रयोगसंग्रहः (अहमदाबादनगरे प्रकाशितः)
खागृ = खादिरगृह्यसूत्रम्
खिलानु = खिलानुक्रमणी
गोगृ = गोभिलगृह्यसूत्रम्
गोब्रा = गोपथब्राह्मणम्
जुना = जुनागडलिखितपुस्तकम्[4]
तं = तञ्जौरग्रन्थालयस्थलिखितपुस्तकम्
तैआ = तैत्तिरीयारण्यकम्
तैब्रा = तैत्तिरीयब्राह्मणम्
तैसं = तैत्तिरीयसंहिता
तैसंभ्या = तैत्तिरीयसंध्याभाष्यम् (पुण्यपत्तने १८९९ खिस्ताब्दे मुद्रितम्)
धपंशां = धनिष्ठापञ्चकशान्तिः(मुम्बापुरीमुद्रिता)
धसिं = धर्मसिन्धुः
निरु = निरुक्तं यास्काचार्यकृतं
नृताउ = नृसिंहतापनीयोपनिषत्
पंब्रा = पञ्चविंशब्राह्मणम्
पञ्चामृ = पञ्चामृताद्यभिषेकसूक्तम् (मुम्बापुरीमुद्रितं शके १८०७)
पागृ = पारस्करगृह्यसूत्रम्
पैप्प. अथर्व = पैप्पलाद-अथर्ववेदसंहिता (लवपुरे डॉ. रघुवीरेण परिष्कृता)
प्रर = प्रयोगरत्नं नारायणभट्टकृतं (मुम्बापुर्यां मुद्रितं शके १७८३)

---

1. A second Report of operations in search of Sanskrit MSS. in the Bombay Circle by Peter Peterson, Bombay 1884.

2. India Office Library MSS. Nos. 378 [1970] and 379 [781] as described by Dr. V. M. Apte in ABORI Vol. XX, Parts III-IV, pp. 249-61, 1938-39. आश्वमंसं[1] = MS. No. 378; आश्वमंसं[2] = MS. No. 379.

3. Apokryphen des Rgveda, Dr. phil. J. Scheftelowitz, Breslau 1906.

4. See Preface p. 894.

बौधसू = बौधायनधर्मसूत्रम्
बृहदे = बृहद्देवता (हार्वर्ड ओरिएण्टल् सेरीज्)
मै = मैक्समुल्लरमहोदयेन प्रकाशिता सभाष्या ऋग्वेदसंहिता
महाउ = महानारायणोपनिषद्
मंदी = मन्त्रार्थदीपिका (काश्यां प्रकाशिता)
महा = महाभारतम् (पुण्यपत्तनस्थ-भाण्डारकर-प्राच्यविद्यासंशोधनमन्दिरमुद्रितम्)
मंब्रा = मन्त्रब्राह्मणम्
मागृ = मानवगृह्यसूत्रम्
मामंसं = माध्यंदिनमन्त्रसंहिता
माश्रौ = मानवश्रौतसूत्रम्
मु = मुम्बापुरीमुद्रिता सभाष्या ऋग्वेदसंहिता
मैसं = मैत्रायणीसंहिता
म्यु = लण्डननगरे ब्रिटिशम्युज़ीअमामध्ये वर्तमानमृग्वेदसंहिताया लिखितपुस्तकम्[1]
वासं = वाजसनेयिसंहिता
विप = विवाहपद्धतिः (मुम्बापुर्यां १८८६ खिस्ताब्दे मुद्रिता)
वैसू = वैतानश्रौतसूत्रम्
शब्रा = शतपथब्राह्मणम्
शांआ = शाङ्खायनारण्यकम्
शांक = शांतिकमलाकरः
शांगृ = शाङ्खायनगृह्यसूत्रम्
शांब्रा = शाङ्खायनब्राह्मणम्
शांभ = शान्तिमयूखः (मुम्बापुर्यां १८०६ शके मुद्रापितः)
शांश्रौ = शांखायनश्रौतसूत्रम्
शांसा = शांतिसारः (मुम्बापुर्यां १७८३ शके मुद्रितः)
श्वेउ = श्वेताश्वतरोपनिषद्
संकौ = संस्कारकौस्तुभः (मुम्बापुर्यां खिस्ताब्दे १८६१ मुद्रितः)
संभास = संध्याभाष्यसमुच्चयः (पुण्यपत्तने १८९९ खिस्ताब्दे मुद्रितः)
साम = सामवेदसंहिता
सामविब्रा = सामविधानब्राह्मणम्
सुप = सुपर्णाध्यायः
हिगृ = हिरण्यकेशिगृह्यसूत्रम्
हिश्रौ = हिरण्यकेशिश्रौतसूत्रम्
हिसंध्या = हिरण्यकेशित्रिकालसंध्या (मुम्बापुरीमुद्रिता)

संक्षेपचिह्नानि

= समानम् [identical with]
= अंशतः समानम् [approaches or partly identical with]
= द्रष्टव्यम् [Cf.]

मन्त्रसंख्याया उपरितने कोणे विद्यमाना संख्या प्रायो मन्त्रस्य अर्धसंख्यां बोधयति ।

1. No. Add 5351, Comp. Khila IV. 11.

अथ खिलानि

प्रथमोऽध्यायः

ॐ नमो विष्णवे। अथ खिलेषु सूक्तप्रतीकान्युक्तं प्रयोजनं ..... शतर्च्यादीनामधिदैवता लक्षणानि च। छन्दसां चाधिक्यं च। कृतिः प्रकृतिराकृतिर्विकृतिः संकृतिरभिकृतिरुत्कृतिरित्यक्षरादीनि,[1] चतुरुत्तराण्येव[2] यजूंषि, संख्यानुवर्तनादितुल्यं ऋषीणां च तुल्यनाम्नां गोत्रमनादेशे, खिलान्यन्तरं मन्त्रोक्तान्येव संख्यादीनि संभवेत् ॥

१. → खिल ४.९

२. निवित् पुरोरुचः प्रैषाः कुन्तापा इति चत्वारि यजूंषि

सं तृचं शश्वत् षळृना तार्क्ष्यः सुपर्ण आश्विनं वै तत् सप्तम्याग्नेयी परा ऐन्द्री एकादशी वा नवमी लिङ्गोक्ता देवता अष्टम्यादि[1] विराड्रूपाश्चतस्रो[1] जगत्य उरोबृहती प्र सप्त ब्राह्मयो निषदुपनिषदौ द्वितीया जगती षष्ठी विराट्स्थाना ज्योतिष्मन्तं दश भारद्वाजो ज्योतिष्माँ षष्ठयाद्या लिङ्गोक्तदेवता-मानुष्टुभवन्यन्ये च कृश एकादशाश्विनः कृश आद्याः षड् लिङ्गोक्तदेवता आनुष्टुभमिमानि सप्तापुनर्दोष ऐन्द्रावरुणं जागतमयं षड् रेतागाङ्ग्यो यदा तृचं यामुनिः प्रणेता यं षड् यज्ञवस्सोऽयं चतुष्कं गौरीवीतिरिदमष्टौ चक्षुषी आश्विनापदोषः षष्ठी जगत्यत्रानुक्तगोत्राः सौपर्णाः ॥

१. 'अष्टमी विराड्रूपा चतस्रो' इति साधु

१

समैक्षिष्योर्ध्वमहस आदित्येन सहीयसा। अहं यशस्विनां यशो विश्वा रूपाण्या ददे ॥ १ ॥
उद्यन्नद्य वि नो भज पितां पुत्रेभ्यो यथा। दीर्घायुत्वस्य हेशिषे तस्य नो धेहि सूर्य ॥ २ ॥
उद्यन्तं त्वा मित्रमह आरोहन्तं विचक्षण। पश्येम शरदः शतं जीवेम शरदः शतम् ॥ ३ ॥
अभि त्यं मेषं पुरुहूतमृग्मियम्० ॥ ऋ. सं. १. ५१. १

ऋसं १.५० अनन्तरं पठनीयम्।
मॅ१–आउ१–औध।

१. **समैक्षिष्योर्ध्वमहस**–का; शनैश्चित्सूर्येण–मॅ-आउ; शनैश्चिदद्य सूर्येण–औध. **विश्वा रूपाण्या**–का; विद्यारूपाण्या–मॅ-आउ; विद्यारूपमुपा–औध। २. ≡ तैब्रा ३.७.६.२२; २[2] ≡ खिल १.५.५[2]; धेहि–का; देहि–तैब्रा-मॅ-आउ। ३[1]. ≐ ऋसं १.५०.११; तैब्रा ३.७.६.२२. ३[2] ≡ ऋसं ७.६६.१६; अथर्व १९. ६७. १-२; मैसं ४.९.२०; वासं ३६.२४; तैआ ४.४२.५; मागृ १.२२.११[2]; हिगृ १.७.१०; पागृ १.११.९; मंपा २.५.११-१४. ३ ≡ खिल १,५.६; → ऋसं १०.३७.७-८।

२

शश्वन्नासत्या युवयोर्महित्वं गात्रो अर्चन्ति सदमित्पुरुभू।
यद्ध स्थुरश्विना भुज्युमस्तमनारम्भणे अम्बनि तौग्र्यमस्तम् ॥ १ ॥
यदश्वं श्वेतं दधतो अभित्नासत्या भुज्यू सुमताय पेरवे।
तां वां रातिं विदथेषु विप्रा रेभन्तो दक्षावगमन्मतस्युम् ॥ २ ॥

आ नो विपन्यू सवनं जुषेथामा वां हंसाः सुयुजो वहन्तु ।
युवां स्तोमासो जनयो न मर्या उशन्तो दस्रा वृषणा सचन्ते ॥ ३ ॥
आ नो यातं त्रिवृता सोमपेयं रथेन शुक्रा सवनं मंदाय ।
स्तीर्णं वां बर्हिः सुषुता मधूनि युक्ता होतारो रथिराः सुहस्ताः ॥ ४ ॥
वासारथी चित्रौ जंगतो निधानौ द्यावाभूमी शृणुतं रोदसी मे ।
तावश्विना रासभाश्वा हवं मे शुभस्पती आगतं सूर्यया सह ॥ ५ ॥
प्रेषः सन्तु मधुनो घृतस्य तीव्रं सोमं नि वपन्तु शुष्मिणः ।
एवं तया युवत्यश्विनौ बाहू ऊर्जं दुहतु मधुना घृतेन ॥ ६ ॥
अग्ने मन्दन्तु पतयः स्तोमाः प्र णु त्यं दिवं यान्ति घर्मम् ।
चतुर्दशं त्रिदिवं युवानमोजो मिमातु द्रविणं सुमेके ॥ ७ ॥
हरिं हिनोमि दयमानो अंशुं पुरुभीळ्हं ऋषभं जयान् ।
हर्यश्वं हरितः ससाहं युक्तानेमि त्रिनाभि वरुणं प्रगाथः स्वस्तये ॥ ८ ॥
सोमो वैष्णवं महिमानमोजः सप्त ऋषयः सुवीरा नराः प्रीणयन्ति ।
सौधन्वनासः सुहस्ताः शमीभिस्त्वष्टमाङ्गिरसमृभवं स्वस्तये ॥ ९ ॥
इहेह वो मघवन्निं दधामि ध्रुवं तीव्रं च तं हृदियन्तं बृहस्पतिम् ।
संते दधामि द्रविणं हविष्मते घर्मश्चित्तप्तः प्रवृजे वहन्ति ॥ १० ॥
शश्वत्सौपर्णौ विषितस्तुकं वायसं विश्वभुजः पथिरक्षी नृचक्षसौ ।
इयं हि त्वा दयमानं पृचद्भिर्मा वायसो दोषादयमानो अबूबुधत् ॥ ११ ॥
तमेकनेमिं त्रिवृतं षोळशारं शतावारं विंशति प्रत्यराभिः ।
अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गमेदं द्विनिमित्तैकमोहम् ॥ १२ ॥
सदं सदमेकमेकं तस्थुषः पञ्चत्रिंशाद्दशपरम् । त्रिंशतं शिवं नवगुह्यं यज्ञमष्टषष्ठं विदत् ॥ १३ ॥
अतिष्ठद्वज्रं वृषणं सुवीरं दधन्वे देवो हरिमिन्द्रकेशम् ।
आयौ इन्द्रः षोळशीं शर्म यच्छतु षड्वर्मिणमेकं ध्रुवन्ति साकम् ॥ १४ ॥

एतदादीन्येकादश सौपर्णसूक्तानि । तथा चात्र बृहद्देवता (३.११८-११९)–' शश्वद्धि वामिति । दशाश्विनानीमानीति इन्द्रावरुणयोः स्तुतिः । सौपर्णेयास्तु याः काश्चिन्निपातस्तुतिषु स्तुताः'' ॥ ऋग्विधानमपि (१.१०८)–' सौपर्णानि पवित्राणि सूक्तान्येकादशाभ्यसेत् । वाञ्छन् पुत्रान् पशून् वित्तं स्वर्गमायुरनन्धताम् '' ॥

१. → ऋसं १.११६.५ : यदश्विना ऊहथुर्भुज्युमस्तम् । २[1]. ' यद्रथं वेतं द्रप्सुरक्षिणावत्वा भुज्यू सुमताय पेदवे ' इति शुद्धं स्यात् । ३[2]. सचन्ते; सचेन्ते-का → ऋसं १.११६.६; ११७.९; ११८.९; ११९.१०; १०.३९.१०; ७.७१.५. ४. आ नो यातं → ऋसं ४.४४.५; ८.८.५. रथिराः; रथिनाः इति का–पुस्तकस्थो मुद्रितपाठोऽशुद्धः स्यात् । खिल १.१.३; १०.३ द्रष्टव्यम् । ५. = तैआ १.१०.२. वासारथी–का-तैआ; → निरु १२.२. शृणुतं रोदसी मे–का; चरमः वं

अक्षावौ–तेजा। ६. प्रेषः (= प्र + इषः); पेर्षः–का. ऊर्जं दुहदु–का; → ऋसं ८.७२.१६; १००.१०. ७. मन्दन्तु; मदन्तु–का. ओजो मिमातु–का; 'ओजो मिमाते' इति माध्यं → ऋसं ७.८२.६। ८. अंशु–का; अंशुं ? → हरिरंशुः–ऋसं९.९२.१. हरितः–का; हरितं ? युक्तानेमिं–का; युक्तनेमिं ? प्रगाथः इति पदं सर्वथानावश्यकम्। ९[1]. प्रीणयन्ति–का; 'प्रीणन्ति' इति मूलपाठः स्यात्. ९[2].→ ऋसं ३.६०.३: इन्द्रस्य सख्यमृभवः समानशुर्मनोर्नपातो अपसो दधन्विरे। सौधन्वनासो अमृतत्वमेरिरे विष्वी शमीभिः सुकृतः सुकृत्यया; → ऋसं ७.३५.१२ : शं न ऋभवः सुकृतः सुहस्ताः। १०. इहेह–का; इहेह ? धर्मश्चित्तप्तः प्रवृजे ≡ ऋसं ५.३०.१५. ११[2]. इयं 'इ' धातो रूपं;→ इयाम्–ऋसं ७.८६.४. पृच्यद्भिः–का; पृच्यद्भिः पृदद्भिः इति वा स्यात्। अबूबुधत्; अबुबुधत्–का; → खिल ५.११.१. १२. ≡ श्वेउ १.४. षोळशारं शतावारं–का; षोडशान्तं शतार्धारं–श्वेउ → मभाआदि. १.३.६४ : एकां नाभिं सप्तशता अराः। १३[1]. सदमेकमेकं; सदमेकमकं–का. दश°–का; 'दशं' इत्यपि संभवेत्। १४[1]. दधन्वं देवाँ→ ऋसं ८.१९.१. १४[2].→ वासं २६.१०; तैसं १.४.४१ : महाँ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु।

1. Cf. Bṛhaddevatā, Part II. pp. 112-13.

2. For the Ṛgvidhāna I have used the edition in Roman characters of Rudolf Meyer (Berlin 1878) as well as the Sanskrit transliteration of the same by Pandit Jagadish Shastri (Lahore, 1940). The transliterator does not seem to have paid proper attention to the Khilas treated in the Ṛgvidhāna. By *Sauparṇāni* he means RV. I. 74-84 ! See also notes to Khila IV. 11.

3. Cf. A. B. Keith, JRAS 1907, p. 225.

३

प्र धारा यन्तु मधुनो घृतस्य यदविन्दतं सूरी उस्रियायाम्।
मित्रावरुणौ भुवनस्य कारू तौ मे अश्विना जुषतां सवना ॥ १ ॥
सुखं रथं शतयावानमाशुं प्रातर्यावाणं सुषदं हिरण्ययम्।
आ तिष्ठतं दुहितुर्विवस्वतस्तमेवावोच्छमवसे करामहे ॥ २ ॥
ये वामश्वासो रथिरा विपश्चितो वातध्राजिरः सुयुजो घृतश्चुतः।
येभिर्याथ उप सूर्यां वरेयं तेभिर्नो दस्रा वर्धतं सभस्सु ॥ ३ ॥
यद्वां रेतो अश्विना पोषयित्नु यदासभो वध्रिमत्यैः सुदानू।
यस्माज्जहे देवकामः सुदक्षस्तदस्यै दत्तं भिषजावभिष्टौ ॥ ४ ॥
येनासत्या मेषजं चित्रभानू येनावथुस्तोकंकामामु नु घोषाम्।
तदस्यै दत्तं त्रिषु पुंसु वध्वै येनाविन्दतु नयं सा सुहस्त्यम् ॥ ५ ॥
वष्ट् वां दंसावस्मिन्सुते नासत्या होता कृणोतु वेधाः।
सिक्षतां नार्यृतप्रजाता वि पर्वाणि जिहतां सूतवा उ ॥ ६ ॥
एवा निषद्योपनिषद्य विप्रा युवां रेभत्यौ सयुजा सुपर्ण्यौ।
ब्रह्माण्यकृतविदथेषु शंसा धत्तं तयोस्तनयं तोकमस्मे ॥ ७ ॥

इदं सूक्तं आश्व ३.१२.१४ मन्त्रे निर्दिष्टम्; ऐब्रा ६.२५.७; ८.१०.४ सायणभाष्ये:–' प्र धारा यन्तु मधुन इति सौपर्णसूक्तम् '।

b^2.→ऋसं १०.३८.४ : अर्वाञ्चमिन्द्रमवसे करामहे । b^3. **वातप्राजिषः**→तैआ १.११.७ : वातप्राजिगति. c^2. **याथ उप सूर्यो वरेयं**→ऋसं १०.८५.१५ = अथर्व १४.१.१५ : अयातं .....वरेयं सूर्यामुप । d^1. = अथर्व १.११.१^1: वषट् ते पूषन्नस्मिन्त्सूतावर्यमा होता कृणोतु वेधाः । d^2. = अथर्व १.११.१^2 ।

४

ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुवृदं भूरिमायम् ।
चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अति रिक्तं पिबध्यै ॥ १ ॥
युवं देवा क्रतुना पूर्व्येण युक्तो रथेन तविषं यजत्रा ।
आ गच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः ॥ २ ॥
युवां देवास्त्रय एकादशासः सत्या सत्यस्य दधिरे पुरस्तात् ।
अस्माकं यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी ॥ ३ ॥
पनाय्यं तदश्विनाकृतं वां वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत्ताँ उप यातं पिबध्यै ॥ ४ ॥
अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातम् ।
पिबतं सोमं मधुमन्तमश्विना प्र दाश्वांसमवतं शचीभिः ॥ ५ ॥
ज्योतिष्मन्तं सुप्रतीकमजस्रेण भानुना दद्यग्नी । शिवं प्रजानां कृणुष्व मा हिंसीः पुरुषं जगत्॥ ६॥
धाता रातिः सवितेदं जुषन्तां त्वष्टा यद्दूतो अभवद्दिवस्वतः ।
सं वामञ्जिम्यामुषसा सजूस्तमूर्वं गव्यं महि गृणान इन्द्र ॥ ७ ॥
भरद्वाजस्य सुन्वतो यविष्ठा याह्यग्ने मधुमत्तमः सुतः ।
सोमस्य मा तवसो दीध्यानो अच्छा कोशं जनयित्वाव्रतो भुवत् ॥ ८ ॥
अग्निः पृथुश्रीर्ब्रह्मणस्पतिः सोमो देवेष्वा यमत् । इन्द्रस्याधिपत्य मे बृहस्पते हवींषि ते ॥ ९ ॥
ऋचं वाचं जनयन्तो देवा अग्रे यदब्रुवन् । यस्त्वेदं ब्राह्मणो विद्यात्तस्य देवा असन्वशे ॥ १० ॥

१. = ऋसं ८.५८.३ (वालखिल्य १०.३). २–५. = ऋसं ८.५७.१–४ (वालखिल्य ९). ४. = अथर्व २०.१४३.९; आश्वश्रौ ९.११. 1^1. **भूरिमायं**–का; भूरिवारं–ऋसं. । ३. **सत्या**–का; सत्याः–ऋसं. **दधिरे**–का; दद्दशे–ऋसं । ४^1. **गविष्टौ**–का; गविष्टौ–ऋसं–अथर्व. **यातं**–का; याता–ऋसं । ५^2. °**श्विना**–का; °मस्मे–ऋसं । 6^1. ≐ तैसं ४.१.३.१; ५.१.४.१; मैसं २.७.२ : ज्योतिष्मन्तं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यानम्. 6^2. →मैसं २.७.२; तैसं ४.१.३.१; ५.१.४.१ : शिवं प्रजाभ्योऽहिंसन्तम्. **मा हिंसीः** = अथर्व १८.४.३०; → मनाउ २.१० : मा नो हिंसीर्जातवेदो गामश्वं पुरुषं जगत् । ७. →वासं ८.१७; तैसं १.४.४४; अथर्व ३.८.२; मैसं १.३.३८; कासं ४.१२; १३.९; ऋसं१.५८.१ : धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवो अग्निः । त्वष्टा यद्दूतो अभवद्दिवस्वतः. **अश्विभ्यामुषसा सजूः** = ऋसं १.४४.१४. **ऊर्वं गव्यं महि गृणान इन्द्र** = ऋसं ६.१७.१ । ८. **मधुमत्तमः सुतः** = ऋसं ९.१०५.३. **सोमस्य मा तवसो** = ऋसं ३.१.१; मैसं ४.११.२; कासं २.१५. **दीध्यानो**; दीध्याना–का. **अच्छा कोशं** = ऋसं ९.१०७.१२ । ९. **अग्निः**

पृथुर्ब्रह्मणस्पतेः = अग्निः पृथुर्धर्मणस्पतिः–वासं १०.२९. **सोमो देवेष्वा यमत्** ≡ ऋसं ९.४४.५. १०. ≡ वासं ३१.२१; तैआ ३.१३.२. **ब्राह्मं**–का; ब्राह्मं–वासं-तैआ. **यद्ब्रुवन्**–का; तद्ब्रुवन्–वासं-तैआ. **यस्त्वेवं**–का; यस्त्वैवं–वासं–तैआ ।

५

कृशस्त्वं भुवनस्पते पाति देवानामद्भुतः । अश्विना पातमस्मयू नासत्या तिरोअह्न्यम् ॥ १ ॥
त्वं तं सुपर्ण अभर दिवस्पुत्रा नि षेदिरे । अग्निः प्रजानामभवज्जातवेदो विचर्षणे ॥२॥
अग्निर्होता विभू वसुर्देवानामुत्तमं यशः । पुनरग्निः प्रजापतिर्वैश्वानरो हिरण्ययः ॥ ३ ॥
अग्निस्त्राता शिवो भवद्वरूथ्यो विश्वदेव्योः । द्रविणं पाहि विश्वतः सोमपा अभयंकरः ॥ ४ ॥
अग्ने निजहि मर्माण्यरातीनां च मर्मणाम् । दीर्घायुत्वस्य हेशिवे तस्य नो धेहि सूर्य ॥५॥
उद्यन्तं त्वा मित्रमह आरोहन्तं विचक्षण । पश्येम शरदः शतं जीवेम शरदः शतम् ॥६॥
कृशं च्यवानमृषिमन्धमश्विना जुजुर्वांसं कृणुथः कर्वरेभिः ।
अक्षण्वन्तं स्थूलवपुष्कमुग्रा पुनर्युवानं पतिमित्कनीनाम् ॥ ७ ॥
यो वां सोमैर्हविषा यो घृतेन वेदेन यो मनसा वाशं शक्रा ।
स धत्ते रत्नं वसुमद्दिन्द्रवन्तं पुरुस्पृहं पृतनाज्यं सुवीरम् ॥ ८ ॥
प्र वां नरा सप्तवध्रिर्मनीषा गिरं हिन्वत्प्रतिवाभ्यामिदानीम् ।
वृक्षा समुद्रमुशना युवानमथ तं कृणुत मा विरप्शिनम् ॥ ९ ॥
अजोहवीत्सप्तवध्रिः सुहस्तो द्रुणि बद्धोऽयंसमानः ककुभान् ।
अरूरुजतं युवमस्य वृक्षमदिं न वज्री सुवृषायमाणः ॥ १० ॥
एवा कृशश्चकमानमना....: सुहवा रातिसूरः ।
ब्रह्मचक्रे युवयोर्वर्धनानि धत्तं तस्मै सदमरातिदब्धम् ॥ ११ ॥

१. **भुवनस्पते**–का;→ भुवनस्य पते–ऋसं ९.३१.६; प्रायः 'भुवनपते' इति प्रयोगः→ वासं २.२; तैसं २.६.६.३; तैब्रा ३.७.६.१; शांश्रौ ४.२०.१; आश्वश्रौ १.४. **पातमस्मयू**→ ऋसं १.१३५.५. **नासत्या तिरोअह्न्यं**–ऋसं ३.५८.७. २. **दिवस्पुत्रा** ≡ ऋसं ४.२.१५. **जातवेदो विचर्षणे** ≡ ऋसं १.७८.१; ६.१६.२९; ३६; ८.४३. २. ३¹. **विभू** (?)–का;→ ऋसं १०.९१.१ : होता विभूः । ४¹.→ ऋसं ५.२४.१ : अग्ने त्वं.....त्राता शिवो भव वरूथ्यः. **विश्वदेव्योः**–का; 'विश्वदेव्यः' इति शुद्धम् । ५¹. **मर्माणि**–का; वर्माणि ? →ऋसं ६.७५.१८ : मर्माणि ते वर्मणा छादयामि. ५²–६. ≡ खिल १.१.२²-३;→ ऋसं १०.३७.७-८ । ७.→ ऋसं १०.३९.३²-४¹ : अन्धस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् । युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः;→ ऋसं १.११७.१३ : युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः;→ तांब्रा १४.६.१०. **ऋषिमन्धमश्विना** ≡ खिल १.१२.७. **पतिमित्कनीनां**→ ऋसं १.११६.१० : इत्पतिमकृणुतं कनीनाम् । ८. **वाशं**–का; वाशे (= वा + आशे) ? । ९¹. = ऋसं ८.७३.९. **वृक्षा**–का; वृक्षे ? **समुद्र°**–का; संबद्धं ? → ऋसं ६.७८.६ । १०¹. **सुहस्तो**; सुहस्त-का. १०². → ऋसं ५.७८.५; ९. **सुवृषायमाणः**→ ऋसं १.३२.३ । ११². **ब्रह्मचक्रे** ≡ श्वेउ १.६.

६

इमानि वां भागधेयानि सिक्तत इन्द्रावरुणा प्र महे सुतेषु वाम् ।
यज्ञे यज्ञे हि संवना मुरण्यथो यत्सुन्वते यजमानाय शिक्षथः ॥ १ ॥
निष्विध्वरीरोषधीरापो अभ्यामिन्द्रावरुणा महिमानमाशत ।
या तस्थतू रजसस्पारे अध्वनो यथोः शत्रुर्नैकिरादेव ओहते ॥ २ ॥
सत्यं तदिन्द्रावरुणा घृतश्चुतं मध्व ऊर्मिं दुहते सप्त वाणीः ।
ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः ॥ ३ ॥
घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य ।
या ह वामिन्द्रावरुणा घृतश्चुता ताभिर्दीक्षं यजमानाय शिक्षतम् ॥ ४ ॥
अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिन्द्रियम् ।
अस्मान्त्स्विन्द्रावरुणा घृतश्चुता त्रिभिः सप्तेभिरवतं शुभस्पती ॥ ५ ॥
इन्द्रावरुणा यदृषिभ्यो मनीषा वाचो मतिं श्रुतमधत्तमग्रे ।
तानि छंदांस्यसृजन्त धीरा यज्ञे तन्वानास्तपसाभ्यपश्यन् ॥ ६ ॥
इन्द्रावरुणा सौमनसमदत्तं रायस्पोषं यजमानेषु धत्तम् ।
प्रजां पुष्टिं रयिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ॥ ७ ॥

ऋसं ८.५९ (वालखिल्य ११); ऐब्रा ६.२५ (सायणभाष्यं); शांश्रौ ९.२०.१४ (भाष्यं); बृहदे ३.११९ एतेभ्यो ज्ञायते यदिदं सौपर्णं सूक्तमिति । आश्वश्रौ.८.२; शांश्रौ १२.११.१७ अत्रापि निर्दिष्टम् ।

१२. हि–का; ह–ऋसं । २. निष्विध्वरीरोषधीराप = ऋसं ३.५५.२२. अभ्यामि°–का; आस्तामि°–ऋसं. महिमानमाशात = ऋसं १.८५.२. तस्थतू रजसस्पारे–का; सिस्रतू रजसः पारे –ऋसं । ३१. घृतश्चुतं–का; कृशस्य वां–ऋसं । ४२. दक्षं–का; घस्त–ऋसं । ५२. घृतश्चुता त्रिभिः सप्तेभि°–का; घृतश्चुतस्त्रिभिः साप्तेभि°–ऋसं । ६. मनीषा–का; मनीषां–ऋसं. °मधत्तमग्रे–का; °मदत्तमग्रे–ऋसं. तानि छन्दांस्य°–का; यानि स्थानान्य°–ऋसं. °पश्यन्–का; °पश्यं–ऋसं । ७२. रयिमस्मासु–का; भूतिमस्मासु–ऋसं ।

७

अयं सोमः सुशमी अद्रिबुध्नः परिष्कृतो मतिभिरुक्थशस्तः ।
गोभिः श्रीतो मत्सरः सोमगीतो मक्षू पवाते परि वां सुशिप्रा ॥ १ ॥
अस्य पाजसः पिबतं सुतस्य वारेण्याः परिपूतस्य वृष्णः ।
ताविन्द्रा जठरमा पृणेथामथा मनो वसुधेयाय धत्तम् ॥ २ ॥
एह यातं तन्वा३ शाशदाना मधूनि नश्चकमानो नु मेधा ।
वि स्वा मन्दा पुरुरेजमाना युवायती हवते वां मनीषा ॥ ३ ॥
सुखं नासत्या रथमंशुमन्तं स्योनं सुवहिमधि तिष्ठतं युवम् ।
यं वां वहन्ति हरितो वहिष्ठा शतमश्वा यदि वा सप्त देवा ॥ ४ ॥

यं वेनं तोगच्छतं मानवस्य शार्यातस्य शदने शस्यमाना ।
अधीभयुः सधमादं चकानश्व्यवनो देवान्युवयोः स एषः ॥ ५ ॥
आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरम् ।
शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥ ६ ॥

१[1]. गोभिः श्रीतो ≡ ऋसं ८.८२.५ । २[2]. जठरमा पृणेथां ≡ ऋसं ६.६९.७. अथा मनो वसुधेयाय ≡ अथर्व ३.४.४ : अथा[a] । ३[1]. तन्वा३शाशदाना ≡ ऋसं.१.१२४.६ । ४. ≐ अथर्व १३.२.७ । ५[1].→ ऋसं १.११२.१६; १७; शब्रा ४.१.५.२; ऐब्रा ४.३२ । ६. ≡ ऋसं १.३४.१२.

८

यदा युञ्जाथे मघवानमाशुं पुरुस्पृहं पृतनाज्यं सुवीरम् ।
स्वश्वं दस्रा रयिमा हवेषु तदा युतीर्यिति रसं तनूनाम् ॥ १ ॥
भन्दिष्ठा इमे कवयश्चरन्ति भरेषु न प्रथिता तुर्वशासः ।
वाचं हिन्वानाः पुरुपेशसं वा हविष्मती सवने मन्दयध्यै ॥ २ ॥
श्रुतं हवं तर्पयतं मखस्यु काममेषामा वहथो हवींषि ।
अध स्तोतॄन् यजमानं च पातमूतिभिर्नृपती या अभीके ॥ ३ ॥

१. पुरुस्पृहं पृतनाज्यं सुवीरं ≡ खिल १.५.८[1]. रसं तनूनां ≡ ऋसं ७.१०४.१० । २. प्रथिता–का; प्रथिताः ? ३[1]. तर्पयतं...काममेषां ≐ ऋसं १.५४.९ : तर्पय काममेषाम् ।

९

यं गच्छथः सुतपा देववन्तं हविष्कृतं वृषणा रातहव्यम् ।
स पुष्यत्यन्नं शतमाविरुक्थ्य३मना पिबन् प्रयतमादियित्नु ॥ १ ॥
या दंसांसि जरिता दुष्टरा वां या शंसन्ति जरितारः सुतेषु ।
यानीह पुष्यन्तु विधा जनेषु यैरश्नुथो विदथे सोमपेयम् ॥ २ ॥
यदुशन्ता वृषणा यौ दधीचे शिरो भिषजा समधत्तमर्वाक् ।
तद्वां मतीं मधुना तं युवाना वषट्कृतं भसथो मन्दसाना ॥ ३ ॥
मो षो च आथर्वण यद् ब्रवीमि मधु तेऽन्यैर्वीरतरैरचित्तम् ।
यदन्वशासन् मघवा दधीचे तद्वामवक्षच्छिरसा हयस्य ॥ ४ ॥
यदा गच्छाद्वीळितो वज्रबाहुर्धत्ते पितृभ्या मधु नो दधीचा ।
आ तिरेयं दुश्शुते मा वदेति यदा वदत्सा युवयोः सुकीर्तिः ॥ ५ ॥
याभिः शचीभिर्वृषणा दधीचे याभिस्तुरं कावषेयं मखस्य ।
याभिर्धियं जिन्वथाकें निपाना ताभिर्नोऽवतं विदथे गभीरा ॥ ६ ॥

२. यैरश्नुथो; येरश्नथो–का । ३[1]. दधीचे शिरो ≐ ऋसं १.११७.२२ : दधीचेऽश्व्यं शिरः → ऋसं १.११६.१२; शब्रा १४.१.१.१८-२५ । ४[2].→ ऋसं १.११६.१२[1]: वन्वन्वार्वणो वामवक्ष

शीर्ष्णा प्र यदीमुवाच;→ऋसं १.११७.२२। ५. **पितृभ्यां**-का; पितृभ्यो ? **दुश्शुते मा वदेति**-का; दुःश्रुता मा वदाति ? ६. **याभिः शचीभिर्वृषणा** = ऋसं १.११२.८. **तुरं कावषेयं**→शआ ९.५.३.१५; १०.६.५.९; ऐआ ४.२७; ७.३४; ८.२१; बृउ ६.५.४।

१०

अयं सोमो देवयां वां सुमेधा हृदिस्पृग् याति धिषणां मियानः ।
स्वाधिष्ठो हव्यान्मधुनो घृताद्वा नूनो वां स्तोमो अश्विनाहमेमि ॥ १ ॥
प्र वां महो मन्दते देवकामा ययैरयासो वयुनानि विश्वा ।
तावश्विना पुरुभुजा सुशस्ती ऋषिहिता महतं विश्ववेनाम् ॥ २ ॥
यो वां गोमान्नश्ववान् सूनृतावान् पुरुश्चन्द्रः स्पार्हो स्पार्हयिष्णुः ।
यं जोहवीमि रथिरो गविष्टौ तमह्वे रथमा विश्वरूपम् ॥ ३ ॥
सुवृद्रथो वां वृषणा सुवह्निः पुरुस्पृहो वसुविद्वयोधाः ।
येन वाजान् वहतं स्पार्हवीरानुरुश्रियः शुरुधोऽश्वांश्च माध्वी ॥ ४ ॥

२[1]. **ययैरयासो**-का; ययेरयासो ? **वयुनानि विश्वा** = ऋसं १.१५.१०; ७५.१४। ४[1]. **सुवृद्रथो** = ऋसं १.१८३.२.

११

इदं देवा भागधेयं पुराणं यदाशिरे हविषा याज्ञियासः ।
एष स्य घर्मः परिषिक्त ऋग्मिस्तं बप्सथो रथिरा विद्वन्ता ॥ १ ॥
वक्वणं शिरो वृषणा यन्मखस्य शिरो भिषजा समधत्तमर्वाक् ।
तद्वां नरः सरिरं चारु चित्रं सदा गृणन्ति कवयः सुतेषु ॥ २ ॥
येन देवा अव्रत सं रपांसि येनासहन्त पृतना अदेवीः ।
येनाभवन्नमृताः सोमधानं तमर्पयतं शिरसा हयस्य ॥ ३ ॥
पुरा विशीर्णां विदथेन देवा नावाशिषोरुन्धत नापि नाकम् ।
ईजाना बर्हीरु सदा यदास्य शिरो दत्तं समधान्वारुहन् स्वः ॥ ४ ॥
यद्वां माता उप आतिष्ठदुग्रं सुवृद्रथानव्यथेयं सरण्यूः ।
तत्र वां माध्वी मधवाहितं सुनीथे प्रत्नमश्विना मयोभुः ॥ ५ ॥
युवं त्रिभिश्चितयथोऽपि नाकं युवं पयांसि शंकरीषु धत्तम् ।
युवं वीरुद्भिः सृजतं महीमं युवं सप्तये सृजतं वि सिन्धून् ॥ ६ ॥
युवं माध्वी मधुभिः सारघेभिर्युवं मेषजा स्थो भिषजा सुपाणी ।
युवं रथेभी रथिरौ स्थ उग्रा सुमङ्गलावमीवचातनेभिः ॥ ७ ॥
तन्मे दत्तं चक्षुरक्ष्णोर्विचक्षे पश्यामो येन स्वरिमा दिशश्च ।
येनाभिष्याय वि धवाम शक्रं दुर्हणाद्वामश्विना शूरसातौ ॥ ८ ॥

२[1]. →ऋसं १०.१७१.२; खिल १.९.३[1]। **३**[2]. **शिरसा हयस्य** = खिल १.९.४[2]। **४**[1]. →शब्रा १४.१.१.१८; १४.२.१.११; ४.१.५.१३-१८; ऋसं १.११६.१२. **बर्हीरु समा** = ऋसं १०.१२४.४। **५**[1]. **सरण्यूः** = ऋसं १०.१७.२; अथर्व १८.२.३३। **६**[2]. **सर्तवे सृजतं वि सिन्धून्** →ऋसं १.३२.१२; २.१२.१२।

१२

आश्विना वहतं पीवरीः स्वधाश्वावतीर्दासपत्नीरिरावतीः ।
युवोर्दानासो दिवि नादितेर्यो युवोः पयांसि रुरुचिरे सुशुक्वा ॥ १ ॥
यद्रेभं दस्रा विनिगूळहमप्सु युवायन्तं वाजयन्तमूबीसात् ।
उन्निन्यथुरश्विना वन्धिमाशुं तद्वां व्रतं महयन्युक्थशासः ॥ २ ॥
यो वां नु सरिरे यो पृथिव्यां यो वीरुत्सु ग्रावसु यान्तरिक्षे ।
यो वीरेषु सूरिषु यापि नाके ताभिर्नः शर्म यच्छतं युवाना ॥ ३ ॥
यो वां भरित्रा स्तुवतो मघानि प्रयन्त्रीणि द्विषतो वहीणानि ।
त्रात्रीणि शश्वता सार्तपन्ति ताभिर्नः शर्म यच्छतं युवाना ॥ ४ ॥
यो वां त्रिचक्रः सुपविः सुशस्तिस्त्रिवन्धुरः केतुमान् वातरंहाः ।
योगे यस्य वि तनोत्यभीशुं विभावरीः सदथो यन्मयोभु ॥ ५ ॥
युवमूहथुर्विमदाय जायां युवं वशां शयवे धेनुमक्रताम् ।
युवमायुषा तारयतं प्र बन्धनमत्रिममुक्तं युवमंहसो वि ॥ ६ ॥
हवन्तं मेषान् वृक्ये शिवायै पितां चकार ऋषिमन्धमश्विना ।
तस्मिन्नृज्राश्वे चक्षुषी अधत्तमाविष्कृणुतं पुनरस्य लोकम् ॥ ७ ॥
यद्वां चक्षुर्दिवि यत्सुपर्णो येन पश्यथो भुवनान्यमर्त्याः ।
तन्मे दत्तं चक्षुषी देवबन्धू नमस्यां विन्देथ पुरुधा चकानाम् ॥ ८ ॥

उपप्रयन्तो अध्वरम्० ॥ ऋ. सं. १. ७४. १

इत्यृग्वेदे खिले प्रथमोऽध्यायः ।

'उपप्रयन्तो अध्वरम्' (ऋसं १.७४.१) इति सूक्तान्तेन ज्ञायते यद्वितीयादिद्वादशपर्यन्तान्येकादश सौपर्णसूक्तानि ऋसं १.७३ अन्ते पठितव्यानीति ।

१[1]. **वहतं पीवरीः** = ऋसं ८.५.२०. **नादितेर्यो**-का; नादितेया ? **२**[1]. ≐ ऋसं १०.३९.९ युवं ह रेभं वृषणा गुहा हितमुदैरयतं..... । युवमूबीसमुत तप्तमत्रय ओमन्वन्तं चक्रथुः. **रेभं** →ऋसं १.११६.२४; ११७.४; ११८.६। **३. ताभिः**-का; तेभिः ? **४. यो**-का; या ? **त्रात्रीणि शश्वता** = खिल ४.७.२[2]। **६. युवमूहथुर्विमदाय जायां** ≐ ऋसं १.११७.२० : युवं शचीभिर्विमदाय जायां न्यूहथुः **शयवे धेनुं** = ऋसं १०.३९.१३; ≐ ऋसं १.११८.८. **आयुषा तारयतं प्र बन्धनं** ≐ ऋसं १.११९.६ : प्र दीर्घेण वन्दनस्तार्यायुषा. **अत्रिममुक्तं युवमंहसो** ≐ ऋसं १.११७.३ : अंहसः..... अत्रि मुञ्चथो। **७. पिता चकार ऋषिमन्धं** ≐ ऋसं १.११६.१६ : मेषान् वृक्ये.....पितान्धं चकार; **मेषान् वृक्ये**-ऋसं १.११७.१७. **ऋज्राश्वे चक्षुषी** = ऋसं १.११७.१७[2]। **८. सुपर्णो**-का; **सुपर्णौ ? अमर्त्याः**-का; अमर्त्या ? **विन्देथ**-का; विन्देथे ?

द्वितीयोऽध्यायः

ॐ मैका भद्रं पञ्चानुष्टुभो जागर्ध्येका जातवेदस्यं स्वस्त्ययनं द्वे वर्षंस्त्वेका द्विरण्यवर्णामेकोना श्रीर्भांगैवी श्रीरलक्ष्मीघ्नं भैक्ष्यमानुष्टुभं वै शकर्यन्तं हिंसाघ्नेयी चतुर्थी प्रस्तारपङ्क्तिस्त्रिष्टुभौ पञ्चदस्युपरिष्टाद्बृहती श्रीः[1] पुत्राः[1] परे षट् त्रिष्टुप्तीतः पञ्चानन्दकर्दमौ वैश्वदेवं मयि ऋषेयः श्लेषे जातवेदस्यं बृहत्यादि सं स्रवन्त्विति संस्रवान् वैश्वदेवं द्वितीयादि त्रिष्टुभौ आ ते सस प्रजावान् गर्भाधाशीस्तुतिः[2] प्रजापतिरैन्द्रवायव्यौ चतुर्थी बृहती पञ्चमी प्रस्तारपङ्क्तिरग्निः पञ्च जीवपुत्र आग्निवारुण[3]मतिजगत्यानुष्टुप्[4] त्रिष्टुबन्तं चक्षुरेकात्मस्तुतिः शंवतीः षट् शान्तिरानुष्टुभं पञ्चम्यादि बृहती जगत्यौ स्वग्नेका यस्योपानुष्टुप्[5] वालखिल्याः परेऽष्टौ[5]।

१. 'श्रीपुत्राः' इति साधु;→बृहद्दे ५.९१.

२. 'आशीःस्तुतिः' इति शुद्धं.

३. आग्निवारुण°–Macdonell, Brhad. Part II, p. 190; अग्निवारुण°–Scheftelowitz

४. उप (प्र वद) इत्यस्या ऋषिर्वसिष्ठ इति निरु. ९.७

५. 'वालखिल्याः परेऽष्टौ' इति वस्तुतस्तृतीयाध्याये समन्वेति

१

मा बिभेर्न मरिष्यसि परि त्वा पामि सर्वतः ।
घनेन हन्मि वृश्चिकमहिं दण्डेनागतम् ॥ १ ॥
त्वमग्ने द्युभिस्त्वमाशुशुक्षणिः० ॥ ऋ. सं. २. १. १

प्रथममण्डलान्ते पठनीयम् । ऋसं १.१९१.१० अन्ते पठनीयमिति मु ।

मॅ२–मु–आउ२–अल–जुना–ऋमं–ऋव्र (शान्तिपाठ)–पञ्चामृ–आश्वमंसं–औध ।

१. मा बिभेर्न मरिष्यसि ≡ अथर्व ५.३०.८ । १[2]. ≡ अथर्व १०.४.९. **अहिं**–का–मु–अथर्व; अहं–मॅ–आउ–अल–ऋमं–ऋव्र–पञ्चामृ ।

मॅ–आउ–अल–ऋमं–ऋव्र–पञ्चामृ-पुस्तकेषु बहवो मन्त्रा अस्मिन्सूक्तेऽधिकत्वेनोपलभ्यन्ते पाठवैषम्येण । ऋमं-पाठोऽधो दीयते–

आदित्यरथवेगेन विष्णोर्बाहुबलेन च । गरुडपक्षनिपातेन भूमिं गच्छ महायशाः ॥ २ ॥
गरुडस्य जातमात्रेण त्रयो लोकाः प्रकम्पिताः । प्रकम्पिता मही सर्वा सशैलवनकानना ॥ ३ ॥
गगनं नष्टचन्द्रार्कं ज्योतिषं न प्रकाशते ।
देवता भयभीताश्च मारुतो न प्लवायति मारुतो न प्लवायत्यों नमः ॥ ४ ॥
भो सर्प भद्रं भद्रं ते दूरं गच्छ महायशाः । जनमेजयस्य यज्ञान्ते आस्तीकवचनं स्मर ॥ ५ ॥
आस्तीकवचनं श्रुत्वा यः सर्पो न निवर्तते । शतधा भिद्यते मूर्ध्नि शिंशवृक्षफलं यथा ॥ ६ ॥
ब्रह्मस्थो माधवश्चैव सुचुकुन्दो महामुनिः । कपिलो मुनिरास्तीकः पञ्चैते सुखशायिनः ॥ ७ ॥
नर्मदायै नमः प्रातर्नर्मदायै नमो निशि । नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः ॥ ८ ॥
यो जरत्कारुणा जातो जरत्कार्व्यां महायशाः । तस्य सर्पोऽपि भद्रं ते दूरं गच्छ महायशाः ।
तस्य सर्पस्य सर्पत्वं तस्मै सर्प नमोऽस्तु ते ॥ ९ ॥

आउ–पुस्तके १–६ मन्त्राः । मु–पुस्तके सप्तमो मन्त्रो नास्ति । अल–पञ्चामृ–पुस्तकयोः केवलं १-४ मन्त्राः ।

२. विष्णोर्बाहु°–ऋमं–ऋत्र–पञ्चामृ; विष्णुबाहु°–मॅ–मु–आउ–अल. निपातेन भूमिं; भातेन भूमी–अल. महायशाः; महाविषः–अल। ३-४[1] ≡ सुप २.१-२. ३[1]. जातमात्रेण–मॅ–मु–आउ–ऋमं–ऋत्र–पञ्चामृ; जातमात्रस्य–अल–सुप; मातमात्रेण–औध। ४[1]. ज्योतिषं न प्रकाशते; न ज्योतींषि चकासति–सुप। ४[2]. अल–सुप–पाठौ भिन्नौ। अल–देवता भयवित्रस्ता मारुतो नष्टचेतनाः; सुप–देवता भयवित्रस्ता नष्टशेषश्च मारुतः. भयभीताश्च; भयवित्रस्ता–आउ। ५. भो–का; भोः–इतरेषु. महायशाः; महाविष–आउ–औध. जनमेजयस्य–ऋमं–मॅ–मु; जन्मेजयस्य–आउ–ऋत्र–पञ्चामृ। ५-६ ≡ ममा १. ५३. २२ (टिप्पणी)। ७. ≡ मॅ ९. अगस्त्यो माधवः–ऋत्र; अगस्त्यं माधवं–ऋमं–पञ्चामृ; अगस्तिर्माधवः–मॅ. मुचुकुन्दो; मुचकुंदं–पञ्चामृ. ७[2]. = तं : श्वफल्कमास्तिकं चैव पंचैतानि स्मरेन्निशि पंचैतानि स्मरेन्नित्यं नमः। ८. = मॅ १०। ९. = मॅ ७. जरत्कन्यां; जरत्कार्वा–औध. सर्पोऽपि–ऋमं–ऋत्र; सर्पाप–मॅ; सर्पापि–मु; स्मरामि–औध. दूरं; भूमि–मॅ. महायशाः; महाविष–औध। ९[1]. (केवलं ऋमं–मध्य एव वर्तते) ≡ खिल २. १४. ८[2].

अधोलिखितः मॅ ८ मन्त्रः ऋमं–पुस्तके नास्ति—

असितं चार्थसिद्धिं च सुनीतिं चापि यः स्मरेत्।
दिवा वा यदि वा रात्रौ नास्ति सर्पभयं हरेत्॥

अधोलिखितं खिलसूक्तं ऋसं २. ३२ अनन्तरं पठनीयमिति औंधपुस्तके—

कुहूमहं सुकृतं विघ्ननापसमस्मिन्यज्ञे सुहवां जोहवीमि।
सा नो ददातु श्रवणं पितॄणां तस्यै ते देवि हविषा विधेम॥ १॥
कुहूर्देवानामसृतस्य पत्नी हव्या नो अस्य हविषः शृणोतु।
सं दाशुषे किरतु भूरि वामं रायस्पोषं यजमाने दधातु॥ २॥
अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम्। अग्निश्च हव्यवाहनो भवतं दाशुषे मयः॥ ३॥
अन्विदनुमते त्वं मन्यासै शं च नस्कृधि। क्रत्वे दक्षाय नो हिनु प्र ण आयूंषि तारिषत्॥ ४॥
धाता दधातु नो रयिमीशानो जगतस्पतिः। स नः पूर्णेन वावनत्॥ ५॥
धाता ददातु दाशुषे वसूनि प्रजाकामाय मीळ्हुषे दुरोणे।
तस्मै देवा अमृताः सं व्ययन्तां विश्व देवासो अदितिः सजोषाः॥ ६॥
धाता ददातु दाशुषे प्राचीं जीवातुमक्षिताम्। वयं देवस्य धीमहि सुमतिं वाजिनीवतः॥ ७॥
धाता प्रजानामुत राय ईशे धातेदं विश्वं भुवनं जजान।
धाता कृष्टीरनिमिषाभि चष्टे धात्र इदव्यं घृतवज्जुहोत॥ ८॥

एतस्मिन् विषये बृहद्देवतावचनम् (४. ८७-८८)—' तत्पूर्वे द्वे ऋचौ कुह्वाः कुहूमहमिति स्मृते। तदुत्तरे द्वेऽनुमतेरनु नोऽन्विदिति स्मृते। धातुश्चतस्रस्तत्रादौ धाता ददातु नो रयिम्॥ ' एतेनैव क्रमेण तैत्तिरीयसंहितायां (३. ३. ११) कुहूमहमित्यादिसूक्तगताः सर्वे मन्त्रा उपलभ्यन्ते। प्रथमं ५-८ इति धातृदेवताकाश्चत्वारो मन्त्राः ५, ६, ७, ६ इति क्रमेण वर्तन्ते। अनन्तरं ३, ४ इति अनुमतिदेवताकौ मन्त्रौ तदनन्तरं ऋसं. २. ३२.४-५ एतौ राकाया मन्त्रौ वर्तेते। समनन्तरमेव १, २ इति कुहूदेवताकौ मन्त्रौ समाम्नातौ (तैसं ३. ३. ११. ५)। किंत्वयं सार्धश्लोकात्मकोंऽशो बृहद्देवतायाः सर्वेषु लिखितपुस्तकेषु नास्ति। अतः तस्य मूलपाठत्वं शङ्कास्पदम्[1]। काश्मीरखिलग्रन्थ इदं सूक्तं नास्ति। औंधपुस्तकस्थो मन्त्राणां क्रमः तैसं-क्रमाद्भिन्न एव। इदं सूक्तं ऋसं २. ३२ अनन्तरं

1. Cf. Scheftelowitz, p. 25. A. B. Keith considers the Bṛhaddevatā verses as original, Comp. JRAS 1907, p. 229.

२

भद्रं वद दक्षिणतो भद्रमुत्तरतो वद । भद्रं पुरस्तान्नो वद भद्रं पश्चात् कपिञ्जल ॥ १ ॥
भद्रं वद पुत्रैर्भद्रं वद गृहेषु च । भद्रमस्माकं वद भद्रं नो अभयं वद ॥ २ ॥
भद्रमधस्तान्नो वद भद्रमुपरिष्टान्नो वद । भद्रंभद्रं न आ वद भद्रं नः सर्वतो वद ॥ ३ ॥
असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि । अभयं सततं पश्चाद्भद्रमुत्तरतो गृहे ॥ ४ ॥
यौवनानि महयसि जिग्युषामिव दुन्दुभिः । शकुन्तक प्रदक्षिणं शतपत्राभि नो वद ॥ ५ ॥
आवदंस्त्वं शकुने भद्रमा वद० ॥ ऋ. सं. २. ४३. ३

ऋसं २. ४३. २ अनन्तरं पठनीयम् । मॅ–मु–औध-मते द्वितीयमण्डलान्ते पठनीयम् । मॅ–औध-पुस्तकयोः खिलान्ते 'आवदंस्त्वम्' (ऋसं २.४३.३) इति मन्त्रः संपूर्णः पठितः । आश्वमॅसं[1]–पुस्तके द्वितीयमण्डलान्ते 'भद्रं वद दक्षिणतः' इति मन्त्रं पठित्वानन्तरं 'अथ परिशिष्टम्' (पदशिष्टं अथवा परिशिष्टं ?) इत्युक्तम् । एतद्ग्रन्थकर्तृमते प्रथमो मन्त्रः ऋसं. २. ४३ मध्ये समाविष्टः खिलसूक्तं च द्वितीयमन्त्रादारब्धम् । आश्वमॅसं[2]–मध्येऽस्य सूक्तस्य चत्वारो मन्त्राः—१, $३^2+४^1$, $४^2+५^1$, ५^2, ऋसं. २. ४३. ३.

मॅ३–मु–आउ३–ऋमं–ऋब्र–औध–आश्वमॅसं–अल–जुना ।

१. ≡ निरु ९. ५. **कपिञ्जल**; कपिंजर–ऋब्र. १. २. ५. → कौसू ४६. ५४. । २[2]. **अस्माकं**; अस्माकं नो–मु–ऋब्र. **अभयं वद**; अभयं कृधि–ऋब्र । ३[2]. **आ वद**; आ भर–ऋब्र । ४[1]. **असपत्नं**; असपत्नः–मु ।

३

जागर्षि त्वं भुवने जातवेदो जागर्षि यत्र यजते हविष्मान् ।
इदं हविः श्रद्दधानो जुहोमि तेन पासि गुह्यं नाम गोनाम् ॥ १ ॥
विदा दिवो विष्यन्नद्रिमुक्थैः० ॥ ऋ. सं. ५. ४५. १

ऋसं ५.४४ अनन्तरं पठनीयम् ।

मॅ४–आउ४–मु–ऋमं–आश्वमॅसं–अल–जुना ।

१[2]. **तेन पासि गुह्यं नाम गोनाम्** ≡ ऋसं ५. ३. ३.

मॅ५–मु–अल–औध–अनुसारेण ऋसं ५. ४९ अनन्तरमधो लिखितं खिलं पठनीयम्–

सूक्तान्ते तृणान्यप्रावरण्ये वोदकेऽपि वा । यस्तृणैरध्वयनं तदधीतं स्तृणानि भव ते भव ॥ १ ॥
वापीकूपतडागानां समुद्रं गच्छ स्वाहाग्निं गच्छ स्वाहा ॥ २ ॥

पठनीयमिति यदुक्तं तदपि तैसं–पाठेन सम्यक्तया न समन्वेति । औन्धपुस्तक इदं सूक्तं केवलमभ्यूहमात्रेणैव स्वीकृतमिति तत्पुस्तकसंपादकैरावेदितम् । आश्रौ१.१०; ४.१२; ६.१४ द्रष्टव्यम् ।

१-२. ≐ अथर्व ७. ४७. १,२. ३-४. ≐ अथर्व ७. २०. १,२; → खिल ३. १५. ३. ५, ६, ७. ≐ अथर्व ७. १७. १, ३, २; → खिल ३. १५. २.

१. **सुवृतं**; सुभगां–तैसं. **पितृणां**; पितृणां–तैसं. **तस्यै ते**; तस्यास्ते–तैसं । २. **हविषः शृणोतु**; हविषश्चिकेतु–तैसं. **यजमाने**; चिकितुषे–तैसं । ३. **भवतं**; भवतां–तैसं । ४. **नस्कृधि**; नः कृधि–तैसं. **तारिषत्**; तारिषः–तैसं । ५. **दधातु**; ददातु–तैसं । ७. **दाशुषे**; नो रयिं–तैसं. **वाजिनीवतः**; सत्यराधसः । ८. **प्रजानामुत**; प्रजाया उत–तैसं. तैस–मध्ये उत्तरार्धः सर्वथा भिन्नो वर्तते–धाता पुत्रं यजमानाय दाता तस्मा उ हव्यं घृतवद्विधेम ।

अनुभा ५. ४९; ऋग्वि २. २२. ३ द्रष्टव्यम्। १[1]. सूक्तान्ते तृणावप्रावरण्ये वोदके पिबा–अल; सूक्तान्तेऽस्येतृणान्यग्नाविरिणे वोदकेऽपि वा–औध. १[2]. यस्तृणै°–अल; यदस्तृणैरधीतं तत्तृणानि भवति ध्रुवं–औध। २. 'अग्निं गच्छ स्वाहा' मु–पुस्तके नास्ति।

४

स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम्।
असुरघ्नमिन्द्रसखं समत्सु बृहद्यशो नावमिवा रुहेम ॥ १ ॥
अंहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम्।
प्रयतपाणिः शरणं प्र पद्ये स्वस्ति संबाधेष्वभयं नो अस्तु ॥ २ ॥
प्र श्यावाश्व धृष्णुया० ॥ ऋ. सं. ५. ५२. १

ऋसं ५. ५१ अनन्तरं पठनीयम्। आश्वगृ ३. ११. २ भाष्यमपि द्रष्टव्यम्।

मॅ६–मु–आउ५–ऋमं–ऋभ्र (शान्तिपाठ)–औध–आश्वमंसं–अल–जुना–सुप१०. ५-६।

१. **स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं**; स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः–नृताउ १. १; प्रर (पुण्याह)· **महद्भूतं**; महाद्भुतं–आउ. **नावमिवा रुहेम** = ऋसं १०.१७८.२। २[3]. **नो अस्तु**; च नो अस्तु–आउ.

५

वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव ब्रह्मद्विषो जहि ॥ १ ॥
प्र सम्राजे बृहदर्चा गभीरम्० ॥ ऋ. सं. ५. ८५. १

ऋसं ५. ८४ अनन्तरं पठनीयम्।

मॅ७–आउ६–मु–आश्वमंसं–औध–अल–जुना। पञ्चामृ–पुस्तकेऽयं मन्त्रः श्रीसूक्तस्य चतुर्विंशतितममन्त्रत्वेनागतः।

१. = ऋसं ५. ८४. ३ : यत्ते अभ्रस्य विद्युतो दिवो वर्षन्ति वृष्टयः।

६

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम्। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मम आ वह ॥ १ ॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम्। यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२॥

हे जातवेदः। जातानि वेद जातप्रज्ञो वा। जाते जाते विद्यत इति वा। हे अग्ने त्वं हिरण्यवर्णां हिरण्यस्य सुवर्णस्य वर्णः कान्तिस्तद्वद्वर्णो यस्यास्ताम्। हरिणीं हरितवर्णाम्। हरिणीरूपधरां वा। श्रीर्भूत्वा हरिणीरूपमरण्ये संचचार हेति देवीपुराणाच्च। सुवर्णरजतस्रजाम्। सुवर्णस्य पुष्पाणि सुवर्णानि एवं रजतस्य रजतानि तेषां स्रक् माला यस्यास्ताम्। स्रक्साहचर्यात् पुष्पाणीत्यवगम्यते। पुष्पसादृश्यात् पुष्पे फले लुक्। आपं चैव हलन्तानामित्याप्। यद्वा सुवर्णरजतविकृतश्चञ्चलाम्। सुष्ठु वर्णो यस्य तत्सुवर्णं यद्रजतं तत्पुष्पस्रजाम्। तद्विकृतश्चञ्चलां वा। चन्द्रां चन्द्रवत्प्रकाशमानाम्। तद्रूपेणावस्थितां वा। हिरण्मयीं हिरण्यस्वरूपाम्। हिरण्यविग्रहां वा। लक्ष्मीं लक्षणवतीम्। 'लक्ष्मीर्लोभाद्वा लक्षणाद्वा' (निरु. ४. १०) इत्यादिनिरुक्तात्। एवंरूपां श्रियं मे मह्यं मदर्थमा वह। आहृय। अग्नेर्देवहोतृत्वादाह्वानं तदधीनमिति भावः। 'अग्निर्वै देवानां होता' (ऐ. ब्रा. २. ७) इति श्रुतेः ॥ १ ॥

हे जातवेदः अग्ने त्वमनपगामिनीमपगमनरहिताम्। अनपायिनीमित्यर्थः। तां वक्ष्यमाणलक्षणां लक्ष्मीं मे मह्यमा वह। आहृय। यस्यां श्रीदेव्यामावाहितायां सत्यां हिरण्यं सुवर्णं गां धेनुमश्वं वाजिनं पुरुषान् पुत्रपौत्रमित्रदासभृतानहं विन्देयं प्राप्नुयाम् ॥ २ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम्। श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥
काम्यस्मिन्तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम्।
पद्मेस्थितां पद्मवर्णां तामिहोप ह्वये श्रियम् ॥ ४ ॥
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम्।
तां पद्मनेमिं शरणं प्र पद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणोमि ॥ ५ ॥
आदित्यवर्णे तपसोऽधि जातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च बाह्या अलक्ष्मीः ॥ ६ ॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह। प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिं वृद्धिं ददातु मे॥७॥

अश्वपूर्वाम् अश्वाः पूर्वे पुरोगा यस्यास्ताम्। अथवाश्वपूर्णामश्वैः पूर्णाम्। परिपूर्णामिति केचित्। रथमध्यां रथा मध्ये यस्यास्ताम्। हस्तिनादप्रबोधिनीम्। हस्तिनां गजानां नादेन बृंहितेन गजपुष्करतूर्यनादेन वा प्रबोधिनीं प्रकर्षेण ज्ञापयित्रीम्। देवीं देवनशीलाम्। द्योतनशीलां वा। श्रियं श्रयणीयाम्। सेवारूपां वा। उप ह्वये समीपं प्रत्याह्वये। एतादृशीं देवीं श्रीर्मा मां जुषतां सेवताम् ॥ ३ ॥

का वाङ्मनसयोरगोचरा दुर्निरूपस्वरूपामित्यर्थः। ब्रह्मरूपां वा। को ह वै नाम प्रजापतिरिति श्रुत्यन्तरात्। क इति ब्रह्मणो नामेति पुराणाच्च। सोस्मिताम्। आ ईषदुद्गतं स्मितं हास्यं तद्युक्ताम्। उपाम्बलोपश्छान्दसः। हिरण्यप्राकारां हिरण्यस्य सुवर्णस्य प्राकार आवरणं यस्यास्ताम्। हिरण्यप्रकृष्ट आकार आकृतिर्यस्यास्तामिति वा। आर्द्रां क्लिन्नां क्षीरोदधेरुत्पन्नत्वात्। रुद्ररूपां वा। रुद्रशब्दोऽन्यामूर्धन्यस्वरादिः। आर्द्रया रुद्र इत्यादौ तथा दर्शनात्। अन्यद्बाहुलकम्। ज्वलन्तीं प्रकाशमानाम्। तृप्तां प्रीतामपि च तर्पयन्तीं भक्तान् मनोरथैरिति शेषः। पद्मेस्थितां कमले निषण्णामासीनाम्। पद्मवर्णां कमलवर्णाम्। तामिति प्रसिद्धां श्रियमिहोप ह्वये समीपं प्रत्याह्वये ॥ ४ ॥

अत्र प्र पद्य इत्यस्यानन्तरमहंशब्दप्रक्षेपः प्रामादिकः। चन्द्रां चन्द्रवत् प्रकाशमानां प्रभासाम्। प्रकृष्टा भाः कान्तिर्यस्यास्ताम्। आप चैवेत्याप्। यशसा कीर्त्या ज्वलन्तीं प्रकाशमानाम्। लोके स्वर्लोके देवजुष्टां देवैरिन्द्राद्यैर्जुष्टां सेविताम्। प्रीतां वा। उदारां वदान्यां प्रगल्भां वा। पद्मिनीं पद्मलतारूपाम्। पद्माकारां वा। ईमिति निपातोऽनर्थकः। 'मिताक्षेरेष्वनर्थकाः कर्मामिदु' (निरु. १. ९) इति यास्कवचनात्। ईकारवाच्यां वा। तां श्रियं लोक इह लोके शरणं रक्षित्रीं प्र पद्ये प्रपद्येऽस्मि। अहमिति शेषः। अतो हे श्रीः मे ममालक्ष्मीरश्रीर्नश्यतां नाशं प्राप्नोतु। एतादृशीं त्वां वृणोमि। शरणत्वेन स्वीकुर्वे ॥ ५ ॥

वृक्षोऽथेत्यन्तःपादमपि पूर्वरूपं बाहुलकात्। आदित्यवर्णे। आदित्यस्य सूर्यस्य वर्ण इव वर्णो यस्यास्तस्याः संबोधनम्। हे श्रीः तव तपसः नियमादेतोर्वनस्पतिः। 'अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः' (मनु. १. ४७) इति मानवस्मरणात्। बिल्वः बिल्वनामको वृक्षो द्रुमोऽधिजातः प्रादुर्भूतः। त्वत्करादिति शेषः। 'काश्यपाय्याः शमी जाता बिल्वो लक्ष्म्याः करेऽभवत्' इति वामनपुराणात्। अथानन्तरं तस्य बिल्वस्य फलानि पक्वशल्लाटुकानि तपसा त्वत्तपसा। त्वदनुग्रहेणेत्यर्थः। अन्तरा अन्तरिन्द्रियसंबन्धिनी माया अज्ञानं तत्कार्याणि च बाह्या बहिरिन्द्रियसंबन्धिन्यो याश्चा अलक्ष्मीरश्रियो नुदन्तु अपनुदन्तु। निवारयन्नित्यर्थः ॥ ६ ॥

हे श्रीः देवसखः देवो महादेवस्तस्य सखा कुबेरः। कीर्तिः कीर्त्यभिमानिनी दक्षकन्या देवता। कुबेरकोशशाला वा। सा च मणिना चिन्तामणिना मणिमत्रेण कोशाध्यक्षेण वा सह सार्धमुपैतु उपगच्छतु। अहमस्मिन् राष्ट्रे जनपदे प्रादुर्भूतोऽस्मि। उत्पन्नोऽस्मि। स आगत्य कीर्तिं यशः कीर्तं वा वृद्धिं सर्ववस्तुसमृद्धिं मे महां ददातु यच्छतु ॥ ७ ॥

क्षुत्पिपासामला ज्येष्ठामलक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥८॥
गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोप ह्वये श्रियम् ॥९॥
मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥
कर्दमेन प्रजा भूता मयि सं भव कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११॥
आपः स्रवन्तु स्निग्धानि चिक्लीत वस मे गृहे । नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥
पक्वां पुष्करिणीं पुष्टां पिङ्गलां पद्ममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो मम वह ॥१३॥
आर्द्रां पुष्करिणीं यष्टीं सुवर्णां हेममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो मम वह ॥१४॥
तां म आ वह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥ १५ ॥
यः आनन्दं समाविशदुपाधावन् विभावसुम् । श्रियः सर्वा उपासिष्व चिक्लीत वस मे गृहे ॥ १६ ॥
कर्दमेन प्रजा स्रष्टा संभूतिं गमयामसि । अदधादुपगाद्येषां कामान् ससृज्महे ॥ १७ ॥

क्षुत्पिपासामलामशनतृष्णामलिनात्मिकां ज्येष्ठां वृद्धाम् । श्रियः प्रागुत्पन्नामित्यर्थः । अलक्ष्मीमश्रियमहं नाशयामि नाशं प्रापयामि । हे श्रीः त्वमभूतिमसंपत्तिं तथा सर्वामसमृद्धिं च अनभिवृद्धिमपि मे मम गृहात् निर्णुद निवारय ॥ ८ ॥

गंधद्वाराम् । गंधो घ्राणग्राह्यो गुणो द्वारं लक्षणं यस्यास्ताम् । दुराधर्षां केनापि धर्षयितुमशक्यां नित्यपुष्टां नित्यं सदा सस्यादिभिः पुष्टां समृद्धां करीषिणीं करीषः शुष्कगोमयादिस्तद्वतीम् । गवाश्वादिबहुपशुसमृद्धामिति यावत् । सर्वभूतानां सर्वप्राणिनामीश्वरीमधिष्ठात्रीम् । आधारभूतां वा । तां भूरूपां श्रियमिह लोक उप ह्वये उपाह्वये समीपं प्रत्याह्वये ॥ ९ ॥

हे श्रीः मनसः कामं मनोरथम् । आकूतिं संकल्पं च । वाचः वागिन्द्रियस्य सत्यं याथार्थ्यम् । पशूनां गवादीनां रूपं क्षीरादि । अन्नस्य अदनीयस्य यवव्रीह्यादेः रूपं भक्ष्यादिचतुर्विधं चाशीमहि लभेमहि । श्रीः संपत् यशः कीर्तिश्च मयि श्रयताम् । आश्रयताम् ॥ १० ॥

कर्दमेन कर्दमाख्येन पुत्रेण प्रजा प्रकृष्टं जा अपत्यं यस्याः सा । सुपुत्रेत्यर्थः । 'जामपत्यम्' (निरु. ३.६) इति यास्कवचनात् । भूता अभवत् । अतः हे कर्दम श्रीपुत्र त्वं मयि मदीयगृहे सं भव संवस । पद्ममालिनीं कमलमालाधारिणीं मातरं तव जननीं श्रियं मे मम कुले वंशे वासय निवासय ॥११॥

आपः अबभिमानिन्यो देवताः । स्निग्धानि स्नेहयुक्तानि कार्याणि सृजन्तु उत्पादयन्तु । अपां स्नेहगुणवत्त्वादिति भावः । हे चिक्लीत चिक्लीताख्य श्रीपुत्र मे मम गृहे गेहे वस निवस । च अपि च देवीं मातरं श्रियं मे मम कुले वंशे नि वासय संवासय ॥ १२ ॥

आर्द्रामार्द्रां पुष्करिणीमभिषेकोद्युक्तदिग्गजशुण्डाग्राम् । पुष्करशब्दो गजशुण्डाग्रवाचकः । पद्ममालिनीं पद्मवतीम् । पद्मलतारूपां वा । पुष्टिं पुष्टयभिमानिनीं पुष्टिरूपां वा । 'पुष्टिरूपेण संस्थिता' इति मार्कण्डेयवचनात् । पिङ्गलां पिङ्गलवर्णाम् । पद्ममालिनीमित्यादि सिद्धमन्यत् ॥ १३ ॥

आर्द्रामार्द्रांगाम् । यःकरिणीं यष्टिकरां वेत्रहस्तामित्यर्थः । टिलोपश्छान्दसः । दण्डकारिणीं वा । दण्डकरां वा । यष्टिं दण्डरूपाम् । सुवर्णां शोभनवर्णां हेममालिनीं हेमविकृतमणिश्रृङ्खलादिमालावतीं सूर्यां सूर्यवत् प्रकाशमानाम् । तद्रूपां वा । सिद्धमन्यत् ॥ १४ ॥

इयं द्वितीयया व्याख्याता । प्रभूतं भूयिष्ठम् । गावः गाः । दास्यः परिचारिकाः । उभयत्र शसर्थे जस् । इयान् विशेषः ॥ १५ ॥ इति श्रीसूक्तभाष्यं समाप्तम् ॥

जातवेदः पुनीहि मा रायस्पोषं च धारय। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः ॥ १८ ॥
अच्छा नो मित्रमहो देव देवाँनग्ने वोचः सुमतिं रोदस्योः।
वीहि स्वस्तिं सुक्षितिं दिवो नृन् द्विषो अंहांसि दुरितां तरेम तां तरेम तवावसा तरेम ॥ १९ ॥

एतत् श्रीसूक्तं तदनुसारीणि पञ्च सूक्तानि च पञ्चममण्डलान्ते पठनीयानीति का-पुस्तकादवगम्यते। बृहद्दे ५.९९ अपि द्रष्टव्यम्[1]। आश्वमंसं-अनुसारेणेदं ऋसं ६. १. १ अन्ते पठनीयम्। बहुभिर्भाष्यैर्युतमिदं बहुत्र मुद्रितं प्रायः पञ्चदशर्चम्। एतासां पञ्चदशानामृचां प्राचीनत्वं ऋग्वि २. ९३ (= मॅ-पुस्तके श्रीसूक्ते षोडशो मन्त्रः) इत्यनेन ज्ञायते। शान्तिमयूख-शान्तिकमलाकर-प्रयोगरत्नाह्निकचन्द्रिका-संस्कारकौस्तुभ-ब्रह्मकर्मसमुच्चयादय इतरेऽपि ग्रन्था अस्य सूक्तस्य पञ्चदशर्चत्वं दर्शयन्ति।

आह्निकसूत्रावल्यां पञ्चदश मन्त्राः षोडशश्च ऋग्वि २. १८। मॅ-पुस्तके यद्यपि श्रीसूक्ते २९ मन्त्रास्तथापि भाष्यं १५ मन्त्राणामेव। ऋमं-पुस्तके २८ मन्त्राः, ऋव्र-आचं-मु-पुस्तकेषु २७ मन्त्राः, क्रिप्रसं-आउ-जुना-पुस्तकेषु २३ एव। पञ्चामृ-पुस्तके ३० मन्त्राः येषु १-२२ = मॅ१-२२; २४ = खिल २. ५; २५ = ऋमं २७; शिष्टाः ६ विभिन्ना अबद्धाश्च। का-पुस्तके आदितः १५ मन्त्रा इतरपुस्तकस्थमन्त्रैः समानाः, शिष्टाश्चत्वारो विभिन्ना अज्ञातचराश्च[2]। अल-पुस्तके एतत्सूक्तं नास्ति।

मनु ३. २३२ भाष्ये, अग्निपुराणे (४१. ८), हेमाद्रौ (१. ७३१. १५), प्रयोगरत्ने, संस्कारकौस्तुभे (मूलशान्तिः) चेदं सूक्तं निर्दिष्टम्। ३, ५, ६, ७, १०, ११ मन्त्राणां प्रतीकानि ऋग्वि २. १८-१९ मध्ये निर्दिष्टानि। ३ = मागृ २. १३. ६; ७[3] = मागृ २. १३. ६; ८ = तैआ १०. ६६; ९ = तैआ १०.१; मागृ २. १३. ६; मनाउ ४. ८; मामंसं; अन्त्ये; शांमं; प्रर; १० = वासं ३९. ४; तैब्रा २. ४. ६. ६; १८[2] = तैसं ३. १. ४. ३; मंब्रा २. २. ११; शांश्रौ ४. १७. १२; → आश्वश्रौ २. ७; १९ = ऋसं ६. २. ११; १४. ६.

१. **स्रजां**; स्रजं-आउ. **ममा**-ऋमं-आउ-जुना-प्रर-पञ्चामृ-आसू; म आ-मॅ-मु-आचं-ऋव्र-क्रिप्रसं। २. **°लक्ष्मीमनप°**; °लक्ष्मीमलप°-आसू-प्रर-जुना. **गामश्वं**; गामश्वान्-आउ। ३. **अश्व-**

1. Cf. Bṛhaddevatā, part II, p. 189.

2. With regard to the antiquity of the Kashmir recension, Scheftelowitz says that since according to the *Khila-anukramaṇī* the last six verses (14-19) deal with sons of Śrī as is referred to by Bṛhaddevatā V. 19, it is clear that this recension preceded the Bṛhaddevatā (Apokryphen des Ṛgveda p. 75). The verse in the Bṛhaddevatā runs thus :

श्रीसूक्तमाशीर्वादस्तु श्रीपुत्राणां पराणि षट्।
तस्याद्वालक्ष्म्यपनुदमग्निस्तत्र निपातभाक् ॥

The second pāda of this verse Scheftelowitz translates thus : " die sechs letzten Verse sind den Söhnen der Śrī geweiht ". This translation does not seem to be correct. Macdonell (Bṛhaddevatā, part II, pp. 188-9) translates the same quite differently : " The following six are connected with fortune and sons ". To this Macdonell adds the following note :—" This must refer to the six *Khilas* which follow the Śrīsūkta in Kashmir MS. of the Khilas ..... ". This interpretation is confirmed by the next verse (92) which advises a special application of three of these six hymns, सं स्रवन्तु being charms for the prosperity of cattle (Śrī), आ ते गर्भो and अग्निरेतु for the attainment of sons (Putra) (प्रजावज्जीवपुत्रौ वा गर्भकर्मणि संस्तुतौ। नानारूपाः पयस्विन्यः सं स्रवन्तीति संस्तुताः). पराणि, षट्, means " the following six " (hymns), not " the last six " (verses). परे षट् in the खिलानुक्रमणी means the same. Compare बालखिल्याः परेऽष्टौ (End of 2nd Adhyāya, खिलानुक्रमणी). The last six verses of Śrīsūkta in the Kashmir recension have no special connection with the sons of Śrī. This passage in the Bṛhaddevatā, therefore, cannot serve the purpose of establishing the priority of the Kashmir recension to the Bṛhaddevatā.

पूर्वा-मॅ-मु-आचं-क्रिप्रसं; अश्वपूर्णां-ऋग्वि-आउ-जुना-प्र-ऋमं-आसू-मागृ. **प्रमोदिनीं**-आउ-जुना-मागृ-आसू-पञ्चामृ-प्र; प्रबोधिनीं-ऋमं-मॅ-ऋब्र-आचं-मु-क्रिप्रसं. **देवीं**; देवीः-प्र-आचं-पञ्चामृ। ४. **कांस्योस्मिं तां**-का; कांसोस्मितां-मॅ-मु-ऋमं-आचं-पञ्चामृ-आसू-ऋब्र-क्रिप्रसं-आउ-जुना-प्र. **°प्रावारां**-का; °प्राकारां-मॅ-मु-आउ-जुना। ५. **पद्मनेमिं**-आउ-जुना-प्र; पद्मनेमीं-ऋमं-आसू; पद्मिनीमीं-मॅ-मु-ऋब्र-क्रिप्रसं-आचं-पञ्चामृ. **प्र**-मॅ-मु-आउ-आचं-क्रिप्रसं; अहं प्र-ऋमं-ऋब्र-आसू-पञ्चामृ-प्र. **अलक्ष्मी°**-ऋमं-मु-आउ-जुना-आसू-पञ्चामृ; ऽलक्ष्मी°-ऋब्र-आचं-प्र-मॅ. **वृणोमि**-ऋमं-मॅ-मु-आउ-जुना-आसू-क्रिप्रसं; वृणे-ऋब्र-मु-पञ्चामृ-आचं। ६. **तस्य**; यस्य-आसू. **मायान्तरा**-ऋमं-ऋब्र-आसू-आचं-पञ्चामृ-क्रिप्रसं-जुना-प्र; या अन्तरा-मॅ-आउ; ममान्तरा-मु। ७. **स्मि राष्ट्रे**-मॅ-आउ-जुना-आचं-पञ्चामृ; सुराष्ट्रे-ऋमं-ऋब्र-मु-क्रिप्रसं-प्र-आसु. **कीर्तिं वृद्धिं ददातु**-आउ-जुना-प्र-आसू-क्रिप्रसं; कीर्तिमृद्धिं ददातु-मॅ-मु-ऋमं-ऋब्र-आचं; श्रीः श्रद्धां दधातु-मागृ। ८. **°मला ज्येष्ठामलक्ष्मीं**-का-मु; °मलां ज्येष्ठामलक्ष्मीं-मॅ-ऋब्र-आचं; °मलां ज्येष्ठामलक्ष्मीर्-क्रिप्रसं; °मला ज्येष्ठा अलक्ष्मीर्-ऋमं-आउ-जुना-प्र-आसू-पञ्चामृ; °मलं ज्येष्ठामलक्ष्मीर्°-तैआ. **गृह्णात्**; पाप्मानं-तैआ। १०. **°माकूतिं**; °माकूतं-मु. **अन्नस्य**; अन्नं च-क्रिप्रसं; अन्यस्य-प्र। ११. **भव**-ऋमं-मॅ-मु-ऋब्र-आचं; भ्रम-आउ-जुना-प्र-आसू-पञ्चामृ-क्रिप्रसं. **कुले**; गृहे-आउ-क्रिप्रसं-जुना। १२. **स्रवन्तु**-का; सृजन्तु-ऋमं-मॅ-मु-आउ-जुना-क्रिप्रसं; स्रजन्तु-ऋब्र-आसू-आचं-पञ्चामृ-प्र। १३. **पक्वां**-का; आर्द्रां-इतरेषु. **पुष्टां**-का; पुष्टिं-ऋमं-मॅ-मु-आचं-प्र; पुष्टीं-जुना-क्रिप्रसं-पञ्चामृ; यष्टिं-ऋब्र; यष्टीं-आउ. **पिङ्गलां पद्ममालिनीं**; सुवर्णां हेममालिनीं-ऋब्र-आउ-जुना-आसू-पञ्चामृ. **सूर्यां**-ऋब्र-प्र-आसू-जुना-पञ्चामृ; चन्द्रां-इतरेषु. **ममा**-आउ-जुना-प्र-आसू-पञ्चामृ; म आ-ऋमं-ऋब्र-मॅ-मु-आचं-क्रिप्रसं. ऋमं-आउ-क्रिप्रसं-पुस्तकेषु त्रयोदशचतुर्दशमन्त्रयोर्व्यत्यासः। **१४. पुष्करिणीं**-आउ-जुना; यःकरिणीं-मॅ-मु-ऋमं-ऋब्र-आसू-पञ्चामृ-आचं; यष्करिणीं-क्रिप्रसं-प्र. **यष्टीं**; यष्टिं-मॅ-मु-प्र-आचं; पुष्टीं-आउ-जुना; पुष्टिं-ऋब्र. **सुवर्णां हेममालिनीं**; पिंगलां पद्ममालिनीं-आउ-जुना-ऋब्र-प्र-आसू-पञ्चामृ. १४[२]=१[२]. **चन्द्रां**-ऋब्र-प्र-जुना-पञ्चामृ-आसू; सूर्यां-इतरेषु. **ममा**-आउ-जुना-प्र-आसू-पञ्चामृ; म आ-ऋमं-मॅ-मु-ऋब्र-आचं-क्रिप्रसं. १५[१] = २[१]. १५[२] = २[२]. **प्रभूतं**; प्रभूतिं-ऋमं-प्र-आचं-आसू. **विन्देयं**-का; अश्वान् विन्देयं-इतरेषु. खिलानुक्रमण्यनुसारेणेयमुपरिष्टाद्बृहती (८ + ८ + ८ + १२ अक्षराणि) अतः का-पुस्तके 'अश्वान्' नास्ति। इतरपुस्तकानुसारेणेयं प्रस्तारपङ्क्तिः। १६[२]. **चिक्लीत वस मे गृहे** = १२[१]। १७[१]. ≐ ११[१]. १७[२]. **येषां**; यस्मै ? १८[१]. **जातवेदः पुनीहि मा** = ऋसं ९. ६७. २७.

१६-१९ मन्त्राः केवलं का-पुस्तक एव। इतरपुस्तकेषु वर्तमानाः पञ्चदशोत्तरा मन्त्रा अत्रोद्धियन्ते। ऋमं-मॅ-पुस्तकयोर्मन्त्राणां पौर्वापर्यं विभिन्नम्। ऋमं-पुस्तकस्थः पाठः क्रमश्चात्र दीयते। ऋब्र२० = आचं २० = ऋमं १९; ऋब्र १९ = आचं १९ = ऋमं २७; आचं २१-२४ = ऋमं २०-२३; आचं-२७ = ऋमं २४. ऋमं २८ आचं-मध्ये नास्ति. आउ-क्रिप्रसं २२ = ऋमं १६; आउ-क्रिप्रसं २१ = ऋमं १७; आउ-क्रिप्रसं १६ = ऋमं १८; आउ-क्रिप्रसं १९ = ऋमं २१. ऋमं २३, २५-२८ मन्त्राः आउ-क्रिप्रसं-मध्ये न सन्ति. मॅ २८=ऋमं २४; मॅ २४-२७ = ऋमं २५-२८. मॅ २९ मन्त्रः केवलं औंध-पुस्तके दत्तः। ऋब्र-मु २७ = ऋमं २४; मु १७ = ऋमं २७. ऋमं २८ मु-ऋब्र-आचं-पुस्तकेषु नास्ति. आश्वमंसं[१] मॅ-पुस्तकमनुसरति; २६ मन्त्रः १७ मन्त्रात्पूर्वमागच्छतीति तु विशेषः. आश्वमंसं[२]-पुस्तके मॅ-पुस्तकस्थाः १-२३,२६,२८ मन्त्राः। एते सर्वेऽधिका मन्त्रा अर्वाचीना इति २२[२] मन्त्रात् स्पष्टं ज्ञायते।

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम्। सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत्॥ १६॥
पद्मानने पद्मऊरू पद्माक्षी पद्मसंभवे। तन्मे भजसि पद्माक्षी येन सौख्यं लभाम्यहम्॥ १७॥

अश्वदायै गोदायै धनदायै महाधने । धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥ १८ ॥
पुत्रपौत्रं धनं धान्यं हस्त्यश्वादिगवे रथम् । प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥ १९ ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणं धनमश्नुते ॥ २० ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ २१ ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥२२॥

सरसिजनिलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ २३ ॥
श्रीवर्चस्वमायुष्यमारोग्यमाविधाच्छुभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥ २४ ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ २५ ॥
महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥ २६ ॥
पद्मानने पद्मिनि पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं हृदि सं नि धत्स्व ॥ २७ ॥
आनन्दः कर्दमः श्रीतश्चिक्लीत इव विश्रितः ।
ऋषयः श्रियः पुत्राश्च श्रीर्देवी देवदेवता ॥ २८ ॥

१६. **यः**; स–ऋग्वि. **सूक्तं**–ऋमं–मु–आचं–क्रिप्रसं; श्रियः–ऋग्वि–आसू–पञ्चामृ–ऋव्र–मॅ–आउ–जुना। १७. **पद्मानने**; पद्मासने. **पद्मऊरू**–ऋमं–ऋव्र–आउ–जुना–मु–आचं; पद्मऊरु–मॅ; पद्मरूपे–क्रिप्रसं. **पद्माक्षी**–ऋमं–ऋव्र–जुना–मु–आचं; पद्माक्षि–मॅ–आउ–क्रिप्रसं. **तन्मे**; यन्मां–पञ्चामृ; त्वं मां. **भजसि**; भजस्व. **पद्माक्षी**–ऋमं–जुना–आचं; पद्माक्षि–मॅ–आउ–मु–ऋव्र–क्रिप्रसं–पञ्चामृ। १८. **अश्वदायै गोदायै धनदायै**–ऋमं–ऋव्र–आचं; अश्वदायी गोदायी धनदायी–मॅ–जुना; अश्वदायी गोदायी धनदायि–मु–आउ; अश्वदायि गोदायि धनदायि–क्रिप्रसं–पञ्चामृ. **जुषतां**; लभतां–ऋव्र. **देवि**–मॅ–मु–ऋव्र–क्रिप्रसं–आचं–पञ्चामृ; देवी–आउ; देवीं–ऋमं–जुना. **सर्वकामांश्च देहि मे**; सर्वकामार्थसिद्धये–पञ्चामृ। १९. **पुत्रपौत्रं**–ऋमं–जुना. पुत्रपौत्र–मॅ–मु–आउ–ऋव्र–क्रिप्रसं–पञ्चामृ–आचं. **°श्वादिगव रथं**–ऋमं–मॅ–मु–ऋव्र–पञ्चामृ–आचं; °श्वाश्वतरै रथैः–आउ–जुना–क्रिप्रसं; °श्वाश्वतरीरथं–औध; °श्वाजाविगोरथं. **भवसि**–ऋमं–जुना–क्रिप्रसं; भवसी–मॅ–मु–आउ–ऋव्र–आचं; भजसि–पञ्चामृ; भवतु. **मे**; मां–आउ–पञ्चामृ–जुना। २०. **वरुणं**–मॅ–मु–ऋमं–ऋव्र–जुना–पञ्चामृ–आचं; वरुणो–आउ–क्रिप्रसं. **उत्सृजे**–ऋमं; अश्नुते–मॅ–पञ्चामृ; उच्यते–क्रिप्रसं–जुना; अस्तु मे–मु; अस्तु ते–ऋव्र–आचं; अश्विना–आउ। २१. **सोमिनो मह्यं**; सोमिनः सोमं–क्रिप्रसं; सोमिनो मिहं–जुना. **सोमिनः**; सोमिनि। २२. **भक्तानां श्रीसूक्तं जपेत्**; भक्त्या श्रीसूक्तजापिनां–औध. **जपेत्**; जपेत् सदा। २३. **°शुकगन्ध°**–मु–ऋव्र–औध–आचं; °शुभगन्ध°–इतरेषु. **°माल्यशोभे**–ऋव्र–औध; °माल्यशुभे–मु. **°भूतिकरि**; भूतिकरी–मु। २४. **श्री°**; श्रीर्°–क्रिप्रसं. **°वर्चस्वं**–ऋमं–मॅ–मु–जुना–क्रिप्रसं–आचं; °वर्चस्यं–इतरेषु. **°विधाच्छुभमानं**–ऋमं; °विधाच्छोभमानं–मु–ऋव्र–आचं; °विधात्पवमानं–मॅ–आउ–जुना–क्रिप्रसं; °युधात्पवमानं–पञ्चामृ. **धान्यं धनं**; धनं धान्यं–मु. **बहुपुत्र°**; पुत्र°–आउ; पशुपुत्र°–जुना। २५. **लक्ष्मीं प्रियसखीं**–ऋमं–ऋव्र–आचं; लक्ष्मी प्रियसखी–मु; विष्णोः प्रियसखीं–मॅ. **देवीं**; भूमिं–औध। २६. **महालक्ष्मी**–ऋमं–मॅ–ऋव्र–आचं; महादेव्यै–मु. **विष्णुपत्नी**–ऋमं–मॅ–ऋव्र–आचं; विष्णुपत्न्यै–मु। २७. **पद्मिनि**; पद्मवि–ऋव्र–आचं; पद्मनि–मु. **पद्मप्रिये**; पद्मालये. **विश्वमनो°**; विष्णुमनो°–औध. **हृदि**; मयि–मु–ऋव्र। २८.

श्रीत°–ऋमं; श्रीद°. **विश्रितः**–ऋमं; विश्रुतः–मॅ; (इति) विश्रुताः–औध. **श्रियः पुत्राश्च**–ऋमं; श्रियपुत्राश्च–मॅ. **देवी देवदेवता**–ऋमं; देवीर्देवताः श्रिया–मॅ; श्रीर्देवीर्देवता मताः–औध.

ऋमं–पुस्तकेऽविद्यमानो मॅ २९ मन्त्र एवमस्ति—

ऋणरोगादि दारिद्र्यं पापक्षुदपमृत्यवः । भयः शोकमनस्तापा नश्यन्तु मम सर्वदा ॥

औधपुस्तके–ऋणरोगादिदारिद्र्य°.... भयशोक°....

पञ्चामृ–पुस्तके केषुचिल्लिखितपुस्तकेषु च २३-३० मन्त्राः सर्वथा विभिन्ना अतोऽत्र लिख्यन्ते–

चन्द्राभां लक्ष्मीमीशानां सूर्याभां श्रियमीश्वरीम् । चन्द्रसूर्याग्निवर्णाभां महालक्ष्मीमुपास्महे ॥२३॥

वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः । रोहन्तु सर्वबीजान्यव ब्रह्मद्विषो जहि ॥ २४ ॥

पद्मप्रिये पद्मिनि पद्महस्ते पद्मानने पद्मदलायताक्षि ।
विश्वप्रिये विष्णुमनोनुकूले त्वत्पादपद्मं मयि सं नि धत्स्व ॥ २५ ॥

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी ।
गम्भीरावर्तनाभिस्तनभरनमिता शुभ्रवस्त्रोत्तरीया ॥
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैः स्नापिता हेमकुम्भै-
र्नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥ २६ ॥

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूतसमस्तदेववनितां त्रैलोक्यदीपाङ्कुराम् ।
श्रीमन्मन्दकटाक्षलब्धविभवब्रह्मेन्द्रगङ्गाधरां
त्वां त्रैलोक्यकुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम्[1] ॥ २७ ॥

सिद्धलक्ष्मीर्मोक्षलक्ष्मीर्जयलक्ष्मीः सरस्वती ।
श्रीर्लक्ष्मीर्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा ॥ २८ ॥

वराङ्कुशापाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम् ।
बालार्ककोटिप्रतिभां त्रिनेत्रां भजेऽहमाद्यां जगदीश्वरीं ताम् ॥ २९ ॥

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ ३० ॥

२३. श्रियमीश्वरीं; श्रियमैश्वरीं. **°वर्णाभां**; संकाशां; सर्वाभां. **महालक्ष्मी°**; श्रीमहालक्ष्मी°; श्रियं लक्ष्मी° । **२४.** = खिल २. ५ । **२५.** ≐ ऋमं २७ । **२६. °नमिता**; °णमिता । **२८. प्रसन्ना मम सर्वदा**; प्रसन्नवरदा भव । **२९. वराङ्कुशा°**; वराङ्कुशौ. **°मभीतिमुद्रां**; °मुपैतिमुद्रां. **°प्रतिमां**; °प्रतिमां. **भजेऽहमाद्यां**; भजे हिमाद्यां; भजेऽहमम्बां.

मॅ–पुस्तके श्रीसूक्तानन्तरं पठनीयं सूक्तद्वयं (मॅ ९, मॅ १०) दत्तं तद्यथा—

विश्वेश्वर विरूपाक्ष विश्वरूप सदाशिव । शरणं भव भूतेश करुणाकर शंकर ॥ १ ॥
हर शंभो महादेव विश्वेशामरवल्लभ । शिव शंकर सर्वात्मन् नीलकण्ठ नमोऽस्तु ते ॥ २ ॥
मृत्युंजयाय रुद्राय नीलकण्ठाय शंभवे । अमृतेशाय शर्वाय श्रीमहादेवाय ते नमः ॥ ३ ॥
एतानि शिवनामानि यः पठेन्नियतः सकृत् । नास्ति मृत्युभयं तस्य पापरोगादि किंचन ॥ ४ ॥

तथा च—

यज्ञेशाच्युत गोविन्द माधवानन्त केशव । कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥ १ ॥
कृष्णाय गोपिनाथाय चक्रिणे मुरवैरिणे । अमृतेशाय गोपाय गोविन्दाय नमो नमः ॥ २ ॥
एतान्यनन्तनामानि मण्डलान्ते (सदा) पठेत् ॥ ३ ॥

1. Scheftelowitz does not give this verse and counts verse 26 as two (26 and 27) verses.

७

चिकीतो अस्य नाम तदिवा नक्तं च सुक्रतो ।
अस्मान् दीदास युज्याय जीवसे जातवेदः पुनन्तु मां देवजनाः ॥ १ ॥
पुनन्तु मनसा धियः पुनन्तु विश्वा भूतानि । जातवेदो यदस्तुतम् ॥ २ ॥
विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा । संभृता अस्माकं वीरा ध्रुवा ध्रुवेषु तिष्ठति॥३॥
ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवा ध्रुवेषु तिष्ठति । अग्ने अच्छा यदस्तुतं रायस्पोषं च धारय ॥ ४ ॥
अच्छा नो मित्रमहो देव देवाननग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन् द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम ॥५॥

१२-२१ ≐ ऋसं ९. ६७. २७१; तैब्रा. १. ४. ८. १; २. ६. ३. ४; वासं १९. ३९ । २. ≡ मंदी (पृष्ठ १७ मन्त्रः २१) । ३१. ≡ ऋसं ९. ६७. २७२ । ४१. ≡ ऋसं १०. १७३. ४; अथर्व ६. ८८. १; तैब्रा २. ४. २. ८; खागृ १. ४. ४; गोगृ २. ३. १२; मंब्रा १. ३. ७. **रायस्पोषं च धारय** ≡ खिल २. ६. १८.

८

मयि श्लेषो मा वधीः प्र सम्राजं च सुक्रतो ।
अस्मान् पृणीष्व युज्याय जीवसे जातवेदः पुनीहि मा ॥ १ ॥
मर्तो यो नो दिदासत्यधिरस्था न नीनशत् । देविध्वतो विभावसो जागारमुत ते धियम् ॥२॥
अनमीवा भवन्त्वघ्न्या सु सं गर्भो वि मोचतु । अरातीर्यन्ति ये केचित्सूरयश्चाभि मज्मना ॥३॥
रायस्पोषं वि धारय जातवेदः पुनीहि मा । उस्रा भवन्तु नो मयो बह्वीर्गोष्ठे घृताच्यः ॥ ४ ॥
अच्छा नो मित्रमहो देव देवाननग्ने वोचः सुमतिं रोदस्योः ।
वीहि स्वस्तिं सुक्षितिं दिवो नॄन् द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम॥ ५ ॥

१२. ≐ खिल २. ७. १२ । २. **अधिरस्था**; अधरस्था ? ४१. → खिल २. ६. १८१. **बह्वीर्गोष्ठे घृताच्यः** → खिल ४. १२. १२ । ५. = खिल २. ७. ५; ६. १९; ऋसं ६. २. ११; १४.६.

९

सं स्रवन्तु मरुतः समग्नयः सं पूषणः । सं धान्यस्य या स्फातिः संस्राव्येण हविषा जुहोमि॥१॥
एह यन्ति पशवो ये परेयुर्ये यां सहचारं जुजोष ।
त्वष्टा येषां रूपधेयानि वेदास्मिंस्तांल्लोके सविताभि रक्षतु ॥ २ ॥
इमं गोष्ठं पशवः सं स्रवन्तु बृहस्पतिरा नयतु प्रजानन् ।
सिनीवाली नयत्यग्र एषामा जग्मुषोऽनुमते नि यच्छ ॥ ३ ॥
सं सिञ्चामि गवां क्षीरं समाज्येन बलं रसम् ।
संसिक्ता अस्माकं वीरा ध्रुवा गावः सन्तु गोपतौ ॥ ४ ॥

आ हरामि गवां क्षीरमा हरामि धान्यं३ रसम् ।
आहता अस्माकं वीरा आ पत्नीरिदमस्तकम् ॥ ५ ॥

एतत् अथर्व २. २६ अनेन समानम् । १ = अथर्व ३; २ = अथर्व १; ३ = अथर्व २ एवं मन्त्राणां पौर्वापर्यभेदः । ' नानारूपाः पयस्विन्यः सं स्रवन्तीति संस्तुताः ' इति बृहद्दे (५. ९२) । कौशिकसूत्रं (१९. १४) द्रष्टव्यम् ।

१. **सं स्रवन्तु**-का; सं सं स्रवन्तु-अथर्व; सं स्रवन्ति-बृहद्दे. **मरुतः**-का; पशवः-अथर्व । २. **यन्ति-का**; यन्तु-अथर्व. **वेदास्मिंस्तांल्लोके**-का; वेदास्मिन् तान् गोष्ठे-अथर्व. **सविताभि रक्षतु**-का; सविता नि यच्छतु-अथर्व । ३. **नयत्यग्र**-का; नयत्वाग्र-अथर्व. **ऽनुमते**-का; अनुमते-अथर्व । ४. **गावः सन्तु**-का; गावो मयि-अथर्व । ५. **हरामि धान्यं३**-का; हार्षं धान्यं१-अथर्व ।

१०

आ ते गर्भो योनिमेतु पुमान् बाण इवेषुधिम् । आ वीरो अत्र जायतां पुत्रस्ते दशमास्यः ॥१॥
करोमि ते प्राजापत्यमा गर्भो योनिमेतु ते ।
अनूनः पूर्णो जायतामनन्धोऽश्रोणोऽपिशाचधीतः ॥ २ ॥
पुमांस्ते पुत्रो जायतां पुमाननु जायताम् । यानि भद्राणि बीजान्यृषभा जनयन्ति नः ॥३॥
तानि भद्राणि बीजान्यृषभा जनयन्तु ते । तैस्त्वं पुत्रं जनयेः सं जायतां वीरतमः स्वानाम् ॥४॥
यो वशायां गर्भो योऽपि वेहतीन्द्रस्तं नि दधे वनस्पतौ ।
तैस्त्वं पुत्रान् विन्दस्व सा प्रसूर्धेनुका भव ॥ ५ ॥
सं वो मनांसि जानतां सं नाभिः सं ततोऽसत् ।
सं त्वा कामस्य योक्त्रेण युञ्ज्मन्यविमोचनाय ॥ ६ ॥
कामः समृध्यतां मह्यमपराजितमेव मे । यं कामं कामये देव तं मे वायो समर्धय ॥ ७ ॥

इदं सूक्तं प्रजावत आर्षमिति खिलानुक्रमण्यामुक्तम् । ' अग्निरेतु ' इत्यग्रे वर्तमानेन जीवपुत्राख्य-सूक्तेन सहेदं गर्भकर्मणि विनियुक्तम् । ' प्रजावज्जीवपुत्रो वा गर्भकर्मणि संस्तुतौ ' इति बृहद्दे (५. ९२) । आश्वगृ १.१३.६ द्रष्टव्यम् । एते प्रजावज्जीवपुत्राख्ये सूक्ते अनवलोभने विनियुक्ते इति प्र-ऋब्र-मतम् । एतत्सूक्तं ऋमं-प्र-संकौ-ऋब्र-आपमं (१. १२. ९)-पुस्तकेषु ४[२], ५[१], ६ मन्त्रान् वर्जयित्वोद्धृतम् ।

१. = अथर्व ३. २३. २; हिगृ १. २५. १; शांगृ १. १९. ६. **आ ते गर्भो योनिमेतु**-ऋमं-आपमं-हिगृ; आ ते योनिं गर्भ एतु-अथर्व-शांगृ; आ ते गर्भो योनिमेतु-ऋब्र-प्र-संकौ. **अत्र**-शांगृ-हिगृ; ऽत्र-अथर्व; ऋमं-ऋब्र-संकौ-प्र-आपमं-पुस्तकेषु ' अत्र ' नास्ति । २. = हिगृ. १. २५. १; २[१]. = अथर्व ३. २३. ५[१]. **प्राजापत्यमा**; प्राजापत्येषा-संकौ. **एतु**-ऋमं-अथर्व-आपमं-हिगृ; ऐतु-ऋब्र-प्र-संकौ. **अनन्धोऽश्रोणोऽपिशाचधीतः**-का; अनन्धोश्लोणोपिशाचधीरः-हिगृ; अश्लोणो-पिशाचधीतः-ऋमं-ऋब्र-आपमं-संकौ-प्र । ३[१] = अथर्व ३. २३. ३[१]; शांगृ १. १९. ६. ३[२]. = शांगृ १. १९. ६; अथर्व ३. २३. ४[१]. **पुमांस्ते पुत्रो जायतां**-का; पुमांस्ते पुत्रो नारि तं -ऋमं-आपमं-संकौ-ऋब्र-प्र. पुमांसं पुत्रं जनय तं -अथर्व-शांगृ. **यानि**-का-अथर्व-आपमं-संकौ-शांगृ; तानि-ऋमं-ऋब्र-प्र. **ऋषभा**; पुरुषा-शांगृ. **जनयन्ति नः**-का-आपमं-शांगृ; जनयन्ति च-अथर्व; जनयन्तु नौ-ऋमं-प्र-संकौ; जनयन्ति नौ-औध; जनयन्तु ते-ऋब्र । ४. = हिगृ १. २५. १. **तानि**-का-आपमं; यानि-ऋमं-ऋब्र-संकौ-प्र-हिगृ. **जनयन्तु ते**-का; जनयन्तु नः-ऋमं-हिगृ; जनयन्ति

नः–ऋग्र–प्रर–संकौ; जनयन्तु नौ–आपमं. **तैस्त्वं पुत्रान् जनयेः**–का; तैस्त्वं गर्भिणी भव–हिगृ। ५. = हिगृ १. २५. १. ५[२] ≡ अथर्व ३. २३. ४[२]; शांगृ १. १९. ६. **योऽपि**–का; यश्च–हिगृ. **पुत्रान्**; पुत्रं–अथर्व.हिगृ-शांगृ-मध्ये ५[२]–पाठो विभिन्नः। हिगृ–तेन त्वं गर्भिणी भव सा प्रासूर्धेनुगा भव. शांगृ–तेभिष्टं पुत्रं जनय सुप्रसूर्धेनुका भव। ६[१]. **सं वो मनांसि** ≡ ऋसं १०. १९१. २;अथर्व ६. ६४. १. ६[२] ≡ हिगृ १. २४. ४.। ७. **कामः समृध्यतां**–का–ऋमं–प्रर–संकौ; कामप्रमृध्यतां–आपमं. **तं मे**–ऋमं–आपमं–संकौ; तन्मे–प्रर.

११

अग्निरेतु प्रथमो देवतानां सोऽस्याः प्रजां मुञ्चतु मृत्युपाशात्।
तदयं राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात्॥ १॥
इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै तिरतु दीर्घमायुः।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि वि बुध्यतामियम्॥ २॥
मा ते गृहे निशि घोर उत्थादन्यत्र त्वद्रुदत्यः सं विशन्तु।
मा त्वं विकेश्युर आ वधिष्ठा जीवपुत्रा पतिलोके वि राज प्रजां पश्यन्ती सुमनस्यमाना॥३॥
अप्रजस्त्यं पौत्रमर्त्यं पाप्मानमुत वार्धम्। प्रजामिवोन्मुच्यस्व द्विषद्भ्यः प्रति मुञ्चामि पाशान्॥४॥
देवकृतं ब्राह्मणं कल्पमानं तेन हन्मि योनिषदः पिशाचान्।
क्रव्यादो मृत्यूनधरान् पातयामि दीर्घमायुस्तव जीवन्तु पुत्राः॥ ५॥
त्वं ह्यग्ने प्रथमो मनोता०॥ ऋ. सं. ६. १. १

६-११ खिलसूक्तानि पञ्चममण्डलान्ते पठनीयानि। इदं सूक्तं जीवपुत्रस्यार्षमित्यनुक्रमण्यामुक्तम्। ऋमं-ऋग्र–प्रर–संकौ–पुस्तकेषु 'अथ जीवपुत्राख्यं सूक्तम्' इत्युक्त्वेदं समुद्धृतम्। हिगृ-मध्ये एको मन्त्रोऽन्तेऽधिकः। इदं षण्मन्त्रात्मकमिति गोगृ २. १. २४; खागृ १. ३. ११ (: अग्निरेतु प्रथम इति षड्भिश्च पाणिग्रहणे)। मंत्रा १.१.१०; आपमं १.४. ७ मध्ये केवलं पूर्वे चत्वारो मन्त्राः, तथा च आपमं-पुस्तके तृतीयचतुर्थयोर्मध्य एको मन्त्रोऽधिकः। प्रथमद्वितीयौ मन्त्रौ पागृ १.५.११; मंदी ५४-५५ मध्ये उपलभ्येते। 'अग्निरेत्विति सूक्तेन जुहुयादाज्यमन्वहम्' इति ऋग्वि २. ११०। बृहद्दे ५. ९२ द्रष्टव्यम्।

१. **एतु**–खिलानु–मंत्रा–खागृ–का; ऐतु–इतरेषु. १[१] ≐ अथर्व ४. १४. ५ : अग्ने प्रेहि प्रथमो देवतानाम्. **देवतानां**; देवताभ्यः–मंत्रा. **सोऽस्याः**; सोऽस्यै–ऋग्र–पागृ–संकौ–प्रर–औध। २. **तिरतु दीर्घमायुः**–का; नयतु दीर्घमायुः–ऋमं–ऋग्र–संकौ–पागृ–हिगृ–प्रर–आपमं–मंदी; जरदष्टिं कृणोतु–मंत्रा. **जीवतामस्तु**–का; जीवतु–ऋग्र. **अभि वि**–का–मंत्रा–मंदी–पागृ; अभि प्र–हिगृ–प्रर–ऋग्र–संकौ–आपमं। ३. **गृहे निशि घोर**–का; गृहे निशि घोष–ऋमं–प्रर–हिगृ–संकौ–ऋग्र–आपमं; गृहेषु निशि घोष–मंत्रा. **उत्थाद्**; उत्पाद्–प्रर. **रुदत्यः**–का–ऋग्र–हिगृ–संकौ–आपमं–मंत्रा; रुदन्त्यः–ऋमं–प्रर. **विकेश्युर**–का–ऋमं–हिगृ–आपमं; विकेश्युर–प्रर–संकौ; विकेश्युरव–ऋग्र; रुदत्युर–मंत्रा. **जीवपुत्रा**–का; जीवपत्नी–इतरेषु. **प्रजां पश्यन्ती सुमनस्यमाना**–का; पश्यन्ती प्रजां सुमनस्यमानम्–ऋमं–ऋग्र–प्रर–संकौ; पश्यन्ती प्रजां सुमनस्यमानां–आपमं–मंत्रा; प्रजां पश्यन्ती सुमनस्यमानां–हिगृ। ४. **अप्रजस्त्यं पौत्रमर्त्यं**–मंत्रा; अप्रजस्तां पौत्रमृत्युं–ऋमं–प्रर–संकौ–हिगृ–आपमं; अप्रजास्त्वां पुत्रं मृत्यु–ऋग्र. **वार्धं**; वा अर्धं–मंत्रा; वार्धं–संकौ. **प्रजामिवोन्मुच्यस्व**–का; शीर्ष्णः स्रजमिवोन्मुच्य–ऋग्र–मंत्रा–हिगृ–ऋमं–संकौ–प्रर–आपमं. **पाशान्**—का; पार्श–ऋमं–ऋग्र–संकौ–प्रर–आपमं–मंत्रा–हिगृ। ५. **पातयामि**–का–ऋमं–प्रर–संकौ; पादयामि–हिगृ।

१२

चक्षुश्च श्रोत्रं च मनश्च वाक्च प्राणापानौ देह इदं शरीरम् ।
द्वौ प्रत्यञ्चावनुलोमौ विसर्गाविदं तं मन्ये दशयन्त्रमुत्सम् ॥ १ ॥
यं ओनयत्परावतः० ॥ ऋ. सं. ६. ४५. १

ऋसं ६. ४४ अनन्तरं पठनीयम् । बृहद्दे ५. १०८ एतदेव दर्शयति । इदमेकर्चं सूक्तं सायणाचार्यैः ऋसं ६.४४. २४ व्याख्याने समुद्धृतम् । मॅ(११)-मु-आउ(८)-जुना-औध-पुस्तकेष्विदं तृचं सूक्तम् । अल-पुस्तक इदं द्व्रचम् ।

१[1]. → तैब्रा २. ५. ६. ५ : प्राणापानौ चक्षुः श्रोत्रं वाचं मनसि संभृताम्; तैउ १. ७. १ : चक्षुः श्रोत्रं मनो वाक् त्वक्. १[2]. **दशयन्त्रमुत्सम्** ≡ ऋसं ६. ४४. २४. °**वेदं**-का; °वेतं-मॅ-मु-आउ-औध-जुना । उत्तरे ऋचौ–

पुरश्च पृष्ठश्च करौ च बाहू जङ्घे चोरू उदरं शिरश्च ।
रोमाणि मांसं रुधिरास्थिमज्जमेतच्छरीरं जलबुद्बुदोपमम् ॥ २ ॥
भ्रुवौ ललाटे च तथा च कर्णौ हनू कपोलौ चुबुकस्तथा च ।
ओष्ठौ च दन्ताश्च तथैव जिह्वा मे तच्छरीरं मुखरत्नकोशम् ॥ ३ ॥

२. **पुरश्च**; उरश्च; जुना–आउ; नखश्च–औध. **पृष्ठश्च**; पृष्टिश्च–मु. **रोमाणि**; लोमानि–जुना. ३. **चुबुकः**; चिबुकः–जुना. **मे तच्छरीरं**; एतत्सुशुभ्रं–आउ; एतच्छरीरं–जुना.

ऋसं ६. ४८ अन्ते पठनीयमेकं खिलसूक्तं मॅ-औध-जुना-पुस्तकेषु विद्यते । मॅ-पुस्तके

यत्स्तृणैरध्ययनं तदधीतं स्तृणानि भवते भव । वापीकूपतडागानां समुद्रं गच्छ स्वाहा ॥ १ ॥
सूक्तान्ते स्तृणान्यग्नौ ॥ २ ॥

औध-पुस्तके

सूक्तान्तेऽस्येत्तृणान्यग्नाविरिणे वोदकेऽपि वा ।
यदस्तृणैरधीतं तत् तृणानि भवति ध्रुवम् ॥ १ ॥
वापीकूपतडागानां समुद्रं गच्छ स्वाहा [अग्निं गच्छ स्वाहा] ॥ २ ॥

जुनागउ-पुस्तके

यत्स्तृणैरध्ययनं स्तृणानि तृणते तृण । समुद्रं गच्छ स्वाहा भूमिं गच्छ स्वाहा ॥

खिल २. ३ टिप्पणी द्रष्टव्या ।

१३

शंवतीः पारयन्त्येतेदं पृच्छस्व वचो यथा । अम्यारं तं समाकेतं य एवेदमिति ब्रवत् ॥ १ ॥
जायाकेतं परिस्रुतं भारती ब्रह्मवादिनी । संजानानां महीं जातां य एवेदमिति ब्रवत् ॥ २ ॥
इन्द्रस्तं किं विभुं प्रभुं भानुना यं जुजोषति । तेन सूर्यमरोचयद्येनेमे रोदसी उभे ॥ ३ ॥
जुषस्वाग्ने अङ्गिरः काण्वं मेध्यातिथिम् । मा त्वा सोमस्य बर्बृहत् सुतस्य मधुमत्तमः ॥ ४ ॥
त्वमग्ने अङ्गिरस्तम शोचस्व देववीतमः । आ शंतम शंतमाभिरमिष्टिभिः शान्ति स्वस्तिमकुर्वत ॥५॥
शं नः कनिक्रदद्देवः पर्जन्यो अभि वर्षत्वोषधयः सं प्रवर्धन्ताम् ।
शं नो द्यावापृथिवी शं प्रजाभ्यः शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ६ ॥
शं न इन्द्राग्नी भवतामवोभिः० ॥ ऋ. सं. ७.३५. १

ऋसं ७. ३४ अनन्तरमिदं पठनीयम्। आश्वमंस[२]–मतमपि तथैव। मॅ–मु–औध–अनुसारेणेदं ऋसं ७. ३५ अनन्तरं पठनीयम्।

मॅ१३–मु–आउ९–ऋमं–अल–जुना–ऋब्र(शान्ति)–अल। ऋग्विधानेऽपि (२. १३९)–'शंवतीः शं न इन्द्राग्नी इत्येते सततं जपेत्। न रक्षोभ्यो न भूतेभ्यो व्याधिभ्यो वा भयं भवेत्' इति॥

१. एतेदं पृच्छस्व वचो यथा–का; तं पृच्छन्ति वचो यथा–आउ–जुना; एतं छंति वचो युजा–अल; एते तं पृच्छन्ति वचो युजा–मॅ–मु. **अभ्यारं तं समाकेतं**–का; अभ्यायन्तं समायन्ते–आउ; अभ्यारेतं यमाकेतं–अल; अभ्यानंते यमाकेतं–जुना; अभ्यारं तं यमाकेतुं–ऋमं–ऋब्र–मॅ–मु. **ब्रवत्**; ब्रुवत्–अल; ब्रवन्–मु–ऋब्र। **२. जायाकेतं**–का–जुना; जायाकेतुं–आउ; भासाकेतुं–ऋमं–मु–मॅ–ऋब्र. **परिस्तृतं**–ऋमं–मु; पुरुस्पृहं–मॅ–आउ–जुना. **भारती ब्रह्मवादिनी**–का; भारतीर्ब्रह्मवर्धनीः–ऋमं–ऋब्र–मॅ–मु; भारतीं ब्रह्मवर्धनीं–आउ; भारती ब्रह्मवर्धनी–जुना. **जाता**–का; माता–ऋमं–ऋब्र–मॅ–मु–आउ–जुना. **ब्रवत्**; ब्रवन्–ऋब्र। **३. इन्द्रः**; इन्द्रं–अल. **किं**; कर्–आउ. **भानुना यं**–अल; भानुनेयं–ऋमं–ऋब्र–मॅ–मु–आउ; भानुमेयं–जुना. **जुजोषति**–का; सरस्वती–मॅ–आउ–जुना; सरस्वती ऋमं–ऋब्र–मु–अल. **तेन**–का; येन–ऋमं–ऋब्र–मॅ–मु–आउ–अल–जुना। **४. बर्हृहत्सुतस्य**; बर्हृहन्सुतासो–आउ; बर्हृहत्सुतासो–अल. **मधुमत्तमः**; मधुमत्तमाः–आउ। **५. त्वं**–ऋमं–मॅ–मु–आउ; त्वां–का–अल. **अङ्गिरस्तम**–अल–जुना; अङ्गिरस्तमः–आउ; अङ्गिरः–ऋमं–मॅ–मु. **शंतमाभिरभिष्टिभिः**; शंतमाभिष्टिभिः–अल. **शान्ति**; शान्तिः–मु; शान्ति–अल। **६. वर्षत्वोषधयः सं प्रवर्धन्तां**–का; वर्षत्वोषधयः प्रति धीयन्तां–आउ; अवर्षत्योषधयः प्रतिधीयतां–अल; अभिवर्षत्वोषधयः प्रतिधीयतां–जुना; वर्षतु–ऋमं–मॅ–मु. **शं नो अस्तु द्विपदे शं चतुष्पदे** = खिल ५. १. ५[२]. **नो अस्तु**–का; न एधि–मॅ–मु।

जुनागडलिखितपुस्तक इदं नवर्चं सूक्तम्। तृतीयमन्त्रानन्तरं लिखिता अधिका मन्त्रा अधो दीयन्ते–

शं वो भूमिः शं व आपः शं वो भवन्तु मरुतः स्वर्काः।
शं वः प्रजाभ्यः शमयन्तु पापं शं वः पर्जन्यो अभि वर्षतु॥
शं व इन्द्रः शंताता शं वो भवन्तूषसो विभातीः।
शं वो वसवो रुद्रा आदित्याः सदन्तु शं वो मित्रावरुणावश्विना शम्॥
शं वो विष्णुः प्रजया संरराणोऽनु स्वधां कृणुहि लोके अस्मिन्।
शं वो भवतु भुवनस्य यस्पतिः शं वो भव द्विपदे शं चतुष्पदे॥

१४

स्वप्नः स्वप्नाधिकरणे सर्वं निर्ष्वापया जनम्। आ सूर्यमन्यान् स्वापयाव्युषं जागृयामहम्॥ १॥
कं ई व्यक्ता नरः सनीळा०॥ ऋ. सं. ७. ५६. १

ऋसं ७. ५५ अनन्तरं पठनीयम्। अयं मन्त्रः अथर्व ४. ५. ७ अनेन समानः। मॅ–पुस्तक एतदेकादशर्चं, पञ्चामृ–पुस्तके दशर्चम्। ऋब्र(शान्तिपाठः)–आश्वमंस–जुना–पुस्तकेष्वष्टौ, ऋमं–आउ–मु–पुस्तकेषु नव मन्त्राः। आउ–पुस्तकस्थः षष्ठो मन्त्रो मॅ–पुस्तके नास्ति। मु १-८ = ऋमं–मॅ–पञ्चामृ १-८; मु ९ = पञ्चामृ ९ = मॅ १०; ऋमं ९ = आउ ६; पञ्चामृ १० = मॅ ९; आउ ७ = मॅ८; आउ ८ = मॅ ६; आउ ९ = मॅ ७. अल-पुस्तके ८-९ मन्त्रौ न स्तः। जुना–पुस्तके तृतीयो मन्त्रो नास्ति।

१. स्वप्नाधिकरणे; स्वप्नाभिकरणेन–अथर्व. **जनं**–अथर्व–मॅ–मु–आउ; जरां–पञ्चामृ; जिनं–ऋमं–ऋब्र. **आ सूर्यं**; ओत्सूर्यं–अथर्व. → मैसं ४. २. १: आ तु सूर्यस्योदेतोर्जागृयात्. **अन्यान्**–का–आउ; अन्यान्–ऋमं–मॅ–मु–अथर्व; अन्यत्–पञ्चामृ. **स्वापयाव्युषं**–अथर्व; स्वापयद्व्युषं–जुना–आउ; स्वाप-

यद्ध्यूळ्हं–ऋमं–ऋव्र–मॅं–मु–पञ्चामृ. **आगृभ्यादहं**–का; जागृयादहं–ऋमं–मॅं–पञ्चामृ; जाघ्रियादहं–ऋव्र–मु–आउ; जाघ्र्यादहं–जुना; जागृतान्–अथर्व.

शिष्टानां मन्त्राणां ऋमं–पुस्तकानुसारेण पाठो दीयते–

अजगरो नाम सर्पः सर्पिरविषो महान् ।
तस्मिन् हि सर्पः सुधितस्तेन त्वा स्वापयामसि ॥ २ ॥

सर्पः सर्पो अजगरः सर्पिरविषो महान् । तस्य सर्पास्मिन्धवस्तस्य गाधमशीमहि ।। ३ ॥

कालिको नाम सर्पो नवनागसहस्रबलः । यमुनाह्रदे ह्रं सो जातो यो नारायणवाहनः ॥ ४ ॥

यदि कालिकजूतस्य यदि काः कालिकाद्भयम् ।
जन्मभूमिमतिक्रान्तो निर्विषो याति कालिकः ॥ ५ ॥
आ याहीन्द्र पथिभिरीळितेभिर्यज्ञमिमं नो भागधेयं जुषस्व ।
तृप्तां जुहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयी वपामिव ॥ ६ ॥
यशस्करं बलवन्तं प्रभुत्वं तमेव राजाधिपतिर्बभूव ।
संकीर्णनागाश्वपतिर्नराणां सुमङ्गल्यं सततं दीर्घमायुः ॥ ७ ॥

कर्कोटको नाम सर्पो यो दृष्टीविष उच्यते । तस्य सर्पस्य सर्पत्वं तस्मै सर्प नमोऽस्तु ते ॥ ८ ॥

अति कालिकरौद्रस्य विष्णुः सौम्येन भाविना । यमुननदीं कालिकं ते विष्णुस्तोत्रमनु स्मरम् ॥९॥

२. तस्मिन् हि–ऋमं–मु–पञ्चामृ–ऋव्र–मॅं; तस्मिन्नु–आउ–जुना । **३. तस्य**–ऋमं–मु–पञ्चामृ; यस्य–मॅं–आउ. **सर्पात्**–ऋमं–मु; शुष्कात्–मॅं–आउ–पञ्चामृ. **गाधमशीमहि** ≡ ऋमं ५. ४७. ७ । **४. नाम**; नाग–पञ्चामृ. **°बळः**; °फणः–पञ्चामृ. **ह सो**; ऽसौ–आउ । **५. भयं**–मॅं–आउ–पञ्चामृ; भयात्–ऋमं–ऋव्र–मु. **जन्मभूमिमतिक्रान्तो**–ऋमं–ऋव्र–मॅं–मु; जन्मभूमिपरिक्रान्तो–आउ–पञ्चामृ; जन्मभूमिरतिक्रांतो–जुना । **६. तृप्तां**–ऋमं–ऋव्र–पञ्चामृ–मॅं–मु–निरु; तृप्ता–आउ. **जुहुः**–मॅं–आउ–निरु; जहुः–ऋमं–ऋव्र–मॅं–पञ्चामृ–जुना. **°नागाश्वपति... सततं**; °नागाश्वपतिं नराणां सुपर्णं तं विदतं–जुना । ८[२]. = खिल २.१. ९[३] । **९. विष्णुः सौम्येन**–आउ; विष्णु सौम्येन–ऋमं. **भाविना**–आउ–जुना; भामिनि–ऋमं. **ते**–ऋमं; तेन–आउ; **स्मरं**–आउ; **स्मरन्**–ऋमं; स्वरं–जुना । मॅं–पुस्तके ९-११ मन्त्रा एवम्–

येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु । तेषामप्सु सदस्कृतं तेभ्यः सर्पेभ्यो नमः ॥ ९ ॥
नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥ १० ॥
उग्रायुधाः प्रमतिनः प्रवीरा मायाविनो बलिनो मिच्छमानाः ।
ये देवा असुरान् पराभवन् तांस्त्वं वज्रेण मघवन्नि वारय ॥ ११ ॥

९-१०. ≡ तैसं ४. २. ८. ३ (व्यत्यासेन). **९. दिवो**; दिवि–पञ्चामृ; **तेषां**–मु; येषां–तैसं–पञ्चामृ. **सदस्कृतं**–मॅं; सदःकृतं–तैसं–पञ्चामृ । **१०.** = वासं १३. ६; कासं १६. १५; मैसं २. ७. १५; हिगृ २. १६. ७; मागृ २. ७. ३; ११. १०; १६. ३; माश्रौ ६. १. ७; आसू ; मंदी; शांम; मांमसं. **अस्तु**–मॅं; स्तु–इतरेषु । **११. देवा असुरान्**–देवानसुराः–ओध. ओधपुस्तक एते त्रयोऽपि मन्त्राः सन्ति तथापि नवमदशमयोर्मध्येऽधो लिखितो मन्त्रोऽधिकः—

वा इषवो यातुधानानां ये वा वनस्पतीननु । ये वावटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥

१५

यस्य व्रतमुपतिष्ठन्त आपो यस्य व्रते पशवो यन्ति सर्वे ।
यस्य व्रते पुष्टिपतिर्निविष्टस्तं सरस्वन्तमवसे जोहवीमि ॥ १ ॥
यज्ञे दिवो नृषदने पृथिव्याः० ॥ ऋ. सं. ७. ९७. १

ऋसं ७. ९६ अनन्तरं पठनीयम्। बृहद्दे ६. १९ तदेव दर्शयति। इदं दर्शपूर्णमासयोर्विनियोज्यमिति वैसू ८. २; काम्यपशुयागे याज्यात्वेन विनियोज्यमिति शांश्रौ ६. ११. ८; आश्रौ ३. ८।

तैसं ३. १. ११. ३; मैसं ४. १०. १; अथर्व ७. ४०. १; मॅ१५-आउ११-आश्वमंस[1]-औध--जुना-अल एतेषु सर्वेषु **' यस्य व्रतं पशवो यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः '** इति प्रथमार्धः। **जोहवीमि**-का; हवामहे-अथर्व; हुवेम-इतरेषु।

१६

उप॑ प्र वद मण्डूकि वर्षमा॑ वद तादुरि। मध्ये॑ ह्रदस्य प्लवस्व निगृ॑ह्य चतुरः पदः॥ १॥
इन्द्रासोमा तपतं रक्ष उब्जतम्०॥ ऋ. सं. ७. १०४. १

इत्यृग्वेदे खिले द्वितीयोऽध्यायः॥

ऋसं ७. १०३ अनन्तरं पठनीयम्।

अथर्व ४. १५. १४; निरु. ९. ७; ऋमं-मॅ१६-आउ१२-मु-आश्वमंस-औध-अल-जुना।

उप प्र वद-का-अथर्व; उपप्लवद-ऋमं-मॅ-मु-आउ; उपप्लवत-औध. **प्लवस्व**-का-जुना-अथर्व-निरु-मॅ-आउ; प्लवस्य-ऋमं-मु. **निगृह्य** का-ऋमं-मु-मॅ; विगृह्य-अथर्व-निरु-आउ-जुना. **पदः**--का-अथर्व-निरु-मॅ-आउ-जुना; परः-ऋमं-मु।

अथ तृतीयोऽध्यायः

अभि दस्रा प्रस्कण्वः प्रागायं तु[1] प्र पुष्टिगुर्यथा शुष्टिगुर्यथा आयुरुपमन्थौ मेध्य एतत्ते मातरिश्वा द्वितीयः[2] प्रागायो वैश्वदेवो भूरि पञ्च कृशः पृषध्रस्य[3] दानस्तुतिस्तु[4] गायत्रं तु तृतीयापञ्चम्यावनुष्टुभौ प्रति पृषध्रः पाङ्क्तयन्तं[5] सलिङ्गोक्ता देवता त्वमेका पावमानीः षड् वैश्वदेवमन्त्याद्ये च पावमानीस्तुतिः पञ्चमी त्रिष्टुप् इळैव द्वे बृहद्दिवो यज्ञ तिस्रः सनुषीरेकैकहि मम द्वात्रिंशत्प्राजापत्यो हृयो वैश्वदेवं तु विवाहार्थाशीस्त्वानुष्टुभं त्वाद्या त्रिष्टुप् तृतीयाविंशीपञ्चविंश्यः पङ्क्तयो दशमी पुरउष्णिग् द्वादशाद्ये आस्तारपङ्क्तिः प्रस्तारपङ्क्तिरेकोनविंशी बृहत्येकोनत्रिंशी त्रिष्टुब्जगतीवोद्दृष्टौ परागदासो ध्रुव एका ककुप् द्वे उदेका यज्ञासौ द्वे ब्रह्म दश वामदेव्यो नकुलः सौरी धर्मस्तुतिर्बार्हस्पत्या सावित्र्यष्टिर्धर्मपरा एताः सौर्यश्चान्द्रमस्यश्च शेषा जगत्यः॥

१. तु-का; तत्-अनु. २. **द्वितीयः प्रगाथो वैश्वदेवो**-का; नो विश्व इति वैश्वदेवः प्रगाथः-अनु. ३. **पृषध्रस्य**-का; प्रस्कण्वस्य-अनु. ४. तु-का; अनुक्रमण्यां नास्ति. ५. **पाङ्क्तयन्तं सलिङ्गोक्ता देवता**-का; अन्त्याग्निसौरी पङ्क्तिः-अनु.

१

अभि॑ प्र॑ वः सुरा॑धसमिन्द्रमर्च॑ यथा॑ विदे॑। यो॑ जरि॑तृभ्यो मघवा॑ पुरूव॑सुः स॑हस्रेणेव॑ शिक्षति॥ १॥
शतानी॑केव॑ प्र॑ जिगाति धृष्णु॑या॑ हन्ति॑ वृत्रा॑णि दा॑शुषे॑।
गिरे॑रिव॑ प्र॑ रसा॑ अस्य पिन्विरे॑ दत्रा॑णि पुरुभो॑जसः॥ २॥
आ॑ त्वा॑ सुता॑स इन्दवो॑ मदा॑ य॑ इन्द्र॑ गिर्वणः।
आपो॑ न॑ वज्रिन्नन्वो॑क्यं॒३॒ सरः॑ पृणन्ति॑ शूर॑ रा॑धसे॥ ३॥

अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब ।
आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥ ४ ॥
आ नः स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः ।
ये ते स्वधावन्त्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ॥ ५ ॥
उग्रं न वीरं नमसोप सेदिम विभूतिमक्षितावसुम् ।
उद्रीव वज्रिन्नवतो न सिञ्चते क्षरन्तीन्द्र धीतयः ॥ ६ ॥
यद्ध नूनं यद्वा यज्ञे यद्वा पृथिव्यामधि । अतो नो यज्ञमाशुभिर्महेमत उग्र ऋष्वेभिरा गहि ॥७॥
अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः ।
येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ॥ ८ ॥
एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः । यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥९॥
यथा कण्वे मघवन् त्रसदस्यवि यथा पक्थे दशव्रजे ।
यथा गोशर्ये असनोरृजिश्वनीन्द्र गोमद्धिरण्यवत् ॥ १० ॥

= ऋसं ८. ४९ वालखिल्यम [१]। शांश्रौ ७. २३. ४; १२. ९. ११; १२. ६. १२ भाष्ये ऐआ ६. २४ भाष्ये च निर्दिष्टम्। बृहदे ६. ८४-८६ द्रष्टव्यम्। १. = साम १. ३. १. ५. ३; २. २. १. १३. १; अथर्व २०. ५१. १। २. = साम २.२.१.१३.२; अथर्व २०. ५१.२। ३. य-का; ये-मॅ; → ऋप्रा २. २८। ७. ऋष्वेभिः-का; उग्रेभिः-मॅ-मु। ९[२] = ऋसं ८. ५०. ९[२].

२

प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये । यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥१॥
शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
शिनिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः ॥ २ ॥
यदीं सुतास इन्दवोऽभि प्रियममन्दिषुः ।
आपो न धायि सवनं म आ वसो दुघा इवोप दाशुषे ॥ ३ ॥
अनेहसं वो हवमानमूतये मध्वः क्षरन्ति धीतयः ।
आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे ॥ ४ ॥
आ नः सोमे स्वध्वरं इयानो अत्यो न तोशते ।
ये ते स्वधावन् स्वधयन्ति गूर्तयः पौरं च्छन्दयसे हवम् ॥ ५ ॥
प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः ।
उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे ॥ ६ ॥
यद्ध नूनं परावति यद्वा पृथिव्यां दिवि । युजानं इन्द्र हरिभिर्महेमत उग्र ऋष्वेभिरा गहि ॥७॥
रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।
येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे ॥ ८ ॥

एतावतस्ते वसो विद्याम शूर नव्यसः ।
यथा प्रावो मघवन् मेध्यातिथिं यथा नीपातिथिं धने ॥ ९ ॥
यथा कण्वे मघवन् मेधे अध्वरे दीर्घनीथे दमूनसि ।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् ॥ १० ॥

= ऋसं ८. ५० वालखिल्यम् [२] । शांश्रौ ७. २३. ४; १२. ९. ११ मध्ये निर्दिष्टम् । ऐब्रा ६. २४ सायणभाष्ये द्वितीयमन्त्रस्य निर्देशः । **२. शतानीका हेतयो अस्य** → ऋप्रा २. ५०. **शिनिर्ने**–का; गिरिर्ने–मॅ-मु । ५. **स्वधावन् स्वधयन्ति**–का; स्वदावन्स्वदन्ति–मॅ-मु । ७. **उग्र**–का; ऋग्व–मॅ-मु । ९[१] = ऋसं ८. ४९. ९[१] । १०. **दीर्घनीथे दमूनसि** → ऋप्रा ५. ४८.

यथा मनौ सांवरणौ सोममिन्द्रापिवः सुतम् ।
नीपातिथौ मघवन् मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा ॥ १ ॥
पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिह्मबुध्नितम् ।
सहस्राण्यासिषासद्वामृषिस्त्वोतो दस्यवे वृकः ॥ २ ॥
य उक्थेभिर्न विन्धते चिकिर्ष ऋषिचोदनः ।
इन्द्रं तमच्छा वद नव्यस्या मत्यविथन्तं न भोजसे ॥ ३ ॥
यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे ।
स त्विमा विश्वा सवनानि चिक्रददादिज्जनिष्ट पौंस्यम् ॥ ४ ॥
यो नो दाता वसूनामिन्द्रं तं हूमहे वयम् । विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥५॥
यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते ।
तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥ ६ ॥
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते ॥७॥
प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् ।
यदेदेस्तम्भीत् प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः ॥ ८ ॥
यस्यायं विश्व आर्यो दासः शेवधिपा अरिः । तिरश्चिदर्ये रुशमे पवीरवि तुभ्येत्सो अज्यते रयिः ॥९॥
तुरण्यवो मधुमन्तो घृतश्चुतो विप्रासो अर्कमानृचुः ।
अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः ॥ १० ॥

= ऋसं ८. ५१ वालखिल्यम् [३] । **१. सांवरणौ**–मॅ-मु; सांवरण–का[1] । **२. आसिषा-सत्**–का; असिषासत्–मॅ-मु । **३. अविध्यन्तं**–का; अरिष्यन्त–मॅ-मु । **१०. मधुमन्तो घृतश्चुतो**–का; मधुमन्तं घृतश्चुतं–मॅ-मु.

1. Scheftelowitz defends the Kashmir reading (p. 38), but compare the names in the latter half of the same verse and also the parallel Khila, III. 4. 1.

४

यथा मनौ विवस्वति सोमं शक्रापिबः सुतम् ।
यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचा ॥ १ ॥
पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः । यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजीनसि॥२॥
य उक्थो केवला दधे यः सोमं धृषतापिबत् ।
यस्मै विष्णुस्त्रीणि पदा विचक्रमे उप मित्रस्य धर्मभिः ॥ ३ ॥
यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।
तं त्वा वयं सुदुघामिव गोदुहे जुहूमसि श्रवःसु च ॥ ४ ॥
यो नो दाता स नः पिता महाँ उग्र ईशानकृत् ।
अयामन्नुग्रो मघवा पुरूवसुर्गोरश्वस्य प्र दाति नः ॥ ५ ॥
यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति ।
वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥ ६ ॥
कदा चन प्र युच्छस्युभे निं पासि जन्मनी । तुरीयादित्य सवनं त इन्द्रियमातस्थावमृतं दिवि ॥७॥
यस्मै त्वं मघवन्निन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे ।
अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवम् ॥ ८ ॥
अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत । पूर्वीरृतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥ ९ ॥
सं मिन्द्रो रायो बृहतीरधूनुत सं क्षोणी सं सु सूर्यम् ।
सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥ १० ॥

= ऋसं ८. ५२ वालखिल्यम् [४] । **२. दशशिप्र दशोण्ये**→ऋप्रा २. ७१. °**वृजीनासि**-का; °वृजूनसि-मॅ-मु । **३. धृषतापिबत्**-का; धृषितापिबत्-मॅ-मु । ४[२]. → ऋसं १. ४. १ : सुरुप-कृत्नुमूतये सुदुघामिव गोदुहे जुहूमसि; → ऋसं ८. १. १० : आ त्वद्य सबर्दुघां हुवे गायत्रवेपसम् इन्द्रं धेनुं सुदुघां. **गोदुहे**-का → ऋसं १. ४. १; गोदुहो-मॅ-मु. **श्रवःसु च**-का → ऋसं ३. ३७. ७; श्रवस्यवः-मॅ-मु । ५. **दाति**-का; दातु-मॅ-मु । ६[२] ≡ ऋसं ८. ६१. १०[२] । ७ ≡ वासं ८. ३; तैसं १. ४. २२. **सवनं**-का; हवनं-मॅ-मु ।

५

उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम् । पूर्भित्तमं मघवन्निन्द्र गोविदमीशानं रायं ईमहे ॥१॥
य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे ।
तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे ॥ २ ॥
आ नो विश्वेषां रसं मध्वः सिञ्चन्त्यद्रयः । ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवः ॥३॥
विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सुन्वन्त्वा वसु ।
शर्धिषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥ ४ ॥
इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः । आ शंतन शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः॥५॥

आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगम् ।
प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक् ॥ ६ ॥
यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते । वीतिहोत्राभिरुत देवहूतिभिः ससवांसो विशृण्विरे ॥७॥
अहं हि ते हरिवो वज्र वाजयुराजिं यामि सदोतिभिः ।
त्वामिदेव तममे समश्वयुर्गव्युरग्रे मतीनाम् ॥ ८ ॥

= ऋसं ८.५३ बालखिल्यम् [५] । ३. सिञ्चन्त्य°–का; सिञ्चन्त्व°–मॅ-मु । ४. सुन्वन्त्वा–(→ ऋसं १०. ७६.४ : आ नो रयिं सुनोतन)–का; सन्वन्त्वा–मॅ-मु. शीष्टेषु–का; शीष्टेषु–मॅ-मु । ६. प्र सू तिरा शचीभिर्ये त उक्थिनः → ऋपा ८. ४; ३० । ७. वीतिहोत्राभिः–का; वयं होत्राभिः–मॅ-मु. विश्टृण्विरे–का; मनामहे–मॅ-मु । ८. मतीनां–का; मथीनां–मॅ-मु ।

६

एतत्त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः । ते स्तोभन्त ऊर्जमावन् घृतश्चुतं पप्रासो नक्षन्धीतिभिः ॥१॥
नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे ।
यया संवर्ते अमदो यया कृश एवास्मे इन्द्र मत्स्व ॥ २ ॥
आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।
वसवो रुद्रा अवसे न आ गमञ्छृण्वन्तु मरुतो हवम् ॥ ३ ॥
पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः ।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम् ॥ ४ ॥
यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम । तेन नो बोधि सधमादो वृधे भगो दानाय वृत्रहन् ॥५॥
आजिपते नृपते त्वमिद्धि नो वाज आ भक्षि सुक्रतो ।
वयं होत्राभिरुत देवहूतिभिः ससवांसो मनामहे ॥ ६ ॥
सन्ति ह्यर्यं आशिष इन्द्र आयुजनानाम् ।
अस्मान्नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम् ॥ ७ ॥
वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो ।
महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय ॥ ८ ॥

= ऋसं ८. ५४ बालखिल्यम् [६] । → बृदे ६. ८४ । १. पप्रासो–का; पौरासो–मॅ-मु । २. सुकृत्यया–का; सुकृत्यया–मॅ-मु । ६. भक्षि–का; वक्षि–मॅ-मु. वयं–का; वीती–मॅ-मु. देवहूतिभिः–का; देववीतिभिः–मॅ-मु. मनामहे–का; वि शृण्विरे–मॅ-मु ।

७

भूरीदिन्द्रस्य वीर्यं व्यख्यमभ्यायति । राधस्ते दस्यवे वृक ॥ १ ॥
शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते । महो दिवं न तस्तभुः ॥ २ ॥
शतं वेणूञ्छतं शुनः शतं चर्माणि म्लातानि । शतं मे बल्बजस्तुका अरुषीणां चतुःशतम् ॥३॥

सुदेवो॑ स्य काण्वायना॑ वयोवयो विचर्न्तः । अश्वासो॑ न चङ्क्रमत ॥ ४ ॥
आदित्साप्तस्य चर्किरन्नानूनं च महि श्रवः । श्यावीरतिष्ठसंन् पथश्चक्षुषा चन सन्नशे ॥५॥

= ऋसं ८. ५५ वालखिल्यम् [७] । १. अभ्याजति–का; अभ्यायति–मॅ-मु । ४. सुदेवाः स्य काण्वायना → ऋप्रा ८. २०. काण्वायना–मॅ-मु; कण्वायना–का. चङ्क्रमत–का; चङ्कमत–मॅ-मु । ५. आनूनं च–का; आनूनस्य–मॅ-मु ।

८

प्रति ते दस्यवे वृक रांधो अदर्शयंहयम् । द्यौर्न प्रथिना शवः ॥ १ ॥
दश मह्यं पूतक्रतुः सहस्रा दस्यवे वृकः । नित्याद्रायो अमंहत ॥ २ ॥
शतं मे गर्दभानां शतमूर्णावतीनाम् । शतं दासाँ अधि स्रजः ॥ ३ ॥
तत्रो अपि प्रणीयत पूतक्रतायी व्यक्ता । अश्वानामिनं यूथ्यम् ॥ ४ ॥
अचेत्यग्निश्चिकितिर्हव्यवाट् स सुमद्रथः ।
अग्निः शुक्रेण शोचिषा बृहत्सूर्यो अरोचत दिवि सूर्यो अरोचत ॥ ५ ॥
अग्न आ याह्यग्निभिः० ॥ ऋ. सं. ८. ६०. १

= ऋसं ८. ५६ वालखिल्यम् [८] । एतान्यष्टौ सूक्तानि (खिल ३. १-८ = ऋसं ८. ४९-५६) ' अग्न आ याह्यग्निभिः ' (ऋसं ८. ६०) इति सूक्तात्पूर्वं पठनीयानि । एतानि बृहद्दे ६. ८४-८६ अत्र निर्दिष्टानि ।

१[२]. = ऋसं १. ८. ५ । २. पूतक्रतुः–का; पूतक्रतः–मॅ; पीतक्रतः–मु-जुना । ३. अधि–का; अति–मॅ-मु । ४. पूतक्रतायी–का; पूतक्रतायै–मॅ-मु. यूथ्यं–का; यूथ्यां-मॅ-मु । ५[१]. = साम १. ५. २. २. १. चिकितिः–का–साम; चिकितुः–मॅ-मु. ५[२]. बृहत्सूर्यो–का–खिल ४. ९. ७; बृहत्सूरो–मॅ-मु ।

९

त्वं द्रप्सं धनुषा युध्यमानमुपातिष्ठो मघवन्नंशुमत्याः ।
प्र शूर आपः सनिता धनानीन्द्र तानि ते पुरुकृत् सहांसि ॥ १ ॥
त्वं ह त्यत्सप्तभ्यो जायमानः० ॥ ऋ. सं. ८. ९६. १६

ऋसं ८. ९६. १५ अनन्तरं पठनीयम् । सनिता धनानि = ऋसं १. १००. ९; ९. ९०. ३.

१०

पावमानीः स्वस्त्ययनीः सुदुघा हि घृतश्चुतः । ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं हितम् ॥१॥
पावमानीर्दिशन्तु न इमं लोकमथो अमुम् । कामान्त्समर्धयन्तु नो देवीर्देवीः समाहिताः ॥ २ ॥
येन देवाः पवित्रेणात्मानं पुनते सदा । तेन सहस्रधारेण पावमान्यः पुनन्तु मा ॥ ३ ॥
प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयम् । तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे ॥ ४ ॥
इन्द्रः सुनीती सह मा पुनातु सोमः स्वस्त्या वरुणः समीच्या ।
यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मोर्जयन्त्या पुनातु ॥ ५ ॥

पावमानीः स्वस्त्ययनीर्योभिर्गच्छति नान्दनम्। पुण्यांश्च भक्षान् भक्षयत्यमृतत्वं च गच्छति॥६॥

प्र देवमच्छा मधुमन्त० ॥ ऋ. सं. ९. ६८. १

ऋसं ९. ६७ अनन्तरं पठनीयम्।

ऋव्र–मॅ१७–मु–अल–जुना–आउ१३–ऋव्र–पुस्तकेष्विदं विंशर्चम्। आद्याः पञ्चर्चो मॅ–मु–आउ–ऋव्र(पवमान)–पुस्तकेष्वादितो वर्तन्ते। षष्ठी मॅ–मु–आउ–अल–पुस्तकेषु पञ्चदशी। हिरण्यकेशि-त्रिकालसंध्यायां धर्मसिन्धौ चेदं षड्चम्। आउ-पुस्तके तृतीयचतुर्थमन्त्रयोर्व्यत्यासः। औंधपुस्तक इदमे-कविंशर्चम्। १-५ ≡ तैब्रा १. ४. ८. ५-६. १-३, ६ ≡ साम २. ५. २. ८. ३-६. ३ ≡ निरु ५. ६; बौधसू २. १७. ३४.

१. → ऋसं ९. ६७. ३१[1], ३२[1] : ऋषिभिः संभृतं रसम्। **२. दिशन्तु**; दधन्तु–साम. **कामान् समर्धयन्तु**; कामाः स्पर्धयन्तु–अल. **देवैर्देवीः**; देवीर्देवैः–का–साम–धसि–तैब्रा; देवैर्देवी–अल. **समाहृताः**—का-साम; समाहिताः–ऋव्र–मॅ–मु–जुना–आउ; समाहिता–अल; समाभृताः–तैब्रा–ऋव्र–धसि। **३. पावमान्यः पुनन्तु मा**–तैब्रा–आउ–धसि; पवमानः पुनातु मा–अल–जुना; पावमानीः पुनन्तु नः–साम; पावमान्यः पुनन्तु मां–मॅ–मु–ऋव्र। **४. हिरण्मयं**—तैब्रा–ऋव्र–मॅ–मु–धसि; हिरण्ययं–आउ; हिरण्यं–अल. **पुनीमहे**–तैब्रा–ऋव्र–धसि–मॅ–मु–आउ; पुनातु मा–अल–जुना। **५. सुनीती**—का; पुनीहो–मु; पुनीती–ऋव्र–औंध. **मा**; आउ–पुस्तके 'मा' नास्ति. **मोर्ज-यन्त्या**—तैब्रा–मॅ–धसि; मूर्जयन्त्या–मु–ऋव्र. पञ्चमो मन्त्रः अल–जुना–पुस्तकयोर्दशमः स चैवमस्ति–'इन्द्रः सुदीतिं सुदवा पुनातु सोमः स्वस्त्या वरुणः सुनीत्या। यमो राजा प्रमृणाभिः पुनातु मा जात-वेदा मूर्जयन्त्या पुनातु'। अल-पुस्तके क्वचिदशुद्धम्। **६. स्वस्त्ययनीर्याभिः**; स्वस्त्ययनीस्ताभिः–साम। शिष्टानां चतुर्दशमन्त्राणां पाठवैविध्यं पौर्वापर्यभेदश्च। १६ ≡ बृहद्दे ६. १४५; १७ ≡ बृहद्दे ६. १४१; १९ ≡ ऋविधा ३. ३. २; २० ≡ ऋविधा ४. २५. १ ≡ बृहद्दे ६.१४४. अल-जुना-पुस्तकपाठोऽधो दीयते। तत्र मन्त्राणां क्रमस्त्वेवम्:–अल १-९ = मॅ-मु-आउ ७-१५ (आउ-पुस्तक-क्रमेण); अल १० = मॅ-मु-आउ ५; अल ११-१४ = मॅ-मु-आउ १-४; अल १५-१६ = मॅ-मु-आउ १६-१७; अल १७ = मॅ-मु-आउ६; अल १८ = मॅ-मु-आउ १९; अल १९ = मॅ-मु-आउ २०; अल २० = मॅ-मु-आउ १८. ऋव्र–आश्वमेसं[1]–पुस्तकयोः क्रमः मॅक्समुक्षरपाठानुसारी, किंतु द्वादशो मन्त्रः ऋव्र–आश्वमेसं[1]–पुस्तकयोश्चतुर्दशत्वेनागच्छति। १७[2]–१८[1] आश्वमेसं[1] मध्ये नास्ति।

यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किं चिदन्यत्।
आतस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि ॥ १ ॥
मातापित्रोर्यच्च कृतं वचो मे यत्स्थावरं जङ्गममाबभूव।
विश्वस्य यद्यद्दुरितं वचो मे तत्पावमानीभिरहं पुनामि ॥ २ ॥
क्रयविक्रयाद्योनिदोषान्नक्षान्नोज्यात्प्रतिग्रहात्।
असंभोजनाच्चापि नृशंसं तत्पावमानीभिरहं पुनामि ॥ ३ ॥
गोघ्नात्तस्करत्वात्स्त्रीवधाच्च किल्बिषम्।
पापकं च चरणेभ्यस्तत्पावमानीभिरहं पुनामि ॥ ४ ॥
ब्रह्मवधात्सुरापानात्सुवर्णस्तेयाद्वृषलीमिथुनसंगमात्।
गुरोर्दाराभिगमनाच्च तत्पावमानीभिरहं पुनामि ॥ ५ ॥
बालघ्नान्मातृपितृवधाद्भ्रूमितस्करात्सर्ववर्णगमनमिथुनसंगमात्।
दारेभ्यश्च प्रतिग्रहात्सद्यः प्रहरन्ति सर्वदुष्कृतं तत्पावमानीभिरहं पुनामि ॥ ६ ॥
अमन्त्रमब्रं यत्किंचिदूषते च हुताशने। संवत्सरकृतं पापं तत्पावमानीभिरहं पुनामि ॥ ७ ॥

दुर्यष्टं दुरधीतं पापं यच्चाज्ञानतोकृतम् ।
अयाजिताश्चासंयाज्यास्तत्पावमानीभिरहं पुनामि ॥ ८ ॥
ऋतस्य योनयोऽमृतस्य धाम सर्वा देवेभ्यः पुण्यगन्धाः ।
ता न आपः प्रवहन्तु पापं श्रद्धा गच्छामि सुकृतामु लोकं तत्पावमानीभिरहं पुनामि ॥ ९ ॥

१० = का ५

११ – १४ = का १–४

१५ = का ६

पावमानीं पितॄन्देवान् ध्यायेयश्च सरस्वतीम् । पितॄंस्तस्योप तिष्ठेत क्षीरं सर्पिर्मधूदकम् ॥ १६ ॥
ऋषयस्तु तपस्तेपुः सर्वे स्वर्गजिगीषवः । तपसस्तपसोऽग्र्यं तु पावमानीर्ऋचो जपेत् ॥ १७ ॥
पावमानं परं ब्रह्म ये पठन्ति मनीषिणः । सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः ॥ १८ ॥
दशोत्तराण्यृचां चैतत्पावमानीः शतानि षट् । एतज्जुह्वत्प्रपंश्चैव घोरं मृत्युभयं जयेत् ॥ १९ ॥
पावमानं परं ब्रह्म शुक्रं ज्योतिः सनातनम् । ऋषींस्तस्योप तिष्ठेत क्षीरं सर्पिर्मधूदकम् ॥ २० ॥

२. **यत्**–अल–जुना; तत्–मॅ–मु–ऋब्र–आउ । ५. **सुवर्ण**°—अल–जुना; स्वर्ण–ऋब्र–मॅ–मु–आउ. **वृषलीमिथुन**°–अल; वृषलिमिथुन°–जुना; वृषलीगमनमैथुन°–मॅ–आउ; वृषलिगमनमैथुन°–मु–ऋब्र. **दाराधि**°–मॅ–अल–जुना–आउ; दाराधि°–मु; दाराद्धि°–ऋब्र । ६. °**मिथुन**°–अल–जुना; °मैथुन°–मॅ–मु–आउ–ऋब्र. °**संगमात्**; °संभवात्–आउ. **प्रहरन्ति**–अल–जुना; प्रहरति–मॅ–मु–आउ–ऋब्र । ८. °**ज्ञानतोकृतं**–अल–जुना; °ज्ञानतः कृतं–आउ । ९. **सर्वा**–अल–जुना; विश्वा–मॅ–मु–आउ–ऋब्र. **पुण्यगन्धाः**–मॅ–मु–आउ–ऋब्र–जुना; पुण्यगन्धा–अल. **श्रद्धा**–अल; शुद्धा–मॅ–मु–आउ–जुना–ऋब्र. **गच्छामि**–जुना–अल; यचामि–आउ । १६. **पावमानीं पितॄन्**–मु; पावमानी पितॄं–अल; पावमानीः पितॄन्–ऋब्र; पावमानं पितॄन्–बृहद्दे–मॅ–आउ–जुना. **ध्यायेयश्च**–मु–बृहद्दे–मॅ–आउ; ध्यायेम्यश्च–अल–जुना–ऋब्र. **पितॄंस्तस्योप**°–ऋब्र–अल–जुना–मु–बृहद्दे; ऋषींस्तस्योप°–मॅ–आउ. **तिष्ठेत**–अल–जुना; वर्तेत–बृहद्दे–औध; वर्तेत तत्–ऋब्र–मॅ–मु–आउ । १७. **ऋषयस्तु**–अल–जुना; अथ ते वै–बृहद्दे. **तेपुः**–मॅ–मु–आउ; तेपे–अल–जुना. **स्वर्गजिगीषवः**; सर्वजिगीषमाः–अल; सर्वजिगीषिताः–जुना. **तपसस्तपसोऽग्र्यं तु**–अल–जुना; ततस्ते तपसोग्रेग–बृहद्दे; तपन्तस्तपसोऽग्रेग–औध.

[illegible] **वै**व–जुना; जपेन्मन्त्रै–मॅ–मु–मु–आउ । २०. **पावमानं**–जुना–अल; पावमान्यः–बृहद्दे. **शुक्रं ज्योतिः**–ऋब्र–मॅ–मु–आउ–जुना–बृहद्दे; शुक्रज्योतिः–अल. **ऋषींस्**–मु–जुना–ऋब्र; पितॄंश्च–मॅ: पितॄंस्–आउ; ऋषींश्च–अल. **तिष्ठेत**–अल; तिष्ठे तत्–मॅ–मु–ऋब्र–आउ. २०[२] बृहद्देवतायां विभिन्नः ।

औधपुस्तके विंशतिमन्त्रानन्तरमेको मन्त्रोऽधिकः स यथा–

एतत्पुण्यं पापहरं रोगमृत्युभयापहम् । पठतां शृण्वतां चैव ददाति परमां गतिम् ॥

११

ईळैव वामनु वस्तां घृतेन यस्याः पदे पुनते देवयन्तः ।
घृतपदी शक्वरी सोमपृष्ठोप यज्ञमस्थित वैश्वदेवी ॥ १ ॥

वैश्वदेवी पुनर्ती देव्यागाद्यस्यामिमा बह्वयस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमाद्येषु वयं स्याम पतयो रयीणाम् ॥ २ ॥
प्र तु द्रव परिकोशं नि षीद० ॥ ऋ. सं. ९. ८७. १

ऋसं ९. ८६ अनन्तरं पठनीयम् ।

मॅ१८–औध ।

१. = अथर्व ७. २७. **इळैव वां**–मॅ; इडैवास्माँ–अथर्व. **घृतेन**–मॅ; व्रतेन–अथर्व । २[1]. **तन्वो वीतपृष्ठाः** = अथर्व ६. ६२. २[1]. २[2] = अथर्व ६. ६२. २[2]. **मदन्तः**–का–मॅ; गृणन्तः–अथर्व. **सधमाद्येषु**–का; सधमादेषु–मॅ–अथर्व ।

१२

यत्र लोक्यास्तनुत्यजाः श्रद्धया तपसा जिताः ।
तेजश्च यत्र ब्रह्म च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥ १ ॥
यत्र देवा महात्मनः सेन्द्राः समरुद्गणाः ।
ब्रह्मा च यत्र विष्णुश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥ २ ॥
यत्र तत्परमं पदं विष्णोर्लोके महीयते । देवैः सुकृतकर्मभिस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव॥३॥
यत्रानन्दाश्च मोदाश्च० ॥ ऋ. सं. ९. ११३. ११

ऋसं ९. ११३. १० अनन्तरं पठनीयम् । मॅ–मु–औध–पुस्तकेष्विदं नवममण्डलान्ते पठनीयम् । आउ–आश्वमंसं[1]–पुस्तकयोरिदं ऋसं ९. ११३ अनन्तरं पठनीयम् ।

मॅ१९–मु–आउ१४–औध–ऋमं–आश्वमंसं–अल–जुना ।

ऋमं–आश्वमंसं[1]–पुस्तकयोश्चतुर्मन्त्रात्मकमिदं सूक्तम् । आश्वमंसं[2]–पुस्तके मण्डलान्तेऽस्य सूक्तस्य केवलमन्त्या ऋगस्ति । मॅ–मु–आउ–अल–जुना–पुस्तकेष्वेतत्पञ्चर्चम् । १–२ = मॅ–मु–आउ ३–४; ३ = मॅ–मु–आउ १ । औधपुस्तके षड्ऋचम् । मॅ–मु–आउ–अनुसारेण पञ्च, ऋमं-पुस्तके या चतुर्थी सा चात्र षष्ठी । **१. लोक्याः**—का; लोकाः–ऋमं–मॅ–मु–आउ–जुना. **तनुत्यजाः**—का–आउ; तनूत्यजाः–ऋमं–मॅ–मु–जुना. **ब्रह्म**; ब्रह्मा–ऋमं–जुना; ' तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ' इत्यंशो ऋसं ९.११३ सूक्ते प्रतिमन्त्रं समानः । **२. महात्मनः**–का; महात्मानः–इतरेषु. **सेन्द्राः स**°–का; सेन्द्राश्च–मॅ–मु–आउ; °श्चेन्द्राश्च–जुना । ऋमं–आश्वमंसं[1]–पुस्तकयोश्चतुर्थो (औधपुस्तके षष्ठो) मन्त्रोऽधो दीयते–

यत्र तद्विष्णुर्महीयते नराणां च नराधिपम् ।
यत्र इक्ष्वाकुगदाधरः स्मरणं मुक्तिश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥ इति परिशिष्टम् ॥

तद्विष्णु°; विष्णु°–आश्वमंसं. **च नराधिपं**; नराधिपतिं–आश्वमंसं. °**गदाधरः**; °गदा°–आश्वमंसं; °गदाधर°–औध. मॅ–मु–आउ–औध–पुस्तकस्थौ द्वितीयपञ्चममन्त्रौ—

यत्र तत्परमाव्यं भूतानामधिपतिः ।
भावभावी च यो गीश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥
यत्र गङ्गा च यमुना यत्र प्राची सरस्वती ।
यत्र सोमेश्वरो देवस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥

एतौ मन्त्रौ ऋमं–पुस्तकेऽप्यन्यत्रोपलभ्येते ' यत्र तत्परमं पदम् ' इत्यनेन सह । एतौ अल–जुना–पुस्तकयोश्चतुर्थपञ्चमौ । **परमाव्यं**; परमाप्यं–औध. °**धिपतिः**; °धिपतिं–ऋमं–आउ–जुना–औध;

°मधिपति–आउ. **भावभावी**; भावभागी–ऋमं. **च यो गीश्च**; वयो गीश्च–आउ; च योगीश्च–औध; च योगी च–ऋमं. **यमुना**; यमुना च–मु–जुना।

१३

सस्रुषीस्तदपसो दिवा नक्तं च सस्रुषीः। वरेण्यक्रतुरहमा देवीरवसे हुवे ॥ १ ॥
ओ चित्सखायं सख्या ववृत्याम्० ॥ ऋ. सं. १०. १०. १

ऋसं १०. ९ अनन्तरं पठनीयम्।

अथर्व ६. २३. १; वैसू ४. १४; कौसू ७. १४; मॅ २०–आउ १५–आश्वमंसं–आचं–संभा–औध–अल–जुना।

°**क्रतु**°–का–अथर्व; °क्रतू°–मॅ–आउ–जुना–आचं–संभा. °**रवसे**–मॅ–आउ–जुना–उद्गीथ–आचं–संभा; °रवसा–का. **आ देवीरवसे हुवे**; अपो देवीरुप ह्वये–अथर्व।

ऋग्वेदसंहिताया दशमे मण्डले उद्गीथभाष्यमंशत उपलब्धमस्ति। ऋसं १०. ४६. ५ सायणभाष्ये उद्धृतादुद्गीथवचनादेते उद्गीथाचार्याः सायणपूर्वकालीना इति व्यक्तं प्रतीयते। ऋसं १०. ९ भाष्यारम्भे इदं सूक्तं 'खैलिक्या सह दशर्चम्' इत्युक्त्वा 'सस्रुषीः' इत्यादिको मन्त्रस्तैरुद्धृत्य व्याख्यातः। तद्व्याख्यानं शोधयित्वात्रोद्धियते–'अब्देवत्या खैलिक्येषा। सस्रुषीः स्रवणशीला निम्नानुसारिण्यः तदपसः तदेव स्रवणशीलत्वं निम्नानुसारित्वमपः कर्म यासां ताः। दिवा नक्तं च अहनि रात्रौ च सस्रुषीः। वरेण्यक्रतुः स्नानपानपावनादिवरणीयकर्मा अहं देवीरपः आ हुवे आह्वयामि अवसे आत्मनो रक्षणार्थं तर्पणार्थं वा'।

सप्तमाष्टकेऽष्टाविंशतिवर्गानन्तरं (दशमे मण्डले अष्टादशसूक्तानन्तरं) षष्ठोऽध्यायः समाप्तः। तथा च 'भद्रं नो' इति दशर्चं विंशं सूक्तमिति सर्वानुक्रमणीतोऽपि लभ्यते। उद्गीथकृते ऋग्वेदभाष्ये तावत् 'भद्रं नो' इत्येकर्चं विंशं सूक्तं विद्यते तदनन्तरं च सप्तमाष्टके षष्ठोऽध्यायः (= चतुष्पञ्चाशोऽध्यायः) समाप्तः 'अग्निमीळे भुजाम्' इति द्वितीयेन मन्त्रेण चाग्निममेकविंशं सूक्तं प्रारभ्यते। तच्च 'जुषद्धव्या' इति पञ्चम(चतुर्थ)मन्त्रानन्तरं त्रुटितम्। अनन्तरं 'कुह श्रुत इन्द्रः' इति द्वाविंशं सूक्तमागतम्। उद्गीथभाष्यगतोऽयं गणनाभेदः किंमूल इत्यन्वेषणीयम्।

१४

एहीन्द्र वसुमता रथेन साकं सोममपिबन्मदाय।
हत्सु पीत्वा मन्दसानो मरुद्भिः स्तीर्णं याहि वृत्रहत्याय वज्री ॥ १ ॥
इन्द्र सोममिमं पिब० ॥ ऋ. सं. १०. २४. १

ऋसं १०. २३ अनन्तरं पठनीयम्। **हृत्सु पीत्वा** → ऋसं ८. ४८. १२ : हृत्सु पीतो.

मॅ२१–मु–आउ१६–अल–जुना–आश्वमंसं–औध–ऋमं–पुस्तकेषु ऋसं १०. ७५. ५ अनन्तरं पठनीयमेकर्चं परिशिष्टं दृष्टमस्ति तद्यथा—

सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतन्ति।
ये वै तन्वं १ वि सृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते ॥ १ ॥

संगथे–मॅ–मु–औध–ऋमं–आउ; संगते–मॅक्समुल्लरमहाशयानां केषुचिल्लिखितपुस्तकेषु।

१५

मम व्रते हृदयं ते दधामि मम चित्तमनु चित्तं ते अस्तु।
मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नि युनक्तु मह्यम् ॥ १ ॥
धाता त्वा मह्यमदद्न्मह्यं धाता दधातु त्वा। प्र धाता त्वा मह्यं प्रा यच्छन्मह्यं त्वानुमतिर्ददौ ॥२॥

अनुमतेऽनु मन्यस्व स्वानुमतेऽनु मन्यस्व ।
मह्यमेनं समा कुरु वाचा चक्षुषा मनसा मयि संयतम् ॥ ३ ॥
आ हरयत्ते हृदयं तदस्तु हृदयं मम । अथो यन्मम हृदयं तदस्तु हृदयं तव ॥ ४ ॥
हृदयेन हृदयं प्राणेन प्राणमगृभम् । गृभ्णामि चक्षुषा चक्षुर्गृभ्णामि मनसा मनः ॥ ५ ॥
आकूतं चित्तं चक्षुः श्रोत्रमथो बलम् । श्रियं यो देवा जग्मुस्तया बध्नामि ते मनः ॥ ६ ॥
अन्नमयेन मणिना प्राणसूत्रेण पृश्निना । बध्नामि सत्यग्रन्थिना हृदयं च मनश्च ते ॥ ७ ॥
आवर्तनं निवर्तनं मया संवननं तव । इन्द्राग्नी अश्विनोभा त्वष्टा धाता च चक्रतुः ॥ ८ ॥
येन चित्तेन वदसि येन त्वान्योऽभि दासति । सर्वं तदग्न आ भर मह्यं दासाय राध्यः ॥९॥
अनुवनं सुवनमुद्वनं वनम् । घर्मस्य पश्य रूपाणि तेन बध्नामि ते मनः ॥ १० ॥
सं मा विशन्तु पशवः सं मा विशन्त्वोषधीः । सं मा विशन्तु राजानो यथाहं कामये तथा ॥ ११ ॥
अन्तरं च नेदीयश्च मनो देवा उपासते ।
अनन्तरोऽहं तुभ्यं भूयासं हृदयं मे भूयासमनन्तरम् ॥ १२ ॥
सभा समासावितुश्चावतामुभे प्रजापतेर्दुहितारौ सचेतसौ ।
संगथेषु पदे चारु नमो वैश्वानराय अधि ॥ १३ ॥
[...] य पदेन त आ ते प्राणान् समा ददे । अथो एतत्समाददे यदन्येषु जनेषु च ॥ १४ ॥
अहं ते चक्षुषा चक्षुरहं ते मनसा मनः । अहं गन्धर्वरूपेण सन आ वर्तयामि ते ॥१५॥
हतचित्तो हतमनो हतो अन्येषु ते मनः । सर्वेषु कृष्णकेशेषु हतो अन्येषु ते मनः ॥ १६ ॥
सर्वासु शुद्धदन्तीषु हतो अन्यासु ते मनः । मां चैव पश्य सूर्यं च मा तृतीयं कदा चन ॥१७॥
स्मृतिरसि कामसंजननी मयि ते कामो अस्तु । यत्ते मनो वरेण्यं लोकेषु बहुधा कृतम् ॥१८॥
समुद्रमिव सरितः सर्वं त्वानुवर्तयामसि । आ दीपयामि ते हृदयमग्ना मेऽवं प्र दीपयामसि ॥१९॥
एष ते हृदयेऽङ्गारो दीप्तस्ते अस्मि दह्यसे ।
मया ते दह्यमानस्याग्निर्दीप्तेन तृप्यतु भूमिर्दीप्तेन तृप्यतु ॥ २० ॥
चित्तं च ते मनश्च ते मयि धाता नि यच्छतु । मयि ते चित्तमायत्तं मनस्ते मयि समश्नुते ॥२१॥
आवृतास्ते मया प्रा ॥ २२ ॥
॥ २३ ॥
॥ २४ ॥
॥ २५ ॥
नष्टं ते कृपमन्यस्मिन्मयि ते रमतां मनः । अनु [ ] मनः ॥ २६ ॥
चक्षुः श्रोत्रं चाधीतं च सर्वं ते अहमा ददे । हृद्य ऋषिरजायत दे [ ] ॥२७॥
तदेवैष्यदधुर्हृदयेष्वर्थदर्शिनम् । सर्वज्ञं सर्वदर्शिनं स नः कर्माणि साधय ॥ २८ ॥

ये [ ] स्तव जातवेदः प्रविष्टा अग्निर्दुहृदयस्य कर्म ।
तेषामहं भागधेयं जुहोमि तां मा देवाः सर्वैः कामैस्तर्पयन्ताम् ॥ २९ ॥
भृगूणामङ्गिरसां तपसो गृणं संयतम् । कुशिकाभ्यवराणां च मन आ वर्तयामि ते ॥ ३० ॥
यत्ते मनो वरेण्यं लोकेषु बहुधा कृतम् । तत्त आ वर्तयामस्यग्निश्चाहश्च ब्राह्मणः ॥ ३१ ॥
यत्कक्षीवान् संवननं पुत्रो अङ्गिरसामवेत् । तेन नोऽद्य विश्वे देवाः सं प्रियां समवीवनन् ॥ ३२ ॥

इदमुत्तरं च ऋसं १०. ८४ अनन्तरं पठनीयम् । खिलानुक्रमण्यनुसारेणेदं हृद्यसूक्तम् । ' सुहृद्भूत्वा-सुहृद्यस्य देयं संवननं स्मृतम् । एकैकमभिरूपं तु हृद्यसूक्ताद्यतः पुनः ' इति ऋग्वि ३. २१. २-३ । बृहद्दे ७. ११७ अपि द्रष्टव्यम्[1] । १ ≡ पारा १. ८. ८; २. २. १६; मारा १. १०. १३; २२. १०; आश्वगृ १. २१. ७; शांगृ २. ४. १; मंब्रा १. २. १५;→ मंदी; ऋसं; संकौ (उपनयन); हिगृ १. ५. ११.

१. → अथर्व ६. ९४. २. **हृदयं ते**–का–ऋसं–शांगृ–संकौ; ते हृदयं–इतरेषु. **दधामि**–का–शांगृ–आश्वगृ–पारा–संकौ–ऋसं–मंदी; दधातु–मारा–मंब्रा. **एकव्रता**–का; एकव्रतो–ऋसं–संकौ; एकमना–इतरेषु. **बृहस्पतिः**–का–ऋसं–मंब्रा–शांगृ–संकौ; प्रजापतिः–मारा–पारा–आश्वगृ–मंदी । ३. **अनुमतेऽनु मन्यस्व**→ गोगृ १. ३. २; खागृ १. २. १८; आपगृ १. २. ३; हिगृ १. २. ९. ४. → मंब्रा १. ३. ९ : यदेतद्धृदयं तव तदस्तु हृदयं मम । यदिदं हृदयं मम तदस्तु हृदयं तव । ७. ≡ मंब्रा १. ३. ८; गोगृ २. ३. २१. **अन्नमयेन**–का; अन्नप्राशेन–मंब्रा–गोगृ. **हृदयं च मनश्च**–का; मनश्च हृदयं च–मंब्रा । ८. → तैसं ३. ३. १०. १: आ वर्तन वर्तय नि निवर्तन वर्तयेन्द्र । ९. **अग्न**; अत्र ? १३[1]. ≡ अथर्व ७. १२. १: सभा च मा समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने । १८[2]. = ३१[1]. २०. **दांसेन**[2]; दांसेन न–का । २९[2] ≡ बृउ ६. ३. १. **तेषां**; तेभ्यो–बृउ. **तां मा देवाः**; ते मा तृप्ताः–बृउ. **तर्पयन्तां**; तर्पयन्तु–बृउ । ३०[1]. **गृण**–का; उग्रेण ? → बृहद्दे ६. १४१ : तपसोग्रेण; खिल ३. १०. १७ : तपसोऽग्र्यं । ३२. = खिल ५. १. ३; संकौ (कन्यादान) ।

१६

उत्तुदैनं गृहपते ज्ञातेभ्यः शयनादधि । ग्रीवा गृहीत्वोत्तिष्ठ पादतो न विवेशय ॥ १ ॥
उत्खादुदन्तु मरुत उत्समुद्रमतो दधि । कृत्वायमग्निर्दहतु कृत्वा तपतु सूर्यः ॥ २ ॥
कामशर्म्यार्थेऽभितप्तां यथा स्त्रियं शोषयसि । एवं शोषय नोऽरातीर्दिवा नक्तं दशस्यतम् ॥ ३ ॥
इमां मे मित्रावरुणौ कृधि चित्तेन व्यस्यताम् । दत्वा पीत्वाग्रतः कृत्वा यथास्यां देवशो वशे ॥ ४ ॥
परान्कृणुष्व दासान् देवीर्वशानन्ववायिनः । अधिष्ठाय पदा मूर्ध्नि सान्वयाञ्छश्वतीः समाः ॥ ५ ॥
ऋतुभिष्ट्वार्तवेभिरायुषा सह वर्चसा । संवत्सरस्य तेजसा तेन मा सह शुन्धत ॥ ६ ॥
अनेन ब्रह्मणाग्ने त्वमयं चेन्द्रो न ईळितः । सम्राजं चाधिपत्यं च स्वानां कृणु तमुत्तमम् ॥ ७ ॥
अग्ने नि जहि संहितानिषून् मर्मणि मर्मणि । खादिरं हृदि शङ्कून्नो द्विषतो न विवेशय ॥ ८ ॥
सत्येनोत्तभिता भूमिः० ॥ ऋ. सं. १०. ८५. १

ऋसं १०. ८४ अनन्तरं पठनीयम् । इदं परागदास्यार्षमिति खिलानुक्रमणी । ऋग्वि ३. ११२-११४; बृहद्दे[3] ७. ११८ मध्ये पराकदास इत्यस्यर्षेर्नाम [बृहद्दे–' पराकदास आग्नेयं यदुदित्यष्टकं परम् ।

1. Comp. Bṛhaddevatā, part II, p. 281
2. Cf. A. B. Keith, JRAS 1907, p. 225
3. Comp. Bṛhaddevatā, part II, p. 281

मैत्रावरुण्युक्तत्रास्ति चतुर्थ्यैन्द्राग्न्युपोत्तमा '॥ ऋविध–' पराकदासस्य विधिं हृद्येनोक्तं विदुर्बुधाः । क्षीणां संवननं चैतत्पुंसामपि विधीयते ॥ द्वेष्यं तु ज्ञातिनामेव जयश्चैव सदा युधि । खादिरं कारयेच्छङ्कुं हृदि तं संनिवेशयेत् । कृत्वा प्रतिकृतिं पूर्वं पांसुभिर्वाथवा तुषैः । इषुमप्यनुमन्त्र्यैव संग्रामं संप्रकल्पयेत् '॥] अस्य सूक्तस्य पञ्चममन्त्रस्य प्रथमपादादृषेर्नामेदं संपन्नं दृश्यते । चतुर्थो मन्त्रो मित्रावरुणौ स्तौति सप्तमश्चेन्द्रमिति यत् बृहद्देवतायामुक्तं तत्सत्यमेव ।

१. **शयनात्** → अथर्व ३. २५. १ : उत्तुदस्त्वोत्तुदतु मा धृथाः शयने स्वे । २. **समुद्रं**; समुद्रा–का । ६. = अथर्व ५. २८. ११; हिगृ. १. ११.२. **°ष्टवार्तवैरायुषा सह वर्चसा**–का; °ष्टार्तवैरायुषे वर्चसे त्वा–अथर्व–हिगृ (हिगृ-मध्ये ' त्वा ' नास्ति). **तेजस्त**–का; धायसा–हिगृ. **तेन मा सह शुन्धत** = ऋसं १०. १७. १४; तेन संहनु कृण्मसि–अथर्व; तेन सञ्जनुगृह्णासि–हिगृ । ८. **खादिरं** → ऋविध. ३. २१ : खादिरं कारयेच्छङ्कुं हृदि तं संनिवेशयेत् । ५. **शश्वतीः समाः**; शाश्वतीः समाः–का[1] ।

१७

ध्रुवैधि पोष्या मयि मह्यं त्वादाद्बृहस्पतिः । मया पत्या प्रजावती सं जीव शरदः शतम् ॥ १ ॥
विं हि सोतोरसृक्षत० ॥ ऋ. सं. १०. ८६. १

ऋसं १०. ८५ अनन्तरं पठनीयम् । अथर्व १४. १. ५२; शांगृ १. १७; पारा १. ८. १९; आपमं १. ८. ९; ऋमं–मंदी–विप-मॅ२२-मु–आउ१७-आश्वमंसं–अल.

ऋमं–मॅ–मु–आउ–अल–जुना–आश्वमंसं–पुस्तकेष्वस्मान्मन्त्रात्पूर्वं पञ्च मन्त्रा अधिकाः । बृहद्दे ७. १३७ अनुसारेणार्यं मन्त्रः ऋसं १०. ८५ सूक्तस्यान्तिमः [→ ' आ नः (= ऋसं १०. ८५. ४३) प्रजापते इमां (= ऋसं १०. ८५. ४५) ऐन्द्री चान्त्या बृहस्पतेः ' ।] । स च बृहस्पतिं स्तौति[2] ।

ध्रुवैधि; ममेयमस्तु–अथर्व. **मयि**; अथर्ववेदे नास्ति. **पोष्या**–अथर्व–आपमं–ऋमं–विप–मॅ–मु–आउ; पोष्ये–पारा–मंदी. **प्रजावती**; प्रजावति–अथर्व ।

ऋमं–मॅ–मु–आउ–आश्वमंसं–पुस्तकेषु वर्तमानाः पञ्च मन्त्रा अधो दीयन्ते—

अविधवा भव वर्षाणि शतं साग्रं तु सुव्रता । तेजस्वी च यशस्वी च धर्मपत्नी पतिव्रता ॥ १ ॥
जनयद्बहुपुत्राणि मा च दुःखं लभेत्क्वचित् । भर्ता ते सोमपा नित्यं भवेद्धर्मपरायणः ॥ २ ॥
अष्टपुत्रा भव त्वं च सुभगा च पतिव्रता । भर्तुश्चैव पितुर्भ्रातुर्हृदयानन्दिनी सदा ॥ ३ ॥
इन्द्रस्य तु यथेन्द्राणी श्रीधरस्य यथा श्रिया । शंकरस्य यथा गौरी तद्भर्तुरपि भर्तरि ॥ ४ ॥
अत्रेर्यथानुसूया स्याद्वसिष्ठस्याप्यरुन्धती । कौशिकस्य यथा सती तथा त्वमपि भर्तरि ॥ ५ ॥

२ **लभेत्**; लभेः–ऋमं ।

१८

एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं वि भात्येकैवेदं वि बभूव सर्वम् ॥ १ ॥
यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति ।
यो अनूचानो ब्राह्मणो युक्त आस्ते को स्वित्तत्र यजमानस्य संवित् ॥ २ ॥
यावन्मात्रमुषसो न प्रतीकम्० ॥ ऋ. सं. १०. ८८. १९

1. Cf. A. B. Keith, JRAS 1907, p. 225
2. Comp. Bṛhaddevatā, part II, p. 287

ऋसं १०. ८८. १८ अनन्तरं पठनीयम्। शांश्रौ १६. १३. १८ अपि तदेव दर्शयति। ऋसं १०. ८८. १८ भाष्ये 'अत्रोत्तराणि वालखिल्यसंहितायां दर्शितानि' इत्युक्त्वा 'एक एवाग्निः' इति मन्त्र उद्धृतः सायणाचार्यैः स्वकीय ऋग्वेदभाष्ये। शाङ्खायनशाखायां दशमं वालखिल्यसूक्तमपठित्वा 'एक एवाग्निः' 'यमृत्विजो' इति तत्स्थं मन्त्रद्वयं 'यावन्मात्रम्' इत्यस्मात्पूर्वं खिलत्वेन पठन्तीति चरणव्यूहभाष्ये लिखितम्। एवं जुनागडलिखितपुस्तके 'यमृत्विजो' इत्यादि वालखिल्यं नास्ति 'एक एवाग्निः' 'यमृत्विजो' इति मन्त्रौ च 'यावन्मात्रम्' इत्यस्मात्पूर्वं लिखितौ। १. = वालखिल्य १०. २ (ऋसं ८. ५८. २). **प्रभूतः**–मॅ–मु–आउ–जुना; प्रभूत–का. **एकैवा**–का–जुना; एकं वा–मॅ–मु–आउ। २. = वालखिल्य १०. १ (ऋसं ८. ५८. १). **आस्ते**–का; आसीत्–मॅ–मु–आउ।

१९

उदपप्तताम वसतेर्वयो यथा रिणन्त्वा भृगवो मन्यमानाः।
पुरूरवः पुनरस्तं परेह्या मे मनो देवजना अयान्त्स्युः ॥ १ ॥
प्र ते महे विदथे शंसिषं हरी० ॥ ऋ. सं. १०. ९६. १

ऋसं १०. ९५ अनन्तरं पठनीयम्। जुनागडलिखितपुस्तक इदमुपलभ्यते।

१[1] = ऋसं १. १२४. १२; ६. ६४. ६: उत्ते वयश्चिद्वसतेरपप्तन्. १[2]. = ऋसं १०. ९५. २. **उदपप्तताम**–जुना; उदपप्तम–का. **रिणन्त्वा**–का; रणंत्वा–जुना. **परेह्या मे**–जुना; परेहि यामे–का. **अयान्त्स्युः**–जुना; अयात्स्वः–का।

२०

[यच्च कृतं] यदकृतं यदेनश्चकृमा वयम्। ओषधयस्तत्स्मात्पान्तु दुरितादेनसस्परि ॥ १ ॥
बृहस्पते प्रति मे देवतामिहि० ॥ ऋ. सं. १०. ९८. १

ऋसं १०. ९७ अनन्तरं पठनीयम्। जुनागडलिखितपुस्तक इदमुपलभ्यते। **यच्च कृतं**–जुनागडलिखितपुस्तके। च इति स्वरितं कृ इत्यनुदात्तं च। का-पुस्तकेऽत्र त्रुटिर्वर्तते। 'यद्' इति खिलानुक्रमणीतः आद्यं पदमुद्धृत्य 'अचित्तम्' इति शेफ्टेलोवित्झ्महाशयैरभ्यूहितमासीत् (= यदचित्तं)।

यदेनश्चकृमा वयं = वासं ३. ४५; लाश्रौ २०. १२. १२।

२१

असौ या सेना मरुतः परेषामभ्यैति न ओजसा स्पर्धमाना।
तां गूहत तमसापव्रतेन यथामीषामन्यो अन्यं न जानात् ॥ १ ॥
अन्धा अमित्रा भवताशीर्षाणोऽहय इव। तेषां वो अग्निर्दग्धानामिन्द्रो हन्तु वरंवरम् ॥ २ ॥

इदमुत्तरं च ऋसं १०. १०३ अनन्तरं पठनीयम्[1]।

१. = साम २. ९. ३. ४. ३; अथर्व ३. २. ६; वासं १७. ४७; आसू; मंदी। २. = साम २. ९. ३. ८. २; अथर्व ६. ६७. २. इदमृग्द्वयं मॅ २३–मु–आउ १८–अल–जुना–ऋब्र(शान्तिपाठः)–औंध–ऋमं–आश्वमंसं–पुस्तकेषूपलभ्यते। १[1]. **अभ्यैति न ओजसा**–का–वासं–ऋमं–मॅ–मु–आउ–जुना–आसू–मंदी–ऋब्र; अभ्येति न ओजसा–साम; अस्मानैत्यभ्योजसा–अथर्व. १[2]. = ऋसं ५. ४०. ६: गूहत् सूर्यं तमसापव्रतेन. **गूहत**–का; विध्यत–अथर्व. **यथामीषां**–का–मॅ–आउ–जुना; यथामीषा-

1. Cf. Bṛhaddevatā, Part II, p. 297

ऋमं-ऋब्र-मु; यथामी-वासं-आसू-मंदी; यथैतेषां-साम; यथैषां-अथर्व. **जानात्**-का-साम-अथर्व-ऋमं-मॅ-मु-आउ-जुना; जानन्-वासं-आसू-मंदी. २. = ऋसं १०. १०३. १२[२]. **अन्धा अमिषा भवता**; मूढा अमित्राश्चरता-अथर्व. °**शीर्षाणोऽहय**-का-साम; °शीर्षाणा अहय-ऋमं-मॅ-मु-आउ-जुना-ऋब्र; °शीर्षाण इवाहयः-अथर्व. **अग्निदग्धानां**-का-जुना; अग्निमूढानां-अथर्व; अग्निदग्धाना-मग्निमूळ्हानां-ऋमं-मॅ-मु-आउ-ऋब्र; अग्निनुन्नानां-साम. **वरंवरं**; वरंवनम्-ऋब्र.

२२

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥ १ ॥
इयं पित्रे राष्ट्र्येत्यग्रे प्रथमाय जनुषे भूमनेष्टाः ।
तस्मा एतं सुरुचं ह्वारमह्यं घर्मं श्रीणन्ति प्रथमाय धासेः ॥ २ ॥
महान्महीं अस्तभायद्वि जातो द्यां पिता सत्य पार्थिवं च रजः ।
स बुध्न्यादाष्ट जनुषाभ्यग्रं बृहस्पतिर्देवता तस्य सम्राट् ॥ ३ ॥
अभि त्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभिप्रियं मतिं कविम् ।
ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥ ४ ॥
तां सूर्याचन्द्रमसा गातुवित्तमा महस्तेजो वसुमद्भ्राजतो दिवि ।
सामात्मना चरतः सामचारिणा यमयोर्व्रतं न वसे जातु देवयोः ॥ ५ ॥
उभावन्तौ परि यात अर्म्या दिवो न रश्मीँस्तनुतो व्यर्णवे ।
उभा भुवन्ती भुवना कविक्रतू सूर्या न चन्द्रा चरतो हतामती ॥ ६ ॥
पती द्युमद्विश्वविदा उभा दिवः सूर्या उभा चन्द्रमसा विचक्षणा ।
विश्ववारा वरिवोभा वरेण्या तां नोऽवतं मतिमन्ता महित्रता ॥ ७ ॥
विश्ववपरी प्रतरणा तरन्ता सुवर्विदा दृशये भूरिरश्मी ।
सूर्या हि चन्द्रा वसु त्वेषदर्शता मनस्विनो भानु चरतो नु सं दिवम् ॥ ८ ॥
अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः ।
अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् ॥ ९ ॥
पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ।
विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ॥ १० ॥
असावि सोमः पुरुहूत तुभ्यम्० ॥ ऋ. सं. १०. १०४. १

इत्यृग्वेदे खिले तृतीयोऽध्यायः ॥

ऋसं १०. १०३ अनन्तरं पठनीयम् । खिलानुक्रमणीमतेनेदं वामदेव्यस्य नकुलस्यार्षम् । निरुक्त-टीकाकारो दुर्गाचार्योऽपि ' वि सीमतः सुरुचो वेन आवः ' (निरु १. ७) ' ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि ' (निरु ६. १२) इति मन्त्रौ नकुलस्य वामदेव्यस्य सूक्तादुद्धृताविति ब्रवीति ।

नकुलसूक्तस्य चतुर्थे मन्त्रे द्वितीयः पादोऽष्टादशाक्षर इति ऋक्प्रातिशाख्ये (१७.४५) निर्दिष्टम्–'एकादशैव च्छन्दसि पादा ये षोळशाक्षराः। सर्वे त्रिकद्रुकीयासु नाकुलेऽष्टादशाक्षरः'॥ तथा चात्र बृहद्देवता[1] (८. १४-१६[1])—'चतुर्थी बार्हस्पत्या स्यान्नाकुले च महानिति। द्रुचस्तु मारुतः प्रेतेत्यैन्द्री वा ब्रह्म यत्परम्॥ तत्रानिरुक्तसूक्तादावृगेका सूर्यमर्चति। धर्मपराश्चतस्रस्तु सवितारमभीति या॥ सूक्तशेषस्य षळृचः सूर्याचन्द्रमसौ सह'।

'असौ या सेना' इति महद्देवताकं द्रुचं सूक्तं ऋसं १०.१०३ अनन्तरं पठनीयमिति 'द्रुचस्तु मारुतः' इत्यनेन सिद्धम्। तेनैव सह 'ब्रह्म जज्ञानम्' इति सूक्तं पठनीयमिति यत् बृहद्देवतायामुक्तं तदपि खिलानुक्रमण्या संगच्छते। अस्य नकुलसूक्तस्य देवताज्ञापनविषये बृहद्देवतायाः खिलानुक्रमण्याश्च प्रायः समानत्वं दृश्यते। '..... सौरी धर्मस्तुतिर्बार्हस्पत्या सावित्र्यष्टिर्धर्मपरा एताः सौर्यश्चान्द्रमस्यश्च शेषा जगत्यः' इति खिलानुक्रमणी। अस्य प्रथमानुक्तदेवताका ऋक् सूर्यं स्तौति ('तत्रानिरुक्तसूक्तादावृगेका सूर्यमर्चति')। अथर्ववेदानुक्रमण्यां (४. १. १) निरुक्ते (१. ७) चेयमृगादित्यं स्तौतीत्येवोक्तम्। 'ब्रह्म जज्ञानमित्यस्य नकुल ऋषिः ब्रह्मा देवता' इति तु संकौ। द्वितीया 'इयं पित्रे' इत्याद्या धर्मस्तुतिपरेति खिलानुक्रमणीवचनम्। धर्मशब्दस्य साक्षान्निर्देशोऽपि तस्यामृच्युपलभ्यते। बृहद्देवतापाठेऽस्या ऋचो देवता नोक्ता दृश्यते। 'धर्मपराः' इत्यस्य स्थाने 'धर्मं परा' इति बृहद्देवताया एकस्मिन् लिखितपुस्तक उपलभ्यमानः पाठः खिलानुक्रमणीवचनेन समन्वियात्। परा (= द्वितीया) धर्मं स्तौतीति तस्यार्थो भवेत्। तृतीया 'महान्' इति बृहस्पतिं स्तौति ('नाकुले च महानिति')। 'अभि त्यम्' इति चतुर्थी सवितृदेवताका ('सवितारमभीति या')। एताश्चतस्र ऋचः प्रवर्ग्ये विनियुक्ताः ('धर्मपराश्चतस्रस्तु') → ऐब्रा १. १९; आश्रश्रौ ४. ६; शांश्रौ ५. ९। शिष्टाः षडृचः सूर्याचन्द्रमसौ स्तुवन्ति[2] ('सूक्तशेषस्य षळृचः सूर्याचन्द्रमसौ सह')।

१–४ ≡ आश्रश्रौ ४. ६; ऐब्रा १. १९. १, २, ४ ≡ शांश्रौ ५. ९. १–३ ≡ अथर्व ४. १. १, २, ५. ५–१० ≡ तैब्रा २. ८. ९. १, २

१. → मैसं २. ७. १५; कास १६. १५; २०. ५; ३८. १४; कपिसं २५. ५; ३२. ७; तैसं ४. २. ८. २; ५. २. ७. १; वासं १३. ३; साम १. ४. १. ३. ९; सामविब्रा १. १. ४. ८; तैब्रा २. ८. ८. ८.; ३. १२. १. १; शांब्रा ८. ४; तैआ १. १३. ३; कौसू ९. १; १५. २; १८. २५; १९. १; २५. १५; ३८. २३; ५१. ७; ७९. ११; १३९. १०; बौधसू २. १८. ७; वैसू १४. १; शांश्रौ १५. ३. ६; १८. १. २; आचं; मंदी; पञ्चामृ; ऋब्र(यज्ञोपवीत); प्रर; ऋमं; संकौ; शांक; मामंसं; शांम; धर्पशां; धासिं। २. → शांश्रौ १५. ३. ६ भाष्यं; वैसू १४. १। ३. → तैसं २. ३. १४. ६. ४. → साम १. ५. २. ३. ८; मैसं १. २. ५; कासं २. ६; २४. ५; कपिसं १. १९; ३७. ६; तैसं १. २. ६. १; ६. १. ९. ४; वासं ४. २५; अथर्व ७. १४. १-२; कौसू २४. ३; शब्रा १३. ५. १. ११; शांब्रा २३. ८; २७. २; ऋप्रा १७. ४४; वैसू १३. ७; धर्पशां; ऋब्र। ९. ≡ ऋसं १. १०२. २। १०. ≡ ऋसं १०. ८५. १८; मैसं ४. १२. २; तैब्रा २. ७. १२. २; अथर्व ७. ८१. १; १३. २. ११; १४. १. २३.

१[1]. ≐ अथर्व १९. २२. २१ : भूतानां ब्रह्मा प्रथमो ह जज्ञे। २. **पित्रे**–का–आश्रश्रौ–शांश्रौ–ऐब्रा; **पित्र्या**–अथर्व–वैसू. **एत्यग्रे**–का–ऐब्रा–आश्रश्रौ–शांश्रौ; **एवग्रे**–अथर्व. **भूमनेष्ठाः**–आश्रश्रौ–शांश्रौ; **भुवनेष्ठाः**–अथर्व. **श्रीणन्ति**–का–आश्रश्रौ–शांश्रौ; **श्रीणन्तु**–अथर्व. **प्रथमाय**–का–

1. Comp. Bṛhaddevatā part II, pp 296 ff.
2. Cf. also Oldenberg, Hymnen des Ṛgveda I, 363 ff.

अथर्व; प्रथमस्य–आश्वश्रौ–शांश्रौ. **धासे**–का–आश्वश्रौ–शांश्रौ; धास्यवे–अथर्व । **३. अस्तमायत्**–ऐब्रा–तैसं–आश्वश्रौ; अस्कभायत्–अथर्व. **पिता**; तैसं-मध्ये नास्ति. **बुध्न्यात्**–का-अथर्व; बुध्नात्–तैसं-आश्वश्रौ. **आष्ट्र**–का; आष्ट्र-अथर्व. **जनुषाभ्युग्रं**–का-आश्वश्रौ; जनुषाभ्यग्रं–तैसं; जनुषोऽभ्यग्रं–अथर्व. **तस्य**–का; यस्य–तैसं । **४. ओण्योः**; ऊण्योः–तैसं. **कविं**; तैसं-ऋसं-मैसं-अथर्वपुस्तकेषु नास्ति. **कृपा**; कृपात्–अथर्व । **५. गातुवित्तमा**–का; विश्वभृत्तमा–तैब्रा. **भ्राजतो**–का; राजतो–तैब्रा. **सामात्मना**–का; सामात्माना–तैब्रा. **वसे**–का; मणे–तैब्रा । **९. वितर्तुरं**–का-ऋसं; विचर्तुरं–तैब्रा । **१०. अध्वरं**–का; ऽर्णवं–अथर्व. **विश्वान्यन्यो**–का; विश्वान्यो–अथर्व. **भुवनाभिचष्ट**–का-ऋसं; भुवनाभिचष्टे–तैब्रा; भुवना विचष्ट–अथर्व–मैसं. **जायते पुनः**–का; जायसे नवः–अथर्व ।

मॅ(२४)-मु-अल-जुना-औधपुस्तकेषु ऋसं १०.१०६ अनन्तरमधो दीयमानमेकर्चं सूक्तं पठनीयम्–

हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान् ।
शचीमंदन्त उत दक्षिणाभिर्नेंजिह्मायन्त्यो नरकं पताम ॥

निरु १. ११ मध्ये इदमुद्धृतम् । **नरकं**; नरके–औध ।

अथ चतुर्थोऽध्यायः

ॐ आ यस्मिन्नेकानुष्टुभं तु तदा रात्रि चतुष्कमाद्या बृहत्यर्वाङ्नमेका त्रिष्टुब्नमस्ते चतुष्कमइमाखानो वैद्युतमन्त्ये त्रिष्टुभौ यां चत्वारिंशत्प्रत्यङ् कृत्यानाशनमाशीः पाङ्क्त्यन्तमायुष्यं दश दाक्षायणायैकर्चाः[1] सनकः सनाकः सनातनः सनन्दनः सहसंज्ञाः सुमः सुश्रीः सुवाक् सर्वो हिरण्यात्मस्तुतिः पञ्चम्यष्टमीनवम्यौ त्रिष्टुभः सप्तमी शक्करी भूमिः सप्त प्राजापत्या लाक्षा लाक्षास्तवो मेधां नव मेधा मानवी मधावी चतुर्थ्यादिर्महाबृहती पङ्क्तिर्विराड्जगती गायत्री त्रिष्टुबा सूः सप्ताथर्वणः सुभेषज आग्नेयं[2] प्रकृतिः कृतिराकृतिर्विकृतिः संकृतिरभिकृतिरुत्कृतिर्वेनस्तुचं वेनो भाववृत्तं तु येन सप्तोना मानवः शिवसंकल्पो मानसं यासां द्वे अनुष्टुप्पङ्क्ती नेजमेष तृचं प्राजापत्यो नेजमेषोऽनीकवन्तमेका ॥

१. दाक्षायणा एकर्चाः Macdonell, Bṛhaddevatā, part II, p. 305
२. आग्नेयं Macdonell, ibid.; आग्नेयः–का.

१

आ यस्मिन् देववीतये पुत्रासो यन्तु संयतः । अनाधृष्टं विपन्यया प्रति श्रुताय वो धृषत्॥१॥
अहं रुद्रेभिर्वसुभिश्चरामि० ॥ ऋ. सं. १०. १२५. १

ऋसं १०. १२४ अनन्तरं[1] पठनीयम् ।
अनाधृष्टं विपन्यया = शांश्रौ १८. ३. २

२

आ रात्रि पार्थिवं रजः पितुरप्रायि धामभिः ।
दिवः सदांसि बृहती वि तिष्ठस आ त्वेषं वर्तते तमः ॥ १ ॥

1. Cf. Bṛhaddevatā, part II p. 304. Macdonell means to say that this and the next hymn (आ रात्रि) precede RV. X 128. In fact the present hymn (आ यस्मिन्) precedes RV. X. 125.

ये ते रात्रि नृचक्षसो युक्तासो नवतिर्नव । अशीतिः सन्त्वष्टा उतो ते सप्त सप्ततिः ॥ २ ॥
रात्रीं प्र पद्ये जननीं सर्वभूतनिवेशनीम् । भद्रां भगवतीं कृष्णां विश्वस्य जगतो निशाम् ॥ ३ ॥
संवेशनीं संयमनीं ग्रहनक्षत्रमालिनीम् । प्रपन्नोऽहं शिवां रात्रीं भद्रे पारमशीमहि ॥ ४ ॥
ममाग्ने वर्चो विहवेष्वस्तु० ॥ ऋ. सं. १०. १२८. १

ऋसं १०. १२७ अनन्तरं पठनीयम्[1] । ऋमं–मॅ२५-मु-आउ१९-औध–ऋव्र(शांतिपाठः)–आश्वमंसं[1]-पञ्चाशृ-पुस्तकेष्वस्मिन्सूक्ते दश मन्त्रा अधिकाः । जुनागड-पुस्तक इदं सप्तदशर्चम् । अल–आश्वमंसं[2]-पुस्तकयोरिदं पञ्चदशर्चम् । तत्र १-४ = का १-४; ५ = ऋमं ९; ६ = ऋमं १०. शिष्टाः ऋमं-पाठात् सर्वथा भिन्नाः । ऋमं-पाठे ५, ६, ७, ८ मन्त्राणामन्तिमैः पादैः ऋसं १. ९९ इत्येकर्चं सूक्तं संपद्यते । चतुर्दशमन्त्रस्य पूर्वार्धः ऋसं १०. १२७ सूक्तस्य सर्वानुक्रमात् उत्तरार्धश्च ऋविव ४. २८ अस्मादुद्धृतः । द्वादशो मन्त्रः तैआ १०. १. ६५ अनेन समानः । केषुचित्पुस्तकेषु ५-८, १०, ११, १४ मन्त्रास्त्यक्ताः ।

१. = वासं १४. ३२; अथर्व १९. ४७. १; निरु ९. २९; → पैप्प. अथर्व. ६. २०. **पितुरप्रायि धामभिः**; पितरः प्रायुधामभिः–मु-ऋव्र; पितरः प्रयुधामभिः–पैप्प. अथर्व. **बृहती वि**; बृहतीव–पैप्प. अथर्व । २. = अथर्व १९. ४७. ३; → पैप्प. अथर्व ६. २०. **ये ते रात्रि**; एते रात्रे–पैप्प. अथर्व. **युक्तासो**; दृष्टारो–पैप्प. अथर्व; द्रष्टारो–अथर्व. **नवतिर्नव**–मॅ-मु-आउ-अल-जुना-ऋव्र; नवतीर्नव–का. **सन्त्वष्टा**; सन्त्यष्टा–अथर्व; सन्त्वाष्टा–पैप्प. अथर्व. **सप्ततिः**; सप्ततीः–मु-ऋव्र । ३. **निशां**–का- ऋमं-ऋव्र-अल-जुना-मॅ-मु-आउ; दिशां–पञ्चाशृ । ४. **संवेशनीं**–जुना; संवेशिनीं–अल. **संयमनीं**–जुना; संयमिनीं–मु-अल. **ग्रह°**–का-ऋव्र-मॅ-आउ-अल-जुना; गृह°–ऋमं-पञ्चाशृ. ' भद्रे पारमशीमह्यो नमः ' इत्यधिकमितरेषु पुस्तकेषु ।

ऋमं–आदिपुस्तकस्था अधिका मन्त्रा ऋव्र-पाठानुसारेणाधो दीयन्ते—

स्तोष्यामि प्रयतो देवीं शरण्यां बह्वृचप्रियाम् ।
सहस्रसंमितां दुर्गां जातवेदसे सुनवाम सोमम् ॥ ५ ॥
शान्त्यर्थं तद्द्विजातीनामृषिभिः समुपाश्रिताः ।
ऋग्वेदे त्वं समुत्पन्नारातीयतो नि दहाति वेदः ॥ ६ ॥
ये त्वां देवि प्रपद्यन्ति ब्राह्मणा हव्यवाहनीम् ।
अविद्या बहुविद्या वा स नः पर्षदति दुर्गाणि विश्वा ॥ ७ ॥
ये अग्निवर्णा शुभां सौम्यां कीर्तयिष्यन्ति ये द्विजाः ।
तान् तारयति दुर्गाणि नावेव सिन्धुं दुरितात्यग्निः ॥ ८ ॥
दुर्गेषु विषमे घोरे संग्रामे रिपुसंकटे ।
अग्निचोरनिपातेषु दुष्टग्रहनिवारणि दुष्टग्रहनिवारण्यो नमः ॥ ९ ॥
दुर्गेषु विषमेषु त्वं संग्रामेषु वनेषु च ।
मोहयित्वा प्रपद्यन्ते तेषां मे अभयं कुरु तेषां मे अभयं कुर्वो नमः ॥ १० ॥
केशिनीं सर्वभूतानां पञ्चमीति च नाम च ।
सा मां समां दिशां देवी सर्वतः परिरक्षतु सर्वतः परिरक्षत्वो नमः ॥ ११ ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीं शरणमहं प्र पद्ये सुतरसि तरसे नमः सुतरसि तरसे नमः ॥ १२ ॥

1. Cf. Bṛhaddevatā, part II, p. 304

दुर्गा दुर्गेषु स्थानेषु श्रं नो देवीरभिष्टये ।
य इमं दुर्गास्तवं पुण्यं रात्रौ रात्रौ सदा पठेत् ॥ १३ ॥
रात्रिः कुशिकः सौभरो रात्रिर्वा भारद्वाजो रात्रिस्तवं गायत्रम् ।
रात्रीसूक्तं जपेन्नित्यं तत्काल उपपद्यते ॥ १४ ॥

६. **तद्द्विजाती**°–ऋब्र; तद्विजातौ°–ऋमं-मॅ-मु-पञ्चामृ; त्वं द्विजाती°–आउ. **समुपाश्रिताः**; सोमपाश्रिताः–ऋमं-ऋब्र-पञ्चामृ-मॅ-मु-आउ; सोमपैः श्रिता–आउ. **समुत्पन्नारा**°; समुत्पन्नामरा°–मु-पञ्चामृ । ७. **देवि**; देवीं–पञ्चामृ. **प्रपद्यन्ति**; प्रपद्यन्ते–आउ. **स**; सा–मॅ । ८. **ये अग्नि**°–ऋमं-ऋब्र-पञ्चामृ–मु; अग्नि°–मॅ-आउ. **तान् तार**°; तांस्तार°–आउ । ९[२]. **अग्निचोर..... नमः**–ऋब्र; अग्निचोरनिपातेषु दुष्टग्रहनिवारणे दुष्टग्रहनिवारण्यों नमः–ऋमं; अग्निचोरनिपातेषु सर्वग्रहनिवारणे सर्वग्रहनिवारण्यों नमः–आउ; अग्निचोरनिपातेषु सर्वग्रहनिवारिणि सर्वग्रहनिवारिण्यों नमः–मॅ; अग्निचौर-निपाते च सर्वग्रहनिवारणे सर्वग्रहनिवारण्यों नमः–अल; अग्निचौरनिपातेषु सर्वग्रहनिवारणे–जुना; अग्निचोर-निपाते च सर्वग्रहनिवारणे दुष्टग्रहनिवारण्यों नमः–मु; अग्निचोरनिपाते न सर्वग्रहनिवारणे सर्वग्रहनिवारण्यों नमः–पञ्चामृ. ९[२]–१०[१] आश्वमंस[१]-पुस्तके नास्ति । १०[२]. **मोहयित्वा**; नमस्कृत्वा–अल-जुना. **कुरु**; कृणु–मॅ. **कुर्वो**; कृण्वो–मॅ. **तेषां मे**; तेषां नो–अल-जुना । ११. **केशिनी**; 'केशिनी' इति साधु. **समां दिशां**–ऋब्र; समादिशा–ऋमं–मु; समां विशां–पञ्चामृ; समा निशा–मॅ–आउ–औध; समाहिषा–जुना. **देवी**; देवीं–पञ्चामृ. **सर्वतः** (२); विश्वतः–जुना । १२. ≡ तैआ १०. १. ६५; मनाउ ६. ३. **कर्मफलेषु**; कर्मफलेन–पञ्चामृ । १३. **य इमं**; इमं–पञ्चामृ । १४. **रात्रिः**; रात्री–अनु. **कुशिकः सौभरो**–अनु–मॅ-मु-आउ; कुशिकः सोभरो–ऋब्र; कुशिकसौभरो–पञ्चामृ; कुशिकसोभरो–ऋमं. **रात्रिर्वा भारद्वाजो रात्रिस्तवं गायत्रम्**–अनु–मु-ऋब्र-पञ्चामृ; रात्रिस्तवं गायत्री–ऋमं; रात्रिस्तवो गायत्री–मॅ–आउ. **रात्रिसूक्तं**; रात्रिसूक्तं–मु. **जपेन्नित्यं तत्काल उपपद्यते**; जपन्नेव तं कालं प्रतिपद्यते–ऋग्वि; जपेन्नित्यं तत्कालमुपपद्यते न योनिं पुनरायाति सर्वपापैः प्रमुच्यते–औध ।

अल–आश्वमंस[२]–पुस्तकयोः[1] का१–४; ऋमं ९–१० अनन्तरं वर्तमाना नव मन्त्रा अधो दीयन्ते । औधपुस्तके ऋमं–पाठानुसारं १४ मन्त्रानन्तरमेते नव मन्त्राः १५–२३ इति दत्ताः ।

क्षीरेण स्नापिता दुर्गा चन्दनेनानुलेपिता । बैल्वपत्रकृता माला नमो दुर्गे नमो नमः ॥ ७ ॥
सर्वभूतपिशाचेभ्यः सर्वसर्पसरीसृपैः । देवेभ्यो मानुषेभ्यश्चोभयेभ्यो माभिरक्षताम् ॥ ८ ॥
ऋग्वेदे स्तुतया देवी काश्यपेन उदाहृता । जातवेदप्रभा गौरी जातवेदसे सुनवाम सोमम् ॥ ९ ॥
सुरासुरैर्द्विजवरैः पिशाचासुरराक्षसैः । अरातीभयमुत्पन्नमरातीयतो निदहाति वेदः ॥ १० ॥
राजद्वारे पथे घोरे संग्रामेषु च गौतमी । सर्वं रक्षतु दुरितं स नः पर्षदति दुर्गाणि विश्वा ॥ ११ ॥
महद्भये समुत्पन्ने स्मरन्ति च जपन्ति च । सर्वं तारयते दुर्गा नावेव सिन्धुं दुरितात्यग्निः ॥ १२ ॥
य इमं स्तवं दुर्गायाः पठन्ति च शृणोति च । त्रिषु लोकेषु विख्यातं त्रिषु लोकेषु पूजितम् ॥ १३ ॥
अपुत्रो लभते पुत्रान् धनहीनो धनं लभेत् । अचक्षुर्लभते चक्षुर्बद्धो मुच्येत बन्धनात् ॥ १४ ॥
व्याधितो मुच्यते रोगादरोगी श्रियमाप्नुयात् । सर्वकामित्वं ददाति नारायणि नमोऽस्तु ते ।
कात्यायनि नमोऽस्तु ते ॥ १५ ॥

७. **स्नापिता**; स्नपिता–आश्वमंस–जुना. **चन्दनेनानुलेपिता**; चन्दनेन विलेपिता–औध. **बैल्वपत्रकृता माला**; बिल्वपत्रकृतापीडा–औध । ८. **°भयेभ्यो माभिरक्षतां**; उभयेभ्योऽभिरक्ष मां–

1. Dr. V. M. Apte (ABORI XX, Part III-IV, pp. 259-60) has reproduced these verses "as they are not traced either to Müller or to Aufrecht or to Scheftelowitz." In fact the Rātrī-sūkta of ĀMS 379 is identical with that already published by Peterson in his Second Report of operations in search of Sanskrit Manuscripts in the Bombay Circle, Bombay 1884.

औंध । ९. **ऋग्वेदे स्तुतया**; या ऋग्वेदे स्तुता-औंध. **काश्यपेन**; कश्यपेन-आश्वमंसं । १०. **पिशाचासुरराक्षसैः**; पिशाचोरगराक्षसैः-औंध. **अरातीभयमुत्पन्नं**; अरातीभय उत्पन्ने-औंध । ११. **राजद्वारे पथे**; गजद्वारेऽपथे-औंध. **गौतमी**; गौतमी-जुना. **दुरितं**; दुरिता-जुना । १२. **महद्भये**; महाभये-औंध । १३. **य इमं स्तवं दुर्गायाः**; य इमं दुर्गास्तवं-औंध; परमं स्तव दुर्गायाः (?)-आश्वमंसं. **पठन्ति च शृणोति च**; शृण्वन्ति च जपन्ति च-औंध । १५. **अरोगी**; आरोगी-जुना. **सर्वकामित्वं ददाति**; ददाति कामितं सर्वं-औंध; सर्वकाममित्वं ददाति (?)-आश्वमंसं. नारायणि नमोस्तु ते कात्यायनि नमोस्तु ते कात्यायनि नमोस्तु ते-जुना. आश्वमंसं-पुस्तके ऋमं १३ मन्त्रोऽन्ते विनिवेशितः । औंध-पुस्तके च ऋसं १०.४.२२; १.१३३.५ मन्त्रौ अन्ते विनिवेशितौ ।

जुनागढलिखितपुस्तके सप्तदशर्चं रात्रिसूक्तं विद्यते । तत्रादौ का १-४ मन्त्राः । अनन्तरं

आदित्यवर्णां तपसा ज्वलन्तीं वैरोकिणीं चन्द्रसहस्रदीप्तीम् ।
दैवीं कुमारीं ऋषिभिश्च पूजितां तां दुर्गमातां शरणं प्रपद्ये ॥

इति पञ्चमो मन्त्रः । तदनन्तरं ऋमं-पुस्तकस्थौ ९-१० मन्त्रौ ततः अल-पुस्तकस्थौ ७-८ मन्त्रौ ततश्च ऋमं-पुस्तकस्थ एकादशो मन्त्रोऽन्ते च ९-१५ अल-पुस्तकस्था मन्त्राः ।

३

अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः ।
इमं नो यज्ञं विहवे जुषस्वेह कुर्मो हरिवो वेदिनं त्वा ॥ १ ॥

इदमुत्तरे च द्वे सूक्ते ऋसं १०. १२८ अनन्तरं पठनीयानि[1] । तैसं ४. ७. १४. ४; तैब्रा २. ४. ३. २; अथर्व ५. ३. ११; कौसू १४०. ६; ऋमं-ऋब्र(सांवत्स. श्राद्ध)-मॅ२६-मु-आउ २०-अलजुना-आश्वमंसं-प्रर (समावर्तन) ।

यज्ञं; हव्यं-औंध. **जुषस्वेह**-का; जुषस्वास्म-औंध; जुषस्वास्य-इतरेषु. **कुर्मो**-तैसं-तैब्रा; कुल्मो-ऋमं-ऋब्र-मु-आउ-अल-जुना-प्रर. **वेदिनं**-का; मेदिनं-इतरेषु. ' इमं नो यज्ञं विहवे शृणोत्वस्माकमभूर्हर्यश्व मेदी ' इत्यथर्वपाठः ।

४

नमस्ते अस्तु विद्युते नमस्ते स्तनयित्नवे । नमस्ते अस्त्वश्मने यो मा दूणाशो अस्यसि ॥ १ ॥
नमस्ते प्रवतो नपाद्यत्तस्तपः समूहसि । मृळया नस्तनूभ्योऽभयं नः पशुभ्यः ॥ २ ॥
प्रवतो नपान्नम एवास्तु तुभ्यं नमस्ते हेतये तपुषे च कृण्मः ।
विद्मा ते नाम परमं गुहा यत्समुद्रे अन्तर्निहितापि नासि ॥ ३ ॥
यो त्वा देवो अजनिष्ट धिष्व धियं कृण्वानो असनाय वाजम् ।
सो नो मृळ विदथे गृणानो तस्मै ते नमो अस्तु देवि ॥ ४ ॥

ऋसं १०. १२८ अनन्तरं पठनीयम्[2] । अथर्व १. १३ अनेनेदं समानम् । ' नमस्ते वैद्युतं सूक्तमाशीर्वादः परं तु यत् ' इति बृहद्दे ८. ४४ । अन्यत्रापि (बृहद्दे १. ५४) इदं निर्दिष्टम् ।

१[1]. = वासं ३६. २१; पैप्प. अथर्व; मंदी; कौसू ३८.८. **यो मा दूणाशो**-का; येना दूडाशे-अथर्व । २. **ऽभयं नः पशुभ्यः**-का; मयस्तोकेभ्यः कृधि-अथर्व; = वासं ३६. २२; मंदी : शं नः

1. Cf. Bṛhaddevatā, part II, p. 304.
2. Ibid.

कुरु प्रजाभ्योऽभयं नः पशुभ्यः। ३. विद्मा ते नाम परमं गुहा = ऋग्वे १०. ४५. २. नाम—का; धाम—अथर्व. °पि नासि—का; °सि नाभिः—अथर्व। ४. अजानिङ्ग—का; असृक्त—अथर्व; 'अजनिषत' इति युक्तम्। श्रिष्ण श्रियं—का; विश्व इषुं—अथर्व. वाजं—का; धृष्णुं—अथर्व.

५

यां कल्पयन्ति नोऽरयः क्रूरां कृत्यां वधूमिव। तां ब्रह्मणा परि णिङ्ग्धि प्रत्यक्कर्तारमृच्छतु॥१॥
शीर्षण्वतीं कर्णवतीं विश्वरूपां भयंकरीम्। यः प्राहिणोमि हार्दा त्वा वि तं त्वं योजयाशुभि॥२॥
येन चित्तेन वदसि प्रतिकूलमघायुनि। तमेवं ते नि कृत्ये ह मास्मौ ऋष्यो अनागसः॥३॥
अभि वर्तस्व कर्तारं निरस्तास्माभिरोजसा। आयुरस्य नि वर्तस्व प्रजां च पुरुषादिनि॥४॥
यस्त्वा कृत्ये चकारेह तं त्वं गच्छ पुनर्नवे। अरातीः कृत्यां नाशय सर्वांश्च यातुधान्यः॥५॥
क्षिप्रं कृत्ये नि वर्तस्व कर्तुरेवं गृहान्प्रति। पशूंश्चास्य नाशय वीरांश्चास्य नि बर्हय॥ ६॥
यस्त्वा कृत्ये प्र जिगाति [विद्वाँ अविदुषो गृहान्। तस्यैवेतः परेत्याशु तनुं कृधि परुष्यसः॥७॥
प्रतीचीं त्वापसेधतु ब्रह्म रोचिष्णवमित्रहा। अग्निश्च कृत्ये रक्षोहा रिप्रहा चाज एकपात्॥८॥
यथा त्वाङ्गिरसः पूर्वे भृगवश्चापसेधिरे। अत्रयश्च वसिष्ठाश्च तथैव त्वापसेधिम॥ ९॥]
यस्ते परूंषि संदधौ रथस्येव ऋभुर्धिया। तं गच्छ तत्र ते जनमज्ञातस्तेऽयं जनः॥ १०॥
[यो नः कश्चिद्रणस्यो वा] कश्चिद्वान्योऽभि हिंसति।
तस्य त्वं द्रोरिवेद्धोऽग्निस्तनुः पृच्छस्व हेळितः॥ ११॥
भ[वाशर्वा देवहेळिम]स्य ते पापकृत्वने। हरस्वतीस्त्वं च कृत्ये नोच्छिष्टस्तस्य किंचन॥१२॥
ये नो शिवासः पन्थानः परायान्ति परावतम्। तैर्देव्यरातीः कृत्या नो गमयस्वा नि वर्तय॥१३॥
यो नः कश्चिद्दुहोऽरातिमैनसाभि दासति।
दूरस्थो वान्तिकस्थो वा तस्य हृदयमसृक् पिब॥ १४॥
येनासि कृत्ये प्रहिता दूढ्येनास्मज्जिघांसया। तस्य व्यनच्म्यनच हिनस्तु शरदाशनिः॥१५॥
यद्यु वैषि द्विपदस्मान् यदि वैषि चतुष्पदी। निरस्तातोऽव्रतास्माभिः कर्तुरष्टापदी गृहम्॥१६॥
यो नः शपादशपतो यश्च नः शपतः शपात्। वृक्ष इव विद्युता हत आ मूलादनु शुष्यतु॥१७॥
यं द्विष्मो यश्च नो द्वेष्टि यघायुर्यश्च नः शपात्। शुने पेष्ट्रमिवावक्षामं तं प्रत्यस्यामि मृत्यवे॥१८॥
यश्च सापत्नः शपथो यश्च जाम्याः शपथः। ब्रह्मा च यस्तुरुद्धः शपात् सर्वं तत् कृण्वधस्पदम्॥१९॥
सबन्धुश्चासबन्धुश्च यो अस्मॉं अभि दासति। तस्य त्वं भिन्ध्यधिष्टाय पदा विष्फूर्यते शिरः॥२०॥
अभि प्रेहि सहस्राक्ष युक्त्वाशुं शपथं रथम्। शत्रूरन्विच्छती कृत्ये वृकीवाविवृतो गृहान्॥२१॥
परि णो वृङ्धि शपथान् दहन्नग्निरिव व्रजम्। शत्रूरेवा वि नो जहि दिव्या वृक्षमिवाशनिः॥२२॥
शत्रून्मे प्रोष्ट शपथान् कृत्याश्च सुहृदो हृदाः। जिह्मा ऋक्षणाश्च दुर्हृदः समिद्धं जातवेदसम्॥२३॥
असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि। अभयं सततं पश्चाद्दमुत्तरतो गृहे॥ २४॥
परेहि कृत्ये मा तिष्ठ वृक्षस्येव पदं नय। मृगस्य हि मृगारिस्त्वं तं त्वं निकर्तुमर्हसि॥२५॥

अभ्यास्ये घोररूपे वररूपे विनाशनि । जम्भिताः प्रत्या गृभ्णीष्व स्वयमादायाद्भुतम् ॥ २६ ॥
त्वमिन्द्रो यमो वरुणस्त्वमापो अग्निरथानिलः । ब्रह्मा चैव रुद्रश्च त्वष्टा चैव प्रजापतिः ॥२७॥
आवर्तध्वं निवर्तध्वमृतवः परिवत्सराः । अहोरात्राश्चाब्दाश्च त्वं दिशः प्रदिशश्च मे ॥ २८ ॥
त्वमिन्द्रो यमो वरुणस्त्वमापो अग्निरथानिलः । अत्याहृत्य पशून् देवानुत्पातयस्वाद्भुतम् ॥२९॥
अभ्यक्तास्ताः स्वलंकृताः सर्वं नो दुरितं जहि ।
जानीथाश्चैव कृत्यानां कर्तॄन्नॄन् पापचेतसः ॥ ३० ॥
यथा हन्ति पूर्वासिनं तयैवेष्वाशुकृज्जनः । तथा त्वया युजा वयं तस्य निकृण्म स्थास्नु जङ्गमम् ॥३१॥
उत्तिष्ठैव परेहितोऽभ्यास्ये किमिहेच्छसि । ग्रीवास्ते कृत्ये पदौ चापि कर्त्स्यामि निर्द्रवा॥३२॥
स्वायसा सन्ति नोसयो विद्मश्चैव परूंषि ते । तैः स्थ निकृण्म स्थान्युग्रे यदि नो जीवयस्व ईम् ॥३३॥
मास्योच्छिषो द्विपदं मो च किंचिच्चतुष्पदम् । मा ज्ञातीरनुजास्वन्वा मा वेशं प्रतिवेशिना॥३४॥
शत्रूयता प्रहितामिमां येनाभि यथायथा । ततस्तया त्वानुदतु योऽयमन्तमैयि श्रितः ॥३५॥
एवं त्वं निकृतास्माभिर्ब्रह्मणा देवि सर्वशः । यथा तमाश्रितं कर्त्वा पापधीरेव नो जहि ॥३६॥
यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति । देवास्तं सर्वे धूर्वन्तु ब्रह्म वर्म ममान्तरम् ॥३७॥
यथा विद्युद्भतो वृक्ष आ मूलादनु शुष्यति । एवं स प्रति शुष्यतु यो मे पापं चिकीर्षति ॥ ३८ ॥
यथा प्रतिहिता भूत्वा तामेव प्रति धावति । पापं तमेव धावतु यो मे पापं चिकीर्षति ॥३९॥
कुवीरं ते सुखं रुद्रं नन्दीमानं विमथ ह ।
ब्रह्म वर्म ममान्तरं शर्म वर्म ममान्तरं घर्मवर्म ममान्तरम् ॥ ४० ॥

ऋसं १०. १२८ अनन्तरं पठनीयम् । 'यां कल्पयन्ति नोऽरयः कृत्यानाशनमात्मनः' इति बृहद्दे[1] ८. ४५ । 'यां कल्पयन्तीति सदा जपेत नियतव्रतः । नैनं कृत्या निर्हिंसन्ति कुद्धाभिचारितानि च' इति ऋग्वि ४. ३० । ऋग्वि ४. ४१ अत्रेदं कृत्यासूक्तमित्युक्तम् । अथर्व १०.१ प्रायोऽनेन समानम् । पैप्प. अथर्व; कौसू. ३९. ७ अपि द्रष्टव्यम् ।

१. ब्रह्मणा परि निङ्क्ष्मः; ब्रह्मणाप निर्णुद्मः-औध । **२[2]. यः** प्राहिणोदिहाद्य त्वां वि तं त्वं योजयासुभिः-औध । **३[2]. ± तं कृत्येऽभिनिवर्तस्व मास्मानिच्छो अनागसः**-अथर्व १०. १. ७. येन दिष्टेह वहसि प्रतिकूलमधायिनि । तमेवेतो निवर्तस्व मास्मान्मृच्छो अनागसः-औध । **४. वर्तस्व**; कृन्तस्व-औध । **५. कृत्याः**; कृत्ये-औध. **नाशय सर्वाश्च यातुधान्यः** = अथर्व १९. ३९. ८ । **६. पशूंश्चावास्य**; पशूंश्चैवास्य-औध । **७-९.** 'यस्त्वा कृत्ये प्र जिगा' इत्येतावन्मात्रोऽशः का-पुस्तके वर्तते । शिष्टं त्रुटितम् । एते त्रयो मन्त्रा औधपुस्तकादुद्धृताः । उद्धृतभागेषु सर्वत्र स्वरितमुपरिष्टाच्चिह्नाङ्कितमनुदात्तं चाधस्ताच्चिह्नाङ्कितम् । 'प्र जिगांति' अस्य स्थाने 'प्रजिघाय' इति औध । **१०.** = अथर्व १०. १. ८. **रथस्येव ऋभुर्धिया**; रक्षस्येव विभुर्धिया-औध. **गृच्छ**-का; गच्छ-अथर्व-औध. **ते जनं**-का; **तेऽयनं**-अथर्व-औध । **११.** प्रथमपादः का-पुस्तके त्रुटितः औध-पुस्तकादुद्धृतः । **कश्चिद्वान्योऽभि**-औध; **कश्चिद्वा न्यभि**-का । **तनूः पृच्छस्व हेळितः**; तनू मृच्छस्व हेळिता-औध । **१२. भवा शर्वो देवहेळिमस्य ते**; भवा शर्वो देवहेळिमस्यत-औध; भ.....स्य

1. Cf. Bṛhaddevatā, part II, pp. 304–5

ते–का; शिष्टं औंधपुस्तकानुसारेण पूरितम्। **हरस्वतीस्त्वं**; हरस्वती त्वं–औंध. **नोच्छिषः**; मोच्छिषः–औंध. १३. = १५ औंध. **ये नो**–का; ये नः–औंध. **परायान्ति**; परायन्ति–औंध. **तैर्देव्यरातीः**–का; तैर्देवि राज्ञ्याः–औंध. **गमयस्वा नि वर्तय**–का; गमयस्वानुकूत्तये–औंध। १४. = १३ औंध. **द्रुहोऽरातिर्मनसाप्यमि दासति**–का; द्रुहारातिर्मनसा प्रतिभूषति–औंध। १५. = १४ औंध. **व्यनच्चाव्यनच्च**–का = ऋसं १०. १२०. २; अथर्व ५. २. २; व्यानच्चाव्यानच्च–औंध.**शरदाशनिः**–का; हरसाशनिः–औंध। १६. **यद्यु**–का; यदि–औंध. **निरस्तातोऽव्रतास्माभिः**–का; निरस्ततो व्रजास्माभिः–औंध. **गृहम्**–का; गृहान्–औंध। १७[1]. = तैब्रा ३. ७. ६. २३; तैआ २. ५. ११; आपश्रौ ४. १५. १. **यो नः...शपात्**–का; यो नः शपादशपतः शपतो यश्च नः शपात्–अथर्व ७. ५९.१; ६. ३७. ३. १७[2]. = अथर्व ७.५९.१. **वृक्ष इव...शुष्यतु**–का; वृक्षमिव विद्युदाशुतमा मूलादनु शोषय–औंध। १८[1]. ≐ अथर्व १६. ६. ४ : यं द्विष्मो यश्च नो द्वेष्टि तस्मा एनद्गमयामः. १८[2]. = अथर्व ६. ३७. ३[2]. **पेष्टूमिवावक्षामं**; पिष्टमिव क्षामं–औंध. **तं प्रत्यस्यामि मृत्यवे**; तं प्रत्यस्य स्वमृत्यवे–औंध. १९. ≐ अथर्व २. ७. २. **यश्च जाम्याः शपथः**; यश्च यामी शपाति नः–औंध. ब्रह्मा यन्मन्युतः शपात्सर्वं तन्नो अधस्पदम्–अथर्व। २०[1]. = अथर्व ६. १५. २[1]; ५४. ३[1]. **°सबन्धुश्च**–का; °प्यबन्धुश्च–औंध. **विष्पूर्यते शिरः**–का; विस्फूर्य तच्छिरः–औंध। २१. ≐ अथर्व ६. ३७. १. उप प्रागात्सहस्राक्षो युक्त्वा शपथो रथम्–अथर्व. **युक्त्वाशुं शपथ रथं**; युक्त्वा तु शपथं रथे–औंध. शप्तारमन्विच्छन्मम वृक इवाविमतो गृहम्–अथर्व. **शत्रूँरन्विच्छती**–का; शत्रूनन्विच्छती–औंध. **वृकीवाविवृतो**–का; वृकीवाविमतो–औंध। २२. ≐ अथर्व ६. ३७. २. परि णो वृङ्धि शपथ ह्रदमग्निरिवा दहन्–अथर्व. **व्रजं**–का; ह्रदं–औंध. शप्तारमत्र नो जहि दिवो वृक्षमिवाशनिः–अथर्व. **शत्रूँरेवा वि नो**–का; शत्रूनेवाभितो–औंध। २३. **प्रोष्ट**–का; प्रोथ–औंध. **सुहृदो हृद्याः**–का; सुहृदोऽसुहृत्–औंध। २४. = खिल २. २. ४. **असपत्नं पुरस्तात्** = अथर्व १९. १६. १; २७. १४. **दक्षिणतस्कृधि**–का; दक्षिणतः कृधि–औंध। २५. ≐ अथर्व १०. १. २६. **तिष्ठ**–का–औंध; तिष्ठो–अथर्व. **वृद्धस्येव**–का; विद्धस्येव–अथर्व–औंध. मृगः स मृगयुस्त्वं न त्वा निर्कर्तुमर्हति–अथर्व. **मृगारिस्त्वं ... °मर्हसि**–का; मृगारिप्रो न त्वा नीकर्तुमर्हति–औंध। २६. ≐ अघ्न्यास्येव घोररूपे विषुरूपेऽविनाशिनि। जृम्भिता प्रति गृभ्णीष्व स्वयमादाय चाद्भुतम्–औंध। २७. **°मापो अग्नि°**–का; °मापोऽग्नि°–औंध. **ब्रह्मा**–का; त्वं ब्रह्मा–औंध. २८. **दिशः प्रदिशः** = अथर्व ९. २. २१; १९. ४५. ३। २९. ≐ त्वं यमं वरुणं सोमं त्वमापोऽग्निमथानिलम्। अत्राहृत्य पशूंश्चैवमुत्पादयसि चाद्भुतम्–औंध. ३०. ≐ अथर्व १०. १. २५ : अभ्यक्ताक्ता स्वरंकृता सर्वं भरन्ती दुरितं परेहि। जानाहि कृत्ये कर्तारं दुहितेव पितरं स्वम्. औंधपुस्तके त्रिंशो मन्त्रो विभिन्नो वर्तते स यथा–' ये मे दमे दारुगर्भे शयानं धिया सहितं पुरुषं निजघ्नुः। कुम्भीपाकं नरकं ग्रीवबद्धं हुता एवं पुरुषासो यमस्य ॥ ' त्रिंशो मन्त्रश्चैकत्रिंशत्त्वेनागतः। ' अभ्यक्ताक्ता स्वलंकृता सर्वं नो दुरितं दह ' इति तस्य पूर्वार्धः। ३१. ≐ अथर्व १०. १. २७ = ३२ औंध. **पूर्वासिनं ... ... °ज्ञनः**–का; पुरासीनं तथैवेष्वा सुकृन्नरः–औंध. **त्वया युजा वयं** = ऋसं १. ८. ४; अथर्व ४. ३२. १. **तस्य**; औंधपुस्तके नास्ति. **स्थास्नु**–औंध; स्थास्तु–का। ३२[1]. = अथर्व १०. १. २०[2]. **°घ्न्यास्ये**–का; ऽज्ञाते–अथर्व–औंध. ३२[2]. = अथर्व १०. १. २१[1]. ३२ = ३३ औंध. **पदा**–का; पादौ–अथर्व–औंध. **चापि**–का–अथर्व; चाभि–औंध. **निर्द्रव**–का–अथर्व. विद्रव–औंध। ३३[1]. ≐ अथर्व १०. १. २०[1]: स्वायसा असयः सन्ति नो गृहे विघ्रा ते कृत्ये यतिधा परूंषि. ३३ = ३४.औंध. **स्वायसा**–का; स्वायसाः–औंध. **विघ्रश्चैव**–का; विघ्र चैव–औंध. **तैः स्थ ... ... ईम्**–का; तैस्ते निकृण्मस्तान्युग्रे यदि नो जीवयस्वरीन्–औंध. ३४ = ३५ औंध. **मो च**–का; मोत–औंध. **ज्ञातीरनुजास्वन्वा**–का; ' ज्ञातीननुजसूत्वा ' इति पाठं शेफ्टेलोवित्प्रमहाशया अभ्यूहन्ति. ज्ञातीननुजान् पूर्वान्–औंध. **वेशं प्रति-**

वेशिना–का; वेशि प्रतिवेशिनौ–औंध. ३५ = ३६ औंध. **शत्रूयता ... ... यथायथा**–का; शत्रूयता प्रहितासि दूढ्येनाभि यथायतः–औंध. ३६ = ३७ औंध. **एवं त्वं ... .. सर्वशः**–का; यथेतमाश्रिता गत्वा पापधीनिव नो जहि–औंध। ३७. = साम २. ९. ३. ८. ३; ऋसं ६. ७५. १९; अथर्व १. १९. ३[१], ४[२]; आश्वगृ ३. ५. ७ = ४० औंध। **३९. प्रतिहिता**–का; प्रतिशुष्को–औंध. **तामेव**–का; तमेव–औंध. **तमेव**–का; तमेवं–औंध। ४०. = ४२ औंध : कुबेर ते मुखं रौद्रं नन्दिन्ना-नन्दमावह। ज्वरमृत्युभयं घोरं विश नाशय मे ज्वरम्।

औंधपुस्तके केचन मन्त्रा अधिकत्वेन विद्यन्ते तेऽधो दीयन्ते—

उरवा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः। अव ब्रह्मद्विषो जहि ॥ ४१ ॥
यो मे करोति प्रद्वारे यो गृहे यो निवेशने। यो मे केशनखे कुर्यादशने दन्तधावने ॥ ४३ ॥
प्रतिसर प्रतिधाव कुमारीव पितुर्गृहान्। मूर्धानमेषां स्फोटय पदमेषां कुले कृधि ॥ ४४ ॥
ये नो रयिं दुश्चरितासो अग्ने जहुर्मर्तासो अनृतं वदन्तः।
तेषां वपूंष्यर्चिषा जातवेदः शुष्कं न वृक्षमभि सं दहस्व ॥ ४५ ॥
कृष्णवर्णे महद्रूपे बृहत्कर्णे महद्भये। देवि देवि महादेवि मम शत्रून् विनाशय ॥ ४६ ॥
खट् फट् जहि महाकृत्ये विधूमाग्निसमप्रभे। जहि शत्रूंस्त्रिशूलेन क्रुध्यस्व पिब शोणितम् ॥४७॥
ये द्रुह्युरंजवे मह्यमग्ने कदाधियो दुर्मदा अड्मनासः।
आवध्यैतान् शोचिषा विध्य तन्तून् वैवस्वतस्य सदनं नयस्व ॥ ४८ ॥

६

आयुष्यं वर्चस्यं रायस्पोषमौद्भिदम्। इदं हिरण्यं वर्चस्वज्जैत्रायाविशतादु मामु ॥ १ ॥
उच्चैर्वाजि पृतनाषाट् सभासाहं धनंजयम्। सर्वाः समग्रा ऋद्धयो हिरण्येऽस्मिन्त्समाहिताः॥२॥
शुनमहं हिरण्यस्वपितुर्नामेव जग्रभ। तेन मां सूर्यत्वचमकरं पुरुषप्रियम् ॥ ३ ॥
सम्राजं च विराजं चाभिष्टिर्यौ च मे ध्रुवा। लक्ष्मीं राष्ट्रस्य यो मुखे तया मामिन्द्र सं सृज ॥४॥
अग्नेः प्रजाते परि यद्धिरण्यममृतं जज्ञे अधि मर्त्येषु।
यं एनद्वेद स इदेनदर्हति जरामृत्युर्भवति यो बिभर्ति ॥ ५ ॥
यद्वेद राजा वरुणो यदु देवी सरस्वती। इन्द्रो यद्वृत्रहा वेद तन्मे वर्चस आयुषे ॥ ६ ॥
न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्रथमजं ह्येतत्।
यो बिभर्ति दाक्षायणाहिरण्यं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥ ७ ॥
यदाबध्नन् दाक्षायणा हिरण्यं शतानीकाय सुमनस्यमानाः।
तन्म आ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासत् ॥ ८ ॥
घृतादुलुप्तं मधुमत् सुवर्णं धनंजयं धरुणं धारयिष्णु।
ऋणक्सपत्नानधरांश्च कृण्वदा रोह मां महते सौभगाय ॥ ९ ॥
प्रियं मा कुरु देवेषु प्रियं राजसु मा कुरु। प्रियं विश्वेषु गोप्येषु मयि धेहि रुचा रुचम्॥१०॥

नासदासीन्नो सदासीत्० ॥ ऋ. सं. १०. १२९. १

ऋसं १०. १२८ अनन्तरं पठनीयम्। अस्मिन्नेवार्थे बृहद्देवता[1] (८. ४५):–'हिरण्यस्तुतिरा ख्यं नासद् (= ऋसं १०. १२९) यत्परमेष्ठिनः'। ऋग्विधानमपि (४.४३)–'आयुष्यमायुर्वर्चस्यं

1. Cf. Bṛhaddevatā, part II, p. 305

सूक्तं दाक्षायणं महत् ' इति । शांगृ ३. १; आश्वगृ ३. ८. २१; शांक एतेष्विदमुद्धृतम् । ऋमं-ऋव्र-मॅ२७-आउ२०-मु-अल-जुना-आश्वमंसं-प्रर(समावर्तन)-संकौ(समावर्तन)-पुस्तकेष्विदं संपूर्णमुपलभ्यते । एतेष्वेकादशो मन्त्रोऽधिकः । ऋव्र-प्रर-पुस्तकयोरस्य ऋषिच्छन्दोदेवताविनियोगा अपि कथिताः- ' आयुष्यमिति सूक्तस्य सनत्कुमारसनन्दनसनातनादय ऋषयः । हिरण्यं देवता । आद्याश्चतस्रोऽनुष्टुभः पञ्चमी त्रिष्टुप् षष्ठ्यनुष्टुप् सप्तमी शक्करी अष्टमीनवम्यौ त्रिष्टुभौ दशम्यनुष्टुबेकादशी पङ्क्तिः । कण्ठे मणिधारणे विनियोगः ' । संकौ अपि द्रष्टव्यम् ।

१-४ ≡ हिगृ १. १०. ६; ११. १ ≐ आपमं २. ८. १-३, ८. १ ≡ वासं ३४. ५०; अन्त्ये. ५ ≡ अथर्व १९. २६. १. ६ ≡ अथर्व ५. २५. ६; १९. २६. ४. ७ ≡ अथर्व १. ३५. २; वासं ३४. ५१. ८ ≡ वासं ३४. ५२; अथर्व १. ३५. १. ९ ≡ अथर्व ५. २८. १४; १९. ३३. २; ४६. ६. १० ≐ अथर्व १९. ६२; तैसं ५. ७. ६. ४; मैसं ३. ४. ८; हिगृ १. १०. ६; आपमं २. ८. ४.

१. **वर्चस्यं**; वर्चस्यं सुवीर्यं-आपमं. **वर्चस्वज्जैत्राया**-हिगृ-मॅ-आउ-अल; वर्चस्व जैत्राया-मु-ऋव्र-वासं-संकौ-प्रर-ऋमं; वर्चस्वज्जैत्र्याया-आपमं. **विशतादु मा**-वासं-मॅ-आउ-प्रर; विशतादिमा-ऋमं-ऋव्र-जुना-मु-संकौ; विशतादिमं-अल; विशतान्मा-आपमं-हिगृ । २. **वाजि**; वादि-आपमं. **सभासाहं**; सत्रासाहं-आपमं. **समग्रा**; समग्र-अल; समृद्धीः-आपमं. **समाहृताः**-का; समाभृताः-हिगृ; समाहिताः-इतरेषु । ३. **हिरण्यस्व°**-का-ऋमं-मु-जुना-संकौ; हिरण्ये स्व°-अल; हिरण्यस्य-इतरेषु. **नामेव**-का-ऋमं-आउ-मॅ-प्रर; मानेव-ऋव्र-मु-जुना-अल-संकौ; नामाग्रभिषं-हिगृ; नामाग्रर्भषं-आपमं. **पुरुषप्रियं**-का; पूरुषु प्रियं-मॅ-मु-अल-आउ-ऋव्र-संकौ-प्रर; पुरुषु प्रियं-ऋमं; पूरिषु प्रियं-जुना; हिगृ-आपमं-पुस्तकयोरुत्तरार्धोऽन्यथा वर्तते-' तं मा हिरण्यवर्चसं करोतु पूरुषु (पुरुषु-हिगृ) प्रियम् । ४. **सम्राजं च विराजं**; विराजं च सम्राजं-हिगृ. **चाभिष्टिर्या च मे ध्रुवा**-का-ऋमं-ऋव्र-मॅ-मु-आउ-प्रर-संकौ; चाभिष्टिर्यातवे ध्रुवा-अल-जुना; चाभिष्टिर्या च ना गृहे-हिगृ; चाभिश्रीर्या च नो गृहे-आपमं. **या**; मा-अल. **माभिन्द्र सं सृज**; मा सं सृजामसि-हिगृ-आपमं; मामिन्द्र संसृज-प्रर । ५. **प्रजातं**; प्रयातं-अल-जुना-संकौ. **जज्ञे**-का-ऋव्र-आउ; दध्रे-अथर्व; यज्ञे-इतरेषु. **इदेनदर्हति**-का-ऋव्र-आउ-प्रर; इदेनमर्हति-ऋमं-अथर्व-मॅ-मु-जुना-संकौ; त्रिवेदमर्हति-अल. **यो**-का; ये-अल । ६. **यद् वृत्रहा**; यजंपुहा-अल. **वर्चस**; वर्चस्य-अल । ७. **°स्तरन्ति**-का-वासं-अल; सहन्ते-अथर्व; °स्वरन्ति-इतरेषु. **प्रथमजं**; प्रथमं-अल. **दाक्षायणा**; दाक्षायणं-अथर्व-वासं-प्रर. **देवेषु**; जांवेषु-अथर्व । ८. **यदाबध्नन्**-वासं-ऋमं-अथर्व-मॅ-आउ-संकौ; यदाबध्नं-का-ऋव्र-प्रर-मु-अल-जुना. **सुमनस्यमानाः**-वासं-अथर्व-मॅ-आउ; सुमनस्यमाना-ऋमं-ऋव्र-मु-अल-जुना-प्रर-संकौ. **यथासत्**; यथासन्-अल; यथासं-आउ. **तन्म आ**-का-वासं; तत्ते-अथर्व; तन्न आ-मॅ-मु-अल-जुना-ऋव्र-संकौ-प्रर; तदा-आउ. तत्ते बध्नाम्यायुषे वर्चसे बलाय दीर्घायुत्वाय शतशारदाय-अथर्व. ९. **घृतादुल्लुप्तं**-का-अथर्व-मॅ-आउ; घृतादुलुप्तं-प्रर; घृतादुर्लुप्तं-अल-जुना-मु-ऋमं-ऋव्र-प्रर-संकौ. **सुवर्णं**; सुपर्णं-का-अल. **ऋणक्**; वृणक्-प्रर. **सपत्नान्**-का-अथर्व; खपत्नाद्-अल; सपत्नाद्-इतरेषु. **कृण्वदा**; कृण्वमा-अल; कृण्वन्ना-जुना । १०. **राजसु**; राजस-अल. **गोप्त्रेषु**-का-ऋमं-मु; गोप्तृषु-जुना; गोत्रेषु-इतरेषु ।

उपरिनिर्दिष्टेषु सर्वेषु पुस्तकेषु वर्तमान एकादशो मन्त्र एवमस्ति—

अग्नियेन विराजति सूर्यो येन विराजति ।
विराड्येन विराजति तेनास्मान् ब्रह्मणस्पते विराज समिधं कुरु ॥

विराड्येन-मॅ-आउ-अल-जुना-प्रर-संकौ; विराज्येन-ऋमं-ऋव्र-मु. **समिधं**; समिधा-अल-जुना; समर्द-प्रर ।

७

भूमिर्माता नभः पितार्यमा ते पितामहः । घृताची नाम वा असि सा देवानामसि स्वसा॥१॥
यस्त्वा पिबति जीवति त्रायसे पुरुषं त्वम् । त्रात्रिणी शश्वतामसि शश्वतां सम्यञ्चनी ॥ २ ॥
यद्दण्डेन यदिषुणा यद्वारुहैरसा कृतम् । तस्य त्वमसि निष्कृतिः सानौ निष्कृत्य ओषधीः ॥३॥
वृक्षंवृक्षं सं पतसि वृषायन्तीव कन्यना । जयन्ती प्रत्यातिष्ठन्ती संजेया नाम वा असि ॥४॥
भद्रात् प्रक्षे निस्तिष्ठाश्वत्थे खदिरे धवे । भद्रात्पर्णे न्यग्रोधे सा मां रौत्सीदरुन्धती ॥ ५ ॥
अश्वस्यासृक्संपतसि तत्पर्णमभि तिष्ठसि । सरत्पतत्पर्णसि सा मां रौत्सीदरुन्धती ॥ ६ ॥
हिरण्यपर्णे सुभगे सोक्ष्मे लोमशवक्षणे । अर्णामसि स्वसा लाक्षे वातो ह्यात्मा बभूव ते ॥ ७॥
तव त्य इन्द्र सख्येषु वह्नयः० ॥ ऋ. सं. १०. १३८. १

ऋसं १०. १३७ अनन्तरं पठनीयम् । तथा चात्र बृहद्देवता[1] (८. ५१)–' भूमिर्लाक्षं परं सूक्तं तवैन्द्रं सूक्तमुत्तरम् ' । इदं लाक्षादेवताकमिति खिलानुक्रमणी । बृहद्दे १. १२९; २. ८४ अपि द्रष्टव्यम् । अस्य सूक्तस्य सप्तमे मन्त्रे लाक्षा इति पदमागतम् । इदं अथर्व ५. ५ अनेन प्रायः समानम् । क्वचित् मन्त्राणां व्यत्यासः । पैप्प. अथर्व ६.४ अपि द्रष्टव्यम् ॥

१. = अथर्व १. **भूमिर्माता**–का-बृहद्दे; रात्री माता–अथर्व. → अथर्व १२. १. १२;६३. **घृताची**–का; सिलाची–अथर्व । २ = अथर्व २ । ३. = अथर्व ४. **इषुणा**–का; इष्वा–अथर्व. **सानौ निष्कृत्य ओषधीः**–का; सेमं निष्कृधि पूरुष–अथर्व । ४. = अथर्व ३. **सं पतसि वृषायन्तीव कन्यना**–का; आ रोहसि वृषण्यन्तीव कन्यला–अथर्व. **संजेया**–का; स्परणी–अथर्व । ५. = अथर्व ५ : भद्रात्प्रक्षान्निस्तिष्ठस्यश्वत्थात्खदिराद्धवात् । भद्रान्न्यग्रोधात्पर्णात्सा न एह्यरुन्धति । ६. = अथर्व ९ : अश्वस्यास्नः सपतिता सा वृक्षाँ अभि सिष्यदे । सरा पतत्रिणी भूत्वा सा न एह्यरुन्धति. **अर्णसि**–का; ' अर्णसी ' इति स्यादिति शेफ्टेलोवित्समहाशयाः । ७. = अथर्व ७. **हिरण्यपर्णे**–का; हिरण्यवर्णे–अथर्व. **सोक्ष्मे**–का; शुष्मे–अथर्व.

अधो दीयमानं ' हिमस्य त्वा ' इत्यादि सूक्तं ऋसं १०. १४२ अनन्तरं पठनीयम् । मु–मते तु ' आ रात्रि पार्थिवं ' इत्यस्यानन्तरं (ऋसं १०. १२७ अनन्तरं) पठितव्यम् । इदं मॅ२८–मु-आउ२१-ऋमं–आश्वमंस[2]-अल-जुना–औंध-पञ्चाम्-पुस्तकेषूपलभ्यते । प्रथममन्त्रस्य प्रथमतृतीयपादौ = अथर्व ६. १०६. ३; वासं १७. ५. तैसं ४. ६. १. १.

हिमस्य त्वा जरायुणा शाले परिव्ययामसि ।
उत द्रुदो हि नो भुवोऽग्निर्ददातु भेषजम् ।
शीतह्रदो हि नो भुवोऽग्निर्ददातु भेषजम् ॥ १ ॥
अन्तिकामग्निमजनयद्दुर्वारः शिशुरागमत् । अजातपुत्रपक्षाया हृदयं मम द्रूयते ॥ २ ॥
विपुलं वनं बह्वाकाशं चर जातवेदः कामाय । मां च रक्ष पुत्रांश्च शरणमुभौ तव ॥ ३ ॥
पिङ्गाक्ष लोहितग्रीव कृष्णवर्ण नमोऽस्तु ते । अस्माञ्जिहीर्ष्वोनं सागरस्योर्मयो यथा ॥ ४ ॥
इन्द्रः क्षत्रं ददातु वरुणमभि षिञ्चतु । शत्रवो निधनं यान्तु जय त्वं ब्रह्मतेजसा ॥ ५ ॥
कपिलजटां सर्वभक्षं चाग्निं प्रत्यक्षदैवतम् ।
वरुणं च वशाम्यग्ने मम पुत्रांश्च रक्षतु मम पुत्रांश्च रक्षतां नमः ॥ ६ ॥

1. Cf. Bṛhaddevatā, part II, p. 307. This Khila follows आयुष्यं वर्चस्वं and not यां कल्पयन्ति as stated by Macdonell.

सार्धं वर्षशतं जीव पिब खाद च मोद च । दुःखितांश्च द्विजांश्चैव प्रजां च पशु पालय ॥ ७ ॥
यावदादित्यस्तपति यावद्भ्राजति चन्द्रमाः । यावद्वायुः प्लवायति तावज्जीव तया सह ॥ ८ ॥
येन केन प्रकारेण को वीनामनु जीवति । परेषामुपकारार्थं यजीवति स जीवति ।
एतां वैश्वानरीं सर्वदेव नमोऽस्तु ते ॥ ९ ॥
न चोरभयं न च सर्पभयं न च व्याघ्रभयं न च मृत्युभयम् ।
यस्यापमृत्युर्न च मृत्युः स सर्वं लभते स सर्वं जयते ॥ १० ॥

१. **द्विमस्य**; यमस्य–ऋमं. **जरायुणा शाले**–मु-आउ-अल-जुना-अथर्व-ऋमं; जरायुणाग्ने–तैसं. **भुवो**; धियो–औध. **शीतह्रदो**–मु-अल-जुना; शिशीतह्रदो–ऋमं; शीतह्रदा–अथर्व-आउ. **भुवोऽग्निर्ददातु**–ऋमं-आउ-अल-जुना; भियोऽग्निर्ददातु–मु; भुवोऽग्निष्कृणोतु–अथर्व; धियोऽग्निर्ददातु–औध । २. **अजनयद्वर्वारः**–आउ; अजय॰र्वादः–मु; अजनयद्व॰र्वादः–मॅ; अजनदूर्वादः–अल-जुना; अजरदूर्वासः–ऋमं. **शिशुरागमत्**–मॅ-अल-आउ; शिशुलागमत्–ऋमं-मु; शशहागमत्–औध. **दूयते**–मॅ-मु-आउ; हूयते–जुना-ऋमं; दूयेत–अल । ३. **चर**; चरत–ऋमं; तव–मु. **वनं**; धनं–मु. **मां च**–आउ-मु-ऋमं; मांश्च–अल. ***मुभौ तव**–अल-जुना; *मभूतव । ४. **अस्मान्नि बर्ह रस्योनं**–मु; अस्यां निबर्हणः स्योनां–ऋमं; अस्मान्वि वर्जय स्थानं–आउ; अस्माद्वि बर्ह स्योनां–मॅ; अस्मांद्विबर्हज स्योनां–अल-जुना; अस्माच्चिबर्हरस्येनां–औध; अस्माद्वि बर्हरस्येनां । ५. **इन्द्रः**–मॅ-आउ-अल-जुना; इन्द्र–ऋमं-मु. **वरुणमभि**; वरुणस्त्वमभि–अल. **शत्रवो**; शत्रवस्ते–अल-जुना. **यान्तु**; यातु–ऋमं. **जय त्वं**–आउ-जुना; जप त्वं–अल; जयस्त्वं–मॅ-मु-ऋमं । ६. ***जर्टी**; *जर्टि–अल. **वशाग्नयग्रे**; वशाह्यग्नि–अल. वशाह्यग्ने–जुना. **रक्षतु**; रक्षति–अल-जुना. 'मम पुत्रांश्च रक्षत्वों नमः' अल–जुना–पुस्तकयोः नास्ति । ७. **दुःखितांश्च**–मॅ-आउ; दुःखितान्त–ऋमं; दुःखितां न–मु । अल-जुना मध्ये सप्तमो मन्त्रो नास्ति । ८. **वायुः**; वातः–जुना. **प्लवायति**–जुना; प्रवायति–अल. **तया सह**–जुना; जया जय–इतरेषु. अष्टममन्त्रानन्तरं अल-आश्वमंसं-पुस्तकयोरेको मन्त्रोऽधिकोऽस्ति—

एकश॰स्तिनोद्देशेन(*नोर्देशेन–आश्वमंसं) त्वं विपुलेन । पृथिवी त्वं भुञ्जत्येकच्छत्रेण दण्डेन ॥

९. **वीनामनु**; नेहनाको न–अल; मेहनाको न–जुना; हि नाम न–मु; हि नाम नु–औध; हीनमनु–आउ; विनमनु. **परेषामुपकारार्थं**; यदेषामपकाराणां–अल-जुना. **वैश्वानरीं सर्वदेव**–मॅ-मु; वैश्वानरं सर्वदेव–ऋमं; वैश्वानर सर्वदेव–आउ; वैश्वानरीं सर्वदेवान्–औध; वैश्वानरं सर्वदेवं । मु–पुस्तके 'एतां वैश्वानरीं' इत्यादिभागो दशममन्त्रानन्तरमागतः । अयं अल-जुना पुस्तकयोर्नास्ति । १०. **स सर्वं लभते स सर्वं जयते**–मॅ-मु; सर्वं लभते सर्वं जयते–ऋमं. दशमो मन्त्रः आउ-अल–पुस्तकयोर्नास्ति । दशममन्त्रानन्तरं आश्वमंसं–पुस्तके ऋसं १०. १४२. ८ इत्ययं मन्त्रो दत्तोऽस्ति ।

८

मेधां मह्यमङ्गिरसो मेधां सप्तर्षयो ददुः । मेधामिन्द्रश्चाग्निश्च मेधां धाता ददातु मे ॥ १ ॥
मेधां मे वरुणो राजा मेधां देवी सरस्वती । मेधां मे अश्विनौ देवावा धत्तां पुष्करस्रजा ॥२॥
या मेधाप्सरस्सु गन्धर्वेषु च यन्मनः । दैवी या मानुषी मेधा सा मामा विशतादिह ॥ ३ ॥
यन्मेऽनूक्तं तद्गमतां शकेयं यदनुब्रुवे ।
निशामितं नि शामये मयि श्रुतम् । सह व्रतेन भूयासं ब्रह्मणा सं गमेमहि ॥ ४ ॥
शरीरं मे विचक्षण वाङ्मे मधुमदुहे ।
अवृधमहमसौ सूर्यो ब्रह्मण आणीः स्थ। श्रुतं मे मा प्र हासीः ॥ ५ ॥

मेधां देवीं मनसा रेजमानां गन्धर्वजुष्टां प्रति नो जुषस्व ।
मह्यं मेधां वद मह्यं श्रियं वद मेधावी भूयासमङ्गिराश्चरिष्णुः ॥ ६ ॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥ ७ ॥
मेधाव्यहं सुमनाः सुप्रतीकः श्रद्धामनाः सत्यमतिः सुशेवः ।
महायशा धारयिष्णुः प्रवक्ता भूयासमस्येश्वरया प्रयोगे ॥ ८ ॥
यां मेधां देवगणाः पितरश्चोपासते । तया मामद्य मेधयाग्ने मेधाविनं कुरु ॥ ९ ॥

एतदुत्तरं च ऋसं १०. १५१ अनन्तरं पठनीयम् । तथा चात्र बृहद्देवता (८. ५८)–' आग्नेयं श्रद्धया श्राद्धं मेधासूक्तमतः परम् । आग्नेयमा सूरेतु ' इति । ऋग्विधानमपि (४. ७१-७२)–'श्रद्धासूक्तं जपेन्नित्यं श्रद्धाकामः समाहितः । सर्वत्र लभते श्रद्धां मेधासूक्तं तथैव च ' इति । पुनरप्यन्यत्र (ऋग्वि ४. ९६-९७)–' पुरा स्तनप्रदानात्तं श्रद्धासूक्तेन पाययेत् । मेधासूक्तेन चैवैनं पिष्टं व्रीहिमयं चरुम् । मधुमिश्रं जातरूपं मेधावी तन जायते ' इति । ऋसं–मॅ२९-आउ२२–ऋब्र-अल–जुना–मु–आश्वमंसं-प्र-औधपुस्तकेष्विदं संपूर्णमुपलभ्यते ।

१. ≡ आपमं २. ४. ५; अन्त्ये. १[२]. ≡ वासं ३२. १५. **मेधां**; मेधा–मु. **सप्तर्षयो**–का–ऋब्र–आपमं; सप्त ऋषयो–इतरेषु. **अग्निश्च**; वायुश्च–वासं–अन्त्ये. **दधातु**–का–अल; ददातु–इतरेषु. **मे**–का–ऋब्र–अल–आउ–अन्त्ये; ते–इतरेषु । **२.** ≡ तैआ १०. ४०; आपमं २. १२. २; आश्वगृ १. १५. २; पागृ २. ४. ८; मंब्रा १. ५. ९; हिगृ १. ६. ४; ८. ४; गोगृ २. ७. २१; मैदी; मामंपा. → वैसू ३२. १५; मनाउ १६. ५. **मे**–का–ऋब्र–वासं–तैआ–पागृ–हिगृ; ते–इतरेषु. **वरुणो राजा**–का–ऋमं–ऋब्र–अल–आउ–मु–प्र–मॅ; देवः सविता–वासं–आश्वगृ–पागृ–आपमं; इन्द्रो ददातु–तैआ–हिगृ. **मे**–का–वासं–तैआ–हिगृ–मामंपा–आउ–अल; ते–इतरेषु. **धत्तां**–मॅ–मु–अल–जुना–तैआ–आश्वगृ–पागृ–ऋब्र–प्र–आउ–आपमं; धत्तं–का. **पुष्करस्रजा**–का–प्र–ऋमं–मॅ–मु–अल; पुष्करस्रजौ–इतरेषु. **३.** ≡ तैआ १०. ४१; आपमं २. ४. ६; हिगृ १. ८. ४; → मनाउ १६. ६. **मेधाप्सरस्सु**–का–ऋमं; मेधा अप्सरस्सु–प्र; मेधाप्सरासु–इतरेषु. तैआ–आपमं–हिगृमध्ये ' अप्सरासु च या मेधा ' इति पाठः. **यन्मनः**–का–तैआ–प्र–मॅ–मु–आउ–ऋमं–हिगृ; यन्मम–अल; यद्यशः–आपमं. **दैवी या मानुषी मेधा**–का; दैवी मेधा मनुष्यजा–हिगृ. **मामा**–का–आपमं–मु-आउ; माया–ऋमं–मॅ–प्र–अल–जुना; मेधा–आउ. ' मां मेधा सुरभिर्जुषताम् ' इति तैआ–हिगृ–पुस्तकयोरन्तिमः पादः. **इह**–का–आपमं; इमां–मु–अल–जुना–मॅ–ऋब्र–प्र; उ मां–आउ । **४. मेऽनूक्तं**–का; मेनोक्तं–इतरेषु. **तद्रमतां**–का–प्र–मॅ–आउ; तद्रवतां–मु–जुना; प्रद्रवतां–अल. **शकेयं यदनुब्रुवे**–का; शके अन्यदनुब्रुवे–अल–जुना. **निशामितं**–का; निशामतं–ऋमं–प्र–मॅ–मु–ऋब्र–अल–जुना; निशामनं–आउ. **शामये**–का; शामयि–ऋमं–प्र–मु; शामहै–मॅ–ऋब्र–आउ–अल–जुना. **मयि**–का; महि–अल–जुना. **श्रुतं**–का; व्रतं–इतरेषु. **व्रतेन भूयासं ब्रह्मणा**–का; व्रतेषु भूयासं ब्रह्मणा–ऋमं–ऋब्र–प्र; प्रियेण भूयासं ब्रह्मणा–मु–आउ–अल–जुना; ब्रह्मणा–मॅ । **५**[१]. ≡ तैआ ७. ४. १. **विचक्षण**; विचक्षणं–ऋमं–ऋब्र–अल–जुना–आउ–प्र; विचर्षण–तैआ. **मधुमद्वहे**–का; मधुमद्वहां–मॅ–ऋमं–मु–आउ–प्र; मधुमत्तमा–तैआ–पागृ; मधुमद्वहा–ऋब्र; मधुमद्वहा–अल–जुना. **अवृधं**–का; अवृद्धं–मॅ–आउ–ऋब्र–ऋमं–मु–प्र–अल–जुना. **ब्रह्मण आणीः**–का; ब्रह्मण आणी–प्र; ब्रह्मणानी–इतरेषु. **स्थ**–का–मॅ–आउ; स्थः–ऋमं–मु–अल–जुना–ऋब्र–प्र. **हासीः**–का–प्र–मॅ–मु–आउ; हासीत्–जुना–अल. → वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितं आविरावीर्य एधि वेदस्य म आणी स्थ श्रुतं मे मा प्र हासीरनेनाधीतेन–ऐआ. । **६. देवीं**; देवी–का. **मनसा**; समनसां–मु.

→ वाग्देवी मनसा–शांगृ १. २४. **अजिराचरिष्णुः**–का; अजिराजरिष्णुः–अल–जुना. अजराजरिष्णुः–प्रर–मॅ–ऋमं–आउ; अजराजरिष्णु–ऋव्र–मु । ७. = तैआ १०. १; वासं ३२. ११; ऋसं १.१८.६. ८. = ९ मॅ–मु–आउ–प्रर–ऋमं–ऋव्र–अल–जुना–औध. **मेधाव्यहं सुमनाः**–ऋमं–जुना–आउ–मॅ–ऋव्र–प्रर; मेधाव्यं सुमनः–मु; मेधाव्यहं समनाः–अल. **श्रद्धामनाः**–मॅ–मु–आउ–जुना–ऋमं–ऋव्र–प्रर; श्रद्धामयाः–अल. **सत्यमतिः**–का–मॅ–मु–ऋमं–प्रर; सत्यमनाः–आउ; सत्यमुपः–अल–जुना. **धारयिष्णुः**; धारयिष्णु–मु. **प्रवक्ता**; प्रयुक्ता–ऋमं–प्रर; प्रविक्ता–अल–जुना. → तद्वक्तारमवतु–ऐआ. **अस्यध्वरया**–का; अस्ये स्वधया–मु–ऋव्र; अस्यै स्वधया–ऋमं; अयं स्वधया–मॅ–अल–जुना; अस्य स्वधया–आउ; अये स्वधया–प्रर; अस्मै शरया–औध । ९. = इतरपुस्तकेष्वष्टमी. → वासं ३२. १४. ९३. = अथर्व ६. १०८. ४. **चोपासते**; चोप आसते–प्रर. **तया मामद्य मेधयाग्ने**; तया मा मेधया मे–ऋमं–ऋव्र–मु. **कुरु**; कृणु–अथर्व.

मु–औधपुस्तकयोर्देशमो मन्त्र एवमस्ति—

नाशयित्री पलाशस्यारुषसौ पथिकामसु । अथोत तस्य यक्ष्माणां पापरोगनाशिनी ॥

औधपुस्तके उत्तरार्धो भिन्नः–अथो ततस्य यक्ष्माणमपापा रोगनाशिनी. औधपुस्तके पुनरेकादशो मन्त्रो दत्तोऽस्ति स यथा—

ब्रह्मवृक्ष पलाश त्वं श्रद्धां मेधां च देहि मे । वृक्षाधिप नमस्तेऽस्तु अत्र त्वं संनिधौ भव ॥

९

आ सूरेतु परावतोऽग्निर्गृहपतिः सुप्रतीको विभावसुः । अग्निर्ज्योतिर्निचाय्यः पृथिव्यामध्याभर ।
यमागत्य वाज्यध्वानं सर्वा मृधो वि धूनुते । आक्रम्या वाजिन् पृथिवीमग्निमिच्छ रुचा त्वम् ।
सेनां जिगाति सुष्टुतिं सुदीधितिर्विभावसुम् ॥ १ ॥
ध्रुवमग्निर्नो दूतो रोदसी हव्यवाड् देवाँ आ वक्षदध्वरे ।
विप्रो दूतः परिष्कृतो यजिष्ठश्च यज्ञियः कविः ।
अग्निवानवदौर्ववद्भृगुवज्जमदग्निवत्

॥ २ ॥

यदि ते मात्रा ... हव्यवाळग्निर्नो दूतो रोदसी
उतोत्तरेण दुहिता जुहोता मधुमत्तममग्नये जातवेदसे ।
प्रजां मे यच्छ द्विपदं चतुष्पदमग्निमहिंसन्तमङ्गिरस्वत् ।
उदस्थाद्ध्वं ईयते घृमन्तो दीधतो बृहच्छुक्राः शोचन्तो अर्चयः ॥ ३ ॥
महिषी वो अग्निर्धूमकेतुरुषर्बुधो वैश्वानर उषसामग्रमख्य-
दत्यक्रमीद्द्रविणोदा वाज्यर्वाकः सु लोकं सुकृतः पृथिव्याम्
ततः खनेम सुप्रतीकमग्निं वैश्वानरं स्वो रुहाणा अधि
नाके अस्मिन्नधा पोषस्व पोषेण पुननों नष्टमा कृधि पुननों रयिमा कृधि ॥ ४ ॥
न वै देवान् पीवरो सेयतात्मा रोरूयमाणः ककुभामचोदतेऽग्ने उ मन्य
त्वमग्ने व्रतभृच्छुचिरग्ने देवाँ इहा वहोप यज्ञं हविश्च नः ।

व्रतानि बिभ्रद्व्रतपा अदब्धो यजा नो देवाँ अजरः सुवीरः ।
दधद्रत्नानि सुमृळीको अग्ने गोपाय नो जीवसे जातवेदः ॥ ५ ॥
देवो अग्निः स्विष्टकृत् सुहविषा मन्द्रः कविः सत्यमन्मायजीं
होता होतृहोतुरायजीयानग्ने यान् देवानयाड् याँ अपिप्रेयँ
ते होत्रे अमत्सत ताँ ससनुषीं होत्रां देवगमां दिवि
देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्निर्होताभूद्सुवने वसुधेयस्य नमोवाके वीहि ॥ ६ ॥
सर्वं वहन्तु दुष्कृतमग्निं गीर्भिर्हवामहे ।
अग्निः शुक्रेण शोचिषा बृहत्सूर्यो अरोचत दिवि सूर्यो अरोचत ।
घृतैर्हव्येभिराहुतं सुमत्सूर्यो न रोचन् तेऽग्नौ हव्यानि धत्तनाग्नौ ब्रह्माणि केवलाग्ने बृहन्तमध्वरे ।
सश्चतो दाशुषो गृहमेवा त्वमग्ने सहोभिर्गीर्भिर्वत्सो अवीवृधत् ॥ ७ ॥
शासं इत्था महाँ असि० ॥ १०. १५२. १

ऋसं १०. १५१ अनन्तरं पठनीयम् । एतस्मिन्नर्थे बृहद्देवता[1] (८. ५९) द्रष्टव्या । इदं सुभेषज-स्यार्षम् । अस्मिन् विषये ऋक्प्रातिशाख्य[2] (१६. ८८-९०)-' उत्तरास्तु सुभेषजे । कृतिः प्रकृतिरा-कृतिर्विकृतिः संकृतिस्तथा । षष्ठी चाभिकृतिर्नाम सप्तम्युत्कृतिरुच्यते ॥ अशीतिश्चतुरशीतिरष्टाशीतिर्द्विन-वतिः । षण्णवतिः शतं पूर्णमुत्तमा तु चतुःशतम् ' ॥ गोपथब्राह्मणे (५.२३) सौभेषजं छन्दो निर्दिष्टम् ।

१. ≐ मैसं २. ७. १; वासं ११. ११ : अग्निं(अग्नेः-वासं) ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ; तैसं ४. १. १. ४ : तया ज्योतिरजस्रमिदग्निं खात्वी न आ भरा. **आगत्य वाज्य°... रुचा त्वं** ≡ वासं ११. १८; मैसं २. ७. २; कासं १६. २; १९. ३; तैसं ४. १. २. ३; ५. १२. ६. २. कियांश्चिद्भागः का-पुस्तके त्रुटितः । ' जमदग्निवत् ' इत्यस्यानन्तरं ' च्यवनवत् ' इति स्यात् यत एते पञ्चर्षयः प्रायेण समसुल्लिख्यन्ते; → आपश्रौ २४. ५. १२; आश्वश्रौ १२. १०. ४. **उषसामग्र-मख्यत्** ≡ ऋसं ४. १३. १. शिष्टं वासं ११. २२; तैसं ४. १. २. ४; ५. १. ३. १; मैसं २. ७. २; कासं. १६. २ एतैः समानम्. **अत्यक्रमीत्**-का; उदक्रमीत्-इतरेषु. **अर्वाकः सु°**-वासं-मैसं; अर्वाकः स°-तैसं. **सुकृतः पृथिव्यां**-का; सुकृतं पृथिव्याः-इतरेषु. **अस्मिन्**-का; उत्तमं-वासं; उत्तमे-तैसं । ५. **ककुभामचोदते** ≡ ऋसं ५. ४४. २. **उ मन्य**; तमन्य इति शेफ्टेलोवित्झमहा-शया अभ्यूहन्ति. **त्वमग्ने व्रत°...जीवसे जातवेदः** ≡ मैसं ४. ११. ४; तैब्रा २. ४.१.११; ऐब्रा ७. ८; शांश्रौ ३. ५. ९; आपश्रौ ९. ४. १४; आश्वश्रौ ३. १२; शांगृ २. १३. **व्रतानि**-का-आश्वश्रौ-शांश्रौ-ऐब्रा; व्रता नु-तैब्रा-मैसं-आपश्रौ. **अदब्धो**-का-मैसं-आश्वश्रौ; अदाभ्यो-इतरेषु. **यजा नो**; भवा नो-शांश्रौ. **देवाँ**-का-तैब्रा-ऐब्रा-शांश्रौ-आपश्रौ-आश्वश्रौ; देवो-मैसं; वूतो-शांगृ. **सुमृळीको**-का-मैसं-आश्वश्रौ-शांश्रौ; सुविदानो-इतरेषु । ६. खिल ५. ७. ३१ अत्रायं मन्त्रः पुनरागतः । ७. **अग्निः शुक्रेण ... ... अरोचत** ≡ खिल ८. ५[3]. **गीर्भिर्वत्सो अवीवृधत्** ≡ ऋसं ८. ८. १५.

औंधपुस्तकानुसारेण ऋसं १०. १६१ अनन्तरमधो दीयमानमेकर्चं सूक्तं पठनीयम् । तत्पुस्तक-संपादकैरिदं केवलमभ्यूहमात्रेण स्वीकृतमित्यावेदितम् ।

1. Cf. Bṛhaddevatā part II, p. 309.

2. Regarding the ignorance of this hymn on the part of Uvaṭa, the commentator of Ṛk-prātiśākhya, Cf. Scheftelowitz, p. 125.

ऊर्ध्वरेखा प्र दहन्ते विष्णुरिमिन्द्राग्नी अमृतं जुषेथाम्।
महीं दधाना उप दीर्घमायुरस्मे धत्तं पुरुभुजा पुरंधिः॥

१०

वेनस्तत्पश्यद्भुवनस्य विद्वान् यत्र विश्वं भुवत्येकनीळम्।
इदं धेनुरदुहज्जायमाना स्वर्विदमभ्यनूषत व्राः॥ १॥
प्र तद्वोचेदमृतं नु विद्वान् गन्धर्वो नाम निहितं गुहा यत्।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुष्पितासत्॥ २॥
सतो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त॥ ३॥
अक्षीभ्यां ते नासिकाभ्यां॰॥ ऋ. सं. १०. १६३. १

ऋसं १०. १६२ अनन्तरं पठनीयम्। अत्र बृहद्देवता (८. ६६)-'वैन्यं तु वेनस्तत्पश्यदक्षीभ्याम्' इति। वाजपेयेऽतिरिक्तोक्थे इदं विनियुक्तं (→ शांश्रौ १५. ३)। विज्ञानकर्मणीदं विनियोज्यमिति कौसू ३७. ३। एतत्सूक्तं अथर्व २. १. १, २, ३[१] + ५[२] अत्रोपलभ्यते। पैप्प. अथर्व २. ६ अत्रापीदं पाठभेदेनोपलभ्यते। वासं ३२.८-१०; तैआ १०.१.३; मनाउ २.३; अन्त्ये अत्रापीदं दृश्यते।

१. भुवनस्य विद्वान्-का; विश्वा भुवनानि विद्वान्-तैआ; परमं गुहा यत्-अथर्व; निहितं गुहा सद्-वासं. **भुवत्येक°**-का-अन्त्ये; भवत्येक°-इतरेषु. **°नीळं**-का-वासं-अन्त्ये-तैआ; °रूप-अथर्व. वासं-तैआ-अन्त्ये-पुस्तकेषूत्तरार्धः सर्वथा भिन्नः. **°धेनुः**-का; पृश्निः-अथर्व. **जायमाना**-का; जायमानाः-अथर्व. **स्वर्विदं**-का; स्वर्विदो-अथर्व। **२. अमृतं नु**; अमृतस्य-अथर्व. **नाम**-का-तैआ (→ ऋसं १०.४५.२ : विद्मा ते नाम परमं गुहा यत्); धाम-इतरेषु. **निहितं**-का-तैआ; विभृत-वासं. **गुहा यत्**-का-अथर्व; गुहा सत्-वासं-अन्त्ये; गुहासु-तैआ। **३. सतो**-का; स नो-वासं-अथर्व-अन्त्ये-तैआ. **बन्धुर्जनिता स विधाता**-का-वासं-तैआ-अन्त्ये; पिता जनिता स उत बन्धुः-अथर्व. **तृतीये धामन्**-का-वासं-अन्त्ये; तृतीये धामानि-तैआ; समाने योनौ-अथर्व. **अभ्यै°**-का-तैआ; अध्यै°-इतरेषु।

११

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्त होता तन्मे मनः शिवसंकल्पमस्तु॥ १॥
येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु॥ २॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किं चन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु॥ ३॥
येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्त होता तन्मे मनः शिवसंकल्पमस्तु॥ ४॥
यस्मिन्नृचः साम यजूंषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः।
यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु॥ ५॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु ॥ ६ ॥
यदत्र षष्ठं त्रिशतं शरीरं यज्ञस्य गुह्यं नवनाभमाद्यम् ।
दश पञ्च त्रिंशतं यत्परं च तन्मे मनः शिवसंकल्पमस्तु ॥ ७ ॥
ये पञ्चपञ्चा दशतं शतं च सहस्रं च नियुतं न्यर्बुदं च ।
ते यज्ञचित्तेष्टकात्तं शरीरं तन्मे मनः शिवसंकल्पमस्तु ॥ ८ ॥
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
[तस्य योनिं परिपश्यन्ति] धीरास्तन्मे मनः शिवसंकल्पमस्तु ॥ ९ ॥
येन कर्माणि प्रचरन्ति धीरा विप्रा वाचा मनसा कर्मणा च ।
यस्यान्वितमनु सं यन्ति प्राणिनस्तन्मे मनः शिवसंकल्पमस्तु ॥ १० ॥
यें मनो हृदयं ये च देवा ये अन्तरिक्षे बहुधा चरन्ति ।
यें श्रोत्रं चक्षुषी सैंचरन्ति तन्मे मनः शिवसंकल्पमस्तु ॥ ११ ॥
येन द्यौरुग्रा पृथिवी चान्तरिक्षं ये पर्वताः प्रदिशो दिशश्च ।
येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥ १२ ॥
येनेदं सर्वं जगतो बभूवुर्ये देवा अपि महतो जातवेदाः ।
तदिदाग्निस्तपसो ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु ॥ १३ ॥

तुभ्येदमिन्द्र परि षिच्यते मधु० ॥ ऋ. सं. १०. १६७. १

ऋसं १०. १६६ अनन्तरं पठनीयम्। बृहद्देवतापि[1] (८. ६९)–' ऋषभं मा (= १०. १६६) सपत्नघ्नं येनेदमिति मानसम् ' इति। ऋग्विधानं (४. १०४-१०५) च–' येनेदमिति[2] वै नित्यं जपेत नियतव्रतः। समाधिं मनसस्तेन विन्दते नैव मुह्यति ' इति। इदं शिवसंकल्पसूक्तमिति खिलानुक्रमणी। ' खिलानि श्रीसूक्तशिवसंकल्पादीनि श्राद्धे ब्राह्मणान् श्रावयेत् ' इति मेधातिथिः (मनु ३. २३२)। शिवसंकल्पसूक्तं पापहरमिति मनुः (११. २५१)। तथा चाग्निपुराणे–' शिवसंकल्पजापेन समाधिं मनसो लभेत् ' (२६०. ७४) ' येनेदमिति वै जप्त्वा समाधिं विन्दते परम् ' (२५९. ९३)।

१-६ = वासं ३४. १-६; ऋमं; आसू; ऋब्र; अन्ये; प्रर (गर्भाधान); आश्वमंसं. का-वासं-पुस्तकयोः प्रथमचतुर्थमन्त्रयोर्व्यत्यासः। का–औधपुस्तकयोस्तृतीयचतुर्थमन्त्रयोर्व्यत्यासः सप्तमो मन्त्रश्च औधपुस्तके नास्ति। २. **यक्ष**; यक्ष्म°. ४. **तथैवैति**–का; तथेवेति–औध. **ज्योतिरेकं** = ऋसं १. ९३. ४। ६. **जविष्ठं**–का; यविष्ठं–ऋब्र-जुना-प्रर-औध। आश्वमंसं-पुस्तके षण्णां मन्त्राणामनन्तरं ऋसं ७. ५९. १२ ऋक् लिखितास्ति। ७. **नवनाभमाद्यं**–का; नवनाभमाद्यं–म्यु। **गुह्यं**–म्यु; ' गु ' इत्यक्षरं का–पुस्तके नष्टम्। ८. **पञ्चपञ्चा दशतं**–का; पञ्च पञ्चाशतः–औध. **न्यर्बुदं**–का; चार्बुदं–औध. **'ष्टकात्तं**–का; 'ष्टकाटं–औध. ' 'ष्टकास्तच्छरीरं ' इति शुद्धमिति शेफ्टेलोवित्सुमहाशयाः। ९[1]. = वासं ३१. १८;

1. Cf. Bṛhaddevatā part II, p. 312.

2. The editior of Lahore edition of Rgvidhāna which is a transliteration of Meyer's edition gives the text as येनें(? तुभ्ये)दमिति, while Meyer has rightly printed merely येनेदमिति. The transliterator did so because he related the verse to RV. X. 167 which begins with तुभ्येदम्, not knowing the Khila येनेदम्. See also footnote to Khila I. 2.

तैआ ३. १२. ७; ३. १९. १; श्वेउ ३. ८. ९[२] = वासं ३१. १९. **तमसः परस्तात्**–का; तमसस्तु पारे-तैआ. **तस्य योनिं परिपश्यन्ति**–म्यु-औध; का-पुस्तक एतत्त्रुटितम्। **१०. प्रचरन्ति**–का; प्रतिरन्ति–प्रर-म्यु. **विप्रा**–का-औध; यतो–प्रर-म्यु. **कर्मणा च**–का; कर्मणा वा–औध; तानि हन्ति–प्रर-म्यु. **यस्यान्वितमनु**–म्यु; यस्यां त्वितमनु-प्रर; संविदमनु-का; यस्त्वां दिशमनु-औध. **११. ये**–का; ये मे–औध. **अन्तरिक्षे बहुधा चरन्ति**–का; अन्तरिक्षं बहुधा कल्पयन्ति-औध; दिव्या आपो यः सूर्यरश्मिः–म्यु. **श्रोत्रं**–का; श्रोत्रं च-औध. **संचरन्ति**–का-औध; संचरन्तं-म्यु। **१२.** → ऋसं १०. १२१. ५; वासं ३२. ६. **ये**–का; यः-जुना; येन-औध. यत्पर्वताः पृथिवी चान्तरिक्षं यत्पर्वताः प्रदिशो दिशश्च इति म्यु-पुस्तके मन्त्रस्य पूर्वार्धः। **येनेदं**–का; येनेदं सर्वं-औध. **जगद्व्याप्तं**–औध; जगत्व्याप्तं-का. **प्रजानां**–का; प्रजानत्-औध. **१३. बभूवुर्ये देवा अपि**–का; बभूव तदेवापि–म्यु; बभूव यदेवा अपि-औध. **तादिवाग्निस्**–का; तदेवाग्निं-जुना; यदेवाग्न्यं-औध. **ज्योतिरेकं** = ऋसं १. ९३. ४. **जातवेदाः**; जातवेदः इति स्यादिति शेफ्टेलोवित्झमहाशयाः।

लण्डननगरे ब्रिटिश म्यूझिअम्मध्ये ऋग्वेदसंहिताया एकं लिखितपुस्तकं (क्रमाङ्कः Add. 5351) अस्ति। तत्र १०. १६६ सूक्तानन्तरं अष्टाविंशतिमन्त्रात्मिका शिवसंकल्पोपनिषद् लिखितास्ति। शेफ्टेलोवित्झमहाशयैः सा टिप्पण्या जर्मनभाषान्तरेण च सह प्रकाशितास्ति[1]। तत्र १३ मन्त्रानन्तरं वर्तमाना मन्त्रा अत्र दीयन्ते। अस्य लिखितपुस्तकस्य 'म्यु' इति संज्ञा कृता। उपरि दत्तास्त्रयोदश मन्त्रा अस्मिन् लिखितपुस्तकेऽपि वर्तन्ते। तेषां पाठभेदा उपरि 'म्यु' इति संज्ञया दत्ताः। तथापि का-पुस्तककमात् म्यु-पुस्तकस्थः क्रमो भिन्नः स यथा–का १, २ = म्यु १, २; का ३ = म्यु ५; का ४ = म्यु ७; का ५ = म्यु ४; का ६ = म्यु ६; का ७ = म्यु १२; का ८ = म्यु १०; का ९ = म्यु ११; का १० = म्यु ३; का ११ = म्यु ११; का १२ = म्यु ९; का १३ = म्यु ८. इण्डिया ऑफिस-मध्ये वर्तमाने अन्यस्मिन् ऋग्वेदसंहितालिखितपुस्तकेऽपि (क्रमाङ्कः २१३१) इदं शिवसंकल्पसूक्तमुपलभ्यते तत्त्व म्यु-पाठेन समानमेव। जुनागड-नवानगर-पुस्तकद्वयेऽपि शिवसंकल्पसूक्तं लिखितमस्ति तत्र मन्त्रसंख्या मन्त्रक्रमश्च म्यु-पुस्तकानुसार्येव। यत्र जुनागड–पुस्तकं न निर्दिष्टं तत्र तत्स्थः पाठो म्यु-समान एवेति मन्तव्यम्। औधपुस्तके २६ मन्त्रात्मकं शिवसंकल्पसूक्तं मुद्रितमस्ति। तत्रस्थाः १३ मन्त्रपर्यन्तं वर्तमानाः पाठभेदा उपरि दत्ता एव। औध-पुस्तकस्थो मन्त्राणां क्रमोऽपि का-पुस्तकाद्भिन्नः। अतः सोऽत्र प्रदर्श्यते–का १, २ = औध १, २; का ३ = औध ४; का ४ = औध ३; का ५, ६ = औध ५, ६; का ७ औधमध्ये नास्ति; का ८ = औध ७; का ९ = औध ८; का १० = औध ९; का ११ = औध १०. औधपुस्तके एकादशो मन्त्रः सर्वथा भिन्नो वर्तते स यथा–

यस्येदं धीराः पुनन्ति कवयो ब्रह्माणमेतं व्यावृणत इन्दुम्।
स्थावरं जङ्गमं च धीराकाशं तन्मे मनः शिवसंकल्पमस्तु ॥ ११ ॥

का १२ = औध १२; का १३ = औध १६। म्यु-पुस्तकस्था अधिका मन्त्रा अधुनोद्ध्रियन्ते–

अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्तपरं च यत्।
सूक्ष्मात्सूक्ष्मतरं ज्ञानं तन्मे मनः शिवसंकल्पमस्तु ॥ १४ ॥
अस्ति विनाशयित्वा सर्वमिदं नास्ति पुनस्तथैव दृष्टं ध्रुवम्।
अस्ति नास्ति हितं मध्यमं पदं तन्मे मनः शिवसंकल्पमस्तु ॥ १५ ॥
अस्ति नास्ति विपरीतो प्रवादोऽस्ति नास्ति सर्वं वा इदं गुह्यम्।
अस्ति नास्ति परात्परो यत्परं तन्मे मनः शिवसंकल्पमस्तु ॥ १६ ॥
परात्परतरं यच्च तत्पराच्चैव यत्परम्।
तत्पराात्परतोऽज्ञेयं तन्मे मनः शिवसंकल्पमस्तु ॥ १७ ॥

1. ZDMG 1921, Band. 75. pp. 201-12.

परात्परतरो ब्रह्मा तत्परात्परतो हरिः ।
तत्परात्परतो ह्येष तन्मे मनः शिवसंकल्पमस्तु ॥ १८ ॥
गोभिर्जुष्टो धनेन ह्यायुषा च बलेन च ।
प्रजया पशुभिः पुष्कलार्थं तन्मे मनः शिवसंकल्पमस्तु ॥ १९ ॥
प्रयतः प्रणवो नित्यं परमं पुरुषोत्तमम् ।
ओंकारं परमात्मानं तन्मे मनः शिवसंकल्पमस्तु ॥ २० ॥
यो वै वेदादिषु गायत्री सर्वव्यापिमहेश्वरात् ।
तद्विरुक्तं तथाद्वैश्यं तन्मे मनः शिवसंकल्पमस्तु ॥ २१ ॥
यो वै वेद महादेवं परमं पुरुषोत्तमम् ।
यः सर्वं यस्य चित्सर्वं तन्मे मनः शिवसंकल्पमस्तु ॥ २२ ॥
योऽसौ सर्वेषु वेदेषु पठते ह्यज ईश्वरः ।
अकायो निर्गुणोऽध्यात्मा तन्मे मनः शिवसंकल्पमस्तु ॥ २३ ॥
कैलासशिखरे रम्ये शंकरस्य शुभे गृहे ।
देवतास्तत्र मोदन्ति तन्मे मनः शिवसंकल्पमस्तु ॥ २४ ॥
कैलासशिखराभासा हिमवद्गिरिसंस्थिताः ।
नीलकण्ठं त्रिनेत्रं च तन्मे मनः शिवसंकल्पमस्तु ॥ २५ ॥
आब्रह्मस्तम्बपर्यन्तं त्रैलोक्यं सचराचरम् ।
उत्पादितं जगद्व्याप्तं तन्मे मनः शिवसंकल्पमस्तु ॥ २६ ॥
य इमं शिवसंकल्पं सदा ध्यायन्ति ब्राह्मणाः ।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसंकल्पमस्तु ॥ २७ ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् तन्मे मनः शिवसंकल्पमस्तु ॥ २८ ॥

औंध-पुस्तकस्थः मन्त्रक्रमो म्यु-पुस्तकाद्भिन्नः अतः सोऽत्र प्रदर्श्यते–म्यु १४ = औंध १३; म्यु १५ = औंध २५; म्यु १६ = औंध २६; म्यु १७ औंधमध्ये नास्ति; म्यु १८ = औंध २३; म्यु १९ = औंध १७; म्यु २० = औंध २१, २०; म्यु २१ = औंध १९; म्यु २२ = औंध २०, २१; म्यु २३ = औंध १८; म्यु २४ = औंध १४; म्यु २५, २६ औंधमध्ये न स्तः; म्यु २७ = औंध २४; म्यु २८ औंध मध्ये नास्ति । तथा च औंधपुस्तकस्थौ द्वौ मन्त्रौ म्यु-पुस्तके न स्तः तौ यथा–

आदित्यवर्णं तपसा ज्वलन्तं यत्पश्यसि गुहासु जायमानः ।
शिवरूपं शिवमुदितं शिवालयं तन्मे मनः शिवसंकल्पमस्तु ॥ १५ ॥
ओंकारं चतुर्भुजं लोकनाथं नारायणम् ।
सर्वस्थितं सर्वगतं सर्वव्याप्तं तन्मे मनः शिवसंकल्पमस्तु ॥ २२ ॥

औंधपुस्तकस्थाः पाठभेदा अधुना प्रदर्श्यन्ते–

१४. अचिन्त्यं–म्यु; अव्यक्तं–औंध. **च यत्**–म्यु; शिवं–औंध. **१५. विनाशयित्वा**–म्यु; नास्ति शयित्वा–औंध. **तथैव**–जुना–औंध; तथैवा–म्यु. **१६. प्रवादो**–औंध; प्रवाहो–म्यु. **सर्वं वा इदं गुह्यं**–म्यु; गुह्यं वा इदं सर्वं–औंध. **१७. यश्च**–जुना; यस्य–म्यु. **यत्परं**–जुना; तत्परं–म्यु. **परतो**–म्यु; परतरो–जुना. **१८. परात्परतरो**–म्यु; तत्परात्परतो–औंध. **ब्रह्मा**–औंध; ब्रह्म–म्यु. **तत्परात्परतो ह्येष**–म्यु; परात्परतरं ज्ञानं–औंध. **१९. पुष्कलार्थं**–म्यु; पुष्करार्थं–औंध. **२१. वै**–म्यु; औंधपुस्तके नास्ति. **सर्वव्यापिमहेश्वरात्**–म्यु; सर्वव्यापी महेश्वरः–औंध. **तद्विरुक्तं**

तथाद्वैरूप्यं–जुना; यद्विरूपं तथाद्वयैरूप्यं–म्यु; तदुक्तं च यदा ज्ञेयं–औध. **२३. पठते ह्यज**–म्यु; पठ्यतेऽनद–औध. **अकायो निर्गुणोऽध्यात्मा**–जुना; अकायो निगुणो ध्यात्वा–म्यु; अकायो निर्व्रणो ह्यात्मा–औध. **२४. शुभे गृहे देवतास्तत्र मोदन्ति**–जुना; शुभे गृहे देवतास्तत्र मोदंति–म्यु; गृहालयं देवतास्तत्प्रमोदन्ते–औध. **२५. हिमवद्गिरि**°; हि भवद्गिरि°–म्यु. **२७. इमं**–म्यु; इदं–औध. **सदा ध्यायन्ति**–म्यु; सदाधीयन्ति–औध. **परं मोक्षं गमिष्यन्ति**–जुना; परमोक्षं गमिष्यन्ति–म्यु; परं मोक्षमाप्स्यन्ति–औध. **२८** ≡ ऋसं ७. ५९. १२.

१२

यासामूधश्चतुर्बिलं मधोः पूर्णं घृतस्य च । ता नः सन्तु पयस्वतीर्बह्वीर्गोष्ठे घृताच्यः ॥ १ ॥
उपमैतु मयोभुव ऊर्जं चौजश्च बिभ्रतीः ।
दुहाना अक्षितिं पयो मयि गोष्ठे निवर्तध्वं यया भवान्युत्तमः ॥ २ ॥
विभ्राड्बृहत्पिबतु सोम्यं मधु० ॥ ऋ. सं. १०. १७०. १

ऋसं १०. १६९ अनन्तरं पठनीयम् । आश्वगृ २. १०. ६ मध्ये एतौ मन्त्रावुध्दृतौ ।

१ ≡ आपश्रौ ७. १७. १; शांगृ ३. ९. ३. **बह्वीः**–का–आश्वगृ–शांगृ; **अस्मिन्**–आपश्रौ. **घृताच्यः**–का–आश्वगृ–शांगृ; वयोवृधः–आपश्रौ । **२. मयोभुव**–जुना–आश्वगृ; मयाभुवं–का. **बिभ्रतीः**–जुना–आश्वगृ; → शांगृ ३. ७: ऊर्जं बिभ्रतः; पिप्रतीः–का. **अक्षितं**–जुना–आश्वगृ; अक्षितिं–का. **मयि**–जुना–आश्वगृ; मम–का. **गोष्ठे**–जुना–आश्वगृ; गोत्रे–का. **निवर्तध्वं**–जुना; निविशध्वं–का–आश्वगृ. **भवान्युत्तमः**–जुना; भवाम्युत्तमः–का–आश्वगृ ।

१३

नेजमेष परा पत सुपुत्रः पुनरा पत । अस्यै मे पुत्रकामायै गर्भमा धेहि यः पुमान् ॥ १ ॥
यथेयं पृथिवी मह्युत्तानो गर्भमा दधे । एवं तं गर्भमा धेहि दशमे मासि सूतवे ॥ २ ॥
विष्णोः श्रैष्ठ्येन रूपेणास्यां नार्यां गवीन्यां । पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ॥ ३ ॥
महि त्रीणामवोऽस्तु० ॥ ऋ. सं. १०. १८५. १

ऋसं १०. १८४ अनन्तरं पठितव्यम् । बृहद्देवतापि[1] (८. ८२–८३)–' यद्विष्णुरिति (= १०. १८४. १) सूक्तं तु वैश्वदेवं प्रचक्षते । तस्मिन्स्वदारगर्भार्थमृषिराशास्त आशिषः । परं तु नेजमेषेति गर्भार्थं वा तदुच्यते ' इति । ऋग्वि ४. ११९; आर्षानु १०. ९६ अपि द्रष्टव्यम् । मागृ २. १८. ४; आश्वगृ १. १४. ३; शांगृ १. २२; आपमं १. १२. ७, ४, ६; संकौ; प्रर; ऋव्र; आश्वमंसं; धसिं; मॅं ३०; आउ २३; अल; जुना; मु; औध एतेष्विदमुपलभ्यते ।

१[१] ≡ बृहद्दे ८. ८४. **गर्भमा**–का–आपमं–बृहद्दे–ऋमं–मॅं–मु–आउ; पुनरा–मागृ । २[१] ≡ अथर्व ५. २५. २[१]. **उत्ताना**–ऋमं–मॅं–मु–आउ; मह्युत्ताना–मागृ; भूतानां–अथर्व; तिष्ठन्ती–आपमं. २[२]. **तं**–का; त्वं–आपमं. **धेहि**; धत्स्व–आपमं । ३ ≡ अथर्व ५. २५. १०, ११. **श्रैष्ठ्येन**–का; श्रेष्ठेन–इतरेषु. **नार्यां**–का–आपमं–ऋमं–मॅं–मु–आउ; नार्या–अथर्व–मागृ. **पुत्रं**–का–अथर्व–मागृ; पुत्रान्–ऋमं–ऋव्र–प्रर–मॅं–मु–आउ; गर्भं–आपमं → ऋसं १०. १८४. ३: तं ते गर्भं हवामहे दशमे मासि सूतवे; आश्वगृ १. ७. ३ : पुमांस एव मे पुत्रा जायेरन् ।

1. Cf. Bṛhaddevatā part II, pp 316-17.

१४

अनीकवन्तमृतयेऽग्निं गीर्भिर्हवामहे । स नः पर्षदति द्विषः ॥ १ ॥
प्र नूनं जातवेदसं० ॥ ऋ. सं. १०. १८८. १

इत्यृग्वेदे खिले चतुर्थोऽध्यायः ॥

ऋसं १०. १८७ अनन्तरं पठनीयम् । ऋसं १०. १८८ अनन्तरं पठितव्यमिति मु-पुस्तके । साकमेधे अस्य विनियोगः । आश्वश्रौ २. १८; आश्वमंस[२]; मॅ३१; आउ २४; अल; जुना; मु एतेष्वि-दमुपलभ्यते ।

'स नः पर्षदति द्विषः' इति ऋसं १०. १८७ सूक्ते प्रतिमन्त्रमन्तिमः पादः ।

अथ पञ्चमोऽध्यायः

ॐ संज्ञानं पञ्च कश्यपः संज्ञानः शंयुरुत्तमा साशीः शक्करी सर्वत्र नैर्हस्त्यं तृचं निर्हस्त्यः सपत्नघ्नं[१] सेनादरणमानुष्टुभं बृहतीमध्यं प्र सप्त कश्यपो जमदग्निरुत्तमा शंयुराद्याग्नेयी गायत्री द्वितीयोपोत्तमाशीः पाङ्क्तं[२] तृतीया अक्षरस्तुतिः सानुष्टुप् चतुर्थी सौमी पञ्चमी सौरी विदा दश पादाश्च पञ्च विश्वामित्र इन्द्रो वा प्रजापतिरैन्द्रं पावमानमानुष्टुभं[३] पुरीषपदान्याग्नेयवैष्णवैन्द्रपौष्णदैवानि वैराजानि द्वितीयापञ्चम्यावुष्णिहौ[४] चतुर्थी न्यङ्कुसारिणी सप्तमी पुरस्ताद्बृहती नवम्यन्त्ये पङ्क्ती अग्निरेकादश लिङ्गोक्तदेवतं यजूंषि वायुः सप्त प्रउगेणोक्तदैवतं गायत्रं षष्ठी शक्करी याजुषाणि पञ्च होता द्वादश वसिष्ठो वा[५] प्रैषसूक्तान्याद्यमाप्रियं परं लिङ्गोक्तदेवतमनिरुक्तं स्वयशोक्तदेवतमन्यत्प्रोक्तमजैदेकादश सप्तमीनवम्यौ त्रिष्टुभौ देवं होताष्टादश होता द्वादश इदं तृचं वसिष्ठवामदेवौ कुन्तापौ द्विबृहत्यावनुष्टुब्वच्यस्वरानुष्टुबन्तं[६] राज्ञश्चतुष्कमिन्द्रः पङ्क्त्यन्तं[७] यः पञ्च यः षड् यत्पञ्च एता द्व्यूनैतशो मुनिः षष्ठयष्टम्यावुष्णिहावन्त्या द्विपदा यजूंषि वा चत्वारि विततौ षडानुष्टुभमिहेत्था चतुष्कं द्विपदं भुगेकपादा निचृद्वीमेऽनुष्टुबादित्याः पञ्च जगती त्रिष्टुबुपरिष्टाद्बृहती पुरस्ताद्बृहती द्विपदा यजुर्वा त्वं तृचमानुष्टुभं तु यद्दश होतृप्रतिगरित्रोः संवादो नाकपृष्ठ्यु जगत्याद्या जगत्याद्या ॥

१. निर्हस्त्यः सपत्नघ्नं Macdonell, Bṛhaddevatā part II. p. 320 ; निर्हस्त्यसपत्नघ्नं का; → ऋविव ४. २४. ४

२. पाङ्क्तं ibid ; पाङ्क्त्यं–का

३. पावमानं ibid ; पावनं–का

४. अष्टम्यप्युष्णिक्

५. वाशब्दः समुच्चये । विश्वामित्रौ वसिष्ठश्च प्रैषाणामृषी । पुरोरुचां निविदां प्रैषाणां च विश्वामित्र ऋषिरिति शांश्रौ ८. १५. १५ भाष्ये ।

६. आद्ये द्वे बृहत्यावित्यर्थः. Scheftelowitz suggests द्वितीया बृहती (?).

७. 'वच्यस्व त्रिरानुष्टुबन्तम्' इति शुद्धम् । Scheftelowitz suggests वच्यस्वानु°.

८. 'उप वो नर एमसि इति चतुर्दशी सेयं पङ्क्तिः' इति आश्वश्रौ ८. ३. १२ भाष्येऽपि ।

१

संज्ञानमुशना वदत् संज्ञानं बरुणो वदत् । संज्ञानमिन्द्रश्चाग्निश्च संज्ञानं सविता वदत् ॥ १ ॥
संज्ञानं नः स्वेभ्यः संज्ञानमरणेभ्यः । संज्ञानमश्विना युवमिहास्मासु नि यच्छताम् ॥ २ ॥
यत्कक्षीवान् संवननं पुत्रो अङ्गिरसामवेत् । तेन नोऽद्य विश्वे देवाः सं प्रियां समवीवनन् ॥३॥
सं वो मनांसि जानतां समाकूतिं मनामसि । अमी यो विमना जनस्तं समावर्तयामसि ॥४॥
तच्छंयोरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ।
ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ५ ॥

दशममण्डलान्ते पठनीयम्[1]। पूर्णमासे विनियोगः (शांश्रौ ३.६. ३)। ऋमं–मॅ३२–आउ२५–मु–अल–जुना–औध–पुस्तकेष्विदमुपलभ्यते । बृहद्दे ८. ९३; ऋग्वि ४. १२६–१२७ अत्रापीदं निर्दिष्टम्। **२** = अथर्व ७. ५२. १; तैब्रा २. ४. ४. ६. **संज्ञानं नः**–अथर्व–तैब्रा–ऋमं–आउ; संज्ञानं न–अल–जुना–मु; संज्ञानं वः–मॅ–औध. **स्वेभ्यः**–का–ऋमं–मॅ–आउ–अल; स्वेभिः–अथर्व; स्वेभ्यः–मु; स्वैः–तैब्रा. **अरणेभ्यः**–का–ऋमं–मॅ–आउ–अल–मु; अरणेभिः–अथर्व; अरणैः–तैब्रा. **यच्छतां**–का–मु–अल; यच्छत–इतरेषु । **३** = खिल ३. १५. ३२. **कक्षीवान्**; कक्षीवां. **संवननं**–का–आउ–ऋमं–मु–अल–जुना; संवननो–मॅ. **अङ्गिरसामवेत्**–का–आउ; अङ्गिरसामवे–मॅ–अल–जुना; अङ्गिरसा भवेत्–ऋमं–मु; अङ्गिरसां भवेत्–औध. **समवीवनन्**–का; समचीचरन्–ऋमं; समजीजनन्–इतरेषु । **४**[1] = अथर्व ३. ८. ५[1]. **जानतां**; सं व्रता–अथर्व. **समाकूतिं**–का; समाकूतिर्–मॅ–मु–ऋमं–आउ; समाकूतीर्–अथर्व–अल–जुना. **मनामसि**–का–मु–अल–जुना–मॅ; नमामसि–अथर्व–आउ. **जनः**; दनः–ऋमं; नसः–मु; मनः–औध. **तं**; सं–औध; स्वं । **५** = तैसं २. ६. १०. २; तैब्रा ३. ५. ११; तैआ १. ९. ७; शब्रा १. ९. १. २६–२८; मैसं ४. १३. १०; शांब्रा १. ५; ३. ८; मागृ १. ५. ६; २. १५. ६; आश्वगृ ३. ५. ९; शांगृ ४. ५. ९; १. १४. २१; माश्रौ १. ३. ४. → वैसू १३.३; निरु ४.२१ (सभाष्यं); पञ्चामृ; शांमं; संकौ; ऋब्र; संभा. इयं शंयुबार्हस्पत्या ऋग्वेदसंहिताया अन्त्या ऋगिति शांगृ २. ११. १३; ४. ५. बाष्कलानां 'तच्छंयोरा वृणीमहे' इत्यन्त्या ऋग्भवतीति आश्वगृ ३. ५. ९ नारायणीयवृत्तिः । अस्मिन्मन्त्रे प्रथमं चतुर्भिः पादैरवसानं अनन्तरं द्वाभ्यां पादाभ्यामवसानमिति ऋप्रा १८. ५६.

ऋमं–मु–औध–पुस्तकेष्वयं मन्त्रो नास्ति ।

---

1. According to the commentary on the Caraṇavyūha *Saṃjñānam* is the last hymn of the Bāṣkalaśākhā and consists of 15 verses. But as it has only 5 verses, the commentator also counted the next two hymns and made up 15. In the British Museum MS. No. Add 5351, India Office MS. No. 2131, the Bombay edition of Ṛgvedabhāṣya and also in the Aundh edition these three hymns are given together. That these were originally not one is clear from their different contents. The fact that these three hymns were handed down together at the end of the Ṛgveda Saṃhitā and that the verse *Tacchaṃyorā* with which the Bāṣkalaśākhā ends also appears secondarily at the end of the third hymn lead the commentator to look upon the *Tacchaṃyorā* coming for the second time as the proper end of the whole. Not only the Khilānukramaṇī but the Bṛhaddevatā (VIII. 93-7) also says that these three are independent hymns. Ṛgvidhāna IV. 126-7 also points to the same. Thus the conception that the *Saṃjñāna* hymn consisted of 15 verses is quite late. In the Nirṇayasagar edition of Ṛgveda the first *Tacchaṃyorā* which originally formed the end of the *Saṃjñāna* hymn is omitted. In order to make up the number 15 a quite late verse is added. The fact that Śānkh. Śr. III. 6. 3 quotes mere beginning of the hymn shows that it is old, and belongs to the Vedic period. [See Scheftelowitz, Zeitschrift für Indologie und Iranistik, Vol. I, pp. 50-7, 1922].

२

नैर्हस्त्यं सेनादारणं परि वर्त्मेव यद्भविः । तेनामित्राणां बाहून् हविषा शोषयामसि ॥ १ ॥
परि वर्त्मान्येषामिन्द्रः पूषा च चक्रतुः । तेषां वो अग्निदग्धानामग्निगूळ्हानामिन्द्रो हन्तु वरंवरम् ॥ २ ॥
एषु नह्य विषादनं हरिणस्य धियं यथा । पराङमित्रौ एषत्ववींची गौरुपेजतु ॥ ३ ॥

ऋमं-अल-जुना-मु-औधपुस्तकेषूपलभ्यते । → बृहद्दे[1] ८. ९४ : यत्तु नैर्हस्त्यं तत्सपत्ननिबर्हणं; ऋग्वि ४. १२४ : सेनादारणमेतत्स्यान्नैर्हस्त्यमिति शौनकः ।

१. **नैर्हस्त्यं**; नैर्हस्त्ये-अल. **वर्त्मेव**-का; वर्त्म तु-इतरेषु. **बाहून्**-का-जुना; व्याहून्-अल; **बाहुः**. १[1] = अथर्व ६. ६६. २[2]. **तेनामित्राणां**-का; तेनाविप्राणां-जुना. २ = अथर्व ६.६७.१[1],२[2]. **एषां**; सर्वतः-अथर्व. **च चक्रतुः**-का; च सस्रतुः-मु-अथर्व; च सस्रुतः-अल-जुना; नु यच्छतु-ऋमं. २[2]=खिल ३. २१. २[2]. **अग्निदग्धानामाग्निगूळ्हानां**-का; अग्निमूळहानां-ऋमं-मु-अल-अथर्व; अग्निदग्धानामग्निमूळहानां-जुना. ३ = अथर्व ६. ६७. ३. **एषु**-का; एषु. **नह्य**-का; नह्या. **विषादनं**-का; वृषाजिनं-इतरेषु. **धियं यथा**-का-मु-अल; भियं यथा-जुना; हि प्रियं यथा-ऋमं; भियं कृधि-अथर्व. **पराङ्**-का; परां-जुना-मु; परॉं-औध; परा. **अमित्रौ**-का-ऋमं; अमित्रां-मु-जुना; अमित्रा-अल; अमित्र-अथर्व. **एषत्व°**; एषत्व°-अथर्व. **गौरुपेजतु**-का-जुना-ऋमं; गौरुपाजतु-मु; गौरुपेषतु-अथर्व; गौदुपेजतु-अल ।

३

प्राध्वराणां पते वसो होतर्वरेण्यक्रतो । तुभ्यं गायत्रमृच्यते ॥ १ ॥
गोकामो अन्नकामः प्रजाकामोत कश्यपः ।
भूतं भविष्यत्प्र स्तौति महद्ब्रह्मैकमक्षरं बहु ब्रह्मैकमक्षरम् ॥ २ ॥
यदक्षरं भूतकृतो विश्वे देवा उपासते । महद्विमस्य गोसारं जमदग्निमकुर्वत ॥ ३ ॥
जमदग्निरा प्यायते छन्दोभिश्चतुरुत्तरैः ।
राज्ञः सोमस्य भक्षेण ब्रह्मणा वीर्यावता शिवा नः प्रदिशो दिशः ॥ ४ ॥
अजो यत्तेजो ददृशे शुक्रं ज्योतिः परोगुहा ।
तदृषिः कश्यपः स्तौति सत्यं ब्रह्म चराचरं ध्रुवं ब्रह्म चराचरम् ॥ ५ ॥
त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
अगस्त्यस्य त्र्यायुषं यद्देवानां त्र्यायुषं तन्नो अस्तु त्र्यायुषम् ॥ ६ ॥
तच्छंयोरा वृणीमहे गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ।
ऊर्ध्वं जिगातु भेषजं शं नो अस्तु द्विपदे शं चतुष्पदे ॥ ७ ॥

ऋमं-मु-अल-औध । → बृहद्दे ८. ९४ : सं समिद् (= ऋसं १०. १९१. १) प्राध्वराणां चेत्याग्नेय्यावेव ते स्मृते ।

१. **गायत्रमृच्यते** = ऋसं ८. ३८. १०. **ऋच्यते**; ऋच्यतो-अल । २. **प्रजाकामोत** (प्रजाकामः + उत)-का; प्रजाकाम उत-ऋमं-मु-औध-जुना; पूजाकाम उत-अल. **भूतं भविष्यत्**

1. Cf. Bṛhaddevatā, Part II, p. 320.

= अथर्व ४. ११. २; ११. ७. १७; १५. २. ६. **महद्**-का-ऋमं; मह°-अल-जुना; सह-मु-औध। ३. = तैआ १. ९. ६. **भूतकृतो**-का-ऋमं-अल-जुना; भूतकृत-तैआ-मु-औध. **जमदग्निमकुर्वत**-का-तैआ-ऋमं-अल; जमदग्निरकुर्वतं-मु-औध। ४. = तैआ १. ९. ६; = अथर्व ८. ९. १९ : सप्त च्छन्दांसि चतुरुत्तराणि. **प्यायते**-का; प्यायसे. **चतुरुत्तरैः**; चतुरक्षरैः-ऋमं. **राज्ञः**-तैआ-अल-जुना; राज्ञा-का-ऋमं; राजा-मु-औध. **भक्षेण**-का-अल-जुना-मु-औध; दक्षेण-ऋमं; तृप्तासः-तैआ. **वीर्यावता**-तैआ-ऋमं-औध-जुना; वीर्याता-अल. वीर्यावतां-मु; वीर्यवतां-का. ऋमं-मु-अल-जुना-औधपुस्तकेषु ' सत्या नः प्रदिशो दिशः ' इत्यधिकम्। ५. **दृदृशे**-का-ऋमं-अल-जुना; ददृशे-मु-औध. **पुरोगुहा**-मु-अल-जुना-औध; पुरोगुहा-ऋमं. **तदृषिः**-का-ऋमं-अल-जुना; यदृषिः-मु-औध. **कश्यपः**-मु-औध; कश्यप-का-अल-जुना-ऋमं. ६. = वासं ३. ६२; शांगृ १. २८; हिगृ १. ९. ६; खागृ २. ३. २१; मागृ १. १. २४; पागृ १. १६. ७; २. १. १५; मैब्रा १. ६. ८; ऋब्र; आपमं; मंदी; आसू. ६[1] = अथर्व ५. २८. ७. **देवानां**; देवेषु-वासं. **तन्नो**-का-वासं; तन्मे-ऋमं-मु-आपमं-अल-औध. षष्ठमन्त्रस्यान्ते मु-औधपुस्तकयोः ' सर्वमस्तु शतायुषं बलायुषम् ' इत्यधिकं ऋमं-पुस्तके च ' शतायुषं बलायुषम् ' इत्यधिकम्। ऋमं-पुस्तके षष्ठमन्त्रानन्तरमेको मन्त्रोऽधिकः स एवं–

ॐ च मे स्वरश्च मे यज्ञेप च ते नमश्च।
यत्ते न्यूनं तस्मै त उप यत्तेऽतिरिक्तं तस्मै ते नमः॥

७. **दैवी**; दैवीः-मु। अस्य मन्त्रस्यानन्तरं मु-पुस्तके ' इति परिशिष्टानि समाप्तानि ' इति लिखितं निविदध्यायश्चानन्तरं मुद्रितः।

४

विदा मघवन् विदा गातुमनु शंसिषो दिशः। शिक्षा शचीनां पते पूर्वीणां पुरूवसो॥ १॥
आभिर्ष्टमभिष्टिभिः प्रचेतन प्र चेतय। इन्द्र द्युम्नाय न इषे एवा हि शक्रः॥ २॥
रायें वाजाय वज्रिवः शविष्ठ वज्रिन्नृञ्जसे। महिष्ठ वज्रिन्नृञ्जस आ याहि पिब मत्स्व॥ ३॥
विदा रायें सुवीर्यं मघो वाजानां पतिर्वशाँ अनु। महिष्ठ वज्रिन्नृञ्जसे यः शविष्ठः शूराणाम्॥४॥
यो महिष्ठो मघोनां चिकित्वाँ अभि नो नय। इन्द्रो विदे तमु स्तुषे वशी हि शक्रः॥ ५॥
तमूतये हवामहे जेतारमपराजितम्। स नः पर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत्॥ ६॥
इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम्। स नः पर्षदति द्विषः स नः पर्षदति क्षिधः॥७॥
पूर्वस्य यत्ते अद्रिवः सुम्नं आ धेहि नो वसो। पूर्तिः शविष्ठ शश्वत ईशे हि शक्रः॥ ८॥
नूनं तं नव्यं मन्यसे प्रभो जनस्य वृत्रहन्।
समन्येषु ब्रवावहै शूरो यो गोषु गच्छति संवा सुशेवो अद्वयाः॥ ९॥
एवा ह्येवैवा ह्यग्नाइ एवा ह्येवैवा हि विष्णाउ।
एवा ह्येवैवा हीन्द्र। एवा ह्येवैवा हि पूषन्। एवा ह्येवैवा हि देवाः॥ १०॥
एवा हि शक्रो वशी हि शक्रो वशाँ अनु।
आयो मन्यो मन्यव उपो मन्यो मन्यव उपेहि विश्वथ॥ ११॥

1. For the composition of Khila V. 1-2 in later Vedic period and for the German translation of Khila V. 1-3, see Scheftelowitz, Zeitschr. Ind. Irani. I.pp. 50-7.

अस्य सूक्तस्यादितो नव मन्त्राः 'महानाम्न्यः[1]' इत्युच्यन्ते (आश्वश्रौ ७. १२. १०; ऐआ ४. १. १ भाष्यं; शांश्रौ १०. ६. १८ भाष्यं; षड्वा ३. ११; शांब्रा २३. २ द्रष्टव्यम्)। अन्यौ द्वौ च 'पुरीषपदानि' इत्युच्येते (आश्वश्रौ ७. १२. ११; ८. १४. १६; तांब्रा १३. ४.१२, १३; लाट्यायश्रौ ४. १०. १८ भाष्यं इत्यादि द्रष्टव्यम्) । ऐआ ४. १. १ मध्ये सामवेदे पूर्वार्चिकान्ते चैतदुपलभ्यते। एतत्सूक्तं 'तच्छंयोरा' इति पूर्वसूक्तस्यान्त्यं मन्त्रमनुवर्तत इति बृहद्दे ८. ९८-१०२; ऋविव ४. १२७-१२८ एताभ्यां स्पष्टम्। अल-जुना-पुस्तकयोरेतदुपलभ्यते।

१. **शंसिषो**-का; शासिषो; शसिषो। २. **'भिष्टिभिः**; 'भिष्टिभिः स्वार्ज्ञांशुः-साम. **प्रचेतन**-का; प्रचेतनः-जुना। ४. **राये**-का-साम-अल-जुना; रायः-ऐआ. **भुवो**; भवो-साम। ५. **मघोनां**; मघोनां अंशुर्न शोचिः-साम. **चिकित्वाँ**-अल-जुना; चिकित्वो. **तमु**-का; तमुप. **स्तुषे वशी**-का-ऐआ-अल-जुना; स्तुहि ईशे-साम। ६. **जेतारमपराजितं** = ऋसं १.११.२. **स नः पर्षदति** = ऋसं १०.१८७.१. **पर्षद्**; स्वर्षद्-साम. **ऋतुश्छन्द्**; ऋतुच्छन्द-अल। ७. **इन्द्रं धनस्य सातये** = ऋसं ८. ३. ५. **पर्षदति**; स्वर्षदति-साम. **स्निधः**; द्विषः-साम। ८. **अद्रिवः**; अद्रिवोऽशुर्मदाय-साम. **शश्वत**-का-अल; शश्यते-साम-ऐआ. **ईशे**-का-ऐआ-अल; वशी-साम. **पूर्तिः**; पूर्द्धि-अल। ९. **मन्यसे**-का; संन्यसे-साम-ऐआ; सन्यसे-अल-जुना; सन्यस्ये. **समन्येषु ब्रवावहै** = ऋसं १. ३०. ६; समर्येषु ब्रवावहै-साम; समन्येषु ब्रवावहे-अल; समन्येषु ब्रवामहै. **सखा सुशेवो अद्वयाः** = ऋसं १. १८७. ३. **अद्वयाः**-ऐआ-अल-जुना; अद्वयुः-साम. १०. द्वितीयः पादः साम-अल-पुस्तकयोर्नास्ति किंतु बृहद्दे ८. १०२ तत्र प्रमाणम्। जुनागडपुस्तके दशमो मन्त्र एवं वर्तते-'एवा ह्येवेव। एवा ह्यग्ने। एवा ह्यिन्द्र। एवा हि पूषन्। एवा हि देवाः।' ११. सामवेदे नास्ति. अस्य केचनांशाः पूर्वमन्त्रेभ्य उद्धृताः. **एवा हि शक्रो** ≐ २[3]; **वशी हि शक्रो** ≐ ५[3]; **वशाँ अनु** ≐ ४[1]. १०[2], ११[1]→ आश्वश्रौ ६. २. १२ : एवा ह्येवैवा ह्यिन्द्रं; एवा हि शक्रो वशी हि शक्र. **विश्वथ**-का-अल; विश्वध-ऐआ।

५

निविद्ध्यायः

अग्निर्देवेद्धः। अग्निर्मन्विद्धः। अग्निः सुयमित्। होता देववृतः। होता मनुवृतः। प्रणीर्यज्ञानाम्। रथीरध्वराणाम्। अतूर्तो होता। तूर्णिर्हव्यवाट्। आ देवो देवान् वक्षत्। यक्षदग्निर्देवो देवान्। सो अध्वरा करति जातवेदाः ॥ १ ॥

इन्द्रो मरुत्वान् सोमस्य पिबतु। मरुत्स्तोत्रो मरुद्गणः। मरुत्सखा मरुद्वृधः। हन् वृत्रा सृजदपः। मरुतामोजसा सह। य ईमेनं देवा अन्वमदन्। असूर्ये वृत्रतूर्ये। शम्बर-

---

1. The *Mahānāmnyaḥ* (9 verses) belong to the Vedic period, as is clear from the fact that they were known to the other Vedas and are mentioned along with old Rgveda hymns; Cf. VS. XXIII. 35; TS. V. 2. 11. 1; MS. III. 12. 21; KS. V. 10. 5; AV. XI. 7. 6. From AV. XI 7. 6 it appears that at the time of the composition of the other Vedas the *Mahānāmnyaḥ* were as popular as the *Pāvamāni* and *Revati* verses of Rgveda. All words in them belong to RV. vocabulary. In Upākaraṇa ceremonial in Baudhayana we find *Mahānāmnyaḥ* after the 10th Maṇḍala of Rgveda so mentioned as if they formed a regular part of the Saṁhitā coordinated with the Maṇḍalas. (Cf. Oldenberg, Hymnen des Rgveda, Band I. pp. 509-10). The statement in the Khilānukramaṇī that Indra or Prajāpati composed this hymn is also referred to in AB. V. 7. 2-4. [See, Scheftelowitz, Zeit. Indo. Iran. I. 58-68].

हत्ये गविष्टौ । अर्चन्तं गुह्या पदा । परमस्यां परावति । आदीं ब्रह्माणि वर्धयन् । अनाधृष्टान्योजसा । कृण्वन् देवेभ्यो दुवः । मरुद्भिः सखिभिः सह । इन्द्रो मरुत्वाँ इह श्रवदिह सोमस्य पिबतु । प्रेमां देवो देवहूतिमवतु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसा गमत् ॥ २ ॥

इन्द्रो देवः सोमं पिबतु । एकजानां वीरतमः । भूरिजानां तवस्तमः । हर्योः स्याता । पृश्नेः प्रेता । वज्रस्य भर्ता । पुरां मेता । पुरां दर्मा । अपां सृष्टा । अपां नेता । सत्वनां नेता । निजघ्निर्दूरेश्रवाः । उपमाजिकृदंसनावान् । इहोशन् देवो बभूवान् । इन्द्रो देव इह श्रवदिह सोमं पिबतु । प्रेमां देवो देवहूतिमवतु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसा गमत् ॥ ३ ॥

सविता देवः सोमस्य पिबतु हिरण्यपाणिः सुजिह्वः । सुबाहुः स्वङ्गुरिः । त्रिरहन् सत्यसवनः । यत्प्रासुवद्वसुधिती उभे जोष्ट्री सवीमनि । श्रेष्ठं सावित्रमासुवन् । दोग्ध्रीं धेनुम् । वोळ्हारमनड्वाहम् । आशुं सप्तिम् । जिष्णुं रथेष्ठाम् । पुरंधिं योषाम् । समेयं युवानम् । परामीवां साविषत् पराघशंसम् । सविता देव इह श्रवदिह सोमस्य मत्सत् । प्रेमां देवो देवहूतिमवतु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसा गमत् ॥ ४ ॥

द्यावापृथिवी सोमस्य मत्सताम् । पिता च माता च । पुत्रश्च प्रजननं च । धेनुश्च ऋषभश्च । धन्या च धिषणा च । सुरेताश्च सुदुघा च । शंभूश्च मयोभूश्च । ऊर्जस्वती च पयस्वती च । रेतोधाश्च रेतोभृच्च । द्यावापृथिवी इह श्रुतामिह सोमस्य मत्सताम् । प्रेमां देवी देवहूतिमवतां देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवताम् । चित्रे चित्राभिरूतिभिः । श्रुतां ब्रह्माण्यावसा गमताम् ॥ ५ ॥

ऋभवो देवाः सोमस्य मत्सन् । विष्टी स्वपसः । कर्मणा सुहस्ताः । धन्या धनिष्ठाः । शम्या शमिष्ठाः । शच्या शचिष्ठाः । ये धेनुं विश्वजुवं विश्वरूपामरक्षन् । अरक्षन् धेनुरभवद्विश्वरूपी । अयुञ्जत हरी । अयुदेँवाँ उप । अबुध्रन् सं कनीनामदन्तः । संवत्सरे स्वपसो यज्ञियं भागमायन् । ऋभवो देवा इह श्रवन्निह सोमस्य मत्सन् । प्रेमां देवा देवहूतिमवन्तु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवन्तु । चित्राश्चित्राभिरूतिभिः । श्रवन् ब्रह्माण्यावसा गमन् ॥ ६ ॥

विश्वे देवाः सोमस्य मत्सन् । विश्वे वैश्वानराः । विश्वे विश्वमहसः । महि महान्तः । तकाना नेमधितीवानः । आस्काः पचतत्राहसः । वात आत्मानो अग्निजूताः । ये द्यां च पृथिवीं चातस्थुः । अपश्च स्वश्च । ब्रह्म च क्षत्रं च । बर्हिश्च वेदिं च । यज्ञं चोरु चान्तरिक्षम् । ये स्थ त्रय एकादशाः । त्रयश्च त्रिंशच्च । त्रयश्च त्री च शता । त्रयश्च त्री च

सहस्रा । तावन्तोऽभिषाचः । तावन्तो रातिषाचः । तावतीः पत्नीः । तावतीर्भ्राः । तावन्त उदरणे । तावन्तो निवेशने । अतो वा देवा भूयांसः स्थ । मा वो देवा अतिशसा मा परिशसा विक्षि । विश्वे देवा इह श्रवन्निह सोमस्य मत्सन् । प्रेमां देवा देवहूतिमवन्तु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवन्तु । चित्राश्चित्राभिरूतिभिः । श्रवन् ब्रह्माण्यावसा गमन् ॥ ७ ॥

अग्निर्वैश्वानरः सोमस्य मत्सत् । विश्वेषां देवानां समित् । अजस्रं दैव्यं ज्योतिः । यो विड्भ्यो मानुषीभ्योऽदीदेत् । द्युषु पूर्वासु दिद्युतानः । अजर उपसामनीके । आ यो द्यां भात्या पृथिवीम् । उर्वन्तरिक्षम् । ज्योतिषा यज्ञाय शर्म यंसत् । अग्निर्वैश्वानर इह श्रवदिह सोमस्य मत्सत् । प्रेमां देवो देवहूतिमवतु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसा गमत् ॥ ८ ॥

मरुतो देवाः सोमस्य मत्सन् । सुष्टुभः स्वर्काः । अर्कस्तुभो बृहद्वयसः । शूरा अनाधृष्टरथाः । त्वेषासः पृश्निमातरः । शुभ्रा हिरण्यखादयः । तवसो भन्ददिष्टयः । नभस्या वर्षनिर्णिजः । मरुतो देवा इह श्रवन्निह सोमस्य मत्सन् । प्रेमां देवा देवहूतिमवन्तु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवन्तु । चित्राश्चित्राभिरूतिभिः । श्रवन् ब्रह्माण्यावसा गमन् ॥ ९ ॥

अग्निर्जातवेदाः सोमस्य मत्सत् । स्वनीकश्चित्रभानुः । अप्रोषिवान् गृहपतिस्तिरस्तमांसि दर्शतः । घृताहवन ईड्यः । बहुलवर्त्मास्तृतयज्वा । प्रतीत्या शत्रून् जेतापराजितः । अग्ने जातवेदोऽभि द्युम्नमभि सह आयच्छस्व । तुशो अशुशः । समिद्धारं स्तोतारमंहसस्पाहि । अग्निर्जातवेदा इह श्रवदिह सोमस्य मत्सत् । प्रेमां देवो देवहूतिमवतु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसा गमत् ॥ १० ॥

अस्य मदे जरितरिन्द्रः सोमस्य मत्सत् । अस्य मदे जरितरिन्द्रोऽहिमहन् । अस्य मदे जरितरिन्द्रो वृत्रमहन् । अस्य मदे जरितरिन्द्रोऽपां वेगमैरयत् । अस्य मदे जरितरिन्द्रोऽजिन्वदजुवोऽपिन्वदजितः । अस्य मदे जरितरिन्द्र उदार्यं वर्णमतिरदव दासीद्विशो अस्तभ्नात् । अस्य मदे जरितरिन्द्र उद्द्यामस्तभ्नादप्रथयत् पृथिवीम् । अस्य मदे जरितरिन्द्रो दिवि सूर्यमैरयदप्यन्तरिक्षमतिरत् । अस्य मदे जरितरिन्द्रः समुद्रान् प्रकुपिताँ अरम्णात् । अस्य मदे जरितरिन्द्र ऋश्याँ इव पम्फणतः पर्वतान् प्रकुपिताँ अरम्णात् । अस्य मदे जरितरिन्द्र इह श्रवदिह सोमस्य मत्सत् । प्रेमां देवो देवहूतिमवतु देव्या धिया । प्रेदं ब्रह्म प्रेदं क्षत्रम् । प्रेमं सुन्वन्तं यजमानमवतु । चित्रश्चित्राभिरूतिभिः । श्रवद्ब्रह्माण्यावसा गमत् ॥ ११ ॥

एता ११ निविदः सु; शांश्रौ ७. ९. ३; ८. १६-२५ अत्रोपलभ्यन्ते । तथा च १ = ऐब्रा २. ३४; शब्रा १. ४. २. ५; तैसं २. ५. ९; आश्रश्रौ १. ३; ५. ९. अलपुस्तके 'अग्निर्देवेदः'

एतावदेव। 'द्वादशपदा वा एषा निविद्' इति ऐब्रा २. ३३. ६. ४. → ऐब्रा ३. २९ सायणभाष्यम्. ७. → शब्रा १४. ६. ९. २; बृउ ३. ९. १ (वैश्वदेवस्य निविद्); निरु ७. २४ दुर्गभाष्यम्। ९. → ऋसं १. ८६. ४ सायणभाष्यम्. १०. → शब्रा १३. ५. १. १२. ११. ≡ ऐब्रा ४. १; शांब्रा १७. ३; षोडशीशस्त्र इयमुत्तमा निविद् (आश्वश्रौ. ६. २; शांश्रौ ८. ७. ४)।

१. **प्रणीर्यज्ञानां** → ऋसं १०. ४६. ४ : नेतारमध्वराणाम्. **रथीरध्वराणां** ≡ ऋसं १. ४४. २; ८. ११. २. २. शांश्रौमध्ये केषांचन पादानां व्यत्यासः। **मरुत्स्तोत्रो मरुद्गणः** ≡ ऋसं ४. १८. ७ सायणभाष्यं. **य ईमेनं देवा ... गविष्ठौ** → ऋसं ३. ४७. ४. **गविष्ठौ**; गविष्टौ–मु–शांश्रौ. 'परमस्यां परावति' इत्यस्यानन्तरं शांश्रौमध्ये 'वधीद्वृत्रं सृजदपः। मरुतामोजसा सह' इत्यधिकम्. 'घ्नन्वृत्रा सृजदपः। मरुतामोजसा सह' इति शांश्रौमध्ये नास्ति. 'प्रेदं ब्रह्म प्रेदं क्षत्रम्' इति ऐब्रा ३. ११. ९ मध्ये निवित्पादत्वेनोद्धृतम्। अस्या निविदो विषये ऋसं ८. ३७. १, ६ द्रष्टव्यम्। ३. **सृष्टा**; स्रष्टा–मु. **भूरिजानां**; भूरिदानं–मु. **हयाः स्थाता ... ... पुरां दर्मा अपां सृष्टा** → ऋसं ३. ४५. २. **पुरां भेत्ता** ≡ साम. १. २७५. **अपां नेता** ≡ ऋसं २. १२. ७. **उपमाजिकृत्**–का; उपमातिकृत्–इतरेषु. **सोमं पिबतु**; सोमस्य पिबतु–मु। ४. **पिबतु**; मत्सत्–शांश्रौ. **सविता ... सुजिह्वः** → ऋसं ३. ५४. ११. **यत्प्रासु°**; यः प्रासु°–शांश्रौ–मु. **वसुधिती**–शांश्रौ → खिल ५. ७. ३[४]; वसुधीती–का–मु. **आसुवन्**; आसुवं–शांश्रौ–मु. **जिष्णुं रथेष्ठां पुरंधिं योषां**–का–शांश्रौ; पुरंधिं योषां जिष्णुं रथेष्ठां–मु. **गमतां**; गमन्तां–मु। ६. **शच्या शचिष्ठाः** ≡ ऋसं ४. २०. ९. **अरक्षन्। अरक्षन् धनुः**–का–मु → ऋसं ४. ३३. ४; आतक्षन्। अतक्षन् धेनुः–शांश्रौ. **धनुरभव°**; धेनुमभव°–शांश्रौ–मु. **अबुध्रन्**; अबुध्रन्–मु. **श्रवन्**; श्रवत्–मु। ७. **विश्वे विश्वमहसः**–का; विश्वे हि विश्वमहसः–मु. **तक्काक्षा**–का–मु; पक्काक्षा–शांश्रौ. **नेमधितीवानः**–का; नेमतिथीवानः–इतरेषु. **आस्काः**–का; अस्काः–मु. **वात आत्मानो**–का; वातात्मानो–इतरेषु. **अग्निजूताः**–का; अग्निदूताः–शांश्रौ–मु; अग्निहूताः. **अतिशासा मा परिशासा विक्षि**–का; अपिशसा मा परिशसा वृक्षि–मु; अविशसा मा विशसायुरा वृक्षि–शांश्रौ। ८. **उपसामनीके ... भात्या** ≐ ऋसं ५. ७६. १ : आ भात्यग्निरुषसामनीकं. **दीदेत्**–का; अदीदेत्–मु. **भात्या**–का; भात्यां–मु. **उर्वन्तरिक्षं**–का; ओर्वन्तरिक्षं–शांश्रौ–मु. **यज्ञाय**–का; यज्ञियाय–शांश्रौ। ९. **श्रवन्**–का; श्रवत्–मु। १०. **बहुलवर्मा**–का; बहुलवर्मा–इतरेषु. **प्रतीत्या शत्रून्** ≡ ऋसं १०. ११६. ५. **तुशो अप्तुशः**–मु; स्तुशो अस्तुशः–शांश्रौ. **समिद्धारं**–का; समेद्धारं–इतरेषु। ११. **अस्य मदे ...** → ऋसं ७. ८२. ३. **°पिन्वदजितः**–का; °पिन्वदपितः–मु. **दार्साद्विशो**–का; दार्सादिशो–मु; दार्सं वर्णं–शांश्रौ. **अस्तभ्नात्**; अहन्–शांश्रौ. **उद्द्यामस्तभ्नात्** ≡ ऋसं २. १२. २. **दिवि सूर्यमैरयद्व्यन्तरिक्षमतिरत्**; व्यन्तरिक्षमतिरदा सूर्यं दिव्यैरयत्–शांश्रौ. **व्यन्तरिक्षमतिरत्** ≡ ऋसं ८. १४. ५. **समुद्रान् प्रकुपितॉं अरम्णात्**–का; समुद्रं प्रकुपितं अरम्णात्–मु. **पर्वतान् प्रकुपितॉं अरम्णात्** ≡ ऋसं २. १२. २. **ऋश्यॉं**–का; ऋष्यॉं–शांश्रौ–मु.

मु–पुस्तक निविदां परिगणनं कृतं तद्यथा–

अग्निर्द्वादश। इन्द्रो मरुत्वानिन्द्रो देवः सविता देवः पृथिव्यिंशतिः। द्यावापृथिवी पञ्चदश। ऋभवो देवाः सप्तदश। विश्वे देवास्त्रिंशत्। अग्निर्वैश्वानरः पञ्चदश। मरुतो देवाश्चतुर्दश। अग्निर्जातवेदा अस्य मदे पृथक् षोळश। इति निविदध्यायः॥

६

वायुरग्रेगा यज्ञप्रीः साकं गन् मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः १॥
हिरण्यवर्तनी नरा देवा पती अभिष्टये। वायुश्चेन्द्रश्च सुमखा॥ २॥

काव्या राजाना क्रत्वा दक्षस्य दुरोणे । रिशादसा सधस्थ आ ॥ ३ ॥
दैव्या अध्वर्यू आ गतं रथेन सूर्यत्वचा । मध्वा यज्ञं समञ्जाथे ॥ ४ ॥
इन्द्र उक्थेभिर्मन्दिष्ठो वाजानां च वाजपतिः । हरिवान् सुतानां सखा ॥ ५ ॥
विश्वान् देवान् हवामहेऽस्मिन् यज्ञे सुपेशसः । त इमं यज्ञमा गमन् देवासो देव्या धिया ॥
जुषाणा अध्वरे सदो ये यज्ञस्य तनूकृतः । विश्व आ सोमपीतये ॥ ६ ॥
वाचा महीं देवीं वाचमस्मिन् यज्ञे सुपेशसम् । सरस्वतीं हवामहे ॥ ७ ॥

एताः 'पुरोरुचः' शांश्रौ ७. १०. ९–१६; मु–पुस्तके चोपलभ्यन्ते । काश्चन अन्यत्राप्युपलभ्यन्ते । १ = वासं २७. ३१; शांब्रा १४. ४; आश्वश्रौ २. १२; ५. १०. ३, ४ = वासं ३३. ७२–७३. ६. शांब्रा १४. ५; आश्वश्रौ ५. १० अत्र निर्दिष्टा. खिलानुक्रमण्यनुसारेणेयं शक्करी सा च का–मु–पुस्तकानुसारिणी । शांब्रा–शांश्रौ–पुस्तकयोस्तु सा महापङ्क्तिः 'जुषाणा अध्वरे सदो' इत्यंशस्य तत्राभावात् ।

२. **सुमखा**–का; सुमखौ–शांश्रौ; सुमुखः–मु । ३. **काव्या राजाना**–का–मु; काव्ययोराजानेषु–वासं–शांश्रौ । ४. **दैव्या अध्वर्यू**–का; दैव्यावध्वर्यू–वासं–शांश्रौ । ६. **सुपेशसः**; सजोषसः–शांश्रौ । ७. = अथर्व ५. ७. ४: सरस्वतीं ... हवामहे । वाचं जुष्टां मधुमतीमवादिषं देवानां देवहूतिषु. **वाचा महीं**–का; वाचामहं–शांश्रौ; वाचमहं–मु. **वाचमस्मिन्**; वाचास्मिन्–मु. **सुपेशसं**; सुपेशसा–मु । मु–पुस्तके षष्ठो मन्त्रः षष्ठसप्तमत्वेन पठितः सप्तमश्चाष्टमत्वेन पठितः ।

७ [१]

प्रैषाध्यायः

(अ) होता यक्षदग्निं समिधा सुषमिधा समिद्धं नाभा पृथिव्याः संगथे वामस्य ।
वर्ष्मन् दिवः इळस्पदे वेत्वाज्यस्य होतर्यज ॥

(आ) होता यक्षत्तनूनपातमदितेर्गर्भं भुवनस्य गोपाम् ।
मध्वार्च देवौ देवेभ्यो देवयानान् पथो अनक्तु वेत्वाज्यस्य होतर्यज ॥

(इ) होता यक्षन्नराशंसं नृशस्तं नृणां प्रणेत्रम् ।
गोभिर्वपावान् स्याद्वीरैः शक्तीवान् रथैः प्रथमयावा हिरण्यैश्चन्द्री वेत्वाज्यस्य होतर्यज ॥

(उ) होता यक्षदग्निमीळ ईळितो देवो देवाँ आ वक्षद्वृतो हव्यवाळमूरः ।
उपेमं यज्ञमुपेमां देवो देवहूतिमवतु वेत्वाज्यस्य होतर्यज ॥

(ए) होता यक्षद्बर्हिः सुष्टरीमोर्णम्रदा अस्मिन्यज्ञे वि च प्र च प्रथतां स्वासस्थे देवेभ्यः ।
एमेनदध्व वसवो रुद्रा आदित्याः सदन्तु प्रियमिन्द्रस्यास्तु वेत्वाज्यस्य होतर्यज ॥

(ऐ) होता यक्षद्दुरः ऋष्वाः कवष्यो कोषधावनीरुदाताभिर्जिहतां वि पक्षोभिः श्रयन्ताम् ।
सुप्रायणा अस्मिन् यज्ञे वि श्रयन्तामृतावृधो व्यन्त्वाज्यस्य होतर्यज ॥

(ओ) होता यक्षदुषासानक्ता बृहती सुपेशसा नृणां पतिभ्यो योनिं कृण्वाने ।
संस्मयमाने इन्द्रेण देवैरेदं बर्हिः सीदतां वीतामाज्यस्य होतर्यज ॥

(औ) होता यक्षद्दैव्या होतारा मन्द्रा पोतारा कवी प्रचेतसा ।
स्विष्टमद्यान्यः करदिषा स्वभिगूर्तमन्य ऊर्जा स्वतवसेमं यज्ञं दिवि देवेषु धत्तां वीतामाज्यस्य होतर्यज ॥

(अं) होता यक्षत्तिस्रो देवीरपसामपस्तमा अच्छिद्रमद्येदमपस्तन्वताम् ।
देवेभ्यो देवीर्दिवमपो व्यन्त्वाज्यस्य होतर्यज ॥

(अः) होता यक्षत्त्वष्टारमचिष्टमपाकं रेतोधां विश्रवसं यशोधाम् ।
पुरुरूपमकामकर्शनं सुपाप्नः पोषैः स्यात्सुवीरो वीरैर्वेत्वाज्यस्य होतर्यज ॥

(क) होता यक्षद्वनस्पतिमुपावसृक्षद्धियो जोष्टारं शशमन्नरः ।
स्वदात्स्वधितिर्ऋतुथाद्य देवो देवेभ्यो हव्यवाड् वेत्वाज्यस्य होतर्यज ॥

(ख) होता यक्षदग्निं स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानां स्वाहा स्वाहाकृतीनां स्वाहा हव्यसूक्तीनाम् ।
स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्तु होतर्यज ॥

७ [२]

(अ) अजैदग्निरसनद्वाजं नि देवो देवेभ्यो हव्यवाट् । प्राञ्जोभिर्हिन्वानो धेनाभिः कल्पमानो यज्ञस्यायुः । प्रतिरन्नुपप्रेप होतर्हव्या देवेभ्यः ॥

(आ) होता यक्षदग्निमाज्यस्य जुषतां हविर्होतर्यज ॥

(इ) होता यक्षत्सोममाज्यस्य जुषतां हविर्होतर्यज ॥

(उ) होता यक्षदग्नीषोमौ च्छागस्य वपाया मेदसो जुषेतां हविर्होतर्यज ॥

(ए) होता यक्षदग्नीषोमौ पुरोळाशस्य जुषेतां हविर्होतर्यज ॥

(ऐ) होता यक्षदग्नीषोमौ च्छागस्य हविषा आत्तामद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासे अश्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवाग्नीषोमौ जुषेतां हविर्होतर्यज ॥

(ओ) देवेभ्यो वनस्पते हवींषि हिरण्यपर्ण प्रदिवस्ते अर्थम् ।
प्रदक्षिणिद्रशनया नियूय ऋतस्य वक्षि पथिभी रजिष्ठैः ॥

(औ) होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्टया रशनयाधित । यत्राग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्याज्यस्य हविषः प्रिया धामानि यत्राग्नीषोमयोश्छागस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतं प्रस्तुत्येवोपस्तुत्येवोपावसृक्षद्रभीयांसमिव कृत्वी करदेवं देवो वनस्पतिर्जुषतां हविर्होतर्यज ॥

(अं) वनस्पते रशनया नियूय पिष्टतमया वयुनानि विद्वान् ।
वहा देवत्रा दधिषो हवींषि प्र च दातारममृतेषु वोचः ॥

(अः) होता यक्षदग्निं स्विष्टकृतमयाळग्निमाज्यस्य हविषः प्रिया धामान्ययाट् सोमस्याज्यस्य हविषः प्रिया धामान्ययाळग्नीषोमयोश्छागस्य हविषः प्रिया धामान्ययाड् वनस्पतेः प्रिया पाथांस्ययाड् देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषतां हविर्होतर्यज ॥

(क) अग्निमद्य होतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोळाशं गृह्णन्नग्नय आज्यं गृह्णन् सोमायाज्यं बध्नन्नग्नीषोमाभ्यां च्छागं सूपस्थाद्य देवो वनस्पतिरभवदग्नय आज्येन सोमायाज्येनाग्नीषोमाभ्यां च्छागेनाघत्तां तं मेदस्तः प्रति पचताग्नीष्टामवीवृधेतां पुरोळाशेन त्वामद्य ऋष आर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य आ संगतेभ्यः । एष मे देवेषु वसु वार्यायक्षत इति ता या देवा देवदानान्यदुस्तान्यस्मा आ च शास्त्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥

७ [३]

(अ) देवं बर्हिः सुदेवं देवैः स्यात्सुवीरं वीरैर्वस्तोर्बृज्येतात्योः प्रभ्रियेतात्यन्यान् राया बर्हिष्मतो मदेम वसुवने वसुधेयस्य वेतु यज ॥

(आ) देवीर्द्वारः संघाते विड्वीर्यामञ्छिथिरा ध्रुवा देवहूतौ वत्स ईमेनास्तरुणा आमिमीयात्कुमारो वा नवजातो मैना अर्वा रेणुककाटः प्रणग्वसुवने वसुधेयस्य व्यन्तु यज ॥

(इ) देवी उषासानक्ता व्यस्मिन् यज्ञे प्रयत्यह्नेतामपि नूनं दैवीर्विशः प्रायासिष्टां सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यज ॥

(उ) देवी जोष्ट्री वसुधिती ययोरन्याघा द्वेषांसि यूयवदान्यावक्षद्वसु वार्याणि यजमानाय वसुवने वसुधेयस्य वीतां यज ॥

(ए) देवी ऊर्जाहुती इषमूर्जमन्यावक्षत्सग्धिं सपीतिमन्या नवेन पूर्वं दयमाना स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यज ॥

(ऐ) देवा दैव्या होतारा पोतारा नेष्टारा हताघशंसावाभरद्वसू वसुवने वसुधेयस्य वीतां यज ॥

(ओ) देवीस्तिस्रस्तिस्रो देवीरिळा सरस्वती भारती या भारत्यादित्यैरस्पृक्षत्सरस्वतीमं रुद्रैर्यज्ञमावीदिहैवेळया वसुमत्या सधमादं मदेम वसुवने वसुधेयस्य व्यन्तु यज ॥

(औ) देवो नराशंसस्त्रिशीर्षा षळक्षः शतमिदेनं शितिपृष्ठा आदधति सहस्रमीं प्रवहन्ति मित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिस्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वेतु यज ॥

(अं) देवो वनस्पतिर्वर्षप्रावा घृतनिर्णिग् धामग्रेगास्पृक्षदान्तरिक्षं मध्येनाप्राः पृथिवी-मुपरेणादृंहीद्वसुवने वसुधेयस्य वेतु यज ॥

(अः) देवं बर्हिर्वारितीनां निवेधासि प्रच्युतीनामप्रच्युतं निकामधरणं पुरुस्पार्हं यशस्वदेना बर्हिषाण्या बर्हीष्यभिष्याम वसुवने वसुधेयस्य वेतु यज ॥

(क) देवो अग्निः स्विष्टकृत्सुद्रविणा मन्द्रः कविः सत्यमन्मायजी होता होतृहोतुराय-जीयानग्ने यान् देवानयाड् यॉं अपिप्रेर्ये ते होत्रे अमत्सत। तां ससनुषीं होत्रां देवंगमां दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्ने होताभूर्वसुवने वसुधेयस्य नमोवाके वीहि यज ॥

७ [४]

(अ) होता यक्षदिन्द्रं हरिवॉं इन्द्रो धाना अत्तु पूषण्वान्करम्भं सरस्वतीवान् भारतीवान् परिवाप इन्द्रस्यापूपो मित्रावरुणयोः पयस्या प्रातःसावस्य पुरोळाशॉं इन्द्रः प्रस्थितां जुषाणो वेतु होतर्यज ॥

(आ) होता यक्षदिन्द्रं हरिवॉं इन्द्रो धाना अत्तु पूषण्वान् करम्भं सरस्वतीवान् भारतीवान् परिवाप इन्द्रस्यापूपो माध्यंदिनस्य सवनस्य पुरोळाशॉं इन्द्रः प्रस्थितां जुषाणो वेतु होतर्यज ॥

(इ) होता यक्षदिन्द्रं हरिवॉं इन्द्रो धाना अत्तु पूषण्वान् करम्भं सरस्वतीवान् भारतीवान् परिवाप इन्द्रस्यापूपस्तृतीयस्य सवनस्य पुरोळाशॉं इन्द्रः प्रस्थितां जुषाणो वेतु होतर्यज ॥

(उ) होता यक्षदग्निं पुरोळाशानां जुषतां हविर्होतर्यज ॥

(ए) होता यक्षद्वायुमग्रेगामग्रेयावानमग्रे सोमस्य पातारं करदेवं वायुरावसा गमज्जुषतां वेतु पिबतु सोमं होतर्यज ॥

(ऐ) होता यक्षदिन्द्रवायू अहेन्ता रिहाणा गव्याभिर्गोमन्ता भ्रियन्तां वीरया शुक्रया एनयोर्नियुतो गोअग्रयाणां वीरो कशाश्वपुरस्तात्तासामिह प्रयाणमास्तिकविमोचनं करत एवेन्द्रवायू जुषेतां वीतां पिबतां सोमं होतर्यज ॥

(ओ) होता यक्षन्मित्रावरुणा सुक्षत्रा रिशादसा नि चिन्मिषन्ता निचिरा निचय्यॉं-साक्षणध्विद्गातुवित्तरानुल्बणेन चक्षसा ऋतमृतमिति दीध्याना करत एवं मित्रा-वरुणा जुषेतां वीतां पिबेतां सोमं होतर्यज ॥

(औ) होता यक्षदश्विना नासत्या दीद्यग्नी रुद्रवर्तनी न्यन्तरेण चक्रेण च वामीरिष ऊर्ज आवहतं सुवीराः सनुतरेणा नरुषो बाधेतां मधुकशयेमं यज्ञं युवाना मिमिक्षतां करत एवाश्विना जुषेतां वीतां पिबेतां सोमं होतर्यज ॥

(अं) होता यक्षदिन्द्रं प्रातः प्रातःसावस्यार्वावतो गमदा परावत ओरोरन्तरिक्षादा स्वात्सधस्थादिमे अस्मै शुक्रा मधुश्चुतः प्रस्थिता इन्द्राय सोमास्तां जुषतां वेतु पिबतु सोमं होतर्यज ॥

(अः) होता यक्षदिन्द्रं माध्यंदिनस्य सवनस्य निष्केवल्यस्य भागस्यात्तारं पातारं श्रोतारं हवनागन्तारमस्या धियोऽवितारं सुन्वतो यजमानस्य वृधमोभा कुक्षी पृणतां वार्त्रघ्नं च माघोनं चेमे अस्मै शुक्रामन्थिनः प्रस्थिता इन्द्राय सोमास्तां जुषतां वेतु पिबतु सोमं होतर्यज ॥

(क) होता यक्षदिन्द्रं तृतीयस्य सवनस्य ऋभुमतो विभुमतो वाजवतो बृहस्पतिवतो विश्वदेव्यावतः समस्य मदाः प्रातस्तनाग्मत सं माध्यंदिनाः समिदातनारतेषां समुक्षितानां गौर इव प्रगाह्या वृषायस्वायूया बाहुभ्यामुप याहि हरिभ्यां प्रप्रुथ्या शिप्रे निष्पृथ्य ऋजीषिन्निमे अस्मै तीव्रा आशीर्वन्तः प्रस्थिता इन्द्राय सोमास्तां जुषतां वेतु पिबतु सोमं होतर्यज ॥

(ख) होता यक्षदिन्द्रं मरुत्वन्तमिन्द्रो मरुत्वाञ्जुषतां वेतु पिबतु सोमं होतर्यज ॥

(ग) होता यक्षदादित्यान् प्रियान् प्रियधाम्नः प्रियव्रतान् महः स्वसरस्य पतीनुरोरन्तरिक्षस्याध्यक्षान् स्वादित्यमवोचत्तदस्मै सुन्वते यजमानाय करन्नेवमादित्या जुषन्तां मन्दन्तां व्यन्तु पिबन्तु मन्दन्तु सोमं होतर्यज ॥

(घ) होता यक्षद्देवं सवितारं परामीवां साविषत् पराघशंसं सुसावित्रमसाविषत्तदस्मै सुन्वते यजमानाय करदेवं देवः सविता जुषतां मन्दतां वेतु पिबतु सोमं होतर्यज ॥

(ङ) अग्निमद्य होतारमवृणीतायं सुन्वन् यजमानः पचन् पक्तीः पचन् पुरोळाशान् गृह्णन्नग्नय आज्यं गृह्णन् सोमायाज्यं बध्नन्नग्नये च्छागं सुन्वन्निन्द्राय सोमं भृज्ञ हरिभ्यां धानाः सूपस्था अद्य देवो वनस्पतिरभवदग्नय आज्येन सोमायाज्येनाग्नये च्छागेनेन्द्राय सोमेन हरिभ्यां धानाभिरधत्त मेदस्तः प्रति पचताग्रभीदवीवृधत पुरोळाशैरपादिन्द्रः सोमं गवाशिरं यवाशिरं तीव्रान्तं बहुरमध्यमुपोत्था मदा व्यश्नोद्विमदाँ आनळवीवृधताङ्गूषैस्त्वामद्य ऋष आर्षेय ऋषीणां नपादवृणीतायं सुन्वन्यजमानो बहुभ्य आ संगतेभ्यः । एष मे देवेषु वसु वार्यायक्ष्यत इति ता या देवा देवदानान्यदुस्तान्यस्मा आ च शास्त्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥

(च) धानासोमानामिन्द्राद्धि च पिब च बब्धां ते हरी धाना उप ऋजीषं जिघ्रतामा रथचर्षणे सिञ्चख यत्त्वा पृच्छाद्विषं पत्नीः कामीमदथा इत्यस्मिन् सुन्वति यजमाने तस्मै किमरास्याः । सुष्ठु सुवीर्यं यज्ञस्यागुर उद्दचं यद्यदचीकमतोत्तत्तथाभूद्धोतर्यज ॥

(छ) इह मद एव मघवन्निन्द्र ते श्रो वसुमतो रुद्रवतो आदित्यवत ऋभुमतो विभुमतो वाजवतो बृहस्पतिवतो विश्वदेव्यावतः श्रस्सुत्यामग्निमिन्द्रायेन्द्राग्निभ्यां प्रब्रूहि । मित्रावरुणाभ्यां वसुभ्यो रुद्रेभ्यो आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्रह्मणेभ्यः सोम्येभ्यः सोमपेभ्यो ब्रह्मन् वाचं यच्छ ॥

(ज) होता यक्षदश्विना सोमानां तिरो अह्नयानां त्रिरा वर्तिर्यातां त्रिरह मानयेथामुतो तुरीयं नासत्या वाजिनाय देवाः । सजूरग्नी रोहिदश्वो घृतस्नुः । सजूरुषा अरुषेभिः । सजूः सूर्य एतशेभिः । सजोषसावश्विना दंसोभिः करत एवाश्विना जुषेतां मन्देतां वीतां पिबेतां सोमं होतर्यज ॥

७ [५]

(अ) होता यक्षदिन्द्रं होत्रात्सजूर्देवा पृथिव्या ऋतुना सोमं पिबतु होतर्यज ॥

(आ) होता यक्षन्मरुतः पोत्रात्सुष्टुभः स्वर्का ऋतुना सोमं पिबन्तु पोतर्यज ॥

(इ) होता यक्षद्द्रावो नेष्ट्रात्त्वष्टा सुजनिमा सजूर्देवानां पत्नीभिर्ऋतुना सोमं पिबतु नेष्टर्यज ॥

(उ) होता यक्षदग्निमाग्नीध्रादृतुना सोमं पिबत्वग्नीध्रयज ॥

(ऊ) होता यक्षदिन्द्रं ब्रह्माणं ब्रह्मणादृतुना सोमं पिबतु ब्रह्मन् यज ॥

(ऐ) होता यक्षन्मित्रावरुणा प्रशास्तारौ प्रशास्त्रादृतुना सोमं पिबतां प्रशास्तर्यज ॥

(ओ) होता यक्षद्देवं द्रविणोदां होत्रादृतुभिः सोमं पिबतु होतर्यज ॥

(औ) होता यक्षद्देवं द्रविणोदां पोत्रादृतुभिः सोमं पिबतु पोतर्यज ॥

(अं) होता यक्षद्देवं द्रविणोदां नेष्ट्रादृतुभिः सोमं पिबतु नेष्टर्यज ॥

(अः) होता यक्षद्देवं द्रविणोदामपाद्धोत्रादपात्पोत्रादपान्नेष्ट्रात्तुरीयं पात्रममृक्तममर्त्यमिन्द्रपानं देवो द्रविणोदाः पिबतु द्राविणोदसः । स्वयमायूयाः स्वयमभिगूर्याः स्वयमभिगूर्तया होत्राय ऋतुभिः सोमस्य पिबत्वच्छावाक यज ॥

(क) होता यक्षदश्विनाध्वर्यू आध्वर्यवादृतुना सोमं पिबेतामध्वर्यू यजताम् ॥

(ख) होता यक्षदग्निं गृहपतिं गार्हपत्यात्सुगृहपतिस्त्वधाग्नेऽयं सुन्वन् यजमानः स्यात्सुगृहपतिस्त्वमनेन सुन्वता यजमानेनाग्निर्गृहपतिर्गार्हपत्यादृतुना सोमं पिबतु गृहपते यज ॥

[१] एते प्रैषा मु-पुस्तकेऽप्युपलभ्यन्ते। तथा च १ = मैसं ४. १३. २; कासं १५. १३; तैब्रा ३. ६. २; → ऐब्रा २. ४. १–१५ सायणभाष्यं; वासं २१. २९; ३०; ३३; ३४.

अ. ≐ ऋसं ३. ५. ९; → ऋप्रा १. ५७. **नाभा पृथिव्याः** = ऋसं १. १४३. ४।

इ. **नराशंसं नृशस्तं नॄंः प्रणेत्रं** = ऋप्रा ४. ७८. **नृशस्तं**; नृशस्र-मु।

ए. **सदन्तु**; **स्वदन्तु**–मैसं।

ऐ. **कवष्यो कोषधावनीः** = ऋप्रा २. ४१. **यक्षद्दूर**; यक्षद्दुर-मु. **'रुदातामि'**; **'रुद्रातामि'**-मु. **श्रयन्तां**; श्रयतां-मु. **सुप्रायणा अस्मिन्यज्ञे वि श्रयन्तां** = निरु ४.१८ (नि.४.१)

ओ. **नॄंः पतिभ्यो योनिं कृण्वाने** = ऋप्रा ४. ७८.

औ. **स्विष्टमद्यान्यः करत्** = ऋप्रा ४. ५१. **स्वतवसेमं**-कासं; सतवसेमं-का-तैब्रा-मु।

अः. **अचिष्टं**–मु; अचिष्टु-का-कासं-तैब्रा।

ख. = आश्रौ ३. ४; शांश्रौ ५. १८. २. **जुषाणा ... व्यन्तु** ≐ ऐब्रा १. १७. ६ (सभाष्यं): जुषाणो अग्निराज्यस्य वेतु. अयं प्रैषः मु-पुस्तके ७ [२] अ अनन्तरं मुद्रितः। 'इति प्रयाजप्रैषः' इति च तत्राधिकम्।

[२] शांश्रौ ५. १६. ९; मैसं ४. १३. ५; कासं १६. २१; तैब्रा ३. ६. ५-१५; ऐब्रा २. ५. ७; मु एतेष्वेते प्रैषा उपलभ्यन्ते। 'उपप्रैषाः' इति तेषां नाम।

अ. **उपप्रेष**; उपप्रेष्य–तैब्रा–मु।

आ–इ. = मैसं ४. १३. ५; आश्रौ ३. ४. ८ भाष्यम्।

उ. = शांश्रौ ५. १८. १०; → मैसं ४. १३. ५; तैब्रा ३. ६. ८. १. **अग्नीषोमौ**–मु; अग्नी–मैसं; इन्द्राग्नी–तैब्रा।

ए. = शांश्रौ ५. १९. ७; → मैसं ४. १३. ५; तैब्रा ३. ६. ८. २. **अग्नीषोमौ**–मु; अग्नी–मैसं; इन्द्राग्नी–तैब्रा. 'ए' इत्यस्यानन्तरं मु-पुस्तके 'होता यक्षदग्निं पुरोळाशस्य जुषतां हविर्होतर्यज' इत्यधिकम्।

ऐ. = मैसं ४. १३. ७; कासं १८. २१; तैब्रा ३. ६. ११. १; शांश्रौ ५. १९. १५; निरु ४. ३; → वासं २१. ४३. **अग्नीषोमौ**–मु; अग्नी–मैसं–कासं; इन्द्राग्नी–तैब्रा. **हविषा**; हविष–मु. **अग्निघ्नात्तानां पीवोपवसनानां** = ऋप्रा २. ७३. **पार्श्वतः श्रोणितः शितामतः** = निरु ४. ३. **उत्सादतोऽक्षादक्षादवत्तानां** = ऋप्रा २. ४१. **एवाग्नीषोमौ**–मु; एवेन्द्राग्नी–इतरेषु।

ओ. = निरु ८. ९; मैसं ४. १३. ७; कासं १८. २१; तैब्रा ३. ६. ११; शांश्रौ ५. १९.१८.

औ. = मैसं ४. १३. ७; कासं १८. २१; तैब्रा ३. ६. ११; शांश्रौ ५. १९. १९. → वासं २१. ४६. **वह्वा**; वह-मु. **दधिषो**; दिधिषो–मु.

अं. = मैसं ४. १३. ७; कासं १८. २१; तैब्रा ३. ६. १२; निरु ८. २०; शांश्रौ ५. १९. २०; ऋप्रा ७. ९. **वनस्पते रशनया नियूय** = ऋसं १०. ७०. १०

अः. = मैसं ४. १३. ७; कासं १८. २१; शांश्रौ ५. १९. २२; → वासं २१. ४७; तैब्रा ३. ६. ११. ४; शांश्रौ १. ९. २. **अग्नीषोमयोश्छागस्य**–मु; अग्र्योश्छागस्य–मैसं; अश्विनोश्छागस्य–कासं; अग्निरिन्द्राग्न्योश्छागस्य–तैब्रा. **अध्वरा**; अध्वरान्–कासं. 'अः' अस्यानन्तरं 'इति पाशुकप्रैषाः। अथानुयाजप्रैषाः' इति मु-पुस्तके।

क. ≐ मैसं ४. १३. ९; तैब्रा ३. ६. १५; शांश्रौ ५. २०. ५; वासं २१. ५९-६१; २८.४६. **अग्नीषोमाभ्यां**–मु; इन्द्राग्निभ्यां–मैसं–तैब्रा. **सूपस्थाद्य**–का; सूपस्था अद्य–मु; → तैसं १. २. २. ३ : सूपस्था देवो वनस्पतिः. **छागेनाधत्तां**–का; छागेनाधर्त्त–वासं २८. ४६; शांश्रौ ५. २०. ५ भाष्यं; छागेनाधस्तां–तैब्रा–मैसं; छागेनाधस्त–मु. → शांश्रौ ६. १. १०;११ (सभाष्यं). **संगतेभ्यः**

सगथेभ्यः–मु. 'वसु' मु–पुस्तके नास्ति। मु–पुस्तके 'क' इत्यय प्रैषः 'सूक्तवाकप्रैषः' इति संज्ञया ७ [३] अनन्तरं वर्तते।

[३] अ. ≡ मैसं ४.१३.८; तैब्रा ३.६.१३; शांश्रौ ५.२०. १; → वासं २१.४८; २८.१२.

आ. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १३; → वासं २१. ४९; २८. १३. **मैना अर्वा रेणुककाटः प्रणग्** → ऋसं ८. २८. ४ : न ता अर्वा रेणुककाटो अश्नुते. **प्रणग्**–मैसं; पृणग्–तैब्रा–मु. **°स्तरुणा**; °स्तरुण–तैब्रा–मु. **नवजातो**; वनजातौ–मु।

इ. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १३; → वासं २१. ५०; २८. १४. **व्यास्मिन्**–का; °व्यास्मिन्–मैसं–तैब्रा–मु. **प्रायासिष्टां**; प्रायाशिष्टां–तैब्रा।

उ. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १३; निरु ९. ४२; → वासं २१. ५१; २८. १५. **यूयवदा°**; युयवदा°–मु।

ए. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १३; निरु ९. ४३; → वासं २१. ५२; २८. १६. **दयमानाः**–मैसं; दयमाना–तैब्रा–मु।

ऐ. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १३; → वासं २१. ५३; २८. १७. **हताघशंसो**–तैब्रा–मु; हताघशंसा–मैसं।

ओ. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १३; → वासं २१. ५४; २८.१८.

औ. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १६; शांश्रौ १. १३. २; → वासं २१.५५; २८. १९.

अं. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १३; शांश्रौ ५. २०. ४; → वासं २१. ५६; २८. २०. **°मुपरेणा°**; °मपरेणा°–मु।

अः. ≡ मैसं ४. १३. ८; तैब्रा ३. ६. १३; शांश्रौ ५. २०. ४; → वासं २१. ५७; २८. २१. **यशस्वदेना**; यशस्विदेना–मु।

क. = खिल ४. ९. ६; मैसं ४. १०. ३; तैब्रा ३. ५. ९. १; ३. ६. १३; ऋप्रा ४. ७३; आश्रौ १. ८; शांश्रौ १. १३. ३–४; → वासं २१. ५८; २८. २२.

[४] अ. ≡ आश्रौ ५. ४; शांश्रौ ७. १. ३. मु–पुस्तके अस्मात्पूर्वं किंचिदधिकं विद्यते तद्यथा–'अथ सुत्यायां सवनीयप्रैषाः। होता यक्षदग्निं च्छागस्य वपाया मेदसो जुषतां हविर्होतर्यज'। **इन्द्रं हरिवाँ ... इन्द्रस्यापूपो** ≡ ऐब्रा २. २४. ५. **प्रातःसावस्य**; प्रातः प्रातःसावस्य–मु। मु–पुस्तके अ इति प्रैषानन्तरं उ ए ऐ ओं औ अं इति प्रैषा मुद्रिताः शिष्टाश्च ७ [५] अन्ते निवेशिताः। ७ [५] अन्ते 'होता यक्षदग्निं पुरोळाशस्य जुषतां हविर्होतर्यज' इति प्रैषो मुद्रितः। तस्य चानन्तरं आ उ अः ख ग इति प्रैषा विनिवेशिताः तदनन्तरं कियांश्चिदधिको भागो वर्तते तस्य चानन्तरं इ क घ ङ च छ ज इति प्रैषाणां स्थानम्। मध्ये वर्तमानो मु–पुस्तकस्थोऽधिको भागोऽत्र दीयते–

होता यक्षदग्निं छागस्य हविष आददद्य मध्यतो मेद उद्भृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभः॥ वसनूनं वासे अह्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करदेवाग्निर्जुषतां हविर्होतर्यज [→ प्रैष ७ [२] ऐ]॥ **(होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्टयारशनयाधित॥ यत्राग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्याज्यस्य हविषः प्रिया धामानि यत्राग्नेश्छागस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतं प्रस्तुह्येवोपस्तुत्येवोपावस्रक्षद्भीयांसमिव कृत्वी करदेवं देवो वनस्पतिर्जुषतां हविर्होतर्यज** [= प्रैष ७ [२] औ] ॥ **होता यक्षदग्निं स्विष्टकृतमयाळग्निरग्नेराज्यस्य हविषः प्रिया धामान्ययाट् सोमस्याज्यस्य हविषः प्रिया धामान्ययाळग्नेश्छागस्य हविषः प्रिया धामान्ययाट् वनस्पतेः प्रिया पाथांस्ययाट्**

देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत्त्वं महिमानमाचजतामेज्याऽइष कृणोतु सोऽअध्वरा जातवेदा जुषतां हविर्होतर्यज) [= प्रैष ७ [२] अः]

उ. ≡ आश्वश्रौ ५. ४; शांश्रौ ७. १. ७

ए. ≡ आश्वश्रौ ५. ५; शांश्रौ ७. २. ३. **अवसा गमत्** ≡ ऋसं ५. ४६. ६.

ऐ. ≡ आश्वश्रौ ५. ५; शांश्रौ ७. २. ३. **अर्हन्ता रिह्राणा**-का; अर्हन्तार्हाणा-मु. **गोअग्रयाणां वीरौ कशाश्वपुरस्तात्**-का; गोअग्रा वीरोपशाश्वपुरस्ताः-मु. **आस्तिकविमोचनं**-का; अस्तिवहविमोचनं-मु ।

ओ. ≡ शांश्रौ ७. २. ६; आश्वश्रौ ५. ५. **नि चिन्मिषन्ता ... चक्षसा** ≐ ऋसं ८. २५. ९ : अक्ष्णश्चिद्रातुवित्तरानुल्बणेन चक्षसा । नि चिन्मिषन्ता निचिरा नि चिक्यतुः । **निच्यँसा**°-का; निचिर्यासा°-मु. **चक्षसा**-का; चक्षस-मु. **पिबेतां**-का; पिबतां-मु ।

औ. ≡ शांश्रौ ७. २. ९; आश्वश्रौ ५. ५. **च वामीः**-का; वामीः-मु. **ऊर्जं आवहतं**-का; ऊर्जावहतं-मु, °**आ नरुषो**-का; °आरुषो-मु. **मधुकशयेमं यज्ञं युवाना मिमिक्षतां** ≡ पंब्रा २१. १०. १२; काश्रौ २३. ३. १. **पिबेतां**-का; पिबतां मु.

अं. ≡ शांश्रौ ७. ४. २; आश्वश्रौ ५. ५. **ओरोरन्तरिक्षात्** ≡ ऋसं ३. ४६. ३. **स्वात्सधस्थात्** ≡ ऋसं ६. १७. ५.

अः. ≡ शांश्रौ ७. १७. ४; आश्वश्रौ ५. ५. **मन्थिनः**-का; मधुश्चुतः-मु.

क. ≡ शांश्रौ ८. २. ४. **प्रातस्तनागमत**-का; प्रातस्तना अगमत-मु. **वृषायस्वायूया बाहुभ्यां** ≡ ऋपा ९. ५२. **प्रप्रुथ्या शिप्रे** ≡ ऋसं ३. ३२. १. **ऋजीषिन्**-का; ऋजीर्षि-मु. **निष्पृथ्य**-का; निष्पृथ्य-मु ।

ख. ≡ शांश्रौ ७. १९. ३.

ग. ≡ शांश्रौ ८. १. ५; आश्वश्रौ ५. १७. **प्रियधाम्नः...पतीनुरोः** ≡ ऋपा ४. ७३. **स्वादित्यमवोचत तत्**-का; स्वादित्यानवोदधत्-मु. ' मन्दन्तु ' मु-मध्ये नास्ति ।

घ. ≡ शांश्रौ ८. ३. ३; आश्वश्रौ ५. १८. **सुसावित्रमसाविषत्** ≡ ऋपा ५. २७. **मन्दतां**-का; मदतां-मु ।

ङ. ≡ शांश्रौ ५. २०. ६ (भाष्यं) → मैसं ४. १३. ९; तैब्रा ३. ६. १५; वासं २१. ५९; २८. २३; प्रैष [२] क. **भृज्ञ**-का; भृंजन्-मु. **तीव्रान्तं बहुरमध्यं** ≡ ऐब्रा २. २०. १५. **मदा व्यश्रोत्**-का; मदाश्रौत्-मु. **संगतेभ्यः**-का; सगथेभ्यः-मु ।

च. ≡ शांश्रौ ८. ८. २; निरु ५. १२ (सभाष्यं). **धानासोमानां**-का-मु; धानाः सोमानां -शांश्रौ-निरु(भाष्यं). **यत्रवा**-का-निरु; यत्वा-मु. **विषं पत्नीः**-का-मु; वृषन् पत्नी-निरु (भाष्यं). **अरास्थाः**-का-निरु; अरात्थाः-मु. **उदृशं**; उदुचं-निरु(भाष्यं). **यद्यदृचीक**°-का; यद्यदृचीक°-मु. **अचीकमतोत्तत्तथा**-का; अचीकमतं तत्तथा-निरु (भाष्यं).

छ. ≡ शांश्रौ १०. १. ११. मु-मध्ये एतन्नास्ति. **ते भ्यो**-का; तेभ्यो-शांश्रौ(भाष्यं). **वसुमतो...विश्वदेव्यावतः** ≐ ऐब्रा २. २०. १४ : वसुमते रुद्रवत आदित्यवत ऋभुमते विभुमते वाजजिते बृहस्पतिवते विश्वदेव्यावते. → मैसं ४. ९. ८; प्रैष [४] क.

ज. ≡ आश्वश्रौ ६. ५. **आ वर्तिः**-का; वर्तिः-मु. **यातां**-का; यातं-मु. **अह**-का; **इह**-मु. **मानयेथां**-का; मादयेथां-मु. **देवाः**-का; धेनुः-मु. **अरुषेभिः**-का; अरुणीभिः-मु. **एतशेभिः**-का; एतशेन-मु. **सजोषसावश्विना**-का; सजोषावश्विना-मु. **मन्देतां**-का; मदेतां-मु. **पिबेतां**-का; पिबतां-मु ।

[५] एते द्वादश ऋतुप्रैषाः ऐब्रा ५. ९; मु अत्रोपलभ्यन्ते।

अ. = शांश्रौ ७. ८. २. **दिव्या**-का; दिव आ-मु।

आ. **पिबन्तु**-का; पिबतु-मु।

ए. **इन्द्रं ब्रह्माणं**-का; इन्द्रो ब्रह्मा-मु. **ब्रह्मणा°**-का; ब्राह्मणा°-मु. **प्रशास्तर्यज** = ऋप्रा १. १०२; माश्रौ २. ४. १. २८.

ऐ. **पोतर्यज** = ऋप्रा १. १०१; माश्रौ २. ४. १. २८.

अः → ऋसं २. ३७. ४. 'पिबतु' मु-मध्ये नास्ति।

क. **पिबेतामध्वर्यू यजताम्**-का; पिबतामध्वर्यू यजतं-मु।

ख. **त्वधाग्ने**-का; त्वयाग्ने-मु. = त्वयाग्नेऽयं सुन्वन्यजमानस्य-ऋप्रा २. ४२; मु.

काश्मीरपुस्तकेऽविद्यमाना अन्येऽपि केचन प्रैषाः सूत्रेषु ऋक्प्रातिशाख्ये च निर्दिष्टा वर्तन्ते तेऽप्यत्र संगृह्यन्ते—

१

होता यक्षदश्विना सरस्वतीमिन्द्रं सुत्रामाणमिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न तोक्मभिर्लाजैर्महस्वन्तो सदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्तां सौम्यं मधु पिबन्तु मदन्तु व्यन्तु होतर्यज।

= वासं २१. ४२; तैब्रा २. ६. ११. १०; शांश्रौ १५. १५. ९; मैसं ३. ११. ४; कासं १८. ९. **शुक्राः पयस्वन्तोऽमृताः** → ऋप्रा २. ४८. **तानश्विना सरस्वतीन्द्रः** → ऋप्रा ४. ७३. **अश्विना**-तैब्रा-शांश्रौ; अश्विनौ-इतरेषु. **सुत्रामाणं**-वासं-तैब्रा-शांश्रौ; मैसं-कासं मध्य एतन्नास्ति. **परिष्कृताः**-वासं-तैब्रा; परिसुता-मैसं. **सदा**; मदा-तैब्रा. **मधुश्चुतः**-वासं-तैब्रा; मधुश्च्युतः-मैसं. **सुत्रामा वृत्रहा**-वासं-तैब्रा; मैसंमध्ये नास्ति. **मदन्तु व्यन्तु**-वासं; मदन्तां व्यन्तु-मैसं; मदन्तु वियन्तु सोमं-तैब्रा.

२

पिता मातरिश्वाछिद्रा पदा धा अच्छिद्रोक्था कवयः शंसन् सोमो विश्वविद्वीथानि नेषद्बृहस्पतिरुक्थामदानि शंसिषत्।

आज्यशस्त्रात्पूर्वं करणीयोऽयं जपः ऐब्रा २. ३८; आश्वश्रौ ५. ९; शांश्रौ ७. ९. १; तैसं ५. ६. ८. ६. अत्रोपलभ्यते। **बृहस्पतिरुक्थामदानि शंसिषत्** = ऋप्रा ९. ९. **धा अच्छिद्रोक्था**; धादच्छिद्रोक्था-आश्वश्रौ. **अच्छिद्रोक्था कवयः शंसन् सोमो विश्वविद्वीथानि**; अच्छिद्रा उशिजः पदा नु तक्षुः सोमो विश्वविद्वेता-तैसं; पदोशिगसीयानुतक्षिषत्सोमो नीथविद्वीथानि-शांश्रौ.

३

दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्या दुर आशासाना मेधपतिम्यां मेधम्। प्राक्ष्मा अग्निं भरत स्तृणीत बर्हिरम्वेनं माता मन्यतामनु पितानु भ्राता सगर्म्योऽनु सखा सयूथ्यः। उदीचीनामस्य पदो निधत्तात्पूर्वं चक्षुर्गमयतादुरं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरम्। एकधास्य त्वचमाच्छयतात्पुरा नाम्या अपिशसो वपामुत्खिदतादन्तरेवोष्माणं तारं पृच्छात्। इयेनमस्य वक्षः कृणुतात्प्रशसा बाहू शला दोष्णी कश्यपेवांसाच्छिद्रे श्रोणी कवषोरू लेकपर्णाष्ठीवन्ता षडविंशतिरस्य वक्रयस्ता अनुष्ठ्योच्यावयतादास्रं गात्रमस्यानूनं कृणुतात्। ऊवध्यगोहं पार्थिवं खनतात्। अस्ना रक्षः सं सृजतात्। वनिष्नुमस्य मा राविष्टोरुकं मन्यमाना नेद्वस्तोके तनये रविता रवच्छमितारः। अग्निगो शमीध्वं सुशमि शमीध्वं शमीध्वमग्निगाऽउ ॥

तैब्रा ३. ६. ६. १ भाष्ये अग्निगुप्रैष इत्यस्य संज्ञा। ऐब्रा २. ६; शांब्रा १०. ४; आश्वश्रौ ३.३; शांश्रौ ५. १७. १-१०; मैसं ४. १३. ४; तैब्रा ३. ६. ६. १-३; कासं १६. २१; निरु ५. ११ भाष्ये एतेष्विदं दृश्यते। → शब्रा १३. ५. २.

उदीचीनाम्; उदीचीनाँ–निरुक्तभाष्ये. **सगर्भ्योऽनु सखा सयूथ्यः**–ऋप्रा २. ४१. **अध्रिगो शमीध्वं सुशमि शमीध्वमध्रिगो**–निरु ५. ११. **माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः**–वास ६. ९. **आरभध्वमुत मनुष्या**–ऐब्रा–आश्वश्रौ; उत मनुष्या आरभध्वं–इतरेषु. **मेधपतिभ्यां**; मेधपतये–मैसं. **स्तृणीत बर्हिः** ≡ ऋसं १. १३. ५. **अन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं**–ऐब्रा–आश्वश्रौ–शांश्रौ; अन्ववसृजताद्दिशः श्रोत्रमन्तरिक्षमसुं–तैब्रा; अन्ववसृजतादन्तरिक्षमसुं–मैसं. **वारयध्वात्**–ऐब्रा–आश्वश्रौ–शांश्रौ; वारयतात्–तैब्रा–मैसं. **रक्षितारः**–ऐब्रा–आश्वश्रौ–शांश्रौ–तैब्रा; रक्षद्–मैसं.

अन्येऽपि केचन प्रैषा आश्वश्रौ–मध्य उपलभ्यन्ते तेऽत्रोद्धियन्ते–

आश्वश्रौ ३. ९; कासं १७. १९; मु–

होता यक्षदश्विना सरस्वतीमिन्द्रं सुत्रामाणं सोमानां सुराम्णां जुषन्तां व्यन्तु पिबन्तु मदन्तु सोमान् सुराम्णो होतर्यज।

आश्वश्रौ ३. ५; शांश्रौ ५. १९; मैसं ४. १३. ५; मु–

होता यक्षदग्निं पुरोळाशस्य जुषतां हविर्होतर्यज।

आश्वश्रौ १०. ९; शांश्रौ १६. ७. २; वासं २३. ६४; मु–

होता यक्षत्प्रजापतिं महिम्नो जुषतां वेतु पिबतु सोमं होतर्यज।

कुन्तापाध्यायः (८–२२)

८

इदं जना उपश्रुतं नराशंस स्तविष्यते। षष्टिं सहस्रा नवतिं च कौरव आ रुशमेषु दधहे ॥१॥
उष्ट्रा यस्य प्रवाहिणो वधूमन्तो द्विदेशिन। वष्मी रथस्य नि जिहीळते दिव ईषमाणा उपस्पृशः ॥२॥
एष इषाय मामहे शतं निष्कान् दश स्रजः। त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् ॥ ३ ॥

८-२२ एतानि कुन्तापसूक्तानि ऐतरेयब्राह्मणे (६. ३२-३६) निर्दिष्टानि। तत्र 'इदं जना' इत्याद्या ऋचः 'नाराशंस्यः' उच्यन्ते। अथर्व २०. १२७. १-३; शांश्रौ १२. १४. १-३ अत्रापि ता उपलभ्यन्ते। ऋसं १. १२६. १-३ आभिः सह प्रायः तासां समानत्वम्।

१. ≡ आश्वश्रौ ८. ३. **जना उपश्रुतं**–का; जना उपश्रुत–इतरेषु. **नराशंस**–का–शांश्रौ–आश्वश्रौ–मु; नाराशंस–अथर्व. **कौरव**–का–शांश्रौ; कौरम–इतरेषु। २. **प्रवाहिणो**; प्रवाहणो–अथर्व–मु। ३. **इषाय**–का–अथर्व–शांश्रौ; इषाय–मु।

९

वर्ष्यस्व रेभ वर्ष्यस्व वृक्षे न पक्वे शकुनः। निष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव ॥१॥
प्र रेभासो मनीषया वृषा गाव इवेरते। अमोतपुत्रका एषामु मोदका उपासते ॥ २ ॥
प्र रेभ धिय भरस्व गोविदं वसुविदम्। देवत्रेमां वाचं शृणीहीषुनीं वीरास्तारम् ॥ ३ ॥

एताः 'रेभ्यः' अथर्व २०. १२७. ४-६; शांश्रौ १२. १५. १; १२. १४. ४-५; मु अत्रोपलभ्यन्ते।

१. **निष्टे**-का; नष्टे-अथर्व-शांश्रौ-मु. **क्षुरो न क्षुरिजोरिव** = ऋसं ८. ४. १६. २. **मनीषया**-का-मु; मनीषा-अथर्व-शांश्रौ. **एषामु मोदका उपासते**-का; एषाममीत गा इवासते -अथर्व-शांश्रौ; अमीतका इवासते-मु । ३. **धियं**-का; धीं-अथर्व. **शृणीहीषुः**-मु-शांश्रौ; श्रीणीहीषुः- अथर्व. **वीरास्तारं**-का; वीरस्तारं-अथर्व-शांश्रौ; न वीरमस्तारं-मु ।

१०

राज्ञो विश्वजनीनस्य यो देवो मर्त्यो अति । वैश्वानरस्य सुष्टुतिमा सुनोता परिक्षितः ॥ १ ॥
परिक्षितः क्षेममकरत्तम आसनमा सरम् । अराय्यं कुर्वन् कौरव्यः पतिर्वदति जायया ॥२॥
कतरत् आ हराणि दधि मन्था३ परिस्रुतम् । जायां पतिं वि पृच्छति राष्ट्रे राज्ञः परिक्षितः ॥३॥
अमीव स्वः प्र जिहीते यवः पक्वः पथो बिलम् । जनः स भद्रमेधते राष्ट्रे राज्ञः परिक्षितः ॥४॥

एताः 'पारिक्षित्यः' अथर्व २०. १२७. ७-१०; शांश्रौ १२. १७. १. १-४; मु अत्रापि दृश्यन्ते । शांश्रौ १२. १६. २; आश्वश्रौ ८. ३; ऐब्रा ६. ३२ भाष्यमपि द्रष्टव्यम् ।

१. **सुनोता**-का-मु-अथर्व; शृणोता-शांश्रौ. **परिक्षितः**-का; परिक्षितिः-मु । २. **परिक्षितः** -का; परिक्षितः-मु; परिच्छितः-अथर्व. **क्षेममकरत्**-का-मु; क्षेममकरुतम-शांश्रौ; क्षेममकरोत्- अथर्व. **तम आसनमा**-का-अथर्व; तमासुनुमा-मु. **सरम्**-का-मु; चरन्-अथर्व-शांश्रौ. **अराय्यं**-का; मरायं-मु; कुलायं-अथर्व-शांश्रौ. **कुर्वन्**-का-मु; कृण्वन्-अथर्व-शांश्रौ । ३. **मन्था**-मु-शांश्रौ; मन्थ-अथर्व. **परिस्रुतं**-शांश्रौ; परि श्रुतं-अथर्व; परिस्रुता-मु. **जाया**-का; जायाः-अथर्व । ४. **अमीव स्वः प्र जिहीते**-का; अमीवर्ष्म प्र जिहाते-मु. **भद्रमेधते**-का; भद्रमैधत्त-मु; भद्रमेधति-शांश्रौ ।

११

इन्द्रः कारुमबूबुधदुत्तिष्ठ वि चरा चरन् । ममेदुग्रस्य चर्कृतिः सर्वे इत्ते पृणादरिः ॥ १ ॥
इह गावः प्र जायध्वमिहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो वीरत्राता वि पोदतु ॥ २ ॥
नेमा इन्द्र गावो रिषन्मो आसां गोपतीरिषत् । मासाममित्रयुर्जन इन्द्र मा स्तेन ईशत ॥३॥
उप वो नर एमसि सूक्तेन वचसा वयं भद्रेण वचसा वयम् ।
चनो दधिष्व नो गिरो न रिष्येम कदा चन ॥ ४ ॥

एताः 'कारव्यः' अथर्व २०. १२७. ११-१४; मु अत्र दृश्यन्ते । १-३ = शांश्रौ १२. १५. २-४. २ = ऐब्रा ८. ११; आपमं १. ९. १.

१. **चरन्**-का; जरन्-शांश्रौ; जनं-अथर्व-मु. **चर्कृतिः**-का; चर्कृधि-अथर्व-शांश्रौ-मु. **सर्व इत्त पृणादरिः**-का; सर्वा इत्ते पृणादुरिः-मु । २. **वीरत्राता**-का-मु; ऽपि पूषा-अथर्व-शांश्रौ । **पोदतु**-का; पादति-अथर्व । ३. **नेमा**-का-अथर्व-मु; मेमा-शांश्रौ. **गोपतीरिषत्**-का-शांश्रौ; गोप रीरिषत्-अथर्व । ४. **वो नर एमासे**-का-मु; नो न रमसि-अथर्व. **चनो**-का; वना-अथर्व. **दधिष्व नो**-का; दधिर्ष्व नो-मु; दधिष्वनो-अथर्व. **नो गिरो**-का; नोऽगिरो-मु ।

१२

यः समेयो विदथ्य३ः सुत्वा यज्वा च पूरुषः । मूर्यं चामू रिशादसं तदेवाः प्रागकल्पयन् ॥ १ ॥
यो जाम्या३ः प्रथमदधः सप्तायं निनिरसति । ज्येष्ठो यदप्रचेतास्तदाहुरधरागिति ॥ २ ॥
यद्वद्रस्य पुरुषस्य पुत्रो भवति दाधृषिः । तद्विप्रो अब्रवीदुदगन्धर्वः काम्यं वचः ॥ ३ ॥

यश्च पणिरभुजिष्यो३ यश्च रेवाँ अदाशुरिः । धीराणां शश्वतामहं तदपागेति शुश्रव ॥ ४ ॥
ये च देवा अयजन्तायो ये च पराददुः । सूर्यो दिवमिव गत्वाय मघवानो वि रप्शते ॥ ५ ॥

'दिशां कल्पयः'—नामकमेतत्सूक्तं अथर्व २०. १२८. १-५; मु अत्र वर्तते । १ = शांश्रौ १२. २०. २. १. २ = शांश्रौ १२. २०. २. ३. ३ = शांश्रौ १२. २०. २. २. ४-५ = शांश्रौ १२. २०. २. ४. ऐआ ६. ३२ सायणभाष्यं द्रष्टव्यम् ।

१. **रिशादसं**-का; रिशादसः-शांश्रौ-अथर्व. **तद्देवाः**-का; तं देवाः-मु । २. **जाम्याः प्रत्यमदत्**-का; जाम्या अप्रत्तमदत्-मु; जाम्या अप्रथयत्तत्-शांश्रौ; जाम्या अप्रथयः-अथर्व. **यः**-का-मु; यत्-अथर्व-शांश्रौ. **निनित्सति**-का-मु; दुधूर्षति-अथर्व-शांश्रौ. **यदप्रचे**°-का; यदि प्रचे°-मु । ३. **उदग्**; उ तत्-अथर्व-शांश्रौ. **काम्यं**-का; काव्यं-मु । ४. **पणिरभुजिष्यो**; पणि रघुजिष्ठयो-अथर्व. **अहं**-का-अथर्व-मु; अह-शांश्रौ. **शुश्रव**-का; शुश्रुम-अथर्व-शांश्रौ-मु । ५. **देवा**; देवाँ-अथर्व. **परादद्**-का; पराददिः-अथर्व-मु. **गत्वाय**-का; गत्वा-मु. **मघवानो**-का; मघवा नो-अथर्व ।

१३

योऽनाक्ताक्ष्यो अनभ्यक्तो३ मणिवो अहिरण्यवः । अब्रह्माब्रह्मणः पुत्रस्तो ता कल्पेषु संमिता ॥ १ ॥
य आक्ताक्ष्यः सुअभ्यक्तः सुमणिः सुहिरण्यवः । सुब्रह्मा ब्रह्मणः पुत्रस्तो ता कल्पेषु संमिता ॥ २ ॥
अप्रपाणा च वेशन्ता रेवाँ अप्रचतिश्चयः । अयभ्या कन्या कल्याणी त्वो ता कल्पेषु संमिता ॥ ३ ॥
सुप्रपाणा च वेशन्ता रेवाँ सुप्रचतिश्चयः । सुयभ्या कन्या कल्याणी त्वो ता कल्पेषु संमिता ॥ ४ ॥
परिवृक्ता च महिषी स्वस्त्या च युधिगमः । श्वाशुरश्च आयामी त्वो ता कल्पेषु संमिता ॥ ५ ॥
वावाता च महिष्वणिस्या च युधिगमः । अनाशुरश्च आयामी त्वो ता कल्पेषु संमिता ॥ ६ ॥

एताः जनकल्पाभिधा ऋचः अथर्व २०.१२८.६-११; शांश्रौ १२. २१.२.१-६; मु अत्रापि द्रष्टव्याः ।

१. °**नाक्ताक्ष्यो**-का; °नाक्ताक्षो-अथर्व-शांश्रौ-मु. **मणिवो**-का-मु; अमणिवो-अथर्व-शांश्रौ. °**ब्रह्मणः पुत्र**°-का; °ब्रह्मणस्पुत्र-मु । **पुत्रस्तो ता**-का; पुत्रस्तोता-अथर्व. **संमिता**-का; संमितः-मु । २. **आक्ताक्ष्यः**-का; आक्ताक्षः-इतरेषु. **स्वभ्यक्तः**-का; सुभ्यक्तः-अथर्व. **ब्रह्मणः पुत्र**°-का; ब्रह्मणस्पुत्र°-मु. **संमिता**-का; संमितः-मु । ३. **वेशन्ता**; येशान्ता-मु. **अप्रचतिश्चयः**-का; अप्रदिश्च यः-शांश्रौ-मु; अप्रतिदिश्ययः-अथर्व. **अयभ्या**; अयभ्रा-मु. **त्वो ता**-का; तोता-अथर्व-शांश्रौ-मु. **संमिता**-का; संमितः-मु । ४. **वेशन्ता**; येशान्ता-मु. **सुप्रचतिश्चयः**-का; सुप्रदिश्च यः-शांश्रौ-मु; सुप्रतिदिश्ययः-अथर्व. **सुयभ्या**; सुयभ्रा-मु. **त्वो**-का; तो-अथर्व-मु-शांश्रौ. **संमिता**-का; संमितः-मु । ५. **परिवृक्ता च महिषी स्वस्त्या**-का-अथर्व; परिवृक्ता च महिष्यनस्त्या-शांश्रौ; वावाता च महिष्यनस्ता-मु. **च युधिगमः**-का; चायुधिगमः-शांश्रौ. **श्वाशुरश्च आयामी त्वो**-का; अनाशुरश्च आयामी-मु; अनाशुरश्चायामी तो-शांश्रौ; अनाशुरश्चायामी-अथर्व. **संमिता**-का; संमितः-मु । ६. **वावाता**; परिवृक्ता-मु. **महिष्वणिस्या**-का; महिषी स्वस्त्या-अथर्व-शांश्रौ; महिषी विष्वस्त्या-मु. **अनाशुरश्च आयामी**-का; श्वाशुरश्चायामी-अथर्व; श्वाशुरश्च आयामी-मु; श्वाशुरश्चायामी-शांश्रौ. **त्वो**-का; तो-अथर्व-शांश्रौ-मु. **संमिता**-का; संमितः-मु ।

१४

यदिन्द्रादो दाशराज्ञेऽमानुषं विगाहयाः । विरूपः सर्वस्मा आसीत्सहंगक्षाय वज्रते ॥ १ ॥
त्वं विराळसि मघवन्नग्रे पर्याकरोरधि । त्वं रौहिणं व्यास्यस्त्वं वृत्रस्याभिनच्छिरः ॥ २ ॥

यः पर्वतान् व्यदधाद्वो अपो व्यगाहयाः । यो वृत्रं वृत्रहन्नहन् तस्मा इन्द्र नमोऽस्तु ते ॥३॥
प्रष्टिं धावन्तं हर्योरौच्चैःश्रवसमब्रवम् । स्वस्त्यश्व जैत्रायेन्द्रमा वहतो रथम् ॥ ४ ॥
यत्वा श्वेता उच्चैःश्रवसं हर्योर्युञ्जन्ति दक्षिणम् । मूर्धानमश्व देवानां बिभ्रदिन्द्रं महीयते ॥५॥

एताः 'इन्द्रगाथाः' अथर्व २०. १२८. १२-१६; मु-पुस्तके च द्रष्टव्याः । १ = शांश्रौ १२. १५. ५. २ = शांश्रौ १२. १६. १. १. ४ = शांश्रौ १२. १६. १. २.

१. **यदिन्द्रादो**–अथर्व–शांश्रौ; यदिन्द्रो--मु. ऽ**मानुषं**; मानुषं--अथर्व. **विगाहथाः**–अथर्व–शांश्रौ; व्यगाहथाः--मु. **सदृङ्मक्षाय वञ्चते**–मु; सह यक्षाय कल्पते–अथर्व; स ह यक्ष्माय पत्यते–शांश्रौ। २. **विषाक्षं**–मु; वृषाक्षुं–अथर्व–शांश्रौ. **पर्याकरोः**–मु; मर्याकरोः--शांश्रौ; मर्याकरो–अथर्व. **अभि**–का–मु; अपि–शांश्रौ; **रविः**–अथर्व. **व्यास्यस्त्वं**–का–मु; व्यास्यो वि–अथर्व–शांश्रौ। ३. **यो वृषं वृत्रहन्नहन्** ; यो वृत्रो वृत्रहन्नहन्–मु; इन्द्रो यो वृत्रहान्महं–अथर्व. **तस्मा इन्द्र**–का; तस्मादिन्द्र –अथर्व । ४. **प्राष्टिं**–का; पृष्ठं–अथर्व. **अब्रवं**–का--मु; अब्रुवन्–अथर्व–शांश्रौ. **वहतो रथं**–का; वह सुस्रजं–अथर्व–शांश्रौ–मु। ५. **यत्वा श्वेता उच्चैःश्रवसं**; यत्वा श्वेतोच्चैःश्रवसं–मु; ये त्वा श्वेता अजैश्रवसो-- अथर्व. **हर्यो°**–का--मु; हार्यो--अथर्व. मूर्धानमश्व--का--मु; पूर्वा नमस्य–अथर्व. **महीयते** –का; महीयसे--मु. **बिभ्रदिन्द्रं**–का; बिभ्रदिन्द्र--अथर्व ।

१५

एता अश्वा आ प्लवन्ते । प्रतीपं प्रातिपत्वनम् । तासामेका हरिक्रिका । हरिक्रिके किमिच्छसि॥ १॥
साधुं पुत्रं हिरण्ययम् । कोह तं परास्यः । यत्रामूस्तिस्रः शिशपाः। परि त्रयः पृदाकवः ॥२॥
शृङ्गं धमन्त आसते । अयं वहाते अवहि । स इत्थ कं स एव कम् । स घा घ ते सघा घ मे ॥ ३ ॥
गोमी घ गोमिनीरभि । पुमां भूम्ने निनित्ससि । बल्बबथो इति । बल्बबो अथो इति ॥४॥
अजकोऽरकोऽविका । अश्वस्य वारो गोः शफः। केशिनी श्येनी एनीव । अनामयोपजिह्विका ॥५॥
को अम्ब ह्रुडमायुनि । को अर्जुन्याः पयः । को असिक्न्याः पयः । एतं पृच्छ कुहं पृच्छ ॥६॥
कुहा कं पक्कं पृच्छ । य आयन्ति श्वभिष्कुभि । अब्जन्तः कुभायवः। आमनको मनस्थकः॥७॥
देवत्तः प्रतिजूर्यः । पिनष्टि पर्तिका हविः । प्र बुद्बुदो मथायति । शुङ्ग उत्पत ॥ ८ ॥
मा त्वाति सखा नो वदत् । वशायाः पुत्रमायन् तम् । इरा चेन्द्रममन्दत । इयन्नियन्निति ॥९॥
अथो इयन्निति । अथो ज्यायस्तरो भुवत् । इयं यका शलाकका । आ मिनोति नि भज्यते॥१०॥
तस्या अनुनिभञ्जनम् । वरुणो याति बभ्रुभिः । शतं बभ्रोरभीशुभिः। शतं कशा हिरण्ययीः ॥११॥
शतं रथा हिरण्ययाः । आहल्कुः शवर्तकः । आयवनेन तेजनी । शफेन पीव ओहते ॥१२॥
वनिष्नुनोप नृत्यति । इमं मद्यमदुरिति । ते वृक्षाः सह तिष्ठन्ति । पाकबलिः शकबलिः ॥१३॥
अश्वत्थः खदिरो धवः । अरट्टुः परमः शये । हत इव पापपूरुषः । अदोहमित्पीयूषकम्॥१४॥
द्वौ च हास्तिनो दती । अध्यर्धं च परस्वतः । आदलाबुकमेककम् । अलाबुकं निखातकम् ॥ १५ ॥
कर्करिको निखातकः । तद्वात उन्मथायति । कुलायं करवाँ इति । उग्रं वल्बदाततम् ॥१६॥
न वल्बदानततम् । क एषां कर्करिं लिखत् । क एषां दुन्दुभिं हनत् । यदीं हनत्कथं हनत् ॥१७॥
दैलीं हनत्कथं हनत् । पर्याकारं पुनः पुनः ॥ १८ ॥

एतानि सप्ततिपदानि 'ऐतशप्रलापाः' इतिसंज्ञकानि अथर्व २०. १२१-१३२ मु-पुस्तके च द्रष्टव्यानि। १-३, १२, १५-१८ ≡ शांश्रौ १२. १८. ऐब्रा ६. ३३; आश्रौ ८. ३; वैसू ३२. २०; गोब्रा २. ६. १३ अपि द्रष्टव्यम्।

१. **प्रातिसत्वनं**–का–ऐब्रा–मु; प्राति सुत्वनं–अथर्व–शांश्रौ. **हरिक्लिका हरिक्लिके**–शांश्रौ–मु; हरिक्लिनका हरिक्लिनके–अथर्व। २. **त**–अथर्व–शांश्रौ; कं–मु। ३. **वह्वते**–का; महान्ते–मु; महा ते–अथर्व. **अवहि**–मु; अर्वोहः–अथर्व. **स इत्थ कं स एव कं**–का–मु; स इच्छकं सघाघते–अथर्व. **सघा घ ते सघा घ मे**–का; सघा घ ते सघा ग मे–मु; सघाघते–अथर्व। ४. **गोमी घ गोमिनीरभि**–का; गोमी घ मोमिनीरभि–मु; गोमीघा गोगतीरिति–अथर्व. **पुमां भूम्ने निनित्सासि**–का; पुमां कुस्ते-निमिच्छसि–अथर्व; पुमान् भूम्ने निजित्सति–मु. **बल्बबथो इति**–का; बद्बबथो इति–मु; पल्प बद्ध वयो इति–अथर्व. **बल्बबो अथो**–का; बद्बबो अथो–मु; बद्धवो अघा–अथर्व। ५. **अजकोऽरकोऽविका**–मु; अजागारकंविका–अथर्व. **वारो गोः शफः**–का; वारो गोशपद्यके–अथर्व; वालो गोशफः–मु. **केशिनी श्येनी एनीव**–का; श्येनीपतां सा–अथर्व; केशिनी श्येनी एनीवा–मु। ६. **अम्ब हुलमायुनि**–का; अंब कुलिमायुनि–मु; अर्य बहुलिमा इषूनि–अथर्व. **असिक्न्याः**–का; असिद्याः–अथर्व। ७. **य आयन्ति श्वभिष्कुभिः**–का; यवानो यति स्वभिः कुभिः–अथर्व. **अब्जन्तः कुभायवः**–का; अकुभ्यन्तः कुभायवः–मु; अकुप्यन्तः कुपायकुः–अथर्व. **आमनको मनस्थकः**–का; आमणको मणत्थकः–मु; आमणको मणत्सकः–अथर्व। ८. **देवत्तः प्रति जूर्यः**–का; देवत्तः प्रतिहूर्यः–मु; देव त्वप्रति सूर्य–अथर्व. **पिनष्टि पर्तिका**–का; पिनष्टि पतिका–मु; एनश्चिपकूक्तिका–अथर्व. **प्र बुद्बुदो मथायति**–का–मु; प्र दुदुदो मघाप्रति–अथर्व. **शुङ्ग उत्पत**–का–मु; शृंग उत्पन्न–अथर्व। ९. **त्वाति**–का; त्वाभि–अथर्व; त्वाबि–मु. **नो वदत्**–का; नो विदन्–अथर्व; नाविदन्–मु. **आयन् तं**–का; आयान्तं–मु; आ यन्ति–अथर्व. **चेन्द्रममन्दते**–का–मु; वेदुमर्यदत–अथर्व। १०. **इयन्निति**; इयंनिति–मु; इयमिति–अथर्व. **उयायस्तरो भुवत्**–का–मु; ऽश्वा अस्थिरो भवन्–अथर्व. **इयं यका**–का–मु; उयं यकां शलोलका–अथर्व. **मिनोति**–का; मिणोति–मु; आमिनोनिति भद्यते–अथर्व। ११. **तस्या अनुनिभञ्जनं**–का–मु; तस्य अनु निभंजनं–अथर्व. **बभ्रुभिः**–का–मु; वस्वभिः–अथर्व. **शतं बभ्रोरभीशुभिः**–का; शतं वा भारती शवः–अथर्व; शतं बभ्रोरभीशवः–मु. **बभ्रोः**–का–मु; **वायोः**–अथर्व. **कशा हिरण्ययीः**–मु; कुथा हिरण्ययाः–अथर्व। १२. **रथा**–का; रथ्या–अथर्व. **आहलकुः शवर्तकः**–का; आहलकुः शवर्तकुः–मु; अहल कुश वर्तक–अथर्व. **तेजनी**–का; तेदनी–शांश्रौ; तीजनी–अथर्व; तेजनिः–मु. **ओहते**–का; ओहति–मु. **पीव**–का; इव–अथर्व। १३. **वनिष्ठुनोप**–का–मु; वनिष्ठा नाव–अथर्व. **नृत्यति**–का–मु; गृह्णन्ति–अथर्व. **इमं**–का–मु; इदं–अथर्व. **अदुरिति**–का–मु; मदूरिति–अथर्व. **तिष्ठन्ति**–का; तिष्ठति–अथर्व. **पाकवालिः शकवालिः**–का–मु; पाक बलिः शक बलिः–अथर्व। १४. **शये**–का; शयो–अथर्व. **खादिरो**–का; खबुरो–मु. **अरदुः परमः**–का–मु; अरदु-परम–अथर्व. **पापपूरुषः**–का–मु; व्याप पूरुषः–अथर्व. **अदोहमित्पीयूषकं**–का–मु। अदूहमित्या पूषकं–अथर्व. १५. **द्यौ च**–का; दौव–अथर्व. **हस्तिनो दती**–का; हस्तिनौ दती–मु; हस्तिनो दती–अथर्व. **अध्यर्धं च**–का–मु; अत्यर्धच्च–अथर्व. १६. **तद्वात**–का–मु; कद्वात–शांश्रौ. **उन्मथायति**–का; उन्मथा इति–मु. **करवाँ**–का–मु; कृणवाद्–अथर्व–शांश्रौ. **वल्षद्**–का; बलिशद्–मु; वनिषद्–अथर्व–शांश्रौ। १७. **वल्षद्**–का; बलिशद्–मु; वनिषद्–अथर्व–शांश्रौ. **कर्कारिं**–का; कर्करी–अथर्व; कर्करी (रिखत्)–मु. **यदीं हनत् कथं हनत्** ≡ आश्रौ ८. ३. १७. **यदीं**; यदीयं–अथर्व। १८. 'अन्त्या (अष्टादशी) द्विपदा' इति खिलानुक्रमणी। **देवीं**–का–मु; लेलिं–शांश्रौ; देवी–अथर्व. **कथं**–का–मु–शांश्रौ; कु–अथर्व. **पर्याकारं पुनःपुनः** ≡ आश्रौ. ८. ३. १७. **पर्याकारं**–का–मु–आश्रौ; पर्यागारं–अथर्व–शांश्रौ।

अथर्व २०. १३२ अन्ते यदधिकं तदत्र दीयते–

त्रीण्युदस्य नामानि । हिरण्यं हार्दैके अब्रवीत् ।
द्वौ वा ये शिखावः । नीलशिखण्डवाहनः ।

१६

वितती किरणौ द्वौ तावा पिनष्टि पूरुषः । न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥ १ ॥
मातृष्टे किरणौ द्वौ नीवीतः पुरुषादते । न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥ २ ॥
निगृह्य कर्णकौ द्वौ निरायच्छसि मध्यमम् । न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥ ३ ॥
उत्तानायै शयानायै तिष्ठन्नेवाव गूहसि । न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥ ४ ॥
श्लक्ष्णायां श्लक्ष्णिकायां श्लक्ष्णमेवाव गूहसि । न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥५॥
अव श्लक्ष्णमवभ्रशदन्तर्लोमवति हृदे । न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥ ६ ॥

एताः 'प्रवह्लिकाः' अथर्व २०. १३३; शांश्रौ १२. २२; सु अत्राप्युपलभ्यन्ते। आश्वश्रौ ८. ३ अपि द्रष्टव्यम्।

२. **नीवीतः** (नीवी + इतः)–सु; निवृत्तः–अथर्व–शांश्रौ. **पुरुषादते**–सु; पुरुषादतिः–शांश्रौ; पुरुषानृते–अथर्व। ३. **मध्यमं**–का; मध्यमां–सु; मध्यमे–शांश्रौ–अथर्व. **कर्णकौ**; कर्तकौ–सु। ४. **तिष्ठन्नेवाव**–का; तिष्ठन्तीवाव–अथर्व। ५. **गूहसि**–गूहति–अथर्व। ६. **अवभ्रशद्**–का–सु; इव भ्रंशद्–अथर्व–शांश्रौ. **लोमवति**–का–शांश्रौ; लोममति–अथर्व।

१७

इहेत्था प्रागपागुदगधरागरालो उदभर्त्सत ॥ १ ॥
इहेत्था प्रागपागुदगधराग्वत्साः प्रुषन्त आसते ॥ २ ॥
इहेत्था प्रागपागुदगधराक्स्थालीपाको वि लीयते ॥ ३ ॥
इहेत्था प्रागपागुदगधराक् सिलीपुच्छो वि लीयते ॥ ४ ॥

एताः 'आजिज्ञासेन्याः' अथर्व २०. १३४. १-४; शांश्रौ १२. २३. १; आश्वश्रौ ८. ३; सु अत्राप्युपलभ्यन्ते। सर्वास्वृक्षु 'इहेत्था' इत्यस्य स्थाने 'इहेत्थ' इति अथर्व–शांश्रौ–आश्वश्रौ–सु पुस्तकेषु।

१. **प्रागपागुदगधराक्** = वास ६. ३६. **अरालो**–का–सु; अरालाग्–अथर्व–शांश्रौ. **उदभर्त्सत**–शांश्रौ; उदभर्त्सथ–अथर्व; उदभन्यते–सु। २. **प्रुषन्त**–का; पुरुषन्त–अथर्व। ३. **स्थालीपाको वि लीयते**–का–शांश्रौ–अथर्व; सर्वापुत्सीलिलीशये–सु। ४. **सिलीपुच्छो वि लीयते**–का; स्थालीपाको वि लीयते–सु; च्छिलीपु च्छिलीषते–शांश्रौ; स वै पृथु लीयते–अथर्व।

१८

भुगित्यभिगतः । शरित्यभिष्ठितः । फलित्यपक्रान्तः ॥ १ ॥

एते त्रयः पादाः 'प्रतिराध्यः' उच्यन्ते ते च अथर्व २०. ११५. १; शांश्रौ १२. २३. २; आश्वश्रौ ८. ३; सु अत्रापि दृश्यन्ते।

शरिति–सु; शलिति–अथर्व–शांश्रौ. **अभिष्ठितः**–का–सु; अपक्रान्तः–अथर्व–शांश्रौ. **अपक्रान्तः**–का–सु; अभिष्ठितः–अथर्व–शांश्रौ।

१९

वीमे देवा अक्रंसताध्वर्यो: क्षिप्रं प्र चर । सुशस्तिरिद्ववामस्यति प्रखिदसो महत् ॥ १ ॥

अयम् ' अतिवादः ' अथर्व २०. १३५. ४; शांश्रौ १२. २३. ४; आश्वश्रौ ८. ३; मु अत्रापि द्रष्टव्यः ।

अध्वर्यो:-का; अध्वर्यो-शांश्रौ-अथर्व-मु. **सुशस्तिः**-मु; सुमत्यं-शांश्रौ-अथर्व. **अस्यति प्रखिदसो महत्**-का; अस्यति प्राक्खिदसो महे-मु; अस्यसि प्रक्षुदसि-शांश्रौ-अथर्व ।

२०

आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन् ।
तां ह जरितर्न प्रत्यायन् तामु ह जरितः प्रत्यायन् ॥ १ ॥
तां ह जरितर्न प्रत्यगृभ्णन् तामु ह जरितः प्रत्यगृभ्णन् ।
अहा नेत सन्नविचेतनानि जज्ञा नेत सन्नपुरोगवासः ॥ २ ॥
उत श्वेत आशुपत्वा उतो पद्याभिर्जविष्ठः । उतेमाशु मानं पिपर्ति ॥ ३ ॥
आदित्या रुद्रा वसवस्त्वेळते इदं राधः प्रति गृभ्णीह्यङ्गिरः ।
इदं राधो बृहत्पृथु देवा ददत्वा वरम् ॥ ४ ॥
तद्वो अस्तु सुचेतनं युष्मे अस्तु दिवे दिवे । प्रत्येव गृभायत ॥ ५ ॥

एता देवनीथाभिधा ऋचः अथर्व २०. १३५. ६-१०; ऐब्रा ६. ३५; शांश्रौ १२. १९. १-४; मु एतेषूपलभ्यन्ते । ऐब्रा-आश्वश्रौ (८. ३) मध्ये ' सप्तदश पदानि ' इति तासां सञ्ज्ञा ।

१. **दक्षिणां**; ऽर्श दक्षिणां-शांश्रौ. **जरितर्न**-का; जरितः-अथर्व । २. **जरितर्न**-का; जरितर्नः-अथर्व. **जरितः**-का; जरितर्नः-अथर्व. **प्रत्यगृभ्णन्**-का; प्रत्यगृभ्यः-अथर्व. **नेत**-का; देत-शांश्रौ. **जज्ञा**-का; यज्ञा-शांश्रौ. **नेत**-का; देत-शांश्रौ. अहानेतरसं न वि चेतनानि यज्ञानेतरसं न पुरोगवामः-अथर्व । ३. **जविष्ठः**-का; यविष्ठः-अथर्व-शांश्रौ. **आशुपत्वा उतो**-का; आशुपत्नोतो-शांश्रौ. **उतेमाशु**-का-मु; उतो आशु-शांश्रौ । ४. **त्वेळते**-मु-ऐब्रा; त्वेनुत-अथर्व; त्वेलत-शांश्रौ. **इदं राधो बृहत्**-मु-ऐब्रा-आश्वश्रौ; इदं राधो विभु प्रभु इदं राधो बृहत्-अथर्व. **ददत्वा वरं**-का; ददत्वासुरं-अथर्व; ददतु यद्वरं-शांश्रौ. **युष्मे**-का; युष्माँ-अथर्व । ५. **सुचेतनं**-का; सजोषणं-शांश्रौ. **प्रत्येव**-का; प्रत्वेव-शांश्रौ ।

२१

त्वमिन्द्र शर्मन्नरिणा हव्यं पारावतेभ्यः । विप्राय स्तुवते वसु ऋजुरिच्छ्वसे वहः ॥ १ ॥
त्वमिन्द्र कपोताय च्छिन्नपक्षाय वञ्चते । श्यामाकं पक्वं विरुज वारस्मा अकृणोर्बहु ॥ २ ॥
आरङ्गरो वावदीति त्रेधा बद्धो वरत्रया: । ईरामु ह प्र शंसत्यनिरामप सेधत ॥ ३ ॥

एताः ' भूतेच्छदः ' अथर्व २०.१३५. ११-१३; शांश्रौ १२.१६.४,५,३; मु अत्राप्युपलभ्यन्ते ।

१. **शर्मन्नरिणा**-का; शर्मरिणा-इतरेषु. **पारावतेभ्यः**-का; परावतेभ्यः-मु. **वसु ऋजुरिच्छ्वसे वहः**-का; वसूनि जुरश्रवसे महे-मु; वसुवनिं दुरश्रवसे वह-अथर्व; वसु नि दूरश्रवसे वहः-शांश्रौ । २. **वि रुज**-का; पीलु च-मु-अथर्व-शांश्रौ. **अकृणोः**-अथर्व-शांश्रौ; अकृणोद्-का-मु । ३. **आरङ्गरो**-का-मु; अरंगरो-इतरेषु. **वरत्रया**-का; वरत्रया-इतरेषु. **उ ह**; अह-अथर्व. **शंसत्यनिरा°**-का; शंसत्वनिरा°-मु. **सेधत**-का; सेधति-अथर्व-शांश्रौ; बाधतां-मु ।

२२

यदस्या अंहुभेद्याः पृथु स्थूरमुपातसत् । मुष्का इदस्या एजतो गोशफे शकुलाविव ॥ १ ॥
यदा स्थूरेण पससा अणू मुष्का उपावधीत् । विश्वञ्चावस्यार्दतः सिकतास्विव गर्दभौ ॥२॥
यदल्पिका स्वल्पिका कर्कन्धुकेव पच्यते । वासन्तिकमिव तेजनं यभ्यमाना वि नम्यते ॥३॥
यदेवासो ललाबुकं प्र विष्टीमिनमाविषुः । सक्थ्ना ते दृश्यते नारी सत्यस्याक्षीभगो यथा ॥४॥
महानग्न्युप ब्रूतेऽश्वस्या वेशितं पसः । ईदृक्फलस्य वृक्षस्य शूपं शूपं भजेमहि ॥ ५ ॥
महानग्न्यदसं हि सोऽक्रन्ददस्तमासदत् । शक्नुकामना मुत्र मशकं सक्थ्युद्यतम् ॥ ६ ॥
महानग्न्युलूखलमति क्रामन्त्यब्रवीत् । यथैव ते वनस्पतेऽपि घ्नन्ति तथैव मे ॥ ७ ॥
महानग्नी कृकवाकुं शम्यया परिधावति । इदं न विद्म तेजनं शीर्ष्णी भवति धानिका ॥८॥
महानग्नी महानग्नं धावन्तमनु धावति । इमास्तदस्य गा रक्ष यभ मामद्ध्योदनम् ॥ ९ ॥
महान् वै भद्रो बिल्वो महान् पक्व उदुम्बरः । महाँ अभिक्षु बाधते महतः साधु खोदनम् ॥१०॥
कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा ध्यावयोतय इन्द्रं सबाध इह सोमपीतये ॥ ११ ॥
यद्ध प्राचीरजगन्तोरो मण्डूरधाणिकीः । हता इन्द्रस्य शत्रवः सर्वे बुद्बुदयाशवः ॥ १२ ॥
दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत् ॥ १३ ॥

इत्यृग्वेदे खिले पञ्चमोऽध्यायः ॥

इति खिलानि समाप्तानि ॥

ऐब्रा ६. ३६ अनुसारेण खिलानुक्रमणीमते चेदं दशर्चं सूक्तम् । वृषाकपिशस्त्र आहनस्यानन्तरं 'कपृन्नरः' 'यद्ध प्राची०' इति तृची 'दधिक्राव्णो' इति मन्त्रश्च पठ्यते । अतोऽत्रान्त्यास्तिस्र ऋच आहनस्याभिः संज्ञाः । शांब्रा ३०. ७-८; शांश्रौ १२.२४.२; १२.२५. १; आश्वश्रौ ८.३.→ 'होतृ-प्रतिगरित्रोः संवादः' इति खिलानुक्रमणी । आद्या दशर्चः 'आहनस्याः' इतिसंज्ञकाः । ऐब्रा ६.३६. भाष्ये; शांब्रा ३०.६; गोब्रा २. ६. १५; शांश्रौ १२. २४. १; आश्वश्रौ ८.३; वैसू ३२.३१ द्रष्टव्यम् । अश्वमेधे 'यदस्या अंहुभेद्याः' इत्यनयोद्गाता परिवृक्तां महिषीमभिमेथति → शांश्रौ १६. ४. मु-पुस्तके अष्टमीं नवमीं च वर्जयित्वा शिष्टा अष्टावाहनस्याः ।

१-४ ≡ अथर्व २०. १३६. १-४. १ ≡ वासं २३. २८; शांश्रौ १२. २४. २. २; १६. ४. ३. २ ≡ शांश्रौ १२. २४. २. ३. ४ ≡ वासं २३. २९; शांश्रौ १२. २४. २. १; १६. ४. ६. ५ ≡ अथर्व २०. १३६. ९; शांश्रौ १२. २४. २. ६. ६ ≡ अथर्व २०. १३६. ५. ७. ≡ अथर्व २०. १३६. ६; शांश्रौ १२. २४. २. ७. ८ ≡ अथर्व २०. १३६. १०; शांश्रौ १२. २४. २. ५. ९ ≡ अथर्व २०. १३६. ११; शांश्रौ १२. २४. २. ४. १० ≡ अथर्व २०. १३६. १५; शांश्रौ १२. २४. २. ८. ११ ≡ ऋसं १०. १०१. १२; अथर्व २०. १३७. २. १२ ≡ ऋसं १०. १५५. ४; अथर्व २०. १३७. १. १३ ≡ ऋसं ४. ३९. ६; अथर्व २०. १३७. ३.

१. **पृथु**-का-मु; कृषु-अथर्व-वासं-शांश्रौ. **स्थूरं**-का-मु; स्थूलं-अथर्व-वासं-शांश्रौ. **मुष्का इदस्या**-का; मुष्काविदस्य-इतरेषु. **एजतो**-का; एजते-मु. **गोशफे** → खिल ५. १५. ५[1]. २. **स्थूरेण**-का-मु; स्थूलेन-अथर्व-शांश्रौ. **पससा अणू**-का; पससा अनू-मु; पससाणी-अथर्व-शांश्रौ.

अर्दतः–का; वर्धतः–अथर्व–शांश्रौ;· अर्दते–मु. **सिकतास्विव**–का; सिकतास्वेव–अथर्व. **गर्दभौ**–का; गर्दभः–मु। ३. **कर्कन्धुकेव**–मु; कर्कंधूकेव–अथर्व. **पच्यते**–का–मु; °पद्यते–अथर्व. **तेजनं**–का–अथर्व; तेजनो–मु. **यभ्यमाना वि नभ्यते**–का; यभ्यमाना वि तन्वते–मु; यन्त्य वाताय वित्थति –अथर्व। ४. **ललाबुकं**–का; ललामगुं–अथर्व–वासं–शांश्रौ; ललागमुं–मु. **विष्टीमिन**°–वासं–अथर्व–शांश्रौ; पिष्टीपिन°–मु. °**माविषुः**–का; °मापिषुः–मु. **सक्थ्ना**–मु–वासं–शांश्रौ; सकुला–अथर्व. **ते दृश्यते**–का; देदृश्यते–मु; देदिश्यते–वासं–अथर्व–शांश्रौ. **नारी**–का; नरः–मु. **सत्यस्याक्षीभगो यथा**–का; सक्थ्यः साक्षीव गो यथा–मु; सत्यस्याक्षिभुवो यथा–अथर्व–वासं–शांश्रौ। ५. **महानद्युप**–का; महाणद्युप–मु. **ऽश्वस्या**–का; अश्वस्या–मु; स्वसा–अथर्व; स्वस्त्या–शांश्रौ. **ईदृक्**–का–मु; इत्थं अथर्व–शांश्रौ. **शूर्पशूर्प**–का; शूर्पेशूर्प–अथर्व। ६. **महान**°–का–अथर्व; महाण°–मु. **अदृसं**–का–मु; अदृपत्–शांश्रौ। अतृप्रद्–अथर्व. **हि सो**–का–मु; वि मो–अथर्व. **अस्तमासदत्**–का; अस्तमासरत्–मु; अस्थानासरन्–अथर्व. **शक्नु**–मु; शक्ति–अथर्व. **कामनाभुव**–का; कानना शका–मु; कानना स्वच–अथर्व. **सक्थ्युद्यतं**–का; सक्थ्युद्यमत्–मु; सक्तु पद्यम–अथर्व। ७. **महान**°–का–अथर्व; महाण°–मु. **यथैव ते**–का–मु; यथा तव–अथर्व–शांश्रौ. **ऽपि घ्नन्ति**–का–मु; निरघ्नन्ति–अथर्व; निघ्नन्ति–शांश्रौ. **तथैव मे**–का–मु; तथैवति–अथर्व; तथा मम–शांश्रौ। ८. **इदं**–का; अयं–अथर्व; वयं–शांश्रौ. तेजनं–का; यो मृगः–अथर्व–शांश्रौ। **भवति धानिका**–का; हरति धाणिकां–अथर्व–शांश्रौ। ९. **तदस्य**–अथर्व; तु तस्य–शांश्रौ। १०. **बिल्वो**–अथर्व; बिल्बो–का. **पक्व**–का–मु; भद्र–अथर्व–शांश्रौ. **आभिक्षु**–का–मु शांश्रौ; अभिक्त–अथर्व।

संहितापदपाठशुद्धिपत्रम्

म.	सू.	म.		अशुद्धम्	शुद्धम्
९	१	२	प	रक्षः ऽहा	रक्षः ऽहा
,,	११	२	सं	देवाय	देवार्य
,,	७७	२	सं	वेविंजान	वेविंजान्
,,	७९	४	सं	त्वच्य१प्सु	त्वष्य१प्सु
,,	९३	४	सं	°रस्मद्य१गा	°रस्मद्य१गा
,,	९४	५	सं	°भ्य१र्षाश्वं	°भ्य१र्षाश्वं
,,	९७	३९	सं	नः	नः
,,	,,	५४	सं	स्नेहयच्चा०	स्नेहयच्चा०
,,	,,	,,	प	स्नेहर्यत्	स्नेहर्यत्
,,	९८	७	सं	इत्परि	इत्परि
,,	१०४	३	सं	दक्षसाधनं	दक्षसाधनं
,,	१०७	१	सं	अप्स्व१न्तरा	अप्स्व१न्तरा
,,	,,	२	सं	स्रवार्दब्धः	स्रवार्दब्धः
,,	१०८	३	सं	ह्य१ङ्ग	ह्य१ङ्ग
१०	२	७	सं	य	यं
,,	१०	७	सं	यम्यं१	यम्यं१
,,	,,	१२	सं	पपृच्यां	पपृच्यां
,,	२९	३	सं	अभ्यु१ग्रो	अभ्यु१ग्रो
,,	३४	५	प	सखिभ्यः	सखिऽभ्यः
,,	३५	११	प	सर्वतातये	सर्वऽतातये
,,	३६	१०	प	रयिमत्	रयिऽमत्
,,	४४	३	प	सत्यऽशुष्मम्	सत्यऽशुष्मम्
,,	४५	१०	सं	सौश्रवसेष्वग्न	सौश्रवसेष्वग्न
,,	८५	२६	प	त्वम्	त्वम्
,,	८८	१६	प	समऽईची	समऽईची
,,	९०	९	प	छन्दांसि	छन्दांसि
,,	१०२	७	सं	°मध्यांना०	°मध्यांना०

सं = संहितापाठे; प = पदपाठे

म.	सू.	म.	अशुद्धम्	शुद्धम्
१०	१०६	५ सं	मित्रेव	मित्रेव
,,	,,	११ सं	शो	यशो
,,	,,	,, प	ऋध्याम	ऋध्याम
,,	१०९	४ सं	ब्राह्मणस्योप०	ब्राह्मणस्योप०
,,	,,	५ सं	जुह्वं१	जुह्वं१
,,	११२	५ सं	इन्द्र	इन्द्र
,,	११३	८ सं	°सोमव्रत्या	°सोमव्रत्या
,,	११५	४ प	ऋयसानस्य	ऋयसानस्य
,,	११६	७ प	पक्वः	पक्वः
,,	,,	८ प	उत	उत
,,	,,	,, प	पर्यस्वन्तः	प्रयस्वन्तः
,,	११७	९ प	समौ	समौ
,,	१२१	४ प	आहुः	आहुः
,,	१३०	१ प	इमे	इमे
,,	१३८	४ प	अयार्यः	अयास्यः
,,	१४२	५ सं	न्यङ्डुतानामन्वेषि	न्यङ्डुत्तानामन्वेषि
,,	१४६	१ सं	विन्दतीऽ	विन्दतीऽ
,,	१४९	३ सं	°घजत्र°	°घजत्र°
,,	१५७	४ सं	यदायन्	°यदायन्°
,,	१७३	६ सं	ध्रवेण	ध्रुवेण

भाष्यशुद्धिपत्रम्

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
६३		म. ९. अ. २. सू. ४७]	म. ९. अ. २. सू. ४६]
१०५	११	ऽऊर्जम्	ऽऊर्जम्
१३१	२६	ऽअनुष्वधं	ऽअनुष्वधं
१७९	३	ोमोऽष्टौ	सोमोऽष्टौ
१७९	९	कर्मांथ	कर्मार्थे
१८३	३	हम्यं	तुभ्यं
१९५	१०	°पुत्रस	°पुत्रस्य
,,	११	°दवोदासिः	°दैवोदासिः
२०७	२१	पवित्र	पवित्रे
२११	९	°मश्न°	°मश्नु°
२२१	७	वपणनमने	वर्षणनमने
३२३	१४	स्त्रीपुंसा°	स्त्रीपुंसा°
३३६	३०	विराट°	विराट्°
३६५	७	द्रह्न	द्रुह्न
३७२	१	वा यो	वायो
४३६	४	द्विना°	द्विता°
४३९	६	°मदत्वा	°मदस्वा
४६५	१८	सप्तषेन्द्रियाणि	सप्त षेन्द्रियाणि
४६६	१	असुस्त्वं	असुरत्वं
५२५	६	सूक्तंवाऽयश्च°	सूक्तं वाऽयश्च०
५४३	५	लोकेसुप्तं	लोके सुप्तं
५९०	२६	क्रुद्धा०	क्रुद्धा०
६७३	२५	वत	वर्ते
,,	,,	ह	हे
७५३	५	उद्गूर्णं विशेषागहनरूपं वा	उद्गूर्णविशेषागहनरूपा वा
७६६	१९	°र्थक्ताय	°र्युक्ताय
७६७	११	श्रुप्रत्ययः	श्रुप्रत्ययः
७८६	१६	°तु स्थ	°तुस्तस्य
८२७	१२	पष्ठी	षष्ठी
८२९	१४	ऽस्व	ऽस्वं